शब्द-वेदः

शब्द-वेदः

(चतुर्णां वेदानामेकादशसंहितानां सङ्कलनम्)

सञ्चयनकर्ता प्रस्तोता च

कर्पूरचन्द्रकुलिशः

संस्थापकसम्पादकः, राजस्थानपत्रिका

सम्पादकः

कैलाशचतुर्वेदी

पूर्वनिदेशकः संस्कृत-शिक्षा-विभागः, राजस्थानम्

पत्रिका प्रकाशनम्

शब्द-वेदः

(चतुर्ण्णां वेदानामेकादशसंहितानां सङ्कलनम्)

सञ्चयनकर्ता प्रस्तोता च

कर्पूरचन्द्रकुलिशः

संस्थापकसम्पादकः, राजस्थानपत्रिका

सम्पादकः

कैलाशचतुर्वेदी

पूर्वनिदेशकः संस्कृत-शिक्षा-विभागः, राजस्थानम्

पत्रिका प्रकाशनम्

शब्द-वेद

कर्पूरचन्द कुलिश

ISBN : 978-93-80271-88-0

प्रकाशक : पत्रिका प्रकाशन
(राजस्थान पत्रिका प्रा.लि. की एक इकाई)
409, लक्ष्मी कॉम्प्लेक्स, एम. आई. रोड,
जयपुर - 302 001 (भारत)
फोन : 0141-3005974

e-mail : patrikapublication@epatrika.com

website : www.patrika.com

प्रधान कार्यालय : केसरगढ़, जवाहरलाल नेहरू मार्ग,
जयपुर - 302 004 (भारत)
फोन : +91-141-39404142 , फैक्स : 91-141-2566011

e-mail : info@rajasthanpatrika.com

website : www.patrika.com

संस्करण (प्रथम) : जुलाई, 2000

संस्करण (द्वितीय) : जुलाई, 2010

मूल्य : रु. 6500/-

यू.एस. डॉलर : $ 400/-

मुद्रक : जयपुर प्रिंटर्स प्रा. लि., जयपुर (भारत)

ŚABDA-VEDA : By KARPOOR CHANDRA KULISH — Price : Rs. 6500/-

Subject of Book : A collection of rare recensions(sākhā) of Vedic Samhitās.

ŚABDA-VEDA

(A collection of rare recensions (śākhā) of Vedic Samhitas)

Compiled & Presented by

K.C.Kulish

Founder-Editor, Rajasthan Patrika

Editor

Kailash Chaturvedi

Ex-Director, Sanskrit Education, Rajasthan

PATRIKA PUBLICATION

ŚABDA-VEDA
K.C. Kulish

ISBN : 978-93-80271-88-0
Published by : **Patrika Publication**
(A Unit of Rajasthan Patrika Pvt. Ltd.)
409, Laxmi Complex, M.I. Road,
Jaipur- 302001 (INDIA)
Ph.: 0141-3005974
e-mail : *patrikapublication@epatrika.com*
website : *www.patrika.com*
Head Office : Kesargarh Jawaharlal Nehru Marg,
Jaipur-302 004 (INDIA)
Ph. : +91-141-39404142, Fax: 91-141-2566011
e-mail : *info@rajasthanpatrika.com*
website : *www.patrika.com*

First Edition : July, 2000
Second Edition : July, 2010
Price : **Rs. 6500/-**
U.S. Dollar : **$ 400**
Printed by : Jaipur Printers Pvt. Ltd., Jaipur (INDIA)

ŚABDA-VEDA : By KARPOOR CHANDRA KULISH **Price : Rs. 6500/-**

Subject of Book : A collection of rare recensions(śākhā)of Vedic Samhitās.

प्ररोचना

'शब्द वेदः' प्रस्तुत करते हुए मुझे प्रसन्नता हो रही है। ग्यारह वेद-संहिताओं के संकलन का यह नाम पढ़कर पाठकों को कुछ अनूठा लगेगा, परन्तु यह नाम मुझे वेद विज्ञान के विशारद स्व. स्वामी सुरजनदासजी महाराज ने दिया था। लगभग दस वर्ष पूर्व वेद संहिताओं के संकलन और प्रकाशन का काम मैंने हाथ में लिया था। अनेक बाधाओं के कारण प्रकाशन में अत्यधिक विलम्ब हो गया, परन्तु मैंने अपना संकल्प नहीं छोड़ा। यह भी हुआ कि यह ग्रन्थ आधा छपकर पड़ा रहा। बीच में कई व्यवधान आए, परन्तु चि. गुलाब कोठारी का सहारा मिलने पर नये सिरे से काम शुरु किया और वह सुचारु रूप से सम्पन्न हो गया।

'शब्द वेदः' का नामकरण करने के साथ ही स्वामीजी महाराज इसकी भूमिका भी लिख गये, जो अपने आपमें विलक्षण है। यह भूमिका संस्कृत मासिक भारती (जयपुर) में प्रकाशित हो चुकी है। भूमिका वाले भारती के अंक डॉ. प्रभाकर शास्त्री एवं भारती के सम्पादक श्री गिरिराज किशोरजी के सहयोग से प्राप्त हुए हैं।

स्वामी सुरजनदास जी ने पग-पग पर वेद कार्य में सदैव मार्ग दर्शन किया और शब्द वेदः के प्रकाशन में वे प्रेरणा स्रोत रहे। उन्होंने पं. मधुसूदन ओझा का शिष्यत्व ग्रहण किया था।

वेद को सृष्टि का निर्माता कहा गया है और वेद को अपौरुषेय भी माना जाता है। हमें मानना होगा कि वेद-ग्रन्थों से सृष्टि नहीं रची जा सकती। हमें यह भी मानना होगा कि जिस भाषा और लिपि में वेद संहितायें लिखी गई हैं, वह ईश्वरीय नहीं हो सकती। वैदिक भाषा और देवनागरी लिपि मानव की ही रची हुई है। जिस मुख से वेद मन्त्रों का उच्चारण होता है, वह मानव मुख ही है। जिस लिपि में वेद मन्त्र लिखे गये हैं, वे मानवीय हाथों से ही लिखे गये हैं। यह भी स्पष्ट है कि वेद संहिताओं का संकलन वेदव्यास ने किया और हम जिन मन्त्रों का उच्चारण करते हैं, वे वेदव्यास की ही देन है। उन्होंने संहिता-बद्ध करके मन्त्रों को हमारे कल्याण के लिए शिष्य-प्रशिष्यों के माध्यम से शाखाओं में उपलब्ध कराया।

वेद का जो ईश्वरीय स्वरूप है, वह तत्त्व रूप में है। तैत्तिरीय ब्राह्मण में कहा गया है:-

ऋग्भ्यो जातां सर्वशो मूर्त्तिमाहुः
सर्वा गतिर्याजुषी हैव शश्वत् ।
सर्वं तेजः सामरूप्यं ह शश्वत्
सर्वं हीदं ब्रह्मणा हैव सृष्टम् ॥

अर्थात् जितने भी मूर्त पदार्थ, बिम्ब, प्रतिमाएं हैं, सब ऋग्वेद से बनती हैं और इस ऋक्-तत्त्व का ज्ञान देने वाला शास्त्र ऋग्वेद है। विश्व में जितना भी गति तत्त्व, हलचल, कम्पन, स्पन्दन, क्रियादि है, सब यजुर्वेद से निर्मित है और यजुर्वेद ही यत् और जू भागों में बंटकर गति और स्थिति की रचना करता है। यत् का अर्थ गति और जू का अर्थ स्थिति अथवा आकाश है। आकाश के स्थिर आधार पर वायु अपनी गति करता है। प्रत्येक गति के लिये आगत्यात्मक आधार होना आवश्यक है। हमारे पांवों के नीचे ठोस धरती न हो तो हम चल नहीं सकते। वेद में ब्रह्म को अकर्म एवं जगत् को कर्म कहा गया है। यजुर्वेद हमें क्रिया अथवा गति तत्त्व का ज्ञान देता है। यत् और जू के संयोग से ही सृष्टि का प्रारम्भ है, यही यजुर्वेद है। सृष्टि में जितना भी तेज तत्त्व है, वह सामवेद से उत्पन्न है। तेज ही सामवेद है। सामवेद को वितान वेद, विभूति वेद, महिमा वेद इत्यादि नामों से जाना जाता है। इसी के लिये गीता में भगवान श्रीकृष्ण ने कहा है 'वेदानां सामवेदोऽस्मि'। सामतत्व का ज्ञान देने वाला शास्त्र ही सामवेद है। अथर्व को सोम, अन्न, अथर्वा, सुब्रह्म इत्यादि नाम से जाना जाता है। सोम अथवा अन्न से ही संसार चलता है। ऋग्, यजु और सामवेद तीनों अग्नि वेद हैं और सोम ही अथर्ववेद है। अग्नि और सोम का मेल ही जगत का कारण है जिसके लिये कहा गया है ''अग्निषोमात्मकं जगत्''।

उपर्युक्त विवेचन से स्पष्ट हो जाता है कि तत्त्व रूप में जो वेद है वही शब्द रूप में वेद शास्त्र है। तत्त्व रूप में वेद अग्नि और सोम है और इन्हीं तत्त्वों का शब्द रूप में ज्ञान देने वाले वेद शास्त्र रूप में प्रस्तुत है। शब्द रूप में ईश्वरीय तत्त्वों का ज्ञान देने वाले वेद शास्त्र भी ईश्वरीय है क्योंकि यह ज्ञान अन्यत्र दुर्लभ है।

यदा कदा कुछ लोग वेद पर विचार करने पर इसीलिये आपत्ति करते हैं कि ईश्वरीय वाणी पर विचार करना पाप है। यहाँ यह स्पष्ट कर देना आवश्यक है कि प्रत्येक शास्त्र मनुष्य के लिये, जीव के लिये रचे गये हैं। इनमें वेद शास्त्र भी है। ईश्वर ने अपने लिये वेदों की रचना नहीं की है बल्कि जीव के लिये की है। ईश्वर पूर्ण है, जीव अपूर्ण है। अतः उसको पूर्णता की ओर ले जाने के लिये शास्त्रों की रचना की गई है, इस दृष्टि से वेद को भी विचारणीय मानना चाहिये। विचार के बिना शास्त्र नहीं समझा जा सकता। शास्त्र का मर्म ही विचार है और विचार ही मानव की पहचान है।

प्रस्तुत संहिता संकलन का नाम "शब्द वेदः" इसीलिये रखा गया है ताकि वेद के विषय में भ्रान्तियाँ दूर हो सकें। तत्त्व रूपी वेद और शब्द-रूपी वेद दोनों का अन्तर स्पष्ट हो जाएगा। जो लोग वेद को केवल पूजा की वस्तु समझ कर विचार नहीं करना चाहते हैं उन्हें समझ लेना होगा कि शब्द-वेद स्वाध्याय और विचार करने का शास्त्र हैं परन्तु वह भी ईश्वरीय वाणी ही है क्योंकि वह ईश्वरीय तत्त्वों का ज्ञान करवाता है।

प्रस्तुत ग्रन्थ, उपलब्ध ग्यारह वेद संहिताओं का संकलन है। वर्तमान में कुल 11 ही संहितायें प्रकाशित उपलब्ध हैं जिनमें ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद को सब कोई जानते हैं परन्तु इनकी विभिन्न शाखाएं भी बड़ी कठिनाई से जुटाई गई हैं। किसी समय चारों वेदों की कुल 1131 संहिताएं थी। सभी वेदों के साथ ब्राह्मण, आरण्यक और उपनिषद् थे। इस प्रसंग में एक प्रश्न, वेदों और उनकी शाखाओं के सम्बन्ध में उपस्थित होता है। ब्राह्मण, आरण्यक और उपनिषद् भी वेदों की ही शाखायें हैं और वेदों के समान ही प्रामाणिक है। सभी वेदों की अपनी-अपनी शाखायें हैं। ब्राह्मणों में मन्त्र-संहिता वेद का क्रियात्मक रूप है, आरण्यकों में वेदों का उपासना पक्ष है और उपनिषदों में वेदों का ज्ञान पक्ष है। कर्म, उपासना और ज्ञान मिलाकर ही वेद शास्त्र का सम्पूर्ण रूप विकसित होता है। ऐसी अवस्था में मन्त्र वेद और अन्य शाखाओं की रचना भिन्न-भिन्न काल में मानना कहाँ तक उचित है? मन्त्र रूपी वेद की व्याख्या ही कर्मकाण्ड के रूप में ब्राह्मण है। उसे उपासना पद्धति से जानना ही आरण्यक है और ज्ञान द्वारा जानने का प्रयास ही उपनिषद् है। वेद शास्त्र की सांगोपांग पद्धति से तो ऐसा ही लगता है कि ब्राह्मण, आरण्यक और उपनिषदों की रचना भी संहिता वेद के साथ ही हुई होगी। जो भी हो, इस प्रश्न पर विचार होना आवश्यक है। कालान्तर में अधिकांश का लोप हो गया। केवल 11 संहितायें रह गई है, जिन्हें संकलित करने का यह प्रयास इसलिए किया गया है कि बची हुई संहितायें, एकत्र उपलब्ध हो जाये।

ऐसा ही प्रश्न संहिताओं के विषय में है। ऋक्, यजु, साम तीनों अग्नि वेदों में अविनाभाव माना जाता है और अग्नि-सोम (अथर्व) में भी अविनाभाव है। तब भिन्न-भिन्न वेदों के रचनाकाल को भिन्न-भिन्न क्यों कर माना जाता है। वेद संहिताओं का निर्माण वेद-व्यास ने किया है। वेदों के अविनाभाव को वेदव्यास अवश्य ही जानते होंगे। उनके द्वारा निर्मित संहिताओं में निरन्तरता होनी स्वाभाविक मान कर चलना होगा। ऋग्वेद का काल और अन्य वेदों का काल अलग-अलग क्यों कर मानना चाहिए? भारतीय मेधा-मनीषा के सामने यह एक ऐसा प्रश्न है जिस पर मौलिक विचार अत्यावश्यक है।

महाभाष्य के अनुसार ऋग्वेद की 21, यजुर्वेद की 101, सामवेद की 1000 और अथर्ववेद की 9 शाखायें मिलाकर इन वेदों की कुल संख्या 1131 हैं और प्रत्येक शाखा के साथ ब्राह्मण, आरण्यक और उपनिषद् भी रचे गये हैं। इस प्रकार मन्त्रवेद, ब्राह्मण, आरण्यक और उपनिषदों की कुल संख्या- 4524 हो जाती है। यदि इस संख्या में वेदाङ्गभूत श्रौत-कल्प-गृह्यसूत्र-शिक्षा-व्याकरण-निरुक्त-छन्द-ज्यौतिष वाङ्मय का परिगणन कर लिया जावे तो वैदिक वाङ्मय की विशालता एवं समृद्धता का स्वरूप सामने आ जाता है, किन्तु वेद-विद्या का लोप होते होते अब लोक-व्यवहार में कुल चार ही वेद रह गये। अन्य संहितायें सामान्य जानकारी में नहीं है और लगभग लुप्त प्रायः है। कतिपय विद्वान् केवल संहिताओं को ही वेद मानते हैं और ब्राह्मणों, आरण्यकों एवं उपनिषदों को वेद की श्रेणी नहीं देते परन्तु यह दृष्टि वैदिक दृष्टि से मेल नहीं खाती क्योंकि ब्राह्मण वेद का परीक्षात्मक कर्म काण्ड पक्ष है, आरण्यक उपासना काण्ड है और उपनिषद् ज्ञान काण्ड है। सभी के बीच अविनाभाव है, अतः इन्हें वेद की श्रेणी में मानना ही उचित है।

विद्वज्जन ऐसा मानते हैं कि महाभारत तक वेद विद्या का प्रभाव था। जनमेजय के नागयज्ञ के उपरान्त वेद का लोप होता गया। एक-एक कर संहिताएं, और अन्य वैदिक वाङ्मय भी तिरोहित हो गया। वैदिक ज्ञान के व्याख्याता ब्राह्मणों का प्रयोग शिथिल हो गया, कालान्तर में ब्राह्मण ग्रन्थ तो वेद-शिक्षण से बाहर ही हो गये। ब्राह्मणों के अभाव में वेद स्वयं लुप्त हो गये। ग्रन्थ रूप में शेष जो वेद रह गये वे पूजा के पात्र बन गये। ज्ञान-विज्ञान के मूल वेद का सर्वविद्या-निधानत्व ही समाप्त हो गया। पूजा के लिए वेद बच गये, वे भी केवल चार ही रह गये। वेद का ज्ञान लुप्त हो जाने पर शब्द मात्र रह गये और अज्ञान के कारण ग्रन्थ ही पूजे जाने लगे। वर्तमान जिस वेद को हम जानते हैं वह शब्द-वेद ही है, तत्त्व वेद नहीं।

कहने का तात्पर्य यह कदापि नहीं है कि शब्द-वेद का कोई महत्त्व नहीं। शब्द का ऐतिहासिक महत्त्व तो अवश्य ही है। वेद-मन्त्रों का उच्चारण आज भी वैसे ही होता है जैसा कि श्रुति के प्रादुर्भाव के समय होता था। संसार में एक ही शास्त्र ऐसा है जिसकी उच्चारण विधि में और पाठ में अन्तर नहीं हुआ है। उच्चारण और पाठ में जहाँ अन्तर है वह भी उसी रूप में मान्य है। शब्द रूपी वेद का दूसरा बड़ा महत्त्व कर्मकाण्ड में है। आज भी देश भर में जो कर्मकाण्ड होता है वह वेद मन्त्रों के ही सहारे होता है। कर्मकाण्ड की इस विधा से देश की संस्कृति एवं जीवनशैली और पहिचान बनी हुई है।

वेद के विषय में यह मान्यता है कि वेद स्वयं अपना उद्धारक है। इस मान्यता में यह निहित है कि यदि वेद कलेवर अथवा मन्त्रोच्चार विद्यमान है तो उसके सूत्र पकड़ कर वेद का तात्त्विक पक्ष भी खोजा जा सकता है। स्व. पं. मधुसूदन ओझा को श्रेय देना होगा कि उन्होंने वेद के पारिभाषिक शब्दों के मर्म को खोजा और उन शब्दों के भीतर ही उनके रहस्य को खोला। उन्होंने ब्राह्मण ग्रन्थों की महत्ता स्थापित की। उनके शिष्य स्व. पं. मोतीलाल शास्त्री ने शतपथ ब्राह्मण का पूरा भाष्य ही कर डाला और उसे विज्ञान के रूप में प्रस्तुत किया। इसे वेद के उद्धार की भूमिका अथवा प्रक्रिया ही कहा जाएगा। यह कार्य निरन्तर गति पकड़ रहा है। आज देश में एकाधिक विद्वान् वेद के तात्त्विक पक्ष को जानने लगे हैं और उसके आधार पर ग्रन्थों की रचना कर रहे हैं। वरिष्ठ वैज्ञानिक डाक्टर ए.एस. रामनाथन ने अंग्रेजी में भी कतिपय ग्रन्थों का प्रणयन किया है- जिसे राजस्थान पत्रिका ने प्रकाशित किया है। "वेद में आत्मा की परिकल्पना", "वेद क्या है?", "भगवद्गीता का सार" जैसे वृहत् ग्रन्थ उदाहरण के रूप में प्रस्तुत हैं। वरिष्ठ- वेद-विद्वान डॉ. दयानन्द भार्गव सरल भाषा और शैली में हिन्दी में विभिन्न ग्रन्थों की रचना कर रहे हैं। वर्तमान में वे गीता पर एक लेख माला चला रहे हैं जो 'राजस्थान पत्रिका' में प्रति शनिवार को "विज्ञान वार्ता" स्तम्भ में प्रकाशित हो रही है। राजस्थान पत्रिका ने अब तक वेद विषयक लगभग 75 ग्रन्थों का प्रकाशन कर दिया है। इन ग्रन्थों के प्रकाशन में पं. मोतीलाल शास्त्री के पौत्र स्व. प्रद्युम्न शास्त्री की महत्वपूर्ण भूमिका रही। पं. मोतीलालजी स्वयं 20 हजार पृष्ठ प्रकाशित कर गये थे और उनकी कितनी ही पाण्डुलिपियां अप्रकाशित पड़ी है जिन्हें उनके पुत्र श्री कृष्णचन्द्र शर्मा सुरक्षित रखे हुए हैं और राजस्थान पत्रिका द्वारा उनके प्रकाशन का प्रयास जारी है।

जयनारायण व्यास विश्वविद्यालय, जोधपुर में राज्य सरकार द्वारा मधुसुदन ओझा शोध प्रतिष्ठान स्थापित किया गया है, जो ओझाजी के ग्रन्थोंका निरन्तर प्रकाशन कर रहा है। स्व. स्वामी सुरजनदास के शिष्य डॉ. गणेशीलाल सुथार इसके निदेशक हैं। प्रतिष्ठान ने अब तक वेदधर्मव्याख्यानाम्, इन्द्रविजयः, वर्णसमीक्षा, पितृसमीक्षा, अपरवादः, व्योमवादः, आवरणवादः ग्रन्थों का प्रकाशन कर दिया है। इसी विश्वविद्यालय में कई अन्य विद्वान वेद विज्ञान के स्वाध्याय में रत हैं। जोधपुर में ''वाक्'' नामक संस्था वेद- विज्ञान सम्बन्धी गतिविधियाँ चला रही है। इसके अध्यक्ष वेदनिष्ठ वैज्ञानिक डॉ. अचलदास बोहरा हैं। उन्हें देश के विख्यात एवं वयोवृद्ध विद्वान डॉ. फतेहसिंह का मार्गदर्शन उपलब्ध है। ब्यावर के श्री अनन्त शर्मा निरन्तर स्वाध्यायरत हैं। उन्होंने अपरवाद, व्योमवाद, अत्रिख्याति आवरणवादि कतिपय ग्रन्थों का सटिप्पण अनुवाद भी किया है। ओझाजी के ये ग्रन्थ पूर्व-पक्ष से सम्बन्धित हैं। महामहोपाध्याय पं. गिरधरशर्मा चतुर्वेदी ने ओझाजी के सान्निध्य में रहकर समीक्षात्मक ग्रन्थों की रचना की, जिनमें 'ब्रह्मसमीक्षा' की संस्कृत व्याख्या विशेष उल्लेखनीय है। उनके सुपुत्र पं. देवीदत्त चतुर्वेदी ने भी 'भगवद्गीता', 'देवीसूक्त रहस्य', 'रात्रिसूक्त रहस्य' आदि रचनाओं द्वारा वैदिक साहित्य की श्रीवृद्धि में योगदान किया है। होशियारपुर के वैदिक विद्वान् पं. ब्रजबिहारी चौबे ने 'गृह्यसूत्रों' पर विशेष अनुसंधान कार्य प्रकाशित किया है।

मै स्वयं उपयुक्त सभी गतिविधियों में निरन्तर सहयोग करता रहता हूं। लगभग 10 वर्षों तक देश और विदेशों में व्याख्यान-मालायें करता रहा हूं। मुझे प्रसन्नता है कि विदेशी श्रोताओं ने मेरे व्याख्यानों में गहरी रूचि दिखाई। जयपुर के दीप-माध्वाश्रम के संचालक स्वामी महेश्वरानन्द ने इन व्याख्यानों का आयोजन किया। वाइस आफ जर्मन, बी. बी. सी., वायस आफ अमरीका, जयपुर दूरदर्शन के माध्यम से भी मेरी वार्तायें प्रसारित हुई हैं।

ओझा जी की दृष्टि से मार्ग दर्शन पाकर महामहोपाध्याय गिरिधर शर्मा चतुर्वेदी, स्वामी सुरजनदास जी, डॉ. वासुदेवशरण अग्रवाल, आद्यादत्त जी ठाकुर प्रभृति विद्वानों ने भी कतिपय ग्रन्थों की रचना की। स्वामी सुरजनदास जी ने राजस्थान पत्रिका द्वारा प्रकाशित शतपथ-ब्राह्मण के कतिपय भागों की काण्डिकाओं का भाष्य भी किया।

इसी वर्ष एक अंग्रेजी प्रकाशन ने वेद वाङ्मय की शृंखला में एक नई कड़ी जोड़ दी। देश के मूर्धन्य पत्रकार श्री ऋषि कुमार मिश्र ने पं. मोतीलाल शास्त्री की कृतियों के आधार पर उन्हीं की अन्तिम इच्छा के अनुसरण में एक वृहत् ग्रन्थ की रचना की है, जिसका नाम ''बिफोर द बिगनिंग एण्ड आफ्टर द एण्ड'' (अनादि-अनन्त) रखा है। श्री ऋषि कुमार मिश्र ने पं. मोतीलाल जी का शिष्यत्व ही ग्रहण कर रखा था और जयपुर में ही रहते हुए वे सुदीर्घ काल तक मानवाश्रम में ही शास्त्रीजी के सानिध्य में रहते थे। इस पुस्तक के प्रकाशन पर मुझे विशेष प्रसन्नता है क्योंकि मैं भी विगत पन्द्रह वर्षों से शास्त्रीजी की पाण्डुलिपियों के प्रकाशन में रत हूँ। मैं पंडितजी के सानिध्य में तो नहीं रहा, उनकी दृष्टि में अवश्य रहा। उनका व्यक्तित्व सामने आने के बाद इस आशा और आस्था से कार्यरत हूँ कि आज नहीं तो कल उनका स्मरण देश को होगा। दिसम्बर, 1956 में राष्ट्रपति डॉ. राजेन्द्रप्रसाद महाभाग ने राष्ट्रपति भवन में पं. मोतीलाल शास्त्री के पाँच व्याख्यानों का आयोजन किया था, जिसे सुनकर उन्होंने एक पत्र लिखकर शास्त्रीजी को भेंट किया और यह उद्गार प्रकट किये कि शास्त्री जी के मौलिक विचारों का प्रसार होना चाहिये, सरकार को भी इस कार्य में पहल करनी चाहिये। शास्त्री जी द्वारा स्थापित वैदिक-तत्व-शोध संस्थान के संरक्षक भी राष्ट्रपति स्वयं बने। शास्त्रीजी का आग्रह अंग्रेजी माध्यम पर था और ठीक ही था, अतः उस दिशा में भी सक्रिय हूँ।

प्रस्तुत संकलन में प्रयास किया गया है कि उपलब्ध सभी ग्यारह वेद संहिताओं को मिला लिया जाय ताकि भविष्य में इनका लोप न हो। इस प्रयास को सरल बनाने के लिए हमने कतिपय प्रकाशित संहिताओं की फोटो प्रति करवा ली है और जहाँ अशुद्धि सामने आई उसे ठीक कर दिया गया। जो संहिता प्रकाशित नहीं थी, उसे नये सिरे से कम्पोज करवाया गया परन्तु पुस्तक के सामान्य पृष्ठों के साथ उसी रूप में प्रकाशित कर दिया गया।

संकलन को अशुद्धियों से बचाने के लिए उपलब्ध पुस्तकों की फोटो स्टेट कापी बनाकर एक बड़े आकार में कई पृष्ठों का समावेश कर दिया गया है। ताकि आकार अत्यधिक बड़ा न हो। मूल्य अधिक न बढ़े अतः कम्पोज का उपयोग कम कर दिया गया। प्रयोजन केवल इतना ही है कि सभी संहितायें एक साथ उपलब्ध हों। ग्रन्थ का आकार बड़ा हो जाने के कारण अलबत्ता कागज मोटा लगाना पड़ा जिससे कम्पोज की बचत का लाभ लुप्त हो गया। फिर भी ग्यारह संहिताओं को सम्मिलित रूप में प्रकाशित करने का अपने आप में उपयोग है और महत्त्व भी। यह एक अभिनव प्रयोग है।

वेदवाचस्पति पं. मोतीलाल शास्त्री के जामता और राजस्थान संस्कृत शिक्षा निदेशालय के पूर्व-निदेशक श्री कैलाश चतुर्वेदी ने इस कार्य को सम्पन्न करने का दायित्व स्वयं संभाला है। यह कार्य शास्त्रीजी के पौत्र प्रद्युम्नकुमार शास्त्री ने आज से 8 वर्ष पूर्व हाथ में लिया था, परन्तु पूरा नहीं कर पाये एवं उनका असमय-स्वर्गवास हो गया। चतुर्वेदीजी ने न केवल सम्पादन-प्रकाशन का दायित्व निभाया है बल्कि दुर्लभ संहिताओं का संकलन भी किया है।

हमारा प्रयास केवल उपलब्ध संहिताओं का रक्षण करना ही है। चार वेदों का एक संकलन तो पहिले भी उपलब्ध है और पृथक्-पृथक् वेदों का प्रकाशन भी एकाधिक बार हुआ है, परन्तु एक विशाल ग्रन्थ में ग्यारह संहिताओं का एक साथ प्रकाशन अपने आप में एक उपलब्धि है।

इस शताब्दी के उत्तरार्द्ध में वेद के मौलिक पक्ष पर निरन्तर कार्य होता रहा और निरन्तर बढ़ रहा है। वेद अब शब्द मात्र न रहकर तत्त्व रूप में प्रकट हो रहा है। वेद का तात्त्विक रूप विस्तार पा रहा है। मैं आशा करता हूं कि सहृदय विद्वज्जन वेद विज्ञान की ओर उन्मुख होंगे। इसी प्रयोजन से ''शब्द वेदः'' का प्रकाशन किया गया है। राजस्थान पत्रिका प्रकाशन की यह बहुमूल्य कड़ी है, एक ऐतिहासिक घटना है और वेद-निष्ठजनों को समर्पित है।

कर्पूरचन्द्र कुलिश

गुरुपूर्णिमा, सम्वत् २०५७
१६, जुलाई, २०००
'स्वस्ति'
११ हॉस्पिटल रोड, जयपुर

आदर्श-ग्रन्थाः

अस्य ग्रन्थस्य प्रकाशने निम्नाङ्किताः प्रकाशिताः संहिताः आदर्शरूपत्वेनास्माभिः संगृहीताः—

१.	ऋग्वेद-संहिता	(श्रीपाददामोदर सातवलेकरेण सम्पादिता)	१९३६ संस्करणम्
२.	यजुर्वेद-संहिता	" "	१९४६ संस्करणम्
३.	काण्व-संहिता	" "	१९४० संस्करणम्
४.	तैत्तिरीय-संहिता	" "	१९४३ संस्करणम्
५.	काठक-संहिता	" "	१९४२ संस्करणम्
६.	मैत्रायणी-संहिता	" "	१९४२ संस्करणम्
७.	सामवेद-संहिता	" "	१९३९ संस्करणम्
८.	अथर्ववेद-संहिता	" "	१९४३ संस्करणम्
९.	कपिष्ठलकठ-संहिता	(डॉ. रघुवीरेण सम्पादिता)	१९३२ संस्करणम्
१०.	जैमिनीय-संहिता	" "	१९३८ संस्करणम्
११.	पैप्पलाद-संहिता	" "	१९४६ संस्करणम्

एतान् प्रति सादरं कृतज्ञता-ज्ञापनं पुण्यस्मरणञ्चैषां क्रियते।

प्रकाशकः

सर्वं वेदात् प्रसिध्यति

आर्याणां विश्ववारा[1] संस्कृतिः अभ्युदयनिःश्रेयसहेतुर्भारतीयो धर्मश्च वेदैकमूलाविति निर्विवादम्। अत एव 'वेदोऽखिलो धर्ममूलम्' (मनुः 2 / 61) 'वेदाद् धर्मो हि निर्बभौ' (मनु 2 / 10) 'वेद एव द्विजातीनां निःश्रेयसकरः परः' (या. स्मृ. 1 / 40) इत्यादिवचनानि प्रथन्ते।

विदितवेदितव्यैः अधिगतयाथातथ्यैः साक्षात्कृतधर्मभिस्तत्रभवद्भिर्महर्षिभिः प्रातिभेनालौकिकेन चक्षुषा साक्षात्कृतानामाध्यात्मिकाधिदैविकाधिभौतिकानां तत्त्वानां समुद्घाटनपरो विमलो वचनराशिरेव वेदशास्त्रम्। अत एवेदं पितृदेवमनुष्याणां सनातनं चक्षुः, सर्वभूतानां विधारकं वर्णाश्रमादीनां च सर्वेषां तत्त्वानां प्रकाशकं च प्रोच्यते। यथोक्तं भगवता मनुना-

'पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्।
अशक्यं चाप्रमेयं च वेदशास्त्रमिति स्थितिः॥'
(मनु. 11 / 94)

चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति ॥
(मनु. 12 / 97)

शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः।
वेदादेव प्रसूयन्ते प्रसूतिगुणकर्मतः ॥
(मनु. 12 / 98)

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् ।
तस्मादेतत् परं मन्ये यज्जन्तोरस्य साधनम् ॥
(मनु. 12 / 99)

भारतीयमितरत्सर्वं वाङ्मयमेव-वेदाङ्गत्वेन वा, वेदमूलकत्वेन वा वेदव्याख्यानत्वेन वा, वेदोपजीवित्वेन वा स्वकीयं सार्थक्यं भजते नान्यथा। छन्दःशास्त्रादीनां तु स्पष्टमेव वेदाङ्गत्वमुक्तम् यथा-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥

नानाविधस्य ब्राह्मणारण्यकोपनिषत्साहित्यस्य तु 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप. परि. 31) इत्यापस्तम्बादिवचनाद् वेदत्वं सुसमर्थितमेव। आश्वलायनादिप्रणीतानां नानाविधानां श्रौतकल्पगृह्यधर्मसूत्रग्रन्थानां, मन्वादिप्रणीतानां स्मृतीनां, बौधायनादिनिर्मितानां धर्मशास्त्राणां च वेदोपकरणत्वेन वेदमूलत्वं सुप्रसिद्धमेव।'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।' (म.भा. 1 / 1 / 267) इति वचनात् इतिहासपुराणशास्त्रयोरपि वेदोपबृंहकत्वेन वेदमूलकत्वं निश्चप्रचमेव। सर्वेषां दर्शनानाम् अर्वाचीनस्य च सर्वविधस्य वाङ्मयस्य वेदोपजीवित्वं स्वीक्रियत एव सर्वैरिति नास्ति कस्यचित् प्रमाणोपन्यासस्यावश्यकता विपश्चितां कृते। एवं भारतीयं सर्वं वाङ्मयं वेदोपजीवित्वाद् वेदमूलकत्वाच्चाप्रधानत्वापरपर्यायमङ्गत्वमेव भजते न प्रधानत्वापरपर्यायमङ्गित्वम्। प्रधाने च कृतः

1. 'सा प्रथमा संस्कृतिः विश्ववारा'- यजुःसंहिता 7/14

प्रयत्नः फलवान् भवतीति तदध्ययन एव प्रयतितव्यं प्राधान्येन भारतीयैर्द्विजातिभिः। अत एव 'तस्माद् ब्राह्मणेन निष्कारणं धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' (पात. म. भा. पस्पशाह्निक) 'स्वाध्यायोऽध्येतव्यः' (तै.आ. 2 / 15)

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

(मनु. 2 / 16 म.)

वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः ।
तं ह्यस्याहुः परं धर्ममुपधर्मोऽन्य उच्यते ॥

(मनु. 4 / 147 म.)

इत्यादिश्रौतस्मार्तवचनानि द्विजातीनां कृते वेदस्यावश्याध्येयतां प्रतिपादयन्ति वेदानां महत्त्वं च बोधयन्ति।

'धर्मब्रह्मणी वेदैकवेद्ये' इति पुरुषार्थानुशासनसूत्रात् 'चोदनालक्षणोऽर्थो धर्मः' इति जैमिनिसूत्रे 'चोदनैव धर्मे प्रमाणम्।' इत्युक्त्या धर्मस्य, 'शास्त्रयोनित्वात्' इति व्यासोक्त्या ब्रह्मसूत्रे च ब्रह्मणश्च शास्त्रैकविषयत्वस्य प्रतिपादनात् 'नावेदविन्मनुते तं बृहन्तम्' इति श्रुतेश्च धर्मब्रह्मणोर्वेदैकबोध्यत्वेन तद्बोधकत्वेनापि अस्ति वेदानां महत्त्वम्।

अपि च प्रत्यक्षानुमानादिप्रमाणानामविषयभूतस्य स्वर्गापूर्वादेरर्थस्य, भूतस्य भाविनः सूक्ष्मस्य विप्रकृष्टस्य चार्थस्य बोधने वेदस्यैवाप्रतिहता गतिर्नान्यस्योपायस्येति तदर्थमस्ति वेदानामतीवोपयोगित्वमित्येतदपि बोधयति वेदानां निरतिशायि महत्त्वम्। तदुक्तम्-

प्रत्यक्षेणानुमानेन यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥ इति॥

अत एव च सम्प्रदायविदोऽप्यकुण्ठितां शक्तिं वेदस्य दर्शयन्ति। यथा- 'चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहित विप्रकृष्टमित्येवंजातीयमर्थं शक्नोति बोधयितुम्' (शाबर भा. 1।2) इति। मनुनाऽपि 'भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिध्यति' इत्युक्त्या एतदेव बोधितम्।

कथमीदृशं सामर्थ्यं वेदस्येति नाशङ्कनीयम्-यतो हि वेदः अलौकिकप्रतिभाजुषां विदितवेदितव्यानामधिगतयाथातथ्यानां साक्षात्कृतधर्मणां महर्षीणां वचनरूपो राशिरिति तस्य प्रत्यक्षकल्पत्वेन सर्वातिशायि प्रामाण्यम्। एतादृशा महर्षयश्चातीतानागतानसंवेद्यान् पदार्थानपि आर्षेण चक्षुषाऽध्यक्षयन्ति। तदुक्तं भर्तृहरिणा वाक्यपदीये-

आविर्भूतप्रकाशानामनुपप्लुतचेतसाम्।
अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ॥

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावा वचनं तेषां नानुमानेन बाध्यते ॥

(वाक्य. ब्र. का. 37, 38)

मनुरपि 'देवपितृमनुष्याणां वेदश्चक्षुः सनातनम्' इत्युक्त्या तस्य निर्भ्रान्तं प्रत्यक्षत्वमेव बोधयति।

अत एव श्रुतिस्मृत्योर्वचनत्वेन साम्येऽपि श्रुतेः प्रत्यक्षद्रष्टृमहर्षिवचनत्वेन प्रत्यक्षरूपत्वात् स्मृतेश्च श्रोतुर्वचनरूपत्वेनानुमानरूपत्वात् अनुमानापेक्षया च प्रत्यक्षस्य बलवत्त्वात् श्रुतिस्मृत्योर्विरोधे श्रुतेः प्रामाण्यमङ्गीक्रियते न स्मृतेः।

ननु श्रुतेः प्रत्यक्षरूपत्वेन प्रामाण्यस्वीकारे कथं प्रत्यक्षापेक्षयाऽपि तस्य प्राबल्यमङ्गीक्रियते इति चेत्, न, सांव्यवहारिकस्य प्रत्यक्षस्य इन्द्रियापाटवभ्रमप्रमादविप्रलिप्सा-दोषजन्यत्वेन क्वचिदप्रामाण्यसम्भवेऽपि उपर्युक्तदोषरहितानां प्रातिभया दृष्ट्याऽसंवेद्यानामर्थानां साक्षात्कर्तृणां महर्षीणां प्रत्यक्षे तादृशदोषाशङ्काया अप्यसम्भवेन तत्र सर्वातिशायिप्रामाण्यस्य लौकिकसांव्यवहारिकप्रत्ययापेक्षया बलवत्त्वस्य च स्वतः सिद्धत्वात्। एतदर्थमेव भर्तृहरिणा आविर्भूतप्रकाशानामनुपप्लुतचेतसामिति विशेषणद्वयं समुपात्तम्। अत ईदृशस्य सर्वार्थबोधनक्षमस्य परमपुरुषार्थरूपनिःश्रेयससाधकस्य वेदस्य महत्त्वं निर्विवादमेव सिध्यति।

ऋग्वेदः

यद्यपि 'एकविंशतिधा बाह्वृच्यम्, एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः नवधाऽऽथर्वणो वेदः' इति महाभाष्योक्त्या वैदिकं संहितासाहित्यमेव एकत्रिंशदुत्तरसहस्रशाखात्मकत्वेनातितरां विशालं समृद्धं च, तद्व्याख्यानभूतानां ब्राह्मणानामारण्यकानामुपनिषदां तथा तदङ्गभूतस्य श्रौतकल्पगृह्यसूत्रशिक्षाव्याकरणनिरुक्त छन्दोज्यौतिषादिवाङ्मयस्य गणनायां तु का कथा तस्याः समृद्धतायाः विशालतायाश्च। तथापि दैवदुर्विपाकाद्वा कालप्रभावाद्वा विलुप्तास्वपि भूयसीषु संहिताशाखासु कथाशेषतामुपयातेषु भूयःसु तद्व्याख्यानभूतेषु ब्राह्मणादिग्रन्थेषु

नाममात्रावशेषासु गाथासु कुम्व्यासु च त्किञ्चिदवशिष्टं साहित्यं तदपि पर्याप्तं तत्र भवतां भारतीयानां महर्षीणां लोकोत्तरां प्रतिभां, क्रान्तदर्शितां, विदितवेदितव्यतामधिगतयाथातथ्यतां च निदर्शयितुम्। तत्र, 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप. परि. 31) इत्यापस्तम्बोक्त्या मन्त्रब्राह्मणयोर्वेदत्वेन तयोरेव समासतः परिचयोऽत्र उपन्यस्यते। परमत्रापस्तम्बसूत्रे मन्त्रशब्देन 'ब्रह्म वै मन्त्रः' (शत. 7 / 1 / 1 / 5) इति श्रुत्या मन्त्रात्मकवेदसंहितायाः, ब्राह्मणशब्देन च वेदव्याख्यानभूतानां ब्राह्मणारण्यकोपनिषदां ग्रहणम्, 'ब्रह्मवेदस्तद्व्याख्यानं ब्राह्मणमितिव्युत्पत्तेः।'

वेदाश्च 'ऋग्वेदं भगवोऽध्येमि, यजुर्वेदं सामवेदमाथर्वणं च' (छा. 7 / 1 / 2) 'ऋग्वेदो यजुर्वेदः सामवेद आथर्वणः।' (मु. 1 / 1 / 5) 'ऋग्यजुः सामाथर्वाणश्चत्वारो वेदाः' (नृ. ता उ. 1 / 1 / 2) 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' (मु. 1 / 1) इत्यादिश्रुतिवचनैः ऋग्यजुःसामाथर्वाणश्चत्त्वारः इति निर्विवादम्।

तत्र 'एकविंशतिधा वाह्वृच्यम्।' इति पतञ्जल्युक्त्या एकविंशतिशाखाभेदभिन्नस्यापि ऋग्वेदस्य साम्प्रतं पञ्चैव शाखाः प्रामुख्यं भजन्ते-आश्वलायनी, शाङ्खायनी, शाकला, बाष्कला, माण्डूकेया चेति। आस्वपि शाखासु ऋग्वेदेऽद्यत्वे शाकलसंहितैव प्रचलिताऽस्ति, नान्यासां शाखानां संहिताः समुपलभ्यन्ते। यद्यपि शाकलशाखासंहितानुसार- मृगवेदस्यान्तिमो मन्त्रः 'समानी व आकूतिः' (ऋ. सं. 10 / 191 / 4) इति वर्तते। वाष्कलशाखासंहितानुसारं च 'तच्छंयोरावृणीमहे' इति वर्तते। अर्थाद् वाष्कलशाखासंहितायां पञ्चदशर्चात्मकं संज्ञानसूत्रमधिकं वर्तते। अस्य भेदस्य सत्त्वे प्रमाणमाश्वालायनसूत्रम् पञ्चानामपि शाखानां पारायणे ऋग्वेदस्य समाप्तिः 'तच्छंयोरावृणीमहे' इत्यत्रैव बोध्या। तदुक्तं महिदासेन- 'पञ्चशाखानां पारायणे तच्छंयोरावृणीमहे' इत्यत्र समाप्तिरेकवेदत्वात्।' तदुक्तं च-

ऋचां समूह ऋग्वेदस्तमभ्यस्य प्रयत्नतः ।
पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम् ॥

सांख्याश्वलायनौ चैव माण्डूका बाष्कलास्तथा ।
बह्वृचा ऋषयः सर्वे पञ्चैते ह्येकवेदिनः ॥ इति।

(चौखंबा संस्करण पृष्ठ 23-24)

अस्मिंश्च ऋग्वेदे वाष्कलसंहितायाम् अष्टकविभागानुसारं अष्टौ (8) अष्टकानि, चतुःषष्टिः (64) अध्यायाः षडुत्तरे द्वे सहस्रे (2006) वर्गाः, संज्ञानसूक्तस्य चतुर्णां वर्गाणां गणने तु दशोत्तरे द्वे सहस्रे (2010) वर्गाः, सपादाशीत्यधिकपञ्चशतानि दशसहस्राणि (105801$^{1/4}$) ऋचश्च सन्ति। द्वात्रिंशदधिकशतद्वयाधिकमेकविंशतिसहस्रमर्धर्चाः पादश्चैकः (21232$^{1/4}$) षड्विंशत्यधिकाष्टशतयुक्त-पञ्चाशत्सहस्राधिकलक्षं (153826) पदानि द्वात्रिंशत्सहस्राधिक चतुर्लक्षम् (432000) अक्षराणि च सन्ति।

मण्डलविभागे तु मण्डलानि दश (10) सूक्तानि सप्तदशाधिकं सहस्रम् (1017) पदानि च एकलक्षद्विपञ्चाशत्सहस्रपञ्चशत-चतुर्दशानि (152514) वासिष्ठानाम्। तेषां 'इन्द्रो' इति एकसप्ततिपदात्मको वर्गो-नास्ति। इतरगोत्रीयाणां तु 'इन्द्रोतिभिः' (अ. 3 अ. 3 वर्ग 23) इति तृतीयाष्टकतृतीयाध्यायस्य त्रयोविंशतिवर्गस्य एकसप्तति (71) पदानां मेलनेन पदानि-एकलक्षद्विपञ्चाशत्-सहस्रपञ्चाशीतिः (152585) भवन्ति। तदुक्तं चरणव्यूहभाष्ये-

'अध्यायाश्च चतुःषष्टिर्मण्डलानि दशैव तु ।
वर्गाणां परिसंख्यातं द्वे सहस्रे षडुत्तरे ॥

सहस्रमेतत् सूक्तानां निश्चितं खैलिकैर्विना ।
दशसप्त च पठ्यन्ते, संख्यात वै पदक्रमम् ॥

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिः पादश्च पारणं सम्प्रकीर्तितम् ॥

अर्धर्चानां सहस्राणामेकविंशतिकं तथा ।
शतद्वयं तु द्वात्रिंशत्सपादं मुनिभिः पुरा ॥'

एकं च शतसहस्रं दश च सहस्राणि सप्तशतानि (110704) चर्चापदानि ज्ञेयानि पदानि चान्यानि चत्वारि। चत्वारि वाव शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि (432000) (कात्या. सर्वानु. पृ. 52-53)= वर्गसंख्यायाः स्पष्टीकरणं शौनकेनानुवाकानुक्रमण्यां कृतम्। तदुक्तं शौनकेनानुवाकानुक्रमण्याम्-

एकर्च एकवर्गः (1) स्यादेकर्चः (1) नवकस्तथा ।
द्वौ (2) वर्गौ तु द्व्यृचौ ज्ञेयौ त्र्यूनं तृचशतं (97) स्मृतम् ॥

चतुष्कं शतमेकं च चत्वारः सप्ततिस्तथा (175) ।
पञ्चानां च सहस्रं तु द्वे च सप्तोत्तरे शते (1207) ॥

त्रीणि शतानि षट्कानां चत्वाशिंच्च षट्मताः (346) ।
सप्तर्चानां शतं तूनविंशतिश्चाधिका स्मृता (119) ॥

अष्टर्चानां तु पञ्चाशद् एकोनदशकं (59) तथा ॥

एकर्चादिवर्गाणां तत्रत्यानामृचां च तालिकाऽधस्तात् प्रदर्श्यंते सौकर्येण बौधाय-

ऋक्संख्यानुसारं		वर्गनाम	वर्ग संख्या	समस्ता	ऋक्संख्या
एकर्च:	1	ऋक्	1	=	1
द्वृचः	2	ऋचौ	2	=	4
तृचः	3	ऋचः	97	=	291
चतुष्कः	4	ऋचः	174	–	696
पञ्चकः	5	ऋचः	1207	=	6035
षट्कः	6	ऋचः	346	=	2076
सप्तकः	7	ऋचः	119	=	833
अष्टकः	8	ऋचः	59	=	472
नवकः	9	ऋचः	1	=	9
			2006		10417

इदं त्ववधेयम् यदेकर्चादिवर्गानुसारिणी या ऋक्संख्योपरि निर्दिष्टा सा शाकलशैशिरीयशाखानुसारं न तूपलभ्यमानशाकलसंहितानुसारम्। अत- एवोक्तमनुवाकानुक्रमण्यां शौनकेन 'तान् पारणे शाकले शैशिरीये वदन्ति शिष्टा न खिलेषु विप्राः' (अनु. वाकानुक्रमणी 36 श्लोकः) एषाऽपि च बालखिल्यसूक्तवर्जम्। अत एव 'न खिलेषु इत्युक्तम्।'

'ऋचां दश सहस्राणि ऋचां पञ्चशतानि च।' ऋचामशीति पादश्च पारणं सम्प्रकीर्तितम्।' इत्यत्र पारणे या 10580$^{1/4}$ ऋक्संख्या प्रोक्ता साऽपि न विशुद्धशाकलसंहिताया अपि तु ऋग्वेदीयसर्वशाखानामिति बोध्यम्। पं. श्रीभगवद्दत्तमहोदयैः 'वैदिकवाङ्मयस्य इतिहास' नाम्नि पुस्तके प्रथमभागे 134 पृष्ठे उद्धृताभ्यां लौगाक्षिस्मृति- श्लोकाभ्यामेतत् स्पष्टं प्रतीयते। तद् यथा-

ऋचां दशसहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीति पादश्च पारायणविधौ खलु ॥

पूर्वोक्तसंख्या या साऽपि सर्वशाखोक्तसूक्तगाः ।
मन्त्राश्चेति मिलित्वैव कथितेति पुनः पुनः ॥

चरणव्यूहभाष्यकृता महिदासेन ऋग्वेदस्य वर्गाणामृचां च संख्यायाः प्रदर्शकाः केचित् श्लोकाः उद्धृताः। तद् यथा-

एकर्च एकवर्गश्च एकर्चो नवकस्तथा ।
द्वौ वर्गौ तु द्वृचौ ज्ञेयौ ऋक्त्रयस्य शतं स्मृतम् ॥

चतुर्ऋचां पञ्चसप्तत्यधिकं च शतं तथा ।
पञ्चर्चतुं द्विशतकं सहस्रं रुद्रसंयुतम् ॥

पञ्चचत्वारिंशत्तथा षड्ऋचाँ तु शतत्रयम् ।
सप्तर्चानां शतं ज्ञेयं विंशतिश्चाधिकाः स्मृताः ॥

अष्टर्चानां तु पञ्चाशत् पञ्च चैवाधिकास्तथा ।
द्व सहस्रे दशवर्गाः पञ्च शाखासु निश्चिताः ॥

वर्गाः संज्ञानसूक्तस्य चत्वारश्चात्र मिश्रिताः ।
एवं पारायणे प्रोक्ता ऋचां संख्या न न्यूनतः ॥

उपर्युक्तश्लोकानुसारिणी वर्गाणामृचां च संख्याऽधस्तात् तालिकया ज्ञेया-

ऋक्संख्यानुसारं वर्गनाम	वर्गसंख्या	ऋक्संख्या
एकर्चः-वर्गः एका ऋक्	1	1
द्वृचः-द्वे ऋचौ	2	4
तृचः-तिस्रः ऋचः	100	300
चतुष्कः-चतस्रः ऋचः	175	700

ऋक्संख्यानुसारं वर्गनाम	वर्गसंख्या	ऋक्संख्या
पञ्चर्चः-पञ्च ऋचः	1211	6055
षड् ऋचः-षड् ऋचः	345	2070
सप्तर्चः-सप्त ऋचः	120	840
अष्टर्चः-अष्ट ऋचः	55	440
नवर्चः-नव ऋचः	1	9
	2010	10419

इयं वर्गसंख्या च शाकलचरणीयपञ्चशाखानाम्। अत्र च संज्ञानसूक्तस्य चत्वारो वर्गा अपि वर्गसंख्यायां, तदीयाः पञ्चदशर्चश्च ऋक्संख्यायां सम्मिलिताः। संज्ञानसूक्तस्य पञ्चदशर्चानाम् अपरिगणने तु 10404 ऋक्संख्या जायते। अस्यामृक्संख्यायां पूर्वोक्तायां 10402 ऋक्संख्यायां च संख्याद्वयस्य भेदो वर्तते। परमयं भेदः शाखान्तरत्वेन जात इति प्रतीयते।

अत्र युधिष्ठिरमीमांसकमहोदयैः 'ऋग्वेद की ऋक् संख्या' इति पुस्तके लिखितं यत्- 'महिदासः बालखिल्यसहितानां मन्त्राणां संख्यां 10552 बालखिल्यरहितानां तु 10472 मनुते' इति। परमेतन्न समीचीनम्। यतो हि महिदासेन यैषा संख्या चरणव्यूहभाष्ये प्रदर्शिता सा सर्वानुक्रमण्या वर्तते न महिदासस्य। तेन स्पष्टमेवोक्तम्- 'बालखिल्यसहिता सर्वानुक्रमणीमन्त्ररूपा ऋक्संख्योच्यते-द्विपञ्चाशदधिकपञ्चशतदशसहस्राणि' (10472) इति (च. व्यू. भा. पृ. 17)।

बाष्कलशाखायामष्टौ सूक्तान्यधिकानि वर्तन्ते। तदुक्तमनुवाकानुक्रमण्यां शौनकेन-'एतत् सहस्रं दश सप्त चैवाष्टावतो बाष्कलकेऽधिकानि' इति। अपि चानुवाकानुक्रमण्यामेकविंशश्लोके शाकलशाखातो बाष्कलशाखाया भेदान्तरमपि दर्शितम्। तथा हि शाकलसंहितायां रहूगण-गौतमस्य चतुःसप्ततितमसूक्तात् त्रिनवतितमसूक्तपर्यन्तानां विंशतिसूक्तानामनन्तरं कुत्सस्य सूक्तानि सन्ति। परं बाष्कलसंहितायामतो भिन्न एव क्रमः। तत्र गौतमदृष्ट-सूक्तानामनन्तरमौशिजस्य कक्षीवतः एकादश (11) सूक्तानि परुच्छेपस्य च त्रयोदश (13) सूक्तानि वर्तन्ते। ततः कुत्सदृष्टानि सूक्तानि, तदनन्तरं च दीर्घतमोदृष्टानि 25 सूक्तानि। अर्थात् कुत्सदृष्टानां सूक्तानां संनिवेशक्रम उभयोः संहितयोर्विभिन्नो वर्तते। तदुक्तमनुवाकानानुक्रमण्याम्-

इत्याद्ये मण्डले दृष्टाश्चत्वारो विंशतिस्तथा।
गौतमादौशिजः कुत्सः [illegible]रुच्छेपादृषे परः ।
कुत्साद्दीर्घतमा इत्येषः तु बाष्कलकः क्रमः ॥

उपरितन्येषा ऋग्वेदीयवर्गादिसंख्या बालखिल्यसूक्तवर्जं विद्यते। यतो हि बालखिल्यानि सूक्तानि पारायणे न सन्ति। श्रौतस्मार्तसर्वकर्मानुष्ठाने बालखिल्यप्रसिद्धावपि वेदपरायणे बालखिल्यवर्जमेव परिगण्यते।

पारायणे ऋचामुपरितनी $10580^{1/4}$ संख्या तु चरणव्यूहभाष्यकृता महिदासेन स्पष्टीकृता। तद्यथा- 'अथाध्ययने ऋक्संख्योच्यते-षण्णवत्यधिकचतुःशतदशसहस्राणि' (10496) इति। ततो नैमित्तिकद्विपदासहिताः षट्षष्ट्युत्तरपञ्चशतदशसहस्राणि (10566) इति। 'संज्ञानमुशनावदत्' सूक्तस्य पञ्चदशर्चैकीकृत्य 10581 इति-एवं पारायणे ऋक्संख्या 'ऋचां दशसहस्राणि। इति वचनस्य परिपूर्णा भवति इत्यर्थः। एका (ऋक्) उर्वरिता सा। भद्रन्नो अपि वाताय मनः''(10 / 201) इति पादाधिक्यमनुक्रमणिकावृत्तावप्युक्तेः।' (चरणव्यूह पृ. 21-22)

अत्रापि ऋचां 10496 संख्यायाः प्रकार एवं वर्तते-यत् ऋग्वेदे सामान्यत ऋचां संख्या बालखिल्यसूक्तवर्जं 10402 वर्तते। एषा च संख्या ऋग्वेदस्य कस्याश्चित् शाखायाः एकादशश्लोकात्मके छन्दःसंख्यासंज्ञके प्राचीने परिशिष्टे उपलभ्यते। तत्र हि आद्येषु दशसु श्लोकेषु गायत्र्यादिच्छन्दोऽनुसारमृक्संख्याया उल्लेखः कृतः। अन्तिमे चैकादशे पद्ये सङ्कलय्य ऋक्संख्यानिर्देशः कृतः। तद्यथा-

एकपञ्चाशद् ऋग्वेदे गायत्र्यः शाकलेयके ।
सहस्रद्वितयं चैव चत्वार्येव शतानि तु ॥1॥
त्रीणि शतानि सैकानि चत्वारिंशत्तथोष्णिहः ।
अनुष्टुभां शतान्यष्टौ पञ्चाशद् पञ्चसंयुता ॥2॥
बृहतीनां शतं ज्ञेयमेकाशीत्यधिकं बुधैः ।
शतानि त्रीणि पङ्क्तीनां द्वादशाभ्यधिकानि तु ॥3॥
पञ्चाशत् त्रिष्टुभः प्रोक्तास्तिस्रश्चैव ततोऽधिकाः ।
सहस्राण्येव चत्वारि विज्ञेयं तु शतद्वयम् ॥4॥
चत्वारिंशत्तथाष्टौ च तथा चापि शतत्रयम् ।
जगतीनामियं संख्या सहस्रं तु प्रकीर्तितम् ॥5॥

अत्र तैत्तिरीयसंहितायां प्रचलिते सारस्वतपाठे संहिताब्राह्मणारण्यकेषु मन्त्रब्राह्मणयोः प्राचुर्येण सांकर्यं दृश्यते। तथाहि-केचन मन्त्राः संहितायां यस्मिन् प्रपाठके आम्नातास्तस्मिन्नेव प्रपाठके तदग्रे तदीयं ब्राह्मणमाम्नातम्। यथा-सम्पश्यामि प्रजा अहमिह प्रजासो मानवीः इति संहितामन्त्रः। एतस्यैव ब्राह्मणं संहितायामेव तदग्रे एव सम्पश्यामि। प्रजाऽअहमित्याह यावन्त एवेति। ब्राह्मणमिति। (च. व्यू. भा. 1.41) क्वचिदेकत्र प्रपाठके मन्त्राः, अपरत्र च तदीयं ब्राह्मणम्। यथा संहितायां प्रथमे काण्डे षष्ठे प्रपाठके दर्शपौर्णमासिका मन्त्राः पठ्यन्ते, सप्तमे प्रपाठके च तेषां मन्त्राणां ब्राह्मणं पठितम्। क्वचिदेकस्मिन् काण्डे मन्त्राः, अपरस्मिंश्च काण्डे तदीयं ब्राह्मणम्। यथा संहितायां चतुर्थ काण्डे अग्निचयनमन्त्राः, पञ्चमे काण्डे च तदीय ब्राह्मणमाम्नातम्।

एषा च मन्त्रब्राह्मणयोः संकीर्णता न केवलमस्याः शाखायाः संहितायामपितु तदीये ब्राह्मणेऽपि। यथा तैत्तिरीयब्राह्मणस्य प्रथमाष्टके प्रथमे प्रपाठके आधान ब्राह्मणम्, तत्रैव द्वितीयस्मिन् प्रपाठके आधानमन्त्राः। एवं केचनाश्वमेधिकाः पदार्थाः (मन्त्रा ब्राह्मणानि च) संहिताभागे, केचन च ब्राह्मणभागे निरूप्यन्ते राजसूयविधयः केचन संहितायां प्रथमकाण्डे अष्टमे प्रपाठके निरूपिताः, केचन ब्राह्मणभागे प्रथमाष्टके सप्तमाष्टमप्रपाठकयोर्निरूपिताः। तैत्तिरीयसंहितायां ब्राह्मणे चारण्यकेषु मन्त्राः, संहितायां च मन्त्राणां व्याख्यानमिति संमिश्रणम्। क्वचिन्मन्त्राः ब्राह्मणानि च सह पठितानि। तद् यथा षष्ठे प्रपाठके याजमानाः मन्त्रास्तद्ब्राह्मणानि च सन्ति।

पुनराधानवर्णने प्रथमकाण्डस्य पञ्चमे प्रपाठके आरम्भे अनुवाकद्वये ब्राह्मणानि तृतीयेऽनुवाके मन्त्राः चतुर्थेऽनुवाके च पुनर्ब्राह्मणम् इति ब्राह्मणसम्पुटिताः मन्त्राः सन्ति। प्रथमकाण्डस्यैव पञ्चमषष्ठयोरनुवाकयोः उपस्थानमन्त्राः सप्तमाष्टमनवमानुवाकेषु ब्राह्मणानि, दशमेऽनुवाके च पुनरुपस्थानमन्त्राः इति मन्त्रसम्पुटितानि ब्राह्मणानि। प्रथमकाण्डस्याष्टमे प्रपाठके राजसूयसम्बन्धिनो विंशतिरनुवाकाः। तेषु द्वितीयाष्टमानुवाकवर्जं प्रारंभिकेषु दशसु अनुवाकेषु (अष्टस्वनुवाकेषु) मन्त्राः ब्राह्मणानि चेति उभयं विद्यते। एकादशात् षोडशपर्यन्तं षडनुवाका विशुद्धमन्त्रात्मकाः। द्वितीयाष्टमसप्तदशाष्टादशोनविंशविंशानुवाकाश्च विशुद्धब्राह्मणात्मकाः।

तत्र तेषामध्ययनमष्टादशयजुः सहस्राणि अधीत्य शाखापारो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति, तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति। (च. व्यू. पृ. 33) इति चरणव्यूहपरिभाषासूत्रे प्रदर्शितं मन्त्राणं परिमाणं ऋग्यजुरात्मकोभयसमुदायस्य समग्रस्यैव यजुर्वेदस्य न केवलानामृचां न वा केवलानां यजुषाम्। ऋग्यजुःसामान्येन अष्टादशसहस्राणि यजूंषि यजुर्वेदमन्त्राः भवन्तीत्यर्थः इति सातवलेकरः। एषा च संहिता काण्डप्रपाठकानुवकेषु विभक्ता। तत्र काण्डानि सप्त (7) प्रपाठकाः प्रश्ना वा चतुश्चत्वारिंशत् (44), अनुवाकाश्च एकपञ्चाशदुत्तरषट् शतानि (651)। सप्तसु काणेडषु क्रमशः 8, 6, 5, 7, 7, 6, 5 प्रपाठकाः समुच्चिताश्च 44 प्रपाठका भवन्ति।

प्रतिकाण्डं प्रतिप्रपाठकमनुवाकसंख्याऽधस्तात्प्रदीयते-तत्र प्रथमे काण्डे अष्टसु प्रपाठकेषु क्रमशः- 14, 14, 14, 46, 11, 12, 13, 22 अनुवाकाः सम्भूय च 146 अनुवाकाः सन्ति।

द्वितीये काण्डे षट्सु प्रापठकेषु क्रमशः- 11, 12, 14, 14, 12, 12 अनुवाकाः समुच्चिताश्च 75 अनुवाकाः सन्ति। तृतीये काण्डे तु पञ्चसु प्रपाठकेषु क्रमशः 11, 11, 11, 11, 11 अनुवाकाः सम्भूय च 55 अनुवाकाः सन्ति।

चतुर्थे काण्डे सप्तसु प्रपाठकेषु क्रमशः- 11, 11, 13, 12, 11, 9, 15 अनुवाकाः संभूय च 82 अनुवाकाः सन्ति।

पञ्चमे काण्डे सप्तसु प्रपाठकेषु क्रमशः- 11, 12, 12, 12, 24, 23, 26 अनुवाकाः संभूय 120 अनुवाकाः सन्ति।

षष्ठे काण्डे षट्सु प्रपाठकेषु क्रमशः- 11, 11, 11, 11, 11, 11 अनुवाकाः संभूय च 66 अनुवाकाः सन्ति।

सप्तमे काण्डे पञ्चसु प्रपाठकेषु क्रमशः- 20, 20, 20, 22, 25 अनुवाकाः समुच्चिताश्च 107 अनुवाकाः सन्ति। संभूय च सप्तसु काण्डेषु चतुश्चत्वारिंशत्प्रपाठकेषु अनुवाकसंख्या 651 जायते। तत्र पञ्चाशती 2198, पदानि 19290 अक्षराणि च 253868 इत्यपि प्रपञ्चितं चरणव्यूहभाष्यकृता महिदासेन। यथा-

काण्डास्तु सप्त विज्ञेयाः प्रश्नाश्चाधिक्यकाश्चतु ।
श्चत्वारिंशत्तु विज्ञेयाः अनुवाकाः शतानि षट् ॥1॥

एकपञ्चाशदधिकाः संख्याः पञ्चाशदुच्यते।
द्विसहस्रञ्चैक- शतमष्टानवतिश्चाधिका ॥2॥

लक्षैकं तु द्विनवति-सहस्राणि प्रकीर्तितम्।
पदानि नवतिश्चैव तथैवाक्षरमुच्यते ॥3॥

लक्षद्वयं त्रिपञ्चाशत्-सहस्राणि शतःष्टकम्।
अष्टषट्यधिकञ्चैव यजुर्वेदप्रमाणकम् ॥4॥ (पृष्ठ- 40)

एवं वाक्यसंख्यापि परिगणिता- 19488 वाक्यानीति। तदुक्तम्-

शाखावाक्यान्ययुतानि सहस्राणि नवैव च।
चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते ॥
(च. व्यू. भाष्य पृष्ठ- 40)

परमेषा वाक्यसंख्या ब्राह्मणग्रन्थस्य न तु संहिताग्रन्थस्य 'इति ब्राह्मणे वाक्यसंख्या 19488' (च. व्यू. भाष्य) इति चरणव्यूहभाष्योक्तेः, संहितायां मन्त्रेषु वाक्यगणनाया असंभवाच्च।

आर्षेयपाठस्तु अस्यास्तैत्तिरीयशाखासंहिताया अनुष्ठानोपयोगित्वात् सत्याषाढापस्तम्बबौधायनादिभिराचार्यैः स्वस्वगृह्यसूत्रे स्पष्टतरमुल्लिखितत्वाच्चोपयुक्ततरः प्रतिभाति। तत्र संहिता ब्राह्मणं च पृथक् पृथग् वर्तेते न तु संकीर्णे। अस्मिन् पाठे संहितायां पञ्च काण्डानि प्राजापत्यं, सौम्यं, आग्नेयं, वैश्वदेवं, स्वायम्भुवं चेति। काण्डानामेताः समाख्याः तत्तत्काण्डद्रष्टृन् महर्षीन् अवलम्ब्य सम्प्रवृत्ता इति ज्ञायते। तत्र प्राजापत्ये प्रथमकाण्डे नव प्रपाठकाः। तथा चोक्तं काण्डानुक्रमण्याम्-

शाखादिं याजमानं च होतृन् हौत्रं च दार्शिकम्।
तद्विधीन् पितृमेधं च नवाहुः कस्य तद्विदः ।इति॥

अस्यायमर्थः- शाखादिः (पौरोडाशिकं) याजमानं, होतारः, दार्शिकंहौत्रं चेति चत्वारि, तेषां ब्राह्मणान्यपि चत्वारि, पितृमेधश्चेति नव प्रकरणानि प्राजापत्यानि। बौधायनोऽप्याह- 'पौरोडाशिकं याजमानं, होतारः, हौत्रं पितृमेध इति सब्राह्मणानि सानुब्राह्मणानि प्राजापत्यानि' (बौ.गृ.सू.प्र. 3 / 3) प्राजापत्यानि- प्राजापत्य काण्ड विषयाः प्रपाठकगताः।

द्वितीये सौम्ये काण्डेऽपि-अध्वरः, ग्रहाः दाक्षिणानीति त्रीणि तद् ब्राह्मणानि च त्रीणि, वाजपेयः तद्ब्राह्मणम्, सवाः, शुक्रिये द्वे (प्रवर्ग्यः, तद् ब्राह्मणञ्च) इति नव प्रपाठकाः। तदुक्तम्-

अध्वर प्रभृतित्रीणि तद्विधिर्वाजपेयके।
सवाः शुक्रियकाण्डे च नवेन्दोरिति धारणा ॥ (काण्डानु.)

अत्र दाक्षिणानीत्यनेन दक्षिणाद्रव्याणि समिष्टयजूंषि, अवभृथयजूंषि च गृह्यन्ते। यथाऽऽह बौधायनः- अध्वर्यवं, ग्रहाः, दाक्षिणानि समिष्टयजूंषि अवभृथ-यजूंषि, वाजपेयः शुक्रियाणि, सवा इति सब्राह्मणानि सानुब्राह्मणानि वा सौम्यानि। इति।

तृतीये आग्नेये काण्डे-अग्न्याधेयपुनराधेयाऽग्न्युपस्थानानीति त्रीणि, अग्निः (अग्निचयनं) अग्न्याधेयादित्रिकस्य ब्राह्मणम्, अग्निचयनस्य ब्राह्मणमिति द्वयम्, अग्निहोत्रब्राह्मणं चेत्येवं सप्त प्रकरणानि सन्ति। तदुक्तं काण्डानुक्रमण्याम्-

त्रिष्वग्न्याधेयपूर्वेषु ह्यग्नौ च सविधिद्वये।
विधौ चैवाग्निहोत्रस्य सप्तस्वग्निमृषिं विदुः॥

काठकोक्तानां सावित्रनाचिकेतचातुर्होत्रीयवैश्वसृजारुणकेतुकाभिधानां पञ्चानां प्रकरणानामप्यत्रैव परिग्रहः। अग्न्याधेयमग्निहोत्र-मग्न्युपस्थानमग्निचयनं सावित्रं नाचिकेतं, चातुर्होत्रीयं वैश्वसृजमारुणम् इति सब्राह्मणानि सानुब्राह्मणान्याग्नेयानि इति बौधायनसूत्रात्।

चतुर्थे वैश्वदेवकाण्डे-राजसूयः, तद्ब्राह्मणम्, पशुबन्धः, काम्येष्टयः, उपानुवाक्यम् याज्याः, अश्वमेधः, तद्ब्राह्मणम्, सात्रायणम्, उपहोमाः, सूक्तानि, नक्षत्रेष्टयः, सौत्रामणी, अच्छिद्राणि, पशुहौत्रं पुरुषमेधश्चेति षोडश प्रकरणानि। तदुक्त काण्डानुक्रमण्याम्-

अवशिष्टानि यानि स्युः काण्डान्यन्यानि षोडश ।
विश्वान् देवानृषींस्तेषु विदुर्वेदविदो जनाः ॥
सब्राह्मणो राजसूयः पशुबन्धः सहेष्टिभिः ।
उपानुवाक्यं याज्याश्च अश्वमेधः सब्राह्मणः॥
सात्रायणं चोपहोमाः सूक्तानि च सहेष्टिभिः ।
सौत्रामणी सहाच्छिद्रैर्हौत्रं मेधश्च षोडश॥

काठकोक्तानां दिवश्येन्यपाधनामिकानामिष्टीनामुपनिदाञ्चात्रैव परिगणनं बौधायनसूत्रे तथैव परिगणनात्। तदाह बौधायनः-

राजसूयः, पशुबन्धः, इष्टयो नक्षत्रेष्टो दिवश्येनयोऽपाधाः सात्रायणमुपहोमाः कौलिकीसूक्तानि औपानुवाक्यं याज्याः अश्वमेधः पुरुषमेधः सौत्रामणी अच्छिद्राणि पशुहौत्रमुपनिषदः इति सब्राह्मणानि सानुब्राह्मणानि वैश्वदेवानि।इति॥

पञ्चमं स्वायम्भुवं काण्डञ्चैकविधमेव ब्रह्माम्नायविध्यात्मकम्।

तदुक्तम्-

ऋषिं स्वायम्भुवं प्राहुर्ब्रह्माम्नायविधावपि ।
स्वाध्यायब्राह्मणमिति सह वै प्रश्न उच्यते॥

अत्रोपरितनेषु बौधायनसूत्रेषु ब्राह्मणशब्देन मन्त्राणां कर्मणि विनियोजकं विधिरूपं वाक्यजातम्, अनुब्राह्मणशब्देन च विधिमनूद्य अर्थवादसहितं क्वचित् मन्त्रार्थोपवर्णनयुक्तं वाक्यजातं गृह्यते। तदुक्तम्-

ब्राह्मणं मन्त्रकाण्डस्थविधिजातमितीरितम् ।
अनुब्राह्मणमन्यत्तु कथितं सार्थवादकम् ॥

(तै. सं. भाष्य. 1 / 8 / 1)

एषु पञ्चसु काण्डेषु च संहितायां 625 अनुवाका: ब्राह्मणे च 640 अनुवाका: सम्भूय च संहिताब्राह्मणयो: 1265 अनुवाका: सन्ति। प्रतिकाण्डमनुवाकानुतालिका तु निम्नाङ्किता-

काण्डे	संहितायाम् अनुवाका:	ब्राह्मणे अनुवाका:	योग:
प्राजापत्यकाण्डे	58	77	135
सौम्यकाण्डे	129	106	235
आग्नेयकाण्डे	118	123	241
वैश्वदेवकाण्डे	314	320	634
स्वायम्भुवे काण्डे	6	14	20
	625	640	1265

अस्या: संहिताया एकमेव ब्राह्मणमुपलभ्यते तैत्तिरीयाभिधम्। तत्र काण्डानि त्रीणि (3), प्रपाठका: अष्टाविंशति: (28)। तत्रापि प्रथमे-द्वितीये च काण्डे अष्टौ अष्टौ प्रपाठका: तृतीये च द्वादश। प्रपाठकश्चानुवाकेषु विभक्ता:। अनुवाकाश्च अष्टात्रिंशदुत्तरत्रिशतानि (338) सन्ति। तत्र प्रथमे काण्डे 78, द्वितीये 96, तृतीये च 164 अनुवाका इति सम्भूय 338 अनुवाका भवन्ति काण्डत्रये।

अस्यां तैत्तिरीयशाखायां दशप्रपाठात्मक आरण्यकग्रन्थोऽपि वर्तते य: तैत्तिरीयारण्यकनाम्ना प्रसिद्ध:। एषु दशसु प्रपाठकेषु काठकाभिधेयं प्रपाठकत्रयमपि विद्यते। दशसु प्रपाठकेषु क्रमश: 32, 20, 21, 42, 12, 12, 12, 9, 10, 64 अनुवाका इति सम्भूय 234 अनुवाका: सन्ति। दशमे प्रपाठके मतान्तरेण 80 अनुवाका: सन्ति। एवं च अनुवाकसंख्या 250 भवति। एषा अनुवाकसंख्या आन्ध्रमतेन। तामिलमतेन 67, मैसूर (कर्नाटक) मतेन च 76 वर्तते। सायणेनैतत् प्रकरणं खिलनाम्नाऽऽख्यातम्। एतदेव प्रकरणं 'नारायणोपनिषद्' वर्तते। सप्तमात् प्रपाठकादारभ्य नवमप्रपाठकपर्यन्तं तैत्तिरीयारण्यकमेव शिक्षावल्ली आनन्दवल्ली भृगुवल्लीति वल्लीत्रयात्मकं तैत्तिरीयोपनिषन्नाम्ना प्रसिद्धम्।

द्वितीयस्यां मैत्रायणीशाखायां संहिताग्रन्थ एवोपलभ्यते न तु ब्राह्मणग्रन्थ:। इयं संहिता गद्य-पद्यात्मिका, अत्रापि तैत्तिरीयसंहितावत्-मन्त्रा ब्राह्मणानि च सङ्कीर्णान्येवोपलभ्यन्ते। तत्र च काण्डानि चत्वारि (4) प्रपाठकाश्च चतु:पञ्चाशत् (54) सन्ति। तत्र प्रथमे काण्डे एकादश (11) द्वितीये त्रयोदश (13) तृतीये च षोडश (16) खिलकाण्डनाम्ना विश्रुते चतुर्थे च चतुर्दश (14) प्रपाठका: सन्ति। प्रथमे काण्डे क्रमश: दर्शपूर्णमासाध्वराधानपुनराधानचातुर्मास्यवाजपेयानां निरूपणं द्वितीये काण्डे त्रयोदशसु प्रपाठकेषु काम्येष्टिराजसूयाग्निचितीनां विस्तृतं निरूपणम्, तृतीये काण्डे अग्निचिति अध्वरविधिसौत्रायणो प्रतिपादनानन्तरमश्वमेधस्य विस्तृतं द्वादशादाषोडशप्रपाठकेषु चतुर्थे च काण्डे पूर्वनिरूपित-राजसूयादिविषयकान्यसामग्रीसंकलनं विद्यते। मैत्रायणीयमारण्यकमुपनिषद्वा संहिताया अन्ते एव मुद्रितम्। तत्र सप्त प्रपाठका: सन्ति। येषु क्रमश: 4, 7, 5, 6, 2, 38, 11 खण्डा: सन्ति।

तृतीयस्यां कठशाखायामपि कठसंहितैवोपलभ्यते न पुथक् ब्राह्मणमारण्यकञ्च। यद्यपि तैत्तिरीयब्राह्मणस्य तृतीयाष्टकस्यान्ते दशमैकादशद्वादशप्रपाठात्मको भाग: काठकपदाभिधेय उपलभ्यते, किन्तु स न कठशाखावलम्बी ब्राह्मणभाग:, अपितु तैत्तिरीयब्राह्मणान्तर्गतस्तैत्तिरीयारण्यकान्तर्गतो वा। अत एव तैत्तिरीयशाखाध्येतार: सर्वेऽपि नियमेन प्रपाठकत्रयात्मकमिमपि भागमधीयते। वस्तुतोऽयं प्रपाठकत्रयात्मको भागो न तैत्तिरीयब्राह्मणान्तर्गत: अपि तु तैत्तिरीयारण्यकान्तर्गत एव मन्तव्य:। अत एवाध्येतारोऽध्यापयन्ति च।

अत्रापि संहिताभागे मन्त्रा ब्राह्मणानि च संकीर्णान्येवोपलभ्यन्ते। एषा कठसंहिता च पञ्चसु खण्डेषु विभक्ता। तत्राद्याश्चत्वार: खण्डा: क्रमश: इठिमिका, मध्यमिका, ओरिमिका याज्यानुवाक्याभिधानानि काण्डान्युच्यन्ते। अन्तिमं पञ्चमं काण्डं तु अश्वमेधीयानुवचननाम्ना प्रसिद्धम्। आद्यानि चत्वारि काण्डानि स्थानकेषु विभक्तानि। तत्र इठिमिकाकाण्डे 18, मध्यमिकाकाण्डे 12, ओरिमिकाकाण्डे च 10 स्थानकानि सङ्कलनया च चत्वारिंशत् स्थानकानि आद्येषु चतुर्षु काण्डेषु सन्ति। याज्यानुवाक्याकाण्डस्य च ओरिमिकाकाण्डेऽन्तर्भूतत्वात्र तत्र पृथक् स्थानकानि। अन्त्यमश्वमेधीयानुवचनकाण्डं तु अनुवचनेषु विभक्तम्। तत्र च त्रयोदश अनुवचनानि सन्ति।

अस्या: शाखाया: काठकाभिधस्य ब्राह्मणस्य कतिपयेंऽशा इदानीमुपलब्धा:। तेषां संग्रह: 'काठकब्राह्मणसंकलनम्' इति नाम्ना डा. सूर्यकान्तमहोदयेन प्रकाशित: अस्या: शाखाया उपनिषत् कठोपनिषन्नाम्ना प्रसिद्धोपलभ्यते च। अस्यां द्वावध्यायौ। प्रत्यध्यायं च तिस्र: वल्लय: सन्ति। षट्सु वल्लीसु क्रमश:- 24, 17, 15, 15, 18 मन्त्रा: सन्ति, संभूय च 89 मन्त्रा:।

कृष्णयजुर्वेदस्य 'कपिष्ठलकठनाम्नी एकाऽपरापि शाखा वर्तते। यस्या: संहिता-ग्रन्थो लवपुरे 1932 खिष्टाब्दे मुद्रित: अस्या मूलसंहिता काठक-संहितासमानैव पर स्वराङ्कनपद्धतिर्ऋग्वेदतुल्या। ऋग्वेदवदेव एषा अष्टकेषु अध्यायेषु च विभक्ता। अत्र अष्टौ अष्टकानि सन्ति। प्रत्यष्टकं चाष्टौ अध्याया वर्तन्ते। एषाऽप्यपूर्णा विद्यते। प्रथमोऽष्टक: पूर्ण उपलभ्यते। द्वितीयतृतीयाष्टके त्रुटिते उपलभ्येते। चतुर्थस्याष्टकस्य पञ्चविंशात् एकत्रिंशपर्यन्तमध्याया उपलभ्यन्ते। केवल द्वात्रिंशोऽध्यायो नोपलभ्यते। पञ्चममष्टकमपि त्रयस्त्रिंशाध्यायवर्जमुपलभ्यते। षष्ठमष्टकं अपि 43 अध्यायवर्जमुपलभ्यते। अतोऽग्रे सप्तमाष्टमाष्टकद्वयं सर्वथा नोपलभ्यते।'

शुक्लयजुर्वेदः

शुक्लयजुर्वेदसंहिता तु वाजसनेयी संहिता प्रोच्यते वाजसनेयेन याज्ञवल्क्येनाख्यातत्वात् वाजिरूपधरेण सूर्येण देवरातसुताय याज्ञवल्क्याय शुक्लयजुषामुपदिष्टत्वाच्च। तदाह सायणः- 'आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्त' इति।'[1] आदित्येनाध्यापितत्वादादित्यान्युच्यन्ते। 'वाज इत्यन्नस्य नामधेयम्। ''अन्नं वै वाजः'' इति श्रुतेः। वाजस्य सनिः दानं यस्य महर्षेरस्ति सोऽयं वाजसनिः। तस्य पुत्रो वाजसनेयः, तस्य याज्ञवल्क्य इति नामधेयम्।' तेन याज्ञवल्क्येनैतानि शुक्लयजूंषि महर्षिभ्यः पञ्चदशभ्य आख्यायन्ते इति। वाजिरूपधरेण सूर्येण शुक्लयजुषामुपदिष्टत्वादेव तदध्यायिनः काण्वमाध्यन्दिनादयो वाजिन उच्यन्ते। वाजिनां च पञ्चदश शाखाः। तच्छाखाध्येतारश्चरणव्यूहे- 'जाबालाः, बौधायनाः, काण्वाः, माध्यन्दिनाः शाफेया (शापेयाः), तापनीयाः (तापायनीयाः) कापालाः, पौण्ड्रवत्साः, आर्वाटिदकाः, परमावटिकाः, पाराशाराः (पाराशर्या) वैणेयाः (वैनेयाः) वैधेयाः, औधेयाः गालवाः इति संज्ञाभिरभिहिताः। क्वचित् जाबालानां बौधायनानां च स्थाने वैजवाः कात्यायनीयाः इति पठ्यन्ते।' (च. व्यू. भा. पृ. 39) तदेतदभिसन्धायोक्तम्-

एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः ।
अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः ॥

यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम ।
वाजिनस्ते समाख्याताः सूर्याश्वः सोऽभवद् यतः ॥

शाखाभेदास्तु तेषां वै दश पञ्च चवाजिनाम् ।
काण्वादयस्तु महाभागा याज्ञवल्क्यप्रवर्तिताः॥

शुक्लयजुर्वेदे- ऋग्यजुर्विभागेन मन्त्राणां परिमाणं दर्शितं चरणव्यूहे। तत् यथा-

द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके ।
ऋग्गणः परिसंख्यातस्ततोन्यानि यजूंषि च॥

'अष्टौ शतानि सहस्राणि चाष्टविंशतिरन्यान्यधिकश्च पादमेतत् प्रमाणं यजुषां हि केवलं सवालखिल्यं सशुक्रियं ब्राह्मणं च चतुर्गुणम्' इति (च. व्यू. पृ. 31) वाजसनेयके वेदे नवशताधिकसहस्रमन्त्रा इत्यर्थः। एतत् सकलं सशुक्रियमन्त्रं 'ऋचं वाचम्' इति षट्त्रिंशदध्यायोक्त-चतुर्विंशत्यृचात्मकसहितम्। .... ऋक्संख्या पञ्चविंशत्युत्तरंकोनविंशतिशतम् (1925) यजुःसंख्या अष्टाविंशत्युत्तराष्टशतान्यष्टौ सहस्राणि। 'ब्राह्मणं च चतुर्गुणम्' वेदचतुर्गुणं शतपथब्राह्मणमित्यर्थः। (च. व्यू. भा. पृ. 40)

'यजुर्वेदतरोरासन् शाखा एकोत्तरं शतम्।
तत्रापि च शिवाः शाखाः दश पञ्च च वाजिनाम्॥

इति वचनेन 'वाजसनेयानां पञ्चदश भेदा भवन्ति' इतिचरणव्यूहोक्त्या च वाजसनेयिनाम्ना प्रसिद्धासु शुक्लयजुर्वेदीयासु पञ्चदशाशाखासु इदानीं काण्वामाध्यन्दिनशाखे एवोपलभ्येते। उभयोरपि शाखयोः संहिता चत्वारिंशदध्यायात्मिका। अस्या अन्तिमश्चत्वारिंशोऽध्यायः ईशोपनिषन्नाम्ना प्रसिद्धः।

भगवान् सूर्यो वाजिरूपं धृत्वा मध्याह्ने शुक्लानि अयातयामानि यजुंषि देवरातसुताय याज्ञवल्क्यायोपदिष्टवानत एवैषा शाखा माध्यन्दिनी उच्यते। यदाह महिदासश्चरणव्यूहभाष्ये- 'मध्याह्ने शुक्लवर्णेन सूर्येण दत्ता' इति।

अस्याः शाखायाः संहिता चत्वारिंशदध्यायात्मिकेति पूर्वमुक्तम्। तत्र 303 अनुवाकाः, 1975 कण्डिकाश्च सन्ति। प्रतीकोक्त गणितमन्त्राश्च ऊनपञ्चाशत् (49) वर्तन्ते। 29625, शब्दाः, 55575 अक्षराणि च तत्र सन्ति। तत्राद्येषु पञ्चविंशत्यध्यायेषु मन्त्राणां संग्रहः। अन्त्याः पञ्चदशाध्यायाश्च खिलनाम्ना प्रसिद्धाः।

अस्याः शाखायाः ब्राह्मणं शतपथं चतुर्दशकाण्डात्मकम्। तत्र च प्रपाठकाः अष्टषष्टिः (68)। एतदीयानि काण्डनामानि तु '1- हविर्यज्ञकाण्डम् । 2- एकपात्काण्डम् । 3- अध्वरकाण्डम् । 4- ग्रहकाण्डम् । 5- सवकाण्डम् । 6- उखासम्भरणकाण्डम् । 7- हस्तिघटकाण्डम् । 8- चितिकाण्डम्। 9- संचितिकाण्डम् । 10- अग्निरहस्यकाण्डम् । 11- अष्टाध्यायीकाण्डम् । 12- मध्यमकाण्डम्। 13- अश्वमेधकाण्डम् । 14- बृहदारण्यककाण्डम्' इति।

अत्र च 24000 श्लोकाः 768000 अक्षराणि च सन्ति। अत्र 12000, ऋचां, 8000, यजुषां 4000 साम्नां च सङ्ग्रहः।

---

1. वस्तुतः याज्ञवल्क्यस्यैव शतपथब्राह्मणस्थमन्तिमं वाक्यम् (14.6.4.33), सायणस्तु काण्वसंहिता भाष्योपक्रमे क्वाचिदुद्धरतीदम् व्याख्याति च नाम, वाजइत्यन्नस्य नाम...... नामधेयम् । इति।

माध्यन्दिनशतपथस्य पूर्ण विवरणं निम्नतालिकया ज्ञातुं शक्यते-

काण्ड संख्या-काण्डसंज्ञा	अध्याया:	प्रपाठका:	ब्राह्मणानि	काण्डिका:
1. हविर्यज्ञकाण्डम्	9	7	37	837
2. एकपदिकाकाण्डम्	6	5	24	549
3. अध्वरकाण्डम्	9	7	38	849
4. ग्रहकाण्डम्	6	5	39	648
5. सवकाण्डम्	5	4	25	471
6. उषासंभरणकाण्डम्	8	5	27	530
7. हस्तिघटकाण्डम्	5	4	12	398
8. चितिकाण्डम्	7	4	27	437
9. संचितिकाण्डम्	5	4	15	402
10. अग्निरहस्यकाण्डम्	6	4	31	369
11. अष्टाध्यायीकाण्डम्	8	4	42	437
12. मध्यमकाण्डम्	9	4	29	459
13. अश्वमेधकाण्डम्	8	4	43	432
14. बृहदारण्यककाण्डम्	9	7	50	796
योग: 14	100	68	438	7624

अस्मिन् माध्यन्दिनीये शतपथे नवमकाण्डं यावत् संहिताक्रमेणैव ब्राह्मणक्रमो वर्तते पिण्डपितृयज्ञवर्जम्। पिण्डपितृयागे तु संहिताब्राह्मणयो: क्रमभेदो वर्तते। तथा हि पिण्डपितृयागसम्बन्धिनो मन्त्रा: संहितायां दर्शपूर्णमासयागमन्त्रानन्तरं पठिता:। ब्राह्मणे त्वाधानानन्तरं तद्विधि: (पिण्डपितृयागविधि:) प्रतिपादित:।

शतपथब्राह्मणस्य चतुर्थाध्यायतो नवमाध्याय पर्यन्तं षडध्यायात्मकं चतुर्दशं काण्डमेव बृहदारण्यकमित्याख्यायते। अस्मिन् आद्येषु त्रिष्वध्यायेषु प्रवर्ग्ययागनिरूपणाम्। शेषाश्च षडध्याया: बृहदारण्यकोपनिषन्नाम्नाख्यायन्ते।

कण्वशाखा तु कण्वमहर्षिणा प्रचारिता। अत्रापि च संहितायाम् अन्तिमश्चत्वारिशोऽध्याय: 'ईशोपनिषन्नाम्नैव व्यपदिश्यते। अस्या: शाखाया: संहितायां 228 अनुवाका:, 2086 मन्त्राश्च सन्ति। अस्या: संहिताया अध्यायानुवाकमन्त्रतालिका निम्नांकिता-

अध्याय संख्या	अनुवाकसंख्या	मन्त्रसंख्या	अध्याय संख्या	अनुवाकसंख्या	मन्त्रसंख्या
1	10	50	21	7	106
2	7	60	22	8	72
3	9	76	23	6	60
4	10	49	24	21	47
5	10	55	25	10	67
6	8	50	26	8	44
7	22	340	27	15	45
8	22	32	28	12	14
9	7	46	29	6	50
10	6	43	30	4	46
11	10	47	31	7	51
12	7	85	32	6	84
13	7	116	33	2	46
14	7	65	34	4	22
15	9	35	35	4	55
16	7	85	36	1	24
17	8	65	37	3	20
18	7	86	38	7	27
19	9	43	39	9	12
20	5	46	40	1	18
	187	1474	40	141	910

अस्याः शाखाया ब्राह्मणमपि शतपथाभिधमेव। किन्त्वत्र सप्तदश काण्डानि वर्तन्ते। तत्र च डा. कालाण्डमतानुसारं 104 अध्यायाः 446 ब्राह्मणानि 5865 कण्डिकाश्च सन्ति। अस्याध्यायब्राह्मणकण्डिकासंख्याबोधार्थं निम्नतालिका द्रष्टव्याः-

काण्ड संख्या	काण्ड नाम	अध्याय संख्या	ब्राह्मण संख्या	कण्डिका संख्या
1	एकपात्काण्डम्	6	22	376
2	हविर्यज्ञकाण्डम्	8	32	532
3	उद्धारिकाण्डम्	2	22	124
4	अध्वरकाण्डम्	9	36	649
5	ग्रहकाण्डम्	8	38	904
6	वाजपेयकाण्डम्	2	7	700
7	राजसूयकाण्डम्	5	19	289
8	उपासम्भरणकाण्डम्	8	27	511
9	हस्तिघटकाण्डम्	5	16	257
10	चितिकाण्डम्	5	20	243
11	साग्निचितिकाण्डम्	7	20	437
12	अग्निरहस्यकाण्डम्	6	28	286
13	अष्टाध्यायीकाण्डम्	8	31	241
14	मध्यमकाण्डम्	9	28	392
15	अश्वमेधकाण्डम्	8	44	308
16	प्रवार्यकाण्डम्	2	8	192
17	वृहदारण्यककाण्डम्	6	47	295
योगः 17		104	445	6806

काण्वशाखीयस्य शतपथब्राह्मणस्य क्रमो न संहिताक्रममनुसरति। तथा हि- अत्र दर्शपूर्णमासेष्ट्या निरूपणं द्वितीये काण्डे वर्तते। तदीया मन्त्राश्च संहितायां प्रथममेव पठिताः। यतो हि काण्वशाखीयं शतपथं न दर्शपूर्णमासेष्ट्याः प्रारभ्यते अपि तु आधानतः। अपि च ये तावद्विषया माध्यन्दिनीये शतपथे द्वितीये काण्डे समाम्नाताः, ते सर्वेऽपि अत्र प्रथमकाण्ड एव समाम्नाताः। एवमुभयशाखीययोः शतपथयोर्भूयान् विषयविपर्यासो दृश्यते, परमत्र विस्तरभयात्र प्रदर्श्यते। अस्य ब्राह्मणस्य षोडश काण्डमध्यायद्वयात्मकम्, तत्र च प्रवर्ग्ययागस्य निरूपणम्। षडध्यायात्मकं सप्तदशं च काण्डं बृहदारण्यकनाम्ना वृहदारण्यकोपनिषन्नाम्ना वा प्रसिद्धम्। अस्य च सप्तदशस्य काण्डस्य षट्सु अध्यायेषु क्रमशः 6, 6, 9, 15, 5 ब्राह्मणानि इति सम्भूय 47 ब्राह्मणानि सन्ति। प्रतिब्राह्मणं च खण्डेषु कण्डिकासु वा विभक्तम्।

सामवेदः

यद्यपि सामशब्दः ''गीतिषु समाख्या'' (जै. सू. 2 / 1 / 36) इति जैमिन्युक्त्या 'का साम्नो गतिरिति स्वर इति होवाच। (छा. उ. 1 / 8 / 4) इति छान्दोग्यश्रुत्या।' तस्य हैतस्य साम्नो यः स्वं वेद, भवति हास्य स्वं 'तस्य स्वर एव स्वम्' (बृ.उ. 1 / 3 / 25) इति बृहदारण्यकश्रुत्या 'तस्य हैतस्य साम्नो यः सुवर्णं वेद, भवति हास्य सुवर्णं, तस्य वै स्वर एव सुवर्णम्, (साम वि. ब्रा. 1 प्रया. 1 ख) इत्युक्त्या ऋच्यध्यूढं साम गीयते' (छा. उ. 1/6/1) इत्युक्त्या च नानालापस्तोमयुक्तायां स्वरात्मिकायां गीतावेव प्रसिद्धस्तथाप्ययं सामवेदरूपो ग्रन्थो न गीत्यात्मकः, अपितु तदुपयोगिनीनामृचां संग्रहो मन्त्रमयः। 'या ऋक् तत्साम' (छा. उ. 1 / 3 / 4) इति छान्दोग्य श्रुतिरेतमेवार्थमुपोद्वलयति। न हि सामवेदे मन्त्रसमूहरूपे विद्यते एकमपि गानम्। अपि तु सामगानस्य योनिमन्त्रा एवात्र वर्तन्ते। एतान् मन्त्रानाश्रित्यैव सहस्रशः प्रदर्शितानि गानानि महर्षिभिः तत्र तत्र। तानि च गानानि सर्वाणि ग्रामगेयारण्योहोह्यभेदेन चतुर्विधानीत्यग्रे वक्ष्यते। 'ऋच्यध्यूढं साम गीयते' इति छान्दोग्यवचनमपि सामगानानां योनिभूतर्गाश्रितत्वमेव प्रतिपादयति। अतः सामवेदः सामगानोपयोगियोनिभूतर्क्-तदुत्तरर्क्-संग्रहात्मक एवेति निश्चप्रचम्।

वस्तुतस्तु सामवेदसंहितायां भागद्वयमस्ति-आर्चिकः गानं चेति। आर्चिकोऽपि द्विविधः छन्द आर्चिकः (पूर्वार्चिकः) उत्तरार्चिकश्चेति) द्वयोरपि केवलमृचामेव पाठः। पूर्वार्चिको योनिग्रन्थः, तत्राग्रे गीयमानानां साम्नामाधारभूतानामृचामेव पाठात्। उत्तरग्रन्थरूप उत्तरार्चिके तु क्रतुषु गीयमानानां साम्नामाधारभूता ऋच एव क्रमेण सूक्तात्मना पठिताः। सूक्तं हि नामर्चां समुदायः उत्तरग्रन्थे च योनिभूता या

ऋचस्तदुत्तरं तदाधारेण तया सह गीयमानयोर्द्वयोः ऋचोरपि पाठात् ऋक्समुदायत्वेन सूक्तता संजायते। 'तृचं साम' इति हि प्रसिद्धिः। अस्यायमेवाभिप्रायः यत् एकस्य साम्न एकाऽऽधारभूता ऋक्। तस्यामेव सामोत्पद्यते। अर्थात् तयाऽऽधारभूतया ऋचा सह उत्तरे द्वे ऋचे मिलित्वा एकस्य साम्न आवृत्त्या गानं भवति। तत्र छन्दआर्चिकमध्ये एकैकस्य साम्न उत्पत्त्याधारभूता ऋच एकैकशः एवाम्नायन्ते न तु सूक्तरूपेण। उत्तरार्चिके तु उत्पत्त्याधारभूतया ऋचा सह उत्तरे द्वे ऋचे संमेल्य ऋक्समुदायसूक्तरूपेण ऋच आम्नायन्ते। तत्र यः क्रमः छन्दआर्चिकपठितायाः योनिभूताया ऋचो भवति एव स एव योनिभूतर्क् संयुक्तानामुत्तरार्चिकपठितानामृचां गाने भवति। 'यद्योन्यां तदुत्तरयोर्गायति' इति वचनात्।

सहस्रवर्त्मा सामवेदः' इति पस्पशाह्निके पतञ्जल्युक्त्या 'सामवेदस्य किल सहस्रभेदा आसन्' इति चरणव्यूहोक्त्या च सामवेदस्य सहस्रं शाखा आसन् इति स्फुटं प्रतीयते। किन्तु तासां शाखानामध्येतारोऽनध्यायेष्वधीयाना आसन्। अतस्ते शतक्रतुना वज्रेणाभिहताः प्रणष्टा इति केचिदेव षोडश शाखापाठकाः अवशिष्टाः। तेषां च गणनं चरणव्यूहे 'आसुरायणीया इत्यत आरभ्य जैमिनीयाश्चेत्यन्तेन सन्दर्भेण कृतम्। तत्र अष्टौ सामसहस्राणि सामानि च चतुर्दश। अष्टौ शतानि' इति चरणव्यूहोक्त्या 8814 सामसंख्या कौथुमादिशाखायां वर्तते। आरण्यकसूर्यसूक्तसुपर्णप्रेक्षबालखिल्यानां सम्भूय संख्या नवतिदशत्यात्मिका (900) वर्तते। तदुक्तं चरणव्यूहे- 'नवतिदशतिर्बालखिल्यकम्। सरहस्यं ससुपर्णप्रेक्षं वै बालखिल्यके। सारण्यकानि सौर्याणि ह्येतत्सामगणं स्मृतम्' इति। किन्तु सम्प्रति उपर्युक्तानां षोडशशाखानां मध्ये तिस्रः शाखा एव समुपलभ्यन्ते। ताश्च कौथुमी, जैमिनीया, राणायनीया चेति। तासु कौथुमी गुर्जरप्रदेशे जैमिनीया कर्णाटके राणायनीया च महाराष्ट्रदेशे प्रसिद्धाः।

कौथुमी सामसंहिता पूर्वार्चिकोत्तरार्चिकभेदेन भागद्वये विभक्ता। तत्र पूर्वार्चिके षट्प्रपाठकाः। प्रतिप्रपाठकं च द्वावर्धप्रपाठकौ। प्रतिप्रपाठकं च दशदशतयो भवन्ति सामान्यतः। किन्तु षष्ठे प्रपाठके नवदशतयः। यद्यपि सामान्यतो दशर्चानामेका दशतिर्भवति, तथापि तत्र न्यूनाधिकभावोऽपि समुपलभ्यते। एवं च पूर्वार्चिके षट् प्रपाठकाः, द्वादशार्धप्रपाठकाः, ऊनषष्टिर्दशतयः, 585 मन्त्राश्च सन्ति। तत्र प्रथमे प्रपाठके 96, द्वितीये- 97, तृतीये- 99, चतुर्थे-98, पञ्चमे-96, षष्ठे च 99 इति, समुच्चिता संख्या च 585 जायते।

प्रपाठकादीनां विवरणम्

प्रपाठकः	अर्धप्रपा.	दशति	विवरणम्
1	2	10	प्रथमार्धस्य तृतीयदशत्याम् 14 ऋचः द्वितीयार्धस्य प्रथमायां तृतीयस्यां च दशत्यां 8-8 ऋचः पञ्चमदाशत्यां च 6, शिष्टासु षट्सुदशतिषु प्रतिदशति दशेति कृत्वा 10 × 6 = 60 ऋचः संभूय च 96 ऋचः।
2	2	10	प्रथमार्धस्य द्वितीयदशत्याम् 8, द्वितीयार्धस्य पञ्चमदशत्यां 9, शिष्टास्वष्टसु दशतिषु प्रतिदशति दशेति कृत्वा 10 × 8 = 60, संभूय च 97 ऋचः।
3	2	10	प्रथमार्धस्य तृतीयदशत्यां 9, शिष्टासु नवसु दशतिषु प्रतिदशति दशेति कृत्वा 10 × 9= 90, संभूय च 99 ऋचः।
4	2	10	प्रथमार्धस्य चतुर्दशत्यां 9, द्वितीयार्धस्य द्वितीयदशत्यां 8, तस्यैव चतुर्थदशत्यां च 11, शिष्टासु, सप्तदशतिषु प्रतिदशति दशेति कृत्वा 10 × 7= 70 संभूय च 98 ऋचः।
5	2	10	प्रथमार्धस्य प्रथमदशत्यां 8, प्रथमार्धस्य चतुर्थ दशत्यां च 8, शिष्टास्वष्टसु दशतिषु प्रतिदशति दशेति कृत्वा 10 × 8= 80, संभूय च 96 ऋचः।
6	2	9	प्रथमार्धस्य द्वितीयदशत्यां 14, तस्यैव तृतीयस्यां पञ्चम्यां च दशत्यां क्रमशः- 12, 12, द्वितीयार्धस्य प्रथमदशत्यां 9, तस्यैव द्वितीयदशत्यां 12, तृतीयदशत्यां 12, चतुर्थदशत्यां च 8, शिष्टयोर्द्वयोर्दशत्योः 10-10 इति सम्भूय 99 ऋचः।

6 प्रपाठकाः 12 अर्धप्रपाठकाः 59 दशतयः, 585 ऋचः

सामसंहितायां पूर्वार्चिके ऋग्वेदस्य विभिन्नेषु मण्डलेषु विभिन्नर्षिदृष्टानामेकदेवताकत्वेन सङ्ग्रहः कृतः। तद्देवतानाम्नैव तेषां पर्वणां वा संज्ञानिर्देशो विहितः। एवं च पूर्वार्चिकस्य प्रथमात् प्रपाठकादारभ्य द्वितीयप्रपाठके प्रथमार्धप्रपाठकस्य द्वितीयदशतिपर्यन्ताना-मृचामग्निदेवताकत्वेन तावान् ऋक्समुदायः आग्नेयं पर्व कथ्यते। द्वितीयप्रपाठके प्रथमार्धप्रपाठकस्य तृतीयदशतिमारभ्य पञ्चमप्रपाठकपर्यन्तो भागस्तत्रत्यानामृचामिन्द्रदेवताकत्वेन ऐन्द्रंपर्व इति व्यपदिश्यते। षष्ठः प्रपाठकः पवमानदेवतर्क्समुदायरूपत्वात् पावमानं पर्व समाम्नायते। प्रपाठकस्थाने अध्यायविभागः सायणेन कृतः। एते षट् प्रपाठकाः पञ्चसु अध्यायेषु सायणेन विभक्ताः। अतोऽनन्तरमारण्यकं पर्व। अत्र च पञ्च दशतयः पञ्च पञ्चाशत् मन्त्राश्च। तदनन्तरं च महानाम्नीनामृचां संग्रहः। ताश्च केवलं संख्यायां दश सन्ति।

उत्तरार्चिके तु नव प्रपाठकाः। तत्राद्येषु पञ्चसु प्रपाठकेषु द्वौ द्वावर्धप्रापठकौ। शिष्टेषु तु चतुर्षु प्रपाठकेषु प्रत्येकं त्रयस्त्रयोऽर्धप्रपाठकाः। केचित् उत्तरार्चिकमेकादशप्रपाठकात्मकं स्वीकुर्वते। प्रतिप्रपाठकं चार्धप्रपाठकद्वयमूरीकुर्वन्ति। उभयत्रापि मते द्वाविंशतिरर्धप्रपाठका जायन्ते इति न किमपि वैषम्यं परिणामे। अर्धप्रपाठकानां च खण्डेषु विभागः। किन्तु तेषु खण्डसंख्या न नियता। एवमत्रोत्तरार्चिके सम्भूय मतभेदेन नव एकादश वा प्रपाठकाः द्वाविंशतिरर्धप्रपाठकाः, 119 खण्डाः, 400 सूक्तानि, 1225 मन्त्राश्च।

एषां तालिकाऽधस्तात्प्रदीयते:-

प्रपाठकः	अर्ध प्र.	खण्डसंख्या	सूक्तसंख्या	ऋक्संख्या
1	प्रथम:	6	23	62
	द्वितीय:	6	22	62
2	प्रथम:	6	19	55
	द्वितीय:	6	19	56
3	प्रथम:	7	22	69
	द्वितीय:	7	23	76
4	प्रथम:	6	24	83
	द्वितीय:	7	14	59
5	प्रथम:	9	20	80
	द्वितीय:	12	23	94
6	प्रथम:	3	11	32
	द्वितीय:	6	20	56
	तृतीय:	6	18	54
7	प्रथम:	4	16	46
	द्वितीय:	4	14	38
	तृतीय:	4	21	44
8	प्रथम:	4	14	40
	द्वितीय:	4	19	54
	तृतीय:	5	18	54
9	प्रथम:	4	18	51
	द्वितीय:	2	13	33
	तृतीय:	1	9	27
9 प्रपाठका:	22 अर्धप्र.	119 सू.	400 ऋच:	1225

अत्र च 400 सूक्तेषु एकर्चानि त्रयोदश (13) द्व्यृचानि षट्षष्टि: (66) तृचानि सप्ताशीत्युत्तरं शतद्वयम् (287) चतुर्ऋचानि नव (9) पञ्चर्चानि चत्वारि (4) षड्ऋचानि दश (10) सप्तर्चे सूक्ते द्वे (2) अष्टर्चमेकम् (1) नवर्चानि त्रीणि (3) दशर्चानि त्रीणि (3) द्वादशर्चे द्वे (2) एवमुत्तरार्चिके नवप्रपाठात्मके एकादशप्रकाराणां सूक्तानां समुदिता संख्या चतु:शती। सामवेदस्य द्वितीयोपलभ्यमाना शाखा राणायनीया। राणायनीयानां सामसंहितापि कौथुमसंहितासमानैव। **कौथुमानां राणायनीयानां च सामसंहितायां न कोऽपि मन्त्रभेद:।** उच्चारणे क्वचित् क्वचिद् भेद: समुपलभ्यते। तथाहि- कौथुमीया: सामगानसमये 'हा उ:' 'रा इ' इत्युच्चारयन्ति।

सामवेदे गानभागश्चतुर्विध:— प्रकृति:, आरण्यकम्, ऊहो रहस्यं चेति। अत्र प्रकृतिरेव ग्रामे गेयगानशब्देन, रहस्यं चोह्यशब्देन व्यपदिश्यते। तत्र प्रकृतिभागे एकैकस्यामृचि एकैकं साम समुत्पद्यते। अत्रत्या ऋच: प्रायेण पूर्वार्चिकाम्नाता एव। तास्वेव रथन्तरादीनि सामानि गीयन्ते। अत्र च गाने न त्रैस्वर्यमात्रं न वा चातु:स्वर्यमात्रमपेक्षितम् अपितु निषादर्षभगांधारादिस्वरसप्तकं नियतम्। अर्थात् निषादादिसप्त स्वरा: सामगानस्य निदानभूता:। लोकेऽपि गान्धर्वविद्यापरपर्याया: संगीतविद्याया इमे एव सप्त स्वरा: निदानभूता इति गन्धर्ववेदोऽपि सामवेदोपवेदत्वेन परिगण्यते। एवं निषादादिविजातीयस्वरसमाहारस्यैव सामशब्दवाच्यत्वं रथन्तरादिशब्दवाच्यत्वं च बोध्यम्। एतादृशानि प्रर:शतानि सामानि प्रकृतिग्रन्थे पूर्वार्चिके पठितानि।

आरण्यकग्रन्थेऽपि प्रकृतिवदेव सामानि पठितानि। वस्तुतोऽयमारण्यकभाग: प्रकृतिग्रन्थस्यैवांशभूत: न तत: पृथक्। परं त्वत्र पठितानां साम्नामरण्यमात्रगेयत्वप्रतिपादनात् अस्य ग्रन्थस्यारण्यकत्वव्यवहार: सम्प्रवृत्त:। अर्थात् प्रकृतेरेव पूर्वभागस्य ग्रामगेयत्वेन उत्तरभागस्य चारण्यगेयत्वेन ग्राम्यारण्यभेदेन द्विविधो व्यवहार: प्रवृत्त:।

ऊहग्रन्थे तु 'एकं साम तृचं क्रियते स्तोत्रीयम्' इति विधिमनुसृत्य तत्तत्क्रतुषु तृचे कर्तव्यानां स्तोत्राणां सम्पत्तये तृचात्मके ऋक्समुदाये साम्नां पाठ:। एतत्त्रित्वसम्पादनमपि 'यद्योन्यां तदुत्तरयोर्गायति' इति वचनात् योनिभूतामृचमादायैव कर्तव्यम्। एतदर्थमेवोत्तरार्चिके योनिभूतानामृचां पाठ:। तत्र येन क्रमेण योनिग्रन्थे ऋच: पठितास्तेनैव क्रमेणोहग्रन्थे पठ्यन्ते क्रतुकाले च गीयन्ते। नात्र प्रकृतिग्रन्थवत् एकैकस्यामृचि एकैकं सामोत्पद्यते- अपि तु तृचे उत्पद्यते। तृचगानस्यैव तत्र कर्तव्यताविधानात्। तादृशं तृचगानं तु तत्काले ऊहित्वा कर्तव्यम्। नैष ऊहो मन्दबुद्धिभिरस्माभिर्याथातथ्येन कर्तुं शक्यमिति ऋषय क्रान्तदर्शिनस्तथोहं कृत्वा तं ग्रन्थरूपेण विन्यस्यारक्षन्। सोऽयमूहग्रन्थ:।

अत्र च प्रकृतिग्रन्थदृष्टक्रमापेक्षयाऽन्यादृश एव क्रमो द्वादशान्तर्गतदशरात्रमारभ्यानुष्ठेयेषु क्रतुषु कर्तव्यानां स्तोत्राणां क्रममनुसृत्याश्रीयते। एवञ्चोहग्रन्थो ब्राह्मणक्रममेवोपादत्ते।

रहस्यग्रन्थोऽप्यरण्यगेयसामभिरेव दशरात्रादिक्रतूपयोगिभिस्तृचगीतैः संग्रथितः। अत्रा प्यूहग्रन्थक्रमानुसारमेव क्रम आश्रितः। एवं च प्रकृतिग्रन्थमूलक ऊहग्रन्थः, आरण्यकग्रन्थमूलकश्च रहस्यग्रन्थः।

तत्र प्रकृतिग्रन्थे (1) आग्नेयम् (2) ऐन्द्रम् (3) पावमानम् इति पर्वत्रयं पूर्वं प्रतिपादितम्। ऐन्द्रे पर्वणि बहुसामप्रभृतयः पञ्चावान्तरभेदाः। आरण्यके च (1) अर्कपर्व (2) द्वन्द्वपर्व (3) वाचोव्रतपर्व (4) शुक्रियपर्व (5) महानाम्नी पर्व इति पञ्चपर्वाणि। ऊहे (1) दशरात्रम् (2) संवत्सरम् (3) एकाहः (4) अहीनः (5) सत्रम् (6)प्रायश्चितत्तम् (7) क्षुद्रम् इति सप्त विभागाः। इमे सप्त विभागा एव रहस्येऽपि अनेनैव क्रमेण बोध्याः इति सर्वं प्रतिपादितं ताण्ड्यमहाब्राह्मणोपोद्घाते श्रीचिन्नस्वामिभिः।

उपर्युक्तेन प्रघट्टकेनेदं प्रतीयते 'यत् सामगानं ग्रामगेयारण्यगेयोहोह्यभेदेन चतुर्धा। तत्र ग्रामे गेयं गानं पूर्वार्चिकस्य मन्त्रेषु गीयते अर्थात् प्रकृतिग्रन्थस्य पूर्वभागस्य मन्त्रेषु गीयते। अरण्ये गेयं गानं चारण्यककाण्डस्य अर्थात् प्रकृतिग्रन्थस्योत्तरभागस्य मन्त्रेषु गीयते। ऊहगानमूह्यगानं च उत्तरार्चिकस्य (उत्तराग्रन्थस्य) मन्त्रेषु (तृचे) मुख्यतया गीयेते इति प्रत्येतव्यम्। तत्रापि ग्रामगानमारण्यगानं चोत्तरयोरूहोह्यगानयोः क्रमशः प्रकृती योनी वा मन्येते। अर्थात् ग्रामगेयगानस्वरादीनाश्रित्य ऊह्यगानस्य अरण्ये गेयगानस्वरादीनाश्रित्य च ऊहगानस्य रचना भवति।

ग्रामगेयगानादिभेदभिन्नचतुर्विधगानानां च संख्या प्रतिशाखं भिन्ना। तत्र सर्वाधिकानि गानानि जैमिनीयशाखायां समुपलभ्यन्ते। अधस्तात् कौथुमजैमिनीयशाखानुसारं गानसंख्योल्लिख्यते:-

	कौथुमीयशाखा	जैमिनीयशाखा
ग्रामगेयगानसंख्या	1197	1232
अरण्ये गेयगानसंख्या	294	291
ऊहगानसंख्या	1026	1802
ऊह्यगानसंख्या	205	356
योगः	2722	3681

गानसमये मन्त्राणां स्वरूपपरिवर्तनं जायते। तत्राष्टौ कारणानि विकारः, विश्लेषः, विकर्षणम्, विरामः, अभ्यासः, लोपः, आगमः, स्तोभश्चेति। विद्यमानस्य वर्णस्य स्थाने वर्णान्तरोच्चारणं विकारः। सन्धिविच्छेदो विश्लेषः। ह्रस्वस्थाने दीर्घस्य, दीर्घस्थाने च प्लुतस्योच्चारणं विकर्षणम्। विश्रामो विरामः। द्विस्त्रिरुच्चारणमभ्यासः। वर्णस्यानुच्चारणं लोपः। अधिकवर्णस्योच्चारणमागमः। व्यर्थस्यानन्वितस्य शब्दस्योच्चारणं स्तोभः। "ऋचो यदधिकं किञ्चित् द्विरुक्तं वापि दृश्यते। स्तोभत्वं तस्य मन्यन्ते क्रमशः शास्त्रचिन्तकाः"। स्तोभानुसंहारपरि, 1/16" इत्युक्तेः।

स्तोभश्च वर्ण-पद-वाक्यभेदेन त्रिविधः। तत्र वर्णस्तोभः इकारादिः, पदस्तोभो हाई, हाऊ आदिः। वाक्यस्तोभश्च प्रशस्तिस्तुतिसंख्यानादि—भेदेन नवविधः। उक्तैः कारणैः परिवर्तितो मन्त्रसमुदायो मानम्। इति सर्वं समासतः प्रतिपादितं कात्यायनश्रौतसूत्रस्योपोद्घाते श्रीविद्याधरशर्मभिः।

एतदुभयशाखासम्बन्धीनि ब्राह्मणानि चाष्टावुपलभ्यन्ते ताण्ड्यम्, षड्विंशम्, मन्त्रः, सामविधानम्, दैवतम् आर्षेयम्, संहितोपनिषद् वंशश्चेति। तत्रान्यब्राह्मणापेक्षया ताण्ड्यब्राह्मणस्य महत्त्वात् ताण्ड्यब्राह्मणमेव ताण्ड्यमहाब्राह्मणमिति निर्दिशन्ति। प्रौढब्राह्मणम्, पञ्चविंशब्राह्मणमित्यपरनामनी तस्य। अपरे तु ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, मन्त्रब्राह्मणं चेति त्रयं सम्भूय ताण्ड्यमहाब्राह्मणमुच्यते। तत्र ताण्ड्यब्राह्मणे पञ्चविंशतिः प्रपाठकाः, सप्तचत्वारिंशदुत्तरशतत्रयं (347) खण्डाश्च वर्तन्ते। षड्विंशे पञ्चप्रपाठकाः। पञ्चसु च प्रपाठकेषु क्रमशः 7, 10, 12, 7, 10 खण्डाः, सम्भूय च 46 खण्डाः सन्ति। मन्त्रब्राह्मणे द्वौ प्रपाठकौ प्रतिप्रपाठकं च खण्डद्वयम्। छान्दोग्योपनिषच्च अष्टप्रपाठात्मिकेति सम्भूय ताण्ड्यादिषु त्रिषु ब्राह्मणेषु छान्दोग्योपनिषदि च क्रमशः 25, 5, 2, 8 इति चत्वारिंशत् प्रपाठका भवन्ति। सायणस्तु प्रपाठकस्थाने अध्यायशब्दं प्रयुङ्क्ते। तन्मते षडविंशं ब्राह्मणमध्यायेषु विभक्तम्। तदनुसारं षडविंशब्राह्मणं षडध्यायात्मकम्, यतो हि स तृतीयं प्रपाठकमध्यायद्वये विभजति। अस्य पञ्चमः प्रपाठकोऽद्भुतब्राह्मणसंज्ञयाऽपि व्यपदिश्यते। एतच्च षड्विंशब्राह्मणं ताण्ड्यस्यैवांशभूतम्। अत एव तस्य "ताण्ड्यशेषः" इत्यपरं नाम। भाष्यकारोऽपि "अथास्मिन् ताण्ड्यशेषब्राह्मणे, इत्येव भाष्यमवतारयति। ताण्ड्योक्तानामेव केषाञ्चित् कर्मणां भेदादिकमनुक्तानां चाल्पीयसां कर्मणां स्वरूपं चेत्येषामेवात्र प्रतिपादनात्। अत्र ताण्ड्येऽविहिताः अपूर्वतया विहिताः यागाः पञ्चैव येषां नामान्यधस्तादुल्लिख्यन्ते—श्येनयागः, इषुः, सन्दंशः, वज्रः, वैश्वदेवाख्यं त्रयोदशरात्रं सत्रं च।"

मन्त्रब्राह्मणे प्रपाठकद्वयम् इति पूर्वमुक्तम्। परं केचित् दशाध्यायात्मकं मन्त्रब्राह्मणं संगिरन्ते। तत्राद्ययोर्द्वयोः। अध्याययोः (प्रपाठकयोः) गृह्यकर्मणि विनियुक्तानां मन्त्राणां संग्रहः। अष्टौ अध्यायाश्च (प्रपाठकाश्च) छान्दोग्योपनिषद्रूपाः।

अपरे तु अध्यायद्वयात्मकं मन्त्रब्राह्मणम्। अष्टाध्यायात्मिका छान्दोग्योपनिषच्च स्वतन्त्रेति आचक्षते।

सामविधानब्राह्मणे त्रय: प्रपाठका:। प्रथमे द्वितीये च प्रपाठके च अष्टौ अष्टौ तृतीये च नव खण्डा इति कृत्वा पञ्चविंशति: खण्डा अत्र विद्यन्ते। कृच्छ्रचान्द्रायणादीनां प्रायश्चित्तकर्मणां तदङ्गतयां क्वचिद् विहितानां होमादीनां च तत्र निरूपणम्।

आर्षेयब्राह्मणमपि प्रपाठकत्रयपरिमितम्। प्रथमे प्रपाठके अष्टाविंशति:, द्वितीये पञ्चविंशति:, तृतीये उनत्रिंशदिति संभूय द्व्यशीति: खण्डास्तत्र सन्ति। संहिताग्रन्थोक्तानां सामगानानामृष्यादिकं तत्र वैशिष्ट्येन प्रतिपादितम्। दैवतब्राह्मणं खण्डत्रयात्मकम्। प्रथमे खण्डे षड्विंशति:, द्वितीये एकादश तृतीये च पञ्चविंशति: कण्डिका इति कृत्वा तत्र द्विषष्टि: कण्डिका: सन्ति। अत्र निधनानां देवता:, छन्दांसि, तेषां वर्णसंख्या, तेषां देवता: तन्नामानिर्वचनं चेति प्रतिपाद्यन्ते।

संहितोपनिषद्ब्राह्मणे पञ्चखण्डात्मकं एक: प्रपाठको विद्यते। अत्र सामवेदस्य आरण्यगानग्रामगेयगानयोरुल्लेख:। कतिपयानां प्राचीनानां ब्राह्मणवाक्यानां श्लोकादीनां चात्र संग्रह:। ''विद्या ह वै ब्राह्मणमाजगाम'' इत्यादयोऽध्ययनप्रशसादिपरा: श्लोका: अत्रैवोपलभ्यन्ते। सामवेदस्य प्रतिशाख्यसूत्रस्य सामतन्त्रस्य फुल्लसूत्रादेश्च मूलमत्रैवोपलभ्यते।

वंशब्राह्मणे त्रय: खण्डा:। अत्र सामसम्प्रदायप्रवर्तकानामाचार्याणां परम्पराया: अनुकीर्तनम्। सेयं परम्परा विद्यापरम्परा न जन्मपरम्परा। विद्यया जन्मना च वंशस्य द्वैविध्यात्।

अस्या: शाखाया: उपनिषद् अष्टप्रपाठात्मिका अष्टाध्यायात्मिका वा ताण्ड्यमहाब्राह्मणान्तर्गतस्य मन्त्रब्राह्मणस्यान्तर्गता इति निरूपितं पूर्वमेव।

तृतीया जैमिनीया शाखा पूर्णोपलभ्यते। अस्या: शाखाया: संहिता ब्राह्मणमुपनिषच्चेति त्रयमप्युपलभ्यते। अस्या विशेषत: प्रचार: कर्णाटके वर्तते। कालेण्डमतानुसारमस्या मन्त्रसंख्या 1687 वर्तते। तत्र पूर्वार्चिके आरण्यके च खण्डे समुच्चिता मन्त्रा: 646, उत्तरार्चिके च 1041 मन्त्रा: सन्ति।

अस्या: शाखाया ब्राह्मणं जैमिनीयं महाब्राह्मणम्। एतत् जैमिनीयब्राह्मणम्, जैमिनीयार्षेयब्राह्मणम्, जैमिनीयोपनिषद् ब्राह्मणञ्चेति त्रिधा विभक्तम्। तत्र जैमिनीयब्राह्मणे त्रयोऽध्याया:, जैमिनीयार्षेयब्राह्मणे एकोऽध्याय:, जैमिनीयोपनिषद् ब्राह्मणे च चत्वारोऽध्याया इति कृत्वा अष्टौ अध्याया वर्तन्ते तत्र। जैमिनीयब्राह्मणे अग्निहोत्र (महाब्राह्मण) द्वादशाहमहाव्रतैकाहाहीनसत्राणांनिरूपणम्। तत्रापि अग्निहोत्रब्राह्मणे 360 खण्डा:, एकाहे 153 खण्डा:, अहीने 99 खण्डा: सत्रे च 37 खण्डा इति समुच्चित्य 1189 खण्डा: सन्ति इति। एष विभाग: बड़ोदाप्रकाशितस्य सूचीपत्रस्य प्रथमे भागे 105 पृष्ठे प्रत्त:। केचित्तु जैमिनीयब्राह्मणं त्रिधा विभज्य प्रथमे भागे 360 खण्डा:, द्वितीये 437, तृतीये च 385 इति समुच्चित्य 1182 खण्डा जैमिनीयब्राह्मणे सन्तीतिमन्यन्ते। उभयोरपि विभागयोर्न खण्डसंख्यायां भूयान् भेदस्तथापि प्रथमो विभाग एव साधीयान् प्रतीयते तस्य वर्णनीययज्ञादिविषयानुसारित्वात्।

जैमिनीयार्षेयब्राह्मणे 84 खण्डा: सन्ति। इदं तलवकारशाखीया: ऋष्यनुक्रमणीरूपम्। जैमिनीया शाखैव तलवकारशाखानाम्नाऽपि व्यपदिश्यते। अत एव जैमिनीयमहाब्राह्मणस्य तलवकारब्राह्मणमित्यपरं नामधेयम्। अत एव च अस्या: शाखाया उपनिषत् (केनोपनिषत्) तलवकारब्राह्मणान्तर्गतत्वात् तलवकारोपनिषन्नाम्ना प्रसिद्धा वर्तते। आर्षेयब्राह्मणे आग्नेयादिसामपर्वणां ग्रामगेयगानारण्यगानर्षीनां निरूपणम्। एतज्जैमिनीयार्षेयब्राह्मणं कौथुमशाखीयार्षेयब्राह्मणाद्, विभिन्नम्, अनयो: पाठे पर्याप्तवैषम्यस्योपलम्भात्। कौथुमशाखीयार्षेयब्राह्मणे एकैकस्य मन्त्रस्य द्वे ऋषी ततोऽप्यधिका वा ऋषयो वर्तन्ते, परमत्र जैमिनीयार्षेयब्राह्मणे प्राय: एक एव ऋषि: पठित:।

जैमिनीयोपनिषद्ब्राह्मणे चत्वारोऽध्याया: 154 खण्डाश्च सन्ति। इदं ब्राह्मणमारण्यकं श्रीभगवद्दत्तो मनुते। श्रीविश्वबन्धुमहोदयास्तु ब्राह्मणमेवैतदिति स्वीकुर्वन्ति। एतदारण्यकमस्तु ब्राह्मणं वा परमेतदध्यायचतुष्टयात्मकम्। अस्य चतुर्थोऽध्यायो द्वादशानुवाकात्मक:। तत्र नवानामनुवाकानामेको विभाग:, अनुवाकत्रयस्य चापर:। दशमोऽनुवाक: केनोपनिषन्नाम्ना प्रसिद्ध:। भगवन्त आद्यशंकराचार्यास्तु केनोपनिषद्भाष्यमारभमाणा: केनेषितमित्याद्योपनिषत् परब्रह्मविषया वक्तव्येति नवमाध्यायस्यारम्भ:। प्रागेतस्मात् कर्माण्यशेषत: परिसमापितानि। समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि कर्माङ्गसामविषयाणि च। अनन्तरं गायत्रसामविषयं वंशान्तमुक्तम् इति कथयन्ति। एतेनेदं प्रतिभाति यत् तैर्यत् जैमिनीयोपनिषत्ब्राह्मणस्य संस्करणमुपलब्धं तत्र द्वादशानुवाकात्मकश्चतुर्थोऽध्याय: खण्डद्वये विभक्त आसीत्। नवानामनुवाकानां चतुर्थाध्यायसंज्ञाऽऽसीत्। अन्त्यञ्चानुवाकत्रयं पञ्चमाध्यायनाम्ना व्यपदिष्टमासीत्। अतस्तद्रीत्या केनोपनिषद: प्रारम्भे ''अथ नवमाध्यायस्यारम्भ:'' इति कथनं साधु सङ्गच्छते। तिरुपतिप्रकाशिते जैमिनीयोपनिषद्ब्राह्मणे नवानुवाकात्मक एव चतुर्थोऽध्याय: प्रकाशित:। अत्र एतेनापि इदं स्पष्टं ज्ञायते यत् द्वादशानुवाकात्मकश्चतुर्थोऽध्याय: चतुर्थाऽध्यायपञ्चमाध्याययोर्विभक्त आसीत्। जैमिनीयोपनिषद् ब्राह्मणस्य चतुर्ष्वध्यायेषु अष्टाविंशति: खण्डा वर्तन्ते। प्रथमात् आसप्तदशखण्डं नवानुवाका: तत: 18, 19, 20, 21 इति खण्डचतुष्टयात्मको दशमोऽनुवाक: 22, 23, 24 खण्डात्मक एकादशोऽनुवाक: 25, 26, 27, 28 खण्डात्मको द्वादशोऽनुवाकश्च।

अथर्ववेद:

ननु-

तस्माद् यज्ञात् सर्वहुत: ऋच: सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादअजायत ॥

(ऋ. 10 / 90) इति, त्रयो वेदा अजायन्त, ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायो:, सामवेद: आदित्यात् (ऐ. ब्रा. 5 / 32)

इति 'वेदैरशून्यस्त्रिभिरेति सूर्यः' (तै. ब्रा. 3 /- 12 / 9 / 11) इति, 'यमृषयस्त्रयीविदो विदुः' ऋचः सामानि यजूंषि (तै. ब्रा. 1 / 2 / 1 / 26) इति 'सैषा त्रय्येव विद्या तपति' (शत. ब्रा. 1/5/2/2) इत्यादिश्रुतिभिः—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञासिद्ध्यर्थमृग्यजुः सामलक्षणम् ॥

(मनु. 1 / 23)

इत्यादिस्मृतिभिश्च ऋग्यजुःसाम्नामेव वेदत्वं नाथर्वण इति प्रतिभाति। अथोच्येत 'ऋचां त्वः पोषमास्ते पुपुण्वान् गायत्रं त्वो शायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः (ऋ. 10 / 71 / 11) इति श्रुतौ यज्ञनिष्पत्त्यर्थं प्रतिपादितेषु होत्रादि-ऋत्विजां हौत्रादिकर्मसु ऋग्वेदेन हौत्रमेव प्रतिपाद्यते, यजुषाऽऽध्वर्यवम्, साम्ना औद्मात्रमिति वेदत्रय्याः प्रतिनियतप्रयोगप्रतिपादनपरत्वात् अवशिष्टब्रह्मकर्तव्यताप्रतिपादनपरस्य चतुर्थस्याथर्ववेदस्यास्त्यावश्यकतेति। तन्न। 'यद् ऋचैव हौत्रं क्रियते, यजुषाऽऽध्वर्यवम्, साम्ना औद्गात्रमिति आरब्धव्या त्रयी विद्या भवति। अथ केन ब्रह्मत्वं क्रियते इति त्रय्या विद्येति ब्रूयात्' (ऐ. ब्रा. 5 / 33) इत्यैतरेयः ब्राह्मणश्रुत्या क्रत्वपेक्षितस्य ब्रह्मकर्तव्यस्यापि त्रय्या विद्ययैव सिद्धिप्रतिपादनात्। अतो नास्ति चतुर्थोऽथर्ववेदः न च तस्य काऽपि आवश्यकता इति चेत्, न।

'ऋग्वेदं भगवोध्येमि यजुर्वेदं सामवेदमाथर्वणं चेति' (छा. उ. 7 / 1 / 2) 'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वणः' (मु. 1 / 1 / 5) 'ऋग्यजुःसामाथर्वाणश्चत्वारो वेदाः' (वृ. उ. 1 / 1 / 2) 'अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' (बृ. उ. 4 / 4 / 10) 'ऋग्यजुसामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादाः' (नृ. ता. उ. 1 / 1 / 2) इत्यादिश्रुतिवचनैरथर्वणोऽपि वेदत्वस्य स्पष्टं सिद्धेः। अस्ति चाथर्ववेदस्य यज्ञनिष्पत्त्यर्थमावश्यकताऽपि। तथा हि यज्ञस्य द्वौ पक्षौ वाक् च मनश्च। तयोरन्यतरो वाक्पक्षस्त्रय्या विद्यया होत्रादिभिस्त्रिभिः ऋत्विग्भिः संस्क्रियते द्वितीयश्च मनःपक्षो ब्रह्मणाऽथर्वाङ्गिरोभिः संस्क्रियते। अत एवोक्तं गोपथे- 'प्रजापतिर्यज्ञमतनुत। स ऋचैव हौत्रमकरोत्, यजुषाऽऽध्वर्यवं, साम्नाऔद्गात्रम्, अथर्वाङ्गिरोभिर्ब्रह्मत्वम्' इति प्रक्रम्य 'स वा यत्र त्रिभिर्वेदैर्यज्ञस्यान्यतरः पक्षः संस्क्रियते। मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति' (पूर्वभाग 2/24) इति। ऐतरेयब्राह्मणोऽपि 'अयं वै यज्ञो योऽयं पवते। तस्य वाक् च मनश्च वर्तन्यौ। वाचा च हि मनसा च यज्ञोऽवर्तत। इयं वै वाक्। अदो मनः। तद् वाचा त्रय्या विद्ययैकं पक्षं संस्कुर्वन्ति। मनसैव ब्रह्मा (अपरं पक्षं) संस्करोति।' (ऐ. ब्रा. 5 / 33) इति श्रुत्या एकस्यैव पक्षस्य त्रयीसंस्कार्यत्वमुक्तम्, अपरस्य तु ब्रह्मसंस्कार्यत्वमेव प्रतिपादितम्। ब्रह्माचाथर्वाङ्गिरोविदेव भवति। अत एव गोपथे 'ऋग्विदमेव होतारं वृणीष्व यजुर्वेदमध्वर्युम्, सामविदमुद्गातारम्, अथर्वाङ्गिरोविदं ब्रह्माणम्। तथा हास्य यज्ञश्चतुष्पात् प्रतितिष्ठति' (गोपथ पूर्वभाग 2 / 24) इति श्रुतौ ब्रह्मणोऽथर्वाङ्गिरोवित्त्वमुक्तम्। उपपद्यते चैतदेव। तथाहि- आग्नेयसौम्यभेदेन वेदो द्विविधः। तत्र ऋग्यजुःसामानि आग्नेयवेदः, अथर्वाङ्गिरसां वेदश्च सौम्यवेदः। यज्ञस्य च वाङ्मनसरूपपक्षद्वये वाचः संस्कार ऋगादिवेदत्रय्या। 'तस्य वा एतस्याग्नेर्वागेवोपनिषत्' (शत. ब्रा. 10 / 3 / 5 / 1) इति शतपथश्रुत्या। 'अग्निर्वाग् भूत्वा मुखं प्राविशत्' (ऐ. उ. 2 / 4) इत्यैतरेयोपनिषच्छ्रुत्या च वाचः अग्निरूपत्वेन साजात्यात् अग्निरूपायाः वाचः संस्कारः आग्नेय्या वेदत्रय्या जायते। यतो हि एक एवाग्निर्घनतरलविरलभेदैः त्रिधा विभक्तः सन् अग्निवाय्वादित्यशब्दैर्व्यपदिश्यते। एवमग्नेस्त्रैविध्यात् त्रिविधेनाग्निना उत्पादितस्य आग्नेयवेदस्यापि त्रैविध्यं स्वतः सिद्धम्। अत एव मनुना-

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥

(मनु. 1 / 23)

इत्युक्तम्। शतपथेऽपि 'सा वा एषा वाक् त्रेधा विहिता ऋचो यजूंषि सामानि, तेनाग्निस्त्रेधा विहितः ऋचो यजूंषि सामानि तेनाग्निस्त्रिधा विहितः' (शत. 10 / 3 / 5 / 2) एभिस्त्रिभिरपि वेदैरग्निरूपाया वाच एव संस्कारः संभवति नान्यस्य सौम्यस्य मनसः। मनसस्तु अथर्वाङ्गिरोभिरेव संस्कारः संभवति। तथा हि- 'चन्द्रमा मनो भूत्वा हृदयं प्राविशत्' (ऐ.उ. 2 / 4) 'चन्द्रमा वै मनः' इत्यादिश्रुतिभिर्मनसः सौम्यत्वम्। अथर्ववेदस्यापि 'अन्तरा हि भृग्वङ्गिरसो वेदानुदुह्य भृग्वङ्गिरसः सोमपानं मन्यन्ते। सोमात्मको ह्ययं वेदः' (गोपथ ब्रा. पूर्व 2 / 9) ऋचामग्निर्दैवतं पृथ्वी स्थानम्। यजुषां वायुर्दैवतमन्तरिक्षं स्थानम्। साम्नामादित्यो दैवतं द्यौः स्थानम्। अथर्वणां चन्द्रमा दैवतमाप स्थानम्' (गो. ब्रा. 1 / 29) इति गोपथश्रुत्या अस्ति सौम्यत्वम्। अतः सौम्यस्य मनसः संस्कारः साजात्यात् सौम्यवेदेनाथर्वणैव संभवति। अत एव मनः संस्कारकस्य ब्रह्मणोऽथर्वाङ्गिरोवित्त्वं प्रतिपादितम् 'अथर्वाङ्गिरोविदमेवब्रह्माणम्' (गो. ब्रा. 2 / 24) इति गोपथश्रुत्या। न हि- अथर्वाङ्गिरसां ज्ञानमन्तरा मनसः संस्कार उपपद्यते।

उपर्युक्तानि त्रय्या एव वेदत्वबोधकानि श्रुतिवचनानि तु आग्नेयवेदपराणीति न कोऽपि विरोधः। सूर्यस्याग्नित्वेन आग्नेयस्य च वेदस्य त्रिविधत्वेन सैषा त्रय्येव विद्या तपति 'वेदैरशून्यस्त्रिभिरेति सूर्यः' (ते. ब्रा. 3 / 12 / 9 / 11) 'ऋग्भिः पूर्वाह्ने' (तै. ब्रा. 3 / 12 / 9 / 1) इत्यादिश्रुतीनामपि स्वरसतः समन्वयः संगच्छते। अतएव त्रय्या विद्यया त्रिविष्टपादिप्राप्ति अथर्वाङ्गिरोरूपब्रह्मवेदेन च ब्रह्मलोकप्राप्तिमुपदिशन्ती श्रुतिः स्पष्टमेव त्रयी विद्याभिन्नमथर्वाङ्गिरसां वेदं समाचष्टे:-

'त्रिविष्टपं त्रिदिवं नाकमुत्तमं तमेतया त्रय्या विद्ययैति ।
अत उत्तरे ब्रह्मलोका महान्तोऽथर्वणामङ्गिरसां च सा गतिः ॥'

(गो. पू. 5 / 25)

अयं च वेदः अथर्ववेदः, ब्रह्मवेदः, अङ्गिरो वेदः अथर्वाङ्गिरसां वेदः भृग्वङ्गिरोवेदः सौभेषजं वेदः इत्यादिसंज्ञाभिर्व्यपदिश्यते तत्र तत्र। 'तेभ्यः श्रान्तेभ्यस्तप्तेभ्यः सन्तप्तेभ्यो यान् मन्त्रानपश्यन्स आथर्वणो वेदोऽभवत्' (गो. ब्रा. 1 / 1 / 5) इति 'भूयिष्ठं ब्रह्म यद् भृग्वङ्गिरसः येऽङ्गिरसः स रसः। येऽथर्वाणस्तद् भेषजम्' (गो. ब्रा 1 / 34) इति 'चन्द्रेण देवेन दिशां लोकेन लोकानां, ब्रह्मवेदेन वेदानां, तेन त्वा शमयाम्यसौ स्वाहा' (शा. गृ. सू. 1 / 16 / 3) इति, 'ऋग्वेद एव भर्गो यजुर्वेद एव महः सामवेद एव यशो ब्रह्मवेद एव सर्वम्' (गो. ब्रा. पूर्व 5 / 15) इति, तद् यथा- 'चत्वारो वा इमे वेदाः ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद इति' (गो. ब्रा. 1 / 2 / 16) इति, एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः' (शत. ब्रा. 14 / 4 / 10) इति, 'यस्माद् ऋचोऽपातक्षन् यजु र्यस्मादपाकषन्। सामानि यस्य लोमानि अथर्वाङ्गिरसो मुखम्। स्कम्भं तं ब्रूहि कतमः स्विदेव सः।' (अथर्व. 1) / 7 / 20) इति, 'तस्य यजुरेव शिरः, ऋग्दक्षिणः पक्षः, सामोत्तरः पक्षः, आदेश आत्मा, अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा' (तै. उ. ब्रा. 3 अनु.) इति च।

उपर्युक्ताभिर्ब्रह्मवेदादिसंज्ञाभिरथर्ववेदो व्यपदिश्यते इत्यस्योपपत्तिस्तु निम्नाङ्किता—

तथाहि स्वयम्भूर्वै प्रजापतिः वाक्प्राणोभयात्मकस्य वाय्वाकाशोभयात्मकस्य वा यजुषः वाग्रूपेण जूभागेन अप उत्पाद्य 'तत्सृष्ट्वातदेवानुप्राविशत्' इति श्रुतेः ऋग्यजुःसाममय्या त्रय्या विद्यया सहासु अप्सु प्रविष्टो भवति। तदुक्तं शतपथे षष्ठे काण्डे सोऽयं पुरुषः प्रजापतिरकामयत-भूयान्त्स्यां प्रजायेयेति। सोऽश्राम्यत्, स तपोऽतप्यत, स श्रान्तस्तेपानो ब्रह्मैव प्रथममसृज्यत त्रयीमेव विद्याम्। सैवास्या प्रतिष्ठाऽभवत्। तस्मादाहुः-ब्रह्माऽस्य सर्वस्य प्रतिष्ठेति। तस्मादनूच्य प्रतितिष्ठति। प्रतिष्ठा हैषा यद् ब्रह्म। तस्यां प्रतिष्ठायां प्रतितिष्ठतोऽतप्यत। सोऽपोऽसृजत वाच एव लोकात्। वागेवास्य साऽसृजत। सेदं सर्वमाप्नोत् यदिदं किञ्च। यदाप्नोत् तस्मादापः, यदवृणोत् तस्माद्वाः। सोऽकामयतआभ्योऽद्भ्योऽधिप्रजायेयेति। सोऽनया त्रय्या विद्यया सहापः प्राविशत्'' (शत. 6 / 1 / 1 / 8-10) एता एवापः परमे स्थाने (सूर्यादप्युपरितने स्थाने) तिष्ठन्तीति व्युत्पत्त्या पारमेष्ठ्य उच्यन्ते। तदुक्तं शतपथे एकादशे काण्डे- 'आपो वा इदं सर्वम्, ता यत् परमे स्थाने तिष्ठन्ति, योहीहाभिखनेदप एवाभिविन्देत्। परमाद्वा एतत्स्थानाद् वर्षति यद्दिवस्तस्मात् परमेष्ठी नाम' (शत. 11 / 1 / 6 / 16)।

अत एव कौषीतकिब्राह्मणेऽप्युक्तम्—'अस्ति वै चतुर्थो देवलोक आपः। ता यत् परमे स्थाने तिष्ठन्ति तस्मात् पारमेष्ठ्य उच्यन्ते' (कौ. 18 / 2) अप्तत्त्वमेवेदमहृदयत्वादशरीरत्वाच्च ऋतमुच्यते। तदुक्तम्—

ऋतमेव परमेष्ठि ऋतं नात्येति किञ्चन ।
ऋते भूमिरियं श्रिता ऋते समुद्र आहितः ।इति॥

(तै. ब्रा. काण्ड)

स एष आपोमयः परमेष्ठी स्नेहतेजोगुणकः। तत्र स्नेहप्रधानं तत्त्वं भृगुः, तेजः प्रधानं तत्त्वं चाङ्गिराः। उभयोः समन्वितावस्था चाऽऽपः। आसु अप्सु प्रविष्टः ऋग्यजुःसाममयः स्वयम्भूर्ब्रह्मा। स च तत्राप्सु प्रविश्य ता अपः समतपत् ताभ्यः सन्तप्ताभ्योऽद्भ्यः तापपरिपाकाद् भृगोरुत्पत्तिरभवत्। तदुक्तं गोपथश्रुतौ अथेतरा पेयाः स्वाद्व्यः शान्ताः (आपः) तत्रैवाश्राम्यत् अभ्यपतत्, समतपत्। ताभ्यः श्रान्ताभ्यस्तप्ताभ्यः सन्तप्ताभ्यो यद्रेत आसीत् तदभृज्ज्यत। यदभृज्ज्यत तस्माद् भृगुः समभवत्ः तद्भृगोर्भृगुत्वम्। (गो. ब्रा. पू. 1 / 3) भृगुरेव च घनतरलविरलावस्थाभेदेन अब्वायुसोमभेदतस्त्रिधा व्यभज्यत। तदुक्तम्—'आपो वायुः सोमः' इत्येते भृगवः (गो. ब्रा. पू. 2 / 8 / 9) ततः पुनः प्रजापतेस्तपोरूपव्यापारेण स भृगुः अङ्गिरो रूपे पर्यणमत्। तदुक्तम्—'तं वरुणं मृत्युं' (वरुणमयं भृगुं) अभ्यश्राम्यत्, अभ्यतपत् समतपत्। तस्य श्रान्तस्य तप्तस्य सन्तप्तस्य सर्वेभ्योऽङ्गेभ्यो रसोऽक्षरत्। सोऽङ्गरसोऽभवत्। तं वा एतमङ्गरसं सन्तं (अङ्गिरा) इत्याचक्षते। (गो. ब्रा. पू. 1 / 7)

स आपोमयः परमेष्ठी प्रजापतिः भृगुं सृष्ट्वा केन्द्र एव प्रतितिष्ठति यत्र त्रयीमयः स्वयम्भूर्ब्रह्मा प्रतिष्ठितः। परमेष्ठिप्रजापतेरापः शरीरम्। तदन्तः प्रविष्ट आप्यप्राणश्च तासामात्मा प्रजापतिः। आपोमयपरमेष्ठिप्रजापतिना सृष्टो भृगुश्च परमेष्ठिप्रजापतेरभिन्नः। यतो हि परमेष्ठी प्रजापतिरापोमयः। भृग्वङ्गिरसोर्भृगुरपि स्नेहप्राधान्यादप्प्रधानः। अत उभयोरम्मयत्वात् अप्प्राधान्याच्च विवेकः कर्तुं न शक्यते इत्येतदेव भृगुसर्जनानन्तरमापोमयपरमेष्ठिनोऽन्तर्धानमुच्यते यद् गोपथे श्रूयते।[1] स च भृगुरन्तर्हितं तं परमेष्ठिप्रजापतिमन्वेष्टुमैच्छत्, परं नाशकत्तथा कर्त्तुमात्मना सह तस्याविवेकात्। अथाशरीरिण्या वाचा 'वात वातेति' तमब्रवीत् अन्वविन्दामहे इति 'अथार्वागेनमेतास्वप्सु अन्विच्छ' इत्येवं प्रेरितो भृगुरेनमापोमयं प्रजापतिप्राणं (परमेष्ठिनम्) अर्वाक् (केन्द्रे) एतासु शरीररूपासु अप्सु एवाविन्दत। अथ अर्वागप्सु सत्त्वादेवायं प्रजाप्रतिः 'अथार्वाक्' इति व्युत्पत्त्या अथर्वा समभवत्। यतो हि अथ अर्वागेव परोक्षभाषया अथर्वा जातः देवानां 'परोक्षप्रिया हि देवाः' इति वचनेन परोक्षप्रियत्वात्। एषः अथर्वा अपां केन्द्रे स्थितः आपोमयः प्रजापतिप्राण एव। अर्थात् ऋग्यजुःसामरूपवेदत्रयी-गर्भितमापोमयं वेदतत्वमेव अथर्वा परमेष्ठी प्रजापतिर्वा।

तस्मात्सिद्धमेतदुपरितनेन प्रघट्टकेन यत् अथर्वा ब्रह्मा, अपां केन्द्रस्थः परमेष्ठी प्रजापतिः, भृगुः अङ्गिराश्च सर्वाण्यपि तत्त्वानि आपोमयानि। अपां वेद एव चाथर्ववेदः। अप्तत्वस्य घनतरलविरलभेदैः 'आपो वायुः सोमः—इति त्रिधा विभक्तत्वात् अयमपां वेदोऽथर्ववेदः सौम्यवेदनाम्नाऽपि व्यपदिश्यते। एवं चास्य वेदस्य अथर्ववेदः, ब्रह्मवेदः, भृग्वङ्गिरसां वेदः, अथर्वाङ्गिरसां वेदः, आथर्वणो वेदः इति सर्वा अपि संज्ञा एकार्थबोधिका एव। भृग्वङ्गिरोऽथर्वब्रह्मादीनां सर्वेषामपि तत्वानां अप्सम्बन्धित्वेनाप्त्वात्।'

ऋग्यजुःसाममयः स्वयम्भूप्रजापतिः अप उत्पाद्य एतास्वप्सु एव 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति तैत्तिरीयकश्रुत्या प्रविष्टो भूत्वा

1. गोपथ पूर्व भाग 1 / 4 प्रघट्टकस्य भावः

प्रथमजब्रह्मरूपेण अर्थात् गायत्रीमात्रिकसौरवेदरूपेण प्रादुर्भवति। तदुक्तं शतपथे षष्ठे काण्डे 'सोऽकामयत, आभ्योद्भ्योऽधिप्रजायेयेति। सोऽनया त्रय्या विद्यया सहाप प्राविशत्। तत अण्डं समवर्तत। तदभ्यमृशत् अस्त्विति, अस्तु भूयोऽस्तु इत्येव तदब्रवीत्। ततो ब्रह्मैव प्रथममसृज्यत त्रय्येव विद्या। तस्मादाहुः-ब्रह्मास्य सर्वस्य प्रथमजम् इति (शत. 6 / 1 / 1 / 10) एतदेवाभिसन्धायोक्तम्-

आपोभृग्वङ्गिरोरूपमापो भृग्विङ्गरोमयम्।
सर्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयम् ।
अन्तरैते त्रयो वेदा भृगूनाङ्गिरसः श्रिताः ॥
(गो. ब्रा. पू. 2 / 39) इति

अर्थात् भृग्वङ्गिरोरूपासु अप्सु ऋग्यजुःसाममयस्य स्वयम्भूप्रजापतेः प्रवेशात् ऋग्यजुःसामरूपत्रयीवेदमयस्य प्रथमजस्य ब्रह्मणः (गायत्रीमात्रिकस्य सौरवेदस्य) प्रादुर्भावो जायते इति। अलमनया प्रासंगिकचर्चया, प्रकृतमनुसराम॥

(नवधाऽऽथर्वणो वेदः) इति महाभाष्योक्त्या 'अथर्ववेदस्य नव भेदा भवन्ति' इति चरणव्यूहोक्त्या च अथर्ववेदस्य नवशाखा आसन् इति स्पष्टं प्रतीयते। प्रपञ्चहृदये चरणव्यूहे सामवेदसायणभाष्यभूमिकायामपि च नवैव शाखाः प्रतिपादिताः। परं तासां नामसु महान् विसंवादः। तथापि साम्प्रतं बहुभिर्विद्वद्भिः पैप्पलाद-तौद-मौद-शौनकीय-जाबाल-जलद-ब्रह्मवद-देवदर्श-चारणवैद्याभिधाभिस्ता व्यपदिश्यन्ते। तासु शाखास्वद्यत्वे पैप्पलादा शौनकीया चेति शाखाद्वयमेवोपलभ्यते अन्यास्तु विलुप्ता एव। तासामस्तित्वं तु पातञ्जलमहाभाष्यचरणव्यूहशाबरभाष्याथर्वपरिशिष्टादिभिः स्फुटमनुमीयते।

पैप्पलादशाखाया पुरा विशेषख्यातिरासीत्। प्रपञ्चहृदयानुसारं पैप्पलादशाखा विंशतिकाण्डात्मिकास्ति। तस्या ब्राह्मणानि चाष्टाध्यायात्मकानि। अस्याः संहिताया एकैव प्रतिः शारदालिप्यां काश्मीरेषूपलब्धा। सा च काश्मीरनरेशेन डॉ. राथमहोदयाय प्रत्ता 1875 खिृष्टाब्दे।

शौनकसंहिताऽपि मुद्रिता वर्तते। अस्याः शाखायाः संहिता विंशतिकाण्डात्मिका। तत्र च 111 अनुवाकाः 736 सूक्तानि, 5987 मन्त्राश्च सन्ति। अथर्ववेदस्य पञ्चदशे अष्टादश (18) पर्यायमन्त्राः षोडशे च नव (9)। किन्वितोऽतिरिक्ता अपि पर्यायमन्त्राः काण्डेषु वर्तन्ते। तानि यथा- अष्टमस्य काण्डस्य दशमे सूक्ते षट्, नवमकाण्डस्य षष्ठे सूक्ते षट् नवमकाण्डस्य सप्तमे सूक्ते एकः, एकादशस्य काण्डस्य, तृतीयसूक्ते त्रयः, द्वादशाध्यायस्य पञ्चमे सूक्ते सप्त, त्रयोदशाध्यायस्य चतुर्थे सूक्ते षट् इति संकलनया ऊनत्रिंशत् पर्यायमन्त्राः दशमकाण्डवर्जम् अष्टमात् काण्डादारभ्य आत्रयोदशं काण्ड पञ्चसु काण्डेषु सन्तीति ज्ञेयम्। एषां पर्यायाणां सूक्तेषु गणना न जायते इति सूक्तसंख्यायां न कोऽपि भेदः। अथर्ववेदस्य काण्डानुवाकादिसंख्यातालिकाऽधस्तात् प्रदीयते स्पष्टप्रतिपत्त्यर्थम्:-

काण्ड संख्या	अनुवाक् संख्या	सूक्त संख्या	ऋक् संख्या
प्रथमे	6	35	153
द्वितीये	6	36	207
तृतीये	6	31	230
चतुर्थे	8	40	324
पञ्चमे	6	31	376
षष्ठे	13	142	454
सप्तमे	10	123	286
अष्टमे	5	10	293
नवमे	5	10	313
दशमे	5	10	350
एकादशे	5	10	313
द्वादशे	5	5	304
त्रयोदशे	4	4	188
चतुर्दशे	2	2	139
पञ्चदशे	2	पर्यायाः- 18	220
षोडशे	2	पर्यायाः- 9	103
सप्तदशे	1	1	30
अष्टादशे	4	4	283
एकोनविंशे	7	72	453
विंशे	9	143	958
योग: 20	111	736	5977

केचिदेषा संहिता अष्टादशकाण्डात्मिका एव अवशिष्टं काण्डद्वयं तु प्रक्षिप्तं परिशिष्ट वेति मन्यन्ते। पञ्चपटलिकायां अष्टादशकाण्डानामेव विवरणदर्शनात्। अन्ये तु वैदिकाः ऊनविंशतिकाण्डात्मकोऽथर्ववेदः। विंशं काण्डं तु खिलवर्जं ऋग्वेदादेवोद्धृतमिति तस्य परिशिष्टत्वमेवेति कथयन्ति।

अतर्ववेदस्य सर्वानुक्रमण्यामूनविंशकाण्डपर्यन्तमेव ऋष्यादेः संकलनदर्शनात्, एकोनविंशकाण्डस्यान्ते 'भृग्वङ्गिरसां ब्रह्मेति भृग्वङ्गिरसां ब्रह्मेति द्विरुक्तेरेतद्ग्रन्थपर्यवसानसूचकत्वात्, विंशस्य काण्डस्य आरम्भ एव ऋषिदैवतच्छन्दांस्याश्वलायनक्रमानुसारेण अनुक्रमिष्यामः' इति वचनाच्च विंशस्य काण्डस्य परिशिष्टत्वमेवेति सातवलेकरमहोदयानामप्यभिमतम्।

अन्ये तु सुधियो विंशतिकाण्डात्मक एवथर्ववेद इति स्वीकुर्वते। 'ब्रह्मणो विंशतिऋषय संबभूवुर्विंशतिः काण्डानि दृष्टानि' इति गोपथे वर्णनात्। केवलर्ग्वेदान्मन्त्राणां संकलनेनैव विंशं काण्डं नाथर्ववेदीयमिति मन्तुं शक्यते। अन्यथा त्वस्य वेदस्य प्रथमेऽष्टमे दशमे काण्डे ऋग्वेदस्य बहूनां मन्त्राणामुपलब्ध्या तेषामप्यथर्ववेदीयत्वं न स्यात्।

अथर्ववेदीयं ब्राह्मणं गोपथम्। इदं पूर्वोत्तरभागयोर्विभक्तम्। पूर्वभागे पञ्च प्रपाठकाः, उत्तरभागे च षट्। आथर्वणचरणव्यूहानुसारमिदं शतप्रपाठकात्मकमासीत्पूर्वमिति प्रतीयते तथा ह्युक्तं चरणव्यूहे- तत्र गोपथः शतप्रपाठकं ब्राह्मणमासीत्। तस्यावशिष्टे द्वे ब्राह्मणे पूर्वमुत्तरं चेति।

अथर्ववेदस्य शौनकशाखेव पिप्लाद शाखाऽपि विशतिकाण्डात्मिका। एषा च अनुवाकेषु सूक्तेषु च विभक्ता। पैप्लादशाखाया आद्यो मन्त्रः 'शन्नो देवी' इति वर्तते। शौनकीयशाखायास्तु ये त्रिषप्ताः इति। शौनकीयाथर्ववेदस्य प्रथमात् काण्डात् सप्तमकाण्डपर्यन्तो भागः पैप्पलादशाखीयाथर्ववेदेऽपि भूयसा समुपलभ्यते। अष्टमात् काण्डात् चतुर्दशकाण्डपर्यन्तो भागस्तु तत्र पैप्पलादीयेऽथर्ववेदेऽपि पूर्णतयोपलभ्यते। पञ्चदशस्य काण्डस्य प्रारम्भिकोंऽशः षोडशसप्तदशकाण्डे चाधिक्येनोभयोः संहितयोः समानानि, पितृमेधाख्यं अष्टादशं काण्डं पैप्पलादीयेऽथर्ववेदे नोपलभ्यते। कुन्तापसूक्तसहितं विंशं काण्डमपि तत्र नोपलभ्यते। शौनकसंहिताया ऊनविंशकाण्डस्य द्वासप्ततिसूक्तेषु द्वादश सूक्तानि विहाय सर्वं काण्डं पैप्पलादशाखायां विप्रकीर्णरूपेण विद्यते। शाखाद्वयस्याध्ययनेनेदं स्पष्टं प्रतिभाति यत् शौनकशाखाया आद्यानि पञ्चकाण्डानि पैप्पलादशाखायां आद्यनवकाण्डात्मकतया परिणतानि। दशमात् चतुर्दशकाण्डपर्यन्तं पञ्चकाण्डानि पैप्पलादशाखायां सर्वथाऽभिनवानि। शौनकशाखाथर्ववेदस्य षष्ठं सप्तमं काण्डं च पैप्पलादाथर्ववेदस्य ऊनविंशे च काण्डे समुपलभ्येते। शौनकशाखाया अष्टमादि-एकादशपर्यन्तकाण्डानां पैप्पलादाथर्ववेदस्य षोडशे काण्डे, द्वादशं काण्डं सप्तदशे काण्डे, त्रोयदशचतुर्दशषोडशसप्तदशानि काण्डानि च अष्टादशे काण्डे उपलभ्यन्ते। उभयोः शाखयोरथर्ववेदे कतिपयैः पाठभेदैः सह पूर्णतया विभिन्नार्थकः पाठो बाहुल्येनोपलभ्यते। उभयोः शाखयोः समानेषु सूक्तेषु मन्त्रेषु च पाठस्य समानता स्वल्पमातायामेव दृश्यते। पैप्लादशाखीयस्याथर्ववेदस्य अष्टमांशो नवमांशो वा मौलिकः। यतो हि एषोंऽशो न शौनकशाखीयेऽथर्ववेदे न वा अन्यत्रोपलभ्यभाने मन्त्रसंग्रहे विद्यते।

वेदानां पारायणम्

''स्वाध्यायोऽध्येतव्यः'' (तै. आ. 2 / 15) इत्यादिविधिवाक्यैः वेदानामध्ययनं पारायणं वाऽऽवश्यकम्। तच्चाध्ययनं न काम्यं कर्म किन्तु नित्यम्। नित्यस्य च कमर्णोऽकरणे प्रत्यवायपातः। अत एव पुरुषार्थनुशासने 'वेदस्याध्ययनं नित्यमनध्ययने पातात्' इति सूत्रेण वेदाध्ययनस्य नित्यत्वं प्रतिपादितम्। तदनध्ययने पातित्यं च अपहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत् तयोऽनुत्सृजत्यभागो वाचि भवत्यभागो नाके. (तै. आ. 2 / 15) इति श्रुत्याम्नातम्। एतमेवार्थमृगप्यभिवदति-

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागोऽस्ति ।
यदीं शृणोत्यलीकं शृणोति न हि वेदं सुकृतस्य पन्थाम् ॥

(ऋ. 10 / 71 / 6)

अस्या अयमर्थः- सचिविद्-वेदः यतो हि सोऽध्येतारं पुरुषं तदीयप्रयासाभिज्ञानेन सखिवत् पालयतीति। पालनं चात्र बहुद्रव्यप्रयाससाध्यक्रतु-फलस्याध्ययनमात्रेण सम्पादनम्। ईदृशं सचिविदं वेदरूपं सखायं यः पुमान् अध्ययनमकृत्वा त्यजति तस्य वाच्यपि भाग्यं नास्ति, फले भाग्यं नास्तीति किमु वक्तव्यम्। सकलदेवतानां धर्मस्य परब्रह्मतत्त्वस्य च प्रतिपादकं वेदमनुच्चार्य परनिन्दानृतकलहादिहेतुं लौकिकीं 'वार्तां सर्वत्रोच्चारयतः स्पष्ट एव वाचि भाग्याभावः।' अतः एवाम्नायते- 'नानुध्यायाद् बहून् शब्दान् वाचो विग्लापनं हि तत्।' (सत. ब्रा. 4 / 7 / 2 / 23)। यद्यप्यसौ काव्यनाटकं शृणोति तथापि निरर्थकमेव तच्छ्रवणं तेन सुकृतमर्मज्ञानाभावात्। अत एवोक्तम्-यदि 'शृणोत्यलीकं शृणोति न हि प्रवेद सुकृतस्य पन्थाम्' इति। एवं च वेदानामनध्ययने प्रत्यवायपातात् वेदाध्ययनस्य नित्यकर्मत्वेन तदनुष्ठानस्यावश्यकर्तव्यत्वाद् वेदानामध्ययनं पारायणं वाऽऽवश्यकमत एव नित्यं कर्म। किञ्च 'यद् ऋचोऽधीते पय आहुतिभिरेव तद्देवतास्तर्पयति, यद् यजूंषि घृताहुतिभिः, यत्सामानि मध्वाहुतिभिर्यदथर्वाजिरसः सोमाहुतिभिः, यद् ब्राह्मणानि, कल्पान् गाथा:नाराशंसीरितिहासपुराणानीत्यमृताहुतिभिः, यद् ऋचोऽधीते पयसः कूल्या अस्य पितॄन् स्वधा उपक्षरन्ति' (आश्वा. गृ. सू. 3।3) इति ब्रह्मयज्ञ- खण्डे आश्वलायनगृह्यसूत्रोक्त्या, 'यद् ऋचोऽधीते पयसः कूल्या अस्य पितॄन् स्वधा अभिवहन्ति, यद् यजूंषि घृतस्य कूल्या, यत्सामानि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः कूल्या' (तै. आ. 20 / 10) इक्युक्त्या 'यस्तान् ऋग्विद् ऋचैवाधीते स नाकपृष्ठं भजते ह वा शाश्वत्' (च. व्यू. भा. पृ. 26) इतिवचनेन, 'ततो वेदमारभ्य सन्ततमधीयीत, इति बौधायनवचनेन च वेदानां नित्याभ्यासरूपो ब्रह्मयज्ञः, पारायणं च कर्तव्यं द्विजातिभिः- इत्यवश्यकर्तव्यता सिध्यति वेदपारायणस्य।'

अत एव चरणव्यूहभाष्ये तस्माद् ब्रह्मयज्ञार्थे पारायणार्थे च ऋग्वेदस्याध्ययनं कर्तव्यम् (च. व्यू. भा. पृ. 6) इत्युक्तम्। तच्च पारायणं क्रमपाः क्रमपदः (क्रमरथः) क्रमजटः क्रमदण्डश्चेति चतुष्पारायणम् (च. व्यू. पृ. 6) इत्युक्त्या चतुर्विधम्। तत्रापि आद्ये द्वे प्रकृतिपारायणे, अन्त्ये च द्वे विकृतिरूपे पारायणे। अस्य व्याख्यां विदधन्महिदासः स्पष्टमाह- (अध्ययने संहितापारायणम् 1. पदपारायणम् 2. जटापारायणम् 3. क्रमदण्डपारायणञ्चेति, एतत् पारायणचतुष्टयमित्यर्थः इति (च. व्यू. भा. पृ. 13) तथापि चतुर्णां वेदानां पारायणं प्रकारान्तरेण द्वैविध्यं भजते-उपेन्द्रपारायणं विश्वरूपपारायणञ्च। उपेन्द्रस्य वामनत्वेन केवलमृगादीनां चतसृणां संहितानां पारायणं स्वल्पत्वात् (वामनत्त्वात्) उपेन्द्रपारायणमिति संज्ञयेह व्यपदिश्यते। ब्राह्मणादिसहितानां संहितानां पारायणं तु बृहत्त्वात् विश्वरूपपारायणभिति समाम्नायते विश्वरूपस्य बृहत्त्वात्। तत्रेदानीमल्पायुर्भिर्व्यस्तजीवनैरल्पमतिभिः प्राणिभि-विश्वरूपपारायणं कर्तुं न सुशकमिति हृदि निध्यायास्माभिरुपेन्द्रपारायणार्थं चतसृणां संहितानां एकादशशाखानामेव प्रकाशनमत्र ग्रन्थे विहितम्। येन तदेव पारायणं कृत्वा पुरुषाः पारायणफलमाप्नुयुः वेदानां च प्रचारोऽपि सुस्थिरः स्यात्।

यथा पुरा ब्रह्मयज्ञरूपस्य स्वाध्यायस्योपादेयतासीत्तथेदानीमप्यस्ति तस्यावश्यकता ब्रह्मलोकप्राप्त्यर्थं प्रत्यवायपरिहारद्वारा पतित्यनिवारणार्थञ्च। अपि चेदानीन्तने काले वेदप्रचारस्य विलुप्तप्रायत्वात्तदुद्धारार्थं वेदपारायणस्य विशेषतः आवश्यकता।

वेदप्रचारः

सनकसनन्दसनत्कुमाराद्युपक्रमस्योदासीनसम्प्रदायस्य तु उपक्रमत एव लोके वेदानामुपदेशस्तत्प्रचार एव च परममुद्देश्यम्। अस्य सम्प्रदायस्याद्याचार्येण भगवता सनत्कुमारेण वेदैकप्रतिपाद्यस्य ब्रह्मण उपदेशः शोकस्य पारमप्राप्ताय नारदाय प्रति इति छान्दोग्योपनिषदि भूमविद्यायां स्पष्टं प्रतिपादितमेव। तदनन्तरमपि अस्मिन् सम्प्रदाये समये समये प्रादुर्भूतास्तादृशा मुनयो यैर्वेदानां प्रचाराय विहितो भूयान् प्रयासोऽनेकविधः। तेषु बाभ्रव्यदाल्भ्य पद्मश्रुतिसिद्धमुनयो विशेषतो गणनामर्हन्ति। बाभ्रव्यो हि महामुनिः सर्वतः प्रथमं वेदानां क्रमसंहितां लोके प्रचारयामास। यथोक्तम्- 'इति बाभ्रव्य उवाच च क्रमम्।' (ऋ: प्रा. 11)। महाभारतेऽपि। पाञ्चालेन क्रमः प्राप्तस्तस्माद् भूतात् सनातनाद्। बाभ्रव्यगोत्रः स बभौ प्रथमं वेदपारगः। (म.भा.शा.अध्या. 342 / 100) एतत्पद्यमुपर्युक्तमेवार्थं परिपोषयति।

दाल्भ्यो हि मुनिः 'मधुबभ्रुवोर्ब्राह्मणकौशिकयोः, इति सूत्रेण निरूपितस्य कुशिकगोत्रीयस्य बाभ्रव्यस्य शिष्य आसीत्। अनेन हि मुनिना अन्नाविष्कारिण्या विद्याया आविष्कारः मुख्यप्राणरूपसामगानाद्विहितः' इति स्पष्टमुपलभ्यते छान्दोग्योपनिषदि प्रथमप्रपाठके द्वादशखण्डे। तद् यथा-

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज ॥1॥

तस्मै श्वा श्वेतः प्रादुर्बभूव, तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायतु अशनायाम वा इति ॥2॥

तान् होवाच हैव मा प्रातरुपसमायातेति। तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयाञ्चकार ॥3॥

ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः संरब्धाः सर्पन्तीत्येवमाससृपुः ते ह समुपविश्य हिञ्चक्रु ॥4॥

ओ 3 मदा 3 मों 3 पिबा 3 मों 3 देवी वरुणः प्रजापतिः सविता उन्नमिहाहरदन्नपतेरऽन्नमिहाहराऽऽहरोउमिति ॥5॥

पद्ममुनिना चार्वाकद्वारा प्रचारितस्य वेदविरोधिनो लौकायतिकधर्मस्य लोकरुचिरत्वेन तत्र प्रवृत्तायाः वेद- पथाद् भ्रष्टाया अत एव निरन्तरमवनतिपथं प्राप्ताया जनताया उद्धाराय लोके वेदाध्ययनं प्रचारितम्। तदर्थमेव च वैदिकव्याकरणस्यापि निर्माणाय पाणिनिर्महामुनिः प्रेरितः।

(स्व.) सुरजनदास स्वामी
संस्कृत-विभागाध्यक्षचरः
जयनारायण-व्यास-विश्वविद्यालयः,
जोधपुरम्

विषय-प्रवेश

वेद भारतीय संस्कृति का तो प्रथम ग्रन्थ है ही, मानव जाति के इतिहास का भी यह प्रथम लिखित दस्तावेज है। संयुक्त राष्ट्र संघ ने इसे विश्व धरोहर (विरासत) में से एक माना है। ईसा से लगभग 150 वर्ष पूर्व ऋग्वेद की 9 शाखाएं, यजुर्वेद की 101, सामवेद की 1000 तथा अथर्ववेद की 30 शाखाएं उपलब्ध थीं। उनमें से आज जो उपलब्ध हैं, उनको श्रद्धेय पिताजी कर्पूरचन्द्र कुलिश ने देश भर से एकत्र करवाकर संग्रह रूप दिया। चारों वेदों की ऐसी ग्यारह शाखाओं को इस ग्रन्थ में शामिल किया गया है। उच्चारण की प्रामाणिकता को सुरक्षित रखने की दृष्टि से पाठ को स्वराङ्कित रूप में ही मुद्रित किया गया है। यह विश्व का सबसे बड़ा आश्चर्य है कि हजारों वर्षों बाद भी पाठ में कोई मात्रा-अनुस्वार की गलती नहीं हो पाई। ऐसा कहीं अन्यत्र देखने को नहीं मिलता।

इस शब्दवेद ग्रन्थ में चारों वेदों का पाठ संग्रहित है। इसे अक्षरशः याद करने में हजारों लोगों ने पीढ़ी दर पीढ़ी अपना जीवन लगा दिया। एक ही मंत्र को भिन्न-भिन्न क्रम में बोलकर विकृति पाठ द्वारा भी। आज भी हमारे देश में प्रकृति, जीवन, धर्म जैसे मूल विषयों को समझने के लिए वेद ही एक सहारा है। अकेले उषा की स्तुति में सैंकड़ों सूक्त हैं, नायिका रूप में। वेदों में जीवन के प्रति समग्र दृष्टि उपलब्ध है। पर्यावरण के प्रति पूर्ण सचेत, नाचती-गाती प्रकृति का विवरण है। ऋग्वेद में विश्वामित्र का नदी से संवाद इसका ही प्रमाण है। ऐसे में व्यक्ति अत्याचार कैसे कर सकता है, प्रकृति पर?

वेदों में शब्द ब्रह्म का रहस्य छिपा है। शब्द वेद भी तत्त्व वेद की शब्दमयी प्रतिमा है। अतः हमेशा से पूज्य रही है। वेद के विषय में कहा जाता है कि इसके एक लाख मंत्रों में से एक भी सही तरह समझ में आ जाए तथा उसका सम्यक् प्रयोग किया जाये तो इस लोक तथा परलोक की सभी कामनाओं की पूर्ति कर देता है। वेद शब्द ज्ञानसूचक है। शब्द और ध्वनि का चोली-दामन का नाता है। शब्द शरीर है, ध्वनि उसका सूक्ष्म शरीर है तथा स्पंदन ही शब्द की आत्मा है। शब्द सृष्टि के संग्रह के कारण इस ग्रन्थ को शब्द वेद कहना ही उचित समझा गया। इसका अध्ययन करते समय शब्द, अर्थ, प्रत्यय, ध्वनि, स्पंदन आदि का प्रत्यक्ष होगा। व्यक्ति किस धरातल पर मनन करता है, उसका प्रभाव भी परिलक्षित होता रहेगा। वैखरी, मध्यमा अथवा पश्यन्ती के धरातल पर शब्द शक्ति का भी अनुभव हो जाएगा। बीज मंत्रों की महत्ता का ज्ञान हो जाएगा। यह सारी देव शक्ति ही ब्रह्म रूप है।

वेद में प्राणों को देव कहा गया है। सूर्य संस्थान को प्राणों अथवा देवों का लोक कहते हैं। प्राणों को भी यहां देव प्राण कहते हैं। सूर्य को देवराज इन्द्र कहते हैं। इसके आगे पितृ प्राण संस्था है और अन्त में ऋषि प्राण का लोक है। सम्पूर्ण सृष्टि के मूल में ये तीन प्राण रहते हैं, जिनको भारत में तीन ऋणों (ऋषि ऋण, पितृ ऋण, देव ऋण) के नाम से ही जाना जाता है। इन्हीं के आधार पर हमारी तीन संस्थाएं बनती हैं- आधिभौतिक, आधिदैविक तथा आध्यात्मिक तथा कारण, सूक्ष्म तथा स्थूल शरीर। सूक्ष्म शरीर प्राणों का शरीर है। आधिदैविक है। यही कारण है सम्पूर्ण अध्यात्म जगत् का। जगत् सारा कार्य रूप है। वेद सम्पूर्ण जगत् के कार्य कारण भाव को स्पष्ट करने वाला ग्रन्थ भी है और कारण के आलम्बन की व्याख्या भी करता है। यही वेद की वैज्ञानिकता है। यह दृष्टि कभी सम्पूर्ण विश्व में प्रचलित थी। यूनान, मिश्र, मय, रोमन आदि संस्कृतियां इसके उदाहरण रही हैं। आज वैश्वीकरण के दौर में ये सब लुप्त प्रायः हो गई। इनके कार्य कारण भाव समझाने वाले नहीं रहे। हमें गर्व है कि हम इस पुरातन ज्ञान को संग्रहित करके विश्व संस्कृति को समर्पित कर रहे हैं। शब्द वेद का प्रतिपाद्य तत्त्वेद है। अतः शब्द वेद के उपोद्घात के रूप में यहां तत्त्वेद की संक्षेप में चर्चा करना अप्रासंगिक न होगा।

वेद का आधार है प्रजापति अथवा ब्रह्म। पूरा विश्व इसी का विस्तार है-विवर्त है। इस विस्तार की क्रिया ही वेद रूप है। ऋक्, यजु, साम ही विस्तार का स्वरूप बनता है। ऋक् केन्द्र है, साम उसका स्वरूप (मूर्ति) तथा यजु बीच का गतिशील भाग। सृष्टि में जो कुछ दिखाई देता है वह प्रत्येक अपने आप में एक प्रजापित ही है। ऋक्-यजु-साम को सृष्टि में मन-प्राण-वाक् रूप देखा जा सकता है। मन केन्द्र, वाक् मूर्ति रूप साम तथा यजु बीच का प्राण भाग।

प्रजापति के दो भेद होते हैं-निरुक्त तथा अनिरुक्त। जिसका पदार्थ रूप दिग्, देश, काल आदि से ग्रहण किया जा सके वही निरुक्त है। इसके पूर्व की ऋत संस्था को अनिरुक्त कहते हैं। वह निष्कल, निर्धर्मक, अखण्ड पदार्थ है, बिना स्वरूप के। हम जो कुछ देखते हैं सभी में भेद और संख्या होने से निरुक्त हैं। ये सारे अनिरुक्त से ही उत्पन्न हुए हैं। क्योंकि यह निरुक्त रूप सदा परिवर्तनीय है, अतः इनका आधार कोई मूल तत्त्व अवश्य होता है, जिस पर यह परिवर्तन नित्य रूप से जारी रहता है। उस निरुक्त में मन-प्राण-वाक् अभेद रूप रहते हैं। उसी से निरुक्त रूप प्रकट हुआ। मन-प्राण-वाक् ही आगे चलकर पदार्थ का नाभि-मूर्ति-महिमा कहलाता है। तीनों के मिलने से एक ही प्रजापति का रूप सिद्ध होता है, व्यवहार में इनको तीन प्रजापति भी कहा जाता है- नभ्य, व्याकृत, सर्व। नभ्य+मूर्ति=व्याकृत। तीनों को सर्व कहा गया है। व्याकृत प्रजापति में नभ्य प्रजापति के

साथ मूर्ति प्रजापति मिलकर व्याकृत भाव बनाता है। इसी व्याकृत रूप से चारों ओर गौ (किरणें) फैलती हैं। इन्हीं के साथ सूर्य की किरणें भी मिलती हैं। व्याकृत की किरणों के वेद, यज्ञ और रस तीन भेद होते हैं। सूर्य किरणों के मेल से वेद ही मूर्ति का रूप बनता है। इस व्याकृत प्रजापति के चारों ओर एक अदृष्ट मंडल बनता है-वेद, यज्ञ, रस से, जिसे महिमा कहते हैं। व्याकृत प्रजापति के साथ महिमा मिलकर सर्व प्रजापति कहलाता है।

प्रथम प्रजापति को अनन्त और असीम कहा है, क्योंकि जिन मन-प्राण-वाक् के कारण उसका स्वरूप बनता है, उनमें एक भी प्रजापति के शरीर से पृथक् नहीं है। न उनका परिमाण किसी प्रमाण से सिद्ध हो सकता। जगत के अनन्त होने से धातु रूप तीनों को भी अनन्त माना है। पं. मधुसूदन ओझा ने ब्रह्म विज्ञान में लिखा है कि इन तीनों को ही क्रमशः रस, बल और अभ्व कहते हैं। रस आदि रूप है, बल कारण रूप तथा वाक् का प्रथम स्वरूप अभ्व है। ऋक्, यजु, साम भी आगे चलकर तीन-तीन प्रकार के हो जाते हैं- रस, छन्द और वितान।

रस वेद के तीन विभाग-महोक्थ, महाव्रत, अग्नि ही ऋक्-यजु-साम कहलाते हैं। वस्तु के मूर्ति भाग से जो प्राण रूप अंश बाहर निकला वह महोक्थ है। जो भाग बाहर से आकर इस क्षति की पूर्ति करता है वह महाव्रत है। जिस कारण चिनाई के द्वारा वस्तु की स्वरूप बनता है-वह अग्नि है-यजु है। इसका एक रूप चित्य तथा दूसरा चितेनिधेय अग्नि कहलाता है। महोक्थ ऋचाओं का, महाव्रत साम का तथा अग्नि यजु का समुद्र है। वेद सृष्टि क्रिया-प्रक्रिया का विज्ञान रूप है। वेद अन्तरिक्ष में होने वाली क्रियाओं तथा प्रतिक्रियाओं की सैद्धान्तिक प्रक्रिया है। इसी को शब्दों में प्रस्तुत करना शब्द वेद कहा जा सकता है; किन्तु मूलतः वेद मंत्र सूक्तात्मक है। इनकी सृष्टि रचना के अनुरूप करनी पड़ती है। वेद के शब्दों की रचना इतनी वैज्ञानिक है कि हर शब्द का सार, अर्थ, प्रत्यय शब्द में ही निहित है। इन शब्दों का अनुवाद नहीं हो सकता। उच्चारण में भी इतना ही सूक्ष्म ध्वनि का स्वरूप दिखाई देता है। अतः प्रत्येक मन्त्र अपने आप में सिद्ध मंत्र है। इसी शब्द को छन्द रूप में, एकाक्षर बीज रूप में प्रयोग करके भिन्न-भिन्न देवताओं की शक्तियों के अर्जन का माध्यम बनाया है।

चूंकि शब्द ब्रह्म भी उसी सृष्टि सिद्धान्त पर कार्य करता है, अतः सरस्वती के रूप को समझ कर लक्ष्मी (अर्थ वाक्) के स्वरूप को समझा जा सकता है। शब्द वेद आज देश में चारों संहिताओं की उपलब्ध ग्यारह शाखाओं का संग्रह है। इनमें से कई के पाठ करने वाले भी आज दुर्लभ हैं। किन्तु; उनका समावेश भी इस ग्रन्थ में कर लिया गया है। तत्त्व रूप वेदों का शब्द रूप यहां प्रस्तुत है। अतः यह शब्द वेद है।

हर देश का अपना इतिहास होता है, भूगोल होता है, साहित्य होता है। भाषा, लोकभाषाएं तथा वहां की अपनी संस्कृति होती है। अपनी-अपनी विकास की कहानी होती है। देश का परम्परागत ज्ञान मौखिक रूप में कथा, गीत अथवा गाथाओं के रूप में आगे से आगे बढ़ता जाता है। भारत भी इस दृष्टि से कोई अपवाद नहीं है। भारत की एक विशेषता यह भी रही है कि यह ऋषि-मुनियों की तपोभूमि रही है। विश्व के जैन, बौद्ध, सिख जैसे धर्मों की जन्मभूमि रही है। सम्प्रदायों की दृष्टि से यह देश समृद्ध रहा है। जहां पश्चिम के देश विज्ञान आधारित भौतिक जगत् के प्रयोगों से जुड़े, वहीं भारत आध्यात्मिक दृष्टि के प्रयोगों में अग्रणी रहा। यही कारण है कि आज भी, सारी आधुनिक विलासिता के बीच रहकर भी पश्चिम का समाज भारत की ओर ललचाई आंखों से देखता है। हमारे दर्शन के प्रति उनकी ललक बढ़ती ही जा रही है।

प्रकृति एक नियत सिद्धान्त पर काम करती है। हर एक प्राणी, जड-चेतन, स्थिर-गतिमान आदि सभी एक से सिद्धान्त पर कार्य करते हैं। विज्ञान कहता है संसार में दो ही तत्त्व हैं- पदार्थ (मैटर) और ऊर्जा (एनर्जी)। ये कभी नष्ट नहीं होते। एक दूसरे में बदलते रहते हैं। वेद जो भारतीय वाङ्मय का मूल आधार है, हजारों वर्ष पुरातन हैं, उनका भी आधार यही मत है। भाषा भेद से हम उनको रस और बल, ब्रह्म और माया आदि नामों से जानते हैं। पानी का बर्फ बनना या वाष्प बनना परिवर्तन नहीं विवर्त कहलाता है। अर्थात् बर्फ और वाष्प से फिर पानी बन सकता है। दही की तरह परिवर्तन नहीं होता कि फिर से दूध नहीं बन सके।

प्रकृति में काल को भी एक बड़ा आधार माना है। किन्तु इस काल को हमारे काल भेद से मिलाकर नहीं देखा जा सकता। प्रकृति में यह तय है कि जिसका जन्म हुआ है, उसकी मृत्यु निश्चित है। जिसकी मृत्यु होती है, उसका पुनर्जन्म निश्चित है। और जन्म तथा मृत्यु के बीच में वह कर्म करता है और कर्म के फल भी भोगता है। पुनर्जन्म भी इसी आधार पर होता है।

प्रकृति में सूक्ष्म तत्त्व भी है और स्थूल तत्त्व भी। स्थूल जो दिखाई देता है, उसके मूल में सूक्ष्म तत्त्व है। सूक्ष्म तत्त्व का भी 'कारण' तत्त्व होता है। सृष्टि तो सदा कारण से ही चलती है। कारण का भी आधार अथवा आलम्बन होता है। सृष्टि विस्तार आलम्बन से स्थूल अवस्था पर्यन्त जिन सिद्धान्तों पर आधारित रहकर आगे बढ़ता है, उनको वेद कहा जाता है। तत्त्व वेद कहा जाता है। उनका शब्दों में जो विवरण है, उसे शब्द वेद कहा जाता है। शब्द-वेद से तत्त्व वेद के क्रिया-कलापों की जानकारी मिलती है। प्रकाशन सुविधाओं

न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥ ७ ॥
अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ॥ ८ ॥
अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।
यद्वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९ ॥
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेरृतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥ [३] (६६८)

॥ ८३ ॥

१-१० वसिष्ठो मैत्रावरुणिः । इन्द्रावरुणौ । जगती ।

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् ॥ १ ॥
यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ॥ २ ॥
सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ॥ ३ ॥
इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥ ४ ॥
इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥ ५ ॥ [४]
युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ॥ ६ ॥
दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ॥ ७ ॥
दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।
श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥ ८ ॥
वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम् ॥ ९ ॥
अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेरृतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥ [५] (६७८)

॥ ८४ ॥

१-५ वसिष्ठो मैत्रावरुणिः । इन्द्रावरुणौ । त्रिष्टुप् ।

आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥ १ ॥ (६७९)

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥ २ ॥
कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ॥ ३ ॥
अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥ ४ ॥
इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ [६] (६८३)

॥ ८५ ॥

१-५ वसिष्ठो मैत्रावरुणिः । इन्द्रावरुणौ । त्रिष्टुप् ।

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके ॥ १ ॥
स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।
युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥ २ ॥
आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति ॥ ३ ॥
स सुक्रतुरृतचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान् ॥ ४ ॥
इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ [७] (६८८)

॥ ८६ ॥

१-८ वसिष्ठो मैत्रावरुणिः । वरुणः । त्रिष्टुप् ।

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥ १ ॥
उत स्वया तन्वा सं वदे तत्कदा न्वन्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥ २ ॥ (६९०)

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥
किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ॥ ४ ॥
अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः
अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥ ५ ॥
न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥ ६ ॥
अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥ ७ ॥
अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥८॥ [८] (६९६)

॥ ८७ ॥

१-७ वसिष्ठो मैत्रावरुणिः । वरुणः । त्रिष्टुप् ।

रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनाम् ।
सर्गो न सृष्टो अर्वतीरृतायञ्चकार महीरवनीरहभ्यः ॥ १ ॥
आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान् ।
अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ॥ २ ॥
परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके ।
ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त मन्म ॥ ३ ॥
उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति ।
विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ॥ ४ ॥
तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः ।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम् ॥ ५ ॥
अव सिन्धुं वरुणो द्यौरिव स्थाद्द्रप्सो न श्वेतो मृगस्तुविष्मान् ।
गम्भीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा ॥ ६ ॥ (७०२)

यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः ।
अनु व्रतान्यदितेर्ऋधन्तो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ [९] (७०३)

॥ ८८ ॥

१-७ वसिष्ठो मैत्रावरुणिः । वरुणः, (७ पाशविमोचनी) । त्रिष्टुप् ।

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम् ॥ १ ॥
अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।
स्वर्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात् ॥ २ ॥
आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ३ ॥
वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥ ४ ॥
क्व त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ ५ ॥
य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते ।
मा त एनस्वन्तो यक्षिन्भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम् ॥ ६ ॥
ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्यस्मत्पाशं वरुणो मुमोचत् ।
अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ [१०] (७१०)

॥ ८९ ॥

१-५ वसिष्ठो मैत्रावरुणिः । वरुणः । गायत्री, ५ जगती ।

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम् । मृळा सुक्षत्र मृळय ॥ १ ॥
यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः । मृळा सुक्षत्र मृळय ॥ २ ॥
क्रत्वः समह दीनता प्रतीपं जगमा शुचे । मृळा सुक्षत्र मृळय ॥ ३ ॥
अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम् । मृळा सुक्षत्र मृळय ॥ ४ ॥
यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥ ५ ॥ [११] (७१५)

॥ ९० ॥

१-७ वसिष्ठो मैत्रावरुणिः । १-४ वायुः, ५-७ इन्द्रवायू । त्रिष्टुप् ।

(६) प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ १ ॥
ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो ।
कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥ २ ॥
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥ ३ ॥
उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः ।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः ॥ ४ ॥
ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।
इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते ॥ ५ ॥
ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ॥ ६ ॥
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ [१२] (७२२)

॥ ९१ ॥

१-७ वसिष्ठो मैत्रावरुणिः । १, ३ वायुः, २, ४-७ इन्द्रवायू । त्रिष्टुप् ।

कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥ १ ॥
उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।
इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् ॥ २ ॥
पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ ३ ॥
यावत्तरस्तन्वो यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥ ४ ॥ (७२६)

नियुवाना नियुतः स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे ॥ ५ ॥
या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥ ६ ॥
अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ [१३] (७२९)

॥ ९२ ॥

१-५ वसिष्ठो मैत्रावरुणिः । १, ३, ५ वायुः; २,४ इन्द्रवायू । त्रिष्टुप् ।

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ १ ॥
प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै ।
प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः ॥ २ ॥
प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ ३ ॥
ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥ ४ ॥
आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥ [१४] (७३४)

॥ ९३ ॥

१-८ वसिष्ठो मैत्रावरुणिः । इन्द्राग्नी । त्रिष्टुप् ।

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ १ ॥
ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥ २ ॥
उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ॥ ३ ॥ (७३७)

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥ ४ ॥
सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥ ५ ॥ [१५]
इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ॥ ६ ॥
सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।
यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथन्तु ॥ ७ ॥
एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान् ।
मेन्द्रो नो विष्णुर्मरुतः परि ख्यन्यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥ [१६] (७४२)

॥ ९४ ॥

१-१२ वसिष्ठो मैत्रावरुणिः । इन्द्राग्नी । गायत्री, १२ अनुष्टुप् ।

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनि ॥ १ ॥
शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः । ईशाना पिप्यतं धियः ॥ २ ॥
मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये । मा नो रीरधतं निदे ॥ ३ ॥
इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे । धिया धेना अवस्यवः ॥ ४ ॥
ता हि शश्वन्त ईळत इत्था विप्रास ऊतये । सबाधो वाजसातये ॥ ५ ॥
ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे । मेधसाता सनिष्यवः ॥ ६ ॥ [१७]
इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा । मा नो दुःशंस ईशत ॥ ७ ॥
मा कस्य नो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । इन्द्राग्नी शर्म यच्छतम् ॥ ८ ॥
गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे । इन्द्राग्नी तद्वनेमहि ॥ ९ ॥
यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः । सप्तीवन्ता सपर्यवः ॥ १० ॥
उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ११ ॥
ताविद्दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् । आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥ १२ ॥ [१८]
(७५४)

॥ ९५ ॥

१-६ वसिष्ठो मैत्रावरुणिः । सरस्वती, ३ सरस्वान् । त्रिष्टुप् ।

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥ १ ॥
एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥ २ ॥
स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥ ३ ॥
उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥ ४ ॥
इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥ ५ ॥
अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः ।
वर्ध शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ [१९] (७६०)

॥ ९६ ॥

१-६ वसिष्ठो मैत्रावरुणिः । सरस्वती, ४-६ सरस्वान् । १-२ प्रगाथः- (१ बृहती, २ सतो बृहती), ३ प्रस्तारपङ्क्तिः, ४-६ गायत्री ।

बृहदु गायिषे वचोऽसुर्या नदीनाम् ।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी ॥ १ ॥
उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम् ॥ २ ॥
भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥ ३ ॥
जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः । सरस्वन्तं हवामहे ॥ ४ ॥
ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेभिर्नोऽविता भव ॥ ५ ॥
पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः । भक्षीमहि प्रजामिषम् ॥ ६ ॥ [२०] (७६६)

॥ ९७ ॥

१-१० वसिष्ठो मैत्रावरुणिः । १ इन्द्रः, २, ४-८ बृहस्पतिः ३, ९ इन्द्राब्रह्मणस्पती, १० इन्द्राबृहस्पती । त्रिष्टुप् ।

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥ १ ॥
आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ २ ॥
तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥ ३ ॥
स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ॥ ४ ॥
तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ॥ ५ ॥ [२१]
तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश्चिद्यस्य नीलवत्सधस्थं नभो न रूपमरुषं वसानाः ॥ ६ ॥
स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरिषिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ७ ॥
देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा ।
दक्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा ॥ ८ ॥
इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेन्द्राय वज्रिणे अकारि ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥ ९ ॥
बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥ [२२] (७७६)

॥ ९८ ॥

१-७ वसिष्ठो मैत्रावरुणिः । इन्द्रः, ७ इन्द्राबृहस्पती । त्रिष्टुप् ।

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौराद्वेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन् ॥ १ ॥ (७७७)

यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान्पाहि सोमान् ॥ २ ॥
जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्वन्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥ ३ ॥
यद्योधया महतो मन्यमानान्त्साक्षाम तान्बाहुभिः शाशदानान् ।
यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥ ४ ॥
प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य ॥ ५ ॥
तवेदं विश्वमभितः पशव्यं यत्पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ६ ॥
बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ [२३] (७८३)

॥ ९९ ॥

१-७ वसिष्ठो मैत्रावरुणिः । विष्णुः, ४-६ इन्द्राविष्णू । त्रिष्टुप् ।

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥ १ ॥
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ॥ २ ॥
इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या ।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः ॥ ३ ॥
उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम् ।
दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु ॥ ४ ॥
इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ॥ ५ ॥
इयं मनीषा बृहती बृहन्तोरुक्रमा तवसा वर्धयन्ती ।
ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र ॥ ६ ॥
वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ [२४] (७९०)

॥ १०० ॥

१-७ वसिष्ठो मैत्रावरुणिः । विष्णुः । त्रिष्टुप् ।

नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत् ।
प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात् ॥ १ ॥
त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥ २ ॥
त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥ ३ ॥
वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥ ४ ॥
प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥ ५ ॥
किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि ।
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥ ६ ॥
वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥७॥ [२५]६* (७९७)

॥ १०१ ॥

१-६ वसिष्ठो मैत्रावरुणिः(वृष्टिकामः), कुमार आग्नेयो वा । पर्जन्यः । त्रिष्टुप् ।

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघमूधः ।
स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ॥ १ ॥
यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।
स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्ट्यस्मे ॥ २ ॥
स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥ ३ ॥
यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः ।
त्रयः कोशास उपसेचनासो मध्वः श्चोतन्त्यभितो विरप्शम् ॥ ४ ॥
इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।
मयोभुवो वृष्टयः सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः ॥ ५ ॥ (८०२)

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ [१] (८०३)

॥ १०२ ॥

१-३ वसिष्ठो मैत्रावरुणिः (वृष्टिकामः), कुमार आग्नेयो वा । पर्जन्यः । गायत्री, २ पादनिचृत् ।

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे । स नो यवसमिच्छतु ॥ १ ॥
यो गर्भमोषधीनां गवां कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ २ ॥
तस्मा इदास्ये हविर्जुहोता मधुमत्तमम् । इळां नः संयतं करत् ॥ ३ ॥ [२] (८०६)

॥ १०३ ॥

१-१० वसिष्ठो मैत्रावरुणिः । मण्डूकाः (पर्जन्यः) । त्रिष्टुप्, १ अनुष्टुप् ।

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥ १ ॥
दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ॥ २ ॥
यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम् ।
अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ॥ ३ ॥
अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम् ।
मण्डूको यदभिवृष्टः कनिष्कन्पृश्निः संपृङ्क्ते हरितेन वाचम् ॥ ४ ॥
यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥ ५ ॥ [३]
गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ॥ ६ ॥
ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥ ७ ॥
ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न के चित् ॥ ८ ॥
देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम् ॥ ९ ॥
गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥१०॥ [४] (८१६)

॥ १०४ ॥

१-२५ वसिष्ठो मैत्रावरुणिः । (राक्षोघ्नं) इन्द्रासोमौ; ८, १६, १९-२२, इन्द्रः; ९, १२-१३ सोमः; १०, १४ अग्निः, ११ देवाः, १७ ग्रावाणः, १८ मरुतः, २३ वसिष्ठाशीः (पूर्वार्धः), (उत्तरार्धः) पृथिव्यन्तरिक्षे । त्रिष्टुप्: १-६, १८, २१, २३ जगती; ७ जगती त्रिष्टुब्वा; २५ अनुष्टुप् ।

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥ १ ॥
इन्द्रासोमा समघशंसमभ्यघं तपुर्ययस्तु चरुरग्निवाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥ २ ॥
इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम् ।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥ ३ ॥
इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
उत्तक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥ ४ ॥
इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥ ५ ॥ [५]
इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥ ६ ॥
प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा ॥ ७ ॥
यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥ ८ ॥
ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥ ९ ॥
यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम् ।
रिपुः स्तेनः स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा तना च ॥१०॥ [६]
परः सो अस्तु तन्वा तना च तिस्रः पृथिवीरधो अस्तु विश्वाः ।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् ॥११॥
सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् ॥१२॥ (८२८)

न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ॥१३॥
यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ॥१४॥
अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥१५॥ [७]
यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥१६॥
प्र या जिगाति खर्गलेव नक्तमप द्रुहा तन्वं गूहमाना ।
वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥१७॥
वि तिष्ठध्वं मरुतो विक्ष्विच्छत गृभायत रक्षसः सं पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥१८॥
प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥१९॥
एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥२०॥ [८]
इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्याविवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्सत एति रक्षसः ॥२१॥
उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥२२॥
मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥२३॥
इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥२४॥
प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम् । रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥२५॥ [९] (८४१)

॥ इति सप्तमं मण्डलं समाप्तम् ॥

मंत्र-संख्या

षष्ठमण्डलस्यान्तपर्यन्तं	५१३३
सप्तममण्डलस्य	८४१
सर्वयोगः-	५९७४

अथाष्टमं मण्डलम् ।

॥ १ ॥

(१-३४) १-२ प्रगाथो घौरः काण्वः, ३-२९ मेधातिथि-मेध्यातिथी काण्वौ, ३०-३३ आसङ्गः प्लायोगिः, ३४ शश्वती आङ्गिरसी ऋषिका । इन्द्रः, ३०-३४ आसङ्गः । १-४ प्रगाथः= (विषमा बृहती, समा सतोबृहती), ५-३२ बृहती, ३३-३४ त्रिष्टुप् ।

(१) मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥ १ ॥
अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् ॥ २ ॥
यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम् ॥ ३ ॥
वि तर्तूर्यन्ते मघवन्विपश्चितोऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥ ४ ॥
महे चन त्वामद्रिवः परा शुल्काय देयाम् ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ५ ॥ [१०]
वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ ६ ॥
क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः ॥ ७ ॥
प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः ।
याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥ ८ ॥
ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रवस्तेभिर्नस्तूयमा गहि ॥ ९ ॥ (९)

आ त्वद्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥१०॥ [११]
यत्तुदत्सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत्कुत्समार्जुनेयं शतक्रतुस्त्सरद्गन्धर्वमस्तृतम् ॥११॥
य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः ॥१२॥
मा भूम निष्ट्याइवेन्द्र त्वदरणाइव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥१३॥
अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।
सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥१४॥
यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः ॥१५॥ [१२]
आ त्वद्य सधस्तुतिं वावातुः सख्युरा गहि ।
उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥१६॥
सोता हि सोममद्रिभिरेमेनमप्सु धावत ।
गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥१७॥
अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥१८॥
इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।
शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुम् ॥१९॥
मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥२०॥ [१३]
मदेनेषितं मदमुग्रमुग्रेण शवसा ।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः ॥२१॥
शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥२२॥
एन्द्र याहि मत्स्व चित्रेण देव राधसा ।
सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥२३॥ (२३)

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥२४॥
आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥२५॥ [१४]
पिबा त्वस्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥२६॥
य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥२७॥
त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥२८॥
मम त्वा सूर उदिते मम मध्यंदिने दिवः ।
मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥२९॥
स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनाम् ।
निन्दिताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥३०॥ [१५]
आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहम् ।
उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥३१॥
य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया ।
एष विश्वान्यभ्यस्तु सौभगासंगस्य स्वनद्रथः ॥३२॥
अध प्लायोगिरति दासदन्यानासंगो अग्ने दशभिः सहस्रैः ।
अधोक्षणो दश मह्यं रुशन्तो नळाइव सरसो निरतिष्ठन् ॥३३॥
अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः ।
शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥३४॥ [१६] (३४)

॥ २ ॥

(१-४२) १-४० मेधातिथिः काण्वः प्रियमेधश्चाङ्गिरसः, ४१-४२ मेधातिथिः काण्वः । इन्द्रः, ४१-४२ विभिन्दुः । गायत्री, २८ अनुष्टुप् ।

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिन्ररिमा ते ॥ १ ॥
नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥ २ ॥
तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः । इन्द्र त्वास्मिन्त्सधमादे ॥ ३ ॥ (२७)

इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः । अन्तर्देवान्मर्त्यांश्च ॥ ४ ॥
न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम् । अपस्पृण्वते सुहार्दम् ॥ ५ ॥ [१७]
गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयन्ते । अभित्सरन्ति धेनुभिः ॥ ६ ॥
त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य । स्वे क्षये सुतपाव्नः ॥ ७ ॥
त्रयः कोशासः श्चोतन्ति तिस्रश्चम्वः सुपूर्णाः । समाने अधि भार्मन् ॥ ८ ॥
शुचिरसि पुरुनिःष्ठाः क्षीरैर्मध्यत आशीर्तः । दध्ना मन्दिष्ठः शूरस्य ॥ ९ ॥
इमे त इन्द्र सोमास्तीव्रा अस्मे सुतासः । शुक्रा आशिरं याचन्ते ॥१०॥ [१८]
ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि । रेवन्तं हि त्वा शृणोमि ॥११॥
हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् । ऊधर्न नग्ना जरन्ते ॥१२॥
रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥१३॥
उक्थं चन शस्यमानमगोररिरा चिकेत । न गायत्रं गीयमानं ॥१४॥
मा न इन्द्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥१५॥ [१९]
वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः । कण्वा उक्थेभिर्जरन्ते ॥१६॥
न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत ॥१७॥
इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः ॥१८॥
ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्यस्मान् । महाँइव युवजानिः ॥१९॥
मो ष्वद्य दुर्हणावान्त्सायं करदारे अस्मत् । अश्रीरइव जामाता ॥२०॥ [२०]
विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम् । त्रिषु जातस्य मनांसि ॥२१॥
आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् । यशस्तरं शतमूतेः ॥२२॥
ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय । भरा पिबन्नर्याय ॥२३॥
यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः । वाजं स्तोतृभ्यो गोमन्तम् ॥२४॥
पन्यंपन्यमित्सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥२५॥ [२१]
पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् । नि यमते शतमूतिः ॥२६॥
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् । गीर्भिः श्रुतं गिर्वणसम् ॥२७॥
स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् ॥२८॥
स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय । इन्द्र कारिणं वृधन्तः ॥२९॥ (६३)

गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि । सत्रा दधिरे शवांसि ॥३०॥ [२२]
एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः । सनादमृक्तो दयते ॥३१॥
हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः । महान्महीभिः शचीभिः ॥३२॥
यस्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च । अनु घेन्मन्दी मघोनः ॥३३॥
एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे । वाजदावा मघोनाम् ॥३४॥
प्रभर्ता रथं गव्यन्तमपाकाच्चिद्यमवति । इनो वसु स हि वोळ्हा ॥३५॥ [२३]
सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः । सत्योऽविता विधन्तम् ॥३६॥
यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा । यो भूत्सोमैः सत्यमद्वा ॥३७॥
गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम् । कण्वासो गात वाजिनम् ॥३८॥
य ऋते चिद्गास्पदेभ्यो दात्सखा नृभ्यः शचीवान् । ये अस्मिन्काममश्रियन् ॥३९॥
इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् । मेषो भूतोऽभि यन्नयः ॥४०॥
शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत् । अष्टा परः सहस्रा ॥४१॥
उत सु त्ये पयोवृधा माकी रणस्य नप्त्या । जनित्वनाय मामहे ॥४२॥[२४](७८)

॥ ३ ॥

१-२४ मेध्यातिथिः काण्वः । इन्द्रः, २१-२४ पाकस्थामा कौरयाणः । प्रगाथः= (विषमा बृहती, समा सतोबृहती), २१ अनुष्टुप्, २२-२३ गायत्री, २४ बृहती ।

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्यो वृधे३ऽस्माँ अवन्तु ते धियः ॥ १ ॥
भूयाम ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये ।
अस्माञ्चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥ २ ॥
इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ३ ॥
अयं सहस्रमृषिभिः सहस्कृतः समुद्रइव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ४ ॥
इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ५ ॥ [२५] (८१)

इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥ ६ ॥
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥ ७ ॥
अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥ ८ ॥
तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥ ९ ॥
येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥१०॥ [२६]
शग्धी न इन्द्र यत्त्वा रयिं यामि सुवीर्यम् ।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥११॥
शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम् ॥१२॥
कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥१३॥
कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥१४॥
उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथाइव ॥१५॥ [२७]
कण्वाइव भृगवः सूर्याइव विश्वमिद्धीतमानशुः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥१६॥
युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥१७॥
इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥१८॥
निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।
निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥१९॥ (९५)

निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।
निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् ॥२०॥ [२८]
यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः ।
विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् ॥२१॥
रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम् ।
अदाद्रायो विबोधनम् ॥२२॥
यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः ।
अस्तं वयो न तुग्र्यम् ॥२३॥
आत्मा पितुस्तनूर्वास ओजोदा अभ्यञ्जनम् ।
तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम् ॥२४॥ [२९](१००)

॥ ४ ॥

१-२१ देवातिथिः काण्वः । इन्द्रः, १५-१८ पूषा वा, १९-२१ कुरुङ्गः । प्रगाथः= (विषमा बृहती, समा सतोबृहती), २१ पुर उष्णिक् ।

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ १ ॥
यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि ॥ २ ॥
यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ ३ ॥
मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥ ४ ॥
प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा ।
विश्वे त इन्द्र पृतनायवो यहो नि वृक्षाइव येमिरे ॥ ५ ॥ [३०]
सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।
पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ॥ ६ ॥
मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ ७ ॥ (१०७)

सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ ८ ॥
अश्वी रथी सुरूप इद्गोमाँ इदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ॥ ९ ॥
ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥१०॥ [३१]
अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥११॥
स्वयं चित्स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि ।
इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥१२॥
रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन ।
अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् ॥१३॥
उप ब्रध्नं वावाता वृषणा हरी इन्द्रमपसु वक्षतः ।
अर्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥१४॥
प्र पूषणं वृणीमहे युज्याय पुरूवसुम् ।
स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥१५॥ [३२]
सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन ।
त्वे तन्नः सुवेदमुस्रियं वसु यं त्वं हिनोषि मर्त्यम् ॥१६॥
वेमि त्वा पूषन्नृञ्जसे वेमि स्तोतव आघृणे ।
न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥१७॥
परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ।
अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥१८॥
स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।
राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥१९॥
धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।
षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥२०॥
वृक्षाश्चिन्मे अभिपित्वे अरारणुः ।
गां भजन्त मेहनाश्वं भजन्त मेहना ॥२१॥[३३]७*(१२१)

॥ ५ ॥

१-३९ ब्रह्मातिथिः काण्वः । अश्विनौ, ३७ (उत्तरार्धः)-३९ कशुश्चैद्यः । गायत्री, ३७-३८ बृहती, ३९ अनुष्टुप् ।

दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् । वि भानुं विश्वधातनत् ॥ १ ॥
नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा । सचेथे अश्विनोषसम् ॥ २ ॥
युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत । वाचं दूतो यथोहिषे ॥ ३ ॥
पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू । स्तुषे कण्वासो अश्विना ॥ ४ ॥
मंहिष्ठा वाजसातमेषयन्ता शुभस्पती । गन्तारा दाशुषो गृहम् ॥ ५ ॥ [१]
ता सुदेवाय दाशुषे सुमेधामवितारिणीम् । घृतैर्गव्यूतिमुक्षतम् ॥ ६ ॥
आ नः स्तोममुप द्रवत्तूयं श्येनेभिराशुभिः । यातमश्वेभिरश्विना ॥ ७ ॥
येभिस्तिस्रः परावतो दिवो विश्वानि रोचना । त्रीँरक्तून्परिदीयथः ॥ ८ ॥
उत नो गोमतीरिष उत सातीरहर्विदा । वि पथः सातये सितम् ॥ ९ ॥
आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम् । वोळ्हमश्वावतीरिषः ॥१०॥ [२]
वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी । पिबतं सोम्यं मधु ॥११॥
अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः । छर्दिर्यन्तमदाभ्यम् ॥१२॥
नि षु ब्रह्म जनानां याविष्टं तूयमा गतम् । मो ष्वन्याँ उपारतम् ॥१३॥
अस्य पिबतमश्विना युवं मदस्य चारुणः । मध्वो रातस्य धिष्ण्या ॥१४॥
अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम् । पुरुक्षुं विश्वधायसम् ॥१५॥ [३]
पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः । वाघद्भिरश्विना गतम् ॥१६॥
जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः । युवां हवन्ते अश्विना ॥१७॥
अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः । युवाभ्यां भूत्वश्विना ॥१८॥
यो ह वां मधुनो दृतिराहितो रथचर्षणे । ततः पिबतमश्विना ॥१९॥
तेन नो वाजिनीवसू पश्वे तोकाय शं गवे । वहतं पीवरीरिषः ॥२०॥ [४]
उत नो दिव्या इष उत सिन्धूँरहर्विदा । अप द्वारेव वर्षथः ॥२१॥
कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा । यद्वां रथो विभिष्पतात् ॥२२॥
युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये । शश्वदूतीर्दशस्यथः ॥२३॥
ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः । यद्वां वृषण्वसू हुवे ॥२४॥ (१४१)

यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम् । अत्रिं शिञ्जारमश्विना ॥२५॥ [५]
यथोत कृत्व्ये धनेंऽशुं गोष्वगस्त्यम् । यथा वाजेषु सोभरिम् ॥२६॥
एतावद्वां वृषण्वसू अतो वा भूयो अश्विना । गृणन्तः सुम्नमीमहे ॥२७॥
रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना । आ हि स्थाथो दिविस्पृशम् ॥२८॥
हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः । उभा चक्रा हिरण्यया ॥२९॥
तेन नो वाजिनीवसू परावतश्चिदा गतम् । उपेमां सुष्टुतिं मम ॥३०॥ [६]
आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना । इषो दासीरमर्त्या ॥३१॥
आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना । पुरुश्चन्द्रा नासत्या ॥३२॥
एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः । अच्छा स्वध्वरं जनम् ॥३३॥
रथं वामनुगायसं य इषा वर्तते सह । न चक्रमभि बाधते ॥३४॥
हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः । धीजवना नासत्या ॥३५॥ [७]
युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू । ता नः पृङ्क्तमिषा रयिम् ॥३६॥
ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ॥३७॥
यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥३८॥
माकिरेना पथा गाद्येनेमे यन्ति चेदयः ।
अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥३९॥[८] (१६०)

॥ ६ ॥

१-४८ वत्सः काण्वः । इन्द्रः, ४६-४८ तिरिन्दिरः पार्शव्यः । गायत्री ।

(२)महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर्वत्सस्य वावृधे ॥ १ ॥
प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः । विप्रा ऋतस्य वाहसा ॥ २ ॥
कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधम् ॥ ३ ॥
समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥ ४ ॥
ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ५ ॥ [९]
वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा । शिरो बिभेद वृष्णिना ॥ ६ ॥ (१६६)

इमा अभि प्र णोनुमो विपामग्रेषु धीतयः । अग्नेः शोचिर्न दिद्युतः ॥ ७ ॥
गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः । कण्वा ऋतस्य धारया ॥ ८ ॥
प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम् । प्र ब्रह्म पूर्वचित्तये ॥ ९ ॥
अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ । अहं सूर्य इवाजनि ॥१०॥ [१०]
अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद्दधे ॥११॥
ये त्वामिन्द्र न तुष्टुवुरृषयो ये च तुष्टुवुः । ममेद्वर्धस्व सुष्टुतः ॥१२॥
यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन् । अपः समुद्रमैरयत् ॥१३॥
नि शुष्ण इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि । वृषा ह्युग्र शृण्विषे ॥१४॥
न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् । न विव्यचन्त भूमयः ॥१५॥ [११]
यस्त इन्द्र महीरपः स्तभूयमान आशयत् । नि तं पद्यासु शिश्नथः ॥१६॥
य इमे रोदसी मही समीची समजग्रभीत् । तमोभिरिन्द्र तं गुहः ॥१७॥
य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः । ममेदुग्र श्रुधी हवम् ॥१८॥
इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥१९॥
या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन् । परि धर्मेव सूर्यम् ॥२०॥ [१२]
त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः । त्वां सुतास इन्दवः ॥२१॥
तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः । यज्ञो वितन्तसाय्यः ॥२२॥
आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीम् । उत प्रजां सुवीर्यम् ॥२३॥
उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा । अग्रे विक्षु प्रदीदयत् ॥२४॥
अभि व्रजं न तत्निषे सूर उपाकचक्षसम् । यदिन्द्र मृळयासि नः ॥२५॥ [१३]
यदङ्ग तविषीयस इन्द्र प्रराजसि क्षितीः । महाँ अपार ओजसा ॥२६॥
तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये । उरुज्रयसमिन्दुभिः ॥२७॥
उपह्वरे गिरीणां संगथे च नदीनाम् । धिया विप्रो अजायत ॥२८॥
अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति । यतो विपान एजति ॥२९॥
आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् । परो यदिध्यते दिवा ॥३०॥ [१४]
कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम् । उतो शविष्ठ वृष्ण्यम् ॥३१॥
इमां म इन्द्र सुष्टुतिं जुषस्व प्र सु मामव । उत प्र वर्धया मतिम् ॥३२॥
उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः । विप्रा अतक्ष्म जीवसे ॥३३॥
अभि कण्वा अनूषतापो न प्रवता यतीः । इन्द्रं वनन्वती मतिः ॥३४॥ (१९४)

इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः । अनुत्तमन्युमजरम् ॥३५॥ [१५]
आ नो याहि परावतो हरिभ्यां हर्यताभ्याम् । इममिन्द्र सुतं पिब ॥३६॥
त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः । हवन्ते वाजसातये ॥३७॥
अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम् । अनु सुवानास इन्दवः ॥३८॥
मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति । मत्स्वा विवस्वतो मती ॥३९॥
वावृधान उप द्यवि वृषा वज्र्यरोरवीत् । वृत्रहा सोमपातमः ॥४०॥ [१६]
ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा । इन्द्र चोष्कूयसे वसु ॥४१॥
अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः । शतं वहन्तु हरयः ॥४२॥
इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम् । कण्वा उक्थेन वावृधुः ॥४३॥
इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः । इन्द्रं सनिष्युरूतये ॥४४॥
अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥४५॥
शतमहं तिरिन्दिरे सहस्रं पर्शावा ददे । राधांसि याद्वानाम् ॥४६॥
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् । ददुष्पज्राय साम्ने ॥४७॥
उदानट् ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत् । श्रवसा याद्वं जनम् ॥४८॥ [१७] (२०८)

॥ ७ ॥

१-३६ पुनर्वत्सः काण्वः । मरुतः । गायत्री ।

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥ १ ॥
यदङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् । नि पर्वता अहासत ॥ २ ॥
उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्त पिप्युषीमिषम् ॥ ३ ॥
वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान् । यद्यामं यान्ति वायुभिः ॥ ४ ॥
नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे । महे शुष्माय येमिरे ॥ ५ ॥ [१८]
युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे । युष्मान्प्रयत्यध्वरे ॥ ६ ॥
उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना दिवः ॥ ७ ॥
सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे । ते भानुभिर्वि तस्थिरे ॥ ८ ॥
इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः । इमं मे वनता हवम् ॥ ९ ॥
त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु । उत्सं कवन्धमुद्रिणम् ॥१०॥ [१९]
मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उप गन्तन ॥११॥ (२१९)

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥१२॥
आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् । इयर्ता मरुतो दिवः ॥१३॥
अधीव यद्गिरीणां यामं शुभ्रा अचिध्वम् । सुवानैर्मन्दध्व इन्दुभिः ॥१४॥
एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः । अदाभ्यस्य मन्मभिः ॥१५॥ [२०]
ये द्रप्सा इव रोदसी धमन्त्यनु वृष्टिभिः । उत्सं दुहन्तो अक्षितम् ॥१६॥
उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः । उत्स्तोमैः पृश्निमातरः ॥१७॥
येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् । राये सु तस्य धीमहि ॥१८॥
इमा उ वः सुदानवो घृतं न पिप्युषीरिषः । वर्धान्काण्वस्य मन्मभिः ॥१९॥
क्व नूनं सुदानवो मदथा वृक्तबर्हिषः । ब्रह्मा को वः सपर्यति ॥२०॥ [२१]
नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धां ऋतस्य जिन्वथ ॥२१॥
समु त्ये महतीरपः सं क्षोणी समु सूर्यम् । सं वज्रं पर्वशो दधुः ॥२२॥
वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः । चक्राणा वृष्णि पौंस्यम् ॥२३॥
अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम् । अन्विन्द्रं वृत्रतूर्ये ॥२४॥
विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः । शुभ्रा व्यञ्जत श्रिये ॥२५॥ [२२]
उशना यत्परावत उक्ष्णो रन्ध्रमयातन । द्यौर्न चक्रदद्भिया ॥२६॥
आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः । देवास उप गन्तन ॥२७॥
यदेषां पृषती रथे प्रष्टिर्वहति रोहितः । यान्ति शुभ्रा रिणन्नपः ॥२८॥
सुषोमे शर्यणावत्यार्जीके पस्त्यावति । ययुर्निचक्रया नरः ॥२९॥
कदा गच्छाथ मरुत इत्था विप्रं हवमानम् । मार्डीकेभिर्नाधमानम् ॥३०॥ [२३]
कद्ध नूनं कधप्रियो यदिन्द्रमजहातन । को वः सखित्व ओहते ॥३१॥
सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः । स्तुषे हिरण्यवाशीभिः ॥३२॥
ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय । ववृत्यां चित्रवाजान् ॥३३॥
गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः । पर्वताश्चिन्नि येमिरे ॥३४॥
आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः । धातारः स्तुवते वयः ॥३५॥
अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा । ते भानुभिर्वि तस्थिरे ॥३६॥ [२४] (२४४)

॥ ८ ॥

१-२३ सध्वंसः काण्वः । अश्विनौ । अनुष्टुप् ।

आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम् ।
दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥ १ ॥
आ नूनं यातमश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥ २ ॥
आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥ ३ ॥
आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥ ४ ॥
आ नो यातमुपश्रुत्यश्विना सोमपीतये ।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥ ५ ॥ [२५]
यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥ ६ ॥
दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा ।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥ ७ ॥
किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना ।
पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥ ८ ॥
आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना ।
अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥ ९ ॥
आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू ।
विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् ॥१०॥ [२६]
अतः सहस्रनिर्णिजा रथेना यातमश्विना ।
वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः ॥११॥
पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।
स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम् ॥१२॥
आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥१३॥ (२५७)

यन्नासत्या परावति यद्वा स्थो अध्यम्बरे ।
अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥१४॥
यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥१५॥ [२७]
प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥१६॥
आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥१७॥
आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
राजन्तावध्वराणामश्विना यामहूतिषु ॥१८॥
आ नो गन्तं मयोभुवाश्विना शंभुवा युवम् ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥१९॥
याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥२०॥ [२८]
याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्वस्माँ अश्विना प्रावतं वाजसातये ॥२१॥
प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥२२॥
त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः ।
कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥२३॥ [२९] (२६७)

॥ ९ ॥

१-२१ शशकर्णः काण्वः । अश्विनौ । अनुष्टुप्; १,४,६,१४,१५, बृहती; २,३,२०,२१ गायत्री; ५ ककुप्; १० त्रिष्टुप्; ११ विराट्; १२ जगती ।

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥ १ ॥
यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु । नृम्णं तद्धत्तमश्विना ॥ २ ॥
ये वां दंसांस्यश्विना विप्रासः परिमामृशुः । एवेत्काण्वस्य बोधतम् ॥ ३ ॥ (२७०)

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥ ४ ॥
यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम् ।
तेन माविष्टमश्विना ॥ ५ ॥ [३०]
यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥ ६ ॥
आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥ ७ ॥
आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥ ८ ॥
यदद्य वां नासत्योक्थैराचुच्युवीमहि ।
यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतम् ॥ ९ ॥
यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव ।
पृथी यद्वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥१०॥ [३१]
यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातम् ॥११॥
यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥१२॥
यदद्याश्विनावहं हुवेय वाजसातये ।
यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥१३॥
आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥१४॥
यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥१५॥ [३२]
अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१६॥
प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।
प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥१७॥ (२८४)

यदुषो यासि भानुना सं सूर्येण रोचसे ।
आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥१८॥
यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।
यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥१९॥
प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे । प्र दक्षाय प्रचेतसा ॥२०॥
यन्नूनं धीभिरश्विना पितुर्योना निषीदथः । यद्वा सुम्नेभिरुक्थ्या ॥२१॥ [३३] (२८८)

॥ १० ॥

१-६ प्रगाथो घौरः काण्वः । अश्विनौ । १ बृहती, २ मध्येज्योतिः, ३ अनुष्टुप्, ४ आस्तारपङ्क्तिः, प्रगाथः = (५ बृहती, ६ सतोबृहती)

यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः ।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥ १ ॥
यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतम् ।
बृहस्पतिं विश्वान्देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥ २ ॥
त्या न्व१श्विना हुवे सुदंससा गृभे कृता ।
ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥ ३ ॥
ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥ ४ ॥
यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।
यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥ ५ ॥
यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।
यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥ ६ ॥ [३४] (२९४)

॥ ११ ॥

१-१० वत्सः काण्वः । अग्निः । गायत्री, १ प्रतिष्ठा, २ वर्धमाना, १० त्रिष्टुप् ।

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥ १ ॥
त्वमसि प्रशस्यो विदथेषु सहन्त्य । अग्ने रथीरध्वराणाम् ॥ २ ॥
स त्वमस्मदप द्विषो युयोधि जातवेदः । अदेवीरग्ने अरातीः ॥ ३ ॥ (२९७)

अन्ति चित्सन्तमह यज्ञं मर्तस्य रिपोः । नोप वेषि जातवेदः ॥ ४ ॥
मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः ॥ ५ ॥ [३५]
विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे ॥ ६ ॥
आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वांकामया गिरा ॥ ७ ॥
पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥ ८ ॥
समत्स्वग्निमवसे वाजयन्तो हवामहे । वाजेषु चित्रराधसम् ॥ ९ ॥
प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥१०॥ [३६]८* (३०४)

॥ इति पञ्चमोऽष्टकः ॥५॥

॥ १२ ॥

१—३३ पर्वतः काण्वः । इन्द्रः । उष्णिक् ।

य इन्द्र सोमपातमो मदः शविष्ठ चेतति । येना हंसि न्य१त्रिणं तमीमहे ॥ १ ॥
येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् । येना समुद्रमाविथा तमीमहे ॥ २ ॥
येन सिन्धुं महीरपो रथाँइव प्रचोदयः । पन्थामृतस्य यातवे तमीमहे ॥ ३ ॥
इमं स्तोममभिष्टये घृतं न पूतमद्रिवः । येना नु सद्य ओजसा ववक्षिथ ॥ ४ ॥
इमं जुषस्व गिर्वणः समुद्रइव पिन्वते । इन्द्र विश्वाभिरूतिभिर्ववक्षिथ ॥ ५ ॥ [१]
यो नो देवः परावतः सखित्वनाय मामहे । दिवो न वृष्टिं प्रथयन्ववक्षिथ ॥ ६ ॥
ववक्षुरस्य केतवो उत वज्रो गभस्त्योः । यत्सूर्यो न रोदसी अवर्धयत् ॥ ७ ॥
यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः । आदित्त इन्द्रियं महि प्र वावृधे ॥ ८ ॥
इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति । अग्निर्वनेव सासहिः प्र वावृधे ॥ ९ ॥
इयं त ऋत्वियावती धीतिरेति नवीयसी । सपर्यन्ती पुरुप्रिया मिमीत इत् ॥१०॥ [२]
गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक् । स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥११॥
सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये । प्राची वाशीव सुन्वते मिमीत इत् ॥१२॥
यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः । घृतं न पिप्य आसन्यृतस्य यत् ॥१३॥
उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत् । पुरुप्रशस्तमूतय ऋतस्य यत् ॥१४॥
अभि वह्नय ऊतयेऽनूषत प्रशस्तये । न देव विव्रता हरी ऋतस्य यत् ॥१५॥ [३]
यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये । यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥१६॥
यद्वा शक्र परावति समुद्रे अधि मन्दसे । अस्माकमित्सुते रणा समिन्दुभिः ॥१७॥ (३२१)

यद्वासि सुन्वतो वृधो यजमानस्य सत्पते । उक्थे वा यस्य रण्यसि समिन्दुभिः ॥१८॥
देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि । अधा यज्ञाय तुर्वणे व्यानशुः ॥१९॥
यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम् । होत्राभिरिन्द्रं वावृधुर्व्यानशुः ॥२०॥ [४]
महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । विश्वा वसूनि दाशुषे व्यानशुः ॥२१॥
इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः । इन्द्रं वाणीरनूषता समोजसे ॥२२॥
महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम् । अर्कैरभि प्र णोनुमः समोजसे ॥२३॥
न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम् । अमादिदस्य तित्विषे समोजसः ॥२४॥
यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः । आदित्ते हर्यता हरी ववक्षतुः ॥२५॥ [५]
यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः । आदित्ते हर्यता हरी ववक्षतुः ॥२६॥
यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे । आदित्ते हर्यता हरी ववक्षतुः ॥२७॥
यदा ते हर्यता हरी वावृधाते दिवेदिवे । आदित्ते विश्वा भुवनानि येमिरे ॥२८॥
यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे । आदित्ते विश्वा भुवनानि येमिरे ॥२९॥
यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः । आदित्ते विश्वा भुवनानि येमिरे ॥३०॥
इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः । जामिं पदेव पिप्रतीं प्राध्वरे ॥३१॥
यदस्य धामनि प्रिये समीचीनासो अस्वरन् । नाभा यज्ञस्य दोहना प्राध्वरे ॥३२॥
सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः । होतेव पूर्वचित्तये प्राध्वरे ॥३३॥[६](३३७)

॥ १३ ॥

१-३३ नारदः काण्वः । इन्द्रः । उष्णिक् ।

(३)इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम् । विदे वृधस्य दक्षसो महान्हि षः ॥ १ ॥
स प्रथमे व्योमनि देवानां सदने वृधः । सुपारः सुश्रवस्तमः समप्सुजित् ॥ २ ॥
तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम् । भवा नः सुम्ने अन्तमः सखा वृधे ॥ ३ ॥
इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः । मन्दानो अस्य बर्हिषो वि राजसि ॥ ४ ॥
नूनं तदिन्द्र दद्धि नो यत्त्वा सुन्वन्त ईमहे । रयिं नश्चित्रमा भरा स्वर्विदम् ॥ ५ ॥ [७]
स्तोता यत्ते विचर्षणिरतिप्रशर्धयद्गिरः । वया इवानु रोहते जुषन्त यत् ॥ ६ ॥
प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम् । मदेमदे ववक्षिथा सुकृत्वने ॥ ७ ॥
क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः । अया धिया य उच्यते पतिर्दिवः ॥ ८ ॥
उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी । नमोवृधैरवस्युभिः सुते रण ॥ ९ ॥ (३४६)

स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा । गन्तारा दाशुषो गृहं नमस्विनः ॥१०॥ [८]
तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः । आ याहि यज्ञमाशुभिः शमिद्धि ते ॥११॥
इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय । श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥१२॥
हवे त्वा सूर उदिते हवे मध्यंदिने दिवः । जुषाण इन्द्र सप्तिभिर्न आ गहि ॥१३॥
आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः । तन्तुं तनुष्व पूर्व्यं यथा विदे ॥१४॥
यच्छक्रासि परावति यदर्वावति वृत्रहन् । यद्वा समुद्रे अन्धसोऽवितेदसि ॥१५॥ [९]
इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः । इन्द्रे हविष्मतीर्विशो अराणिषुः ॥१६॥
तमिद्विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः । इन्द्रं क्षोणीरवर्धयन्वयाइव ॥१७॥
त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः सदावृधम् ॥१८॥
स्तोता यत्ते अनुव्रत उक्थान्यृतुथा दधे । शुचिः पावक उच्यते सो अद्भुतः ॥१९॥
तदिद्रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु । मनो यत्रा वि तद्दधुर्विचेतसः ॥२०॥ [१०]
यदि मे सख्यमावर इमस्य पाह्यन्धसः । येन विश्वा अति द्विषो अतारिम ॥२१॥
कदा त इन्द्र गिर्वणः स्तोता भवाति शंतमः । कदा नो गव्ये अश्व्ये वसौ दधः ॥२२॥
उत ते सुष्टुता हरी वृषणा वहतो रथम् । अजुर्यस्य मदिन्तमं यमीमहे ॥२३॥
तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः । नि बर्हिषि प्रिये सदद्ध द्विता ॥२४॥
वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः । धुक्षस्व पिप्युषीमिषमवा च नः ॥२५॥ [११]
इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः । ऋतादियर्मि ते धियं मनोयुजम् ॥२६॥
इह त्या सधमाद्या युजानः सोमपीतये । हरी इन्द्र प्रतद्वसू अभि स्वर ॥२७॥
अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् । उतो मरुत्वतीर्विशो अभि प्रयः ॥२८॥
इमा अस्य प्रतूर्तयः पदं जुषन्त यद्दिवि । नाभा यज्ञस्य सं दधुर्यथा विदे ॥२९॥
अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे । मिमीते यज्ञमानुषग्विचक्ष्य ॥३०॥ [१२]
वृषायमिन्द्र ते रथ उतो ते वृषणा हरी । वृषा त्वं शतक्रतो वृषा हवः ॥३१॥
वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः । वृषा यज्ञो यमिन्वसि वृषा हवः ॥३२॥
वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः । वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥३३॥ [१३] (३७

॥ १४ ॥

१-१५ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ । इन्द्रः । गायत्री ।

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् । स्तोता मे गोषखा स्यात् ॥ १ ॥ (३८०)

शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे । यदहं गोपतिः स्याम् ॥ २ ॥
धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते । गामश्वं पिप्युषी दुहे ॥ ३ ॥
न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः । यद्दित्ससि स्तुतो मघम् ॥ ४ ॥
यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् । चक्राण ओपशं दिवि ॥ ५ ॥ [१४]
वावृधानस्य ते वयं विश्वा धनानि जिग्युषः । ऊतिमिन्द्रा वृणीमहे ॥ ६ ॥
व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद्वलम् ॥ ७ ॥
उद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः । अर्वाञ्चं नुनुदे वलम् ॥ ८ ॥
इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च । स्थिराणि न पराणुदे ॥ ९ ॥
अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते । वि ते मदा अराजिषुः ॥१०॥ [१५]
त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः । स्तोतॄणामुत भद्रकृत् ॥११॥
इन्द्रमित्केशिना हरी सोमपेयाय वक्षतः । उप यज्ञं सुराधसम् ॥१२॥
अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजयः स्पृधः ॥१३॥
मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः ॥१४॥
असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् ॥१५॥[१६](३८५)

॥ १५ ॥

१-१३ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ। इन्द्रः। उष्णिक्।

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम् । इन्द्रं गीर्भिस्तविषमा विवासत ॥ १ ॥
यस्य द्विबर्हसो बृहत्सहो दाधार रोदसी । गिरीँरज्राँ अपः स्वर्वृषत्वना ॥ २ ॥
स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे । इन्द्र जैत्रा श्रवस्या च यन्तवे ॥ ३ ॥
तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम् । उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ ४ ॥
येन ज्योतींष्यायवे मनवे च विवेदिथ । मन्दानो अस्य बर्हिषो वि राजसि ॥ ५ ॥ [१७]
तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा । वृषपत्नीरपो जया दिवेदिवे ॥ ६ ॥
तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् । वज्रं शिशाति धिषणा वरेण्यम् ॥ ७ ॥
तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः । त्वामापः पर्वतासश्च हिन्विरे ॥ ८ ॥
त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः । त्वां शर्धो मदत्यनु मारुतम् ॥ ९ ॥
त्वं वृषा जनानां मंहिष्ठ इन्द्र जज्ञिषे । सत्रा विश्वा स्वपत्यानि दधिषे ॥१०॥ [१८]
सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे । नान्य इन्द्रात्करणं भूय इन्वति ॥११॥ (३९६)

यदिन्द्र मन्मशस्त्वा नाना हवन्त ऊतये । अस्माकेभिर्नृभिरत्रा स्वर्जय ॥१२॥
अरं क्षयाय नो महे विश्वा रूपाण्याविशन् । इन्द्रं जैत्राय हर्षया शचीपतिम् ॥१३॥[१९](३९८)

॥ १६ ॥

१-१२ इरिम्बिठिः काण्वः। इन्द्रः। गायत्री।

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः । नरं नृषाहं मंहिष्ठम् ॥ १ ॥
यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या । अपामवो न समुद्रे ॥ २ ॥
तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् । महो वाजिनं सनिभ्यः ॥ ३ ॥
यस्यानूना गभीरा मदा उरवस्तरुत्राः । हर्षुमन्तः शूरसातौ ॥ ४ ॥
तमिद्धनेषु हितेष्वधिवाकाय हवन्ते । येषामिन्द्रस्ते जयन्ति ॥ ५ ॥
तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः । एष इन्द्रो वरिवस्कृत् ॥ ६ ॥ [२०]
इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः । महान्महीभिः शचीभिः ॥ ७ ॥
स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः । एकश्चित्सन्नभिभूतिः ॥ ८ ॥
तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः । इन्द्रं वर्धन्ति क्षितयः ॥ ९ ॥
प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु । सासह्वांसं युधामित्रान् ॥१०॥
स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ॥११॥
स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि ॥१२॥[२१](४१०)

॥ १७ ॥

१-१५ इरिम्बिठिः काण्वः। इन्द्रः; १४ वास्तोष्पतिर्वा। गायत्री, प्रगाथः=(१४ बृहती, १५ सतोबृहती)।

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥ १ ॥
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना । उप ब्रह्माणि नः शृणु ॥ २ ॥
ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः । सुतावन्तो हवामहे ॥ ३ ॥
आ नो याहि सुतावतोऽस्माकं सुष्टुतीरुप । पिबा सु शिप्रिन्नन्धसः ॥ ४ ॥
आ ते सिञ्चामि कुक्ष्योरनु गात्रा वि धावतु । गृभाय जिह्वया मधु ॥ ५ ॥ [२२]
स्वादुष्टे अस्तु संसुदे मधुमान्तन्वे३ तव । सोमः शमस्तु ते हृदे ॥ ६ ॥
अयमु त्वा विचर्षणे जनीरिवाभि संवृतः । प्र सोम इन्द्र सर्पतु ॥ ७ ॥
तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते ॥ ८ ॥ (४१८)

इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा । वृत्राणि वृत्रहञ्जहि ॥ ९ ॥
दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि । यजमानाय सुन्वते ॥१०॥ [२३]
अयं त इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥११॥
शाचिगो शाचिपूजनायं रणाय ते सुतः । आखण्डल प्र हूयसे ॥१२॥
यस्ते शृङ्गवृषो नपात्प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्र आ मनः ॥१३॥
वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्यानाम् ।
द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा ॥१४॥
पृदाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः ।
भूर्णिमश्वं नयत्तुजा पुरो गृभेन्द्रं सोमस्य पीतये ॥१५॥[२४](४२५)

॥ १८ ॥

१-२२ इरिम्बिठिः काण्वः। आदित्याः; ४,६,७ अदितिः; ८ अश्विनौ; ९ अग्निसूर्यानिलाः। उष्णिक्।

इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः । आदित्यानामपूर्व्यं सवीमनि ॥ १ ॥
अनर्वाणो ह्येषां पन्था आदित्यानाम् । अदब्धाः सन्ति पायवः सुगेवृधः ॥ २ ॥
तत्सु नः सविता भगो वरुणो मित्रो अर्यमा । शर्म यच्छन्तु सप्रथो यदीमहे ॥ ३ ॥
देवेभिर्देव्यदितेऽरिष्टभर्मन्ना गहि । स्मत्सूरिभिः पुरुप्रिये सुशर्मभिः ॥ ४ ॥
ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे । अंहोश्चिदुरुचक्रयोऽनेहसः ॥ ५ ॥ [२५]
अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः । अदितिः पात्वंहसः सदावृधा ॥ ६ ॥
उत स्या नो दिवा मतिरदितिरूत्या गमत् । सा शंताति मयस्करदप स्रिधः ॥ ७ ॥
उत त्या दैव्या भिषजा शं नः करतो अश्विना । युयुयातामितो रपो अप स्रिधः ॥ ८ ॥
शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः । शं वातो वात्वरपा अप स्रिधः ॥ ९ ॥
अपामीवामप स्रिधमप सेधत दुर्मतिम् । आदित्यासो युयोतना नो अंहसः ॥१०॥ [२६]
युयोता शरुमस्मदाँ आदित्यास उतामतिम् । ऋधग्द्वेषः कृणुत विश्ववेदसः ॥११॥
तत्सु नः शर्म यच्छतादित्या यन्मुमोचति । एनस्वन्तं चिदेनसः सुदानवः ॥१२॥
यो नः कश्चिद्रिरिक्षति रक्षस्त्वेन मर्त्यः । स्वैः ष एवै रिरिषीष्ट युर्जनः ॥१३॥
समित्तमघमश्नवद्दुःशंसं मर्त्यं रिपुम् । यो अस्मत्रा दुर्हणावाँ उप द्वयुः ॥१४॥
पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम् । उप द्वयुं चाद्वयुं च वसवः ॥१५॥ [२७]
आ शर्म पर्वतानामोतापां वृणीमहे । द्यावाक्षामारे अस्मद्रपस्कृतम् ॥१६॥ (४४१)

ते नो भद्रेण शर्मणा युष्माकं नावा वसवः । अति विश्वानि दुरिता पिपर्तन ॥१७॥
तुचे तनाय तत्सु नो द्राघीय आयुर्जीवसे । आदित्यासः सुमहसः कृणोतन ॥१८॥
यज्ञो हीळो वो अन्तर आदित्या अस्ति मृळत । युष्मे इद्वो अपि ष्मसि सजात्ये ॥१९॥
बृहद्वरूथं मरुतां देवं त्रातारमश्विना । मित्रमीमहे वरुणं स्वस्तये ॥२०॥
अनेहो मित्रार्यमन्नृवद्वरुण शंस्यम् । त्रिवरूथं मरुतो यन्त नश्छर्दिः ॥२१॥
ये चिद्धि मृत्युबन्धव आदित्या मनवः स्मसि । प्र सू न आयुर्जीवसे तिरेतन ॥२२॥[२८](४४७)

॥ १९ ॥

१-३७ सोभरिः काण्वः। अग्निः, ३४-३५ आदित्याः; ३६-३७ त्रसदस्युः पौरुकुत्स्यः। १-२६ प्रगाथः=(विषमा ककुप्, समा सतोबृहती), २७ द्विपदा विराट्, २८-३३ प्रगाथः=(समा ककुप्, विषमा सतोबृहती), ३४ उष्णिक्, ३५ सतोबृहती, ३६ ककुप्; ३७ पङ्क्तिः।

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे । देवत्रा हव्यमोहिरे ॥ १ ॥
विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यन्तुरम् ।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥ २ ॥
यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥
ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥ ४ ॥
यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥ ५ ॥ [२९]
तस्येदर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः ।
न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥ ६ ॥
स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते । सुवीरस्त्वमस्मयुः ॥ ७ ॥
प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः ।
त्वे क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम् ॥ ८ ॥
सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः । स धीभिरस्तु सनिता ॥ ९ ॥
यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते ।
सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतम् ॥१०॥ [३०]
यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः । हव्या वा वेविषद्विषः ॥११॥ (४५८)

विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु ।
अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः ॥१२॥
यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति । गिरा वाजिरशोचिषम् ॥१३॥
समिधा यो निशिती दाशददितिं धामभिरस्य मर्त्यः ।
विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ॥१४॥
तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणम् । मन्युं जनस्य दूढ्यः ॥१५॥ [३१]
येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः ।
वयं तत्ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि ॥१६॥
ते घेदग्ने स्वाध्यो३ ये त्वा विप्र निदधिरे नृचक्षसम् । विप्रासो देव सुक्रतुम् ॥१७॥
त इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि ।
त इद्वाजेभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥१८॥
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥१९॥
भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥२०॥ [३२]
ईळे गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे । यजिष्ठं हव्यवाहनम् ॥२१॥
तिग्मजम्भाय तरुणाय राजते प्रयो गायस्यग्नये ।
यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः ॥२२॥
यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चाव च । असुर इव निर्णिजम् ॥२३॥
यो हव्यान्यैरयता मनुर्हितो देव आसा सुगन्धिना ।
विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः ॥२४॥
यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः । सहसः सूनवाहुत ॥२५॥ [३३]
न त्वा रासीयाभिशस्तये वसो न पापत्वाय सन्त्य ।
न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया ॥२६॥
पितुर्न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः ॥२७॥
तवाहमग्न ऊतिभिर्नेदिष्ठाभिः सचेय जोषमा वसो । सदा देवस्य मर्त्यः ॥२८॥
तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः ।
त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे ॥२९॥
प्र सो अग्ने तवोतिभिः सुवीराभिस्तिरते वाजभर्मभिः । यस्य त्वं सख्यमावरः ॥३०॥ [३४] (४७७)

तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे ।
त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥३१॥
तमागन्म सोभरयः सहस्रमुष्कं स्वभिष्टिमवसे । सम्राजं त्रासदस्यवम् ॥३२॥
यस्य ते अग्ने अन्ये अग्नय उपक्षितो वया इव ।
विपो न द्युम्ना नि युवे जनानां तव क्षत्राणि वर्धयन् ॥३३॥
यमादित्यासो अद्रुहः पारं नयथ मर्त्यम् । मघोनां विश्वेषां सुदानवः ॥३४॥
यूयं राजानः कं चिच्चर्षणीसहः क्षयन्तं मानुषाँ अनु ।
वयं ते वो वरुण मित्रार्यमन्स्यामेदृतस्य रथ्यः ॥३५॥
अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् । मंहिष्ठो अर्यः सत्पतिः ॥३६॥
उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि ।
तिसृणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः ॥३७॥ [३५] (४७८)

॥ २० ॥

१-२६ सोभरिः काण्वः । मरुतः । प्रगाथः= (विषमा ककुप्, समा सतोबृहती)।

आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थाता समन्यवः । स्थिरा चिन्नमयिष्णवः ॥ १ ॥
वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः ।
इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः ॥ २ ॥
विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम् । विष्णोरेषस्य मीळ्हुषाम् ॥ ३ ॥
वि द्वीपानि पापतन्तिष्ठद्दुच्छुनोभे युजन्त रोदसी ।
प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः ॥ ४ ॥
अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः । भूमिर्यामेषु रेजते ॥ ५ ॥ [३६]
अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत् ।
यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः ॥ ६ ॥
स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृषप्सवः । वहन्ते अह्रुतप्सवः ॥ ७ ॥
गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ।
गोबन्धवः सुजातास इषे भुजे महान्तो नः स्परसे नु ॥ ८ ॥
प्रति वो वृषदञ्जयो वृष्णे शर्धाय मारुताय भरध्वम् । हव्या वृषप्रयाव्णे ॥ ९ ॥ (४९३)

वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥१०॥ [३७]
समानमञ्ज्येषां वि भ्राजन्ते रुक्मासो अधि बाहुषु । दविद्युतत्यृष्टयः ॥११॥
त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे ।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥१२॥
येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे । वयो न पित्र्यं सहः ॥१३॥
तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।
अराणां न चरमस्तदेषां दाना मह्ना तदेषाम् ॥१४॥
सुभगः स व ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु । यो वा नूनमुतासति ॥१५॥ [३८]
यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये गथ ।
अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वो धूतयो नशत् ॥१६॥
यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः । युवानस्तथेदसत् ॥१७॥
ये चार्हन्ति मरुतः सुदानवः स्मन्मीळ्हुषश्चरन्ति ये ।
अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम् ॥१८॥
यून ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा । गाय गा इव चर्कृषत् ॥१९॥
साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
वृष्णश्चन्द्रान्न सुश्रवस्तमान्गिरा वन्दस्व मरुतो अह ॥२०॥ [३९]
गावश्चिद्घा समन्यवः सजात्येन मरुतः सबन्धवः । रिहते ककुभो मिथः ॥२१॥
मर्तश्चिद्वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति ।
अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि ॥२२॥
मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः । यूयं सखायः सप्तयः ॥२३॥
याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम् ।
मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ॥२४॥
यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः । यत्पर्वतेषु भेषजम् ॥२५॥
विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत ।
क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः ॥२६॥ [४०]१* (५१०)

॥ २१ ॥

१-१८ सोभरिः काण्वः । इन्द्रः, १७-१८ चित्रः । प्रगाथः= (विषमा ककुप्, समा सतोबृहती)।

(४) वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥ १ ॥
उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ २ ॥
आ याहीम इन्दवोऽश्वपते गोपत उर्वरापते । सोमं सोमपते पिब ॥ ३ ॥
वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।
या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ॥ ४ ॥
सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे । अभि त्वामिन्द्र नोनुमः ॥ ५ ॥ [१]
अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद्वि दीधयः ।
सन्ति कामासो हरिवो ददिष्ट्वं स्मो वयं सन्ति नो धियः ॥ ६ ॥
नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः । विद्मा पुरा परीणसः ॥ ७ ॥
विद्मा सखित्वमुत शूर भोज्य१मा ते ता वज्रिन्नीमहे ।
उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ॥ ८ ॥
यो न इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे । सखाय इन्द्रमूतये ॥ ९ ॥
हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥१०॥ [२]
त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि । संस्थे जनस्य गोमतः ॥११॥
जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः ।
नृभिर्वृत्रं हन्याम शूशुयाम चावेरिन्द्र प्र णो धियः ॥१२॥
अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि । युधेदापित्वमिच्छसे ॥१३॥
नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥१४॥
मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः । नि षदाम सचा सुते ॥१५॥ [३]
मा ते गोदत्र निरराम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे ॥१६॥
इन्द्रो वा घेदियन्मघं सरस्वती वा सुभगा ददिर्वसु । त्वं वा चित्र दाशुषे ॥१७॥ (५२७)

चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु ।
पर्जन्यइव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥१८॥ [४] (५२८)

॥ २२ ॥

१-१८ सोभरिः काण्वः । अश्विनौ । १-६ प्रगाथः= (विषमा बृहती, समा सतोबृहती),
७ बृहती, ८ अनुष्टुप्, ११ ककुप्, १२ मध्येज्योतिः, प्रगाथः=
(९, १३, १५, १७ ककुप्, १०, १४, १६, १८ सतोबृहती)

ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये ।
यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥ १ ॥
पूर्वापुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम् ।
सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम् ॥ २ ॥
इह त्या पुरुभूतमा देवा नमोभिरश्विना ।
अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥ ३ ॥
युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति ।
अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥ ४ ॥
रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना ।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥ ५ ॥ [५]
दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि ॥ ६ ॥
उप नो वाजिनीवसू यातमृतस्य पथिभिः ।
येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः ॥ ७ ॥
अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू ।
आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥ ८ ॥
आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू । युञ्जाथां पीवरीरिषः ॥ ९ ॥
याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥१०॥ [६]
यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे । वयं गीर्भिर्विपन्यवः ॥११॥
ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम् ।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥१२॥ (५४०)

ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे । ता ऊ नमोभिरीमहे ॥१३॥
ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी ।
मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम् ॥१४॥
आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी । हुवे पितेव सोभरी ॥१५॥ [७]
मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः ।
आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥१६॥
आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा । गोमद्दस्रा हिरण्यवत् ॥१७॥
सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना ।
अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥१८॥ [८] (५४६)

॥ २३ ॥

१-३० विश्वमना वैयश्वः । अग्निः । उष्णिक् ।

ईळिष्वा हि प्रतीव्यं यजस्व जातवेदसम् । चरिष्णुधूममगृभीतशोचिषम् ॥ १ ॥
दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा । उत स्तुषे विष्पर्धसो रथानाम् ॥ २ ॥
येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे । उपविदा वह्निर्विन्दते वसु ॥ ३ ॥
उदस्य शोचिरस्थाद्दीदियुषो व्यजरम् । तपुर्जम्भस्य सुद्युतो गणश्रियः ॥ ४ ॥
उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा । अभिख्या भासा बृहता शुशुक्वनिः ॥ ५ ॥ [९]
अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् । यथा दूतो बभूथ हव्यवाहनः ॥ ६ ॥
अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम् । तमया वाचा गृणे तमु वः स्तुषे ॥ ७ ॥
यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत् । मित्रं न जने सुधितमृतावनि ॥ ८ ॥
ऋतावानमृतायवो यज्ञस्य साधनं गिरा । उपो एनं जुजुषुर्नमसस्पदे ॥ ९ ॥
अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः । होता यो अस्ति विक्ष्वा यशस्तमः ॥१०॥ [१०]
अग्ने तव त्ये अजरेन्धानासो बृहद्भाः । अश्वाइव वृषणस्तविषीयवः ॥११॥
स त्वं न ऊर्जां पते रयिं रास्व सुवीर्यम् । प्राव नस्तोके तनये समत्स्वा ॥१२॥
यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि । विश्वेदग्निः प्रति रक्षांसि सेधति ॥१३॥
श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते । नि मायिनस्तपुषा रक्षसो दह ॥१४॥
न तस्य मायया चन रिपुरीशीत मर्त्यः । यो अग्नये ददाश हव्यदातिभिः ॥१५॥ [११]
व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः । महो राये तमु त्वा समिधीमहि ॥१६॥ (५६२)

उशना काव्यस्त्वा नि होतारमसादयत् । आयजिं त्वा मनवे जातवेदसम् ॥१७॥
विश्वे हि त्वा सजोषसो देवासो दूतमक्रत । श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥१८॥
इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः । पावकं कृष्णवर्तनिं विहायसम् ॥१९॥
तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम् । विशामग्निमजरं प्रत्नमीड्यम् ॥२०॥ [१२]
यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् । भूरि पोषं स धत्ते वीरवद्यशः ॥२१॥
प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम् । प्रति स्रुगेति नमसा हविष्मती ॥२२॥
आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत् । मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥२३॥
नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत् । ऋषे वैयश्व दम्यायाग्नये ॥२४॥
अतिथिं मानुषाणां सूनुं वनस्पतीनाम् । विप्रा अग्निमवसे प्रत्नमीळते ॥२५॥ [१३]
महो विश्वाँ अभि षतोऽभि हव्यानि मानुषा । अग्ने नि षत्सि नमसाधि बर्हिषि ॥२६॥
वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः । सुवीर्यस्य प्रजावतो यशस्वतः ॥२७॥
त्वं वरो सुषाम्णेऽग्ने जनाय चोदय । सदा वसो रातिं यविष्ठ शश्वते ॥२८॥
त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः । महो रायः सातिमग्ने अपा वृधि ॥२९॥
अग्ने त्वं यशा अस्या मित्रावरुणा वह । ऋतावाना सम्राजा पूतदक्षसा ॥३०॥ [१४]
(५७६)

॥ २४ ॥

१-३० विश्वमना वैयश्वः । इन्द्रः, २८-३० वरुः सौषाम्णिः । उष्णिक्, ३० अनुष्टुप् ।

सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे । स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ १ ॥
शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा । मघैर्मघोनो अति शूर दाशसि ॥ २ ॥
स न स्तवान आ भर रयिं चित्रश्रवस्तमम् । निरेके चिद्यो हरिवो वसुर्ददिः ॥ ३ ॥
आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम् । धृषता धृष्णो स्तवमान आ भर ॥ ४ ॥
न ते सव्यं न दक्षिणं हस्तं वरन्त आमुरः । न परिबाधो हरिवो गविष्टिषु ॥ ५ ॥ [१५]
आ त्वा गोभिरिव व्रजं गीर्भिरृणोम्यद्रिवः । आ स्मा कामं जरितुरा मनः पृण ॥ ६ ॥
विश्वानि विश्वमनसो धिया नो वृत्रहन्तम । उग्र प्रणेतरधि षू वसो गहि ॥ ७ ॥
वयं ते अस्य वृत्रहन्विद्याम शूर नव्यसः । वसोः स्पार्हस्य पुरुहूत राधसः ॥ ८ ॥
इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः । अमृक्ता रातिः पुरुहूत दाशुषे ॥ ९ ॥
आ वृषस्व महामह महे नृतम राधसे । दृळ्हश्चिद्दृह्य मघवन्मघत्तये ॥१०॥ [१६]
नू अन्यत्रा चिदद्रिवस्त्वन्नो जग्मुराशसः । मघवञ्छग्धि तव तन्न ऊतिभिः ॥११॥ (५८७)

नह्यङ्ग नृतो त्वदन्यं विन्दामि राधसे । राये द्युम्नाय शवसे च गिर्वणः ॥१२॥
एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु । प्र राधसा चोदयाते महित्वना ॥१३॥
उपो हरीणां पतिं दक्षं पृञ्चन्तमब्रवम् । नूनं श्रुधि स्तुवतो अश्व्यस्य ॥१४॥
नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वत् । नकी राया नैवथा न भन्दना ॥१५॥ [१७]
एदु मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः । एवा हि वीरः स्तवते सदावृधः ॥१६॥
इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम् । उदानंश शवसा न भन्दना ॥१७॥
तं वो वाजानां पतिमहूमहि श्रवस्यवः । अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥१८॥
एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् । कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥१९॥
अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः । घृतात्स्वादीयो मधुनश्च वोचत ॥२०॥ [१८]
यस्यामितानि वीर्या न राधः पर्येतवे । ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥
स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् । अर्यो गयं मंहमानं वि दाशुषे ॥२२॥
एवा नूनमुप स्तुहि वैयश्व दशमं नवम् । सुविद्वांसं चर्कृत्यं चरणीनाम् ॥२३॥
वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् । अहरहः शुन्ध्युः परिपदामिव ॥२४॥
तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने । द्विता कुत्साय शिश्नथो नि चोदय ॥२५॥ [१९]
तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे । स त्वं नो विश्वा अभिमातीः सक्षणिः ॥२६॥
य ऋक्षादंहसो मुचद्यो वार्यात्सप्त सिन्धुषु । वधर्दासस्य तुविनृम्ण नीनमः ॥२७॥
यथा वरो सुषाम्णे सनिभ्य आवहो रयिम् । व्यश्वेभ्यः सुभगे वाजिनीवति ॥२८॥
आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः । स्थूरं च राधः शतवत्सहस्रवत् ॥२९॥
यत्त्वा पृच्छादीजानः कुहया कुहयाकृते । एषो अपश्रितो वलो गोमतीमव तिष्ठति ॥३०॥ [२०]
(६०६)

॥ २५ ॥

१-२४ विश्वमना वैयश्वः । मित्रावरुणौ, १०-१२ विश्वे देवाः । उष्णिक्, २३ उष्णिग्गर्भा ।

ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया । ऋतावाना यजसे पूतदक्षसा ॥ १ ॥
मित्रा तना न रथ्या वरुणो यश्च सुक्रतुः । सनात्सुजाता तनया धृतव्रता ॥ २ ॥
ता माता विश्ववेदसासुर्याय प्रमहसा । मही जजानादितिरृतावरी ॥ ३ ॥
महान्ता मित्रावरुणा सम्राजा देवावसुरा । ऋतावानावृतमा घोषतो बृहत् ॥ ४ ॥
नपाता शवसो महः सूनू दक्षस्य सुक्रतू । सृप्रदानू इषो वास्त्वधि क्षितः ॥ ५ ॥ [२१]
सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः । नभस्वतीरा वां चरन्तु वृष्टयः ॥ ६ ॥ (६१२)

अधि या बृहतो दिवोऽभि यूथेव पश्यतः । ऋतावाना सम्राजा नमसे हिता ॥ ७ ॥
ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू । धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥ ८ ॥
अक्ष्णश्चिद्गातुवित्तरानुल्बणेन चक्षसा । नि चिन्मिषन्ता निचिरा नि चिक्यतुः ॥९॥
उत नो देव्यदितिरुरुष्यतां नासत्या । उरुष्यन्तु मरुतो वृद्धशवसः ॥१०॥ [२२]
ते नो नावमुरुष्यत दिवा नक्तं सुदानवः । अरिष्यन्तो नि पायुभिः सचेमहि ॥११॥
अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे । श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये ॥१२॥
तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम् । मित्रो यत्पान्ति वरुणो यदर्यमा ॥१३॥
उत नः सिन्धुरपां तन्मरुतस्तदश्विना । इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ॥१४॥
ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित् । तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥१५॥ [२३]
अयमेक इत्था पुरूरु चष्टे वि विश्पतिः । तस्य व्रतान्यनु वश्चरामसि ॥१६॥
अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम । मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥
परि यो रश्मिना दिवोऽन्तान्ममे पृथिव्याः । उभे आ पप्रौ रोदसी महित्वा ॥१८॥
उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः । अग्निर्न शुक्रः समिधान आहुतः ॥१९॥
वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः । ईशे हि पित्वोऽविषस्य दावने ॥२०॥ [२४]
तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे । भोजेष्वस्माँ अभ्युच्चरा सदा ॥२१॥
ऋज्रमुक्षण्यायने रजतं हरयाणे । रथं युक्तमसनाम सुषामणि ॥२२॥
ता मे अश्व्यानां हरीणां नितोशना । उतो नु कृत्व्यानां नृवाहसा ॥२३॥
स्मदभीशू कशावन्ता विप्रा नविष्ठया मती । महो वाजिनावर्वन्ता सचासनम् ॥२४॥[२५](६३०)

॥ २६ ॥

१-२५ विश्वमना वैयश्वः व्यश्वो वाङ्गिरसः । अश्विनौ, २०-२५ वायुः । उष्णिक्; १६-१९,२१,२५ गायत्री; २०, अनुष्टुप् ।

युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु । अतूर्तदक्षा वृषणा वृषण्वसू ॥ १ ॥
युवं वरो सुषाम्णे महे तने नासत्या । अवोभिर्याथो वृषणा वृषण्वसू ॥ २ ॥
ता वामद्य हवामहे हव्येभिर्वाजिनीवसू । पूर्वीरिष इषयन्तावति क्षपः ॥ ३ ॥
आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा । उप स्तोमान्तुरस्य दर्शथः श्रिये ॥ ४ ॥
जुहुराणा चिदश्विना मन्येथां वृषण्वसू । युवं हि रुद्रा पर्षथो अति द्विषः ॥ ५ ॥ [२६]
दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः । धियंजिन्वा मधुवर्णा शुभस्पती ॥ ६ ॥ (६३६)

उप नो यातमश्विना राया विश्वपुषा सह । मघवाना सुवीरावनपच्युता ॥ ७ ॥
आ मे अस्य प्रतीव्यमिन्द्रनासत्या गतम् । देवा देवेभिरद्य सचनस्तमा ॥ ८ ॥
वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत् । सुमतिभिरुप विप्राविहा गतम् ॥ ९ ॥
अश्विना स्वृषे स्तुहि कुवित्ते श्रवतो हवम् । नेदीयसः कूळयातः पणीँरुत ॥१०॥ [२७]
वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः । सजोषसा वरुणो मित्रो अर्यमा ॥११॥
युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः । अहरहर्वृषणा मह्यं शिक्षतम् ॥१२॥
यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव । सपर्यन्ता शुभे चक्राते अश्विना ॥१३॥
यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम् । वर्तिरश्विना परि यातमस्मयू ॥१४॥
अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम् । विषुद्रुहेव यज्ञमूहथुर्गिरा ॥१५॥ [२८]
वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा । युवाभ्यां भूत्वश्विना ॥१६॥
यददो दिवो अर्णव इषो वा मदथो गृहे । श्रुतमिन्मे अमर्त्या ॥१७॥
उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम् । सिन्धुर्हिरण्यवर्तनिः ॥१८॥
स्मदेतया सुकीर्त्याश्विना श्वेतया धिया । वहेथे शुभ्रयावाना ॥१९॥
युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।
आन्नो वायो मधु पिबास्माकं सवना गहि ॥२०॥ [२९]
तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवांस्या वृणीमहे ॥२१॥
त्वष्टुर्जामातरं वयमीशानं राय ईमहे । सुतावन्तो वायुं द्युम्ना जनासः ॥२२॥
वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम् । वहस्व महः पृथुपक्षसा रथे ॥२३॥
त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे । ग्रावाणं नाश्वपृष्ठं मंहना ॥२४॥
स त्वं नो देव मनसा वायो मन्दानो अग्रियः । कृधि वाजाँ अपो धियः ॥२५॥ [३०] (६५५)

॥ २७ ॥

१-२२ मनुर्वैवस्वतः । विश्वे देवाः । प्रगाथः= (विषमा बृहती, समा सतोबृहती)।

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥ १ ॥
आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥ २ ॥ (६५७)

प्र सू न एत्वध्वरोऽग्ना देवेषु पूर्व्यः ।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥ ३ ॥
विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः ।
अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ॥ ४ ॥
आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ॥ ५ ॥ [३१]
अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥ ६ ॥
वयं वो वृक्तबर्हिषो हितप्रयस आनुषक् ।
सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ॥ ७ ॥
आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥ ८ ॥
वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद्दूराद्वसवो नू चिदन्तितो वरूथमादधर्षति ॥ ९ ॥
अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ॥१०॥ [३२]
इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।
उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ॥११॥
उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥१२॥
देवंदेवं वोऽवसे देवंदेवमभिष्टये ।
देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥१३॥
देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥१४॥
प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम् ।
न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥१५॥
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ॥१६॥ [३३] (६७१)

ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः ।
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ॥१७॥
अज्रे चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ॥१८॥
यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यन्दिने दिवः ॥१९॥
यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥२०॥
यदद्य सूर उदिते यन्मध्यन्दिन आतुचि ।
वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ॥२१॥
वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै ॥२२॥ [३४] (६७७)

॥ २८ ॥

१-५ मनुर्वैवस्वतः । विश्वे देवाः । गायत्री, ४ पुरउष्णिक् ।

ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् । विदन्नह द्वितासनन् ॥ १ ॥
वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः । पत्नीवन्तो वषट्कृताः ॥ २ ॥
ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक् । पुरस्तात्सर्वया विशा ॥ ३ ॥
यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत् । अरावा चन मर्त्यः ॥ ४ ॥
सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम् । सप्तो अधि श्रियो धिरे ॥ ५ ॥ [३५] (६८२)

॥ २९ ॥

१-१० मनुर्वैवस्वतः, कश्यपो वा मारीचः । विश्वे देवाः । द्विपदा विराट् ।

बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम् ॥ १ ॥
योनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ॥१॥ २ ॥
वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ॥ ३ ॥
वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥२॥ ४ ॥
तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥ ५ ॥ (६८७)

पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥३॥ ६ ॥
त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥ ७ ॥
विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥४॥ ८ ॥
सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥ ९ ॥
अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥५॥१०॥ [३६] (६९२)

॥ ३० ॥

१-४ मनुर्वैवस्वतः। विश्वे देवाः। १ गायत्री, २ पुरउष्णिक्, ३ बृहती, ४ अनुष्टुप्।

नहि वो अस्त्यर्भको देवासो न कुमारकः । विश्वे सतोमहान्त इत् ॥ १ ॥
इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च । मनोर्देवा यज्ञियासः ॥ २ ॥
ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत ।
मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥ ३ ॥
ये देवास इह स्थन विश्वे वैश्वानरा उत ।
अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥ ४ ॥[३७] (६९६)

॥ ३१ ॥

१-१८ मनुर्वैवस्वतः। १-४ यज्ञः, यजमानश्च, ५-९ दम्पती, १०-१८ दम्पत्याशिषः। गायत्री, ९, १४ अनुष्टुप्, १० पादनिचृत्, १५-१८ पङ्क्तिः।

(५)यो यजाति यजात इत्सुनवच्च पचाति च । ब्रह्मेदिन्द्रस्य चाकनत् ॥ १ ॥
पुरोळाशं यो अस्मै सोमं ररत आशिरम् । पादित्तं शक्रो अंहसः ॥ २ ॥
तस्य द्युमाँ असद्रथो देवजूतः स शूशुवत् । विश्वा वन्वन्नमित्रिया ॥ ३ ॥
अस्य प्रजावती गृहेऽसश्चन्ती दिवेदिवे । इळा धेनुमती दुहे ॥ ४ ॥
या दम्पती समनसा सुनुत आ च धावतः । देवासो नित्ययाशिरा ॥ ५ ॥ [३८]
प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिराशाते । न ता वाजेषु वायतः ॥ ६ ॥
न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः । श्रवो बृहद्विवासतः ॥ ७ ॥
पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः । उभा हिरण्यपेशसा ॥ ८ ॥
वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम् । समूधो रोमशं हतो देवेषु कृणुतो दुवः॥९॥
आ शर्म पर्वतानां वृणीमहे नदीनाम् । आ विष्णोः सचाभुवः ॥१०॥ [३९]
ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः । उरुरध्वा स्वस्तये ॥११॥ (७०७)

अरमतिरनर्वणो विश्वो देवस्य मनसा। आदित्यानामनेह इत् ॥१२॥
यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः। सुगा ऋतस्य पन्थाः ॥१३॥
अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम् ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥१४॥
मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१५॥
न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१६॥
नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१७॥
असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१८॥[४०]२*(७१४)

॥ ३२ ॥

१-३० मेधातिथिः काण्वः। इन्द्रः। गायत्री।

प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया । मदे सोमस्य वोचत ॥ १ ॥
यः सृबिन्दमनर्शनिं पिप्रुं दासमहीशुवम् । वधीदुग्रो रिणन्नपः ॥ २ ॥
न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर । कृषे तदिन्द्र पौंस्यम् ॥ ३ ॥
प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि । हुवे सुशिप्रमूतये ॥ ४ ॥
स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः । पुरं न शूर दर्षसि ॥ ५ ॥ [१]
यदि मे रारणः सुत उक्थे वा दधसे चनः । आरादुप स्वधा गहि ॥ ६ ॥
वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः। त्वं नो जिन्व सोमपाः ॥ ७ ॥
उत नः पितुमा भर संरराणो अविक्षितम् । मघवन्भूरि ते वसु ॥ ८ ॥
उत नो गोमतस्कृधि हिरण्यवतो अश्विनः । इळाभिः सं रभेमहि ॥ ९ ॥
बृबदुक्थं हवामहे सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे ॥१०॥ [२]
यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा । जरितृभ्यः पुरूवसुः ॥११॥
स नः शक्रश्चिदा शकद्दानवाँ अन्तराभरः । इन्द्रो विश्वाभिरूतिभिः ॥१२॥
यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा । तमिन्द्रमभि गायत ॥१३॥ (७२७)

आयन्तारं महि स्थिरं पृतनासु श्रवोजितम् । भूरेरीशानमोजसा ॥१४॥
नकिरस्य शचीनां नियन्ता सूनृतानाम् । नकिर्वक्ता न दादिति ॥१५॥ [३]
न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम् । न सोमो अप्रता पपे ॥१६॥
पन्य इदुप गायत पन्य उक्थानि शंसत । ब्रह्मा कृणोत पन्य इत् ॥१७॥
पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः । इन्द्रो यो यज्वनो वृधः ॥१८॥
वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः । इन्द्र पिब सुतानाम् ॥१९॥
पिब स्वधैनवानामुत यस्तुग्र्ये सचा । उतायमिन्द्र यस्तव ॥२०॥ [४]
अतीहि मन्युषाविणं सुषुवांसमुपारणे । इमं रातं सुतं पिब ॥२१॥
इहि तिस्रः परावत इहि पञ्च जनाँ अति । धेना इन्द्रावचाकशत् ॥२२॥
सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः। निम्नमापो न सध्र्यक् ॥२३॥
अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे । भरा सुतस्य पीतये ॥२४॥
य उद्नः फलिगं भिनन्न्यक्सिन्धूँरवासृजत् । यो गोषु पक्वं धारयत् ॥२५॥ [५]
अहन्वृत्रमृचीषम और्णवाभमहीशुवम् । हिमेनाविध्यदर्बुदम् ॥२६॥
प्र व उग्राय निष्टुरेऽषाळ्हाय प्रसक्षिणे । देवत्तं ब्रह्म गायत ॥२७॥
यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः । इन्द्रो देवेषु चेतति ॥२८॥
इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥२९॥
अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥३०॥[६](७३४)

॥ ३३ ॥

१-१९ मेध्यातिथिः काण्वः। इन्द्रः। बृहती, १६-१८ गायत्री, १९ अनुष्टुप्।

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ १ ॥
स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥ २ ॥
कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥ ३ ॥
पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥ ४ ॥ (७४८)

यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।
य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ॥ ५ ॥ [७]
यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः ।
विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ॥ ६ ॥
क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥ ७ ॥
दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥ ८ ॥
य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥ ९ ॥
सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥१०॥ [८]
वृषणस्ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो ॥११॥
वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर ।
वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् ॥१२॥
एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् ।
नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च सुक्रतुः ॥१३॥
वहन्तु त्वा रथेष्ठामा हरयो रथयुजः ।
तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो ॥१४॥
अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।
अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः ॥१५॥ [९]
नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति । यो अस्मान्वीर आनयत् ॥१६॥
इन्द्रश्चिद्घा तदब्रवीत्स्त्रिया अशास्यं मनः । उतो अह क्रतुं रघुम् ॥१७॥
सप्ती चिद्घा मदच्युता मिथुना वहतो रथम्। एवेद्धूर्वृष्ण उत्तरा ॥१८॥
अधः पश्यस्व मोपरि संतरां पादकौ हर ।
मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ ॥१९॥ [१०] (७६३)

॥ ३४ ॥

(१-१८) १-१५ नीपातिथिः काण्वः, १६-१८ सहस्रं वसुरोचिषोऽङ्गिरसः । इन्द्रः । अनुष्टुप्, १६-१८ गायत्री ।

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १ ॥
आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ २ ॥
अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ३ ॥
आ त्वा कण्वा इहावसे हवन्ते वाजसातये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ४ ॥
दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ५ ॥ [११]
स्मत्पुरंधिर्न आ गहि विश्वतोधीर्न ऊतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ६ ॥
आ नो याहि महेमते सहस्रोते शतामघ ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥
आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ॥
आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ९ ॥
आ याह्यर्य आ परि स्वाहा सोमस्य पीतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१०॥ [१२]
आ नो याह्युपश्रुत्युक्थेषु रणया इह ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥११॥
सरूपैरा सु नो गहि सम्भृतैः सम्भृताश्वः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१२॥ (७७५)

आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१३॥
आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१४॥
आ नः सहस्रशो भरायुतानि शतानि च ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥१५॥
आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः । ओजिष्ठमश्व्यं पशुम् ॥१६॥
य ऋज्रा वातरंहसोऽरुषासो रघुष्यदः । भ्राजन्ते सूर्या इव ॥१७॥
पारावतस्य रातिषु द्रवच्चक्रेष्वाशुषु । तिष्ठं वनस्य मध्य आ ॥१८॥ [१३] (७८१)

॥ ३५ ॥

१-२४ श्यावाश्व आत्रेयः । अश्विनौ । उपरिष्टाज्ज्योतिः, २२, २४ पङ्क्तिः, २३ महाबृहती ।

अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ १ ॥
विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ २ ॥
विश्वैर्देवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ ३ ॥
जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ४ ॥
स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ५ ॥
गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनाव गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ६ ॥ [१४]
हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ७ ॥
हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ८ ॥ (७८९)

श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ९ ॥
पिबतं च तृप्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥१०॥
जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥११॥
हतं च शत्रून्यततं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥१२॥ [१५]
मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१३॥
अङ्गिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१४॥
ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१५॥
ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१६॥
क्षत्रं जिन्वतमुत जिन्वतं नॄन्हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१७॥
धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१८॥ [१६]
अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥१९॥
सर्गाँ इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥२०॥
रश्मीँरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥२१॥
अर्वाग्रथं नि यच्छतं पिबतं सोम्यं मधु ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२२॥ (८०३)

नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२३॥
स्वाहाकृतस्य तृम्पतं सुतस्य देवावन्धसः ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२४॥ [१७] (८०५)

॥ ३६ ॥

१-७ श्यावाश्व आत्रेयः । इन्द्रः । शक्वरी, ७ महापङ्क्तिः ।

अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ १ ॥
प्राव स्तोतारं मघवन्नव त्वां पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ २ ॥
ऊर्जा देवाँ अवस्योजसा त्वां पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ३ ॥
जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ४ ॥
जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ५ ॥
अत्रीणां स्तोममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥ ६ ॥
श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥ ७ ॥ [१८] (८१२)

॥ ३७ ॥

१-७ श्यावाश्व आत्रेयः । इन्द्रः । १ अतिजगती, २-७ महापङ्क्तिः ।

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ १ ॥
सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ २ ॥ (८१४)

एकराळस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ३ ॥
सस्थावाना यवयसि त्वमेक इच्छचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ४ ॥
क्षेमस्य च प्रयुजश्च त्वमीशिषे शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ५ ॥
क्षत्राय त्वमवसि न त्वमाविथ शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यन्दिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ६ ॥
श्यावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥ ७ ॥ [१९] (८१९)

॥ ३८ ॥

१-१० श्यावाश्व आत्रेयः । इन्द्राग्नी । गायत्री ।

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इन्द्राग्नी तस्य बोधतम् ॥ १ ॥
तोशासा रथयावाना वृत्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥ २ ॥
इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः । इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥
जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती । इन्द्राग्नी आ गतं नरा ॥ ४ ॥
इमा जुषेथां सवना येभिर्हव्यान्यूहथुः । इन्द्राग्नी आ गतं नरा ॥ ५ ॥
इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम । इन्द्राग्नी आ गतं नरा ॥ ६ ॥ [२०]
प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू । इन्द्राग्नी सोमपीतये ॥ ७ ॥
श्यावाश्वस्य सुन्वतोऽत्रीणां शृणुतं हवम् । इन्द्राग्नी सोमपीतये ॥ ८ ॥
एवा वामह्व ऊतये यथाहुवन्त मेधिराः । इन्द्राग्नी सोमपीतये ॥ ९ ॥
आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे । याभ्यां गायत्रमृच्यते ॥ १० ॥ [२१] (८२९)

॥ ३९ ॥

१-१० नाभाकः काण्वः । अग्निः । महापङ्क्तिः ।

अग्निमस्तोष्यृग्मियमग्निमीळा यजध्यै ।
अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरन्तश्चरति दूत्यं१ नभन्तामन्यके समे ॥ १ ॥ (८३०)

न्यग्ने नव्यसा वचस्तनूषु शंसमेषाम् ।
न्यराती रराव्णां विश्वा अर्यो अरातीरितो युच्छन्त्वामुरो नभन्तामन्यके समे ॥ २ ॥
अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि ।
स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभन्तामन्यके समे ॥ ३ ॥
तत्तदग्निर्वयो दधे यथायथा कृपण्यति ।
ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्यै देवहूत्यै नभन्तामन्यके समे ॥ ४ ॥
स चिकेत सहीयसाग्निश्चित्रेण कर्मणा ।
स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं१ नभन्तामन्यके समे ॥ ५ ॥ [२२]
अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यम् ।
अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभन्तामन्यके समे ॥ ६ ॥
अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा ।
स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभन्तामन्यके समे ॥ ७ ॥
यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु ।
तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यज्ञेषु पूर्व्यं नभन्तामन्यके समे ॥ ८ ॥
अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः ।
स त्रीँरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभन्तामन्यके समे ॥ ९ ॥
त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरज्यसि ।
त्वामापः परिस्रुतः परि यन्ति स्वसेतवो नभन्तामन्यके समे ॥ १० ॥ [२३] (८३९)

॥ ४० ॥

१-१२ नाभाकः काण्वः । इन्द्राग्नी । महापङ्क्तिः, २ शक्वरी, १२ त्रिष्टुप् ।

इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।
येन दृळ्हा समत्स्वा वीळु चित्साहिषीमह्यग्निर्वनेव वात इन्नभन्तामन्यके समे ॥ १ ॥
नहि वां वव्रयामहेऽथेन्द्रमिद्यजामहे शविष्ठं नृणां नरम् ।
स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे ॥ २ ॥
ता हि मध्यं भराणामिन्द्राग्नी अधिक्षितः ।
ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभन्तामन्यके समे ॥ ३ ॥ (८४२)

अभ्यर्च नभाकवदिन्द्राग्नी यजसा गिरा ।
ययोर्विश्वमिदं जगदियं द्यौः पृथिवी मह्युपस्थे बिभृतो वसु नभन्तामन्यके समे ॥ ४ ॥
प्र ब्रह्माणि नभाकवदिन्द्राग्निभ्यामिरज्यत ।
या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इन्द्र ईशान ओजसा नभन्तामन्यके समे ॥ ५ ॥
अपि वृश्च पुराणवद्व्रततेरिव गुष्पितमोजो दासस्य दम्भय ।
वयं तदस्य संभृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे ॥ ६ ॥ [२४]
यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा ।
अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे ॥ ७ ॥
या नु श्वेताववो दिव उच्चरात उप द्युभिः ।
इन्द्राग्न्योरनु व्रतमुहाना यन्ति सिन्धवो यान्त्सीं बन्धादमुञ्चतां नभन्तामन्यके समे ॥ ८ ॥
पूर्वीष्ट इन्द्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः ।
वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे ॥ ९ ॥
तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम् ।
उतो नु चिद्य ओजसा शुष्णस्याण्डानि भेदति जेषत्स्वर्वतीरपो नभन्तामन्यके समे ॥ १० ॥
तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियम् ।
उतो नु चिद्य ओहत आण्डा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभन्तामन्यके समे ॥ ११ ॥
एवेन्द्राग्निभ्यां पितृवन्नवीयो मन्धातृवदङ्गिरस्वदवाचि ।
त्रिधातुना शर्मणा पातमस्मान्वयं स्याम पतयो रयीणाम् ॥ १२ ॥ [२५] (८५१)

॥ ४१ ॥

१-१० नाभाकः काण्वः । वरुणः । महापङ्क्तिः ।

अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः ।
यो धीता मानुषाणां पश्वो गा इव रक्षति नभन्तामन्यके समे ॥ १ ॥
तमू षु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे ॥ २ ॥
स क्षपः परि षस्वजे न्यु१स्रो मायया दधे स विश्वं परि दर्शतः ।
तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन्नभन्तामन्यके समे ॥ ३ ॥ (८५४)

यः ककुभो निधारयः पृथिव्यामधि दर्शतः ।
स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि गोपा इवेर्यो नभन्तामन्यके समे ॥ ४ ॥
यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या ।
स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे ॥ ५ ॥ [२६]
यस्मिन्विश्वानि काव्या चक्रे नाभिरिव श्रिता ।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वाँ अयुक्षत नभन्तामन्यके समे ॥ ६ ॥
य आस्वत्क आशये विश्वा जातान्येषाम् ।
परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे ॥ ७ ॥
स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे ।
स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे ॥ ८ ॥
यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।
त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे ॥ ९ ॥
यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता ।
स धाम पूर्व्यं ममे यः स्कम्भेन वि रोदसी अजो न द्यामधारयन्नभन्तामन्यके समे ॥ १० ॥ [२७] (८६१)

॥ ४२ ॥

१-६ नाभाकः काण्वः, अर्चनाना आत्रेयो वा । १-३ वरुणः, ४-६ अश्विनौ । १-३ त्रिष्टुप्, ४-६ अनुष्टुप् ।

अस्तभ्नाद्द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥ १ ॥
एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थे ॥ २ ॥
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥ ३ ॥
आ वां ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ४ ॥
यथा वामत्रिरश्विना गीर्भिर्विप्रो अजोहवीत् ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ५ ॥ (८६६)

एवा वामह्व ऊतये यथाहुवन्त मेधिराः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ६ ॥ [२८] (८८७)

॥ ४३ ॥

१-३३ विरूप आङ्गिरसः । अग्निः । गायत्री ।

(६) इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः । गिरः स्तोमास ईरते ॥ १ ॥
अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ॥ २ ॥
आरोका इव घेदह तिग्मा अग्ने तव त्विषः । दद्भिर्वनानि बप्सति ॥ ३ ॥
हरयो धूमकेतवो वातजूता उप द्यवि । यतन्ते वृथगग्नयः ॥ ४ ॥
एते त्ये वृथगग्नय इद्धासः समदृक्षत । उषसामिव केतवः ॥ ५ ॥ [२९]
कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः । अग्निर्यद्रोधति क्षमि ॥ ६ ॥
धासिं कृण्वान ओषधीर्बप्सदग्निर्न वायति । पुनर्यन्तरुणीरपि ॥ ७ ॥
जिह्वाभिरह नन्नमदर्चिषा जञ्जणाभवन् । अग्निर्वनेषु रोचते ॥ ८ ॥
अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ ९ ॥
उदग्ने तव तद्घृतादर्ची रोचत आहुतम् । निंसानं जुह्वो मुखे ॥१०॥ [३०]
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥११॥
उत त्वा नमसा वयं होतर्वरेण्यक्रतो । अग्ने समिद्भिरीमहे ॥१२॥
उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत । अङ्गिरस्वद्धवामहे ॥१३॥
त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्सता । सखा सख्या समिध्यसे ॥१४॥
स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम् । अग्ने वीरवतीमिषम् ॥१५॥ [३१]
अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत । इमं स्तोमं जुषस्व मे ॥१६॥
उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते । गोष्ठं गाव इवाशत ॥१७॥
तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥१८॥
अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः । अद्मसद्याय हिन्विरे ॥१९॥
तं त्वामज्मेषु वाजिनं तन्वाना अग्ने अध्वरम् । वह्निं होतारमीळते ॥२०॥ [३२]
पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥२१॥
तमीळिष्व य आहुतोऽग्निर्विभ्राजते घृतैः । इमं नः शृणवद्धवम् ॥२२॥
तं त्वा वयं हवामहे शृण्वन्तं जातवेदसम् । अग्ने घ्नन्तमप द्विषः ॥२३॥ (८९०)

विशां राजानमद्भुतमध्यक्षं धर्मणामिमम् । अग्निमीळे स उ श्रवत् ॥२४॥
अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितम् । सप्तिं न वाजयामसि ॥२५॥ [३३]
घ्नन्मृध्राण्यप द्विषो दहन्रक्षांसि विश्वहा । अग्ने तिग्मेन दीदिहि ॥२६॥
यं त्वा जनास इन्धते मनुष्वदङ्गिरस्तम । अग्ने स बोधि मे वचः ॥२७॥
यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत । तं त्वा गीर्भिर्हवामहे ॥२८॥
तुभ्यं घेत्ते जना इमे विश्वाः सुक्षितयः पृथक् । धासिं हिन्वन्त्यत्तवे ॥२९॥
ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः । तरन्तः स्याम दुर्गहा ॥३०॥ [३४]
अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम् । हृद्भिर्मन्द्रेभिरीमहे ॥३१॥
स त्वमग्ने विभावसुः सृजन्सूर्यो न रश्मिभिः । शर्धन्तमांसि जिघ्नसे ॥३२॥
तत्ते सहस्व ईमहे दात्रं यन्नोपदस्यति । त्वदग्ने वार्यं वसु ॥३३॥ [३५] (९००)

॥ ४४ ॥

१-३० विरूप आङ्गिरसः । अग्निः । गायत्री ।

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥ १ ॥
अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना । प्रति सूक्तानि हर्य नः ॥ २ ॥
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ आ सादयादिह ॥ ३ ॥
उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः । अग्ने शुक्रास ईरते ॥ ४ ॥
उप त्वा जुह्वो मम घृताचीर्यन्तु हर्यत । अग्ने हव्या जुषस्व नः ॥ ५ ॥ [३६]
मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम् । अग्निमीळे स उ श्रवत् ॥ ६ ॥
प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुम् । अध्वराणामभिश्रियम् ॥ ७ ॥
जुषाणो अङ्गिरस्तमेमा हव्यान्यानुषक् । अग्ने यज्ञं नय ऋतुथा ॥ ८ ॥
समिधान उ सन्त्य शुक्रशोच इहा वह । चिकित्वान्दैव्यं जनम् ॥ ९ ॥
विप्रं होतारमद्रुहं धूमकेतुं विभावसुम् । यज्ञानां केतुमीमहे ॥१०॥ [३७]
अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः । भिन्धि द्वेषः सहस्कृत ॥११॥
अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं स्वाम् । कविर्विप्रेण वावृधे ॥१२॥
ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम् । अस्मिन्यज्ञे स्वध्वरे ॥१३॥
स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा । देवैरा सत्सि बर्हिषि ॥१४॥
यो अग्निं तन्वो दमे देवं मर्तः सपर्यति । तस्मा इद्दीदयद्वसु ॥१५॥ [३८] (९१५)

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥१६॥
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतींष्यर्चयः ॥१७॥
ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः । स्तोता स्यां तव शर्मणि ॥१८॥
त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः । त्वां वर्धन्तु नो गिरः ॥१९॥
अदब्धस्य स्वधावतो दूतस्य रेभतः सदा । अग्नेः सख्यं वृणीमहे ॥२०॥ [३९]
अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥२१॥
उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा । अग्ने सख्यस्य बोधि नः ॥२२॥
यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम् । स्युष्टे सत्या इहाशिषः ॥२३॥
वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥२४॥
अग्ने धृतव्रताय ते समुद्रायेव सिन्धवः । गिरो वाश्रास ईरते ॥२५॥ [४०]
युवानं विश्पतिं कविं विश्वादं पुरुवेपसम् । अग्निं शुम्भामि मन्मभिः ॥२६॥
यज्ञानां रथ्ये वयं तिग्मजम्भाय वीळवे । स्तोमैरिषेमाग्नये ॥२७॥
अयमग्ने त्वे अपि जरिता भूतु सन्त्य । तस्मै पावक मृळय ॥२८॥
धीरो ह्यस्यद्मसद्विप्रो न जागृविः सदा । अग्ने दीदयसि द्यवि ॥२९॥
पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे । प्र ण आयुर्वसो तिर ॥३०॥ [४१] (९३०)

॥ ४५ ॥

१-४२ त्रिशोकः काण्वः । इन्द्रः, १ अग्नीन्द्रौ । गायत्री ।

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥ १ ॥
बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥ २ ॥
अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः । येषामिन्द्रो युवा सखा ॥ ३ ॥
आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम् । क उग्राः के ह शृण्विरे ॥ ४ ॥
प्रति त्वा शवसी वदद्गिरावप्सो न योधिषत् । यस्ते शत्रुत्वमाचके ॥ ५ ॥ [४२]
उत त्वं मघवञ्छृणु यस्ते वष्टि ववक्षि तत् । यद्वीळयासि वीळु तत् ॥ ६ ॥
यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुप । रथीतमो रथीनाम् ॥ ७ ॥
वि षु विश्वा अभियुजो वज्रिन्विष्वग्यथा वृह । भवा नः सुश्रवस्तमः ॥ ८ ॥
अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये । न यं धूर्वन्ति धूर्तयः ॥ ९ ॥
वृज्याम ते परि द्विषोऽरं ते शक्र दावने । गमेमेदिन्द्र गोमतः ॥१०॥ [४३] (९४०)

शनैश्चिद्यन्तो अद्रिवोऽश्वावन्तः शतग्विनः । विवक्षणा अनेहसः ॥११॥
ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता । जरितृभ्यो विमंहते ॥१२॥
विद्मा हि त्वा धनंजयमिन्द्र दृळ्हा चिदारुजम् । आदारिणं यथा गयम् ॥१३॥
ककुहं चित्त्वा कवे मन्दन्तु धृष्णविन्दवः । आ त्वा पणिं यदीमहे ॥१४॥
यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये । तस्य नो वेद आ भर ॥१५॥ [४४]
इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥१६॥
उत त्वाबधिरं वयं श्रुत्कर्णं सन्तमूतये । दूरादिह हवामहे ॥१७॥
यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत । भवेरापिर्नो अन्तमः ॥१८॥
यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि । गोदा इदिन्द्र बोधि नः ॥१९॥
आ त्वा रम्भं न जिव्रयो ररभ्मा शवसस्पते । उश्मसि त्वा सधस्थ आ ॥२०॥ [४५]
स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने । नकिर्यं वृण्वते युधि ॥२१॥
अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥२२॥
मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् । माकीं ब्रह्मद्विषो वनः ॥२३॥
इह त्वा गोपरीणसा महे मन्दन्तु राधसे । सरो गौरो यथा पिब ॥२४॥
या वृत्रहा परावति सना नवा च चुच्युवे । ता संसत्सु प्र वोचत ॥२५॥ [४६]
अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे । अत्रादेदिष्ट पौंस्यम् ॥२६॥
सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यम् । व्यानट् तुर्वणे शमि ॥२७॥
तरणिं वो जनानां त्रदं वाजस्य गोमतः । समानमु प्र शंसिषम् ॥२८॥
ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम् । इन्द्रं सोमे सचा सुते ॥२९॥
यः कृन्तदिद्वि योन्यं त्रिशोकाय गिरिं पृथुम् । गोभ्यो गातुं निरेतवे ॥३०॥ [४७]
यद्दधिषे मनस्यसि मन्दानः प्रेदियक्षसि । मा तत्करिन्द्र मृळय ॥३१॥
दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि । जिगात्विन्द्र ते मनः ॥३२॥
तवेदु ताः सुकीर्तयोऽसन्नुत प्रशस्तयः । यदिन्द्र मृळयासि नः ॥३३॥
मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु ॥३४॥
बिभया हि त्वावत उग्रादभिप्रभङ्गिणः । दस्मादहमृतीषहः ॥३५॥ [४८]
मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो । आवृत्वद्भूतु ते मनः ॥३६॥
को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ॥३७॥
एवारे वृषभा सुतेऽसिन्वन्भूर्यावयः । श्वघ्नीव निवता चरन् ॥३८॥ (९६८)

आ तं एता वचोयुजा हरी गृभ्णे सुमद्रथा । यदीं ब्रह्मभ्य इद्ददः ॥३९॥
भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः । वसु स्पार्हं तदा भर ॥४०॥
यद्वीळाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् । वसु स्पार्हं तदा भर ॥४१॥
यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति । वसु स्पार्हं तदा भर ॥४२॥ [४९]३※(९७२)

॥ ४६ ॥

१-३३ वशोऽश्व्यः । इन्द्रः, २१-२४ पृथुश्रवाः कानीतः, २५-२८, ३२ वायुः । गायत्री, १ पादनिचृत्, ५ ककुप्, ७ बृहती, ८ अनुष्टुप्, ९ सतोबृहती, ११-१२ विपरीतोत्तरः प्रगाथः=(बृहती, विपरीता), १३ द्विपदा जगती, १४ बृहती पिपीलिकमध्या, १५ ककुम्न्यंकुशिरा, १६ विराट्, १७ जगती, १८ उपरिष्टाद्बृहती, १९ बृहती, २० विषमपदा बृहती, २१,२४ पङ्क्तिः, २२ संस्तारपङ्क्तिः, २५-२८ प्रगाथः=(बृहती, सतोबृहती), ३० द्विपदा विराट्, ३१ उष्णिक्, ३२ पङ्क्तिः ।

त्वावतः पुरूवसो वयमिन्द्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥ १ ॥
त्वां हि सत्यमद्रिवो विद्म दातारमिषाम् । विद्म दातारं रयीणाम् ॥ २ ॥
आ यस्य ते महिमानं शतमूते शतक्रतो । गीर्भिर्गृणन्ति कारवः ॥ ३ ॥
सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा । मित्रः पान्त्यद्रुहः ॥ ४ ॥
दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते । सदा राया पुरुस्पृहा ॥ ५ ॥ [१]
तमिन्द्रं दानमीमहे शवसानमभीर्वम् । ईशानं राय ईमहे ॥ ६ ॥
तस्मिन्हि सन्त्यूतयो विश्वा अभीरवः सचा ।
तमा वहन्तु सप्तयः पुरूवसुं मदाय हरयः सुतम् ॥ ७ ॥
यस्ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः ।
य आददिः स्वर्नृभिर्यः पृतनासु दुष्टरः ॥ ८ ॥
यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता ।
स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥ ९ ॥
गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्य महामह ॥१०॥ [२]
नहि ते शूर राधसोऽन्तं विन्दामि सत्रा ।
दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥११॥
य ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥१२॥
स नो वाजेष्वविता पुरूवसुः पुरःस्थाता मघवा वृत्रहा भुवत् ॥१३॥ (९८५)

अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥१४॥
ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनम् । नूनमथ ॥१५॥ [३]
विश्वेषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः । कृपयतो नूनमत्यथ ॥१६॥
महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये ।
यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा ॥१७॥
ये पातयन्ते अज्मभिर्गिरीणां स्नुभिरेषाम् ।
यज्ञं महिष्वणीनां सुम्नं तुविष्वणीनां प्राध्वरे ॥१८॥
प्रभङ्गं दुर्मतीनामिन्द्र शविष्ठा भर । रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥१९॥
सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत ।
प्रासहा सम्राट् सहुरिं सहन्तं भुज्युं वाजेषु पूर्व्यम् ॥२०॥ [४]
आ स एतु य ईवदाँ अदेवः पूर्तमाददे ।
यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीतेऽस्या व्युष्याददे ॥२१॥
षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्राणां विंशतिं शता ।
दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा ॥२२॥
दश श्यावा ऋधद्रयो वीतवारास आशवः । मथ्रा नेमिं नि वावृतुः ॥२३॥
दानासः पृथुश्रवसः कानीतस्य सुराधसः ।
रथं हिरण्ययं ददन्मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः ॥२४॥
आ नो वायो महे तने याहि मखाय पाजसे ।
वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ॥२५॥ [५]
यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्ततीनाम् ।
एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः ॥२६॥
यो म इमं चिदु त्मनामन्दच्चित्रं दावने ।
अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥२७॥
उचथ्ये वपुषि यः स्वराळुत वायो घृतस्नाः ।
अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत् ॥२८॥ (१०००)

अध प्रियमिषिराय षष्टिं सहस्रासनम् । अश्वानामिन्न वृष्णाम् ॥२९॥
गावो न यूथमुप यन्ति वध्रय उप मा यन्ति वध्रयः ॥३०॥
अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत् । अध श्वित्नेषु विंशतिं शता ॥३१॥
शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे ।
ते ते वायविमे जना मदन्तीन्द्रगोपा मदन्ति देवगोपाः ॥३२॥
अध स्या योषणा मही प्रतीची वशमश्व्यम् । अधिरुक्मा वि नीयते ॥३३॥ [६](१००१)

॥ ४७ ॥

१-१८ त्रित आप्त्यः । आदित्याः, १४-१८ आदित्योषसः (दुःस्वप्नघ्नं) । महापङ्क्तिः ।

महि वो महतामवो वरुण मित्र दाशुषे ।
यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ १ ॥
विदा देवा अघानामादित्यासो अपाकृतिम् ।
पक्षा वयो यथोपरि व्यस्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ २ ॥
व्यस्मे अधि शर्म तत्पक्षा वयो न यन्तन ।
विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ३ ॥
यस्मा अरासत क्षयं जीवातुं च प्रचेतसः ।
मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ४ ॥
परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा ।
स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ५ ॥ [७]
परिह्वृतेदना जनो युष्मादत्तस्य वायति ।
देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ६ ॥
न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु ।
यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ७ ॥
युष्मे देवा अपि ष्मसि युध्यन्तइव वर्मसु ।
यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ८ ॥ (१०१३)

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु ।
माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः ॥ ९ ॥
यद्देवाः शर्म शरणं यद्भद्रं यदनातुरम् ।
त्रिधातु यद्वरूथ्यं तदस्मासु वि यन्तनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१०॥ [८]
आदित्या अव हि ख्यताधि कूलादिव स्पशः ।
सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥११॥
नेह भद्रं रक्षस्विने नावयै नोपया उत ।
गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१२॥
यदाविर्यदपीच्यं देवासो अस्ति दुष्कृतम् ।
त्रिते तद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१३॥
यच्च गोषु दुष्ष्वप्न्यं यच्चास्मे दुहितर्दिवः ।
त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१४॥
निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः ।
त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१५॥ [९]
तदन्नाय तदपसे तं भागमुपसेदुषे ।
त्रिताय च द्विताय चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१६॥
यथा कलां यथा शफं यथ ऋणं संनयामसि ।
एवा दुष्ष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१७॥
अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्माद्दुष्ष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१८॥ [१०](१०२३)

॥ ४८ ॥

१-१५ प्रगाथो घौरः काण्वः । सोमः । त्रिष्टुप्, ५ जगती ।

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥ १ ॥
अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य ।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥ २ ॥ (१०२५)

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥ ३ ॥

शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥ ४ ॥

इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु ।
ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ॥ ५ ॥ [११]

अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।
अथा हि ते मद आ सोम मन्ये रेवाँइव प्र चरा पुष्टिमच्छ ॥ ६ ॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥ ७ ॥

सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्याइस्तस्य विद्धि ।
अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ॥ ८ ॥

त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः ।
यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥ ९ ॥

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।
अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥१०॥ [१२]

अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः ।
आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ॥११॥

यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश ।
तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥१२॥

त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥१३॥

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥१४॥

त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥१५॥ [१३] (१०३८)

अथ वालखिल्यम् ।

॥ ४९ ॥ [१]

१-१० प्रस्कण्वः काण्वः । इन्द्रः । प्रगाथः=(विषमा बृहती, समा सतोबृहती)।

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ १ ॥

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ २ ॥

आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ।
आपो न वज्रिन्नन्वोक्यं सरः पृणन्ति शूर राधसे ॥ ३ ॥

अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥ ४ ॥

आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः ।
यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥ ५ ॥ [१४]

उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुम् ।
उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ॥ ६ ॥
यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि ।
अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहि ॥ ७ ॥
अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।
येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥ ८ ॥

एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः ।
यथा प्रावो मघवन्मेध्यातिथिं यथा नीपातिथिं धने ॥ ९ ॥
यथा कण्वे मघवन्त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोर्ऋजिश्वनीन्द्र गोमद्धिरण्यवत् ॥१०॥[१५](१०४८)

॥ ५० ॥ [२]

१-१० पुष्टिगुः काण्वः । इन्द्रः । प्रगाथः=(विषमा बृहती, समा सतोबृहती)।

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥ १ ॥
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥ २ ॥
यदीं सुतास इन्दवोऽभि प्रियममन्दिषुः ।
आपो न धायि सवनं म आ वसो दुघा इवोप दाशुषे ॥ ३ ॥
अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥ ४ ॥
आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।
यं ते स्वदावन्त्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ॥ ५ ॥ [१६]
प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ॥ ६ ॥
यद्ध नूनं परावति यद्वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि ॥ ७ ॥
रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥ ८ ॥
एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥ ९ ॥
यथा कण्वे मघवन्मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥१०॥ [१७](१०५८)

॥ ५१ ॥ [३]

१-१० श्रुष्टिगुः काण्वः । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती)।

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।
नीपातिथौ मघवन्मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥ १ ॥ (१०५९)

पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।
सहस्राण्यसिषासद्गवामृषिस्त्वोतो दस्यवे वृकः ॥ २ ॥
य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे ॥ ३ ॥
यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्वि१मा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ॥ ४ ॥
यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥ ५ ॥[१८]
यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ ६ ॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ७ ॥
प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदस्तम्भीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥ ८ ॥
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ९ ॥
तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥१०॥[१९](१०६८)

॥ ५२ ॥ [४]

१-१० आयुः काण्वः । इन्द्रः । प्रगाथः = (विषमा बृहती, समा सतोबृहती)।

यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा ॥ १ ॥
पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥ २ ॥
य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥ ३ ॥ (१०७१)

यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।
तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥ ४ ॥
यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नः ॥ ५ ॥ [२०]
यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥ ६ ॥
कदा चन प्र युच्छस्युभे नि पासि जन्मनी ।
तुरीयादित्य हवनं त इन्द्रियमा तस्थावमृतं दिवि ॥ ७ ॥
यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ॥ ८ ॥
अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ ९ ॥
समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥१०॥ [२१] (१०७८)

॥ ५३ ॥ [५]

१-८ मेध्यः काण्वः । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् ।
पूर्भित्तमं मघवन्निन्द्र गोविदमीशानं राय ईमहे ॥ १ ॥
य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥ २ ॥
आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः ।
ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥ ३ ॥
विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु ।
शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ४ ॥ [२२]
इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥ ५ ॥ (१०८३)

आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ॥ ६ ॥
यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते ।
वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ॥ ७ ॥
अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः ।
त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम् ॥ ८ ॥ [२३] (१०८६)

॥ ५४ ॥ [६]

१-८ मातरिश्वा काण्वः । इन्द्रः, ३-४ विश्वे देवाः । प्रगाथः = (विषमा बृहती, समा सतोबृहती) ।

एतत्त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।
ते स्तोभन्त ऊर्जमावन्घृतश्चुतं पौरासो नक्षन्धीतिभिः ॥ १ ॥
नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व ॥ २ ॥
आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम् ॥ ३ ॥
पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ॥ ४ ॥ [२४]
यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ॥ ५ ॥
आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो ।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ॥ ६ ॥
सन्ति ह्यर्य आशिष इन्द्र आयुर्जनानाम् ।
अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ॥ ७ ॥
वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ॥ ८ ॥ [२५] (१०९४)

॥ ५५ ॥ [७]

१-५ कृशः काण्वः । इन्द्रः, प्रस्कण्वश्च । गायत्री, ३,५ अनुष्टुप् ।

भूरीदिन्द्रस्य वीर्यं व्यख्यमभ्यायति । राधस्ते दस्यवे वृक ॥ १ ॥
शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते । मह्ना दिवं न तस्तभुः ॥ २ ॥
शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि ।
शतं मे बल्बजस्तुका अरुषीणां चतुःशतम् ॥ ३ ॥
सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः । अश्वासो न चङ्क्रमत ॥ ४ ॥
आदित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः ।
श्यावीरतिध्वसन्पथश्चक्षुषा चन संनशे ॥ ५ ॥ [२६] (१०९९)

॥ ५६ ॥ [८]

१-५ पृषध्रः काण्वः । इन्द्रः, ५ अग्निसूर्यौ । गायत्री, ५ पङ्क्तिः ।

प्रति ते दस्यवे वृक राधो अदर्श्यह्रयम् । द्यौर्न प्रथिना शवः ॥ १ ॥
दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः । नित्याद्रायो अमंहत ॥ २ ॥
शतं मे गर्दभानां शतमूर्णावतीनाम् । शतं दासाँ अति स्रजः ॥ ३ ॥
तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता । अश्वानामिन्न यूथ्याम् ॥ ४ ॥
अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत ॥ ५ ॥ [२७] (११०४)

॥ ५७ ॥ [९]

१-४ मेध्यः काण्वः । अश्विनौ । त्रिष्टुप् ।

युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।
आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥ १ ॥
युवां देवास्त्रय एकादशासः सत्याः सत्यस्य ददृशे पुरस्तात् ।
अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥ २ ॥
पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप याता पिबध्यै ॥ ३ ॥ (११०७)

अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः ॥ ४ ॥ [२८] (११०८)

॥ ५८ ॥ [१०]

१-३ मेध्यः काण्वः । विश्वे देवाः, १ ऋत्विजो वा । त्रिष्टुप् ।

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत्का स्वित्तत्र यजमानस्य संवित् ॥ १ ॥
एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ॥ २ ॥
ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ॥ ३ ॥ [२९] (११११)

॥ ५९ ॥ [११]

१-७ सुपर्णः काण्वः । इन्द्रावरुणौ । जगती ।

इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम् ।
यज्ञेयज्ञे ह सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः ॥ १ ॥
निष्षिध्वरीरोषधीराप आस्तामिन्द्रावरुणा महिमानमाशत ।
या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते ॥ २ ॥
सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥ ३ ॥
घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वामिन्द्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतम् ॥ ४ ॥ [३०]
अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।
अस्मान्त्स्विन्द्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती ॥ ५ ॥
इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।
यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ॥ ६ ॥
इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।
प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥ ७ ॥ [३१] (१११८)

॥ इति वालखिल्यं समाप्तम् ॥

॥ ६० ॥

१-२० भर्गः प्रागाथः । अग्निः । प्रगाथः=(विषमा बृहती, समा सतोबृहती) ।

(७) अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १ ॥
अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ २ ॥
अग्ने कविर्वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः ॥ ३ ॥
अद्रोघमा वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।
अभि प्रयांसि सुधिता वसो गहि मन्दस्व धीतिभिर्हितः ॥ ४ ॥
त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतस्कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ५ ॥ [३२]
शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि ।
देवानां शर्मन्मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥ ६ ॥
यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि ।
एवा दह मित्रमहो यो अस्मध्रुग्दुर्मन्मा कश्च वेनति ॥ ७ ॥
मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः ।
अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥ ८ ॥
पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ९ ॥
पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥१०॥ [३३]
आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥११॥
येन वंसाम पृतनासु शर्धतस्तरन्तो अर्य आदिशः ।
स त्वं नो वर्ध प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥१२॥
शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥१३॥ (११३१)

नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद्वितिष्ठसे ।
स त्वं नो होतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु ॥१४॥
शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्या वहसि हविष्कृत आदिद्देवेषु राजसि ॥१५॥ [३४]
सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयम् ।
भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥१६॥
अग्निमग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः ।
अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनाम् ॥१७॥
केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना ।
इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥१८॥
अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः ।
अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः ॥१९॥
मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावताम् ।
परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः ॥२०॥ [३५](११३८)

॥ ६१ ॥

१-१८ भर्गः प्रागाथः । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥ १ ॥
तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ २ ॥
आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।
विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिदधृष्वणिम् ॥ ३ ॥
अप्रामिसत्य मघवन्तथेदसदिन्द्र क्रत्वा यथा वशः ।
सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः ॥ ४ ॥
शग्ध्यू षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ ५ ॥ [३६](११४३)

पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर ॥ ६ ॥
त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥ ७ ॥
त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे ।
आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥ ८ ॥
अविप्रो वा यदविधद्विप्रो वेन्द्र ते वचः ।
स प्र ममन्दत्त्वाया शतक्रतो प्राचामन्यो अहंसन ॥ ९ ॥
उग्रबाहुर्म्रक्षकृत्वा पुरन्दरो यदि मे शृणवद्धवम् ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥१०॥ [३७]
न पापासो मनामहे नारायासो न जल्हवः ।
यदिन्न्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥११॥
उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यम् ।
वेदा भृमं चित्सनिता रथीतमो वाजिनं यमिदू नशत् ॥१२॥
यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥१३॥
त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥१४॥
इन्द्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥१५॥ [३८]
त्वं नः पश्चादधरादुत्तरात्पुर इन्द्र नि पाहि विश्वतः ।
आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥१६॥
अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१७॥
प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो वीर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥१८॥ [३९] (११५६)

॥ ६२ ॥

१-१२ प्रगाथो घौरः काण्वः । इन्द्रः । पङ्क्तिः, ७-९ बृहती ।

प्रो अस्मा उपस्तुतिं भरता यज्जुजोषति ।
उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः ॥ १ ॥
अयुजो असमो नृभिरेकः कृष्टीरयास्यः ।
पूर्वीरति प्र वावृधे विश्वा जातान्योजसा भद्रा इन्द्रस्य रातयः ॥ २ ॥
अहितेन चिदर्वता जीरदानुः सिषासति ।
प्रवाच्यमिन्द्र तत्तव वीर्याणि करिष्यतो भद्रा इन्द्रस्य रातयः ॥ ३ ॥
आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।
येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इन्द्रस्य रातयः ॥ ४ ॥
धृषतश्चिद्धृषन्मनः कृणोषीन्द्र यत्त्वम् ।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ॥ ५ ॥
अव चष्ट ऋचीषमोऽवताँ इव मानुषः ।
जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इन्द्रस्य रातयः ॥ ६ ॥ [४०]
विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।
भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥ ७ ॥
गृणे तदिन्द्र ते शव उपमं देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ॥ ८ ॥
समनेव वपुष्यतः कृणवन्मानुषा युगा ।
विदे तदिन्द्रश्चेतनमध श्रुतो भद्रा इन्द्रस्य रातयः ॥ ९ ॥
उज्जातमिन्द्र ते शव उत्त्वामुत्तव क्रतुम् ।
भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि भद्रा इन्द्रस्य रातयः ॥१०॥
अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ ।
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥११॥
सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः ॥१२॥ [४१] (११६८)

॥ ६३ ॥

१-१२ प्रगाथः काण्वः । इन्द्रः, १२ देवाः । गायत्री; १, ४-५, ७ अनुष्टुप्; १२ त्रिष्टुप् ।

स पूर्व्यो महानां वेनः क्रतुभिरानजे । यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥ १ ॥
दिवो मानं नोत्सदन्त्सोमपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या ॥ २ ॥
स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप । स्तुषे तदस्य पौंस्यम् ॥ ३ ॥
स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः । शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे ॥ ४ ॥
आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः । श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने ॥ ५ ॥
इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च । यमर्का अध्वरं विदुः ॥ ६ ॥ [४२]
यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत । अस्तृणाद्बर्हणा विपोऽर्यो मानस्य स क्षयः ॥ ७ ॥
इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या । प्रावश्चक्रस्य वर्तनिम् ॥ ८ ॥
अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे । यवं न पश्व आ ददे ॥ ९ ॥
तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः । स्याम मरुत्वतो वृधे ॥१०॥
बळृत्वियाय धाम्न ऋक्वभिः शूर नोनुमः । जेषामेन्द्र त्वया युजा ॥११॥
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥१२॥ [४३] (११८०)

॥ ६४ ॥

१-१२ प्रगाथः काण्वः । इन्द्रः । गायत्री ।

उत्त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥ १ ॥
पदा पणीँरराधसो नि बाधस्व महाँ असि । नहि त्वा कश्चन प्रति ॥ २ ॥
त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् । त्वं राजा जनानाम् ॥ ३ ॥
एहि प्रेहि क्षयो दिव्याघोषञ्चर्षणीनाम् । ओभे पृणासि रोदसी ॥ ४ ॥
त्यं चित्पर्वतं गिरिं शतवन्तं सहस्रिणम् । वि स्तोतृभ्यो रुरोजिथ ॥ ५ ॥
वयमु त्वा दिवा सुते वयं नक्तं हवामहे । अस्माकं काममा पृण ॥ ६ ॥ [४४]
क्व स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ॥ ७ ॥
कस्य स्वित्सवनं वृषा जुजुष्वाँ अव गच्छति । इन्द्रं क उ स्विदा चके ॥ ८ ॥
कं ते दाना असक्षत वृत्रहन्कं सुवीर्या । उक्थे क उ स्विदन्तमः ॥ ९ ॥ (११८९)
६७

अयं ते मानुषे जने सोमः पूरुषु सूयते । तस्येहि प्र द्रवा पिब ॥१०॥
अयं ते शर्यणावति सुषोमायामधि प्रियः । आर्जीकीये मदिन्तमः ॥११॥
तमद्य राधसे महे चारुं मदाय घृष्वये । एहीमिन्द्र द्रवा पिब ॥१२॥ [४५] (११९२)

॥ ६५ ॥

१-१२ प्रगाथः काण्वः । इन्द्रः । गायत्री ।

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः । आ याहि तूयमाशुभिः ॥ १ ॥
यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे । यद्वा समुद्रे अन्धसः ॥ २ ॥
आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे । इन्द्र सोमस्य पीतये ॥ ३ ॥
आ त इन्द्र महिमानं हरयो देव ते महः । रथे वहन्तु बिभ्रतः ॥ ४ ॥
इन्द्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत् । एहि नः सुतं पिब ॥ ५ ॥
सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे । इदं नो बर्हिरासदे ॥ ६ ॥ [४६]
यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् । तं त्वा वयं हवामहे ॥ ७ ॥
इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः । जुषाण इन्द्र तत्पिब ॥ ८ ॥
विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि । अस्मे धेहि श्रवो बृहत् ॥ ९ ॥
दाता मे पृषतीनां राजा हिरण्यवीनाम् । मा देवा मघवा रिषत् ॥१०॥
सहस्रे पृषतीनामधि श्चन्द्रं बृहत्पृथु । शुक्रं हिरण्यमा ददे ॥११॥
नपातो दुर्गहस्य मे सहस्रेण सुराधसः । श्रवो देवेष्वक्रत ॥१२॥ [४७] (१२०४)

॥ ६६ ॥

१-१५ कलिः प्रागाथः । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती), १५ अनुष्टुप् ।

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये ।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ १ ॥
न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ २ ॥
यः शक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः ।
स ऊर्वस्य रेजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा ॥ ३ ॥
निखातं चिद्यः पुरुसंभृतं वसूदिद्वपति दाशुषे ।
वज्री सुशिप्रो हर्यश्व इत्करदिन्द्रः क्रत्वा यथा वशत् ॥ ४ ॥ (१२०८)

यद्वावन्थ पुरुष्टुत पुरा चिच्छूर नृणाम् ।
वयं तत्त इन्द्र सं भरामसि यज्ञमुक्थं तुरं वचः ॥ ५ ॥ [४८]
सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः ।
त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥ ६ ॥
वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।
तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते ॥ ७ ॥
वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
सेमं नः स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥ ८ ॥
कदू न्वस्याकृतमिन्द्रस्यास्ति पौंस्यम् ।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥ ९ ॥
कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ।
इन्द्रो विश्वान्बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि ॥१०॥ [४९]
वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन् ।
पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥११॥
पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः ।
तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् ॥१२॥
वयं घा ते त्वे इद्विन्द्र विप्रा अपि ष्मसि ।
नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ॥१३॥
त्वं नो अस्या अमतेरुत क्षुधोऽभिशस्तेरव स्पृधि ।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥१४॥
सोम इद्वः सुतो अस्तु कलयो मा बिभीतन ।
अपेदेष ध्वस्मायति स्वयं घैषो अपायति ॥१५॥ [५०] (१२१९)

॥ ६७ ॥

१-२१ मत्स्यः साम्मदः, मान्यो मैत्रावरुणिः, बहवो वा मत्स्या जालनद्धाः ।
आदित्याः, १०-१२ अदितिः । गायत्री ।

। सुमृळीकाँ अभिष्टये ॥ १ ॥
त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे । आदित्यासो यथा विदुः ॥ २ ॥
मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा । आदित्यानामरंकृते ॥ ३ ॥ (१२२२)
तेषां हि चित्रमुक्थ्यं वरूथमस्ति दाशुषे

महि वो महतामवो वरुण मित्रार्यमन् । अवांस्या वृणीमहे ॥ ४ ॥
जीवान्नो अभि धेतनादित्यासः पुरा हथात् । कद्ध स्थ हवनश्रुतः ॥ ५ ॥ [५१]
यद्वः श्रान्ताय सुन्वते वरूथमस्ति यच्छर्दिः । तेना नो अधि वोचत ॥ ६ ॥
अस्ति देवा अंहोरुर्वस्ति रत्नमनागसः । आदित्या अद्भुतैनसः ॥ ७ ॥
मा नः सेतुः सिषेदयं महे वृणक्तु नस्परि । इन्द्र इद्धि श्रुतो वशी ॥ ८ ॥
मा नो मृचा रिपूणां वृजिनानामविष्यवः । देवा अभि प्र मृक्षत ॥ ९ ॥
उत त्वामदिते मह्यहं देव्युप ब्रुवे । सुमृळीकामभिष्टये ॥१०॥ [५२]
पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः । माकिस्तोकस्य नो रिषत् ॥११॥
अनेहो न उरुव्रज उरूचि वि प्रसर्तवे । कृधि तोकाय जीवसे ॥१२॥
ये मूर्धानः क्षितीनामदब्धासः स्वयशसः । व्रता रक्षन्ते अद्रुहः ॥१३॥
ते न आस्नो वृकाणामादित्यासो मुमोचत । स्तेनं बद्धमिवादिते ॥१४॥
अपो षु ण इयं शरुरादित्या अप दुर्मतिः । अस्मदेत्वजघ्नुषी ॥१५॥ [५३]
शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयम् । पुरा नूनं बुभुज्महे ॥१६॥
शश्वन्तं हि प्रचेतसः प्रतियन्तं चिदेनसः । देवाः कृणुथ जीवसे ॥१७॥
तत्सु नो नव्यं सन्यस आदित्या यन्मुमोचति । बन्धाद्बद्धमिवादिते ॥१८॥
नास्माकमस्ति तत्तर आदित्यासो अतिष्कदे । यूयमस्मभ्यं मृळत ॥१९॥
मा नो हेतिर्विवस्वत आदित्याः कृत्रिमा शरुः । पुरा नु जरसो वधीत् ॥२०॥
वि षु द्वेषो व्यंहतिमादित्यासो वि संहितम् । विष्वग्वि वृहता रपः ॥२१॥ [५४] ४ (१२४०)

॥ ६८ ॥

१-१९ प्रियमेध आङ्गिरसः । इन्द्रः, १४-१९ ऋक्षाश्वमेधौ । १-१२ अनुष्टुम्मुखः प्रगाथः=
(१, ४, ७, १० अनुष्टुप्+गायत्र्यौ), १३-१९ गायत्री ।

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ॥ १ ॥
तुविशुष्म तुविक्रतो शचीवो विश्वया मते । आ पप्राथ महित्वना ॥ २ ॥
यस्य ते महिना महः परि ज्मायन्तमीयतुः । हस्ता वज्रं हिरण्ययम् ॥ ३ ॥
विश्वानरस्य वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानाम् ॥ ४ ॥
अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः । नाना हवन्त ऊतये ॥ ५ ॥ [१]
परोमात्रमृचीषममिन्द्रमुग्रं सुराधसम् । ईशानं चिद्वसूनाम् ॥ ६ ॥
तंतमिद्राधसे मह इन्द्रं चोदामि पीतये । यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ॥ ७ ॥ (१२४७)

न यस्य ते शवसान सख्यमानंश मर्त्यः । नकिः शवांसि ते नशत् ॥ ८ ॥
त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनम् । जयेम पृत्सु वज्रिवः ॥ ९ ॥
तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम ।
इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम् ॥ १० ॥ [२]
यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः । यज्ञो वितन्तसाय्यः ॥ ११ ॥
उरु णस्तन्वे तन उरु क्षयाय नस्कृधि । उरु णो यन्धि जीवसे ॥ १२ ॥
उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम् । देववीतिं मनामहे ॥ १३ ॥
उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्या । तिष्ठन्ति स्वादुरातयः ॥ १४ ॥
ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि । आश्वमेधस्य रोहिता ॥ १५ ॥ [३]
सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे । आश्वमेधे सुपेशसः ॥ १६ ॥
षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः । सचा पूतक्रतौ सनम् ॥ १७ ॥
ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी । स्वभीशुः कशावती ॥ १८ ॥
न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः । अवद्यमधि दीधरत् ॥ १९ ॥ [४] (१२५९)

॥ ६९ ॥

१-१८ प्रियमेध आङ्गिरसः । इन्द्रः, ११ (अर्धर्चः) विश्वे देवाः, ११ (उत्तरार्धः)- १२ वरुणः ।
अनुष्टुप्, २ उष्णिक्, ४-६ गायत्र्यः, ११, १६ पङ्क्तिः, १७-१८ बृहती ।

प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे । धिया वो मेधसातये पुरंध्या विवासति ॥ १ ॥
नदं व ओदतीनां नदं योयुवतीनाम् । पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ २ ॥
ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः ।
जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥ ३ ॥
अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे । सूनुं सत्यस्य सत्पतिम् ॥ ४ ॥
आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि । यत्राभि संनवामहे ॥ ५ ॥ [५]
इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु । यत्सीमुपह्वरे विदत् ॥ ६ ॥
उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि ।
मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥ ७ ॥
अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥ ८ ॥
अव स्वराति गर्गरो गोधा परि सनिष्वणत् ।
पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम् ॥ ९ ॥ (१२६८)

आ यत्पतन्त्येन्यः सुदुघा अनपस्फुरः । अपस्फुरं गृभायत सोममिन्द्राय पातवे ॥ १० ॥ [६]
अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥ ११ ॥
सुदेवो असि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥ १२ ॥
यो व्यतीँरफाणयत्सुयुक्ताँ उप दाशुषे । तक्वो नेता तदिद्वपुरुपमा यो अमुच्यत ॥ १३ ॥
अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः ।
भिनत्कनीन ओदनं पच्यमानं परो गिरा ॥ १४ ॥
अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम् । स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥ १५ ॥
आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम् ।
अध द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम् ॥ १६ ॥
तं घेमित्था नमस्विन उप स्वराजमासते ।
अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने ॥ १७ ॥
अनु प्रत्नस्यौकसः प्रियमेधास एषाम् ।
पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥ १८ ॥ [७] (१२७७)

॥ ७० ॥

१-१५ पुरुहन्मा आङ्गिरसः । इन्द्रः । बृहती; प्रगाथः= (१,३,५ बृहती २,४,६ सतोबृहती),
१३ उष्णिक्, १४ अनुष्टुप्, १५ पुरउष्णिक् ।

(८) यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥ १ ॥
इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥ २ ॥
नकिष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजसम् ॥ ३ ॥
अषाळ्हमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः ।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥ ४ ॥
यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥ ५ ॥ [८] (१२८२)

आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥ ६ ॥
न सीमदेव आपदिषं दीर्घायो मर्त्यः ।
एतग्वा चिद्य एतशा युयोजत इन्द्रो हरी युयोजते ॥ ७ ॥
तं वो महो महाय्यमिन्द्रं दानाय सक्षणिम् ।
यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥ ८ ॥
उदू षु णो वसो महे मृशस्व शूर राधसे ।
उदू षु मह्यै मघवन्मघत्तय उदिन्द्र श्रवसे महे ॥ ९ ॥
त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि ।
मध्ये वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः ॥ १० ॥ [९]
अन्यव्रतममानुषमयज्वानमदेवयुम् ।
अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः ॥ ११ ॥
त्वं न इन्द्रासां हस्ते शविष्ठ दावने । धानानां न सं गृभायास्मयुर्द्विः सं गृभायास्मयुः ॥ १२ ॥
सखायः क्रतुमिच्छत कथा राधाम शरस्य । उपस्तुतिं भोजः सूरिर्यो अह्रयः ॥ १३ ॥
भूरिभिः समह ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे ।
यदित्थमेकमेकमिच्छर वत्सान्पराददः ॥ १४ ॥
कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत् । अजां सूरिर्न धातवे ॥ १५ ॥ [१०] (१२९२)

॥ ७१ ॥

१-१५ सुदीति-पुरुमीळ्हावाङ्गिरसौ, तयोर्वान्यतरः । अग्निः । गायत्री,
१०-१५ प्रगाथः= (बृहती, सतोबृहती) ।

त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ॥ १ ॥
नहि मन्युः पौरुषेय ईशे हि वः प्रियजात । त्वमिदसि क्षपावान् ॥ २ ॥
स नो विश्वेभिर्देवेभिरूर्जो नपाद्भद्रशोचे । रयिं देहि विश्ववारम् ॥ ३ ॥
न तमग्ने अरातयो मर्तं युवन्त रायः । यं त्रायसे दाश्वांसम् ॥ ४ ॥
यं त्वं विप्र मेधसातावग्ने हिनोषि धनाय । स तवोती गोषु गन्ता ॥ ५ ॥ [११]
त्वं रयिं पुरुवीरमग्ने दाशुषे मर्ताय । प्र णो नय वस्यो अच्छ ॥ ६ ॥
उरुष्या णो मा परा दा अघायते जातवेदः । दुराध्ये मर्ताय ॥ ७ ॥ (१२९९)

अग्ने माकिष्टे देवस्य रातिमदेवो युयोत । त्वमीशिषे वसूनाम् ॥ ८ ॥
स नो वस्व उप मास्यूर्जो नपान्माहिनस्य । सखे वसो जरितृभ्यः ॥ ९ ॥
अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥ १० ॥ [१२]
अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ ११ ॥
अग्निं वो देवयज्ययाग्निं प्रयत्यध्वरे ।
अग्निं धीषु प्रथममग्निमर्वत्यग्निं क्षैत्राय साधसे ॥ १२ ॥
अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम् ।
अग्निं तोके तनये शश्वदीमहे वसुं सन्तं तनूपाम् ॥ १३ ॥
अग्निमीळिष्वावसे गाथाभिः शीरशोचिषम् ।
अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतये छर्दिः ॥ १४ ॥
अग्निं द्वेषो योतवै नो गृणीमस्यग्निं शं योश्च दातवे ।
विश्वासु विक्ष्ववितेव हव्यो भुवद्वस्तुर्ऋषूणाम् ॥ १५ ॥ [१३] (१३०७)

॥ ७२ ॥

१-१८ हर्यतः प्रागाथः । अग्निः हवींषि वा । गायत्री ।

हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः । विद्वाँ अस्य प्रशासनम् ॥ १ ॥
नि तिग्ममभ्यंशुं सीदद्धोता मनावधि । जुषाणो अस्य सख्यम् ॥ २ ॥
अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया । गृभ्णन्ति जिह्वया ससम् ॥ ३ ॥
जाम्यतीतपे धनुर्वयोधा अरुहद्वनम् । दृषदं जिह्वयावधीत् ॥ ४ ॥
चरन्वत्सो रुशन्निह निदातारं न विन्दते । वेति स्तोतव अम्ब्यम् ॥ ५ ॥ [१४]
उतो न्वस्य यन्महदश्वावद्योजनं बृहत् । दामा रथस्य ददृशे ॥ ६ ॥
दुहन्ति सप्तैकामुप द्वा पञ्च सृजतः । तीर्थे सिन्धोरधि स्वरे ॥ ७ ॥
आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत् । खेदया त्रिवृता दिवः ॥ ८ ॥
परि त्रिधातुरध्वरं जूर्णिरेति नवीयसी । मध्वा होतारो अञ्जते ॥ ९ ॥
सिञ्चन्ति नमसावतमुच्चाचक्रं परिज्मानम् । नीचीनबारमक्षितम् ॥ १० ॥ [१५]
अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु । अवतस्य विसर्जने ॥ ११ ॥ (१३१८)

गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥१२॥
आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥१३॥
ते जानत स्वमोक्यं१ सं वत्सासो न मातृभिः । मिथो नसन्त जामिभिः ॥१४॥
उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि । इन्द्रे अग्ना नमः स्वः ॥१५॥ [१६]
अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः । सूर्यस्य सप्त रश्मिभिः ॥१६॥
सोमस्य मित्रावरुणोदिता सूर आ ददे । तदातुरस्य भेषजम् ॥१७॥
उतो न्वस्य यत्पदं हर्यतस्य निधान्यम् । परि द्यां जिह्वयातनत् ॥१८॥ [१७] (१३२५)

॥ ७३ ॥

१-१८ गोपवन आत्रेयः सप्तवध्रिर्वा । अश्विनौ । गायत्री ।

उदीराथामृतायते युञ्जाथामश्विना रथम् । अन्ति षद्भूतु वामवः ॥ १ ॥
निमिषश्चिज्जवीयसा रथेना यातमश्विना । अन्ति षद्भूतु वामवः ॥ २ ॥
उप स्तृणीतमत्रये हिमेन घर्ममश्विना । अन्ति षद्भूतु वामवः ॥ ३ ॥
कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः । अन्ति षद्भूतु वामवः ॥ ४ ॥
यदद्य कर्हि कर्हि चिच्छुश्रूयातमिमं हवम् । अन्ति षद्भूतु वामवः ॥ ५ ॥ [१८]
अश्विना यामहूतमा नेदिष्ठं याम्याप्यम् । अन्ति षद्भूतु वामवः ॥ ६ ॥
अवन्तमत्रये गृहं कृणुतं युवमश्विना । अन्ति षद्भूतु वामवः ॥ ७ ॥
वरेथे अग्निमातपो वदते वल्ग्वत्रये । अन्ति षद्भूतु वामवः ॥ ८ ॥
प्र सप्तवध्रिराशसा धारामग्नेरशायत । अन्ति षद्भूतु वामवः ॥ ९ ॥
इहा गतं वृषण्वसू शृणुतं म इमं हवम् । अन्ति षद्भूतु वामवः ॥१०॥ [१९]
किमिदं वां पुराणवज्जरतोरिव शस्यते । अन्ति षद्भूतु वामवः ॥११॥
समानं वां सजात्यं समानो बन्धुरश्विना । अन्ति षद्भूतु वामवः ॥१२॥
यो वां रजांस्यश्विना रथो वियाति रोदसी । अन्ति षद्भूतु वामवः ॥१३॥
आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतम् । अन्ति षद्भूतु वामवः ॥१४॥
मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम् । अन्ति षद्भूतु वामवः ॥१५॥
अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी । अन्ति षद्भूतु वामवः ॥१६॥
अश्विना सु विचाकशद्वृक्षं परशुमाँइव । अन्ति षद्भूतु वामवः ॥१७॥
पुरं न धृष्णवा रुज कृष्णया बाधितो विशा । अन्ति षद्भूतु वामवः ॥१८॥ [२०] (१३४३)

॥ ७४ ॥

१-१५ गोपवन आत्रेयः । अग्निः, १३-१५ श्रुतर्वा आर्क्ष्यः । १-१२ अनुष्टुम्मुखः प्रगाथः= (अनुष्टुप् + गायत्र्यौ), १३-१५ अनुष्टुप् ।

विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ १ ॥
यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् । प्रशंसन्ति प्रशस्तिभिः ॥ २ ॥
पन्यांसं जातवेदसं यो देवतात्युद्यता । हव्यान्यैरयद्दिवि ॥ ३ ॥
आगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।
यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥ ४ ॥
अमृतं जातवेदसं तिरस्तमांसि दर्शतम् । घृताहवनमीड्यम् ॥ ५ ॥ [२१]
सबाधो यं जना इमेऽग्निं हव्येभिरीळते । जुह्वानासो यतस्रुचः ॥ ६ ॥
इयं ते नव्यसी मतिरग्ने अधाय्यस्मदा ।
मन्द्र सुजात सुक्रतोऽमूर दस्मातिथे ॥ ७ ॥
सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया । तया वर्धस्व सुष्टुतः ॥ ८ ॥
सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि श्रवः । दधीत वृत्रतूर्ये ॥ ९ ॥
अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्पतिम् ।
यस्य श्रवांसि तूर्वथ पन्यंपन्यं च कृष्टयः ॥१०॥ [२२]
यं त्वा गोपवनो गिरा चनिष्ठदग्ने अङ्गिरः । स पावक श्रुधी हवम् ॥११॥
यं त्वा जनास ईळते सबाधो वाजसातये । स बोधि वृत्रतूर्ये ॥१२॥
अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति ।
शर्धांसीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ॥१३॥
मां चत्वार आशवः शविष्ठस्य द्रवित्नवः ।
सुरथासो अभि प्रयो वक्षन्वयो न तुग्र्यम् ॥१४॥
सत्यमित्त्वा महेनदि परुष्ण्यव देदिशम् ।
नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः ॥१५॥ [२३] (१३५८)

॥ ७५ ॥

१-१६ विरूप आङ्गिरसः । अग्निः । गायत्री ।

युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ १ ॥
उत नो देव देवाँ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥ २ ॥ (१३६०)

त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ॥ ३ ॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ ४ ॥
तं नेमिमृभवो यथा नमस्व सहूतिभिः । नेदीयो यज्ञमङ्गिरः ॥ ५ ॥ [२४]
तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥ ६ ॥
कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥ ७ ॥
मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्न्याः ॥ ८ ॥
मा नः समस्य दूढ्य१ः परिद्वेषसो अंहतिः । ऊर्मिर्न नावमा वधीत् ॥ ९ ॥
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ॥१०॥ [२५]
कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कृधि ॥११॥
मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा । संवर्गं सं रयिं जय ॥१२॥
अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना । वर्धा नो अमवच्छवः ॥१३॥
यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा । तं घेदग्निर्वृधावति ॥१४॥
परस्या अधि संवतोऽवराँ अभ्या तर । यत्राहमस्मि ताँ अव ॥१५॥
विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः । अधा ते सुम्नमीमहे ॥१६॥ [२६] (१३७४)

॥ ७६ ॥

१-१२ कुरुसुतिः काण्वः । इन्द्रः । गायत्री ।

इमं नु मायिनं हुव इन्द्रमीशानमोजसा । मरुत्वन्तं न वृञ्जसे ॥ १ ॥
अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः । वज्रेण शतपर्वणा ॥ २ ॥
वावृधानो मरुत्सखेन्द्रो वि वृत्रमैरयत् । सृजन्त्समुद्रिया अपः ॥ ३ ॥
अयं ह येन वा इदं स्वर्मरुत्वता जितम् । इन्द्रेण सोमपीतये ॥ ४ ॥
मरुत्वन्तमृजीषिणमोजस्वन्तं विरप्शिनम् । इन्द्रं गीर्भिर्हवामहे ॥ ५ ॥
इन्द्रं प्रत्नेन मन्मना मरुत्वन्तं हवामहे । अस्य सोमस्य पीतये ॥ ६ ॥ [२७]
मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो । अस्मिन्यज्ञे पुरुष्टुत ॥ ७ ॥
तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः । हृदा हूयन्त उक्थिनः ॥ ८ ॥
पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु । वज्रं शिशान ओजसा ॥ ९ ॥
उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् ॥१०॥
अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम् । इन्द्र यद्दस्युहाभवः ॥११॥
वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् । इन्द्रात्परि तन्वं ममे ॥१२॥ [२८] (१३८६)

॥ ७७ ॥

१-११ कुरुसुतिः काण्वः । इन्द्रः । गायत्री, ११-१२ प्रगाथः= (बृहती, सतोबृहती)

जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरम् । क उग्राः के ह शृण्विरे ॥ १ ॥
आदीं शवस्यब्रवीदौर्णवाभमहीशुवम् । ते पुत्र सन्तु निष्टुरः ॥ २ ॥
समित्तान्वृत्रहाखिदत्खे अराँइव खेदया । प्रवृद्धो दस्युहाभवत् ॥ ३ ॥
एकया प्रतिधापिबत्साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका ॥ ४ ॥
अभि गन्धर्वमतृणदबुध्नेषु रजःस्वा । इन्द्रो ब्रह्मभ्य इद्वृधे ॥ ५ ॥ [२९]
निराविध्यद्गिरिभ्य आ धारयत्पक्वमोदनम् । इन्द्रो बुन्दं स्वाततम् ॥ ६ ॥
शतब्रध्न इषुस्तव सहस्रपर्ण एक इत् । यमिन्द्र चकृषे युजम् ॥ ७ ॥
तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे । सद्यो जात ऋभुष्ठिर ॥ ८ ॥
एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा । हृदा वीड्वधारयः ॥ ९ ॥
विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः ।
शतं महिषान्क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥१०॥
तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः ।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा ॥११॥ [३०] (१३९७)

॥ ७८ ॥

१-१० कुरुसुतिः काण्वः । इन्द्रः । गायत्री, १० बृहती ।

पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर । शता च शूर गोनाम् ॥ १ ॥
आ नो भर व्यञ्जनं गामश्वमभ्यञ्जनम् । सचा मना हिरण्यया ॥ २ ॥
उत नः कर्णशोभना पुरूणि धृष्णवा भर । त्वं हि शृण्विषे वसो ॥ ३ ॥
नकीं वृधीक इन्द्र ते न सुषा न सुदा उत । नान्यस्त्वच्छूर वाघतः ॥ ४ ॥
नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे । विश्वं शृणोति पश्यति ॥ ५ ॥ [३१]
स मन्युं मर्त्यानामदब्धो नि चिकीषते । पुरा निदश्चिकीषते ॥ ६ ॥
क्रत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः । वृत्रघ्नः सोमपाव्नः ॥ ७ ॥
त्वे वसूनि संगता विश्वा च सोम सौभगा । सुदात्वपरिह्वृता ॥ ८ ॥
त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः । त्वामश्वयुरेषते ॥ ९ ॥
तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे ।
दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना ॥१०॥ [३२] (१४०७)

॥ ७९ ॥

१-९ कृत्नुर्भार्गवः । सोमः । गायत्री, ९ अनुष्टुप् ।

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः । ऋषिर्विप्रः काव्येन ॥ १ ॥
अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम् । प्रेमन्धः ख्यन्निः श्रोणो भूत् ॥ २ ॥
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः । उरु यन्तासि वरूथम् ॥ ३ ॥
त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन् । यावीरघस्य चिद्द्वेषः ॥ ४ ॥
अर्थिनो यन्ति चेदर्थं गच्छानिद्ददुषो रातिम् । ववृज्युस्तृष्यतः कामम् ॥ ५ ॥ [३३]
विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत् । प्रेमायुस्तारीदतीर्णम् ॥ ६ ॥
सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः । भवा नः सोम शं हृदे ॥ ७ ॥
मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ॥ ८ ॥
अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे ।
राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ॥ ९ ॥[३४](१४१६)

॥ ८० ॥

१-१० एकद्यूर्नौधसः । इन्द्रः, १० देवाः । गायत्री, १० त्रिष्टुप् ।

नह्यन्यं बळाकरं मर्डितारं शतक्रतो । त्वं न इन्द्र मृळय ॥ १ ॥
यो नः शश्वत्पुराविथामृध्रो वाजसातये । स त्वं न इन्द्र मृळय ॥ २ ॥
किमङ्ग रध्रचोदनः सुन्वानस्यावितेदसि । कुवित्स्विन्द्र णः शकः ॥ ३ ॥
इन्द्र प्र णो रथमव पश्चाच्चित्सन्तमद्रिवः । पुरस्तादेनं मे कृधि ॥ ४ ॥
हन्तो नु किमाससे प्रथमं नो रथं कृधि । उपमं वाजयु श्रवः ॥ ५ ॥ [३५]
अवा नो वाजयुं रथं सुकरं ते किमित्परि । अस्मान्सु जिग्युषस्कृधि ॥ ६ ॥
इन्द्र दृह्यस्व पूरसि भद्रा त एति निष्कृतम् । इयं धीरृत्वियावती ॥ ७ ॥
मा सीमवद्य आ भागुर्वी काष्ठा हितं धनम् । अपावृक्ता अरत्नयः ॥ ८ ॥
तुरीयं नाम यज्ञियं यदा करस्तदुश्मसि । आदित्पतिर्न ओहसे ॥ ९ ॥
अवीवृधद्वो अमृता अमन्दीदेकद्युर्देवा उत याश्च देवीः ।
तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १० ॥ [३६] (१४२६)

॥ ८१ ॥

१-९ कुसीदी काण्वः । इन्द्रः । गायत्री ।

(९)आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ॥ २ ॥
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ॥ ३ ॥
एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् । न राधसा मर्धिषन्नः ॥ ४ ॥
प्र स्तोषदुप गासिषच्छ्रवत्साम गीयमानम् । अभि राधसा जुगुरत् ॥ ५ ॥ [३७]
आ नो भर दक्षिणेनाभि सव्येन प्र मृश । इन्द्र मा नो वसोर्निर्भाक् ॥ ६ ॥
उप क्रमस्वा भर धृषता धृष्णो जनानाम् । अदाशूष्टरस्य वेदः ॥ ७ ॥
इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सु तं सनुहि ॥ ८ ॥
सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ॥ ९ ॥[३८]५*(१४३५)

॥ ८२ ॥

१-९ कुसीदी काण्वः । इन्द्रः । गायत्री ।

आ प्र द्रव परावतोऽर्वावतश्च वृत्रहन् । मध्वः प्रति प्रभर्मणि ॥ १ ॥
तीव्राः सोमास आ गहि सुतासो मादयिष्णवः । पिबा दधृग्यथोचिषे ॥ २ ॥
इषा मन्दस्वादु तेऽरं वराय मन्यवे । भुवत्त इन्द्र शं हृदे ॥ ३ ॥
आ त्वशत्रवा गहि न्युक्थानि च हूयसे । उपमे रोचने दिवः ॥ ४ ॥
तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम् । प्र सोम इन्द्र हूयते ॥ ५ ॥ [१]
इन्द्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः । वि पीतिं तृप्तिमश्नुहि ॥ ६ ॥
य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ॥ ७ ॥
यो अप्सु चन्द्रमा इव सोमश्चमूषु ददृशे । पिबेदस्य त्वमीशिषे ॥ ८ ॥
यं ते श्येनः पदाभरत्तिरो रजांस्यस्पृतम् । पिबेदस्य त्वमीशिषे ॥ ९ ॥ [२] (१४४४)

॥ ८३ ॥

१-९ कुसीदी काण्वः । विश्वे देवाः । गायत्री ।

देवानामिदवो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥ १ ॥
ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा । वृधासश्च प्रचेतसः ॥ २ ॥
अति नो विष्पिता पुरु नौभिरपो न पर्षथ । यूयमृतस्य रथ्यः ॥ ३ ॥ (१४४७)

वामं नो अस्त्वर्यमन्वामं वरुण शंस्यम् । वामं ह्यावृणीमहे ॥ ४ ॥
वामस्य हि प्रचेतस ईशानासो रिशादसः । नेमादित्या अघस्य यत् ॥ ५ ॥ [३]
वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना । देवा वृधाय हूमहे ॥ ६ ॥
अधि न इन्द्रैषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ॥ ७ ॥
प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या । मातुर्गर्भे भरामहे ॥ ८ ॥
यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । अधा चिद्व उत ब्रुवे ॥ ९ ॥ [४] (१४५३)

॥ ८४ ॥

१-९ उशना काव्यः । अग्निः । गायत्री ।

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् । अग्निं रथं न वेद्यम् ॥ १ ॥
कविमिव प्रचेतसं यं देवासो अध द्विता । नि मर्त्येष्वादधुः ॥ २ ॥
त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ३ ॥
कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् । वराय देव मन्यवे ॥ ४ ॥
दाशेम कस्य मनसा यज्ञस्य सहसो यहो । कदु वोच इदं नमः ॥ ५ ॥ [५]
अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः । वाजद्रविणसो गिरः ॥ ६ ॥
कस्य नूनं परीणसो धियो जिन्वसि दम्पते । गोषाता यस्य ते गिरः ॥ ७ ॥
तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु । स्वेषु क्षयेषु वाजिनम् ॥ ८ ॥
क्षेति क्षेमेभिः साधुभिर्नकिर्यं घ्नन्ति हन्ति यः । अग्ने सुवीर एधते ॥ ९ ॥ [६] (१४६२)

॥ ८५ ॥

१-९ कृष्ण आङ्गिरसः । अश्विनौ । गायत्री ।

आ मे हवं नासत्याश्विना गच्छतं युवम् । मध्वः सोमस्य पीतये ॥ १ ॥
इमं मे स्तोममश्विनेमं मे शृणुतं हवम् । मध्वः सोमस्य पीतये ॥ २ ॥
अयं वां कृष्णो अश्विना हवते वाजिनीवसू । मध्वः सोमस्य पीतये ॥ ३ ॥
शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा । मध्वः सोमस्य पीतये ॥ ४ ॥
छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा । मध्वः सोमस्य पीतये ॥ ५ ॥ [७]
गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना । मध्वः सोमस्य पीतये ॥ ६ ॥
युञ्जाथां रासभं रथे वीड्वङ्गे वृषण्वसू । मध्वः सोमस्य पीतये ॥ ७ ॥ (१४६९)

त्रिवन्धुरेण त्रिवृता रथेना यातमश्विना । मध्वः सोमस्य पीतये ॥ ८ ॥
नू मे गिरो नासत्याश्विना प्रावतं युवम् । मध्वः सोमस्य पीतये ॥ ९ ॥ [८] (१४७१)

॥ ८६ ॥

१-५ कृष्ण आङ्गिरसः, विश्वको वा कार्ष्णिः । अश्विनौ । जगती ।

उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ १ ॥
कथा नूनं वां विमना उप स्तवद्युवं धियं ददथुर्वस्यइष्टये ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ २ ॥
युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये ।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ ३ ॥
उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे ।
यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतम् ॥ ४ ॥
ऋतेन देवः सविता शमायत ऋतस्य शृङ्गमुर्विया वि पप्रथे ।
ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतम् ॥ ५ ॥ [९] (१४७६)

॥ ८७ ॥

१-६ कृष्ण आङ्गिरसो, द्युम्नीको वा वासिष्ठः, प्रियमेध आङ्गिरसो वा । अश्विनौ ।
प्रगाथः=(विषमा बृहती, समा सतोबृहती)

द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतम् ।
मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे ॥ १ ॥
पिबतं घर्मं मधुमन्तमश्विना बर्हिः सीदतं नरा ।
ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः ॥ २ ॥
आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥ ३ ॥
पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत् ।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम् ॥ ४ ॥
आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः ।
दस्रा हिरण्यवर्तनी शुभस्पती पातं सोममृतावृधा ॥ ५ ॥ (१४८१)

वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये ।
ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्या गतम्   ॥ ६ ॥ [१०] (१४८२)

॥ ८८ ॥

१-६ नोधा गौतमः । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे   ॥ १ ॥
द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे   ॥ २ ॥
न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीळवः ।
यद्दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते   ॥ ३ ॥
योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना ।
आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन्   ॥ ४ ॥
प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमनु स्वधां ववक्षिथ   ॥ ५ ॥
नकिः परिष्टिर्मघवन्मघस्य ते यद्दाशुषे दशस्यसि ।
अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसातये   ॥ ६ ॥ [११] (१४८८)

॥ ८९ ॥

१-७ नृमेध-पुरुमेधावाङ्गिरसौ । इन्द्रः । १-४ प्रगाथः= (विषमा बृहती, समा सतोबृहती),
५-६ अनुष्टुप्, ७ बृहती ।

बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि   ॥ १ ॥
अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण   ॥ २ ॥
प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा   ॥ ३ ॥
अभि प्र भर धृषता धृषन्मनः श्रवश्चित्ते असद्बृहत् ।
अर्षन्त्वापो जवसा वि मातरो हनो वृत्रं जया स्वः   ॥ ४ ॥   (१४९२)

यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
तत्पृथिवीमप्रथयस्तदस्तभ्ना उत द्याम्   ॥ ५ ॥
तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।
तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम्   ॥ ६ ॥
आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।
घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ ७ ॥   [१२] (१४९९)

॥ ९० ॥

१-६ नृमेध-पुरुमेधावाङ्गिरसौ । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती) ।

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु ।
उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः   ॥ १ ॥
त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः   ॥ २ ॥
ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता ।
इमा जुषस्व हर्यश्व योजनेन्द्र या ते अमन्महि   ॥ ३ ॥
त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृञ्जसे ।
स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं रयिमा कृधि   ॥ ४ ॥
त्वमिन्द्र यशा अस्यृजीषी शवसस्पते ।
त्वं वृत्राणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता   ॥ ५ ॥
तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ ६ ॥ [१३]   (१५०१)

॥ ९१ ॥

१-७ अपाला आत्रेयी । इन्द्रः । १-२ पङ्क्तिः, ३-७ अनुष्टुप् ।

कन्या वारवायती सोममपि स्रुताविदत् ।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा   ॥ १ ॥
असौ य एषि वीरको गृहंगृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥ २ ॥   (१५०३)

आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि ।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव   ॥ ३ ॥
कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत् ।
कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै   ॥ ४ ॥
इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।
शिरस्ततस्योर्वरामादिदं म उपोदरे   ॥ ५ ॥
असौ च या न उर्वरादिमां तन्वं मम ।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि   ॥ ६ ॥
खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम्   ॥ ७ ॥ [१४] (१५०८)

॥ ९२ ॥

१-३३ श्रुतकक्षः सुकक्षो वा आङ्गिरसः । इन्द्रः । गायत्री, १ अनुष्टुप् ।

पान्तमा वो अन्धस इन्द्रमभि प्र गायत । विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम्॥ १ ॥
पुरुहूतं पुरुष्टुतं गाथान्यं सनश्रुतम् । इन्द्र इति ब्रवीतन ॥ २ ॥
इन्द्र इन्नो महानां दाता वाजानां नृतुः । महाँ अभिज्ञ्वा यमत् ॥ ३ ॥
अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥ ४ ॥
तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये । तदिद्ध्यस्य वर्धनम् ॥ ५ ॥ [१५]
अस्य पीत्वा मदानां देवो देवस्यौजसा । विश्वाभि भुवना भुवत् ॥ ६ ॥
त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥ ७ ॥
युध्मं सन्तमनर्वाणं सोमपामनपच्युतम् । नरमवार्यक्रतुम् ॥ ८ ॥
शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम । अवा नः पार्ये धने ॥ ९ ॥
अतश्चिदिन्द्र ण उपा याहि शतवाजया । इषा सहस्रवाजया ॥१०॥ [१६]
अयाम धीवतो धियोऽर्वद्भिः शक्र गोदरे । जयेम पृत्सु वज्रिवः ॥११॥
वयमु त्वा शतक्रतो गावो न यवसेष्वा । उक्थेषु रणयामसि ॥१२॥
विश्वा हि मर्त्यत्वनानुकामा शतक्रतो । अगन्म वज्रिन्नाशसः ॥१३॥
त्वे सु पुत्र शवसोऽवृत्रन्कामकातयः । न त्वामिन्द्राति रिच्यते ॥१४॥
स नो वृषन्त्सनिष्ठया सं घोरया द्रवित्न्वा । धियाविड्ढि पुरंध्या ॥१५॥ [१७] (१५२३)

यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः । तेन नूनं मदे मदेः ॥१६॥
यस्ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः । य ओजोदातमो मदः ॥१७॥
विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः । विश्वासु दस्म कृष्टिषु ॥१८॥
इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥१९॥
यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः । इन्द्रं सुते हवामहे ॥२०॥ [१८]
त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः ॥२१॥
आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति रिच्यते ॥२२॥
विव्यक्थ महिना वृषन्भक्षं सोमस्य जागृवे । य इन्द्र जठरेषु ते ॥२३॥
अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् । अरं धामभ्य इन्दवः ॥२४॥
अरमश्वाय गायति श्रुतकक्षो अरं गवे । अरमिन्द्रस्य धाम्ने ॥२५॥
अरं हि ष्मा सुतेषु णः सोमेष्विन्द्र भूषसि । अरं ते शक्र दावने ॥२६॥ [१९]
पराकात्ताच्चिदद्रिवस्त्वां नक्षन्त नो गिरः । अरं गमाम ते वयम् ॥२७॥
एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥२८॥
एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः । अधा चिदिन्द्र मे सचा ॥२९॥
मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते । मत्स्वा सुतस्य गोमतः ॥३०॥
मा न इन्द्राभ्या दिशः सूरो अक्तुष्वा यमन् । त्वा युजा वनेम तत् ॥३१॥
त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः । त्वमस्माकं तव स्मसि ॥३२॥
त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान् । सखाय इन्द्र कारवः ॥३३॥ [२०] (१५४१)

॥ ९३ ॥

१-३४ सुकक्ष आङ्गिरसः । इन्द्रः, ३४ इन्द्र-ऋभवश्च । गायत्री ।

उद्घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥ १ ॥
नव यो नवतिं पुरो बिभेद बाह्वोजसा । अहिं च वृत्रहावधीत् ॥ २ ॥
स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् । उरुधारेव दोहते ॥ ३ ॥
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥ ४ ॥
यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे । उतो तत्सत्यमित्तव ॥ ५ ॥ [२१]
ये सोमासः परावति ये अर्वावति सुन्विरे । सर्वांस्ताँ इन्द्र गच्छसि ॥ ६ ॥
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥ ७ ॥   (१५४८)

इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः । द्युम्नी श्लोकी स सोम्यः ॥ ८ ॥
गिरा वज्रो न संभृतः सबलो अनपच्युतः । ववक्ष ऋष्वो अस्तृतः ॥ ९ ॥
दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः । त्वं च मघवन्वशः ॥१०॥ [२२]
यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम् । न देवो नाध्रिगुर्जनः ॥११॥
अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः । उभे सुशिप्र रोदसी ॥१२॥
त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत्पयः ॥१३॥
वि यदहेरध त्विषो विश्वे देवासो अक्रमुः । विदन्मृगस्य ताँ अमः ॥१४॥
आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यम् । अजातशत्रुरस्तृतः ॥१५॥ [२३]
श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् । आ शुषे राधसे महे ॥१६॥
अया धिया च गव्यया पुरुणामन्पुरुष्टुत । यत्सोमेसोम आभवः ॥१७॥
बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शक्र आशिषम् ॥१८॥
कया त्वं न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥१९॥
कस्य वृषा सुते सचा नियुत्वान्वृषभो रणत् । वृत्रहा सोमपीतये ॥२०॥ [२४]
अभी षु णस्त्वं रयिं मन्दसानः सहस्रिणम् । प्रयन्ता बोधि दाशुषे ॥२१॥
पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये । अपां जग्मिर्निचुम्पुणः ॥२२॥
इष्टा होत्रा असृक्षतेन्द्रं वृधासो अध्वरे । अच्छावभृथमोजसा ॥२३॥
इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥२४॥
तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्रमा वह ॥२५॥ [२५]
आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे । स्तोतृभ्य इन्द्रमर्चत ॥२६॥
आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो । स्तोतृभ्य इन्द्र मृळय ॥२७॥
भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो । यदिन्द्र मृळयासि नः ॥२८॥
स नो विश्वान्या भर सुवितानि शतक्रतो । यदिन्द्र मृळयासि नः ॥२९॥
त्वामिद्वृत्रहन्तम सुतावन्तो हवामहे । यदिन्द्र मृळयासि नः ॥३०॥ [२६]
उप नो हरिभिः सुतं याहि मदानां पते । उप नो हरिभिः सुतम् ॥३१॥
द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः । उप नो हरिभिः सुतम् ॥३२॥
त्वं हि वृत्रहन्नेषां पाता सोमानामसि । उप नो हरिभिः सुतम् ॥३३॥
इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ॥३४॥ [२७] (१५७५)

॥ ९४ ॥

१-१२ बिन्दुः पूतदक्षो वा आङ्गिरसः । मरुतः । गायत्री ।

(१०)गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम् ॥ १ ॥
यस्या देवा उपस्थे व्रता विश्वे धारयन्ते । सूर्यामासा दृशे कम् ॥ २ ॥
तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः । मरुतः सोमपीतये ॥ ३ ॥
अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः । उत स्वराजो अश्विना ॥ ४ ॥
पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥ ५ ॥
उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः । प्रातर्होतेव मत्सति ॥ ६ ॥ [२८]
कदत्विषन्त सूरयस्तिर आप इव स्रिधः । अर्षन्ति पूतदक्षसः ॥ ७ ॥
कद्वो अद्य महानां देवानामवो वृणे । त्मना च दस्मवर्चसाम् ॥ ८ ॥
आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः । मरुतः सोमपीतये ॥ ९ ॥
त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे । अस्य सोमस्य पीतये ॥१०॥
त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे । अस्य सोमस्य पीतये ॥११॥
त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे । अस्य सोमस्य पीतये ॥१२॥ [२९] (१५८७)

॥ ९५ ॥

१-९ तिरश्चीराङ्गिरसः । इन्द्रः । अनुष्टुप् ।

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
अभि त्वा समनूषतेन्द्र वत्सं न मातरः ॥ १ ॥
आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः ।
पिबा त्वस्यान्धस इन्द्र विश्वासु ते हितम् । ॥ २ ॥
पिबा सोमं मदाय कमिन्द्र श्येनाभृतं सुतम् ।
त्वं हि शश्वतीनां पती राजा विशामसि ॥ ३ ॥
श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ ४ ॥
इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत् ।
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ ५ ॥ [३०]
तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥ ६ ॥ (१५९३)

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥ ७ ॥
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥ ८ ॥
इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥ ९ ॥ [३१] (१५९६)

॥ ९६ ॥

१-२१ तिरश्चीराङ्गिरसो,द्युतानो वा मारुतः। इन्द्रः, १४ इन्द्रामरुतो, १५ इन्द्राबृहस्पती । त्रिष्टुप्,४ विराट् ।

अस्मा उषास आतिरन्त याममिन्द्राय नक्तमूर्म्याः सुवाचः ।
अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिन्धवः सुपाराः ॥ १ ॥
अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम् ।
न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥ २ ॥
इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ।
शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके ॥ ३ ॥
मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम् ।
मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम् ॥ ४ ॥
आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्तवा उ ।
प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ॥ ५ ॥ [३२]
तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात् ।
इन्द्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥ ६ ॥
वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ ७ ॥
त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्रा इव राशयो यज्ञियासः ।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥ ८ ॥
तिग्ममायुधं मरुतामनीकं कस्त इन्द्र प्रति वज्रं दधर्ष ।
अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥ ९ ॥
मह उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः ।
गिर्वाहसे गिर इन्द्राय पूर्वीर्धेहि तन्वे कुविदङ्ग वेदत् ॥१०॥ [३३] (१६०६)

उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम् ।
नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदङ्ग वेदत् ॥११॥
तद्विविड्ढि यत्त इन्द्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास ।
उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदङ्ग वेदत् ॥१२॥
अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त ॥१३॥
द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्यो अंशुमत्याः ।
नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥१४॥
अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः ।
विशो अदेवीरभ्याचरन्तीर्बृहस्पतिना युजेन्द्रः ससाहे ॥१५॥ [३४]
त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
गूळ्हे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥१६॥
त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन्धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इन्द्र शच्येदविन्दः ॥१७॥
त्वं ह त्यद्वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ ।
त्वं सिन्धूँरसृजस्तस्तभानान्त्वमपो अजयो दासपत्नीः ॥१८॥
स सुक्रतू रणिता यः सुतेष्वनुत्तमन्युर्यो अहेव रेवान् ।
य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः ॥१९॥
स वृत्रहेन्द्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम ।
स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता ॥२०॥
स वृत्रहेन्द्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव ।
कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः ॥२१॥ [३५] (१६१७)

॥ ९७ ॥

१-१५ रेभः काश्यपः । इन्द्रः । बृहती, १०, १३ अतिजगती, ११-१२ उपरिष्टाद्बृहती, १४ त्रिष्टुप्, १५ जगती ।

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ १ ॥ (१६१८)

यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम् ।
यजमाने सुन्वति दक्षिणावति तस्मिन्तं धेहि मा पणौ ॥२॥
य इन्द्र सस्त्यव्रतोऽनुष्वापमदेवयुः ।
स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः ॥३॥
यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥४॥
यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि ।
यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥५॥ [३६]
स नः सोमेषु सोमपाः सुतेषु शवसस्पते ।
मादयस्व राधसा सूनृतावतेन्द्र राया परीणसा ॥६॥
मा न इन्द्र परा वृणग्भवा नः सधमाद्यः ।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक् ॥७॥
अस्मे इन्द्र सचा सुते नि षदा पीतये मधु ।
कृधी जरित्रे मघवन्नवो महदस्मे इन्द्र सचा सुते ॥८॥
न त्वा देवास आशत न मर्त्यासो अद्रिवः ।
विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत ॥९॥
विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम् ॥१०॥ [३७]
समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥११॥
नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥१२॥
तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥१३॥
त्वं पुर इन्द्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयध्यै ।
त्वद्विश्वानि भुवनानि वज्रिन्द्यावा रेजेते पृथिवी च भीषा ॥१४॥
तन्म ऋतमिन्द्र शूर चित्र पात्वपो न वज्रिन्दुरिताति पर्षि भूरि ।
कदा न इन्द्र राय आ दशस्येर्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् ॥१५॥ [३८] ६*(१६३२)

॥९८॥

१-१२ नृमेध आङ्गिरसः । इन्द्रः । उष्णिक्, ७, १०-११ ककुप्, ९, १२ पुरउष्णिक् ।

इन्द्राय साम गायत विप्राय बृहते बृहत् । धर्मकृते विपश्चिते पनस्यवे ॥१॥
त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः । विश्वकर्मा विश्वदेवो महाँ असि ॥२॥
विभ्राजञ्ज्योतिषा स्व१रगच्छो रोचनं दिवः । देवास्त इन्द्र सख्याय येमिरे ॥३॥
एन्द्र नो गधि प्रियः सत्राजिदगोह्यः । गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥४॥
अभि हि सत्य सोमपा उभे बभूथ रोदसी । इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥५॥
त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि । हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥६॥ [१]
अधा हीन्द्र गिर्वण उप त्वा कामान्महः ससृज्महे । उदेव यन्त उदभिः ॥७॥
वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि । वावृध्वांसं चिदद्रिवो दिवेदिवे ॥८॥
युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे । इन्द्रवाहा वचोयुजा ॥९॥
त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं पृतनाषहम् ॥१०॥
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ । अधा ते सुम्नमीमहे ॥११॥
त्वां शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो । स नो रास्व सुवीर्यम् ॥१२॥[२](१६४४)

॥९९॥

१-८ नृमेध आङ्गिरसः । इन्द्रः । प्रगाथः= (विषमा बृहती, समा सतोबृहती)

त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
स इन्द्र स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि ॥१॥
मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषन्ति वेधसः ।
तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः ॥२॥
श्रायन्तइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥३॥
अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥४॥
त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥५॥ (१६४९)

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥६॥
इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥७॥
इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् ।
समानमिन्द्रमवसे हवामहे वसवानं वसूजुवम् ॥८॥ [३] (१६५२)

॥१००॥

(१-१२) १-३, ६-१२ नेमो भार्गवः, ४-५ इन्द्रः । १-९, १२ इन्द्रः, (८ सुपर्णः, ९ वज्रो वा)
१०-११ वाक् । त्रिष्टुप्, ६ जगती, ७-९ अनुष्टुप् ।

अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यन्ति पश्चात् ।
यदा मह्यं दीधरो भागमिन्द्रादिन्मया कृणवो वीर्याणि ॥१॥
दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः ।
असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जङ्घनाव भूरि ॥२॥
प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥३॥
अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥४॥
आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदञ्छिशुमन्तः सखायः ॥५॥
विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते ।
पारावतं यत्पुरुसम्भृतं वस्वपावृणोः शरभाय ऋषिबन्धवे ॥६॥ [४]
प्र नूनं धावता पृथङ्नेह यो वो अवावरीत् ।
नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत् ॥७॥
मनोजवा अयमान आयसीमतरत्पुरम् ।
दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥८॥
समुद्रे अन्तः शयत उद्ना वज्रो अभीवृतः ।
भरन्त्यस्मै संयतः पुरःप्रस्रवणा बलिम् ॥९॥ (१६६१)

यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥१०॥
देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥११॥
सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे ।
हनाव वृत्रं रिणचाव सिन्धूनिन्द्रस्य यन्तु प्रसवे विसृष्टाः ॥१२॥ [५] (१६६४)

॥१०१॥

१-१६ जमदग्निर्भार्गवः । मित्रावरुणौ, ५ मित्रावरुणादित्याः, ६ आदित्याः, ७-८ अश्विनौ, ९-१० वायुः, ११-१२ सूर्यः, १३ उषाः सूर्यप्रभा वा, १४ पवमानः, १५-१६ गौः । १-२ प्रगाथः= (बृहती, सतोबृहती), ३ गायत्री, ४ सतोबृहती, ५-१३ प्रगाथः= (विषमा बृहती, समा सतोबृहती), १४-१६ त्रिष्टुप् ।

ऋधगित्था स मर्त्यः शशमे देवतातये ।
यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥१॥
वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा ।
ता बाहुता न दंसना रथर्यतः साकं सूर्यस्य रश्मिभिः ॥२॥
प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत् । अयःशीर्षा मदेरघुः ॥३॥
न यः संपृच्छे न पुनर्हवीतवे न संवादाय रमते ।
तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम् ॥४॥
प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।
वरूथ्यं१ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥५॥ [६]
ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् ।
ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते ॥६॥
आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा ।
उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥७॥
रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू ।
प्राचीं होत्रां प्रतिरन्तावितं नरा गृणाना जमदग्निना ॥८॥
आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानोऽयं शुक्रो अयामि ते ॥९॥ (१६७३)

वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अथा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥१०॥ [७]
बण्महाँ असि सूर्य बळादित्य महाँ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥११॥
बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥१२॥
इयं या नीच्यर्किणी रूपा रोहिण्या कृता ।
चित्रेव प्रत्यदर्श्यायत्यन्तर्दशसु बाहुषु ॥१३॥
प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे ।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश ॥१४॥
माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥१५॥
वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम् ।
देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥१६॥ [८] (१६८०)

॥ १०२ ॥

१-२२ प्रयोगो भार्गवः, पावकोऽग्निर्बार्हस्पत्यो वा, गृहपति-यविष्ठौ सहसः पुत्रावन्यतरो वा । अग्निः । गायत्री ।

त्वमग्ने बृहद्वयो दधासि देव दाशुषे ।
कविर्गृहपतिर्युवा ॥ १ ॥
स न ईळानया सह देवाँ अग्ने दुवस्युवा ।
चिकिद्विभानवा वह ॥ २ ॥
त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य ।
अभि ष्मो वाजसातये ॥ ३ ॥
और्वभृगुवच्छुचिमप्नवानवदा हुवे ।
अग्निं समुद्रवाससम् ॥ ४ ॥
हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः ।
अग्निं समुद्रवाससम् ॥ ५ ॥ [९] (१६८५)

आ सवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥ ६ ॥
अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
अच्छा नप्त्रे सहस्वते ॥ ७ ॥
अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ।
अस्य क्रत्वा यशस्वतः ॥ ८ ॥
अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।
आ वाजैरुप नो गमत् ॥ ९ ॥
विश्वेषामिह स्तुहि होतॄणां यशस्तमम् ।
अग्निं यज्ञेषु पूर्व्यम् ॥१०॥ [१०]
शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा ।
दीदाय दीर्घश्रुत्तमः ॥११॥
तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम् ।
मित्रं न यातयज्जनम् ॥१२॥
उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
वायोरनीके अस्थिरन् ॥१३॥
यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनम् ।
आपश्चिन्नि दधा पदम् ॥१४॥
पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः ।
भद्रा सूर्यइवोपदृक् ॥१५॥ [११]
अग्ने घृतस्य धीतिभिस्तेपानो देव शोचिषा ।
आ देवान्वक्षि यक्षि च ॥१६॥
तं त्वाजनन्त मातरः कविं देवासो अङ्गिरः ।
हव्यवाहममर्त्यम् ॥१७॥
प्रचेतसं त्वा कवेऽग्ने दूतं वरेण्यम् ।
हव्यवाहं नि षेदिरे ॥१८॥
नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति ।
अथैतादृग्भरामि ते ॥१९॥ (१६९९)

यदग्ने कानि कानि चिदा ते दारूणि दध्मसि ।
ता जुषस्व यविष्ठ्य ॥२०॥
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति ।
सर्वं तदस्तु ते घृतम् ॥२१॥
अग्निमिन्धानो मनसा धियं सचेत मर्त्यः ।
अग्निमीधे विवस्वभिः ॥२२॥ [१२] (१७०२)

॥ १०३ ॥

१-१४ सोभरिः काण्वः । अग्निः; १४ अग्नामरुतः । बृहती; ५ विराड्रूपा; ७, ९, ११, १३ सतोबृहती; ८, १२ ककुप्; १० हसीयसी; १४ अनुष्टुप् ।

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्त नो गिरः ॥ १ ॥
प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना ।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य सानवि ॥ २ ॥
यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत ॥ ३ ॥
प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत् ।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥ ४ ॥
स दृळ्हे चिदभि तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः ।
त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥ ५ ॥ [१३]
यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये ॥ ६ ॥
अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥ ७ ॥
प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥ ८ ॥
आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥ ९ ॥ (१७११)

प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम् ।
अग्निं रथानां यमम् ॥१०॥ [१४]
उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ।
दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥११॥
मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः ।
यः सुहोता स्वध्वरः ॥१२॥
मो ते रिषन्ये अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः ।
कीरिश्चिद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥१३॥
आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।
सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥१४॥ [१५] (१७१६)

॥ इत्यष्टमं मण्डलं समाप्तम् ॥

मंत्र-संख्या

सप्तममण्डलस्यान्तपर्यन्तं ५९७४
अष्टममण्डलस्य (वालखिल्यसहिता) १७१६
" (वालखिल्यरहिता १६३६)

सर्वयोगः- ७६९०

अथ नवमं मण्डलम् ।

॥ १ ॥

१-१० मधुच्छन्दा वैश्वामित्रः । पवमानः सोमः । गायत्री ।

(१)स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ १ ॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् । द्रुणा सधस्थमासदत् ॥ २ ॥
वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः । पर्षि राधो मघोनाम् ॥ ३ ॥
अभ्यर्ष महानां देवानां वीतिमन्धसा । अभि वाजमुत श्रवः ॥ ४ ॥
त्वामच्छा चरामसि तदिदर्थं दिवेदिवे । इन्दो त्वे न आशसः ॥ ५ ॥ [१६]
पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥ ६ ॥
तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश । स्वसारः पार्ये दिवि ॥ ७ ॥
तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम् । त्रिधातु वारणं मधु ॥ ८ ॥
अभीऽममघ्न्या उत श्रीणन्ति धेनवः शिशुम् । सोममिन्द्राय पातवे ॥ ९ ॥
अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते । शूरो मघा च मंहते ॥१०॥ [१७] (१०)

॥ २ ॥

१-१० मेधातिथिः काण्वः । पवमानः सोमः । गायत्री ।

पवस्व देववीरति पवित्रं सोम रंह्या । इन्द्रमिन्दो वृषा विश ॥ १ ॥
आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः । आ योनिं धर्णसिः सदः ॥ २ ॥
अधुक्षत प्रियं मधु धारा सुतस्य वेधसः । अपो वसिष्ट सुक्रतुः ॥ ३ ॥
महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः । यद्गोभिर्वासयिष्यसे ॥ ४ ॥
समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥ ५ ॥ [१८]
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सं सूर्येण रोचते ॥ ६ ॥
गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भसे ॥ ७ ॥
तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे । तव प्रशस्तयो महीः ॥ ८ ॥
अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया । पर्जन्यो वृष्टिमाँइव ॥ ९ ॥
गोषा इन्दो नृषा अस्यश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ॥१०॥ [१९] (२०)

७१

॥ ३ ॥

१-१० शुनःशेप आजीगर्तिः, स देवरातः कृत्रिमो वैश्वामित्रः । पवमानः सोमः । गायत्री ।

एष देवो अमर्त्यः पर्णवीरिव दीयति । अभि द्रोणान्यासदम् ॥ १ ॥
एष देवो विपा कृतोऽति ह्वरांसि धावति । पवमानो अदाभ्यः ॥ २ ॥
एष देवो विपन्युभिः पवमान ऋतायुभिः । हरिर्वाजाय मृज्यते ॥ ३ ॥
एष विश्वानि वार्या शूरो यन्निव सत्वभिः । पवमानः सिषासति ॥ ४ ॥
एष देवो रथर्यति पवमानो दशस्यति । आविष्कृणोति वग्वनुम् ॥ ५ ॥ [२०]
एष विप्रैरभिष्टुतोऽपो देवो वि गाहते । दधद्रत्नानि दाशुषे ॥ ६ ॥
एष दिवं वि धावति तिरो रजांसि धारया । पवमानः कनिक्रदत् ॥ ७ ॥
एष दिवं व्यासरत्तिरो रजांस्यस्पृतः । पवमानः स्वध्वरः ॥ ८ ॥
एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः । हरिः पवित्रे अर्षति ॥ ९ ॥
एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः । धारया पवते सुतः ॥१०॥ [२१] (३०)

॥ ४ ॥

१-१० हिरण्यस्तूप आङ्गिरसः । पवमानः सोमः । गायत्री ।

सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥ १ ॥
सना ज्योतिः सना स्वर्विश्वा च सोम सौभगा । अथा नो वस्यसस्कृधि ॥ २ ॥
सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥ ३ ॥
पवीतारः पुनीतन सोममिन्द्राय पातवे । अथा नो वस्यसस्कृधि ॥ ४ ॥
त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः । अथा नो वस्यसस्कृधि ॥ ५ ॥ [२२]
तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् । अथा नो वस्यसस्कृधि ॥ ६ ॥
अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम् । अथा नो वस्यसस्कृधि ॥ ७ ॥
अभ्यर्षानपच्युतो रयिं समत्सु सासहिः । अथा नो वस्यसस्कृधि ॥ ८ ॥
त्वां यज्ञैरवीवृधन्पवमान विधर्मणि । अथा नो वस्यसस्कृधि ॥ ९ ॥
रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥१०॥ [२३] (४०)

॥ ५ ॥

१-११ असितः काश्यपो देवलो वा । आप्रीसूक्तं=(१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ इळः, ४ बर्हिः, ५ देवीः द्वारः, ६ उषासानक्ता, ७ दैव्यौ होतारौ प्रचेतसौ, ८ तिस्रो देव्यः सरस्वतीळाभारत्यः, ९ त्वष्टा, १० वनस्पतिः, ११ स्वाहाकृतयः)। गायत्री, ८-११ अनुष्टुप् ।

समिद्धो विश्वतस्पतिः पवमानो वि राजति । प्रीणन्वृषा कनिक्रदत् ॥ १ ॥
तनूनपात्पवमानः शृङ्गे शिशानो अर्षति । अन्तरिक्षेण रारजत् ॥ २ ॥
ईळेन्यः पवमानो रयिर्वि राजति द्युमान् । मधोर्धाराभिरोजसा ॥ ३ ॥
बर्हिः प्राचीनमोजसा पवमानः स्तृणन्हरिः । देवेषु देव ईयते ॥ ४ ॥
उदातैर्जिहते बृहद् द्वारो देवीर्हिरण्ययीः । पवमानेन सुष्टुताः ॥ ५ ॥ [२४]
सुशिल्पे बृहती मही पवमानो वृषण्यति । नक्तोषासा न दर्शते ॥ ६ ॥
उभा देवा नृचक्षसा होतारा दैव्या हुवे । पवमान इन्द्रो वृषा ॥ ७ ॥
भारती पवमानस्य सरस्वतीळा मही ।
इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः ॥ ८ ॥
त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे ।
इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः ॥ ९ ॥
वनस्पतिं पवमान मध्वा समङ्ग्धि धारया ।
सहस्रवल्शं हरितं भ्राजमानं हिरण्ययम् ॥१०॥
विश्वे देवाः स्वाहाकृतिं पवमानस्या गत ।
वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥११॥ [२५] (५१)

॥ ६ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

। अव्यो वारेष्वस्मयुः ॥ १ ॥
मन्द्रया सोम धारया वृषा पवस्व देवयुः । अभि वाजिनो अर्वतः ॥ २ ॥
अभि त्यं मद्यं मदमिन्दविन्द्र इति क्षर । अभि वाजमुत श्रवः ॥ ३ ॥
अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ । पुनाना इन्द्रमाशत ॥ ४ ॥
अनु द्रप्सास इन्दव आपो न प्रवतासरन् । वने क्रीळन्तमत्यविम् ॥ ५ ॥ [२६]
यमत्यमिव वाजिनं मृजन्ति योषणो दश । सुतं भराय सं सृज ॥ ६ ॥ (५७)
तं गोभिर्वृषणं रसं मदाय देववीतये

देवो देवाय धारयेन्द्राय पवते सुतः । पयो यदस्य पीपयत् ॥ ७ ॥
आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः । प्रत्नं नि पाति काव्यम् ॥ ८ ॥
एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये । गुहा चिद्दधिषे गिरः ॥ ९ ॥ [२७] (६०)

॥ ७ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः । विदाना अस्य योजनम् ॥ १ ॥
प्र धारा मध्वो अग्रियो महीरपो वि गाहते । हविर्हविष्षु वन्द्यः ॥ २ ॥
प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने । सद्माभि सत्यो अध्वरः ॥ ३ ॥
परि यत्काव्या कविर्नृम्णा वसानो अर्षति । स्वर्वाजी सिषासति ॥ ४ ॥
पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥ ५ ॥ [२८]
अव्यो वारे परि प्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥ ६ ॥
स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥ ७ ॥
आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥ ८ ॥
अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितम् ॥ ९ ॥ [२९] (६९)

॥ ८ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् । वर्धन्तो अस्य वीर्यम् ॥ १ ॥
पुनानासश्चमूषदो गच्छन्तो वायुमश्विना । ते नो धान्तु सुवीर्यम् ॥ २ ॥
इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदम् ॥ ३ ॥
मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥ ४ ॥
देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः । सं गोभिर्वासयामसि ॥ ५ ॥ [३०]
पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥ ६ ॥
मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ॥ ७ ॥
वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥ ८ ॥
नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम् । भक्षीमहि प्रजामिषम् ॥ ९ ॥ [३१] (७८)

॥ ९ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । सुवानो याति कविक्रतुः ॥ १ ॥
प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे । वीत्यर्ष चनिष्ठया ॥ २ ॥
स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् । महान्मही ऋतावृधा ॥ ३ ॥
स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः । या एकमक्षि वावृधुः ॥ ४ ॥
ता अभि सन्तमस्तृतं महे युवानमा दधुः । इन्दुमिन्द्र तव व्रते ॥ ५ ॥ [३२]
अभि वह्निरमर्त्यः सप्त पश्यति वावहिः । क्रिविर्देवीरतर्पयत् ॥ ६ ॥
अवा कल्पेषु नः पुमस्तमांसि सोम योध्या । तानि पुनान जङ्घनः ॥ ७ ॥
नू नव्यसे नवीयसे सूक्ताय साधया पथः । प्रत्नवद्रोचया रुचः ॥ ८ ॥
पवमान महि श्रवो गामश्वं रासि वीरवत् । सना मेधां सना स्वः ॥ ९ ॥ [३३] (८७)

॥ १० ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

प्र स्वानासो रथाइवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥ १ ॥
हिन्वानासो रथाइव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥ २ ॥
राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥ ३ ॥
परि सुवानास इन्दवो मदाय बर्हणा गिरा । सुता अर्षन्ति धारया ॥ ४ ॥
आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥ ५ ॥ [३४]
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥ ६ ॥
समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥ ७ ॥
नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा । कवेरपत्यमा दुहे ॥ ८ ॥
अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ॥ ९ ॥ [३५] (९६)

॥ ११ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ इयक्षते ॥ १ ॥
अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥ २ ॥
स नः पवस्व शं गवे शं जनाय शमर्वते । शं राजन्नोषधीभ्यः ॥ ३ ॥ (९९)

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥ ४ ॥
हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ॥ ५ ॥ [३६]
नमसेदुप सीदत दध्नेदभि श्रीणीतन । इन्दुमिन्द्रे दधातन ॥ ६ ॥
अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥ ७ ॥
इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥ ८ ॥
पवमान सुवीर्यं रयिं सोम रिरीहि नः । इन्दविन्द्रेण नो युजा ॥ ९ ॥ [३७] (१०

॥ १२ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

सोमा असृग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः ॥ १ ॥
अभि विप्रा अनूषत गावो वत्सं न मातरः । इन्द्रं सोमस्य पीतये ॥ २ ॥
मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥ ३ ॥
दिवो नाभा विचक्षणोऽव्यो वारे महीयते । सोमो यः सुक्रतुः कविः ॥ ४ ॥
यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः । तमिन्दुः परि षस्वजे ॥ ५ ॥ [३८]
प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतम् ॥ ६ ॥
नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः । हिन्वानो मानुषा युगा ॥ ७ ॥
अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥ ८ ॥
आ पवमान धारय रयिं सहस्रवर्चसम् । अस्मे इन्दो स्वाभुवम् ॥ ९ ॥ [३९] (११

॥ १३ ॥

१-९ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥ १ ॥
पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये ॥ २ ॥
पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥ ३ ॥
उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिन्दो सुवीर्यम् ॥ ४ ॥
ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥ ५ ॥ [१]
अत्या हियाना न हेतृभिरसृग्रं वाजसातये । वि वारमव्यमाशवः ॥ ६ ॥
वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः । दधन्विरे गभस्त्योः ॥ ७ ॥
जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ॥ ८ ॥
अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ॥ ९ ॥ [२] (१२३)

॥ १४ ॥

१-८ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत्पुरुस्पृहम् ॥ १ ॥
गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् ॥ २ ॥
आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥ ३ ॥
निरिणानो वि धावति जहच्छर्याणि तान्वा । अत्रा सं जिघ्रते युजा ॥ ४ ॥
नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा । गाः कृण्वानो न निर्णिजम् ॥ ५ ॥ [३]
अति श्रिती तिरश्चता गव्या जिगात्यण्व्या । वग्नुमियर्ति यं विदे ॥ ६ ॥
अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णत वाजिनः ॥ ७ ॥
परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा । वसूनि याह्यस्मयुः ॥ ८ ॥ [४] (१३१)

॥ १५ ॥

१-८ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः । गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥
एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते ॥ २ ॥
एष हितो वि नीयतेऽन्तः शुभ्रावता पथा । यदी तुञ्जन्ति भूर्णयः ॥ ३ ॥
एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो वृषा । नृम्णा दधान ओजसा ॥ ४ ॥
एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः । पतिः सिन्धूनां भवन् ॥ ५ ॥
एष वसूनि पिब्दना परुषा ययिवाँ अति । अव शादेषु गच्छति ॥ ६ ॥
एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः । प्रचक्राणं महीरिषः ॥ ७ ॥
एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः । स्वायुधं मदिन्तमम् ॥ ८ ॥ [५] (१३९)

॥ १६ ॥

१-८ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

प्र ते सोतार ओण्योरसं मदाय घृष्वये । सर्गो न तक्त्येतशः ॥ १ ॥
क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा । गोषामण्वेषु सश्चिम ॥ २ ॥
अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ॥ ३ ॥
प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ॥ ४ ॥ (१४३)

प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत । महे भराय कारिणः ॥ ५ ॥
पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥ ६ ॥
दिवो न सानु पिप्युषी धारा सुतस्य वेधसः । वृथा पवित्रे अर्षति ॥ ७ ॥
त्वं सोम विपश्चितं तना पुनान आयुषु । अव्यो वारं वि धावसि ॥ ८ ॥ [६] (१४७)

॥ १७ ॥

१-८ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः ॥ १ ॥
अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव । इन्द्रं सोमासो अक्षरन् ॥ २ ॥
अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ ३ ॥
आ कलशेषु धावति पवित्रे परि षिच्यते । उक्थैर्यज्ञेषु वर्धते ॥ ४ ॥
अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् । इष्णन्त्सूर्यं न चोदयः ॥ ५ ॥
अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः । दधानाश्चक्षसि प्रियम् ॥ ६ ॥
तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः । मृजन्ति देवतातये ॥ ७ ॥
मधोर्धारामनु क्षर तीव्रः सधस्थमासदः । चारुर्ऋताय पीतये ॥ ८ ॥ [७] (१५५)

॥ १८ ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः । मदेषु सर्वधा असि ॥ १ ॥
त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः । मदेषु सर्वधा असि ॥ २ ॥
तव विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥ ३ ॥
आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे । मदेषु सर्वधा असि ॥ ४ ॥
य इमे रोदसी मही सं मातरेव दोहते । मदेषु सर्वधा असि ॥ ५ ॥
परि यो रोदसी उभे सद्यो वाजेभिरर्षति । मदेषु सर्वधा असि ॥ ६ ॥
स शुष्मी कलशेष्वा पुनानो अचिक्रदत् । मदेषु सर्वधा असि ॥ ७ ॥ [८] (१६२)

॥ १९ ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु । तन्नः पुनान आ भर ॥ १ ॥
युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती । ईशाना पिप्यतं धियः ॥ २ ॥ (१६४)

वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि । हरिः सन्योनिमासदत् ॥ ३ ॥
अवावशन्त धीतयो वृषभस्याधि रेतसि । सूनोर्वत्सस्य मातरः ॥ ४ ॥
कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत् । याः शुक्रं दुहते पयः ॥ ५ ॥
उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु । पवमान विदा रयिम् ॥ ६ ॥
नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर । दूरे वा सतो अन्ति वा ॥ ७ ॥ [९] (१६९)

॥ २० ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

प्र कविर्देववीतयेऽव्यो वारेभिरर्षति । साह्वान्विश्वा अभि स्पृधः ॥ १ ॥
स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥ २ ॥
परि विश्वानि चेतसा मृशसे पवसे मती । स नः सोम श्रवो विदः ॥ ३ ॥
अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ॥ ४ ॥
त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ । पुनानो वह्ने अद्भुत ॥ ५ ॥
स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः । सोमश्चमूषु सीदति ॥ ६ ॥
क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥ ७ ॥ [१०] (१७६)

॥ २१ ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः । मत्सरासः स्वर्विदः ॥ १ ॥
प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः ॥ २ ॥
वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित् । सिन्धोरूर्मा व्यक्षरन् ॥ ३ ॥
एते विश्वानि वार्या पवमानास आशत । हिता न सप्तयो रथे ॥ ४ ॥
आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे । यो अस्मभ्यमरावा ॥ ५ ॥
ऋभुर्न रथ्यं नवं दधाता केतमादिशे । शुक्राः पवध्वमर्णसा ॥ ६ ॥
एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत । सतः प्रासाविषुर्मतिम् ॥ ७ ॥ [११] (१८३)

॥ २२ ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

एते सोमास आशवो रथाइव प्र वाजिनः । सर्गाः सृष्टा अहेषत ॥ १ ॥
एते वाताइवोरवः पर्जन्यस्येव वृष्टयः । अग्नेरिव भ्रमा वृथा ॥ २ ॥ (१८५)

एते पूता विपश्चितः सोमासो दध्याशिरः । विपा व्यानशुर्धियः ॥ ३ ॥
एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः । इयक्षन्तः पथो रजः ॥ ४ ॥
एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः । उतेदमुत्तमं रजः ॥ ५ ॥
तन्तुं तन्वानमुत्तममनु प्रवत आशत । उतेदमुत्तमाय्यम् ॥ ६ ॥
त्वं सोम पणिभ्य आ वसु गव्यानि धारयः । ततं तन्तुमचिक्रदः ॥ ७ ॥ [१२] (१९०)

॥ २३ ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

सोमा असृग्रमाशवो मधोर्मदस्य धारया । अभि विश्वानि काव्या ॥ १ ॥
अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् ॥ २ ॥
आ पवमान नो भरार्यो अदाशुषो गयम् । कृधि प्रजावतीरिषः ॥ ३ ॥
अभि सोमास आयवः पवन्ते मद्यं मदम् । अभि कोशं मधुश्चुतम् ॥ ४ ॥
सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम् । सुवीरो अभिशस्तिपाः ॥ ५ ॥
इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः । इन्दो वाजं सिषाससि ॥ ६ ॥
अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति । जघान जघनच्च नु ॥ ७ ॥ [१३] (१९७)

॥ २४ ॥

१-७ असितः काश्यपो देवलो वा । पवमानः सोमः । गायत्री ।

प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु मृञ्जत ॥ १ ॥
अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत ॥ २ ॥
प्र पवमान धन्वसि सोमेन्द्राय पातवे । नृभिर्यतो वि नीयसे ॥ ३ ॥
त्वं सोम नृमादनः पवस्व चर्षणीसहे । सस्निर्यो अनुमाद्यः ॥ ४ ॥
इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि । अरमिन्द्रस्य धाम्ने ॥ ५ ॥
पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ॥ ६ ॥
शुचिः पावक उच्यते सोमः सुतस्य मध्वः । देवावीरघशंसहा ॥ ७ ॥ [१४] (२०४)

॥ २५ ॥

१-६ दृळ्हच्युत आगस्त्यः । पवमानः सोमः । गायत्री ।

(२) पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ॥ १ ॥
पवमान धिया हितो३भि योनिं कनिक्रदत् । धर्मणा वायुमा विश ॥ २ ॥ (२०६)

सं देवैः शोभते वृषा कविर्योनावधि प्रियः । वृत्रहा देववीतमः ॥ ३ ॥
विश्वा रूपाण्याविशन्पुनानो याति हर्यतः । यत्रामृतास आसते ॥ ४ ॥
अरुषो जनयन्गिरः सोमः पवत आयुषक् । इन्द्रं गच्छन्कविक्रतुः ॥ ५ ॥
आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ॥ ६ ॥ [१५] (२१०)

॥ २६ ॥

१-६ इध्मवाहो दार्ढच्युतः । पवमानः सोमः । गायत्री ।

तममृक्षन्त वाजिनमुपस्थे अदितेरधि । विप्रासो अण्व्या धिया ॥ १ ॥
तं गावो अभ्यनूषत सहस्रधारमक्षितम् । इन्दुं धर्तारमा दिवः ॥ २ ॥
तं वेधां मेधयाह्यन्पवमानमधि द्यवि । धर्णसिं भूरिधायसम् ॥ ३ ॥
तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः । पतिं वाचो अदाभ्यम् ॥ ४ ॥
तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः । हर्यतं भूरिचक्षसम् ॥ ५ ॥
तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् । इन्दविन्द्राय मत्सरम् ॥ ६ ॥ [१६] (२१६)

॥ २७ ॥

१-६ नृमेध आङ्गिरसः । पवमानः सोमः । गायत्री ।

एष कविरभिष्टुतः पवित्रे अधि तोशते । पुनानो घ्नन्नप स्रिधः ॥ १ ॥
एष इन्द्राय वायवे स्वर्जित्परि षिच्यते । पवित्रे दक्षसाधनः ॥ २ ॥
एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्ववित् ॥ ३ ॥
एष गव्युरचिक्रदत्पवमानो हिरण्ययुः । इन्दुः सत्राजिदस्तृतः ॥ ४ ॥
एष सूर्येण हासते पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ॥ ५ ॥
एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः । पुनान इन्दुरिन्द्रमा ॥ ६ ॥ [१७] (२२२)

॥ २८ ॥

१-६ प्रियमेध आङ्गिरसः । पवमानः सोमः । गायत्री ।

एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः । अव्यो वारं वि धावति ॥ १ ॥
एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः । विश्वा धामान्याविशन् ॥ २ ॥
एष देवः शुभायतेऽधि योनावमर्त्यः । वृत्रहा देववीतमः ॥ ३ ॥
एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ॥ ४ ॥ (२२६)

एष सूर्यमरोचयत्पवमानो विचर्षणिः । विश्वा धामानि विश्ववित् ॥ ५ ॥
एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति । देवावीरघशंसहा ॥ ६ ॥ [१८] (२२८)

॥ २९ ॥

१-६ नृमेध आङ्गिरसः । पवमानः सोमः । गायत्री ।

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा । देवाँ अनु प्रभूषतः ॥ १ ॥
सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा । ज्योतिर्जज्ञानमुक्थ्यम् ॥ २ ॥
सुषहा सोम तानि ते पुनानाय प्रभूवसो । वर्धा समुद्रमुक्थ्यम् ॥ ३ ॥
विश्वा वसूनि संजयन्पवस्व सोम धारया । इनु द्वेषांसि सध्र्यक् ॥ ४ ॥
रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् । निदो यत्र मुमुच्महे ॥ ५ ॥
एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया । द्युमन्तं शुष्ममा भर ॥ ६ ॥ [१९] (२३४)

॥ ३० ॥

१-६ बिन्दुराङ्गिरसः । पवमानः सोमः । गायत्री ।

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् । पुनानो वाचमिष्यति ॥ १ ॥
इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत् । इयर्ति वग्नुमिन्द्रियम् ॥ २ ॥
आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम् । पवस्व सोम धारया ॥ ३ ॥
प्र सोमो अति धारया पवमानो असिष्यदत् । अभि द्रोणान्यासदम् ॥ ४ ॥
अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः । इन्दविन्द्राय पीतये ॥ ५ ॥
सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे । चारुं शर्धाय मत्सरम् ॥ ६ ॥ [२०] (२४०)

॥ ३१ ॥

१-६ गोतमो राहूगणः । पवमानः सोमः । गायत्री ।

प्र सोमासः स्वाध्य१ः पवमानासो अक्रमुः । रयिं कृण्वन्ति चेतनम् ॥ १ ॥
दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः । भवा वाजानां पतिः ॥ २ ॥
तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः । सोम वर्धन्ति ते महः ॥ ३ ॥
आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥ ४ ॥
तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम् । वर्षिष्ठे अधि सानवि ॥ ५ ॥
स्वायुधस्य ते सतो भुवनस्य पते वयम् । इन्दो सखित्वमुश्मसि ॥ ६ ॥ [२१] (२४६)

॥ ३२ ॥

१-६ श्यावाश्व आत्रेयः । पवमानः सोमः । गायत्री ।

प्र सोमासो मदच्युतः श्रवसे नो मघोनः । सुता विदथे अक्रमुः ॥ १ ॥
आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ २ ॥
आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् । अत्यो न गोभिरज्यते ॥ ३ ॥
उभे सोमावचाकशन्मृगो न तक्तो अर्षसि । सीदन्नृतस्य योनिमा ॥ ४ ॥
अभि गावो अनूषत योषा जारमिव प्रियम् । अगन्नाजिं यथा हितम् ॥ ५ ॥
अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च । सनिं मेधामुत श्रवः ॥ ६ ॥ [२२] (२५२)

॥ ३३ ॥

१-६ त्रित आप्त्यः । पवमानः सोमः । गायत्री ।

प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः । वनानि महिषा इव ॥ १ ॥
अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया । वाजं गोमन्तमक्षरन् ॥ २ ॥
सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमा अर्षन्ति विष्णवे ॥ ३ ॥
तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥ ४ ॥
अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः । मर्मृज्यन्ते दिवः शिशुम् ॥ ५ ॥
रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणः ॥ ६ ॥ [२३] (२५८)

॥ ३४ ॥

१-६ त्रित आप्त्यः । पवमानः सोमः । गायत्री ।

प्र सुवानो धारया तनेन्दुर्हिन्वानो अर्षति । रुजद्दृळ्हा व्योजसा ॥ १ ॥
सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे ॥ २ ॥
वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः । दुहन्ति शक्मना पयः ॥ ३ ॥
भुवत्त्रितस्य मर्ज्यो भुवदिन्द्राय मत्सरः । सं रूपैरज्यते हरिः ॥ ४ ॥
अभीमृतस्य विष्टपं दुहते पृश्निमातरः । चारु प्रियतमं हविः ॥ ५ ॥
समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः । धेनूर्वाश्रो अवीवशत् ॥ ६ ॥ [२४] (२६४)

॥ ३५ ॥

१-६ प्रभूवसुराङ्गिरसः । पवमानः सोमः । गायत्री ।

आ नः पवस्व धारया पवमान रयिं पृथुम् । यया ज्योतिर्विदासि नः ॥ १ ॥
इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय । रायो धर्ता न ओजसा ॥ २ ॥ (२६६)

त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः । क्षरा णो अभि वार्यम् ॥ ३ ॥
प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः । व्रता विदान आयुधा ॥ ४ ॥
तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि । सोमं जनस्य गोपतिम् ॥ ५ ॥
विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः । पुनानस्य प्रभूवसोः ॥ ६ ॥ [२५] (२७०)

॥ ३६ ॥

१-६ प्रभूवसुराङ्गिरसः । पवमानः सोमः । गायत्री ।

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन्वाजी न्यक्रमीत् ॥ १ ॥
स वह्निः सोम जागृविः पवस्व देववीरति । अभि कोशं मधुश्चुतम् ॥ २ ॥
स नो ज्योतींषि पूर्व्य पवमान वि रोचय । क्रत्वे दक्षाय नो हिनु ॥ ३ ॥
शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः । पवते वारे अव्यये ॥ ४ ॥
स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा । पवतामान्तरिक्ष्या ॥ ५ ॥
आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि । वीरयुः शवसस्पते ॥ ६ ॥ [२६] (२७६)

॥ ३७ ॥

१-६ रहूगण आङ्गिरसः । पवमानः सोमः । गायत्री ।

स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ १ ॥
स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥ २ ॥
स वाजी रोचना दिवः पवमानो वि धावति । रक्षोहा वारमव्ययम् ॥ ३ ॥
स त्रितस्याधि सानवि पवमानो अरोचयत् । जामिभिः सूर्यं सह ॥ ४ ॥
स वृत्रहा वृषा सुतो वरिवोविददाभ्यः । सोमो वाजमिवासरत् ॥ ५ ॥
स देवः कविनेषितोऽभि द्रोणानि धावति । इन्दुरिन्द्राय मंहना ॥ ६ ॥ [२७] (२८२)

॥ ३८ ॥

१-६ रहूगण आङ्गिरसः । पवमानः सोमः । गायत्री ।

एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति । गच्छन्वाजं सहस्रिणम् ॥ १ ॥
एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ २ ॥
एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भते ॥ ३ ॥
एष स्य मानुषीष्वा श्येनो न विक्षु सीदति । गच्छञ्जारो न योषितम् ॥ ४ ॥
एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः । य इन्दुर्वारमाविशत् ॥ ५ ॥
एष स्य पीतये सुतो हरिरर्षति धर्णसिः । क्रन्दन्योनिमभि प्रियम् ॥ ६ ॥ [२८] (२८८)

॥ ३९ ॥

१-६ बृहन्मतिराङ्गिरसः । पवमानः सोमः । गायत्री ।

आशुरर्ष बृहन्मते परि प्रियेण धाम्ना । यत्र देवा इति ब्रवन् ॥ १ ॥
परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥ २ ॥
सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥ ३ ॥
अयं स यो दिवस्परि रघुयामा पवित्र आ । सिन्धोरूर्मा व्यक्षरत् ॥ ४ ॥
आविवासन्परावतो अथो अर्वावतः सुतः । इन्द्राय सिच्यते मधु ॥ ५ ॥
समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः । योनावृतस्य सीदत ॥ ६ ॥ [२९] (२९४)

॥ ४० ॥

१-६ बृहन्मतिराङ्गिरसः । पवमानः सोमः । गायत्री ।

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥ १ ॥
आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः । ध्रुवे सदसि सीदति ॥ २ ॥
नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणम् ॥ ३ ॥
विश्वा सोम पवमान द्युम्नानीन्दवा भर । विदाः सहस्रिणीरिषः ॥ ४ ॥
स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम् । जरितुर्वर्धया गिरः ॥ ५ ॥
पुनान इन्दवा भर सोम द्विबर्हसं रयिम् । वृषन्निन्दो न उक्थ्यम् ॥ ६ ॥ [३०] (३००)

॥ ४१ ॥

१-६ मेध्यातिथिः काण्वः । पवमानः सोमः । गायत्री ।

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥ १ ॥
सुवितस्य मनामहेऽति सेतुं दुराव्यम् । साह्वांसो दस्युमव्रतम् ॥ २ ॥
शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ॥ ३ ॥
आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् । अश्वावद्वाजवत्सुतः ॥ ४ ॥
स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥ ५ ॥
परि णः शर्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपम् ॥ ६ ॥ [३१] (३०६)

॥ ४२ ॥

१-६ मेध्यातिथिः काण्वः । पवमानः सोमः । गायत्री ।

जनयन्रोचना दिवो जनयन्नप्सु सूर्यम् । वसानो गा अपो हरिः ॥ १ ॥
एष प्रत्नेन मन्मना देवो देवेभ्यस्परि । धारया पवते सुतः ॥ २ ॥ (३०८)

वावृधानाय तूर्वये पवन्ते वाजसातये । सोमाः सहस्रपाजसः ॥ ३ ॥
दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते । क्रन्दन्देवाँ अजीजनत् ॥ ४ ॥
अभि विश्वानि वार्याभि देवाँ ऋतावृधः । सोमः पुनानो अर्षति ॥ ५ ॥
गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः । पवस्व बृहतीरिषः ॥ ६ ॥ [३२] (३१२)

॥ ४३ ॥

१-६ मेध्यातिथिः काण्वः । पवमानः सोमः । गायत्री ।

यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि ॥ १ ॥
तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा । इन्दुमिन्द्राय पीतये ॥ २ ॥
पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः । विप्रस्य मेध्यातिथेः ॥ ३ ॥
पवमान विदा रयिमस्मभ्यं सोम सुश्रियम् । इन्दो सहस्रवर्चसम् ॥ ४ ॥
इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ । यदक्षारति देवयुः ॥ ५ ॥
पवस्व वाजसातये विप्रस्य गृणतो वृधे । सोम रास्व सुवीर्यम् ॥ ६ ॥ [३३] ८* (३१८)

॥ इति षष्ठोऽष्टकः ॥ ६ ॥

॥ ४४ ॥

१-६ अयास्य आङ्गिरसः । पवमानः सोमः । गायत्री ।

प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥ १ ॥
मती जुष्टो धिया हितः सोमो हिन्वे परावति । विप्रस्य धारया कविः ॥ २ ॥
अयं देवेषु जागृविः सुत एति पवित्र आ । सोमो याति विचर्षणिः ॥ ३ ॥
स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम् । बर्हिष्माँ आ विवासति ॥ ४ ॥
स नो भगाय वायवे विप्रवीरः सदावृधः । सोमो देवेष्वा यमत् ॥ ५ ॥
स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः । वाजं जेषि श्रवो बृहत् ॥ ६ ॥ [१] (३२४)

॥ ४५ ॥

१-६ अयास्य आङ्गिरसः । पवमानः सोमः । गायत्री ।

स पवस्व मदाय कं नृचक्षा देववीतये । इन्दविन्द्राय पीतये ॥ १ ॥
स नो अर्षाभि दूत्यं त्वमिन्द्राय तोशसे । देवान्सखिभ्य आ वरम् ॥ २ ॥
उत त्वामरुणं वयं गोभिरञ्ज्मो मदाय कम् । वि नो राये दुरो वृधि ॥ ३ ॥
अत्यू पवित्रमक्रमीद्वाजी धुरं न यामनि । इन्दुर्देवेषु पत्यते ॥ ४ ॥
समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ॥ ५ ॥
तया पवस्व धारया यया पीतो विचक्षसे । इन्दो स्तोत्रे सुवीर्यम् ॥ ६ ॥ [२] (३३०)

॥ ४६ ॥

१-६ अयास्य आङ्गिरसः । पवमानः सोमः । गायत्री ।

असृग्रन्देववीतयेऽत्यासः कृत्व्याइव । क्षरन्तः पर्वतावृधः ॥ १ ॥
परिष्कृतास इन्दवो योषेव पित्र्यावती । वायुं सोमा असृक्षत ॥ २ ॥
एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः । इन्द्रं वर्धन्ति कर्मभिः ॥ ३ ॥
आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना । गोभिः श्रीणीत मत्सरम् ॥ ४ ॥
स पवस्व धनंजय प्रयन्ता राधसो महः । अस्मभ्यं सोम गातुवित् ॥ ५ ॥
एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः । इन्द्राय मत्सरं मदम् ॥ ६ ॥ [३] (३३६)

॥ ४७ ॥

१-५ कविर्भार्गवः । पवमानः सोमः । गायत्री ।

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत । मन्दान उद्वृषायते ॥ १ ॥
कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा । ऋणा च धृष्णुश्चयते ॥ २ ॥
आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् । उक्थं यदस्य जायते ॥ ३ ॥
स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति । यदी मर्मृज्यते धियः ॥ ४ ॥
सिषासतू रयीणां वाजेष्वर्वतामिव । भरेषु जिग्युषामसि ॥ ५ ॥ [४] (३४१)

॥ ४८ ॥

१-५ कविर्भार्गवः । पवमानः सोमः । गायत्री ।

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः । चारुं सुकृत्ययेमहे ॥ १ ॥
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् । शतं पुरो रुरुक्षणिम् ॥ २ ॥
अतस्त्वा रयिमभि राजानं सुक्रतो दिवः । सुपर्णो अव्यथिर्भरत् ॥ ३ ॥
विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरम् । गोपामृतस्य विर्भरत् ॥ ४ ॥
अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे । अभिष्टिकृद्विचर्षणिः ॥ ५ ॥ [५] (३४६)

॥ ४९ ॥

१-५ कविर्भार्गवः । पवमानः सोमः । गायत्री ।

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि । अयक्ष्मा बृहतीरिषः ॥ १ ॥
तया पवस्व धारया यया गाव इहागमन् । जन्यास उप नो गृहम् ॥ २ ॥
घृतं पवस्व धारया यज्ञेषु देववीतमः । अस्मभ्यं वृष्टिमा पव ॥ ३ ॥
ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृचः ।
शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हिथ्ँसीः ॥९॥
ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मयि धेहि । सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि । उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यथ्ँहस आस्य यज्ञस्योदृचः ॥१०॥
व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः । दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसथ्ँ सुतीर्था नो असद्वशे । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥११॥
श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः ।
ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः ॥१२॥
इयं ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम् ।
अंहोमुचः स्वाहाकृताः पृथिवीमा विशत पृथिव्या सम्भव ॥१३॥
अग्ने त्वथ्ँ सु जागृहि वयथ्ँ सु मन्दिषीमहि । रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि ॥१४॥
पुनर्मनः पुनरायुर्म आगन् पुनः प्राणः पुनरात्मा म आगन् पुनश्चक्षुः पुनः श्रोत्रं म आगन् ।
वैश्वानरो अदब्धस्तनूपा अग्निर्नः पातु दुरितादवद्यात् ॥१५॥
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ।
रास्वेयत्सोमा भूयो भर देवो नः सविता वसोर्दाता वस्वदात् ॥१६॥
एषा ते शुक्र तनूरेतद्वर्चस्तया सम्भव भ्राजं गच्छ ।
जूरसि धृता मनसा जुष्टा विष्णवे ॥१७॥

तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा ।
शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥१८॥
चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतःशीर्ष्णी ।
सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतां पूषाऽध्वनस्पात्विन्द्रायाध्यक्षाय ॥१९॥
अनु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ।
सा देवि देवमच्छेहीन्द्राय सोमथ्ँ रुद्रस्त्वा वर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥२०॥
वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि ।
बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिरा चके ॥२१॥
अदित्यास्त्वा मूर्द्धन्नाजिघर्मि देवयजने पृथिव्या इडायास्पदमसि घृतवत् स्वाहा । अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वयथ्ँ रायस्पोषेण वियौष्म तोतो रायः ॥२२॥
समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा ।
मा म आयुः प्रमोषीर्मो अहं तव वीरं विदेय तव देवि सन्दृशि ॥२३॥
एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतादेष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोनामानाथ्ँ साम्राज्यं गच्छेति मे सोमाय ब्रूतादास्माकोऽसि शुक्रस्ते ग्राह्यो विचितस्त्वा वि चिन्वन्तु ॥२४॥
अभि त्यं देवथ्ँ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवथ्ँ रत्नधामभि प्रियं मतिं कविम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ।
प्रजाभ्यस्त्वा प्रजास्त्वाऽनुप्राणन्तु प्रजास्त्वमनुप्राणिहि ॥२५॥
शुक्रं त्वा शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन ।
सग्मे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण क्रीयसे
सहस्रपोषं पुषेयम् ॥२६॥
मित्रो न एहि सुमित्रधः इन्द्रस्योरुमा विश दक्षिणमुशन्नुशन्तथ्ँ स्योनः स्योनम् ।
स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥२७॥
परि माऽग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज ।
उदायुषा स्वायुषोदस्थाममृताँ२ अनु ॥२८॥
प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥२९॥

अदित्यास्त्वगस्यदित्यै सद आसीद।
अस्तभ्नाद्द्यां वृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः।
आऽसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥३०॥

वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ ॥३१॥

सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकम्। यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥३२॥

उस्रावेतं धूर्षाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ।
स्वस्ति यजमानस्य गृहान् गच्छतम् ॥३३॥

भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि।
मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृका अघायवो विदन्।
श्येनो भूत्वा परा पत यजमानस्य गृहान् गच्छ तन्नौ संस्कृतम् ॥३४॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥३५॥

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि
वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमा सीद ॥३६॥

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥३७॥

[अ० ४, कं० ३७, मं० सं० ८९]

इति चतुर्थोऽध्यायः।

अथ पञ्चमोऽध्यायः।

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वा
श्येनाय त्वा सोमभृते विष्णवे त्वाऽग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥

अग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि पुरूरवा असि। गायत्रेण त्वा छन्दसा
मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा मन्थामि ॥२॥

भवतं नः समनसौ सचेतसावरेपसौ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥३॥

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपावा।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥४॥

आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वन ओजिष्ठाय। अनाधृष्टमस्यनाधृष्यं
देवानामोजोऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳ स्विते मा धाः ॥५॥

अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि।
सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः ॥६॥

अꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व।
आप्याययास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय।
एष्टा रायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम् ॥७॥

या ते अग्नेऽयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा।
या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा।
या ते अग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत्त्वेषं वचो अपावधीत्स्वाहा ॥८॥

तप्तायनी मेऽसि वित्तायनी मेऽस्यवतान्मा नाथितादवतान्मा व्यथितात्। विदेदग्निर्नभो
नामो ऽग्ने अङ्गिर आयुना नाम्नेहि योऽस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा
दधे विदेदग्निर्नभो नामो ऽग्ने अङ्गिर आयुना नाम्नेहि यो द्वितीयस्यां पृथिव्यामसि
यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे विदेदग्निर्नभो नामो ऽग्ने अङ्गिर आयुना नाम्नेहि
यस्तृतीयस्यां पृथिव्यामसि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वा दधे। अनु त्वा देववीतये ॥९॥

सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्व
सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ॥१०॥

इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः
पातु विश्वकर्मा त्वाऽऽदित्यैरुत्तरतः पात्विदमहं तप्तं वार्बहिर्धा यज्ञान्निः सृजामि ॥११॥

सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्यवनिः स्वाहा सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा
सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा सिꣳह्यस्या वह देवान् यजमानाय स्वाहा
भूतेभ्यस्त्वा ॥१२॥

ध्रुवोऽसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेः
पुरीषमसि ॥१३॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥१४॥

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाꣳसुरे स्वाहा ॥१५॥

इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥१६॥

देवश्रुतौ देवेष्वा घोषतं प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्।
स्वं गोष्ठमा वदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टमत्र रमेथां वर्ष्मन्
पृथिव्याः ॥१७॥

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाꣳसि।
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ १८ ॥

दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात्।
उभा हि हस्ता वसुना पृणस्वा प्र यच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥ १९ ॥

प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ २० ॥

विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि।
वैष्णवमसि विष्णवे त्वा ॥ २१ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आ ददे नार्यसीदमहꣳ रक्षसां ग्रीवा अपि कृन्तामि।
बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद ॥२२॥

रक्षोहणं वलगहनं वैष्णवीमिदमहं तं वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहं
तं वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं वलगमुत्किरामि यं मे सबन्धु-
र्यमसबन्धुर्निचखानेदमहं तं वलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्यां
किरामि ॥२३॥

स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥२४॥

रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वो वलगहनोऽवनयामि वैष्णवान्
रक्षोहणो वो वलगहनोऽवस्तृणामि वैष्णवान् रक्षोहणौ वां वलगहना उप दधामि वैष्णवी
रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवा स्थ ॥२५॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आ ददे नार्यसीदमहꣳ रक्षसां ग्रीवा अपि कृन्तामि। यवोऽसि यवयास्मद्द्वेषो यवयारातीर्
दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥२६॥

उद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्यां द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण
धर्मणा। ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि। ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह
प्रजां दृꣳह ॥२७॥

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात्।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥२८॥

परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥२९॥

इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि। ऐन्द्रमसि वैश्वदेवमसि ॥३०॥

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः। श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदाः ॥३१॥

उशिगसि कविरङ्घारिरसि बम्भारिरवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः
सम्राडसि कृशानुः परिषद्योऽसि पवमानो नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदन
ऋतधामासि स्वर्ज्योतिः ॥३२॥

समुद्रोऽसि विश्वव्यचा अजोऽस्येकपादहिरसि बुध्न्यो वागस्यैन्द्रमसि सदोऽस्यृतस्य
द्वारौ मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर स्वस्ति मेऽस्मिन्पथि देवयाने भूयात् ॥३३॥

मित्रस्य मा चक्षुषेक्षध्वमग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन पात माऽग्नयः
पिपृत माऽग्नयो गोपायत मा नमो वोऽस्तु मा मा हिꣳसिष्ट ॥३४॥

ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समित्। त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु
यन्तासि वरूथꣳ स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहा ॥३५॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥३६॥

अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥३७॥

उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥३८

देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ।
एतत्त्वं देव सोम देवो देवाँ२ उपागा इदमहं मनुष्यान्त्सह रायस्पोषेण
स्वाहा निर्वरुणस्य पाशान्मुच्ये ॥३९॥

अग्ने व्रतपास्त्वे व्रतपा या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि ।
यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः ॥४०॥

उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥४१
अत्यन्याँ२ अगां नान्याँ२ उपागामर्वाक् त्वा परेभ्योऽविदं परोऽवरेभ्यः ।
तं त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा ।
ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥४२॥

द्यां मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भव ।
अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ।
अतस्त्वं देव वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयꣳ रुहेम ॥४३॥
[अ० ५, कं० ४३, मं० सं० १५०]

इति पञ्चमोऽध्यायः ।

अथ षष्ठोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे नार्यसीदमहꣳ रक्षसां
ग्रीवा अपि कृन्तामि । यवोऽसि यवयास्मद् द्वेषो यवयारातीर्दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै
त्वा शुन्धन्तांल्लोकाः पितृषदनाः पितृषदनमसि ॥१॥

अग्रेणीरसि स्वावेश उन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति देवस्त्वा सविता मध्वानक्तु
सुपिप्पलाभ्यस्त्वौषधीभ्यः । द्यामग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः ॥२
बा० च० ३

या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य विष्णोः परमं पदमव भारि भूरि । ब्रह्मवनि त्वा क्षत्रवनि
रायस्पोषवनि पर्यूहामि । ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥३॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥४॥

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥५॥

परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं यजमानꣳ रायो मनुष्याणाम् ।
दिवः सूनुरस्येष ते पृथिव्याँल्लोक आरण्यस्ते पशुः ॥६॥
उपावीरस्युप देवान्दैवीर्विशः प्रागुरुशिजो वह्नितमान् ।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥७॥
रेवती रमध्वं बृहस्पते धारया वसूनि ।
ऋतस्य त्वा देवहविः पाशेन प्रति मुञ्चामि धर्षा मानुषः ॥८॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नीषोमाभ्यां जुष्टं नि युनज्मि । अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु पिताऽनु भ्राता
सगर्भ्योऽनु सखा सयूथ्यः । अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥९॥

अपां पेरुरस्यापो देवीः स्वदन्तु स्वात्तं चित्सद्देवहविः ।
सं ते प्राणो वातेन गच्छताꣳ समङ्गानि यजत्रैः सं यज्ञपतिराशिषा ॥१०॥
घृतेनाक्तौ पशूँस्त्रायेथाꣳ रेवति यजमाने प्रियं धा आ विश ।
उरोरन्तरिक्षात्सजूर्देवेन वातेनास्य हविषस्त्मना यज समस्य तन्वा भव ।
वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥११॥
माहिर्भूर्मा पृदाकुर्नमस्त आतानानर्वा प्रेहि । घृतस्य कुल्या उप ऋतस्य पथ्या अनु ॥१२॥
देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयं परिवेष्टारो भूयास्म ॥१३॥

वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि
नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्राँस्ते शुन्धामि ॥१४॥

मनस्त आ प्यायतां वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायताꣳ
श्रोत्रं त आ प्यायताम् । यत्ते क्रूरं यदास्थितं तत्त आ प्यायतां निष्ट्यायतां तत्ते शुध्यतु
शमहोभ्यः । ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥१५॥

रक्षसां भागोऽसि निरस्तꣳ रक्ष इदमहꣳ रक्षोऽभि तिष्ठामीदमहꣳ रक्षोऽव बाध इदमहꣳ
रक्षोऽधमं तमो नयामि । घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वे स्तोकानामग्निराज्यस्य
वेतु स्वाहा स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतम् ॥१६॥
इदमापः प्र वहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् ।
आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥१७॥
सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् । रेडस्यग्निष्ट्वा श्रीणात्वापस्त्वा
समरिणन्वातस्य त्वा ध्राज्यै पूष्णो रꣳह्या ऊष्मणो व्यथिषत् प्रयुतं द्वेषः ॥१८॥

घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ।
दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ॥१९॥
ऐन्द्रः प्राणो अङ्गेअङ्गे नि दीध्यदैन्द्र उदानो अङ्गेअङ्गे निधीतः ।
देव त्वष्टर्भूरि ते सꣳ समेतु सलक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥२०॥
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥२०॥
समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहा मित्रावरुणौ
गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा
यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाऽग्निं वैश्वानरं गच्छ
स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनाऽऽपृण स्वाहा ॥२१
मापो मौषधीर्हिꣳसीर्धाम्नोधाम्नो राजँस्ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ।
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥२२
हविष्मतीरिमा आपो हविष्माँ२ आ विवासति ।
हविष्मान् देवो अध्वरो हविष्माँ२ अस्तु सूर्यः ॥२३॥
अग्नेर्वोऽपन्नगृहस्य सदसि सादयामीन्द्राग्न्योर्भागधेयी स्थ मित्रावरुणयोर्भागधेयी स्थ
विश्वेषां देवानां भागधेयी स्थ । अमूर्या उप सूर्ये याभिर्वा सूर्यः सह ।
ता नो हिन्वन्त्वध्वरम् ॥२४॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ ॥२५॥

सोम राजन् विश्वास्त्वं प्रजा उपावरोह विश्वास्त्वां प्रजा उपावरोहन्तु ।
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।
श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहा ॥२६॥
देवीरापो अपां नपाद्यो व ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमः ।
तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भाग स्थ स्वाहा ॥२७॥
कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधीः ॥२८॥
यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहा ॥२९॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आ ददे रावाऽसि गभीरमिममध्वरं कृधीन्द्राय सुषूतमम् ।
उत्तमेन पविनोर्जस्वन्तं मधुमन्तं पयस्वन्तं निग्राभ्या स्थ देवश्रुतस्तर्पयत मा ॥३०॥
मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयतात्मानं मे तर्पयत
प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वि तृषन् ॥३१॥
इन्द्राय त्वा वसुमते रुद्रवत इन्द्राय त्वाऽऽदित्यवत इन्द्राय त्वाऽभिमातिघ्ने ।
श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ॥३२॥
यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः ॥३३॥
१ श्वात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ॥३४॥
मा भेर्मा सं विक्था ऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम् ।
२ पाप्मा हतो न सोमः ॥३५॥
प्रागपागुदगधराक्सर्वतस्त्वा दिश आ धावन्तु । अम्ब निष्पर समरीर्विदाम् ॥३६॥
त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥३७॥
[अ० ६, कं० ३७, मं० सं० ११७]

इति षष्ठोऽध्यायः ।

अथ सप्तमोऽध्यायः ।

वाचस्पतये पवस्व वृष्णो अꣳशुभ्यां गभस्तिपूतः ।
देवो देवेभ्यः पवस्व येषां भागोऽसि ॥१॥

मधुमतीर्न इषस्कृधि यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा
स्वाहोर्वन्तरिक्षमन्वेमि ॥२॥

स्वाङ्कृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवांꣳशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता
भङ्गेन हतोऽसौ फट् प्राणाय त्वा व्यानाय त्वा ॥३॥

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोमम् । उरुष्य राय एषो यजस्व ॥४॥

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ॥५॥

स्वाङ्कृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य उदानाय त्वा ॥६॥

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥७॥

इन्द्रवायू इमे सुता उप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ।
उपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ॥८॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् ।
उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा ॥९॥

राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः । तां धेनुं मित्रावरुणा
युवं नो विश्वाहा धत्तमनपस्फुरन्तीमेष ते योनिर्ऋतायुभ्यां त्वा ॥१०॥

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥११॥

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे ।
उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाह्यपमृष्टः शण्डो
देवास्त्वा शुक्रपाः प्र णयन्त्वनाधृष्टासि ॥१२॥

सुवीरो वीरान् प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।
सञ्जग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि ॥१३॥

अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥१४॥

स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमा जुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो याः स्विष्टा याः सुप्रीताः सुहुता यत्स्वाहायाडग्नीत् ॥१५॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपाꣳ सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ।
उपयामगृहीतोऽसि मर्काय त्वा ॥१६॥

मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तावेष ते योनिः प्रजाः
पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपाः प्र णयन्त्वनाधृष्टासि ॥१७॥

सुप्रजाः प्रजाः प्रजनयन् परीह्यभि रायस्पोषेण यजमानम् ।
सञ्जग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि ॥१८॥

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥१९॥

उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः ।
पाहि यज्ञं पाहि यज्ञपतिं विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ॥२०॥

सोमः पवते सोमः पवतेऽस्मै ब्रह्मणेऽस्मै क्षत्रायास्मै सुन्वते यजमानाय पवत इष ऊर्जे
पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते विश्वेभ्यस्त्वा
देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥२१॥

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थाव्यं गृह्णामि । यत्त इन्द्र बृहद्वयस्तस्मै
त्वा विष्णवे त्वैष ते योनिरुक्थेभ्यस्त्वा देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ॥२२॥

मित्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राय त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रा-
ग्निभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रावरुणाभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्रा-
बृहस्पतिभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामीन्द्राविष्णुभ्यां त्वा देवाव्यं यज्ञस्यायुषे गृह्णामि ॥२३॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥२४॥

उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम
एष ते योनिर्वैश्वानराय त्वा । ध्रुवं ध्रुवेण मनसा वाचा सोममव नयामि ।
अथा न इन्द्र इद्विशोऽसपत्नाः समनसस्करत् ॥२५॥

यस्ते द्रप्स स्कन्दति यस्ते अꣳशुर्ग्रावच्युतो धिषणयोरुपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतꣳ स्वाहा देवानामुत्क्रमणमसि ॥२६॥

प्राणाय मे वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्वोदानाय मे वर्चोदा वर्चसे
पवस्व वाचे मे वर्चोदा वर्चसे पवस्व क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे
वर्चोदा वर्चसे पवस्व चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ॥२७॥

आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे
पवस्व विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ॥२८॥

कोऽसि कतमोऽसि कस्यासि को नामासि । यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ।
भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याꣳ सुवीरो वीरैः सुपोषः पोषैः ॥२९॥

उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वोपयामगृहीतोऽसि शुक्राय त्वो-
पयामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय त्वो-
पयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतो-
ऽसि सहस्याय त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयाम-
गृहीतोऽस्यꣳहसस्पतये त्वा ॥३०॥

इन्द्राग्नी आ गतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ।
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥३१॥

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ।
उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ॥३२॥

ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वाꣳसो दाशुषः सुतम् ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३३॥

विश्वे देवास आ गत शृणुता म इमꣳ हवम् । एदं बर्हिर्नि षीदत ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३४॥

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३५॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ।
उपयामगृहीतोऽसि मरुतां त्वौजसे ॥३६॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूँ२रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३७॥

मरुत्वाँ२ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रतिपत्सुतानाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥३८॥

महाँ२ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥३९॥

महाँ२ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ२ इव । स्तोमैर्वत्सस्य वावृधे ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥४०॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यꣳ स्वाहा ॥४१॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च स्वाहा ॥४२॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा ॥४३॥

अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥४४॥

रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा वि भजतु ।
ऋतस्य पथा प्रेत चन्द्रदक्षिणा वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः ॥४५॥

ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ।
अस्मद्राता देवत्रा गच्छत प्रदातारमा विशत ॥४६॥

अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयायुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे रुद्राय
त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय प्राणो दात्र एधि वयो मह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा
मह्यं वरुणो ददातु सोऽमृतत्वमशीय त्वग्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे यमाय त्वा मह्यं वरुणो
ददातु सोऽमृतत्वमशीय हयो दात्र एधि वयो मह्यं प्रतिग्रहीत्रे ॥ ४७ ॥

कोऽदात्कस्मा अदात्कामोऽदात्कामायादात्।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ ४८ ॥

[अ० ७, कं० ४८, मं० सं० १४०]

इति सप्तमोऽध्यायः।

अथाष्टमोऽध्यायः।

उपयामगृहीतोऽस्यादित्येभ्यस्त्वा। विष्ण उरुगायैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ॥१॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यत आदित्येभ्यस्त्वा ॥ २ ॥
कदा चन प्र युच्छस्युभे नि पासि जन्मनी।
तुरीयादित्य सवनं त इन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वा ॥ ३ ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा ॥ ४ ॥
विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन् मत्स्व।
श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः।
पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारप एधते गृहे ॥ ५ ॥
वाममद्य सवितर्वाममु श्वो दिवे दिवे वाममस्मभ्यꣳ सावीः।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥ ६ ॥
उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा असि चनो मयि धेहि।
जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥ ७ ॥
उपयामगृहीतोऽसि सुशर्माऽसि सुप्रतिष्ठानो बृहदुक्षाय नमः।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ८ ॥

उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम त इन्दोरिन्द्रियावतः पत्नीवतो ग्रहाँ२ ऋध्यासम्।
अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पिताऽभूत्।
अहꣳ सूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यत् ॥ ९ ॥

अग्ना३इ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा।
प्रजापतिर्वृषाऽसि रेतोधा रेतो मयि धेहि प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ॥१०॥
उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा। हर्योर्धाना स्थ सहसोमा इन्द्राय ॥११॥
यस्ते अश्वसनिर्भक्षो यो गोसनिस्तस्य त इष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्योपहूतस्योपहूतो
भक्षयामि ॥१२॥

देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्यात्मकृतस्यैनसोऽवयजनमस्येनस एनसोऽवयजनमसि।
यच्चाहमेनो विद्वाँश्चकार यच्चाविद्वाँस्तस्य सर्वस्यैनसोऽवयजनमसि ॥१३॥
सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन।
त्वष्टा सुदत्रो वि दधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१४॥

समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥१५॥

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन।
त्वष्टा सुदत्रो वि दधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१६॥
धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः।
त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणं दधात स्वाहा ॥१७॥

सुगा वो देवाः सदना अकर्म य आजग्मेदꣳ सवनं जुषाणाः।
भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि स्वाहा ॥१८॥

याँ२ आवह उशतो देव देवाँस्तान् प्रेरय स्वे अग्ने सधस्थे।
जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं घर्मꣳ स्वरातिष्ठतानु स्वाहा ॥१९॥

वयꣳ हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह।
ऋधगया ऋधगुताशमिष्ठाः प्रजानन् यज्ञमुप याहि विद्वान्त्स्वाहा ॥२०॥
देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥२१॥

यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ॥२२॥
माहिर्भूर्मा पृदाकुः। उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्।
नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥२३॥
अग्नेरनीकमप आ विवेशापां नपात् प्रतिरक्षन्नसुर्यम्।
दमेदमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत् स्वाहा ॥२४॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाहा ॥२५॥
देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत।
देव सोमैष ते लोकस्तस्मिञ्छं च वक्ष्व परि च वक्ष्व ॥२६॥
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि।
देवानाꣳ समिदसि ॥२७॥
एजतु दशमास्यो गर्भो जरायुणा सह। यथाऽयं वायुरेजति यथा समुद्र एजति।
एवायं दशमास्यो अस्रज्जरायुणा सह ॥२८॥
यस्यै ते यज्ञियो गर्भो यस्यै योनिर्हिरण्ययी। अङ्गान्यह्रुता यस्य तं मात्रा समजीगमꣳ स्वाहा ॥२९॥
पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्ज धीरः।
एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्ताꣳ स्वाहा ॥ ३० ॥
मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ॥ ३१ ॥
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥ ३२ ॥
आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥ ३३ ॥
युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥३४॥
इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम्। ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम्।
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥३५॥

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोडशी ॥३६॥
इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम्।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा ॥३७॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधद्रयिं मयि पोषम्।
उपयामगृहीतोऽस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे।
अग्ने वर्चस्विन्वर्चस्वाँस्त्वं देवेष्वसि वर्चस्वानहं मनुष्येषु भूयासम् ॥ ३८ ॥
उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः। सोममिन्द्र चमू सुतम्।
उपयामगृहीतोऽसीन्द्राय त्वौजस एष ते योनिरिन्द्राय त्वौजसे।
इन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ३९ ॥
अदृश्रमस्य केतवो वि रश्मयो जनाँ२ अनु। भ्राजन्तो अग्नयो यथा।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय।
सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम् ॥ ४० ॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय ॥ ४१ ॥
आ जिघ्र कलशं मह्या त्वा विशन्त्विन्दवः।
पुनरूर्जा नि वर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः ॥ ४२ ॥
इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति।
एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ॥ ४३ ॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। यो अस्माँ२ अभिदासत्यधरं गमया तमः।
उपयामगृहीतोऽसीन्द्राय त्वा विमृध एष ते योनिरिन्द्राय त्वा विमृधे ॥४४ ॥
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥४५॥
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम्।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत्।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥४६॥

उपयामगृहीतोऽस्यग्नये त्वा गायत्रच्छन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि
विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्यनुष्टुप्तेऽभिगरः ॥४७॥
व्रेशीनां त्वा पत्मन्ना धूनोमि कुकूननानां त्वा पत्मन्ना धूनोमि
भन्दनानां त्वा पत्मन्ना धूनोमि मदिन्तमानां त्वा पत्मन्ना धूनोमि
मधुन्तमानां त्वा पत्मन्ना धूनोमि शुक्रं त्वा शुक्र आ धूनोम्यह्नो रूपे सूर्यस्य रश्मिषु ॥४८॥
ककुभꣳ रूपं वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगाः ।
यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा ॥४९॥
उशिक् त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीह्यस्मत्सखा
त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ॥५०॥
इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ।
उपसृजन् धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्मासु दीधरत् स्वाहा ॥५१॥
सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम ।
दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ५२ ॥
युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तं-तमिद्धतं वज्रेण तं-तमिद्धतम् ।
दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् । अस्माकꣳ शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ।
भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः ॥५३॥
परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायामन्धो अच्छेतः ।
सविता सन्यां विश्वकर्मा दीक्षायां पूषा सोमक्रयण्याम् ॥५४॥
इन्द्रश्च मरुतश्च क्रयायोपोत्थितोऽसुरः पण्यमानो मित्रः क्रीतो विष्णुः
शिपिविष्ट ऊरावासन्नो विष्णुर्नरन्धिषः ॥५५॥
प्रोह्यमाणः सोम आगतो वरुण आसन्द्यामासन्नोऽग्निराग्नीध्र इन्द्रो हविर्धाने
ऽथर्वोपावह्रियमाणः ॥५६॥
विश्वे देवा अꣳशुषु न्युप्तो विष्णुराप्रीतपा आप्याय्यमानो यमः सूयमानो विष्णुः
सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः ॥५७॥
विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतो रुद्रो हूयमानो वातोऽभ्यावृत्तो नृचक्षाः
प्रतिख्यातो भक्षो भक्ष्यमाणः पितरो नाराशꣳसाः ॥५८॥

सन्नः सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्रियमाणः सलिलः प्रप्लुतो
ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा ।
या पत्येते अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूतौ ॥५९॥
देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु
पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूत् ॥६०॥
चतुस्त्रिꣳशत्तन्तवो ये वितत्निरे य इमं यज्ञꣳ स्वधया ददन्ते ।
तेषां छिन्नꣳ सम्वेतद्दधामि स्वाहा घर्मो अप्येतु देवान् ॥६१॥
यज्ञस्य दोहो विततः पुरुत्रा सो अष्टधा दिवमन्वाततान ।
स यज्ञ धुक्ष्व महि मे प्रजायाꣳ रायस्पोषं विश्वमायुरशीय स्वाहा ॥६२॥
आ पवस्व हिरण्यवदश्ववत्सोम वीरवत् । वाजं गोमन्तमा भर स्वाहा ॥६३॥

[अ०८, कं० ६३, मं० सं० १५०]

इत्यष्टमोऽध्यायः ।

अथ नवमोऽध्यायः ।

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाजं नः स्वदतु स्वाहा ॥१॥
ध्रुवसदं त्वा नृषदं मनःसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा
जुष्टतमम् । अप्सुषदं त्वा घृतसदं व्योमसदमुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते
योनिरिन्द्राय त्वा जुष्टतमम् । पृथिविसदं त्वाऽन्तरिक्षसदं दिविसदं देवसदं नाकसद-
मुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥२॥
अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् । अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तम-
मुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥३॥
ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशिप्रियाणां वोऽहमिषमूर्जꣳ समग्रभ-
मुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।
सम्पृचौ स्थः सं मा भद्रेण पृङ्क्तं विपृचौ स्थो वि मा पाप्मना पृङ्क्तम् ॥४॥

इन्द्रस्य वज्रोऽसि वाजसास्त्वयायं वाजꣳ सेत् ।
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥५॥
अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवत वाजिनः ।
देवीरापो यो व ऊर्मिः प्रतूर्तिः ककुन्मान् वाजसास्तेनायं वाजꣳ सेत् ॥६॥
वातो वा मनो वा गन्धर्वाः सप्तविꣳशतिः । ते अग्रेऽश्वमयुञ्जँस्ते अस्मिञ्जवमा दधुः ॥७॥
वातरꣳहा भव वाजिन्युज्यमान इन्द्रस्येव दक्षिणः श्रियैधि ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ॥८॥
जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तो अचरच्च वाते ।
तेन नो वाजिन् बलवान् बलेन वाजजिच्च भव समने च पारयिष्णुः ।
वाजिनो वाजजितो वाजꣳ सरिष्यन्तो बृहस्पतेर्भागमवजिघ्रत ॥९॥
देवस्याहꣳ सवितुः सवे सत्यसवसो बृहस्पतेरुत्तमं नाकꣳ रुहेयम् ।
देवस्याहꣳ सवितुः सवे सत्यसवस इन्द्रस्योत्तमं नाकꣳ रुहेयम् ।
देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेरुत्तमं नाकमरुहम् ।
देवस्याहꣳ सवितुः सवे सत्यप्रसवस इन्द्रस्योत्तमं नाकमरुहम् ॥१०॥
बृहस्पते वाजं जय बृहस्पतये वाचं वदत बृहस्पतिं वाजं जापयत ।
इन्द्र वाजं जयेन्द्राय वाचं वदतेन्द्रं वाजं जापयत ॥११॥
एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपताजीजपत बृहस्पतिं वाजं वनस्पतयो
विमुच्यध्वम् । एषा वः सा सत्या संवागभूद्ययेन्द्रं वाजमजीजपताजीजपतेन्द्रं वाजं वनस्पतयो
विमुच्यध्वम् ॥१२॥
देवस्याहꣳ सवितुः सवे सत्यप्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम् ।
वाजिनो वाजजितोऽध्वन स्कभ्नुवन्तो योजना मिमानाः काष्ठां गच्छत ॥१३॥
एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु सꣳसनिष्यदत्पथामङ्काꣳस्यन्वापनीफणत् स्वाहा ॥१४॥
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ॥१५॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥१६॥
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्यवो महो ये धनꣳ समिथेषु जभ्रिरे ॥१७॥
वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥१८॥
आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ।
वाजिनो वाजजितो वाजꣳ ससृवाꣳसो बृहस्पतेर्भागमवजिघ्रत निमृजानाः ॥१९॥
आपये स्वाहा स्वापये स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाऽहर्पतये
स्वाहाऽह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय
स्वाहाऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाऽधिपतये स्वाहा ॥२०॥
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां
पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् । प्रजापतेः प्रजा अभूम स्वर्देवा अगन्मामृता
अभूम ॥२१॥
अस्मे वो अस्त्विन्द्रियमस्मे नृम्णमुत क्रतुरस्मे वर्चाꣳसि सन्तु वः ।
नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या इयं ते राड्
यन्ताऽसि यमनो ध्रुवोऽसि धरुणः । कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ॥२२॥
वाजस्येमं प्रसवः सुषुवेऽग्रे सोमꣳ राजानमोषधीष्वप्सु ।
ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥२३॥
वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।
अदित्सन्तं दापयति प्रजानन्त्स नो रयिꣳ सर्ववीरं नि यच्छतु स्वाहा ॥२४॥
वाजस्य नु प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परि याति विद्वान् प्रजां पुष्टिं वर्धयमानो अस्मे स्वाहा ॥२५॥
सोमꣳ राजानमवसेऽग्निमन्वारभामहे । आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा ॥२६॥
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।
वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनꣳ स्वाहा ॥२७॥

अग्ने अच्छा वदेह नः प्रति नः सुमना भव।
प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदा असि स्वाहा ॥२८॥
प्र नो यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः। प्र वाग्देवी ददातु नः स्वाहा ॥ २९ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभि षिञ्चाम्यसौ ॥ ३० ॥
अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषम् अश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषं
विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेषꣳ सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम् ॥३१
पूषा पञ्चाक्षरेण पञ्च दिश उदजयत्ता उज्जेषꣳ सविता षडक्षरेण षडृतूनुदजयत्तानुज्जेषं मरुतः
सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयँस्तानुज्जेषं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥३२
मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषम्
इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वे देवा द्वादशाक्षरेण जगतीमुदजयँस्ता-
मुज्जेषम् ॥ ३३ ॥
वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयँस्तमुज्जेषꣳ रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ
स्तोममुदजयँस्तमुज्जेषम् आदित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयँस्तमुज्जेषम् अदितिः
षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषं प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोम-
मुदजयत्तमुज्जेषम् ॥ ३४ ॥
एष ते निर्ऋते भागस्तं जुषस्व स्वाहाऽग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा
यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा
मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरासद्भ्यः स्वाहा
सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥ ३५ ॥
ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ये देवा
विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः
स्वाहा ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥ ३६ ॥
अग्ने सहस्व पृतना अभिमातीरपास्य। दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ॥ ३७ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। उपांशोर्वीर्येण जुहोमि हतꣳ रक्षः
स्वाहा रक्षसां त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ हतः ॥ ३८ ॥
सविता त्वा सवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाम्।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥३९॥

बा० य० ५

इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥ ४० ॥

[अ० ९, कं० ४०, मं० सं० ११७]

इति नवमोऽध्यायः।

अथ दशमोऽध्यायः।

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः।
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥ १ ॥
वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि
वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥ २ ॥
अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहाऽर्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तौजस्वती स्थ राष्ट्रदा
राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे
दत्त स्वाहाऽपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापां पतिरसि राष्ट्रदा राष्ट्रं मे देहि
स्वाहाऽपां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देह्यपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहाऽपां
गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥ ३ ॥
सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वचस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त सूर्यवर्चस
स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त मान्दा स्थ राष्ट्रदा राष्ट्रं मे
दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा
व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा
राष्ट्रममुष्मै दत्त शविष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शविष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै
दत्त शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त जनभृत
स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त विश्वभृत स्थ राष्ट्रदा
राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्तापः स्वराज स्थ राष्ट्रदा राष्ट्र-
ममुष्मै दत्त। मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाः अनाधृष्टाः सीदत
सहौजसो महि क्षत्रं क्षत्रियाय दधतीः ॥ ४ ॥

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा
सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय
स्वाहाऽꣳशाय स्वाहा भगाय स्वाहाऽर्यम्णे स्वाहा ॥ ५ ॥
पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥ ६ ॥
सधमादो द्युम्निनीराप एता अनाधृष्टा अपस्यो वसानाः।
पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्मातृतमास्वन्तः ॥ ७ ॥
क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसीन्द्रस्य वार्त्रघ्नमसि मित्रस्यासि वरुणस्यासि त्वयाऽयं वृत्रं वधेत्। दृवाऽसि
रुजाऽसि क्षुमाऽसि। पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पात ॥८॥
आविर्मर्या आवित्तो अग्निर्गृहपतिरावित्त इन्द्रो वृद्धश्रवा आवित्तौ मित्रावरुणौ धृतव्रता-
वावित्तः पूषा विश्ववेदा आवित्ते द्यावापृथिवी विश्वशम्भुवावावित्तादितिरुरुशर्मा ॥ ९ ॥
अवेष्टा दन्दशूकाः प्राचीमा रोह गायत्री त्वाऽवतु रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्त
ऋतुर्ब्रह्म द्रविणम् ॥ १० ॥
दक्षिणामा रोह त्रिष्टुप् त्वाऽवतु बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ॥ ११ ॥
प्रतीचीमा रोह जगती त्वाऽवतु वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड् द्रविणम् ॥ १२ ॥
उदीचीमा रोहानुष्टुप् त्वाऽवतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं द्रविणम् ॥ १३ ॥
ऊर्ध्वामा रोह पङ्क्तिस्त्वाऽवतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशिशिरावृतू
वर्चो द्रविणं प्रत्यस्तं नमुचेः शिरः ॥ १४ ॥
सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्। मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि ॥ १५ ॥
हिरण्यरूपा उषसो विरोक उभाविन्द्रा उदिथः सूर्यश्च।
आ रोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च मित्रोऽसि वरुणोऽसि ॥ १६ ॥
सोमस्य त्वा द्युम्नेनाभि षिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण।
क्षत्राणां क्षत्रपतिरेध्यति दिद्यून् पाहि ॥ १७ ॥
इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।
इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥१८॥

प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः।
ता आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणाः।
विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥ १९ ॥
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता वयꣳ स्याम पतयो रयीणाꣳ स्वाहा।
रुद्र यत्ते क्रिवि परं नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा ॥ २० ॥
इन्द्रस्य वज्रोऽसि मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि।
अव्यथायै त्वा स्वधायै त्वाऽरिष्टो अर्जुनो मरुतां प्रसवेन जयापाम मनसा समिन्द्रियेण ॥ २१
मा त इन्द्र ते वयं तुराषाडयुक्तासो अब्रह्मता विदसाम।
तिष्ठा रथमधि यं वज्रहस्ता रश्मीन् देव यमसे स्वश्वान् ॥ २२ ॥
अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा मरुतामोजसे स्वाहेन्द्रस्येन्द्रियाय स्वाहा।
पृथिवि मातर्मा मा हिꣳसीर्मो अहं त्वाम् ॥ २३ ॥
हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २४ ॥
इयदस्यायुरस्यायुर्मयि धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेह्यूर्गस्यूर्जं मयि धेहि ॥
इन्द्रस्य वां वीर्यकृतो बाहू अभ्युपावहरामि ॥ २५ ॥
स्योनाऽसि सुषदाऽसि क्षत्रस्य योनिरसि।
स्योनामा सीद सुषदामा सीद क्षत्रस्य योनिमा सीद ॥ २६ ॥
नि षसाद धृतव्रतो वरुणः पस्त्यास्वा। साम्राज्याय सुक्रतुः ॥ २७ ॥
अभिभूरस्येतास्ते पञ्च दिशः कल्पन्तां ब्रह्मँस्त्वं ब्रह्माऽसि सविताऽसि सत्यप्रसवो
वरुणोऽसि सत्यौजा इन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः।
बहुकार श्रेयस्कर भूयस्करेन्द्रस्य वज्रोऽसि तेन मे रध्य ॥ २८ ॥
अग्निः पृथुर्धर्मणस्पतिर्जुषाणो अग्निः पृथुर्धर्मणस्पतिराज्यस्य वेतु स्वाहा
स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानां मध्यमेष्ठ्याय ॥ २९ ॥
सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे बृहस्पतिना ब्रह्मणा वरुणे-
नौजसाऽग्निना तेजसा सोमेन राज्ञा विष्णुना दशम्या देवतया प्रसूतः प्र सर्पामि ॥ ३० ॥

अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥
वायुः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिस्रुतः । इन्द्रस्य युज्यः सखा ॥ ३१ ॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ॥
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥ ३२ ॥

युवꣳ सुराममश्विना नमुचावासुरे सचा । विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥ ३३ ॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥ ३४ ॥

[अ०१०, कं० ३४, मं० सं० १३९

इति दशमोऽध्यायः ।

अथैकादशोऽध्यायः ।

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः । अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याऽभरत् ॥ १ ॥
युक्तेन मनसा वयं देवस्य सवितुः सवे । स्वर्ग्याय शक्त्या ॥ २ ॥
युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतः सविता प्र सुवाति तान् ॥३॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ ४ ॥
युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ ५ ॥
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना ॥ ६ ॥
देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ ७ ॥
इमं नो देव सवितर्यज्ञं प्र णय देवाव्यꣳ सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितम् ।
ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा ॥ ८ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आ ददे गायत्रेण छन्दसाऽङ्गिरस्वत्पृथिव्याः सधस्थादग्निं
पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ ९ ॥

अभ्रिरसि नार्यसि त्वया वयमग्निꣳ शकेम खनितुꣳ सधस्थ आ । जागतेन छन्दसाऽङ्गिरस्वत् १०
हस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याऽभरदानुष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ ११ ॥

प्रतूर्तं वाजिन्ना द्रव वरिष्ठामनु संवतम् ।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ॥ १२ ॥

युञ्जाथाꣳ रासभं युवमस्मिन् यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् ॥ १३ ॥

योगे-योगे तवस्तरं वाजे-वाजे हवामहे । सखाय इन्द्रमूतये ॥ १४ ॥

प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहि ।
उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन् पूष्णा सयुजा सह ॥ १५ ॥
पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भराग्निं पुरीष्यमङ्गिरस्वदच्छेमो
ऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥ १६ ॥

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततन्थ ॥ १७ ॥
आगत्य वाज्यध्वानꣳ सर्वा मृधो वि धूनुते । अग्निꣳ सधस्थे महति चक्षुषा नि चिकीषते ॥१८॥
आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् । भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम् ॥१९॥
द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षꣳ समुद्रो योनिः ।
विख्याय चक्षुषा त्वमभि तिष्ठ पृतन्यतः ॥ २० ॥
उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः ॥ २१ ॥
उदक्रमीद् द्रविणोदा वाज्यर्वाकः सुलोकꣳ सुकृतं पृथिव्याम् ।
ततः खनेम सुप्रतीकमग्निꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥ २२ ॥
आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥ २३ ॥

आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्री स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥ २४ ॥
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ २५ ॥
परि त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि । धृषद्वर्णं दिवे-दिवे हन्तारं भङ्गुरावताम् ॥ २६ ॥
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ २७ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामि ।
ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम् ।
शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामः ॥ २८ ॥
अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ२ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥ २९ ॥
शर्म च स्थो वर्म च स्थोऽछिद्रे बहुले उभे । व्यचस्वती सं वसाथां भृतमग्निं पुरीष्यम् ॥ ३० ॥
सं वसाथाꣳ स्वर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ॥३१॥
पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्ने ।
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ ३२ ॥
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरन्दरम् ॥ ३३ ॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनञ्जयꣳ रणे-रणे ॥ ३४ ॥
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ ३५ ॥
नि होता होतृषदने विदानस्त्वेषो दीदिवाँ२ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥ ३६ ॥
सꣳसीदस्व महाँ२ असि शोचस्व देववीतमः । वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ३७
अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ३८
सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ॥ ३९ ॥

सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्स्वः । वासो अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो ४०
उदु तिष्ठ स्वध्वरावा नो देव्या धिया । दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥४१॥
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ४२ ॥
स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमाꣳस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥ ४३ ॥
स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥ ४४ ॥
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी अभि शोचीर्माऽन्तरिक्षं मा वनस्पतीन् ॥४५॥
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ।
वृषाग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आ याहि वीतये ॥ ४६ ॥
ऋतꣳ सत्यमृतꣳ सत्यमग्निं पुरीष्यमङ्गिरस्वद्भरामः ।
ओषधयः प्रति मोदध्वमग्निमेतꣳ शिवमायन्तमभ्यत्र युष्माः ।
व्यस्यन् विश्वा अनिरा अमीवा निषीदन्नो अप दुर्मतिं जहि ॥ ४७ ॥
ओषधयः प्रति गृभ्णीत पुष्पवतीः सुपिप्पलाः । अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमाऽसदत् ४८
वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥ ४९ ॥
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ ५० ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ ५१ ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ५२ ॥
मित्रः सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह ।
सुजातं जातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजाभ्यः ॥ ५३ ॥
रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥ ५४ ॥
सꣳसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥५५॥
सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥ ५६ ॥
उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया ।
माता पुत्रं यथोपस्थे साऽग्निं बिभर्तु गर्भ आ । मखस्य शिरोऽसि ॥ ५७ ॥

वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्ध्रुवाऽसि पृथिव्यसि धारया मयि प्रजाᳫं रायस्पोषं
गौपत्यᳫं सुवीर्यᳫं सजातान्यजमानाय रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वद्ध्रुवाऽस्यन्त-
रिक्षमसि धारया मयि प्रजाᳫं रायस्पोषं गौपत्यᳫं सुवीर्यᳫं सजातान्यजमानायादित्यास्त्वा
कृण्वन्तु जागतेन छन्दसाऽङ्गिरस्वद्ध्रुवाऽसि द्यौरसि धारया मयि प्रजाᳫं रायस्पोषं गौपत्यᳫं
सुवीर्यᳫं सजातान्यजमानाय विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद्-
ध्रुवाऽसि दिशोऽसि धारया मयि प्रजाᳫं रायस्पोषं गौपत्यᳫं सुवीर्यᳫं सजातान्यजमानाय ॥ ५८ ॥

अदित्यै रास्नास्यदितिष्टे बिलं गृभ्णातु । कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये ।
पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ॥ ५९ ॥

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्व-
दादित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन
छन्दसाऽङ्गिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ॥ ६० ॥

अदितिष्ट्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थे अङ्गिरस्वत् खनत्ववट
देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे
धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे
वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वच्छ्रपयन्तूखे
ग्नास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे
जनयस्त्वाच्छिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे ॥ ६१ ॥

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ६२ ॥

देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या ।
अव्यथमाना पृथिव्यामाशा दिश आ पृण ॥ ६३ ॥

उत्थाय बृहती भवोदु तिष्ठ ध्रुवा त्वम् । मित्रैतां त उखां परि ददाम्यभित्या एषा मा भेदि ॥६४॥

वसवस्त्वाऽऽछृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वाऽऽछृन्दन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्व-
दादित्यास्त्वाऽऽछृन्दन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आछृन्दन्त्वानु-
ष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ ६५ ॥

आकूतिमग्निं प्रयुजᳫं स्वाहा मनो मेधामग्निं प्रयुजᳫं स्वाहा चित्तं विज्ञातमग्निं प्रयुजᳫं स्वाहा
वाचो विधृतिमग्निं प्रयुजᳫं स्वाहा प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वाहा ॥६६॥
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥६७॥
मा सु भित्था मा सु रिषोऽम्ब धृष्णु वीरयस्व सु । अग्निश्चेदं करिष्यथः ॥ ६८ ॥

दृᳫंहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृताऽसि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥ ६९ ॥
द्रन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ७० ॥
परस्या अधि संवतोऽवराँ२ अभ्या तर । यत्राहमस्मि ताँ२ अव ॥ ७१ ॥
परमस्याः परावतो रोहिदश्व इहा गहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ॥ ७२ ॥
यदग्ने कानि कानि चिदा ते दारूणि दध्मसि । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ ७३ ॥
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ ७४ ॥
अहरहरप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥ ७५ ॥
नाभा पृथिव्याः समिधाने अग्नौ रायस्पोषाय बृहते हवामहे ।
इरम्मदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥ ७६ ॥
याः सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्ताँस्ते अग्नेऽपि दधाम्यास्ये ॥ ७७ ॥
दᳫंष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराँ२ उत ।
हनुभ्याᳫं स्तेनान् भगवस्ताँस्त्वं खाद सुखादितान् ॥ ७८ ॥
ये जनेषु मलिम्लव स्तेनासस्तस्करा वने । ये कक्षेष्वघायवस्ताँस्ते दधामि जम्भयोः ॥ ७९ ॥
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निन्दाद्यो अस्मान्धिप्साच्च सर्वं तं भस्मसा कुरु ॥८०॥
सᳫंशितं मे ब्रह्म सᳫंशितं वीर्यं बलम् । सᳫंशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥ ८१ ॥
उदेषां बाहू अतिरमुद्वर्चो अथो बलम् । क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाँ२ अहम् ॥ ८२ ॥
अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र-प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ ८३ ॥

[अ० ११, कं० ८३, मं० सं० १११]

इत्येकादशोऽध्यायः ।

अथ द्वादशोऽध्यायः ।

दृशानो रुक्म उर्व्या व्यद्यौद् दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ १ ॥

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकᳫं समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः ॥ २ ॥
विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥ ३ ॥
सुपर्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोम आत्मा छन्दाᳫंस्यङ्गानि
यजूᳫंषि नाम । साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ।
सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत ॥ ४ ॥
विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आ रोह पृथिवीमनु वि क्रमस्व
विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आ रोहान्तरिक्षमनु वि क्रमस्व
विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह दिवमनु वि क्रमस्व
विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आ रोह दिशोऽनु वि क्रमस्व ॥ ५ ॥
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ६ ॥
अग्नेऽभ्यावर्त्तिन्नभि मा नि वर्तस्वायुषा वर्चसा प्रजया धनेन । सन्या मेधया रय्या पोषेण ॥ ७ ॥
अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः ।
अधा पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥ ८ ॥
पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाह्यᳫंहसः ॥ ९ ॥
सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ १० ॥
आ त्वाऽहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥११॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमᳫं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ १२ ॥
अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषाऽऽगात् ।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥ १३ ॥
हᳫंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ १४ ॥
सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनां तपसा माऽर्चिषाऽभि शोचीरन्तरस्याᳫं शुक्रज्योतिर्वि भाहि ॥ १५ ॥

अन्तरग्ने रुचा त्वमुखायाः सदने स्वे । तस्यास्त्वᳫं हरसा तपञ्जातवेदः शिवो भव ॥ १६ ॥
शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥१७॥
दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ १८ ॥
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥ १९ ॥
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवाᳫंसमपामुपस्थे महिषा अवर्धन् ॥ २० ॥
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ २१ ॥
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥ २२ ॥
विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायञ्जना यदग्निमयजन्त पञ्च ॥ २३ ॥
उशिक्पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥ २४ ॥
दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥ २५ ॥
यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥ २६ ॥
आ तं भज सौश्रवसेष्वग्न उक्थ उक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥ २७ ॥
त्वामग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥ २८ ॥
अस्ताव्यग्निर्नराᳫं सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥ २९ ॥
समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आऽस्मिन् हव्या जुहोतन ॥ ३० ॥

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥३१॥
प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्ट्वम् ।
बृहद्भिर्भानुभिर्भासन्मा हिꣳसीस्तन्वा प्रजाः ॥ ३२ ॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ३३ ॥
प्र-प्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥ ३४ ॥
आपो देवीः प्रति गृभ्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभा उ लोके ।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत् ॥ ३५ ॥
अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ ३६ ॥
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥ ३७ ॥
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सꣳसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरा ऽसदः ॥३८॥
पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः ॥ ३९ ॥
पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाह्यꣳहसः ॥ ४० ॥
सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ ४१ ॥
बोधा मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुष्टे तन्वं वन्दे अग्ने ॥ ४२ ॥
स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद् द्वेषाꣳसि विश्वकर्मणे स्वाहा ॥ ४३ ॥
पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ ४४ ॥
अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदाद्यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥ ४५ ॥
संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ।
अग्नेर्भस्मास्यग्नेः पुरीषमसि चित स्थ परिचित ऊर्ध्वचितः श्रयध्वम् ॥ ४६ ॥
अयꣳ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः ॥ ४७ ॥

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ ४८ ॥
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ२ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥ ४९ ॥
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥ ५० ॥
इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ५१ ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥५२॥
चिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद परिचिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥५३॥
लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥ ५४ ॥
ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥ ५५ ॥
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ ५६ ॥
समितꣳ सं कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ ॥ ५७ ॥
सं वां मनाꣳसि सं व्रता समु चित्तान्याकरम् ।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ॥ ५८ ॥
अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ२ असि । शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहाऽसदः ॥५९॥
भवतं नः समनसौ सचेतसावरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥ ६० ॥
मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ॥ ६१ ॥
असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ६२ ॥
नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं वि चृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमे नाके अधि रोहयैनम् ॥ ६३ ॥
यस्यास्ते घोर आसञ्जुहोम्येषां बन्धानामवसर्जनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाऽहं परि वेद विश्वतः ॥ ६४ ॥

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तं ते वि ष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः । नमो भूत्यै येदं चकार ॥ ६५ ॥
निवेशनः सङ्गमनो वसूनां विश्वा रूपाऽभि चष्टे शचीभिः ।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥ ६६ ॥
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥ ६७ ॥
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥ ६८ ॥
शुनꣳ सु फाला वि कृषन्तु भूमिꣳ शुनं कीनाशा अभि यन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तनास्मे ॥ ६९ ॥
घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाऽभ्या ववृत्स्व ॥ ७० ॥
लाङ्गलं पवीरवत्सुशेवꣳ सोमपित्सरु । तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहणम् ७१
कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः ॥ ७२ ॥
वि मुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य । ज्योतिरापाम ॥ ७३ ॥
सजूरब्दो अयवोभिः सजूरुषा अरुणीभिः ।
सजोषसावश्विना दꣳसोभिः सजूः सूर एतशेन सजूर्वैश्वानर इडया घृतेन स्वाहा ॥ ७४ ॥
या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामहꣳ शतं धामानि सप्त च ॥ ७५ ॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ ७६ ॥
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥ ७७ ॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । सनेयमश्वं गां वास आत्मानं तव पूरुष ॥ ७८ ॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ७९ ॥
यत्रौषधीः समग्मत राजानः समिताविव । विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥ ८० ॥
अश्वावतीꣳ सोमावतीमूर्जयन्तीमुदोजसम् । आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥८१॥
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष ॥ ८२ ॥
इष्कृतिर्नाम वो माताऽथो यूयꣳ स्थ निष्कृतीः । सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥८३॥
अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः । ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥८४ ॥

यदिमा वाजयन्नहमोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ८५ ॥
यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥ ८६ ॥
साकं यक्ष्म प्र पत चाषेण किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ ८७ ॥
अन्या वो अन्यामवत्वन्यान्यस्या उपावत । ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ ८८ ॥
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥८९॥
मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥ ९० ॥
अवपतन्तीरवदन्दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ ९१ ॥
या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः । तासामसि त्वमुत्तमारं कामाय शꣳ हृदे ॥ ९२ ॥
या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु । बृहस्पतिप्रसूता अस्यै संदत्त वीर्यम् ॥ ९३ ॥
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । सर्वाः संगत्य वीरुधोऽस्यै संदत्त वीर्यम् ॥ ९४ ॥
मा वो रिषत् खनिता यस्मै चाहं खनामि वः । द्विपाच्चतुष्पादस्माकꣳ सर्वमस्त्वनातुरम् ॥ ९५ ॥
ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तꣳ राजन् पारयामसि ॥ ९६ ॥
नाशयित्री बलासस्यार्शस उपचितामसि । अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥९७॥
त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ॥९८॥
सहस्व मे अरातीः सहस्व पृतनायतः । सहस्व सर्वं पाप्मानꣳ सहमानास्योषधे ॥ ९९ ॥
दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा वि रोहतात् ॥ १०० ॥
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः । उपस्तिरस्तु सोऽस्माकं यो अस्माँ२ अभिदासति ॥१०१॥
मा मा हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा व्यानट् ।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥ १०२॥
अभ्या वर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितो अरोहत् ॥ १०३ ॥
अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ॥ १०४ ॥
इषमूर्जमहमित आदमृतस्य योनिं महिषस्य धाराम् ।
आ मा गोषु विशत्वा तनूषु जहामि सेदिमनिराममीवाम् ॥ १०५ ॥
अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥ १०६ ॥

पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥ १०७॥

ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः सन्दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥१०८॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम् ॥ १०९ ॥

इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिꣳ रयिम् ॥११०॥

ऋतावानं महिषं विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥१११॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥११२॥

सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥११३॥

आ प्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः । भवा नः सप्रथस्तमः सखा वृधे ॥११४॥

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वाङ्कामया गिरा ॥११५॥

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥११६॥

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य । सम्राडेको वि राजति ॥११७॥

[अ०१२, कं० ११७, मं० सं० ११९]

इति द्वादशोऽध्यायः।

अथ त्रयोदशोऽध्यायः।

मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । मामु देवताः सचन्ताम् ॥ १ ॥

अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ२ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥ २ ॥

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥ ३ ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ४ ॥

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ ५ ॥

नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ६ ॥

या इषवो यातुधानानां ये वा वनस्पतीँ१रनु । ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ७ ॥

ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥ ८ ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ ९ ॥

तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो वि सृज विष्वगुल्काः ॥१०॥

प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने मा किष्टे व्यथिरा दधर्षीत् ॥११॥

उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ२ ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥१२॥

ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ।
अग्नेष्ट्वा तेजसा सादयामि ॥१३॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ।
इन्द्रस्य त्वौजसा सादयामि ॥१४॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥१५॥

ध्रुवाऽसि धरुणाऽऽस्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृꣳह ॥१६॥

प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् । व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥१७॥

भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥१८॥

विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥१९॥

काण्डात्काण्डात्प्ररोहन्ती परुषः-परुषस्परि । एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥२०॥

या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥२१॥

यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥२२॥

या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥२३॥

विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् । प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
अग्निष्टेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥२४॥

मधुश्च माधवश्च वासन्तिकावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप
ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
वासन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् २५

अषाढाऽसि सहमाना सहस्वारातीः सहस्व पृतनायतः । सहस्रवीर्याऽसि सा मा जिन्व ॥२६॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥२७॥

मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥२८॥

मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥२९॥

अपां गम्भन्त्सीद मा त्वा सूर्योऽभि ताप्सीन्माऽग्निर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजा अनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ॥३०॥

त्रीन्त्समुद्रान्त्समसृपत्स्वर्गानपां पतिर्वृषभ इष्टकानाम् ।
पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥३१॥

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥३२॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥३३॥

ध्रुवाऽसि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्यो अधि जातवेदाः ।
स गायत्र्या त्रिष्टुभाऽनुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन् ॥३४॥

इषे राये रमस्व सहसे द्युम्न ऊर्जे अपत्याय । सम्राडसि स्वराडसि सारस्वतौ त्वोत्सौ प्रावताम् ॥३५॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ॥३६॥

युक्ष्वा हि देवहूतमाँ२ अश्वाँ२ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥३७॥

सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्ये अग्नेः ॥३८॥

ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा ।
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥३९॥

अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् । सहस्रदा असि सहस्राय त्वा ॥४०॥

आदित्यं गर्भं पयसा समङ्धि सहस्रस्य प्रतिमां विश्वरूपम् ।
परि वृङ्धि हरसा माऽभि मꣳस्थाः शतायुषं कृणुहि चीयमानः ॥४१॥

वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥४२॥

अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिं विराजम् ॥४३॥

वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥४४॥

यो अग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥४५॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥४६॥

इमं मा हिꣳसीर्द्विपादं पशुꣳ सहस्राक्षो मेधाय चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो नि षीद ।
मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४७॥

इमं मा हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४८॥

इमꣳ साहस्रꣳ शतधारमुत्सं व्यच्यमानꣳ सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा हिंसीः परमे व्योमन् ।
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४९॥

इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ।
उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५०॥

अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्रमायँस्तेन रोहमायन्नुप मेध्यासः ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो नि षीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५१॥

त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥५२॥

अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयाम्यर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि सरिरे त्वा सदने सादयाम्यपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयाम्यपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयाम्यानुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्दसा सादयामि ॥५३॥

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत् त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥५४॥

अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभः स्वारꣳ स्वारादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद् बृहद् भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥५५॥

अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाश्चाक्षुष्यो जगती वार्षी जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥५६॥

इदमुत्तरात्स्वस्तस्य श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऐडमैडान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥५७॥

इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात् त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते विश्वकर्म ऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यो लोकं ता इन्द्रम् ॥५८॥

[अ० १३, कं० ५८, मं० सं० १३१]

इति त्रयोदशोऽध्यायः ।

अथ चतुर्दशोऽध्यायः ।

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवं योनिमा सीद साधुया ।
उख्यस्य केतुं प्रथमं जुषाणाऽश्विनाऽध्वर्यू सादयतामिह त्वा ॥ १ ॥
कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ २ ॥
स्वैर्दक्षैर्दक्षपितेह सीद देवानाꣳ सुम्ने बृहते रणाय ।
पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा सं विशस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ३ ॥
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा ऽऽ यजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ४ ॥

अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानाम् ।
ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ५ ॥
शुक्रश्च शुचिश्च ग्रैष्मावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
ग्रैष्मावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥६॥
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥ ७ ॥
प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या वि भाहि श्रोत्रं मे श्लोकय ।
अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि दिवो वृष्टिमेरय ॥ ८ ॥
मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो बस्तो वयो विबलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिꣳहो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः ककुप् छन्द ऋषभो वयः सतोबृहती छन्दः ॥ ९ ॥
अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दस्त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड्वयो विराट् छन्दः पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वय उष्णिक् छन्दस्तुर्यवाड्वयोऽनुष्टुप् छन्दो लोकं ता इन्द्रम् ॥ १० ॥
इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधसे ॥ ११ ॥
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीः ।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
वायुष्ट्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ १२ ॥
राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक् सम्राडसि प्रतीची दिक् स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिक् ॥ १३ ॥

विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
वायुष्टेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ १४ ॥

नभश्च नभस्यश्च वार्षिकावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
वार्षिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥१५॥
इषश्चोर्जश्च शारदावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
शारदावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥१६॥
आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ॥ १७ ॥
मा छन्दः प्रमा छन्दः प्रतिमा छन्दो अस्रीवयश्छन्दः पङ्क्तिश्छन्द उष्णिक् छन्दो बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः ॥ १८ ॥
पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो वाक् छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजाश्छन्दोऽश्वश्छन्दः ॥ १९ ॥
अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ २० ॥
मूर्धाऽसि राड् ध्रुवाऽसि धरुणा धर्त्र्यसि धरणी ।
आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥ २१ ॥
यन्त्री राड् यन्त्र्यसि यमनी ध्रुवाऽसि धरित्री ।
इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा लोकं ता इन्द्रम् ॥ २२ ॥

आशुस्त्रिवृद्भान्तः पंञ्चदृशो व्योमा सप्तदृशो धुरुणं एकविंᳬंशः प्रतूर्तिरष्टादृशो—
स्तपों नवदृशो ऽभीवुर्त्तः संविंᳬंशो वर्चो द्वाविंᳬंशः सम्भरंणस्त्रयोविंᳬंशो
योनिंश्चतुर्विंᳬंशो गर्भाः पञ्चविंᳬंशा ओजस्त्रिणवः क्रतुरेकत्रिंᳬंशः
प्रतिष्ठा त्रंयस्त्रिंᳬंशो ब्रध्नस्यं विष्टपं चतुस्त्रिंᳬंशो नाकः षट्त्रिंᳬंशो
विवर्त्तोऽष्टाचत्वारिंᳬंशो धूर्त्रं चतुष्टोमः ॥ २३ ॥

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमं
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रᳬं स्पृतं पंञ्चदृश स्तोमों
नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रᳬं स्पृतᳬं सप्तदृश स्तोमों
मित्रस्यं भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वातं स्पृत एकविंᳬंश स्तोमः ॥ २४ ॥

वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुंष्पात् स्पृतं चतुर्विंᳬंश स्तोमं
आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भा स्पृताः पंञ्चविंᳬंश स्तोमो
ऽदित्यै भागोऽसि पूष्ण आधिपत्यमोर्ज स्पृतं त्रिणव स्तोमो
देवस्यं सवितुर्भागोऽसि बृहस्पतेराधिपत्यᳬं समीचीर्दिशं स्पृताश्चतुष्टोम स्तोमः ॥ २५ ॥

यवानां भागोऽस्ययवानामाधिंपत्यं प्रजा स्पृताश्चतुश्चत्वारिंᳬंश स्तोमं
ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतᳬं स्पृतं त्रयस्त्रिंᳬंश स्तोमः ॥ २६ ॥

सहश्च सहस्यश्च हैमन्तिकावृतू अग्नेरन्तःश्लेषोऽसि कल्पेंतां द्यावापृथिवी कल्पन्तामाप
ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
हैमन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविंशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सींदतम् ।२७।

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्
तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत्
पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्
सप्तभिरस्तुवत सप्त ऋषयोऽसृज्यन्त धाताऽधिपतिरासीत् ॥ २८ ॥

नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासी—
देकादृशभिरस्तुवत ऋतवोऽसृज्यन्तार्तवा अधिपतय आसं—
स्त्रयोदृशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिरासीत्
पञ्चदृशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत्
सप्तदृशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीत् ॥ २९ ॥

वा० य० ८

नवदृशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्तां—
मेकविंᳬंशत्यास्तुवतैकंशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्
त्रयोविंᳬंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत्
पञ्चविंᳬंशत्यास्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्
सप्तविंᳬंशत्याऽस्तुवत द्यावापृथिवी व्यैतां वसंवो रुद्रा आदित्या अनुव्यायँस्त एवाधिपतय आसन् ।३०।

नवविंᳬंशत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासी—
देकत्रिंᳬंशताऽस्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसं—
स्त्रयस्त्रिंᳬंशताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासी—
लोके तो इन्द्रम् ॥ ३१ ॥

[अ० १४, कं० ३१, मं० सं० १६५]

इति चतुर्दशोऽध्यायः ।

अथ पञ्चदशोऽध्यायः ।

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजातान् नुद जातवेदः ।
अधि नो ब्रूहि सुमना अहेडँस्तव स्याम शर्मंस्त्रिवरूथ उद्भौ ॥ १ ॥

सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयᳬं स्याम प्र णुदा नः सपत्नान् ॥ २ ॥

षोडशी स्तोम ओजो द्रविणं चतुश्चत्वारिंᳬंश स्तोमो वर्चो द्रविणम् ।
अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्व ॥ ३ ॥

एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो
व्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः सरिरं छन्दः ककुप्छन्द—
स्त्रिककुप्छन्दः काव्यं छन्दो अङ्कुपं छन्दो ऽक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो
विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः ॥ ४ ॥

आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरञ्छन्दो
निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सᳬंस्तुप्छन्दो ऽनुष्टुप्छन्द
एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्धाश्छन्दो
विशालं छन्द—श्छदिश्छन्दो दूरोहणं छन्द—स्तन्द्रं छन्दो अङ्काङ्कं छन्दः ॥ ५ ॥

रश्मिना सत्याय सत्यं जिन्व प्रेतिना धर्मणा धर्मं जिन्वा—न्वित्या दिवा दिवं जिन्व
सन्धिनाऽन्तरिक्षेणान्तरिक्षं जिन्व प्रतिधिना पृथिव्या पृथिवीं जिन्व
विष्टम्भेन वृष्ट्या वृष्टिं जिन्व प्रवयाऽह्नाऽहर्जिन्वा—नुया रात्र्या रात्रीं जिन्वो—
शिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनादित्येभ्य आदित्याञ्जिन्व ॥ ६ ॥

तन्तुना रायस्पोषेण रायस्पोषं जिन्व सᳬंसर्पेण श्रुताय श्रुतं जिन्वै—डेनौषधीभिरोषधीर्जिन्वो—
त्तमेन तनूभिस्तनूर्जिन्व वयोधसाधीतेनाधीतं जिन्वा—भिजिता तेजसा तेजो जिन्व ॥ ७ ॥

प्रतिपदसि प्रतिपदे त्वा ऽनुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा ॥८॥

त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वा
ऽऽक्रमोऽस्याक्रमाय त्वा संक्रमोऽसि संक्रमाय त्वो—त्क्रमोऽस्युत्क्रमाय त्वो—
त्क्रान्तिरस्युत्क्रान्त्यै त्वा ऽधिपतिनोर्जोर्जं जिन्व ॥ ९ ॥

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत् त्वा स्तोमः पृथिव्याᳬं
श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु रथन्तरᳬं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु
दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे
लोके यजमानं च सादयन्तु ॥ १० ॥

विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदृशस्त्वा स्तोमः पृथिव्याᳬं
श्रयतु प्र उगमुक्थमव्यथायै स्तभ्नातु बृहत्साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु
दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे
लोके यजमानं च सादयन्तु ॥ ११ ॥

सम्राडसि प्रतीची दिगादित्यास्ते देवा अधिपतयो वरुणो हेतीनां प्रतिधर्ता सप्तदृशस्त्वा स्तोमः
पृथिव्याᳬं श्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु वैरूपᳬं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा
प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥ १२ ॥

स्वराडस्युदीची दिङ्मरुतस्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्त्तैकविंᳬंशस्त्वा स्तोमः पृथिव्याᳬं
श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजᳬं साम प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा
देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे
स्वर्गे लोके यजमानं च सादयन्तु ॥ १३ ॥

अधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिंᳬंशौ त्वा
स्तोमौ पृथिव्याᳬं श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताᳬं शाक्वररैवते सामनी
प्रतिष्ठित्या अन्तरिक्ष ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधि-
पतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥ १४ ॥

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ ।
पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो
नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १५ ॥

अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ ।
मेनका च सहजन्या चाप्सरसौ यातुधाना हेती रक्षाᳬंसि प्रहेतिस्तेभ्यो नमो अस्तु
ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १६ ॥

अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ ।
प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमो अस्तु
ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १७ ॥

अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ ।
विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमो अस्तु
ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १८ ॥

अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ ।
उर्वशी च पूर्वचित्तिश्चाप्सरसाववस्फूर्जन् हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमो अस्तु
ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ १९ ॥
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाᳬं रेताᳬंसि जिन्वति ॥ २० ॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ २१ ॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ २२ ॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥ २३ ॥

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥ २४ ॥
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥ २५ ॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे-विशे ॥ २६ ॥
जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥ २७ ॥
त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वने-वने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥ २८ ॥
सखायः सं वः सम्यञ्चमिषँ स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ २९ ॥
सँसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या भर ॥ ३० ॥
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ॥ ३१ ॥
एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिँ स्वध्वरं विश्वस्य दूतममृतम् ॥ ३२ ॥
विश्वस्य दूतममृतं विश्वस्य दूतममृतम् । स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ॥ ३३ ॥
स दुद्रवत्स्वाहुतः स दुद्रवत्स्वाहुतः । सुब्रह्मा यज्ञः सुशमी वसूनां देवँ राधो जनानाम् ॥ ३४ ॥
अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥ ३५ ॥
स इधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ ३६ ॥
क्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥ ३७ ॥
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥ ३८ ॥
भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये । येना समत्सु सासहः ॥ ३९ ॥
येना समत्सु सासहोऽव स्थिरा तनुहि भूरि शर्धताम् । वनेमा ते अभिष्टिभिः ॥ ४० ॥
अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषँ स्तोतृभ्य आ भर ॥ ४१ ॥
सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सँ सुजातासः सूरय इषँ स्तोतृभ्य आ भर ॥ ४२ ॥

उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषँ स्तोतृभ्य आ भर ॥ ४३ ॥
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रँ हृदिस्पृशम् । ऋध्यामा त ओहैः ॥ ४४ ॥
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ॥ ४५ ॥
एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ॥ ४६ ॥
अग्निँ होतारं मन्ये दास्वन्तं वसुँ सूनुँ सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाऽऽजुह्वानस्य सर्पिषः ॥ ४७ ॥
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमँ रयिं दाः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ४८ ॥
येन ऋषयस्तपसा सत्रमायन्निन्धाना अग्निँ स्वराभरन्तः ।
तस्मिन्नहं नि दधे नाके अग्निं यमाहुर्मनव स्तीर्णबर्हिषम् ॥ ४९ ॥
तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ ५० ॥
आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥ ५१ ॥
अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमानः सरिरस्य मध्य उप प्र याहि दिव्यानि धाम ॥ ५२ ॥
सम्प्रच्यवध्वमुप सम्प्रयाताग्ने पथो देवयानान् कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानाऽन्वाताँसीत् त्वयि तन्तुमेतम् ॥ ५३ ॥
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सँ सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ ५४ ॥
येन वहसि सहस्रं येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ ५५ ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥ ५६ ॥

तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप
ओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
शैशिरावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥ ५७ ॥
परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
सूर्यस्तेऽधिपतिस्तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ ५८ ॥
लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥ ५९ ॥
ता अस्य सूददोहसः सोमँ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥ ६० ॥
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमँ रथीनां वाजानाँ सत्पतिं पतिम् ॥ ६१ ॥
प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ ६२ ॥
आयोष्ट्वा सदने सादयाम्यवतश्छायायाँ समुद्रस्य हृदये ।
रश्मीवतीं भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम् ॥ ६३ ॥
परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीं दिवं यच्छ दिवं दृँह दिवं मा हिँसीः ।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवे सीदतम् ॥ ६४ ॥
सहस्रस्य प्रमाऽसि सहस्रस्य प्रतिमाऽसि सहस्रस्योन्माऽसि साहस्रोऽसि सहस्राय त्वा ॥ ६५ ॥

[अ० १५, कं० ६५, मं० सं० १३६]

इति पञ्चदशोऽध्यायः ।

अथ षोडशोऽध्यायः ।

नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥ १ ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥ २ ॥
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिँसीः पुरुषं जगत् ॥ ३ ॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मँ सुमना असत् ॥ ४ ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परा सुव ॥ ५ ॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चैनँ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाँ हेड ईमहे ॥ ६ ॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥ ७ ॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ ८ ॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥ १० ॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥ ११ ॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ॥ १२ ॥
अवतत्य धनुष्ट्वँ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥
नमस्त आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ १४ ॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ १५ ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ॥ १६ ॥
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः
पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो
नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥ १७ ॥
नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो
नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः ॥ १८ ॥
नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौ—
षधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो
नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः ॥ १९ ॥

नमः कृत्स्नायतया धावते सत्वनां पतये नमो नमः सहमानाय निव्याधिन
आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो
नमो निचेरवे परिचरायारण्यानां पतये नमः ॥ २० ॥
नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते
तस्कराणां पतये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ॥ २१ ॥
नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो
नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो ऽस्यद्भ्यश्च वो नमः ।२२।
नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो
नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥ २३ ॥
नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्यो ऽश्वपतिभ्यश्च वो नमो
नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृंहतीभ्यश्च वो नमः ।२४।
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥२५॥
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमो
नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥ २६ ॥
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो
नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥ २७ ॥
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च
पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥ २८ ॥
नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च
नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥ २९ ॥
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च
सवृधे च नमोऽग्र्याय च प्रथमाय च ॥ ३० ॥
नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्याय चा-
वस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥ ३१ ॥

वा० य० ९

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चा-
पगल्भाय च नमो जघन्याय च बुध्न्याय च ॥ ३२ ॥
नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः श्लोक्याय चा-
वसान्याय च नम उर्वर्याय च खल्याय च ॥ ३३ ॥
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चा-
शुरथाय च नमः शूराय चावभेदिने च ॥ ३४ ॥
नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च
श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥ ३५ ॥
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चा-
युधिने च नमः स्वायुधाय च सुधन्वने च ॥ ३६ ॥
नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च
सरस्याय च नमो नादेयाय च वैशन्ताय च ॥ ३७ ॥
नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च
विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥ ३८ ॥
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च
रुद्राय च नमस्ताम्राय चारुणाय च ॥ ३९ ॥
नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमोऽग्रेवधाय च
दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥
नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च
शिवतराय च ॥ ४१ ॥
नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च
कूल्याय च नमः शष्प्याय च फेन्याय च ॥ ४२ ॥
नमः सिकत्याय च प्रवाह्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च
पुलस्तये च नम इरिण्याय च प्रपथ्याय च ॥ ४३ ॥
नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च
निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥ ४४ ॥

नमः शुष्क्याय च हरित्याय च नमः पांसव्याय च रजस्याय च नमो लोप्याय चो-
लप्याय च नम ऊर्व्याय च सूर्व्याय च ॥ ४५ ॥
नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च नम आखिदते च
प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानां
हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥ ४६ ॥
द्रापे अन्धसस्पते दरिद्र नीललोहित ।
आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किंचनाममत् ॥ ४७ ॥
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ४८ ॥
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ४८ ॥
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४९॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं बिभ्रदा गहि ॥ ५१ ॥
विकिरिद्र विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रं हेतयोऽन्यमस्मन्नि वपन्तु ताः ।५२॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५४॥
अस्मिन् महत्यर्णवे ऽन्तरिक्षे भवा अधि । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५५॥
नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५६॥
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५७॥
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५८॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥५९॥
ये पथां पथिरक्षय ऐलबृदा आयुर्युधः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥६०॥
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥६१॥
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥६२॥
य एतावन्तश्च भूयांसश्च दिशो रुद्रा वितस्थिरे । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ॥६३॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ६४ ॥
नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ६५ ॥
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ६६ ॥

[अ० १६, कं० ६६, मं० सं० १८०]

इति षोडशोऽध्यायः ।

अथ सप्तदशोऽध्यायः ।

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्यो अधि सम्भृतं पयः ।
तां न इषमूर्जं धत्त मरुतः संरराणा अश्मंस्ते क्षुन्मयि त ऊर्ग्
यं द्विष्मस्तं ते शुगृच्छतु ॥ १ ॥
इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च दश च शतं च शतं च सहस्रं च सहस्रं चायुतं
चायुतं च नियुतं च नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चैता
मे अग्न इष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥ २ ॥
ऋतव स्थ ऋतावृध ऋतुष्ठा स्थ ऋतावृधः ।
घृतश्चुतो मधुश्चुतो विराजो नाम कामदुघा अक्षीयमाणाः ॥ ३ ॥
समुद्रस्य त्वाऽवकयाग्ने परि व्ययामसि । पावको अस्मभ्यं शिवो भव ॥ ४ ॥
हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि । पावको अस्मभ्यं शिवो भव ॥ ५ ॥
उप ज्मन्नुप वेतसेऽव तर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरा गहि
सेमं नो यज्ञं पावकवर्णं शिवं कृधि ॥ ६ ॥
अपामिदं न्ययनं समुद्रस्य निवेशनम् ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ॥ ७ ॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥ ८ ॥
स नः पावक दीदिवोऽग्ने देवाँ२ इहा वह । उप यज्ञꣳ हविश्च नः ॥ ९ ॥
पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तूर्वन् न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥ १० ॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ ११ ॥
नृषदे वेडप्सुषदे वेड् बर्हिषदे वेड् वनसदे वेट् स्वर्विदे वेट् ॥ १२ ॥
ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ॥ १३ ॥
ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुर एतारो अस्य ।
येभ्यो न ऋते पवते धाम किञ्चन न ते दिवो न पृथिव्या अधि स्नुषु ॥ १४ ॥
प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ १५ ॥
अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् । अग्निर्नो वनते रयिम् ॥ १६ ॥
य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ२ आ विवेश ॥ १७ ॥
किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथाऽऽसीत् ।
यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ १८ ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥ १९ ॥
किꣳ स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥ २० ॥
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥ २१ ॥
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥ २२ ॥

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥ २३ ॥
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत् ॥ २४ ॥
चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ॥ २५ ॥
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्त ऋषीन् पर एकमाहुः ॥ २६ ॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तꣳ सम्प्रश्नं भुवना यन्त्यन्या ॥ २७ ॥
त आयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥ २८ ॥
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कꣳ स्विद् गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ॥ २९ ॥
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥ ३० ॥
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ ३१ ॥
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा ॥ ३२ ॥
आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत् साकमिन्द्रः ॥ ३३ ॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ ३४ ॥
स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ ३५ ॥

बृहस्पते परि दीया रथेन रक्षोहाऽमित्राँ२ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ ३६ ॥
बलविज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥ ३७ ॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳ रभध्वम् ॥ ३८ ॥
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु ॥ ३९ ॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥ ४० ॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ ४१ ॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाꣳसि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥ ४२ ॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ२ उ देवा अवता हवेषु ॥ ४३ ॥
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥ ४४ ॥
अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिते । गच्छामित्रान् प्र पद्यस्व माऽमीषां कं चनोच्छिषः ॥ ४५ ॥
प्रेता जयता नर इन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथाऽसथ ॥ ४६ ॥
असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।
तां गूहत तमसाऽपव्रतेन यथाऽमी अन्यो अन्यं न जानन् ॥ ४७ ॥
यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।
तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ ४८ ॥
मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजाऽमृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वाऽनु देवा मदन्तु ॥ ४९ ॥
उदेनमुत्तरां नयाग्ने घृतेनाहुत । रायस्पोषेण सꣳ सृज प्रजया च बहुं कृधि ॥ ५० ॥

इन्द्रेमं प्रतरां नय सजातानामसद्वशी । समेनं वर्चसा सृज देवानां भागदा असत् ॥ ५१ ॥
यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रुवन्नयं च ब्रह्मणस्पतिः ॥ ५२ ॥
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥ ५३ ॥
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात् ॥ ५४ ॥
समिद्धे अग्नावधि मामहान उक्थपत्र ईड्यो गृभीतः ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवाः ॥ ५५ ॥
दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमनाः शतपयाः ।
परिगृह्य देवा यज्ञमायन् देवा देवेभ्यो अध्वर्यन्तो अस्थुः ॥ ५६ ॥
वीतꣳ हविः शमितꣳ शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति ।
ततो वाका आशिषो नो जुषन्ताम् ॥ ५७ ॥
सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥ ५८ ॥
विमान एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥ ५९ ॥
उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यन्तौ ॥ ६० ॥
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥ ६१ ॥
देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् । यक्षदग्निर्देवो देवाँ२ आ च वक्षत् ॥ ६२ ॥
वाजस्य मा प्रसव उद्ग्राभेणोदग्रभीत् । अधा सपत्नानिन्द्रो मे निग्राभेणाधराँ२ अकः ॥ ६३ ॥
उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥ ६४ ॥
क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः ।
दिवस्पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराध्वम् ॥ ६५ ॥
प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह ।
विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥ ६६ ॥

पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ॥ ६७ ॥
स्वर्यन्तो नापेक्षन्त आ द्याᳬं रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारᳬं सुविद्वाᳬंसो वितेनिरे ॥ ६८ ॥
अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥ ६९ ॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकᳬं समीची ।
द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥ ७० ॥
अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रं व्यानाः ।
त्वᳬं साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥ ७१ ॥
सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद ।
भासाऽन्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृᳬंह ॥ ७२ ॥
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमा सीद साधुया ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥ ७३ ॥
ताᳬं सवितुर्वरेण्यस्य चित्रामाऽहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कण्वो अदुहत्प्रपीनाᳬं सहस्रधारां पयसा महीं गाम् ॥ ७४ ॥
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवीᳬंषि जुहुरे समिद्धे ॥ ७५ ॥
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वाᳬं शश्वन्त उप यन्ति वाजाः ॥ ७६ ॥
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रᳬं हृदिस्पृशम् । ऋध्यामा त ओहैः ॥ ७७ ॥
चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहाऽदाभ्यᳬं हविः ॥ ७८ ॥
सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्व घृतेन स्वाहा ॥ ७९ ॥
शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च । शुक्रश्च ऋतपाश्चात्यᳬंहाः ॥ ८० ॥
ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च । मितश्च सम्मितश्च सभराः ॥ ८१ ॥
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्ता च विधर्ता च विधारयः ॥ ८२ ॥
वा० य० १०

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरे अमित्रश्च गणः ॥ ८३ ॥
ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥ ८४ ॥
स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ॥ ८५ ॥
इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ ८६ ॥
इमᳬं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियᳬं सदनमा विशस्व ॥ ८७ ॥
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमा वह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ ८८ ॥
समुद्रादूर्मिर्मधुमाँ२ उदारदुपाᳬंशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ ८९ ॥
वयं नाम प्र ब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥ ९० ॥
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ आ विवेश ॥ ९१ ॥
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकᳬं सूर्य एकं जजान वेनादेकᳬं स्वधया निष्टतक्षुः ॥ ९२ ॥
एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ ९३ ॥
सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ ९४ ॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ९५ ॥
अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ ९६ ॥

कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥ ९७ ॥
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ ९८ ॥
धामन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥ ९९ ॥
[अ० १७, कं० ९९, मं० सं० १०३]

इति सप्तदशोऽध्यायः ।

अथाष्टादशोऽध्यायः ।

…श्लोकश्च मे
वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे
श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥ १ ॥
प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे
श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥ २ ॥
ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे
परूᳬंषि च मे शरीराणि च म आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥ ३ ॥
ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे
वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥
सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे
जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥ ५ ॥
ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मे
ऽभयं च मे सुखं च मे शयनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ॥ ६ ॥
यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे
सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम् ॥ ७ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे
भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥ ८ ॥
ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे
कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे यज्ञेन कल्पन्ताम् ॥ ९ ॥
रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे
कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥ १० ॥
वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च म ऋद्धं च म ऋद्धिश्च मे
क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥ ११ ॥
व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे
श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥ १२ ॥
अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च
मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥ १३ ॥
अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे
पशव आरण्याश्च मे वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥ १४ ॥
वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इत्या च मे गतिश्च मे
यज्ञेन कल्पन्ताम् ॥ १५ ॥
अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे
पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १६ ॥
मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे धाता च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे
मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १७ ॥
पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे
नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १८ ॥
अᳬंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाᳬंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च
मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥ १९ ॥
आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे
मरुत्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे
हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥ २० ॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥२१॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥ २२ ॥

व्रतं च म ऋतवश्च मे तपश्च मे संवत्सरश्च मेऽहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ।२३।

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च म एकादश च म एकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म एकविꣳशतिश्च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥ २४ ॥

चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ।२५।

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥ २६ ॥

पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥ २७ ॥

वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाऽहर्पतये स्वाहाऽह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय स्वाहाऽऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाऽधिपतये स्वाहा प्रजापतये स्वाहा । इयं ते राण्मित्राय यन्ताऽसि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाऽऽधिपत्याय ॥ २८ ॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पताꣳ स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ।
स्तोमश्च यजुश्च ऋक् च साम च बृहच्च रथन्तरं च ।
स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट् स्वाहा ॥ २९ ॥

वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥ ३० ॥
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसाऽऽगमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ ३१ ॥
वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावतु ॥ ३२ ॥
वाजो नो अद्य प्र सुवाति दानं वाजो देवाँ२ ऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयम् ॥ ३३ ॥
वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति ।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ॥ ३४ ॥
सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः । सोऽहं वाजꣳ सनेयमग्ने ॥३५॥
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ ३६ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥ ३७ ॥
ऋताषाडृतधामाऽग्निर्गन्धर्व—स्तस्यौषधयोऽप्सरसो मुदो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ ३८ ॥
सꣳहितो विश्वसामा सूर्यो गन्धर्व—स्तस्य मरीचयोऽप्सरस आयुवो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ ३९ ॥
सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व—स्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ ४० ॥
इषिरो विश्वव्यचा वातो गन्धर्व—स्तस्यापो अप्सरस ऊर्जो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ ४१ ॥
भुज्युः सुपर्णो यज्ञो गन्धर्व—स्तस्य दक्षिणा अप्सरस स्तावा नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ ४२ ॥
प्रजापतिर्विश्वकर्मा मनो गन्धर्व—स्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ ४३ ॥
स नो भुवनस्य पते प्रजापते यस्य त उपरि गृहा यस्य वेह ।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥ ४४ ॥

समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुतां गणः शम्भूर्मयोभूरभि मा वाहि स्वाहाऽवस्यूरसि दुवस्वाञ्छम्भूर्मयोभूरभि मा वाहि स्वाहा ॥ ४५ ॥
यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥ ४६ ॥
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥ ४७ ॥
रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥४८॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः ॥ ४९ ॥
स्वर्ण घर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा स्वर्ण ज्योतिः स्वाहा
स्वर्ण सूर्यः स्वाहा ॥ ५० ॥
अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् ।
तेन वयं गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥ ५१ ॥
इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ।
ताभ्यां पतेम सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥ ५२ ॥
इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः ।
महान्त्सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिꣳसीः ॥ ५३ ॥
दिवो मूर्धाऽसि पृथिव्या नाभिरूर्गपामोषधीनाम् । विश्वायुः शर्म सप्रथा नमस्पथे ॥ ५४ ॥
विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिं भिन्त ।
दिवस्पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याव ॥ ५५ ॥
इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः । तस्य न इष्टस्य प्रीतस्य द्रविणेहा गमेः ॥ ५६ ॥
इष्टो अग्निराहुतः पिपर्तु न इष्टꣳ हविः । स्वगेदं देवेभ्यो नमः ॥ ५७ ॥
यदाकूतात्समसुस्रोद्धृदो वा मनसो वा सम्भृतं चक्षुषो वा ।
तदनु प्रेत सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥ ५८ ॥
एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वो अत्र तꣳ स्म जानीत परमे व्योमन् ॥ ५९ ॥

एतं जानाथ परमे व्योमन् देवाः सधस्था विद रूपमस्य ।
यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवाथाविरस्मै ॥ ६० ॥
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳ सृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥ ६१ ॥
येन वहसि सहस्रं येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ ६२ ॥
प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ ६३ ॥
यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः । तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥ ६४ ॥
यत्र धारा अनपेता मधोर्घृतस्य च याः । तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥ ६५ ॥
अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥ ६६ ॥
ऋचो नामास्मि यजूꣳषि नामास्मि सामानि नामास्मि ।
ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि ।
तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥ ६७ ॥
वार्त्रहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वाऽऽवर्तयामसि ॥ ६८ ॥
सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र सं पिणक् कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥ ६९ ॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ२ अभिदासत्यधरं गमया तमः ॥ ७० ॥
मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व ॥ ७१ ॥
वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निर्नः सुष्टुतीरुप ॥ ७२ ॥
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥ ७३ ॥
अश्याम तं काममग्ने तवोती अश्याम रयिꣳ रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥ ७४ ॥
वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥ ७५ ॥

धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥ ७६ ॥
त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ७७ ॥

[अ० १८, कं० ७७, मं० सं० ८९]

इत्यष्टादशोऽध्यायः ।

अथैकोनविंशोऽध्यायः ।

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन । मधुमतीं मधुमता सृजामि सꣳ सोमेन ।
सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥ १ ॥

परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः ।
दधन्वा यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥ २ ॥

वायोः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ।
वायोः पूतः पवित्रेण प्राङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ॥ ३ ॥

पुनाति ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तना ॥ ४ ॥

ब्रह्म क्षत्रं पवते तेज इन्द्रियꣳ सुरया सोमः सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ॥ ५ ॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वे-
न्द्राय त्वा सुत्राम्ण एष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ॥ ६ ॥

नाना हि वां देवहितꣳ सदस्कृतं मा सꣳ सृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिꣳसीः स्वां योनिमाविशन्ती ॥ ७ ॥

उपयामगृहीतोऽस्याश्विनं तेजः सारस्वतं वीर्यमैन्द्रं बलम् ।
एष ते योनिर्मोदाय त्वाऽऽनन्दाय त्वा महसे त्वा ॥ ८ ॥

तेजोऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि बलमसि बलं मयि धेह्यो-
जोऽस्योजो मयि धेहि मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ॥ ९ ॥

या व्याघ्रं विषूचिकोभौ वृकं च रक्षति । श्येनं पतत्रिणꣳ सिꣳहꣳ सेमं पात्वꣳहसः ॥ १० ॥

बा० व० ११

सुरावन्तं बर्हिषदꣳ सुवीरं यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥ ३२ ॥

यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विनाविन्द्रमग्निम् ॥ ३३ ॥

यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमं तꣳ शुक्रं मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥ ३४ ॥

यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहं तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामि ॥ ३५ ॥

पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन् पितरोऽमीमदन्त पितरो
ऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ३६ ॥

पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा ।
पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ३७ ॥

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ३८ ॥

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ३९ ॥

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँ१रनु ॥ ४० ॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥ ४१ ॥

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥ ४१॥
यं पोता स पुनातु मा ॥ ४२ ॥

पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ ४२ ॥

उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ ४३ ॥

वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥ ४४ ॥

ये समानाः समनसः पितरो यमराज्ये । तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ ४५ ॥

ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः ॥ ४६ ॥

द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥ ४७ ॥

यदापिपेष मातरं पुत्रः प्रमुदितो धयन् । एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया ।
सम्पृच स्थ सं मा भद्रेण पृङ्क्त विपृच स्थ वि मा पाप्मना पृङ्क्त ॥ ११ ॥

देवा यज्ञमतन्वत भेषजं भिषजाऽश्विना । वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ॥ १२ ॥

दीक्षायै रूपꣳ शष्पाणि प्रायणीयस्य तोक्मानि ।
क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु ॥ १३ ॥

आतिथ्यरूपं मासरं महावीरस्य नग्नहुः । रूपमुपसदामेतत्तिस्रो रात्रीः सुराऽऽसुता ॥ १४ ॥

सोमस्य रूपं क्रीतस्य परिस्रुत्परि षिच्यते । अश्विभ्यां दुग्धं भेषजमिन्द्रायैन्द्रꣳ सरस्वत्या ॥ १५ ॥

आसन्दी रूपꣳ राजासन्द्यै वेद्यै कुम्भी सुराधानी ।
अन्तर उत्तरवेद्या रूपं कारोतरो भिषक् ॥ १६ ॥

वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् । यूपेन यूप आप्यते प्रणीतो अग्निरग्निना ॥ १७ ॥

हविर्धानं यदश्विनाऽऽग्नीध्रं यत्सरस्वती । इन्द्रायैन्द्रꣳ सदस्कृतं पत्नीशालं गार्हपत्यः ॥ १८ ॥

प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य । प्रयाजेभिरनुयाजान् वषट्कारेभिराहुतीः ॥ १९ ॥

पशुभिः पशूनाप्नोति पुरोडाशैर्हवीꣳष्या । छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥ २० ॥

धानाः करम्भः सक्तवः परीवापः पयो दधि । सोमस्य रूपꣳ हविष आमिक्षा वाजिनं मधु ॥ २१ ॥

धानानाꣳ रूपं कुवलं परीवापस्य गोधूमाः । सक्तूनाꣳ रूपं बदरमुपवाकाः करम्भस्य ॥ २२ ॥

पयसो रूपं यद्यवा दध्नो रूपं कर्कन्धूनि । सोमस्य रूपं वाजिनꣳ सौम्यस्य रूपमामिक्षा ॥ २३ ॥

आ श्रावयेति स्तोत्रियाः प्रत्याश्रावो अनुरूपः । यजेति धाय्यारूपं प्रगाथा येयजामहाः ॥ २४ ॥

अर्धऋचैरुक्थानाꣳ रूपं पदैराप्नोति निविदः । प्रणवैः शस्त्राणाꣳ रूपं पयसा सोम आप्यते ॥ २५ ॥

अश्विभ्यां प्रातःसवनमिन्द्रेणैन्द्रं माध्यन्दिनम् । वैश्वदेवꣳ सरस्वत्या तृतीयमाप्तꣳ सवनम् ॥ २६ ॥

वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम् । कुम्भीभ्यामम्भृणौ सुते स्थालीभि स्थालीराप्नोति ॥ २७ ॥

यजुर्भिराप्यन्ते ग्रहा ग्रहै स्तोमाश्च विष्टुतीः । छन्दोभिरुक्थाशस्त्राणि साम्नावभृथ आप्यते ॥ २८ ॥

इडाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः । शंयुना पत्नीसंयाजान्त्समिष्टयजुषा सꣳस्थाम् ॥ २९ ॥

व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् । दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ३० ॥

एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम् । तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥ ३१ ॥

इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ॥ ४८ ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ ४९ ॥

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ५० ॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः ।
तेभिर्यमः सꣳरराणो हवीꣳष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ ५१ ॥

त्वꣳ सोम प्र चिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥ ५२ ॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीँ१रपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥ ५३ ॥

त्वꣳ सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥ ५४ ॥

बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शन्तमेनाथा नः शं योररपो दधात ॥ ५५ ॥

आऽहं पितॄन्त्सुविदत्राँ२ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ५६ ॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ५७ ॥

आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ५८ ॥

अग्निष्वात्ताः पितर एह गच्छत सदः-सदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥ ५९ ॥

ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ।
तेभ्यः स्वराडसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥ ६० ॥

अग्निष्वात्तानृतुमतो हवामहे नाराशंसे सोमपीथं य आशुः ।
ते नो विप्रासः सुहवा भवन्तु वयं स्याम पतयो रयीणाम् ॥ ६१ ॥

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥ ६२ ॥

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥ ६३ ॥

यमग्ने कव्यवाहन त्वं चिन्मन्यसे रयिम् । तन्नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥ ६४ ॥

यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥ ६५ ॥

त्वमग्न ईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥ ६६ ॥

ये चेह पितरो ये च नेह याँश्च विद्म याँ२ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥ ६७ ॥

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥ ६८ ॥

अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥ ६९ ॥

उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि । उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥ ७० ॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥ ७१ ॥

सोमो राजामृतं सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७२ ॥

अद्भ्यः क्षीरं व्यपिबत् क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७३ ॥

सोममद्भ्यो व्यपिबच्छन्दसा हंसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७४ ॥

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७५ ॥

रेतो मूत्रं वि जहाति योनिं प्रविशदिन्द्रियम् । गर्भो जरायुणाऽऽवृत उल्बं जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७६ ॥

दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः । अश्रद्धामनृतेऽदधाच्छ्रद्धां सत्ये प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७७ ॥

वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७८ ॥

दृष्ट्वा परिस्रुतो रसं शुक्रेण शुक्रं व्यपिबत् पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७९ ॥

सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥ ८० ॥

तदस्य रूपममृतं शचीभिस्तिस्रो दधुर्देवताः संरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः ॥ ८१ ॥

तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अन्तरम् ।
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ॥ ८२ ॥

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥ ८३ ॥

पयसा शुक्रममृतं जनित्रं सुरया मूत्राज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊवध्यं वातं सब्वं तदारात् ॥ ८४ ॥

इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यैर्न मिनाति पित्तम् ॥ ८५ ॥

आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभिरासन्दी नाभिरुदरं न माता ॥ ८६ ॥

कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः ।
प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥ ८७ ॥

मुखं सदस्य शिर इत् सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती ।
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ॥ ८८ ॥

अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते ॥ ८९ ॥

अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥ ९० ॥

इन्द्रस्य रूपमृषभो बलाय कर्णाभ्यां श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥ ९१ ॥

आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन्यशसे श्रियै शिखा सिंहस्य लोम त्विषिरिन्द्रियाणि ॥ ९२ ॥

अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपं शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥ ९३ ॥

सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपां रसेन वरुणो न साम्नेन्द्रं श्रियै जनयन्नप्सु राजा ॥ ९४ ॥

तेजः पशूनां हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृतः सोम इन्दुः ॥ ९५ ॥

[अ० १९, क० ९५, मं० सं० १९०]

इत्येकोनविंशोऽध्यायः ।

अथ विंशोऽध्यायः ।

क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि । मा त्वा हिंसीन्मा मा हिंसीः ॥ १ ॥
नि षसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः । मृत्योः पाहि विद्योत्पाहि ॥२॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि
षिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिञ्चामि ॥ ३ ॥
कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥ ४ ॥

शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणो अमृतं सम्राट् चक्षुर्विराट् श्रोत्रम् ॥ ५ ॥
जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः ।
मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥ ६ ॥
बाहू मे बलमिन्द्रियं हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥ ७ ॥
पृष्ठीर्मे राष्ट्रमुदरमंसौ ग्रीवाश्च श्रोणी । ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥ ८ ॥
नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् । आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ।
जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ॥ ९ ॥
प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु ।
प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन् प्रति प्राणेषु प्रति तिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ॥१०॥
त्रया देवा एकादश त्रयस्त्रिंशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥ ११ ॥
प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूंषि सामभिः
सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्कारा
आहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ॥ १२ ॥
लोमानि प्रयतिर्मम त्वङ्म आनतिरागतिः । मांसं म उपनतिर्वस्वस्थि मज्जा म आनतिः ॥१३॥
यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ १४ ॥
यदि दिवा यदि नक्तमेनांसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ १५ ॥
यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयम् । सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥१६॥
यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
यच्छूद्रे यदर्ये यदेनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि ॥ १७ ॥
यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ।
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥ १८ ॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ १९ ॥
द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ २० ॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ २१ ॥
अपो अद्यान्वचारिषथ्ं रसेन समसृक्ष्महि ।
पयस्वानग्न आऽगमं तं मा सथ्ं सृज वर्चसा प्रजया च धनेन च ॥ २२ ॥
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ।
समाववर्ति पृथिवी समुषाः समु सूर्यः । समु विश्वमिदं जगत् ।
वैश्वानरज्योतिर्भूयासं विभून् कामान् व्यश्नवै भूः स्वाहा ॥ २३ ॥
अभ्या दधामि समिधमग्ने व्रतपते त्वयि । व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम् ॥ २४ ॥
यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह । तँल्लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥ २५ ॥
यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह । तँल्लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥ २६ ॥
अथ्ंशुना ते अथ्ंशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥ २७ ॥
सिञ्चति परि षिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ॥ २८ ॥
धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥ २९ ॥
बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥ ३० ॥
अध्वर्यो अद्रिभिः सुतथ्ं सोमं पवित्र आ नय । पुनाहीन्द्राय पातवे ॥ ३१ ॥
यो भूतानामधिपतिर्यस्मिँल्लोका अधि श्रिताः ।
य ईशे महतो महाँस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम् ॥ ३२ ॥
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्ण एष ते योनिरश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥ ३३ ॥
प्राणपा मे अपानपाश्चक्षुष्पाः श्रोत्रपाश्च मे । वाचो मे विश्वभेषजो मनसोऽसि विलायकः ॥ ३४ ॥
अश्विनकृतस्य ते सरस्वतिकृतस्येन्द्रेण सुत्राम्णा कृतस्य । उपहूत उपहूतस्य भक्षयामि ॥ ३५ ॥
समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः ।
त्रिभिर्देवैस्त्रिथ्ंशता वज्रबाहुर्जघान वृत्रं वि दुरो ववार ॥ ३६ ॥
नराशथ्ंसः प्रति शूरो मिमानस्तनूनपात्प्रति यज्ञस्य धाम ।
गोभिर्वपावान् मधुना समञ्जन् हिरण्यैश्चन्द्री यजति प्रचेताः ॥ ३७ ॥
ईडितो देवैर्हरिवाँ२ अभिष्टिराजुह्वानो हविषा शर्धमानः ।
पुरन्दरो गोत्रभिद्वज्रबाहुरा यातु यज्ञमुप नो जुषाणः ॥ ३८ ॥

वा० य० १९

जुषाणो बर्हिर्हरिवान् न इन्द्रः प्राचीनथ्ं सीदत् प्रदिशा पृथिव्याः ।
उरुप्रथाः प्रथमानथ्ं स्योनमादित्यैरक्तं वसुभिः सजोषाः ॥ ३९ ॥
इन्द्रं दुरः कवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः ।
द्वारो देवीरभितो वि श्रयन्ताथ्ं सुवीरा वीरं प्रथमाना महोभिः ॥ ४० ॥
उषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुं ततं पेशसा संवयन्ती देवानां देवं यजतः सुरुक्मे ॥ ४१ ॥
दैव्या मिमाना मनुषः पुरुत्रा होताराविन्द्रं प्रथमा सुवाचा ।
मूर्धन् यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः ॥ ४२ ॥
तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा जनयो न पत्नीः ।
अच्छिन्नं तन्तुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः ॥ ४३ ॥
त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाकोऽचिष्टुर्यशसे पुरूणि ।
वृषा यजन्वृषणं भूरिरेता मूर्धन् यज्ञस्य समनक्तु देवान् ॥ ४४ ॥
वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्जठरं पृणानः स्वदाति यज्ञं मधुना घृतेन ॥ ४५ ॥
स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयन्ताम् ॥ ४६ ॥
आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥ ४७ ॥
आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥ ४८ ॥
आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥ ४९ ॥
त्रातारमिन्द्रमवितारमिन्द्रथ्ं हवे-हवे सुहवथ्ं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रथ्ं स्वस्ति नो मघवा धात्विन्द्रः ॥ ५० ॥
इन्द्रः सुत्रामा स्ववाँ२ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ ५१ ॥

तस्य वयथ्ं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ२ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ॥ ५२ ॥
आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन् विं न पाशिनोऽति धन्वेव ताँ२ इहि ॥ ५३ ॥
एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥ ५४ ॥
समिद्धो अग्निरश्विना तप्तो घर्मो विराट् सुतः । दुहे धेनुः सरस्वती सोमथ्ं शुक्रमिहेन्द्रियम् ॥ ५५ ॥
तनूपा भिषजा सुतेऽश्विनोभा सरस्वती । मध्वा रजाथ्ंसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥ ५६ ॥
इन्द्रायेन्दुथ्ं सरस्वती नराशथ्ंसेन नग्नहुम् । अधातामश्विना मधु भेषजं भिषजा सुते ॥ ५७ ॥
आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् । इडाभिरश्विनाविषथ्ं समूर्जथ्ं सथ्ं रयिं दधुः ॥ ५८ ॥
अश्विना नमुचेः सुतथ्ं सोमथ्ं शुक्रं परिस्रुता । सरस्वती तमा भरद्बर्हिषेन्द्राय पातवे ॥ ५९ ॥
कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः । इन्द्रो न रोदसी उभे दुहे कामान्त्सरस्वती ॥ ६० ॥
उषासानक्तमश्विना दिवेन्द्रथ्ं सायमिन्द्रियैः । सञ्जानाने सुपेशसा समञ्जाते सरस्वत्या ॥ ६१ ॥
पातं नो अश्विना दिवा पाहि नक्तथ्ं सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रथ्ं सचा सुते ॥ ६२ ॥
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा । तीव्रं परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥ ६३ ॥
अश्विना भेषजं मधु भेषजं नः सरस्वती । इन्द्रे त्वष्टा यशः श्रियथ्ं रूपथ्ं-रूपमधुः सुते ॥ ६४ ॥
ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता । कीलालमश्विभ्यां मधु दुहे धेनुः सरस्वती ॥ ६५ ॥
गोभिर्न सोममश्विना मासरेण परिस्रुता । समधातथ्ं सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥ ६६ ॥
अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥ ६७ ॥
अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥ ६८ ॥
यमश्विना सरस्वती हविषेन्द्रमवर्धयन् । स बिभेद वलं मघं नमुचावासुरे सचा ॥ ६९ ॥
तमिन्द्रं पशवः सचाश्विनोभा सरस्वती । दधाना अभ्यनूषत हविषा यज्ञ इन्द्रियैः ॥ ७० ॥
य इन्द्र इन्द्रियं दधुः सविता वरुणो भगः । स सुत्रामा हविष्पतिर्यजमानाय सश्चत ॥ ७१ ॥
सविता वरुणो दधद्यजमानाय दाशुषे । आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥ ७२ ॥
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥ ७२ ॥

अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रथ्ं सरस्वती यजमानमवर्धयन् ॥ ७३ ॥
ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥ ७४ ॥
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥ ७५ ॥
युवथ्ं सुराममश्विना नमुचावासुरे सचा । विपिपानाः सरस्वतीन्द्रं कर्मस्वावत ॥ ७६ ॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दथ्ंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥ ७७ ॥
यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥ ७८ ॥
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिथ्ं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥ ७९ ॥
अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् । वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥ ८० ॥
गोमदू षु णासत्याश्वावद्यातमश्विना । वर्ती रुद्रा नृपाय्यम् ॥ ८१ ॥
न यत्परो नान्तर आदधर्षद्वृषण्वसू । दुःशथ्ंसो मर्त्यो रिपुः ॥ ८२ ॥
ता न आ वोढमश्विना रयिं पिशङ्गसन्दृशम् । धिष्ण्या वरिवोविदम् ॥ ८३ ॥
पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ ८४ ॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥ ८५ ॥
महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥ ८६ ॥
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ ८७ ॥
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ ८८ ॥
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ८९ ॥
अश्विना पिबतां मधु सरस्वत्या सजोषसा । इन्द्रः सुत्रामा वृत्रहा जुषन्ताथ्ं सोम्यं मधु ॥ ९० ॥

[अ० २०, कं० ९०, मं० सं० १००]

[पू० वि० मं० सं० १५८५]

इति विंशोऽध्यायः ।

इति पूर्वविंशतिः समाप्ता ।

अथोत्तरविंशतिः।

अथैकविंशोऽध्यायः।

इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके॥१॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः॥२॥

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्॥३॥

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।
अव यक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि॥४॥

महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम।
तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम्॥५॥

सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माणमदितिꣳ सुप्रणीतिम्।
दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये॥६॥

सुनावमा रुहेयमस्रवन्तीमनागसम्। शतारित्राꣳ स्वस्तये॥७॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजाꣳसि सुक्रतू॥८॥

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन।
आ मा जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥९॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः॥१०॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥११॥

समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः। गायत्री छन्द इन्द्रियं त्र्यविर्गौर्वयो दधुः॥१२॥

तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती। उष्णिहा छन्द इन्द्रियं दित्यवाड्गौर्वयो दधुः॥१३॥

इडाभिरग्निरीड्यः सोमो देवो अमर्त्यः। अनुष्टुप्छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः॥१४॥

सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः। बृहती छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधुः॥१५॥

दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः। पङ्क्तिश्छन्द इहेन्द्रियं तुर्यवाड्गौर्वयो दधुः॥१६॥

उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः। त्रिष्टुप्छन्द इहेन्द्रियं पष्ठवाड्गौर्वयो दधुः॥१७॥

दैव्या होतारा भिषजेन्द्रेण सयुजा युजा। जगती छन्द इन्द्रियमनड्वान्गौर्वयो दधुः॥१८॥

तिस्र इडा सरस्वती भारती मरुतो विशः। विराट् छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः॥१९॥

त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना। द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः॥२०॥

शमिता नो वनस्पतिः सविता प्रसुवन् भगम्। ककुप्छन्द इहेन्द्रियं वशा वेहद्वयो दधुः॥२१॥

स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत्। अतिच्छन्दा इन्द्रियं बृहदृषभो गौर्वयो दधुः॥२२॥

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः। रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः॥२३॥

ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुताः। बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः॥२४॥

वर्षाभिर्ऋतुनाऽऽदित्या स्तोमे सप्तदशे स्तुताः। वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः॥२५॥

शारदेन ऋतुना देवा एकविꣳश ऋभवः स्तुताः। वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः॥२६॥

हेमन्तेन ऋतुना देवास्त्रिणवे मरुत स्तुताः। बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः॥२७॥

शैशिरेण ऋतुना देवास्त्रयस्त्रिꣳशेऽमृता स्तुताः। सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः॥२८॥

होता यक्षत्समिधाऽग्निमिडस्पदेऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं मधु शष्पैर्न तेज इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥२९॥

होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजं पथा मधुमता भरन्नश्विनेन्द्राय वीर्यं बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३०॥

होता यक्षन्नराशꣳसं न नग्नहुं पतिꣳ सुरया भेषजं मेषः सरस्वती भिषग्रथो न चन्द्र्यश्विनोर्वपा इन्द्रस्य वीर्यं बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३१॥

होता यक्षदिडेडित आजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजं यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३२॥

होता यक्षद्बर्हिरूर्णम्रदा भिषङ्नासत्या भिषजाऽश्विनाऽश्वा शिशुमती भिषग्धेनुः सरस्वती भिषग्दुह इन्द्राय भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३३॥

होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिश इन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजꣳ शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३४॥

होता यक्षत्सुपेशसोषे नक्तं दिवाऽश्विना समञ्जाते सरस्वत्या त्विषिमिन्द्रे न भेषजꣳ श्येनो न रजसा हृदा श्रिया न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३५॥

होता यक्षद्दैव्या होतारा भिषजाऽश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः शूषꣳ सरस्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३६॥

होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा सरस्वती मह इन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३७॥

होता यक्षत्सुरेतसमृषभं नर्यापसं त्वष्टारमिन्द्रमश्विना भिषजं न सरस्वतीमोजो न जूतिरिन्द्रियं वृको न रभसो भिषग्यशः सुरया भेषजꣳ श्रिया न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३८॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं भीमं न मन्युꣳ राजानं व्याघ्रं नमसाऽश्विना भामꣳ सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥३९॥

होता यक्षदग्निꣳ स्वाहाऽऽज्यस्य स्तोकानाꣳ स्वाहा मेदसां पृथक् स्वाहा छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहा ऋषभमिन्द्राय सिꣳहाय सहस इन्द्रियꣳ स्वाहाऽग्निं न भेषजꣳ स्वाहा सोममिन्द्रियꣳ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारं वरुणं भिषजां पतिꣳ स्वाहा वनस्पतिं प्रियं पाथो न भेषजꣳ स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज॥४०॥

होता यक्षदश्विनौ छागस्य वपाया मेदसो जुषेताꣳ हविर्होतर्यज।
होता यक्षत्सरस्वतीं मेषस्य वपाया मेदसो जुषताꣳ हविर्होतर्यज।
होता यक्षदिन्द्रमृषभस्य वपाया मेदसो जुषताꣳ हविर्होतर्यज॥४१॥

होता यक्षदश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यं मधु पिबन्तु मदन्तु व्यन्तु होतर्यज॥४२॥

होता यक्षदश्विनौ छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासे अज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवाश्विना जुषेताꣳ हविर्होतर्यज॥४३॥

होता यक्षत्सरस्वतीं मेषस्य हविष आवयदद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घसन्नूनं घासे अज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करदेवꣳ सरस्वती जुषताꣳ हविर्होतर्यज॥४४॥

होता यक्षदिन्द्रमृषभस्य हविष आवयदद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घसन्नूनं घासे अज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करदेवमिन्द्रो जुषताꣳ हविर्होतर्यज॥४५॥

होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित। यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः प्रिया धामानि यत्रेन्द्रस्य ऋषभस्य हविषः प्रिया धामानि यत्राग्नेः प्रिया धामानि यत्र सोमस्य प्रिया धामानि यत्रेन्द्रस्य सुत्राम्णः प्रिया धामानि यत्र सवितुः प्रिया धामानि यत्र वरुणस्य प्रिया धामानि यत्र वनस्पतेः प्रिया पाथाꣳसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयस इव कृत्वी करदेवं देवो वनस्पतिर्जुषताꣳ हविर्होतर्यज॥४६॥

होता यक्षदग्निꣳ स्विष्टकृतमयाडग्निरश्विनोश्छागस्य हविषः प्रिया धामान्ययाट् सरस्वत्या मेषस्य हविषः प्रिया धामान्ययाडिन्द्रस्य ऋषभस्य हविषः प्रिया धामान्ययाडग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाडिन्द्रस्य सुत्राम्णः प्रिया धामान्ययाट् सवितुः प्रिया धामान्ययाड्वरुणस्य प्रिया धामान्ययाड्वनस्पतेः प्रिया पाथाꣳस्ययाड्देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषताꣳ हविर्होतर्यज॥४७॥

देवं बर्हिः सरस्वती सुदेवमिन्द्रे अश्विना।
तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥४८॥
देवीर्द्वारो अश्विना भिषजेन्द्रे सरस्वती।
प्राणं न वीर्यं नसि द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥४९॥
देवी उषासावश्विना सुत्रामेन्द्रे सरस्वती।
बलं न वाचमास्य उषाभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥५०॥
देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन्।
श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥५१॥
देवी ऊर्जाहुती दुघे सुदुघेन्द्रे सरस्वत्यश्विना भिषजाऽवतः।
शुक्रं न ज्योति स्तनयोराहुती धत्त इन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज॥५२॥

देवा देवानां भिषजा होताराविन्द्रमश्विना।
वषट्कारैः सरस्वती त्विषिं न हृदये मतिꣳ होतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥५३॥
देवीस्तिस्रस्तिस्रो देवीरश्विनेडा सरस्वती।
शूषं न मध्ये नाभ्यामिन्द्राय दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥ ५४ ॥
देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथः।
रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥ ५५ ॥
देवो देवैर्वनस्पतिर्हिरण्यपर्णो अश्विभ्याꣳ सरस्वत्या सुपिप्पल इन्द्राय पच्यते मधु।
ओजो न जूतिर्ऋषभो न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥५६॥
देवं बर्हिर्वारितीनामध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या स्योनमिन्द्र ते सदः।
ईशायै मन्युꣳ राजानं बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥ ५७ ॥
देवो अग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ होताराविन्द्रमश्विना वाचा वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत् स्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपाः स्विष्टो अग्निरग्निना होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिꣳ स्वधां वसुवने वसुधेयस्य व्यन्तु यज ॥ ५८ ॥
अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशान् बध्नन्नश्विभ्यां छागꣳ सरस्वत्यै मेषमिन्द्राय ऋषभꣳ सुन्वन्नश्विभ्याꣳ सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् ॥ ५९ ॥
सूपस्था अद्य देवो वनस्पतिरभवदश्विभ्यां छागेन सरस्वत्यै मेषेणेन्द्राय ऋषभेणाक्षँस्तान् मेदस्तः प्रति पचताग्रभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥ ६० ॥
त्वामद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आ सङ्गतेभ्य एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देव दानान्यदुस्तान्यस्मा आ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥ ६१ ॥
[अ० २१, कं० ६१, मं० सं० ६१

इत्येकविंशोऽध्यायः।

अथ द्वाविंशोऽध्यायः।

तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे ॥ १ ॥
वा० प० १३.

इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या।
सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती ॥ २ ॥
अभिधा असि भुवनमसि यन्तासि धर्ता। स त्वमग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः ॥३॥
स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम्।
तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ॥ ४ ॥
प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि
विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि।
यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः। परो मर्तः परः श्वा ॥ ५ ॥
अग्नये स्वाहा सोमाय स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा
विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥६॥
हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा प्रोथते स्वाहा
प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा
सन्दिताय स्वाहा वल्गते स्वाहाऽऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा
जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा
सꣳहानाय स्वाहोपस्थिताय स्वाहाऽऽयनाय स्वाहा प्रायणाय स्वाहा ॥ ७ ॥
यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा
शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा
विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा
शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा
वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा
यन्मूत्रं करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥ ८ ॥
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥ ९ ॥
हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम् ॥ १० ॥
देवस्य चेततो महीं प्र सवितुर्हवामहे। सुमतिꣳ सत्यराधसम् ॥ ११ ॥
सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे। प्र देवाय मतीविदे ॥ १२ ॥
रातिꣳ सत्पतिं महे सवितारमुप ह्वये। आसवं देववीतये ॥ १३ ॥

देवस्य सवितुर्मतिमासवं विश्वदेव्यम्। धिया भगं मनामहे ॥ १४ ॥
अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत् ॥ १५ ॥
स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः। अग्निर्धिया समृण्वति ॥ १६ ॥
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ२ आ सादयादिह ॥ १७ ॥
अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः। गोजीरया रꣳहमाणः पुरन्ध्या ॥ १८ ॥
विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि। ययुर्नामाऽसि शिशुर्नामाऽस्यादित्यानां पत्वाऽन्विहि देवा आशापाला एतं
देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षतेह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा ॥१९॥
काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा स्वाहाऽऽधिमाधीताय
स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञातायादित्यै स्वाहाऽदित्यै मह्यै स्वाहा
ऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा
सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा
पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा
विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ॥ २० ॥
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्। विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥२१॥
आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ २२ ॥
प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा
वाचे स्वाहा मनसे स्वाहा ॥ २३ ॥
प्राच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा
प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहो-
र्ध्वायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहाऽवाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा ॥२४॥
अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा स्रवन्तीभ्यः स्वाहा
स्यन्दमानाभ्यः स्वाहा कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः स्वाहा
ऽर्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥ २५ ॥

वाताय स्वाहा धूमाय स्वाहाऽभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा
स्तनयते स्वाहाऽवस्फूर्जते स्वाहा वर्षते स्वाहाऽववर्षते स्वाहोग्रं वर्षते स्वाहा
शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा प्रुष्णते स्वाहा शीकायते स्वाहा
प्रुष्वाभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥ २६ ॥
अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा
दिवे स्वाहा दिग्भ्यः स्वाहाऽऽशाभ्यः स्वाहोर्व्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा ॥२७॥
नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा
मासेभ्यः स्वाहा ऋतुभ्यः स्वाहाऽऽर्तवेभ्यः स्वाहा संवत्सराय स्वाहा
द्यावापृथिवीभ्याꣳ स्वाहा चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा
वसुभ्यः स्वाहा रुद्रेभ्यः स्वाहाऽऽदित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा
विश्वेभ्यो देवेभ्यः स्वाहा मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा
पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥ २८ ॥
पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्राय स्वाहा
नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा
परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ २९ ॥
असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा
गणपतये स्वाहाऽभिभुवे स्वाहाऽधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा
चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥ ३० ॥
मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा
नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा
तपसे स्वाहा तपस्याय स्वाहाऽꣳहसस्पतये स्वाहा ॥ ३१ ॥
वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा स्वः स्वाहा
मूर्ध्ने स्वाहा व्यश्नुविने स्वाहाऽन्त्याय स्वाहाऽन्त्याय भौवनाय स्वाहा
भुवनस्य पतये स्वाहाऽधिपतये स्वाहा प्रजापतये स्वाहा ॥ ३२ ॥
आयुर्यज्ञेन कल्पताꣳ स्वाहा प्राणो यज्ञेन कल्पताꣳ स्वाहाऽपानो यज्ञेन कल्पताꣳ स्वाहा
व्यानो यज्ञेन कल्पताꣳ स्वाहोदानो यज्ञेन कल्पताꣳ स्वाहा समानो यज्ञेन कल्पताꣳ स्वाहा
चक्षुर्यज्ञेन कल्पताꣳ स्वाहा श्रोत्रं यज्ञेन कल्पताꣳ स्वाहा वाग्यज्ञेन कल्पताꣳ स्वाहा
मनो यज्ञेन कल्पताꣳ स्वाहाऽऽत्मा यज्ञेन कल्पताꣳ स्वाहा ब्रह्मा यज्ञेन कल्पताꣳ स्वाहा
ज्योतिर्यज्ञेन कल्पताꣳ स्वाहा स्वर्यज्ञेन कल्पताꣳ स्वाहा पृष्ठं यज्ञेन कल्पताꣳ स्वाहा
यज्ञो यज्ञेन कल्पताꣳ स्वाहा ॥ ३३ ॥

एकस्मै स्वाहा द्वाभ्यां स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्ट्यै स्वाहा
स्वर्गाय स्वाहा ॥ ३४ ॥

[अ० २२, कं० ३४, मं० सं० २६७]

इति द्वाविंशोऽध्यायः ।

अथ त्रयोविंशोऽध्यायः ।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्यस्ते महिमा ।
यस्तेऽहन्त्संवत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव
यस्ते दिवि सूर्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥ २ ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३ ॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ।
यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव
यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥ ४ ॥

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ ५ ॥

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ ६ ॥

यद्वातो अपो अगनीगन्प्रियामिन्द्रस्य तन्वम् । एतꣳ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः ॥७॥
वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाञ्जन्तु जागतेन
छन्दसा । भूर्भुवः स्वर्लाजी३ञ्छाची३न्यव्ये गव्य एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ॥८॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥९॥
सूर्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥ १० ॥

का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥ ११ ॥

द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः । अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ १२ ॥
वायुष्ट्वा पचतैरवत्वसितग्रीवश्छागैर्न्यग्रोधश्चमसैः शल्मलिर्वृद्ध्या ।
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्मा कृष्णश्च नोऽवतु नमोऽग्नये ॥ १३ ॥

सꣳशितो रश्मिना रथः सꣳशितो रश्मिना हयः । सꣳशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ॥१४॥
स्वयं वाजिँस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व । महिमा तेऽन्येन न सन्नशे ॥ १५ ॥

न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभिः सुगेभिः ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥ १६ ॥

अग्निः पशुरासीत्तेनायजन्त स एतँल्लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि
पिबैता अपः । वायुः पशुरासीत्तेनायजन्त स एतँल्लोकमजयद्यस्मिन्वायुः स ते लोको भविष्यति तं
जेष्यसि पिबैता अपः । सूर्यः पशुरासीत्तेनायजन्त स एतँल्लोकमजयद्यस्मिन्त्सूर्यः स ते लोको
भविष्यति तं जेष्यसि पिबैता अपः ॥ १७ ॥

प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा ।
अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥१८॥

गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे
निधीनां त्वा निधिपतिꣳ हवामहे वसो मम । आहमजानि गर्भधमा त्वमजासि गर्भधम् ॥ १९ ॥

ता उभौ चतुरः पदः सम्प्रसारयाव स्वर्गे लोके प्रोर्णुवाथां वृषा वाजी रेतोधा रेतो दधातु ॥२०॥
उत्सक्थ्या अव गुदं धेहि समञ्जिं चारया वृषन् । य स्त्रीणां जीवभोजनः ॥ २१ ॥

यकासकौ शकुन्तिकाऽऽहलगिति वञ्चति । आहन्ति गभे पसो निगल्गलीति धारका ॥ २२ ॥
यकोऽसकौ शकुन्तक आहलगिति वञ्चति । विवक्षत इव ते मुखमध्वर्यो मा नस्त्वमभि भाषथाः ॥२३॥
माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः । प्रतिलामीति ते पिता गभे मुष्टिमतꣳसयत् ॥ २४ ॥
माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः । विवक्षत इव ते मुखं ब्रह्मन्मा त्वं वदो बहु ॥२५॥
ऊर्ध्वामेनामुच्छ्रापय गिरौ भारꣳ हरन्निव । अथास्यै मध्यमेधताꣳ शीते वाते पुनन्निव ॥ २६ ॥
ऊर्ध्वमेनमुच्छ्रयताद्गिरौ भारꣳ हरन्निव । अथास्य मध्यमेजतु शीते वाते पुनन्निव ॥ २७ ॥
यदस्या अꣳहुभेद्याः कृधु स्थूलमुपातसत् । मुष्काविदस्या एजतो गोशफे शकुलाविव ॥ २८ ॥
यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः । सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥ २९ ॥

यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ॥ ३० ॥
यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते । शूद्रो यदर्यायै जारो न पोषमनु मन्यते ॥ ३१ ॥
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूꣳषि तारिषत् ॥ ३२ ॥
गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥ ३३ ॥

द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ।
विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा ॥ ३४ ॥
महानाम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः । मैघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥ ३५ ॥
नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया । देवानां पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ॥३६॥
रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः ।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ॥ ३७ ॥
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ॥ ३८ ॥
कस्त्वा छ्यति कस्त्वा वि शास्ति कस्ते गात्राणि शम्यति । क उ ते शमिता कविः ॥ ३९ ॥
ऋतवस्त ऋतुथा पर्व शमितारो वि शासतु । संवत्सरस्य तेजसा शमीभिः शम्यन्तु त्वा ॥ ४० ॥
अर्धमासाः परूꣳषि ते मासा आ च्छ्यन्तु शम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टꣳ सूदयन्तु ते ॥ ४१ ॥
दैव्या अध्वर्यवस्त्वा च्छ्यन्तु वि च शासतु । गात्राणि पर्वशस्ते सिमाः कृण्वन्तु शम्यन्तीः ॥४२॥
द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते । सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ॥ ४३ ॥
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः । शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ॥ ४४ ॥
कः स्विदेकाकी चरति क उ स्विज्जायते पुनः । किꣳ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥४५॥
सूर्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥ ४६ ॥
किꣳ स्वित्सूर्यसमं ज्योतिः किꣳ समुद्रसमꣳ सरः ।
किꣳ स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥ ४७ ॥
ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥ ४८ ॥

पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वं भुवनमा विवेशा३ ॥ ४९ ॥
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश ।
सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥ ५० ॥
केष्वन्तः पुरुष आ विवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद्ब्रह्मन्नुप वल्हामसि त्वा किꣳ स्विन्नः प्रति वोचास्यत्र ॥ ५१ ॥
पञ्चस्वन्तः पुरुष आ विवेश तान्यन्तः पुरुषे अर्पितानि ।
एतत्त्वात्र प्रतिमन्वानो अस्मि न मायया भवस्युत्तरो मत् ॥ ५२ ॥
का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥ ५३ ॥

द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥ ५४ ॥

का ईमरे पिशङ्गिला का ईं कुरुपिशङ्गिला ।
क ईमास्कन्दमर्षति क ईं पन्थां वि सर्पति ॥ ५५ ॥
अजारे पिशङ्गिला श्वावित्कुरुपिशङ्गिला ।
शश आस्कन्दमर्षत्यहिः पन्थां वि सर्पति ॥ ५६ ॥

कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥ ५७ ॥

षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होतार ऋतुशो यजन्ति ॥ ५८ ॥

को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः ॥ ५९ ॥

वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ॥ ६० ॥

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ६१ ॥

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ६२ ॥
सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे । दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥ ६३ ॥
होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः । जुषतां पिबतु सोमꣳ होतर्यज ॥ ६४ ॥
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥ ६५ ॥

[अ० २३, कं० ६५, मं० सं० ८३]

इति त्रयोविंशोऽध्यायः ।

अथ चतुर्विंशोऽध्यायः ।

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्याꣳ सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ॥ १ ॥

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥ २ ॥

शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥ ३ ॥

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उषस्याः ॥ ४ ॥

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाता अदित्यै सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥ ५ ॥

कृष्णग्रीवा आग्नेयाः शितिभ्रवो वसूनाꣳ रोहिता रुद्राणाꣳ श्वेता अवरोकिण आदित्यानां नभोरूपाः पार्जन्याः ॥ ६ ॥

उन्नत ऋषभो वामनस्त ऐन्द्रावैष्णवा उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः शुकरूपा वाजिनाः कल्माषा आग्निमारुताः श्यामाः पौष्णाः ॥ ७ ॥

एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवा वशा मैत्रावरुण्योऽन्यत एन्यो मैत्र्यः ॥ ८ ॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेता वायव्या अविज्ञाता अदित्यै सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥ ९ ॥

कृष्णा भौमा धूम्रा आन्तरिक्षा बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारकाः ॥ १० ॥

धूम्रान्वसन्तायालभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥ ११ ॥

त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्सा अनुष्टुभे तुर्यवाह उष्णिहे ॥ १२ ॥

पष्ठवाहो विराज उक्षाणो बृहत्या ऋषभाः ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ॥ १३ ॥

कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥ १४ ॥

उक्ताः सञ्चरा एता ऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥ १५ ॥

अग्नयेऽनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान्मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥ १६ ॥

उक्ताः सञ्चरा एता ऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः ॥ १७ ॥

धूम्रा बभ्रुनीकाशाः पितॄणाꣳ सोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदां कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ॥ १८ ॥

उक्ताः सञ्चरा एताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः ॥ १९ ॥

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिका हेमन्ताय ककराञ्छिशिराय विककरान् ॥ २० ॥

समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान्मित्राय कुलीपयान्वरुणाय नाक्रान् ॥ २१ ॥

सोमाय हꣳसानालभते वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान्मित्राय मद्गून्वरुणाय चक्रवाकान् ॥ २२ ॥

अग्नये कुटरूनालभते वनस्पतिभ्य उलूकानग्नीषोमाभ्यां चाषानश्विभ्यां मयूरान्मित्रावरुणाभ्यां कपोतान् ॥ २३ ॥

सोमाय लबानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥ २४ ॥

अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः सन्धिभ्यो जतूर्मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान् ॥ २५ ॥

भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे कशान्दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥ २६ ॥

वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून्विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ॥ २७ ॥

ईशानाय परस्वत आलभते मित्राय गौरान्वरुणाय महिषान्बृहस्पतये गवयाँस्त्वष्ट्र उष्ट्रान् ॥ २८ ॥

प्रजापतये पुरुषान्हस्तिन आलभते वाचे प्लुषीँश्चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥ २९ ॥

प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः कृमिः समुद्राय शिशुमारो हिमवते हस्ती ॥ ३० ॥

मयुः प्राजापत्य उलो हलिक्ष्णो वृषदꣳशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥ ३१ ॥

सोमाय कुलुङ्ग आरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥ ३२ ॥

सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥ ३३ ॥

सुपर्णः पार्जन्य आतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्तरिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥ ३४ ॥

पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हꣳसो वातस्य नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः ॥ ३५ ॥

एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्या ऋक्षो जतूः सुषिलीका त इतरजनानां जहका वैष्णवी ॥ ३६ ॥

अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रो मासां कश्यपो रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ॥ ३७ ॥

वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाजगरो वसूनां कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥ ३८ ॥

श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥ ३९ ॥

खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ॥ ४० ॥

[अ० २४, कं० ४०, मं० सं० ४०]

इति चतुर्विंशोऽध्यायः ।

अथ पञ्चविंशोऽध्यायः ।

शादं दद्भिरवकां दन्तमूलैर्मृदं बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳ सरस्वत्या अग्रजिह्वं जिह्वाया उत्सादमवक्रन्देन तालु वाजꣳ हनुभ्यामप आस्येन वृषणमाण्डाभ्यामादित्याँ श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्तोभ्यां विद्युतं कनीनकाभ्याꣳ शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवोऽवार्याणि पक्ष्माणि पार्या इक्षवः ॥ १ ॥

वातं प्राणेनापानेन नासिके उपयाममधरेणौष्ठेन सदुत्तरेण प्रकाशेनान्तरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां कर्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिरदितिꣳ शीर्ष्णा निर्ऋतिं निर्जर्जल्पेन शीर्ष्णा सङ्क्रोशैः प्राणान् रेष्माणꣳ स्तुपेन ॥ २ ॥

मशकान् केशैरिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन कूर्माञ्छफैराक्रमणꣳ स्थूराभ्यामृक्षलाभिः कपिञ्जलाञ्जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निमतिरुग्भ्यां पूषणं दोर्भ्यामश्विनावꣳसाभ्याꣳ रुद्रꣳ रोराभ्याम् ॥ ३ ॥

अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टम्यर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥ ४ ॥

इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीयापां चतुर्थी निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाꣳ सप्तमी विष्णोरष्टमी पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ॥ ५ ॥

मरुताᳬ स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयाऽऽदित्यानां तृतीया वायोः
पुच्छमग्नीषोमयोर्भासदौ कुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणावल्गाभ्यामाक्रमणᳬ
स्थूराभ्यां बलं कुष्ठाभ्याम् ॥ ६ ॥

पूषणं वनिष्ठुनाऽन्धाहीन्स्थूलगुदया सर्पान्गुदाभिर्विह्रुत आन्त्रैरपो वस्तिना वृषणमाण्डाभ्यां
वाजिनᳬ शेपेन प्रजाᳬ रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्माञ्छकपिण्डैः ॥ ७ ॥

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसज्जीमूतान्हृदयौपशेनान्तरिक्षं पुरीतता
नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशिभिरुपलान्प्लीह्ना वल्मीकान्
क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवन्तीर्ह्रदान्कुक्षिभ्याᳬ समुद्रमुदरेण वैश्वानरं भस्मना ॥ ८ ॥

विधृतिं नाभ्या घृतᳬ रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वा
अश्रुभिर्ह्रादुनीर्दूषीकाभिरस्ना रक्षाᳬसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथिवीं त्वचा
जुम्बकाय स्वाहा ॥ ९ ॥

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १० ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ११ ॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रᳬ रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥ १२ ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ १३ ॥

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे-दिवे ॥ १४ ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानाᳬ रातिरभि नो निवर्त्तताम् ।
देवानाᳬ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥ १५ ॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणᳬ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ १६ ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ १७ ॥

तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ १८ ॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १९ ॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥ २० ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २१ ॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ २२ ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥ २३ ॥

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ २४ ॥

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥ २५ ॥

एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदेनᳬ सौश्रवसाय जिन्वति ॥ २६ ॥

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥ २७ ॥

होताऽध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शᳬस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥ २८ ॥

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनᳬ सम्भरन्त्युतो तेषामभिगूर्त्तिर्न इन्वतु ॥ २९ ॥

उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥ ३० ॥

यद्वाजिनो दाम सन्दानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणᳬ सर्वा ता ते अपि देवेष्वस्तु ॥ ३१ ॥

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ ३२ ॥

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधᳬ शृतपाकं पचन्तु ॥ ३३ ॥

यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ३४ ॥

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो माᳬसभिक्षामुपासत उतो तेषामभिगूर्त्तिर्न इन्वतु ॥ ३५ ॥

यन्नीक्षणं माँस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥ ३६ ॥

मा त्वाऽग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्त्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥ ३७ ॥

निक्रमणं निषदनं विवर्तनं यच्च पड्वीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ ३८ ॥

यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्वीशं प्रिया देवेष्वा यामयन्ति ॥ ३९ ॥

यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ ४० ॥

चतुस्त्रिᳬशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या विशस्त ॥ ४१ ॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।
या ते गात्राणामृतुथा कृणोमि ता-ता पिण्डानां प्र जुहोम्यग्नौ ॥ ४२ ॥

मा त्वा तपत्प्रिय आत्माऽपियन्तं मा स्वधितिस्तन्व आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्ताऽतिहाय छिद्रा गात्राण्यसिना मिथू कः ॥ ४३ ॥

न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ ४४ ॥

सुगव्यं नो वाजी स्वश्व्यं पुᳬसः पुत्राँ२ उत विश्वापुषᳬ रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनताᳬ हविष्मान् ॥ ४५ ॥

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ॥ ४६ ॥

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमᳬ रयिं दाः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ४७ ॥

[अ० २५, कं० ४७, मं० सं० ५०]

इति पञ्चविंशोऽध्यायः ।

अथ षड्विंशोऽध्यायः ।

अग्निश्च पृथिवी च सन्नते ते मे सं नमतामदो वायुश्चान्तरिक्षं च सन्नते ते मे सं नमतामद
आदित्यश्च द्यौश्च सन्नते ते मे सं नमतामद आपश्च वरुणश्च सन्नते ते मे सं नमतामदः ।
सप्त सᳬसदो अष्टमी भूतसाधनी । सकामाँ२ अध्वनस्कुरु संज्ञानमस्तु मेऽमुना ॥ १ ॥

यथेमां वाचं कल्याणीमावदानि जनेभ्यः ।
ब्रह्मराजन्याभ्याᳬ शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥ २ ॥

बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥ ३ ॥

इन्द्र गोमन्निहा याहि पिबा सोमᳬ शतक्रतो । विद्यद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते ॥ ४ ॥

इन्द्रा याहि वृत्रहन्पिबा सोमᳬ शतक्रतो । गोमद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते ॥ ५ ॥

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वै—ष ते योनि—र्वैश्वानराय त्वा ॥ ६ ॥
वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥
उपयामगृहीतोऽसि वैश्वानराय त्वै—ष ते योनि—र्वैश्वानराय त्वा ॥ ७ ॥
वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निरुक्थेन वाहसा ॥
उपयामगृहीतोऽसि वैश्वानराय त्वै—ष ते योनि—र्वैश्वानराय त्वा ॥ ८ ॥
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥
उपयामगृहीतोऽस्यग्—नये त्वा वर्चस एष ते योनि—रग्नये त्वा वर्चसे ॥ ९ ॥
महाँ२ इन्द्रो वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान्द्वेष्टि ॥
उपयामगृहीतोऽसि महेन्द्राय त्वै—ष ते योनि—र्महेन्द्राय त्वा ॥ १० ॥
तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः । अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ११ ॥
यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ १२ ॥
एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ १३ ॥
ऋतवस्ते यज्ञं वि तन्वन्तु मासा रक्षन्तु ते हविः ।
संवत्सरस्ते यज्ञं दधातु नः प्रजां च परि पातु नः ॥ १४ ॥
उपह्वरे गिरीणाᳬ संगमे च नदीनाम् । धिया विप्रो अजायत ॥ १५ ॥
उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रᳬ शर्म महि श्रवः ॥ १६ ॥
स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परि स्रव ॥ १७ ॥
एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥ १८ ॥
अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदाऽनु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ॥ १९ ॥
अग्ने पत्नीरिहा वह देवानामुशतीरुप । त्वष्टारᳬ सोमपीतये ॥ २० ॥
अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना । त्वᳬ हि रत्नधा असि ॥ २१ ॥
द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥ २२ ॥
तवायᳬ सोमस्त्वमेह्यर्वाङ् शश्वत्तमᳬ सुमना अस्य पाहि ।
अस्मिन् यज्ञे बर्हिष्या निषद्या दधिष्वेमं जठर इन्दुमिन्द्र ॥ २३ ॥
वा० य० १५

अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मदस्व जुजुषाणो अन्धसस्त्वष्टर्देवेभिर्जनिभिः सुमद्गणः ॥ २४ ॥
स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ २५ ॥
रक्षोहा विश्वचर्षणिरभि योनिमयोहते । द्रोणे सधस्थमासदत् ॥ २६ ॥
[अ० २६, कं० २६, मं० सं० ६२]

इति षड्विंशोऽध्यायः ।

अथ सप्तविंशोऽध्यायः ।

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः ॥ १ ॥
सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥ २ ॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥ ३ ॥
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥ ४ ॥
क्षत्रेणाग्ने स्वायुः सᳬ रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥ ५ ॥
अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यᳬ सहवीराᳬ रयिं दाः ॥ ६ ॥
अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवेभिरद्य परि पाहि नो वृधे ॥ ७ ॥
बृहस्पते सवितर्बोधयैनᳬ सᳬशितं चित्सन्तराᳬ सᳬ शिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवाः ॥ ८ ॥

अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ९ ॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १० ॥
ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीᳬष्यग्नेः । द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ११ ॥
तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥ १२ ॥
मध्वा यज्ञं नक्षसे प्रीणानो नराशᳬसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥ १३ ॥
अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्निᳬ स्रुचो अध्वरेषु प्रयत्सु ॥ १४ ॥
स यक्षदस्य महिमानमग्नेः स ईं मन्द्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥ १५ ॥
द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥ १६ ॥
ते अस्य योषणे दिव्ये न योना उषासानक्ता । इमं यज्ञमवतामध्वरं नः ॥ १७ ॥
दैव्या होतारा ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वामभि गृणीतम् । कृणुतं नः स्विष्टिम् ॥ १८ ॥
तिस्रो देवीर्बर्हिरेदᳬ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥ १९ ॥
तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् । रायस्पोषं वि ष्यतु नाभिमस्मे ॥ २० ॥
वनस्पतेऽव सृजा रराणस्त्मना देवेषु । अग्निर्हव्यᳬ शमिता सूदयाति ॥ २१ ॥
अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदं जुषन्ताम् ॥ २२ ॥
पीवो अन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ २३ ॥
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥ २४ ॥
आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानाᳬ समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ २५ ॥
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ २६ ॥
प्र याभिर्यासि दाश्वाᳬसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिᳬ सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ २७ ॥

आ नो नियुद्भिः शतिनीभिरध्वरᳬ सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ २८ ॥
नियुत्वान्वायवा गह्ययᳬ शुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥ २९ ॥
वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ ३० ॥
वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः ॥ ३१ ॥
वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥ ३२
एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विᳬशती च ।
तिसृभिश्च वहसे त्रिᳬशता नियुद्भिर्वायविह ता वि मुञ्च ॥ ३३
तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवाᳬस्या वृणीमहे ॥ ३४ ॥
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ३५ ॥
न त्वावाँ२ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ३६ ॥
त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ ३७ ॥
स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
गामश्वᳬ रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ३८ ॥
कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ३९ ॥
कस्त्वा सत्यो मदानां मᳬहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ ४० ॥
अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥ ४१ ॥
यज्ञा-यज्ञा वो अग्नये गिरा-गिरा च दक्षसे ।
प्र-प्र वयममृतं जातवेदसं प्रियं मित्रं न शᳬसिषम् ॥ ४२ ॥
पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ४३ ॥
ऊर्जो नपातᳬ स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्ववितां भुवद्वृध उत त्राता तनूनाम् ॥ ४४ ॥

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि । उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते कल्पन्ताꣳ संवत्सरस्ते कल्पताम् ।
प्रेत्या एत्यै सं चाञ्च प्र च सारय । सुपर्णचिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवः सीद ॥ ४५ ॥
[अ० २७, कं० ४५, मं० सं० ४५]

इति सप्तविंशोऽध्यायः ।

अथाष्टाविंशोऽध्यायः ।

होता यक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्या अधि ।
दिवो वर्ष्मन्त्समिध्यत ओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज ॥ १ ॥
होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम् ।
इन्द्रं देवꣳ स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज ॥ २ ॥
होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥ ३ ॥
होता यक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्यज ॥ ४ ॥
होता यक्षदोजो न वीर्यꣳ सहो द्वार इन्द्रमवर्धयन् ।
सुप्रायणा अस्मिन्यज्ञे वि श्रयन्तामृतावृधो द्वार इन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्यज ॥ ५ ॥
होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही ।
सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यस्य होतर्यज ॥ ६ ॥
होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रं भिषज्यतः ।
कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज ॥ ७ ॥
होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडा सरस्वती भारती महीः ।
इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ॥ ८ ॥
होता यक्षत्त्वष्टारमिन्द्रं देवं भिषजꣳ सुयजं घृतश्रियम् ।
पुरुरूपꣳ सुरेतसं मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ॥ ९ ॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं धियो जोष्टारमिन्द्रियम् ।
मध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञं मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥ १० ॥
होता यक्षदिन्द्रꣳ स्वाहाऽऽज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम् । स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज ॥ ११ ॥
देवं बर्हिरिन्द्रꣳ सुदेवं देवैर्वीरवत्स्तीर्णं वेद्यामवर्धयत् ।
वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज ॥ १२ ॥
देवीर्द्वार इन्द्रꣳ सङ्घाते वीड्वीर्यामन्नवर्धयन् । आ वत्सेन तरुणेन कुमारेण च
मीवतापार्वाणꣳ रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥ १३ ॥
देवी उषासानक्तेन्द्रं यज्ञे प्रयत्यह्वेताम् ।
दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज ॥ १४ ॥
देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धताम् । अयाव्यन्याघा द्वेषाꣳस्यान्या
वक्षद्वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १५ ॥
देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्धताम् ।
इषमूर्जमन्या वक्षत्सग्धिꣳ सपीतिमन्या नवेन पूर्वं दयमाने पुराणेन नवमधातामूर्जमूर्जाहुती
ऊर्जयमाने वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ १६ ॥
देवा दैव्या होतारा देवमिन्द्रमवर्धताम् ।
हताघशꣳसावाभार्ष्टां वसु वार्याणि यजमानाय शिक्षितौ वसुवने वसुधेयस्य वीतां यज ॥ १७ ॥
देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन् ।
अस्पृक्षद्भारती दिवꣳ रुद्रैर्यज्ञꣳ सरस्वतीडा वसुमती गृहान् वसुवने वसुधेयस्य व्यन्तु यज ।१८।
देव इन्द्रो नराशꣳसस्त्रिवरूथस्त्रिवन्धुरो देवमिन्द्रमवर्धयत् ।
शतेन शितिपृष्ठानामाहितः सहस्रेण प्र वर्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पति स्तोत्रमश्विनाध्वर्यवं
वसुवने वसुधेयस्य वेतु यज ॥ १९ ॥
देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयत् ।
दिवमग्रेणास्पृक्षदान्तरिक्षं पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥ २० ॥
देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥ २१ ॥

देवो अग्निः स्विष्टकृद्देवमिन्द्रमवर्धयत् ।
स्विष्टं कुर्वन्त्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥ २२ ॥
अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निन्द्राय छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय छागेन ।
अघत्तं मेदस्तः प्रति पचताग्रभीदवीवृधत्पुरोडाशेन । त्वामद्य ऋषे ॥ २३ ॥
होता यक्षत्समिधानं महद्यशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् ।
गायत्रीं छन्द इन्द्रियं त्र्यविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २४ ॥
होता यक्षत्तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् ।
उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २५ ॥
होता यक्षदीडेन्यमीडितं वृत्रहन्तममिडाभिरीड्यꣳ सहः सोममिन्द्रं वयोधसम् ।
अनुष्टुभं छन्द इन्द्रियं पञ्चाविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २६ ॥
होता यक्षत्सुबर्हिषं पूषण्वन्तममर्त्यꣳ सीदन्तं बर्हिषि प्रियेऽमृतेन्द्रं वयोधसम् ।
बृहतीं छन्द इन्द्रियं त्रिवत्सं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥ २७ ॥
होता यक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् ।
पङ्क्तिं छन्द इहेन्द्रियं तुर्यवाहं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ २८ ॥
होता यक्षत्सुपेशसा सुशिल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम् ।
त्रिष्टुभं छन्द इहेन्द्रियं पष्ठवाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥ २९ ॥
होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् ।
जगतीं छन्द इन्द्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥ ३० ॥
होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पतिमिन्द्रं वयोधसम् ।
विराजं छन्द इहेन्द्रियं धेनुं गां न वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ ३१ ॥
होता यक्षत्सुरेतसं त्वष्टारं पुष्टिवर्धनꣳ रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम् ।
द्विपदं छन्द इन्द्रियमुक्षाणं गां न वयो दधद्वेत्वाज्यस्य होतर्यज ॥ ३२ ॥
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनां बिभ्रतं वशिं
भगमिन्द्रं वयोधसम् । ककुभं छन्द इहेन्द्रियं वशां वेहतं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥३३॥
होता यक्षत्स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् ।
अतिच्छन्दसं छन्द इन्द्रियं बृहदृषभं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥ ३४ ॥

देवं बर्हिर्वयोधसं देवमिन्द्रमवर्धयत् ।
गायत्र्या छन्दसेन्द्रियं चक्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ३५ ॥
देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रमवर्धयन् ।
उष्णिहा छन्दसेन्द्रियं प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥ ३६ ॥
देवी उषासानक्ता देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।
अनुष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३७ ॥
देवी जोष्ट्री वसुधिती देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।
बृहत्या छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३८ ॥
देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्धताम् ।
पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ३९ ॥
देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्धताम् ।
त्रिष्टुभा छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥ ४० ॥
देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्धयन् ।
जगत्या छन्दसेन्द्रियꣳ शूषमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥ ४१ ॥
देवो नराशꣳसो देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
विराजा छन्दसेन्द्रियꣳ रूपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४२ ॥
देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
द्विपदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४३ ॥
देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धयत् ।
ककुभा छन्दसेन्द्रियं यश इन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४४ ॥
देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवमवर्धयत् ।
अतिच्छन्दसा छन्दसेन्द्रियं क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥ ४५ ॥
अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निन्द्राय वयोधसे छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय वयोधसे छागेन ।
अघत्तं मेदस्तः प्रति पचताग्रभीदवीवृधत्पुरोडाशेन । त्वामद्य ऋषे ॥ ४६ ॥
[अ० २८, कं० ४६, मं० सं० ५०]

इत्यष्टाविंशोऽध्यायः ।

अथैकोनत्रिंशोऽध्यायः ।

समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः ।
वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥ १ ॥

घृतेनाञ्जन्त्सं पथो देवयानान् प्रजानन् वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि ॥ २ ॥

ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ ३ ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ ४ ॥

एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥ ५ ॥

अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वाꣳ सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥ ६ ॥

प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥

आदित्यैर्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ ८ ॥

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥ ९ ॥

अश्वो घृतेन त्मन्या समक्त उप देवाँ२ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ १० ॥

प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥ ११ ॥

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १२ ॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥ १३ ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ १४ ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम् ॥ १५ ॥

इमा ते वाजिन्नवमार्जनानीमा शफानाꣳ सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ १६ ॥

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ १७ ॥

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानडादिद् ग्रसिष्ठ ओषधीरजीगः ॥ १८ ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥ १९ ॥

हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन् यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥ २० ॥

ईर्मान्तासः शिलिकमध्यमासः सꣳ शूरणासो दिव्यासो अत्याः ।
हꣳसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥ २१ ॥

तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ २२ ॥

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥ २३ ॥

उप प्रागात्परमं यत्सधस्थमर्वाँ२ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥ २४ ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ २५ ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ २६ ॥

नराशꣳसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या ॥ २७ ॥

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ २८ ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ २९ ॥

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ३० ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियꣳ शुक्रपिशं दधाने ॥ ३१ ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ३२ ॥

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदꣳ स्योनꣳ सरस्वती स्वपसः सदन्तु ॥ ३३ ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिꣳशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ ३४ ॥

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवीꣳषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ ३५ ॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः ॥ ३६ ॥

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३७ ॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥ ३८ ॥

धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ ३९ ॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयꣳ समने पारयन्ती ॥ ४० ॥

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ४१ ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ४२ ॥

रथे तिष्ठन् नयति वाजिनः पुरो यत्र-यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥ ४३ ॥

तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँ१रनपव्ययन्तः ॥ ४४ ॥

रथवाहनꣳ हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥ ४५ ॥

स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ४६ ॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशꣳस ईशत ॥ ४७ ॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन् ॥ ४८ ॥

ऋजीते परि वृङ्धि नोऽश्मा भवतु नस्तनूः । सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥४९॥

आ जङ्घन्ति सान्वेषां जघनाँ२ उप जिघ्नते । अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ ५० ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳसं परि पातु विश्वतः ॥ ५१ ॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ५२ ॥

दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥ ५३ ॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ ५४ ॥
उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥ ५५ ॥
आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ ५६ ॥
आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ५७ ॥
आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः
शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितोऽधोरामः सावित्रो
वारुणः कृष्ण एकशितिपात्पेत्वः ॥ ५८ ॥
अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ
पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ॥ ५९ ॥
अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय
बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो
द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां
पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र औष्णिहाय
त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै
चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ॥ ६० ॥

[अ० २९, कं० ६०, मं० सं० ६०]

इत्येकोनत्रिंशोऽध्यायः ।

अथ त्रिंशोऽध्यायः ।

देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥ १ ॥
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ २ ॥

विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥ ३ ॥
विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥ ४ ॥
ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं
नारकाय वीरहणं पाप्मने क्लीबमाक्रयाया अयोगूं कामाय पुꣳश्चलूमतिक्रुष्टाय मागधम् ॥ ५ ॥
नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभꣳ
हसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ॥ ६ ॥
तपसे कौलालं मायायै कर्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्याया इषुकारꣳ
हेत्यै धनुष्कारं कर्मणे ज्याकारं दिष्टाय रज्जुसर्जं मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥ ७ ॥
नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यं
प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यताया अकितवं
पिशाचेभ्यो बिदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ८ ॥
सन्धये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराध्या एदिधिषुःपतिं
निष्कृत्यै पेशस्कारीꣳ संज्ञानाय स्मरकारीं प्रकामोद्यायोपसदं वर्णायानुरुधं
बलायोपदाम् ॥ ९ ॥
उत्सादेभ्यः कुब्जं प्रमुदे वामनं द्वार्भ्यः स्रामꣳ स्वप्नायान्धमधर्माय बधिरं
पवित्राय भिषजं प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया अभिप्रश्निनं
मर्यादायै प्रश्नविवाकम् ॥ १० ॥
अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपाल-
मिरायै कीनाशं कीलालाय सुराकारं भद्राय गृहपꣳ श्रेयसे वित्तध-
माध्यक्ष्यायानुक्षत्तारम् ॥ ११ ॥
भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं
देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो लोकेभ्य उपसेक्तार-
मव ऋत्यै वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय रजयित्रीम् ॥ १२ ॥
ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारं
बलायानुचरं भूम्ने परिष्कन्दं प्रियाय प्रियवादिनमरिष्ट्या अश्वसादꣳ
स्वर्गाय लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥ १३ ॥

मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारꣳ शोकायाभिसर्तारं
क्षेमाय विमोक्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनं वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीं
निर्ऋत्यै कोशकारीं यमायासूम् ॥ १४ ॥
यमाय यमसूमथर्वभ्योऽवतोकाꣳ संवत्सराय पर्यायिणीं परिवत्सरायाविजाता-
मिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीं वत्सराय विजर्जराꣳ संवत्सराय पलिक्नी-
मृभुभ्योऽजिनसन्धꣳ साध्येभ्यश्चर्मम्नम् ॥ १५ ॥
सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलं
पाराय मार्गारमवाराय कैवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालꣳ स्वनेभ्यः पर्णकं
गुहाभ्यः किरातꣳ सानुभ्यो जम्भकं पर्वतेभ्यः किम्पूरुषम् ॥ १६ ॥
बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोषाय ग्लाविनं
विश्वेभ्यो भूतेभ्यः सिध्मलं भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं
व्यृद्ध्या अपगल्भꣳ संशराय प्रच्छिदम् ॥ १७ ॥
अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिन-
मास्कन्दाय सभास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातं
क्षुधे यो गां विकृन्तन्तं भिक्षमाण उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥ १८ ॥
प्रतिश्रुत्काया अर्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ
शब्दायाडम्बराघातं महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं
वनाय वनपमन्यतोऽरण्याय दावपम् ॥ १९ ॥
नर्माय पुꣳश्चलूꣳ हसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं
तान्महसे वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥ २० ॥
अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय वꣳशनर्तिनं
दिवे खलतिꣳ सूर्याय हर्यक्षं नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलास-
मह्ने शुक्लं पिङ्गाक्षꣳ रात्र्यै कृष्णं पिङ्गाक्षम् ॥ २१ ॥
अथैतानष्टौ विरूपाना लभतेऽतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुक्लं चातिकृष्णं
चातिकुल्वं चातिलोमशं च । अशूद्रा अब्राह्मणास्ते प्राजापत्याः ।
मागधः पुꣳश्चली कितवः क्लीबोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥ २२ ॥

[अ० ३०, कं० २२, मं० सं० १७७]

इति त्रिंशोऽध्यायः ।

अथैकत्रिंशोऽध्यायः ।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥
ततो विराडजायत विराजो अधि पूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥
तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ ८ ॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् । मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते ॥ १० ॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥ ११ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥
नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ १३ ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ ॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥
अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७ ॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ १८ ॥
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥ १९ ॥

यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥
रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे ॥२१॥
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ २२ ॥

[अ०३१, कं० २२, मं० सं० २२]

इत्येकत्रिंशोऽध्यायः ।

अथ द्वात्रिंशोऽध्यायः ।

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः ॥ १ ॥
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परि जग्रभत् ॥ २ ॥
न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भ इत्येष मा मा हिंसीदित्येषा यस्मान्न जात इत्येषः॥ ३ ॥
एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥ ४ ॥
यस्माज्जातं न पुरा किं चनैव य आबभूव भुवनानि विश्वा ।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी ॥ ५ ॥
येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ६ ॥
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ।
आपो ह यद्बृहती—र्यश्चिदापः+ ॥ ७ ॥
वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु ॥ ८ ॥

॥ 'हिरण्यगर्भः' इत्येषोऽनुवाकः । (वा. य. २५।१०-१३); 'मा मा हिंसीत्' इत्येषा ऋक् (वा. य. १२।१०२);
'यस्मान्न जातः' इत्येषोऽनुवाकः । (वा. य. ८।३६-३७)

+ 'आपो ह यद्बृहतीः'; 'यश्चिदापः' । (वा. य. २७।२५-२६)

वा० य० १७

प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥ ९ ॥
स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥ १० ॥
परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनाऽऽत्मानमभि सं विवेश ॥ ११ ॥
परि द्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥ १२ ॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषं स्वाहा ॥ १३ ॥
यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाऽग्ने मेधाविनं कुरु स्वाहा ॥ १४ ॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥ १५ ॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥ १६ ॥

[अ० ३२, कं० १६, मं० सं० १६]

इति द्वात्रिंशोऽध्यायः ।

अथ त्रयस्त्रिंशोऽध्यायः ।

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥ १ ॥
हरयो धूमकेतवो वातजूता उप द्यवि । यतन्ते वृथगग्नयः ॥ २ ॥
यजा नो मित्रावरुणा यजा देवाँ२ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥ ३ ॥
युक्ष्वा हि देवहूतमाँ२ अश्वाँ२ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ ४ ॥
द्वे विरूपे चरतः स्वर्थे अन्याऽन्या वत्समुप धापयेते ।
हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥ ५ ॥

अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे-विशे ॥ ६ ॥
त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ७ ॥
मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ ८ ॥
अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥ ९ ॥
विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥ १० ॥
आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत् सूदयच्च ॥ ११ ॥
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥ १२ ॥
त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥ १३ ॥
त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥ १४ ॥
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् । १५ ॥
विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृडीको भवतु जातवेदाः ॥ १६ ॥
महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥ १७ ॥
आपश्चित्पिप्यु स्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥ १८ ॥
गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ १९ ॥
यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ २० ॥

आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥ तं प्रत्नथा ऽयं वेनः॥ ॥२१॥
आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ २२ ॥
प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥ २३ ॥
बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥ २४ ।
इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ२ अभिष्टिरोजसा ॥ २५ ॥
इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन् व्यंसमुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥ २६ ॥
कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ।
महाँ२ इन्द्रो य ओजसा कदा चन स्तरीरसि कदा चन प्र युच्छसि+ ॥ २७ ॥
आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं ये पुरुपुत्रां महीं सहस्रधारां बृहतीं दुदुक्षन् ॥ २८ ॥
इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥ २९ ॥
विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥ ३० ॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ३१ ॥
येना पावक चक्षसा भुरण्यन्तं जनाँ२ अनु । त्वं वरुण पश्यसि ॥ ३२ ॥
दैव्यावध्वर्यू आ गतं रथेन सूर्यत्वचा । मध्वा यज्ञं समञ्जाथे ॥
तं प्रत्नथा ऽयं वेन—श्चित्रं देवानाम्× ॥ ३३ ॥
आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ ३४ ॥

॥ तं प्रत्नथा० । अयं वेना० । (वा. य. ७।१२, १६)।
+ महाँ२ इन्द्रो य ओजसा० । (वा. य. ७।४०)। कदा चन स्तरी० ॥ कदा चन प्र युच्छसि० । (वा. य. ८।२-३)
× तं प्रत्नथा···देवानाम् । (वा. य. ७।१२, १६, ४२)

यद्द्य कच्च वृत्रहन्नुदगा अभि सूर्य । सर्वं तदिन्द्र ते वशे ॥ ३५ ॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनम् ॥ ३६ ॥
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳ सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ३७ ॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥ ३८ ॥
बण्महाँ२ असि सूर्य बडादित्य महाँ२ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२ असि ॥ ३९ ॥
बट् सूर्य श्रवसा महाँ२ असि सत्रा देव महाँ२ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ ४० ॥
श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥ ४१ ॥
अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ४२ ॥
आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ४३ ॥
प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ ४४ ॥
इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान् मारुतं गणम् ॥ ४५ ॥
वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥ ४६ ॥
अधि न इन्द्रैषां विष्णो सजात्यानाम् । इता मरुतो अश्विना ॥
तं प्रत्नथा ऽयं वेनो ये देवास आ न इडाभि-
विश्वेभिः सोम्यं मध्वो-मासश्चर्षणीधृतः+ ॥ ४७ ॥
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो ।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥ ४८ ॥

+ तं प्रत्नथा०, ऽयं वेनः०, ये देवासः०, ओमासः० । (वा. य. ७.१२, १६, १९, ३३); विश्वेभिः सोम्यं मधु० । आ न इडाभिः० । (वा. य. ३३।१०, ३४)

इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीं द्यां मरुतः पर्वताँ२ अपः ।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳ सवितारमूतये ॥ ४९ ॥
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ॥ ५० ॥
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥ ५१ ॥
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ ५२ ॥
विश्वे देवाः शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥ ५३ ॥
देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम् ।
आदिद्दामानꣳ सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥ ५४ ॥
प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारꣳ रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ५५ ॥
इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् । इन्दवो वामुशन्ति हि ॥ ५६ ॥
मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीꣳ साधन्ता ॥ ५७ ॥
दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आ यातꣳ रुद्रवर्त्तनी ॥
तं प्रत्नथा ऽयं वेनः× ॥ ५८ ॥
विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ ५९ ॥
नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः ।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६० ॥
उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृडात ईदृशे ॥ ६१ ॥
उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ२ इयक्षते ॥ ६२ ॥
ये त्वाऽहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ६३ ॥

× (वा. य. ७।१२, १६)

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ६४ ॥
आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि । महान्महीभिरूतिभिः ॥ ६५ ॥
त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ ६६ ॥
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६७ ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत् ॥ ६८ ॥
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ६९ ॥
प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥ ७० ॥
गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥ ७१ ॥
काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे । रिशादसा सधस्थ आ ॥ ७२ ॥
दैव्यावध्वर्यू आ गतꣳ रथेन सूर्यत्वचा । मध्वा यज्ञꣳ समञ्जाथे ॥
तं प्रत्नथा ऽयं वेनः+ ॥ ७३ ॥
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ७४ ॥
आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन् ।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥ ७५ ॥
उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ७६ ॥
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥ ७७ ॥
ब्रह्माणि मे मतयः शꣳ सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ७८ ॥

+ (वा. य. ७।१२, १६)

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ२ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ७९ ॥
तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ ८० ॥
इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ८१ ॥
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ८२ ॥
अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ ८३ ॥
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ८४ ॥
आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानोऽयꣳ शुक्रो अयामि ते ॥ ८५ ॥
इन्द्रवायू सुसन्दृशा सुहवेह हवामहे ।
यथा नः सर्व इज्जनोऽनमीवः सङ्गमे सुमना असत् ॥ ८६ ॥
ऋधगित्था स मर्त्यः शशमे देवतातये ।
यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥ ८७ ॥
आ यातमुप भूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥ ८८ ॥
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ८९ ॥
चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥ ९० ॥
देवं-देवं वोऽवसे देवं-देवमभिष्टये । देवं-देवꣳ हुवेम वाजसातये गृणन्तो देव्या धिया ॥ ९१ ॥
दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन् ।
क्ष्मया वृधान ओजसा चनोहितो ज्योतिषा बाधते तमः ॥ ९२ ॥
इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिꣳशत्पदा न्यक्रमीत् ॥ ९३ ॥

देवासो हि ष्मा मनवे समन्यवो विश्वे साकꣳ सरातयः।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः॥ ९४॥
अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत्।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण॥ ९५॥
प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत। वृत्रꣳ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा॥ ९६॥
अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सुतस्य विष्णवि।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा।
इमा उ त्वा यस्याय मयꣳ सहस्र मूर्ध्व ऊ षु णः॥ ९७॥

[अ० ३३, कं० ९७, मं० सं० ९७]

इति त्रयस्त्रिंशोऽध्यायः।

अथ चतुस्त्रिंशोऽध्यायः।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥ १॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ २॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किं चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥ ३॥
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥ ४॥
यस्मिन्नृचः साम यजूꣳषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।
यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥ ५॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥ ६॥
पितुं नु स्तोषं महो धर्माणं तविषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्॥ ७॥

*इमा उ त्वा०। यस्यायं०। अय१ सहस्रम०। (वा. य. ३३।८१-८३); ऊर्ध्व ऊ षु ण०। (वा. य. ११।४२)।

वा० य० १८

अन्विदनुमते त्वं मन्यासै शं च नस्कृधि। क्रत्वे दक्षाय नो हिनु प्र ण आयूꣳषि तारिषः॥ ८॥
अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवतं दाशुषे मयः॥ ९॥
सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥ १०॥
पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥ ११॥
त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः॥ १२॥
त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते॥ १३॥
उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान।
अरुषस्तूपो रुशदस्य पाज इडायास्पुत्रो वयुनेऽजनिष्ट॥ १४॥
इडायास्त्वा पदे वयं नाभा पृथिव्या अधि। जातवेदो नि धीमह्यग्ने हव्याय वोढवे॥ १५॥
प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत्।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय॥ १६॥
प्र वो महे महि नमो भरध्वमाङ्गूष्यꣳ शवसानाय साम।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन्॥ १७॥
इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयाꣳसि।
तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः॥ १८॥
न ते दूरे परमा चिद्रजाꣳस्या तु प्र याहि हरिवो हरिभ्याम्।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ॥ १९॥
अषाढं युत्सु पृतनासु पप्रिꣳ स्वर्षामप्सां वृजनस्य गोपाम्।
भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम॥ २०॥
सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति।
सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै॥ २१॥
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ॥ २२॥
देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभि युध्य।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ॥ २३॥

अष्टौ व्यख्यत् ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून्।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि॥ २४॥
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥ २५॥
हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववाँ यात्वर्वाङ्।
अपसेधन् रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः॥ २६॥
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव॥ २७॥
उभा पिबतमश्विनोभा नः शर्म यच्छतम्। अविद्रियाभिरूतिभिः॥ २८॥
अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम्।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ॥ २९॥
द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ ३०॥
आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ ३१॥
आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः।
दिवः सदाꣳसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः॥ ३२॥
उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति। येन तोकं च तनयं च धामहे॥ ३३॥
प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रꣳ हुवेम॥ ३४॥
प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह॥ ३५॥
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम॥ ३६॥
उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्।
उतोदिता मघवन्त्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम॥ ३७॥

भग एव भगवाँ२ अस्तु देवास्तेन वयं भगवन्तः स्याम।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुर एता भवेह॥ ३८॥
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु॥ ३९॥
अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः॥ ४०॥
पूषन् तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्त इह स्मसि॥ ४१॥
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कम्।
स नो रासच्छुरुधश्चन्द्राग्रा धियं-धियꣳ सीषधाति प्र पूषा॥ ४२॥
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥ ४३॥
तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते। विष्णोर्यत्परमं पदम्॥ ४४॥
घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा॥ ४५॥
ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥ ४६॥
आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना।
प्रायुस्तारिष्टं नी रपाꣳसि मृक्षतꣳ सेधतं द्वेषो भवतꣳ सचाभुवा॥ ४७॥
एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥ ४८॥
सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन्॥ ४९॥
आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम्। इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम्॥ ५०॥
न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत्।
यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः॥ ५१॥
यदाबध्नन् दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम्॥ ५२॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ॥ ५३ ॥

इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अꣳशः ॥ ५४ ॥

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम्।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥ ५५ ॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ ५६ ॥

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकाꣳसि चक्रिरे ॥ ५७ ॥

ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ॥
य इमा विश्वा विश्वकर्मा यो नः पिता ऽन्नपतेऽन्नस्य नो देहि + ॥ ५८ ॥

[अ० ३४, कं० ५८, मं० सं० ५८]

इति चतुस्त्रिंशोऽध्यायः।

अथ पञ्चत्रिंशोऽध्यायः।

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः। अस्य लोकः सुतावतः।
द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै ॥ १ ॥

सविता ते शरीरेभ्यः पृथिव्याँल्लोकमिच्छतु। तस्मै युज्यन्तामुस्रियाः ॥ २ ॥

वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा। वि मुच्यन्तामुस्रियाः ॥ ३ ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ४ ॥

सविता ते शरीराणि मातुरुपस्थ आ वपतु। तस्मै पृथिवि शं भव ॥ ५ ॥

प्रजापतौ त्वा देवतायामुपोदके लोके नि दधाम्यसौ। अप नः शोशुचदघम् ॥ ६ ॥

परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥ ७ ॥

+ य इमा विश्वा०, विश्वकर्मा० यो नः पिता०। (वा० य० १७।१७, २६-२७); अन्नपते...... देहि० (वा० य० ११।८३)

शं वातः शꣳ हि ते घृणिः शं ते भवन्त्विष्टकाः।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाऽभि शूशुचन् ॥ ८ ॥

कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।
अन्तरिक्षꣳ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥ ९ ॥

अश्मन्वती रीयते सꣳ रभध्वमुत्तिष्ठत प्र तरता सखायः।
अत्रा जहीमोऽशिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान् ॥ १० ॥

अपाघमप किल्बिषमप कृत्यामपो रपः। अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव ॥ ११ ॥

सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ १२ ॥

अनड्वाहमन्वारभामहे सौरभेयꣳ स्वस्तये। स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव ॥ १३ ॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १४ ॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥ १५ ॥

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम् ॥ १६ ॥

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा ॥ १७ ॥

परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ२ आ दधर्षति ॥ १८ ॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ १९ ॥

वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान् पराके।
मेदसः कुल्या उप तान्त्स्रवन्तु सत्या एषामाशिषः सं नमन्ताꣳ स्वाहा ॥ २० ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः।
अप नः शोशुचदघम् ॥ २१ ॥

अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः। असौ स्वर्गाय लोकाय स्वाहा ॥ २२ ॥

[अ० ३५, कं० २२, मं० सं० २८]

इति पञ्चत्रिंशोऽध्यायः।

अथ षट्त्रिंशोऽध्यायः।

ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये।
वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु।
शं नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥ ३ ॥

कया नश्चित्र आ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता ॥ ४ ॥

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु ॥ ५ ॥

अभी षु णः सखीनामविता जरितॄणाम्। शतं भवास्यूतिभिः ॥ ६ ॥

कया त्वं न ऊत्याभि प्र मन्दसे वृषन्। कया स्तोतृभ्य आ भर ॥ ७ ॥

इन्द्रो विश्वस्य राजति। शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ८ ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥

शं नो वातः पवताꣳ शं नस्तपतु सूर्यः। शं नः कनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥ १० ॥

अहानि शं भवन्तु नः शꣳ रात्रीः प्रति धीयताम्।
शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या।
शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥ ११ ॥

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥ १२ ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः ॥ १३ ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥ १४ ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥ १५ ॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ १६ ॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ १७ ॥

दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥

दृते दृꣳह मा। ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम् ॥ १९ ॥

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे।
अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ २० ॥

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥ २१ ॥

यतो-यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ २२ ॥

सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम
शरदः शतं प्र ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥ २४ ॥

[अ०, ३६, कं० २४, मं० सं० २४]

इति षट्त्रिंशोऽध्यायः।

अथ सप्तत्रिंशोऽध्यायः।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आ ददे नारिरसि ॥ १ ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ २ ॥

देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ३ ॥

देव्यो वम्र्यो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ४ ॥

इयत्यग्र आसीन्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ५ ॥

इन्द्रस्यौज स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः।
मखाय त्वा मखस्य शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ६ ॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ७ ।

मखस्य शिरोऽसि। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखस्य शिरोऽसि। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखस्य शिरोऽसि। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ८ ॥

अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ ९ ॥

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा। मखाय त्वा मखस्य त्वा शीर्ष्णे।
मखाय त्वा मखस्य त्वा शीर्ष्णे। मखाय त्वा मखस्य त्वा शीर्ष्णे ॥ १० ॥

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे। देवस्त्वा सविता मध्वानक्तु
पृथिव्याः सꣳस्पृशस्पाहि। अर्चिरसि शोचिरसि तपोऽसि ॥ ११ ॥

अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दा आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः।
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्य ओजो मे दा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि
मनोरश्वासि ॥ १२ ॥

स्वाहा मरुद्भिः परि श्रीयस्व दिवः सꣳस्पृशस्पाहि। मधु मधु मधु ॥ १३ ॥
गर्भो देवानां पिता मतीनां पतिः प्रजानाम्। सं देवो देवेन सवित्रा गत सꣳ सूर्येण रोचते ॥ १४ ॥
समग्निरग्निना गत सं दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट।
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत ॥ १५ ॥
धर्ता दिवो वि भाति तपसस्पृथिव्या धर्ता देवो देवानाममर्त्यस्तपोजाः।
वाचमस्मे नि यच्छ देवायुवम् ॥ १६ ॥

वा० य० १९

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥ १७ ॥
विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते।
देवश्रुत्त्वं देव घर्म देवो देवान् पाह्यत्र प्रावीरनु वां देववीतये।
मधु माध्वीभ्यां मधु माधूचीभ्याम् ॥ १८ ॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा। ऊर्ध्वो अध्वरं दिवि देवेषु धेहि ॥ १९ ॥

पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिꣳसीः।
त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेहि प्रजामस्मासु धेह्यरिष्टाऽहꣳ सह पत्या भूयासम् ॥ २० ॥
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा।
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥ २१ ॥

[अ० ३७, कं० २१; मं० सं० ५५]

इति सप्तत्रिंशोऽध्यायः।

अथाष्टात्रिंशोऽध्यायः।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आ ददेऽदित्यै रास्नाऽसि ॥ १ ॥
इड एह्यदित एहि सरस्वत्येहि। असावेह्यसावेह्यसावेहि ॥ २ ॥
अदित्यै रास्नाऽसीन्द्राण्या उष्णीषः। पूषाऽसि घर्माय दीष्व ॥ ३ ॥

अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व।
स्वाहेन्द्रवत् स्वाहेन्द्रवत् स्वाहेन्द्रवत् ॥ ४ ॥
यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः। उर्वन्तरिक्षमन्वेमि ॥ ५ ॥
गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि द्यावापृथिवीभ्यां त्वा परि गृह्णाम्यन्तरिक्षेणोप यच्छामि।
इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट्।
स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ६ ॥

समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा।
अनाधृष्याय त्वा वाताय स्वाहाऽप्रतिधृष्याय त्वा वाताय स्वाहा।
अवस्यवे त्वा वाताय स्वाहाऽशिमिदाय त्वा वाताय स्वाहा ॥ ७ ॥

इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वाऽऽदित्यवते स्वाहेन्द्राय त्वाऽभिमातिघ्ने स्वाहा।
सवित्रे त्व ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा विश्वदेव्यावते स्वाहा ॥ ८ ॥
यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥ ९ ॥
विश्वा आशा दक्षिणसद्विश्वान् देवानयाडिह। स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥ १० ॥
दिवि धा इमं यज्ञमिमं यज्ञं दिवि धाः। स्वाहाऽग्नये यज्ञियाय शं यजुर्भ्यः ॥ ११ ॥
अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः। तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥ १२ ॥
अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम्। इहैव रातयः सन्तु ॥ १३ ॥
अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम्। इहैव रातयः सन्तु ॥ १३ ॥
इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥ १४ ॥
स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः।
स्वाहा पितृभ्य ऊर्ध्वबर्हिर्भ्यो घर्मपावभ्यः स्वाहा द्यावापृथिवीभ्याꣳ
स्वाहा विश्वेभ्यो देवेभ्यः ॥ १५ ॥
स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः।
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा।
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा।
मधु हुतमिन्द्रतमे अग्नावश्याम ते देव घर्म नमस्ते अस्तु मा मा हिꣳसीः ॥ १६ ॥
अभीमं महिमा दिवं विप्रो बभूव सप्रथाः।
उत श्रवसा पृथिवीꣳ सꣳ सीदस्व महाँ२ असि रोचस्व देववीतमः।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् × ॥ १७ ॥
या ते घर्म दिव्या शुग्या गायत्र्याꣳ हविर्धाने।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा।
या ते घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा।
या ते घर्म पृथिव्याꣳ शुग्या जगत्याꣳ सदस्या।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ॥ १८ ॥
क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि।
विशस्त्वा धर्मणा वयमनु क्रामाम सुविताय नव्यसे ॥ १९ ॥

× स० सीदस्व ... दर्शतम्। (वा० य० ११। ३७)

चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः।
अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिम ॥ २० ॥
घर्मैतत्ते पुरीषं तेन वर्धस्व चा च प्यायस्व। वर्धिषीमहि च वयमा च प्यासिषीमहि ॥ २१ ॥
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सꣳ सूर्येण दिद्युतदुदधिर्निधिः ॥ २२ ॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ २३ ॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ २४ ॥
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥ २५ ॥
यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥ २६ ॥
मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः।
घर्मस्त्रिशुग्वि राजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥ २७ ॥
पयसो रेत आभृतं तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम्।
त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः।
इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमत उपहूत उपहूतस्य भक्षयामि ॥ २८ ॥

[अ० ३८, कं० २८, मं० सं० ७५]

इत्यष्टात्रिंशोऽध्यायः।

अथैकोनचत्वारिंशोऽध्यायः।

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः। पृथिव्यै स्वाहाऽग्नये स्वाहाऽन्तरिक्षाय स्वाहा
वायवे स्वाहा। दिवे स्वाहा सूर्याय स्वाहा ॥ १ ॥
दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहा वरुणाय स्वाहा।
नाभ्यै स्वाहा पूताय स्वाहा ॥ २ ॥
वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा। चक्षुषे स्वाहा चक्षुषे स्वाहा
श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥ ३ ॥
मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥ ४
प्रजापतिः सम्भ्रियमाणः सम्राट् सम्भृतो वैश्वदेवः सꣳसन्नो घर्मः प्रवृक्त-
स्तेज उद्यत आश्विनः पयस्यानीयमाने पौष्णो विष्यन्दमाने मारुतः क्लथन्।
मैत्रः शरसि सन्ताय्यमाने वायव्यो ह्रियमाण आग्नेयो हूयमानो वाग्घुतः ॥ ५ ॥

सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे
चन्द्रमाः पञ्चम ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे।
मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वे देवा द्वादशे ॥ ६ ॥
उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ॥ ७ ॥
अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना।
शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं देवं वनिष्ठुना
वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ ८ ॥
उग्रँल्लोहितेन मित्रꣳ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन
साध्यान् प्रमुदा। भवस्य कण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥ ९ ॥
लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा
लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा।
माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वाहा स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा
ऽस्थभ्यः स्वाहाऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा।
रेतसे स्वाहा पायवे स्वाहा ॥ १० ॥
आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ॥
शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥ ११ ॥
तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा।
निष्कृत्यै स्वाहा प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥ १२ ॥
यमाय स्वाहाऽन्तकाय स्वाहा मृत्यवे स्वाहा।
ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा
द्यावापृथिवीभ्याꣳ स्वाहा ॥ १३ ॥

[अ० ३९, कं० १३, मं० सं० ११६]

इत्येकोनचत्वारिंशोऽध्यायः।

अथ चत्वारिंशोऽध्यायः।

ईशा वास्यमिदꣳ सर्वं यत्किं च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥
असुर्या नाम ते लोका अन्धेन तमसावृताः। ताँस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ॥३॥
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्शत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥
तदेजति तन्नैजति तद्दूरे तद्वन्तिके। तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥
यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति। सर्वभूतेषु चात्मानं ततो न वि चिकित्सति ॥ ६ ॥
यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥
अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते। ततो भूय इव ते तमो य उ सम्भूत्याꣳ रताः ॥ ९ ॥
अन्यदेवाहुः सम्भवादन्यदाहुरसम्भवात्। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥
सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह। विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥ ११ ॥
अन्धं तमः प्र विशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥ १२ ॥
अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥
विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ १४ ॥
वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम्। ओ३म् क्रतो स्मर। क्लिबे स्मर। कृतꣳ स्मर ॥१५
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ १६ ॥
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। योऽसावादित्ये पुरुषः सोऽसावहम्।
ओ३म् खं ब्रह्म ॥ १७ ॥

[अ० ४०, कं० १७, मं० सं० १७]

इति चत्वारिंशोऽध्यायः। [उ० विं० मं० सं० १४०३]

इत्युत्तरविंशतिः समाप्ता। [सर्वे मिलित्वा ३९८८]

इति वाजसनेयि-माध्यन्दिन-शुक्ल यजुर्वेदसंहिता समाप्ता।

काण्व संहिता

अथ शुक्लयजुर्वेदीय-

काण्व-संहिता ।

अथ प्रथमो दशकः ।

अथ प्रथमोऽध्यायः ।

॥ ओ३म् ॥ इषे त्वोर्जे त्वा वायवं स्थ । देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥१॥ १
आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्माः । मा व स्तेन ईशत माघशꣳसः ॥२॥ २
ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः । यजमानस्य पशून् पाहि वसोः पवित्रमसि ॥३॥ (१) ३

द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि । विश्वधाः परमेण धाम्ना ॥१॥ ४
दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ।
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥२॥ ५
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण । सुप्वा कामधुक्षः ॥३॥ ६
सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ रक्षस्व ॥४॥ (२) ७

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि ॥१॥ ८
कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति । कर्मणे वां वेषाय वाम् ॥२॥ ९
प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः । उर्वन्तरिक्षमन्वेमि ॥३॥ १०
धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति । धूर्व तं यं वयं धूर्वामः ॥४॥ ११
देवानामसि सस्नितमं वह्नितमं पप्रितमं जुष्टतमं देवहूतमम् ।
अह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥५॥ १२
विष्णुस्त्वा क्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तां पञ्च ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥६॥ १३
अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि । भूताय त्वा नारातये स्वरभिविख्येषम् ॥७॥१४ [१४]
१

दृꣳहन्तां दुर्याः पृथिव्यामुर्वन्तरिक्षमन्वेमि ।
पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे । अग्ने हव्यꣳ रक्षस्व ॥८॥ (३) १५

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥१॥ १६
देवीरापो अग्रेगुवो अग्रेपुवः । अग्र इममद्य यज्ञं नयत सुधातुं यज्ञपतिं देवायुवम् ॥२॥ १७
युष्मा इन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिता स्थ ।
अग्नये त्वा जुष्टं प्रोक्षाम्यग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥३॥ १८
दैव्याय कर्मणे शुन्धध्वं देवयज्यायै । यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ॥४॥(४)१९

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥१॥ २०
अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः । प्रति त्वादित्यास्त्वग्वेत्तु ॥२॥ २१
अग्नेस्तनूरसि वाचो विसर्जनम् । देववीतये त्वा गृह्णामि ॥३॥ २२
बृहन् ग्रावासि वानस्पत्यः स इदं देवेभ्यः । हव्यꣳ शमीष्व सुशमि शमीष्व हविष्कृदेहि ॥४॥ २३
कुक्कुटोऽसि मधुजिह्व इषमूर्जमावद । वयꣳ संघाते संघाते जेष्म ॥५॥ २४
वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु । परापूतꣳ रक्षः परापूता अरातयः ॥६॥ २५
अपहतꣳ रक्षो वायुर्वो विविनक्तु ।
देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना ॥७॥ (५) २६

धृष्टिरस्यपाग्ने अग्निमामादं जहि । निष्क्रव्यादꣳ सेधा देवयजं वह ॥१॥ २७
ध्रुवमसि पृथिवीं दृꣳह ॥
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥२॥ २८
अग्ने ब्रह्म गृभ्णीष्व धरुणमस्यन्तरिक्षं दृꣳह ।
ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ।
धर्त्रमसि दिवं दृꣳह । ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ॥३॥ २९
विश्वाभ्यस्त्वाशाभ्य उपदधामि द्विषतो वधाय ।
चित स्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥४॥ (६) ३०

शर्मास्यवधूतꣳ रक्षोऽवधूता अरातयः । अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु ॥१॥ ३१
धिषणासि पर्वती प्रति त्वादित्यास्त्वग्वेत्तु ।
दिवस्कम्भन्यसि धिषणासि पार्वतेयी प्रति त्वा पर्वती वेत्तु ॥२॥ ३२ [१२]

धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिम् । धिनुहि मां यज्ञन्यम् ॥३॥ ३३
प्राणाय त्वोदानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां ।
देवो वः सविता प्रतिगृह्णातु हिरण्यपाणिरच्छिद्रेण पाणिना । चक्षुषे त्वा महीनां पयोऽसि ॥४॥ ३४
वेदोऽसि वेद येन त्वं देव वेद देवेभ्यो वेदोऽभवः । तेन मह्यं वेदो भव ॥५॥(७) ३५

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सं वपामि समाप ओषधीभिः समोषधयो रसेन ।
सꣳ रेवतीर्जगतीभिः सं मधुमतीर्मधुमतीभिः पृच्यन्ताम् । ३६
जनयत्यै त्वा सं यौमि ॥१॥
इदमग्नेरिदमग्नीषोमयोरिषे त्वा । घर्मोऽसि विश्वायुरुरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् ॥२॥ ३७
अग्निष्टे त्वचं मा हिꣳसीद्देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाके ॥३॥ ३८
अन्तरितꣳ रक्षोऽन्तरिता अरातयः ।
मा भेर्मा सं विक्था अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात् ॥
त्रिताय त्वा द्विताय त्वैकताय त्वा ॥४॥(८) ३९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आददेऽध्वरकृतं देवेभ्यः ।
इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः । वायुरसि तिग्मतेजा द्विषतो वधः ॥१॥ ४०
पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषम् ॥२॥ ४१
पृथिव्यै वर्मासि पृथिवि देवयजनि । ओषध्यास्ते मूलं मा हिꣳसिषम् ॥२॥
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥३॥ ४२
अपाररुं पृथिव्यै देवयजनाद् वध्यासं ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् । अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् ।
व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ॥४॥ ४३
गायत्रेण त्वा छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा छन्दसा परिगृह्णामि जागतेन त्वा छन्दसा परिगृह्णामि ।
सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चासि । ऊर्जस्वती चासि पयस्वती च ॥५॥ ४४
पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीवदानुम् ।
यामैरयꣳश्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदिश्य यजन्ते । द्विषतो वधोऽसि ॥६॥(९)४५ [४५]

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः ।
अनिशितोऽसि सपत्नक्षिद्वाजिनं त्वा वाजेध्यायै सम्मार्ज्मि ।
प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातयः ।
अनिशितासि सपत्नक्षिद्वाजिनीं त्वा वाजेध्यायै सम्मार्ज्मि ॥१॥ ४६
अदित्यै रास्नासीन्द्राण्यै संनहनम् । विष्णोर्वेष्पोऽस्यूर्जे त्वादब्धेन त्वा चक्षुषावपश्यामि ॥२॥ ४७
अग्नेर्जिह्वासि सुभूर्देवेभ्यः । धाम्ने धाम्ने भव यजुषे यजुषे । सवितुस्त्वा प्रसव उत्पुनाम्यच्छिद्रेण
पवित्रेण सूर्यस्य रश्मिभिः । सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥३॥४८
तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि । प्रियं देवानामनाधृष्टं देवयजनम् ॥४॥ ४९
यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे ।
आत्मन्वान्त्सोमघृतवान्हि भूत्वाग्ने गच्छ स्वर्यजमानाय विन्द ॥ ५ ॥(१०) ५०
॥ इषे त्वा तिस्रः ॥ ३ ॥ द्यौरसि चतस्रः ॥ ४ ॥ अग्ने व्रतपतेऽष्ट ॥ ८ ॥ पवित्रे स्थ चतस्रः ॥ ४ ॥ शर्मासि सप्त ॥ ७ ॥ धृष्टिरसि चतस्रः ॥ ४ ॥ शर्मासि पुनः पञ्च ॥ ५ ॥ देवस्य त्वा चतस्रः ॥ ४ ॥ द्वितीयो देवस्य त्वा षट् ॥ ६ ॥ प्रत्युष्टं पञ्च ॥ ५ ॥ दशानुवाकेषु पञ्चाशत् ॥ ५० ॥ इषे देवस्य समाः पञ्चाशत् ॥ ५० ॥
॥ इति शुक्लयजुःकाण्वसंहितायां प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः ॥

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि ।
बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि ॥१॥ १
अदित्यै व्युन्दनमसि विष्णो स्तुपोऽसि । ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः ॥२॥ २
भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा ।
गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै ॥३॥ ३
यजमानस्य परिधिरस्यग्निरिड ईडितः । इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै ।
यजमानस्य परिधिरस्यग्निरिड ईडितः । मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै ।
यजमानस्य परिधिरस्यग्निरिड ईडितः ॥४॥ ४
वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरे ॥५॥ ५
समिदसि सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै । सवितुर्बाहू स्थः ॥६॥ ६
ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यः । आ त्वा वसवो रुद्रा आदित्याः सदन्तु ॥७॥ ७
घृताच्यसि जुहूर्नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद । घृताच्यस्युपभृन्नाम सेदं प्रियेण
धाम्ना प्रिये सदसि सीद । घृताच्यसि ध्रुवा नाम सेदं प्रियेण धाम्ना प्रिये सदसि सीद ।
प्रियेण धाम्ना प्रिये सदसि सीद ॥८॥ ८ [५८]

ध्रुवा असदत्तस्य योनौ ता विष्णो पाहि ।
पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ॥९॥ (१) ९

अग्ने वाजजिद्वाजं त्वा सरिष्यन्तं वाजजितꣳ सम्मार्ज्मि ।
नमो देवेभ्यः स्वधा पितृभ्यः सुयमे मे भूयास्तम् ॥ १ ॥ १०
अस्कन्नमद्य देवेभ्य आज्यꣳ संभ्रियासम् । अङ्घ्रिणा विष्णो मा त्वावक्रमिषम् ॥२॥ ११
वसुमतीमग्ने ते छायामुपस्थेषं विष्णोः स्थानमसि । इत इन्द्रो वीर्यमकृणोदूर्ध्वोऽध्वर आस्थात् ॥३॥ १२
अग्ने वेर्होत्रं वेर्दूत्यम् । अवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी ॥४॥ १३
स्विष्टकृद्देवेभ्य इन्द्र आज्येन हविषा भूत् स्वाहा । सं ज्योतिषा ज्योतिः ॥५॥ १४
अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमावृषायिषत ॥६॥ १५
उपहूता पृथिवी मातोप मां पृथिवी माता ह्वयताम् । अग्निराग्नीध्रात् स्वाहा ॥७॥ १६
उपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयताम् । अग्निराग्नीध्रात् स्वाहा ॥८॥ १७
मयीदमिन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् ।
अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिषः ।
अग्ने वाजजिद्वाजं त्वा ससृवाꣳसं वाजजितꣳ सम्मार्ज्मि ॥९॥ (२) १८

देव सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणम् । तदहं मनसे प्रब्रवीमि ॥१॥ १९
मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ।
अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॥२॥ २०
बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् । भूर्भुवः स्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि ॥३॥२१
मित्रस्य त्वा चक्षुषा प्रतीक्षे । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
प्रतिगृह्णामि पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥४॥ २२
आदद्देऽग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन । या अप्स्वन्तर्देवतास्ता इदꣳ शमयन्तु ॥५॥ २३
स्वाहाकृतं जठरमिन्द्रस्य गच्छ । वसिनां मे मा संपृक्था ऊर्ध्वं मे नाभेः सीद ॥६॥ २४
इन्द्रस्य त्वा जठरे सादयामि । प्रजापतेर्भागोस्यूर्जस्वान् पयस्वान् ॥७॥ २५
प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि ।
ऊर्गस्यूर्जं मयि धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिँल्लोक इह च ॥८॥ २६
पुरा ते अग्ने सुमित्या वर्धस्व चा च प्यायस्व । वर्धिषीमहि च वयमा च प्यासिषीमहि ॥९॥२७
[७७]

एतत् ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमव तेन यज्ञपतिं तेन मामव ॥१०॥ २८
मनोज्योतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु ।
अरिष्टं यज्ञꣳ समिमं दधातु विश्वे देवास इह मादयन्तामों प्रतिष्ठ ॥११॥ (३) २९

अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ।
अग्नीषोमौ तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ।
इन्द्राग्न्योरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामि ।
इन्द्राग्नी तमपनुदतां योऽस्मान् द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ॥१॥ ३०
वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्व. : संजानाथां द्यावापृथिवी मित्रावरुणौ त्वा वृष्ट्यावताम् ॥२॥३१
व्यन्तु वयोक्तं रिहाणा मरुतां पृषतीं गच्छ । वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह ॥३॥३२
चक्षुष्पा असि चक्षुर्मे पाहि । यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमानः ॥४॥ ३३
तं त एतमनु जोषं भराम्येष नेत्त्वदपचेतयातै । अग्नेः प्रियं पाथोऽपीतम् ॥५॥ ३४
सꣳस्रवभागा स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः ।
इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयध्वꣳ स्वाहा वाट् ।
घृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम् ॥६॥ (४) ३५

अग्नेऽदब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै ।
अविषं नः पितुं कृणु सुषदा योनौ स्वाहा वाट् ॥१॥ ३६
अग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा ।
उलूखले मुसले यच्च शूर्पे आशिश्लेष दृषदि यत् कपाले ॥२॥ ३७
उत्प्रुषो विप्रुषः सं जुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा ।
आप्यायतां ध्रुवा हविषा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः ॥
सूर्याया ऊधो अदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन् ॥३॥ ३८
देवा गातुविदो गातुमित्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥४॥ ३९
संबर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सं मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत् स्वाहा ॥५॥ ४०
कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति ।
पोषाय रक्षसां भागोऽसि ॥६॥ ४१
वेदोऽस्युपवेदो द्विपदो ग्रीवा उपवेविद्धि । वेदो अग्ने सुभग धारयेह ॥७॥ ४२ [९१]

श्रद्धाः कर्मण्या अनपायिनो यथासन् ॥
जुहोमि त्वा सुभग सौभगाय पुरूतमं पुरुहूत श्रवस्यन् ॥८॥(५) ४३

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१॥ ४४
या उ च त उप च । शिवे मे संतिष्ठस्वारिष्टे मे संतिष्ठस्व स्विष्टे मे संतिष्ठस्व ॥२॥ ४५
दिवि विष्णुर्व्यक्रꣳस्त जागतेन छन्दसा ततो निर्भक्तः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।
अन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ।
पृथिव्यां विष्णुर्व्यक्रꣳस्त गायत्रेण छन्दसा ततो निर्भक्तः ।
योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥३॥ ४६
अगन्मादस्यै प्रतिष्ठाया अगन्म स्वः । सं ज्योतिषाभूम ॥४॥ ४७
स्वयंभूरसि श्रेष्ठो रश्मिर्वर्चोदा असि वर्चो मे देहि । सूर्यस्यावृतमन्वावर्ते ॥५॥ ४८
अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासम् ।
सुगृहपतिस्त्वं मया गृहपतिना भूयाः ॥६॥ ४९
अस्थूरि णौ गार्हपत्यानि सन्तु शतꣳ हिमाः ।
तिग्मेन नस्तेजसा सꣳशिशाधि सूर्यस्यावृतमन्वावर्ते ॥७॥ ५०
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र-प्र यज्ञपतिं तिर ॥८॥ ५१
ततोऽसि तंतुरस्यनु मा तनुहि । अस्मिन्यज्ञेऽस्याꣳ साधु कृत्यायामस्मिन्क्षेत्रेऽस्मिँल्लोके ॥९॥५२
इदं मे कर्मेदं वीर्यं पुत्रोऽनु संतनोतु । अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि ।
इदमहं य एवास्मि स एवास्मि ॥१०॥(६) ५३

अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा । अपहता असुरा रक्षाꣳसि वेदिषदः ॥१॥ ५४
ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात् प्रणुदात्यस्मात् ॥२॥ ५५
अत्र पितरो मादयध्वं यथाभागमावृषायध्वम् । अमीमदन्त पितरो यथाभागमावृषायिषत ॥३॥ ५६
नमो वः पितरः शुष्माय नमो वः पितरस्तपसे ।
नमो वः पितरो यज्जीवं तस्मै नमो वः पितरो रसाय ।
नमो वः पितरो घोराय मन्यवे स्वधायै वः पितरो नमः ।
एतद्वः पितरो वासो गृहान्नः पितरो दत्त ॥ ४ ॥ ५७[१००]

उदायुषा स्वायुषोत्पर्जन्यस्य धामभिः । उदस्थाममृताँ अनु ॥५॥ ५८
आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथेह पुरुषोऽसत् ॥६॥ ५९
ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ॥७॥ (७) ६०

कृष्णोऽसि नव ॥ ९ ॥ अग्ने वाजजिन्नव ॥ ९ ॥ देव सवितरेकादश ॥ ११ ॥ अग्नीषोमयोः षट् ॥ ६ ॥
अग्नेऽदब्धायोऽष्ट ॥ ८ ॥ सं वर्चसा दश ॥ १० ॥ अग्नये कव्यवाहनाय सप्त ॥ ७ ॥
सप्तानुवाकेषु षष्ठि ॥ ६० ॥ कृष्ण इमं मे षष्ठि ॥ ६ ॥
इति शुक्लयजुःकाण्वसंहितायां द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ॥

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥१॥ १
सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसे ॥२॥ २
तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ॥३॥ ३
उप त्वाग्ने हविष्मतीर्घृताचीर्यन्तु हर्यत । जुषस्व समिधो मम ॥४॥ ४
भूर्भुवः स्वर्द्यौरिव भूम्ना भूमिरिव वरिम्णा ।
तस्यास्ते पृथिवि देवयजनि पृष्ठेऽग्निमन्नादमन्नाद्यायादधे ॥५॥ ५
आयं गौः पृश्निरक्रमीदसदन् मातरं पुरः । पितरं च प्रयन्त्स्वः ॥६॥ ६
अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन् महिषो दिवम् ॥७॥ ७
त्रिꣳशद्धाम विराजति वाक् पतङ्गाय धीयते । प्रति वस्तोरह द्युभिः ॥८॥ (१) ८

अग्निर्ज्योतिषं त्वा वायुमतीं प्राणवतीम् । स्वर्ग्यꣳ स्वर्गायोपदधामि भास्वतीम् । ९
अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥१॥
सूर्यं ज्योतिषं त्वा वायुमतीं प्राणवतीम् । स्वर्ग्यꣳ स्वर्गायोपदधामि भास्वतीम् ।
सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥२॥ १०
सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या । जुषाणो अग्निर्वेतु स्वाहा ॥३॥ ११
सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्यो वेतु स्वाहा ॥ ४ ॥ १२
इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः । अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा ।
अग्नयेऽन्नादायान्नपतये स्वाहा ॥५॥ १३
अनमित्रं मे अधरागनमित्रमुदक्कृधि । इन्द्रानमित्रं पश्चान्मेऽनमित्रं पुरस्कृधि ॥६॥ १४ [११४]

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ३ अभिपातु विश्वतः ।
इन्द्रो जिघांसतां मनांसि विषूचीना व्यस्यतात् ॥७॥ १५
समिदसि समिद्धो मे अग्ने दीदिहि । समेद्धा ते अग्ने दीद्यासम् ॥८॥(२) १६

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥१॥ १७
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥२॥ १८
उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दातारा इषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥३॥ १९
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोहाथा नो वर्धया रयिम् ॥४॥ २०
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥५॥ २१
अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ॥६॥ २२
तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि । वर्चोदा अग्नेऽसि वर्चो मे देहि ॥७॥ २३
अग्ने यन्मे तन्वा ऊनं तन्म आपृण । इन्धानास्त्वा शतं हिमा द्युमन्तं समिधीमहि ॥८॥ २४
वयस्वन्तो वयस्कृतं सहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ॥९॥ २५
चित्रावसो स्वस्ति ते पारमशीय । सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणां स्तुतेन ॥१०॥ २६
सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मिषीय ।
अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीय ॥११॥ २७
ऊर्ज स्थोर्जं वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय ।
रेवती रमध्वमस्मिन् योनावस्मिन् गोष्ठेऽस्मिन् क्षयेऽस्मिँल्लोके ॥१२॥ २८
इहैव स्तेतो मापगात । संहितासि विश्वरूप्यूर्जा माविश गौपत्येन ॥१३॥ २९
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥१४॥ ३०
राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥१५॥ ३१
स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥१६॥ ३२
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ॥१७॥ ३३ [१४३]

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ।
स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात् ॥१८॥ ३४
इळ एह्यदित एहि काम्य एहि । मयि वः कामधरणं भूयात् ॥१९॥ ३५
सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥२०॥ ३६
यो रेवान्यो अमीवहा वसुवित् पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥२१॥ ३७
मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥२२॥ ३८
महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥२३॥ ३९
नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशंसः ॥२४॥ ४०
ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम् ॥२५॥ ४१
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥२६॥ ४२
तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥२७॥ ४३
परि ते दूळभो रथोऽस्माँ३ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥
समिद्धो मासमर्धय प्रजया च धनेन च ॥२८॥ (३) ४४

भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् । सुवीरो वीरैः सुपोषः पोषैः ॥१॥ ४५
नर्य प्रजां मे पाहि शंस्य पशून् मे पाहि । आगन्म विश्ववेदसमस्मभ्यं वसुवित्तमम् ॥२॥ ४६
अग्ने सम्राळभि द्युम्नमभि सह आयच्छस्व । अयमग्निर्गृहपतिर्गार्हपत्यः प्रजावान्वसुवित्तमः॥३॥ ४७
अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्व । गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्रत एमसि॥४॥४८
ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः ।
येषामध्येति प्रवसन्येषु सौमनसो बहुः ॥५॥ ४९
गृहानुपह्वयामहे ते नो जानन्तु जानतः । उपहूता इह गाव उपहूता अजावयः ॥६॥ ५०
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः । क्षेमाय वः शान्त्यै प्रपद्ये ।
शिवं शग्मं शंयोः शंयोः ॥७॥ (४) ५१

प्रघासिनो हवामहे मरुतश्च रिशादसः । करम्भेण सजोषसः ॥१॥ ५२
यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमा वयमिदं तदवयजामहे स्वाहा ॥२॥ ५३
मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥३॥ ५४[१६४]

अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा । देवेभ्यः कर्म कृत्वास्तं प्रेत सचाभुवः ॥४॥ ५५
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥५॥ (५) ५६
पूर्णा दर्वि परा पत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ॥१॥ ५७
देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारं निहरामि ते निहारं निहरासि मे स्वाहा ॥२॥ (६) ५८

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥१॥ ५९
सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि ।
प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाँ३ अनु योजा न्विन्द्र ते हरी ॥२॥ ६०
मनो न्वाहुवामहे नाराशंसेन स्तोमेन । पितॄणां च मन्मभिः ॥३॥ ६१
आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥४॥ ६२
पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥५॥ ६३
वयं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥६॥ (७) ६४
एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहा । एष ते रुद्र भाग आखुस्ते पशुः ॥१॥ ६५
अव रुद्रमदीमह्यव देवं त्र्यम्बकम् ।
यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥२॥ ६६
भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम् । सुगं मेषाय मेष्यै ॥३॥ ६७
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥४॥ ६८
त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥५॥ ६९
एतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि ।
अवततधन्वा पिनाकावसः कृत्तिवासा अहिंसन्नः शिवः शान्तोऽतीहि ॥६॥ (८) ७०

वाजिनं वाजोऽवतु भक्षो अस्मान् रेतः सिक्तममृतं बलाय ।
विश्वे देवा अभि यत् संबभूवुस्तन्मा धिनोतु प्रजया धनेन ॥१॥ ७१
वाज्यहं वाजिनस्योपहूत उपहूतस्य भक्षयामि । वाजे वाजी भूयासम् ॥२॥ ७२
सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूम् । दीर्घायुत्वाय वर्चसे ॥३॥ ७३ (१८३)

कश्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् ॥४॥ ७४
येन धाता बृहस्पतेरिन्द्रस्य चायुषेऽवपत् । तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय ॥५॥ ७५
दीर्घायुत्वाय बलाय वर्चसे । सुप्रजास्त्वाय चासा अथो जीव शरदः शतम् ॥६॥ (९) ७६ [१८६]

समिधाग्निमष्ट ॥ ८ ॥ अग्निर्ज्योतिर्षट्त्वाष्ट ॥ ८ ॥ उपप्रयन्तोऽष्टाविंशतिः ॥ २८ ॥ भूर्भुवः स्वः सप्त ॥ ७ ॥ प्रघासिनः पञ्च ॥ ५ ॥ पूर्णा दर्वि द्वे ॥ २ ॥ अक्षन्नमीमदन्त षट् ॥ ६ ॥ एष ते च षट् ॥ ६ ॥ वाजिनं वाजश्च षट् ॥ ६ ॥ नवानुवाकेषु षट्सप्ततिः ॥ ७६ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ॥

एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे ।
ऋक्सामाभ्यां सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम ॥१॥ १
इमा आपः शमु मे सन्तु देवीरोषधे त्रायस्व स्वधिते मैनं हिंसीः ।
आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥२॥ २
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ।
दीक्षातपसोस्तनूरसि तां त्वा शिवां शग्मां परिदधे भद्रं वर्णं पुष्यन् ॥३॥ (१) ३
महीनां पयोऽसि वर्चोदा असि वर्चो मे देहि । वृत्रस्य कनीनकासि चक्षुर्दा असि चक्षुर्मे देहि ॥१॥४
चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥२॥ ५
आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहे ॥३॥ ६
स्वाहा यज्ञं मनसः स्वाहोरोरन्तरिक्षात् । स्वाहा द्यावापृथिवीभ्यां स्वाहा वातादारभे ॥४॥(२) ७

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा
दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहा ।
आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहा ॥१॥ ८
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥२॥(३) ९
ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मा पातम् । आस्य यज्ञस्योदृचः ॥१॥ १०
शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हिंसीः ।
ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ ॥२॥ ११ [१९७]

सोमस्य नीविरसि विष्णोः शर्मासि शर्म यजमानस्य ।
इन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि ॥३॥ १२
उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यꣳहसः । आस्य यज्ञस्योदृचः ॥४॥ (४) १३

व्रतं कृणुत व्रतं कृणुत व्रतं कृणुत । अग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः ॥१॥ १४
दैवीं धियं मनामहे सुमृडीकामभिष्टये । वर्चोधां यज्ञवाहसꣳ सुतीर्था नो असद्वशे ॥२॥ १५
ये देवा मनोजाता मनोयुजो दक्षक्रतवः । ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा ॥३॥ १६
श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः ।
ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः ॥४॥ १७
इयं ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम् ।
अꣳहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या संभव ॥५॥ १८
अग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि । रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि ॥६॥ १९
पुनर्मनः पुनरायुर्म आगात् पुनश्चक्षुः पुनः श्रोत्रं म आगात् ।
पुनः प्राणः पुनरात्मा म आगाद्वैश्वानरो अदब्धस्तनूपा अग्निर्नो पातु दुरितादवद्यात् ॥७॥ २०
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥८॥ २१
रास्वेयत्सोमा भूयो भर । देवो नः सविता वसोर्दाता वस्वदात् ॥९॥ (५) २२

एषा ते शुक्र तनूरेतद्वर्चस्तया सम्भव भ्राजं गच्छ । जूरसि धृता मनसा जुष्टा विष्णवे ॥१॥ २३
तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा ।
शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥२॥ २४
चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतः शीर्ष्णी ।
सा नः सुप्राची सुप्रतीची भव ॥३॥ २५
मित्रस्त्वा पदि बध्नीतां पूषाध्वनस्पात्विन्द्रायाध्यक्षाय ।
अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः ॥४॥ २६
सा देवि देवमच्छेहीन्द्राय सोमम् । रुद्रस्त्वा वर्तयतु स्वस्ति सोमसखा पुनरेहि ॥५॥ (६) २७

वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि । बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिराचके ॥१॥ २८
अदित्यास्त्वा मूर्धन्नाजिघर्मि देवयजने पृथिव्याः । इडायास्पदमसि घृतवत् स्वाहा ॥२॥ २९
अस्मे रमस्वास्मे ते बन्धुः । त्वे रायो अस्मे रायः ॥३॥ ३० [२१६]

मा वयꣳ रायस्पोषेण वियौष्म तोतो रायः । समख्ये देव्या धिया सं दक्षिणयोरुचक्षसा।
मा म आयुः प्रमोषीर्मो अहं तव वीरान्विदेय तव देवि संदृशि ॥४॥ (७) ३१

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतात् ।
एष ते जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानानाꣳ
साम्राज्यं गच्छतादिति मे सोमाय ब्रूतात् ॥१॥ ३२
आस्माकोऽसि शुक्रस्ते ग्रह्यः । विचितस्त्वा विचिन्वन्तु ॥२॥ ३३
अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥३॥ ३४
प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु । प्रजास्त्वमनुप्राणिहि ॥४॥ (८) ३५

चन्द्रं त्वा चन्द्रेण क्रीणामि शुक्रꣳ शुक्रेणामृतममृतेन । सग्मे ते गोरस्मे ते चन्द्राणि॥१॥ ३६
तपसस्तनूरसि प्रजापतेर्वर्णः । परमेण पशुना क्रीयसे सहस्रपोषं पुषेयम् ॥२॥ ३७
मित्रो न एहि सुमित्रध इन्द्रस्योरुमाविश दक्षिणम् । उशन्नुशन्तꣳ स्योनः स्योनम् ॥३॥ ३८
स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानो ।
एते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥४॥ ३९
परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज । उदायुषा स्वायुषोदस्थाममृताँ[2] अनु ॥५॥ ४०
प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥६॥(९) ४१

अदित्यास्त्वगस्यदित्यै सद आसीद । अस्तभ्नाद्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥१॥ ४२
वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥२॥ ४३
सूर्यस्य चक्षुरारोहाग्नेरक्ष्णः कनीनकाम् । यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता ॥३॥ ४४
उस्रा एतं धूर्षाहौ युज्येथामनश्रू अवीरहणौ ब्रह्मचोदनौ ।
स्वस्ति यजमानस्य गृहान् गच्छतम् ॥ ४ ॥ ४५
भद्रो मेऽसि प्रच्यवस्व भुवस्पते विश्वान्यभि धामानि ।
मा त्वा परिपरिणो विदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृका अघायवो विदन् ।
श्येनो भूत्वा परापत यजमानस्य गृहान गच्छ तन्नौ सꣳस्कृतम् ॥ ५ ॥ ४६ [२३२]

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥६॥ ४७
वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थः ।
वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥७॥ ४८
या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥८॥ (१०) ४९ [२३५]

पदस्यस्य निष्कः ॥ ३ ॥ महीनां चतस्रः ॥ ४ ॥ आकूत्यै द्वे ॥ २ ॥ ऋक्सामयोश्चतस्रः ॥ ४ ॥
व्रतं कृणुत नव ॥ ९ ॥ एषा ते पञ्च ॥ ५ ॥ वस्व्यसि चतस्रः ॥ ४ ॥ एष ते चतस्रः
॥ ४ ॥ चन्द्रं त्वा षट् ॥ ६ ॥ अदित्यास्त्वगष्ट ॥ ८ ॥ दशानुवाकेष्वेकोनपञ्चाशत् ॥ ४९ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः।

अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वा ।
अतिथेरातिथ्यमसि विष्णवे त्वा श्येनाय त्वा सोमभृते
विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥ १
अग्नेर्जनित्रमसि वृषणौ स्थः । उर्वश्यस्यायुरसि पुरूरवा असि ।
गायत्रेण त्वा छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि
जागतेन त्वा छन्दसा मन्थामि ॥२॥ २
भवतं नः समनसौ सचेतसावरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥३॥ ३
अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥४॥ (१) ४

आपतये त्वा गृह्णामि परिपतये त्वा गृह्णामि । तनूनप्त्रे शाक्वराय शक्मन ओजिष्ठाय ॥१॥ ५
अनाधृष्टमस्यनाधृष्यं देवानामोजः । अनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यम् ॥२॥ ६
अञ्जसा सत्यमुपगेषꣳ सुविते मा धाः । अग्ने व्रतपास्त्वे व्रतपाः ॥३॥ ७
या तव तनूरियꣳ सा मयि या मम तनूरेषा सा त्वयि ।
सह नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः ॥४॥ ८ [२४३]

अꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ॥५॥ ९
आप्याययास्मान् सखीन्त्सन्या मेधया । स्वस्ति ते देव सोम सुत्यामुदृचमशीय ॥६॥ १०
एष्टा रायः प्रेषे भगाय । ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्यै ॥७॥ ११
या ते अग्ने यः शया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीस्त्वेषं वचो अपावधीत् स्वाहा ।
या ते अग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचो अपावधीस्त्वेषं वचो अपावधीत् स्वाहा ।
या ते अग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा ।
उग्रं वचो अपावधीस्त्वेषं वचो अपावधीत् स्वाहा ॥८॥ (२) १२

तप्तायनी मेऽसि वित्तायनी मेऽसि । अवतान्मा व्यथितमवतान्मा नाथितम् ॥१॥ १३
विदेदग्निर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।
योऽस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ।
विदेदग्निर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।
यो द्वितीयस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ।
विदेदग्निर्नभो नामाग्ने अङ्गिर आयुना नाम्नेहि ।
यस्तृतीयस्यां पृथिव्यामसि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ।
अनु त्वा देववीतये सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्व सिꣳह्यसि
सपत्नसाही देवेभ्यः शुन्धस्व सिꣳह्यसि सपत्नसाही देवेभ्यः शुम्भस्व ॥२॥ (३) १४

इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु ।
मनोजवास्त्वा पितृभिर्दक्षिणतः पातु विश्वकर्मा त्वादित्यैरुत्तरतः पातु ॥१॥ १५
इदमहं तप्तं वार्बहिर्धा यज्ञान्निः सृजामि ।
सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्यवनिः स्वाहा ॥२॥ १६
सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहा ।
सिꣳह्यस्यावह देवान्यजमानाय स्वाहा भूतेभ्यस्त्वा ॥३॥ १७
ध्रुवोऽसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳह ।
अच्युतक्षिदसि दिवं दृꣳहाग्नेः पुरीषमसि ॥४॥ (४) १८

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥१॥ १९ [२५४]

इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाꣳसुरे स्वाहा ॥२॥ २०
इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या।
व्यस्कभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा ॥३॥ २१
देवश्रुतौ देवेष्वाघोषतम्। प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम् ॥४॥ २२
स्वं गोष्ठमावदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्वादिष्टम्।
अत्र रमेथां वर्ष्मन् पृथिव्याः ॥५॥ २३
विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि।
यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥६॥ २४
दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात्।
उभा हि हस्ता वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वा ॥७॥ २५
प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥८॥ २६
विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि।
वैष्णवमसि विष्णवे त्वा ॥९॥ (५) २७

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि।
बृहन्नसि बृहद्रवा बृहतीमिन्द्राय वाचं वद। रक्षोहणं वलगहनं वैष्णवीम् ॥१॥ २८
इदमहं तं वलगमुद्वपामि यं नो निष्ट्यो यममात्यो निचखान।
इदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखान।
इदमहं तं वलगमुद्वपामि यं नः सबन्धुर्यमसबन्धुर्निचखान।
इदमहं तं वलगमुद्वपामि यं नः सजातो यमसजातो निचखानोत्कृत्यां किरामि ॥२॥ २९
स्वराळसि सपत्नहा सत्रराळस्यभिमातिहा। जनराळसि रक्षोहा सर्वराळस्यमित्रहा ॥३॥ ३०
रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वलगहनोऽवनयामि वैष्णवान्।
रक्षोहणो वलगहनोऽवस्तृणामि वैष्णवान् ॥४॥ ३१
रक्षोहणौ वलगहना उपदधामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी।
वैष्णवमसि वैष्णवा स्थ ॥५॥ (६) ३२ [१६७]
३

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि। यवोऽसि यवयास्मद् द्वेषो यवयारातीः।
दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा ॥१॥ ३३
शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि।
उद्दिवꣳ स्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्याम् ॥२॥ ३४
द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणौ ध्रुवेण धर्मणा।
ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि ॥३॥ ३५
ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह। ध्रुवासि ध्रुवोऽस्मिन्यजमान आयतने भूयात्।
घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य छदिरसि विश्वजनस्य छाया ॥४॥ ३६
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः। वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥५॥ ३७
इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसि। ऐन्द्रमसि वैश्वदेवमसि ॥६॥ (७) ३८

विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः। श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदाः ॥१॥ ३९
उशिगसि कविरङ्घारिरसि बम्भारिः। अवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्जालीयः ॥२॥ ४०
सम्राडसि कृशानुः परिषद्योऽसि पवमानः। नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदनः ॥४॥ ४२
ऋतधामासि स्वर्ज्योतिः समुद्रोऽसि विश्वव्यचाः। अजोऽस्येकपादहिरसि बुध्न्यः ॥३॥ ४१
समूढोऽसि विश्ववेदा ऊनातिरिक्तस्य प्रतिष्ठा।
अग्नयः सगरा सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन।
पातमाग्नयः पिपृतमाग्नयो नमो वोऽस्तु मा मा हिꣳसिष्ट ॥५॥ (८) ४३

ज्योतिरसि विश्वरूपं विश्वेषां देवानाꣳ समित्। त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः।
उरु यन्तासि वरूथꣳ स्वाहा। जुषाणो अप्तुराज्यस्य वेतु स्वाहा ॥१॥ ४४
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥२॥ ४५
अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन्।
अयं वाजाञ्जयतु वाजसाता अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥३॥ ४६
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥४॥ ४७
देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन्।
एतत्त्वं देव सोम देवो देवाँ उपागाः ॥५॥ ४८ [१८१]

इदमहं मनुष्यान्त्सह रायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये। अग्ने व्रतपास्त्वे व्रतपाः ॥६॥ ४९
या तव तनूर्मय्यभूदेषा सा त्वयि या मम तनूस्त्वय्यभूदियꣳ सा मयि।
यथायथं नौ व्रतपते व्रतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पतिः ॥७॥ (९) ५०
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि। घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर स्वाहा ॥१॥ ५१
अत्यन्याँ३ अगां नान्याँ३ उपागाम्। अर्वाक्त्वा परेभ्यः परोऽवरेभ्यः ॥२॥ ५२
तं त्वा जुषामहे देव वनस्पते देवयज्यायै। देवास्त्वा देवयज्यायै जुषन्तां विष्णवे त्वा ॥३॥ ५३
ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः।
दिवं मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या संभव ॥४॥ ५४
अयꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय।
अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम ॥५॥ (१०) ५५ [१९०]

अग्नेस्तनूरसि चतस्रः ॥ ४ ॥ आ पतयेऽष्ट ॥ ८ ॥ तप्तायनी द्वे ॥ २ ॥ इन्द्रघोषस्त्वा चतस्रः ॥ ४ ॥ विभूरसि
युञ्जते नव ॥ ९ ॥ देवस्य त्वा पञ्च ॥ ५ ॥ द्वितीयदेवस्य त्वा षट् ॥ ६ ॥ विभूरसि
पञ्च ॥ ५ ॥ ज्योतिरसि सप्त ॥ ७ ॥ उरु विष्णो पञ्च ॥ ५ ॥ दशानुवाकेषु
पञ्चपञ्चाशत् ॥ ५५ ॥ अग्नेस्तनूरसि। पञ्चपञ्चाशत् ॥
॥ इति शुक्लयजुःकाण्वसंहितायां पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
आददे नार्यसीदमहꣳ रक्षसो ग्रीवा अपिकृन्तामि।
यवोऽसि यवयास्मद् द्वेषो यवयारातीः।
दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा। १
शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥१॥
अग्रेणीरसि स्वावेश उन्नेतॄणामेतस्य वित्तादधि त्वा स्थास्यति।
देवस्त्वा सविता मध्वानक्तु सुपिप्पलाभ्यस्त्वौषधीभ्यः।
दिवमग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳहीः ॥२॥ २
या ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य विष्णोः परमं पदमवभारि भूरि ॥३॥ ३ [२२३]

ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामि।
ब्रह्म दृꣳह क्षत्रं दृꣳहायुर्दृꣳह प्रजां दृꣳह ॥४॥ ४
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥५॥ ५
तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम् ॥६॥ ६
परि वीरसि परि त्वा दैवीर्विशो व्ययन्ताम्। परीमं यजमानꣳ रायो मनुष्याणाम्।
दिवः सूनुरस्येष ते पृथिव्याँल्लोक आरण्यस्ते पशुः ॥७॥ (१) ७

उपावीरस्युप देवान् दैवीर्विशः प्रागुरुशिजो वह्नितमान्।
देव त्वष्टर्वसु रम हव्या ते स्वदन्ताम् ॥१॥ ८
रेवती रमध्वं बृहस्पते धारया वसूनि।
ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि धर्षा मानुषः ॥२॥ ९
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
अग्नीषोमाभ्यां जुष्टं नियुनज्मि।
अद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः।
अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥३॥ १०
अपां पेरुरस्यापो देवीः स्वदन्तु। स्वात्तं चित्सद्देवहविः ॥४॥ ११
सं ते प्राणो वातेन गच्छताꣳ समङ्गानि यजत्रैः। सं यज्ञपतिराशिषा ॥५॥ १२
घृतेनाक्तौ पशूँस्त्रायेथाꣳ रेवति यजमाने। प्रियं धा आविश ॥६॥ १३
उरोरन्तरिक्षात्सजूर्देवेन वातेन। अस्य हविषस्त्मना यज समस्य तन्वा भव ॥७॥ १४
वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः। स्वाहा देवेभ्यो देवेभ्यः स्वाहा।
माहिर्भूर्मा पृदाकुः ॥८॥ (२) १५

नमस्त आतानानर्वा प्रेहि। घृतस्य कुल्या उप ऋतस्य पथ्या उप ॥१॥ १६
देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु। सुपरिविष्टा वयं परिवेष्टारो भूयास्म ॥२॥ १७
वाचं ते शुन्धामि प्राणं ते शुन्धामि चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि।
नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्राꣳस्ते शुन्धामि ॥३॥ १८
मनस्त आप्यायतां वाक्त आप्यायतां प्राणस्त आप्यायतां
चक्षुस्त आप्यायताꣳ श्रोत्रं त आप्यायताम्।
यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्ते निष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः ॥४॥ १९ [२०९]

ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः । रक्षसां भागोऽसि निरस्तꣳ रक्षः ॥५॥ २०
इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाधे । इदमहꣳ रक्षोऽधमं तमो नयामि ॥६॥ २१
घृतेन द्यावापृथिवी प्रोर्ण्वाथां वायो वे स्तोकानाम् ।
जुषाणो अग्निराज्यस्य वेतु स्वाहा । स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतम् ॥७॥ (३) २२

सं ते मनो मनसा सं प्राणः प्राणेन गच्छताम् । रेडस्यग्निष्ट्वा श्रीणात्वापस्त्वा समरिणन् ॥१॥ २३
वातस्य त्वा ध्राज्यै पूष्णो रꣳह्या ऊष्मणो व्यथिषत् । प्रयुतं द्वेषः ॥२॥ २४
घृतं घृतपावानः पिबत वसां वसापावानः पिबत । अन्तरिक्षस्य हविरसि स्वाहा ॥३॥ २५
दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।
ऐन्द्रः प्राणो अङ्गेअङ्गे निधीत ऐन्द्र उदानो अङ्गेअङ्गे निदीधे ॥४॥ २६
देव त्वष्टर्भूरि ते सꣳसमेतु स लक्ष्मा यद्विषुरूपं भवाति ।
देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु ॥५॥ (४) २७

समुद्रं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहा ।
अन्तरिक्षं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा ।
अहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा ।
द्यावापृथिवी गच्छ स्वाहा सोमं गच्छ स्वाहा ।
यज्ञं गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहा ।
अग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ ॥१॥ २८
दिवं ते धूमो गच्छत्वन्तरिक्षं ज्योतिः । पृथिवीं भस्मनापृण स्वाहा ॥२॥ २९
मापो मौषधीर्हिꣳसीर्धाम्नोधाम्नो राजꣳस्ततो वरुण नो मुञ्च ।
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥३॥ ३०
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥४॥ ३१
इदमापः प्रवहत यत्किं च दुरितं मयि ।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥५॥ (५) ३२

हविष्मतीरिमा आपो हविष्माꣳ३ आविवासति ।
हविष्मान्देवो अध्वरो हविष्माꣳ३ अस्तु सूर्यः ॥१॥ ३३ [३३३]

अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि । इन्द्राग्न्योर्भागधेयी स्थ मित्रावरुणयोर्भागधेयी स्थ ।
विश्वेषां देवानां भागधेयी स्थ ॥२॥ ३४
अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम् ॥३॥ (६) ३५

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वो अध्वरं दिवि देवेषु होत्रा यच्छ ॥१॥ ३६
सोम राजन्विश्वास्त्वं प्रजा उपावरोह । विश्वास्त्वां प्रजा उपावरोहन्तु ॥२॥ ३७
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।
श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहा ॥३॥ ३८
देवीरापो अपां नपाद्यो व ऊर्मिर्हविष्य्यः । इन्द्रियावान्मदिन्तमः ॥४॥ ३९
तं देवेभ्यो देवत्रा दात शुक्रपेभ्यः । येषां भाग स्थ स्वाहा ॥५॥ ४०
कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधीः ॥६॥ ४१
यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहा ॥७॥ (७) ४२

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे रावासि गभीरमिममध्वरं कृधीन्द्राय सुषूतमम् ।
उत्तमेन पविनोर्जस्वन्तं मधुमन्तं पयस्वन्तम् ।
निग्राभ्या स्थ देवश्रुतस्तर्पयत मा ॥१॥ ४३
मनो मे तर्पयत वाचं मे तर्पयत प्राणं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत ।
आत्मानं मे तर्पयत प्रजां मे तर्पयत पशून्मे तर्पयत गणान्मे तर्पयत गणा मे मा वितृषन् ॥२॥ ४४
इन्द्राय त्वा वसुमते रुद्रवत इन्द्राय त्वादित्यवते ।
इन्द्राय त्वाभिमातिघ्ने श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ॥३॥ ४५
यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरा अन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृध्यधि दात्रे वोचः ॥४॥ ४६
श्वात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं नयतोपहूताः सोमस्य पिबत ॥५॥ ४७
मा भेर्मा संविक्था ऊर्जं धत्स्व धिषणे वीड्वी सती वीडयेथामूर्जं दधाथाम् ।
पाप्मा हतो न सोमः ॥६॥ ४८
प्रागपागुदगधराक्सर्वतस्त्वा दिश आधावन्तु । अम्ब निष्पर समरीर्विदाम् ॥७॥ ४९ [३३९]

त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥८॥ (८) ५० [३४०]

देवस्य त्वा सप्त ॥ ७ ॥ उपावीरस्यष्ट ॥ ८ ॥ नमस्ते सप्त ॥ ७ ॥ सं ते पञ्च ॥ ५ ॥ समुद्रं
पञ्च ॥ ५ ॥ हविष्मतीस्तिस्रः ॥ ३ ॥ हृदे त्वा सप्त ॥ ७ ॥ देवस्य त्वाष्ट ॥ ८ ॥
अष्टानुवाकेषु पञ्चाशत् ॥ ५० ॥ इद देवस्य समाः पञ्चाशत् ॥
॥ इति शुक्लयजुःकाण्वसंहितायां षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः ॥

वाचस्पतये पवस्व वृष्णो अꣳशुभ्यां गभस्तिपूतः ।
देवो देवेभ्यः पवस्व येषां भागोऽसि मधुमतीर्न इषस्कृधि ॥१॥ १
यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा ।
स्वाहोर्वन्तरिक्षमन्वेमि स्वाहाकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः ॥२॥ २
मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय । देवेभ्यस्त्वा मरीचिपेभ्यो देवाꣳशो यस्मै त्वेडे ॥
तत्सत्यमुपरिप्रुता भङ्गेन हतोऽसौ फट् प्राणाय त्वा व्यानाय त्वा ॥३॥ (१) ३

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन्पाहि सोमम् । उरुष्य राय एषो यजस्व ॥१॥ ४
अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन्मादयस्व ।
स्वाहोर्वन्तरिक्षमन्वेमि स्वाहाकृतोऽसि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः ।
मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय । देवेभ्यस्त्वा मरीचिपेभ्य उदानाय त्वा ॥२॥(२)५

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ॥१॥ ६
इन्द्रवायू इमे सुता उप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ।
उपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ॥२॥ (३) ७

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् ।
उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वा ॥१॥ ८
राया वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः ।
तां धेनुं मित्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् । एष ते योनिरृतायुभ्यां त्वा ॥२॥(४)९
[३४९]

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥१॥ (५) १०

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्धसे । उपयामगृहीतोऽसि शण्डाय त्वा ॥१॥११
एष ते योनिर्वीरतां पाह्यपमृष्टः शण्डो देवास्त्वा शुक्रपाः प्रणयन्त्वनाधृष्टासि ।
सुवीरो वीरान्प्रजनयन्परीह्यभि रायस्पोषेण यजमानम् ।
संजग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि ॥२॥ १२
अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥३॥ १३
स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमा जुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो यास्स्विष्टा यास्सुप्रीता यत्स्वाहा ॥४॥ (६) १४

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपाꣳ संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ।
उपयामगृहीतोऽसि मर्काय त्वा ॥१॥ १५
मनो न येषु हवनेषु तिग्मं विपः शच्या वनुथो द्रवन्ता ।
आ यः शर्याभिस्तुविनृम्णो अस्या श्रीणीतादिशं गभस्तौ ॥२॥ १६
एष ते योनिः प्रजाः पाह्यपमृष्टो मर्को देवास्त्वा मन्थिपाः प्रणयन्त्वनाधृष्टासि ।
सुप्रजाः प्रजाः प्रजनयन्परीह्यभि रायस्पोषेण यजमानम् ।
संजग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्को मन्थिनोऽधिष्ठानमसि ॥३॥ १७
अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा सꣳस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः ॥४॥ १८
स प्रथमो बृहस्पतिश्चिकित्वाꣳस्तस्मा इन्द्राय सुतमा जुहोत स्वाहा ।
तृम्पन्तु होत्रा मध्वो यास्स्विष्टा यास्सुप्रीता यत्स्वाहा ॥५॥ (७) १९

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥१॥ २०
उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणः । पाहि यज्ञं पाहि यज्ञपतिम् ॥२॥ २१[३६१]

विष्णुस्त्वामिन्द्रियेण पातु विष्णुं त्वं पाह्यभि सवनानि पाहि ।
सोमः पवते सोमः पवते सोमः पवते ॥३॥ २२
अस्मै ब्रह्मणे पवतेऽस्मै क्षत्राय पवतेऽस्मै सुन्वते यजमानाय पवते ।
इष ऊर्जे पवतेऽद्भ्य ओषधीभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते ब्रह्मवर्चसाय पवते।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥४॥ (८) २३

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवं गृह्णामि ।
यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैषते योनिरुक्थेभ्यस्त्वा ॥१॥ २४
देवेभ्यस्त्वा देवायुवं गृह्णामि यज्ञस्यायुषे मित्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राग्निभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राय त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्रावरुणाभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ।
इन्द्राबृहस्पतिभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुष इन्द्राविष्णुभ्यां
त्वा देवायुवं गृह्णामि यज्ञस्यायुषे ॥२॥ (९) २५

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥१॥ २६
उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः ।
एष ते योनिर्वैश्वानराय त्वा ॥२॥ २७
ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामि । अथा न इन्द्र इद्विशो सपत्नाः समनसस्करत् ॥३॥
(१०) २८

यस्ते द्रप्स स्कन्दति यस्ते अꣳशुर्ग्रावच्युतो धिषणयोरुपस्थात् ।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा
वषट्कृतꣳ स्वाहा देवानामुत्क्रमणमसि ॥१॥ (११) २९

उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वा ।
उपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वा ।
उपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय त्वा ।
उपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्यूर्जे त्वा ।
उपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वा ।
उपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वा । ३० [३७०]
उपयामगृहीतोऽस्यꣳहसस्पतये त्वा ॥१॥ (१२)
४

इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ।
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥१॥ (१३) ३१
आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ।
उपयामगृहीतोऽस्यग्नीन्द्राभ्यां त्वैष ते योनिरग्नीन्द्राभ्यां त्वा ॥१॥ (१४) ३२
ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वाꣳसो दाशुषः सुतम् ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥१॥(१५) ३३
विश्वे देवास आगत शृणुता म इमꣳ हवम् । एदं बर्हिर्निषीदत ।
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥१॥(१६) ३४
इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥१॥ (१७) ३५
मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥१॥ (१८) ३६
उपयामगृहीतोऽसि मरुतामोजसे त्वा ॥१॥ (१९) ३७
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥१॥ (२०) ३८
महाँ३ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥१॥ (२१) ३९
महाँ३ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ३ इव स्तोमैर्वत्सस्य वावृधे ।
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥१॥ (२२) ४० [३८०]

॥वस्पतये तिस्रः ॥३॥ उपयामगृहीतोऽसि द्वे ॥२॥ आ वायो द्वे ॥२॥ अयं वां द्वे ॥ २ ॥ या वामेका ॥ १ ॥
तं प्रत्नथा चतस्रः ॥ ४ ॥ अयं वेनः पञ्च ॥ ५ ॥ ये देवासश्चतस्रः ॥ ४ ॥ इन्द्राय त्वा द्वे ॥ २ ॥ मूर्धानं
तिस्रः ॥ ३ ॥ यस्त एका ॥१॥ मधव एका ॥ १ ॥ इन्द्राग्नी आगतमेका ॥ १ ॥ आ घा य एका ॥१॥
ओमासश्चर्षणीधृत एका ॥ १ ॥ विश्वे देवास एका ॥ १ ॥ इन्द्र मरुत्व एका ॥ १ ॥ मरुत्वन्तं
वृषभमेका ॥१॥ मरुतामोजस एका ॥१॥ सजोषा इन्द्र एका ॥१॥ महाँ इन्द्र एका ॥ १ ॥
महाँ इन्द्रस्येका ॥१॥ द्वाविंशत्यनुवाकेषु चत्वारिंशत् ॥४०॥
॥ इति शुक्लयजुःकाण्वसंहितायां सप्तमोऽध्यायः ॥७॥

अथाष्टमोऽध्यायः ॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यत आदित्येभ्यस्त्वा ॥१॥ १
कदा चन प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्य सवनं त इन्द्रियमातस्था अमृतं दिव्यादित्येभ्यस्त्वा ॥२॥ २
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वा । ३
विवस्वाँ३ आदित्यैष ते सोमपीथस्तस्मिन् मत्स्व ॥३॥ (१)

श्रदस्मै नरो वचसे दधातन यदाशीर्दा दंपती वाममश्नुतः ।
पुमान् पुत्रो जायते विन्दते वस्वधा विश्वाहारप एधते गृहे ॥१॥ (२) ४
वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥१॥ (३) ५

उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनो मयि धेहि ।
जिन्व यज्ञं जिन्व यज्ञपतिं भगाय सवित्रे त्वा ॥१॥ (४) ६
उपयामगृहीतोऽसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षाय नमः ।
विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥१॥ (५) ७

उपयामगृहीतोऽसि बृहस्पतिसुतस्य ते देव सोम ।
इन्द इन्द्रियावतः पत्नीवतो ग्रहाँ३ ऋध्यासम् ॥१॥ ८
अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पितास ।
अहꣳ सूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यत् ॥२॥ ९
अग्ने वाक्पत्नि सजूर्देवेन त्वष्ट्रा । सोमं पिब स्वाहा ॥३॥ १०
अग्ने वाक्पत्नि सजूर्देवेन त्वष्ट्रा । सोमं पिब स्वाहा ॥३॥
प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि । प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ॥४॥(६) ११
उपयामगृहीतोऽसि हरिरसि हारियोजनो हरिभ्यां त्वा । १२
हर्योर्धाना स्थ सहसोमा इन्द्राय ॥१॥
यस्ते देव सोमाश्वसनिर्भक्षो यो गोसनिः ।
तस्य त इष्टयजुष स्तुतस्तोमस्य शस्तोक्थस्योपहूत उपहूतस्य भक्षयामि ॥२॥ (७) १३
[३९१]

युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ।
उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने ॥१॥ (८)१४
आतिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ।
उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने ॥१॥ (९)१५
इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने ॥१॥(१०)१६

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा ।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतीꣳषि सचते स षोळशी ॥१॥ १७
इन्द्रश्च सम्राड् वरुणश्च राजा तौ ते भक्षं चक्रतुरग्र एतम् ।
तयोरहमनु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्राणेन स्वाहा॥२॥(११)१८

अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ।
उपयामगृहीतोऽस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे ।
अग्ने वर्चस्वन्वर्चस्वाꣳस्त्वं देवेष्वसि । वर्चस्वानहं मनुष्येषु भूयासम् ॥१॥ (१२) १९

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ।
उपयामगृहीतोऽस्यग्नये त्वा वर्चस एष ते योनिरग्नये त्वा वर्चसे ।
अग्ने वर्चस्वन्वर्चस्वाꣳस्त्वं देवेष्वसि । वर्चस्वानहं मनुष्येषु भूयासम् ॥१॥ (१३) २०

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वौजस एष ते योनिरिन्द्राय त्वौजसे ।
इन्द्रौजिस्वन्नोजस्वाꣳस्त्वं देवेष्वसि । ओजस्वानहं मनुष्येषु भूयासम् ॥१॥ (१४) २१

अदृश्रमस्य केतवो वि रश्मयो जनाँ३ अनु । भ्राजन्तो अग्नयो यथा ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे ।
सूर्य भ्राजस्वन्भ्राजस्वाꣳस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ॥१॥ (१५) २२

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे ।
सूर्य भ्राजस्वन्भ्राजस्वाꣳस्त्वं देवेष्वसि । भ्राजस्वानहं मनुष्येषु भूयासम् ॥१॥(१६) २३
[४०१]

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ।
उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते योनिः सूर्याय त्वा भ्राजे ।
सूर्य भ्राजस्वन्भ्राजस्वाꣳस्त्वं देवेष्वसि ।
भ्राजस्वानहं मनुष्येषु भूयासम् ॥१॥ (१७) २४

वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माꣳ३ अभिदासत्यधरं गमया तमः ।
उपयामगृहीतोऽसीन्द्राय त्वा विमृध एष ते योनिरिन्द्राय त्वा विमृधे ॥१॥ (१८) २५

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥१॥ (१९) २६

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥१॥ (२०) २७

विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ।
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥१॥ (२१) २८

उपयामगृहीतोऽस्यग्नये त्वा गायत्रछन्दसं गृह्णामीन्द्राय त्वा त्रिष्टुप्छन्दसं गृह्णामि ।
विश्वेभ्यस्त्वा देवेभ्यो जगच्छन्दसं गृह्णाम्यनुष्टुप्तेऽभिगरः ॥१॥ २९
प्रेष्णीनां त्वा पत्मन्नाधूनोमि कुकूननानां त्वा पत्मन्नाधूनोमि
भन्दनानां त्वा पत्मन्नाधूनोमि मदिन्तमानां त्वा पत्मन्नाधूनोमि ।
शुक्रं त्वा शुक्र आधूनोम्यह्नो रूपे सूर्यस्य रश्मिषु ॥२॥ ३०
ककुहꣳ रूपं वृषभस्य रोचते बृहत्सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः ।
यत्ते सोमादाभ्यं नाम जागृवि तस्मै त्वा गृह्णामि तस्मै ते सोम सोमाय स्वाहा ॥३॥ ३१ [४११]

उशिक् त्वं देव सोमाग्नेः प्रियं पाथोऽपीहि वशी त्वं देव सोमेन्द्रस्य प्रियं पाथोऽपीहि ।
अस्मत्सखा त्वं देव सोम विश्वेषां देवानां प्रियं पाथोऽपीहि ॥४॥ (२२) ३२ [४१२]

कदाचन तिस्रः ॥ ३ ॥ अदस्मत्येका ॥ १ ॥ वाममद्येका ॥ १ ॥ सावित्र एका ॥ १ ॥ सुशर्मेत्येका ॥ १ ॥
बृहस्पतिसुतस्त्रः ॥ ४ ॥ हरिरसि द्वे ॥ २ ॥ युक्ष्वा ह्येका ॥ १ ॥ आतिष्ठैका ॥ १ ॥ इन्द्रमित्येकैका ॥ १ ॥
यस्माच्च जात इति द्वे ॥ २ ॥ अग्न आयूंष्येका ॥१॥ अग्ने पवस्वैका ॥ १ ॥ उत्तिष्ठन्नेका ॥ १ ॥
अदब्धेनेका ॥१॥ उदुत्यमेका ॥ १ ॥ चित्रमेका ॥१॥ वि न एका ॥१॥ वाचस्पतिमेका ॥१॥
विश्वकर्मन्नेका ॥ १ ॥ विश्वकर्मन्नित्येका ॥ १ ॥ अग्नये त्वा चतस्रः ॥ ४ ॥
द्वाविंशत्यनुवाकेषु द्वात्रिंशत् ॥ ३२ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां अष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

प्राणाय मे वर्चोदा वर्चसे पवस्व व्यानाय मे वर्चोदा वर्चसे पवस्व ।
उदानाय मे वर्चोदा वर्चसे पवस्व वाचे मे वर्चोदा वर्चसे पवस्व ॥१॥ १
क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्व श्रोत्राय मे वर्चोदा वर्चसे पवस्व ।
चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथाम् ॥२॥ २
आत्मने मे वर्चोदा वर्चसे पवस्वौजसे मे वर्चोदा वर्चसे पवस्वायुषे मे वर्चोदा वर्चसे पवस्व ।
विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथाम् ॥३॥ ३
कोऽसि कतमोऽसि कस्यासि को नामासि ।
यस्य ते नामामन्महि यं त्वा सोमेनातीतृपाम ॥४॥ ४
भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् । सुवीरो वीरैः सुपोषः पोषैः ॥५॥ (१) ५

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥१॥ ६
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥२॥ ७
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥३॥ ८
अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजाञ्जयतु वाजसाता अयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥४॥ ९ [४२१]

रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु ।
ऋतस्य पथा प्रेत चन्द्रदक्षिणाः ॥४॥ १०
वि स्वः पश्य व्यन्तरिक्षं यतस्व सदस्यैः ।
ब्राह्मणमद्य विदेय पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ॥५॥ ११
अस्मद्राता देवत्रा गच्छ प्रदातारमाविश ।
अग्नये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयात् ॥७॥ १२
आयुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ।
रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयात् । प्राणो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ।
बृहस्पतये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयात् । त्वग्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ।
यमाय त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीयात् ।
हयो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे ॥८॥ १३
कोऽदात्कस्मा अदात्कामोऽदात्कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते तत्रे काम सुता हनजामहे ॥९॥ (२) १४
समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवन्त्सꣳ स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाम् ॥१॥ १५
सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥२॥ १६
धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः ।
त्वष्टा विष्णुः प्रजया सꣳरराणो यजमानाय द्रविणं दधातु ॥३॥ १७
सुगा वो देवाः सदना अकर्म य आजग्मेदꣳ सवनं जुषाणाः ।
भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि ॥४॥ १८
याꣳ३ आवह उशतो देव देवाꣳस्तान्प्रेरय स्वे अग्ने सधस्थे ।
जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽसुं घर्मꣳ स्वरातिष्ठतानु ॥५॥ १९
वयꣳ हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगया ऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान् ॥६॥ २०
देवा गातुविदो गातुं वित्त्वा गातुमित । मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः ॥७॥ २१
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा ।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा ॥८॥ (३) २२ [४३४]

माहिर्भूर्मा पृदाकुः । उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ।
नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥१॥ २३
अग्नेरनीकमप आविवेशापां नपात् प्रतिरक्षन्नसुर्यम् ।
दमेदमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत् स्वाहा ॥२॥ २४
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत् स्वाहा ॥३॥ २५
देवीराप एष वो गर्भस्तꣳ सुप्रीतꣳ सुभृतं बिभृत ।
देव सोमैष ते लोकः परि च वक्षि शं च वक्षि । अवभृथ निचुम्पुण निचेरुरसि निचुम्पुण ।
अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।
देवानाꣳ समिदसि ॥४॥ (४) २६

एजतु दशमास्यो गर्भो जरायुणा सह ।
यथायं वायुरेजति यथा समुद्र एजत्येवायं दशमास्यो अस्रज्जरायुणा सह ॥१॥ २७
यस्यास्ते यज्ञियो गर्भो यस्या योनिर्हिरण्ययी ।
अङ्गान्यह्रुता यस्य तं मात्रा समजीगमꣳ स्वाहा ॥२॥ २८
पुरुदस्मो विषुरूप इन्दुरन्तर्महिमानमानञ्ज धीरः ।
एकपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानु प्रथन्ताꣳ स्वाहा ॥३॥ २९
मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥४॥ ३०
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥५॥ (५) ३१

आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः ।
पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥१॥ ३२
इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिते सरस्वति महि विश्रुति ।
एता ते अघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूतात् ॥२॥ ३३
इह रतिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहा ।
उपसृजं धरुणं मात्रे धरुणो मातरं धयन्रायस्पोषमस्मासु दीधरत् स्वाहा ॥३॥ ३४
अगन्म ज्योतिरमृता अभूम दिवं पृथिव्या अध्यारुहाम ।
अविदाम देवान्त्स्वर्ज्योतिः ॥४॥ ३५ [४४७]

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम् ।
दूरे चत्ताय छन्त्सद्गहनं यदिनक्षदस्माकꣳ शत्रून् परि शूर विश्वतो दर्मा दर्शीष्ट विश्वतः ॥५॥ ३६
भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम् । सुवीरो वीरैः सुपोषः पोषैः ॥६॥ (६) ३७

परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायामन्धो अच्छेतः सविता सन्याम् ।
विश्वकर्मा दीक्षायां पूषा सोमक्रयण्याम् ॥१॥ ३८
इन्द्रश्च मरुतश्च क्रयायोपोत्थितः । असुरः पण्यमानो मित्रः क्रीतः ॥२॥ ३९
विष्णुः शिपिविष्ट ऊरा आसन्नो विष्णुर्नरन्धिषः प्रोह्यमाणः ।
सोम आगतो वरुण आसन्द्यामासन्नः ॥३॥ ४०
अग्निराग्नीध्र इन्द्रो हविर्धाने । अथर्वोपावह्रियमाणो विश्वे देवा अꣳशुषु न्युप्यमानेषु ॥४॥ ४१
विष्णुराप्रीतपा आप्याय्यमानो यमः सूयमानो विष्णुः संभ्रियमाणः । वायुः पूयमानः शुक्रः पूतः ५।४२
शुक्रः क्षीरश्रीर्मन्थी सक्तुश्रीः । विश्वे देवाश्चमसेषून्नीतोऽसुर्होमायोद्यतः ॥६॥ ४३
रुद्रो हूयमानो वातोऽभ्यावृत्तो नृचक्षाः प्रतिख्यातो भक्षः पीतः पितरो नाराशꣳसाः साद्यमानः ।
सिन्धुरवभृथायोद्यतः समुद्रोऽभ्यवह्रियमाणः सलिलः प्रप्लुतः । ॥७॥ ४४
ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा ।
या पत्येते अप्रतीता सहोभिर्विष्णू अगन्वरुणा पूर्वहूतौ ॥८॥ ४५
देवान् दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु ।
पितॄन् पृथिवीमगन्यज्ञः ततो मा द्रविणमष्टु यं कं च
लोकमगन्यज्ञस्ततो मे भद्रमभूत् ॥९॥ (७) ४६ [४५८]

प्राणाय मे पञ्च ॥५॥ उदु त्यं न व ॥९॥ समिद्ध णोऽद्य ॥८॥ माहिश्चतस्रः ॥४॥ एजतु दशमास्य पञ्च ॥५॥
आजिघ्र षट् ॥ ६ ॥ परमेष्ठी नव ॥ ९ ॥ सप्तानुवाकेषु षट्चत्वारिंशत् ॥ ४६ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

देव सवितः प्रसुव यज्ञं प्रसुवेमं भगाय ।
दिव्यो गन्धर्वः केतपाः केतं नः पुनातु वाचस्पतिर्नो अद्य वाजꣳ स्वदतु ॥१॥ १
ध्रुवसदं त्वा नृषदं मनःसदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥२॥ २ [४६०]
५

अप्सुषदं त्वा घृतसदं व्योमसदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।
पृथिविसदं त्वाऽन्तरिक्षसदं दिविसदं देवसदं नाकसदम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥३॥ ३
अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् । अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥४॥ ४
ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशिप्रियाणां वोऽहमिषमूर्जꣳ समग्रभम् ।
उपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥५॥ ५
संपृचः स्थ सं मा भद्रेण पृङ्क्त । विपृचः स्थ वि मा पाप्मना पृङ्क्त ॥६॥ (१) ६

इन्द्रस्य वज्रोऽसि वाजसास्त्वयाऽयं वाजꣳ सेत् ।
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥१॥ ७
देवीरापो अपांनपाद्यो व ऊर्मिः प्रतूर्तिः । ककुन्मान् वाजसास्तेनायं वाजꣳ सेत् ॥२॥ ८
अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिभिः । अश्वा भवत वाजिनः ॥३॥ ९
वातो वा मनो वा गन्धर्वाः सप्तविꣳशतिः । ते अग्रेऽश्वमयुञ्जꣳस्ते अस्मिञ्जवमादधुः ॥४॥ १०
वातरꣳहा भव वाजिन्युज्यमान इन्द्रस्येव दक्षिणः श्रियैधि ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ॥५॥ ११
जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तो अचरच्च वाते ।
तेन नो वाजिन् बलवान् बलेन वाजजिच्चैधि समने च पारयिष्णुः ॥६॥ १२
वाजिनो वाजजितो वाजꣳ सरिष्यन्तः । बृहस्पतेर्भागमवजिघ्रत ॥७॥ (२) १३

देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेरुत्तमं नाकꣳ रुहेमेन्द्रस्योत्तमं नाकꣳ रुहेम ।
देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेरुत्तमं नाकमरुहामेन्द्रस्योत्तमं नाकमरुहाम ॥१॥ १४
बृहस्पते वाजं जय बृहस्पतये वाचं वदत । बृहस्पतिं वाजं जापयत ॥२॥ १५
इन्द्र वाजं जयेन्द्राय वाचं वदत । इन्द्रं वाजं जापयत ॥३॥ १६
एषा वः सा सत्या संवागभूद्यया बृहस्पतिं वाजमजीजपत ।
आजीजपत बृहस्पतिं वाचं वनस्पतयो विमुच्यध्वम् ॥४॥ १७
देवस्य वयꣳ सवितुः सवे सत्यसवसः । बृहस्पतेर्वाजजितो वाजं जेष्म ॥५॥ १८ [४७१]

वाजिनो वाजं जयताध्वन स्कभ्नन्तः । योजना मिमानाः काष्ठां गच्छत ॥६॥ १९
एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु सन्तवीत्वत्पथामङ्काꣳस्यन्वापनीफणत् ॥७॥ २०
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥८॥ २१
शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन्नमीवाः ॥९॥ २२
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता इव त्मना महो ये धनꣳ समिथेषु जभ्रिरे ॥१०॥ २३
वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥११॥ २४
आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वाय गम्यात् ॥१२॥ २५
वाजिनो वाजजितो वाजꣳ ससृवाꣳसः । बृहस्पतेर्भागमवजिघ्रत निमृजानाः ॥१३॥ (३) २६

आपये स्वाहा स्वापये स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा । वसवे स्वाहाऽहर्पतये स्वाहा ।
आह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय स्वाहान्त्याय
भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा ॥१॥ २७
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पताम् ।
पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥२॥ २८
प्रजापतेः प्रजा अभूम स्वर्देवा अगन्मामृता अभूम ॥३॥ २९
जाय एहि स्वो रोहाव । अस्मे वो अस्त्विन्द्रियमस्मे नृम्णमुत क्रतुः । अस्मे वर्चाꣳसि सन्तु वः ॥४॥ ३०
नमो मात्रे पृथिव्या इयं ते राड्यन्तासि यमनः ।
ध्रुवोऽसि धरुणः कृष्यै क्षेमाय रय्यै पोषाय ॥५॥ (४) ३१

वाजस्येमं प्रसवः सुषुवेऽग्रे सोमꣳ राजानमोषधीष्वप्सु ।
ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः ॥१॥ ३२
वाजस्येदं प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः ।
सनेमि राजा परियाति विद्वान् रयिं पुष्टिं वर्धयमानो अस्मे ॥२॥ ३३ [४९१]

वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट् ।
अदित्सन्तं दापयति प्रजानन्त्स नो रयिꣳ सर्ववीरं नियच्छतु ॥३॥ ३४
अग्ने अच्छावदेह नः प्रति नः सुमना भव ।
प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदा असि ॥४॥ ३५
सोमꣳ राजानमवसेऽग्निमन्वारभामहे । आदित्यं विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥५॥ ३६
प्र नो यच्छत्वर्यमा प्र पूषा प्र सरस्वती । प्र वाग्देवी ददातु नः ॥६॥ ३७
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय । वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनम् ॥७॥ ३८
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रे दधामि ।
बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामि ॥८॥ (५) ३९

अग्निरेकाक्षरेण प्राणमुदजयत् तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयतां तानुज्जेषम् ।
विष्णुस्त्र्यक्षरेण त्रीनिमाँल्लोकानुदजयत्तानुज्जेषꣳ सोमश्चतुरक्षरेण
चतुष्पदः पशूनुदजयत्तानुज्जेषम् ॥१॥ ४०
पूषा पञ्चाक्षरेण पञ्च ऋतूनुदजयत्तानुज्जेषꣳ सविता षडक्षरेण षड्ऋतूनुदजयत्तानुज्जेषम् ॥
मरुतः सप्ताक्षरेण सप्त ग्राम्यान् पशूनुदजयꣳस्तानुज्जेषं
बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥२॥ ४१
मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत् तमुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषम् ।
इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषं विश्वे
देवा द्वादशाक्षरेण जगतीमुदजयꣳस्तामुज्जेषम् ॥३॥ ४२
वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयꣳस्तमुज्जेषꣳ
रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयꣳस्तमुज्जेषम् ।
आदित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयꣳस्तमुज्जेष-
मदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषम् ।
प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ॥४॥ (६) ४३ [५०१]

देव सवितष्षट् ॥ ६ ॥ इन्द्रस्य वज्रः सप्त ॥ ७ ॥ देवस्य वयं त्रयोदश ॥ १३ ॥ आपये पञ्च ॥ ५ ॥
वाजस्येममष्ट ॥ ८ ॥ अग्निरेकाक्षरेण चतस्रः ॥ ४ ॥ षळनुवाकेषु त्रयश्चत्वारिंशत् ॥ ४३ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां दशमोऽध्यायः ॥ १० ॥
इति प्रथमो दशकः ॥ १ ॥

अथ द्वितीयो दशकः ॥ २ ॥

अथ प्रथमोऽध्यायः (अथैकादशोऽध्यायः)।

एष ते निर्ऋते भागस्तं जुषस्व स्वाहाऽग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा
यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा ।
विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो
वा मरुन्नेत्रेभ्यो वा देवेभ्य उत्तरसद्भ्यः स्वाहा ।
सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥१॥ १
ये देवा अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्तेभ्यः स्वाहा ।
ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा
मित्रावरुणनेत्रा वा मरुन्नेत्रा वोत्तरसदस्तेभ्यः स्वाहा ।
ये देवाः सोमनेत्रा उपरिसदो दुवस्वन्तस्तेभ्यः स्वाहा ॥२॥ २
अग्ने सहस्व पृतना अभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥३॥ ३
उपांशोर्वीर्येण जुहोमि हतꣳ रक्षः स्वाहा । रक्षसां त्वा वधायावधिष्म रक्षोऽमुष्य
त्वा वधायामुमवधिष्म । जुषाणोऽध्वाज्यस्य वेतु स्वाहा ॥४॥ (१) ४

अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः ।
याभिर्मित्रावरुणा अभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥१॥ ५
वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऊर्मिरसि राष्ट्रदा राष्ट्रममुष्मै देहि ।
वृषसेनोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥ ६ [५०७]
अर्थेत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
ओजस्वती स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
आपः परिवाहिणी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
अपां पतिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां पतिरसि राष्ट्रदा राष्ट्रममुष्मै देहि ।
अपां गर्भोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहापां गर्भोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ।
सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यवर्चस स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
सूर्यत्वच स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा सूर्यत्वच स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
व्रजक्षित स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा व्रजक्षित स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।

वाशा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा वाशा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
मान्दा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
शक्वरी स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शक्वरी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
जनभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा जनभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
विश्वभृत स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
शैष्ठा स्थ राष्ट्रदा राष्ट्रं मे दत्त स्वाहा शैष्ठा स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ।
आपः स्वाराज्ञी स्थ राष्ट्रदा राष्ट्रममुष्मै दत्त ॥३॥ ७
सं मधुमतीर्मधुमतीभिः पृच्यन्तां महि क्षत्रं क्षत्रियाय वन्वानाः ।
अनाधृष्टाः सीदत सहौजसो महि क्षत्रं क्षत्रियाय दधतीः ॥४॥ (२) ८

सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳसोमो वनस्पतीनाम् ।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥१॥ ९
इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय ।
इममुममुष्य पुत्रममुष्यै पुत्रमस्यै विशे ॥२॥ १०
एष वः कुरवो राजैष वः पञ्चाला राजा । सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥३॥ (३) ११

सोमस्य त्विषिरस्यग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा ।
पूष्णे स्वाहा बृहस्पतये स्वाहा ॥१॥ १२
इन्द्राय स्वाहाꣳशाय स्वाहा श्लोकाय स्वाहा घोषाय स्वाहा भगाय स्वाहार्यम्णे स्वाहा ।
सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥२॥ १३
सधमादो द्युम्निनीराप एता अनाधृष्टा अपस्यो वसानाः ।
पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्मातृतमास्वन्तः ॥३॥ १४
क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि ।
इन्द्रस्य वार्त्रघ्नमसि त्वयायं वृत्रं वध्यान्मित्रस्यासि वरुणस्यासि ॥४॥ १५
रुजासि द्रुवासि क्षुपासि । पातैनं प्राञ्चं पातैनं प्रत्यञ्चं पातैनं तिर्यञ्चं दिग्भ्यः पात ॥५॥ १६
आविर्मर्या आवित्तो अग्निर्गृहपतिरावित्त इन्द्रो वृद्धश्रवा
आवित्तः पूषा विश्ववेदा आवित्तौ मित्रावरुणौ धृतव्रतौ ।
आवित्ते द्यावापृथिवी विश्वशम्भू आवित्तादितिरुरुशर्मा ॥६॥ (४) १७ [५१८]

अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु ।
रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्त ऋतुर्ब्रह्म द्रविणम् ॥१॥ १८
दक्षिणामारोह त्रिष्टुप् त्वावतु । बृहत्साम पञ्चदश स्तोमो ग्रीष्म ऋतुः क्षत्रं द्रविणम् ॥२॥ १९
प्रतीचीमारोह जगती त्वावतु । वैरूपꣳ साम सप्तदश स्तोमो वर्षा ऋतुर्विड् द्रविणम् ॥३॥ २०
उदीचीमारोहानुष्टुप् त्वावतु । वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलं द्रविणम् ॥४॥ २१
ऊर्ध्वामारोह पङ्क्तिस्त्वावतु ।
शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशिशिरा ऋतू वर्चो द्रविणम् ।
प्रत्यस्तं नमुचेः शिरः ॥५॥ २२
सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात् । मृत्योः पाह्योजोऽसि सहोऽस्यमृतमसि ॥६॥ २३
हिरण्यरूपा उषसो विरोक उभा इन्द्रा उदिथः सूर्यश्च ।
आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च । मित्रोऽसि वरुणोऽसि ॥७॥ (५) २४

सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसा ।
इन्द्रस्येन्द्रियेण मरुतामोजसा क्षत्राणां क्षत्रपतिरेध्यति दिद्यून्पाहि ॥१॥ २५
इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्याय ।
इममुममुष्य पुत्रममुष्यै पुत्रमस्यै विशे ॥२॥ २६
एष वः कुरवो राजैष वः पञ्चाला राजा । सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥३॥ २७
प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः ।
ता आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनु रीयमाणाः ।
विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥४॥ २८
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥५॥ २९
रुद्र यत्ते क्रिवि परं नाम । तस्मिन्हुतमस्यमेष्टमसि स्वाहा ॥६॥ ६ ३०

इन्द्रस्य वज्रोऽसि मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि ।
अव्यथायै त्वा स्वधायै त्वारिष्टो अर्जुनः ।
मरुतां प्रसवेन जयापाम मनसा समिन्द्रियेण ॥१॥ ३१
मा त इन्द्र ते वयं तुराषाडयुक्तासो अब्रह्मता विदसाम ।
तिष्ठा रथमधि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वान् ॥२॥ ३२ [५२२]

अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा ।
इन्द्रस्येन्द्रियाय स्वाहा मरुतामोजसे स्वाहा ।
पृथिवि मातर्मा मा हिꣳसीर्मो अहं त्वाम् ॥३॥ ३३
हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥४॥ ३४
इयदस्यायुरस्यायुर्मे देहि युङ्ङसि वर्चोऽसि वर्चो मे देहि ।
ऊर्गस्यूर्जं मयि धेहीन्द्रस्य वां बाहू वीर्यकृता उपावहरामि ॥५॥ (७) ३५

स्योनासि सुषदासि क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ॥१॥ ३६
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥२॥ ३७
अभिभूरस्येतास्ते पञ्च दिशः कल्पन्ताम् । ब्रह्मꣳस्त्वं ब्रह्मासि ॥३॥ ३८
सवितासि सत्यप्रसवो वरुणोऽसि सत्यौजाः ।
इन्द्रोऽसि विशौजा रुद्रोऽसि सुशेवः ॥४॥ ३९
प्रियंकर श्रेयस्कर भूयस्कर । इन्द्रस्य वज्रोऽसि तेन मे रध्य ॥५॥ ४०
अग्निः पृथुर्धर्मणस्पतिर्जुषाणो अग्निः पृथुर्धर्मणस्पतिः । आज्यस्य हविषो वेतु स्वाहा ।
स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानां मध्यमेष्ठ्याय ॥६॥ (८) ४१

सवित्रा प्रसवित्रा सरस्वत्या वाचा । त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे ॥१॥ ४२
बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना तेजसा सोमेन राज्ञा ।
विष्णुना दशम्या देवतया प्रसूतः प्रसर्पामि ॥२॥ (९) ४३

अश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ।
वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ॥१॥ ४४
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमउक्तिं न जग्मुः ।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥२॥ ४५
युवꣳ सुराममश्विना नमुचावासुरे सचा ।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥३॥ ४६ [५३०]

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥४॥ (१०) ४७ [५४८]

एष ते चतस्रः ॥ ४ ॥ अपो देवाश्चतस्रः ॥४॥ सविता त्वा तिस्रः ॥ ३ ॥ सोमस्य त्विषि षट् ॥६॥
अवेष्टा सप्त ॥ ७ ॥ सोमस्य त्वा षट् ॥ ६ ॥ इन्द्रस्य वज्रः पञ्च ॥५॥ स्योनासि षट् ॥ ६ ॥
सवित्रा द्वे ॥ २ ॥ अश्विभ्यां चतस्रः ॥ ४ ॥ दशानुवाकेषु सप्तचत्वारिंशत् ॥४७॥

॥ इति शुक्लयजुःकाण्वसंहितायां एकादशोऽध्यायः ॥११॥

अथ द्वादशोऽध्यायः ।

युञ्जानः प्रथमं मनस्तत्वाय सविता धियः । अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥१॥ १
युक्तेन मनसा वयं देवस्य सवितुः सवे । स्वर्ग्याय शक्त्या ॥२॥ २
युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम् ।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥३॥ ३
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥४॥ ४
युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥५॥ ५
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा ।
यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना ॥६॥ ६
देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥७॥ ७
इमं नो देव सवितर्यज्ञं प्रणय देवाव्यꣳ सखिविदꣳ सत्राजितं धनजितꣳ स्वर्जितम् ।
ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरं बृहद्गायत्रवर्तनि स्वाहा ॥८॥ ८
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
आददे गायत्रेण छन्दसाङ्गिरस्वत् पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर ।
त्रैष्टुभेन छन्दसाङ्गिरस्वत् ॥९॥ ९ [५५७]

अभ्रिरसि नार्यसि त्वया वयमग्निꣳ शकेम खनितुम् ।
सधस्थ आ जागतेन छन्दसाङ्गिरस्वत् ॥१०॥ १०
हस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम् ।
अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरदानुष्टुभेन छन्दसाङ्गिरस्वत् ॥११॥ (१) ११

प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् ।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ॥१॥ १२
युञ्जाथाꣳ रासभं युवमस्मिन् यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् ॥२॥ १३
योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥३॥ १४
प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यं मयोभूरेहि ।
उर्वन्तरिक्षं वीहि स्वस्तिगव्यूतिरभयानि कृण्वन् पूष्णा सयुजा सह ॥४॥ १५
पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर ।
अग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥५॥ १६
अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥६॥ १७
आगत्य वाज्यध्वानꣳ सर्वा मृधो विधूनुते । अग्निꣳ सधस्थे महति चक्षुषा निचिकीषते ॥७॥ १८
आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् । भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम् ॥८॥ १९
द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः ।
विख्याय चक्षुषा त्वमभि तिष्ठ पृतन्यतः ॥९॥ २०
उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः ॥१०॥ २१
उदक्रमीद् द्रविणोदा वाज्यर्वाकः सुलोकꣳ सुकृतं पृथिव्याम् ।
ततः खनेम सुप्रतीकमग्निꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥११॥ २२
आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम् ॥१२॥ २३
आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषेत ।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराणः ॥१३॥ २४
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥१४॥ २५ [५७३]

परि त्वाग्ने पुरं वयं विप्रꣳ सहस्य धीमहि । धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावताम् ॥१५॥ २६
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥१६॥ (२) २७

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत् खनामि ।
ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम् ।
शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वत्खनामः ॥१॥ २८
अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥२॥ २९
शर्म च स्थो वर्म च स्थोऽछिद्रे बहुले उभे । व्यचस्वती संवसाथां भृतमग्निं पुरीष्यम् ॥३॥ ३०
संवसाथाꣳ स्वर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ।
पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥४॥ ३१
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥५॥ ३२
तमु त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरन्दरम् ॥६॥ ३३
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनञ्जयꣳ रणेरणे ॥७॥ ३४
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ।
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥८॥ ३५
नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत्सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥९॥ ३६
सꣳसीदस्व महाँ२ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥१०॥ (३) ३७
अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥१॥ ३८
सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ॥२॥ ३९
सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः । वासो अग्ने विश्वरूपꣳ संव्ययस्व विभावसो ॥३॥ ४०
उदु तिष्ठ स्वध्वरावा नो देव्या धिया ।
दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥४॥ ४१ [५८९]

ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥५॥ ४२
स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमाꣳस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः ॥६॥ ४३
स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥७॥ ४४
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी अभि शोचीर्मान्तरिक्षं मा वनस्पतीन् ॥८॥ ४५
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥९॥ ४६
वृषाग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आयाहि वीतये ।
ऋतꣳ सत्यमृतꣳ सत्यमग्निं पुरीष्यमङ्गिरस्वद्भरामः ॥१०॥ ४७
ओषधयः प्रतिमोदध्वमग्निमेतꣳ शिवमायन्तमभ्यत्र युष्माः ।
व्यस्यन् विश्वा अनिरा अमीवा निषीदन्नो अप दुर्मतिं जहि ॥११॥ ४८
ओषधयः प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः ।
अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥१२॥ ४९
वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥१३॥ (४) ५०

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥१॥ ५१
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥२॥ ५२
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥३॥ ५३
मित्रः सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह ।
सुजातं जातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजाभ्यः ॥४॥ ५४
रुद्राः सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥५॥ ५५
सꣳसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥६॥ ५६
सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥७॥ ५७
उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया ।
माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥८॥ ५८ [६०६]

मखस्य शिरोऽसि वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वद् ध्रुवासि पृथिव्यसि ।
धारया मयि प्रजाᳬं रायस्पोषं गौपत्यᳬं सुवीर्यᳬं सजातान्यजमानाय ।
रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वद् ध्रुवास्यन्तरिक्षमसि ।
धारया मयि प्रजाᳬं रायस्पोषं गौपत्यᳬं सुवीर्यᳬं सजातान्यजमानाय ।
आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वद् ध्रुवासि द्यौरसि ।
धारया मयि प्रजाᳬं रायस्पोषं गौपत्यᳬं सुवीर्यᳬं सजातान्यजमानाय ।
विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वद् ध्रुवासि दिशोऽसि ।
धारया मयि प्रजाᳬं रायस्पोषं गौपत्यᳬं सुवीर्यᳬं सजातान्यजमानाय ।
अदित्यै रास्नास्यदितिष्टे बिलं गृभ्णातु ॥९॥ ५९
कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ॥१०॥ ६०
वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत् ।
आदित्यास्त्वा धूपयन्तु जागतेन छन्दसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा
धूपयन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत् ।
इन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ॥११॥ (५) ६१

अदितिष्ट्वा देवी विश्वदेव्यावती । पृथिव्याः सधस्थे अङ्गिरस्वत् खनत्ववट ॥१॥ ६२
देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे ।
धिषणास्त्वा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखे ।
वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वच्छ्रपयन्तूखे ।
ग्नास्त्वा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे ।
जनयस्त्वाच्छिन्नपत्रा देवीर्विश्वदेव्यावतीः । पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखे ॥२॥ ६३
मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥३॥ ६४
देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या ।
अव्यथमाना पृथिव्यामाशा दिश आपृण ॥४॥ ६५
उत्थाय बृहती भवोदु तिष्ठ ध्रुवा त्वम् । मित्रैतां त उखां परिददाम्यभित्या एषा मा भेदि ।
वसवस्त्वाच्छृन्दन्तु गायत्रेण छन्दसाङ्गिरस्वद्रुद्रास्त्वाच्छृन्दन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वत् ।
आदित्यास्त्वाच्छृन्दन्तु जागतेन छन्दसाङ्गिरस्वद्विश्वे त्वा
देवा वैश्वानरा आच्छृन्दन्त्वानुष्टुभेन छन्दसाङ्गिरस्वत् ॥५॥ (६) ६६ [११४]

आकूतिमग्निं प्रयुजᳬं स्वाहा मनो मेधामग्निं प्रयुजᳬं स्वाहा ।
चित्तं विज्ञातमग्निं प्रयुजᳬं स्वाहा वाचो विधृतिमग्निं प्रयुजᳬं स्वाहा ।
प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा ॥१॥ ६७
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥२॥ ६८
मा सु भित्था मा सु रिषोऽम्ब धृष्णु वीरयस्व सु । अग्निश्चेदं करिष्यथः ॥३॥ ६९
दृᳬंहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥४॥ ७०
द्रवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥५॥ ७१
परस्या अधि संवतोऽवराँ३ अभ्यातर । यत्राहमस्मि ताँ३ अव ॥६॥ ७२
परमस्याः परावतो रोहिदश्व इहागहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ॥७॥ ७३
यदग्ने कानि कानि चिदा ते दारूणि दध्मसि । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥८॥ ७४
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥९॥ ७५
अहरहरप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥१०॥ ७६
नाभा पृथिव्याः समिधाने अग्नौ रायस्पोषाय बृहते हवामहे ।
इरम्मदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥११॥ ७७
याः सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्ताᳬंस्ते अग्नेऽपिदधाम्यास्ये ॥१२॥ ७८
दᳬंष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराँ३ उत ।
हनुभ्याᳬं स्तेनान् भगवस्ताᳬंस्त्वं खाद सुखादितान् ॥१३॥ ७९
ये जनेषु मलिम्लव स्तेनासस्तस्करा वने ।
ये कक्षेष्वघायवस्ताᳬंस्ते दधामि जम्भयोः ॥१४॥ ८०
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान्धिप्साच्च सर्वं तं मस्मसा कुरु ॥१५॥ ८१
सᳬंशितं मे ब्रह्म सᳬंशितं वीर्यं बलम् । सᳬंशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥१६॥ ८२
उदेषां बाहू अतिरमुद्वर्चो अथो बलम् । क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ३ अहम् ॥१७॥ ८३
अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । विश्वकर्मणे स्वाहा ॥१८॥ ८४[११९]

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥१९॥ (७) ८५ [१३३]

युञ्जान एकादश ॥ ११ ॥ प्रतूर्तं वाजिन् षोडश ॥ १६ ॥ देवस्य त्वा दश ॥ १० ॥ अपो देवीस्त्रि-
षोडश ॥ १६ ॥ मापो एकादश ॥ ११ ॥ अदितिष्ट्वा पञ्च ॥ ५ ॥ आकूतिमेकोनविंशतिः
॥ १९ ॥ सप्तानुवाकेषु पञ्चाशीतिः ॥ ८५ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां द्वादशोऽध्यायः ॥१२॥

अथ त्रयोदशोऽध्यायः ।

दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥१॥ १
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकᳬं समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन्द्रविणोदाः ॥२॥ २
विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥३॥ ३
सुपर्णोऽसि गरुत्माᳬंस्त्रिवृत्ते शिरः । गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ ॥४॥ ४
स्तोम आत्मा छन्दाᳬंस्यङ्गानि यजूᳬंषि नाम ।
साम ते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः ॥५॥ ५
सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत ।
विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आरोह । पृथिवीमनु विक्रमस्व ।
विष्णोः क्रमोऽस्यभिमातिहा त्रैष्टुभं छन्द आरोह । अन्तरिक्षमनु विक्रमस्व ।
विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आरोह । दिवमनु विक्रमस्व ।
विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्द आरोह । दिशोऽनु विक्रमस्व ॥६॥ ६
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥७॥ ७
अग्नेऽभ्यावर्तिन्नभि मा निवर्तस्वायुषा वर्चसा प्रजया धनेन ।
सन्या मेधया रय्या पोषेण ॥८॥ ८
अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः ।
अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥९॥ ९ [१४२]

पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यᳬंहसः ॥१०॥ १०
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥११॥ ११
आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥१२॥ १२
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमᳬं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥१३॥ १३
अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात् ।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥१४॥ १४
हᳬंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥१५॥ १५
सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनां तपसा मार्चिषाभिशोचीरन्तरस्याᳬं शुक्रज्योतिर्विभाहि ॥१६॥ १६
अन्तरग्ने रुचा त्वमुखायाः सदने स्वे । तस्यास्त्वᳬं हरसा तपञ्जातवेदः शिवो भव ॥१७॥ १७
शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥१८(१)॥ १८

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥१॥ १९
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥२॥ २०
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवाᳬंसमपामुपस्थे महिषा अवर्धन् ॥३॥ २१
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥४॥ २२
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥५॥ २३
विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायञ्जना यदग्निमयजन्त पञ्च ॥
उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो निधायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥ २५ [१५८]

दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥८॥ २६
यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥९॥ २७
आ तं भज सौश्रवसेष्वग्न उक्थ उक्थ आभज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥१०॥ २८
त्वामग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः ॥११॥ २९
अस्ताव्यग्निर्नरा॑ सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥१२॥ (२) ३०

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥१॥ ३१
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्व॑ सुप्रतीको विभावसुः ॥२॥ ३२
प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्ट्वम् । बृहद्भिर्भानुभिर्भासन्मा हिं॑सीस्तन्वा प्रजाः॥३॥ ३३
अक्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥४॥ ३४
प्र प्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥५॥ ३५
आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्व॑ सुरभा उ लोके ।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृताप्स्वेनत् ॥६॥ ३६
अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥७॥ ३७
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥८॥ ३८
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने। स॑सृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासदः॥९॥ ३९
पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्या॑ शिवतमः ॥१०॥ ४०
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्य॑हसः ॥११॥ ४१
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥१२॥ ४२
बोधा मे अस्य वचसो यविष्ठ म॑हिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुष्टे तन्वं वन्दे अग्ने ॥१३॥ ४३ [६७६]

७

स बोधि सूरिर्मघवा वसुपते वसुदावन् । युयोध्यस्मद्द्वेषा॑सि विश्वकर्मणे स्वाहा ॥१४॥ ४४
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥१५॥ (३) ४५

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदाद्यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥१॥ ४६
संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् । अग्नेर्भस्मास्यग्नेः पुरीषमसि ।
चित स्थ परिचित ऊर्ध्वचितः श्रयध्वम् ॥२॥ ४७
अय॑ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रियं वाजमत्यं न सप्ति॑ ससवान्त्सन्त्स्तूयसे जातवेदः ॥३॥ ४८
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥४॥ ४९
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ३ ऊचिषे धिष्ण्या ये ।
या रोचने परस्तात् सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥५॥ ५०
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्तां यज्ञमद्रुहोऽनमीवा इषो महीः ॥६॥ ५१
इडामग्ने पुरुद॑सं॑ सनिं गोः शश्वत्तम॑ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥७॥ ५२
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्धया रयिम् ॥८॥ ५३
चिदसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद । परिचिदसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥९॥ ५४
लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योना असीषदन् ॥१०॥ ५५
ता अस्य सूददोहसः सोम॑ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥११॥ ५६
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतम॑ रथीनां वाजाना॑ सत्पतिं पतिम् ॥१२॥ ५७
समितं॑ संकल्पेथा॑ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ ॥१३॥ ५८
सं वां मना॑सि सं व्रता समु चित्तान्याकरम् ।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ॥१४॥ ५९
अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ३ असि । शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः ॥१५॥ ६०
भवतं नः समनसौ सचेतसा अरेपसौ ।
मा यज्ञ॑ हि॑सिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥१६॥ ६१ [६९४]

मातेव पुत्रं पृथिवी पुरीष्यमग्नि॑ स्वे योना अभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु ॥१७॥(४) ६२

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥१॥ ६३
नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमे नाके अधिरोहयैनम् ॥२॥ ६४
यस्यास्ते घोर आसञ्जुहोम्येषां बन्धानामवसर्जनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परिवेद विश्वतः ॥३॥ ६५
यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तं ते विष्याम्यायुषो न मध्यादथैतं पितुमद्धि प्रसूतः । नमो भूत्यै येदं चकार ॥४॥ ६६
निवेशनः सङ्गमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः ।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥५॥ ६७
सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ॥६॥ ६८
युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥७॥ ६९
शुन॑ सु फाला वि कृषन्तु भूमि॑ शुनं कीनाशा अभियन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तमस्मे ॥८॥ ७०
घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानास्मान्त्सीते पयसाभ्याववृत्स्व ॥९॥ ७१
लाङ्गलं पवीरवत्सुशेव॑ सोमपित्सरु ।
तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहणम् ॥१०॥ ७२
तदुद्वपति गामविं प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहणम् ॥१०॥ ७२
कामं कामदुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः ॥११॥ ७३
विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य । ज्योतिरापाम ॥१२॥ ७४
सजूरब्दो अयवोभिः सजूरुषा अरुणीभिः ।
सजोषसा अश्विना द॑सोभिः सजूः सूर एतशेन सजूर्वैश्वानर इडया घृतेन स्वाहा ॥१३॥(५) ७५
या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामह॑ शतं धामानि सप्त च ॥१॥ ७६
शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥ ७७
[७१०]

ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥३॥ ७८
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे । सनेयमश्वं गां वास आत्मानं तव पूरुष ॥४॥ ७९
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥५॥ ८०
यत्रौषधीः समग्मत राजानः समिताविव । विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥६॥ ८१
अश्वावती॑ सोमावतीमूर्जयन्तीमुदोजसम् । आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥ ८२
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धन॑ सनिष्यन्तीनामात्मानं तव पूरुष ॥८॥ ८३
इष्कृतिर्नाम वो माताथो यूय॑ स्थ निष्कृतीः ।
सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥९॥ ८४
अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः । ओषधीः प्राचुच्यवुर्यत्किं च तन्वो रपः ॥१०॥ ८५
यदिमा वाजयन्नहमोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥ ८६
यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥१२॥ ८७
साकं यक्ष्म प्र पत चाषेण किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१३॥ ८८
अन्या वो अन्यामवत्वन्यान्यस्या उपावत । ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥१४॥ ८९
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व॑हसः ॥१५॥ ९०
मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥१६॥ ९१
अवपतन्तीरवदन्दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥१७॥ ९२
या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः । तासामसि त्वमुत्तमारं कामाय श॑ हृदे ॥१८॥ ९३
या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु । बृहस्पतिप्रसूता अस्यै संदत्त वीर्यम् ॥१९॥ ९४
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । सर्वाः संगत्य वीरुधोऽस्यै संदत्त वीर्यम् ॥२०॥ ९५
नाशयित्री बलासस्यार्शस उपचितामसि । अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥२१॥ ९६
मा वो रिषत् खनिता यस्मै चाहं खनामि वः । द्विपच्चतुष्पदस्माक॑ सर्वमस्त्वनातुरम् ॥२२॥ ९७
ओषधयः संवदन्ते सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्त॑ राजन् पारयामसि ॥२३॥ ९८
त्वां गन्धर्वा अखन॑स्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ॥२४॥ ९९
त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकं यो अस्माँ३ अभिदासति ॥२५॥ (६) १०० [७१३]

मा मां हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा व्यानट् ।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥१॥ १०१
अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितो अरोहत् ॥२॥ १०२
अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ॥३॥ १०३
इषमूर्जमहमित आदमृतस्य योनिं महिषस्य धाराम् ।
आ मा गोषु विशत्वा तनूषु जहामि सेदिमनिरामममीवाम् ॥४॥ १०४
अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥५॥ १०५
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥६॥ १०६
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः सन्दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥७॥ १०७
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं क्रतुम् ॥८॥ १०८
इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिꣳ रयिम् ॥९॥ १०९
ऋतावानं महिषं विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो जनाः ॥
श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥१०॥ ११०
आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥११॥ १११
सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥१२॥ ११२
आप्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः । भवा नः सप्रथस्तमः सखा वृधे ॥१३॥ ११३
आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् । अग्ने त्वां कामया गिरा ॥१४॥ ११४
तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥१५॥ ११५
अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य । सम्राडेको विराजति ॥१६॥(७) ११६ [७४९]

दशानोऽष्टादश ॥१८॥ दिवस्परि द्वादश ॥१२॥ समिधाग्निं दुवः पञ्चदश ॥१५॥ अपेत सप्तदश ॥ १७ ॥
अप्सुन्वस्त्रं त्रयोदश ॥ १३ ॥ या ओषधीः पञ्चविंशतिः ॥ २५ ॥ मा मा षोडश ॥ १६ ॥
सप्तानुवाकेषु षोडशोत्तरं शतम् ॥ ११६ ॥ इति शुक्लयजुःकाण्वसंहितायां त्रयोदशोऽध्यायः ॥१३॥

अथ चतुर्दशोऽध्यायः ।

मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । मामु देवताः सचन्ताम्॥१॥ १
अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानो महाँ२ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व ॥२॥ २
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥३॥ ३
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥४॥ ४
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥५॥ ५
नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥६॥ ६
या इषवो यातुधानानां ये वा वनस्पतीꣳरनु । ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥७॥ ७
ये वामी रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥८॥ ८
कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ२ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥९॥ ९
तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ॥१०॥ १०
प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशꣳसो यो अन्त्यग्ने मा किष्टे व्यथिरादधर्षीत् ॥११॥ ११
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ२ ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥१२॥ १२
ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥१३॥ १३
अग्नेष्ट्वा तेजसा सादयामि । अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपाꣳ रेताꣳसि जिन्वति । इन्द्रस्य त्वौजसा सादयामि ॥१४॥ १४
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥१५॥ (१) १५ [७६४]

ध्रुवासि धरुणास्तृता विश्वकर्मणा ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमानां पृथिवीं दृꣳह ॥१॥ १६
प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन् । व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥२॥ १७
भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥३॥ १८
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥४॥ १९
काण्डात्काण्डात्प्ररोहन्ती परुषः-परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥५॥ २०
या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥६॥ २१
यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥७॥ २२
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥८॥ २३
विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् ।
प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम् ॥९॥ २४
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
अग्निष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥१०॥ २५
मधुश्च माधवश्च वासन्तिका ऋतू अग्नेरन्तःश्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव
देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥११॥ २६
अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः । सहस्रवीर्यासि सा मा जिन्व ॥१२॥ २७
सहस्वेमा अभिमातीः सहस्व पृतनायतः । सहस्व सर्वं पाप्मानꣳ सहमानास्योषधे ॥१३॥ (२) २८
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥१॥ २९
मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥२॥ ३०
मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥३॥ ३१ [७८०]

अपां गम्भन्त्सीद मा त्वा सूर्योऽभिताप्सीन्माग्निर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजा अनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ॥४॥ ३२
त्रीन्त्समुद्रान्त्समसृपत् स्वर्गानपां पतिर्वृषभ इष्टकानाम् ।
पुरीषं वसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥५॥ ३३
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥६॥ ३४
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥७॥ ३५
ध्रुवासि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्यो अधि जातवेदाः ।
स गायत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यं वहतु प्रजानन् ॥८॥ ३६
इषे राये रमस्व सहसे द्युम्न ऊर्जे अपत्याय ।
सम्राडसि स्वराडसि सारस्वतौ त्वोत्सौ प्रावताम् ॥९॥ ३७
अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ॥१०॥ ३८
युक्ष्वा हि देवहूतमाँ२ अश्वाँ२ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥११॥ (३) ३९
सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्ये अग्नेः ॥१॥ ४०
ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा ।
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥२॥ ४१
अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् । सहस्रदा असि सहस्राय त्वा ॥३॥ ४२
आदित्यं गर्भं पयसा समङ्धि सहस्रस्य प्रतिमां विश्वरूपम् ।
परिवृङ्धि हरसा माभिमꣳस्थाः शतायुषं कृणुहि चीयमानः ॥४॥ ४३
वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥५॥ ४४
अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिं विराजम् ॥६॥ ४५
वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥७॥ ४६
यो अग्निरग्नेरध्यजायत शोकात्पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥८॥ ४७ [७९६]

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्ष२ सूर्य आत्मा जगतस्तस्थुषश्च ॥९॥ (४) ४८

इमं मा हिँ२सीर्द्विपादं पशु२ सहस्राक्ष मेधाय चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो निषीद ।
मयुं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥१॥ ४९
इमं मा हिँ२सीरेकशफं पशुं कनिक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
गौरं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥२॥ ५०
इम२ साहस्र२ शतधारमुत्सं व्यच्यमान२ सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा हिँ२सीः परमे व्योमन् ।
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
गवयं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥३॥ ५१
इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिँ२सीः परमे व्योमन् ।
उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
उष्ट्रं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥४॥ ५२
अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे ।
तेन देवा देवतामग्रमाय२स्तेन रोहमायन्नुप मेध्यासः ।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
शरभं ते शुगृच्छतु यं द्विष्मस्तं ते शुगृच्छतु ॥५॥ ५३
त्वं यविष्ठ दाशुषो नॄ२ पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥६॥(५) ५४ [८०३]

अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयामि ।
अपां त्वा ज्योतिषि सादयाम्यपां त्वायने सादयामि ।
अर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि सरिरे त्वा सदने सादयामि ।
अपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयामि ।
अपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सादयामि ।

अपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि ।
गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयामि ।
आनुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्दसा सादयामि ॥१॥ (६) ५५
अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनः । गायत्री वासन्ती ॥१॥ ५६
गायत्र्यै गायत्रं गायत्रादुपा२शुरुपा२शोस्त्रिवृत् त्रिवृतो रथन्तरम् ।
वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः ॥२॥ ५७
अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणम् । ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी ॥३॥ ५८
त्रिष्टुभः स्वार२ स्वारादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद् बृहत् ।
भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥४॥ ५९
अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसम् । वर्षाश्चाक्षुष्यो जगती वार्षी ॥५॥ ६०
जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपम् ।
जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥६॥ ६१
इदमुत्तरात् स्वस्तस्य श्रोत्र२ सौवम् । शरच्छ्रौत्र्यनुष्टुप्छारदी ॥७॥ ६२
अनुष्टुभ ऐडमैडान्मन्थी मन्थिन एकवि२श एकवि२शाद्वैराजम् ।
विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥८॥ ६३
इयमुपरि मतिस्तस्यै वाङ्मात्या । हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती ॥९॥ ६४
पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात् त्रिणवत्रयस्त्रि२शौ त्रिणवत्रयस्त्रि२शाभ्या२ शाक्वररैवते ।
विश्वकर्म ऋषिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ।
लोकं पृण ता अस्येन्द्रं विश्वाः ॥१०॥ (७) ६५ [८१४]

मयि गृह्णामि पञ्चदश ॥१५॥ ध्रुवासि त्रयोदश ॥१३॥ मधुवाता एकादश ॥११॥ सम्यक्स्रवन्ति नव ॥९॥ इमं मा षट् ॥६॥ अपान्त्वेकां ॥१॥ अयं पुरो दश ॥१०॥ सप्तानुवाकेषु पञ्चषष्टिः ॥ ६५ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साधुया ।
उख्यस्य केतुं प्रथमं जुषाणाश्विनाध्वर्यू सादयतामिह त्वा ॥१॥ १
कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा ॥२॥ २ [८१६]

स्वैर्दक्षैर्दक्षपितेह सीद देवाना२ सुम्ने बृहते रणाय ।
पितेवैधि सूनव आ सुशेवा स्वावेशा तन्वा संविशस्वाश्विनाध्वर्यू सादयतामिह त्वा ॥३॥ ३
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू सादयतामिह त्वा ॥४॥ ४
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशामधिपत्नीं भुवनानाम् ।
ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा ।
शुक्रश्च शुचिश्च ग्रैष्मा ऋतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
ग्रैष्मा ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु
तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥५॥(१) ५

सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैः ।
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैः । ६
अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥१॥
प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि । चक्षुर्म उर्व्या विभाहि श्रोत्रं मे श्लोकय ॥२॥ ७
अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि । दिवो वृष्टिमेरय ॥३॥ (२) ८

मूर्धा वयः प्रजापतिश्छन्दः क्षत्रं वयो मयन्दं छन्दः ।
विष्टम्भो वयोऽधिपतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दः ॥१॥ ९
बस्तो वयो विबलं छन्दो वृष्णिर्वयो विशालं छन्दः ।
पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः ॥२॥ १० [८२४]

सि२हो वयश्छदिश्छन्दः पष्ठवाड्वयो बृहती छन्दः ।
उक्षा वयः ककुप्छन्द ऋषभो वयः सतोबृहती छन्दः ॥३॥ ११
अनड्वान्वयः पङ्क्तिश्छन्दो धेनुर्वयो जगती छन्दः ।
त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड्वयो विराट् छन्दः ॥४॥ १२
पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वय उष्णिक् छन्दः ।
तुर्यवाड्वयोऽनुष्टुप् छन्दो लोकं पृण ता अस्येन्द्रं विश्वाः ॥५॥(३) १३
इन्द्राग्नी अव्यथमानामिष्टकां द२हतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधसे ॥१॥ १४
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीम् ।
अन्तरिक्षं यच्छान्तरिक्षं द२हान्तरिक्षं मा हिँ२सीः ।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥२॥ १५
राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक् सम्राडसि प्रतीचीदिक्
स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिक् ।
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
वायुष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ।
नभश्च नभस्यश्च वार्षिका ऋतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
वार्षिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ।
इषश्चोर्जश्च शारदा ऋतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
शारदा ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु
तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥३॥(४) १६

आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि ।
चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ॥१॥ १७ [८३१]

मा छन्दः प्रमा छन्दः प्रतिमा छन्दो अस्त्रीवयश्छन्दः । पङ्क्तिश्छन्द उष्णिक् छन्दः ॥२॥ १८
बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दः । त्रिष्टुप् छन्दो जगती छन्दः ॥३॥ १९
पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दः ।
नक्षत्राणि छन्दो वाक् छन्दः ॥४॥ २०
मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दः । अजाछन्दोऽश्वश्छन्दः ॥५॥ २१
अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता । वसवो देवता रुद्रा देवता ।
आदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवता ।
इन्द्रो देवता वरुणो देवता ॥६॥(५) २२

मूर्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी । आयुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा॥१॥२३
यन्त्री राड् यन्त्र्यसि यमनी ध्रुवासि धरित्री । इषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ।
लोकं पृण ता अस्येद्र विश्वाः ॥२॥(६) २४

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योमा सप्तदशो धरुणं एकविंशः प्रतूर्तिरष्टादशः ।
तपो नवदशोऽभीवर्तः सविंशो वर्चो द्वाविंशः सम्भरणस्त्रयोविंशो योनिश्चतुर्विंशः॥१॥ २५
गर्भाः पञ्चविंश ओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा त्रयस्त्रिंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशः ।
नाकः षट्त्रिंशो विवर्तोऽष्टाचत्वारिंशो धर्त्रं चतुष्टोमः ॥२॥ (७) २६

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमः ।
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रं स्पृतं पञ्चदश स्तोमः ॥१॥ २७
नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रं स्पृतं सप्तदश स्तोमः ।
मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्पृत एकविंश स्तोमः ॥२॥ २८
वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विंश स्तोमः ।
आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भा स्पृताः पञ्चविंश स्तोमः ॥३॥ २९
अदित्यै भागोऽसि पूष्ण आधिपत्यमोज स्पृतं त्रिणव स्तोमः ।
देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यं समीचीर्दिश स्पृताश्चतुष्टोम स्तोमः॥४॥३० [८४]
यवानां भागोऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिंश स्तोमः ।
ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं स्पृतं त्रयस्त्रिंश स्तोमः ।

सहश्च सहस्यश्च हैमन्तिका ऋतू अग्नेरन्तः श्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
हैमन्तिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु
तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥५॥ (८) ३१

एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत
ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत् ।
पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्सप्तभिरस्तुवत
सप्त ऋषयोऽसृज्यन्त धाताधिपतिरासीत् ॥१॥ ३२
नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवत
ऋतवोऽसृज्यन्तार्तवा अधिपतय आसन् ।
त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिरासीत्पञ्चदशभिरस्तुवत
क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् ॥२॥ ३३
सप्तदशभिरस्तुवत ग्राम्याः पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत
शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्ताम् ।
एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्
त्रयोविंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाधिपतिरासीत् ॥३॥ ३४
पञ्चविंशत्यास्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्सप्तविंशत्यास्तुवत
द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायंस्त एवाधिपतय आसन् ।
नवविंशत्यास्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रिंशतास्तुवत
प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसन् ।
त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् ।
लोकं पृण ता अस्येन्द्रं विश्वाः ॥४॥ (९) ३५ [८९]

भुवक्षितिः पञ्च ॥ ५ ॥ सजूरृतुभिस्तिस्रः ॥ ३ ॥ मूर्धा वयः पञ्च ॥ ५ ॥ इन्द्राग्नी तिस्रः ॥ ३ ॥ आयुर्मे षट् ॥ ६ ॥ मूर्धासि द्वे ॥ २ ॥ आशुश्च द्वे ॥ २ ॥ अग्नेर्भागः पञ्च ॥ ५ ॥ एकया चतस्रः ॥ ४ ॥

॥ नवानुवाकेषु पञ्चत्रिंशत् ॥ ३५ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां पञ्चदशोऽध्यायः ॥१५॥

अथ षोडशोऽध्यायः ।

अग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमना अहेडंस्तव स्याम शर्मंस्त्रिवरूथ उद्भौ ॥१॥ १
सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्नुद जातवेदः ।
अधि नो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान् ।
षोडशी स्तोम ओजो द्रविणं चतुश्चत्वारिंश स्तोमो वर्चो द्रविणम् ॥२॥ २
अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥३॥ ३
एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दः। आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः॥४॥ ४
सिन्धुश्छन्दः समुद्रश्छन्दः सरिरं छन्दः ।
ककुप् छन्दस्त्रिककुप् छन्दः काव्यं छन्दो अङ्कुपं छन्दः ॥५॥ ५
अक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरोभ्रजश्छन्दः।
आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दः ॥६॥ ६
बृहच्छन्दो रथन्तरं छन्दो निकायश्छन्दो विवधश्छन्दः ।
गिरश्छन्दो भ्रजश्छन्दः संस्तुप् छन्दोऽनुष्टुप् छन्दः ॥७॥ ७
एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दः ।
विष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दः । तन्द्रं छन्दो अङ्काङ्कं छन्दः ॥८॥(१)८

रश्मिना सत्याय सत्यं जिन्व प्रेतिना धर्मणा धर्मं जिन्व ।
अन्वित्या दिवा दिवं जिन्व सन्धिनान्तरिक्षेणान्तरिक्षं जिन्व ॥१॥ ९
प्रतिधिना पृथिव्या पृथिवीं जिन्व विष्टम्भेन वृष्ट्या वृष्टिं जिन्व ।
प्रवयाह्नाहर्जिन्वानुया रात्र्या रात्रीं जिन्व ॥२॥ १०
उशिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनादित्येभ्य आदित्याञ्जिन्व ।
तन्तुना रायस्पोषेण रायस्पोषं जिन्व संसर्पेण श्रुताय श्रुतं जिन्व ॥३॥ ११
ऐडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व ।
वयोधसाधीतेनाधीतं जिन्वाभिजिता तेजसा तेजो जिन्व ॥४॥ १२
प्रतिपदसि प्रतिपदे त्वानुपदस्यनुपदे त्वा । सम्पदसि सम्पदे त्वा तेजोऽसि तेजसे त्वा ॥५॥ १३
त्रिवृदसि त्रिवृते त्वा प्रवृदसि प्रवृते त्वा । विवृदसि विवृते त्वा सवृदसि सवृते त्वा॥६॥१४[८१]

आक्रमोऽस्याक्रमाय त्वा सङ्क्रमोऽसि सङ्क्रमाय त्वा ।
उत्क्रमोऽस्युत्क्रमाय त्वोत्क्रान्तिरस्युत्क्रान्त्यै त्वा ।
आधिपतिनोर्जोर्जं जिन्व वेषश्रीः क्षत्राय क्षत्रं जिन्व ॥७॥ (२) १५

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयः । अग्निर्हेतीनां प्रतिधर्ता ॥१॥ १६
त्रिवृत् त्वा स्तोमः पृथिव्यां श्रयत्वाज्यमुक्थमव्यथायै स्तभ्नातु ।
रथन्तरं साम प्रतिष्ठित्या अन्तरिक्षे ॥२॥ १७
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥३॥ १८
विराळसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतयः । इन्द्रो हेतीनां प्रतिधर्ता ॥४॥ १९
पञ्चदशस्त्वा स्तोमः पृथिव्यां श्रयतु प्र उगमुक्थमव्यथायै स्तभ्नातु।
बृहत्साम प्रतिष्ठित्या अन्तरिक्षे ॥५॥ २०
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥६॥ २१
सम्राळसि प्रतीची दिगादित्यास्ते देवा अधिपतयः । वरुणो हेतीनां प्रतिधर्ता ॥७॥ २२
सप्तदशस्त्वा स्तोमः पृथिव्यां श्रयतु मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु ।
वैरूपं साम प्रतिष्ठित्या अन्तरिक्षे ॥८॥ २३
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥९॥ २४
स्वराळस्युदीची दिङ् मरुतस्ते देवा अधिपतयः । सोमो हेतीनां प्रतिधर्ता ॥१०॥ २५
एकविंशस्त्वा स्तोमः पृथिव्यां श्रयतु निष्केवल्यमुक्थमव्यथायै स्तभ्नातु ।
वैराजं साम प्रतिष्ठित्या अन्तरिक्षे ॥११॥ २६
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१२॥२७
आधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयः । बृहस्पतिर्हेतीनां प्रतिधर्ता ॥१३॥ २८ [८७]

त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताम् ।
शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षे ॥१४॥ २९
ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु ।
विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य
पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥१५॥ (३) ३०

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्रामण्यौ ।
पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिः ॥१॥ ३१
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥२॥ ३२
अयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ ।
मेनका च सहजन्या चाप्सरसौ यातुधाना हेती रक्षाꣳसि प्रहेतिः ॥३॥ ३३
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु । ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥४॥ ३४
अयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्यौ ।
प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिः ॥५॥ ३५
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६॥ ३६
अयमुत्तरात्संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ ।
विश्वाची च घृताची चाप्सरसा आपो हेतिर्वातः प्रहेतिः ॥७॥ ३७
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥८॥ ३८
अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ ।
उर्वशी च पूर्वचित्तिश्चाप्सरसा अवस्फूर्जन्हेतिर्विद्युत्प्रहेतिः ॥९॥ ३९
तेभ्यो नमो अस्तु ते नो मृळयतु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१०॥ (४) ४०

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥१॥ ४१
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥२॥ ४२
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥३॥ ४३
[८९१]
९

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥४॥ ४४
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥५॥ ४५
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥६॥ ४६
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥७॥ ४७
जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥८॥ ४८
त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥९॥ ४९
सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥१०॥ ५०
सꣳ समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्याभर ॥११॥ ५१
त्वामग्ने हविष्मन्तो देवं मर्तास ईळते । मन्ये त्वा जातवेदसꣳ स हव्या वक्ष्यानुषक् ॥१२॥ ५२
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे ॥१३॥ ५३
एना वो अग्निं नमसोर्जो नपातमाहुवे । प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ॥१४॥५४
विश्वस्य दूतममृतं विश्वस्य दूतममृतम् । स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ॥१५॥५५
स दुद्रवत् स्वाहुतः स दुद्रवत् स्वाहुतः । सुब्रह्मा यज्ञः सुशमी वसूनां देवꣳ राधो जनानाम् ॥१६॥ ५६
अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥१७॥ ५७
स इधानो वसुष्कविरग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥१८॥ ५८
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥१९॥ ५९
भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥२०॥ ६०
भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये । येना समत्सु सासहः ॥२१॥ ६१
येना समत्सु सासहोऽव स्थिरा तनुहि भूरि शर्धताम् । वनेमा ते अभिष्टिभिः ॥२२॥ ६२
अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषꣳ स्तोतृभ्य आभर ॥२३॥ ६३ [९११]

सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आभर ॥२४॥ ६४
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आभर ॥२५॥ ६५
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः ॥२६॥ ६६
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीरृतस्य बृहतो बभूथ ॥२७॥ ६७
एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ॥२८॥ ६८
अग्निꣳ होतारं मन्ये दास्वन्तं वसुꣳ सूनुꣳ सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनुवष्टि शोचिषाजुह्वानस्य सर्पिषः ॥२९॥ ६९
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥३०॥ (५) ७०

येन ऋषयस्तपसा सत्रमायन्निन्धाना अग्निꣳ स्वराभरन्तः ।
तस्मिन्नहं निदधे नाके अग्निं यमाहुर्मनव स्तीर्णबर्हिषम् ॥१॥ ७१
तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥२॥ ७२
आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥३॥ ७३
अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमानः सरिरस्य मध्य उप प्र याहि दिव्यानि धाम ॥४॥ ७४
सम्प्रच्यवध्वमुप सम्प्रयाताग्ने पथो देवयानान् कृणुध्वम् ।
पुनः कृण्वाना पितरा युवानान्वाताꣳसीत् त्वयि तन्तुमेतम् ॥५॥ ७५
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥६॥ ७६
येन वहसि सहस्रं येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥७॥ ७७
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नग्न आरोहाथा नो वर्धया रयिम् ॥८॥(६) ७८
[९१७]

तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तःश्लेषोऽसि ।
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ।
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी इमे ।
शैशिरावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ।
परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम् ।
विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योतिर्यच्छ ।
सूर्यस्तेऽधिपतिस्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥१॥ ७९
लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥२॥८०
ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥३॥ ८१
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥४॥ ८२
प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनुवाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥५॥ ८३
आयोष्ट्वा सदने सादयाम्यवतश्छायायाꣳ समुद्रस्य हृदये ।
रश्मीवतीं भास्वतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षम् ।
परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीं प्रथस्वतीम् । दिवं यच्छ दिवं दृꣳह दिवं मा हिꣳसीः ।
विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय ।
सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद् ध्रुवे सीदतम् ॥६॥ ८४
सहस्रस्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि । साहस्रोऽसि सहस्राय त्वा ॥७॥(७)८५[९१४]

अग्ने जातानष्ट ॥ ८ ॥ रश्मिना सत्याय सप्त ॥ ७ ॥ राश्यसि पञ्चदश ॥ १५ ॥ अयं पुरो दश ॥ १० ॥
अग्निर्मूर्धा त्रिंशत् ॥ ३० ॥ येन ऋषयोऽष्ट ॥ ८ ॥ तपश्च सप्त ॥ ७ ॥
सप्तानुवाकेषु पञ्चाशीतिः ॥ ८५ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां षोडशोऽध्यायः ॥१६॥

अथ सप्तदशोऽध्यायः।

नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥१॥ १
या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥ २
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥३॥ ३
शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥४॥ ४
[९१८]

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव ॥५॥ ५
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चैनꣳरुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥६॥ ६
असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥ ७
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥८॥ ८
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥९॥ ९
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥१०॥ १०
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥११॥ ११
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥१२॥ १२
अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥१३॥ १३
नमस्त आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥१४॥ १४
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५॥ १५
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित् त्वा हवामहे ॥१६॥ (१) १६

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः ।
नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो
हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥१॥ १७
नमो बभ्लुशायाव्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमः ।
नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै वनानां पतये नमः ॥२॥ १८
नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः ।
नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमः॥३॥ १९
[१५३]

नमः कृत्स्नायताय धावते सत्वनां पतये नमो नमः
सहमानाय निव्याधिन आव्याधिनीनां पतये नमः ।
नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः॥४॥ २०
नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः ।
नमः सृकायिभ्यो जिघांꣳसद्भ्यो मुष्णतां पतये नमो
नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ॥५॥ (२) २१

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः ।
नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥१॥ २२
नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः ।
नमः शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥२॥ २३
नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः ।
नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमः ॥३॥ २४
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः ।
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥४॥ २५
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो अरथेभ्यश्च वो नमः ।
नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो अर्भकेभ्यश्च वो नमः ॥५॥ (३) २६

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः ।
नमो निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥१॥ २७
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च ।
नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥२॥ २८
नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च ।
नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥३॥ २९
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च ।
नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥४॥ ३०
नम आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च ।
नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥५॥ (४) ३१ [१५५]

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च ।
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥१॥ ३२
नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च ।
नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ॥२॥ ३३
नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च ।
नम आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥३॥ ३४
नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च ।
नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥४॥ ३५
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च ।
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥५॥ (५) ३६

नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च ।
नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥१॥ ३७
नमः कूप्याय चावट्याय च नम ईध्र्याय चातप्याय च ।
नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥२॥ ३८
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च ।
नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥३॥ ३९
नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च ।
नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च ॥४॥ ४०
नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।
नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय
च नमः शिवाय च शिवतराय च ॥५॥(६) ४१

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च।
नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥१॥ ४२
नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च ।
नमः कपर्दिने च पुलस्तिने च नम इरिण्याय च प्रपथ्याय च ॥२॥ ४३
नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च ।
नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥३॥ ४४[१५८]

नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च ।
नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च ॥४॥ ४५
नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय चाभिघ्नते च ।
नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमः ।
नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो
नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥५॥ (७) ४६

द्रापे अन्धसस्पते दरिद्र नीललोहित ।
आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाममत् ॥१॥ ४७
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥२॥ ४८
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी । शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥३॥ ४९
परि णो हेती रुद्रस्य वृज्यात् परि त्वेषस्य दुर्मतिर्महीगात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥४॥ ५०
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥५॥ ५१
विकिरिद्र विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्निवपन्तु ताः ॥६॥ ५२
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥७॥ ५३
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥८॥ ५४
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥९॥ ५५
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥१०॥५६
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥११॥५७
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१२॥ ५८
ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१३॥ ५९
ये पथां पथिरक्षय ऐलबृदा आयुर्युधः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१४॥ ६०
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१५॥ ६१
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥१६॥ ६२
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥१७॥६३
[१६०]

नमोऽस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ।
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥१८॥(८) ६४ [९९८]

नमस्ते षोळश ॥ १६ ॥ नमो हिरण्यबाहवे पञ्च ॥५॥ नम उष्णीषिणे पञ्च ॥५॥ नमस्तक्षभ्यः पञ्च ॥५॥ नमो ज्येष्ठाय पञ्च ॥५॥ नमः स्रुत्याय पञ्च ॥ ५ ॥ नमः पार्याय पञ्च ॥ ५ ॥ द्रापे अन्धसस्पत अष्टादश ॥ १८ ॥ अष्टानुवाकेषु चतुःषष्टिः ॥ ६४ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां सप्तदशोऽध्यायः ॥१७॥

अथाष्टादशोऽध्यायः ।

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्यो अधि संभृतं पयः ।
तां न इषमूर्जं धत्त मरुतः सꣳरराणा अश्मꣳस्ते क्षुन्मयि त ऊर्ग्यं द्विष्मस्तं ते शुगृच्छतु ॥१॥ १
इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च दश च शतं च शतं च ।
सहस्रं च सहस्रं चायुतं चायुतं च नियुतं च नियुतं च ॥२॥ २
अर्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च ।
एता मे अग्न इष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥३॥ ३
ऋतवं स्थ ऋतावृधं ऋतुष्ठा स्थ ऋतावृधः ।
घृतश्च्युतो मधुश्च्युतो विराजो नाम कामदुघा अक्षीयमाणाः ॥४॥ ४
समुद्रस्य त्वावकयाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥५॥ ५
हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥६॥ ६ [१००४]
१०

उप ज्मन्नुप वेतसेऽवतर नदीष्वा ।
अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधि ॥७॥ ७
अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥८॥ ८
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥९॥ ९
स नः पावक दीदिवोऽग्ने देवाँ३ इहावह । उप यज्ञꣳ हविश्च नः ॥१०॥ १०
पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥११॥ ११
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ।
नृषदे वेळप्सुषदे वेड् बर्हिषदे वेड् वनसदे वेट् स्वर्विदे वेट् ॥१२॥ १२
ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ॥१३॥ १३
ये देवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुर एतारो अस्य ।
येभ्यो न ऋते पवते धाम किञ्चन न ते दिवो न पृथिव्या अधि स्नुषु ॥१४॥ १४
प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥१५॥ (१) १५

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् । अग्निर्नो वनुते रयिम् ॥१॥ १६
य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ३ आविवेश ॥२॥ १७
किꣳस्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥३॥ १८
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥४॥ १९
किꣳस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥५॥ २०[१०१८]

या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥६॥ २१
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा ॥७॥ २२
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥८॥ २३
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥९॥ (२) २४

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् ॥१॥ २५
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्त ऋषीन्पर एकमाहुः ॥२॥ २६
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तꣳ संप्रश्नं भुवना यन्त्यन्या ॥३॥ २७
त आयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥४॥ २८
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कꣳस्विद् गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त पूर्वे ॥५॥ २९
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभा अध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः ॥६॥ ३०
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥७॥ ३१
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा ॥८॥ (३) ३२
आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥१॥ ३३ [१०३१]

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥ ३४
स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥ ३५
बृहस्पते परिदीया रथेन रक्षोहामित्राँ३ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥४॥ ३६
बलविज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥५॥ ३७
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायो अनु सꣳरभध्वम् ॥६॥ ३८
अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु ॥७॥ ३९
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥ ४०
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥ ४१
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाꣳसि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१०॥ ४२
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ३ उ देवा अवता हवेषु ॥११॥ ४३
अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१२॥ ४४
अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिते । गच्छामित्रान्प्रपद्यस्व मामीषां कञ्चनोच्छिषः ॥१३॥ ४५
प्रेता जयता नर इन्द्रो वः शर्म यच्छतु । उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥१४॥ ४६
असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना ।
तां गूहत तमसापव्रतेन यथामी अन्यो अन्यं न जानन् ॥१५॥ ४७
यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।
तत्र इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥१६॥ ४८ [१०४९]

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानुवस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१७॥ (४) ४९

उदेनमुत्तरां नयाग्ने घृतेनाहुत । रायस्पोषेण सःसृज प्रजया च बहुं कृधि ॥१॥ ५०
इन्द्रेमं प्रतरां नय सजातानामसद्वशी । समेनं वर्चसा सृज देवानां भागदा असत्॥२॥५१
यस्यं कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मैं देवा अधिब्रुवन्नयं च ब्रह्मणस्पतिः ॥३॥ ५२
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वः सुप्रतीको विभावसुः॥४॥ ५३
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात् ॥५॥ ५४
समिद्धे अग्ना अधि मामहान उक्थपत्र ईड्यो गृभीतः ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवाः ॥६॥ ५५
दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमणाः शतपयाः ।
परिगृह्य देवा यज्ञमायन् देवा देवेभ्यो अध्वर्यन्तो अस्थुः ॥७॥ ५६
वीतः हविः शमितः शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति ।
ततो वाका आशिषो नो जुषन्ताम् ॥८॥ ५७
सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ३ अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः ॥९॥ ५८
विमान एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम् ।
स विश्वाचीरभिचष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥१०॥ ५९
उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥११॥ ६०
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमः रथीनां वाजानाः सत्पतिं पतिम् ॥१२॥६१
देवहूर्यज्ञ आ च वक्षत्सुम्नहूर्यज्ञ आ च वक्षत् । यक्षदग्निर्देवो देवाँ३ आ च वक्षत् ॥१३॥ ६२
वाजस्य मा प्रसव उद्ग्राभेणोदग्रभीत् । अधा सपत्नानिन्द्रो मे निग्राभेणाधराँ३ अकः ॥१४॥ ६३
उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥१५॥ (५) ६४

क्रमध्वमग्निना नाकमुख्यः हस्तेषु बिभ्रतः । दिवस्पृष्ठः स्वर्गत्वा मिश्रा देवेभिराध्वम्॥१॥६५[१०६३]

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह ।
विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥२॥ ६६
पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ॥३॥ ६७
स्वर्यन्तो नापेक्षन्त आ द्याः रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारः सुविद्वाःसो वितेनिरे ॥४॥ ६८
अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति ॥५॥ ६९
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकः समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदाः ॥६॥ ७०
अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः सहस्रं व्यानाः ।
त्वः साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥७॥ ७१
सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद ।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृःह ॥८॥ ७२
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वं योनिमासीद साधुया ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥९॥ ७३
ताः सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कण्वो अदुहत्प्रपीनाः सहस्रधारां पयसा महीं गाम् ॥१०॥ ७४
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवीःषि जुहुरे समिद्धे ॥११॥ ७५
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वाः शश्वन्त उपयन्ति वाजाः॥१२॥७६
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रः हृदिस्पृशम् । ऋध्यामा त ओहैः ॥१३॥ ७७
चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमन्वीतिहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहादाभ्यः हविः ॥१४॥ ७८
सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥१५॥ (६) ७९

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माःश्च । शुक्रश्च ऋतपाश्चात्यःहाः॥१॥८० [१०७८]

ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च । मितश्च संमितश्च सभराः ॥२॥ ८१
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरे अमित्रश्च गणः ॥३॥ ८२
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्ता च विधर्ता च विधारयः ॥४॥ ८३
ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च संमितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥५॥ ८४
स्वतवाःश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ॥६॥ ८५
इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ।
एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥७॥ (७) ८६[१०८४]

अश्मन्नूर्जं पञ्चदश ॥१५॥ अग्निस्तिग्मेन नव ॥९॥ चक्षुषः पिता अष्ट ॥८॥ वाजः शिशानः सप्तदश॥१७॥
इदेनं पञ्चदश ॥१५॥ क्रमध्वमग्निना पञ्चदश ॥ १५ ॥ शुक्रज्योतिश्च सप्त ॥ ७॥
सप्तानुवाकेषु षडशीतिः ॥८६॥
इति शुक्लयजुःकाण्वसंहितायां अष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

इमः स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमर्वन्त्समुद्रियः सदनमाविशस्व ॥१॥ १
घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।
अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥२॥ २
समुद्रादूर्मिर्मधुमाँ३ उदारदुपाःशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥३॥ ३
वयं नाम प्रब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥४॥ ४
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ३ आविवेश ॥५॥ ५
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकः सूर्य एकं जजान वेनादेकः स्वधया निष्टतक्षुः ॥६॥ ६[१०९०]
एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसाम् ।

सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥७॥ ७
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥८॥ ८
अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥९॥ ९
कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभिचाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥१०॥ १०
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥११॥ ११
धामं ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥१२॥ (१) १२

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे ।
धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे ।
श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥ १३
प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे । चित्तं च म आधीतं च मे वाक् च मे मनश्च मे ।
चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥२॥ १४
ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे । शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे ।
परूःषि च मे शरीराणि च म आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥३॥ १५
ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मे ।
अमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे ।
वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥ (२) १६
सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे । विश्वं च मे महश्च मे क्रीडा च मे मोदश्च मे ।
जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥१॥ १७
वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे । सुगं च मे सुपथ्यं च म ऋद्धं च म ऋद्धिश्च मे ।
क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥ १८[११०१]

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे । विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे ।
सीरं च मे लयश्च मे सूश्च मे प्रसूश्च मे यज्ञेन कल्पन्ताम् ॥३॥ १९
शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे । कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे ।
भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥४॥ (३) २०

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे । घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे ।
कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे यज्ञेन कल्पन्ताम् ॥१॥ २१

ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे ।
जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे ।
सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ॥२॥ २२
रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे । विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे ।
कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥३॥ २३
व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे । मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे ।
श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥४॥ (४) २४

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे ।
सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे ।
सीसं च मे त्रपु च मे श्यामं च मे लोहं च मे यज्ञेन कल्पन्ताम् ॥१॥ २५
अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे ।
कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे ।
वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥२॥ २६
वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ।
अर्थश्च मे यामश्च म इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥३॥ (५) २७

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे ।
सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे ।
पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१॥ २८
मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे । धाता च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे ।
मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥२॥ २९[११११]
११

पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे । द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे।
नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥३॥ (६) ३०

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मे ।
उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च मे ।
आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१॥ ३१

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मे ।
ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे ।
सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२॥ ३२
स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ।
ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे ।
वेदिश्च मे बर्हिश्च मे स्वगाकारश्च मेऽवभृथश्च मे यज्ञेन कल्पन्ताम् ॥३॥ ३३
अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे । प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे ।
दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥४॥ ३४
व्रतं च म ऋतवश्च मे संवत्सरश्च मे तपश्च मे ।
अहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥५॥ (७) ३५

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे
नव च म एकादश च म एकादश च मे त्रयोदश च मे त्रयोदश च मे ।
पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म
एकविꣳशतिश्च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे ।
पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे
नवविꣳशतिश्च म एकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥१॥ ३६
चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च मे
विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मे ।
द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे
चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२॥ ३७[११२१]

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे ।
पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे ।
तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥३॥ ३८
पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च मे ।
ऋषभश्च मे वेहच्च मेऽनड्वाꣳश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥४॥ (८) ३९
वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा । वसवे स्वाहाहर्पतये स्वाहा ।
अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन आन्त्यायनाय स्वाहान्त्याय
भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥ ४०
इयं ते राण्मित्राय यन्तासि यमनः । ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्याय ॥२॥ ४१
आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पताम् ।
वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पताम् ।
ब्रह्म यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पताꣳ स्वर्यज्ञेन कल्पताम् ॥३॥ ४२
स्तोमश्च यजुश्च ऋक् च साम च बृहच्च रथन्तरं च ।
स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा अभूम वेट् स्वाहा ॥३॥ (९) ४३ [११२७]

यन्ता च ॥४॥ ऊर्क्च चतस्रः ॥४॥ अश्मा च तिस्रः॥३॥
इमं स्तनं द्वादश ॥१२॥ वाजश्चतस्रः ॥४॥ सत्यं चतस्रः ॥४॥ ऊर्क्च चतस्रः ॥४॥ एका चतस्रः ॥४॥ वाजाय चतस्रः ॥४॥
द्वितीयोऽग्निश्च तिस्रः ॥३॥ अंशुः पञ्च ॥५॥
नवानुवाकेषु त्रयश्चत्वारिंशत् ॥४३॥
इति शुक्लयजुःकाण्वसंहितायां एकोनविंशोऽध्यायः ॥१९॥

अथ विंशोऽध्यायः।

वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥१॥ १
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसागमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥२॥ २
वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावतु ॥३॥ ३
वाजो नो अद्य प्रसुवाति दानं वाजो देवाꣳ३ ऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्भवेयम् ॥४॥ ४ [११३१]

वाजः पुरस्तादुत मध्यतो नो वाजो देवान् हविषा वर्धयाति ।
वाजो हि मा सर्ववीरं चकार विश्वा आशा वाजपतिर्जयेयम् ॥५॥ ५
सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः । सोऽहं वाजꣳ सनेयमग्ने ॥६॥ ६
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥७॥ (१) ७

ऋताषाडृतधामाग्निर्गन्धर्वः । तस्यौषधयोऽप्सरसो मुदो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥१॥ ८
सꣳहितो विश्वसामा सूर्यो गन्धर्वः । तस्य मरीचयोऽप्सरस आयुवो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥२॥ ९
सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः । तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥३॥ १०
इषिरो विश्वव्यचा वातो गन्धर्वः । तस्यापो अप्सरस ऊर्जो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥४॥ ११
भुज्युः सुपर्णो यज्ञो गन्धर्वः । तस्य दक्षिणा अप्सरसस्तावा नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥५॥ १२
प्रजापतिर्विश्वकर्मा मनो गन्धर्वः । तस्य ऋक्सामान्यप्सरस एष्टयो नाम ।
स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥६॥ १३
स नो भुवनस्य पते प्रजापते यस्य त उपरि गृहा यस्य वेह ।
अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥७॥ १४
समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्मयोभूरभि मा वाहि स्वाहा ।
मारुतोऽसि मरुतां गणः शम्भूर्मयोभूरभि मा वाहि स्वाहा ।
अवस्यूरसि दुवस्वाञ्छम्भूर्मयोभूरभि मा वाहि स्वाहा । ॥८॥ १५
यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥९॥ १६
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥१०॥ १७ [११४४]

रुचं नो धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि ।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥११॥ १८
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेळमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥१२॥ १९
स्वर्ण घर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्ण शुक्रः स्वाहा ।
स्वर्ण ज्योतिः स्वाहा स्वर्ण सूर्यः स्वाहा ॥१३॥ (२) २०

अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् ।
तेन गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाकमुत्तमम् ॥१॥ २१
इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ।
ताभ्यां पतेम सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥२॥ २२
इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः ।
महान्त्सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिꣳसीः ॥३॥ २३
दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम्
विश्वायुः शर्म सप्रथा नमस्पथे ॥४॥ २४
विश्वस्य मूर्धन्नधि तिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिं भिन्त ।
दिवस्पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याव ॥५॥ २५
इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः । तस्य न इष्टस्य प्रीतस्य द्रविणेहागमेः ॥६॥ २६
इष्टो अग्निराहुतः पिपर्तु न इष्टꣳ हविः । स्वगेदं देवेभ्यो नमः ॥७॥ (३) २७

यदाकूतात्समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा ।
तदनु प्रेत सुकृतामु लोकं यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥१॥ २८
एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वो अत्र तꣳ स्म जानीत परमे व्योमन् ॥२॥ २९
एतं जानाथ परमे व्योमन्देवाः सधस्था विद रूपमस्य ।
यदागच्छात्पथिभिर्देवयानैरिष्टापूर्ते कृणवथाविरस्मै ॥३॥ ३०
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते सꣳसृजेथामयं च ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥४॥ ३१ [११५८]

येन वहसि सहस्रं येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥५॥ ३२
प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥६॥ ३३
यद्दत्तं यत्परादानं यत्पूर्तं याश्च दक्षिणाः । तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥७॥ ३४
यत्र धारा अनपेता मधोर्घृतस्य च याः । तदग्निर्वैश्वकर्मणः स्वर्देवेषु नो दधत् ॥८॥ ३५
ये अग्नयः पाञ्चजन्या अस्यां पृथिव्यामधि । तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव॥९॥(४)३६

वार्त्रहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वावर्तयामसि ॥१॥ ३७
सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र संपिणक् कुणारुम् ।
अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जघन्थ ॥२॥ ३८
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ३ अभिदासत्यधरं गमया तमः ॥३॥ ३९
मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्था परस्याः ।
सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रून्ताढि वि मृधो नुदस्व ॥४॥ ४०
वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निर्नः सुष्टुतीरुप ॥५॥ ४१
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥६॥ ४२
अश्याम तं काममग्ने तवोती अश्याम रयिꣳ रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥७॥ ४३
वयं ते अद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रो अग्ने ॥८॥ ४४
धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥९॥ ४५
त्वं यविष्ठ दाशुषो नॄꣳः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥१०॥(५)४६ [११७३]

वाजस्यनु सप्त ॥७॥ ऋतावाद त्रयोदश ॥१३॥ अग्निं युनज्मि सप्त ॥७॥ यदाकूतान्नव ॥९॥ वार्त्रहत्याय दश॥१०॥
पञ्चानुवाकेषु षट्चत्वारिंशत् ॥४६॥

॥ इति शुक्लयजुःकाण्वसंहितायां विंशोऽध्यायः ॥ २० ॥

॥ इति द्वितीयो दशकः ॥ २ ॥

॥ अथ तृतीयो दशकः ॥ ३ ॥

एकविंशोऽध्यायः ।

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन ।
मधुमतीं मधुमता सृजामि सꣳ सोमेन ।
सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१॥ १
परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः ।
दधन्वा यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥२॥ २
वायोः पूतः पवित्रेण प्राङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ।
वायोः पूतः पवित्रेण प्रत्यङ्क्सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ॥३॥ ३
पुनाति ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता । वारेण शश्वता तना ॥४॥ ४
ब्रह्म क्षत्रं पवते तेज इन्द्रियꣳ सुरया सोमः सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ।
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं न जग्मुः ।
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ।
एष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ॥५॥ ५
नाना हि वां देवहितꣳ सदस्कृतं मा सꣳ सृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिꣳसीः स्वां योनिमाविशन्ती ॥६॥ ६
उपयामगृहीतोऽस्याश्विनं तेजः सारस्वतं वीर्यमैन्द्रं बलम् ।
एष ते योनिर्मोदाय त्वानन्दाय त्वा महसे त्वा ॥७॥ ७
तेजोऽसि तेजो मयि धेहि वीर्यमसि वीर्यं मयि धेहि
बलमसि बलं मयि धेह्योजोऽस्योजो मयि धेहि ।
मन्युरसि मन्युं मयि धेहि सहोऽसि सहो मयि धेहि ॥८॥ ८
या व्याघ्रं विषूचिकोभौ वृकं च रक्षति ।
श्येनं पतत्रिणꣳ सिꣳहꣳ सेमं पात्वꣳहसः ॥९॥ ९
यदापिपेष मातरं पुत्रः प्रमुदितो धयन् ।
एतत्तदग्ने अनृणो भवाम्यहतौ पितरौ मया ॥१०॥ १० [११८३]

संपृचः स्थ सं मा भद्रेण पृङ्क्त । विपृचः स्थ वि मा पापेन पृङ्क्त ॥११॥ (१) ११

देवा यज्ञमतन्वत भेषजं भिषजाश्विना ।
वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ॥१॥ १२
दीक्षायै रूपꣳ शष्पाणि प्रायणीयस्य तोक्मानि ।
क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु ॥२॥ १३
आतिथ्यरूपं मासरं महावीरस्य नग्नहुः ।
रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता ॥३॥ १४
सोमस्य रूपं क्रीतस्य परिस्रुत्परिषिच्यते ।
अश्विभ्यां दुग्धं भेषजमिन्द्रायैन्द्रꣳ सरस्वत्या ॥४॥ १५
आसन्दी रूपꣳ राजासन्द्यै वेद्यै कुम्भी सुराधानी ।
अन्तर उत्तरवेद्या रूपं कारोतरो भिषक् ॥५॥ १६
वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् ।
यूपेन यूप आप्यते प्रणीतो अग्निरग्निना ॥६॥ १७
हविर्धानं यदश्विनाग्नीध्रं यत्सरस्वती ।
इन्द्रायैन्द्रꣳ सदस्कृतं पत्नीशालं गार्हपत्यः ॥७॥ १८
प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य ।
प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः ॥८॥ १९
पशुभिः पशूनाप्नोति पुरोडाशैर्हवीꣳष्या ।
छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान् ॥९॥ २०
धानाः करम्भः सक्तवः परीवापः पयो दधि ।
सोमस्य रूपꣳ हविष आमिक्षा वाजिनं मधु ॥१०॥ २१
धानानाꣳ रूपं कुवलं परीवापस्य गोधूमाः ।
सक्तूनाꣳ रूपं बदरमुपवाकाः करम्भस्य ॥११॥ २२
पयसो रूपं यद्यवा दध्नो रूपं कर्कन्धूनि ।
सोमस्य रूपं वाजिनꣳ सौम्यस्य रूपमामिक्षा ॥१२॥ २३
आश्रावयेति स्तोत्रियाः प्रत्याश्रावो अनुरूपः ।
यजेति धाय्यारूपं प्रगाथा येयजामहाः ॥१३॥ २४ [११९७]

अर्धं ऋचैरुक्थानाꣳ रूपं पदैराप्नोति निविदः ।
प्रणवैः शस्त्राणाꣳ रूपं पयसा सोम आप्यते ॥१४॥ २५
अश्विभ्यां प्रातःसवनमिन्द्रेणैन्द्रं माध्यंदिनम् ।
वैश्वदेवꣳ सरस्वत्या तृतीयमाप्तꣳ सवनम् ॥१५॥ २६
वायव्यैर्वायव्यान्याप्नोति सतेन द्रोणकलशम् ।
कुम्भीभ्यामम्भृणौ सुते स्थालीभिः स्थालीराप्नोति ॥१६॥ २७
यजुर्भिराप्यन्ते ग्रहा ग्रहै स्तोमाश्च विष्टुतीः ।
छन्दोभिरुक्थाशस्त्राणि साम्नावभृथ आप्यते ॥१७॥ २८
इडाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः ।
शंयुना पत्नीसंयाजान्त्समिष्टयजुषा सꣳस्थाम् ॥१८॥ २९
व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥१९॥ ३०
एतावद्रूपं यज्ञस्य यद्देवैर्ब्रह्मणा कृतम् । तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥२०॥(२) ३१

सुरावन्तं बर्हिषदꣳ सुवीरं यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः ॥१॥ ३२
यस्ते रसः संभृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विना इन्द्रमग्निम् ॥२॥ ३३
यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमं तꣳ शुक्रं मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्षयामि ॥३॥ ३४
यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहं तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्षयामि ॥४॥ ३५
पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः ।
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ ५ ॥ ३६
अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः । पितरः शुन्धध्वम् ॥६॥ ३७
पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ।
पवित्रेण शतायुषा ॥७॥ ३८
पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥८॥ ३९
[११११]
१२

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥९॥ ४०
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥१०॥४१
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूꣳरनु ॥११॥ ४२
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥१२॥ ४३
पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥१३॥ ४४
उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥१४॥ ४५
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥१५॥ ४६
ये समानाः समनसः पितरो यमराज्ये ।
तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥१६॥ ४७
ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्मयि कल्पतामस्मिँल्लोके शतꣳ समाः ॥१७॥ ४८
द्वे सृती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥१८॥ ४९
इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ॥१९ (३) ५०

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥१॥ ५१
त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥२॥ ५२
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥३॥ ५३
त्वꣳ सोमꣳ पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥४॥ ५४
बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शन्तमेनाथा नः शं योररपो दधात ॥५॥ ५५ [११२८]

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥६॥ ५६
आहं पितॄन्त्सुविदत्राꣳ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥७॥ ५७
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥८॥ ५८
आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥९॥ ५९
ये अग्निष्वात्ता ये अनग्निष्वात्ता मध्ये दिवः स्वधया मादयन्ते ।
तेभ्यः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयाति ॥१०॥ ६०
अग्निष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथं य आशुः ।
ते नो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम् ॥११॥ ६१
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिꣳसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥१२॥ ६२
आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥१३॥ ६३
यमग्ने कव्यवाहन त्वं चिन्मन्यसे रयिम् । तन्नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम् ॥१४॥ ६४
अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ॥१५॥६५
यो अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः ।
त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ॥१६॥ ६६
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥१७॥ ६७
ये चेह पितरो ये च नेह याꣳश्च विद्म याँ२ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञꣳ सुकृतं जुषस्व ॥१८॥ ६८
अद्या यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥१९॥ ६९
उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥२०॥ ७० [११४३]

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजय स्पृधः ॥२१॥ (४) ७१

सोमो राजामृतꣳ सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥१॥ ७२
अद्भ्यः क्षीरं व्यपिबत् क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
सोममद्भ्यो व्यपिबच्छन्दसा हꣳसः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥२॥ ७३
रेतो मूत्रं वि जहाति योनिं प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृत उल्बं जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥३॥ ७४
दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।
अश्रद्धामनृते दधाच्छ्रद्धाꣳ सत्ये प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥४॥ ७५
वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ।
दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रं व्यपिबत्पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥५॥ (५)७६

सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥१॥ ७७
तदस्य रूपममृतꣳ शचीभिस्तिस्रो दधुर्देवताः सꣳरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य माꣳसमभवन्न लाजाः ॥२॥ ७८
तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अन्तरम् ।
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ॥३॥ ७९
सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥४॥ ८० [११५३]

पयसा शुक्रममृतं जनित्रꣳ सुरया मूत्राज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊवध्यं वातꣳ सब्वं तदारात् ॥५॥ ८१
इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यैर्न मिनाति पित्तम् ॥६॥ ८२
आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभिरासन्दी नाभिरुदरं न माता ॥७॥ ८३
कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः ।
प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥८॥ ८४
मुखꣳ सदस्य शिर इत् सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती ।
चप्पं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ॥९॥ ८५
अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते ॥१०॥ ८६
अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥११॥ ८७
इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याꣳ श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥१२॥ ८८
आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन्यशसे श्रियै शिखा सिꣳहस्य लोम त्विषिरिन्द्रियाणि ॥१३॥ ८९
अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥१४॥ ९०
सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ श्रियै जनयन्नप्सु राजा ॥१५॥ ९१
तेजः पशूनाꣳ हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृतः सोम इन्दुः ॥१६॥ (६) ९२

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि । मा त्वा हिꣳसीन्मा मा हिꣳसीः ।
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः । मृत्योः पाहि विद्योत्पाहि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥१॥ ९३ [१२९६]

अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभि षिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभि षिञ्चामि।
इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभि षिञ्चामि ॥२॥ ९४
कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥३॥ ९५
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणो अमृतꣳ सम्राट् चक्षुर्विराट् श्रोत्रम् ॥४॥ ९६
जिह्वा मे भद्रं वाङ् महो मनो मन्युः स्वराड् भामः ।
मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥५॥ ९७
बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥६॥ ९८
पृष्टीर्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी । ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥७॥ ९९
नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ।
आनन्दनन्दा आण्डौ मे भगः सौभाग्यं पसः ॥८॥ १००
जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ।
प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु ॥९॥ १०१
प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन् प्रति प्राणेषु प्रति तिष्ठामि पुष्टे ।
प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ॥१०॥ १०२
त्रया देवा एकादश त्रयस्त्रिꣳशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥११॥ १०३
प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन ।
सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूꣳषि सामभिः ॥१२॥ १०४
सामान्यृग्भिरृचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैः ।
वषट्कारा आहुतिभिराहुतयो मे कामान्त्समर्धयन्तु भूः स्वाहा ॥१३॥ १०५
लोमानि प्रयतिर्मम त्वङ् म आनतिरागतिः ।
माꣳसं म उपनतिर्वस्वस्थि मज्जा म आनतिः ॥१४॥७॥ १०६ [१३०९]

स्वादीं त्वैकादश ॥११॥ देवा यज्ञं विंशतिः ॥२०॥ सुरावन्तमेकोनविंशतिः ॥१९॥ उदीरतामेकविंशतिः ॥२१॥
सोमो राजा पञ्च ॥५॥ सीसेन तन्त्रं षोडश ॥१६॥ क्षत्रस्य नाभिश्चतुर्दश ॥१४॥

॥ सप्तानुवाकेषु षडुत्तरशतम् ॥ १०६ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां एकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः।

यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१॥ १
यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥२॥ २
यदि जाग्रद्यदि स्वप्न एनाꣳसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥३॥ ३
यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यच्छूद्रे यदर्ये यदेनश्चकृमा वयम् ।
यदेकस्याधि धर्मणि तस्यावयजनमसि ।
यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ।
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोऽयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ।
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः ।
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु । योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥४॥ ४
द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥५॥ ५
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥६॥ ६
अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि ।
पयस्वानग्न आगमं तं मा सꣳ सृज वर्चसा प्रजया च धनेन च ।
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥७॥ ७
समाववर्ति पृथिवी समुषाः समु सूर्यः । समु विश्वमिदं जगत् ।
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥८॥ (१) ८
अग्ने व्रतपते त्वयि । व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम् ॥१॥ ९
यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह । तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ॥२॥ १०
यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह । तं लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥३॥ ११
अꣳशुना ते अꣳशुः पृच्यतां परुषा परुः । गन्धस्ते सोममवतु मदाय रसो अच्युतः ॥४॥ १२
सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ॥५॥ १३
[१२९१]

धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥६॥ १४
बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥७॥ १५
अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय । पुनीहीन्द्राय पातवे ॥८॥ (२) १६

यो भूतानामधिपतिर्यस्मिँल्लोका अधि श्रिताः ।
य ईशे महतो महाꣳस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम् ॥१॥ १७
उपयामगृहीतोऽस्यश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ।
एष ते योनिरश्विभ्यां त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णे ॥२॥ १८
प्राणपा मे अपानपाश्चक्षुष्पाः श्रोत्रपाश्च मे । वाचो मे विश्वभेषजो मनसोऽसि विलायकः॥३॥ १९
अश्विनकृतस्य ते सरस्वतिकृतस्येन्द्रेण सुत्राम्णा कृतस्य । उपहूत उपहूतस्य भक्षयामि ॥४॥ (३) २०

समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः ।
त्रिभिर्देवैस्त्रिꣳशता वज्रबाहुर्जघान वृत्रं वि दुरो ववार ॥१॥ २१
नराशꣳसः प्रति शूरो मिमानस्तनूनपात्प्रति यज्ञस्य धाम ।
गोभिर्वपावान्मधुना समञ्जन् हिरण्यैश्चन्द्री यजति प्रचेताः ॥२॥ २२
ईडितो देवैर्हरिवाँꣳ अभिष्टिराजुह्वानो हविषा शर्धमानः ।
पुरन्दरो गोत्रभिद्वज्रबाहुरा यातु यज्ञमुप नो जुषाणः ॥३॥ २३
जुषाणो बर्हिर्हरिवान्न इन्द्रः प्राचीनꣳ सीदत्प्रदिशा पृथिव्याः ।
उरुप्रथाः प्रथमानꣳ स्योनमादित्यैरक्तं वसुभिः सजोषाः ॥४॥ २४
इन्द्रं दुरः कवष्यो धावमाना वृषाणं यन्तु जनयः सुपत्नीः ।
द्वारो देवीरभितो वि श्रयन्ताꣳ सुवीरा वीरं प्रथमाना महोभिः ॥५॥ २५
उषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुं ततं पेशसा संवयन्ती देवानां देवं यजतः सुरुक्मे ॥६॥ २६
दैव्या मिमाना मनुषः पुरुत्रा होतारा इन्द्रं प्रथमा सुवाचा ।
मूर्धन्यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः ॥७॥ २७
तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा जनयो न पत्नीः ।
अच्छिन्नं तन्तुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः ॥८॥ २८ [१३००]

त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाकोऽचिष्टुर्यशसे पुरूणि ।
वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवान् ॥९॥ २९
वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्जठरं पृणानः स्वदाति यज्ञं मधुना घृतेन ॥१०॥ ३०
स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा मोदमानाः स्वाहा देवा अमृता मादयन्ताम् ॥११॥ (४) ३१

आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥१॥ ३२
आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥२॥ ३३
आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥३॥ ३४
त्रातारमिन्द्रमवितारमिन्द्रँ हवेहवे सुहवँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः ॥४॥ ३५
इन्द्रः सुत्रामा स्ववाँ२ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥५॥ ३६
तस्य वयँ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ२ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ॥६॥ ३७
आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमन्विं न पाशिनोऽति धन्वेव ताँ२ इहि ॥७॥ ३८
एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥८॥ (५) ३९

समिद्धो अग्निरश्विना तप्तो घर्मो विराट् सुतः ।
दुहे धेनुः सरस्वती सोमँ शुक्रमिहेन्द्रियम् ॥१॥ ४०
तनूपा भिषजा सुतेऽश्विनोभा सरस्वती । मध्वा रजाँसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥२॥ ४१
इन्द्रायेन्दुँ सरस्वती नराशँसेन नग्नहुम् ।
अधातामश्विना मधु भेषजं भिषजा सुते ॥३॥ ४२ [१३२१]
११

आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् । इडाभिरश्विना इषँ समूर्जँ सँ रयिं दधुः ॥४॥ ४३
अश्विना नमुचेः सुतँ सोमँ शुक्रं परिस्रुता । सरस्वती तमा भरद्बर्हिषेन्द्राय पातवे ॥५॥ ४४
कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः ।
इन्द्रो न रोदसी उभे दुहे कामान्त्सरस्वती ॥६॥ ४५
उषासानक्तमश्विना दिवेन्द्रँ सायमिन्द्रियैः । संजानाने सुपेशसा समञ्जाते सरस्वत्या ॥७॥ ४६
पातं नो अश्विना दिवा पाहि नक्तँ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रँ सचा सुते ॥८॥ ४७
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा । तीव्रं परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥९॥ ४८
अश्विना भेषजं मधु भेषजं नः सरस्वती । इन्द्रे त्वष्टा यशः श्रियँ रूपँरूपमधुः सुते ॥१०॥ ४९
ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता । कीलालमश्विभ्यां मधु दुहे धेनुः सरस्वती ॥११॥ ५०
गोभिर्न सोममश्विना मासरेण परिस्रुता । समधातँ सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥१२॥ (६) ५१

अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥१॥ ५२
यमश्विना सरस्वती हविषेन्द्रमवर्धयन् । स बिभेद वलं मघं नमुचावासुरे सचा ॥२॥ ५३
तमिन्द्रं पशवः सचाश्विनोभा सरस्वती । दधाना अभ्यनूषत हविषा यज्ञ इन्द्रियैः ॥३॥ ५४
य इन्द्र इन्द्रियं दधुः सविता वरुणो भगः । स सुत्रामा हविष्पतिर्यजमानाय सश्चत ॥४॥ ५५
सविता वरुणो दधद्यजमानाय दाशुषे । आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥५॥ ५६
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥६॥ ५७
अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रँ सरस्वती यजमानमवर्धयन् ॥७॥ ५८
ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥८॥ ५९
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥९॥ ६०
युवँ सुराममश्विना नमुचावासुरे सचा । विपिपानाः सरस्वतीन्द्रं कर्मस्वावत ॥१०॥ ६१
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दँसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥११॥ ६२
यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥१२॥ ६३
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिँ रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥१३॥ (७) ६४ [१३७१]

प्राणेन सरस्वती वीर्यम् । वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥१॥ ६५
अश्विना तेजसा चक्षुः प्राणेन सरस्वती वीर्यम् । वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥१॥ ६६
गोमदू षु णासत्याश्वावद्यातमश्विना । वर्ती रुद्रा नृपाय्यम् ॥२॥ ६७
न यत्परो नान्तर आदधर्षद्वृषण्वसू । दुःशँसो मर्त्यो रिपुः ॥३॥ ६८
ता न आ वोळ्हमश्विना रयिं पिशङ्गसंदृशम् । धिष्ण्या वरिवोविदम् ॥४॥ ६९
पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥५॥ ७०
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥६॥ ७१
महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥७॥ ७२
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥८॥ ७३
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥९॥ ७४
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥१०॥
अश्विना पिबतां मधु सरस्वत्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ताँ सोम्यं मधु ॥११॥ (८) ७५ [१३५४]

यो भूतानां चतस्रः ॥ ४ ॥ समिद्ध इन्द्र एकादश ॥ ११ ॥
यद्देवा अष्ट ॥ ८ ॥ अभ्यादधामीत्यष्ट ॥ ८ ॥ अयात्वष्ट ॥ ८ ॥ समिद्धो अग्निर्द्वादश ॥ १२ ॥ अश्विना हविस्त्रयोदश ॥ १३ ॥ अश्विना तेजसैकादश ॥ ११ ॥
॥ अत्रानुवाकेषु पञ्चसप्ततिः ॥ ७५ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः ।

इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके ॥१॥ १
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । २
अहेळमानो वरुणेह बोध्युरुशँस मा न आयुः प्र मोषीः ॥२॥
त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेळो अव यासिसीष्ठाः । ३
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाँसि प्र मुमुग्ध्यस्मत् ॥३॥
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । ४
अव यक्ष्व नो वरुणँ रराणो वीहि मृळीकँ सुहवो न एधि ॥४॥
महीमू षु मातरँ सुव्रतानामृतस्य पत्नीमवसे हुवेम । ५ [१३५९]
तुविक्षत्रामजरन्तीमुरूचीँ सुशर्माणमदितिँ सुप्रणीतिम् ॥५॥

सुत्रामाणं पृथिवीं द्यामनेहसँ सुशर्माणमदितिँ सुप्रणीतिम् ।
दैवीं नावँ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥६॥ ६
सुनावमा रुहेयमस्रवन्तीमनागसम् । शतारित्राँ स्वस्तये ॥७॥ ७
आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाँसि सुक्रतू ॥८॥ ८
प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ मा जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥९॥ ९
शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकँ रक्षाँसि सनेम्यस्मद्युयवन्नमीवाः ॥१०॥ १०
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता इव त्मना महो ये धनँ समिथेषु जभ्रिरे ॥११॥ ११
वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥१२॥ (१) १२

समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः । गायत्री छन्द इन्द्रियं त्र्यविर्गौर्वयो दधुः ॥१॥ १३
तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती । उष्णिहा छन्द इन्द्रियं दित्यवाड् गौर्वयो दधुः ॥२॥ १४
इडाभिरग्निरीड्यः सोमो देवो अमर्त्यः । अनुष्टुप् छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥३॥ १५
सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः । बृहती छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधुः ॥४॥ १६
दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ।
पङ्क्तिश्छन्द इहेन्द्रियं तुर्यवाड् गौर्वयो दधुः ॥५॥ १७
उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः । त्रिष्टुप् छन्द इहेन्द्रियं पष्ठवाड् गौर्वयो दधुः ॥५॥ १८
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा । जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः ॥७॥ १९
तिस्र इडा सरस्वती भारती मरुतो विशः । विराट् छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः ॥८॥ २०
त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥९॥ २१
शमिता नो वनस्पतिः सविता प्रसुवन् भगम् ।
ककुप् छन्द इहेन्द्रियं वशा वेहद्वयो दधुः ॥१०॥ २२
स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत् ।
अतिच्छन्दा इन्द्रियं बृहदृषभो गौर्वयो दधुः ॥११॥ (२) २३ [१३७०]

वसन्तेन॑ ऋतुना॑ दे॒वा वस॑वस्त्रि॒वृता॑ स्तु॒ताः । र॒थन्त॒रेण॒ तेज॑सा ह॒विरिन्द्रे॒ वयो॑ दधुः ॥१॥ २४
ग्रीष्मेण॑ ऋतुना॑ दे॒वा रु॒द्राः प॑ञ्चद॒शे स्तु॒ताः । बृ॒हता॑ य॒शसा॒ बलꣳ॑ ह॒विरिन्द्रे॒ वयो॑ दधुः ॥२॥ २५
व॒र्षाभि॑र्ऋ॒तुना॑दि॒त्या स्तोमे॑ सप्तद॒शे स्तु॒ताः ।
वै॒रू॒पेण॑ वि॒शौज॑सा ह॒विरिन्द्रे॒ वयो॑ दधुः ॥३॥ २६
शा॒रदेन॑ ऋ॒तुना॑ दे॒वा एक॑वि॒ꣳश ऋ॒भव॑ स्तु॒ताः ॥
वै॒रा॒जेन॑ श्रि॒या श्रियꣳ॑ ह॒विरिन्द्रे॒ वयो॑ दधुः ॥४॥ २७
हे॒म॒न्तेन॑ ऋ॒तुना॑ दे॒वास्त्रि॑ण॒वे म॒रुत॑ स्तु॒ताः । बले॑न॒ शक्व॑रीः सहो॑ ह॒विरिन्द्रे॒ वयो॑ दधुः ॥५॥ २८
शै॒शि॒रेण॑ ऋ॒तुना॑ दे॒वास्त्र॑यस्त्रि॒ꣳशेऽमृता॑ स्तु॒ताः ।
स॒त्येन॑ रे॒वतीः॑ क्ष॒त्रꣳ ह॒विरिन्द्रे॒ वयो॑ द॒धुः ॥६॥ (३) २९

होता॑ यक्षत्स॒मिधा॒ग्निमि॒डस्प॒देऽश्विनेन्द्र॒ꣳ सर॑स्वतीम॒जो धू॒म्रो न गो॒धूमैः॒ कुव॑लैर्भेष॒जं मधु॑ ।
शष्पै॒र्न तेज॑ इन्द्रि॒यं पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥१॥ ३०
होता॑ यक्ष॒त्तनू॒नपा॒त्सर॑स्वती॒मवि॑र्मे॒षो न भे॑ष॒जं प॒था मधु॑म॒ता भर॑न्न॒श्विनेन्द्रा॑य वी॒र्य॑म् ।
बद॑रैरुप॒वाका॑भिर्भेष॒जं तोक्म॑भिः॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥२॥ ३१
होता॑ यक्ष॒न्नरा॒शꣳसं॒ न न॒ग्नहुं॒ पति॒ꣳ सुर॑या भेष॒जं मे॒षः सर॑स्वती भि॒षग्रथो॒ न च॒न्द्र्य॑श्विनो॑र्व॒पा इन्द्र॑स्य
वी॒र्य॑म् । बद॑रैरुप॒वाका॑भिर्भेष॒जं तोक्म॑भिः॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥३॥ ३२
होता॑ यक्ष॒दिडे॑डि॒त आ॒जुह्वा॑नः॒ सर॑स्वती॒मिन्द्रं॒ बले॑न व॒र्धय॑न्नृष॒भेण॒ गवे॑न्द्रि॒यम॒श्विनेन्द्रा॑य भेष॒जम् ।
यवैः॑ क॒र्कन्धु॑भि॒र्मधु॑ ला॒जैर्न मास॑रं॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥४॥ ३३
होता॑ यक्षद्ब॒र्हिरूर्ण॑म्रदा भि॒षङ् नास॑त्या भि॒षजा॒श्विनाश्वा॒ शिशु॑मती भि॒षग्धे॒नुः सर॑स्वती भि॒षक् ।
दु॒ह इन्द्रा॑य भेष॒जं पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥५॥ ३४
होता॑ यक्ष॒द्दुरो॒ दिशः॑ कव॒ष्यो॒ न व्यच॑स्वतीर॒श्विभ्यां॒ न दुरो॒ दिश॒ इन्द्रो॒ न रोद॑सी दु॒घे दु॒हे धे॒नुः
सर॑स्वत्य॒श्विनेन्द्रा॑य भेष॒जम् ।
शु॒क्रं न ज्योति॑रिन्द्रि॒यं पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥६॥ ३५
होता॑ यक्षत्सु॒पेश॑सो॒षे नक्तं॒ दिवा॒श्विना॒ सम॑ञ्जा॒ते सर॑स्वत्या॒ त्विषि॒मिन्द्रे॒ न भे॑ष॒जम् ।
श्ये॒नो न रज॑सा हृ॒दा श्रि॒या न मास॑रं॒ पयः॒ सोमः॑ परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥७॥ ३६
होता॑ यक्ष॒द्दैव्या॒ होता॑रा भि॒षजा॒श्विनेन्द्रं॒ न जागृ॑वि॒ दिवा॒ नक्तं॒ न भे॑ष॒जैः ।
शू॒षꣳ सर॑स्वती भि॒षक् सीसे॑न दु॒ह इन्द्रि॒यं पयः॒ सोमः॑ परि॒स्रुता॑
घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥८॥ ३७ [१३९१]

होता॑ यक्षत्ति॒स्रो दे॒वीर्न भे॑ष॒जं त्रय॑स्त्रि॒धात॑वो॒ऽपसो॑ रू॒पमिन्द्रे॑ हिर॒ण्यय॑म॒श्विनेडा॒ न भार॑ती ।
वा॒चा सर॑स्वती॒ मह॒ इन्द्रा॑य दु॒ह इ॒न्द्रि॒यं पयः॒ सोमः॑ परि॒स्रुता॑
घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥९॥ ३८
होता॑ यक्षत् सु॒रेत॑समृष॒भं नर्या॑पसं॒ त्वष्टा॑र॒मिन्द्र॑म॒श्विना॑ भि॒षजं॒
न सर॑स्वती॒मोजो॒ न जू॒तिरि॑न्द्रि॒यं वृको॒ न र॑भ॒सो भि॒षक् ।
यशः॒ सुर॑या भेष॒जꣳ श्रि॒या न मास॑रं॒ पयः॒ सोमः॑
परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥१०॥ ३९
होता॑ यक्ष॒द्वन॒स्पति॑ꣳ शमि॒तार॑ꣳ श॒तक्र॑तुं भी॒मं न म॒न्युꣳ राजा॑नं व्या॒घ्रं नम॑सा॒श्विना॑ ।
भा॒मꣳ सर॑स्वती भि॒षगिन्द्रा॑य दु॒ह इन्द्रि॒यं पयः॒ सोमः॑
परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥११॥ ४०
होता॑ यक्षद॒ग्निꣳ स्वाहाज्य॑स्य स्तो॒काना॒ꣳ स्वाहा॒ मेद॑सां॒
पृथ॒क् स्वाहा॒ छाग॑म॒श्विभ्या॒ꣳ स्वाहा॑ मे॒षꣳ सर॑स्वत्यै ।
स्वाह॑ ऋष॒भमिन्द्रा॑य सि॒ꣳहाय॒ सह॑स इन्द्रि॒यꣳ स्वाहा॒ग्निं न भे॑ष॒जꣳ स्वाहा॒ सोम॑मिन्द्रि॒यम् ।
स्वाहेन्द्र॑ꣳ सु॒त्रामा॑णꣳ सवि॒तारं॒ वरु॑णं भि॒षजां॒ पति॒ꣳ स्वाहा॒ वन॒स्पतिं॑ प्रि॒यं पाथो॒ न भे॑ष॒जम् ।
स्वाहा॑ दे॒वा आ॑ज्य॒पा जु॑षा॒णो अ॒ग्निर्भे॑ष॒जं पयः॒ सोमः॑
परि॒स्रुता॑ घृ॒तं मधु॒ व्यन्त्वाज्य॑स्य होत॒र्यज॑ ॥१२॥ (४) ४१

होता॑ यक्षद॒श्विनौ॒ छाग॑स्य व॒पाया॒ मेद॑सो॒ जुषेता॒ꣳ ह॒विर्होत॒र्यज॑ ।
होता॑ यक्ष॒त्सर॑स्वतीं मे॒षस्य॑ व॒पाया॒ मेद॑सो॒ जुषता॒ꣳ ह॒विर्होत॒र्यज॑ ।
होता॑ यक्ष॒दिन्द्र॑मृष॒भस्य॑ व॒पाया॒ मेद॑सो॒ जुषता॒ꣳ ह॒विर्होत॒र्यज॑ ॥१॥ ४२
होता॑ यक्षद॒श्विनौ॒ सर॑स्वती॒मिन्द्र॑ꣳ सु॒त्रामा॑णमि॒मे सोमाः॑
सु॒रामा॑ण॒श्छागै॒र्न मे॒षैर्ऋ॑ष॒भैः सु॒ताः ।
शष्पै॒र्न तोक्म॑भिर्ला॒जैर्मह॑स्वन्तो॒ मदा॒ मास॑रेण॒ परि॑ष्कृताः
शु॒क्राः पय॑स्वन्तो॒ऽमृताः॒ प्रस्थि॑ता वो मधु॒श्च्युत॒स्तान॒श्विना॒ सर॑स्व॒तीन्द्रः॑
सु॒त्रामा॑ वृत्र॒हा जु॒षन्ता॒ꣳ सो॒म्यं मधु॑ ।
पिब॑न्तु॒ मद॑न्तु॒ व्यन्तु॒ होत॒र्यज॑ ॥२॥ ४३ [१३९७]
होता॑ यक्षद॒श्विनौ॒ छाग॑स्य ह॒विष॒ आत्ता॑म॒द्य म॑ध्य॒तो मेद॒ उद्भृ॑तं पु॒रा द्वेषो॑भ्यः पु॒रा पौरु॑षेय्या
गृ॒भः । घस्तां॑ नू॒नं घा॒से अ॑ज्रा॒णां यव॑सप्रथमाना॒ꣳ सु॒मत्क्ष॑राणा॒ꣳ श॒तरु॒द्रिया॑णाम॒ग्निष्वा॒त्ताना॒ं

पीवो॑पवसनानाम् । पा॒र्श्व॒तः श्रो॑णि॒तः शि॑ताम॒त उ॑त्साद॒तोऽङ्गा॑दङ्गा॒दव॑त्ताना॒ं कर॑त ए॒वा॒-
श्विना॑ जु॒षेता॒ꣳ ह॒विर्होत॒र्यज॑ । होता॑ यक्ष॒त्सर॑स्वतीं मे॒षस्य॑ ह॒विष॒ आव॑यद॒द्य म॑ध्य॒तो मेद॒
उद्भृ॑तं पु॒रा द्वेषो॑भ्यः पु॒रा पौरु॑षेय्या गृ॒भः । घस॑न्नू॒नं घा॒से अ॑ज्रा॒णां यव॑सप्रथमाना॒ꣳ
सु॒मत्क्ष॑राणा॒ꣳ श॒तरु॒द्रिया॑णाम॒ग्निष्वा॒त्ताना॒ं पीवो॑पवसनानाम् । पा॒र्श्व॒तः श्रो॑णि॒तः शि॑ताम॒त
उ॑त्साद॒तोऽङ्गा॑दङ्गा॒दव॑त्ताना॒ं कर॑देव॒ꣳ सर॑स्वती जु॒षता॒ꣳ ह॒विर्होत॒र्यज॑ । होता॑ यक्ष॒दिन्द्र॑मृष॒-
भस्य॑ ह॒विष॒ आव॑यद॒द्य म॑ध्य॒तो मेद॒ उद्भृ॑तं पु॒रा द्वेषो॑भ्यः पु॒रा पौरु॑षेय्या गृ॒भः । घस॑न्नू॒नं
घा॒से अ॑ज्रा॒णां यव॑सप्रथमाना॒ꣳ सु॒मत्क्ष॑राणा॒ꣳ श॒तरु॒द्रिया॑णाम॒ग्निष्वा॒त्ताना॒ं पीवो॑पवसनानाम् ।
पा॒र्श्व॒तः श्रो॑णि॒तः शि॑ताम॒त उ॑त्साद॒तोऽङ्गा॑दङ्गा॒दव॑त्ताना॒ं कर॑देव॒मिन्द्रो॑ जु॒षता॒ꣳ ह॒विर्होत॒र्यज॑
॥३॥ ४४

होता॑ यक्ष॒द्वन॒स्पति॑म॒भि हि पि॒ष्टत॑मया॒ रभि॑ष्ठया रश॒नया॑धि॒त ।
यत्रा॒श्विनो॒श्छाग॑स्य ह॒विषः॑ प्रि॒या धामा॑नि॒ यत्र॒ सर॑स्वत्या मे॒षस्य॑ ह॒विषः॑
प्रि॒या धामा॑नि॒ यत्रेन्द्र॑स्य ऋष॒भस्य॑ ह॒विषः॑ प्रि॒या धामा॑नि ।
यत्रा॒ग्नेः प्रि॒या धामा॑नि॒ यत्र॒ सोम॑स्य प्रि॒या धामा॑नि॒ यत्रेन्द्र॑स्य सु॒त्राम्णः॑ प्रि॒या धामा॑नि ।
यत्र॑ सवि॒तुः प्रि॒या धामा॑नि॒ यत्र॒ वरु॑णस्य प्रि॒या धामा॑नि॒ यत्र॒ वन॒स्पतेः॑ प्रि॒या पाथा॑ꣳसि ॥
यत्र॑ दे॒वाना॑माज्य॒पानां॑ प्रि॒या धामा॑नि॒ यत्रा॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि ।
तत्रै॒तान्प्र॒स्तुत्ये॑वोप॒स्तुत्ये॑वो॒पाव॑स्रक्ष॒द्रभी॑यस इव कृ॒त्वी कर॑दे॒वं दे॒वो
वन॒स्पति॑र्जु॒षता॒ꣳ ह॒विर्होत॒र्यज॑ ॥४॥ ४५
होता॑ यक्षद॒ग्निꣳ स्वि॑ष्ट॒कृत॒मया॑ड॒ग्निर॒श्विनो॒श्छाग॑स्य ह॒विषः॑ प्रि॒या धामा॒न्यया॑ट्
सर॑स्वत्या मे॒षस्य॑ ह॒विषः॑ प्रि॒या धामा॒न्यया॒डिन्द्र॑स्य ऋष॒भस्य॑ ह॒विषः॑ प्रि॒या धामा॑नि ।
अया॑ड॒ग्नेः प्रि॒या धामा॒न्यया॒ट् सोम॑स्य प्रि॒या धामा॒न्यया॒डिन्द्र॑स्य सु॒त्राम्णः॑ प्रि॒या धामा॑नि ।
अया॑ट् सवि॒तुः प्रि॒या धामा॒न्यया॒ड् वरु॑णस्य प्रि॒या धामा॒न्यया॒ड् वन॒स्पतेः॑ प्रि॒या पाथा॑ꣳसि ।
अया॑ड् दे॒वाना॑माज्य॒पानां॑ प्रि॒या धामा॑नि॒ यक्ष॑द॒ग्नेर्होतुः॑ प्रि॒या धामा॑नि । यक्ष॒त्स्वं
म॑हि॒मान॒माय॑जता॒मेज्या॒ इषः॑ कृ॒णोतु॒ सो अ॑ध्व॒रा जा॒तवे॑दा जु॒षता॒ꣳ ह॒विर्होत॒र्यज॑ ॥५॥ ४६

दे॒वं ब॒र्हिः सर॑स्वती सुदे॒वमिन्द्रे॑ अ॒श्विना॑ ।
तेजो॒ न चक्षु॑र॒क्ष्योर्ब॒र्हिषा॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥१॥ ४७
दे॒वीर्द्वारो॑ अ॒श्विना॑ भि॒षजेन्द्रे॒ सर॑स्वती ।
प्रा॒णं न वी॒र्यं॑ न॒सि द्वारो॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥२॥ ४८ [१४०२]

दे॒वी उ॒षासा॑ अ॒श्विना॑ सु॒त्रामेन्द्रे॒ सर॑स्वती ।
बलं॒ न वाच॑मा॒स्य उ॒षाभ्यां॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥३॥ ४९
दे॒वी जोष्ट्री॒ सर॑स्वत्य॒श्विनेन्द्र॑मवर्धयन् ।
श्रोत्रं॒ न कर्ण॑यो॒र्यशो॒ जोष्ट्री॑भ्यां दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥४॥ ५०
दे॒वी ऊ॒र्जाहु॑ती दु॒घे सु॒दुघेन्द्रे॒ सर॑स्वत्य॒श्विना॑ भि॒षजा॑वतः ।
शु॒क्रं न ज्योति॒ स्तन॑यो॒राहु॑ती धत्त इन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५॥ ५१
दे॒वा दे॒वानां॑ भि॒षजा॒ होता॑रा॒ इन्द्र॑म॒श्विना॑ वषट्का॒रैः सर॑स्वती॒ त्विषि॒ न हृद॑ये म॒तिम् ।
होतृ॑भ्यां दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥६॥ ५२
दे॒वीस्ति॒स्रस्ति॒स्रो दे॒वीर॒श्विनेडा॒ सर॑स्वती ।
शूषं॒ न मध्ये॒ नाभ्या॒मिन्द्रा॑य दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥७॥ ५३
दे॒व इन्द्रो॒ नरा॒शꣳस॑स्त्रिव॒रूथः॒ सर॑स्वत्या॒श्विभ्या॑मीयते॒ रथः॑ ।
रेतो॒ न रू॒पम॒मृतं॑ ज॒नित्र॒मिन्द्रा॑य॒ त्वष्टा॒ दध॑दिन्द्रि॒याणि॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥८॥ ५४
दे॒वो दे॒वैर्वन॒स्पति॒र्हिर॑ण्यपर्णो अ॒श्विभ्या॒ꣳ सर॑स्वत्या सुपिप्प॒ल इन्द्रा॑य पच्यते॒ मधु॑ ।
ओजो॒ न जू॒तिर्ऋ॑ष॒भो न भामं॒ वन॒स्पति॑र्नो॒ दध॑दिन्द्रि॒याणि॑ व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥९॥ ५५
दे॒वं ब॒र्हिर्वारि॑तीनामध्व॒रे स्ती॒र्णम॒श्विभ्या॒मूर्ण॑म्रदाः॒ सर॑स्वत्या स्यो॒नमि॑न्द्र ते॒ सदः॑ ।
ई॒शायै॑ म॒न्युꣳ राजा॑नं ब॒र्हिषा॑ दधुरिन्द्रि॒यं व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥१०॥ ५६
दे॒वो अ॒ग्निः स्वि॑ष्ट॒कृद्दे॒वान्य॑क्षद्यथाय॒थꣳ होता॑रा॒ इन्द्र॑म॒श्विना॑
वा॒चा वाच॒ꣳ सर॑स्वतीम॒ग्निꣳ सोम॒ꣳ स्वि॑ष्ट॒कृत् ।
स्वि॑ष्ट॒ इन्द्रः॑ सु॒त्रामा॑ सवि॒ता वरु॑णो भि॒षगि॒ष्टो दे॒वो वन॒स्पतिः॒ स्वि॑ष्टा दे॒वा आ॑ज्य॒पाः ।
स्वि॑ष्टो अ॒ग्निर॒ग्निना॒ होता॑ हो॒त्रे स्वि॑ष्ट॒कृद्यशो॒ न दध॑दिन्द्रि॒यमूर्ज॒मप॑चिति॒ꣳ स्व॒धां
व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥११॥ ५७
अ॒ग्निम॒द्य होता॑रमवृणीता॒यं यज॑मानः॒ पच॒न् पक्तीः॑
पच॑न् पुरो॒डाशा॑न् ब॒ध्नन्न॒श्विभ्यां॒ छाग॒ꣳ सर॑स्वत्यै मे॒षमिन्द्रा॑य ऋष॒भम् ।
सु॒न्वन्न॒श्विभ्या॒ꣳ सर॑स्वत्या॒ इन्द्रा॑य सु॒त्राम्णे॑ सुरासो॒मान् ॥१२॥ ५८
सू॒प॒स्था अ॒द्य दे॒वो वन॒स्पति॑रभवद॒श्विभ्यां॒ छागे॑न॒ सर॑स्वत्यै मे॒षेणेन्द्रा॑य ऋष॒भेण॑ ।
अक्ष॒ꣳस्तान् मे॑द॒स्तः प्रति॑ पच॒ताग्र॑भीष॒तावी॑वृधन्त पुरो॒डाशै॒रपु॑र॒श्विना॒ सर॑स्व॒तीन्द्रः॑ सु॒त्रामा॑
सुरासो॒मान् ॥ १३॥ ५९ [१४१३]

त्वामद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आ संगतेभ्य एष मे देवेषु
वसु वार्यायक्ष्यत इति ।
ता या देवा देव दानान्यदुस्तान्यस्मा आ च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय
प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥१४॥ (६) ६० [१४१४]

इमं मे वरुण द्वादश ॥ १२ ॥ समिद्धो अग्निरेकादश ॥ ११ ॥ वसन्तेन षट् ॥ ६ ॥ होता यक्षद्
द्वादश ॥ १२ ॥ होता यक्षदश्विनौ छागस्य पञ्च ॥ ५ ॥ देवं बर्हिश्चतुर्दश ॥ १४ ॥
॥ षडनुवाकेषु षष्टिः ॥ ६० ॥

॥ इति शुक्लयजुःकाण्वसंहितायां त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

तेजोऽसि शुक्रममृतमायुष्पा आयुर्मे पाहि ।
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे ॥१॥ १
इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।
सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती ॥२॥ २
अभिधा असि भुवनमसि यन्तासि धर्ता ।
स त्वमग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः स्वगा त्वा देवेभ्यः ॥३॥ ३
प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि देवेभ्यः प्रजापतये तेन राध्यासम् ।
तं बधान देवेभ्यः प्रजापतये तेन राध्नुहि ।
प्रजापतये त्वा जुष्टं प्रोक्षामीन्द्राग्निभ्यां त्वा जुष्टं प्रोक्षामि वायवे त्वा जुष्टं प्रोक्षामि
विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि ॥४॥ ४
यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः । परो मर्तः परः श्वा ॥५॥ (१) ५

अग्नये स्वाहा सोमाय स्वाहापां मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहा ।
इन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥१॥ (२) ६

हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा ।
प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा ॥१॥ ७
निविष्टाय स्वाहोपविष्टाय स्वाहा संदिताय स्वाहा वल्गते स्वाहा ।
आसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा ॥२॥ ८ [१४११]
१०

कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा ।
सꣳहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥३॥ ९
यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा ।
शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा ॥४॥ १०
जवाय स्वाहा बलाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा ।
विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा ॥५॥ ११
ईक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा ।
यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मूत्रं करोति तस्मै स्वाहा
कुर्वते स्वाहा कृताय स्वाहा ॥६॥ (३) १२

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥१॥ १३
हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥२॥ १४
देवस्य चेततो महीं प्र सवितुर्हवामहे । सुमतिꣳ सत्यराधसम् ॥३॥ १५
सुष्टुतिꣳ सुमतीवृधो रातिꣳ सवितुरीमहे । प्र देवाय मतीविदे ॥४॥ १६
रातिꣳ सत्पतिं महे सवितारमुप ह्वये । आसवं देववीतये ॥५॥ १७
देवस्य सवितुर्मतिमासवं विश्वदेव्यम् । धिया भगं मनामहे ॥६॥ १८
अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥७॥ १९
स हव्यवाळमर्त्य उशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥८॥ २०
तं त्वा घृतस्न ईमहे चित्रभानो स्वर्विदम् । देवाँ२ आ वीतये वह ॥९॥ २१
अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ२ आ सादयादिह ॥१०॥ (४) २२

ाजीजनो हि पवमान सूर्यं विधारे शक्मना पयः । गोजीरया रꣳहमाणः पुरन्ध्या ॥१॥ (५) २३

ेभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि मयोऽस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणा असि ।
ायुर्नामासि शिशुर्नामास्यादित्यानां पत्वान्विहि ॥१॥ २४
देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितꣳ रक्षत ।
इह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा ॥२॥ (६) २५

काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहा ।
स्वाहाधिमाधीताय स्वाहा मनः प्रजापतये स्वाहा चित्तं विज्ञाताय ॥१॥ २६ [१४४०]

अदित्यै स्वाहादित्यै मह्यै स्वाहादित्यै सुमृळीकायै स्वाहा ।
सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा ॥२॥ २७
पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा ।
त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा ।
विष्णवे स्वाहा विष्णवे निभूयपाय स्वाहा विष्णवे शिपिविष्टाय स्वाहा ॥३॥ २८
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥४॥ (७) २९
आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः । ३०
शूर इषव्योऽतिव्याधी महारथो जायताम् ॥१॥
दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा ।
जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम् ॥२॥ ३१
निकामेनिकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् ।
योगक्षेमो नः कल्पताम् ॥३॥ (८) ३२
प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा ।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ॥१॥ (९) ३३
प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्वाच्यै दिशे स्वाहा ।
प्रतीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ।
ऊर्ध्वायै दिशे स्वाहार्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥१॥ (१०) ३४
अद्भ्यः स्वाहा वार्भ्यः स्वाहोदकाय स्वाहा तिष्ठन्तीभ्यः स्वाहा
स्रवन्तीभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा ।
कूप्याभ्यः स्वाहा सूद्याभ्यः स्वाहा धार्याभ्यः
स्वाहार्णवाय स्वाहा समुद्राय स्वाहा सरिराय स्वाहा ॥१॥ (११) ३५
वाताय स्वाहा धूमाय स्वाहाभ्राय स्वाहा मेघाय स्वाहा विद्योतमानाय स्वाहा स्तनयते स्वाहा ।
अवस्फूर्जते स्वाहा वर्षते स्वाहाववर्षते स्वाहोग्रं वर्षते स्वाहा
शीघ्रं वर्षते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा ।
प्रुष्णते स्वाहा शीकायते स्वाहा प्रुष्वाभ्यः स्वाहा
ह्रादुनीभ्यः स्वाहा नीहाराय स्वाहा ॥१॥ (१२) ३६ [१४५०]

अग्नये स्वाहा सोमाय स्वाहेन्द्राय स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा ।
दिवे स्वाहा दिग्भ्यः स्वाहाशाभ्यः
स्वाहोर्व्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा ॥१॥(१३) ३७

नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहाहोरात्रेभ्यः स्वाहार्धमासेभ्यः स्वाहा ।
मासेभ्यः स्वाहा ऋतुभ्यः स्वाहार्तवेभ्यः स्वाहा
संवत्सराय स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा ॥१॥ ३८
चन्द्राय स्वाहा सूर्याय स्वाहा रश्मिभ्यः स्वाहा वसुभ्यः स्वाहा ।
रुद्रेभ्यः स्वाहादित्येभ्यः स्वाहा मरुद्भ्यः स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा ॥२॥(१४) ३९

मूलेभ्यः स्वाहा शाखाभ्यः स्वाहा वनस्पतिभ्यः स्वाहा ।
पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहौषधीभ्यः स्वाहा ॥१॥(१५) ४०

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा ।
चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा ।
वनस्पतिभ्यः स्वाहा परिप्लवेभ्यः स्वाहा चराचरेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा॥१॥(१६) ४१

असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा ।
गणश्रिये स्वाहा गणपतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा ॥१॥ ४२
शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा ।
मलिम्लुचाय स्वाहा दिवा पतयते स्वाहा ॥२॥ (१७) ४३

मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा ।
नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा ।
सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहाꣳहसस्पतये स्वाहा ॥१॥(१८) ४४

वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा ।
स्वः स्वाहा मूर्ध्ने स्वाहा व्यश्नुविने स्वाहा ।
अन्त्याय स्वाहान्त्यायनाय स्वाहा भौवनाय स्वाहा
भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा ॥१॥ (१९) ४५ [१४५९]

आयुर्यज्ञेनं कल्पताꣳ स्वाहां प्राणो यज्ञेनं कल्पताꣳ स्वाहांपानो यज्ञेनं कल्पताꣳ स्वाहां
व्यानो यज्ञेनं कल्पताꣳ स्वाहां ।
उदानो यज्ञेनं कल्पताꣳ स्वाहां समानो यज्ञेनं कल्पताꣳ स्वाहा चक्षुर्यज्ञेनं कल्पताꣳ स्वाहा
श्रोत्रं यज्ञेनं कल्पताꣳ स्वाहां ।
वाग्यज्ञेनं कल्पताꣳ स्वाहा मनो यज्ञेनं कल्पताꣳ स्वाहात्मा यज्ञेनं कल्पताꣳ स्वाहां
पृष्ठं यज्ञेनं कल्पताꣳ स्वाहां ।
ब्रह्म यज्ञेनं कल्पताꣳ स्वाहां यज्ञो यज्ञेनं कल्पताꣳ स्वाहा ज्योतिर्यज्ञेनं कल्पताꣳ स्वाहा
स्वर्यज्ञेनं कल्पताꣳ स्वाहां ॥१॥ (२०) ४६

एकंस्मै स्वाहा द्वाभ्याꣳ स्वाहां शताय स्वाहैंकशताय स्वाहां ।
व्युंष्ट्यै स्वाहां स्वर्गाय स्वाहां ॥१॥ (२१) ४७ [१४६१]

तेजोऽसि पञ्च ॥५॥ अश्वय एका ॥१॥ हिङ्काराय षट् ॥६॥ तत्सवितुर्दश ॥१०॥ अजीजनो ह्येका ॥१॥
विभूर्द्वे ॥२॥ काय चतस्रः ॥४॥ आब्रह्मंस्तिस्रः ॥३॥ प्राणायैका ॥१॥ प्राच्यायैका ॥१॥
अद्भ्य एका ॥१॥ वातायैका ॥१॥ अश्वय इत्येका ॥१॥ नक्षत्रेभ्यो द्वे ॥२॥ मूलेभ्य एका ॥१॥
पृथिव्या इत्येका ॥१॥ अस्नव द्वे ॥२॥ मधव एका ॥१॥ वाजायैका ॥१॥
आयुर्यज्ञेनैका ॥१॥ एकस्मा इत्येका ॥१॥
॥ एकविंशत्यनुवाकेषु सप्तचत्वारिंशत् ॥४७॥
॥ इति शुक्लयजुःकाण्वसंहितायां चतुर्विंशोऽध्यायः ॥२४॥

अथ पञ्चविंशोऽध्यायः ।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकं आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवायं हविषां विधेम ॥१॥ १
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः सूर्यस्ते महिमा ।
यस्तेऽहन्त्संवत्सरे महिमा संबभूव यस्ते वायावन्तरिक्षे महिमा संबभूवं ।
यस्ते दिवि सूर्ये महिमा संबभूव तस्मै ते महिम्ने प्रजापतये स्वाहां देवेभ्यः ॥२॥ (१) २

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूवं ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवायं हविषां विधेम ॥१॥ ३ [१४६४]

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ।
यस्ते रात्रौ संवत्सरे महिमा संबभूव यस्ते पृथिव्यामग्नौ महिमा संबभूवं ।
यस्ते नक्षत्रेषु चन्द्रमसि महिमा संबभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहां ॥२॥ (२) ४

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥१॥ ५
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥२॥ ६
यद्वातो अपो अगनीगन्प्रियामिन्द्रस्य तन्वम् ।
एतꣳ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः ॥३॥ ७
वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसा ।
आदित्यास्त्वाञ्जन्तु जागतेन छन्दसा ॥४॥ ८
भूर्भुवः स्वर्लाजी३ञ्छाची३न्यव्ये गव्ये ।
एतदन्नमत्त देवा एतदन्नमद्धि प्रजापते ॥५॥ ९
कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥६॥ १०
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥७॥ ११
का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥८॥ १२
द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥९॥(३) १३

वायुष्ट्वा पचतैरवत्वसितग्रीवश्छागैः । न्यग्रोधश्चमसैः शल्मलिर्वृद्ध्या ॥१॥ १४
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन् । ब्रह्मा कृष्णश्च नोऽवतु नमोऽग्नये ॥२॥ १५
सꣳशितो रश्मिना रथः सꣳशितो रश्मिना हयः ।
सꣳशितो अप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ॥३॥ १६
स्वयं वाजिꣳस्तन्वं कल्पयस्व स्वयं यजस्व स्वयं जुषस्व ।
महिमा तेऽन्येन न संनशे ॥४॥ १७
न वा उ एतन्म्रियसे न रिष्यसि देवाँ२ इदेषि पथिभिः सुगेभिः ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥५॥ १८ [१४७९]

अग्निः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः ।
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ।
वायुः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्वायुः ।
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ।
सूर्यः पशुरासीत्तेनायजन्त स एतं लोकमजयद्यस्मिन्त्सूर्यः ।
स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ॥६॥ (४) १९

प्राणाय स्वाहापानाय स्वाहां व्यानाय स्वाहां । अम्बे अम्बिकेऽम्बालिके न मां नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥१॥ २०

गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे ।
निधीनां त्वा निधिपतिꣳ हवामहे वसो मम ॥२॥ २१
आहमजानि गर्भधमा त्वमजासि गर्भधम् । ता उभौ चतुरः पदः संप्रसारयाव ।
स्वर्गे लोके प्रोर्णुवाथां वृषा वाजी रेतोधा रेतो दधातु ॥३॥ (५) २२

उत्सक्थ्या अव गुदं धेहि समञ्जिं चारया वृषन् । य स्त्रीणां जीवभोजनः ॥१॥ २३
यकासकौ शकुन्तिकाहलगिति वञ्चति । आहन्ति गभे पसो निगल्गलीति धारका ॥२॥२४
यकोऽसकौ शकुन्तक आहलगिति वञ्चति ।
विवक्षत इव ते मुखमध्वर्यो मा नस्त्वमभि भाषथाः ॥३॥ २५
माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः ।
प्रतिलामीति ते पिता गभे मुष्टिमतꣳसयत् ॥४॥ २६
माता च ते पिता च तेऽग्रे वृक्षस्य क्रीडतः ।
विवक्षत इव ते मुखं ब्रह्मन्मा त्वं वदो बहु ॥५॥ २७
ऊर्ध्वामेनामुच्छ्रापय गिरौ भारꣳ हरन्निव ।
अथास्यै मध्यमेधताꣳ शीते वाते पुनन्निव ॥६॥ २८
ऊर्ध्वमेनमुच्छ्रयताद्गिरौ भारꣳ हरन्निव ।
अथास्य मध्यमेजतु शीते वाते पुनन्निव ॥७॥ २९
यदस्या अꣳहुभेद्याः कृधु स्थूलमुपातसत् ।
मुष्काविदस्या एजतो गोशफे शकुलाविव ॥८॥ ३० [१४९१]

यद्देवासो ललामगुं प्र विष्टीमिनमाविषुः ।
सक्थ्ना देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥९॥ ३१
यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते ।
शूद्रा यदर्यजारा न पोषाय धनायति ॥१०॥ ३२
यद्धरिणो यवमत्ति न पुष्टं बहु मन्यते ।
शूद्रो यदर्यायै जारो न पोषमनु मन्यते ॥११॥ ३३
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूꣳषि तारिषत् ॥१२॥ (६) ३४

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥१॥ ३५
द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ।
विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा ॥२॥ ३६
महानाम्न्यो रेवत्यो विश्वा आशाः प्रभूवरीः ।
मेघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥३॥ ३७
नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया ।
देवानां पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ॥४॥ ३८
रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः ।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ॥५॥ ३९
कुविदङ्ग यवमन्तो यवंश्चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं न जग्मुः ॥६॥ (७) ४०

कस्त्वा छ्यति कस्त्वा विशास्ति कस्ते गात्राणि शम्यति । क उ ते शमिता कविः॥१॥४१
ऋतवस्त ऋतुथा पर्व शमितारो वि शासतु ।
संवत्सरस्य तेजसा शमीभिः शम्यन्तु त्वा ॥२॥ ४२
अर्धमासाः परूꣳषि ते मासा आ छ्यन्तु शम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टꣳ सूदयन्तु ते ॥३॥ ४३
दैव्या अध्वर्यवस्त्वा छ्यन्तु वि च शासतु ।
गात्राणि पर्वशस्ते सिमाः कृण्वन्तु शम्यन्तीः ॥४॥ ४४ [१५०५]

द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते ।
सूर्यस्ते नक्षत्रैः सह लोकं कृणोतु साधुया ॥५॥ ४५
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः ।
शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ॥६॥ (८) ४६

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजं किम्वावपनं महत् ॥१॥ ४७
सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥२॥ ४८
किꣳ स्वित्सूर्यसमं ज्योतिः किꣳ समुद्रसमꣳ सरः ।
किꣳ स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥३॥ ४९
ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमꣳ सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते ॥४॥ ५०
पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वं भुवनमा विवेशा३ ॥५॥ ५१
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमा विवेश ।
सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवो अस्य पृष्ठम् ॥६॥ ५२
केष्वन्तः पुरुष आ विवेश कान्यन्तः पुरुषे अर्पितानि ।
एतद् ब्रह्मन्नुप वल्हामसि त्वा किꣳ स्विन्नः प्रति वोचास्यत्र ॥७॥ ५३
पञ्चस्वन्तः पुरुष आ विवेश तान्यन्तः पुरुषे अर्पितानि ।
एतत्त्वात्र प्रतिमन्वानो अस्मि न मायया भवस्युत्तरो मत् ॥८॥ (९) ५४

का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥१॥ ५५
द्यौरासीत्पूर्वचित्तिरश्व आसीद् बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥२॥ ५६
का ईमरे पिशङ्गिला का ईं कुरु पिशङ्गिला ।
क ईमा स्कन्दमर्षति क ईं पन्थां वि सर्पति ॥३॥ ५७ [१५१८]

अजारे पिशङ्गिला श्वावित्कुरु पिशङ्गिला ।
शश आस्कन्दमर्षत्यहिः पन्थां वि सर्पति ॥४॥ ५८
कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः ।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतार ऋतुशो यजन्ति ॥५॥ ५९
षळस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः ।
यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होतार ऋतुशो यजन्ति ॥६॥ ६०
को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्यस्य वेद बृहतो जनित्रं को वेद चन्द्रमसं यतोजाः ॥७॥ ६१
वेदाहमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अन्तरिक्षम् ।
वेद सूर्यस्य बृहतो जनित्रमथो वेद चन्द्रमसं यतोजाः ॥८॥ ६२
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥९॥ ६३
इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयꣳ सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥१०॥ ६४
सुभूः स्वयम्भूः प्रथमोऽन्तर्महत्यर्णवे ।
दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥११॥ ६५
होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः ।
जुषतां पिबतु सोमꣳ होतर्यज ॥१२॥ ६६
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥१३॥(१०) ६७ [१५१८]

हिरण्यगर्भो द्वे ॥ २ ॥ यः प्राणतो द्वे ॥ २ ॥ युञ्जन्ति नव ॥ ९ ॥ वायुष्ट्वा षट् ॥ ६ ॥ प्राणाय तिस्रः ॥ ३ ॥
द्यौस्तकथ्या द्वादश ॥१२॥ गायत्री षट् ॥६॥ कस्त्वा षट् ॥६॥ कः स्विदष्ट ॥८॥ का स्वित् त्रयोदश ॥ १३ ॥
॥ दशानुवाकेषु सप्तषष्टिः ॥ ६७ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां पञ्चविंशोऽध्यायः ॥ २५ ॥

अथ षड्विंशोऽध्यायः ।

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीव आग्नेयो रराटे ।
पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोः ॥१॥ १
आश्विना अधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्याꣳ सौर्ययामौ ।
श्वेतश्च कृष्णश्च पार्श्वयोः ॥२॥ २
त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छ इन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ।
रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः ॥३॥ ३
शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतः
शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः । ४
पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥४॥
शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः । ५
श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामाः ॥५॥
अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः । पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः ॥६॥ ६
फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः । ७
प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः ॥७॥
कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः । ८
कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उषस्याः ॥८॥
शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाता अदित्यै । ९
सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥९॥ (३)

कृष्णग्रीवा आग्नेयाः शितिभ्रवो वसूनाꣳ रोहिता रुद्राणाम् । १०
श्वेता अवरोकिण आदित्यानां नभोरूपाः पार्जन्याः ॥१॥
उन्नत ऋषभो वामनस्त ऐन्द्रावैष्णवा उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्याः । ११
शुकरूपा वाजिनाः कल्माषा आग्निमारुताः श्यामाः पौष्णाः ॥२॥
शुकरूपा वाजिनाः कल्माषा आग्निमारुताः श्यामाः पौष्णाः ॥२॥
एता ऐन्द्राग्ना द्विरूपा अग्नीषोमीया वामना अनड्वाह आग्नावैष्णवाः । १२
वशा मैत्रावरुण्योऽन्यत एन्यो मैत्र्यः ॥३॥
वशा मैत्रावरुण्योऽन्यत एन्यो मैत्र्यः ॥३॥
कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेता वायव्या अविज्ञाता अदित्यै । १३ [१५४१]
सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः ॥४॥

कृष्णा भौमा धूम्रा आन्तरिक्षा बृहन्तो दिव्याः ।
शबला वैद्युताः सिध्मास्तारकाः ॥५॥ (२) १४

धूम्रान्वसन्तायालभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योऽरुणाञ्छरदे ।
पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥१॥ १५
त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै ।
त्रिवत्सा अनुष्टुभे तुर्यवाह उष्णिहे ॥२॥ १६
पष्ठवाहो विराज उक्षाणो बृहत्या ऋषभाः ककुभे ।
अनड्वाहः पङ्क्त्यै धेनवोऽतिच्छन्दसे ॥३॥ १७
कृष्णग्रीवा आग्नेया बभ्रवः सौम्या उपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः ।
पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥४॥ १८
उक्ताः संचरा एता ऐन्द्राग्नाः ।
कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥५॥ (३) १९

अग्नयेऽनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान् ।
मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥१॥ २०
उक्ताः संचरा एता ऐन्द्राग्नाः । प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः ॥२॥ २१
धूम्रा बभ्रुनीकाशाः पितॄणाꣳ सोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदाम् ।
कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः ॥३॥ २२
उक्ताः संचरा एताः शुनासीरीयाः । श्वेता वायव्याः श्वेताः सौर्याः ॥४॥ २३
वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिकाः ।
हेमन्ताय ककराञ्छिशिराय विककरान् ॥५॥ (४) २४

समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान् ।
मित्राय कुलीपयान्वरुणाय नाक्रान् ॥१॥ २५
सोमाय हꣳसानालभते वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान् ।
मित्राय मद्गून्वरुणाय चक्रवाकान् ॥२॥ २६
अग्नये कुटरूनालभते वनस्पतिभ्य उलूकानग्नीषोमाभ्यां चाषान् ।
अश्विभ्यां मयूरान्मित्रावरुणाभ्यां कपोतान् ॥३॥ २७ [१५५५]

सोमाय लबानालंभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः ।
कुलीकां देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥४॥ २८
अह्ने पारावतानालंभते रात्र्यै सीचापूरहोरात्रयोः संधिभ्यो जतूः ।
मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान् ॥५॥ (५) २९

भूम्या आखूनालंभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे कशान् ।
दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥१॥ ३०
वसुभ्य ऋश्यानालंभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून् ।
विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ॥२॥ ३१
ईशानाय परस्वत आलंभते मित्राय गौरान्वरुणाय महिषान् ।
बृहस्पतये गवयाःस्त्वष्ट्र उष्ट्रान् ॥३॥ ३२
प्रजापतये पुरुषान् हस्तिन आलंभते वाचे प्लुषीन् ।
चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥४॥ ३३
प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः ।
शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः क्रिमिः समुद्राय
शिशुमारो हिमवते हस्ती ॥५॥ (६) ३४

मयुः प्राजापत्य उलो हलिक्ष्णो वृषदःशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी ।
कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥१॥ ३५
सोमाय कुलुङ्ग आरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः ।
पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥२॥ ३६
सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविङ्भौमी ।
शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥३॥ ३७
सुपर्णः पार्जन्य आतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्तरिक्षः ।
प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥४॥ ३८
पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हःसो वातस्य ।
नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः ॥५॥ (७) ३९

एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्यै ।
ऋक्षो जतूः सुषिलीका त इतरजनानां जहका वैष्णवी ॥१॥ ४० [१५६८]

अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रो मासां कश्यपः ।
रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ॥२॥ ४१
वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाजगरो वसूनां कपिञ्जलः ।
कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥३॥ ४२
श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः ।
क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥४॥ ४३
खङ्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः ।
सिःहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः॥५॥(८)४४ [१५७१]

अश्वस्तूपरो नव ॥ ९ ॥ कृष्णग्रीवा पञ्च ॥ ५ ॥ धूम्रान्वसन्ताय पञ्च ॥ ५ ॥ अग्नयेऽनीकवते पञ्च ॥ ५ ॥ समुद्राय शिशुमारान् पञ्च ॥ ५ ॥ भूम्या आखून् पञ्च ॥ ५ ॥ मयुः प्राजापत्य पञ्च ॥ ५ ॥ एण्यह्न इति पञ्च ॥ ५ ॥
॥ अष्टानुवाकेषु चतुश्चत्वारिंशत् ॥ ४४ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

शादं दद्भिरवकां दन्तमूलैर्मृदं बर्स्वैस्तेगान्दःष्ट्राभ्याः सरस्वत्या अग्रजिह्वं जिह्वाया उत्सादम् ।
अवक्रन्देन तालु वाजः हनुभ्यामप आस्येन वृषणमाण्डाभ्याम् ॥१॥ १
आदित्यान् श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्तोभ्यां विद्युतं कनीनकाभ्याम् ।
शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवोऽवार्याणि पक्ष्माणि
पार्या इक्षवः ॥२॥ (१) २

वातं प्राणेनापानेन नासिके उपयाममधरेणौष्ठेन सदुत्तरेण ।
प्रकाशेनान्तरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं
कनीनकाभ्याम् ॥१॥ ३
कर्णाभ्याः श्रोत्रः श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिः ।
अदितिः शीर्ष्णा निर्ऋतिं निर्जर्जल्येन शीर्ष्णा संक्रोशैः प्राणान् रेष्माणः स्तुपेन ॥२॥ (२) ४

मशकान्केशैरिन्द्रः स्वपसा वहेन बृहस्पतिः शकुनिसादेन कूर्मान् ।
शफैराक्रमणः स्थूराभ्यामृक्षलाभिः कपिञ्जलान् ॥१॥ ५ [१५७७]

जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निमतिरुग्भ्याम् ।
पूषणं दोर्भ्यामश्विना अःसाभ्याः रुद्रः रोराभ्याम् ॥२॥ (३) ६

अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थी ।
अदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताः सप्तमी बृहस्पतेरष्टमी ।
अर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी॥१॥ (४) ७

इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीया सोमस्य चतुर्थी ।
निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाः सप्तमी विष्णोरष्टमः ।
पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी ।
द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ॥१॥ (५) ८

मरुताः स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः पुच्छ-
मग्नीषोमयोर्भासदौ । क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणा अल्गाभ्यामाक्रमणः
स्थूराभ्यां बलं कुष्ठाभ्याम् ॥१॥ (६) ९

पूषणं वनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्पान्गुदाभिर्विह्रुतं आन्त्रैरपो वस्तिना वृषणमाण्डाभ्याम् ।
वाजिनः शेपेन प्रजाः रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्माञ्छकपिण्डैः ॥१॥ (७) १०

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसत् ।
जीमूतान्हृदयौपशेनान्तरिक्षं पुरीतता ॥१॥ ११
नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशिभिः ।
उपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवन्तीः ।
ह्रदान्कुक्षिभ्याः समुद्रमुदरेण वैश्वानरं भस्मना ॥२॥ (८) १२
विधृतिं नाभ्या घृतः रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वा अश्रुभिः ।
ह्रादुनीर्दूषीकाभिरस्ना रक्षाःसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय
स्वाहा ॥१॥ (९) १३
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥ १४
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥२॥ १५ [१५८७]

यस्येमे हिमवन्तो महित्वा यस्य समुद्रः रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥३॥ १६
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥४॥ (१०) १७
आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥ १८
देवानां भद्रा सुमतिर्ऋजूयतां देवानाः रातिरभि नो निवर्तताम् ।
देवानाः सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥२॥ १९
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणः सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥३॥ २०
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥४॥ २१
तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥ २२
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥ २३
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥७॥ २४
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाःसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥ २५
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥ २६
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥ (११) २७

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परिख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥१॥ २८ [१६००]

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥२॥ २९
एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेनꣳ सौश्रवसाय जिन्वति ॥३॥ ३०
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥४॥ ३१
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शꣳस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥५॥ ३२
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनꣳ संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥६॥ ३३
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥७॥ ३४
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते अपि देवेष्वस्तु ॥८॥ (१२) ३५

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥१॥ ३६
यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ श्रृतपाकं पचन्तु ॥२॥ ३७
यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥३॥ ३८
ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो माꣳसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥४॥ ३९
यन्नीक्षणं माꣳस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥५॥ ४०
मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥६॥ ४१ [१६१३]

निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥७॥ (१३) ४२
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥१॥ (१४) ४३
इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ॥१॥ ४४
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥२॥ (१५) ४५ [१६१७]

शादं दद्भिर्द्वे ॥२॥ वातं प्राणेन द्वे ॥२॥ मशकान्केशैरिति द्वे ॥२॥ अग्नेः पक्षतिरेका ॥१॥ इन्द्राग्न्योः
पक्षतिरेका ॥१॥ मारुताꣳ स्कन्धा एका ॥१॥ पूषणं वनिष्ठुनेत्येका ॥१॥ इन्द्रस्य क्रोडो द्वे ॥२॥
विधृतिमेका ॥१॥ हिरण्यगर्भश्चतस्रः ॥४॥ आ नो दश ॥१०॥ मा नोऽष्ट ॥८॥
यदश्वस्य सप्त ॥७॥ यदश्वायैका ॥१॥ इमा नु कं द्वे ॥२॥
पञ्चदशानुवाकेषु पञ्चचत्वारिंशत् ॥४५॥
॥ इति शुक्लयजुःकाण्वसंहितायां सप्तविंशोऽध्यायः ॥२७॥

अथाष्टाविंशोऽध्यायः ।

अग्निश्च पृथिवी च संनते ते मे सं नमतामदो वायुश्चाऽन्तरिक्षं च संनते ते मे सं नमतामद
आदित्यश्च द्यौश्च संनते ते मे सं नमतामद आपश्च वरुणश्च संनते ते मे सं नमतामदः ।
सप्त सꣳसदो अष्टमी भूतसाधनी ॥१॥ १
सकामाँ२ अध्वनस्कुरु संज्ञानमस्तु मेऽमुना ।
यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥२॥ २
ब्रह्मराजन्याभ्याꣳ शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥३॥ (१) ३
बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥१॥ (२) ४ [१६२१]

इन्द्र गोमन्निहा याहि पिबा सोमꣳ शतक्रतो । विद्यद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते ॥१॥ (३) ५
ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (४) ६
वैश्वानरꣳ हवामह ऋतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (५) ७
वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निरुक्थेन वाहसा ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (६) ८
वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (७) ९
मरुत्वाँ२ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आसिञ्चस्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रतिपत्सुतानाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥१॥ (८) १०
महाँ२ इन्द्रो वज्रहस्तः षोळशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान्द्वेष्टि ।
उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने ॥१॥ (९) ११
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥१॥ (१०) १२
अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ॥१॥ (११) १३
आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यꣳ सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यꣳ सुमघवन् बोधि गोदाः ॥१॥ (१२) १४ [१६३१]

अग्निश्च तिस्रः ॥३॥ बृहस्पत एका ॥१॥ इन्द्र गोमन्नेका ॥१॥ ऋतावानमेका ॥१॥ वैश्वानरमेका ॥१॥
वैश्वानर एका ॥१॥ वैश्वानरस्य सुमतावेका ॥१॥ मरुत्वाँ२ इन्द्र एका ॥१॥ महाँ२ इन्द्र एका ॥१॥
अग्निर्ऋषिरेका ॥१॥ अनु वीरैरेका ॥१॥ आ नो गोत्रा इत्येका ॥१॥ द्वादशानुवाकेषु चतुर्दश ॥१४॥
॥ इति शुक्लयजुःकाण्वसंहितायां अष्टाविंशोऽध्यायः ॥२८॥

अथैकोनत्रिंशोऽध्यायः ।

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः ॥१॥ १
सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥२॥ २
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥३॥ ३
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥४॥ ४
क्षत्रेणाग्ने स्वायुः सꣳ रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥ ५
अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीरꣳ रयिं दाः ॥६॥ ६
अनाधृष्यो जातवेदा अनिष्टृतो विराळग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे ॥७॥ ७
बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्संतराꣳ सꣳ शिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवाः ॥८॥ ८
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥९॥ ९
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१०॥ (१) १०

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः ।
द्युमत्तमा सुप्रतीकस्य सूनोः ॥१॥ ११
तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥२॥ १२
मध्वा यज्ञं नक्षसे प्रीणानो नराशꣳसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥३॥ १३
अच्छायमेति शवसा घृतेनेळानो वह्निर्नमसा । अग्निꣳ स्रुचो अध्वरेषु प्रयत्सु ॥४॥ १४
स यक्षदस्य महिमानमग्नेः स ईं मन्द्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥५॥ १५ [१६४६]

सोमाय लबानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानां पत्नीभ्यः ।
कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान् ॥४॥ २८
अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः संधिभ्यो जतूः ।
मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान् ॥५॥ (५) २९

भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे कशान् ।
दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥१॥ ३०
वसुभ्य ऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो न्यङ्कून् ।
विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान् ॥२॥ ३१
ईशानाय परस्वत आलभते मित्राय गौरान्वरुणाय महिषान् ।
बृहस्पतये गवयाꣳस्त्वष्ट्र उष्ट्रान् ॥३॥ ३२
प्रजापतये पुरुषान् हस्तिन आलभते वाचे प्लुषीन् ।
चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥४॥ ३३
प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः ।
शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्तिका नीलङ्गोः क्रिमिः समुद्राय
शिशुमारो हिमवते हस्ती ॥५॥ (६) ३४

मयुः प्राजापत्य उलो हलिक्ष्णो वृषदꣳशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी ।
कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥१॥ ३५
सोमाय कुलुङ्ग आरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः ।
पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः ॥२॥ ३६
सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी ।
शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक् ॥३॥ ३७
सुपर्णः पार्जन्य आतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलज आन्तरिक्षः ।
प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः ॥४॥ ३८
पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हꣳसो वातस्य ।
नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः ॥५॥ (७) ३९

एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्यै ।
ऋक्षो जतूः सुषिलीका त इतरजनानां जहका वैष्णवी ॥१॥ ४० [१५६८]

अन्यवापोऽर्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रो मासां कश्यपः ।
रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः ॥२॥ ४१
वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाजगरो वसूनां कपिञ्जलः ।
कपोत उलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः ॥३॥ ४२
श्वित्र आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या अरण्याय सृमरो रुरू रौद्रः ।
क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः ॥४॥ ४३
खङ्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः ।
सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ॥५॥ (८) ४४ [१५७१]

अश्वस्तूपरो नव ॥ ९ ॥ कृष्णग्रीवा पञ्च ॥ ५ ॥ धूम्रान्वसन्ताय पञ्च ॥ ५ ॥ अग्नयेऽनीकवते पञ्च ॥ ५ ॥ समुद्राय शिशुमारान् पञ्च ॥ ५ ॥ भूम्या आखून् पञ्च ॥ ५ ॥ मयुः प्राजापत्य पञ्च ॥ ५ ॥ एण्यह्न इति पञ्च ॥ ५ ॥

॥ अष्टानुवाकेषु चतुश्चत्वारिंशत् ॥ ४४ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां षड्विंशोऽध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

शादं दद्भिरवकां दन्तमूलैर्मृदं बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳ सरस्वत्या अग्रजिह्वं जिह्वाया उत्सादम् ।
अवक्रन्देन तालु वाजꣳ हनुभ्यामप आस्येन वृषणमाण्डाभ्याम् ॥१॥ १
आदित्यान् श्मश्रुभिः पन्थानं भ्रूभ्यां द्यावापृथिवी वर्तोभ्यां विद्युतं कनीनकाभ्याम् ।
शुक्लाय स्वाहा कृष्णाय स्वाहा पार्याणि पक्ष्माण्यवार्या इक्षवोऽवार्याणि पक्ष्माणि
पार्या इक्षवः ॥२॥ (१) २

वातं प्राणेनापानेन नासिके उपयाममधरेणौष्ठेन सदुत्तरेण ।
प्रकाशेनान्तरमनूकाशेन बाह्यं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बाधेनाशनिं मस्तिष्केण विद्युतं
कनीनकाभ्याम् ॥१॥ ३
कर्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्यां कर्णौ तेदनीमधरकण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिः ।
अदितिꣳ शीर्ष्णा निर्ऋतिं निर्जर्जल्येन शीर्ष्णा संक्रोशैः प्राणान् रेष्माणꣳ स्तुपेन ॥२॥ (२) ४

मशकान्केशैरिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन कूर्मान् ।
शफैराक्रमणꣳ स्थूराभ्यामृक्षलाभिः कपिञ्जलान् ॥१॥ ५ [१५७७]

जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीलेनारण्यमग्निमतिरुग्भ्याम् ।
पूषणं दोर्भ्यामश्विना अꣳसाभ्याꣳ रुद्रꣳ रोराभ्याम् ॥२॥ (३) ६

अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थी ।
अदित्यै पञ्चमीन्द्राण्यै षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टमी ।
अर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥१॥ (४) ७

इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीया सोमस्य चतुर्थी ।
निर्ऋत्यै पञ्चम्यग्नीषोमयोः षष्ठी सर्पाणाꣳ सप्तमी विष्णोरष्टमी ।
पूष्णो नवमी त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी ।
द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां देवानामुत्तरम् ॥१॥ (५) ८

मरुताꣳ स्कन्धा विश्वेषां देवानां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीया वायोः पुच्छ-
मग्नीषोमयोर्भासदौ । कुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणा अल्गाभ्यामाक्रमणꣳ
स्थूराभ्यां बलं कुष्ठाभ्याम् ॥१॥ (६) ९

पूषणं वनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्पान्गुदाभिर्विहुत आन्त्रैरपो वस्तिना वृषणमाण्डाभ्याम् ।
वाजिनꣳ शेपेन प्रजाꣳ रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्माञ्छकपिण्डैः ॥१॥ (७) १०

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवोऽदित्यै भसत् ।
जीमूतान्हृदयौपशेनान्तरिक्षं पुरीतता ॥१॥ ११
नभ उदर्येण चक्रवाकौ मतस्नाभ्यां दिवं वृक्काभ्यां गिरीन्प्लाशिभिः ।
उपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवन्तीः ।
ह्रदान्कुक्षिभ्याꣳ समुद्रमुदरेण वैश्वानरं भस्मना ॥२॥ (८) १२

विधृतिं नाभ्या घृतꣳ रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्नीहारमूष्मणा शीनं वसया प्रुष्वा अश्रुभिः ।
ह्रादुनीर्दूषीकाभिरस्ना रक्षाꣳसि चित्राण्यङ्गैर्नक्षत्राणि रूपेण पृथिवीं त्वचा जुम्बकाय
स्वाहा ॥१॥ (९) १३
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥१॥ १४
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥२॥ १५ [१५८७]

यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥३॥ १६
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥४॥ (१०) १७
आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥ १८
देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्तताम् ।
देवानाꣳ सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे ॥२॥ १९
तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणꣳ सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥३॥ २०
तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥४॥ २१
तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥५॥ २२
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥६॥ २३
पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह ॥७॥ २४
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः ॥८॥ २५
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥ २६
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥१०॥ (११) २७

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परिख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥१॥ २८ [१६००]

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥२॥ २९
एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टेदेन सौश्रवसाय जिन्वति ॥३॥ ३०
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥४॥ ३१
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥५॥ ३२
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥६॥ ३३
उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥७॥ ३४
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणं सर्वा ता ते अपि देवेष्वस्तु ॥८॥ (१२) ३५

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥१॥ ३६
यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ॥२॥ ३७
यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥३॥ ३८
ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥४॥ ३९
यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥५॥ ४०
मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥६॥ ४१ [१६१३]

निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥७॥ (१३) ४२
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥१॥ (१४) ४३
इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधाति ॥१॥ ४४
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥२॥ (१५) ४५ [१६१७]

शादं दद्भिर्द्वे ॥२॥ वातं प्राणेन द्वे ॥२॥ मशकान्केशैरिति द्वे ॥ २ ॥ अग्नेः पक्षतिरेका ॥१॥ इन्द्राग्न्योः
पक्षतिरेका ॥१॥ मारुतान् स्कन्धा एका ॥१॥ पूषणं वनिष्ठुनेत्येका ॥१॥ इन्द्रस्य क्रोडो द्वे ॥२॥
विधृतिमेका ॥१॥ हिरण्यगर्भश्चतस्रः ॥४॥ आ नो दश ॥१०॥ मा नोऽष्ट ॥८॥
यदश्वस्य सप्त ॥७॥ यदश्वायैका ॥१॥ इमा नु कं द्वे ॥२॥
पञ्चदशानुवाकेषु पञ्चचत्वारिंशत् ॥४५॥
॥ इति शुक्लयजुःकाण्वसंहितायां सप्तविंशोऽध्यायः ॥२७॥

अथाष्टाविंशोऽध्यायः ।

अग्निश्च पृथिवी च संनते ते मे सं नमतामदो वायुश्चाऽन्तरिक्षं च संनते ते मे सं नमतामद
आदित्यश्च द्यौश्च संनते ते मे सं नमतामद आपश्च वरुणश्च संनते ते मे सं नमतामदः । १
सप्त संसदो अष्टमी भूतसाधनी ॥१॥
सकामाँ२ अध्वनस्कुरु संज्ञानमस्तु मेऽमुना । २
यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥२॥
ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च ।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुप मादो नमतु ॥३॥ (१) ३
बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ।
उपयामगृहीतोऽसि बृहस्पतये त्वैष ते योनिर्बृहस्पतये त्वा ॥१॥ (२) ४ [१६११]

इन्द्र गोमन्निहा याहि पिबा सोमं शतक्रतो । विद्यद्भिर्ग्रावभिः सुतम् ।
उपयामगृहीतोऽसीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते ॥१॥ (३) ५
ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (४) ६
वैश्वानरं हवामह ऋतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (५) ७
वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निरुक्थेन वाहसा ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (६) ८
वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ।
उपयामगृहीतोऽसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥१॥ (७) ९
मरुत्वाँ२ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आसिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रतिपत्सुतानाम् ।
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥१॥ (८) १०
महाँ२ इन्द्रो वज्रहस्तः षोळशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान्द्वेष्टि ।
उपयामगृहीतोऽसीन्द्राय त्वा षोळशिन एष ते योनिरिन्द्राय त्वा षोळशिने ॥१॥ (९) ११
अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥१॥ (१०) १२
अनु वीरैरनु पुष्यास्म गोभिरन्वश्वैरनु सर्वेण पुष्टैः ।
अनु द्विपदानु चतुष्पदा वयं देवा नो यज्ञमृतुथा नयन्तु ॥१॥ (११) १३
आ नो गोत्रा दर्दृहि गोपते गाः समस्मभ्यं सनयो यन्तु वाजाः ।
दिवक्षा असि वृषभ सत्यशुष्मोऽस्मभ्यं सु मघवन् बोधि गोदाः ॥१॥ (१२) १४ [१६३१]

अग्निश्च तिस्रः ॥३॥ बृहस्पत एका ॥१॥ इन्द्र गोमन्नेका ॥१॥ ऋतावानमेका ॥१॥ वैश्वानरमेका ॥१॥
वैश्वानर एका ॥१॥ वैश्वानरस्य सुमतावेका ॥१॥ मरुत्वाँ२ इन्द्र एका ॥१॥ महाँ२ इन्द्र एका ॥१॥
अग्निर्ऋषिरेका ॥१॥ अनुवीरैरेका ॥१॥ आ नो गोत्रा इत्येका ॥१॥ द्वादशानुवाकेषु चतुर्दश ॥१४॥
॥ इति शुक्लयजुःकाण्वसंहितायां अष्टाविंशोऽध्यायः ॥ २८ ॥

अथैकोनत्रिंशोऽध्यायः ।

समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश्चतस्रः ॥१॥ १
सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥२॥ २
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥३॥ ३
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥४॥ ४
क्षत्रेणाग्ने स्वायुः संरभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥ ५
अति निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यं सहवीरं रयिं दाः ॥६॥ ६
अनाधृष्यो जातवेदा अनिष्टृतो विराळग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे ॥७॥ ७
बृहस्पते सवितर्बोधयैनं संशितं चित्संतरां सं शिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनु मदन्तु देवाः ॥८॥ ८
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥९॥ ९
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१०॥ (१) १०
ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः ।
द्युमत्तमा सुप्रतीकस्य सूनोः ॥१॥ ११
तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथो अनक्तु मध्वा घृतेन ॥२॥ १२
मध्वा यज्ञं नक्षसे प्रीणानो नराशंसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥३॥ १३
अच्छायमेति शवसा घृतेनेळानो वह्निर्नमसा । अग्निं स्रुचो अध्वरेषु प्रयत्सु ॥४॥ १४
स यक्षदस्य महिमानमग्नेः स ईं मन्द्रा सुप्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥५॥ १५ [१६४६]

द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥६॥ १६
ते अस्य योषणे दिव्ये न योना उषासानक्ता । इमं यज्ञमवतामध्वरं नः ॥७॥ १७
दैव्या होतारा ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वामभि गृणीतम् । कृणुतं नः स्विष्टिम् ॥८॥ १८
तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥९॥ १९
तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम् । रायस्पोषं वि ष्यतु नाभिमस्मे ॥१०॥ २०
वनस्पतेऽव सृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति ॥११॥ २१
अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् ।
विश्वे देवा हविरिदं जुषन्ताम् ॥१२॥ (२) २२

पीवो अन्ना रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥१॥ २३
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥२॥ २४
वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् ।
शिवो नियुद्भिः शिवाभिः ॥३॥ २५
प्र याभिर्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिꣳ सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥४॥ २६
वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥५॥ २७
एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती च ।
तिसृभिश्च वहसे त्रिꣳशता च नियुद्भिर्वायविह ता वि मुञ्च ॥६॥ २८
नियुत्वान्वायवा गह्ययꣳ शुक्रो अयामि ते । गन्तासि सुन्वतो गृहम् ॥७॥ २९
वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥८॥ ३०
आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥९॥ ३१
तव वाय ऋतस्पते त्वष्टुर्जामातरद्भुत । अवाꣳस्या वृणीमहे ॥१०॥ (३) ३२

हिरण्यगर्भ इत्येषः । येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥१॥ ३३ [१६६४]

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥२॥ ३४
आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानाꣳ समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥३॥ ३५
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ।
मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ।
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥४॥ (४) ३६

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥१॥ ३७
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ॥२॥ ३८
अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥३॥ ३९
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥४॥ ४०
न त्वावाꣳ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥५॥ ४१
त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥६॥ ४२
स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वꣳ रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥७॥ ४३
कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥८॥ ४४
कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥९॥ ४५
अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतये ॥१०॥ ४६
यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् ॥११॥ ४७
ऊर्जो नपातꣳ स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥१२॥ (५) ४८ [१६७९]

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि वत्सरोऽसि ।
उषसस्ते कल्पन्तामहोरात्रास्ते कल्पन्तामर्धमासास्ते कल्पन्तां मासास्ते कल्पन्तामृतवस्ते
कल्पन्ताꣳ संवत्सरस्ते कल्पताम् ॥१॥ ४९
प्रेत्या एदि सं चाञ्च प्र च सारय ।
सुपर्णचिदसि तया देवतयाङ्गिरस्वद् ध्रुवः सीद ॥२॥ (६) ५० [१६८१]

समाम्नाय दश ६ १० ॥ ऊर्ध्वा द्वादश ॥ १२ ॥ पीवो अन्नान्दश ॥ १० ॥ हिरण्यगर्भश्चतस्रः ॥ ४ ॥
अग्न आयूꣳषि द्वादश ॥ १२ ॥ संवत्सरो द्वे ॥ २ ॥ षडनुवाकेषु पञ्चाशत् ॥ ५० ॥

॥ इति शुक्लयजुःकाण्वसंहितायां एकोनत्रिंशोऽध्यायः ॥२९॥

अथ त्रिंशोऽध्यायः ।

होता यक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्या अधि ।
दिवो वर्ष्मन्त्समिध्यत ओजिष्ठश्चर्षणीसहां वेत्वाज्यस्य होतर्यज ॥१॥ १
होता यक्षत्तनूनपातमूतिभिर्जेतारमपराजितम् ।
इन्द्रं देवꣳ स्वर्विदं पथिभिर्मधुमत्तमैर्नराशꣳसेन तेजसा वेत्वाज्यस्य होतर्यज ॥२॥ २
होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्यो वज्रहस्तः पुरंदरो वेत्वाज्यस्य होतर्यज ॥३॥ ३
होता यक्षद्बर्हिषीन्द्रं निषद्वरं वृषभं नर्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासददेत्वाज्यस्य होतर्यज ॥४॥ ४
होता यक्षदोजो न वीर्यꣳ सहो द्वार इन्द्रमवर्धयन् ।
सुप्रायणा अस्मिन्यज्ञे वि श्रयन्तामृतावृधो द्वार इन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्यज ॥५॥ ५
होता यक्षदुषे इन्द्रस्य धेनू सुदुघे मातरा मही ।
सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यस्य होतर्यज ॥६॥ ६
होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रं भिषज्यतः ।
कवी देवौ प्रचेतसा इन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज ॥७॥ ७
होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपस इडा सरस्वती भारती महीः ।
इन्द्र पत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्यज ॥८॥ ८
होता यक्षत्त्वष्टारमिन्द्रं देवं भिषजꣳ सुयजं घृतश्रियम् ।
पुरुरूपꣳ सुरेतसं मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ॥९॥ ९ [१६९०]

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं धियो जोष्टारमिन्द्रियम् ।
मध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञं मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥१०॥ १०
होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा
हव्यसूक्तीनाम् । स्वाहा देवा आज्यपा जुषाणा इन्द्र आज्यस्य व्यन्तु होतर्यज ॥११॥ (१) ११

देवं बर्हिरिन्द्रꣳ सुदेवं देवैर्वीरवत्स्तीर्णं वेद्यामवर्धयत् ।
वस्तोर्वृतं प्राक्तोर्भृतꣳ राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज ॥१॥ १२
देवीर्द्वार इन्द्रꣳ संघाते वीड्वीर्यामन्नवर्धयन् । आ वत्सेन तरुणेन कुमारेण च मीवतापार्वाणꣳ
रेणुककाटं नुदन्तां वसुवने वसुधेयस्य व्यन्तु यज ॥२॥ १३
देवी उषासानक्तेन्द्रं यज्ञे प्रयत्यह्वेताम् ।
दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज ॥३॥ १४
देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धताम् । अयाव्यन्याघा द्वेषाꣳस्यान्या वक्षद्वसु
वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥४॥ १५
देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्धताम् ।
इषमूर्जमन्या वक्षत्सग्धिꣳ सपीतिमन्या नवेन पूर्वं दयमाने पुराणेन नवमधातामूर्जमूर्जाहुती
ऊर्जयमाने वसु वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥५॥ १६
देवा दैव्या होतारा देवमिन्द्रमवर्धताम् ।
हताघशꣳसा आभार्ष्टां वसु वार्याणि यजमानाय शिक्षितौ वसुवने वसुधेयस्य वीतां यज ॥६॥ १७
देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्धयन् ।
अस्पृक्षद्भारती दिवꣳ रुद्रैर्यज्ञꣳ सरस्वतीडा वसुमती
गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥७॥ १८
देव इन्द्रो नराशꣳसस्त्रिवरूथस्त्रिवन्धुरो देवमिन्द्रमवर्धयत् ।
शतेन शितिपृष्ठानामाहितः सहस्रेण प्र वर्तते मित्रावरुणेदस्य होत्रमर्हतो
बृहस्पतिं स्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज ॥८॥ १९
देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयत् ।
दिवमग्रेणास्पृक्षदान्तरिक्षं पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥९॥ २०
देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥१०॥ २१ [१७०२]

देवो अग्निः स्विष्टकृद्देवमिन्द्रमवर्धयन् ।
स्विष्टं कुर्वन् त्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥११॥ २२
अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोळाशं बध्नन्निन्द्राय च्छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय च्छागेन ।
अघत्तं मेदस्तः प्रति पचताग्रभीदवीवृधत्पुरोळाशेन । त्वामद्य ऋषे ॥१२॥ (२) २३

होता यक्षत्समिधानं महद्यशः सुसमिद्धं वरेण्यमग्निमिन्द्रं वयोधसम् ।
गायत्रीं छन्द इन्द्रियं त्र्यविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥१॥ २४
होता यक्षत्तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् ।
उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥२॥ २५
होता यक्षदीळेन्यमीळितं वृत्रहन्तममिळाभिरीड्य१ सहः सोममिन्द्रं वयोधसम् ।
अनुष्टुभं छन्द इन्द्रियं पञ्चाविं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥३॥ २६
होता यक्षत्सुबर्हिषं पूषण्वन्तममर्त्य१ सीदन्तं बर्हिषि प्रियेऽमृतेन्द्रं वयोधसम् ।
बृहतीं छन्द इन्द्रियं त्रिवत्सं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥४॥ २७
होता यक्षद्व्यचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं वयोधसम् ।
पङ्क्तिं छन्द इहेन्द्रियं तुर्यवाहं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥५॥ २८
होता यक्षत्सुपेशसा सुशिल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिन्द्रं वयोधसम् ।
त्रिष्टुभं छन्द इहेन्द्रियं पष्ठवाहं गा वयो दधद्वीतामाज्यस्य होतर्यज ॥६॥ २९
होता यक्षत्प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम् ।
जगतीं छन्द इन्द्रियमनड्वाहं गां वयो दधद्वीतामाज्यस्य होतर्यज ॥७॥ ३०
होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्महीः पतिमिन्द्रं वयोधसम् ।
विराजं छन्द इहेन्द्रियं धेनुं गां न वयो दधद्व्यन्त्वाज्यस्य होतर्यज ॥८॥ ३१
होता यक्षत्सुरेतसं त्वष्टारं पुष्टिवर्धन१ रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम् ।
द्विपदं छन्द इन्द्रियमुक्षाणं गां न वयो दधद्वेत्वाज्यस्य होतर्यज ॥९॥ ३२
होता यक्षद्वनस्पति१ शमितार१ शतक्रतु१
हिरण्यपर्णमुक्थिन१ रशनां बिभ्रतं वशिं भगमिन्द्रं वयोधसम् ।
ककुभं छन्द इहेन्द्रियं वशां वेहतं गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥१०॥ ३३
होता यक्षत्स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम् ।
अतिच्छन्दसं छन्द इन्द्रियं बृहदृषभं गां वयो दधद्व्यन्त्वाज्यस्य होतर्यज ११(३)३४ [१७१५]

देवं बर्हिर्वयोधसं देवमिन्द्रमवर्धयत् ।
गायत्र्या छन्दसेन्द्रियं चक्षुरिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥१॥ ३५
देवीर्द्वारो वयोधस१ शुचिमिन्द्रमवर्धयन् ।
उष्णिहा छन्दसेन्द्रियं प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥२॥ ३६
देवी उषासानक्ता देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।
अनुष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥३॥ ३७
देवी जोष्ट्री वसुधिती देवमिन्द्रं वयोधसं देवी देवमवर्धताम् ।
बृहत्या छन्दसेन्द्रिय१ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥४॥ ३८
देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रं वयोधसं देवी देवमवर्धताम् ।
पङ्क्त्या छन्दसेन्द्रिय१ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥५॥ ३९
देवा दैव्या होतारा देवमिन्द्रं वयोधसं देवौ देवमवर्धताम् ।
त्रिष्टुभा छन्दसेन्द्रियं त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥६॥ ४०
देवीस्तिस्रस्तिस्रो देवीर्वयोधसं पतिमिन्द्रमवर्धयन् ।
जगत्या छन्दसेन्द्रिय१ शूषमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥७॥ ४१
देवो नराश१सो देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
विराजा छन्दसेन्द्रिय१ रूपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥८॥ ४२
देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
द्विपदा छन्दसेन्द्रियं भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥९॥ ४३
देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धयत् ।
ककुभा छन्दसेन्द्रियं यश इन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥१०॥ ४४
देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसं देवो देवमवर्धयत् ।
अतिच्छन्दसा छन्दसेन्द्रियं क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥११॥ ४५
अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोळाशं बध्नन्निन्द्राय वयोधसे छागम् ।
सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय वयोधसे छागेन ।
अघत्तं मेदस्तः प्रतिपचताग्रभीदवीवृधत्पुरोळाशेन । त्वामद्य ऋषे ॥१२॥ (४) ४६ [१७२७]

होता यक्षदेकादश ॥११॥ देवं बर्हिर्द्वादश ॥१२॥ होता यक्षदेकादश ॥११॥ देवं बर्हिर्द्वादश ॥१२॥
॥ चतुरनुवाकेषु षट्चत्वारिंशत् ॥४६॥
॥ इति शुक्लयजुःकाण्वसंहितायां त्रिंशतितमोऽध्यायः ॥३०॥
॥ इति तृतीयो दशकः ॥

अथ चतुर्थो दशकः ॥

अथैकत्रिंशोऽध्यायः।

समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः ।
वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥१॥ १
घृतेनाञ्जन्त्सं पथो देवयानान्प्रजानन्वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ता१ स्वधामस्मै यजमानाय धेहि ॥२॥ २
ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥३॥ ३
स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥४॥ ४
एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥५॥ ५
अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वा१ सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥६॥ ६
प्रथमा वा१ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥७॥ ७
आदित्यैर्नो भारती वष्टु यज्ञ१ सरस्वती सह रुद्रैर्न आवीत् ।
इळोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥८॥ ८
त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥९॥ ९
अश्वो घृतेन त्मन्या समक्त उप देवाँ२ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥१०॥ १०
प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥११॥ (१) ११

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥१॥ १२
जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्व१ स त्वा वर्मणो महिमा पिपर्तु ॥२॥ १३ [१७४०]

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥३॥ १४
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यता१ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥४॥ १५
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रिय१ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वन् ज्या इय१ समने पारयन्ती ॥५॥ १६
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमा१सं परि पातु विश्वतः ॥६॥ १७
बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥७॥ १८
सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म य१सन् ॥८॥ १९
वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥९॥ २०
रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥१०॥ २१
आ जङ्घन्ति सान्वेषां जघनाँ२ उप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥११॥ २२
उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥१२॥ (२) २३

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥१॥ २४
यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥२॥ २५
असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥३॥ २६
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥४॥ २७ [१७५४]

इमा ते वाजिन्नवमार्जनानीमा शफाना२ सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥५॥ २८
आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥६॥ २९
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानडादिद्ग्रसिष्ठ ओषधीरजीगः ॥७॥ ३०
अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥८॥ ३१
हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥९॥ ३२
ईर्मान्तासः सिलिकमध्यमासः स२ शूरणासो दिव्यासो अत्याः ।
ह२सा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥१०॥ ३३
तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥११॥ ३४
उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः ॥१२॥ ३५
उप प्रागात्परमं यत्सधस्थमर्वा२ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथा शास्ते दाशुषे वार्याणि ॥१३॥ (३) ३६

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥१॥ ३७
तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन्देवत्रा च कृणुह्यध्वरं नः ॥२॥ ३८
नराश२संस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥३॥ ३९
आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥४॥ ४०
प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥५॥ ४१ [१०६८]

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥६॥ ४२
आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रिय२ शुक्रपिशं दधाने ॥७॥ ४३
दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥८॥ ४४
आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेद२ स्योन२ सरस्वती स्वपसः सदन्तु ॥९॥ ४५
य इमे द्यावापृथिवी जनित्री रूपैरपि२शद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥१०॥ ४६
उपावसृज त्मन्या समञ्जन्देवानां पाथ ऋतुथा हवी२षि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥११॥ ४७
सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृत२ हविरदन्तु देवाः ॥१२॥ (४) ४८

अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकवि२शाभ्यां वैराजाभ्याम् । पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्र औष्णिहाय त्रयस्त्रि२शाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः ॥१॥ (५) ४९

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेवः । ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः स२हितोऽधोरामः सावित्रो वारुणः कृष्ण एकशितिपात्पेत्वः ॥१॥ (६) ५०

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ ।
मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः पेत्वः ॥१॥ (७) ५१ [१०७८]

समिद्धो अञ्जन्नेकादश ॥११॥ केतुं कृण्वन्द्वादश ॥१२॥ यदक्रन्दस्त्रयोदश ॥१३॥ समिद्धो अद्य द्वादश ॥१२॥ अग्नये गायत्रायैका ॥१॥ आग्नेयः कृष्णग्रीव एका ॥ १ ॥ अग्नयेऽनीकवत इत्येका ॥ १ ॥

॥ सप्तानुवाकेष्वेकपञ्चाशत् ॥ ५१ ॥

॥ इति शुक्लयजुःकाण्वसंहितायामेकत्रिंशत्तमोऽध्यायः ॥३१॥

अथ द्वात्रिंशोऽध्यायः ।

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥१॥ १
हरयो धूमकेतवो वातजूता उप द्यवि । यतन्ते वृथगग्नयः ॥२॥ २
यजा नो मित्रावरुणा यजा देवाँ२ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥३॥ ३
युक्ष्वा हि देवहूतमाँ२ अश्वाँ२ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥४॥ ४
द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।
हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः ॥५॥ ५
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥६॥ ६
त्रीणि शता त्री सहस्राण्यग्निं त्रि२शच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥७॥ ७
मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कवि२ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥८॥ ८
अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥९॥ ९
विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥१०॥ १०
आ यदिषे नृपतिं तेज आनट् छुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवान२ स्वाध्यं जनयत्सूदयच्च ॥११॥ ११
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्य२ सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि ॥१२॥ १२
त्वा२ हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥१३॥ १३
त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥१४॥ १४
श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आसीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् ॥१५॥ १५
विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।
अग्निर्देवानामव आवृणानः सुमृडीको भवतु जातवेदाः ॥१६॥ १६ [१०९४]

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥१७॥ (१) १७

आपश्चित्पिप्यु स्तर्यो न गावो नक्षन्नृतं जरितारस्त इन्द्र ।
याहि वायुर्न नियुतो नो अच्छा त्व२ हि धीभिर्दयसे वि वाजान् ॥१॥ १८
गाव उपावतावतं मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्यया ॥२॥ १९
यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥३॥ २०
आ सुते सिञ्चत श्रिय२ रोदस्योरभिश्रियम् ।
रसा दधीत वृषभम् । तं प्रत्नथायं वेनश्चोदयत् ॥४॥ २१
आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
[illegible]द्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥५॥ २२
प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमख२ सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥६॥ २३
बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥७॥ २४
इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ२ अभिष्टिरोजसा ॥८॥ २५
इन्द्रो वृत्रमवृणोच्छर्धनीतिः प्र मायिनाममिनाद्वर्पणीतिः ।
अहन्व्य२समुशधग्वनेष्वाविर्धेना अकृणोद्राम्याणाम् ॥९॥ २६
कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं त इत्था ।
सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ।
महाँ२ इन्द्रो य ओजसा कदा चन स्तरीरसि कदा चन प्रयुच्छसि ॥१०॥ २७
आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं ये पुरुपुत्रां मही२ सहस्रधारां बृहतीं दुदुक्षन् ॥११॥ २८
इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥१२॥ (२) २९

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥१॥ ३०
उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥२॥ ३१
येना पावक चक्षसा भुरण्यन्तं जनाँ२ अनु । त्वं वरुण पश्यसि ॥३॥ ३२ [१११०]

दैव्या अध्वर्यू आ गतꣳ रथेन सूर्यत्वचा। मध्वा यज्ञꣳ समञ्जाथे।
तं प्रत्नथायं वेनश्चोदयच्चित्रं देवानाम् ॥४॥ ३३
आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥५॥ ३४
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे ॥६॥ ३५
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनम् ॥७॥ ३६
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳ सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥८॥ ३७
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥९॥ ३८
बण्महाँ२ असि सूर्य बळादित्य महाँ२ असि।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२ असि ॥१०॥ ३९
बट् सूर्य श्रवसा महाँ२ असि सत्रा देव महाँ२ असि।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥११॥ ४०
श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥१२॥ ४१
अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात्।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥१३॥ ४२
आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१४॥ (३) ४३

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥१॥ ४४
इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम्। आदित्यान्मारुतं गणम् ॥२॥ ४५
वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः ॥३॥ ४६
अधि न इन्द्रैषां विष्णो सजात्यानाम्। इता मरुतो अश्विना।
तं प्रत्नथायं वेनश्चोदयद्धे देवास आ न इळाभिर्विश्वेभिः सोम्यं मध्वोमासश्चर्षणीधृतः ॥४॥ ४७
अग्न इन्द्र वरुण मित्र देवाः शर्धः प्र यन्त मारुतोत विष्णो।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त ॥५॥ ४८ [१८१६]

इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीं द्यां मरुतः पर्वताँ२ अपः।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शꣳसꣳ सवितारमूतये ॥६॥ ४९
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः।
यः शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः ॥७॥ ५०
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम्।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्तादवपदो यजत्राः ॥८॥ ५१
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥९॥ ५२
विश्वे देवाः शृणुतेमꣳ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥१०॥ ५३
देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वꣳ सुवसि भागमुत्तमम्।
आदिद्दामानꣳ सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥११॥ (४) ५४

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारꣳ रथप्राम्।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥१॥ ५५
इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ॥२॥ ५६
मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीꣳ साधन्ता ॥३॥ ५७
दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः। आ यातꣳ रुद्रवर्तनी।
तं प्रत्नथायं वेनश्चोदयत् ॥४॥ ५८
विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥५॥ ५९
नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुर एतारमग्नेः।
एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥६॥ ६०
उग्रा विघनिना मृध इन्द्राग्नी हवामहे। ता नो मृळात ईदृशे ॥७॥ ६१
उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ२ इयक्षते ॥८॥ ६२
ये त्वाहिहत्ये मघवन्नवर्धन्ये शाम्बरे हरिवो ये ग विष्टौ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमꣳ सगणो मरुद्भिः ॥९॥ ६३
जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥१०॥ ६४ [१८४१]

आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि। महान्महीभिरूतिभिः ॥११॥ ६५
त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥१२॥ ६६
अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥१३॥ ६७
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत् ॥१४॥ ६८
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम्।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥१५॥ (५) ६९

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥१॥ ७०
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥१॥
गाव उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥२॥ ७१
काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे। रिशादसा सधस्थ आ ॥३॥ ७२
दैव्या अध्वर्यू आ गतꣳ रथेन सूर्यत्वचा।
मध्वा यज्ञꣳ समञ्जाथे। तं प्रत्नथायं वेनश्चोदयत् ॥४॥ ७३
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥५॥ ७४
आ रोदसी अपृणदा स्वर्महज्जातं यदेनमपसो अधारयन्।
सो अध्वराय परि णीयते कविरत्यो न वाजसातये चनोहितः ॥६॥ ७५
उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा। आङ्गूषैराविवासतः ॥७॥ ७६
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृळीका भवन्तु नः ॥८॥ ७७
ब्रह्माणि मे मतयः शꣳ सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः।
आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥९॥ ७८
अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ२ अस्ति देवता विदानः।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥१०॥ ७९
तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥११॥ ८० [१८५८]

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥१२॥ ८१
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥१३॥ ८२
अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥१४॥ ८३
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम्।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥१५॥ (६) ८४ [१८६२]

अस्याजरासः सप्तदश ॥१७॥ आपश्चिद् द्वादश ॥१२॥ विभ्राड् चतुर्दश ॥१४॥ प्रवावृज एकादश ॥११॥
प्रयायुं पञ्चदश ॥१५॥ प्रदीरयेति च पञ्चदश ॥१५॥ षडनुवाकेषु चतुरशीतिः ॥८४॥
॥ इति शुक्लयजुःकाण्वसंहितायां द्वात्रिंशोऽध्यायः ॥३२॥

अथ त्रयस्त्रिंशोऽध्यायः।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥१॥ १
पितुं नु स्तोषं महो धर्माणं तविषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥२॥ २
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि।
क्रत्वे दक्षाय नो हिनु प्र ण आयूꣳषि तारिषः ॥३॥ ३
सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥४॥ ४
पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥५॥ ५
त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥६॥ ६
त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥७॥ ७
उत्तानायामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान।
अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुनेऽजनिष्ट ॥८॥ ८
इळायास्त्वा पदे वयं नाभा पृथिव्या अधि।
जातवेदो नि धीमह्यग्ने हव्याय वोळ्हवे ॥९॥ ९ [१८७१]

प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥१०॥ १०
प्र वो महे महि नमो भरध्वमाङ्गूष्यꣳ शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥११॥ ११
इच्छन्ति त्वा सोम्यासः सखायः सुन्वन्ति सोमं दधति प्रयाꣳसि ।
तितिक्षन्ते अभिशस्तिं जनानामिन्द्र त्वदा कश्चन हि प्रकेतः ॥१२॥ १२
न ते दूरे परमा चिद्रजाꣳस्या तु प्र याहि हरिवो हरिभ्याम् ।
स्थिराय वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥१३॥ १३
अषाढं युत्सु पृतनासु पप्रिꣳ स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजाꣳ सुक्षितिꣳ सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥१४॥ १४
सोमो धेनुꣳ सोमो अर्वन्तमाशुꣳ सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यꣳ सभेयं पितृश्रवणं यो ददाशदस्मै ॥१५॥ १५
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥१६॥ १६
देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ॥१७॥ १७
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥१८॥ १८
हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते ।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥१९॥ १९
हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥२०॥ २०
ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥२१॥ २१
उभा पिबतमश्विनोभा नः शर्म यच्छतम् । अविद्रियाभिरूतिभिः ॥२२॥ २२
अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥२३॥ २३ [१८९९]

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥२४॥ २४
आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥२५॥(१) २५

आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः ।
दिवः सदाꣳसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥१॥ २६
उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति । येन तोकं च तनयं च धामहे ॥२॥ २७
प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥३॥ २८
पूषन्तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥४॥ २९
पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियꣳ सीषधाति प्र पूषा ॥५॥ ३०
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥६॥ ३१
तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते । विष्णोर्यत्परमं पदम् ॥७॥ ३२
घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥८॥ ३३
ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥९॥ ३४
आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपाꣳसि मृक्षतꣳ सेधतं द्वेषो भवतꣳ सचाभुवा ॥१०॥ ३५
एष व स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥११॥ ३६
सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः ।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन् ॥१२॥ ३७
आयुष्यं वर्चस्यꣳ रायस्पोषमौद्भिदम् ।
इदꣳ हिरण्यं वर्चस्वज्जैत्रायाविशतादु माम् ॥१३॥ ३८ [१९००]

न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत् ।
यो बिभर्ति दाक्षायणꣳ हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥१४॥ ३९
यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः ।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥१५॥ ४०
उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवाना स्तुता मन्त्राः कविशस्ता अवन्तु ॥१६॥ ४१
इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अꣳशः ॥१७॥ ४२
सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥१८॥ ४३
उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥१९॥ ४४
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकाꣳसि चक्रिरे ॥२०॥ ४५
ब्रह्मणस्पते त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ।
य इमा विश्वा विश्वकर्मा यो नः पिताऽन्नपतेऽन्नस्य नो देहि ॥२१॥ (२) ४६ [१९०८]

पञ्चमतः पञ्चविंशतिः ॥ २५ ॥ आगाद्देकविंशतिः ॥ २१ ॥ द्वयोरनुवाकयोः षट्चत्वारिंशत् ॥ ४६ ॥

॥ इति शुक्लयजुःकाण्वसंहितायां त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अथ चतुस्त्रिंशोऽध्यायः ।

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु ॥१॥ १
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥२॥ २
विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥३॥ ३
विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥४॥ ४ [१९१२]

ब्रह्मणे ब्राह्मणं क्षत्राय राजन्यं मरुद्भ्यो वैश्यं तपसे शूद्रं तमसे तस्करं नारकाय
वीरहणम् । पाप्मने क्लीबमाक्रयाया अयोगूं कामाय पुꣳश्चलूमतिक्रुष्टाय मागधम् ॥५॥ ५
नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलम् । नर्माय रेभꣳ हसाय
कारिमानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् ॥६॥ ६
तपसे कौलालं मायायै कर्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्याया इषुकारꣳ
हेत्यै धनुष्कारम् । कर्मणे ज्याकारं दिष्टाय रज्जुसर्जं मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥७॥ ७
नदीभ्यः पौञ्जिष्टमृक्षीकाभ्यो नैषादं पुरुषव्याघ्राय दुर्मदं गन्धर्वाप्सरोभ्यो व्रात्यम् ।
प्रयुग्भ्य उन्मत्तꣳ सर्पदेवजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्यताया अकितवं
पिशाचेभ्यो बिदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥८॥ (१) ८

संधये जारं गेहायोपपतिमार्त्यै परिवित्तं निर्ऋत्यै परिविविदानमराध्या एदिधिषुःपतिं
निष्कृत्यै पेशस्कारीꣳ संज्ञानाय स्मरकारीम् । प्रकामोद्यायोपसदं वर्णायानुरुधं
बलायोपदाम् ॥१॥ ९

उत्सादेभ्यः कुब्जं प्रमुदे वामनं द्वार्भ्यः स्रामꣳ स्वप्नायान्धमधर्माय बधिरं पवित्राय
भिषजम् । प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षाया अभिप्रश्निनं मर्यादायै
प्रश्नविवाकम् ॥२॥ १०

अर्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं वीर्यायाविपालं तेजसेऽजपालमिरायै कीनाशम् ।
कीलालाय सुराकारं भद्राय गृहपꣳ श्रेयसे वित्तधमाध्यक्षायानुक्षत्तारम् ॥३॥ ११
भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारम् ।
देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारꣳ सर्वेभ्यो लोकेभ्य उपसेक्तारमव ऋत्यै
वधायोपमन्थितारं मेधाय वासःपल्पूलीं प्रकामाय रजयित्रीम् ॥४॥ १२
ऋतये स्तेनहृदयं वैरहत्याय पिशुनं विविक्त्यै क्षत्तारमौपद्रष्ट्र्यायानुक्षत्तारं
बलायानुचरं भूम्ने परिष्कन्दम् । प्रियाय प्रियवादिनमरिष्ट्या अश्वसादꣳ स्वर्गाय
लोकाय भागदुघं वर्षिष्ठाय नाकाय परिवेष्टारम् ॥५॥ (२) १३
मन्यवेऽयस्तापं क्रोधाय निसरं योगाय योक्तारꣳ शोकायाभिसर्तारं क्षेमाय विमोक्तार-
मुत्कूलनिकूलेभ्यस्त्रिष्ठिनम् । वपुषे मानस्कृतꣳ शीलायाञ्जनीकारीं निर्ऋत्यै कोशकारीं
यमायासूम् ॥१॥ १४ [१९११]

यमार्य यमसूमथर्वभ्योऽवतोका२ संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सराया-
तीत्वरीमिद्वत्सरायातिष्कद्वरीम्। वत्सराय विजर्जरा२ संवत्सराय पलिक्नीमृभुभ्योऽजिनसन्ध२
साध्येभ्यश्चर्मम्नम् ॥२॥ १५

सरोभ्यो धैवरमुपस्थावराभ्यो दाशं वैशन्ताभ्यो बैन्दं नड्वलाभ्यः शौष्कलम्।
पाराय मार्गारमवाराय केवर्तं तीर्थेभ्य आन्दं विषमेभ्यो मैनालम्।
स्वनेभ्यः पर्णकं गुहाभ्यः किरात२ सानुभ्यो जम्भकं पर्वतेभ्यः किंपूरुषम् ॥३॥ १६

बीभत्सायै पौल्कसं वर्णाय हिरण्यकारं तुलायै वाणिजं पश्चादोषाय ग्लाविनं विश्वेभ्यो
भूतेभ्यः सिध्मलम्। भूत्यै जागरणमभूत्यै स्वपनमार्त्यै जनवादिनं व्यृद्धया अपगल्भ२
सं२शराय प्रच्छिदम् ॥४॥ १७

अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधिकल्पिनमास्कन्दाय
समास्थाणुं मृत्यवे गोव्यच्छमन्तकाय गोघातम्। क्षुधे यो गां विकृन्तन्तं भिक्षमाण
उपतिष्ठति दुष्कृताय चरकाचार्यं पाप्मने सैलगम् ॥५॥ (३) १८

प्रतिश्रुत्काया अर्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूक२ शब्दायाडम्बरा-
घातम्। महसे वीणावादं क्रोशाय तूणवध्ममवरस्पराय शङ्खध्मं वनाय वनपमन्य-
तोऽरण्याय दावपम् ॥१॥ १९

नर्माय पुं२श्चलू२ हसाय कारिं यादसे शाबल्यां ग्रामण्यं गणकमभिक्रोशकं तान्महसे।
वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय तलवम् ॥२॥ २०

अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालमन्तरिक्षाय व२शनर्तिनं दिवे
खलति२ सूर्याय हर्यक्षम्। नक्षत्रेभ्यः किर्मिरं चन्द्रमसे किलासमह्ने शुक्लं पिङ्गाक्ष२
रात्र्यै कृष्णं पिङ्गाक्षम् ॥ ३ ॥ २१

अथैतानष्टौ विरूपाना लभतेऽतिशुक्लं चातिकृष्णं चातिदीर्घं चातिह्रस्वं च।
अतिस्थूलं चातिकृशं चातिकुल्वं चातिलोमशं चाशूद्रा अब्राह्मणास्ते प्राजापत्याः।
मागधः पुं२श्चली क्लीबः कितवोऽशूद्रा अब्राह्मणास्ते प्राजापत्याः ॥४॥ (४) २२ [१९३०]

देव सवितरष्ट ॥ ८ ॥ संधये जारं पञ्च ॥ ५ ॥ मन्यवे पञ्च ॥ ५ ॥ प्रतिश्रुत्कायै चतस्रः ॥ ४ ॥
चतुरनुवाकेषु द्वाविंशतिः ॥२२॥ इति शुक्लयजुःकाण्वसंहितायां चतुस्त्रिंशोऽध्यायः ॥३४॥

अथ पञ्चत्रिंशोऽध्यायः।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमि२ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ १
पुरुष एवेद२ सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥ २
एतावानस्य महिमातो ज्यायाँ२श्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥ ३
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥४॥ ४
ततो विराळजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥ ५
तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्।
पशू२स्ता२श्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥ ६
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दा२सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥ ७
तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८॥ ८
तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९॥ ९
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥१०॥ १०
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्या२ शूद्रो अजायत ॥ ११ ॥ ११
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥ १२
नाभ्या आसीदन्तरिक्ष२ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ १३ ॥ १३ [१९४३]

यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥१४॥ १४
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः।
देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् ॥१५॥ १५
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥ (१) १६

अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१॥ १७
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥२॥ १८
प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥३॥ १९
यो देवेभ्य आतपति यो देवानां पुरोहितः।
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥४॥ २०
रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन्।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥५॥ २१
श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥६॥ (२) २२

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म तदापः तत्प्रजापतिः ॥१॥ २३
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परि जग्रभत् ॥२॥ २४
न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः।
हिरण्यगर्भ इत्येषः ॥३॥ २५
एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।
स एव जातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः। २६ [१९५६]
यस्मान्न जात इत्येषः ॥४॥

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीळम्।
तस्मिन्निद२ सं च वि चैति सर्व२ स ओतः प्रोतश्च विभूः प्रजासु ॥५॥ २७
प्र तद्वोचेदमृतं नु विद्वान्गन्धर्वो धाम विभृतं गुहा सत्।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥६॥ २८
स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥७॥ २९
परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि सं विवेश ॥८॥ ३०
परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥९॥ ३१
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिष२ स्वाहा ॥१०॥ ३२
यां मेधां देवगणाः पितरश्चोपासते। तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥११॥ ३३
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥१२॥ (३) ३४

अपेतो यन्तु पणयोऽसुम्ना देवपीयवः। अस्य लोकः सुतावतः ॥१॥ ३५
द्युभिरहोभिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै।
सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु। तस्मै युज्यन्तामुस्रियाः ॥२॥ ३६
वायुः पुनातु सविता पुनात्वग्नेर्भ्राजसा सूर्यस्य वर्चसा। वि मुच्यन्तामुस्रियाः ॥३॥ ३७
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥४॥ ३८
सविता ते शरीराणि मातुरुपस्थ आ वपतु। तस्मै पृथिवि शं भव।
प्रजापतौ त्वा देवतायामुपोदके लोके नि दधाम्यसौ ॥५॥ ३९
परं मृत्यो अनु परेहि पन्थां यस्ते अन्य इतरो देवयानात्
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा२ रीरिषो मोत वीरान् ॥६॥ ४०
शं वातः श२ हि ते घृणिः शं ते भवन्त्विष्टकाः।
शं ते भवन्त्वग्नयः पार्थिवासो मा त्वाभि शूशुचन् ॥ ७ ॥ ४१
कल्पन्तां ते दिशस्तुभ्यमापः शिवतमास्तुभ्यं भवन्तु सिन्धवः।
अन्तरिक्ष२ शिवं तुभ्यं कल्पन्तां ते दिशः सर्वाः ॥८॥ ४२ [१९७२]

अश्मन्वती रीयते सꣳ रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहीमोऽशिवा ये असञ्छिवान्वयमुत्तरेमाभि वाजान् ॥९॥ ४३
अपाघमप किल्बिषमप कृत्यामपो रपः ।
अपामार्ग त्वमस्मदप दुःष्वप्न्यꣳ सुव ॥१०॥ ४४
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥११॥ ४५
अनड्वाहमन्वारभामहे स्वस्तये ।
स न इन्द्र इव देवेभ्यो वह्निः संतारणो भव ॥१२॥ ४६
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥१३॥ ४७
अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥१४॥ ४८
आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमान्त्स्वाहा ॥१५॥ ४९
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन ॥१६॥ ५०
परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः क इमाँ२ आ दधर्षति ॥१७॥ ५१
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥१८॥ ५२
वह वपां जातवेदः पितृभ्यो यत्रैनान्वेत्थ निहितान्पराके ।
मेदसः कुल्या उप तान्त्स्रवन्तु सत्या एषामाशिषः सन्तु कामाः स्वाहा ॥१९॥ ५३
स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथाः । अप नः शोशुचदघम् ॥२०॥ ५४
अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकाय स्वाहा ।
अप नः शोशुचदघम् ॥ २१ ॥ (४) ५५ [१९८५]

सहस्रशीर्षा षोडश ॥१६॥ अद्भ्यः संभृतः षट् ॥६॥ तदेवाग्निर्द्वादश ॥१२॥
अपेतो यन्त्वेकविंशतिः ॥२१॥ चतुरनुवाकेषु पञ्चपञ्चाशत् ॥ ५५ ॥
॥ इति शुक्लयजुःकाण्वसंहितायां पञ्चत्रिंशोऽध्यायः ॥३५॥

अथ षट्त्रिंशोऽध्यायः ।

ऋचं वाचं प्र पद्ये मनो यजुः प्र पद्ये साम प्राणं प्र पद्ये चक्षुः श्रोत्रं प्र पद्ये ।
वागोजः सहौजो मयि प्राणापानौ ॥१॥ १
यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु ।
शं नो भवतु भुवनस्य यस्पतिः ॥२॥ २
भूर्भुवः स्वः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥३॥ ३
कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥४॥ ४
कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृळ्हा चिदारुजे वसु ॥५॥ ५
अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥६॥ ६
कया त्वं न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥७॥ ७
इन्द्रो विश्वस्य राजति । शं नो अस्तु द्विपदे शं चतुष्पदे ॥८॥ ८
शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥९॥ ९
शं नो वातः पवताꣳ शं नस्तपतु सूर्यः । शं नः कनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥१०॥ १०
अहानि शं भवन्तु नः शꣳ रात्रीः प्रति धीयताम् ।
शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शं न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं योः ॥११॥ ११
शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥१२॥ १२
स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ॥१३॥ १३
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥१४॥ १४
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥१५॥ १५
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥१६॥ १६
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिः शान्तिरेव शान्तिः ॥१७॥ १७
दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥१८॥ १८
दृते दृꣳह मा । ज्योक्ते संदृशि जीव्यासं ज्योक्ते संदृशि जीव्यासम् ॥१९॥ १९
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥२०॥ २० [१००५]

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे ॥२१॥ २१
यतोयतः समीहसे ततो नो अभयं कुरु ।
शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥२२॥ २२
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु ।
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥२३॥ २३
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम् ॥२४॥ (१) [१००९] २४

ऋचं वाचमित्येकानुवाके चतुर्विंशतिः ॥२४॥
॥ इति शुक्लयजुःकाण्वसंहितायां षट्त्रिंशोऽध्यायः ॥३६॥

अथ सप्तत्रिंशोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । आ ददे नारिरसि ॥१॥ १
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥२॥ २
देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥३॥ ३
देव्यो वम्रियो भूतस्य प्रथमजा मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥४॥ ४
इयत्यग्र आसीर्मखस्य तेऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥५॥ ५
इन्द्रस्यौज स्थ मखस्य वोऽद्य शिरो राध्यासं देवयजने पृथिव्याः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥६॥ ६
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥७॥ ७ [१०१६]

मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥८॥ ८
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
अश्वस्य त्वा वृष्णः शक्ना धूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे । मखाय त्वा मखस्य त्वा शीर्ष्णे
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥९॥ ९
ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा । मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ।
मखाय त्वा मखस्य त्वा शीर्ष्णे ॥१०॥ (१) १०
यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।
देवस्त्वा सविता मध्वानक्तु पृथिव्याः सꣳ स्पृशस्पाहि ।
अर्चिरसि शोचिरसि तपोऽसि ॥११॥ ११
अनाधृष्टा पुरस्तादग्नेराधिपत्य आयुर्मे दाः पुत्रवती दक्षिणत इन्द्रस्याधिपत्ये प्रजां मे दाः ।
सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्मे दा आश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ।
विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्य ओजो मे दा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि ॥१२॥ १२
स्वाहा मरुद्भिः परि श्रीयस्व दिवः सꣳस्पृशस्पाहि । मधु मधु मधु ॥३॥ (२) १३
गर्भो देवानां पिता मतीनां पतिः प्रजानाम् । १४
सं देवो देवेन सवित्रा गत सꣳ सूर्येण रोचते ॥१॥
समग्निरग्निना गत सं दैवेन सवित्रा सꣳ सूर्येणारोचिष्ट । १५
स्वाहा समग्निस्तपसा गत सं दैव्येन सवित्रा सꣳ सूर्येणारूरुचत ॥२॥
धर्ता दिवो वि भाति तपसस्पृथिव्यां धर्ता देवो देवानाममर्त्यस्तपोजाः । १६
वाचमस्मे नि यच्छ देवायुवम् ॥३॥
अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥४॥ १७ [१०२६]

विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते सर्वस्य वचसस्पते ।
देवश्रुत्त्वं देव घर्म देवो देवान्पाह्यत्र प्रावीरनु वां देववीतये ।
मधु माध्वीभ्यां मधु माधूचीभ्याम् ।
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वो अध्वरं दिवि देवेषु धेहि ॥५॥ १८
पिता नोऽसि पिता नो बोधि नमस्ते अस्तु मा मा हिंसीः ।
त्वष्टृमन्तस्त्वा सपेम पुत्रान्पशून्मयि धेह्यरिष्टाहꣳ सह पत्या भूयासम् ॥६॥ १९
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।
रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ॥७॥ (३) २० [१०१९]

देवस्य त्वा दश ॥१०॥ यमाय तिस्रः ॥३॥ गर्भो देवानां सप्त ॥७॥ त्र्यनुवाकेषु विंशतिः ॥२०॥
॥ इति शुक्लयजुःकाण्वसंहितायां सप्तत्रिंशोऽध्यायः ॥३७॥

अथाष्टत्रिंशोऽध्यायः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । १
आ ददेऽदित्यै रास्नासि ॥१॥ २
इड एह्यदित एहि सरस्वत्येहि । असावेह्यसावेह्यसावेहि ॥२॥ ३
अदित्यै रास्नासीन्द्राण्या उष्णीषः । पूषासि घर्माय दीष्व ॥३॥ ४
अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्वेन्द्राय पिन्वस्व । स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥४॥
यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः । उर्वन्तरिक्षमन्वेमि ॥५॥ ५
गायत्रं छन्दोऽसि त्रैष्टुभं छन्दोऽसि द्यावापृथिवीभ्यां त्वा परि गृह्णाम्यन्तरिक्षेणोप यच्छामि ।
इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत वाट् । ६
स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥६॥ (१)
समुद्राय त्वा वाताय स्वाहा सरिराय त्वा वाताय स्वाहा ।
अनाधृष्याय त्वा वाताय स्वाहाप्रतिधृष्याय त्वा वाताय स्वाहा ॥ ७
अवस्यवे त्वा वाताय स्वाहाशिमिदाय त्वा वाताय स्वाहा ॥१॥
इन्द्राय त्वा वसुमते रुद्रवते स्वाहेन्द्राय त्वादित्यवते स्वाहा ।
इन्द्राय त्वाभिमातिघ्ने स्वाहा सवित्रे त्व ऋभुमते विभुमते वाजवते स्वाहा बृहस्पतये त्वा
विश्वदेव्यावते स्वाहा ॥२॥ ८ [१०३७]

यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥३॥ ९
विश्वा आशा दक्षिणसत्सर्वान्देवानयाडिह ।
स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विना ॥४॥ १०
दिवि धा इमं यज्ञमिमं यज्ञं दिवि धाः । स्वाहाग्नये यज्ञियाय शं यजुर्भ्यः ॥५॥ ११
अश्विना घर्मं पातꣳ हार्द्वानमहर्दिवाभिरूतिभिः ।
तन्त्रायिणे नमो द्यावापृथिवीभ्याम् ॥६॥ १२
अपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसाताम् । इहैव रातयः सन्तु ॥७॥ १३
इषे पिन्वस्वोर्जे पिन्वस्व ब्रह्मणे पिन्वस्व क्षत्राय पिन्वस्व द्यावापृथिवीभ्यां पिन्वस्व ।
धर्मासि सुधर्मामेन्यस्मे नृम्णानि धारय ब्रह्म धारय क्षत्रं धारय विशं धारय ॥८॥(२) १४

स्वाहा पूष्णे शरसे स्वाहा ग्रावभ्यः स्वाहा प्रतिरवेभ्यः ।
स्वाहा पितृभ्य ऊर्ध्वबर्हिभ्यो घर्मपावभ्यः स्वाहा
द्यावापृथिवीभ्याꣳ स्वाहा विश्वेभ्यो देवेभ्यः ॥१॥ १५
स्वाहा रुद्राय रुद्रहूतये स्वाहा सं ज्योतिषा ज्योतिः ।
अहः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।
मधु हुतमिन्द्रतमे अग्नौ अश्याम ते देव घर्म नमस्ते अस्तु मा मा हिꣳसीः ॥२॥ (३) १६

अभीमं महिमा दिवं विप्रो बभूव सप्रथाः ।
उत श्रवसा पृथिवीꣳ सꣳ सीदस्व महाꣳ असि रोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥१॥ (४) १७

या ते घर्म दिव्या शुग्या गायत्र्याꣳ हविर्धाने । सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्मान्तरिक्षे शुग्या त्रिष्टुभ्याग्नीध्रे । सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ।
या ते घर्म पृथिव्याꣳ शुग्या जगत्याꣳ सदस्या ।
सा त आ प्यायतां निष्ट्यायतां तस्यै ते स्वाहा ॥१॥ १८
क्षत्रस्य त्वा परस्पाय ब्रह्मणस्तन्वं पाहि ।
विशस्त्वा धर्मणा वयमनु क्रामाम सुविताय नव्यसे ॥२॥ १९
चतुःस्रक्तिर्नाभिर्ऋतस्य सप्रथाः स नो विश्वायुः सप्रथाः स नः सर्वायुः सप्रथाः ।
अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिम ॥३॥ २० [१०४९]

घर्मैतत्ते पुरीषं तेन वर्धस्व चा च प्यायस्व । २१
वर्धिषीमहि च वयमा च प्यासिषीमहि ॥४॥ २२
अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सꣳ सूर्येण दिद्युतदुदधिर्निधिः ॥५॥
सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु । २३
योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥६॥
उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ॥७॥(५) २४

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥१॥ २५
मयि त्यदिन्द्रियं बृहन्मयि दक्षो मयि क्रतुः ।
घर्मस्त्रिशुग्वि राजति विराजा ज्योतिषा सह ब्रह्मणा तेजसा सह ॥
पयसो रेत आभृतं तस्य दोहमशीमह्युत्तरामुत्तराꣳ समाम् ॥२॥ (६) २६
त्विषः संवृक् क्रत्वे दक्षस्य ते सुषुम्णस्य ते सुषुम्णाग्निहुतः ।
इन्द्रपीतस्य प्रजापतिभक्षितस्य मधुमत उपहूत उपहूतस्य भक्षयामि ॥१॥ (७) २७ [१०५६]

देवस्य त्वा षट् ॥६॥ समुद्राय त्वाष्ट ॥८॥ स्वाहा पूष्णे द्वे ॥२॥ अभीममेका ॥१॥ या ते सप्त ॥७॥
यावती द्वे ॥२॥ त्विषःसंवृगेका ॥१॥ सप्तानुवाकेषु सप्तविंशतिः ॥२७॥
इति शुक्लयजुःकाण्वसंहितायां अष्टत्रिंशोऽध्यायः ॥३८॥

अथैकोनचत्वारिंशोऽध्यायः ।

स्वाहा प्राणेभ्यः साधिपतिकेभ्यः पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा
दिवे स्वाहा सूर्याय स्वाहा । दिग्भ्यः स्वाहा चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः १
स्वाहा वरुणाय स्वाहा । नाभ्यै स्वाहा पूताय स्वाहा ॥१॥ (१)

वाचे स्वाहा प्राणाय स्वाहा प्राणाय स्वाहा । २
चक्षुषे स्वाहा चक्षुषे स्वाहा श्रोत्राय स्वाहा श्रोत्राय स्वाहा ॥१॥
मनसः काममाकूतिं वाचः सत्यमशीय ।
पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ॥२॥ (२) ३ [१०५९]

प्रजापतिः संभ्रियमाणः सम्राट् संभृतो वैश्वदेवः संसन्नो घर्मः प्रवृक्तस्तेज उद्यत आश्विनः
पयस्यानीयमाने पूषा विष्यन्दमाने मारुतः क्लथन् ।
मैत्रः शरसि संताय्यमाने वायव्यो ह्रियमाण आग्नेयो हूयमानो वाग्घुतः ॥१॥ (३) ४
सविता प्रथमेऽहन्नग्निर्द्वितीये वायुस्तृतीय आदित्यश्चतुर्थे
चन्द्रमाः पञ्चम ऋतुः षष्ठे मरुतः सप्तमे बृहस्पतिरष्टमे ।
मित्रो नवमे वरुणो दशम इन्द्र एकादशे विश्वे देवा द्वादशे ॥१॥(४) ५
उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाꣳश्चाभियुग्वा च विक्षिपः स्वाहा ॥१॥ (५) ६
अग्निꣳ हृदयेनाशनिꣳ हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना ।
शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तःपर्शव्येनोग्रं
देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥१॥ (६) ७
उग्रं लोहितेन मित्रꣳ सौव्रत्येन रुद्रं दौर्व्रत्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा ।
भवस्य कण्ठ्यꣳ रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥१॥ (७) ८
लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय
स्वाहा लोहिताय स्वाहा मेदसे स्वाहा मेदसे स्वाहा ।
माꣳसेभ्यः स्वाहा माꣳसेभ्यः स्वाहा स्नावभ्यः स्वाहा
स्नावभ्यः स्वाहास्थभ्यः स्वाहास्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा ।
रेतसे स्वाहा पायवे स्वाहा ॥१॥ (८) ९
आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा ।
शुचे स्वाहा शोचते स्वाहा शोकाय स्वाहा ॥१॥ १०
तपसे स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा ।
निर्ऋत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ॥२॥ ११
यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा ।
ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा ॥३॥(९)१२[१०७८]

स्वाहाप्राणेभ्य एका ॥१॥ वाचे द्वे ॥२॥ प्रजापतिःसम्भ्रियमाण एका ॥१॥ सविता प्रथम एका ॥१॥
उग्रश्चैका ॥१॥ अग्निꣳ हृदयेनैका ॥१॥ उग्रंलोहितेनैका ॥१॥ लोमभ्यः स्वाहा चेत्येका ॥१॥
आयासाय तिस्रः ॥३॥ नवानुवाकेषु द्वादश ॥१२॥
इति शुक्लयजुःकाण्वसंहितायां एकोनचत्वारिंशोऽध्यायः ॥३९॥

अथ चत्वारिंशोऽध्यायः।

ईशा वास्यमिद२ सर्वं यत्किं च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥१॥ १
कुर्वन्नेवेह कर्माणि जिजीविषेच्छत२ समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥२॥ २
असुर्या नाम ते लोका अन्धेन तमसावृताः॥
ता२स्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥३॥ ३
अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥४॥ ४
तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥५॥ ५
यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न वि जुगुप्सते ॥६॥ ६
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥७॥ ७
स पर्यगाच्छुक्रमकायमव्रणमस्नाविर२ शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥ ८
अन्धं तमः प्र विशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्याया२ रताः ॥९॥ ९
अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥ १०
विद्यां चाविद्यां च यस्तद्वेदोभय२ सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥११॥ ११
अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते।
ततो भूय इव ते तमो य उ संभूत्या२ रताः ॥१२॥ १२
अन्यदेवाहुः संभवादन्यदाहुरसंभवात्।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१३॥ १३ [१०८१]

संभूतिं च विनाशं च यस्तद्वेदोभय२ सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते ॥१४॥ १४
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥१५॥ १५
पूषन्नेक ऋषे यम सूर्य प्राजापत्य व्यूह रश्मीन्त्समूह
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि।
योऽसावसौ पुरुषः सोऽहमस्मि ॥१६॥ १६
वायुरनिलममृतमथेदं भस्मान्त२ शरीरम्।
ॐ३ क्रतो स्मर कृत२ स्मर क्रतो स्मर कृत२ स्मर ॥१७॥ १७
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥१८॥ (१) १८ [१०८६]

॥ ईशावास्यमित्येकानुवाके अष्टादश ॥१८॥

॥ इति शुक्लयजुःकाण्वसंहितायां चत्वारिंशोऽध्यायः ॥४०॥

॥ इति शुक्लयजुःकाण्वसंहिता समाप्ता।

तैत्तिरीय संहिता

ॐ

कृष्ण-यजुर्वेदीय

तैत्तिरीय-संहिता

प्रथमं काण्डम् ।

दर्शपूर्णमासौ ।

[अथ प्रथमः प्रपाठकः ॥]

वत्सापाकरणम् ॥ ४ द्विपदा विराड् गायत्री, ५ मध्येज्योतिस्त्रिष्टुप्, ६-७ एकपदा त्रिष्टुप् । प्रजापतिर्ऋषिः ।

इषे त्वोर्जे त्वा वायवः स्थोपायवः स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आ प्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयक्ष्मा मा वः स्तेन ईशत माऽघशंसो रुद्रस्य हेतिः परि वो वृणक्तु ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि ॥ (इषे, त्रिचत्वारिंशत्) ॥ १ ॥

बर्हिराहरणम् ॥ ३ त्रिष्टुप्, ८ एकपदा त्रिष्टुप्, १८ एकपदा गायत्री । प्रजापतिर्ऋषिः ।

यज्ञस्य घोषदसि प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा त आ वहन्ति कवयः पुरस्ताद् देवेभ्यो जुष्टमिह बर्हिरासदे देवानां परिषूतमसि वर्षवृद्धमसि देवबर्हिर्मा त्वाऽन्वङ् मा तिर्यक् पर्व ते राध्यासमाच्छेत्ता ते मा रिषं देवबर्हिः शतवल्शं वि रोह सहस्रवल्शा (१) वि वयꣳ रुहेम पृथिव्याः सम्पृचः पाहि सुसम्भृता त्वा सं भराम्यदित्यै रास्नाऽसीन्द्राण्यै सन्नहनं पूषा ते ग्रन्थिं ग्रथ्नातु स ते माऽऽ स्थादिन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेर्मूर्ध्ना हराम्युर्वन्तरिक्षमन्विहि देवं गममसि ॥ (सहस्रवल्शा, अष्टात्रिंशच्च) ॥ २ ॥

रात्रिदोहः ॥ ८ गायत्री । प्रजापतिर्ऋषिः ।

शुन्धध्वं दैव्याय कर्मणे देवयज्यायै मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधाया असि परमेण धाम्ना दृꣳहस्व मा ह्वार्वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारꣳ हुतः स्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याꣳ सा विश्वायुः सा विश्व-

१ (तै. ७.)

व्यचाः सा विश्वकर्मा सं पृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमा मन्द्रा धनस्य सातये सोमेन (१) त्वाऽऽ तनच्मीन्द्राय दधि विष्णो हव्यꣳ रक्षस्व ॥ (सोमेनाष्टौ च ;) ॥ ३ ॥

व्रीहिनिर्वापः ॥ प्रजापतिर्ऋषिः ।

कर्मणे वां देवेभ्यः शकेयं वेषाय त्वा प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममह्रुतमसि हविर्धानं दृꣳहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा (१) हिꣳसिषमुरु वाताय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपाम्यग्नीषोमाभ्यामिदं देवानामिदमु नः सह स्फात्यै त्वा नाऽरात्यै सुवरभि वि ख्येषं वैश्वानरं ज्योतिर्दृꣳहन्तां दुर्या द्यावापृथिव्योरुर्वन्तरिक्षमन्विह्यदित्यास्त्वोपस्थे सादयाम्यग्ने हव्यꣳ रक्षस्व ॥ (त्वा षट्चत्वारिंशच्च) ॥ ४ ॥

प्रोक्षणम्, अवघातः ॥ १ गायत्री, ६, १४ एकपदा गायत्री । प्रजापतिर्ऋषिः ।

देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरापो देवीरग्रेपुवो अग्रेगुवोऽग्र इमं यज्ञं नयताग्रे यज्ञपतिं धत्त युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये प्रोक्षिताः स्थाग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्याꣳ शुन्धध्वं दैव्याय कर्मणे देवयज्यायै अवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा (१) पृथिवी वेत्त्वधिषवणमसि वानस्पत्यं प्रति त्वाऽदित्यास्त्वग्वेत्त्वग्नेस्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णाम्यद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्यꣳ सुशमि शमिष्वेषमा वदोर्जमा वद द्युमद्वदत वयꣳ सङ्घातं जेष्म वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु परापूतꣳ रक्षः परापूता अरातयो रक्षसां भागो (२)ऽसि वायुर्वो वि विनक्तु देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ (त्वा, भागः, एकादश च) ॥ ५ ॥

व्रीहिपेषणम् ॥ १० एकपदा त्रिष्टुप् । प्रजापतिर्ऋषिः ।

अवधूतꣳ रक्षोऽवधूता अरातयोऽदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु दिवः स्कम्भनिरसि प्रति त्वाऽदित्यास्त्वग्वेत्तु धिषणाऽसि पर्वत्या प्रति त्वा दिवः स्कम्भनिर्वेत्तु धिषणाऽसि पार्वतेयी प्रति त्वा पर्वतिर्वेत्तु देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामधि वपामि धान्यमसि धिनुहि देवान् प्राणाय त्वा (१)ऽपानाय त्वा व्यानाय त्वा दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ (प्राणाय त्वा, पञ्चदश च) ॥ ६ ॥

कपालोपधानम् ॥ १२ अनुष्टुप् । प्रजापतिर्ऋषिः ।

धृष्टिरसि ब्रह्म यच्छापाग्नेऽग्निमामादं जहि निष्क्रव्यादꣳ सेधाऽऽ देवयजं वह निर्दग्धꣳ रक्षो निर्दग्धा अरातयो ध्रुवमसि पृथिवीं दृꣳहाऽऽयुर्दृꣳह प्रजां दृꣳह सजातानस्मै यजमानाय

पर्यूह धरुणमसि पर्यूह धर्त्रमस्यन्तरिक्षं दृꣳह प्राणं दृꣳहापानं दृꣳह सजातानस्मै यजमानाय पर्यूह धर्मासि दिशो दृꣳह दिवं दृꣳह चक्षुः (१) दृꣳह श्रोत्रं दृꣳह सजातानस्मै यजमानाय पर्यूह चितः स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह भृगूणामङ्गिरसां तपसा तप्यध्वं

यानि घर्मे कपालान्युपचिन्वन्ति वेधसः ।

पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चताम् ॥ (चक्षुः, द्वाचत्वारिंशच्च) ॥ ७ ॥

पुरोडाशश्रपणम् ॥ २ उपरिष्टाद्बृहती; ३-४, ११ एकपदा गायत्री । प्रजापतिर्ऋषिः ।

सं वपामि समापो अद्भिरग्मत समोषधयो रसेन सꣳ रेवतीर्जगतीभिर्मधुमतीर्मधुमतीभिः सृज्यध्वमद्भ्यः परि प्रजाताः स्थ समद्भिः पृच्यध्वं जनयत्यै त्वा सं यौम्यग्नये त्वाऽग्नीषोमाभ्यां मखस्य शिरोऽसि घर्मोऽसि विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतां त्वचं गृह्णीष्वान्तरितꣳ रक्षोऽन्तरिता अरातयो देवस्त्वा सविता (१) श्रपयतु वर्षिष्ठे अधि नाकेऽग्निस्ते तनुवं माऽति धागग्ने हव्यꣳ रक्षस्व सं ब्रह्मणा पृच्यस्वैकताय स्वाहा द्विताय स्वाहा त्रिताय स्वाहा ॥ (सविता, द्वाविंशतिश्च) ॥ ८ ॥

वेदिकरणम् ॥ २० द्विपदा गायत्री; २४ एकपदा त्रिष्टुप्, २५ त्रिपदा त्रिष्टुप् । प्रजापतिर्ऋषिः ।

आ दद इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्मतेजाः पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमपहतोऽररुः पृथिव्यै व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगपहतोऽररुः पृथिव्यै देवयजन्यै व्रजं (१) गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगररुस्ते दिवं माऽस्कान् वसवस्त्वा परि गृह्णन्तु गायत्रेण छन्दसा रुद्रास्त्वा परि गृह्णन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वा परि गृह्णन्तु जागतेन छन्दसा देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस ऋतमस्यृतसदनमस्यृतश्रीरसि धा असि स्वधा अस्युर्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरप्शिन् (२) उदादाय पृथिवीं जीरदानुर्यामैरयञ्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्य यजन्ते ॥ (देवयजन्यै व्रजं, तमतो मा, विरप्शिन्नेकादश च) ॥ ९ ॥

हविर्ग्रहणम् ॥ ७-८, १० अनुष्टुप्; ९ त्रिष्टुप्; २० गायत्री । प्रजापतिर्ऋषिः ।

प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयोऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳ सं मार्ज्मि वाचं प्राणं चक्षुः श्रोत्रं प्रजां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ सं मार्ज्म्याशासाना सौमनसं प्रजाꣳ सौभाग्यं तनूम् ।

अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम् ॥

सुप्रजसस्त्वा वयꣳ सुपत्नीरुप (१) सेदिम ।

अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ॥

इमं वि ष्यामि वरुणस्य पाशं यमबध्नीत सविता सुकेतः ।

धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि ॥

समायुषा सं प्रजया समग्ने वर्चसा पुनः ।

सं पत्नी पत्याऽहं गच्छे समात्मा तनुवा मम ॥

महीनां पयोऽस्योषधीनाꣳ रसस्तस्य तेऽक्षीयमाणस्य नि (२) र्वपामि महीनां पयोऽस्योषधीनाꣳ रसोऽदब्धेन त्वा चक्षुषाऽवेक्षे सुप्रजास्त्वाय तेजोऽसि तेजोऽनु प्रेह्यग्निस्ते तेजो मा वि नैदग्नेर्जिह्वाऽसि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव शुक्रमसि ज्योतिरसि तेजोऽसि देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः शुक्रं (३) त्वा शुक्रायां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वाऽर्चिषि धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि ॥ (उप, निः, शुक्रं, षोडश च) ॥ १० ॥

इध्माबर्हिःसंस्कारो वेद्यां हविरासादनं । १४ गायत्री; २० एकपदा त्रिष्टुप् । प्रजापतिर्ऋषिः ।

कृष्णोऽस्याखरेष्ठोऽग्नये त्वा स्वाहा वेदिरसि बर्हिषे त्वा स्वाहा बर्हिरसि स्रुग्भ्यस्त्वा स्वाहा दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा स्वधा पितृभ्य ऊर्ग्भव बर्हिषद्भ्य ऊर्जा पृथिवीं गच्छत विष्णोः स्तूपोऽस्यूर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यो गन्धर्वोऽसि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडितः इन्द्रस्य बाहुरसि (१) दक्षिणो यजमानस्य परिधिरिड ईडितो मित्रावरुणौ त्वोत्तरतः परि धत्तां ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्यै वीतिहोत्रं त्वा कवे द्युमन्तꣳ समिधीमह्यग्ने बृहन्तमध्वरे विशो यन्त्रे स्थो वसूनाꣳ रुद्राणामादित्यानाꣳ सदसि सीद जुहूरुपभृद् ध्रुवाऽसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि (२) सीदैता असदन्त्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियम् ॥ (असि, सदसि, पञ्चदश च) ॥ ११ ॥

१०।४-५ ' मा निर्मृक्षं... संमार्ज्मि ' । (१०।१२) 'धाम्ने धाम्ने... गृह्णामि ' (११।१७-१८) 'असि घृताची... सीद'

आधारः ॥ १ एकपदा गायत्री, ८ द्विपदा पङ्क्ती । प्रजापतिर्ऋषिः ।

भुवनमसि वि प्रथस्वाऽग्ने यष्टरिदं नमः ।

जुह्वेह्यग्निस्त्वा ह्वयति देवयज्यायै उपभृदेहि देवस्त्वा सविता ह्वयति देवयज्यायै अग्नाविष्णू मा वामव क्रमिषं वि जिहाथां मा मा सं ताप्तं लोकं मे लोककृतौ कृणुतं विष्णोः स्थानमसी—त इन्द्रो अकृणोद् वीर्याणि समारभ्योर्ध्वो अध्वरो दिविस्पृशमह्रुतो (१) यज्ञो यज्ञपतेरिन्द्रावान्त्स्वाहा बृहद्भाः पाहि माऽग्ने दुश्चरितादा मा सुचरिते भज मखस्य शिरोऽसि सं ज्योतिषा ज्योतिरङ्क्ताम् ॥ (अह्रुत, एकविंशतिश्च) ॥१२॥

स्रुग्व्यूहनादुत्तरकर्म ॥ १-२ अनुष्टुप्, १२ पुरस्ताज्ज्योतिस्त्रिष्टुप्, १४ त्रिष्टुप् । प्रजापतिर्ऋषिः ।

वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् ।

अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ।

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।

अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ।

वसुभ्यस्त्वा रुद्रेभ्यस्त्वा—ऽऽदित्येभ्यस्त्वा—ऽक्तꣳ रिहाणा वियन्तु वयः ।- प्रजां योनिं मा निर्मृक्षमा प्यायन्तामाप ओषधयो मरुतां पृषतयः स्थ दिवं (१) गच्छ ततो नो वृष्टिमेरय । आयुष्पा अग्नेऽस्यायुर्मे पाहि चक्षुष्पा अग्नेऽसि चक्षुर्मे पाहि ध्रुवाऽसि

यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः ।

तं त एतमनु जोषं भराम्येष नेत्त्वदपचेतयातै

यज्ञस्य पाथ उप समितꣳ संस्रावभागाः स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च (२) देवा इमां वाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्हिषि मादयध्वम्—अग्नेर्वामपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनी सुम्ने मा धत्तं धुरि धुर्यौ पात—मग्नेऽदब्धायोऽशीततनो पाहि माऽद्य दिवः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषं नः पितुं कृणु सुषदा योनिꣳ स्वाहा देवा गातुविदो गातुं वित्त्वा गातुम् (३) इत मनसस्पत इमं नो देव देवेषु यज्ञꣳ स्वाहा वाचि स्वाहा वाते धाः ॥ (दिवं, च, षड्विंशतिश्च) ॥ १३ ॥

काम्येष्टियाज्यापुरोऽनुवाक्याः ॥ १-२, ४, ६, ८-१०, १२, १४ त्रिष्टुप्; ७ अनुष्टुप्; शिष्टा गायत्र्यः । विश्वेदेवा ऋषयः ।

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।

उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥

अश्रवꣳ हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।

अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् (१) ।

उभा हि वाꣳ सुहवा जोहवीमि ता वाजꣳ सद्य उशते धेष्ठा ॥

वयमु त्वा पथस्पते रथं न वाजसातये । धिये पूषन्नयुज्महि ॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कम् ।

स नो रासच्छुरुधश्चन्द्राग्रा धियंधियꣳ सीषधाति प्र पूषा ॥

क्षेत्रस्य पतिना वयꣳ हितेनेव जयामसि ।

गामश्वं पोषयित्न्वा स नो (२) मृडातीदृशे ॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।

मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुम् ।

अग्निर्विद्वान्त्स यजात् (३) सेदु होता सो अध्वरान् स ऋतून् कल्पयाति ॥

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥

अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।

पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥

त्वमग्ने व्रतपा असि देव आ (४) मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥

यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।

अग्निष्टद्विश्वमा पृणाति विद्वान् येभिर्देवाꣳ ऋतुभिः कल्पयाति ॥

(जुषेथां, नो, यजा,-त्रा, त्रयोविंशतिश्च) ॥ १४ ॥

[दुवे २३ । यज्ञस्य ८८ । शुन्धध्वं २८ । कर्मणे २६ । देवो १११ । अवधूतं ६५ । घृष्टिः ९८ । स-७२ ।-मार्ष्ट १६१ । प्रत्युष्टं १६६ । कृष्णो ११५ । भुवनं ७१ । वाजस्यमा १६३; २२३ । चतुर्दश । १५१०]

[इति प्रथमकाण्डे प्रथमः प्रपाठकः ॥]

अग्निष्टोमे क्रयः ।

[अथ द्वितीयः प्रपाठकः ॥]

यजमानस्य क्षौरस्नानानुलेपनादिसंस्काराः प्राचीनवंशप्रवेशश्च ॥ १ द्विपदा गायत्री; ६ त्रिपदा विराट्, ७ एकपदा विराट्, १२-१४ गायत्री; १६ अनुष्टुप् । सोमऋषिः ।

आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसी—र्देव-

शूरहानि प्र वपे स्वस्त्युत्तराण्यशीया—ऽऽपो अस्मान् मातरः शुन्धन्तु घृतेन नो घृतप्वः पुनन्तु विश्वमस्मत् प्र वहन्तु रिप्र—मुदाभ्यः शुचिरा पूत एमि सोमस्य तनूरसि तनुवं मे पाहि महीनां पयोऽसि वर्चोधा असि वर्चो (१) मयि धेहि वृत्रस्य कनीनिकाऽसि चक्षुष्पा असि चक्षुर्मे पाहि चित्पतिस्त्वा पुनातु— वाक्पतिस्त्वा पुनातु— देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभि—स्तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमा वो देवास ईमहे सत्यधर्माणो अध्वरे यद् वो देवास आगुरे यज्ञियासो हवामहे इन्द्राग्नी द्यावापृथिवी आप ओषधीः (२) त्वं दीक्षाणामधिपतिरसीह मा सन्तं पाहि ॥ (वर्चो, ओषधीरेकं च) ॥ १ ॥

यजमानस्य दीक्षा ॥ ५ त्रिपदा विराट्, ६ अनुष्टुप्; ८ त्रिष्टुप् । सोमऋषिः ।

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहा—ऽऽपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाह—र्क्सामयोः शिल्पे स्थस्ते वामा रभे ते मा (१) पातमाऽस्य यज्ञस्योदृचः

इमां धियꣳ शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳ शिशाधि

ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावꣳ रुहेम—

ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा मा मा हिꣳसी—र्विष्णोः शर्माऽसि शर्म यजमानस्य शर्म मे यच्छ नक्षत्राणां माऽतीकाशात् पाही—न्द्रस्य योनिरसि (२) मा मा हिꣳसीः कृष्यै त्वा सुसस्यायै सुपिप्पलाभ्यस्त्वौषधीभ्यः सूपस्था देवो वनस्पति—रूर्ध्वो मा पाह्योदृचः स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात् स्वाहा यज्ञं वातादा रभे ॥ (मा, योनिरसि, त्रिꣳशच्च) ॥ २ ॥

दैवकर्मसंस्कारः ॥ १-२ अनुष्टुप्, ४ गायत्री, ५ एकपदा त्रिष्टुप्, २१ त्रिष्टुप् । सोमऋषिः ।

दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसꣳ सुपारा नो असद् वशे । ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा—ऽग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः ।

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं (१) यज्ञेष्वीड्यः ॥

विश्वे देवा अभि मामाऽववृत्रन् पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदावा रास्वेयत् सोमाऽऽभूयो भर मा पृणन् पूर्त्या वि राधि माऽहमायुषा चन्द्रमसि मम भोगाय भव वस्त्रमसि

मम भोगाय भवो—स्राऽसि मम भोगाय भव हयोऽसि मम भोगाय भव (२) छागोऽसि मम भोगाय भव मेषोऽसि मम भोगाय भव वायवे त्वा वरुणाय त्वा निर्ऋत्यै त्वा रुद्राय त्वा देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमस्तं वो माऽव क्रमिष—मच्छिन्नं तन्तुं पृथिव्या अनु गेषं भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वथेमव स्य (३) वर आ पृथिव्या आरे शत्रून् कृणुहि सर्ववीर एदमगन्म देवयजनं पृथिव्या विश्वे देवा यदजुषन्त पूर्व ऋक्सामाभ्यां यजुषा सन्तरन्तो रायस्पोषेण समिषा मदेम ॥ (त्वं, भव, स्य, पञ्चविंशतिश्च) ॥ ३ ॥

सोमक्रयण्यानयनम् ॥ ५ अनुष्टुप् । सोमऋषिः ।

इयं ते शुक्र तनूरिदं वर्चस्तया सं भव भ्राजं गच्छ जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहा शुक्रमस्यमृतमसि वैश्वदेवꣳ हविः सूर्यस्य चक्षुराऽरुहमग्नेरक्ष्णः कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चिता चिदसि मनाऽसि धीरसि दक्षिणा (१) ऽसि यज्ञियाऽसि क्षत्रियाऽस्यदितिरस्युभयतःशीर्ष्णी सा नः सुप्राची सुप्रतीची सं भव मित्रस्त्वा पदि बध्नातु पूषाऽध्वनः पात्विन्द्रायाध्यक्षायानु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वाऽऽवर्तयतु मित्रस्य पथा स्वस्ति सोमसखा (२) पुनरेहि सह रय्या ॥ (दक्षिणा, सखा, पञ्च च) ॥ ४ ॥

सोमक्रयण्याः पदसंग्रहः ॥ सोमऋषिः ।

वस्व्यसि रुद्राऽस्य—दितिरस्या—दित्याऽसि शुक्राऽसि चन्द्राऽसि बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिरा चिकेतु पृथिव्यास्त्वा मूर्धन्ना जिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा (१) अपि कृन्ताम्य—स्मे राय—स्त्वे राय—स्तोते रायः सं देवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव संदृशि माऽहꣳ रायस्पोषेण वि योषम् ॥ (अस्य ग्रीवा, एकान्नत्रिꣳशच्च) ॥ ५ ॥

सोमोन्मानम् ॥ २ अतिच्छन्दा (अष्टिः) । सोमऋषिः ।

अꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतोऽमात्योऽसि शुक्रस्ते ग्रहो—ऽभि त्यं देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं मतिमूर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा सुवः । प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनु (१) प्राणिहि प्रजास्त्वामनु प्राणन्तु ॥ (अꣳशु, एकं च) ॥ ६ ॥

सोमक्रयणम् ॥ सोमऋषिः ।

सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहꣳ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन सम्यत्ते गोरस्मे चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणाम्यस्मे ते बन्धुर्मयि ते रायः श्रयन्तामस्मे ज्योतिः सोमविक्रयिणि तमो मित्रो न एहि सुमित्रधा इन्द्रस्योरु (१) मा विश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनꣳ स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन् ॥ (उरुं, द्वाविꣳशतिश्च) ॥ ७ ॥

सोमस्य शकटारोपणम् ॥ १ अनुष्टुप्, २ एकपदा गायत्री, ५-६ त्रिष्टुप्, ७ गायत्री । सोमऋषिः ।

उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अनु ।
उर्वन्तरिक्षमन्विह्यदित्याः सदोऽस्यदित्याः सद आसीदास्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्नियासु हृत्सु (१) क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रावुदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥
उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ वरुणस्य स्कम्भनमसि वरुणस्य स्कम्भसर्जनमसि प्रत्यस्तो वरुणस्य पाशः ॥ (हृत्सु, पञ्चत्रिꣳशच्च) ॥ ८ ॥

सोमस्य प्राचीनवंशं प्रति गमनम् ॥ १ षट्पदाऽतिजगती, २-३ अनुष्टुप्, ४ जगती । सोमऋषिः ।

प्र च्यवस्व भुवस्पते विश्वान्यभि धामानि मा त्वा परिपरी विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरा दघच्छ्येनो भूत्वा परा पत यजमानस्य नो गृहे देवैः सꣳस्कृतं यजमानस्य स्वस्त्ययन्यपि पन्थामगस्महि स्वस्तिगामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु नमो मित्रस्य (१) वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसत ॥ वरुणस्य स्कम्भनमसि वरुणस्य स्कम्भसर्जनमस्युन्मुक्तो वरुणस्य पाशः ॥ (मित्रस्य, त्रयोविꣳशतिश्च) ॥ ९ ॥

आतिथ्येष्टिः ॥ ६ त्रिष्टुप् । सोमऋषिः ।

अग्नेरातिथ्यमसि विष्णवे त्वा सोमस्याऽऽतिथ्यमसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वाऽग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यानदित्याः सदोऽस्यदित्याः सद आ (१) सीद वरुणोऽसि धृतव्रतो वारुणमसि शंयोर्देवानाꣳ सख्यान्मा देवानामपसश्छित्स्मह्यापतये त्वा गृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि
२ (तै० सं०)

शाक्वराय त्वा गृह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णाम्यनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेऽन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुप गेषꣳ सुविते मा (२) धाः (आ, मै,-कं च) ॥ १० ॥

उपसदः ॥ सोमऋषिः

अꣳशुरꣳशुस्ते देव सोमाऽऽप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाऽऽप्यायय सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि (१) या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया-रजाशया-हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीꣳ स्वाहा (त्वयि, चत्वारिꣳशच्च) ॥ ११ ॥

उत्तरवेदिनिर्माणम् ॥ सोमऋषिः ।

वित्तायनी मेऽसि तिक्तायनी मेऽस्यवतान्मा नाथितमवतान्मा व्यथितं विदेरग्निर्नभो नामाग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽदधेऽग्ने अङ्गिरो यो द्वितीयस्यां-तृतीयस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं नाम (१) यज्ञियं तेन त्वाऽऽदधे सिꣳहीरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतां ध्रुवाऽसि देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु विश्वकर्मा त्वाऽऽदित्यैरुत्तरतः पातु सिꣳहीरसि सपत्नसाही स्वाहा सिꣳहीरसि सुप्रजावनिः स्वाहा सिꣳही (२) रसि रायस्पोषवनिः स्वाहा सिꣳहीरस्यादित्यवनिः स्वाहा सिꣳहीरस्या वह देवान्देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳहाच्युतक्षिदसि दिवं दृꣳहाग्नेर्भस्मास्यग्नेः पुरीषमसि ॥ (नाम, सिꣳहीः, पञ्चत्रिꣳशच्च) ॥ १२ ॥

हविर्धानमण्डपनिर्माणम् ॥ १ जगती, ३ विराड् गायत्री, ४ गायत्री, ५, ८-९ त्रिष्टुप्, ६ द्विपदा त्रिष्टुप्, ७ एकपदा विराट् । सोमऋषिः ।

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥
सुवाग्देव दुर्याꣳ आ वद देवश्रुतौ देवेष्वा घोषेथामा नो वीरो जायतां कर्मण्यो यꣳ सर्वेऽनुजीवाम यो बहूनामसद्वशी । इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य (१) पाꣳसुरे
इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये ।
व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः ॥

११।९-१) तनू...वधी - स्वाहा । ६-७ या ते अग्ने -ऽ। (१२।६) विदे... नाम -* ५ -ऽ विदे... अङ्गिरो यः-* ६ पृथि... दधे ।

प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जीह्वरतमत्र रमेथां वर्ष्मन्पृथिव्या दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्र यच्छ (२) दक्षिणादोत सव्यात् ।
विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ (अध्व, यच्छ, - चतुश्चत्वारिꣳशच्च) ॥ १३ ॥

काम्याः सामिधेन्यः पुरोऽनुवाक्या याज्याश्च ॥ १-१८ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाꣳ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपूꣳष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशꣳसो (१) यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ।
उदग्ने तिष्ठ प्रत्याऽऽतनुष्व न्यमित्राꣳ ओषतात्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥
स ते (२) जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥
सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना साऽसदिष्टिः ॥
अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरता (३) मियं गीः ।
स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥
इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवाꣳसमनु द्यून् ।
क्रीडन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवाꣳसो जनानाम् ॥
यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥

महो रुजामि (४) बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥
अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवः सध्रियञ्चो निषद्याऽग्ने तव नः पान्त्वमूर ॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह (५) देभुः ॥
त्वया वयꣳ सधन्यस्त्वोतास्तव प्रणीत्याश्याम वाजान् ।
उभा शꣳसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥
अया ते अग्ने समिधा विधेम प्रति स्तोमꣳ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥
रक्षोहणं वाजिनमाऽऽजिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा (६) स रिषः पातु नक्तम् ॥
वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥
उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ ।
मदे चिदस्य प्ररुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ (अघशꣳसः, स ते, जरता, रुजामि, ह, दिवा, चत्वारिꣳशच्च) ॥ १४ ॥

[आयु १०८ । आङ्ग्रे १२० । देवी- १०५ । मित्रं १०५ । वरुण- ७९ । - स्कम्भ ५० । सोम- ७२ । सुत- ८५ । प्रा -७३ । - प्रे- १०१ । - इन्द्र- ९० । वित्तायनी १२५ । युञ्जते १२९ । कृणुष्व २११ । चतुर्दश ॥ १६९० ॥]

[इति प्रथमकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥]

अग्निष्टोमे पशुः ।

[अथ तृतीयः प्रपाठकः ॥ ३ ॥

सदोमण्डपनिर्माणम् ॥ १० अनुष्टुप् । सोमऋषिः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददेऽभ्रिरसि नारिरसि परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा अपि कृन्तामि दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धतां लोकः पितृषदनो यवोऽसि यवयास्मद्द्वेषो (१) यवयारातीः पितृणाꣳ सदनमस्युत्

दिवꣳ स्तभानाऽन्तरिक्षं पृण पृथिवीं दृꣳह द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणयोर्ध्रुवेण धर्मणा ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोषवनिं पर्यूहामि ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह रायस्पोषं दृꣳह घृतेन द्यावापृथिवी आ पृणेथामिन्द्रस्य सदोऽसि विश्वजनस्य छाया परि त्वा गिर्वणो गिर इमा (२) भवन्तु विश्वतो वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीन्द्रमसीन्द्राय त्वा ॥ (दिवं, इमा, अष्टादश च) ॥ १ ॥

उपरवनिर्माणम् ॥ सोमऋषिः ।

रक्षोहणो वलगहनो वैष्णवान् खनामीदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेदमेनमधरं करोमि यो नः समानो योऽसमानोऽरातीयति गायत्रेण छन्दसाऽवबाढो वलगः किमत्र भद्रं तन्नौ सह विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासां नाष्ट्राणाꣳ हन्ता (१) रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो वलगहनोऽव नयामि वैष्णवान् यवोऽसि यवयास्मद्द्वेषो यवयारातीः रक्षोहणो वलगहनोऽव स्तृणामि वैष्णवान् रक्षोहणो वलगहनोऽभि जुहोमि वैष्णवान् रक्षोहणौ वलगहनावुप दधामि वैष्णवी रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी रक्षोहणौ वलगहनौ परि स्तृणामि वैष्णवी रक्षोहणौ वलगहनौ वैष्णवी बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय (२) वाचं वद ॥ (हन्ता,-त्राय द च) ॥ २ ॥

धिष्णियाः ॥ सोमऋषिः ।

विभूरसि प्रवाहणो - वह्निरसि हव्यवाहनः - श्वात्रोऽसि प्रचेताः - तुथोऽसि विश्ववेदाः - उशिगसि कविः - अङ्घारिरसि बम्भारिः - अवस्युरसि दुवस्वान् - शुन्ध्यूरसि मार्जालीयः - सम्राडसि कृशानुः - परिषद्योऽसि पवमानः - प्रतक्वाऽसि नभस्वान् - असंमृष्टोऽसि हव्यसूदः - ऋतधामाऽसि सुवर्ज्योतिः - ब्रह्मज्योतिरसि सुवर्धामा - अजोऽस्येकपात् - अहिरसि बुध्नियो रौद्रेणानीकेन (१) पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥ (अनीकशङ्गी च) ॥ ३ ॥

वैसर्जनहोमः ॥ १, ५ गायत्री, ३ त्रिष्टुप्, ४ अनुष्टुप् । सोमऋषिः ।

त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरूथꣳ स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहा-

ऽयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।

अयꣳ शत्रूञ्जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ ॥

उरु विष्णो वि क्रमस्वोरु क्षयाय नः कृधि । घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर ॥

सोमो जिगाति गातुविद् (१) देवानामेति निष्कृतमृतस्य योनिमासदम्-

(अदि-१५) त्वꣳसोम...हिꣳसीः ।

-दित्याः सदोऽस्यदित्याः सद आ सीद एष वो देव सवितः सोमस्तꣳ रक्षध्वं मा वो दभदेतत्त्वꣳ सोम देवो देवानुपागा इदमहं मनुष्यो मनुष्यान्त्सह प्रजया सह रायस्पोषेण नमो देवेभ्यः स्वधा पितृभ्य इदमहं निर्वरुणस्य पाशात्सुवरभि (२) वि ख्येषं वैश्वानरं ज्योतिरग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूस्त्वय्यभूदियꣳ सा मयि या तव तनूर्मय्यभूदेषा सा त्वयि यथायथं नौ व्रतपते व्रतिनोर्व्रतानि ॥ (गातुविद्-, ख्यो,-ऽष्टात्रिꣳशच्च) ॥ ४ ॥

यूपच्छेदनम् ॥ सोमऋषिः ।

अत्यन्यानगां नान्यानुपागामर्वाक्त्वा परैरविदं परोऽवरैस्तं त्वा जुषे वैष्णवं देवयज्यायै देवस्त्वा सविता मध्वाऽनक्त्वोषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीर्दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिꣳसीः पृथिव्या सं भव

वनस्पते शतवल्शो वि रोह सहस्रवल्शा वि वयꣳ रुहेम यं (१) त्वाऽयꣳ स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायाच्छिन्नो रायः सुवीरः ॥ (यं, दश च) ॥ ५ ॥

यूपस्थापनम् ॥ ११ त्रिष्टुप्, १२-१३) गायत्र्यौ । सोमऋषिः ॥

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा शुन्धतां लोकः पितृषदनो यवोऽसि यवयास्मद्द्वेषो यवयारातीः पितृणाꣳ सदनमसि स्वावेशोऽस्यग्रेगा नेतृणां वनस्पतिरधि त्वा स्थास्यति तस्य वित्ताद्देवस्त्वा सविता मध्वाऽनक्तु सुपिप्पलाभ्यस्त्वौषधीभ्य उद्दिवꣳ स्तभानान्तरिक्षं पृण पृथिवीमुपरेण दृꣳह

ते ते धामान्युश्मसी (१) गमध्यै गावो यत्र भूरिशृङ्गा अयासः ।

अत्राह तदुरुगायस्य विष्णोः परमं पदमव भाति भूरेः ॥

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥

ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोषवनिं पर्यूहामि ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह रायस्पोषं (२) दृꣳह परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमꣳ रायस्पोषो यजमानं मनुष्या अन्तरिक्षस्य त्वा सानाववगूहामि ॥ (उश्मसी, पोषम्, ऊनविꣳशतिश्च) ॥ ६ ॥

पशोरुपाकरणम् ॥ १३ पङ्क्तिः, १४ त्रिष्टुप् । सोमऋषिः ।

इषे त्वोपवीरस्युपो देवान् दैवीर्विशः प्रागुर्वह्नीरुशिजो बृहस्पते धारया वसूनि हव्या ते स्वदन्तां देव त्वष्टर्वसु रण्व रेवती रमध्वमग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि पुरूरवा घृतेनाक्ते वृषणं दधाथां गायत्रं छन्दोऽनु प्र जायस्व त्रैष्टुभं - जागतं छन्दोऽनु प्र जायस्व

(७.११ छन्दो...यस्व ।)

भवतं (१) नः समनसौ समोकसावरेपसौ ।

मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥

अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ।

स्वाहाकृत्य ब्रह्मणा ते जुहोमि मा देवानां मिथुया कर्म भागधेयम् ॥

(भवतमेकत्रिꣳशच्च) ॥ ७ ॥

उपाकृतस्य पशोर्नियमनम् । १२ त्रिष्टुप्, १६ अनुष्टुप् ॥ सोमऋषिः ।

आ ददे ऋतस्य त्वा देवहविः पाशेनाऽऽरभे धर्षा मानुषानद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यपां पेरुरसि स्वात्तं चित्सदेवꣳ हव्यमापो देवीः स्वदतैनꣳ सं ते प्राणो वायुना गच्छताꣳ सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा घृतेनाक्तौ पशुं त्रायेथाꣳ रेवतीर्यज्ञपतिं प्रियधाऽऽ विशतोरो अन्तरिक्ष सजूर्देवेन (१) वातेनाऽस्य हविषस्त्मना यज सम्स्य तनुवा भव वर्षो वर्षीयसि यज्ञे यज्ञपतिं धाः पृथिव्याः सम्पृचः पाहि नमस्त आतानाऽनर्वा प्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणाऽऽपो देवीः शुद्धायुवः शुद्धा यूयं देवाꣳ ऊढ्वꣳ शुद्धा वयं परिविष्टाः परिवेष्टारो वो भूयास्म ॥ (देवेन, पञ्चचत्वारिꣳशच्च) ॥ ८ ॥

महाविनष्ट पशोरङ्गोच्छेदनम् ॥ सोमऋषिः ।

वाक्त आ प्यायतां प्राणस्त आ प्यायतां चक्षुस्त आ प्यायताꣳ श्रोत्रं त आ प्यायतां या ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत्ते क्रूरं यदास्थितं तत्त आ प्यायतां तत्त एतेन शुन्धतां नाभिस्त आ प्यायतां पायुस्त आ प्यायताꣳ शुद्धाश्चरित्राः शमद्भ्यः (१) शमोषधीभ्यः शं पृथिव्यै शमहोभ्यामोषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसी रक्षसां भागोऽसीदमहꣳ रक्षोऽधमं तमो नयामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमेनमधमं तमो नयामीषे त्वा घृतेन द्यावापृथिवी प्रोर्ण्वाथामच्छिन्नो रायः सुवीर उर्वन्तरिक्षमन्विहि वायो वीहि (२) स्तोकानाꣳ स्वाहोर्ध्वनभसं मारुतं गच्छतम् ॥ (शमद्भ्यो, वीहि, पञ्च च) ॥ ९ ॥

वपाहोमः ॥ सोमऋषिः ।

सं ते मनसा मनः सं प्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत्स्वाहैन्द्रः प्राणो अङ्गेअङ्गे नि देध्यदैन्द्रोऽपानो अङ्गेअङ्गे वि बोभुवद्देव त्वष्टर्भूरि ते सꣳसमेतु विषुरूपा यत्सलक्ष्माणो भवथ देवत्रा यन्तमवसे सखायोऽनु त्वा माता पितरो मदन्तु श्रीरस्यग्निस्त्वा श्रीणात्वापः समरिणन्वातस्य (१) त्वा ध्राज्यै पूष्णो रꣳह्या अपामोषधीनाꣳ रोहिष्यै घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा त्वाऽन्तरिक्षाय दिशः प्रदिश आदिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः ॥ (वातस्य, सप्तत्रिꣳशच्च) ॥ १० ॥

गुदकाण्डहोमः ॥ सोमऋषिः

समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा सोमं गच्छ स्वाहा यज्ञं गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा नभो दिव्यं गच्छ स्वाहाऽग्निं वैश्वानरं गच्छ स्वाहाऽद्भ्यस्त्वौषधीभ्यो मनो मे हार्दि यच्छ तनूं त्वचं पुत्रं नप्तारमशीय शुगसि (१) तमभि शोच योऽस्मान्द्वेष्टि यं च वयं द्विष्मो धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ (शुगसि षड्विꣳशतिश्च) ॥ ११ ॥

वसतीवरीग्रहणकालामन्त्रणमुपाहरणम् ॥ अनुष्टुप् । सोमऋषिः

हविष्मतीरिमा आपो हविष्मान्देवो अध्वरो

हविष्माꣳ आ विवासति हविष्माꣳ अस्तु सूर्यः ॥

अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेन्द्राग्नियोर्भागधेयीः स्थ मित्रावरुणयोर्भागधेयीः स्थ विश्वेषां देवानां भागधेयीः स्थ यज्ञे जागृत ॥ (हविष्मतीश्चतुर्विꣳशत्) ॥ १२ ॥

सोमस्य शकटादुपावरोहः ॥ ३ त्रिष्टुप्, ७ गायत्री । सोमऋषिः ।

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्ध्वमिममध्वरं कृधि दिवि देवेषु होत्रा यच्छ सोम राजन्नेह्यव रोह मा भेर्मा सं विक्था मा त्वा हिꣳसिषं प्रजास्त्वमुपावरोह प्रजास्त्वामुपावरोहन्तु

शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।

शृणोत ग्रावाणो विदुषो नु (१) यज्ञꣳ शृणोतु देवः सविता हवं मे ।

देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं देवेभ्यो देवत्रा धत्त शुक्रꣳ शुक्रपेभ्यो येषां भागः स्थ स्वाहा कार्षिरस्यपापां मृध्रꣳ समुद्रस्य वोक्षित्या उन्नये ।

यमग्ने पृत्सु मर्त्यमावा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥

(नु सप्तचत्वारिꣳशच्च) ॥ १३ ॥

काम्ययाज्यानुवाक्याः ॥ १-३, ८, १०, १२, १७, १६-१८, २२ त्रिष्टुप्, ७, ९, १३, १५, २१, २३-२८ गायत्री; ११, १९, २० अनुष्टुप् । विश्वेदेवा ऋषयः ।

त्वमग्ने रुद्रो असुरो महो दिवस्त्वꣳ शर्धो मारुतं पृक्ष ईशिषे ।

त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना ॥

आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः ।

अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥

अग्निर्होता नि षसादा यजीयानुपस्थे मातुः सुरभावु लोके ।
युवा कविः पुरुनिष्ठ (१) ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥
साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् ।
स आयुरागात् सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥
त्वे वसूनि पुर्वणीक (२) होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सꣳसौभगानि दधिरे पावके ॥
तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥
अश्याम तं काममग्ने तवोत्यश्याम रयिꣳरयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते ॥
श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तमा भर । (३) वसो पुरुस्पृहꣳरयिम् ॥
स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥
आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः ।
पुनस्ते प्राण आयति परा यक्ष्मꣳसुवामि ते ॥
आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि (४) रक्षतादिमम् ।
तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ॥
दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥
शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे । त्वं घृतेभिराहुतः ॥
दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभि (५) र्यदेनं द्यौरजनयत् सुरेताः ॥
आ यदिषे नृपतिं तेज आनट् छुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानꣳस्वाधियं जनयत् सूदयच्च ॥
स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥

३ (तै. सं.)

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम् ।
विश्वा य (६) श्चर्षणीरभ्यासा वाजेषु सासहत् ॥
तमग्ने पृतनासहꣳ रयिꣳ सहस्व आ भर ।
त्वꣳहि सत्यो अद्भुतो दाता वाजस्य गोमतः ॥
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥
वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ॥
अग्न आयूꣳषि (७) पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत् पोषꣳरयिं मयि ॥
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥
स नः पावक दीदिवोऽग्ने देवाꣳ इहा वह । उप यज्ञꣳहविश्च नः ॥
अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः (८) कविः । शुचीरोचत आहुतः ॥
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतीꣳष्यर्चयः ॥

(पुरुनिष्ठः, पुर्वणीक, भरा,ऽभि वयोभि,-र्य, आयूꣳषि, विप्रः शुचि,-श्चतुर्दश च) ॥ १४ ॥

[देवस्य ११८ । रक्षोहणो १०२ । विभू- ५८ । - स्व १३१ । - मतिं ६० । पृथिव्या ११६ । इष २१ । आददे ९४ । वाक् १०५ । सꣳ७८ । संमुद्रꣳ७६ । हविष्मती- ३४ । - हृदे ९७ । त्वं ४१४ । चतुर्दश ॥ १५६७ ॥

[इति प्रथमकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥]

सुत्यादिने कर्तव्या ग्रहाः ।

[अथ चतुर्थः प्रपाठकः ॥ ४ ॥]

सोमाभिषवः ॥ सोमऋषिः ।

आ ददे ग्रावास्यध्वरकृद् देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पविनेन्द्राय सोमꣳ सुषुत
मधुमन्तं पयस्वन्तं वृष्टिवनिमि न्द्राय त्वा वृत्रघ्न इन्द्राय त्वा वृत्रतुर इन्द्राय त्वाऽभिमातिघ्न
इन्द्राय त्वा ऽऽदित्यवत इन्द्राय त्वा विश्वदेव्यावते श्वात्राः स्थ वृत्रतुरो राधोगूर्ता अमृतस्य
पत्नीस्ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकꣳ (१) सोमः पिबतु यत्ते
सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यजमानायोरु राया कृध्यधि दात्रे वोचो
धिषणे वीडू सती वीडयेथामूर्जं दधाथामूर्जं मे धत्तं मा वाꣳ हिꣳसिषं मा मा हिꣳसिष्टं प्राग-
पागुदगधराक्तास्त्वा दिश आ धावन्त्व म्ब नि ष्वर । यत्ते (२) सोमादाभ्यं नाम जागृवि तस्मै
ते सोम सोमाय स्वाहा ॥ (युष्माक, ते, नव च) ॥ १ ॥

उपांशुग्रहः ॥ सोमऋषिः ।

वाचस्पतये पवस्व वाजिन् वृषा वृष्णो अꣳशुभ्यां गभस्तिपूतो देवो देवानां पवित्रमसि येषां
भागोऽसि तेभ्यस्त्वा स्वाङ्कृतोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थि-
वेभ्यो मनस्त्वाष्टु र्वन्तरिक्षमन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य
एष ते योनिः प्राणाय त्वा (वाचः सप्तचत्वारिꣳशत्) ॥ २ ॥

अन्तर्यामग्रहः ॥ सोमऋषिः ।

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोममुरुष्य रायः समिषो यजस्वान्तस्ते दधामि द्यावा-
पृथिवी अन्तरुर्वन्तरिक्षꣳसजोषा देवैरवरैः परैश्चान्तर्यामे मघवन् मादयस्व स्वाङ्कृतोऽसि मधु-
मतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु र्वन्तरिक्षमन्विहि
स्वाहा त्वा सुभवः सूर्याय देवेभ्य (१) स्त्वा मरीचिपेभ्य एष ते योनिरपानाय त्वा ॥ (देवेभ्यः,
सप्त च) ॥ ३ ॥

ऐन्द्रवायवग्रहः ॥ १ त्रिष्टुप्, २ गायत्री । सोमऋषिः ।

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ उप प्रयोभिरा गतमिन्दवो वामुशन्ति हि ॥
उपयामगृहीतोऽसि वायवे त्वे न्द्रवायू इमे सुताः । उप प्रयोभिरा गतमिन्दवो वामुशन्ति हि ॥
उपयामगृहीतोऽसीन्द्रवायुभ्यां त्वैष ते योनिः सजोषाभ्यां त्वा ॥ (आ त्रिचत्वारिꣳशत्) ॥ ४ ॥

मैत्रावरुणग्रहः ॥ गायत्री । सोमऋषिः ।

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् ।
उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वैष ते योनिर्ऋतायुभ्यां त्वा ॥ (अयं विꣳशतिः) ॥ ५ ॥

आश्विनग्रहः ॥ गायत्री । सोमऋषिः ।

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा (याऽष्टादश १८) ॥ ६ ॥

प्रातर्युजौ वि मुच्येथामश्विनावेह गच्छतम् । अस्य सोमस्य पीतये ॥
उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिरश्विभ्यां त्वा ॥ (प्रातर्युजावेकान्नविꣳशतिः) ॥ ७ ॥

शुक्रग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपाꣳ सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥
उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहि ॥ (अयं पञ्चविꣳशतिः) ॥ ८ ॥

मन्थिग्रहः ॥ जगती । सोमऋषिः ।

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ सुवर्विदं प्रतीचीनं वृजनं दोहसे
गिराऽऽशुं जयन्तमनु यासु वर्धसे ।
उपयामगृहीतोऽसि मर्काय त्वैष ते योनिः प्रजाः पाहि ॥ (तं षड्विꣳशतिः) ॥ ९ ॥

आग्रयणग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्था प्सुषदो महिनैकादश स्थ ते देवा
यज्ञमिमं जुषध्वमु पयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभिसवना
पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥
(ये त्रिचत्वारिꣳशत्) ॥ १० ॥

भ्रातृव्यवत आग्रयणग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

त्रिꣳशत्त्रयश्च गणिनो रुजन्तो दिवꣳ रुद्राः पृथिवीं च सचन्ते ।
एकादशासो अप्सुषदः सुतꣳ सोमं जुषन्ताꣳ सवनाय विश्वे ॥
उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभिसवना पाहि विष्णुस्त्वां
पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ (त्रिꣳशद् द्विचत्वारिꣳशत्) ॥ ११ ॥

उक्थ्यग्रहः ॥ सोमऋषिः ।

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत् त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे
त्वैष ते योनिरिन्द्राय त्वोक्थायुवे (उपयामगृहीतो द्वाविꣳशतिः) ॥ १२ ॥

ध्रुवग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम् ।
कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥
उपयामगृहीतोऽस्यग्नये त्वा वैश्वानराय ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षि-
त्तम एष ते योनिरग्नये त्वा वैश्वानराय ॥ (मूर्धानं पञ्चत्रिꣳशत्) ॥ १३ ॥

ऋतुग्रहाः ॥ सोमऋषिः ।

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चे षश्चो र्जश्च सहश्च सहस्यश्च तपश्च
तपस्यश्चो पयामगृहीतोऽसि सꣳसर्पोऽस्यꣳहस्पत्याय त्वा ॥ (मधुश्चिꣳशत्) ॥ १४ ॥

ऐन्द्राग्नग्रहः ॥ गायत्री । सोमऋषिः ।

इन्द्राग्नी आ गतꣳसुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥
उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥ (इन्द्राग्नी विꣳशतिः) ॥ १५ ॥

वैश्वदेवग्रहः ॥ गायत्री । सोमऋषिः ।

ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वाꣳसो दाशुषः सुतम् ॥
उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ (ओमासो विꣳशतिः) ॥ १६ ॥

पूर्वो मरुत्वतीयग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम ॥
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ (मरुत्वन्तं षड्विꣳशतिः) ॥ १७ ॥

द्वितीयमरुत्वतीयग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः ॥
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ (इन्द्रैकान्नत्रिꣳशत्) ॥ १८ ॥

तृतीयमरुत्वतीयग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

मरुत्वाꣳ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रदिवः सुतानाम् ॥
उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ (मरुत्वानेकान्नत्रिꣳशत्) ॥ १९ ॥

माहेन्द्रग्रहः ॥ गायत्री । सोमऋषिः ।

महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव । स्तोमैर्वत्सस्य वावृधे ॥
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ (महानेकान्नविꣳशतिः) ॥ २० ॥

माहेन्द्रग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

महाꣳ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्रियग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥
उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ (महान् षड्विꣳशतिः) ॥ २१ ॥

आदित्यग्रहः ॥ १-२ बृहती, ३ त्रिष्टुप् । सोमऋषिः ।

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥

उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ॥
कदा चन प्रयुच्छस्युभे नि पासि जन्मनी ।
तुरीयादित्य सवनं त इन्द्रियमातस्थावमृतं दिवि ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वो (१) र्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत् ॥
विवस्व आदित्यैष ते सोमपीथस्तेन मन्दस्व तेन तृप्य तृप्यास्म ते वयं तर्पयितारो या दिव्या वृष्टिस्तया त्वा श्रीणामि ॥ (वृः. सप्तविꣳशतिश्च) ॥ २२ ॥

सावित्रग्रहः ॥ त्रिष्टुप् । सोमऋषिः ।

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥
उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ (वामं चतुर्विꣳशतिः) ॥ २३ ॥

सावित्रग्रहः ॥ जगती । सोमऋषिः ।

अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥
उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ (अदब्धेभिस्त्रयोविꣳशतिः) ॥ २४ ॥

सावित्रग्रहः ॥ गायत्री । सोमऋषिः ।

हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥
उपयामगृहीतोऽसि देवाय त्वा सवित्रे ॥ (हिरण्यपाणिं चतुर्दश) ॥ २५ ॥

वैश्वदेवग्रहः ॥ सोमऋषिः ।

सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ (सुशर्मा द्वादश) ॥ २६ ॥

पात्नीवतग्रहः ॥ सोमऋषिः ।

बृहस्पतिसुतस्य त इन्द्रो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाम्यग्ना३इ पत्नीवा३ः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ॥ (बृहस्पतिसुतस्य पञ्चदश) ॥ २७ ॥

हारियोजनग्रहः ॥ सोमऋषिः ।

हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं ग्रहं गृह्णामि हरीः स्थ हर्योर्धानाः सहसोमा इन्द्राय स्वाहा
(हरिः षड्विꣳशतिः) ॥ २८ ॥

आग्नेयोऽतिग्रहः ॥ गायत्री । सोमऋषिः ।

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥
उपयामगृहीतोऽस्यग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा तेजस्वते ॥ (अग्ने त्रयोविꣳशतिः) ॥ २९ ॥

ऐन्द्रोऽतिग्रहः ॥ गायत्री । सोमऋषिः ।

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः । सोममिन्द्र चमू सुतम् ॥
उपयामगृहीतोऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते ॥ (उत्तिष्ठन्नेकविꣳशतिः) ॥ ३० ॥

सौर्योऽतिग्रहः ॥ गायत्री । सोमऋषिः ।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनम् ॥
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वते ॥
(तरणिर्विꣳशतिः) ॥ ३१ ॥

[illegible] ॥ गायत्री । सोमऋषिः ।

आ प्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः । भवा नः सप्रथस्तमः (आ भवं) ॥ ३२ ॥

[illegible] ॥ त्रिष्टुप् । सोमऋषिः ।

ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसं मर्त्यासः ।
अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान् ॥ (ईयुष्टेकान्नविꣳशतिः) ॥ ३३ ॥

[illegible] ॥ सोमऋषिः ।

ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादयामि ज्वलन्तीं त्वा सादयामि मल्मलाभवन्तीं त्वा सादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयामि (ज्योतिष्मतीꣳ षट्त्रिꣳशत्) ॥ ३४ ॥

स्रुवाहुतयः । विश्वेदेवा ऋषयः

प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा (प्रयासाय चतुर्विꣳशतिः) ॥ ३५ ॥

[illegible] । विश्वेदेवा ऋषयः ।

चित्तꣳ सन्तानेन भवं यक्ना रुद्रं तनिम्ना पशुपतिꣳ स्थूलहृदयेनाग्निꣳ हृदयेन

रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तःपार्श्वेनौषिष्ठहनꣳ शिङ्गीनिकोश्याभ्याम्
(चित्तमष्टादश) ॥ ३६ ॥

३७-४२ षोडशिग्रहः ॥ ३७-४० अनुष्टुप् । सोमऋषिः ।

आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी । अर्वाचीनꣳ सु ते मनो ग्रावा कृणोतु वग्नुना ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
(आ तिष्ठ षड्विꣳशतिः) ॥ ३७ (३१) ॥

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसमृषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
(इन्द्रं त्रयोविꣳशतिः) ॥ ३८ (३२) ॥

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियꣳ रजः सूर्यं न रश्मिभिः ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
(असावि सप्तविꣳशतिः) ॥ ३९ (३३) ॥

सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आऽधित ।
स्योनास्मै सुषदा भव यच्छास्मै शर्म सप्रथाः ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
(सर्वस्य षड्विꣳशतिः) ४० (३४) ॥

स्वराडनुष्टुप् ।

महाꣳ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ।
स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
(महान् षड्विꣳशतिः) ॥ ४१ (३५) ॥

त्रिष्टुप् ।

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् ।
जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥
उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने ॥
(सजोषा विꣳशत्) ॥ ४२ (३६) ॥

दक्षिणा ॥ १ गायत्री, २-३ त्रिष्टुप् । सोमऋषिः ।

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥
दिवं गच्छ सुवः पत रूपेण (१) वो रूपमभ्यैमि वयसा वयः ।
तुथो वो विश्ववेदा वि भजतु वर्षिष्ठे अधि नाके ॥
एतत् ते अग्ने राध ऐति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा यज्ञस्य पथा
सुविता नयन्तीर्ब्राह्मणमद्य राध्यासमृषिमार्षेयं पितृमन्तं पैतृमत्यꣳ सुधातुदक्षिणं वि सुवः पश्य
व्यन्तरिक्षं यतस्व सदस्यैः (२) रस्मद्दात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा विशतानवहायास्मान्
देवयानेन पथेत सुकृतां लोके सीदत तन्नः सꣳस्कृतम् ॥ (रूपेण सदस्यै-रष्टादश च) ॥ ४३ (२०) ॥

समिष्टयजूꣳषि ॥ १-६ त्रिष्टुप् । सोमऋषिः ।

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः ।
त्वष्टा विष्णुः प्रजया सꣳरराणो यजमानाय द्रविणं दधातु ॥
समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्मघवन्त्सꣳस्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाꣳ सुमत्या यज्ञियानाम् ॥
सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा नो अत्र वरिवः कृणोत्व (१) नु मार्ष्टु तनुवो यद्विलिष्टम् ॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगयाडृधगुताशमिष्ठाः प्रजानन् यज्ञमुपयाहि विद्वान् ॥
स्वगा वो देवाः सदनमकर्म य आजग्म सवनेदं जुषाणाः ।
जक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽस्मे धत्त वसवो वसूनि ॥
यानाऽवह उशतो देव देवान् तान् (२) प्रेरय स्वे अग्ने सधस्थे ।
वहमाना भरमाणा हवीꣳषि वसुं घर्मं दिवमा तिष्ठतानु ॥
यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहैष ते यज्ञो यज्ञपते सहसूक्तवाकः
सुवीरः स्वाहा देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञꣳ स्वाहा
वाचि स्वाहा वाते धाः ॥ (कृणोतु तान्-,द्विचत्वारिꣳशच्च) ॥ ४४ (२८) ॥
४ (तै. सं.)

अवभृथः ॥ १-४ त्रिष्टुप् । सोमऋषिः ।

उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥
शतं ते राजन् भिषजः सहस्रमुर्वी गम्भीरा सुमतिष्टे अस्तु ।
बाधस्व द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥
अभिष्ठितो वरुणस्य पाशोऽग्नेरनीकमप आ विवेश ।
अपांनपात् प्रतिरक्षन्नसुर्यं दमेदमे (१) समिधं यक्ष्यग्ने ॥
प्रति ते जिह्वा घृतमुच्चरण्येत् समुद्रे ते हृदयमप्स्वन्तः ।
सं त्वा विशन्त्वोषधीरुताऽऽपो यज्ञस्य त्वा यज्ञपते हविर्भिः ॥
सूक्तवाके नमोवाके विधेमावभृथ निचङ्कुण निचेरुरसि निचङ्कुणाव देवैर्देवकृतमेनोऽयाडव
मर्त्यैर्मर्त्यकृतमुरोरा नो देव रिषस्पाहि सुमित्रा न आप ओषधयः (२) सन्तु दुर्मित्रास्तस्मै
भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मो देवीराप एष वो गर्भस्तं वः सुप्रीतꣳ सुभृतमकर्म देवेषु
नः सुकृतो ब्रूतात् प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश एधोऽस्येधिषीमहि समिदसि
तेजोऽसि तेजो मयि धेह्यपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आ (३)
ऽगमं तं मा सꣳ सृज वर्चसा ॥ (दमेदम्, ओषधयः, आ, षट् च) ॥ ४५ (१९) ॥

काम्ययाज्यापुरोऽनुवाक्याः ॥ १-२, ४, ८, १० त्रिष्टुप्, ३, ५, ७, ९, ११-१२ गायत्री, ६ अनुष्टुप् ।

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि ।
जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् ॥
यस्मै त्वꣳ सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम् ।
अश्विनꣳ स पुत्रिणं वीरवन्तं गोमन्तꣳ रयिं नशते स्वस्ति ॥
त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः । न त्वामिन्द्राति रिच्यते ॥
उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानꣳ (१) सुतासः ।
यदीꣳ सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥
अग्ने रसेन तेजसा जातवेदो वि रोचसे । रक्षोहाऽमीवचातनः ॥
अपो अन्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आऽगमं तं मा सꣳसृज वर्चसा ॥
वसुर्वसुपतिर्हिकमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥
त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे (२) अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानाम् ।

त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ॥
अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयꣳ शत्रूञ्जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ ॥
अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥
त्वꣳ ह्यग्ने (३) अग्निना विप्रो विप्रेण सन्त्सता । सखा सख्या समिध्यसे ॥
उदग्ने शुचयस्तव ० वि ज्योतिषा ० ॥ (मघवानं, मन्दे, ह्यग्ने, चतुर्दश च) ॥ ४६ (४०) ॥
[आ १०९ । बाध ४७ । ऐन्द्रवायवमगृहीत ५७ । आ ४३ । ऽयं २० । वा १८ । प्रातर्युजा-१९ ।-युवं २५ । तं २६ । ये ४३ । विश्व-
४२ ।-दुपयामगृहीतो २२ । मूर्धानं ३५ । मधु-३० ।-रिन्द्राग्नी २० । ओमासो २० । मरुत्वन्त २६ ।-मिन्द्रं २९ । महान्
२९ । महान् १९ । महान् २६ । कदा ७७ । वाम- २४ ।- मर्दयन्ति- २३ ।-हिरण्यपाणिꣳ १४ । सुशर्मा १२ ।
बृहस्पति-१५ ।- हरि-२६ ।- राम २३ । अग्निश्चिन्- २१ ।- तरणि- २० । -राध्वांयस्वे-९ ।-यु -१९ । -ज्योतिष्मता ।
३६ । प्रयासाय २४ । चित्रा-१८ ।- मातिष्ठ- २६ ।- अग्र- २३ ।-मसावि २७ । - सवस्य २६ । महान् २६ । सजोषा
१० । उ- ११८ ।- दातो-१४८ ।- हं १५६ ।-यः १६४ । षट्चत्वारिꣳशत् ॥ १८१० ॥]
[इति प्रथमकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥]

पुनराधानम् ।

[अथ पञ्चमः प्रपाठकः ॥ ५ ॥] अग्निऋषिः ।

पुनराधानविधानम् ॥

देवासुराः संयत्ता आसन्, ते देवा विजयमुपयन्तोऽग्नौ वामं वसु सं न्यदधतेदमु नो भविष्यति यदि
नो जेष्यन्तीति, तदग्निर्न्यकामयत तेनापाक्रामत् तद्देवा विजित्यावरुरुत्समाना अन्वायन्, तदस्य सहसा-
ऽदित्सन्त, सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वं, यदश्र्वशीयत, त (१) द्रजतꣳ हिरण्यमभवत्, तस्माद्र-
जतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हि, यो बर्हिषि ददाति, पुराऽस्य संवत्सराद्गृहे रुदन्ति, तस्माद्बर्हिषि न
देयꣳ सोऽग्निरब्रवीद्भाग्यसान्यथ व इदमिति पुनराधेयं ते केवलमित्यब्रुवन्नृध्नवत् खलु स इत्यब्रवीद्यो
मद्देवत्यमग्निमादधाता इति तं पूषाऽऽधत्त तेन (२) पूषाऽऽर्ध्नोत् तस्मात् पौष्णाः पशव उच्यन्ते, तं मनुराऽधत्त, तेन मनुरार्ध्नोत्, तस्मा-
त् त्वाष्ट्राः पशव उच्यन्ते, तं त्वष्टाऽऽधत्त, तेन त्वष्टाऽऽर्ध्नोत् तस्मात् त्वाष्ट्राः पशव उच्यन्ते, तं धाताऽऽधत्त तेन धाताऽऽर्ध्नोत् संवत्सरो वै धाता, तस्मात् संवत्सरं प्रजाः
न्मानव्यः प्रजा उच्यन्ते, तं धाताऽऽधत्त तेन धाताऽऽर्ध्नोत् संवत्सरो वै धाता, तस्मात् संवत्सरं प्रजाः
पशवोऽनु प्र जायन्ते य एवं पुनराधेयस्यर्धिं वेद (३) र्ध्नोत्येव योऽस्यैवं बन्धुतां वेद, बन्धुमान्
भवति भागधेयं वा अग्निराहित इच्छमानः प्रजां पशून् यजमानस्योप दोद्राव्योद्वास्य पुनरा दधीत,
भागधेयेनैवैनꣳ समर्धयत्यथो शान्तिरेवास्यैषा पुनर्वस्वोरा दधीतैतद्वै पुनराधेयस्य नक्षत्रं यत्पुनर्वसू
स्वायामेवैनं देवतायामाधाय, ब्रह्मवर्चसी भवति दर्भै (४) रा दधात्ययातयामत्वाय दर्भैरादधात्यद्भ्य
एवैनमोषधीभ्योऽवरुध्याऽऽधत्ते पञ्चकपालः पुरोडाशो भवति पञ्च वा ऋतवः ऋतुभ्य एवैनमवरुध्या-
ऽऽधत्ते ॥ (अर्धयत तत्, तेन, वेद, दर्भैः, पञ्चविꣳशतिश्च) ॥ १ ॥

* ४६।१२ (तै. स. १।३।१४।२८); × ४६।१४ (१।२।१४।१०)

याज्यानुवाक्यादिविधानम् ॥ अग्निऋषिः ।

परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयते, पञ्चकपालः पुरोडाशो भवति पाङ्क्तो यज्ञः पाङ्क्ताः
पशवो यज्ञमेव पशूनव रुन्धे वीरहा वा एष देवानां योऽग्निमुद्वासयते, न वा एतस्य ब्राह्मणा ऋतायवः
पुराऽन्नमक्षन्, पङ्क्त्यो याज्यानुवाक्या भवन्ति पाङ्क्तो यज्ञः पाङ्क्तः पुरुषो, देवानेव वीरं निरवदायाग्निं
पुनरा (१) धत्ते शताक्षरा भवन्ति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति यद्वा
अग्निराहितो नर्ध्यते ज्यायो भागधेयं निकामयमानो यदाग्नेयꣳ सर्वं भवति सैवास्यर्द्धिः सं वा एतस्य
गृहे वाक् सृज्यते योऽग्निमुद्वासयते स वाचꣳ सꣳसृष्टां यजमान ईश्वरोऽनु परा भवितोर्विभक्तयो भवन्ति
वाचो विधृत्यै यजमानस्यापराभावाय (२) विभक्तिं करोति ब्रह्मैव तदकः पाꣳसु यजति यथा वामं
वसु विविदानो गूहति तादृगेव तदग्निं प्रति स्विष्टकृतं निराह यथा वामं वसु विविदानः प्रकाशं जिग-
मिषति तादृगेव तद्विभक्तिमुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो वै पुरोडाशः पशवं
एते आहुती यदभितः पुरोडाशमेते आहुती (३) जुहोति यजमानमेवोभयतः पशुभिः परि गृह्णाति
कृतयजुः संभृतसम्भार इत्याहुर्न सम्भृत्याः सम्भारा न यजुः कर्तव्यमित्यथो खलु सम्भृत्या एव
सम्भाराः कर्तव्यं यजुर्यज्ञस्य समृद्ध्यै पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः पुनरुत्सृष्टोऽनड्वान्
पुनराधेयस्य समृद्ध्यै सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं जुहोति यत्रयत्रैवास्य न्यक्तं तत (४)
एवैनमव रुन्धे वीरहा वा एष देवानां योऽग्निमुद्वासयते तस्य वरुण एवर्णयादाग्निवारुणमेका-
दशकपालमनु निर्वपेद्यं चैव हन्ति यश्चास्यर्णयात्तौ भागधेयेन प्रीणाति नाऽऽर्तिमार्च्छति यजमानः ॥
(आ,-ऽपराभावाय, -ऽऽहुती, ततः, षट्त्रिꣳशच्च) ॥ २ ॥

पुनराधानमन्त्राः ॥ १ उपरिष्टाद्बृहती, २-४, ९-१० गायत्री, ५-६ अनुष्टुप्, ७-८ त्रिष्टुप् । अग्निऋषिः ।

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा ।
उपस्थे ते देव्यदितेऽग्निमन्नादमन्नाद्यायाऽऽदधे ॥
आऽयं गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥
त्रिꣳशद्धाम वि राजति वाक् पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः ॥
अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिषः सुवः ॥
यत् त्वा (१) क्रुद्धः परोवप मन्युना यदवर्त्या ।
सुकल्पमग्ने तत् तव पुनस्त्वोद्दीपयामसि ॥
यत् ते मन्युपरोप्तस्य पृथिवीमनु दध्वसे । आदित्या विश्वे तद् देवा वसवश्च समाभरन् ॥
मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ।
बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्ताम् ॥
सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त (२) र्षयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥

पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥
सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि ॥
लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः सकेतः सुकेतस्ते न (२) आदित्या आज्यं जुषाणा वियन्तु विवस्वाꣳ अदितिर्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु ॥ (सह, सप्त, च- अर्ध दश च) ॥ ३ ॥

पूर्वोक्तमन्त्राणां व्याख्यानम् । अग्निर्ऋषिः ।

भूमिर्भूम्ना द्यौर्वरिणेत्याहाऽऽशिषैवैनमा धत्ते सर्पा वै जीर्यन्तोऽमन्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत् ततो वै ते जीर्णास्तनूरपाघ्नत सर्पराज्ञिया ऋग्भिर्गार्हपत्यमा दधाति पुनर्नवमेवैनमजरं कृत्वाऽऽधत्तेऽथो पूतमेव पृथिवीमन्नाद्यं नोपानमत् (१) स एतं मन्त्रमपश्यत् ततो वै तामन्नाद्यमुपानमत् यत्सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्यावरुध्या अथो अस्यामेवैनं प्रतिष्ठितमा धत्ते यत्त्वा क्रुद्धः परोवपेत्याहापह्नुत एवास्मै तत् पुनस्त्वोद्दीपयामसीत्याह समिन्ध एवैनं यत्ते मन्युपरोप्तस्येत्याह देवताभिरेवै (२) नꣳ सं भरति वि वा एतस्य यज्ञश्छिद्यते योऽग्निमुद्वासयते बृहस्पतिवत्यर्चोप तिष्ठते ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञꣳ सं दधाति विच्छिन्नं यज्ञꣳ समिमं दधात्वित्याह सन्तत्यै विश्वे देवा इह मादयन्तामित्याह सन्तत्यैव यज्ञं देवेभ्योऽनु दिशति सप्त ते अग्ने समिधः सप्त जिह्वा (३) इत्याह सप्तसप्त वै सप्तधाऽग्नेः प्रियास्तनुवस्ता एवाव रुन्धे पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परि गृह्णात्यादित्या वा अस्माल्लोकादमुं लोकमायन्तेऽमुष्मिं-ल्लोके व्यतृष्यन्त इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान् (४) होमानजुहवुस्त आर्ध्नुवन् ते सुवर्गं लोकमायन् यः परांचीनं पुनराधेयादग्निमादधीत स एतान् होमाञ्जुहुयाद्यामेवाऽऽदित्या ऋद्धिमार्ध्नुवन् तामेवर्ध्नोति ॥ (एन-, मेव, जिह्वा, एतान्, पञ्चत्रिꣳशच्च) ॥ ४ ॥

गार्हपत्योपस्थानम् । १-३, ७-१२ गायत्री, ४ जगती, ५ त्रिष्टुप्, ६ अनुष्टुप् । अग्निर्ऋषिः ।

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥
अस्य प्रत्नामनु द्युतꣳ शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ॥
अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥
उभा वामिन्द्राग्नी आहुवध्या (१) उभा राधसः सह मादयध्यै ।
उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आ रोहाथा नो वर्धया रयिम् ॥

अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत्पोषꣳ रयिं (२) मयि ॥
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥
स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽवह । उप यज्ञꣳ हविश्च नः ॥
अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतीꣳष्यर्चयः ॥
आयुर्दा अग्नेऽस्यायुर्मे (३) देहि वर्चोदा अग्नेऽसि वर्चो मे देहि तनूपा अग्नेऽसि तनुवं मे पाह्यग्ने यन्मे तनुवा ऊनं तन्म आ पृण चित्रावसो स्वस्ति ते पारमशीयेन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यशस्कृतꣳ सुवीरासो अदाभ्यम् । अग्ने सपत्नदम्भनं वर्षिष्ठे अधि नाके ॥
सं त्वमग्ने सूर्यस्य वर्चसा (४) ऽगथाः समृषीणाꣳ स्तुतेन सं प्रियेण धाम्ना ।
त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृज ॥
(आहुवध्यै, रयिं, मे, वर्चसा, सप्तदश च) ॥ ५ ॥

गार्हपत्यस्य पुनराधानोत्तरकालीनोपस्थानम् । १, ५-७, १२-१३ गायत्री, ९-१० द्विपदा विराट्, १४ बृहती, १५ अनुष्टुप् । अग्निर्ऋषिः ।

सं पश्यामि प्रजा अहमिडप्रजसो मानवीः । सर्वा भवन्तु नो गृहे ॥
अम्भः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीय सहः स्थ सहो वो भक्षीयोर्जः स्थोर्जं वो भक्षीय रेवती रमध्वमस्मिँल्लोकेऽस्मिन् गोष्ठेऽस्मिन् क्षयेऽस्मिन् योनाविहैव स्तेतो माऽप गात बह्वीर्मे भूयास्त (१) सꣳहितासि विश्वरूपीरा मोर्जा विशाऽऽ गौपत्येनाऽऽ रायस्पोषेण सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्ताम् ॥
उप त्वाऽग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥
राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानꣳ स्वे दमे ॥
स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥
अग्ने (२) त्वं नो अन्तमः । उत त्राता शिवो भव वरूथ्यः ॥
तं त्वा शोचिष्ठ दीदिवः । सुम्नाय नूनमीमहे सखिभ्यः ॥
वसुरग्निर्वसुश्रवाः । अच्छा नक्षि द्युमत्तमो रयिं दाः ॥
ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडाः स्थ मधुकृतः स्योना माऽऽ विशतेरा मदः । सहस्रपोषं वः पुष्यासं (३) मयि वो रायः श्रयन्ताम् ॥
तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजम् ॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥
परि त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि ।
धृषद्वर्णं (४) दिवेदिवे भेत्तारं भङ्गुरावतः ॥
अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीं तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीम् ॥
(भूयास्त, स्वस्तयेऽग्ने, पुष्यासं, धृषद्वर्ण-, मेकान्नत्रिꣳशच्च) ॥ ६ ॥

पूर्वानुवाकोक्तमन्त्राणां व्याख्यानम् ।

अयज्ञो वा एष योऽसामोपप्रयन्तो अध्वरमित्याह स्तोममेवास्मै युनक्त्युपेत्याह प्रजा वै पशव उपेमं लोकं प्रजामेव पशूनिमं लोकमुपैत्यस्य प्रत्नामनु द्युतमित्याह सुवर्गो वै लोकः प्रत्नः सुवर्गमेव लोकꣳ समारोहत्यग्निर्मूर्धा दिवः ककुदित्याह मूर्धानमे (१) वैनꣳ समानानां करोत्यथो देवलोकादेव मनुष्यलोके प्रति तिष्ठत्ययमिह प्रथमो धायि धातृभिरित्याह मुख्यमेवैनं करोत्युभा वामिन्द्राग्नी आहुवध्या इत्याहौजो बलमेवाव रुन्धेऽयं ते योनिर्ऋत्विय इत्याह पशवो वै रयिः पशूनेवाव रुन्धे षड्भिरुप तिष्ठते षड्वा (२) ऋतव ऋतुष्वेव प्रति तिष्ठति षड्भिरुत्तराभिरुप तिष्ठते द्वादश सं पद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति यथा वै पुरुषोऽश्वो गौर्जीर्यत्येवमग्निराहितो जीर्यति संवत्सरस्य परस्तादाग्निपावमानीभिरुप तिष्ठते पुनर्नवमेवैनमजरं करोत्यथो पुनात्येवोप तिष्ठते योग एवास्यैष उप तिष्ठते (३) दम एवास्यैष उप तिष्ठते याच्ञैवास्यैषोप तिष्ठते यथा पापीयाञ्छ्रेयस आहृत्य नमस्यति तादृगेव तदायुर्दा अग्नेऽस्यायुर्मे देहीत्याहाऽऽयुर्दा ह्येष वर्चोदा अग्नेऽसि वर्चो मे देहीत्याह वर्चोदा ह्येष तनूपा अग्नेऽसि तनुवं मे पाहीत्याह (४) तनूपा ह्येषोऽग्ने यन्मे तनुवा ऊनं तन्म आ पृणेत्याह यन्मे प्रजायै पशूनामूनं तन्म आ पूरयेति वावैतदाह चित्रावसो स्वस्ति ते पारमशीयेत्याह रात्रिर्वै चित्रावसुरव्युष्ट्यै वा एतस्यै पुरा ब्राह्मणा अभैषुर्व्युष्टिमेवाव रुन्ध इन्धानास्त्वा शतꣳ (५) हिमा इत्याह शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्येषा वै सूर्मी कर्णकावत्येतया ह स्म वै देवा असुराणाꣳ शततर्हाꣳस्तृꣳहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रातृव्याय प्र हरति स्तृत्या अच्छम्बट्कारꣳ सं त्वमग्ने सूर्यस्य वर्चसाऽगथा इत्याहैतत्त्वमसीदमहं (६) भूयासमिति वावैतदाह त्वमग्ने सूर्यवर्चा असीत्याहाऽऽशिषमेवैतामा शास्ते ॥ (मूर्धानं, वै, तिष्ठत, आह, शत-, मह, चैकादश च) ॥ ७ ॥

षष्ठानुवाकोक्तमन्त्राणां व्याख्यानम् । अग्निर्ऋषिः ।

सं पश्यामि प्रजा अहमित्याह यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धेऽम्भः स्थाम्भो वो भक्षीये-त्याहाम्भो ह्येता महः स्थ महो वो भक्षीयेत्याह महो ह्येताः सहः स्थ सहो वो भक्षीयेत्याह सहो ह्येता

ऊर्जः स्थोर्जं वो भक्षीयेत्या (१) होर्जो ह्येता रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवाऽऽत्मन् रमयत इहैव स्तेतो माऽप गातेत्याह ध्रुवा एवैना अनपगाः कुरुत इष्टकचिद्वा अन्योऽग्निः पशुचिदन्यः सꣳहितासि विश्वरूपीरिति वत्समभि मृशत्युपैवैनं धत्ते पशुचितमेनं कुरुते प्र (२) वा एषोऽस्माल्लोकाच्च्यवते य आहवनीयमुप तिष्ठते गार्हपत्यमुप तिष्ठतेऽस्मिन्नेव लोके प्रति तिष्ठत्यथो गार्हपत्यायैव नि ह्नुते गायत्रीभिरुप तिष्ठते तेजो वै गायत्री तेज एवाऽऽत्मन् धत्तेऽथो यदेतं तृचमन्वाह सन्तत्यै गार्हपत्यं वा अनु द्विपादो वीराः प्रजायन्ते य एवं विद्वान् द्विपदाभिर्गार्हपत्यमुप तिष्ठत (३) आऽस्य वीरो जायत ऊर्जा वः पश्याम्यूर्जा मा पश्यतेत्याहाऽऽशिषमेवैतामा शास्ते तत्सवितुर्वरेण्यमित्याह प्रसूत्यै सोमानꣳ स्वरणमित्याह सोमपीथमेवाव रुन्धे कृणुहि ब्रह्मणस्पत इत्याह ब्रह्मवर्चसमेवाव रुन्धे कदा चन स्तरीरसीत्याह न स्तरीꣳ रात्रिं वसति (४) य एवं विद्वानग्निमुप तिष्ठते परि त्वाऽग्ने पुरं वयमित्याह परिधिमेवैतं परि दधात्यस्कन्दायाग्ने गृहपत इत्याह यथायजुरेवैतच्छतꣳ हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति तामाशिषमा शासे तन्तवे ज्योतिष्मती (५) मिति ब्रूयाद्यस्य पुत्रोऽजातः स्यात्तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो जातः स्यात् तेज एवास्मिन् ब्रह्मवर्चसं दधाति ॥
(ऊर्जो वो भक्षीयेति, प्र, गार्हपत्यमुप तिष्ठते, वसति, ज्योतिष्मती, मेकान्नत्रिꣳशच्च) ॥ ८ ॥

पूर्वोक्तोपस्थानस्याग्निहोत्राङ्गता । अग्निर्ऋषिः ।

अग्निहोत्रं जुहोति यदेव किं च यजमानस्य स्वं तस्यैव तद्रेतः सिञ्चति प्रजनने प्रजननꣳ हि वा अग्निरथौषधीरन्तगता दहति तास्ततो भूयसीः प्रजायन्ते यत्सायं जुहोति रेत एव तत्सिञ्चति प्रैव प्रातस्तनेन जनयति तद्रेतः सिक्तं न त्वष्ट्राऽविकृतं प्रजायते यावच्छो वै रेतसः सिक्तस्य (१) त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायत एष वै दैव्यस्त्वष्टा यो यजते बह्वीभिरुप तिष्ठते रेतस एव सिक्तस्य बहुशो रूपाणि वि करोति स प्रैव जायते श्वःश्वो भूयान् भवति य एवं विद्वानग्निमुप तिष्ठते ऽहर्देवानामासीद्रात्रिरसुराणां तेऽसुरा यद्देवानां वित्तं वेद्यमासीत्तेन सह (२) रात्रिं प्राविशन् ते देवा हीना अमन्यन्त तेऽपश्यन्नाग्नेयी रात्रिराग्नेयाः पशव इममेवाग्निꣳ स्तवाम स नः स्तुतः पशून् पुनर्दास्यतीति तेऽग्निमस्तुवन्त्स एभ्यः स्तुतो रात्रिया अध्यहरभि पशून्निरार्जत् ते देवाः पशून् वित्त्वा कामाꣳ अकुर्वत य एवं विद्वानग्निमुप तिष्ठते पशुमान् भवत्या (३) दित्यो वा अस्माल्लोकादमुं लोकमैत् सोऽमुं लोकं गत्वा पुनरिमं लोकमभ्यध्यायत् स इमं लोकमागत्य मृत्योरबिभेन्मृत्युसंयुत इव ह्ययं लोकः सोऽमन्यतेममेवाग्निꣳ स्तवानि स मा स्तुतः सुवर्गं लोकं गमयिष्यतीति सोऽग्निमस्तौत् स एनꣳ स्तुतः सुवर्गं लोकमगमयद् (४) य एवं विद्वानग्निमुप तिष्ठते सुवर्गमेव लोकमेति सर्वमायुरेत्यभि वा एषोऽग्नी आ रोहति य एनावुप तिष्ठते यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति नक्तमुप तिष्ठते न प्रातः सꣳ हि नक्तं व्रतानि सृज्यन्ते सह श्रेयाꣳश्च पापीयाꣳश्चाऽऽसाते ज्योतिर्वा अग्निस्तमो रात्रिर्य (५) न्नक्तमुप तिष्ठते ज्योतिषैव तमस्तरत्युपस्थेयोऽग्नी३र्नोपस्थेया३ इत्याहुर्मनुष्यायेन्न्वै योऽहरहराहृत्याथैनं याचति स

इन्द्वे तमुपाचच्छ्य को देवानहरहर्याचिष्यतीति तस्मान्नोपस्थेयो ऽथो खल्वाहुराशिषे वै कं यजमानो यजत इत्येषा खलु वा (६) आहिताग्नेराशीर्यदग्निमुप तिष्ठते तस्मादुपस्थेयः प्रजापतिः पशूनसृजत ते सृष्टा अहोरात्रे प्राविशन् ताञ्छन्दोभिरन्वविन्दद्यच्छन्दोभिरुप तिष्ठते स्वमेव तदन्विच्छति न तत्र जाम्यस्तीत्याहुर्योऽहरहरुप तिष्ठत इति यो वा अग्निं प्रत्यङ्ङुप तिष्ठते प्रत्येनमोषति यः पराङ् विष्वङ् प्रजया पशुभि (७) रेति कवातिर्यङ्ङिवोपतिष्ठेत नैनं प्रत्योषति न विष्वङ् प्रजया पशुभिरेति (सिकत्यं, सह, भवति, यो, व,-खलु वै, पशुभि-; रष्टादश च) ॥ ९ ॥

प्रवत्स्यतो यजमानस्याग्नेरुपस्थानमन्त्राः, आचमनम्, कपालानुमन्त्रणादि च । १, २, ६, ९ त्रिष्टुप्; ३ विपरीता बृहती, ४ शङ्कुमत्यनुष्टुप्; ५, ७, ११ अनुष्टुप्; १२ विराट्स्थाना; ८ द्विपदा । प्रजापतिर्ऋषिः ।)

मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे ।
त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम बिभराण्यग्ने ॥
मम नाम तव च जातवेदो वाससी इव विवसानौ ये चरावः ।
आयुषे त्वं जीवसे वयं यथायथं वि परि दधावहै पुनस्ते ॥
नमोऽग्नयेऽप्रतिविद्धाय नमोऽनाधृष्टाय नमः सम्राजे ।
अषाढो (१) ऽग्निर्बृहद्वया विश्वजित्सहन्त्यः श्रेष्ठो गन्धर्वः ॥
त्वत्पितारो अग्ने देवास्त्वामाहुतयस्त्वद्विवाचनाः ।
सं मामायुषा सं गौपत्येन सुहिते मा धाः ॥
अयमग्निः श्रेष्ठतमोऽयं भगवत्तमोऽयꣳ सहस्रसातमः । अस्मा अस्तु सुवीर्यम् ॥
मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ।
या इष्टा उषसो निम्रुचश्च ताः सं दधामि हविषा घृतेन ॥
पयस्वतीरोषधयः (२) पयस्वद्वीरुधां पयः । अपां पयसो यत्पयस्तेन मामिन्द्र सꣳसृज ॥
अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ॥
अग्निꣳ होतारमिह तꣳ हुवे देवान् यज्ञियानिह यान् हवामहे ॥
आ यन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य ॥
कस्त्वा युनक्ति स त्वा युनक्तु यानि घर्मे कपालान्युपचिन्वन्ति (३) वेधसः ।
पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चताम् ॥
अभिन्नो घर्मो जीरदानुर्यत आत्तस्तदगन् पुनः ।
इध्मो वेदिः परिधयश्च सर्वे यज्ञस्याऽऽयुरनु सं चरन्ति ॥
त्रयस्त्रिꣳशत्तन्तवो ये वितत्निरे य इमं यज्ञꣳ स्वधया ददन्ते तेषां छिन्नं प्रत्येतद्दधामि स्वाहा घर्मो देवाꣳ अप्येतु ॥ (अषाढ, ओषधय, उपचिन्वन्ति, पञ्चचत्वारिꣳशच्च) ॥ १० ॥

काम्या याज्यापुरोऽनुवाक्याः ॥ १-२, १३, १५, १७, २० गायत्री; ३, ७ जगती; ४-६, ८-१०, १२, १४, १६, १८-१९ त्रिष्टुप्; ११ अनुष्टुप् । विश्वेदेवा ऋषयः ।

वैश्वानरो न ऊत्याऽऽ प्र यातु परावतः । अग्निरुक्थेन वाहसा ॥
ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ॥
वैश्वानरस्य दꣳसनाभ्यो बृहदरिणादेकः स्वपस्यया कविः ।
उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा ॥
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स (१) रिषः पातु नक्तम् ॥
जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा ।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥
त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाꣳ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥
अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरꣳ सुवीर्यम् ।
वयं जयेम शतिनꣳ सहस्रिणं वैश्वानर (२) वाजमग्ने तवोतिभिः ॥
वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥
अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि ॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ।
अथा वयमादित्य (३) व्रते तवानागसो अदितये स्याम ॥
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥
सुरभि नो मुखा करत् प्र ण आयूꣳषि तारिषत् ॥
आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषाऽपस्ततान ।
सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचाꣳसि ॥
अग्निर्मूर्धा भुवः (४।४।४)
मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न (४) उप गन्तन ॥
या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।
अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु । अदितिः पात्वꣳहसः ॥
महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिम् ॥
सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माण (५) मदितिꣳ सुप्रणीतिम् ।
दैवीं नावꣳ स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥
इमाꣳसु नावमाऽरुहꣳ शतारित्राꣳ शतस्फ्याम् । अच्छिद्रां पारयिष्णुम् ॥ (दिवा स, इमाꣳसु नावमाऽरुहꣳ शतारित्राꣳ शतस्फ्याम् । अच्छिद्रां पारयिष्णुम्) ॥ ११ ॥

सहस्रिणं वैश्वानरा--, ऽऽ दिव्या, तू नो, ऽनेहसꣳ सुशर्माण, -मेकाद्शꣳ शतिश्च) ॥ ११ ॥ सहस्रिणं वैश्वानरा--, ऽऽ दिव्या, तू नो, ऽनेहसꣳ सुशर्माणं, -मेकाद्शꣳ शतिश्च) ॥ ११ ॥

[देवासुराः २२४। परा २३६। भूमि--१६२। भूमि--२२४।--हत्वघ्नन्तः २१७। संवत्सरा--२२७। स्वर्गः २१९। संपस्यामीः २०५। त्वांह्यग्निदोत्रं २६६। मम नाम १९५। वैश्वानर २०९। (पञ्चदश ॥ ११ ॥ २०२०)]

[॥ इति प्रथमकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥]

याजमानकाण्डम् ।

[अथ षष्ठः प्रपाठकः ॥ ६ ॥] प्रजापतिर्ऋषिः ।
आज्यग्रहणानुमन्त्रणम् ॥ अनुष्टुप् ।

सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च । बृहस्पतिप्रसूतो यजमान इह मा रिषत् ॥

आज्यमसि सत्यमसि सत्यस्याध्यक्षमसि हविरसि वैश्वानरं वैश्वदेवमुत्पूतशुष्मꣳ सत्यौजाः सहोऽसि सहमानमसि सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व पृतन्यतः । सहस्रवीर्यमसि तन्मा जिन्वाऽऽज्यस्याऽऽज्यमसि सत्यस्य सत्यमसि सत्यायु (१) रसि सत्यशुष्ममसि सत्येन त्वाऽभि धारयामि तस्य ते भक्षीय पञ्चानां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वर्तूनां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वा दिशां यन्त्राय धर्त्राय गृह्णामि पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामि चरोस्त्वा पञ्चबिलस्य यन्त्राय धर्त्राय गृह्णामि ब्रह्मणस्त्वा तेजसे यन्त्राय धर्त्राय गृह्णामि क्षत्रस्य त्वौजसे यन्त्राय (२) धर्त्राय गृह्णामि विशे त्वा यन्त्राय धर्त्राय गृह्णामि सुवीर्याय त्वा गृह्णामि सुप्रजास्त्वाय त्वा गृह्णामि रायस्पोषाय त्वा गृह्णामि ब्रह्मवर्चसाय त्वा गृह्णामि भूरस्माकꣳ हविर्देवानामाशिषो यजमानस्य देवानां त्वा देवताभ्यो गृह्णामि कामाय त्वा गृह्णामि (सत्यायु, तेजसेयन्त्राय, त्रयस्त्रिꣳशच्च) ॥ १ ॥

हविरासादनानुमन्त्रणम् ॥ ४-५ द्विपदा त्रिष्टुप्; ६ त्रिष्टुप्; १० विपरीतिकमध्या ॥ प्रजापतिर्ऋषिः ।

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुवि - द्ग्रोऽस्युग्रोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुवि - दभिभूरस्यभिभूरहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुवि - द्युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः ॥
इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥

यन्मे अग्ने अस्य यज्ञस्य रिष्या (१) द्यद्वा स्कन्दादाज्यस्योत विष्णो ।
तेन हन्मि सपत्नं दुर्मरायुमैनं दधामि निर्ऋत्या उपस्थे ।

भूर्भुवः सुव - रुच्छुष्मो अग्ने यजमानायैधि निशुष्मो अभिदासते । अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वा - मर्त्यस्य ते होतर्मूर्धन्ना जिघर्मि रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय मनोऽसि प्राजापत्यं मनसा मा भूतेनाऽऽ विश वागस्यैन्द्री सपत्नक्षयणी (२) वाचा मेन्द्रियेणाऽऽ विश वसन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु वर्षा ऋतूनां प्रीणामि ता मा प्रीताः प्रीणन्तु शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु हेमन्तशिशिरावृतूनां प्रीणामि तौ मा प्रीतौ प्रीणीता - मग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयास - मग्नेरहं देवयज्ययाऽन्नादो भूयासꣳ (३) दब्धिरस्यदब्धो भूयासममुं दभेय - मग्नीषोमयोरहं देवयज्यया वृत्रहा भूयास - मिन्द्राग्नियोरहं देवयज्ययेन्द्रियाव्यन्नादो भूयास - मिन्द्रस्याहं देवयज्ययेन्द्रियावी भूयासं महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेय - मग्नेः स्विष्टकृतोऽहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेयम् ॥ (रिष्यात, सपत्नक्षयण्य,-न्नादो भूयास, त्रयस्त्रिꣳशच्च) ॥२॥

इडा भागानुमन्त्रणम् ॥ ५ त्रिष्टुप् । प्रजापतिर्ऋषिः

अग्निर्मा दुरिष्टात् पातु सविताऽघशꣳसा - द्यो मेऽन्ति दूरेऽरातीयति तमेतेन जेषꣳ सुरूपवर्षवर्ण एहीमान् भद्रान् दुर्याꣳ अभ्येहि मामनुव्रता न्यु शीर्षाणि मृढ्वमिड एह्यदित एहि सरस्वत्येहि रन्तिरसि रमतिरसि सूनर्यसि जुष्टे जुष्टिं तेऽशीयोपहूत उपहवं (१) तेऽशीय सा मे सत्याशीरस्य यज्ञस्य भूयादरेडता मनसा तच्छकेयं यज्ञो दिवꣳ रोहतु यज्ञो दिवं गच्छतु यो देवयानः पन्थास्तेन यज्ञो देवाꣳ अप्येत्वस्मास्विन्द्र इन्द्रियं दधात्वस्मान् राय उत यज्ञाः सचन्तामस्मासु सन्त्वाशिषः सा नः प्रिया सुप्रतूर्तिर्मघोनी जुष्टिरसि जुषस्व नो जुष्टा नो (२) ऽसि जुष्टिं ते गमेयं मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु । बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्ताम् ॥

अब्धन् पिन्वस्व ददतो मे मा क्षायि कुर्वतो मे मोप दसत् प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वान् प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यक्षितोऽस्यक्षित्यै त्वा (३) मा मे क्षेष्ठा अमुत्रामुष्मिन् लोके ॥ (उपहवं, जुष्टा न-स्त्वा, षट् च) ॥ ३ ॥

अनुयाजानामनुमन्त्रणम् ॥ १२-१३ अनुष्टुप्; १४ पुर उष्णिक्; १८ त्रिष्टुप् । प्रजापतिर्ऋषिः ।

बर्हिषोऽहं देवयज्यया प्रजावान् भूयासं नराशꣳसस्याहं देवयज्यया पशुमान् भूयास - मग्नेः स्विष्टकृतोऽहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेय - मग्नेरहमुज्जितिमनूज्जेषꣳ सोमस्याहमुज्जितिमनूज्जेष - मग्नेरहमुज्जितिमनूज्जेष - मग्नीषोमयोरहमुज्जितिमनूज्जेष - मिन्द्राग्नियोरहमुज्जितिमनूज्जेष - मिन्द्रस्याहमु (१) ज्जितिमनूज्जेषं महेन्द्रस्याहमुज्जितिमनूज्जेष - मग्नेः स्विष्ट-

कृतोऽहमुज्जितिमनूज्जेषं वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत् । अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ॥

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ।

अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥

एमा अग्मन्नाशिषो दोहकामा इन्द्रवन्तो (२) वनामहे धुक्षीमहि प्रजामिषम् ॥

रोहितेन त्वाऽग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो देवतां गमयत्वेतशेन त्वा सूर्यो देवतां गमयतु वि ते मुञ्चामि रशना वि रश्मीन् वि योक्त्रा यानि परिचर्तनानि धत्तादस्मासु द्रविणं यच्च भद्रं प्र णो ब्रूताद्भागधान् देवतासु ॥

विष्णोः शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां गमेयꣳ सोमस्याहं देवयज्यया (३) सुरेता रेतो धिषीय त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयं देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासं वेदोऽसि वित्तिरसि विदेय कर्मासि करुणमसि क्रियासꣳ सनिरसि सनितासि सनेयं घृतवन्तं कुलायिनꣳ रायस्पोषꣳ सहस्रिणं वेदो ददातु वाजिनम् (इन्द्रवन्तः,-सिन्द्रवन्त, सोमस्याहं देवयज्यया, चतुश्चत्वारिꣳशच्च) ॥ ४ ॥

ध्रुवाप्यायनादि ॥ १ विराट्स्थाना । प्रजापतिर्ऋषिः ।

आ प्यायतां ध्रुवा घृतेन यज्ञं यज्ञं प्रति देवयद्भ्यः ।

सूर्याया ऊधोऽदित्या उपस्थ उरुधारा पृथिवी यज्ञे अस्मिन् ॥

प्रजापतेर्विभान्नाम लोकस्तस्मिꣳस्त्वा दधामि सह यजमानेन सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः पूर्णमसि पूर्णं मे भूया अक्षितमसि मा मे क्षेष्ठाः प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तां दक्षिणायां (१) दिशि मासाः पितरो मार्जयन्तां प्रतीच्यां दिशि गृहाः पशवो मार्जयन्तामुदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वायां दिशि यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्तां विष्णोः क्रमोऽस्यभिमातिहा गायत्रेण छन्दसा पृथिवीमनु वि क्रमे निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभेन छन्दसाऽन्तरिक्षमनु वि क्रमे निर्भक्तः स यं द्विष्मो विष्णोः (२) क्रमोऽस्यरातीयतो हन्ता जागतेन छन्दसा दिवमनु वि क्रमे निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभेन छन्दसा दिशोऽनु वि क्रमे निर्भक्तः स यं द्विष्मः ॥ (दक्षिणायां, द्विष्मो विष्णो,-रेकान्नत्रिꣳशच्च) ॥ ५ ॥

सूर्योपस्थानादि ॥ ९-१० गायत्री; १४ अतिजगती; १५ त्रिष्टुप् ।

अगन्म सुवः सुवरगन्म संदृशस्ते मा छित्सि यत्ते तपस्तस्मै ते माऽऽवृक्षि सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहि वर्चोधा असि वर्चो मयि धेहीदमहममुं भ्रातृव्यमाभ्यो दिग्भ्योऽस्यै दिवोऽस्मादन्तरिक्षादस्यै पृथिव्या अस्मादन्नाद्यान्निर्भजामि निर्भक्तः स यं द्विष्मः ॥ (१)

सं ज्योतिषाऽभूवमैन्द्रीमावृतमन्वावर्ते समहं प्रजया सं मया प्रजा समहꣳ रायस्पोषेण सं मया रायस्पोषः समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासं वसुमान् यज्ञो वसीयान् भूयासमग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । (२) दधत् पोषꣳ रयिं मयि ।

अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीं तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीं कस्त्वा युनक्ति स त्वा वि मुञ्चत्वग्ने व्रतपते व्रतमचारिषं तदशकं तन्मेऽराधि यज्ञो बभूव स आ (१) बभूव स प्र जज्ञे स वावृधे ।

स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन् करोतु वयꣳ स्याम पतयो रयीणाम् ॥

गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।

इडावाꣳ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ॥

(द्विष्मः । सुवीर्यꣳ, स आ, पञ्चत्रिꣳशच्च) ॥ ६ ॥

देवतापरिग्रहादिविधिः ॥ प्रजापतिर्ऋषिः ।

यथा वै समृतसोमा एवं वा एते समृतयज्ञा यद्दर्शपूर्णमासौ कस्य वाह देवा यज्ञमा गच्छन्ति कस्य वा न बहूनां यजमानानां यो वै देवताः पूर्वः परिगृह्णाति स एनाः श्वो भूते यजत एतद्वै देवानामायतनं यदाहवनीयोऽन्तराग्नी पशूनां गार्हपत्यो मनुष्याणामन्वाहार्यपचनः पितॄणामग्निं गृह्णाति स्व एवायतने देवताः परि (१) गृह्णाति ताः श्वो भूते यजते व्रतेन वै मेध्योऽग्निर्व्रतपतिर्ब्राह्मणो व्रतभृद्व्रतमुपैष्यन् ब्रूयादग्ने व्रतपते व्रतं चरिष्यामीत्यग्निर्वै देवानां व्रतपतिस्तस्मा एव प्रतिप्रोच्य व्रतमालभते बर्हिषा पूर्णमासे व्रतमुपैति वत्सैरमावास्यायामेतद्ध्येतयोरायतनमुपस्तीर्यः पूर्वश्चाग्निरपरश्चेत्याहुर्मनुष्या (२) इन्न्वा उपस्तीर्णमिच्छन्ति किमु देवा येषां नवावसानमुपास्मिञ्छ्वो यक्ष्यमाणे देवता वसन्ति य एवं विद्वानग्निमुपस्तृणाति यजमानेन ग्राम्याश्च पशवोऽवरुध्या आरण्याश्चेत्याहुर्यद्ग्राम्यानुपवसति तेन ग्राम्यानव रुन्धे यदारण्यस्याश्नाति तेनारण्यान्यदनाश्वानुपवसेत् पितृदेवत्यः स्यादारण्यस्याश्नातीन्द्रियं (३) वा आरण्यमिन्द्रियमेवाऽऽत्मन् धत्ते यदनाश्वानुपवसेत् क्षोधुकः स्याद्यदश्नीयाद्रुद्रोऽस्य पशूनभि मन्येतापोऽश्नाति तन्नेवाशितं नेवानशितं न क्षोधुको भवति नास्य रुद्रः पशूनभि मन्यते वज्रो वै यज्ञः क्षुत्खलु वै मनुष्यस्य भ्रातृव्यो यदनाश्वानुपवसति वज्रेणैव साक्षात् (४) क्षुधं भ्रातृव्यꣳ हन्ति ॥ (परि, मनुष्या, इन्द्रियं, साक्षात्, त्रीणि च) ॥ ७ ॥

यज्ञायुधसम्भृतिः ॥ प्रजापतिर्ऋषिः ।

यो वै श्रद्धामनारभ्य यज्ञेन यजते नास्येष्टाय श्रद्दधतेऽपः प्र णयति श्रद्धा वा आपः श्रद्धामेवाऽऽरभ्य यज्ञेन यजत उभयेऽस्य देवमनुष्या इष्टाय श्रद्दधते तदाहुरति वा एता वर्त्रं नेदन्त्यति वाचं

मनो यावैता नाति नेदन्तीति मनसा प्र णयतीयं वै मनो (१) ऽनयैवैनाः प्र णयत्यस्कन्नहविर्भवति य एवं वेद यज्ञायुधानि सं भरति यज्ञो वै यज्ञायुधानि यज्ञमेव तत्सं भरति यदेकमेकꣳ संभरेत् पितृदेवत्यानि स्युर्यत्सह सर्वाणि मानुषाणि द्वेद्वे सं भरति याज्यानुवाक्ययोरेव रूपं करोत्यथो मिथुनमेव यो वै दश यज्ञायुधानि वेद मुखतोऽस्य यज्ञः कल्पते स्फ्यश्च (२) कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानि य एवं वेद मुखतोऽस्य यज्ञः कल्पते यो वै देवेभ्यः प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा हव्यꣳ हविर्निरुप्यमाणमभि मन्त्रयेताग्निꣳ होतारमिह तꣳ हुव इति (३) देवेभ्य एव प्रतिप्रोच्य यज्ञेन यजते जुषन्तेऽस्य देवा हव्यमेष वै यज्ञस्य ग्रहो गृहीत्वैव यज्ञेन यजते तदुदित्वा वाचं यच्छति यज्ञस्य धृत्या अथो मनसा वै प्रजापतिर्यज्ञमतनुत मनसैव तद्यज्ञं तनुते रक्षसामनन्ववचाराय यो वै यज्ञं योगे आगते युनक्ति युङ्क्ते युञ्जानेषु कस्त्वा युनक्ति स त्वा युनक्त्वि (४) त्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति युङ्क्ते युञ्जानेषु ॥ (वै मनः, स्फ्य, इति युनक्त्वि,-कादश च) ॥ ८ ॥

इष्टकाम्नानसम्पत्तिः ॥ प्रजापतिर्ऋषिः ।

प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो यावत्यमावास्या तावानतिरात्रो य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाऽऽप्नोति य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति (१) तावदुपाऽऽप्नोति य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाऽऽप्नोति परमेष्ठिनो वा एष यज्ञोऽग्र आसीत् तेन स परमां काष्ठामगच्छत् तेन प्रजापतिं निरवासाययत् तेन प्रजापतिः परमां काष्ठामगच्छत् तेनेन्द्रं निरवासाययत् तेनेन्द्रः परमां काष्ठामगच्छत् तेनाग्नीषोमौ निरवासाययत् तेनाग्नीषोमौ परमां काष्ठामगच्छतां य (२) एवं विद्वान् दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छति यो वै प्रजातेन यज्ञेन यजते प्र प्रजया पशुभिर्मिथुनैर्जायते द्वादश मासाः संवत्सरो द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि सम्पाद्यानीत्याहुर्वत्सं चोपावसृजत्युखां चाधि श्रयत्यव च हन्ति दृषदौ च समाहन्त्यधि च वपते कपालानि चोप दधाति पुरोडाशं (३) चाधिश्रयत्याज्यं च स्तम्बयजुश्च हरत्यभि च गृह्णाति वेदिं च परि गृह्णाति पत्नीं च सं नह्यति प्रोक्षणीश्चाऽऽसादयत्याज्यं चैतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोस्तानि य एवꣳ सम्पाद्य यजते प्रजातेनैव यज्ञेन यजते प्र प्रजया पशुभिर्मिथुनैर्जायते ॥ (उक्थ्येनोपाप्नोति,-अगच्छतां य, पुरोडाशं, चत्वारिꣳशच्च) ॥ ९ ॥

इतिः ॥ लवन ॥ प्रजापतिर्ऋषिः ।

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमित्याह ध्रुवानेवैनान् कुरुत उग्रोऽस्युग्रोऽहꣳ सजातेषु भूयासमित्याहाप्रतिवादिन एवैनान् कुरुतेऽभिभूरस्यभिभूरहꣳ सजातेषु भूयासमित्याह य एवैनं प्रत्युत्पिपीते तमुपास्यते युनज्मि त्वा ब्रह्मणा दैव्येनेत्याहैष वा अग्नेर्योगस्तेन (१) एवैनं युनक्ति यज्ञस्य वै समृद्धेन देवाः सुवर्गं लोकमायन् यज्ञस्य व्यृद्धेनासुरान् पराभावयन् यन्मे अग्ने अस्य यज्ञस्य रिष्यादित्याह

यज्ञस्यैव तत्समृद्धेन यजमानः सुवर्गं लोकमेति यज्ञस्य व्यृद्धेन भ्रातृव्यान् परा भावयत्यग्निहोत्रमेताभिर्व्याहृतिभिरुप सादयेद्यज्ञमुखं वा अग्निहोत्रं ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म (२) कुरुते संवत्सरे पर्यागत एताभिरेवोप सादयेद्ब्रह्मणैवोभयतः संवत्सरं परि गृह्णाति दर्शपूर्णमासौ चातुर्मास्यान्यालभमान एताभिर्व्याहृतीभिर्हवीꣳष्यासादयेद्यज्ञमुखं वै दर्शपूर्णमासौ चातुर्मास्यानि ब्रह्मैता व्याहृतयो यज्ञमुख एव ब्रह्म कुरुते संवत्सरे पर्यागत एताभिरेवाऽऽसादयेद्ब्रह्मणैवोभयतः संवत्सरं परि गृह्णाति यद्वै यज्ञस्य साम्ना क्रियते राष्ट्रं (३) यज्ञस्याऽऽशीर्गच्छति यदृचा विशं यज्ञस्याऽऽशीर्गच्छत्यथ ब्राह्मणोऽनाशीर्केण यज्ञेन यजते सामिधेनीरनुवक्ष्यन्नेता व्याहृतीः पुरस्ताद्दध्याद्ब्रह्मैव प्रतिपदं कुरुते तथा ब्राह्मणः साशीर्केण यज्ञेन यजते यं कामयेत यजमानं भ्रातृव्यमस्य यज्ञस्याऽऽशीर्गच्छेदिति तस्यैता व्याहृतीः पुरोऽनुवाक्यायां दध्याद्भ्रातृव्यदेवत्या वै पुरोऽनुवाक्या भ्रातृव्यमेवास्य यज्ञस्या (४) ऽऽशीर्गच्छति यान् कामयेत यजमानान्त्समावत्येनान् यज्ञस्याऽऽशीर्गच्छेदिति तेषामेता व्याहृतीः पुरोऽनुवाक्याया अर्धर्च एकां दध्याद्याज्यायै पुरस्तादेकां याज्याया अर्धर्च एकां तथैनान्त्समावती यज्ञस्याऽऽशीर्गच्छति यथा वै पर्जन्यः सुवृष्टं वर्षत्येवं यज्ञो यजमानाय वर्षति स्थलयोदकं परिगृह्णन्त्याशिषा यज्ञं यजमानः परि गृह्णाति मनोऽसि प्राजापत्यं (५) मनसा मा भूतेनाऽऽविशेत्याह मनो वै प्राजापत्यं प्राजापत्यो यज्ञो मन एव यज्ञमात्मन् धत्ते वागस्यैन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाऽऽविशेत्याहैन्द्री वै वाग्वाचमेवैन्द्रीमात्मन् धत्ते ॥ (तेन,-व ब्रह्म, राष्ट्रं, यज्ञस्य, प्राजापत्य-, मष्टात्रिꣳशच्च) ॥ १० ॥

काश्रावणादिमन्त्रविधानम् ॥

यो वै सप्तदशं प्रजापतिं यज्ञमन्वायत्तं वेद प्रति यज्ञेन तिष्ठति न यज्ञाद्भ्रꣳशत आ श्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तो य एवं वेद प्रति यज्ञेन तिष्ठति न यज्ञाद्भ्रꣳशते यो वै यज्ञस्य प्रायणं प्रतिष्ठा (१) मुदयनं वेद प्रतिष्ठितेनारिष्टेन यज्ञेन सꣳस्थां गच्छत्या श्रावयास्तु श्रौषड्यज ये यजामहे वषट्कार एतद्वै यज्ञस्य प्रायणमेषा प्रतिष्ठैतदुदयनं य एवं वेद प्रतिष्ठितेनारिष्टेन यज्ञेन सꣳस्थां गच्छति यो वै सूनृतायै दोहं वेद दुह एवैनां यज्ञो वै सूनृताऽऽश्रावयेत्येवैनामह्वदस्तु (२) श्रौषडित्युपावास्राग्जन्युदनैषीद्यजेत्युदनैषीद्ये यजामह इत्युपासदद्वषट्कारेण दोग्ध्येष वै सूनृतायै दोहो य एवं वेद दुह एवैनां देवा वै सत्रमासत तेषां दिशोऽदस्यन्त एतामार्द्रां पङ्क्तिमपश्यन्ना श्रावयेति पुरोवातमजनयन्नस्तु श्रौषडित्यभ्रꣳ समप्लावयन् यजेति विद्युतं (३) मजनयन् ये यजामह इति प्रावर्षयन्नभ्यस्तनयन् वषट्कारेण ततो वै तेभ्यो दिशः प्राप्यायन्त य एवं वेद प्रास्मै दिशः प्यायन्ते प्रजापतिं त्वो वेद प्रजापतिस्त्वं वेद यं प्रजापतिर्वेद स पुण्यो भवत्येष वै छन्दस्यः प्रजापतिरा श्रावयास्तु श्रौषड्यज ये यजामहे वषट्कारो य एवं वेद पुण्यो भवति वसन्त (४) मृतूनां प्रीणामीत्याहर्तवो वै प्रयाजा ऋतूनेव प्रीणाति तेऽस्मै प्रीता यथापूर्वं कल्पन्ते कल्पन्तेऽस्मा ऋतवो य एवं वेदाग्नीषोमयोरहं देवयज्यया चक्षुष्मान् भूयासमित्याहाग्नीषोमाभ्यां वै यज्ञश्चक्षुष्मान् ताभ्यामेव चक्षुरात्मन् धत्तेऽग्नेरहं देवयज्ययाऽन्नादो भूयास-

मित्याहाग्निर्वै देवानामन्नादस्तेनैवा (५) ऽन्नाद्यमात्मन् धत्ते दब्धिरस्यदब्धो भूयासममुं दभेयमित्याहै-
तया वै दब्ध्या देवा असुरानदभ्नुवन् तयैव भ्रातृव्यं दभ्नोत्यग्नीषोमयोरहं देवयज्ययां वृत्रहा भूयास-
मित्याहाग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन् ताभ्यामेव भ्रातृव्यं स्तृणुत इन्द्राग्नियोरहं देवयज्ययेन्द्रियाव्य-
न्नादो भूयासमित्याहेन्द्रियाव्येवान्नादो भवतीन्द्रस्या (६) ऽहं देवयज्ययेन्द्रियावी भूयासमित्याहेन्द्रि-
याव्येव भवति महेन्द्रस्याहं देवयज्यया जेमानं महिमानं गमेयमित्याह जेमानमेव महिमानं गच्छ-
त्यग्नेः स्विष्टकृतोऽहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेयमित्याहायुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति ॥
प्रतिष्ठा,-मंहुरस्तु, विष्णुं, वसन्त,-मेवे,-न्द्रस्या, ऽष्टात्रिंशच्च) ॥ ११ ॥

काम्यायाज्यापुरोऽनुवाक्याः ॥ १, ३, ७ गायत्री; २, ४, ९-११, १३-१४, १६-१९ त्रिष्टुप्; ५, ८, १२, १५ अनुष्टुप्; ६ बृहती । विश्वेदेवा ऋषयः ।

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥
इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता श्रवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥
इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ॥
अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु (१) क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥
आ यस्मिन्त्सप्त वासवास्तिष्ठन्ति स्वारुहो यथा ।
ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः ॥
आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।
घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः ॥
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥
गायन्ति त्वा गायत्रिणो (२) ऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रतवुद्वꣳशमिव येमिरे ॥
अꣳहोमुचे प्र भरेमा मनीषामोषिष्ठदाव्ने सुमतिं गृणानाः ।
इदमिन्द्र प्रति हव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः ॥
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अꣳहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥
प्र सम्राजं प्रथममध्वराणा (३) मꣳहोमुचं वृषभं यज्ञियानाम् ।
अपां नपातमश्विना हयन्तमस्मिन्नर इन्द्रियं धत्तमोजः ॥
६ (तै. सं.)

वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
अधस्पदं तमीं कृधि यो अस्माꣳ अभिदासति ॥
इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥
मृगो न भीमः कुचरो गिरिष्ठाः परावत (४) आ जगामा परस्याः ।
सृकꣳ सꣳशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व ॥
वि शत्रून् वि मृधो नुद वि वृत्रस्य हनू रुज ।
वि मन्युमिन्द्र भामितोऽमित्रस्याभिदासतः ॥
त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥
मा ते अस्याꣳ (५) सहसावन् परिष्टावघाय भूम हरिवः परादै ।
त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥
अनवस्ते रथमश्वाय तक्षन् त्वष्टा वज्रं पुरुहूत द्युमन्तम् ।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥
वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिः सजोषाः ।
अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून् ॥
(वृत्रहत्येऽनु, गायत्रिणो, ऽध्वराणां, परावतो, ऽस्या,-मष्टाचत्वारिꣳशच्च) ॥ १२ ॥
[सं त्वा १३३ । ध्रुवो-१८६ । -स्त्वऽग्नि-१५६ । बर्हिषोऽहं १२४ । आप्यायतां- १२९ । -मर्गन्म १८५ । यथा वै २०३ । यो २११ । प्रजापति-१९० । -ध्रुवोऽसि २८६ । यो वै संप्तदश-१३८ । -मिन्द्रं वो २९८ । द्वादश ॥ २५०९]
[॥ इति प्रथमकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥]

याजमान-ब्राह्मणम् ।

[अथ सप्तमः प्रपाठकः ॥ ७ ॥] प्रजापतिर्ऋषिः ।

इडानुमन्त्रणमन्त्रब्राह्मणम् ॥

पाकयज्ञं वा अन्वाहिताग्नेः पशव उप तिष्ठन्त इडा खलु वै पाकयज्ञः सैषान्तरा प्रयाजानूयाजान् यज-
मानस्य लोकेऽवहिता तामाह्रियमाणामभि मन्त्रयेत सुरूपवर्षवर्ण एहीति पशवो वा इडा पशूनेवोप
ह्वयते यज्ञं वै देवा अदुहन् यज्ञोऽसुराꣳ अदुहत् तेऽसुरा यज्ञदुग्धाः पराऽभवन् यो वै यज्ञस्य दोहं
विद्वान् (१) यजतेऽप्यन्यं यजमानं दुहे सा मे सत्याऽऽशीरस्य यज्ञस्य भूयादित्याहैष वै यज्ञस्य
दोहस्तेनैवैनं दुहे प्रत्ता वै गौर्दुहे प्रत्तेडा यजमानाय दुह एते वा इडायै स्तना इडोपहूतेति वायु-
र्वत्सो यर्हि होतेडामुपह्वयेत तर्हि यजमानो होतारमीक्षमाणो वायुं मनसा ध्यायेन् (२) मात्रे वत्स-

मुपावसृजति सर्वेण वै यज्ञेन देवाः सुवर्गं लोकमायन् पाकयज्ञेन मनुरश्राम्यत्सेडा मनुमुपावर्तत तां
देवासुरा व्यह्वयन्त प्रतीचीं देवाः पराचीमसुराः सा देवानुपावर्तत पशवो वै तद् देवानवृणत पशवो-
ऽसुरानजहुर्यं कामयेतापशुः स्यादिति पराचीं तस्येडामुपह्वयेतापशुरेव भवति यं (३) कामयेत
पशुमान्त्स्यादिति प्रतीचीं तस्येडामुपह्वयेत पशुमानेव भवति ब्रह्मवादिनो वदन्ति स त्वा इडामुप-
ह्वयेत य इडामुपह्वयात्मानमिडायामुपह्वयेतेति सा नः प्रिया सुप्रतूर्तिर्मघोनीत्याहेडामेवोपहूयाऽऽ-
त्मानमिडायामुपह्वयते व्यस्तमिव वा एतद्यज्ञस्य यदिडा सामि प्राश्नन्ति (४) सामि मार्जयन्त
एतत् प्रति वा असुराणां यज्ञो व्यच्छिद्यत ब्रह्मणा देवाः समदधुर्बृहस्पतिस्तनुतामिमं न इत्याह ब्रह्म
वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञꣳ सं दधाति विच्छिन्नं यज्ञꣳ समिमं दधात्वित्याह संतत्यै विश्वे
देवा इह मादयन्तामित्याह संतत्यैव यज्ञं देवेभ्योऽनु दिशति यां वै (५) यज्ञे दक्षिणां ददाति तामस्य
पशवोऽनु संक्रामन्ति स एष ईजानोऽपशुर्भावुको यजमानेन खलु वै तत्कार्यमित्याहुर्यथा देवत्रा दत्तं
कुर्वीतात्मन् पशून् रमयेतेति ब्रध्न पिन्वस्वेत्याह यज्ञो वै ब्रध्नो यज्ञमेव तन्महयत्यथो देवत्रैव दत्तं
कुरुत आत्मन् पशून् रमयते ददतो मे (६) मा क्षायीत्याहाक्षितिमेवोपैति कुर्वतो मे मोप दस-
दित्याह भूमानमेवोपैति ॥ (विद्वान्, ध्यायेन्,-यं, प्राश्नन्ति, यां वै, मे, पञ्चविꣳशतिश्च) ॥ १ ॥

सत्रय-स्तुमिजयोः प्रश्नोत्तराभ्यामिडाप्रशंसनम् ॥ प्रजापतिर्ऋषिः ।

सꣳश्रवा ह सौवर्चनसस्तुमिञ्जमौपोदितिमुवाच यत्सत्रिणाꣳ होताऽभूः कामिडामुपाह्वथा इति
तामुपाह्व इति होवाच या प्राणेन देवान् दाधार व्यानेन मनुष्यानपानेन पितॄनिति छिनत्ति सा न छिनत्ती३
इति छिनत्तीति होवाच शरीरं वा अस्यै तदुपाह्वथा इति होवाच गौर्वा (१) अस्यै शरीरं गां
वाव तौ तत्पर्यवदताम् या यज्ञे दीयते सा प्राणेन देवान् दाधार यया मनुष्या जीवन्ति सा व्यानेन
मनुष्यान् यां पितृभ्यो घ्नन्ति साऽपानेन पितॄन् य एवं वेद पशुमान् भवत्यथ वै तामुपाह्व इति होवाच
या प्रजाः प्रभवन्तीः प्रत्याभवतीत्यन्नं वा अस्यै तदु (२) पाह्वथा इति होवाचौषधयो वा
अस्या अन्नमोषधयो वै प्रजाः प्रभवन्तीः प्रत्या भवन्ति य एवं वेदान्नादो भवत्यथ वै तामुपाह्व इति
होवाच या प्रजाः पराभवन्तीरनुगृह्णाति प्रत्याभवन्तीर्गृह्णातीति प्रतिष्ठां वा अस्यै तदुपाह्वथा इति होवाचेयं
वा अस्यै प्रतिष्ठे (३) यं वै प्रजाः पराभवन्तीरनुगृह्णाति प्रत्याभवन्तीर्गृह्णाति य एवं वेद प्रत्येव
तिष्ठत्यथ वै तामुपाह्व इति होवाच यस्यै निक्रमणे घृतं प्रजाः संजीवन्तीः पिबन्तीति छिनत्ति सा
न छिनत्ती३ इति न छिनत्तीति होवाच प्र तु जनयतीत्येष वा इडामुपाह्वथा इति (४) होवाच
वृष्टिर्वा इडा वृष्ट्यै वै निक्रमणे घृतं प्रजाः संजीवन्तीः पिबन्ति य एवं वेद प्रैव जायतेऽन्नादो भवति ॥
(गौर्वा, अस्यै तदु, प्रतिष्ठा, ऽष्टाया इति चिरꣳशतिश्च) ॥ २ ॥

अन्वाहार्यः ॥ प्रजापतिर्ऋषिः ।

परोक्षं वा अन्ये देवा इज्यन्ते प्रत्यक्षमन्ये यद्यजते य एव देवाः परोक्षमिज्यन्ते तानेव तद्यजति
यदन्वाहार्यमाहरत्येते वै देवाः प्रत्यक्षं यद् ब्राह्मणास्तानेव तेन प्रीणात्यथो दक्षिणैवास्यैषाऽथो यज्ञस्यैव

छिद्रमपि दधाति यद्वै यज्ञस्य क्रूरं यद्विलिष्टं तदन्वाहार्येणा (१) ऽन्वाहरति तदन्वाहार्यस्यान्वाहार्यत्वं
देवदूता वा एते यदृत्विजो यदन्वाहार्यमाहरति देवदूतानेव प्रीणाति प्रजापतिर्देवेभ्यो यज्ञान् व्या-
दिशत् स रिरिचानोऽमन्यत स एतमन्वाहार्यमभक्तमपश्यत् तमात्मन्नधत्त स वा एष प्राजापत्यो यदन्वाहार्यो
यस्यैवं विदुषोऽन्वाहार्य आह्रियते साक्षादेव प्रजापतिमृध्नोत्यपरिमितो निरुप्योऽपरिमितः प्रजापतिः
प्रजापतेरा (२) प्त्यै देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतं प्राजापत्यमन्वाहार्यमपश्यन्
तमन्वाहरन्त ततो देवा अभवन् पराऽसुरा यस्यैवं विदुषोऽन्वाहार्य आह्रियते भवत्यात्मना परास्य
भ्रातृव्यो भवति यज्ञेन वा इष्टी पक्वेन पूर्ती यस्यैवं विदुषोऽन्वाहार्य आह्रियते स त्वेवेष्टापूर्ती
प्रजापतेर्भागोऽसी (३) त्याह प्रजापतिमेव भागधेयेन समर्धयत्यूर्जस्वान् पयस्वानित्याहोर्जमेवास्मिन्
पयो दधाति प्राणापानौ मे पाहि समानव्यानौ मे पाहीत्याहाऽऽशिषमेवैतामा शास्तेऽक्षितोऽ-
स्यक्षित्यै त्वा मा मे क्षेष्ठा अमुत्रामुष्मिँल्लोक इत्याह क्षीयते वा अमुष्मिँल्लोकेऽन्नमितः प्रदानꣳ ह्यमुष्मिँल्लोके
(४) प्रजा उपजीवन्ति यदेवमभिमृशत्यक्षितिमेवैनद्गमयति नास्यामुष्मिँल्लोकेऽन्नं क्षीयते ॥
(अन्वाहार्येण, प्रजापते,-रसि, ह्यमुष्मिँल्लोके, पञ्चदश च) ॥ ३ ॥

देवाहुतीनामनुमन्त्रणमन्त्रव्याख्यानम् ॥ प्रजापतिर्ऋषिः ।

बर्हिषोऽहं देवयज्यया प्रजावान् भूयासमित्याह बर्हिषा वै प्रजापतिः प्रजा असृजत तेनैव प्रजाः सृजते
नराशꣳसस्याहं देवयज्यया पशुमान् भूयासमित्याह नराशꣳसेन वै प्रजापतिः पशूनसृजत तेनैव पशून्
सृजतेऽग्नेः स्विष्टकृतोऽहं देवयज्ययाऽऽयुष्मान् यज्ञेन प्रतिष्ठां गमेयमित्याहाऽऽयुरेवात्मन् धत्ते प्रति
यज्ञेन तिष्ठति दर्शपूर्णमासयो (१) र्वै देवा उज्जितिमनूदजयन् दर्शपूर्णमासाभ्यामसुरानपानुदन्ताग्नेर-
हमुज्जितिमनूज्जेषमित्याह दर्शपूर्णमासयोरेव देवतानां यजमान उज्जितिमनूज्जयति दर्शपूर्णमासाभ्यां भ्रातृ-
व्यानप नुदते वाजवतीभ्यां व्यूहत्यन्नं वै वाजोऽन्नमेवावरुन्धे द्वाभ्यां प्रतिष्ठित्यै यो वै यज्ञस्य द्वौ
दोहौ विद्वान् यजत उभयत (२) एव यज्ञं दुहे पुरस्ताच्चोपरिष्टाच्चैष वा अन्यो यज्ञस्य दोह इडायामन्यो
यर्हि होता यजमानस्य नाम गृह्णीयात् तर्हि ब्रूयादेमा अग्मन्नाशिषो दोहकामा इति सꣳस्तुता एव देवता
दुहेऽथो उभयत एव यज्ञं दुहे पुरस्ताच्चोपरिष्टाच्च रोहितेन त्वाऽग्निर्देवतां गमयत्वित्याहैते वै देवाश्वा
(३) यजमानः प्रस्तरो यदेतैः प्रस्तरं प्रहरति देवाश्वैरेव यजमानꣳ सुवर्गं लोकं गमयति वि ते मुञ्चामि
रशना वि रश्मीनित्याहैष वा अग्नेर्विमोकस्तेनैवैनं वि मुञ्चति विष्णोः शंयोरहं देवयज्यया यज्ञेन प्रतिष्ठां
गमेयमित्याह यज्ञो वै विष्णुर्यज्ञ एवान्ततः प्रति तिष्ठति सोमस्याहं देवयज्यया सुरेता (४) रेतो धिषी-
येत्याह सोमो वै रेतोधास्तेनैव रेत आत्मन् धत्ते त्वष्टुरहं देवयज्यया पशूनाꣳ रूपं पुषेयमित्याह
त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृत्तेनैव पशूनाꣳ रूपमात्मन् धत्ते देवानां पत्नीरग्निर्गृहपतिर्यज्ञस्य
मिथुनं तयोरहं देवयज्यया मिथुनेन प्र भूयासमित्याहैतस्माद्वै मिथुनात् प्रजापतिर्मिथुनेन (५) प्राजायत
तस्मादेव यजमानो मिथुनेन प्र जायते वेदोऽसि वित्तिरसि विदेयेत्याह वेदेन वै देवा असुराणां
वित्तं वेद्यमविन्दन्त तद्वेदस्य वेदत्वं यद्यदकाम्यस्याभिध्यायेत् तस्य नाम गृह्णीयात् तद्वेवास्य सर्वं

शृङ्गे घृतवन्तं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनमित्याह प्र सहस्रं पशूनाप्नोत्यां (६)—स्य प्रजायां वाजी जायते य एवं वेद ॥ (दर्शपूर्णमासयोः, इत्याह, देवताः, सुरेताः, प्रजापतिर्मिथुनेन,-ऽऽप्नोत्,-द्वौ च ८) ॥ ४ ॥

आप्यायनादिमन्त्रव्याख्यानम् ॥ प्रजापतिर्ऋषिः।

ध्रुवां वै रिच्यमानां यज्ञोऽनु रिच्यते यज्ञं यजमानो यजमानं प्रजा ध्रुवामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजा आ प्यायतां ध्रुवा घृतेनेत्याह ध्रुवामेवाऽऽप्याययति तामाप्यायमानां यज्ञोऽन्वा प्यायते यज्ञं यजमानो यजमानं प्रजाः प्रजापतेर्विभान्नाम लोकस्तस्मिꣳस्त्वा दधामि सह यजमानेन (१) इत्याहायं वै प्रजापतेर्विभान्नाम लोकस्तस्मिन्नेवैनं दधाति सह यजमानेन रिच्यत इव वा एतद्यजते यद्यजमानभागं प्राश्नात्यात्मानमेव प्रीणाति—एतावान्वै यज्ञो यावान्यजमानभागो यज्ञो यजमानो यद्यजमानभागं प्राश्नाति यज्ञ एव यज्ञं प्रतिष्ठापयति—एतद्वै सूयवसꣳ सोदकं यद्बर्हिश्चाऽऽपश्च (२) एतद्यजमानस्याऽऽयतनं यद्वेदिः—यत्पूर्णपात्रमन्तर्वेदि निनयति स्व एवाऽऽयतने सूयवसꣳ सोदकं कुरुते सदसि सन्मे भूया इत्याहाऽऽपो वै यज्ञ आपोऽमृतं यज्ञमेवामृतमात्मन्धत्ते सर्वाणि वै भूतानि व्रतमुपयन्तमनूप यन्ति प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तामित्याहैष वै दर्शपूर्णमासयोरवभृथो (३) यान्येवैनं भूतानि व्रतमुपयन्तमनूपयन्ति तैरेव सहावभृथमवैति विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन् यद्विष्णुक्रमान्क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशः (४) छन्दोभिरेवेमाँल्लोकान्यथापूर्वमभि जयति ॥ (इव, -आपश्च,-अवभृथो, दिशः, सप्त च) ॥ ५ ॥

उपस्थानादिमन्त्रव्याख्यानम् प्रजापतिर्ऋषिः।

अगन्म सुवः सुवरगन्मेत्याह सुवर्गमेव लोकमेति संदृशस्ते मा छित्सि यत्ते तपस्तस्मै ते मा वृक्षीत्याह यथायजुरेवैतत् सुभूरसि श्रेष्ठो रश्मीनामायुर्धा अस्यायुर्मे धेहीत्याहाऽऽशिषमेवैतामा शास्ते प्र वा एषोऽस्माँल्लोकाच्च्यवते यो (१) विष्णुक्रमान्क्रमते सुवर्गाय हि लोकाय विष्णुक्रमाः क्रम्यन्ते ब्रह्मवादिनो वदन्ति स त्वै विष्णुक्रमान्क्रमेत य इमाँल्लोकान्भ्रातृव्यस्य संविद्य पुनरिमं लोकं प्रत्यवरोहेदित्ये—ष वा अस्य लोकस्य प्रत्यवरोहो यदाहेदमहममुं भ्रातृव्यमाभ्यो दिग्भ्योऽस्यै दिव इतीमानेव लोकान्भ्रातृव्यस्य संविद्य पुनरिमं लोकं प्रत्यवरोहति सं (२) ज्योतिषाऽभूवमित्याहास्मिन्नेव लोके प्रति तिष्ठत्यै—न्द्रीमावृतमन्वावर्त इत्याहासौ वा आदित्य इन्द्रस्तस्यैवाऽऽवृतमनु पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते समहं प्रजया सं मया प्रजेत्याहाऽऽशिषमे (३) वैतामा शास्ते समिद्धो अग्ने मे दीदिहि समेद्धा ते अग्ने दीद्यासमित्याह यथायजुरेवैत—द्वसुमान्यज्ञो वसीयान्भूयासमित्याहाऽऽशिषमेवैतामा शास्ते बहु वै गार्हपत्यस्यान्ते मिश्रमिव चर्यत आग्निपावमानीभ्यां गार्हपत्यमुप तिष्ठते पुनात्येवाग्निं पुनीत आत्मानं द्वाभ्यां प्रतिष्ठित्या अग्ने गृहपत इत्याह (४) यथायजुरेवैतच्छतꣳ हिमा इत्याह शतं

त्वा हेमन्तानिन्धिषीयेति वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति तामाशिषमा शास्ते तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोऽजातः स्यात् तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासेऽमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो (५) जातः स्यात् तेज एवास्मिन्ब्रह्मवर्चसं दधाति यो वै यज्ञं प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवति कस्त्वा युनक्ति स त्वा वि मुञ्चत्वित्याह प्रजापतिर्वै कः प्रजापतिनैवैनं युनक्ति प्रजापतिना वि मुञ्चति प्रतिष्ठित्या ईश्वरं वै व्रतमविसृष्टं प्रदहोऽग्ने व्रतपते व्रतमचारिषमित्याह व्रतमेव (६) वि सृजते शान्त्या अप्रदाहाय पराङ् वाव यज्ञ एति न नि वर्तते पुनर्यो वै यज्ञस्य पुनरालम्भं विद्वान्यजते तमभि नि वर्तते यज्ञो बभूव स आ बभूवेत्याहैष वै यज्ञस्य पुनरालम्भस्तेनैवैनं पुनरालभते—ऽनवरुद्धा वा एतस्य विराड् य आहिताग्निः सन्नसभः पशवः खलु वै (७) ब्राह्मणस्य सभे—ष्ट्वा प्राङुत्क्रम्य ब्रूयाद्गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञ इत्यव सभाꣳ रुन्धे प्र सहस्रं पशूनाप्नोत्यास्य प्रजायां वाजी जायते ॥ (वः, स,-माशिषं, गृहपत इत्याह, यस्य पुत्रो, व्रतमेव, खलु वै, चतुर्विꣳशतिश्च) ॥ ६ ॥

वाजपेयाङ्गभूते रथसंस्कारः ॥ १ महासतोबृहती; २ द्विपदा गायत्री, ३ अतिजगती; ४ पुर उष्णिक्, ५ अनुष्टुप्; ६ उष्णिक्। सोमऋषिः।

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः।
केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः ॥
इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यात् ॥
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म साविषत् ॥
अप्स्व (१) न्तरमृतमप्सु भेषजमपामुत प्रशस्तिष्वश्वा भवथ वाजिनः ॥
वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविꣳशतिः।
ते अग्रे अश्वमायुञ्जन्ते अस्मिञ्जवमादधुः ॥
अपां नपादाशुहेमन्य ऊर्मिः ककुद्मान्प्रतूर्तिर्वाजसातमस्तेनायं वाजꣳ सेत् ॥
विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमस्य—ङ्कौ न्यङ्का (२) वभितो रथं यौ ध्वान्तं वाताग्रमनु संचरन्तौ दूरेहेतिरिन्द्रियावान्पतत्री ते नोऽग्नयः पप्रयः पारयन्तु ॥
(अप्सु, न्यङ्कौ, पञ्चदश च) ॥ ७ ॥

रथधावनम् ॥ ४ गायत्री; ५-१० त्रिष्टुप्; ११ द्विपदा विराड्गायत्री; १२ आस्तारपङ्क्तिः, १३ विराट्; १४-१५ जगती; १६ त्रिष्टुप् ॥ सोमऋषिः।

देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वाजं जेषं देवस्याहꣳ सवितुः प्रसवे बृहस्पतिना वाजजिता वर्षिष्ठं नाकꣳ रुहेय—

—मिन्द्राय वाचं वदतेन्द्रं वाजं जापयतेन्द्रो वाजमजयित् ॥
अश्वाजनि वाजिनि वाजेषु वाजिनीवत्यश्वान्त्समत्सु वाजय ॥
अर्वाऽसि सप्तिरसि वाज्यसि वाजिनो वाजं धावत मरुतां प्रसवे जयत वि योजना मिमीध्वमध्वनः स्कभ्नीत (१) काष्ठां गच्छत
वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ॥
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनः ॥
मितद्रवः सहस्रसा मेधसाता सनिष्यवः।
महो ये रत्नꣳ समिथेषु जभ्रिरे शं नो भवन्तु वाजिनो हवेषु ॥
देवताता मितद्रवः स्वर्काः।
जम्भयन्तोऽहिं वृकꣳ रक्षाꣳसि सनेम्यस्मद्युयवन् (२) अमीवाः ॥
एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि।
क्रतुं दधिक्रा अनु सन्तवीत्वत् पथामङ्काꣳस्यन्वापनीफणत् ॥
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥
आ मा वाजस्य प्रसवो जगम्यादा द्यावापृथिवी विश्वशम्भू।
आ मा गन्तां पितरा (३) मातरा चाऽऽ मा सोमो अमृतत्वाय गम्यात् ॥
वाजिनो वाजजितो वाजꣳ सरिष्यन्तो वाजं जेष्यन्तो बृहस्पतेर्भागमव जिघ्रत
वाजिनो वाजजितो वाजꣳ ससृवाꣳसो वाजं जिगिवाꣳसो बृहस्पतेर्भागे नि मृड्ढ्व—मियं वः सा सत्या सन्धाऽभूद्यामिन्द्रेण समधद्ध्वम् अजीजिपत वनस्पतय इन्द्रं वाजं वि मुच्यध्वम् ॥ (स्कभ्नीत, युयवन्, पितरा, द्विचत्वारिꣳशच्च) ॥ ८ ॥

यूपारोहणम् ॥ सोमऋषिः।

क्षत्रस्योल्बमसि क्षत्रस्य योनिरसि जाय एहि सुवो रोहाव रोहाव हि सुवरहं नावुभयोः सुवो रोक्ष्यामि वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चाऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च। आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो (१) यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताꣳ सुवर्देवाꣳ अगन्मामृता अभूम प्रजापतेः प्रजा अभूम समहं प्रजया सं मया प्रजा समहꣳ

रायस्पोषेण सं मया रायस्पोषोऽन्नाय त्वाऽन्नाद्याय त्वा वाजाय (२) त्वा वाजजित्यायै त्वाऽमृतमसि पुष्टिरसि प्रजननमसि (अपानो, वाजाय, नव च) ॥ ९ ॥

अन्नहोमाः ॥ १-३ त्रिष्टुब्जगती वा, ४-७ अनुष्टुप्।

वाजस्येमं प्रसवः सुषुवे अग्रे सोमꣳ राजानमोषधीष्वप्सु।
ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः ॥
वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः।
स विराजं पर्येति प्रजानन्प्रजां पुष्टिं वर्धयमानो अस्मे ॥
वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट्।
अदित्सन्तं दापयतु प्रजानन्रयिं (१) च नः सर्ववीरां नि यच्छतु ॥
अग्ने अच्छा वदेह नः प्रति नः सुमना भव।
प्र णो यच्छ भुवस्पते धनदा असि नस्त्वम् ॥
प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः।
प्र देवाः प्रोत सूनृता प्र वाग्देवी ददातु नः ॥
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय।
वाचं विष्णुꣳ सरस्वतीꣳ सवितारं (२) च वाजिनम् ॥
सोमꣳ राजानं वरुणमग्निमन्वारभामहे।
आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभि षिञ्चामी—न्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामि ॥ (रयिꣳ, सवितारꣳ, षट्त्रिꣳशच्च) ॥ १० ॥

उज्जितिः ॥ सोमऋषिः।

अग्निरेकाक्षरेण वाचमुदजय—दश्विनौ द्व्यक्षरेण प्राणापानावुदजयतां विष्णुस्त्र्यक्षरेण त्रीन् लोकानुदजयत् सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत् पूषा पञ्चाक्षरेण पङ्क्तिमुदजयद्धाता षडक्षरेण षडृतूनुदजय—न्मरुतः सप्ताक्षरेण सप्तपदाꣳ शक्वरीमुदजयन् बृहस्पतिरष्टाक्षरेण गायत्रीमुदजय—न्मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत् (१) वरुणो दशाक्षरेण विराजमुदजय—दिन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयद् विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन् वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयन् रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजय—न्नादित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजय—न्नदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत् प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत् (अजयत्, षट्चत्वारिꣳशच्च) ॥ ११ ॥

अतिग्राह्या: ॥ ७ पङ्क्तिः, ९ अनुष्टुप्, ११ त्रिष्टुप् । सोमऋषिः ।

उपयामगृहीतोऽसि नृषदं त्वा द्रुषदं भुवनसदमिन्द्राय जुष्टं गृह्णाम्ये॑ष ते योनिरिन्द्राय त्वो॑प-यामगृहीतोऽस्यप्सुषदं त्वा घृतसदं व्योमसदमिन्द्राय जुष्टं गृह्णा॑म्येष ते योनिरिन्द्राय त्वो॑प-यामगृहीतोऽसि पृथिविषदं त्वाऽन्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णा॑म्येष ते योनिरिन्द्राय त्वा ॥

ये ग्रहाः पञ्चजनीना येषां तिस्रः परमजाः ।
दैव्यः कोशः (१) समुब्जितः ।
तेषां विशिप्रियाणामिषमूर्ज॑ समग्रभी॑—
—मेष ते योनिरिन्द्राय त्वा ॥
अपा॑ रसमुद्वयस॑ सूर्यरश्मि॑ समाभृतम् ।
अपा॑ रसस्य यो रसस्तं वो गृह्णाम्युत्तमं—
—मेष ते योनिरिन्द्राय त्वा ॥
अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः ।
स प्रत्युदैद्धरुणो मध्वो अग्र॑ स्वायां यत् तनुवां (२) तनूमैरयत ।
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्ये॑ष ते योनिः प्रजापतये त्वा ॥ (कोशं,-स्तनुवां, त्रयोदश च) ॥ १२ ॥

काम्यायाज्यापुरोऽनुवाक्याः ॥ १-२, ५-८, १०-१२ त्रिष्टुप्, ३-४ अनुष्टुप्, ९ आस्तारपङ्क्तिः, १३ गायत्री, १४ साम्नी । विश्वेदेवा ऋषयः ।

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः ।
अन्विन्द्र॑ रोदसी वावशाने अन्वापो अजिहत जायमानम् ॥
अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥
इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् ।
न ह्यस्या अपरं चन जरसा (१) मरते पतिः ॥
नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।
यस्येदमप्य॑ हविः प्रियं देवेषु गच्छति ॥
यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥
आ ते मह इन्द्रोत्युग्र समन्यवो यत् समरन्त सेनाः ।
पताति दिद्युन्नर्यस्य बाह्वोर्मा ते (२) मनो विष्वद्रियग्विचारीत् ॥
७ (तै. सं.)

मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत् ते ।
नव्ये देष्णे शस्ते अस्मिन् त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥
आ तू भर माकिरेतत् परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।
इन्द्र यत् ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व (३) प्र यन्धि ॥
प्रदातार॑ हवामह इन्द्रमा हविषा वयम् ।
उभा हि हस्ता वसुना पृणस्वाऽऽ प्र यच्छ दक्षिणादोत सव्यात् ॥
प्रदाता वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
अस्मिन् यज्ञे बर्हिष्या निषद्याथा भव यजमानाय शं योः ॥
इन्द्रः सुत्रामा स्ववा॑ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य (४) पतयः स्याम ॥
तस्य वय॑ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववा॑ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥
रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
क्षुमन्तो याभिर्मदेम ॥
प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।
अभीके चिदु लोककृत् सङ्गे समत्सु वृत्रहा ।
अस्माकं बोधि चोदिता नभन्तामन्यकेषाम् ।
ज्याका अधि (५) धन्वसु ॥ (जरसा, मा ते, हर्यश्व, सुवीर्यस्याष्टे,-कं च) ॥ १३ ॥

[पाकयज्ञ॑ ११९ । स॑ध्रुवाः २२० । पुरोक्षं २१५ । बर्हिषो ३०८ । ध्रुवा-२०० ।-मग्नम् ३०४ । देवं सवित-११५ ।-देवस्य १९२ । क्षत्रस्य १०९ । वाजस्या १३६ । ऽग्नि-९६ ।-उपयामगृहीतो ११३ । नु २५१ । त्रयोदश ॥ २६५५ ॥]

[इति प्रथमकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥]

राजसूयः ।

[अथाष्टमः प्रपाठकः ॥ ८ ॥]
अनुमत्यादियागाः नैर्ऋतमन्त्राश्च ॥ विश्वेदेवा ऋषयः ।

अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा ये प्रत्यञ्चः शम्याया अवशीयन्ते तं नैर्ऋतमे-ककपालं कृष्णं वासः कृष्णतूषं दक्षिणा
वीहि स्वाहाऽऽहुतिं जुषाणै एष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेमम॑हसः स्वाहा नमो य इदं चकार॑—

—ऽऽदित्यं चरुं निर्वपति वरो दक्षिणा ऽऽग्नावैष्णवमेकादशकपालं वामनो वही दक्षिणा ऽग्नी-षोमीयमे (१) कादशकपाल॑ हिरण्यं दक्षिणै—न्द्रमेकादशकपालमृषभो वही दक्षिणा ऽऽग्नेय-मष्टाकपालमैन्द्रं दध्यृषभो वही दक्षिणै—न्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथमजो वत्सो दक्षिणा सौम्य॑ श्यामाकं चरुं वासो दक्षिणा सरस्वत्यै चरु॑ सरस्वते चरुं मिथुनौ गावौ दक्षिणा
(अग्नीषोमीयं, चतुस्त्रिंशच्च) ॥ १ ॥

चातुर्मास्येषु प्रथमं वैश्वदेवपर्व ॥ विश्वेदेवा ऋषयः ।
आग्नेयमष्टाकपालं निर्वपति सौम्यं चरु॑ सावित्रं द्वादशकपाल॑ सारस्वतं चरुं पौष्णं चरुं मारुत॑ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालम् ॥ (आग्नेयम्,-द्वादश) ॥ २ ॥

द्वितीयं वरुणप्रघासपर्व ॥ २ गायत्री, ३ विराट्स्थाना, ४ महापङ्क्तिः, ५ अनुष्टुप् । विश्वेदेवा ऋषयः ।
ऐन्द्राग्नमेकादशकपालं मारुतीमामिक्षां वारुणीमामिक्षां कायमेककपालम्
प्रघास्यान् हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः ॥
मो षू ण इन्द्र पृत्सु देवास्तु स्म ते शुष्मिन्नवया ।
मही ह्यस्य मीढुषो यव्या । हविष्मतो मरुतो वन्दते गीः ॥
यद् ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये । यच्छूद्रे यदर्य एनश्चकृमा वयम् ।
यदे (१) कस्याधि धर्मणि तस्यावयजनमसि स्वाहा ॥
अक्रन् कर्म कर्मकृतः सह वाचा मयो भुवा । देवेभ्यः कर्म कृत्वाऽस्तं प्रेत सुदानवः ॥
(वयं यद्, विंशतिश्च) ॥ ३ ॥

तृतीयं साकमेधपर्व ॥ २-३ अनुष्टुप् । विश्वेदेवा ऋषयः ।
अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साक॑ सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मध्यंदिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुम्
पूर्णा दर्वि परा पत सुपूर्णा पुनरापत । वस्नेव वि क्रीणावहा इषमूर्ज॑ शतक्रतो ॥
देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारमिन्नि मे हरा निहारं (१) नि हरामि ते ॥
मरुद्भ्यः क्रीडिभ्यः पुरोडाश॑ सप्तकपालं निर्वपति साक॑ सूर्येणोद्यताग्नेयमष्टाकपालं निर्वपति सौम्यं चरु॑ सावित्रं द्वादशकपाल॑ सारस्वतं चरुं पौष्णं चरुमैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेक-कपालम् ॥ (हरा निहारं, त्रिंशच्च) ॥ ४ ॥

महापितृयज्ञः ॥ ६-७ पङ्क्तिः, ९ आस्तारपङ्क्तिः, १०-१२ गायत्री, १३ शक्वरी । विश्वेदेवा ऋषयः ।
सोमाय पितृमते पुरोडाश॑ षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्यो-ऽभिवान्यायै दुग्धे मन्थ—मेतत् ते तत ये च त्वाम—न्वेतत् ते पितामह प्रपितामह ये च त्वामन्व॑—त्र पितरो यथाभागं मन्दध्व॑

सुसंदृशं त्वा वयं मघवन् मन्दिषीमहि ।
प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशा॑ अनु । योजा न्विन्द्र ते हरी ॥ (१)
अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती । योजा न्विन्द्र ते हरी ॥
अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरोऽमीमृजन्त पितरः ॥
परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः ।
अथा पितॄन्त्सुविदत्रा॑ अपीत यमेन ये सधमादं मदन्ति ॥
मनो न्वा हुवामहे नाराश॑सेन स्तोमेन पितॄणां च मन्मभिः ॥
आ (२) न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥
पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रात॑ सचेमहि ॥
यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहि॑सिम ।
अग्निर्मा तस्मादेनसो गार्हपत्यः प्र मुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम् ॥
(हरी, मन्मभिरा, चतुश्चत्वारिंशच्च) ॥ ५ ॥

त्र्यंबक पुरोडाशाः । ९ महापङ्क्तिः, १० अनुष्टुप् । विश्वेदेवा ऋषयः ।
प्रतिपूरुषमेककपालान्निर्वपत्येकमतिरिक्तं यावन्तो गृह्याः स्मस्तेभ्यः कमकरं पशूना॑ शर्मासि शर्म यजमानस्य शर्म मे यच्छै—क एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वै—ष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषज—मथो अस्मभ्यं भेषज॑ सुभेषजं (१) यथाऽसति । सुगं मेषाय मेष्यै
अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम् ।
यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात् ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥
एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीहि—(२)—अवततधन्वा पिनाकहस्तः कृत्तिवासाः (सुभेषज,-मिहि, त्रीणि च) ॥ ६ ॥

शुनासीर्यम्, इन्द्रतुरीयम्, पञ्चेध्मीयमन्त्राः, अपामार्गहोममन्त्राश्च ॥ विश्वेदेवा ऋषयः ।
ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमे-ककपालं द्वादशगव॑ सीरं दक्षिणा ऽऽग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुं वहिनी धेनुर्दक्षिणा,

ये देवाः पुरःसदोऽग्निनेत्राः*--*दक्षिणसदो यमनेत्राः*--*पश्चात्सदः सवितृनेत्राः*--*उत्तरसदो वरुणनेत्राः*--*उपरिषदो बृहस्पतिनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यो (१) नमस्तेभ्यः स्वाहा समूढꣳ रक्षः संदग्धꣳ रक्ष इदमहꣳ रक्षोऽभि सं दहाम्यग्नये रक्षोघ्ने स्वाहा यमाय*- सवित्रे*- वरुणाय*- बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा प्रष्टिवाही रथो दक्षिणा,
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ
रक्षसो वधं जुहोमि हतꣳ रक्षोऽवधिष्म रक्षो यद्वस्ते तद्दक्षिणा ॥ (तेभ्यः, पञ्चचत्वारिꣳशच्च) ॥ ७ ॥

देविकादि कर्माष्टकम् ॥ विश्वेदेवा ऋषयः ।

धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुं कुह्वै चरुं मिथुनौ गावौ दक्षिणाऽऽग्नावैष्णवमेकादशकपालं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं वामनो वही दक्षिणाऽग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं बभ्रुर्दक्षिणा सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुꣳ श्यामो दक्षिणा वैश्वानरं द्वादशकपालं नि (१) र्वपति हिरण्यं दक्षिणा वारुणं यवमयं चरुमश्वो दक्षिणा (नि,-र्वही च) ॥ ८ ॥

रत्निनां हवींषि, अभिषेचनीयस्य दीक्षणीया च ॥ विश्वेदेवा ऋषयः ।

बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालꣳ राजन्यस्य गृह ऋषभो दक्षिणाऽऽदित्यं चरुं महिष्यै गृहे धेनुर्दक्षिणा नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणाऽऽग्नेयमष्टाकपालꣳ सेनान्यो गृहे हिरण्यं दक्षिणा वारुणं दशकपालꣳ सूतस्य गृहे महानिरष्टो दक्षिणा मारुतꣳ सप्तकपालं ग्रामण्यो गृहे पृश्निर्दक्षिणा सावित्रं द्वादशकपालं (१) क्षत्तुर्गृह उपध्वस्तो दक्षिणाऽऽश्विनं द्विकपालꣳ संग्रहीतुर्गृहे सवात्यौ दक्षिणा पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणेन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रति निर्वपतीन्द्रायाꣳहोमुचेऽयं नो राजा भूत्वा वृत्रं वध्यान्मैत्राबार्हस्पत्यं भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे (२) पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्वि चिनुयाद्ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये मैत्रः स्वयंकृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्मः सैव श्वेता श्वेतवत्सा दक्षिणा (सावित्रं द्वादशकपाल,-माश्वत्थे, अष्टाविꣳशतिश्च) ॥ ९ ॥

देवसुवां हवींषि ॥ विश्वेदेवा ऋषयः ।

अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाꣳ रुद्राय पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणां मित्राय सत्यायाऽऽम्बानां चरुं वरुणाय धर्मपतये यवमयं चरुꣳ

(७।३-६) रक्षोहण...स्वाहा। (७।४-७) -अग्ने देवा। (७।१०-१२) रक्षोघ्ने स्वाहा।

सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां (१) बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनां ये देवा देवसुवः स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजा प्रति त्यन्नाम राज्यमधायि स्वां तनुवं वरुणो अशिश्रेच्छुचेर्मित्रस्य व्रत्या अभूमामन्महि महत ऋतस्य नाम सर्वे व्राता (२) वरुणस्याभूवन्वि मित्र एवैररातिमतारीदसूषुदन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणं न आनड् विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि ॥ (पशूनां, व्राताः, पञ्चत्रिꣳशच्च) ॥ १० ॥

अभिषेकजलग्रहणम् ॥ विश्वेदेवा ऋषयः ।

अर्थेतः स्थापां पतिरसि वृषास्यूर्मिर्वृषसेनोऽसि व्रजक्षितः स्थ मरुतामोजः स्थ सूर्यवर्चसः स्थ सूर्यत्वचसः स्थ मान्दाः स्थ वाशाः स्थ शक्वरीः स्थ विश्वभृतः स्थ जनभृतः स्थाग्नेस्तेजस्याः स्थापामोषधीनाꣳ रसः स्थापो देवीर्मधुमतीरगृह्णन्नूर्जस्वती राजसूयाय चितानाः ।

याभिर्मित्रावरुणावभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्य (१) रातीः ॥

राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त (अत्ये,-कादश च) ॥ ११ ॥

अभिषेकजलसंस्कारः ॥ ५, २० त्रिष्टुप् । विश्वेदेवा ऋषयः ।

देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना अनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः ॥

सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः ।

पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशु (१) र्मातृतमास्वन्तः ॥

क्षत्रस्योल्बमसि क्षत्रस्य योनिरस्याविन्नो अग्निर्गृहपतिराविन्न इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणावृतावृधावाविन्ने द्यावापृथिवी धृतव्रते आविन्ना देव्यदितिर्विश्वरूप्याविन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन् राष्ट्रे महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेन्द्रस्य (२) वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्याच्छत्रुबाधनाः स्थ पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात हिरण्यवर्णावुषसां विरोकेऽयःस्थूणावुदितौ सूर्यस्याऽऽरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च ॥ (शिशु,-रिन्द्रस्य,-चतुश्चत्वारिꣳशच्च) ॥ १२ ॥

दिग्व्यास्थापनम् ॥ विश्वेदेवा ऋषयः ।

समिधमा तिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृत्स्तोमो रथन्तरꣳ सामाग्निर्देवता ब्रह्म द्रविणमुग्रामा तिष्ठ त्रिष्टुप्त्वा छन्दसामवतु पञ्चदशस्तोमो बृहत्सामेन्द्रो देवता क्षत्रं द्रविणं विराजमा तिष्ठ जगती त्वा छन्दसामवतु सप्तदशस्तोमो वैरूपꣳ साम मरुतो देवता विड्द्रविणमुदीचीमा तिष्ठानुष्टुप्त्वा (१) छन्दसामवत्वेकविꣳशस्तोमो वैराजꣳ साम मित्रावरुणौ देवता बलं द्रविणमूर्ध्वामा तिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिꣳशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो द्रविणमीदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः । शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्चा (२) त्यꣳहाः । अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाꣳशाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा (२) ॥ (अनुष्टुप्त्वं, तपाश्च, सरीसृपेभ्यः स्वाहा) ॥ १३ ॥

अभिषेकः ॥ ६ महापङ्क्तिः, १०, १२ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादमृतमसि मृत्योर्मा पाहि दिद्योन्मा पाह्यवेष्टा दन्दशूका निरस्तं नमुचेः शिरः ॥

सोमो राजा वरुणो देवा धर्मसुवश्च ये ।

ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रꣳ सुवन्ताꣳ सोमस्य त्वा द्युम्नेनाभि षिञ्चाम्यग्ने (१) स्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा क्षत्राणां क्षत्रपतिरस्यति दिवस्पाहि ॥

समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनु संचरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः ॥

रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि ।

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता (२) बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥

(अग्ने,-स्तै,-कादश च) ॥ १४ ॥

रथेन दिग्विजयः ॥ १८ जगती । विश्वेदेवा ऋषयः ।

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यान्मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेन विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि मरुतां प्रसवे जेषमाप्तं मनः समहमिन्द्रियेण वीर्येण पशूनां मन्युरसि तवेव मे मन्युर्भूयान्नमो मात्रे पृथिव्यै माहं मातरं पृथिवीꣳ हिꣳसिषं मा (१) मां माता पृथिवी हिꣳसीदियदस्यायुरस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेह्यग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुतामोजसे स्वाहा हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा (२) अद्रिजा ऋतं बृहत् ॥ (हिꣳसिषम्,-र्तजा,-स्त्रीणि च) ॥ १५ ॥

जितवतो राज्ञः सेवोपचारः ॥ ७ गायत्री । विश्वेदेवा ऋषयः ।

मित्रोऽसि वरुणोऽसि समहं विश्वैर्देवैः क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि स्योनामा सीद सुषदामा सीद मा त्वा हिꣳसीन्मा मा हिꣳसीन्नि षसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुर्ब्रह्मा३न् त्वꣳ राजन्ब्रह्माऽसि सवितासि सत्यसवो ब्रह्मा३न् त्वꣳ राजन्ब्रह्मासीन्द्रोऽसि सत्यौजा (१) ब्रह्मा३न् त्वꣳ राजन्ब्रह्मासि मित्रोऽसि सुशेवो ब्रह्मा३न् त्वꣳ राजन्ब्रह्माऽसि वरुणोऽसि सत्यधर्मेन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तेन मे रध्य दिशोऽभ्ययꣳ राजाऽभूत् सुश्लोका३ँ सुमङ्गला३ँ सत्यराजा३न् ॥ अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहा ॥ (सत्यौजा,-श्चत्वारिꣳशच्च) ॥ १६ ॥

संसृपां हवींषि ॥ विश्वेदेवा ऋषयः ।

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा सारस्वतं चरुं वत्सतरी दक्षिणा सावित्रं द्वादशकपालमुपध्वस्तो दक्षिणा पौष्णं चरुꣳ श्यामो दक्षिणा बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वारुणं दशकपालं महानिरष्टो दक्षिणा सौम्यं चरुं बभ्रुर्दक्षिणा त्वाष्ट्रमष्टाकपालꣳ शुण्ठो दक्षिणा वैष्णवं त्रिकपालं वामनो दक्षिणा ॥ (आग्नेयं द्विचत्वारिꣳशत्) ॥ १७ ॥

दशपेयः ॥ विश्वेदेवा ऋषयः ।

सद्यो दीक्षयन्ति सद्यः सोमं क्रीणन्ति पुण्डरिस्रजां प्र यच्छति दशभिर्वत्सतरैः सोमं क्रीणाति दशपेयो भवति शतं ब्राह्मणाः पिबन्ति सप्तदशꣳ स्तोत्रं भवति प्राकाशावध्वर्यवे ददाति स्रजमुद्गात्रे रुक्मꣳ होत्रेऽश्वं प्रस्तोतृप्रतिहर्तृभ्यां द्वादश पष्ठौहीर्ब्रह्मणे वशां मैत्रावरुणायर्षभं ब्राह्मणाच्छꣳसिने वाससी नेष्टापोतृभ्याꣳ स्थूरि यवाचितमच्छावाकायानड्वाहमग्नीधे भार्गवो होता भवति श्रायन्तीयं ब्रह्मसामं भवति वारवन्तीय (१) मग्निष्टोमसामꣳ सारस्वतीरपो गृह्णाति ॥ (वारवन्तीयं, चत्वारि च) ॥ १८ ॥

दिशामवेष्टयः, पञ्चद्वयबन्धः, सारवदुतानां हवींषि च ॥ विश्वेदेवा ऋषयः ।

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा मैत्रावरुणीमामिक्षां वशा दक्षिणा बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणाऽऽदित्यां मल्हां गर्भिणीमा लभते मारुतीं पृश्निं पष्ठौहीमश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालं तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा ॥

(आग्नेयꣳ सप्तचत्वारिꣳशत्) ॥ १९ ॥

प्रयुजां हवींषि ॥ विश्वेदेवा ऋषयः ।

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालं बार्हस्पत्यं चरुं त्वाष्ट्रमष्टाकपालं वैश्वानरं द्वादशकपालं दक्षिणो रथवाहनवाहो दक्षिणा सारस्वतं चरुं निर्वपति पौष्णं चरुं मैत्रं चरुं वारुणं चरुं क्षैत्रपत्यं चरुमादित्यं चरुमुत्तरो रथवाहनवाहो दक्षिणा ॥ (आग्नेयं चतुस्त्रिꣳशत्) ॥ २० ॥

सौत्रामणी ॥ २-३ गायत्री, ४ त्रिष्टुप्, ७ एकपदा त्रिष्टुप् । विश्वेदेवा ऋषयः ।

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन सृजामि सꣳ सोमेन सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व[1] पुनातु ते परिस्रुतꣳ सोमꣳ सूर्यस्य दुहिता ।

वारेण शश्वता तना[2] ॥

वायुः पूतः पवित्रेण प्रत्यङ् सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा[3] ॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।

इहेहैषां कृणुत भोजनानि (१) ये बर्हिषो नमोवृक्तिं न जग्मुः ॥

आश्विनं धूम्रमा लभते सारस्वतं मेषमैन्द्रमृषभमैन्द्रमेकादशकपालं निर्वपति सावित्रं द्वादशकपालं वारुणं दशकपालꣳ सोमप्रतीकाः पितरस्तृप्णुत वडबा दक्षिणा ॥

(भोजनानि, षड्विꣳशतिश्च) ॥ २१ ॥

काम्ययाज्यापुरोऽनुवाक्याः ॥ १-२, ४, ६-७, ९, १६-१९ त्रिष्टुप् ३, ५, ८, गायत्री १० अनुष्टुप् ११ पङ्क्तिः १५ जगती । विश्वेदेवा ऋषयः ।

अग्नाविष्णू महि तद्वां महित्वं वीतं घृतस्य गुह्यानि नाम ।

दमेदमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमा चरण्येत् ॥

अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा ।

दमेदमे सुष्टुतीर्वावृधाना प्रति वां जिह्वा घृतमुच्चरण्येत् ॥

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ।

आ नो दिवो बृहतः (१) पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।

हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य । रास्व रत्नानि दाशुषे ॥

८ (ते ५)

एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।

बृहस्पते सुप्रजा वीरवन्तो वयꣳ स्याम पतयो रयीणाम्[6] ॥

बृहस्पते अति यदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।

यद्दीदयच्छवस (२) ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजाꣳसि सुक्रतू[8] ॥

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।

आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा[9] ॥

अग्निं वः पूर्व्यं गिरा देवमीडे वसूनाम् । सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम्[10] ॥

मक्षू देववतो रथः (३) शूरो वा पृत्सु कासु चित् ।

देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्[11] ॥

न यजमान रिष्यसि न सुन्वान न देवयो[12] ॥

असदत्र सुवीर्यमुत त्यदाश्वश्वियम्[13] ॥ नकिष्टं कर्मणा नशन्न प्र योषन्न योषति[14] ॥

उप क्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।

पृणन्तं च पपुरिं च (४) श्रवस्यवो घृतस्य धारा उप यन्ति विश्वतः[15] ॥

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।

आरे बाधेथां निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्तमस्मत्[16] ॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।

अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत्[17] ॥

सोमापूषणा जनना रयीणां जनना दिवो जनना (५) पृथिव्याः ।

जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम्[18] ॥

इमौ देवौ जायमानौ जुषन्तेमौ तमाꣳसि गूहतामजुष्टा ।

आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु[19]

बृहतः, शवसा, रथः, पपुरिं च, दिवो जनना, पञ्चविꣳशतिश्च) ॥ २२ ॥

[अनुमत्यै ८४ । आग्नेय-१८ । ऐन्द्राग्न-७० । मरुत्वते ८० । सोमाय १४४ । प्रतिपूरुष-१०३ । ऐन्द्राग्नं ९५ । धात्रे ५८ । बार्हस्पत्यं-१२३ । मरुते १२५ । उर्वेतो ६१ । देवीः १४१ । समिध-१५० । सोमस्ये-१११ । इन्द्रस्य १०३ । मित्र-९० । आग्नेयं ४२ । सद ५४ । आग्नेय-४७ । आग्नेयं-३४ । स्वाद्वीं त्वा ७६ । अग्नाविष्णू २७५ । द्वाविꣳशतिः ॥ २०९४]

[॥ इति प्रथमकाण्डे अष्टमः प्रपाठकः ॥ ८ ॥]

[युज १५३० । आर्षो १६९० । देवस्या-१५६० । ऽऽददे १८१० । देवासुराः २०१७ । सं त्वा २५०९ । पाकयज्ञ -२६५५ । अनुमत्या २०९४ । अष्टौ ॥ ८ ॥ १६५८२]

॥ इति प्रथमं काण्डं सम्पूर्णम् ॥ १ ॥

अथ द्वितीयं काण्डम् ।

पशुविधानम् ।

[अथ प्रथमः प्रपाठकः ॥ १ ॥]

१-६ भूति-ग्राम-प्रजाकामस्य आमयाविनश्च, ७-९ प्रजाकामस्य, १० पशुकामस्य च पशवः । विश्वेदेवा ऋषयः ॥

वायव्यꣳ श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवातिक्षिप्रा देवतेत्याहुः सैनमीश्वरा प्रदह इत्येतमेव सन्तं वायवे नियुत्वत आ लभेत नियुद्वा अस्य धृतिर्धृत एव भूतिमुपैत्यप्रदाहाय भवत्येव (१) वायवे नियुत्वत आ लभेत ग्रामकामो वायुर्वा इमाः प्रजा नस्योता नेनीयते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्रजा नस्योता नि यच्छति ग्राम्येव भवति नियुत्वते भवति ध्रुवा एवास्मा अनपगाः करोति वायवे नियुत्वत आ लभेत प्रजाकामः प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्य प्रजाया (२) अपक्रामतो योऽलं प्रजायै सन् प्रजां न विन्दते वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्राणापानाभ्यां प्रजां प्र जनयति विन्दते प्रजां वायवे नियुत्वत आ लभेत ज्योगामयावी प्राणो वै वायुरपानो नियुत् प्राणापानौ खलु वा एतस्मादपक्रामतो यस्य ज्योगामयति वायुमेव नियुत्वन्तꣳ स्वेन भागधेयेनोप (३) धावति स एवास्मिन् प्राणापानौ दधात्युत यदीतासुर्भवति जीवत्येव प्रजापतिर्वा इदमेक आसीत् सोऽकामयत प्रजाः पशून्त्सृजेयेति स आत्मनो वपामुदक्खिदत् तामग्नौ प्रागृह्णात् ततोऽजस्तूपरः समभवत् तꣳ स्वायै देवताया आऽलभत ततो वै स प्रजाः पशूनसृजत यः प्रजाकामः (४) पशुकामः स्यात् स एतं प्राजापत्यमजं तूपरमा लभेत प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां पशून् प्र जनयति यच्छ्मश्रुणस्तत् पुरुषाणाꣳ रूपं यत् तूपरस्तदश्वानां यदन्यतोदन् तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानामेतावन्तो वै ग्राम्याः पशवस्तान् (५) रूपेणैवाव रुन्धे सोमापौष्णं त्रैतमा लभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभि जायेते ऊर्जं पुष्टिं तृतीयः सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयत्यौदुम्बरो यूपो (६) भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे[13] ॥ (एव, प्रजाया, अप, प्रजाकामः, स्तान्, यूप, एकान्नत्रिꣳशच्च) ॥ १ ॥

१-४ अक्षोदरगृहीतस्य, ५ पशुप्रजाकामस्य, ६-१० ब्रह्मवर्चसकामस्य, ११-१२ विद्वत्सभाजयार्थिनः, १३-१६ तीव्ररोगमहितस्य, प्रजाकामस्य, विदुषो जनानुरागार्थिनः, पौरोहित्यस्पर्धावतश्च पशुविधानम् ॥ विश्वेदेवा ऋषयः ।

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराचीरायन् ता वरुणमगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीद्वरं वृणीष्वाथ मे पुनर्देहीति तासां वरमाऽलभत स कृष्ण एकशितिपादभवद्यो वरुणगृहीतः स्यात् स एतं वारुणं कृष्णमेकशितिपादमा लभेत वरुण-(१) -मेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति कृष्ण एकशितिपाद्भवति वारुणो ह्येष देवतया समृद्ध्यै सुवर्भानुरासुरः सूर्यं तमसाऽविध्यत् तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्य यत् प्रथमं तमोऽपाघ्नन्त्सा

कृष्णाऽविरभवद्यद् द्वितीयꣳ सा फल्गुनी यत् तृतीयꣳ सा बलक्षी यदध्यस्थाद्वपाकृन्तन्त्साऽविर्वशा (२) समभवत् ते देवा अब्रुवन् देवपशुर्वा अयꣳ समभूत् कस्मा इममा लप्स्यामह इत्यथ वै तर्ह्यल्पा पृथिव्यासीदजाता ओषधयस्तामविं वशामादित्येभ्यः कामायाऽलभन्त ततो वा अप्रथत पृथिव्यजायन्तौषधयो यः कामयेत प्रथेय पशुभिः प्र प्रजया जायेयेति स एतामविं वशामादित्येभ्यः कामाया-(३) -ऽऽलभेतादित्यानेव कामꣳ स्वेन भागधेयेनोप धावति त एवैनं प्रथयन्ति पशुभिः प्र प्रजया जनयन्त्यसावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एता मल्हा आऽलभन्ताऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्हस्पत्यां ताभिरेवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एता मल्हा आ लभेता-(४) -ऽऽग्नेयीं कृष्णग्रीवीꣳ सꣳहितामैन्द्रीꣳ श्वेतां बार्हस्पत्यामेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन् ब्रह्मवर्चसं दधति ब्रह्मवर्चस्येव भवति वसन्ता प्रातराग्नेयीं कृष्णग्रीवीमा लभेत ग्रीष्मे मध्यंदिने सꣳहितामैन्द्रीꣳ शरदपराह्णे श्वेतां बार्हस्पत्यां त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता प्रातर्ग्रीष्मे मध्यंदिने शरदपराह्णे यावन्त्येव तेजाꣳसि तान्येवा (५) ऽव रुन्धे संवत्सरं पर्यालभ्यन्ते संवत्सरो वै ब्रह्मवर्चसस्य प्रदाता संवत्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति गर्भिणयो भवन्तीन्द्रियं वै गर्भ इन्द्रियमेवास्मिन् दधति सारस्वतीं मेषीमा लभेत य ईश्वरो वाचो वदितोः सन् वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् (६) वाचं दधाति प्रवदिता वाचो भवत्यपन्नदती भवति तस्मान्मनुष्याः सर्वां वाचं वदन्त्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसमुत यदीतासुर्भवति जीवत्येव सौम्यं बभ्रुमा लभेताऽऽग्नेयं कृष्णग्रीवं प्रजाकामः सोमो (७) वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते प्रजामाग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुं यो ब्राह्मणो विद्यामनूच्य न विरोचेत यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यत् सौम्यो ब्रह्मवर्चसं तेन कृष्णग्रीव आग्नेयो भवति तम एवास्मादप हन्ति श्वेतो भवति (८) रुचमेवास्मिन् दधाति बभ्रुः सौम्यो भवति ब्रह्मवर्चसमेवास्मिन् त्विषिं दधात्याग्नेयं कृष्णग्रीवमा लभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायाꣳ स्पर्धमान आग्नेयो वै ब्राह्मणः सौम्यो राजन्योऽभितः सौम्यमाग्नेयौ भवतस्तेजसैव ब्रह्मणोभयतो राष्ट्रं परि गृह्णात्येकधा समावृङ्क्ते पुर एनं दधते[9] ॥ (लभेत वर्णं, वशे, -ऽनमवि, वशामादित्येभ्यः कामाय, मल्हा आ लभेत, तान्येव, सैवास्मिन्, सोमो, श्वेतो भवति, त्रिचत्वारिꣳशच्च) ॥ २ ॥

१-३ स्पर्धमानस्य, ४ सङ्ग्रामार्थिनः, ५-७ ग्रामकामस्य, ८ अन्नकामस्य, १० राज्यकामस्य, ११ पुनः प्रतिष्ठाकामस्य, १२ पापक्षयार्थिनः, १३ राज्यार्थिनश्च पशुविधानम् ॥ विश्वेदेवा ऋषयः ।

देवासुरा एषु लोकेष्वस्पर्धन्त स एतं विष्णुर्वामनमपश्यत् तꣳ स्वायै देवताया आऽलभत ततो वै स इमाँल्लोकानभ्यजयद्वैष्णवं वामनमा लभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभि जयति विषम आ लभेत विषमा इव हीमे लोकाः समृद्ध्या इन्द्राय मन्युमते मनस्वते ललामं प्राशृङ्गमा लभेत

संग्रामे (१) संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति जयति तꣳ संग्राम-मिन्द्राय मरुत्वते पृश्निसक्थमा लभेत ग्रामकाम इन्द्रमेव मरुत्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति यदृषभस्तेन-(२)-ऐन्द्रो यत् पृश्निस्तेन मारुतः समृद्ध्यै पश्चात् पृश्निसक्थो भवति पश्चादन्ववसायिनीमेवास्मै विशं करोति सौम्यं बभ्रुमा लभेतान्नकामः सौम्यं वा अन्नꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवति बभ्रुर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै सौम्यं बभ्रुमा लभेत यमलꣳ (३) राज्याय सन्तꣳ राज्यं नोपनमेत् सौम्यं वै राज्यꣳ सोममेव स्वेन भागधेयेनोप धावति स एवास्मै राज्यं प्र यच्छत्युपैनꣳ राज्यं नमति बभ्रुर्भवत्येतद्वै सोमस्य रूपꣳ समृद्ध्यै इन्द्राय वृत्रतुरे ललामं प्राशृङ्गमा लभेत गतश्रीः प्रतिष्ठाकामः पाप्मानमेव वृत्रं तीर्त्वा प्रतिष्ठां गच्छती-न्द्रायाभिमातिघ्ने ललामं प्राशृङ्गमा (४) लभेत यः पाप्मना गृहीतः स्यात् पाप्मा वा अभिमातिरिन्द्रमेवाभिमातिहनꣳ स्वेन भागधेयेनोप धावति स एवास्मात् पाप्मानमभिमातिं प्र णुदते इन्द्राय वज्रिणे ललामं प्राशृङ्गमा लभेत यमलꣳ राज्याय सन्तꣳ राज्यं नोपनमेदिन्द्रमेव वज्रिणꣳ स्वेन भागधेयेनोप धावति स एवास्मै वज्रं प्र यच्छति स एनं (५) वज्रो भूत्या इन्ध उपैनꣳ राज्यं नमति ललामः प्राशृङ्गो भवत्येतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥ (संग्रामे, तेन, -ऽलं, -अभिमातिघ्ने ललामं प्राशृङ्गमे, -नं, पञ्चदश च) ॥ ३ ॥

१-७ ब्रह्मवर्चसकामस्य, ८ स्वर्दोषनिवारणार्थिनः, ९-१० भ्रातृव्यवतः, ११ पापविमुक्तिकामस्य, १२-१५ भ्रष्टराज्यस्य च पशुविधानम् । विश्वेदेवा ऋषयः ।

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतां दशर्षभामालभन्त तयैवास्मिन् रुचमदधु-र्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतां दशर्षभामा लभेताममेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति वसन्ता प्रातस्त्रीन् ललामाना लभेत ग्रीष्मे मध्यन्दिने (१) त्रीञ्छितिपृष्ठाञ्छरद्यपराह्णे त्रीञ्छितिवारान् त्रीणि वा आदित्यस्य तेजाꣳसि वसन्ता प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे यावन्त्येव तेजाꣳसि तान्येवाव रुन्धे त्रयस्त्रय आ लभ्यन्तेऽभिपूर्वमेवास्मिन् तेजो दधाति संवत्सरं पर्यालभ्यन्ते संवत्सरो वै ब्रह्मवर्चसस्य प्रदाता संवत्सर एवास्मै ब्रह्मवर्चसं प्र यच्छति ब्रह्मवर्चस्येव भवति संवत्सरस्य परस्तात् प्राजापत्यं कद्रु-(२)-मा लभेत प्रजापतिः सर्वा देवता देवतास्वेव प्रति तिष्ठति यदि बिभीयाद् दुश्चर्मा भविष्यामीति सोमापौष्णꣳ श्याममा लभेत सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति देवाश्च वै यमश्चास्मिँल्लोकेऽस्पर्धन्त स यमो देवानामिन्द्रियं वीर्यमयुवत तद्यमस्य (३) यमत्वं ते देवा अमन्यन्त यमो वा इदमभूद्यद्वयꣳ स्म इति ते प्रजापतिमुपाधावन्त्स एतौ प्रजापतिरात्मन उक्षवशौ निरमिमीत ते देवा वैष्णावरुणीं वशामालभन्तैन्द्रमुक्षाणं तं वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदन्तैन्द्रेणैवास्येन्द्रियमवृञ्जत यो भ्रातृव्यवान् स्यात् स स्पर्ध-

मानो वैष्णावरुणीं (४) वशामा लभेतैन्द्रमुक्षाणं वरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्र णुदत ऐन्द्रेणैवास्येन्द्रियं वृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवती-न्द्रो वृत्रमहन् तं वृत्रो हतः षोडशभिर्भोगैरसिनात् तस्य वृत्रस्य शीर्षतो गाव उदायन् ता वैदेह्योऽभवन् तासामृषभो जघनेऽनूदैत् तमिन्द्रो (५) ऽचायत् सोऽमन्यत यो वा इममालभेत मुच्येतास्मात् पाप्मन इति स आग्नेयं कृष्णग्रीवमालभतैन्द्रमृषभं तस्याग्निरेव स्वेन भागधेयेनोपसृतः षोडशधा वृत्रस्य भोगानप्यदहदैन्द्रेणेन्द्रियमात्मन्नधत्त यः पाप्मना गृहीतः स्यात् स आग्नेयं कृष्णग्रीवमा लभेतैन्द्रमृषभमग्निरेवास्य स्वेन भागधेयेनोपसृतः (६) पाप्मानमपि दहत्यैन्द्रेणेन्द्रियमात्मन् धत्ते मुच्यते पाप्मनो भवत्येव द्यावापृथिव्यां धेनुमा लभेत ज्योगपरुद्धोऽनयोर्हि वा एषोऽप्रतिष्ठितोऽथैष ज्योगपरुद्धो द्यावापृथिवी एव स्वेन भागधेयेनोप धावति ते एवैनं प्रतिष्ठां गमयतः प्रत्येव तिष्ठति पर्यारिणी भवति पर्यारीव ह्येतस्य राष्ट्रं यो ज्योगपरुद्धः समृद्ध्यै वायव्यं (७) वत्समा लभेत वायुर्वा अनयोर्वत्स इमे वा एतस्मै लोका अपशुष्का विडपशुष्काऽथैष ज्योगपरुद्धो वायुमेव स्वेन भागधेयेनोप धावति स एवास्मा इमाँल्लोकान् विशं प्र दापयति प्रास्मा इमे लोकाः स्नुवन्ति भुञ्जत्येनं विडुप तिष्ठते ॥ (मध्यन्दिने, कद्रुं, यमस्य, स्पर्धमानो वैष्णावरुणीं, तमिन्द्रो, ऽस्य स्वेन भागधेयेनोपसृतो, वायव्यं, द्विचत्वारिꣳशच्च) ॥ ४ ॥

१-५ पशुकामस्य, ६ प्रजाकामस्य, ७-८ भूतिकामस्य, ९-११ विच्छिन्नसोमपीथस्य, १२-१६ अभिचरतश्च पशवः । विश्वेदेवा ऋषयः ।

इन्द्रो वलस्य बिलमपौर्णोत् स य उत्तमः पशुरासीत् तं पृष्ठं प्रति सङ्गृह्योदक्खिदत् तꣳ सहस्रं पशवोऽनूदायन्त्स उन्नतोऽभव-द्यः पशुकामः स्यात् स एतमैन्द्रमुन्नतमा लभेतेन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भव-त्युन्नतो (१) भवति साहस्री वा एषा लक्ष्मी यदुन्नतो लक्ष्मियैव पशूनव रुन्धे यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमा लभेतैतस्मिन् वै तत् सहस्रमध्यतिष्ठत् तस्मादेष वामनः समीषितः पशुभ्य एव प्रजातेभ्यः प्रतिष्ठां दधाति कोऽर्हति सहस्रं पशून् प्राप्तुमित्याहुरहोरात्राण्येव सहस्रꣳ सम्पाद्याऽऽ लभेत पशवो (२) वा अहोरात्राणि पशूनेव प्रजातान् प्रतिष्ठां गमय-त्योषधीभ्यो वेहतमा लभेत प्रजाकाम ओषधयो वा एतं प्रजायै परि बाधन्ते योऽलं प्रजायै सन् प्रजां न विन्दत ओषधयः खलु वा एतस्यै सूतुमपि घ्नन्ति या वेहद्भवत्योषधीरेव स्वेन भागधेयेनोप धावति ता एवास्मै स्वाद्योनेः प्रजां प्र जनयन्ति विन्दते (३) प्रजामापो वा ओषधयोऽसत् पुरुष आप एवास्मा असतः सद्ददति तस्मादाहुर्यश्चैवं वेद यश्च नाऽऽपस्त्वावासतः सद्ददती-त्यैन्द्रीꣳ सूतवशामा लभेत भूतिकामोऽजातो वा एष योऽलं भूत्यै सन् भूतिं न प्राप्नोतीन्द्रं खलु वा एषा सूत्वा वशाऽभव-(४)-दिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येव यꣳ सूत्वा वशा स्यात् तमैन्द्रमेवाऽऽलभेतैतद्वाव तदिन्द्रियꣳ साक्षादेवेन्द्रियमव रुन्धे ऐन्द्राग्नं पुनरुत्सृष्टमा लभेत य आ तृतीयात् पुरुषात् सोमं न पिबेद्विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणः सन्ना (५) तृतीयात् पुरुषात् सोमं न पिबतीन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र

यच्छत उपैनꣳ सोमपीथो नमति यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे यदाग्नेयो भवत्याग्नेयो वै ब्राह्मणः स्वामेव देवतामनु सं तनोति पुनरुत्सृष्टो भवति पुनरुत्सृष्ट इव ह्येतस्य (६) सोमपीथः समृद्ध्यै ब्राह्मणस्पत्यं तूपरमा लभेताभिचरन् ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति तूपरो भवति क्षुरपविर्वा एषा लक्ष्मी यत् तूपरः समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो (७) भिनत्त्येवैनम् ॥ (भवत्युन्नतः, पशवो, विन्दते ऽभवत्, सन्, तस्य, इध्म, त्रीणि च) ॥ ५ ॥

१-२ ग्रामकामस्य समानेषु श्रेष्ठ्यकामस्य च, ३-६ अन्नकामस्य, ७-८ इन्द्रियकामस्य, ९-१० दानकर्तृक (स्वप्रतिग्रहीतृक) दानकामस्य, ११-१२ अन्नकामस्य, १३-१४ ग्रामकामस्य, १५-१६ अज्ञातचिररोगग्रस्तस्य च पशवः ॥ विश्वेदेवा ऋषयः ।

बार्हस्पत्यꣳ शितिपृष्ठमा लभेत ग्रामकामो यः कामयेत पृष्ठꣳ समानानाꣳ स्यामिति बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनं पृष्ठꣳ समानानां करोति ग्राम्येव भवति शितिपृष्ठो भवति बार्हस्पत्यो ह्येष देवतया समृद्ध्यै पौष्णꣳ श्याममा लभेतान्नकामोऽन्नं वै पूषा पूषणमेव स्वेन भागधेयेनोप धावति स एवास्मा (१) अन्नं प्र यच्छत्यन्नाद एव भवति श्यामो भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै मारुतं पृश्निमा लभेतान्नकामोऽन्नं वै मरुतो मरुत एव स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति पृश्निर्भवत्येतद्वा अन्नस्य रूपꣳ समृद्ध्यै ऐन्द्रमरुणमा लभेतेन्द्रियकाम इन्द्रमेव (२) स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं दधातीन्द्रियाव्येव भव-त्यरुणो भ्रूमान् भवत्येतद्वा इन्द्रस्य रूपꣳ समृद्ध्यै सावित्रमुपध्वस्तमा लभेत सनिकामः सविता वै प्रसवानामीशे सवितारमेव स्वेन भागधेयेनोप धावति स एवास्मै सनिं प्र सुवति दानकामा अस्मै प्रजा भव-न्त्युपध्वस्तो भवति सावित्रो ह्येष (३) देवतया समृद्ध्यै वैश्वदेवं बहुरूपमा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति बहुरूपो भवति बहुरूपꣳ ह्यन्नꣳ समृद्ध्यै वैश्वदेवं बहुरूपमा लभेत ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै (४) सजातान् प्र यच्छन्ति ग्राम्येव भवति बहुरूपो भवति बहुदेवत्यो ह्येष समृद्ध्यै प्राजापत्यं तूपरमा लभेत यस्यानाज्ञातमिव ज्योगामयेत् प्राजापत्यो वै पुरुषः प्रजापतिः खलु वै तस्य वेद यस्यानाज्ञातमिव ज्योगामयति प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवैनं तस्मात् स्रामान्मुञ्चति तूपरो भवति प्राजापत्यो ह्ये-(५)-ष देवतया समृद्ध्यै ॥ (अस्मा, एव, -षो, -स्मै, हि, त्रीणि च) ॥ ६ ॥

१-३ ब्रह्मवर्चसकामस्य, ४ वृष्टिकामस्य, ५ प्रजाकामस्य, ६ अन्नकामस्य, ७ ग्रामकामस्य, ८-९ ब्रह्मवर्चसकामस्य, १०-११ अभिचरतश्च पशवः ॥ विश्वेदेवा ऋषयः ।

वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः परापतत् तं बृहस्पतिरुपागृह्णात् सा शितिपृष्ठा वशाऽभवद्यो द्वितीयः परापतत् तं मित्रावरुणावुपागृह्णीतां सा द्विरूपा वशाऽभवद्यस्तृतीयः परापतत्

तं विश्वे देवा उपागृह्णन्त्सा बहुरूपा वशाऽभवद्यश्चतुर्थः परापतत् स पृथिवीं प्राविशत् तं बृहस्पतिर- (१) -भ्यगृह्णादस्त्वेवायं भोगायेति स उक्षवशः समभवद्यल्लोहितं परापतत् तद्रुद्र उपागृह्णात् सा रौद्री रोहिणी वशाऽभव-द्बार्हस्पत्याꣳ शितिपृष्ठामा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु (२) वै ब्रह्मवर्चसं छन्दसामेव रसेन रसं ब्रह्मवर्चसमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत वृष्टिकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै पर्जन्यो वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां पर्जन्यं वर्षयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु वै वृष्टिश्छन्दसामेव रसेन (३) रसं वृष्टिमव रुन्धे मैत्रावरुणीं द्विरूपामा लभेत प्रजाकामो मैत्रं वा अहर्वारुणी रात्रिरहोरात्राभ्यां खलु वै प्रजाः प्र जायन्ते मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अहोरात्राभ्यां प्रजां प्र जनयतश्छन्दसां वा एष रसो यद्वशा रस इव खलु वै प्रजा छन्दसामेव रसेन रसं प्रजामव (४) रुन्धे वैश्वदेवीं बहुरूपामा लभेतान्नकामो वैश्वदेवं वा अन्नं विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु वा अन्नं छन्दसामेव रसेन रसमन्नमव रुन्धे वैश्वदेवीं बहुरूपामा लभेत ग्रामकामो वैश्वदेवा वै (५) सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति छन्दसां वा एष रसो यद्वशा रस इव खलु वै सजाताश्छन्दसामेव रसेन रसꣳ सजातानव रुन्धे बार्हस्पत्यमुक्षवशमा लभेत ब्रह्मवर्चसकामो बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं (६) दधाति ब्रह्मवर्चस्येव भवति वशं वा एष चरति यदुक्षा वश इव खलु वै ब्रह्मवर्चसं वशेनैव वशं ब्रह्मवर्चसमव रुन्धे रौद्रीꣳ रोहिणीमा लभेताभिचरन् रुद्रमेव स्वेन भागधेयेनोप धावति तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छति रोहिणी भवति रौद्री ह्येषा देवतया समृद्ध्यै स्फ्यो यूपो (७) भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्येवैनं वैभीदक इध्मो भिनत्त्येवैनम् ॥ (अभि, खलु, रसेना, -ऽव, ब्रह्मवर्चसं, यूप, एकान्नविꣳशतिश्च) ॥ ७ ॥

१-३ ब्रह्मवर्चसकामस्य, ४-७ अभिचरतः, ८ महायज्ञप्राप्तिकामिनः, ९-१० पशुकामस्य, ११-१२ समव (-प्रतिष्ठा पूर्ति-सन्धि) कामस्य, १३-१६ वृष्टिकामस्य च पशवः ॥ विश्वेदेवा ऋषयः ।

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एताꣳ सौरीꣳ श्वेतां वशामालभन्त तयैवास्मिन् रुचमदधु-र्यो ब्रह्मवर्चसकामः स्यात् तस्मा एताꣳ सौरीꣳ श्वेतां वशामा लभेताममेवाऽऽदित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवति बैल्वो यूपो भवत्यसौ (१) वा आदित्यो यतोऽजायत ततो बिल्व उदतिष्ठत् सयोन्येव ब्रह्मवर्चसमव रुन्धे ब्राह्मणस्पत्यां बभ्रुकर्णीमा लभेताभिचरन् वारुणं दशकपालं पुरस्तान्निर्वपेद्वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणा स्तृणुते बभ्रुकर्णी भवत्येतद्वै ब्रह्मणो रूपꣳ समृद्ध्यै स्फ्यो यूपो भवति वज्रो वै स्फ्यो वज्रमेवास्मै प्र हरति शरमयं बर्हिः शृणात्ये-(२)-वैनं वैभीदक इध्मो भिनत्त्येवैनं वैष्णवं वामनमा लभेत

यं यज्ञो नोपनमेद्विष्णुर्वै यज्ञो विष्णुमेव स्वेन भागधेयेनोप धावति स एवास्मै यज्ञं प्र यच्छत्युपैनं यज्ञो नमति वामनो भवति वैष्णवो ह्येष देवतया समृद्ध्यै त्वाष्ट्रं वडबमा लभेत पशुकामस्त्वष्टा वै पशूनां मिथुनानां (३) प्रजनयिता त्वष्टारमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् मिथुनान् प्र जनयति प्रजा हि वा एतस्मिन् पशवः प्रविष्टा अथैष पुमान्त्सन् वडबः साक्षादेव प्रजां पशूनव रुन्धे मैत्रꣳ श्वेतमा लभेत संग्रामे संयत्ते समयकामो मित्रमेव स्वेन भागधेयेनोप धावति स एवैनं मित्रेण सं नयति (४) विशालो भवति व्यवसाययत्येवैनं प्राजापत्यं कृष्णमा लभेत वृष्टिकामः प्रजापतिर्वै वृष्ट्या ईशे प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयति कृष्णो भवत्येतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्धे शबलो भवति विद्युतमेवास्मै जनयित्वा वर्षयत्यवाश्रृङ्गो भवति वृष्टिमेवास्मै नि यच्छति ॥ (अश्वैः, श्रृणाति, मिथुनानां, नयति, पञ्चविꣳशतिश्च) ॥ ८ ॥

१-२ अन्नाद्यकामस्य, ३-५ अन्नकामस्य, ६ दीर्घरोगिणः ७-८ पुष्टिकामस्य च पशुविधानम् ॥ विश्वेदेवा ऋषयः ।

वरुणꣳ सुषुवाणमन्नाद्यं नोपानमत् स एतां वारुणीं कृष्णां वशामपश्यत् ताꣳ स्वायै देवताया आ लभत ततो वै तमन्नाद्यमुपानमद्यमलमन्नाद्याय सन्तमन्नाद्यं नोपनमेत् स एतां वारुणीं कृष्णां वशामा लभेत वरुणमेव स्वेन भागधेयेनोप धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद (१) एव भवति कृष्णा भवति वारुणी ह्येषा देवतया समृद्ध्यै मैत्रꣳ श्वेतमा लभेत वारुणं कृष्णमपां चौषधीनां च संधावन्नकामो मैत्रीर्वा ओषधयो वारुणीरापोऽपां च खलु वा ओषधीनां च रसमुप जीवामो मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा अन्नं प्र यच्छतोऽन्नाद एव भवत्य-(२)-पां चौषधीनां च संधाव लभत उभयस्यावरुद्ध्यै विशाखो यूपो भवति द्वे ह्येते देवते समृद्ध्यै मैत्रꣳ श्वेतमा लभेत वारुणं कृष्णं ज्योगामयावी यन्मैत्रो भवति मित्रेणैवास्मै वरुणꣳ शमयति यद्वारुणः साक्षादेवैनं वरुणपाशान्मुञ्चत्युत यदीतासुर्भवति जीवत्येव देवा वै पुष्टिं नाविन्दन् (३) तां मिथुनेऽपश्यन् तस्यां न समराधयन्तावश्विनावब्रूतामावयोर्वा एषा मैतस्यां वदध्वमिति साश्विनोरेवाभवद्यः पुष्टिकामः स्यात् स एतामाश्विनीं यमीं वशामा लभेताश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् पुष्टिं धत्तः पुष्यति प्रजया पशुभिः । (अन्नादो,ऽन्नाद एव भवत्य,-विन्दन्, पञ्चचत्वारिꣳशच्च) ॥ ९ ॥

१ दुर्ब्राह्मणस्य सोमपिपासोः, २ मृषाभिशस्तस्य, ३ आश्विनशस्त्रकाले सूर्यानाविर्भाववतश्च पशवः ।

आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेदश्विनौ वै देवानामसोमपावास्तां तौ पश्चा सोमपीथं प्राप्नुतामश्विनावेतस्य देवता यो दुर्ब्राह्मणः सोमं पिपासत्यश्विनावेव स्वेन भागधेयेनोप धावति तावेवास्मै सोमपीथं प्र यच्छत उपैनꣳ सोमपीथो नमति यद्धूम्रो भवति धूम्रिमाणमेवास्मादप हन्ति ललामो (१) भवति मुखत एवास्मिन् तेजो दधाति वायव्यं गोमृगमा लभेत यमजघ्निवाꣳसमभिशꣳसेयुरपूता वा एतं वागृच्छति यमजघ्निवाꣳसमभिशꣳसन्ति नैष ग्राम्यः पशुर्नारण्यो यद्गोमृगो नेवैष ग्रामे नारण्ये यमजघ्निवाꣳसमभिशꣳसन्ति वायुर्वै देवानां पवित्रं वायुमेव स्वेन भागधेयेनोप धावति स एवै-(२)-नं पवयति पराची वा एतस्मै व्युच्छन्ती व्युच्छति तमः पाप्मानं प्र विशति यस्याऽऽश्विने शस्यमाने सूर्यो नाऽऽविर्भवति सौर्यं बहुरूपमा लभेतामुमेवादित्यꣳ स्वेन भागधेयेनोप धावति स एवास्मात् तमः पाप्मानमप हन्ति प्रतीच्यस्मै व्युच्छन्ती व्युच्छत्यप तमः पाप्मानꣳ हते ॥ (लभेत, स एव, षट्चत्वारिꣳशच्च) ॥ १० ॥

काम्येष्टियाज्यापुरोऽनुवाक्याः ॥ त्रिष्टुप्, ७ द्विपदा; ९ जगती; १२-१६ अनुष्टुप्, १८, २१ गायत्री । विश्वेदेवा ऋषयः

इन्द्रं वो विश्वतस्परी*— इन्द्रं नरो*— मरुतो यद्ध वो दिवो*— या वः शर्म*— ॥

भरेष्विन्द्रꣳ सुहवꣳ हवामहेꣳहोमुचꣳ सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणꣳ सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥
प्रिया वो नाम (१) हुवे तुराणाम् । आ यत् तृपन्मरुतो वावशानाः ॥
श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥
अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रेभिरभि रक्षतु त्मना ।
इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैर्नो वरुणः सꣳ शिशातु ॥
सं नो देवो वसुभिरग्निः सꣳ (२) सोमस्तनूभी रुद्रियाभिः ।
समिन्द्रो मरुद्भिर्यज्ञियैः समादित्यैर्नो वरुणो अजिज्ञिपत् ॥
यथाऽऽदित्या वसुभिः संबभूवुर्मरुद्भी रुद्राः समजानताभि ।
एवा त्रिणामन्नहृणीयमाना विश्वे देवाः समनसो भवन्तु ॥
कुत्रा चिद्यस्य समृतौ रण्वा नरो नृषदने । अर्हन्तश्चिद्यमिन्धते संजनयन्ति जन्तवः ॥
सं यदिषो वनामहे सꣳ हव्या मानुषाणाम् ।
उत द्युम्नस्य शवस (३) ऋतस्य रश्मिमा ददे ॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तराऽसत् ॥
शुचिरपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥
धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा (४) असुर्यमृतावानश्चयमाना ऋणानि ॥

११। १-२ (सं. ११३।१२); ११।३-४ (सं. १।५।११)

तिस्रो भूमीर्धारयन् त्रीꣳरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनाऽऽदित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥
त्यान्नु क्षत्रियाꣳ अव आदित्यान् याचिषामहे । सुमृडीकाꣳ अभिष्टये ॥
न दक्षिणा वि चिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद् (५) युष्मानीतो अभयं ज्योतिरश्याम् ॥
आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शन्तमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥
इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युरा चके ॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः ॥
(नाम, सꣳ, शवसा, रक्षमाणा, धीर्या चिदे,-कान्नपञ्चाशच्च) ॥ ११ ॥

(वायव्यं ३१२ । प्रजापति-४४३ ।-देवासुरा २६५ । असा-३९२ ।-विग्री ३५३ । बार्हस्पत्यं २५३ । वषट्कारो २६९ । ऽसौ २५० । वरुण-१५५ ।-माश्विन-१४६ ।-मिन्द्र-१९९ । -मेकादश ॥ ३२७८ ॥]

[इति द्वितीयकाण्डे प्रथमः प्रपाठकः ॥ १ ॥]

इष्टिविधानम् ।

[अथ द्वितीयः प्रपाठकः ॥ २ ॥]

१-२ प्रजाकामस्य, ३ स्पर्धमानस्य, ४ सङ्ग्राममुपप्रयास्यतः, ५ जितशत्रोः, ६-७ समामेष्यतः, ८-९ समां प्राप्तस्य च पुरोडाशाश्चरवश्च ॥ विश्वेदेवा ऋषयः ॥

प्रजापतिः प्रजा असृजत ताः सृष्टा इन्द्राग्नी अपागूहताꣳ सोऽचायत् प्रजापतिरिन्द्राग्नी वै मे प्रजा अपाघुक्षतामिति स एतमैन्द्राग्नमेकादशकपालमपश्यत् तं निरवपत् तावस्मै प्रजाः प्रासाधयता-मिन्द्राग्नी वा एतस्य प्रजामप गूहतो योऽलं प्रजायै सन् प्रजां न विन्दत ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इन्द्राग्नी (१) एव स्वेन भागधेयेनोप धावति तावेवास्मै प्रजां प्र साधयतो विन्दते प्रजा-मैन्द्राग्नमेकादशकपालं निर्वपेत् स्पर्धमानः क्षेत्रे वा सजातेषु वेन्द्राग्नी एव स्वेन भागधेयेनोप धावति ताभ्यामेवेन्द्रियं वीर्यं भ्रातृव्यस्य वृङ्क्ते वि पाप्मना भ्रातृव्येण जयते ऽप वा एतस्मादिन्द्रियं वीर्यं क्रामति यः संग्राममुपप्रयात्यैन्द्राग्नमेकादशकपालं नि-(२)-र्वपेत् संग्राममुपप्रयास्यन्निन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं वीर्यं धत्तः सहेन्द्रियेण वीर्येणोप प्र याति जयति तꣳ संग्रामं वि वा एष इन्द्रियेण वीर्येणर्ध्यते यः संग्रामं जयत्यैन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं जित्वेन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं वीर्यं (३) धत्तो नेन्द्रियेण वीर्येण व्यृध्यते ऽप वा एतस्मादिन्द्रियं वीर्यं क्रामति य एति जनतामैन्द्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्निन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं वीर्यं धत्तः सहेन्द्रियेण वीर्येण जनतामेति पौष्णं चरुमनु निर्व-

पेत् पूषा वा इन्द्रियस्य वीर्यस्यानुप्रदाता पूषणमेव (४) स्वेन भागधेयेनोप धावति स एवास्मा इन्द्रियं वीर्यमनु प्र यच्छति क्षैत्रपत्यं चरुं निर्वपेज्जनतामागत्येयं वै क्षेत्रस्य पतिरस्यामेव प्रति तिष्ठत्यैन्द्राग्नमेकादशकपालमुपरिष्टान्निर्वपेदस्यामेव प्रतिष्ठायेन्द्रियं वीर्यमुपरिष्टादात्मन् धत्ते ॥ (इन्द्राग्नी, नि,-वीर्य,-मेव,-काञ्चत्वारिꣳशच्च) ॥ १ ॥

१ आहिताग्नेर्दर्शपूर्णमासातिक्रमे, २ व्रतस्याचरणे, ३-४ विशाचप्रयाधायाम्, ५ अभिचरतः, ६ गोपुरुषमृत्युतप्तवतः, ७ युयुत्सोः, ८ आयुरुपुमीतस्य, ९ गृहदाहे च पुरोडाशाः ॥ विश्वेदेवा ऋषयः ॥

अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयेत् पथो वा एषोऽध्यपथेनैति यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयत्यग्निमेव पथिकृतꣳ स्वेन भागधेयेनोप धावति स एवैनमपथात् पन्थामपि नयत्यनड्वान् दक्षिणा वही ह्येष समृद्ध्यै अग्नये व्रतपतये (१) पुरोडाशमष्टाकपालं निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदग्निमेव व्रतपतिꣳ स्वेन भागधेयेनोप धावति स एवैनं व्रतमा लम्भयति व्रत्यो भवत्य-ग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यꣳ रक्षाꣳसि सचेरन्नग्निमेव रक्षोहणꣳ स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाꣳस्यप हन्ति निशितायां निर्वपेत् (२) निशितायाꣳ हि रक्षाꣳसि प्रेरते संप्रेर्णान्येवैनानि हन्ति परिश्रिते याजयेद्रक्षसामनन्ववचाराय रक्षोघ्नी याज्यानुवाक्ये भवतो रक्षसाꣳ स्तृत्या अग्नये रुद्रवते पुरोडाशमष्टाकपालं निर्वपेदभिचरन्नेषा वा अस्य घोरा तनूर्यद्रुद्रस्तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छत्य-ग्नये सुरभिमते पुरोडाशमष्टाकपालं निर्वपेद्यस्य गावो वा पुरुषा (३) वा प्रमीयेरन् यो वा बिभीयादेषा वा अस्य भेषज्या तनूर्यत् सुरभिमती तयैवास्मै भेषजं करोति सुरभिमते भवति पूतीगन्धस्यापहत्या अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत् संग्रामे संयत्ते भागधेयेनैवैनꣳ शमयित्वा परानभि निर्दिशति यमवरेषां विध्यन्ति जीवति स यं परेषां प्र स मीयते जयति तꣳ संग्राम- (४)-मभि वा एष एतानुच्यति येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते पुरुषाहुतिर्ह्यस्य प्रियतमाग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनꣳ शमयति नैषां पुराऽऽयुषोऽपरः प्रमीयते ऽभि वा एष एतस्य गृहानुच्यति यस्य गृहान् दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्भागधेयेनैवैनꣳ शमयति नास्यापरं गृहान् दहति ॥ (व्रतपतये, निशितायां निर्वपेत्, पुरुषाः, संग्रामं, न, चत्वारि च) ॥ २ ॥

१ कामोपनमनेच्छोः, २ क्षेत्रादौ स्पर्धमानस्य, ३ अभिचर्यमाणस्य, ४ सर्वायुःप्राप्तिकामस्य, ५ भूतिकामस्य, ६ काम्तिकामस्य, ७ तेजःकामस्य, ८ पराभिभवेच्छोश्च पुरोडाशाः ॥ विश्वेदेवा ऋषयः ।

अग्नये कामाय पुरोडाशमष्टाकपालं निर्वपेद्यं कामो नोपनमेदग्निमेव कामꣳ स्वेन भागधेयेनोप धावति स एवैनं कामेन समर्धयत्युपैनं कामो नमत्य-ग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेत् स्पर्धमानः क्षेत्रे वा सजातेषु वाग्निमेव यविष्ठꣳ स्वेन भागधेयेनोप धावति तेनैवेन्द्रियं वीर्यं भ्रातृव्यस्य (१) युवते वि पाप्मना भ्रातृव्येण जयते ऽग्नये यविष्ठाय पुरोडाशमष्टाकपालं निर्वपेदभिचर्यमाणोऽग्निमेव यविष्ठꣳ स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाꣳसि यवयति नैनमभिचरन्त्स्तृणुते ऽग्नय आयुष्मते पुरो-

डाशमष्टाकपालं निर्वपेद्यः कामयेत सर्वमायुरियामित्यग्निमेवाऽऽयुष्मन्तं स्वेन भागधेयेनोप धावति स एवास्मि-(२)-न्नायुर्दधाति सर्वमायुरेत्य्[१]-अग्नये जातवेदसे पुरोडाशमष्टाकपालं निर्वपेद्भूतिकामोऽग्निमेव जातवेदसं स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति भवत्येवा[२]-ग्नये रुक्मते पुरोडाशमष्टाकपालं निर्वपेद्रुक्कामोऽग्निमेव रुक्मन्तं स्वेन भागधेयेनोप धावति स एवास्मिन् रुचं दधाति रोचत एवा[३]-ग्नये तेजस्वते पुरोडाश-(३)-मष्टाकपालं निर्वपेत् तेजस्कामोऽग्निमेव तेजस्वन्तं स्वेन भागधेयेनोप धावति स एवास्मिन् तेजो दधाति तेजस्व्येव भवत्य्[४]-अग्नये साहन्त्याय पुरोडाशमष्टाकपालं निर्वपेत् सीक्षमाणोऽग्निमेव साहन्त्यं स्वेन भागधेयेनोप धावति तेनैव सहते यं सीक्षते[५] ॥ (आयुष्मन्त,-स्मिन्, तेजस्वते पुरोडाश,-मष्टाविंशतिश्च) ॥ ३ ॥

१ अन्नवत्कामस्य, २ अन्नाद्यकामस्य, ३ अन्नपतित्वकामस्य, ४ दीर्घरोगयुक्तकामस्य, ५ चक्षुष्पाटवकामस्य, ६ पुत्रकामस्य पुरोडाशाः, ७ रसकामस्य चरुः, ८ धनकामस्य, ९ संग्रामजयपूर्वकधनकामस्य, १० द्विरग्न्युद्धरणे, ११-१४ उद्धृताग्निनाशे पुरोडाशाः ॥ १५ त्रिष्टुप्। विश्वेदेवा ऋषयः।

अग्नयेऽन्नवते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नवान्त्स्यामित्यग्निमेवान्नवन्तं स्वेन भागधेयेनोप धावति स एवैनमन्नवन्तं करोत्यन्नवानेव भवत्य्[१]-अग्नयेऽन्नादाय पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नादः स्यामित्यग्निमेवान्नादं स्वेन भागधेयेनोप धावति स एवैनमन्नादं करोत्यन्नाद (१) एव भवत्य्[२]-अग्नयेऽन्नपतये पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेतान्नपतिः स्यामित्यग्निमेवान्नपतिं स्वेन भागधेयेनोप धावति स एवैनमन्नपतिं करोत्यन्नपतिरेव भवत्य्[३]-अग्नये पवमानाय पुरोडाशमष्टाकपालं निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावी यदग्नये पवमानाय निर्वपति प्राणमेवास्मिन् तेन दधाति यदग्नये (२) पावकाय वाचमेवास्मिन् तेन दधाति यदग्नये शुचय आयुरेवास्मिन् तेन दधात्युत यदीतासुर्भवति जीवत्येवै[४]-तामेव निर्वपेच्चक्षुष्कामो यदग्नये पवमानाय निर्वपति प्राणमेवास्मिन् तेन दधाति यदग्नये पावकाय वाचमेवास्मिन् तेन दधाति यदग्नये शुचये चक्षुरेवास्मिन् तेन दधात्यु-(३)-त यद्यन्धो भवति प्रैव पश्यत्य्[५]-अग्नये पुत्रवते पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति वृद्धामिन्द्रः प्र यच्छत्य्[६]-अग्नये रसवतेऽजक्षीरे चरुं निर्वपेद्यः कामयेत रसवान्त्स्यामित्यग्निमेव रसवन्तं स्वेन भागधेयेनोप धावति स एवैनं रसवन्तं करोति (४) रसवानेव भवत्यजक्षीरे भवत्याग्नेयी वा एषा यदजा साक्षादेव रसमव रुन्धे[७] ऽग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेद्यः कामयेत वसुमान्त्स्यामित्यग्निमेव वसुमन्तं स्वेन भागधेयेनोप धावति स एवैनं वसुमन्तं करोति वसुमानेव भवत्य्[८]-अग्नये वाजसृते पुरोडाशमष्टाकपालं निर्वपेत् संग्रामे संयत्ते वाजं (५) वा एष सिसीर्षति यः संग्रामं जिगीषत्यग्निः खलु वै देवानां वाजसृदग्निमेव वाजसृतं स्वेन भागधेयेनोप धावति धावति वाजं हन्ति वृत्रं जयति तं संग्राममथो अग्निरिव न प्रतिधृषे भवत्य्[९]-अग्नयेऽग्निवते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुर्निर्दिष्टभागो वा एतयोरन्योऽनिर्दिष्टभागोऽन्यस्तौ संभवन्तौ यजमान- (६) -मभि संभवतः स ईश्वर आर्तिमार्तोर्यदग्नयेऽग्निवते निर्वपति भागधेयेनैवैनौ शमयति नाऽऽर्तिमार्च्छति यजमानो[१०] ऽग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेद्[११] अपर

आदीप्यानुद्धृत्य इत्याहु[१२]-स्तत् तथा न कार्यं यद्भागधेयमभि पूर्व उद्ध्रियते किमपरोऽभ्युत् (७) ध्रियेतेति[१३] तान्येवावक्षाणानि संनिधाय मन्थे[१४]-

-दितः प्रथमं जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः।

स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यं वहतु प्रजानन्निति[१५]

छन्दोभिरेवैनं स्वाद्योनेः प्र जनयत्य्[१६]-एष वाव सोऽग्निरित्याहु[१७]-र्ज्योतिस्त्वा अस्य परापतितमिति यदग्नये ज्योतिष्मते निर्वपति यदेवास्य (८) ज्योतिः परापतितं तदेवाव रुन्धे[१८] ॥ (अन्नादो, ऽग्नये, दधाति, करोति, वाजं, यजमान,-मुद्,-स्य, षट् च) ॥ ४ ॥

१-२ अभिशस्यमानस्य प्रजाकामस्य च पुरोडाशचरवः, ३ पुत्रजन्मवतः, ४-५ दर्शपूर्णमासातिक्रमवतः, ६-७ अग्निमुद्वासयिष्यतः, ८-१३ ग्रामकामस्य पुरोडाशाः ॥ विश्वेदेवा ऋषयः।

वैश्वानरं द्वादशकपालं निर्वपेद्वारुणं चरुं दधिक्राव्णे चरुमभिशस्यमानो यद्वैश्वानरो द्वादशकपालो भवति संवत्सरो वा अग्निर्वैश्वानरः संवत्सरेणैवैनं स्वदयत्यप पापं वर्णं हते वारुणेनैवैनं वरुणपाशान्मुञ्चति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं पुनात्येवैनमाद्यमस्यान्नं भवत्य्[१]-एतामेव निर्वपेत् प्रजाकामः संवत्सरो (१) वा एतस्याशान्तो योनिं प्रजायै पशूनां निर्दहति योऽलं प्रजायै सन् प्रजां न विन्दते यद्वैश्वानरो द्वादशकपालो भवति संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव भागधेयेन शमयति सोऽस्मै शान्तः स्वाद्योनेः प्रजां प्र जनयति वारुणेनैवैनं वरुणपाशान्मुञ्चति दधिक्राव्णा पुनाति हिरण्यं दक्षिणा पवित्रं वै हिरण्यं पुनात्येवैनं (२) विन्दते प्रजां[२] वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन् तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद् द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिन् जात एतामिष्टिं निर्वपति पूत (३) एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवत्य्-अव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वाऽतिपादयति सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते वैश्वानरं द्वादशकपालं निर्वपेदमावास्यां वा पौर्णमासीं वाऽतिपाद्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेव प्रीणात्यथो संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्या (४) अथो देवता एवान्वारभ्य सुवर्गं लोकमेति वीरहा वा एष देवानां योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः पुराऽन्नमक्षन्नाग्नेयमष्टाकपालं निर्वपेद्वैश्वानरं द्वादशकपालमग्निमुद्वासयिष्यन् यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्मा आतिथ्यं करोत्यथो यथा जनं यतेऽवसं करोति तादृ- (५) -गेव तद् द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरः खलु वा अग्नेर्योनिः स्वामेवैनं योनिं गमयत्याद्यमस्यान्नं भवति वैश्वानरं द्वादशकपालं निर्वपेन्मारुतं सप्तकपालं ग्रामकाम आहवनीये वैश्वानरमधि श्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मै सजाताꣳश्च्यावयति मारुतो भवति (६) मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्य-

विशमव रुन्धे[११] सप्तकपालो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धे[१२] ऽनूच्यमान आ सादयति विशमेवास्मा अनुवर्त्मानं करोति[१३] ॥ (संवत्सर, एनं, पूतः, समष्ट्यै, तादृग्, भवति,-द्वात्रिंशच्च) ॥ ५ ॥

१ संग्राममुपप्रयास्यतश्चरुः, २ संग्रामभूमिं प्राप्तस्य, ३ विद्विषतोरन्नं अभ्यवहर्तुः, ४ शपथं कृत्वा द्रुह्यतः, ५ अविं प्रतिगृह्णानस्य, ६ उभयतोदन्तं प्रतिगृह्णानस्य, ७ याचितुं प्रयास्यतः, ८-९ याचित्वा प्रत्यागच्छतश्च पुरोडाशाः ॥ विश्वेदेवा ऋषयः।

आदित्यं चरुं निर्वपेत् संग्राममुपप्रयास्यन्नियं वा अदितिरस्यामेव पूर्वे प्रति तिष्ठन्ति[१] वैश्वानरं द्वादशकपालं निर्वपेदायतनं गत्वा संवत्सरो वा अग्निर्वैश्वानरः संवत्सरः खलु वै देवानामायतनमेतस्माद्वा आयतनाद्देवा असुरानजयन् यद्वैश्वानरं द्वादशकपालं निर्वपति देवानामेवायतने यतते जयति तं संग्राम[२]-मेतस्मिन् वा एतौ मृजाते (१) यो विद्विषाणयोरन्नमत्ति वैश्वानरं द्वादशकपालं निर्वपेद्विद्विषाणयोरन्नं जग्ध्वा संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितमेवात्ति नास्मिन् मृजाते[३] संवत्सराय वा एतौ समिमाते यौ समिमाते तयोर्यः पूर्वोऽभिद्रुह्यति तं वरुणो गृह्णाति वैश्वानरं द्वादशकपालं निर्वपेत् समिमानयोः पूर्वोऽभिद्रुह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरमेवाऽऽप्त्वा निर्वरुणं (२) परस्तादभि द्रुह्यति नैनं वरुणो गृह्णात्या[४]-व्यं वा एष प्रति गृह्णाति योऽविं प्रतिगृह्णाति वैश्वानरं द्वादशकपालं निर्वपेदविं प्रतिगृह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितामेव प्रति गृह्णाति नाऽऽव्यं प्रति गृह्णात्या[५]-त्मनो वा एष मात्रामाप्नोति य उभयादत् प्रतिगृह्णात्यश्वं वा पुरुषं वा वैश्वानरं द्वादशकपालं निर्वपेदुभयादत् (३) प्रतिगृह्य संवत्सरो वा अग्निर्वैश्वानरः संवत्सरस्वदितमेव प्रतिगृह्णाति नात्मनो मात्रामाप्नोति[६] वैश्वानरं द्वादशकपालं निर्वपेत् सनिमेष्यन्त्संवत्सरो वा अग्निर्वैश्वानरो यदा खलु वै संवत्सरं जनतायां चरत्यथ स धनार्घो भवति यद्वैश्वानरं द्वादशकपालं निर्वपति संवत्सरसातामेव सनिमभि प्र च्यवते दानकामा अस्मै प्रजा भवन्ति[७] यो वै संवत्सरं (४) प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरं पुनरागत्य निर्वपेद्यमेव प्रयुङ्क्ते तं भागधेयेन वि मुञ्चति प्रतिष्ठित्यै[८] यया रज्ज्वोत्तमां गामाजेत् तां भ्रातृव्याय प्र हिणुयान्निर्ऋतिमेवास्मै प्र हिणोति[९] ॥ (मृजाते, वरुण,-मुभयादत्, संवत्सरं, षट्त्रिंशच्च) ॥ ६ ॥

१-२ पशुकामस्य चरुः, ३ पशुकामस्य, ४ ब्रह्मवर्चसकामस्य, ५ अन्नकामस्य, ६ भूतिकामस्य, ७ पाप्मनागृहीतस्य, ८ अरेः पीडितस्य, ९ भयस्य पीडितस्य वा, १० महायज्ञेच्छोः पुरोडाशाः ॥

ऐन्द्रं चरुं निर्वपेत् पशुकाम ऐन्द्रा वै पशव इन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवति[१] चरुर्भवति स्वादेवास्मै योनेः पशून् प्र जनयती[२]-न्द्रायेन्द्रियावते पुरोडाशमेकादशकपालं निर्वपेत् पशुकाम इन्द्रियं वै पशव इन्द्रमेवेन्द्रियावन्तं स्वेन भागधेयेनोप धावति स (१) एवास्मा इन्द्रियं पशून् प्र यच्छति पशुमानेव भवती[३]-न्द्राय घर्मवते पुरोडाशमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकामो ब्रह्मवर्चसं वै घर्म इन्द्रमेव घर्मवन्तं स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवती[४]-न्द्रायार्कवते पुरोडाशमेकादशकपालं निर्वपेदन्नकामोऽर्को वै देवानामन्न-मिन्द्रमेवार्कवन्तं स्वेन भागधेयेनो-(२)-प धावति स एवास्मा अन्नं प्र यच्छत्यन्नाद एव भवती[५]-न्द्राय

घर्मवते पुरोडाशमेकादशकपालं निर्वपेदिन्द्रायेन्द्रियावत इन्द्रायार्कवते भूतिकामो यदिन्द्राय घर्मवते निर्वपति शिर एवास्य तेन करोति यदिन्द्रायेन्द्रियावत आत्मानमेवास्य तेन करोति यदिन्द्रायार्कवते भूत एवान्नाद्ये प्रति तिष्ठति भवत्येवे[६]-न्द्राया-(३)-ऽꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेद्यः पाप्मना गृहीतः स्यात् पाप्मा वा अꣳह इन्द्रमेवाꣳहोमुचꣳ स्वेन भागधेयेनोप धावति स एवैनं पाप्मनोऽꣳहसो मुञ्चती[७]-न्द्राय वैमृधाय पुरोडाशमेकादशकपालं निर्वपेद्यं मृधोऽभि प्रवेपेरन् राष्ट्राणि वाऽभि समियुरिन्द्रमेव वैमृधꣳ स्वेन भागधेयेनोप धावति स एवास्मान्मृधो (४) ऽप हन्ती[८]-न्द्राय त्रात्रे पुरोडाशमेकादशकपालं निर्वपेद्बद्धो वा परियत्तो वेन्द्रमेव त्रातारꣳ स्वेन भागधेयेनोप धावति स एवैनं त्रायत इन्द्रायार्काश्वमेधवते पुरोडाशमेकादशकपालं निर्वपेद्यं महायज्ञो नोपनमेदेते वै महायज्ञस्यान्त्ये तनू यदर्काश्वमेधाविन्द्रमेवार्काश्वमेधवन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मा (५) अन्ततो महायज्ञं च्यावयत्युपैनं महायज्ञो नमति[१०] ॥ (स, भागधेयेने,-न्द्राय, मृधो, ऽस्मै, सप्त च) ॥ ७ ॥

१ ग्रामकामस्य पुरोडाशः, २-३ सेनाकामस्य चरुः, ४ युद्धार्थिनः, ५ नष्टधैर्यस्य, ६ अन्यकर्तृकदानकामस्य, ७ [illegible]स्य, ८ राज्यभ्रष्टस्य भ्रश्यमानस्य वा, ९-११ अन्यसाम्यमनिच्छतः पुरोडाशाः ॥ विश्वेदेवा ऋषयः।

इन्द्रायान्वृजवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इन्द्रमेवान्वृजुꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजातानानुकान् करोति ग्राम्येव भवती[१]-न्द्राण्यै चरुं निर्वपेद्यस्य सेनाऽसꣳशितेव स्यादिन्द्राणी वै सेनायै देवतेन्द्राणीमेव स्वेन भागधेयेनोप धावति सैवास्य सेनाꣳ सꣳ श्यति[२] बल्बजानपी- (१) -ध्मे सं नह्येद्गौर्यत्राधिष्कन्नान्यमेहत् ततो बल्बजा उदतिष्ठन् गवामेवैनं न्यायमपिनीय गा वेदयती[३]-न्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत् संग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा संग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति जयति तꣳ (२) संग्राम[४]-मेतामेव निर्वपेद्यो हतमनाः स्वयं पाप इव स्यादेतानि हि वा एतस्मादपक्रान्तान्यथैष हतमनाः स्वयं पाप इन्द्रमेव मन्युमन्तं मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति न हतमनाः स्वयं पापो भवती[५]-न्द्राय दात्रे पुरोडाशमेकादशकपालं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्यु-(३)-रितीन्द्रमेव दातारꣳ स्वेन भागधेयेनोप धावति स एवास्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्ती[६]-न्द्राय प्रदात्रे पुरोडाशमेकादशकपालं निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेन्द्रमेव प्रदातारꣳ स्वेन भागधेयेनोप धावति स एवास्मै प्र दापयती[७]-न्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपेदपरुद्धो वा (४) ऽपरुध्यमानो वेन्द्रमेव सुत्रामाणꣳ स्वेन भागधेयेनोप धावति स एवैनं त्रायतेऽनपरुध्यो भवती[८]-न्द्रो वै सदृङ् देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतमैन्द्रमेकादशकपालं निरवपत् तेनैवास्मिन्निन्द्रियमदधाच्छक्वरी याज्यानुवाक्ये अकरोद्वज्रो वै शक्वरी स एनं वज्रो भूत्या ऐन्ध (५) सोऽभवत् सोऽबिभेद्भूतः प्र मा धक्ष्यतीति स प्रजापतिं पुनरुपाधावत् स प्रजापतिः शक्वर्या अधि रेवतीं निरमिमीत शान्त्या अप्रदाहाय योऽलꣳ श्रियै सन्त्सदृङ् समानैः स्यात् तस्मा एतमैन्द्रमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप

धावति स एवास्मिन्निन्द्रियं दधाति रेवती पुरोऽनुवाक्या भवति (६) शान्त्या अप्रदाहाय शाक्वरी याज्या वज्रो वै शाक्वरी स एनं वज्रो भूत्वा इन्धे भवत्येव ॥ (अपि तत्, एवं, वै,-न्व, भवति, चतुर्दश च) ॥ ८ ॥

१ अभिचरतः, २ प्रत्यभिचरतः, ३ पराभिचारपीडितस्य च चरुपुरोडाशौ, ४ यशोपनतिकामस्य पुरोडाशः, ५-७ चक्षुष्कामस्य चरुः, ८-९ यज्ञकर्तृभ्रातृव्यवत इन्द्रियसामर्थ्यविनाशकामस्य, १०-११ भ्रातृव्योपाकृतयज्ञानुष्ठपतकामिनः पुरोडाशः ॥ विश्वेदेवा ऋषयः ।

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्त्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदाग्नावैष्णव एकादशकपालो भवत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन चाभि चरति सरस्वत्याज्यभागा भवति वाग्वै सरस्वती वाचैवैनमभि चरति बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवैनमभि चरति (१) प्रति वै परस्तादभिचरन्तमभि चरन्ति द्वेद्वे पुरोऽनुवाक्ये कुर्यादतिप्रयुक्त्या एतयैव यजेताभिचर्यमाणो देवताभिरेव देवताः प्रतिचरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म स देवताश्चैव यज्ञं च मध्यतो व्यवसर्पति तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्त्स्तृणुते आग्नावैष्णवमेकादशकपालं निर्वपेद्यं यज्ञो नो-(२)-पनमेदग्निः सर्वा देवता विष्णुर्यज्ञोऽग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवास्मै यज्ञं प्र यच्छत उपैनं यज्ञो नमत्याग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामोऽग्नेर्वै चक्षुषा मनुष्या वि पश्यन्ति यज्ञस्य देवा अग्निं चैव विष्णुं च स्वेन भागधेयेनोप धावति तावेवा-(३)-ऽस्मिन् चक्षुर्धत्तश्चक्षुष्मानेव भवति धेन्वै वा एतद्रेतो यदाज्यमनडुहस्तण्डुला मिथुनादेवास्मै चक्षुः प्र जनयति घृते भवति तेजो वै घृतं तेजश्चक्षुस्तेजसैवास्मै तेजश्चक्षुरव रुन्धे इन्द्रियं वै वीर्यं वृङ्क्ते भ्रातृव्यो यजमानोऽयजमानस्याध्वरकल्पां प्रति निर्वपेद्भ्रातृव्ये यजमाने नास्येन्द्रियं (४) वीर्यं वृङ्क्ते पुरा वाचः प्रवदितोर्निर्वपेद्यावत्येव वाक् तामप्रोदितां भ्रातृव्यस्य वृङ्क्ते तामस्य वाचं प्रवदन्तीमन्या वाचोऽनु प्र वदन्ति ता इन्द्रियं वीर्यं यजमाने दधत्याग्नावैष्णवमष्टाकपालं निर्वपेत् प्रातःसवनस्याऽऽकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रं प्रातः सवनं प्रातः सवनमेव तेनाऽऽप्नोत्या-(५)-ग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यंदिनस्य सवनस्याऽऽकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुप् त्रैष्टुभं माध्यंदिनꣳ सवनं माध्यंदिनमेव सवनं तेनाऽऽप्नोत्याग्नावैष्णवं द्वादशकपालं निर्वपेत् तृतीयसवनस्याऽऽकाले सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर्यद् द्वादशकपालो भवति द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाऽऽप्नोति देवताभिरेव देवताः (६) प्रतिचरति यज्ञेन यज्ञं वाचा वाचं ब्रह्मणा ब्रह्म कपालैरेव छन्दाꣳस्याप्नोति पुरोडाशैः सवनानि मैत्रावरुणमेककपालं निर्वपेद्वशायै काले यैवासौ भ्रातृव्यस्य वशाऽनूबन्ध्या सो एवैषैतस्यैककपालो भवति न हि कपालैः पशुमर्हत्याप्तुम् ॥ (ब्रह्मणैवैनमभि चरति, यज्ञो न, तावेवा, -ऽस्येन्द्रियं, -माप्नोति देवताः, सप्तत्रिꣳशच्च) ॥ ९ ॥

१-५ ब्रह्मवर्चसकामस्य, ६ चर्मरोगभीतस्य, ७ प्रजाकामस्य, ८ अभिचरतः, ९-१० दीर्घरोगयुतस्य, ११ परस्य वैरिजननकामस्य च चरवः ॥

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतꣳ सौमारौद्रं चरुं निरवपन्

१० (तै. सं.)

तेनैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सौमारौद्रं चरुं निर्वपेत् सोमं चैव रुद्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव भवति तिष्यापूर्णमासे निर्वपेद्रुद्रो (१) वै तिष्यः सोमः पूर्णमासः साक्षादेव ब्रह्मवर्चसमव रुन्धे परिश्रिते याजयति ब्रह्मवर्चसस्य परिगृहीत्यै श्वेतायै श्वेतवत्सायै दुग्धं मथितमाज्यं भवत्याज्यं प्रोक्षणमाज्येन मार्जयन्ते यावदेव ब्रह्मवर्चसं तत् सर्वं करोत्य-ति ब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरिति मानवी ऋचौ धाय्ये कुर्याद्यद्वै किं च मनुरवदत् तद्भेषजं (२) भेषजमेवास्मै करोति यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णं चरुं निर्वपेत् सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचं करोति न दुश्चर्मा भवति सोमारौद्रं चरुं निर्वपेत् प्रजाकामः सोमो वै रेतोधा अग्निः प्रजानां प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजां प्र जनयति विन्दते (३) प्रजाꣳ सौमारौद्रं चरुं निर्वपेदभिचरन्त्सौम्यो वै देवतया पुरुष एष रुद्रो यदग्निः स्वाया एवैनं देवतायै निष्क्रीय रुद्रायापि दधाति ताजगार्तिमार्च्छति सोमारौद्रं चरुं निर्वपेज्ज्योगामयावी सोमं वा एतस्य रसो गच्छत्यग्निꣳ शरीरं यस्य ज्योगामयति सोमादेवास्य रसं निष्क्रीणात्यग्नेः शरीरमुत यदी-(४)-तासुर्भवति जीवत्येव सौमारुद्रयोर्वा एतं ग्रसितꣳ होता निष्खिदति स ईश्वर आर्तिमार्तोरनड्वान् होत्रा देयो वह्निर्वा अनड्वान् वह्निर्होता वह्निनैव वह्निमात्मनः स्पृणोति सोमारौद्रं चरुं निर्वपेद्यः कामयेत स्वेऽस्मा आयतने भ्रातृव्यं जनयेयमिति वेदिं परिगृह्यार्धमुद्धन्यादर्धं नार्धं बर्हिषः स्तृणीयादर्धं (५) नार्धमिध्मस्याभ्यादध्यादर्धं न स्व एवास्मा आयतने भ्रातृव्यं जनयति ॥ (रुद्रो, भेषजं, विन्दते, यदु,-र्धं, द्वादश च) ॥ १० ॥

१ ग्रामकामस्य, २ प्रजाराजयोर्विरोधकामस्य, ३ उक्तविरोधसमाधानेच्छोः, ४ ग्रामकामस्य पुरोडाशः, ५ ग्रामकामस्य चरुः, ६ समानैरप्रियस्य चरुपुरोडाशाः ॥ विश्वेदेवा ऋषयः ।

ऐन्द्रमेकादशकपालं निर्वपेन्मारुतꣳ सप्तकपालं ग्रामकाम इन्द्रं चैव मरुतश्च स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्याहवनीय ऐन्द्रमधि श्रयति गार्हपत्ये मारुतं पापवस्यसस्य विधृत्यै सप्तकपालो मारुतो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धेऽनूच्यमान आ सादयति विशमेवा-(१)-स्मा अनुवर्त्मानं करोत्य-तामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैन्द्रस्यावद्यन् ब्रूयादिन्द्रायानु ब्रूहीत्याश्राव्य ब्रूयान्मरुतो यजेति मारुतस्यावद्यन् ब्रूयान्मरुद्भ्योऽनु ब्रूहीत्याश्राव्य ब्रूयादिन्द्रं यजेति स्व एवैभ्यो भागधेये समदं दधाति वितृꣳहाणास्तिष्ठन्त्ये-तामेव (२) निर्वपेद्यः कामयेत कल्पेरन्निति यथादेवतमवदाय यथादेवतं यजेद्भागधेयेनैवैनान् यथायथं कल्पयति कल्पन्त एवै-न्द्रमेकादशकपालं निर्वपेद्वैश्वदेवं द्वादशकपालं ग्रामकाम इन्द्रं चैव विश्वाꣳश्च देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्यैन्द्रस्यावदाय वैश्वदेवस्याव द्येदथैन्द्रस्यो-(३)-परिष्टादिन्द्रियेणैवास्मा उभयतः सजातान् परि गृह्णात्युपाधाय्यपूर्वयं वासो दक्षिणा सजातानामुपहित्यै पृश्न्यै दुग्धे प्रैयङ्गवं चरुं निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्न्यै वै पयसो मरुतो जाताः पृश्न्यै प्रियङ्गवो मारुताः खलु वै देवतया सजाता मरुत एव स्वेन भागधेयेनोप धावति

त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति प्रियवती याज्यानुवाक्ये (४) भवतः प्रियमेवैनꣳ समानानां करोति द्विपदा पुरोऽनुवाक्या भवति द्विपद एवाव रुन्धे चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्धे देवासुराः संयत्ता आसन् ते देवा मिथो विप्रिया आसन् तेऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाश्चतुर्धा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैः स इन्द्रः प्रजापतिमुपाधावत् त-(५)-मेतया संज्ञान्याऽयाजयदग्नये वसुमते पुरोडाशमष्टाकपालं निरवपत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणायाऽऽदित्यवते चरुं ततो वा इन्द्रं देवा ज्यैष्ठ्यायाभि समजानत यः समानैर्मिथो विप्रियः स्यात् तमेतया संज्ञान्या याजयेदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वरुणाया-(६)-ऽऽदित्यवते चरुमिन्द्रमेवैनं भूतं ज्यैष्ठ्याय समाना अभि सं जानते वसिष्ठः समानानां भवति ॥ (एवै, वै,-ग्रस्यं, याज्यानुवाक्ये, तं वरुणाय, चतुर्दश च) ॥ ११ ॥

काम्येष्टियाज्यापुरोनुवाक्याः ॥ ८,१०,१३-१९,२१,२७ त्रिष्टुप्; ७,९,२०,२८-२९गायत्री; ४,२० जगती; ११,१२,२६ अनुष्टुप्; २४ उष्णिक् पदपङ्क्तिर्वा; २५ पंक्तिः । विश्वेदेवा ऋषयः ।

हिरण्यगर्भ *- आपो ह यत् *- प्रजापते *- ॥

स वेद पुत्रः पितरꣳ स मातरꣳ स सूनुर्भुवत् स भुवत् पुनर्मघः ।

स द्यामौर्णोदन्तरिक्षꣳ स सुवः स विश्वा भुवो अभवत् स आऽभवत् ॥

उदु त्यं *- चित्रम् *- ॥

स प्रत्नवन्नवीयसाऽग्ने द्युम्नेन संयता । बृहत् ततन्थ भानुना ॥

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो (१) नर्या पुरूणि ।

अग्निर्भुवद्रयिपती रयीणाꣳ सत्रा चक्राणो अमृतानि विश्वा ॥

हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः ।

वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥

बडित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।

प्र या भूमिं प्रवत्वति मह्ना जिनोषि (२) महिनि ॥

प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥

स्तोमासस्त्वा विचारिणि प्रति ष्टोभन्त्यक्तुभिः । प्र या वाजं न हेषन्तं पेरुमस्यस्यर्जुनि ॥

ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।

अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यच्छ ॥

आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाꣳ ऋजीषी ।

सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥

१ (ऋ. ४।१।८।१३), २ (ऋ. ४।१।८।१९), ३ (ऋ. १।८।१४।१२), ५ (ऋ. १।४।४३।१), ६ (ऋ. १।३।४३।२)

प्र (३) सुवानः सोम ऋतयुश्चिकेतेन्द्राय ब्रह्म जमदग्निरर्चन् ।

वृषा यन्ताऽसि शवसस्तुरस्यान्तर्यच्छ गृणते धर्त्रं दृꣳह ॥

सबाधस्ते मदं च शुष्मयं च ब्रह्म नरो ब्रह्मकृतः सपर्यन् ।

अर्को वा यत् तुरते सोमचक्षास्तत्रेदिन्द्रो दधते पृत्सु तुर्याम् ॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् (४) ।

वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

प्र तत् ते अद्य शिपिविष्ट नामाऽर्यः शꣳसामि वयुनानि विद्वान् ।

तं त्वा गृणामि तवसमतव्यान् क्षयन्तमस्य रजसः पराके ॥

किमित् ते विष्णो परिचक्ष्यं भूत् प्र यद्ववक्षे शिपिविष्टो अस्मि ।

मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ (५) ॥

अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नः सूनुमतः ॥

दा नो अग्ने शतिनो दाः सहस्रिणो दुरो न वाजꣳ श्रुत्या अपा वृधि ।

प्राची द्यावापृथिवी ब्रह्मणा कृधि सुवर्ण शुक्रमुषसो वि दिद्युतः ॥

अग्निर्दा द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति ।

अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा ॥

मा (६) नो मर्धी *-रा तू भर *- ॥

घृतं न पूतं तनूररेपाः शुचि हिरण्यम् । तत् ते रुक्मो न रोचत स्वधावः ॥

उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।

उतो न उत् पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ॥

वायो शतꣳ हरीणां युवस्व पोष्याणाम् । उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥

प्र याभि-(७)-र्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।

नि नो रयिꣳ सुभोजसं युवेह नि वीरवद्गव्यमश्वियं च राधः ॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥

रेवाꣳ इद्रेवतः स्तोता स्यात् त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥

(दधानो, जिनोषि, देभुः प्र हव्यं, बभूथ, मा, याभिः, ।-ऽष्टाविꣳशच्च) ॥ १२ ॥

[प्रजापति-२३९ ।-रग्नये २५४ । ऽग्ने १८८ । ऽग्ने ४०६ । वैश्वानर-३२९ ।-मादित्य-२३६ ।-मैन्द्र-२५० ।-मिन्द्राया-३१४ ।-ऽऽग्नावैष्णव-३३७ ।-मसा-२६१-पैन्द्र-२३१४ । हिरण्यगर्भो १९० । द्वादश ॥ ३५२६]

[इति द्वितीयकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥]

१२ (ऋ. १।७।१३।७), २४ (१।७।१३।८)

इष्टिविधानम् ।

[अथ तृतीयः प्रपाठकः ॥ ३ ॥] विश्वेदेवा ऋषयः ।

१ भूतिकामस्य, २ अवरुद्धस्यापरुद्धराजस्य च चरुः, ३-१२ अपरुद्धराजस्य [illegible] प्रयोगविशेषाः ॥

आदित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूतिकाम आदित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन् भूतिं न प्राप्नोत्यादित्यानेव भुवद्वतः स्वेन भागधेयेनोप धावति त एवैनं भूतिं गमयन्ति भवत्येवाऽऽदित्येभ्यो धारयद्वद्भ्यश्चरुं निर्वपेदपरुद्धो वाऽपरुध्यमानो वाऽऽदित्या वा अपरोद्धार आदित्या अवगमयितार आदित्यानेव धारयद्वतः (१) स्वेन भागधेयेनोप धावति त एवैनं विशि दाध्रत्यनपरुध्यो भवत्यदितेऽनु मन्यस्वेत्यपरुध्यमानोऽस्य पदमा ददीतेयं वा अदितिरियमेवास्मै राज्यमनु मन्यते सत्याऽऽशीरित्याह सत्यामेवाऽऽशिषं कुरुत इह मन इत्याह प्रजा एवास्मै समनसः करोत्युप प्रेत मरुतः (२) सुदानव एना विश्पतिनाऽभ्यमुं राजानमित्याह मारुती वै विड् ज्येष्ठो विश्पतिर्विशैवैनं राष्ट्रेण समर्धयति यः परस्ताद् ग्राम्यवादी स्यात् तस्य गृहाद्व्रीहीनाहरेच्छुक्लाश्च कृष्णाश्च वि चिनुयाद् ये शुक्लाः स्युस्तमादित्यं चरुं निर्वपेदादित्या वै देवतया विड्विशमेवाव गच्छति (३) अवगताऽस्य विडनवगतं राष्ट्रमित्याहुर्ये कृष्णाः स्युस्तं वारुणं चरुं निर्वपेद्वारुणं वै राष्ट्रमुभे एव विशं च राष्ट्रं चाव गच्छति यदि नावगच्छेदिममहमादित्येभ्यो भागं निर्वपाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरिति निर्वपेदादित्या एवैनं भागधेयं प्रेप्सन्तो विशमव (४) गमयन्ति यदि नावगच्छेदाश्वत्थान् मयूखान् सप्त मध्यमेषायामुपहन्यादिदमहमादित्यान् बध्नाम्याऽमुष्मादमुष्यै विशोऽवगन्तोरित्यादित्या एवैनं बद्धवीरा विशमव गमयन्ति यदि नावगच्छेदेतमेवाऽऽदित्यं चरुं निर्वपेदिध्मेऽपि मयूखान्त्सं नह्येदनपरुध्यमेवाव गच्छत्याश्वत्था भवन्ति मरुतां वा एत-(५)-दोजो यदश्वत्थ ओजसैव विशमव गच्छति सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव गच्छति ॥ (धारयद्वतो, मरुतो, गच्छति, विशमवै,-न, द्वादश च) ॥ १ ॥

१-६ [illegible], ७-९ ब्रह्मवर्चसकामस्य, १० हिरण्यार्थिनः, ११ हिरण्यं लब्धवतश्चोरादिभीतस्य, १२ विनष्टहिरण्यस्य च इष्टिविशेषाः । ॥ विश्वेदेवा ऋषयः ।

देवा वै मृत्योर्बिभ्यतस्ते प्रजापतिमुपाधावन्तेभ्य एतं प्राजापत्यं शतकृष्णलं निरवपत् तेष्वेवामृतमदधा—द्यो मृत्योर्बिभीयात् तस्मा एतं प्राजापत्यं शतकृष्णलं निर्वपेत् प्रजापतिमेव स्वेन भागधेयेनोप धावति स एवास्मिन्नायुर्दधाति सर्वमायुरेति शतकृष्णला भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये (१) प्रति तिष्ठति घृते भवत्यायुर्वै घृतममृतं हिरण्यमायुश्चैवास्मा अमृतं च समीची दधाति चत्वारिचत्वारि कृष्णलान्यव द्यति चतुरवत्तस्याऽऽप्त्या एकधा ब्रह्मण उप हरत्येकधैव यजमान आयुर्दधात्य—सावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतं सौर्यं चरुं निरवपन् तेनैवास्मिन् (२) रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतं सौर्यं चरुं निर्वपेदमुमेवाऽऽदित्यं स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसं दधाति ब्रह्मवर्चस्येव भवत्यु—भयतो रुक्मौ भवत उभयत एवास्मिन् रुचं दधाति प्रयाजेप्रयाजे कृष्णलं जुहोति दिग्भ्य एवास्मै ब्रह्मवर्चसमव रुन्ध आग्नेयमष्टाकपालं निर्वपेत् सावित्रं द्वादशकपालं भूम्यै (३) चरुं यः कामयेत हिरण्यं विन्देय हिरण्यं मोप नमे-

दिति यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दते सावित्रो भवति सवितृप्रसूत एवैनद्विन्दते भूम्यै चरुर्भवत्यस्यामेवैनद्विन्दत उपैनं हिरण्यं नमति वि वा एष इन्द्रियेण वीर्येणर्ध्यते यो हिरण्यं विन्दत एता-(४)-मेव निर्वपेद्धिरण्यं वित्त्वा नेन्द्रियेण वीर्येण व्यृध्यत एतामेव निर्वपेद्यस्य हिरण्यं नश्येद्यदाग्नेयो भवत्याग्नेयं वै हिरण्यं यस्यैव हिरण्यं तेनैवैनद्विन्दति सावित्रो भवति सवितृप्रसूत एवैनद्विन्दति भूम्यै चरुर्भवत्यस्यां वा एतन्नश्यति यन्नश्यत्यस्यामेवैनद्विन्दती—न्द्र-(५)-स्त्वष्टुः सोममभीषहाऽपिबत् स विष्वङ् व्यार्च्छत् स इन्द्रियेण सोमपीथेन व्यार्ध्यत स यदूर्ध्वमुदवमीत् ते श्यामाका अभवन्त्स प्रजापतिमुपाधावत् तस्मा एतं सोमेन्द्रं श्यामाकं चरुं निरवपत् तेनैवास्मिन्निन्द्रियं सोमपीथमदधा—द्वि वा एष इन्द्रियेण सोमपीथेनर्ध्यते यः सोमं वमिति यः सोमवामी स्यात् तस्मा (६) एतं सोमेन्द्रं श्यामाकं चरुं निर्वपेत् सोमं चैवेन्द्रं च स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियं सोमपीथं धत्तो नेन्द्रियेण सोमपीथेन व्यृध्यते यत् सौम्यो भवति सोमपीथमेवाव रुन्धे यदैन्द्रो भवतीन्द्रियं वै सोमपीथ इन्द्रियमेव सोमपीथमव रुन्धे श्यामाको भवत्येष वाव स सोमः (७) साक्षादेव सोमपीथमव रुन्धे ऽग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं पशुकामोऽग्निरेवास्मै पशून् प्रजनयति वृद्धानिन्द्रः प्र यच्छति दधि मधु घृतमापो धाना भवन्त्येतद्वै पशूनां रूपं रूपेणैव पशूनव रुन्धे पञ्चगृहीतं भवति पाङ्क्ता हि पशवो बहुरूपं भवति बहुरूपा हि पशवः (८) समृद्ध्यै प्राजापत्यं भवति प्राजापत्या वै पशवः प्रजापतिरेवास्मै पशून् प्र जनयत्या—त्मा वै पुरुषस्य मधु यन्मध्वग्नौ जुहोत्यात्मानमेव तद्यजमानोऽग्नौ प्र दधाति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तः पुरुषः पाङ्क्ताः पशव आत्मानमेव मृत्योर्निष्क्रीय पशूनव रुन्धे ॥ (इन्द्रियं, ऽस्मिन्, भूम्यां, एता, -मिन्द्रः, स्यात् तस्मै, सोमः, बहुरूपा हि पशव, एकचत्वारिंशच्च) ॥ २ ॥

१-३ यज्ञविभ्रष्टस्य, ४ कामितार्थसिद्ध्यर्थिनः, ५ ब्रह्मवर्चसार्थिनः, ६ क्लैब्याद्बिभ्यतः, ७ ग्रामकामस्य, ८-९ ज्ञातिकामतो वैश्यस्य वश्यार्थं च चरुपुरोडाशाः ॥ विश्वेदेवा ऋषयः ।

देवा वै सत्रमासतर्द्धिपरिमितं यशस्कामास्तेषां सोमं राजानं यश आर्च्छत् स गिरिमुदैत् तमग्निरनूदैत् तावग्नीषोमौ समभवतां ताविन्द्रो यज्ञविभ्रष्टोऽनु परैत् तावब्रवीद्याजयतं मेति तस्मा एतामिष्टिं निरवपतामाग्नेयमष्टाकपालमैन्द्रमेकादशकपालं सौम्यं चरुं तयैवास्मिन् तेजः (१) इन्द्रियं ब्रह्मवर्चसमधत्तां यो यज्ञविभ्रष्टः स्यात् तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालमैन्द्रमेकादशकपालं सौम्यं चरुं यदाग्नेयो भवति तेज एवास्मिन् तेन दधाति यदैन्द्रो भवतीन्द्रियमेवास्मिन् तेन दधाति यत् सौम्यो ब्रह्मवर्चसं तेना—ऽऽग्नेयस्य च सौम्यस्य चैन्द्रे समाश्लेषयेत् तेजश्चैवास्मिन् ब्रह्मवर्चसं च समीची (२) दधात्य—ग्नीषोमीयमेकादशकपालं निर्वपेद्यं कामो नोपनमेदाग्नेयो वै ब्राह्मणः स सोमं पिबति स्वामेव देवतां स्वेन भागधेयेनोप धावति सैवैनं कामेन समर्धयत्युपैनं कामो नमत्य—ग्नीषोमीयमष्टाकपालं निर्वपेद्ब्रह्मवर्चसकामोऽग्नीषोमावेव स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव (३) भवति यदष्टाकपालस्तेनाऽऽग्नेयो यच्छ्यामाकस्तेन सौम्यः समृद्ध्यै सोमाय वाजिने श्यामाकं चरुं निर्व-

पेद्यः क्लैब्याद्बिभीयाद्रेतो हि वा एतस्माद्वाजिनमपक्रामत्यथैष क्लैब्याद्बिभाय सोममेव वाजिनं स्वेन भागधेयेनोप धावति स एवास्मिन् रेतो वाजिनं दधाति न क्लीबो भवति ब्राह्मणस्पत्यमेकादशकपालं निर्वपेद् ग्रामकामो (४) ब्रह्मणस्पतिमेव स्वेन भागधेयेनोप धावति स एवास्मै सजातान् प्र यच्छति ग्राम्येव भवति गणवती याज्यानुवाक्ये भवतः सजातैरेवैनं गणवन्तं करोत्ये—तामेव निर्वपेद्यः कामयेत ब्रह्मन् विशं वि नाशयेयमिति मारुती याज्यानुवाक्ये कुर्याद् ब्रह्मन्नेव विशं वि नाशयति ॥ (तेजः, समीची, एव, ग्रामकाम,-श्चत्वारिंशच्च) ॥ ३ ॥

१ स्वर्गकामस्य, २ कन्यकार्थदानकामस्य, ३ सभां जिगमिषोः, ४-५ जातिनिकृष्टस्य राजन्यस्य, ६ तथाविधस्य ब्राह्मणस्य च इष्टयः ॥ विश्वेदेवा ऋषयः ।

अर्यम्णे चरुं निर्वपेत् सुवर्गकामोऽसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनं सुवर्गं लोकं गमयत्य—र्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्युरित्यसौ वा आदित्योऽर्यमा यः खलु वै ददाति सोऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवा-(१)-स्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्त्य—र्यम्णे चरुं निर्वपेद्यः कामयेत स्वस्ति जनतामियामित्यसौ वा आदित्योऽर्यमाऽर्यमणमेव स्वेन भागधेयेनोप धावति स एवैनं तद्गमयति यत्र जिगमिषती—न्द्रो वै देवानामानुजावर आसीत् स प्रजापतिमुपाधावत् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं नि-(२)-रवपत् तेनैवैनमग्रं देवतानां पर्यणयद् बुध्नवती अग्रवती याज्यानुवाक्ये अकरोद् बुध्नादेवैनमग्रं पर्यणय—द्यो राजन्य आनुजावरः स्यात् तस्मा एतमैन्द्रमानुषूकमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवैनमग्रं समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं (३) परि णयत्यानुषूको भवत्येषा ह्येतस्य देवता य आनुजावरः समृद्ध्यै यो ब्राह्मण आनुजावरः स्यात् तस्मा एतं बार्हस्पत्यमानुषूकं चरुं निर्वपेद् बृहस्पतिमेव स्वेन भागधेयेनोप धावति स एवैनमग्रं समानानां परि णयति बुध्नवती अग्रवती याज्यानुवाक्ये भवतो बुध्नादेवैनमग्रं परि णयत्यानुषूको भवत्येषा ह्येतस्य (४) देवता य आनुजावरः समृद्ध्यै ॥ (एव नि,-रवं, -मेतस्य, चत्वारि च) ॥ ४ ॥

यक्ष्मगृहीतस्येष्टिः ॥ विश्वेदेवा ऋषयः ।

प्रजापतेस्त्रयस्त्रिंशद् दुहितर आसन् ताः सोमाय राज्ञेऽददात् तासां रोहिणीमुपैत् ता ईर्ष्यन्तीः पुनरगच्छन् ता अन्वैत् ताः पुनरयाचत ता अस्मै न पुनरददात् सोऽब्रवीदृतममीष्व यथा समावच्छ उपैष्याम्यथ ते पुनर्दास्यामीति स ऋतममीत् ता अस्मै पुनरददात् तासां रोहिणीमेवोपै-(१)-त् तं यक्ष्म आर्च्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्योऽविन्दत् तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एता एव नमस्यन्नुपाधावत् ता अब्रुवन् वरं वृणामहै समावच्छ एव न उपाय इति तस्मा एत-(२)-मादित्यं चरुं निरवपन् तेनैवैनं पापात् स्रामादमुञ्चन् यः पापयक्ष्मगृहीतः स्यात् तस्मा एतमादित्यं चरुं निर्वपेदादित्यानेव स्वेन भागधेयेनोप धावति त एवैनं पापात् स्रामान्मुञ्चन्त्य—मावास्यायां निर्वपेदमुमेवैनमाप्यायमानमन्वा प्याययति

नवोनवो भवति जायमान इति पुरोऽनुवाक्या भवत्यायुरेवास्मिन् (३) तया दधाति यमादित्या अंशुमाप्याययन्तीति याज्यैवैनमेतया प्याययति ॥ (एवोपै,-त, -मस्मिन्, त्रयोदश च) ॥ ५ ॥

अन्नादत्वशक्तिकामस्य त्रिधातुसंज्ञकयागः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिर्देवेभ्योऽन्नाद्यं व्यादिशत् सोऽब्रवीद्यदिमान् लोकानभ्यतिरिच्याता इति तन्ममासदिति तदिमान् लोकानत्यरिच्यतेन्द्रं राजानमिन्द्रमधिराजमिन्द्रं स्वराजानं ततो वै स इमान् लोकांस्त्रेधाऽदुहत् तत् त्रिधातोस्त्रिधातुत्वं यं कामयेतान्नादः स्यादिति तस्मा एतं त्रिधातुं निर्वपेदिन्द्राय राज्ञे पुरोडाश-(१)-मेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञेऽयं वा इन्द्रो राजाऽयमिन्द्रोऽधिराजोऽसाविन्द्रः स्वराडिमानेव लोकान्त्स्वेन भागधेयेनोप धावति त एवास्मा अन्नं प्र यच्छन्त्यन्नाद एव भवति यथा वत्सेन प्रत्तां गां दुह एवमेवेमान् लोकान् प्रत्तान् काममन्नाद्यं दुह उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय त्रयः (२) पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तरउत्तरो ज्यायान् भवत्येवमिव हीमे लोकाः समृद्ध्यै सर्वेषामभिगमयन्नव द्यत्यछम्बट्कारं व्यत्यासमन्वाहानिर्दाहाय ॥ (पुरोडाशं, त्रयः, षड्विंशतिश्च) ॥ ६ ॥

वीर्यकामस्य सर्वपृष्ठाख्येष्टिः, ९ अभिशस्यमानस्य इयमेवेष्टिः ॥ विश्वेदेवा ऋषयः ।

देवासुराः संयत्ता आसन् तान् देवानसुरा अजयन् ते देवाः पराजिग्याना असुराणां वैश्यमुपाऽऽयन् तेभ्य इन्द्रियं वीर्यमपाक्रामत् तदिन्द्रोऽचायत् तदन्वपाक्रामत् तदवरुधं नाशक्नोत् तदस्मादभ्यर्धोऽचरत् स प्रजापतिमुपाधावत् तमेतया सर्वपृष्ठयाऽयाजयत् तयैवास्मिन्निन्द्रियं वीर्यमदधा—द्य इन्द्रियकामो (१) वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेदेता एव देवताः स्वेन भागधेयेनोप धावति ता एवास्मिन्निन्द्रियं वीर्यं दधति यदिन्द्राय राथन्तराय निर्वपति यदेवाग्नेस्तेजस्तदेवाव रुन्धे यदिन्द्राय बार्हताय यदेवेन्द्रस्य तेजस्तदेवाव रुन्धे यदिन्द्राय वैरूपाय यदेव सवितुस्तेजस्त-(२)-देवाव रुन्धे यदिन्द्राय वैराजाय यदेव धातुस्तेजस्तदेवाव रुन्धे यदिन्द्राय शाक्वराय यदेव मरुतां तेजस्तदेवाव रुन्धे यदिन्द्राय रैवताय यदेव बृहस्पतेस्तेजस्तदेवाव रुन्ध एतावन्ति वै तेजांसि तान्येवाव रुन्ध उत्तानेषु कपालेष्वधि श्रयत्ययातयामत्वाय द्वादशकपालः पुरोडाशो (३) भवति वैश्वदेवत्वाय समन्तं पर्यवद्यति समन्तमेवेन्द्रियं वीर्यं यजमाने दधाति व्यत्यासमन्वाहानिर्दाहाया—श्व ऋषभो वृष्णिर्बस्तः सा दक्षिणा वृषत्वा—यैतयैव यजेताभिशस्यमान एताश्चेद्वा अस्य देवता अन्नमदन्त्यदन्त्युवेवास्य मनुष्याः ॥ (इन्द्रियकामः, सवितुस्तेजस्त, पुरोडाशो, ऽष्टात्रिंशच्च) ॥ ७ ॥

चक्षुष्कामस्येष्टिः ॥ विश्वेदेवा ऋषयः ।

रजनो वै कौणेयः क्रतुजितं जानकिं चक्षुर्वन्यमयात् तस्मा एतामिष्टिं निरवपदग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालं तयैवास्मिन् चक्षुरदधा—द्यश्चक्षुष्कामः स्यात् तस्मा एतामिष्टिं निर्वपेदग्नये भ्राजस्वते पुरोडाशमष्टाकपालं सौर्यं चरुमग्नये भ्राजस्वते पुरोडाशमष्टाकपालमग्नेर्वै चक्षुषा मनुष्या वि (१) पश्यन्ति सूर्यस्य देवा अग्निं चैव सूर्यं च स्वेन भागधेयेनोप धावति तावेवास्मिन् चक्षुर्धत्तश्चक्षुष्मानेव भवति यदाग्नेयौ भवतश्चक्षुषी एवास्मिन् तत् प्रति दधाति

यत् सौर्यो नासिकां तेनाभितः सौर्यमाग्नेयौ भवतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते[3] समानी याज्यानुवाक्ये भवतः समानꣳ हि (२) चक्षुः समृद्ध्यै उदु त्यं जातवेदसꣳ सप्त त्वा हरितो रथे चित्रं देवानामुदगादनीकमिति पिण्डान् प्र यच्छति चक्षुरेवास्मै प्र यच्छति यदेव तस्य तत् ॥ (वि, हं,-हाविꣳशतिश्च) ॥ ८ ॥

ग्रामकामस्य सांग्रहण्येष्टिः ॥ विश्वेदेवा ऋषयः ।

ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासं धीरश्चेत्ता वसुविद् ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमुग्रश्चेत्ता वसुविद् ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमभिभूश्चेत्ता वसुवि[3]—दामनमस्यामनस्य देवा ये सजाताः*-- --*कुमाराः समनसस्तानहं कामये हृदा ते मा कामयन्ताꣳ हृदा तान् म आमनसः कृधि स्वाहा ऽऽमनमस्या-(१)-मनस्य देवा याः स्त्रियः समनसस्ता अहं कामये हृदा ता मां कामयन्ताꣳ हृदा ता म आमनसः कृधि स्वाहा वैश्वदेवीꣳ सांग्रहणीं निर्वपेद्ग्रामकामो वैश्वदेवा वै सजाता विश्वानेव देवान्त्स्वेन भागधेयेनोप धावति त एवास्मै स जातान् प्र यच्छन्ति ग्राम्येव भवति सांग्रहणी भवति मनोग्रहणं वैसं ग्रहणं मनं एव सजातानाम् (२) गृह्णाति ध्रुवोऽसि ध्रुवोऽहꣳ सजातेषु भूयासमिति परिधीन् परि दधात्याशिषमेवैतामा शास्तेऽथो एतदेव सर्वꣳ सजातेष्वधि भवति यस्यैवं विदुष एते परिधयः परिधीयन्त आमं नमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोत्येतावन्तो वै सजाता ये महान्तो ये क्षुल्लका याः स्त्रियस्तानेवाव रुन्धे (३) त एनमवरुद्धा उप तिष्ठन्ते[1] ॥ (असि, सजातानाꣳ, रुन्धे पञ्च च) ॥ ९ ॥

आयुष्कामेष्टिमन्त्राः ॥ ६ प्रस्तारपङ्क्तिः १० त्रिष्टुप् । विश्वेदेवा ऋषयः ।

यन्नवमैत् तन्नवनीतमभवद्यदसर्पत् तत् सर्पिरभवद्यदध्रियत तद् घृत—मभवं—दश्विनोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहे—न्द्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि स्वाहा[3] मित्रावरुणयोः प्राणोऽसि तस्य ते दत्तां ययोः प्राणोऽसि स्वाहा विश्वेषां देवानां प्राणोऽसि (१) तस्य ते ददतु येषां प्राणोऽसि स्वाहा

घृतस्य धारामृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः ।

तत् त्वा विष्णुः पर्यपश्यत् तत त्वेडा गव्यैरयत् ॥

पावमानेन त्वा स्तोमेन गायत्रस्य वर्तन्योपाꣳशो वीर्येण देवस्त्वा सवितोत् सृजतु जीवातवे जीवनस्यायै बृहद्रथन्तरयोस्त्वा स्तोमेन त्रिष्टुभो वर्तन्या शुक्रस्य वीर्येण देवस्त्वा सवितोत् (२) सृजतु जीवातवे जीवनस्यायै अग्नेस्त्वा मात्रया जगत्यै वर्तन्याऽऽग्रयणस्य वीर्येण देवस्त्वा सवितोत् सृजतु जीवातवे जीवनस्यायै

इममग्न आयुषे वर्चसे कृधि प्रियꣳ रेतो वरुण सोम राजन् ।

(९।४) -*समं...स्वाहा; (९।५) -*आमनमस्य... ये

मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत् ॥

अग्निरायुष्मान्त्स वनस्पतिभिरायुष्मान् तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि[11] सोम आयुष्मान् (१) स ओषधीभिर्[12]—*-- यज्ञ आयुष्मान्त्स दक्षिणाभिर्[13]—*- ब्रह्माऽऽयुष्मत् तद्ब्राह्मणैरायुष्मद्[14]*- देवा आयुष्मन्तस्तेऽमृतेन[15]*-- पितर आयुष्मन्तस्ते स्वधयाऽऽयुष्मन्तस्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि[16] ॥ (अस्तु,-दा,-युष्मान्, पञ्चविꣳशतिश्च) ॥ १० ॥

आयुरारोग्यकामयोरिष्टिः ॥ विश्वेदेवा ऋषयः ।

अग्निं वा एतस्य शरीरं गच्छति सोमꣳ रसो वरुण एनं वरुणपाशेन गृह्णाति सरस्वतीं वागग्नाविष्णू आत्मा यस्य ज्योगामयति यो ज्योगामयावी स्याद्यो वा कामयेत सर्वमायुरियामिति तस्मा एतामिष्टिं निर्वपेदाग्नेयमष्टाकपालꣳ सौम्यं चरुं वारुणं दशकपालꣳ सारस्वतं चरुमाग्नावैष्णवमेकादशकपालमग्नेर्वास्य शरीरं निष्क्रीणाति सोमाद्रसम् (१) वारुणेनैवैनं वरुणपाशान्मुञ्चति सारस्वतेन वाचं दधात्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन च भिषज्यत्युत यदीतासुर्भवति जीवत्येव यन्नवमैत् तन्नवनीतमभवदित्याज्यमवेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टे[3] ऽश्विनोः प्राणोऽसीत्याहाश्विनौ वै देवानां (२) भिषजौ ताभ्यामेवास्मै भेषजं करोतीन्द्रस्य प्राणोऽसीत्याहेन्द्रियमेवास्मिन्नेतेन दधाति मित्रावरुणयोः प्राणोऽसीत्याह प्राणापानावेवास्मिन्नेतेन दधाति विश्वेषां देवानां प्राणोऽसीत्याह वीर्यमेवास्मिन्नेतेन दधाति घृतस्य धारामृतस्य पन्थामित्याह यथायजुरेवैतत् पावमानेन त्वा स्तोमेनेत्याह (३) प्राणमेवास्मिन्नेतेन दधाति बृहद्रथन्तरयोस्त्वा स्तोमेनेत्याहौज एवास्मिन्नेतेन दधात्यग्नेस्त्वा मात्रयेत्याहाऽऽत्मानमेवास्मिन्नेतेन दधात्यृ—त्विजः पर्याहुर्यावन्त एवर्त्विजस्त एनं भिषज्यन्ति ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर्दधति यदेव तस्य त—द्धिरण्यात् (४) घृतं निष्पिबत्यायुर्वै घृतममृतꣳ हिरण्यममृतादेवाऽऽयुर्निष्पिबति[1] शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यथो खलु यावतीः समा एष्यन् मन्येत तावन्मानꣳ स्यात् समृद्ध्यै इममग्न आयुषे वर्चसे कृधीत्याहाऽऽयुरेवास्मिन् वर्चो दधाति विश्वे देवा जरदष्टिर्यथाऽसदित्या—(५)—ह जरदष्टिमेवैनं करोत्य—ग्निरायुष्मानिति हस्तं गृह्णात्येते वै देवा आयुष्मन्तस्त एवास्मिन्नायुर्दधति सर्वमायुरेति[11] ॥ (रसं, त्वं,—देवानाꣳ, स्तोमेनेति, हिरण्या,—दसदिति द्वाविꣳशतिश्च) ॥ ११ ॥

अश्वदानवतो वारुणीष्टिः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तं निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेद्वरुणमेव स्वेन भागधेयेनोप धावति स एवैनं वरुणपाशान्मुञ्चति (१) चतुष्कपाला भवन्ति चतुष्पाद्ध्यश्वः समृद्ध्यै एकमतिरिक्तं निर्वपेद्यमेव प्रतिग्राही भवति यं वा नाध्येति तस्मादेव वरुणपाशान्मुच्यते यद्यपरं प्रतिग्राही स्यात् सौर्यमेककपालमनु निर्वपेदमुमेवाऽऽदित्यमुच्चारं कुरुते ऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजते

(१० । १२-१५) *- आयुष्मान्...करोमि ।

ऽपोनप्त्रीयं चरुं (२) पुनरेत्य निर्वपेदप्सुयोनिर्वा अश्वः स्वामेवैनं योनिं गमयति स एनꣳ शान्त उप तिष्ठते[3] ॥ (मुञ्चति, चरुꣳ, सप्तदश च) ॥ १२ ॥

पाप्मना गृहीतस्येष्टिः ६ विश्वेदेवा ऋषयः ।

या वामिन्द्रावरुणा यतव्या तनूस्तयेमम꣡ꣳहसो मुञ्चतं[1] या वामिन्द्रावरुणा सहस्या[2]*- -*रक्षस्या[3]*- -* तेजस्या तनूस्तयेमम꣡ꣳहसो मुञ्चतं यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनाव यजे यो वामिन्द्रावरुणा द्विपात्सु पशुषु*- -*चतुष्पात्सु*- -*गोष्ठे[6]*- -*गृहेष्व—*- -*प्स्वो—*- -*षधीषु*- -*वनस्पतिषु स्रामस्तं वामेतेनाव यजे इन्द्रो वा एतस्ये-(१)-न्द्रियेणाप क्रामति वरुण एनं वरुणपाशेन गृह्णाति यः पाप्मना गृहीतो भवति यः पाप्मना गृहीतः स्यात् तस्मा एतामैन्द्रावरुणीं पयस्यां निर्वपेदिन्द्र एवास्मिन्निन्द्रियं दधाति वरुण एनं वरुणपाशान्मुञ्चति[13] पयस्या भवति पयो हि वा एतस्मादपक्रामत्यथैष पाप्मना गृहीतो यत् पयस्या भवति पय एवास्मिन् तया दधाति[14] पयस्यायां (२) पुरोडाशमव दधात्यात्मन्वन्तमेवैनं करोत्यथो आयतनवन्तमेव चतुर्धा व्यूहति दिक्ष्वेव प्रति तिष्ठति[16] पुनः समूहति दिग्भ्य एवास्मै भेषजं करोति[17] समूढावं द्यति यथाऽऽविद्धं निष्कृन्तति तादृगेव त—द्यो वामिन्द्रावरुणावग्नौ स्रामस्तं वामेतेनाव यज इत्याह दुरिष्ट्या एवैनं पाति[19] यो वामिन्द्रावरुणा द्विपात्सु पशुषु स्रामस्तं वामेतेनाव यज इत्याहैतावतीर्वा आप ओषधयो वनस्पतयः प्रजाः पशव उपजीवनीयास्ता एवास्मै वरुणपाशान्मुञ्चति[20] ॥ (एतस्य, पयस्यायां, पाति, पञ्चविꣳशतिश्च) ॥ १३ ॥

काम्या याज्यापुरोनुवाक्याः ॥ त्रिष्टुप्; ५,७ गायत्री; ९ अनुष्टुप्; १४-१५ जगती । विश्वेदेवा ऋषयः ।

स प्रत्नवं*-न्नि काव्ये[1]*-न्द्रं वो विश्वतस्परी[2]*-न्द्रं नरः[3]*- ॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत् त्वावतः सखा[4] ॥

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ॥

तेभिर्नो विश्वैः सुमना अहेडन् राजन्त्सोम प्रति हव्या गृभाय ॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥

युवमे-(१)-तानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ॥

युवꣳ सिन्धूꣳरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥

अग्नीषोमाविमꣳ सु मे शृणुतं वृषणा हवम् ।

प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥

आऽन्यं दिवो मातरिश्वा जभाराऽमथ्नादन्यं परि श्येनो अद्रेः ।

अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥

(१३।१-२) तनू...मुञ्चतं; (१३।६-११) स्राम...यजे; (१३।७-१२)-* यो वा...रुणा । (१४।१-२) (तै. सं. २।२।१२।७-८); (१४।३-४) (तै. सं. १।६।१२।१-२)

अग्नीषोमा हविषः प्रस्थितस्य वीतꣳ (२) हर्यतं वृषणा जुषेथाम् ।

सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः[11] ॥

आ प्यायस्व[12]*- सं ते[13]*- ॥

गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमम् ।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ।

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।

देवानां यः पितरमाविवासति (३) श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥

स सुष्टुभा स ऋक्वता गणेन वलꣳ रुरोज फलिगꣳ रवेण ।

बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥

मरुतो यद्ध वो दिवो[15]*- या वः शर्म[16]*-

अर्यमाऽऽयाति वृषभस्तुविष्मान् दाता वसूनां पुरुहूतो अर्हन् ।

सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु ॥

ये तेऽर्यमन् बहवो देवयानाः पन्थानो (४) राजन् दिव आचरन्ति ।

तेभिर्नो देव महि शर्म यच्छ शं न एधि द्विपदे शं चतुष्पदे ॥

बुध्नादग्रमङ्गिरोभिर्गृणानो वि पर्वतस्य दꣳहितान्यैरत् ।

रुजद्रोधाꣳसि कृत्रिमाण्येषाꣳ सोमस्य ता मद इन्द्रश्चकार ।

बुध्नादग्रेण वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम् ।

वृथाऽसृजत् पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार (५) ॥

प्र यो जज्ञे विद्वाꣳ अस्य बन्धुं विश्वानि देवो जनिमा विवक्ति ।

ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाऽभि प्र तस्थौ[13] ॥

महान् मही अस्तभायद्वि जातो द्याꣳ सद्म पार्थिवं च रजः ।

स बुध्नादाष्ट जनुषाऽभ्यग्रं बृहस्पतिर्देवता यस्य सम्राट् ॥

बुध्नाद्यो अग्रमभ्यर्त्योजसा बृहस्पतिमा विवासन्ति देवाः (६) ।

भिनद्वलं वि पुरो दर्दरीति कनिक्रदत् सुवरपो जिगाय ॥

(युवं, वीतं, विवासति, पन्थान,-श्चकार, देवा, नव च) ॥ १४ ॥

आदित्येभ्यो २६८ । देवा ४४१ । देवा २४३ । कर्युष्मो २०४ । प्रजापतेः १६३ । प्रजापति-१२६ । -देवासुरा १८८ । रश्मिनो १२८ । ध्रुवो १५५ । य-१७५ ।-दुम्रि २०२ । प्रजापति- ११७ ।-र्वा १७६ । स १०९ । चतुर्दश ॥ २६६५ ॥

[इति द्वितीयकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥]

१४ । १२-१३ (तै. सं. ४।२।७।१२-१३); १४ । १७-१८ (तै. सं. १।५।११।१५-१६)

हविर्विधानम् ।

[अथ चतुर्थः प्रपाठकः ॥ ४ ॥]

भ्रातृव्यैः स्पर्धमानस्येष्टिः ॥

देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रक्षाꣳसि पिशाचास्तेऽन्यतस्तेषां देवानामुत यदल्पं लोहितमकुर्वन्तद्रक्षाꣳसि रात्रीभिरसुभ्नन्तान्सुब्धान्मृतानभि व्यौच्छत्ते देवा अविदुर्यो वै नोऽयं म्रियते रक्षाꣳसि वा इमं घ्नन्तीति ते रक्षाꣳस्युपामन्त्रयन्त तान्यब्रुवन्वरं वृणामहै य-(१)-दसुरान् जयाम तन्नः सहासदिति ततो वै देवा असुरानजयन्तेऽसुराञ्जित्वा रक्षाꣳस्यपानुदन्त तानि रक्षाꣳस्यनृतमकर्तेति समन्तं देवान्पर्यविशन्ते देवा अग्नावनाथन्त तेऽग्नये प्रवते पुरोडाशमष्टाकपालं निरवपन्नग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निरवपन्यान्येव पुरस्ताद्रक्षाꣳस्या-(२)-सन् तानि तेन प्राणुदन्त यदग्नये विबाधवते यान्येवाभितो रक्षाꣳस्यासन् तानि तेन व्यबाधन्त यदग्नये प्रतीकवते यान्येव पश्चाद्रक्षाꣳस्यासन् तानि तेनापानुदन्त ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालं निर्वपेदग्नये विबाधवते (३) ऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान् भ्रातृव्यस्तं तेन प्र णुदते यदग्नये विबाधवते य एवैनेन सदृङ् तं तेन वि बाधते यदग्नये प्रतीकवते य एवास्मात् पापीयान् तं तेनाप नुदते प्र श्रेयाꣳसं भ्रातृव्यं नुदतेऽति सदृशं क्रामति नैनं पापीयानाप्नोति य एवं (४) विद्वानेतयेष्ट्या यजते ॥ (य,-द्रक्षाꣳसि, विबाधवत, एवं, चत्वारि च) ॥ १ ॥

भ्रातृव्यवतः स्पर्धमानस्य विजितेष्टिः ॥ विश्वेदेवा ऋषयः ।

देवासुराः संयत्ता आसन् ते देवा अब्रुवन् यो नो वीर्यावत्तमस्तमनु समारभामहा इति इन्द्रमब्रुवन् त्वं वै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत् तिस्रो म इमास्तनुवो वीर्यावतीस्ताः प्रीणीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्नियमꣳहोमुगियं विमृधेयमिन्द्रियावती-(१)-त्यब्रवीत् त इन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निरवपन्निन्द्राय वैमृधायेन्द्रायेन्द्रियावते यदिन्द्रायाꣳहोमुचे निरवपन्नꣳहस एव तेनामुच्यन्त यदिन्द्राय वैमृधाय मृध एव तेनापाघ्नत यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन्नदधत त्रयस्त्रिꣳशत्कपालं पुरोडाशं निरवपन् त्रयस्त्रिꣳशद्वै देवतास्ता इन्द्र आत्मन्ननु समारम्भयत भूत्यै (२) तां वाव देवा विजितिमुत्तमामसुरैर्व्यजयन्त यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालं निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावतेऽꣳहसा वा एष गृहीतो यस्माच्छ्रेयान् भ्रातृव्यो यदिन्द्रायाꣳहोमुचे निर्वपत्यꣳहस एव तेन मुच्यते मृधा वा एषोऽभिषण्णो यस्मात् समानेष्वन्यः श्रेयानुता-(३)-भ्रातृव्यो यदिन्द्राय वैमृधाय मृध एव तेनाप हते यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽत्मन् धत्ते त्रयस्त्रिꣳशत्कपालं पुरोडाशं निर्वपति त्रयस्त्रिꣳशद्वै देवतास्ता एव यजमान आत्मन्ननु समारम्भयते भूत्यै सा वा एषा विजितिर्नामेष्टिर्य एवं विद्वानेतयेष्ट्या यजत उत्तमामेव विजितिं भ्रातृव्येण वि जयते ॥ (इन्द्रियावती, भूत्यै, उत,-त्रयस्त्रिꣳशच्च) ॥ २ ॥

भ्रातृव्यवतः स्पर्धमानस्य संवर्गेष्टिः ॥ विश्वेदेवा ऋषयः ।

देवासुराः संयत्ता आसन् तेषां गायत्र्योजो बलमिन्द्रियं वीर्यं प्रजां पशून्त्संगृह्याऽऽदायापक्रम्यातिष्ठत् तेऽमन्यन्त यतरान् वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तां व्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुराः सा नान्यतराꣳश्चनोपावर्तत ते देवा एतद्यजुरपश्यन्—

ओजोऽसि सहोऽसि बलमसि (१) भ्राजोऽसि देवानां धाम
नामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभू—

रिति वाव देवा असुराणामोजो बलमिन्द्रियं वीर्यं प्रजां पशूनवृञ्जत यद्गायत्र्यपक्रम्यातिष्ठत् तस्मादेतां गायत्रीतीष्टिमाहुः संवत्सरो वै गायत्री संवत्सरो वै तदपक्रम्यातिष्ठद्यदेतया देवा असुराणामोजो बलमिन्द्रियं वीर्यं (२) प्रजां पशूनवृञ्जत तस्मादेताꣳ संवर्ग इतीष्टिमाहु—र्यो भ्रातृव्यवान्त्स्यात् स स्पर्धमान एतयेष्ट्या यजेताग्नये संवर्गाय पुरोडाशमष्टाकपालं निर्वपेत् तꣳ शृतमासन्नमेतेन यजुषाऽभि मृशेदोज एव बलमिन्द्रियं वीर्यं प्रजां पशून् भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ॥ (असि, वीर्यं, पञ्चचत्वारिꣳशच्च) ॥ ३ ॥

प्रजाकामस्य पशुकामस्य च गार्मुतश्चरुः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः पराचीरायन् ता यत्रावसन् ततो गर्मुदुदतिष्ठत् ता बृहस्पतिश्चान्ववैताꣳ सोऽब्रवीद् बृहस्पतिरनया त्वा प्रतिष्ठान्यथ त्वा प्रजा उपावर्त्स्यन्तीति तं प्रातिष्ठत् ततो वै प्रजापतिं प्रजा उपावर्तन्त यः प्रजाकामः स्यात् तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत् प्रजापति-(१)-मेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजां प्र जनयति प्रजापतिः पशूनसृजत तेऽस्मात् सृष्टाः पराञ्च आयन् ते यत्रावसन् ततो गर्मुदुदतिष्ठत् तान् पूषा चान्ववैताꣳ सोऽब्रवीत् पूषाऽनया मा प्र तिष्ठाथ त्वा पशव उपावर्त्स्यन्तीति मां प्र तिष्ठेति सोमोऽब्रवीन्मम वा (२) अकृष्टपच्यमित्युभौ वां प्र तिष्ठानीत्यब्रवीत् तौ प्रातिष्ठत् ततो वै प्रजापतिं पशव उपावर्तन्त यः पशुकामः स्यात् तस्मा एतꣳ सौमापौष्णं गार्मुतं चरुं निर्वपेत् सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनां प्रजनयिता सोम एवास्मै रेतो दधाति पूषा (३) पशून् प्र जनयति ॥ (... प्रजापतिं, वै, पूषा, त्रीणि च) ॥ ४ ॥

चित्रायागोपहोममन्त्राः ॥ गायत्री, ५ उपरिष्टाद्बृहती । विश्वेदेवा ऋषयः ।

अग्ने गोभिर्न आ गहीन्दो पुष्ट्या जुषस्व नः । इन्द्रो धर्ता गृहेषु नः ॥
सविता यः सहस्रियः स नो गृहेषु रारणत् । आ पूषा एत्वा वसु ॥
धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥
त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत् । सहस्रेणायुतेन च ॥
येन देवा अमृतं (१) दीर्घꣳ श्रवो दिव्यैरयन्त ।
रायस्पोष त्वमस्मभ्यं गवां कुल्मिं जीवस आ युवस्व ॥
अग्निर्गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा ॥

अग्ने गृहपते यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि श्रैष्ठ्यात् पथो मा योषं मूर्धा भूयासꣳ स्वाहा ॥ (अमृतं,-मष्टाविꣳशच्च) ॥ ५ ॥

पशुकामस्य चित्रायागः ॥ विश्वेदेवा ऋषयः ।

चित्रया यजेत पशुकाम इयं वै चित्रा यद्वा अस्यां विश्वं भूतमधि प्रजायते तेनेयं चित्रा य एवं विद्वाꣳश्चित्रया पशुकामो यजते प्र प्रजया पशुभिर्मिथुनैर्जायते प्रैवाऽऽग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितं त्वष्टा रूपाणि वि करोति सारस्वतौ भवत एतद्वै दैव्यं मिथुनं दैव्यमेवास्मै (१) मिथुनं मध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर्भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक् पुष्टिमेव वाचमुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनꣳ सप्तैतानि हवीꣳषि भवन्ति सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुध्या अथैता आहुतीर्जुहोत्येते वै देवाः पुष्टिपतयस्त एवा-(२)-स्मिन् पुष्टिं दधति पुष्यति प्रजया पशुभिरथो यदेता आहुतीर्जुहोति प्रतिष्ठित्यै ॥ (अस्मै, त एव, द्वादश च) ॥ ६ ॥

कारीरीष्टियाज्यानुमन्त्राः ॥ ३ त्रिष्टुप्, ११ पङ्क्तिः । विश्वेदेवा ऋषयः ।

मारुतमसि मरुतामोजोऽपां धारां भिन्धि
रमयत मरुतः श्येनमायिनं मनोजवसं वृषणꣳ सुवृक्तिम् ॥
येन शर्ध उग्रमवसृष्टमेति तदश्विना परि धत्तꣳ स्वस्ति ।

पुरोवातो वर्षन् जिन्वरावृत् स्वाहा वातावद्वर्षन्नुग्ररावृत् स्वाहा स्तनयन् वर्षन् भीमरावृत् स्वाहाऽनश्न्यवस्फूर्जन् दिद्युद्वर्षन् त्वेषरावृत् स्वाहाऽतिरात्रं वर्षन् पूर्तिरावृत् (१) स्वाहा बहु हायमवृषादिति श्रुतरावृत् स्वाहाऽऽतपति वर्षन् विराडावृत् स्वाहाऽवस्फूर्जन् दिद्युद्वर्षन् भूतरावृत् स्वाहा मान्दा वाशाः शुन्ध्यूरजिराः ।

ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः । मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह माऽवत ॥
वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामि ॥ (पूर्तिरावृत्, द्विचत्वारिꣳशच्च) ॥ ७ ॥

कारीर्युत्तरमन्त्राः ॥ १-२ विषमपदाबृहती, ३ विषमपदापङ्क्तिः, ४ गायत्री, ५ सतःपङ्क्तिः, ६ जगती, ७ द्विपदा विराड् गायत्री, ८ द्विपदा गायत्री, ९ अनुष्टुप्, १० विराण्महापङ्क्तिः । विश्वेदेवा ऋषयः ।

देवा वसव्या अग्ने सोम सूर्य ॥ देवाः शर्मण्या मित्रावरुणाऽर्यमन् ॥
देवाः सपीतयोऽपां नपादाशुहेमन् ।
उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्याऽवत ॥
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन । पृथिवीं यद् व्युन्दन्ति ॥
आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति (१) वृष्टयः ।
उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।

न वो दस्रा उप दस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत ॥
सृजा वृष्टिं दिव आऽद्भिः समुद्रं पृण ॥
अब्जा असि प्रथमजा बलमसि समुद्रियम् ॥
उन्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः ।
उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम् ॥
ये देवा (२) दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः ।
त इमं यज्ञमवन्तु त इदं क्षेत्रमा विशन्तु त इदं क्षेत्रमनु वि विशन्तु ॥
(यन्ति, देवा, विꣳशतिश्च) ॥ ८ ॥

कारीरीपूर्वभागविधानम् ॥ विश्वेदेवा ऋषयः ।

मारुतमसि मरुतामोज इति कृष्णं वासः कृष्णतूषं परि धत्त एतद्वै वृष्ट्यै रूपꣳ सरूप एव भूत्वा पर्जन्यं वर्षयति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातं प्रति मीवति पुरोवातमेव जनयति वर्षस्यावरुद्ध्यै वातनामानि जुहोति वायुर्वै वृष्ट्या ईशे वायुमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यं वर्षयत्य—ष्टौ (१) जुहोति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव वृष्टिꣳ सं प्र च्यावयति कृष्णाजिने सं यौति हविरेवाक—रन्तर्वेदि सं यौत्यवरुद्ध्यै यतीनामद्यमानानाꣳ शीर्षाणि पराऽपतन् ते खर्जूरा अभवन् तेषाꣳ रस ऊर्ध्वोऽपतत् तानि करीराण्यभवन्त्सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति यत् करीराणि भवन्ति (२) सौम्ययैवाऽऽहुत्या दिवो वृष्टिमव रुन्धे मधुषा सं यौत्यपां वा एष ओषधीनाꣳ रसो यन्मध्वद्भ्य एवौषधीभ्यो वर्षयत्यथो अद्भ्य एवौषधीभ्यो वृष्टिं नि नयति मान्दा वाशा इति सं यौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसावेहीत्येवमेवैना नामधेयैरा (३) च्यावयति वृष्णो अश्वस्य संदानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनꣳ समर्धयति वर्षस्यावरुद्ध्यै ॥ (मधुषा, भवन्ति, नामधेयैरा,-द्वात्रिꣳशच्च) ॥ ९ ॥

कारीर्युत्तरभागविधानम् ॥ विश्वेदेवा ऋषयः ।

देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्या बध्नाति देवताभिरेवान्वहं वृष्टिमिच्छति यदि वर्षेत् तावत्येव होतव्यं यदि न वर्षेच्छ्वो भूते हविर्निर्वपे—दहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति नक्तं वा हि दिवा वा वर्षति मित्रावरुणावेव स्वेन भागधेयेनोप धावति तावेवास्मा (१) अहोरात्राभ्यां पर्जन्यं वर्षयतोऽग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु वै भूत्वा वर्षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप धावति ता (२) एवास्मै पर्जन्यं वर्षयन्त्युतावर्षिष्यन् वर्षत्येव सृजा वृष्टिं दिव

आऽद्भिः संमुद्रं पृणेत्याहेमाश्चैवामूश्चापः समर्धयत्यथो आभिरेवामुरच्छैत्ये– द्जा असि प्रथमजा बलमसि समुद्रियमित्याह यथायजुरेवैत–दुद्गम्भय पृथिवीमिति वर्षाह्वां जुहोत्येषा वा (२) ओषधीनां वृष्टिवनिस्तयैव वृष्टिमा च्यावयति ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ॥ (असौ, धावति ता, वा, एकविंशतिश्च) ॥ १० ॥

सर्वकामार्थिनः, अभिचरतः, अभिचर्यमाणस्य, सहस्रेण यक्ष्यमाणस्य, बहुविधयज्ञसाधनद्रव्यार्थिनश्च त्रैधातवीष्टिः ॥ विश्वेदेवा ऋषयः ।

सर्वाणि छन्दा॰स्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यं यत् ककुदुष्णिहा जगत्यै यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दा॰स्यव रुन्धे गायत्री वा एषा यदुष्णिहा यानि चत्वार्यध्यक्षराणि चतुष्पाद एव ते पशवो यथा पुरोडाशे पुरोडाशोऽध्येवमेव यदृच्यध्यक्षराणि यज्जगत्या (१) परिदध्यादन्तं यज्ञं गमयेत् त्रिष्टुभा परि दधातीन्द्रियं वै वीर्यं त्रिष्टुगिन्द्रिय एव वीर्ये यज्ञं प्रतिष्ठापयति नान्तं गमयत्य–ग्ने त्री ते वाजिना त्री षधस्थेति त्रिवत्या परि दधाति सरूपत्वाय सर्वो वा एष यज्ञो यत् त्रैधातवीयं कामायकामाय प्र युज्यते सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यते त्रैधातवीयेन यजेताभिचरन्त्सर्वो वा (२०) एष यज्ञो यत् त्रैधातवीय॰ सर्वेणैवैनं यज्ञेनाभि चरति स्तृणुत एवैन–मेतयैव यजेताभिचर्यमाणः सर्वो वा एष यज्ञो यत् त्रैधातवीय॰ सर्वेणैव यज्ञेन यजते नैनमभिचरन्त्स्तृणुत एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद्दात्ये–तयैव यजेत सहस्रेणेजानोऽन्तं वा एष पशूनां गच्छति (३) यः सहस्रेण यजते प्रजापतिः खलु वै पशूनसृजत ता॰स्त्रैधातवीयेनैवासृजत य एवं विद्वा॰स्त्रैधातवीयेन पशुकामो यजते यस्मादेव योनेः प्रजापतिः पशूनसृजत तस्मादेवैनान्त्सृजत उपैनमुत्तर॰ सहस्रं नमति देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत सर्वो वा एष यज्ञो (४) यत् त्रैधातवीय॰ सर्वेणैव यज्ञेन यजते न देवताभ्य आ वृश्च्यते द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालास्त्रिष्षमृद्धत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तरउत्तरो ज्यायान् भवत्येवमिव हीमे लोका यवमयो मध्य एतद्वा अन्तरिक्षस्य रूप॰ समृद्ध्यै सर्वेषामभिगमयन्नव द्यत्यछम्बट्कार॰ हिरण्यं ददाति तेज एवा (५) ऽव रुन्धे तार्प्यं ददाति पशूनेवाव रुन्धे धेनुं ददात्याशिष एवाव रुन्धे साम्नो वा एष वर्णो यद्धिरण्यं यजुषां तार्प्यमुक्थामदानां धेनुरेतानेव सर्वान् वर्णानव रुन्धे ॥ (जगत्या, भिचरन्त्सर्वो वै, गच्छति, यज्ञ,-स्तेज एव, त्रिःशच्च) ॥ ११ ॥

त्रैधातवीयेष्टेर्वैनार्थमाख्यायिका ॥ विश्वेदेवा ऋषयः ।

त्वष्टा हतपुत्रो वीन्द्र॰ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति स यावदूर्ध्वः पराविध्यति तावति स्वयमेव व्यरमत यदि वा तावत् प्रवण-(१)-मासीद्यदि वा तावदध्यग्नेरासीत् स संभवन्नग्नीषोमावभि समभवत् स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँ-

१२ (तै. सं.)

ल्लोकानवृणोद्यदिमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत् तपो वै स वज्र आसीत् तमुद्यन्तुं नाशक्नोदथ वै तर्हि विष्णु-(२)-रन्या देवताऽऽसीत् सोऽब्रवीद्विष्णवेहीदमा हरिष्यावो येनायमिदमिति स विष्णुस्त्रेधाऽऽत्मानं वि न्यधत्त पृथिव्यां तृतीयमन्तरिक्षे तृतीयं दिवि तृतीयमभिपर्यावर्ताद्ध्यबिभेद्यत् पृथिव्यां तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं (३) मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णादधा मेति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यदन्तरिक्षे तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं (४) मयि वीर्यं तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णाद्द्विर्माऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यद्दिवि तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्णवनुस्थितः सोऽब्रवीन्मा मे प्र हार्येनाह–(५)-मिदमस्मि तत् ते प्र दास्यामीति त्वी३ इत्यब्रवीत् सन्धां तु सं दधावहै त्वामेव प्र विशानीति यन्मां प्रविशेः किं मा भुञ्ज्या इत्यब्रवीत् त्वामेवेन्धीय तव भोगाय त्वां प्र विशेयमित्यब्रवीत् तं वृत्रः प्राविशदुदरं वै वृत्रः क्षुत् खलु वै मनुष्यस्य भ्रातृव्यो य (६) एवं वेद हन्ति क्षुधं भ्रातृव्यं तदस्मै प्रायच्छत् तत् प्रत्यगृह्णात् त्रिर्माऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियं दधात्विति यत् त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वं यद्विष्णुरन्वतिष्ठत विष्णवेऽति प्रायच्छत् तस्मादैन्द्रावैष्णव॰ हविर्भवति (७) यद्वा इदं किं च तदस्मै तत् प्रायच्छदृचः सामानि यजू॰षि सहस्रं वा अस्मै तत् प्रायच्छत् तस्मात् सहस्रदक्षिणम् ॥ (प्रवणं, विष्णु,-र्वा इद,-मिद,-मह, यो, भवत्ये,-कविंशतिश्च) १२ ॥

राजन्यस्य शत्रुस्तम्भनिवारकग्रहः ॥ विश्वेदेवा ऋषयः ।

देवा वै राजन्याज्जायमानादबिभयुस्तमन्तरेव सन्तं दाम्ना ऽपौम्भन्त्स वा एषोऽपोम्भो जायते यद्राजन्यो यद्वा एषोऽनपोम्भो जायेत वृत्रान् घ्न॰श्चरे–द्यं कामयेत राजन्यमनपोम्भो जायेत वृत्रान् घ्न॰श्चरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेदैन्द्रो वै राजन्यो ब्रह्म बृहस्पतिर्ब्रह्मणैवैनं (१) दाम्नोऽपोम्भनान्मुञ्चति हिरण्मयं दाम दक्षिणा साक्षादेवैनं दाम्नोऽपोम्भनान्मुञ्चति ॥ (एनं, द्वादश च) ॥ १३ ॥

काम्येष्टियाज्यापुरोऽनुवाक्याः ॥ १-५, १५, १७ त्रिष्टुप्; ६-८ बृहती; ९ उष्णिक्; १०, १४, १६ गायत्री । विश्वेदेवा ऋषयः ।

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे ।
भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरति दीर्घमायुः ॥
यमादित्या अ॰शुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति ।
तेन नो राजा वरुणो बृहस्पतिरा प्यायायन्तु भुवनस्य गोपाः ॥
प्राच्यां दिशि त्वमिन्द्रासि राजोतोदीच्यां वृत्रहन् वृत्रहाऽसि ।
यत्र यन्ति स्रोत्यास्त–(१)–ज्जितं ते दक्षिणतो वृषभ एधि हव्यः

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयाति ।
विश्वा हि भूयाः पृतना अभिष्टीरुपसद्यो नमस्यो यथाऽसत् ॥
अस्येदेव प्र रिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् ।
स्वराडिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशान–(२)–मस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः ॥
त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥
यद् द्याव इन्द्र ते शत॰ शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्र॰ सूर्या अनु न जातमष्ट रोदसी ॥
न त्वा वज्रिन्त्सहस्र॰ सूर्या अनु न जातमष्ट रोदसी ॥ (३) । सोतुर्बाहुभ्या॰ सुयतो नार्वा ॥
पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः
रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥
उदग्ने शुचयस्तव॰–वि ज्योतिषो–॰–दु त्यं जातवेदस॰–
सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावापृथिवी अन्तरिक्ष॰ सूर्य आत्मा जगतस्तस्थुष–(४)–श्च ॥
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥
विश्वे देवाः शृणुतेम॰ हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम् ॥
(न,-मीशान,-मद्रि,-स्तस्थुष,-श्चित्वारिंशच्च) ॥ १४ ॥

[देवा २०४ । देवासुरा १९९ । देवासुराः १४५ । प्रजापति–१५३ ।-रश्मे ८८ । त्रिगर्भा ११२ । मारुतं ९२ । देवा १२० । मारुतं १०९ । देवाः १७१ । मयीणि २८० । स्वर्गा २७१ । देवा ६२ । नवोनव–२३० । -श्चतुर्दश ॥ २४०९ ॥]

[इति द्वितीयकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥]

इष्टिविधानम् ।

[अथ पञ्चमः प्रपाठकः ॥ ५ ॥]

विश्वरूपवधाख्यायिका, रजस्वलाव्रतानि च ॥ प्रजापतिर्ऋषिः ।

विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीत् स्वस्रीयोऽसुराणां तस्य त्रीणि शीर्षाण्यासन्त्सोमपान॰ सुरापानमन्नादन॰ स प्रत्यक्षं देवेभ्यो भागमवदत् परोक्षमसुरेभ्यः सर्वस्मै वै प्रत्यक्षं भागं वदन्ति यस्मा एव परोक्षं वदन्ति तस्य भाग उदितस्तस्मादिन्द्रोऽबिभेदीदृङ्वै राष्ट्रं वि पर्यावर्तयतीति तस्य

(१४।११) तै. सं. १।३।१४।२८ (१४।१२) तै. सं. १।२।१४।१७ (१४।१३) तै. सं. १।४।४।१

वज्रमादाय शीर्षाण्यच्छिनद्यत् सोमपान-(१)-मासीत् स कपिञ्जलोऽभवद्यत् सुरापान॰ स कलविङ्को यदन्नादन॰ स तित्तिरि–स्तस्याञ्जलिना ब्रह्महत्यामुपागृह्णात् ता॰ संवत्सरमबिभस्तं भूतान्यभ्यक्रोशन् ब्रह्महन्निति स पृथिवीमुपासीदस्यै ब्रह्महत्यायै तृतीयं प्रति गृहाणेति साऽब्रवीद्वरं वृणै खातात् पराभविष्यन्ती मन्ये ततो मा परा भूवमिति पुरा ते (२) संवत्सरादपि रोहादित्यब्रवीत् तस्मात् पुरा संवत्सरात् पृथिव्यै खातमपि रोहति वारेवृत॰ ह्यस्यै तृतीयं ब्रह्महत्यायै प्रत्यगृह्णात् तत् स्वकृतमिरिणमभवत् तस्मादाहिताग्निः श्रद्धादेवः स्वकृत इरिणे नाव स्येद्ब्रह्महत्यायै ह्येष वर्णः स वनस्पतीनुपासीदस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति तेऽब्रुवन् वरं वृणामहै वृक्णात् (३) पराभविष्यन्तो मन्यामहे ततो मा परा भूमेत्यावश्चनाद्वो भूया॰स उत्तिष्ठानित्यब्रवीत् तस्माद्वृक्षाणामावश्चनाद्वृक्षाणां भूया॰स उत्तिष्ठन्ति वारेवृत॰ ह्येषां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्स निर्यासोऽभवत् तस्मान्निर्यासस्य नाऽऽश्यं ब्रह्महत्यायै ह्येष वर्णोऽथो खलु य एव लोहितो यो वाऽऽवश्चनान्निर्येषति तस्य नाऽऽश्यं (४) काममन्यस्य स स्त्रीष॰सादमुपासीदस्यै ब्रह्महत्यायै तृतीयं प्रति गृह्णीतेति ता अब्रुवन् वरं वृणामहा ऋत्वियात् प्रजां विन्दामहै काममा विजनितोः सं भवामेति तस्मादृत्वियात् स्त्रियः प्रजां विन्दन्ते काममा विजनितोः सं भवन्ति वारेवृत॰ ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन्त्सा मलवद्वासा अभवत् तस्मान्मलवद्वाससा न सं वदेत (५) न सहाऽऽसीत नास्या अन्नमद्याद्ब्रह्महत्यायै ह्येषा वर्णं प्रतिमुच्याऽऽस्तेऽथो खल्वाहुरभ्यञ्जनं वाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं काममन्यदिति यां मलवद्वाससम्॰ सम्भवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो यां पराचीं तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या (६) ऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलतिरपमारी याऽऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन् या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जु॰ सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेदखर्वेण वा (७) पात्रेण प्रजायै गोपीथाय ॥ (सोमपानं, ते, वृक्णा,-दाश्यं, वदेत, या, वा, त्रीणि च) ॥ १ ॥

पूर्णमासयागस्याग्नीषोमीयपुरोडाशः ॥ प्रजापतिर्ऋषिः ।

त्वष्टा हतपुत्रो वीन्द्र॰ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तं नोपाह्वयत पुत्रं मेऽवधीरिति स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयत् स्वाहेन्द्रशत्रुर्वर्धस्वेति यदवर्तयत् तद्वृत्रस्य वृत्रत्वं यदब्रवीत् स्वाहेन्द्रशत्रुर्वर्धस्वेति तस्मादस्ये-(१)-न्द्रः शत्रुरभवत् स सम्भवन्नग्नीषोमावभि समभवत् स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वं तस्मादिन्द्रोऽबिभेत् स प्रजापतिमुपाधावच्छत्रुर्मेऽजनीति तस्मै वज्र॰ सिक्त्वा प्रायच्छदेतेन जहीति तेनाभ्यायत तावब्रूतामग्नीषोमौ मा (२) प्र हार्ग्गावमन्तः स्व इति मम वै युव॰ स्थ इत्यब्रवीन्मामभ्येतमिति तौ भागधेयमैच्छेतां ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् तावब्रूतामभि संदष्टौ वै स्वो न शक्नुव ऐतुमिति स इन्द्र आत्मनः शीतरूरावजनयत्

तच्छीतरूरयोर्जन्म य एवꣳ शीतरूरयोर्जन्म वेद (३) नैनꣳ शीतरूरौ हतस्ताभ्यामेनमभ्यनयत् तस्माज्जञ्जभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितां प्राणो वै दक्षोऽपानः क्रतुस्तस्माज्जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवाऽऽत्मन्धत्ते सर्वमायुरेति स देवतां वृत्रान्निर्हृत्य वार्त्रघ्नꣳ हविः पूर्णमासे निरवपद् घ्नन्ति वा एनं पूर्णमास आ (४) ऽमावास्यायां प्याययन्ति तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायां तत्सꣳस्थाप्य वार्त्रघ्नꣳ हविर्वज्रमादाय पुनरभ्यायत ते अब्रूतां द्यावापृथिवी मा प्र हारावयोर्वै श्रित इति ते अब्रूतां वरं वृणावहै नक्षत्रविहिताऽहमसानीत्यसावब्रवीच्चित्रविहिताऽहमितीयं तस्मान्नक्षत्रविहिताऽसौ चित्रविहितेयं य एवं द्यावापृथिव्यो-(५)-र्वरं वेदैनं वरो गच्छति स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन् ते देवा वृत्रꣳ हत्वाऽग्नीषोमावब्रुवन् हव्यं नो वहतमिति तावब्रूतामपतेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज इति तेऽब्रुवन् क इदमच्छैतीति गौरित्यब्रुवन् गौर्वाव सर्वस्य मित्रमिति साऽब्रवीत् (६) वरं वृणै मय्येव सतोभयेन भुनजाध्या इति तद्गौराहरत् तस्माद्गवि सतोभयेन भुञ्जत एतद्वा अग्नेस्तेजो यद्घृतमेतत्सोमस्य यत्पयो य एवमग्नीषोमयोस्तेजो वेद तेजस्व्येव भवति ब्रह्मवादिनो वदन्ति किंदेवत्यं पौर्णमासमिति प्राजापत्यमिति ब्रूयात् तेनेन्द्रं ज्येष्ठं पुत्रं निरवासाययदिति तस्मा-(७)-ज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ति ॥ (अभ्य, आ, वेदा,-ऽस, द्यावापृथिव्यो,-रब्रवीत्, तस्मा,-त्पञ्चाशच्च) ॥ २ ॥

पौर्णमासेऽनुनिर्वाप्यो वैमृधपुरोडाशः, अमावास्यायां सान्नाय्यहविर्विधानञ्च ॥ प्रजापतिर्ऋषिः ।

इन्द्रं वृत्रं जघ्निवाꣳसं मृधोऽभि प्रावेपन्त स एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्यत् तं निरवपत् तेन वै स मृधोऽपाहत यद्वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति मृध एव तेन यजमानोऽप हत इन्द्रो वृत्रꣳ हत्वा देवताभिश्चेन्द्रियेण च व्यार्ध्यत स एतमाग्नेयमष्टाकपालममावास्यायामपश्यदैन्द्रं दधि (१) तं निरवपत् तेन वै स देवताश्चेन्द्रियं चावारुन्ध यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवत्यैन्द्रं दधि देवताश्चैव तेनेन्द्रियं च यजमानोऽव रुन्ध इन्द्रस्य वृत्रं जघ्नुष इन्द्रियं वीर्यं पृथिवीमनु व्यार्छत् तदोषधयो वीरुधोऽभवन्त्स प्रजापतिमुपाधावद्वृत्रं मे जघ्नुष इन्द्रियं वीर्यं (२) पृथिवीमनु व्यारत् तदोषधयो वीरुधोऽभवन्निति स प्रजापतिः पशुभ्योऽब्रवीदेतदस्मै सं नयतेति तत्पशव ओषधीभ्योऽध्यात्मन्त्समनयन् तत्प्रत्यदुहन् यत्समनयन्तत्सांनाय्यस्य सांनाय्यत्वं यत्प्रत्यदुहन्तत्प्रतिधुषः प्रतिधुक्त्वꣳ समनेषुः प्रत्यधुक्षन्न तु मयि श्रयत इत्यब्रवीदेतदस्मै (३) शृतं कुरुतेत्यब्रवीत् तदस्मै शृतमकुर्वन्निन्द्रियं वावास्मिन्वीर्यं तदश्रयन्तच्छृतस्य शृतत्वꣳ समनेषुः प्रत्यधुक्षञ्छृतमक्रन्न तु मा धिनोतीत्यब्रवीदेतदस्मै दधि कुरुतेत्यब्रवीत् तदस्मै दध्यकुर्वन्तदेनमधिनोत्तद्दध्नो दधित्वं ब्रह्मवादिनो वदन्ति दध्नः पूर्वस्यावदेयं (४) दधि हि पूर्वं क्रियत इत्यनादृत्य तच्छृतस्यैव पूर्वस्याव द्येदिन्द्रियमेवास्मिन्वीर्यꣳ श्रित्वा दध्नोपरिष्टाद्धिनोति यथापूर्वमुपैति यत्पूतीकैर्वा पर्णवल्कैर्वाऽऽतञ्च्यात्सौम्यं तद्यत्क्वलै राक्षसं तद्यत्तण्डुलैर्वैश्वदेवं तद्यदातञ्चनेन मानुषं तद्यद्दध्ना तत्सेन्द्रं दध्नाऽऽतनक्ति (५) सेन्द्रत्वाया-ऽग्निहोत्रोच्छेषणमभ्यातनक्ति यज्ञस्य संतत्यै इन्द्रो वृत्रꣳ हत्वा परां परावतमगच्छद-

पाराधमिति मन्यमानस्तं देवताः प्रैषमैच्छन्त्सोऽब्रवीत् प्रजापतिर्यः प्रथमोऽनुविन्दति तस्य प्रथमं भागधेयमिति तं पितरोऽन्वविन्दन्तस्मात् पितृभ्यः पूर्वेद्युः क्रियते सोऽमावास्यां प्रत्याऽगच्छत्तं देवा अभि समगच्छन्तामा वै नो (६) ऽद्य वसु वसतीतीन्द्रो हि देवानां वसु तदमावास्याया अमावास्यत्वं ब्रह्मवादिनो वदन्ति किंदेवत्यꣳ सांनाय्यमिति वैश्वदेवमिति ब्रूयाद्विश्वे हि तद्देवा भागधेयमभि समगच्छन्तेत्यथो खल्वैन्द्रमित्येव ब्रूयादिन्द्रं वाव ते तदभिषज्यन्तोऽभि समगच्छन्तेति ॥ (दधि, वीर्यं,-अस्मै, अवदेयं, तनक्ति, नो, द्विचत्वारिꣳशच्च) ॥ ३ ॥

भ्रातृव्यवतः पशुकामस्य च यागौ, सांनाय्यदेवता च ॥ प्रजापतिर्ऋषिः ।

ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासौ यजेत य एनौ सेन्द्रौ यजेतेति वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति तेन पूर्णमासः सेन्द्र ऐन्द्रं दध्यमावास्यायां तेनामावास्या सेन्द्रा य एवं विद्वान्दर्शपूर्णमासौ यजते सेन्द्रावेवैनौ यजते श्वःश्वोऽस्मा ईजानाय वसीयो भवति देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता-(१)-मिष्टिमपश्यन्नाग्नावैष्णवमेकादशकपालꣳ सरस्वत्यै चरुꣳ सरस्वते चरुं तां पौर्णमासꣳ सꣳस्थाप्यानु निरवपन्ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्त्स्यात्स पौर्णमासꣳ सꣳस्थाप्यैतामिष्टिमनु निर्वपेत् पौर्णमासेनैव वज्रं भ्रातृव्याय प्रहृत्याऽऽग्नावैष्णवेन देवताश्च यज्ञं च भ्रातृव्यस्य वृङ्क्ते मिथुनान्पशून्त्सारस्वताभ्यां यावदेवास्यास्ति तत् (२) सर्वं वृङ्क्ते पौर्णमासीमेव यजेत भ्रातृव्यवान्नामावास्याꣳ हत्वा भ्रातृव्यं नाऽऽप्याययति साकम्प्रस्थायीयेन यजेत पशुकामो यस्मै वा अल्पेनाऽऽहरन्ति नाऽऽत्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यं तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति दारुपात्रेण जुहोति न हि मृन्मयमाहुतिमानश औदुम्बरं (३) भवत्यूर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे नागतश्रीर्महेन्द्रं यजेत त्रयो वै गतश्रियः शुश्रुवान्ग्रामणी राजन्यस्तेषां महेन्द्रो देवता यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान्भवति संवत्सरमिन्द्रं यजेत संवत्सरꣳ हि व्रतं नाति स्वै-(४)-वैनं देवतेज्यमाना भूत्या इन्धे वसीयान्भवति संवत्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालं निर्वपेत् संवत्सरमेवैनं वृत्रं जघ्निवाꣳसमग्निर्व्रतपतिर्व्रतमा लम्भयति ततोऽधि कामं यजेत ॥ (एतां, त,-दौदुम्बरꣳ, स्वा, त्रिꣳशच्च) ॥ ४ ॥

अभ्युदयेष्टि, ५ स्वर्गकामस्य दाक्षायणयज्ञः, १० व्यावृत्कामस्य संवेष्टिः ॥ प्रजापतिर्ऋषिः ।

नासोमयाजी सं नयेदनागतं वा एतस्य पयो योऽसोमयाजी यदसोमयाजी सं नयेत् परिमोष एव सोऽनृतं करोत्यथो परैव सिच्यते सोमयाज्येव सं नयेत् पयो वै सोमः पयः सांनाय्यं पयसैव पय आत्मन्धत्ते वि वा एतं प्रजया पशुभिरर्धयति वर्धयत्यस्य भ्रातृव्यं यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा (१) अभ्युदेति त्रेधा तण्डुलान्वि भजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधꣳश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमग्निरेवास्मै प्रजां प्रजनयति वृद्धामिन्द्रः प्र यच्छति यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रति तिष्ठति न द्वे (२) यजेत यत्पूर्वया सम्प्रति यजेतो-

त्तरया छम्बट्कुर्याद्यदुत्तरया सम्प्रति यजेत पूर्वया छम्बट्कुर्यान्नेष्टिर्भवति न यज्ञस्तदनु ह्वीतमुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायतेऽनादृत्य तद्द्वे एव यजेत यज्ञमुखमेव पूर्वयाऽऽलभते यजत उत्तरया देवता एव पूर्वयाऽवरुन्ध इन्द्रियमुत्तरया देवलोकमेव (३) पूर्वयाऽभिजयति मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोक ऋधुकं भवति दाक्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे सं नयेन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजेत पूर्णमासे वै देवानाꣳ सुतस्तेषामेतमर्धमासं प्रसुतस्तेषां मैत्रावरुणी वशाऽमावास्यायामनूबन्ध्या यत् (४) पूर्वेद्युर्यजते वेदिमेव तत् करोति यद्वत्सानपाकरोति सदोहविर्धाने एव सं मिनोति यद्यजते देवैरेव सुत्याꣳ सं पादयति स एतमर्धमासꣳ सधमादं देवैः सोमं पिबति यन्मैत्रावरुण्याऽऽमिक्षयाऽमावास्यायां यजते यैवासौ देवानां वशाऽनूबन्ध्या सो एवैषैतस्य साकं वा एष देवानभ्यारोहति य एषां यज्ञ-(५)-मभ्यारोहति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान्भवति यदि नावविध्यति सदृङ् व्यावृत्काम एतेन यज्ञेन यजेत क्षुरपविर्ह्येष यज्ञस्तानक् पुण्यो वा भवति प्र वा मीयते तस्यैतद्व्रतं नानृतं वदेन्न माꣳसमश्नीयान्न स्त्रियमुपेयान्नास्य पल्पूलनेन-वासः पल्पूलयेयुः (६) -रेतद्धि देवाः सर्वं न कुर्वन्ति ॥ (चन्द्रमा, द्वे, एव, य,-ज्ञं, पल्पूलयेयुः, दश च) ॥ ५ ॥

दर्शपूर्णमासयोः सोमयागेन सह तौल्यकथनम् ॥ प्रजापतिर्ऋषिः ।

एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे देवानामव स्यत्ये-तानि वा अङ्गपरूꣳषि संवत्सरस्य यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजतेऽङ्गपरूꣳष्येव संवत्सरस्य प्रति दधात्ये-ते वै संवत्सरस्य चक्षुषी यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गं लोकमनु पश्यत्ये-(१)-षा वै देवानां विक्रान्तिर्यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु वि क्रमत एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते य एव देवयानः पन्थास्तꣳ समारोहत्ये-तौ वै देवानाꣳ हरी यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते यावेव देवानाꣳ हरी ताभ्या-(२)-मेवैभ्यो हव्यं वहत्ये-तद्वै देवानामास्यं यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते साक्षादेव देवानामास्ये जुहोत्ये-ष वै हविर्धानी यो दर्शपूर्णमासयाजी सायंप्रातरग्निहोत्रं जुहोति यजते दर्शपूर्णमासावहरहर्हविर्धानिनाꣳ सुतो य एवं विद्वान्दर्शपूर्णमासौ यजते हविर्धान्यस्मीति सर्वमेवास्य बर्हिष्यं दत्तं भवति देवा वा अहः (३) -र्यज्ञियं नाविन्दन्ते दर्शपूर्णमासावपुनन्तौ वा एतौ पूतौ मेध्यौ यद्दर्शपूर्णमासौ य एवं विद्वान्दर्शपूर्णमासौ यजते पूतावेवैनौ मेध्यौ यजते नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिन्द्रियः स्यात् सोमस्य वै राज्ञोऽर्धमासस्य रात्रयः पत्नय आसन्तासाममावास्यां च पौर्णमासीं च नोपैत् (४) ते एनमभि समनह्येतां तं यक्ष्म आर्च्छद्राजानं यक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत्पापीयानभवत्तत्पापयक्ष्मस्य यज्जायाभ्यामविन्दत्तज्जायेन्यस्य य एवमेतेषां यक्ष्माणां जन्म वेद नैनमेते यक्ष्मा विन्द-

न्ति स एते एव नमस्यन्नुपाधावत् ते अब्रूतां वरं वृणावहा आवं देवानां भागधे असाव-(५)-दधि देवा इज्यान्ता इति तस्मात्सदृशीनाꣳ रात्रीणाममावास्यायां च पौर्णमास्यां च देवा इज्यन्त एते हि देवानां भागधे भागधा अस्मै मनुष्या भवन्ति य एवं वेद भूतानि क्षुधमघ्नन्त्सद्यो मनुष्या अर्धमासे देवा मासि पितरः संवत्सरे वनस्पतयस्तस्मादहरहर्मनुष्या अशनमिच्छन्तेऽर्धमासे देवा इज्यन्ते मासि पितृभ्यः क्रियते संवत्सरे वनस्पतयः फलं (६) गृह्णन्ति य एवं वेद हन्ति क्षुधं भ्रातृव्यम् ॥ (पश्यति, ताभ्या,-महः,-दयात्, फलꣳ, सप्त च) ॥ ६ ॥

सामिधेनीमन्त्रव्याख्यानम् ॥ प्रजापतिर्ऋषिः ।

देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाश्रयन्त हिं करोति साम्नैवाकर्हिं करोति यत्रैव देवा अश्रयन्त तत एवैनान्प्र युङ्क्ते हिं करोति वाच एवैष योगो हिं करोति प्रजा एव तद्यजमानः सृजते त्रिः प्रथमामन्वाह त्रिरुत्तमां यज्ञस्यैव तद्बर्सं (१) नह्यत्यप्रस्रꣳसाय संततमन्वाह प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै राथन्तरीं प्रथमामन्वाह राथन्तरो वा अयं लोक इममेव लोकमभि जयति त्रिर्वि गृह्णाति त्रय इमे लोका इमानेव लोकानभि जयति बार्हतीमुत्तमामन्वाह बार्हतो वा असौ लोकोऽमुमेव लोकमभि जयति प्र वो (२) वाजा इत्यनिरुक्तां प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर्यज्ञमेव प्रजापतिमा रभते प्र वो वाजा इत्यन्वाहान्नं वै वाजोऽन्नमेवाव रुन्धे प्र वो वाजा इत्यन्वाह तस्मात्प्राचीनꣳ रेतो धीयतेऽग्न आ याहि वीतय इत्याह तस्मात्प्रतीचीः प्रजा जायन्ते प्र वो वाजा (३) इत्यन्वाह मासा वै वाजा अर्धमासा अभिद्यवो देवा हविष्मन्तो गौर्घृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिदमसीदमसीत्येव यज्ञस्य प्रियं धामाव रुन्धे यं कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्याग्न आ याहि वीतय इति सन्ततमुत्तरमर्धर्चमा लभेत (४) प्राणेनैवास्यापानं दाधार सर्वमायुरेति यो वा अरत्निꣳ सामिधेनीनां वेदारत्नावेव भ्रातृव्यं कुरुतेऽर्धर्चौ सं दधात्येष वा अरत्निः सामिधेनीनां य एवं वेदारत्नावेव भ्रातृव्यं कुरुत ऋषेरृषेर्वा एता निर्मिता यत्सामिधेन्यस्ता यदसंयुक्ताः स्युः प्रजया पशुभिर्यजमानस्य वि तिष्ठेरन्नर्धर्चौ सं दधाति सं (५) युनक्त्येवैनास्ता अस्मै संयुक्ता अवरुद्धाः सर्वामाशिषं दुह्रे ॥ (बर्सं, वो, वाजा, लभेत, सं, दश च) ॥ ७ ॥

द्वितीयादिसामिधेनीमन्त्रव्याख्यानम् ॥ प्रजापतिर्ऋषिः ।

अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह रथन्तरस्यैष वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तत्सामन्वन्तं करो-त्यग्निरमुष्मिँल्लोक आसीदादित्योऽस्मिंस्ताविमौ लोकावशान्तौ (१) आस्तां ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यस्मिँल्लोकेऽग्निमदधुर्बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यं ततो वा इमौ लोकावशाम्यतां यदेवमन्वाहानयोर्लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवं वेद पञ्चदश सामिधेनीरन्वाह पञ्चदश (२) वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते तासां त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः संवत्सरस्य रात्रयोऽक्षरश एव संवत्सरमाप्नोति नृमेधश्च परुच्छेपश्च

ब्रह्मवाद्यमवदेतामस्मिन् दारावार्द्रेऽग्निं जनयाव यतरो नौ ब्रह्मीयानिति नूमेध्योऽभ्यवदत् स धूममजनयत परुच्छेपोऽभ्यवदत् सोऽग्निमजनयदृष इत्यब्रवीत् (३) यत् समावद्विद्म कथा त्वमग्निमजीजनो नाहमिति सामिधेनीनामेवाहं वर्णं वेदेत्यब्रवीद् घृतवत् पदमनूच्यते स आसां वर्णस्तं त्वा समिद्भिरङ्गिर इत्याह सामिधेनीष्वेव तज्ज्योतिर्जनयति[1] स्त्रियस्तेन यदृचः स्त्रियस्तेन यद्गायत्रियः स्त्रियस्तेन यत् सामिधेन्यो वृषण्वतीमन्वाह (४) तेन पुंस्वतीस्तेन सेन्द्रास्तेन मिथुना अग्निर्देवानां दूत आसीदुशना काव्योऽसुराणां तौ प्रजापतिं प्रश्नमैतां स प्रजापतिरग्निं दूतं वृणीमह इत्यभि पर्यावर्तत ततो देवा अभवन् पराऽसुरा यस्यैवं विदुषोऽग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्य-ध्वरवतीमन्वाह भ्रातृव्यमेवैतया (५) ध्वरति शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह परिधिमेवैतं परि दधात्यस्कन्दाय यदतं ऊर्ध्वमभ्यादध्याद्यथा बहिःपरिधि स्कन्दति तादृगेव तत् त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणां सहरक्षा असुराणां त एतर्ह्या शंसन्ते मां वरिष्यते मा-(६)-मिति वृणीध्वं हव्यवाहनमित्याह य एव देवानां तं वृणीत आर्षेयं वृणीते बन्धोरेव नैत्यथो संतत्यै[12] परस्तादर्वाचो वृणीते तस्मात् परस्तादर्वाञ्चो मनुष्यान् पितरोऽनु प्र पिपते[13] ॥ (अशान्तौ, पञ्चदश,-ऽब्रवी,-दन्वाह,-तया, मा,-मेकान्नत्रिंशच्च) ॥ ८ ॥

प्रवरमन्त्रस्य निगदस्य, ९-१५ स्रुगाद्यापननिगदस्य च व्याख्यानम् ॥ प्रजापतिर्ऋषिः ।

अग्ने महाँ असीत्याह महान् ह्येष यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो हव्यं भरति[1] देवेद्ध इत्याह देवा ह्येतमैन्धत मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐन्ध-र्षिष्टुत इत्याहर्षयो ह्येतमस्तुवन् विप्रानुमदित इत्याह (१) विप्रा ह्येते यच्छुश्रुवांसः कविशस्त इत्याह कवयो ह्येते यच्छुश्रुवांसो ब्रह्मसंशित इत्याह ब्रह्मसंशितो ह्येष घृताहवन इत्याह घृताहुतिर्ह्यस्य प्रियतमा प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानां रथीरध्वराणामित्याहैष हि देवरथोऽतूर्तो होतेत्याह न ह्येतं कश्चन (२) तरति तूर्णिर्हव्यवाडित्याह सर्वं ह्येष तरत्या-स्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां चमसो देवपान इत्याह चमसो ह्येष देवपानोऽराँ इवाग्ने नेमिर्देवांस्त्वं परिभूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान् देवयते यजमानायेति भ्रातृव्यमस्मै (३) जनयेदा वह देवान् यजमानायेत्याह यजमानमेवैतेन वर्धयत्य-ग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयत आ चाग्ने देवान् वह सुयजा च यज जातवेद इत्याहाग्निमेव तत् संश्यति सोऽस्य संशितो देवेभ्यो हव्यं वहत्य-ग्निर्होते-(४)-त्याहाग्निर्वै देवानां होता य एव देवानां होता तं वृणीते स्मो वयमित्याहाऽऽत्मानमेव सत्त्वं गमयति[11] साधु ते यजमान देवतेत्याहाऽऽशिषमेवैतामा शास्ते[11] यद्ब्रूयादग्निं होतारमवृथा इत्यग्निनोभयतो यजमानं परि गृह्णीयात् प्रमायुकः स्यात्-यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृत् (५) यद् द्वे इव ब्रूयाद् भ्रातृव्यमस्मै जनयेद् घृतवतीमध्वर्यो स्रुचमाऽस्यस्वेत्याह यजमानमेवैतेन वर्धयति[13] देवायुवमित्याह देवान् ह्येषाऽवति विश्ववारामित्याह विश्वं ह्येषाऽवती-डामहै देवाँ ईडेन्यान्नमस्याम नमस्यान् यजाम यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव (६) तद्यथाभागं यजति[15] ॥

(आह, चना,-ऽस्मै,-होता,-ऽव,-देव, त्रीणि च) ॥ ९ ॥

नैमित्तिक्यः काम्याश्च सामिधेन्यः ॥ प्रजापतिर्ऋषिः ।

त्रीँस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान करोति[1] पञ्चदशानु ब्रूयाद्राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैनं स्तोमे प्रति ष्ठापयति[2] त्रिष्टुभा परि दध्यादिन्द्रियं वै त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियं परि गृह्णाति[3] यदि कामयेत (१) ब्रह्मवर्चसमस्त्विति गायत्रिया परि दध्याद्ब्रह्मवर्चसं वै गायत्री ब्रह्मवर्चसमेव भवति[4] सप्तदशानु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनं स्तोमे प्रति ष्ठापयति[5] जगत्या परि दध्याज्जागता वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून् परि गृह्णात्ये-कविंशतिमनु ब्रूयात् प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्यै[7] (२) चतुर्विंशतिमनु ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्धे[8] त्रिंशतमनु ब्रूयादन्नकामस्य त्रिंशदक्षरा विराडन्नं विराड्विराजैवास्मा अन्नाद्यमव रुन्धे[9] द्वात्रिंशतमनु ब्रूयात् प्रतिष्ठाकामस्य द्वात्रिंशदक्षराऽनुष्टुगनुष्टुप् छन्दसां प्रतिष्ठा प्रतिष्ठित्यै[10] षट्त्रिंशतमनु ब्रूयात् पशुकामस्य षट्त्रिंशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशू-(३)-नव रुन्धे[11] चतुश्चत्वारिंशतमनु ब्रूयादिन्द्रियकामस्य चतुश्चत्वारिंशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभैवास्मा इन्द्रियमव रुन्धे[12] ऽष्टाचत्वारिंशतमनु ब्रूयात् पशुकामस्याष्टाचत्वारिंशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धे[13] सर्वाणि छन्दांस्यनु ब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य छन्दांस्यवरुद्धानि यो बहुयाजी-परिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै[15] ॥ (कामयेत, प्रतिष्ठित्यै, पशून्, सप्तचत्वारिंशच्च) ॥ १० ॥

सामिधेनीषु होतुर्नियमविशेषः, ९-२५ आध्वर्यव आघारश्च ॥ प्रजापतिर्ऋषिः ।

निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवाना-मुप व्ययते देवलक्ष्ममेव तत् कुरुते[1] तिष्ठन्नन्वाह तिष्ठन् ह्याश्रुततरं वदति[3] तिष्ठन्नन्वाह सुवर्गस्य लोकस्याभिजित्या आसीनो यजत्यस्मिन्नेव लोके प्रति तिष्ठति[5] यत् क्रौञ्चमन्वाहाऽऽसुरं तद्यन्मन्द्रं मानुषं तद्यदन्तरा तत् सदेवमन्तराऽनूच्यं सदेवत्वाय[6] विद्वांसो वै (१) पुरा होतारोऽभूवन् तस्माद्विधृता अध्वानोऽभूवन् न पन्थानः समरुक्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाहाध्वनां विधृत्यै पथामसंरोहाया-थो भूतं चैव भविष्यच्चाव रुन्धेऽथो परिमितं चैवापरिमितं चाव रुन्धेऽथो ग्राम्यांश्चैव पशूनारण्यांश्चाव रुन्धेऽथो (२) देवलोकं चैव मनुष्यलोकं चाभि जयति[8] देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्त्स प्रजापतिस्तूष्णीमाघारमा ऽघारयत् ततो वै देवा यज्ञमन्वपश्यन् यत् तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या अथो सामिधेनीरेवाभ्यनक्त्य-लूक्षो भवति य एवं वेदा-थो तर्पयत्येवैना-स्तृप्यति प्रजया पशुभि-(३)-र्य एवं वेद[12] यदेकया ऽऽघारयेदेकां प्रीणीयाद्यद् द्वाभ्यां द्वे प्रीणीयाद्यत् तिसृभिरति तद्रेचयेन्मनसा ऽऽघारयति मनसा ह्यनाप्तमाप्यते[14] तिर्यञ्चमा घारयत्यच्छम्बट्कारं[15] वाक् च मनश्चाऽऽर्तीयेतामहं देवेभ्यो हव्यं वहामीति वागब्रवीदहं देवेभ्य इति मनस्तौ प्रजापतिं प्रश्नमैतां सोऽब्रवीत् (४) प्रजापतिर्दूतीरेव त्वं मनसोऽसि यद्धि मनसा ध्यायति तद्वाचा वदतीति तत् खलु तुभ्यं न वाचा

जुहवन्नित्यब्रवीत् तस्मान्मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै[16] परिधीन्त्सं मार्ष्टि पुनात्येवैनान्त्[17] त्रिर्मध्यमं त्रयो वै प्राणाः प्राणानेवाभि जयति त्रिर्दक्षिणार्धं त्रयं (५) इमे लोका इमानेव लोकानभि जयति[18] त्रिरुप वाजयति त्रिरुत्तरार्धं त्रयो वै देवयानाः पन्थानस्तानेवाभि जयति[19] द्वादश सं पद्यन्ते द्वादश मासाः संवत्सरः संवत्सरमेव प्रीणात्यथो संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्यै त्रयो वै देवलोका देवलोकानेवाभि जयति[11] आघारमा घारयति तिर इव (६) वै सुवर्गो लोकः सुवर्गमेवास्मै लोकं प्र रोचयत्यृ-जुमा घारयत्यृजुर्ह्ये हि प्राणः संततमा घारयति प्राणानामन्नाद्यस्य संतत्या अथो रक्षसामपहत्यै[22] यं कामयेत प्रमायुकः स्यादिति जिह्मं तस्याऽऽ घारयेत् प्राणमेवास्माज्जिह्मं नयति ताजक् प्र मीयते[23] शिरो वा एतद्यज्ञस्य यदाघार आत्मा ध्रुवा (७) ऽऽघारमाघार्य ध्रुवां समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति दधात्य-ग्निर्देवानां दूत आसीद् दैव्योऽसुराणां तौ प्रजापतिं प्रश्नमैतां स प्रजापतिर्ब्राह्मणमब्रवीदेतद्वि ब्रूहीत्या श्रावयेतीदं देवाः शृणुतेति वाव तदब्रवीदग्निर्देवो होतेति य एव देवानां तमवृणीत ततो देवा (८) अभवन् पराऽसुरा यद्ब्राह्मणश्चाब्राह्मणश्च प्रश्नमेयातां ब्राह्मणायाधि ब्रूयाद्यद्ब्राह्मणायाध्याहाऽऽत्मनेऽध्याह यद्ब्राह्मणं पराहाऽऽत्मानं पराऽऽह तस्माद्ब्राह्मणो न परोच्यः[26] ॥ (वा, त्रयो, पशुभि,-रब्रवीत, त्रयं, इव, ध्रुवा, देवा,-श्चत्वारिंशच्च) ॥ ११ ॥

यस्यैवं विदुषः प्रवरं प्रवृणते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति[25]

काम्येष्टियाज्यापुरोऽनुवाक्याः । विश्वेदेवा ऋषयः ।

आयुष्टे*-आयुर्दा अग्ने*-आ प्यायस्व*- सं ते*-ऽवं ते हेडः*- उदुत्तमं*- प्र णो देव्या*-नो दिवो*-ऽग्नाविष्णू*- अग्नाविष्णू*- इमं मे वरुण*- तत् त्वा यामि*- दूत्यं[13]*- चित्रम्*- ॥

अपां नपादा ह्यस्थादुपस्थं जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः[15] ॥
सम-(१)-न्या यन्त्युप यन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरापः[16] ।
तमस्मेरा युवतयो युवानं मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेण शिक्वना रेवदग्निर्दीदायानिध्मो घृतनिर्णिगप्सु ॥
स शुक्रेण शिक्वना रेवदग्निर्दीदायानिध्मो घृतनिर्णिगप्सु ॥
इन्द्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृडात ईदृशे[18] ॥
इन्द्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृडात ईदृशे ॥
इन्द्रावरुणा युवमध्वराय नो (२) विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः[19] ॥

(१२-१।२) १।२।१४।११-१२, (१२।३-४) ४।२।७।१२-१३, (१२।५-६) १।५।१।१९-१०, (१२।७-८,९-१०) १।८।२२।३-४, १-२, (१२।११-१२) २।१।११।२१-२२, (१२।१३-१४) १।४।४३।१-२ ।

आ नो मित्रावरुणा*-प्र बाहवा[21]*-
त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अव यक्ष्व नो वरुणं (१) रराणो वीहि मृडीकं सुहवो न एधि[23] ॥
प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः[24] ॥
प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।
धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् (४) ॥
वि पाजसा*-वि ज्योतिषा*- ॥
स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीद्यत् ॥
तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम ।
स यक्षद्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥
अंहोमुचे[31]*- विवेष यन्मा*- वि न इन्द्र[32]*-न्द्र क्षत्रं*- मिन्द्रियाणि शतक्रतो[34]*- ऽनु ते दायि[35]*- ॥ (तं, नो, वरुणं, राजन्,-श्चतुश्चत्वारिंशच्च) ॥ १२ ॥

[विश्वरूप-१५३ ।-एवहे-१५४ ।-ग्नं १४१ । ब्रह्मवादिनो २३० । नै-३०६ ।-व २०७ । देवा २६० । नवुशो ३११ । ऽग्ने ३०३ । त्रीन् १९७ । निवीत-४४० ।-माघु-२४७ -द्वादश ॥ २६६५)]

[इति द्वितीयकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥]

अवशिष्टकर्माभिधानम् ।

[अथ षष्ठः प्रपाठकः ॥ ६ ॥]

प्रयाजविधिः ॥ प्रजापतिर्ऋषिः ।

समिधो यजति वसन्तमेवर्तूनामव रुन्धे तनूनपातं यजति ग्रीष्ममेवाव रुन्ध इडो यजति वर्षा एवाव रुन्धे बर्हिर्यजति शरदमेवाव रुन्धे स्वाहाकारं यजति हेमन्तमेवाव रुन्धे तस्मात् स्वाहाकृता हेमन् पशवोऽव सीदन्ति समिधो यजत्युषस एव देवतानामव रुन्धे तनूनपातं यजति यज्ञमेवाव रुन्ध (१) इडो यजति पशूनेवाव रुन्धे बर्हिर्यजति प्रजामेवाव रुन्धे[1] समानयत उपभृतस्तेजो वा आज्यं प्रजा बर्हिः प्रजास्वेव तेजो दधाति[3] स्वाहाकारं यजति वाचमेवाव रुन्धे[4] दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड्विराजैवान्नाद्यमव रुन्धे[5] समिधो यजत्यस्मिन्नेव लोके प्रति तिष्ठति तनूनपातं यजति (२) यज्ञ एवान्तरिक्षे प्रति तिष्ठतीडो यजति पशुष्वेव प्रति तिष्ठति बर्हिर्यजति य एव देवयानाः पन्थानस्तेष्वेव प्रति तिष्ठति स्वाहाकारं यजति सुवर्ग एव लोके प्रति तिष्ठत्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठति[8]

(१२।२०-२१) १।८।२२।८-९, (१२।२६-२७) ४।१।५।१, १।२।१४।१, (१२।३०-३४) १।६।१२।९-१०, १२-११, ३-४

देवासुरा एषु लोकेष्वस्पर्धन्त ते देवाः प्रयाजैरेभ्यो लोकेभ्योऽसुरान् प्राणुदन्त तत् प्रयाजानां (३) प्रयाजत्वं यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान्नुदतेऽभिक्रामं जुहोत्यभिजित्यै यो वै प्रयाजानां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते समिधो बहीरिव यजति तनूनपातमेकमिव मिथुनं तदिडो बहीरिव यजति बर्हिरेकमिव मिथुनं तदेतद्वै प्रयाजानां मिथुनं य एवं वेद प्र (४) प्रजया पशुभिर्मिथुनैर्जायते देवानां वा अनिष्टा देवता आसन्नथासुरा यज्ञमजिघांसन् ते देवा गायत्रीं व्यौहन् पञ्चाक्षराणि प्राचीनानि त्रीणि प्रतीचीनानि ततो वर्म यज्ञायाभवद्वर्म यजमानाय यत् प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै तस्माद्वरूथं पुरस्ताद्वर्षीयः पश्चाद्ध्रसीयो देवा वै पुरा रक्षोभ्य (५) इति स्वाहाकारेण प्रयाजेषु यज्ञꣳ सꣳस्थाप्यमपश्यन् तꣳ स्वाहाकारेण प्रयाजेषु समस्थापयन् वि वा एतद्यज्ञं छिन्दन्ति यत् स्वाहाकारेण प्रयाजेषु सꣳस्थापयन्ति प्रयाजानिष्ट्वा हवीꣳष्यभि घारयति यज्ञस्य संतत्या अथो हविरेवाकरथो यथापूर्वमुपैति पिता वै प्रयाजाः प्रजाऽनूयाजा यत् प्रयाजानिष्ट्वा हवीꣳष्यभिघारयति पितैव तत् पुत्रेण साधारणं (६) कुरुते तस्मादाहुर्यश्चैवं वेद यश्च न कथा पुत्रस्य केवलं कथा साधारणं पितुरित्यस्कन्नमेव तद्यत् प्रयाजेष्विष्टेषु स्कन्दति गायत्र्येव तेन गर्भं धत्ते सा प्रजां पशून् यजमानाय प्र जनयति ॥

(कन्ध यजति, प्रयाजानां, प्र, रक्षोभ्यः, साधारणं, पञ्चत्रिꣳशच्च) ॥ १ ॥

आज्यभागौ; ६ अहीन याज्यानुवाक्ये; ७-१० प्रधानस्य हविषो याज्यानुवाक्ये च ॥ प्रजापतिर्ऋषिः ।

चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य प्रति दधाति पूर्वार्धे जुहोति तस्मात् पूर्वार्धे चक्षुषी प्रबाहुग्जुहोति तस्मात् प्रबाहुक् चक्षुषी देवलोकं वा अग्निना यजमानोऽनु पश्यति पितृलोकꣳ सोमेनोत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमायैवमिव हीमौ लोकावनयोर्लोकयोरनुख्यात्यै राजानौ वा एतौ देवतानां (१) यदग्नीषोमावन्तरा देवता इज्येते देवतानां विधृत्यै तस्माद्राज्ञा मनुष्या विधृता ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येनान्यतोदतश्च पशून् दाधारोभयतोदतश्चेत्यृचमनूच्याऽऽज्यभागस्य जुषाणेन यजति तेनान्यतोदतो दाधारर्चमनूच्य हविष ऋचा यजति तेनोभयतोदतो दाधार मूर्धन्वती पुरोऽनुवाक्या भवति मूर्धानमेवैनꣳ समानानां करोति (२) नियुत्वत्या यजति भ्रातृव्यस्यैव पशून् नि युवते केशी ह दार्भ्यं केशी सात्यकामिरुवाच सप्तपदां ते शक्वरीꣳ श्वो यज्ञे प्रयोक्तासे यस्यै वीर्येण प्र जातान् भ्रातृव्यान्नुदते प्रति जनिष्यमाणान् यस्यै वीर्येणोभयोर्लोकयोर्ज्योतिर्धत्ते यस्यै वीर्येण पूर्वार्धेनानड्वान् भुनक्ति जघनार्धेन धेनुरिति पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति जातानेव भ्रातृव्यान् प्र णुदत उपरिष्टाल्लक्ष्मा (३) याज्या जनिष्यमाणानेव प्रति नुदते पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवत्यस्मिन्नेव लोके ज्योतिर्धत्त उपरिष्टाल्लक्ष्मा याज्याऽमुष्मिन्नेव लोके ज्योतिर्धत्ते ज्योतिष्मन्तावस्मा इमौ लोकौ भवतो य एवं वेद पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति तस्मात् पूर्वार्धेनानड्वान् भुनक्त्युपरिष्टाल्लक्ष्मा याज्या तस्माज्जघनार्धेन धेनुर्य एवं वेद भुङ्क्त एनमेतौ वज्र आज्यं वज्र आज्यभागौ (४) वज्रो वषट्कारस्त्रिवृतमेव वज्रꣳ सम्भृत्य भ्रातृव्याय प्र हरत्यछम्बट्कारमपगूर्य वषट्करोति स्तृत्यै गायत्री पुरोऽनुवाक्या भवति त्रिष्टुग् याज्या ब्रह्मन्नेव क्षत्रमन्वारम्भयति

तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद प्रैवैनं पुरोऽनुवाक्ययाऽऽह प्र णयति याज्यया गमयति वषट्कारेणैवैनं पुरोऽनुवाक्यया दत्ते प्र यच्छति याज्यया प्रति (५) वषट्कारेण स्थापयति त्रिपदा पुरोऽनुवाक्या भवति त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठति चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्धे द्व्यक्षरो वषट्कारो द्विपाद्यजमानः पशुष्वेवोपरिष्टात् प्रति तिष्ठति गायत्री पुरोऽनुवाक्या भवति त्रिष्टुग् याज्यैषा वै सप्तपदा शक्वरी यद्वा एतया देवा अशिक्षन् तदशक्नुवन् य एवं वेद शक्नोत्येव (६) यच्छिक्षति ॥ (देवतानां, करोत्यु, परिष्टाल्लक्ष्मा, ऽऽज्यभागौ प्रत्यु,-व, द्वे च) ॥ २ ॥

आग्नेयपुरोडाशविधिः, १०-११ कपालनाशे प्रायश्चित्तं च ॥ प्रजापतिर्ऋषिः ।

प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् स आत्मन्नाज्यमधत्त तं देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति सोऽब्रवीद्यजान् व आज्यभागावुप स्तृणानभि घारयानिति तस्माद्यजन्त्याज्यभागावुप स्तृणन्त्यभि घारयन्ति ब्रह्मवादिनो वदन्ति कस्मात् सत्याद्यातयामान्यन्यानि हवीꣳष्ययातयाममाज्यमिति प्राजापत्य-(१)-मिति ब्रूयादयातयामा हि देवानां प्रजापतिरिति छन्दाꣳसि देवेभ्योऽपाक्रामन् न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुरवत्तमधारयन् पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुरवत्तं जुहोति छन्दाꣳस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्त्यङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायन् तदृषयो यज्ञवास्त्वभ्यवायन् ते (२) ऽपश्यन् पुरोडाशं कूर्मं भूतꣳ सर्पन्तं तमब्रुवन्निन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स नाध्रियत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नयेऽध्रियत यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै तमब्रुवन् कथाऽहास्था इत्यनुपाक्तोऽभूवमित्यब्रवीद्यथाऽक्षोऽनुपाक्तो (३) ऽवार्च्छत्येवमवाऽऽरमित्युपरिष्टादभ्यज्याधस्तादुपानक्ति सुवर्गस्य लोकस्य समष्ट्यै सर्वाणि कपालान्यभि प्रथयति तावतः पुरोडाशानमुष्मिँल्लोकेऽभि जयति यो विदग्धः स नैर्ऋतो योऽशृतः स रौद्रो यः शृतः स सदेवस्तस्मादविदहता शृतंकृत्यः सदेवत्वाय भस्मनाऽभि वासयति तस्मान्माꣳसेनास्थि छन्नं वेदेनाभि वासयति तस्मात् (४) केशैः शिरश्छन्नं प्रच्युतं वा एतदस्माँल्लोकादगतं देवलोकं यच्छृतꣳ हविरनभिघारितमभिघार्योद्वासयति देवत्रैवैनद्गमयति यद्येकं कपालं नश्येदेको मासः संवत्सरस्यानवेतः स्यादथ यजमानः प्र मीयेत यद् द्वे नश्येतां द्वौ मासौ संवत्सरस्यानवेतौ स्यातामथ यजमानः प्र मीयेत संख्यायोद्वासयति यजमानस्य (५) गोपीथाय यदि नश्येदाश्विनं द्विकपालं निर्वपेद् द्यावापृथिव्यमेककपालमश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति द्यावापृथिव्य एककपालो भवत्यनयोर्वा एतदस्यति यद्यज्ञस्य नश्यत्यनयोरेवैनद्विन्दति प्रतिष्ठित्यै ॥ (प्राजापत्यं, ते, ऽनुपाक्त,-स्तस्मा-द्यजमानस्य, द्वात्रिꣳशच्च) ॥ ३ ॥

वेदिनिर्माणम् ॥ प्रजापतिर्ऋषिः ।

देवस्य त्वा सवितुः प्रसव इति स्फ्यमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै शतभृष्टिरसि वानस्पत्यो द्विषतो वध इत्याह वज्रमेव तत् सꣳ

श्यति भ्रातृव्याय प्रहरिष्यन्त्स्तम्बयजुर्हरत्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भजति (१) तस्मान्नाभागं निर्भजन्ति त्रिर्हरति त्रय इमे लोका एभ्य एवैनं लोकेभ्यो निर्भजति तूष्णीं चतुर्थꣳ हरत्यपरिमितादेवैनं निर्भजत्युद्धन्ति यदेवास्या अमेध्यं तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति मूलं छिनत्ति भ्रातृव्यस्यैव मूलं छिनत्ति पितृदेवत्याऽतिखातेयतीं खनति प्रजापतिना (२) यज्ञमुखेन संमिता मा प्रतिष्ठायै खनति यजमानमेव प्रतिष्ठां गमयति दक्षिणतो वर्षीयसीं करोति देवयजनस्यैव रूपमकः पुरीषवतीं करोति प्रजा वै पशवः पुरीषं प्रजयैवैनं पशुभिः पुरीषवन्तं करोत्युत्तरं परिग्राहं परि गृह्णात्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यं निर्भज्याऽऽत्मन उत्तरं परिग्राहं परि गृह्णाति क्रूरमिव वा (३) एतत् करोति यद्वेदिं करोति धा असि स्वधा असीति योयुप्यते शान्त्यै प्रोक्षणीरा सादयत्यापो वै रक्षोघ्नी रक्षसामपहत्यै स्फ्यस्य वर्त्मन्त्सादयति यज्ञस्य संतत्यै यं द्विष्यात् तं ध्यायेच्छुचैवैनमर्पयति ॥ (भजति, प्रजापतिना, वै, [illegible] च) ॥ ४ ॥

बर्हिः प्रोक्षणम् ॥ प्रजापतिर्ऋषिः ।

ब्रह्मवादिनो वदन्त्यद्भिर्हवीꣳषि प्रौक्षीः केनाप इति ब्रह्मणेति ब्रूयादद्भिर्ह्येव हवीꣳषि प्रोक्षति ब्रह्मणाऽप इध्माबर्हिः प्रोक्षति मेध्यमेवैनत् करोति वेदिं प्रोक्षत्यृक्षा वा एषाऽलोमकाऽमेध्या यद्वेदिर्मेध्यामेवैनां करोति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रो-(१)-क्षत्येभ्य एवैनल्लोकेभ्यः प्रोक्षति क्रूरमिव वा एतत् करोति यत् खनत्यपो नि नयति शान्त्यै पुरस्तात् प्रस्तरं गृह्णाति मुख्यमेवैनं करोतीयन्तं गृह्णाति प्रजापतिना यज्ञमुखेन संमितं बर्हिः स्तृणाति प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रति ष्ठापयत्यनतिदृश्नꣳ स्तृणाति प्रजयैवैनं पशुभिरनतिदृश्नं करोत्यु-(२)-त्तरं बर्हिषः प्रस्तरꣳ सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर्दधाति व्यावृत्त्या अनक्ति हविष्कृतमेवैनꣳ सुवर्गं लोकं गमयति त्रेधाऽनक्ति त्रय इमे लोका एभ्य एवैनं लोकेभ्योऽनक्ति न प्रति शृणाति यत् प्रतिशृणीयादनूर्ध्वंभावुकं यजमानस्य स्यादुपरीव प्र हरत्यु-(३)-परीव हि सुवर्गो लोको नि यच्छति वृष्टिमेवास्मै नि यच्छति नात्यग्रं प्र हरेद्यदत्यग्रं प्रहरेदत्यासारिण्यध्वर्योर्नाशुका स्यान्न पुरस्तात् प्रत्यस्येद्यत् पुरस्तात् प्रत्यस्येत् सुवर्गाल्लोकाद्यजमानं प्रति नुदेत् प्राञ्चं प्र हरति यजमानमेव सुवर्गं लोकं गमयति न विष्वञ्चं वि युयाद्यद्विष्वञ्चं वियुयात् (४) स्त्र्यस्य जायेतोर्ध्वमुद्यौत्यूर्ध्वमिव हि पुꣳसः पुमानेवास्य जायते यत् स्फ्येन वोपवेषेण वा योयुप्येत स्तृतिरेवास्य सा हस्तेन योयुप्यते यजमानस्य गोपीथाय ब्रह्मवादिनो वदन्ति किं यज्ञस्य यजमान इति प्रस्तर इति तस्य क्व सुवर्गो लोक इत्याहवनीय इति ब्रूयाद्यत् प्रस्तरमाहवनीये प्रहरति यजमानमेव (५) सुवर्गं लोकं गमयति वि वा एतद्यजमानो लिशते यत् प्रस्तरं योयुप्यन्ते बर्हिरनु प्र हरति शान्त्यै अनारम्भण इव वा एतर्ह्यध्वर्युः स ईश्वरो वेपनो भवितोर्ध्रुवाऽसीतीमामभि मृशतीयं वै ध्रुवाऽस्यामेव प्रति तिष्ठति न वेपनो भवत्यगाꣳ३नग्नीदित्याह यद्ब्रूयादगन्नग्निरित्य-(६)-ग्नावग्निं गमयेन्निर्यजमानꣳ सुवर्गाल्लोकाद्गच्छेदगन्नित्येव ब्रूयाद्यजमानमेव सुवर्गं लोकं गमयति ॥

(प्र, करोति, हरति, वियुया,-देव,-ग्नि, सप्तदश च) ॥ ५ ॥

उपांशुयाजः, ९-१३ स्विष्टकृत् च ॥ प्रजापतिर्ऋषिः ।

अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमाऽरिष्यतीति स निलायत सोऽपः प्राविशत् तं देवताः प्रैषमैच्छन् तं मत्स्यः प्राब्रवीत् तमशपद्धियाधिया त्वा वध्यासुर्यो मा प्रावोच इति तस्मान्मत्स्यं धियाधिया घ्नन्ति शप्तो (१) हि तमन्वविन्दन् तमब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातॄणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति परिधीन् परि दधाति रक्षसामपहत्यै सꣳ स्पर्शयति (२) रक्षसामनन्ववचाराय न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यपहन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप हन्ति यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो वदन्ति स त्वै यजेत यो यज्ञस्याऽऽर्त्या वसीयान्त्स्यादिति भूपतये स्वाहा भुवनपतये स्वाहा भूतानां (३) पतये स्वाहेति स्कन्नमनु मन्त्रयेत यज्ञस्यैव तदार्त्या यजमानो वसीयान् भवति भूयसीर्हि देवताः प्रीणाति जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपाꣳशुयाजमन्तरा यजत्यजामित्वाय मिथुनत्वायाग्निरमुष्मिँल्लोक आसीद्यमोऽस्मिन् ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यन्नाद्येन देवा अग्नि-(४)-मुपामन्त्रयन्त राज्येन पितरो यमं तस्मादग्निर्देवानामन्नादो यमः पितृणाꣳ राजा य एवं वेद प्र राज्यमन्नाद्यमाप्नोति तस्मा एतद्भागधेयं प्रायच्छन् यदग्नये स्विष्टकृतेऽवद्यन्ति यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयति सकृत्सकृदव द्यति सकृदिव हि रुद्र उत्तरार्धादव द्यत्येषा वै रुद्रस्य (५) दिक् स्वायामेव दिशि रुद्रं निरवदयते द्विरभि घारयति चतुरवत्तस्याऽऽप्त्यै पशवो वै पूर्वा आहुतय एष रुद्रो यदग्निर्यत् पूर्वा आहुतीरभि जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्यादतिहाय पूर्वा आहुतीर्जुहोति पशूनां गोपीथाय ॥ (शप्तः, स्पर्शयति, भूतानां,-मग्निꣳ, रुद्रस्य, सप्तत्रिꣳशच्च) ॥ ६ ॥

इडोपाह्वानम् ॥ प्रजापतिर्ऋषिः ।

मनुः पृथिव्या यज्ञियमैच्छत् स घृतं निषिक्तमविन्दत् सोऽब्रवीत् कोऽस्येश्वरो यज्ञेऽपि कर्तोरिति तावब्रूतां मित्रावरुणौ गोरेवाऽऽवमीश्वरौ कर्तोः स्व इति तौ ततो गाꣳ समैरयताꣳ सा यत्रयत्र न्यक्रामत् ततो घृतमपीड्यत तस्माद्घृतपद्युच्यते तदस्यै जन्मोपहूतꣳ रथन्तरꣳ सह पृथिव्येत्याहे-(१)-यं वै रथन्तरमिमामेव सहान्नाद्येनोप ह्वयत उपहूतं वामदेव्यꣳ सहान्तरिक्षेणेत्याह पशवो वै वामदेव्यं पशूनेव सहान्तरिक्षेणोप ह्वयत उपहूतं बृहत् सह दिवेत्याहेरं वै बृहदिरामेव सह दिवोप ह्वयत उपहूताः सप्त होत्रा इत्याह होत्रा एवोप ह्वयत उपहूता धेनुः (२) सहर्षभेत्याह मिथुनमेवोप ह्वयत उपहूतो भक्षः सखेत्याह सोमपीथमेवोप ह्वयत उपहूताꣳ हो इत्याहाऽऽत्मानमेवोप ह्वयत आत्मा ह्युपहूतानां वसिष्ठ इडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते चतुष्पादो हि पशवो मानवीत्याह मनुर्ह्येता-(३)-मग्रेऽपश्यद्घृतपदीत्याह यदेवास्यै पदाद्घृतमपीड्यत तस्मादेवमाह मैत्रावरुणीत्याह मित्रावरुणौ ह्येनाꣳ समैरयतां ब्रह्म देवकृतमुपहूतमित्याह ब्रह्मैवोप ह्वयते दैव्या अध्वर्यव उपहूता

उपहूता मनुष्या इत्याह देवमनुष्यानेवोप ह्वयते य इमं यज्ञमवान् ये यज्ञपतिं वर्धानित्याह (४) यज्ञाय चैव यजमानाय चाऽऽशिषमा शास्त उपहूते द्यावापृथिवी इत्याह द्यावापृथिवी एवोप ह्वयते पूर्वजे ऋतावरी इत्याह पूर्वजे ह्येते ऋतावरी देवी देवपुत्रे इत्याह देवी ह्येते देवपुत्रे उपहूतोऽयं यजमान इत्याह यजमानमेवोप ह्वयत उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण उपहूतो दिव्ये धामन्नुपहूत (५) इत्याह प्रजा वा उत्तरा देवयज्या पशवो भूयो हविष्करणꣳ सुवर्गो लोको दिव्यं धामे-दमसीदमसीत्येव यज्ञस्य प्रियं धामोप ह्वयते विश्वमस्य प्रियमुपहूतमित्याहाच्छम्बट्कारमेवोप ह्वयते ॥ (आह, एनु,-रेता,-माहो,-पहूत,-भतुश्चिꣳशच्च) ॥ ७ ॥

इडाभक्षणं, ७-१५ प्राशित्रभक्षणं च ॥ प्रजापतिर्ऋषिः ।

पशवो वा इडा स्वयमा दत्ते काममेवाऽऽत्मना पशूनामा दत्ते न ह्यन्यः कामं पशूनां प्रयच्छति वाचस्पतये त्वा हुतं प्राश्नामीत्याह वाचमेव भागधेयेन प्रीणाति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै चतुरवत्तं भवति हविर्वै चतुरवत्तं पशवश्चतुरवत्तं यद्धोता प्राश्नीयाद्धोता (१) ऽऽर्तिमार्च्छेद्यदग्नौ जुहुयाद्रुद्राय पशूनपि दध्यादपशुर्यजमानः स्याद्वाचस्पतये त्वा हुतं प्राश्नामीत्याह परोक्षमेवैनज्जुहोति सदसस्पतये त्वा हुतं प्राश्नामीत्याह स्वगाकृत्यै प्राश्नन्ति तीर्थ एव प्राश्नन्ति दक्षिणां ददाति तीर्थ एव दक्षिणां ददाति वि वा एतद्यज्ञं (२) छिन्दन्ति यन्मध्यतः प्राशित्रमवद्यन्ति सर्वाभिर्देवताभिरेव यज्ञꣳ सं तन्वन्ति देवा वै यज्ञाद्रुद्रमन्तरायन्त्स यज्ञमविध्यत् तं देवा अभि समगच्छन्त कल्पतां न इदमिति तेऽब्रुवन्त्स्विष्टं वै न इदं भविष्यति यदिमꣳ राधयिष्याम इति तत् स्विष्टकृतः स्विष्टकृत्वं तस्याऽऽविद्धं नि-(३)-रकृन्तन् यवेन सम्मितं तस्माद्यवमात्रमवं द्ये-द्यज्ज्यायोऽवद्येद्रोपयेत् तद्यज्ञस्य यदुप च स्तृणीयादभि च घारयेदुभयतः सꣳस्थायि कुर्यादवदायाभि घारयति द्विः सं पद्यते द्विपाद्यजमानः प्रतिष्ठित्यै यत् तिरश्चीनमतिहरेदनभिविद्धं यज्ञस्याभि विध्येदग्रेण परि हरति तीर्थेनैव परि हरति तत् पूष्णे पर्यहरन् तत् (४) पूषा प्राश्य दतोऽरुणत् तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि तं देवा अब्रुवन् वि वा अयमार्धि प्राशित्रियो वा अयमभूदिति तद्बृहस्पतये पर्यहरन्त्सोऽबिभेद्बृहस्पतिरित्थं वाव स्य आर्तिमारिष्यतीति स एतं मन्त्रमपश्यत् सूर्यस्य त्वा चक्षुषा प्रति पश्यामीत्यब्रवीन्न हि सूर्यस्य चक्षुः (५) किं चन हिनस्ति सोऽबिभेत् प्रतिगृह्णन्तं मा हिꣳसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रति गृह्णामीत्यब्रवीत् सवितृप्रसूत एवैनद्ब्रह्मणा देवताभिः प्रत्यगृह्णात् सोऽबिभेत् प्राश्नन्तं मा हिꣳसिष्यतीत्यग्नेस्त्वाऽऽस्येन प्राश्नामीत्यब्रवीन्न ह्यग्नेरास्यं किं चन हिनस्ति सोऽबिभेत् (६) प्राशितं मा हिꣳसिष्यतीति ब्राह्मणस्योदरेणेत्यब्रवीन्न हि ब्राह्मणस्योदरं किं चन हिनस्ति बृहस्पतेर्ब्रह्मणेति स हि ब्रह्मिष्ठोऽप वा एतस्मात् प्राणाः क्रामन्ति यः प्राशित्रं प्राश्नात्यद्भिर्मार्जयित्वा प्राणान्त्सं मृशतेऽमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुप ह्वयते ॥ (होता, यज्ञं, नि,-ए,-चक्षुः,-रबिभे,-च्चतुश्चत्वारिꣳशच्च) ॥ ८ ॥

अनूयाजाः, १२-२२ सूक्तवाकाश्च ॥ प्रजापतिर्ऋषिः ।

अग्नीध्र आ दधात्यग्निमुखानेवर्तून् प्रीणाति समिधमा दधात्युत्तरासामाहुतीनां प्रतिष्ठित्या अथो समिद्धत्येव जुहोति परिधीन्त्सं मार्ष्टि पुनात्येवैनांस्त्रिः-त्रिः सं मार्ष्टि त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै द्विः पर्येति चतुः सं पद्यते चतुष्पादः पशवः पशूनेवाव रुन्धे ब्रह्मन् प्र स्थास्याम इत्याहात्र वा एतर्हि यज्ञः श्रितो (१) यत्र ब्रह्मा यत्रैव यज्ञः श्रितस्ततं एवैनमा रभते यद्धस्तेन प्रमीवेद्वेपनः स्याद्यच्छीर्ष्णा शीर्षक्तिमान्त्स्याद्यत् तूष्णीमासीताऽसम्प्रत्तो यज्ञः स्यात् प्रतिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो यत्रैव यज्ञः श्रितस्तत एवैनꣳ सं प्र यच्छति देव सवितरेतत् ते प्रा-(२)-ऽऽहेत्याह प्रसूत्यै बृहस्पतिर्ब्रह्मेत्याह स हि ब्रह्मिष्ठः स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहीत्याह यज्ञाय यजमानायाऽऽत्मने तेभ्य एवाऽऽशिषमा शास्तेऽनार्त्या आश्राव्याऽऽह देवान् यजेति ब्रह्मवादिनो वदन्तीष्टा देवता अथ कतम एते देवा इति छन्दाꣳसीति ब्रूयाद्गायत्रीं त्रिष्टुभं (३) जगतीमित्यथो खल्वाहुर्ब्राह्मणा वै छन्दाꣳसीति तानेव तद्यजति देवानां वा इष्टा देवता आसन्नथाग्निर्नोदज्वलत् तं देवा आहुतीभिरनूयाजेष्वन्वविन्दन् यदनूयाजान् यजत्यग्निमेव तत् समिन्धे एतदुर्वै नामाऽऽसुर आसीत् स एतर्हि यज्ञस्याऽऽशिषमवृङ्क्त यद्ब्रूयादेतदु द्यावापृथिवी भद्रमभूदित्येतदुमेवाऽऽसुरं यज्ञस्याऽऽशिषं गमयेदिदं द्यावापृथिवी भद्रमभूदित्येव (४) ब्रूयाद्यजमानमेव यज्ञस्याऽऽशिषं गमयत्यार्ध्म सूक्तवाकमुत नमोवाकमित्याहेदमरात्स्मेति वावैतदाहोपश्रितो दिवः पृथिव्योरित्याह द्यावापृथिव्योर्हि यज्ञ उपश्रित ओमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी (५) स्तामित्याहाऽऽशिषमेवैतामा शास्ते यद्ब्रूयात् सूपावसाना च स्वध्यवसाना चेति प्रमायुको यजमानः स्याद्यदा हि प्रमीयतेऽथेमामुपावस्यति सूपचरणा च स्वधिचरणा चेत्येव ब्रूयाद्वरीयसीमेवास्मै गव्यूतिमा शास्ते न प्रमायुको भवति तयोराविद्यग्निरिदꣳ हविरजुषतेत्याह या अयाक्ष्म (६) देवतास्ता अरीरधामेति वावैतदाह यन्न निर्दिशेत् प्रतिवेशं यज्ञस्याऽऽशीर्गच्छेदाशास्तेऽयं यजमानोऽसावित्याह निर्दिश्यैवैनꣳ सुवर्गं लोकं गमयत्यायुरा शास्ते सुप्रजास्त्वमा शास्त इत्याहाऽऽशिषमेवैतामा शास्ते सजातवनस्यामा शास्त इत्याह प्राणा वै सजाताः प्राणानेव (७) नान्तरेति तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषा इत्याहाग्निर्देवेभ्यो वनुते वयं मनुष्येभ्य इति वावैतदाहेह गतिर्वामस्येदं च नमो देवेभ्य इत्याह याश्चैव देवता यजति याश्च न ताभ्य एवोभयीभ्यो नमस्करोत्यात्मनोऽनार्त्यै ॥ (श्रितः, प्र, त्रिष्टुभं,-मेतदु, द्यावापृथिवी, अयाक्ष्म, च, षट्चत्वारिꣳशच्च) ॥ ९ ॥

शंयुवाकमन्त्रव्याख्या, ४-७ पत्नीसंयाजाश्च ॥ प्रजापतिर्ऋषिः ।

देवा वै यज्ञस्य स्वगाकर्तारं नाविन्दन् ते शंयुं बार्हस्पत्यमब्रुवन्निमं नो यज्ञꣳ स्वगा कुर्विति सोऽब्रवीद्वरं वृणै यदेवाब्राह्मणोक्तोऽश्रद्दधानो यजाते सा मे यज्ञस्याऽऽशीरसदिति तस्माद्यदब्राह्मणोक्तोऽश्रद्दधानो यजते शंयुमेव तस्य बार्हस्पत्यं यज्ञस्याऽऽशीर्गच्छत्येतन्ममेत्यब्रवीत् किं मे प्रजाया (१) इति योऽपगुरातै शतेन यातयाद्यो निहनत् सहस्रेण यातयाद्यो लोहितं करवद्यावतः प्रस्कद्य पाꣳसून्त्संगृह्णात् तावतः संवत्सरान् पितृलोकं न प्र जानादिति तस्माद्ब्राह्मणाय नाप गुरेत न नि हन्यान्न लोहितं कुर्या-

-देतावता हैनसा भवति तच्छंयोरा वृणीमह इत्याह यज्ञमेव तत् स्वगा करोति त-(२)-च्छंयोरा वृणीमह इत्याह शंयुमेव बार्हस्पत्यं भागधेयेन समर्धयति गातुं यज्ञाय गातुं यज्ञपतय इत्याहाऽऽशिषमेवैतामा शास्ते सोमं यजति रेत एव तद्दधाति त्वष्टारं यजति रेत एव हितं त्वष्टा रूपाणि वि करोति देवानां पत्नीर्यजति मिथुनत्वायाग्निं गृहपतिं यजति प्रतिष्ठित्यै जामि वा एतद्यज्ञस्य क्रियते (३) यदाज्येन प्रयाजा इज्यन्त आज्येन पत्नीसंयाजा ऋचमनूच्य पत्नीसंयाजानामृचा यजत्यजामित्वायाथो मिथुनत्वाय पङ्क्तिप्रायणो वै यज्ञः पङ्क्त्युदयनः पञ्च प्रयाजा इज्यन्ते चत्वारः पत्नीसंयाजाः समिष्टयजुः पञ्चमं पङ्क्तिमेवानु प्रयन्ति पङ्क्तिमनूद्यन्ति ॥ (प्रजाया,-स्तत, क्रियते, षट्त्रिꣳशच्च) ॥ १० ॥

सर्वेष्टिहौत्रमन्त्राः ॥ गायत्री, १८-१९ अनुष्टुप् । विश्वेदेवा ऋषयः ।

युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥
उत नो देव देवाꣳ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥
त्वꣳ ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥
तं नेमिमृभवो यथाऽऽ नमस्व सहूतिभिः । नेदीयो यज्ञ-(१)-मङ्गिरः ॥
तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥
कमु ष्विदस्य सेनयाऽग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥
मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्नियाः ॥
मा नः समस्य दूढ्यः परिद्वेषसो अꣳहतिः । ऊर्मिर्न नावमा वधीत् ॥
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमै-(२)-रमित्रमर्दय ॥
कुवित् सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कृधि ॥
मा नो अस्मिन् महाधने परा वर्ग्भारभृद्यथा । संवर्गꣳ सꣳ रयिं जय ॥
अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना । वर्धा नो अमवच्छवः ॥
यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा । तं घेदग्निर्वृधाऽवति ॥
परस्या अधि (३) संवतोऽवराꣳ अभ्या तर । यत्राहमस्मि ताꣳ अव ॥
विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः । अधा ते सुम्नमीमहे ॥
य उग्र इव शर्यहा तिग्मशृङ्गो न वꣳसगः । अग्ने पुरो रुरोजिथ ॥
सखायः सं वः सम्यञ्चमिषꣳ स्तोमं चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥

सꣳ समिद्युवसे वृषन्न-(४)-ग्ने विश्वान्यर्य आ ।
इडस्पदे समिध्यसे स नो वसून्या भर ॥
प्रजापते *-स वेद *-सोमापूषणे *-मौ देवौ *- ॥
(यज्ञ,-मग्ने,-रधि, वृष,-ञ्चत्वारिꣳशच्च) ॥ ११ ॥

पितृयज्ञहविषां हौत्रमन्त्राः ॥ त्रिष्टुप्, १, १२ अनुष्टुप्, ५ जगती । विश्वेदेवा ऋषयः ।

उशन्तस्त्वा हवामह उशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥
त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीꣳरपोर्णु वीरेभिरश्वैर्मघवा भवा (१) नः ॥
त्वꣳ सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम् ॥
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥
बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शन्तमेनाथास्मभ्यꣳ (२) शं योररपो दधात ॥
आऽहं पितॄन्त्सुविदत्राꣳ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहाऽऽगमिष्ठाः ॥
उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥
उदीरतामवर उत् परास उन्मध्यमाः पितरः सोम्यासः ।
असुं (३) य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।
शुचीदयन् दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥

११।२० (१।८।१०।१२), ११।२१ (२।२।१२।४), ११।२२-२३ (१।८।२२।१८-१९)

यदग्ने (४) कव्यवाहन पितॄन् यक्ष्यृतावृधः ।
प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ ॥
त्वमग्न ईडितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि[13] ।
मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिरृक्वभिर्वावृधानः ।
याꣳश्च देवा वावृधुर्ये च देवान्त्स्वाहाऽन्ये स्वधयाऽन्ये मदन्ति (५) ॥
इमं यम प्रस्तरमा हि सीदाऽङ्गिरोभिः पितृभिः संविदानः ॥
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥
अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तꣳ हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य[16] ॥
अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयꣳ सुमतौ यज्ञियानामपि भद्रे सौमनसे (६) स्याम ॥
(भवा,ऽस्मस्तु,-मनु,-मग्ने, मदन्ति, सौमनस, एकं च) ॥ १२ ॥

[समिध-३३५ । -अङ्गुषी ३०२ । प्रजापति-२८२ । -देवस्य १८३ । प्रत्नवादिनो ३१७ । ऽपि- २८७ । -मंहुः २८४ । एषतो १४४ । ऽमिले ३१९ । देवा १८३ । यूवो २१२ । अन्यो- ३०१ । द्वादश ॥ ३४१३]

[॥ इति द्वितीयकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥]

[वाकुर्व ३२०८ । प्रजापति-३५२६ । -राशिदेवस्य २६६५ । देवा २४०६ । विश्वरूपः ३१६५ । समिधः २४२३ । (यट् ॥ ६ ॥ १९२०३)]

॥ इति द्वितीयं काण्डं सम्पूर्णम् ॥ २ ॥

अथ तृतीयं काण्डम् ।

न्यूनकर्माभिधानम् ।

[अथ प्रथमः प्रपाठकः ॥ १ ॥]

दीक्षितेन वक्तव्यमन्त्रेषु अमेध्यदर्शने वर्षणे च वक्तव्यौ ॥ विश्वेदेवा ऋषयः ।

प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत सोऽकामयत प्रजाः सृजेयेति स द्वितीयमतप्यत स वयाꣳस्यसृजत सोऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवादमपश्यत् तमवदत् ततो वै स प्रजा असृजत यत् तपस्तप्त्वा दीक्षितवादं वदति प्रजा एव तद्यजमानः (१) सृजते[2] यद्वै दीक्षितोऽमेध्यं पश्यत्यपास्माद्दीक्षा क्रामति नीलमस्य हरो व्येत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा हासीरित्याह नास्माद्दीक्षाऽप क्रामति नास्य नीलं न हरो व्येति[3] यद्वै दीक्षितमभिवर्षति दिव्या आपोऽशान्ता ओजो बलं दीक्षां (२) तपोऽस्य निर्घ्नन्त्युन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्याहैतदेव सर्वमात्मन् धत्ते नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्त्यग्निर्वै दीक्षितस्य देवता सोऽस्मादेतर्हि तिर इव यर्हि याति तमीश्वरꣳ रक्षाꣳसि हन्तोः-(३)-भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्वित्याह ब्रह्म वै देवानां बृहस्पतिस्तमेवान्वारभते स एनꣳ सं पारयत्येदमगन्म देवयजनं पृथिव्या इत्याह देवयजनꣳ ह्येष पृथिव्या आगच्छति यो यजते[5] विश्वे देवा यदजुषन्त पूर्व इत्याह विश्वे ह्येतं देवा जोषयन्ते यद्ब्राह्मणा (४) ऋक्सामाभ्यां यजुषा सन्तरन्त इत्याहर्क्सामाभ्याꣳ ह्येष यजुषा सन्तरति यो यजते[6] रायस्पोषेण समिषा मदेमेत्याहाऽऽशिषमेवैतामा शास्ते[7] ॥ (यजमानो, दीक्षाꣳ, हन्तो,-र्ब्राह्मणा,-श्चतुर्विꣳशतिश्च) ॥ १ ॥

सोमोपस्थानमन्त्राः, अध्वर्युकर्तव्यविषयश्च ॥ विश्वेदेवा ऋषयः ।

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो जागतो भाग इति मे सोमाय ब्रूताच्छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूता-द्यो वै सोमꣳ राजानꣳ साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं छन्दाꣳसि खलु वै सोमस्य राज्ञः साम्राज्यो लोकः पुरस्तात् सोमस्य क्रयादेवमभि मन्त्रयेत साम्राज्यमेवै-(१)-नं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं[3] यो वै तानूनप्त्रस्य प्रतिष्ठां वेद प्रत्येव तिष्ठति ब्रह्मवादिनो वदन्ति न प्राश्नन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रति तिष्ठतीति प्रजापतौ मनसीति ब्रूयात् त्रिरव जिघ्रेत् प्रजापतौ त्वा मनसि जुहोमीत्येषा वै तानूनप्त्रस्य प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति[4] यो (२) वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति यतो मन्येतानभिक्रम्य होष्यामीति तत् तिष्ठन्ना श्रावयेदेषा वा अध्वर्योः प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात् प्रतिष्ठाया इयात् तस्मात् समानत्र तिष्ठता होतव्यं प्रतिष्ठित्यै[7] यो वा अध्वर्योः स्वं वेद स्ववानेव भवति स्रुग्वा अस्य स्वं वायव्यमस्य (३) स्वं चमसोऽस्य स्वं यद्वायव्यं वा चमसं वाऽनन्वारभ्याऽऽश्रावयेत् स्वादियात् तस्मादन्वारभ्याऽऽश्राव्यꣳ स्वादेव नैति[8] यो वै सोममप्र-

तिष्ठाप्य स्तोत्रमुपाकरोत्यप्रतिष्ठितः सोमो भवत्यप्रतिष्ठितः स्तोमोऽप्रतिष्ठितान्युक्थान्यप्रतिष्ठितो यजमानोऽप्रतिष्ठितोऽध्वर्युर्वायव्यं वै सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमः स्तोमस्य स्तोम उक्थानां ग्रहं वा (४) गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात् प्रत्येव सोमꣳ स्थापयति प्रति स्तोमं प्रत्युक्थानि प्रति यजमानस्तिष्ठति प्रत्यध्वर्युः[9] ॥ (एव, वो,ऽस्तु, वा,-ऽष्टाविꣳशतिश्च) ॥ २ ॥

सोमक्रयणीपदहरणम्, २-३ पशुश्रपणार्थस्याग्नेः प्रणयनम्, ४ पशोरवदाननाशे प्रायश्चित्तं, ५ पश्ववदानेनाशार्थं होमश्च ॥ विश्वेदेवा ऋषयः ।

यज्ञं वा एतत् सं भरन्ति यत् सोमक्रयण्यै पदं यज्ञमुखꣳ हविर्धाने यर्हि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्याद्यज्ञमुख एव यज्ञमनु सं तनोति[1] प्राञ्चमग्निं प्र हरन्त्युत् पत्नीमा नयन्त्यन्वनाꣳसि प्र वर्तयन्त्यथ वा अस्यैष धिष्णियो हीयते सोऽनु ध्यायति स ईश्वरो रुद्रो भूत्वा (१) प्रजां पशून् यजमानस्य शमयितोर्यर्हि पशुमाप्रीतमुदञ्चं नयन्ति तर्हि तस्य पशुश्रपणꣳ हरेत् तेनैवैनं भागिनं करोति[2] यजमानो वा आहवनीयो यजमानं वा एतद्वि कर्षन्ते यदाहवनीयात् पशुश्रपणꣳ हरन्ति स वैव स्यान्निर्मन्थ्यं वा कुर्याद्यजमानस्य सात्मत्वाय यदि पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमव द्येत् सैव ततः (२) प्रायश्चित्ति-र्ये पशुं विमथ्नीरन् यस्तान् कामयेताऽऽर्तिमार्च्छेयुरिति कुविदङ्गेति नमोवृक्तिवत्यर्चाऽऽग्नीध्रे जुहुयान्नमोवृक्तिमेवैषां वृङ्क्ते ताजगार्तिमार्च्छन्ति ॥ (भूत्वा, ततः, षड्विꣳशतिश्च) ॥ ३ ॥

पशूपाकरणमन्त्राः ॥ त्रिष्टुप्, १, ९-१० अनुष्टुप्, ११-१२ द्विपदा । विश्वेदेवा ऋषयः ।

प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः ।
तस्मै प्रति प्र वेदय चिकित्वाꣳ अनु मन्यताम् ॥
इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने सुकृतस्य मध्ये ।
अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यम् ॥
प्रजानन्तः प्रति गृह्णन्ति पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तम् ।
सुवर्गं याहि पथिभिर्देवयानैरोषधीषु प्रति तिष्ठा शरीरैः[3] ॥
येषामीशे (१) पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् ।
निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥
ये बध्यमानमनु बध्यमाना अभ्यैक्षन्त मनसा चक्षुषा च ।
अग्निस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संविदानः[5] ॥
य आरण्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।
वायुस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया संविदानः ॥
प्रमुञ्चमाना (२) भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।
उपाकृतꣳ शशमानं यदस्थाज्जीवं देवानामप्येतु पाथः[7] ॥

नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह देवयानः ।
जीवं देवानामप्येतु पाथः सत्याः सन्तु यजमानस्य कामाः[8] ॥
यत् पशुर्मायुमकृतोरो वा पद्भिराहते । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः[9] ॥
शमितार उपेतन यज्ञं (३) देवेभिरिन्वितम् । पाशात् पशुं प्र मुञ्चत बन्धाद्यज्ञपतिं परि[10] ॥
अदितिः पाशं प्र मुमोक्त्वेतं नमः पशुभ्यः पशुपतये करोमि[11] ॥
अरातीयन्तमधरं कृणोमि यं द्विष्मस्तस्मिन् प्रति मुञ्चामि पाशम्[12] ॥
त्वामु ते दधिरे हव्यवाहꣳ शृतंकर्तारमुत यज्ञियं च ।
अग्ने सदक्षः सतनुर्हि भूत्वाऽथ हव्या जातवेदो जुषस्व[13] ॥
जातवेदो वपया गच्छ देवान् त्वꣳ (४) हि होता प्रथमो बभूथ ।
घृतेन त्वं तनुवो वर्धयस्व स्वाहाकृतꣳ हविरदन्तु देवाः[14] ॥
स्वाहा देवेभ्यो[15] देवेभ्यः स्वाहा[16] ॥ (ईशे, प्रमुञ्चमाना, यज्ञं, त्वꣳ, षोडश च) ॥ ४ ॥

पशूपाकरणविधिः । विश्वेदेवा ऋषयः ।

प्राजापत्या वै पशवस्तेषाꣳ रुद्रोऽधिपतिर्यदेताभ्यामुपाकरोति ताभ्यामेवैनं प्रतिप्रोच्याऽऽलभत आत्मनोऽनाव्रस्काय द्वाभ्यामुपाकरोति द्विपाद्यजमानः प्रतिष्ठित्यै उपाकृत्य पञ्च जुहोति पाङ्क्ताः पशवः पशूनेवाव रुन्धे[3] मृत्यवे वा एष नीयते यत् पशुस्तं यदन्वारभेत प्रमायुको यजमानः स्यान्नानाप्राणो यजमानस्य पशुनेत्याह व्यावृत्त्यै (१) यत् पशुर्मायुमकृतेति जुहोति शान्त्यै शमितार उपेतनेत्याह यथायजुरेवैत-द्वपायां वा आह्रियमाणायामग्नेर्मेधोऽप क्रामति त्वामु ते दधिरे हव्यवाहमिति वपामभि जुहोत्यग्नेरेव मेधमव रुन्धेऽथो शृतत्वाय[5] पुरस्तात् स्वाहाकृतयो वा अन्ये देवा उपरिष्टात् स्वाहाकृतयोऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपां (२) जुहोति तानेवोभयान् प्रीणाति ॥ (व्यावृत्त्यै, वपां, पञ्च च) ॥ ५ ॥

आग्नीध्राभिमर्शनादिविधयः, द्रोणकलशाद्यासादनमन्त्रविशेषाश्च ॥ विश्वेदेवा ऋषयः ।

यो वा अयथादेवतं यज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान् भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्यर्चाऽऽग्नीध्रमभि मृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रुचो वायव्यया वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुप चरति न देवताभ्य आ वृश्च्यते वसीयान् भवति युनज्मि ते पृथिवीं ज्योतिषा सह युनज्मि वायुमन्तरिक्षेण (१) ते सह युनज्मि वाचꣳ सह सूर्येण ते युनज्मि तिस्रो विपृचः सूर्यस्य ते । अग्निर्देवता गायत्री छन्द उपाꣳशोः पात्रमसि[6] सोमो देवता त्रिष्टुप् छन्दोऽन्तर्यामस्य पात्रमसीन्द्रो देवता जगती छन्द इन्द्रवायुवोः पात्रमसि[8] बृहस्पतिर्देवताऽनुष्टुप् छन्दो मित्रावरुणयोः पात्रमस्यश्विनौ देवता पङ्क्तिश्छन्दोऽश्विनोः पात्रमसि[10] सूर्यो देवता बृहती (२) छन्दः शुक्रस्य पात्रमसि[11] चन्द्रमा देवता सतो बृहती छन्दो मन्थिनः पात्रमसि[12] विश्वे देवा देवतोष्णिहा छन्द आग्रयणस्य पात्रमसीन्द्रो देवता ककुच्छन्द उक्थानां पात्रमसि[14] पृथिवी देवता विराट् छन्दो ध्रुवस्य पात्रमसि[15] ॥ (अन्तरिक्षेण, बृहती, पञ्चत्रिꣳशच्च) ॥ ६ ॥

स्पर्धाविजयोर्यजमानयोः प्रयोगाः केचिन्मन्त्राश्च । विश्वेदेवा ऋषयः ।

"हुणगां वा अध्वर्युर्यजमानस्येग्गः खलु वै पूर्वोऽर्धुः क्षीयत आसन्यान्मा मन्त्रात् पाहि कस्याश्चिदभिशस्त्या इति पुरा प्रातरनुवाकाज्जुहुयादात्मन एव तदध्वर्युः पुरस्ताच्छर्म नह्यतेऽनार्त्यै संवेशाय त्वोपवेशाय त्वा गायत्रियाः*- -*त्रिष्टुभो*- -*जगत्या अभिभूत्यै स्वाहा प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं देवतासु वा एते प्राणापानयो-(१)-र्व्यायच्छन्ते येषाꣳ सोमः समृच्छते संवेशाय त्वोपवेशाय त्वेत्याह छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि वृङ्क्ते प्रेतिवन्त्याज्यानि भवन्त्यभिजित्यै मरुत्वतीः प्रतिपदो विजित्या उभे बृहद्रथन्तरे भवत इयं वाव रथन्तरमसौ बृहदाभ्यामेवैनमन्तरेत्यद्य वाव रथन्तरꣳ श्वो बृहदद्याश्वादेवैनमन्तरेति भूतं (२) वाव रथन्तरं भविष्यद्बृहद् भूताच्चैवैनं भविष्यतश्चान्तरेति परिमितं वाव रथन्तरमपरिमितं बृहत् परिमिताच्चैवैनमपरिमिताच्चान्तरेति विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेताꣳ स एतज्जमदग्निर्विहव्यमपश्यत् तेन वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्यꣳ शस्यत इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते (३) यस्य भूयाꣳसो यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति यद्यग्निष्टोमः सोमः परस्तात् स्यादुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वीत यज्ञक्रतुभिरेवास्य देवता वृङ्क्ते वसीयान् भवति" ॥ (प्राणापानयो,-र्भूतं, वृङ्क्ते, ऽष्टाविꣳशतिश्च) ॥ ७ ॥

उपांशुग्रहाभिषवः विधिः, मन्त्राश्च ॥ २, ४ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

निग्राभ्याः स्थ देवश्रुत आयुर्मे तर्पयत प्राणं मे तर्पयतापानं मे तर्पयत व्यानं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत मनो मे तर्पयत वाचं मे तर्पयताऽऽत्मानं मे तर्पयताङ्गानि मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत गृहान् मे तर्पयत गणान् मे तर्पयत सर्वगणं मा तर्पयत तर्पयत मा (१ गणा मे मा वि तृषन्-न्नोषधयो वै सोमस्य विशो विशः खलु वै राज्ञः प्रदातोरीश्वरा ऐन्द्रः सोमोऽ-

वीवृधं वो मनसा सुजाता ऋतप्रजाता भग इद्वः स्याम ।

इन्द्रेण देवीर्वीरुधः संविदाना अनु मन्यन्ताꣳ सवनाय सोमम्—

-मित्याहौषधीभ्य एवैनꣳ स्वायै विशः स्वायै देवतायै निर्याच्याभि षुणोति यो वै सोमस्याभिषूयमाणस्य (२) प्रथमोऽꣳशुः स्कन्दति स ईश्वर इन्द्रियं वीर्यं प्रजां पशून् यजमानस्य निर्हन्तोस्तमभि मन्त्रयेताऽऽमाऽस्कान्त्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्याशिषमेवैतामा शास्त इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घाताय

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च (३) पूर्वः ।

तृतीयं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः" ॥ (मा,ऽभिषूयमाणस्य, च, दश च) ॥८॥

ग्रहमन्त्रोच्चारणादिधर्माः, आघारसंस्रावमन्त्राश्च ॥ ३-४ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

यो वै देवान् देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येषु यान् प्राचीनमाग्रयणाद् ग्रहान् गृह्णीयात् तानुपाꣳशु गृह्णीयाद्यानूर्ध्वाꣳस्तानुपब्दिमतो देवानेव तद्-

(७।२-३) अभि... स्वाहा, (७।३-४) संवेशा... त्वा ।

वयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव देवेषु भवति मनुष्ययशसी मनुष्येष्व्-

—ग्निः प्रातः सवने पात्वस्मान् वैश्वानरो महिना विश्वशम्भूः ।

स नः पावको द्रविणं दधात्वा-(१)-युष्मन्तः सहभक्षाः स्याम ॥

विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः ।

आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानाꣳ सुमतौ स्याम ॥

इदं तृतीयꣳ सवनं कवीनामृतेन ये चमसमैरयन्त ।

ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु ॥

आयतनवतीर्वा अन्या आहुतयो हूयन्तेऽनायतना अन्या या आघारवतीस्ता आयतनवतीर्याः (२) सौम्यास्ता अनायतना ऐन्द्रवायवमादायाऽऽघारमा घारयेदध्वरो यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरोऽसि स पिन्वस्व घृतवद्देव सोमेति सौम्या एव तदाहुतीरायतनवतीः करोत्यायतनवान् भवति य एवं वेदाथो द्यावापृथिवी एव घृतेन व्युनत्ति ते व्युत्ते उपजीवनीये भवत उपजीवनीयो भवति (३) य एवं वेदै—ष ते रुद्र भागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिम् ॥

मनुः पुत्रेभ्यो दायं व्यभजत् स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं निरभजत् स आऽगच्छत् सोऽब्रवीत् कथा मा निरभागिति न त्वा निरभाक्षमित्यब्रवी—दङ्गिरस इमे सत्रमासते ते (४) सुवर्गं लोकं न प्र जानन्ति तेभ्य इदं ब्राह्मणं ब्रूहि ते सुवर्गं लोकं यन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति तदेभ्योऽब्रवीत् ते सुवर्गं लोकं यन्तो य एषां पशव आसन् तानस्मा अददु—स्तं पशुभिश्चरन्तं यज्ञवास्तौ रुद्र आऽगच्छत् सोऽब्रवीन्मम वा इमे पशव इत्यदुर्वै (५) मह्यमिमानित्यब्रवीन्न वै तस्य त ईशत इत्यब्रवीद्यद्यज्ञवास्तौ हीयते मम वै तदिति तस्माद्यज्ञवास्तु नाभ्यवेत्यꣳ सोऽब्रवीद्यज्ञे माऽऽ भजाथ ते पशून् नाभि मꣳस्य इति तस्मा एतं मन्थिनः सꣳस्रावमजुहोत् ततो वै तस्य रुद्रः पशून् नाभ्यमन्यत यत्रैत-(६)-मेवं विद्वान् मन्थिनः सꣳस्रावं जुहोति न तत्र रुद्रः पशूनभि मन्यते" ॥ (इत्याह, वा, भवति, ते, वा, एत,-मेकादश च) ॥ ९ ॥

ग्रहवहोमादिमन्त्राभिधानम् ॥ २ गायत्री, ३-५ त्रिष्टुप्, ९ अनुष्टुप् ।

जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् ।

यद्वाचो मधुमत् तस्मिन् मा धाः स्वाहा सरस्वत्यै ॥

ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरम् । बृहद्गायत्रवर्तनि ॥

यस्ते द्रप्सः स्कन्दति यस्ते अꣳशुर्बाहुच्युतो धिषणयोरुपस्थात् ।

अध्वर्योर्वा परि यस्ते पवित्रात् स्वाहाकृतमिन्द्राय तं जुहोमि ॥

यो द्रप्सो अꣳशुः पतितः पृथिव्यां परिवापात (१) पुरोडाशात् करम्भात् ।

धानासोमान्मन्थिन इन्द्र शुक्रात् स्वाहाकृतमिन्द्राय तं जुहोमि ॥

यस्ते द्रप्सो मधुमाꣳ इन्द्रियावान्त्स्वाहाकृतः पुनरप्येति देवान् ।

दिवः पृथिव्याः पर्यन्तरिक्षात् स्वाहाकृतमिन्द्राय तं जुहोमि ॥

अध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य इत्याहुर्वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान् पशुषु प्रजां मयि (२) च यजमाने चेत्याह वाचमेव तद्यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्ग्रहान् गृहीत्वा बहिष्पवमानꣳ सर्पन्ति पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पुनरेत्योप तिष्ठते यज्ञो वै विष्णुर्यज्ञमेवाक—

—र्विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्य । प्र ते धारा मधुश्चुत उत्सं दुह्रते (३) अक्षित—

—मित्याह यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाऽऽप्याययति ॥

(परिवापा,-न्मयि, दुह्रते, चतुर्दश च) ॥ १० ॥

चित्रादियाज्यापुरोऽनुवाक्याः ॥ त्रिष्टुप्, १,५,७, ११-१२, २२, २३-२५ गायत्री, १५-१६, २५ अनुष्टुप् । विश्वेदेवा ऋषयः ।

अग्निना रयिमश्नवत् पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥

गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।

इडावाꣳ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ॥

आ प्यायस्व*- सं ते*- ॥

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।

यतो वीरः (१) कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥

शिवस्त्वष्टरिहाऽऽ गहि विभुः पोष उत त्मना । यज्ञेयज्ञे न उदव ॥

पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।

प्रजां त्वष्टा वि ष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥

प्र णो दे—*-व्या नो दिवः*- ॥

पीपिवाꣳसꣳ सरस्वतः स्तनं यो विश्वदर्शतः । धुक्षीमहि प्रजामिषम् (२)

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेषां ते सुम्नमीमहे ॥

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः ।

यस्य व्रते पुष्टिपतिर्निविष्टस्तꣳ सरस्वन्तमवसे हुवेम ॥

दिव्यꣳ सुपर्णं वयसं बृहन्तमपां गर्भं वृषभमोषधीनाम् ।

(११।३-४) ४।२।७।१२-१३, (११।९-१०) १।८।२२।३-४ ।

अभीपतो वृष्ट्या तर्पयन्तं तꣳ सरस्वन्तमवसे हुवेम ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।

जुषस्व हव्य-(३)-माहुतं प्रजां देवि दिदिड्ढि नः ॥

या सुपाणिः स्वङ्गुरिः सुषूमा बहुसूवरी । तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन ॥

इन्द्रं वो विश्वतस्परि—*- न्द्रं नरः*- ॥

असितवर्णा हरयः सुपर्णा मिहो वसाना दिवमुत् पतन्ति ॥

त आऽववृत्रन्त्सदनानि कृत्वाऽऽदित् पृथिवी घृतैर्व्युद्यते ॥

हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान् ।

शुचिभ्राजा उषसो (४) नवेदा यशस्वतीरपस्युवो न सत्याः ॥

आ ते सुपर्णा अमिनन्त एवैः कृष्णो नोनाव वृषभो यदीदम् ।

शिवाभिर्न स्मयमानाभिराऽगात् पतन्ति मिहः स्तनयन्त्यभ्रा ॥

वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥

पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित् सानु रेजत स्वने वः ।

यत् क्रीडथ मरुत (५) ऋष्टिमन्त आप इव सध्रियञ्चो धवध्वे ॥

अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।

दृतिꣳ सु कर्ष विषितं न्यञ्चꣳ समा भवन्तूद्वता निपादाः ॥

त्वं त्या चिदच्युताऽग्ने पशुर्न यवसे । धामा ह यत् ते अजर वना वृश्चन्ति शिक्वसः ॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम ।

याश्च (६) माया मायिनां विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।

अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।

अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥

उदप्रुतो मरुतस्ताꣳ इयर्त वृष्टिं (७) ये विश्वे मरुतो जुनन्ति ।

क्रोशाति गर्दा कन्येव तुन्ना पेरुं तुञ्जाना पत्येव जाया ॥

घृतेन द्यावापृथिवी मधुना समुक्षत पयस्वतीः कृणुताऽऽप ओषधीः ।

ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतः सिञ्चथा मधु ॥

(११।१७-१८) १।६।१२।१-२

उदु त्यं *- चित्रम् *- ॥

और्वभृगुवच्छुचिमप्नवानवदा हुवे । अग्निꣳ समुद्रवाससम् ॥

आ सवꣳ सवितुर्यथा भगस्ये- (८) -व भुजिꣳ हुवे । अग्निꣳ समुद्रवाससम् ॥

हुवे वातस्वनं कविं पर्जन्यक्रन्द्यꣳ सहः । अग्निꣳ समुद्रवाससम् ॥

(धीर, हवे, हवन्,-मुचम्, मरुत,-स्य, हवे, भवन्तु, द्वादश च) ॥ ११ ॥

[प्राश्नेति- २२४ । देव २१२ । प्राणं १२६ । प्रजापतेः २१६ । भक्षानुपहा १०५ । य १३३ । इष्टर्गो १७८ । निग्राभ्यां १६० । यो ३११ । श्री १६४ । अग्ने-४१२ -कादश ॥ २२४८]

[इति तृतीयकाण्डे प्रथमः प्रपाठकः ॥ १ ॥]

पवमानग्रहादीनां व्याख्यानम् ।

[अथ द्वितीयः प्रपाठकः ॥ २ ॥]

पवमानग्रहपदम् ॥ विश्वेदेवा ऋषयः ।

यो वै पवमानानामन्वारोहान् विद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽव च्छिद्यते

श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारय

सुपर्णोऽसि त्रिष्टुप्छन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारय

सघाऽसि जगतीछन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारयेत्याहै-ते (१) वै पवमानानामन्वारोहास्तान् य एवं विद्वान् यजतेऽनु पवमानाना रोहति न पवमानेभ्योऽव च्छिद्यते यो वै पवमानस्य सन्ततिं वेद सर्वमायुरेति न पुराऽऽयुषः प्र मीयते पशुमान् भवति विन्दते प्रजां पवमानस्य ग्रहा गृह्यन्तेऽथ वा अस्यैतेऽगृहीता द्रोणकलश आधवनीयः पूतभृत् तान् यदगृहीत्वोपाकुर्यात् पवमानं वि (२) च्छिन्द्यात् तं विच्छिद्यमानमध्वर्योः प्राणोऽनु वि च्छिद्येतो-पयामगृहीतोऽसि प्रजापतये त्वेति द्रोणकलशमभि मृशेदि *- न्द्राय त्वेत्याधवनीयं *- विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतं पवमानमेव तत् सं तनोति सर्वमायुरेति न पुराऽऽयुषः प्र मीयते पशुमान् भवति विन्दते प्रजाम् ॥ (एते, वि, द्विपञ्चाशच्च) ॥ १ ॥

सवनविकल्पनम्, तन्मन्त्राश्च ॥ २-३ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

त्रीणि वाव सवनान्यथ तृतीयꣳ सवनमव लुम्पन्त्यनꣳशु कुर्वन्त उपाꣳशुꣳ हुत्वोपाꣳशुपात्रेऽꣳशुमवास्य तं तृतीयसवनेऽपिसृज्याभि षुणुयाद्यदाप्याययति तेनाꣳशुमद्यदभिषुणोति तेनर्जीषि सर्वाण्येव तत् सवनान्यꣳशुमन्ति शुक्रवन्ति समावद्वीर्याणि करोति

द्वौ समुद्रौ विततावजूर्यौ पर्यावर्तेते जठरेव पादाः ।

तयोः पश्यन्तो अति यन्त्यन्यमपश्यन्तः (१) सेतुनाऽति यन्त्यन्यम् ॥

द्वे द्रधसी सतती वस्त एकः केशी विश्वा भुवनानि विद्वान् ।

(१।११-१२) ११।४।११-२, (१।४-५) —० कवधान...होऽसि ।

तिरोधायैत्यसितं वसानः शुक्रमा दत्ते अनुहाय जार्यै ॥

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतं महायज्ञमपश्यन् तमतन्वताग्निहोत्रं व्रतमकुर्वत तस्माद् द्विव्रतः स्याद् द्विर्ह्यग्निहोत्रं जुह्वति पौर्णमासं यज्ञमग्नीषोमीयं (२) पशुमकुर्वत दार्श्यं यज्ञमाग्नेयं पशुमकुर्वत वैश्वदेवं प्रातःसवनमकुर्वत वरुणप्रघासान् माध्यन्दिनꣳ सवनꣳ साकमेधान् पितृयज्ञं त्र्यम्बकाꣳस्तृतीयसवनमकुर्वत तमेषामसुरा यज्ञमन्ववाजिगाꣳसन् तं नान्ववायन् तेऽब्रुवन्नध्वर्तव्या वा इमे देवा अभूवन्निति तदध्वरस्याध्वरत्वं ततो देवा अभवन् पराऽसुरा य एवं विद्वान्त्सोमेन यजते भवत्यात्मना परा (३) ऽस्य भ्रातृव्यो भवति ॥ (अपश्यन्तो, ऽग्नीषोमीयं, परा, त्रीणि च) ॥ २ ॥

सोमावेक्षणम् ॥ विश्वेदेवा ऋषयः ।

परिभूरग्निं परिभूरिन्द्रं परिभूर्विश्वान् देवान् परिभूर्माꣳ सह ब्रह्मवर्चसेन

स नः पवस्व शं गवे शं जनाय शमर्वते शꣳ राजन्नोषधीभ्यो

ऽच्छिन्नस्य ते रयिपते सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।

तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥

प्राणाय मे वर्चोदा वर्चसे पवस्वा-पानाय *- व्यानाय *- वाचे *- (१) दक्षक्रतुभ्यां *- चक्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथाꣳ श्रोत्राया- *- ऽऽत्मने *- ऽङ्गेभ्य *- आयुषे *- वीर्याय *- विष्णो-रिन्द्रस्य विश्वेषां देवानां जठरमसि वर्चोदा मे वर्चसे पवस्व कोऽसि को नाम कस्मै त्वा काय त्वा यं त्वा सोमेनातीतृपं यं त्वा सोमेनामीमदꣳ सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषै-र्विश्वेभ्यो मे रूपेभ्यो वर्चोदा (२) वर्चसे पवस्व तस्य मे रास्व तस्य ते भक्षीय तस्य त इदमुन्मृजे ॥

बुभूषन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो भूत्याऽभि पवते ब्रह्मवर्चसकामोऽवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तो ब्रह्मवर्चसेनाभि पवत आमयावी- (३) -ऽवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्त आयुषाऽभि पवतेऽभिचरन्नवेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिस्तमेव तर्पयति स एनं तृप्तः प्राणापानाभ्यां वाचो दक्षक्रतुभ्यां चक्षुर्भ्याꣳ श्रोत्राभ्यामात्मनोऽङ्गेभ्य आयुषोऽन्तरेति ताजक् प्र धन्वति ॥ (वाचे, वर्चोदा, आमयावी, पञ्चचत्वारिꣳशच्च) ॥ ३ ॥

स्फ्याद्युपस्थानमन्त्राः विविधाः ॥ विश्वेदेवा ऋषयः ।

स्फ्यः स्वस्तिर्विघनः स्वस्तिः पर्शुर्वेदिः परशुर्नः स्वस्तिः ।

यज्ञिया यज्ञकृतः स्थ ते माऽस्मिन् यज्ञ उप ह्वयध्व-

-मुप मा द्यावापृथिवी ह्वयेता-मुपाऽऽस्तावः *- -*कलशः *- -*सोमो *- -*अग्निः *-

(३।२-५,८-१२) *- मे वर्चोदा...पवस्व, (३।६) वर्चोदौ...पवेथाम्, (३।१३-१४) *- जठर... पवस्व । (४।२-६,७) *- ह्वयताम्, (३।४-६)

रुप देवाः *- उप यज्ञः *- उप मा होत्रा उपहवे ह्वयन्तां नमोऽग्नये मखघ्ने मखस्य मा यशोऽर्यादित्याहवनीयमुप तिष्ठते यज्ञो वै मखो (१) यज्ञं वाव स तद्हन् तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नमो रुद्राय मखघ्ने नमस्कृत्या मा पाहीत्याग्नीध्रं तस्मा एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै नम इन्द्राय मखघ्न इन्द्रियं मे वीर्यं मा निर्वधीरिति होत्रीयमाशिषमेवैतामा शास्त इन्द्रियस्य वीर्यस्यानिर्घाताय या वै (२) देवताः सदस्यार्तिमार्पयन्ति यस्ता विद्वान् प्रसर्पति न सदस्यार्तिमार्छति नमोऽग्नये मखघ्न इत्याहैता वै देवताः सदस्यार्तिमार्पयन्ति ता य एवं विद्वान् प्रसर्पति न सदस्यार्तिमार्छति दृढे स्थः शिथिरे समीची माꣳहसस्पातꣳ सूर्यो मा देवो दिव्यादꣳहसस्पातु *- वायुरन्तरिक्षाद् *- (३) अग्निः पृथिव्या *- यमः पितृभ्यः *- सरस्वती मनुष्येभ्यो देवी द्वारौ मा मा सं ताप्तं नमः सदसे नमः सदसस्पतये नमः सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्या अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत् पाकतर उन्निवत उदुद्वतश्च गेषं पातं मा द्यावापृथिवी अद्याह्नः सदो वै प्रसर्पन्तं (४) पितरोऽनु प्र सर्पन्ति त एनमीश्वरा हिꣳसितोः सदः प्रसृप्य दक्षिणार्धं परेक्षेताऽगन्त पितरः पितृमानहं युष्माभिर्भूयासꣳ सुप्रजसो मया यूयं भूयास्तेति तेभ्य एव नमस्कृत्य सदः प्र सर्पत्यात्मनोऽनार्त्यै ॥ (मखो, वा, अन्तरिक्षात्, प्रसर्पन्तं, सप्तचत्वारिꣳशच्च) ॥ ४ ॥

भक्षमन्त्राः ॥ ८ गायत्री; ९ बृहती, १०, २० त्रिष्टुप्; १२ अनुष्टुप्; १४ द्विपदा गायत्री । विश्वेदेवा ऋषयः ।

भक्षेहि माऽऽविश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वायेहि वसो पुरोवसो प्रियो मे हृदोऽस्य-श्विनोस्त्वा बाहुभ्याꣳ सघ्यासं नृचक्षसं त्वा देव सोम सुचक्षा अव ख्येषं मन्द्राऽभिभूतिः केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृप्यतु मन्द्रा स्वर्वाच्यदितिरनाहतशीर्ष्णी वाग्जुषाणा सोमस्य तृप्यत्वेहि विश्वचर्षणे (१) शम्भूर्मयोभूः स्वस्ति मा हरिवर्ण प्र चर क्रत्वे दक्षाय रायस्पोषाय सुवीरताया मा मा राजन् वि बीभिषो मा मे हार्दि त्विषा वधीः । वृष्णे शुष्मायाऽऽयुषे वर्चसे ॥

वसुमद्गणस्य सोम देव ते मतिविदः प्रातःसवनस्य गायत्रछन्दस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि रुद्रवद्गणस्य सोम देव ते मतिविदो माध्यन्दिनस्य सवनस्य त्रिष्टुप्छन्दस इन्द्रपीतस्य नराशꣳसपीतस्य (२) पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयाम्या-दित्यवद्गणस्य सोम देव ते मतिविदस्तृतीयस्य सवनस्य जगतीछन्दस इन्द्रपीतस्य नराशꣳसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य सङ्गथे ॥

हिन्व मे गात्रा हरिवो गणान् मे मा वि तीतृषः ।

शिवो मे सप्तर्षीनुप तिष्ठस्व मा मेऽवाङ्नाभिमति (३) गाः ॥

(४।७) *- ह्वयन्ताम्, (४।२-९) अग्नये मखघ्ने इत्येवं मन्त्राः । (५।१५-१८) *- पाहि ।

अपाम सोमममृता अभूमादर्श्म ज्योतिरविदाम देवान् ।

किमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥

यन्म आत्मनो मिन्दाऽभूदग्निस्तत् पुनराऽहार्जातवेदा विचर्षणिः ॥

पुनरग्निश्चक्षुरदात् पुनरिन्द्रो बृहस्पतिः ।

पुनर्मे अश्विना युवं चक्षुरा धत्तमक्ष्योः ॥

इष्टयजुषस्ते देव सोम स्तुतस्तोमस्य (४) शस्तोक्थस्य हरिवत इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि ॥

आपूर्याः स्थाऽऽ मा पूरयत प्रजया च धनेन च ॥

एतत् ते तत ये च त्वामन्व-त्र ते पितामह प्रपितामह ये च त्वामन्व-त्र पितरो यथाभागं मन्दध्वम्

नमो वः पितरो रसाय नमो वः पितरः शुष्माय नमो वः पितरो जीवाय नमो वः पितरः (५) स्वधायै नमो वः पितरो मन्यवे नमो वः पितरो घोराय पितरो नमो वो य एतस्मिꣳल्लोके स्थ युष्माꣳस्तेऽनु येऽस्मिꣳल्लोके मां तेऽनु य एतस्मिꣳल्लोके स्थ यूयं तेषां वसिष्ठा भूयास्त येऽस्मिꣳल्लोकेऽहं तेषां वसिष्ठो भूयासं

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव (६) ।

यत् कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणाम् ॥

देवकृतस्यैनसोऽवयजनमसि मनुष्यकृतस्यैनसोऽवयजनमसि पितृकृतस्यैनसोऽवयजनमस्य-प्सु धौतस्य सोम देव ते नृभिः सुतस्येष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य यो भक्षो अश्वसनिर्यो गोसनिस्तस्य ते पितृभिर्भक्षंकृतस्योपहूतस्योपहूतो भक्षयामि ॥ (विश्वचर्षणे, नराशꣳसपीतस्या,-ऽसि, स्तुतस्तोमस्य, पितरो, बभूव, पञ्चचत्वारिꣳशच्च) ॥ ५ ॥

पृषदाज्यम्, दधिघर्ममन्त्रश्च ॥ २ बृहती । विश्वेदेवा ऋषयः ।

महीनां पयोऽसि विश्वेषां देवानां तनूरृध्यासमद्य पृषतीनां ग्रहं पृषतीनां ग्रहोऽसि विष्णोर्हृदयमस्येकमिष विष्णुस्त्वानु वि चक्रमे भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्नियै दुग्धं

यावती द्यावापृथिवी महित्वा यावच्च सप्त सिन्धवो वितस्थुः ।

तावन्तमिन्द्र ते (१) ग्रहꣳ सहोर्जा गृह्णाम्यस्तृतम् ॥

यत् कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकाः स्युर्यच्छ्वाऽवमृशेच्चतुष्पादोऽस्य पशवः प्रमायुकाः स्युर्यत् स्कन्देद्यजमानः प्रमायुकः स्यात् पशवो वै पृषदाज्यं पशवो वा एतस्य स्कन्दन्ति यस्य पृष-

ह्राज्यꣳ स्कन्दति यत् पृषदाज्यं पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यं प्राणो वा (२) एतस्य स्कन्दति यस्य पृषदाज्यꣳ स्कन्दति यत् पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति हिरण्यमवधाय गृह्णात्यमृतं वै हिरण्यं प्राणः पृषदाज्यममृतमेवास्य प्राणे दधाति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यश्वमव घ्रापयति प्राजापत्यो वा अश्वः प्राजापत्यः प्राणः स्वादेवास्मै योनेः प्राणं (३) निर्मिमीते वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यꣳ स्कन्दति वैष्णव्यर्चा पुनर्गृह्णाति यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं तनोति ॥ (ते, वै, प्राण, द्वाविंशतिश्च) ॥ ६ ॥

स्तुतशस्त्रयोरभिधानम् ॥ विश्वेदेवा ऋषयः ।

देव सवितरेतत् ते प्राऽऽह तत् प्र च सुव प्र च यज बृहस्पतिर्ब्रह्माऽऽयुष्मत्या ऋचो मा गात तनूपात् साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्र- (१)-मस्यूर्जं मह्यꣳ शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादि-

—न्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम् ॥

सा मे सत्याऽऽशीर्देवेषु भूयाद्ब्रह्मवर्चसं माऽऽगम्यात् ॥

यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे ।

स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन् करोतु वयꣳ स्याम पतयो रयीणाम् ॥

यज्ञो वा वै (२) यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे स यः स्तुतशस्त्रयोर्दोहमविद्वान् यजते तं यज्ञो दुहे स इष्ट्वा पापीयान् भवति य एनयोर्दोहं विद्वान् यजते स यज्ञं दुहे स इष्ट्वा वसीयान् भवति स्तुतस्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्यꣳ शस्त्रं दुहा- (३)-मा मा शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्रयोर्दोहस्तं य एवं विद्वान् यजते दुह एव यज्ञमिष्ट्वा वसीयान् भवति ॥ (शस्त्रं, वै, दुहा, द्वाविंशतिश्च) ॥ ७ ॥

प्रस्थितयाज्यादग्धहोमादिमन्त्राः ॥ १६-२०, २४-२५ त्रिष्टुप्, २२-२३ जगती, २६ अनुष्टुप् । विश्वेदेवा ऋषयः ।

श्येनाय पत्वने स्वाहा वट् स्वयमभिगूर्ताय नमो विष्टम्भाय धर्मणे स्वाहा वट् स्वयमभिगूर्ताय नमः परिधये जनप्रथनाय स्वाहा वट् स्वयमभिगूर्ताय नम ऊर्जे होत्राणाꣳ स्वाहा वट् स्वयमभिगूर्ताय नमः पयसे होत्राणाꣳ स्वाहा वट् स्वयमभिगूर्ताय नमः प्रजापतये मनवे स्वाहा वट् स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट् स्वाहा वट् स्वयमभिगूर्ताय नम-

—स्तृम्पन्ताꣳ होत्रा मधोर्घृतस्य

यज्ञपतिमृषय एनसा (१) ऽऽहुः ।

प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध ।

सं नस्ताभ्याꣳ सृजतु विश्वकर्मा

१६ (तै. सं.)

घोरा ऋषयो नमो अस्त्वेभ्यः ।

चक्षुष एषां मनसश्च सन्धौ बृहस्पतये महि षद् द्युमन्नमः ॥

नमो विश्वकर्मणे स उ पात्वस्मा-

नेनन्यान्त्सोमपान् मन्यमानः ।

प्राणस्य विद्वान्त्समरे न धीर एनश्चकृवान् महि बद्ध एषाम् ॥

तं विश्वकर्मन् (२) प्र मुञ्चा स्वस्तये

ये भक्षयन्तो न वसून्यानृहुः ।

यानग्नयोऽन्वतप्यन्त धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां कृणोतु विश्वकर्मा ॥

नमः पितृभ्यो अभि ये नो अख्यन् यज्ञकृतो यज्ञकामाः सुदेवा

अकामा वो दक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट ।

यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यास्तेभ्यो यो दक्षिणां न (३) नयेदैभ्यो वृश्च्येत यद्वैश्वकर्मणानि जुहोति सदस्यानेव तत् प्रीणात्य-

—स्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्नुतः ।

पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥

आशीर्दाया दम्पती वाममश्नुतामरिष्टो रायः सचताꣳ समोकसा ।

य आऽसिचत् संदुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः ॥

सर्पिर्ग्रीवी (४) पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य ।

सहजानिर्यः सुमखस्यमान इन्द्रायाऽऽशिरꣳ सह कुम्भ्याऽदात् ॥

आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणꣳ सवर्चसम् ।

सञ्जयन् क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो अन्याꣳ अधरान्त्सपत्नान् ॥

भूतमसि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां त्वा परि गृह्णामि विश्वे त्वा देवा वैश्वानराः (५) प्र च्यावयन्तु दिवि देवान् दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवान्

ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ।

यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत् ।

यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन् ॥

(एनसा, विश्वकर्मन्, न, सर्पिर्ग्रीवी, वैश्वानरा,-श्चत्वारिꣳशच्च) ॥ ८ ॥

प्रतिगरः, तन्मन्त्राश्च ॥ विश्वेदेवा ऋषयः ।

यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्य त्रीण्येतान्य-

२०२८

क्षराणि त्रिपदा गायत्री गायत्रं प्रातःसवनं गायत्रियैव प्रातःसवने वज्रमन्तर्धत्त उक्थं वाचीत्याह माध्यन्दिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनꣳ सवनं त्रिष्टुभैव माध्यन्दिने सवने वज्रमन्तर्धत्त (१) उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वरो वज्रो वज्रेणैव तृतीयसवने वज्रमन्तर्धत्ते ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो यथासवनं प्रतिगरे छन्दाꣳसि सम्पादयेत् तेजः प्रातःसवन आत्मन् दधीतेन्द्रियं माध्यन्दिने सवने पशूꣳस्तृतीयसवन इत्यु-—क्थशा इत्याह प्रातःसवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि (२) त्रिपदा गायत्री गायत्रं प्रातःसवनं प्रातःसवन एव प्रतिगरे छन्दाꣳसि सं पादयत्यथो तेजो वै गायत्री तेजः प्रातःसवनं तेज एव प्रातःसवन आत्मन् धत्त उक्थं वाचीत्याह माध्यन्दिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभं माध्यन्दिनꣳ सवनं माध्यन्दिन एव सवने प्रतिगरे छन्दाꣳसि सं पादयत्यथो इन्द्रियं वै त्रिष्टुगि-न्द्रियं माध्यन्दिनꣳ सवन- (३)-मिन्द्रियमेव माध्यन्दिने सवन आत्मन् धत्त उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः पशवो जागतं तृतीयसवनं तृतीयसवन एव प्रतिगरे छन्दाꣳसि सं पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव तृतीयसवन आत्मन् धत्ते यद्वै होताऽध्वर्युमभ्याह्वयत आव्यमस्मिन् दधाति तद्यन्ना- (४)-पहनीत पुराऽस्य संवत्सराद्गृह आ वेवी-रन्छोꣳसा मोद इवेति प्रत्याह्वयते तेनैव तदप हते यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते यदभिप्रतिगृणीयाद्यथाऽऽयतया समृच्छते तादृगेव तद्-यदर्धर्चाल्लुप्येत यथा धावद्भ्यो हीयते तादृगेव तत् प्रबाहुग्वा ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृणा- (५)-मृचः प्रणव उक्थशꣳसिनां प्रतिगरो-ऽध्वर्यूणां य एवं विद्वान् प्रतिगृणात्यन्नाद एव भवत्याऽस्य प्रजायां वाजी जायत इयं वै होता-ऽसावध्वर्युर्यदासीनः शꣳसत्यस्या एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो दुहे यत् तिष्ठन् प्रतिगृणात्यमुष्या एव तदध्वर्युर्नैति (६) तिष्ठतीव ह्यसावथो अमूमेव तेन यजमानो दुहे यदासीनः शꣳसति तस्मादितः प्रदानं देवा उप जीवन्ति यत् तिष्ठन् प्रतिगृणाति तस्मादमुतः प्रदानं मनुष्या उप जीवन्ति यत् प्राङासीनः शꣳसति प्रत्यङ् तिष्ठन् प्रतिगृणाति तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयति (७) पराङा वर्तते वज्रमेव तन्नि करोति ॥ (पत्ते, क्षराणि, सवने, नो,-द्गातृणा,-मेति, वर्तयत्य, द्वौ च) ॥ ९ ॥

प्रतिनिर्ग्राह्यमन्त्राः ॥ विश्वेदेवा ऋषयः ।

उपयामगृहीतोऽसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णा-म्यु-पयामगृहीतोऽस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामि-म्यु-पयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्व (१) तं ते दुश्चक्षा माऽव ख्यन्मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहि मयि वसुर्विदद्वसुश्चक्षुष्पा-

श्चक्षुर्मे पाहि मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहि भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो न इन्द्रवायू मित्रावरुणा-वश्विनावभिदासति भ्रातृव्य (२) उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्तमश्चेतयानि ॥ (दुश्चक्षा, भ्रातृव्य,-स्त्रयोदश च) ॥ १० ॥

त्रैधातवीवेष्टिमन्त्राः ॥ १ ककुप्, २ उष्णिक्, ३-६, ९-१० त्रिष्टुप्, ७-८ गायत्री । विश्वेदेवा ऋषयः ।

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः । यस्य त्वꣳ सख्यमाविथ ॥

प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् । विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥

अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।

तिस्र उ ते तनुवो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥

सं वां कर्मणा समिषा (१) हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।

जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।

इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥

त्रीण्यायूꣳषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।

ताभिर्देवानामवो यक्षि विद्वानथा (२) भव यजमानाय शं योः ॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः । स त्रीꣳरेकादशाꣳ इह ॥

यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः । नभन्तामन्यके समे ॥

इन्द्राविष्णू दृꣳहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।

शतं वर्चिनः सहस्रं च साकꣳ हथो अप्रत्यसुरस्य वीरान् ॥

उत माता महिषमन्ववेनदमी त्वा (३) जहति पुत्र देवाः ।

अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥

(इषा, ऽथ, त्वा, त्रयोदश च) ॥ ११ ॥

[य-१४१ । -स्त्रीणि १५३ । परिभूः १६५ । स्वयो २६३ । भक्षं २७४ । महीनां १७२ । देवं १७२ । श्येनाय २५० । य-१५८ ।-मुपयामगृहीतः ११२। त्रे-१६२ । कांदश ॥ २३२१]

[इति तृतीयकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥]

वैकृतविधीनामभिधानम् ।

[अथ तृतीयः प्रपाठकः ॥ ३ ॥]

अग्निमारुतमन्त्राः ॥ ७-९ द्विपदा गायत्री । विश्वेदेवा ऋषयः ।

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च त्वा तपसश्च तेजसे जुहोमि तेजोविदसि तेजो मा मा हासीन्माऽहं तेजो हासिषं मा मां तेजो

उदु त्यं *- चित्रम् *- ॥
औ॒र्वभृ॒गुवच्छु॒चिम॑प्नवान॒वदा हु॑वे । अ॒ग्नि२ँ स॑मु॒द्रवा॑ससम् ॥
आ स॒व२ँ स॑वि॒तुर्यथा॒ भग॑स्येव भु॒जि२ँ हु॑वे । अ॒ग्नि२ँ स॑मु॒द्रवा॑ससम् ॥
हु॒वे वात॑स्वनं क॒विं प॒र्जन्य॑क्रन्द्य॒२ँ सहः॑ । अ॒ग्नि२ँ स॑मु॒द्रवा॑ससम् ॥
(यो॒नि, इव॑, हव्य,-सुभगो, मरुत,-स्तु, वृ॒ति, मर्नन्तु, द्वादश च) ॥ ११ ॥

[प्रथमार्गति- २६४ । तैव ११२ । पुष्टं १२६ । प्रजातिः २१६ । प्राजापत्या १०५ । च १३३ । दृहगौ १७८ । निम्रान्यां १६० । यो १११ । हुती १६४ । अग्नि- ४१२ -कादश ॥ २२४८]

[इति तृतीयकाण्डे प्रथमः प्रपाठकः ॥ १ ॥]

पवमानग्रहादीनां व्याख्यानम् ।

[अथ द्वितीयः प्रपाठकः ॥ २ ॥]

पवमानग्रहग्रहणम् ॥ विश्वेदेवा ऋषयः ।

यो वै पव॑मानाना॒मन्वारो॒हान् वि॒द्वान् यज॑ते॒ऽनु॒ पव॑माना॒ना रोह॑ति॒ न पव॑माने॒भ्योऽव॑ च्छिद्यते
श्ये॒नो॑ऽसि गाय॒त्रछ॑न्दा अनु॒ त्वा ऽऽ र॑भे स्व॒स्ति मा॒ सं पा॑रय
सु॒प॒र्णो॑ऽसि त्रि॒ष्टुप्छ॑न्दा अनु॒ त्वा ऽऽ र॑भे स्व॒स्ति मा॒ सं पा॑रय
सघा॑ऽसि जग॑तीछन्दा अनु॒ त्वा ऽऽ र॑भे स्व॒स्ति मा॒ सं पा॑र॒येत्या॑ह—ते (१) वै पव॑माना-नामन्वारो॒हास्तान् य ए॒वं वि॒द्वान् यज॑ते॒ऽनु॒ पव॑माना॒ना रोह॑ति॒ न पव॑माने॒भ्योऽव॑ च्छिद्यते॒ यो वै पव॑मानस्य॒ सन्त॑ति॒ वेद॒ सर्व॒मायु॑रेति॒ न पु॒रा ऽऽयु॑षः॒ प्र मी॑यते पशु॒मान् भ॑वति वि॒न्दते॑ प्र॒जां पव॑मानस्य॒ ग्रहा॑ गृह्य॒न्तेऽथ॒ वा अ॑स्यै॒तेऽगृ॑हीता द्रोणकल॒श आ॑धव॒नीयः॑ पूत॒भृत् तान् यदगृ॑हीत्वोपाकु॒र्यात् पव॑मानं॒ वि (२) छि॑न्द्यात् तं वि॒च्छिद्य॑मानमध्व॒र्योः प्रा॒णोऽनु॒ वि च्छि॑द्येतो॒—प॒या॒मगृ॑हीतोऽसि प्र॒जाप॑तये त्वेति॒ द्रोणकल॒शम॒भि मृ॑शेदि *- न्द्राय॑ त्वेत्या॑धव॒नीय॑ *- विश्वे॑भ्यस्त्वा दे॒वेभ्य॒ इति॑ पूत॒भृतं॒ पव॑मानमे॒व तत् सं त॑नोति॒ सर्व॒मायु॑रेति॒ न पु॒रा ऽऽयु॑षः॒ प्र मी॑यते पशु॒मान् भ॑वति वि॒न्दते॑ प्र॒जाम् ॥ (एते, वि, द्विचत्वारि१ँशच्च) ॥ १ ॥

सवनत्रिकरणम्, तन्मन्त्राश्च ॥ २-३ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

त्रीणि॒ वाव सव॑नान्यथ॑ तृ॒तीय॒२ँ सव॑न॒मव॑ लुम्पन्त्यन॒१ँशु कु॒र्वन्त॑ उपा॒१ँशु२ँ हु॒त्वोपा॑१ँशुपा॒त्रे॑ऽ१ँशुम॒वास्य॒ तं तृ॑तीयसव॒नेऽपि॒सृज्या॒भि षु॑णुयाद्यदा॑प्याय॒यति॒ तेना॑१ँशु॒मद्यद॑भिषु॒णोति॒ तेन॑र्जी॒षि सर्वा॑ण्ये॒व तत् सव॑नान्य१ँशु॒मन्ति॑ शु॒क्रव॑न्ति स॒माव॑द्वीर्याणि करोति

द्वौ स॑मु॒द्रौ वित॑तावज॒र्यौ प॒र्याव॑र्तेते ज॒ठरे॑व॒ पादाः॑ ।
तयोः॒ पश्य॑न्तो॒ अति॑ यन्त्य॒न्यमप॑श्यन्तः (१) सेतु॒नाऽति॑ यन्त्य॒न्यम् ॥
द्वे द्रव॑सी स॒तती॑ वस्त॒ एकः॑ के॒शी विश्वा॒ भुव॑नानि वि॒द्वान् ।

(११।३१-३२) १।४।४३।१-२, (११४-५) —* इच्यान...शोऽसि ।

ति॒रो॒धायै॒त्यसि॑तं॒ वसा॑नः शु॒क्रमा द॑त्ते अनु॒हाय॑ जा॒र्यै ॥
दे॒वा वै य॒ज्ञाऽकु॑र्वत॒ तदसु॑रा अकुर्वत॒ ते दे॒वा ए॒तं म॑हाय॒ज्ञम॑पश्यन् तम॑तन्वताग्निहो॒त्रं व्र॒तम॑कुर्वत॒ तस्मा॒द् द्विव्र॑तः स्या॒द् द्विर्ह्य॑ग्निहो॒त्रं जुह्व॑ति पौर्णमा॒सं य॒ज्ञम॑ग्नीषो॒मीय॑ (२) प॒शुम॑कुर्वत दा॒र्श्यं य॒ज्ञमा॑ग्ने॒यं प॒शुम॑कुर्वत वैश्वदे॒वं प्रा॒तःसव॒नम॑कुर्वत वरुणप्रघा॒सान् माध्य॑न्दिन॒२ँ सव॑न२ँ साकमे॒धान् पि॑तृय॒ज्ञं त्र्य॑म्बका२ँस्तृ॒तीयसव॒नम॑कुर्वत॒ तमे॑षा॒मसु॑रा य॒ज्ञम॒न्ववा॑जिगा२ँसन् तं नान्ववा॑यन् तेऽब्रुवन्नध्व॒र्तव्या॒ वा इ॒मे दे॒वा अ॑भूव॒न्निति॒ तद॑ध्व॒रस्या॑ध्वर॒त्वं ततो॑ दे॒वा अभ॑वन् परा ऽसु॑रा॒ य ए॒वं वि॒द्वान्त्सोमे॑न॒ यज॑ते॒ भव॑त्या॒त्मना॒ परा॑ (३) ऽस्य॒ भ्रातृ॑व्यो भवति ॥ (अपश्यन्तो, ऽग्नीषोमीयं, परा, त्रीणि च) ॥ २ ॥

सोमावेक्षणम् ॥ विश्वेदेवा ऋषयः ।

प॒रि॒भूर॒ग्निं प॑रि॒भूरिन्द्रं॑ परि॒भूर्विश्वा॑न् दे॒वान् प॑रि॒भूर्मा॒२ँ स॒ह ब्र॑ह्मवर्च॒सेन॑
स नः॑ पवस्व॒ शं गवे॒ शं जना॑य॒ शमर्व॑ते॒ श२ँ रा॑जन्नोष॑धीभ्यो
ऽच्छि॑न्नस्य ते रयिपते सु॒वीर्य॑स्य रा॒यस्पोष॑स्य ददि॒तारः॑ स्याम ।
तस्य॑ मे रास्व॒ तस्य॑ ते भक्षीय॒ तस्य॑ त इ॒दमुन्मृ॑जे ॥
प्रा॒णाय॑ मे वर्चो॒दा वर्च॑से पवस्वा॒—पा॒नाय॑ *- व्या॒नाय॑ *- वा॒चे *- (१) द॑क्षक्र॒तुभ्यां॑ *- चक्षु॑र्भ्यां मे वर्चो॒दौ वर्च॑से पवेथा॒२ँ श्रोत्रा॑य॒—*- ऽऽत्मने॑ *- ऽङ्गेभ्य॒ *- आयु॑षे *- वी॒र्या॑य *- विष्णो॒रिन्द्र॑स्य॒ विश्वे॑षां दे॒वानां॑ ज॒ठर॑मसि वर्चो॒दा मे॒ वर्च॑से पवस्व॒ कोऽसि॒ को ना॑म॒ कस्मै॑ त्वा॒ काय॑ त्वा॒ यं त्वा॒ सोमे॒नाती॑तृपं॒ यं त्वा॒ सोमे॒नामी॑मद२ँ सुप्र॒जाः प्र॒जया॑ भूयास२ँ सु॒वीरो॑ वी॒रैः सु॒वर्चा॒ वर्च॑सा सु॒पोषः॒ पोषै॒र्विश्वे॑भ्यो मे रू॒पेभ्यो॑ वर्चो॒दा (२) वर्च॑से पवस्व॒ तस्य॑ मे रास्व॒ तस्य॑ ते भक्षीय॒ तस्य॑ त इ॒दमुन्मृ॑जे ॥
बु॒भूष॑न्नवे॑क्षेतै॒ष वै पात्रि॑यः प्र॒जाप॑तिर्य॒ज्ञः प्र॒जाप॑ति॒स्तमे॒व त॑र्पयति॒ स ए॑नं तृ॒प्तो भूत्या॒ऽभि प॑वते ब्रह्मवर्च॒सका॑मोऽवे॑क्षेतै॒ष वै पात्रि॑यः प्र॒जाप॑तिर्य॒ज्ञः प्र॒जाप॑ति॒स्तमे॒व त॑र्पयति॒ स ए॑नं तृ॒प्तो ब्र॑ह्मवर्च॒सेना॒भि प॑वत आमया॒वी (३)—ऽवे॑क्षेतै॒ष वै पात्रि॑यः प्र॒जाप॑तिर्य॒ज्ञः प्र॒जाप॑ति॒स्तमे॒व त॑र्पयति॒ स ए॑नं तृ॒प्त आयु॑षा॒ऽभि प॑वतेऽभि॒चर॑न्नवे॑क्षेतै॒ष वै पात्रि॑यः प्र॒जाप॑तिर्य॒ज्ञः प्र॒जाप॑ति॒स्तमे॒व त॑र्पयति॒ स ए॑नं तृ॒प्तः प्रा॑णापा॒नाभ्यां॑ वा॒चो द॑क्षक्र॒तुभ्यां॒ चक्षु॑र्भ्या॒२ँ श्रोत्रा॑भ्यामा॒त्मनोऽङ्गे॑भ्य॒ आयु॑षो॒ऽन्तरे॑ति ता॒जक् प्र ध॑न्वति ॥ (वा॒चे, व॑र्चो॒दा, आ॑मया॒वी, पञ्च॑चत्वारि२ँशच्च) ॥ ३ ॥

स्फ्याद्युपस्थानमन्त्राः विधिश्च ॥ विश्वेदेवा ऋषयः ।

स्फ्यः स्व॒स्तिर्वि॑घ॒नः स्व॒स्तिः पर्शु॒र्वेदिः॑ पर॒शुर्नः॑ स्व॒स्तिः ।
य॒ज्ञिया॑ यज्ञ॒कृतः॑ स्थ॒ ते मा॒ऽस्मिन् य॒ज्ञ उप॑ ह्वयध्व॒—
—मुप॑ मा॒ द्यावा॑पृथि॒वी ह्व॑येता॒—मुपा॑ऽऽस्ता॒वः *- —* क॒लशः॑ *- —* सोमो॑ *- —* अ॒ग्निः *-

(३।३-५,८-१२) *-मे वर्चोदा...पवस्व, (३।६) वर्चोदौ...पवेथाम्, (३।१३-१४) *- जठर... पवस्व । (४।३-६,७) *- ह्वयताम्, (३।४-६)

रुपं॑ दे॒वाः *- उप॑ य॒ज्ञः *- उप॑ मा॒ होत्रा॑ उपह॒वे ह्व॑यन्तां॒ नमो॒ऽग्नये॑ मख॒घ्ने म॒खस्य॑ मा॒ यशो॑ऽर्या॒दित्या॑हव॒नीय॒मुप॑ तिष्ठते य॒ज्ञो वै म॒खो (१) य॒ज्ञं वाव स तद॑हन् तस्मा॑ ए॒व न॑म॒स्कृत्य॒ सदः॒ प्र स॑र्पत्या॒त्मनोऽना॑र्त्यै॒ नमो॑ रु॒द्राय॑ मख॒घ्ने न॑म॒स्कृत्या॑ मा पा॒हीत्याग्नी॑ध्रं॒ तस्मा॑ ए॒व न॑म॒स्कृत्य॒ सदः॒ प्र स॑र्पत्या॒त्मनोऽना॑र्त्यै॒ नम॒ इन्द्रा॑य मख॒घ्न इ॑न्द्रि॒यं मे॑ वी॒र्यं॑ मा निर्व॑धी॒रिति॑ हो॒त्रीय॑मा॒शिष॑मे॒वैतामा शा॑स्त इन्द्रि॒यस्य॑ वी॒र्य॑स्या॒निर्घा॑ताय॒ या वै (२) दे॒वताः॒ सद॒स्यार्ति॑मार्प॒यन्ति॒ यस्ता वि॒द्वान् प्र॒सर्प॑ति॒ न सद॒स्या-र्ति॒मार्छ॑ति॒ नमो॒ऽग्नये॑ मख॒घ्न इत्या॑है॒ता वै दे॒वताः॒ सद॒स्यार्ति॒मार्प॑यन्ति॒ ता य ए॒वं वि॒द्वान् प्र॒सर्प॑ति॒ न सद॒स्यार्ति॒मार्छ॑ति॒ दृढे स्थः॑ शिथि॒रे स॒मीची॒ मा॒ऽ२ँह॑सस्पात२ँ॒ सूर्यो॑ मा दे॒वो दि॒व्याद२ँह॑सस्पातु *- वा॒युर॒न्तरि॑क्षा॒द् *- (३) अ॒ग्निः पृ॑थि॒व्या *- य॒मः पि॒तृभ्यः॑ *- सर॑स्वती मनु॒ष्ये॑भ्यो॒ देवी॑ द्वारौ॒ मा मा॒ सं ता॑प्तं॒ नमः॒ सद॑से॒ नमः॒ सद॑स॒स्पत॑ये॒ नमः॒ सखी॑नां पुरो॒गाणां॒ चक्षु॑षे॒ नमो॑ दि॒वे नमः॑ पृथि॒व्या अहे॑ दैधिषव्यो॒दत॑स्तिष्ठा॒न्यस्य॒ सद॑ने सीद॒ योऽस्मत् पाक॑तर॒ उन्नि॒वत॑ उद्व॒तश्च॑ गेषं॒ पा॒तं मा॑ द्यावापृथिवी अ॒द्याह्नः॑ सदो॒ वै प्र॒सर्प॑न्तं (४) पि॒तरो॒ऽनु॒ प्र स॑र्पन्ति॒ त ए॑नमीश्व॒रा हि२ँसि॑तोः॒ सदः॑ प्र॒सृप्य॑ दक्षिणा॒र्धं परे॑क्षे॒ताऽग॑न्त पितरः पितृ॒मान॒हं यु॒ष्माभि॑र्भूयास२ँ सुप्र॒जसो॒ मया॑ यू॒यं भू॑या॒स्तेति॒ तेभ्य॑ ए॒व न॑म॒स्कृत्य॒ सदः॒ प्र स॑र्पत्या॒त्मनोऽना॑र्त्यै ॥
(म॒खो, वै, अ॒न्तरि॑क्षा॒द्, प्र॒सर्प॑न्तं, प्रच॑त्वारि२ँशच्च) ॥ ४ ॥

भक्षमन्त्राः ॥ ८ गायत्री; ९ बृहती, १०, २० त्रिष्टुप्, १२ अनुष्टुप्, १४ द्विपदा गायत्री । विश्वेदेवा ऋषयः ।

भक्षेहि॒ मा ऽऽ वि॑श दीर्घायु॒त्वाय॑ शन्तनु॒त्वाय॑ रा॒यस्पोषा॑य॒ वर्च॑से सुप्रजा॒स्त्वायेहि॑ वसो पुरो-वसो प्रि॒यो मे॑ हृ॒दोऽस्य॒—श्विनो॑स्त्वा बा॒हुभ्या॒२ँ सघ्यास॒ नृ॒चक्ष॑सं त्वा देव सोम सु॒चक्षा॒ अव॑ ख्येषं॒ म॒न्द्राऽभिभू॑तिः के॒तुर्य॒ज्ञानां॒ वाग्जु॑षा॒णा सोम॑स्य तृप्यतु म॒न्द्रा स्व॑र्वा॒च्यदि॑ति॒रना॑हतशीर्ष्णी॒ वाग्जु॑षा॒णा सोम॑स्य तृप्य॒त्वेहि॑ विश्वचर्षणे (१) श॒म्भूर्म॑यो॒भूः स्व॒स्ति मा॑ हरिवर्ण॒ प्र च॑र॒ क्रत्वे॒ दक्षा॑य रा॒यस्पोषा॑य सुवी॒रता॑यै॒ मा मा॑ राजन् वि बी॑भिषो॒ मा मे॒ हार्दि॑ त्वि॒षा व॑धीः । वृष॑णे॒ शुष्मा॒याऽऽयु॑षे॒ वर्च॑से ॥
वसु॑मद्गणस्य सोम देव ते मति॒विदः॑ प्रा॒तःसव॒नस्य॑ गाय॒त्रछ॑न्दस॒ इन्द्र॑पीतस्य॒ नरा॒श२ँस॑पीतस्य॒ पि॒तृपी॑तस्य॒ मधु॑मत॒ उप॑हूत॒स्योप॑हूतो भक्षयामि रु॒द्रव॑द्गणस्य सोम देव ते मति॒विदो॒ माध्य॑न्दिनस्य॒ सव॑नस्य त्रि॒ष्टुप्छ॑न्दस॒ इन्द्र॑पीतस्य॒ नरा॒श२ँस॑पीतस्य (२) पि॒तृपी॑तस्य॒ मधु॑मत॒ उप॑हूत॒स्यो-प॑हूतो भक्षयाम्या॒—दि॒त्यव॑द्गणस्य सोम देव ते मति॒विद॑स्तृ॒तीय॑स्य॒ सव॑नस्य॒ जग॑तीछन्दस॒ इन्द्र॑-पीतस्य॒ नरा॒श२ँस॑पीतस्य पि॒तृपी॑तस्य॒ मधु॑मत॒ उप॑हूत॒स्योप॑हूतो भक्षयामि ॥
आ प्या॑यस्व॒ समे॑तु ते वि॒श्वतः॑ सोम॒ वृष्णि॑यम् । भवा॒ वाज॑स्य सङ्ग॒थे ॥
हि॒न्व मे॒ गात्रा॑ हरिवो ग॒णान् मे॒ मा वि ती॑तृषः ।
शि॒वो मे॑ सप्तर्षी॒नुप॑ तिष्ठस्व॒ मा मेऽवाङ्नाभि॒मति॑ (३) गाः ॥

(३।०) *- ह्वयताम्, (३।२-९) कस्मिंश्चित् मते अयमेव एव मन्त्रः । (४।१५-१८) *- पातु ।

अपा॑म॒ सोम॑म॒मृता॑ अभू॒माद॑र्श्म॒ ज्योति॒रवि॑दाम दे॒वान् ।
किम॒स्मान् कृ॑णव॒दरा॑तिः॒ किमु॑ धू॒र्तिर॑मृत॒ मर्त्य॑स्य ॥
यन्म॑ आ॒त्मनो॑ मि॒न्दाऽभू॑द॒ग्निस्तत् पुन॒राऽहा॑र्जा॒तवे॑दा॒ विच॑र्षणिः ॥
पुन॑र॒ग्निश्चक्षु॑रदा॒त् पुन॒रिन्द्रो॒ बृह॒स्पतिः॑ ।
पुन॑र्मे अश्विना यु॒वं चक्षु॒रा ध॑त्तम॒क्ष्योः ॥
इ॒ष्टय॑जुषस्ते देव सोम स्तु॒तस्तो॑मस्य (४) श॒स्तोक्थ॑स्य॒ हरि॑वत॒ इन्द्र॑पीतस्य॒ मधु॑मत॒ उप॑हूत॒स्योप॑हूतो भक्षयामि ॥
आ॒प॒र्याः स्था॒ऽऽ मा॑ पूरयत प्र॒जया॑ च॒ धने॑न च ॥
ए॒तत् ते॑ तत॒ ये च॒ त्वामन्वे॒तत् ते॑ पितामह प्रपितामह॒ ये च॒ त्वामन्वत्र॑ पितरो यथाभा॒गं म॑न्दध्वं॒
नमो॑ वः पितरो॒ रसा॑य॒ नमो॑ वः पितरः॒ शुष्मा॑य॒ नमो॑ वः पितरो॒ जीवा॑य॒ नमो॑ वः पितरः (५) स्व॒धायै॒ नमो॑ वः पितरो म॒न्यवे॒ नमो॑ वः पितरो॒ घोरा॑य॒ पित॑रो॒ नमो॑ वो॒ य ए॒तस्मि॑ꣳल्लो॒के स्थ यु॒ष्मा२ँस्तेऽनु॒ येऽस्मि॑ꣳल्लो॒के मां तेऽनु॒ य ए॒तस्मि॑ꣳल्लो॒के स्थ यू॒यं तेषां॒ वसि॑ष्ठा भूयास्त॒ येऽस्मि॑ꣳल्लो॒केऽहं तेषां॒ वसि॑ष्ठो भूयासं॒
प्रजा॑पते॒ न त्वदे॒तान्य॒न्यो विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव (६) ।
यत् का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒य२ँ स्या॑म॒ पत॑यो रयी॒णाम् ॥
दे॒वकृ॑त॒स्यैन॑सोऽव॒यज॑नमसि मनु॒ष्य॑कृत॒स्यैन॑सोऽव॒यज॑नमसि पि॒तृकृ॑त॒स्यैन॑सोऽव॒यज॑नम॒स्य॒—प्सु धौ॑तस्य सोम देव ते॒ नृभिः॑ सु॒तस्ये॒ष्टय॑जुषः स्तु॒तस्तो॑मस्य श॒स्तोक्थ॑स्य॒ यो भ॒क्षो अ॑श्व॒सनि॒र्यो गो॒सनि॒स्तस्य॑ ते पि॒तृभि॑र्भ॒क्षंकृ॑त॒स्योप॑हूत॒स्योप॑हूतो भक्षयामि ॥ (विश्वचर्षणे, नराश२ँसपीतस्या,-ऽति, स्तुतस्तोमस्य, पितरो, बभूव, षट्चत्वारि२ँशच्च) ॥ ५ ॥

पृषदाज्यम्, तद्विधिमन्त्रश्च ॥ २ बृहती । विश्वेदेवा ऋषयः ।

म॒हीनां॒ पयो॑ऽसि॒ विश्वे॑षां दे॒वानां॑ त॒नूरृ॒ध्यास॑म॒द्य पृष॑तीनां॒ ग्रहं॒ पृष॑तीनां॒ ग्रहो॑ऽसि॒ विष्णो॒र्हृद॑यम॒स्येक॑मिष॒ विष्णु॒स्त्वानु॒ वि च॑क्रमे भू॒तिर्द॒ध्ना घृ॒तेन॑ वर्धतां॒ तस्य॑ मे॒ष्टस्य॑ वी॒तस्य॒ द्रवि॑ण॒मा ग॑म्या॒ज्ज्योति॑रसि वैश्वान॒रं पृश्ञि॑यै दु॒ग्धं
याव॑ती॒ द्यावा॑पृथि॒वी म॑हि॒त्वा याव॑च्च स॒प्त सिन्ध॑वो वित॒स्थुः ।
ताव॑न्तमिन्द्र ते (१) ग्रह॒२ँ स॒होर्जा॑ गृह्णा॒म्यस्तृ॑तम् ॥
यत् कृ॑ष्णशकु॒नः पृ॑षदा॒ज्यम॑वमृ॒शेच्छू॒द्रा अ॑स्य प्र॒मायु॑काः स्यु॒र्यच्छ्वाऽवमृ॒शेच्चतु॑ष्पादोऽस्य प॒शवः॑ प्र॒मायु॑काः स्यु॒र्यत् स्कन्दे॒द्यज॑मानः प्र॒मायु॑कः स्यात् प॒शवो॒ वै पृ॑षदा॒ज्यं प॒शवो॒ वा ए॒तस्य॑ स्कन्दन्ति॒ यस्य॑ पृष-

आज्यꣳ स्कन्दति यत् पृषदाज्यं पुनर्गृह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो वै पृषदाज्यं प्राणो वा (२)
एतस्य स्कन्दति यस्य पृषदाज्यꣳ स्कन्दति यत् पृषदाज्यं पुनर्गृह्णाति प्राणमेवास्मै पुनर्गृह्णाति हिरण्यम-
वधाय गृह्णात्यमृतं वै हिरण्यं प्राणः पृषदाज्यममृतमेवास्य प्राणे दधाति शतमानं भवति शतायुः पुरुषः
शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्य॒श्वमव घ्रापयति प्राजापत्यो वा अश्वः प्राजापत्यः प्राणः स्वादेवा-
स्मै योनेः प्राणं (३) निर्मिमीते वि वा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यꣳ स्कन्दति वैष्णव्यर्चा
पुनर्गृह्णाति यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं तनोति ॥ (ते, वै, प्राण, द्वाविꣳशतिश्च) ॥ ६ ॥

स्तुतशस्त्रयोरभिधानम् ॥ विश्वेदेवा ऋषयः ।

देव सवितरेतत् ते प्राऽऽह तत् प्र च सुव प्र च यज बृहस्पतिर्ब्रह्माऽऽयुष्मत्या ऋचो मा गात
तनूपात् साम्नः सत्या व आशिषः सन्तु सत्या आकूतय ऋतं च सत्यं च वदत स्तुत देवस्य
सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्र-
(१)-मस्यूर्जं मह्यꣳ शस्त्रं दुहामा मा शस्त्रस्य शस्त्रं गम्यादि—

—न्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम् ॥
सा मे सत्याऽऽशीर्देवेषु भूयाद्ब्रह्मवर्चसं माऽऽगम्यात् ॥
यज्ञो बभूव स आ बभूव स प्र जज्ञे स वावृधे ।
स देवानामधिपतिर्बभूव सो अस्माꣳ अधिपतीन् करोतु वयꣳ स्याम पतयो रयीणाम् ॥

यज्ञो वा वै (२) यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुहे स यः स्तुतशस्त्रयोर्दोहमविद्वान् यजते तं यज्ञो
दुहे स इष्ट्वा पापीयान् भवति य एनयोर्दोहं विद्वान् यजते स यज्ञं दुहे स इष्ट्वा वसीयान् भवति स्तुत-
स्य स्तुतमस्यूर्जं मह्यꣳ स्तुतं दुहामा मा स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्रमस्यूर्जं मह्यꣳ शस्त्रं दुहा-
(३)-मा मा शस्त्रस्य शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्रयोर्दोहस्तं य एवं विद्वान् यजते दुह एव यज्ञमिष्ट्वा
वसीयान् भवति ॥ (शस्त्रं, वै, दुहे, द्वात्रिꣳशतिश्च) ॥ ७ ॥

प्रस्थितयाज्याद्यहोमादिमन्त्राः ॥ १६-२०, २४-२५ त्रिष्टुप्, २२-२३ जगती, २१ अनुष्टुप् । विश्वेदेवा ऋषयः ।

श्येनाय पत्वने स्वाहा वट् स्वयमभिगूर्ताय नमो विष्टम्भाय धर्मणे स्वाहा वट् स्वयमभि-
गूर्ताय नमः परिधये जनप्रथनाय स्वाहा वट् स्वयमभिगूर्ताय नम ऊर्जे होत्राणाꣳ स्वाहा
वट् स्वयमभिगूर्ताय नमः पयसे होत्राणाꣳ स्वाहा वट् स्वयमभिगूर्ताय नमः प्रजापतये
मनवे स्वाहा वट् स्वयमभिगूर्ताय नम ऋतमृतपाः सुवर्वाट् स्वाहा वट् स्वयमभिगूर्ताय नम—

—स्तृम्पन्ताꣳ होत्रा मधोर्घृतस्य
यज्ञपतिमृषय एनसा (१) ऽऽहुः ।
प्रजा निर्भक्ता अनुतप्यमाना मधव्यौ स्तोकावप तौ रराध ॥
सं नस्ताभ्याꣳ सृजतु विश्वकर्मा

१६ (तै. सं.)

घोरा ऋषयो नमो अस्त्वेभ्यः ।
चक्षुष एषां मनसश्च सन्धौ बृहस्पतये महि षद् द्युमन्नमः ॥
नमो विश्वकर्मणे स उ पात्वस्मा—
नेनन्यान्त्सोमपान् मन्यमानः ।
प्राणस्य विद्वान्त्समरे न धीर एनश्चकृवान् महि बद्ध एषाम् ॥
तं विश्वकर्मन् (२) प्र मुञ्चा स्वस्तये
ये भक्षयन्तो न वसून्यानृहुः ।
यानग्नयोऽन्वतप्यन्त धिष्णिया इयं तेषामवया दुरिष्ट्यै स्विष्टिं नस्तां कृणोतु विश्वकर्मा ॥
नमः पितृभ्यो अभि ये नो अख्यन् यज्ञकृतो यज्ञकामाः सुदेवा
अकामा वो दक्षिणां न नीनिम मा नस्तस्मादेनसः पापयिष्ट ।

यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यास्तेभ्यो यो दक्षिणां न (३) नयेदैभ्यो वृश्च्येत यद्वैश्वकर्मणानि
जुहोति सदस्यानेव तत् प्रीणात्य—

—स्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्नुतः ।
पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥
आशीर्दाया दम्पती वाममश्नुतामरिष्टो रायः सचताꣳ समोकसा ।
य आऽसिचत् संदुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः ॥
सर्पिर्ग्रीवी (४) पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य ।
सहजानिर्यः सुमखस्यमान इन्द्रायाऽऽशिरꣳ सह कुम्भ्याऽदात् ॥
आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणꣳ सवर्चसम् ।
सञ्जयन् क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो अन्याꣳ अधरान्त्सपत्नान् ॥
भूतमसि भूते मा धा मुखमसि मुखं भूयासं द्यावापृथिवीभ्यां त्वा परि गृह्णामि विश्वे त्वा
देवा वैश्वानराः (५) प्र च्यावयन्तु दिवि देवान् दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवान्
ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ।
यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत् ।
यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन् ॥
(एनसा, विश्वकर्मन्, न, सर्पिर्ग्रीवी, वैश्वानराः,-श्चत्वारिꣳशच्च) ॥ ८ ॥

प्रतिगरः, तन्मन्त्राश्च ॥ विश्वेदेवा ऋषयः ।

यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयत्युक्थशा इत्याह प्रातःसवनं प्रतिगीर्य त्रीण्येतान्य-

२०२८

क्षराणि त्रिपदा गायत्री गायत्रं प्रातःसवनं गायत्रियैव प्रातःसवने वज्रमन्तर्धत्त उक्थं वाचीत्याह माध्यं-
दिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा त्रिष्टुप् त्रैष्टुभं माध्यंदिनꣳ सवनं त्रिष्टुभैव माध्यंदिने
सवने वज्रमन्तर्धत्त (१) उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी
शाक्वरो वज्रो वज्रेणैव तृतीयसवने वज्रमन्तर्धत्ते ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यो यथा-
सवनं प्रतिगरे छन्दाꣳसि सम्पादयेत् तेजः प्रातःसवन आत्मन् दधीतेन्द्रियं माध्यंदिने सवने पशूꣳस्तृ-
तीयसवन इत्यु—क्थशा इत्याह प्रातःसवनं प्रतिगीर्य त्रीण्येतान्यक्षराणि (२) त्रिपदा गायत्री गायत्रं प्रातः-
सवनं प्रातःसवन एव प्रतिगरे छन्दाꣳसि सं पादयत्यथो तेजो वै गायत्री तेजः प्रातःसवनं तेज एव
प्रातःसवन आत्मन् धत्त उक्थं वाचीत्याह माध्यंदिनꣳ सवनं प्रतिगीर्य चत्वार्येतान्यक्षराणि चतुष्पदा
त्रिष्टुप् त्रैष्टुभं माध्यंदिनꣳ सवनं माध्यंदिन एव सवने प्रतिगरे छन्दाꣳसि सं पादयत्यथो इन्द्रियं वै त्रिष्टुगि-
न्द्रियं माध्यंदिनꣳ सवन-(३)-मिन्द्रियमेव माध्यंदिने सवन आत्मन् धत्त उक्थं वाचीन्द्रायेत्याह तृतीय-
सवनं प्रतिगीर्य सप्तैतान्यक्षराणि सप्तपदा शक्वरी शाक्वराः पशवो जागतं तृतीयसवनं तृतीयसवन एव
प्रतिगरे छन्दाꣳसि सं पादयत्यथो पशवो वै जगती पशवस्तृतीयसवनं पशूनेव तृतीयसवन आत्मन् धत्ते
यद्वै होताऽध्वर्युमभ्याह्वयत आव्यमस्मिन् दधाति तद्यन्ना-(४)-पहनीत पुराऽस्य संवत्सराद्गृह आ वेवी-
रन्छोꣳसा मोद इवेति प्रत्याह्वयते तेनैव तदप हते यथा वा आयतां प्रतीक्षत एवमध्वर्युः प्रतिगरं
प्रतीक्षते यदभिप्रतिगृणीयाद्यथाऽऽयतया समृच्छते तादृगेव तं—दर्धर्चाल्लुप्येत यथा धावद्भ्यो हीयते
तादृगेव तत् प्रबाहुग्वा ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृणा-(५)-मृचः प्रणव उक्थशꣳसिनां प्रतिगरो-
ऽध्वर्यूणां य एवं विद्वान् प्रतिगृणात्यन्नाद एव भवत्याऽस्य प्रजायां वाजी जायत इयं वै होता-
साध्वर्युर्यदासीनः शꣳसत्यस्या एव तद्धोता नैत्यास्त इव हीयमथो इमामेव तेन यजमानो दुहे यद-
तिष्ठन् प्रतिगृणात्यमुष्या एव तदध्वर्युर्नैति (६) तिष्ठतीव ह्यसावथो अमूमेव तेन यजमानो दुहे यदा-
सीनः शꣳसति तस्मादितः प्रदानं देवा उप जीवन्ति यत् तिष्ठन् प्रतिगृणाति तस्मादमुतः प्रदानं मनुष्या
उप जीवन्ति यत् प्राङासीनः शꣳसति प्रत्यङ् तिष्ठन् प्रतिगृणाति तस्मात् प्राचीनꣳ रेतो धीयते
प्रतीचीः प्रजा जायन्ते यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमेनमभि प्र वर्तयति (७) पराङा वर्तते वज्रमेव
तन्नि करोति ॥ (धत्ते, क्षराणि, सवनं, नो,-द्गातृणा,-मेति, वर्तयति, द्वे च) ॥ ९ ॥

प्रतिनिर्ग्राह्यमन्त्राः ॥ विश्वेदेवा ऋषयः ।

उपयामगृहीतोऽसि वाक्षसदसि वाक्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णा-
म्यु—पयामगृहीतोऽस्यृतसदसि चक्षुष्पाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामि
म्यु—पयामगृहीतोऽसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णा-
देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तꣳ रक्षस्व (१)
तं ते दुश्चक्षा माऽव ख्य—न्मयि वसुः पुरोवसुर्वाक्पा वाचं मे पाहि मयि वसुर्विदद्वसुश्चक्षुष्पा-

श्चक्षुर्मे पाहि मयि वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पाहि भूरसि श्रेष्ठो रश्मीनां प्राणपाः
प्राणं मे पाहि धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो न इन्द्रवायू मित्रावरुणा-
—वश्विनावभिदासति भ्रातृव्य (२) उत्पिपीते शुभस्पती इदमहं तमधरं पादयामि यथेन्द्राहमुत्त-
मश्चेतयानि ॥ (रक्षस्व, भ्रातृव्य,-स्त्रयोदश च) ॥ १० ॥

त्रैधातवीयेष्टिमन्त्राः ॥ १ ककुप्; २ उष्णिक्; ३-६, ९-१० त्रिष्टुप्; ७-८ गायत्री । विश्वेदेवा ऋषयः ।

प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः । यस्य त्वꣳ सख्यमाविथ ॥
प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् । विपां ज्योतीꣳषि बिभ्रते न वेधसे ॥
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तनुवो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥
सं वां कर्मणा समिषा (१) हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥
उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥
त्रीण्यायूꣳषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा (२) भव यजमानाय शं योः ॥
अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः । स त्रीꣳरेकादशाꣳ इह ॥
यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतः । नभन्तामन्यके समे ॥
इन्द्राविष्णू दृꣳहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।
शतं वर्चिनः सहस्रं च साकꣳ हथो अप्रत्यसुरस्य वीरान् ॥
उत माता महिषमन्ववेनदमी त्वा (३) जहति पुत्र देवाः ।
अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्त्सखे विष्णो वितरं वि क्रमस्व ॥
(इषा, ऽथ, त्वा, त्रयोदश च) ॥ ११ ॥

[य-१४१ । -श्रीणि १५३ । परिभूः १९५ । स्पवो २६३ । भक्षे १४४ । महीनां १७२ । देवं १७२ । श्येनाय १५० ।
य-१५८ । -दुपयामगृहीतः ११३। प्र-१५३ । कादश ॥ २३२१]

[इति तृतीयकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥]

वैकृतविधीनामभिधानम् ।

[अथ तृतीयः प्रपाठकः ॥ ३ ॥]

अतिग्राह्यग्रहमन्त्राः ॥ ७-९ द्विपदा गायत्री । विश्वेदेवा ऋषयः ।

अग्ने तेजस्विन् तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै
च त्वा तपसश्च तेजसे जुहोमि तेजोविदसि तेजो मा मा हासीन्माऽहं तेजो हासिषं मा मां तेजो

हासीदिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भूया ओजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा क्षत्रस्य चौ-(१)-जसे जुहोम्योजोविदस्योजो मा मा हासीन्माऽहमोजो हासिषं मा मामोजो हासीत् सूर्य भ्राजस्विन् भ्राजस्वी त्वं देवेषु भूया भ्राजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु वायोश्च त्वाऽपां च भ्राजसे जुहोमि सुवर्विदसि सुवर्मा मा हासीन्माहꣳ सुवर्हासिषं मा माꣳ सुवर्हासीन्मयि (१) मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ (च, मयि, त्रयोविंशतिश्च) ॥ १ ॥

स्तोत्रोपाकरणं, प्रतिगरादिमन्त्रश्च ॥ विश्वेदेवा ऋषयः ।

वायुर्हिङ्कर्ताऽग्निः प्रस्तोता प्रजापतिः साम बृहस्पतिरुद्गाता विश्वे देवा उपगातारो मरुतः प्रतिहर्तार इन्द्रो निधनं ते देवाः प्राणभृतः प्राणं मयि दधत्वेतद्वै सर्वमध्वर्युरुपाकुर्वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याहैतदेव सर्वमात्मन् धत्त इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शꣳसिषद्विश्वे देवाः (१) सूक्तवाचः पृथिवि मातर्मा मा हिꣳसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनु मदन्तु ॥ (विश्वे देवा, अष्टाविंशतिश्च) ॥ २ ॥

अदाभ्यांशुग्रहमन्त्राः ॥ २१-२५ अनुष्टुप्, [illegible] स्वराट् । विश्वेदेवा ऋषयः ।

वसवस्त्वा प्र वृहन्तु गायत्रेण छन्दसाऽग्नेः प्रियं पाथ उपेहि रुद्रास्त्वा प्र वृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथ उपेह्यादित्यास्त्वा प्र वृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहि मान्दासु ते शुक्र शुक्रमा धूनोमि भन्दनासु*- कोतनासु*- नूतनासु*- रेशीषु*- मेषीषु*- वाशीषु*- विश्वभृत्सु*- माध्वीषु*- ककुहासु*- शक्वरीषु*-(१) शुक्रासु ते शुक्र शुक्रमा धूनोमि

शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः ॥
आ ऽस्मिन्नुग्रा अचुच्यवुर्दिवो धारा असश्चत ॥
ककुहꣳ रूपं वृषभस्य रोचते बृहत् सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः ॥
यत् ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहो-

-शिक् त्वं देव सोम गायत्रेण छन्दसाऽग्नेः (२) प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीह्या-

नः प्राण एतु परावत आऽन्तरिक्षाद्दिवस्परि । आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा ॥
इन्द्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः (३) । वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना ॥

(१३-१४) ते शुक्र... धूनोमि

दधन्वे वा यदीमनु वोचद्ब्रह्माणि वेरु तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥
(शक्वरीषु, -अग्ने, -बृहस्पतिः, पञ्चविꣳशतिश्च) ॥ ३ ॥

अदाभ्यांशुग्रहमन्त्रब्राह्मणम् ॥ विश्वेदेवा ऋषयः ।

एतद्वा अपां नामधेयं गुह्यं यदाधावा मान्दासु ते शुक्र शुक्रमा धूनोमीत्याहापामेव नामधेयेन गुह्येन दिवो वृष्टिमव रुन्धे शुक्रं ते शुक्रेण गृह्णामीत्याहैतद्वा अह्नो रूपं यद्रात्रिः सूर्यस्य रश्मयो वृष्ट्या ईशतेऽह्न एव रूपेण सूर्यस्य रश्मिभिर्दिवो वृष्टिं च्यावयत्याऽस्मिन्नुग्रा (१) अचुच्यवुरित्याह यथायजुरेवैतत् ककुहꣳ रूपं वृषभस्य रोचते बृहदित्याहैतद्वा अस्य ककुहꣳ रूपं यद्वृष्टी रूपेणैव वृष्टिमव रुन्धे यत् ते सोमादाभ्यं नाम जागृवीत्याहैष ह वै हविषा हविर्यजति योऽदाभ्यं गृहीत्वा सोमाय जुहोति परा वा एतस्याऽऽयुः प्राण एति (२) योऽꣳशुं गृह्णात्या नः प्राण एतु परावत इत्याहाऽऽयुरेव प्राणमात्मन् धत्तेऽमृतमसि प्राणाय त्वेति हिरण्यमभि व्यनित्यमृतं वै हिरण्यमायुः प्राणोऽमृतेनैवाऽऽयुरात्मन् धत्ते शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यप उप स्पृशति भेषजं वा आपो (३) भेषजमेव कुरुते ॥ (इमा, एत्या, -प, -स्त्रीणि च) ॥ ४ ॥

द्वादशाहशेषाः पृश्निग्रहाख्या उन्मानविशेषाः ॥ विश्वेदेवा ऋषयः ।

वायुरसि प्राणो नाम सवितुराधिपत्येऽपानं मे दाश्चक्षुरसि श्रोत्रं नाम धातुराधिपत्य आयुर्मे दा रूपमसि वर्णो नाम बृहस्पतेराधिपत्ये प्रजां मे दा ऋतमसि सत्यं नामेन्द्रस्याऽऽधिपत्ये क्षत्रं मे दा भूतमसि भव्यं नाम पितृणामाधिपत्येऽपामोषधीनां गर्भं धा ऋतस्य त्वा व्योमन ऋतस्य (१) त्वा विभूमन ऋतस्य त्वा विधर्मण ऋतस्य त्वा सत्यायर्तस्य त्वा ज्योतिषे प्रजापतिर्विराजमपश्यत् तया भूतं च भव्यं चासृजत तामृषिभ्यस्तिरोऽदधात् तां जमदग्निस्तपसाऽपश्यत् तया वै स पृश्नीन् कामानसृजत तत् पृश्नीनां पृश्नित्वं यत् पृश्नयो गृह्यन्ते पृश्नीनेव तैः कामान् यजमानोऽव रुन्धे वायुरसि प्राणो (२) नामेत्याह प्राणापानावेवाव रुन्धे चक्षुरसि श्रोत्रं नामेत्याहाऽऽयुरेवाव रुन्धे रूपमसि वर्णो नामेत्याह प्रजामेवाव रुन्ध ऋतमसि सत्यं नामेत्याह क्षत्रमेवाव रुन्धे भूतमसि भव्यं नामेत्याह पशवो वा अपामोषधीनां गर्भः पशूनेवा-(३)-व रुन्ध एतावद्वै पुरुषं परितस्तदेवाव रुन्ध ऋतस्य त्वा व्योमन इत्याहेयं वा ऋतस्य व्योमेमामेवाभि जयत्यृतस्य त्वा विभूमन इत्याहान्तरिक्षं वा ऋतस्य विभूमान्तरिक्षमेवाभि जयत्यृतस्य त्वा विधर्मण इत्याह द्यौर्वा ऋतस्य विधर्म दिवमेवाभि जयत्यृतस्य (४) त्वा सत्यायेत्याह दिशो वा ऋतस्य सत्यं दिश एवाभि जयत्यृतस्य त्वा ज्योतिष इत्याह सुवर्गो वै लोक ऋतस्य ज्योतिः सुवर्गमेव लोकमभि जयत्येतावन्तो वै देवलोकास्तानेवाभि जयति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठति ॥ (ऋतस्य, प्राण, पशु, -र्तस्य, षट्चत्वारिꣳशच्च) ॥ ५ ॥

गवामयनिका परः संज्ञका अतिग्राह्याः ॥ विश्वेदेवा ऋषयः ।

देवा वै यज्ञेन नावारुन्धत तत् परैरवारुन्धत तत् पराणां परत्वं यत् परे गृह्यन्ते यदेव यज्ञेन

नावरुन्धे तस्यावरुद्ध्यै यं प्रथमं गृह्णातीममेव तेन लोकमभि जयति यं द्वितीयमन्तरिक्षं तेन यं तृतीयममुमेव तेन लोकमभि जयति यदेते गृह्यन्त एषां लोकानामभिजित्या (१) उत्तरेष्वहःस्वमुतोऽर्वाञ्चो गृह्यन्तेऽभिजित्यैवेमाल्लोकान् पुनरिमं लोकं प्रत्यवरोहन्ति यत् पूर्वेष्वहःस्वितः पराञ्चो गृह्यन्ते तस्मादितः पराञ्च इमे लोका यदुत्तरेष्वहःस्वमुतोऽर्वाञ्चो गृह्यन्ते तस्मादमुतोऽर्वाञ्च इमे लोकास्तस्मादयातयाम्नो लोकान् मनुष्या उप जीवन्ति ब्रह्मवादिनो वदन्ति कस्मात् सत्यादद्भ्य ओषधयः सं भवन्त्योषधयो (२) मनुष्याणामन्नं प्रजापतिं प्रजा अनु प्र जायन्त इति परानन्विति ब्रूयाद्यद्गृह्णात्यद्भ्यस्त्वौषधीभ्यो गृह्णामीति तस्मादद्भ्य ओषधयः सं भवन्ति यद् गृह्णात्योषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति तस्मादोषधयो मनुष्याणामन्नं यद्गृह्णाति प्रजाभ्यस्त्वा प्रजापतये गृह्णामीति तस्मात् प्रजापतिं प्रजा अनु प्र जायन्ते ॥ (अभिजित्या, ओषधयो, ऽष्टाचत्वारिꣳशच्च) ॥ ६ ॥

[illegible]मन्त्रविधानम् ॥ विश्वेदेवा ऋषयः ।

प्रजापतिर्देवासुरानसृजत तदनु यज्ञोऽसृज्यत यज्ञं छन्दाꣳसि ते विष्वञ्चो व्यक्रामन्त्सोऽसुराननु यज्ञोऽपाक्रामद्यज्ञं छन्दाꣳसि ते देवा अमन्यन्तामी वा इदमभूवन् यद्वयꣳ स्म इति ते प्रजापतिमुपाधावन्त्सोऽब्रवीत् प्रजापतिश्छन्दसां वीर्यमादाय तद्वः प्र दास्यामीति स छन्दसां वीर्य-(१)-मादाय तदेभ्यः प्रायच्छत् तदनु छन्दाꣳस्यपाक्रामन् छन्दाꣳसि यज्ञस्ततो देवा अभवन् पराऽसुरा य एवं छन्दसां वीर्यं वेदाऽऽश्रावयास्तु श्रौषड् यज ये यजामहे वषट्कारो भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै कमध्वर्युरा श्रावयतीति छन्दसां वीर्यायेति ब्रूयादेतद्वै (२) छन्दसां वीर्यमाश्रावयास्तु श्रौषड् यज ये यजामहे वषट्कारो य एवं वेद सवीर्यैरेव छन्दोभिरर्चति यत् किं चार्चति यदिन्द्रो वृत्रमहन्नमेध्यं तद्यद्यतीनपावपदमेध्यं तदथ कस्मादिन्द्रो यज्ञ आ सꣳस्थातोरित्याहुरिन्द्रस्य वा एषा यज्ञिया तनूर्यद्यज्ञस्तामेव त-(३)-द्यजन्ति य एवं वेदोपैनं यज्ञो नमति ॥ (वीर्यं, वै, त, -दष्टौ च) ॥ ७ ॥

[illegible]मन्त्राः ॥ १,६ त्रिष्टुप्, ५-६ अनुष्टुप् ॥ विश्वेदेवा ऋषयः ।

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम् ॥

आ वृश्च्यते वा एतद्यजमानोऽग्निभ्यां यदेनयोः शृतङ्कृत्याथान्यत्रावभृथमवैत्यायुर्दा अग्ने हविषो जुषाण इत्यवभृथमवैष्यञ्जुहुयादाहुत्यैवैनौ शमयति नाऽऽर्तिमार्च्छति यजमानो

यत् कुसीद-(१)-मप्रतीत्तं मयि येन यमस्य बलिना चरामि ।
इहैव सन् निरवदये तदेतत् तदग्ने अनृणो भवामि ।
विश्वलोप विश्वदावस्य त्वाऽऽसञ्जुहोम्यग्धादेकोऽहुतादेकः समसनादेकः ।
ते नः कृण्वन्तु भेषजꣳ सदः सहो वरेण्यम् ॥
अयं नो नभसा पुरः सꣳस्फानो अभि रक्षतु । गृहाणामसमर्त्यै बहवो नो गृहा असन् ॥

स त्वं नो (२) नभसस्पत ऊर्जं नो धेहि भद्रया ।
पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥

देव सꣳस्फान सहस्रपोषस्येशिषे स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिम् ॥

अग्निर्वाव यम इयं यमी कुसीदं वा एतद्यमस्य यजमान आ दत्ते यदोषधीभिर्वेदिꣳ स्तृणाति यदनुपौष्य प्रयायाद्ग्रीवबद्धमेन-(३)-ममुष्मिँल्लोके नेनीयेरन् यत् कुसीदमप्रतीत्तं मयीत्युपौषतीहैव सन् यमं कुसीदं निरवदायानृणः सुवर्गं लोकमेति यदि मिश्रमिव चरेदञ्जलिना सक्तून् प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत् प्रदाव्यः स एवैनꣳ स्वदयत्यहां विधान्यामेकाष्टकायामपूपं चतुःशरावं पक्त्वा प्रातरेतेन कक्षमुपौषेद्यदि (४) दहति पुण्यसमं भवति यदि न दहति पापसममेतेन ह स्म वा ऋषयः पुरा विज्ञानेन दीर्घसत्रमुप यन्ति यो वा उपद्रष्टारमुपश्रोतारमनुख्यातारं विद्वान् यजते सममुष्मिँल्लोक इष्टापूर्तेन गच्छतेऽग्निर्वा उपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता तान् य एवं विद्वान् यजते सममुष्मिँल्लोक इष्टापूर्तेन गच्छतेऽयं नो नभसा पुर (५) इत्याहाग्निर्वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वं नो नभसस्पत इत्याह वायुर्वै नभसस्पतिर्वायुमेव तदाहैतन्मे गोपायेति देव सꣳस्फानेत्याहासौ वा आदित्यो देवः सꣳस्फान आदित्यमेव तदाहैतन्मे गोपायेति (६) ॥ (कुसीदं, न, एनं, वादं, पुर, इति) ॥ ८ ॥

[illegible] ॥ १-५ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

एतं युवानं परि वो ददामि तेन क्रीडन्तीश्चरत प्रियेण ।
मा नः शाप्त जनुषा सुभागा रायस्पोषेण समिषा मदेम ॥
नमो महिम्न उत चक्षुषे ते मरुतां पितस्तदहं गृणामि ।
अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यम् ॥
देवानामेष उपनाह आसीदपां गर्भ ओषधीषु न्यक्तः ।
सोमस्य द्रप्समवृणीत पूषा (१) बृहन्नद्रिरभवत् तदेषाम् ॥
पिता वत्सानां पतिरघ्नियानामथो पिता महतां गर्गराणाम् ।
वत्सो जरायु प्रतिधुक् पीयूष आमिक्षा मस्तु घृतमस्य रेतः ॥
त्वां गावोऽवृणत राज्याय त्वाꣳ हवन्त मरुतः स्वर्काः ।
वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो वि भजा वसूनि ॥

व्यृद्धेन वा एष पशुना यजते यस्यैतानि न क्रियन्त एष (२) ह त्वै समृद्धेन यजते यस्यैतानि क्रियन्ते ॥ (पूषा, -ष्टौ च) ॥ ९ ॥

पाशुकगर्भप्रायश्चित्तम् ॥ १ बृहती; २, ४ अनुष्टुप्; ३ न्यङ्कुसारिणी; ५ एकपदा गायत्री; ६ द्विपदा विराट्; ८ गायत्री ॥
विश्वेदेवा ऋषयः ।

सूर्यो देवो दिविषद्भ्यो धाता क्षत्राय वायुः प्रजाभ्यः ।
बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मतीं जुहोतु ॥
यस्यास्ते हरितो गर्भोऽथो योनिर्हिरण्ययी । अङ्गान्यह्रुता यस्यै तां देवैः समजीगमम् ॥
आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र नर्दबुद । भूम्याश्चतस्रः प्रदिशस्ताभिरा वर्तया पुनः ॥
वि ते भिनद्मि तकरीं वि योनिं वि गवीन्यौ । वि (१) मातरं च पुत्रं च वि गर्भं च जरायु च ॥
बहिस्ते अस्तु बालिति ॥
उरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम् ॥
एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी सप्तपद्यष्टापदी भुवनाऽनु प्रथता स्वाहा
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥
(वि, चतुश्चत्वारिंशच्च) ॥ १० ॥

याज्यापुरोऽनुवाक्याः ॥ त्रिष्टुप्; १-३ गायत्री, ७, ९, ११-१२ अनुष्टुप् । विश्वेदेवा ऋषयः ।

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती । उक्थं मदश्च शस्यते ॥
अयं वां परि षिच्यते सोम इन्द्राबृहस्पती । चारुर्मदाय पीतये ॥
अस्मे इन्द्राबृहस्पती रयिं धत्तꣳ शतग्विनम् । अश्वावन्तꣳ सहस्रिणम् ॥
बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥
वि ते विष्वग्वातजूतासो अग्ने भामासः (१) शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥
त्वामग्ने मानुषीरीडते विशो होत्राविदं विविचिꣳ रत्नधातमम् ।
गुहा सन्तꣳ सुभग विश्वदर्शतं तुविष्मणसꣳ सुयजं घृतश्रियम् ॥
धाता ददातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥
धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं जजान ।
धाता पुत्रं यजमानाय दाता (२) तस्मा उ हव्यं घृतवद्विधेम ॥
धाता ददातु नो रयिं प्राचीं जीवातुमक्षिताम् । वयं देवस्य धीमहि सुमतिꣳ सत्यराधसः ॥
धाता ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे ।
तस्मै देवा अमृताः सं व्ययन्तां विश्वे देवासो अदितिः सजोषाः ॥
१७ (तै. सं.)

अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ॥
अन्विदनुमते त्वं (३) मन्यासै शं च नः कृधि ।
क्रत्वे दक्षाय नो हिनु प्र ण आयूꣳषि तारिषः ॥
अनु मन्यतामनुमन्यमाना प्रजावन्तꣳ रयिमक्षीयमाणम् ।
तस्यै वयꣳ हेडसि माऽपि भूम सा नो देवी सुहवा शर्म यच्छतु ॥
यस्यामिदं प्रदिशि यद्विरोचतेऽनुमतिं प्रति भूषन्त्यायवः ।
यस्या उपस्थ उर्वन्तरिक्षꣳ सा नो देवी सुहवा शर्म यच्छतु (४) ॥
राकामहꣳ सुहवाꣳ सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याऽच्छिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यम् ॥
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳ सुभगे रराणा ॥
सिनीवालि *- या सुपाणिः *- ॥
कुहूमहꣳ सुभगां विद्मनापसमस्मिन् यज्ञे सुहवां जोहवीमि ।
सा नो ददातु श्रवणं (५) पितॄणां तस्यास्ते देवि हविषा विधेम ॥
कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्चिकेतु ।
सं दाशुषे किरतु भूरि वामꣳ रायस्पोषं चिकितुषे दधातु ॥
(भामासो, दाता, त्वं, यच्छतु, श्रवणं, चतुर्विꣳशतिश्च) ॥ ११ ॥
[अग्ने १२३ । वायुं ७८ । वसंव १०५ । एत-१०२ ।-द्यावु-२४६ ।-देवा १४८ । प्रजापति-१५८ ।-रायुर्वा ३०० एतꣳ १०८ । सूर्यो ९४ । इद-२०४ । -त्रेकादश ॥ १८५०]
[॥ इति तृतीयकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥]

इष्टिहोमाभिधानम् ।

[अथ चतुर्थः प्रपाठकः ॥ ४ ॥] विश्वेदेवा ऋषयः ।
यज्ञागमदर्शनानिमित्तकहोमविधिः ॥

वि वा एतस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते सूर्यो देवो दिविषद्भ्य इत्याह बृहस्पतिना चैवास्य
प्रजापतिना च यज्ञस्य व्यृद्धमपि वपति रक्षाꣳसि वा एतत् पशुꣳ सचन्ते यदेकदेवत्य आलब्धो भूयान्
भवति यस्यास्ते हरितो गर्भ इत्याह देवत्रैवैनां गमयति रक्षसामपहत्या आ वर्तन वर्तयेत्याह (१
ब्रह्मणैवैनमा वर्तयति वि ते भिनद्मि तकरीमित्याह यथायजुरेवैतत् उरुद्रप्सो विश्वरूप इन्दुरित्याह
प्रजा वै पशव इन्दुः प्रजयैवैनं पशुभिः समर्धयति दिवं वै यज्ञस्य व्यृद्धं गच्छति पृथिवीमतिरिक्तं तद्य
(११।१०-१८) ३।१।११।१५-१९

च्छमयेदार्तिमार्च्छेद्यजमानो मही द्यौः पृथिवी च न इत्या-(२)-ह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चातिरिक्तं
शमयेदार्तिमार्च्छेद्यजमानो मही द्यौः पृथिवी च न इत्याह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चातिरिक्तं च शमयति नाऽऽर्तिमार्च्छति यजमानो भस्मनाऽभि समूहति स्वगाकृत्या अथो अनयोर्वा एष गर्भो-ऽनयोरेवैनं दधाति यदवद्येदति तद्रेचयेद्यन्नावद्येत् पशोरालब्धस्य नाव द्येत् पुरस्तान्नाभ्या अन्यदवद्ये-दुपरिष्टादन्यत् पुरस्ताद्वै नाभ्यै (३ प्राण उपरिष्टादपानो यावानेव पशुस्तस्याव द्यति विष्णवे शिपि-विष्टाय जुहोति यद्वै यज्ञस्यातिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्यै अष्टाप्रूड्ढिरण्यं दक्षिणाऽष्टापदी ह्येषाऽऽत्मा नवमः पशोराप्त्यै अन्तर-कोश उष्णीषेणाऽऽविष्टितं भवत्येवमिव हि पशुरुल्बमिव (४) चर्मेव माꣳसमिवास्थीव यावानेव पशु-स्तमाप्त्वाऽव रुन्धे यस्यैषा यज्ञे प्रायश्चित्तिः क्रियत इष्ट्वा वसीयान् भवति ॥ आहे,-ति, नाभ्या, इवे,-कविꣳशतिश्च) ॥ १ ॥

यज्ञालम्भनमन्त्राः ॥ १, ७, ९-१० त्रिष्टुप्, ८ अनुष्टुप् । विश्वेदेवा ऋषयः ।

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥
आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याꣳ स्वाहा
किक्किटा ते वाचꣳ सरस्वत्यै स्वाहा (१)
त्वं तुरीया वशिनी वशाऽसि सकृद्यत् त्वा मनसा गर्भ आऽशयत् ।
वशा त्वं वशिनी गच्छ देवान्त्सत्याः सन्तु यजमानस्य कामाः ॥
अजाऽसि रयिष्ठा पृथिव्याꣳ सीदोर्ध्वाऽन्तरिक्षमुप तिष्ठस्व दिवि ते बृहद्भाः ॥
तन्तुं तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ॥
अनुल्बणं वयत जोगुवामपो मनु-(२)-र्भव जनया दैव्यं जनम् ॥
मनसो हविरसि प्रजापतेर्वर्णो गात्राणां ते गात्रभाजो भूयास्म ॥
(स्वाहा, मनु,-स्त्रयोदश च) ॥ २ ॥

काम्यपश्ववदानविधानम् ॥ विश्वेदेवा ऋषयः ।
इमे वै सहाऽऽस्तां ते वायुर्व्यवात् ते गर्भमदधातां तꣳ सोमः प्राजनयदग्निरग्रसत स एतं प्रजापति-राग्नेयमष्टाकपालमपश्यत् तं निरवपत् तेनैवैनामग्नेरधि निरक्रीणात् तस्मादप्यन्यदेवत्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदग्नेरेवैनामधि निष्क्रीयाऽऽलभते य-(१) द्वायुर्व्यवात् तस्माद्वायव्या यदिमे गर्भमदधातां तस्माद् द्यावापृथिव्या यत् सोमः प्राजनयदग्निरग्रसत तस्मादग्नीषोमीया यदनयोर्वि-यत्योर्वागवदत् तस्मात् सारस्वती यत् प्रजापतिरग्नेरधि निरक्रीणात् तस्मात् प्राजापत्या सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन (२) भाग-

धेयेनोप धावति स एवैनं भूतिं गमयति द्यावापृथिव्यामा लभेत कृषमाणः प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्षति व्यस्यामोषधयो रोहन्ति समर्धुकमस्य सस्यं भवत्य-ग्नीषोमीयामा लभेत यः कामयेतान्नवानन्नादः स्यामित्यग्निनैवान्नमव रुन्धे सोमेनान्नाद्यमन्नवानेवान्नादो भवति सारस्वतीमा लभेत य (३) ईश्वरो वाचो वदितोः सन् वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् वाचं दधाति प्राजापत्यामा लभेत यः कामयेतानभिजितमभि जयेयमिति प्रजापतिः सर्वा देवता देवता-भिरेवानभिजितमभि जयति वायव्ययोपाकरोति वायोरेवैनामवरुध्याऽऽलभत आकूत्यै त्वा कामाय त्वे-(४)-त्याह यथायजुरेवैतत् किक्किटाकारं जुहोति किक्किटाकारेण वै ग्राम्याः पशवो रमन्ते प्रा-ऽरण्याः पतन्ति यत् किक्किटाकारं जुहोति ग्राम्याणां पशूनां धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्ती-मेवैनाꣳ सुवर्गं लोकं गमयति त्वं तुरीया वशिनी वशाऽसीत्याह देवत्रैवैनां गमयति सत्याः सन्तु यजमानस्य कामा इत्याहैष वै कामो (५) यजमानस्य यदनार्त उदृचं गच्छति तस्मादेवमाहा-ऽजाऽसि रयिष्ठेत्याहैष्वेवैनां लोकेषु प्रति ष्ठापयति दिवि ते बृहद्भा इत्याह सुवर्ग एवास्मै लोके ज्योतिर्दधाति तन्तुं तन्वन् रजसो भानुमन्विहीत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोत्य-नुल्बणं वयत जोगु-वामप इत्या-(६)-ह यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्ति-र्मनुर्भव जनया दैव्यं जनमित्याह मान-व्यो वै प्रजास्ता एवाऽऽद्याः कुरुते मनसो हविरसीत्याह सुवर्गत्यै गात्राणां ते गात्रभाजो भूया-स्मेत्याहाऽऽशिषमेवैतामा शास्ते तस्यै वा एतस्या एकमेवादेवयजनं यदालब्धायामभ्रो (७) भवति यदालब्धायामभ्रः स्यादप्सु वा प्रवेशयेत् सर्वां वा प्राश्नीया-द्यदप्सु प्रवेशयेद्यज्ञवेशसं कुर्यात् सर्वामेव प्राश्नीयादिन्द्रियमेवाऽऽत्मन् धत्ते सा वा एषा त्रयाणामेवावरुद्धा संवत्सरसदः सहस्रयाजिनो गृहमे-धिनस्त एवैतया यजेरन् तेषामेवैषाऽऽप्ता ॥ (य, स्वेन, य,-त्वा, काम, इत्या, भ्रो, द्विचत्वारिंशच्च) ॥ ३ ॥

जयहोममन्त्राः तदवदानं च ॥ ११ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

चित्तं च चित्तिश्चा-ऽऽकूतं चा-ऽऽकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्करीश्च दर्शश्च पूर्णमासश्च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव
देवासुराः संयत्ता आसन्त्स इन्द्रः प्रजापतिमुपा-(१)-धावत् तस्मा एताञ्जयान् प्रायच्छत् ताञ्जुहोत् ततो वै देवा असुरानजयन् यदजयन् तज्जयानां जयत्वꣳ स्पर्धमानेनैते होतव्या जयत्येव तां पृतनाम् ॥
(उप, पञ्चविꣳशतिश्च) ॥ ४ ॥

अभ्यातानमन्त्राः ॥ विश्वेदेवा ऋषयः ।

अग्निर्भूतानामधिपतिः स माऽवत्वि-न्द्रो ज्येष्ठानां *- यमः पृथिव्या *- वायुरन्तरिक्षस्य *- सूर्यो दिवः *- चन्द्रमा नक्षत्राणां *- बृहस्पतिर्ब्रह्मणो *- मित्रः सत्यानां *- वरुणोऽपाꣳ *- समुद्रः स्रोत्या-नां *- अन्नꣳ साम्राज्यानामधिपति तन्माऽवतु सोम ओषधीनाꣳ *- सविता प्रसवानाꣳ *- रुद्रः
(५।२-१०, १२-१६) अधिपतिः... इतु । अग्ने च ' अग्निर् महान्.. ' (५।१८) इत्यादयश्च ।

पशूनां॑ ७-त्वष्टा॑ रूपाणां॑ ८-विष्णुः॒ पर्वतानां॑ ९-मरुतो॑ गणाना॒मधिपतयस्ते माऽवन्तु पितरः पितामहाः परेऽवरे (१) तता॑स्ततामहा इह माऽवत । अस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधाया॑मस्मिन् कर्मन्नस्यां देवहूत्याम् ॥ (अवतु, ततामहा च) ॥ ५ ॥

कथ्यातानाम्नाष्टहोमविधानम् ॥ विश्वेदेवा ऋषयः ।

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतानभ्यातानानपश्यन् तानभ्यातन्वत यद्देवानां कर्माऽऽसीदार्ध्यत तद्यदसुराणां न तदार्ध्यत येन कर्मणेर्त्सेत् तत्र होतव्या ऋध्नोत्येव तेन कर्मणा यद्विश्वे देवाः समभरन् तस्मादभ्यातानाः वैश्वदेवा यत् प्रजापतिर्जयान् प्रायच्छत् तस्माज्जयाः प्राजापत्याः (१) यद्राष्ट्रभृद्भी राष्ट्रमाऽदद॑त तद्राष्ट्रभृतां राष्ट्रभृत्त्वं ते देवा अभ्यातानैरसुरानभ्यातन्वत जयैरजयन् राष्ट्रभृद्भी राष्ट्रमाऽदद॑त यद्देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानानामभ्यातानत्वं यज्जयैरजयन् तज्जयानां जयत्वं यद्राष्ट्रभृद्भी राष्ट्रमाऽदद॑त तद्राष्ट्रभृतां राष्ट्रभृत्त्वं ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्त्स्यात् स (२) एतान् जुहुयादभ्यातानैरेव भ्रातृव्यानभ्यातनुते जयैर्जयति राष्ट्रभृद्भी राष्ट्रमा दत्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ॥ (प्राजापत्याः, सं, अष्टात्रिंशच्च) ॥ ६ ॥

राष्ट्रभृन्मन्त्राः ॥ विश्वेदेवा ऋषयः

ऋताषाडृतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा संहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवः सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवाः प्रजापतिर्विश्वकर्मा मनो (१) गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्वस्तस्याऽऽपोऽप्सरसो मुदाः

भुवनस्य पते यस्य त उपरि गृहा इह च ।

स नो रास्वाज्यानिꣳ रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिम् ॥

परमेष्ठ्यधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवः सुक्षितिः सुभूतिर्भद्रकृत् सुवर्वान् पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो दूरेहेतिरमृडयो (२) मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो गन्धर्वस्तस्याऽऽधयोऽप्सरसः शोचयन्तीर्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा

स नो भुवनस्य पते यस्य त उपरि गृहा इह च ।

उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ ॥ (मनोऽमृडयः, षट्चत्वारिꣳशच्च) ॥ ७ ॥

राष्ट्रभृन्मन्त्राणां काम्यप्रयोगाः ॥ विश्वेदेवा ऋषयः ।

राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमव रुन्धे राष्ट्रमेव भवत्यात्मने होतव्या

(का२-१२,१४-१५) नाम...ताभ्यः स्वाहा ।

राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव रुन्धे वसिष्ठः समानानां भवति ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रꣳ सजाता राष्ट्रेणैवास्मै राष्ट्रꣳ सजातानव रुन्धे ग्राम्ये-(१)-व भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै सजातानव रुन्धे त एनमवरुद्धा उप तिष्ठन्ते रथमुख ओजस्कामस्य होतव्या ओजो वै राष्ट्रभृत ओजो रथ ओजसैवास्मा ओजोऽव रुन्ध ओजस्व्येव भवति यो राष्ट्रादपभूतः स्यात् तस्मै होतव्या यावन्तोऽस्य रथाः स्युस्तान् ब्रूयाद् युङ्ग्ध्वमिति राष्ट्रमेवास्मै युनक्त्या-(२)-हुतयो वा एतस्याक्लृप्ता यस्य राष्ट्रं न कल्पते स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभि जुहुयादाहुतीरेवास्य कल्पयति ता अस्य कल्पमाना राष्ट्रमनु कल्पते संग्रामे संयत्ते होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रे खलु वा एते व्यायच्छन्ते ये संग्रामꣳ संयन्ति यस्य पूर्वस्य जुह्वति स एव भवति जयति तꣳ संग्रामं मान्धुक इध्मो (३) भवत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां प्रति बध्नन्ति य उन्माद्येत् तस्मै होतव्या गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यत्येते खलु वै गन्धर्वाप्सरसो यद्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनाञ्छमयति नैयग्रोध औदुम्बर आश्वत्थः प्लाक्ष इतीध्मो भवत्येते वै गन्धर्वाप्सरसां गृहाः स्व एवैना-(४)-नायतने शमयत्यभिचरता प्रतिलोमꣳ होतव्याः प्राणानेवास्य प्रतीचः प्रति यौति तं ततो येन केन च स्तृणुते स्वकृत इरिणे जुहोति प्रदरे वैतद्वा अस्यै निर्ऋतिगृहीतं निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति यद्वाचः क्रूरं तेन वषट् करोति वाच एवैनं क्रूरेण प्र वृश्चति ताजगार्तिमार्च्छति यस्य कामयेतान्नाद्य-(५)-मा ददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि सं गृह्णीयात् प्रजापतिर्वै भुवनस्य पतिः प्रजापतिनैवास्यान्नाद्यमा दत्त इदमहममुष्याऽऽमुष्यायणस्यान्नाद्यꣳ हरामीत्याहान्नाद्यमेवास्य हरति षड्भिर्हरति षड्वा ऋतवः प्रजापतिनैवास्यान्नाद्यमादायर्तवोऽस्मा अनु प्र यच्छन्ति (६) यो ज्येष्ठबन्धुरपभूतः स्यात् तꣳ स्थलेऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा तस्मै होतव्या वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलं वर्ष्मणैवैनं वर्ष्म समानानां गमयति चतुःशरावो भवति दिक्ष्वेव प्रति तिष्ठति क्षीरे भवति रुचमेवास्मिन् दधात्युद्धरति शृतत्वाय सर्पिष्वान् भवति मेध्यत्वाय चत्वार आर्षेयाः प्राश्नन्ति दिशामेव ज्योतिषि जुहोति ॥ (ग्राम्ये, युनक्ति,-इध्म, एवैना,-नन्नाद्यं, यच्छन्ति,-आर्षेयाः प्राश्नन्ति द्वे च) ॥ ८ ॥

दैविकाख्यहविषां काम्यप्रयोगाः ॥ विश्वेदेवा ऋषयः ।

दैविका निर्वपेत् प्रजाकामश्छन्दाꣳसि वै दैविकाश्छन्दाꣳसीव खलु वै प्रजाश्छन्दोभिरेवास्मै प्रजाः प्र जनयति प्रथमं धातारं करोति मिथुनी एव तेन करोत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति प्रजास्वेव प्रजातासु कुह्वा वाचं दधात्येता एव निर्वपेत् पशुकामश्छन्दाꣳसि वै दैविकाश्छन्दाꣳसी-(१)-व खलु वै पशवश्छन्दोभिरेवास्मै पशून् प्र जनयति प्रथमं धातारं करोति प्रैव तेन वापयत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति पशूनेव प्रजातान् कुह्वा प्रति ष्ठापयत्येता एव निर्वपेद्ग्रामकामश्छन्दाꣳसि वै दैविकाश्छन्दाꣳसीव खलु वै ग्रामश्छन्दोभिरेवास्मै ग्राम-(२)-मव रुन्धे मध्यतो धातारं करोति मध्यत एवैनं ग्रामस्य दधात्येता एव निर्वपेज्ज्योगामयावी छन्दा-

ꣳसि वै दैविकाश्छन्दाꣳसि खलु वा एतमभि मन्यन्ते यस्य ज्योगामयति छन्दोभिरेवैनमगदं करोति मध्यतो धातारं करोति मध्यतो वा एतस्याक्लृप्तं यस्य ज्योगामयति मध्यत एवास्य तेन कल्पयत्येता एव नि-(३)-र्वपेद्यं यज्ञो नोपनमेच्छन्दाꣳसि वै दैविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं यज्ञो नोपनमति प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं यज्ञो नमत्येता एव निर्वपेदीजानश्छन्दाꣳसि वै दैविका यातयामानीव खलु वा एतस्य छन्दाꣳसि य ईजान उत्तमं धातारं करोत्यु-(४)-परिष्टादेवास्मै छन्दाꣳस्ययातयामान्यव रुन्ध उपैनमुत्तरो यज्ञो नमत्येता एव निर्वपेद्यं मेधा नोपनमेच्छन्दाꣳसि वै दैविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं मेधा नोपनमति प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं मेधा नमत्येता एव निर्वपे-(५)-द्रुक्कामश्छन्दाꣳसि वै दैविकाश्छन्दाꣳसीव खलु वै रुक् छन्दोभिरेवास्मिन् रुचं दधाति क्षीरे भवन्ति रुचमेवास्मिन् दधति मध्यतो धातारं करोति मध्यत एवैनꣳ रुचो दधाति गायत्री वा अनुमतिस्त्रिष्टुग्राका जगती सिनीवाल्यनुष्टुप् कुहूर्धाता वषट्कारः पूर्वपक्षो राकाऽपरपक्षः कुहूरमावास्या सिनीवाली पौर्णमास्यनुमतिश्चन्द्रमा धाताऽष्टौ (६) वसवोऽष्टाक्षरा गायत्र्येकादश रुद्रा एकादशाक्षरा त्रिष्टुब् द्वादशादित्या द्वादशाक्षरा जगती प्रजापतिरनुष्टुब् धाता वषट्कार एतद्वै दैविकाः सर्वाणि च छन्दाꣳसि सर्वाश्च देवता वषट्कारस्ता यत् सह सर्वा निर्वपेदीश्वरा एनं प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत् तथो एवोत्तरे निर्वपेत् तथैनं न प्र दहन्त्य-(७)-थो यस्मै कामाय निरुप्यन्ते तमेवाऽऽभिरुपाऽऽप्नोति ॥ (छन्दाꣳसि, ग्राम, नि,-र्वपेदीजान, करो,-त्यु, निर्वपे, दृष्टौ, दहन्ति, नव च) ॥ ९ ॥

प्रवत्स्यतोऽग्निहोत्रिणो होमः, समारोपश्च ॥ १-२ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।

यत् त्वेमहे प्रति तन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ॥

वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या ।

आवः क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥

यत् सायंप्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उप धत्ते (१) यजमानोऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यत् सायंप्रातर्जुहोत्यहोरात्राण्येवाऽऽप्त्वेष्टकाः कृत्वोप धत्ते दश समानत्र जुहोति दशाक्षरा विराड् विराजमेवाऽऽप्त्वेष्टकां कृत्वोप धत्तेऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्योऽस्य भवति तस्माद्यत्र दशोषित्वा प्रयाति तदशक्याऽस्त्ववास्त्वेव तदत् ततोऽर्वाचीनꣳ (२) रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा वास्तोष्पतीयं प्रयायाद् रुद्र एनं भूत्वाऽग्निरनूत्थाय हन्याद्वास्तोष्पतीयं जुहोति भागधेयेनैवैनꣳ शमयति नाऽऽर्तिमार्च्छति यजमानो यद्युक्ते जुहुयाद्यथा प्रयाति वास्त्वाहुतिं जुहोति तादृगेव तद्यद्युक्ते जुहुयाद्यथा क्षेम आहुतिं जुहोति तादृगेव तदहुतमस्य वास्तोष्पतीयꣳ स्या-(३)-द्दक्षिणो युक्तो भवति सव्योऽयुक्तोऽथ वास्तोष्पतीयं जुहोत्युभयमेवाकरपरिवर्गमेवैनꣳ शमयति यदेकया जुहुयाद्दर्वि-

होमं कुर्यात् पुरोऽनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वाय यद्धुत आदध्याद् रुद्रं गृहानन्वारोहयेद्यदवक्षाणान्यसंप्रक्षाप्य प्रयायाद्यथा यवसे बहुं वाऽऽदहनं वा तादृगेव तदयं ते योनिर्ऋत्विय इत्यरण्योः समारोहयत्ये-(४)-ष वा अग्नेर्योनिः स्व एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत् पुनराधेयः स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्यारोहेत्यात्मन्त्समारोहयते यजमानो वा अग्नेर्योनिः स्वायामेवैनं योन्याꣳ समारोहयते (धत्ते, अर्वाचीनꣳ, स्यात्, समारोहयति, पञ्चचत्वारिꣳशच्च) ॥ १० ॥

राजसूयगता याज्यापुरोऽनुवाक्याः ॥ त्रिष्टुप्; १,३,५,७,११,१५,१८ गायत्री; ८ जगती । विश्वेदेवा ऋषयः ।

त्वमग्ने बृहद्वयो दधासि देव दाशुषे । कविर्गृहपतिर्युवा ॥

हव्यवाडग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।

सुगार्हपत्याः समिषो दिदीह्यस्मद्रियक् सं मिमीहि श्रवाꣳसि ॥

त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।

श्येनो गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः (१) पवित्रमत्येति रेभन् ॥

आ विश्वदेवꣳ सत्पतिꣳ सूक्तैरद्या वृणीमहे । सत्यसवꣳ सवितारम् ॥

आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।

हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन् ॥

यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा (२) नो अश्वेषु रीरिषः ।

वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥

उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।

गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन् ॥

हꣳसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।

बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाꣳ अगायत् ॥

एन्द्र सानसिꣳ रयिꣳ (३) सजित्वानꣳ सदासहम् । वर्षिष्ठमूतये भर ॥

प्र ससाहिषे पुरुहूत शत्रून् ज्येष्ठस्ते शुष्म इह रातिरस्तु ।

इन्द्राऽऽभर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् ॥

त्वꣳ सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥

भुवस्त्वमिन्द्र ब्रह्मणा महान् भुवो विश्वेषु सवनेषु यज्ञियः ।

भुवो नॄꣳश्च्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो (४) विश्वचर्षणे ॥

मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । सत्यं चित्रश्रवस्तमम् ॥
मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाऽभि चष्टे सत्याय हव्यं घृतवद्विधेम ॥
प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमꣳहो अश्नोत्यन्तितो न दूरात् ॥
य-(५)-च्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् । मिनीमसि द्यविद्यवि ॥
यत् किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता वि ष्य शिथिरे-(६)-व देवाथा ते स्याम वरुण प्रियासः ॥
(सोमो, मा, रयिं, मन्द्रो, य,-च्छिथिरा, सप्त च) ॥ ११ ॥

[वि षा २२१ । आ वांयो ११३ । इम ३९२ चित्त-७५ ।-मग्नि-६७ । देवा ११८ । कतापा-१०६ द्वादशांमाय ३४९ । देविका ३५९ । वास्तो-२४५ । स्व-३०७ । मेकादश ॥ ३३९२]

[इति तृतीयकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥]

इष्टिशेषाभिधानम् ।

[अथ पञ्चमः प्रपाठकः ॥ ५ ॥]

दर्शपूर्णमासाङ्गभूतारम्भणीयेष्टिः ॥ १-३ त्रिष्टुप्, ४ शक्वरी । विश्वेदेवा ऋषयः ।

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्ताम् ॥
यत् ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम् ॥
निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती ।
सहस्रपोषꣳ सुभगा रराणा सा न आ गन् वर्चसा (१) संविदाना ॥
अग्नीषोमौ प्रथमौ वीर्येण वसून् रुद्रानादित्यानिह जिन्वतम् ।
माध्यꣳ हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन साताविथाऽस्मभ्यꣳ
सहवीराꣳ रयिं नि यच्छतम् ॥

आदित्याश्चाङ्गिरसश्चाग्नीनाऽदधत ते दर्शपूर्णमासौ प्रैप्सन् तेषामङ्गिरसां निरुप्तꣳ हविरासीदथाऽऽ-
दित्या एतौ होमावपश्यन् तावजुहवुस्ततो वै ते दर्शपूर्णमासौ (२) पूर्व आ ऽलभन्त दर्शपूर्णमासावाल-
भमान एतौ होमौ पुरस्ताज्जुहुयात् साक्षादेव दर्शपूर्णमासावा लभते ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्ण-
मासावा लभेत य एनयोरनुलोमं च प्रतिलोमं च विद्यादित्यमावास्याया ऊर्ध्वं तदनुलोमं पौर्णमास्यै प्रती-

अतिमोक्षमन्त्राः ॥ अनुष्टुप्, ३, ६, ९ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते । अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥
आऽगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति ।
नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥
ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽध्यासते । वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥
यास्ते रात्रीः सवित-(१)-र्देवयानीरन्तरा द्यावापृथिवी वियन्ति ।
गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसि ॥
ये देवा यज्ञहनो यज्ञमुषो दिव्यध्यासते । सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥
येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः ।
तेनाग्ने त्वमुत वर्धयेमꣳ सजातानाꣳ श्रैष्ठ्य आ धेह्येनम् ॥

यज्ञहनो वै देवा यज्ञमुषः (२) सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते
तस्य । ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः
सपशुः सुवर्गं लोकमेत्य-प वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं निर्व-
पेदग्निः सर्वा देवताः (३) पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चाव रुन्धे गायत्रो वा अग्निर्गायत्रछन्दास्तं
छन्दसा व्यर्धयति यत् पञ्चकपालं करोत्यष्टाकपालः कार्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्रछन्दाः स्वेनैवैनं
छन्दसा समर्धयति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव यज्ञाच्चैति ॥ (सवित,-यज्ञमुषो,
देवता,-श्चत्वारिꣳशच्च) ॥ ४ ॥

आदित्यग्रहमन्त्राः ॥ १ आर्षि., २ शक्वरी, ४ अनुष्टुप्, ६-७ त्रिष्टुप्, ८ बृहती । विश्वेदेवा ऋषयः ।

सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानोऽग्निर्मा पातु चक्षुषः ।
सक्ष शूष सवितर्विश्वचर्षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते ॥
अहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार । यदन्तरिक्षं तदु मे पिताऽभूदहꣳ सूर्य-
मुभयतो ददर्शाहं भूयासमुत्तमः समानाना-(१)-मा समुद्रादाऽन्तरिक्षात् प्रजापतिरुदधिं च्यावयाती-
न्द्रः प्र स्नौतु मरुतो वर्षयन्तू-
-न्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः । उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम् ॥
पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यं जुहोति रुद्रादेव पशूनन्तर्दधा-
त्यथो ओषधीष्वेव पशून् (२) प्रति ष्ठापयति
कविर्यज्ञस्य वि तनोति पन्थां नाकस्य पृष्ठे अधि रोचने दिवः ।
येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान् ॥
यास्ते विश्वाः समिधः सन्त्यग्ने याः पृथिव्यां बर्हिषि सूर्ये याः ।

चीनं तत् प्रतिलोमं यत् पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावा लभेतामुमपक्षीयमाणमन्वप (३) क्षीयेत
सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या वै सरस्वत्यनुलोममेवैनावा लभतेऽमुमाप्यायमानमन्वा प्यायत
आग्नावैष्णवमेकादशकपालं पुरस्तान्निर्वपेत् सरस्वत्यै चरुꣳ सरस्वते द्वादशकपालं यदाग्नेयो भवत्यग्निर्वै
यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते यद्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञमेवाऽऽरभ्य प्र तनुते सरस्वत्यै (४) चरुर्भ-
वति सरस्वते द्वादशकपालोऽमावास्या वै सरस्वती पूर्णमासः सरस्वान् तावेव साक्षादा रभत ऋध्नो-
त्याभ्यां द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै ॥
(वर्चसा, दर्शपूर्णमासा,-वप, सरस्वत्यै, पञ्चविꣳशतिश्च) ॥ १ ॥

सौमिकब्रह्मत्वविधिः ॥ विश्वेदेवा ऋषयः ।

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् तं वसिष्ठः प्रत्यक्षमपश्यत् सोऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्व-
त्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोच इति तस्मा एतान्त्स्तोमभागानब्रवीत्
ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त तस्माद्वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय त्वा
क्षयं जिन्वेत्या-(१)-ह देवा वै क्षयो देवेभ्य एव यज्ञं प्राऽऽह प्रेतिरसि धर्माय त्वा धर्मं जिन्वेत्याह मनुष्या
वै धर्मो मनुष्येभ्य एव यज्ञं प्राऽऽहा-न्वितिरसि दिवे त्वा दिवं जिन्वेत्याहैभ्य एव लोकेभ्यो यज्ञं प्राऽऽह
विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्वेत्याह वृष्टिमेवाव (२) रुन्धे प्रवाऽस्यनुवाऽसीत्याह मिथुनत्वायो-
शिगसि वसुभ्यस्त्वा वसूञ्जिन्वेत्याहाष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्या एतावन्तो वै देवास्तेभ्य
एव यज्ञं प्राऽऽहौ-जोऽसि पितृभ्यस्त्वा पितॄञ्जिन्वेत्याह देवानेव पितॄननु सं तनोति तन्तुरसि प्रजा-
भ्यस्त्वा प्रजा जिन्वे-(३)-त्याह पितॄनेव प्रजा अनु सं तनोति पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्वे-
त्याह प्रजा एव पशूननु सं तनोति रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वेत्याहौषधीष्वेव पशून् प्रति ष्ठाप-
यत्य-भिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेत्याहाभिजित्यै अधिपतिरसि प्राणाय त्वा प्राणं (४) जिन्वे-
त्याह प्रजास्वेव प्राणान् दधाति त्रिवृदसि प्रवृदसीत्याह मिथुनत्वाय सꣳरोहोऽसि नीरोहोऽसीत्याह
प्रजात्यै वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्याह प्रतिष्ठित्यै ॥ (इत्य,-व, जिन्व, प्राणं, त्रिꣳशच्च) ॥२॥

विष्णुक्रमाः ॥ विश्वेदेवा ऋषयः ।

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना वषट्कारेण
वज्रेण पूर्वजान् भ्रातृव्यानधरान् पादयाम्यवैनान् बाधे प्रत्येनान्नुदेऽस्मिन् क्षयेऽस्मिन् भूमिलोके
योऽस्मान् द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणात्येनान् क्रामामी-न्द्रेण देवेन पृतना जयामि
त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण (१) सहजान्*- विश्वेभिर्देवेभिः
पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजा-*-
-निन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः । घ्नन्तो वृत्राण्यप्रति । यत् ते अग्ने तेजस्तेनाहं
तेजस्वी भूयासं यत् ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत् ते अग्ने हरस्तेनाहꣳ हरस्वी भूयासम् ॥
(वज्रेण, षट्चत्वारिꣳशच्च) ॥ ३ ॥

(३।२-१) भ्रातृव्या... क्रामामि ।

तास्ते गच्छन्त्वाहुतिं घृतस्य देवायते यजमानाय शर्म ॥
आशासानः सुवीर्यꣳ रायस्पोषꣳ स्वश्वियम् ।
बृहस्पतिना राया स्वगाकृतो मह्यं यजमानाय (३) तिष्ठ ॥
(समानानां, पशून्, यजमानाय,-ष्ट च) ॥ ५ ॥

पत्नीविषयका योक्त्रबन्धादिमन्त्राः ॥ १, ४ त्रिष्टुप्, २-३ अनुष्टुप् । विश्वेदेवा ऋषयः ।

सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः ।
सं त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे ॥
प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु । अथाहमनुकामिनी स्वे लोके विशा इह ॥
सुप्रजसस्त्वा वयꣳ सुपत्नीरुप सेदिम । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् ॥
इमं वि ष्यामि वरुणस्य पाशं (१) यमबध्नीत सविता सुकेतः ।
धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि ॥

प्रेद्धुदेवृतस्य वामीरन्वग्निस्तेऽग्रं नयत्वदितिर्मध्यं ददताꣳ रुद्रावसृष्टाऽसि युवा नाम मा मां
हिꣳसी-र्वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पन्नेजनीर्गृह्णामि यज्ञाय वः पन्नेजनीः
-*सादयामि*- विश्वस्य ते विश्वावतो वृष्णियावत-(२)-स्तवाग्ने वामीरनु सन्दृशि विश्वा रेताꣳसि
धिषीयो-गन् देवान् यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्त्सुन्वति यजमान आशिषः स्वाहाकृताः
समुद्रेष्ठा गन्धर्वमा तिष्ठतानु । वातस्य पत्मन्निड ईडिताः ॥ (पाशं, वृष्णियावत,-स्त्रिꣳशच्च) ॥ ६ ॥

स्रुचां वृक्षावयवविधानम् ॥ विश्वेदेवा ऋषयः ।

वषट्कारो वै गायत्रियै शिरोऽच्छिनत् तस्यै रसः पराऽपतत् स पृथिवीं प्राविशत् स खदिरोऽभवद्यस्य
खादिरः स्रुवो भवति छन्दसामेव रसेनाव द्यति सरसा अस्याऽऽहुतयो भवन्ति तृतीयस्यामितो दिवि
सोम आसीत् तं गायत्र्याऽहरत् तस्य पर्णमच्छिद्यत तत् पर्णोऽभवत् तत् पर्णस्य पर्णत्वं यस्य पर्णमयी
जुहू-(१)-र्भवति सौम्या अस्याऽऽहुतयो भवन्ति जुषन्तेऽस्य देवा आहुती-र्देवा वै ब्रह्मन्नवदन्त तत् पर्ण
उपाशृणोत् सुश्रवा वै नाम यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति ब्रह्म वै पर्णो विण्मरु-
तोऽन्नं विण्मारुतोऽश्वत्थो यस्य पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्ब्रह्मणैवान्नमव रुन्धेऽथो ब्रह्म-(२)-व विश्यध्यू-
हति राष्ट्रं वै पर्णो विडश्वत्थो यत् पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्राष्ट्रमेव विश्यध्यूहति प्रजापतिर्वा
अजुहोत् सा यत्राऽऽहुतिः प्रत्यतिष्ठत् ततो विकङ्कत उदतिष्ठत् ततः प्रजा असृजत यस्य वैकङ्कती ध्रुवा
भवति प्रत्येवास्याऽऽहुतयस्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचाꣳ (३) रूपं यस्यैवꣳ रूपाः स्रुचो भवन्ति
सर्वाण्येवैनꣳ रूपाणि पशूनामुप तिष्ठन्ते नास्यापरूपमात्मञ्जायते ॥ (जुहू,-र्ब्रह्म, स्रुचाꣳ, सप्तदश च) ॥ ७ ॥

दधिग्रहमन्त्राः ॥ विश्वेदेवा ऋषयः ।

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे रातं देवेभ्योऽ-
ग्निजिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यो दिवे त्वाऽन्तरिक्षाय

(३।८) -* वसुभ्यो... नेजनीः ।- यज्ञाय... नेजनीः ।

त्वा पृथिव्यै त्वा ऽपेन्द्र द्विषतो मनोऽप जिज्यासतो जह्यप यो नोऽरातीयति तं जहि[2] प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यो (१) विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अक्खिद्रा अजायन्त तस्मै त्वा प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि[3] ॥
(ओषधीभ्यः, अष्टादश च) ॥ ८ ॥

हविर्ग्रहविधानम् ॥ विश्वेदेवा ऋषयः ।

यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आ वृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात् प्रजापतिः सर्वा देवता देवताभ्य एव नि ह्नुवाते[1] ज्येष्ठो वा एष ग्रहाणां यस्यैष गृह्यते ज्यैष्ठ्यमेव गच्छति[2] सर्वासां वा एतद्देवतानाꣳ रूपं यदेष ग्रहो यस्यैष गृह्यते सर्वाण्येवैनꣳ रूपाणि पशूनामुप तिष्ठन्ते उपयामगृहीतो (१) ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीत्याह ज्योतिरेवैनꣳ समानानां करोत्य-ग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्याहैतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो गृह्णात्य-पेन्द्र द्विषतो मन इत्याह भ्रातृव्यापनुत्त्यै[3] प्राणाय त्वाऽपानाय त्वेत्याह प्राणानेव यजमाने दधाति[4] तस्मै त्वा प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमी- (२) -त्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोत्या-ज्यग्रहं गृह्णीयात् तेजस्कामस्य तेजो वा आज्यं तेजस्व्येव भवति सोमग्रहं गृह्णीयाद्ब्रह्मवर्चसकामस्य ब्रह्मवर्चसं वै सोमो ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णीयात् पशुकामस्योर्ग्वै दध्यूर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे ॥ (उपयामगृहीतो, जुहोमि, त्रिचत्वारिꣳशच्च) ॥ ९ ॥

अंशुग्रहाः प्राणग्रहाश्च ॥ १ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समतः ऊ षु मधु मधुनाऽभि योधि ।
उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा ॥

प्राणग्रहान् गृह्णात्येतावद्वा अस्ति यावदेते ग्रहाः स्तोमाश्छन्दाꣳसि पृष्ठानि दिशो यावदेवास्ति त- (१) -दव रुन्धे[1] ज्येष्ठा वा एतान् ब्राह्मणाः पुरा विदामक्रन् तस्मात् तेषाꣳ सर्वा दिशोऽभिजिता अभूवन् यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति[2] पञ्च गृह्यन्ते पञ्च दिशः सर्वास्वेव दिक्ष्वृध्नुवन्ति[3] नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधति[4] प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः (२) प्राणैरेव प्रयन्ति प्राणैरुद्यन्ति दशमेऽहन् गृह्यन्ते प्राणा वै प्राणग्रहाः प्राणेभ्यः खलु वा एतत् प्रजा यन्ति[5] यद्वामदेव्यं योनेश्च्यवते दशमेऽहन् वामदेव्यं योनेश्च्यवते यद्दशमेऽहन् गृह्यन्ते प्राणेभ्य एव तत् प्रजा न यन्ति ॥ (तद्, प्राणग्रहाः, सप्तविꣳशतिश्च) ॥ १० ॥

याज्यादीष्टकोपधानमिष्टकायाः ॥ गायत्री, २-४ अनुष्टुभः, ६-८, २१ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

प्र देवं देव्या धिया भरता जातवेदसम् । हव्या नो वक्षदानुषक् ॥
अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते । रथो न योरभीवृतो घृणीवान् चेतति त्मना[2] ॥
अयमग्निरुरुष्यत्यमृतादिव जन्मनः । सहसश्चित् सहीयान् देवो जीवातवे कृतः[3] ॥

इडायास्त्वा पदे वयं नाभा पृथिव्या अधि । जातवेदो नि धीमह्यग्ने हव्याय वोढवे[4] (१) ॥
अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तꣳ सवित्रे यज्ञं नय यजमानाय साधु[5] ॥
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः[6] ॥
नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदत् सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः[7] ॥
त्वं दूतस्त्व- (२) -मु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन् दीद्यद्बोधि गोपाः[8] ॥
अभि त्वा देव सवितरीशानं वार्याणाम् । सदाऽवन् भागमीमहे[9] ॥
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः[10] ॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः[11] ॥
तमु (३) त्वा दध्यङ् ऋषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरन्दरम्[12] ॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनञ्जयꣳ रणेरणे[13] ॥
उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि । धनञ्जयो रणेरणे[14] ॥
आ यꣳ हस्ते न खादिनꣳ शिशुं जातं न बिभ्रति । विशामग्निꣳ स्वध्वरम्[15] ॥
प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ नि षीदतु ॥
आ (४) जातं जातवेदसि प्रियꣳ शिशीतातिथिम् । स्योन आ गृहपतिम्[16] ॥
अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः[17] ॥
त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता । सखा सख्या समिध्यसे[18] ॥
तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु । स्वेषु क्षयेषु वाजिनम् ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र (५) पूर्वे साध्याः सन्ति देवाः[21] ॥
(योनिम्, त्वं, तम्, आ, यत्र, चत्वारि च) ॥ ११ ॥

[पूर्व-२२५ ।-येयो २३० । ऽग्निना ९६ । ये १९३ । सूर्यः १५१ । सं १३० । यद्वार १६७ । उपयामगृहीतो १४१ । यां १४३ । त्वे १३० । प्रे-२५४ । कांदश ॥ १७९०]
[॥ इति तृतीयकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥]
[पुरावति- २१४८ ।-यो वा २३३५ । अग्ने १८५७ । वि वै २३९२ । पूर्णा १७९० । (पञ्च ॥ ५ ॥ १०६१२)]
॥ इति तृतीयं काण्डं सम्पूर्णम् ॥ ३ ॥

अथ चतुर्थं काण्डम् ।

अग्निचित्याङ्गमन्त्रपाठाभिधानम् ।

[अथ प्रथमः प्रपाठकः ॥ १ ॥] अग्निचितिः ।

खनित्रादानम् ॥ ३, ९ गायत्री; १-२, १३ अनुष्टुभः; ५ त्रिष्टुप्; ४, ६ जगती ।

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः । अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याऽभरत्[1] ॥
युक्त्वाय मनसा देवान्त्सुवर्यतो धिया दिवम् ।
बृहज्ज्योतिः करिष्यतः सविता प्र सुवाति तान्[2] ॥
युक्तेन मनसा वयं देवस्य सवितुः सवे । सुवर्गेयाय शक्त्यै[3] ॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इ- (१) -न्मही देवस्य सवितुः परिष्टुतिः[4] ॥
युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोका यन्ति पथ्येव सूराः ।
शृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः[5] ॥
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः ।
यः पार्थिवानि विममे स एतशो रजाꣳसि देवः सविता महित्वना ॥
देव सवितः प्र सुव यज्ञं प्र सुव (२) यज्ञपतिं भगाय दिव्यो गन्धर्वः ।
केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः[7] ॥
इमं नो देव सवितर्यज्ञं प्र सुव देवायुवꣳ सखिविदꣳ सत्राजितं धनजितꣳ सुवर्जितम् ॥
ऋचा स्तोमꣳ समर्धय गायत्रेण रथन्तरम् । बृहद्गायत्रवर्तनि ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छन्दसाऽऽददेऽङ्गिरस्व-दभ्रिरसि नारि- (३) -रसि पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन त्वा छन्दसाऽऽददेऽङ्गिरस्व-दभ्रिरसि नारिरसि त्वया वयꣳ सधस्थ आऽग्निꣳ शकेम खनितुं पुरीष्यं जागतेन त्वा छन्दसाऽऽददेऽङ्गिरस्व-
-द्धस्त आधाय सविता बिभ्रदभ्रिꣳ हिरण्ययीम् ।
तया ज्योतिरजस्रमिदग्निं खात्वी न आ भराऽऽनुष्टुभेन त्वा छन्दसा (४) ऽऽददेऽङ्गिरस्वत् ॥
(इत, सुव, नारि,-रङ्गिरस्वत्, त्रीणि च) ॥ १ ॥

मृदाक्रमणम् ॥ त्रिष्टुभः ३, ४, १९ गायत्रो; ११-१२, २० अनुष्टुभः; २ उपरिष्टाद्बृहती; १३ पुरस्ताद्बृहती; ५ प्रस्तारपङ्क्तिः; १, १०, १४-१५, १७-१८, २१ मध्येज्योतिः । अग्निऋषिः ।

इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।
तया देवाः सुतमा बभूवुरृतस्य सामन्त्सरमारपन्ती[1] ॥
प्रतूर्तं वाजिन्ना द्रव वरिष्ठामनु संवतम् ।
दिवि ते जन्म परममन्तरिक्षे नाभिः पृथिव्यामधि योनिः[2] ॥
युञ्जाथाꣳ रासभं युवमस्मिन् यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् ॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये[4] ॥
प्रतूर्व- (१) -न्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभूरेहि ।
उर्वन्तरिक्षमन्विहि स्वस्तिगव्यूतिरभयानि कृण्वन् ॥
पूष्णा सयुजा सह । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेह्य-ग्निं पुरीष्यमङ्गिरस्वद-च्छेमो[8]-ऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामो ऽग्निं पुरीष्यमङ्गिरस्वद्भरामः ॥
अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य (२) पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततान ॥
आगत्य वाज्यध्वनः सर्वा मृधो वि धूनुते । अग्निꣳ सधस्थे महति चक्षुषा नि चिकीषते[11] ॥
आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् ।
भूम्या वृत्वाय नो ब्रूहि यतः खनाम तं वयम् ॥
द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षꣳ समुद्रस्ते योनिः ।
विख्याय चक्षुषा त्वमभि तिष्ठ (३) पृतन्यतः ॥
उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनिष्यन्त उपस्थे अस्याः ॥
उदक्रमीद् द्रविणोदा वाज्यर्वाऽकः स लोकꣳ सुकृतं पृथिव्याः ।
ततः खनेम सुप्रतीकमग्निꣳ सुवो रुहाणा अधि नाक उत्तमे[17] ॥
अपो देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः ।
तासाꣳ स्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥
जिघर्म्य- (४) -ग्निं मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नꣳ रभसं विदानम् ॥
आ त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व ।

मर्येश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तनुवा जर्हृषाणः ॥
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥
परि त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि । धृषद्वर्णं दिवेदिवे भेत्तारं (५) भङ्गुरावतः ॥
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ (मर्त्यं,-स्सूर्यस्य, तिष्ठ, जिघर्मि, भेत्तारं, विꣳशतिश्च) ॥ २ ॥

मृत्खननम् ॥ २ स्वराडभिसारिणी; ३, १०-११, १३ त्रिष्टुप्; ४-५ अनुष्टुप्, ६ प्रतिष्ठा; ७-९ गायत्री, १२ बृहती । अग्निर्देवः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां
पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत् खनामि ॥
ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम् ।
शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत् खनामि ॥
अपां पृष्ठमसि सप्रथा उर्वग्निं भरिष्यदपरावपिष्ठम् ।
वर्धमानं मह आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व ॥
शर्म च स्थो (१) वर्म च स्थो अच्छिद्रे बहुले उभे ।
व्यचस्वती सं वसाथां भर्तमग्निं पुरीष्यम् ॥
सं वसाथाꣳ सुवर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ॥
पुरीष्योऽसि विश्वभराः । अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे (२) अथर्वणः । वृत्रहणं पुरन्दरम् ।
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनञ्जयꣳ रणेरणे ॥
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥
नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदत् सुदक्षः ।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥
सꣳ सीदस्व महाꣳ असि शोचस्व (३) देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥
जनिष्वा हि जेन्यो अग्रे अह्नाꣳ हितो हितेष्वरुषो वनेषु ।

दमेदमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् ॥ (स्थ, ईधे, शोचस्व, सप्तविꣳशतिश्च) ॥ ३ ॥

मृदाहरणम् ॥ १,५,११ त्रिष्टुप्; २,६,८-९,१२ अनुष्टुप्; ३,७ बृहती; ४ उपरिष्टाद्बृहती; १० उष्णिक् । अग्निर्देवः ।

सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलिष्टम् ।
देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यम् ॥
सुजातो ज्योतिषा सह शर्म वरूथमाऽसदः सुवः ।
वासो अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो ॥
उदु तिष्ठ स्वध्वराऽवा नो देव्या कृपा ।
दृशे च भासा बृहता सुशुक्वनिराऽग्ने याहि सुशस्तिभिः (१) ॥
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥
स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रः शिशुः परि तमाꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गाः ॥
स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः ॥
शिवो भव (२) प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी अभि शूशुचो माऽन्तरिक्षं मा वनस्पतीन् ।
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥
रासभो वां कनिक्रदत् सुयुक्तो वृषणा रथे । स वामग्निं पुरीष्यमाशुर्दूतो वहादितः ॥
वृषाऽग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आ याहि (३) वीतय ऋतꣳ सत्यम् ॥
ओषधयः प्रति गृह्णीताग्निमेतꣳ शिवमायन्तमभ्यत्र युष्मान् ।
व्यस्यन् विश्वा अमतीररातीर्निषीदन् नो अप दुर्मतिꣳ हनत् ॥
ओषधयः प्रति मोदध्वमेनं पुष्पावतीः सुपिप्पलाः ।
अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमाऽसदत् ॥ (सुशस्तिभि,-र्भव, याहि, षट्त्रिꣳशच्च) ॥ ४ ॥

उखानिर्माणम् ॥ १ त्रिष्टुप्, ५, ७-१०, १९ अनुष्टुप्; २-४ गायत्री; ६ महाबृहती । अग्निर्देवः ।

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
मित्रः (१) सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह । सुजातं जातवेदसमग्निं वैश्वानरं विभुम् ॥
अयक्ष्माय त्वा सꣳ सृजामि प्रजाभ्यः ।
विश्वे त्वा देवा वैश्वानराः सꣳ सृजन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् ॥
रुद्राः सम्भृत्य पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥
सꣳसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु (२) ताम् ॥
सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥
उखां करोतु शक्त्या बाहुभ्यामदितिर्धिया । माता पुत्रं यथोपस्थे साऽग्निं बिभर्तु गर्भ आ ॥
मखस्य शिरोऽसि यज्ञस्य पदे स्थः । वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽङ्गिरस्वत् पृथिव्यसि रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदन्तरिक्षमस्या (३) दित्यास्त्वा कृण्वन्तु जागतेन छन्दसाऽङ्गिरस्वद् द्यौरसि विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद् दिशोऽसि ध्रुवाऽसि धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानायादित्यै रास्नाऽस्यदितिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसाऽङ्गिरस्वत् ॥
कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । तां पुत्रेभ्यः सं प्रा-(४)-यच्छददितिः श्रपयानिति ॥
(मित्रः, करोतु,-स्य, प्र, चत्वारि च) ॥ ५ ॥

उखासंस्कारः ॥ १४ शङ्कुमत्युष्णिक्; १८ अनुष्टुप्; १५-१७ गायत्री । अग्निर्देवः ।

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वदिन्द्रस्त्वा धूपयत्वङ्गिरस्वद् विष्णुस्त्वा धूपयत्वङ्गिरस्वद् वरुणस्त्वा धूपयत्वङ्गिरस्वददितिस्त्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थेऽङ्गिरस्वत् खनत्ववट देवानां त्वा पत्नी-(१)-र्देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद् दधतूखे धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वदभीन्धतामुखे ग्नास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वत् पचन्तूखे वरूत्रयो-(२)-जनयस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वच्छ्रपयन्तूखे ॥
मित्रैतामुखां पचैषा मा भेदि । एतां ते परि ददाम्यभित्यै ॥
अभीमां (२) महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥
मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम् ॥
देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्या ॥

(६-१२) त्वा देवी... पचन्तूखे ।

अव्यथमाना पृथिव्यामाशा दिश आ पृण । उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम् ॥
वसवस्त्वाऽऽच्छृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद् रुद्रास्त्वाऽऽच्छृन्दन्तु (३) त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्यास्त्वाऽऽच्छृन्दन्तु जागतेन छन्दसाऽङ्गिरस्वद् विश्वे त्वा देवा वैश्वानरा आ च्छृन्दन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् ॥ (पत्नी,-रिमाꣳ रुद्रास्त्वाऽऽच्छृन्दन्त्वेकान्नविꣳशतिश्च) ॥ ६ ॥

अग्निचयनाङ्गपशुसामिधेन्यः ॥ १-५, १-९ त्रिष्टुप्; ६ विराड्रूपा; १० अनुष्टुप् । अग्निर्देवः ।

समास्त्वाऽग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशः पृथिव्याः ॥
सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु माऽन्ये ॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने (१) सं वरणे भवा नः ।
सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन् पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥
क्षत्रेणाग्ने स्वायुः सꣳ रभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमस्था एधि राज्ञामग्ने विहव्यो दीदिहीह ॥
अति (२) निहो अति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीराꣳ रयिं दाः ॥
अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ।
विश्वा आशाः प्रमुञ्चन् मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे ॥
बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्सन्तराꣳ सꣳ शिशाधि ।
वर्धयैनं महते सौभगाय (३) विश्व एनमनु मदन्तु देवाः ॥
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥
उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ (अग्ने,ऽति, सौभगाय, चतुस्त्रिꣳशच्च) ॥ ७ ॥

आग्नेयो वाग्वापुरोऽनुवाक्याः ॥ १-६ पिपीलिकमध्यानुष्टुप्; ७,१०-१२ पिपीलिकमध्योष्णिक्; ८ पुरउष्णिक्; ९ शङ्कुमती गायत्री; १३-२० त्रिष्टुप् । अग्निर्देवः ।

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः ।
द्युमत्तमा सुप्रतीकस्य सूनोः ॥

तनूनपादसुरो विश्ववेदा देवो देवेषु देवः । पथ आनक्ति मध्वा घृतेन ॥
मध्वा यज्ञं नक्षसे प्रीणानो नराशꣳसो अग्ने । सुकृद्देवः सविता विश्ववारः ॥
अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा । अग्निꣳ स्रुचो अध्वरेषु प्रयत्सु ॥
स यक्षदस्य महिमानमग्नेः स (१) ई मन्द्रासु प्रयसः । वसुश्चेतिष्ठो वसुधातमश्च ॥
द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥
ते अस्य योषणे दिव्ये न योना उषासानक्ता । इमं यज्ञमवतामध्वरं नः ॥
दैव्या होताराऊर्ध्वमध्वरं नोऽग्नेर्जिह्वामभि गृणीतम् । कृणुतं नः स्विष्टिम् ॥
तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती (२) भारती । मही गृणाना ॥
तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीरम् । रायस्पोषं वि ष्यतु नाभिमस्मे ॥
वनस्पतेऽव सृजा रराणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति ॥
अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदं जुषन्ताम् ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्या- (३) -मुतेमां कस्मै देवाय हविषा विधेम ॥
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सहा- (४) -ऽऽहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥
यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितौ व्येति कस्मै देवाय हविषा विधेम ॥
येन द्यौरुग्रा पृथिवी च दृढे येन सुवः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥
आपो ह यन्महतीर्विश्व- (५) -मायन् दक्षं दधाना जनयन्तीरग्निम् ।
ततो देवानां निरवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीरग्निम् ।
यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥ (म, सरस्वती, द्याꣳ, सह, विश्वं, चतुश्चत्वारिꣳशच्च) ॥८॥

अग्न्युत्पादनम् ॥ ७-८, १५-१६ अनुष्टुप्; ११-१३ गायत्री; ९, १४ त्रिष्टुप्; १० पिपीलिकमध्योष्णिक् । अग्निर्देवता ।

आकूतिमग्निं प्रयुजꣳ स्वाहा मनो मेधामग्निं प्रयुजꣳ स्वाहा चित्तं विज्ञातमग्निं प्रयुजꣳ स्वाहा वाचो विधृतिमग्निं प्रयुजꣳ स्वाहा प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वाहा
विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा ॥
मा सु भित्था मा सु रिषो दृꣳहस्व वीडयस्व सु । अम्ब धृष्णु वीरयस्वा (१) ग्निश्चेदं करिष्यथः ॥
दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृताऽसि ।
जुष्टं देवानामिदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥
मित्रैतामुखां तपैषा मा भेदि । एतां ते परि ददाम्यभित्त्यै ॥
द्रुन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥
परस्या अधि संवतोऽवराꣳ अभ्या (२) तर । यत्राहमस्मि ताꣳ अव ॥
परमस्याः परावतो रोहिदश्व इहाऽऽगहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ॥
सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनामर्चिषा मा तपसाऽभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्वि भाहि ॥
अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपन् (३) जातवेदः शिवो भव ॥
शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहाऽसदः ॥
(वीरयस्वा,-ऽऽ, तपन्, विꣳशतिश्च) ॥९॥

अग्निधारणम् ॥ १-३, ५-१० अनुष्टुप्; ३-४, ११, १३ त्रिष्टुप्, १२ जगती । अग्निर्देवता ।

यदग्ने यानि कानि चाऽऽ ते दारूणि दध्मसि । तदस्तु तुभ्यमिद्घृतं तज्जुषस्व यविष्ठ्य ॥
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥
रात्रिꣳरात्रिमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥
नाभा (१) पृथिव्याः समिधानमग्निꣳ रायस्पोषाय बृहते हवामहे ।
इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥
याः सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्ताꣳस्ते अग्नेऽपि दधाम्यास्ये ॥
दꣳष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्कराꣳ उत ।
हनूभ्याꣳ स्तेनान् भगवस्ताꣳस्त्वं खाद सुखादितान् ॥
ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने । ये (२) कक्षेष्वघायवस्ताꣳस्ते दधामि जम्भयोः ॥

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निन्दाद्यो अस्मान् दिप्साच्च सर्वं तं मस्मसा कुरु ॥
सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम् । सꣳशितं क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः ॥
उदेषां बाहू अतिरमुद्वर्च उदू बलम् । क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि (३) स्वाꣳ अहम् ॥
दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥
विश्वा रूपाणि प्रति मुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत् सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावा क्षामा रुक्मो (४) अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥
सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दाꣳस्यङ्गानि धिष्णियाः शफा यजूꣳषि नाम ॥
सुपर्णोऽसि गरुत्मान् दिवं गच्छ सुवः पत ॥ (नाम, वे, नयामि, रुक्मो, ऽष्टाविꣳशतिश्च) ॥१०॥

यातुमन्यनकर्मसंबन्धिविहित याज्यापुरोऽनुवाक्याः ॥ १-७, ९, ११, १७, १९-२० गायत्री; १०, १२, १४, १८ त्रिष्टुप्; ८, १३ जगती । विश्वेदेवा देवताः ।

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥
सोम यास्ते मयोभुव ऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भव ॥
अग्निर्मूर्धा*- भुवः*- ॥
त्वं नः सोम*- या ते धामानि*- ॥
तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥
अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता (१) ।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥
चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥
पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रꣳ शरणꣳ सजोषा दुराधर्षं गृणते शर्म यꣳसत् ॥
पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजꣳ सनोतु नः ॥
शुक्रं ते अन्यद्यजतं ते अन्य- (२) -द्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥

(११।३-४) मै. सं. ४,२,४,१,३ । (११।५-६) तै. सं. २,३,१४,५-६ ।

तेऽवर्धन्त स्वतवसो महित्वनाऽऽ नाकं तस्थुरुरु चक्रिरे सदः ।
विष्णुर्यद्धाऽऽवद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहाꣳसि सहसा सहन्ते (३) रेजते अग्ने पृथिवी मखेभ्यः ॥
विश्वे देवाः*- विश्वे देवाः*- ॥
द्यावा नः पृथिवी इमꣳ सिध्रमद्य दिविस्पृशम् । यज्ञं देवेषु यच्छताम् ॥
प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वꣳ सदने ऋतस्य ।
आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम् ॥
अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥
स हव्यवाडमर्त्य उशिग्दूतश्चनोहितः (४) । अग्निर्धिया समृण्वति ॥
शं नो भवन्तु*- वाजेवाजे*- ॥ (पुरुत्वना, ऽन्यत्, सहन्ते, चनोहितो, ऽष्टौ च) ॥११॥

[युञ्जान २०३। इमां २७०। देवस्य १०७। सं १८६। वि २०४। वसवः १६९। समा १८४। ऊर्ध्वा २८४। आहुति १००। य-२३८-दम् २०८। एकादश ॥ २२९३ ॥]

[॥ इति चतुर्थकाण्डे प्रथमः प्रपाठकः ॥ १ ॥]

देवयजनग्रहाभिधानम् ।

[अथ द्वितीयः प्रपाठकः ॥ २ ॥] अग्निर्देवता ।

आवाहनाद्यग्निस्थापनम् ॥ ८-९ गायत्री; ११, १४-१५ अनुष्टुप्; ५, १०, १२-१३ त्रिष्टुप्; ६ ककुब्विराट्; ७ महाबृहती; १६ जगती ।

विष्णोः क्रमोऽस्यभिमातिहा गायत्रं छन्द आ रोह पृथिवीमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभं छन्द आ रोहान्तरिक्षमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः (१) क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आ रोह दिशोऽनु वि क्रमस्व निर्भक्तः स यं द्विष्मः ॥

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥
अग्नेऽभ्यावर्तिन्नभि न आ वर्तस्वाऽऽयुषा वर्चसा सन्या मेधया प्रजया धनेन ॥
अग्ने (२) अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः ।
तासां पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि ॥

(११।१५-१६) तै. सं. २,२,१४,१५-१७ । (११।२०-२२) तै. सं. १,७,८,१२,९ ।

पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥
सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि ॥
उदुत्तमं वरुण पाशमस्मदवाधमं (३) वि मध्यमꣳ श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥
आ त्वाऽहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्त्वस्मिन् राष्ट्रमधि श्रय ॥
अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषाऽऽगात् ।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥
सीद त्वं मातुरस्या (४) उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनामर्चिषा मा तपसाऽभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्वि भाहि ॥
अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥
शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् ।
शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहाऽऽसदः ॥
हꣳसः शुचिष-(५)-द्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥
(विष्णो,-रसे,ऽधम,-मस्याः, शुचिषत्, षोडश च) ॥ १ ॥

आसन्द्यां स्थापितस्याग्नेरुपस्थानम् ॥ त्रिष्टुप् । अग्निर्ऋषिः ।

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा (१) रजसि तस्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन् ॥
अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥
उशिक् पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत् ॥
विश्वस्य केतुर्भुवनस्य गर्भ आ (२) रोदसी अपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायन् जना यदग्निमयजन्त पञ्च ॥

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसोः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः ॥
यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरां वस्यो अच्छाभि द्युम्नं देवभक्तं यविष्ठ ॥
आ (३) तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥
त्वामग्ने यजमाना अनु द्यून् विश्वा वसूनि दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः ॥
दृशानो रुक्म उर्व्या व्यद्यौद् दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदे-(४)-नं द्यौरजनयत् सुरेताः ॥
(त्वा, गर्भ आ, यविष्ठ आ, यत्, चत्वारि च) ॥ २ ॥

चयनार्थस्य देवयजनस्य परिग्रहः ॥ त्रिष्टुप्; १ उपरिष्टाद्बृहती; २-३,८-१० अनुष्टुप्; ४,७,११-१२,१५ गायत्री । अग्निर्ऋषिः ।

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवतमः सुप्रतीको विभावसुः ॥
प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिस्त्वम् ।
बृहद्भिर्भानुभिर्भासन् मा हिꣳसीस्तनुवा प्रजाः ॥
समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आ (१) ऽस्मिन् हव्या जुहोतन ॥
प्रप्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥
आपो देवीः प्रति गृह्णीत भस्मैतत् स्योने कृणुध्वꣳ सुरभावु लोके ।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् ॥
अप्स्वग्ने सधिष्टव (२) सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सꣳसृज्य मातृभिस्त्वं ज्योतिष्मान् पुनराऽसदः ॥
पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्याꣳ शिवतमः ॥
पुनरूर्जा (२) नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥

सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्निया विश्वतस्परि ॥
पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥
बोधा नो अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु (४) त्वो गृणाति वन्दारुस्ते तनुवं वन्दे अग्ने ॥
स बोधि सूरिर्मघवा वसुदावा वसुपतिः । युयोध्यस्मद् द्वेषाꣳसि ॥
(आ, तवो,-र्जा,-नु, षोडश च) ॥ ३ ॥

गार्हपत्यचयनम् ॥ १, ५-७,९ त्रिष्टुप्; ४,८,१०,१३-१४ अनुष्टुप् । अग्निर्ऋषिः ।

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदादिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥
अग्नेर्भस्मास्यग्नेः पुरीषमसि संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् ॥
सं या वः प्रियास्तनुवः सं प्रिया हृदयानि वः ।
आत्मा वो अस्तु (१) संप्रियः संप्रियास्तनुवो मम ॥
अयꣳ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः ॥
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाꣳ ऊचिषे धिष्णिया ये ।
याः परस्ताद्रोचने सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥
अग्ने यत् ते दिवि वर्चः पृथिव्यां यदोषधीष्व-(२)-प्सु वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः । जुषन्ताꣳ हव्यमाहुतमनमीवा इषो महीः ॥
इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे ॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जान-(३)-न्नग्न आ रोहाथा नो वर्धया रयिम् ॥
चिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद परिचिदसि तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥
लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योनावसीषदन् ॥
ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ॥
(भस्मवो,-षधीषु, जान,-न्नष्टाचत्वारिꣳशच्च) ॥ ४ ॥

आहवनीयचयनार्थं भुवःकर्षणम् ॥ त्रिष्टुप्; १ महाबृहती; २ द्विपदा त्रिष्टुप्; ३,६,१९ अनुष्टुप्; ४, १७ पङ्क्तिः; ९ महासतोबृहती; १३ बृहती; १४-१५ गायत्री । अग्निर्ऋषिः ।

समितꣳ सं कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ ।
इषमूर्जमभि संवसानौ सं वां मनाꣳसि सं व्रता समु चित्तान्याऽकरम् ॥
अग्ने पुरीष्याधिपा भवा त्वं नः । इषमूर्जं यजमानाय धेहि ॥
पुरीष्यस्त्वमग्ने रयिमान् पुष्टिमाꣳ असि । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहाऽसदः ॥
भवतं नः समनसौ समोकसा-(१)-वरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः ॥
मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा ।
तां विश्वैर्देवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु ॥
यदस्य पारे रजसः शुक्रं ज्योतिरजायत । तं नः पर्षदति द्विषोऽग्ने वैश्वानर स्वाहा ॥
नमः सु ते निर्ऋते विश्वरूपे (२) ऽयस्मयं वि चृता बन्धमेतम् ।
यमेन त्वं यम्या संविदानोत्तमं नाकमधि रोहयेमम् ॥
यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचर्त्यम् ।
इदं ते तद्वि ष्याम्यायुषो न मध्यादथा जीवः पितुमद्धि प्रमुक्तः ॥
यस्यास्ते अस्याः क्रूर आसञ्जुहोम्येषां बन्धानामवसर्जनाय ।
भूमिरिति त्वा जना विदुर्निर्ऋति-(३)-रिति त्वाऽहं परि वेद विश्वतः ॥
असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥
देवीमहं निर्ऋतिं वन्दमानः पितेव पुत्रं दसये वचोभिः ।
विश्वस्य या जायमानस्य वेद शिरःशिरः प्रति सूरी वि चष्टे ॥
निवेशनः सङ्गमनो वसूनां विश्वा रूपाऽभि चष्टे (४) शचीभिः ।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥
सं वरत्रा दधातन निराहावान् कृणोतन ।
सिञ्चामहा अवटमुद्रिणं वयं विश्वाऽहाऽदस्तमक्षितम् ॥
निष्कृताहावमवटꣳ सुवरत्रꣳ सुषेचनम् । उद्रिणꣳ सिञ्चे अक्षितम् ॥
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नयौ ॥
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह (५) बीजम् ।

गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमा ऽयवन् ॥
लाङ्गलं पवीरवꣳ सुशेवꣳ सुमतित्सरु ।
उदित् कृषति गामविं प्रफर्व्यं च पीवरीम् । प्रस्थावद्रथवाहनम् ॥
शुनं नः फाला वि तुदन्तु भूमिꣳ शुनं कीनाशा अभि यन्तु वाहान् ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥
कामं कामदुघे धुक्ष्व मित्राय (६) वरुणाय च ।
इन्द्रायाग्नये पूष्ण ओषधीभ्यः प्रजाभ्यः ॥
घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानाऽस्मान्त्सीते पयसाऽभ्याववृत्स्व ॥
(सभाकमी, विश्वके,–त्रिवृन्निर्ऋति,–रुभि षड्, इड, मित्राय, द्वाविंशतिश्च) ॥ ५ ॥

कृष्यर्थं भूमि ओषधिविधानः ॥ अनुष्टुप्; ९ बृहती । अग्निर्देवता ।

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा । मन्दामि बभ्रूणामहꣳ शतं धामानि सप्त च ॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः । अथा शतक्रत्वो यूयमिमं मे अगदं कृत ॥
पुष्पावतीः प्रसूवतीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । रपाꣳसि विघ्नतीरित रप-(१)-श्चातयमानाः ॥
अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता । गोभाज इत् किलासथ यत् सनवथ पूरुषम् ॥
यदहं वाजयन्निमा ओषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥
यदोषधयः सङ्गच्छन्ते राजानः समिताविव । विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः ॥
निष्कृतिर्नाम वो माताऽथा यूयꣳ स्थ सङ्कृतीः ।
सराः पतत्रिणीः (२) स्थन यदामयति निष्कृत ॥
अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत ।
ताः सर्वा ओषधयः संविदाना इदं मे प्रावता वचः ॥
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष ॥
अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः ।
ओषधयः प्राचुच्यवुर्यत् किं च तनुवाꣳ रपः ॥
या-(३)-स्त आतस्थुरात्मानं या आविविशुः परुःपरुः ।
तास्ते यक्ष्मं वि बाधन्तामुग्रो मध्यमशीरिव ॥
साकं यक्ष्म प्र पत श्येनेन किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥

अश्वावतीꣳ सोमवतीमूर्जयन्तीमुदोजसम् । आ वित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥
या (४) ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु ।
तासां त्वमस्युत्तमा प्र णो जीवातवे सुव ॥
अवपतन्तीरवदन् दिव ओषधयः परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ।
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । इह सङ्गत्य ताः सर्वा अस्मै सं दत्त भेषजम् ॥
मा वो रिषत् खनिता यस्मै चाहं खनामि वः (५) ।
द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम् ॥
ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै करोति ब्राह्मणस्तꣳ राजन् पारयामसि ॥
(रपः, पतत्रिणी,–र्या, या, वो, ऽष्टादश च) ॥ ६ ॥

लोष्टक्षेपादिकम् ॥ १,४,१३ त्रिष्टुप्; २ उष्णिक्; ३,१२ गायत्री; ५,८ विष्टारपङ्क्तिः; ६–७,१० सतोबृहती; ९ उपरिष्टाज्ज्योतिः । अग्निर्देवता ।

मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥
अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितोऽव सर्पतु ॥
अग्ने यत् ते शुक्रं यच्चन्द्रं यत् पूतं यद्यज्ञियम् । तद्देवेभ्यो भरामसि ॥
इषमूर्जमहमित आ (१) दद ऋतस्य धाम्नो अमृतस्य योनेः ।
आ नो गोषु विशत्वौषधीषु जहामि सेदिमनिराममीवाम् ॥
अग्ने तव श्रवो वयो महि भ्राजन्त्यर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिꣳ रयिम् ।
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व (२) धीतिभिर्हितः ।
त्वे इषः सं दधुर्भूरिरेतसश्चित्रोतयो वामजाताः ॥
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रः पितरा विचरन्नुपावस्युभे पृणक्षि रोदसी ॥
ऋतावानं महिषं विश्वचर्षणिमग्निꣳ सुम्नाय दधिरे पुरो जनाः ।

श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ।
निष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसे महे ।
रातिं भृगूणामुशिजं कविक्रतुं पृणक्षि सानसिꣳ (३) रयिम् ॥
चितः स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाऽङ्गिरस्वद् ध्रुवाः सीदत ॥
आ प्यायस्व समेतु ते विश्वतः सोम वृष्णियम् । भवा वाजस्य सङ्गथे ॥
सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्णियान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥
(आ, मन्दस्व, मानुषि,–मेकचत्वारिꣳशच्च) ॥ ७ ॥

अभ्यवस्कन्दनादिमन्त्राः ॥ १–६ त्रिष्टुप्; ७–९ अनुष्टुप् । अग्निर्देवता ।

अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह ।
बृहस्पतिः सविता तन्म आह पूषा माऽधात् सुकृतस्य लोके ॥
यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुतं जनिम तत् ते अर्वन् ॥
अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम् ।
वर्धमानं महः (१) आ च पुष्करं दिवो मात्रया वरिणा प्रथस्व ॥
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
द्रप्सश्चस्कन्द पृथिवीमनु (२) द्यामिमं च योनिमनु यश्च पूर्वः ।
तृतीयं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥
नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥
येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः ॥
या इषवो यातुधानानां (३) ये वा वनस्पतीꣳरनु । ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥
(महो, अनु, यातुधानानां,– मेकादश च) ॥ ८ ॥

स्वयमातृण्णाद्युपधानम् ॥ १ बृहती; २–४,१४ अनुष्टुप्; ७–११,१६–१७ गायत्री; १३ महापङ्क्तिः, १८,२१–२२ त्रिष्टुप् । अग्निर्देवता ।

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुकृता ।
मा त्वा समुद्र उद्वधीन्मा सुपर्णो व्यथमाना पृथिवीं दृꣳह ॥

प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोऽसि पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै (१) चरित्रायाग्निस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥
काण्डात्काण्डात् प्ररोहन्ती परुषः परुषः परि । एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥
अषाढाऽसि सहमाना सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व पृतन्यतः ।
सहस्रवीर्या (२) सि सा मा जिन्व ॥
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥
मधु नक्तमुतोषसि मधुमत् पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥
मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥
तद्विष्णोः परमं (३) पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥
ध्रुवाऽसि पृथिवि सहस्व पृतन्यतः । स्यूता देवेभिरमृतेनाऽऽगाः ॥
यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः ।
ताभिः सर्वाभी रुचे जनाय नस्कृधि ॥
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥
विराड् (४) ज्योतिरधारयत् सम्राड् ज्योतिरधारयत् स्वराड् ज्योतिरधारयत् ॥
अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥
युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
तृतीयं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त (५) होत्राः ॥
अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ।
अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् ॥
ऋचे त्वा रुचे त्वा समित् स्रवन्ति सरितो न धेनाः ।
अन्तर्हृदा मनसा पूयमानाः ॥
घृतस्य धारा अभि चाकशीमि । हिरण्ययो वेतसो मध्य आसाम् ॥

तस्मिन्त्सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधु देवताभ्यः ।
तस्याऽऽसते हरयः सप्त तीरे (६) स्वधां दुहाना अमृतस्य धाराम् ॥
(प्रतिष्ठायै, सहस्रवीर्यं परमं, विराट्, सप्त, तीरे, चत्वारि च) ॥ ९ ॥

पशुशीर्षोपधानम् ॥ त्रिष्टुप्, ६,८,१० जगती ॥ अग्निर्ऋषिः ।

आदित्यं गर्भं पयसा समञ्जन्त्सहस्रस्य प्रतिमां विश्वरूपम् ।
परि वृङ्धि हरसा माऽभि मृक्षः शतायुषं कृणुहि चीयमानः ॥
इमं मा हिꣳसीर्द्विपादं पशूनाꣳ सहस्राक्ष मेध आ चीयमानः ।
मयुमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥
वातस्य ध्राजिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः (१) परमे व्योमन् ॥
इमं मा हिꣳसीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥
अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तौ नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिं विराजम् ॥
इमꣳ समुद्रꣳ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा (२) हिꣳसीः परमे व्योमन् ।
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥
वरूत्रिं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥
इमामूर्णायुं वरुणस्य मायां त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिꣳसीः परमे व्योमन् ।
उष्ट्रमारण्यमनु (३) ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥
यो अग्निरग्नेस्तपसोऽधि जातः शोचात् पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा व्यानट् तमग्ने हेडः परि ते वृणक्तु ॥
अजा ह्यग्नेरजनिष्ट गर्भात् सा वा अपश्यज्जनितारमग्रे ।
तया रोहमायन्नुप मेध्यासस्तया देवा देवतामग्र आयन् ।
तया शरभ-(४)-मारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद ॥
(हिꣳसीः,-मां, ऽनु, शरभं, नव च) ॥ १० ॥
२१ (तै. सं.)

याज्यानुवाक्याः ॥ गायत्री; २,६,१० त्रिष्टुप् ॥ विश्वेदेवा ऋषयः ।
इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥
श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥
प्र चर्षणिभ्यः पृतना हवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनाऽत्यन्या ॥
मरुतो यस्य हि (१) क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥
यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् । मरुतः शृणुता हवम् ॥
श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥
अव ते हेडः- उदुत्तमम् - ।
कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता (२) ॥
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत् स जीवात् ॥
अग्ने नय-ऽऽदेवानाꣳ- शं नो भवन्तु-वाजेवाजे- ।
अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥
वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ।
इमं मे (३) वरुण-तत्त्वा यामि-त्वं नो अग्ने-स त्वं नो अग्ने ॥
(हि, वृता, म, एकादश च) ॥ ११ ॥
[विष्णो- २६६ । दिवो २०४ । ऽग्नेपुते २१६ । ऽपु १९८ । सं १२२ । वा २६८ । मा १८९ । ऽभि १९१ । भुवा १०४ । ऽऽदित्य-२०९ । मिन्द्राग्नी १६१ । एकादश ॥ २४९८ ॥]
[॥ इति चतुर्थकाण्डे द्वितीयः प्रपाठकः ॥२॥]

चितिवर्णनम् ।

[अथ तृतीयः प्रपाठकः ॥३॥]
प्रथमचितौ अपस्याभिधानेष्टकोपधानम् ॥ अग्निर्ऋषिः ।
अपां त्वेमन्त्सादयाम्य-पां त्वोद्मन्त्सादयाम्य-पां त्वा भस्मन्त्सादयाम्य-पां त्वा ज्योतिषि
सादयाम्य-पां त्वाऽयने सादयाम्य-र्णवे सदने सीद समुद्रे सदने सीद सलिले सदने

(१।१७-८) तै. सं. १।५।११।९-१०, (१।११-१२) तै. सं. १।१।१४।९-१०, (१।१३-१४) तै. सं. १।७।८।१२,१
(१।१७-१८) तै. सं. २।१।११।२१-२२, (१।१९-२०) तै. सं. २।५।१२।२२-२३ ।

सीदा-पां क्षये सीदा-पाꣳ सधिषि सीदा-पां त्वा सदने सादयाम्य-पां त्वा सधस्थे सादयाम्य-पां त्वा पुरीषे सादयाम्य-पां त्वा योनौ (१) सादयाम्य-पां त्वा पाथसि सादयामि गायत्री छन्द-स्त्रिष्टुप् छन्दो जगती छन्दो-ऽनुष्टुप् छन्दः पङ्क्तिश्छन्दः ॥ (योनौ, पञ्चदश च) ॥१॥

प्रथमचितौ प्राणभृदिष्टकोपधानम् ॥ अग्निर्ऋषिः ।
अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्रियै गायत्रं गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत् त्रिवृतो रथन्तरꣳ रथन्तराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यो ऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशाद्बृहद् बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो (१) गृह्णामि प्रजाभ्यो ऽयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या ऋक्षममृक्षमाच्छुक्रः शुक्रात् सप्तदशः सप्तदशाद्वैरूपं वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इदमुत्तरात् सुवस्तस्य श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप्छारद्यनुष्टुभः स्वारꣳ स्वारान्मन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजं वैराजाज्जमदग्निर्ऋषिः प्रजापतिगृहीतया (२) त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमुपरि मतिस्तस्यै वाङ्माती हेमन्तो वाच्यायनः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात् त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते शाक्वररैवताभ्यां विश्वकर्मर्षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ॥
(मनः, प्रजापतिगृहीतया, त्रिꣳशच्च) ॥ २ ॥

प्रथमचितौ अपानभृदिष्टकोपधानम् ॥ अग्निर्ऋषिः ।
प्राची दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत् स्तोमः स उ पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषि-र्दक्षिणा दिशां ग्रीष्म ऋतूनामिन्द्रो देवता क्षत्रं द्रविणं पञ्चदशः स्तोमः स उ सप्तदशवर्तनिर्दित्यवाड्वयस्त्रेताऽयानां दक्षिणाद्वातो वातः सनातन ऋषिः-प्रतीची दिशां वर्षा ऋतूनां विश्वे देवा देवता विट् (१) द्रविणꣳ सप्तदशः स्तोमः स उ एकविꣳशवर्तनिस्त्रिवत्सो वयो द्वापरोऽयानां पश्चाद्वातो वातोऽहभून ऋषि-रुदीची दिशाꣳ शरदृतूनां मित्रावरुणौ देवता पुष्टं द्रविणमेकविꣳशः स्तोमः स उ त्रिणववर्तनिस्तुर्यवाड् वय आस्कन्दोऽयानामुत्तराद्वातो वातः प्रत्न ऋषि-रूर्ध्वा दिशाꣳ हेमन्तशिशिरावृतूनां बृहस्पतिर्देवता वर्चो द्रविणं त्रिणवः स्तोमः स उ त्रयस्त्रिꣳशवर्तनिः पष्ठवाद्वयो (२) ऽभिभूरयानां विष्वग्वातो वातः सुपर्ण ऋषिः पितरः पितामहाः परेऽवरे ते नः पान्तु ते नोऽवन्त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याम् ॥ (विट्, वयो, ऽष्टाविꣳशतिश्च) ॥ ३ ॥

(३।१-४) पितरः... देवहूत्याम् ।

द्वितीयचितावाश्विन्यादीष्टकोपधानम् ॥ अग्निर्ऋषिः ।
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवां योनिमा सीद साध्या ।
उख्यस्य केतुं प्रथमं पुरस्तादश्विनाऽध्वर्यू सादयतामिह त्वा ॥
स्वे दक्षे दक्षपितेह सीद देवत्रा पृथिवी बृहती रराणा ।
स्वासस्था तनुवा सं विशस्व पितेवैधि सूनव आ सुशेवाऽश्विनाऽध्वर्यू सादयतामिह त्वा ॥
कुलायिनी वसुमती वयोधा रयिं नो वर्ध बहुलꣳ सुवीरम् (१) ।
अपामतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्धेहि यजमानाय पोषमश्विना-
ऽध्वर्यू सादयतामिह त्वा ॥
अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभि गृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽयजस्वाश्विनाऽध्वर्यू सादयतामिह त्वा ॥
दिवो मूर्धाऽसि पृथिव्या नाभिर्विष्टम्भनी दिशामधिपत्नी भुवनानाम् (२) ॥
ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा ॥
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः-सजू रुद्रैः-सजूरादित्यैः-सजूर्विश्वैर्देवैः-सजूर्देवैः
सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू सादयतामिह त्वा ॥
प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्म उर्व्या (३) वि भाहि श्रोत्रं मे श्लोकया-प-
स्पिन्वौषधीर्जिन्व द्विपात् पाहि चतुष्पादव दिवो वृष्टिमेरय ॥ (सुवीरं, भुवनाना,-मुर्व्या सप्तदश च) ॥४॥

द्वितीयचितौ वयस्याख्येष्टकोपधानम् ॥ अग्निर्ऋषिः ।
त्र्यविर्वयस्त्रिष्टुप् छन्दो दित्यवाड् वयो विराट् छन्दः पञ्चाविर्वयो गायत्री छन्द-स्त्रिवत्सो वय उष्णिहा छन्द- स्तुर्यवाड् वयोऽनुष्टुप् छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः सतोबृहती छन्द ऋषभो वयः ककुच्छन्दो धेनुर्वयो जगती छन्दो ऽनड्वान् वयः पङ्क्तिश्छन्दो बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वय-(१)-स्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिꣳहो वयश्छदिश्छन्दो विष्टम्भो वयोऽधिपतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो मूर्धा वयः प्रजापतिश्छन्दः ॥
(वयः, षड्विꣳशतिश्च) ॥ ५ ॥

तृतीयचितौ स्वयमातृण्णाद्युपधानम् ॥ अग्निर्ऋषिः ।
इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम् । पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधताम् ॥
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीꣳ सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायो-

(४।६-९) -सजूर्देवैर्वयो...त्वा । (४।७-१०) -सजूर्ऋतु...धाभिः ।

दानाय प्रतिष्ठायै चरित्राय वायुस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा (१) शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥

राज्ञ्यसि प्राची दिग् विराडसि दक्षिणा दिक् सम्राडसि प्रतीची दिक् स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगायुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जिन्व वाचं मे पिन्वा-(२)-ऽऽत्मानं मे पाहि ज्योतिर्मे यच्छ ॥ (छर्दिषा, जिन्व, षट् च) ॥ ६ ॥

तृतीयचितौ छन्दस्योपधानम् ॥ अग्निर्ऋषिः ।

मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽस्रीविश्छन्दः पङ्क्तिश्छन्द उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप् छन्दो विराट् छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो मनश्छन्दो वाक् छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छन्दः ॥

अग्निर्देवता (१) वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता विश्वे देवा देवता मरुतो देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता मूर्धाऽसि राड् ध्रुवाऽसि धरुणा यन्त्र्यसि यमित्री ष त्वोर्जे त्वा कृष्यै त्वा क्षेमाय त्वा यन्त्री राड् ध्रुवाऽसि धरणी धर्त्र्यसि धरित्र्यायुषे त्वा (२) वर्चसे त्वौजसे त्वा बलाय त्वा ॥ (देवता, त्वा, षट् च) ॥ ७ ॥

चतुर्थचितौ स्तोमीयाख्येष्टकासु काश्चिदुपधानम् ॥ अग्निर्ऋषिः ।

आशुस्त्रिवृद्भान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभिवर्तः सविंशो धरुण एकविंशो वर्चो द्वाविंशः सम्भरणस्त्रयोविंशो योनिश्चतुर्विंशो गर्भाः पञ्चविंशा ओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा त्रयस्त्रिंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशो नाकः षट्त्रिंशो विवर्तोऽष्टाचत्वारिंशो धर्त्रश्चतुष्टोमः ॥ (आशुः सप्तत्रिंशच्च) ॥ ८ ॥

अवशिष्टस्तोमीयोपधानम् ॥ अग्निर्ऋषिः ।

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत् स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदशः स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याऽऽधिपत्यं दिवो वृष्टिर्वाताः स्पृता एकविंशः स्तोमोऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतं त्रिणवः स्तोमो वसूनां भागोऽसि (१) रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विंशः स्तोम आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भाः स्पृताः पञ्च-

विंशः स्तोमो देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ समीचीर्दिशः स्पृताश्चतुष्टोमः स्तोमो यावानां भागोऽस्ययावानामाधिपत्यं प्रजाः स्पृताश्चतुश्चत्वारिंशः स्तोम ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं निशान्तꣳ स्पृतं त्रयस्त्रिंशः स्तोमः ॥

(वसूनां भागोऽसि, षट्चत्वारिंशच्च) ॥ ९ ॥

सृष्टयभिधेयेष्टकोपधानम् ॥ अग्निर्ऋषिः ।

एकयाऽस्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत् तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत् पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत् सप्तभिरस्तुवत सप्तर्षयोऽसृज्यन्त धाताऽधिपतिरासीन्नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतर्तवोऽसृज्यन्ताऽऽर्तवोऽधिपतिरासीत् त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपति-(१)-रासीत् पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्तामेकविंशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत् त्रयोविंशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत् पञ्चविंशत्याऽस्तुवताऽऽरण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत् सप्तविंशत्याऽस्तुवत द्यावापृथिवी व्यै-(२)-तां वसवो रुद्रा आदित्या अनु व्यायन् तेषामाधिपत्यमासीन्नवविंशत्याऽस्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपतिरासीदेकत्रिंशताऽस्तुवत प्रजा असृज्यन्त यावानां चायावानां चाऽऽधिपत्यमासीत् त्रयस्त्रिंशताऽस्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥ (अधिपति-र्वि, पञ्चत्रिंशच्च) ॥ १० ॥

चतुर्थचितौ व्युष्टिसंज्ञकेष्टकोपधानम् ॥ त्रिष्टुप्; २, ४ जगती; १३ अनुष्टुप् ॥ अग्निर्ऋषिः ।

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा ।
वधूर्जजान नवगज्जनित्री त्रय एनां महिमानः सचन्ते ॥
छन्दस्वती उषसा पेपिशाने समानं योनिमनु सञ्चरन्ती ।
सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा ॥
ऋतस्य पन्थामनु तिस्र आऽगुस्त्रयो घर्मासो अनु ज्योतिषाऽऽगुः ।
प्रजामेका रक्षत्यूर्जमेका (१) व्रतमेका रक्षति देवयूनाम् ॥
चतुष्टोमो अभवद्या तुरीया यज्ञस्य पक्षावृषयो भवन्ती ।
गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युञ्जानाः सुवराऽभरन्निदम् ॥
पञ्चभिर्धाता वि दधाविदं यत् तासाꣳ स्वसृरजनयत् पञ्चपञ्च ।
तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः ॥

त्रिꣳशत् स्वसार उप यन्ति निष्कृतꣳ समानं केतुं प्रतिमुञ्चमानाः (२) ।
ऋतूꣳस्तन्वते कवयः प्रजानतीर्मध्येछन्दसः परि यन्ति भास्वतीः ॥
ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि ।
वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे ॥
एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम् ।
तेन दस्यून् व्यसहन्त देवा हन्ताऽसुराणामभवच्छचीभिः ॥
अनानुजामनुजां मामकर्त सत्यं वदन्त्यन्विच्छ एतत् ।
भूयास-(३)-मस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त ॥
अभून्मम सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधम् ।
भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्र युक्त ॥
पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च ।
पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरभि लोकमेकम् (४) ॥
ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति ।
सूर्यस्यैका चरति निष्कृतेषु घर्मस्यैका सवितैकां नि यच्छति ॥
या प्रथमा व्यौच्छत् सा धेनुरभवद्यमे ।
सा नः पयस्वती धुक्ष्वोत्तरामुत्तराꣳ समाम् ॥
शुक्रर्षभा नभसा ज्योतिषाऽऽगाद्विश्वरूपा शबलीरग्निकेतुः ।
समानमर्थꣳ स्वपस्यमाना बिभ्रती जरामजर उष आऽगाः ॥
ऋतूनां पत्नी (५) प्रथमेयमाऽगादह्नां नेत्री जनित्री प्रजानाम् ।
एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत् ॥
(दृढा, प्रतिमुञ्चमाना, भूयास,- मेकं, पत्नी,- द्वाविꣳशतिश्च) ॥ ११ ॥

सपत्नविनाशकमन्त्रेष्टकोपधानम् ॥ १-२ त्रिष्टुप् ॥ अग्निर्ऋषिः ।

अग्ने जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अस्मे दीदिहि सुमना अहेडन् तव स्याꣳ शर्मन् त्रिवरूथ उद्भित् ॥
सहसा जातान् प्र णुदा नः सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्र णुदा नः सपत्नान् ॥

चतुश्चत्वारिꣳशः स्तोमो वर्चो द्रविणꣳ षोडशः स्तोम ओजो द्रविणं पृथिव्याः पुरीषमस्य-(१)-प्सो नाम । एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मन-

श्छन्दो व्यचश्छन्दः सिन्धुश्छन्दः समुद्रं छन्दः सलिलं छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरं छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सꣳस्तुप् छन्दोऽनुष्टुप् छन्दः ककुच्छन्दस्त्रिककुच्छन्दः काव्यं छन्दोऽङ्कुपं छन्दः (२) पदपङ्क्तिश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भृज्वान् छन्दः प्रच्छच्छन्दः पक्षश्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विशालं छन्दो विष्पर्धाश्छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दोऽङ्काङ्कं छन्दः ॥ (अस्य, छन्दः,-त्रयस्त्रिꣳशच्च) ॥ १२ ॥

याज्यानुवाक्याः ॥ गायत्री; ३-७, ११-१८, १९, २३-२५ त्रिष्टुप्; २०-२१ विराट् ॥ विश्वे देवा ऋषयः ।

अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः ॥
त्वꣳ सोमासि सत्पतिस्त्वꣳ राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥
भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः ।
न यत् ते शोचिस्तमसा वरन्त न ध्वस्मानस्तनुवि रेप आ धुः ॥
भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य (१) ।
रुशद् दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् ॥
सेनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद् दिदीहि ॥
स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव ।
यत् सीमहि दिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रम् ॥
यथा होतर्मनुषो (२) देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥
अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारꣳ रत्नधातमम् ॥
वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥
सान्तपना इदꣳ हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥
यो नो मर्तो वसवो दुर्हृणायुस्तिरः सत्यानि मरुतो (३) जिघाꣳसात् ।
द्रुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तम् ॥
संवत्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषासः ।
तेऽस्मत् पाशान् प्र मुञ्चन्त्वꣳहसः सान्तपना मदिरा मादयिष्णवः ॥

विप्रीहि देवाꣳ उशतो यविष्ठ विद्वाꣳ ऋतूꣳरृतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वꣳ होतृणामस्यायजिष्ठः ॥
अग्ने यदद्य विशो अध्वरस्य होतः पावक (४) शोचे वेष्ट्वꣳ हि यज्वा ।
ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥
अग्निना रयिमश्नवत् पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ॥
गयस्फानो अमीवहा वसुवित् पुष्टिवर्धनः । सुमित्रः सोम नो भव ॥
गृहमेधास आ गत मरुतो माऽप भूतन । प्रमुञ्चन्तो नो अꣳहसः ॥
पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् । महोभि-(५)-श्चर्षणीनाम् ॥
प्र बुध्निया ईरते वो महाꣳसि प्र णामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ॥
उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची । उप स्वैनमरमतिर्वसूयुः ॥
इमो अग्ने वीततमानि हव्याऽजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईꣳ सुरभीणि वियन्तु ॥
क्रीडं वः शर्धो मारुतमनर्वाणꣳ रथेशुभम् (६) । कण्वा अभि प्र गायत ॥
अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीडिनः पयोधाः ॥
प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे ।
ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥
उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन (७) चित् पथा ।
श्चोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥
अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् ॥
तꣳ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता । अग्निꣳ हव्याय वोढवे ॥
इन्द्राग्नी रोचना दिवः॰-श्नथद्वृत्र॰-मिन्द्रं वो विश्वतस्परि॰-न्द्रं नरो॰- विश्वकर्मन् हविषा वावृधानो॰-विश्वकर्मन् हविषा वर्धनेन॰- ॥
(सूर्यस्य, मनुषो, मरुतः, पावक, महोभी, रथेशुभं, केन, पञ्चचत्वारिꣳशच्च) ॥ १३ ॥
(सूर्यस्य, मनुषो, मरुतः, पावक, महोभी, रथेशुभं, केन, पञ्चचत्वारिꣳशच्च) ॥ १३ ॥ (सूर्यस्य, मनुषो ...)

[अपा-६५।-मयं १३० । प्राची १२८। ध्रुवक्षिति-१६७।-स्यवि-७६।-रिग्नाभी १०६। मा १०६। ऽऽशुः२७। तुभ्ये-९६।-रेक्ये १२५।-य-२६९।मग्ने १३३। ऽग्नि-३९६। त्रयोदश ॥ १८४४ ॥]

[॥ इति चतुर्थकाण्डे तृतीयः प्रपाठकः ॥३॥]

(१३।२८-२९) तै. सं. ४।२।११।१-२, (१३।३०-३१) तै. सं. १।६।१२।१-२, (१३।३२-३३) तै. सं. ४।६।२।१५-१६।

पञ्चमचितिशेषनिरूपणम् ।

[अथ चतुर्थः प्रपाठकः ॥४॥]

पञ्चमचितिशेषस्तोमभागाख्येष्टकोपधानम् ॥ अग्निर्ऋषिः ।

रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्माय त्वा धर्मं जिन्वा–न्वितिरसि दिवे त्वा दिवं जिन्व सन्धिरस्यन्तरिक्षाय त्वाऽन्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व प्रवाऽस्यह्ने त्वाऽहर्जिन्वा–नुवाऽसि रात्रियै त्वा रात्रिं जिन्वो–शिगसि (१) वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदीतिरस्यादित्येभ्यस्त्वाऽऽदित्याञ्जिन्वौ–जोऽसि पितृभ्यस्त्वा पितॄञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वा–भिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वा–धिपतिरसि प्राणाय (२) त्वा प्राणं जिन्व यन्ताऽस्यपानाय त्वाऽपानं जिन्व सꣳसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व त्रिवृदसि प्रवृदसि संवृदसि विवृदसि सꣳरोहोऽसि नीरोहोऽसि प्ररोहोऽस्यनु–रोहोऽसि वसुकोऽसि वेषश्रिरसि वस्यष्टिरसि ॥

(असि, प्राणाय, त्रिचत्वारिꣳशच्च) ॥ १ ॥

नाकसदाख्येष्टकोपधानम् ॥ अग्निर्ऋषिः ॥

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत् त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथयत् स्तभ्नातु रथन्तरꣳ साम प्रतिष्ठित्यै॰-विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथयत् स्तभ्नातु बृहत् साम प्रतिष्ठित्यै॰-सम्राडसि प्रतीची दि-(१)-गादित्यास्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीयमुक्थमव्यथयत् स्तभ्नातु वैरूपꣳ साम प्रतिष्ठित्यै॰-स्वराडस्युदीची दिग्विश्वे ते देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तैकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु निष्केवल्यमुक्थमव्यथयत् स्तभ्नातु वैराजꣳ साम प्रतिष्ठित्या॰- अधिपत्न्यसि बृहती दिङ्मरुतस्ते देवा अधिपतयो (२) बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथयन्ती स्तभ्नीताꣳ शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु ॥

(दि,-गधिपतय,- श्चत्वारिꣳशच्च) ॥ २ ॥

चोदाख्येष्टकोपधानम् ॥ ८ त्रिष्टुप् । अग्निर्ऋषिः ।

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थला च कृतस्थ-

(२।१-४) अन्तरिक्षाय...सादयन्तु ।

ला चाप्सरसौ यातुधाना हेती रक्षाꣳसि प्रहेति–॰-रयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेति–॰-रयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती चा-(१)-नुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेति–॰-रयमुत्तरात् संयद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेति–॰-रयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन् प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यं (२) द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधाम्या–योस्त्वा सदने सादयाम्यवतश्छायायां नमः समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूमतीं परिभूमतीं दिवं यच्छ दिवं दृꣳह दिवं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या (३) छर्दिषा शन्तमेन तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥

प्रोथदश्वो न यवसे अविष्यन् यदा महः संवरणाद् व्यस्थात् ।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥

(च, यं, स्वस्त्या, ऽष्टाविꣳशतिश्च) ॥ ३ ॥

छन्दोभिधेष्टकोपधानम् ॥ १-३ गायत्री; ४-६ त्रिष्टुप्, ७-९ जगती; १०-१२ अनुष्टुप्; १३-१५ बृहती; १४ सतोबृहती; १६-१८ उष्णिक्; १९-२१ पङ्क्तिः; २२-२५ अक्षरपङ्क्तिः; २६ अत्यष्टिः; २७-२९ द्विपदा ॥ अग्निर्ऋषिः ॥

अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति ॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥
अबोध्यग्निः समिधा जनानां (१) प्रति धेनुमिवाऽऽयतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत् ॥
जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥
त्वामग्ने अङ्गिरसो (२) गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत् त्वामाहुः सहसस्पुत्रमङ्गिरः ॥

(३।१-५) तेभ्यो... दधामि ।

यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ॥
सखायः सं वः सम्यञ्चमिषꣳ (३) स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥
सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्या भर ॥
एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ॥
स योजते अरुषो विश्वभोजसा स दुद्रवत् स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी (४) वसूनां देवꣳ राधो जनानाम् ॥
उदस्य शोचिरस्थादाजुह्वानस्य मीढुषः ।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥
अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥
स इधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥
क्षपो राजन्नुत त्मनाऽग्ने वस्तोरुतोषसः । स तिग्मजम्भ (५) रक्षसो दह प्रति ॥
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर ॥
आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यꣳ हूयत इषꣳ स्तोतृभ्य आ भर ॥
उभे सुश्चन्द्र सर्पिषो दर्वी श्रीणीष आसनि ।
उतो न उत् पुपूर्या (६) उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ॥
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः ॥
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ॥
आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः ॥
एभिर्नो अर्कैर्भवा नो अर्वाङ् (७) सुवर्न ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ॥
अग्निꣳ होतारं मन्ये दास्वन्तं वसोः सूनुꣳ सहसो जातवेदसम् । विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥
अग्ने त्वं नो अन्तमः । उत त्राता शिवो भव वरूथ्यः ॥

हं त्वा शोचिष्ठ दीदिवः । सुम्नाय नूनमीमहे सखिभ्यः ॥
वसुरग्निर्वसुश्रवाः (८) । अच्छा नक्षि द्युमत्तमो रयिं दाः ॥
(ऋतावा,-मङ्गिरः, हवं, सुशमी, विश्वजन्म, दुवस्यत्, भुवोद्, वसुश्रवाः, षट् च) ॥ ४ ॥

संयुजादीष्टकोपधानम् ॥ अग्निर्देवः ।

इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्म्याघाराभ्यां *-तेजसा *-वर्चसो *-क्थेभिः *-स्तोमेभि *-श्छन्दोभी *-रय्यै पोषाय सजातानां मध्यमस्थेयाय मया त्वा सयुजा युजा युनज्म्यम्बा *- दुला *-नितत्नि *-रभ्रयन्ती *- मेघयन्ती *- वर्षयन्ती *- चुपुणीका नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि पृथिव्युदपुरमन्नेन विष्टा मनुष्यास्ते गोप्तारोऽग्निर्वियत्तोऽस्यां तामहं प्र पद्ये सा (१) मे शर्म च वर्म चास्त्वन्तरिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर्वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु द्यौरपराजिताऽमृतेन विष्टाऽऽदित्यास्ते गोप्तारः सूर्यो वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु ॥ (सा, ऽष्टाचत्वारिंशच्च) ॥ ५ ॥

विश्वज्योतिरादीष्टकोपधानम् ॥ अग्निर्देवः ।

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छाग्निस्तेऽधिपतिर्विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधिपतिः पुरोवातसनिरस्यभ्रसनिरसि विद्युत्सनि (१) रसि स्तनयित्नुसनिरसि वृष्टिसनिरस्यग्नेर्यान्यसि देवानामग्नेयान्यसि वायोर्यान्यसि देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसि देवानामन्तरिक्षयान्यस्यन्तरिक्षमस्यन्तरिक्षाय त्वा सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा केताय त्वा प्रचेतसे त्वा विवस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्वर्चे त्वा रुचे त्वा द्युते त्वा (२) भासे त्वा ज्योतिषे त्वा यशोदां त्वा यशसि *- तेजोदां त्वा तेजसि *- पयोदां त्वा पयसि *- वर्चोदां त्वा वर्चसि *- द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ (विद्युत्सनि,- र्भासे,- द्वाविंशच्च) ॥ ६ ॥

भूयस्कृदादीष्टकोपधानम् ॥ अग्निर्देवः ।

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वाऽस्यन्तरिक्षसदस्यन्तरिक्षे सीदाप्सुषदसि श्येनसदसि गृध्रसदसि सुपर्णसदसि नाकसदसि पृथिव्यास्त्वा द्रविणे सादयाम्यन्तरिक्षस्य त्वा द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा द्रविणे सादयामि प्राणं मे पाह्यपानं मे पाहि व्यानं मे (१) पाह्यायुर्मे पाहि विश्वायुर्मे पाहि सर्वायुर्मे पाह्यग्ने यत् ते परं हृन्नाम तावेहि सं रभावहै पाञ्च-

(५।२-७) त्वा सयुजा...युनज्मि । (५।९-१४) नामासि...दधामि । (६।१०-२१) सादयामि ...सीद ।

जन्येष्वप्यसद्यग्ने यावा अयावा एवा ऊमाः सब्दः सगरः सुमेकः ॥
(मे, द्वात्रिंशच्च) ॥ ७ ॥

इन्द्रतन्वाख्येष्टकोपधानम् ॥ अग्निर्देवः ।

अग्निना विश्वाषाट् सूर्येण स्वराट् क्रत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघवान् दक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्देन तनूधा अन्नेन गयः पृथिव्याऽसनो ऋग्भिरन्नादो वषट्कारेणर्धः साम्ना तनूपा विराजा ज्योतिष्मान् ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्रेण मनुष्यानश्वेन च रथेन च वज्र्यृतुभिः प्रभुः संवत्सरेण परिभूस्तपसाऽनाधृष्टः सूर्यः सन् तनूभिः ॥ (अग्निर्नैऋताक्षरपञ्चाशत्) ॥ ८ ॥

यज्ञतन्वाख्येष्टकोपधानम् ॥ अग्निर्देवः ।

प्रजापतिर्मनसाऽन्धोऽच्छेतो धाता दीक्षायां सविता भृत्यां पूषा सोमक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट आसादितो नरंधिषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात् प्रणीयमान इन्द्रो हविर्धानेऽदितिरासादितो विष्णुरुपावह्रियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः क्षीरश्रीर्मन्थी सक्तुश्रीर्वैश्वदेव उन्नीतो रुद्र (१) आहुतो वायुरावृत्तो नृचक्षाः प्रतिख्यातो भक्ष आगतः पितॄणां नाराशंसोऽसुरात्तः सिन्धुरवभृथमवप्रयन्त्समुद्रोऽवगतः सलिलः प्रप्लुतः सुवरुदृचं गतः ॥
(रुद्र, एकत्रिंशतिश्च) ॥ ९ ॥

नक्षत्रेष्टकोपधानम् ॥ अग्निर्देवः ।

कृत्तिका नक्षत्रमग्निर्देवताऽग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता *- मृगशीर्षं नक्षत्रं सोमो देवता *-ऽऽर्द्रा नक्षत्रं रुद्रो देवता *-पुनर्वसू नक्षत्रमदितिर्देवता *-तिष्यो नक्षत्रं बृहस्पतिर्देवता *-ऽऽश्रेषा नक्षत्रं सर्पा देवता *- मघा नक्षत्रं पितरो देवता *- फल्गुनी नक्षत्र (१) मर्यमा देवता *- फल्गुनी नक्षत्रं भगो देवता *-हस्तो नक्षत्रं सविता देवता *-चित्रा नक्षत्रमिन्द्रो देवता *-स्वाती नक्षत्रं वायुर्देवता *- विशाखे नक्षत्रमिन्द्राग्नी देवता *-ऽनूराधा नक्षत्रं मित्रो देवता *-रोहिणी नक्षत्रमिन्द्रो देवता *- विचृतौ नक्षत्रं पितरो देवता *-ऽषाढा नक्षत्रमापो देवता *-ऽषाढा नक्षत्रं विश्वे देवा देवता *- श्रोणा नक्षत्रं विष्णुर्देवता *-श्रविष्ठा नक्षत्रं वसवो (२) देवता *-शतभिषङ्नक्षत्रमिन्द्रो देवता *- प्रोष्ठपदा नक्षत्रमज एकपाद्देवता *-प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता *-रेवती नक्षत्रं पूषा देवता *-ऽश्वयुजौ नक्षत्रमश्विनौ देवता *-ऽपभरणीर्नक्षत्रं यमो देवता *- पूर्णा पश्चाद्यत् ते देवा अदधुः *- ॥ (नक्षत्रं, वसवः,- स्त्रयस्त्रिंशच्च) ॥ १० ॥

(१०।२-२०) ऋचे त्वा...ज्योतिषे त्वा (१०।२८-२९) तै. सं. ३।५।१।१-२ ।

ऋतव्येष्टकोपधानम् ॥ अग्निर्देवः ।

मधुश्च माधवश्च वासन्तिकावृतू *-शुक्रश्च शुचिश्च ग्रैष्मावृतू *- नभश्च नभस्यश्च वार्षिकावृतू *- इषश्चोर्जश्च शारदावृतू *-सहश्च सहस्यश्च हैमन्तिकावृतू *-तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः (१) येऽग्नयः समनसोऽन्तरा द्यावापृथिवी शैशिरावृतू अभि कल्पमाना इन्द्रमिव देवा अभि सं विशन्तु संयच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्योग्रा च भीमा च पितॄणां यमस्येन्द्रस्य *-ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य *- धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य धातुः *- प्राची च प्रतीची च वसूनां रुद्राणा (२) मादित्यानां ते तेऽधिपतयस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि सहस्रस्य प्रमा असि सहस्रस्य प्रतिमा असि सहस्रस्य विमा असि सहस्रस्योन्मा असि साहस्रोऽसि सहस्राय त्वेमा मे अग्न इष्टका धेनवः सन्त्वेका च शतं च सहस्रं चायुतं च (३) नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चैता मे अग्न इष्टका धेनवः सन्तु षष्टिः सहस्रमयुतमक्षीयमाणा ऋतस्थाः स्थर्तावृधो घृतश्चुतो मधुश्चुत ऊर्जस्वतीः स्वधाविनीस्ता मे अग्न इष्टका धेनवः सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिँल्लोके ॥ (सव्रता, रुद्राणां, च, पञ्चचत्वारिंशच्च) ॥ ११ ॥

अवशेषमन्त्रसहितविशेषविधानेषु अनुवाकः ॥ विश्वेदेवा ऋषयः ।

समिद्दिशामाशया नः सुवर्विन्मधोर्अतो माधवः पात्वस्मान् ।
अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रं रक्षतु पात्वस्मान् ॥
रथन्तरं सामभिः पात्वस्मान् गायत्री छन्दसां विश्वरूपा ।
त्रिवृन्नो विष्ठया स्तोमो अह्नां समुद्रो वात इदमोजः पिपर्तु ॥
उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजस्विनी ।
इन्द्राधिपतिः पिपृतादतो नो महि (१) क्षत्रं विश्वतो धारयेदम् ॥
बृहत् साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् ।
इन्द्र स्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥
प्राची दिशां सहयशा यशस्वती विश्वे देवाः प्रावृषाऽह्नां सुवर्वती ।
इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टं सहस्रियं सहस्वत् ॥
वैरूपे सामन्निह तच्छकेम जगत्यैनं विक्ष्वा वेशयामः ।
विश्वे देवाः सप्तदशेन (२) वर्च इदं क्षत्रं सलिलवातमुग्रम् ॥
धर्त्री दिशां क्षत्रमिदं दाधारोपस्थाऽऽशानां मित्रवदस्त्वोजः ।
मित्रावरुणा शरदाऽह्नां चिकित्नू अस्मै राष्ट्राय महि शर्म यच्छतम् ॥

(११।१-१०) अग्नेरन्तः...विशन्तु । (११।१३-१६) ते तेऽधिपतयो...दधामि ।

वैराजे सामन्नधि मे मनीषाऽनुष्टुभा सम्भृतं वीर्यं सहः ।
इदं क्षत्रं मित्रवदार्द्रदानु मित्रावरुणा रक्षतमाधिपत्यैः ॥
सम्राड् दिशां सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु ।
अवस्युवाता (३) बृहतीर्नु शक्वरीरिमं यज्ञमवन्तु नो घृताचीः ॥
सुवर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची ।
त्वं गोपाः पुरएतोत पश्चाद् बृहस्पते याम्यां युङ्ग्धि वाचम् ॥ ॥
ऊर्ध्वा दिशां रन्तिराशौषधीनां संवत्सरेण सविता नो अह्नाम् ।
रेवत् सामातिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु ॥
स्तोमत्रयस्त्रिंशे भुवनस्य पत्नि विवस्वद्वाते अभि नो (४) गृणाहि ।
घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो अस्तु ॥
ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता ।
बृहस्पतिर्मातरिश्वोत वायुः संधुवाना वाता अभि नो गृणन्तु ॥
विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ।
विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे ॥
वैश्वानरो न ऊत्या *- पृष्टो दिवि *-नु नो (५) ऽद्यानुमति *-रन्विदनुमते त्वं *- कया नश्चित्र आ भुवत् *-को अद्य युङ्क्ते *- ॥
(महि, सप्तदशेना,-ऽवस्युवाता, नो, नु,- ऽष्टाविंशच्च) ॥ १२ ॥

[दुग्धी १४३ । राष्ट्र-१४०।-४-१७८।-मुगि-४०५।- रिग्भा विष्णु। ९८। बृहस्पति-१२९।-भूयस्कृ-८३।- कृत्तिका ९१ प्रजापति। ७१। कृत्तिका ११३। मधुः १९५। समिद् २६४ । द्वादश ॥ १८८० ॥]

[इति चतुर्थकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

होमविधिनिरूपणम् ।

[अथ पञ्चमः प्रपाठकः ॥ ५ ॥]

शिवाग्नौ शतरुद्रहोममन्त्राः (रुद्राध्यायः) ॥ १-१५ अनुष्टुभः; ३ विषमपदा बृहती, ७ आस्तारपंक्तिः; ८ षट्पदा जगती । अग्निर्देवः ।

नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥
या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शंतमया गिरिशन्ताभि चाकशीहि ॥

(१२।१५-१६) तै. सं. १।५।३।१,३, (१२।१७-१८) तै. सं. ३।३।११।११-१२, (१२।१९-२०) तै. सं. ४।२।११।१-१०।

यामिषुं गिरिशन्त हस्ते (१) बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वान् जम्भयन्त्सर्वाश्च यातुधान्यः ॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाꣳ रुद्रा अभितो दिक्षु (२) श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥
प्र मुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषवः (३) परा ता भगवो वप ॥
अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ॥
नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्या- (४) -मुत ते नमो बाहुभ्यां तव धन्वने ॥
परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ॥
(हस्ते, दिक्षि,-षव, उभाभ्यां, द्वाविंशतिश्च ॥ १ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रु-द्रायाऽऽततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमो (१) रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाऽऽक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नवीताय धावते सत्वनां पतये नमः ॥ (नमो, एकान्नत्रिꣳशच्च) ॥ २ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नम (१) इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वा-नेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वपतिभ्य- (२) -श्च वो नमः ॥ (नमो, ऽश्वपतिभ्य,- स्त्रीणि च) ॥ ३ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो (१) रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथका-रेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च (२) वो नमः ॥ (रथेभ्यः, श्वपतिभ्यश्च, द्वे च) ॥ ४ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ।

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च (१) नमो अग्रियाय च प्रथमाय च नम आशवे चाजि-राय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥ (संवृध्वने च, पञ्चविꣳशतिश्च) ॥ ५ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय

च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च (१) नम आशुषेणाय चाऽऽशुरथाय च नमः शूराय चाव-भिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुत-सेनाय च ॥ (प्रतिश्रवाय च, पञ्चविꣳशतिश्च) ॥ ६ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चाऽऽयुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च (१) नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ (वैशन्ताय च त्रिꣳशच्च) ॥ ७ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च (१) नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ (शिवतराय च, त्रिꣳशच्च) ॥ ८ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ।

नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्रदय्याय च निवेष्प्याय च नमः पाꣳसव्याय च रजस्याय च नमः शुष्क्याय च हरि-त्याय च नमो लोप्याय चोलप्याय च (१) नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च प्रख्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो- नमो विचिन्वत्केभ्यो- नम आनि-र्हतेभ्यो- नम आमीवत्केभ्यः- ॥ (उल्प्याय च त्रयोविꣳशतिश्च) ॥ ९ ॥

(१११) देवा... वेभ्यः । १६-१९

चित्यग्नौ होममन्त्राः ॥ १ आस्तारपंक्तिः; २,११-१२ अनुष्टुप्; ३-६ जगती; ७-९ त्रिष्टुप्; १० पदपङ्क्त्या महाबृहती । अग्निर्ऋषिः ।

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।
एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किं चनाऽऽममत् ॥
या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी ।
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥
इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतिम् ।
यथा नः शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि- (१) -न्ननातुरम् ॥
मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो (२) रुद्र रीरिषः ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥
आरात् ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।
रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥
स्तुहि (३) श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः ॥
परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं (४) बिभ्रदा गहि ॥
विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥
सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥
(अस्मिन्,-स्तनुवः, स्तुहि, पिनाकं,-मेकान्नविꣳशच्च) ॥ १० ॥

चित्यग्नौ होममन्त्राः ॥ १-१० अनुष्टुप् । अग्निर्ऋषिः ।

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि- ॥

सं त्वा शोचिष्ठ दीदिवः । सुम्नाय नूनमीमहे सखिभ्यः ॥
वसुरग्निर्वसुश्रवाः (८) । अच्छा नक्षि द्युमत्तमो रयिं दाः ॥
(अन्नानां,-महिम्नः, ह्यर्दः,सुम्नानि, विषाजन्म, इद्धः, अर्वाङ्, वसुश्रवाः, पञ्च च) ॥ ४ ॥

सयुगादीष्टकोपधानम् ॥ अग्निर्देवः ।

इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्म्या-घाराभ्यां-तेजसा-वर्चसो-क्थेभिः-स्तोमेभि-श्छन्दोभी-रय्यै पोषाय सजातानां मध्यमस्थेयाय मया त्वा सयुजा युजा युनज्म्य-म्बा-दुला-नितत्नि-रभ्रयन्ती-मेघयन्ती-वर्षयन्ती-चुपुणीका नामासि प्रजापतिना त्वा विश्वाभिर्धीभिरुप दधामि पृथिव्युदपुरमन्नेन विष्टा मनुष्यास्ते गोप्तारोऽग्निर्वियत्तोऽस्यां तामहं प्र पद्ये सा (१) मे शर्म च वर्म चा-स्त्वधिद्यौरन्तरिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर्वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु द्यौरपराजिताऽमृतेन विष्टाऽऽदित्यास्ते गोप्तारः सूर्यो वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु ॥ (सा, द्वाचत्वारिंशच्च) ॥५॥

विश्वज्योतिरादीष्टकोपधानम् ॥ अग्निर्देवः ।

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छाग्निस्तेऽधिपति-र्विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधिपतिः पुरोवातसनिरस्य-भ्रसनिरसि विद्युत्सनि-(१)-रसि स्तनयित्नुसनिरसि वृष्टिसनिरस्य-ग्नेर्यान्यसि देवानामग्नेयान्यसि वायोर्यान्यसि देवानां वायोयान्यस्य-न्तरिक्षस्य यान्यसि देवानामन्तरिक्षयान्यस्य-न्तरिक्षमस्य-न्तरिक्षाय त्वा सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा केताय त्वा प्रचेतसे त्वा विवस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्व-र्चे त्वा रुचे त्वा द्युते त्वा (२) भासे त्वा ज्योतिषे त्वा यशोदां त्वा यशसि-तेजोदां त्वा तेजसि-पयोदां त्वा पयसि-वर्चोदां त्वा वर्चसि-द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीद ॥ (विद्युत्सनि,- स्त्वं,-कात्रिंशच्च) ॥ ६ ॥

भूयस्कृदादीष्टकोपधानम् ॥ अग्निर्देवः ।

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यू-र्ध्वाऽस्य-न्तरिक्षसदस्यन्तरिक्षे सीदा-प्सुषदसि श्येनसदसि गृध्रसदसि सुपर्णसदसि नाकसदसि पृथिव्यास्त्वा द्रविणे सादयाम्य-न्तरिक्षस्य त्वा द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा द्रविणे सादयामि प्राणं मे पाह्य-पानं मे पाहि व्यानं मे (१) पाह्या-युर्मे पाहि विश्वायुर्मे पाहि सर्वायुर्मे पाह्य-ग्ने यत् ते परꣳहृन्नाम तावेहि सꣳ रभावहै पाञ्च-

(५।२-७) त्वा सयुजा...युनज्मि । (५।९-१४) नामासि...दधामि । (६।१०-३२) सादयामि ...सीद ।

जन्येष्वप्यस्यग्ने यावो अयावो एवा ऊर्माः सब्दः सगरः सुमेकः ॥
(मे, द्वात्रिंशच्च) ॥ ७ ॥

इन्द्रतन्वाख्येष्टकोपधानम् ॥ अग्निर्देवः ।

अग्निना विश्वाषाट् सूर्येण स्वराट् क्रत्वा शचीपति-र्ऋषभेण त्वष्टा यज्ञेन मघवान् दक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्देन तनूधा अन्नेन गयः पृथिव्याऽसनो-र्ऋग्भिरन्नादो वषट्कारेणर्धः साम्ना तनूपा विराजा ज्योतिष्मान् ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्रेण मनुष्या-नश्वेन च रथेन च वज्र्य-तुभिः प्रभुः संवत्सरेण परिभू-स्तपसाऽनाधृष्टः सूर्यः सन् तनूभिः ॥ (अग्निनैकान्नपञ्चाशत्) ॥ ८ ॥

यज्ञतन्वाख्येष्टकोपधानम् ॥ अग्निर्देवः ।

प्रजापतिर्मनसाऽन्धोऽच्छेतो धाता दीक्षायाꣳ सविता भृत्यां पूषा सोमक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट आसादितो नरंधिषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात् प्रणीयमान इन्द्रो हविर्धानेऽदितिरासादितो विष्णुरुपावह्रियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः क्षीरश्री-र्मन्थी सक्तुश्री-र्वैश्वदेव उन्नीतो रुद्र (१) आहुतो वायुरावृत्तो नृचक्षाः प्रतिख्यातो भक्ष आगतः पितृणां नाराशꣳसोऽसुरात्तः सिन्धुरवभृथमवप्रय-न्त्समुद्रोऽवगतः सलिलः प्रप्लुतः सुवरुदृचं गतः ॥
(रुद्र, एकविꣳशतिश्च) ॥ ९ ॥

नक्षत्रेष्टकोपधानम् ॥ अग्निर्देवः ।

कृत्तिका नक्षत्रमग्निर्देवताऽग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता-मृगशीर्षं नक्षत्रꣳ सोमो देवता-ऽऽर्द्रा नक्षत्रꣳ रुद्रो देवता-पुनर्वसू नक्षत्रमदितिर्देवता-तिष्यो नक्षत्रं बृहस्पतिर्देवता-ऽऽश्रेषा नक्षत्रꣳ सर्पा देवता-मघा नक्षत्रं पितरो देवता-फल्गुनी नक्षत्र-(१)-मर्यमा देवता-फल्गुनी नक्षत्रं भगो देवता-हस्तो नक्षत्रꣳ सविता देवता-चित्रा नक्षत्रमिन्द्रो देवता-स्वाती नक्षत्रं वायुर्देवता-विशाखे नक्षत्रमिन्द्राग्नी देवता-ऽनूराधा नक्षत्रं मित्रो देवता-रोहिणी नक्षत्रमिन्द्रो देवता-विचृतौ नक्षत्रं पितरो देवता-ऽषाढा नक्षत्रमापो देवता-ऽषाढा नक्षत्रं विश्वे देवा देवता-श्रोणा नक्षत्रं विष्णुर्देवता-श्रविष्ठा नक्षत्रं वसवो (२) देवता-शतभिषङ्नक्षत्रमिन्द्रो देवता-प्रोष्ठपदा नक्षत्रमज एकपाद्देवता-प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता-रेवती नक्षत्रं पूषा देवता-ऽश्वयुजौ नक्षत्रमश्विनौ देवता-ऽपभरणीर्नक्षत्रं यमो देवता-पूर्णा पश्चा-द्यत् ते देवा अदधुः-॥ (नक्षत्रं, वसवः,- षट्त्रिꣳशच्च) ॥ १० ॥

(१०।२-२०) ऋचे त्वा...ज्योतिषे त्वा (१०।२८-२९) तै. सं. ३।५।१।१-२ ।

ऋतव्येष्टकोपधानम् ॥ अग्निर्देवः ।

मधुश्च माधवश्च वासन्तिकावृतू-शुक्रश्च शुचिश्च ग्रैष्मावृतू-नभश्च नभस्यश्च वार्षिकावृतू-इषश्चोर्जश्च शारदावृतू-सहश्च सहस्यश्च हैमन्तिकावृतू-तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तःश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः (१) येऽग्नयः समनसोऽन्तरा द्यावापृथिवी शैशिरावृतू अभि कल्पमाना इन्द्रमिव देवा अभि सं विशन्तु संयच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्यो-ग्रा च भीमा च पितॄणां यमस्येन्द्रस्य-ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य-धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य धातुः-प्राची च प्रतीची च वसूनाꣳ रुद्राणा-(२)-मादित्यानां ते तेऽधिपतयस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि सहस्रस्य प्रमा असि सहस्रस्य प्रतिमा असि सहस्रस्य विमा असि सहस्रस्योन्मा असि साहस्रोऽसि सहस्राय त्वे-मा मे अग्न इष्टका धेनवः सन्त्वेका च शतं च सहस्रं चायुतं च (३) नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चेमा मे अग्न इष्टका धेनवः सन्तु षष्टिः सहस्रमयुतमक्षीयमाणा ऋतस्थाः स्थर्तावृधो घृतश्चुतो मधुश्चुत ऊर्जस्वतीः स्वधाविनीस्ता मे अग्न इष्टका धेनवः सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिꣳल्लोके ॥ (सव्रता, रुद्राणां, च, पञ्चचत्वारिꣳशच्च) ॥ ११ ॥

अश्वमेधगतदशहविर्भेदविधायकानुवाक्याः ॥ विश्वेदेवा ऋषयः ।

समिद्दिशामाशया नः सुवर्विन्मधोरतो माधवः पात्वस्मान् ।
अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रꣳ रक्षतु पात्वस्मान् ॥
रथन्तरꣳ सामभिः पात्वस्मान् गायत्री छन्दसां विश्वरूपा ।
त्रिवृन्नो विष्ठया स्तोमो अह्नाꣳ समुद्रो वात इदमोजः पिपर्तु ॥
उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीना ।
इन्द्राधिपतिः पिपृतादतो नो महि (१) क्षत्रं विश्वतो धारयेदम् ॥
बृहत् साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् ।
इन्द्र स्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥
प्राची दिशाꣳ सहयशा यशस्वती विश्वे देवाः प्रावृषा ऽह्नाꣳ सुवर्वती ।
इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टꣳ सहस्रियꣳ सहस्वत् ॥
वैरूपे सामन्निह तच्छकेम जगत्यैनं विक्ष्वा वेशयामः ।
विश्वे देवाः सप्तदशेन (२) वर्च इदं क्षत्रꣳ सलिलवातमुग्रम् ॥
धर्त्री दिशां क्षत्रमिदं दाधारोपस्थाऽऽशानां मित्रवदस्त्वोजः ।
मित्रावरुणा शरदाऽह्नां चिकित्न् अस्मै राष्ट्राय महि शर्म यच्छतम् ॥

(११।१-१०) अग्नेरन्तः...विशन्तु । (११।१३-१६) ते तेऽधिपतयो...दधामि ।

वैराजे सामन्नधि मे मनीषाऽनुष्टुभा सम्भृतं वीर्यꣳ सहः ।
इदं क्षत्रं मित्रवदार्द्रदानु मित्रावरुणा रक्षतमाधिपत्यैः ॥
सम्राड् दिशाꣳ सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु ।
अवस्युवाता (३) बृहतीनु शक्वरीरिमं यज्ञमवन्तु नो घृताचीः ॥
सुवर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची ।
त्वं गोपाः पुरएतोत पश्चाद् बृहस्पते याम्यां युङ्ग्धि वाचम् ॥
ऊर्ध्वा दिशाꣳ रन्तिराशौषधीनाꣳ संवत्सरेण सविता नो अह्नाम् ।
रेवत् सामातिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु ॥
स्तोमत्रयस्त्रिꣳशे भुवनस्य पत्नि विवस्वद्वाते अभि नो (४) गृणाहि ।
घृतवती सवितराधिपत्यैः पयस्वती रन्तिराशा नो अस्तु ॥
ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशाना सहसो या मनोता ।
बृहस्पतिर्मातरिश्वोत वायुः सन्धुवाना वाता अभि नो गृणन्तु ॥
विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ।
विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे ॥
वैश्वानरो न ऊत्या-पृष्टो दिव्य-नु नो (५) ऽद्यानुमति-रन्विदनुमते त्वं-कया नश्चित्र आ भुवत्-को अद्य युङ्क्ते-॥
(महि, सप्तदशेना,-ऽवस्युवाता, नो, नु,-अष्टादश च) ॥ १२ ॥

[इष्मी १४३ । रश्मि-१४०।-व-१०८।-मनि-४०५।- रिन्द्राग्निभ्यां ९८। बृहस्पति-१२९।-भूयस्कृ-८२।-ग्निना ४९ प्रजापतिः ७१। कृत्तिका ११३। मधुः १९५। समिद् २६४। द्वादश ॥ १८८७ ॥]

[इति चतुर्थकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

होमविधिनिरूपणम् ।

[अथ पञ्चमः प्रपाठकः ॥ ५ ॥]

चित्यग्नौ रुद्रहोममन्त्राः (रुद्राध्यायः) ॥ १-१५ अनुष्टुभः; ३ विषमपदा बृहती, ७ आस्तारपङ्क्तिः; ८ षट्पदा जगती, अग्निर्देवः ।

नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥
या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभि चाकशीहि ॥

(१२।१५-१६) तै. सं. १।५।११।१,३, (१२।१७-१८) तै. सं. ३।१।११।११-१२, (१२।१९-२०) तै. सं. ४।२।११।९-१०।

यामिषुं गिरिशन्त हस्ते (१) बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वान् जम्भयन्त्सर्वाश्च यातुधान्यः ॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमाꣳ रुद्रा अभितो दिक्षु (२) श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥
असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृशन्नदृशन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥
प्र मुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् । याश्च ते हस्त इषवः (३) परा ता भगवो वप ॥
अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखा शिवो नः सुमना भव ॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ॥
नमस्ते अस्त्वायुधायानातताय धृष्णवे ।
उभाभ्या-(४)-मुत ते नमो बाहुभ्यां तव धन्वने ॥
परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मन्नि धेहि तम् ॥
(हस्ते, दिक्षु, -षव, उभाभ्यां, द्वाविꣳशतिश्च ॥ १ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो
नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो
नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रु-
द्रायाऽऽततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्याय वनानां पतये नमो नमो (१)
रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो
भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम उच्चैर्घोषायाऽऽक्रन्दयते पत्तीनां पतये नमो नमः
कृत्स्नवीताय धावते सत्वनां पतये नमः ॥ (नम, एकान्नत्रिꣳशच्च) ॥ २ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां
पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां
पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघाꣳसद्भ्यो
मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे
गिरिचराय कुलुञ्चानां पतये नमो नम (१) इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वा-
नेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो
विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च
वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो
अश्वेभ्योऽश्वपतिभ्य-(२)-श्च वो नमः ॥ (नमो,ऽश्वपतिभ्य,-स्त्रीणि च) ॥ ३ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो
गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च
वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यो (१) रथपतिभ्यश्च वो नमो नमः
सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथका-
रेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो
नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः
श्वभ्यः श्वपतिभ्यश्च (२) वो नमः ॥ (रथेभ्यः, श्वपतिभ्यस्, द्वे च) ॥ ४ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ।

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय
च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च
शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च
वर्षीयसे च नमो वृद्धाय च संवृध्वने च (१) नमो अग्रियाय च प्रथमाय च नम आशवे चाजि-
राय च नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च
द्वीप्याय च ॥ (संवृध्वने च, पञ्चविꣳशतिश्च) ॥ ५ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय
च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय

च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय
च नमः श्रवाय च प्रतिश्रवाय च (१) नम आशुषेणाय चाऽऽशुरथाय च नमः शूराय चाव-
भिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुत-
सेनाय च ॥ (प्रतिश्रवाय च, पञ्चविꣳशतिश्च) ॥ ६ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय च
नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चाऽऽयुधिने च नमः स्वायुधाय च सुधन्वने च
नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो
नाद्याय च वैशन्ताय च (१) नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय
च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय
च वास्तुपाय च ॥ (वैशन्ताय च त्रिꣳशच्च) ॥ ७ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ॥

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम
उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो
हरिकेशेभ्यो नमस्ताराय नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च
नमः शिवाय च शिवतराय च (१) नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च
नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च
नमः सिकत्याय च प्रवाह्याय च ॥ (शिवतराय च, त्रिꣳशच्च) ॥ ८ ॥

चित्यग्नौ होममन्त्राः ॥ अग्निर्ऋषिः ।

नम इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्त-
ये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च
नमो ह्रदय्याय च निवेष्प्याय च नमः पाꣳसव्याय च रजस्याय च नमः शुष्क्याय च हरि-
त्याय च नमो लोप्याय चोलप्याय च (१) नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च
पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आक्खिदते च प्रक्खिदते च नमो वः
किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनि-
र्हतेभ्यो नम आमीवत्केभ्यः ॥ (उलप्याय च त्रयस्त्रिꣳशच्च) ॥ ९ ॥

(९।१६) देवा... येभ्यः । १६-१९

चित्यग्नौ होममन्त्राः ॥ १ आस्तारपंक्तिः; २,११-१२ अनुष्टुप्; ३-६ जगती; ७-९ त्रिष्टुप्; १० पथ्यापंक्तिः महाबृहती । अग्निर्ऋषिः ।

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।
एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किं चनाऽऽममत् ॥
या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी ।
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥
इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतिम् ।
यथा नः शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मि-(१)-न्ननातुरम् ॥
मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो (२) रुद्र रीरिषः ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥
आरात् ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु ।
रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥
स्तुहि (३) श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः ॥
परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडये ॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान आ चर पिनाकं (४) बिभ्रदा गहि ॥
विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ हेतयोऽन्यमस्मन्नि वपन्तु ताः ॥
सहस्राणि सहस्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥
(अस्मिꣳ,-स्तनुवः, स्तुहि, पिनाकं,-मेकान्नविꣳशतिश्च) ॥ १० ॥

चित्यग्नौ होममन्त्राः ॥ १-१० अनुष्टुप् । अग्निर्ऋषिः ।

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
अस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः - ॥
नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः - ॥
ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः - ॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः - ॥
ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् - ॥
ये पथां पथिरक्षय ऐलबृदा यव्युधः -- ॥
ये तीर्थानि (१) प्रचरन्ति सृकावन्तो निषङ्गिणः -- ॥
य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ॥
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥

नमो रुद्रेभ्यो ये पृथिव्यां --येऽन्तरिक्षे --ये दिवि येषामन्नं--वातो--वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च (२) नो द्वेष्टि तं वो जम्भे दधामि ॥ (तीर्थानि, यश्च, षट् च) ॥ ११ ॥

[नमस्ते २२२ । नमो हिरण्यबाहवे ७९ । नमः सहमानाय १०३ । नम आव्याधिनीभ्यो १०२ । नमो भवाय ७५ । नमो ज्येष्ठाय ७५ । नमो दुन्दुभ्याय ८० । नमः सोमाय ८० । नम इरिण्याय ८३ । द्रापे २२२ । सहस्राणि-१०६ । -कांदशा ॥१२३४॥]

[इति चतुर्थकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥]

परिषेचनसंस्काराभिधानम् ।

[अथ षष्ठः प्रपाठकः ॥ ६ ॥]

अग्निसंस्कारेषु परिषेचनादि ॥ १ अतिजगती; ३-४ उष्णिक्; ५,८-१०,२१ गायत्री; ६ वर्धमाना, ककुम्मती वा गायत्री; ७ द्विपदा त्रिष्टुप्; ११-१२ आस्तारपङ्क्तिः; १८, २०, २२ त्रिष्टुप्; १९ जगती । अग्निर्ऋषिः ।

अश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे ।
अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि सम्भृतां तां न इषमूर्जं धत्त मरुतः सꣳरराणाः
अश्मꣳस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्मः ॥
समुद्रस्य त्वाऽवाकयाऽग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥
हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥
उप (१) ज्मन्नुप वेतसेऽवत्तरं नदीष्वा । अग्ने पित्तमपामसि ॥
मण्डूकि ताभिरा गहि सेमं नो यज्ञम् । पावकवर्णꣳ शिवं कृधि ॥
पावक आ चितयन्त्या कृपा । क्षामन् रुरुच उषसो न भानुना ॥
तूर्वन् न यामन्नेतशस्य नू रण आ यो घृणे । न ततृषाणो अजरः ॥

(११।२-१०) तेषाꣳ सहस्र० (११।१२) येषामन्नमिषवः... दधामि । (११।११) नमो रुद्रेभ्यो०,...येषां... इषवस्तेभ्यो...दधामि । (११।१४) येषां वर्षमिषवस्ते... दधामि ।

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् (२) वक्षि यक्षि च ॥
स नः पावक दीदिवोऽग्ने देवाꣳ इहाऽऽवह । उप यज्ञꣳ हविश्च नः ॥
अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् ।
अन्यं ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्यं ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥
नृषदे वट्--(३)--ऽप्सुषदे वट् वनसदे वट् बर्हिषदे वट् सुवर्विदे वट् ॥
ये देवा देवानां यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं जुहुध्वं मधुनो घृतस्य ॥
ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य ।
येभ्यो नर्ते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु ॥
प्राणदा (४) अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः ।
अन्यं ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥
अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वं न्यत्रिणम् । अग्निर्नो वꣳसते रयिम् ॥
सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥
(रूपं, देवान्, वट्, प्राणदा,-अष्टाचत्वारिꣳशच्च) ॥ १ ॥

वैश्वकर्मणहोमः ॥ त्रिष्टुप्; १७ पङ्क्तिः । अग्निर्ऋषिः ।

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः ।
स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश ॥
विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन् पर एकमाहुः ॥
यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान (१) ।
यो देवानां नामधा एक एव तꣳ सम्प्रश्नं भुवना यन्त्यन्या ॥
त आऽयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्निमानि ॥
न तं विदाथ य इदं जजानान्यद् युष्माकमन्तरं भवाति ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥

परो दिवा पर एना (२) पृथिव्या परो देवेभिरसुरैर्गुहा यत् ।
कꣳ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ॥
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधि श्रितम् ॥
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीना (३)-मपां गर्भं व्यदधात् पुरुत्रा ॥
चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृꣳहन्त पूर्व आदिद् द्यावापृथिवी अप्रथेताम् ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः ॥
किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत् स्वित् किमासीत् ।
यदी भूमिं जनयन् (४) विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥
किꣳ स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारयन् ॥
या ते धामानि परमाणि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तनुवं जुषाणः ॥
वाचस्पतिं विश्वकर्माणमूतये (५) मनोयुजं वाजे अद्या हुवेम ।
स नो नेदिष्ठा हवनानि जोषते विश्वशम्भूरवसे साधुकर्मा ॥
विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व तनुवं जुषाणः ।
मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु ॥
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत् ॥
समुद्राय वयुनाय सिन्धूनां पतये नमः (६) ।
नदीनाꣳ सर्वासां पित्रे जुहुता विश्वकर्मणे विश्वाऽहाऽमर्त्यꣳ हविः ॥
(गुहा,-मो,-षधीनां, जनयं,-मूतये, नमो, नव च) ॥ २ ॥

अग्निचयनम् ॥ १-४,१२, १४-१५ अनुष्टुप्; ६,९-११ त्रिष्टुप्, ५ विराट्; ७ विराड्रूपा; १३ द्विपदा त्रिष्टुप् । अग्निर्ऋषिः ।

उदेनमुत्तरां नयाग्ने घृतेनाऽऽहुत । रायस्पोषेण सꣳ सृज प्रजया च धनेन च ॥
इन्द्रेमं प्रतरां कृधि सजातानामसद्वशी । समेनं वर्चसा सृज देवेभ्यो भागधा असत् ॥

यस्य कुर्मो हविर्गृहे तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः ॥
उदु त्वा विश्वे देवा (१) अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवतमः सुप्रतीको विभावसुः ॥
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्तीः ॥
रायस्पोषे अधि यज्ञो अस्थात् समिद्धे अग्नावधि मामहानः ।
उक्थपत्र ईड्यो गृभीतस्तप्तं घर्मं परिगृह्यायजन्त ॥
ऊर्जा यद्यज्ञमशमन्त देवा दैव्याय धर्त्रे जोष्ट्रे ।
देवश्रीः श्रीमणाः शतपयाः (२) परिगृह्य देवा यज्ञमायन् ॥
सूर्यरश्मिर्हरिकेशः पुरस्तात् सविता ज्योतिरुदयाꣳ अजस्रम् ।
तस्य पूषा प्रसवे याति देवः सम्पश्यन् विश्वा भुवनानि गोपाः ॥
देवा देवेभ्यो अध्वर्यन्तो अस्थुर्वीतꣳ शमित्रे शमिता यजध्यै ।
तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्ताम् ॥
विमान एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि (३) चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥
उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ ॥
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं पतिम् ॥
सुम्नहूर्यज्ञो देवाꣳ आ च वक्षद्यक्षदग्निर्देवो देवाꣳ आ च वक्षत् ॥
वाजस्य (४) मा प्रसवेनोद्ग्राभेणोदग्रभीत् । अधा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ॥
उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् । अधा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥
(विश्वे देवाः; शतपया, अभि , वाजस्य, षड्विꣳशतिश्च) ॥ ३ ॥

अग्निप्रणयनमाहात्म्यप्रतिपादकसूक्तम् ॥ त्रिष्टुप्; १३, १५ अनुष्टुप् । अग्निर्ऋषिः ।

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत् साकमिन्द्रः ॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा ॥

स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन ।
सꣳसृष्टजित् सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ॥
बृहस्पते परि दीया (१) रथेन रक्षोहाऽमित्राꣳ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायोऽनु सꣳरभध्वम् ॥
बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥
अभि गोत्राणि सहसा गाहमानोऽदायो (२) वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु ॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे ॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु (३) ।
अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु ॥
उद्धर्षय मघवन्नायुधान्युत् सत्वनां मामकानां महाꣳसि ।
उद् वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः ॥
उप प्रेत जयता नरः स्थिरा वः सन्तु बाहवः ।
इन्द्रो वः शर्म यच्छत्वनाधृष्या यथाऽसथ ॥
अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिता ।
गच्छामित्रान् प्र (४) विश मैषां कं चनोच्छिषः ॥
मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम् ।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः ॥
यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।
इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु ॥
(इषुहस्तैः,-दायो, जयन्तु, प्र, चत्वारिꣳशच्च) ॥ ४ ॥

चित्यामग्निस्थापनादिमारुतहोमान्तम् ॥ १,५-७,१०,१२ त्रिष्टुप्; २, ४ अनुष्टुप्; ३ पुरस्ताद्बृहती; ११ विराट्; १५-१६ अभिकृतिः । अग्निर्ऋषिः ।

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह ।
विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥
क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः ।
दिवः पृष्ठꣳ सुवर्गत्वा मिश्रा देवेभिराध्वम् ॥
पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद् दिवमाऽरुहम् ।
दिवो नाकस्य पृष्ठात् सुवर्ज्योतिरगा- (१) -महम् ॥
सुवर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे ॥
अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सजोषाः सुवर्यन्तु यजमानाः स्वस्ति ॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥
अग्ने सहस्राक्ष (२) शतमूर्धञ्छतं ते प्राणाः सहस्रमपानाः ।
त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥
सुपर्णोऽसि गरुत्मान् पृथिव्याꣳ सीद पृष्ठे पृथिव्याः सीद भासाऽन्तरिक्षमा पृण ज्योतिषा
दिवमुत्तभान तेजसा दिश उद् दृꣳह ॥
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां योनिमा सीद साध्या ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा (३) यजमानश्च सीदत ॥
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।
त्वाꣳ शश्वन्त उप यन्ति वाजाः ॥
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवीꣳषि जुहुरे समिद्धे ॥
ताꣳ सवितुर्वरेण्यस्य चित्रामाऽहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कण्वो अदुहत् प्रपीनाꣳ सहस्रधारां (४) पयसा महीं गाम् ॥
सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि ।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥

ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च सम्मितश्च सभराः ॥
शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्चात्यꣳहाः (५) ॥
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरेअमित्रश्च गणः ॥
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः ॥
ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च सम्मितासश्च न ऊतये सभरसो मरुतो यज्ञे अस्मि—
—न्निन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो (६) यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मान एवमिमं यजमानं
दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥
(अगाः, सहस्राक्ष, देवाः, सहस्रधारा,-मꣳहा, अनुवर्त्मानः, षोडश च) ॥ ५ ॥

अश्वमेधकर्तुः कवचादिसन्नाहः ॥ त्रिष्टुप्; ६ जगती, १२-१३ अनुष्टुप् । विश्वेदेवा ऋषयः ।

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तनुवा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु ॥
धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥
वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताऽधि धन्वन् (१) ज्या इयꣳ समने पारयन्ती ॥
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥
बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनाऽवगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥
रथे तिष्ठन् नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं (२) पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूꣳरनपव्ययन्तः ॥
रथवाहनꣳ हविरस्य नाम यत्राऽऽयुधं निहितमस्य वर्म ॥
तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥
स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥

ब्राह्मणासः (३) पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशꣳस ईशत ॥
सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यꣳसन् ॥
ऋजीते परि वृङ्ग्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नोऽदितिः (४) शर्म यच्छतु ॥
आ जङ्घन्ति सान्वेषां जघनाꣳ उप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳसं परि पातु विश्वतः ॥
वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धो असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि ॥
दिवः पृथिव्याः पर्यो- (५) -ज उद्भृतं वनस्पतिभ्यः पर्याभृतꣳ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ॥
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥
उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूरा- (६) -द्दवीयो अप सेध शत्रून् ॥
आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुनाꣳ इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥
आऽमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥
(धन्वन्, महिमानं, ब्राह्मणासोऽदितिः, परि, दूरा,- देकचत्वारिꣳशच्च) ॥ ६ ॥

अश्वस्तोमीया होममन्त्राः ॥ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥
यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त (१) आहुस्ते त्रीणि दिवि बन्धनानि ॥
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम् ॥
इमा ते वाजिन्नवमार्जनानीमा शफानाꣳ सनितुर्निधाना ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥
आत्मानं ते मनसाऽऽरादजानामवो दिवा (२) पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानडादिद् ग्रसिष्ठ ओषधीरजीगः ॥
अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं (३) ते ॥
हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन् यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥
ईर्मान्तासः सिलिकमध्यमासः सꣳ शूरणासो दिव्यासो अत्याः ।
हꣳसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥
तव शरीरं पतयिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्राऽरण्येषु जर्भुराणा चरन्ति ॥
उप (४) प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चात् कवयो यन्ति रेभाः ॥
उप प्रागात् परमं यत् सधस्थमर्वाꣳ अच्छा पितरं मातरं च ।
अद्या देवान् जुष्टतमो हि गम्या अथाऽऽशास्ते दाशुषे वार्याणि ॥
(विपृक्तो, दिवा, वीर्यं,-मुपे,-चतुःपञ्चाशच्च) ॥ ७ ॥

अश्वस्तोमीया होममन्त्राः । त्रिष्टुप्; ३,६ जगती । विश्वेदेवा ऋषयः ॥
मा नो मित्रो वरुणो अर्यमाऽऽयुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥
यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद् विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥

एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः ।
अभिप्रियं यत् पुरोडाशमर्वता त्वष्टे-(१)-देनꣳ सौश्रवसाय जिन्वति ॥
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥
होताऽध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शꣳस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वम् ॥
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनꣳ सम्भरन्त्युतो (२) तेषामभिगूर्तिर्न इन्वतु ॥
उप प्रागात् सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते अपि देवेष्वस्तु ॥
यदश्वस्य क्रविषो (३) मक्षिकाऽऽश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥
यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ शृतपाकं पचन्तु ॥
यत् ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामा श्रिष-(४)-न्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥
(इ-दुतो, क्रविषः, श्रिषत्, सप्त च) ॥ ८ ॥

अश्वस्तोत्रमन्त्राः । त्रिष्टुप्; ३ मध्येज्योतिः । विश्वेदेवा ऋषयः ।
ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो माꣳसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥
यन्नीक्षणं माꣳस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्याऽपिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥
निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं (१) जघास सर्वा ता ते अपि देवेष्वस्तु ॥
मा त्वाऽग्निर्ध्वनयिद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥

यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥
यत् ते सादे महसा शूकृतस्य पार्ष्णिया वा कशया (२) वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥
चतुस्त्रिꣳशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥
एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथर्तुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥
मा त्वा तपत् (३) प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ तिष्ठिपत् ते ।
मा ते गृध्नुरविशस्ताऽतिहाय छिद्रा गात्राण्यसिना मिथू कः ॥
न वा उवेतन्म्रियसे न रिष्यसि देवाꣳ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥
सुगव्यं नो वाजी स्वश्वियं पुꣳसः पुत्राꣳ उत विश्वापुषꣳ रयिम् (४) ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनताꣳ हविष्मान् ॥
(पार्ष्णि, कशया, तप,-दुवि, नव च) ॥ ९ ॥

[अस्मद् २४३। य १०९। ट- २२६।-द्वाभ्याः २४०। वार्षी ३१६। जीमूतस्य १४१। य-२२९।-त्मा २०७। ये १०९। नव च ॥ २३३१ ॥]

[॥ इति चतुर्थकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥

वसोर्धारादिविशिष्टसंस्काराभिधानम् ।

[अथ सप्तमः प्रपाठकः ॥ ७ ॥]

(१-११) वसोर्धारा होममन्त्राः । १ गायत्री । अग्निर्ऋषिः ।

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रा-
वश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपान-(१)-श्च मे व्यानश्च मेऽसुश्च मे चित्तं च
म आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च
म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे (२) शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च
मे परूꣳषि च मे शरीराणि च मे ॥ (अपान,-स्तनूश्च मे, ऽष्टादश च) ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे
वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च

मे जगच्च (१) मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं
च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं
च म ऋद्धं च म ऋद्धि-(२)-श्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥
(जगच्च,-र्द्धि,-श्चतुर्दश) ॥२॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च
मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च (१) मे
महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं
च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं (२)
च मे सूषा च मे सुदिनं च मे ॥ (विश्वं च, शयन,-मष्टौ च) ॥ ३ ॥

ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृ-
षिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च (१)
मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च
मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुरा (२) श्च मे
प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ (विभु च मसुरा,- श्चतुर्दश च) ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च
मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे
कृष्टपच्यं च (१) मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च
मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे
गतिश्च मे ॥ (कृष्टपच्यं च,- द्वाचत्वारिꣳशच्च) ॥५॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म
इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च (१) म इन्द्रश्च
मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे
च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म (२) इन्द्रश्च मे दिशश्च
म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे । (त्वष्टा च, द्यौश्च म, एकविꣳशतिश्च) ॥६॥

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे
मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे
ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च (१) मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे

माहेन्द्रश्चं म आदित्यश्चं मे सावित्रश्चं मे सारस्वतश्चं मे पौष्णश्चं मे पात्नीवतश्चं मे हारियोजनश्चं मे ॥
(ऋतुग्रहाश्च, चतुंस्त्रिंशच्च) ॥ ७ ॥

इध्मश्चं मे बर्हिश्चं मे वेदिश्च मे धिष्णियाश्च मे स्रुचंश्च मे चमसाश्चं मे ग्रावाणश्च मे स्वरंवश्च म उपरवाश्चं मेऽधिषवंणे च मे द्रोणकलशश्चं मे वायव्यांनि च मे पूतभृच्चं म आधवनीयंश्च म आग्नींध्रं च मे हविर्धानं च मे गृहाश्चं (१) मे सदंश्च मे पुरोडाशांश्च मे पचताश्चं मेऽवभृथश्चं मे स्वगाकारश्चं मे ॥
(गृहाश्च, षोडश च) ॥ ८ ॥

अग्निश्चं मे घर्मश्चं मेऽर्कश्चं मे सूर्यंश्च मे प्राणश्चं मेऽश्वमेधश्चं मे पृथिवी च मेऽदितिश्च मे दितिंश्च मे द्यौश्चं मे शक्वरीरङ्गुलंयो दिशंश्च मे यज्ञेनं कल्पन्तामृक् चं मे सामं च मे स्तोमंश्च मे यजुंश्च मे दीक्षा (१) चं मे तपंश्च म ऋतुश्चं मे व्रतं चं मेऽहोरात्रयोर्वृष्ट्या बृंहद्रथन्तरे चं मे यज्ञेनं कल्पेताम् ॥ (दीक्षा, ऽष्टादंश च) ॥ ९ ॥

गर्भाश्च मे वत्साश्चं मे त्र्यविंश्च मे त्र्यवी चं मे दित्यवाट् चं मे दित्यौही चं मे पञ्चाविश्च मे पञ्चावी चं मे त्रिवत्सश्चं मे त्रिवत्सा चं मे तुर्यवाट् चं मे तुर्यौही चं मे पष्ठवाच्चं मे पष्ठौही चं म उक्षा चं मे वशा चं म ऋषभश्चं (१) मे वेहच्चं मेऽनड्वाञ्चं मे धेनुश्चं म आयुर्यज्ञेनं कल्पतां प्राणो यज्ञेनं कल्पतामपानो यज्ञेनं कल्पतां व्यानो यज्ञेनं कल्पतां चक्षुर्यज्ञेनं कल्पताᳬ श्रोत्रं यज्ञेनं कल्पतां मनो यज्ञेनं कल्पतां वाग्यज्ञेनं कल्पतामात्मा यज्ञेनं कल्पतां यज्ञो यज्ञेनं कल्पताम् ॥
(ऋषभश्चं, चत्वारिंशच्चं) ॥ १० ॥

एका च मे तिस्रश्चं मे पञ्चं च मे सप्त चं मे नवं च म एकांदश च मे त्रयोंदश च मे पञ्चंदश च मे सप्तदंश च मे नवंदश च म एकंविंशतिश्च मे त्रयोंविंशतिश्च मे पञ्चंविंशतिश्च मे सप्तविंशतिश्च मे नवंविंशतिश्च म एकंत्रिंशच्च मे त्रयंस्त्रिंशच्च (१) मे चतंस्रश्च मेऽष्टौ चं मे द्वादंश च मे षोडंश च मे विंशतिश्चं मे चतुंर्विंशतिश्च मेऽष्टाविंशतिश्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिंशच्चं मे चतुंश्चत्वारिंशच्च मेऽष्टाचंत्वारिंशच्च मे वाजंश्च प्रसवश्चां-पिजश्च क्रतुंश्च सुवंश्च मूर्धा च व्यश्नियश्चा-(२)-ऽऽन्त्यायनश्चान्त्यंश्च भौवनश्च भुवंनश्चाधिंपतिश्च ॥
(त्रयंस्त्रिंशच्च, व्यश्नियश्चै,-कांदश च) ॥ ११ ॥

वाजप्रसवीयहोमः ॥ १, ३ अनुष्टुप्; २, ४-५, ८ त्रिष्टुप्; ६-७ विराट् । अग्निर्ऋषिः ।

वाजो नः सप्त प्रदिशश्चतंस्रो वा परावतः । वाजो नो विश्वैर्देवैर्धनसाताविहावंतु ॥
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिंद्धाः ।
विश्वे नो देवा अवसा ऽऽ गंमन्तु विश्वंमस्तु द्रविंणं वाजो अस्मे ॥

वाजंस्य प्रसवं देवा रथैर्याता हिरण्ययैः । अग्निरिन्द्रो बृहस्पतिर्मरुतः सोमंपीतये ॥
वाजेवाजे ऽवत वाजिनो नो धनेषु (१) विप्रा अमृता ऋतज्ञाः
अस्य मध्वः पिबत मादयंध्वं तृप्ता यांत पथिभिर्देवयानैः ॥
वाजः पुरस्तादुत मध्यतो नो वाजो देवाᳬ ऋतुभिः कल्पयाति ।
वाजंस्य हि प्रसवो नन्नंमीति विश्वा आशा वाजंपतिर्भवेयम् ॥
पयः पृथिव्यां पय ओषंधीषु पयों दिव्यन्तरिंक्षे पयों धाम् ।
पयंस्वतीः प्रदिशः सन्तु मह्यम् ॥
सं मां सृजामि पयंसा घृतेन सं मां सृजाम्यप (२) ओषंधीभिः । सोऽहं वाजंᳬ सनेयमग्ने ॥
नक्तोषासा समंनसा विरूपे धापयेते शिशुमेकᳬ समीची ।
द्यावा क्षामा रुक्मो अन्तर्वि भांति देवा अग्निं धारयन् द्रविणोदाः ॥
समुद्रोऽसि नभंस्वानार्द्रदानुः शम्भूर्मयोभूरभि मां वाहि स्वाहा मारुतोऽसि मरुतां गणः शम्भूर्मयोभूरभि मां वाहि स्वाहा ऽवस्युरंसि दुवंस्वाञ्छम्भूर्मयोभूरभि मां (३) वाहि स्वाहा ॥
(धनेषु,-पो, मा, द्वे चं) ॥ १२ ॥

अग्नियोगः, पुनश्चितिश्च ॥ त्रिष्टुप्; ३ विराट्स्थाना; ५ शक्वरी; ६ जगती; ११, १३ अनुष्टुप् । अग्निर्ऋषिः ।

अग्निं युनज्मि शवंसा घृतेनं दिव्यᳬ सुंपर्णं वयंसा बृहन्तंम् ।
तेनं वयं पंतेम ब्रध्नस्यं विष्टपᳬ सुवो रुहाणा अधि नाकं उत्तमे ॥
इमौ ते पक्षावजरौ पतत्रिणो याभ्याᳬ रक्षाᳬस्यपहᳬस्यंग्ने ।
ताभ्यां पतेम सुकृतांमु लोकं यत्रर्षंयः प्रथमजा ये पुंराणाः ॥
चिदंसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावां ।
हिरंण्यपक्षः शकुनो भुरण्युर्महान्त्सधस्थे ध्रुव (१) आ निषंत्तः ॥
नमंस्ते अस्तु मा मां हिᳬसीर्विश्वंस्य मूर्धन्नधि तिष्ठसि श्रितः ।
समुद्रे ते हृदंयमन्तरायुर्द्यावांपृथिवी भुवंनेष्वर्पिते ॥
उद्नो दंत्तोदधिं भिन्त दिवः पर्जन्यांदन्तरिंक्षात् पृथिव्यास्ततो नो वृष्ट्याऽवत ।
दिवो मूर्धाऽसिं पृथिव्या नाभिरूर्गपामोषंधीनाम् । विश्वायुः शर्म सप्रथा नमंस्पथे ॥
येनर्षंयस्तपंसा सत्र-(२)-मासतेन्धांना अग्निᳬ सुवंराभरंन्तः ।
तस्मिन्नहं नि दंधे नाके अग्निमेतं यमाहुर्मनंवः स्तीर्णबंर्हिषम् ॥
तं पत्नींभिरनुं गच्छेम देवाः पुत्रैर्भ्रातृंभिरुत वा हिरंण्यैः ।
नाकं गृह्णानाः सुंकृतस्यं लोके तृतीयें पृष्ठे अधिं रोचने दिवः ॥

आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पंतिश्चेकिंतानः ।
पृष्ठे पृथिव्या निहिंतो दविंद्युतदधस्पदं कृणुते (३) ये पृंतन्यवंः ॥
अयमग्निर्वीरतंमो वयोधाः संहस्रियों दीप्यतामप्रंयुच्छन् ।
विभ्राजंमानः सरिरस्य मध्य उप प्र यांत दिव्यानि धामं ॥
सं प्र च्यंवध्वमनु सं प्र यातावग्ने पथो देवयानांन् कृणुध्वम् ।
अस्मिन्त्सधस्थे अध्युत्तंरस्मिन् विश्वे देवा यजंमानश्च सीदत ॥
येनां सहस्रं वहंसि येनांग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह देवयानो य (४) उंत्तमः ॥
उद्बुंध्यस्वाग्ने प्रतिं जागृह्येनमिष्टापूर्ते सᳬ सृंजेथामयं चं ।
पुनंः कृण्वᳬस्त्वा पितरं युवांनमन्वातांᳬसीत् त्वयि तन्तुंमेतम् ॥
अयं ते योनिंर्ऋत्वियो यतो जातो अरोचथाः । तं जानन्नंग्न आ रोहाथां नो वर्धया रयिम् ॥
(ध्रुवः, सप्त, कृणुते, यः, सप्तत्रिंशच्च) ॥ १३ ॥

विहव्यानेष्टकोपधानम् ॥ त्रिष्टुप् । अग्निर्ऋषिः ।

ममांग्ने वर्चो विहवेष्वंस्तु वयं त्वेन्धांनास्तनुवं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतंस्रस्त्वयाऽध्यंक्षेण पृतंना जयेम ॥
ममं देवा विंहवे संन्तु सर्व इन्द्रांवन्तो मरुतो विष्णुंरग्निः ।
ममान्तरिंक्षमुरु गोपमंस्तु मह्यं वातंः पवतां कामे अस्मिन् ॥
मयिं देवा द्रविंणमा यंजन्तां मय्याशीरंस्तु मयिं देवहूंतिः ।
दैव्या होतांरा वनिषन्त (१) पूर्वेऽरिंष्टाः स्याम तनुवां सुवीराः ॥
मह्यं यजन्तु मम यानि हव्याऽऽकूंतिः सत्या मनंसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधिं वोचता मे ॥
देवीः षडुर्वीरुरु णंः कृणोत विश्वे देवास इह वीरयध्वम् ।
मा हांस्महि प्रजया मा तनूभिर्मा रंधाम द्विषते सोंम राजन् ॥
अग्निर्मन्युं प्रंतिनुदन् पुरस्ता-(२)-ददंब्धो गोपाः परिं पाहि नस्त्वम् ।
प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा वि नेंशत् ॥
धाता धांतृणां भुवंनस्य यस्पतिर्देवᳬ संवितारंमभिमातिषाहंम् ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजंमानं न्यर्थात् ॥
उरुव्यचां नो महिषः शर्म यᳬसदस्मिन् हवे पुरुहूतः पुंरुक्षु ।
स नंः प्रजायै हर्यश्व मृडयेन्द्र मा (३) नो रीरिषो मा परां दाः ॥

ये नंः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामवं बाधामहे तान् ।
वसंवो रुद्रा आंदित्या उंपरिस्पृशं मोग्रं चेत्तारमधिराजमंक्रन् ॥
अर्वाञ्चमिन्द्रममुतों हवामहे यो गोजिद्धनजिदंश्वजिद्यः ।
इमं नो यज्ञं विंहवे जुंषस्वास्य कुंर्मो हरिवो मेदिनं त्वां ॥
(वनिषन्त, पुरस्ता, न्मा, त्रिचंत्वारिंशच्च) ॥ १४ ॥

अश्वमेधसम्बन्धिवाग्यानुवाक्याः ॥ उपरिष्टाज्ज्योतिर्जगती; ८ पङ्क्तिः; १४ बृहती; २१-२२ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

अग्नेर्मन्वे प्रथमस्य प्रचेंतसो यं पाञ्चंजन्यं बहवंः समिन्धते ।
विश्वंस्यां विशि प्रविविशिवाᳬसंमीमहे स नो मुञ्चत्वᳬहंसः ॥
यस्येदं प्राणन्निमिषद्यदेजंति यस्यं जातं जनंमानं च केवंलम् ।
स्तौम्यग्निं नांथितो जोंहवीमि स नो मुञ्चत्वᳬहंसः ॥
इन्द्रंस्य मन्ये प्रथमस्य प्रचेंतसो वृत्रघ्नः स्तोमा उप मामुपागुः ।
यो दाशुषः सुकृतो हवमुप गन्ता (१) स नो मुञ्चत्वᳬहंसः ॥
यः संग्रामं नयंति सं वशी युधे यः पुष्टानिं सᳬसृजतिं त्रयाणि ।
स्तौमीन्द्रं नाथितो जोंहवीमि स नो मुञ्चत्वᳬहंसः ॥
मन्वे वां मित्रावरुणा तस्यं वित्तᳬ सत्यौजसा दृᳬहणा यं नुदेथे ।
या राजांनᳬ सरथं याथ उंग्रा ता नो मुञ्चतमागंसः ॥
यो वाᳬ रथं ऋजुरंश्मिः सत्यधर्मा मिथु चरंन्तमुपयातिं दूषयंन् ।
स्तौमि (२) मित्रावरुंणा नाथितो जोंहवीमि तौ नो मुञ्चतमागंसः ॥
वायोः संवितुर्विदथांनि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षंतः ।
यौ विश्वंस्य परिभू बंभूवतुस्तौ नो मुञ्चतमागंसः ॥
उप श्रेष्ठा न आशिषों देवयोर्धर्मे अस्थिरन् ।
स्तौमि वायुᳬ संवितारं नाथितो जोंहवीमि तौ नो मुञ्चतमागंसः ॥
रथीतमौ रथीनामंह्व ऊतये शुभं गमिंष्ठौ सुयमेभिरश्वैः ।
ययोः-(३)-वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागंसः ॥
यदयांतं वहतुᳬ सूर्यायास्त्रिचक्रेणं सᳬसदमिच्छमांनौ ।
स्तौमि देवावश्विनौ नाथितो जोंहवीमि तौ नो मुञ्चतमागंसः ॥
मरुतां मन्वे अधिं नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे ।
आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनंसः ।

त्रिग्ममायुधं वीडितꣳ सहस्वद्दिव्यꣳ शर्धः (४) पृतनासु जिष्णु ।
स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥
देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे ।
आशून्हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥
यदिदं माऽभिशोचति पौरुषेयेण दैव्येन ।
स्तौमि विश्वान्देवान्नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥
अनु नोऽद्यानुमति*-रन्वि-(५)-दनुमते त्वं*-वैश्वानरो न ऊत्या*-पृष्टो दिवि*-॥
ये अप्रथेताममितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनाम् ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः ॥
उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातम् ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः ॥
यत्ते वयं पुरुषत्रा यविष्ठाविद्वाꣳसश्चकृमा कच्चना-(६)-ऽऽगः ।
कृधी स्वस्माꣳ अदितेरनागा व्येनाꣳसि शिश्रथो विष्वगग्ने ॥
यथा ह तद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः ।
एवा त्वमस्मत्प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरां न आयुः ॥
(मन्ता, स्तौमि, यदो, वायो, अनु, यत्, चतुर्विꣳशतिश्च) ॥ १५ ॥

[अग्नाविष्णू ११८ । ज्यैष्ठ्यं च ११४ । शं च-११८ ।-मू-११४ ।-वाजा ९८ ।ऽग्नि-१२१ ।-युञ्जे-८४ ।-रश्मिः ६६ ।ऽग्नि-५८-र्मूर्धा १० । एषा १११ । वाचो १५२ ।ऽग्ने २३० । ममा-१६३ ।-ऽग्ने: ३३४ ।- पञ्चदश ॥ २०१८ ॥]

[॥ इति चतुर्थकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥]

[युञ्जानो २२९३ । विष्णो-२४२८ । अपां १८४४ । रश्मि-१८८७ -नमो १२२४ । ऽश्म-२३२१ । अग्नाविष्णू २०१८ । (सप्त ॥ ७ ॥ १४१०५)]

॥ इति चतुर्थं काण्डं सम्पूर्णम् ॥ ४ ॥

(४।७।१५-१६) तै. सं. ४।३।११।११-१२ (४।७।१०-१८) तै. सं. १।५।११।६,४

अथ पञ्चमं काण्डम् ।

उख्याग्निकथनम् ।

[अथ प्रथमः प्रपाठकः ॥ १ ॥]

अभ्र्यादानविधिः ॥ अग्निर्ऋषिः ।

सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवाव रुन्धे चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति छन्दाꣳसि देवेभ्योऽपाक्रामन् न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीतमधारयन् पुरोऽनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दाꣳस्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति यं कामयेत (१) पापीयान्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनमप गृह्णाति पापीयान्भवति यं कामयेत वसीयान्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान्भवत्यथो यज्ञस्यैवैषाऽभिक्रान्ति-रेति वा एष यज्ञमुखादृद्ध्या योऽग्नेर्देवताया एत्यष्टावेतानि सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रो (२) ऽग्निस्तेनैव यज्ञमुखादृद्ध्या अग्नेर्देवतायै नैत्य-ष्टौ सावित्राणि भवन्त्याहुतिर्नवमी त्रिवृतमेव यज्ञमुखे वि यातयति यदि कामयेत छन्दाꣳसि यज्ञयशसेनार्पयेयमित्यृचमन्तमां कुर्याच्छन्दाꣳस्येव यज्ञयशसेनार्पयति यदि कामयेत यजमानं यज्ञयशसेनार्पयेयमिति यजुरन्तमं कुर्याद्यजमानमेव यज्ञयशसेनार्पयत्यृ-चा स्तोमꣳ समर्द्धये-त्या-(३)-ह समृद्ध्यै चतुर्भिरभ्रिमा दत्ते चत्वारि छन्दाꣳसि छन्दोभिरेव देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्या अग्निर्देवेभ्यो निलायत स वेणुं प्राविशत् स एतामूतिमनु समचरद्वेणोः सुषिरꣳ सुषिराऽभ्रिर्भवति सयोनित्वाय स यत्रयत्रावसत् तत्कृष्णमभवत् कल्माषी भवति रूपसमृद्ध्या उभयतः क्ष्णूर्भवतीतश्चा-(४)-मुतश्चार्कस्यावरुद्ध्यै व्याममात्री भवत्येतावद्वै पुरुषे वीर्यं वीर्यसम्मिताऽपरिमिता भवत्यपरिमितस्यावरुद्ध्यै यो वनस्पतीनां फलग्रहिः स एषां वीर्यावान् फलग्रहिर्वेणुर्वैणवी भवति वीर्यस्यावरुद्ध्यै ॥ (कामयेत, गायत्रो, ऽर्धयेति, च, सप्तविꣳशतिश्च) ॥ १ ॥

मृदाहरणविधिः ॥ अग्निर्ऋषिः ।

व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमा दत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्तं वाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवास्यैतन्महिमानं व्याचष्टे युञ्जाथाꣳ रासभं युवमिति गर्दभमसत्येव गर्दभं प्रति ष्ठापयति तस्मादश्वाद्गर्दभोऽसत्तरो योगेयोगे तवस्तरमित्याह (१) योगेयोग एवैनं युङ्क्ते वाजेवाजे हवामह इत्याहान्नं वै वाजोऽन्नमेवाव रुन्धे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुन्धेऽग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत् प्राजापत्योऽश्वोऽश्वेन सं भरत्यनुवित्त्यै पापवस्यसं वा एतत् क्रियते यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान् (२) ह्यश्वाद्गर्दभोऽश्वं पूर्वं नयन्ति पापवस्यसस्य व्यावृत्त्यै तस्माच्छ्रेयाꣳसं पापीयान् पश्चादन्वेति

बहुर्वै भवतो भ्रातृव्यो भवतीव खलु वा एष योऽग्निं चिनुते वज्रिन्नश्वः प्रत्यवरोहन्नाक्रमणमग्निमित्याह वज्रेणैव पाप्मानं भ्रातृव्यमव क्रामति रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव (३) पशून् निर्याच्याऽऽत्मने कर्म कुरुते पूष्णा सयुजा सहेत्याह पूषा वा अध्वनाꣳ सन्नेता समष्ट्यै पुरीषायतनो वा एष यदग्निरङ्गिरसो वा एतमग्रे देवतानाꣳ समभरन् पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहीत्याह सायतनमेवैनं देवताभिः सं भरत्य-ग्निं पुरीष्यमङ्गिरस्वदच्छेम इत्याह येन (४) सङ्गच्छते वाजमेवास्य वृङ्क्ते प्रजापतये प्रतिप्रोच्याग्निः सम्भृत्य इत्याहुरियं वै प्रजापतिस्तस्या एतच्छ्रोत्रं यद्वल्मीकोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्याम इति वल्मीकवपामुप तिष्ठते साक्षादेव प्रजापतये प्रतिप्रोच्याग्निꣳ सं भरत्य-ग्निं पुरीष्यमङ्गिरस्वद्भराम इत्याह येन सङ्गच्छते वाजमेवास्य वृङ्क्ते ऽन्वग्निरुषसामग्र-(५)-मख्यदित्याहानुख्यात्यै आगत्य वाज्यध्वन आक्रम्य वाजिन् पृथिवीमित्याहेच्छत्येवैनं पूर्वया विन्दत्युत्तराभ्यामा क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते द्यौस्ते पृष्ठं पृथिवी सधस्थमित्याहैभ्यो वा एतं लोकेभ्यः प्रजापतिः समैरयद् रूपमेवास्यैतन्महिमानं व्याचष्टे वज्री वा (६) एष यदश्वो दद्भिरन्यतोदद्भ्यो भूयाँल्लोमभिरुभयादद्भ्यो यं द्विष्यात् तमधस्पदं ध्यायेद्वज्रेणैवैनꣳ स्तृणुते ॥ (आह, पापीयान्, रुद्रादेव, येना,-ऽग्र, वज्री वै, सप्तदश च) ॥ २ ॥

अथाक्रमणादि मृत्संस्कारः ॥ अग्निर्ऋषिः ।

उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्तेऽप उप सृजति यत्र वा आप उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून् यज्ञो यज्ञं यजमानो यजमानं प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः (१) स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति जिघर्म्यग्निं मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति प्रतिक्ष्यन्तं भुवनानि विश्वेत्याह सर्वꣳ ह्येष प्रत्यङ् क्षेति पृथुं तिरश्चा वयसा बृहन्तमित्याहाल्पो ह्येष जातो महान् (२) भवति व्यचिष्ठमन्नꣳ रभसं विदानमित्याहान्नमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदा-ऽऽ त्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत् पुरुषो मनसाऽभिगच्छति तद्वाचा वदत्य-रक्षसेत्याह रक्षसामपहत्यै मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवास्मिन् दधात्य-पचितिमान् भवति य एवं (३) वेद मनसा त्वै तामाप्तुमर्हति यामध्वर्युरनग्नावाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्यां प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येतर्हि खलु वा एतद्यज्ञमुखं यर्ह्येनदाहुतिरश्नुते परि लिखति रक्षसामपहत्यै तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्माद्रक्षाꣳस्यप हन्ति (४) गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति त्रिष्टुभा परि लिखतीन्द्रियं वै त्रिष्टुगिन्द्रियेणैवैनं परि गृह्णात्य-नुष्टुभा परि लिखत्यनुष्टुप् सर्वाणि छन्दाꣳसि परिभूः पर्याप्त्यै मध्यतोऽनुष्टुभा वाग्वा अनुष्टुप् तस्मान्मध्यतो वाचा

वदामो गायत्रिया प्रथमया परि लिखत्यथानुष्टुभाऽथ त्रिष्टुभा तेजो वै गायत्री (५) यज्ञोऽनुष्टुगिन्द्रियं त्रिष्टुप् तेजसा चैवेन्द्रियेण चोभयतो यज्ञं परि गृह्णाति ॥ (अन्धोऽध्वर्युः,-महान्, भवति य एवं, हन्ति, त्रिष्टुभा तेजो वै गायत्री, त्रयोदश च) ॥ ३ ॥

मृत्खननं, वल्मीकवपो, सम्भरणं च ॥ अग्निर्ऋषिः ।

देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर्जातः प्रजाः शुचाऽऽर्पयत् तं देवा अर्धर्चेनाशमयञ्छिवं प्रजाभ्योऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति द्वाभ्यां खनति प्रतिष्ठित्या अपां पृष्ठमसीति पुष्करपर्णमा (१) हरत्यपां वा एतत् पृष्ठं यत् पुष्करपर्णꣳ रूपेणैवैनदा हरति पुष्करपर्णेन सं भरति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निꣳ सं भरति कृष्णाजिनेन सं भरति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सं भरति यद्ग्राम्याणां पशूनां चर्मणा सम्भरेद् ग्राम्यान् पशूञ्छुचाऽर्पयेत् कृष्णाजिनेन सं भरत्यारण्यानेव पशून् (२) शुचाऽर्पयति तस्मात् समावत् पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृता लोमतः सं भरत्यतो ह्यस्य मेध्यं कृष्णाजिनं च पुष्करपर्णं च सꣳ स्तृणातीयं वै कृष्णाजिनमसौ पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णात्य-ग्निर्देवेभ्यो निलायत तमथर्वाऽन्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्न इत्या-(३)-ह य एवैनमन्वपश्यत् तेनैवैनꣳ सं भरति त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत् तमु त्वा दध्यङ्ङृषिरित्याह दध्यङ् वा आथर्वणस्तेजस्व्यासीत् तेज एवास्मिन् दधाति तमु त्वा पाथ्यो वृषेत्याह पूर्वमेवोदितमुत्तरेणाभि गृणाति (४) चतसृभिः सं भरति चत्वारि छन्दाꣳसि छन्दोभिरेव गायत्रीभिर्ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यं कामयेत वसीयान्स्यादित्युभयीभिस्तस्य सं भरेत् तेजश्चैवास्मा इन्द्रियं च समीची दधात्य-ष्टाभिः सं भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तꣳ सं भरति सीद होतरित्या-(५)-ह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्सꣳ सीदस्वेति वयाꣳसि जनिष्वा हि जेन्यो अग्रे अह्नामित्याह देवमनुष्यानेवास्मै सꣳसन्नान् प्र जनयति ॥ (आ,-ऽरण्यानेव पशून्,-निरमन्थदग्न इत्या, गृणाति, होतरिति, सप्तविꣳशतिश्च) ॥ ४ ॥

सम्भृतमृदो वशभूमौ समाहरणम् ॥ अग्निर्ऋषिः ।

क्रूरमिव वा अस्या एतत् करोति यत् खनत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्यै शुचꣳ शमयति सं ते वायुर्मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणꣳ सं दधाति सं ते वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते तस्मै च देवि वषडस्तु (१) तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्मात् सर्वानृतून् वर्षति यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद् रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति सुजातो ज्योतिषा सहेत्यनुष्टुभोप नह्यत्यनुष्टुप् (२) सर्वाणि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनं तनुवा परि दधाति वेदुको वासो भवति य एवं वेद वारुणो वा अग्निरुपनद्ध उदु तिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इति सावित्रीभ्यामुत् तिष्ठति सवितृप्रसूत एवास्योर्ध्वां

वरुणमेनिमुत् सृजति द्वाभ्यां प्रतिष्ठित्यै स जातो गर्भो असि (२) रोदस्योरित्याहेमे वै रोदसी तयोरेष गर्भो यदग्निस्तस्मादेवमाहा—ग्ने चारुर्विभृत ओषधीष्वित्याह यदा ह्येतं विभरन्त्यथ चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्गा इत्याहौषधयो वा अस्य मातरस्ताभ्य एवैनं प्र च्यावयति स्थिरो भव वीडुङ्ग इति गर्दभ आ सादयति (४) सं नह्यत्येवैनमेतया स्थेम्ने गर्दभेन सं भरति तस्माद् गर्दभः पशूनां भारभारितमो गर्दभेन सं भरति तस्माद्गर्दभोऽप्यनालेशेऽत्यन्यान् पशून् मेद्यत्यन्न२ँ ह्येने-नार्क२ँ संभरन्ति गर्दभेन सं भरति तस्माद् गर्दभो द्विरेताः सन् कनिष्ठं पशूनां प्र जायतेऽग्निर्ह्यस्य योनिं निर्दहति प्रजासु वा एष एतर्ह्यारूढः (५) स ईश्वरः प्रजाः शुचा प्रदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य एवैन२ँ शमयति मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि प्रजा मा द्यावापृथिवी अभि शूशुचो माऽन्तरिक्षं मा वनस्पतीनित्याहैभ्य एवैनं लोकेभ्यः शमयति प्रैतु वाजी कनिक्रददित्याह वाजी ह्येषं नानदद्रासभः पत्वेत्या-(६)-ह रासभ इति ह्येतमृषयोऽवदन् भरन्नग्निं पुरीष्यमित्याहाग्नि२ँ ह्येष भरति मा पाद्यायुषः पुरेत्याहाऽऽयुरेवास्मिन् दधाति तस्माद्गर्दभः सर्वमायुरेति तस्माद्गर्दभे पुरा-ऽऽयुषः प्रमीते बिभ्यति वृषाऽग्निं वृषणं भरन्नित्याह वृषा ह्येष वृषाऽग्निर—पां गर्भ२ँ (७) समुद्रिय-मित्याहापा२ँ ह्येष गर्भो यदग्नि—रग्न आ याहि वीतय इति वा इमौ लोकौ व्यैतामग्न आ याहि वीतय इति यदाहानयोर्लोकयोर्वीत्यै प्रच्युतो वा एष आयतनादगतः प्रतिष्ठा२ँ स एतर्ह्यध्वर्युं च यजमानं च ध्या-यत्यृत२ँ सत्यमित्याहेयं वा ऋतमसौ (८) सत्यमनयोरेवैनं प्रति ष्ठापयति नाऽऽर्तिमार्च्छत्यध्वर्युर्न यज-मानो वरुणो वा एष यजमानमभ्येति यदग्निरुपनद्ध ओषधयः प्रति गृभ्णीताग्निमेतमित्याह शान्त्यै व्यस्यन् विश्वा अमतीररातीरित्याह रक्षसामपहत्यै निषीदन् नो अप दुर्मति२ँ हनदित्याह प्रतिष्ठित्यै ओषधयः प्रति मोदध्व-(९)-मेनमित्याहौषधयो वा अग्नेर्भागधेयं ताभिरेवैन२ँ समर्धयति पुष्पावतीः सुपिप्पला इत्याह तस्मादोषधयः फलं गृह्णन्त्य—यं वो गर्भ ऋत्वियः प्रत्न२ँ सधस्थमाऽसददित्याह याभ्य एवैनं प्रच्यावयति तास्वेवैनं प्रति ष्ठापयति द्वाभ्यामुपावहरति प्रतिष्ठित्यै ॥ (अस्य,-नृषद्,-वति, सादयत्या,-रूढः, पत्वेति गर्भ,-मसौ, मोदध्वं, द्विचत्वारि२ँशच्च) ॥ ५ ॥

उखानिर्माणम् ॥ अग्निर्ऋषिः ।

वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्र२ँसयति सवितृप्रसूत एवास्य विषूचीं वरुणमेनिं वि सृजत्य—प उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्य शुच२ँ शमयति तिसृभिरुप सृजति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्य शुच२ँ शमयति मित्रः स२ँसृज्य पृथिवीमित्याह मित्रो वै शिवो देवानां तेनैवै-(१)-न२ँ स२ँ सृजति शान्त्यै यद्ग्राम्याणां पात्राणां कपालैः स२ँसृजेद्ग्राम्याणि पात्राणि शुचाऽर्पयेदर्म-कपालैः स२ँ सृजत्येतानि वा अनुपजीवनीयानि तान्येव शुचाऽर्पयति शर्कराभिः स२ँ सृजति धृत्या अथो शन्त्वाया—जलोमैः स२ँ सृजत्येषा वा अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तनुवा स२ँ सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः स२ँ (२) सृजति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञ२ँ स२ँसृजति रुद्राः सम्भृत्य पृथिवीमित्याहैता वा एतं देवता अग्रे समभरन् ताभिरेवैन२ँ सम्भरति मखस्य शिरोऽसी-

२६ (तै. सं.)

त्याह यज्ञो वै मखस्तस्यैतच्छिरो यदुखा तस्मादेवमाह यज्ञस्य पदे स्थ इत्याह यज्ञस्य ह्येते (३) पदे अथो प्रतिष्ठित्यै प्रान्याभिर्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनत्वाय त्र्युद्धिं करोति त्रय इमे लोका एषां लोकानामाप्त्यै छन्दोभिः करोति वीर्यं वै छन्दा२ँसि वीर्येणैवैनां करोति यजुषा बिलं करोति व्यावृत्त्यै इयतीं करोति प्रजापतिना यज्ञमुखेन सम्मिताम् द्विस्तनां करोति द्यावापृथिव्योर्दोहाय चतुःस्तनां करोति पशूनां दोहाया—ष्टास्तनां करोति छन्दसां दोहाय नवाश्रिमभिचरतः (४) कुर्यात् त्रिवृतमेव वज्र२ँ सम्भृत्य भ्रातृव्याय प्र हरति स्तृत्यै कृत्वाय सा महीमुखामिति नि दधाति देवता-स्वेवैनां प्रति ष्ठापयति ॥ (तेनैव, लोमभिः स,-मेव, अभिचरत, एकविंशतिश्च) ॥ ६ ॥

धूपनादिरुखासंस्कारः ॥ अग्निर्ऋषिः ।

सप्तभिर्धूपयति सप्त वै शीर्षण्याः प्राणाः शिर एतद्यज्ञस्य यदुखा शीर्षन्नेव यज्ञस्य प्राणान् दधाति तस्मात् सप्त शीर्षन् प्राणा अश्वशकेन धूपयति प्राजापत्यो वा अश्वः सयोनित्वाया—दितिस्त्वेत्याहेयं वा अदितिरदित्यैवादित्यां खनत्यस्या अक्रूरङ्काराय न हि स्वः स्व२ँ हिनस्ति देवानां त्वा पत्नीरित्याह देवानां (१) वा एतां पत्नयोऽग्रेऽकुर्वन् ताभिरेवैनां दधाति धिषणास्त्वेत्याह विद्या वै धिषणा विद्या-भिरेवैनामभीन्धे ग्नास्त्वेत्याह छन्दा२ँसि वै ग्नाश्छन्दोभिरेवैना२ँ श्रपयति वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो होत्राभिरेवैनां पचति जनयस्त्वेत्याह देवानां वै पत्नी-(२)-र्जनयस्ताभिरेवैनां पचति षड्भिः पचति षड्वा ऋतव ऋतुभिरेवैनां पचति द्विः पचन्त्वित्याह तस्माद् द्विः संवत्सरस्य सस्यं पच्यते वारुण्युखा-ऽभीद्धा मैत्रियोपैति शान्त्यै देवस्त्वा सवितोद्वपत्वित्याह सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्वपत्य—पद्यमाना पृथिव्याशा दिश आ पृण-(३)-त्याह तस्मादग्निः सर्वा दिशोऽनु वि भात्यु—त्तिष्ठ बृहती भवो-र्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्यै असुर्यं पात्रमनाच्छृण्णमा च्छृणत्ति देवत्राऽक—रजक्षीरेणाऽऽ-च्छृणत्ति परमं वा एतत् पयो यदजक्षीरं परमेणैवैनां पयसाऽऽच्छृणत्ति यजुषा व्यावृत्त्यै छन्दो-भिरा च्छृणत्ति छन्दोभिर्वा एषा-(४)-क्रियते छन्दोभिरेव छन्दा२ँस्या च्छृणत्ति ॥ (आह देवानां, वै पत्नीः, पृण, वा, षट् च) ॥ ७ ॥

वह्निपशवः ॥ अग्निर्ऋषिः ।

एकविंशत्या माषैः पुरुषशीर्षमच्छैत्यमेध्या वै माषा अमेध्यं पुरुषशीर्षममेध्यैरेवास्यामेध्यं निरवदाय मेध्यं कृत्वाऽऽहरत्ये—कविंशतिर्भवन्त्येकविंशो वै पुरुषः पुरुषस्याऽऽप्त्यै व्यृद्धं वा एतत् प्राणैर-मेध्यं यत् पुरुषशीर्ष२ँ सप्तधा वितृण्णां वल्मीकवपां प्रति नि दधाति सप्त वै शीर्षण्याः प्राणाः प्राणैरेवैनत् समर्धयति मेध्यत्वाय यावन्तो (१) वै मृत्युबन्धवस्तेषां यम आधिपत्यं परीयाय यमगाथाभिः परि गायति यमादेवैनद्वृङ्क्ते तिसृभिः परि गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते तस्माद्गायते न देयं गाथा हि तद्वृङ्क्ते ऽग्निभ्यः पशूना लभते कामा वा अग्नयः कामानेवाव रुन्धे यत् पशून् नाऽऽलभेतानवरुद्धा अस्य (२) पशवः स्युर्यत् पर्यग्निकृतानुत्सृजेद्यज्ञवेशसं कुर्याद्यत् स२ँस्थापयेद्यातयामानि शीर्षाणि स्युर्यत् पशूनालभते तेनैव पशूनव रुन्धे यत् पर्यग्निकृतानुत्सृजति शीर्ष्णामयातयामत्वाय

प्राजापत्येन स२ँ स्थापयति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रति ष्ठापयति प्रजापतिः प्रजा असृजत स रिरि-चानोऽमन्यत स एता आप्रीरपश्यत् ताभिर्वै स मुखत (१) आत्मानमाऽप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापतिर्यज्ञमेवैताभिर्मुखत आ प्रीणात्य—परिमितछन्दसो भवन्त्यपरिमितः प्रजापतिः प्रजा-पतेराप्त्यै ऊनातिरिक्ता मिथुनाः प्रजात्यै लोमशं वै नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाव रुन्धे सर्वाणि वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता अग्नेश्चित्यस्य (२) भवन्त्ये—कविंशतिं सामिधेनीरन्वाह रुग्वा एकविंशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविंशश्च—तुर्विंशतिमन्वाह चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे पराचीरन्वाह पराङिव हि सुवर्गो लोकः समास्त्वाऽग्न ऋतवो वर्धयन्त्वि-त्याह समाभिरेवाग्निं वर्धयत्यृ—(३)—तुभिः संवत्सरं विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह तस्मा-दग्निः सर्वा दिशोऽनु वि भाति प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवास्मादप नुदत्यु—द्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादप हन्त्यु—गन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति न संवत्सरस्तिष्ठति नास्य श्रीस्तिष्ठति यस्यैताः (४) क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद् दधाति सुवर्गस्य लोकस्यानुख्यात्यै ॥ (यावन्तो, ऽस्य, मुखत, श्चित्यस्य, वर्धयत्या,-द्वियां,ऽष्टाविंशतिश्च) ॥ ८ ॥

इष्टयजनम् ॥ अग्निर्ऋषिः ।

षड्भिर्दीक्षयति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयति सप्तभिर्दीक्षयति सप्त छन्दा२ँसि छन्दोभिरेवैनं दीक्षयति विश्वो देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति वाग्वा अनुष्टुप् तस्मात् प्राणानां वागुत्तमै—कस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः (१) प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजाना२ँ सृष्ट्यै यद-र्चिषि प्रवृञ्ज्याद्भूतमव रुन्धीत यदङ्गारेषु भविष्यदङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुन्धे भविष्यद्धि भूयो भूताद् द्वाभ्यां प्र वृणक्ति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मणा वा एषा यजुषा सम्भृता यदुखा सा यद्भिद्येतार्तिमार्च्छे-(२)-द्यजमानो हन्येतास्य यज्ञो मित्रैतामुखां तपेत्याह ब्रह्म वै मित्रो ब्रह्मन्नेवैनां प्रति ष्ठापयति नाऽऽर्तिमार्च्छति यजमानो नास्य यज्ञो हन्यते यदि भिद्येत तैरेव कपालैः स२ँ सृजेत् सैव ततः प्रायश्चित्ति—र्यो गतश्रीः स्यान्मथित्वा तस्याव दध्याद्भूतो वा एष स स्वां (३) देवतामुपैति यो भूतिकामः स्याद्य उखायै सम्भवेत् स एव तस्य स्याद्धि ह्येष सम्भवत्येष वै स्वयम्भूर्नाम भवत्येवं यं कामयेत भ्रातृव्यमस्मै जनयेयमित्यन्यतस्तस्याऽऽहृत्याव दध्यात् साक्षादेवास्मै भ्रातृव्यं जनयत्य—म्बरीषादन्नकामस्याव दध्यादम्बरीषे वा अन्नं भ्रियते सयोन्येवान्न-(४)-मव रुन्धे मुञ्जानव दधा-त्यूर्ग्वै मुञ्जा ऊर्जमेवास्मा अपि दधात्य—ग्निर्देवेभ्यो निलायत स क्रुमुकं प्राविशत् क्रुमुकमव दधाति यदे-वास्य तत्र न्यक्तं तदेवाव रुन्ध आज्येन सं यौत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्-

धयत्यथो तेजसा (५) वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुप तिष्ठते त्रय इमे लोका एष्वेव लोकेष्वाविदं गच्छत्यथो प्राणा-नेवाऽऽत्मन् धत्ते ॥ (प्रजापति,-र्न्यून, स्वां,-मेवान्नं, तेजसा, चतुस्त्रि२ँशच्च) ॥ ९ ॥

उखधारणम् ॥ अग्निर्ऋषिः ।

न ह स्म वै पुराऽग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्षिरस्वदयद्यदग्ने यानि कानि चेति समि-धमा दधात्यपरशुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवं वेदौ—दुम्बरीमा दधात्यूर्ग्वा उदु-म्बर ऊर्जमेवास्मा अपि दधाति प्रजापतिरग्निमसृजत त२ँ सृष्ट२ँ रक्षा२ँस्य-(१)-जिघा२ँसन्स एतद्रा-क्षोघ्नमपश्यत् तेन वै स रक्षा२ँस्यपाहत यद्राक्षोघ्नं भवत्यग्नेरेव तेन जाताद्रक्षा२ँस्यप हन्त्या—श्वत्थीमा दधात्यश्वत्थो वै वनस्पतीना२ँ सपत्नसाहो विजित्यै वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीम-यीमा दधाति शान्त्यै स२ँशितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरी (२) वाचयति ब्रह्मणैव क्षत्र२ँ स२ँ श्यति क्षत्रेण ब्रह्म तस्माद्ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं तस्माद्राजन्यो ब्राह्मणवानत्यन्य२ँ राजन्यं मृत्युर्वा एष यदग्निरमृत२ँ हिरण्य२ँ रुक्ममन्तरं प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्त एकवि-२ँशतिनिर्बाधो भवत्येकविंशतिर्वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य (३) एकवि२ँश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति निर्बाधैर्वै देवा असुरान् निर्बाधेऽकुर्वत तन्निर्बाधानां निर्बाधत्वं निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते सावित्रिया प्रति मुञ्चते प्रसूत्यै नक्तोषासेत्युत्तरया ऽहोरात्राभ्यामेवैनमुद्यच्छते देवा अग्निं धारयन् द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य (४) प्राणैर्दाधारा—ऽऽसीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति षडुद्यामं शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैनमुद्यच्छते यद् द्वादशोद्याम२ँ संवत्सरेणैव मौञ्जं भवत्यूर्ग्वै मुञ्जा ऊर्जैवैन२ँ स-(५)-मर्धयति सुपर्णोऽसि गरुत्मानित्यवेक्षते रूपमेवास्यैतन्महिमानं व्या-चष्टे दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनं लोकं गमयति ॥ (रक्षा२ँस्यौ,-दुम्बरी, आदित्य, उद्यत्य, सं, चतुर्विंशतिश्च) ॥ १० ॥

अश्वस्वामिनः प्रयाजयाज्याः ॥ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः ।
वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥
घृतेनाञ्जन्त्सं पथो देवयानान् प्रजानन् वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ता२ँ स्वधामस्मै यजमानाय धेहि ॥
ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा (१) देवैर्वसुभिः सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥

स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥
एता उ वः सुभगा विश्वरूपा वि पक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥
अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभि संविदाने ।
उषासा वा५ (२) सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि ॥
प्रथमा वा५ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥
आदित्यैर्नो भारती वष्टु यज्ञ५ सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥
त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः (३)
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥
अश्वो घृतेन त्मन्या समक्त उप देवा५ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥
प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥

(अभिव्रो, वा,-मस्त्वो, द्विचत्वारि५शच्च) ॥ ११ ॥

[सावित्राणि २०७ । व्यृद्ध-३१७ । युञ्-२६३ ।-देवस्य २०० । पूर्वं १९२ । वाजुना २२१ । सुमभि-२०६ । -२६बिन्
समा १२८ । पविद्र-२८४ ।-ने २०४ । समिद्ध १९२ ॥ एकादश ॥ ३०८१]

[॥ इति पञ्चमकाण्डे प्रथमः प्रपाठकः ॥ १ ॥]

चित्युपक्रमाभिधानम् ।

[अथ द्वितीयः प्रपाठकः ॥ २ ॥]

आसन्द्यां वह्निस्थापनं, वात्सप्रेणोपस्थानं च ॥ अग्निर्देवता ।

विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन् यद्विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जगती द्यौरानुष्टुभीर्दिशश्छन्दोभिरेवेमाँल्लोकान् यथापूर्वमभि जयति प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः (१) पराङैत् तमेतयाऽन्वैदक्रन्ददिति तया वै सोऽग्नेः प्रियं धामावारुन्ध यदेतामन्वाहाग्नेरेवैतया प्रियं धामाव रुन्ध ईश्वरो वा एष पराङ् प्रदघो यो विष्णुक्रमान् क्रमते चतसृभिरा वर्तते चत्वारि

छन्दा५सि छन्दा५सि खलु वा अग्नेः प्रिया तनूः प्रियामेवास्य तनुवमभि (२) पर्यावर्तते दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते शुनःशेपमाजीगर्तिं वरुणोऽगृह्णात् स एतां वारुणीमपश्यत् तया वै स आत्मानं वरुणपाशादमुञ्चद्वरुणो वा एतं गृह्णाति य उखां प्रतिमुञ्चत उदुत्तमं वरुणपाशमस्मदित्याहाऽऽत्मानमेवैतया (३) वरुणपाशान्मुञ्चत्या त्वाऽहार्षमित्याहाऽऽह्येन५ हरति ध्रुवस्तिष्ठाविचाचलिरित्याह प्रतिष्ठित्यै विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैन५ समर्धयत्यस्मिन् राष्ट्रमधि श्रयेत्याह राष्ट्रमेवास्मिन् ध्रुवमकर्यं कामयेत राष्ट्र५ स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवत्य (४) ग्ने बृहन्नुषसामूर्ध्वो अस्थादित्याहाग्रमेवैन५ समानानां करोति निर्जगन्वान् तमस इत्याह तम एवास्मादप हन्ति ज्योतिषाऽऽगादित्याह ज्योतिरेवास्मिन् दधाति चतसृभिः सादयति चत्वारि छन्दा५सि छन्दोभिरेवाति-च्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैन५ समानानां करोति सद्वती (५) भवति सत्त्वमेवैनं गमयति वात्सप्रेणोप तिष्ठत एतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामावारुन्धाग्नेरेवैतेन प्रियं धामाव रुन्धे एकादशं भवत्येकधैव यजमाने वीर्यं दधाति स्तोमेन वै देवा अस्मिँल्लोक आर्ध्नुवन् छन्दोभिरमुष्मिन्त्स्तोमस्येव खलु वा एतद्रूपं यद्वात्सप्रं यद्वात्सप्रेणोपतिष्ठत (६) इममेव तेन लोकमभि जयति यद्विष्णुक्रमान् क्रमतेऽमुमेव तैर्लोकमभि जयति पूर्वेद्युः प्र क्रामत्युत्तरेद्युरुप तिष्ठते तस्माद्योगेऽन्यासां प्रजानां मनः क्षेमेऽन्यासां तस्माद्यायावरः क्षेम्यस्येशे तस्माद्यायावरः क्षेम्यमध्यवस्यति मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै ॥

(सृष्टो, ऽन्वं,-तया, भवति, सद्वत्यु,-पतिष्ठते, द्विचत्वारि५शच्च) ॥ १ ॥

उख्याग्निनयनम् ॥ अग्निर्देवता ।

अन्नपतेऽन्नस्य नो देहीत्याहाग्निर्वा अन्नपतिः स एवास्मा अन्नं प्र यच्छत्यनमीवस्य शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याहाऽऽशिषमेवैतामा शास्त उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः (१) प्राणैरेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैन५ समर्धयति चतसृभिरा सादयति चत्वारि छन्दा५सि छन्दोभिरेवातिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैन५ समानानां करोति सद्वती भवति सत्त्वमेवैनं गमयति प्रेदग्ने ज्योतिष्मान् (२) याहीत्याह ज्योतिरेवास्मिन् दधाति तनुवा वा एष हिनस्ति य५ हिनस्ति मा हि५सीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैन५ शमयति रक्षा५सि वा एतद्यज्ञ५ सचन्ते यदन उत्सर्जत्यक्रन्ददित्यन्वाह रक्षसामपहत्या अनसा वहन्त्यपचितिमेवास्मिन् दधाति तस्मादनस्वी च रथी चातिथीनामपचिततमौ (३) अपचितिमान् भवति य एवं वेद समिधाऽग्निं दुवस्यतेति घृतानुषिक्तामवसिते समिधमा दधाति यथाऽतिथय आगताय सर्पिष्वदातिथ्यं क्रियते तादृगेव तद्गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्योऽप्सु भस्म प्र वेशयत्यप्सुयोनिर्वा अग्निः स्वामेवैनं योनिं गमयति तिसृभिः प्र वेशयति त्रिवृद्वा (४) अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति परा वा एषोऽग्निं वपति योऽप्सु भस्म प्रवेशयति ज्योतिष्मती-

त्यावर्थ दधाति ज्योतिरेवास्मिन् दधाति द्वाभ्यां प्रतिष्ठित्यै परा वा एष प्रजां पशून् वपति योऽप्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति प्रजामेव पशूनात्मन् धत्ते पुनस्त्वाऽऽदित्या (५) रुद्रा वसवः समिन्धतामित्याहैता वा एतं देवता अग्रे समैन्धत ताभिरेवैन५ समिन्धे बोधा स बोधीत्युप तिष्ठते बोधयत्येवैनं तस्मात् सुप्त्वा प्रजाः प्र बुध्यन्ते यथास्थानमुप तिष्ठते तस्माद्यथास्थानं पशवः पुनरेत्योप तिष्ठन्ते ॥ (देवा, ज्योतिष्मा,-नपचिततमौ, त्रिवृद्वा, आदित्या, द्विचत्वारि५शच्च) ॥ २ ॥

गार्हपत्यचयनम् ॥ अग्निर्देवता ।

यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं देवयजनमस्या अनिर्याच्याग्निं चिनुते यमायैन५ स चिनुतेऽपेतेत्यध्यवसाययति यममेव देवयजनमस्यै निर्याच्याऽऽत्मनेऽग्निं चिनुत इष्वग्रेण वा अस्या अनामृतमिच्छन्तो नाविन्दन् ते देवा एतद्यजुरपश्यन्नपेतेति यदेतेनाध्यवसाययत्य-(१)-नामृत एवाग्निं चिनुत उद्धन्ति यदेवास्या अमेध्यं तदप हन्त्यपोऽवोक्षति शान्त्यै सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य रूप५ रूपेणैव वैश्वानरमव रुन्ध ऊषान् नि वपति पुष्टिर्वा एषा प्रजननं यदूषाः पुष्टयामेव प्रजननेऽग्निं चिनुतेऽथो संज्ञान एव संज्ञान५ ह्येतत् (२) पशूनां यदूषा द्यावापृथिवी सहाऽऽस्तां ते वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति यदमुष्या यज्ञियमासीत् तदस्यामदधात् त ऊषा अभवन् यदस्या यज्ञियमासीत् तदमुष्यामदधात् तददश्चन्द्रमसि कृष्णमूषान् निवपन्नदो ध्यायेद् द्यावापृथिव्योरेव यज्ञियेऽग्निं चिनुतेऽय५ सो अग्निरिति विश्वामित्रस्य (३) सूक्तं भवत्येतेन वै विश्वामित्रोऽग्नेः प्रियं धामावारुन्धाग्नेरेवैतेन प्रियं धामाव रुन्धे छन्दोभिर्वै देवाः सुवर्गं लोकमायन् चतस्रः प्राचीरुप दधाति चत्वारि छन्दा५सि छन्दोभिरेव तद्यजमानः सुवर्गं लोकमेति तेषा५ सुवर्गं लोकं यतां दिशः समव्लीयन्त ते द्वे पुरस्तात् समीची उपादधत द्वे (४) पश्चात् समीची ताभिर्वै ते दिशोऽदृ५हन् यद् द्वे पुरस्तात् समीची उपदधाति द्वे पश्चात् समीची दिशां विधृत्या अथो पशवो वै छन्दा५सि पशूनेवास्मै समीचो दधात्यष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तं चिनुतेऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्री सुवर्गं लोकमञ्जसा वेद सुवर्गस्य लोकस्य (५) प्रज्ञात्यै त्रयोदश लोकम्पृणा उप दधात्येकवि५शतिः सं पद्यन्ते प्रतिष्ठा वा एकवि५शः प्रतिष्ठा गार्हपत्य एकवि५शस्यैव प्रतिष्ठां गार्हपत्यमनु प्रति तिष्ठति प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद पञ्चचितीकं चिन्वीत प्रथमं चिन्वानः पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे त्रिचितीकं चिन्वीत द्वितीयं चिन्वानस्त्रय इमे लोका एष्वेव लोकेषु (६) प्रति तिष्ठत्येकचितीकं चिन्वीत तृतीयं चिन्वान एकधा वै सुवर्गो लोक एकवृतैव सुवर्गं लोकमेति पुरीषेणाभ्यूहति तस्मान्मा५सेनास्थि छन्नं न दुश्चर्मा भवति य एवं वेद पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठति ॥ (अध्यवसाययति, ह्येत,-द्विश्वामित्रस्य, दधत द्वे, लोकस्य, लोकेषु, सप्तचत्वारि५शच्च) ॥ ३ ॥

अग्न्यभिसंवपनम् ॥ अग्निर्देवता ।

वि वा एतौ द्विषाते यश्च पुराऽग्निर्यश्चोखायाः समितमिति चतसृभिः सं नि वपति चत्वारि छन्दा५सि छन्दा५सि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनौ तनुवा स५ शास्ति समितमित्याह तस्माद्ब्रह्मणा क्षत्र५

समेति यत् सन्युप्य विहरति तस्माद्ब्रह्मणा क्षत्रं व्येत्यृतुभि-(१)-र्वा एतं दीक्षयन्ति स ऋतुभिरेव विमुच्यो मातेव पुत्रं पृथिवी पुरीष्यमित्याहर्तुभिरेवैनं दीक्षयित्वर्तुभिर्वि मुञ्चति वैश्वानर्या शिक्यमा दत्ते स्वदयत्येवैनं नैर्ऋतीः कृष्णास्तिस्रस्तुषपक्वा भवन्ति निर्ऋत्यै वा एतद्भागधेयं यत् तुषा निर्ऋत्यै रूपं कृष्ण५ रूपेणैव निर्ऋतिं निरवदयत इमां दिशं यन्त्येषा (२) वै निर्ऋत्यै दिक् स्वायामेव दिशि निर्ऋतिं निरवदयते स्वकृत इरिण उप दधाति प्रदरे वैतद्वै निर्ऋत्या आयतन५ स्व एवाऽऽयतने निर्ऋतिं निरवदयते शिक्यमभ्युप दधाति नैर्ऋतो वै पाशः साक्षादेवैनं निर्ऋतिपाशान्मुञ्चति तिस्र उप दधाति त्रेधाविहितो वै पुरुषो यावानेव पुरुषस्तस्मान्निर्ऋतिमव यजते पराचीरुप (३) दधाति पराचीमेवास्मान्निर्ऋतिं प्र णुदतेऽप्रतीक्षमा यन्ति निर्ऋत्या अन्तर्हित्यै मार्जयित्वोप तिष्ठन्ते मेध्यत्वाय गार्हपत्यमुप तिष्ठन्ते निर्ऋतिलोक एव चरित्वा पूता देवलोकमुपावर्तन्त एकयोप तिष्ठन्त एकधैव यजमाने वीर्यं दधाति निवेशनः सङ्गमनो वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनं पशुभिः समर्धयन्ति ॥

(ऋतुभि,-रेषा, पराचीरुप,-शाचत्वारि५शच्च) ॥ ४ ॥

क्षेत्रकर्षणम् ॥ अग्निर्देवता ।

पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितो यज्ञपरुषैवैनं वि मिमीते यावान् पुरुष ऊर्ध्वबाहुस्तावान् भवत्येतावद्वै पुरुषे वीर्यं वीर्येणैवैनं वि मिमीते पक्षी भवति न ह्यपक्षः पतितुमर्हत्यरत्निना पक्षौ द्राघीया५सौ भवतस्तस्मात् पक्षप्रवया५सि वया५सि व्याममात्रौ पक्षौ च पुच्छं च भवत्येतावद्वै पुरुषे वीर्यं (१) वीर्यसंमितो वेणुना वि मिमीत आग्नेयो वै वेणुः सयोनित्वाय यजुषा युनक्ति यजुषा कृषति व्यावृत्त्यै षड्गवेन कृषति षड् वा ऋतव ऋतुभिरेवैनं कृषति यद् द्वादशगवेन संवत्सरेणैवेयं वा अग्नेरतिदाहादबिभेत् सैतद् द्विगुणमपश्यत् कृष्टं चाकृष्टं च ततो वा इमां नात्यदहद्यत् कृष्टं चाकृष्टं च (२) भवत्यस्या अनतिदाहाय द्विगुणं त्वा अग्निमुद्यन्तुमर्हतीत्याहुर्यत् कृष्टं चाकृष्टं च भवत्यग्नेरुद्यत्या एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तान् यत् प्राच उत्सृजेद्रुद्रायापि दध्याद्दक्षिणा पितृभ्यो नि धुवेयत् प्रतीचो रक्षा५सि हन्युरुदीच उत्सृजत्येषा वै देवमनुष्याणा५ शान्ता दिक् (३) तामेवैनाननूत्सृजत्यथो खल्विमां दिशमुत्सृजत्यसौ वा आदित्यः प्राणः प्राणमेवैनाननूत्सृजति दक्षिणा पर्यावर्तन्ते स्वमेव वीर्यमनु पर्यावर्तन्ते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तन्ते तस्मात् पराञ्चः पशवो वि तिष्ठन्ते प्रत्यञ्च आ वर्तन्ते तिस्रस्तिस्रः सीताः (४) कृषति त्रिवृतमेव यज्ञमुखे वि यातयत्योषधीर्वपति ब्रह्मणाऽन्नमव रुन्धेऽर्केऽर्कश्चीयते चतुर्दशभिर्वपति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य वपत्यन्नस्यान्नस्यावरुद्ध्यै कृष्टे वपति कृष्टे ह्योषधयः प्रतितिष्ठन्त्यनुसीतं वपति प्रजात्यै द्वादशसु सीतासु वपति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नं पचति यदग्निचि-(५)-दनवरुद्धस्याश्नीयादवरुद्धेन व्यृध्येत ये वनस्पतीनां फलग्रहयस्तानिध्मेऽपि प्रौक्षेदनवरुद्धस्यावरुद्ध्यै दिग्भ्यो लोष्टान्त्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येऽग्निं चिनुते यं द्विष्यात् यत्र स स्यात् तस्यै दिशो लोष्टमा हरेदिषमूर्जमहमित आ ददे इतीषमे-

योऽर्ज तस्यै दिशोऽर्थ (१) रुन्धे क्षोधुको भवति यस्तस्यां दिशि भवत्युत्तरवेदिमुप वपत्युत्तरवेद्याꣳ ह्यग्निश्चीयतेऽथो पशवो वा उत्तरवेदिः पशूनेवाव रुन्धेऽथो यज्ञपरुषोऽनन्तरित्यै ॥ (योऽर्थं, षु, दिक्, सीतां, मग्निं चि, -दुव, पञ्चविꣳशतिश्च) ॥ ५ ॥

कृष्टे क्षेत्रे सिकतादिवापः ॥ अग्निर्ऋषिः ।

अग्ने तव श्रवो वय इति सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य सूक्तꣳ सूक्तेनैव वैश्वानरमव रुन्धे षड्भिर्नि वपति षड् वा ऋतवः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे समुद्रं वै नामैतच्छन्दः समुद्रमनु प्रजाः प्र जायन्ते यदेतेन सिकता नि वपति प्रजानां प्रजननायेन्द्रो (१) वृत्राय वज्रं प्राहरत् स त्रेधा व्यभवत् स्फ्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयं येऽन्तः शरा अशीर्यन्त ताः शर्करा अभवन् तच्छर्कराणाꣳ शर्करत्वं वज्रो वै शर्कराः पशुरग्निर्यच्छर्कराभिरग्निं परिमिनोति वज्रेणैवास्मै पशून् परि गृह्णाति तस्माद्वज्रेण पशवः परिगृहीतास्तस्मात् स्थेयानस्थेयसो नोप हरते त्रिसप्ताभिः पशुकामस्य (२) परि मिनुयात् सप्त वै शीर्षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै पशूनव रुन्धे त्रिणवाभिर्भ्रातृव्यवतस्त्रिवृतमेव वज्रꣳ सम्भृत्य भ्रातृव्याय प्र हरति स्तृत्या अपरिमिताभिः परि मिनुयादपरिमितस्यावरुद्ध्यै यं कामयेतापशुः स्यादित्यपरिमित्य तस्य शर्कराः सिकता व्यूहेदपरिगृहीत एवास्य विषूचीनꣳ रेतः परा सिञ्चत्यपशुरेव भवति (३) यं कामयेत पशुमान्त्स्यादिति परिमित्य तस्य शर्कराः सिकता व्यूहेत् परिगृहीत एवास्मै समीचीनꣳ रेतः सिञ्चति पशुमानेव भवति सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्दधाति गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः शंयुं बार्हस्पत्यं मेधो नोपानमत् सोऽग्निं प्राविशत् (४) सोऽग्नेः कृष्णो रूपं कृत्वोदायत सोऽश्वं प्राविशत् सोऽश्वस्यावान्तरशफोऽभवद्यदश्वमाक्रमयति य एव मेधोऽश्वं प्राविशत् तमेवाव रुन्धे प्रजापतिनाऽग्निश्चेतव्य इत्याहुः प्राजापत्योऽश्वो यदश्वमाक्रमयति प्रजापतिनैवाग्निं चिनुते पुष्करपर्णमुप दधाति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनि- (५) -मेवाग्निं चिनुतेऽपां पृष्ठमसीत्युप दधात्यपां वा एतत् पृष्ठं यत् पुष्करपर्णꣳ रूपेणैवैनदुप दधाति ॥ (इन्द्रः, पशुकामस्य, भवति, -विशत्, सयोनिं, विꣳशतिश्च) ॥ ६ ॥

रुक्माद्युपधानम् ॥ अग्निर्ऋषिः ।

ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्ममुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत् प्रजा यजमानः सृजते ब्रह्म जज्ञानमित्याह तस्माद्ब्राह्मणो मुख्यो मुख्यो भवति य एवं वेद ब्रह्मवादिनो वदन्ति न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्य इति यत् पृथिव्यां चिन्वीत पृथिवीꣳ शुचाऽर्पयेन्नौषधयो न वनस्पतयः (१) प्र जायेरन् यदन्तरिक्षे चिन्वीतान्तरिक्षꣳ शुचाऽर्पयेन्न वयाꣳसि प्र जायेरन् यद्दिवि चिन्वीत दिवꣳ शुचाऽर्पयेन्न पर्जन्यो वर्षेद्रुक्ममुप दधात्यमृतं वै हिरण्यममृत एवाग्निं चिनुते प्रजात्यै हिरण्मयं पुरुषमुप दधाति यजमानलोकस्य विधृत्यै यदिष्टकाया आतृण्णमनूपदध्यात् पशूनां च यज-

मानस्य च प्राणमपि दध्याद् दक्षिणतः (२) प्राञ्चमुप दधाति दाधारं यजमानलोकं न पशूनां च यजमानस्य च प्राणमपि दधात्यथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुत्सृष्ट्यै द्रप्सश्चस्कन्देत्यभि मृशति होत्रास्वेवैनं प्रति ष्ठापयति स्रुचावुप दधात्याज्यस्य पूर्णां कार्ष्मर्यमयीं दध्नः पूर्णामौदुम्बरीमियं वै कार्ष्मर्यमय्यसावौदुम्बरीमे एवोप धत्ते (३) तूष्णीमुप दधाति न हीमे यजुषाऽऽप्तुमर्हति दक्षिणां कार्ष्मर्यमयीमुत्तरामौदुम्बरीं तस्मादस्या असावुत्तराऽऽज्यस्य पूर्णां कार्ष्मर्यमयीं वज्रो वा आज्यं वज्रः कार्ष्मर्यो वज्रेणैव यज्ञस्य दक्षिणतो रक्षाꣳस्यप हन्ति दध्नः पूर्णामौदुम्बरीं पशवो वै दध्यूर्गुदुम्बरः पशुष्वेवोर्जं दधाति पूर्णे उप दधाति पूर्णे एवैन- (४) -ममुष्मिंल्लोक उप तिष्ठेते विराज्यग्निश्चेतव्य इत्याहुः स्रुग्वै विराड्यत् स्रुचावुपदधाति विराज्येवाग्निं चिनुते यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति यज्ञमुखꣳ रुक्मो यद्रुक्मं व्याघारयति यज्ञमुखादेव रक्षाꣳस्यप हन्ति पञ्चभिर्व्याघारयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्माद्रक्षाꣳस्यप हन्त्यक्ष्णया व्याघारयति तस्मादक्ष्णया (५) पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै ॥ (वनस्पतयो, दक्षिणतो, धत्त, एनं, तस्मादक्ष्णया, पञ्च च) ॥ ७ ॥

स्वयमातृण्णाद्युपधानम् ॥ अग्निर्ऋषिः ।

स्वयमातृण्णामुप दधातीयं वै स्वयमातृण्णेमामेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते प्रथमेष्टकोपधीयमाना पशूनां च यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या अग्नावग्निश्चेतव्य इत्याहुरेष वा (१) अग्निर्वैश्वानरो यद्ब्राह्मणस्तस्मै प्रथमामिष्टकां यजुष्कृतां प्र यच्छेत् तां ब्राह्मणश्चोपदध्याताम् अग्नावेव तदग्निं चिनुत ईश्वरो वा एष आर्तिमार्तोर्योऽविद्वानिष्टकामुपदधाति त्रीन् वरान् दद्यात् त्रयो वै प्राणाः प्राणानाꣳ स्तृत्यै द्वावेव देयौ द्वौ हि प्राणावेक एव देय एको हि प्राणः पशु- (२) -र्वा एष यदग्निर्न खलु वै पशव आयवसे रमन्ते दूर्वेष्टकामुप दधाति पशूनां धृत्यै द्वाभ्यां प्रतिष्ठित्यै काण्डात्काण्डात् प्ररोहन्तीत्याह काण्डेनकाण्डेन ह्येषा प्रतितिष्ठत्येवा नो दूर्वे प्र तनु सहस्रेण शतेन चेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै देवलक्ष्मं वै त्र्यालिखिता तामुत्तरलक्ष्माणं देवा उपादधताधरलक्ष्माणमसुरा यं (३) कामयेत वसीयान्त्स्यादित्युत्तरलक्ष्माणं तस्योप दध्याद्वसीयानेव भवति यं कामयेत पापीयान्त्स्यादित्यधरलक्ष्माणं तस्योप दध्यादसुरयोनिमेवैनमनु परा भावयति पापीयान् भवति त्र्यालिखिता भवतीमे वै लोकास्त्र्यालिखितेभ्य एव लोकेभ्यो भ्रातृव्यमन्तरेत्यङ्गिरसः सुवर्गं लोकं यतः पुरोडाशः कूर्मो भूत्वाऽनु प्रासर्पत् (४) यत् कूर्ममुपदधाति यथा क्षेत्रविदञ्जसा नयत्येवमेवैनं कूर्मः सुवर्गं लोकमञ्जसा नयति मेधो वा एष पशूनां यत् कूर्मो यत् कूर्ममुपदधाति स्वमेव मेधं पश्यन्तः पशव उप तिष्ठन्ते श्मशानं वा एतत् क्रियते यन्मृतानां पशूनाꣳ शीर्षाण्युपधीयन्ते यज्जीवन्तं कूर्ममुपदधाति तेनाश्मशानचिद्वास्तव्यो वा एष यत् (५) कूर्मो मधु वाता ऋतायत इति दध्ना मधुमिश्रेणाभ्यनक्ति स्वदयत्येवैनं ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणाभ्यनक्त्युभयस्यावरुद्ध्यै मही द्यौः पृथिवी च न इत्याहाऽऽभ्यामेवैनमुभयतः

परि गृह्णाति प्राञ्चमुप दधाति सुवर्गस्य लोकस्य समष्ट्यै पुरस्तात् प्रत्यञ्चमुप दधाति तस्मात् (६) पुरस्तात् प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते यो वा अपनाभिमग्निं चिनुते यजमानस्य नाभिमनु प्र विशति स एनमीश्वरो हिꣳसितोरुलूखलमुप दधात्येषा वा अग्नेर्नाभिः सनाभिमेवाग्निं चिनुते हिꣳसायै औदुम्बरं भवत्यूर्ग्वा उदुम्बर ऊर्जमेवाव रुन्धे मध्यत उप दधाति मध्यत एवास्मा ऊर्जं दधाति तस्मा- (७) -न्मध्यत ऊर्जा भुञ्जत इयद्भवति प्रजापतिना यज्ञमुखेन सम्मितमव हन्त्यन्नमेवाकर्वैष्णव्यर्चोप दधाति विष्णुर्वै यज्ञो वैष्णवा वनस्पतयो यज्ञ एव यज्ञं प्रति ष्ठापयति ॥ (एष वै, पशु, -यं, -मसर्पं, -देव यत्, तस्मात्, तस्मात्, सप्तविꣳशतिश्च) ॥ ८ ॥

उखाद्युपधानम् ॥ अग्निर्ऋषिः ।

एषां वा एतल्लोकानां ज्योतिः सम्भृतं यदुखा यदुखामुपदधात्येभ्य एव लोकेभ्यो ज्योतिरव रुन्धे मध्यत उप दधाति मध्यत एवास्मै ज्योतिर्दधाति तस्मान्मध्यतो ज्योतिरुपास्महे सिकताभिः पूरयत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे यं कामयेत क्षोधुकः स्यादित्यूनां तस्योप (१) दध्यात् क्षोधुक एव भवति यं कामयेतानुपदस्यदन्नमद्यादिति पूर्णां तस्योप दध्यादनुपदस्यदेवान्नमत्ति सहस्रं वै प्रति पुरुषः पशूनां यच्छति सहस्रमन्ये पशवो मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वायोखायामपि दधाति प्रतिष्ठामेवैनद्गमयति व्यृद्धं वा एतत् प्राणैरमेध्यं यत् पुरुषशीर्षममृतं खलु वै प्राणा (२) अमृतꣳ हिरण्यं प्राणेषु हिरण्यशल्कान् प्रत्यस्यति प्रतिष्ठामेवैनद्गमयित्वा प्राणैः समर्धयति दध्ना मधुमिश्रेण पूरयति मधव्योऽसानीति शृतातङ्क्येन मेध्यत्वाय ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेण पूरयत्युभयस्यावरुद्ध्यै पशुशीर्षाण्युप दधाति पशवो वै पशुशीर्षाणि पशूनेवाव रुन्धे यं कामयेतापशुः स्यादिति (३) विषूचीनानि तस्योप दध्याद्विषूच एवास्मात् पशून् दधात्यपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति समीचीनानि तस्योप दध्यात् समीच एवास्मै पशून् दधाति पशुमानेव भवति पुरस्तात् प्रतीचीनमश्वस्योप दधाति पश्चात् प्राचीनमृषभस्यापशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वानेवास्मै समीचो दधात्येतावन्तो वै पशवो (४) द्विपादश्च तान् वा एतदग्नौ प्र दधाति यत् पशुशीर्षाण्युपदधात्यमुमारण्यमनु ते दिशामीत्याह ग्राम्येभ्य एव पशुभ्य आरण्यान् पशूञ्छुचमनूत्सृजति तस्मात् समावत् पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृताः सर्पशीर्षमुप दधाति यैव सर्पे त्विषिस्तामेवाव रुन्धे (५) यत् समीचीनं पशुशीर्षैरुपदध्याद् ग्राम्यान् पशून् दꣳशुकाः स्युर्यद्विषूचीनमारण्यान् यजुरेव वदेदव तां त्विषिꣳ रुन्धे या सर्पे न ग्राम्यान् पशून् हिनस्ति नाऽऽरण्यानथो खल्वुपधेयमेव यदुपदधाति तेन तां त्विषिमव रुन्धे या सर्पे यद्यजुर्वदति तेन शान्तम् ॥ (अयं, प्राणा, इति, पशवो, ऽव रुन्धे, चतुश्चत्वारिꣳशच्च) ॥ ९ ॥

अपस्यानां प्राणभृतामपानभृतां च प्रथमचितावुपधानम् ॥ अग्निर्ऋषिः ।

पशुर्वा एष यदग्निर्योनिः खलु वा एषा पशोर्वि क्रियते यत् प्राचीनमैष्टकाद्यजुः क्रियते रेतोऽपस्या अपस्या उप दधाति योनावेव रेतो दधाति पञ्चोप दधाति पाङ्क्ताः पशवः पशूनेवास्मै प्र जनयति

पञ्च दक्षिणतो वज्रो वा अपस्या वज्रेणैव यज्ञस्य दक्षिणतो रक्षाꣳस्यप हन्ति पञ्च पश्चात् (१) प्राचीरुप दधाति पश्चाद्वै प्राचीनꣳ रेतो धीयते पश्चादेवास्मै प्राचीनꣳ रेतो दधाति पञ्च पुरस्तात् प्रतीचीरुप दधाति पञ्च पश्चात् प्राचीस्तस्मात् प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते पञ्चोत्तरतश्छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्त्स्वमायतनमभि पर्यूहत इयं वा अग्नेरतिदाहादबिभेत् सैता (२) अपस्या अपश्यत् ता उपाधत्त ततो वा इमां नात्यदहद्यदपस्या उपदधात्यस्या अनतिदाहायोवाच हेयमददित् स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेददिति प्राणभृत उप दधाति रेतस्येव प्राणान् दधाति तस्माद्वदन् प्राणन् पश्यञ्छृण्वन् पशुर्जायतेऽयं पुरो (३) भुव इति पुरस्तादुप दधाति प्राणमेवैताभिर्दाधारायं दक्षिणा विश्वकर्मेति दक्षिणतो मन एवैताभिर्दाधारायं पश्चाद्विश्वव्यचा इति पश्चाच्चक्षुरेवैताभिर्दाधारेदमुत्तरात् सुवरित्युत्तरतः श्रोत्रमेवैताभिर्दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधार दशदशोप दधाति सवीर्यत्वायाक्ष्णयो- (४) -प दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै याः प्राचीस्ताभिर्वसिष्ठ आर्ध्नोद्या दक्षिणा ताभिर्भरद्वाजो याः प्रतीचीस्ताभिर्विश्वामित्रो या उदीचीस्ताभिर्जमदग्निर्या ऊर्ध्वास्ताभिर्विश्वकर्मा य एवमेतासामृद्धिं वेदर्ध्नोत्येव य आसामेवं बन्धुतां वेद बन्धुमान् भवति य आसामेवं क्लृप्तिं वेद कल्पते (५) ऽस्मै य आसामेवमायतनं वेदाऽऽयतनवान् भवति य आसामेवं प्रतिष्ठां वेद प्रत्येव तिष्ठति प्राणभृत उपधाय संयत उप दधाति प्राणानेवास्मिन् धित्वा संयद्भिः सं यच्छति तत् संयताꣳ संयत्त्वमथो प्राण एवापानं दधाति तस्मात् प्राणापानौ सं चरतो विषूचीरुप दधाति तस्माद्विष्वञ्चौ प्राणापानौ यद्वा अग्नेरसंयत- (६) -मसुवर्ग्यमस्य तत् सुवर्ग्योऽग्निर्यत् संयत उप दधाति समेवैनं यच्छति सुवर्ग्यमेवाकस्त्र्यविर्वयः कृतमयानामित्याह वयोभिरेवायानव रुन्धे वयोभिरयाꣳसि सर्वतो वायुमतीर्भवन्ति तस्मादयꣳ सर्वतः पवते ॥ (पश्चात्, -देता, पुरो, ऽक्ष्णया, कल्पते, ऽसंयतं, पञ्चत्रिꣳशच्च) ॥ १० ॥

अश्वमेधे अश्वशरीरे सूचीभी रेखाकरणम् ॥ अनुष्टुप्; ६ त्रिष्टुप्; विश्वेदेवा ऋषयः ।

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुत् सूचीभिः शिम्यन्तु त्वा ॥
द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा ।
सच्छन्दा या च विच्छन्दाः सूचीभिः शिम्यन्तु त्वा ॥
महानाम्नी रेवतयो विश्वा आशाः प्रसूवरीः । मेघ्या विद्युतो वाचः सूचीभिः शिम्यन्तु त्वा ॥
रजता हरिणीः सीसा युजो युज्यन्ते कर्मभिः । अश्वस्य वाजिनस्त्वचि सूचीभिः शिम्यन्तु त्वा ॥
नारी- (१) -स्ते पत्नयो लोम वि चिन्वन्तु मनीषया ।
देवानां पत्नीर्दिशः सूचीभिः शिम्यन्तु त्वा ॥
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ (नारी, त्रिꣳशच्च) ॥ ११ ॥

अश्वस्य [illegible] ॥ अनुष्टुप् । विश्वेदेवा ऋषयः ।

कस्त्वा छ्यति कस्त्वा वि शास्ति कस्ते गात्राणि शिम्यति । क उ ते शमिता कविः ॥
ऋतवस्त ऋतुधा परुः शमितारो वि शासतु ।
संवत्सरस्य धायसा शिमीभिः शिम्यन्तु त्वा ॥
दैव्या अध्वर्यवस्त्वा छ्यन्तु वि च शासतु । गात्राणि पर्वशस्ते शिमाः कृण्वन्तु शिम्यन्तः ॥
अर्धमासाः परूꣳषि ते मासाश्छ्यन्तु शिम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टꣳ (१) सूदयन्तु ते ॥
पृथिवी तेऽन्तरिक्षेण वायुश्छिद्रं भिषज्यतु । द्यौस्ते नक्षत्रैः सह रूपं कृणोतु साधुया ॥
शं ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः । शमस्थभ्यो मज्जभ्यः शमु ते तनुवे भुवत् ॥
(विलिष्टं, त्रिꣳशच्च) ॥ १२ ॥

[विष्णुमुखा १४२। अर्धपते २९२। सवितृ २४७ वि १९८। पुरुसमुद्रेणो-३२५। रत्ने २७०। अहं २५५। मन्त्र-३०७। -मैत्री २९४। पुषु-३२५। -मौवृषी ८०। को ८०। द्वादश ॥ ३१९५]

[॥ इति पञ्चमकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥]

चितीनां निरूपणम् ।

[अथ तृतीयः प्रपाठकः ॥ ३ ॥]

आश्विनी-ऋतव्या-प्राणभृत्-अपस्या-वयस्या-ख्येष्टकोपधानविधानम् ॥ अग्निर्ऋषिः ।

उत्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वै यज्ञस्य क्रियमाणस्यान्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोत्यृतव्या उप दधात्यृतूनां कॢप्त्यै (१) पञ्चोप दधाति पञ्च वा ऋतवो यावन्त एवर्तवस्तान् कल्पयति समानप्रभृतयो भवन्ति समानोदर्कास्तस्मात् समाना ऋतव एकेन पदेन व्यावर्तन्ते तस्मादृतवो व्यावर्तन्ते प्राणभृत उप दधात्यृतुष्वेव प्राणान् दधाति तस्मात् समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र जनयत्येवैना—एष वै वायुर्यत् प्राणो यदृतव्या उपधाय प्राणभृत (२) उपदधाति तस्मात् सर्वानृतूननु वायुरा वरीवर्ति वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात् सर्वानृतून् वर्षति यत् प्राणभृत उपधाय वृष्टिसनीरुपदधाति तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते पशवो वै वयस्या नानामनसः खलु वै पशवो नानाव्रतास्तेऽप एवाभि समनसो (३) यं कामयेतापशुः स्यादिति वयस्यास्तस्योपधायापस्या उप दध्यादसंज्ञानमेवास्मै पशुभिः करोत्यपशुरेव भवति यं कामयेत पशुमान्त्स्यादित्यपस्यास्तस्योपधाय वयस्या उप दध्यात् संज्ञानमेवास्मै पशुभिः करोति पशुमानेव भवति चतस्रः पुरस्तादुप दधाति तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे (४) मूर्धन्वतीर्भवन्ति तस्मात् पुरस्तान्मूर्धा पञ्च दक्षिणायाꣳ

श्रोण्यामुप दधाति पञ्चोत्तरस्यां तस्मात् पश्चाद्वर्षीयान् पुरस्तात् प्रवणः पशु—र्बस्तो वय इति दक्षिणेऽꣳस उप दधाति वृष्णिर्वय इत्युत्तरेऽꣳसावेव प्रति दधाति व्याघ्रो वय इति दक्षिणे पक्ष उप दधाति सिꣳहो वय इत्युत्तरे पक्षयोरेव वीर्यं दधाति पुरुषो वय इति (५) मध्ये तस्मात् पुरुषः पशूनामधिपतिः ॥ (कॢप्त्यै, प्राणभृतः, समनसः, कृष्णे, इति, पञ्च च) ॥ १ ॥

स्वयमातृण्णा-दिश्या-प्राणभृत्-बृहती-वालखिल्याख्येष्टकोपधानम् ॥ अग्निर्ऋषिः ।

इन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामुप दधातीन्द्राग्निभ्यां वा इमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषेन्द्राग्नी इत्याहेन्द्राग्नी वै देवानामोजोभृतावोजसैवैनामन्तरिक्षे चिनुते धृत्यै स्वयमातृण्णामुप दधात्यन्तरिक्षं वै स्वयमातृण्णाऽन्तरिक्षमेवोप धत्तेऽश्वमुप (१) घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्यै देवानां वै सुवर्गं लोकं यतां दिशः समव्लीयन्त त एता दिश्या अपश्यन् ता उपादधत ताभिर्वै ते दिशोऽदृꣳहन् यद्दिश्या उपदधाति दिशां विधृत्यै दश प्राणभृतः पुरस्तादुप (२) दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद्धत्ते तस्मात् पुरस्तात् प्राणा ज्योतिष्मतीमुत्तमामुप दधाति तस्मात् प्राणानां वाग्ज्योतिरुत्तमा दशोप दधाति दशाक्षरा विराड् विराट् छन्दसां ज्योतिर्ज्योतिरेव पुरस्ताद्धत्ते तस्मात् पुरस्ताज्ज्योतिरुपाऽऽस्महे छन्दाꣳसि पशुष्वाजिमयुस्तान् बृहत्युदजयत् तस्माद्बार्हताः (३) पशव उच्यन्ते मा छन्द इति दक्षिणत उप दधाति तस्माद्दक्षिणावृतो मासाः पृथिवी छन्द इति पश्चात् प्रतिष्ठित्या अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति षट्त्रिꣳशत् संपद्यन्ते षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनव रुन्धे बृहती छन्दसाꣳ स्वाराज्यं परीयाय यस्यैता (४) उपधीयन्ते गच्छति स्वाराज्यꣳ सप्त वालखिल्याः पुरस्तादुप दधाति सप्त पश्चात् सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ प्राणानाꣳ सवीर्यत्वाय मूर्धाऽसि राडिति पुरस्तादुप दधाति यन्त्री राडिति पश्चात् प्राणानेवास्मै समीचो दधाति ॥ (उपो,- पु, बार्हता, एता,- श्चतुस्त्रिꣳशच्च) ॥ २ ॥

अक्ष्णयास्तोमीयोपधानविधिः ॥ अग्निर्ऋषिः ।

देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्ष्णयास्तोमीया अपश्यन् ता अन्यथाऽनूच्याऽन्यथोपादधत तदसुरा नान्ववायन् ततो देवा अभवन् पराऽसुरा यदक्ष्णयास्तोमीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्या—शुस्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखं वै त्रिवृ-(१)-द्यज्ञमुखमेव पुरस्ताद्वि यातयति व्योम सप्तदश इति दक्षिणतोऽन्नं वै व्योमान्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते धरुण एकविꣳश इति पश्चात् प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्यै भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्त ओजः पञ्चदश ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्ता-(२)-दुप दधाति द्वौ त्रिवृतावभिपूर्वं यज्ञमुखे वि यातयत्य—भिवर्तः सविꣳश इति दक्षिणतोऽन्नं वा अभिवर्तोऽन्नꣳ सविꣳशोऽन्नमेव दक्षिणतो

धत्ते तस्माद्दक्षिणेनान्नमद्यते वर्चो द्वाविꣳश इति पश्चाद्यद्विꣳशतिर्द्वे तेन विराजौ यद्द्वे प्रतिष्ठा तेन विराजोरेवाभिपूर्वमन्नाद्ये प्रति तिष्ठति तपो नवदश इत्युत्तरतस्तस्मात् सव्यो (३) हस्तयोस्तपस्वितरो योनिश्चतुर्विꣳश इति पुरस्तादुप दधाति चतुर्विꣳशत्यक्षरा गायत्री गायत्री यज्ञमुखं यज्ञमुखमेव पुरस्ताद्वि यातयति गर्भाः पञ्चविꣳश इति दक्षिणतोऽन्नं वै गर्भा अन्नं पञ्चविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत ओजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठति सम्भरणस्त्रयोविꣳश इत्यु-(४)-त्तरतस्तस्मात् सव्यो हस्तयोः सम्भार्यतरः क्रतुरेकत्रिꣳश इति पुरस्तादुप दधाति वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रिꣳश इति पश्चात् प्रतिष्ठित्यै नाकः षट्त्रिꣳश इत्युत्तरतः सुवर्गो वै (५) लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै ॥ (त्रिवृत्, पुरस्तात्, सव्यः, इति, वै, पञ्च च) ॥ ३ ॥

अक्ष्णयास्तोमीया-सृष्टि-व्युष्टाख्योपधानविधिः ॥ अग्निर्ऋषिः ।

अग्नेर्भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वा अग्निर्यज्ञमुखं दीक्षा यज्ञमुखं ब्रह्म यज्ञमुखं त्रिवृद्यज्ञमुखमेव पुरस्ताद्वि यातयति नृचक्षसां भागोऽसीति दक्षिणतः शुश्रुवाꣳसो वै नृचक्षसोऽन्नं धाता जातायैवास्मा अन्नमपि दधाति तस्माज्जातोऽन्नमत्ति जनित्रꣳ स्पृतꣳ सप्तदशः स्तोम इत्याहान्नं वै जनित्र-(१)-मन्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते मित्रस्य भागोऽसीति पश्चात् प्राणो वै मित्रोऽपानो वरुणः प्राणापानावेवास्मिन् दधाति दिवो वृष्टिर्वाताः स्पृता एकविꣳशः स्तोम इत्याह प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्या इन्द्रस्य भागोऽसीत्युत्तरत ओजो वा इन्द्र ओजो विष्णुरोजः क्षत्रमोजः पञ्चदश (२) ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति वसूनां भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वै वसवो यज्ञमुखꣳ रुद्रा यज्ञमुखं चतुर्विꣳशो यज्ञमुखमेव पुरस्ताद्वि यातयत्या—दित्यानां भागोऽसीति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं गर्भा अन्नं पञ्चविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यतेऽदित्यै भागो (३) ऽसीति पश्चात् प्रतिष्ठा वा अदितिः प्रतिष्ठा पूषा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै देवस्य सवितुर्भागोऽसीत्युत्तरतो ब्रह्म वै देवः सविता ब्रह्म बृहस्पतिर्ब्रह्म चतुष्टोमो ब्रह्मवर्चसमेवोत्तरतो धत्ते तस्मादुत्तरोऽर्धो ब्रह्मवर्चसितरः सावित्रवती भवति प्रसूत्यै तस्माद्ब्राह्मणानामुदीची सनिः प्रसूता धर्त्रश्चतुष्टोम इति पुरस्तादुप दधाति यज्ञमुखं वै धर्त्रो (४) यज्ञमुखं चतुष्टोमो यज्ञमुखमेव पुरस्ताद्वि यातयति यावानां भागोऽसीति दक्षिणतो मासा वै यावा अर्धमासा अयावास्तस्माद्दक्षिणावृतो मासा अन्नं वै यावा अन्नं प्रजा अन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यत ऋभूणां भागोऽसीति पश्चात् प्रतिष्ठित्यै विवर्तोऽष्टाचत्वारिꣳश इत्युत्तरतोऽनयोर्लोकयोः सवीर्यत्वाय तस्मादिमौ लोकौ समावद्वीर्यौ (५) यस्य मुख्यवतीः पुरस्तादुपधीयन्ते मुख्य एव भवत्याऽस्य मुख्यो जायते यस्यान्नवतीर्दक्षिणतोऽत्त्यन्नमाऽस्यान्नादो जायते यस्य प्रतिष्ठावतीः पश्चात् प्रत्येव तिष्ठति यस्यौजस्वतीरुत्तरत ओजस्व्येव भवत्याऽस्यौजस्वी जायतेऽर्को वा एष यदग्निस्तस्यैतदेव स्तोत्रमेतच्छस्त्रं यदेषा विधा (६)

विधीयतेऽर्क एव तदर्क्यमनु वि धीयतेऽत्त्यन्नमाऽस्यान्नादो जायते यस्यैषा विधा विधीयते य उ चैनामेवं वेद सृष्टीरुप दधाति यथासृष्टमेवाव रुन्धे न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन् ता उपादधत ततो वा इदं (७) व्यौच्छद्यस्यैता उपधीयन्ते व्येवास्मा उच्छत्यथो तम एवाप हते ॥ (वै जनित्रं, पञ्चदशो, ऽदित्यै भागो, वै धर्त्रः, समावद्वीर्यौ, विधा, ततो वा इदं, चतुर्दश च) ॥ ४ ॥

असपत्ना-विराट्-स्तोमभागाख्योपधानविधिः ॥ अग्निर्ऋषिः ।

अग्ने जातान् प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान् प्र णुदते सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतो ब्रह्मवर्चसं वै चतुश्चत्वारिꣳशो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः षोडशः स्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मा-(१)-दुत्तरतोऽभिप्रयायी जयति वज्रो वै चतुश्चत्वारिꣳशो वज्रः षोडशो यदेते इष्टके उपदधाति जाताꣳश्चैव जनिष्यमाणाꣳश्च भ्रातृव्यान् प्रणुद्य वज्रमनु प्र हरति स्तृत्यै पुरीषवतीं मध्य उप दधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य एवं वेदै—ता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते (२) नास्य सपत्नो भवति पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात् पशुमानुत्तमां वाचं वदति दशदशोप दधाति सवीर्यत्वायाक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यानि वै छन्दाꣳसि सुवर्ग्याण्यासन् तैर्देवाः सुवर्गं लोकमायन् तेनर्षयो (३) ऽश्राम्यन् ते तपोऽतप्यन्त तानि तपसाऽपश्यन् तेभ्य एता इष्टका निरमिमतैवश्छन्दो वरिवश्छन्द इति ता उपादधत ताभिर्वै ते सुवर्गं लोकमायन् यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति यज्ञेन वै प्रजापतिः प्रजा असृजत ताः स्तोमभागैरेवासृजत यत् (४) स्तोमभागा उपदधाति प्रजा एव तद्यजमानः सृजते बृहस्पतिर्वा एतद्यज्ञस्य तेजः समभरद्यत् स्तोमभागा यत् स्तोमभागा उपदधाति सतेजसमेवाग्निं चिनुते बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामपश्यद्यत् स्तोमभागा यत् स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै सप्तसप्तोप दधाति सवीर्यत्वाय तिस्रो मध्ये प्रतिष्ठित्यै ॥ (उत्तरतो धत्ते तस्मा,-दुपधीयन्त, ऋषयो, ऽसृजत यत्, त्रिचत्वारिꣳशच्च) ॥ ५ ॥

स्तोमभागाख्योपधानविधानम् ॥ अग्निर्ऋषिः ।

रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्ममन्वितिरिति दिवꣳ सन्धिरित्यन्तरिक्षं प्रतिधिरिति पृथिवीं विष्टम्भ इति वृष्टिं प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून् प्रकेत इति रुद्रान्त्सुदीतिरित्यादित्यानोज इति पितॄꣳस्तन्तुरिति प्रजाः पृतनाषाडिति पशून् रेवदित्योषधी—रभिजिदसि युक्तग्रावे-(१)-न्द्राय त्वेन्द्रं जिन्वेत्येव दक्षिणतो वज्रं पर्यौहदभिजित्यै ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधाद्यन्तेत्यपानꣳ संसर्प इति चक्षुर्वयोधा इति श्रोत्रं ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर्न मिथुनी अभवन् तासु त्रिवृदसीत्येव मिथुनमदधात् ताः प्रजा मिथुनी (२) भवन्तीर्न प्राजायन्त ताः संरोहोऽसि नीरोहोऽसीत्येव प्राजनयत् ताः प्रजाः प्रजाता न प्रत्यतिष्ठन् ता वसुकोऽसि वेषश्रिरसि वस्य-

ष्ठिरसीत्येष्वेषु लोकेषु प्रत्यस्थापयद्यदाह वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव प्रजाता एषु लोकेषु प्रति ष्ठापयति सात्माऽन्तरिक्षꣳ (३) रोहति सप्राणोऽमुष्मिँल्लोके प्रति तिष्ठत्यव्यर्धुकः प्राणापानाभ्यां भवति य एवं वेद ॥ (युक्तप्राणा, प्रजा मिथुनं,-न्तरिक्षं, द्वादश च) ॥ ६ ॥

नाकसत्-चोडा-स्वयमातृण्णा-विकर्णीनामुपधानविधिः ॥ अग्निर्ऋषिः ।

नाकसद्भिर्वै देवाः सुवर्गं लोकमायन् तन्नाकसदां नाकसत्त्वं यन्नाकसद उपदधाति नाकसद्भिरेव तद्यजमानः सुवर्गं लोकमेति सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते पृष्ठानां वा एतत् तेजः संभृतं यन्नाकसदो यन्नाकसद (१) उपदधाति पृष्ठानामेव तेजोऽव रुन्धे पञ्चचोडा उप दधात्यप्सरस एवैनमेता भूता अमुष्मिँल्लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य यं द्विष्यात् तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्च्छत्युत्तरा नाकसद्भ्य उप दधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत् (२) पश्चात् प्राचीमुत्तमामुप दधाति तस्मात् पश्चात् प्राची पत्न्यन्वास्ते स्वयमातृण्णां च विकर्णीं चोत्तमे उप दधाति प्राणो वै स्वयमातृण्णाऽऽयुर्विकर्णी प्राणं चैवाऽऽयुश्च प्राणानामुत्तमौ धत्ते तस्मात् प्राणश्चाऽऽयुश्च प्राणानामुत्तमौ नान्यामुत्तरामिष्टकामुप दध्याद्यदन्यामुत्तरामिष्टकामुपदध्यात् पशूनां (३) च यजमानस्य च प्राणं चाऽऽयुश्चापि दध्यात् तस्मान्नान्योत्तरेष्टकोपधेया स्वयमातृण्णामुप दधात्यसौ वै स्वयमातृण्णाऽमूमेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या एषा वै (४) देवानां विक्रान्तिर्यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव विक्रान्तिमनु वि क्रमते उत्तरत उप दधाति तस्मादुत्तरतउपचारोऽग्निर्वायुमती भवति समिद्ध्यै ॥ (नाकसद,-स्तत, पशूना,-मेषा वै, द्वाविꣳशतिश्च) ॥ ७ ॥

छन्दस्याख्योपधानविधिः ॥ अग्निर्ऋषिः ।

छन्दाꣳस्युप दधाति पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे छन्दाꣳसि वै देवानां वामं पशवो वाममेव पशूनव रुन्ध एताꣳ ह वै यज्ञसेनश्चैत्रियायणश्चितिं विदां चकार तया वै स पशूनवारुन्ध यदेतामुपदधाति पशूनेवाव रुन्धे गायत्रीः पुरस्तादुप दधाति तेजो वै गायत्री तेज एव (१) मुखतो धत्ते मूर्धन्वतीर्भवन्ति मूर्धानमेवैनꣳ समानानां करोति त्रिष्टुभ उप दधातीन्द्रियं वै त्रिष्टुगिन्द्रियमेव मध्यतो धत्ते जगतीरुप दधाति जागता वै पशवः पशूनेवाव रुन्धेऽनुष्टुभ उप दधाति प्राणा वा अनुष्टुप् प्राणानामुत्सृष्ट्यै बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाꣳस्युप दधाति विषुरूपा वै पशवः पशव (२) छन्दाꣳसि विषुरूपानेव पशूनव रुन्धे विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैना एवं वेदातिच्छन्दसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वेभिरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसमुपदधाति वर्ष्मैवैनꣳ समानानां करोति द्विपदा उप दधाति द्विपाद्यजमानः (३) प्रतिष्ठित्यै ॥ (तेज एव, पशवः पशवो, यजमान, एकं च) ॥ ८ ॥

सयुक्-मण्डल-विश्वज्योतिः संज्ञकेष्टकोपधानम् ॥ अग्निर्ऋषिः ।

सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यत् सयुजो नोपदध्याद् देवता अस्याग्निं वृञ्जीरन् यत् सयुज उपदधात्यात्मनैवैनꣳ सयुजं चिनुते नाग्निना व्यृध्यतेऽथो यथा पुरुषः स्नावभिः सन्तत एवमेवैताभिरग्निः सन्ततोऽग्निना वै देवाः सुवर्गं लोकमायन् ता अमूः कृत्तिका अभवन् यस्यैता उपधीयन्ते सुवर्गमेव (१) लोकमेति गच्छति प्रकाशं चित्रमेव भवति मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प्र विशति नाऽऽर्तिमार्च्छत्यग्निं चिक्यानो विश्वज्योतिष उप दधातीमानेवैताभिर्लोकान् ज्योतिष्मतः कुरुतेऽथो प्राणानेवैता यजमानस्य दाधत्येता वै देवताः सुवर्ग्यास्ता एवा- (२)-न्वारभ्य सुवर्गं लोकमेति ॥ (सुवर्गमेव, ता एव, चत्वारि च) ॥ ९ ॥

वृष्टिसनि-संयानी-आदित्या-घृता-यशोदाख्योपधानविधिः ॥ अग्निर्ऋषिः ।

वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात् सर्वानृतून् वर्षति पुरोवातसनिरसीत्याहैतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्धे संयानीभिर्वै देवा इमाँल्लोकान्त्समयुस्तत् संयानीनाꣳ संयानित्वं यत् संयानीरुपदधाति यथाऽप्सु नावा संयात्येव-(१)-मेवैताभिर्यजमान इमाँल्लोकान्त्सं याति प्लवो वा एषोऽग्नेर्यत् संयानीर्यत् संयानीरुपदधाति प्लवमेवैतमग्नय उप दधात्युत यस्यैतासूपहितास्वापोऽग्निꣳ हरन्त्यहृत एवास्याग्निरादित्येष्टका उप दधात्यादित्या वा एतं भूत्यै प्रति नुदन्ते योऽलं भूत्यै सन् भूतिं न प्राप्नोत्यादित्या (२) एवैनं भूतिं गमयन्त्यसौ वा एतस्याऽऽदित्यो रुचमादत्ते योऽग्निं चित्वा न रोचते यदादित्येष्टका उपदधात्यसावेवास्मिन्नादित्यो रुचं दधाति यथाऽसौ देवानाꣳ रोचत एवमेवैष मनुष्याणाꣳ रोचते घृतेष्टका उप दधात्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धयत्य-(३)-थो तेजसाऽनुपरिहारꣳ सादयत्यपरिवर्गमेवास्मिन् तेजो दधाति प्रजापतिरग्निमचिनुत स यशसा व्यार्ध्यत स एता यशोदा अपश्यत् ता उपाधत्त ताभिर्वै स यश आत्मन्नधत्त यद्यशोदा उपदधाति यश एव ताभिर्यजमान आत्मन् धत्ते पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन् यशो दधाति ॥ (एवं, प्राप्नोत्यादित्या, अर्धयत्य, -ष्टाचत्वारिꣳशच्च) ॥ १० ॥

भूयस्कृद्-अग्निरूपा-द्रविणोदा-आयुष्या-अग्निहृदया-ऋतव्याख्येष्टकोपधानम् ॥ अग्निर्ऋषिः ।

देवासुराः संयत्ता आसन् कनीयाꣳसो देवा आसन् भूयाꣳसोऽसुरास्ते देवा एता इष्टका अपश्यन् ता उपादधत भूयस्कृदसीत्येव भूयाꣳसोऽभवन् वनस्पतिभिरोषधीभिर्वरिवस्कृदसीतीमामजयन् प्राच्यसीति प्राचीं दिशमजयन्नूर्ध्वाऽसीत्यमूमजयन्नन्तरिक्षसदस्यन्तरिक्षे सीदेत्यन्तरिक्षमजयन् ततो देवा अभवन् (१) पराऽसुरा यस्यैता उपधीयन्ते भूयानेव भवत्यभीमाँल्लोकान् जयति भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यप्सुषदसि श्येनसदसीत्याहैतद्वा अग्ने रूपꣳ रूपेणैवाग्निमव रुन्धे पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर्लोकान् द्रविणावतः कुरुत आयुष्या उप दधात्यायुरेवा-(२)-स्मिन् दधात्यग्ने यत् ते परꣳ हृन्नामेत्याहैतद्वा अग्नेः प्रियं धाम प्रियमेवास्य धामोपाऽऽप्नोति तावेहि सꣳ रभावहा इत्याह व्येवैनेन परि धत्ते पाञ्चजन्येष्वप्येध्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकस्तस्मादेवमाहर्तव्या

उप (३) दधात्येतद्वा ऋतूनां प्रियं धाम यदृतव्या ऋतूनामेव प्रियं धामाव रुन्धे सुमेक इत्याह संवत्सरो वै सुमेकः संवत्सरस्यैव प्रियं धामोपाऽऽप्नोति ॥ (अभवन्,-न्नेवो,-प, षड्विꣳशतिश्च) ॥ ११ ॥

अश्वमेधविधिः ॥ विश्वेदेवा ऋषयः ।

प्रजापतेरक्ष्यश्वयत् तत् पराऽपतत् तदश्वोऽभवद्यदश्वयत् तदश्वस्याश्वत्वं तद्देवा अश्वमेधेनैव प्रत्यदधुरेष वै प्रजापतिꣳ सर्वं करोति योऽश्वमेधेन यजते सर्व एव भवति सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजꣳ सर्वं वा एतेन पाप्मानं देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन्त्सर्वं पाप्मानं (१) तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदोत्तरं वै तत् प्रजापतेरक्ष्यश्वयत् तस्मादश्वस्योत्तरतोऽव द्यन्ति दक्षिणतोऽन्येषां पशूनां वैतसः कटो भवत्यप्सुयोनिर्वा अश्वोऽप्सुजो वेतसः स्व एवैनं योनौ प्रति ष्ठापयति चतुष्टोमः स्तोमो भवति सरड्ढ वा अश्वस्य सक्थ्याऽवृहत् (२) तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर्यच्चतुष्टोमः स्तोमो भवत्यश्वस्य सर्वत्वाय ॥ (सर्वं पाप्मानं,-मवृहद्, द्वादश च) ॥ १२ ॥

[ब्रह्मन्वयज्ञ २५५ । इन्द्राग्नी २३४ । देवा २५५ । अग्ने-३६४ । राज्ञे २४१ । रश्मि-१६२ । -नाकसद्भि-२२२ । -छन्दाꣳसि १५१ । सर्वाभ्यो १०४ । वृष्टिसनी-१६९ । -देवासुराः १०६ । प्रजापते- ११२ । द्वादश ॥ २४०१]

[इति पञ्चमकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥]

इष्टकात्रयाभिधानम् ।

[अथ चतुर्थः प्रपाठकः ॥ ४ ॥]

इन्द्रतनु-यज्ञतनु-नक्षत्राख्येष्टकोपधानम् ॥ अग्निर्ऋषिः ।

देवासुराः संयत्ता आसन् ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत् ता उपाधत्त ताभिर्वै स तनुवमिन्द्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन् पराऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिन्द्रियं वीर्यं यजमान आत्मन् धत्तेऽथो सेन्द्रमेवाग्निꣳ सतनुं चिनुते भवत्यात्मना पराऽस्य भ्रातृव्यो (१) भवति यज्ञो देवेभ्योऽपाक्रामत् तमवरुधं नाशक्नुवन् त एता यज्ञतनूरपश्यन् ता उपादधत ताभिर्वै ते यज्ञमवारुन्धत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽव रुन्धे त्रयस्त्रिꣳशतमुप दधाति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्धेऽथो सात्मानमेवाग्निꣳ सतनुं चिनुते सात्माऽमुष्मिँल्लोके (२) भवति य एवं वेद ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन् दधात्येताभिर्वा अग्निश्चितो ज्वलति ताभिरेवैनꣳ समिन्ध उभयोरस्मै लोकयोर्ज्योतिर्भवति नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि तान्येवाव रुन्धे सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि तान्येवाऽऽप्नोत्यथो अनूकाशमेवैतानि (३) ज्योतीꣳषि कुरुते सुवर्गस्य लोकस्यानुख्यात्यै यत् सꣳस्पृष्टा उपदध्याद्वृष्ट्यै लोकमपि दध्यादवर्षुकः पर्जन्यः स्यादसꣳस्पृष्टा उप दधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात् प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते ॥ (भ्रातृव्यो, लोके, एवैतानि, -ऽष्टचत्वारिꣳशच्च) ॥ १ ॥

ऋतव्य-वैश्वदेवाख्येष्टकोपधानं, प्रोक्षणविधिश्च ॥ अग्निर्ऋषिः ।

ऋतव्या उप दधात्यृतूनां कॢप्त्यै द्वन्द्वमुप दधाति तस्माद् द्वन्द्वमृतवोऽधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषा द्वन्द्वमन्यासु चितीषूप दधाति चतस्रो मध्ये धृत्या अन्तःश्लेषणं वा एताश्चितीनां यदृतव्या यदृतव्या उपदधाति चितीनां विधृत्या अवकामनूप दधात्येषा वा अग्नेर्योनिः सयोनि-(१)-मेवाग्निं चिनुते उवाच ह विश्वामित्रोऽददित् स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेददिति संवत्सरो वा एतं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चितिं चिनुते षड् वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठत्येता वा (२) अधिपत्नीर्नामेष्टका यस्यैता उपधीयन्तेऽधिपतिरेव समानानां भवति यं द्विष्यात् तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्च्छत्यङ्गिरसः सुवर्गं लोकं यन्तो या यज्ञस्य निष्कृतिरासीत् तामृषिभ्यः प्रत्यौहन् तद्धिरण्यमभवद्यद्धिरण्यशल्कैः प्रोक्षति यज्ञस्य निष्कृत्या अथो भेषजमेवास्मै करोत्यथो (३) रूपेणैवैनꣳ समर्धयत्यथो हिरण्यज्योतिषैव सुवर्गं लोकमेति साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्या इमा मे अग्न इष्टका धेनवः सन्त्वित्याह धेनूरेवैनाः कुरुते ता एनं कामदुघा अमुत्रामुष्मिँल्लोक उप तिष्ठन्ते ॥ (सयोनि,-मेता वै, करोत्य,-ष्टाचत्वारिꣳशच्च) ॥ २ ॥

शतरुद्रीयहोमविधिः ॥ अग्निर्ऋषिः ।

रुद्रो वा एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वत्सो जातः स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्यायेच्छतरुद्रीयं जुहोति भागधेयेनैवैनꣳ शमयति नाऽऽर्तिमार्च्छत्यध्वर्युर्न यजमानो यद् ग्राम्याणां पशूनां (१) पयसा जुहुयाद् ग्राम्यान् पशूञ्छुचाऽर्पयेद्यदारण्यानामारण्यान् जर्तिलयवाग्वा वा जुहुयाद् गवीधुकयवाग्वा वा न ग्राम्यान् पशून् हिनस्ति नाऽऽरण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयी वा एषा यदजाऽऽहुत्यैव जुहोति न ग्राम्यान् पशून् हिनस्ति नाऽऽरण्यानङ्गिरसः सुवर्गं लोकं यन्तो (२) ऽजायां घर्मं प्रासिञ्चन्त्सा शोचन्ती पर्णं पराऽजिहीत सोऽर्कोऽभवत् तदर्कस्यार्कत्वमर्कपर्णेन जुहोति सयोनित्वायोदङ् तिष्ठन् जुहोत्येषा वै रुद्रस्य दिक् स्वायामेव दिशि रुद्रं निरवदयते चरमायामिष्टकायां जुहोत्यन्तत एव रुद्रं निरवदयते त्रेधाविभक्तं जुहोति त्रय इमे लोका इमानेव लोकान्त्समावद्वीर्यान् करोतीयत्यग्रे जुहोत्य-(३)-थेयत्यथेयतीति त्रय इमे लोका एभ्य एवैनं लोकेभ्यः शमयति तिस्र उत्तरा आहुतीर्जुहोति षट् सं पद्यन्ते षड् वा ऋतव ऋतुभिरेवैनꣳ शमयति यदनुपरिक्रामं जुहुयादन्तरवचारिणꣳ रुद्रं कुर्यादथो खल्वाहुः कस्यां वाऽह दिशि रुद्रः कस्यां वेत्यनुपरिक्राममेव होतव्यमपरिवर्गमेवैनꣳ शमयत्येता (४) वै देवताः सुवर्ग्या या उत्तमास्ता यजमानं वाचयति ताभिरेवैनꣳ सुवर्गं लोकं गमयति यं द्विष्यात् तस्य सञ्चरे पशूनां न्यस्येद्यः प्रथमः पशुरभितिष्ठति स आर्तिमार्च्छति ॥
(पशूनां, यन्तो, जुहोति, शमयति, त्रिꣳशच्च) ॥ ३ ॥

परिषेचन-विकर्षणविधानम् ॥ अग्निर्ऋषिः ।

अश्मन्नूर्जमिति परि षिञ्चति मार्जयत्येवैनमथो तर्पयत्येव स एनं तृप्तोऽक्षुध्यन्नशोचन्नमुष्मिंल्लोक उप तिष्ठते तृप्यति प्रजया पशुभिर्य एवं वेद ता न इषमूर्जं धत्त मरुतः सꣳरराणा इत्याहान्नं वा ऊर्गन्नमेवाव रुन्धेऽश्मꣳस्ते क्षुदमुं ते शु-(१)-गृच्छतु यं द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च शुचा चार्पयति त्रिः परिषिञ्चन् पर्येति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्य शुचꣳ शमयति त्रिः पुनः पर्येति षट् सं पद्यन्ते षड्वा ऋतव ऋतुभिरेवास्य शुचꣳ शमयत्य-पां वा एतत् पुष्पं यद्वेतसोऽपाꣳ (२) शरोऽवका वेतसशाखया चावकाभिश्च वि कर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचꣳ शमयति यो वा अग्निं चितं प्रथमः पशुरधिक्रामतीश्वरो वै तꣳ शुचा प्रदहो मण्डूकेन वि कर्षत्येष वै पशूनामनुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नाऽऽरण्येषु तमेव शुचाऽर्पयत्य-ष्टाभिर्वि कर्षत्य-(३)-ष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्य शुचꣳ शमयति पावकवतीभिरन्नं वै पावकोऽन्नेनैवास्य शुचꣳ शमयति मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत् कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्तेऽन्तर्मृत्योर्धत्तेऽन्तरन्नाद्यादित्याहुरन्यामुपमुञ्चतेऽन्यां नान्त-(४)-रेव मृत्योर्धत्तेऽवान्नाद्यꣳ रुन्धे नमस्ते हरसे शोचिष इत्याह नमस्कृत्य हि वसीयाꣳसमुपचरन्त्य-न्यं ते अस्मत् तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य शुचाऽर्पयति पावको अस्मभ्यꣳ शिवो भवेत्याहान्नं वै पावकोऽन्नमेवाव रुन्धे द्वाभ्यामधि क्रामति प्रतिष्ठित्या अपस्यवतीभ्याꣳ शान्त्यै ॥ (शु,-ग्वेतसोऽपा-मष्टाभिर्वि कर्षति, नान्त,-रेकान्नपञ्चाशच्च) ॥ ४ ॥

व्याघारण-वैश्वकर्मणाहुतिविधानम् ॥ अग्निर्ऋषिः ।

नृषदे वडिति व्याघारयति पङ्क्त्याऽऽहुत्या यज्ञमुखमारभतेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोऽक्षमेव वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति हुतादो वा अन्ये देवा (१) अहुतादोऽन्ये तानग्निचिदेवोभयान् प्रीणाति ये देवा देवानामिति दध्ना मधुमिश्रेणावोक्षति हुतादश्चैव देवानहुतादश्च यजमानः प्रीणाति ते यजमानं प्रीणन्ति दध्नैव हुतादः प्रीणाति मधुषाऽहुतादो ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणावोक्षत्युभयस्यावरुद्ध्यै प्रमुष्टिनाऽवोक्षति प्राजापत्यो (२) वै प्रमुष्टिः सयोनित्वाय द्वाभ्यां प्रतिष्ठित्या अनुपरिचारमवोक्षत्यपरिवर्गमेवैनान् प्रीणाति वि वा एष प्राणैः प्रजया पशुभिर्ऋध्यते योऽग्निं चिन्वन्नधिक्रामति प्राणदा अपानदा इत्याह प्राणानेवाऽऽत्मन् धत्ते वर्चोदा वरिवोदा इत्याह प्रजा वै वर्चः पशवो वरिवः प्रजामेव पशूनात्मन् धत्त इन्द्रो वृत्रमहन् तं वृत्रो (३) हतः षोडशभिर्भोगैरसिनात् स एतामग्नयेऽनीकवत आहुतिमपश्यत् तामजुहोत् तस्याग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत यदग्नयेऽनीकवत आहुतिं जुहोत्यग्निरेवास्यानीकवान्त्स्वेन भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वकर्मणेन पाप्मनो निर्मुच्यते यं कामयेत चिरं पाप्मनो (४) निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो निर्मुच्यते यं काम-

येत ताजक् पाप्मनो निर्मुच्येतेति सर्वाणि तस्यानुद्रुत्य जुहुयात् ताजगेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै ॥ (देवाः, प्राजापत्यो, वृत्र,-श्चिरं पाप्मनो,-ऽष्टाविꣳशतिश्च) ॥ ५ ॥

समिदाधान-अग्निप्रणयन-होतुरप्रतिरथजपविधानम् ॥ अग्निर्ऋषिः ।

उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतेऽवसं करोति तादृगेव तत् तिस्र आ दधाति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्मै भागधेयं करोत्यौदुम्बरीर्भवन्त्यूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपि दधात्युदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणै-(१)-रेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनꣳ समर्धयति पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवतेऽपामतिं दुर्मतिं बाधमाना इत्याह रक्षसामपहत्यै रायस्पोषे यज्ञपतिमाभजन्तीरित्याह पशवो वै रायस्पोषः (२) पशूनेवाव रुन्धे षड्भिर्हरति षड्वा ऋतव ऋतुभिरेवैनꣳ हरति द्वे परिगृह्यवती भवतो रक्षसामपहत्यै सूर्यरश्मिर्हरिकेशः पुरस्तादित्याह प्रसूत्यै ततः पावका आशिषो नो जुषन्तामित्याहान्नं वै पावकोऽन्नमेवाव रुन्धे देवासुराः संयत्ता आसन् ते देवा एतदप्रतिरथमपश्यन् तेन वै ते प्रत्य-(३)-सुरानजयन् तदप्रतिरथस्याप्रतिरथत्वं यदप्रतिरथं द्वितीयो होताऽन्वाहाप्रत्येव तेन यजमानो भ्रातृव्यान् जयत्यथो अनभिजितमेवाभि जयति दशर्चं भवति दशाक्षरा विराड् विराजेमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अथो दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठत्य-संदिव वा अन्तरिक्षमन्तरिक्षमिवाऽऽग्नीध्रमाग्नीध्रे (४) ऽश्मानं नि दधाति सत्वाय द्वाभ्यां प्रतिष्ठित्यै विमान एष दिवो मध्य आस्त इत्याह व्येवैतया मिमीते मध्ये दिवो निहितः पृश्निरश्मेत्याहान्नं वै पृश्न्यन्नमेवाव रुन्धे चतसृभिरा पुच्छादेति चत्वारि छन्दाꣳसि छन्दोभिरेवे-न्द्रं विश्वा अवीवृधन्नित्याह वृद्धिमेवोपावर्तते वाजानाꣳ सत्पतिं पति-(५)-मित्याहान्नं वै वाजोऽन्नमेवाव रुन्धे सुम्नहूर्यज्ञो देवाꣳ आ च वक्षदित्याह प्रजा वै पशवः सुम्नं प्रजामेव पशूनात्मन् धत्ते यक्षदग्निर्देवो देवाꣳ आ च वक्षदित्याह स्वगाकृत्यै वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीदित्याहासौ वा आदित्य उद्यन्नुद्ग्राभ एष (६) निम्रोचन् निग्राभो ब्रह्मणैवाऽऽत्मानमुद्गृह्णाति ब्रह्मणा भ्रातृव्यं नि गृह्णाति ॥ (प्राणैः, पोषो, प्रत्य,-ग्नीध्रे, पतिं,- मेष, दश च) ॥ ६ ॥

चित्यारोहणं तत्राग्निनिक्षेपादि च ॥ अग्निर्ऋषिः ।

प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्तते क्रमध्वमग्निना नाकमित्याहेमानेवैतया लोकान् क्रमते पृथिव्या अहमुदन्तरिक्षमारुहमित्याहेमानेवैतया लोकान्त्समारोहति सुवर्यन्तो नापेक्षन्त इत्याह सुवर्गमेवैतया लोकमेत्य-ग्ने प्रेहि (१) प्रथमो देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षुर्दधाति पञ्चभिरधि क्रामति पाङ्क्तो यज्ञो यावानेव यज्ञस्तेन सह सुवर्गं लोकमेति नक्तोषासेति पुरोऽनुवाक्यामन्वाह प्रत्यै अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै तस्मै ते विधेम वाजाय स्वाहेत्याहान्नं वै वाजोऽन्नमेवाव (२) रुन्धे दध्नः पूर्णामौदुम्बरीꣳ स्वयमातृण्णायां

जुहोत्यूर्ग्वै दध्यूर्गुदुम्बरोऽसौ स्वयमातृण्णाऽमुष्यामेवोर्जं दधाति तस्मादमुतोऽर्वाचीमूर्जमुप जीवाम-स्तिसृभिः सादयति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीमा दधात्येषा वै सूर्मी कर्णकावत्येतया ह स्म (३) वै देवा असुराणाꣳ शततर्हाꣳस्तृꣳहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रातृव्याय प्र हरति स्तृत्या अछम्बट्कारं विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीमा दधाति भा एवाव रुन्धे ताꣳ सवितुर्वरेण्यस्य चित्रामिति शमीमयीꣳ शान्त्या अग्निर्वै हृ वा अग्निचितं दुहेऽग्निचिदग्निं दुहे ताꣳ (४) सवितुर्वरेण्यस्य चित्रामित्याहैष वा अग्नेर्दोहस्तमस्य कण्व एव श्रायसोऽवेत् तेन ह स्मैनꣳ स दुहे यदेतया समिधमादधात्यग्निचिदेव तदग्निं दुहे सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवास्य साप्तानि प्रीणाति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापते-(५)-राप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्या अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राविशज्जुह्वन्मनसा दिशो ध्यायेद् दिग्भ्य एवैनमव रुन्धे दध्ना पुरस्ताज्जुहोत्याज्येनोपरिष्टात् तेजश्चैवास्मा इन्द्रियं च समीची दधाति द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षा-(६)-देव वैश्वानरमव रुन्धे यत् प्रयाजानूयाजान् कुर्याद्विकस्तिः सा यज्ञस्य दर्विहोमं करोति यज्ञस्य प्रतिष्ठित्यै राष्ट्रं वै वैश्वानरो विण्मरुतो वैश्वानरꣳ हुत्वा मारुतान् जुहोति राष्ट्र एव विशमनु बध्नात्यु-च्चैर्वैश्वानरस्याऽऽश्रावयत्युपाꣳशु मारुतान् जुहोति तस्माद्राष्ट्रं विशमति वदति मारुता भवन्ति मरुतो वै देवानां विशो देवविशेनैवास्मै मनुष्यविश-(७)-मव रुन्धे सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुन्धे गणेन गणमनुद्रुत्य जुहोति विशमेवास्मा अनुवर्त्मानं करोति ॥ (इत्य,-स्मं, ताꣳ, प्रजापतेः, साक्षा,-न्मनुष्यविश,-मेकविꣳशतिश्च) ॥ ७ ॥

वसोर्धाराविधानम् ॥ अग्निर्ऋषिः ।

वसोर्धारां जुहोति वसोर्मे धाराऽसदिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिंल्लोके पिन्वमानोप तिष्ठत आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुन्धेऽथो कामा वै वसोर्धारा कामानेवाव रुन्धे यं कामयेत प्राणानस्यान्नाद्यं वि (१) च्छिन्द्यामिति विग्राहं तस्य जुहुयात् प्राणानेवास्यान्नाद्यं वि च्छिनत्ति यं कामयेत प्राणानस्यान्नाद्यꣳ सं तनुयामिति संततां तस्य जुहुयात् प्राणानेवास्यान्नाद्यꣳ सं तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नमव रुन्धेऽन्नं च मेऽक्षुच्च म इत्याहैतद्वा (२) अन्नस्य रूपꣳ रूपेणैवान्नमव रुन्धेऽग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमव रुन्धेऽर्धेन्द्राणि जुहोति देवता एवाव रुन्धे यत् सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तम इन्द्रमुत्तरमाहेन्द्रियमेवास्मिन्नुपरिष्टाद् दधाति यज्ञायुधानि जुहोति यज्ञो (३) वै यज्ञायुधानि यज्ञमेवाव रुन्धेऽथो एतद्वै यज्ञस्य रूपꣳ रूपेणैव यज्ञमव रुन्धेऽवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे घर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमव रुन्ध ऋक् च मे साम च म इत्याहै-(४)-

तद्वै छन्दसाꣳ रूपꣳ रूपेणैव छन्दाꣳस्यव रुन्धे गर्भाश्च मे वत्साश्च म इत्याहैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे कल्पान् जुहोत्यक्लृप्तस्य क्लृप्त्यै युग्मदयुजे जुहोति मिथुनत्वायो-त्तरवती भवतोऽभिक्रान्त्या एका च मे तिस्रश्च म इत्याह देवछन्दसं वा एका च तिस्रश्च (५) मनुष्यछन्दसं चतस्रश्चाष्टौ च देवछन्दसं चैव मनुष्यछन्दसं चाव रुन्ध आ त्रयस्त्रिꣳशतो जुहोति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्ध आऽष्टाचत्वारिꣳशतो जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धे वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति ॥ (वि, वै, यज्ञ, माह, च,-द्वाचत्वारिꣳशच्च) ॥ ८ ॥

वाजप्रसवीयहोमविधानम् ॥ अग्निर्ऋषिः ।

अग्निर्देवेभ्योऽपाक्रामद्भागधेयमिच्छमानस्तं देवा अब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै मह्यमेव वाजप्रसवीयं जुहवन्निति तस्मादग्नये वाजप्रसवीयं जुह्वति यद्वाजप्रसवीयं जुहोत्यग्निमेव तद्भागधेयेन समर्धयत्यथो अभिषेक एवास्य स चतुर्दशभिर्जुहोति सप्त ग्राम्या ओषधयः सप्ता-(१)-ऽऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य जुहोत्यन्नस्यान्नस्यावरुद्ध्या औदुम्बरेण स्रुवेण जुहोत्यूर्ग्वा उदुम्बर ऊर्गन्नमूर्जैवास्मा ऊर्जमन्नमव रुन्धेऽग्निर्वै देवानामभिषिक्तोऽग्निचिन्मनुष्याणां तस्मादग्निचिद्वर्षति न धावे-द्वरुद्धꣳ ह्यस्यान्नमन्नमिव खलु वै वर्षं यद्धावेदन्नाद्याद्धावेदुपावर्ततान्नाद्यमेवाभ्यु-(२)-पावर्तते नक्तोषासेति कृष्णायै श्वेतवत्सायै पयसा जुहोत्यह्नैवास्मै रात्रिं प्र दापयति रात्रियाऽहरहोरात्रे एवास्मै प्रत्ते काममन्नाद्यं दुहाते राष्ट्रभृतो जुहोति राष्ट्रमेवाव रुन्धे षड्भिर्जुहोति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर्जुहोति वज्रो वै रथो वज्रेणैव दिशो (३) ऽभि जयत्य-ग्निचितꣳ ह वा अमुष्मिंल्लोके वातोऽभि पवते वातनामानि जुहोत्यभ्येवैनममुष्मिंल्लोके वातः पवते त्रीणि जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमव रुन्धे समुद्रोऽसि नभस्वानित्याहैतद्वै वातस्य रूपꣳ रूपेणैव वातमव रुन्धेऽञ्जलिना जुहोति न ह्येतेषामन्यथा (४) ऽऽहुतिरवकल्पते ॥ (सप्ता,- भि, दिशो, ऽन्यथा, द्वे च) ॥ ९ ॥

अग्नियोगपुनश्चितिविधानम् ॥ अग्निर्ऋषिः ।

सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथ एष खलु वै देवरथो यदग्नि-रग्निं युनज्मि शवसा घृतेनेत्याह युनक्त्येवैनꣳ स एनं युक्तः सुवर्गं लोकमभि वहति यत् सर्वाभिः पञ्चभिर्युञ्ज्याद्युक्तोऽस्याग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः स्तोमा अप्रतिष्ठितान्युक्थानि तिसृभिः प्रातःसवनेऽभि मृशति त्रिवृ-(१)-द्वा अग्निर्यावानेवाग्निस्तं युनक्ति यथाऽनसि युक्त आधीयत एवमेव तत् प्रत्याहुतयस्तिष्ठन्ति प्रति स्तोमाः प्रत्युक्थानि यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभि मृशत्येतावान् वै यज्ञो यावानग्निष्टोमो भूमा त्वा अस्यात ऊर्ध्वः क्रियते यावानेव यज्ञस्तमन्ततोऽन्वारोहति द्वाभ्यां प्रतिष्ठित्या एकयाऽप्रस्तुतं भवत्यथा-(२)-भि मृशत्युपैनमुत्तरो यज्ञो नमत्यथो संतत्यै प्र वा एषोऽस्माल्लोकाच्च्यवते योऽग्निं चिनुते न वा एतस्यानिष्टक आहुतिरव कल्पते यां वा एषोऽनिष्टक आहुतिं

जुहोति स्रवति वै सा तां स्रवन्ती यज्ञोऽनु परा भवति यज्ञं यजमानो यत् पुनश्चितिं चिनुत आहुतीनां प्रतिष्ठित्यै प्रत्याहुतयस्तिष्ठन्ति (१) न यज्ञः परा भवति न यजमानोऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवैनं छन्दसा चिनुते यदेकादश त्रैष्टुभेन यद् द्वादश जागतेन छन्दोभिरेवैनं चिनुते नपात्को वैनामैषोऽग्निर्यत् पुनश्चितिर्य एवं विद्वान् पुनश्चितिं चिनुत आ तृतीयात् पुरुषादन्नमत्ति यथा वै पुनराधेयं एवं पुनश्चितिर्योऽग्न्याधेयेन न-(४)-र्ध्नोति स पुनराधेयमा धत्ते योऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुते यत् पुनश्चितिं चिनुत ऋद्ध्या अथो खल्वाहुर्न चेतव्येति रुद्रो वा एष यदग्निर्यथा व्याघ्रं सुप्तं बोधयति तादृगेव तत्-दथो खल्वाहुश्चेतव्येति यथा वसीयांसं भागधेयेन बोधयति तादृगेव तत्-न्मनुरग्निमचिनुत (५) तेन नाऽऽर्ध्नोत् स एतां पुनश्चितिमपश्यत् तामचिनुत तया वै स आर्ध्नोत् पुनश्चितिं चिनुत ऋद्ध्यै ॥ (त्रिष्ट, दध, तिष्ठन्ति, ना,-चिनुत, सप्तदश च) ॥ १० ॥

काम्यचितिविधानम् ॥ अग्निर्ऋषिः ।

छन्दश्चितं चिन्वीत पशुकामः पशवो वै छन्दांसि पशुमानेव भवति श्येनचितं चिन्वीत सुवर्गकामः श्येनो वै वयसां पतिष्ठः श्येन एव भूत्वा सुवर्गं लोकं पतति कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामिति शीर्षण्वानेवामुष्मिँल्लोके भवत्यलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकामश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति प्रउगचितं चिन्वीत भ्रातृव्यवान् प्रै-(१)-व भ्रातृव्यान् नुदत उभयतः प्रउगं चिन्वीत यः कामयेत प्रजातान् भ्रातृव्यान् नुदेय प्रति जनिष्यमाणानिति प्रैव जातान् भ्रातृव्यान् नुदते प्रति जनिष्यमाणान् रथचक्रचितं चिन्वीत भ्रातृव्यवान् वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्र हरति द्रोणचितं चिन्वीतान्नकामो द्रोणे वा अन्नं भ्रियते सयोन्येवान्नमव रुन्धे समूह्यं चिन्वीत पशुकामः पशुमानेव भवति (२) परिचाय्यं चिन्वीत ग्रामकामो ग्राम्येव भवति श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति पितृलोक एवर्ध्नोति विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेतां स एता जमदग्निर्विहव्या अपश्यत् ता उपाधत्त ताभिर्वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्या उपदधातीन्द्रियमेव ताभिर्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते होतुर्धिष्णिय उप दधाति यजमानायतनं वै (३) होता स्व एवास्मा आयतन इन्द्रियं वीर्यमव रुन्धे द्वादशोप दधाति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धेऽष्टावष्टावन्येषु धिष्णियेषूप दधात्यष्टाशफाः पशवः पशूनेवाव रुन्धे षण्मार्जालीये षड् वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान् पितॄन् प्रीणाति ॥ (प्र, भवति वा, अष्टाचत्वारिंशच्च) ॥ ११ ॥

अश्वमेधीयस्तोत्रगतस्तोमसामविधानम् ॥ विश्वेदेवा ऋषयः ।

पवस्व वाजसातय इत्यनुष्टुक् प्रतिपद्भवति तिस्रोऽनुष्टुभश्चतस्रो गायत्रियो यत् तिस्रोऽनुष्टुभस्तस्मादश्वस्त्रिभिस्तिष्ठँस्तिष्ठति यच्चतस्रो गायत्रियस्तस्मात् सर्वांश्चतुरः पदः प्रतिदधत् पलायते परमा वा एषा छन्दसां यदनुष्टुक् परमश्चतुष्टोमः स्तोमानां परमस्त्रिरात्रो यज्ञानां परमोऽश्वः पशूनां परमेणैवैनं परमतां गमयत्ये-कविंशमहर्भवति (१) यस्मिन्नश्व आलभ्यते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश एष प्रजापतिः प्रजापत्योऽश्वस्तमेव साक्षादृध्नोति शाक्वराः पृष्ठं भवन्त्यन्यद

२९ (तै. सं.)

न्यच्छन्दोऽन्यन्ये वा एते पशव आ लभ्यन्त उतेव ग्राम्या उतेवाऽऽरण्या यच्छक्वरयः पृष्ठं भवन्त्यश्वस्य सर्वत्वाय पार्थुरश्मं ब्रह्मसामं भवति रश्मिना वा अश्वो (२) यत ईश्वरो वा अश्वोऽयतोऽप्रतिष्ठितः परां परावतं गन्तोर्यत् पार्थुरश्मं ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै संकृत्यच्छावाकसामं भवत्युत्सन्नयज्ञो वा एष यदश्वमेधः कस्तद्वेदेत्याहुर्यदि सर्वो वा क्रियते न वा सर्व इति संकृत्यच्छावाकसामं भवत्यश्वस्य सर्वत्वाय पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति (३) सर्वस्याऽऽप्त्यै सर्वस्य जित्यै सर्वमेव तेनाऽऽप्नोति सर्वं जयति ॥ (भवत्य,-श्वो, भवति, दश च) ॥ १२ ॥

[देवासुरा १९। चेतव्या १८। रुद्रो २३। ऽश्म-२४९।-न्नुपद्द २४०। उत २१०। प्राचीं २७१। वर्षा-२११। रुग्निः २०२। सुवर्णं २६७। छन्दश्चितं १९८। पवस्व १६०। द्वादश ॥ २९०६ ॥]

॥ इति पञ्चमकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

वायव्यपश्वाद्याना निरूपणम् ।

[अथ पञ्चमः प्रपाठकः ॥५॥]

दीक्षणीयेष्टित्रिहविष्का ॥ अग्निर्ऋषिः ।

यदेकेन संस्थापयति यज्ञस्य संतत्या अविच्छेदाय-न्द्राः पशवो ये मुष्करा यदैन्द्राः सन्तोऽग्निभ्य आ लभ्यन्ते देवताभ्यः समदं दधात्याग्नेयीस्त्रिष्टुभो याज्यानुवाक्याः कुर्याद्यदाग्नेयीस्तेनाऽऽग्नेया यत् त्रिष्टुभस्तेनैन्द्राः समृद्ध्यै न देवताभ्यः समदं दधाति वायवे नियुत्वते तूपरमा लभते तेजोऽग्नेर्वायुस्तेजस एष आ लभ्यते तस्माद्यद्रियङ् वायु-(१)-र्वाति तद्रियङ्ङग्निर्दहति स्वमेव तत् तेजोऽन्वेति यन्न नियुत्वते स्यादुन्माद्येद्यजमानो नियुत्वते भवति यजमानस्यानुन्मादाय वायुमती श्वेतवती याज्यानुवाक्ये भवतः सतेजस्त्वाय हिरण्यगर्भः समवर्तताग्र इत्याघारमा घारयति प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय सर्वाणि वा एष रूपाणि पशूनां प्रत्या लभ्यते यच्छ्मश्रुणस्तत् (२) पुरुषाणां रूपं यत् तूपरस्तदश्वानां यदन्यतोदन् तद्गवां यदव्या इव शफास्तदवीनां यदजस्तदजानां वायुर्वै पशूनां प्रियं धाम यद्वायव्यो भवत्येतमेवैनमभि संजानानाः पशव उप तिष्ठन्ते वायव्यः कार्या३ः प्राजापत्या३ इत्याहुर्यद्वायव्यं कुर्यात् प्रजापतेरियाद्यत् प्राजापत्यं कुर्याद्वायो-(३)-रियाद्यद्वायव्यः पशुर्भवति तेन वायोर्नैति यत् प्राजापत्यः पुरोडाशो भवति तेन प्रजापतेर्नैति यद् द्वादशकपालस्तेन वैश्वानरान्नैत्या-ग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणोऽग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चाऽऽरभते-ऽग्निरवमो देवतानां विष्णुः परमो यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता (४) एवोभयतः परिगृह्य यजमानोऽव रुन्धे पुरोडाशेन वै देवा अमुष्मिँल्लोक आर्ध्नुवन् चरुणाऽस्मिन् यः कामयेतामुष्मिँल्लोक ऋध्नुयामिति स पुरोडाशं कुर्वीतामुष्मिन्नेव लोक ऋध्नोति यदष्टाकपालस्तेनाऽऽग्नेयो यत् त्रिकपालस्तेन वैष्णवः समृद्ध्यै यः कामयेतास्मिँल्लोक ऋध्नुयामिति स चरुं कुर्वीताग्नेर्घृतं विष्णोस्तण्डुलास्तस्मा-(५)-च्चरुः कार्योऽस्मिन्नेव लोक ऋध्नोत्या-दित्यो भवती यं वा अदितिरस्यामेव प्रति तिष्ठत्यथो अस्यामेवाधि यज्ञं तनुते यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते यथा सामि गर्भोऽवपद्यते तादृगेव

तदार्तिमार्च्छेद्वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत् संवत्सरो वा अग्निर्वैश्वानरो यथा संवत्सरमाप्त्वा काल आगते विजायत एवमेव संवत्सरमाप्त्वा काल आगतेऽग्निं चिनुते नाऽऽर्तिमार्च्छत्ये-षा वा (६) अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे त्रीण्येतानि हवींषि भवन्ति त्रय इमे लोका एषां लोकानां रोहाय ॥ (वायु,-तं,-द्वायो,-देवता,-स्तस्मा,-दष्वा, ऽष्टात्रिंशच्च) ॥ १ ॥

चयनविधिः, तत्फलं च ॥ अग्निर्ऋषिः ।

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनु प्राविशत् ताभ्यः पुनः संभवितुं नाशक्नोत् सोऽब्रवीदृध्नवदित् स यो मेतः पुनः संचिनवदिति तं देवाः समचिन्वन् ततो वै त आर्ध्नुवन् यत् समचिन्वन् तच्चित्यस्य चित्यत्वं य एवं विद्वानग्निं चिनुत ऋध्नोत्येव कस्मै कमग्निश्चीयत इत्याहुरग्निवा-(१)-न्सानीति वा अग्निश्चीयते विदुरेनं देवाः श्चीयतेऽग्निवानेव भवति कस्मै कमग्निश्चीयत इत्याहुर्देवा मा वेदन्निति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुर्गृह्यसानीति वा अग्निश्चीयते गृह्येव भवति कस्मै कमग्निश्चीयत इत्याहुः पशुमान्सानीति वा अग्नि-(२)-श्चीयते पशुमानेव भवति कस्मै कमग्निश्चीयत इत्याहुः सप्त मा पुरुषा उप जीवानिति वा अग्निश्चीयते त्रयः प्राञ्चस्त्रयः प्रत्यञ्च आत्मा सप्तम एतावन्त एवैनममुष्मिँल्लोक उप जीवन्ति प्रजापतिरग्निमचिकीषत् तं पृथिव्यब्रवीन्न मय्यग्निं चेष्यसेऽति मा धक्ष्यति सा त्वाऽतिदहमाना वि धविष्ये (३) स पापीयान् भविष्यसीति सोऽब्रवीत् तथा वा अहं करिष्यामि यथा त्वा नातिधक्ष्यतीति स इमामभ्यमृशत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदेतीमामेवेष्टकां कृत्वोपाधत्तानतिदाहाय यत् प्रत्यग्निं चिन्वीत तदभि मृशेत् प्रजापतिस्त्वा सादयतु तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदे-(४)-तीमामेवेष्टकां कृत्वोप धत्तेऽनतिदाहाय प्रजापतिरकामयत प्र जायेयेति स एतमुख्यमपश्यत् तं संवत्सरमबिभस्ततो वै स प्राजायत तस्मात् संवत्सरं भार्यः प्रैव जायते तं वसवोऽब्रुवन् प्र त्वमजनिष्ठा वयं प्र जायामहा इति तं वसुभ्यः प्रायच्छत् तं त्रीण्यहान्यबिभरुस्तेन (५) त्रीणि च शतान्यसृजन्त त्रयस्त्रिंशतं च तस्मात् त्र्यहं भार्यः प्रैव जायते तान् रुद्रा अब्रुवन् प्र यूयमजनिढ्वं वयं प्र जायामहा इति तं रुद्रेभ्यः प्रायच्छन् तं षडहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिंशतं च तस्मात् षडहं भार्यः प्रैव जायते तानादित्या अब्रुवन् प्र यूयमजनिढ्वं वयं (६) प्र जायामहा इति तमादित्येभ्यः प्रायच्छन् तं द्वादशाहान्यबिभरुस्तेन त्रीणि च शतान्यसृजन्त त्रयस्त्रिंशतं च तस्माद् द्वादशाहं भार्यः प्रैव जायते तेन वै ते सहस्रमसृजन्तोखां सहस्रतमीं य एवमुख्यं साहस्रं वेद प्र सहस्रं पशूनाप्नोति ॥ (अग्निवा,-न्नग्नि,-र्धविष्ये,-सीद,-तेन,-वयं, चत्वारिंशच्च) ॥ २ ॥

उखाहोमः, पुरुषशीर्षोपधानं, वामभृदुपधानं च ॥ अग्निर्ऋषिः ।

यजुषा वा एषा क्रियते यजुषा पच्यते यजुषा वि मुच्यते यदुखा सा वा एषैतर्हि यातयाम्नी सा न पुनः प्रयुज्येत्याहुरग्ने युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाँ इत्युखायां जुहोति तेनैवैनां पुनः प्र युङ्क्ते तेनायातयाम्नी यो वा अग्निं योग आगते युनक्ति युङ्क्ते युञ्जानेष्वग्ने (१) युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमाँ इत्याहैष वा अग्नेर्योगस्तेनैवैनं युनक्ति युङ्क्ते युञ्जानेषु ब्रह्मवादिनो वदन्ति

चेतव्या३ उत्ताना३ इति वयसां वा एष प्रतिमया चीयते यदग्निर्यन्न्यञ्चं चिनुयात् पृष्टित एनमाहुतय ऋच्छेयुर्यदुत्तानं न पतितुं शक्नुयादसुवर्ग्योऽस्य स्यात् प्राचीनमुत्तानं (२) पुरुषशीर्षमुप दधाति मुखत एवैनमाहुतय ऋच्छन्ति नोत्तानं चिनुते सुवर्ग्योऽस्य भवति सौर्या जुहोति चक्षुरेवास्मिन् प्रति दधाति द्विर्जुहोति द्वे हि चक्षुषी समान्या जुहोति समानं हि चक्षुः समृद्ध्यै देवासुराः संयत्ता आसन् ते वामं वसु सं न्यदधत तद्देवा वामभृताऽवृञ्जत तद्वामभृतो वामभृत्त्वं यद्वामभृत-(३)-मुपदधाति वाममेव तया वसु यजमानो भ्रातृव्यस्य वृङ्क्ते हिरण्यमूर्ध्नी भवति ज्योतिर्वै हिरण्यं ज्योतिर्वामं ज्योतिषैवास्य ज्योतिषा वामं वृङ्क्ते द्वियजुर्भवति प्रतिष्ठित्यै ॥ (भवतं, उत्तानं, वामभृतं चतुर्विंशतिश्च) ॥ ३ ॥

रेतःसिग्घोमः चित्यभिमर्शश्च ॥ ७ अतिजगती शक्वरी वा; ११ त्रिष्टुप् । अग्निर्ऋषिः ।

आपो वरुणस्य पत्नय आसन् ता अग्निरभ्यध्यायत् ताः समभवत् तस्य रेतः पराऽपतत् तदियमभवद्यद् द्वितीयं पराऽपतत् तदसावभवदियं वै विराडसौ स्वराड् यद्विराजावुपदधातीमे एवोप धत्ते यद्वा असौ रेतः सिञ्चति तदस्यां प्रति तिष्ठति तत् प्र जायते ता ओषधयो (१) वीरुधो भवन्ति ता अग्निरत्ति य एवं वेद प्रैव जायतेऽन्नादो भवति यो रेतस्वी स्यात् प्रथमायां तस्य चित्यामुभे उप दध्यादिमे एवास्मै समीची रेतः सिञ्चतो यः सिक्तरेताः स्यात् प्रथमायां तस्य चित्यामन्यामुप दध्यादुत्तमायामन्यां रेत एवास्य सिक्तमाभ्यामुभयतः परि गृह्णाति संवत्सरं न क-(२)-ञ्चन प्रत्यवरोहेन्न हीमे कं चन प्रत्यवरोहतस्तदेनयोर्व्रतं यो वा अपशीर्षाणमग्निं चिनुतेऽपशीर्षाऽमुष्मिँल्लोके भवति यः सशीर्षाणं चिनुते सशीर्षाऽमुष्मिँल्लोके भवति

चित्तिं जुहोमि मनसा घृतेन यथा देवा इहाऽऽगमन् वीतिहोत्रा ऋतावृधः ।
समुद्रस्य वयुनस्य पत्मन् जुहोमि विश्वकर्मणे विश्वाऽहाऽमर्त्यं हवि-

-रिति स्वयमातृण्णामुपधाय जुहोत्ये (३) तद्वा अग्नेः शिरः सशीर्षाणमेवाग्निं चिनुते सशीर्षाऽमुष्मिँल्लोके भवति य एवं वेद सुवर्गाय वा एष लोकाय चीयते यदग्निस्तस्य यदयथापूर्वं क्रियतेऽसुवर्ग्यमस्य तत् सुवर्ग्योऽग्नि-श्चितिमुपधायाभि मृशे-

-च्चित्तिमचित्तिं चिनवद्वि विद्वान् पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नः स्वपत्याय (४) देव दितिं च रास्वादितिमुरुष्येति ॥

यथापूर्वमेवैनामुप धत्ते प्राञ्चमेनं चिनुते सुवर्ग्योऽस्य भवति ॥

(ओषधयो, कं, जुहोति, स्वपत्याय,-द्वादश च) ॥ ४ ॥

हिरण्येष्टका-स्वयमातृण्णोपधानम् ॥ अग्निर्ऋषिः ।

विश्वकर्मा दिशां पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नमः प्रजापती रुद्रो वरुणोऽग्निर्दिशां पतिः स नः पशून् पातु सोऽस्मान् पातु तस्मै नम एता वै देवता एतेषां पशूनामधिपतयस्ताभ्यो वा एष आ वृश्च्यते यः पशुशीर्षाण्युपदधाति हिरण्येष्टका उप दधात्येताभ्य एव

देवताभ्यो नमस्करोति ब्रह्मवादिनो (१) वदन्त्यग्नौ ग्राम्यान् पशून् प्र दधाति शुचाऽऽरण्यानर्पयति किं तत उच्छिꣳषन्तीति यद्धिरण्येष्टका उपदधात्यमृतं वै हिरण्यममृतेनैव ग्राम्येभ्यः पशुभ्यो भेषजं करोति नैनान् हिनस्ति प्राणो वै प्रथमा स्वयमातृण्णा व्यानो द्वितीयाऽपानस्तृतीयाऽनु प्राण्यात् प्रथमाꣳ स्वयमातृण्णामुपधाय प्राणेनैव प्राणꣳ समर्धयति व्यन्याद् (२) द्वितीयामुपधाय व्यानेनैव व्यानꣳ समर्धयत्यपान्यात् तृतीयामुपधायापानेनैवापानꣳ समर्धयत्यथो प्राणैरेवैनꣳ समिन्धे भूर्भुवः सुवरिति स्वयमातृण्णा उप दधातीमे वै लोकाः स्वयमातृण्णा एताभिः खलु वै व्याहृतीभिः प्रजापतिः प्राजायत यदेताभिर्व्याहृतीभिः स्वयमातृण्णा उपदधातीमानेव लोकानुपधायैषु (३) लोकेष्वधि प्र जायते प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे त्वा तया देवतयाऽङ्गिरस्वद् ध्रुवा सीदाग्निना वै देवाः सुवर्गं लोकमजिगाꣳसन् तेन पतितुं नाशक्नुवन् त एताश्चतस्रः स्वयमातृण्णा अपश्यन् ता दिक्षूपादधत तेन सर्वतश्चक्षुषा सुवर्गं लोकमायन् यच्चतस्रः स्वयमातृण्णा दिक्षूपदधाति सर्वतश्चक्षुषैव तदग्निना यजमानः (४) सुवर्गं लोकमेति ॥

(ब्रह्मवादिनो, व्यन्या,- देषु, यजमान,- श्चत्वारि च) ॥५॥

अग्नेर्वरणम्-लोकंपृणोपधानम् ॥ अग्निर्ऋषिः ।

अग्न आ याहि वीतय इत्याहाह्वदेवैनमग्निं दूतं वृणीमह इत्याह हुत्वैवैनं वृणीतेऽग्निनाऽग्निः समिध्यत इत्याह समिन्ध एवैनमग्निर्वृत्राणि जङ्घनदित्याह समिद्ध एवास्मिन्निन्द्रियं दधात्यग्नेः स्तोमं मनामह इत्याह मनुत एवैनमेतानि वा अह्नाꣳ रूपाण्य-(१)-न्वहमेवैनं चिनुतेऽवाह्नाꣳ रूपाणि रुन्धे ब्रह्मवादिनो वदन्ति कस्मात् सत्यादयातयाम्न्यन्या इष्टका अयातयाम्नी लोकंपृणेत्यैन्द्राग्नी हि बार्हस्पत्येति ब्रूयादिन्द्राग्नी च हि देवानां बृहस्पतिश्चायातयामानोऽनुचरवती भवत्यजामित्वायाऽनुष्टुभाऽनु चरत्यात्मा वै लोकंपृणा प्राणोऽनुष्टुप् तस्मात् प्राणः सर्वाण्यङ्गान्यनु चरति ता अस्य सूददोहस (२) इत्याह तस्मात् परुषिपरुषि रसः सोमꣳ श्रीणन्ति पृश्नय इत्याहान्नं वै पृश्न्यन्नमेवाव रुन्धेऽर्को वा अग्निरर्कोऽन्नमन्नमेवाव रुन्धे जन्मन् देवानां विशस्त्रिष्वा रोचने दिव इत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोति यो वा इष्टकानां प्रतिष्ठां वेद प्रत्येव तिष्ठति तया (३) देवतयाऽङ्गिरस्वद् ध्रुवा सीदेत्याहैषा वा इष्टकानां प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति ॥ (रूपाणि, सूददोहस,-स्तया, षोडश च) ॥ ६ ॥

एकयूपादिविधिः ॥ १० अनुष्टुप् । अग्निर्ऋषिः ।

सुवर्गाय वा एष लोकाय चीयते यदग्निर्वज्र एकादशिनी यदग्नावेकादशिनीं मिनुयाद्वज्रेणैनꣳ सुवर्गाल्लोकादन्तर्दध्याद्यन्न मिनुयात् स्वरुभिः पशून् व्यर्धयेदेकयूपं मिनोति नैनं वज्रेण सुवर्गाल्लोकादन्तर्दधाति न स्वरुभिः पशून् व्यर्धयति वि वा एष इन्द्रियेण वीर्येणर्ध्यते योऽग्निं चिन्वन्नधि-

क्रामत्यैन्द्रिय-(१)-र्चा ऽऽक्रमणं प्रतीष्टकामुप दध्यान्नेन्द्रियेण वीर्येण व्यृध्यते रुद्रो वा एष यदग्निस्तस्य तिस्रः शरव्याः प्रतीची तिरश्च्यनूची ताभ्यो वा एष आ वृश्च्यते योऽग्निं चिनुतेऽग्निं चित्वा तिसृधन्वमयाचितं ब्राह्मणाय दद्यात् ताभ्य एव नमस्करोत्यथो ताभ्य एवाऽऽत्मानं निष्क्रीणीते यत् ते रुद्र पुरो (२) धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र संवत्सरेण नमस्करोमि यत् ते रुद्र दक्षिणा धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र परिवत्सरेण नमस्करोमि यत् ते रुद्र पश्चाद्धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्रेदावत्सरेण नमस्करोमि यत् ते रुद्रोत्तराद्धनुस्त-(३)-द्वातो अनु वातु ते तस्मै ते रुद्रेदुवत्सरेण नमस्करोमि यत् ते रुद्रोपरि धनुस्तद्वातो अनु वातु ते तस्मै ते रुद्र वत्सरेण नमस्करोमि रुद्रो वा एष यदग्निः स यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वा एष एतर्हि संचितमेतैरुप तिष्ठते नमस्कारैरेवैनꣳ शमयति ॥

येऽग्नयः (४) पुरीष्याः प्रविष्टाः पृथिवीमनु । तेषां त्वमस्युत्तमः प्र णो जीवातवे सुव ॥

आपं त्वाऽग्ने मनसाऽऽपं त्वाऽग्ने तपसाऽऽपं त्वाऽग्ने दीक्षयाऽऽपं त्वाऽग्न उपसद्भि-

-रापं त्वाऽग्ने सुत्ययाऽऽपं त्वाऽग्ने दक्षिणाभि-रापं त्वाऽग्नेऽवभृथेना-पं त्वाऽग्ने वशयाऽऽपं त्वाऽग्ने स्वगाकारेणे-त्याहै-(५)-षा वा अग्नेराप्तिस्तयैवैनमाप्नोति ॥ (ऐन्द्रिया, पुर, उत्तराद्धनुस्त,-ऽग्नयं, आह,-द्वौ च) ॥ ७ ॥

उपस्थानम्, आत्मेष्टकोपधानं च ॥ अग्निर्ऋषिः ।

गायत्रेण पुरस्तादुप तिष्ठते प्राणमेवास्मिन् दधाति बृहद्रथन्तराभ्यां पक्षावोज एवास्मिन् दधात्यृतुस्थायज्ञायज्ञियेन पुच्छमृतुष्वेव प्रति तिष्ठति पृष्ठैरुप तिष्ठते तेजो वै पृष्ठानि तेज एवास्मिन् दधाति प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः पराङैत् तं वारवन्तीयेनावारयत तद्वारवन्तीयस्य वारवन्तीयत्वꣳ श्यैतेन श्येती अकुरुत तच्छ्यैतस्य श्यैतत्वं (१) यद्वारवन्तीयेनोपतिष्ठते वारयत एवैनꣳ श्यैतेन श्येती कुरुते प्रजापतेर्हृदयेनापिपक्षं प्रत्युप तिष्ठते प्रेमाणमेवास्य गच्छति प्राच्या त्वा दिशा सादयामि गायत्रेण छन्दसाऽग्निना देवतयाऽग्नेः शीर्ष्णाऽग्नेः शिर उप दधामि दक्षिणया त्वा दिशा सादयामि त्रैष्टुभेन छन्दसेन्द्रेण देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधामि प्रतीच्या त्वा दिशा सादयामि (२) जागतेन छन्दसा सवित्रा देवतयाऽग्नेः पुच्छेनाग्नेः पुच्छमुप दधाम्यु-दीच्या त्वा दिशा सादयाम्यानुष्टुभेन छन्दसा मित्रावरुणाभ्यां देवतयाऽग्नेः पक्षेणाग्नेः पक्षमुप दधाम्यू-र्ध्वया त्वा दिशा सादयामि पाङ्क्तेन छन्दसा बृहस्पतिना देवतयाऽग्नेः पृष्ठेनाग्नेः पृष्ठमुप दधामि योऽपात्मानमग्निं चिनुतेऽपात्माऽमुष्मिंल्लोके भवति यः सात्मानं चिनुते (३) सात्माऽमुष्मिंल्लोके भवत्यात्मेष्टकामुप दधात्येष वा अग्नेरात्मा सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिंल्लोके भवति य एवं वेद ॥

(श्यैतत्वं, प्रतीच्या त्वा दिशा सादयामि, यः सात्मानं चिनुते, द्वाविंशतिश्च) ॥ ८ ॥

शान्त्याहुतिविधानं प्रोक्षणं च ॥ अग्निर्ऋषिः ।

अग्न उदधे या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्मा-ग्ने दुध्र✽- गह्य✽- किꣳशिल✽- वन्य या त इषुर्युवा नाम तया नो मृड तस्यास्ते नमस्तस्यास्त उप जीवन्तो भूयास्म पञ्च वा एतेऽग्नयो यच्चितय उदधिरेव नाम प्रथमो दुध्रो (१) द्वितीयो गह्यस्तृतीयः किꣳशिलश्चतुर्थो वन्यः पञ्चमस्तेभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च प्र दहेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्च्छत्यध्वर्युर्न यजमानो वाङ्म आसन् नसोः प्राणो-ऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाहुवोर्बलमूरुवोरोजोऽरिष्टा विश्वान्यङ्गानि तनू-(२)-स्तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसी-रप वा एतस्मात् प्राणाः क्रामन्ति योऽग्निं चिन्वन्नधिक्रामति वाङ्म आसन् नसोः प्राण इत्याह प्राणानेवाऽऽत्मन् धत्ते यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्त्वा-हुतिभागा वा अन्ये रुद्रा हविर्भागा (३) अन्ये शतरुद्रीयꣳ हुत्वा गावीधुकं चरुमेतेन यजुषा चरमायामिष्टकायां नि दध्याद्भागधेयेनैवैनꣳ शमयति तस्य त्वै शतरुद्रीयं हुतमित्याहुर्यस्यैतदग्नौ क्रियत इति वसवस्त्वा रुद्रैः पुरस्तात् पान्तु पितरस्त्वा यमराजानः पितृभिर्दक्षिणतः पान्त्वा-दित्यास्त्वा विश्वैर्देवैः पश्चात् पान्तु द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतः पातु (४) देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति यत् संचितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः ॥

(दुध्र-स्तनू, हविर्भागाः, पातु, द्वाविंशतिश्च) ॥ ९ ॥

सर्पाहुतिः महाहोमः; अप्रतिरथोपहोमश्च ॥ १५ त्रिष्टुप् । अग्निर्ऋषिः ।

समीची नामासि प्राची दिक् तस्यास्तेऽग्निरधिपतिरसितो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जम्भे दधाम्यो-जस्विनी नामासि दक्षिणा दिक् तस्यास्त इन्द्रोऽधिपतिः पृदाकुः प्राची नामासि प्रतीची दिक् तस्यास्ते (१) सोमोऽधिपतिः स्वजोऽवस्थावा नामास्युदीची दिक् तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजि-रधिपत्नी नामासि बृहती दिक् तस्यास्ते बृहस्पतिरधिपतिः श्वित्रो वशिनी नामासीयं दिक् तस्यास्ते यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च (२) नो द्वेष्टि तं वां जम्भे दधाम्ये-ता वै देवता अग्निं चितꣳ रक्षन्ति ताभ्यो यदाहुतीर्न जुहुयादध्वर्युं च यजमानं च ध्यायेयुर्यदेता आहुतीर्जुहोति भागधेयेनैवैनाञ्छमयति नाऽऽर्तिमार्च्छत्यध्वर्युर्न यजमानो हेतयो नाम स्थ तेषां वः पुरो गृहा अग्निर्व इषवः सलिलो✽- निलिम्पा नाम (३) स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवः सगरो✽- वज्रिणो नाम स्थ तेषां वः पश्चाद् गृहाः स्वप्नो व इषवो गह्वरो✽- ऽवस्थावानो नाम स्थ तेषां व उत्तराद् गृहा आपो व इषवः

(५।३-४) या त...भूयास्म । (१०।८-९,१०) स्थ तेषां...इषवः ।

समुद्रो✽- ऽधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान्✽- क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा (४) अन्नं व इषवोऽनिमिषो वातनामं तेभ्यो वो नमस्ते नो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निचिदेवोभयान् प्रीणाति दध्ना मधुमिश्रेणैता आहुतीर्जुहोति भागधेयेनैवैनान् प्रीणात्यथो खल्वाहुरिष्टका वै देवा अहुताद इत्य-(५)-नुपरिक्रामं जुहोत्यपरिवर्गमेवैनान् प्रीणाती-

-मꣳ स्तनमूर्जस्वन्तं धयापां प्रप्यातमग्ने सरिरस्य मध्ये ।

उत्सं जुषस्व मधुमन्तमूर्व समुद्रियꣳ सदनमा विशस्व ॥

यो वा अग्निं प्रयुज्य न विमुञ्चति यथाऽश्वो युक्तोऽविमुच्यमानः क्षुध्यन् पराभवत्येवमस्याग्निः परा भवति तं पराभवन्तं यजमानोऽनु परा भवति सोऽग्निं चित्वा लूक्षो (६) भवतीमꣳ स्तनमूर्जस्वन्तं धयापामित्याज्यस्य पूर्णाꣳ स्रुचं जुहोत्येष वा अग्नेर्विमोको विमुच्यैवास्मा अन्नमपि दधाति तस्मादाहुर्यश्चैवं वेद यश्च न सुधायꣳ ह वै वाजी सुहितो दधातीत्यग्निर्वाव वाजी तमेव तत् प्रीणाति स एनं प्रीतः प्रीणाति वसीयान् भवति (७) (त्, च, नाम, गृहा, इति, लूक्षो, भवति) ॥ १० ॥

अश्वमेधशेषभूतपशूनां प्रथमः सङ्घः ॥ विश्वेदेवा ऋषयः ।

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय राज्ञे गवयः शार्दूलाय राज्ञे गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः क्रिमिः सोमस्य राज्ञः कुलुङ्गः सिन्धोः शिꣳशुमारो हिमवतो हस्ती ॥ (इन्द्रायाष्टाविꣳशतिः) ॥ ११ ॥

द्वितीयः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

मयुः प्राजापत्य ऊलो हलीक्ष्णो वृषदꣳशस्ते धातुः सरस्वत्यै शारिः श्येता पुरुषवाक् सरस्वते शुकः श्येतः पुरुषवा-गारण्योऽजो नकुलः शका ते पौष्णा वाचे क्रौञ्चः ॥ (मयुस्त्रयोविꣳशतिः) ॥१२॥

तृतीयः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

अपां नप्त्रे जषो नाक्रो मकरः कुलीकयस्तेऽकूपारस्य वाचे पैङ्गराजो भगाय कुषीतक आती वाहसो दर्विदा ते वायव्या दिग्भ्यश्चक्रवाकः ॥ (अपामेकान्नविꣳशतिः) ॥ १३ ॥

चतुर्थः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

बलायाजगर आखुः सृजया शयण्डकस्ते मैत्रा मृत्यवेऽसितो मन्यवे स्वजः कुम्भीनसः पुष्करसादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥ (बलायाष्टादश) ॥ १४ ॥

पञ्चमः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीना-मेण्यह्ने कृष्णो रात्रियै पिकः क्ष्विङ्का नीलशीर्ष्णी तेऽर्यम्णे धातुः कत्कटः ॥ (पुरुषमृगोऽष्टादश) ॥ १५ ॥

षष्ठः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

सौरी बलाकर्-श्यो मयूरः श्येनस्ते गन्धर्वाणां वसूनां कपिञ्जलो रुद्राणां तित्तिरी रोहित

(१०।११-१२) स्थ तेषां...इषवः ।

कुण्डृणाची गोलत्तिका ता अप्सरसां—मरण्याय सृमरः (सौर्यैकादश) ॥ १६ ॥

सप्तमः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

पृषतो वैश्वदेवः पित्वो न्यङ्कुः कशस्तेऽनुमत्या अन्यवापोऽर्धमासानां मासां कश्यपः कर्यिः कुटरुर्दात्यौहस्ते सिनीवाल्यै बृहस्पतये शित्पुटः ॥ (पृषतोऽष्टादश) ॥ १७ ॥

अष्टमः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

शका भौमी पान्त्रः कशो मान्थीलवस्ते पितृणां—मृतूनां जहका संवत्सराय लोपा कपोत उलूकः शशस्ते नैर्ऋताः कृकवाकुः सावित्रः ॥ (शकाऽष्टादश) ॥ १८ ॥

नवमः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

रुरू रौद्रः कृकलासः शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्ग—स्तरक्षुः कृष्णः श्वा चतुरक्षो गर्दभस्त इतरजनाना—मग्नये धूङ्क्ष्णा ॥ (रुरुर्विंशतिः) ॥ १९ ॥

दशमः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

अलज आन्तरिक्ष उद्रो मद्गुः प्लवस्तेऽपा—मदित्यै हंससाचि—रिन्द्राण्यै कीर्शा गृध्रः शितिकक्षी वार्ध्राणसस्ते दिव्यो द्यावापृथिव्या श्वावित् ॥ (अलजोऽष्टादश) ॥ २० ॥

एकादशः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

सुपर्णः पार्जन्यो हंसो वृको वृषदंशस्त ऐन्द्रा अपामुद्रो ऽर्यम्णे लोपाशः सिंहो नकुलो व्याघ्रस्ते महेन्द्राय कामाय परस्वान् ॥ (सुपर्णोऽष्टादश) ॥ २१ ॥

अश्वमेधशेषः प्रथमो ग्राम्यपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

आग्नेयः कृष्णग्रीवः सारस्वती मेषी बभ्रुः सौम्यः पौष्णः श्यामः शितिपृष्ठो बार्हस्पत्यः शिल्पो वैश्वदेव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नः संहितो ऽधोरामः सावित्रो वारुणः पेत्वः ॥ (आग्नेयो द्वाविंशतिः) ॥ २२ ॥

द्वितीयो ग्राम्यपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्हस्पत्यौ धात्रे पृषोदरः सौर्यो बलक्षः पेत्वः ॥ (अश्वः षोडश) ॥ २३ ॥

तृतीयो ग्राम्यपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

अग्नयेऽनीकवते रोहिताञ्जिरनड्वा—नधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ मारुतः कल्माष आग्नेयः कृष्णोऽजः सारस्वती मेषी वारुणः कृष्ण एकशितिपात् पेत्वः ॥ (अग्नये द्वाविंशतिः) ॥ २४ ॥

[यत् ३२८। प्रजापति- ३४०।- येजुषा १७१ ।ऽऽपो २१८। विश्वकर्मा २०३ ।ऽग्ने १६६। सुवर्णं २५८। गायत्रेणा- १०२।-ग्ने २३२। समीची-३५०।-ग्रीव १८। मधु-२३।-रुपो १९। बलाय १८। पुरुषमृगः १८। सारी १८। पृषतः १८। शका १८। रुरु-२०।-रलजः १८। सुपर्णं १८। आग्नेयो २२।ऽश्वो १६।ऽग्नये २२। चतुर्विंशतिः ॥ २०२० ॥]

[॥ इति पञ्चमकाण्डे पञ्चमः प्रपाठकः ॥५॥]

उपानुवाक्याभिधानम् ।

[अथ षष्ठः प्रपाठकः ॥६॥]

कुम्भेष्टकामन्त्रणम् ॥ १-३, ९-१० त्रिष्टुप्; ४ जगती; ५-८ अनुष्टुप्; ११-१३ गायत्री ।

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपः शꣳ स्योना भवन्तु ॥
यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।
मधुश्चुतः शुचयो याः पावकास्ता न आपः शꣳ स्योना भवन्तु ॥
यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति (१) शुक्रास्ता न आपः शꣳ स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यताऽऽपः शिवया तनुवोप स्पृशत त्वचं मे ।
सर्वाꣳ अग्नीꣳरप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥
यददः संप्रयतीरहावनदता हते । तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः ॥
यत् प्रेषिता वरुणेन ताः शीभꣳ समवल्गत (२) ।
तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनु स्थन ॥
अपकामꣳ स्यन्दमाना अवीवरत वो हिकम् ।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद्वार्णाम वो हितम् ॥
एको देवो अप्यतिष्ठत् स्यन्दमाना यथावशम् । उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥
आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत् ताः ॥
तीव्रो रसो मधुपृचा-(३)- मरंगम आ मा प्राणेन सह वर्चसा गन् ॥
आदित् पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्न आसाम् ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः ॥
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः (४) ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या सं भव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा ॥

(उन्दन्ति, समवल्गत, मधुपृचां, मातरो, द्वाविंशतिश्च) ॥ १ ॥

कुम्भेष्टका-वस्त्रधानम् ॥ अग्निर्ऋषिः ।

अपां ग्रहान् गृह्णात्येतद्वाव राजसूयं यदेते ग्रहाः सवो ऽग्निर्वरुणसवो राजसूयमग्निसवश्चित्यस्ताभ्या-

मेव सूयतेऽथो उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य यश्चाग्निचित आपो भवन्त्यापो वा
अग्नेर्भ्रातृव्या यदपोऽग्नेरधस्तादुपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना परा ऽस्य भ्रातृव्यो भवत्यमृतं (१)
वा आपस्तस्मादद्भिरवतान्तमभिषिञ्चन्ति नाऽऽर्तिमार्च्छति सर्वमायुरेति यस्यैता उपधीयन्ते य उ चैना
एवं वेदा—न्नं वा आपः पशव आपोऽन्नं पशवोऽन्नादः पशुमान् भवति यस्यैता उपधीयन्ते य उ चैना एवं
वेद द्वादश भवन्ति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा (२) अन्नमव रुन्धे पात्राणि भवन्ति
पात्रे वा अन्नमद्यते सयोन्येवान्नमव रुन्ध आ द्वादशात् पुरुषादन्नमत्त्यथो पात्रान्न छिद्यते यस्यैता उपधीयन्ते
य उ चैना एवं वेद कुम्भाश्च कुम्भीश्च मिथुनानि भवन्ति मिथुनस्य प्रजात्यै प्र प्रजया पशुभिर्मिथुनैर्जायते
यस्यैता उपधीयन्ते य उ (३) चैना एवं वेद शुग्वा अग्निः सोऽध्वर्युं यजमानं प्रजाः शुचाऽर्पयति यदप
उपदधाति शुचमेवास्य शमयति नाऽऽर्तिमार्च्छत्यध्वर्युर्न यजमानः शाम्यन्ति प्रजा यत्रैता उपधीयन्ते
ऽपां वा एतानि हृदयानि यदेता आपो यदेता अप उपदधाति दिव्याभिरेवैनाः सꣳसृजति वर्षुकः पर्जन्यो
(४) भवति यो वा एतासामायतनं क्लृप्तिं वेदाऽऽयतनवान् भवति कल्पतेऽस्मा अनुसीतमुप
दधात्येतद्वा आसामायतनमेषा क्लृप्ति—र्य एवं वेदाऽऽयतनवान् भवति कल्पतेऽस्मै द्वन्द्वमन्या
उप दधाति चतस्रो मध्ये धृत्या अन्नं वा इष्टका एतत् खलु वै साक्षादन्नं यदेष चरुर्यदेतं चरुमुपदधाति
साक्षा-(५)-देवास्मा अन्नमव रुन्धे मध्यत उप दधाति मध्यत एवास्मा अन्नं दधाति तस्मान्मध्यतोऽन्नमद्यते बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मा अन्नमव रुन्धे ब्रह्मवर्चसमसि
ब्रह्मवर्चसाय त्वेत्याह तेजस्वी ब्रह्मवर्चसी भवति यस्यैता उपधीयन्ते य उ चैनमेवं वेद ॥

(अमृत,-मस्मा, उ, पुर्जन्यः, साक्षात्, सप्तचत्वारिंशच्च) ॥ २ ॥

भूतेष्टकोपधानाभिषेकादि ॥ अग्निर्ऋषिः ।

भूतेष्टका उप दधात्यत्रात्र वै मृत्युर्जायते यत्रयत्रैव मृत्युर्जायते तत एवैनमव यजते तस्मादग्निचित्
सर्वमायुरेति सर्वे ह्यस्य मृत्यवोऽवेष्टास्तस्मादग्निचिन्नाभिचरितवै प्रत्यगेनमभिचारः स्तृणुते सूयते
वा एष योऽग्निं चिनुते देवसुवामेतानि हवीꣳषि भवन्त्येतावन्तो वै देवानाꣳ सवास्त एवा-(१)-स्मै
सवान् प्र यच्छन्ति त एनꣳ सुवन्ते सवोऽग्निर्वरुणसवो राजसूयं ब्रह्मसवश्चित्यो देवस्य त्वा
सवितुः प्रसव इत्याह सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरभि षिञ्चत्य—न्नस्यान्नस्याभि षिञ्चत्यन्नस्या-
न्नस्यावरुद्ध्यै पुरस्तात् प्रत्यञ्चमभि षिञ्चति पुरस्ताद्धि प्रतीचीनमन्नमद्यते शीर्षतोऽभि षिञ्चति शीर्षतो
ह्यन्नमद्यत आ मुखादन्ववस्रावयति (२) मुखत एवास्मा अन्नाद्यं दधात्य—ग्नेस्त्वा साम्राज्येनाभि
षिञ्चामीत्याह ब्रह्म वै वा अग्नेः सवस्तेनैवैनमभि षिञ्चति बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामीत्याह ब्रह्म वै
देवानां बृहस्पतिर्ब्रह्मणैवैनमभि षिञ्चतीन्द्रस्य त्वा साम्राज्येनाभि षिञ्चामीत्याहेन्द्रियमेवास्मिन्नुपरिष्टाद्दधाति
त-(३)-द्वै राजसूयस्य रूपं य एवं विद्वानग्निं चिनुत उभावेव लोकावभि जयति यश्च राजसूयेनेजानस्य
यश्चाग्निचित इन्द्रस्य सुषुवाणस्य दशधेन्द्रियं वीर्यं पराऽपतत् तद्देवाः सौत्रामण्या समभरन्त्सूयते वा

एष योऽग्निं चिनुतेऽग्निं चित्वा सौत्रामण्या यजेतेन्द्रियमेव वीर्यꣳ संभृत्याऽऽत्मन् धत्ते ॥

(एवा,-न्ववस्रावयते,-त, द्वाचत्वारिꣳशच्च) ॥ ३ ॥

क्षेत्रमाधनपूर्णाहुतिहोमः ॥ अग्निर्ऋषिः ।

सजूरब्दोऽयावभिः सजूरुषा अरुणीभिः सजूः सूर्य एतशेन सजोषावश्विना दꣳसोभिः सजूरग्निर्वैश्वानर इडाभिर्घृतेन स्वाहा संवत्सरो वा अब्दो मासा अयावा उषा अरुणीः सूर्य एतश इमे अश्विना संवत्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतꣳ संवत्सरं पशवोऽनु प्र जायन्ते संवत्सरेणैवास्मै पशून् प्र जनयति दर्भस्तम्बे जुहोति य-(१)-द्वा अस्या अमृतं यद्वीर्यं तद्दर्भास्तस्मिन् जुहोति प्रैव जायतेऽन्नादो भवति यस्यैवं जुह्वत्येता वै देवता अग्नेः पुरस्ताद्भागास्ता एव प्रीणात्यथो चक्षुरेवाग्नेः पुरस्तात् प्रति दधात्य—नन्धो भवति य एवं वेदा—ऽऽपो वा इदमग्रे सलिलमासीत् स प्रजापतिः पुष्करपर्णे वातो भूतोऽलेलायत् सः (२) प्रतिष्ठां नाविन्दत स एतदपां कुलायमपश्यत् तस्मिन्नग्निमचिनुत तदियमभवत् ततो वै स प्रत्यतिष्ठ—द्यां पुरस्तादुपादधात् तच्छिरोऽभवत् सा प्राची दिग्यां दक्षिणत उपादधात् स दक्षिणः पक्षोऽभवत् सा दक्षिणा दिग्यां पश्चादुपादधात् तत् पुच्छमभवत् सा प्रतीची दिग्यामुत्तरत उपादधात् (३) स उत्तरः पक्षोऽभवत् सोदीची दिग्यामुपरिष्टादुपादधात् तत् पृष्ठमभवत् सोर्ध्वा दि—गियं वा अग्निः पञ्चेष्टकस्तस्माद्यदस्यां खनन्त्यभीष्टकां तृन्दन्त्यभि शर्कराꣳ सर्वा या इयं वयोभ्यो नक्तं दृशे दीप्यते तस्मादिमां वयाꣳसि नक्तं नाध्यासते य एवं विद्वानग्निं चिनुते प्रत्येव (४) तिष्ठत्यभि दिशो जयत्या—ग्नेयो वै ब्राह्मणस्तस्माद्ब्राह्मणाय सर्वासु दिक्ष्वर्धुकꣳ स्वामेव तद्दिशमन्वेत्य—पां वा अग्निः कुलायं तस्मादापोऽग्निꣳ हारुकाः स्वामेव तद्योनिं प्र विशन्ति ॥

(यत्, स, उपादधा,-देव, द्वाविंशच्च) ॥ ४ ॥

अभिजिदादिनामकचयनम् ॥ अग्निर्ऋषिः ।

संवत्सरमुख्यं भृत्वा द्वितीये संवत्सर आग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं वैश्वदेवं द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालं तृतीये संवत्सरेऽभिजिता यजेत यदष्टाकपालो भवत्यष्टाक्षरा गायत्र्याग्नेयं गायत्रं प्रातःसवनं प्रातःसवनमेव तेन दाधार गायत्रीं छन्दो यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुगैन्द्रं त्रैष्टुभं माध्यंदिनꣳ सवनं माध्यंदिनमेव सवनं तेन दाधार त्रिष्टुभं (१) छन्दो यद् द्वादशकपालो भवति द्वादशाक्षरा जगती वैश्वदेवं जागतं तृतीयसवनं तृतीयसवनमेव तेन दाधार जगतीं छन्दो यद्बार्हस्पत्यश्चरुर्भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मैव तेन दाधार यद्वैष्णवस्त्रिकपालो भवति यज्ञो वै विष्णुर्यज्ञमेव तेन दाधार यत् तृतीये संवत्सरेऽभिजिता यजतेऽभिजित्यै यत् संवत्सरमुख्यं बिभर्तीममेव (२) तेन लोकꣳ स्पृणोति यद् द्वितीये संवत्सरेऽग्निं चिनुतेऽन्तरिक्षमेव तेन स्पृणोति यत् तृतीये संवत्सरे यजतेऽमुमेव तेन लोकꣳ स्पृणोत्ये—तं वै परं आट्णारः कक्षीवाꣳ औशिजो वीतहव्यः श्रायसस्त्रसदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत ततो वै ते सहस्रꣳ सहस्रं पुत्रानविन्दन्त प्रथते प्रजया पशुभिस्तां मात्रामाप्नोति यां तेऽगच्छन् य एवं (३) विद्वानेतमग्निं चिनुते ॥ (त्रिष्टुभं,- मेव,- वं, चत्वारि च) ॥५॥

पुरीषचितिप्रशंसा ॥ अग्निर्ऋषिः ।

प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वाऽतिष्ठत् तं देवा बिभ्यतो नोपाऽऽयन् ते छन्दोभिरात्मानं छादयित्वोपाऽऽयन् तच्छन्दसां छन्दस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्रूपं यत् कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते छन्दोभिरेवाऽऽत्मानं छादयित्वाऽग्निमुप चरत्यात्मनोऽहिꣳसायै देवनिधिर्वा एष नि धीयते यदग्नि-(१)-रन्ये वा वै निधिमगुप्तं विन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्यै अथो खल्वाहुर्नाऽऽक्रम्येति नैर्ऋत्युखा यदाक्रामेन्निर्ऋत्या आत्मानमपि दध्यात् तस्मान्नाऽऽक्रम्या पुरुषशीर्षमुप दधाति गुप्त्या अथो यथा ब्रूयादेतन्मे गोपायेति तादृगेव तत् (२) प्रजापतिर्वा अथर्वाऽग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थान्येतꣳ ह वाव तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति यदिष्टकाभिरग्निं चिनोति सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिंल्लोके भवति य एवं वेद शरीरं वा एतदग्नेर्यच्चित्य आत्मा वैश्वानरो यच्चिते वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्या-(३)-भ्यारोहति शरीरं वा एतद्यजमानः सꣳस्कुरुते यदग्निं चिनुते यच्चिते वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्याऽऽत्मनाऽभ्यारोहति तस्मात् तस्य नाव द्यन्ति जीवन्नेव देवानप्येति वैश्वानर्यर्चा पुरीषमुप दधातीयं वा अग्निर्वैश्वानरस्तस्यैषा चितिर्यत् पुरीषमग्निमेव वैश्वानरं चिनुत एषा वा अग्नेः (४) प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे ॥ (अग्नि,- स्तत्, सꣳस्कृत्या,- ग्ने,- र्दश च) ॥ ६ ॥

दीक्षाकालविकल्पाः ॥ अग्निर्ऋषिः ।

अग्नेर्वै दीक्षया देवा विराजमाप्नुवन् तिस्रो रात्रीर्दीक्षितः स्यात् त्रिपदा विराड् विराजमाप्नोति षड्रात्रीर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः संवत्सरो विराड् विराजमाप्नोति दश रात्रीर्दीक्षितः स्याद्दशाक्षरा विराड् विराजमाप्नोति द्वादश रात्रीर्दीक्षितः स्याद् द्वादश मासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति त्रयोदश रात्रीर्दीक्षितः स्यात् त्रयोदश (१) मासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति पञ्चदश रात्रीर्दीक्षितः स्यात् पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरो विराड् विराजमाप्नोति सप्तदश रात्रीर्दीक्षितः स्याद् द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरो विराड् विराजमाप्नोति चतुर्विꣳशतिꣳ रात्रीर्दीक्षितः स्याच्चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति त्रिꣳशतꣳ रात्रीर्दीक्षितः स्यात् (२) त्रिꣳशदक्षरा विराड् विराजमाप्नोति मासं दीक्षितः स्याद्यो मासः स संवत्सरः संवत्सरो विराड् विराजमाप्नोति चतुरो मासो दीक्षितः स्याच्चतुरो वा एतं मासो वसवोऽबिभरुस्ते पृथिवीमाऽजयन् गायत्रीं छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाऽजयन् त्रिष्टुभं छन्दो द्वादशाऽऽदित्यास्ते दिवमाऽजयन् जगतीं छन्दस्ततो वै ते (३) व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां तस्माद् द्वादश मासो भृत्वाऽग्निं चिन्वीत द्वादश मासाः संवत्सरः संवत्सरोऽग्निश्चित्यस्तस्याहोरात्राणीष्टका आप्तेष्टकमेनं चिनुतेऽथो व्यावृतमेव गच्छति श्रैष्ठ्यꣳ समानानाम् ॥ (त्रयोदश, स्यात्, ते, ऽष्टाविꣳशतिश्च) ॥ ७ ॥

अन्वारोहणाभिधानम् ॥ अग्निर्ऋषिः ।

सुवर्गाय वा एष लोकाय चीयते यदग्निस्तं यन्नान्वारोहेत् सुवर्गाल्लोकाद्यजमानो हीयेत पृथिवीमा-

ऽक्रमिषं प्राणो मा मा हासीदन्तरिक्षमाऽक्रमिषं प्रजा मा मा हासीद्दिवमाऽक्रमिषꣳ सुवरगन्मेत्याहैष वा अग्नेरन्वारोहस्तेनैवैनमन्वारोहति सुवर्गस्य लोकस्य समष्ट्यै यत् पक्षसंमितां मिनुयात् (१) कनीयाꣳसं यज्ञक्रतुमुपेयात् पापीयस्यस्याऽऽत्मनः प्रजा स्याद्वेदिसंमितां मिनोति ज्यायाꣳसमेव यज्ञक्रतुमुपैति नास्याऽऽत्मनः पापीयसी प्रजा भवति साहस्रं चिन्वीत प्रथमं चिन्वानः सहस्रसंमितो वा अयं लोक इममेव लोकमभि जयति द्विषाहस्रं चिन्वीत द्वितीयं चिन्वानो द्विषाहस्रं वा अन्तरिक्षमन्तरिक्षमेवाभि जयति त्रिषाहस्रं चिन्वीत तृतीयं चिन्वान-(२)-स्त्रिषाहस्रो वा असौ लोकोऽमुमेव लोकमभि जयति जानुदघ्नं चिन्वीत प्रथमं चिन्वानो गायत्रियैवेमं लोकमभ्यारोहति नाभिदघ्नं चिन्वीत द्वितीयं चिन्वानस्त्रिष्टुभैवान्तरिक्षमभ्यारोहति ग्रीवदघ्नं चिन्वीत तृतीयं चिन्वानो जगत्यैवामुं लोकमभ्यारोहति नाग्निं चित्वा रामामुपेयादयोनौ रेतो धास्यामीति न द्वितीयं चित्वाऽन्यस्य स्त्रिय-(३)-मुपेयान्न तृतीयं चित्वा कां चनोपेयाद्रेतो वा एतन्नि धत्ते यदग्निं चिनुते यदुपेयाद्रेतसा व्यृध्येताथो खल्वाहुरप्रजस्यं तद्यन्नोपेयादिति यद्रेतःसिचावुपदधाति ते एव यजमानस्य रेतो बिभृतस्तस्मादुपेयाद्रेतसोऽस्कन्दाय त्रीणि वाव रेताꣳसि पिता पुत्रः पौत्रो (४) यद् द्वे रेतःसिचावुपदध्याद्रेतोऽस्य वि च्छिन्द्यात् तिस्र उप दधाति रेतसः संतत्या इयं वाव प्रथमा रेतःसिग्वाग्वा इयं तस्मात् पश्यन्तीमां पश्यन्ति वाचं वदन्तीमन्तरिक्षं द्वितीया प्राणो वा अन्तरिक्षं तस्मान्नान्तरिक्षं पश्यन्ति न प्राणमसौ तृतीया चक्षुर्वा असौ तस्मात् पश्यन्त्यमूं पश्यन्ति चक्षु-र्यजुषेमां चा-(५)-मूं चोप दधाति मनसा मध्यमामेषां लोकानां क्लृप्त्या अथो प्राणानामिष्टो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्याह स्तुतशस्त्रे एवैतेन दुहे पिता मातरिश्वाऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुः सोमो विश्ववित्नेता नेषद्बृहस्पतिरुक्थामदानि शꣳसिषदित्याहैतद्वा (६) अग्नेरुक्थं तेनैवैनमनु शꣳसति ॥ (मिनुया,-च्चिन्वान, स्त्रियं पौत्रं,-च, वै, सप्त च) ॥ ८ ॥

आसन्दी-षडुद्याम-उखा-उलूखलादिप्रशंसा ॥ अग्निर्ऋषिः ।

सूयते वा एषोऽग्नीनां य उखायां भ्रियते यदधः सादयेद्गर्भाः प्रपादुकाः स्युरथो यथा सवात् प्रत्यवरोहति तादृगेव तदासन्द्यां सादयति गर्भाणां धृत्या अप्रपादायाथो सवमेवैनं करोति गर्भो वा एष यदुखा योनिः शिक्यं यच्छिक्यादुखां निरूहेद्योनेर्गर्भं निर्हण्यात् षडुद्यामꣳ शिक्यं भवति षोढाविहितो वै (१) पुरुष आत्मा च शिरश्च चत्वार्यङ्गान्यात्मन्नेवैनं बिभर्ति प्रजापतिर्वा एष यदग्निस्तस्योखा चोलूखलं च स्तनौ तावस्य प्रजा उप जीवन्ति यदुखां चोलूखलं चोपदधाति ताभ्यामेव यजमानोऽमुष्मिंल्लोकेऽग्निं दुहे संवत्सरो वा एष यदग्निस्तस्य त्रेधाविहिता इष्टकाः प्राजापत्या वैष्णवी-(२)-र्वैश्वकर्मणीरहोरात्राण्येवास्य प्राजापत्या यदुखां बिभर्ति प्राजापत्या एव तदुप धत्ते यत् समिध आदधाति वैष्णवा वै वनस्पतयो वैष्णवीरेव तदुप धत्ते यदिष्टकाभिरग्निं चिनोतीयं वै विश्वकर्मा वैश्वकर्मणीरेव तदुप धत्ते तस्मादाहुस्त्रिवृदग्निरिति तं वा एतं यजमान एव चिन्वीत यदस्यान्य (३) श्चिनुयाद्यत् तं दक्षिणाभिर्न राधयेदग्निमस्य वृञ्जीत योऽस्याग्निं चिनुयात् तं दक्षिणाभी राधयेदग्निमेव तत् स्पृणोति ॥ (वै, वैष्णवी,-रन्यो, विꣳशतिश्च) ॥ ९ ॥

ऋतुभिः चयनप्रशंसा ॥ अग्निर्ऋषिः ।

प्रजापतिरग्निमचिनुतर्तुभिः संवत्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं वर्षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन मध्यं ब्रह्मणा वा अस्य तत् पूर्वार्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशोत्तरं पक्षमाशया मध्यं य एवं विद्वानग्निं चिनुत ऋतुभिरेवैनं चिनुतेऽथो एतदेव सर्वमव (१) रुन्धे शृण्वन्त्येनमग्निं चिक्यानमत्यन्यान् रोचते इयं वाव प्रथमा चितिरोषधयो वनस्पतयः पुरीषमन्तरिक्षं द्वितीया वयाꣳसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषं यत् त्रिचितीकं चिन्वीत यज्ञं दक्षिणामात्मानं प्रजामन्तरियात् तस्मात् पञ्चचितीकश्चेतव्य एतदेव सर्वꣳ स्पृणोति यत् तिस्रश्चितय-(२)-स्त्रिवृद्ध्यग्निर्यद् द्वे द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्तꣳ स्पृणोत्यथो दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठति संवत्सरो वै षष्ठी चितिर्ऋतवः पुरीषꣳ (३) षट् चितयो भवन्ति षट् पुरीषाणि द्वादश सं पद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति ॥ (अव, चितयः, पुरीषं, पञ्चदश च) ॥ १० ॥

अश्वमेधिकाष्टादशिपशुषु प्रथमः पशुसमूहः ॥ विश्वेदेवा ऋषयः ।

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा वारुण्यस्तिस्रः श्वेता वशाः सौर्यो मैत्राबार्हस्पत्या धूम्रललामास्तूपराः ॥ (रोहितः षड्विꣳशतिः) ॥ ११ ॥

द्वितीयोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर्वशा मैत्रिय ऐन्द्राबार्हस्पत्या अरुणललामास्तूपराः ॥ (पृश्निः षड्विꣳशतिः) ॥ १२ ॥

तृतीयोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्त ऐन्द्रवायवाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः श्यामललामास्तूपराः ॥ (शितिबाहुः पञ्चविꣳशतिः) ॥ १३ ॥

चतुर्थोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः शितिककुच्छितिपृष्ठः शितिभसत् त ऐन्द्राबार्हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिध्मा वशा वैश्वकर्मण्यस्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णाः श्येतललामास्तूपराः (उन्नतः पञ्चविꣳशतिः) ॥ १४ ॥

पञ्चमोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

कर्णास्त्रयो यामाः सौम्यास्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो नकुलास्तिस्रो रोहिणीस्त्र्यव्यस्ता

वसूनां तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाꣳ सोमैन्द्रा बभ्रुललामास्तूपराः ॥ (कर्णास्त्रयोविꣳशतिः) ॥ १५ ॥

षष्ठोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

शुण्ठास्त्रयो वैष्णवा अधीलोधकर्णास्त्रयो विष्णव उरुक्रमाय लप्सुदिनस्त्रयो विष्णव उरुगायाय पञ्चावीस्तिस्र आदित्यानां त्रिवत्सास्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरललामास्तूपराः ॥ (शुण्ठा विꣳशतिः) ॥ १६ ॥

सप्तमोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्रायाधिराजाय त्रयः शितिककुद इन्द्राय स्वराज्ञे त्रयः शितिभसदस्तिस्रस्तुर्यौह्यः साध्यानां तिस्रः पष्ठौह्यो विश्वेषां देवानामाग्नेन्द्राः कृष्णललामास्तूपराः ॥ (इन्द्राय द्वाविꣳशतिः) ॥ १७ ॥

अष्टमोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

अदित्यै त्रयो रोहितैता इन्द्राण्यै त्रयः कृष्णैताः कुह्वै त्रयोऽरुणैतास्तिस्रो धेनवो राकायै त्रयोऽनड्वाहः सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः ॥ (अदित्या अष्टादश) ॥ १८ ॥

नवमोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

सौम्यास्त्रयः पिशङ्गाः सोमाय राज्ञे त्रयः सारङ्गाः पार्जन्या नभोरूपास्तिस्रोऽजा मल्हा इन्द्राण्यै तिस्रो मेष्य आदित्या द्यावापृथिव्या मालङ्गास्तूपराः ॥ (सौम्या एकान्नविꣳशतिः) ॥ १९ ॥

दशमोऽष्टादशिपशुसमूहः ॥ विश्वेदेवा ऋषयः ।

वारुणास्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो रोहितललामा वरुणाय रिशादसे त्रयोऽरुणललामाः शिल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयः सर्वदेवत्या ऐन्द्रासूराः श्येतललामास्तूपराः ॥ (वारुणा विꣳशतिः) ॥ २० ॥

द्वन्द्विनः पशवः ॥ विश्वेदेवा ऋषयः ।

सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविन्द्राग्निभ्यामोजोदाभ्यामुष्टाराविन्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहाववी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायव आरोहणवाहावनड्वाहौ वारुणी कृष्णे वशे अराड्यौ दिव्यावृषभौ परिमरौ ॥ (सोमाय चतुस्त्रिꣳशत्) ॥ २१ ॥

अतिरात्रेऽनुष्टेयाः केचित् पशवः ॥ विश्वेदेवा ऋषयः ।

एकादश प्रातर्गव्याः पशव आ लभ्यन्ते छगलः कल्माषः किकिदीविर्विदीगयस्ते त्वाष्ट्राः सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विनस्ते विशालयूप आ लभ्यन्ते ॥ (एकादश पञ्चविꣳशतिः) ॥ २२ ॥

ऋतुपशवः ॥ विश्वेदेवा ऋषयः ।

पिशङ्गास्त्रयो वासन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृश्निसक्था-

त्रयो हैमन्तिकौ अवलिप्तास्त्रयः शैशिराः संवत्सराय निवक्षसः ॥ (पिशङ्गा विꣳशतिः) ॥ २३ ॥

[हिरण्यवर्णा २२२। अपां १९७। भूतेष्टका १९८। सजू २२२। संवत्सर १५७। प्रजापति-२१०-२प्रे: १०८। सुवर्णाय १०७। सूयवे १७०। प्रजापती १६५। रोहित: २८। पृश्नि: २१। शितिबाहु- २५।-वेत: २५। कृष्णा: २३। शुण्ठा: २०। इन्द्राय-२२१-दिते १८। सौम्या १९। वारुणा: २०। सोमापौ-१७-कौरव २५। पिशङ्गा-२०। त्रयोविꣳशतिः ॥ २४१६ ॥]

[इति पञ्चमकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥]

उपानुवाक्याद्यवशिष्टकर्मनिरूपणम् ।

[अथ सप्तमः प्रपाठकः ॥ ७ ॥]

चित्यभिमर्शनादि ॥ अग्निर्देवता ।

यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान् भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्या गायत्रिया प्रथमां चितिमभि मृशेत् त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्च्यते वसीयान् भवतीडायै वा एषा विभक्तिः पशव इडा पशुभिरेनं (१) चिनुते यं वै प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्च्छत्यश्वावभितस्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिणतस्तावालभ्येष्टका उप दध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः साक्षादेव प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्च्छत्येतद्वा अह्नो रूपं यच्छ्वेतोऽश्वो रात्रियै कृष्ण एतदह्नो (२) रूपं यदिष्टका रात्रियै पुरीषमिष्टका उपधास्यञ्छ्वेतमश्वमभि मृशेत् पुरीषमुपधास्यन् कृष्णमहोरात्राभ्यामेवैनं चिनुते हिरण्यपात्रं मधोः पूर्णं ददाति मधव्योऽसानीति सौर्या चित्रवत्याऽवेक्षते चित्रमेव भवति मध्यन्दिनेऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति ॥

(एनं,-मेतदह्नो, ऽष्टाचत्वारिंशच्च) ॥ १ ॥

ऋषभेष्टकोपधानम् ॥ १, ५, ७-११ त्रिष्टुप्; ३ अनुष्टुप् । अग्निर्देवता ।

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् ।
अस्थूरि णो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा सꣳ शिशाधि ॥

प्राणो वा एते यदिष्टकाश्चित्यां चित्यामृषभमुप दधाति मिथुनमेवास्य तदुपाकरोति प्रजननाय तस्मात् यूथे यूथ ऋषभः ॥

संवत्सरस्य प्रतिमां यां त्वा रात्र्युपासते । प्रजाꣳ सुवीरां कृत्वा विश्वमायुर्व्यश्नवत् ॥

प्राजापत्या-(१)-मेतामुप दधातीयं वाव सैकाष्टका यदेवैकाष्टकायामन्नं क्रियते तदेवैतयाऽव रुन्ध एषा वै प्रजापतेः कामदुघा तयैव यजमानोऽमुष्मिंल्लोकेऽग्निं दुहे

येन देवा ज्योतिषोर्ध्वा उदायन् येनाऽऽदित्या वसवो येन रुद्राः ।
येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति ॥

३१ (तै. सं.)

सुवर्गाय वा एष लोकाय (२) चीयते यदग्निर्येन देवा ज्योतिषोर्ध्वा उदायन्नित्युख्यꣳ समिन्ध इष्टका एवैता उप धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे ।
शतं यो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा ॥
ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।
तेषां यो अज्यानिमजीतिमावहात् तस्मै नो देवाः (३) परि दत्तेह सर्वे ॥
ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु ।
तेषामृतूनाꣳ शतशारदानां निवात एषामभये स्याम ॥
इदुवत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ।
तेषां वयꣳ सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम ॥
भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा ।
स नो मयोभूः पितो (४) आ विशस्व शं तोकाय तनुवे स्योनः ॥

अज्यानीरेता उप दधात्येता वै देवता अपराजितास्ता एव प्र विशति नैव जीयते ब्रह्मवादिनो वदन्ति यदर्धमासा मासा ऋतवः संवत्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं निरुप्यत इत्येता हि तद्देवता उदजयन् यदृतुभ्यो निर्वपेद् देवताभ्यः समदं दध्यादाग्रयणं (५) निरुप्यैता आहुतीर्जुहोत्यर्धमासानेव मासानृतून्त्संवत्सरं प्रीणाति न देवताभ्यः समदं दधाति भद्रान्नः श्रेयः समनैष्ट देवा इत्याह हुताद्याय यजमानस्यापराभावाय ॥

(प्राजापत्यां, लोकाय, देवाः, पितो, दध्यादाग्रयणं, पञ्चविꣳशतिश्च) ॥ २ ॥

वज्रिणीष्टकोपधान-वसोर्धाराविशेषविधानम् ॥ १-४ बृहती; ७ गायत्री । अग्निर्देवता ।

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः ।
यो नः पुरस्ता-*- -*द्दक्षिणतः*- -*पश्चा-*- -*दुत्तरतोऽघायुरभिदासत्येतꣳ सोऽश्मानमृच्छतु ॥

देवासुराः संयत्ता आसन् तेऽसुरा दिग्भ्य आऽबाधन्त तान् देवा इष्वा च वज्रेण चापानुदन्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षूप (१) दधाति देवपुरा एवैतास्तनूपानीः पर्यूहते

ऽग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् ॥

ब्रह्मवादिनो वदन्ति यन्न देवतायै जुह्वत्यथ किंदेवत्या वसोर्धारेत्यग्निर्वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धाराऽऽग्नावैष्णव्यर्चा वसोर्धारां जुहोति भागधेयेनैवैनौ समर्धयत्यथो एता-(२)-मेवाहुतिमायतनवतीं करोति यत्काम एनां जुहोति तदेवाव रुन्धे रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरा-

(३।१-३) यो नः...मृच्छतु ।

ऽन्या शिवाऽन्या यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति यद्वसोर्धारां जुहोति यैवास्य शिवा तनूस्तां तेन प्रीणाति यो वै वसोर्धारायै (१) प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनं पचेत् तं ब्राह्मणाश्चत्वारः प्राश्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायामेवैनां तनुवां प्रति ष्ठापयति चतस्रो धेनूर्दद्यात् ताभिरेव यजमानोऽमुष्मिंल्लोकेऽग्निं दुहे ॥ (वपै,-तां, धाराये, पट्चत्वारिꣳशच्च) ॥ ३ ॥

होमविशेषा राष्ट्रभृदाख्येष्टकोपधानं च ॥ ५-८ त्रिष्टुप् । अग्निर्देवता ।

चित्तिं जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाऽऽहुतिर्वैश्वकर्मणी नैनं चिक्यानं भ्रातृव्यो दभ्नोत्यथो देवता एवाव रुन्धेऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्याऽऽहुत्या यज्ञमुखमा रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाव रुन्धेऽग्निर्देवेभ्योऽपाक्रामद्भागधेय-(१)-मिच्छमानस्तस्मा एतद्भागधेयं प्रायच्छन्नेतद्वा अग्नेरग्निहोत्रमेतर्हि खलु वा एष जातो यर्हि सर्वश्चितो जातायैवास्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान् भवति ब्रह्मवादिनो वदन्ति यदेष गार्हपत्यश्चीयतेऽथ क्वास्याऽऽहवनीय इत्यसावादित्य इति ब्रूयादेतस्मिन् हि सर्वाभ्यो देवताभ्यो जुह्वति (२) य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोत्य-

-ग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहाऽऽ वह ।
अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु ॥
भद्रं पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः ।
ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभि सं नमन्तु ॥
धाता विधाता परमो-(३)-त संदृक् प्रजापतिः परमेष्ठी विराजा ।
स्तोमाश्छन्दाꣳसि निविदो म आहुरेतस्मै राष्ट्रमभि सं नमाम ॥
अभ्यावर्तध्वमुप मेत साकमयꣳ शास्ताऽधिपतिर्वो अस्तु ।
अस्य विज्ञानमनु सꣳ रभध्वमिमं पश्चादनु जीवाथ सर्वे ॥

राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चितीं राष्ट्रभृत् तयैवास्मिन् राष्ट्रं दधाति (४) राष्ट्रमेव भवति नास्माद्राष्ट्रं भ्रꣳशते ॥ (भागधेयं, जुह्वति, परमा, राष्ट्रं दधाति, सप्त च) ॥ ४ ॥

पुनः पराभवादिविधानम् ॥ अग्निर्देवता ।

यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याग्निरुख्य उद्वायति यन्निर्मन्थ्यं कुर्याद्विच्छिन्द्याद्भ्रातृव्यमस्मै जनयेत् स एव पुनः परीध्यः स्वादेवैनं योनेर्जनयति नास्मै भ्रातृव्यं जनयति तमो वा एतं गृह्णाति यस्याग्निरुख्य उद्वायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसै-(१)-व तमो मृत्युमप हते हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव तमोऽप हतेऽथो तेजो वै हिरण्यं तेज एवाऽऽत्मन् धत्ते सुवर्न घर्मः स्वाहा सुवर्नार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा

सुवर्न सूर्यः स्वाहाऽर्को वा एष यदग्निरसावादित्यो (२) ऽश्वमेधो यदेता आहुतीर्जुहोत्यर्काश्वमेधयोरेव ज्योतीꣳषि सं दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत आपो वा इदमग्रे सलिलमासीत् स एतां प्रजापतिः प्रथमां चितिमपश्यत् तामुपाधत्त तदियमभवत् तं विश्वकर्माऽब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्य-(३)-ब्रवीत् स एतां द्वितीयां चितिमपश्यत् तामुपाधत्त तदन्तरिक्षमभवत् स यज्ञः प्रजापतिमब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्यब्रवीत् स विश्वकर्माणमब्रवीदुप त्वाऽऽयानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत् तं दिश्याभिरुपैत् ता उपाधत्त ता दिशो (४) ऽभव-न्त्स परमेष्ठी प्रजापतिमब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्यब्रवीत् स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामाऽऽयानीति नेह लोकोऽस्तीत्यब्रूताꣳ स एतां तृतीयां चितिमपश्यत् तामुपाधत्त तदसावभवत् स आदित्यः प्रजापतिमब्रवीदुप त्वा (५) आऽऽयानीति नेह लोकोऽस्तीत्यब्रवीत् स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामाऽऽयानीति नेह लोकोऽस्तीत्यब्रूताꣳ स परमेष्ठिनमब्रवीदुप त्वाऽऽयानीति केन मोपैष्यसीति लोकंपृणयेत्यब्रवीत् तं लोकंपृणयोपैत् तस्मादयातयाम्नी लोकंपृणाऽयातयामा ह्यसा-(६)-वादित्य-स्तानृषयोऽब्रुवन्नुप व आऽऽयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन् तान् द्वाभ्यां चितिभ्यामुपायन्त्स पञ्चचितीकः समपद्यत य एवं विद्वानग्निं चिनुते भूयानेव भवत्यभीमाँल्लोकाञ्जयति विदुरेनं देवा अथो एतासामेव देवतानाꣳ सायुज्यं गच्छति ॥ (नमसा, ऽऽदित्यो, ऽस्तीति, दिशो,-त्वा, ऽसौ, पञ्चचत्वारिꣳशच्च) ॥ ५ ॥

संवत्सरव्रतादि ॥ ८ त्रिपादनुष्टुप्; ९-१० अनुष्टुप् । अग्निर्देवता ।

पशुर्वा अग्निर्यदग्निंचित् पक्षिणोऽश्नीयात् तमेवाग्निमद्यादार्तिमार्च्छेत् संवत्सरं व्रतं चरेत् संवत्सरꣳ हि व्रतं नाति पशुर्वा एष यदग्निर्हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात् प्रत्यञ्चमुपचरति तस्मात् पश्चात् प्राङुपचर्य आत्मनोऽहिꣳसायै तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ (१) पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याहैताभिर्वा इमे लोका विधृता यदेता उपदधात्येषां लोकानां विधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उप दधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यं यत् स्वयमातृण्णा उपधाय (२) हिरण्येष्टका उपदधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्र भान्ति

यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः ।
ताभिः सर्वाभी रुचे जनाय नस्कृधि ॥
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥
रुचं नो धेहि (३) ब्राह्मणेषु रुचꣳ राजसु नस्कृधि ।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥

पूर्वोक्तविधिप्रशंसा ॥ अग्निर्ऋषिः ।

प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वाऽतिष्ठत् तं देवा बिभ्यतो नोपाऽऽयन् ते छन्दोभिरात्मानं छादयित्वोपाऽऽयन् तच्छन्दसां छन्दस्त्वं ब्रह्म वै छन्दाꣳसि ब्रह्मण एतद्रूपं यत् कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते छन्दोभिरेवाऽऽत्मानं छादयित्वाऽग्निमुप चरत्यात्मनोऽहिꣳसायै देवनिधिर्वा एष नि धीयते यदग्नि-(१)-रन्ये वा वै निधिमगुप्तं विन्दन्ति न वा प्रति प्र जानात्युखामा क्रामत्यात्मानमेवाधिपां कुरुते गुप्त्या अथो खल्वाहुर्नाऽऽक्रम्येति नैर्ऋत्युखा यदाक्रामेन्निर्ऋत्या आत्मानमपि दध्यात् तस्मान्नाऽऽक्रम्या पुरुषशीर्षमुप दधाति गुप्त्या अथो यथा ब्रूयादेतन्मे गोपायेति तादृगेव तत् (२) प्रजापतिर्वा अथर्वाऽग्निरेव दध्यङ्ङाथर्वणस्तस्येष्टका अस्थान्येतꣳ ह वाव तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति यदिष्टकाभिरग्निं चिनोति सात्मानमेवाग्निं चिनुते सात्माऽमुष्मिँल्लोके भवति य एवं वेद शरीरं वा एतदग्नेर्यच्चित्य आत्मा वैश्वानरो यच्चिते वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्या-(३)-भ्यारोहति शरीरं वा एतद्यजमानः सꣳ स्कुरुते यदग्निं चिनुते यच्चिते वैश्वानरं जुहोति शरीरमेव सꣳस्कृत्याऽऽत्मनाऽभ्यारोहति तस्मात् तस्य नाव द्यन्ति जीवन्नेव देवानप्येति वैश्वानर्यर्चा पुरीषमुप दधातीयं वा अग्निर्वैश्वानरस्तस्यैषा चितिर्यत् पुरीषमग्निमेव वैश्वानरं चिनुत एषा वा अग्नेः (४) प्रिया तनूर्यद्वैश्वानरः प्रियामेवास्य तनुवमव रुन्धे ॥ (अग्नि,- स्तत्, सꣳस्कृत्या,- ग्ने,- दश च) ॥ ६ ॥

दीक्षाकालविकल्पाः ॥ अग्निर्ऋषिः ।

अग्नेर्वै दीक्षया देवा विराजमाप्नुवन् तिस्रो रात्रीर्दीक्षितः स्यात् त्रिपदा विराड् विराजमाप्नोति षड्रात्रीर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः संवत्सरो विराड् विराजमाप्नोति दश रात्रीर्दीक्षितः स्याद्दशाक्षरा विराड् विराजमाप्नोति द्वादश रात्रीर्दीक्षितः स्याद् द्वादश मासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति त्रयोदश रात्रीर्दीक्षितः स्यात् त्रयोदश (१) मासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति पञ्चदश रात्रीर्दीक्षितः स्यात् पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरो विराड् विराजमाप्नोति सप्तदश रात्रीर्दीक्षितः स्याद् द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरो विराड् विराजमाप्नोति चतुर्विꣳशतिꣳ रात्रीर्दीक्षितः स्याच्चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरो विराड् विराजमाप्नोति त्रिꣳशतꣳ रात्रीर्दीक्षितः स्यात् (२) त्रिꣳशदक्षरा विराड् विराजमाप्नोति मासं दीक्षितः स्याद्यो मासः स संवत्सरः संवत्सरो विराड् विराजमाप्नोति चतुरो मासो दीक्षितः स्याच्चतुरो वा एतं मासो वसवोऽबिभरुस्ते पृथिवीमाऽजयन् गायत्री छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाऽजयन् त्रिष्टुभं छन्दो द्वादशाऽऽदित्यास्ते दिवमाऽजयन् जगतीं छन्दस्ततो वै ते (३) व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां तस्माद् द्वादश मासो भृत्वाऽग्निं चिन्वीत द्वादश मासाः संवत्सरः संवत्सरोऽग्निश्चित्यस्तस्याहोरात्राणीष्टका आप्तेष्टकमेनं चिनुतेऽथो व्यावृतमेव गच्छति श्रैष्ठ्यꣳ समानानाम् ॥ (त्रयोदश, स्यात्, ते, ऽष्टाविꣳशतिश्च) ॥ ७ ॥

अन्वारोहणाद्यभिधानम् ॥ अग्निर्ऋषिः ।

सुवर्गाय वा एष लोकाय चीयते यदग्निस्तं यन्नान्वारोहेत् सुवर्गाल्लोकाद्यजमानो हीयेत पृथिवीमा-

ऽक्रमिषं प्राणो मा मा हासीदन्तरिक्षमाऽक्रमिषं प्रजा मा मा हासीद्दिवमाऽक्रमिषꣳ सुवरगन्मेत्याहैष वा अग्नेरन्वारोहस्तेनैवैनमन्वारोहति सुवर्गस्य लोकस्य समष्ट्यै यत् पक्षसंमितां मिनुयात् (१) कनीयाꣳसं यज्ञक्रतुमुपेयात् पापीयस्यस्याऽऽत्मनः प्रजा स्याद्वेदिसंमितां मिनोति ज्यायाꣳसमेव यज्ञक्रतुमुपैति नास्याऽऽत्मनः पापीयसी प्रजा भवति साहस्रं चिन्वीत प्रथमं चिन्वानः सहस्रसंमितो वा अयं लोक इममेव लोकमभि जयति द्विषाहस्रं चिन्वीत द्वितीयं चिन्वानो द्विषाहस्रं वा अन्तरिक्षमन्तरिक्षमेवाभि जयति त्रिषाहस्रं चिन्वीत तृतीयं चिन्वान-(२)-स्त्रिषाहस्रो वा असौ लोकोऽमुमेव लोकमभि जयति जानुदघ्नं चिन्वीत प्रथमं चिन्वानो गायत्रियैवेमं लोकमभ्यारोहति नाभिदघ्नं चिन्वीत द्वितीयं चिन्वानस्त्रिष्टुभैवान्तरिक्षमभ्यारोहति ग्रीवदघ्नं चिन्वीत तृतीयं चिन्वानो जगत्यैवामुं लोकमभ्यारोहति नाग्निं चित्वा रामामुपेयादयोनौ रेतो धास्यामीति न द्वितीयं चित्वाऽन्यस्य स्त्रिय-(३)-मुपेयान्न तृतीयं चित्वा कां चनोपेयाद्रेतो वा एतन्नि धत्ते यदग्निं चिनुते यदुपेयाद्रेतसा व्यृध्येताथो खल्वाहुरप्रजस्यं तद्यन्नोपेयादिति यद्रेतःसिचावुपदधाति ते एव यजमानस्य रेतो बिभृतस्तस्मादुपेयाद्रेतसोऽस्कन्दाय त्रीणि वाव रेताꣳसि पिता पुत्रः पौत्रो (४) यद् द्वे रेतःसिचावुपदध्याद्रेतोऽस्य वि च्छिन्द्यात् तिस्र उप दधाति रेतसः संतत्या इयं वाव प्रथमा रेतःसिग्वाग्वा इयं तस्मात् पश्यन्तीमां पश्यन्ति वाचं वदन्तीमन्तरिक्षं द्वितीया प्राणो वा अन्तरिक्षं तस्मान्नान्तरिक्षं पश्यन्ति न प्राणमसौ तृतीया चक्षुर्वा असौ तस्मात् पश्यन्त्यमूं पश्यन्ति चक्षुर्यजुषेमां चा-(५)-मूं चोप दधाति मनसा मध्यमामेषां लोकानां क्लृप्त्या अथो प्राणानामिद्धो यज्ञो भृगुभिराशीर्दा वसुभिस्तस्य त इष्टस्य वीतस्य द्रविणेह भक्षीयेत्याह स्तुतशस्त्रे एवैतेन दुहे पिता मातरिश्वाऽच्छिद्रा पदा धा अच्छिद्रा उशिजः पदाऽनु तक्षुः सोमो विश्वविन्नेता नेषद्बृहस्पतिरुक्थामदानि शꣳसिषदित्याहैतद्वा (६) अग्नेरुक्थं तेनैवैनमनु शꣳसति ॥ (मिनुया, -च्चिन्वानः, स्त्रियं पौत्रं,-श्च, वै, सप्त च) ॥ ८ ॥

आसन्दी-षडुद्याम-उखा-उलूखलादिप्रशंसा ॥ अग्निर्ऋषिः ।

सूयते वा एषोऽग्नीनां य उखायां भ्रियते यदधः सादयेद्गर्भाः प्रपादुकाः स्युरथो यथा सवात् प्रत्यवरोहति तादृगेव तदासन्दी सादयति गर्भाणां धृत्या अप्रपादायाथो सवमेवैनं करोति गर्भो वा एष यदुख्यो योनिः शिक्यं यच्छिक्यादुखां निरूहेद्योनेर्गर्भं निर्हण्यात् षडुद्यामꣳ शिक्यं भवति षोढाविहितो वै (१) पुरुष आत्मा च शिरश्च चत्वार्यङ्गान्यात्मन्नेवैनं बिभर्ति प्रजापतिर्वा एष यदग्निस्तस्योखा चोलूखलं च स्तनौ तावस्य प्रजा उप जीवन्ति यदुखां चोलूखलं चोपदधाति ताभ्यामेव यजमानोऽमुष्मिँल्लोकेऽग्निं दुहे संवत्सरो वा एष यदग्निस्तस्य त्रेधाविहिता इष्टकाः प्राजापत्या वैष्णवी-(२)-र्वैश्वकर्मणीरहोरात्राण्येवास्य प्राजापत्या यदुख्यं बिभर्ति प्राजापत्या एव तदुप धत्ते यत् समिध आदधाति वैष्णवा वै वनस्पतयो वैष्णवीरेव तदुप धत्ते यदिष्टकाभिरग्निं चिनोतीयं वै विश्वकर्मा वैश्वकर्मणीरेव तदुप धत्ते तस्मादाहुस्त्रिवृदग्निरिति तं वा एतं यजमान एव चिन्वीत यदस्यान्य (३) श्चिनुयाद्यत् तं दक्षिणाभिर्न राधयेदग्निमस्य वृञ्जीत योऽस्याग्निं चिनुयात् तं दक्षिणाभी राधयेदग्निमेव तत् स्पृणोति ॥ (वै, वैष्णवी,-रन्यो, विꣳशतिश्च) ॥ ९ ॥

ऋतुभिः पक्षप्रशंसा ॥ अग्निर्ऋषिः ।

प्रजापतिरग्निमचिनुतर्तुभिः संवत्सरं वसन्तेनैवास्य पूर्वार्धमचिनुत ग्रीष्मेण दक्षिणं पक्षं वर्षाभिः पुच्छꣳ शरदोत्तरं पक्षꣳ हेमन्तेन मध्यं ब्रह्मणा वा अस्य तत् पूर्वार्धमचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः पुच्छं विशोत्तरं पक्षमाशया मध्यं य एवं विद्वानग्निं चिनुत ऋतुभिरेवैनं चिनुतेऽथो एतदेव सर्वमव (१) रुन्धे शृण्वन्त्येनमग्निं चिक्यानमत्त्यन्नꣳ रोचते इयं वाव प्रथमा चितिरोषधयो वनस्पतयः पुरीषमन्तरिक्षं द्वितीया वयाꣳसि पुरीषमसौ तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा पुरीषं यजमानः पञ्चमी प्रजा पुरीषं यत् त्रिचितीकं चिन्वीत यज्ञं दक्षिणामात्मानं प्रजामन्तरियात् तस्मात् पञ्चचितीकश्चेतव्य एतदेव सर्वꣳ स्पृणोति यत् तिस्रश्चितय-(२)-स्त्रिवृद्ध्यग्निर्यद् द्वे द्विपाद्यजमानः प्रतिष्ठित्यै पञ्च चितयो भवन्ति पाङ्क्तः पुरुष आत्मानमेव स्पृणोति पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश सं पद्यन्ते दशाक्षरो वै पुरुषो यावानेव पुरुषस्तꣳ स्पृणोत्यथो दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठति संवत्सरो वै षष्ठी चितिरृतवः पुरीषꣳ (३) षट् चितयो भवन्ति षट् पुरीषाणि द्वादश सं पद्यन्ते द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति ॥ (अव, चितयः, पुरीषं, पञ्चदश च) ॥ १० ॥

आश्वमेधिकाश्वादिपशुषु प्रथमः पशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते रौद्राः श्येतः श्येताक्षः श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा वारुण्यस्तिस्रः श्वेता वशाः सौर्यो मैत्राबार्हस्पत्या धूम्रललामास्तूपराः ॥ (रोहितः षड्विꣳशतिः) ॥ ११ ॥

द्वितीयोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी बलक्षी ताः सारस्वत्यः पृषती स्थूलपृषती क्षुद्रपृषती ता वैश्वदेव्यस्तिस्रः श्यामा वशाः पौष्णियस्तिस्रो रोहिणीर्वशा मैत्रिय ऐन्द्राबार्हस्पत्या अरुणललामास्तूपराः ॥ (पृश्निः षड्विꣳशतिः) ॥ १२ ॥

तृतीयोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्त ऐन्द्रावायवाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते मैत्रावरुणाः शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रः शिल्पा वशा वैश्वदेव्यस्तिस्रः श्येनीः परमेष्ठिने सोमापौष्णाः श्यामललामास्तूपराः ॥ (शितिबाहुः पञ्चविꣳशतिः) ॥ १३ ॥

चतुर्थोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाः शितिककुच्छितिपृष्ठः शितिभसत् त ऐन्द्राबार्हस्पत्याः शितिपाच्छित्योष्ठः शितिभ्रुस्त ऐन्द्रावैष्णवास्तिस्रः सिध्मा वशा वैश्वकर्मण्यस्तिस्रो धात्रे पृषोदरा ऐन्द्रापौष्णाः श्येतललामास्तूपराः (उन्नतः पञ्चविꣳशतिः) ॥ १४ ॥

पञ्चमोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

कर्णास्त्रयो यामाः सौम्यास्त्रयः श्वितिङ्गा अग्नये यविष्ठाय त्रयो नकुलास्तिस्रो रोहिणीस्त्र्यव्यस्ता

वसूनां तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाꣳ सोमैन्द्रा बभ्रुललामास्तूपराः ॥ (कर्णास्त्रयोविꣳशतिः) ॥ १५ ॥

षष्ठोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

शुण्ठास्त्रयो वैष्णवा अधीलोधकर्णास्त्रयो विष्णव उरुक्रमाय लप्सुदिनस्त्रयो विष्णव उरुगायाय पञ्चावीस्तिस्र आदित्यानां त्रिवत्सास्तिस्रोऽङ्गिरसामैन्द्रावैष्णवा गौरललामास्तूपराः ॥ (शुण्ठा विꣳशतिः) ॥ १६ ॥

सप्तमोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

इन्द्राय राज्ञे त्रयः शितिपृष्ठा इन्द्रायाधिराजाय त्रयः शितिककुद इन्द्राय स्वराज्ञे त्रयः शितिभसदस्तिस्रस्तुर्यौह्यः साध्यानां तिस्रः पष्ठौह्यो विश्वेषां देवानामाग्नेन्द्राः कृष्णललामास्तूपराः ॥ (इन्द्राय द्वाविꣳशतिः) ॥ १७ ॥

अष्टमोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

अदित्यै त्रयो रोहितैता इन्द्राण्यै त्रयः कृष्णैताः कुह्वै त्रयोऽरुणैतास्तिस्रो धेनवो राकायै त्रयोऽनड्वाहः सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः ॥ (अदित्या अष्टादश) ॥ १८ ॥

नवमोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

सौम्यास्त्रयः पिशङ्गाः सोमाय राज्ञे त्रयः सारङ्गाः पार्जन्या नभोरूपास्तिस्रोऽजा मल्हा इन्द्राण्यै तिस्रो मेष्य आदित्या द्यावापृथिव्या मालङ्गास्तूपराः ॥ (सौम्या एकान्नविꣳशतिः) ॥ १९ ॥

दशमोऽश्वादिपशुसङ्घः ॥ विश्वेदेवा ऋषयः ।

वारुणास्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो रोहितललामा वरुणाय रिशादसे त्रयोऽरुणललामाः शिल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयः सर्वदेवत्या ऐन्द्रासूराः श्येतललामास्तूपराः ॥
(वारुणा विꣳशतिः) ॥ २० ॥

इष्टिनः पशवः ॥ विश्वेदेवा ऋषयः ।

सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविन्द्राग्निभ्यामोजोदाभ्यामुष्टाराविन्द्राग्निभ्यां बलदाभ्याꣳ सीरवाहाववी द्वे धेनू भौमी दिग्भ्यो वडबे द्वे धेनू भौमी वैराजी पुरुषी द्वे धेनू भौमी वायव आरोहणवाहावनड्वाहौ वारुणी कृष्णे वशे अराड्यौ दिव्यावृषभौ परिमरौ ॥
(सोमाय चतुस्त्रिꣳशत्) ॥ २१ ॥

अतिरात्रेऽनुबन्ध्याः केचित् पशवः ॥ विश्वेदेवा ऋषयः ।

एकादश प्रातर्गव्याः पशव आ लभ्यन्ते छगलः कल्माषः किकिदीविर्विदीगयस्ते त्वाष्ट्राः सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विनस्ते विशालयूप आ लभ्यन्ते ॥
(एकादश पञ्चविꣳशतिः) ॥ २२ ॥

ऋतुपशवः ॥ विश्वेदेवा ऋषयः ।

पिशङ्गास्त्रयो वासन्ताः सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयः शारदाः पृश्निसक्था-

त्रयो हैमन्तिका अवलिप्तास्त्रयः शैशिराः संवत्सराय निवक्षसः ॥ (पिशङ्गा विꣳशतिः) ॥ २१ ॥

[हिरण्यवर्णा २२२। अपां १९७। मूर्धन्वान् १९८। सुम्न २१२। संवत्सरं १५१। प्रजापति-२१०।-रुद्रैः १७८। सुवर्णाय १०७। सूर्यो १७०। प्रजापती १६५। रोहितः २८। पृश्निः २१। शितिबाहु- २५।-बभ्रुः २५। कर्णाः २१। शुण्ठाः २०। इन्द्राय-२२१।-दितियै १८। सोम्या १९। वारुणाः २०। सोमाय-३४।-वायव २५। पिशङ्गा-२०। त्रयोविꣳशतिः ॥ २४१६०]

[इति पञ्चमकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥]

उपानुवाक्याद्यवशिष्टकर्मनिरूपणम् ।

[अथ सप्तमः प्रपाठकः ॥ ७ ॥]

चित्यभिमर्शनादि ॥ अग्निर्ऋषिः ।

यो वा अयथादेवतमग्निं चिनुत आ देवताभ्यो वृश्च्यते पापीयान् भवति यो यथादेवतं न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्या गायत्रिया प्रथमां चितिमभि मृशेत् त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथादेवतमेवाग्निं चिनुते न देवताभ्य आ वृश्च्यते वसीयान् भवतीडायै वा एषा विभक्तिः पशव इडा पशुभिरेनं (१) चिनुते यं वै प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्च्छत्यश्वावभितस्तिष्ठेतां कृष्ण उत्तरतः श्वेतो दक्षिणतस्तावालभ्येष्टका उप दध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः साक्षादेव प्रजापतये प्रतिप्रोच्याग्निं चिनोति नाऽऽर्तिमार्च्छत्येतद्वा अह्नो रूपं यच्छ्वेतोऽश्वो रात्रियै कृष्ण एतदह्नो (२) रूपं यदिष्टका रात्रियै पुरीषमिष्टका उपधास्यञ्छ्वेतमश्वमभि मृशेत् पुरीषमुपधास्यन् कृष्णमहोरात्राभ्यामेवैनं चिनुते हिरण्यपात्रं मधोः पूर्णं ददाति मधव्योऽसानीति सौर्या चित्रवत्याऽवेक्षते चित्रमेव भवति मध्यन्दिने ऽश्वमव घ्रापयत्यसौ वा आदित्य इन्द्र एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति ॥

(एनं,-मेतदह्नो, ऽष्टाचत्वारिꣳशच्च) ॥ १ ॥

ऋषभेष्टकोपधानम् ॥ १, ५, ७-११ त्रिष्टुप्; ३ अनुष्टुप् । अग्निर्ऋषिः ।

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् ।
अस्थूरि णो गार्हपत्यानि सन्तु तिग्मेन नो ब्रह्मणा सꣳ शिशाधि ॥

पशवो वा एते यदिष्टकाश्चित्याञ्चित्यामृषभमुप दधाति मिथुनमेवास्य तद्यज्ञे करोति प्रजननाय तस्माद्यूथेयूथ ऋषभः ॥

संवत्सरस्य प्रतिमां यां त्वा रात्र्युपासते । प्रजाꣳ सुवीरां कृत्वा विश्वमायुर्व्यश्नवत् ॥

प्राजापत्या-(१)-मेतामुप दधातीयं वावैषैकाष्टका यदेवैकाष्टकायामन्नं क्रियते तदेवैतयाऽव रुन्ध एषा वै प्रजापतेः कामदुघा तयैव यजमानोऽमुष्मिंल्लोकेऽग्निं दुहे

येन देवा ज्योतिषोर्ध्वा उदायन् येनाऽऽदित्या वसवो येन रुद्राः ।
येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति ॥

सुवर्गाय वा एष लोकाय (२) चीयते यदग्निर्येन देवा ज्योतिषोर्ध्वा उदायन्नित्युख्यꣳ समिन्ध इष्टका एवैता उप धत्ते वानस्पत्याः सुवर्गस्य लोकस्य समष्ट्यै

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे ।
शतं यो नः शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा ॥
ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।
तेषां यो अज्यानिमजीतिमावहात् तस्मै नो देवाः (३) परि दत्तेह सर्वे ॥
ग्रीष्मो हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु ।
तेषामृतूनाꣳ शतशारदानां निवात एषामभये स्याम ॥
इदुवत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ।
तेषां वयꣳ सुमतौ यज्ञियानां ज्योगजीता अहताः स्याम ॥
भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा ।
स नो मयोभूः पितो (४) आ विशस्व शं तोकाय तनुवे स्योनः ॥

अज्यानीरेता उप दधात्येता वै देवता अपराजितास्ता एव प्र विशति नैव जीयते ब्रह्मवादिनो वदन्ति यदर्धमासा मासा ऋतवः संवत्सर ओषधीः पचन्त्यथ कस्मादन्याभ्यो देवताभ्य आग्रयणं निरुप्यत इत्येता हि तद्देवता उदजयन् यदृतुभ्यो निर्वपेद् देवताभ्यः समदं दध्यादाग्रयणं (५) निरुप्यैता आहुतीर्जुहोत्यर्धमासानेव मासानृतून्त्संवत्सरं प्रीणाति न देवताभ्यः समदं दधाति भद्रान्नः श्रेयः समनैष्ट देवा इत्याह हुताद्याय यजमानस्यापराभावाय ॥

(प्राजापत्यां, लोकाय, देवाः, पितो, दध्यादाग्रयणं, पञ्चविꣳशतिश्च) ॥ २ ॥

वज्रिणीष्टकोपधान-वसोर्धाराविशेषविधानम् ॥ १-४ बृहती; ५ गायत्री । अग्निर्ऋषिः ।

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तनूपा नः प्रतिस्पशः ।
यो नः पुरस्तात् *- -*दक्षिणतः*- -*पश्चात् *- -*दुत्तरतोऽघायुरभिदासत्येतꣳ सोऽश्मानमृच्छतु ॥

देवासुराः संयत्ता आसन् तेऽसुरा दिग्भ्य आऽबाधन्त तान् देवा इष्वा च वज्रेण चापानुदन्त यद्वज्रिणीरुपदधातीष्वा चैव तद्वज्रेण च यजमानो भ्रातृव्यानप नुदते दिक्षूप (१) दधाति देवपुरा एवैतास्तनूपानीः पर्यूहते

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । द्युम्नैर्वाजेभिरा गतम् ॥

ब्रह्मवादिनो वदन्ति यन्न देवतायै जुह्वत्यथ किंदेवत्या वसोर्धारेत्यग्निर्वसुस्तस्यैषा धारा विष्णुर्यज्ञस्तस्यैषा धाराऽऽग्नावैष्णव्यर्चा वसोर्धारां जुहोति भागधेयेनैवैनौ समर्धयत्यथो एता-(२)-मेवाहुतिमायतनवतीं करोति यत्काम एतां जुहोति तदेवाव रुन्धे रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरा-

(३।१-३) यो नः...मृच्छतु ।

ऽन्या शिवाऽन्या यच्छतरुद्रीयं जुहोति यैवास्य घोरा तनूस्तां तेन शमयति यद्वसोर्धारां जुहोति यैवास्य शिवा तनूस्तां तेन प्रीणाति यो वै वसोर्धारायै (१) प्रतिष्ठां वेद प्रत्येव तिष्ठति यदाज्यमुच्छिष्येत तस्मिन् ब्रह्मौदनं पचेत् तं ब्राह्मणाश्चत्वारः प्राश्नीयुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मण एषा खलु वा अग्नेः प्रिया तनूर्यद्वैश्वानरः प्रियायामेवैनां तनुवां प्रति ष्ठापयति चतस्रो धेनूर्दद्यात् ताभिरेव यजमानोऽमुष्मिंल्लोकेऽग्निं दुहे ॥ (अपै,-तां, धारायै, पट्चत्वारिꣳशच्च) ॥ ३ ॥

होमविशेषा राष्ट्रभृदाद्येष्टकोपधानं च ॥ ५-८ त्रिष्टुप् । अग्निर्ऋषिः ।

चित्तिं जुहोमि मनसा घृतेनेत्याहादाभ्या वै नामैषाऽऽहुतिर्वैश्वकर्मणी नैनं चिक्यानं भ्रातृव्यो दभ्नोत्यथो देवता एवाव रुन्धेऽग्ने तमद्येति पङ्क्त्या जुहोति पङ्क्त्याऽऽहुत्या यज्ञमुखमा रभते सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह होत्रा एवाव रुन्धेऽग्निर्देवेभ्योऽपाक्रामद्भागधेय-(१)-मिच्छमानस्तस्मा एतद्भागधेयं प्रायच्छन्नेतद्वा अग्नेरग्निहोत्रमेतर्हि खलु वा एष जातो यर्हि सर्वश्चितो जातायैवास्मा अन्नमपि दधाति स एनं प्रीतः प्रीणाति वसीयान् भवति ब्रह्मवादिनो वदन्ति यदेष गार्हपत्यश्चीयतेऽथ क्वास्याऽऽहवनीय इत्यसावादित्य इति ब्रूयादेतस्मिन् हि सर्वाभ्यो देवताभ्यो जुह्वति (२) य एवं विद्वानग्निं चिनुते साक्षादेव देवता ऋध्नोत्य-

-ग्ने यशस्विन् यशसेममर्पयेन्द्रावतीमपचितीमिहाऽऽ वह ।
अयं मूर्धा परमेष्ठी सुवर्चाः समानानामुत्तमश्लोको अस्तु ॥
भद्रं पश्यन्त उप सेदुरग्रे तपो दीक्षामृषयः सुवर्विदः ।
ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभि सं नमन्तु ॥
धाता विधाता परमो-(३)-त संदृक् प्रजापतिः परमेष्ठी विराजा ।
स्तोमाश्छन्दाꣳसि निविदो म आहुरेतस्मै राष्ट्रमभि सं नमाम ॥
अभ्यावर्तध्वमुप मेत साकमयꣳ शास्ताऽधिपतिर्वो अस्तु ।
अस्य विज्ञानमनु सꣳ रभध्वमिमं पश्चादनु जीवाथ सर्वे ॥

राष्ट्रभृत एता उप दधात्येषा वा अग्नेश्चिती राष्ट्रभृत् तयैवास्मिन् राष्ट्रं दधाति (४) राष्ट्रमेव भवति नास्माद्राष्ट्रं भ्रꣳशते ॥ (भागधेयं, जुह्वति, परमो, राष्ट्रं दधाति, सप्त च) ॥ ४ ॥

पुनः परोऽवत्तादिविधानम् ॥ अग्निर्ऋषिः ।

यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते यस्याग्निरुख्य उद्वायति यन्निर्मन्थ्यं कुर्याद्विच्छिन्द्याद्भ्रातृव्यमस्मै जनयेत् स एव पुनः परीध्यः स्वादेवैनं योनेर्जनयति नास्मै भ्रातृव्यं जनयति तमो वा एतं गृह्णाति यस्याग्निरुख्य उद्वायति मृत्युस्तमः कृष्णं वासः कृष्णा धेनुर्दक्षिणा तमसैव (१) तमो मृत्युमप हते हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिषैव तमोऽप हतेऽथो तेजो वै हिरण्यं तेज एवाऽऽत्मन् धत्ते सुवर्न घर्मः स्वाहा सुवर्नार्कः स्वाहा सुवर्न शुक्रः स्वाहा सुवर्न ज्योतिः स्वाहा

सुवर्न सूर्यः स्वाहाऽर्को वा एष यदग्निरसावादित्यो (२) ऽश्वमेधो यदेता आहुतीर्जुहोत्यर्काश्वमेधयोरेव ज्योतीꣳषि सं दधात्येष ह त्वा अर्काश्वमेधी यस्यैतदग्नौ क्रियत आपो वा इदमग्रे सलिलमासीत् स एतां प्रजापतिः प्रथमां चितिमपश्यत् तामुपाधत्त तदियमभवत् तं विश्वकर्माऽब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्य-(३)-ब्रवीत् स एतां द्वितीयां चितिमपश्यत् तामुपाधत्त तदन्तरिक्षमभवत् स यज्ञः प्रजापतिमब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्यब्रवीत् स विश्वकर्माणमब्रवीदुप त्वाऽऽयानीति केन मोपैष्यसीति दिश्याभिरित्यब्रवीत् तं दिश्याभिरुपैत् ता उपाधत्त ता दिशो (४) ऽभव-न्त्स परमेष्ठी प्रजापतिमब्रवीदुप त्वाऽऽयानीति नेह लोकोऽस्तीत्यब्रवीत् स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामाऽऽयानीति नेह लोकोऽस्तीत्यब्रूताꣳ स एतां तृतीयां चितिमपश्यत् तामुपाधत्त तदसावभवत् स आदित्यः प्रजापतिमब्रवीदुप त्वा (५) ऽऽयानीति नेह लोकोऽस्तीत्यब्रवीत् स विश्वकर्माणं च यज्ञं चाब्रवीदुप वामाऽऽयानीति नेह लोकोऽस्तीत्यब्रूताꣳ स परमेष्ठिनमब्रवीदुप त्वाऽऽयानीति केन मोपैष्यसीति लोकम्पृणयेत्यब्रवीत् तं लोकम्पृणयोपैत् तस्मादयातयाम्नी लोकम्पृणाऽयातयामा ह्यसा-(६)-वादित्यस्ताननृषयोऽब्रुवन्नुप व आऽयामेति केन न उपैष्यथेति भूम्नेत्यब्रुवन् तान् द्वाभ्यां चितीभ्यामुपायन्त्स पञ्चचितीकः समपद्यत य एवं विद्वानग्निं चिनुते भूयानेव भवत्यभीमाँल्लोकाञ्जयति विदुरेनं देवा अथो एतासामेव देवतानाꣳ सायुज्यं गच्छति ॥ (तमसा, ऽऽदित्यो, ऽस्तीति, दिशो,-त्वा, ऽसौ, पञ्चचत्वारिꣳशच्च) ॥ ५ ॥

स्वयमातृण्णादीष्टकाप्रशंसा ॥ ८ त्रिपादनुष्टुप्; ९-१० अनुष्टुप् । अग्निर्ऋषिः ।

वयो वा अग्निर्यदग्निचित् पक्षिणोऽश्नीयात् तमेवाग्निमद्यादार्तिमार्च्छेत् संवत्सरं व्रतं चरेत् संवत्सरꣳ हि व्रतं नाति पशुर्वा एष यदग्निर्हिनस्ति खलु वै तं पशुर्य एनं पुरस्तात् प्रत्यञ्चमुपचरति तस्मात् पश्चात् प्राङुपचर्य आत्मनोऽहिꣳसायै तेजोऽसि तेजो मे यच्छ पृथिवीं यच्छ (१) पृथिव्यै मा पाहि ज्योतिरसि ज्योतिर्मे यच्छान्तरिक्षं यच्छान्तरिक्षान्मा पाहि सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याहैताभिर्वा इमे लोका विधृता यदेता उपदधात्येषां लोकानां विधृत्यै स्वयमातृण्णा उपधाय हिरण्येष्टका उप दधातीमे वै लोकाः स्वयमातृण्णा ज्योतिर्हिरण्यं यत् स्वयमातृण्णा उपधाय (२) हिरण्येष्टका उपदधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो एताभिरेवास्मा इमे लोकाः प्र भान्ति

यास्ते अग्ने सूर्ये रुच उद्यतो दिवमातन्वन्ति रश्मिभिः ।
ताभिः सर्वाभी रुचे जनाय नस्कृधि ॥
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ॥
रुचं नो धेहि (३) ब्राह्मणेषु रुचꣳ राजसु नस्कृधि ।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥

द्वेधा वा अग्निं चिक्यानस्य यश इन्द्रियं गच्छत्यग्निं वा चितमीजानं वा यदेता आहुतीर्जुहोत्यात्मन्नेव यश इन्द्रियं धत्त ईश्वरो वा एष आर्तिमार्तोर्योऽग्निं चिन्वन्नधिक्रामति तत्त्वा यामि ब्रह्मणा वन्दमान इति वारुण्यर्चा (४) जुहुयाच्छान्तिरेवैषाऽग्नेर्गुप्तिरात्मनो हविष्कृतो वा एष योऽग्निं चिनुते यथा वै हविः स्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति मैत्रावरुण्याऽऽमिक्षया यजेत मैत्रावरुणतामेवोपैत्यात्मनोऽस्कन्दाय यो वा अग्निमृतुस्थां वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति संवत्सरो वा अग्नि(५)र्ऋतुस्थास्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षाः पुच्छꣳ शरदुत्तरः पक्षो हेमन्तो मध्यं पूर्वपक्षाश्चितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका एष वा अग्निर्ऋतुस्था य एवं वेदर्तुर्ऋतुरस्मै कल्पमान एति प्रत्येव तिष्ठति प्रजापतिर्वा एतं ज्यैष्ठ्यकामो न्यधत्त ततो वै स ज्यैष्ठ्यमगच्छद्य एवं विद्वानग्निं चिनुते (६) ज्यैष्ठ्यमेव गच्छति ॥ (पृथिवी यच्छ, यत् स्वयमातृण्णा वेधुत्राय, वेद,- वा, ऽग्नि,- चिनुते, त्रीणि च) ॥ ६ ॥

आकूतिमन्त्राः ॥ १-४ त्रिष्टुप्; ५-१० अनुष्टुप् । अग्निर्ऋषिः ।

यदाकूतात् समसुस्रोद्धृदो वा मनसो वा संभृतं चक्षुषो वा ।
तमनु प्रेहि सुकृतस्य लोकं यत्रर्षयः प्रथमजा ये पुराणाः ॥
एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिं जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वो अत्र तꣳ स्म जानीत परमे व्योमन् ॥
जानीतादेनं परमे व्योमन् देवाः सधस्था विद रूपमस्य ।
यदागच्छात् (१) पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै ॥
सं प्र च्यवध्वमनु सं प्र याताग्ने पथो देवयानान् कृणुध्वम् ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥
प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥
यदिष्टं यत् परादानं यद्दत्तं या च दक्षिणा ।
त- (२) -दग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् ॥
येना सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥
येनाग्ने दक्षिणा युक्ता यज्ञं वहन्त्यृत्विजः । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे ॥
येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः । तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे (३) ॥
यत्र धारा अनपेता मधोर्घृतस्य च याः । तदग्निर्वैश्वकर्मणः सुवर्देवेषु नो दधत् ॥
(आगच्छात्, त,-द्यानशुस्तेनेमं यज्ञं नो वह सुवर्देवेषु गन्तवे चतुर्दश च) ॥ ७ ॥

स्वयंचितिः, कूर्मोपधानं च ॥ १,२ त्रिष्टुप् । अग्निर्ऋषिः ।

यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः ।
ये ते अग्ने मेडयो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन् ॥

उत्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वा अध्वर्युरग्नेश्चिन्वन्नन्तरेत्यात्मनो वै तदन्तरेति यास्ते अग्ने समिधो यानि (१) धामेत्याहैषा वा अग्नेः स्वयंचितिरग्निरेव तदग्निं चिनोति नाध्वर्युरात्मनोऽन्तरेति

चतस्र आशाः प्र चरन्त्वग्नय इमं नो यज्ञं नयतु प्रजानन्
घृतं पिन्वन्नजरꣳ सुवीरं ब्रह्म समिद्भवत्याहुतीनाम् ॥

सुवर्गाय वा एष लोकायोप धीयते यत् कूर्मश्चतस्र आशाः प्र चरन्त्वग्नय इत्याह (२) दिश एवैतेन प्र जानातीमं नो यज्ञं नयतु प्रजानन्नित्याह सुवर्गस्य लोकस्याभिनीत्यै ब्रह्म समिद्भवत्याहुतीनामित्याह ब्रह्मणा वै देवाः सुवर्गं लोकमायन् यद्ब्रह्मण्वत्योपदधाति ब्रह्मणैव तद्यजमानः सुवर्गं लोकमेति प्रजापतिर्वा एष यदग्निस्तस्य प्रजाः पशवश्छन्दाꣳसि रूपꣳ सर्वान् वर्णानिष्टकानां (३) कुर्याद्रूपेणैव प्रजां पशूञ्छन्दाꣳस्यव रुन्धेऽथो प्रजाभ्य एवैनं पशुभ्यश्छन्दोभ्योऽवरुध्य चिनुते ॥
(एति यास्ते अग्ने समिधो यान्या,-ग्नय इत्याहे-ष्टकानाꣳ, षोडश च) ॥ ८ ॥

अग्निग्रहः, सर्वमुखं च ॥ १-२ त्रिष्टुप् । अग्निर्ऋषिः ।

मयि गृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ।
मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः ॥
यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्याꣳ आविवेश ।
तमात्मन् परि गृह्णीमहे वयं मा सो अस्माꣳ अवहाय परा गात् ॥

यदध्वर्युरात्मन्नग्निमगृहीत्वाऽग्निं चिनुयाद्योऽस्य स्वोऽग्निस्तमपि (१) यजमानाय चिनुयादग्निं खलु वै पशवोऽनूप तिष्ठन्तेऽपक्रामुका अस्मात् पशवः स्युर्मयि गृह्णाम्यग्रे अग्निमित्याहाऽऽत्मन्नेव स्वमग्निं दाधार नास्मात् पशवोऽप क्रामन्ति ब्रह्मवादिनो वदन्ति यन्मृच्चाऽऽपश्चाग्नेरनाद्यमथ कस्मान्मृदा चाद्भिश्चाग्निश्चीयत इति यदद्भिः संयौत्या(२)पो वै सर्वा देवता देवताभिरेवैनꣳ सꣳ सृजति यन्मृदा चिनोतीयं वा अग्निर्वैश्वानरोऽग्निनैव तदग्निं चिनोति ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भिश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दाꣳसि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो य(३)न्मृदा चिनोति तस्मादग्निरुच्यते हिरण्येष्टका उप दधाति ज्योतिर्वै हिरण्यं ज्योतिरेवास्मिन् दधात्यथो तेजो वै हिरण्यं तेज एवाऽऽत्मन् धत्ते यो वा अग्निꣳ सर्वतोमुखं चिनुते सर्वासु प्रजास्वन्नमत्ति सर्वा दिशोऽभि जयति गायत्रीं पुरस्तादुप दधाति त्रिष्टुभं दक्षिणतो जगतीं पश्चादनुष्टुभमुत्तरतः पङ्क्तिं मध्य एष वा (४) अग्निः सर्वतोमुखस्तं य एवं विद्वाꣳश्चिनुते सर्वासु प्रजास्व-

न्नमत्ति सर्वा दिशोऽभि जयत्यथो दिश्येव दिशं प्र वयति तस्माद्दिशि दिक् प्रोता ॥
(अपि, संयौति, वैश्वानरो य,-न्नेष वै, पञ्चविꣳशतिश्च) ॥ ९ ॥

पशुशीर्षोपधानं, तत्र केषांचिद्विशेषाश्च । अग्निर्ऋषिः ।

प्रजापतिरग्निमसृजत सोऽस्मात् सृष्टः प्राङ् प्राद्रवत् तस्मा अश्वं प्रत्यास्यत् स दक्षिणाऽऽवर्तत तस्मै वृष्णिं प्रत्यास्यत् स प्रत्यङ्ङाऽवर्तत तस्मा ऋषभं प्रत्यास्यत् स उदङ्ङाऽवर्तत तस्मै बस्तं प्रत्यास्यत् स ऊर्ध्वोऽद्रवत् तस्मै पुरुषं प्रत्यास्यद्यत् पशुशीर्षाण्युपदधाति सर्वत एवैन(१)मवरुध्य चिनुत एता वै प्राणभृतश्चक्षुष्मतीरिष्टका यत् पशुशीर्षाणि यत् पशुशीर्षाण्युपदधाति ताभिरेव यजमानोऽमुष्मिंल्लोके प्राणित्यथो ताभिरेवास्मा इमे लोकाः प्र भान्ति मृदाऽभिलिप्योप दधाति मेध्यत्वाय पशुर्वा एष यदग्निरन्नं पशव एष खलु वा अग्निर्यत् पशुशीर्षाणि यं कामयेत कनीयोऽस्यान्नꣳ (२) स्यादिति संतरां तस्य पशुशीर्षाण्युप दध्यात् कनीय एवास्यान्नं भवति यं कामयेत समावदस्यान्नꣳ स्यादिति मध्यतस्तस्योप दध्यात् समावदेवास्यान्नं भवति यं कामयेत भूयोऽस्यान्नꣳ स्यादित्यन्तेषु तस्य व्युदूह्योप दध्यादन्तत एवास्मा अन्नमव रुन्धे भूयोऽस्यान्नं भवति (३) ॥ (एन,-मन्नं, भूयोऽस्यान्नं भवति) ॥ १० ॥

[११-२४] अश्वमेधाङ्गत्वशरीरहोममन्त्राः ॥ ११-२६ । विश्वेदेवा ऋषयः ।

स्तेगान् दꣳष्ट्राभ्यां मण्डूकान् जम्भ्येभिरादकां खादेनोर्जꣳ सꣳसूदेनारण्यं जाम्बीलेन मृदं बर्स्वेभिः शर्कराभिरवकामवकाभिः शर्करामुत्सादेन जिह्वामवक्रन्देन तालुꣳ सरस्वतीं जिह्वाग्रेण ॥ (स्तेगान् द्वाविꣳशतिः) ॥ ११ ॥

वाजꣳ हनूभ्यामप आस्येनाऽऽदित्याञ्छ्मश्रुभिरुपयाममधरेणोष्ठेन सदुत्तरेणान्तरेणानूकाशं प्रकाशेन बाह्यꣳ स्तनयित्नुं निर्बाधेन सूर्याग्नी चक्षुर्भ्यां विद्युतौ कनीनकाभ्यामशनिं मस्तिष्केण बलं मज्जभिः ॥ (वाजं पञ्चविꣳशतिः) ॥ १२ ॥

कूर्माञ्छफैरच्छलाभिः कपिञ्जलान्त्साम कुष्ठिकाभिर्जवं जङ्घाभिरगदं जानुभ्यां वीर्यं कुहाभ्यां भयं प्रचालाभ्यां गुहोपपक्षाभ्यामश्विनाꣳसाभ्यामदितिꣳ शीर्ष्णा निर्ऋतिं निर्जाल्मकेन शीर्ष्णा ॥ (कूर्मान् त्रयोविꣳशतिः) ॥ १३ ॥

योक्त्रं गृध्राभिर्युगमानतेन चित्तं मन्याभिः संक्रोशान् प्राणैः प्रकाशेन त्वचं पराकाशेनान्तरां मशकान् केशैरिन्द्रꣳ स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन रथमुष्णिहाभिः ॥ (योक्त्रमेकविꣳशतिः) ॥ १४ ॥

मित्रावरुणौ श्रोणीभ्यामिन्द्राग्नी शिखण्डाभ्यामिन्द्राबृहस्पती ऊरुभ्यामिन्द्राविष्णू अष्ठीवद्भ्याꣳ सवितारं पुच्छेन गन्धर्वाञ्छेपेनाप्सरसो मुष्काभ्यां पवमानं पायुना पवित्रं पोत्राभ्यामाक्रमणꣳ स्थूराभ्यां प्रतिक्रमणं कुष्ठाभ्याम् ॥ (मित्रावरुणौ द्वाविꣳशतिः) ॥ १५ ॥

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवो जीमूतान् हृदयौपशाभ्यामन्तरिक्षं पुरितता नभ उदर्येणेन्द्राणीं प्लीह्ना वल्मीकान् क्लोम्ना गिरीन् प्लाशिभिः समुद्रमुदरेण वैश्वानरं भस्मना ॥ (इन्द्रस्य द्वाविꣳशतिः) ॥ १६ ॥

पूष्णो वनिष्ठुरन्धाहेः स्थूरगुदा सर्पान् गुदाभिर्ऋतून् पृष्टीभिर्दिवं पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणां द्वितीयाऽऽदित्यानां तृतीयाऽङ्गिरसां चतुर्थी साध्यानां पञ्चमी विश्वेषां देवानाꣳ षष्ठी ॥ (पूष्णस्त्रयोविꣳशतिः) ॥ १७ ॥

ओजो ग्रीवाभिर्निर्ऋतिमस्थभिरिन्द्रꣳ स्वपसा वहेन रुद्रस्य विचलः स्कन्धोऽहोरात्रयोर्द्वितीयोऽर्धमासानां तृतीयो मासां चतुर्थ ऋतूनां पञ्चमः संवत्सरस्य षष्ठः ॥ (ओजो विꣳशतिः) ॥ १८ ॥

आनन्दं नन्दथुना कामं प्रत्यासाभ्यां भयꣳ शितीमभ्यां प्रशिषं प्रशासाभ्याꣳ सूर्याचन्द्रमसौ वृक्याभ्याꣳ श्यामशबलौ मतस्नाभ्यां व्युष्टिꣳ रूपेण निम्रुक्तिमरूपेण ॥ (आनन्दं षोडश) ॥ १९ ॥

अहर्माꣳसेन रात्रिं पीवसाऽपो यूषेण घृतꣳ रसेन श्यां वसया दूषीकाभिर्ह्रादुनिमश्रुभिः पृष्वां दिवꣳ रूपेण नक्षत्राणि प्रतिरूपेण पृथिवीं चर्मणा छवीं छव्योपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा ॥ (अहरष्टाविꣳशतिः) ॥ २० ॥

अग्नेः पक्षतिः सरस्वत्यै निपक्षतिः सोमस्य तृतीयाऽपां चतुर्थ्योषधीनां पञ्चमी संवत्सरस्य षष्ठी मरुताꣳ सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटूरः ॥ (अग्नेरेकान्नत्रिꣳशत्) ॥ २१ ॥

वायोः पक्षतिः सरस्वतो निपक्षतिश्चन्द्रमसस्तृतीया नक्षत्राणां चतुर्थी सवितुः पञ्चमी रुद्रस्य षष्ठी सर्पाणाꣳ सप्तम्यर्यम्णोऽष्टमी त्वष्टुर्नवमी धातुर्दशमीन्द्राण्या एकादश्यदित्यै द्वादशी द्यावापृथिव्योः पार्श्वं यम्यै पाटूरः ॥ (वायोरष्टाविꣳशतिः) ॥ २२ ॥

पन्थामनूवृग्भ्याꣳ संततिꣳ स्नावन्याभ्याꣳ शुकान् पित्तेन हरिमाणं यक्ना हलीक्ष्णान् पापवातेन कूश्माञ्छकभिः शवर्तानूवध्येन शुनो विशसनेन सर्पांल्लोहितगन्धेन वयाꣳसि पक्वगन्धेन पिपीलिकाः प्रशादेन ॥ (पन्थां द्वाविꣳशतिः) ॥ २३ ॥

पुरस्तात्स्वयंचितिः ॥

क्रमैरत्यक्रमीद्वाजी विश्वैर्देवैर्यज्ञियैः संविदानः ।
स नो नय सुकृतस्य लोकं तस्य ते वयꣳ स्वधया मदेम ॥ (क्रमैरष्टादश) ॥ २४ ॥

अथानुमन्त्रणम् ॥

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्माऽन्तरिक्षं समुद्रो योनिः सूर्यस्ते चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं मासाश्चार्धमासाश्च पर्वाण्यृतवोऽङ्गानि संवत्सरो महिमा ॥ (द्यौः पञ्चविंशतिः) ॥ २५ ॥

अथानुप्रापणम् ॥

अग्निः पशुरासीत् तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निः स ते लोकस्तं जेष्यस्यथावजिघ्र वायुः पशुरासीत् तेनायजन्त स एतं लोकमजयद्यस्मिन् वायुः स ते लोकस्तस्मात् त्वाऽन्तरेष्यामि यदि नावजिघ्रस्यादित्यः पशुरासीत् तेनायजन्त स एतं लोकमजयद्यस्मि- (१) -न्नादित्यः स ते लोकस्तं जेष्यसि यद्यवजिघ्रसि ॥ (यस्मिन्नष्टौ च) ॥ २६ ॥

[य-१४८। स्वा-२७५। मिग्नर्स्य १९६। चित्तिं २०७। यथा १४५। वयो १०१। य-१४१। या १६६। मयि २२५। प्रजापतिः १५०। स्तेगान् २२। यामं २५। कूर्मान् २१। योक्त्रं २१। मित्रावरुणा-२२। विश्वेभ्य २२। पूष्णे २४। ओजं २०। आनन्द-१६। मई-२८। तुभ्यं-२९। यो यो २८। पन्थ्यां २२। कर्मे-१८। द्यौस्ते २५। अग्निः ५८। षड्विंशतिः ॥ २५८२ ॥]

[॥ इति पञ्चमकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥]

[सावित्राणि १०८१। विष्णुमुखा ११९५। उत्सन्नयज्ञो २४७७। देवासुरा २९०८। यदेकेन २०२७। हिरण्यवर्णा २४३६। यो वा २५८२। (तुल्य ॥ ७ ॥ १९४०४)]

॥ इति पञ्चमं काण्डं सम्पूर्णम् ॥ ५ ॥

अथ षष्ठं काण्डम् ।

सोममन्त्रब्राह्मणनिरूपणम् ।

[अथ प्रथमः प्रपाठकः ॥ १ ॥]

प्राचीनवंशाख्यशालानिर्माणं क्षौरादिभिः संस्कृतस्य यजमानस्य तत्र प्रवेशविधानम् । सोमऋषिः ।

प्राचीनवंशं करोति देवमनुष्या दिशो व्यभजन्त प्राचीं देवा दक्षिणा पितरः प्रतीचीं मनुष्या उदीचीं रुद्रा यत् प्राचीनवंशं करोति देवलोकमेव तद्यजमान उपावर्तते परि श्रयत्यन्तर्हितो हि देवलोको मनुष्यलोकान्नास्माल्लोकात् स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्यमुष्मिंल्लोकेऽस्ति वा न वेति दिक्ष्वतीकाशान् करोत्यु- (१) -भयोर्लोकयोरभिजित्यै केशश्मश्रु वपते नखानि नि कृन्तते मृता वा एषा त्वगमेध्या यत् केशश्मश्रु मृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैत्यङ्गिरसः सुवर्गं लोकं यन्तोऽप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी अव रुन्धे तीर्थे स्नाति तीर्थे हि ते तां प्रावेशयन् तीर्थे स्नाति (२) तीर्थमेव समानानां भवत्यपोऽश्नात्यन्तरत एव मेध्यो भवति वाससा दीक्षयति सौम्यं वै क्षौमं देवतया सोममेव देवतामुपैति यो दीक्षते सोमस्य तनूरसि तनुवं मे पाहीत्याह स्वामेव देवतामुपैत्यथो आशिषमेवैतामा शास्तेऽग्नेस्तूषाधानं वायोर्वातपानं पितृणां नीविरोषधीनां प्रघात (३) आदित्यानां प्राचीनतानो विश्वेषां देवानामोतुर्नक्षत्राणामतीकाशास्तद्वा एतत् सर्वदेवत्यं यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याशनं प्राणोऽश्नाति सप्राण एव दीक्षत आशितो भवति यावानेवास्य प्राणस्तेन सह मेधमुपैति घृतं देवानां मस्तु पितृणां निष्पक्वं मनुष्याणां तद्वा (४) एतत् सर्वदेवत्यं यन्नवनीतं यन्नवनीतेनाभ्यङ्क्ते सर्वा एव देवताः प्रीणाति प्रच्युतो वा एषोऽस्माल्लोकादगतो देवलोकं यो दीक्षितोऽन्तरेव नवनीतं तस्मान्नवनीतेनाभ्यङ्क्तेऽनुलोमं यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन् तस्य कनीनिका परापतत् तदाञ्जनमभवद्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते दक्षिणं पूर्वमाङ्क्ते (५) सव्यं हि पूर्वं मनुष्या आञ्जते न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व आङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे परिमितमाङ्क्तेऽपरिमितं हि मनुष्या आञ्जते सतूलयाऽऽङ्क्तेऽपतूलया हि मनुष्या आञ्जते व्यावृत्त्यै यदपतूलयाऽऽञ्जीत वज्र इव स्यात् सतूलयाऽऽङ्क्ते मित्रत्वाय (६) इन्द्रो वृत्रमहन्त्सोऽपोऽभ्यम्रियत तासां यन्मेध्यं यज्ञियं सदेवमासीत् तदपोदक्रामन् ते दर्भा अभवन् यद्दर्भपुञ्जीलैः पवयति या एव मेध्या यज्ञियाः सदेवा आपस्ताभिरेवैनं पवयति द्वाभ्यां पवयत्यहोरात्राभ्यामेवैनं पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति पञ्चभिः (७) पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनं पवयति षड्भिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति सप्तभिः पवयति सप्त छन्दांसि छन्दोभिरेवैनं पवयति नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनं पवयत्येकविंशत्या पवयति दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविंशो यावानेव पुरुषस्तमपरिवर्गं (८) पवयति चित्पतिस्त्वा

पुनात्वित्याह मनो वै चित्पतिर्मनसैवैनं पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनं पवयति देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनं पवयति तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमित्याहाऽऽशिषमेवैतामा शास्ते ॥ (अतीकाशान् करोत्यु,-वेशयन् तीर्थे स्नाति, प्रघातो, मनुष्याणां तद्वा, आङ्क्ते, मित्रत्वाय, पञ्चभि,-रपरिवर्गं,-मष्टाचत्वारिंशच्च) ॥ १ ॥

यज्ञशालां प्रविष्टस्य यजमानस्य दीक्षाहोमविधानम् ॥ सोमऋषिः ।

यावन्तो वै देवा यज्ञायापुनत त एवाभवन् य एवं विद्वान् यज्ञाय पुनीते भवत्येव बहिः पवयित्वाऽन्तः प्र पादयति मनुष्यलोक एवैनं पवयित्वा पूतं देवलोकं प्र णयत्यदीक्षित एकयाऽऽहुत्येत्याहुः स्रुवेण चतस्रो जुहोति दीक्षितत्वाय स्रुचा पञ्चमीं पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे आकूत्यै प्रयुजेऽग्नये स्वाहेत्याह मेधायै मनसेऽग्नये स्वाहेत्याह (१) स्वाहेत्याहाऽऽकूत्या हि पुरुषो यज्ञमभि प्रयुङ्क्ते यजेयेति मेधायै मनसेऽग्नये स्वाहेत्याह मेधया हि मनसा पुरुषो यज्ञमभिगच्छति सरस्वत्यै पूष्णेऽग्नये स्वाहेत्याह वाग्वै सरस्वती पृथिवी पूषा वाचैव पृथिव्या यज्ञं प्र युङ्क्त आपो देवीर्बृहतीर्विश्वशम्भुव इत्याह या वै वर्ष्यास्ता (२) आपो देवीर्बृहतीर्विश्वशम्भुवो यदेतद्यजुर्न ब्रूयाद्दिव्या आपोऽशान्ता इमं लोकमा गच्छेयुरापो देवीर्बृहतीर्विश्वशम्भुव इत्याहास्मा एवैना लोकाय शमयति तस्माच्छान्ता इमं लोकमा गच्छन्ति द्यावापृथिवी इत्याह द्यावापृथिव्योर्हि यज्ञ उर्वन्तरिक्षमित्याहान्तरिक्षे हि यज्ञो बृहस्पतिर्नो हविषा वृधात्वि- (३) -त्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै यज्ञमव रुन्धे यद्ब्रूयाद्विधेरिति यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परि वृणक्ति प्रजापतिर्यज्ञमसृजत सोऽस्मात् सृष्टः पराङैत् स प्र यजुरव्लीनात् प्र साम तमृगुदयच्छद्यदृगुदयच्छत् तदौद्ग्रहणस्यौद्ग्रहणत्वमृचा (४) जुहोति यज्ञस्योद्यत्यै अनुष्टुप्छन्दसामुदयच्छदित्याहुस्तस्मादनुष्टुभा जुहोति यज्ञस्योद्यत्यै द्वादश वात्सबन्धान्युदयच्छन्नित्याहुस्तस्माद् द्वादशभिर्वात्सबन्धविदो दीक्षयन्ति सा वा एषर्गनुष्टुग्वागनुष्टुग्यदेतयर्चा दीक्षयति वाचैवैनं सर्वया दीक्षयति विश्वे देवस्य नेतुरित्याह सावित्र्येतेन मर्तो वृणीत सख्य- (५) -मित्याह पित्र्येतेन विश्वे राय इषुध्यसीत्याह वैश्वदेव्येतेन द्युम्नं वृणीत पुष्यस इत्याह पौष्ण्येतेन सा वा एषा सर्वदेवत्या यदेतयर्चा दीक्षयति सर्वाभिरेवैनं देवताभिर्दीक्षयति सप्ताक्षरं प्रथमं पदमष्टाक्षराणि त्रीणि यानि त्रीणि तान्यष्टावुपयन्ति यानि चत्वारि तान्यष्टौ यदष्टाक्षरा तेन (६) गायत्री यदेकादशाक्षरा तेन त्रिष्टुग्यद् द्वादशाक्षरा तेन जगती सा वा एषा सर्वाणि छन्दांसि यदेतयर्चा दीक्षयति सर्वैरेवैनं छन्दोभिर्दीक्षयति सप्ताक्षरं प्रथमं पदं सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्धे एकस्मादक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उप जीवन्ति पूर्णया जुहोति (७) पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानां सृष्ट्यै ॥ (अग्नये, ता, वृधात्वि, चा, सख्यं, तेन, जुहोति, पञ्चदश च) ॥ २ ॥

कृष्णाजिनेन वस्त्रेण मेखलया च दीक्षाविधानम् ॥ सोमऋषिः ।

ऋक्सामे वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णो रूपं कृत्वाऽपक्रम्यातिष्ठतां तेऽमन्यन्त यं वा इमे उपा-

वर्त्स्यतः स इदं भविष्यतीति ते उपामन्त्रयन्त ते अहोरात्रयोर्महिमानमपनिधाय देवानुपावर्तेतामेष वा ऋचो वर्णो यच्छुक्लं कृष्णाजिनस्यैष साम्नो यत् कृष्णमृक्सामयोः शिल्पे स्थ इत्याहर्क्सामे एवाव रुन्धे एष (१) वा अह्नो वर्णो यच्छुक्लं कृष्णाजिनस्यैष रात्रिया यत् कृष्णं यदेवैनयोस्तत्र न्यक्तं तदेवाव रुन्धे कृष्णाजिनेन दीक्षयति ब्रह्मणो वा एतद्रूपं यत् कृष्णाजिनं ब्रह्मणैवैनं दीक्षयतीमां धियं शिक्षमाणस्य देवेत्याह यथायजुरेवैतद्गर्भो वा एष यद्दीक्षित उल्बं वासः प्रोर्णुते तस्मात् (२) गर्भाः प्रावृता जायन्ते न पुरा सोमस्य क्रयादपोर्णुवीत यत् पुरा सोमस्य क्रयादपोर्णुवीत गर्भाः प्रजानां परापातुकाः स्युः क्रीते सोमेऽपोर्णुते जायत एव तदथो यथा वसीयांसं प्रत्यपोर्णुते तादृगेव तदङ्गिरसः सुवर्गं लोकं यन्त ऊर्जं व्यभजन्त ततो यदत्यशिष्यत ते शरा अभवन्नूर्ग्वै शरा यच्छरमयी (३) मेखला भवत्यूर्जमेवाव रुन्धे मध्यतः सं नह्यति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुञ्जत ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यं यन्मध्यतः संनह्यति मेध्यं चैवास्यामेध्यं च व्यावर्तयतीन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधा व्यभवत् स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयं (४) येऽन्तःशरा अशीर्यन्त ते शरा अभवन् तच्छराणां शरत्वं वज्रो वै शराः क्षुत् खलु वै मनुष्यस्य भ्रातृव्यो यच्छरमयी मेखला भवति वज्रेणैव साक्षात् क्षुधं भ्रातृव्यं मध्यतोऽप हते त्रिवृद्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणं मध्यतो यजमाने दधाति पृथ्वी भवति रज्जूनां व्यावृत्त्यै मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वाय (५) यज्ञो दक्षिणामभ्यध्यायत् तां समभवत् तदिन्द्रोऽचायत् सोऽमन्यत यो वा इतो जनिष्यते स इदं भविष्यतीति तां प्राविशत् तस्या इन्द्र एवाजायत सोऽमन्यत यो वै मदितोऽपरो जनिष्यते स इदं भविष्यतीति तस्या अनुमृश्य योनिमाच्छिनत् सा सूतवशाऽभवत् तत् सूतवशायै जन्म (६) तां हस्ते न्यवेष्टयत तां मृगेषु न्यदधात् सा कृष्णविषाणाऽभवदिन्द्रस्य योनिरसि मा मा हिंसीरिति कृष्णविषाणां प्र यच्छति सयोनिमेव यज्ञं करोति सयोनिं दक्षिणां सयोनिमिन्द्रं सयोनित्वाय कृष्यै त्वा सुसस्याया इत्याह तस्मादकृष्टपच्या ओषधयः पच्यन्ते सुपिप्पलाभ्यस्त्वौषधीभ्य इत्याह तस्मादोषधयः फलं गृह्णन्ति यद्धस्तेन (७) कण्डूयेत पामनंभावुकाः प्रजाः स्युर्यत् स्मयेत नग्नंभावुकाः कृष्णविषाणया कण्डूयतेऽपिगृह्य स्मयते प्रजानां गोपीथाय न पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामव चृतेद्यत् पुरा दक्षिणाभ्यो नेतोः कृष्णविषाणामवचृतेद्योनिः प्रजानां परापातुका स्यान्नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति योनिर्वै यज्ञस्य चात्वालं योनिः कृष्णविषाणा योनावेव योनिं दधाति यज्ञस्य सयोनित्वाय ॥ (एष एव,- स्तस्मा,- च्छरमयी, यूपस्तृतीयं, मिथुनत्वाय जन्म, हस्तेना,- ष्टाचत्वारिंशच्च) ॥ ३ ॥

यजमानस्य दण्डप्रदानमुष्टीकरणवाग्यमपूर्वकं नियमानुष्ठानम् ॥ सोमऋषिः ।

वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन् प्राविशत् सैषा वाग्वनस्पतिषु वदति या दुन्दुभौ या तूणवे या वीणायां यद्दीक्षितदण्डं प्रयच्छति वाचमेवाव रुन्धे औदुम्बरो भवत्यूर्ग्वा उदुम्बर ऊर्जमेवाव रुन्धे मुखेन संमितो भवति मुखत एवास्मा ऊर्जं दधाति तस्मान्मुखत ऊर्जा भुञ्जते (१) क्रीते सोमे मैत्रावरुणाय दण्डं प्र यच्छति मैत्रावरुणो हि पुरस्तादृत्विग्भ्यो वाचं विभजति तामृत्विजो यजमाने प्रति

छादयन्ति स्वाहा यज्ञं मनसेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः स्वाहोरोरन्तरिक्षादित्याहान्तरिक्षे हि यज्ञः स्वाहा यज्ञं वातादा रभ इत्याहायं (२) वाव यः पवते स यज्ञस्तमेव साक्षादा रभते मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्या अदीक्षिष्टायं ब्राह्मण इति त्रिरुपांश्वाह देवेभ्य एवैनं प्राऽऽह त्रिरुच्चैरुभयेभ्य एवैनं देवमनुष्येभ्यः प्राऽऽह न पुरा नक्षत्रेभ्यो वाचं वि सृजेद् यत् पुरा नक्षत्रेभ्यो वाचं विसृजेद् यज्ञं विच्छिन्द्या-(३)-दुदितेषु नक्षत्रेषु व्रतं कृणुतेति वाचं वि सृजति यज्ञव्रतो वै दीक्षितो यज्ञमेवाभि वाचं वि सृजति यदि विसृजेद् वैष्णवीमृचमनु ब्रूयाद् यज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं तनोति दैवीं धियं मनामह इत्याह यज्ञमेव तन्म्रदयति सुपारा नो असद् वश इत्याह व्युष्टिमेवाव रुन्धे (४) ब्रह्मवादिनो वदन्ति होतव्यं दीक्षितस्य गृहा३ इ न होतव्या३मिति हविर्वै दीक्षितो यज्जुहुयाद् यजमानस्यावदाय जुहुयाद् यन्न जुहुयाद् यज्ञपरुरन्तरियाद् ये देवा मनोजाता मनोयुज इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोक्षं जुहोति तन्नेव हुतं नेवाहुतꣳ स्वपन्तं वै दीक्षितꣳ रक्षाꣳसि जिघाꣳसन्त्यग्निः (५) खलु वै रक्षोहाऽग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहीत्याहाग्निमेवाधिपां कृत्वा स्वपिति रक्षसामपहत्या अव्रत्यमिव वा एष करोति यो दीक्षितः स्वपिति त्वमग्ने व्रतपा असीत्याहाग्निर्वै देवानां व्रतपतिः स एवैनं व्रतमा लम्भयति देव आ मर्त्येष्वेत्याह देवो (६) ह्येष सन् मर्त्येषु त्वं यज्ञेष्वीड्य इत्याहैतꣳ हि यज्ञेष्वीडतेऽप वै दीक्षितात् सुषुपुष इन्द्रियं देवताः क्रामन्ति विश्वे देवा अभि मामाऽववृत्रन्नित्याहेन्द्रियेणैवैनं देवताभिः सं नयति यदेतद्यजुर्न ब्रूयाद्यावत एव पशूनभि दीक्षेत तावन्तोऽस्य पशवः स्यू रास्वेयत् (७) सोमाऽऽ भूयो भरेत्याहापरिमितानेव पशूनव रुन्धे चन्द्रमसि मम भोगाय भवेत्याह यथादेवतमेवैनाः प्रति गृह्णाति वायवे त्वा वरुणाय त्वेति यदेवमेता नानुदिशेदयथादेवतं दक्षिणा गमयेदा देवताभ्यो वृश्च्येत यदेवमेता अनुदिशति यथादेवतमेव दक्षिणा गमयति न देवताभ्य आ (८) वृश्च्यते देवीरापो अपां नपादित्याह यो मेध्यो यज्ञियः सदेवं तं वो माऽव क्रमिषमिति वावैतदाहाच्छिन्नं तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽत्येति ॥ (मुष्टी, अयं, छिन्द्या,- दुन्धे, अग्नि,-र्वाह देव, इयत्, देवताभ्य आ, चतुस्त्रिꣳशच्च) ॥४॥

प्रायणीयेष्टिविधानम् ॥ सोमऋषिः ।

देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् तेऽन्योऽन्यमुपाधावन् त्वया प्र जानाम त्वयेति तेऽदित्याꣳ समध्रियन्त त्वया प्र जानामेति साऽब्रवीद् वरं वृणै मत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः पञ्च देवता यजति पञ्च दिशो दिशां प्रज्ञात्या (१) अथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पथ्याꣳ स्वस्तिमयजन् प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणा सोमेन प्रतीचीꣳ सवित्रोदीचीमदित्योर्ध्वां पथ्याꣳ स्वस्तिं यजति प्राचीमेव तया दिशं प्र जानाति पथ्याꣳ स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति चक्षुषी वा एते यज्ञस्य यदग्नीषोमौ ताभ्यामेवानु पश्यत्य-(२)-ग्नीषोमाविष्ट्वा सवितारं यजति सवितृप्रसूत एवानु पश्यति सवितारमिष्ट्वाऽदितिं यजतीयं वा अदितिरस्यामेव प्रतिष्ठायानु पश्यत्य-दितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो वै देवानां विशो देवविशं खलु

वै कल्पमानं मनुष्यविशमनु कल्पते यन्मारुतीमृचमन्वाह विशां क्लृप्त्यै ब्रह्मवादिनो वदन्ति प्रयाजवदननूयाजं प्रायणीयं कार्यमनूयाजव-(३)-दप्रयाजमुदयनीयमितीमे वै प्रयाजा अमी अनूयाजाः सैव सा यज्ञस्य सन्ततिस्-तत् तथा न कार्यमात्मा वै प्रयाजाः प्रजाऽनूयाजा यत् प्रयाजानन्तरियादात्मानमन्तरियाद्यदनूयाजानन्तरियात् प्रजामन्तरियाद्यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु (४) परा भवति प्रयाजवदेवानूयाजवत् प्रायणीयं कार्यं प्रयाजवदनूयाजवदुदयनीयं नाऽऽत्मानमन्तरेति न प्रजां न यज्ञः पराभवति न यजमानः प्रायणीयस्य निष्कास उदयनीयमभि निर्वपति सैव सा यज्ञस्य सन्ततिर्-याः प्रायणीयस्य याज्या यत् ता उदयनीयस्य याज्याः कुर्यात् पराङमुं लोकमा रोहेत् प्रमायुकः स्याद्याः प्रायणीयस्य पुरोऽनुवाक्यास्ता (५) उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रति तिष्ठति ॥ (प्रज्ञात्यै, पश्यत्य,- नूयाजव,- यजमानोऽनु, पुरोऽनुवाक्यास्ता, अष्टौ च) ॥५॥

अरुणया गवा सोमक्रयणविधानम् ॥ सोमऋषिः ।

कद्रूश्च वै सुपर्णी चाऽऽत्मरूपयोरस्पर्धेताꣳ सा कद्रूः सुपर्णीमजयत् साऽब्रवीत् तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्वेती-यं वै कद्रूरसौ सुपर्णी छन्दाꣳसि सौपर्णेयाः साऽब्रवीदस्मै वै पितरौ पुत्रान् बिभृतस्तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानं निष्क्रीणीष्वे (१)-ति मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा पशुभिश्च दीक्षया चाऽऽगच्छत् तस्माज्जगती छन्दसां पशव्यतमा तस्मात् पशुमन्तं दीक्षोप नमति त्रिष्टुगुदपतत् त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा दक्षिणाभिश्च (२) तपसा चाऽऽगच्छत् तस्मात् त्रिष्टुभो लोके माध्यन्दिने सवने दक्षिणा नीयन्त एतत् खलु वाव तप इत्याहुर्यः स्वं ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिषा तमस्या अजाऽभ्यरुन्ध तदजाया अजत्वꣳ सा सोमं चाऽऽहरच्चत्वारि चाक्षराणि साऽष्टाक्षरा समपद्यत ब्रह्मवादिनो वदन्ति (३) कस्मात् सत्याद् गायत्री कनिष्ठा छन्दसाꣳ सती यज्ञमुखं परीयायेति यदेवादः सोममाऽहरत् तस्माद्यज्ञमुखं पर्यैत् तस्मात् तेजस्विनीतमा पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं यन्मुखेन समगृह्णात् तदधयत् तस्माद् द्वे सवने शुक्रवती प्रातःसवनं च माध्यन्दिनं च तस्मात् तृतीयसवन ऋजीषमभि षुण्वन्ति धीतमिव हि मन्यन्त (४) आशिरमव नयति सशुक्रत्वायाथो सं भरत्येवैनत् तꣳ सोममाह्रियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात् स तिस्रो रात्रीः परिमुषितोऽवसत् तस्मात् तिस्रो रात्रीः क्रीतः सोमो वसति ते देवा अब्रुवन्त्स्त्रीकामा वै गन्धर्वाः स्त्रिया निष्क्रीणामेति ते वाचꣳ स्त्रियमेकहायनीं कृत्वा तया निरक्रीणन्-त्सा रोहिद्रूपं कृत्वा गन्धर्वेभ्यो (५) ऽपक्रम्यातिष्ठत् तद्रोहितो जन्म ते देवा अब्रुवन्नप युष्मदक्रमीन्नास्मानुपावर्तते वि ह्वयामहा इति ब्रह्म गन्धर्वा अवदन्नगायन् देवाः सा देवान् गायत उपावर्तत तस्माद्गायन्तꣳ स्त्रियः कामयन्ते कामुका एनꣳ स्त्रियो भवन्ति य एवं वेदाथो य एवं विद्वानपि जन्येषु भवति तेभ्य एव ददत्युत यद्बहुतया (६) भवन्त्ये-कहायन्या क्रीणाति वाचैवैनꣳ सर्वया क्रीणाति तस्मादेकहायना

मनुष्या वाचं वदन्त्य-कूटयाऽकर्णयाऽकाणयाऽश्लोणयाऽसप्तशफया क्रीणाति सर्वयैवैनं क्रीणाति यच्छ्वेतया क्रीणीयाद्दुश्चर्मा यजमानः स्याद्यत् कृष्णयाऽनुस्तरणी स्यात् प्रमायुको यजमानः स्याद्यद् द्विरूपया वार्त्रघ्नी स्यात् स वाऽन्यं जिनीयात् तं वाऽन्यो जिनीयादरुणया पिङ्गाक्ष्या (७) क्रीणात्येतद्वै सोमस्य रूपꣳ स्वयैवैनं देवतया क्रीणाति ॥ (निष्क्रीणीष्व, दक्षिणाभिश्च, वदन्ति, मन्यन्ते, गन्धर्वेभ्यो, बहुतया, पिङ्गाक्ष्या, द्वे च) ॥६॥

सोमक्रयप्रकारः ॥ सोमऋषिः ।

तद्धिरण्यमभवत् तस्मादद्भ्यो हिरण्यं पुनन्ति ब्रह्मवादिनो वदन्ति कस्मात् सत्यादनस्थिकेन प्रजाः प्रवीयन्तेऽस्थन्वतीर्जायन्त इति यद्धिरण्यं घृतेऽवधाय जुहोति तस्मादनस्थिकेन प्रजाः प्र वीयन्तेऽस्थन्वतीर्जायन्त एतद्वा अग्नेः प्रियं धाम यद् घृतं तेजो हिरण्यमियं ते शुक्र तनूरिदं वर्च इत्याह सतेजसमेवैनꣳ सतनुं (१) करोत्यथो सं भरत्येवैनं यदबद्धमवदध्याद्गर्भाः प्रजानां परापातुकाः स्युर्बद्धमव दधाति गर्भाणां धृत्यै निष्टर्क्यं बध्नाति प्रजानां प्रजननाय वाग्वा एषा यत् सोमक्रयणी जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति धृता मनसेत्याह मनसा हि वाग्धृता जुष्टा विष्णव इत्याह (२) यज्ञो वै विष्णुर्यज्ञायैवैनां जुष्टां करोति तस्यास्ते सत्यसवसः प्रसव इत्याह सवितृप्रसूतामेव वाचमव रुन्धे काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येष खलु वा अरक्षोहतः पन्था योऽग्नेश्च सूर्यस्य च सूर्यस्य चक्षुराऽरुहमग्नेरक्ष्णः कनीनिकामित्याह य एवारक्षोहतः पन्थास्तꣳ समारोहति (३) वाग्वा एषा यत् सोमक्रयणी चिदसि मनाऽसीत्याह शास्त्येवैनामेतत् तस्माच्छिष्टाः प्रजा जायन्ते चिदसीत्याह यद्धि मनसा चेतयते तद्वाचा वदति मनाऽसीत्याह यद्धि मनसाऽभिगच्छति तत् करोति धीरसीत्याह यद्धि मनसा ध्यायति तद्वाचा (४) वदति दक्षिणाऽसीत्याह दक्षिणा ह्येषा यज्ञियाऽसीत्याह यज्ञियामेवैनां करोति क्षत्रियाऽसीत्याह क्षत्रिया ह्येषाऽदितिरस्युभयतःशीर्ष्णीत्याह यदेवाऽऽदित्यः प्रायणीयो यज्ञानामादित्य उदयनीयस्तस्मादेवमाह यदबद्धा स्यादयता स्याद्यत् पदिबद्धाऽनुस्तरणी स्यात् प्रमायुको यजमानः स्याद् (५) यत् कर्णगृहीता वार्त्रघ्नी स्यात् स वाऽन्यं जिनीयात् तं वाऽन्यो जिनीयान्मित्रस्त्वा पदि बध्नात्वित्याह मित्रो वै शिवो देवानां तेनैवैनां पदि बध्नाति पूषाऽध्वनः पात्वित्याहेयं वै पूषेमामेवास्या अधिपामकः समष्ट्या इन्द्रायाध्यक्षायेत्याहेन्द्रमेवास्या अध्यक्षं करोत्य-(६)-नु त्वा माता मन्यतामनु पितेत्याहानुमतयैवैनया क्रीणाति सा देवि देवमच्छेहीत्याह देवी ह्येषा देवः सोम इन्द्राय सोममित्याहेन्द्राय हि सोम आह्रियते यदेतद्यजुर्न ब्रूयात् पराच्येव सोमक्रयण्येयाद्रुद्रस्त्वाऽऽ वर्तयत्वित्याह रुद्रो वै क्रूरो (७) देवानां तमेवास्यै परस्ताद्दधात्यावृत्त्यै क्रूरमिव वा एतत् करोति यद्रुद्रस्य कीर्तयति मित्रस्य पथेत्याह शान्त्यै वाचा वा एष वि क्रीणीते यः सोमक्रयण्या स्वस्ति सोमसखा पुनरेहि सह रय्येत्याह वाचैव विक्रीय पुनरात्मन् वाचं धत्तेऽनुपदासुकाऽस्य वाग्भवति य एवं वेद (८) ॥ (सतनुं, विष्णव इत्याह, समारोहति, तद्वाचा यजमानः स्यात्, करोति, क्रूरो, वेद) ॥७॥

सोमक्रयण्या गोमध्यमार्गे पदसप्तप्रदप्रकारः ॥ सोमऋषिः ।

षट् पदान्यनु नि क्रामति षड्ढं वाङ्नाति वदत्युत संवत्सरस्यायने यावत्येव वाक्तामव रुन्धे सप्तमे पदे जुहोति सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्धे सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै वस्व्यसि रुद्राऽसीत्याह रूपमेवास्या एतन्महिमानं (१) व्याचष्टे बृहस्पतिस्त्वा सुम्ने रण्वत्वित्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनव रुन्धे रुद्रो वसुभिरा चिकेत्वित्याहाऽऽवृत्त्यै पृथिव्यास्त्वा मूर्धन्ना जिघर्मि देवयजन इत्याह पृथिव्या ह्येष मूर्धा यद्देवयजनमिडायाः पद इत्याहेडायै ह्येतत् पदं यत् सोमक्रयण्यै घृतवति स्वाहे-(२)-त्याह यदेवास्यै पदाद् घृतमपीड्यत तस्मादेवमाह यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्या (३) इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति पशवो वै सोमक्रयण्यै पदं यावत्मूतꣳ सं वपति पशूनेवाव रुन्धेऽस्मे राय इति सं वपत्यात्मानमेवाध्वर्युः (४) पशुभ्यो नान्तरेति त्वे राय इति यजमानाय प्र यच्छति यजमान एव रयिं दधाति तोते राय इति पत्निया अर्धो वा एष आत्मनो यत् पत्नी यथा गृहेषु निधत्ते तादृगेव तत् त्वष्टीमती ते सपेयेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधात्य-स्मै वै लोकाय गार्हपत्य आ धीयते (५) ऽमुष्मा आहवनीयो यद्गार्हपत्य उपवपेदस्मिँल्लोके पशुमान्त्स्याद्यदाहवनीयेऽमुष्मिँल्लोके पशुमान्त्स्यादुभयोरुप वपत्युभयोरेवैनं लोकयोः पशुमन्तं करोति ॥ (महिमानꣳ, स्वाहा, अपहत्या, अध्वर्यु - धीयते, चतुर्विꣳशतिश्च) ॥८॥

क्रयार्थं सोमस्योन्मानप्रकारः ॥ सोमऋषिः ।

ब्रह्मवादिनो वदन्ति विचित्यः सोमा३ न विचित्या३ इति सोमो वा ओषधीनाꣳ राजा तस्मिन् यदापन्नं ग्रसितमेवास्य तद्यद्विचिनुयाद्यथाऽऽस्याद् ग्रसितं निष्खिदति तादृगेव तद्यन्न विचिनुयाद्यथाऽक्षन्नापन्नं विधावति तादृगेव तत् क्षोधुकोऽध्वर्युः स्यात् क्षोधुको यजमानः सोमविक्रयिन्त्सोमꣳ शोधयेत्येव ब्रूयाद्यदीतरं (१) यदीतरमुभयेनैव सोमविक्रयिणमर्पयति तस्मात् सोमविक्रयी क्षोधुकोऽरुणो ह स्माऽऽहौपवेशिः सोमक्रयण एवाहं तृतीयसवनमव रुन्ध इति पशूनां चर्मन् मिमीते पशूनेवाव रुन्धे पशवो हि तृतीयꣳ सवनं यं कामयेतापशुः स्यादित्यृक्षतस्तस्य मिमीतर्क्षं वा अपशव्यमपशुरेव भवति यं कामयेत पशुमान्त्स्या-(२)-दिति लोमतस्तस्य मिमीतैतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवत्यपामन्ते क्रीणाति सरसमेवैनं क्रीणात्य-मात्योऽसीत्याहामैवैनं कुरुते शुक्रस्ते ग्रह इत्याह शुक्रो ह्यस्य ग्रहोऽनसाऽच्छ याति महिमानमेवास्याच्छ यात्य-नसा (३) ऽच्छ याति तस्मादनोवाह्यꣳ समे जीवनं यत्र खलु वा एतꣳ शीर्ष्णा हरन्ति तस्माच्छीर्षहार्यं गिरौ जीवनमभि त्यं देवꣳ सवितारमित्यतिच्छन्दसर्चा मिमीतेऽतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वेभिरेवैनं छन्दोभिर्मिमीते वर्ष्म वा एषा छन्दसां यद-

तिच्छन्दा यदतिच्छन्दसर्चा मिमीते वर्ष्मैवैनꣳ समानानां करोत्येकैकयोत्सर्गं (४) मिमीतेऽयातयाम्नियायातयाम्नियैवैनं मिमीते तस्मान्नानावीर्या अङ्गुलयः सर्वास्वङ्गुष्ठमुप नि गृह्णाति तस्मात् समावद्वीर्योऽन्याभिरङ्गुलिभिस्तस्मात् सर्वा अनु सं चरति[1] यत् सह सर्वाभिर्मिमीत सꣳश्लिष्टा अङ्गुलयो जायेरन्नेकैकयोत्सर्गं मिमीते तस्माद्विभक्ता जायन्ते[2] पञ्च कृत्वो यजुषा मिमीते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पञ्च कृत्वस्तूष्णीं (५) दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धे यद्यजुषा मिमीते भूतमेवाव रुन्धे यत् तूष्णीं भविष्यद्[3] यद्वै तावानेव सोमः स्याद्यावन्तं मिमीते यजमानस्यैव स्यान्नापि सदस्यानां प्रजाभ्यस्त्वेत्युप समूहति सदस्यानेवान्वाभजति वाससोप नह्यति सर्वदेवत्यं वै (६) वासः सर्वाभिरेवैनं देवताभिः समर्धयति पशवो वै सोमः प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति व्यानाय त्वेत्यनु शृन्थति व्यानमेव पशुषु दधाति तस्मात् स्वपन्तं प्राणा न जहति[4] ॥
(इतरं, पशुमानस्यां,- स्वात्वनंसो,- रसगं, तूष्णीꣳ, सर्वदेवत्यं वै, त्रयस्त्रिꣳशच्च) ॥ ९ ॥

अजादिभिर्द्रव्यान्तरैः सोमक्रयणम् ॥ सोमऋषिः ।

यत् कलया ते शफेन ते क्रीणानीति पणेतागोअर्घꣳ सोमं कुर्यादगोअर्घं यजमानमगोअर्घमध्वर्युं गोस्तु महिमानं नाव तिरेद्गवा ते क्रीणानीत्येव ब्रूयाद्गोअर्घमेव सोमं करोति गोअर्घं यजमानं गोअर्घमध्वर्युं न गोर्महिमानमव तिरत्यजया क्रीणाति सतपसमेवैनं क्रीणाति हिरण्येन क्रीणाति सशुक्रमेवै-(१)-नं क्रीणाति धेन्वा क्रीणाति साशिरमेवैनं क्रीणात्यृषभेण क्रीणाति सेन्द्रमेवैनं क्रीणात्यनडुहा क्रीणाति वह्निर्वा अनड्वान् वह्निनैव वह्नि यज्ञस्य क्रीणाति मिथुनाभ्यां क्रीणाति मिथुनस्यावरुद्ध्यै वाससा क्रीणाति सर्वदेवत्यं वै वासः सर्वाभ्य एवैनं देवताभ्यः क्रीणाति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धे[2] (२) तपसस्तनूरसि प्रजापतेर्वर्ण इत्याह पशुभ्य एव तदध्वर्युर्नि ह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेद[3] शुक्रं ते शुक्रेण क्रीणामीत्याह यथायजुरेवैतत्[4] देवा वै येन हिरण्येन सोममक्रीणन् तदभीषहा पुनराऽददत को हि तेजसा विक्रेष्यत इति येन हिरण्येन (३) सोमं क्रीणीयात् तदभीषहा पुनरा ददीत तेज एवाऽऽत्मन् धत्ते[5] अस्मे ज्योतिः सोमविक्रयिणि तम इत्याह ज्योतिरेव यजमाने दधाति तमसा सोमविक्रयिणमर्पयति[6] यदनुपग्रथ्य हन्याद्दन्दशूकास्ताꣳ समाꣳ सर्पाः स्युरिदमहꣳ सर्पाणां दन्दशूकानां ग्रीवा उप ग्रथ्नामीत्याहादन्दशूकास्ताꣳ समाꣳ सर्पा भवन्ति तमसा सोमविक्रयिणं विध्यति[7] स्वान (४) भ्राजेत्याहैते वा अमुष्मिंल्लोके सोममरक्षन् तेभ्योऽधि सोममाऽहरन् यदेतेभ्यः सोमक्रयणान्नानुदिशेदक्रीतोऽस्य सोमः स्यान्नास्यैतेऽमुष्मिंल्लोके सोमꣳ रक्षेयुर्यदेतेभ्यः सोमक्रयणाननुदिशति क्रीतोऽस्य सोमो भवत्येतेऽस्यामुष्मिंल्लोके सोमꣳ रक्षन्ति[8] ॥
(सशुक्रमेवा, व रुन्धे, येन हिरण्येन, स्वान, चतुश्चत्वारिꣳशच्च) ॥ १० ॥

क्रीतस्य सोमस्य शकटेन प्राचीनवंशं प्रतिनयनम् ॥ सोमऋषिः ।

वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शान्त्यै इन्द्रस्योरुमा विश दक्षिणमित्याह देवा वै यꣳ सोममक्रीणन् तमिन्द्रस्योरौ दक्षिण आऽसादयन्नेष खलु वा एतर्हीन्द्रो यो यजते

तस्मादेवमाह[1] आयुषा स्वायुषेत्याह देवता एवान्वारभ्योत् (१) तिष्ठत्युर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो ह्येतर्हि सोमः[2] अदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्[3] वि वा एनमेतदर्धयति यद्ब्राह्मणꣳ सन्तं मैत्रं करोति वारुण्यर्चाऽऽसादयति स्वयैवैनं देवतया समर्धयति[4] वाससा पर्यानह्यति सर्वदेवत्यं वै वासः सर्वाभिरेवै-(२)-नं देवताभिः समर्धयत्यथो रक्षसामपहत्यै[5] वनेषु व्यन्तरिक्षं ततानेत्याह वनेषु हि व्यन्तरिक्षं ततान वाजमर्वत्स्वित्याह वाजꣳ ह्यर्वत्सु पयो अघ्नियास्वित्याह पयो ह्यघ्नियासु हृत्सु क्रतुमित्याह हृत्सु हि क्रतुं वरुणो विक्ष्वग्निमित्याह वरुणो हि विक्ष्वग्निं दिवि सूर्य-(३)-मित्याह दिवि हि सूर्यꣳ सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा एष सोमं दधाति यो यजते तस्मादेवमाह[6] उदु त्यं जातवेदसमिति सौर्यर्चा कृष्णाजिनं प्रत्यानह्यति रक्षसामपहत्यै[7] उस्रावेतं धूर्षाहावित्याह यथायजुरेवैतत्[8] प्र च्यवस्व भुवस्पत इत्याह भूतानाꣳ ह्ये-(४)-ष पतिर्विश्वान्यभि धामानीत्याह विश्वानि ह्येषोऽभि धामानि प्रच्यवते मा त्वा परिपरी विददित्याह यदेवादः सोममाह्रियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात् तस्मादेवमाहापरिमोषाय[9] यजमानस्य स्वस्त्ययन्यसीत्याह यजमानस्यैवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै[10] वरुणो वा एष यजमानमभ्यैति यत् (५) क्रीतः सोम उपनद्धो नमो मित्रस्य वरुणस्य चक्षस इत्याह शान्त्यै[11] आ सोमं वहन्त्यग्निना प्रति तिष्ठते तौ सम्भवन्तौ यजमानमभि सं भवतः पुरा खलु वावैष मेधायाऽऽत्मानमारभ्य चरति यो दीक्षितो[12] यदग्नीषोमीयं पशुमालभत आत्मनिष्क्रयण एवास्य स तस्मात् तस्य नाऽश्यं पुरुषनिष्क्रयण इव ह्यथो खल्वाहु-(६)-रग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयं पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाश्यं[13] वारुण्यर्चा परि चरति स्वयैवैनं देवतया परि चरति[14] ॥ (अन्वारभ्योत्, सर्वाभिरेव, सूर्यं, भूतानाꣳ ह्ये,- ति य,- दाहुः, सप्तविꣳशतिश्च) ॥ ११ ॥

[प्राचीनवꣳशं ४४८। वार्वन्त ३६५। ऋक्सामे ३९८। वा- ४२३।- देवाः २५८। कद्रू- ३६०।- स्वान ४००। वह् १७४। ब्रह्मवादिनो ३३३। य- २४४।- द्वादश ३२७। एकादश ॥ ३८४०॥

[॥ इति षष्ठकाण्डे प्रथमः प्रपाठकः ॥१॥]

सोममन्त्रब्राह्मणनिरूपणम् ।

[अथ द्वितीयः प्रपाठकः ॥२॥]

आतिथ्येष्टिविधानम् ॥ सोमऋषिः ।

यदुभौ विमुच्याऽऽतिथ्यं गृह्णीयाद्यज्ञं वि च्छिन्द्याद्यदुभावविमुच्य यथाऽनागतायाऽऽतिथ्यं क्रियते तादृगेव तद्विमुक्तोऽन्योऽनड्वान् भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यं गृह्णाति यज्ञस्य सन्तत्यै[1] पत्न्यन्वारभते पत्नी हि पारीणह्यस्येशे पत्नियैवानुमतं निर्वपति यद्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवै-(१)-ष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै[2] यावद्भिर्वै राजाऽनुचरैरागच्छति सर्वेभ्यो वै तेभ्य आतिथ्यं क्रियते छन्दाꣳसि खलु वै सोमस्य राज्ञोऽनुचराण्यग्नेरातिथ्यमसि विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति

सोमस्याऽऽतिथ्यमसि विष्णवे त्वेत्याह त्रिष्टुभ एवैतेन करोत्यतिथेरातिथ्यमसि विष्णवे त्वेत्याह जगत्या एवैतेन करोत्यग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वेत्याहानुष्टुभ एवैतेन करोति श्येनाय त्वा सोमभृते (२) विष्णवे त्वेत्याह गायत्रिया एवैतेन करोति[3] पञ्च कृत्वो गृह्णाति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे[4] ब्रह्मवादिनो वदन्ति कस्मात् सत्याद्गायत्रिया उभयत आतिथ्यस्य क्रियत इति यदेवादः सोममा (३) ऽहरत् तस्माद्गायत्रिया उभयत आतिथ्यस्य क्रियते पुरस्ताच्चोपरिष्टाच्च[5] शिरो वा एतद्यज्ञस्य यदातिथ्यं नवकपालः पुरोडाशो भवति तस्मान्नवधा शिरो विष्यूतम्[6] नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता स्तोमेन सम्मितास्तेजस्त्रिवृत् तेज एव यज्ञस्य शीर्षन् दधाति[7] नवकपालः पुरोडाशो भवति ते त्रयस्त्रिकपालास्त्रिवृता प्राणेन सम्मितास्त्रिवृद्वै (४) प्राणस्त्रिवृतमेव प्राणमभिपूर्वं यज्ञस्य शीर्षन् दधाति[8] प्रजापतेर्वा एतानि पक्ष्माणि यदश्ववाला ऐक्षवी तिरश्ची यदाश्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची प्रजापतेरेव तच्चक्षुः सं भरति[9] देवा वै या आहुतीरजुहवुस्ता असुरा निष्कावमादन् ते देवाः कार्ष्मर्यमपश्यन् कर्मण्यो वै कर्मैनेन कुर्वीतेति ते कार्ष्मर्यमयान् परिधी-(५)-नकुर्वत तैर्वै ते रक्षाꣳस्यपाघ्नत यत् कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै[10] सꣳ स्पर्शयति रक्षसामनन्ववचाराय[11] न पुरस्तात् परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यपहन्त्यूर्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप हन्ति[12] यजुषाऽन्यां तूष्णीमन्यां मिथुनत्वाय[13] द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै[14] ब्रह्मवादिनो वदन्त्य-(६)-ग्निश्च वा एतौ सोमश्च कथा सोमायाऽऽतिथ्यं क्रियते नाग्नय इति यदग्नावग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियते[15] अथो खल्वाहुरग्निः सर्वा देवता इति यद्धविरासाद्याग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयति[16] ॥ (पत्निया एव, त्वा, आ, त्रिवृद्वै, परिधीन्, वदन्त्य,- ष्टाचत्वारिꣳशच्च) ॥ १ ॥

तानूनप्त्रसंज्ञकस्याज्यस्य ग्रहणं, अवान्तरदीक्षा च ॥ सोमऋषिः ।

देवासुराः संयत्ता आसन् ते देवा मिथो विप्रिया आसन् तेऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाः पञ्चधा व्यक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेऽमन्यन्तासुरेभ्यो वा इदं भ्रातृव्येभ्यो रध्यामो यन्मिथो विप्रियाः स्मो या न इमाः प्रियास्तनुवस्ताः समवद्यामहै ताभ्यः स निर्ऋच्छाद्यो नः (१) प्रथमोऽन्योऽन्यस्मै द्रुह्यादिति तस्माद्यः सतानूनप्त्रिणां प्रथमो द्रुह्यति स आर्तिमार्च्छति[1] यत् तानूनप्त्रꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवति[2] पञ्च कृत्वोऽव द्यति पञ्चधा हि ते तत् समवाद्यन्ताथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे[3] आपतये त्वा गृह्णामीत्याह प्राणो वा (२) आपतिः प्राणमेव प्रीणाति परिपतय इत्याह मनो वै परिपतिर्मन एव प्रीणाति तनूनप्त्र इत्याह तनुवो हि ते ताः समवाद्यन्त शाक्वरायेत्याह शक्त्यै हि ते ताः समवाद्यन्त शक्मन्नोजिष्ठायेत्याहौजिष्ठꣳ हि ते तदात्मनः समवाद्यन्तानाधृष्टमस्यनाधृष्यमित्याहानाधृष्टꣳ ह्येतदनाधृष्यं देवानामोज (३) इत्याह देवानाꣳ ह्येतदोजोऽभिशस्तिपा अनभिशस्तेन्यमित्याहाभिशस्तिपा ह्येतदनभिशस्तेन्यं

ह्येतदनभिशस्तेन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामित्याह यथायजुरेवैतत्[1] घृतं वै देवा वज्रं कृत्वा सोममघ्नन्नन्तिकमिव खलु वा अस्यैतच्चरन्ति यत् तानूनप्त्रेण प्रचरन्त्यꣳशुरꣳशुष्टे देव सोमाऽऽप्यायतामित्याह य-(४)-देवास्यापुवायते यन्मीयते तदेवास्यैतेनाऽऽप्याययत्या तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वेत्याहोभावेवेन्द्रं च सोमं चाऽऽप्याययत्या प्यायय सखीन्त्सन्या मेधयेत्याहर्त्विजो वा अस्य सखायस्तानेवाऽऽप्याययति स्वस्ति ते देव सोम सुत्यामशीये-(५)-त्याहाऽऽशिषमेवैतामा शास्ते[2] प्र वा एतेऽस्माल्लोकाच्च्यवन्ते ये सोममाप्याययन्त्यन्तरिक्षदेवत्यो हि सोम आप्यायित एष्टा रायः प्रेषे भगायेत्याह द्यावापृथिवीभ्यामेव नमस्कृत्यास्मिंल्लोके प्रति तिष्ठन्ति[3] देवासुराः संयत्ता आसन् ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवता इति ते (६) ऽग्निमेव वरूथं कृत्वाऽसुरानभ्यभवन्नग्निमिव खलु वा एष प्र विशति योऽवान्तरदीक्षामुपैति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यात्मानमेव दीक्षया पाति प्रजामवान्तरदीक्षया[4] सन्तरां मेखलाꣳ समायच्छते प्रजा ह्यात्मनोऽन्तरतरा तप्तव्रतो भवति मदन्तीभिर्मार्जयते निर्ह्यग्निः शीतेन वायति समिद्ध्यै[5] या ते अग्ने (७) रुद्रिया तनूरित्याह स्वयैवैनं देवतया व्रतयति सयोनित्वाय शान्त्यै[6] ॥ (घो, वा, ओजं, आहु च, दशीये,- ति ते, ऽग्न, एकादश च) ॥ २ ॥

उपसद्होमविधानम् ॥ सोमऋषिः ।

तेषामसुराणां तिस्रः पुर आसन्नयस्मय्यवमाऽथ रजताऽथ हरिणी ता देवा जेतुं नाशक्नुवन् ता उपसदैवाजिगीषन् तस्मादाहुर्यश्चैवं वेद यश्च नोपसदा वै महापुरं जयन्तीति त इषुꣳ समस्कुर्वताग्निमनीकꣳ सोमꣳ शल्यं विष्णुं तेजनं तेऽब्रुवन् क इमामसिष्यतीति (१) रुद्र इत्यब्रुवन् रुद्रो वै क्रूरः सोऽस्यत्विति सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति तस्माद्रुद्रः पशूनामधिपतिस्ताꣳ रुद्रोऽवासृजत् स तिस्रः पुरो भित्त्वैभ्यो लोकेभ्योऽसुरान् प्राणुदत[1] यदुपसद उपसद्यन्ते भ्रातृव्यपराणुत्त्यै[2] नान्यामाहुतिं पुरस्ताज्जुहुयाद्यदन्यामाहुतिं पुरस्ताज्जुहुया-(२)-दन्यन्मुखं कुर्यात्[3] स्रुवेणाऽऽघारमा घारयति यज्ञस्य प्रज्ञात्यै[4] पराङतिक्रम्य जुहोति पराच एवैभ्यो लोकेभ्यो यजमानो भ्रातृव्यान् प्र णुदते[5] पुनरत्याक्रम्योपसदं जुहोति प्रणुद्यैवैभ्यो लोकेभ्यो भ्रातृव्याञ्जित्वा भ्रातृव्यलोकमभ्यारोहति[6] देवा वै याः प्रातरुपसद उपासीदन्नह्नस्ताभिरसुरान् प्राणुदन्त याः सायꣳ रात्रियै ताभिर्यत् सायं प्रातरुपसद (३) उपसद्यन्तेऽहोरात्राभ्यामेव तद्यजमानो भ्रातृव्यान् प्र णुदते[7] याः प्रातर्याज्याः स्युस्ताः सायं पुरोऽनुवाक्याः कुर्यादयातयामत्वाय[8] तिस्र उपसद उपैति त्रय इमे लोका इमानेव लोकान् प्रीणाति[9] षट् सं पद्यन्ते षड्वा ऋतव ऋतूनेव प्रीणाति[10] द्वादशाहीने सोम उपैति द्वादश मासाः संवत्सरः संवत्सरमेव प्रीणाति[11] चतुर्विꣳशतिः सं (४) पद्यन्ते चतुर्विꣳशतिरर्धमासा अर्धमासानेव प्रीणात्याराग्रामवान्तरदीक्षामुपेयाद्यः कामयेतास्मिन् मे लोकेऽर्धुकꣳ स्यादित्येकमग्रेऽथ द्वावथ त्रीनथ चतुर एषा वा आराग्राऽवान्तरदीक्षाऽस्मिन्नेवास्मै लोकेऽर्धुकं भवति[12] परोवरीयसीमवान्तरदीक्षामुपेयाद्यः कामयेतामुष्मिन् मे लोकेऽर्धुकꣳ स्यादिति चतुरोऽग्रे (५) ऽथ त्रीनथ द्वावथैकमेषा वै परोवरीयस्यवान्तरदीक्षाऽमुष्मिन्नेवास्मै लोकेऽर्धुकं भवति[13] ॥ (असिष्यतीति, जुहुयात्, सायम्प्रातरुपसदः,- चतुर्विꣳशतिः सं, चतुरोऽग्रे, षोडश च) ॥ ३ ॥

वेदिकरणाय वेद्युपरिपादनम् ॥ सोमऋषिः ।

सुवर्गं वा एते लोकं यन्ति य उपसदमुपयन्ति तेषां य उन्नयते हीयत एव स नोदनैषीति सूत्रीयमिवं यो वै स्वार्थेतां यतां श्रान्तो हीयत उत स निष्टाय सह वसति तस्मात् सकृदुन्नीय नापरमुन्नयेत दध्नोन्नयेतैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे (१) यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा स पृथिवीं प्राविशत् तं देवा हस्तान्त्सꣳरभ्यैच्छन् तमिन्द्र उपर्युपर्यत्यक्रामत् सोऽब्रवीत् को माऽयमुपर्युपर्यत्यक्रमीदित्यहं दुर्गे हन्तेत्यथ कस्त्वमित्यहं दुर्गादाहर्तेति सोऽब्रवीद् दुर्गे वै हन्ताऽवोचथा वराहोऽयं वाममोषः (२) सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्ति तं जहि यदि दुर्गे हन्ताऽसीति स दर्भपुञ्जीलमुद्वृह्य सप्त गिरीन् भित्त्वा तमहन्त्सोऽब्रवीद् दुर्गाद्वा आहर्ताऽवोचथा एतमा हरेति तमेभ्यो यज्ञ एव यज्ञमाऽहरद्यत् तद्वित्तं वेद्यमसुराणामविन्दन्त तदेकं वेदेर्वेदित्व—मसुराणां (३) वा इयमग्र आसीद्यावदासीनः परापश्यति तावद्देवानां ते देवा अब्रुवन्नस्त्वेव नोऽस्यामपीति कियद्वो दास्याम इति यावदियꣳ सलावृकी त्रिः परिक्रामति तावन्नो दत्तेति स इन्द्रः सलावृकी रूपं कृत्वेमां त्रिः सर्वतः पर्यक्रामत् तदिमामविन्दन्त यदिमामविन्दन्त तद्वेदेर्वेदित्वꣳ (४) सा वा इयꣳ सर्वैव वेदिरियति शक्ष्यामीति त्वा अवमाय यजन्ते त्रिꣳशत् पदानि पश्चात् तिरश्ची भवति षट्त्रिꣳशत् प्राची चतुर्विꣳशतिः पुरस्तात् तिरश्ची दशदश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्ध उद्धन्ति यदेवास्या अमेध्यं तदप हन्त्यु—द्धन्ति तस्मादोषधयः परा भवन्ति (५) बर्हिः स्तृणाति तस्मादोषधयः पुनरा भवन्त्यु—त्तरं बर्हिष उत्तरबर्हिः स्तृणाति प्रजा वै बर्हिर्यजमान उत्तरबर्हिर्यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरः ॥ (रुन्धे, वाममोषो, वेद्यमसुराणां, वेदित्वं, भवन्ति, पञ्चविꣳशतिश्च) ॥ ४ ॥

दीक्षितस्य व्रतनिर्णयः ॥ सोमऋषिः ।

यद्वा अनीशानो भारमादत्ते वि वै स लिशते यद् द्वादश साह्नस्योपसदः स्युस्तिस्रोऽहीनस्य यज्ञस्य विलोम क्रियेत तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्यत्वायाथो सलोम क्रियते वत्सस्यैकः स्तनो भागी हि सोऽथैकꣳ स्तनं व्रतमुपैत्यथ द्वावथ त्रीनथ चतुर एतद्वै (१) क्षुरपवि नाम व्रतं येन प्र जातान् भ्रातृव्यान् नुदते प्रति जनिष्यमाणानथो कनीयसैव भूय उपैति चतुरोऽग्रे स्तनान् व्रतमुपैत्यथ त्रीनथ द्वावथैकमेतद्वै सुजघनं नाम व्रतं तपस्यꣳ सुवर्ग्यमथो प्रैव जायते प्रजया पशुभि—र्यवागू राजन्यस्य व्रतं क्रूरेव वै यवागूः क्रूर इव (२) राजन्यो वज्रस्य रूपꣳ समृद्ध्या आमिक्षा वैश्यस्य पाकयज्ञस्य रूपं पुष्ट्यै पयो ब्राह्मणस्य तेजो वै ब्राह्मणस्तेजः पयस्तेजसैव तेजः पय आत्मन् धत्तेऽथो पयसा वै गर्भा वर्धन्ते गर्भ इव खलु वा एष यद्दीक्षितो यदस्य पयो व्रतं भवत्यात्मानमेव तद्वर्धयति त्रिव्रतो वै मनुरासीद् द्विव्रता असुरा एकव्रता (३) देवाः प्रातर्मध्यन्दिने सायं तन्मनोर्व्रतमासीत् पाकयज्ञस्य रूपं पुष्ट्यै प्रातश्च सायं चासुराणां निर्मध्यं क्षुधो रूपं ततस्ते पराऽभवन् मध्यन्दिने मध्यरात्रे देवानां ततस्तेऽभवन्त्सुवर्गं लोकमायन् यदस्य मध्यन्दिने मध्यरात्रे व्रतं भवति मध्यतो वा अन्नेन

भुङ्क्ते मध्यत एव तदूर्जं धत्ते भ्रातृव्याभिभूत्यै भवत्यात्मना (४) पराऽस्य भ्रातृव्यो भवति गर्भो वा एष यद्दीक्षितो योनिर्दीक्षितविमितं यद्दीक्षितो दीक्षितविमितात् प्रवसेद्यथा योनेर्गर्भः स्कन्दति तादृगेव तत् प्रवस्तव्यमात्मनो गोपीथाय—एष वै व्याघ्रः कुलगोपो यदग्निस्तस्माद्यद्दीक्षितः प्रवसेत् स एनमीश्वरोऽनूत्थाय हन्तोर्न प्रवस्तव्यमात्मनो गुप्त्यै दक्षिणतः शय एतद्वै यजमानस्या-(५)-ऽऽयतनꣳ स्व एवाऽऽयतने शयेऽग्निमभ्यावृत्य शये देवता एव यज्ञमभ्यावृत्य शये ॥ (एतद्वै,- क्रूर इवै,- कव्रता, आत्मना, यजमानस्य, त्रयोदश च) ॥ ५ ॥

यागार्थं काम्या भूमयः ॥ सोमऋषिः ।

पुरोहविषि देवयजने याजयेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदभि सुवर्गं लोकं जयेदि—त्येतद्वै पुरोहविर्देवयजनं यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमप आदित्यमभि विपश्यत्यु—पैनमुत्तरो यज्ञो नमत्यभि सुवर्गं लोकं जयत्या—प्ते देवयजने याजयेद्भ्रातृव्यवन्तं पन्थां वाऽधिस्पर्शयेत् कर्तं वा यावन्नानसे यातवै (१) न रथायैतद्वा आप्तं देवयजन—माप्नोत्येव भ्रातृव्यं नैनं भ्रातृव्य आप्नोत्ये—कोन्नते देवयजने याजयेत् पशुकाम—मेकोन्नताद्वै देवयजनादङ्गिरसः पशूनसृजन्ता—न्तरा सदोहविर्धाने उन्नतꣳ स्यादेतद्वा एकोन्नतं देवयजनं पशुमानेव भवति त्र्युन्नते देवयजने याजयेत् सुवर्गकामं त्र्युन्नताद्वै देवयजनादङ्गिरसः सुवर्गं लोकमायन्—न्तराऽऽहवनीयं च हविर्धानं चो-(२)-न्नतꣳ स्यादन्तरा हविर्धानं च सदश्चान्तरा सदश्च गार्हपत्यं चैतद्वै त्र्युन्नतं देवयजनꣳ सुवर्गमेव लोकमेति प्रतिष्ठिते देवयजने याजयेत् प्रतिष्ठाकाम—मेतद्वै प्रतिष्ठितं देवयजनं यत् सर्वतः समं प्रत्येव तिष्ठति यत्रान्यान्या ओषधयो व्यतिषक्ताः स्युस्तद्याजयेत् पशुकाम—मेतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै पशू-(३)-नव रुन्धे पशुमानेव भवति निर्ऋतिगृहीते देवयजने याजयेद्यं कामयेत निर्ऋत्याऽस्य यज्ञं ग्राहयेयमित्ये—तद्वै निर्ऋतिगृहीतं देवयजनं यत् सदृश्यै सत्या ऋक्षं निर्ऋत्यैवास्य यज्ञं ग्राहयति व्यावृत्ते देवयजने याजयेद्व्यावृत्कामं यं पात्रे वा तल्पे वा मीमाꣳसेरन् प्राचीनमाहवनीयात् प्रवणꣳ स्यात् प्रतीचीनं गार्हपत्यादेतद्वै व्यावृत्तं देवयजनं वि पाप्मना (४) भ्रातृव्येणाऽऽ वर्तते नैनं पात्रे न तल्पे मीमाꣳसन्ते कार्ये देवयजने याजयेद्भूतिकामं कार्यो वै पुरुषो भवत्येव ॥ (यातवै, हविर्धानं च, पशून्, पाप्मना, अष्टादश च) ॥ ६ ॥

उत्तरवेदिनिर्माणम् ॥ सोमऋषिः ।

तेभ्य उत्तरवेदिः सिꣳही रूपं कृत्वोभयानन्तराऽपक्रम्यातिष्ठत् ते देवा अमन्यन्त यतरान् वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तामुपामन्त्रयन्त साऽब्रवीद्वरं वृणै सर्वान् मया कामान् व्यश्नवथ पूर्वां तु माऽग्नेराहुतिरश्नवता इति तस्मादुत्तरवेदिं पूर्वामग्नेर्व्याघारयन्ति वारेवृतꣳ ह्यस्यै शम्यया परि मिमीते (१) मात्रैवास्यै साऽथो युक्तेनैव युक्तमव रुन्धे वित्तायनी मेऽसीत्याह वित्ता ह्येनानावत् तिक्तायनी मेऽसीत्याह तिक्तान् ह्येनानावदवतान्मा नाथितमित्याह नाथितान् ह्येनानावदवतान्मा व्यथितमित्याह व्यथितान् ह्येनानाव—द्विदेरग्निर्नभो नामा-(२)-ग्ने अङ्गिर इति त्रिर्हरति य एवैषु लोकेष्व-

ग्नयस्तानेवाव रुन्धे तूष्णीं चतुर्थꣳ हरत्यनिरुक्तमेवाव रुन्धे सिꣳहीरसि महिषीरसीत्याह सिꣳही ह्येषा रूपं कृत्वोभयानन्तराऽपक्रम्यातिष्ठ—दुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामित्याह यजमानमेव प्रजया पशुभिः प्रथयति ध्रुवा (३) ऽसीति सꣳ हन्ति धृत्यै देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेत्यव चोक्षति प्र च किरति शुद्ध्या इन्द्रघोषस्त्वा वसुभिः पुरस्तात् पात्वित्याह दिग्भ्य एवैनां प्रोक्षति देवाꣳश्चेदुत्तरवेदिरुपावर्तीहैव वि जयामहा इत्यसुरा वज्रमुद्यत्य देवानभ्यायन्त तानिन्द्रघोषो वसुभिः पुरस्तादपा-(४)-नुदत मनोजवाः पितृभिर्दक्षिणतः प्रचेता रुद्रैः पश्चाद्विश्वकर्माऽऽदित्यैरुत्तरतो यदेवमुत्तरवेदिं प्रोक्षति दिग्भ्य एव तद्यजमानो भ्रातृव्यान् प्र णुदत इन्द्रो यतीन्त्सालावृकेभ्यः प्रायच्छत् तान् दक्षिणत उत्तरवेद्या आदन् यत् प्रोक्षणीनामुच्छिष्येत तद्दक्षिणत उत्तरवेद्यै नि नयेद्यदेव तत्र क्रूरं तत् तेन शमयति यं द्विष्यात् तं ध्यायेच्छुचै-(५)-वैनमर्पयति ॥ (मिमीते, नाम, ध्रुवा, ऽपं, शुचा, त्रीणि च) ॥ ७ ॥

व्याघारणं सम्भारस्थापनं च ॥ सोमऋषिः ।

सोत्तरवेदिरब्रवीत् सर्वान् मया कामान् व्यश्नवथेति ते देवा अकामयन्तासुरान् भ्रातृव्यानभि भवेमेति तेऽजुहवुः सिꣳहीरसि सपत्नसाही स्वाहेति तेऽसुरान् भ्रातृव्यानभ्यभवन् तेऽसुरान् भ्रातृव्यानभिभूयाकामयन्त प्रजां विन्देमहीति तेऽजुहवुः सिꣳहीरसि सुप्रजावनिः स्वाहेति ते प्रजामविन्दन्त ते प्रजां वित्त्वा (१) ऽकामयन्त पशून् विन्देमहीति तेऽजुहवुः सिꣳहीरसि रायस्पोषवनिः स्वाहेति ते पशूनविन्दन्त ते पशून् वित्त्वाऽकामयन्त प्रतिष्ठां विन्देमहीति तेऽजुहवुः सिꣳहीरस्यादित्यवनिः स्वाहेति त इमां प्रतिष्ठामविन्दन्त त इमां प्रतिष्ठां वित्त्वाऽकामयन्त देवता आशिष उपेयामेति तेऽजुहवुः सिꣳहीरस्या वह देवान् देवयते (२) यजमानाय स्वाहेति ते देवता आशिष उपाऽऽयन् पञ्च कृत्वो व्याघारयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धेऽक्षया व्याघारयति तस्मादक्षया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै भूतेभ्यस्त्वेति स्रुचमुद्गृह्णाति य एव देवा भूतास्तेषां तद्भागधेयं तानेव तेन प्रीणाति पौतुद्रवान् परिधीन् परि दधात्येषां (३) लोकानां विधृत्या अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमारिष्यतीति स निलायत स यां वनस्पतिष्ववसत् तां पूतुद्रौ यामोषधीषु ताꣳ सुगन्धितेजने यां पशुषु तां पेत्वस्यान्तरा शृङ्गे तं देवताः प्रैषमैच्छन् तमन्वविन्दन् तमब्रुव-(४)-न्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणां भागधेयमसदिति तस्माद्यद्गृहीतस्याहुतस्य बहिःपरिधि स्कन्दति तेषां तद्भागधेयं तानेव तेन प्रीणाति सोऽमन्यतास्थन्वन्तो मे पूर्वे भ्रातरः प्रामेषतास्थानि शातया इति स यान्य-(५)-स्थान्यशातयत तत् पूतुद्र्वभवद्यन्माꣳसमुपमृतं तद्गुल्गुलु यदेतान्त्सम्भाराꣳसंभरत्यग्निमेव तत् सं भरत्य—ग्नेः पुरीषमसीत्याहाग्नेर्ह्येतत् पुरीषं यत् सम्भारा अथो खल्वाहुरेते वावैनं ते भ्रातरः परि शेरे यत् पौतुद्रवाः परिधय इति ॥ (वित्त्वा, देवयते, एषां,- मब्रुवन्, यानि, चतुश्चत्वारिꣳशच्च) ॥ ८ ॥

हविर्धानानस्य शकटे अन्तर्भाव्य हविर्धानमण्डपनिर्माणम् ॥ सोमऋषिः ।

बद्धमव स्यति वरुणपाशादेवैनं मुञ्चति प्र णेनेक्ति मेध्य एवैनं करोति सावित्रियर्चा हुत्वा हविर्धाने प्र वर्तयति सवितृप्रसूत एवैने प्र वर्तयति वरुणो वा एष दुर्वागुभयतो बद्धो यदक्षः स यदुत्सर्जेद्यजमानस्य गृहानभ्युत्सर्जेत् सुवागेव दुर्याꣳ आ वदेत्याह गृहा वै दुर्याः शान्त्यै पत्न्यु-(१)-पानक्ति पत्नी हि सर्वस्य मित्रं मित्रत्वाय यद्वै पत्नी यज्ञस्य करोति मिथुनं तदथो पत्निया एवैष यज्ञस्यान्वारम्भोऽनवच्छित्त्यै वर्त्मना वा अन्वित्य यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति वैष्णवीभ्यामृग्भ्यां वर्त्मनोर्जुहोति यज्ञो वै विष्णुर्यज्ञादेव रक्षाꣳस्यप हन्ति यदध्वर्युरनग्नावाहुतिं जुहुयादन्धोऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्यु-(२)-र्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति प्राची प्रेतमध्वरं कल्पयन्ती इत्याह सुवर्गमेवैने लोकं गमयत्य—त्र रमेथां वर्ष्मन् पृथिव्या इत्याह वर्ष्म ह्येतत् पृथिव्या यद्देवयजनꣳ शिरो वा एतद्यज्ञस्य यद्धविर्धानं दिवो वा विष्णवुत वा पृथिव्या (३) इत्याशीर्पदयर्चा दक्षिणस्य हविर्धानस्य मेथीं नि हन्ति शीर्षत एव यज्ञस्य यजमान आशिषोऽव रुन्धे दण्डो वा औपरस्तृतीयस्य हविर्धानस्य वषट्कारेणाक्षमच्छिनद्यत् तृतीयं छदिर्हविर्धानयोरुदाह्रियते तृतीयस्य हविर्धानस्यावरुद्ध्यै शिरो वा एतद्यज्ञस्य यद्धविर्धानं विष्णो रराटमसि विष्णोः पृष्ठमसीत्याह तस्मादेतावद्धा शिरो विष्यूतं विष्णोः (४) स्यूरसि विष्णोर्ध्रुवमसीत्याह वैष्णवꣳ हि देवतया हविर्धानं यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत् तं न विस्रꣳसयेदमेहेनाध्वर्युः प्र मीयेत तस्मात् स विस्रस्यः ॥ (पत्नी, हन्यु,-र्वा पृथिव्या, विष्यूतं विष्णोः, षड्विꣳशतिश्च) ॥ ९ ॥

सदो निर्माणम् ॥ सोमऋषिः ।

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै वज्र इव वा एषा यदभ्रिरभ्रिरसि नारिरसीत्याह शान्त्यै काण्डेकाण्डे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रक्षः परिलिखिता अरातय इत्याह रक्षसामपहत्यै (१) इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव द्वेष्टि यश्चैनं द्वेष्टि तयोरेवानन्तरायं ग्रीवाः कृन्तति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याहैभ्य एवैनां लोकेभ्यः प्रोक्षति परस्तादर्वाचीं प्रोक्षति तस्मात् (२) परस्तादर्वाचीं मनुष्या ऊर्जमुपजीवन्ति क्रूरमिव वा एतत् करोति यत् खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यव ऊर्गुदुम्बर ऊर्जैवोर्जꣳ समर्धयति यजमानेन सम्मितौदुम्बरी भवति यावानेव यजमानस्तावतीमेवास्मिन्नूर्जं दधाति पितृणाꣳ सदनमसीति बर्हिरव स्तृणाति पितृदेवत्यꣳ (३) ह्येतद्यन्निखातं यद्बर्हिरनवस्तीर्य मिनुयात् पितृदेवत्या निखाता स्याद्बर्हिरवस्तीर्य मिनोत्यस्यामेवैनां मिनोत्यथो स्वारुहमेवैनां करोत्यु—द्दिवꣳ स्तभानाऽन्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै द्युतानस्त्वा मारुतो मिनोत्वित्याह द्युतानो ह स्म वै मारुतो देवानामौदुम्बरीं मिनोति तेनैवै-(४)-नां मिनोति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवै—तद्घृतेन द्यावापृथिवी आ पृणेथामित्यौदुम्बर्यां जुहोति द्यावापृथिवी एव रसे-

नानक्त्यो—न्तमन्ववस्रावयत्यान्तमेव यजमानं तेजसाऽनक्त्यै—न्द्रमसीति छदिरधि नि दधात्यैन्द्रं हि देवतया सदो विश्वजनस्य छायेत्याह विश्वजनस्य ह्येषा छाया यत् सदो[16] नवच्छदि (५) तेजस्कामस्य मिनुयात् त्रिवृता स्तोमेन संमितं तेजस्त्रिवृत् तेजस्व्येव भवत्येकादशच्छदीन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशच्छदि भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशच्छदि प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या एकविंशतिच्छदि प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या उदरं वै सद ऊर्गुदुम्बरो मध्यत औदुम्बरीं मिनोति मध्यत एव प्रजानामूर्जं दधाति तस्मान् (६) मध्यत ऊर्जा भुञ्जते[18] यजमानलोके वै दक्षिणानि छदींषि भ्रातृव्यलोक उत्तराणि दक्षिणान्युत्तराणि करोति यजमानमेवायजमानादुत्तरं करोति तस्माद्यजमानोऽयजमानादुत्तरो[19] ऽन्तर्वर्तान् करोति व्यावृत्त्यै तस्मादरण्यं प्रजा उप जीवन्ति[20] परि त्वा गिर्वणो गिर इत्याह यथायजुरेवैत—दिन्द्रस्य स्यूरसीन्द्रस्य ध्रुवमसीत्याहैन्द्रं हि देवतया सदो[22] (७) यं प्रथमं ग्रन्थिं ग्रथ्नीयाद्यत् तं न विस्रंसयेदमेहेनाध्वर्युः प्र मीयेत तस्मात् स विस्रस्यः[23] ॥ (भवत्यै, तस्मात्, विश्वदेवत्यं, तेनैव, नवच्छदि, तस्मात्, सदः, पञ्चदश च) ॥ १० ॥

हविर्धाने चतुर्णामुपरवाणां निर्माणम् ॥ सोमऋषिः ।

शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा हविर्धाने खायन्ते तस्माच्छीर्षन् प्राणा अधस्तात् खायन्ते तस्मादधस्ताच्छीर्ष्णः प्राणा रक्षोहणो वलगहनो वैष्णवान् खनामीत्याह वैष्णवा हि देवतयोपरवा असुरा वै निर्यन्तो देवानां प्राणेषु वलगान् न्यखनन् तान् बाहुमात्रेऽन्वविन्दन् तस्माद्बाहुमात्राः खायन्त इदमहं तं वलगमुद्वपामि (१) यं नः समानो यमसमानो निचखानेत्याह द्वौ वाव पुरुषौ यश्चैव समानो यश्चासमानो यमेवास्मै तौ वलगं निखनतस्तमेवोद्वपति संतृणत्ति तस्मात् संतृण्णा अन्तरतः प्राणा न सं भिनत्ति तस्मादसंभिन्नाः प्राणा अपोऽव नयति तस्मादार्द्रा अन्तरतः प्राणा यवमतीरव नयत्यू-(२)-र्ग्वै यवः प्राणा उपरवाः प्राणेष्वेवोर्जं दधाति बर्हिरव स्तृणाति तस्माल्लोमशा अन्तरतः प्राणा आज्येन व्याघारयति तेजो वा आज्यं प्राणा उपरवाः प्राणेष्वेव तेजो दधाति हनू वा एते यज्ञस्य यदधिषवणे न सं तृणत्त्यसंतृण्णे हि हनू अथो खलु दीर्घसोमे संतृद्ये धृत्यै[13] शिरो वा एतद्यज्ञस्य यद्धविर्धानं (३) प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता मुखमाहवनीयो नासिकोत्तरवेदिरुदरं सदो यदा खलु वै जिह्वया दत्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्धाने चर्मन्नधि ग्रावभिरभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह एवै-(४)-नामियं वै विराट् तस्यै त्वक् चर्मोधोऽधिषवणे स्तना उपरवा ग्रावाणो वत्सा ऋत्विजो दुहन्ति सोमः पयो य एवं वेद दुह एवैनाम् (वपामि, यवमतीरव नयति, हविर्धानं,- मेव, त्रयोविंशतिश्च) ॥ ११ ॥

[य- ३४१।- इंद्रपुरा- ३६१।- स्वेदाय २६६। सुवर्गं २७५। यद् २६३। पुरोहविषि २१८। तेभ्यः २५३। सा २९२। ब्रूत २२६। देवस्य ३६५। शिर २२३। एकादश ॥ ३०८५]

[॥ इति षष्ठकाण्डे द्वितीयः प्रपाठकः ॥२॥]

सोममन्त्रब्राह्मणनिरूपणम् ।

[अथ तृतीयः प्रपाठकः ॥३॥]

आग्नीध्रीयसदः प्रभृतिस्थानेषु धिष्णियाख्यस्थलविशेषनिर्माणम् ॥ सोमऋषिः ।

चात्वालाद्धिष्णियानुप वपति योनिर्वै यज्ञस्य चात्वालं यज्ञस्य सयोनित्वाय देवा वै यज्ञं पराऽजयन्त तमाग्नीध्रात् पुनरपाजयन्नेतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदाग्नीध्राद्धिष्णियान् विहरति यदेव यज्ञस्यापराजितं तत एवैनं पुनस्तनुते पराजित्येव खलु वा एते यन्ति ये बहिष्पवमानं सर्पन्ति बहिष्पवमाने स्तुत (१) आहाग्नीदग्नीन् वि हर बर्हिः स्तृणाहि पुरोडाशां अलं कुर्विति यज्ञमेवापजित्य पुनस्तन्वाना यन्त्य—ङ्गारैर्द्वे सवने वि हरति शलाकाभिस्तृतीयं सशुक्रत्वायाथो सं भरत्येवैनं—धिष्णिया वा अमुष्मिंल्लोके सोममरक्षन् तेभ्योऽधि सोममाऽहरन् तमन्ववायन् तं पर्यविशन् य एवं वेद विन्दते (२) परिवेष्टारं ते सोमपीथेन व्यार्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान् देवा अब्रुवन् द्वेद्वे नामनी कुरुध्वमथ प्र वाऽऽप्स्यथ न वेत्यग्नयो वा अथ धिष्णियास्तस्माद् द्विनामा ब्राह्मणोऽर्धुकस्तेषां ये नेदिष्ठं पर्यविशन् ते सोमपीथं प्राऽऽप्नुवन्नाहवनीय आग्नीध्रीयो होत्रीयो मार्जालीयस्तस्मात् तेषु जुह्वत्य—तिहाय वषट् करोति वि हि (३)-ते सोमपीथेनाऽऽर्ध्यन्त देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन् तांस्ताभिः प्राणुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन् तांस्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यङ्ङासीनो धिष्णियान् व्याघारयति पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान् प्र णुदते तस्मात् पराचीः प्रजाः प्र वीयन्ते प्रतीचीः (४)-र्जायन्ते प्राणा वा एते यद्धिष्णिया यदध्वर्युः प्रत्यङ् धिष्णियानतिसर्पेत् प्राणान्त्सं कर्षेत् प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वः खलु वै नाभ्यै प्राणोऽवाङपानो यदध्वर्युः प्रत्यङ् होतारमतिसर्पेदपाने प्राणं दध्यात् प्रमायुकः स्या—न्नाध्वर्युरुप गायेद्वाग्वीर्यो वा अध्वर्युर्यदध्वर्युरुपगायेदुद्गात्रे (५) वाचं सं प्र यच्छेदुपदासुकाऽस्य वाक् स्या—द्ब्रह्मवादिनो वदन्ति नासंस्थिते सोमेऽध्वर्युः प्रत्यङ् सदोऽतीयादथ कथा दाक्षिणानि होतुमेति यामो हि स तेषां कस्मा अह देवा यामं वाऽयामं वाऽनु ज्ञास्यन्तीत्यु—त्तरेणाऽऽग्नीध्रं परीत्य जुहोति दाक्षिणानि न प्राणान्त्सं कर्षति न्यन्ये धिष्णिया उप्यन्ते (६) नान्ये यान् निवपति तेन तान् प्रीणाति यान् न निवपति यदनुदिशति तेन तान् ॥ (स्तुते, विन्दते, हि, प्रतीचीः,- रुद्गात्रे, उप्यन्ते, चतुर्दश च) ॥ १ ॥

वैसर्जनहोमः, अग्नीषोमयोराग्नीध्रीये हविर्धाने च प्रणयनम् ॥ सोमऋषिः ।

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्वैसर्जनानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमत आहवनीये जुहोति सुवर्गमेवैनं लोकं गमयति देवान् वै सुवर्गं लोकं यतो रक्षांस्यजिघांसन्ते सोमेन राज्ञा रक्षांस्यपहत्याप्पुमात्मानं कृत्वा सुवर्गं लोकमायन् रक्षसामनुपलाभायाऽऽत्तः सोमो भवत्यथ (१) वैसर्जनानि जुहोति रक्षसामपहत्यै त्वं सोम तनूकृद्भ्य इत्याह तनूकृद्ध्येष द्वेषोभ्योऽन्यकृतेभ्य इत्याहान्यकृतानि हि रक्षांस्यु—रु यन्ताऽसि वरूथमित्याहोरु णस्कृधीति वा वैतदाह जुषाणो अप्तुराज्यस्य वेत्वित्याहाप्पुमेव यजमानं कृत्वा सुवर्गं लोकं

गमयति रक्षसामनुपलाभायाऽऽ सोमो ददत (२) आ ग्राव्ण आ वायव्यान्या द्रोणकलशमुत् पत्नीमा नयन्त्यन्वनांसि प्र वर्तयन्ति यावदेवास्यास्ति तेन सह सुवर्गं लोकमेति नयवत्यर्चाऽऽग्नीध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै ग्राव्णो वायव्यानि द्रोणकलशमाग्नीध्र उप वासयति वि ह्येनं तैर्गृह्णते यत् सहोपवासयेदपवायेत सौम्यर्चा प्र पादयति स्वयै-(३)-वैनं देवतया प्र पादयत्य—दित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैत—द्यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सं प्र यच्छत्ये—तत् त्वं सोम देवो देवानुपागा इत्याह देवो ह्येष सन् (४) देवानुपैतीदमहं मनुष्यो मनुष्यानित्याह मनुष्यो ह्येष सन् मनुष्यानुपैति यदेतद्यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्यात् सह प्रजया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं लोकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवानां स्वधा पितृभ्य इत्याह स्वधाकारो हि (५) पितृणा—मिदमहं निर्वरुणस्य पाशादित्याह वरुणपाशादेव निर्मुच्यतेऽग्ने व्रतपत आत्मनः पूर्वा तनूरादेयेत्याहुः को हि तद्वेद यद्वसीयान्त्स्वे वशे भूते पुनर्वा ददाति न वेति ग्रावाणो वै सोमस्य राज्ञो मलिम्लुसेना य एवं विद्वान् ग्राव्ण आग्नीध्र उपवासयति नैनं मलिम्लुसेना विन्दति (६) ॥ (अथ, ददत, स्वया, सन्, हि, विन्दति) ॥ २ ॥

यूपच्छेदनम् ॥ सोमऋषिः ।

वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतयाऽच्छैत्य—त्यन्यानगां नान्यानुपागामित्याहाति ह्यन्यानेति नान्यानुपैत्यर्वाक् त्वा परैरविदं परोऽवरैरित्याहार्वाग्घ्येनं परैर्विन्दति परोऽवरैस्तं त्वा जुषे (१) वैष्णवं देवयज्याया इत्याह देवयज्यायै ह्येनं जुषते देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्त्योषधे त्रायस्वैनं स्वधिते मैनं हिंसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत् तमप्या हरेत् सतेजसमेवैनमा हरती—(२)-मे वै लोका यूपात् प्रयतो बिभ्यति दिवमग्रेण मा लेखीरन्तरिक्षं मध्येन मा हिंसीरित्याहैभ्य एवैनं लोकेभ्यः शमयति वनस्पते शतवल्शो वि रोहेत्याव्रश्चने जुहोति तस्माद्व्रश्चनाद्वृक्षाणां भूयांस उत्तिष्ठन्ति सहस्रवल्शा वि वयं रुहेमेत्याहाऽऽशिषमेवैतामा शास्तेऽनक्षसङ्गं (३) वृश्चे—द्यदक्षसङ्गं वृश्चेदधर्षं यजमानस्य प्रमायुकं स्या—द्यं कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै वृश्चेदेष वै वनस्पतीनामप्रतिष्ठितोऽप्रतिष्ठित एव भवति यं कामयेतापशुः स्यादित्यपर्णं तस्मै शुष्काग्रं वृश्चेदेष वै वनस्पतीनामपशव्योऽपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति बहुपर्णं तस्मै बहुशाखं वृश्चेदेष वै (४) वनस्पतीनां पशव्यः पशुमानेव भवति प्रतिष्ठितं वृश्चेत् प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै स्वाद्योनेः रूढः प्रत्येव तिष्ठति यः प्रत्यङ्ङुपनतस्तं वृश्चेत् स हि मेधमभ्युपनतः पञ्चारत्निं तस्मै वृश्चेद्यं कामयेतोपैनमुत्तरो यज्ञो नमेदिति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञो (५) नमति षडरत्निं प्रतिष्ठाकामस्य षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति सप्तारत्निं पशुकामस्य सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्धे नवारत्निं तेजस्कामस्य त्रिवृता स्तोमेन

संमितं तेजस्त्रिवृत् तेजस्व्येव भवत्येकादशारत्निमिन्द्रियकामस्यैकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशारत्निं भ्रातृव्यवतः पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशारत्निं प्रजाकामस्य सप्तदशः प्रजापतिः प्रजापतेराप्त्या (६) एकविंशत्यरत्निं प्रतिष्ठाकामस्यैकविंशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या अष्टाश्रिर्भवत्यष्टाक्षरा गायत्री तेजो गायत्री गायत्री यज्ञमुखं तेजसैव गायत्रिया यज्ञमुखेन संमितः ॥ (जुषे, सतेजस, -मनक्षसङ्गं, बहुशाखं वृश्चेदेष वै, यज्ञ उपैनमुत्तरो यज्ञः, आप्त्या, एकान्नविंशतिश्च) ॥ ३ ॥

छिन्नस्य यूपस्य स्थापनम् ॥ सोमऋषिः ।

पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनं लोकेभ्यः प्रोक्षति पराञ्चं प्रोक्षति पराङिव हि सुवर्गो लोकः क्रूरमिव वा एतत् करोति यत् खनत्यपोऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यवो यजमानेन यूपः संमितो यावानेव यजमानस्तावतीमेवास्मिन्नूर्जं दधाति (१) पितृणां सदनमसीति बर्हिरव स्तृणाति पितृदेवत्यं ह्येतद्यन्निखातं यद्बर्हिरनवस्तीर्य मिनुयात् पितृदेवत्यो निखातः स्याद्बर्हिरवस्तीर्य मिनोत्यस्यामेवैनं मिनोति यूपशकलमवास्यति सतेजसमेवैनं मिनोति देवस्त्वा सविता मध्वाऽनक्त्वित्याह तेजसैवैनमनक्ति सुपिप्पलाभ्यस्त्वौषधीभ्य इति चषालं प्रति (२) मुञ्चति तस्माच्छीर्षत ओषधयः फलं गृह्णन्त्य—नक्ति तेजो वा आज्यं यजमानेनाग्निष्ठाऽश्रिः संमिता यदग्निष्ठामश्रिमनक्ति यजमानमेव तेजसाऽनक्त्यान्तमनक्त्यान्तमेव यजमानं तेजसाऽनक्ति सर्वतः परि मृशत्यपरिवर्गमेवास्मिन् तेजो दधात्यु—द्दिवं स्तभानाऽन्तरिक्षं पृणेत्याहैषां लोकानां विधृत्यै वैष्णव्यर्चा (३) कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयति द्वाभ्यां कल्पयति द्विपाद्यजमानः प्रतिष्ठित्यै यं कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्धयेयमित्यग्निष्ठां तस्याश्रिमाहवनीयादित्थं वेत्थं वाऽति नावयेत् तेजसैवैनं देवताभिरिन्द्रियेण व्यर्धयति यं कामयेत तेजसैनं देवताभिरिन्द्रियेण समर्धयेयमित्य-(४)-ग्निष्ठां तस्याश्रिमाहवनीयेन सं मिनुयात् तेजसैवैनं देवताभिरिन्द्रियेण समर्धयति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतत् परि व्ययत्यूर्ग्वै रशना यजमानेन यूपः संमितो यजमानमेवोर्जा समर्धयति नाभिदघ्ने परि व्ययति नाभिदघ्न एवास्मा ऊर्जं दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यं कामयेतोर्जैनं (५) व्यर्धयेयमित्यूर्ध्वां वा तस्यावाचीं वाऽवोहेदूर्जैवैनं व्यर्धयति यदि कामयेत वर्षुकः पर्जन्यः स्यादित्यवाचीमवोहेद्वृष्टिमेव नि यच्छति यदि कामयेतावर्षुकः स्यादित्यूर्ध्वामुदूहेद्वृष्टिमेवोद्यच्छति पितृणां निखातं मनुष्याणामूर्ध्वं निखातादा रशनाया ओषधीनां रशना विश्वेषां (६) देवानामूर्ध्वं रशनाया आ चषालादिन्द्रस्य चषालं साध्यानामतिरिक्तं स वा एष सर्वदेवत्यो यद्यूपो यद्यूपं मिनोति सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः सुवर्गं लोकमायन् तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गं लोकमायन् तमृषयो यूपेनैवानु प्राजानन् तद्यूपस्य यूपत्वं (७) यद्यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान्मिनोति पुरस्ताद्धि यज्ञस्य प्रज्ञायते प्रशानं हि तदविदतिपन्न आहुरिदं कार्यमासीदिति साध्या वै देवा यज्ञमत्यमन्यन्त तान् यज्ञो नास्पृशत् तान् यज्ञस्यातिरिक्तमासीत् तदस्पृशदतिरिक्तं वा एतद्यज्ञस्य यदग्नावग्निं मथित्वा प्रहरत्यतिरिक्तमेत-(८)-

यूपस्य यदूर्ध्वं चषालात् तेषां तद्भागधेयं तानेव तेन प्रीणाति देवा वै सꣳस्थिते सोमे प्र स्रुचोऽहरन् प्र यूपं तेऽमन्यन्त यज्ञवेशसं वा इदं कुर्म इति ते प्रस्तरꣳ स्रुचां निष्क्रयणमपश्यन्त्स्वरुं यूपस्य सꣳस्थिते सोमे प्र प्रस्तरꣳ हरति जुहोति स्वरुमयज्ञवेशसाय ॥ (दधाति, पृथु,-वा, समर्धयेदुमिन्द्र,-अन्नं, विश्वेषां, यूपस्य,- सꣳस्थिते सोमेऽष्ट, द्विचत्वारिꣳशच्च) ॥ ४ ॥

मन्थनविधिरग्निप्रहरणम् ॥ सोमक्रतिः ।

साध्या वै देवा अस्मिंल्लोक आसन् नान्यत् किं चन मिषत् तेऽग्निमेवाग्नये मेधायाऽऽलभन्त न ह्यन्यदालम्भ्यमविन्दन् ततो वा इमाः प्रजाः प्राजायन्त यदग्नावग्निं मथित्वा प्रहरति प्रजानां प्रजननाय रुद्रो वा एष यदग्निर्यजमानः पशुर्यत् पशुमालभ्याग्निं मन्थेद् रुद्राय यजमान-(१)-मपि दध्यात् प्रमायुकः स्याद्-अथो खल्वाहुरग्निः सर्वा देवता हविरेतद्यत् पशुरिति यत् पशुमालभ्याग्निं मन्थति हव्यायैवाऽऽसन्नाय सर्वा देवता जनयत्य्-उपाकृत्यैव मन्थ्यस्तन्नेवाऽऽलब्धं नेवानालब्धम्-अग्नेर्जनित्रमसीत्याहाग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इत्याह वृषणौ (२) ह्येतौ-उर्वश्यस्यायुरसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणं दधाथामित्याह वृषणꣳ ह्येते दधाते ये अग्निं गायत्रं छन्दोऽनु प्र जायस्वेत्याह छन्दोभिरेवैनं प्र जनयत्य्-अग्नये मथ्यमानायानु ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनं मन्थति जातायानु ब्रूहि (३) प्रह्रियमाणायानु ब्रूहीत्याह काण्डेकाण्ड एवैनं क्रियमाणे समर्धयति गायत्रीः सर्वा अन्वाह गायत्रछन्दा वा अग्निः स्वेनैवैनं छन्दसा समर्धयत्य्-अग्निः पुरा भवत्यग्निं मथित्वा प्र हरति तौ संभवन्तौ यजमानमभि सं भवतो भवतं नः समनसावित्याह शान्त्यै प्रहृत्य जुहोति जातायैवास्मा अन्नमपि (४) दधात्याज्येन जुहोत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा ॥ (यजमान,-माह वृषणौ, जातायानु ब्रूह्य, अपि, द्वादश च) ॥ ५ ॥

पशोरुपाकरणम् ॥ सोमक्रतिः ।

इषे त्वेति बर्हिरा दत्त इच्छत इव ह्येष यो यजते उपवीरसीत्याहोप ह्येनानाकरोत्य्-उपो देवान् दैव्या विशः प्रागुरित्याह दैव्या ह्येता विशः सतीर्देवानुपयन्ति वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिजस्तस्मादेवमाह बृहस्पते धारया वसूनीत्या-(१)-ह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै पशूनव रुन्धे हव्या ते स्वदन्तामित्याह स्वदयत्येवैनान् देव त्वष्टर्वसु रण्वेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधाति रेवती रमध्वमित्याह पशवो वै रेवतीः पशूनेवास्मै रमयति देवस्य त्वा सवितुः प्रसव इति (२) रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै ऋतस्य त्वा देवहविः पाशेनाऽऽरभ इत्याह सत्यं वा ऋतꣳ सत्येनैवैनमृतेनाऽऽरभतेऽक्ष्णया परि हरति वध्यꣳ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्यावृत्त्यै धर्षा मानुषानिति नि युनक्ति धृत्या अद्भ्य-(३)-स्त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत् पशुर्-अपां पेरुरसीत्याहैष ह्यपां पाता यो मेधायाऽऽरभ्यते स्वात्तं चित् सदेवꣳ हव्यमापो देवीः स्वदतैनमित्याह स्वदयत्येवैन-मुपरिष्टात् प्रोक्षत्युपरिष्टादेवैनं मेध्यं करोति पाययत्यन्त-

-रत एवैनं (४) मेध्यं करोत्यधस्तादुपोक्षति सर्वत एवैनं मेध्यं करोति ॥ (वसूनीति, प्रसव इत्,-अद्भ्यो,-ऽन्तरत एवैनं, दश च) ॥ ६ ॥

सामिधेन्य आघारौ प्रयाजाश्च ॥ सोमक्रतिः ।

अग्निना वै होत्रा देवा असुरानभ्यभवन्नग्नये समिध्यमानायानु ब्रूहीत्याह भ्रातृव्याभिभूत्यै सप्तदश सामिधेनीरन्वाह सप्तदशः प्रजापतिः प्रजापतेराप्त्यै सप्तदशान्वाह द्वादश मासाः पञ्चर्तवः स संवत्सरः संवत्सरं प्रजा अनु प्र जायन्ते प्रजानां प्रजननाय देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्त्स प्रजापतिस्तूष्णीमाघार-(१)-मा ऽघारयत् ततो वै देवा यज्ञमन्वपश्यन् यत् तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या असुरेषु वै यज्ञ आसीत् तं देवास्तूष्णीꣳहोमेनावृञ्जत यत् तूष्णीमाघारमाघारयति भ्रातृव्यस्यैव तद्यज्ञं वृङ्क्ते परिधीन्त्सं मार्ष्टि पुनात्येवैनान् त्रिस्त्रिः सं मार्ष्टि त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै द्वादश सं पद्यन्ते द्वादश (२) मासाः संवत्सरः संवत्सरमेव प्रीणात्यथो संवत्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्यै शिरो वा एतद्यज्ञस्य यदाघारोऽग्निः सर्वा देवता यदाघारमाघारयति शीर्षत एव यज्ञस्य यजमानः सर्वा देवता अव रुन्धे शिरो वा एतद्यज्ञस्य यदाघार आत्मा पशुराघारमाघार्य पशुꣳ समनक्त्यात्मन्नेव यज्ञस्य (३) शिरः प्रति दधाति सं ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो वायावेवास्य प्राणं जुहोति सं यजत्रैरङ्गानि सं यज्ञपतिराशिषेत्याह यज्ञपतिमेवास्याऽऽशिषं गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात् पशुमभ्यवमीत् तस्मादुपरिष्टात् पशोर्नाव द्यन्ति यदुपरिष्टात् पशुꣳ समनक्ति मेध्यमेवै-(४)-नं करोत्य्-ऋत्विजो वृणीते छन्दाꣳस्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्या एकादश प्रयाजान् यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तं प्र यजति वपामेकः परि शय आत्मैवाऽऽत्मानं परि शये वज्रो वै स्वधितिर्वज्रो यूपशकलो घृतं खलु वै (५) देवा वज्रं कृत्वा सोममघ्नन् घृतेनाक्तौ पशुं त्रायेथामित्याह वज्रेणैवैनं वशे कृत्वाऽऽलभते ॥ (आघार,-पद्यन्ते द्वादशा,-ऽऽत्मन्नेव यज्ञस्य, मेध्यमेव, खलु वा, अष्टादश च) ॥ ७ ॥

पशुसंज्ञपनम् ॥ सोमक्रतिः ।

पर्यग्नि करोति सर्वहुतमेवैनं करोत्यस्कन्दायास्कन्नꣳ हि तद्यद्धुतस्य स्कन्दति त्रिः पर्यग्नि करोति त्र्यावृद्धि यज्ञोऽथो रक्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशू३र्नान्वारभ्या३ इति मृत्यवे वा एष नीयते यत् पशुस्तं यदन्वारभेत प्रमायुको यजमानः स्याद्-अथो खल्वाहुः सुवर्गाय वा एष लोकाय नीयते यत् (१) पशुरिति यन्नान्वारभेत सुवर्गाल्लोकाद्यजमानो हीयेत वपाश्रपणीभ्यामन्वारभते तन्नेवान्वारब्धं नेवानन्वारब्ध-मुप प्रेष्य होतर्हव्या देवेभ्य इत्याहेषितꣳ हि कर्म क्रियते रेवतीर्यज्ञपतिं प्रियधाऽऽविशतेत्याह यथायजुरेवैतद्-अग्निना पुरस्तादेति रक्षसामपहत्यै पृथिव्याः संपृचः पाहीति बर्हि-(२)-रुपास्यत्यस्कन्दायास्कन्नꣳ हि तद्यद्बर्हिषि स्कन्दत्यथो बर्हिषदमेवैनं करोति पराङा वर्ततेऽध्वर्युः पशोः संज्ञप्यमानात् पशुभ्य एव तन्नि ह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशू-

-नाप्नोति य एवं वेद पश्चाल्लोका वा एषा प्राच्युदानीयते यत् पत्नी नमस्त आतानेत्याहाऽऽदित्यस्य वै रश्मय (१) आतानास्तेभ्य एव नमस्करोत्य्-अनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणेत्याहाऽऽशिषमेवैतामा शास्त आपो देवीः शुद्धायुव इत्याह यथायजुरेवैतत् ॥ (लोकाय नीयते यद्, बर्हिर्, रश्मयः, त्रिꣳशच्च) ॥ ८ ॥

वपाहोमः ॥ सोमक्रतिः ।

पशोर्वा आलब्धस्य प्राणाञ्छुगृच्छति वाक्त आ प्यायतां प्राणस्त आ प्यायतामित्याह प्राणेभ्य एवास्य शुचꣳ शमयति सा प्राणेभ्योऽधि पृथिवीꣳ शुक्प्र विशति शमहोभ्यामिति नि नयत्यहोरात्राभ्यामेव पृथिव्यै शुचꣳ शमयत्य्-ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः (१) शान्त्यै पार्श्वत आ च्छ्यति मध्यतो हि मनुष्या आच्छ्यन्ति तिरश्चीनमा च्छ्यत्यनूचीनꣳ हि मनुष्या आच्छ्यन्ति व्यावृत्त्यै रक्षसां भागोऽसीति स्थविमतो बर्हिरक्त्वाऽपास्यत्यस्नैव रक्षाꣳसि निरवदयत इदमहꣳ रक्षोऽधमं तमो नयामि योऽस्मान् द्वेष्टि यं च वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव (२) द्वेष्टि यश्चैनं द्वेष्टि तावुभावधमं तमो नयतीषे त्वेति वपामुत्खिदतीच्छत इव ह्येष यो यजते यदुपतृन्द्याद्रुद्रोऽस्य पशून् घातुकः स्याद्यन्नोपतृन्द्यादयता स्याद्-अन्ययोपतृणत्त्यन्ययान धृत्यै घृतेन द्यावापृथिवी प्रोर्ण्वाथामित्याह द्यावापृथिवी एव रसेनानक्त्यच्छिन्नो (३) रायः सुवीर इत्याह यथायजुरेवैतत् क्रूरमिव वा एतत् करोति यद्वपामुत्खिदत्युर्वन्तरिक्षमन्विहीत्याह शान्त्यै प्र वा एषोऽस्माल्लोकाच्च्यवते यः पशुं मृत्यवे नीयमानमन्वारभते वपाश्रपणी पुनरन्वारभतेऽस्मिन्नेव लोके प्रति तिष्ठत्य्-अग्निना पुरस्तादेति रक्षसामपहत्या अथो देवता एव हव्येना-(४)-न्वेति नान्तममङ्गारमति हरेद्यदन्तममङ्गारमतिहरेद्देवता अति मन्येत वायो वीहि स्तोकानामित्याह तस्माद्विभक्ताः स्तोका अव पद्यन्ते अग्रं वा एतत् पशूनां यद्वपाऽग्रमोषधीनां बर्हिरग्रेणैवाग्रꣳ समर्धयत्यथो ओषधीष्वेव पशून् प्रति ष्ठापयति स्वाहाकृतीभ्यः प्रेष्येत्याह (५) यज्ञस्य समिष्ट्यै प्राणापानौ वा एतौ पशूनां यत् पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभि घारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति स्वाहोर्ध्वनभसं मारुतं गच्छतमित्याहोर्ध्वनभा ह स्म वै मारुतो देवानां वपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद्विष्वञ्चौ प्राणापानौ ॥ (स्वधितिः,- चैव,-अच्छिन्नो, हव्येन,-प्रेष्येत्याह, षट्चत्वारिꣳशच्च) ॥ ९ ॥

पश्ववदानानि ॥ सोमक्रतिः ।

पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमा लभते वपया प्रचर्य पुरोडाशेन प्र चरत्यूर्ग्वै पुरोडाश ऊर्जमेव पशूनां मध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य त्रिः पृच्छति शृतꣳ हवी३ः शमितरिति त्रिषत्या हि देवा योऽशृतꣳ शृतमाह स एनसा प्राणापानौ वा एतौ पशूनां (१) यत् पृषदाज्यं पशोः खलु वा आलब्धस्य हृदयमात्माऽभि समेति यत् पृषदाज्येन हृदयमभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति पशुना वै देवाः सुवर्गं लोकमायन् तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति तस्य शिरश्छित्त्वा मेधं प्राक्षारयन्त्स प्रक्षोऽभवत् तत् प्रक्षस्य प्रक्षत्वं यत् प्लक्षशाखोत्तरबर्हिर्भवति समे-

-धस्यैव (२) पशोरव द्यति पशुं वै ह्रियमाणꣳ रक्षाꣳस्यनु सचन्तेऽन्तरा यूपं चाऽऽहवनीयं च हरति रक्षसामपहत्यै पशोर्वा आलब्धस्य मनोऽप क्रामति मनोतायै हविषोऽवदीयमानस्यानु ब्रूहीत्याह मन एवास्याव रुन्ध एकादशावदानान्यव द्यति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तस्याव (३) द्यति हृदयस्याग्रेऽव द्यत्यथ जिह्वाया अथ वक्षसो यद्वै हृदयेनाभिगच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसोऽधि निर्वदत्येतद्वै पशोर्यथापूर्वं यस्यैवमवदाय यथाकाममुत्तरेषामवद्यति यथापूर्वमेवास्य पशोरवत्तं भवति मध्यतो गुदस्याव द्यति मध्यतो हि प्राण उत्तमस्याव द्यत्यु (४) त्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाजामि जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवाव दयते तदवदानानामवदानत्वं देवासुराः संयत्ता आसन् ते देवा अग्निमब्रुवन् त्वया वीरेणासुरानभि भवामेति (५) सोऽब्रवीद्वरं वृणै पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत दोः पूर्वार्धस्य गुदं मध्यतः श्रोणिं जघनार्धस्य ततो देवा अभवन् पराऽसुरा यत् त्र्यङ्गाणाꣳ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्य्-अक्ष्णयाऽव द्यति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै ॥ (पशूनां, समेधस्यैव, तस्याव,- उत्तमस्याव द्यति,- इति, पञ्चचत्वारिꣳशच्च) ॥ १० ॥

अनूयाजविधानम् ॥ सोमक्रतिः ।

मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनां यद्यूषो रसमेव पशुषु दधाति पार्श्वेन वसाहोमं प्र यौति मध्यं वा एतत् पशूनां यत् पार्श्वꣳ रस एष पशूनां यद्वसा यत् पार्श्वेन वसाहोमं प्रयौति मध्यत एव पशूनाꣳ रसं दधाति घ्नन्ति (१) वा एतत् पशुं यत् संज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण ऐन्द्रोऽपान ऐन्द्रः प्राणो अङ्गेअङ्गे नि देध्यदित्याह प्राणापानावेव पशुषु दधाति देव त्वष्टर्भूरि ते सꣳसमेत्वित्याह त्वाष्ट्रा हि देवतया पशवो विषुरूपा यत् सलक्ष्माणो भवथेत्याह विषुरूपा ह्येते सन्तः सलक्ष्माण एतर्हि भवन्ति देवत्रा यन्त-(२)-मवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहानुमतमेवैनं मात्रा पित्रा सुवर्गं लोकं गमयत्य्-अर्धर्चे वसाहोमं जुहोत्यसौ वा अर्धर्च इयमर्धर्च इमे एव रसेनानक्ति दिशो जुहोति दिश एव रसेनानक्त्यथो दिग्भ्य एवोर्जꣳ रसमव रुन्धे प्राणापानौ वा एतौ पशूनां यत् पृषदाज्यं वानस्पत्याः खलु (३) वै देवतया पशवो यत् पृषदाज्यस्योपहत्याऽऽह वनस्पतयेऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापानावेव पशुषु दधात्य्-अन्यस्यान्यस्य समवत्तꣳ समवद्यति तस्मान्नानारूपाः पशवो यूष्ण उप सिञ्चति रसो वा एष पशूनां यद्यूषो रसमेव पशुषु दधातीडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते (४) चतुष्पादो हि पशवो यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवैनं पशुभ्यो निर्भजत्यपशुरेव भवति यं कामयेत पशुमान्त्स्यादिति मेदस्वत् तस्मा आ दध्यान्मेदोरूपा वै पशवो रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवति प्रजापतिर्यज्ञमसृजत स आज्यं (५) पुरस्तादसृजत पशुं मध्यतः पृषदाज्यं पश्चात् तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मध्यतः पृषदाज्येनानूयाजास्तस्मादेतन्मिश्रमिव

पश्चात् सृष्टंरं ह्येकादशानूयाजान् यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत् पशुं यत् संज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां यत् पृषदाज्यं यत् पृषदाज्येना-(६)-नूयाजान् यजति प्राणापानावेव पशुषु दधाति ॥ (घ्नन्ति, यन्तं, कर्ज, इवत, भाज्यं, यत् पृषदाज्येन, षट् च) ॥ ११ ॥

[पारर्वालात् ३१४। सुवर्णाय ३००। वैष्णव्या ३१९। पृथिव्यै ४४२। साध्या २१८। हृदं २१०। ऽग्निना २६८। पर्यग्नि १८७। एतोः २९६। पशुं २५५। मेदसे-३०६। -कांदश ॥ ३१५५ ॥]

[॥ इति षष्ठकाण्डे तृतीयः प्रपाठकः ॥३॥]

सोममन्त्रब्राह्मणनिरूपणम् ।

[अथ चतुर्थः प्रपाठकः ॥४॥]

गुदहोमविधानम् ॥ सोमऋषिः ।

यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भिरेवासृजत यदुपयज उपयजति प्रजा एव तद्यजमानः सृजते जघनार्धादव द्यति जघनार्धाद्धि प्रजाः प्रजायन्ते स्थविमतोऽव द्यति स्थविमतो हि प्रजाः प्रजायन्ते ऽसंभिन्दन्नव द्यति प्राणानामसंभेदाय न पर्यावर्तयति यत् पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः स्यात् समुद्रं गच्छ स्वाहेत्याह रेतं (१) एव तद्धात्य-न्तरिक्षं गच्छ स्वाहेत्याहान्तरिक्षेणैवास्मै प्रजाः प्र जनयत्यन्तरिक्षꣳ ह्यनु प्रजाः प्रजायन्ते देवꣳ सवितारं गच्छ स्वाहेत्याह सवितृप्रसूत एवास्मै प्रजाः प्र जनयत्य-होरात्रे गच्छ स्वाहेत्याहाहोरात्राभ्यामेवास्मै प्रजाः प्र जनयत्यहोरात्रे ह्यनु प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहे-(२)-त्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति सोमं गच्छ स्वाहेत्याह सौम्या हि देवतया प्रजा यज्ञं गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः करोति छन्दाꣳसि गच्छ स्वाहेत्याह पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे द्यावापृथिवी गच्छ स्वाहेत्याह प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परि गृह्णाति नभो (३) दिव्यं गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिं नि यच्छत्य-ग्निं वैश्वानरं गच्छ स्वाहेत्याह प्रजा एव प्रजाता अस्यां प्रति ष्ठापयति प्राणानां वा एषोऽव द्यति योऽवद्यति गुदस्य मनो मे हार्दि यच्छेत्याह प्राणानेव यथास्थानमुप ह्वयते पशोर्वा आलब्धस्य हृदयꣳ शुगृच्छति सा हृदयशूल-(४)-मभि समेति यत् पृथिव्याꣳ हृदयशूलमुद्वासयेत् पृथिवीꣳ शुचाऽर्पयेदप्स्वप्सु शुचाऽर्पयेच्छुष्कस्य चाऽऽर्द्रस्य च सन्धावुद्वासयत्युभयस्य शान्त्यै यं द्विष्यात् तं ध्यायेच्छुचैवैनमर्पयति ॥ (रेतः, स्वाहा, नभो, हृदयशूलं, द्वात्रिꣳशच्च) ॥ १ ॥

सोमाभिषवोपयुक्तानां वसतीवरीसंज्ञकानामपामुपादानम् ॥ सोमऋषिः ।

देवा वै यज्ञमाग्नीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन् वसतु नु न इदमिति तद्वसतीवरीणां वसतीवरित्वं तस्मिन् प्रातर्न समशक्नुवन् तदप्सु प्रावेशयन् ता वसतीवरीरभवन् वसतीवरीर्गृह्णाति यज्ञो वै वसतीवरीर्यज्ञमेवाऽऽरभ्य गृहीत्वोप वसति यस्यागृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञः स्या-

(१)-द्यज्ञं वि च्छिन्द्या-ज्ज्योतिष्या वा गृह्णीयाद्धिरण्यं वाऽवधाय सशुक्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुम्भ्यानां गृह्णीयात् स हि गृहीतवसतीवरीको वसतीवरीर्गृह्णाति पशवो वै वसतीवरीः पशूनेवाऽऽरभ्य गृहीत्वोप वसति यदन्वीपं तिष्ठन् गृह्णीयान्निर्मार्गुका अस्मात् पशवः स्युः प्रतीपं तिष्ठन् गृह्णाति प्रतिरुध्यैवास्मै पशून् गृह्णाती-न्द्रो (२) वृत्रमहन्त्सोऽपोऽभ्यम्रियत तासां यन्मेध्यं यज्ञियꣳ सदेवमासीत् तदत्यमुच्यत ता वहन्तीरभवन् वहन्तीनां गृह्णाति या एव मेध्या यज्ञियाः सदेवा आपस्तासामेव गृह्णाति नान्तमा वहन्तीरतीयादवन्तमा वहन्तीरतीयाद्यज्ञमति मन्येत न स्थावराणां गृह्णीयाद्वरुणगृहीता वै स्थावरा यत् स्थावराणां गृह्णीया-(३)-द्वरुणेनास्य यज्ञं ग्राहये-द्यद्वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात् ताम्रा आपो दिवा ददृश्रे यन्नक्तं भवत्यपोऽहः प्र विशति तस्माच्चन्द्रा आपो नक्तं ददृश्रे छायायै चाऽऽतपतश्च सन्धौ गृह्णात्यहोरात्रयोरेवास्मै वर्णं गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्माꣳ अस्तु (४) सूर्य इत्याह सशुक्राणामेव गृह्णात्य-नुष्टुभा गृह्णाति वाग्वा अनुष्टुग्वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा गृह्णाति त्रिः सादयति सप्त सं पद्यन्ते सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्धे ऽस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपसादयेदस्मिँल्लोके पशुमान्त्स्याद्यदाहवनीयेऽमुष्मि-(५)-ꣳल्लोके पशुमान्त्स्यादुभयोरुप सादयत्युभयोरेवैनं लोकयोः पशुमन्तं करोति सर्वतः परि हरति रक्षसामपहत्या इन्द्राग्नियोर्भागधेयीः स्थेत्याह यथायजुरेवैत-दाग्नीध्र उप वासयत्येतद्वै यज्ञस्यापराजितं यदाग्नीध्रं यदेव यज्ञस्यापराजितं तदेवैना उप वासयति यतः खलु वै यज्ञस्य विततस्य न क्रियते (६) तदनु यज्ञꣳ रक्षाꣳस्यव चरन्ति यद्वहन्तीनां गृह्णाति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय न ह्येता ईलयन्त्या तृतीयसवनात् परि शेरे यज्ञस्य संतत्यै ॥ (स्या,-दिन्द्रो, गृह्णीया- दस्तु, मुष्मिꣳ, क्रियते, षड्विꣳशतिश्च) ॥ २ ॥

हविर्धानशकटाद् अधिषवणफलकयोरुपरि सोमावरोहणम् ॥ सोमऋषिः ।

ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यः सोममुपावहरन्त्सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्य उपावहरति पुरा वाचः (१) प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक् तामव रुन्धे ऽपोऽग्रेऽभिव्याहरति यज्ञो वा आपो यज्ञमेवाभि वाचं वि सृजति सर्वाणि छन्दाꣳस्यन्वाह पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे गायत्रिया तेजस्कामस्य परि दध्यात् त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्यानुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विराजा-ऽन्नकामस्य शृणोत्वग्निः समिधा हवं (२) म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्यापोऽच्छैत्य-प इष्य होतरित्याहेषितꣳ हि कर्म क्रियते मैत्रावरुणस्य चमसाध्वर्यवा द्रवेत्याह मित्रावरुणौ वा अपां नेतारौ ताभ्यामेवैना अच्छैति देवीरापो अपां नपादित्याहाऽऽहुत्यैवैना निष्क्रीय गृह्णात्यथो हविष्कृतानामेवाभिघृतानां गृह्णाति (३) कार्षिरसीत्याह शमलमेवाऽऽसामप प्लावयति समुद्रस्य वोऽक्षित्या उन्नय इत्याह तस्मादद्यमानाः पीयमाना आपो न क्षीयन्ते योनिर्वै यज्ञस्य चात्वालं यज्ञो वसतीवरीर्होतृचमसं

च मैत्रावरुणचमसं च सꣳस्पर्श्य वसतीवरीर्व्यानयति यज्ञस्य सयोनित्वायाथो स्वादेवैना योनेः प्र जनयत्य-ध्वर्योऽवेरपा३ इत्याहोते-(४)-मनन्नमुतेमाः पश्येति वावैतदाह यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ नि मार्ष्टि यद्यतिरात्रो यजुर्वदन् प्र पद्यते यज्ञक्रतूनां व्यावृत्त्यै ॥ (वाचो, हवं,-मभिघृतानां गृह्णात्यु,-त पञ्चविꣳशतिश्च) ॥ ३ ॥

सोमस्याभिषवः ॥ सोमऋषिः ।

देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपाꣳशुसवनो यदुपाꣳशुसवनमभि मिमीते व्यानमेव पशुषु दधाती-न्द्राय त्वेन्द्राय त्वेति मिमीत इन्द्राय हि सोम आह्रियते पञ्च कृत्वो यजुषा मिमीते (१) पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पञ्च कृत्वस्तूष्णीं दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धे श्वात्राः स्थ वृत्रतुर इत्याहैष वा अपाꣳ सोमपीथो य एवं वेद नाप्स्वार्तिमार्च्छति यत् ते सोम दिवि ज्योतिरित्याहैभ्य एवैनं (२) लोकेभ्यः सं भरति सोमो वै राजा दिशोऽभ्यध्यायत् स दिशोऽनु प्राविशत् प्रागपागुदगधरागित्याह दिग्भ्य एवैनꣳ सं भरत्यथो दिश एवास्मा अव रुन्धे ऽम्ब नि ष्वरेत्याह कामुका एनꣳ स्त्रियो भवन्ति य एवं वेद यत् ते सोमादाभ्यं नाम जागृवीत्या-(३)-हैष वै सोमस्य सोमपीथो य एवं वेद न सौम्यामार्तिमार्च्छति घ्नन्ति वा एतत् सोमं यदभिषुण्वन्त्यꣳशूनप गृह्णाति त्रायत एवैनं प्राणा वा अꣳशवः पशवः सोमो ऽꣳशून् पुनरपि सृजति प्राणानेव पशुषु दधाति द्वौद्वावपि सृजति तस्माद् द्वौद्वौ प्राणाः ॥ (यजुषा मिमीत, एनं, जागृवीति, चतुश्चत्वारिꣳशच्च) ॥ ४ ॥

सुत्यादिनेऽनुष्ठेयेषु ग्रहेषु उपांशुग्रहः । सोमऋषिः ।

प्राणो वा एष यदुपाꣳशुर्यदुपाꣳश्वग्रा ग्रहा गृह्यन्ते प्राणमेवानु प्र यन्त्य-रुणो ह स्माऽऽहौपवेशिः प्रातःसवन एवाहं यज्ञꣳ सꣳ स्थापयामि तेन ततः सꣳस्थितेन चरामीत्यष्टौ कृत्वोऽग्रेऽभि षुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेव तेनाऽऽप्नोत्येकादश कृत्वो द्वितीयमेकादशाक्षरा त्रिष्टुप् त्रैष्टुभं माध्यंदिनꣳ (१) सवनं माध्यंदिनमेव सवनं तेनाऽऽप्नोति द्वादश कृत्वस्तृतीयं द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाऽऽप्नोत्येताꣳ ह वाव स यज्ञस्य सꣳस्थितिमुवाचास्कन्दायास्कन्नꣳ हि तद्यज्ञस्य सꣳस्थितस्य स्कन्दत्य-थो खल्वाहुर्गायत्री वाव प्रातःसवने नातिवाद इत्यनतिवादुक एनं भ्रातृव्यो भवति य एवं वेद तस्मादष्टावष्टौ (२) कृत्वोऽभिषुत्यं ब्रह्मवादिनो वदन्ति पवित्रवन्तोऽन्ये ग्रहा गृह्यन्ते किंपवित्र उपाꣳशुरिति वाक्पवित्र इति ब्रूयाद्वाचस्पतये पवस्व वाजिन्नित्याह वाचैवैनं पवयति वृष्णो अꣳशुभ्यामित्याह वृष्णो ह्येतावꣳशू यौ सोमस्य गभस्तिपूत इत्याह गभस्तिना ह्येनं पवयति देवो देवानां पवित्रमसीत्याह देवो ह्येषः (३) सन् देवानां पवित्रं येषां भागोऽसि तेभ्यस्त्वेत्याह येषाꣳ ह्येष भागस्तेभ्य एनं गृह्णाति स्वाङ्कृतोऽसीत्याह प्राणमेव स्वमकृत मधुमतीर्न इषस्कृधीत्याह सर्वमेवास्मा इदꣳ स्वदयति विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान्

दधाति मनस्त्वा (४) ऽष्टित्याह मन एवाश्नुत उर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो हि प्राणः स्वाहा त्वा सुभवः सूर्यायेत्याह प्राणा वै स्वभवसो देवास्तेष्वेव परोक्षं जुहोति देवेभ्यस्त्वा मरीचिपेभ्य इत्याहाऽऽदित्यस्य वै रश्मयो देवा मरीचिपास्तेषां तद्भागधेयं तानेव तेन प्रीणाति यदि कामयेत वर्षुकः पर्जन्यः (५) स्यादिति नीचा हस्तेन नि मृज्याद्वृष्टिमेव नि यच्छति यदि कामयेतावर्षुकः स्यादित्युत्तानेन नि मृज्याद्वृष्टिमेवोद्यच्छति यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति ब्रूयादाहुतिमेवैनं प्रेप्सन् हन्ति यदि दूरे स्यादा तमितोस्तिष्ठेत् प्राणमेवास्यानुगत्य हन्ति यद्यभिचरेदमुष्य (६) त्वा प्राणे सादयामीति सादयेदसन्नो वै प्राणः प्राणमेवास्य सादयति षड्भिरꣳशुभिः पवयति षड् वा ऋतव ऋतुभिरेवैनं पवयति त्रिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति ब्रह्मवादिनो वदन्ति कस्मात् सत्यात् त्रयः पशूनाꣳ हस्तादाना इति यत् त्रिरुपाꣳशुꣳ हस्तेन विगृह्णाति तस्मात् त्रयः पशूनाꣳ हस्तादानाः पुरुषो (७) हस्ती मर्कटः ॥ (माध्यंदिन- मष्टावष्टौ,- ह्येष, मनस्त्वा, पर्जन्यो, ऽमुष्य, पुरुषो, द्वे च) ॥ ५ ॥

अन्तर्यामग्रहः ॥ सोमऋषिः ।

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा उपाꣳशौ यज्ञꣳ सꣳस्थाप्यमपश्यन् तमुपाꣳशौ समस्थापयन् तेऽसुरा वज्रमुद्यत्य देवानभ्यायन्त ते देवा बिभ्यत इन्द्रमुपाधावन् तानिन्द्रोऽन्तर्यामेणान्तरधत्त तदन्तर्यामस्यान्तर्यामत्वं यदन्तर्यामो गृह्यते भ्रातृव्यानेव तद्यजमानोऽन्तर्धत्ते ऽन्तस्ते (१) दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षमित्याहैभिरेव लोकैर्यजमानो भ्रातृव्यानन्तर्धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूद्यद्वयꣳ स्म इति तेऽब्रुवन् मघवन्ननु न आ भजेति सजोषा देवैरवरैः परैश्चेत्यब्रवीद्ये चैव देवाः परे ये चावरे ताननुभया-(२)-नन्वाभजत् सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चावरे ताननुभयानन्वाभजत्य-न्तर्यामे मघवन् मादयस्वेत्याह यज्ञादेव यजमानं नान्तरेत्यु-पयामगृहीतोऽसीत्याहापानस्य धृत्यै यदुभावपवित्रौ गृह्येयातां प्राणमपानोऽनु न्यृच्छेत् प्रमायुकः स्यात् पवित्रवानन्तर्यामो गृह्यते (३) प्राणापानयोर्विधृत्यै प्राणापानौ वा एतौ यदुपाꣳश्वन्तर्यामौ व्यान उपाꣳशुसवनो यं कामयेत प्रमायुकः स्यादित्यसꣳस्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ वि च्छिनत्ति ताजक् प्र मीयते यं कामयेत सर्वमायुरियादिति सꣳस्पृष्टौ तस्य सादयेद्व्यानेनैवास्य प्राणापानौ सं तनोति सर्वमायुरेति ॥ (ते, ऽनुभयान्, गृह्यते, चतुश्चत्वारिꣳशच्च) ॥ ६ ॥

ऐन्द्रवायवग्रहः । सोमऋषिः ।

वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवानु प्र यन्ति वायुं देवा अब्रुवन्त्सोमꣳ राजानꣳ हनामेति सोऽब्रवीद्वरं वृणै मदग्रा एव वो ग्रहा गृह्यान्ता इति तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्ते तमघ्न-न्त्सोऽपूयत् तं देवा नोपाधृष्णुवन् ते वायुमब्रुवन्निमं नः स्वदये-(१)-ति सोऽब्रवीद्वरं वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता इति तस्मान्नानादेवत्यानि सन्ति वायव्यान्युच्यन्ते तमेभ्यो वायुरेवास्वदयत् तस्माद्यत् पूयति तत् प्रवाते वि षजन्ति वायुर्हि तस्य पवयिता स्वदयिता तस्य विग्रहणं नाविन्दन्त्साऽदितिरब्रवीद्वरं वृणा अथ मया वि गृह्णीध्वं मद्देवत्या एव वः सोमाः (२) सन्ना

अंशुभिर्युवयामगृहीतोऽसीत्याहादितिर्देवत्यास्तेन यानि हि दारुमयाणि पात्राण्यस्यै तानि योनेः संभूतानि यानि मृन्मयानि साक्षात्तान्यस्यै तस्मादेवमाह वाग्वै पराच्यव्याकृताऽवदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह (१) गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते तस्मात्सकृदिन्द्राय मध्यतो गृह्यते द्विर्वायवे द्वौ हि स वरावृणीत ॥ (स्वदु, सोमाः, सह,-द्वाविंशतिश्च) ॥ ७ ॥

मैत्रावरुणग्रहः ॥ सोमऋषिः ।

मित्रं देवा अब्रुवन्त्सोमं राजानं हनामेति सोऽब्रवीन्नाहं सर्वस्य वा अहं मित्रमस्मीति तमब्रुवन् हनामैवेति सोऽब्रवीद्वरं वृणै पयसैव मे सोमं श्रीणन्निति तस्मान्मैत्रावरुणं पयसा श्रीणन्ति तस्मात्पशवोऽपाक्रामन्मित्रः सन्क्रूरमकरिति क्रूरमिव खलु वा एषः (१) करोति यः सोमेन यजते तस्मात्पशवोऽप क्रामन्ति यन्मैत्रावरुणं पयसा श्रीणाति पशुभिरेव तन्मित्रं समर्धयति पशुभिर्यजमानं पुरा खलु वावैवं मित्रोऽवेदप मत्क्रूरं चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणं देवा अब्रुवन्त्वयांऽशभुवा सोमं राजानं हनामेति सोऽब्रवीद्वरं वृणै मह्यं चै (२) वैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते तस्माद्राज्ञा राजानमंशभुवा घ्नन्ति वैश्येन वैश्यं शूद्रेण शूद्रं न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा मित्रावरुणावब्रुवन्निदं नो विवासयतमिति तावब्रूतां वरं वृणावहा एक एवाऽऽवत्पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः (३) पूर्वो मैत्रावरुणाद्गृह्यते प्राणापानौ ह्येतौ यदुपांश्वन्तर्यामौ मित्रोऽहरजनयद्वरुणो रात्रिं ततो वा इदं व्यौच्छद्यन्मैत्रावरुणो गृह्यते व्युष्ट्यै ॥ (एष-चै,-न्द्रवायवो, द्वाविंशतिश्च) ॥ ८ ॥

आश्विनग्रहः ॥ सोमऋषिः ।

यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुवन्भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रति धत्तमिति तावब्रूतां वरं वृणावहै ग्रह एव नावत्रापि गृह्यतामिति ताभ्यामेतमाश्विनमगृह्णन्ततो वै तौ यज्ञस्य शिरः प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ (१) भिषजाविति तस्माद्ब्राह्मणेन भेषजं न कार्यमपूतो ह्येषोऽमेध्यो यो भिषक्तौ बहिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन्तस्माद्बहिष्पवमाने स्तुत आश्विनो गृह्यते तस्मादेवं विदुषा बहिष्पवमान उपसद्यः पवित्रं वै बहिष्पवमान आत्मानमेव पवयते तयोस्त्रेधा भैषज्यं वि न्यदधुरग्नौ तृतीयमप्सु तृतीयं तस्मादुदपात्र-(२)-मुपनिधाय ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्याद्यावदेव भेषजं तेन करोति समर्धुकमस्य कृतं भवति ब्रह्मवादिनो वदन्ति कस्मात्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति यदेकपात्रा गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्रा हूयन्ते तस्माद्द्वौद्वौ बहिष्टात्प्राणाः प्राणा वा एते यद्द्विदेवत्याः पशव इडा यदिडां पूर्वां द्विदेवत्येभ्य उपह्वयेत (३) पशुभिः प्राणानन्तर्दधीत प्रमायुकः स्याद्द्विदेवत्यान्भक्षयित्वेडामुप ह्वयते प्राणानेवाऽऽत्मन्धित्वा पशूनुप ह्वयते वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवं भक्षयति तस्मात्पुरस्ताद्वाचा वदति पुरस्तान्मैत्रावरुणं तस्मात्

पुरस्ताच्चक्षुषा पश्यति सर्वतः परिहारमाश्विनं तस्मात्सर्वतः श्रोत्रेण शृणोति प्राणा वा एते यद्द्विदेवत्याः (४) अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञं रक्षांस्यव चरन्ति यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्यां सादयति वाच्येव वाचं दधात्या तृतीयसवनात्परि शेरे यज्ञस्य संतत्यै ॥ (मनुष्यचरा,-वुदपात्र,-मुपह्वयेत, द्विदेवत्याः, षट्चत्वारिंशच्च) ॥ ९ ॥

शुक्रामन्थिग्रहौ ॥ सोमऋषिः ।

बृहस्पतिर्देवानां पुरोहित आसीच्छण्डामर्कावसुराणां ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तोऽसुरास्तेऽन्योऽन्यं नाशक्नुवन्नभिभवितुं ते देवाः शण्डामर्कावुपामन्त्रयन्त तावब्रूतां वरं वृणावहै ग्रहावेव नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थिनावगृह्णन्ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषः शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा (१) अस्य भ्रातृव्यो भवति तौ देवा अपनुद्याऽऽत्मन इन्द्रायाजुहवुरपनुत्तौ शण्डामर्कौ सहामुनेति ब्रूयाद्यं द्विष्याद्यमेव द्वेष्टि तेनैनौ सहाप नुदते स प्रथमः संकृतिर्विश्वकर्मेत्येवैनावात्मन इन्द्रायाजुहवुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा आदित्यः शुक्रश्चन्द्रमा मन्थ्यपिगृह्य प्राञ्चौ नि-(२)-ष्क्रामतस्तस्मात्प्राञ्चौ यन्तौ न पश्यन्ति प्रत्यञ्चावावृत्य जुहुतस्तस्मात्प्रत्यञ्चौ यन्तौ पश्यन्ति चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासिकोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते सर्वतः परि क्रामतो रक्षसामपहत्यै देवा वै याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन्तांस्ताभिः प्रा-(३)-णुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन्तांस्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यञ्चौ शुक्रामन्थिनौ पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान्प्र णुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीर्जायन्ते शुक्रामन्थिनौ वा अनु प्रजाः प्र जायन्तेऽत्त्रीश्चाऽऽद्याश्च सुवीराः प्रजाः प्रजनयन्परीहि शुक्रः शुक्रशोचिषा (४) सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेत्याहैता वै सुवीरा या अत्त्रीरेताः सुप्रजा या आद्या य एवं वेदात्त्र्यस्य प्रजा जायते नाऽऽद्या प्रजापतेरक्ष्यश्वयत्तत्पराऽपतत्तद्विकङ्कतं प्राविशत्तद्विकङ्कते नारमत तद्यवं प्राविशत्तद्यवेऽरमत तद्यवस्य (५) यवत्वं यद्वैकङ्कतं मन्थिपात्रं भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः सं भरति ब्रह्मवादिनो वदन्ति कस्मात्सत्यान्मन्थिपात्रं सदो नाश्नुत इत्यार्तपात्रं हीति ब्रूयाद्यदश्नुवीतान्धोऽध्वर्युः स्यादार्तिमार्छेत्तस्मान्नाश्नुते ॥ (आत्मना परा, नि,-ष्प्र, शुक्रशोचिषा, यवस्य, सप्तत्रिंशच्च) ॥ १० ॥

आग्रयणग्रहः ॥ सोमऋषिः ।

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान्ग्रहानपश्यन्तानगृह्णत ततो वै तेऽग्रं पर्यायन्यस्यैवं विदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्भ्रातृव्यस्यैव रुक्त्वाऽग्रं समानानां पर्येति ये देवा दिव्येकादश स्थेत्याह-(१)-तावतीर्वै देवतास्ताभ्य एवैनं सर्वाभ्यो गृह्णात्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष

देवतया वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत साऽमन्यत वागन्तर्यन्ति वै मेति साऽऽग्रयणं प्रत्याऽगच्छत्तदाग्रयणस्याऽऽग्रयणत्वं (२) तस्मादाग्रयणे वाग्वि सृज्यते यत्तूष्णीं पूर्वे ग्रहा गृह्यन्ते यथा त्सारीयति म आख इयति नाप राल्स्यामीत्युपावसृजत्येवमेव तदध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य वाचं वि सृजते त्रिर्हिं करोत्युद्गातॄनेव तद्वृणीते प्रजापतिर्वा एष यदाग्रयणो यदाग्रयणं गृहीत्वा हिं करोति प्रजापतिरेव (३) तत्प्रजा अभि जिघ्रति तस्माद्वत्सं जातं गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य यदाग्रयणः सवनेसवनेऽभि गृह्णात्यात्मन्नेव यज्ञं सं तनोत्युपरिष्टादा नयति रेत एव तद्दधात्यधस्तादुप गृह्णाति प्र जनयत्येवैनद्ब्रह्मवादिनो वदन्ति कस्मात्सत्याद्गायत्री कनिष्ठा छन्दसां सती सर्वाणि सवनानि वहतीत्ये-(४)-ष वै गायत्रियै वत्सो यदाग्रयणस्तमेव तदभिनिवर्तं सर्वाणि सवनानि वहति तस्माद्वत्समपाकृतं गौरभि नि वर्तते ॥ (आह, ऽऽग्रयणत्वं, प्रजापतिरेव, ति, विंशतिश्च) ॥ ११ ॥

[यज्ञेन २३२। देवा २२६। ब्रह्मवादिनो २२५। देवस्य १९७। प्राणो ३५२। देवा १९१। वा-१०८।-मित्रं १८१। यज्ञस्य २३६। बृहस्पति-२८०।-देवा २२०। एकादश ॥ २१३६]

[॥ इति षष्ठकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥]

सोममन्त्रब्राह्मणनिरूपणम् ।

[अथ पञ्चमः प्रपाठकः ॥ ५ ॥]

उक्थ्यग्रहः ॥ सोमऋषिः ।

इन्द्रो वृत्राय वज्रमुदयच्छत्स वृत्रो वज्रादुद्यतादबिभेत्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्यं प्रायच्छत्तस्मै द्वितीयमुदयच्छत्सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति (१) तस्मा उक्थ्यमेव प्रायच्छत्तस्मै तृतीयमुदयच्छत्तं विष्णुरन्वतिष्ठत जहीति सोऽब्रवीन्मा मे प्र हारस्ति वा इदं मयि वीर्यं तत्ते प्र दास्यामीति तस्मा उक्थ्यमेव प्रायच्छत्तं निर्मायं भूतमहन्यज्ञो हि तस्य मायाऽऽसीद्यदुक्थ्यो गृह्यत इन्द्रियमेव (२) तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्त इन्द्राय त्वा बृहद्वते वयस्वत इत्याहेन्द्राय हि स तं प्रायच्छत्तस्मै त्वा विष्णवे त्वेत्याह यदेव विष्णुरन्वतिष्ठत जहीति तस्माद्विष्णुमन्वाभजति त्रिर्निर्गृह्णाति त्रिर्हि स तं तस्मै प्रायच्छदेष ते योनिः पुनर्हविरसीत्याह पुनःपु-(३)-नर्ह्यस्मान्निर्गृह्णाति चक्षुर्वा एतद्यज्ञस्य यदुक्थ्यस्तस्मादुक्थ्यं हुतं सोमा अन्वायन्ति तस्मादात्मा चक्षुरन्वेति तस्मादेकं यन्तं बहवोऽनु यन्ति तस्मादेको बहूनां भद्रो भवति तस्मादेको बह्वीर्जाया विन्दते यदि कामयेताध्वर्युरात्मानं यज्ञयशसेनार्पयेयमित्यन्तराऽऽहवनीयं च हविर्धानं च तिष्ठन्नव नये-(४)-दात्मानमेव यज्ञयशसेनार्पयति यदि कामयेत यजमानं यज्ञयशसेनार्पयेयमित्यन्तरा सदोहविर्धाने तिष्ठन्नव नयेद्यजमानमेव यज्ञयशसेनार्पयति यदि कामयेत सदस्यान्यज्ञयशसेनार्पयेयमिति सद आलभ्याव नयेत्सदस्यानेव यज्ञयशसेनार्पयति ॥ (इति,-न्द्रियमेव, पुनः पुन,-र्नयेद् [illegible]) ॥ १ ॥

ध्रुवग्रहः ॥ सोमऋषिः ।

आयुर्वा एतद्यज्ञस्य यद्ध्रुव उत्तमो ग्रहाणां गृह्यते तस्मादायुः प्राणानामुत्तमं मूर्धानं दिवो अरतिं पृथिव्या इत्याह मूर्धानमेवैनं समानानां करोति वैश्वानरमृताय जातमग्निमित्याह वैश्वानरं हि देवतयाऽऽयुरुभयतोवैश्वानरो गृह्यते तस्मादुभयतः प्राणा अधस्ताच्चोपरिष्टाच्चार्धिनोऽन्ये ग्रहा गृह्यन्तेऽर्धी ध्रुवस्तस्मा-(१)-दर्ध्यवाङ्प्राणोऽन्येषां प्राणानामुपोप्तेऽन्ये ग्रहाः साद्यन्तेऽनुपोप्ते ध्रुवस्तस्मादस्थ्नाऽन्याः प्रजाः प्रतितिष्ठन्ति मांसेनान्या असुरा वा उत्तरतः पृथिवीं पर्यचिकीर्षन्तां देवा ध्रुवेणादृंहन्तद्ध्रुवस्य ध्रुवत्वं यद्ध्रुव उत्तरतः साद्यते धृत्या आयुर्वा एतद्यज्ञस्य यद्ध्रुव आत्मा होता यद्धोतृचमसे ध्रुवमवनयत्यात्मन्नेव यज्ञस्या (२) आयुर्दधाति पुरस्तादुक्थस्यावनीय इत्याहुः पुरस्ताद्ध्यायुषो भुङ्क्ते मध्यतोऽवनीय इत्याहुर्मध्यमेन ह्यायुषो भुङ्क्त उत्तरार्धेऽवनीय इत्याहुरुत्तमेन ह्यायुषो भुङ्क्ते वैश्वदेव्यामृचि शस्यमानायामव नयति वैश्वदेव्यो वै प्रजाः प्रजास्वेवाऽऽयुर्दधाति ॥ (अर्धी ध्रुवस्तस्मा,-देव यज्ञस्या,-एकचत्वारिंशच्च) ॥ २ ॥

ऋतुग्रहाः ॥ सोमऋषिः ।

यज्ञेन वै देवाः सुवर्गं लोकमायन्तेऽमन्यन्त मनुष्या नोऽन्वाभविष्यन्तीति ते संवत्सरेण योपयित्वा सुवर्गं लोकमायन्तमृषय ऋतुग्रहैरेवानु प्राजानन्यदृतुग्रहा गृह्यन्ते सुवर्गस्य लोकस्य प्रज्ञात्यै द्वादश गृह्यन्ते द्वादश मासाः संवत्सरः संवत्सरस्य प्रज्ञात्यै सह प्रथमौ गृह्येते सहोत्तमौ तस्माद्द्वौद्वावृतू उभयतोमुखमृतुपात्रं भवति को (१) हि तद्वेद यत ऋतूनां मुखमृतुना प्रेष्येति षट्कृत्व आह षड्वा ऋतव ऋतूनेव प्रीणात्यृतुभिरिति चतुश्चतुष्पद एव पशून्प्रीणाति द्विः पुनर्ऋतुनाऽऽह द्विपद एव प्रीणात्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुस्तस्माच्चतुष्पादः पशव ऋतूनुप जीवन्ति द्विः (२) पुनर्ऋतुनाऽऽह तस्माद्द्विपादश्चतुष्पदः पशूनुप जीवन्त्यृतुना प्रेष्येति षट्कृत्व आहर्तुभिरिति चतुर्द्विः पुनर्ऋतुनाऽऽहाऽऽक्रमणमेव तत्सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै नान्योऽन्यमनु प्र पद्येत यदन्योऽन्यमनु प्र पद्येतर्तुर्ऋतुमनु प्र पद्येतर्तवो मोहुकाः स्युः (३) प्रसिद्धमेवाध्वर्युर्दक्षिणेन प्र पद्यते प्रसिद्धं प्रतिप्रस्थातोत्तरेण तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणोपयामगृहीतोऽसि संसर्पोऽस्यंहस्पत्याय त्वेत्याहास्ति त्रयोदशो मास इत्याहुस्तमेव तत्प्रीणाति ॥ (को, जीवन्ति द्विः, स्यु, रष्टात्रिंशच्च) ॥ ३ ॥

ऐन्द्राग्न-वैश्वदेवग्रहौ ॥ सोमऋषिः ।

सुवर्गाय वा एते लोकाय गृह्यन्ते यदृतुग्रहा ज्योतिरिन्द्राग्नी यदैन्द्राग्नमृतुपात्रेण गृह्णाति ज्योतिरेवास्मा उपरिष्टाद्दधाति सुवर्गस्य लोकस्यानुख्यात्या ओजोभृतौ वा एतौ देवानां यदिन्द्राग्नी यदैन्द्राग्नो गृह्यत ओज एवाव रुन्धे वैश्वदेवं शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजा असावादित्यः शुक्रो यद्वैश्वदेवं शुक्रपात्रेण गृह्णाति तस्मादसावादित्यः (१) सर्वाः प्रजाः प्रत्यङ्ङुदेति तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति वैश्वदेवं शुक्रपात्रेण गृह्णाति वैश्वदेव्यो वै प्रजास्तेजः शुक्रो यद्वैश्वदेवं शुक्रपात्रेण गृह्णाति प्रजास्वेव तेजो दधाति ॥ (तस्मादसावादित्य-, स्त्रिंशच्च) ॥ ४ ॥

माहेन्द्रग्रहश्च ॥ सोमऋषिः ।

इन्द्रो मरुद्भिः सांविद्येन माध्यंदिने सवने वृत्रमहन् यन्माध्यंदिने सवने मरुत्वतीया गृह्यन्ते वार्त्रघ्ना एव ते यजमानस्य गृह्यन्ते तस्य वृत्रं जघ्नुष ऋतवोऽमुह्यन्त्स ऋतुपात्रेण मरुत्वतीयानगृह्णात् ततो वै स ऋतून् प्राजानाद्यदृतुपात्रेण मरुत्वतीया गृह्यन्त ऋतूनां प्रज्ञात्यै वज्रं वा एतं यजमानो भ्रातृव्याय प्र हरति यन्मरुत्वतीया उदेव प्रथमेन (१) यच्छति प्र हरति द्वितीयेन स्तृणुते तृतीयेना-ऽऽयुधं वा एतद्यजमानः सं स्कुरुते यन्मरुत्वतीया धनुरेव प्रथमो ज्या द्वितीय इषुस्तृतीयः प्रत्येव प्रथमेन धत्ते वि सृजति द्वितीयेन विध्यति तृतीयेने-न्द्रो वृत्रं हत्वा परां परावतमगच्छदपाराधमिति मन्यमानः स हरितो-ऽभवत् स एतान्मरुत्वतीयानात्मस्परणानपश्यत् तानगृह्णीत (२) प्राणमेव प्रथमेनास्पृणुतापानं द्वितीयेना-ऽऽत्मानं तृतीयेना-ऽऽत्मस्परणा वा एते यजमानस्य गृह्यन्ते यन्मरुत्वतीयाः प्राणमेव प्रथमेन स्पृणुतेऽपानं द्वितीयेनाऽऽत्मानं तृतीयेने-न्द्रो वृत्रमहन् तं देवा अब्रुवन् महान् वा अयमभूद्यो वृत्रमवधीदिति तन्महेन्द्रस्य महेन्द्रत्वं स एतं माहेन्द्रमुद्धारमुदहरत वृत्रं हत्वाऽन्यासु देवतास्व-(३)-धि यन्माहेन्द्रो गृह्यत उद्धारमेव तं यजमान उद्धरतेऽन्यासु प्रजास्वधि शुक्रपात्रेण गृह्णाति यजमानदेवत्यो वै माहेन्द्रस्तेजः शुक्रो यन्माहेन्द्रं शुक्रपात्रेण गृह्णाति यजमान एव तेजो दधाति ॥ (प्रथमेना, -गृह्णीत, देवतास्व, द्वाविंशतिश्च) ॥ ५ ॥

आदित्यग्रहः ॥ सोमऋषिः ।

अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् तस्या उच्छेषणमददुस्तत् प्राश्नात् सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचत् साऽमन्यतोच्छेषणान्म इमेऽज्ञत यदग्रे प्राशिष्यामीतो मे वसीयांसो जनिष्यन्त इति साऽग्रे प्राश्नात् सा रेतोऽधत्त तस्यै व्यृद्धमाण्डमजायत साऽऽदित्येभ्य एव (१) तृतीयमपचद्भोगाय म इदं श्रान्तमस्त्विति तेऽब्रुवन् वरं वृणामहै योऽतो जायाता अस्माकं स एकोऽसद्योऽस्य प्रजायामृध्याता अस्माकं भोगाय भवादिति ततो विवस्वानादित्यो ऽजायत तस्य वा इयं प्रजा यन्मनुष्यास्तास्वेक एवर्धो यो यजते स देवानां भोगाय भवति देवा वै यज्ञा-(२)-द्रुद्रमन्तरायन्त्स आदित्यानन्वाक्रमत ते द्विदेवत्यान् प्रापद्यन्त तान् न प्रति प्रायच्छन् तस्मा-दपि वध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्माद् द्विदेवत्येभ्य आदित्यो निर्गृह्यते यदुच्छेषणादजायन्त तस्मादुच्छेषणाद्गृह्यते तिसृभिर्ऋग्भिर्गृह्णाति माता पिता पुत्रस्तदेव तन्मिथुनमुल्बं गर्भो जरायु तदेव त-(३)-न्मिथुनं पशवो वा एते यदादित्य ऊर्ग्दधि दध्ना मध्यतः श्रीणात्यूर्जमेव पशूनां मध्यतो दधाति शृतातङ्क्येन मेध्यत्वाय तस्मादामा पक्वं दुहे पशवो वा एते यदादित्यः परिश्रित्य गृह्णाति प्रतिरुध्यैवास्मै पशून् गृह्णाति पशवो वा एते यदादित्य एष रुद्रो यदग्निः परिश्रित्य गृह्णाति रुद्रादेव पशूनन्तर्दधात्येष (४) वै विवस्वानादित्यो यदुपांशुसवनः स एतमेव सोमपीथं परि शय आ तृतीयसवनात् विवस्वन्नादित्यैष ते सोमपीथ इत्याह विवस्वन्तमेवाऽऽदित्यं सोमपीथेन समर्धयति या दिव्या वृष्टिस्तया त्वा श्रीणामीति वृष्टिकामस्य श्रीणीयाद्वृष्टिमेवाव रुन्धे यदि ताजक् प्रस्कन्देद्वर्षुकः पर्जन्यः स्याद्

यदि चिरमवर्षुको न (५) सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजेन्न हुत्वाऽन्वीक्षेत यदन्वीक्षेत चक्षुरस्य प्रमायुकं स्यात् तस्मान्नान्वीक्ष्यः ॥ (एव, यज्ञा, ज्जरायु तदेव तद्,-न्तर्दधाति, न, सप्तविंशतिश्च) ॥ ६ ॥

सावित्र-वैश्वदेवग्रहौ च ॥ सोमऋषिः ।

अन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति प्रजापतिर्वा एष यदाग्रयणः प्रजानां प्रजननाय न सादयत्य-सन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्कुर्याद्रुद्रं प्रजा अन्ववसृजे-देष वै गायत्रो देवानां यत् सविता एष गायत्रियै लोके गृह्यते यदाग्रयणो यदन्तर्यामपात्रेण सावित्रमाग्रयणाद्गृह्णाति स्वादेवैनं योनेर्निर्गृह्णाति विश्वे (१) देवास्तृतीयं सवनं नोदयच्छन् ते सवितारं प्रातःसवनभागं सन्तं तृतीयसवनमभि पर्यणयन् ततो वै ते तृतीयं सवनमुदयच्छन् यत् तृतीयसवने सावित्रो गृह्यते तृतीयस्य सवनस्योद्यत्यै सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति वैश्वदेव्यो वै प्रजा वैश्वदेवः कलशः सविता प्रसवानामीशे यत् सवितृपात्रेण वैश्वदेवं कलशाद्गृह्णाति सवितृप्रसूत एवास्मै प्रजाः प्र (२) जनयति सोमे सोममभि गृह्णाति रेत एव तद्दधाति सुशर्माऽसि सुप्रतिष्ठान इत्याह सोमे हि सोममभिगृह्णाति प्रतिष्ठित्या एतस्मिन् वा अपि ग्रहे मनुष्येभ्यो देवेभ्यः पितृभ्यः क्रियते सुशर्माऽसि सुप्रतिष्ठान इत्याह मनुष्येभ्य एवैतेन करोति बृहदित्याह देवेभ्य एवैतेन करोति नम इत्याह पितृभ्य एवैतेन करोत्ये-(३)-तावतीर्वै देवतास्ताभ्य एवैनं सर्वाभ्यो गृह्णात्ये-ष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येषः ॥ (विश्वे प्र, पितृभ्य एवैतेन करोत्ये,- कान्नविंशतिश्च) ॥ ७ ॥

पात्नीवतग्रहः ॥ सोमऋषिः ।

प्राणो वा एष यदुपांशुर्यदुपांशुपात्रेण प्रथमश्चोत्तमश्च ग्रहौ गृह्येते प्राणमेवानु प्रयन्ति प्राणमनूद्यन्ति प्रजापतिर्वा एष यदाग्रयणः प्राण उपांशुः पत्नीः प्रजाः प्र जनयन्ति यदुपांशुपात्रेण पात्नीवतमाग्रयणा-द्गृह्णाति प्रजानां प्रजननाय तस्मात् प्राणं प्रजा अनु प्र जायन्ते देवा वा इतइतः पत्नीः सुवर्गं (१) लोक-मजिगांसन् ते सुवर्गं लोकं न प्राजानन् त एतं पात्नीवतमपश्यन् तमगृह्णत ततो वै ते सुवर्गं लोकं प्राजानन् यत् पात्नीवतो गृह्यते सुवर्गस्य लोकस्य प्रज्ञात्यै स सोमो नातिष्ठत स्त्रीभ्यो गृह्यमाणस्तं घृतं वज्रं कृत्वाऽघ्नन् तं निरिन्द्रियं भूतमगृह्णन् तस्मात् स्त्रियो निरिन्द्रिया अदायादीरपि पापात् पुंस उपस्तितरं (२)-वदन्ति यद्धृतेन पात्नीवतं श्रीणाति वज्रेणैवैनं वशे कृत्वा गृह्णात्यु-पयामगृहीतोऽसीत्याहेयं वा उपयामस्तस्मादिमां प्रजा अनु प्र जायन्ते बृहस्पतिसुतस्य त इत्याह ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयती-न्दो इत्याह रेतो वा इन्दू रेत एव तद्दधाती-न्द्रियाव इत्या-(३)-ह प्रजा वा इन्द्रियं प्रजा एवास्मै प्र जनयत्य-ग्ना३ इत्याहाग्निर्वै रेतोधाः पत्नीव इत्याह मिथुनत्वाय सजूर्देवेन त्वष्ट्रा सोमं पिबेत्याह त्वष्टा वै पशूनां मिथुनानां रूपकृद्रूपमेव पशुषु दधाति देवा वै त्वष्टारमजिघांसन्त्स पत्नीः प्रापद्यत तं न प्रति प्रायच्छन् तस्मादपि (४) वध्यं प्रपन्नं न प्रति प्र यच्छन्ति तस्मात् पात्नीवते त्वष्टेऽपि गृह्यते न सादयत्यसन्नाद्धि प्रजाः प्रजायन्ते नानु वषट् करोति यदनुवषट्-

कुर्याद्रुद्रं प्रजा अन्ववसृजेद्यन्नानुवषट्कुर्यादशान्तमग्नीत् सोमं भक्षयेदुपांश्वनु वषट् करोति न रुद्रं प्रजा अन्ववसृजति शान्तमग्नीत् सोमं भक्षयत्य-ग्नीन्नेष्टुरुपस्थमा सीद (५) नेष्टः पत्नीमुदानयेत्याहाग्नीदेव नेष्टरि रेतो दधाति नेष्टा पत्नियां-मुद्गात्रा सं ख्यापयति प्रजापतिर्वा एष यदुद्गाता प्रजानां प्रजननाया-प उप प्र वर्तयति रेत एव तत् सिञ्चत्यू-रुणोप प्र वर्तयत्यूरुणा हि रेतः सिच्यते नग्नंकृत्योरुमुप प्र वर्तयति यदा हि नग्न ऊरुर्भवत्यथ मिथुनी (६) भवतोऽथ रेतः सिच्यतेऽथ प्रजाः प्र जायन्ते ॥ (पत्नीः सुवर्गं,- मुपस्तितरं,- मिन्द्रियाव इत्य,- पि, सीद, मिथुन्य,- ष्टौ च) ॥ ८ ॥

हारियोजनग्रहः ॥ सोमऋषिः ।

इन्द्रो वृत्रमहन् तस्य शीर्षकपालमुदौब्जत् स द्रोणकलशोऽभवत् तस्मात् सोमः समस्रवत् स हारियोजनोऽभवत् तं व्यचिकित्सज्जुहवानी३ मा हौषा३मिति सोऽमन्यत यद्धोष्याम्यामं होष्यामि यद्य होष्यामि यज्ञवेशसं करिष्यामीति तमध्रियत होतुं सोऽग्निरब्रवीन्न मय्यामं होष्यसीति तं धानाभिरश्रीणात् (१) तं शृतं भूतमजुहोद्यद्धानाभिर्हारियोजनं श्रीणाति शृतत्वाय शृतमेवैनं भूतं जुहोति बह्वीभिः श्रीणात्येतावतीरेवास्यामुष्मिंल्लोके कामदुघा भवन्त्यथो खल्वाहुरेता वा इन्द्रस्य पृश्नयः कामदुघा यद्धारियोजनीरिति तस्माद्बह्वीभिः श्रीणीया-दृक्सामे वा इन्द्रस्य हरी सोमपानौ तयोः परिधय आधानं यदप्रहृत्य परिधीञ्जुहुयादन्तराधानाभ्यां (२) घासं प्र यच्छेत् प्रहृत्य परिधीञ्जुहोति निराधानाभ्यामेव घासं प्र यच्छत्यु-न्नेता जुहोति यातयामेव ह्येतर्ह्यध्वर्युः स्वगाकृतो यदध्वर्युर्जुहुयाद्यथा विमुक्तं पुनर्युनक्ति तादृगेव त-च्छीर्षन्नधिनिधाय जुहोति शीर्षतो हि स समभवद्-विक्रम्य जुहोति विक्रम्य हीन्द्रो वृत्रमहन्त्समृद्ध्यै पशवो वै हारियोजनीर्यत् संभिन्द्यादल्पा (३) एनं पशवो भुञ्जन्त उप तिष्ठेरन् यन्न संभिन्द्याद्बहव एनं पशवोऽभुञ्जन्त उप तिष्ठेरन् मनसा सं बाधत उभयं करोति बहव एवैनं पशवो भुञ्जन्त उप तिष्ठन्त उन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तमेवाव रुन्धत उत्तरवेद्यां नि वपति पशवो वा उत्तरवेदिः पशवो हारियोजनीः पशुष्वेव पशून् प्रति ष्ठापयन्ति (४) ॥ (अश्रीणा,- दन्तराधानाभ्या,- मल्पाः, स्थापयन्ति) ॥ ९ ॥

आग्रयणादीनां कथञ्चित् क्षये पुनर्ग्रहणम्, दारुपात्र-पुरोरुक् प्रशंसा च ॥ सोमऋषिः ।

ग्रहान् वा अनु प्रजाः पशवः प्र जायन्त उपांश्वन्तर्यामावजावयः शुक्रामन्थिनौ पुरुषा ऋतुग्रहानेकशफा आदित्यग्रहं गावः आदित्यग्रहो भूयिष्ठाभिर्ऋग्भिर्गृह्यते तस्माद्गावः पशूनां भूयिष्ठा यत् त्रिरुपांशुं हस्तेन विगृह्णाति तस्माद् द्वौ त्रीनजा जनयत्य-थावयो भूयसीः पिता वा एष यदाग्रयणः पुत्रः कलशो यदाग्रयण उपदस्येत् कलशाद्गृह्णीयाद्यथा पिता (१) पुत्रं क्षित उपधावति तादृगेव तद्-यत् कलश उपदस्येदाग्रयणाद्गृह्णीयाद्यथा पुत्रः पितरं क्षित उपधावति तादृगेव त-दात्मा वा एष यज्ञस्य यदाग्रयणो यद्ग्रहो वा कलशो वोपदस्येदाग्रयणाद्गृह्णीयादात्मन एवाधि यज्ञं निष्करोत्य-विज्ञातो वा एष गर्भेणाविज्ञातेन ग्रहो गृह्यते यदाग्रयणः स्थाल्या गृह्णाति वायव्येन जुहोति तस्मात् (२) गर्भेणाविज्ञातेन ब्रह्महा-ऽवभृथमवयन्ति परा स्थालीरस्यन्त्युद्वायव्यानि हरन्ति तस्मात् स्त्रियं जातां पराऽस्यन्त्युत् पुमांसं हरन्ति

यत् पुरोरुचमाह यथा वस्यस आहरति तादृगेव तद्यद्ग्रहं गृह्णाति यथा वस्यस आहृत्य प्राऽऽह तादृगेव तद्यत् सादयति यथा वस्यस उपनिधायापक्रामति तादृगेव तद्य-(३)-द्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद् दृढं पुरस्तादुपयामा यजुषा गृह्यन्त उपरिष्टादुपयामा ऋचा यज्ञस्य धृत्यै ॥ (यथा पिता, तस्मा,- दपक्रामति तादृगेव त,-द्वादश च) ॥ १० ॥

सोमपात्रप्रशंसा, सवनीयपुरोडाशविधानं च ॥ सोमऋषिः ।

प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्तेऽमुमेव तैर्लोकमभि जयति पराङिव ह्यसौ लोको यानि पुनः प्रयुज्यन्त इममेव तैर्लोकमभि जयति पुनःपुनरिव ह्ययं लोकः प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वोषधयः परा भवन्ति यानि पुनः (१) प्रयुज्यन्ते तान्यन्वोषधयः पुनरा भवन्ति प्रान्यानि पात्राणि युज्यन्ते नान्यानि यानि पराचीनानि प्रयुज्यन्ते तान्यन्वारण्याः पशवोऽरण्यमप यन्ति यानि पुनः प्रयुज्यन्ते तान्यनु ग्राम्याः पशवो ग्राममुपावयन्ति यो वै ग्रहाणां निदानं वेद निदानवान् भवत्याज्यमित्युक्थं तद्वै ग्रहाणां निदानं यदुपांशु शंसति त-(२)-दुपांश्वन्तर्यामयोर्यदुच्चैस्तदितरेषां ग्रहाणामेतद्वै ग्रहाणां निदानं य एवं वेद निदानवान् भवति यो वै ग्रहाणां मिथुनं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते स्थालीभिरन्ये ग्रहा गृह्यन्ते वायव्यैरन्य एतद्वै ग्रहाणां मिथुनं य एवं वेद प्र प्रजया पशुभिर्मिथुनैर्जायते इन्द्रस्त्वष्टुः सोममभीषहाऽपिबत् स विष्वङ् (३) व्यार्च्छत् स आत्मन्नारमणं नाविन्दत् स एताननुसवनं पुरोडाशानपश्यत् तान् निरवपत् तैर्वै स आत्मन्नारमणमकुरुत तस्मादनुसवनं पुरोडाशा निरुप्यन्ते तस्मादनुसवनं पुरोडाशानां प्राश्नीयादात्मन्नेवाऽऽरमणं कुरुते नैनं सोमोऽति पवते ब्रह्मवादिनो वदन्ति नर्चा न यजुषा पङ्क्तिराप्यतेऽथ किं (४) यज्ञस्य पाङ्क्तत्वमिति धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पङ्क्तिराप्यते तद्यज्ञस्य पाङ्क्तत्वम् ॥ (भवन्ति यानि पुनः, शंसति त,- द्विष्वङ्, किं, चतुर्दश च) ॥ ११ ॥

[इन्द्र २३३। आयुं-१३९। -युञ्जते १८७। सुवर्गाय- ८०। -ग्नो १०८। ऽदितिः- २०७। -रन्तर्यामपात्रेण १६९। प्राण १०८। इन्द्रो २००। ग्रहान् १६८। प्रे- २१७। कादश २१५५]

[॥ इति षष्ठकाण्डे पञ्चमः प्रपाठकः ॥५॥]

सोममन्त्रब्राह्मणनिरूपणम् ।

[अथ षष्ठः प्रपाठकः ॥६॥]

दक्षिणाहोम, तद्दानादिवर्णनं च ॥ सोमऋषिः ।

सुवर्गाय वा एतानि लोकाय हूयन्ते यद्दाक्षिणानि द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानः प्रतिष्ठित्या आग्नीध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमते सदोऽभ्यैति सुवर्गमेवैनं लोकं गमयति सौरीभ्यामृग्भ्यां गार्हपत्ये जुहोत्यमुमेवैनं लोकं समारोहयति नयवत्यर्चाऽऽग्नीध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै दिवं गच्छ सुवः पतेति हिरण्यं (१) हुत्वोद्गृह्णाति सुवर्गमेवैनं लोकं गमयति रूपेण वो रूपमभ्यै-

मीत्याह रूपेण वा अस्य तद् रूपमभ्येति यद्धिरण्येन । तुथो वो विश्ववेदा वि भजत्वित्याह तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा वि भजति तेनैवैना वि भजत्यग्ने राध (२) एति सोमच्युतमित्याह सोमच्युतं ह्यस्य राध एति । तन्मित्रस्य पथा नयेत्याह शान्त्यै । ऋतस्य पथा प्रेत चन्द्रदक्षिणा इत्याह सत्यं वा ऋतं सत्येनैवैना ऋतेन वि भजति । यज्ञस्य पथा सुविता नयन्तीरित्याह यज्ञस्य ह्येताः पथा यन्ति यद्दक्षिणा । ब्राह्मणमद्य राध्यासम् (३) ऋषिमार्षेयमित्याहैष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान् तस्मादेवमाह । वि सुवः पश्य व्यन्तरिक्षमित्याह सुवर्गमेवैनं लोकं गमयति । यतस्व सदस्यैरित्याह मित्रत्वाय । अस्मद्दात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा विशतेत्याह वयमिह प्रदातारः स्मोऽस्मानमुत्र मधुमतीरा विशतेति (४) वावैतदाह । हिरण्यं ददाति ज्योतिर्वै हिरण्यं ज्योतिरेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्या अग्नीधे ददात्यग्निमुखानेवर्तून् प्रीणाति । ब्रह्मणे ददाति प्रसूत्यै होत्रे ददात्यात्मा वा एष यज्ञस्य यद्धोताऽऽत्मानमेव यज्ञस्य दक्षिणाभिः समर्धयति ॥ (हिरण्यं, राधो, राध्यासं, मधुमतीरा विशतेत्,- एकत्रिंशच्च) ॥ १ ॥

समिष्टयजुर्होमः ॥ सोमऋषिः ।

समिष्टयजूंषि जुहोति यज्ञस्य समिष्ट्यै यद्वै यज्ञस्य क्रूरं यद्विलिष्टं यदत्येति यन्नात्येति यदतिकरोति यन्नापि करोति तदेव तैः प्रीणाति । नव जुहोति नव वै पुरुषे प्राणाः पुरुषेण यज्ञः संमितो यावानेव यज्ञस्तं प्रीणाति । षडृग्मियाणि जुहोति षड्वा ऋतव ऋतूनेव प्रीणाति त्रीणि यजूंषि (१) त्रय इमे लोका इमानेव लोकान् प्रीणाति । यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छेत्याह यज्ञपतिमेवैनं गमयति स्वां योनिं गच्छेत्याह स्वामेवैनं योनिं गमयत्येष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर इत्याह यजमान एव वीर्यं दधाति । वासिष्ठो ह सात्यहव्यो देवभागं पप्रच्छ यत् सृञ्जयान् बहुयाजिनोऽयीयजो यज्ञे (२) यज्ञं प्रत्यतिष्ठिपा३ यज्ञपता३विति स होवाच यज्ञपताविति सत्याद्वै सृञ्जयाः परा बभूवुरिति होवाच यज्ञे वाव यज्ञः प्रतिष्ठाप्य आसीद्यजमानस्यापराभावायेति । देवा गातुविदो गातुं वित्त्वा गातुमितेत्याह यज्ञ एव यज्ञं प्रति ष्ठापयति यजमानस्यापराभावाय ॥ (यजूंषि, यज्ञे, एकचत्वारिंशच्च) ॥ २ ॥

अवभृथः ॥ सोमऋषिः ।

अवभृथयजूंषि जुहोति यदेवार्वाचीनमेकहायनादेनः करोति तदेव तैरव यजतेऽपोऽवभृथमवैत्यप्सु वै वरुणः साक्षादेव वरुणमव यजते । वर्त्मना वा अन्वित्य यज्ञं रक्षांसि जिघांसन्ति साम्ना प्रस्तोताऽन्ववैति साम वै रक्षोहा रक्षसामपहत्यै । त्रिर्निधनमुपैति त्रय इमे लोका एभ्य एव लोकेभ्यो रक्षांसि (१) अप हन्ति । पुरुषःपुरुषो निधनमुपैति पुरुषःपुरुषो हि रक्षस्वी रक्षसामपहत्यै । उरुं हि राजा वरुणश्चकारेत्याह प्रतिष्ठित्यै । शतं ते राजन् भिषजः सहस्रमित्याह भेषजमेवास्मै करोत्यभिष्ठितो वरुणस्य पाश इत्याह वरुणपाशमेवाभि तिष्ठति । बर्हिरभि जुहोत्याहुतीनां प्रतिष्ठित्या अथो अग्निवत्येव जुहोत्यपबर्हिषः प्रयाजान् (२) यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चत्याज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेति । वरुणं यजति वरुणपाशादेवैनं मुञ्चत्यग्नीवरुणौ यजति साक्षादेवैनं वरुणपाशान्मुञ्चत्यपबर्हिषावनूयाजौ यजति प्रजा वै बर्हिः प्रजा एव वरुणपाशान्मुञ्चति चतुरः प्रयाजान् यजति द्वावनूयाजौ षट् सं पद्यन्ते षड्वा ऋतव (३) ऋतुष्वेव प्रति तिष्ठत्यवभृथ निचङ्कुणेत्याह यथोदितमेव वरुणमव यजते । समुद्रे ते हृदयमप्स्वन्तरित्याह समुद्रे ह्यन्तर्वरुणः सं त्वा विशन्त्वोषधीरुताऽऽप इत्याहाद्भिरेवैनमोषधीभिः सम्यञ्चं दधाति । देवीराप एष वो गर्भ इत्याह यथायजुरेवैतत् । पशवो वै (४) सोमो यद्भिन्दूनां भक्षयेत् पशुमान्त्स्याद्वरुणस्त्वेनं गृह्णीयाद्यन्न भक्षयेदपशुः स्यान्नैनं वरुणो गृह्णीयादुपस्पृश्यमेव पशुमान् भवति नैनं वरुणो गृह्णाति । प्रतियुतो वरुणस्य पाश इत्याह वरुणपाशादेव निर्मुच्यतेऽप्रतीक्षमा यन्ति वरुणस्यान्तर्हित्यै । एधोऽस्येधिषीमहीत्याह समिधैवाग्निं नमस्यन्त (५) उपायन्ति । तेजोऽसि तेजो मयि धेहीत्याह तेज एवाऽऽत्मन् धत्ते ॥ (लोकेभ्यो रक्षांसि, प्रयाजा,-नृतवो, वै, नमस्यन्तो, द्वादश च) ॥ ३ ॥

यूपैकादशिनी विधानम् ॥ सोमऋषिः ।

स्फ्येन वेदिमुद्धन्ति रथाक्षेण वि मिमीते यूपं मिनोति त्रिवृतमेव वज्रं संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै । यदन्तर्वेदि मिनुयाद्देवलोकमभि जयेद्यद्बहिर्वेदि मनुष्यलोकं वेद्यन्तस्य संधौ मिनोत्युभयोर्लोकयोरभिजित्यै । उपरसंमितां मिनुयात् पितृलोककामस्य रशनसंमितां मनुष्यलोककामस्य चषालसंमितामिन्द्रियकामस्य सर्वान्त्समान् प्रतिष्ठाकामस्य ये त्रयो मध्यमास्तान्त्समान् पशुकामस्यैतान् वा (१) अनु पशव उप तिष्ठन्ते पशुमानेव भवति । व्यतिषजेदितरान् प्रजयैवैनं पशुभिर्व्यतिषजति । यं कामयेत प्रमायुकः स्यादिति गर्तमितं तस्य मिनुयादुत्तरार्ध्यं वर्षिष्ठमथ ह्रसीयांसमेषा वै गर्तमिद्यस्यैवं मिनोति ताजक् प्र मीयते दक्षिणार्ध्यं वर्षिष्ठं मिनुयात् सुवर्गकामस्याथ ह्रसीयांसमाक्रमणमेव तत् सेतुं यजमानः कुरुते सुवर्गस्य लोकस्य समष्ट्यै (२) यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते । यं कामयेत स्त्र्यस्य जायेतेत्युपान्ते तस्य व्यतिषजेत् स्त्र्येवास्य जायते यं कामयेत पुमानस्य जायेतेत्यान्तं तस्य प्र वेष्टयेत् पुमानेवास्य (३) जायते । असुरा वै देवान् दक्षिणत उपानयन् तान् देवा उपशयेनैवापानुदन्त तदुपशयस्योपशयत्वं यद्दक्षिणत उपशय उपशये भ्रातृव्यापनुत्त्यै । सर्वे वा अन्ये यूपाः पशुमन्तोऽथोपशय एवापशुस्तस्य यजमानः पशुर्यन्न निर्दिशेदार्तिमार्छेद्यजमानोऽसौ ते पशुरिति निर्दिशेद्यं द्विष्यात्तमेव (४) द्वेष्टि तमस्मै पशुं निर्दिशति । यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयान्न ग्राम्यान् पशून् हिनस्ति नाऽऽरण्यान् । प्रजापतिः प्रजा असृजत सोऽन्नाद्येन व्यार्ध्यत स एतामेकादशिनीमपश्यत् तया वै सोऽन्नाद्यमवारुन्ध यद्दश यूपा भवन्ति दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धे (५) य एकादशः स्तन एवास्यै स दुह एवैनां तेन वज्रो वा एषा सं मीयते यदेकादशिनी सेश्वरा पुरस्तात् प्रत्यञ्चं यज्ञं संमर्दितोर्यत् पात्नीवतं मिनोति यज्ञस्य प्रत्युत्तब्ध्यै सयत्वाय ॥ (वै, समष्ट्यै, पुमानेवास्य, यमेव, रुन्धे, त्रिंशच्च) ॥ ४ ॥

एकादशिनी ॥ सोमऋषिः ।

प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एतामेकादशिनीमपश्यत् तया वै स आयुरिन्द्रियं वीर्यमात्मन्नधत्त प्रजा इव खलु वा एष सृजते यो यजते स एतर्हि रिरिचान इव यदेषैकादशिनी भवत्यायुरेव तयेन्द्रियं वीर्यं यजमान आत्मन् धत्ते । प्रैवाऽऽग्नेयेन वापयति मिथुनं सारस्वत्या करोति रेतः (१) सौम्येन दधाति प्र जनयति पौष्णेन बार्हस्पत्यो भवति ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैवास्मै प्रजाः प्र जनयति वैश्वदेवो भवति वैश्वदेव्यो वै प्रजाः प्रजा एवास्मै प्र जनयतीन्द्रियमेवैन्द्रेणाव रुन्धे विशं मारुतेनौजो बलमैन्द्राग्नेन प्रसवाय सावित्रो निर्वरुणत्वाय वारुणो । मध्यत ऐन्द्रमा लभते मध्यत एवेन्द्रियं यजमाने दधाति (२) पुरस्तादैन्द्रस्य वैश्वदेवमा लभते वैश्वदेवं वा अन्नमन्नमेव पुरस्ताद्धत्ते तस्मात् पुरस्तादन्नमद्यत ऐन्द्रमालभ्य मारुतमा लभते विड्वै मरुतो विशमेवास्मा अनु बध्नाति । यदि कामयेत योऽवगतः सोऽप रुध्यतां योऽपरुद्धः सोऽव गच्छत्वित्यैन्द्रस्य लोके वारुणमा लभेत वारुणस्य लोक ऐन्द्रं (३) य एवावगतः सोऽप रुध्यते योऽपरुद्धः सोऽव गच्छति । यदि कामयेत प्रजा मुह्येयुरिति पशून् व्यतिषजेत् प्रजा एव मोहयति । यदभिवाहतोऽपां वारुणमालभेत प्रजा वरुणो गृह्णीयाद्दक्षिणत उदञ्चमा लभतेऽपवाहतोऽपां प्रजानामवरुणग्राहाय ॥ (रेतो, यजमाने दधाति, लोक ऐन्द्रं, सप्तत्रिंशच्च) ॥ ५ ॥

पात्नीवतपशुः ॥ सोमऋषिः ।

इन्द्रः पत्निया मनुमयाजयत् तां पर्यग्निकृतामुदसृजत् तया मनुरार्ध्नोत् पर्यग्निकृतं पात्नीवतमुत्सृजति यामेव मनुरृद्धिमार्ध्नोत् तामेव यजमान ऋध्नोति । यज्ञस्य वा अप्रतिष्ठिताद्यज्ञः परा भवति यज्ञं पराभवन्तं यजमानोऽनु परा भवति यदाज्येन पात्नीवतं संस्थापयति यज्ञस्य प्रतिष्ठित्यै यज्ञं प्रतितिष्ठन्तं यजमानोऽनु प्रति तिष्ठतीष्टं वपया (१) भवत्यनिष्टं वशयाऽथ पात्नीवतेन प्र चरति तीर्थ एव प्र चरत्यथो एतर्ह्येवास्य यामं । त्वाष्ट्रो भवति त्वष्टा वै रेतसः सिक्तस्य रूपाणि वि करोति तमेव वृषाणं पत्नीष्वपि सृजति सोऽस्मै रूपाणि वि करोति ॥ (वपया, षट्त्रिंशच्च) ॥ ६ ॥

सोमचर्वादिविधानम् ॥ ६ अनुदृष्ट ॥ सोमऋषिः ।

घ्नन्ति वा एतत् सोमं यदभिषुण्वन्ति यत् सौम्यो भवति यथा मृतायानुस्तरणीं घ्नन्ति तादृगेव तद्यदुत्तरार्धे वा मध्ये वा जुहुयाद्देवताभ्यः समदं दध्याद्दक्षिणार्धे जुहोत्येषा वै पितॄणां दिक् स्वायामेव दिशि पितॄन् निरवदयते । उद्गातृभ्यो हरन्ति सामदेवत्यो वै सौम्यो यदेव साम्नश्छम्बट्कुर्वन्ति तस्यैव स शान्तिरवे (१) क्षन्ते पवित्रं वै सौम्य आत्मानमेव पवयन्ते य आत्मानं न परिपश्येदितासुः स्यादभिदर्दि कृत्वाऽवेक्षेत तस्मिन् ह्यात्मानं परिपश्यत्यथो आत्मानमेव पवयते । यो गतमनाः स्यात् सोऽवेक्षेत

यन्मे मनः परागतं यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसीति ॥

मन एवात्मन् दाधार (२) न गतमना भवत्यप वै तृतीयसवने यज्ञः क्रामतीजानादनीजानमभ्याग्नावैष्णव्यर्चा घृतस्य यजत्यग्निः सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं च दाधारोपांशु यजति मिथुनत्वाय । ब्रह्मवादिनो वदन्ति मित्रो यज्ञस्य स्विष्टं युवते वरुणो दुरिष्टं क्व तर्हि यज्ञः क्व यजमानो

भवतीति यन्मैत्रावरुणीं वशामालभते मित्रेणैव (३) यज्ञस्य स्विष्टं शमयति वरुणेन दुरिष्टं नाऽऽर्तिमार्छति यजमानो । यथा वै लाङ्गलेनोर्वरां प्रभिन्दन्त्येवमृक्सामे यज्ञं प्र भिन्तो यन्मैत्रावरुणीं वशामालभते यज्ञायैव प्रभिन्नाय मत्यमन्ववास्यति शान्त्यै । यातयामानि वा एतस्य छन्दांसि य ईजानश्छन्दसामेष रसो यद्वशा यन्मैत्रावरुणीं वशामालभते छन्दांस्येव पुनरा प्रीणात्य (४) यातयामत्वायाथो छन्दःस्वेव रसं दधाति ॥ (अवे, दाधार, मित्रेणैव, प्रीणाति, षट् च) ॥ ७ ॥

अतिग्राह्यविधानम् ॥ सोमऋषिः ।

देवा वा इन्द्रियं वीर्यं व्यभजन्त ततो यदत्यशिष्यत तदतिग्राह्या अभवन् तदतिग्राह्याणामतिग्राह्यत्वं यदतिग्राह्या गृह्यन्त इन्द्रियमेव तद्वीर्यं यजमान आत्मन् धत्ते । तेज आग्नेयेनेन्द्रियमैन्द्रेण ब्रह्मवर्चसं सौर्येणोपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्याश्चक्रे पृष्ठानि यत् पृष्ठ्ये न गृह्णीयात् प्राञ्चं यज्ञं पृष्ठानि सं शृणीयुर्यदुक्थ्ये (१) गृह्णीयात् प्रत्यञ्चं यज्ञमतिग्राह्याः सं शृणीयुर्विश्वजिति सर्वपृष्ठे ग्रहीतव्या यज्ञस्य सवीर्यत्वाय । प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् स प्रियास्तनूरप न्यधत्त तदतिग्राह्या अभवन् वितनुस्तस्य यज्ञ इत्याहुर्यस्यातिग्राह्या न गृह्यन्त इत्यप्यग्निष्टोमे ग्रहीतव्या यज्ञस्य सतनुत्वाय । देवता वै सर्वाः सदृशीरासन् ता न व्यावृतमगच्छन् ते देवा (२) एत एतान् ग्रहानपश्यन् तानगृह्णताऽऽग्नेयमग्निरैन्द्रमिन्द्रः सौर्यं सूर्यस्ततो वै तेऽन्याभिर्देवताभिर्व्यावृतमगच्छन् यस्यैवं विदुष एते ग्रहा गृह्यन्ते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छतीमे लोका ज्योतिष्मन्तः समावद्वीर्याः कार्या इत्याहुराग्नेयेनास्मिँल्लोके ज्योतिर्धत्त ऐन्द्रेणान्तरिक्ष इन्द्रवायू हि सयुजौ सौर्येणामुष्मिँल्लोके (३) ज्योतिर्धत्ते ज्योतिष्मन्तोऽस्मा इमे लोका भवन्ति समावद्वीर्यानेनान् कुरुत एतान् वै ग्रहान् बम्बाविश्ववयसावविदतां ताभ्यामिमे लोकाः पराञ्चश्चार्वाञ्चश्च प्राभुर्यस्यैवं विदुष एते ग्रहा गृह्यन्ते प्रास्मा इमे लोकाः पराञ्चश्चार्वाञ्चश्च भान्ति ॥ (उक्थ्ये, देवा, अमुष्मिँल्लोक, एकान्नचत्वारिंशच्च) ॥ ८ ॥

अदाभ्यग्रहः ॥ सोमऋषिः ।

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा अदाभ्ये छन्दांसि सवनानि समस्थापयन् ततो देवा अभवन् पराऽसुरा यस्यैवं विदुषोऽदाभ्यो गृह्यते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति । यद्वै देवा असुरानदाभ्येनादभ्नुवन् तददाभ्यस्यादाभ्यत्वं य एवं वेद दभ्नोत्येव भ्रातृव्यं नैनं भ्रातृव्यो दभ्नोत्ये (१) षा वै प्रजापतेरतिमोक्षिणी नाम तनूर्यददाभ्य उपनद्धस्य गृह्णात्यतिमुक्त्या अति पाप्मानं भ्रातृव्यं मुच्यते य एवं वेद । घ्नन्ति वा एतत् सोमं यदभिषुण्वन्ति सोमे हन्यमाने यज्ञो हन्यते यज्ञे यजमानो ब्रह्मवादिनो वदन्ति किं तद्यज्ञे यजमानः कुरुते येन जीवन्त्सुवर्गं लोकमेतीति जीवग्रहो वा एष यददाभ्योऽनभिषुतस्य गृह्णाति (२) जीवन्तमेवैनं सुवर्गं लोकं गमयति । वि वा एतद्यज्ञं छिन्दन्ति यददाभ्ये संस्थापयन्त्यंशूनपि सृजति यज्ञस्य संतत्यै ॥ (दभ्नोत्य,- अनभिषुतस्य गृह्णाति,- एकान्नत्रिंशच्च) ॥ ९ ॥

अंशुग्रहः ॥ सोमऋषिः ।

देवा वै प्रबाहुग्ग्रहानगृह्णत स एतं प्रजापतिरꣳशुमपश्यत् तमगृह्णीत तेन वै स आर्ध्नोद्यस्यैवं विदुषोऽꣳशुर्गृह्यत ऋध्नोत्येव सकृदभिषुतस्य गृह्णाति सकृद्धि स तेनार्ध्नोन्मनसा गृह्णाति मन इव हि प्रजापतिः प्रजापतेराप्त्यै औदुम्बरेण गृह्णात्यूर्ग्वा उदुम्बर ऊर्जमेवाव रुन्धे चतुःस्रक्ति भवति दिक्ष्वे-(१)-व प्रति तिष्ठति यो वा अꣳशोरायतनं वेदाऽऽयतनवान् भवति वामदेव्यमिति साम तद्वा अस्याऽऽयतनं मनसा गायमानो गृह्णात्यायतनवानेव भवति यदध्वर्युरꣳशुं गृह्णन्नार्धयेदुभाभ्यां नर्ध्येताध्वर्यवे च यजमानाय च यदर्धयेदुभाभ्यामृध्येतानवानं गृह्णाति सैवास्यर्द्धिर्हिरण्यमभि व्यनित्य-(२)-मृतं वै हिरण्यमायुः प्राण आयुषैवामृतमभि धिनोति शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति ॥ (दिक्ष्व,- निति, विꣳशतिश्च) ॥ १० ॥

षोडशिग्रहः ॥ सोमऋषिः ।

प्रजापतिर्देवेभ्यो यज्ञान् व्यादिशत् स रिरिचानोऽमन्यत स यज्ञानाꣳ षोडशधेन्द्रियं वीर्यमात्मानमभि समक्खिदत् तत् षोडश्यभवन्न वै षोडशी नाम यज्ञोऽस्ति यद्वाव षोडशꣳ स्तोत्रꣳ षोडशꣳ शस्त्रं तेन षोडशी तत् षोडशिनः षोडशित्वं यत् षोडशी गृह्यत इन्द्रियमेव तद्वीर्यं यजमान आत्मन् धत्ते देवेभ्यो वै सुवर्गो लोको (१) न प्राभवत् त एतꣳ षोडशिनमपश्यन् तमगृह्णत ततो वै तेभ्यः सुवर्गो लोकः प्राभवद्यत् षोडशी गृह्यते सुवर्गस्य लोकस्याभिजित्या इन्द्रो वै देवानामानुजावर आसीत् स प्रजापतिमुपाधावत् तस्मा एतꣳ षोडशिनं प्रायच्छत् तमगृह्णीत ततो वै सोऽग्रं देवतानां पर्यैदग्रं पर्यैति यस्यैवं विदुषः षोडशी गृह्यते (२) ऽग्रमेव समानानां पर्येति प्रातःसवने गृह्णाति वज्रो वै षोडशी वज्रः प्रातःसवनꣳ स्वादेवैनं योनेर्निर्गृह्णाति सवनेसवनेऽभि गृह्णाति सवनात्सवनादेवैनं प्र जनयति तृतीयसवने पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी पशवस्तृतीयसवनं वज्रेणैवास्मै तृतीयसवनात् पशूनव रुन्धे नोक्थ्ये गृह्णीयात् प्रजा वै पशव उक्थानि यदुक्थ्ये (३) गृह्णीयात् प्रजां पशूनस्य निर्दहेदतिरात्रे पशुकामस्य गृह्णीयाद्वज्रो वै षोडशी वज्रेणैवास्मै पशून्वृत्त्वा रात्रियोपरिष्टाच्छमयत्यप्यग्निष्टोमे राजन्यस्य गृह्णीयाद्व्यावृत्कामो हि राजन्यो यजते साह्न एवास्मै वज्रं गृह्णाति स एनं वज्रो भूत्या इन्धे निर्वा दहत्येकविꣳशꣳ स्तोत्रं भवति प्रतिष्ठित्यै हरिवच्छस्यत इन्द्रस्य प्रियं धामो-(४)-पाप्नोति कनीयाꣳसि वै देवेषु छन्दाꣳस्यासञ्ज्यायाꣳस्यसुरेषु ते देवाः कनीयसा छन्दसा ज्यायश्छन्दोऽभि व्यशꣳसन् ततो वै तेऽसुराणां लोकमवृञ्जत यत् कनीयसा छन्दसा ज्यायश्छन्दोऽभि विशꣳसति भ्रातृव्यस्यैव तल्लोकं

वृङ्क्ते षडक्षराण्यति रेचयन्ति षड् वा ऋतव ऋतूनेव प्रीणाति चत्वारि पूर्वाण्यव कल्पयन्ति (५) चतुष्पद एव पशूनव रुन्धे द्वे उत्तरे द्विपद एवाव रुन्धेऽनुष्टुभमभि सं पादयन्ति वाग्वा अनुष्टुप् तस्मात् प्राणानां वागुत्तमा समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोत्येतस्मिन् वै लोक इन्द्रो वृत्रमहन्त्साक्षादेव वज्रं भ्रातृव्याय प्र हरत्यरुणपिशङ्गोऽश्वो दक्षिणैतद्वै वज्रस्य रूपꣳ समृद्ध्यै ॥

(लोकं, विदुषः षोडशी गृह्यते, यदुक्थ्ये, धाम, कल्पयन्ति, समचत्वारिꣳशच्च) ॥ ११ ॥

[सुवर्गाय २३८ । स- १४१ । -मवभृथ युञ्जते २६२ । इत्येन २८० । प्रजापति-१८७ । -रिन्द्रा ८६ । प्रन्ति २०७ । देवा १८९ । देवा ११९ । देवाः १२० । प्रजापति- १९७ । रेकादश ॥ २१२६]

[॥ इति षष्ठकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥]

[प्राचीनवꣳशं ३८४० । य-३०८५ । व्याख्याता-३१५५ । -एकेन-२६३६ । गर्भः २१५० ।
सुवर्गाय २१२६ । (षट् ॥ ६ ॥ १६९९२)]

॥ इति षष्ठं काण्डं सम्पूर्णम् ॥ ६ ॥

अथ सप्तमं काण्डम् ।

अश्वमेधगतमन्त्राणामभिधानम् ।

[अथ प्रथमः प्रपाठकः ॥१॥]

ज्योतिष्टोमः, ज्योतिष्टोमस्य, तदायसंस्थारूपस्याग्निष्टोमस्य च विधानम् ॥ सोमऋषिः ।

प्रजननं ज्योतिरग्निर्देवतानां ज्योतिर्विराट् छन्दसां ज्योतिर्विराड् वाचोऽग्नौ सं तिष्ठते विराजमभि सं पद्यते तस्मात् तज्ज्योतिरुच्यते द्वौ स्तोमौ प्रातःसवनं वहतो यथा प्राणश्चापानश्च द्वौ माध्यंदिनꣳ सवनं यथा चक्षुश्च श्रोत्रं च द्वौ तृतीयसवनं यथा वाक् च प्रतिष्ठा च पुरुषसम्मितो वा एष यज्ञोऽस्थूरि-(१)-र्यं कामं कामयते तमेतेनाभ्यश्नुते सर्वꣳ ह्यस्थूरिणाऽभ्यश्नुतेऽग्निष्टोमेन वै प्रजापतिः प्रजा असृजत ता अग्निष्टोमेनैव पर्यगृह्णात् तासां परिगृहीतानामश्वतरोऽत्यप्रवत तस्यानुहाय रेत आदत्त तद्गर्दभे न्यमार्ट् तस्माद्गर्दभो द्विरेता अथो आहुर्वडबायां न्यमार्डिति तस्माद्वडबा द्विरेता अथो आहुरोषधीषु (२) न्यमार्डिति तस्मादोषधयोऽनभ्यक्ता रेभन्त्यथो आहुः प्रजासु न्यमार्डिति तस्माद्यमौ जायेते तस्मादश्वतरो न प्र जायत आत्तरेता हि तस्माद्बर्हिष्यनवक्लृप्तः सर्ववेदसे वा सहस्रे वाऽवक्लृप्तोऽति ह्यप्रवत य एवं विद्वानग्निष्टोमेन यजते प्राजाताः प्रजा जनयति परि प्रजाता गृह्णाति तस्मादाहुर्ज्येष्ठयज्ञ इति (३) प्रजापतिर्वाव ज्येष्ठः स ह्येतेनाग्रेऽयजत प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवताऽन्वसृज्यत गायत्री छन्दो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात् ते मुख्या मुखतो ह्यसृज्यन्तोरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवताऽन्वसृज्यत त्रिष्टुप् छन्दो बृहत् (४) साम राजन्यो मनुष्याणामविः पशूनां तस्मात् ते वीर्यवन्तो वीर्याद्ध्यसृज्यन्त मध्यतः सप्तदशं निरमिमीत तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपꣳ साम वैश्यो मनुष्याणां गावः पशूनां तस्मात् त आद्या अन्नधानाद्ध्यसृज्यन्त तस्माद्भूयाꣳसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविꣳशं निरमिमीत तमनुष्टुप् छन्दो (५) ऽन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनां तस्मात् तौ भूतसंक्रामिणावश्वश्च शूद्रश्च तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात् पादावुप जीवतः पत्तो ह्यसृज्येतां प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका असावादित्य एकविꣳश एतस्मिन् वा एते श्रिता एतस्मिन् प्रतिष्ठिता (६) य एवं वेदैतस्मिन्नेव श्रयत एतस्मिन् प्रति तिष्ठति ॥ (अस्थूरि,- रोषधीषु, ज्येष्ठयज्ञ इति,- बृहद्,- अनुष्टुप् छन्दः, एवं वेदैतस्मिन्नेव प्रतिष्ठिता नव च) ॥ १ ॥

स्तोमप्रशंसा ॥ सोमऋषिः ।

प्रातःसवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकविꣳशाय ज्योतिर्दधदेति स्तोम एव तत् स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति यावन्तो

वै स्तोमास्तावन्तः कामास्तावन्तो लोका-(१)-स्तावन्ति ज्योतीꣳष्येतावत एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीꣳष्यव रुन्धे ॥ (यावन्तो लोका,- स्त्रयोदश च) ॥ २ ॥

अतिरात्रविधिः ॥ सोमऋषिः ।

ब्रह्मवादिनो वदन्ति स त्वै यजेत योऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति यस्य त्रिवृतमन्तर्यन्ति प्राणाꣳस्तस्यान्तर्यन्ति प्राणेषु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य पञ्चदशमन्तर्यन्ति वीर्यं तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति (१) प्रजां तस्यान्तर्यन्ति प्रजायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठां तस्यान्तर्यन्ति प्रतिष्ठायां मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य त्रिणवमन्तर्यन्त्यृतूꣳश्च तस्य नक्षत्रियां च विराजमन्तर्यन्त्यृतुषु मेऽप्यसन्नक्षत्रियायां च विराजीति (२) खलु वै यज्ञेन यजमानो यजते यस्य त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यो वै स्तोमानामवमं परमतां गच्छन्तं वेद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत् परमो य एवं वेद परमतामेव गच्छति ॥ (सप्तदशमन्तर्यन्ति, विराजीति, चतुश्चत्वारिꣳशच्च) ॥ ३ ॥

अङ्गिरसां द्विरात्रविधिः ॥ विश्वे देवा ऋषयः ।

अङ्गिरसो वै सत्रमासत ते सुवर्गं लोकमायन् तेषाꣳ हविष्माꣳश्च हविष्कृच्चाहीयेतां तावकामयेताꣳ सुवर्गं लोकमियावेति तावेतं द्विरात्रमपश्यतां तमाऽहरतां तेनायजेतां ततो वै तौ सुवर्गं लोकमैतां य एवं विद्वान् द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैतां पूर्वेणाह्नाऽगच्छतामुत्तरेणा-(१)-भिप्लवः पूर्वमहर्भवति गतिरुत्तरं ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुन्धे सर्वस्तोमोऽतिरात्र उत्तरꣳ सर्वस्याऽऽप्त्यै सर्वस्यावरुद्ध्यै गायत्रं पूर्वेऽहन्त्साम भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमात्मन् धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यं त्रिष्टुगोज एव वीर्यमात्मन् धत्ते रथंतरं पूर्वे (२) ऽहन्त्साम भवतीयं वै रथंतरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति तदाहुः क्व जगती चानुष्टुप् चेति वैखानसं पूर्वेऽहन्त्साम भवति तेन जगत्यै नैति षोडश्युत्तरे तेनानुष्टुभोऽथाऽऽहुर्यत् समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनु (३) पद्येतेत्यमावास्यायां पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं नानैवार्धमासयोर्भवतो नानावीर्ये भवतो हविष्मन्निधनं पूर्वमहर्भवति हविष्कृन्निधनमुत्तरं प्रतिष्ठित्यै ॥ (उत्तरेण, रथंतरं पूर्वे, ऽनु-द्वाविꣳशतिश्च) ॥ ४ ॥

गर्गत्रिरात्रः । विश्वे देवा ऋषयः ।

आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरत् स इमामपश्यत् तां वराहो भूत्वाऽहरत् तां विश्वकर्मा भूत्वा व्यमार्ट् साऽप्रथत सा पृथिव्यभवत् तत् पृथिव्यै पृथिवित्वं तस्यामश्राम्यत् प्रजापतिः स देवानसृजत वसून् रुद्रानादित्यान् ते देवाः प्रजापतिमब्रुवन् प्र जायामहा इति सोऽब्रवीत् (१) यथाऽहं युष्माꣳस्तपसाऽसृक्ष्येवं तपसि प्रजननमिच्छध्वमिति तेभ्योऽग्निमायतनं प्रायच्छदेतेनाऽऽयतनेन श्राम्यतेति तेऽग्निनाऽऽयतनेनाश्राम्यन् ते संवत्सर एकां गामसृजन्त तां वसुभ्यो रुद्रेभ्य आदित्येभ्यः

प्राच्यावर्तत सहस्रमिति तां वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च (२) शतानि त्रयस्त्रिꣳशतं चाथ सैव सहस्रतम्यभवत् ते देवाः प्रजापतिमब्रुवन्त्सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत् त इमं लोकमजयन् तच्चाददुः स उक्थ्येन रुद्रानयाजयत् तेऽन्तरिक्षमजयन् तच्चाददुः सोऽतिरात्रेणाऽऽदित्यानयाजयत् तेऽमुं लोकमजयन् तच्चाददुस्तदन्तरिक्षं (३) व्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलं वै मध्यममहस्त्रिरात्रस्य वि हि तदवैर्यतेति त्रैष्टुभं मध्यमस्याह्न आज्यं भवति संयानानि सूक्तानि शꣳसति षोडशिनꣳ शꣳसत्युत्यह्नो धृत्या अशिथिलंभावाय तस्मात् त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथातिरात्र एषां लोकानां विधृत्यै त्रीणि त्रीणि शतान्यनूचीनाहमव्यवच्छिन्नानि ददात्ये-(४)-षां लोकानामनु संतत्यै दशतं न वि च्छिन्द्याद्विराजं नेद्विच्छिनदानीत्यथ या सहस्रतम्यासीत् तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताꣳ स इन्द्रोऽमन्यतानया वा इदं विष्णुः सहस्रं वर्क्ष्यत इति तस्यामकल्पेतां द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत उभा जिग्यथुरिति तां वा एतामच्छावाक (५) एव शꣳसत्यथ या सहस्रतमी सा होत्रे देयेति होतारं वा अभ्यतिरिच्यते यदतिरिच्यते होताऽनाप्तस्याऽऽपयिताऽथाऽऽहुरुन्नेत्रे देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजामित्यथाऽऽहुः सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरनाकृता सा वशं चरेदित्यथाऽऽहुर्ब्रह्मणे चाग्नीधे च देयेति (६) द्विभागं ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामित्यथाऽऽहुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽहुर्या द्विरूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतत् सहस्रस्यायनꣳ सहस्रꣳ स्तोत्रीयाः सहस्रं दक्षिणाः सहस्रसंमितः सुवर्गो लोकः सुवर्गस्य लोकस्याभिजित्यै ॥ (अरक्षन्त,-च, तदन्तरिक्षं, ददात्य,-च्छावाक,-श्च देयेति, सप्तचत्वारिꣳशच्च) ॥ ५ ॥

सहस्रतमीदानं, तद्भक्षणं होमादिकं च । त्रिवृत् । विश्वेदेवा ऋषयः ।

सोमो वै सहस्रमविन्दत् तमिन्द्रोऽन्वविन्दत् तौ यमो न्यागच्छत् तावब्रवीदस्तु मेऽत्रापीत्यस्तु हीत्यब्रूताꣳ स यम एकस्यां वीर्यं पर्यपश्यदियं वा अस्य सहस्रस्य वीर्यं बिभर्तीति तावब्रवीदियं ममास्त्वेतद्युवयोरिति तावब्रूताꣳ सर्वे वा एतदेतस्यां वीर्यं (१) परि पश्यामोऽꣳशमा हरामहा इति तस्यामꣳशमाऽहरन्त तामप्सु प्रावेशयन्त्सोमायोदेहीति सा रोहिणी पिङ्गलैकहायनी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्माद्रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणीयाद्य एवं विद्वान् रोहिण्या पिङ्गलयैकहायन्या सोमं क्रीणाति त्रयस्त्रिꣳशता चैवास्य त्रिभिश्च (२) शतैः सोमः क्रीतो भवति सुक्रीतेन यजते तामप्सु प्रावेशयन्निन्द्रायोदेहीति सा रोहिणी लक्ष्मणा पष्ठौही वार्त्रघ्नी रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्माद्रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं दद्याद्य एवं विद्वान् रोहिणीं लक्ष्मणां पष्ठौहीं वार्त्रघ्नीं ददाति त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि सा दत्ता (३) भवति तामप्सु प्रावेशयन् यमायोदेहीति सा जरती मूर्खा तज्जघन्या रूपं कृत्वा त्रयस्त्रिꣳशता च त्रिभिश्च शतैः सहोदैत् तस्माज्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुर्वीत य एवं विद्वाञ्जरतीं मूर्खां तज्जघन्यामनुस्तरणीं कुरुते त्रयस्त्रिꣳशच्चैवास्य त्रीणि च शतानि साऽमुष्मिँल्लोके भवति वागेव सहस्रतमी तस्मा-(४)-

द्वरो देयः सा हि वरः सहस्रमस्य सा दत्ता भवति तस्माद्वरो न प्रतिगृह्यः सा हि वरः सहस्रमस्य प्रतिगृहीतं भवतीयं वर इति ब्रूयादथान्यां ब्रूयादियं ममेति तथाऽस्य तत् सहस्रमप्रतिगृहीतं भवत्यु-भयतएनी स्यात् तदाहुरन्यतएनी स्यात् सहस्रं परस्तादेतमिति सैव वरः (५) कल्याणी रूपसमृद्धा सा स्यात् सा हि वरः समृद्ध्यै तामुत्तरेणाऽऽग्नीध्रं पर्याणीयाऽऽहवनीयस्यान्ते द्रोणकलशमवघ्रापये-दाजिघ्र कलशं मह्युरुधारा पयस्वत्या त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः सा मा सहस्र आ भज प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरिति प्रजयैवैनं पशुभी रय्या स-(६)-मर्धयति प्रजावान् पशुमान् रयिमान् भवति य एवं वेद तया सहाऽऽग्नीध्रं परेत्य पुरस्तात् प्रतीच्यां तिष्ठन्त्यां जुहुया-

—दुभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयथामिति ॥

त्रेधाविभक्तं वै त्रिरात्रे सहस्रꣳ साहस्रीमेवैनां करोति सहस्रस्यैवैनां मात्रां (७) करोति रूपाणि जुहोति रूपैरेवैनाꣳ समर्धयति तस्या उपोत्थाय कर्णमा जपे-दिडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अघ्निये नामानि सुकृतं मा देवेषु ब्रूतादिति देवेभ्य एवैनमा वेदयत्यन्वेनं देवा बुध्यन्ते ॥ (एतस्यां वीर्यं, त्रिभिश्च, दत्ता, सहस्रतमी तस्मा,-द्वरः, सं, मात्रा,-मेकान्नचत्वारिꣳशच्च) ॥ ६ ॥

सहस्रतमीदानम् । विश्वेदेवा ऋषयः ।

सहस्रतम्या वै यजमानः सुवर्गं लोकमेति सैनꣳ सुवर्गं लोकं गमयति सा मा सुवर्गं लोकं गमयेत्याह सुवर्गमेवैनं लोकं गमयति सा मा ज्योतिष्मन्तं लोकं गमयेत्याह ज्योतिष्मन्तमेवैनं लोकं गमयति सा मा सर्वान् पुण्याँल्लोकान् गमयेत्याह सर्वानेवैनं पुण्याँल्लोकान् गमयति सा (१) मा प्रतिष्ठां गमय प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरिति प्रजयैवैनं पशुभी रय्यां प्रति ष्ठापयति प्रजावान् पशुमान् रयिमान् भवति य एवं वेद तामग्नीधे वा ब्रह्मणे वा होत्रे वोद्गात्रे वाऽध्वर्यवे वा दद्यात् सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीतं भवति यस्तामविद्वान् (२) प्रतिगृह्णाति तां प्रति गृह्णीयादेकाऽसि न सहस्रमेकां त्वा भूतां प्रति गृह्णामि न सहस्रमेका मा भूताऽऽविश मा सहस्रमित्येकामेवैनां भूतां प्रति गृह्णाति न सहस्रं य एवं वेद स्योनाऽसि सुषदा सुशेवा स्योना माऽऽविश सुषदा माऽऽविश सुशेवा माऽऽविशे-(३)-त्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽविशति नैनꣳ हिनस्ति ब्रह्मवादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती३ सहस्रतमीꣳ सहस्रा३मिति यत् प्राचीमुत्सृजेत् सहस्रꣳ सहस्रतम्यन्वियात् तत् सहस्रमप्रज्ञात्रꣳ सुवर्गं लोकं न प्र जानीयात् प्रतीचीमुत् सृजति ताꣳ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गं लोकमेति यजमान-(४)-मभ्युत् सृजति क्षिप्रे सहस्रं प्र जायत उत्तमा नीयते प्रथमा देवान् गच्छति ॥ (लोकान् गमयति सा,-ऽविद्वान्, सुशेवा, माऽऽविश, यजमानं, द्वादश च) ॥ ७ ॥

आत्रेयचतूरात्रः । विश्वेदेवा ऋषयः ।

अत्रिरददादौर्वाय प्रजां पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स एतं चतूरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता सूद्गाता स्वध्वर्युः

सुसभेयो य एवं विद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते सुहोता सूद्गाता स्वध्वर्युः सुसभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसं त-(१)-दुपयन्तः स्तोमाः श्रीः सा ऽत्रिꣳ श्रद्धादेवं यजमानं चत्वारि वीर्याणि नोपानमन् तेज इन्द्रियं ब्रह्मवर्चसमन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान्त्सोमानपश्यत् तानाऽहरत् तैरयजत तेज एव प्रथमेनावारुन्धेन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन य एवं विद्वाꣳश्चतुरश्चतुष्टोमान्त्सोमानाहरति तैर्यजते तेज एव (२) प्रथमेनाव रुन्ध इन्द्रियं द्वितीयेन ब्रह्मवर्चसं तृतीयेनान्नाद्यं चतुर्थेन यामेवात्रिर्ऋद्धिमार्ध्नोत् तामेव यजमान ऋध्नोति ॥ (त, तेज एवा,-ष्टादश च) ॥ ८ ॥

जामदग्न्यचतूरात्रः । विश्वेदेवा ऋषयः ।

जमदग्निः पुष्टिकामश्चतूरात्रेणायजत स एतान् पोषाꣳ अपुष्यत् तस्मात् पलितौ जामदग्नियौ न सं जानाते एतानेव पोषान् पुष्यति य एवं विद्वाꣳश्चतूरात्रेण यजते पुरोडाशिन्य उपसदो भवन्ति पशवो वै पुरोडाशाः पशूनेवाव रुन्धेऽन्नं वै पुरोडाशोऽन्नमेवाव रुन्धेऽन्नादः पशुमान् भवति य एवं विद्वाꣳश्चतूरात्रेण यजते ॥ (जमदग्निरेकचत्वारिꣳशत्) ॥ ९ ॥

पञ्चरात्रः । विश्वेदेवा ऋषयः ।

संवत्सरो वा इदमेक आसीत् सोऽकामयतर्तून्त्सृजेयेति स एतं पञ्चरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स ऋतूनसृजत य एवं विद्वान् पञ्चरात्रेण यजते प्रैव जायते त ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते व्यावर्तन्त (१) य एवं विद्वान् पञ्चरात्रेण यजते वि पाप्मना भ्रातृव्येणाऽऽवर्तते सार्वसेनिः शौचेयोऽकामयत पशुमान्त्स्यामिति स एतं पञ्चरात्रमाऽहरत् तेनायजत ततो वै स सहस्रं पशून् प्राऽऽप्नोद्य एवं विद्वान् पञ्चरात्रेण यजते प्र सहस्रं पशूनाप्नोति बबरः प्रावाहणिरकामयत वाचः प्रवदिता स्यामिति स एतं पञ्चरात्रमा (२) ऽहरत् तेनायजत ततो वै स वाचः प्रवदिताऽभवद्य एवं विद्वान् पञ्चरात्रेण यजते प्रवदितैव वाचो भवत्यथो एनं वाचस्पतिरित्याहुरनाप्तश्चतूरात्रोऽतिरिक्तः षड्रात्रोऽथ वा एष संप्रति यज्ञो यत् पञ्चरात्रो य एवं विद्वान् पञ्चरात्रेण यजते संप्रत्येव यज्ञेन यजते पञ्चरात्रो भवति पञ्च वा ऋतवः संवत्सर (३) ऋतुष्वेव संवत्सरे प्रति तिष्ठत्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ॥ (व्यावर्तन्त, प्रवदिता स्यामिति स एतं पञ्चरात्रमा, संवत्सरे,-ऽभिजित्यै) ॥ १० ॥

अश्वमेधाश्वबन्धनमन्त्राः । त्रिष्टुप् । विश्वेदेवा ऋषयः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा ददे
इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या ।
तया देवाः सुतमा बभूवुर्ऋतस्य सामन्त्सरमारपन्ती ॥

अभिधा असि भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहाकृतः पृथिव्यां यन्ता राड् यन्ताऽसि यमनो धर्ताऽसि धरुणः (१) कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः ॥ (धरुणः, षड्विꣳशतिश्च) ॥ ११ ॥

अश्वस्य कर्णे जपादिपूर्वकं तदुत्सर्जनम् । विश्वेदेवा ऋषयः ।

विभूर्मात्रा प्रभूः पित्राऽश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानां पत्वान्विह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्याꣳ स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहे-(१)-ह रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत ॥ (रन्तिः स्वाहा, द्वाविꣳशतिश्च) ॥ १२ ॥

अश्वमेधे उद्द्रावहोमाः । विश्वेदेवा ऋषयः ।

आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहाऽऽपलायिताय स्वाहाऽऽवल्गते स्वाहा परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा ॥ (आयनायावल्गत्यापलायिताय षड्विꣳशतिः) ॥ १३ ॥

(१४-२५) अश्वमेधे पूर्वहोमाः । विश्वेदेवा ऋषयः ।

अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहाऽपां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥ (अग्नये वायवेऽपां मोदायेन्द्राय त्रयोविꣳशतिः) ॥ १४ ॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा संवत्सराय स्वाहा सर्वस्मै स्वाहा ॥ (पृथिव्यै सूर्याय नक्षत्रेभ्यः प्राच्यै सप्तचत्वारिꣳशत्) ॥ १५ ॥

(१६-१७) पूर्वदीक्षाहोमाः । विश्वेदेवा ऋषयः ।

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपां मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥ (अग्नये सवित्रे पूष्णेऽपां मोदाय वायवे त्रयोविꣳशतिः) ॥ १६ ॥

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहाऽग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाऽऽशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहाऽऽतपाय स्वाहाऽरण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ (पृथिव्या अग्नयेऽह्ने रात्रियै चतुश्चत्वारिंशत्) ॥१७॥

ऋतुदीक्षामन्त्राः ॥ विश्वेदेवा ऋषयः ।

भुवो देवानां कर्मणाऽपसर्तस्य पथ्याऽसि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा युनज्मि वर्षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयाऽऽनुष्टुभेन त्वा छन्दसा युनज्मि (१) शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यां त्वर्तुनां हविषा दीक्षयाम्याऽहं दीक्षामरुहमृतस्य पत्नीं गायत्रेण छन्दसा ब्रह्मणा चर्तꣳ सत्येऽधाꣳ सत्यमृतेऽधाम् ॥

महीमू षु-*-सुत्रामाणं-*-मिह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा ॥ (आनुष्टुभेन त्वा छन्दसा युनज्मि,- ऽष्टापञ्चाशच्च) ॥ १८ ॥

अश्वचरितहोमाः ॥ विश्वेदेवा ऋषयः ।

हिंकाराय स्वाहा हिंकृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा संदीयमानाय स्वाहा संदिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरꣳस्यते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविश्यमानाय स्वाहा निविष्टाय स्वाहा निषत्स्यते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहा (१) ऽऽसिष्यते स्वाहाऽऽसीनाय स्वाहाऽऽसिताय स्वाहा निपत्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा संमीलते स्वाहा संमीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रभोत्स्यते स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा (२) वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा संहास्यते स्वाहा संजिहानाय स्वाहोज्जिहानाय स्वाहा विवर्त्स्यते स्वाहा

१८ । ७-८ (सं० ११ । ५ । १८-१९)
३८ (तै. सं.)

विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्रꣳस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा (३) निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत् करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा ॥ (निपन्नाय स्वाहा, वीक्षिष्यते स्वाहा, निकषमाणाय स्वाहा, सप्तविꣳशतिश्च) ॥ १९ ॥

सावित्रहोमः ॥ विश्वेदेवा ऋषयः ।

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृतस्य पन्था असि देवानां छायाऽमृतस्य नाम तत् सत्यं यत् त्वं प्रजापतिरस्यधि यदस्मिन् वाजिनीव शुभः स्पर्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन् पशुं न गोपा इर्यः परिज्मा ॥ (अग्नये वायवेऽष्टाचत्वारिंशत्) ॥ २० ॥

[प्रजननं १०९। प्रातःसवने ६३ । ब्रह्मवादिनो १३४। ऽङ्गिरस् १७१। आपः ३४७। सोमः ३८९ । सहस्रतमया २१२। त्रि-११८ । -ऊर्मसद्मिः ४८। संवत्सरो २०० । देवस्यं ७५। विभू- ७२ । रायनाय- २६ ।-स्तनयं २३ । पृथिव्या ४७ । आग्नयं २३ । पृथिव्यै ४४ । भुवं ९९। हिंकाराय-१७७।-स्तनयं ४८। विंशतिः ॥ २६२५ ॥]

[॥ इति सप्तमकाण्डे प्रथमः प्रपाठकः ॥ १ ॥]

षड्रात्राद्यानां निरूपणम् ।

[अथ द्वितीयः प्रपाठकः ॥ २ ॥]

षड्रात्रः ॥ विश्वेदेवा ऋषयः ।

साध्या वै देवाः सुवर्गकामा एतꣳ षड्रात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते सुवर्गं लोकमायन् य एवं विद्वाꣳसः षड्रात्रमासते सुवर्गमेव लोकं यन्ति देवसत्रं वै षड्रात्रः प्रत्यक्षꣳ ह्येतानि पृष्ठानि य एवं विद्वाꣳसः षड्रात्रमासते साक्षादेव देवता अभ्यारोहन्ति षड्रात्रो भवति षड् वा ऋतवः षट् पृष्ठानि (१) पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धते पञ्चदशो भवतीन्द्रियमेवाव रुन्धते सप्तदशो (२) भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै सदोहविर्धानिन एतेन षड्रात्रेण यजेरन्नाश्वत्थी हविर्धानं चाऽऽग्नीध्रं च भवतस्तद्धि सुवर्ग्यं चक्रीवती भवतः सुवर्गस्य

लोकस्य समष्ट्या उलूखलबुध्नो यूपो भवति प्रतिष्ठित्यै प्राञ्चो यान्ति प्राङिव हि सुवर्गः (३) लोकः सरस्वत्या यान्त्येष वै देवयानः पन्थास्तमेवान्वारोहन्त्याक्रोशन्तो यान्त्यवर्तिमेवान्यस्मिन् प्रतिषज्य प्रतिष्ठां गच्छन्ति यदा दश शतं कुर्वन्त्यथैकमुत्थानꣳ शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्ति यदा शतꣳ सहस्रं कुर्वन्त्यथैकमुत्थानꣳ सहस्रसंमितो वा असौ लोकोऽमुमेव लोकमभि जयन्ति यदे-(४)-षां प्रमीयेत यदा वा जीयेरन्नथैकमुत्थानं तद्धि तीर्थम् ॥ (पृष्ठानि, सप्तदशः, सुवर्गो, जयन्ति यद्,- एकादश च) ॥ १ ॥

सप्तरात्रः ॥ विश्वेदेवा ऋषयः ।

कुसुरुबिन्द औद्दालकिरकामयत पशुमान्त्स्यामिति स एतꣳ सप्तरात्रमाऽहरत् तेनायजत तेन वै स यावन्तो ग्राम्याः पशवस्तानवारुन्ध य एवं विद्वान्त्सप्तरात्रेण यजते यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धे सप्तरात्रो भवति सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै त्रिवृदग्निष्टोमो भवति तेज (१) एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते त्रिणवो भवति विजित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै यत् प्रत्यक्षं पूर्वेष्वहःसु पृष्ठान्युपेयुः प्रत्यक्षं (२) विश्वजिति यथा दुग्धामुपसीदत्येवमुत्तममहः स्यान्नैकरात्रश्चन स्याद्बृहद्रथंतरे पूर्वेष्वहःसूप यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्ति यत् प्रत्यक्षं विश्वजिति पृष्ठान्युपयन्ति यथा प्रत्तां दुहे तादृगेव तत् ॥ (तेज, उपेयुः प्रत्यक्षं, द्विचत्वारिꣳशच्च) ॥ २ ॥

अष्टरात्रः ॥ विश्वेदेवा ऋषयः ।

बृहस्पतिरकामयत ब्रह्मवर्चसी स्यामिति स एतमष्टरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स ब्रह्मवर्चस्यभवद्य एवं विद्वानष्टरात्रेण यजते ब्रह्मवर्चस्येव भवत्यष्टरात्रो भवत्यष्टाक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धेऽष्टरात्रो भवति चतस्रो वै दिशश्चतस्रोऽवान्तरदिशा दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे (१) त्रिवृदग्निष्टोमो भवति तेज एवाव रुन्धे पञ्चदशो भवतीन्द्रियमेवाव रुन्धे सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायत एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते त्रिणवो भवति विजित्यै त्रयस्त्रिꣳशो भवति प्रतिष्ठित्यै पञ्चविꣳशोऽग्निष्टोमो भवति प्रजापतेराप्त्यै महाव्रतवानन्नाद्यस्यावरुद्ध्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै (२) (दिग्भ्य एव ब्रह्मवर्चसमव रुन्धे, ऽभिजित्यै) ॥ ३ ॥

नवरात्रः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिः प्रजा असृजत ताः सृष्टाः क्षुधं न्यायन्त्स एतं नवरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै प्रजाभ्योऽकल्पत यर्हि प्रजाः क्षुधं निगच्छेयुस्तर्हि नवरात्रेण यजेतेमे हि वा एतासां लोका अक्लृप्ता

अथैताः क्षुधं नि गच्छन्तीमानेवाऽऽभ्यो लोकान् कल्पयति तान् कल्पमानान् प्रजाभ्योऽनु कल्पते कल्पन्ते (१) ऽस्मा इमे लोका ऊर्जं प्रजासु दधाति त्रिरात्रेणैवेमं लोकं कल्पयति त्रिरात्रेणान्तरिक्षं त्रिरात्रेणामुं लोकं यथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलंभावाय ज्योतिर्गौरायुरिति ज्ञाताः स्तोमा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्ति ज्ञात्रं प्रजानां (२) गच्छति नवरात्रो भवत्यभिपूर्वमेवास्मिन् तेजो दधाति यो ज्योगामयावी स्यात् स नवरात्रेण यजेत प्राणा हि वा एतस्य धृता अथैतस्य ज्योगामयति प्राणानेवास्मिन् दाधार उत यदीतासुर्भवति जीवत्येव ॥ (कल्पन्ते, प्रजानां, त्रयस्त्रिꣳशच्च) ॥ ४ ॥

दशरात्रः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिरकामयत प्र जायेयेति स एतं दशहोतारमपश्यत् तमजुहोत् तेन दशरात्रमसृजत तेन दशरात्रेण प्राजायत दशरात्राय दीक्षिष्यमाणो दशहोतारं जुहुयाद्दशहोत्रैव दशरात्रꣳ सृजते तेन दशरात्रेण प्र जायते वैराजो वा एष यज्ञो यद्दशरात्रो य एवं विद्वान् दशरात्रेण यजते विराजमेव गच्छति प्राजापत्यो वा एष यज्ञो यद्दशरात्रो (१) य एवं विद्वान् दशरात्रेण यजते प्रैव जायत इन्द्रो वै सदृङ् देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतं दशरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वान् दशरात्रेण यजते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छति त्रिककुद्वा (२) एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकविꣳशः ककुत् त्रयस्त्रिꣳशो य एवं विद्वान् दशरात्रेण यजते त्रिककुदेव समानानां भवति यजमानः पञ्चदशो यजमान एकविꣳशो यजमानस्त्रयस्त्रिꣳशः पुर इतरो अभिचर्यमाणो दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति नैनमभिचरन्त्स्तृणुते देवासुराः संयत्ता आसन् ते देवा एताः (३) देवपुरा अपश्यन् यद्दशरात्रस्ताः पर्यौहन्त तेषां न कुतश्चनोपाव्याधोऽभवत् ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्त्स्यात् स दशरात्रेण यजेत देवपुरा एव पर्यूहते तस्य न कुतश्चनोपाव्याधो भवति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति स्तोमः स्तोमस्योपस्तिर्भवति भ्रातृव्यमेवोपस्तिं कुरुते जामि वा (४) एतत् कुर्वन्ति यज्ज्यायाꣳसꣳ स्तोममुपेत्य कनीयाꣳसमुपयन्ति यदग्निष्टोमसामान्यवस्ताच्च पुरस्ताच्च भवन्त्यजामित्वाय त्रिवृदग्निष्टोमोऽग्निष्टुदाग्नेयीषु भवति तेज एवाव रुन्धे पञ्चदश उक्थ्य ऐन्द्रीष्विन्द्रियमेवाव रुन्धे त्रिवृदग्निष्टोमो वैश्वदेवीषु पुष्टिमेवाव रुन्धे सप्तदशोऽग्निष्टोमः प्राजापत्यासु तीव्रसोमोऽन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायते (५) एकविꣳश उक्थ्यः सौरीषु प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् धत्ते सप्तदशोऽग्निष्टोमः प्राजापत्यास्वपूर्व्य उपहव्यमेव गच्छति त्रिणवावग्निष्टोमावभित ऐन्द्रीषु विजित्यै त्रयस्त्रिꣳश उक्थ्यो वैश्वदेवीषु प्रतिष्ठित्यै विश्वजित् सर्वपृष्ठोऽतिरात्रो भवति सर्वस्याभिजित्यै ॥ (एष यज्ञो यद्दशरात्र,- स्त्रिककुद्वा, एता, वै, जायते, एकत्रिꣳशच्च) ॥५॥

एकादशरात्रः ॥ विश्वेदेवा ऋषयः ।

ऋतवो वै प्रजाकामाः प्रजां नाविन्दन्त तेऽकामयन्त प्रजाꣳ सृजेमहि प्रजामव रुन्धीमहि प्रजां विन्दे-

यदि प्रजाकामाः स्यामेति न एतमेकादशरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते प्रजामसृजन्त प्रजामवारुन्धत प्रजामविन्दन्त प्रजावन्तोऽभवन् न क्रतवोऽभवन् तदितिमात्रमात्मवन्तमृतूनां वा एते पुत्रास्तस्मा-(१)-दार्तवा उच्यन्ते य एवं विद्वांसः एकादशरात्रमासते प्रजामेव सृजन्ते प्रजामव रुन्धते प्रजां विन्दन्ते प्रजावन्तो भवन्ति ज्योतिरतिरात्रो भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति चतुर्विंशो भवति चतुर्विंशत्यक्षरा गायत्री (२) गायत्रं ब्रह्मवर्चसं गायत्रियामेव ब्रह्मवर्चसे प्रति तिष्ठन्ति चतुश्चत्वारिंशो भवति चतुश्चत्वारिंशदक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुप् त्रिष्टुभ्येवेन्द्रिये प्रति तिष्ठन्त्य-ष्टाचत्वारिंशो भवत्यष्टाचत्वारिंशदक्षरा जगती जागताः पशवो जगत्यामेव पशुषु प्रति तिष्ठन्त्ये-कादशरात्रो भवति पञ्च वा ऋतव आर्तवाः पञ्चर्तुष्वेवाऽऽर्तवेषु संवत्सरे प्रतिष्ठाय प्रजामव रुन्धते ऽतिरात्रावभितो भवतः प्रजायै परिगृहीत्यै ॥ (एते पुत्रास्तस्मा,-द्गायत्री, -कादशरात्रो च) ॥ ६ ॥

द्वादशरात्रः ॥ विश्वेदेवा ऋषयः ।

ऐन्द्रवायवाग्रान् गृह्णीयाद्यः कामयेत यथापूर्वं प्रजाः कल्पेरन्निति यज्ञस्य वै क्लृप्तिमनु प्रजाः कल्पन्ते यज्ञस्याक्लृप्तिमनु न कल्पन्ते यथापूर्वमेव प्रजाः कल्पयति न ज्यायांसं कनीयानति क्रामत्यै-न्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्याऽऽमयति प्राण ऐन्द्रवायवः प्राणेनैवैनꣳ समर्धयति मैत्रावरुणाग्रान् गृह्णीरन् येषां दीक्षितानां प्रमीयेत (१) प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ मित्रावरुणौ प्राणापानावेव मुखतः परि हरन्त आश्विनाग्रान् गृह्णीताऽऽनुजावरोऽश्विनौ वै देवानामानुजावरौ पश्चेवाग्रं पर्यैतामश्विनावेतस्य देवता य आनुजावरस्तावेवैनमग्रं परि णयतः शुक्राग्रान् गृह्णीत गतश्रीः प्रतिष्ठाकामोऽसौ वा आदित्यः शुक्र एषोऽन्तोऽन्तं मनुष्यः (२) श्रियै गत्वा नि वर्ततेऽन्तादेवान्तमा रभते न ततः पापीयान् भवति मन्थ्यग्रान् गृह्णीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयति ताजगार्तिमार्च्छत्या-ग्रयणाग्रान् गृह्णीत यस्य पिता पितामहः पुण्यः स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो (३) भवत्यथ तन्न प्राप्नोत्युरः इवैतद्यज्ञस्य वागिव यदाग्रयणो वाचैवैनमिन्द्रियेण समर्धयति न ततः पापीयान् भवत्यु-क्थ्याग्रान् गृह्णीताभिचर्यमाणः सर्वेषां वा एतत् पात्राणामिन्द्रियं यदुक्थ्यपात्रꣳ सर्वेणैवैनमिन्द्रियेणाति प्र युङ्क्ते सरस्वत्यभि नो नेषि वस्य इति पुरोरुचं कुर्याद्वाग्वै (४) सरस्वती वाचैवैनमति प्र युङ्क्ते मा त्वत् क्षेत्राण्यरणानि गन्मेत्याह मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छति पूर्णान् ग्रहान् गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्याऽऽमयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चत्युत यदीतासुर्भवति जीवत्येव पूर्णान् ग्रहान् (५) गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत् प्राणान् वा एतर्हि प्रजानाꣳ शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानाꣳ शुचो मुञ्चति ताजक् प्र वर्षति ॥ (प्रमीयेत, मनुष्यः, पुण्यो, वाग्वै, एव पूर्णान् ग्रहान्, पञ्चविंशतिश्च) ॥ ७ ॥

द्वादशाहस्य व्यूढप्रकाशः ॥ विश्वेदेवा ऋषयः ।

गायत्रो वा ऐन्द्रवायवो गायत्रं प्रायणीयमहस्तस्मात् प्रायणीयेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति त्रैष्टुभो वै शुक्रस्त्रैष्टुभं द्वितीयमहस्तस्माद् द्वितीयेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णाति जागतो वा आग्रयणो जागतं तृतीयमहस्तस्मात् तृतीयेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्ये-तद्वै (१) यज्ञमाप्यच्छन्दाꣳस्याप्नोति यदाग्रयणः श्वो गृह्यते यत्रैव यज्ञमदृशन् ततं एवैनं पुनः प्र युङ्क्ते जगन्मुखो वै द्वितीयस्त्रिरात्रो जागत आग्रयणो यच्चतुर्थेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते राथंतरो वा ऐन्द्रवायवो राथंतरं पञ्चममहस्तस्मात् पञ्चमेऽह-(२)-न्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णाति बार्हतो वै शुक्रो बार्हतꣳ षष्ठमहस्तस्मात् षष्ठेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्ये-तद्वै द्वितीयं यज्ञमाप्यच्छन्दाꣳस्याप्नोति यच्छुक्रः श्वो गृह्यते यत्रैव यज्ञमदृशन् ततं एवैनं पुनः प्र युङ्क्ते त्रिष्टुङ्मुखो वै तृतीयस्त्रिरात्रस्त्रैष्टुभः (३) शुक्रो यत् सप्तमेऽहञ्छुक्रो गृह्यते स्व एवैनमायतने गृह्णात्यथो स्वमेव छन्दोऽनु पर्यावर्तन्ते वाग्वा आग्रयणो वागष्टममहस्तस्मादष्टमेऽहन्नाग्रयणो गृह्यते स्व एवैनमायतने गृह्णाति प्राणो वा ऐन्द्रवायवः प्राणो नवममहस्तस्मान्नवमेऽहन्नैन्द्रवायवो गृह्यते स्व एवैनमायतने गृह्णात्ये-त-(४)-द्वै तृतीयं यज्ञमाप्यच्छन्दाꣳस्याप्नोति यदैन्द्रवायवः श्वो गृह्यते यत्रैव यज्ञमदृशन् ततं एवैनं पुनः प्र युङ्क्तेऽथो स्वमेव छन्दोऽनु पर्यावर्तन्ते पथो वा एतेऽध्यपथेन यन्ति येऽन्येनैन्द्रवायवात् प्रतिपद्यन्तेऽन्तः खलु वा एष यज्ञस्य यद्दशममहर्दशमेऽहन्नैन्द्रवायवो गृह्यते यज्ञस्यै-(५)-वान्तं गत्वाऽपथात् पन्थामपि यन्त्यथो यथा वहीयसा प्रतिसारं वहन्ति तादृगेव तच्-छन्दाꣳस्यन्योन्यस्य लोकमभ्यध्यायन् तान्येतेनैव देवा व्यवाहयन्नै-न्द्रवायवस्य वा एतदायतनं यच्चतुर्थमहस्तस्मिन्नाग्रयणो गृह्यते तस्मादाग्रयणस्याऽऽयतने नवमेऽहन्नैन्द्रवायवो गृह्यते शुक्रस्य वा एतदायतनं यत् पञ्चम-(६)-महस्तस्मिन्नैन्द्रवायवो गृह्यते तस्मादैन्द्रवायवस्याऽऽयतने सप्तमेऽहञ्छुक्रो गृह्यत आग्रयणस्य वा एतदायतनं यत् षष्ठमहस्तस्मिञ्छुक्रो गृह्यते तस्माच्छुक्रस्याऽऽयतनेऽष्टमेऽहन्नाग्रयणो गृह्यते छन्दाꣳस्येव तद्वि वाहयति प्र वस्यसो विवाहमाप्नोति य एवं वेदाथो देवताभ्य एव यज्ञे संविदं दधाति तस्मादिदमन्योऽन्यस्मै (७) ददाति ॥ (एतद्वै, पञ्चमेऽहन्, त्रैष्टुभ, एतत्, गृह्यते यज्ञस्य, पञ्चम,-मन्यस्मा, एकं च) ॥ ८ ॥

द्वादशाहगतान्येकादशाहानि ॥ विश्वेदेवा ऋषयः ।

प्रजापतिरकामयत प्र जायेयेति स एतं द्वादशरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै स प्राजायत यः कामयेत प्र जायेयेति स द्वादशरात्रेण यजेत प्रैव जायते ब्रह्मवादिनो वदन्त्यग्निष्टोमप्रायणा यज्ञा अथ कस्मादतिरात्रः पूर्वः प्र युज्यत इति चक्षुषी वा एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमौ य-(१)-दग्निष्टोमं पूर्वं प्रयुञ्जीरन् बहिर्धा कनीनिके दध्युस्तस्मादतिरात्रः पूर्वः प्र युज्यते चक्षुषी एव यज्ञे धित्वा मध्यतः कनीनिके प्रति दधति यो वै गायत्रीं ज्योतिःपक्षां वेद ज्योतिषा भासा सुवर्गं लोकमेति यावग्निष्टोमौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मैषा वै गायत्री ज्योतिःपक्षा य एवं वेद ज्योतिषा भासा

सुवर्गं लोक-(२)-मेति प्रजापतिर्वा एष द्वादशधा विहितो यद् द्वादशरात्रो यावतिरात्रौ तौ पक्षौ येऽन्तरेऽष्टावुक्थ्याः स आत्मा प्रजापतिर्वावैष सन्त्सद्ध वै सत्रेण स्पृणोति प्राणा वै सत् प्राणानेव स्पृणोति सर्वासां वा एते प्रजानां प्राणैरासते ये सत्रमासते तस्मात् पृच्छन्ति किमेते सत्रिण इति प्रियः प्रजाना-(३)-मुत्थितो भवति य एवं वेद ॥ (अग्निष्टोमौ यत्, सुवर्गं लोकं, प्रियः प्रजानां, पञ्च च) ॥ ९ ॥

द्वादशाहः, दीक्षाविशेषश्च ॥ विश्वेदेवा ऋषयः ।

न वा एषोऽन्यतोवैश्वानरः सुवर्गाय लोकाय प्राभवदूर्ध्वो ह वा एष आतत आसीत् ते देवा एतं वैश्वानरं पर्यौहन्त्सुवर्गस्य लोकस्य प्रभूत्या ऋतवो वा एतेन प्रजापतिमयाजयन् तेष्वार्ध्नोदधि तदृध्नोति ह वा ऋत्विक्षु य एवं विद्वान् द्वादशाहेन यजते तेऽस्मिन्नैच्छन्त स रसमह वसन्ताय प्रायच्छ-(१)-द्यवं ग्रीष्मायौषधीर्वर्षाभ्यो व्रीहीञ्छरदे माषतिलौ हेमन्तशिशिराभ्यां तेनेन्द्रं प्रजापतिरयाजयत् ततो वा इन्द्र इन्द्रोऽभवत् तस्मादाहुरानुजावरस्य यज्ञ इति स ह्येतेनाग्रेऽयजतै-ष ह वै कुणपमत्ति यः सत्रे प्रतिगृह्णाति पुरुषकुणपमश्वकुणपं गौर्वा अन्नं येन पात्रेणान्नं बिभ्रति यत् तन्न निर्णेनिजति ततोऽधि (२) मलं जायत एक एव यजेतैको हि प्रजापतिरार्ध्नोद् द्वादश रात्रीर्दीक्षितः स्याद् द्वादश मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्वावैष एष ह त्वै जायते यस्तपसोऽधि जायते चतुर्धा वा एतास्तिस्रस्तिस्रो रात्रयो यद् द्वादशोपसदो याः प्रथमा यज्ञं ताभिः सं भरति या द्वितीया यज्ञं ताभिरा रभते (३) यास्तृतीयाः पात्राणि ताभिर्निर्णेनिक्ते याश्चतुर्थीरपि ताभिरात्मानमन्ततः शुन्धते यो वा अस्य पशुमत्ति माꣳसꣳ सोऽत्ति यः पुरोडाशं मस्तिष्कꣳ स यः परिवापं पुरीषꣳ स य आज्यं मज्जानꣳ स यः सोमꣳ स्वेदꣳ सोऽपि ह वा अस्य शीर्षण्या निष्पदः प्रति गृह्णाति यो द्वादशाहे प्रतिगृह्णाति तस्माद् द्वादशाहेन (४) न याज्यं पाप्मनो व्यावृत्त्यै ॥ (अयच्छ,-दधि, रभते, द्वादशाहेन, चत्वारि च) ॥ १० ॥

एकाद्येकोत्तरा बृहत्संख्या, तत्र युग्मायुग्मानां च मिश्रितानां सङ्ख्याः ॥ विश्वेदेवा ऋषयः ।

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षड्भ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः स्वाहा द्वादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा षोडशभ्यः स्वाहा सप्तदशभ्यः स्वाहाऽष्टादशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न (१) षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा सर्वस्मै स्वाहा ॥ (नवचत्वारिꣳशते स्वाहैकान्न,-विꣳशतिश्च) ॥ ११ ॥

अयुग्मानामेकादिकानां सङ्ख्याः ॥ विश्वेदेवा ऋषयः ।

एकस्मै स्वाहा त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै

स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (एकस्मै पञ्चाशत) ॥ १२ ॥

द्व्यादि युग्मसङ्ख्यासङ्घः ॥ विश्वेदेवा ऋषयः ।

द्वाभ्याꣳ स्वाहा चतुर्भ्यः स्वाहा षड्भ्यः स्वाहाऽष्टाभ्यः स्वाहा दशभ्यः स्वाहा द्वादशभ्यः स्वाहा चतुर्दशभ्यः स्वाहा षोडशभ्यः स्वाहाऽष्टादशभ्यः स्वाहा विꣳशत्यै स्वाहाऽष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (द्वाभ्यामष्टानवत्यै षड्विꣳशतिः) ॥ १३ ॥

त्र्यादि त्र्युत्तरसङ्ख्यासङ्घः ॥ विश्वेदेवा ऋषयः ।

त्रिभ्यः स्वाहा पञ्चभ्यः स्वाहा सप्तभ्यः स्वाहा नवभ्यः स्वाहैकादशभ्यः स्वाहा त्रयोदशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा सप्तदशभ्यः स्वाहैकान्न विꣳशत्यै स्वाहा नवविꣳशत्यै स्वाहैकान्न चत्वारिꣳशते स्वाहा नवचत्वारिꣳशते स्वाहैकान्न षष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकान्नाशीत्यै स्वाहा नवाशीत्यै स्वाहैकान्न शताय स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (त्रिभ्योऽष्टाचत्वारिꣳशत) ॥ १४ ॥

चतुरादि चतुरुत्तरसङ्ख्यासङ्घः ॥ विश्वेदेवा ऋषयः ।

चतुर्भ्यः स्वाहाऽष्टाभ्यः स्वाहा द्वादशभ्यः स्वाहा षोडशभ्यः स्वाहा विꣳशत्यै स्वाहा षण्णवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (चतुर्भ्यः षण्णवत्यै षोडश) ॥ १५ ॥

पञ्चादि पञ्चोत्तरसङ्ख्यासङ्घः ॥ विश्वेदेवा ऋषयः ।

पञ्चभ्यः स्वाहा दशभ्यः स्वाहा पञ्चदशभ्यः स्वाहा विꣳशत्यै स्वाहा पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (पञ्चभ्यः पञ्चनवत्यै चतुर्दश) ॥ १६ ॥

दशादि दशोत्तरसङ्ख्यासङ्घः ॥ विश्वेदेवा ऋषयः ।

दशभ्यः स्वाहा विꣳशत्यै स्वाहा त्रिꣳशते स्वाहा चत्वारिꣳशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा सप्तत्यै स्वाहाऽशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (दशभ्यो द्वाविꣳशतिः) ॥ १७ ॥

विंशत्यादि विंशत्युत्तरसङ्ख्यासङ्घः ॥ विश्वेदेवा ऋषयः ।

विꣳशत्यै स्वाहा चत्वारिꣳशते स्वाहा षष्ट्यै स्वाहाऽशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥ (विꣳशत्यै द्वादश) ॥ १८ ॥

पञ्चाशतमारभ्य पञ्चाशदुत्तराणां शतोत्तराणां च सङ्घः ॥ विश्वेदेवा ऋषयः ।

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याꣳ शताभ्याꣳ स्वाहा त्रिभ्यः शतेभ्यः स्वाहा

चतुर्भ्यः शतेभ्यः स्वाहा पञ्चभ्यः शतेभ्यः स्वाहा षड्भ्यः शतेभ्यः स्वाहा सप्तभ्यः शतेभ्यः स्वाहा ऽष्टाभ्यः शतेभ्यः स्वाहा नवभ्यः शतेभ्यः स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा ॥ (पञ्चाशते द्वात्रिंशच्च) ॥ १९ ॥

शतमारभ्य दशगुणवृद्धियुक्तसंख्यासहः ॥ विश्वेदेवा ऋषयः ।

शताय स्वाहा सहस्राय स्वाहा ऽयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहा ऽर्बुदाय स्वाहा न्यर्बुदाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहा ऽन्ताय स्वाहा परार्धाय स्वाहोषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ (शताय षड्विंशतिः) ॥ २० ॥

[साध्याः २११ । कुसुरुबिन्दो १४२ । बृहस्पतिः १०० । प्रजापतिः ११३ । प्रजापति -२८। - ऋतव १४९ । ऐन्द्रवायवा-ग्रान् २७५ । गायत्रः ३५९ । प्रजापति -१५५ । -नै -२०४ । -इमा ७१ । एकस्मै ५० । द्वाभ्यां २६ । त्रिभ्य -४८ । चतुर्भ्यः १६ । पञ्चभ्यो १४ । दशभ्यो २२ । विंशत्यै १२ । पञ्चाशते ३२ । शताय ३८ । विंशतिः ॥ २३३०]

[॥ इति सप्तमकाण्डे द्वितीयः प्रपाठकः ॥२॥]

सत्रजातनिरूपणम् ।

अथ तृतीयः प्रपाठकः ॥ ३ ॥

द्वादशाहगतमविवाक्यमहः ॥ विश्वेदेवा ऋषयः ।

प्रजवं वा एतेन यन्ति यद्दशममहः पापावहीयं वा एतेन भवन्ति यद्दशममहर्यो वै प्रजवं यतामपथेन प्रतिपद्यते यः स्थाणुं हन्ति यो भ्रेषं न्येति स हीयते स यो वै दशमेऽहन्नविवाक्य उपहन्यते स हीयते तस्मै य उपहताय व्याह तमेवान्वारभ्य समश्नुतेऽथ यो व्याह स (१) हीयते तस्माद्दशमेऽहन्नविवाक्य उपहताय न व्युच्यम्—मथो खल्वाहुर्यज्ञस्य वै समृद्धेन देवाः सुवर्गं लोकमायन् यज्ञस्य व्यृद्धेनासुरान् पराऽभावयन्निति यत् खलु वै यज्ञस्य समृद्धं तद्यजमानस्य यद्व्यृद्धं तद्भ्रातृव्यस्य स यो वै दशमेऽहन्नविवाक्य उपहन्यते स एवार्तिं रेचयति ते ये बाह्या दृशीकवः (२) स्युस्ते वि ब्रूयु—र्यदि तत्र न विन्देयुरन्तः सदसाद्व्युच्यं यदि तत्र न विन्देयुर्गृहपतिना व्युच्यं तद्व्युच्यमेवा—थ वा एतत् सर्पराज्ञिया ऋग्भिः स्तुवन्तीयं वै सर्पतो राज्ञी यद्वा अस्यां किं चार्चन्ति यदानृचुस्तेनेयं सर्पराज्ञी ते यदेव किं च वाचाऽऽनृचुर्यदतोऽध्यर्चितार-(३)-स्तदुभयमाप्त्वाऽवरुन्धोत् तिष्ठामेति तामिर्मनसा स्तुवते न या इमामश्वरथो नाश्वतरीरथः सद्यः पर्याप्तुमर्हति मनो वा इमां सद्यः पर्याप्तुमर्हति मनः परिभवितु—मथ ब्रह्म वदन्ति परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूंष्यथैतस्यैवान्तो नास्ति यद्ब्रह्म तत् प्रतिगृणत आ चक्षीत स (४) प्रतिगरः ॥ (व्याह स, दृशीकवो, ऽध्यर्चितारः, स, एकं च) ॥ १ ॥

द्वादशाहवाजिप्रशंसा ॥ विश्वेदेवा ऋषयः ।

ब्रह्मवादिनो वदन्ति किं द्वादशाहस्य प्रथमेनाह्नर्त्विजां यजमानो वृङ्क्त इति तेज इन्द्रियमिति किं

द्वितीयेनेति प्राणानन्नाद्यमिति किं तृतीयेनेति त्रीनिमाँल्लोकानिति किं चतुर्थेनेति चतुष्पदः पशूनिति किं पञ्चमेनेति पञ्चाक्षरां पङ्क्तिमिति किं षष्ठेनेति षड् ऋतूनिति किं सप्तमेनेति सप्तपदां शक्वरीमिति (१) किमष्टमेनेत्यष्टाक्षरां गायत्रीमिति किं नवमेनेति त्रिवृतं स्तोममिति किं दशमेनेति दशाक्षरां विराजमिति किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभमिति किं द्वादशेनेति द्वादशाक्षरां जगतीमित्येतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते ॥ (शक्वरीमिति, पञ्चचत्वारिंशच्च) ॥ २ ॥

त्रयोदशरात्रः ॥ विश्वेदेवा ऋषयः ।

एष वा आप्तो द्वादशाहो यत् त्रयोदशरात्रः समानं ह्येतदहर्यत् प्रायणीयश्चोदयनीयश्च त्र्यतिरात्रो भवति त्रय इमे लोका एषां लोकानामाप्त्यै प्राणो वै प्रथमोऽतिरात्रो व्यानो द्वितीयोऽपानस्तृतीयः प्राणापानोदानेष्वेवान्नाद्ये प्रति तिष्ठन्ति सर्वमायुर्यन्ति य एवं विद्वांसस्त्रयोदशरात्रमासते तदाहुर्वाग्वा एषा वितता (१) यद् द्वादशाहस्तां विच्छिन्द्युर्यन्मध्येऽतिरात्रं कुर्युरुपदासुका गृहपतेर्वाक् स्यादुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति संततामेव वाचमव रुन्धतेऽनुपदासुका गृहपतेर्वाग्भवति पशवो वै छन्दोमा अन्नं महाव्रतं यदुपरिष्टाच्छन्दोमानां महाव्रतं कुर्वन्ति पशुषु चैवान्नाद्ये च प्रति तिष्ठन्ति (वितता, त्रिंशच्च) ॥ ३ ॥

चतुर्दशरात्रः ॥ विश्वेदेवा ऋषयः ।

आदित्या अकामयन्तोभयोर्लोकयोर्ऋध्नुयामेति त एतं चतुर्दशरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै त उभयोर्लोकयोरार्ध्नुवन्नस्मिंश्चामुष्मिंश्च य एवं विद्वांसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिंश्चामुष्मिंश्च चतुर्दशरात्रो भवति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्यै यत् पराचीनानि पृष्ठानि (१) भवन्त्यमुमेव तैर्लोकमभि जयन्ति यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकमभि जयन्ति त्रयस्त्रिंशौ मध्यतः स्तोमौ भवतः साम्राज्यमेव गच्छन्त्यधिराजौ भवतोऽधिराजा एव समानानां भवन्त्य—तिरात्रावभितो भवतः परिगृहीत्यै ॥ (पृष्ठानि, चतुस्त्रिंशच्च) ॥ ४ ॥

अन्यश्चतुर्दशरात्रः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिः सुवर्गं लोकमैत् तं देवा अन्वायन् तानादित्याश्च पशवश्चान्वायन् ते देवा अब्रुवन् यान् पशूनुपाजीविष्म त इमेऽन्वाग्मन्निति तेभ्य एतं चतुर्दशरात्रं प्रत्यौहन् त आदित्याः पृष्ठैः सुवर्गं लोकमारोहन् त्र्यहाभ्यामस्मिंल्लोके पशून् प्रत्यौहन् पृष्ठैरादित्या अमुष्मिंल्लोक आर्ध्नुवन् त्र्यहाभ्यामस्मिन्-(१)-ल्लोके पशवो य एवं विद्वांसश्चतुर्दशरात्रमासत उभयोरेव लोकयोर्ऋध्नुवन्त्यस्मिंश्चामुष्मिंश्च पृष्ठैरेवामुष्मिंल्लोक ऋध्नुवन्ति त्र्यहाभ्यामस्मिंल्लोके ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधं स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौ—(२)—जो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ्

त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या (३) उभयोर्लोकयोर्ऋद्ध्वोत् तिष्ठन्ति चतुर्दशैतास्तासां या दश दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते याश्चतस्रश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्य—तिरात्रावभितो भवतः परिगृहीत्यै ॥ (आर्ध्नुवन् त्र्यहाभ्यामस्मिन्,-सविवधत्वाय, प्रतिष्ठित्या, एकत्रिंशच्च) ॥ ५ ॥

पञ्चदशरात्रः ॥ विश्वेदेवा ऋषयः ।

इन्द्रो वै सदृङ् देवताभिरासीत् स न व्यावृतमगच्छत् स प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽन्याभिर्देवताभिर्व्यावृतमगच्छद्य एवं विद्वांसः पञ्चदशरात्रमासते व्यावृतमेव पाप्मना भ्रातृव्येण गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं (१) गौरसावायुरेष्वेव लोकेषु प्रति तिष्ठन्त्य—सत्रं वा एतद्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति पञ्चदशरात्रो भवति पञ्चदशो वज्रो वज्रमेव भ्रातृव्येभ्यः प्र हरन्त्य—तिरात्रावभितो भवत इन्द्रियस्य (१) परिगृहीत्यै ॥ (अन्तरिक्ष,- मिन्द्रियस्यै,- कं च) ॥ ६ ॥

अन्यः पञ्चदशरात्रः ॥ विश्वेदेवा ऋषयः ।

इन्द्रो वै शिथिल इवाप्रतिष्ठित आसीत् सोऽसुरेभ्योऽबिभेत् स प्रजापतिमुपाधावत् तस्मा एतं पञ्चदशरात्रं वज्रं प्रायच्छत् तेनासुरान् पराभाव्य विजित्य श्रियमगच्छदग्निष्टुता पाप्मानं निरदहत पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन्नधत्त य एवं विद्वांसः पञ्चदशरात्रमासते भ्रातृव्यानेव पराभाव्य विजित्य श्रियं गच्छन्त्यग्निष्टुता पाप्मानं नि-(१)-र्दहन्ते पञ्चदशरात्रेणौजो बलमिन्द्रियं वीर्यमात्मन् दधते एता एव पशव्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरं पशवोऽनु प्र जायन्ते तस्मात् पशव्या एता एव सुवर्ग्याः पञ्चदश वा अर्धमासस्य रात्रयोऽर्धमासशः संवत्सर आप्यते संवत्सरः सुवर्गो लोकस्तस्मात् सुवर्ग्या ज्योतिर्गौरायुरिति त्र्यहो भवतीयं वाव ज्योतिरन्तरिक्षं (२) गौरसावायुरिमानेव लोकानभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधं स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं (३) यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत् तिष्ठन्ति पञ्चदशैतास्तासां या दश दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते याः पञ्च पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्य—तिरात्रावभितो भवत इन्द्रियस्य वीर्यस्य प्रजायै (४) पशूनां परिगृहीत्यै ॥ (गच्छन्त्यग्निष्टुता पाप्मानं नि,-रन्तरिक्षं, लोकं प्रजायै, द्वे च) ॥ ७ ॥

सप्तदशरात्रः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिरकामयतान्नादः स्यामिति स एतं सप्तदशरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै सोऽन्नादोऽभवद्य एवं विद्वांसः सप्तदशरात्रमासतेऽन्नादा एव भवन्ति पञ्चाहो भवति पञ्च वा ऋतवः

संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते ऽसत्रं वा एत-(१)-द्यदच्छन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति सप्तदशरात्रो भवति सप्तदशः प्रजापतिः प्रजापतेराप्त्या अतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ (एतत्, सप्तत्रिंशच्च) ॥ ८ ॥

विंशतिरात्रः ॥ विश्वेदेवा ऋषयः ।

सा विराड् विक्रम्यातिष्ठद्ब्रह्मणा देवेष्वन्नेनासुरेषु ते देवा अकामयन्तोभयं सं वृञ्जीमहि ब्रह्म चान्नं चेति त एता विंशतिं रात्रीरपश्यन् ततो वै त उभयं समवृञ्जत ब्रह्म चान्नं च ब्रह्मवर्चसिनोऽन्नादा अभवन् य एवं विद्वांस एता आसत उभयमेव सं वृञ्जते ब्रह्म चान्नं च (२) ब्रह्मवर्चसिनोऽन्नादा भवन्ति द्वे वा एते विराजौ तयोरेव नाना प्रति तिष्ठन्ति विंशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या यावानेव पुरुषस्तमाप्त्वोत् तिष्ठन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं (२) लोकमभ्यारोहन्ति यदन्यतः पृष्ठानि स्युर्विविवधं स्यान्मध्ये पृष्ठानि भवन्ति सविवधत्वायौजो वै वीर्यं पृष्ठान्योज एव वीर्यं मध्यतो दधते बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं (३) लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत् तिष्ठन्त्य—तिरात्रावभितो भवतो ब्रह्मवर्चसस्यान्नाद्यस्य परिगृहीत्यै ॥ (वृञ्जते ब्रह्म चान्नं च, सुवर्गं,-मेते सुवर्गं,-त्रयोविंशतिश्च) ॥ ९ ॥

एकविंशतिरात्रः ॥ विश्वेदेवा ऋषयः ।

असावादित्योऽस्मिंल्लोक आसीत् तं देवाः पृष्ठैः परिगृह्य सुवर्गं लोकमगमयन् परैरवस्तात् पर्यगृह्णन् दिवाकीर्त्येन सुवर्गे लोके प्रत्यस्थापयन् परैः परस्तात् पर्यगृह्णन् पृष्ठैरुपावारोहन्त्स वा असावादित्योऽमुष्मिंल्लोके परैरुभयतः परिगृहीतो यत् पृष्ठानि भवन्ति सुवर्गमेव तैर्लोकं यजमाना यन्ति परैरवस्तात् परि गृह्णन्ति दिवाकीर्त्येन (१) सुवर्गे लोके प्रति तिष्ठन्ति परैः परस्तात् परि गृह्णन्ति पृष्ठैरुपावरोहन्ति यत् परे परस्तान्न स्युः पराञ्चः सुवर्गाल्लोकान्निष्पद्येरन् यदवस्तान्न स्युः प्रजा निर्दहेयुरभितो दिवाकीर्त्यं परःसामानो भवन्ति सुवर्ग एवैनाँल्लोक उभयतः परि गृह्णन्ति यजमाना वै दिवाकीर्त्यं संवत्सरः परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति संवत्सर एवोभयतः (२) प्रति तिष्ठन्ति पृष्ठं वै दिवाकीर्त्यं पार्श्वे परःसामानोऽभितो दिवाकीर्त्यं परःसामानो भवन्ति तस्मादभितः पृष्ठं पार्श्वे भूयिष्ठा ग्रहा गृह्यन्ते भूयिष्ठं शस्यते यज्ञस्यैव तन्मध्यतो ग्रन्थिं ग्रथ्नन्त्यविस्रंसाय सप्त गृह्यन्ते सप्त वै शीर्षण्याः प्राणाः प्राणानेव यजमानेषु दधति यत् पराचीनानि पृष्ठानि भवन्त्यमुमेव तैर्लोकमभ्यारोहन्ति यदिमं लोकं न (३) प्रत्यवरोहेयुरुद्वा माद्येयुर्यजमानाः प्र वा मीयेरन् यत् प्रतीचीनानि पृष्ठानि भवन्तीममेव तैर्लोकं प्रत्यवरोहन्त्यथो अस्मिन्नेव लोके प्रति तिष्ठन्त्यनुन्मादाये—न्द्रो वा अप्रतिष्ठित आसीत् स प्रजापतिमुपाधावत् तस्मा एतमेकविंशतिरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै स प्रत्यतिष्ठद्ये बहु-

याजिनोऽप्रतिष्ठिताः (४) स्युस्त एकविंशतिरात्रमासीरन् द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश एतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति तिष्ठन्त्यसावादित्यो न व्यरोचत स प्रजापतिमुपाधावत् तस्मा एतमेकविंशतिरात्रं प्रायच्छत् तमाऽहरत् तेनायजत ततो वै सोऽरोचत य एवं विद्वांस एकविंशतिरात्रमासते (५) रोचन्त एवैकविंशतिरात्रो भवति रुग्वा एकविंशो रुचमेव गच्छन्त्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविंशोऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ (गृह्णीत द्विचत्वारिंशच्च,-सोमपतो, वा,-प्रतिष्ठिता, ब्रह्म, एकविंशतिश्च) ॥ १० ॥

अश्वमेधाहरणपर्यग्निहोममन्त्राः ॥ १ गायत्री, २ महापङ्क्तिः, ३ उपरिष्टाद्बृहती, ४ द्विपदाजगती, ५ अभिसारिणी, ६ महाबृहती, ७ ज्योतिष्मती, ८ अस्तारपङ्क्तिः । विश्वेदेवा ऋषयः ।

अर्वाङ् यज्ञः सं क्रामत्वमुष्मादधि मामभि । ऋषीणां यः पुरोहितः ॥
निर्देवं निर्वीरं कृत्वा विष्कन्धं तस्मिन् हीयतां योऽस्मान् द्वेष्टि ।
शरीरं यज्ञशमलं कुसीदं तस्मिन्त्सीदतु योऽस्मान् द्वेष्टि ।
यज्ञ यज्ञस्य यत् तेजस्तेन सं क्राम मामभि ।
ब्राह्मणानृत्विजो देवान् यज्ञस्य तपसा ते सवाहमा हुवे ॥
इष्टेन पक्वमुप (१) ते हुवे सवाहम् । सं ते वृञ्जे सुकृतं सं प्रजां पशून् ॥
प्रैषान्त्सामिधेनीराघारावाज्यभागावाश्रुतं प्रत्याश्रुतमा शृणोमि ते ।
प्रयाजानूयाजान्त्स्विष्टकृतमिडामाशिष आ वृञ्जे सुवः ॥
अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः ।
याज्यानुवाक्याभ्यामुप ते हुवे सवाहं यज्ञमा ददे ते वषट्कृतम् ॥
स्तुतं शस्त्रं प्रतिगरं ग्रहमिडामाशिष-(२)-आ वृञ्जे सुवः ।
पत्नीसंयाजानुप ते हुवे सवाहं समिष्टयजुरा ददे तव ॥
पशून्त्सुतं पुरोडाशान्त्सवनान्योत यज्ञम् ।
देवान्त्सेन्द्रानुप ते हुवे सवाहमग्निमुखान्त्सोमवतो ये च विश्वे ॥ (अप, प्रयाजानाशिषो, द्वाविंशतिश्च) ॥ ११ ॥

अश्वमेधाहुतिहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

भूतं भव्यं भविष्यद्वषट्स्वाहा नम ऋक्साम यजुर्वषट्स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट्स्वाहा नमोऽग्निर्वायुः सूर्यो वषट्स्वाहा नमः प्राणो व्यानोऽपानो वषट्स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट्स्वाहा नमः पिता पुत्रः पौत्रो वषट्स्वाहा नमो भूर्भुवः (१) सुवर्वषट्स्वाहा नमः ॥ (सुवः,-स्वाहा नमो द्वे च) ॥ १२ ॥

आभूहोममन्त्राः ॥ १ विराट्, २ त्रिष्टुप्, ३ जगती । विश्वेदेवा ऋषयः ।

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् ।
आपो देवीर्यज्ञिया माऽऽविशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ॥
आ मे ग्रहो भवत्वा पुरोरुक् स्तुतशस्त्रे माऽऽविशतां समीची ।
आदित्या रुद्रा वसवो मे सदस्याः सहस्रस्य मा भूमा मा प्र हासीत् ॥
आ माऽग्निष्टोमो विशतू-(१)-क्थ्यश्चातिरात्रो माऽऽविशत्वापिशर्वरः ।
तिरोअह्निया मा सुहुता आ विशन्तु सहस्रस्य मा भूमा मा प्र हासीत् ॥ (अग्निष्टोमो, विशतु,-द्वादश च) ॥ १३ ॥

अनुमूर्होममन्त्राः ॥ विश्वेदेवा ऋषयः ।

अग्निना तपोऽन्वभवद्वाचा ब्रह्म मणिना रूपाणीन्द्रेण देवान् वातेन प्राणान्त्सूर्येण द्यां चन्द्रमसा नक्षत्राणि यमेन पितॄन् राज्ञा मनुष्यान् फलेन नादेयानजगरेण सर्पान् व्याघ्रेणारण्यान् पशूञ्छ्येनेन पतत्रिणो वृष्णाऽश्वानृषभेण गा बस्तेनाजा वृष्णिनाऽवीर्व्रीहिणाऽन्नानि यवेनौषधीर्न्यग्रोधेन वनस्पतीनुदुम्बरेणोर्जं गायत्रिया छन्दांसि त्रिवृता स्तोमान् ब्राह्मणेन (१) वाचम् ॥ (ब्राह्मणेनै,-कं च) ॥ १४ ॥

वैश्वदेवाहुतिमन्त्राः ॥ विश्वेदेवा ऋषयः ।

स्वाहाऽऽधिमाधीताय स्वाहा स्वाहाऽऽधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहाऽदित्यै स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा (१) विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा सर्वस्मै स्वाहा ॥ (पुरुरूपाय स्वाहा, द्वे च) ॥ १५ ॥

पशङ्गहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

दद्भ्यः स्वाहा हनूभ्याꣳ स्वाहौष्ठाभ्याꣳ स्वाहा मुखाय स्वाहा नासिकाभ्याꣳ स्वाहाऽक्षीभ्याꣳ स्वाहा कर्णाभ्याꣳ स्वाहा पार इक्षवोऽवार्येभ्यः पक्ष्मभ्यः स्वाहाऽवार इक्षवः पार्येभ्यः पक्ष्मभ्यः स्वाहा शीर्ष्णे स्वाहा भ्रूभ्याꣳ स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यः स्वाहा वहाय स्वाहा ग्रीवाभ्यः स्वाहा स्कन्धेभ्यः स्वाहा कीकसाभ्यः स्वाहा पृष्टीभ्यः स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याꣳ स्वाहा (१) अꣳसाभ्याꣳ स्वाहा दोषभ्याꣳ स्वाहा बाहुभ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा श्रोणीभ्याꣳ स्वाहोरुभ्याꣳ स्वाहाऽष्ठीवद्भ्याꣳ स्वाहा जङ्घाभ्याꣳ स्वाहा भसदे स्वाहा

शिखण्डेभ्यः स्वाहा वालधानाय स्वाहाऽऽण्डाभ्याꣳ स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा पद्भ्यः स्वाहा शफेभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माꣳसाय स्वाहा स्नावभ्यः स्वाहाऽस्थभ्यः स्वाहा मज्जभ्यः स्वाहा (२) ऽङ्गेभ्यः स्वाहाऽऽत्मने स्वाहा सर्वस्मै स्वाहा ॥ (पार्श्वाभ्याꣳ स्वाहा, मज्जभ्यः स्वाहा, षट् च) ॥ १६ ॥

अश्वावयवहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

कञ्जेताय स्वाहाऽञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदे स्वाहा शितिरन्ध्राय स्वाहा शितिपृष्ठाय स्वाहा शित्यꣳसाय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रवे स्वाहा शितिभसदे स्वाहा श्वेतानूकाशाय स्वाहाऽञ्जये स्वाहा ललामाय स्वाहाऽसितज्ञवे स्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहाऽरुणैताय स्वाहेदृशाय स्वाहा कीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा (१) सर्वस्मै स्वाहा ॥ (रूपाय स्वाहा, द्वे च) ॥ १७ ॥

अश्वावयववर्णहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहाऽरुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा रोहिताय स्वाहा शोणाय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पाकलाय स्वाहा सुरूपाय स्वाहाऽनुरूपाय स्वाहा विरूपाय स्वाहा सरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा ॥ (कृष्णाय षट्चत्वारिꣳशत्) ॥ १८ ॥

ओषधिहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

ओषधीभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा काण्डेभ्यः स्वाहा वल्शेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा सर्वस्मै स्वाहा ॥ (ओषधीभ्यो,-ऽष्टाविꣳशतिः) ॥ १९ ॥

वनस्पतिहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

वनस्पतिभ्यः स्वाहा मूलेभ्यः स्वाहा तूलेभ्यः स्वाहा स्कन्धोभ्यः स्वाहा शाखाभ्यः स्वाहा पर्णेभ्यः स्वाहा पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा गृहीतेभ्यः स्वाहाऽगृहीतेभ्यः स्वाहाऽवपन्नेभ्यः स्वाहा शयानेभ्यः स्वाहा शिष्टाय स्वाहाऽतिशिष्टाय स्वाहा परिशिष्टाय स्वाहा सꣳशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहाऽरिक्ताय स्वाहा प्ररिक्ताय स्वाहा सꣳरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा ॥ (वनस्पतिभ्यः षट्चत्वारिꣳशत्) ॥ २० ॥

[प्रजवं २०। ब्रह्मवादिनं ९१। एव ९३। आदित्याः ८४। प्रजापति- १८३। -रिन्द्र १०१। इन्द्रः २०२। प्रजापतिः ८०। सा १७३। ऽसा २७१। -वर्ताः १३२। भूत-५४। -मा ६८। ऽग्निना ५१। स्वाहा ६०। दद्भ्यो १०६। ऽम्बपुंवताय ५२। कृष्णाया- ४६। -षधीभ्यो २४। वनस्पतिभ्यो ४६। विंशतिः ॥ २१२३ ॥]

[इति सप्तमकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥]

सत्रकर्मनिरूपणम् ।

[अथ चतुर्थः प्रपाठकः ॥ ४ ॥]

चतुर्विंशतिरात्रः ॥ विश्वेदेवा ऋषयः ।

बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयं पुरोधामिति स एतं चतुर्विंशतिरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत् पुरोधां य एवं विद्वाꣳसश्चतुर्विंशतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायु-(१)-रिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति सत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव (२) यन्त्ययो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति चतुर्विंशतिरात्रो भवति चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विंशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ (अन्तरिक्षं गौरसावायु, -राभ्यामेव पञ्चचत्वारिꣳशच्च) ॥ १ ॥

अपरचतुर्विंशतिरात्रः ॥ विश्वेदेवा ऋषयः ।

यथा वै मनुष्या एवं देवा अग्र आसन् तेऽकामयन्तावर्तिं पाप्मानं मृत्युमपहत्य दैवीꣳ सꣳसदं गच्छेमेति त एतं चतुर्विंशतिरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै तेऽवर्तिं पाप्मानं मृत्युमपहत्य दैवीꣳ सꣳसदमगच्छन् य एवं विद्वाꣳसश्चतुर्विंशतिरात्रमासतेऽवर्तिमेव पाप्मानमपहत्य श्रियं गच्छन्ति श्रीर्हि मनुष्यस्य (१) दैवी सꣳसज्ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः संवत्सरस्तं मासा अर्धमासा ऋतवः प्रविश्य दैवीꣳ सꣳसदमगच्छन् य एवं विद्वाꣳसश्चतुर्विंशतिरात्रमासते संवत्सरमेव प्रविश्य वस्यसीꣳ सꣳसदं गच्छन्ति त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः परस्तात् त्रयस्त्रिꣳशैरेवोभयतोऽवर्तिं पाप्मानमपहत्य दैवीꣳ सꣳसदं मध्यतो (२) गच्छन्ति पृष्ठानि हि दैवी सꣳसज्जामि वा एतत् कुर्वन्ति यत् त्रयस्त्रयस्त्रिꣳशा अन्वञ्चो मध्येऽनिरुक्तो भवति तेनाजाम्यूर्ध्वानि पृष्ठानि भवन्त्यूर्ध्वाश्छन्दोमा उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं लोकं यन्ति सत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशव-(३)-श्छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति

त्रयस्त्रयस्त्रिꣳशाः परस्तान्मध्ये पृष्ठान्युरो वै त्रयस्त्रिꣳशा आत्मा पृष्ठान्यात्मन्नेव तद्यजमानाः शर्म नह्यन्तेऽनार्त्यै बृहद्रथंतराभ्यां यन्तीयं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव (४) सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् षडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमानाꣳ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं वाव स क्षयोऽस्मादेव तेन क्षयान्न यन्ति चतुर्विꣳशतिरात्रो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः (५) संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ (मनुष्यस्य, मध्यतः, पशव,- स्ताभ्यामेव, संवत्सर,- श्चतुर्विꣳशतिश्च) ॥ २ ॥

त्रिंशद्रात्रः ॥ विश्वेदेवा ऋषयः ।

ऋक्षा वा इयमलोमकाऽऽसीत् साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैतास्त्रिꣳशतꣳ रात्रीरपश्यत् ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभि-रियं वा अक्षुध्यत् सैतां विराजमपश्यत् तामात्मन् धित्वाऽन्नाद्यमवारुन्धौषधी-(१)-र्वनस्पतीन् प्रजां पशून् तेनावर्धत सा जेमानं महिमानमगच्छद्य एवं विद्वाꣳस एता आसते विराजमेवाऽऽत्मन् धित्वाऽन्नाद्यमव रुन्धते वर्धन्ते प्रजया पशुभिर्जेमानं महिमानं गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव (२) प्रति तिष्ठन्ति त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवाऽऽरभन्ते प्रतिष्ठित्यै त्रिणवो भवति विजित्या एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते त्रिवृदग्निष्टुद्भवति पाप्मानमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत् तेज एवाऽऽत्मन् दधते पञ्चदश इन्द्रस्तोमो भवतीन्द्रियमेवाव (३) रुन्धते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते चतुर्विꣳशो भवति चतुर्विꣳशतिरर्धमासाः संवत्सरः संवत्सरः सुवर्गो लोकः संवत्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान् विषूवन्तो भवन्ति य एवं विद्वाꣳस एता आसते चतुर्विꣳशात् पृष्ठान्युप यन्ति संवत्सर एव प्रतिष्ठाय (४) देवता अभ्यारोहन्ति त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते बहवः षोडशिनो भवन्ति तस्माद्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादियमोषधीभिर्वनस्पतिभिर्व्यतिषक्ता (५) व्यतिषज्यन्ते प्रजया पशुभिर्य एवं विद्वाꣳस एता आसतेऽक्लृप्ता वा एते सुवर्गं लोकं यन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत ऊर्ध्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता

एव सुवर्गं लोकं यन्त्युभयोरेभ्यो लोकयोः कल्पते त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ (ओषधीः, संवत्सर एवा,- व, प्रतिष्ठाय, व्यतिषक्ता,- क्लृप्ताः पञ्चाशच्च) ॥ ३ ॥

द्वात्रिंशद्रात्रः ॥ विश्वेदेवा ऋषयः ।

प्रजापतिः सुवर्गं लोकमैत् तं देवा येनयेन छन्दसाऽनु प्रायुञ्जत तेन नाऽऽप्नुवन् त एता द्वात्रिꣳशतꣳ रात्रीरपश्यन् द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वाऽभ्यारुह्य सुवर्गं लोकमायन् य एवं विद्वाꣳस एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति (१) श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुग्वागनुष्टुप् सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं लोकमभ्यारोहन्ति बृहद्रथंतराभ्यां यन्ती-(२)-यं वाव रथंतरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं लोकं यन्ति पराञ्चो वा एते सुवर्गं लोकमभ्यारोहन्ति ये पराञ्चस्त्र्यहाननुपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्ऋद्ध्वोत्तिष्ठन्ति द्वात्रिꣳशदेतास्तासां यास्त्रिꣳशत् त्रिꣳशदक्षरा (३) विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं लोकं यन्त्य-तिरात्रावभितो भवतः परिगृहीत्यै ॥ (गच्छन्ति, यन्ति, त्रिꣳशदक्षरा, द्वाविꣳशतिश्च) ॥ ४ ॥

त्रयस्त्रिंशद्रात्रः ॥ विश्वेदेवा ऋषयः ।

द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रिꣳशदहश्च य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासते साक्षादेव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान् भवति यदि नाववविध्यति सदृङ् य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासते वि पाप्मना भ्रातृव्येणाऽऽवर्तन्तेऽहर्भाजो वा एता देवा अग्र आऽहर-(१)-न्नहरेकोऽभजताहरेकस्ताभिर्वै ते प्रबाहुगार्ध्नुवन् य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासते सर्व एव प्रबाहुगृध्नुवन्ति सर्वे ग्रामणीयं प्राप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका एष्वे-(२)-व लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते विश्वजिद्भवत्यन्नाद्यस्यावरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत् पुरस्ताद् द्वादशाहमुपेयुरनाप्तां वाचमुपेयुरुपदासुकैषां वाक् स्यादुपरिष्टाद् द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादुपरिष्टाद्वाचा वदामोऽवान्तरं (३) वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवैषा शान्ति-र्द्व्यनीका वा एता रात्रयो यजमाना विश्वजित् सहातिरात्रेण पूर्वाः षोडश सहा-(४)-तिरात्रेणोत्तराः

षोडश य एवं विद्वाꣳसस्त्रयस्त्रिꣳशदहमासत ऐषां द्व्यनीका प्रजा जायतेऽतिरात्रावभितो भवतः परिगृहीत्यै ॥ (अहर,- ष्वे,- वान्तरꣳ, षोडश सह, सप्तदश च) ॥ ५ ॥

षट्त्रिंशद्रात्रः ॥ विश्वेदेवा ऋषयः ।

आदित्या अकामयन्त सुवर्गं लोकमियामेति ते सुवर्गं लोकं न प्राजानन्न सुवर्गं लोकमायन् त एतꣳ षट्त्रिꣳशद्रात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते सुवर्गं लोकं प्राजानन्त्सुवर्गं लोकमायन् य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं लोकं यन्ति ज्योतिरतिरात्रो (१) भवति ज्योतिरेव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा भवन्ति षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठन्त्य-सत्रं वा एतद्यदछन्दोमं यच्छन्दोमा भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवश्छन्दोमा ओजस्येव (२) वीर्ये पशुषु प्रति तिष्ठन्ति षट्त्रिꣳशद्रात्रो भवति षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाꣳ स्वाराज्यमाश्नुताश्नुवते स्वाराज्यं य एवं विद्वाꣳसः षट्त्रिꣳशद्रात्रमासते सुवर्गमेव लोकं यन्त्य-तिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै ॥ (अतिरात्र, ओजस्येव, षट्त्रिꣳशच्च) ॥ ६ ॥

एकोनपञ्चाशद्रात्रः ॥ विश्वेदेवा ऋषयः ।

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सौदासान् भवेयमिति स एतमेकस्मान्नपञ्चाशमपश्यत् तमाऽहरत् तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवं विद्वाꣳस एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान् भवन्ति त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ श्यन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रो (१) वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्दशममहर्भवति वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः संवत्सरं ते संवत्सर एव प्रति तिष्ठन्ति द्वादशैकविꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् (२) दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकस्यै न पञ्चाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारिꣳशत ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया (३) पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं विद्वाꣳस एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्य-तिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ (वज्रं, आत्मन्, प्रजया, द्वाविꣳशतिश्च) ॥ ७ ॥

संवत्सरसत्रदीक्षाकालः ॥ विश्वेदेवा ऋषयः ।

संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै संवत्सरस्य पत्नी यदेकाष्टकैतस्यां वा एष एताꣳ रात्रिं वसति साक्षादेव संवत्सरमारभ्य दीक्षन्त आर्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तं वा एते संवत्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन् मुखं वा एतत् (१) संवत्सरस्य यत् फल्गुनी-

पूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यत् साम्मेघ्ये विषूवान्त्संपद्यते चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत् संवत्सरस्य यच्चित्रापूर्णमासो मुखत एव संवत्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न छम्बट् कुर्वन्ति तेषां (२) पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत् तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत् तिष्ठन्ति तान् कल्याणी कीर्तिरनूत् तिष्ठत्यरात्सुरिमे यजमाना इति तदनु सर्वे राध्नुवन्ति ॥ (एव,- छम्बट् कुर्वन्ति तेषां, चतुस्त्रिꣳशच्च) ॥ ८ ॥

दीक्षा उपसदश्च ॥ विश्वेदेवा ऋषयः ।

सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानꣳ श्रपयन्त उपसद्भि-र्द्वाभ्यां लोमाव द्यन्ति द्वाभ्यां त्वचं द्वाभ्यामसृद् द्वाभ्यां माꣳसं द्वाभ्यामस्थि द्वाभ्यां मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीयाꣳसः सुवर्गं लोकमयामेति ॥ (सुवर्गं पञ्चाशत्) ॥ ९ ॥

प्रायणीयमहः ॥ विश्वेदेवा ऋषयः ।

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात् तं प्रथममुप यन्तीत्येतद्वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रमनुपूर्वमेवैतद्यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत् पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान् प्र युङ्क्ते ते (१) सꣳस्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराट्त्सुवर्गमेव तेन लोकं यन्ति रथंतरं दिवा भवति रथंतरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामं बृहत् तन्मध्यतो दधति विधृत्यै तेनाजामि ॥ (ते, एकान्नपञ्चाशच्च) ॥ १० ॥

संवत्सरगतेषु सर्वमासेष्वहानि ॥ विश्वेदेवा ऋषयः ।

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव तेन तिष्ठन्त्यायुष्टोमं तृतीयमुप यन्त्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयं वाव ज्योतिरन्तरिक्षं गौरसावायुर्यदेतान्त्स्तोमानुपयन्त्येष्वेव तल्लोकेषु सत्त्रिणः प्रतितिष्ठन्तो यन्ति ते सꣳस्तुता विराज-(१)-मभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराडूर्जमेवाव रुन्धते ते न क्षुधाऽऽर्तिमार्छन्त्यक्षोधुका भवन्ति क्षुत्संबाधा इव हि सत्त्रिणोऽग्निष्टोमावभितः प्रधी तावुक्थ्या मध्ये नभ्यं तत् तदेतत् परियद्वचक्रं यदेतेन (२) षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतो ज्योतिषा यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ (३) तत् पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणा-

स्तत् प्राणानर्नु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्विंशतिरहानि सं पद्यन्ते चतुर्विंशतिरर्धमासाः संवत्सरस्तत् संवत्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः संवत्सर इति खलु वा आहुर्वर्षीयान् प्रतिष्ठाया इत्येतावद्वै (४) संवत्सरस्य ब्राह्मणं यावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति ॥ (त्रिरात्रं,- सुतेन, द्वादश,- वेतावद्वा, अष्टौ च) ॥ ११ ॥

अश्वमेधाङ्गाश्वावघ्राणहोममन्त्राः, परिधानमन्त्राश्च ॥ विश्वेदेवा ऋषयः ।

मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृत् स्तोमैरवन्तीः स्थावन्तीस्त्वाऽवन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां निधीनां त्वा निधिपतिं हवामहे वसो मम ॥ (मेषः षड्विंशतिः) ॥ १२ ॥

(१३-१४) अपां होममन्त्राः ॥ विश्वेदेवा ऋषयः ।

कूप्याभ्यः स्वाहा कुल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा ॥ (कूप्याभ्यश्चतुर्विंशतिः) ॥ १३ ॥

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं वहन्तीभ्यः स्वाहा शीघ्रं वहन्तीभ्यः स्वाहा शीभं वहन्तीभ्यः स्वाहोग्रं वहन्तीभ्यः स्वाहा भीमं वहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा ॥ (अद्भ्य एकान्नविंशतिः) ॥ १४ ॥

पुनः प्रहारः ॥ १ द्विपदा गायत्री; २ एकपदा गायत्री; ३ पङ्क्तिः; ४ त्रिष्टुप् । विश्वेदेवा ऋषयः

यो अर्वन्तं जिघांसति तमभ्यमीति वरुणः ॥
परो मर्तः परः श्वा ॥
अहं च त्वं च वृत्रहन्त्सं बभूव सनिभ्य आ ।
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥
अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविद-(१)-युधा ते ॥ (विविद, द्वे च) ॥ १५ ॥

यवाग्वाहोमः ॥ विश्वेदेवा ऋषयः ॥

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा ॥ (नम एकान्नत्रिंशत्) ॥ १६ ॥

गव्यालयाहोमः ॥ १-४ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।
पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड ॥
याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।
या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥
या देवेषु तनुवमैरयन्त यासां सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र (१) गोष्ठे रिरीहि ॥
प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।
शिवाः सतीरुप नो गोष्ठमाऽकस्तासां वयं प्रजया सं सदेम ॥

इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा महीमू षु*- सुत्रामाणम्*- ॥ (इन्द्र,- इह त्रिंशच्च) ॥ १७ ॥

ब्रह्मोद्यम् ॥ १-४ अनुष्टुप्, ५-६ त्रिष्टुप् । विश्वेदेवा ऋषयः ॥

किंस्विदासीत् पूर्वचित्तिः किंस्विदासीद्बृहद्वयः ।
किंस्विदासीत् पिशङ्गिला किंस्विदासीत् पिलिप्पिला ॥
द्यौरासीत् पूर्वचित्तिरश्व आसीद्बृहद्वयः । रात्रिरासीत् पिशङ्गिलाऽविरासीत् पिलिप्पिला ॥
कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किंस्विद्धिमस्य भेषजं किंस्विदावपनं महत् ॥
सूर्य एकाकी चरति (१) चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम् ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥
वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम् ।
सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम ॥ (सूर्य एकाकी चरति, षट्चत्वारिंशच्च) ॥ १८ ॥

मारणोत्तरकालीनोऽश्वोपचारः ॥ गायत्री; २,८,१०,१२,१४-१५ अनुष्टुप्, ३,६ द्विपदा गायत्री; ४ एकपदा त्रिष्टुप्; ५ पंक्तिः । विश्वेदेवा ऋषयः ॥

अम्बे अम्बाल्यम्बिके न मा नयति कश्चन । ससस्त्यश्वकः ॥
सुभगे काम्पीलवासिनि सुवर्गे लोके सं प्रोर्णवाथाम् ।
आऽहमजानि गर्भधमा त्वमजासि गर्भधम् ॥

(१०। ९-१०) तै. सं. १. ५. ११. १८-१९

तौ सह चतुरः पदः सं प्र सारयावहै ॥
वृषा वां रेतोधा रेतो दधातूत् सक्थ्योर्गृदं धेह्यञ्जिमुदञ्जिमन्वज ।
यः स्त्रीणां जीवभोजनो य आसां (१) बिलधावनः । प्रियः स्त्रीणामपीच्यः ॥
य आसां कृष्णे लक्ष्मणि सर्दिगृदिं परावधीत् ॥
अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससस्त्यश्वकः ॥
ऊर्ध्वामेनामुच्छ्रयताद्वेणुभारं गिराविव । अथास्या मध्यमेधतां शीते वाते पुनन्निव ॥
अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससस्त्यश्वकः ॥
यद्धरिणी यवमत्ति न (२) पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ॥
अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससस्त्यश्वकः ॥
इयं यका शकुन्तिकाऽऽहलमिति सर्पति ।
आहतं गभे पसो नि जल्गुलीति धाणिका ॥
अम्बे अम्बाल्यम्बिके न मा यभति कश्चन । ससस्त्यश्वकः ॥
माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः (३) ।
प्र सुलामीति ते पिता गभे मुष्टिमतंसयत् ॥
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ (४) । आपो जनयथा च नः ॥
(आसां,- अत्ति न, रोहतो, जिन्वथ, चत्वारि च) ॥ १९ ॥

मरणोत्तरकालीनोऽश्वोपचारः ॥ ७ बृहती; ८ उपरिष्टाद्बृहती, अनुष्टुप् वा; ९-११ गायत्री । विश्वेदेवा ऋषयः ॥

भूर्भुवः सुवर्वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्यास्त्वाऽञ्जन्तु जागतेन छन्दसा ॥
यद्वातो अपो अगमदिन्द्रस्य तनुवं प्रियाम् । एतं स्तोतरनेन पथा पुनरश्वमा वर्तयासि नः ॥
लाजी३ञ्छाची३न् यशो ममा३म् ।
यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापते ॥
युञ्जन्ति ब्रध्न-(१)-मरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ (ब्रध्नं, पञ्चविंशतिश्च) ॥ २० ॥

सन्ततिहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंतानेभ्यः स्वाहा पर्वभ्यः स्वाहा संधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा । (प्राणायाष्टाविंशतिः) ॥ २१ ॥

प्रमुक्तिहोमः ॥ विश्वेदेवा ऋषयः ।

सिताय स्वाहाऽसिताय स्वाहाऽभिहिताय स्वाहाऽनभिहिताय स्वाहा युक्ताय स्वाहाऽयुक्ताय स्वाहा सुयुक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा संवञ्चते स्वाहाऽनुवञ्चते स्वाहोद्वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा ॥ (सितायाष्टात्रिंशत्) ॥ २२ ॥

[बृहस्पति- १४५। -वैद्य- २७४। -अर्धाः २९१। प्रजापति- १७२। -द्वे २१७। आदित्या १३६। वसिष्ठः १७२। संवत्सराय ११७। सुवर्गं ५०। ब्रह्मवादिनो ९१। ज्योतिष्टोमं २०८। मेषः ३६। कूप्याभ्यो ४०। ऽद्भ्यो २९। यो ५२। नमो २९। मयोभूः ८८। किम- ९१। -म्बे २०७। भूः ७५। प्राणाय २८। सिताय ३८। द्वाविंशतिः ॥ २६२१]

[इति सप्तमकाण्डे चतुर्थः प्रपाठकः ॥४॥]

सत्रविशेषाभिधानम् ।

[अथ पञ्चमः प्रपाठकः ॥५॥]

गवामयनाख्यं संवत्सरसत्रम् ॥ विश्वेदेवा ऋषयः ।

गावो वा एतत् सत्रमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्तामिति कामेन तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नरात्स्मेत्यथ यासां नाजायन्त ताः संवत्सरमाप्त्वोदतिष्ठन्नरात्स्मेति यासां चाजायन्त यासां च न ता उभयीरुदतिष्ठन्नरात्स्मेति गोसत्रं वै (१) संवत्सरो य एवं विद्वांसः संवत्सरमुपयन्त्यृध्नुवन्त्येव तस्मात् तूपरा वार्षिकौ मासौ पर्त्वा चरति सत्राभिजितं ह्यस्यै तस्मात् संवत्सरसदो यत् किं च गृहे क्रियते तदाप्तमवरुद्धमभिजितं क्रियते समुद्रं वा एते प्र प्लवन्ते ये संवत्सरमुपयन्ति यो वै समुद्रस्य पारं न पश्यति न वै स तत उदेति संवत्सरो (२) वै समुद्रस्तस्यैतत् पारं यदतिरात्रौ य एवं विद्वांसः संवत्सरमुपयन्त्यनार्ता एवोदृचं गच्छन्तीयं वै पूर्वोऽतिरात्रोऽसावुत्तरो मनः पूर्वो वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनं पूर्व उदयनमुत्तरो ज्योतिष्टोमो वैश्वानरोऽतिरात्रो भवति ज्योतिरेव पुरस्ताद्धत्ते सुवर्गस्य लोकस्यानुख्यात्यै चतुर्विंशः प्रायणीयो भवति चतुर्विंशतिरर्धमासाः (३) संवत्सरः प्रयन्त एव संवत्सरे प्रति तिष्ठन्ति तस्य त्रीणि च

शतानि पृष्ठ्यश्च स्तोत्रियास्तावतीः संवत्सरस्य रात्रय उभे एव संवत्सरस्य रूपे आप्नुवन्ति ते संस्थित्या अरिष्टया उत्तरैरहोभिश्चरन्ति षडहा भवन्ति षड् वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठन्ति गौश्चाऽऽयुश्च मध्यतः स्तोमौ भवतः संवत्सरस्यैव तन्मिथुनं मध्यतो (४) दधति प्रजननायै ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव तद्विमोकं यन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गे लोके यन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाꣳसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगती ज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव (५) तत् पथा यन्ति समानꣳ साम भवति देवलोको वै साम देवलोकादेव न यन्त्य—न्या अन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यं देवलोकमभ्यारोहन्तो यन्त्य—भिवर्तो ब्रह्मसामं भवति सुवर्गस्य लोकस्याभिवृत्त्या अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यं (६) दधति मासां प्रतिष्ठित्या उपरिष्टान्मासां पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलं गृह्णन्ति ॥ (गौस्त्वं वा, एति संवत्सरो, ऽर्धमासा, मिथुनं मध्यतो देवयानेनैव, वीर्यं, त्रयोदश च) ॥ १ ॥

गवामयनस्य दशमासद्वादशमासविकल्पः ॥ विश्वेदेवा ऋषयः ।

गावो वा एतत् सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासां दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नरात्स्मोत् तिष्ठामाव तं काममरुत्स्महि येन कामेन न्यषदामेति तासामु त्वा अब्रुवन्नर्धा वा यावतीर्वाऽऽसामहा एवेमौ द्वादशौ मासौ संवत्सरꣳ संपाद्योत् तिष्ठामेति तासां (१) द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन् याश्च शृङ्गाण्यसन्वन् याश्चोर्जमवारुन्धत—र्ध्नोति दशसु मासूत्तिष्ठन्नृध्नोति द्वादशसु य एवं वेद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन् तद्वा एतदृद्धमयनं तस्मा-(२)-देतद्गोसनि ॥ (तिष्ठामेति तासां, तस्माद्, द्वे च) ॥ २ ॥

पृष्ठ्यषडहविकल्पः ॥ विश्वेदेवा ऋषयः ।

प्रथमे मासि पृष्ठान्युप यन्ति मध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्यां वै त्रिरेकस्याह्न उपसीदन्ति दह्रं वै साऽपराभ्यां दोहाभ्यां दुहेऽथ कुतः सा धोक्ष्यते यां द्वादश कृत्व उपसीदन्तीति संवत्सरꣳ संपाद्योत्तमे मासि सकृत् पृष्ठान्युपेयुस्तद्यजमाना यज्ञं पशूनव रुन्धते समुद्रं वा (१) एतेऽनवारमपारं प्र प्लवन्ते ये संवत्सरमुपयन्ति यद् बृहद्रथंतरे अन्वर्जेयुर्यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक् तदनुत्सर्गं बृहद्रथंतराभ्यामित्वा प्रतिष्ठां गच्छन्ति सर्वेभ्यो वै कामेभ्यः संधिर्दुहे तद्यजमानाः सर्वान् कामानव रुन्धते ॥ (समुद्रं वै, चतुस्त्रिꣳशच्च) ॥ ३ ॥

उपरि पक्षसि विशेषः ॥ विश्वेदेवा ऋषयः ।

समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्य—न्यदन्यत् साम भवति देवलोको वै साम देवलोकादेवान्यमन्यं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति जगतीं

वै छन्दाꣳसि प्रत्यवरोहन्त्या—ग्रयणं ग्रहा बृहत् पृष्ठानि त्रयस्त्रिꣳशꣳ स्तोमास्तस्माज्ज्यायाꣳसं कनीयान् प्रत्यवरोहति वैश्वकर्मणो गृह्यते विश्वान्येव तेन कर्माणि यजमाना अव रुन्धत आदित्यो (१) गृह्यत इयं वा अदितिरस्यामेव प्रति तिष्ठन्त्य—न्योऽन्यो गृह्येते मिथुनत्वाय प्रजात्या अवान्तरं वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद्दशरात्रो यद्दशरात्रो भवति सत्रस्यर्द्ध्या अथो यदेव पूर्वेष्वहःसु विलोम क्रियते तस्यैवै-(२)-षा शान्तिः ॥ (आदित्य,- स्तस्यैव, द्वे च) ॥ ४ ॥

महाव्रतेन प्रवृत्तयोर्द्वयोर्गवामयनयोर्विशेषः ॥ विश्वेदेवा ऋषयः ।

यदि सोमौ सꣳसुतौ स्यातां महति रात्रियै प्रातरनुवाकमुपाकुर्यात् पूर्वो वाचं पूर्वो देवताः पूर्वश्छन्दाꣳसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यात् प्रातःसवनादेवैषामिन्द्रं वृङ्क्तेऽथो खल्वाहुः सवनमुखे सवनमुखे कार्येति सवनमुखात्सवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवैषां (१) छन्दाꣳसि वृङ्क्ते सजनीयꣳ शस्यं विहव्यꣳ शस्यमगस्त्यस्य कयाशुभीयꣳ शस्यमेतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषां वृङ्क्ते यदि प्रातःसवने कलशो दीर्येत वैष्णवीषु शिपिविष्टवतीषु स्तुवीरन् यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः शिपिविष्टोऽतिरिक्त एवातिरिक्तं दधात्यथो अतिरिक्तेनैवातिरिक्तमाप्त्वाऽव (२) रुन्धते यदि मध्यंदिने दीर्येत वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन एतदेव ॥ (छन्दोभिरेवैषा,- मवैकावꣳशतिश्च) ॥ ५ ॥

गवामयनस्य गुणविकाररूपोऽहरुत्सर्गः ॥ विश्वेदेवा ऋषयः ।

षडहैर्मासान्त्संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्त्संपश्यन्त्य—र्धमासैर्मासान्त्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्त्संपश्यन्त्य—मावास्यया मासान्त्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्त्संपश्यन्ति पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्त्संपश्यन्ति यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति (१) प्राणमस्मिन्त्स दधाति यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तत् प्राणं दधति तदनु सत्रिणः प्राणन्ति यदहर्नोत्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येवꣳ संवत्सरो वि पतेदार्तिमार्च्छेयुर्यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति संवत्सरायैव तदुदानं दधति तदनु सत्रिण उ-(२)-दनन्ति नाऽऽर्तिमार्च्छन्ति पूर्णमासे वै देवानाꣳ सुतो यत् पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति देवानामेव तद्यज्ञेन यज्ञं प्रत्यवरोहन्ति वि वा एतद्यज्ञं छिन्दन्ति यत् षडहसंततꣳ संतमथाहरुत्सृजन्ति प्राजापत्यं पशुमा लभन्ते प्रजापतिः सर्वा देवता देवताभिरेव यज्ञꣳ सं तन्वन्ति यन्ति वा एते सवनाद्येऽह-(३)-रुत्सृजन्ति तुरीयं खलु वा एतत् सवनं यत् सांनाय्यं यत् सांनाय्यं भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतत् सोमपीथा ह्येतर्हि यथायतनं वा एतेषाꣳ सवनभाजो देवता गच्छन्ति येऽहरुत्सृजन्त्यनुसवनं पुरोडाशान् निर्वपन्ति यथायतनादेव सवनभाजो देवता अव रुन्धतेऽष्टाकपालान् प्रातःसवन एकादशकपालान्

माध्यंदिने सवने द्वादशकपालाꣳस्तृतीयसवने छन्दाꣳस्येवाऽऽप्त्वा (४) ऽव रुन्धते वैश्वदेवं चरुं तृतीयसवने निर्वपन्ति वैश्वदेवं वै तृतीयसवनं तेनैव तृतीयसवनान्न यन्ति ॥ (उदचत,- उ,- येऽह,- राप्त्वा, पञ्चदश च) ॥ ६ ॥

उत्सर्गिणामयनमीमांसा ॥ १४ बृहती । विश्वेदेवा ऋषयः ।

उत्सृज्यां३ नोत्सृज्या३मिति मीमाꣳसन्ते ब्रह्मवादिनस्तद्वाहुरुत्सृज्यमेवेत्य—मावास्यायां च पौर्णमास्यां चोत्सृज्यमित्याहुरेते हि यज्ञं वहत इति ते त्वाव नोत्सृज्य इत्याहुर्ये अवान्तरं यज्ञं भेजाते इति या प्रथमा व्यष्टका तस्यामुत्सृज्यमित्याहुरेष वै मासो विशर इति नाऽऽदिष्ट-(१)-मुत्सृजेयु—र्यदादिष्टमुत्सृजेयुर्यादृशे पुनः पर्याप्लावे मध्ये षडहस्य संपद्येत षडहैर्मासान्त्संपाद्य यत् सप्तममहस्तस्मिन्नुत्सृजेयु—स्तदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालं वैश्वदेवं द्वादशकपालं—मग्नेर्वै वसुमतः प्रातःसवनं यदग्नये वसुमते पुरोडाशमष्टाकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति (२) सवनमष्टाभिरुप यन्ति यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्ती—न्द्रस्य वै मरुत्वतो माध्यंदिनꣳ सवनं यदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति सवनमेकादशभिरुप यन्ति विश्वेषां वै देवानामृभुमतां तृतीयसवनं यद्वैश्वदेवं द्वादशकपालं निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्ति सवनं द्वादशभि-(३)-रुप यन्ति प्राजापत्यं पशुमा लभन्ते यज्ञो वै प्रजापतिर्यज्ञस्यानुसर्गाया—भिवर्त इतः षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव तत् सुवर्गं लोकमभिवर्तयन्तो यन्ति प्रतिकूलमिव हीतः सुवर्गो लोक—

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।

शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि

—त्यमु-(४)-त्र आयताꣳ षण्मासो ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आ यन्ति ॥ (नाऽऽदिष्टं,- कुर्वन्ति, द्वादशभि,- रिति, विꣳशतिश्च) ॥ ७ ॥

गवामयनस्य वान्तिमदिनगते सामविशेषाः ॥ विश्वेदेवा ऋषयः ।

देवानां वा अन्तं जग्मुषामिन्द्रियं वीर्यमपाक्रामत् तत् क्रोशेनावारुन्धत तत् क्रोशस्य क्रोशत्वं यत् क्रोशेन चात्वालस्यान्ते स्तुवन्ति यज्ञस्यैवान्तं गत्वेन्द्रियं वीर्यमव रुन्धते सत्रस्यर्द्ध्याऽऽहवनीयस्यान्ते स्तुवन्त्यग्निमेवोपद्रष्टारं कृत्वर्द्धिमुप यन्ति प्रजापतेर्हृदयेन हविर्धानेऽन्तः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति श्लोकेन पुरस्तात् सदसः (१) स्तुवन्त्यनुश्लोकेन पश्चाद्यज्ञस्यैवान्तं गत्वा श्लोकभाजो भवन्ति नवभिरध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियं दधत्य—प्रतिहृताभिरुद्गायति तस्मात् पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यञ्चति शिर एव न पञ्चदशꣳ रथंतरं भवतीन्द्रियमेवाव रुन्धते सप्तदशं (२) बृहदन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्ते पत्नय उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः प्रजा एकविꣳशं भद्रं द्विपदासु प्रतिष्ठित्यै

असृजत सोऽकामयताऽऽसामहꣳ राज्यं परीयामिति तासाꣳ राजनेनैव राज्यं पर्यैत् तद्राजनस्य राजनत्वं यद्राजनं भवति प्रजानामेव तद्यजमाना राज्यं परि यन्ति पञ्चविꣳशं भवति प्रजापते-(३)-राप्त्यै पञ्चभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति पञ्चभिरासीना मनुष्यलोकमेवाभि जयन्ति दश सं पद्यन्ते दशाक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रति तिष्ठन्त्ये—कैकयाऽस्तुतया समायन्ति दिग्भ्य एवान्नाद्यꣳ सं भरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यं (४) संभृत्य तेज आत्मन् दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा भवन्त्या—सन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ होता नाकस्यैव पृष्ठꣳ रोहन्ति कूर्चावध्वर्युर्ब्रध्नस्यैव विष्टपं गच्छन्त्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वं प्रति (५) तिष्ठन्त्यथो आक्रमणमेव तत् सेतुं यजमानाः कुर्वते सुवर्गस्य लोकस्य समष्ट्यै ॥ (सदसः, सप्तदशं, प्रजापते,- र्गायति दिग्भ्य एवान्नाद्यं, प्रति,- कादश च) ॥ ८ ॥

शततन्तुवीणादिविधिः ॥ विश्वेदेवा ऋषयः ।

अर्कयेण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलान्देनेरां लूतामवारुन्ध यदर्क्यं भवति प्रजा एव तद्यजमानाः सृजन्त इलान्दं भवति प्रजाभ्य एव सृष्टाभ्य इरां लूतामव रुन्धते तस्माद्याꣳ समाꣳ सत्रꣳ समृद्धं क्षोधुकास्ताꣳ समां प्रजा इषꣳ ह्यासामूर्जमाददते याꣳ समां व्यृद्धमक्षोधुकास्ताꣳ समां प्रजा (१) न ह्यासामिषमूर्जमाददत उत्क्रोदं कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव तद्यजमाना देवबन्धान्मुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन् दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठन्त्या—जिं धावन्त्यनभिजितस्याभिजित्यै दुन्दुभीन्त्समाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव (२) वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यैवेमां वाक् प्रविष्टा तामेवाव रुन्धतेऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासां वाचामवरुद्ध्या आर्द्रे चर्मन् व्यायच्छेते इन्द्रियस्यावरुद्ध्या आऽन्यः क्रोशति प्रान्यः शꣳसति य आक्रोशति पुनात्येवैनान्त्स यः प्रशꣳसति पूतेष्वेवान्नाद्यं दधात्यृ—षिकृतं च (३) वा एते देवकृतं च पूर्वैर्मासैरव रुन्धते यद्भूतेच्छदाꣳ सामानि भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाद्ये संवत्सरमुपयन्त्यन्तर्वेदि मिथुनौ सं भवतस्तेनैव मिथुनान्न यन्ति ॥ (व्यृद्धमक्षोधुकास्ताꣳ समां प्रजाः, परमामेव, च, त्रिꣳशच्च) ॥ ९ ॥

दासीनृत्यम् ॥ विश्वेदेवा ऋषयः ।

चर्मावभिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति माऽप रात्सीर्माऽति व्यात्सीरित्याह संप्रत्येवैषां पाप्मानमव भिन्दन्त्यु—दकुम्भानधिनिधाय दास्यो मार्जालीयं परि नृत्यन्ति पदो निघ्नतीरिदंमधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवान्नाद्यमव रुन्धते पदो नि घ्नन्ति महीयामेवैषु दधति ॥ (चर्मावभिन्दन्ति) ॥ १० ॥

अश्वमेधाङ्गा अन्नहोममन्त्राः ॥ विश्वेदेवा ऋषयः ।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय

स्वाहा संप्लुताय स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा निहाकाय स्वाहा प्रासचाय स्वाहा प्रचलाकाय स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहो-ग्र२ स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहा ऽभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते (१) स्वाहा ऽनुवर्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहो-द्ग्रहीष्यते स्वाहो-द्गृह्णते स्वाहो-द्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय स्वाहा विप्लुताय स्वाहा ऽऽतप्स्यते स्वाहा ऽऽतपते स्वाहो-ग्रमातपते स्वाहा-ऋग्भ्यः स्वाहा यजुर्भ्यः स्वाहा सामभ्यः स्वाहा ऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशंसीभ्यः स्वाहा रैभीभ्यः स्वाहा (२) सर्वस्मै स्वाहा ॥ (संप्लुते, रैभीभ्यः स्वाहा, द्वे च) ॥११॥

सर्वाङ्गहोममन्त्राः । विश्वेदेवा ऋषयः ।

दत्वते स्वाहा ऽदन्तकाय स्वाहा प्राणिने स्वाहा ऽप्राणाय स्वाहा मुखवते स्वाहा ऽमुखाय स्वाहा नासिकवते स्वाहा ऽनासिकाय स्वाहा ऽक्षण्वते स्वाहा ऽनक्षिकाय स्वाहा कर्णिने स्वाहा ऽकर्णकाय स्वाहा शीर्षण्वते स्वाहा ऽशीर्षकाय स्वाहा पद्वते स्वाहा ऽपादकाय स्वाहा प्राणते स्वाहा-ऽप्राणते स्वाहा वदते स्वाहा ऽवदते स्वाहा पश्यते स्वाहा ऽपश्यते स्वाहा शृण्वते स्वाहा ऽशृण्वते स्वाहा मनस्विने स्वाहा (१) ऽमनसे स्वाहा रेतस्विने स्वाहा ऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहा ऽलोमकाय स्वाहा त्वचे स्वाहा ऽत्वक्काय स्वाहा चर्मण्वते स्वाहा ऽचर्मकाय स्वाहा लोहितवते स्वाहा ऽलोहिताय स्वाहा मांसन्वते स्वाहा ऽमांसकाय स्वाहा स्नावभ्यः स्वाहा ऽस्नावकाय स्वाहा ऽस्थन्वते स्वाहा ऽनस्थिकाय स्वाहा मज्जन्वते स्वाहा ऽमज्जकाय स्वाहा ऽङ्गिने स्वाहा ऽनङ्गाय स्वाहा ऽऽत्मने स्वाहा ऽनात्मने स्वाहा (२) सर्वस्मै स्वाहा ॥ (मनस्विने स्वाहा, ऽनात्मने स्वाहा, द्वे च) ॥ १२ ॥

परिधिमन्त्राः । विश्वेदेवा ऋषयः ।

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्द्ध्यै मह्यꣳ संनत्या अमुष्मै कामायाऽऽयुषे त्वा प्राणाय त्वा ऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वा ऽऽराद्घोषाय त्वा प्रच्युत्यै त्वा ॥ (कोऽष्टाविꣳशतिः) ॥१३॥

सर्वपृष्ठेष्टिः । विश्वेदेवा ऋषयः ।

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायै-

कादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां वैराजाभ्याꣳ शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्वराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिꣳशाय रैवताय शैशिराय द्वादशकपालो ऽदित्यै विष्णुपत्न्यै चरु-रग्नये वैश्वानराय द्वादशकपालो ऽनुमत्यै चरुः काय एककपालः ॥ (अग्नये गायत्रायादित्या अनुमत्यै चरुः सप्तचत्वारिꣳशत्) ॥ १४ ॥

सर्वपृष्ठेष्टिप्रयोगः । विश्वेदेवा ऋषयः ।

यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यं यदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यत् संचितेऽग्नावेतानि हवीꣳषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजां पशून् यजमानस्याभि मन्येत यत् संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेयेनैवैनꣳ शमयति नास्य रुद्रोऽशान्त (१) उपोत्थाय प्रजां पशूनभि मन्यते दश हवीꣳषि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये प्रति तिष्ठत्यृ-तुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवीꣳषि निर्वपत्यृतुभिरेवैनं छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सुषुवाणेनाꣳभिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्या एतया वा इन्द्रं देवा अयाजयन् तस्मादिन्द्रसव एतया मनुं मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवं भवति य एवं विद्वानेतयेष्ट्या यजते दिग्वतीः पुरोऽनुवाक्या भवन्ति सर्वासां दिशामभिजित्यै ॥ (अशान्त इत्याहुः, सुषुवाणेनै,-कचत्वारिꣳशच्च) ॥ १५ ॥

[१६-१७] महिमग्रहः ॥ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

य: प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥ (यः प्राणतो द्यौरादित्योऽष्टाविꣳशतिः) ॥ १६ ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥ (य आत्मदा पृथिव्यग्नि,-रेकान्नचत्वारिꣳशत्) ॥१७॥

ब्रह्मवर्चसहोमः । विश्वेदेवा ऋषयः ।

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायता-मास्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतां दोग्ध्री धेनु-र्वोढाऽनड्वा-नाशुः सप्तिः पुरंधिर्योषा जिष्णू रथेष्ठाः सभेयो युवा ऽस्य यजमानस्य वीरो जायतां निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां

योगक्षेमो नः कल्पताम् ॥ (आ ब्रह्मन्नेकचत्वारिꣳशत्) ॥ १८ ॥

अश्वानुमन्त्रणम् । विश्वेदेवा ऋषयः ।

आऽक्रान् वाजी पृथिवीमग्निं युजमकृत वाजयर्वा ऽऽक्रान् वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां वाज्याऽक्रꣳस्त सूर्यं युजमकृत वाज्यर्वा ऽग्निस्ते वाजिन् युङ्ङनु त्वा ऽऽरभे स्वस्ति मा सं पारय वायुस्ते वाजिन् युङ्ङनु त्वा ऽऽरभे स्वस्ति मा सं (१) पारया ऽऽदित्यस्ते वाजिन् युङ्ङनु त्वा ऽऽरभे स्वस्ति मा सं पारय प्राणधृगसि प्राणं मे दृꣳह व्यानधृगसि व्यानं मे दृꣳहा-पानधृगस्यपानं मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रं मयि धेह्या-युरस्यायुर्मयि धेहि ॥ (वायुस्ते वाजिन् युङ्ङनु त्वा ऽऽरभे स्वस्ति मा सं, त्रिचत्वारिꣳशच्च) ॥ १९ ॥

अश्वहोममन्त्राः । विश्वेदेवा ऋषयः ।

जज्ञि बीजं वर्ष्टा पर्जन्यः पक्ता सस्यꣳ सुपिप्पला ओषधयः स्वधिचरणेयꣳ सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्षꣳ सुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन् यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासा-स्त्रिꣳशिनो मासाः क्लृप्ता ऋतवः शान्तः संवत्सरः ॥ (जज्ञि बीजं चतुर्विꣳशतिः) ॥ २० ॥

अश्वस्य रोगादिनिमित्ते प्रायश्चित्तिः । विश्वेदेवा ऋषयः ।

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽऽगच्छेदग्नयेऽꣳहोमुचेऽष्टाकपालः सौर्यं पयो वायव्य आज्यभागः ॥ (आग्नेयश्चतुर्विꣳशतिः) ॥ २१ ॥

मृगारेष्टिः । विश्वेदेवा ऋषयः ।

अग्नयेऽꣳहोमुचेऽष्टाकपाल इन्द्रायाꣳहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमुग्भ्यां पयस्या वायोसावित्र आगोमुग्भ्यां चरु-रश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालो ऽनुमत्यै चरु-रग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामꣳहोमुग्भ्यां द्विकपालः ॥ (अग्नयेऽꣳहोमुचे त्रिꣳशत्) ॥ २२ ॥

सन्नतिहोमाः । विश्वेदेवा ऋषयः ।

अग्नये समनमत् पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवं मह्यं भद्राः संनतयः सं नमन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनम-द्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनम-न्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनम-दद्भ्यः समनमद्यथा (१) वरुणोऽद्भिः साम्ने समनम-दृचे समनमद्यथा साम्चा ब्रह्मणे समनमत् क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनम-द्विशे समनमद्यथा राजा विशा रथाय समनम-दश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनम-द्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवं मह्यं

(२) भद्राः संनतयः सं नमन्तु ॥ (अग्नये समनमद्यथा, मह्यं, चत्वारि च) ॥ २३ ॥

यजमानेन वाचनीयः ॥ १ त्रिष्टुप् । विश्वेदेवा ऋषयः ।

ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि ॥

नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ॥ (ये ते चतुश्चत्वारिꣳशत्) ॥ २४ ॥

विराड्रूपेणाश्वावयवप्रतिपादनम् । विश्वेदेवा ऋषयः ।

यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान् मेध्यो भवत्यु-षा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रं दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवत्सर आत्मा रश्मयः केशा नक्षत्राणि रूपं तारका अस्थानि नभो माꣳसान्योषधयो लोमानि वनस्पतयो वाला अग्निर्मुखं वैश्वानरो व्यात्तꣳ (१) समुद्र उदरमन्तरिक्षं पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्जभ्यते तद्वि द्योतते यद्विधूनुते तत् स्तनयति यन्मेहति तद्वर्षति वागेवास्य वा-गहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सं बभूवतुर्हयो देवानवह-(२)-दर्वाऽसुरान् वाजी गन्धर्वानश्वो मनुष्यान्त्समुद्रो वा अश्वस्य योनिः समुद्रो [बन्धुः]* ॥ (व्यात्तं,-मवहद्, द्वादश च) ॥ २५ ॥

[नावो ३११। नार्वः १०२। यथे ८४। समान्यां १०२। यदि ११९। यद्दे- २१५। -ऽरमृगयां २२० देवानां- २६१। -मर्येन १८०। यमे ४९। पृथिव्यै १०२। दत्वते १०२। को ३८। ऽग्नये ४७। यो १४१। यो ३८। य ३९। आ ४१ आ ९३। जज्ञ- ३१। -ग्नये २४। ऽग्नये ३०। ऽग्नये १०४। ये ४४। यः ११२। पञ्चविꣳशतिः ॥ २६३१]

[॥ इति सप्तमकाण्डे पञ्चमः प्रपाठकः ॥५॥]

[प्रजननं २६२५। साध्याः २३३०। प्रजवं २१२३। बृहस्पति- २६२१। -गावः २६३१। पञ्च ॥ १२३३०]

॥ इति सप्तमं काण्डं सम्पूर्णम् ॥ ७ ॥

[इषे १६५८२। वायव्यं १९२०३। प्रजापति- १०६२२। -युञ्जानः १४१०५। सावित्राणि १९४०४। प्राचीनवंशं १६९६२। प्रजननं १२१३०। सप्त ॥ १०९३०८]

॥ इति तैत्तिरीयसंहिता समाप्ता ॥

* 'समुद्रो बन्धुः' इत्यत्र संहितायां पदपाठे च 'बन्धु' रिति पदं वैदिका न पठन्ति, तथाऽपि भाष्यकारसंमतत्वात् 'व्यात्तमवहद्, द्वादश च' इति वैदिकसंप्रदायानुरोधिन्यां दशकोक्तद्वादशसंख्यापूरणार्थमादरणीयत्वात्रस्थापितम् ।

काठक संहिता

अथ यजुर्वेदीय--

काठक-संहिता।

अथ प्रथमं स्थानकम्।

पुरोडाशः।

इषे त्वोर्जे त्वा वायवस्स्थोपायवस्स्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ आप्याय-
ध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्माः ॥ मा वस्स्तेन ईशत माघशंसः परि वो रुद्रस्य
हेतिर्वृणक्तु ॥ ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि यजमानस्य पशुपा असि
॥ १ ॥ १-४

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे गोषदसि प्रत्युष्टं रक्षः प्रत्युष्टा-
रातिः प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा ॥ उर्वन्तरिक्षं वीहीन्द्रस्य परिपूतमसि
माघो मोपरि परुस्त ऋध्यासमाच्छेत्ता ते मा रिषत् ॥ देव बर्हिश्शतवल्शं विरोह सहस्रवल्शा वि
वयं रुहेम ॥ अदित्या रास्नासीन्द्राण्यास्संनहनं पूषा ते ग्रन्थिं ग्रथ्नातु सं ते मा स्थादिन्द्रस्य त्वा
बाहुभ्यामुद्यच्छे बृहस्पतेस्त्वा मूर्ध्नाहरामि देवङ्गममसि ॥ तदाहरन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह
बर्हिरासदे ॥ २ ॥ ५-९

वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् ॥ १०

अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः।

मधुमद् घृतवत् पिन्वमाना जीवा जीवन्तीरुप वस्सदेम ॥ ११

[१] मै. १,१,१। कपि. १,१। वा. १,१; १६,५०। काण्व. १,१-३; १७,५०। [मा वस्स्तेन ईशत माघशंसः। ऋ. ६,२८,७; अथर्व. ४,२१,७। परि वो (णो) रुद्रस्य० (हेती)। ऋ. २,३३,१४; अथर्व. ४,२१,७]

[२] मै. १,१,२(२-३,६)। कपि. १,२। वा. १,१०,२१,२४; २,११;५,१२,२६; ६,१,९,३०; ९,३०,३८; ११,९,२८; १८,३७;२०,३; २२,१; ३७,१; ३८,१,३; १,७,२९; ५,४३; १२,१००। काण्व. १,१३,३६,४०; २,२२; ५,२८, ३३; ६,१,१०,४३; १०,३९; ११,४; १२,९,२८; २०,७; २१,९३; २४,१; ३७,१;३८,१,३; १,१०,४६; ५,५५। [देवस्य त्वा सवितुः०। अथर्व. १९,५१,२; ऐ. ब्रा. ८,७। शतवल्शं (०ल्शो) विरोह सहस्रवल्शा... रुहेम। ऋ० ३,८,११; तै. सं. १,३,५,१]

[३] मै. १,१,३(७-१०)। कपि. १,३। वा. १,२-४। काण्व. १,४-५,७।

मातरिश्वनो घर्मोऽसि द्यौरसि पृथिव्यसि विश्वधाया: परेण धाम्नाहुतासि मा ह्वास्सा विश्वा-
युस्सा विश्वव्यचास्सा विश्वधाया हुतस्स्तोको हुतो द्रप्सोऽग्नये बृहते नाकाय स्वाहा द्यावापृथि-
वीभ्याम् ॥ १२

संपृच्यध्वमृतावरीरूर्मिणा मधुमत्तमाः। मन्द्रा धनस्य सातयः ॥ १३

इन्द्रस्य त्वा भागं सोमेनातनच्म्यदस्तमसि विष्णवे विष्णो हव्यं रक्षस्वापो जागृत ॥ ३ ॥ १४

कर्मणे वां वानस्पत्यमसि प्रत्युष्टं रक्षः प्रत्युष्टारातिः ॥ उर्वन्तरिक्षं वीहि धूरसि धूर्व धूर्वन्तं यो-
ऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्तं च धूर्व ॥ देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं
देवहूतमं विष्णोः क्रमोऽस्यहृतमसि हविर्धानं दृंहस्व मा ह्वार्मित्रस्य त्वा चक्षुषा प्रेक्ष उरु त्वा वाताय
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि यच्छन्तु त्वा पञ्च
रक्षायै त्वा नारात्या इदं देवानामिदं नस्सह स्वरभिव्यख्यं ज्योतिर्वैश्वानरं दृंहन्तां दुर्यास्स्वाहा
पृथिव्यामुर्वन्तरिक्षं प्रेह्यग्ने हव्यं रक्षस्व ॥ ४ ॥ १५-१७

विष्णोर्मनसा पूते स्थः ॥ देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ देवस्य
त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं प्रोक्षामि शुन्धन्तां पात्राणि देवयज्यायै
यदशुद्धः पराजघान तद्व एतेन शुन्धन्तामवधूतं रक्षोऽवधूतारातिरदित्यास्त्वगसि प्रति त्वा पृथिवी
वेत्त्वधिषवणमसि वानस्पत्यं प्रति त्वादित्यास्त्वग्वेत्तु पृथिवीं दृंहाग्नेस्तनूरसि वाचो विसर्जनं
देवताभ्यस्त्वा देववीतये गृह्णामि बृहद् ग्रावासि वानस्पत्यस्स इदं देवेभ्यो हव्यं शम्नीष्व सुशमि
शमीष्वाद्रिरसि श्लोककृदपहतं रक्षोऽपहतारातिर्वयं संघातं संघातं संजयेम वर्षवृद्धमसि प्रति त्वा
वर्षवृद्धं वेत्तु परापूतं रक्षः परापूतारातिर्निरस्तो अघशंसो वायुर्व इप ऊर्जे विविनक्तु ॥ ५ ॥ १८-२०

अवधूतं रक्षोऽवधूतारातिरदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु धिषणासि पार्वती प्रति त्वादि-
त्यास्त्वग्वेत्तु पृथिवीं दृंह धिषणासि पार्वतेयी प्रति त्वा पार्वती वेत्तु दिवं दृंह दिवस्स्कम्भधान्यमसि
धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञन्यं प्राणाय त्वा व्यानाय त्वापानाय
त्वा दीर्घामनु समृतिमायुषे त्वा देवो वस्सविता हिरण्यपाणिः प्रतिगृह्णात्वदब्धेन वश्चक्षुषावपश्यामि
रायस्पोषाय सुप्रजास्त्वाय ॥ ६ ॥ २१

[४] मै. १,१,४-५ (११-१२)। कपि. १,४। वा. १,६-११,२९। काण्व. १,९-१५,४६। [देवस्य त्वा सवितुः०। अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

[५] मै. १,१,६-७ (१३-१५)। कपि. १,५। वा. १,१२-१६,३१; ४,४; १०,६। काण्व. १,१६,१८-२६,४८-४९; ४,५; ११,१३।

[६] मै. १,१,७,११ (१५,२७)। कपि. १,६। वा. १,१६,१९-२०। काण्व. १,२६,३१-३४।

निर्दग्धं रक्षो निर्दग्धारातिरपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधा देवयजनं वह ध्रुवमसि
पृथिवीं दृंहायुर्देहि प्राणं देहि सजातानस्मै यजमानाय पर्यूह धरुणमस्यन्तरिक्षं दृंह चक्षुर्देहि श्रोत्रं
देहि सजातानस्मै यजमानाय पर्यूह धर्त्रमसि दिवं दृंहौजो देहि बलं देहि सजातानस्मै यजमानाय
पर्यूह धर्मासि दिशो दृंह रयिं देहि पोषं देहि सजातानस्मै यजमानाय पर्यूह यन्त्रमस्याशा दृंह रूपं
देहि बलं देहि सजातानस्मै यजमानाय पर्यूह चितस्स्थ परिचितो यजमानस्य सजाता भृगूनामाङ्गिरसां
तपसा तप्यध्वम् ॥ २२

यानि घर्मे कपालान्युपचिन्वन्ति वेधसः। पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चताम् ॥ ७ ॥ २३

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं संवपामि समाप ओषधी-
भिस्समोषधयो रसेन मधुना मधुमतीः पृच्यन्तां यद्वो रेवती रेवत्यं यद्वो हविष्या हविष्यं यद्वो
जगतीर्जगत्यं तेनास्मै यज्ञपतय आशासाना मधुना मधुमतीस्संपृच्यध्वं जनयत्यै त्वा मखस्य
शिरोऽसि घर्मोऽसि विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतां प्रत्युष्टं रक्षः प्रत्युष्टारातिर्देवस्त्वा
सविता श्रपयतु वर्षिष्ठेऽधिनाकेऽग्निस्ते तन्वं मा हिंसीदग्ने ब्रह्म गृहीष्वैकताय स्वाहा द्विताय स्वाहा
त्रिताय स्वाहा ॥ ८ ॥ २४

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इन्द्रस्य बाहुरसि दक्षिणस्सह-
स्रभृष्टिश्शततेजा वायुरसि तिग्मतेजाः पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषं व्रजं गच्छ गो-
स्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्विष्टि यं वयं
द्विष्मस्तमतो मा मौग्रप्सस्ते द्यां मा स्कान् व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः
परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्विष्टि यं वयं द्विष्मस्तमतो मा मौगररुर्यां मा पसद्
व्रजं गच्छ गोस्थानं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान्
द्विष्टि यं वयं द्विष्मस्तमतो मा मौगपाररुमदेवयजनं पृथिव्या देवयजनाज्जहि ॥ इमां नरः
कृणुत वो देवेभ्यो जुष्टामदित्या उपस्थे ॥ इमां देवा अजुषन्त विश्वे रायस्पोषा यजमानं विशन्तु ॥
वसवस्त्वा परिगृह्णन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वदादि-
त्यास्त्वा परिगृह्णन्तु जागतेन च्छन्दसाङ्गिरस्वद्वा असि स्वधा असि ॥ २५-२८

पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदानुम्।

तामैरयंश्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्यायजन्त कवयः ॥ ९ ॥ २९

[७] मै. १,१,८ (१६-१७)। कपि. १,७। वा. १,१७-१८। काण्व. १,२७-३०।

[८] मै. १,१,९ (१८-२२)। कपि. १,८। वा. १,२१-२३; ११,५७; ३७,८। काण्व. १,३६-३९; १२,१९; ३७,८।

[९] मै. १,१,१० (२३-२४)। कपि. १,९। वा. १,२४-२६,२८; ११,६०,६५; ४,१। काण्व. १,४८-४३,५५; १२,६१,६६; ४,१।

पृश्न्याः पयोऽसि तस्य तेऽक्षीयमानस्य पिन्वमानस्य पिन्वमानं निर्वपामि ॥ ३०

आशासाना सौमनसं प्रजां सौभाग्यं रयिम्। अग्नेरनुव्रता भूत्वा संनह्य सुकृताय कम् ॥ ३१

अग्ने गृहपत उप मा ह्वयस्व देवानां पत्नीरुप मा ह्वयध्वमदितिरिव त्वा सुपुत्रोपनिषदेयमि-
न्द्राणीवाविधवेषे त्वादब्धेन त्वा चक्षुषावपश्यामि रायस्पोषाय सुप्रजास्त्वायोर्जे त्वाग्नेर्जिह्वासि
सुपूर्देवेभ्यो धाम्ने धाम्ने त्वा यजुषे यजुषे हविरसि वैश्वानरमुम्नीतशुष्मं सत्यौजास्सहो नामासि
सहस्वारातिं सहस्व पृतनायतस्सहस्रवीर्यमसि तन्माजिन्वाज्यस्याज्यमसि हविषो हविस्सत्याभिघृ-
तमसि सत्येन त्वाभिघारयामि ॥ तेजोऽसि शुक्रमसि ज्योतिरसि धामासि प्रियं देवानामनाधृष्टं
देवयजनं देवताभ्यस्त्वा यज्ञियेभ्यो गृह्णामि प्रत्युष्टं रक्षः प्रत्युष्टारातिरनिशितास्स्थ सपत्नक्षयणी-
रायुः प्राणं मा निर्दक्षं वाजिनं त्वा वाजिन्वाजयत्यायै संमार्ज्मि चक्षुः श्रोत्रं मा निर्दक्षं वाजिनीं
त्वा वाजिनि वाजयत्यायै संमार्ज्मि प्रजां योनिं मा निर्दक्षं वाजिनीं त्वा वाजयत्यायै संमा-
र्ज्मि गोष्ठं यजमानस्य रायस्पोषं मा निर्दक्षं वाजिनीं त्वा वाजिनि वाजयत्यायै संमार्ज्मि ॥ १० ॥
३२-३३

देवीरापो अग्रेगुवः प्रेमं यज्ञं नयत प्र यज्ञपतिं तिरत युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये यूयमिन्द्रम-
वृणीध्वं वृत्रतूर्ये प्रोक्षितास्स्थ कृष्णोऽस्याखरेष्ठा अग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टं
प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि पितृणां भागधेयीस्स्थोर्जा पृथिवीं गच्छत विष्णोस्स्तु-
पोऽस्यूर्णम्रदः प्रथस्व स्वासस्थं देवेभ्यो गन्धर्वोऽसि विश्वावसुर्विश्वस्मादीषतो यजमानस्य परिधि-
रिड ईडित इन्द्रस्य बाहुरसि दक्षिणो यजमानस्य परिधिरिड ईडितो मित्रावरुणौ त्वा परिधत्तां
ध्रुवेण धर्मणेड ईडितम् ॥ ३४

वीतिहोत्रं त्वा कवे द्युमन्तस्समिधीमहि। अग्ने बृहन्तमध्वरे ॥ ३५

सूर्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्याः। वर्षिष्ठेऽधि नाके ॥ ३६

सवितुर्बाहू स्थो देवजनानां विधरणिर्वसूनां रुद्राणामादित्यानां सदनमसि जुह्वेहि घृताची द्यौ-
र्जन्मनादितिरच्छिन्नपत्रा प्रिया देवानां प्रियेण धाम्ना प्रिये सदसि सीदोपभृदेहि घृताच्यन्तरिक्षं
जन्मनादितिरच्छिन्नपत्रा प्रिया देवानां प्रियेण धाम्ना प्रिये सदसि सीद ध्रुव एहि घृताची पृथिवी
जन्मनादितिरच्छिन्नपत्रा प्रिया देवानां प्रियेण धाम्ना प्रिये सदसि सीदर्षभोऽसि शाक्वरो वायु-

[१०] मै. १,१,११ (२५-२८)। कपि. १,१०। वा. १,२९-३१; १३,१। काण्व. १,४६-४९; १४,१। [आशासाना सौमनसं०...कम्। अथर्व. १४,१,४२]

[११] मै. १,१,११-१२ (२९-३५)। कपि. १,११। वा. १,१२-१३; २,१-६। काण्व. १,१७-१८, २,१-९। [वीतिहोत्रं त्वा कवे०। ऋ. ५,२६,३; सा. १५२३]

जन्मनादितिश्छिन्नपत्रः प्रियो देवानां प्रियेण धाम्ना प्रिये सदसि सीद ध्रुवा असदृतस्य योनौ
सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ॥ ११ ॥ ३७

भुवनमसि विप्रथस्वाग्निर्यष्टेदं नमो जुह्वग्निस्त्वाह्वयति देवयज्याया उपभृदेहि देवस्त्वा सवि-
ताह्वयति देवयज्याया अग्ग्निणा विष्णू मा वामवक्रमिषं पाहि माग्ने दुश्चरितादा मा सुचरिते भज
विजिहाथां मा मा संताप्तं लोकं मे लोककृतौ कृणुतं विष्णोस्स्थाम्न इत इन्द्रो वीर्यमकृणोत्॥ ऊर्ध्वो
अध्वरो दिविस्पृगहुतो यज्ञो यज्ञपतेः ॥ इन्द्रवान् बृहद्भास्स्वाहा ॥ सं ज्योतिषा ज्योतिर्वाजस्याहं
प्रसवेनाग्नीषोमाभ्यां देवतयोन्नयामि वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयासुं प्रतिनुदे ॥ ३८-४१

वाजस्य मा प्रसवेनोद्ग्राभेनोदजीग्रभम् । अधा सपत्नां इन्द्रो मे निग्राभेनाधराँ अकः॥ ४२
उद्ग्राभश्च निग्राभश्च ब्रह्म देवाँ अवीवृधत् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥ ४३

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वार्थं गिहाणा व्यन्तु वयः ॥ ४४

मरुतां पृषती वशा पृश्निर्भूत्वा दिवं गच्छ । ततो नो वृष्टिमेरय ॥ ४५

अहीनः प्राणश्चक्षुष्पा असि चक्षुर्मे पाहि ॥ ४६

यं परिधिं पर्यधत्था अग्ने देव पणिभिरिध्यमानः ।
तं त एतमनु जोषं भराम्येष नेन्त्वदपचेतयातै ॥ ४७

अग्नेः पाथ उपेहीन्द्रस्य पाथ उपेहि विश्वेषां देवानां पाथ उपेहि यजमानं प्रथत ॥ ४८

सँस्रावभागास्स्थेषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः ।
यज्ञस्य गोपा उत रक्षितारस्स्वाहा देवा अमृता मादयन्ताम् ॥ ४९

अग्नेऽदब्धायोऽशीततनो पाहि विद्योत्पाहि प्रसित्याः पाहि दुरिष्ट्याः पाहि दुरद्मन्या अविषं नः
पितुं कृधि सुषदां योनीन् सुषदां पृथिवीं स्वाहा देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत
इमं देवयज्ञँ स्वाहा वाचि स्वाहा वाते धाः ॥ १२ ॥ ५०

[५०]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां पुरोडाशो नाम प्रथमं स्थानकं संपूर्णम् ॥ १ ॥

[१२] मै. १,१,१३ (३६-४३)। कपि. १,१२। वा. २,८—९,१५—१८,२०—२१। काण्व. २,११—१२,१४—३०, ३६,३९; १७,६३—६४।

अथ द्वितीयं स्थानकम्।

अध्वरम् ।

आर्द्रदानवस्स्थ जीवदानवस्स्थोन्दतीरिह मावताप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे ओषधे
त्रायस्वैनं स्वधिते मैनँ हिंसीर्देवायुरिमान् प्रवपे स्वस्त्युत्तराँ अशीय ॥ १

शं न आपो धन्वन्याश्शं नस्सन्त्वनूप्याः । शं नस्समुद्रिया आपश्शमु नस्सन्तु कूप्याः॥ २
आपो अस्मान् मातरस्सूदयन्तु घृतेन मा घृतप्वः पुनन्तु ।
विश्वँ ह रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि ॥ ३

सोमस्य दात्रमसि तनूरसि तन्वं मे पाहि महीनां पयोऽस्यपामोषधीनां रसो वर्चोधा असि वर्चो
मे धेहि मित्रस्यासि कनीनिकान्तरहं त्वया द्वेषमन्तररातीर्दधे चक्षुर्धा असि चक्षुर्मे धेहि चित्पति-
स्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिस्तस्य
ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयम् ॥ १ ॥ ४

आकूत्यै प्रयुजे अग्नये स्वाहा मेधायै मनसे अग्नये स्वाहा दीक्षायै तपसे अग्नये स्वाहा सरस्व-
त्यै पूष्णे अग्नये स्वाहापो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उरो अन्तरिक्ष बृहस्पतये हविषा वि-
धेम स्वाहा ॥ ५

विश्वो देवस्य नेतुर्मर्तो वरेत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वरेत पुष्यतु ॥ ६

स्वाहेन्द्राग्नी द्यावापृथिवी आप ओषधय उरो अन्तरिक्षानु मे दीक्षां दीक्षापतयो मन्यध्वमनु
तपस्तपस्पतयोऽग्निश्च देव सूर्यश्चमूर्जं दधातन देव सवितस्त्वं दीक्षाणां दीक्षापतिरसीत्थं मा सन्तं
पाह्या मोदृचः पाहि ॥ २ ॥ ७

ऋक्सामयोश्शिल्पे स्थस्ते वामारभ आ मोदृचः पातँ शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा
मा हिंसीः ॥ ८

इमां धियँ शिक्षमानस्य देव क्रतुं दक्षं वरुणँ सँशिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेयम् ॥ ९

[१] मै. १,२,१ (२—३,५—१०)। कपि. १,१३। वा. २,१६,२६; ३,१७; ४,१—४; ५,४२; ६,१५। काण्व. २, ३३,४८; ३,२३; ४.२—५; ५,५४; ६,२०। [आपो अस्मान् मातरः०...एमि। ऋ. १०,१७,१०; अथर्व. ६,५,१,२; तै. सं. १,२,१,१। चक्षुर्धा असि०। अथर्व. २,१७,६]

[२] मै. १,२,२ (११—१४,१६—१७)। कपि. १,१४। वा. ४,७-८; ५,६,४०; ११,६७; २२,२१। काण्व. ४,८-९; ५,८,५०; १२,६८; २४,२९। [विश्वो देवस्य नेतु०। ऋ. ५,५०,१; तै. सं. १,२,२,१; ४,१,९,१। अग्नये स्वाहा। अथर्व १९,४३,१]

[३] मै. १,२,२ (१४-१५,१७—१९,२१)। कपि. १,१५। वा. ४,६,९—१०; २१,६। काण्व. ४,७,१०—१३; २३, ६। [इमां धियँ शिक्षमान (०ण) स्य०। ऋ. ८,४२.३; तै. सं. १,२,२,२]

इमाँ सु नावमारुहमरित्रां पारयिष्णुम् । शतारित्राँ स्वस्तये ॥ १०
सुत्रामाणं पृथिवीं द्यामनेहसँ सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावँ स्वरित्रामनागसमस्रवन्तीमारुहेम स्वस्तये ॥ ११

ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मयि धेहि मा मा हिंसीस्सोमस्य नीविरसि मा मा हिंसीरि-
न्द्रस्य योनिरसि मा मा हिंसीः कृष्यै त्वा सुसस्यायै कृषि सुसस्यामुत्कृधि विष्णोश्शर्मासि
शर्म यजमानस्य शर्म मे यच्छ नमस्ते अस्तु मा मा हिंसीर्नक्षत्राणां मातीकाशात् पाहि सुपस्था-
वा वनस्पत ऊर्ध्वो मा पाह्योदृचस्स्वाहा यज्ञमनसस्स्वाहा दिवस्स्वाहा पृथिव्यास्स्वाहोरोरन्तरिक्षात्
स्वाहा वातात् प्रतिगृह्णामि यज्ञम् ॥ ३ ॥ १२

व्रतं कृणुत तच्छकेयम् ॥ १३

दैवीं धियं मनामहे सुमृडीकामभिष्टये । वर्चोधां विश्वधायसँ सुतीर्थां नो असद्वशे ॥ १४
ये देवा मनुजाता मनुयुजस्सुदक्षा दक्षपितरः । ते नः पान्तु ते नोऽवन्तु तेभ्यस्स्वाहा ॥ १५
अग्ने त्वँ सु जागृहि वयँ सु मन्दिषामहे । गोपाय नो अप्रयुच्छन् प्रबुधे नः पुरस्कृधि॥१६
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥ १७

पृषा सनीनाँ सोमो राधसां रास्वेयत्सोमा भूयो भर देवस्सविता वसोर्वसुदावा मा पृणन् पृन्यां
विराधिष्ट माहमायुषा वर्चसा विराधिषि ॥ देवीराषो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावाँस्तं वो मा
क्रमिषँ सक्षेमहि या ते यज्ञिया तनूस्तयारोह ॥ १८-१९

अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ २०
एदमगन्म देवयजनं पृथिव्या यत्र देवा अजुषन्त विश्वे ।
ऋक्सामाभ्याँ संतरन्तो यजुर्भी रायस्पोषे समिषा मदेम ॥ ४ ॥ २१

इयं ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छ ॥ जूरसि धृता मनसा जुष्टा विष्णवे तस्या-
स्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा ॥ शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवँ हविरसि

[सुत्रामाणं पृथिवीं द्यां०। ऋ. १०,६३,१०; अथर्व. ७,६,३; तै. सं. १,५,११,५]

[४] मै. १,२,३ (२२-२४,२६,२८-२९)। कपि. १,१६। वा. ४,२,११,१४,१६; ६,२७; ३,१४; १२,४२; १५,४६। काण्व. ४,१,१३-१६,१९,२२; ६,३९; ३,२०; १३,५३; १६,७८। [त्वमग्ने व्रतपा असि०। ऋ. ८,११,१; अथर्व. १९,५९,१; तै. सं. १,१,१४,४; १,२,३,१। अयं ते योनिर्ऋत्वियो०। ऋ. ३,२९,१०; अथर्व. ३,२०, १; तै. सं. १,५,५,२; ४,२,४,३; ३,७,१३,५; मै. ब्रा. १,२,१,१६; २,२,८,८]

[५] मै. १,२,४ (३०)। कपि. १,१७-१८। वा. ४,१७-२३; ६,९। काण्व. ४,२३-३१; ६,१०।

चिदसि मनासि धीरसि दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभयतश्शीर्ष्णी सा मा सुप्राची
सुप्रतीची भव मित्रस्त्वा पदि बध्नातु पूषाध्वनस्पात्विन्द्रायाध्यक्षायानु त्वा माता मन्यतामनु पिता
नु भ्राता संगर्भ्योऽनु सखा संयूथ्यः ॥ सा देवि देवमच्छेहीन्द्राय सोमं रुद्रस्त्वावर्तयतु स्वस्ति
सोमसखा पुनरेहि वस्व्यसि रुद्रास्यदितिरस्यादित्यासि चन्द्रासि रुद्रासि बृहस्पतिस्त्वा सुम्ने रम्णातु
रुद्रो वसुभिराचके पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायास्पदे घृतवति स्वाहेदमहं रक्षसो
ग्रीवा अपिकृन्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्ताम्यस्मे रम-
स्वास्मे ते रायो मे रायस्तव तव रायो माहं रायस्पोषेण वियोषँ सं देवी देव्योर्वश्याख्यत सुरेता
रेतो दधानास्त्वष्टृमन्तस्त्वा सपेम मा म आयुः प्रमोषीर्मो अहं तव वीरं विदेय तव संदृशि ॥५॥
२२-२५

देव सूर्य सोमं क्रेष्यामस्तं ते प्रब्रूमस्तं त्वं विश्वेभ्यो देवेभ्य क्रतून् कल्पय दक्षिणाः कल्पय
यथापि यथादेवतमास्माकोऽसि शुक्रस्ते ग्रहः ॥ २६

अभि त्यं देवँ सवितारमोण्योः कविक्रतुम् । अर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् ॥
२७

ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि । हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ २८
प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु प्रजास्त्वमनु प्राणिहि सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्या-
वन्तं वर्हथं शोभमानम् ॥ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन शक्म यत्ते गोर-
स्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णस्सहस्रपोषं पुष्यन्ती परमेण पशुना क्रीयसेऽस्मे ते बन्धु-
र्मित्रो न एहि सुमित्रधा इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तँ स्योनस्स्योनम् ॥ स्वानभ्राडङ्घारे
बम्भारे हस्त सुहस्त कृशान एते वस्सोमक्रयणास्तान् रक्षध्वं मा वो दभन् ॥ २९-३१

उदायुषा स्वायुषोदस्थामोषधीनाम् । उत्पर्जन्यस्य वृष्ट्योदस्थाममृताँ अनु ॥ ३२
उर्वन्तरिक्षं वीहि ॥ ३३

अपि पन्थामगन्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥
३४

अदित्यास्त्वगस्यदित्यास्सदने सीद ॥ ३५

[६] मै. १,२,५-६ (३१-४०)। कपि. १,१९। वा. ४,२४-३२। काण्व. ४,३१-४४। [अभि त्यं देवँ०। श्रौ. सू. परि. अ. ४ सं. ६; अथर्व. ७,१४,१। ऊर्ध्वा यस्यामतिर्भा०। श्रौ. सू. अ. ४ सं. ६; अथर्व. ७,१४,२। उदायुषा स्वायुषो०। श्रौ. सू. अ. १ सं. ३। अपि पन्थामगन्महि०। ऋ. ६,५१,१६; तै. सं. १,२,९,१]

अस्तभ्नाद् द्यामृषभो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥ ३६
वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्न्यासु ।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥ ३७
सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकाम् । यदेतशेभिरीयसे भ्राजमानो विपश्चिता॥६॥ ३८
उस्रा एतं धूर्षाहौ अनवीरहणा अनश्रू ब्रह्मचोदनौ यज्ञस्यायुः प्रतिरन्तौ स्वस्ति गृहान् गच्छतं
धूरसि धूर्व धूर्वन्तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्तं च धूर्व वारुणमसि वरुणस्य स्कम्भ-
न्यसि प्रच्यवस्व भुवनस्पते विश्वान्यभि धामानि मा त्वा परिपरिणो विदन्मा परिपन्थिनो मा त्वा
वृका अघायवो विदन् ॥ श्येनो भूत्वा परापत यजमानस्य नो गृहं संस्कृतम् ॥ ३९--४०
नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥ ४१
वारुणमसि वरुणस्त्वोत्तभ्नातु वरुणस्य स्कम्भसर्जन्यसि प्रमुक्तो वरुणस्य पाशो वरुणोऽसि
धृतव्रतोऽच्छिन्नपत्रः प्रजा उपावरोह वरुणस्यर्तसदनमस्यदित्यास्त्वगस्यदित्यास्सदने सीद ॥ ४२
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥ ४३
वारुणमसि वरुणाय त्वा ॥ ७ ॥ ४४
अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे त्वाग्नये त्वा
रायस्पोषदे विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वापतये त्वा परिपतये गृह्णामि तनूनप्त्रे
शक्मने शाक्कराय शक्मन्नोजिष्ठायानाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेन्यम-
ञ्जसा सत्यमुपागां सुविते मा धा अग्ने व्रतपा अस्मे व्रतपास्त्वे व्रतपाः पुनर्व्रतपा व्रतिनां व्रतानि
याग्ने मम तनूरेषा सा त्वयि या तव तनूरियं सा मयि सह नौ व्रतपा व्रतिनां व्रतानि ॥ या ते
अग्ने रुद्रिया तनूस्तया नः पाहि तस्यै ते स्वाहांशुरंशुस्ते देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्य-
मिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाप्यायय सखीन् सन्या मेधया स्वस्ति ते देव सोम सुत्या-

[अस्तभ्नाद् द्यामृषभो० (०मसुरो०) : ऋ. ८,४२,१; ३,३०,९; तै. सं. १,२,८,१ । वनेषु व्यन्तरिक्ष०।
ऋ. ५,८५,२; तै. सं. १,२,८,१]
[७] मै. १,२,६ (४१-४७) । कपि. २,१ । वा. ४,३०,३३—३६; १०,२७; २०,२ । काण्व. ४.४२,४५-४८; ११.
३७; २१,९३ । [नमो मित्रस्य वरुणस्य० । ऋ. १०,३७,१; तै. सं. १,२,९,१ । निषसाद धृतव्रतो० ।
ऋ. १,२५,१०; तै. सं. १,८,१६,१; तै. ब्रा. १,७,१०,२; २,६,५,१]
[८] मै. १,२,६-७ (४७-५७) । कपि. २,२-३ । वा. ५,१,४-८ । काण्व. ५,१,५-१२ ।
काठ. ९

मशीय स्वस्त्युदृचमशीय राय एष्टा वामानि प्रेषे भगाय ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्यै या ते
अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा वर्षिष्ठा गह्वरेष्ठा उग्रं वचोऽपावधीत् त्वेषं वचोऽपावधीत् स्वाहा
या ते अग्ने रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठा वर्षिष्ठा गह्वरेष्ठा उग्रं वचोऽपावधीत् त्वेषं
वचोऽपावधीत् स्वाहा ॥ ८ ॥ ४५--४६
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसीदमहं रक्षसो ग्रीवा
अपिकृन्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि तप्तायन्यसि
वित्तायन्यस्यवतान्मा नाथितमवताद् व्यथितमग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुना नाम्नेहि
यत्तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधेऽग्ने अङ्गिरो यो द्वितीयस्यां यस्तृतीयस्यां पृथिव्यामस्यायुना
नाम्नेहि यत्तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधे विदेदग्निर्नभो नाम सिंहासि महिष्यसि देवेभ्यः
प्रथस्व देवेभ्यः कल्पस्व देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्व ॥ ४७
विभ्राड् बृहत् पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता अविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विराजति ॥ ४८
इन्द्रघोषास्त्वा वसवः पुरस्तात् पान्तु मनोजवास्त्वा पितरो दक्षिणतः पान्तु प्रचेतास्त्वा रुद्रैः
पश्चात् पातु विश्वकर्मा त्वादित्यैरुत्तरात् पातु त्वष्टा त्वा रूपैरुपरिष्टात् पातु सिंहासि सपत्नसाही
स्वाहा सिंहासि रायस्पोषवनिस्स्वाहा सिंहासि सुप्रजावनिस्स्वाहा सिंह्यस्यादित्यवनिस्स्वाहा सिंह्यस्या-
वह देवान् देवायते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं स्कभानाच्युतक्षिदस्यन्तरिक्षं
स्कभान ध्रुवक्षिदसि दिवं स्कभानाग्नेः कुलायमस्यग्नेः पुरीषमसि यज्ञः प्रत्यष्ठात् ॥ ४९
मनुष्वत्त्वा निधीमहि मनुष्वत्समिधीमहि । अग्ने मनुष्वदङ्गिरो देवान् देवयते यज॥९॥५०
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ ५१
देवश्रुतौ देवेष्वाघोषेथाम् ॥ ५२
इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ ५३

[९] मै. १,२,८ (५८-५९) । कपि. २,३ । वा. ५,९-१३,२२,२६; ६,१; ३३,३० । काण्व. ५.१३—१८,२८,३३,
६,१; ३२,३० । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७ । विभ्राड् बृहत्पिबतु० । ऋ. १०,
१७०,१; सा. ६२८,१४५३ । मनुष्वत्त्वा निधीमहि० । ऋ. ५,२१,१; तै. ब्रा. ३,११,६,३]
[१०] मै. १,२,९ (६०-६१,६३-६४,६७-७१) । कपि. २,४ । वा. ५,१४-२१; ११,४; ३७,२ । काण्व. ५,१९-२२,
२४-२७; १२,४; ३७,२ । [युञ्जते मन उत० । ऋ. ५,८१,१; तै. सं. १,२,१३,१; ४,१,१,१; तै. आ. ४,२,१ ।
इदं विष्णुर्वि चक्रमे० । ऋ. १,२२,१७; सा. २२२,१६६९; अथर्व. ७,२६,४; तै. सं. १,२,१३,१; नि. १२,१९]

इडावती धेनुमती हि भूतं सूयवसिनी मनुषे यशस्ये ।
व्यष्टभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः ॥ ५४
वैष्णवमसि विष्णुस्त्वोत्तभ्नातु ॥ ५५
दिवो वा विष्ण उत वा पृथिव्या महो वा विष्ण उरोरन्तरिक्षात् ।
हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् ॥ ५६
विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ ५७
विष्णोः पृष्ठमसि विष्णो ररराटमसि विष्णोश्श्नप्त्रे स्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णव-
मसि विष्णवे त्वा ॥ ५८
प्र तद्विष्णुस्स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ १० ५९
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इदमहं रक्षसो ग्रीवा अपिकृ-
न्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि बृहन्नसि बृहद्रावा
बृहतीमिन्द्राय वाचं वद रक्षोहणं वलगहनं वैष्णवीमिदमहं तान् वलगानुद्वपामि यान्समानो यानस-
मानो निचखानेदमहं तान् वलगानुद्वपामि यान्सबन्धुर्यानसबन्धुर्निचखानेदमहं तान् वलगानुद्व-
पामि यान्सनाभिर्यानसनाभिर्निचखानेदमहं तान् वलगानुद्वपामि यान्स्वो यानरणो निचखान
राडसि विराडसि सम्राडसि स्वराडसि गायत्रेण च्छन्दसावबाढो यं द्विष्मस्त्रैष्टुभेन जागतेनानुष्टुभेन
पाङ्क्तेन च्छन्दसावबाढो यं द्विष्मः ॥ किमत्र भद्रं तन्नौ सह निरस्तो वलगोऽवबाढो दुरस्यं रक्षो-
घ्नो वलगघ्नः प्रोक्षामि वैष्णवान् रक्षोघ्नो वलगघ्नोऽवसिञ्चामि वैष्णवान् रक्षोघ्नो वलगघ्नोऽवस्तृणामि
वैष्णवान् रक्षोहणौ वलगहनौ प्रोक्षामि वैष्णवी रक्षोहणौ वलगहना उपदधामि वैष्णवी रक्षोहणौ
वलगहनौ पर्यूहामि वैष्णवी रक्षोहा त्वा वलगहा प्रोक्षामि वैष्णवं रक्षोहा त्वा वलगहा स्तृणामि ६०-६१
वैष्णवं रक्षोघ्नो वलगघ्नस्संसादयामि वैष्णवान् ॥ ११ ॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इदमहं रक्षसो ग्रीवा अपि-

[इडा (रा) वती धेनुमती० । ऋ. ७,९९,३; तै. सं. १,२,१३,१; तै. आ. १,८,१ । दिवो वा विष्ण उत० ।
अथर्व. ७,२६,८ । विष्णोर्नु कं वीर्याणि० । ऋ. १,१५४,१; अथर्व. ७,२६,१; तै. सं. १,२,१३,२ । प्र तद्वि-
ष्णुः स्तवते वीर्येण० । ऋ. १,१५४,२; अथर्व ७,२६,२-३ । तै. ब्रा. २,४,३,४; नि. १,२०]
[११] मै. १,२,१०-११ (७२,८०) । कपि. २,५ । वा. ५,२२-२५ । काण्व. ५,२८-३२ ।
[१२] मै. १,२,११ (७५—८०) । कपि. २,६ । वा. ५,२६—३० । काण्व ५,३३—३८ । [देवस्य त्वा सवितु० ।
अथर्व १९,५१,२; ऐ. ब्रा. ८७]

कृन्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि दिवे त्वान्तरिक्षाय त्वा
पृथिव्यै त्वा शुन्धन्तां लोकाः पितृषदना यवोऽसि यवयास्मद् द्वेषो यवयारातिं पितृषदनं त्वा
लोकमास्तृणाम्युद् द्यां स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्यां नितानस्त्वा मारुतो निहन्तु मित्रावरु-
णयोर्ध्रुवेण धर्मणा ॥ ब्रह्मवनिं त्वा क्षत्रवनिं देववनिं सजातवनिं रायस्पोषवनिं पर्यूहामि ब्रह्म
दृंह क्षत्रं दृंह प्रजां दृंह रायस्पोषं दृंह घृतेन द्यावापृथिवी आपृणेथां विश्वजनस्य च्छायासीन्द्रस्य
स्यूरसीन्द्रस्य ध्रुवोऽस्यैन्द्रमसीन्द्राय त्वा ॥ ६२--६३
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥ १२ ॥ ६४
विभूरसि प्रवाहणो वह्निरसि हव्यवाहनश्श्वात्रोऽसि प्रचेतास्तुथोऽसि विश्ववेदा उशिगसि कवि-
रङ्घारिरसि बम्भारिरवस्युरसि दुवस्वाञ्छुन्ध्युरसि मार्जालीयस्सम्राडसि कृशानुः परिषद्योऽस्या-
स्तव्यो नभोऽसि प्रतक्वासंमृष्टोऽसि हव्यसूदन ऋतधामासि स्वर्ज्योतिस्समुद्रोऽसि विश्वव्यचा अजो-
स्यैकपादहिरसि बुध्न्यः कव्योऽसि कव्यवाहनो रौद्रेणानीकेन पाहि माग्ने पिपृहि माग्ने नमस्ते अस्तु
मा मा हिंसीः ॥ १३ ॥ ६५
अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धश्शुक्र आहुतः ॥ ६६
त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥ ६७
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद्देवेषु गच्छति ॥ ६८
त्वं नस्सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत्त्वावतस्सखा ॥ ६९
स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम् । अग्ने वीरवतीमिषम् ॥ ७०
वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥ ७१
आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे ॥ ७२

[परि त्वा गिर्वणो० । ऋ. १,१०,१२; तै. सं. १,६,१,२]
[१३] मै. १,२,१२ (८१) । कपि. २,७ । वा. ५,३१—३४; ३,६३; १८,५३; २०,१; ३७,१०; ३८,१६ । काण्व. ५,
३९—४३; ४,११; २०,२३; २१,०.३; ३७,१९; ३८,१६ ।
[१४] वा. ३३,९; ३,२९; १९,३६; २३,१३ । काण्व. ३२,९; ३,३७; ११,३७ । [अग्निर्वृत्राणि जङ्घनद्० । ऋ. ६,
१६,३४; सा. ४,१३९६; तै. सं. ४,३,१३,१; तै. ब्रा. ३,५,६,१ । त्वं सोमासि सत्पतिः० । ऋ. १,९१,५; तै.
सं. ४,३,१३,१; तै. ब्रा. ३,५,६,१ । अग्ने यं यज्ञमध्वरं० । ऋ. १,१,४; तै. सं. ४,१,११,१ । त्वं नस्सोम
विश्वतो रक्षा० । ऋ. १,९८,८; तै. सं. २,३,१४,१ । स त्वं विप्राय दाशुषे० । ऋ. ८,४३,१५ । वृषा सोम
द्युमाँ० । ऋ. ९,६४,१; सा. ५०४,७८१; तै. सं. ४,२,११,३; ४,३,१३,३ । आ नो अग्ने सुचेतु(न)ना० ।
ऋ. १,७९,९; सा. १५२६; तै. ब्रा. २,४,५,३]

गयस्फानो अमीवहा वसुवित् पुष्टिवर्धनः । सुमित्रस्सोम नो भव ॥ ७३
त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः । त्वया यज्ञं वितन्वते ॥ ७४
त्वं सोम महे भगं त्वं यून ऋतायते । दक्षं ददासि जीवसे ॥ ७५
अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः । तपिष्ठैरजरो दह ॥ ७६
अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि । दधज्ज्योतिर्जनेभ्यः ॥ ७७
आदित् प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् । परो यदिध्यते दिवा ॥ ७८
अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं स्वाम् । कविर्विप्रेण वावृधे ॥ ७९
सोम यास्ते मयोभुव ऊतयस्सन्ति दाशुषे । ताभिर्नोऽविता भव ॥ ८०
अप्स्वग्ने ॥ ८१
अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशम्भुवम् ॥ ८२
अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । शुचिष्पावक ईड्यः ॥ ८३
एषु षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ ८४
इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव ॥ ८५
उदग्ने शुचयस्तव ॥ ८६
न्यग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् । दधाता देवमृत्विजम् ॥ ८७
अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ ८८
सोम गीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृडीको न आविश ॥ १४ ॥ ८९

[गयस्फानो अमीवहा० । ऋ. १,९१,१२; तै. सं. ४,३,१३,५ । त्वमग्ने सप्रथा असि० । ऋ. ५,१३,४; सा. १४०७; तै. ब्रा. २,४,१,६; नि. ६,७ । त्वं सोम महे भगं० । ऋ. १,९१,७; तै. ब्रा. २,४,५,३ । अग्ने रक्षा णो० । ऋ. ७,१५,१३; सा. २४; तै. ब्रा. २,४,१,६ । अग्ने नक्षत्रमजरमा० । ऋ. १०,१५६,४; सा. १५३० । आदित् प्रत्नस्य रेतसो० । ऋ. ८,६,३०; सा. २० । अग्निः प्रत्नेन मन्मना० । ऋ. ८,४४,१२; सा. १७११; तै. ब्रा. ३,५,६,१ । सोम यास्ते मयोभुव० । ऋ. १,९१,९; तै. सं. ४,१,११,१ । अप्स्वग्ने सधिष्टव० । ऋ. ८,४३,९; तै. सं. ४,२,३,२; ४,२,११,३ । अप्सु मे सोमो० । ऋ. १,२३,२०; १०,९,६; अथर्व. १,६,२; तै. ब्रा. २,५,८,६ । अग्नी रक्षांसि सेधति० । ऋ. ७,१५,१०; अथर्व. ८,३,२६; तै. ब्रा. २,४,१,६ । एषु षु ब्रवाणि० । ऋ. ६,१६,१६; सा. ७,००५ । इमं यज्ञमिदं वचो० । ऋ. १,९१,१०; १०,१५०,२ । उदग्ने शुचयस्तव० । ऋ. ८,४४,१७; सा. १५३४; तै. सं. १,३,१४,८; १,५,५,३; २,४,१४,४ । न्यग्निं जातवेदसं होत्रवाहं० । ऋ. ५,२६,७ । अग्निमीडे (०ळे) पुरोहितं० । ऋ. १,१,१; तै. सं. ४,३,१३,३; नि. ७,१५ । सोम गीर्भिष्ट्वा वयं० । ऋ. १,९१,११; तै. ब्रा. ३,५,६,१; शाङ्ख्य ब्रा. १,५,७]

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि ॥ ९०
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममाकृणुष्व शत्रूयतामभितिष्ठा महांसि ॥ ९१
सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्याभर ॥ ९२
सखायस्सं वस्सम्यञ्चमिषं स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ ९३
अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम् । अतूर्तं श्रावयत् पतिं पुत्रं ददाति दाशुषे ॥ ९४
अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः ।
अग्निरत्यं रघुष्यदं जेतारमपराजितम् ॥ ९५
प्रेद्धो अग्न इमो अग्ने ॥ ९६
उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः । शं नः शोचा मरुद्वृधोऽग्ने सहस्रसातमः ॥ ९७
नू नो रास्व सहस्रवत् तोकवत् पुष्टिमद्वसु । द्युमदग्ने सुवीर्यं वर्षिष्ठमनुपक्षितम् ॥ ९८
त्वां चित्रश्रवस्तम त्वामग्ने हविष्मन्तो वि पाजसा ॥ ९९
भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः ।
रास्वा च नस्सुमहो हव्यदातिं त्रास्वोत नस्तन्वो अप्रयुच्छन् ॥ १००
हव्यवाहमभिमातिषाहं रक्षोहणं पृतनासु जिष्णुम् ।
ज्योतिष्मन्तं दीद्यतं पुरंधिमग्निं स्विष्टकृतमाहुवेम ॥ १०१
स्विष्टमग्ने अभि तद्गृणीहि विश्वाश्च देव पृतना अभिष्याः ।
सुगं नु पन्थां प्रदिशन् विभाहि ज्योतिष्मद्धेह्यजरं न आयुः ॥ १०२
सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ।
देवां अच्छा दीद्यद्युञ्जे अद्रिं शमाये अग्ने तन्वं जुषस्व ॥ १०३

[१५] वा. ३३,१२; १५,२९—३१; १७,७६; १२,२२; २२,१७ । काण्व. ३२,१२; १६,५०—५३; १८,७६; १३,१३; २४,२२ । [जुष्टो दमूना अतिथिः० । ऋ. ५,४,५; अथर्व. ७,७३,९; तै. ब्रा. २,४,१,१; नि. ४,५ । अग्ने शर्ध महते० । ऋ. ५,२८,३; अथर्व. ७,७३,१०; तै. ब्रा. २,४,१,१; २,५,२,४ । सं समिद्युवसे० । ऋ. १०, १९१,१; अथर्व. ६,६३,४; तै. सं. २,६,११,४; ४,४,४,४ । सखायस्सं वः० । ऋ. ५,७,१; तै. सं. २,६,११,४; ४,४,४,३ । अग्निस्तुविश्रवस्तमं० । ऋ. ५,२५,५ । अग्निर्ददाति सत्पतिं० । ऋ. ५,२५,६ । प्रेद्धो अग्ने० । ऋ. ७,१,३; सा. १३७५; तै. सं. ४,६,५,४ । इमो अग्ने० । ऋ. ७,१,१८; तै. सं ४,३,१३,६ । उत नो ब्रह्मन्नविष० । ऋ. ३,१३,६ । नू नो रास्व सहस्रवत्० । ऋ. ३,१३,७ । त्वां चित्रश्रवस्तम० । ऋ. १,४५,६; तै. सं. ४,४,४,३ । त्वामग्ने हविष्मन्तो० । ऋ. ५,९,१; तै. ब्रा. २,४,१,४ । भवा नो अग्नेऽवितोत० । ऋ. १०,७७ । सोमस्य मा तवसं० । ऋ. ३,१,१]

श्रीणामुदारः ॥ १०४
यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।
कृधी ष्वस्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥ १०५
महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानाम् ।
मा ते सखायस्सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥ १०६
यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यस्समीधे ।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ॥ १०७
अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध ।
अस्मात् समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नस्सृजेह ॥ १०८
यथा ह त्यद्वसवो गौर्यं चित्पदि षितामसुञ्चता यजत्राः ।
एवो ष्वस्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥ १०९
त्रीण्यायूंषि तव जातवेदस्तिस्र आजानीरुषसस्ते अग्ने ।
ताभिर्देवानामवो यक्षि विद्वानथा भव यजमानाय शं योः ॥ ११०
विप्राहि देवां उशतो यविष्ठ विद्वां ऋतूंरृतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥ १११
आ देवानामपि पन्थामगन्म यच्छक्रवाम तदनु प्रवोढुम् ।
अग्निर्विद्वान् स यजात्सेदु होता सो अध्वरान् स ऋतून् कल्पयाति ॥ ११२
वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायास्सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥ ११३
सार्धामिकद्देवहूतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् ।
स आयुरागात् सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥ ११४

[श्रीणामुदारो० । ऋ. १०,४५,५; तै. सं. ४,२,२,३ । यच्चिद्धि ते पुरुषत्रा० । ऋ. ४,१२,४; तै. सं. ४,७,१५,६ । महश्चिदग्न एनसो० । ऋ. ४,१२,५ । यं त्वा देवापिः शुशुचानो० । ऋ. १०,९८,८ । अग्ने बाधस्व वि मृधो० । ऋ. १०,९८,१२; तै. ब्रा. २,५,८,११ । यथा ह त्यद्वसवो० । ऋ. ४,१२,६; १०,१२६,८; तै. सं. ४,७,१५,७ । त्रीण्यायूंषि तव० । ऋ. ३,१७,३; तै. सं. ३,२,११,२ । विप्राहि देवां उशतो० । ऋ. १०,२,१; तै. सं. ४,३,१३,४; तै. ब्रा. ३,२,७,५; ३,६,११,४ । आ देवानामपि पन्थां० । ऋ. १०,२,३; अथर्व. १९,५९,३; तै. सं. १,१,१४,३ । वि ज्योतिषा बृहता० । ऋ. ५,२,९; अथर्व. ८,३,२४; तै. सं. १,२,१४,७; नि. ४,१८ । सार्धामिकद्देवहूतिं०(०र्वीति) । ऋ. १०,५३,३; तै. सं. १,३,१४,२]

अग्निर्होता न्यसीदद्यजीयानुपस्थे मातुस्सुरभा उ लोके ।
युवा कविः पुरुनिष्ठ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः ॥ ११५
अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे । देवां आसादयादिह ॥ ११६
अग्निर्होता पुरोहितोऽध्वरस्य विचर्षणिः । स वेद यज्ञमानुषक् ॥ १५ ॥ ११७
[१६७]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायामध्वरं नाम द्वितीयं स्थानकं संपूर्णम् ॥ २ ॥

अथ तृतीयं स्थानकम् ।

ज्योतिरिकम् ।

ज्योतिरसि विश्वरूपं मरुतां पृषती देवेभ्यस्त्वा यज्ञियेभ्यो गृह्णामि ॥ १
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः । उरु यन्तासि वरूथम् ॥ २
स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहा ॥ ३
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ ४
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर ॥ ५
स्वाहोर्वन्तरिक्षं वीह्यदित्यास्त्वगस्यदित्यास्सदने सीद ॥ देव सवितरेष ते सोमस्तं रक्षस्व मा
त्वा दभन्नेतत्त्वं देव सोम देवानुपागा इदमहं मनुष्यान् सह प्रजया सह रायस्पोषेण नमो देवे-
भ्यस्स्वधा पितृभ्यो निर्द्रुहो निर्वरुणस्य पाशान्मुक्षीय स्वरभिव्यख्यं ज्योतिर्वैश्वानरमग्ने व्रतपा
अस्मे व्रतपास्त्वे व्रतपा व्रतिनां व्रतानि याग्ने मम तनूस्त्वय्यभूदियं सा मयि या तव तनूर्मय्यभू-
देषा सा त्वयि यथायथं नो व्रतपा व्रतिनां व्रतानि स्वाहा यज्ञं मनसि स्वाहा दिवि स्वाहा पृथि-
व्यां स्वाहोरोरन्तरिक्षे स्वाहा वाते वाचि विसृजे ॥ १ ॥ ६-७
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर ॥ ८

[अग्निर्होता न्यसीदद्० । ऋ. ५,१,६; तै. ब्रा. १,३,१४,१ । अग्निं दूतं पुरोदधे० । ऋ. ८,४४,३ । अग्निर्होता पुरोहितो० । ऋ. ३,११,१]
[१] मै. १,२,१३ (८२-८७) । कपि. २,८ । वा. ५,३५-३६,३८-४१; ७,४३; ४०,१६ । काण्व. ५,४४-४५,४७-५१; ९,८; ४०,१८ । [त्वं सोम तनूकृद्भ्यो० । ऋ. ८,७९,३; तै. सं. १,३,४,१ । अग्ने नय सुपथा० । ऋ. १,१८९,१; (अथर्व. ४,३९,१०); तै. सं. १,१,१४,३; १,४,४३,१; तै. ब्रा. २,८,२,३; तै. आ. १,८,८; शत. ब्रा. १४,८,३,१; उरु विष्णो विक्रमस्व० । अथर्व, ७,२६,३; श्री. सू. पू. अ. ५, सं. १९]
[२] मै. १,२,१४ (८८—९१) । कपि. २,९ । वा. ४,१; ५,३८,४१—४३; ६,१५ । काण्व. ४,१; ५,४७,५१—५५; ६,२० । [उरु विष्णो विक्रमस्व० । अथर्व. ७,२६,३; श्री. सू. पू. अ. ५, सं. १९]

स्वाहात्यन्यान्गां नान्यांनुपागां यान्नाजुजोषं परि तानवृजमर्वाक्त्वा परेभ्योऽविदं परोऽवरेभ्य-
स्तं त्वा जुषामहे वनस्पते देवयज्यायै जुष्टं विष्णवे विष्णवे त्वा देवस्त्वा सविता मध्वानक्त्वोषधे
त्रायस्वैनँ स्वधिते मैनँ हिंसीर्द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या संभव ॥ ९

वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम ॥ १०

यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय ।
अच्छिन्नरायँ सुवीरः ॥ २ ॥ ११

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इदमहं रक्षसो ग्रीवा अपिकृ-
न्तामीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि पृथिव्यै त्वान्तरिक्षाय
त्वा दिवे त्वा शुन्धन्तां लोकाः पितृषदना यवोऽसि यावयास्मद्द्वेषं यावयारातिं पितृषदनं त्वा
लोकमास्तृणामि स्वावेशोऽस्यग्रेगा नेतृणां वनस्पतिस्त्वाधिष्ठास्यति तस्य वित्ताद् घृतेन द्यावापृथिवी
आपृणेथां देवस्त्वा सविता मध्वानक्तु सुपिप्पला ओषधीस्कृधि द्यामग्रेणास्पृक्ष आन्तरिक्षं मध्येना-
प्राः पृथिवीमुपरेणादृँहीः ॥ १२

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरि ॥ १३

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ १४

ब्रह्मवनिं त्वा क्षत्रवनिं देववनिं सजातवनिं रायस्पोषवनिं पर्यूहामि ब्रह्म दृँह क्षत्रं दृँह प्रजां दृँह
रायस्पोषं दृँह ॥ १५

तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ १६

परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां परीमं रायो मनुष्युमन्तरिक्षस्य सानूपेष द्यां ते धूमो
गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्म स्वाहा ॥ ३ ॥ १७

[ओषधे त्रायस्वैनँ स्वधिते० । एक्ष. सू. अ. १ सं. १७ । वनस्पते शतवल्शो०...सौभगाय । ऋ. ३, ८,११; तै. सं. १,३,५,१]

[३] मै. १,२,१४ (९१—१००) । कपि. २,१० । वा. ६,१-६; १०,३१; १३,३३; १९,३ । काण्व. ६,१-७; ११,४४; १४,३५; २१,२३ । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७ । ता वां वास्तून्युश्मसि० । ऋ. १,१५४,६; तै. सं. १,३,६,१; नि. २,७ । विष्णोः कर्माणि पश्यत० । ऋ. १,२२,१९; सा. १६७१; अथर्व. ७,२६,६; तै. सं. १,३,६,२ । तद्विष्णोः परमं पदं० । ऋ. १,२२,२०; सा. १६७२; अथर्व. ७,२६,७; तै. सं. १,३,६,२; ४,२,९,३]

इषे त्वोपावीरस्युप देवान्दैवीर्विशः प्रागुर्वह्नय उशिजो बृहस्पते धारया वसूनि हव्या ते अस्वदन्
देव त्वष्टर्वसु रण रेवती रमध्वमग्नेर्जनित्रमसि वृषणौ स्थ उर्वश्यस्यायुरसि पुरूरवा असि गायत्रं
छन्दोऽनुप्रजायस्व त्रैष्टुभं छन्दोऽनुप्रजायस्व जागतं छन्दोऽनुप्रजायस्व ॥ १८

भवतं नस्समनसौ समोकसा अरेपसौ ।
मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसौ शिवौ भवतमद्य नः ॥ १९

अग्ना अग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ।
स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ४ ॥ २०

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ऋतस्य त्वा देवहविः पाशेन
प्रतिमुञ्चाम्यमुष्मै जुष्टं धर्षा मानुषँ अद्भ्यस्त्वौषधीभ्योऽनु त्वा माता मन्यतामनु पितानु भ्राता
सगर्भ्योऽनु सखा सयूथ्य आवह देवान् देवयते यजमानायापां पेरुरसि स्वात्तँ हव्यं देवेभ्यो घृत-
वत् सं ते वायुः प्राणेन गच्छतां सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा ॥ ५ ॥ २१

घृतेनाक्तौ पशुं त्रायेथां रेवति प्रेधा यज्ञपतिमाविशोरो अन्तरिक्ष सजूर्देवेन वातेनास्य हविष-
स्त्मना यज समस्य तन्वा भव वर्षीयो वर्षीयसो यज्ञं यज्ञपतौ धा नमस्त आतानानर्वा प्रेहि घृतस्य
कुल्यामनु सह प्रजया सह रायस्पोषेण देवीरापश्शुद्धा यूयं देवान् यूद्ध्वं शुद्धा वयं परिविष्टाः परि-
वेष्टारो वो भूयास्म प्राणं ते मा हिंसिषं चक्षुस्ते मा हिंसिषँ श्रोत्रं ते मा हिंसिषं वाचं ते मा हिंसि-
षं यत्ते क्रूरतरं यदास्थितं तत्त एतेन कल्पतां तत्ते मा हिंसिषं चरित्रांस्ते मा हिंसिषं नाभिं ते मा
हिंसिषं मेढ्रं ते मा हिंसिषं पायुं ते मा हिंसिषं देवेभ्यश्शुन्धस्व समङ्क्ष्व ओषधे त्रायस्वैनँ स्वधिते
मैनँ हिंसी रक्षसां भागोऽसीदमहं रक्षोऽवबाध इदमहं रक्षोऽधमं तमो नयामीषे त्वोर्जे घृतेन द्यावा-
पृथिवी प्रोर्णुवाथां देवेभ्यश्शुन्धस्व देवेभ्यश्शुम्भस्वामुष्मै त्वा जुष्टामुर्वन्तरिक्षं वीहि वायो वेष्टो-
कानां प्रत्युष्टं रक्षः प्रत्यष्टारातिर्देवेभ्यस्स्वाहा स्वाहा देवेभ्यः प्रयुता द्वेषाँसि स्वाह्नोर्ध्वनभसं मारुतं
गच्छतम् ॥ ६ ॥ २२

[४] मै. १,२,१५ (१०१) । कपि. २,११ । वा. ५,३—४; ६ ७—८, १३,३४; ३५,१९ । काण्व. ५,३—४; ६, ८-९; १४,३६, ३५,५२ । [अग्ना अ (०व) ग्निश्चरति प्रविष्ट० । अथर्व. ४,३९,९ (पूर्वार्धः) । देवेभ्यो हव्यं वहतु प्रजानन् । ऋ. १०,१६,९; अथर्व. १२,२,८]

[५] मै. १,२,१५ (१०१) कपि. २,१२ । वा. ६,९-१०, ४,२० । काण्व. ६,१०—१२, ४,२६ । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७ । अनु त्वा माता०...सयूथ्यः । ऐ. ब्रा. २,६]

[६] मै. १,२,१५—१६ (१०१,१०३—४; १०९—१३) । कपि. २,१३ । वा. ६,११—१६ । काण्व. ६,१३-२१ [ओषधे त्रायस्वैनँ स्वधिते० । एक्ष सू. अ. १ सं. १७]

रेडस्यग्निस्त्वा श्रीणात्वापस्समारिणन् वातस्य त्वा ध्राज्यै पूष्णो रँह्या ऊष्मणोऽव्यथिष्या अपा-
मोषधीनां रोहिष्या ऐन्द्रः प्राणो अङ्गे अङ्गे निदीध्यदैन्द्रो व्यानो अङ्गे अङ्गे निदीध्यदैन्द्रोऽपानो
अङ्गे अङ्गे निदीध्यत् ॥ २३

देव त्वष्टर्भूरि ते सँ समेतु सलक्ष्म यद्विषुरूपं बभूव ।
देवत्रा यन्तमवसे सखायमनु त्वा माता पितरो मदन्तु ॥ २४

घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा त्वा वाताय दिशः
प्रदिश आदिशो विदिश उद्दिशो दिशस्स्वाहा दिग्भ्यो नमो दिग्भ्यः ॥ ७ ॥ २५

समुद्रं गच्छ स्वाहान्तरिक्षं गच्छ स्वाहा देवं सवितारं गच्छ स्वाहाहोरात्रे गच्छ स्वाहा मित्रा
वरुणौ गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा छन्दो गच्छ स्वाहा सोमं गच्छ स्वाहा यज्ञं गच्छ
स्वाहा नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ पुत्रं नप्तारमशीयौषधी-
भ्यस्स्वाहा ॥ धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्न्या वरुणेति शपामहे ततो
वरुण नो मुञ्च ॥ २६-२७

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ २८

सुमित्रा ण आप ओषधयो भवन्तु दुर्मित्रास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ २९

द्रीपे राज्ञो वरुणस्य गृहो हिरण्ययो मितः ।
ततो धृतव्रतो राजा धाम्नो धाम्न इह मुञ्चतु ॥ ८ ॥ ३०

हविष्मतीरिमा आपो हविष्मान् देवो अध्वरः ।
हविष्मां आविवासति हविष्मानस्तु सूर्यः ॥ ३१

अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि सुम्नायवस्सुम्न्याय सुम्न्यं धत्तेन्द्राग्न्योर्भागधेयीस्स्थ मि-
त्रावरुणयोर्भागधेयीस्स्थ विश्वेषां देवानां भागधेयीस्स्थ सोमस्य वसतीवरीहृदे त्वा मनसे त्वा दिवे
त्वा सूर्याय त्वोर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ सोम राजन् विश्वाः प्रजा उपावरोह विश्वा-

[७] मै. १,२,१७ (११४—११५) कपि. २,१४ । वा. ६,१८—२० । काण्व. ६,२३—२५ ।

[८] मै. १,१,१८ (११६-१९) । कपि. २,१८ । वा. १,१५—१६, ६,२१-२२; १२,१२; २०,१९; ३५,१२, ३६,२३; ३८,२३ । काण्व. ६,२८—३२; १३,१३; २२.४; ३५,४५; ३६,२३, ३८.२३ । [धाम्नो धाम्नो राजन्नितो० । अथर्व. ७,८३,१; श्री. सू. अ. ३, सं. ६ । उदुत्तमं वरुण पाशं० । ऋ. १,२४,१५; सा. ५८९; अथर्व. ७,८३,३; १८,४,६९; तै. सं. १,५,११,३; ४,२,१,३; नि. २,१३ । सुमित्रा ण आप० । श्री. सू. अ. ३, सं ६ । योऽस्मान् द्वेष्टि०...द्विष्मः । अथर्व. ३,२७,१—६; ७,८१,५ । द्रीपे (अप्सु मे) राज्ञो (राजन्) वरुणस्य० । अथर्व. ७,८३,१]

[९] मै. १,३,१, (१—६) । कपि. २,१६ । वा. ६,२३-२९; ८,१७ । काण्व. ६,३३—४१; ९,१७ ।

स्त्वा प्रजा उपावरोहन्तु ॥ ३२

शृणोत्वग्निस्समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।
शृणोतु ग्रावाणो विदुषो नु यज्ञँ शृणोतु देवस्सविता हवं मे ॥ ३३

देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमस्तं देवेभ्यो देवत्रा दात शुक्रपेभ्यो
येषां भागस्स्थ स्वाहा कार्ष्यसि समुद्रस्य वोऽक्षित्या उन्नये ॥ ३४

सं वो दधातु वरुणो मित्रो अग्निस्समिन्द्रस्सं बृहस्पतिः ।
त्वष्टा विष्णुः प्रजया संरराणा यजमानाय द्रविणं दधातु ॥ ३५

यथाधूरन्धूरो धूर्भिः कल्पन्ताम् ॥ ३६

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥ ३७

स्वाहा वसूनां रुद्राणामादित्यानां पत्नेजनीस्स्थ ॥ वसवो रुद्रा आदित्या एता वः पत्नेजनीस्स-
मुद्रं गन्धर्वेष्ठामन्वातिष्ठथ वातस्य पत्मन्नीडिता वामी ते संदृशि विश्वं रेतो धिषीय तव वाम्यनु सं-
दृशि ॥ ९ ॥ ३८-३९

निग्राभ्यास्स्थ देवश्रुतश्शुक्राश्शुक्रभृत आयुर्मे तर्पयत प्राणं मे तर्पयत व्यानं मे तर्पयतापानं मे
तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत वाचं मे तर्पयतात्मानं मे तर्पयत प्रजां मे तर्पयत गृहान्
मे तर्पयत पशून् मे तर्पयत गणान् मे तर्पयत तृप्ता मा तर्पयत प्रीता मा प्रीणीत ते मे मा वितृ-
पन् देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ग्रावाध्वरकृद्देवेभ्य ऊर्ध्वमिम-
मध्वरं कृध्युत्तमेन पविनेन्द्राय सुषुतमं मधुमन्तं पयस्वन्तमिन्द्राय त्वाभिमातिघ्न इन्द्राय त्वा सहोद
इन्द्राय त्वा वसुमत इन्द्राय त्वा रुद्रवत इन्द्राय त्वादित्यवतेऽग्नये त्वा रायस्पोषदे विष्णवे त्वा
श्येनाय त्वा सोमभृते विष्णवे त्वा यत्ते सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरा अन्तरिक्षे तेनास्मै
यज्ञपतय उरु राये कृध्यधि धात्रे वोचश्श्वात्रास्स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं
यज्ञं कृत्वोपहूतास्सोमस्य पिबत मा भेर्मा संविक्था धिषणे वीते वीडयेथामूर्जं दधथामूर्जमस्मासु
धत्तं मा वाँ हिंसिषं मा युवमस्मान् हिंसिष्टं प्रागपागुदगधराक्तास्त्वा दिश आधावन्त्वम्ब निस्वर
समरिविदः ॥ १० ॥ ४०[२०७]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां ज्योतिरिकं नाम तृतीयं स्थानकं संपूर्णम् ॥३॥

[त्वष्टा विष्णुः प्रजया० । अथर्व. ७,१७,४ (उत्तरार्धः) । यमग्ने पृत्सु मर्त्यं० । ऋ. १,२७,७; सा. १४१५; तै. सं. १,३,१३,२]

[१०] मै. १,३,२-३ (८-१३,१६) । कपि. २ १७ । वा. ६,३०-३६ । काण्व. ६,४३-६९ । [प्रागपागुदगधराक्त० । अथर्व. २०,१३४,१ ६]

अथ चतुर्थं स्थानकम् ।

ग्रहाः ।

वाचस्पतये पवस्व ॥ वाजिन् वृष्णो अंशुभ्यां गभस्तिपूतो देवो देवानां पवित्रमसि येषां भागो-
ऽसि मधुमतीर्न इषस्कृधि स्वंकृतोऽस्युर्वन्तरिक्षं वीहि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो
मनस्त्वाष्टु स्वाहा त्वा सुभो सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यः प्राणाय त्वा व्यानाय त्वोपयामगृही-
तोऽसि ॥ १–२

अन्तर्यच्छ मघवन् पाहि सोममुरुष्य रायस्समिषो यजस्व ।
अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् ।
सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ॥ ३

मधुमतीर्न इषस्कृधि स्वंकृतोऽस्युर्वन्तरिक्षं वीहि विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो
मनस्त्वाष्टु स्वाहा त्वा सुभो सूर्याय देवेभ्यस्त्वा मरीचिपेभ्योऽपानाय त्वा ॥ १ ॥ ४

आ वायो भूष शुचिपा उप नस्सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ ५

उपयामगृहीतोऽसि वायवे त्वा ॥ ६

इन्द्रवायू इमे सुता उप प्रयोभिरागतम् ॥ ७
इन्दवो वामुशन्ति हि ॥ ८

उपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वैष ते योनिस्सजोषोभ्यां त्वा ॥ ९

अयं वां मित्रावरुणा सुतस्सोम ऋतावृधा । ममेदिह श्रुतं हवम् ॥ १०

उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वैष ते योनिर्ऋतायुभ्यां त्वा ॥ ११

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ॥ १२

उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वोपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां

[१] मै. १,३,४-५ (१४-१९) । कपि. ३,१ । वा. ७,१-३,८-१२,१६,२०,२५,३०-४०; ८,१,७—९,११,३३-३५; ३८—४१,४४—४७; ९,२—४; १०,३२; १९,६,८; २०,३३; २३,२,४; २६,३—१०; ३३,५६ । काण्व. ७, १—५,७—८,१०-११,१५,२१,२२,२७,३०—४०; ८,६—८,१२,१४—१६,१९-२९; १०,१—५; ११,४५; २१,५,७; २२,१८; २५,२,४; २८,४—११; ३२,५६ ।

[२] मै. १,३,६-९ (२०-२८,३०) । कपि. ३,२ । वा. ७,७—९; ५,३९; ८,१ । काण्व. ७,६—१०; ५,४८ । [आ वायो भूष शुचिपा० । ऋ. ७,९२,१; तै. सं. १,४,४,१; ३,४,२,१ । इन्द्रवायू इमे सुता० । ऋ. १, २,४; तै. सं. १,४,४,१ । अयं वां मित्रावरुणा० । ऋ. २,४१,४; (१,१३७,३; १,४७,१); सा. ९१०; तै. सं. १,४,५,१ । या वां कशा मधुमति० । ऋ. १,२२,३; तै. सं. १,४,६,१]

त्वैष ते योनिर्विष्णोरुरुक्रम उपयामगृतोऽसि मित्रावरुणाभ्यां त्वैष ते योनिर्विष्णोरुरुक्रम उपयाम-
गृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्विष्णोरुरुक्रमैतं रक्षस्व मा त्वा दभन् दुश्शंसास्ते मावक्षन् ॥ २ ॥
१३

अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमानः ।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ १४

उपयामगृहीतोऽसि शण्डायेन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिर्वीरतायै त्वा ॥ १५

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे गिरा या संजयन्तमधि यासु वर्धसे ॥ १६

उपयामगृहीतोऽसि मर्काय सूर्याय त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजाभ्यस्त्वा ॥ ३ ॥ १७

अपनुत्ता शण्डामर्कौ सह तेन यं द्विष्मस्तुथोऽसि जनधाया देवास्त्वा शुक्रपाः प्रणयन्तु तुथो-
ऽसि जनधाया देवास्त्वा मन्थिपाः प्रणयन्त्वायुस्संधत्तं प्राणं संधत्तं चक्षुस्संधत्तं श्रोत्रं संधत्तं वाचं
संधत्तमनाधृष्टासि जिन्वेथां स्वपत्या मध्वा वीतं सुवीराः प्रजाः प्रजनयन् परीहि सुप्रजाः प्रजाः
प्रजनयन् परीहि ॥ १८

इन्द्रेण मन्युना युजा सासह्याम पृतन्यतः । घ्नन्तो वृत्राण्यप्रति ॥ १९

संजग्माना दिवा पृथिव्या शुक्रश्शुक्रशोचिषा मन्थी मन्थिशोचिषा शुक्रोऽसि शुक्रशोचिर्मन्थ्यु-
सि मन्थिशोचिरच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारस्स्याम निरस्ता शण्डामर्कौ
सह तेन यं द्विष्मश्शुक्रस्याधिष्ठानमसि मन्थिनोऽधिष्ठानमसि ॥ २०

या संस्कृतिः प्रथमा विश्वकर्मा यो मध्यमो बृहस्पतिश्चिकित्वान् ।
यः परमो वरुणो मित्रो अग्निस्तस्मा इन्द्राय सुतमाजुहोत तस्मै सूर्याय सुतमाजुहोत ॥ २१
स्वाहा त्वा सुभो सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यः ॥ ४ ॥ २२

ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुषदो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ २३

उपयामगृहीतोऽस्याग्रायणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवनानि पाहि विष्णुस्त्वा पातु

[३] मै. १,३,१० – ११ (३१-३४)। कपि. ३,३ । वा. ७,१२,१६ । काण्व. ७,११,१५। [अयं वेनश्चोदयत्० ऋ. १०,१२३,१; तै.सं. १,३,८,१; नि. १०,३९। तं प्रत्नथा पूर्वथा०। ऋ. ५,४४,१; तै. सं. १,४,९,१; नि.३,१६]

[४] मै. १,३,१२ (३५—३९)। कपि. ३, ३ । ७,१२-१५ । काण्व ७,१२-१५,१७—१९]

[५] मै. १,३,१३—१५ (४०—४३,४५-४७)। कपि. ३,४-५ । वा. ७,१९-२२,२४—२५; ३३,८ । काण्व. ७, २१-२४,२६—२७, ३२,८ । [ये देवा (०सो) दिव्येकादश० । ऋ. १,१३९,११, अथर्व. १९,२७,११-१३; तै. सं. १,४,१०,१]

विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वय-
स्वत उक्थाव्यं यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरिन्द्राय त्वा ॥ २४–२५

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ २६

उपयामगृहीतोऽसि वैश्वानरो ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते
योनिर्वैश्वानराय त्वा ॥ ५ ॥ २७

उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वोक्थेभ्यस्त्वोक्थाव्यं गृह्णाम्येष ते योनिर्मित्रावरुणाभ्यां
त्वा पुनर्हविरसि देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुष उपयामगृहीतोऽसीन्द्राय त्वोक्थेभ्यस्त्वो-
क्थाव्यं गृह्णाम्येष ते योनिरिन्द्राय त्वा पुनर्हविरसि देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुष उप-
यामगृहीतोऽसीन्द्राग्निभ्यां त्वोक्थेभ्यस्त्वोक्थाव्यं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां त्वा देवेभ्यस्त्वा
देवाव्यं पृणच्मि यज्ञस्यायुष उपयामगृहीतोऽसीन्द्राय त्वेन्द्राय त्वोक्थेभ्यस्त्वोक्थाव्यं गृह्णाम्येष ते
योनिरिन्द्राय त्वा देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुष उपयामगृहीतोऽसीन्द्रावरुणाभ्यां त्वो-
क्थेभ्यस्त्वोक्थाव्यं गृह्णाम्येष ते योनिरिन्द्रावरुणाभ्यां त्वा पुनर्हविरसि देवेभ्यस्त्वा देवाव्यं पृणच्मि
यज्ञस्यायुष उपयामगृहीतोऽसीन्द्राबृहस्पतिभ्यां त्वोक्थेभ्यस्त्वोक्थाव्यं गृह्णाम्येष ते योनिरिन्द्राबृह-
स्पतिभ्यां त्वा पुनर्हविरसि देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुष उपयामगृहीतोऽसीन्द्राविष्णु-
भ्यां त्वोक्थेभ्यस्त्वोक्थाव्यं गृह्णाम्येष ते योनिरिन्द्राविष्णुभ्यां त्वा पुनर्हविरसि देवेभ्यस्त्वा देवाव्यं
पृणच्मि यज्ञस्यायुषे ॥ ६ ॥ २८

उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वोपयामगृहीतोऽसि शुक्राय त्वोप-
यामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽसि नभस्याय त्वोपयामगृही-
तोऽसीषाय त्वोपयामगृहीतोऽस्यूर्जाय त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय
त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वा ॥ २९

इन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥ ३०

उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा ॥ ३१

[मूर्धानं दिवो अरतिं० । ऋ. ६,७,१; सा. ६७,११४०; तै. सं. १,४,१३,१]

[६] मै. १,३,१४ (४४) । कपि. ३,४ । वा. ७,२२-२३ । काण्व. ७,२५ ।

[७] मै. १,३,१६-१८ (५० -५३) । कपि. ३,५ । वा. ७,३०-३१,३३ । काण्व. ७,३०--३१,३३ । [इन्द्राग्नी आगतं सुतं० । ऋ. ३,१२,१; सा. ६६९; तै. सं. १,४,१५,१]

ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वांसो दाशुषस्सुतम् ॥ ३२

उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ ७ ॥ ३३

जनिष्ठा उग्रस्सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ३४

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ ३५

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य ।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयस्सुयज्ञाः ॥ ३६

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ ३७

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आसिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवस्सुतानाम् ॥ ३८

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ ३९

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥ ४०

उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते ॥ ४१

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव । स्तोमैर्वत्सस्य वावृधे ॥ ४२

उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ ४३

महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनस्सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुस्सुकृतः कर्तृभिर्भूत् ॥ ४४

उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा ॥ ८ ॥ ४५

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ४६

[ओमासश्चर्षणीधृतो० । ऋ. १,३,७; ऐ. आ. १,४; तै. सं. १,४,१६,१; नि. १२,४०]

[८] मै. १,३,१९-२२,२४-२५ (५५-६२,६४-६८)। कपि. ३,६ । वा. ३३,६४; ७,३५-४० । काण्व. ३२,६४; ७,३५-४० । [जनिष्ठा उग्रस्सहसे तुराय० । ऋ. १०,७३,१; तै. ब्रा. २,८,३,४ । इन्द्र मरुत्व इह पाहि० । ऋ. ३,५१,७; तै. सं. १,४,१८,१ । मरुत्वाँ इन्द्र वृषभो० । ऋ. ३,४७,१; तै. सं. १,४,१९,१; नि. ४,९ । मरुत्वन्तं वृषभं० । ऋ. ३,४७,५; ६,१९,११; तै. सं. १,४,१७,१; तै. ब्रा. २,८,३,४ । महाँ इन्द्रो य ओजसा० । ऋ. ८,६,१; सा. १३०७; अथर्व. २०,१३८,१; तै. सं. १,४,२०,१; तै. ब्रा. ३,५,७,४ । महाँ इन्द्रो नृवदा० । ऋ. ६,१९,१; तै. सं. १,४,२१,१; तै. ब्रा. ३,५,७,४; नि. ६,१६-१७]

[९] मै. १,२,६, १,३,२७ (४०,१००-१०६) । कपि. ३,७ । वा. ७,४१-४२,४४-४६; ८,४१; ३३,३१, १३,४६; ५,३७; ४,३१। काण्व. ८,२३-२४, ९,६-७,९-१०; ३२,३१; १४,४८, ५,४६; ४,४३। उदु त्यं जातवेदसं० । ऋ. १,५०,१ सा. ३१; अथर्व. १३,२,१६, २०,४७,१३; तै. सं. १,२,८,२; १,४,४३,१; नि. १२,१५]

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च ॥ ४७

द्यां गच्छ स्वर्गच्छ रूपं वो रूपेणाभ्यागां वयसा वयस्तुथो वो विश्ववेदा विभजतु वर्षिष्ठेऽधि
नाक एतत्ते अग्ने राध एति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा ब्राह्मण-
मद्यर्ध्यासं पितृमन्तं पैतृमत्यमृषिमार्षेयँ सुधातुदक्षिणम् ॥ ४८

अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयँ शत्रूञ्जयतु जर्हृषाणोऽयँ वाजं जयतु वाजसातौ ॥ ४९
वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्न्यासु ।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥ ५०

वि स्वः पश्य व्युन्तरिक्षं यतस्व सदस्यैरसंद्राता मधुमती देवत्रा गच्छ प्रदातारमाविशानवहा-
यास्मान् देवि दक्षिणे देवयानेन पथा यती सुकृतां लोके सीद तन्नौ सँस्कृतम् ॥ ९ ॥ ५१

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥ ५२
उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ॥ ५३

कदा चन प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्य सवनं त इन्द्रियमातस्था अमृतं दिवि ॥ ५४
उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ॥ ५५

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादँहोश्चिद्या वरिवोवित्तरासत् ॥ ५६

उपयामगृहीतोऽस्यादित्येभ्यस्त्वा ॥ विवस्व आदित्यैष ते सोमपीथस्तस्मिन् मन्दस्व ॥ या
दिव्या वृष्टिस्तया त्वा श्रीणामि ॥ ५७-५९

[चित्रं देवानामुदगाद० । ऋ. १,११५,१; ऐ. आ. ३,९; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,
४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; तै. आ. १,७,६; २,१३,१; नि. १२,१६ । अयं नो अग्निर्वरिवः० ।
श्रौ. उ. पद्क. अ. २, खं. १४ । वनेषु व्यन्तरिक्षं ततान० । ऋ. ५,८५,२; तै. सं. १,२,८,१]
[१०] मै. १,३,२६—२८ (६९-७३,७६-७९) । कपि. ३,८ । वा. ८, १—५,७—८; ३३,६८-६९,८४; २,१६;
३,३४; काण्व. ८,१-३,६-७; ३२,६८—६९,८४; २,२१; ३,४२ । [कदा चन स्तरीरसि० ऋ. ८,५१,७;
सा. ३००; तै. सं. १,४,२२,१; १,५,६,४ । कदा चन प्रयुच्छस्युभे० । ऋ. ८,५२,७; तै. सं. १,४,२२,१ ।
यज्ञो देवानां प्रत्येति० । ऋ. १,१०७,१; तै. सं. १,४,२२,१; २,१,११,४]

अदब्धेभिस्सवितः पायुभिष्ट्वं शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्यजिह्वस्सुविताय नव्यसे रक्षा माकिर्नो अघशँस ईशत ॥ ६०

उपयामगृहीतोऽसि देवाय त्वा सवित्र उपयामगृहीतोऽसि सुशर्मासि सुप्रतिष्ठानो बृहदुक्षे नम
एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥ १० ॥ ६१

उपयामगृहीतोऽसि बृहस्पतिसुतस्य इन्द इन्द्रियावतः पत्नीवतो ग्रहमृध्यासमग्ना३ इ पत्नीवा३-
न्सजूस्त्वष्ट्रा सोमं पिबोपयामगृहीतोऽसि हरिरसि हारियोजनो हर्योस्स्थाता हरिभ्यां त्वा स्तुतस्तो-
मस्य ते देव सोम शस्तोक्थस्येष्टयजुषो हरिवतो ग्रहमृध्यासँ हर्योस्स्थ हरिवतो धानास्सहसोमा
इन्द्रस्य ॥ ६२

अग्न आयूँषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ६३
उपयामगृहीतोऽस्यग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा तेजस्वते ॥ ६४
ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ६५
उपयामगृहीतोऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते ॥ ६६
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा ॥ ६७
उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिस्सूर्याय त्वा भ्राजस्वते ॥ ६८
इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥ ६९
उपयामगृहीतोऽसीन्द्राय त्वा हरिवत एष ते योनिरिन्द्राव त्वा हरिवते ॥ ११ ॥ ७०

धाता रातिस्सवितेदं जुषन्तां प्रजापतिर्वरुणो मित्रो अग्निः ।
त्वष्टा विष्णुः प्रजया संरराणा यजमानाय द्रविणं दधातु ॥ ७१
समिन्द्र नो मनसा नेषि गोभिस्सँ सूरिभिर्हरिवस्सँ स्वस्त्या ।
सं ब्रह्मणा देवकृतं यदस्ति सं देवानाँ सुमत्या यज्ञियानाम् ॥ ७२

[अदब्धेभिस्सवितः० । ऋ. ६, ७१,३; तै सं. १,४,२४,१; तै. ब्रा. २,४,४,७]
[११] मै. १,३,२९—३४ (८०-९३) । कपि. ३,९ । वा. ८,९-१९,३५,३८-४१; १९,३८; ३५,१६ । काण्व. ८,
८,१०,१२-१३,१६,१९-२४; २१,४०; २९,३७; ३५,४८ । [अग्न आयूँषि पवस० । ऋ. ९,६६,१९; सा.
६२७,१४६४,१५१८; तै. सं. १,३,१४,७; १,४,२९,१; १,५,५,१; १,६,६,२; तै. ब्रा. २,६,३,४; तै. आ.
२,५,१ । ओजस्तदस्य तित्विषे० । ऋ. ८,६,५; सा. १८२,१६५३; अथर्व. २०,१०७,२ । अदृश्रन्न (म)-
स्य केतवो० । ऋ. १,५०,३; अथर्व. १३,२,१८; २०,४७,१५ । इन्द्रमिद्धरी वहतो० । ऋ. १,८४,२; सा.
१०३०; तै. सं. १,४,३८,१]
[१२] मै. १,३,३८ (१०७-११३) कपि. ३,९ । वा. २,२१,२४; ८,१४-२२ । काण्व. २,३९,४४; ९,१५-२२ ।
[धाता रातिस्सवितेदं० । अथर्व. ७,१७,४ । समिन्द्र नो (णो) मनसा० । ऋ. ५,४२,४; अथर्व. ७,
९७,२; मै. सं. १,४,४४,१; तै. ब्रा. २,८,२,६]

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनु नो मार्ष्टु तन्वो यद्विलिष्टम् ॥ ७३
सुगा वो देवास्सदनेदमस्तु य आजग्म सवनेदं जुषाणाः ।
जक्षिवाँसः पपिवाँसश्च विश्वेऽस्मे धत्त वसवो वसूनि ॥ ७४
यानावह उशतो देव देवाँस्तान् प्रेरय स्वे अग्ने सधस्थे ।
वहमाना भरमाणा हवीँष्यसुं घर्मं दिवमातिष्ठतानु ॥ ७५
यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगयाडृधगुताशमिष्ट विद्वान् प्रजानन्नुपयाहि यज्ञम् ॥ ७६

यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहैष ते यज्ञो यज्ञपते सहसूक्तवाकस्सुवी-
रो यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा मनसस्पत इमं देवयज्ञं स्वाहा वाचि स्वाहा वाते
रस्स्वाहा देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देवयज्ञं स्वाहा वाचि स्वाहा वाते ७७
धाः ॥ १२ ॥

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ ७८
शतं ते राजन् भिषजस्सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु ।
आरे बाधस्व निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मात् ॥ ७९
अग्नेरनीकमप आविवेशापां नपात् प्रतिरक्षन्नसुर्यम् ।
दमे दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत् ॥ ८०
समुद्रे ते हृदयमप्स्वन्तस्सं त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सह सूक्तवाके नमोवाके विधेम ॥ ८१

अवभृथ निचुङ्कुण निचेरुरसि निचुङ्कुणोऽव नो देवैर्देवकृतमेनो यक्ष्यव मर्त्यैर्मर्त्यकृत-
स्वाहावभृथ निचुङ्कुण निचेरुरसि निचुङ्कुणोऽव नो देवैर्देवकृतमेनो यक्ष्यव मर्त्यैर्मर्त्यकृत-
स्वाहावभृथ निचुङ्कुण निचेरुरसि निचुङ्कुणोऽव नो देवैर्देवकृतमेनो यक्ष्यव मर्त्यैर्मर्त्यकृत-
स्वाहावभृथ निचुङ्कुण निचेरुरसि निचुङ्कुणोऽव नो देवैर्देवकृतमेनो यक्ष्यव मर्त्यैर्मर्त्यकृत-

[सं वर्चसा पयसा० । अथर्व. ६,५३,३ । त्वष्टा सुदत्रो वि दधातु रायः । ऋ. ७,३४,२२ (च. पा.); नि.
६,१४ । सुगा वो देवास्सदना० । अथर्व. ७,९७,४; नि. ६,४२ । यानावह उशतो० । अथर्व. ७,९७,३ ।
यदद्य त्वा प्रयति यज्ञे० । ऋ. ३,२९,१६; अथर्व. ७,९७,१; तै. सं. १,४,४४,१ । यज्ञ यज्ञं गच्छ...वाते
धाः (धां)० । अथर्व. ७,९७,५-८]
[१३] मै. १,३,३९ (११४-११९,१२१-१२३) । कपि. ३,११ । वा. ८,२१,२३-२७; ३,४८; २०,१८-१९,२२-२३;
३८,२५ । काण्व. ८,१३,२३-२६; ३,५६; २१,७; ३८,२४ । [उरुं हि राजा वरुणश्चकार० । ऋ. १,२४,८;
तै. सं. १,४,४५,१ । शतं ते राजन् भिषजः० । ऋ. १,२४,९; तै. सं. १,४,४५,१ । अग्नेरनीकमप आवि-
वेश० । श्रौ. पू. अ. २, खं ८ । अवभृथ निचुङ्कुण० । नि. ५,१८]

ष्टितो वरुणस्य पाशोऽवहतो वरुणस्य पाशोऽप्सु धौतस्य ते देव सोम नृभिस्स्तुतस्य यो भक्षो
गोसनिर्योऽश्वसनिस्तस्य त उपहूत उपहूतस्य भक्षं कृणोमि प्रत्यस्तो वरुणस्य पाशो नमो वरुणस्य
पाशाय ॥ ८२

उदेत प्रजामायुर्वर्चो दधाना अध स्याम सुरभयो गृहेषु ।
गायत्री छन्दाँस्यनु सँरभन्तामस्मान् राय उत यज्ञस्सचन्ताम् ॥ ८३

सुप्रीतश्शिशुरप आविवेश ॥ उन्नेतर्वस्योऽभ्युन्नया नः ॥ एधोऽस्येधिषीमहि समिदसि समेधि-
षीमहि तेजोऽसि तेजो मयि धेहि ॥ ८४-८६

अपो अद्यान्वचारिषं रसेन समगन्महि । पयस्वानग्न आगमं तं मा संसृज वर्चसा ॥ ८७
सं माग्ने वर्चसा सृज प्रजया च धनेन च ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सहर्षिभिः ॥ १३ ॥ ८८
ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ ८९

अग्ने व्रतपते व्रतमालभे तत्ते प्रब्रवीमि तच्छकेयं तेनर्ध्यासम् ॥ ९०

अग्निर्होताय तं हुवे देवान् यज्ञियानिह यान् यजामहे ।
आ देवा यन्तु सुमनस्यमाना व्यन्तु देवा हविषो मे अस्य ॥ ९१
युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः ।
इन्धानास्त्वा सुप्रजसस्सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ ९२

अङ्गिरसो मास्य यज्ञस्य प्रथमानुवाकैरवन्तु ॥ समिद्धो अग्निराहुतस्स्वाहाकृतः पिपर्तु नः ॥
मनोऽसि प्राजापत्यं मनसा मा भूतेनाविश वागस्यैन्द्री सपत्नक्षयणी वाचामिन्द्रियेणाविश देवाः
पितरः पितरो देवा योऽस्मि स सन्यजे तद्वः प्रब्रवीमि तस्य मे वित्त स्वं म इष्टमस्तु शुनं शान्तं स्वं
कृतं वसन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु वसन्तस्याहं देवयज्ययौजस्वान् पयस्वान् भूयासं
ग्रीष्ममृतूनां प्रीणामि स मा प्रीतः प्रीणातु ग्रीष्मस्याहं देवयज्ययौजस्वाँस्तेजस्वान् भूयासं वर्षा

[यो भक्षो गोसनियो० । श्रौ. पू. अ. ६, खं. १३ । एधोऽस्येधिषी(ष)महि० । अथर्व. ७,८९,४; १९,३१,
१२; श्रौ. पू. अ. ३, खं. ६ । अपो(आपो) अद्यान्वचारिषं० । ऋ. १,२३,२३; १०,९,९; अथर्व. ७,८९,१;
९,१,१४; १०,५,४६; तै. सं. १,४,४५,३; १,४,४६,२; तै. ब्रा. २,६,६,५ । सं माग्ने वर्चसा० । ऋ. १,२३,
२४; अथर्व. ७,८९,२; ९,१,१५; तै. सं. १०,५,४७]
[१४] मै. १,४,१, (१-४,१०) । वा. १,५; २,२८ । काण्व. १,८; २,५३ । [ममाग्ने वर्चो विहवेष्वस्तु० ।
ऋ. १०,१२८,१; अथर्व. ५,३,१; तै. सं. ४,७,१४,१]

ऋतूनां प्रीणामि तां मा प्रीताः प्रीणन्तु वर्षाणामहं देवयज्यया पुष्टिमान् पशुमान् भूयासं शरदमृतूनां प्रीणामि सा मा प्रीता प्रीणातु शरदोऽहं देवयज्ययान्नवान् वर्चस्वान् भूयासं हेमन्तमृतूनां प्रीणामि स मा प्रीतः प्रीणातु हेमन्तस्याहं देवयज्यया सहस्वान् वीर्यावान् भूयासम् ॥ १४ ॥ ९३-९५

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद्वां चेति प्र वीर्यम् ॥ ९६

श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेस्सहस्तमा सहसा वाजयन्ता ॥ ९७

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरागतम् ॥ ९८

ता योधिष्टमभि गा इन्द्र नूनमपस्स्वरुषसो अग्न ऊढाः ।
दिशस्स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥ ९९

ता वामेषे रथानामिन्द्राग्नी हवामहे । पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥ १००

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥ १०१

इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥ १०२

आ वृत्रहणा वृत्रहभिश्शुष्मैरिन्द्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः ॥ १०३

उग्रा विघनिना मृध इन्द्राग्नी हवामहे । ता नो मृडात ईदृशे ॥ १०४

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।
प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥ १०५

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे । इन्द्राग्नी तद्वनेमहि ॥ १०६

---

[१५] वा. ३३,६१ । काण्व. ३२,६१ । [इन्द्राग्नी रोचना दिव० । ऋ. ३,१२,९; सा. १६९३; तै. सं. ४,२,११,१; तै. ब्रा. ३,५,७,३ । श्नथद् वृत्रमुत सनोति० । ऋ. ६,६०,१; तै. सं. ४,२,११,१; तै. ब्रा. ३,५,७,३ । या वां सन्ति पुरुस्पृहो० । ऋ. ६,६०,८; सा. ९१२ । ता योधिष्टमभि गा० । ऋ. ६,६०,२ । ता वामेषे रथानाम्० । ऋ. ५,८६,४ । अश्रवं हि भूरि० । ऋ. १,१०९,२; तै. सं. १,१,१४,१; नि. ६,९ । इन्द्राग्नी नवतिं पुरो० । ऋ. ३,१२,६; सा. १५०६,१७०४; तै. सं. १,१,१४,१ । आ वृत्रहणा वृत्रहभिः० । ऋ. ६,६०,३; तै. ब्रा. ३,६,८,१ । उग्रा विघनिना मृध० । ऋ. ६,६०,५; सा. ८५४ । प्र चर्षणिभ्यः पृतना० । ऋ. १,१०९,६; तै. सं. ४,२,११,१ । गोमद्धिरण्यवद्वसु० । ऋ. ७,९४,९]

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥ १०७

पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः ॥ १०८

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥ १०९

क्षेत्रस्य पतिना वयं हितेनेव जयामसि । गामश्वं पोषयित्न्वा स नो मृडातीदृशे ॥ ११०

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्च्युतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु ॥ १५ ॥ १११

अग्नाविष्णू महि तद्वां महित्वं पाथो घृतस्य गुह्यानि नाम ।
दमे दमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमुच्चरण्यत् ॥ ११२

अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा ।
दमे दमे सुष्टुत्या वावृधानानु वां जिह्वा घृतमाचरण्यत् ॥ ११३

अग्निर्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत् ।
यजमानाय परिगृह्य देवान् दीक्षयेदं हविरागच्छतं नः ॥ ११४

इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥ ११५

इयं शुष्मेभिर्बिसखा इवारुजत् सानु गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिस्सरस्वतीमाविवासेम धीतिभिः ॥ ११६

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।
घ्नन् वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान् पृत्सु साहन् ॥ ११७

[गीर्भिर्विप्रः प्रमति० । ऋ. ७,९३,४; तै. ब्रा. ३,६,९,१ । पूषा गा अन्वेतु नः० । ऋ. ६,५४,५; तै. सं. ४,१,११,२; तै. ब्रा. २,४,१,५ । शुक्रं ते अन्यद्यजतं० । ऋ. ६,५८,१; सा. ७५; तै. सं. ४,१,११,२; तै. आ. १,२,४; १,१०,१; ४,५,६; नि. १२,१७ । क्षेत्रस्य पतिना वयं० । ऋ. ४,५७,१; तै. सं. १,१,१४,२; नि. १०,१५ । क्षेत्रस्य पते मधुमन्तं० । ऋ. ४,५७,२; तै. सं. १,१,१४,३; नि. १०,१६]

[१६] वा. २०,८४;२६,३,६-८;२१,१-२,८-९; ३२,३; १३,४; २३,१,३; २५,१०-११; १८,४९,७२-७३। काण्व. २२,६९; २८४,६,८-९; २३,१-२,८-९; २९,३३; १४४; २५,१,३; २७,१४-१५; २०,१९,४१-४२। [अग्नाविष्णू महि तद्वां(-धाम)। अथर्व. ७,२९,१-२ । इयमददाद्रभस०। ऋ. ६,६१,१। इयं शुष्मेभिर्बिसखा० ऋ. ६,६१,२; तै.ब्रा. २,८,२,८; नि. २,२४। जनाय चिद्य ईवत०। ऋ. ६,७३,२; अथर्व.२०,९०,२]

बृहस्पतिस्समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।
अपः सिषासन् स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥ ११८

पावका नस्सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ ११९

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।
तव शर्मन् प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥ १२०

आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गन्तु यज्ञम् ।
हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु ॥ १२१

वृषभं चर्षणीनां विश्वरूपमदाभ्यम् । बृहस्पतिं वरेण्यम् ॥ १२२

अदेवेन मनसा यो रिषण्यति शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो निकर्म मन्युं दुरेवस्य शर्धतः ॥ १२३

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य । रास्व रत्नानि दाशुषे ॥ १२४

बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ १२५

आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् । मध्वा रजांसि सुक्रतू ॥ १२६

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ १२७

हिरण्यगर्भः ॥ १२८

यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १२९

अग्नीषोमा इमं सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १३०

[बृहस्पतिस्समजयद्वसूनि० ऋ. ६,७३,३; अथर्व. २०,९०,३; तै. ब्रा. २,८,२,८। पावका नस्सरस्वती०। ऋ. १,३,१०; सा. १८९; तै. ब्रा. २,४,३,१; नि. ११,२६ । इमा जुह्वाना युष्मदा० । ऋ. ७,९५,५; तै. ब्रा. २,४,६,१ । आ नो दिवो बृहतः० । ऋ. ५,४३,११; तै. सं. १,८,२२,१ । वृषभं चर्षणीनां० । ऋ. ३,६२,६ । अदेवेन मनसा यो०। ऋ. २,२३,१२। बृहस्पते जुषस्व नो०। ऋ. ३,६२,४; तै. सं. १,८,२२,२। बृहस्पते अति यदर्यो० । ऋ. २,२३,१५; तै. सं. १,८,२२,२ । आ नो मित्रावरुणा घृतैः० । ऋ. ३,६२, १६; सा. २२०, ६६३; तै. सं. १,८,२२,३। प्र बाहवा सिसृतं० ऋ. ७,६२,५; तै. सं. १,८,२२,३; तै. ब्रा. २,७,१५,६; २,८,६,७ । हिरण्यगर्भः० । ऋ. १०,१२१,१; अथर्व ४,२,७; तै. सं. ४,१,८,३; ४,२,८,२; शतपथ ब्रा. ९,१,२९; नि. १०,२३ । यः प्राणतो निमिषतश्च०(०तो) । ऋ. १०,१२१,३; अथर्व. ४,२,२; तै. सं. ४,१,८,४; ७,५,१६,१ । अग्नीषोमा इमं (०विमं) सु मे० । ऋ. १,९३,१; तै. सं. २,३,१४,२]

अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥ १३१

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।
युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमा अमुञ्चतं गृभीतान् ॥ १३२

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥ १३३

वैश्वानरो न ऊतय आ प्रयातु परावतः । अग्निरुक्थेन वाहसा ॥ १३४

त्वद्विप्रो जायते वाज्यग्ने त्वद्वीरासो अभिमातिषाहः ।
वैश्वानर त्वमस्मासु धेहि वसूनि राजन् स्पृहयाय्याणि ॥ १३५

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे ॥ १३६

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ॥ १३७

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश ।
वैश्वानरस्सहसा पृष्टो अग्निस्स नो दिवा स रिषः पातु नक्तम् ॥ १३८

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीरम् ।
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥ १३९

इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ १४०

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ १४१

शतेन पाशैर्वरुणाभिधेहि मा ते मोच्यनृतवाङ् नृचक्षः ।
आस्तां जल्म उदरं स्रंसयित्वा कोश इवाबन्धः परिकृत्यमानः ॥ १४२

[अग्नीषोमा सवेदसा०। ऋ. १,९३,९; तै. सं. २,३,१४,१; तै. ब्रा. ३,५,७,२ । युवमेतानि दिवि०। ऋ. १,९३,५; तै. सं. २,३,१४,२; तै. ब्रा. ३,५,७,२ । आन्यं दिवो मातरिश्वा०। ऋ. १,९३,६; तै. सं. २,३,१४,२। वैश्वानरो न ऊतय० । अथर्व. ६,३५,१; आ. श्रौ. सू. २,११ । त्वद्विप्रो जायते वाज्यग्ने० । ऋ. ६,७,३ । ऋतावानं वैश्वानर०। अथर्व. ६,३६,१; आ. श्रौ. सू. ३,८ । वैश्वानरस्य सुमतौ स्याम० । ऋ. १,९८,१; तै. सं. १,५,११,३; नि. ७,२२ । पृष्टो दिवि पृष्टो अग्निः० । ऋ. १,९८,२; तै. सं. १,५,११,१; तै. ब्रा. ३,११,६,४ । अस्माकमग्ने मघवत्सु० । ऋ. ६,८,६; तै. सं. १,५,११,२ । इमं मे वरुण श्रुधी० । ऋ. १,२५,१९; सा. १५८५; तै. सं. २,१,११,६ । तत्त्वा यामि ब्रह्मणा० । ऋ. १,२४,११; तै. सं. २,१,११,६]

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥ १६ ॥ १४३
[३५०]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां ग्रहो नाम चतुर्थं स्थानकं संपूर्णम् ॥ ४ ॥

अथ पञ्चमं स्थानकम् ।

यजमानम् ।

अग्नीषोमाभ्यां यज्ञश्चक्षुष्माँस्तयोरहं देवयज्यया चक्षुषा चक्षुष्मान् भूयासमग्निरन्नस्यान्नपतिस्त-
स्याहं देवयज्ययान्नस्यान्नपतिर्भूयासं दब्धिरस्यदब्धो भूयासममुं दभेयमग्नीषोमा वृत्रहणी तयोरहं
देवयज्यया वृत्रहा भूयासमिन्द्राग्न्योरहं देवयज्ययौजस्वान् वीर्यावान् भूयासमिन्द्रस्याहं देवयज्यये-
न्द्रियावान् भूयासं महेन्द्रस्याहं देवयज्यया जेहमानं भूमानं गमेयमिन्द्रस्याहं विमृधस्य देवयज्य-
यासपत्नो भूयासमिन्द्रस्याहमिन्द्रियावतो देवयज्यया पशुमान् भूयासम्॥ सरस्वत्या अहं देवयज्य-
या वाचमन्नाद्यं पुषेयं पूष्णोऽहं देवयज्यया पुष्टिमान् पशुमान् भूयासमदित्या अहं देवयज्यया
प्रतिष्ठां गमेयं विश्वेषामहं देवानां देवयज्यया प्राणानाँ सायुज्यं गमेयं द्यावापृथिव्योरहं देवयज्यया
प्रजनिषेयं प्रजया पशुभिरग्नेरहँ स्विष्टकृतो देवयज्ययायुः प्रतिष्ठां गमेयम् ॥ १-२

अतीतपद्यज्ञे यज्ञमयाड् देवाँ अरंकृतः । सोमस्ते मित्रो अर्यमा रायस्पोषं दधातन ॥१॥ ३

बृहतो मा वाजेन वाजय वामदेवस्य मा वाजेन वाजय रथन्तरस्य मा वाजेय वाजय जुष्टे जुष्टिं
त गमेयमुपहूत उपहवं तेऽशीय सुहवामेहि सह प्रजया सह रायस्पोषेण ॥ ४

अस्मास्विन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानस्सचन्ताम् ।
अस्माकँ सन्त्वाशिषः ॥ ५

आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणँ सवर्चसम् ।
संजयन् क्षेत्राणि सहसाहमिन्द्र कुर्वाणो अन्याँ अधरान् सपत्नान् ॥ ६

ब्रह्म तेजो मे पिन्वस्व क्षत्रमोजो मे पिन्वस्व प्रजां पुष्टिं मे पिन्वस्व पशून् विशं मे पिन्वस्वे-
षमूर्जं मे पिन्वस्व ॥ ७

मयि त्यदिन्द्रियं महन्मयि द्युम्न उत क्रतुः ।
त्रिशुग्घर्मस्सदमिन्मे विभाति विराड् ज्योतिषा सह ॥ ८

[धीरा त्वस्य महिना० । ऋ. ७.८६,१]
[२] मै. १,४,१ (५,१२) । वा. २,१०; ३८,१४,२७-२८ । काण्व. २,१८; ३८,१४,२३ ।

तस्य दोहमशीय ब्रह्म पिन्वस्व कल्पन्तां दिशो यजमानस्यायुषे ददतो मे मा क्षायि कुर्वतो मे
मोपदसद्भजतां भागी माभागो भक्त ये ब्राह्मणास्सोम्यास्तेषामिदँ हविर्नासोम्यस्याप्यस्ति निर्भक्तो
यं द्विष्मः ॥ २ ॥ ९

देवस्याहं बर्हिषो देवयज्यया प्रजावान् भूयासं देवस्याहं नराशँसस्य देवयज्यया पशुमान् भूया-
सं देवस्याहमग्नेस्स्विष्टकृतो देवयज्ययायुः प्रतिष्ठां गमेयम् ॥ १०

आ माशिषो दोहकामा इन्द्रवन्तो हवामहे । धुक्षीमहि प्रजामिषम् ॥ ११

सा मे सत्याशीर्देवान् गम्याज्जुष्टाज्जुष्टतरा पन्यात् पन्यतराहेडता मनसा देवान् गच्छ यो
देवयानः पन्थास्तेन देवान् गच्छ यज्ञो देवान् गच्छतु यज्ञो देवान् गम्याददो मा गच्छतु ॥
रोहितेन त्वाग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो देवतां गमयत्वेतशेन त्वा सूर्यो देवतां गमयतु यज्ञ
यज्ञं गच्छ यज्ञपतिं गच्छ यज्ञस्यायुरसि यज्ञो म आयुर्दधातु ॥ १२-१३

वि ते मुञ्चामि रशनां वि रश्मीन् वि योक्त्राणि परिचर्तनानि ।
दत्त्वायास्मभ्यं द्रविणेह भद्रं प्र मा ब्रूताद्भविदां देवताभ्यः ॥ १४

विष्णोश्च यज्ञस्यान्तस्तयोरहं देवयज्ययायुः प्रतिष्ठां गमेयम् ॥ ३ ॥ १५

इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्वाँ अथर्वभिः॥ तस्य यज्ञस्येष्टस्य स्विष्टस्य द्रविणमाग-
च्छत्वङ्गिरसो मेऽस्य यज्ञस्य प्रातरनुवाकैरहौपुर्वसुर्यज्ञो वसुमान् यज्ञो वसु वसीय वसुमन्तो भूयास्म
तस्य यज्ञस्य वसोर्वसुमतो वसु मागच्छतु सोमो रेतोधास्तस्याहं देवयज्यया सुरेतोधा रेतो धिषीय
त्वष्टा रूपाणां विकर्ता तस्याहं देवयज्यया विश्वरूपं प्रियं पुषेयं देवानां पत्नीरग्निर्गृहपतिर्मिथुनं यज-
मानस्य तयोरहं देवयज्यया मिथुनेन प्रजनिषीयायुषे वर्चसे रायस्पोषाय सुप्रजास्त्वाय॥१६--१७

सं पत्नी पत्या सुकृतेषु गच्छतां यज्ञस्य युक्तौ धुर्या अभूताम् ।
आप्रीणानौ विजहता अरातिं दिवे ज्योतिरुत्तममारभेथाम् ॥ १८

स्वाहा स्वाहेष्टिभ्यो वषडनिष्टेभ्यो भिषजौ स्विष्टयै स्वाहा निष्कृतिर्दुरिष्टयै स्वाहा ॥ देवेभ्यस्त-
नूभ्यस्स्वाहा ॥ १९--२०

अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि ।
अयास्सन्मनसा कृतोऽयास्सन्हव्यमूहिषेऽया नो धेहि भेषजम् ॥ २१

स्वाहा सरस्वत्यै वेशभगिन्यै स्वाहा ॥ या सरस्वती वेशभगिनी तस्या नो रास्व तस्यास्ते

[३] मै. १,४,१ (६-९,११) । वा. ८,२२ । काण्व. ९,१२ । [वि ते मुञ्चामि रशनां० । अथर्व. ७,७८,१-२]
[४] मै. १,४,१,३(१०,२३,२७-३०) । वा. २,२० । काण्व. २,३६-३७ । [अयादत्त्वाग्नेऽस्यनभि० । श्री. न. प. भा. १, सं. ११]

भक्तिवानो भूयास्म यज्ञस्य त्वा प्रमयाभिमयोन्मया प्रतिमया परिगृह्णामि वेदोऽसि वित्तिरसि वेदमे
त्वा वेदो मे विन्द विदेय ॥ २२--२३

घृतवन्तं कुलायिनं रायस्पोषँ सहस्रिणम् । वेदो वाजं ददातु मे वेदो वीरं ददातु मे ॥ २४

वृषा वृषण्वतीभ्यो वेदपत्नीभ्यो भव ॥ ४ ॥ २५

प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वानक्षितोऽस्यक्षित्यै त्वाक्षितो नामासि मा मे क्षेष्ठाः प्राणापानौ मे
पाहि समानव्यानौ मे पाह्युदानरूपे मे पाह्यूर्गस्यूर्जं मयि धेहा मा गम्याः पूर्णमसि पूर्णं मे भूयास्म
दसि सन्मे भूयास्सर्वमसि सर्वं मे भूया अक्षितिरसि मा मे क्षेष्ठाः प्राच्या दिशा देवा ऋत्विजो
मार्जयन्तां दक्षिणया दिशा मासाः पितरो मार्जयन्तां प्रतीच्या दिशा गृहाः पशवो मार्जयन्ता-
मुदीच्या दिशाप ओषधयो वनस्पतयो मार्जयन्तामूर्ध्वया दिशा यज्ञस्संवत्सरो मार्जयन्ताम् ॥
पृथिवीं विष्णुर्व्यक्रँस्त गायत्रेण च्छन्दसा निर्भक्तो यं द्विष्मोऽन्तरिक्षं विष्णुर्व्यक्रँस्त त्रैष्टुभेन
च्छन्दसा निर्भक्तो यं द्विष्मो दिवं विष्णुर्व्यक्रँस्त जागतेन च्छन्दसा निर्भक्तो यं द्विष्मो दिशो
विष्णुर्व्यक्रँस्तानुष्टुभेन च्छन्दसा निर्भक्तो यं द्विष्मोऽगन्म स्वस्सं ज्योतिषाभूम सूर्यस्यावृतमन्वावर्त
इदमहं योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणं निवेष्टयामि तेजोऽसि तेजो मयि धेहि समहं
प्रजया सं मया प्रजा समहं रायस्पोषेण सं मया रायस्पोषोऽग्नेस्तेजसा तेजस्वी भूयासं वायोरायुषा-
युष्मान् भूयासँ सूर्यस्य वर्चसा वर्चस्वी भूयासमिन्द्रस्येन्द्रियेणेन्द्रियावान् भूयासं धाता मे धाम्ना
सुधां दधातु प्रजापतेः प्रजया प्रजावान् भूयासमग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासँ
सुगृहपतिर्मया त्वं गृहपतिना भूया अस्थूरि णौ गार्हपत्यं दीदायच्छतँ हिमाद्वायु ॥५॥ २६-२७

देवाञ्जनमगन् यज्ञस्ततो मा यज्ञस्याशीरागच्छतु ।पितॄन् सर्पान् गन्धर्वानप ओषधीः पञ्च जना-
ञ्जनमगन् यज्ञस्ततो मा यज्ञस्याशीरागच्छतु पञ्चानां त्वा वातानां धर्त्रायागृह्णामि पञ्चानां त्वा म-
लिलानां धर्त्रायागृह्णामि पञ्चानां त्वा पृष्ठानां धर्त्रायागृह्णामि पञ्चानां त्वा दिशां धर्त्रायागृह्णामि
पञ्चानां त्वा पञ्चजनानां धर्त्रायागृह्णामि भूरस्माकँ हव्यं देवानामाशिषो यजमानस्य चरोस्त्वा
पञ्चबिलस्य धर्त्रायागृह्णामि धामासि प्रियं देवानामनाधृष्टं देवयजनं देवताभिस्त्वा देवताभ्यो
गृह्णामि ॥ २८

[घृतवन्तं कुलायिनं० । श्री. न. प. भा. १, सं. ११]
[५] मै. १,४,२ (१२) । वा. २,२५-२७. १,३१; १५,८; १९,९; २०,२३; ३८,२५ । काण्व. २,४६-५० १,४९. १६,१३; २१.८; २२.८; ३८,२४ । [योऽस्मान् द्वेष्टि...द्विष्मः अथर्व. ३,२७,१-६; ७,८१,५ । तेजोऽसि तेजो मयि धेहि । अथर्व. ७,८९,४; १९,३१,१२]
[६] मै. १,४,१.३-४ (२,१३-२१,२५) । वा. ८,६०; १,५,३१; १५,५०; २,२८ । काण्व. ९,४६; १,८४९; १६, ७१; २,५३ ।

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते ।
अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥ २९

यास्ते रात्रयस्सवितर्देवयानीस्सहस्रयज्ञमभिसंबभूवुः ।
गृहैश्च सर्वैः प्रजया न्वग्रे स्वो रुहाणास्तरता रजाँसि ॥ ३०

ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽध्यासते ।
वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥ ३१

आगन्म मित्रावरुणा वरेण्यं रात्रीणां भागो युवयोर्यो अस्ति ।
नाकं गृह्णानास्सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ ३२

ये देवा यज्ञहनो यज्ञमुषो दिव्यध्यासते ।
सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ॥ ३३

येनेन्द्राय समभरन् पयाँस्युत्तमेन हविषा जातवेदः ।
तेनाग्ने त्वमुत वर्धयेमँ सुजातानाँ श्रैष्ठ्य आधेह्येनम् ॥ ३४

गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इडावाँ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नस्सभावान् ॥ ३५

अग्ने व्रतपते व्रतमचारिषं तदशकं तन्मे प्रव्रमस्तन्नो गोपाय ॥ ६ ॥ ३६
[३८६]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां यजमानं नाम पञ्चमं स्थानकं संपूर्णम् ॥ ५ ॥

अथ षष्ठं स्थानकम् ।

अग्निहोत्र-ब्राह्मणम् ।

प्रजापतिर्वा इदमासीत् तस्मादग्निरध्यसृज्यत सोऽस्य मूर्ध ऊर्ध्व उदद्रवत् तस्य यल्लोहितमासीत्
तद्यपामृष्ट तद्भूम्यां न्यमार्ट् तत उदुम्बरोऽजायत तस्मात् स लोहितं पच्यते स प्राङ् प्राद्रवत् तँ
स्वा वागिष्ट जुहुधीति स इतः पर्यमृष्ट तत् स्वाहेत्यजुहोत् तस्मादेषैवमाहुतिस्स्वा ह्येनं वागिष्ट तस्मा-
न्न ललाटे लोमास्ति न पाण्योस्तस्मादरत्निमात्री स्रुग्भवति चक्षुर्वाव स तत् स्वमजुहोदमुमेवादि-
त्यमग्नौ ज्योतिर्ज्योतिरग्ना इति ज्योतिरेव ज्योतिष्यजुहोद्ब्रह्माजुहोत् सत्यमजुहोदमुमेव तदादित्यम-

[तृतीये पृष्ठे अधि रोचने दिवः० । ऋ. ९,८६,२७ । गोमाँ अग्नेऽविमाँ० । ऋ. ४,२,५; तै. सं. १,६, ६,४; ३,१,११,१]
[१] मै. १,८,१ (१-४) । कपि. ३,११ । ना. ३,१ । काण्व. ३,१ ।

जुहोदेष स्वर्गाग्निहोत्रं श्वश्वो वसीयान् भवति यस्यैवमग्निहोत्रं हूयते ॥ न वै पुरोहोरात्रे आस्तां ते एतयाहुत्योमे सहासृज्येतां यत् सायं जुहोति तेन भ्रातृव्याय पराचीं विवासयति यत् प्रातस्तेनास्मै प्रतीचीमग्नेर्वै गुप्त्या अग्निहोत्रं हूयते यत् सायं जुहोति तेनैनं रात्र्यै रमयति यत् प्रातस्तेनाह्न एषा वा अग्रा आहुतिः प्रथमा हुता यदग्निहोत्रं तस्मादग्नौ सर्वा आहुतयो हूयन्तेऽथैषैवाग्निहोत्रमुच्यतेऽग्निहोत्रं ह वै नाम नास्मादन्यस्समानेषु वसीयान् भवति यस्यैवमग्निहोत्रं हूयते ॥ १ ॥ १–२

स नारमत स प्राद्रवत् तस्मिन्नजुहोत् तस्या आहुत्याः पुरुषोऽजायत स नारमत स प्राद्रवत् तस्मिन्नजुहोत् तस्या आहुत्या अश्वोऽजायत तस्मात् पुरुषश्चाश्वश्च नक्तं प्रत्यञ्चौ न सु विज्ञायेते इव स नारमत स प्राद्रवत् तस्मिन्नजुहोत् तस्या आहुत्या गौरजायताविरजायताजोऽजायत यवोऽजायत व्रीहिरजायतैताभ्यो वै सप्तभ्य आहुतिभ्यस्सप्तैते ग्राम्याः पशवोऽसृज्यन्त स नारमत स प्राद्रवत् तस्मिन्नजुहोत् तस्या आहुत्या वसन्तोऽजायत ग्रीष्मोऽजायत वर्षा अजायन्त शरदजायत हेमन्तोऽजायत स त्रयोदश्यामाहुत्यामुद्यतायामबिभेत् तं प्रत्यङ्ङुपापद्यत तं पाणितः प्राविशत् तस्मात् पाण्योर्लोम नास्त्यग्निधानं ह्येतत् तस्माद्धस्ताभ्यामग्निर्मथ्यमानो जायते ॥ तस्माद्धन्यमानौ हस्तौ प्रतिगृह्णात्यग्नावेव तत् त्राणमिच्छतेऽग्निं वै पशवोऽनूपतिष्ठन्ते पशूनग्निः प्रैनं पशवो विशन्ति प्र पशून् विशति य एवं वेद तामाहुतिमप्सु प्रासिञ्चत् ततश्शिशिरमजायत तस्मात् तत् क्रूरतमं नहि तद्धुतान्नाहुतादजायत साहुतिरपो दग्धुमुपाक्रामत तत आपोऽग्नये वज्रोऽभवँस्तस्मात् प्रोक्षन्नग्निं न प्रापयेद्यत् प्रापयेद्वज्रेण यजेत तामाहुतिमोषधीषु न्यदधात् तस्मादोषधयोऽनभ्यक्ता रेभन्त ओषधिभ्योऽधि पशवः पशुभ्योऽधि प्रजास्तदेतच्छिशिर आज्यं स्यायत्यग्नये तस्माच्छिशिरे कक्ष उपादुत्यः प्रियमेव धामाग्नये प्रादात् सोऽस्मा अन्नाद्यं प्रयच्छत्यन्नादो भवति य एवं वेद ॥ २ ॥
३–४

समाने वै योना आस्तां सूर्यश्चाग्निश्च ततस्सूर्य ऊर्ध्व उदद्रवत् तस्य रेतः परापतत् तदग्निर्योनिनोपागृह्णादयसा तदक्रुडयत् तत् क्रुड्यमानं गवि न्यदधात् तदिदं पयस्तस्मादयस्मयः पात्रं प्रतिधुक् क्रुडयति तत् पयसाग्निहोत्रं जुहोत्यमुमेव तदादित्यं जुहोत्येष ह्येवाग्निहोत्रमनड्वाहो वै पयस्तण्डुला असा आदित्योऽनड्वान् यद्यवाग्वाग्निहोत्रं जुहोत्यमुमेव तदादित्यं जुहोत्येष ह्येवाग्निहोत्रं चक्रवृत्तमन्यदचक्रवृत्तमन्यद्यच्चक्रवृत्तं तदमुयं यदचक्रवृत्तं तदेवमात्रं तस्मादचक्रवृत्तामग्निहोत्रतपनीं कुर्वीत ॥ न क्षीरेण प्रतिपिञ्चेन्नोदकेन यत् क्षीरेण प्रतिपिञ्चेदप्रतिपिक्तं स्याद्यदुदकेन शमयेद्दोहने संस्रावमुच्छिष्येत नोदकमिश्रेण प्रतिपिञ्चेत् तन्न क्षीरेण प्रतिपिक्तं भवति नोदकेन स्कन्नं दाव तत् परि चेदाकरोति

[२] मै. १,८,१-२ (१-७)। कपि. ४,१।
[३] मै. १,८,२-३ (७-८)। कपि. ४,२।

या स्थाल्यग्निहोत्रतपनी तया दुह्यादियं वै मानवा इमामिह नेहातिस्कन्दत्यनयैवोपसीदति तदस्यास्कन्नं भवत्यद्भिः प्रतिपिञ्चत्यापो हि प्रतिषेचनाय तस्यिरे तच्छान्तं मिथुनमापश्च पयश्च यदि दुह्यमानावभिद्यादन्यया स्थाल्या दुह्यात् सैव तत्र प्रायश्चित्तिर्यद्यधिश्रीयमाणं यद्यधिश्रितं स्कन्देदन्यामभिदुह्याधिश्रित्योन्नीय जुहुयात् सैव तत्र प्रायश्चित्तिर्यद्युन्नीयमानं यद्युन्नीतं यदि पुर उपसन्नमहुते स्कन्देत् पुनरवनीयान्यामभिदुह्याधिश्रित्योन्नीय जुहुयात् सैव तत्र प्रायश्चित्तिर्यत्र स्कन्देत् तदपो निनयेदापो वै यज्ञस्य निष्कृतिरद्भिरेवैनं निष्करोति प्रतिपिक्तमन्यदप्रतिपिक्तमन्यत् प्रतिपिक्तं पशुकामस्याप्रतिपिक्तं ब्रह्मवर्चसकामस्य घर्मो वा एष प्रवृज्यते यदग्निहोत्रं यदप्रतिपिक्तं न जुहोति ब्रह्मवर्चसी भवति यदि पयो न विन्देदाज्येन जुहुयात् तद्ध्यप्रतिषेक्यमपशव्यमीश्वरमस्याशान्तं शुचा पशून्निर्दहः प्रतिपिक्तं पशुकामस्य तच्छान्तं मिथुनमापश्च मयश्च यदि पयो न विन्देद्यवाग्वा जुहुयात् तद्धि प्रतिषेक्यं शान्तं मिथुनं पशव्यमापश्च तण्डुलाश्च ॥ ३ ॥ ५–६

अग्निहोत्रे वै जायम्पती व्यभिचरेते यत् प्राचीनमुद्वासयेत् पतिः पूर्वः प्रमीयेत यत् प्राचीनमुद्वासयेज्जाया पूर्वा प्रमीयेत संप्रत्युदीचीनमुद्वासयेत् समेवं जीर्यतः पूर्णमग्र उन्नयेदथ संमितमथ संमितमथ संमिततममुत्तममनुज्येष्ठमेवास्य पुत्रा ऋध्नुवन्ति संमितमग्र उन्नयेदथ भूयोऽथ भूयोऽथ पूर्णमुत्तमं भूयो भूय एवान्नाद्यमभ्युत्क्रामति कनिष्ठस्त्वस्य पुत्राणामर्धुको भवति सर्वान् समावदुन्नयेद्यः कामयेत सर्वे मे पुत्रास्समावदृध्नुयुरिति सर्वेषां वै पिता पुत्राणामृद्धिं कामयते सर्व एव समावदृध्नुवन्ति ॥ नान्योऽन्यमतिक्रामति चतुरुन्नयति चतुष्पद एवास्मै पशून् .... द्विपद एवास्मै पशून् यच्छति पशून् मे यच्छेति पश्चादुपसादयेत् पशवो वै गार्हपत्यः पशवः पयः पशूनामेवैषा यतिर्न पश्चादुपसादयेद्धविर्वा एतद्यदग्निहोत्रं यजमानो हविर्हविर्भूतमेव यजमानमपनुदत उत्तरादुपसादयेदपूतं वा एतद्यदग्निहोत्रमग्निः पवित्रं यत् समयाग्निं हरति तेनैवैनत् पुनात्यनु वा एष एतद्ध्यायति यत् पश्चाधिश्रित्य पुरो जुहोति यत् समयाग्निं हरति तेनैवैनं प्रीणात्यनुध्यायिनं करोत्यस्माद्धि गार्हपत्यादसौ पूर्वोऽग्निरसृज्यतायं वाव प्रजापतिरसौ पूर्वोऽग्निस्तदयमित आदाय प्राङनूद्द्रुत्याजुहोत् तस्मादग्निहोत्रं पश्चाधिश्रित्य पुरो जुह्वति पुर एवान्यानि हवींषि शृतानि कुर्वन्ति पुरो जुह्वति ॥ ४ ॥ ७–८

इध्मो वा एषोऽग्निहोत्रस्य यत् समिद्यत् समिधमादधातीध्ममेवैतमग्निहोत्रस्य करोति रुद्र ओषधीर्विषेणालिम्पत्ताः पशवो नालिशन्त ताभ्यो देवाः प्रायश्चित्तिमैच्छन् स प्रजापतिरब्रवीद्वरं वृणा अहं व एतास्स्वदयिष्यामीति स एतां समिधमवृणीत तस्मादेकैको हि प्रजापतिस्ता अग्निनोपासृजत्ता

[४] मै. १,८,४ (९-१७)। कपि. ४,३।
[५] मै. १,८,४-५ (९-२७)। कपि. ४,४। ना. ३,९। त.ब्रा. ३,१०।

अग्निरस्वदयदेतस्यां वा आहितायामग्निहोत्रिणे वीरुधस्स्वदन्ति स्वदितमस्यान्नं भवति य एवं वेद बहुकीकरोत्युभे आहुती समिद्धे जुहवानीत्येकैव कार्या सकृद्ध्येव सर्वस्मै यज्ञाय समिध्यत आयुर्मे यच्छ वर्चो मे यच्छ प्रजां मे यच्छेति पुर उपसादयेत् सृष्टिर्वा एतद्यदग्निहोत्रं यन्नोपसादयेत् पराचीः प्रजा इयुर्यदुपसादयति तस्मादिदं प्रजा यतास्तस्मादुपतिष्ठन्तेऽग्नौ ज्योतिर्ज्योतिरग्ना इति सायमग्निहोत्रं जुहुयाद्गर्भिण्या वाचा गर्भं दधाति मिथुनया वाचा गर्भं दधाति सूर्यो ज्योतिर्ज्योतिस्सूर्य इति प्रातस्तं गर्भिण्या वाचा मिथुनया प्रजनयति यन्निरुक्तं चानिरुक्तं च तन्मिथुनं यद्यजुषा च मनसा च तन्मिथुनं तदजाम्याहुत्योराग्नेयी सायमाहुतिस्सौरी प्रातरग्निः प्रवापयिता सूर्यः प्रजनयिताग्नस्सूर्ये निम्रुक्ते सायमग्निहोत्रं जुहुयादुपोदयं सूर्यस्य प्रातरग्निरेव प्रवापयित्वा सूर्यं रात्र्यै गर्भं दधाति तं गर्भिण्या वाचा मिथुनया प्रातः प्रजनयत्येतं वै प्रजायमानं प्रजा अनुप्रजायन्ते प्र प्रजया प्र पशुभिर्जायते यस्यैवमग्निहोत्रं हूयत एषा वा अग्निहोत्रस्य स्थाणुर्या पूर्वाहुतिस्तामतिहाय जुहुयात् तमेव परिवृणक्त्यभिक्रामं सायं होतव्यं गर्भमेव दधाति प्रतिक्रामं प्रातः प्रैव जनयति तदाहुरभिक्राममेव होतव्यमभिक्रान्तेन हि यज्ञस्यर्ध्नोति यज्जुहोति तद्देवानां यदुद्दिशति तेन रुद्रं शमयति यन्निमार्ष्टि तत् पितॄणां यत् प्राश्नाति तन्मनुष्याणां तस्मादग्निहोत्रं वैश्वदेवमुच्यते ॥ ५ ॥ ९

प्रियमेधा वै नाम ब्राह्मणा आसंस्ते सर्वमाविदुस्तत् सहैवाविदुस्तेऽग्निहोत्र एव न समराधयंस्तेषां सकृदेकोऽग्निहोत्रमजुहोद् द्विरेकस्त्रिरेकस्तेषां यस्सकृदजुहोत् तमितरा अपृच्छतां कस्मै त्वं जुहोषीत्येकमेवेदमित्यब्रवीत् प्रजापतिः प्रजापतय एवाहं जुहोमीति तेषां यो द्विरजुहोत् तमितरा अपृच्छतां कस्मै त्वं जुहोषीत्यग्नये चैव सायं प्रजापतये चेत्यब्रवीत् सूर्याय च प्रातः प्रजापतये चेति तेषां यस्त्रिरजुहोत् तमितरा अपृच्छतां कस्मै त्वं जुहोषीत्यग्नये सूर्याय प्रजापतय इत्यब्रवीत् तेभ्य एव सायं जुहोमि तेभ्यः प्रातरिति तेषां यो द्विरजुहोत् स आर्ध्नोत् स भूयिष्ठोऽभवत् प्रजयार्धोतरौ श्रियाक्रामत् तस्य प्रजामितयोः प्रजे सजातत्वमुपैतां तस्माद् द्वे होतव्ये यजुषा च मनसा च यामेव स ऋद्धिमार्ध्नोत् तामृध्नोति यदि सायमहुतेऽग्निहोत्रे पूर्वोऽग्निरनुगच्छेदग्निहोत्रमधिश्रित्योन्नीयाग्निना पूर्वेणोद्द्रुत्याग्निहोत्रेणानुद्द्रवेदाहुर्य्यैवैनं व्यावयति यो ब्राह्मणो बहुविस्स्यात् स उद्धरेत् सर्वेणैवैनं ब्रह्मणोद्धरति यत् पुरा धनमदायी स्यात् तदद्यादच्युतेनैवैनं च्यावयति यदि प्रातरहुतेऽग्निहोत्रेऽपरोऽग्निरनुगच्छेदनुगमयित्वा पूर्वं मथित्वापरमुद्धृत्य जुहुयात् सैव तत्र प्रायश्चित्तिर्यदि त्वरेत ॥ पूर्वमग्निमन्ववसाय ततः प्राञ्चमुद्धृत्य जुहुयात् सैव तत्र प्रायश्चित्तिर्जामि नु तद्योऽस्य पूर्वोऽग्निस्तमपरं करोत्यन्यत्रैवावसायाग्निं मथित्वोद्धृत्य जुहुयात् सैव तत्र प्रायश्चित्तिस्ततश्चोऽग्नये तपस्वते जनद्वते पावकवत इष्टिं निर्वपेद्यदा वा अग्निस्संतप्यतेऽथ जायत ओषधयः पावका

[६] मै. १,८,७ (३६-४४)। कपि. ४,५।

ओषधीरेवास्मै पावका भागधेयमपिदधाति न गार्हमनुबुध्यते यदा ह्येवास्मै नापिदधत्यथैषोऽनुगच्छति यौ पन्थाना अभितस्थौ दर्शपूर्णमासौ या मध्ये सृतिस्तदग्निहोत्रमेवं वा अग्निहोत्रिणे दर्शपूर्णमासिने स्वर्गो लोकोऽनुभाति ॥ मनसा वा इमां प्रजापतिर्वेदिं पर्यगृह्णादग्निहोत्रिणे तत्र यत् किंच ददाति तद्बर्हिष्यं यथासन्नेषु नाराशंसेषु ददात्येवमेष ददाति यत्किंच ददाति मध्य एव यज्ञस्य द्यावापृथिवी एतस्य सदोहविर्धाने अहोरात्राणीध्मो दिशः परिधयः स्रुचाः प्रोक्षणीरोषधयो न हि यजमानो यूपो न संभवन् वदेत् पशुरेव भूत्वा संभवत्यहरहर्वै पशवस्संभवन्तोऽथ मेध्या न राजन्यस्याग्निहोत्रमस्त्यव्रत्यो हि स हन्ति व्रतं न विच्छिन्द्यात् पौर्णमासीं च रात्रीममावस्यां च जुहुयात् ते हि व्रतं गोपायति यान्यहानि न जुहुयात् तान्यस्य ब्राह्मणायाग्रे गृह उपहरेयुरग्निर्वै ब्राह्मणोऽग्ना एव तज्जुहोति तदस्य स्वदितमेष्टं भवति ॥ ६ ॥ १०–१२

वाचा वै सह मनुष्या अजायन्त ते वाचो देवाश्चासुराश्च ते यन्मनुष्या अवदँस्तदेवाभवन्ते देवाश्चासुराश्च प्रजापतिमब्रुवन्निमे वावेदमभूवन्निति स वाचस्सत्यं निरमिमीत भूर्भुवस्स्वरिति यत्तुरीयमनृतं तन्मनुष्येषु न्यदधादेतद्धि वाचोऽनृतं यन्मनुष्या वदन्ति भूरितीमामसृजताग्निं रथंतरं त्रिवृतं गायत्रीं भुवरित्यन्तरिक्षं वातं वामदेव्यं त्रिष्टुभं पञ्चदश स्वरिति दिवं सूर्यं बृहदेकविंशं जगतीं भूर्भुवस्स्वरग्नौ ज्योतिर्ज्योतिरग्ना इत्यग्निहोत्रं जुहुयादेतद्धि वाचस्सत्यमेतन्मिथुनमेतद्ब्रह्म तेनैव जुहोतीमा एवैतदिष्टका उपधत्त इमा एवैतदिष्टका उपधायोत्तमं नाकं रोहत्युत्तमस्समानानां भवति यस्यैवमग्निहोत्रं हूयते ॥ वाचं यच्छेदग्निहोत्र उन्नीयमाने तपसा वै प्रजापतिः प्रजा असृजत यन्न व्याहरत् तद्देवातप्यत सृष्टिर्वा एतद्यदग्निहोत्रं सृष्टिरेतद्व्रतं ता उद्भवस्थेत्युदभावयद्यर्हि बिन्दव इव स्युस्तर्ह्यवेक्षेतोद्भवस्थोदहं प्रजया प्र पशुभिर्भूयासमित्युद्भूतिर्वा एतत् प्रभूतिर्यदग्निहोत्रमुत्प्रजया प्र पशुभिर्भवति यस्यैवमग्निहोत्रं हूयतेऽग्निनावेक्षते प्रजननं वा एतद्यदग्निहोत्रमग्निः प्रजनयिता प्रैव जनयति॥ रेतो वा एतद्यदग्निहोत्रं न सुशृतं कुर्याद् रेतः क्रुडयेन्नो अशृतमन्तरेणैव स्याद्रुद्र मृडानार्भव मृड धूर्त नमस्तेऽस्त्विति हुत्वोदङ्ङुदिशेदेतानि वै रुद्रस्य क्रूराणि नामानि तैरेष प्रजा हिनस्त्यग्निहोत्रे भागधेयमिच्छमानस्तान्येवास्य प्रतिनुदति तानि शमयति यद्ययं देवः प्रजा अभिमन्येत सजूर्जातवेदो दिवा पृथिव्या हविषो वीहि स्वाहेति द्वादश रात्रीरग्निहोत्रं जुहुयाद्या वा अग्नेर्जातवेदास्तनूस्तयैष प्रजा हिनस्त्यग्निहोत्रे भागधेयमिच्छमानस्तामेवास्य प्रीणाति तस्यैतज्जुहोति॥ तदजाम्याहुत्योराग्नेय्येषाग्नेर्यातरा संवत्सरं वा एतमिन्धतेऽग्निं वैश्वानरं न वा एतस्य संवत्सरेऽप्यस्ति न वैश्वानरे योऽनाहिताग्निर्यानि दारूणि ते मासा ये स्थूला अङ्गारास्त ऋतवो येऽणीयाँसस्तेऽर्धमासा मुर्मुरा अहोरात्राणि यत् सुवर्णं ज्योतिस्तद्बार्हस्पत्यं यन्न सुवर्णं न लोहितं तन्मैत्रं यल्लोहितं तद्वारुणं यत्सधूमं

[७] मै. १,८,६ (२८-३५)। कपि. ४,६।

तद्वैश्वदेवं यत्राङ्गारेष्वग्निर्लेलायेव तदस्यास्यमाविर्नोम तद्ब्रह्म तस्मिन् होतव्यं मुखेन वा अन्नात्यन्ना-
न्यवत्याविः प्रजासु भवति श्वश्वो वसीयान् भवति यस्यैवमग्निहोत्रँ हूयते ॥ ७ ॥ १३--१६

ओदनपचनो गार्हपत्य आहवनीयो मध्याधिदेवनमामन्त्रणमेषा वै विराट् पञ्चपदा तामेवाप्नोति
तामवरुन्द्धे यस्य हैषावरुद्धा स मनुष्याणाँ श्रेष्ठो भवति यदि सायमग्निहोत्रस्य कालोऽतिपद्येत
दोषा वस्तोस्स्वाहेति जुहुयात् सैव तत्राहुतिस्तेनास्य तदनतिपन्नं भवति यदि प्रातरग्निहोत्रस्य
कालोऽतिपद्येत दिवा वस्तोस्स्वाहेति जुहुयात् सैव तत्राहुतिस्तेनास्य तदनतिपन्नं भवति न स्वाहा-
कारो वा अग्निहोत्रस्याहुतिं युवते यर्हि वाव प्रवदेत् तर्हि जुहुयात् स ह्यग्निहोत्रस्य वषट्कारस्सजूर-
ग्निर्दिवा पृथिव्येति द्यावापृथिवी अग्निं तानेव प्रीणाति तानवरुन्द्धे सजूर्देवेन सवित्रेति न हि सवि-
तुर्ऋत आहुतिरस्ति सजूः पूष्णान्तरिक्षेणेति पशवो वै पूषा पशवोऽन्तरिक्षं पशूनेवावरुन्द्धे सजू
रात्र्येन्द्रवत्या स्वाहेति रात्रीमेवैतदभिजुहोति न हीन्द्रादृत आहुतिरस्ति देवा वै पुराग्निहोत्रमहौषु-
स्तस्मात् पुरा बृहन्महानजनि सजूरह्नेन्द्रवता स्वाहेति धार्हतं वा अहर्यार्हतस्सूर्योऽहश्चैवास्यैतत् सूर्य-
श्चाभिजिता अभिहुतौ भवत आनुष्टुभी वै रात्री त्रैष्टुभमहो रात्रीं चैवैतदहश्चाभिजुहोत्यग्नेऽदाभ्य जुप-
स्व स्वाहेत्युत्तरामाहुतिं जुहोति यथाग्नये समवद्यत्येवमेव तदपिग्नेरग्ने स्वां तन्वमयान् द्यावापृथिवी
ऊर्जमस्मासु धेहीति तृणमक्त्वानुप्रहरति सँस्थितिरेवैषा स्वगाकृतिरग्निहोत्रस्य वा एषोऽशान्तमनु प्रजा
हिनास्ति यत्तृणमक्त्वानु प्रहरति तेनैवैनच्छमयत्यग्ने गृहपते जुषस्व स्वाहेति स्रुवेण गार्हपत्ये जुहोति
यथा पत्नीस्संयाजयत्येवमेव तदनु वा एष एतद्ध्यायति यत् पश्चाधिश्रित्य पुरा जुहोति यत् स्रुवेण
गार्हपत्ये जुहोति तेनैवैनं प्रीणात्यननुध्यायिनं करोत्यस्याग्निहोत्री प्रजायां जायते श्वश्वो वसीयान्
भवति यस्यैवमग्निहोत्रँ हूयते ॥ ८ ॥ १७

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥ १८
अस्य प्रत्नामनु द्युतँ शुक्रँ दुदुह्रे अह्रयः । पयस्सहस्रसामृषिम् ॥ १९
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेताँसि जिन्वति ॥ २०

[८] मै. १,८,७ (३६—४४) । कपि. ४,७ । वा. ३,१० । काण्व. ३,११-१२ ।
[९] मै. १,५,१—२ (१-२१) । कपि. ४,८ । वा. ३,११-१९; १३,१४; १५,१९,२०,२६,५६; ३३,६; १२,५२; २३,३२; १,२५—२६; २,१५; ६,२२; ३५,१२; ३६,२३; ३८,२३ । काण्व. ३,१७-२७; १४,१४; १६,४१, २३,३२; १,२५—२६; २,१५; ६,२२; ३५,१२; ३६,२३; ३८,२३ । [उप- ४७,७८; ३२,६; १३,५३; २५,३४; १,४२-४३; २,३०, ६,३१; २२,४; ३५,४५; ३६,२३; ३८,२३ । [उप- प्रयन्तो अध्वरं० । ऋ. १,७४,१; सा. १३७९; तै. सं. १,५,५,१ । अस्य प्रत्नामनु द्युतं० । ऋ. ९,५४,१; सा. ७५५; तै. सं. १,५,५,१ । अग्निर्मूर्धा दिव० । ऋ. ८,४४,१६; सा. २७,१५३२; तै. सं. १,५,५,१, ४, ४,१,१; तै. ब्रा. ३,५,७,१]

उभा वामिन्द्राग्नी आहुवध्या उभा राधसस्सह मादयध्यै ।
उभा दातारा इषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥ २१
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे ॥ २२
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ २३
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयूँषि तारिषत् ॥ २४
त्वमग्ने सूर्यवर्चास्सं मामायुषा वर्चसा सृज सं त्वमग्ने सूर्यस्य ज्योतिषागथास्समृषीणाँ स्तुतेन
सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मीय ॥ २५
इन्धानास्त्वा शतँ हिमा द्युमन्तस्समिधीमहि ।
वयस्वन्तो वयस्विनं यशस्वन्तो यशस्विनम् ।
सुवीरासो अदाभ्यमग्ने सपत्नदम्भनम् ॥ २६
आयुर्धा अग्नेऽस्यायुर्मे धेहि वयोधा अग्नेऽसि वयो मे धेहि तनूपा अग्नेऽसि तन्वं मे पाहि ॥
यन्मे अग्न ऊनं तन्वस्तन्म आपृणाग्नेस्समिदस्यभिशस्त्या मा पाहि सोमस्य समिदसि परस्पा म
एधि यमस्य समिदसि मृत्योर्मा पाह्यग्ने यत्ते तपस्तेन तं प्रतितप योऽस्मान् द्वेष्टि यं च वयं द्विष्मो-
ऽग्ने यत्ते शोचिस्तेन तं प्रतिशोच योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽग्ने यत्ते तेजस्तेन तं प्रतितितिग्धि
योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽग्ने यत्तेऽर्चिस्तेन तं प्रत्यर्च योऽस्मान् द्वेष्टि यं च वयं द्विष्मो-
ऽग्ने यत्ते हरस्तेन तं प्रतिहर योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽग्ने रुचां पते नमस्ते रुचे मयि
रुचं धेहि चित्रावसो स्वस्ति ते पारमशीयावाग्वसो स्वस्ति ते पारमशीय ॥ ९ ॥ २७-२८
वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो ॥ २९

[उभा वामिन्द्राग्नी० । ऋ. ६,६०,१३; तै. सं. १,१,१४,१; १,५,५,१ । अयमिह प्रथमो० । ऋ. ४,७,१; तै. सं. १,५,५,१ । अयं ते योनिर्ऋत्वियो० । ऋ. ३,२९.१०; अथर्व. ३,२०,१. तै. सं. १,५,५,२, ४,२, ४,३; ४,७,१३,५; तै. ब्रा. १,२,१,१६; २,५,८.८ । दधिक्राव्णो अकारिषं० । ऋ. ४,३९,६; सा. ३५८; अथर्व. २०,१३७,३; तै. सं. १,५,११,४; ७,४,१९,४; ताण्ड्य ब्रा. १,६,१७ । योऽस्मान्द्वेष्टि०...द्विष्मः । अथर्व. १०, ५,१५-२१,२५-३५; १६,७,५; श्री पू. अ. ३ खं. ६]
[१०] वा. ५,३६—३७; ७,४३—४४; ४०,१६; ३३,६५; १९,६—७; १०,५४; २७,१८; ३४,४०; ४,१९ । काण्व. ५,४५-४६; ९,८-९; ४०,१८; ३२,६५; २८,६,९; २२,३९; ३९.३१; ४,२१ । [वेत्था हि वेधो० । ऋ. ६, १६,३; सा. १४७६]

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ ३०
आ तू न इन्द्र वृत्रहन्नस्माकमर्धमागहि । महान्महीभिरूतिभिः ॥ ३१
त्वं महाँ इन्द्र तुभ्यँ ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।
त्वं वृत्रं शवसा जघन्वान् सृजस्सिन्धूँरहिना जग्रसानान् ॥ ३२
३३--३४
ऋतावानं वैश्वानरम् ॥ वैश्वानरस्य सुमतौ स्याम ॥ ३५
अग्ने दा दाशुषे रयिं वीरवन्तं परीणसम् । शिशीहि नस्सूनुमतः ॥
त्वद्धि पुत्र सहसो वि पूर्वीर्देवस्य यन्त्यूतयो वि वाजाः ।
३६
त्वं देहि सहस्रिणं रयिं नोऽद्रोघेन वचसा सत्यमग्ने ॥ ३७
दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि । यजमानाय सुन्वते ॥
आ तू भर माकिरेतत् परिष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् ।
३८
इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व प्रयन्धि ॥
प्र तत्ते अद्य शिपिविष्ट नामार्यश्शँसामि वयुनानि विद्वान् ।
३९
तं त्वा गृणामि तवसमतव्यान् क्षयन्तमस्य रजसः पराके ॥
तं त्वा गृणामि तवसमतव्यान् क्षयन्तमस्य रजसः पराके ॥
वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिस्सदा नः ॥ ४०
त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम् । स नो रास्व सुवीर्यम् ॥ ४१
अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयं वाजं जयतु वाजसाता अयं शत्रूञ्जयतु जर्हृषाणः ॥ ४२
४३--४४
त्वमग्ने व्रतपा असि ॥ यद्वो वयम् ॥ १० ॥

[अग्ने नय सुपथा० । ऋ. १,१८९,१; तै.सं. १,१, १४,४; १,४,४३,१; तै.ब्रा. २,८,२,३; तै. आ. १,८,८; शत. ब्रा. १४,८,३,१ । आ तू न इन्द्र वृत्रहन्० । ऋ. ४,३२,१; सा. १८१ । त्वं महाँ इन्द्र तुभ्यं० । ऋ. ४, १७,१ । ऋतावानं वैश्वानरम् । अथर्व. ६,३६,१; आ. सू. अ. ८ । वैश्वानरस्य सुमतौ० । ऋ. १,९८,१. तै. सं. १,५,११,३; नि. ७,२२ । अग्ने दा दाशुषे० । ऋ. ३,२४,५; तै. सं. २,१२,६ । त्वद्धि पुत्र सहसो० । ऋ. ३,१४,६ । दीर्घस्ते अस्त्वङ्कुशो० । ऋ. ८,१७,१० । अथर्व. २०,५,४, । आ तू भर माकिरेतत्० । ऋ. ३,३६,९, तै. सं. १,७,१३,३ । प्र तत्ते अद्य शिपिविष्ट० । ऋ. ७,१००,५; सा. १६२६; तै. सं. २,२,१२,५; नि. ५,९ । वषट् ते विष्ण अ.स (वास) आ० । ऋ. ७,९९,७; ७,१००,७; सा. १६२७; तै. सं. २,२, १२,४ । त्वामग्ने वाजसातमं० । ऋ. ५,१३,५; तै. सं. १,४,४६,३ । त्वमग्ने व्रतपा असि० । ऋ. ८,११, १; अथर्व. १९,५९.१; तै. सं. १,१,१४,४; १,२,३,१ । यद्वो वयम्० । ऋ. १०,२,४; अथर्व. १९,५९,२; तै. सं. १,१,१४,४]

कृणुष्व पाजः ॥ ४५
स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभिद्यौत् ॥ ४६
सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥ ४७
अर्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता जरतामियं गीः ।
स्वश्वास्त्वा सुरथा मार्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ ४८
इह त्वा भूर्याचरेदुप त्मन् दोषावस्तर्दीदिवाँसमनु द्यून् ।
क्रीडन्तस्त्वा सुमनसस्सपेमाभि द्युम्ना तस्थिवाँसो जनानाम् ॥ ४९
यस्त्वा स्वश्वस्सुहिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग् जुजोषत् ॥ ५०
महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।
त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥ ५१
अस्वप्नजस्तरणयस्सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।
ते पायवस्सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ॥ ५२
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान् सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ ५३
त्वया वयं सधन्य२स्त्वोतास्तव प्रणीत्यश्याम वाजान् ।
उभा शँसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥ ५४
अया ते अग्ने समिधा विधेम प्रति स्तोमँ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात् ॥ ११ ॥ ५५ [४४१]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायामग्निहोत्र-ब्राह्मणं नाम षष्ठं स्थानकं संपूर्णम् ॥६॥

[११] वा. १३, ९ । काण्व. १४,९ । [कृणुष्व पाजः० । ऋ. ४,४.१; तै. सं. १,२,१४,१; नि. ६,१२ । [स ते जानाति सुमतिं० । ऋ. ४,४,६; तै. सं. १,२,१४,२ । सेदग्ने अस्तु सुभग० । ऋ. ४,४,७; तै. सं. १,२, १४.३ । अर्चामि ते सुमतिं० । ऋ. ४,४,८; तै. सं. १,२,१४,३ । इह त्वा भूर्याचरेदुप० । ऋ. ४,४,९; तै. सं. १,२,१४,४ । यस्त्वा स्वश्वस्सुहिरण्यो० । ऋ. ४,४,१०; तै. सं. १,२,१४,४ । महो रुजामि बन्धुता० । ऋ. ४,४,११; तै. सं. १,२,१४,४ । अस्वप्नजस्तरणयस्सुशेवा० । ऋ. ४,४,१२; तै. सं. १,२,१४,५ । ये पायवो मामतेयं० । ऋ. १,१४७,३; ४,४,१३; तै. सं. १,२,१४,५ । त्वया वयं सधन्य२स्त्वोता० । ऋ. ४, ४,१४; तै.सं. १,२,१४,६; नि. ५,१५ । अया ते अग्ने समिधा० । ऋ. ४,४,१५; तै. सं. १,२,१४,६; नि. ३,२१]

अथ सप्तमं स्थानकम् ।

आलोभी ।

अम्भस्थाम्भो वो भक्षीय महस्थ महो वो भक्षीयोर्जस्थोर्जं वो भक्षीय रायस्पोषस्थ रायस्पोषं वो भक्षीय रेवती रमध्वमस्मिन्योनावस्मिन् गोष्ठेऽस्मिँल्लोकेऽस्मिन् क्षये इहैव स्त मापगात मा मा हासिष्ट बह्वीर्मे भवत संहितासि विश्वरूपा मोर्जा विशा गौपत्येना प्रजया रायस्पोषेण मयि वो रायश्श्रयन्तां सहस्रपोषं वः पुषेयम् ॥ १

संपश्यामि प्रजा अहमिडाप्रजसो मानवीः । बह्वीर्भवन्तु नो गृहे ॥ २

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ ३

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥ ४

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नस्स्वस्तये ॥ ५

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
तं त्वा शोचिष्ठ दीदिवस्सुम्नाय नूनमीमहे सखिभ्यः ॥ ६

वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः ।
स नो बोधि श्रुधी हवमुरुष्या णो अघायतस्समस्मात् ॥ ७

ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडास्थ मधुकृतस्स्योना माविशतेरंमदो मयि वो रायश्श्रयन्तां सहस्रपोषं वः पुषेयम् ॥ १ ॥ ८

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ ९

नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशंसः ॥ १०

यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम् ॥ ११

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः ॥ १२

[१] मै. १,५,१—३ (३१-३३) । कपि. ५,१ । वा. ३,२०-२३; १५,४८; २५,४७. ४,२६ । काण्व. ३,२७-३४; १६, ७०; १७,४५; ४,३८ । [उप त्वाग्ने दिवे दिवे० ऋ. १,१,७; सा. १४; तै.सं. १,५,६,२ । राजन्तमध्वराणां० । ऋ. १,१,८; तै. सं. १,५,६,२ । स नः पितेव सूनवे० ऋ. १,१,९; तै. सं. १,५,६,२; नि. ३,२१ । अग्ने त्वं नो अन्तम० । ऋ. ५,२४,१; सा. ४४८,११०७; तै. सं १,५,६,२; ४,४,४,८ । तं त्वा शोचिष्ठ० । ऋ. ५, २४,४; सा. ११०९; तै. सं. १,५,६,३; ४,४,४,८ । वसुरग्निर्वसुश्रवा० । ऋ. ५,२४,२; सा. ११०८; तै. सं. १,५,६,३; ४,४,४,८]

[२] मै. १,५,४ (३५-३९,४१-३४) । कपि. ५,२ । वा. ३,२८-३४,३६; ८,१ । काण्व. ३,३६-४२; ८,१ । [महि त्रीणामवोऽस्तु० ऋ. १०,१८५,१; सा. १९२ । नहि तेषाममा चन० । ऋ. १०,१८५,२ । यस्मै (ते हि) पुत्रासो अदितेः० । ऋ. ८,१८,५ । सोमानं स्वरणं० । ऋ. १,१८,१; सा. १३९,१४६३; तै. सं १,५,६,४; तै. ब्रा. १०,२,११; नि. ६,१०]

यो रेवान्यो अमीवहा वसुवित् पुष्टिवर्धनः । स नस्सिषक्तु यस्तुरः ॥ १३

मा नश्शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥ १४

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥ १५

परि ते दूडभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ १६

अच्छिन्नो दैव्यस्तन्तुर्मा मनुष्यश्छेदि निम्रदोऽसीदमहं तं निमृणामि योऽस्मान् द्वेष्टि यं च वयं
द्विष्मो विभूरस्यभ्यहं तं भूयासं योऽस्मान् द्वेष्टि यं च वयं द्विष्मः प्रभूरसि प्राहं तमतिभूयासं योऽस्मा-
न् द्वेष्टि यं च वयं द्विष्मः पूषा मा प्रपथे पातु पूषा मा पशुपाः पातु पूषा माधिपतिः पातु प्राची
दिगग्निर्देवताग्निं स ऋच्छतु यो मैतस्या दिशोऽभिदासति दक्षिणा दिगिन्द्रो देवतेन्द्रं स ऋच्छतु यो
मैतस्या दिशोऽभिदासति प्रतीची दिक्सोमो देवता सोमं स ऋच्छतु यो मैतस्या दिशोऽभिदास-
त्युदीची दिङ् मित्रावरुणौ देवता मित्रावरुणौ स ऋच्छतु यो मैतस्या दिशोऽभिदासत्यूर्ध्वा दिग्बृह-
स्पतिर्देवता बृहस्पतिं स ऋच्छतु यो मैतस्या दिशोऽभिदासतीयं दिगदितिर्देवतादितिं स ऋच्छतु
यो मैतस्या दिशोऽभिदासति ज्योतिषे तन्तव आशिषमाशास्तेऽसा अनु मा तनु ॥ २ ॥ १७

धनं मे शंस्य पाहि तन्मे गोपाय ॥ १८

मम नाम प्रथमं जातवेदो माता पिता च दधतुर्न्वग्रे ।
तत्त्वं गोपाया पुनर्ददे ते वयं बिभराम तव नाम ॥ १९

प्रजां मे नर्य पाहि तां मे गोपाय ॥ २०

इमान् मे मित्रावरुणौ गृहान् गोपायतं युवम् ।
अविनष्टानविह्रुतान् पूषैनानभिरक्षत्वास्माकं पुनरागमात् ॥ २१

अन्नं मे पुरीष्य पाहि तन्मे गोपाय धनं मे शंस्याजुगुपस्तन्मे पुनर्देहि ॥ अग्ने सहस्राक्ष शतमूर्ध-
ञ्छतं तेजश्शतं ते प्राणास्सहस्रं व्यानाः ॥ त्वं साहस्रस्य राय ईशिषे तस्य नो रास्व तस्य ते भक्ति-
वानो भूयास्म ॥ २२-२४

[यो रेवान्यो अमीवहा० । ऋ. १,१८,२; नि. ३,२१ । मा नश्शंसो अररुषो० । ऋ. १,१८,३ । कदा चन स्तरीरसि० । ऋ. ८,५१,७; सा. ३००; तै. सं. १,४,२२,१; १,५,६,४ । परि ते दूड (ळ) भो० । ऋ.४,९,८ । योऽस्मान द्वेष्टि० । अथर्व. १०,५,१५-२२,२५-३५, १६,७,५; श्री. पू. अ. ३, सं. ६]

[३] मै. १,४,२; १,५,१४ (१२,५१-७७) । कपि. ५,२ । वा. २,२७; ३,३७,३९; १७,७१ । काण्व. २,४०-५०; ३, ४६-४८; १८,७१ ।

मम च नाम तव जातवेदो वाससी इव विवसानौ चराव ।
ते विभृवो दक्षसे जीवसे च यथायथं नौ तन्वौ जातवेदः ॥ २५

प्रजां मे नर्याजुगुपस्तां मे पुनर्देह्यग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासं सुगृहपतिर्मया त्वं गृहपतिना भूया अस्थूरि णौ गार्हपत्यं दीदायच्छतं हिमाद्वायू अन्नं मे पुरीष्याजुगुपस्तन्मे पुनर्देहि ॥ ३ ॥ २६

अग्निहोत्रे स्तोमो योक्तव्यो यस्य वा अग्निहोत्रे स्तोमो युज्यते वसीयान् भवत्युपप्रयन्तो अध्वरमिति प्रजा वा इमा उप तास्सत्सत्स्तोमस्ता एवोपयुनक्त्यस्य प्रत्नामनु द्युतमिति देवा वै प्रत्नं ते सत्सत्स्तोमस्तानेव प्रायुङ्क्त स्वर्गायोपोपेन्नु मघवन् भूय इन्नु त इतीय वा उप स्वर्गमेवत्वास्यां प्रतितिष्ठति या वै प्रजा आभविष्यन्तीस्ता उप ता एवोपयुनक्ति परि ते दूडभो रथ इति स्तोममेवैतया युक्तं परिगृह्णात्यग्निर्मूर्धा दिवः ककुदित्येषा मिथुना रेतस्वती पशव्या यासौ धुरं गायत्री प्रथमा सैषा गायत्र्योपास्थितोभा वामिन्द्राग्नी आहुवध्या इति सूर्यो वा इन्द्रस्सोऽग्निं नक्तं प्राविशत्युभा एवैनौ सहेते यासौ धुरं त्रिष्टुप्प्रथमा सैषा त्रिष्टुभोपास्थितायमिह प्रथमो धायि धातृभिरित्यग्निर्वा अस्मिँल्लोक इह प्रथमोऽधीयत यासौ धुरं जगती प्रथमा सैषा जगत्योपास्थितायं ते योनिर्ऋत्विय इतीयं वा अग्नेर्योनिरग्निस्सूर्यस्य यासौ धुरामनुष्टुप्प्रथमा सैषानुष्टुभोपास्थित ॥ दधिक्राव्णो अकारिषमित्येषा वा अग्नेः पशव्या तनूर्या दधिक्रावती तामेवास्य गृह्णात्युपस्थायुका एनं पशवो भवन्ति पशुर्वा अग्निर्यथा वै गौर्जीर्यति यथाश्वो यथा पुरुष एवमेष आहितो जीर्यत्यग्न्याधेयस्याग्निरुपस्थेयस्तन्वो वा अस्यैतास्ताभिरेवैनं पुनर्णवं करोति यच्छन्दोभिरुपतिष्ठते तैरेवैनं पुनर्णवं करोति यथाग्र आहित एवमस्य भवत्युपतिष्ठते योग एवास्यैष दम एवास्यैष याच्ञ एवास्यैष यथा श्रेयस आहृत्य नमस्यत्येवमेवं तत् ॥ ४ ॥ २७-२८

[४] मै. १,५,५-६ (४५—४६) । कपि. ५,३ । वा. ३,११-१६,३४,३६; २३,३२; ८,२,१३,१४; १५,२०,२६,५६; १२,५२; ३३,६ । काण्व. ३,१७-२२,४२,४४; २५,३४; १४,१४; १६,४१,४७,७८; ३२,६; १३,५३; ८,१ । [उपप्रयन्तो अध्वरं० । ऋ. १,७४,१; सा. १३७९; तै. सं. १,५,५,१ । अस्य प्रत्नामनु द्युतम्० । ऋ. ९,५४,१; सा. ७५५; तै. सं. १,५,५,१ । उपोपेन्नु मघवन् भूय० । ऋ. ८,५१,७; सा. ३००; तै. सं. १,४, २२,१; १,५,६,४ । परि ते दूड (ळ) भो० । ऋ. ४,९,८ । अग्निर्मूर्धा दिवः ककुद्० । ऋ. ८,४४,१६; सा. २७,१५३२; तै. सं. १,५,५,१; ४,४,१,१; तै. ब्रा. ३,५,७,१ । उभा वामिन्द्राग्नी० । ऋ. ६,६०,१३; तै. सं. १,१,१४,१; १,५,५,१ । अयमिह प्रथमो० । ऋ. ४,७,१; तै. सं. १,५,५,१ । अयं ते योनिर्ऋत्वियः० । ऋ. ३,२९,१०; अथर्व. ३,२०,१; तै. सं. १,५,५,२; ३,४,४,३; ४,७,१३,५; तै. ब्रा. १,२,१,१६; २,५,८,८ । दधिक्राव्णो अकारिषं० । ऋ. ४,३९,६; सा. ३५८; अथर्व. २०,१३७,३; तै. सं. १,५,११,४; ७,४,१९,४; ताण्ड्य ब्रा. १,६,१७]

अग्नीषोमीयया पूर्वपक्ष उपतिष्ठताग्नीषोमयोर्वा एतद्भागधेयं यत् पौर्णमासं ताभ्यामेवैनं परिददाति ता एनमनपक्रामन्तौ गोपायत ऐन्द्राग्न्यापरपक्ष इन्द्राग्न्योर्वा एतद्भागधेयं यदमावस्या ताभ्यामेवैनं परिददाति ता एनमनपक्रामन्तौ गोपायतोऽग्नीषोमा एवैनं पूर्वपक्षाय परिदत्त इन्द्राग्नी अपरपक्षाय संप्रदायँ ह वा एनं देवा अनपक्रामन्तो गोपायन्ति य एवं विद्वानग्निमुपतिष्ठते कस्मै कमग्निरुपस्थीयत इत्याहुरशित्रं वा एतदग्नेर्यदग्निमुपतिष्ठतेऽग्नय एवैतदशित्रं क्रियते सायमुपतिष्ठते न प्रातस्तस्मात् सायमतिथये प्रत्येनसो नोत तथा प्रातर्यज्ञस्य यज्ञस्य वा आशीरस्ति यदग्निमुपतिष्ठतेऽग्निहोत्रस्यैवैतामाशिषमाशास्ते प्रजापतिः प्रजा असृजत सोऽग्निमेवाग्रेऽसृजत तस्मा एतद्भागधेयमकल्पयद्यदग्न्युपस्थानं यदग्निमुपतिष्ठते स्वेनैवैनं भागधेयेन समर्धयत्यग्निर्वै प्रयुक्तिमभ्यकामयत यथाश्वो रथकाम्यति यदग्निमुपतिष्ठते प्रैवैनं युङ्क्ते काममस्यर्ध्नोति मनुष्यस्येन्नु यः काममृध्नोति स वसीयान् भवत्यृध्नोति वसीयान् भवति य एवं विद्वानग्निमुपतिष्ठत उपेति संभवत्येवैतयाग्निर्मूर्धेति रेत एवैतया प्रसिञ्चत्युभा वामिन्द्राग्नी इति प्राणापानौ वा इन्द्राग्नी प्राणापाना एवैतया दधात्ययमिह प्रथमो धायीति गर्भमेवैतया दधात्यस्य प्रत्नामनु द्युतमित्यूध एवैतया करोत्ययं ते योनिर्ऋत्विय इति जनयति चैवैतया वर्धयति च क्लृप्ता ह वा अस्य प्रजा जायते य एवं विद्वानग्निमुपतिष्ठते ॥ ५ ॥ २९

अहर्वै देवानामासीद्रात्रिरसुराणां ते देवास्तमसोऽन्धसो मृत्यो रात्र्या अभ्याप्लवमानाद्बिभयुस्ते छन्दोभिरग्निमन्वारभन्त गायत्र्या वसवस्त्रिष्टुभा रुद्रा जगत्यादित्या अम्भस्स्थेति पशव इन्धाना इति मनुष्यास्ते देवास्तमसोऽन्धसो मृत्यो रात्र्याः पारमतरन्यच्छन्दोभिरग्निमुपतिष्ठते तमस एवैषान्धसो मृत्यो रात्र्याः पारतीर्तिंस्त्वमग्ने सूर्यवर्चा इत्यग्नय एवैतामाशिषमाशास्ते सं मामायुषा वर्चसा सृजेत्यात्मन एवैतामाशिषमाशास्ते सं त्वमग्ने सूर्यस्य ज्योतिषागथा इत्यग्नय एवैतामाशिषमाशास्ते ॥ समृषीणाँ स्तुतेनेति च्छन्दाँसि वा ऋषीणाँ स्तुतं छन्दोभिरेवैनँ समर्धयति सं प्रियेण धाम्नेति पशवो वा अग्नेः प्रियं धाम पशुभिरेवैनँ समर्धयति समहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मीयेत्यात्मन एवैतामाशिषमाशास्त इन्धानास्त्वा शतं हिमा इत्येतद्ध वै दाशर्म आरुणिमुवाचाग्निमादधिवाँसमुद्दालकः केनाग्निरुपस्थेय इति तस्मै हैतदग्न्युपस्थानमुवाच स होवाचानयोपस्थेय इन्धानास्त्वा शतँ हिमा इति यो वा एतयोपतिष्ठते पापीयानस्माद् भ्रातृव्यो भवति पापीयान् सपत्नस्सर्वमायुरेत्या जीवितोरन्नमत्त्यायुर्धा अग्नेऽस्यायुर्मे धेहीत्यात्मन एवैतामाशिषमाशास्ते

[५] मै. १,५,७ (४८) । कपि. ५,४ । वा. ३,१२-१६; १३,१४; १५,२०,२६,५६; ३३,१; १२,५२ । काण्व. ३, १८-२२; १४,१४. १६,४१,४७,७८; ३२,६; १३,५३ ।

[६] मै. १,५,८-९ (४९-५०) । कपि. ५,५ । वा. ३,१७-२० । काण्व. ३,२३-२७ । [योऽस्मान् द्वेष्टि०...द्विष्मः । अथर्व. १०,५,१५-२१,२५-३५; १६,७,५; श्री. पू. अ. ३, सं. ६]

वयोधा अग्नेऽसि वयो मे धेहीत्यात्मन एवैतामाशिषमाशास्ते तनूपा अग्नेऽसि तन्वं मे पाहीत्यात्मन
एवैतामाशिषमाशास्ते यन्मे अग्न ऊन तन्वस्तन्म आपृणेति यदेवास्योनमात्मनस्तदापूरयतेऽग्नेस्समि-
दस्यभिशस्त्या मा पाहि सोमस्य यमस्येति सर्वस्मादेवैनमेताः पान्त्यग्ने यत् ते तपस्तेन तं प्रतितप
योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति तेनैवैनं प्रतितपति प्रतिशोचति प्रतितित्यक्ति प्रत्यर्चति प्रति-
हरत्येतद्ध वा आरुणिरुवाचैतेनाहँ सर्वान् सपत्नान् सर्वान् भ्रातृव्यानभ्यभवमिति श्रेयाञ्छ्रेयाना-
त्मना भवति पापीयान् पापीयान् य एनं द्वेष्टि योऽस्मा अरातीयति य एवं विद्वानग्निमुपतिष्ठतेऽग्ने
रुचां पते नमस्ते रुचे मयि रुचं धेहीति सर्वा एव शुचश्शमयित्वा रुचमात्मन् धत्ते चित्रावसो
स्वस्ति ते पारमशीयार्वाग्वसो स्वस्ति ते पारमशीयेति रात्री वै चित्रावसुरहर्वाग्वसुरहोरात्रयोरेवैषा
परीतिर्न नक्तं न दिवार्तिमार्च्छति य एवं वेद भङ्क्ते वा एते यज्ञस्याग्नी रात्र्यसा आदित्योऽहरेते
एव भङ्क्ते इष्ट्वे ईश्वरो भूतं च भविष्यच्चाज्ञातोर्य एवं वेद ॥ ६ ॥ ३०–३१

अम्भस्स्थेत्यम्भो होता महस्स्थेति महो होता ऊर्जस्स्थेत्यूर्जो होता रायस्पोषस्स्थेति रायस्पोषो
होता रेवती रमध्वमिति पशवो वै रेवतीः पशव एतद्यदन्तराग्नी स एवैना गोष्ठे रमयामकरस्मिन्
योना इत्येष ह्यासां योनिरस्मिन् गोष्ठ इत्येष ह्यासां गोष्ठोऽयं वो बन्धुरितो मापगातेत्युपोषैवैनं
पशवो यन्ति नापक्रामन्ति य एवं विद्वानग्निमुपातिष्ठत एति वा एषोऽस्माल्लोकाद्योऽग्निमुपतिष्ठतेऽम्भ-
स्स्थेति पशवो वा अम्भः पशवोऽन्तरिक्षं पशुष्वेव प्रतितिष्ठति बिभ्यति वै देवेभ्यः पशवो देवा-
नामेष एको योऽग्निमुपतिष्ठते ॥ तेऽस्मादीश्वराः प्रत्रसस्सँहितासि विश्वरूपीत्येतानि वै गोर्नामानि
सँहिता विश्वरूपा गौस्तान्येवास्य गृह्णात्यप्रत्रासाय सँहितासि विश्वरूपेति रूपेण रूपेण ह्येषा सँहिता
मोर्जा विशा गौपत्येना प्रजया रायस्पोषेणेत्येतैर्ह्येषा विशन्त्याविशति मयि वो रायश्श्रयन्ताँ सहस्र-
पोषं वः पुषेयमिति साहस्रीमेव पुष्टिं न्यङ्क्ते वत्सं पराहन्ति वत्सनिकान्ताः पशवः पशूनामनु-
क्शात्या अभिका एनं पशवो भवन्ति सप्त वै बन्धुमतीरिष्टका अग्नौ चित्य उपधीयन्ते तास्ता
अमुष्मै लोकाय सप्त ग्राम्यास्ता अत्रोपधेया गौश्चाश्वश्चाविश्चाजा चाश्वतरश्च गर्दभश्च पुरुषो यद्गां
पराहन्ति ता एवैतदपधत्तेऽथो गवैवैनं चिनुते ॥ ७ ॥ ३२--३३

सं पश्यामि प्रजा अहमिति सर्वा एव प्रजा अवरुन्द्ध इडप्रजसो मानवीरित्यैडीर्हि प्रजा मान-
वीर्ये च वै ग्राम्याः पशवो ये चारण्यास्त उभये नक्तँ सँसृज्यन्ते तस्मादपि येऽल्पाः पशवस्ते नक्तं
बहव इव दृश्यन्ते त ईश्वरा अमुं लोकमनुपदो यदेतद्यजुर्वदत्यस्मिन्नेवैनांल्लोके यच्छत्यग्निर्वा एत-
स्यांस्मिँल्लोकेऽग्रे जायते य आहिताग्निस्सोऽस्य पशूनुपजायमानान् हिनस्त्युप त्वाग्ने दिवे दिव इत्यु-

[७] मै. १,५,९-१० (५०-५१) । कपि. ५,५ । वा. ३,२०-२२ । काण्व. ३,२७-२९ ।
[८] मै. १,५,१० (५०-५३) । कपि. ५,५ । वा. ३,२२—२५ । काण्व. ३,३०—३३ ।

पैवैनं जायमानेभ्यश्शमयति दोषावस्तर्धिया वयं नमो भरन्त एमसीति नमस्वत्योपास्थित राजन्त-
मध्वराणां गोपामृतस्य दीदिविम् । वर्धमानँ स्वे दम इति वृधद्वत्या स नः पितेव सूनवेऽग्ने सूपा-
यनो भव सचस्वा नस्स्वस्तय इति स्वस्तिमत्याग्ने त्वं नो अन्तम इत्येतद्ध वै दिवोदासो भैमसे-
निरारुणिमुवाचाग्निमादधिवाँसमुद्दातः केन गार्हपत्य उपस्थेय इति तस्मै हैता उवाच स होवाचा-
भिरुपस्थेयोऽग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्य इत्येषा वा अग्नेः प्रिया तनूर्या
वरूथ्या प्रिययैवैनं तन्वोपास्थित द्विपदाभिर्द्विपात् पुरुषो गृहा गार्हपत्यो गृहेष्वेव प्रतितिष्ठति तिस्रः
पूर्वाश्चतस्र एतास्तास्सप्त सप्त ग्राम्याः पशवस्तानेवावरुन्द्ध ऊर्जा वः पश्याम्यूर्जा मा पश्यतेत्यूर्ज-
मेव गृहेषु पशुष्वात्मन् धत्तेऽथो या अमूरिष्टका उपधत्ते ता एवैतत् कल्पयतीडास्स्थ मधुकृत इतीडा
होता मधुकृतस्स्योना माविशतेरंमद इति स्योना होता इरया सहाविशन्ति मयि वो रायश्श्रयन्ताँ
सहस्रपोषं वः पुषेयमिति साहस्रीमेव पुष्टिं न्यङ्क्ते वत्सं पराहन्ति वत्सनिकान्ताः पशवः पशूना-
मनुक्शात्या अभिका एनं पशवो भवन्त्यथो इष्टकामेवैतां गार्हपत्य उपाधत्ते ॥ ८ ॥ ३४

महि त्रीणामवोऽस्त्वित्येष प्राजापत्यस्तृचः प्राजापत्या इमाः प्रजास्सर्वा एव प्रजा अवरुन्द्धे
प्रजापतिर्वा एताः प्रजापतिमेवैतदुपेत्य सर्वमाप्त्वा सर्वमवरुध्य सोमानँ स्वरणं कृणुहि ब्रह्मणस्पत
इति ब्राह्मणस्पत्या ब्रह्मवर्चसमेवैतयात्मन् धत्ते वैश्वदेवीर्वा एता वैश्वदेवीरिमाः प्रजा ब्रह्मणो योनेः
प्रजाः प्रजायन्ते यदेषा ब्राह्मणस्पत्या ब्रह्मण एवैना योनेः प्रजनयत्येताभिर्वा अदितिः पुत्रान-
न्वैक्षत यत् सोममाहरन्नमुष्माल्लोकात् स्वस्ति पुनरागच्छन् सह सोमेन यमेव कामं कामयते
तँ स्पृणोति यं कामयेत स्वस्ति पुनरागच्छेदिति तमेताभिरन्वीक्षेत स्वस्त्येव पुनरागच्छति ॥
कदा चन स्तरीरसि परि ते दूडभो रथ इति स्तोमस्यैवैतद्योगः कदा चन स्तरीरसीत्ये-
तद्ध वा आरुणिरुवाच न तावद्रात्रीँ स्तर्यमुवस यावदेतामृचमश्रृणवमिति न रात्रीँ स्तर्यं
वसति य एवं वेद गायत्रो वा अग्निर्गायत्रच्छन्दास्तं छन्दसा व्यर्धयति यद्विच्छन्दोभिरुपतिष्ठते
यदेषा गायत्र्युत्तमा स्वेनैवैनं छन्दसा समर्धयति सर्वं वा एष आप्त्वा सर्वमवरुध्य स्वर्गं लोकमेति
योऽग्निमुपतिष्ठते व्यस्य प्रजा छिद्यते यत् पुत्रं ह्वयति प्रजामेवानुसंतनोति मानुषमिव वा एतदुपा-
वर्तत यत् पुत्रं ह्वयत्यच्छिन्नो दैव्यस्तन्तुर्मा मनुष्यश्छेदीति देवलोकं चैव मनुष्यलोकं च संतनो-
त्युभौ लोका आजयति ॥ निम्रदोऽसीत्यव तं गृह्णाति योऽस्य पश्चाद् भ्रातृव्योऽभिभूरसीत्याभि तं
भवति य एनेन सदङ् प्रभूरसि प्राहं तमतिभूयासमित्यति तं क्रामति य एवैनं पूर्वोऽतिक्रान्तो
भ्रातृव्यः पूषा मा प्रपथे पातु पूषा मा पशुपाः पातु पूषा माधिपतिः पात्वितीयं वै पूषा प्रपथेऽन्तरिक्षं

[९] मै. १,५,११(५४) । कपि. ५,५ । वा. ३,२८,३१,३४,३६ । काण्व. ३,३६,३९,४२,४४ । [महि त्रीणामवोऽस्तु० ।
ऋ. १०,१८५,१; सा. १९२ । सोमानँ स्वरणं० । ऋ. १,१८,१, सा. १३९,१४६३; तै. सं. १,५,६,४; तै. आ.
१०,१,११; नि. ६,१० । कदा चन स्तरीरसि० । ऋ. ८,५१,७; सा. ३००; तै. सं. १,४,२२,१; १,५,६,४]

पशुपा द्यौरधिपतिरिति एवैनं लोकाः पान्त्यग्निं समिन्धेऽनुसंतत्यै प्राची दिगग्निर्देवतेत्येता एव
स देवता ऋत्वा पराभवति य एनमेताभ्यो दिग्भ्योऽभिदासति ज्योतिषे तन्तव आशिषमाशास
इत्याशिषमेवाशास्ते योऽस्य प्रियः पुत्रस्स्यात् तस्य नाम गृह्णीयात् तस्मिन्नेव ता आशिषो दधाति
॥ ९ ॥ ३५--३७

अहर्वावासीन्न रात्री सा यमी भ्रातरं मृतं नामृष्यत तां यदपृच्छन्यमि कर्हि ते भ्रातामृतेत्यद्ये-
त्येवाब्रवीत् ते देवा अब्रुवन्नन्तर्दधामेदं रात्रीं करवामेति ते रात्रीमकुर्वँस्ते रात्र्यां भूतायां पशून्ना-
पश्यन् सावेन्न वै पश्यन्तीति सा न व्यौच्छदरेत्कलस्यत पशुषु तान् देवा इच्छन्तः पल्यायन्त
ताँश्छन्दोभिरन्वपश्यँस्तस्माच्छन्दोभिर्नक्तमग्निरुपस्थेयः पशूनामनुक्शात्यै नास्मात् पशवस्तिरो-
भवन्ति य एवं वेद सावेदनु वा अरुयन्निति सा व्यौच्छत् ते देवा अब्रुवन्नमा वै नो वसभूदिति
सामावस्यामा ह वा अस्य वसु भवति विन्दतेऽन्यस्य वसु नास्यान्यो वसु विन्दते य एवं विद्वान-
ग्निमुपातिष्ठते॥ देवा वा अह्ना रक्षाँसि निरघ्नँस्तानि रात्रीं प्राविशँस्ता देवा न व्येतुमधृष्णुवँस्त इन्द्रम-
ब्रुवँस्त्वं वै न ओजिष्ठोऽसि त्वामिमां वीहीति स्तुत मेत्यब्रवीत्तास्तुतो वीर्यं कर्तुमर्हामीति तेऽब्रुवन्नेष
तेऽग्निर्नेदिष्ठँ स त्वा स्तौत्विति तमग्निरस्तौत् स स्तुतस्सर्वा मृधस्सर्वा नाष्ट्रास्सर्वाणि रक्षाँस्यतरदिन्द्रो
यजमानो यदग्निमुपतिष्ठते सर्वा एव मृधस्सर्वा नाष्ट्रास्सर्वाणि रक्षाँसि तरति नास्य नक्तं रक्षाँसीशते
य एवं वेद त्वष्टा वै भूत्वा प्रजापतिः प्रजा असृजत त्वष्टा यजमानस्स यद्वाचावदत् तदभवद्यद्
वाचा वदति तद्भवति यद्यदेव वाचा वदति तत् तद्भवति तत् तत् सृजते ॥१०॥ ३८–३९

धनं मे शँस्य पाहि तन्मे गोपायेति प्रवत्स्यन्नाहवनीयमुपतिष्ठेत धनस्य वा एष गोप्ता तदे-
वास्मै परिददाति मम नाम प्रथमं जातवेद इत्यग्निनैवैतत्तन्वं विपरिधत्ते यथान्ते सतोऽग्निहोत्रँ हुतं
यथेष्टमेवमस्यापि प्रवसतो भवति प्रजां मे नर्य पाहि तां मे गोपायेति प्रजाया वा एष गोप्ता तामे-
वास्मै परिददातीमान्मे मित्रावरुणौ गृहान् गोपायतं युवमिति मित्रेण च वा इमाः प्रजा गुप्ताः
क्रूरेण च मित्रं मित्रः क्रूरं वरुण इयं पूर्वैताभ्य एव देवताभ्यो गृहान् परिददात्यश्नं मे पुरीष्य पाहि
तन्मे गोपायेत्यन्नस्य वा एष गोप्ता तदेवास्मै परिददाति धनं मे शँस्याजुगुपस्तन्मे पुनर्देहीति धन-
मेव गुप्तं पुनरात्मन् धत्तेऽग्ने सहस्राक्ष शतमूर्धञ्छततेज इत्येतैर्वा एतौ व्यृध्येते विप्रवसन्तौ प्राणे-
रपानैस्तेजोभिर्वीर्यैर्यदेतैरुपतिष्ठते तैरेव समृध्येते मम च नाम तव च जातवेद इत्यग्निनैवैतत् तन्वं
यथायथं कुरुते प्रजां मे नर्याजुगुपस्तां मे पुनर्देहीति प्रजामेव गुप्तां पुनरात्मन् धत्तेऽग्ने गृहपत इति

[१०] मै. १,५,१२ (५५) । कपि. ५,६ ।
[११] मै. १,५,१४ (६३—६४, ६६-७१) । कपि. ६,१ । वा. ३,३७; १७,७१ । काण्व. ३,४३; १८,७१ ।

नार्तिमार्च्छतोऽग्निश्च यजमानश्च न श्रेयं नीतोऽश्नं मे पुरीष्याजुगुपस्तन्मे पुनर्देहीत्यन्नमेव गुप्तं
पुनरात्मन् धत्ते ॥ ११ ॥ ४०

प्र वेधसे कवये वेद्याय वचो वन्दारु वृषभाय वृष्णे ।
यतो भयमभयं तन्नो अस्त्वव देवानां यजेह्येळानि ॥ ४१
समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥ ४२
उदग्ने तव तद् घृतादर्ची रोचत आहुतम् । निंसानं जुह्वो मुखे ॥ ४३
उप त्वा जुह्वो मम घृताचीर्यन्तु हर्यत । अग्ने हव्या जुषस्व नः ॥ ४४
प्रजा अग्ने संवासयाशाश्च पशुभिस्सह । राष्ट्राण्यस्मा आधेहि यान्यासन् सवितुस्सवे ॥ ४५
सं वस्सृजामि हृदयँ सँसृष्टं मनो अस्तु वः ।
सँसृष्टास्तन्वस्सन्तु वस्सँसृष्टः प्राणो अस्तु वः ॥ ४६
सं या वः प्रियास्तन्वस्सँप्रिया हृदयानि वः ।
आत्मा वो अस्तु सँप्रियस्सँप्रियास्तन्वो मम ॥ ४७
यो अश्वत्थश्शमीगर्भ आरुरोह त्वय्यपि । तं ते गृह्णामि यज्ञियैः केतुभिस्सह ॥ ४८
मयि गृह्णाम्यहमग्रे अग्निं रायस्पोषेण सह वर्चसेह देवाः ।
मयि प्रजां मयि पुष्टिं दधामि मदेम शतहिमास्सुवीराः ॥ ४९
यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्याँ आविवेश ।
तमात्मनि परिगृह्णीमहे वयं मैषो अस्मानवहाय परागान्मा वयमेतमवहाय परागाम ॥ ५०
मही विश्पत्नी सदनी ऋतस्यार्वाची एतं धरुणे रयीणाम् ।
अन्तर्वती जन्यं जातवेदसमध्वराणां जनयतं पुरोगाम् ॥ ५१
उत् समुद्रान्मधुमाँ ऊर्मिरागात् साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं चेषमूर्जं मधुमत् सम्भरेम ॥ ५२
इयत्यग्र आसीरद्यो देवि प्रथमाना पृथग्यत् ।
देवैर्नुत्ता व्युसर्पो महित्वा अदृँहथाश्शर्कराभिस्त्रिविष्टपि ।
अजयो लोकान् प्रदिशश्चतस्रः ॥ ५३

[१२] मै. १,६,१ (२—४,१०,१२) । कपि. ६,१ । वा० ३,१,४; १२,३०; १३,१ । काण्व. ३,१,४; १३,३१;
१४,१ । [प्र वेधसे कवये० । ऋ. ५,१५,१; तै. ब्रा. १,२,१,९ । समिधाग्निं दुवस्यत० । ऋ. ८,४४,१;
तै. सं. ४,२,३,१; तै. ब्रा. १,२,१,९ । उदग्ने तव तद् घृता० । ऋ. ८,४३,१० । उप त्वा जुह्वो मम० ।
ऋ. ८,४४,५; सा. १५४२ । मयि गृह्णाम्यहमग्रे अग्निं० । अथर्व. ७,८२,२ । यो नो अग्निः पितरो० ।
अथर्व. १२,२,३३]

उदैष्यग्ने अधि मातुः पृथिव्या विश आविश महतस्सधस्थात् ।
आशुं त्वाजौ दधिरे देवयन्तो हव्यवाहं भुवनस्य गोपाम् ॥ ५४
यदीदं दिवो यदि वा पृथिव्यास्संबभूव सुकृतो रणयोः ।
तयोः पृष्ठे सीदतु जातवेदाः प्रजामस्मभ्यं जनयन् रयिं च ॥ ५५
चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदं स्वर्विदम् ।
विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः ॥ ५६
यत् पृथिव्या अनामृतं संबभूव त्वे सचा । तदग्निरग्नये ददत् तस्मिन्नाधीयतामयम् ॥ ५७
यदन्तरिक्षस्य यद्दिवो अनामृतं संबभूव त्वे सचा ।
तदग्निरग्नये ददत् तस्मिन्नाधीयतामयम् ॥ १२ ॥ ५८
इत एवं प्रथमं जज्ञे अग्निरेभ्यो योनिभ्यो अधि जातवेदाः ।
स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ५९

सहाग्ने अग्निना जायस्व सह रय्या सह पुष्ट्या सह प्रजया सह ब्रह्मवर्चसेनाजन्यग्निर्होता पूर्वः पूर्वेभ्यः पवमानः पावकश्शुचिरीड्योऽसुरसि प्रथमजा असुनामासुरुच्यसेऽसुरहमसुस्त्वं किमद्यासुरंसु करदसोरसुं प्रतीतन संजानीध्वं भूर्भुवरङ्गिरसां त्वा देवानां व्रतेनादध आदित्यानां त्वा देवानां व्रतेनादधे द्यौर्महासि भूमिर्भूम्ना तस्यास्ते देव्यदित उपस्थेऽन्नादमन्नाद्यायान्नपत्यायादधे ॥ ६०

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ ६१

अग्ने गृहपतेऽहे बुध्न्य परिषद्य दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय पृथिव्या मूर्धन् सीद यज्ञिये लोके यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामि ॥ ६२

यास्ते शिवास्तन्वो जातवेदो या अन्तरिक्षे दिवि याः पृथिव्याम् ।
ताभिस्संभूय संगणस्सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ ६३

सं त्वमग्ने दिव्येन ज्योतिषा भाहि समन्तरिक्ष्येण सं पार्थिवेन वैश्वानर्या समिधा दीदिही न ऊर्जस्वत्या वर्चस्वत्या भास्वत्या रश्मिवत्या ज्योतिष्मत्या ॥ या वाजिन्नग्नेः प्रिया तनूः पशुषु पवमाना तामावह तया मा जिन्व या वाजिन्नग्नेः प्रिया तनूरप्सु पावका तामावह तया मा जिन्व या

[चन्द्रमग्निं चन्द्ररथं० । ऋ. ३,३,५]
[१२] मै. १,६,१-२ (६-९,१३—१४,१६,१९,२१—२२) । कपि. ६,२—३ । वा. १३,३४; ३,५—८; ५,२३; १७,६६ । काण्व. १४,३६; ३,५—८; ५,२९; १८,६६ । [स गायत्र्या त्रिष्टुभा०...प्रजानन्। ऋ. १०,१६,९; अथर्व. १२,२,८ । आयं गौः पृश्नि० । ऋ. १०,१८९,१; सा. ६३०,१३७६; अथर्व. ६,३१,१; २०,४८,४; तै. सं. १,५,३,१ । यास्ते शिवास्तन्वो० । अथर्व. ९,२,२५]

वाजिन्नग्नेः प्रिया तनूस्सूर्ये शुक्रा शुचिमती तामावह तया मा जिन्वौजसे बलाय त्वोद्यच्छे वृषण शुष्मायायुषे वर्चसे । शस्तिर्नृरसि वृत्रतूरस्मान् पथो ज्यैष्ठ्यान्मा योषम् ॥ ६४-६५
प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्ने भवेह ।
विश्वा आशा दीद्यद्विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥ ६६
भुवरङ्गिरसां त्वा देवानां व्रतेनादध आदित्यानां त्वा देवानां व्रतेनादधे द्यौर्महासि भूमिर्भूम्ना तस्यास्ते देव्यदित उपस्थेऽन्नादमन्नाद्यायान्नपत्यायादधे ॥ ६७
अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन्महिषो दिवम् ॥ ६८
अग्ने नय मयोभो सुशेव दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय पृथिव्या मूर्धन् सीद यज्ञिये लोके यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामि ॥ ६९
यास्ते शिवास्तन्वो जातवेदो या अन्तरिक्षे दिवि याः पृथिव्याम् ।
ताभिस्संभूय संगणस्सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ ७०
सं त्वमग्ने दिव्येन ज्योतिषा भाहि समन्तरिक्ष्येण सं पार्थिवेन वैश्वानर्या समिधा दीदिही न ऊर्जस्वत्या वर्चस्वत्या भास्वत्या रश्मिवत्या ज्योतिष्मत्या नाकोऽसि ब्रध्नः प्रतिष्ठा संक्रमणं भूर्भुवस्स्वरङ्गिरसां त्वा देवानां व्रतेनादध आदित्यानां त्वा देवानां व्रतेनादधे द्यौर्महासि भूमिर्भूम्ना तस्यास्ते देव्यदित उपस्थेऽन्नादमन्नाद्यायान्नपत्यायादधे ॥ ७१
त्रिंशद्धाम विराजति वाक्पतङ्गो अशिश्रयुः । प्रति वस्तोरह द्युभिः ॥ ७२
अग्ने सम्राडजैकपादाहवनीय दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय पृथिव्या मूर्धन् सीद यज्ञिये लोके यो नो अग्ने निष्ट्यो योऽनिष्ट्योऽभिदासतीदमहं तं त्वयाभिनिदधामि ॥ ७३
यास्ते शिवास्तन्वो जातवेदो या अन्तरिक्षे दिवि या पृथिव्याम् ।
ताभिस्संभूय संगणस्सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥ ७४
सं त्वमग्ने दिव्येन ज्योतिषा भाहि समन्तरिक्ष्येण सं पार्थिवेन वैश्वानर्या समिधा दीदिही न ऊर्जस्वत्या वर्चस्वत्या भास्वत्या रश्मिवत्या ज्योतिष्मत्या ॥ ७५
यस्ते अप्सु महिमा यो वनेषु य ओषधीषु पशुष्वाविवेश ।
यत्र यत्र बिभ्रतो जातवेदा अग्ने ततो द्रविणोदा न एहि ॥ ७६

[अस्य प्राणा० (अन्तश्चरति) रोचना० । ऋ. १०,१८९,२; सा. १३७७; अथर्व. ६,३१,२; २०,४८,५; तै. सं. १,५,३,१ । त्रिंशद्धाम विराजति० । ऋ. १०,१८९,३; सा. ६३२,१३७८; अथर्व. ६,३१,३; २०,४८,६; तै. सं. १,५,३,१ । यस्ते अप्सु महिमा० । अथर्व. १९,३,२ (पूर्वार्धः) । यत्र यत्र बि (बि) भ्रतो० । अथर्व. १९,३,१ (उत्तरार्धः)]

मनुष्वत् त्वा निधीमहि मनुष्वत् समिधीमहि ।
अग्ने मनुष्वदङ्गिरो देवान् देवयते यज ॥ १३ ॥ ७७

सप्त ते अग्ने समिधस्सप्त जिह्वास्सप्तर्षयस्सप्त धाम प्रियाणि सप्त होत्रा अनुविद्वान् सप्त योनीरापृणस्वा घृतेन या ते अग्ने पवमाना तनूः पृथिवीमन्वाविवेश याग्नौ या रथन्तरे या गायत्रे छन्दसि या त्रिवृति स्तोमे याग्नौ तां त एतदवरुन्धे तस्यै स्वाहा या ते अग्ने पावका तनूरन्तरिक्षमन्वाविवेश या वाते या वामदेव्ये या त्रैष्टुभे छन्दसि या पञ्चदशे स्तोमे या पशुषु तां त एतदवरुन्धे तस्यै स्वाहा या ते अग्ने शुचिस्तनूर्दिवमन्वाविवेश या सूर्ये या बृहति या जागते छन्दसि या सप्तदशे स्तोमे याप्सु तां त एतदवरुन्धे तस्यै स्वाहा ॥ वातः प्राणस्तदयमात्मा पुरीषमसि संप्रियः पशुभिर्यच्छा लोकाय तनयाय शं योः प्रजां मे यच्छ घर्मश्शिरस्तदयमग्निः पुरीषमसि संप्रियः पशुभिस्त्वदितं नः पितुं पच पशून् मे यच्छार्कश्चक्षुस्तदसौ सूर्यः पुरीषमसि संप्रियः पशुभिर्यद् ते शुक्र शुक्रं धाम शुक्रा तनूश्शुक्रं ज्योतिरजस्रं यत् तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधे वर्चो मे यच्छ येऽग्नयो दिवो येऽन्तरिक्षाद्ये पृथिव्यास्समाजग्मुरिषमूर्जं वसानास्तेऽस्मा अग्नये द्रविणानि दत्त्वा तृप्ताः प्रीताः पुनरस्तं परेत ॥ ७८-७९

कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः ।
कल्पन्तामग्नयः पृथक् मम ज्यैष्ठ्याय सव्रताः ॥ ८०
येऽग्नयस्समनसस्सचेतस ओषधीष्वप्सु प्रविष्टाः ।
ते सम्राजमभिसंयन्तु सर्वे ऊर्जं नो धत्त द्विपदे चतुष्पदे ॥ ८१
अयमग्निश्श्रेष्ठतमोऽयमस्तु यशस्तमः ।
अयं सहस्रसातमस्सुकृतं योनिमासदत् ततो वरान् वृणीमहे ॥ ८२
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥ ८३
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥ १४ ॥ ८४

अदितिर्वै प्रजाकामौदनमपचत् तस्योच्छिष्टमाश्नात् सा गर्भमधत्त तत आदित्या अजायन्त य एष

[मनुष्वत्त्वा निधीमहि० । ऋ. ५,८६,२०; सा. ८२२]
[१३] मै. १,६,२,७ (१९,२४,२९-३२,३४-३८,४४) । कपि. ६,३-४ । वा. १७,७९; १३,२५; १४,६,१५-१६,२७; १५,५७; १०,२७; २०,२; ३३,५७ । काण्व. १८,७९; १४,२६; १५,५,१६,३१,७९; [निषसाद धृतव्रतो० । ऋ. १,२५,१०; तै. सं. १,८,१६,२; तै. ब्रा. १,७,१०,२; २,६,५,१ । प्र नूनं ब्रह्मणस्पति० । ऋ. १,४०,५]
[१५] कपि. ६,५ ।

ओदनः पच्यत आरम्भणमेवैतत् क्रियत आक्रमणमेव प्रादेशमात्रीस्समिधो भवन्त्येतावान् ह्यात्मा प्रजापतिना संमितोऽग्नेर्वै या यज्ञिया तनूरश्वत्थे तया समगच्छतैषास्य घृत्या तनूर्यद् घृतं यद् घृतेन समिधोऽनक्ति ताभ्यामेवैनं तनूभ्यां संगमयति निर्मार्गस्मादधात्यपगूर्त्या वै वीर्यं क्रियते यन्निर्मार्गस्मादधात्यपगूर्त्या एव संवत्सरो वै प्रजननमग्निः प्रजनयिता तत् प्रजनन यत् पुरा संवत्सराद्यां समिध आदधाति प्रजननादेवैनं प्रजनयिता प्रजनयत्यभक्तर्तुर्वै पुरुषो न हि तद्वेद यमृतुमभिजायते यन्नक्षत्रं यत् समिध आदधाति य एवास्यर्तुर्यन्नक्षत्रं तदाप्नोति य एष ओदनः पच्यते योनिरेवैष क्रियते यत् समिध आधीयन्ते रेतस्तद्धीयते संवत्सरे वै रेतो हितं प्रजायते यत् संवत्सरे पर्येतेऽग्निमाधत्ते प्रजातमेवैनमाधत्ते द्वादशसु रात्रीषु पुराधेयास्ता हि संवत्सरस्य प्रतिमाथो तिसृष्वथो द्वयोरथो पूर्वेद्युराधेयास्त एवाग्निमादधानेनादित्या वा इत उत्तमा अमुं लोकमायंस्ते पथिरक्षयस्त इयक्षमाणं प्रतिनुदन्त उच्छेषणभागा वा आदित्वा यदुच्छिष्टेन समिधोऽनक्ति तेभ्य एव प्रायोचत तेभ्य एव प्रोच्य स्वर्गं लोकमारोहति ॥ १५ ॥ ८५

आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ८६
कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये ।
परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥ ८७
अग्निर्होता साध्वीमकरग्न आयूंषि पवसे ॥ ८८
अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम् । दधद्रयिं मयि पोषम् ॥ ८९
यो अश्वस्य दधिक्राव्णो अकारीत् समिद्धे अग्ना उषसो व्युष्टौ ।
अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥ ९०
महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।
यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम् ॥ ९१

[१६] वा. १९,३८; ३५,१६; ८,३८; २६,६-७; १३,५२; १८,७७ । काण्व. ८,१९-२०; २१,४०; २९,३७-३८; ३५,४८; २८,६,९; १४,५४; २०,४६ । [आ वो राजानमध्वरस्य० । ऋ. ४,३,१; सा. ६९; तै. सं. १,३,१४,१ । कद्धिष्ण्यासु वृधसानो० । ऋ. ४,३,६ । अग्निर्होता० । ऋ. १,१,५; ३,११,१; ४,१५,१; ५,१,६; ५,९,२; ६,१५,१३; तै. ब्रा. १,३,१४,१; ३,५,१२,१; ३,६,३,१ । साध्वीमक० । ऋ. १०,५३,३; तै. सं. १,३,१४,१ । अग्न आयूंषि पवसे० । ऋ. ९,६६,१९; सा. ६२७, १४६४, १५१८; तै. सं. १,३,१४,७; ४,२९,१; ५,५,१; ६,६,२; तै. ब्रा. २,६,३,४; तै. आ. २,५,१ । अग्ने पवस्व स्वपा० । ऋ. ९,६६,२१; सा. १५२०; तै. सं. १,३,१४,८; ५,५,२; ६,६,२; तै. ब्रा. २,६,३,४; तै. आ. २,५,१ । यो अश्वस्य दधिक्राव्णो० । ऋ. ४,३९,३ । महश्चर्कर्म्यर्वतः क्रतुप्रा० । ऋ. ४,३९,२]

ऋतावानं वैश्वानरं वैश्वानरस्य सुमतौ स्याम ॥ ९२
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥ ९३
तृपु यदन्ना तृपुणा ववक्ष तृपुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेडिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥ ९४
अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य । तान्यस्मभ्यं रासते ॥ ९५
त्वामग्ने वसुपतिं वसूनामभि प्रमन्दे अध्वरेषु राजन् ।
त्वया वाजं वाजयन्तो जयेमाभिष्याम पृत्सुतीर्मर्त्यानाम् ॥ ९६
त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ९७
तुभ्यं भरन्ति क्षितयो यविष्ठ बलिमग्ने अन्तित ओत दूरात् ।
आ भन्दिष्ठस्य सुमतिं चिकिद्धि बृहत् ते अग्ने महि शर्म भद्रम् ॥ ९८
कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः । अग्निर्यद्रोधति क्षमि ॥ ९९
त्वे वसूनि पूर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन् सं सौभगानि दधिरे पावके ॥ १००
प्र वस्सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्च गाय च वेधसे ॥ १०१
प्र वश्शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति ॥ १०२
वि ज्योतिषा वि पाजसा ॥ १०३
सं त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीद्यत् ॥ १०४
तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम ।
स यक्षद्विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत् ॥१६॥ १०५

[ऋतावानं वैश्वानरं० । अथर्व. ६,३६,१; आ. गृ. अ. ८ । वैश्वानरस्य सुमतौ० । ऋ. १,९८,१; मै. ग. १,५,११,३; नि. ७,२२ । उक्षान्नाय वशान्नाय० । ऋ. ८,४३,११; अथर्व. ३,२१,६; २०,१,३; तै. सं. १,३,१४,७ । तृपु यदन्ना तृपुणा० । ऋ. ४,७,११ । अग्निरीशे वसव्यस्य० । ऋ. ४,५५,८ । त्वामग्ने वसुपति० । ऋ. ५,४,१; तै. सं. १,४,४६,२ । त्वं यविष्ठ दाशुषो० । ऋ. ८,८४,३; सा. १२४६ । तुभ्यं भरन्ति क्षितयो० । ऋ. ५,१,१०; तै. ब्रा. २,४,७,९ । कृष्णा रजांसि पत्सुतः० । ऋ. ८,४३,६ । त्वे वसूनि पू(पु०)र्वणीक० । ऋ. ६,५,२; तै. सं. १,३,१४,२ । प्र वस्सखायो अग्नये० । ऋ. ६,१६,२२ । प्र वश्शुक्राय भानवे० । ऋ. ७,४,१; तै. ब्रा. २,८,२,३ । वि ज्योतिषा० । ऋ. ५,२,९; अथर्व. ८,३,२४; तै. सं. १,२,१४,७; नि. ४,१८ । वि पाजसा० । ऋ. ३,१५,१; तै. सं. १,१,५,१ । स त्वमग्ने प्रतीकेन० । ऋ. १०,११८,८; तै. सं. २,५,१२,५ । तं सुप्रतीकं सुदृशं० । ऋ. ६,१५,१०; तै. सं. २,५,१२,५]

युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव । नि होता पूर्व्यस्सदः । १०६
उत नो देव देवाँ अच्छा वोचो विदुष्टरः । श्रद्विश्वा वार्या कृधि ॥ १०७
त्वं ह यद्यविष्ठ्य सहसस्सून आहुत । ऋतावा यज्ञियो भुवः ॥ १०८
अयमग्निस्सहस्रिणः ॥ १०९
तं नेमिमृभवो यथा नमस्व सहूतिभिः । नेदीयो यज्ञमङ्गिरः ॥ ११०
कस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥ १११
कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥ ११२
मा नो देवानां विशः प्रस्नातीरिवोस्राः । कृशं न हासुरघ्न्याः ॥ ११३
मा नस्समस्य दूढ्यः परिद्वेषसो अंहतिः । ऊर्मिर्न नावमा वधीत् ॥ ११४
नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः । अमैरमित्रमर्दय ॥ ११५
कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् । उरुकृदुरु णस्कृधि ॥ ११६
मा नो अस्मिन् महाधने परावर्ग्भारभृद्यथा । संवर्गं सं रयिं जय ॥ ११७
परस्या अधि संवत एवा पु ब्रवाणि ते ॥ १७ ॥ ११८
[५५९]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायामालोमी नाम सप्तमं स्थानकं संपूर्णम् ॥ ७ ॥

अथाष्टमं स्थानकम् ।

दिशस्थानकम् ।

दिशो वै नाकल्पन्त न प्राजायन्त तत एतामग्नये प्राचीं दिशमरोचयन्यत् कृत्तिका यत् कृत्तिका-
स्वग्निमाधत्ते प्राच्यामेवैनं दिश्याधत्त एष वावैकः प्राङवस्यति य आहिताग्निः प्रत्यञ्चोऽन्य आग्नेय-

[१७] वा. १३,३७; ३३,४; १५,२१; ११,७१; २६,१३ । काण्व. १४,३९; ३२,४; १६,४२; १२,७२ । [युक्ष्वा हि देवहूतमाँ० । ऋ. ८,७५,१; तै. सं. २,६,११,१ । उत नो देव देवाँ० । ऋ. ८,७५,२; तै. सं. २,६,११,१ । त्वं ह यद्यविष्ठ्य० । ऋ. ८,७५,३; तै. सं. २,६,११,१ । अयमग्निस्सहस्रिणः० । ऋ. ८,७५,४; तै. सं. २,६,११,१; ४,४,४,१ । तं नेमिमृभवो यथा० । ऋ. ८,७५,५; तै. सं. २,६,११,१ । क(त) स्मै नूनमभिद्यवे० । ऋ. ८,७५,६; तै. सं. २,६,११,१ । कमु ष्विदस्य सेनयाग्ने० । ऋ. ८,७५,७; तै. सं. २,६,११,२ । मा नो देवानां विशः० । ऋ. ८,७५,८; तै. सं. २,६,११,२ । मा नस्समस्य दूढ्यः० । ऋ. ८,७५,९; तै. सं. २,६,११,२; नि. ५,२३ । नमस्ते अग्न ओजसे० । ऋ. ८,७५,१०; सा. ११,१६४८; तै. सं. २,६,११,२ । कुवित्सु नो गइ (गवि०) ष्टये० । ऋ. ८,७५,११; सा. १६४९; तै. सं. २,६,११,३ । मा नो अस्मिन् महाधने० । ऋ. ८,७५,१२; सा. १६५०; तै. सं. २,६,११,३ । परस्या अधि संवत० । ऋ. ८,७५,१५; तै. सं. २,६,११,३; ४,१,९,२ । एवा पु ब्रवाणि ते० । ऋ. ६,१६,१६; सा. ७,७०५]
[१] मै. १,६,९ (४९) । कपि. ६,६ । तै. ब्रा. १,१,२ । मा. श्रौ. १,५,१ ।

मेतन्नक्षत्रं यत् कृत्तिका यत् कृत्तिकास्वग्निमाधत्ते स्व एवैनं नक्षत्र आधत्ते प्रजापतेर्वा एतच्छिरो यत् कृत्तिका यत् कृत्तिकास्वग्निमाधत्ते शीर्षण्यो मुख्यो भवति सप्त वै कृत्तिकास्सप्त शीर्षण्याः प्राणाः प्राणा इन्द्रियाणि प्राणानेवेन्द्रियाण्याप्नोति पुष्टिमावद्ध्यिष्ठमेकं नक्षत्रं पुष्टिमेव प्रजायाः पशूनां गच्छति ॥ रोहिण्यामाधेयो रोहिण्यां वा एतं देवा आदधत तया रोहमरोहंस्तद्रोहिण्या रोहिणीत्वं रोहिण्यां वा एतं प्रजापतिराधत्त तया रोहमरोहत् तद्रोहिण्या रोहिणीत्वमेष वै मनुष्यस्य स्वर्गो लोको यदस्मिल्लोके वसीयान् भवत्यृद्ध्या एव रोहिण्यामाधेयः कालकाञ्जा वै नामासुरा आसंस्त इष्टका अचिन्वत तदिन्द्र इष्टकामप्युपाधत्त तेषां मिथुनौ दिवमाक्रमेतां ततस्तामावृहत् ते ऽवाकीर्यन्त ता एतौ दिव्यौ श्वानौ यो व्यवृश्चत सोऽयमूर्णवाभिस्त्वैरान्त्रैस्संविततसत्योजो वात्रैषां तद्वीर्यमाधत्तौजो वीर्यं भ्रातृव्यस्याधत्ते यच्चित्रायामग्निमाधत्ते तदेतदैन्द्रं नक्षत्रमभिभूतिमत् पूर्वासु फल्गुनीष्वादधीत यः कामयेत भगी स्यामिति भगस्य वा एतन्नक्षत्रं भगी भवत्युत्तरास्वादधीत यः कामयेत दानकामा मे प्रजास्स्युरित्यर्यम्णो वा एतन्नक्षत्रमेषोऽर्यमा यो ददाति दानमिमाः प्रजा उपजीवन्ति दानकामा अस्मै भवन्ति राजन्यस्यादध्यात् स हि दानमुपजीवति वसन्ता ब्राह्मणेनाधेयो वसन्तो वै ब्राह्मणस्यर्तुस्स्व एवैनमृता आधत्ते तेजो ब्रह्मवर्चसमुपाधत्ते ग्रीष्मे राजन्येनाधेयो ग्रीष्मो वै राजन्यस्यर्तुस्स्व एवैनमृता आधत्त ओजो वीर्यमुपाधत्ते शरदि वैश्येनाधेयश्शरद्वै वैश्यस्यर्तुस्स्व एवैनमृता आधत्त ऊर्जं पशूनुपाधत्ते ॥ सोमेन यजा इति वा अग्निमाधत्ते यस्मिन्नेव कस्मिंश्चर्ता आदधीत सोमेन यक्ष्यमाण एतद्ध्यवर्धयत् सोमेन यजते फल्गुनीपूर्णमास आधेय एतद्वा ऋतूनां मुखमृतुमुख एवैनमाधत्ते शिशिर आधेयश्शिशिरं वा अग्नेर्जन्म प्रजातमेवैनमाधत्ते सर्वासु दिक्ष्वृध्नोति यश्शिशिरेऽग्निमाधत्ते पूर्णमासे नीति वा अग्निमाधत्ते सर्वासु दिक्ष्वग्निश्शिशिरे सर्वास्वेव दिक्ष्वृध्नोति यश्शिशिरेऽग्निमाधत्ते पूर्णमासे वामावस्यायां वादधीतैतद्वै पुण्याहं पुण्याह एवैनमाधत्ते तस्मादिष्ट्या वाग्रायणेन वा पशुना वा सोमेन वा पूर्णमासे वामावस्यायां वा यजेतैष वै यज्ञो यज्ञमेवैतत् प्रति यज्ञमालभते ॥१॥ १-३

यद्वा इमे व्यैतां यदमुष्यायज्ञियमासीत् तदिमामभ्युसृज्यतोषा यदूषा भवन्त्यनयोरेवैनं यज्ञिय आधत्ते प्राजापत्या वा ऊषाश्श्वश्वो भूयांसो भवन्ति प्रजननायैवैते पशूनां वा एतत् प्रियं धाम यदूषा यदूषा भवन्ति पशूनामेव प्रियं धामोपाप्नोत्यलेलेद्वा इयं पृथिवी साविमेदग्निर्माविधक्ष्यतीत्यविभेदग्निर्हैरो मे विनेष्यतीत्यार्द्रेव हीयमासीत् तां देवाश्शर्कराभिरदृंहंस्तेजोऽग्ना अदधुर्यच्छर्करा भवन्तीमामेव दृंहति तेजोऽग्नौ दधात्यभिमृता वा इयं वृत्रेण वाम्रियस्त्वै तद्विदुर्यत्रास्या जीवं यज्ञियं यद्वल्मीकवपा भवन्त्यस्या एवैनं जीवे यज्ञिय आधत्त आपो वा इदमासन् सलिलमेव स प्रजापति-

[१] मै. १,६,३, (३९) । कपि. ६,७ ।

र्वराहो भूत्वोपन्युमज्जत् तस्य यावन्मुखमासीत् तावतीं मृदमुदहरत् सेयमभवद्यद्वराहविहतं भवत्यस्यामेवैनं प्रत्यक्षमाधत्ते वराहो वा अस्यामन्नं पश्यति तस्मा इयं विजिहीते यद्वराहविहतं भवति तदेवान्नमवरुन्द्धे यत् तदादत्त तददितिर्यदप्रथत तत् पृथिवी यदभवत् तद्भूमिर्यद्वराहविहतं भवति प्रथत एव प्रजया पशुभिर्नाना वै पशूनामन्नान्यन्यद्गोरन्नमन्यदश्वस्यान्यदव्या अन्यदजाया अन्यत् पुरुषस्यापोऽन्नं यदप उपसृजति यावदेवान्नं तदवरुन्द्धे पञ्चैते संभाराः पञ्च वै पुरुषे वीर्याणि करोत्यनया वीर्यं करोत्यनया करोत्यनेन यावदेव वीर्यं तदाप्नोति तत् स्पृणोति पञ्चैते संभाराः पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धे ॥ न वा ऋते ऊर्जोऽन्नं धिनोत्यूर्गुदुम्बरो यदौदुम्बराणि भवन्त्यन्न एवोर्जं दधाति शमीमयानि भवन्ति मिथुनत्वायाग्निर्वै सृष्टः प्रजापतिस्तं शम्याग्रे समैन्द्ध यच्छमीमयानि भवन्ति स्वयैवैनं समिधा समिन्द्धेऽश्वो वै भूत्वाग्निर्देवेभ्योऽपाक्रामत् स यत्रातिष्ठत् तदश्वत्थस्समभवत् तदश्वत्थस्याश्वत्थत्वं यदाश्वत्थानि भवन्ति यदेवास्य तत्र न्युक्तं तत् तैस्संभरत्यग्निर्वै मनुष्येभ्योऽपाक्रामत् तं देवा अमन्यन्तायं वाविदं भविष्यतीति तस्य मरुतस्स्तनयित्नुना हृदयमाच्छिन्दन् गा दिव्याशनिरभवद्यद्वृक्षस्याशनिहतस्य भवति यदेवास्य तत्र न्युक्तं तत् तैस्संभरति पर्णमयानि पञ्चयानि भवन्ति पाङ्क्तत्वाय ॥ २ ॥ ४-५

अष्टासु प्रक्रमेषु ब्राह्मणेनाधेयोऽष्टाक्षरा गायत्री गायत्रच्छन्दा ब्राह्मणस्स्वस्यैवैनं छन्दसः प्रात्येनस्य आधत्ते यथा पिता पुत्रं जिन्वत्येवमेवैनं स्वं छन्दो जिन्वत्येकादशसु प्रक्रमेषु राजन्येनाधेय एकादशाक्षरा त्रिष्टुप् त्रिष्टुप् छन्दा राजन्यस्स्वस्यैवैनं छन्दसः प्रात्येनस्य आधत्ते यथा पिता पुत्रं जिन्वत्येवमेनं स्वं छन्दो जिन्वति द्वादशसु प्रक्रमेषु वैश्येनाधेयो द्वादशाक्षरा जगती जगच्छन्दा वैश्यस्स्वस्यैवैनं छन्दसः प्रात्येनस्य आधत्ते यथा पिता पुत्रं जिन्वत्येवमेनं स्वं छन्दो जिन्वत्यपरिमितमवरुणधा इति वा अग्निमाधत्तेऽपरिमित आधेयोऽपरिमितस्यावरुद्ध्यै यावति चक्षुषा मन्येत तावत्यादधीत सत्यं वै चक्षुस्सत्य एवैनमाधत्ते पूर्वाह्ण आधेय एतद्वै पुण्याहं पुण्याह एवैनमाधत्ते व्युष्टायां पुरा सूर्यस्योदेतोराधेय एतास्मिन् वै लोके प्रजापतिः प्रजा असृजत ताः प्राजायन्त प्रजननायैवमाधेय आग्नेयी वै रात्र्यैन्द्रमहर्यदुदिते सूर्य आदधीताग्नेयाद्वर्णादियाद्यदनुदित ऐन्द्रादनुदितेऽपर आधेय उदिते पूर्व उभा एवेन्द्राग्न्योर्वर्णा आप्नोत्यसुर्या वै रात्री वर्णेन शुक्रियमहश्शुक्रिय आधत्ते य उदिते सूर्य आधत्ते नक्तं वा अनुदितेन दिवोदितेन दिवाधत्ते य उदिते सूर्य आधत्ते ॥ न वै सु विदुरिव मनुष्या नक्षत्रं मीमांसन्त इव व्युदितेन वाव पुण्याहे पुण्याह आधत्ते य उदिते सूर्य आधत्ते सप्त ते अग्ने समिधस्सप्त जिह्वास्सप्तर्षयस्सप्त धाम प्रियाणि सप्त होत्रा अनु विद्वान् सप्त योनीरापृणस्वा घृतेनेति यावतीर्वा अग्नेस्तन्वो या वा अस्य ता आदधानो वितर्पयति वि ह तृप्यत्येतावतीर्वा

[३] मै. १,६,१० (५०-५५) । कपि. ६,८ । वा. ३,९ । काण्व. ३,९-१० ।

अग्नेस्तन्वः षोढा सप्त सप्त ता एवास्य प्रीणाति न विलुप्यति पूर्णया स्रुचा मनसा प्रजापतये जुहोति
पूर्णः प्रजापतिः प्रजापतिमेवाप्नोति ॥ ३ ॥ ६—७

अङ्गिरसां त्वा देवानां व्रतेनादध इति ब्राह्मणेनाधेयो ये वै देवानामङ्गिरसस्ते ब्राह्मणस्य प्रत्ये
नसोऽग्निर्वायुर्वाग्बृहस्पतिस्ततो बन्धुरस्य यज्ञस्तत आयनो यतो बन्धुरेवास्य यज्ञो यत आयनस्तत
एनं प्रतीच्छतीन्द्रस्य त्वा मरुत्वतो व्रतेनादध इति राजन्येनाधेयो ये वै देवानां राजानस्ते राजन्यस्य
प्रत्येनस इन्द्रो वरुणो धाता त्वष्टा ततो बन्धुरस्य यज्ञस्तत आयनो यतो बन्धुरेवास्य यज्ञो यत
आयनस्तत एनं प्रतीच्छति मनोस्त्वा ग्रामण्यो व्रतेनादध इति वैश्येनाधेयो मरुतो वै देवानां
विशस्ते वैश्यस्य प्रत्येनसस्ततो बन्धुरस्य यज्ञस्तत आयनो यतो बन्धुरेवास्य यज्ञो यत आयनस्तत
एनं प्रतीच्छतीडा वै मना आसीत् सासुरानग्निमादधानानगच्छत् त आहवनीयमग्र आदधताथ
गार्हपत्यमथौदनपचनं तानब्रवीदाप्त्वा श्रियं प्रत्यवारुक्षन् पुण्या भविष्यन्ति परा तु भविष्यन्तीति
सा देवानग्निमादधानानगच्छत् त ओदनपचनमग्र आदधताथ गार्हपत्यमथाहवनीयं तानब्रवीदाप-
च्छ्रियं यीमं लोकमच्छिन्दन् पुण्या भविष्यन्ति प्रजा त्वेषां न भविष्यतीति सैडव मनोरादधात्
साब्रवीत् तथा तेऽग्निमाधास्यामि यथा मनुष्या देवानुप प्रजनिष्यन्त इति सा गार्हपत्यमग्र आदधा-
दथौदनपचनमथाहवनीयमनयोर्लोकयोर्व्यवगृहीत्यै ॥ ततो मनुष्या देवानुप प्राजायन्त प्रजननायै-
षमाधेयोऽथो अनयोरेव लोकयोर्व्यवगृहीत्यै प्रजापतिर्वै यदग्रे व्याहरत् स सत्यमेव व्याहरदेतद्वाव
स त्रिर्व्याहरद्भूर्भुवस्स्वरित्येतद्वै वाचस्सत्यं यदेव वाचस्सत्यं तेनाधत्ते भूष्णु वै सत्यं य एवं विद्वा-
नेतेनाधत्ते भवत्येवायं वा अपरो भूरसौ पूर्वो भुवो भूर्भुवरित्यपर आधेयस्सत्यस्यानुगत्यै भूर्भु-
वस्स्वरिति पूर्वस्तत् पुरस्सर्वमाप्यते वाग्वै देवतां निरवदत निरुदितदेवता हि वै वागथ तत् सर्वं न
सत्यं यद्वाचा शपते यत् प्राशूर्भवति यां वै तां वाग्देवतां निरवदतैषा वाव सा यदेता व्याहृतय
एतद्वै वाचस्सदेवं यदेव वाचस्सदेवं तेनाधत्तेऽयं वा अपरो भूरसौ पूर्वो भुवो भूर्भुवरित्यपर आधेय
उभा एवैनौ सहाधत्त एष ह्येतस्य योनिरेतस्माद्ध्येषोऽधिसृज्यतेऽयं वावाग्निर्योऽयमन्तरग्नि यो
ऽसौ पूर्वोऽसा आदित्य एष योऽसा अमुष्मादधिसृज्यते यद् द्वितीयं ज्योतिस्तदेव तद्भूर्भुवस्स्वरिति
पूर्व आधेय उभा एवैनौ सहाधत्त एष ह्येतस्य योनिरेतस्माद्ध्येषोऽधि प्राक्रियते योऽसा अमुष्मादधि
प्राक्रियते यत् तृतीयं ज्योतिस्तदेव तेनाप्यतेऽसौ वाव स आदित्यः प्रत्यङ्ङाधीयते तस्मादेष सर्वाः
प्रजाः प्रत्यङ्ङग्निना वै देवा अन्नमदन्ति प्रत्यग्वा अन्नमद्यते यत् प्रत्यङ्ङाधीयतेऽन्नाद्याय प्राचो वै
देवान् प्रजापतिरसृजतापाचोऽसुरान् सोऽसुरान् ब्रह्मणापानुदताग्निर्ब्रह्म यत् प्रत्यङ्ङाधीयते भ्रातृव्य-
स्यापनुत्त्या इममर्घमग्निना परियन्तीममर्घमुपचरन्ति देवानामेवार्धं परियन्ति देवानामर्धमुपचरन्तीमां

[४] मै. १,६,१२ (५८)। कपि. ६,१। तै. ब्रा. १,१,४।

दिशमभ्यावृत्य जुहोत्येतस्यां वै देवा दिशि यस्यामेव देवा दिशि तां दिशमभ्यावृत्य जुहोति
॥ ४ ॥ ८-९

अग्निर्वै प्राङुदेतुं नाकामयत तमश्वेनोदवहन्यत् पूर्वमुदवहँस्तत् पूर्ववाहः पूर्ववाट्त्वमग्निर्वै प्रजाप-
तिस्तस्याश्वश्चक्षुर्यदश्वं पुरो नयन्ति स्वमेव तच्चक्षुः पश्यन्ननुदेति स्तोमपुरोगा वै देवा एभ्यो लोके-
भ्योऽसुरान् प्राणुदन्त स्तोमादश्वस्संभूतो यदश्वं पुरो नयन्ति स्तोमपुरोगा एवैभ्यो लोकेभ्यो भ्रातृव्यं
प्रणुदतेऽग्निं वै जातं रक्षाँस्यधूर्षँस्तान्येनमभिसमलभन्त तान्यश्वेनापाहत यदश्वं पुरो नयन्ति रक्षसा-
मपहत्या अश्वो वै भूत्वा यज्ञो मनुष्यानत्यक्रामत् तमेनदतिक्रामन्तं मन्यन्ते यदश्वमभ्यावर्तयन्ति
यज्ञमेवैतद्यजमानमभ्यावर्तयन्त्यग्निर्वा अश्वं प्राविशत् कृष्णो भूत्वा सोऽत्रागच्छद्यत्रैष मृगशफ
इव तस्मादाक्रम्यो यदश्वमाक्रमयति तमेवावरुन्द्धे वास्तु वा एतदथो अन्तर्हितमिव तस्मान्नाक्रम्य
इन्द्रो वै यतीन् सालावृकेयेभ्यः प्रायच्छत् तेषामद्यमानानाँ स्यूमरश्मिर्ऋषिरश्वं प्राविशत्
तस्मादश्वस्स्वँ शकृदुपजिघ्रति कश्चिद्वापि चाग्निं च न निरास्था३मित्यग्निं वै विभाजं नाशक्नुवँस्तमश्वेन
व्यभजन्यदश्वं पुरो नयन्त्यग्नेरेव विभक्त्यै॥ यौ वाव ता ऋपिश्चाग्निश्च ते एवैनं तद्देवते विभजतोऽश्वो
देयः प्राजापत्यो वा अश्वो यदश्वं ददाति सर्वा एवास्य तेन देवता अभीष्टाः प्रीता भवन्ति परमा
वा एषा दक्षिणा यदश्वो यदश्वं ददाति पर्याप्त्यै वही देयो वहिनो वै पशवो भुञ्जन्ति यज्ञोऽग्नेर्वही
भुनक्त्येनमग्निराहितो हिरण्यं देयँ सतेजस्त्वाय शतमानं वीरं वा एष जनयति योऽग्निमाधत्ते शतदायो
वीरस्त्रिंशन्माने पूर्वयोर्हविषोर्देये चत्वारिँशन्मानमुत्तमेऽभिक्रान्त्या अभिक्रान्तेन हि यज्ञस्यर्ध्नोत्यात्मा
वै हविः पवित्रँ हिरण्यँ सर्वेष्वेवैनँ हविष्षु पुनात्यग्निर्वै वरुणानीरभ्यकामयत तस्य तेजः परापतत्ताद्धि-
रण्यमभवद्यद्धिरण्यमुपास्यति स्वेनैवैनं तेजसा समर्धयति नोपास्य पुनरादधीत ग्रासितमस्य निष्वि-
दति क्षोधुको भवत्यग्निं वै वरुणानीरभ्यकामयन्त तास्समभवदापो वरुणानीर्यदग्ने रेतोऽसिच्यत
तद्धरितमभवद्यदपां तद्रजतं तस्माद्धरितरजताभ्यामुभयाहिरण्यो यद्गर्भस्य शमलं तद्दुर्वर्णं तस्माद्ब्राह्मणेन
दुर्वर्णं न भर्तव्यँ शमलँ हि तद्धिरण्यमुपास्यति स्वेनैवैनं रेतसा समर्धयति ॥ ५ ॥ १०-११

सह वा इमा अग्नेस्तन्व इयमोदनपचनोऽन्तरिक्षं गार्हपत्यो द्यौराहवनीयो यो वा अस्यैता अव्या-
कृत्याधत्ते न पाप्मना व्यावर्तते घातकोऽस्य रुद्रः पशून् भवति यदेतैरुपतिष्ठते ता एवास्यैतद्व्याकृत्य
यथायोनि प्रतिष्ठाप्याधत्ते वि पाप्मना वर्ततेऽघातकोऽस्य रुद्रः पशून् भवति द्यौर्महासीति महान-
ग्निमावाय भवति भूमिर्भूम्नेति श्वश्वो भूयान् भवति तस्यास्ते देव्यदित उपस्थेऽन्नादमन्नाद्यायान्न-
पत्यायादध इत्यन्नादमेवैनमन्नाद्यायान्नपत्यायाधत्तेऽन्नाद्यायाग्निमाधत्तेऽत्त्यन्नं य एवं विद्वानग्निमाधत्ते॥

[५] मै. १,६,४ (४०)। कपि. ७,१। तै. ब्रा. १,१,५।
[६] कपि. ७,२।

अथैतास्सर्पराज्ञ्या ऋच इयं वै सर्पराज्ञ्यन्नँ सार्पराज्ञमन्नाद्यायाग्निमाधत्तेऽत्त्यन्नं य एवं विद्वानग्निमा-
धत्ते वसन्तो वा इमाः प्रजा ग्रीष्मायोपरुणद्धि ग्रीष्मो वर्षाभ्यो वर्षाश्शरदे शरद्धेमन्ताय हेमन्तश्शि-
शिराय शिशिरमग्नयेऽग्निर्यजमानायान्नाद्यायाग्निमाधत्तेऽत्त्यन्नं य एवं विद्वानग्निमाधत्ते ॥ ६ ॥
१२-१३

निरुप्तँ हविरुपसन्नमप्रोक्षितं भवत्यथ मध्याधिदेवनमवोक्ष्याक्षान्न्युप्य जुहोति निषसाद धृतव्रतो
वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरिति त्रिर्वै विराड् व्यक्रमत गार्हपत्यमाहवनीयं मध्याधिदेवनं
विराज एवैनं विक्रान्तमनुविक्रमयति प्रत्येव तिष्ठति गच्छति प्रतिष्ठां धर्मधृत्या जुहोति धर्मधृतमेवैनं
करोति सवितारं धारयितारं गां घ्नन्ति तां विदीव्यन्ते तां सभासद्भ्य उपहरन्ति तेनास्य सोऽभीष्टः
प्रीतो भवति प्र नूनं ब्रह्मणस्पतिरित्यामन्त्रणे जुहोति मन्त्रवत्या वैश्वदेव्या मन्त्रमेवास्मै गृह्णाति
तमभिसमेत्य मन्त्रयन्ते ॥ सह वै देवाश्च मनुष्याश्चौदनपचन आसँस्ते मनुष्या देवानत्यचरँस्तेभ्यो
देवा अश्वं प्रत्युह्य गार्हपत्यमभ्युदक्रामँस्ताँस्तस्मिन्नन्वागच्छँस्ते मनुष्या एव देवानत्यचरँस्तेभ्यो
देवाः पशून् प्रत्युह्याहवनीयमभ्युदक्रामँस्ताँस्तस्मिन्नन्वागच्छँस्ते मनुष्या एव देवानत्यचरँस्तेभ्यो
देवा यज्ञं प्रत्युह्य सभामभ्युदक्रामँस्ताँस्तस्यामन्वागच्छँस्ते मनुष्या एव देवानत्यचरँस्तेभ्यो देवा
विराजं प्रत्युह्यामन्त्रणमभ्युदक्रामँस्ताँस्ततो नानुप्राच्यवन्तैते वै देवानाँ संक्रमाश्श्रेयाँसँ श्रेयाँसं लोक-
मभ्युत्क्रामति य एवं वेदैतद्वै देवानाँ सत्यमनभिजितं यदामन्त्रणं तस्मादामन्त्रणँ सु प्रातर्गच्छेत्
सत्यमेव गच्छति तस्मादामन्त्रणं नानृत एयात्तस्मादामन्त्रणे नानृतं वदेद्बर्हिर्वै नामौदनपचन आस
बर्हिर्जायते य एवं वेद गृहा गार्हपत्यो गृहवान् भवति य एवं वेद धिष्ण्या आहवनीय उपैनं यज्ञो
नमति य एवं वेद सप्रथा मध्याधिदेवनं प्रथते प्रजया पशुभिर्य एवं वेदानाप्त आमन्त्रणं नैनमाप्नोति
य ईप्सति य एवं वेद ॥ ७ ॥
१४-१५

अजो देयस्सयोनित्वाय वासो देयँ सर्वदेवत्यं वासो देवतानाममीष्ट्यै वर्धमाना दक्षिणा देया
दक्षिणाया वै वृद्धिं यजमानोऽनुवर्धत उपाहरन्ती दक्षिणा देया धेनुर्वा उपाहरन्त्युप ह्येषा पय
आहरति नास्याग्निमादधानस्य कनीयो भवति धेनुर्होत्रे देयाशिषामवरुद्ध्या अनड्वानध्वर्यवे
वहत्येव यज्ञस्यावरुन्द्धे रथो देयो देवरथो वा एष प्रयुज्यते यद्यज्ञो मनुष्यरथेनैव देवरथम-
भ्यातिष्ठति मिथुनौ गावौ देयौ मिथुनस्यावरुद्ध्यै षड् देयाः षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति

[७] मै. १,६,११ (५६)। कपि. ७,४। ऋ. १०,३४; २०,२; ३४,४७। काण्व. ११,३७; २१,९३; ३३,४५।
[निषसाद धृतव्रतो० । ऋ. १,२५,१०; तै. सं. १,८,१६,१; तै. ब्रा. १,७,१०,२, २,६,५,२, । प्र नूनं
ब्रह्मणस्पति:० । ऋ. १,४०,५]
[८] कपि. ७,२—३ ।

द्वादश देया द्वादश मासास्संवत्सरस्संवत्सरस्याप्त्यै यदि द्वादशातिप्रच्यवेत चतुर्विंशतिं दद्याच्चतु-
र्विंशत्यक्षरा गायत्री गायत्री यज्ञमुखं गायत्रीमेव यज्ञमुखं नातिक्रामति त्रीणि हवींषि भवन्ति त्रय
इमे लोका इमानेव लोकानाप्नोति त्रिर्विराड् व्यक्रमत विराज एवैनं विक्रान्तमनु विक्रमयति यत्
पवमानं पुनात्येवैनं तेन यत् पावकमन्नं वै पावकमन्नमेवास्मै तेन प्रयच्छति यच्छुचये शुचिमेवैनं
मेध्यं यज्ञियं तेन करोति पशुगानसानि प्रजावानसानि तेजस्व्यसानीति वा अग्निमाधत्ते प्राणो वै
पवमानः प्राणादधि पशवः प्रजायन्ते यदग्नये पवमानाय पशूनेवास्मै तेन प्रजनयत्यापो वै पावका
अद्भ्यः प्रजाः प्रजायन्ते यदग्नये पावकाय प्रजामेवास्मै तेन प्रजनयत्यसौ वा आदित्यश्शुचिरेष
तेजसः प्रदाता यदग्नये शुचयेऽसा एवास्मा आदित्यस्तेजः प्रयच्छति देवाश्च वा असुराश्च संयत्ता
आसन् सोऽग्निर्विजयमुपयत्सु त्रेधा तन्वो विन्यधत्त पशुषु तृतीयमप्सु तृतीयममुष्मिन्नादित्ये तृतीयं
यदेतानि हवींषि निरुप्यन्ते ता एवास्यैतत् तन्वस्संभरति सतनूरेवैतत् सतेजा आधीयत इमे वै लोका
एतानि हवींषि नानाबर्हीँषि भवन्तीमानेव लोकानाप्रीणाति यन्नानाबर्हीँषि स्युर्लोकं प्रजननाय
नोच्छिँषेदूनं व प्रजा उपप्रजायन्ते समानबर्हिषी उत्तरे कार्ये लोकमेव प्रजननायाकस्तमुपप्रजायते
त्रिव वा इमं लोकं त्रिर्मेमं नामुं पश्यामो वा तु न वा तस्मात् समानबर्हिषी उत्तरे कार्ये पशवो वा
एतानि हवींषि घृतं पुरोडाशा रुद्रोऽग्निर्यदग्नेऽनुनिर्वपेद्रुद्राय पशूनपिदध्यादपशुस्स्यात् संवत्सरेऽनुनि-
रुप्यँ संवत्सरेणैवैनँ शमयति शिथिलं वा एतद्यज्ञस्य क्रियतेऽसयोनि यत् संवत्सरेऽनुनिर्वपत्यग्न
एवानुनिरुप्यमशिथिलत्वाय सयोनित्वाय ॥ ८ ॥ १६

अग्निर्वा इमं लोकं नोपाकामयत यदस्मिन्नामं माँसं पचन्ति यत् पुरुषं दहन्ति यत् स्तेयं पचन्ति
तदमीमं लोकं नोपाकामयत स यदिमं लोकमुपावर्तत या अस्य यज्ञियास्तन्व आसँस्ताभिरुदक्रा-
मत् ता एताः पवमाना पावका शुचिस्तस्य या पवमाना तनूरासीत् पशूँस्तया प्राविशद्या पावकाप-
स्तया या शुचिरमुमादित्यं तया प्राणो वै पवमानः प्राणेन पशवो यता यदग्नये पवमानाय पशूने-
वास्मै तेन यच्छत्येषा वा अस्य सा तनूर्यया पशून् प्राविशद्यदिदं घृते हुते प्रतीवार्चिरुज्ज्वलत्येषा
वा अस्य सा तनूर्ययापः प्राविशद्यदिदमप्सु परीव ददृशे यद्धस्ता अवनिज्य स्नात्वा श्रदिव धत्ते य
एवाप्स्वग्निस्स एवैनं तत् पावयति स स्वदयति यदग्नये पावकाय सपशुमेवैनं पावयत्येषा वा अस्य
सा तनूर्ययापः प्राविशद्यदिदं घृते हुते शोणमिवार्चिरुज्ज्वलत्येषा वा अस्य सा तनूर्ययामुमादित्यं
प्राविशद्यदिदमुपरिष्टाद्भाति यज्ज्योतिरिव यदग्नये शुचय आविर्भूत्या एव घोषायैव श्लोकायैव
रुच एवैषा वा अस्य सा तनूर्ययामुमादित्यं प्राविशद्यदिदं घृते हुते सुवर्णमिवार्चिरुज्ज्वलति यदेतानि
हवींषि निरुप्यन्ते ता एवास्यैतत् तन्वस्संभरति सतनूरेवैतत् सतेजा आधीयत इमे वै लोका एतानि

[९] कपि. ७,५।

हवीँषि नानाबर्हीँषि भवन्ति नाना हीमे लोकाः प्रतिष्ठिताः ॥ ९ ॥ १७

गायत्रीस्संयाज्या भवन्ति गायत्रो वा अग्निर्गायत्रच्छन्दा आग्नेयमेतत् क्रियते यदग्न्याधेयमग्ना एवैतदग्निः प्रतितिष्ठन्नेति यदाग्नेयानि हवींष्यग्निनाग्निस्समिध्यत इत्युत्तरयोर्हविषोरनुवाक्यां कुर्यात् तेजस आयतनायोर्वशी वै पुरूरवस्यासीत् सान्तर्वती देवान् पुनः परेत् सोऽदो देवेष्वायुरजायत तामन्वागच्छत् तां पुनरयाचत तामस्मै न पुनरददुस्तस्मा आयुं प्रायच्छन्नेष आयुरित्यग्निं चोल्यमुखायाँ समुप्यैतमाधत्स्व तेन प्रजनिष्यस इति स वृक्षस्य शाखायामग्निमासज्यायुना ग्राममभ्ययँत् स पुनरैमीत्यैद्वृक्षस्याग्रेऽग्निं ज्वलन्तँ सोऽचिकेदयं वाव सोऽग्निरिति तस्यारणी आदायाग्निं मथित्वाधत्त तेन प्राजायत यदारोहस्यारणी भवतः प्रजननायादित्यै घृते चरुममात्रस्यायां पशुकामोऽनुनिर्वपेदियमदितिरस्यामधि पशवः प्रजायन्ते यज्ञमुखमग्न्याधेयं यज्ञमुखमेवालभ्य पशूनवरुन्द्धे चातुष्प्राश्यो भवत्याचतुरँ हीमे पशवो द्वन्द्वं मिथुनास्ते वीर्यकृतोऽग्नीषोमीयमेकादशकपालं पूर्णमासेऽनुनिर्वपेदाग्नेयो वै ब्राह्मणो देवतया सोमराजा यज्ञमुखमग्न्याधेयं यज्ञमुखमेवाक्रम्य स्वाराज्यमुपैति ॥ देवान् वै यज्ञो नाभ्यनमत्तेऽश्राम्यन्यज्ञो नो नाभिनमतीति तेषामग्नीषोमा एवाग्रे यज्ञोऽभ्यनमत्तेऽविदुरग्नीषोमौ वै नोऽग्रे यज्ञोऽभ्यनँस्तयोर्यज्ञस्याभिनतिमिच्छामहा इति तेऽब्रुवन् युवा वै नोऽग्रे यज्ञोऽभ्यनान्युवयोर्नोऽधि यज्ञोऽभिनमत्विति ता अब्रुवतां वार्यं वृणावहा आवामेवाग्र आज्यभागौ यजानिति तस्मादग्नीषोमा एवाग्र आज्यभागौ यजन्ति वार्यवृतँ ह्येनयोर्यदग्नीषोमीयमनुनिर्वपति यज्ञस्याभिनत्या अतो हि देवानग्रे यज्ञोऽभ्यनमद्यदन्यदनुनिर्वपेद्देवतया यज्ञमन्तर्दध्यान्मिथुनं वा अग्निश्च सोमश्च सोमो रेतोधा अग्निः प्रजनयिताग्निर्वावेदँ सर्वमाप ओषधयो वनस्पतयस्तदेव सोम एतौ वै नो देवानां नेदिष्ठमेतौ हि पश्यामो यथा वा इदं मनुष्या उपासत एवमेतं देवा उपासत तेऽचिकयुरुद्धृतेन त्वा अनेनाभिजयेमेति तमुदहरन्त तेनाभ्यजयन्नभिजित्या एवैष उद्ध्रियतेऽग्निं निराधानादविभेन्नातिदूर आधेयो निराधानाय ॥ १० ॥ १८-१९

अग्निं वै सृष्टमग्निहोत्रमन्वसृज्यत तस्मादग्निमाहितमग्निहोत्रेणानूद्द्रवन्त्याग्नेयी सायमाहुतिस्सौरी प्रातर्यदाग्नेय्या प्रातर्जुहुयात् प्रजननं पुरस्तात् परिहरेदयथापूर्वं कुर्यात् पूर्णया स्रुचा मनसा प्रजापतये जुहोति पूर्णः प्रजापतिः प्रजापतिमेवाप्नोति पूर्णो वै प्रजापतिस्समृद्धिभिरूनो व्यृद्धिभिः पूर्णः पुरुषः कामैरूनस्समृद्धिभिः पूर्णयैव पूर्णास्समृद्धीरवरुन्द्ध आनीता वा अन्येषां देवानाँ स्मोऽनानीता अन्येषाँ सँस्पर्शेनान्येषां जीवामस्सकाशेनान्येषां पृथिव्या वातस्यापां तेषामानीतास्स्मस्तेषाँ

[१०] कपि. ७,६ ।
[११] कपि. ७,८ ।
काठ० ९

सँस्पर्शेन जीवामोऽग्नेस्सूर्यस्य दिवस्तेषामनानीतास्स्मस्तेषाँ सकाशेन जीवामस्तानेवालब्ध त एनमानेषन्त श्रेयसो व्रातस्य भवति नास्य मनुष्याः पापवसीयसस्येशते य एवं वेद ॥ यदात्मनालभेत प्रमायुकस्स्यादाज्येन चौषधीभिश्चालभतेऽप्रमायुको भवत्यानीतो वा एष देवानां य आहिताग्निरदन्त्यस्यान्नं पूर्णया स्रुचा जुहोति पूर्णयाग्नयेऽलङ्करलमस्मै भवत्योषधयश्च वै वनस्पतयश्च दिवा समदधुस्त इतोऽन्यत्सर्वमबाधन्त स प्रजापतिरमन्यतेमे वावेदमभूवन्निति सोऽग्निं सृष्ट्वा तमाधत्त तेनैनान्न्यभावयद्भ्रातृव्यसहनो वावैष आधीयते हुताद्यायैष वा अहुतादोऽलमग्न्याधेयाय सन्ननाहिताग्निर्हुदमेवैतेन स्वदितमत्ति ॥ ११ ॥ २०-२१

आधेयोऽग्नी३र्नाधेया३ इति मीमाँसन्ते श्वोऽग्निमाधास्यमानेना३ इत्याधेय एवायज्ञो ह्येष योऽनग्निरजो यद्धस्तां रात्रीं वसेदग्नितेजसं वा अजस्तदेवं तमग्निमाधत्ते कल्माषस्स्यात् स हि सर्वदेवत्यो यस्तँ श्वोऽग्निमाधास्यन् स्यात् स तां रात्रीं व्रतं चरेन्न माँसमश्नीयान्न स्त्रियमुपेयात् सर्वो वै पुरुषोऽग्निमाननग्निरस्मादपक्रामेदेष ह्युतस्य योनिरेतस्माद्धस्पोऽधि सृज्यते यस्तमुद्धरति यो दक्षिणो ब्रह्मवर्चसायैवैष मध्यतेऽथो अग्निभ्यामेवैनँ सयोनिं करोति दुर्गोपस्त्वहरहरस्य मन्थेयुर्यत एवं कृतश्चाहरेदेषा वा अस्यानवरुद्धा तनूस्तामेवावरुन्द्धे यत्र दीप्यमानं परापश्येत् तत आहरेदेवता वा एता आविर्भवन्ति ता एवावरुन्द्धे भृज्जनादाहरेदन्नकामस्यैषा वा अस्यान्नादी तनूस्तामेवावरुन्द्धे॥ यो ब्राह्मणो वा वैश्यो वा पुष्टोऽसुर इव स्यात् तस्य गृहादाहरेदेषैव सा पुष्टिर्यदन्नं तदवरुन्द्धे गृहे त्वस्य ततो नाश्नीयात् त्रिरुद्यच्छते त्रय इमे लोका इमानेव लोकानाप्नोति यदुद्यच्छत इमं तेन लोकमाप्नोति यत् प्राङुद्द्रवत्यन्तरिक्षं तेन यदादधात्यमुं तेन नाधाय पुनरुद्गृह्णीयादपक्रमस्स्स पापीयान् भवति प्राणेभ्यो वै प्रजापतिः प्रजा असृजत ताः प्राजायन्त तया मात्रयोद्गृह्णीयात् प्रजननाय नान्युद्गृह्णीयादग्निरस्य प्राणानुद्दहेत् प्रमीयेत नाधो दध्युयादपक्रमस्स्स पापीयान् भवति ॥ १२ ॥ २२-२३

अहुतादो वा एतस्य पुरा देवा अथैतद्धुताद उपावर्तते तेऽस्योर्जापक्रामन्त्यूर्जमेवावरुन्द्धे तानेव भागिनः करोति यजन्त्यमुष्मिञ्जुह्वत्यस्मिन् पचन्त्यमुष्मिन्ननन्तरयायैतस्याथो वैश्वानरतायामेवैनमुपातिष्ठिपद्ये वै यज्ञेनायजन्ताध्रुवँस्ते न वै सु विदुरिव मनुष्या यज्ञं तस्मान्न सर्व इवर्ध्नोति दक्षिणावद्धयाँ ह स्म वै पुरा दर्शपूर्णमासाभ्यां यजन्ते य एष ओदनः पच्यते दक्षिणामेवैतां ददाति यज्ञस्यर्द्ध्या इष्टी वा एतेन यद्यजते य एष ओदनः पच्यते तेन पूर्त्येष वावेष्टापूर्ती य एतं पचति ॥ प्रजापतिर्वै देवेभ्यो भागधेयानि व्यादिशद्यज्ञमेव सोऽमन्यतात्मानमन्तरगामिति स एतमोदनमपश्यत्तमात्मने

[१२] मै. १,६,११ (५६)। कपि. ७,७ ।
[१३] कपि. ८,१ ।

भागमकल्पयत् प्रजापतेर्वा एष भागो महान्तमपरिमितं पचेदपरिमितः प्रजापतिः प्रजापतिमेवाप्नोति देवाश्च वा असुराश्चास्पर्धन्त ते देवाः प्रजापतिमेवाभ्ययजन्तान्योऽन्यस्यासन्नसुरा अजुहवुस्ते देवा एतमोदनमपचँस्तं प्रजापतये भागमनुनिरवपँस्तं भागं पश्यन् प्रजापतिर्देवानुपावर्तत ततो देवा अभवन् परासुरा अभवन् य एवं विद्वानन्वाहार्यमाहरति भवत्यात्मना परास्य भ्रातृव्यो भवतीज्या वा अन्ये देवास्सपर्येण्या अन्ये देवा ईज्या ब्राह्मणास्सपर्येण्या यज्ञेनैवेडयान् प्रीणात्यन्वाहार्येण सपर्येण्याँस्तस्योभये प्रीता यज्ञे भवन्ति प्रजापतेर्भागोऽस्यूर्जस्वान् पयस्वानक्षितोऽस्यक्षित्यै त्वाक्षितो नामासि मा मे क्षेष्ठाः प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानरूपे मे पाह्यूर्गस्यूर्जं मयि २४-२५
धेह्या मा गम्या इति प्रजापतिमेव समक्षमृध्नोति ॥ १३ ॥
अग्ने सहस्रमाभर रूपं रूपं वयो वयः ॥ २६

पुनराधेय आर्धायते देवानां ज्योतिषा सह । अग्ने सहस्रमाभर रूपं रूपं वयो वयः ॥
पुनराधेय आर्धायते देवानां ज्योतिषा सह । आदित्या विश्वे तद्देवा वसवः पुनराभरन् ॥ २७
यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवः पुनराभरन् ॥ २८
यत्ते क्रुद्धः परोवप मन्युना यदवर्त्या । सुकल्पमग्ने तत् तव पुनस्त्वोद्दीपयामसि ॥
पुनस्त्वादित्या रुद्रा वसवस्समिन्धतां पुनर्ब्रह्माणो वसुधीतमग्ने । २९
इहैव धेह्यधि दक्षमुग्रमश्वावद्गोमद्यवमत् सुवीर्यम् ॥
पुनस्त्वा मित्रावरुणौ पुनरिन्द्रः पुनर्भगः । ३०
पुनस्त्वा विश्वे देवा ब्राह्मणा उददीदिपन् ॥ ३१
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यँहसः ॥ ३२
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥
केतस्सुकेतस्सकेतस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा सलिलस्सलिगस्सगरस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा दिवो ज्योते विवस्व आदित्य ते नो देवा देवेषु ३३
सत्यां देवहूतिमासुवध्वमादित्येभ्यस्स्वाहा ॥ १४ ॥

अग्नेर्वै भागः पुनराधेयं तं भागं प्रेप्सन् व्यर्धयति यद्याधाय मन्येत व्यृध्यतेऽस्या इति पुनराधीत यं भागं प्रेप्सन् व्यर्धयति तं प्राप्याधयत्येव सर्वमाग्नेयं क्रियते यत् किंच सर्वमग्नये भागं प्रादात् सर्वामृद्धिमृध्नोति न संभृत्यास्संभारा इत्याहुर्न यजुष्कार्यमिति संभृतसंभारो ह्येष कृतयजुस्तत् तन्न समृद्ध्यै संभृत्या एव संभाराः कार्यं यजुः पुनरुत्स्यूतं वासो देयं पुनरुत्सृष्टोऽनड्वान् पुनर्निष्कृतो रथ

[१४] मै. १,७,१ (१-२,४,१०—१२) । कपि ८,२ । वा. १२,९—१०,४०—४१,४४ । काण्व. १२,८५; १३. १०-११,४२—४२.४५ । [रूपं रूपं वयो वयः [प. पा.] । अथर्व. १९,१,३ । यत्ते (०त्वा) क्रुद्धः (०द्धाः)०। अथर्व. १२,२,५ । पुनस्त्वादित्या० । अथर्व. १२,२,६] तै. सं. १,५,१—२ । मा. श्रौ. १,६,५ ।
[१५] मै. १,७,२ (१३) । कपि ८,३ ।

एतानि वै पुनराधेयस्य रूपाणि रूपैरेवैनत् समर्धयत्यग्निर्वा उत्सीदन्नप ओषधीरनूत्सीदत्याप एता ओषधयो यद्दर्भा यद्दर्भा उपोलपा भवन्त्यद्भ्य एवैनमोषधीभ्योऽध्यवरुन्द्धे ॥ देवाश्च वा असुराश्च संयत्ता आसँस्ते देवा विजयमुपयन्तोऽग्नौ प्रियास्तन्वस्संन्यदधत यदि जयेमेमा उपावर्तेमहि यदि नो जयेयुरिमा अभ्युपधावेमेति तेऽभिजित्यान्वैच्छन् सर्वेषां नस्सहेति सोऽग्निरब्रवीद्यो मा मदेवत्यमादधातै स एताभिस्तनूभिस्संभवादिति तं देवा आदधत त एताभिस्तनूभिस्समभवन्नेताभिरेव तनूभिस्संभवति य एवं विद्वानेतमाधत्ते त्वष्टा पशुकाम आधत्त त इमे त्वाष्ट्राः पशवस्तेनर्द्धा मनुः पुष्टिकाम आधत्त स इमान् पोषानपुष्यत्तेनर्द्धाः प्रजापतिः प्रजाकाम आधत्त ता इमाः प्राजापत्याः प्रजाः प्राजायन्त तेनर्द्धा यो वै तमाधत्त स तेन वसुना समभवत् तस्मात् पुनर्वसुस्तस्मात् पुनर्वसा आधेय आर्ध्नोद्धि स यस्तमाधत्त तस्मादनूराधास्तस्मादनूराधेष्वाधेयः ॥ १५ ॥ ३४—३५

घर्मं नं सांमन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ।
आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ॥ ३६
आ यस्मिन् सप्त वासवा रोहन्ति पूर्व्यारुहः ।
ऋषिर्ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः ॥ ३७
इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आवृणे ॥ ३८
अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये ।
अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये ॥ ३९
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥ ४०
एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स नस्स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिस्सदा नः ॥ ४१
सं यत्त इन्द्र मन्यवस्सं चक्राणि दधन्विरे । अध त्वे अध सूर्ये ॥ ४२
आ ते मह इन्द्रोत्युग्र समन्यवो यत् समरन्त सेनाः ।
पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्यग्विचारीत् ॥ ४३

[१६] वा. २०,५४,५१—५२; १२,४४; ११,३४; १८,७१ । काण्व. २२,३९,३६-३७; १२,८५; १३.४५; १२,३४; २०,४० । [आमासु पक्वमेरय० । ऋ. ८,८९,७; सा. १४३१; तै. सं. १,६,१२,२; नि. ६,१४ । इन्द्रियाणि शतक्रतो० । ऋ. ७,१०४,२; अथर्व. ८,४,२; नि. ६,११ । अनु ते दायि० । ऋ. ६,२५,८; तै. सं. १, ६,१२,१; तै. ब्रा. २,८,५,७ । इन्द्रमिद्गाथिनो० । ऋ. १,७,१; सा. १९८,७९६; अथर्व. २०,३८,४; ४७.४; ७०,७; तै. सं. १,६,१२,२; तै. ब्रा. १,५,८,१; ७,२ । एवेदिन्द्रं वृषणं० । ऋ. ७,२३,६; अथर्व. २०,१२,६ । सं यत्त इन्द्र० । ऋ ४,३१,६ । आ ते मह० । ऋ. ७,२५,१; तै. सं. १,७,१३,१]

स्थिरं मनश्चकृषे जात इन्द्र वेषीदेको युधये भूयसश्चित् ।
अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणाम् ॥ ४४
यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ ४५
इन्द्रस्सुत्रामा स्ववाँ अवोभिस्सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयस्स्याम ॥ ४६
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषस्सनुतर्युयोतु ॥ ४७
अंहोमुचे प्रभरेमा मनीषां भूविष्ठदाम्ने सुमतिमावृणानाः ।
इदमिन्द्र प्रति हव्यं जुषस्व सत्यास्सन्तु यजमानस्य कामाः ॥ ४८
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥ ४९
अनवस्ते रथमश्वाय तक्षन् त्वष्टा वज्रं पुरुहूत द्युमन्तम् ।
ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ ५०
वृष्णे यत् ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिस्सजोषाः ।
अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून् ॥ ५१
अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधिताय दिवे जनाय तन्वे गृणानः ॥ ५२
अनु द्यावापृथिवी तत् त ओजोऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत् ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः ॥ ५३
अभि प्रभर धृषता धृषन्मनश्श्रवश्चित्ते असद्बृहत् ।
अर्षन्त्वापो जवसा वि मातरो हनो वृत्रं जया स्वः ॥ ५४

[स्थिरं मनश्चकृषे० । ऋ. ५,३०,४ । यो जात एव० । ऋ. २,१२,१; अथर्व. २०,३४,१; तै. सं. १,७,१३, २; नि. ३,२१; १०,१० । इन्द्रः सुत्रामा स्ववां० । ऋ. ६,४७,१२; १०,१३१,६ । अथर्व. ७,९१,१; २०, १२५,६; तै. सं. १,७,१३,४ । तस्य वयं सुमतौ० । ऋ. ६,४७,१३; १०,१३१,७; अथर्व. ७,९२,१; २०, १२५,७; तै. सं. १,७,१३,५; नि. ६,७ । विवेष यन्मा धिषणा० । ऋ. ३,३२,१४; तै. सं. १,६,१२,३ । अनवस्ते रथमश्वाय० । ऋ. ५,३१,४; सा. ४३१,४४०; तै. सं. १,६,१२,६ । वृष्णे यत्ते वृषणो० । ऋ. ५,३१,५; तै. सं. १,६,१२,६, । अनु त्वाहिघ्ने अध० । ऋ. ६,१८,१४ । अनु द्यावापृथिवी० । ऋ. ६, १८,१५ । अभि प्रभर धृषता० । ऋ. ८,८९,४]

अस्मा इदु प्रभरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व विरदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥ ५५
उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनंजयो रणे रणे ॥ ५६
ममाग्ने वर्चः ॥ ५७
इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥ ५८
मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्था परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व ॥ १६ ॥ ५९
रेवतीर्नस्सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥ ६०
ता अस्य नमसा सहस्सपर्यन्ति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ ६१
इन्द्राणी पत्या सुजितं जिगायोदंशेन पतिविद्ये बिभेद ।
त्रिंशद्यस्या जघनं योजनान्युपस्थ इन्द्रं स्थविरं बिभर्ति ॥ ६२
सेना ह नाम पृथिवी धनंजया विश्वव्यचा अदितिस्सूर्यत्वक् ।
इन्द्राणी प्रासहा संजयन्ती मयि पुष्टिं पुष्टिपत्नी दधातु ॥ ६३
इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् ।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ ६४
नाहमिन्द्राणि रारण सख्युर्वृषाकपेरृते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥ ६५

[अस्मा इदु प्रभरा०। ऋ. १,६१,१२; अथर्व. २०,३५,१२; नि. ६,२० । उत ब्रुवन्तु जन्तव०। ऋ. १,७४, ३; सा. १३८१; तै. सं. ३,५,११,४ । ममाग्ने वर्चः० । ऋ. १०,१२८,१; अथर्व. ५,३,१; तै. सं. ४,७,१४,१। इन्द्र क्षत्रमभि० । ऋ. १०,१८०,३; अथर्व. ७,८४,२; तै. सं. १,६,१२,४ । मृगो न भीमः० । ऋ. १०, १८०,२; सा. १८७३; अथर्व. ७,८४,३; तै. सं. १,६,१२,४]

[१७] वा. १३.४; २३,१,३; २५,१०-११; १०,२०; १९,४४,५४,६१; २३,६५ । क.व्र १४,४; २५,१,३; १७, १४—१५; ११,२९; २१,४६,५४,६१; २५,६७ । [रेवतीर्नस्सधमाद०। ऋ. १,३०,१३; सा. १५३,१०८४; अथर्व. २०,१२२,१; तै. सं. १,७,१३,५; २,२,१२,८; ४,१४,४ । ता अस्य नमसा० । ऋ. १,८४,११; सा. १००७; अथर्व. २०,१०९,३ । इन्द्राणीमासु नारिषु० । ऋ. १०,८६,११; अथर्व. २०,१२६,११; तै. सं. १, ७,१३,१; नि. ११,३८ । नाहमिन्द्राणि रारण० । ऋ. १०,८६,१२; अथर्व. २०,१२६,१२; तै. सं. १,७,१३, २; नि. ११,३९]

प्राच्यां दिशि त्वमिन्द्रासि राजोतोदीच्यां वृत्रहन् वृत्रहासि ।
यत्र यन्ति स्रवत्यस्तज्जितं ते दक्षिणतो वृषभ एषि हव्यः ॥ ६६
अस्येदेव प्ररिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् ।
स्वराडिन्द्रो दम आ विश्वगूर्तस्स्वरिरमत्रो ववक्षे रणाय ॥ ६७
त्वमिन्द्रास्यधिराजस्त्वं भवाधिपतिर्जनानाम् ।
दैवीर्विशस्त्वमुताविराजौजस्वत् क्षत्रमजरं ते अस्तु ॥ ६८
हिरण्यगर्भो यः प्राणतः ॥ ६९
सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥ ७०
इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा ।
आभ्यामिन्द्रः पक्वमामास्वन्तस्सोमापूषभ्यां जनदुस्रियासु ॥ ७१
प्रियां वो नाम हुवे तुराणाम् । आ यत् तृपन्मरुतो वावशानाः ॥ ७२
श्रियसे कं भानुभिस्संमिमिक्षिरे ते रश्मिभिस्त ऋक्वभिस्सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥ ७३
इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ ७४
आ नो विश्वाभिरूतिभिस्सजोषा ब्रह्म जुषाणो हर्यश्व याहि ।
वरीवृजत्स्थविरेभिस्सुशिप्रास्मे दधद्वृषणं शुष्ममिन्द्र ॥ ७५
मरुतो यद्ध वो दिवस्सुम्नायन्तो हवामहे । आ तू न उपगन्तन ॥ ७६
यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः ।
जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम् ॥ ७७

[प्राच्यां (०च्या) दिशि (०दास्त्व०)० । अथर्व. ६,९८,३ । अस्येदेव प्ररिरिचे० । ऋ. १,६१,९; अथर्व. २०,३५,९; तै. सं. २,४,१४,२ । त्वमिन्द्रास्यधि (०न्द्राधि०)० । अथर्व. ६,९८,२ । हिरण्यगर्भ० । ऋ. १०,१२१,१; अथर्व. ४,२,७; तै. सं. ४,१,८,३; ४,८,२; ताण्ड्य ब्रा. ९,९,१२; नि. १०,२३ । यः प्राणतो० । ऋ. १०,१२१,३; अथर्व. ४,२,२; तै. सं. ४,१,८,४; ७,५,१६,१ । सोमापूषणा जनना० । ऋ. २,४०,१; तै. सं. १,८,२२,५ । इमौ देवौ जायमानौ० । ऋ. २,४०,२; तै. सं. १,८,२२,५ । प्रिया वो नाम० । ऋ. ७,५६, १०; तै. सं. २,१,११,१ । श्रियसे कं भानुभि० । ऋ. १,८७,६; तै. सं. २,१,११,२; ४,२,११,२; नि. ४,१६। इन्द्रं वो विश्वत० । ऋ. १,७,१०; सा. १६२०; अथर्व. २०,३९,१; ७०,१६; तै. सं. १,६,१२,१ । आ नो विश्वाभि० । ऋ. ७,२४,४; तै. ब्रा. २,४,३,६; ७,१३,४ । मरुतो यद्ध वो० । ऋ. ८,७,११; तै. सं. १, ५,११,४ । यूयमस्मान्नयत० । ऋ. ५,५५,१०]

स युध्मस्सत्वा खजकृत् समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत् सहावा ॥ ७८
सं यद्धनन्त मन्युभिर्जनासश्शूरा यह्वीष्वोषधीषु विक्षु ।
अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः ॥ ७९
ऐन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥ ८०
स्वस्तये वाजिभिश्च प्रणेतस्सं यन्महीरिष आसत्सि पूर्वीः ।
रायो वन्तारो बृहतस्स्यामास्मे अस्तु भग इन्द्र प्रजावान् ॥ ८१
या वश्शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।
अस्मभ्यं तानि मरुतो वियन्त रयिं नो धत्त वृषणस्सुवीरम् ॥ १७ ॥ ८२
[६४१]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां दिशस्थानकं नामाष्टमं स्थानकं संपूर्णम् ॥८॥

अथ नवमं स्थानकम् ।

उत्सीदनम् ।

अग्निर्वा उत्सीदन् संवत्सरमनूत्सीदति सप्तदश सामिधेनीः कार्यास्सप्तदशो वै संवत्सरः पञ्चर्तवो द्वादश मासा एष वाव स संवत्सरस्संवत्सरादेवैनमध्यवरुन्द्धे तदाहुः पञ्चदशैव कार्या न सप्तदशेत्येतद्धि संवत्सरस्य संक्रमणतरं यत् पञ्चदश पञ्चदश सामिधेनीरनूच्यन्ते पञ्चदशार्धमासस्य रात्रयस्ताभिरेव ता आप्यन्ते यावन्ति वै सामिधेनीनामक्षराणि तावन्ति संवत्सरस्याहानि तैरेव तान्याप्यन्तेऽग्निर्वा उत्सीदन् संवत्सरमनूत्सीदति षड्वा ऋतवस्संवत्सरो यत् षड् विभक्तयस्संवत्सरादेवैनमध्यवरुन्द्धे ॥ संवत्सरो वा अग्निर्वैश्वानरष्षडृतवस्तस्मात् षड् विभक्तयो यद् द्व्यक्षरास्सतीश्चतुरक्षराः क्रियन्त आचतुरं हीमे पशवो द्वन्द्वं मिथुनास्ते वीर्यकृतो यद्वा इदमग्निं बहुधा विहरन्ति यदिमान् पोषान् पुपोष तस्मादग्निरेवैतावतीर्विभक्तीरश्नुते नान्या देवता यज्ञमुखं वै प्रयाजा यत् प्रयाजानन्द

[स युध्मस्सत्वा० । ऋ. ६,१८,२ । सं यद्धनन्त मन्यु० । ऋ. ७,५६,२२ । एन्द्र सानसिं रयिं० । ऋ. १,८,१; सा. १२९; अथर्व. २०,७०,१७; तै. सं. ३,४,११,३; तै. ब्रा. ३,५,७,३ । स्वस्तये वाजिभिश्च० । ऋ. ३,३०,१८ । या वश्शर्म शशमानाय० । ऋ. १,८५,१२; तै. सं. १,५,११,५; तै. ब्रा. २,८,५,६]

[१] मै. १,७,३—४ (१४—१८) । कपि. ८,४ । बा. १२,९—१०,४०—४१ । काण्व. १३,१०—११, ४१—४२ ।

रियाद्यज्ञमुखमन्तरियादन्नं वै प्रयाजा यत् प्रयाजानन्तरियादन्नमन्तरियाद्यं कामयेतर्भुयादिति तस्यो-
परिष्टात् प्रजानां विभक्तीः कुर्याद्वीर्यं वै प्रयाजा वीर्यं विभक्तयो वीर्यादेवाधि वषट्करोत्यजिरमृद्धि-
मभिक्रामति ॥ नानाग्नेयं क्रियत इत्याहुः कस्मात् सविभक्तयः प्रयाजा भवन्तीति संवत्सर वा एते
परीजयन्ते यत् प्रयाजास्तेनाग्नेयं तेन नानाग्नेयं क्रियते॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा पुनर्नः
पाह्यँहस इति पुरस्तात् प्रयाजानां जुहुयात् सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया विश्वप्स्न्या
विश्वतस्परीत्युपरिष्टादनुयाजानां जुहुयादूर्जा वा एष पशुभिरुत्सीदन् सहोत्सीदति पुनरेवोर्जं पशून-
वरुन्द्धेऽधो उभयत एव यज्ञस्याशिषश्नोति ॥ १ ॥ १-४

नानाग्नेयं क्रियत इत्याहुः कस्मादाज्यभागौ यजन्तीति चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदा-
ज्यभागा अन्तरियाच्चक्षुषी यज्ञस्यान्तरियादग्न आयूँषि पवस इत्येतां सोमस्याज्यभागस्य लोके कुर्या-
द्यदाग्नेयं तेनाग्नेयी यत् पावमानं तेन सौमी नानाग्नेयं क्रियते न सोममन्तरेत्यग्निर्मूर्धा दिवः ककुदित्ये-
तां सोमस्याज्यभागस्य लोके कुर्यात् प्रजाकामस्य वा पशुकामस्य वा यन्मिथुना तेन प्रजननवती
यद्वृत्रवती तेन सौमी नानाग्नेयं क्रियते न सोममन्तरेति ॥ वीरहा वा एष देवानां योऽग्निमुत्साद-
यते शतदायो वीरो यदेताश्शताक्षरा अक्षरपङ्क्तयो वीरमेवैतद्देवानामवदयतेऽन्यस्यै वै प्रमाया
आधेयोऽन्यस्यै पुनराधेयो न वै तामाधेयेन स्पृणोति यस्यै पुनराधेयः पुनराधेयेन वाव तां स्पृणोति
जरा वै देवहितमायुस्तावतीर्हि समा जीवति तस्मादाहुश्शतदायो वीर इति यदेताश्शताक्षरा अक्षर-
पङ्क्तयो भवन्ति यावदेव वीर्यं तदाप्नोति तत् स्पृणोत्यायुषा वा एष वीर्येण व्यृध्यते योऽग्निमु-
त्सादयते शतायुर्वै पुरुषश्शतवीर्य आयुर्वीर्यं हिरण्यं यद्धिरण्यँ शतमानं ददात्यायुरेव वीर्यं पुनरा-
लभेत ॥ २ ॥ ५-६

यज्ञेन वा एष व्यृध्यते योऽग्निमुत्सादयते पाङ्क्तो यज्ञो यत् पञ्चकपालो यज्ञमेवालभते
तदाहुरष्टकपाल एव कार्यो न पञ्चकपाल इत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्रच्छन्दा आग्ने-
यमेतत् क्रियते यत् पुनराधेयं तस्मादष्टाकपालस्तत् तन्न सूक्ष्यं पञ्चकपाल एव कार्योऽग्निर्वा
उत्सीदन् संवत्सरमनूत्सीदति पञ्च वा ऋतवस्संवत्सरः पञ्चधाद्वा अध्यृतोष्पष्ट ऋतुर्बभूव
समानमेतद्यत् पञ्चधश्चर्तुष्पष्टश्च यत् पञ्चकपालस्संवत्सरादेवैनमध्यवरुन्द्धे पञ्च वा ऋतवः
प्रजननमृतवो यत् पञ्चकपालः प्रजननाय प्रजननं वा ऋतवोऽग्निः प्रजनयिता यत् पञ्चकपालः

[२] मै. १,७,४-५ (१८-१९)। कपि. ८,५। वा. १९,३८; ३५,१६; ३,१२; १३,१४; १५,२०; काण्व. ८,१९; २१,४०; २९,३७; ३५,४८; ३,१८; १४,१४; १६,४१। [अग्न आयूंषि० । ऋ. ९,६६,१९; सा. ६२७, २१,४०; ... १४६४, १५१८, तै. सं. १,३,१४,७; ४,२९,१; ५,५,२; ६,६,२; तै. ब्रा. २,६,३४; तै. आ २,५,२ । अग्नि-मूर्धा दिवः० । ऋ. ८,४४,१६; सा. २७, १५३२; तै. सं. १,५,५,१, ४,४,१,१, तै. ब्रा. ३,५,७,१]

[३] मै. १,७,४-५ (१८-१९)। कपि. ८,६।

काठ. १०

प्रजननादेवैनं प्रजनयिता प्रजनयत्यादित्या वा इतस्सर्वेणैव सहामुं लोकमायँस्तेऽमुं लोकं गत्वा
व्यतृष्यँस्तेऽविदुरमुतः प्रदानाद्वा इहाजगामेति त एतं पुनरादधत तेनार्ध्नुवन्नादित्या वा अस्मिल्लोक
ऋद्धा आदित्या अमुष्मिन् पशवोऽस्मिन्भृतवोऽमुष्मिन्नुभयोरेव लोकयोर्ऋध्नोति य एवं विद्वानेतमाधत्ते
केतस्सुकेतस्सकेतस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा सलिलस्सलिगस्सगरस्ते न
आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा दिवो ज्योतिर्विवस्व आदित्य ते नो देवा देवेषु सत्यां
देवहूतिमासुवध्वमादित्येभ्यस्स्वाहेत्येतैर्वै ते तमादधत तेनार्ध्नुवन् यदा वा एतैराधत्तेऽथाहित
आदित्यो हि पुनराधेयः ॥ ३ ॥ ७

आग्नेयोऽष्टाकपालस्सौम्यश्चरुस्सावित्रो द्वादशकपालस्सारस्वतश्चरुः पौष्णश्चरुर्मारुतस्सप्तकपालो
वैश्वदेव्यामिक्षा द्यावापृथिव्य एककपाल आग्नेयोऽष्टाकपालस्सौम्यश्चरुस्सावित्रोऽष्टाकपालस्सारस्वत-
श्चरुः पौष्णश्चरुरैन्द्राग्नो द्वादशकपालो मारुत्यामिक्षा वारुण्यामिक्षा कायं एककपालो नमस्त आता-
नानर्वा प्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेण ॥ ८

प्रघास्यान् हवामहे मरुतो यज्ञवाहसः । करम्भेण सजोषसः ॥ ९
मो षू ण इन्द्रात्र पृत्सु देवा अस्तु स्म ते शुष्मिन्नवयाः ।
मही ह्यस्य मीढुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥ १०
यद्ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये । यदेनश्चकृमा वयं यदप्स्वश्चकृमा वयम् ।
यदेकस्यापि धर्मण्येतत् तदवयजामहे । स्वाहा ॥ ११
अक्रन् कर्म कर्मकृतस्सह वाचा मयोभुवा । देवेभ्यः कर्म कृत्वास्तं प्रेत सुदानवः ॥४॥ १२

अग्नयेऽनीकवते प्रातरष्टाकपालो मरुद्भ्यस्सान्तपनेभ्यो मध्यंदिने चरुर्मरुद्भ्यो गृहमेधेभ्यस्स-
र्वासां दुग्धे सायमोदनो निष्कासो निधीयते संतर्यै ॥ १३

पूर्णा दर्वे परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ॥ १४
देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारमिन्नि मे हर निहारं निहरामि ते ।
अप्रामित्यमिव संभरेषमूर्जं शतक्रतो ॥ १५

[४] मै. १,१०,१—२ (१,३-७)। कपि. ८,७। वा. ६,१२; ३,४४—४७; २०,१७; ८४,१६। काण्व. ६,१६; ३,५१-५५; २२,४। [मो षू (षु) ण इन्द्रात्र० । ऋ १,१७३,१२। यदेनश्चकृमा वयम्० । अथर्व. १०, ३,८]

[५] मै. १,१०,१-२ (१-२,८-९)। कपि. ८,८। वा. २४,१६, ३,४९—५०; २,९। काण्व. २६,१०; ३, ५७—५८; २,१३। [पूर्णा दर्वे (दर्वि)०। अथर्व. ३,१०,७; श्रौ. पू. अ. २, खं. १८। देहि मे ददामि ते० । श्रौ. पू. अ. २, खं. १८]

मरुद्भ्यः क्रीडिभ्यः प्रातस्सप्तकपालस्साकं सूर्यस्य रश्मिभिराग्नेयोऽष्टाकपालस्सौम्यश्चरुस्सावि-
त्रोऽष्टाकपालस्सारस्वतश्चरुः पौष्णश्चरुरैन्द्राग्न एकादशकपाल ऐन्द्रश्चरुर्वैश्वकर्मण एककपालोऽग्ने वेहोत्रं
वेर्दूत्यमूध्वोऽध्वरेऽस्था अवतां त्वा द्यावापृथिवी अव त्वं द्यावापृथिवी स्विष्टकृदिन्द्राय देवेभ्यो भव १६
जुषाणो अस्य हविषो घृतस्य वीहि स्वाहा ॥ ५ ॥

सोमाय पितृमत आज्यं पितृभ्यो बर्हिषद्भ्यष्षट्कपालः पुरोडाशः पितृभ्योऽग्निष्वात्तेभ्यो धाना
अग्नये कव्यवाहनाय मन्थ एतत् ते तत ये च त्वामन्वेतत् ते पितामह ये च त्वामन्वेतत् ते प्रपिता- १७
मह ये च त्वामन्वत्र पितरो मादयध्वम् ॥

सुसंदृशं त्वा वयं मघवन् मन्दिषीमहि । १८
प्र नूनं पूर्णवन्धुर स्तुतो यासि वशाँ अनु योजा न्विन्द्र ते हरी ॥
परेत पितरस्सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः । १९
दत्त्वायास्मभ्यं द्रविणेह भद्रं रयिं च नस्सर्ववीरं नियच्छत ॥ २०
अमीमदन्त पितरः ॥
अयां विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः । २१
स प्रत्युदैद्धरुणं मध्वो अग्रं स्वां यत् तनूं तन्वमैरयत ॥
अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । २२
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥
नमो वः पितरो जीवाय नमो वः पितरो
नमो वः पितरो मन्यवे नमो वः पितरश्शुष्माय नमो वः पितरो बलाय नमो नमो वः पितरस्स्वधा वः पितरो
रसाय नमो वः पितरः क्रूराय नमो वः पितरो बलाय नमो नमो वः पितरस्स्वधा वः पितरो
यात्र पितरस्स्वधा यत्र यूयं स्थ सा युष्मासु तया यूयं यथाभागं मादयध्वं येह पितर ऊर्ग्यत्र वयं २३
संस्सास्मासु तस्यै वयं ज्योग्जीवन्तो भूयास्म ॥ २४
मनो न्वाहुवामहे नाराशँसेन स्तोमेन । पितृणां च मन्मभिः ॥ २५
आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥

[६] मै. १,१०,३ (१०-२०)। कपि. ८,९-१०। वा. २,२९,३१,—३२; ३,५१-५५। काण्व. २,६५,५४,५६-५७; परेत पितरस्सोम्यासो० । ३,५९—६३। [सुसंदृशं त्वा वयं० । ऋ. १,८२,३; तै. सं. १,८,५,१। अयां विष्ठा० । अथर्व. ७,३,१; श्रौ. पू. अ. २, खं. १९। अथर्व. १८,४,६२—६३; श्रौ. पू. अ. २, खं. ७। अक्षन्नमीमदन्त० । ऋ. १,८२,२, अथर्व. १८,४,६१; सा. ४१५, तै. सं. १,८,५,२। नमो वः पितरो० । अथर्व. १८,४,८१-८७; श्रौ. पू. अ. २, खं. ७। मनो न्वाहुवामहे० । ऋ. १०,५७,३; तै. सं. १,८,५,२ । अथर्व. १,६,३, ६,११,१, तै. सं. १.८,५,२]
आ न (त) एतु मनः० । ऋ. १०,५७,४; अथर्व. १,६,३, ६,११,१, तै. सं. १.८,५,२]

पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥ २६
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् । यद्ध स्या ते पनीयसी समिद्दीदयति द्यवि ।
इषँ स्तोतृभ्य आभर ॥ २७
यदन्तरिक्षं पृथिवीमुत द्यां यत् पितरं मातरं वा जिहिंसिम ।
अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥ ६ ॥ २८

रुद्राखुं ते पशुं करोमि तेन त्वा पशुभ्यो निरवदय एष ते रुद्र भागस्सह स्वस्राम्बिकया तं
जुषस्व स्वाहा ॥ २९

अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम ।
यथा नो वस्यसस्करद्यथा नश्श्रेयसस्करद्यथा नो व्यवसाययात् ॥ ३०
भेषजं गवेऽश्वाय पुरुषाय सुगं मेषाय मेष्यै ।
अथो अस्मभ्यं भेषजं सुभेषजं यथासति ॥ ३१
त्र्यम्बकं यजामहे सुगन्धिं रयिपोषणम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ३२

भगस्स्थ भगस्य वो लप्सीयैष ते रुद्र भागस्तेनावसेन परो मूजवतोऽतीहि कृत्तिवासाः
पिनाकहस्तोऽवततधन्वा ॥ एधोऽस्येधिषीमहि समिदसि समेधिषीमहि तेजोऽसि तेजो मयि धेहि ३३-३४
॥ ७ ॥

चित्तिस्स्रुक् चित्तमाज्यं वाग्वेदिराधीतं बर्हिः केतो अग्निर्विज्ञातमग्निद्वाचस्पतिर्होता मन उपवक्ता
प्राणो हविस्सामाध्वर्युरिन्द्रं गच्छ स्वाहा पृथिवी होता द्यौरध्वर्युस्त्वष्टाग्निर्मित्र उपवक्ता वाचस्पते
वाचो वीर्येण संभृततमेनायक्षसे यज्ञपतये वार्यमा स्वस्करो वाचस्पतिस्सोमं पिबतु जजनदिन्द्रमि-
न्द्रियाय स्वाहा सोमस्सोमस्य पुरोगाश्शुक्रश्शुक्रस्य पुरोगाश्श्रातास्त इन्द्र सोमा वातापे हवनश्रु-
तस्स्वाहाग्निर्होताश्विनाध्वर्यू रुद्रोऽग्नीद्बृहस्पतिरुपवक्ता वाचस्पते हृद्विधे नामन् वाचस्पतिस्सोममपा-
दास्मासु नृम्णं धात् स्वाहा सोमस्सोमस्य पुरोगाश्शुक्रश्शुक्रस्य पुरोगाश्श्रातास्त इन्द्र सोमा
वातापे हवनश्रुतस्स्वाहा ॥ ८ ॥ ३५

[पुनर्नः पितरो० । ऋ. १०,५७,५; तै. सं. १,८,५,३। आ ते अग्न इधीमहि० । ऋ. ५,६,४; सा. ४१९, १०२२; अथर्व. १८,४,८८; तै. सं. ४,४,४,६। इषँ स्तोतृभ्य आ भर । ऋ. ५,६,१-१०; सा. ४१९,४२५, १०२२-१०२४,१५८६,१७३७—१७३९। यदन्तरिक्षं पृथिवी० अथर्व. ६,१२०,१, श्रौ. पू. अ. २, खं. ७]

[७] मै. १,१०,४. (२२—२७)। कपि. ८,११। वा. ३,५७—६१, २०,२३; ३८,२५। काण्व. ३,६५-७०; २२, ७; ३८,२४। [सुगं मेषाय मेष्यै (०ष्ये) [द्वि. पा.]। ऋ. १,४३,६। त्र्यम्बकं यजामहे० । ऋ. ७,५९, १२; अथर्व. १४,१,१७; तै. सं. १,८,६,२; नि. १४,३५। एधोऽस्येधिषीमहि० । श्रौ. पू. अ. ३, खं. ६]

[८] मै. १,९,१ (१)। कपि. ८. १२। [चित्तिस्स्रुक्०...ध्वर्युः । ऐ. ब्रा. ५,२५]

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणे यमायाश्वं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणे रुद्राय गां तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि प्रोस्याक्रन्तन्नपसोऽतन्वत वरुत्रीरवयन् वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वासस्तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिण उत्तानायाङ्गिरसायाप्राणत् तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये पुरुषं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे क इदं कस्मा अदात् कामः कामाय कामो दाता कामः प्रतिग्रहीता कामस्समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत् ते महाहविर्होता सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमना उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता वाचस्पते विधे नामन् विधेम ते नाम विधेस्त्वमस्माकं नाम मा देवानां तन्तुश्छेदि मा मनुष्याणाम् ॥ ९ ॥ ३६-३७

अग्निर्यजुर्भिस्सविता स्तोमैरिन्द्र उक्थामदैर्बृहस्पतिश्छन्दोभिर्विष्णुर्दीक्षातपोभ्यामदितिस्सदोहविर्धानाभ्यामादित्या आज्यैर्मित्रावरुणौ धिष्ण्येभिरग्निभिर्मरुतोऽपश्च बर्हिश्च त्वष्टा समिधाश्विना आशिरा पूषा स्वगाकारैः पृथिव्यग्नेर्वाग्वातस्य सेनेन्द्रस्य धेना बृहस्पतेः पथ्या पूष्णो गायत्री वसूनां त्रिष्टुब्रुद्राणां जगत्यादित्यानामनुष्टुम्मित्रस्य विराड्वरुणस्य पङ्क्तिर्विष्णोर्दीक्षा सोमस्य ॥ १० ॥ ३८

प्रजापतिरकामयत स्यात् प्रजायेयेति स दशधात्मानं व्यधत्त तस्य चित्तिस्स्रुगासीच्चित्तमाज्यं वाग्वेदिराधीतं बर्हिः केतो अग्निर्विज्ञातमग्निद्वाचस्पतिर्होता मन उपवक्ता प्राणो हविस्सामाध्वर्युस्स दशधात्मानं विधाय मिथुनं कृत्वा स आयतनमैच्छत् स त्रिवृतमेवायतनमचायत् प्राणाँस्ततः प्रजा

[९] मै. १,९,१,४ (१,४—१६)। कपि. ८,१३। मा. ७,३०; ७,३७—४८। काण्व. ९,४३ ९,१२—१४। [देवस्य त्वा० अथर्व. १९,५१,२; ऐ ब्रा. ८,७; श. ब्रा. १,१०,२४। कस्मा अदात्काम:०। अथर्व. ३,२९,७; श्री. सू. अ. ५, खं. १३]
[१०] मै. १,९,२ (२)।
[११] मै. १,९,३—४ (३—१६)।

असृजत तत ऊर्ध्वोऽन्य उदतृणत् पञ्चदशोऽवाङन्योऽवातृणत् पञ्चदशो य ऊर्ध्व उदतृणत् स पूर्वपक्षस्तेन देवानसृजत तमूर्ध्वमाप्यायमानं देवा ऊर्ध्वा अन्वाप्यायन्त योऽवाङवातृणत् सोऽपरपक्षस्तेनासुरानसृजत तमपध्वँसमानमसुरा अवाञ्चोऽनुप्राध्वँसन्त दक्षिणँ हस्तमनु देवानसृजत ते वीर्यावन्तोऽभवन् सव्यँ हस्तमन्वसुराँस्ते मृद्धा अभवँस्तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरस्सत्येन देवानसृजत ते सत्यमभवन्ननृतेनासुराँस्तेऽनृतमभवन्नह्ना देवानसृजत ते शुक्लं वर्णमपुष्यन् रात्र्यासुराँस्ते कृष्णा अभवन् स वै तदैच्छद्यस्मिन् होष्यामीति स इन्द्रमेव वीर्यमन्तरात्मन्नपश्यत् सोऽस्मान्यज्ञातमासीत् स इन्द्रं गच्छ स्वाहेत्यपानीद्वीर्यं वै प्राणो वीर्यमिन्द्रो वीर्य एव वीर्यमादधात् ते चतुर्होत्रा सोमगृहपतयो न्यसीदन्निन्द्रं जनयामेति तेषां पृथिवी होतासीद् द्यौरध्वर्युस्त्वष्टाग्निर्मित्र उपवक्ता त एतां ग्रहा अगृह्णत त आयतनमैच्छँस्त एकविंशमेवायतनमचायँस्त इन्द्रमजनयँस्ते पञ्चहोत्रा वरुणगृहपतयो न्यसीदन् स्वरयामेति तेषामग्निर्होतासीदश्विनाध्वर्यू यदश्विना तेन पञ्चहोत्रा रुद्रोऽग्निद्बृहस्पतिरुपवक्ता त एतां ग्रहा अगृह्णत त आयतनमैच्छँस्ते त्रिणवमेवायतनमचायँस्ते स्वरायँस्तँ सेतुं कृत्वा तत् पशवोऽसृज्यन्त तान् देवताभ्योऽनयन् यमायाश्वमग्नये हिरण्यं रुद्राय गां बृहस्पतये वास उत्तानायाङ्गिरसायाप्राणत् प्रजापतये पुरुषम् ॥ ११ ॥ ३९

तस्य यमस्याश्वं प्रतिजगृहुषोऽर्धमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् सोऽर्धमिन्द्रियस्योपाधत्त य एतद्विद्वानश्वं प्रतिगृह्णात्यर्धमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णात्यर्धमस्येन्द्रियस्यापक्रामति तस्याग्नेर्हिरण्यं प्रतिजगृहुषस्तृतीयमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स तृतीयमिन्द्रियस्योपाधत्त य एतद्विद्वान् हिरण्यं प्रतिगृह्णाति तृतीयमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति तृतीयमस्येन्द्रियस्यापक्रामति तस्य रुद्रस्य गां प्रतिजगृहुषश्चतुर्थमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स चतुर्थमिन्द्रियस्योपाधत्त य एतद्विद्वान् गां प्रतिगृह्णाति चतुर्थमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति चतुर्थमस्येन्द्रियस्यापक्रामति ॥ तस्य बृहस्पतेर्वासः प्रतिजगृहुषः पञ्चममिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स पञ्चममिन्द्रियस्योपाधत्त य एतद्विद्वान् वासः प्रतिगृह्णाति पञ्चममिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति पञ्चममस्येन्द्रियस्यापक्रामति तस्योत्तानस्याङ्गिरसस्याप्राणत् प्रतिजगृहुषः षष्ठमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स षष्ठमिन्द्रियस्योपाधत्त य एतद्विद्वानप्राणत् प्रतिगृह्णाति षष्ठमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति षष्ठमस्येन्द्रियस्यापक्रामति तस्य प्रजापतेः पुरुषं प्रतिजगृहुषस्सप्तममिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स सप्तममिन्द्रियस्योपाधत्त य एतद्विद्वान् पुरुषं प्रतिगृह्णाति सप्तममिन्द्रियस्योपधत्ते य

[१२] मै. १,९,४-५ (४-१७)। मा. ७,४८। काण्व. ९,१४।

एतदविद्वान् प्रतिगृह्णाति सप्तममस्येन्द्रियस्यापक्रामति ॥ क इदं कस्मा अदात् कामः कामायेति कामो हि दाता कामः प्रतिग्रहीता कामस्समुद्रमाविशदिति समुद्र इव हि कामोऽपरिमितः कामेन त्वा प्रतिगृह्णामि कामैतत् त इति कामेनैवं प्रतिगृह्णाति कामे प्रतिष्ठापयति न ह वै तस्मिन्नमुष्मिंल्लोके दक्षिणामिच्छन्ति य एवं विद्वान् दक्षिणां प्रतिगृह्णाति यस्तं देवं वेद योऽग्रे दक्षिणा अनयत् प्र तावदाप्नोति यावद्दक्षिणानां नेत्रं य उ तान् वेद येभ्यस्सं तदनयद्दक्षिणीयो भवति यस्तं प्रतिग्रहं वेद येन तं प्रत्यगृह्णन् वसीयान् भवति प्रतिगृह्य वसीयाँसो हि तं प्रतिगृह्याभवँस्तं देवास्त्वरित्वा व्युदृप्यँस्तेऽविदुरहंतः प्रदानाद्वा इहाजगामेति ॥ तं ऋषीनब्रुवन्तो नो यूयं प्रयच्छतेति सप्तहोतॄन् कैनायतनेनेत्यत्रैव वेत्स्यथेति ते सप्तहोत्रार्यमगृहपतयो न्यसीदन् संतनवामेति तेषां महाहविर्होतासीत् सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमना उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता त एतं ग्रहमगृह्णत त आयतनमैच्छँस्तं त्रयस्त्रिंशमेवायतनमचायँस्तेनेदं समतन्वँस्त्रयस्त्रिंशेन च ह वा इदं सप्तहोत्रा च संततं यदिदं देवमनुष्या अन्योऽन्यस्मै प्रददति संततमस्मा अविच्छिन्नं प्रदीयते य एवं वेद ॥ १२ ॥ ४०-४३

प्रजापतिर्दशहोता दर्शपूर्णमासौ चतुर्होता चातुर्मास्यानि पञ्चहोता सौम्योऽध्वरस्सप्तहोताग्निहोत्रं दशहोता दर्शपूर्णमासौ चतुर्होता पशुबन्धष्षड्ढोता सौम्योऽध्वरस्सप्तहोता प्राणो दशहोता चक्षुश्चतुर्होता श्रोत्रं पञ्चहोता वाक्चात्मा च सप्तहोतायुषे कमग्निहोत्रँ हूयते सर्वमायुरेति य एवं वेद चक्षुषे कं पूर्णमा इज्यते न चक्षुषो गृह्यते य एवं वेद श्रोत्राय कममावस्येज्यते न श्रोत्रस्य गृह्यते य एवं वेद ॥ वाचे चात्मने च कं सौम्योऽध्वर इज्यते न वाचो नात्मनो गृह्यते य एवं वेद प्रजापतिर्दशहोतैकस्मिन् भूयिष्ठमाग्न्याहुतीनामुतैकस्मिन् बहुर्भवति य एवं वेद तेजसे कं पूर्णमा इज्यत आग्नेयो वै ब्राह्मणो गायत्रोऽग्निर्गायत्रश्छन्दास्त्वे एव देवते सप्रस्थे अकर्नास्यान्यो योगक्षेमस्येशे य एवं वेदायुषे कममावस्येज्यते सर्वमायुरेति य एवं वेद स्वर्गाय कं सौम्योऽध्वर इज्यते स्वर्गमेव तेनैति ॥ १३ ॥ ४४-४५

यः प्रजया पशुभिरिव प्रमेदरासीं परिधाय तप्तं पिबन् द्वादश रात्रीरधश्शयीत द्वादश्याः प्रातः प्राकुदद्रुत्य दशहोतारं व्याचक्षीतामिथुनो हि वा एषोऽथ न प्रमवति प्रजापतिर्दशहोता दशधैवात्मानं विधाय मिथुनं कृत्वा प्र प्रजया प्र पशुभिर्जायते चतुर्होत्रा याजयेत् पुत्रकामं चतुर्होत्रा वै देवा इन्द्रमजनयन्निन्द्रियं पुत्रः पुत्रमेवास्मै जनयति न त्वेनमपरोऽनुजायते सर्वेण हीन्द्रियेण सर्वेण

[क इदं कस्मा अदात्० । अथर्व. ३,२९,७; श्रौ. सू. अ. ५, खं. १३]
[१३] मै. १,९,५ (१७)।
[१४] मै. १,९,५-६ (१७-१८)।

वीर्येण जायते वरो दक्षिणा वरो हि पुत्रश्चतुर्होत्रा याजयेद्राजानँ संग्रामे संयत्ते चतुर्होत्रा वै देवा इन्द्रमजनयन्यतरेषामिन्द्रो भवति ते संग्रामं जयन्तीन्द्रमेवास्मै जनयति जयति संग्रामं यत् तत्र विन्दते ततो दक्षिणा समृद्ध्यै पञ्चहोत्रा याजयेत् पशुकामं पञ्चहोत्रा वै देवाः पशूनसृजन्त सर्वानेवास्मै पशूञ्जनयति तस्यैताश्चतस्रो दक्षिणा अश्वो हिरण्यं गौर्वासस्सप्तहोत्रा याजयेद्यो यज्ञस्य सँस्थामनु पापीयान् स्याद्धि वा एष च्छिनत्ति यो यज्ञस्य सँस्थामनु पापीयान् भवति पराङेव संक्रामति सप्तहोत्रा वै देवास्स्वरायन् सप्तहोत्रेदँ समतन्वन् समेव तनोति न ततः पापीयान् भवति याद्दक्तन्यजते यच्चतुर्होतॄननुसवनं तर्पयितव्यान् वेद तृप्यति प्रजया पशुभिरुपैनँ सोमपीथो नमति ॥ दशहोतारं व्याख्याय बहिष्पवमानेनोद्गायेत् प्रजापतिर्दशहोता प्रैव जनयति चतुर्होतारं व्याख्यायाज्येरुद्गायेच्चतुर्होत्रा वै देवा इन्द्रमजनयन्निन्द्रमेवास्मै जनयति सेन्द्रं तत् सवनं करोति पञ्चहोतारं व्याख्याय माध्यंदिनेन पवमानेनोद्गायेत् पञ्चहोत्रा वै देवा असुरान् प्राणुदन्त पञ्चहोत्रा पशूनसृजन्त भ्रातृव्यमेव पराणुद्य पशून् सृजते सप्तहोतारं व्याख्यायार्भवेण पवमानेनोद्गायेत् सप्तहोत्रा वै देवास्स्वरायन् सप्तहोत्रेदँ समतन्वन् समेव तनोति ॥ दशहोतारँ सामिधेनीष्वनूच्यमानासु व्याचक्षीत प्रजापतिर्दशहोता प्रैव जनयति चतुर्होतारं प्रयाजानां पुरस्ताद्व्याचक्षीत चतुर्होत्रा वै देवा इन्द्रमजनयन्निन्द्रमेवास्मै जनयति सेन्द्रं यज्ञं करोति पञ्चहोतारँ हविषामवदीयमाने व्याचक्षीत पञ्चहोत्रा वै देवा असुरान् प्राणुदन्त पञ्चहोत्रा पशूनसृजन्त भ्रातृव्यमेव पराणुद्य पशून् सृजते सप्तहोतारमनुयाजानामुपरिष्टाद्व्याचक्षीत सप्तहोत्रा वै देवास्स्वरायन् सप्तहोत्रेदँ समतन्वन् समेव तनोति चतुर्होत्रा पूर्णमासे हवींष्यासन्नान्यभिमृशेच्चतुर्होत्रा वै देवा इन्द्रमजनयन् प्रजननं पूर्णमाः प्रैव जनयति पञ्चहोत्रामावस्यायाँ हवींष्यासन्नान्यभिमृशेत् पञ्चहोत्रा वै देवास्स्वरायन् स्वर्ग्यामावस्या स्वर्गस्यैवैष लोकस्य परिग्रहः ॥ १४ ॥ ४६-४८

अन्नं वै चतुर्होतारोऽन्नवान् भवति य एवं वेद यदेक एव चतुर्होतेत्याहुः कस्मात् सर्वे चतुर्होतार उच्यन्त इति चत्वारो वा एते यज्ञास्तेषां चत्वारो होतारस्तदेषां चतुर्होतृत्वँ संवत्सरं चतुर्णामेको नाश्नीयात् तदेषां व्रतमेषा वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतारोऽन्नाद्यायैवैतां विदुस्तेजसे वीर्याय सर्पराज्ञ्या ऋग्भिर्दशमेऽहन्नुद्गातोद्गायेदियं वै सर्पराज्ञ्यन्नं चतुर्होतारोऽन्नमेवाप्त्वान्नमवरुन्द्धेऽप्रयुक्ता वा एतेऽनवरुद्धा यच्चतुर्होतारो यच्चतुर्होतॄन् होता वदति तानेव प्रयुङ्क्ते तानवरुन्द्ध एतद्वै देवानाँ स्तोत्रमनिरुक्तं यत् सर्पराज्ञ्या ऋचस्तस्यैँ तदुक्थमनिरुक्तं यच्चतुर्होतारो मनसा प्रस्तौति मनसोद्गायति मनसा प्रतिहरति रेत एवैतदुद्गातारः प्रसिञ्चन्ति यच्चतुर्होतॄन् होता वदति रेत एव प्रसिक्तँ होता प्रजनयत्यग्न्याधेये व्याचक्षीत ब्रह्मणो वा एतदुदरणं यदग्न्याधेयं ब्रह्मण एतदुदरणं यच्चतु-

[१५] मै. १,९,७—८ (१९—२०)।

होतारो ब्रह्मण एतदुदरणं यदसा आदित्य उदेति सर्वमेव ब्रह्म सृजतेऽथैते संभारास्सह वै देवानां
चासुराणां च यज्ञौ प्रतता आस्तां यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा यज्ञमादाय व्युत्क्रा-
मँस्तमुपरि समभरँस्तेनासुरान् पराभावयन् यत् समभरँस्तत् संभाराणाँ संभारत्वँ समृतसोम एतेशां
चतुर्भिश्चतुर्भिः प्रचरिष्यञ्जुहुयात् पूर्व एव यज्ञं पूर्वो देवता गृह्णाति सयज्ञो भवत्ययज्ञ इतरो दीक्षायां
वाचयेदेतावान् वै यज्ञो यावानेव यज्ञस्तं गृहीत्वा दीक्षते द्वादशाहे वाचयेदेतावान् वै यज्ञो यावान्
द्वादशाहो यावानेव यज्ञो यावान् द्वादशाहस्तं गृहीत्वा दीक्षतेऽथैताः पत्न्यो दक्षिणतो वै देवानाम-
सुरा यज्ञमभ्यजयँस्तेषामाग्नीध्रमनभिजितमासीत् तद्देवाः पत्नीभिस्संप्रापद्यन्त तेऽसुरा ह्रीकाः पत्नीः
प्रख्याय पुनरावर्तन्त तान् देवास्ततोऽनूत्थाय माध्यंदिनेन पवमानेनाभ्यजयन् यस्य पत्नीर्विद्वान-
ग्निद्भवत्यभि भ्रातृव्यस्य गृहानभि पशूनारोहति नास्य भ्रातृव्यो गृहान्न पशूनभ्यारोहति यस्य पत्नी-
र्विद्वानग्नित्पात्नीवतस्य यजति विद्वान् पत्नीं तर्पयति तृप्ता पत्नी रेतो धत्ते रेतसः प्रजाः प्रजायन्ते
प्रजनिष्णुः प्रजया च पशुभिश्च भवति ॥ १५ ॥ ४९

प्रजास्सृष्ट्वा सोऽकामयत यज्ञं सृजेयेति स एतँ सप्तहोतारमपश्यत् तँ मनसानूद्द्रुत्याजुहोत् तेन
यज्ञमसृजत सोऽस्माद्यज्ञस्सृष्टः पराङैत् तं ग्रहेणानूद्द्रुत्यागृह्णात् तद्ग्रहस्य ग्रहत्वं दीक्षिष्यमाणस्सप्त-
होत्रा पुरस्ताज्जुहुयाद्यज्ञमेव सृष्ट्वालभ्य प्रतनुते ग्रहो भवति यज्ञस्य सृष्टस्य धृत्यै यज्ञं सृष्ट्वा सोऽका-
मयत दर्शपूर्णमासौ सृजेयेति स एतँ चतुर्होतारमपश्यत् तँ मनसानूद्द्रुत्याजुहोत् तेन दर्शपूर्णमासा-
असृजत तौ अस्माद्दर्शपूर्णमासौ सृष्टौ पराञ्चा ऐतां तौ ग्रहेणानूद्द्रुत्यागृह्णात् तद्ग्रहस्य ग्रहत्वं दर्श-
पूर्णमासा आलप्स्यमानश्चतुर्होत्रा पुरस्ताज्जुहुयाद्दर्शपूर्णमासा एवं सृष्ट्वालभ्य प्रतनुते ग्रहो भवति
दर्शपूर्णमासयोस्सृष्टयोर्धृत्यै दर्शपूर्णमासौ सृष्ट्वा सोऽकामयत चातुर्मास्यानि सृजेयेति स एतं पञ्च-
होतारमपश्यत् तँ मनसानूद्द्रुत्याजुहोत् तेन चातुर्मास्यान्यसृजत तान्यस्माच्चातुर्मास्यानि सृष्टानि
पराञ्च्यायँस्तानि ग्रहेणानूद्द्रुत्यागृह्णात् तद्ग्रहस्य ग्रहत्वं चातुर्मास्यान्यालप्स्यमानः पञ्चहोत्रा पुर-
स्ताज्जुहुयाच्चातुर्मास्यान्येव सृष्ट्वालभ्य प्रतनुते ग्रहो भवति चातुर्मास्यानाँ सृष्टानां धृत्या अभिचरन्
दशहोत्रा जुहुयान्नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेवास्योपदासयति स्रक्त्य इरिणे प्रदरे वा
जुहुयादेतद्वा अस्या निर्ऋतिगृहीतं निर्ऋत्यैवैनं ग्राहयति वषट्करोत्येतद्वै वाचः क्रूरं वाचैवैनं
क्रूरेण प्रवृश्चत्याङ्गिरसश्च वा आदित्याश्च स्वर्गे लोकेऽस्पर्धन्त त आदित्या एतं पञ्चहोतारमपश्यँस्तं
मनसानूद्द्रुत्याजुहवुस्तेत आदित्यास्स्वर्गं लोकमायन्नपाङ्गिरसोऽभ्रँशन्त तेऽङ्गिरस आदित्यानब्रुवन्
क्व स्थ कथँ वो हव्यं वक्ष्याम इति च्छन्दस्स्वित्यब्रुवन् गायत्र्यां वसवस्त्रिष्टुभि रुद्रा जगत्यामा-
दित्या इत्यत्र वै देवेभ्यस्सद्र्यो हव्यमुह्यते य एवं देवानुपदेशनाद्वेदोपदेशनवान् भवति यस्स्वर्गं-

कामस्स्यात् स एत पञ्चहोतारं मनसानूद्द्रुत्य जुहुयात् पञ्च वा ऋतव ऋतवस्संवत्सरस्संवत्सर-
स्स्वर्गो लोक ऋतुष्वेव संवत्सरं प्रतिष्ठाय स्वर्गं लोकमेति ॥ योऽब्राह्मणो विद्यामनूच्य नेव रोचेत
स एताँश्चतुर्होतॄनरण्यं परेत्य दर्भस्तम्बमुद्ग्रथ्य ब्राह्मणं दक्षिणतो निषाद्य व्याचक्षीतैतद्वै देवानां
ब्रह्मानिरुक्तं यच्चतुर्होतारस्तदेनं निरुच्यमानं प्रकाशं गमयति दर्भस्तम्बमुद्ग्रथ्य व्याचष्टेऽग्निर्वै दर्भ-
स्तम्बोऽग्निमत्येव व्याचष्टे ब्राह्मणो दक्षिणत आस्ते ब्राह्मणो वै प्रजानामुपद्रष्टोपद्रष्टृमत्येव व्याचष्ट
ईश्वरे वा एता उभौ यशोऽर्तोर्यो व्याचष्टे यश्च दक्षिणत आस्ते यो दक्षिणत आस्ते तस्मै वरं दद्या-
द्यदेव तत्र यश ऋच्छति तद्वरेणावरुन्द्धे ॥ १६ ॥ ५०-५१
ऐन्द्राग्नमेकादशकपालं निर्वपेद्भ्रातृव्यवानोजो वै वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येणाभिभवत्यैन्द्रा-
ग्नमेकादशकपालं निर्वपेत् सजातकाम ओजो वै वीर्यमिन्द्राग्नी ओजसैवैनान् वीर्येणाधस्तादुपा-
स्यते न वा एत एतं प्रयान्तमकामा अनुप्रयान्त्योजो वीर्यमिन्द्राग्नी यदैन्द्राग्न ओज एवैषां वीर्यं
संगृह्य प्रयाति तं प्रयान्तमकामा अनुप्रयान्त्यैन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः प्रजापतेर्वै
प्रजास्सिसृक्षमानस्य तस्यैन्द्राग्नी प्रजा अपागूहतां सोऽवेदिन्द्राग्नी वै मे प्रजा अपाघुक्षतामिति स
एतमैन्द्राग्नमपश्यदेकादशकपालं ततो वै तस्मै तौ प्रजाः पुनरदत्तामिन्द्राग्नी एतस्य प्रजामपगूहतो
योऽलं प्रजायै सन् प्रजां न विन्दते ता एव भागधेयेनोपधावति ता अस्मै प्रीतौ प्रजां पुनर्दत्तः पुन-
र्दातृमती याज्यानुवाक्ये भवतस्समृद्ध्या ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्राममभिप्रयानोजो वै
वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येणाभिप्रयात्यैन्द्राग्नमेकादशकपालं निर्वपेत संग्राममागत्योजो वै वीर्य-
मिन्द्राग्नी ओजसैवैनं वीर्येण जयत्यैन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं जित्वौजसा वा एष वीर्येण
व्यृध्यते यस्संग्रामं जयति सर्वेण हीन्द्रियेण सर्वेण वीर्येण जयत्योजो वीर्यमिन्द्राग्नी यदैन्द्राग्न इन्द्राग्नी
एवैनमोजसा वीर्येण समर्धयत ऐन्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुँ सनिं प्रयन्नोजो वै वीर्य-
मिन्द्राग्नी ओजसैव वीर्येण प्रैति पूषा वीर्यस्यानुप्रदाता यत् पौष्णः पूषैवास्मै वीर्यमनुप्रयच्छत्यैन्द्रा-
ग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं क्षेत्रस्य पतये चरुं यः कामयेतास्यां मे जनतायामृध्येतेत्योजो
वै वीर्यमिन्द्राग्नी यदैन्द्राग्न इन्द्राग्नी एवास्मा ओजसा वीर्येण लोकं विन्दतः पूषा वीर्यस्यानुप्रदाता
यत् पौष्णः पूषैवास्मै वीर्यमनुप्रयच्छत्ययं क्षेत्रस्य पतिर्यत् क्षेत्रपत्योऽस्यामेव प्रतितिष्ठति॥१७॥५२

कया शुभा सवयसस्सनीडास्समान्या मरुतस्संमिमिक्षुः ।
कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥ ५३

[१७] मै. २,१,१ (१)।
[१८] मै. ४,११,३ (७९-९३)। वा. ३३,२७,७८-७९; ३४,४८। काण्व. ३२,२७,७८-७९; ३३,३६। [कया शुभा०...वसूया। ऋ. १,१६५,१]

कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आववर्त ।
श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥ ५४
कुतस्त्वमिन्द्र माहिनस्सन्नेको यासि सत्पते किं त इत्था ।
संपृच्छसे समराणश्शुभानैर्वोचेस्तन्नो हरिवो यत् ते अस्मे ॥ ५५
ब्रह्माणि मे मतयश्शं सुतासश्शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आशासते प्रतिहर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ५६
अतो वयमन्तमेभिर्युजानास्स्वक्षत्रेभिस्तन्वश्शुम्भमानाः ।
महोभिरेताँ उपयुज्महे न्विन्द्र स्वधामनु हि नो बभूथ ॥ ५७
क्व स्या वो मरुतस्स्वधासीद्यन्मामेकँ समधत्ताहिहत्ये ।
अहं ह्युग्रस्तविषस्तुविष्मान् विश्वस्य शत्रोरनमं वधस्नैः ॥ ५८
भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम ॥ ५९
वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहमेता मनवे विश्वश्चन्द्रास्सुगा अपश्चकर वज्रबाहुः ॥ ६०
अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ६१
एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान् कृणवै मनीषा ।
अहं ह्युग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥ ६२
अमन्दन्मा मरुतस्स्तोमो अत्र यन्मे नरश्श्रुत्यं ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥ ६३
एवेदेते प्रति मा रोचमाना अनेद्यश्श्रव एषो दधानाः ।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥ ६४

[कस्य ब्रह्माणि०...रीरमाम। ऋ. १,१६५,२। कुतस्त्वमिन्द्र०...अस्मे। ऋ. १,१६५,३। ब्रह्माणि मे मतयः०...अच्छ। ऋ. १,१६५,४। अतो वयमन्त०...बभूथ। ऋ. १,१६५,५। क्व स्या वो०...वधस्नैः। ऋ. १,१६५,६; तै. ब्रा. २,८,३,५। भूरि चकर्थ०...यद्वशाम। ऋ. १,१६५,७; नि. ६,७। वधीं वृत्रं०...वज्रबाहुः। ऋ. १,१६५,८; तै. ब्रा. २,८,३,६। अनुत्तमा ते०...प्रवृद्ध। ऋ. १,१६५,९। एकस्य चिन्मे०...एषाम्। ऋ. १,१६५,१०। अमन्दन्मा०...तनूभिः। ऋ. १,१६५,११। एवेदेते०...नूनम्। ऋ. १,१६५,१२]

को न्वत्र मरुतो मामहे वः प्रयातन सखीँरच्छा सखायः ।
मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥ ६५
आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा ।
ओ षु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥ ६६
एष वस्स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषायासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १८ ॥ ६७
मरुतो यद्ध वो दिवो यूयमस्मानिन्द्रं वः ॥ ६८
आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥ ६९
त्वा युजा तव तत् सोम सख्य इन्द्रो अपो मनवे ससुतस्कः ।
अहन्नहिमरिणात् सप्त सिन्धूँरपावृणोदपिहितेव खानि ॥ ७०
ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।
अयं यस्सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥ ७१
अग्ने नक्षत्रमग्ने बृहन्नुद त्यं चित्रं देवानाम् ॥ ७२
अयुक्त सप्त शुन्ध्युवस्सूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ॥ ७३
सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥ ७४
अयं पूषा रयिर्भगस्सोमः पुनानो अर्षति । पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ७५

[को न्वत्र मरुतो०...ऋतानाम्। ऋ. १,१६५,१३। आ यद्दुवस्या०...अर्चत्। ऋ. १,१६५,१४। एष वस्स्तोमो०...जीरदानुम्। ऋ. १,१६५,१५; १६६,१५; १६७,११; १६८,१०]
[१९] मै. ४,११,१—२ (२४,४६—४७)। वा. ७,४१—४२; ८,४१; ३३,३१; १३,४६; ४,३, १९,६९। काण्व. ८,२३—२४; ९,६—७, ३२,३१; १४,४८; ४,४; १३,२०। [मरुतो यद्ध वो०। ऋ. ८,७,११; तै. सं. १,५,११,४। यूयमस्मान्नयत०। ऋ. ५,५५,१०। इन्द्रं व०। ऋ. १,७,१०; ६,२९,१; सा. १६२०; अथर्व. २०,३९,१; ७०,१६; तै. सं. १,६,१२,१। आ ते शुष्मो०। ऋ. ६,१९,९; तै. ब्रा. २,५,८,१; ८,५,९। त्वा युजा तव०। ऋ. ४,२८,१। ऋदूदरेण सख्या०। ऋ. ८,४८,१०; तै. सं. २,२,१२,३; नि. ६,४। अग्ने नक्षत्र०। ऋ. १०,१५६,४; सा. १५३०। अग्ने बृहन्०। ऋ. १०,१,१; तै. सं. ४,२,१,४। उदु त्यं०। ऋ. १,५०,१; सा. ३१; अथर्व. १३,२,१६; २०,४७,१३; तै. सं. १,२,८,२; ४,४३,१; नि. १२,१५। चित्रं देवानां०। ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; ऐ. आ. ३,९; तै. आ. १,७,६; २,१३,१; नि. १२,१६। अयुक्त सप्त०। ऋ. १,५०,९; अथर्व. १३,२,२४; २०,४७,२१; तै. ब्रा. २,४,५,४। सप्त त्वा०। ऋ. १,५०,८; सा. ६४०; अथर्व. १३,२,२३; २०,४७,२०; तै. सं. २,४,१४,४। अयं पूषा रयि०। ऋ. ९,१०१,७; सा. ५४६ ८१८]

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणे यमायाश्वं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणे रुद्राय गां तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ग्रास्याकृन्तन्नपसोऽतन्वत वरुत्रीरवयन् वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वासस्तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिण उत्तानायाङ्गिरसायाप्राणत् तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि वरुणस्त्वा नयतु देवि दक्षिणे प्रजापतये पुरुषं तेनामृतत्वमशीय वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे क इदं कस्मा अदात् कामः कामाय कामो दाता कामः प्रतिग्रहीता कामस्समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत् ते महाहविर्होता सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमना उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता वाचस्पते विधे नामन् विधेम ते नाम विधेस्त्वमस्माकं नाम मा देवानां तन्तुश्छेदि मा मनुष्याणाम् ॥ ९ ॥ ३६-३७

अग्निर्यजुर्भिस्सविता स्तोमैरिन्द्र उक्थामदैर्बृहस्पतिश्छन्दोभिर्विष्णुर्दीक्षातपोभ्यामदितिस्सदोहविर्धानाभ्यामादित्या आज्यैर्मित्रावरुणौ धिष्ण्यैरग्निभिर्मरुतोऽपश्च बर्हिश्च त्वष्टा समिधाश्विना आशिरा पूषा स्वगाकारैः पृथिव्यग्नेर्वसवो वातस्य सेनेन्द्रस्य धेना बृहस्पतेः पथ्या पूष्णो गायत्री वसूनां त्रिष्टुब्रुद्राणां जगत्यादित्यानामनुष्टुम्मित्रस्य विराड्वरुणस्य पङ्क्तिर्विष्णोर्दीक्षा सोमस्य ॥ १० ॥ ३८

प्रजापतिरकामयत स्यात् प्रजायेयेति स दशधात्मानं व्यधत्त तस्य चित्तिस्स्रुगासीच्चित्तमाज्यं वाग्वेदिराधीतं बर्हिः केतो अग्निर्विज्ञातमग्निर्वाचस्पतिर्होता मन उपवक्ता प्राणो हविस्सामाध्वर्युस्स दशधात्मानं विधाय मिथुनं कृत्वा स आयतनमैच्छत् स त्रिवृतमेवायतनमचायत् प्राणांस्ततः प्रजा

[९] मै. १,९,२,४ (१,४—१६)। कपि. ८,१३। का. ६,३०; ७,४७—४८। काण्व. ६,४३ ९,१२—१४। [देवस्य त्वा० अथर्व. १९,५१,२; तै.ब्रा. ८,७; तै. ब्रा. ३,२०,२४। कस्मा अदात्कामः० । अथर्व. ३,२९,७; औ. सू. अ. ५, सं. १३]
[१०] मै. १,९,२ (३)।
[११] मै. १,९,३—४ (३—१६)।

असृजत तत ऊर्ध्वोऽन्य उदतृणत् पञ्चदशोऽवाङन्योऽवातृणत् पञ्चदशो य ऊर्ध्व उदतृणत् स पूर्वपक्षस्तेन देवानसृजत तमूर्ध्वमाप्यायमानं देवा ऊर्ध्वा अन्वाप्यायन्त योऽवाङवातृणत् सोऽपरपक्षस्तेनासुरानसृजत तमपध्वँसमानमसुरा अवाञ्चोऽनुप्राध्वँसन्त दक्षिणँ हस्तमनु देवानसृजत ते वीर्यावन्तोऽभवन् सव्यँ हस्तमन्वसुराँस्ते मृद्धा अभवँस्तस्माद्दाक्षिणोऽर्ध आत्मनो वीर्यावत्तरस्सत्येन देवानसृजत ते सत्यमभवन्ननृतेनासुराँस्तेऽनृतमभवन्नह्ना देवानसृजत ते शुक्लं वर्णमपुष्यन् रात्र्यासुराँस्ते कृष्णा अभवन् स वै तदैच्छद्यस्मिन् होष्यामीति स इन्द्रमेव वीर्यमन्तरात्मन्नपश्यत् स ह्येभ्यो ज्ञातमासीत् स इन्द्रं गच्छ स्वाहेत्यपानीद्वीर्यं वै प्राणो वीर्यमिन्द्रो वीर्य एव वीर्यमादधात् ते चतुर्होत्रा सोमगृहपतयो न्यसीदन्निन्द्रं जनयामेति तेषां पृथिवी होतासीद् द्यौरध्वर्युस्त्वष्टाग्निर्मित्र उपवक्ता त एतौ ग्रहा अगृह्णत त आयतनमैच्छँस्त एकविँशमेवायतनमचायँस्त इन्द्रमजनयँस्ते पञ्चहोत्रा वरुणगृहपतयो न्यसीदन् स्वरयामेति तेषामग्निर्होतासीदश्विनाध्वर्यू यदश्विना तेन पञ्चहोत्रा रुद्रोऽग्निर्बृहस्पतिरुपवक्ता त एतौ ग्रहा अगृह्णत त आयतनमैच्छँस्ते त्रिणवमेवायतनमचायँस्ते स्वरायँस्ते सेतुं कृत्वा तत् पशवोऽसृज्यन्त तान् देवताभ्योऽनयन् यमायाश्वमग्नये हिरण्यं रुद्राय गां बृहस्पतये वास उत्तानायाङ्गिरसायाप्राणत् प्रजापतये पुरुषम् ॥ ११ ॥ ३९

तस्य यमस्याश्वं प्रतिजगृहुषोऽर्धमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् सोऽर्धमिन्द्रियस्योपाधत्त य एवंविद्वानश्वं प्रतिगृह्णात्यर्धमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णात्यर्धमस्येन्द्रियस्यापक्रामति तस्याग्नेर्हिरण्यं प्रतिजगृहुषस्तृतीयमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स तृतीयमिन्द्रियस्योपाधत्त य एवंविद्वान् हिरण्यं प्रतिगृह्णाति तृतीयमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति तृतीयमस्येन्द्रियस्यापक्रामति तस्य रुद्रस्य गां प्रतिजगृहुषश्चतुर्थमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स चतुर्थमिन्द्रियस्योपाधत्त य एवंविद्वान् गां प्रतिगृह्णाति चतुर्थमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति चतुर्थमस्येन्द्रियस्यापक्रामति ॥ तस्य बृहस्पतेर्वासः प्रतिजगृहुषः पञ्चममिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स पञ्चममिन्द्रियस्योपाधत्त य एवंविद्वान् वासः प्रतिगृह्णाति पञ्चममिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति पञ्चममस्येन्द्रियस्यापक्रामति तस्योत्तानस्याङ्गिरसस्याप्राणत् प्रतिजगृहुषः षष्ठमिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स षष्ठमिन्द्रियस्योपाधत्त य एवंविद्वानप्राणत् प्रतिगृह्णाति षष्ठमिन्द्रियस्योपधत्ते य एतदविद्वान् प्रतिगृह्णाति षष्ठमस्येन्द्रियस्यापक्रामति तस्य प्रजापतेः पुरुषं प्रतिजगृहुषस्सप्तममिन्द्रियस्यापाक्रामत् स एतेन प्रत्यगृह्णात् स सप्तममिन्द्रियस्योपाधत्त य एवंविद्वान् पुरुषं प्रतिगृह्णाति सप्तममिन्द्रियस्योपधत्ते य

[१२] मै. १,९,४-५ (४-१७)। का. ७,४८। काण्व. ९,१४।

एतदविद्वान् प्रतिगृह्णाति सप्तममस्येन्द्रियस्यापक्रामति ॥ क इदं कस्मा अदात् कामः कामायेति कामो हि दाता कामः प्रतिग्रहीता कामस्समुद्रमाविशदिति समुद्र इव हि कामोऽपरिमितः कामेन त्वा प्रतिगृह्णामि कामैतत् त इति कामेनैव प्रतिगृह्णाति कामे प्रतिष्ठापयति न ह वै तस्मिन्नमुष्मिँल्लोके दक्षिणामिच्छन्ति य एवं विद्वान् दक्षिणां प्रतिगृह्णाति यस्तं देवं वेद योऽग्रे दक्षिणा अनयत् प्र तामवाप्नोति यो दक्षिणानां नेत्रं य उ तान् वेद येभ्यस्तं तदनयद्दक्षिणीयो भवति यस्तं प्रतिग्रहं वेद येन तं प्रत्यगृह्णन् वसीयान् भवति प्रतिगृह्य वसीयाँसो हि तं प्रतिगृह्यामवँस्ते देवास्सुरित्वा प्युरुर्यँस्तेऽविदुरहुतः प्रदानाद्वा इहाजगामेति ॥ तं ऋषीनब्रुवन्तो नो यूयं प्रयच्छतेति सप्तहोतॄन् कैनापतनेनेत्यत्रैव वेत्स्ययेति ते सप्तहोत्रार्यमगृहपतयो न्यसीदन् संतनवामेति तेषां महाहविर्होतासीत् सत्यहविरध्वर्युरचित्तपाजा अग्निदचित्तमना उपवक्तानाधृष्यश्चाप्रतिधृष्यश्चाभिगरा अयास्य उद्गाता त एतं ग्रहमगृह्णत त आयतनमैच्छँस्ते त्रयस्त्रिँशमेवायतनमचायँस्तेनेदं संमतन्वँस्त्रयस्त्रिँशेन च ह वा इदं सप्तहोत्रा च संततं यदिदं देवमनुष्या अन्योऽन्यस्मै प्रददति संततमस्मा अविच्छिन्नं प्रदीयते य एवं वेद ॥ १२ ॥ ४०-४३

प्रजापतिर्दशहोता दर्शपूर्णमासौ चतुर्होता चातुर्मास्यानि पञ्चहोता सौम्योऽध्वरस्सप्तहोताग्निहोत्रं दशहोता दर्शपूर्णमासौ चतुर्होता पशुबन्धः षड्ढोता सौम्योऽध्वरस्सप्तहोता प्राणो दशहोता चक्षुश्चतुर्होता श्रोत्रं पञ्चहोता वाक्चात्मा च सप्तहोतायुषे कमग्निहोत्रं हूयते सर्वमायुरेति य एवं वेद चक्षुषे कं पूर्णमा इज्यते न चक्षुषो गृहये य एवं वेद श्रोत्राय कममावस्येज्यते न श्रोत्रस्य गृहये य एवं वेद ॥ वाचे चात्मने च कं सौम्योऽध्वर इज्यते न वाचो नात्मनो गृहये य एवं वेद प्रजापतिर्दशहोतैकस्मिन् भूयिष्ठमाज्याहुतीनामुतैकस्मिन् बहुर्भवति य एवं वेद तेजसे कं पूर्णमा इज्यत आग्नेयो वै ब्राह्मणो गायत्रोऽग्निर्गायत्रच्छन्दास्स्व एव देवते सप्रस्थे अकर्नास्यान्यो योगक्षेमस्येशे य एवं वेदायुषे कममावस्येज्यते सर्वमायुरेति य एवं वेद स्वर्गाय कं सौम्योऽध्वर इज्यते स्वर्गमेव तेनैति ॥ १३ ॥ ४४-४५

यः प्रजया पशुभिरिव प्रसवेद्दरात्रीं परिधाय तप्तं पिबन् द्वादश रात्रीरधश्शयीत द्वादश्याः प्रातः प्राक्दुत्थ्य दशहोतारं व्याचक्षीतामिथुनो हि वा एषोऽथ न प्रभवति प्रजापतिर्दशहोता दशधैवात्मानं विधाय मिथुनं कृत्वा प्र प्रजया प्र पशुभिर्जायते चतुर्होत्रा याजयेत् पुत्रकामं चतुर्होत्रा वै देवा इन्द्रमजनयन्निन्द्रियं पुत्रः पुत्रमेवास्मै जनयति न त्वेनमपरोऽनुजायते सर्वेण हीन्द्रियेण सर्वेण

[क इदं कस्मा अदात्० । अथर्व. ३,२९,७; श्री. सू. अ. ५, सं. १३]
[१३] मै. १,९,५ (१७)।
[१४] मै. १,९,५-६ (१७-१८)।

वीर्येण जायते वरो दक्षिणा वरो हि पुत्रश्चतुर्होत्रा याजयेद्राजानँ संग्रामे संयत्ते चतुर्होत्रा वै देवा इन्द्रमजनयन्यतरेषामिन्द्रो भवति ते संग्रामं जयन्तीन्द्रमेवास्मै जनयति जयति संग्रामं यत् तत्र विन्दते ततो दक्षिणा समृद्धयै पञ्चहोत्रा याजयेत् पशुकामं पञ्चहोत्रा वै देवाः पशूनसृजन्त सर्वानेवास्मै पशूञ्जनयति तस्यैवाश्वतरो दक्षिणा अश्वो हिरण्यं गौर्वासस्सप्तहोत्रा याजयेद्यो यज्ञस्य सँस्थामनु पापीयान् स्याद्धि वा एष च्छिनत्ति यो यज्ञस्य सँस्थामनु पापीयान् भवति पराङेव संक्रामति सप्तहोत्रा वै देवास्स्वरायन् सप्तहोत्रेदँ समतन्वन् समेव तनोति न ततः पापीयान् भवति याद्वक्तन्यजते यच्चतुर्होतॄननुसवनं तर्पयितव्यान् वेद तृप्यति प्रजया पशुभिरुपैनँ सोमपीथो नमति ॥ दशहोतारं व्याख्याय बहिष्पवमानेनोद्गायेत् प्रजापतिर्दशहोता प्रैव जनयति चतुर्होतारं व्याख्यायाज्यैरुद्गायेच्चतुर्होत्रा वै देवा इन्द्रमजनयन्निन्द्रमेवास्मै जनयति सेन्द्रं तत् सवनं करोति पञ्चहोतारं व्याख्याय माध्यंदिनेन पवमानेनोद्गायेत् पञ्चहोत्रा वै देवा असुरान् प्राणुदन्त पञ्चहोत्रा पशूनसृजन्त भ्रातृव्यमेव पराणुद्य पशून् सृजते सप्तहोतारं व्याख्यायार्भवेण पवमानेनोद्गायेत् सप्तहोत्रा वै देवास्स्वरायन् सप्तहोत्रेदँ समतन्वन् समेव तनोति ॥ दशहोतारँ सामिधेनीष्वनूच्यमानासु व्याचक्षीत प्रजापतिर्दशहोता प्रैव जनयति चतुर्होतारं प्रयाजानां पुरस्ताद्व्याचक्षीत चतुर्होत्रा वै देवा इन्द्रमजनयन्निन्द्रमेवास्मै जनयति सेन्द्रं यज्ञं करोति पञ्चहोतारँ हविषामवदीयमाने व्याचक्षीत पञ्चहोत्रा वै देवा असुरान् प्राणुदन्त पञ्चहोत्रा पशूनसृजन्त भ्रातृव्यमेव पराणुद्य पशून् सृजते सप्तहोतारमनुयाजानामुपरिष्टाद्व्याचक्षीत सप्तहोत्रा वै देवास्स्वरायन् सप्तहोत्रेदँ समतन्वन् समेव तनोति चतुर्होत्रा पूर्णमासे हवींष्यासन्नान्यभिमृशेच्चतुर्होत्रा वै देवा इन्द्रमजनयन् प्रजननं पूर्णमाः प्रैव जनयति पञ्चहोत्रामावस्यायाँ हवींष्यासन्नान्यभिमृशेत् पञ्चहोत्रा वै देवास्स्वरायन् स्वर्ग्यामावस्या स्वर्गस्यैवैष लोकस्य परिग्रहः ॥ १४ ॥ ४६-४८

अन्नं वै चतुर्होतारोऽन्नवान् भवति य एवं वेद यदेक एव चतुर्होतेत्याहुः कस्मात् सर्वे चतुर्होतार उच्यन्त इति चत्वारो वा एते यज्ञास्तेषां चत्वारो होतारस्तदेषां चतुर्होतृत्वँ संवत्सरं चतुर्णामेको नाश्नीयात् तदेषां व्रतमेषा वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतारोऽन्नाद्यायैवैतां विदुस्तेजसे वीर्याय सर्पराज्ञ्या ऋग्भिर्दशमेऽहन्नुद्गातोद्गायेदियं वै सर्पराज्ञ्यन्नं चतुर्होतारोऽन्नमेवाप्त्वान्नमवरुन्द्धेऽप्रयुक्ता वा एतेऽनवरुद्धा यच्चतुर्होतारो यच्चतुर्होतॄन् होता वदति तानेव प्रयुङ्क्ते तानवरुन्द्ध एतद्वै देवानाँ स्तोत्रमनिरुक्तं यत् सर्पराज्ञ्या ऋचस्तस्यैं तदुक्थमनिरुक्तं यच्चतुर्होतारो मनसा प्रस्तौति मनसोद्गायति मनसा प्रतिहरति रेत एवैतदुद्गातारः प्रसिञ्चन्ति यच्चतुर्होतॄन् होता वदति रेत एव प्रसिक्तँ होता प्रजनयत्यग्न्याधेये व्याचक्षीत ब्रह्मणो वा एतदुदरणं यदग्न्याधेयं ब्रह्मण एतदुदरणं यच्चतु-

[१५] मै. १,९,७—८ (१९—२०)।

होतारो ब्रह्मण एतदुदरणं यदसा आदित्य उदेति सर्वमेव ब्रह्म सृजतेऽथैते संभारास्सह वै देवानां चासुराणां च यज्ञौ प्रतता आस्तां यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा यज्ञमादाय व्युत्क्रामँस्तमुपरि समभरँस्तेनासुरान् पराभावयन् यत् समभरँस्तत् संभाराणाँ संभारत्वँ समृतसोम एतेषां चतुर्भिश्चतुर्भिः प्रचरिष्यञ्जुहुयात् पूर्व एव यज्ञं पूर्वो देवता गृह्णाति सयज्ञो भवत्ययज्ञ इतरो दीक्षायां वाचयेदेतावान् वै यज्ञो यावानेव यज्ञस्तं गृहीत्वा दीक्षते द्वादशाहं वाचयेदेतावान् वै यज्ञो यावान् द्वादशाहो यावानेव यज्ञो यावान् द्वादशाहस्तं गृहीत्वा दीक्षतेऽथैताः पत्न्यो दक्षिणतो वै देवानामसुरा यज्ञमभ्यजयँस्तेषामाग्नीध्रमनभिजितमासीत् तद्देवाः पत्नीभिस्संप्रापद्यन्त तेऽसुरा ह्रीकाः पत्नीः प्रख्याय पुनरावर्तन्त तान् देवास्ततोऽनूत्थाय माध्यंदिनेन पवमानेनाभ्यजयन् यस्य पत्नीर्विद्वानग्निङ्चत्यभि भ्रातृव्यस्य गृहानभि पशूनारोहति नास्य भ्रातृव्यो गृहान्न पशूनभ्यारोहति यस्य पत्नीर्विद्वानग्नित्पात्नीवतस्य यजति विद्वान् पत्नीं तर्पयति तृप्ता पत्नी रेतो धत्ते रेतसः प्रजाः प्रजायन्ते प्रजनिष्णुः प्रजया च पशुभिश्च भवति ॥ १५ ॥ ४९

प्रजास्सृष्ट्वा सोऽकामयत यज्ञं सृजेयेति स एतं सप्तहोतारमपश्यत् तं मनसानुद्द्रुत्याजुहोत् तेन यज्ञमसृजत सोऽस्माद्यज्ञस्सृष्टः पराङैत् तं ग्रहेणानुद्द्रुत्यागृह्णात् तद्ग्रहस्य ग्रहत्वं दीक्षिष्यमाणस्सप्तहोत्रा पुरस्ताज्जुहुयाद्यज्ञमेव सृष्ट्वालभ्य प्रतनुते ग्रहो भवति यज्ञस्य सृष्टस्य धृत्यै यज्ञं सृष्ट्वा सोऽकामयत दर्शपूर्णमासौ सृजेयेति स एतं चतुर्होतारमपश्यत् तं मनसानुद्द्रुत्याजुहोत् तेन दर्शपूर्णमासावसृजत तावस्माद्दर्शपूर्णमासौ सृष्टौ पराञ्चा ऐतां तौ ग्रहेणानुद्द्रुत्यागृह्णात् तद्ग्रहस्य ग्रहत्वं दर्शपूर्णमासावालप्स्यमानश्चतुर्होत्रा पुरस्ताज्जुहुयाद्दर्शपूर्णमासावेव सृष्ट्वालभ्य प्रतनुते ग्रहो भवति दर्शपूर्णमासयोस्सृष्टयोर्धृत्यै दर्शपूर्णमासौ सृष्ट्वा सोऽकामयत चातुर्मास्यानि सृजेयेति स एतं पञ्चहोतारमपश्यत् तं मनसानुद्द्रुत्याजुहोत् तेन चातुर्मास्यान्यसृजत तान्यस्माच्चातुर्मास्यानि सृष्टानि पराञ्च्यायँस्तानि ग्रहेणानुद्द्रुत्यागृह्णात् तद्ग्रहस्य ग्रहत्वं चातुर्मास्यान्यालप्स्यमानः पञ्चहोत्रा पुरस्ताज्जुहुयाच्चातुर्मास्यान्येव सृष्ट्वालभ्य प्रतनुते ग्रहो भवति चातुर्मास्यानाँ सृष्टानां धृत्या अभिचरन् दशहोत्रा जुहुयान्नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेवास्योपदासयति स्रक्त्य इरिणे प्रदरे वा जुहुयादेतद्वा अस्या निर्ऋतिगृहीतं निर्ऋत्यैवैनं ग्राहयति वषट्करोत्येतद्वै वाचः क्रूरं वाचैवैनं क्रूरेण प्रवृश्चत्याङ्गिरसश्च वा आदित्याश्च स्वर्गे लोकेऽस्पर्धन्त त आदित्या एतं पञ्चहोतारमपश्यँस्तं मनसानुद्द्रुत्याजुहवुस्ततं आदित्यास्स्वर्गं लोकमायन्नप्याङ्गिरसोऽभ्रंशन्त तेऽङ्गिरस आदित्यानब्रुवन् क्व स्थ कथं वो हव्यं वक्ष्याम इति छन्दस्स्वित्यब्रुवन् गायत्र्यां वसवस्त्रिष्टुभि रुद्रा जगत्यामादित्या इत्यत्र वै देवेभ्यस्सन्द्ध्यो हव्यमुह्यते य एवं देवानुपदेशनाद्वेदोपदेशनवान् भवति यस्स्वर्ग-

कामस्स्यात् स एत पञ्चहोतारं मनसानुद्द्रुत्य जुहुयात् पञ्च वा ऋतव ऋतवस्संवत्सरस्संवत्सरस्स्वर्गो लोक ऋतुष्वेव संवत्सरे प्रतिष्ठाय स्वर्गं लोकमेति ॥ योऽब्राह्मणो विद्यामनूच्य नेव रोचेत स एतांश्चतुर्होतॄनरण्यं परेत्य दर्भस्तम्बमुद्ग्रथ्य ब्राह्मणं दक्षिणतो निषाद्य व्याचक्षीतेतद्वै देवानां ब्रह्मानिरुक्तं यच्चतुर्होतारस्तदेनं निरुच्यमानं प्रकाशं गमयति दर्भस्तम्बमुद्ग्रथ्य व्याचष्टेऽग्निर्वै दर्भस्तम्बोऽग्निमत्येव व्याचष्टे ब्राह्मणो दक्षिणत आस्ते ब्राह्मणो वै प्रजानामुपद्रष्टोपद्रष्टृमत्येव व्याचष्ट ईश्वरौ वा एता उभौ यशोऽर्तोर्यो व्याचष्टे यश्च दक्षिणत आस्ते यो दक्षिणत आस्ते तस्मै वरं दद्याद्देव तत्र यश ऋच्छति तद्वरेणावरुन्द्धे ॥ १६ ॥ ५०-५१

ऐन्द्राग्नमेकादशकपालं निर्वपेद्भ्रातृव्यवानोजो वै वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येणाभिभवत्यैन्द्राग्नमेकादशकपालं निर्वपेत् सजातकाम ओजो वै वीर्यमिन्द्राग्नी ओजसैवैनान् वीर्येणाधस्तादुपास्यते न वा एत एतं प्रयान्तमकामा अनुप्रयान्त्योजो वीर्यमिन्द्राग्नी यदैन्द्राग्न ओज एवैषां वीर्यं संगृह्य प्रयाति तं प्रयान्तमकामा अनुप्रयान्त्यैन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः प्रजापतेर्वै प्रजास्सिसृक्षमाणस्य तस्येन्द्राग्नी प्रजा अपागूहतां सोऽवेदिन्द्राग्नी वै मे प्रजा अपागुक्षतामिति स एतमिन्द्राग्नमपश्यदेकादशकपालं ततो वै तस्मै तौ प्रजाः पुनरदत्तामिन्द्राग्नी एतस्य प्रजामपगूहतो योऽलं प्रजायै सन् प्रजां न विन्दते ता एव भागधेयेनोपधावति ता अस्मै प्रीतौ प्रजां पुनर्दत्तः पुनर्दातृमती याज्यानुवाक्ये भवतस्समृद्ध्या ऐन्द्राग्नमेकादशकपालं निर्वपेत् संग्राममभिप्रयानोजो वै वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येणाभिप्रयात्यैन्द्राग्नमेकादशकपालं निर्वपेत् संग्राममागत्यौजो वै वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येण जयत्यैन्द्राग्नमेकादशकपालं निर्वपेत् संग्रामं जित्वौजसा वा एष वीर्येण व्यृध्यते यस्संग्रामं जयति सर्वेण हीन्द्रियेण सर्वेण वीर्येण जयत्योजो वीर्यमिन्द्राग्नी यदैन्द्राग्न इन्द्राग्नी एवैनमोजसा वीर्येण समर्धयत ऐन्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं सनिं प्रयन्नोजो वै वीर्यमिन्द्राग्नी ओजसैव वीर्येण प्रैति पूषा वीर्यस्यानुप्रदाता यत् पौष्णः पूषैवास्मै वीर्यमनुप्रयच्छत्यैन्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं क्षेत्रस्य पतये चरुं यः कामयेतास्यां मे जनतायामृध्येतेत्योजो वै वीर्यमिन्द्राग्नी यदैन्द्राग्न इन्द्राग्नी एवास्मा ओजसा वीर्येण लोकं विन्दतः पूषा वीर्यस्यानुप्रदाता यत् पौष्णः पूषैवास्मै वीर्यमनुप्रयच्छतीयं क्षेत्रस्य पतिर्यत् क्षेत्रपत्योऽस्यामेव प्रतितिष्ठति॥१७॥५२

कया शुभा सवयसस्सनीडास्समान्या मरुतस्संमिमिक्षुः ।
कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया ॥ ५३

[१७] मै. २,१,१ (१) ।
[१८] मै. ४,११,३ (७९-९३) । वा. ३३,२७,७८-७९; ३४,४८ । काण्व. ३२,२७,७८-७९; ३३,३६ । [कया शुभा०...वसूया । ऋ. १,१६५,१]

कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आववर्त ।
श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरमाम ॥ ५४
कुतस्त्वमिन्द्र माहिनस्सन्नेको यासि सत्पते किं त इत्था ।
संपृच्छसे समराणश्शुभानैर्वोचेस्तन्नो हरिवो यत् ते अस्मे ॥ ५५
ब्रह्माणि मे मतयश्शं सुतासश्शुष्म इयर्ति प्रभृतो मे अद्रिः ।
आशासते प्रतिहर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ५६
अतो वयमन्तमेभिर्युजानास्स्वक्षत्रेभिस्तन्वश्शुम्भमानाः ।
महोभिरेताँ उपयुज्महे न्विन्द्र स्वधामनु हि नो बभूथ ॥ ५७
क्व स्या वो मरुतस्स्वधासीद्यन्मामेकं समधत्ताहिहत्ये ।
अहं ह्युग्रस्तविषस्तुविष्मान् विश्वस्य शत्रोरनमं वधस्नैः ॥ ५८
भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम ॥ ५९
वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहमेता मनवे विश्वश्चन्द्रास्सुगा अपश्चकर वज्रबाहुः ॥ ६०
अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ६१
एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान् कृणवै मनीषा ।
अहं ह्युग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥ ६२
अमन्दन्मा मरुतस्स्तोमो अत्र यन्मे नरश्श्रुत्यं ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥ ६३
एवेदेते प्रति मा रोचमाना अनेद्यश्श्रव एषो दधानाः ।
संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥ ६४

[कस्य ब्रह्माणि०...रीरमाम । ऋ. १,१६५,२ । कुतस्त्वमिन्द्र०...अस्मे । ऋ. १,१६५,३ । ब्रह्माणि मे मतयः०...अच्छ । ऋ. १,१६५,४ । अतो वयमन्त०...बभूथ । ऋ. १,१६५,५ । क्व स्या वो०...वधस्नैः । ऋ. १,१६५,६; तै. ब्रा. २,८,३,५ । भूरि चकर्थ०...यद्वशाम । ऋ. १,१६५,७; नि. ६,७ । वधीं वृत्रं०...वज्रबाहुः । ऋ. १,१६५,८; तै. ब्रा. २,८,३,६ । अनुत्तमा ते०...प्रवृद्ध । ऋ. १,१६५,९ । एकस्य चिन्मे०...एषाम् । ऋ. १,१६५,१० । अमन्दन्मा०...तनूभिः । ऋ. १,१६५,११ । एवेदेते०...नूनम् । ऋ. १,१६५,१२]

को न्वत्र मरुतो मामहे वः प्रयातन सखीँरच्छा सखायः ।
मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥ ६५
आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा ।
ओ षु वर्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥ ६६
एष वस्स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषायासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १८ ॥ ६७
मरुतो यद्ध वो दिवो युयमस्मानिन्द्रं वः ॥ ६८
आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥ ६९
त्वा युजा तव तत् सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः ।
अहन्नहिमरिणात् सप्त सिन्धूनपावृणोदपिहितेव खानि ॥ ७०
ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्च पीतः ।
अयं यस्सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥ ७१
अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि । दधज्ज्योतिर्जनेभ्यः ॥ ७२
उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ ७३
चित्रं देवानाम् ॥ ७२
अयुक्त सप्त शुन्ध्युवस्सूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ॥ ७३
सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥ ७४
अयं पूषा रयिर्भगस्सोमः पुनानो अर्षति । पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ७५

[को न्वत्र मरुतो०...ऋतानाम् । ऋ. १,१६५,१३ । आ यद्दुवस्या०...अर्चत् । ऋ. १,१६५,१४ । एष वस्स्तोमो०...जीरदानुम् । ऋ. १,१६५,१५; १६६,१५; १६७,११; १६८,१०]
[१९] मै. ४,१२,१—२ (२४,४६—४७) । वा. ७,४१—४२; ८,४१; ३३,३१; १३,४६; ४,३; १२,१९ । काण्व. ८,२३—२४; ९,३—७; ३२,३२; १४,४८; ४,४; १३,२० । [मरुतो यद्ध वो० । ऋ. ८,७,११; मै. सं. १, ५,११,४ । युयमस्मान्नयत० । ऋ. ५,५५,१० । इन्द्रं वा० । ऋ. १,७,१०; ३,१९,१; सा. १६२०; अथर्व. २०,३९,१; ७०,१६; तै. सं. १,६,१२,१ । आ ते शुष्मो० । ऋ. ३,१९,९; मै. ब्रा. २,५,८,१; ८,५,९ । त्वा युजा तव० । ऋ. ४,२८,१ । ऋदूदरेण सख्या० । ऋ. ८,४८,१०; तै. सं. २,२,१२,३; नि. ६,४ । अग्ने नक्षत्र० । ऋ. १०,१५६,४; सा. १५३० । अग्ने बृहन्० । ऋ. १०,१,१; तै. सं. ४,२,१,४ । उदु त्यं० । ऋ. १,५०,१; सा. ३१; अथर्व. १३,२,१६; २०,४७,१३; तै. सं. १,२,८,२; ४,४३,१; नि. १२,१५ । चित्रं देवाना० । ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; ऐ. आ. ३,२; तै. आ. १,७,६; २,१३,१; नि. १२,१६ । अयुक्त सप्त० । ऋ. १,५०,९; अथर्व. १३, २,२४; २०,४७,२१; तै. ब्रा. २,४,५,४ । सप्त त्वा० । ऋ. १,५०,८; सा. ६४०; अथर्व. १३,२,२३; २०,४७, २०; तै. सं. २,४,१४,४ । अयं पूषा रयि० । ऋ. ९,१०१,७; सा. ५४६; ८१८]

वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ ७६
यथा ह त्यद्वसवः ॥ ७७
चक्षुर्मे धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः । सं चेदं वि च पश्येम ॥ ७८
सुसंदृशं त्वा वयं प्रतिपश्येम सूर्य । विपश्येम नृचक्षसः ॥ ७९
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुच्छन् ॥ ८०
विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगन्थ ॥ ८१
इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥ ८२
अतिविद्धा विथुरेणा चिदस्ना त्रिस्सप्त सानु संहिता गिरीणाम् ।
न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥ ८३
यस्तस्तम्भ सहसा वि ज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ॥ ८४
विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥ १९ ॥ ८५
[७२६]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायामुत्सादनं नाम नवमं स्थानकं संपूर्णम् ॥९॥

[वयस्सुपर्णा० । ऋ. १०,७३,११; सा. ३१९; ऐ. ब्रा. २,१,८,३; तै. आ. ४,४२,३; नि. ४,३ । यथा ह त्यद्वसवो० । ऋ. ४,१२,६; १०,१२६,८; तै. सं. ४,७,१५,७ । चक्षुर्मे (०र्नो) धेहि० । ऋ. १०,१५८,४ । सुसंदृशं त्वा० । ऋ. १०,१५८,५ । अग्ने त्री ते० । ऋ. ३,२०,२; तै. सं. ३,२,११,१ । विद्मा ते अग्ने० । ऋ. १०,४५,२; तै. सं. ४,२,२,१ । इन्द्र त्रिधातु० । ऋ. ६,४६,९; सा. २६६; अथर्व. २०,८३,१ । अतिविद्धा विथुरेणा० । ऋ. ८,९६,२ । यस्तस्तम्भ सहसा० । ऋ. ४,५०,१; अथर्व. २०,८८,१ । विभिद्या पुरं० । ऋ. १०,६७,५; अथर्व. २०,९१,५]

अथ दशमं स्थानकम् ।

आग्नावैष्णवम् ।

आग्नावैष्णवमेकादशकपालं निर्वपेत् सारस्वतं चरुं बार्हस्पत्यं चरुमभिचरन्वाभिचर्यमाणो वाग्निर्वै सर्वा देवता विष्णुर्यज्ञो वाक् सरस्वती ब्रह्म बृहस्पतिरग्निनैवास्य देवताभिर्देवताः प्रतिचरति विष्णुना यज्ञेन यज्ञं सरस्वत्या वाचा वाचं बृहस्पतिना ब्रह्मणा ब्रह्म सममेव कृत्वा यत् किंच ततः करोति तेनातिप्रयुङ्क्त एतामेव निर्वपेदभिचरन्नग्निर्वै सर्वा देवता विष्णुर्यज्ञो वाक् सरस्वती ब्रह्म बृहस्पतिरग्निनैवैनं देवताभिरभिप्रयुङ्क्ते विष्णुना यज्ञेन सरस्वत्या वाचा बृहस्पतिना ब्रह्मणा स्तृणुत एनमाग्नावैष्णवमेकादशकपालं निर्वपेत् पशुमालप्स्यमानो व्यृद्धेन वा एष पशुना चरति यो देवताश्च यज्ञं चानवरुध्य पशुमालभतेऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चावरुध्य पशुमालभत आग्नावैष्णवमेकादशकपालं निर्वपेत् संग्रामेऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताभिश्चैवैनं यज्ञेन च जयति यदि मन्येत प्रति पुरस्ताच्चरन्तीति द्वे अनुवाक्ये कुर्यादेकां याज्यां सममेव द्वाभ्यां करोत्येकया प्रयुङ्क्त आग्नावैष्णवं घृते चरुं निर्वपेदभिचर्यमाणोऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं च मध्यतः प्रविशति ॥ मिथुनं वा एतद्यद् घृतं च तण्डुलाश्च धेन्वा घृतं पयोऽनडुहस्तण्डुला मिथुनेनैवात्मानमभितः पर्यूहते स्तृत्या आग्नावैष्णवं घृते चरुं निर्वपेच्चक्षुष्कामोऽग्निर्वै मनुष्याश्चक्षुषा पश्यन्ति विष्णोर्देवतास्तौ चक्षुषः प्रदातारौ ता एव भागधेयेनोपधावति ता अस्मै चक्षुः प्रयच्छतो मिथुनं वा एतद्यद् घृतं च तण्डुलाश्च धेन्वा घृतं पयोऽनडुहस्तण्डुला मिथुनं चक्षुर्मिथुनेनैवास्मै मिथुनं जनयति घृते भवति तेजो वै घृतं तेजश्चक्षुस्तेजसैवास्मिंस्तेजो दधात्याग्नावैष्णवमष्टाकपालं निर्वपेत् प्रातस्सारस्वतं चरुं बार्हस्पत्यं चरुमाग्नावैष्णवमेकादशकपालं मध्यंदिन एतौ च चरू आग्नावैष्णवं द्वादशकपालमपराह्ण एतौ च चरू यस्य भ्रातृव्यस्सोमेन यजेताग्निर्वै सर्वा देवता विष्णुर्यज्ञो वाक् सरस्वती ब्रह्म बृहस्पतिरग्निनैवास्य देवताभिर्देवता आप्नोति विष्णुना यज्ञेन यज्ञं सरस्वत्या वाचा वाचं बृहस्पतिना ब्रह्मणा ब्रह्म पुरोडाशैस्सवनानि कपालैश्छन्दाँसि सैषाध्वरकल्पा नामेष्टिर्यज्ञमेवैतयाप्नोति तत्र यत् किंच ददाति तद्दक्षिणा मैत्रावरुणमेककपालमनुनिर्वपति यैवासौ मैत्रावरुणी वशानूबन्ध्या तामेव तेनाप्नोत्येककपालो भवति न वै पुरुषं कपालैराप्नुमर्हत्येकधैवैनमाप्नोति ॥ १ ॥ १-२

देवा वै सत्रमासत यशस्कामा अग्निस्सोम इन्द्रस्तेऽब्रुवन् यशो यश ऋच्छात् तन्नस्सहेति तेषाँ सोमं यश आर्च्छत् तस्मात् स यशस्वी स गिरिमगच्छत् तस्मात् स गिरौ तमग्निरन्वागच्छत् ता

[१] मै. २,१,७ (७) । तै. सं. २,२,९ ।
[२] मै. २,१,५ (४) । तै. सं. २,३,३; २,४,४,३ ।

अग्नीषोमौ समभवतामथेन्द्रोऽधृतशिथिल इवामन्यत सोऽन्वागच्छत् सोऽग्नौ चैव सोमे चानाथत तमेतयेष्ट्यायाजयतामग्नीषोमीयेणैकादशकपालेन तेजो वा अग्निरिन्द्रियं सोमस्तेज एवास्मिन्नग्निराग्नेयेनादधादिन्द्रियं सोमस्सौम्येन ततो वै सोऽभवदेतेन यजेत बुभूषन्नग्नीषोमीयेणैकादशकपालेन तेजो वा अग्निरिन्द्रियं सोमस्तेज एवास्मिन्नग्निराग्नेयेनादधातीन्द्रियं सोमस्सौम्येन भवत्येवाग्नीषोमीयमेकादशकपालं निर्वपेत् सर्वेभ्यः कामेभ्यो ब्राह्मणोऽग्नीषोमौ वै ब्राह्मणस्य स्वा देवता ता एव भागधेयेनोपधावति ता अस्मै सर्वान् कामान् प्रयच्छतोऽग्नीषोमीयमष्टाकपालं निर्वपेच्छ्यामाकं वसन्ता ब्राह्मणो ब्रह्मवर्चसकामोऽग्नीषोमौ वै ब्रह्मवर्चसस्य प्रदातारौ ता एव भागधेयेनोपधावति ता अस्मै ब्रह्मवर्चसं प्रयच्छतो वसन्ता यजेत वसन्तो वै ब्राह्मणस्यर्तुस्स्व एवैनं ब्रह्मवर्चसमवरुन्द्ध एवमिव वै ब्रह्मवर्चसं बभ्रुव क्षुद्रमिव हरितमिव ब्रह्मवर्चसमेव संदधाति यदष्टाकपालस्तेनाग्नेयो यच्छ्यामाकस्तेन सौम्यस्तेनोभयस्मादग्नीषोमीयौ याज्यानुवाक्ये भवतस्समार्ध्यौ संयाज्ये तेजो वा अग्निरिन्द्रियं सोमस्तेजसा चैवेन्द्रियेण च ब्रह्मवर्चसमुभयतः परिगृह्यात्मन्धत्ते ॥ २ ॥ ३

अग्नये वैश्वानराय द्वादशकपालं निर्वपेद्योऽनन्नमद्याद्वा जिघत्सेद् संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरेणैव पूतं स्वदितमत्ति यदि जग्ध्वा निर्वपति संवत्सर एवास्मै जग्धं स्वदयत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेद्यस्समान्तमभिद्रुह्येद्यो वाभिदुद्रुक्षेत् संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरायैव सममते यस्सममते संवत्सरमेवाप्त्वा काममवस्यन्तमभिद्रुह्यत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेद्यः प्रतिगृहीतस्स्यात् सनिकामस्संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरायैतं प्रतिगृह्णन्ति यं प्रतिगृह्णन्ति संवत्सरमेवाप्त्वा सनिं सनिं वनुतेऽग्नये वैश्वानराय द्वादशकपालं निर्वपेत् सनिं निद्धन् संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरमेव प्रयुङ्क्ते यो याचति संवत्सरमेव विमुञ्चति संवत्सरो वा एतदेतस्मै सनोति यद् वनुते तमेव भागिनं करोति यमुत्तममाजेत् तं स रज्जुमप्रियाय भ्रातृव्याय दद्याद् पाशेन वा एष चरति यो याचति पाशमेवाप्रियाय भ्रातृव्याय प्रतिमुञ्चत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेद्यः कामयेतानेन राज्ञा वा ग्रामण्या वेदं सस्यमादद्दीयेति संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरोऽन्नाद्यस्य प्रदाता तमेव भागधेयेनोपधावति सोऽस्मा अन्नाद्यं प्रयच्छति संवत्सरं हव्यमनुप्रजायतेऽग्नये वैश्वानराय द्वादशकपालं निर्वपेद् वृष्टिकामस्संवत्सरो वा अग्निर्वैश्वानर एषा संवत्सरस्य क्रूरा तनूर्या वैश्वानरी यदेतदभितप्तमिवोच्चैस्तिष्ठति भागधेयमिच्छमानस्तामेवास्य प्रीणाति तास्मै प्रीता वृष्टिं नियच्छत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेत् संग्रामे संवत्सरो वा अग्निर्वैश्वानरो यतरस्संवत्सरयोरनायतनो भवति परा स जयते संवत्सरमेवायतनं कृत्वा जयति संग्रामम् ॥ ३ ॥ ४

[३] मै. २,१,२ (२) । तै. सं. २,२,६ । [अग्नये वैश्वानराय द्वादशकपालं । ऐ. ब्रा. अ. ७, खं. ९]

अग्नये वैश्वानराय द्वादशकपालं निर्वपेद्ग्रामकामो भूतिकामो ब्रह्मवर्चसकामस्तस्य हरितँ हिरण्यं मध्ये कुर्याद् रजतमुपरिष्टात् संवत्सरो वा अग्निर्वैश्वानरो वीर्यं संवत्सर आत्मा हरितँ हिरण्यं वीर्यस्यैवैनं मध्यतो दधाति भूत्यं भवत्येव यद् रजतं तत् सह भस्मनापोहति शमलगृहीतो वा एष योऽलं ब्रह्मवर्चसाय सन्न ब्रह्मवर्चसी भवति शमलमेवास्मादपहन्ति ब्रह्मवर्चसेनैनँ सँसृजति यथा वै नाभिमरा अभिसँश्रिता एवँ संवत्सरं मासाश्चर्तवश्चाभिसँश्रिता यद्धिरण्यं मध्ये करोति नाभिमेवैनं करोति॥ यथा नाभिमरा अभिसँश्रिता एवमेनँ सजातैरभिसँश्रयति वारुणं यवमयं चरुं निर्वपेदग्नये वैश्वानराय द्वादशकपालमामयावी वरुणगृहीतो वा एष य आमयावी यद् वारुणो वरुणादेवैनं मुञ्चति यवमयो भवत्येतद्वै वरुणस्य भागधेयं यद्यवास्स्वेनैव भागधेयेन वरुणं निरवदयते प्रादेशमात्रो भवत्येतावान् वै पुरुषो यावदस्य प्राणा अभि यावानेवास्यात्मा तं वरुणान्मुञ्चति संवत्सरो वा अग्निर्वैश्वानर आयुस्संवत्सरस्संवत्सर एवैनमायुषि प्रतिष्ठापयति सर्वमायुरेति वारुणं यवमयं चरुं निर्वपेदग्नये वैश्वानराय द्वादशकपालं राजन्यायाभिचरते वा बुभूषते वा वरुणगृहीतो वा एष योऽन्यस्याददान उपहरमाणश्चरति यद् वारुणो वरुणादेवैनं मुञ्चति यवमयो भवति प्रादेशमात्रो भवति संवत्सरो वा अग्निर्वैश्वानरो वीर्यं संवत्सरस्संवत्सर एवैनं वीर्ये प्रतिष्ठापयति भूत्यं भवत्येवाग्नये वैश्वानराय द्वादशकपालं निर्वपेदग्निमुत्सादयिष्यन् संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरमेष उत्सादयमानोऽनूत्सीदति भागिनमेवैनं कृत्वा संवत्सरमनूत्सादयत्यग्नये वैश्वानराय द्वादशकपालं निर्वपेद्यः पुरुषं प्रतिगृह्णीयादामां वा एष आत्मना दक्षिणां प्रतिगृह्णाति यः पुरुषं प्रतिगृह्णात्यामां दक्षिणां प्रतिगृहीताँ हिनस्ति संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरस्स्वदितस्य स्वदयिता तमेव भागधेयेनोपधावति सोऽस्मै तत् सर्वं स्वदयति ॥ ४ ॥ ५-६

अग्नये पथिकृतेऽष्टाकपालं निर्वपेद्यस्य पौर्णमासी वामावस्या वातिपद्येत बहिष्पथं वा एष एति यस्य पौर्णमासी वामावस्या वातिपद्यतेऽग्निर्देवानां पथिकृत् तमेवान्वारभते स एनं पन्थामपिनयति वि वा एतद्यज्ञं छिनत्ति यद्यज्ञे प्रतत एतामन्तरेष्टिं निर्वपति य एवासा आग्नेयोऽष्टाकपालः पूर्णमासे योऽमावस्यायां तमग्नये पथिकृते कुर्यात् तेनैव पुनः पन्थामवैति न यज्ञं विच्छिनत्त्यग्नये वाजसृतेऽष्टाकपालं निर्वपेत् संग्रामेऽग्निर्वै देवानां वाजसृद्वाजमेष धावति यस्संग्रामं जयति तमेव भागधेयेनोपधावति वाजमेनं धावति जयति संग्राममथो अग्निरिव न प्रतिधृषे भवत्यग्नये व्रतपतयेऽष्टाकपालं निर्वपेद्य आहिताग्निस्सन्नव्रत्यं चरेदानीतो वा एष देवानां य आहिताग्निरदन्त्य स्यान्नं व्रतपतिमेतस्य व्रतं गच्छति य आहिताग्निस्सन्नव्रत्यं चरत्यग्निर्देवानां व्रतपतिस्तमेव

[४] मै. २,१,२ (२) । तै. सं. २,२,६ । [अग्नये०...कपालं । ऐ. ब्रा. अ. ७ खं ९]
[५] मै. २,१,१०—११ (१४—१५) । तै. सं. २,२,१ । [अग्नये पथिकृतेऽष्टाकपालं । ऐ. ब्रा. ७,८]

भागधेयेनोपधावति व्रतपतेरेवाधि व्रतमालभतेऽग्नये रक्षोघ्नेऽष्टाकपालं निर्वपेदामयावीन्द्रं वै जातं रक्षाँस्यसचन्त स आदीयमानो रक्षोभिस्संमृश्यमानोऽग्निं प्राविशत् तस्मादग्नी रक्षाँस्यपाहन् रक्षाँस्येतं सचन्ते य आमयाव्यग्निर्देवानां रक्षोहा तमेव भागधेयेनोपधावति सोऽस्माद् रक्षाँस्यपहन्त्यमावस्यां रात्रीं निशि यजेतामावस्यां वै रात्रीं निशि रक्षाँसि प्रेरते पूर्णान्येवैनान्यपवपति परिश्रिते यजेत रक्षसामन्तर्हित्यै॥ वामदेवस्यैतत् पञ्चदशं राक्षोघ्नं सामिधेन्यो भवन्ति वामदेवश्च वै कुसिदायी चात्मनोराजिमयातां तस्य कुसिदायी पूर्वस्यातिद्रुतस्य कूवरं न्यमृणत् सा द्वितीयमुपपर्यावर्ततेषां वाक्षं वा छेत्स्यामीति स वामदेव उरुष्यमग्निमभिभस्तमवैक्षत स एतत् सूक्तमपश्यत् कृणुष्व पाजः प्रसितिं न पृथ्वीमिति तामग्निरनूद्द्रुत्य समदहत् सा दह्यमाना ह्रदं कौसिदं प्रामज्जद्यदेतदनूच्यते रक्षसां दुष्ट्यै ॥ ५ ॥ ७-८

नैमिष्या वै सत्रमासत त उत्थाय सप्तविंशतिं कुरुपञ्चालेषु वत्सतरानवन्वत तान्वको दाल्भिरब्रवीद्यूयमेवैतान् विभजध्वमिममहं धृतराष्ट्रं वैचित्रवीर्यं गमिष्यामि स मह्यं गृहान् करिष्यतीति तमागच्छत् तन्नासूक्षत् तं प्राकालयत्तैता गा ब्रह्मबन्ध इत्यब्रवीत् पशुपतिर्गा हन्ति ताः परः पचमानश्चरेति तासां देवस्त्रमें राजान्नं प्रासुषोदिति सक्थान्युत्कर्तमपचत तस्मिन् पचमाने व्युदस्यत् सोऽग्नये रुद्रवतेऽष्टाकपालं निरवपत् कृष्णानां व्रीहीणां तस्य यत् किंच धृतराष्ट्रस्यासीत् तत् सर्वमवकर्ण विद्राणमभिव्यौच्छत् ता विप्रश्निका अविन्दन् ब्राह्मणो वै त्वायमभिचरति तमिन्नाथस्वेति तमुपाशिक्षत् तस्मै वहददात् सोऽग्नये सुरभिमतेऽष्टाकपालं निरवपच्छुक्लानां व्रीहीणां ततो वै तत्रदस्यदग्नये रुद्रवतेऽष्टाकपालं निर्वपेत् कृष्णानां व्रीहीणामभिचरन्नग्निर्वै रुद्रो रुद्रायैवैनमपिदधाति कृष्णानां व्रीहीणां भवति कृष्णमिव वै तमस्तमो मृत्युर्मृत्युनैवैनं ग्रहयत्यग्नये सुरभिमतेऽष्टाकपालं निर्वपेद्यर्ह्यं देवः प्रजा अभिमन्येत यदा कामयेत विदस्येदित्येषा वा अग्नेर्भिषज्या तनूर्या सुरभिमती तामेव भागधेयेनोपधावति तयैना भिषज्यत्यग्नये सुरभिमतेऽष्टाकपालं निर्वपेद्यं प्रमीतं शृणुयुः पूतिर्वा एष श्रूयते यः प्रमीतश्श्रूयते यैवाग्नेस्सुरभिमती तनूस्तामेव भागधेयेनोपधावति तयैनं सुरभिं करोत्यग्नये सुरभिमतेऽष्टाकपालं निर्वपेद्यमजाग्निवाँसमभिशँसेयुश्शमलगृहीतो वा एष यमजाग्निवाँसमभिशँसन्ति यैवाग्नेस्सुरभिमती तनूस्तामेव भागधेयेनोपधावति तयैनं पुनात्यग्नयेऽन्नादायाष्टाकपालं निर्वपेद्यः कामयेतान्नादस्स्यामित्यग्निर्वै देवानामन्नादस्तमेव भागधेयेनोपधावति स एनमन्नादं करोत्यग्नयेऽन्नवतेऽष्टाकपालं निर्वपेद्यः कामयेतान्नवान् स्यामित्यग्निर्वै देवानामन्नवाँस्तमेव भागधेयेनोपधावति स एनमन्नवन्तं करोत्यग्नयेऽन्नपतयेऽष्टाकपालं निर्वपेद्यः कामयेतान्नपतिस्स्यामित्यग्निर्वै देवानामन्नपतिस्तमेव भागधेयेनोपधावति स एनमन्नपतिं करोति संवत्सरं परिनिर्वपेत् संवत्सरो वा

[कृणुष्व पाजः प्रसितिं० । ऋ. ४,४,१; तै. सं. १,२,१४,१; नि. ६,१२]
पाठ. १२

अन्नाद्यस्य प्रदाता तमेव भागधेयेनोपधावति स एनमन्नादमन्नवन्तमन्नपतिं करोत्यग्नये वसुमतेऽष्टाकपालं निर्वपेत् सर्वेभ्यः कामेभ्यो ब्राह्मणो यद्वै किंच विन्दते तद्ब्रह्माग्निर्देवानां वसुमाँस्तमेव भागधेयेनोपधावति सोऽस्मै सर्वान् कामान् प्रयच्छति ॥ ६ ॥ ९

अग्नये यविष्ठायाष्टाकपालं निर्वपेदभिचरन् वाभिचर्यमाणो वा देवाश्च वा असुराश्च व्यभ्युचरन्त तेऽसुरा देवेभ्यो विसृष्टीर्व्यसृजँस्ते देवा अविदुर्विसृष्टीर्वै नोऽसुरा व्यस्राक्षुरिति तेऽग्नये यविष्ठायाष्टाकपालं निरवपँस्तेन वै ते ता विसृष्टीरयावयन्तात्मनोऽधि विसृष्टिमेतस्मै विसृजन्ति यमभिचरन्ति यदग्नये यविष्ठाय निर्वपति तेनैव ता विसृष्टिं यावयत आत्मनोऽध्यग्नये यविष्ठायाष्टाकपालं निर्वपेत् समृतसोमे देवतासु वा एते समृच्छन्ते येषाँ सोमौ समृच्छेते अग्निस्सर्वा देवता अग्निनैवैषां यविष्ठेन देवता वृङ्क्ते॥ देवाश्च वा असुराश्च संयत्ता आसन् यान् देवानामघ्नँस्तदेव तेऽभवन् यानसुराणां पुनस्त उत्पत्यायुध्यन्त ते देवा अविदुर्यं वै न इमे केच म्रियन्तेऽग्निर्वा एतान् हन्तीति तेऽब्रुवन् मा नश्शग्रीधाः कथा नश्शग्नीप इति भागो मेऽस्त्वित्यब्रवीन्न वोऽभागधेयः क्षमिष्य इति तेऽग्नये क्षमवतेऽष्टाकपालं निरवपँस्ततो वै स तेभ्योऽक्षमताग्नये क्षमवतेऽष्टाकपालं निर्वपेद्यर्ह्यं देवः प्रजा अभिमन्येत यदा कामयेत विदस्येदिति ये वा इमे केच म्रियन्तेऽग्निर्वा एतान् हन्त्यग्निर्देवानां क्षमवाँस्तमेव भागधेयेनोपधावति सोऽस्मै प्रीतः क्षमत एव देवाः पितरो मनुष्यास्तेऽन्यत आसन्नसुरा रक्षाँसि पिशाचास्तेऽन्यतस्ते समयतन्त ते यद्देवानामप्यल्पकं लोहितमसुरा अकुर्वँस्तद्रात्रीभी रक्षाँस्यसुम्भँस्तान् सुब्धान् मृतानभिव्यौच्छत् ते देवा अविदुर्यं वै न इमे केच म्रियन्ते रक्षाँसि वा एतान् सुम्भन्तीति तान्युपामन्त्रयन्त तान्यब्रुवन् वार्यं वृणामहै यद्देवमानसुराञ्जयाम तन्नस्सहासदिति ततो देवा असुरानजयँस्तेऽसुराञ्जित्वा रक्षाँस्यपानुदन्त तान्यनृतमकर्तेति समन्तं देवान् पर्यविशँस्ते देवा अग्ना एवानाथन्त तेऽग्नये प्रवतेऽष्टाकपालं निरवपन्नग्नये विबाधवतेऽष्टाकपालमग्नये प्रतीकवतेऽष्टाकपालं यदग्नये प्रवते यान्येव पुरस्ताद्रक्षाँस्यासँस्तानि तेन प्राणुदन्त यद्विबाधवते यान्येवाभित आसँस्तानि तेन व्यबाधन्त यत् प्रतीकवते यान्येव पश्चाद्रक्षाँस्यासँस्तानि तेनापानुदन्तैतया यजेत भ्रातृव्यवान् यो बहुभ्रातृव्यस्स्यादग्नये प्रवतेऽष्टाकपालं निर्वपेदग्नये विबाधवतेऽष्टाकपालमग्नये प्रतीकवतेऽष्टाकपालं यदग्नये प्रवते य एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्यस्तं तेन प्रणुदते यद्विबाधवते य एवैनेन सदृङ् तं तेन विबाधते यत् प्रतीकवते य एवास्य पश्चाद्भ्रातृव्यस्तं तेनापनुदते प्र श्रेयाँसं भ्रातृव्यं नुदतेऽति सदृशं क्रामति नैनं पापीयानाप्नोति य एवं विद्वानेतया यजते देवाश्च वा असुराश्च संयत्ता आसँस्तान् गायत्र्यन्तरातिष्ठदोजो वीर्यमन्नाद्यं परिगृह्य संवत्सरो वा एनान् सोऽन्तरातिष्ठच्चतुर्विंशति-

[७] मै. २,१,११ (१५—२१)। वा. १०,१५; १९,९ । काण्व. ११,१३; २१,८ ।

र्गायत्र्या अक्षराणि चतुर्विंशतिस्संवत्सरस्यार्धमासास्तेऽविदुर्यतरान्वा इयमुपावर्त्स्यतीति त इदं भविष्यन्तीति तां व्यह्वयन्त दाभीत्यसुरा अह्वयन् विश्वकर्मन्निति देवास्सा नान्यतराँश्चनोपावर्तत ते देवा एतद्यजुरपश्यन्नोजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धाम नामासि विश्वमसि विश्वायुस्सर्वमसि सर्वायुरभिभूरिति सा देवानुपावर्तत ततो देवा अभवन् परासुरा अभवन्नाग्नेयमष्टाकपालं निर्वपेद्भ्रातृव्यवान् वा स्पर्धमानो वा तमासाद्यैतैर्यजुर्भिरभिमृशेदोजो वै वीर्यं संवत्सरं ओज एव वीर्यं भ्रातृव्यस्य वृङ्क्ते स निर्वार्यः पराभवति सैषा गायत्री नामेष्टिरथो आहुः क्षत्रस्य संवर्ग इति ॥७॥
१०-११

इन्द्राय घर्मवत एकादशकपालं निर्वपेद्ब्रह्मवर्चसकामोऽसौ वा आदित्यो घर्म एष इन्द्र एष ब्रह्मवर्चसस्य प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै ब्रह्मवर्चसं प्रयच्छतीन्द्रायेन्द्रियवत एकादशकपालं निर्वपेत् पशुकाम इन्द्रियं वै पशव इन्द्रः पशूनां प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै पशून् प्रयच्छतीन्द्रायार्कवत एकादशकपालं निर्वपेदन्नकामोऽन्नं वा अर्क इन्द्रोऽन्नाद्यस्य प्रदाता तमेव भागधेयेनोपधावति सोऽस्मा अन्नाद्यं प्रयच्छतीन्द्रायार्कवत एकादशकपालं निर्वपेदपरुद्धोऽवगमकामोऽन्तं वा एष गच्छति यमपरुन्धन्त्येषेन्द्रस्यान्त्या तनूर्यार्कवत्यन्त एवास्मा अन्तं कल्पयति वशा दक्षिणा वशं मा नयादितीन्द्राय घर्मवत एकादशकपालं निर्वपेदिन्द्रायेन्द्रियवत एकादशकपालमिन्द्रायार्कवत एकादशकपालँ समानबर्हीषि बुभूषन् यदिन्द्राय घर्मवतेऽसौ वा आदित्यो घर्म एष इन्द्र एष शिरः प्रजानां शिर एव तेन कुरुते यदिन्द्रायेन्द्रियवत इन्द्रियमेव तेनात्मन् धत्ते यदिन्द्रायार्कवत इयं वा अर्कोऽस्यामेव तेन प्रतितिष्ठति चरुर्मध्ये स्यादजामित्वायेन्द्राय मन्युमत एकादशकपालं निर्वपेत् संग्रामे मन्युना वै वीर्यं करोतीन्द्रियेण जयति मन्युं चैवेन्द्रियं च जित्यै दधातीन्द्राय मन्युमते मनस्वत एकादशकपालं निर्वपेत् संग्रामे मन्युना वै वीर्यं करोतीन्द्रियेण जयति मन्युं चैवेन्द्रियं च सयुजौ कृत्वा तयोर्मनो जित्यै दधातीन्द्राय मनस्वते त्विषीमत एकादशकपालं निर्वपेद्यः कामयेत मनस्वी त्विषीमान् स्यामिति मनो वै श्रीस्त्विषिर्मन एवास्मिञ्छ्रियं त्विषिं दधाति संवत्सरं पुरा
मनसो न कीर्तयेत् संवत्सरेण वा अनाप्तमाप्यते संवत्सरमेवाप्त्वावरुन्द्धे ॥ ८ ॥ १२

इन्द्राय सुत्राम्ण एकादशकपालं निर्वपेदपरुद्धो वापरुध्यमानो वेन्द्रो वै त्रातेन्द्रोऽपरोद्धा तमेव भागधेयेनोपधावति स एनं त्रायत इन्द्रायाँहोमुच एकादशकपालं निर्वपेदामयाव्यँहसा वा एष गृहीतो य आमयाव्येषेन्द्रस्य भिषज्या तनूर्याँहोमुगिन्द्रोऽँहसो मोक्ता तमेव भागधेयेनोपधावति स एनमँहसो मुञ्चतीन्द्रायाँहोमुच एकादशकपालं निर्वपेद्य आत्मना वा गृहैर्वाह्वरणमवेयादँहसा वा

[ओजोऽसि सहोऽसि बलमसि । अथर्व. २,१७,१—३]
[८] मै. २,२,९,१२ (३१,३४) । तै. सं. २,२,७—८; ८,२ । [९] मै. २,२,१० (३०) ।

एष गृहीतो य आत्मना वा गृहैर्वाह्वरणमवैतीन्द्रोऽँहसो मोक्ता तमेव भागधेयेनोपधावति स एनमँहसो मुञ्चतीन्द्रायार्कवतेऽश्वमेधवत एकादशकपालं निर्वपेद्यः कामयेत महायज्ञो मोपनमेदितीयं वा अर्कोऽसावश्वमेध ऐन्द्रो यज्ञोऽन्तमेतस्य यज्ञो गच्छति यं यज्ञकामं यज्ञो नोपनमत्येते इन्द्रस्यान्त्ये तन्वौ ये अर्कवती ये एवेन्द्रस्यान्त्ये तन्वौ ताभ्यामेव यज्ञमालभत उपैनं यज्ञो नमतीन्द्रायान्वृजव एकादशकपालं निर्वपेत् सजातकाम इन्द्रियं वै ज्यैष्ठ्यमिन्द्रियेणैव सजातानन्वृजून् कुरुत इन्द्राय प्रवभ्रायैकादशकपालं निर्वपेद्भ्रातृव्यवान् वज्रो वै प्रवभ्रः प्रवभ्रेण वा इन्द्रोऽसुरेभ्यो वज्रं प्राहरद्वज्रमेव भ्रातृव्याय प्रहरति स्तृणुत एनमाग्नेयमष्टाकपालं निर्वपेदिन्द्राय विमृधायैकादशकपालँ संग्राम ऋद्ध्या एवाग्नेय इन्द्रं वै वृत्रं जघ्निवाँसं मृधोऽसचन्त स एतं वैमृधमपश्यत् तेन ता मृधोऽपाहत वृत्रमेष जिघाँसति यस्संग्रामं जिगीषति यैवेन्द्रस्य विमृधा तनूस्तामेव भागधेयेनोपधावति तया मृधोऽपहते हन्ति वृत्रं जयति संग्राममाग्नेयमष्टाकपालं निर्वपेदिन्द्राय विमृधायैकादशकपालं यँ सर्वतो भयमागच्छेदृद्ध्या एवाग्नेय इन्द्रं वै वृत्रं जघ्निवाँसं तँ समन्तं मृधस्संप्राकम्पन्त स एतं वैमृधमपश्यत् तेन ता मृधोऽपाहत समन्तमेतं मृधस्संप्रकम्पन्ते यँ सर्वतो भयमागच्छति यैवेन्द्रस्य विमृधा तनूस्तामेव भागधेयेनोपधावति तया मृधोऽपहत आत्मनोऽधि ॥ ९ ॥ १३

प्रजापतिर्वा इन्द्राय वज्रं प्रत्यमुञ्चन्महानाम्नीस्तेन व्यजयत ततो वै सोऽभवत् सोऽबिभेद्वज्रो मेऽशान्तो ग्रीवा अपिधक्ष्यतीति ततो रेवतीर्निरमिमीत शान्त्या ऐन्द्रं चरुं निर्वपेद्राजन्याय बुभूषत ऐन्द्रो वै राजन्यो देवतया स्वादेवैनं योनेर्जनयति भूत्यै भवत्येव रेवत्यनुवाक्या शक्करी याज्या वज्रो वै रेवती वज्रश्शक्करी वज्रमेव संदधाति तेन विजयते भवत्येव चरुर्भवति शान्त्या अनुद्दाहायेन्द्राण्यै चरुं निर्वपेत् सेनायामुत्थितायां राज्ञो गृहे सेना वा इन्द्राणी ब्रह्मणैवैनां विस्यै सँश्यति बल्वजा इध्मे च बर्हिषि चापिभवन्ति शक्रो वा एते जाता न्यायेनैवैनामभिनयति यत् सा विन्देत ततो दक्षिणा समृद्ध्या इन्द्राय चेन्द्राण्यै च चरुं निर्वपेत् सेनायामुत्थितायां राज्ञो गृह एषा वा इन्द्रस्य परिवृक्ती जाया गोष्ठेवैनामधिनयति बल्वजा इध्मे च बर्हिषि चापिभवन्ति शक्रो वा एते जाता न्यायेनैवैनामभिनयति यत् सा विन्देत ततो दक्षिणा समृद्ध्यै प्रजापतिर्वै देवेभ्यो भागधेयानि व्यादिशत् तदिन्द्रियमत्यरिच्यत तदिन्द्रोऽब्रवीन्मयीदमस्त्विति तदस्मिन्नदधात् तदेनमत्यत्येवारिच्यत तदिमांल्लोकानूर्ध्वमनूदश्रयत तदेकेनाप्नोन्न द्वितीयेन तत् तृतीयेनाप्त्वावारुन्द्ध त्रीन् पुरोडाशान्निर्वपेद्बुभूषँस्त्रय इमे लोका इमानेव लोकानाप्त्वौजो वीर्यमवरुन्द्ध उत्तर उत्तरो ज्यायान् भवत्युत्तर उत्तरो ह्येषां लोकानां ज्यायानिन्द्राय राज्ञे प्रथममथेन्द्राय स्वराजेऽथेन्द्रायाधिराजायैतानि वै सर्वाणीन्द्रोऽभवन्नोदेतान्येव सर्वाणि भवति य एवं विद्वानेतया यजते ॥ तिस्रोऽनुवाक्यास्ता

[१०] मै. २,२,५, १० (१४—१०,१२)।

याज्यास्तासां प्रथमामनूच्य मध्यमया यजति मध्यमामनूच्योत्तमया यजत्युत्तमामनूच्य पुनः प्रथमया यजत्येषां लोकानां संतत्यै प्रतिप्रज्ञात्यै सर्वा एकानुवाक्याः करोति सर्वा याज्या देवाश्च वा असुराश्च संयत्ता आसंस्तेऽसुरा भूयांसोऽजितमनस आसन् कनीयांसः पराजितमनस्तरा इव देवास्ते देवा असुरेभ्यो बिभ्यत इन्द्रमब्रुवंस्त्वं वै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत् तिस्रो म इमास्तन्वो वीर्यावतीस्ता मे प्रीणीताथैतानभिभविष्याम इति ता वै ब्रूतेत्यब्रुवन्निमं विमृधेत्यब्रवीदियमंहोमुगियमिन्द्रियावतीति त इन्द्राय विमृधायैकादशकपालं निरवपन्निन्द्रायांहोमुच एकादशकपालमिन्द्रायेन्द्रियवत एकादशकपालं यदिन्द्राय विमृधाय मृधा वै तेऽभिषण्णा आसन् ये श्रेयोभिरसुरैरस्पर्धन्त मृध एव तेनापाघ्नत यदिन्द्रायांहोमुचेंऽहसा वै ते गृहीता आसन्नंहस एव तेनामुच्यन्त यदिन्द्रायेन्द्रियवत इन्द्रियमेव तेनात्मन्नदधतैतया यजेत भ्रातृव्यवान् यो वा भूयोभ्रातृव्यस्स्यादिन्द्राय विमृधायैकादशकपालं निर्वपेदिन्द्रायांहोमुच एकादशकपालमिन्द्रायेन्द्रियवत एकादशकपालम् ॥ यदिन्द्राय विमृधाय मृधा वा एषोऽभिषण्णो यश्श्रेयसा भ्रातृव्येण स्पर्धते मृध एव तेनापहते यदिन्द्रायांहोमुचेंऽहसा वा एष गृहीतो यो भ्रातृव्यवानंहस एव तेन मुच्यते यदिन्द्रायेन्द्रियवत इन्द्रियमेव तेनात्मन् धत्ते त्रयस्त्रिंशद्वै देवतास्तास्सर्वा वीर्यैरनुसमारभन्त स उत्तमां विजितिमसुरैर्व्यजयत ततो वै सोऽभवद्यत् त्रयस्त्रिंशत् कपालानि भवन्ति यावतीरेव देवतास्तास्सर्वा वीर्यैरात्मानमनुसमारम्भयते भवत्येव सैषा विजितिर्नामेष्टिरुत्तमामेव विजितिं भ्रातृव्येण विजयते य एवं विद्वानेतया यजते ॥

॥ १० ॥ १४-१६

प्रजापतिः पशूनसृजत तेऽस्मादपाक्रामँस्तेषां बृहस्पतिश्च पदेनान्वैतां ते यत्रावसँस्तद्गर्मुतँ शक्नो जातामविन्दतां तामाच्छिद्याहरतां तं बृहस्पतिरब्रवीदनया त्वाया जयान्युप वै त्वैते पशवः पुनर्नेष्यन्तीति स प्राजापत्यं चरुं निरवपद्गार्मुतमप्सु ततो वै तं पशवः पुनरुपानमन् प्राजापत्यं चरुं निर्वपेद्गार्मुतमप्सु पशुकामोऽपक्रान्ता वा एतस्मात् पशवो योऽपशुः प्रजापतिः पशूनां प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै पशून् पुनरुपावर्तयति गोमूत्रस्यापि स्यात् सयोनित्वाय प्रजापतिः पशून् सृष्ट्वा तेषां पूषणमधिपामकरोत् तेऽस्मादपाक्रामँस्तेषां पूषा पदेनान्वैत् ते यत्रावसँस्तद्गर्मुतँ शक्नो जातामविन्दत् तामाच्छिद्याहरत् तया प्रजापतिमब्रवीदनया मा प्रतिष्ठस्वोप वै त्वैते पशवः पुनर्नेष्यन्तीति तत् सोमोऽभ्यातीयत ॥ मम वा एतद्यदकृष्टपच्यमिति स सौमापौष्णं चरुं निरवपद्गार्मुतमप्सु ततो वै तं पशवः पुनरुपानमन् सौमापौष्णं चरुं निर्वपेद्गार्मुतमप्सु प्रजाकामो वा पशुकामो वा सोमो वै रेतोधाः पूषा प्रजनयिता सोम एवास्मै रेतो दधाति पूषा प्रजनयति विन्दते

[११] मै. २,२,४ (१३) ।

प्रजां वा पशून् वा यतरस्मै कामाय निर्वपति गोमूत्रस्यापि स्यात् सयोनित्वाय मारुतं प्रैयङ्गवं चरुं निर्वपेत् पृश्न्या दुग्धे सजातकामः पृश्न्या वै मरुतो जाता वाचो वास्या वा पृथिव्या मारुतास्सजाता एतन्मरुताँ स्वं पयो यत् प्रियङ्गवस्स्वेनैवैनान् पयसाच्छैति यथा वत्स ऊधोऽभ्यायच्छत्येवमेनँ सजाता अभ्यायच्छन्ति ॥ प्रियवत्यनुवाक्या श्रीवती याज्या यत् प्रियवती प्रियमेवैनँ सजातानां करोति यच्छ्रीवती श्रियमेवैनं गमयति द्विपदानुवाक्या चतुष्पदा याज्या द्विपदश्चैव चतुष्पदश्च पशूनवरुन्द्ध ऐन्द्रमेकादशकपालं निर्वपेन्मारुतं प्रैयङ्गवं चरुं तं पश्चा शृतं कुर्युर्यस्मात् क्षत्रियाद्विडभ्यर्धश्चरेत् क्षत्रं वा इन्द्रो विण्मरुतः क्षत्रायैव विशमनुनियुनक्ति तमनूच्यमाने पश्चात् प्राञ्चमुदाहरन्ति विशमेवास्मै पश्चादुपदधात्यसँसर्गाय मारुतँ सप्तकपालं निर्वपेदैन्द्रमेकादशकपालं यः कामयेत विशे च क्षत्राय च समदं कुर्यामिति क्षत्रं वा इन्द्रो विण्मरुतो भागधेय एवैभ्यस्समदं करोति मारुतस्य मारुतीमनूच्यैन्द्र्या यजेदैन्द्रस्यैन्द्रीमनूच्य मारुत्या यजेत् क्षत्रमेव विशः परिहायादत्ते विट् क्षत्रस्य ते अन्योन्यां निर्णयत उभयतः पुरोडाशस्यावद्येद्यतरान् कामयेत पराजयेरन्नित्युभयत एवं विशमुपदीपयति ताजक् पराजयन्त एतामेव निर्वपेद्यदा कामयेत कल्पेरन्निति तस्याः प्रसृति यजेद्भागधेयेनैवैनान् कल्पयति मारुतँ सप्तकपालं निर्वपेद्यः क्षत्रियो विशो ज्यान्या बिभीयाद्ब्राह्मणो वा विड्ढि मरुतो भागधेयेनैवैनाञ्छमयत्यगस्त्यस्यैतत् सूक्तं कयाशुभीयं तस्य सामिधेनीष्वप्यनुब्रूयात् तस्य याज्यानुवाक्ये स्यातामगस्त्यो वै मरुद्भ्यश्शतमुक्ष्णः पृश्नीन् प्रौक्षत् तानिन्द्रायालभत तं मरुतः क्रुद्धा वज्रमुद्यत्याभ्युपतन् स एतत् सूक्तमपश्यत् तेनैनानशमयद्यदेतदनूच्यते शान्त्यै ॥ ११ ॥ १७-१९

अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ॥ २०

यस्मै त्वँ सुकृते जातवेद उ लोकमग्ने कृणवस्स्योनम् ।

अश्विनँ स पुत्रिणं वीरवन्तं गोमन्तं रयिं नशते स्वस्ति ॥ २१

य इमा विश्वा जातान्याश्रावयति श्लोकेन । प्र च सुवाति सविता ॥ २२

विश्वा रूपाणि ॥ २३

वायुरग्रेगा यज्ञप्रीस्साकं गन्मनसा यज्ञम् । शिवो नियुद्भिश्शिवाभिः ॥ २४

प्र याभिर्यासि दाश्वाँसमच्छा नियुद्भिर्वाय इष्टये दुरोणे ।

नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ २५

[१२] मै. २,२,६ (२२-२६) । तै. ब्रा. २,४,४ । वा. १२,३,५८; २७,२७,३१; ३३.८६ । काण्व. १३,३,५९; २९, २५-२६ । [अस्मै ते प्रतिहर्यते० । ऋ. ८,४३,२ । यस्मै त्वं सुकृते० । ऋ. ५,४,११; तै. सं. १,४,४६,१ । य इमा विश्वा जातानि० । ऋ. ५,८२,९ । विश्वा रूपाणि० । ऋ. ५,८१,२; तै. सं. ४,१,१०,४; नि. १२,१३ । प्र याभिर्यासि दाश्वाँ० । ऋ. ७,९२,३; मै. सं. १,२,१२,७; तै. ब्रा. १,८,१,१]

बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि । प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ २६

दृळ्हा चिद्या वनस्पतीन् क्ष्मया दर्धर्ष्योजसा ।

यत् ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः ॥ २७

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् । विश्वासु पृत्सु दुष्टरम् ॥ २८

गोमाँ अग्ने ॥ २९

मदे मदे हि नो ददिर्यूथा गवामृजुक्रतुः ।

संगृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आभर ॥ ३०

शिप्रिन् वाजानां पते शचीवस्तव दंसना ।

आ तू न इन्द्र शँसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ३१

रेवतीर्नः प्र सधादिषे ॥ ३२

संज्ञानं नो दिवा पशोस्संज्ञानं नक्तमर्वतः ।

संज्ञानं नस्स्वेभ्यस्संज्ञानमरणेभ्यस्संज्ञानमश्विना युवमिहास्मासु नियच्छतम् ॥ ३३

समिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।

सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥ ३४

इन्द्रवायू सुसंदृशा सुहवेह हवामहे । यथा नस्सर्व इज्जनस्संगमे सुमना असत् ॥ ३५

अग्निः प्रथमो वसुभिर्नो अव्यात् सोमो रुद्रैरभिरक्षतु त्मना ।

इन्द्रो मरुद्भिरृतुथा कृणोत्वादित्यैर्नो वरुणश्शर्म यँसत् ॥ ३६

समग्निर्वसुभिर्नो अव्यात् सँ सोमो रुद्रियाभिस्तनूभिः ।

समिन्द्रो रातहव्यो मरुद्भिस्समादित्यैर्वरुणो विश्ववेदाः ॥ ३७

समाना व आकूतानि समाना हृदयानि वः ।

समानमस्तु वो मनो यथा वस्सुसहासति ॥ ३८

[बळित्था पर्वतानां० ऋ. ५,८४,१; तै.सं. २,२,१२,२; नि. ११,३७ । दृढा (दृढा) चिद्या वनस्पतीन्० । ऋ. ५,८४,३ । आ नो अग्ने रयिं भर० । ऋ. १,७९,८; सा. १५५४ । गोमाँ अग्ने० । ऋ. ४,२,५; तै.सं. १,६,६,४; ३,१,११,१ । मदे मदे हि नो० । ऋ. १,८१,७; अथर्व. २०,५६,४; तै. ब्रा. २,४,४,७ । शिप्रिन् वाजानां पते० । ऋ. १,२९,२; अथर्व. २०,७४,२; तै. ब्रा. २,४,४,८ । रेवतीर्नः० । ऋ. १,३०,१३; सा. १५३, १०८४; अथर्व. २०,१२२,१; तै. सं. १,७,१३,५; २,२,१२,८; ४,१२,४ । प्र सधादिषे० । ऋ. १०,१८०,१; तै. सं. ३,४,११,४; तै. ब्रा. २,६,९,१; ३,७,४,४ । संज्ञानं नस्स्वेभ्य० । ऋ. परि० ३६,५; अथर्व. ७,५२,१; समिन्द्र राया० ऋ. १,५३,५; अथर्व. २०,२१,५ । इन्द्रवायू सुसंदृशा० । ऋ. १०,१४१,४; अथर्व. ३,२०,६ । समाना(नी) व आकूतानि० । ऋ. १०,१९१,४; अथर्व. ६,६४,३; तै. ब्रा. २,४,४,५]

सं वो मनाँसि सं व्रता समु चित्तान्याकरम् ।

अमी ये विव्रतास्स्थन तान् वस्संनमयामसि ॥ ३९

यथादित्यमादित्या आप्याययन्ति यथाक्षितिमक्षितयो मदन्ति ।

एवा मामिन्द्रो वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः ॥ ४०

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।

भागं देवेभ्यो विदधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः ॥ १२ ॥ ४१

प्र यो जज्ञे विद्वाँ अस्य बन्धुं विश्वा देवानां जनिमा विवक्ति ।

ब्रह्म ब्रह्मण उज्जभार मध्यान्नीचादुच्चा स्वधयाभि प्रतस्थौ ॥ ४२

महान्मही अस्कभायद् वि जातो द्यां द्विता पार्थिवं च रजः ।

स बुध्नादाष्ट जनुषाभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् ॥ ४३

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नश्शृण्वन्नूतिभिस्सीद सादनम् ॥ ४४

स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।

बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद् वावशतीरुदाजत् ॥ ४५

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।

ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥ ४६

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उप प्रयन्तु मरुतस्सुदानव इन्द्र प्राशूर्भवा सचा ॥ ४७

अर्यमा यातु वृषभस्तुविष्मान् यन्ता वसूनि विधते तनूपाः ।

सहस्राक्षो गोत्रभिद् वज्रबाहुरस्मासु देवो द्रविणं दधातु ॥ ४८

ये ते अर्यमन् बहवो देवयानाः पन्थानो राजन् दिव आचरन्ति ।

तेभिर्नो अद्य पथिभिस्सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ ४९

[सं वो मनांसि० । ऋ. परि. ३६,४; अथर्व. ६,९४,१ । नवो नवो भवति० । ऋ. १०,८५,१९; अथर्व. ७,८१,२; १४,१,२४; तै. सं. २,३,५,३; ४,१४,१; नि. ११,६]

[१३] वा. २३,१,३,१९; ३४,५६; १३,४; २५,१०-११; ७,४१-४२; ८,४१; ३३,३१,३६; १३,४६ । काण्व. २५,१, ३,२१; ३३,४४; १४,४; २७,१४-१५; ८,२३-२४; ९,६-७; ३२,३१,३६; १४,३८ । [प्र यो यज्ञे विद्वाँ० । अथर्व. ४,१,३; आ. श्रौ. सू. ४,६,३ । महान्मही अस्कभा० । अथर्व. ४,१,४ (उत्तरार्धः) । सबुध्या (०ध्न्या) दाष्ट (०ष्ट्र) ० । अथर्व. ४,१,५ (पूर्वार्धः) । गणानां त्वा गणपतिं० । ऋ. २,२३,१; तै. सं. २,३,१४,३ । स सुष्टुभा स ऋक्वता० ऋ. ४,५०,५ अथर्व. २०,८८,५; तै. सं. २,३,१४,४ । अग्निरुक्थे पुरोहितो० । ऋ. ८,२७,१; सा. ४८ । उत्तिष्ठ ब्रह्मणस्पते० । ऋ. १,४०,१; तै. आ. ४,२,१]

अस्मे इन्द्राबृहस्पती रयिं धत्तँ शतग्विनम् । अश्वावन्तँ सहस्रिणम् ॥ ५०
बृहस्पतिर्नः परिपातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नस्सखा सखिभ्यो वरिवः कृणोतु ॥ ५१
हिरण्यगर्भो यः प्राणत उदु त्यं चित्रं देवानाम् ॥ ५२
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् ॥ ५३
दिवो रुक्म उरुचक्षा उदेति दूरे अर्थस्तरणिर्भ्राजमानः ।
नूनं जनास्सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपाँसि ॥ १३ ॥ ५४
[७८०]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायामाग्नावैष्णवं नाम दशमं स्थानकं संपूर्णम् ॥१०॥

अथैकादशं स्थानकम् ।

मारुतम् ।

मारुतं चरुं निर्वपेत् तस्यैकविंशतिनिर्बाधो हरितो रुक्मोऽपिधानस्स्यात् तस्यापग्राहमवद्येद्यत् क्षत्रियं विण् निर्बाधे कुर्वीत विड्वै मरुतो भागधेयेनैवैनाञ्छमयत्येकविंशतिनिर्बाधो भवत्येकविंशतिर्वै मारुता गणा यदेकविंशतिनिर्बाधो निर्बाधैरेवैषां निर्बाधान् वृङ्क्त ऐन्द्रमेकादशकपालं निर्वपेद् वैश्वदेवं द्वादशकपालँ सजातकामः क्षत्रं वा इन्द्रो वैश्वदेवीरिमाः प्रजाः क्षत्रायैव विशमनुनियुनक्त्यैन्द्रस्यावदायाथ वैश्वदेवस्योभे अवदाने अवद्येदथैन्द्रस्य क्षत्रं वा इन्द्रो वैश्वदेवीरिमाः प्रजाः क्षत्रेणैव विशमुभयतः परिगृह्णात्यैन्द्री वैश्वदेववर्णे याज्यानुवाक्ये भवतस्समृद्ध्या उपचाय्यपृडं हिरण्यं दक्षिणा सजातानेवास्मा उपदधाति तदेतदनुवर्त्म नाम हविस्सजातानेवास्मा अनुवर्त्मनः करोति सौम्यँ श्यामाकं चरुं निर्वपेत् सोमवामीन्द्रो वै त्वष्टुस्सोममनुपहूतोऽपिबत् स विश्वक् सोमपीथेन व्यार्ध्यत तस्मात्

[अस्मे इन्द्राबृहस्पती०। ऋ. ४,४९,४; तै. सं. ३,३,११,१। बृहस्पतिर्नः परिपातु०। ऋ. १०, ४२,११; ४३,११; ४४,११; अथर्व. ७,५१,१; २०, १७,११; ८९,११; ९४,११; तै. सं. ३,३,११, १। हिरण्यगर्भो०। ऋ. १०,१२१,१; अथर्व. ४,२,७, तै. सं. ४,१,८,३; २,८,२; ताण्ड्य ब्रा. ९,९,१९; नि. १०, २३। यः प्राणत०। ऋ. १०,१२१,३; अथर्व. ४,२,२; तै. सं. ४,१,८,४; ७,५,१६,१। उदु त्यं०। ऋ. १, ५०,१; सा. ३१; अथर्व. १३,२,१६; २०,४७,१३; तै. सं. १,२,८,२; ४,४३,१; नि. १२,१५। चित्रं देवानाम्। ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै.ब्रा. २,८,७,३; ऐ. आ. ३,९; तै. आ. १,७,६; २,१३,१; नि. १२,१६। तरणिर्विश्वदर्शतो०। ऋ. १,५०,४; सा. ६३५; अथर्व. १३, २,१९; २०,४७,१६; तै. सं. १,४,३१,१; तै. आ. ३,१६,१। दिवो रुक्म उरुचक्षा०। ऋ. ७,६३,४; तै. ब्रा. २,८,७,३]

[१] मै. २,१,१३ (३५)। वा. ७,४१; ८,४१; ३३,३१। काण्व. ८,२३; ९,६; ३२,३१।

सोमो नानुपहूतेन पातवै सोमपीथेन व्यर्धुको भवति स यत् परावमीत्ते श्यामाका एव वाव स सोमपीथो यच्छ्यामाकस्समक्षमेव सोमपीथमवरुन्द्धे सौमेन्द्रः कार्य इन्द्रियेण वा एष सोमपीथेन व्यृध्यते यस्सोमं वमिति सौम्यो ब्राह्मणो देवतयेन्द्रियमस्य सोमपीथो यत् सौमेन्द्र इन्द्रियेणैवैनँ सोमपीथेन समर्धयत्यधृतो वा एतस्मिन् सोमपीथो यस्सोमं वमिति तण्डुलानुच्छिंपेत् तान् कथति प्रत्यावपेत् सोमपीथमेवास्मिन् दधात्यग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेत् सौर्यं चरुमग्नये ज्योतिष्मत उपरिष्टादष्टाकपालं चक्षुष्कामोऽग्नेर्वै मनुष्या नक्तं चक्षुषा पश्यन्ति सूर्यस्य दिवा तौ चक्षुषः प्रदातारौ ता एव भागधेयेनोपधावति ता अस्मै चक्षुः प्रयच्छतो यत् समानी देवता द्वेधा क्रियते तस्मात् समानँ सच्चक्षुर्द्वेधा तस्मात् समानी याज्यानुवाक्ये भवतस्सौर्यस्य मध्यतोऽवद्यतीदमेव तेन करोति यदिदमन्तरा चक्षुषी चक्षुषोर्व्यावृत्त्यै त्रीन् पिण्डान् प्रयच्छत्युदु त्यं जातवेदसमयुक्त सप्त शुन्ध्युवस्सप्त त्वा हरितो रथ इति चक्षुरेवास्मै तत् प्रयच्छति यदेव तस्य तत् सैषा राजनी नामेष्टिरेतया ह वै रजनं कोणेयं क्रतुजिज्जानकिश्चक्षुष्कामं याजयांचकार तयैतया चक्षुष्काम एव यजेताग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं बार्हस्पत्यमष्टाकपालं बुभूषन्निन्द्रो वा अधृतश्शिथिल इवामन्यत सोऽग्नौ चैव बृहस्पतौ चानाथत तमेतयेष्ट्यायाजयतां यदाग्नेयस्तेज एवास्मिंस्तेन पुरस्तादधत्तां यदैन्द्र इन्द्रियमेवास्मिंस्तेन मध्यतोऽधत्तां यद्बार्हस्पत्य उपरिष्टादेवास्मिंस्तेन ब्रह्मवर्चसमधत्तां ततो वै सोऽभवदेतया यजेत बुभूषन् यदाग्नेयस्तेजो वा अग्निस्तेज एव तेन पुरस्ताद्धत्ते यदैन्द्र इन्द्रियं वा इन्द्र इन्द्रियमेव तेन मध्यतो धत्ते यद्बार्हस्पत्यो ब्रह्म वै बृहस्पतिरुपरिष्टादेव तेन ब्रह्मवर्चसं धत्ते भवत्यैवैन्द्र इतरयोर्नाभी समादधातीन्द्रियमेवास्मिन् मध्यतस्समादधात्यैन्द्रो मध्ये भवत्यभित इतरौ तेजो वा अग्निरिन्द्रियमिन्द्रो ब्रह्म बृहस्पतिस्तेजसा चैव ब्रह्मवर्चसेन चेन्द्रियमुभयत आत्मन् परिगृह्णाति त्रिवतीर्याज्यानुवाक्या भवन्ति समृद्ध्यै तदेतत् त्रिधातु नाम हविस्त्रीणि हि स तेन वीर्याण्यधत्त ॥ १ ॥ १

आग्नेयमष्टाकपालं निर्वपेत् सावित्रमष्टाकपालं वायव्यां यवागुं भौममेककपालं यस्य हिरण्यमपहृतं वोपहतं वा स्याद्यो वा कामयेत हिरण्यं विन्देयेत्यग्निर्वा अग्रे हिरण्यमविन्दत् तस्मिन् सविता चामन्त्रयतामेऽतो वायुनानुपगतमस्त्यस्यामेतद्विन्दन्त्यस्यां पुनन्ति यदाग्नेयो विश्या एव स जातवेदा इति हि प्रसवायैव सावित्रोऽभिनीत्यै वायव्यास्यामेतद्विन्दन्त्यस्यां पुनन्त्येता वै देवता हिरण्यस्ये-

[उदु त्यं जातवेदसं०। ऋ. १५०,१; सा. ३१; अथर्व. १३,२,१६; २०,४७,१३; तै. सं. १,२,८,२; ४,४३, १; नि. १२,१५। अयुक्त सप्त शुन्ध्युवः०। ऋ. १,५०,९; अथर्व. १३,२,२४; २०,४७,२१; तै. ब्रा २४. ५,४। सप्त त्वा हरितो०। ऋ. १,५०,८; सा. ६४०; अथर्व. १३,२,२३; २०,४७,२०; तै. सं. १,४,१४,४]

[२] मै. २,२,७ (२९)। तै. सं. २,३,५।

शते ता एव भागधेयेनोपधावति ता अस्मै हिरण्यं ददति यदा हिरण्यं विन्देताथैतामेव निर्वपेद्या एवास्मै देवता हिरण्यं ददति ता एव भागिनीः करोत्यात्मनोऽहिंसाया आग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं दधि मधु घृतं धानास्तण्डुलास्तत् सँसृष्टँ स्यात् तेन पशुकामो यजेतद्वया एवाग्नेयो यदैन्द्र इन्द्रः पशूनां प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै पशून् प्रयच्छति यत् सँसृष्टं पशवो वै सँसृष्टं पशूनेवावरुन्द्ध ऐन्द्रः कार्यमिन्द्रः पशूनां प्रदाता यदैन्द्रे द्वे सह कुर्याज्जामि स्यात् प्राजापत्यं कार्यं प्रजापतिः पशूनां योनिस्स्वादेवैनान् योनेः प्रजनयति प्रजापतिः प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै पशून् प्रयच्छति रेवती सँसृष्टस्य याज्यानुवाक्ये शक्वरी इतरस्य पशवो वै रेवती पशवश्शक्वरी पशूनेवावरुन्द्धे पञ्चैतानि सँसृष्टानि द्वे इतरे तानि सप्त सप्तपदा शक्वरी शाक्वराः पशवः पशूनेवावरुन्द्धे ॥ पङ्क्तिरपिभवति पाङ्क्तः पुरुषस्सर्व एव भूत्वा पशुनुपैति घृतं भवत्याग्नेयं वै घृतमग्निः प्रवापयिता प्र तेन वापयति मधु भवति सौम्यं वै मधु सोमो रेतोधा रेत एव तेन दधाति धानाश्च तण्डुलाश्च भवन्त्यह्नो वै रूपं धाना रात्र्यास्तण्डुला अहोरात्रे पशवोऽनुप्रजायन्ते नक्तं वा हि दिवा वा प्रजायन्तेऽहोरात्रे एवैनाननुप्रजनयति दधि भवत्येतद्रूपा वै पशवो यद्दधि सरूपानेव पशूनवरुन्द्धे न मधु होतव्यमायुर्वै मध्वायुरग्नौ प्रदध्यात् प्रमायुकस्स्यादेतयेष्ट्वायुष्युया यजेत पशूनेवावरुध्यायुरुपैति यद्येतया न यजेत वरं दद्याद्वरेणैव वरँ स्पृणोति ॥ द्वौ दद्याद् द्वौ हि प्राणश्चापानश्च त्रीन् दद्यात् त्रयो हि प्राणाः प्राणो व्यानोऽपानस्तानेव यजमाने दधात्येकमेव दद्यात् त्रिवृतं तु त्रिवृद्धि प्राणो बहु वा एतदन्यदन्यज्जुहोति स ईश्वरोऽन्यद्रूपं पोष्टोस्सिध्मां गां दद्याद्रूपाणां निष्क्रीत्यै सर्वाणि वयाँसि दद्यात् सर्वानेव पशूनवरुन्द्धे यदि नाभ्याशँसेत पष्ठौहीमन्तर्वत्नीं दद्यात् सा हि सर्वाणि वयाँसि यद्वत्सं बिभर्ति तेन वत्सा यद्वत्सतरी तेन वयो यत् परं वय आप्ता तेन स्थविरा तयैव सर्वान् पशूनवरुन्द्ध आपो वा इदं निरमृजन् स मनुरेवोदशिष्यत स एतामि-
ष्टिमपश्यत् तामाहरत् तयायजत तयाप्रथत तयेमं भूमानमगच्छन् प्रथत एव तं भूमानं गच्छति यं
२-४
मनुरगच्छद्य एवं विद्वानेतया यजेत ॥ २ ॥

देवा वै न समजानत ते चतुर्धा व्युदक्रामन्नग्निर्वसुभिस्सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैस्तान् बृहस्पतिरब्रवीद्याजयानि वस्सं वै ज्ञास्यध्व इति तेन गृहे याजयानीतीन्द्रमब्रवीत् तेन वै श्रैष्ठ्याय संज्ञास्यन्त इति सोऽग्नये वसुमतेऽष्टाकपालं निरवपत् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वत एकादशकपालं वरुणायादित्यवते चरुं तानिन्द्रस्य गृहेऽयाजयत् ततो वै ते समजानत त इन्द्रस्यैव श्रैष्ठ्याय समजानत स त्रिष्टुभौ याज्यानुवाक्ये अकरोत् त्रिष्टुब् वा इन्द्रस्य स्वं छन्द ओजो वीर्यं त्रिष्टुप् स्वेनैवास्मिञ्छन्दसौजो वीर्यमदधात् तस्मादिन्द्रो देवानामोजिष्ठो यं स्वा न संजानीरंस्ता-

नेतया याजयेद्यं कामयेतायं श्रैष्ठ्यस्स्यादिति तस्य गृहे समेव जानत एतां एवैनं देवता भागधेयमभि संजानानास्संज्ञापयन्ति त्रिष्टुभौ याज्यानुवाक्ये कुर्यादोजो वै वीर्यं त्रिष्टुबोज एवैषु वीर्यं दधाति संवती संयाज्ये समृद्ध्यै सैषा संज्ञानी नामेष्टिस्समेव जानते प्रजापतिर्वै सोमाय राज्ञे दुहितृरददान्नक्षत्राणि स रोहिण्यामेवावसत् तान्यनुपेयमानानि पुनरगच्छँस्तस्मात् स्त्र्यनुपेयमाना पुनर्गच्छति तान्यन्वागच्छत् तानि पुनरयाचत तान्यस्मै न पुनरददात् सोऽब्रवीत् सर्वेष्वेव समावद्वसाथ ते पुनर्दास्यामीति स रोहिण्यामेवावसत् तं तस्मिन्ननृते यक्ष्मोऽगृह्णाच्चन्द्रमा वै सोमो राजा यद्राजानं यक्ष्मोऽगृह्णात् तद्राजयक्ष्मस्य जन्म स तृणमिवाशुष्यत् स प्रजापता अनाथत सोऽब्रवीत् सर्वेष्वेव समावद्वसाथ त्वातो मोक्ष्यामीति तस्माच्चन्द्रमास्सर्वेषु नक्षत्रेषु समावद्वसति तं वैश्वदेवेन चरुणामावस्यां रात्रीमयाजयत् तेनैनं यक्ष्मादमुञ्चत् सोऽमुमेवाप्यायमानमन्वाप्यायत वैश्वदेवेन चरुणामावस्यां रात्रीं यजेत यो राजयक्ष्माद्बिभीयाद्यक्ष्मादेवैनं मुञ्चति सोऽमुमेवाप्यायमानमन्वाप्यायते ॥३॥ ५

बार्हस्पत्यं चरुं निर्वपेदानुपूकानां व्रीहीणामानुजावरो बृहस्पतिर्वै देवानामानुजावरस्सोऽग्रं पर्यैद्बृहस्पतिरेतस्य देवता य आनुजावरस्तमेवान्वारभते स एनमग्रं परिणयति ब्रह्म वै बृहस्पतिर्ब्रह्म ब्राह्मणस्य पिता पिता पुत्रस्येशे प्राचो वापाचो वा नोत्तोर्ब्रह्मैवैनं पिताग्रं परिणयत्यानुपूका वा एते व्रीहयो य आनुजावरस्तानेतदग्रं परिणयति यद्धविष्करोति तानेवान्वारभते त एनमग्रं परिणयन्ति पुनः प्रवृद्धं बर्हिर्भवति पुनः प्ररूढ इध्मस्समृद्ध्यै बार्हस्पत्यं चरुं निर्वपेत् सजातकामस्तस्य गणवती याज्यानुवाक्ये स्यातां बार्हस्पत्यो वै ब्राह्मणो देवतया स्वामेव देवतां भूयिष्ठेनार्पयते गणवती याज्यानुवाक्ये भवतस्सजातैरेवैनं गणिनं करोति ब्राह्मणस्पत्यं चरुं निर्वपेत् तस्य मारुती याज्यानुवाक्ये स्यातां यः कामयेत ब्रह्म बलं स्यादिति ब्रह्म वै ब्रह्मणस्पतिर्विण्मरुतो ब्रह्मण्येव विशमनुविनाशयति ताजग् ब्रह्म बलं भवत्यर्यम्णे चरुं निर्वपेद्यः कामयेत दानकामा मे प्रजास्स्युरित्येष वा अर्यमा यो ददाति दानमिमाः प्रजा उपजीवन्ति दानकामा अस्मै भवन्त्यैन्द्राबार्हस्पत्यं चरुं निर्वपेद्राजन्याय बुभूषते देवा वै राजन्याज्जायमानादबिभयुस्तमनुहाय दाम्नापोम्भनेनापोभ्यो वा एष जायते यो राजन्यो यद्वा एषोऽनपोब्धो जायेत न किंचन स्यात् सर्वा इमाः प्रजा अधिपादमद्यादैन्द्रो राजन्यो देवतया ब्रह्म बृहस्पतिर्ब्रह्मणैवैनमपोम्भनान्मुञ्चति सोऽनपोब्धो वीर्याय प्रस्रियते द्विवृद्धिरण्यं दक्षिणा यदेवादो दाम तस्य निरवत्त्यै प्राजापत्यं चरुं निर्वपेच्छतकृष्णलं घृत आयुष्कामो देवा वै प्रमयादबिभयुस्ते प्रजापता अनाथन्त तानेतयेष्ट्यायाजयदमृतं वै हिरण्यममृतेनैवैष्वमृतमदधात् ततो वै तेऽमृता अभवन्नेतया यजेत यः प्रमयाद्बिभीयादमृतं वै हिरण्यममृतेनैवास्मिन्नमृतं दधाति शतकृष्णलो भवति शतायुर्वै पुरुषश्शतवीर्य

[४] मै. २,१,१२; २,२,२ (१२,११)।

आयुरेव वीर्यमवरुन्द्धे वैश्वदेवः कार्यो विश्वान् हि स तद्देवानयाजयत् प्राजापत्यः कार्यः प्रजापतियों-
निर्योना एव प्रतितिष्ठति ॥ चत्वारि चत्वारि कृष्णलान्यवदानं भवति समृद्ध्यै तं ब्रह्मणे परिहरन्ति
ब्रह्म वै ब्रह्मा ब्रह्मण्येवास्मिन्नेकधायुर्दधात्येतया यजेत यः कामयेत वसीयान् स्यामित्येष वै मनुष्यस्य
स्वर्गो लोको यदस्मिंल्लोके वसीयान् भवत्यृध्नोति वसीयान् भवति य एवं विद्वानेतया यजेत सौर्यं
चरुं निर्वपेद्धतश्रीस्तस्य हरितो रुक्मोऽभिधानस्स्याद्रजतोऽधस्तादसौ वा आदित्योऽन्तोऽन्तं मनु-
ष्यश्रियो गत्वा निवर्ततेऽन्तादेवान्तमालभते न ततः पापीयान् भवति यादृक् सन् यजतेऽसौ वा
आदित्य इदमासीत् स इदं निर्दहन्नचरत् तं देवा आभ्यां परिगृह्यामुं लोकमगमयन् स न व्यरोचत
ते प्रयाजेषु पञ्च हिरण्यकृष्णलान्यजुहवुस्तेजो वै हिरण्यं तेजसैवास्मिंस्तेजोऽदधुस्ततो वै स तेजो
ऽगृह्णात् स इमाः पञ्च दिशोऽनु तेजस्व्यभवदियं वै रजतासौ हरिण्याभ्यामेवैनं परिगृह्यामुं लोकं
गमयति स वै न विरोचत इत्याहुर्न हि स व्यरोचतेति प्रयाजेषु पञ्च हिरण्यकृष्णलानि जुहुयात्
तेजो वै हिरण्यं तेजसैवैनं संसृजति स इमाः पञ्च दिशोऽनु तेजस्वी भवति ॥ ४ ॥ ६-७

सौमारौद्रं चरुं निर्वपेच्छुक्लानां व्रीहीणां श्वेतायाश्श्वेतवत्साया आज्यं मथितं स्यात् तस्मिन्
ब्रह्मवर्चसकामस्स्वर्भानुर्वा आसुरस्सूर्यं तमसाविध्यत् स न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छं-
स्तमेतयैष्टयायाजयंस्तयास्मात् तमोऽपाघ्नंस्तमसैष प्रावृतो योऽलं ब्रह्मवर्चसाय सन्न ब्रह्मवर्चसी भवति
तम एवास्मादपहन्ति ब्रह्मवर्चसेनैनं संसृजति श्वेतायाश्श्वेतवत्साया आज्यं भवति शुक्ला व्रीहय
एवमिव वै ब्रह्मवर्चसं ब्रह्मवर्चसमेव संदधाति ॥ घृतेन प्रोक्षन्ति घृतेन मार्जयन्ते शान्त्यै शान्ति-
र्यौपोऽप्यस्य तां गौर्यामसौ गृहाण्यावहेयुः परिश्रिते यजेत ब्रह्मवर्चसस्य परिगृहीत्यै प्रादेशमात्रं-
मूर्ध्वौ भवत्येव तिर्यङ्ङेतावान् वै पुरुषो यावदस्य प्राणा अभि यावानेवास्यात्मा तस्मात्
तमोऽपहन्ति साकं रश्मिभिः प्रचरन्त्यसावेवास्मादादित्य उद्यंस्तमोऽपहन्ति तिष्यापूर्णमासे यजेत
तिष्यो वै रुद्रश्चन्द्रमास्सोमस्सौमीरेतः प्राचीनमोपवेषो रौद्रीः प्रतीचीनं शुष्यन्ति प्राचीनं शुष्यन्ति
प्रतीचीनं प्रत्यक्षमेवैना रुद्रोऽशावो दुश्चर्मा भवितोर्य एतया यजेतैव यस्मादपहन्ति
मनोऋचस्सामिधेनीर्धाय्या अनुब्रूयान्मनुर्वै यत् किंचावदत् तद्भेषजमासीद्भेषजमेवास्मै करोत्यु-
पक्षरन्ति सिन्धवो मयोभुव इति नागरश्म्या परिददाति शान्त्यै षट्पदा भवति षड्वा ऋतव
ऋतुष्वेव प्रतितिष्ठतीश्वरस्तु तदति दुश्चर्मेव भवितोस्तेजांसि हुत्व प्रत्यारोहन्तीति सौमापौष्णं
चरुं पशुकामोऽनुनिर्वपेत् सोमो वै ब्राह्मणस्य स्वा देवता पशवः पूषा स्वामेव देवतां पशुभिर्वि-
हयते त्वचमेव कुरुते सौमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणामभिचरन् सोमो वा आसां प्रजानाम-
धिपती रुद्रोऽग्निरधिपतिर्विष्वस्य चावप्यस्य चेशोऽधिपतिमेवैनं निर्याच्य रुद्रायापिदधाति कृष्णानां

[५] मै. २,१,४-६ (५-६) । तै. सं. २,२,१० ।

व्रीहीणां भवति कृष्णमिव वै तमस्तमो मृत्युर्मृत्युनैवैनं ग्राहयति शरमयं बर्हिश्शीर्त्यै वैभीतक इध्मो
विभित्त्यै सौमारौद्रं चरुं निर्वपेद् भ्रातृव्यतायै वा द्वितीयतायै वा तस्यार्धमर्धं सर्वं स्यादर्धं शुक्लानां
व्रीहीणां स्यादर्धं कृष्णानामर्धं शरमयं बर्हिषोऽर्धं दर्भमयमर्धं वैभीतकमिध्मस्यार्धमन्यस्य वृक्षस्य
सोमो वै ब्राह्मणस्य स्वा देवता स्वायामेवास्मै देवतायां द्वितीयं जनयति यदर्धमर्धं द्वितीयत्वायैव
तेन सौमारौद्रं चरुं निर्वपेत् पयस्यामयाविनस्सौम्यो वै जीवन्नाग्नेयः प्रमीतो नैष जीवो न मृतो य
आमयावी तयोरेवैनं भागधेयेन निष्क्रीणाति ॥ पयसि भवति पयो वै पयः पयः पुरुषः पय एत-
स्यामयति यस्यामयति पयसैवास्य पयस्स्पृणोति ग्रसितं वा एष एतं सोमारुद्रयोर्निष्खिदति यो
होता भवति स ईश्वरः प्रमेतोरनड्वाहं तस्मै दद्यात् तं हन्यात् तस्याश्नीयात् सैव तत्र प्रायश्चित्ति-
स्सौमारौद्रं चरुं निर्वपेत् प्रजाकामो वा पशुकामो वा सोमो वै रेतोधा रुद्रोऽग्निस्स प्रजनयिता सोम
एवास्मै रेतो दधात्यग्निः प्रजनयति विन्दते प्रजां वा पशून् वा यतरस्मै कामाय निर्वपति॥५॥८-१०

आदित्येभ्यो धारयद्वद्भ्यश्चरुं निर्वपेदपरुद्धो वापरुरुत्स्यमानो वादित्या वै त्रातार आदित्या
अपरोद्धारस्तानेव भागधेयेनोपधावति त एनं दाधत्यादित्येभ्यो भुवद्वद्भ्यश्चरुं निर्वपेद्भूपन्नदितिर्वै
प्रजाकामौदनमपचत् तस्योच्छिष्टमाश्नात् सा गर्भमधत्त तत आदित्या अजायन्त सामन्यतैतो मे
श्रेयांसोऽजनिष्यन्त यत् पुरस्तादाशिष्यमिति सापरमपचत् तस्योभयत आश्नात् पुरस्ताच्चोपरिष्टाच्च
सा गर्भमधत्त सोऽन्तरेव गर्भोऽवदत् त आदित्या अमन्यन्तायं च वै जनिष्यते स एवेदं भवि-
ष्यतीति तं निरघ्नन् स निरस्तोऽशयत् सा तृतीयमपचदादित्येभ्य एवास्त्वेव स यस्तस्माद्योनेरे-
भूयस्माद्यूयमसृज्यध्वमिति तं समस्कुर्वंस्तस्य यन्मृतमासीत् तदपाकृन्तन् स हस्त्यभवद्यज्जीवं स
विवस्वानादित्यस्स न तथासीद्यथा तेन भवितव्यं स एतमादित्येभ्यो भुवद्वद्भ्यश्चरुं निरवपत् स्वो
वै स्वाय नाथिताय सुहृदयतमस्स्वानेवोपाधावत् ततो वै सोऽभवदादित्या इमाः प्रजास्स्वस्स्वाय
नाथिताय सुहृदयतमस्स्वानेव भागधेयेनोपधावति भूत्यै भवत्येवादित्या भागं वः करिष्यामीति
निर्वपन् ब्रूयादिममुमामुष्यायणममुष्याः पुत्रममुष्यां विश्यवगमयतेति भागधेयमेवेभ्यः कुर्वन् प्राह
तमादित्येभ्यश्चरुं निर्वपत्यादित्या वै देवविशो देवविशो मनुष्यविशाया ईशे देवविशैवैनं मनुष्यविशा-
मवगमयति सप्ताश्वत्था मयूखा भवन्ति तानिध्मेऽपि प्रोक्षति त आ संस्थातोर्वेद्यां शेरते तान् संस्थिते
मध्यमेषामुपहन्तीदमहमादित्यान् बध्नाम्यमुष्यामुष्यायणस्यावगमायेति यद्यां सप्तमादह्नो नावग-
च्छेदिध्मं तान् कृत्वापरया यजेतैवं द्वितीययैवं तृतीयया त्रिर्वा आदित्यास्सप्त सप्त यावन्त एवादि-
त्यास्तान् बध्नाति त एनं बद्धा मोक्षमाणा अवगमयन्ति ॥ विशो वै वीर्यमपाक्रामत् तदश्वत्थं
प्राविशत् तस्मादेषोऽभूतस्सर्वाहा पर्णमेजयंस्तिष्ठति यदाश्वत्था भवन्ति विश एवास्मिन् वीर्यं बध्नाति

[६] मै. २,२,१ (१-१०) । तै. सं. २,३,१ ।

सस्यावारिदं मन इति निरुद्धस्य पदमादधीतामनस एवैनान् करोत्युप प्रेत मरुतस्स्वतवस एना
विश्पतिनाभ्यमुं राजानमिति विशोऽभिवादमभिच्छंसयन् परीयादमनस एवैनान् करोति यः परं-
स्माद्राष्ट्रभ्यवादी स्यात् तस्य गृहाद्व्रीहीनाहरेयुस्तान्छुक्लांश्च कृष्णांश्च विचिनुयुर्ये शुक्लास्तमादित्येभ्यश्चरुं
निर्वपेद्ये कृष्णा नि तान् दध्युरादित्या वै देवविशो देवविशा मनुष्यविशाया ईशे देवविशैवैनं मनुष्य-
विशामवगमयत्येतद्विशमवगमन्निन्वाहुरथ क्व क्षत्रमिति यदा वै क्षत्रमवगच्छत्यथावगच्छति यदा-
वगच्छेद्ये कृष्णास्तं वारुणं चरुं निर्वपेत् क्षत्रं वै वरुणो वरुण एवैनं क्षत्रमवगमयत्यथ विशा अव-
गच्छति देवविशां च मनुष्यविशां च यच्छुक्लानामादित्येभ्यो निर्वपति तस्माच्छुक्ल इव वैश्यो जायते
यत् कृष्णानां वारुणं तस्माद्धूम्र इव राजन्यः ॥६॥ ११-१२

अग्नेरायुरसि तस्य ते मनुष्या आयुष्कृतस्तेनास्मा अमुष्मा आयुर्धेहीन्द्रस्य प्राणस्स ते प्राणं ददातु
यस्य प्राणस्तस्मै ते स्वाहा पितॄणां प्राणस्ते ते प्राणं ददतु येषां प्राणस्तेभ्यो वस्स्वाहा मरुतां
प्राणस्ते ते प्राणं ददतु येषां प्राणस्तेभ्यो वस्स्वाहा विश्वेषां देवानां प्राणस्ते ते प्राणं ददतु येषां
प्राणस्तेभ्यो वस्स्वाहा प्रजापतेः परमेष्ठिनः प्राणस्स ते प्राणं ददातु ययोः प्राणस्ताभ्यां वां स्वाहा
यदसर्पस्तत् सर्पिरभवो यदव्लस्तन्नवनीतमभवो यदघ्रियथास्तद् घृतमभवः ॥ १३

घृतस्य धारामृतस्य पन्थामिन्द्रेण दत्तां प्रयतां मरुद्भिः ।
तत्त्वा विष्णुरन्वपश्यत् तत्त्वेडा गव्यैरयत् ॥ १४

पावमानेन त्वा स्तोमेन गायत्र्या वर्तन्योपांशोर्वीर्येणोद्धराम्यसौ बृहता त्वा रथन्तरेण त्रिष्टुभा
वर्तन्या शुक्रस्य वीर्येणोत्सृजाम्यसावग्नेस्त्वा मात्रया जगत्या वर्तन्या देवस्त्वा सवितोन्नयतु जीवातवे
जीवनस्याया असौ देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेषामयमायुषायुष्मानस्त्वसौ ब्रह्मायुष्मत्
तद्ब्राह्मणैरायुष्मत् तस्यायमायुषायुष्मानस्त्वसा अग्निरायुष्मान् स वनस्पतिभिरायुष्मांस्तस्यायमायुषा-
युष्मानस्त्वसौ यज्ञ आयुष्मान् स दक्षिणाभिरायुष्मांस्तस्यायमायुषायुष्मानस्त्वसौ सोम आयुष्मान्
स ओषधीभिरायुष्मांस्तस्यायमायुषायुष्मानस्त्वसा ओषधय आयुष्मतीस्ता अद्भिरायुष्मतीस्ता-
सामयमायुषायुष्मानस्त्वसौ ॥
१५

इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि ।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ १६

अश्विनोः प्राणस्तौ ते प्राणं दत्तां तेन जीव मित्रावरुणयोः प्राणस्तौ ते प्राणं दत्तां तेन जीव
बृहस्पतेः प्राणस्स ते प्राणं ददातु तेन जीव ॥७॥
१७

[७] मै. २,३,४ (१२-१८) । तै. सं. २,३,१० । [इममग्न आयुषे० । अथर्व. २,२८,५ । जरदष्टिर्यथासत्० । ऋ० परि० २७,८; अथर्व. ८,५,२१]

आग्नावैष्णवमेकादशकपालं निर्वपेत् सारस्वतं चरुं बार्हस्पत्यं चरुं पूर्वेद्युरेतया यक्ष्यमाणोऽग्निर्वै
सर्वा देवता विष्णुर्यज्ञो वाक् सरस्वती ब्रह्म बृहस्पतिरेता एव देवताः पूर्वेद्युर्गृह्णाति प्राणा वै देवताः
प्राणानेव गृहीत्वोपवसत्याग्नेयमष्टाकपालं श्वो निर्वपेत् सौम्यं चरुमादित्यं चरुं वारुणं यवमयं चरु-
मग्नये वैश्वानराय द्वादशकपालमामयाव्यग्निं वै पुरुषस्य प्रमीतस्य मांसानि गच्छन्ति सोमं रसः
पृथिवीं शरीरमियमदितिरस्यां हि शय एता वै देवताः पुरुषस्येशते ताभ्य एवैनमधि समीरयति॥
सौम्यो वै जीवन्नाग्नेयः प्रमीतो नैष जीवो न मृतो य आमयावी तयोरेवैनं भागधेयेन निष्क्रीणाति
वरुणगृहीत एष य आमयावी यद्वारुणो वरुणादेवैनं मुञ्चति यवमयो भवति प्रादेशमात्रो भवति
संवत्सरो वा अग्निर्वैश्वानर आयुस्संवत्सरस्संवत्सर एवैनमायुषि प्रतिष्ठापयति सर्वमायुरेति पञ्चैतानि
हवींषि पाङ्क्तः पुरुषः पुरुषमेवाप्नोत्यग्नेरायुरसीति हिरण्यं घृतेऽवदधात्यग्निजा वै हिरण्यं मनुष्या
अग्नेरायुष्कृतस्तैरेवास्मा आयुर्दधातीन्द्रस्य प्राण इत्येतद्देवत्या वै प्राणास्तानेवास्मिन् दधात्येतद्देवत्या
दिशो यथादेवतमेवैनं दिग्भ्योऽधि समीरयति पञ्चैतानि जुहोति पाङ्क्तः पुरुषः पुरुषमेव स्पृणोति॥
सर्व ऋत्विजः पर्याहुस्सर्व एवास्मा ऋत्विजश्चिकित्सन्ति ब्रह्मणो हस्तमनु पर्याहुर्ब्रह्म वै ब्रह्मा
ब्रह्मण्येवास्मिन्नेकधायुर्दधाति यदसर्प इति घृतस्यैवैतज्जन्म बन्धुतां वीर्यं व्याचष्टे पावमानेन
त्वा स्तोमेनेत्येतावद्वावास्ति यावद्ब्रह्मास्स्तोमाश्छन्दांसि यावदेवास्ति तावतास्मै चिकित्सत्यु-
द्धराम्युत्सृजाम्युन्नयामीति यथा वध्यमुद्धरत्युत्सृजत्युन्नयत्येवमेवैनमेतदुद्धरत्युत्सृजत्युन्नयति देवा
आयुष्मन्त इति प्रयच्छत्येते वै देवा आयुष्मन्तस्तैरेवास्मा आयुः प्रयच्छति तत् पिबत्यायुरेव तत्
पिबति यदेवं तस्य तच्छिरिव धयेद्धिरण्याद् घृतं तेजो वै हिरण्यमायुर्घृतं तेजस एवाध्यायुरात्मन् धत्त
इममग्न आयुषे वर्चसे कृधीति हिरण्यमाबध्नात्यग्निर्वै सर्वा देवता आयुर्हिरण्यं सर्वाभिरेवास्मै देवता-
भिराबध्नाति तिग्ममोजो वरुण संशिशाधीति सममेवैनं श्यति मातेवास्मा अदिते शर्म यच्छेतीयमदिति-
रस्यामेवैनं प्रतिष्ठापयति विश्वे देवा जरदष्टिर्यथासदिति जरामृत्युमेवैनं करोत्यश्विनोः प्राणौ मित्रा-
वरुणयोर्बृहस्पतेरित्येतद्देवत्या वै प्राणास्तानेवास्मिन् दधाति तानस्मिन्नधि विधातयति तानस्माद-
नपगान् करोति ॥८॥
१८-२०

पुरोवातो जिन्व रावत् स्वाहा वातावान् वर्षन्नुग्र रावत् स्वाहा स्तनयन् वर्षन् भीम रावत् स्वाहा-
वस्फूर्जन् विद्युद्वर्षंस्त्वेष रावत् स्वाहातिरात्रं ववृष्वान् पूर्त रावत् स्वाहा बहु हायमवृषदिति श्रुत
रावत् स्वाहा तपति वर्षन् विराड् रावत् स्वाहा नश्नन्यवस्फूर्जन् विद्युद्वर्षन् भूत रावत् स्वाहा मान्दा

[८] मै. २,३,४-५ (१७,१९-२१) । तै. सं. २,३,११ । [इममग्न आयुषे० । अथर्व. २,२८,५ । जरदष्टिर्यथा-
सत । ऋ. परि० २७,८; अथर्व. ८,५,२१]
[९] मै. १,३,२६; २,४,७; ४,१२,५ (७१,२३-२४,१४०) । वा. १८,५५ । काण्व. २०,२५ ।

वशाश्शुन्ध्युवोऽजिरा उन्दतीस्सुफेना ज्योतिष्मतीस्तमस्वतीर्मित्रभृतः क्षत्रभृतस्सुशग्रा इह मावत ॥
वृष्णस्संदानमसि वृष्टचै त्वोपनह्यामि देवा वसव्या अग्ने सोम सूर्योद्रो दत्तोदधिं भिन्त दिवः
पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो मा वृष्ट्यावत देवाश्शर्मण्या मित्र वरुणार्यमन्नुद्रो दत्तोदधिं
भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो मा वृष्ट्यावत देवास्सपीतयोऽपां नपादाशुहेमन्नुद्रो
दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो मा वृष्ट्यावत ॥ २१-२२

दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन । यत् पृथिवीं व्युन्दन्ति ॥ २३
उदीरयत मरुतस्समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उपदस्यन्ति धेनवश्शुभं यातामनु रथा अवृत्सत ॥ २४
आ यं नरस्सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
प्र पर्जन्यस्सृजतां रोदसी अनु धन्वना यन्तु वृष्टयः ॥ २५

सृजा वृष्टिं दिव आद्भिस्समुद्रं पृण ये देवा दिविभागा येऽन्तरिक्षभागा ये पृथिविभागास्त
इमं यज्ञमवन्तु त इदं क्षेत्रमाविशन्तु त इदं क्षेत्रमनुविविशन्त्वब्जा असि प्रथमजा बलमसि समु-
द्रियं दिवो धारां भिन्द्धि मारुतमसि मरुतामोजोऽपां धारां भिन्द्धि ॥ २६

उन्नम्भय पृथिवीं भिन्द्धीदं दिव्यं नभः ।
उद्नो दिव्यस्य नो देहीशानो विष्या दृतिम् ॥ २७
कृष्णं नियानं हरयस्सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन् सदनानि रात्वी घृतेन द्यावापृथिवी व्युन्दन् ॥९॥ २८

कृष्णाजिनं भवति मधु करीराणि श्यावस्याश्वस्य दाम तानि पूर्वस्याग्नेरन्ते निधाय कृष्णं वासो यजमानं परिधापयित्वान्वारम्भयित्वैतानि जुहोति वातनामानि वा एतान्येष वै वर्षस्येशे यदा ह्येव आप्याययति यदा समीरयति यदा प्रदापयत्यथ वर्षति तमेव भागधेयेनोपधावति सोऽस्मै प्रीतो वृष्टिं निनयत्यष्टा एतानि जुहोति चतस्रो दिशश्चतस्र उपदिशा यथादिशमेव दिग्भ्यो वृष्टिं संप्रच्यावयति कृष्णाजिने संयौति हविरेव करोति मधुना संयौत्यपां वा एष ओषधीनां रसो यन्मध्वद्भ्य एवौष-धिभ्यो वर्षति यर्हि वर्षत्यद्भ्य एवौषधिभ्यो वृष्टिं निनयति ॥ मान्दा वशा इत्येतानि वा अपां नामधेयानि यथाद आहासा एहासा एहीत्येवमेवैना एतन्नामग्राहं दिवश्च्यावयति न वा अन्यये-

[दिवा चित्तमः०...व्युन्दन्ति । ऋ. १,३८,९, तै. सं. २,४,८,१ । उदीरयत (था) मरुत० । ऋ. ५, ५५,५; तै. सं. २,४,८,२ । आ यं नरस्सुदानवो० । ऋ. ५,५३,६; तै. सं. २,४,८,१ । कृष्णं नियानं हरय० । ऋ. १,१६४,४७; अथर्व. ६,२२,१, ९,१०,२२; १३,३,९; तै. सं. ३,१,११,४; नि. ७,२४]
[१०] मै. २,४,८ (३२) । तै. सं. २,४,९—१० ।
काठ० १४

त्याहुस्सौम्या आहुत्या दिवो वृष्टिं च्यावयितुमर्हतीति यतीन् वै सालावृकेया आदंस्तेषां शीर्षाणि परापतंस्ते खर्जूरा अभवन् यस्सोमपीथस्स ऊर्ध्वोऽपतत् तानि करीराणि यत् करीराणि भवन्ति सौम्यैवाहुत्या दिवो वृष्टिं निनयति तस्मात् करीराणि न खिये दद्यान्न शुद्रायासोमपीथ इव ह्युप वृष्णस्संदानमसि वृष्टचै त्वोपनह्यामीति वृषा ह्यश्वो वृषा पर्जन्यस्समृद्ध्यै श्यावस्याश्वस्य दाम भवति श्याव इव ह्युप वर्षिष्यन् भवति॥ देवा वसव्या देवाश्शर्मण्या देवास्सपीतय इत्येता वै देवता वर्षस्येशते ताभिरेवास्मा अन्वहं वृष्टिमिच्छति कृष्णाजिनं उपनह्यत्यृक्सामयोर्वा एतद्रूपं यत् कृष्णाजिनमृक्सामा-भ्यामेवास्मै वृष्टिमिच्छति यदि वर्षेत् तदेवेष्टिं निर्वपेद्यदि न वर्षेत् तथैव वसेयुरहोरात्रे वै मित्रावरुणा अहोरात्रे पर्जन्योऽनुवर्षति नक्तं वा हि दिवा वा वर्षत्येतौ वर्षस्येशाते ता एव भागधेयेनोपधावति ता अस्मै प्रीतौ वृष्टिं निनयतोऽग्नये धामच्छदे श्रोऽष्टाकपालं निर्वपेन्मारुतं चरुं सौर्यमेककपालमग्निर्वा इतो वृष्टिमुदीरयति धामच्छदिव भूत्वा वर्षति मरुतस्सृष्टां वृष्टिं नयन्ति ॥ यदासा आदित्योऽर्वाङ् रश्मिभिः पर्यावर्ततेऽथ वर्षत्येता वै देवता वर्षस्येशते ता एव भागधेयेनोपधावति ता अस्मै प्रीता वृष्टिं निनयन्त्यप्यवर्षिष्यन् वर्षत्येव पडेतानि हवींषि पड्वा ऋतव ऋतुभ्य एव वृष्टिं संप्रच्यावयति यत् सप्तमं संवत्सरादेव तेन वृष्टिं च्यावयत्यथैता मारुतीश्चतस्रः पित्र्यास्तासां तिसृभिः प्रचरन्ति न्येकां दधत्यृचोऽनुवाक्या यजूंषि याज्या मरुतो वै वर्षस्येशते तेभ्य एव भूयो भागधेयं करोति या चतुर्थी तां संस्थितेऽप्सु जुहोति सृजा वृष्टिं दिव आद्भिस्समुद्रं पृणेत्याभिरेवामूरच्छैत्यथो इमा-श्चैवामूश्च संसृजति ये देवा दिविभागा इति कृष्णाजिनमवधूनोति दिशश्चैव देवताश्च तर्पयत्यथो इमं
एवास्य लोका अभीष्टाः प्रीता भवन्ति सैषा कारीरी नामेष्टिस्संवत्सरं करीराणां नाश्नीयाद्य एतया
यजेतायो योऽनुब्रुवीत तदस्या व्रतम् ॥१०॥ २९-३२

या वां मित्रावरुणौ सहस्यौजस्या रक्षस्या यातव्या तनूस्तया वां विधेम तयेममभुमामुष्यायण-
ममुष्याः पुत्रमंहसो मुञ्चतं यस्ते राजन् वरुण देवेषु पाशस्तं त एतदवयजे तस्मै स्वाहा यस्ते राजन्
वरुणाग्ने द्विपात्सु चतुष्पात्सु पशुषु वनस्पतिष्वोषधीष्वप्सु पृथिव्यां पाशस्तं त एतदवयजे तस्मै
स्वाहा या वां मित्रावरुणौ सहस्यौजस्या रक्षस्या यातव्या तनूस्तया वामविधाम तयेममभुमामुष्या-
यणममुष्याः पुत्रमंहसोऽमौक्तम् ॥११॥ ३३

मक्षू देववतो रथश्शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ ३४

[११] मै. २,३,१ (३)
[१२] मै. १,३,२६; ४,१०,२,४; ११,२; १२,१; १४,१४ (७३,४९,१०४,४२—४३,४९—५६,७,१००-१०१) वा. ८,४; ३३,६८; ३४,५४, २१,१ । काण्व. ८,३; ३२,६८; ३३,४२; २३, १ । [मक्षू देववतो० । ऋ. ८,३१,१५; तै. सं. १,८,२२,३]

नकिष्टं कर्मणा नशन्न प्रयोषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ ३५
न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ ३६
असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ ३७
अग्निं वः पूर्व्यं गिरा देवमीडे वसूनाम् ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥ ३८
उपक्षरन्ति सिन्धवो मयोभुव ईजानं च यक्ष्यमाणं च धेनवः ।
पृणन्तं च पपुरिं च श्रवस्यवो घृतस्य धारा उपयन्ति विश्वतः ॥ ३९
सोमारुद्रा विवृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥ ४०
सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अवस्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो असत् ॥ ४१
सोमारुद्रा धारयेथामसुर्यं प्र वामिष्टयोऽरमश्नुवन्तु ।
दमे दमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥ ४२
सोमापूषणेमौ देवौ महि वो महतामवः ।
वरुण मित्रार्यमन्नवाँस्याचृणीमहे ॥ ४३
यज्ञो देवानाम् ॥ ४४
धारयन्त आदित्यासो जगत्स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यमृतावानश्चयमाना ऋणानि ॥ ४५

[नकिष्टं कर्मणा० । ऋ. ८,३१,१७; तै. सं. १,८,२२,४ । न यजमान रिष्यसि० । ऋ. ८,३१,१६; तै. सं. १,८,२२,४ । असदत्र सुवीर्यमुत० । ऋ. ८,३१,१८ । अग्निं वः पूर्व्यं गिरा० । ऋ. ८,३१,१४; तै. सं. १,८,२२,४ । सोमारुद्रा विवृहतं० । ऋ. १,८,२२,३ । उपक्षरन्ति सिन्धवो० । ऋ. १,१२५,४; तै. सं. १,८,२२,४ । सोमारुद्रा विवृहतं० । ऋ. ६,७४,२; अथर्व. ७,४२,१; तै. सं. १,८,२२,१ । सोमारुद्रा युवमेतानि० । ऋ. ६,७४,३; अथर्व. ७,४२,२; तै. सं. १,८,२२,५ । सोमारुद्रा धारयेथा० । ऋ. ६,७४,१ । सोमापूषणेमौ० । ऋ. २,४०,१-३; तै. सं. १,८,२२,५ । यज्ञो देवानाम्० । ऋ. १,१०७,१; तै. सं. १,४,२२,१; २,१,११,४ । धारयन्त आदित्यासो० । ऋ. २,२७,४; तै. सं. २,१,११,४]

तिस्रो भूमीर्धारयन् त्रींरुत द्यून् त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥ ४६
इमा गिर आदित्येभ्यो घृतस्नूस्सनाद्राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो मे तुविजातो वरुणो दक्षो अंशः ॥ ४७
आदित्यासो अदितयस्स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥ ४८
इमं मे वरुणास्तभ्नाद् द्याममुरः ॥१२॥ ४९
अग्नाविष्णू अग्नाविष्णू पावका न आ नो दिवो बृहस्पते जुषस्व नः ॥ ५०
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत् तमांसि ॥ ५१
अग्न आयूंषि पवसे ॥ ५२
आयुर्दा देव जरसं वृणानो घृतं वसानो घृतपृष्ठो अग्ने ।
घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमम् ॥ ५३
गयस्फानः ॥ ५४

[तिस्रो भूमीर्धारय० । ऋ. २,२७,८; तै. सं. २,१,११,५ । इमा गिर आदित्येभ्यो० । ऋ. २,२७,१; नि. १२,३६ । आदित्यासो अदितय० । ऋ. ७,५२,१ । इमं मे वरुण० । ऋ. १,२५,१९; सा. १५८५; तै. ब्रा. २,१,११,६ । अस्तभ्नाद् द्याममुरः० । ऋ. ८,४२,१; तै. सं. १,२,८,१]
[१३] मै. ४,११,२; १२,४—५ (५८—६०,६२—६३; ९६—१००; १४०—१४२,१४५) । वा. २०,८४; १९, ३८; ३५,१६; ४,३७; २२,१—२,५—६; १८,७२—७३; २६,८ । काण्व. २२,६९; ८,१९; २२,४०; २१, ३७; ३५,४८; ४,४९; २३,१—२,५—६; २०,४१—४२; २८,८ । [अग्नाविष्णू सजोषसा० । तै. सं. ४, ७,१,५,७,३,२; तै. ब्रा. ३,११,३; श्री. सू. २,८ । अग्नाविष्णू महि० । अथर्व. ७,२९,१—२; तै. सं. १,८, २२,१; २,५,१२,१; श्री. सू. २,८ । पावका नः० । ऋ. १,३,१०; सा. १८९; तै. ब्रा. २,४,३,१; नि. ११,२६ । आ नो दिवो० । ऋ. ५,४३,११; तै. सं. १,८,२२,१; २,५,१२,१; ३,१,११,१ । बृहस्पते जुषस्व नः० । ऋ. ३,६२,४; तै. सं. १,८,२२,२ । बृहस्पतिः प्रथमं० । ऋ. ४,५०,४; अथर्व. २०,८८,४; तै. ब्रा. २,८,२,७ । अग्न आयूंषि० । ऋ. ९,६६,१९; सा. ६२७,१४६४ १५१८; तै. सं. १,३,१४,७ ४,२९,१; ५,५,१; ६,६,२; तै. ब्रा. २,६,३,४; तै. आ. २,५,२ । गयस्फानः० । ऋ. १,९१,१२; तै. सं. ४,१,१३,५]

यां ते धामानि हविषा यजन्ति तां ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणस्सुवीरोऽवीरहा प्रचरा सोम दुर्यान् ॥ ५५
सुत्रामाणं महीमू ष्विमं मे वरुण तत्त्वा यामि वैश्वानरो न ऊतये पृष्टो दिवि ॥ ५६
रथंवता मरुत्वश्येनमार्थिनं मनोजवसं वृषणं सुवृक्तिम् ।
येन शर्धोऽग्रमृद्वद्ग्रमेति तमश्विना परिधयं स्वस्ति ॥ ५७
अभिक्रन्द स्तनय गर्भमाधा उदन्वता परिदीया रथेन ।
दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतो निपादाः ॥ ५८
आ ते सुपर्णा अमिनन्त एवैः कृष्णो नोनाव वृषभो यदीदम् ।
शिवाभिर्न स्मयमानाभिरागात् पतन्ति मिहस्स्तनयन्त्यभ्रा ॥ ५९
कृष्णं नियानं हरयस्सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन् सदनादृतस्यादिद् घृतेन पृथिवीं व्युद्यते ॥ ६०
वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥ ६१
दिवो नो वृष्टिं मरुतो ररीध्वं प्रपिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥ ६२
परि यो रश्मिना दिवोऽन्तान्ममे पृथिव्याः । उभे आपप्रौ रोदसी महित्वा ॥ ६३
वहिष्ठेभिर्विहरन् यासि तन्तुमवव्ययन्नसितं देव वस्म ।
दविध्वतो रश्मयस्सूर्यस्य चर्मेवावाधुस्तमो अप्स्वन्तः ॥१३॥ ६४

[८४४]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां मारुतं नाम एकादशं स्थानकं संपूर्णम् ॥११॥

[या ते धामानि हविषा० । ऋ. १,९१,१९; तै. सं. ३,२,१०,२; मै. ब्रा. २,८,३,१ । सुत्रामाणं० । ऋ. १०,६३,१०; अथर्व. ७,६,३; मै. सं. १,५,११,५ । महीमू षु० । तै. सं. १,५,११,५; कपि. ४६,७ । इमं मे वरुण० । ऋ. १,२५,१९; वा. १२८०; तै. सं. २,१,११,६ । तत्त्वा यामि० । ऋ. १,२४,११; तै. सं. २,१,११,६ । वैश्वानरो न ऊतये० । तै. सं. १,५,११,३; औ. सू. ३,८ । पृष्टो दिवि पृष्टो० । ऋ. १,९८,२; तै. सं. १,५,११,१; तै. ब्रा. ३,११,६,४ । अभिक्रन्द स्तनय० । ऋ. ५,८३,७; अथर्व. ४,१५,६; मै. सं. ३,१,११,६ । आ ते सुपर्णा० । ऋ. १,७९,२; तै. सं. ३,१,११,५ । कृष्णं नियानं हरय० । ऋ. १,१६४,४७; अथर्व. ६,२२,१; ९,१०,२२; १३,३,९; तै. सं. ३,१,११,४; नि. ७,२४ । वाश्रेव विद्युन्मिमाति० । ऋ. १,३८,८; तै. सं. ३,१,११,५ । दिवो नो वृष्टिं० । ऋ. ५,८३,६; तै. सं. ३,१,११,७ । परि यो रश्मिना दिवो० ; ऋ. ८,२५,१८ । वहिष्ठेभिर्विहरन्० । ऋ. ६,६३,४; तै. ब्रा. २,४,५,४]

अथ द्वादशं स्थानकम् ।

पयस्स्थानकम् ।

पयस्यया यजेतामयावी मैत्रावरुणी ब्राह्मणस्य स्यादैन्द्रावरुणी राजन्यस्याग्निवारुणी वैश्यस्यर्द्ध्या एवाग्नेयो मैत्रो ब्राह्मणो देवतया वरुणगृहीत एष य आमयावी स्वामेव देवतां भागधेयेनोपधावति वरुणादेनं वारुणेन मुञ्चत्यैन्द्रो राजन्यो देवतया वरुणगृहीत एष य आमयावी स्वामेव देवतां भागधेयेनोपधावति वरुणादेनं वारुणेन मुञ्चत्यग्निस्सर्वा देवतास्तत्र वैश्यस्यापि वरुणगृहीत एष य आमयावी स्वामेव देवतां भागधेयेनोपधावति वरुणादेनं वारुणेन मुञ्चति पयस्या भवति पयो वै पयस्या पयः पुरुषः पय एतस्यामयति यस्यामयति पयसैवास्य पयस्स्पृणोति ॥ पुरोडाशो भवत्यस्थन्वन्तमेवैनं कृत्वा प्रतिष्ठापयति पशुर्वै पुरुषः पशुः पुरोडाशः पशुनैव पशुं स्पृणोति व्युह्यावद्यति यथानुभिद्य शल्यं निर्हरत्येवमेवास्यैतन्मध्यतो यक्ष्मं निर्हरति समुह्याग्नयेऽवद्यति यथा शल्यं निर्हृत्य समायत्य संनह्यत्येवमेव तदर्थैत एककपाला न वै पुरुषं कपालैराप्तुमर्हत्येकधैवैनमाप्नोत्यष्टौ भवन्त्यष्टौ वै पुरुषस्य शफाश्शफश एवैनमाप्नोतिताननुपरिचारं जुहोत्यत्रात्र वै वरुणपाशो यत्र यत्रैव वरुणपाशस्तत एनं वरुणान्मुञ्चति ॥ व्यृद्धा वा एषाहुतिर्यामनग्नौ जुहोत्यग्नौ सर्वे होतव्या अग्निस्सर्वा देवतास्तेनैव तान् कामान् स्पृणोति न व्यृद्धामाहुतिं जुहोति पयस्यया यजेत सजातकाम ऋद्ध्या एवाग्नेयो मैत्रो ब्राह्मणो देवतया वरुणगृहीत एष योऽलँ सजातेभ्यस्सन्नसजातो भवति स्वामेव देवतां भागधेयेनोपधावति वरुणादेनं वारुणेन मुञ्चति पयस्या भवति पयो वै पयस्या पयस्सजाताः पयसैव पयोऽवरुन्द्धे व्यूहति दिशस्तर्पयति समूहति सजातानेवास्मै समूहति समानमेककपालानां ब्राह्मणं पयस्यया यजेत पशुकाम ऋद्ध्या एवाग्नेयो मैत्रो ब्राह्मणो देवतया वरुणगृहीत एष योऽलं पशुभ्यस्सन्नपशुर्भवति स्वामेव देवतां भागधेयेनोपधावति वरुणादेनं वारुणेन मुञ्चति पयस्या भवति पयो वै पयस्या पयः पशवः पयसैव पयोऽवरुन्द्धे व्यूहति दिशस्तर्पयति समूहति पशूनेवास्मै समूहति समानमेककपालानां ब्राह्मणं पयस्यया यजेत बुभूषन्नृद्ध्या एवाग्नेयो मैत्रो ब्राह्मणो देवतया वरुणगृहीत एष योऽलं भूत्यै सन्न भवति स्वामेव देवतां भागधेयेनोपधावति वरुणादेनं वारुणेन मुञ्चति पयस्या भवति पयो वै पयस्या पयः पुरुषः पयसैव पयोऽवरुन्द्धे व्यूहति दिशस्तर्पयति समूहति भूतिमेवास्मै समूहति समानमेककपालानां ब्राह्मणम् ॥१॥ १-३

ध्रुवोऽसि ध्रुवोऽहँ सजातेषु भूयासं ध्रुवा मयि सजाता उग्रश्चेत्ता वसुविदभिभूरस्यभ्यहँ सजा-

[१] मै. २,३,१ (१-३) । तै. सं. २,३,१३ ।
[२] मै. २,३,२ (४—८) । तै. सं. २,३,९ ।

तान् भूयासं धीरश्चेत्ता वसुवित् परिभूरसि पर्यहँ सजातान् भूयासं धीरश्चेत्ता वसुवित् सुरिरसि सुरिरहँ सजातेष्वधिभूयासमुग्रश्चेत्ता वसुविदामनस्य देवा ये सजातास्समनसो यानहं कामये हृदा ते मां कामयन्तां हृदा तान्म आमनसस्कृधि स्वाहामनस्य देवा याः स्त्रियस्समनसो या अहं कामये हृदा ता मां कामयन्तां हृदा ता म आमनसस्कृधि स्वाहामनस्य देवा ये पुत्रासो ये पशवस्समनसो यानहं कामये हृदा ते मां कामयन्तां हृदा तान्म आमनसस्कृधि स्वाहा ॥ देवाश्च वा असुराश्च संयत्ता आसँस्तेऽसुरा मनस्वितरा आसन्नमनस्तरा इव देवास्ते देवा एतत् संग्रहणमपश्यँस्तेनासुराणां मनाँसि समगृह्णँस्ततो वै ते समनसः पराभवन् मन एव भ्रातृव्यस्य संगृह्णाति सोऽस्यामनाः पराभवत्येतया यजेत पशुकाम एतया वै देवा असुराणां पशून् समगृह्णँस्ततो वै ते पशवः पराभवन् पशूनेव भ्रातृव्यस्य संगृह्णाति सोऽस्यापशुः पराभवत्येतया यजेत सजातकामो मनोग्रहणं वा एतन्मनस्विन इव सजाता यावन्त एव सजातास्तेषां मनाँसि गृह्णाति तेऽस्मान्मनोगृहीता नापयन्ति ॥ वैश्वदेवः कार्यो वैश्वदेवा हि सजाताः पृषत्याः पृषद्वत्साया दुग्धे भवति वैश्वदेवी हि पृषती सर्वेभ्यस्सजातेभ्य आज्यं समाहरन्ति वैश्वदेवत्वाय वैश्वदेवा हि सजाता ध्रुवोऽसीति परिधीन् परिदधाति सजातानेवास्मा उपदधात्यामनस्य देवा इत्यन्वारम्भयित्वा जुहोति मनोग्रहणं वा एतदेवमिव सजातास्स्त्रिय इव पुमाँस इव कुमारा इव यावन्त एव सजातास्तेषां मनाँसि गृह्णाति तेऽस्मान् मनोगृहीता नापयन्ति ॥ वि वा एतद्यज्ञं छिनत्ति यद्यज्ञे प्रतत एता अन्तराहुतीर्जुहोति सँस्थिते होतव्या यद् सँस्थिते जुहुयाद्बहिरात्मँ सजातान् कुर्वीतान्तरा प्रयाजानुयाजाञ्जुहुयात् प्राणा वै प्रयाजा अपाना अनुयाजा आत्मा हविरात्मन्नेव मध्यतस्सजातान् धत्ते दारुमयेण जुहुयाद्यदि कामयेत क्षिप्रं मा सजाता एयुः क्षिप्रं पुनः परेयुरित्येवमिव हि वनस्पतयोऽध्रुवा इव चराचरा इव मृन्मयेन जुहुयाद्यदि कामयेत चिरं मा सजाता एयुश्चिरं पुनः परेयुरित्येवमिव हीयं ध्रुवेव प्रतिष्ठितेवाचराचरेव ॥२॥ ४-७

इन्द्रो वै वृत्राय वज्रमुदयच्छत् सोऽब्रवीद्वीर्यं वा इदं मय्यस्ति तत् ते प्रदास्यामि मा मे प्रहारिति तदस्मै प्रायच्छत् सोऽवेदस्ति वावास्मिन् वीर्यमिति तस्मै द्वितीयं तस्मै तृतीयमुदयच्छत् सोऽब्रवीद्वीर्यं वा इदं मय्यस्ति तत् ते प्रदास्यामि मा मे प्रहारिति तदस्मै प्रायच्छद्यज्ञं वावास्मै तत् प्रायच्छद्यज्ञं प्रायच्छदिन्द्राय प्रायच्छत् तस्मादैन्द्रावैष्णवँ हविर्भवति वीर्यं वावास्मै तत् प्रायच्छत् तन्निर्वीर्यं भूतमस्तृणुत तं विष्णुर्वीर्यमन्वतिष्ठत सोऽब्रवीत् सकृन्माधा विष्णो द्विर्माधा विष्णो त्रिर्माधा विष्ण इति तत् त्रैधातव्यायास्त्रैधातव्यात्वमिन्द्रो वै वृत्रँ हत्वा तँ शवे मानये श्रीढत् सोमो वै वृत्र उदरं श्वो मानवस्तस्मादुदरे सोमः पीयते ॥ तस्मादाहुर्हतो वृत्रोऽस्तृतस्त्विति यज्ञो वा असुरेभ्योऽपाक्रामदु-

[३] मै. २,४,३ (३—२५) । कल्प. २,१८ ।

त्सङ्के पात्राण्योप्यैतद्रूपं कृत्वा यत् तार्प्याणि त्रिषीव्यन्ति स इन्द्रं प्रतिन्यागच्छेत् तेनेन्द्रोऽयजत ततो देवा अभवन् परासुरा अभवन् य एवं विद्वानेतेन यजेत भवत्यात्मना परास्य भ्रातृव्यो भवति यज्ञो न्यागच्छदिन्द्रं प्रतिन्यागच्छत् तस्मादैन्द्रावैष्णवँ हविर्भवत्यृचो वावास्मै तदग्रे प्रायच्छदथ सामान्यथ यजूँषि ब्रह्मणो वा एष योनिरतो वा इदँ सर्वमसृज्यतर्चस्सामानि स्तोमा यजूँषि ब्रह्मण एव योनिमालभते ॥ स इदँ सर्वमत्येत्येतेन वै सृञ्जया अयजन्त त इदँ सर्वमत्यायँस्तदेनान्मुहुः प्रयुज्यमानमवाभृनुत तस्मान्न मुहुः प्रयोज्यं त्रि वा एष च्छिनत्ति य एतेन यजतेऽपि पुत्रं याजयेदनुसंतत्या एतस्य वै वीर्येण वृत्रोऽहरहरिषुमात्रमूर्ध्वोऽवर्धतेषुमात्रं तिर्यङ्ङथो यत् प्राणीत् तत् पुनर्न समैद्वर्धते प्रजया प्र पशुभिर्भवति य एवं विद्वानेतेन यजते सर्वेभ्यः कामेभ्यो यजेत सर्वो वा एष यज्ञस्सर्वेभ्यो हि कामेभ्यस्सौम्योऽध्वरः प्रयुज्यतेऽभिचरन् यजेत न दक्षिणां दद्यान्मेनिमेवैनं कृत्वाभिप्रयुङ्क्ते मेनिरदक्षिणः ॥३॥ ८-१०

त्रीन् पुरोडाशान्निर्वपेद्बुभूषँस्त्रय इमे लोका इमानेव लोकानाप्त्वौजो वीर्यमवरुन्द्ध उत्तर उत्तरो ज्यायान् भवत्युत्तर उत्तरो ह्येषां लोकानां ज्यायानधरोत्तरं भवन्त्येवमिव हीमे लोका द्वादश कपालानि भवन्ति त्रयो हि ते चतुष्कपालास्समृद्ध्यै सर्वेषामभिघातमवद्यत्यच्छम्बट्कारं यस्य नावद्यति च्छम्बट्करोति च्छम्बण्नास्य चरति व्रीहिमयः प्रथमो भवत्यथ यवमयोऽथ व्रीहिमयो रोहिता इव वै व्रीहयो रोहित इवायं लोको रोहित इवासौ शुक्ला इव यवाश्शुक्लमिवान्तरिक्षमन्तरिक्षेणेमे लोकास्संतता एषां लोकानामनुसंतत्यै नैवारमुत्तमं कुर्यादजामित्वाय ॥ तिस्रो धेनवो दक्षिणा त्रीणि तार्प्याणि त्रीणि हिरण्यानि यजुषां वा एतद्रूपं यत् तार्प्याणि त्रिषीव्यन्ति साम्नाँ हिरण्यानि च्छन्दसां धेनव एतानि वै यज्ञस्य रूपाणि रूपैरेव यज्ञमवरुन्द्धे सर्वदेवत्यं वासो यद्वासाँसि ददाति सर्वा एव देवता अवरुन्द्धे तेजो ब्रह्मवर्चसँ हिरण्यं यद्धिरण्यानि ददाति तेज एव ब्रह्मवर्चसमवरुन्द्धे ॥ त्रिस्समृद्धा धेनुरात्मा वत्सः पयो यद्धेनुर्ददाति त्रिस्समृद्धमेवैनं करोति सर्वाणि च्छन्दाँस्यनुब्रूयात् सर्वो वा एष यज्ञस्सर्वाणि हि च्छन्दाँसि सौम्येऽध्वरेऽनूच्यन्ते यज्ञो यदसृज्यत तस्योल्बमन्ववेष्टत तत् तार्प्यमभवद्यज्ञस्त्रैधातव्या यत् तार्प्यं यजमानः परिधत्ते स्वेनैव योनिनात्मानमोर्णुत उष्णिहककुभौ सामिधेनीष्वप्यनुब्रूयादुष्णिहा वै ककुभो वीर्यं ककुबुष्णिहायास्सवीर्ये एवैने अवरुन्द्धे न जगत्या परिदध्यादन्तो वा एषा छन्दसामन्तं गच्छेद्यज्ञं विच्छिन्द्यादग्ने त्री ते वाजिना त्री षधस्थेति त्रिष्टुभा परिदध्यादोजो वै वीर्यं त्रिष्टुब्नान्तं गच्छत्योजस्येनं वीर्ये प्रतिष्ठापयति॥४॥ ११-१३

[४] मै. २,४,४—५ (१८—२१) । तै. सं. २,४,१२,६; २,३,११; ३,२,११ ।
[अग्ने त्री ते वाजिना० । ऋ. ३,२०,२]

देवा वा असुराणां वेशन्वमुपायँस्तदिन्द्रोऽपि नोपैत् तेषां वीर्याण्यपाक्रामन्त्रग्ने रथन्तरमिन्द्राद्बृहद्वि-
श्वेभ्यो देवेभ्यो वैरूपं सवितुर्वैराजं मरुतां शक्वरी त्वष्टू रेवती तानीन्द्रोऽनरुरुत् समानोऽन्वचरत् स
एतमैन्द्रमपश्यद् द्वादशकपालं तेन वै स तानीन्द्रियाणि वीर्याण्यवारुन्द्ध ततो वै सोऽभवत् तन
एनं देवा अनुसमभवन्नेतेन यजेत बुभूषन्नैन्द्रेण द्वादशकपालेनैतान्येवेन्द्रियाणि वीर्याण्यवरुन्द्धे
भवत्येवान्वेनँ स्वास्संभवन्ति द्वादशकपालो भवति वैश्वदेवत्वायोत्तानेषु कपालेष्वधिश्रयति
चरुमेव करोति शान्त्या अनिर्दाहाय सर्वाणि वा एतानीन्द्रियाणि वीर्याणि यत् पृष्ठानि
तान्येनमीश्वराण्यनायतनानि निर्मृजो व्यतिषजेद् याज्यानुवाक्या इन्द्राय राथन्तरायानुब्रूहीति
रथन्तरस्यर्चमनूच्य बृहत ऋचा यजेदिन्द्राय बार्हतायानुब्रूहीति बृहत ऋचमनूच्य रथन्तरस्यर्चा
यजेदिन्द्राय वैरूपायानुब्रूहीति वैरूपस्यर्चमनूच्य वैराजस्यर्चा यजेदिन्द्राय वैराजायानुब्रूहीति
वैराजस्यर्चमनूच्य वैरूपस्यर्चा यजेदिन्द्राय शाक्वरायानुब्रूहीति शक्वरीमनूच्य रेवत्या यजेदिन्द्राय
रैवतायानुब्रूहीति रेवतीमनूच्य शक्वर्या यजेदेतैरेवेन्द्रियैर्वीर्यैरात्मानमभ्यतिषजत्यनिर्मार्गाय न
बृहत्या वषट्कुर्याद् बृहत्या वा इदमन्वयातयामत्वं प्रजाः प्रजायन्ते प्रजननमपिहन्यात् पशवो वै
बृहती रुद्रोऽग्नी रुद्राय पशूनपिदध्यादपशुस्स्यादनुवाक्यायाश्चत्वार्यक्षराणि याज्यामभ्यत्यूहेत् तथा
ते पङ्क्तिश्चानुष्टुप् च संपद्येते अनुष्टुबनुवाक्या स्यात् पङ्क्तिर्याज्या प्रजाकामस्य वा पशुकामस्य
वा प्रजापतिर्वा इदमासीत् तस्य वाग् द्वितीयासीत् तां मिथुनँ समभवत् सा गर्भमधत्त सास्मादपा-
क्रामत् सेमाः प्रजा असृजत सा प्रजापतिमेव पुनः प्राविशद् यदनुष्टुबनुवाक्या भवति पङ्क्तिर्याज्या
वाग् वा अनुष्टुप्पाङ्क्तस्संवत्सरस्संवत्सरः प्रजापतिर्वाच्येव संवत्सरं वृषाणमविसृजति सोऽस्मै मिथुनं
करोति समन्तं पर्यूहं पुरोडाशस्यावद्येदेतैरेवेन्द्रियैर्वीर्यैस्समन्तमात्मानमभितः पर्यूहति स्तृत्या
एतया यजेत यमजामित्रॉसमभिशँसेयुर्देवता वा एतस्यान्नं नादन्ति यमजामित्राँसमभिशँसन्ति तस्य
देवैः परिवृज्यमानस्य मनुष्या अन्नं नादन्ति तस्मादपि यमनृतमभिशँसेयुस्तस्यान्नं नाद्यात् सर्वदेव-
त्यानि पृष्ठानि यत् सर्वपृष्ठया यजते देवता एवास्यान्नमादयति तस्य पूतस्य स्वदितस्य मनुष्या
अन्नमदन्ति सैषा सर्वपृष्ठा नामेष्टिः पृष्ठमेव समानानां भवति य एवं विद्वानेतया यजते ॥५॥ १४
अश्वो न प्रतिगृह्य उभयादन्वा एष एतस्येन्द्रियं वीर्यं निर्वभस्ति यः प्रतिगृह्णाति तस्मान्न प्रति-
गृह्यो वरुणो वा एतमग्रे प्रत्यगृह्णात् स स्वां देवतामार्छत् तं वरुणोऽगृह्णात् स एतेन वारुणेन हवि-
षायजत निर्वरुणत्वाय योऽश्वं प्रतिगृह्णीयात् स एतेन वारुणेन हविषा यजेत निर्वरुणत्वाय चतु-
ष्कपालो भवति चतुष्पाद् वा अश्वः प्रत्यक्षमेवैनं वरुणपाशान्मुञ्चति तदाहुर्न वै तेनेतरेभ्यो मुच्यते

[५] मै. २,३,७ (३३—३५) । तै. सं. २,३,७ ।
[६] मै. २,३,३ (९—११) । तै. सं. २,३,१२ ।

यदेनमेकस्मान्मुञ्चतीति यावतोऽश्वान् प्रतिगृह्णीयात् तावतश्चतुष्कपालान्निर्वपेदत्र वै वरुणपाशो
यत्र यत्रैव वरुणपाशस्तत एनं वरुणान्मुञ्चत्येकोऽधिभवति यस्यैव नाधियन्ति तस्मादेनं तेन
मुञ्चत्यथो भविष्यदेव वरुणस्यावयजते भूयस्त्वा एतं वरुणो गृह्णाति य एतयेष्ट्वापरमश्वं प्रतिगृह्णाति
यद्यपरमश्वं प्रतिग्रहीष्यन् स्यात् सौर्यवारुणं कुर्यात् सूर्यमेव देवतामेतं लोकमुपप्रतिगृह्णाति वरुणादेनं
वारुणेन मुञ्चत्यपांनप्त्रीयश्चरुरपिभवत्ययोनिर्वा अश्वोऽप्सुजा योनिमन्तमेवैनं कृत्वा प्रतिष्ठापय-
त्येकविंशतिस्सामिधेन्यो भवन्त्येकविंशो वै संवत्सरः पञ्चर्तवो द्वादश मासास्त्रय इमे लोका असा
आदित्य एकविंश एष प्रजापतिः प्राजापत्योऽश्वोऽश्वमेवाप्नोति ॥ यस्ते राजन् वरुण गायत्रच्छन्दाः
पाशस्त त एतदवयजे तस्मै स्वाहा यस्ते राजन् वरुण त्रिष्टुप्छन्दा जगच्छन्दा अनुष्टुप्छन्दाः पाशस्तं त
एतदवयजे तस्मै स्वाहेत्येतावन्ति वै छन्दाँसि च्छन्दाँसि वरुणपाशास्तैरेष गृह्णाति यं वरुणो गृह्णात्यत्रात्र
ध वरुणपाशो यत्र यत्रैव वरुणपाशस्तत एनं वरुणान्मुञ्चत्यपांनप्त्रीयं द्वे अपिभवतो या एवास्या-
प्सव्यौ पाशौ ताभ्यामेनं तेन मुञ्चति षडेतानि जुहोति षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति ॥६॥
१५–१६
देवा वा ओषधीषु पक्वास्वाजिमयुस्स इन्द्रोऽवेदग्निर्वा उज्जेष्यतीति सोऽब्रवीद्यतरो ना उज्जयात्
तन्नौ सहेति सोऽग्निरेव पूर्व उदजयत् तदिन्द्रोऽनूदजयत् तस्मादाग्नेन्द्रमैन्द्राग्नं कार्यमग्निर्हि पूर्व उदज-
यत् तदिन्द्रोऽनूदजयदभिजित्या एवाग्रायणं द्वादशकपालो भवति संवत्सराद्ध्येतदधिभवति सप्तदश
सामिधेन्यो भवन्ति संवत्सराद्ध्येतदधिभवत्येका वै तर्हि व्रीहेरश्रुष्टिरासीदेका यवस्यैका माषस्यैका
तिलस्य ते विश्वे देवा अब्रुवन् भागो नोऽस्तु वयमिदं प्रथयिष्याम इति तेभ्य एतं भागमकुर्वंस्ततो
वा इदमप्रथत भूम्ने वैश्वदेवः प्रथयत्येवैतेन पयसि भवति वैश्वदेवत्वाय वैश्वदेवँ हि पयोऽथ वा
इयमब्रवीन्मयि वा एतदध्यसौ वृष्ट्या पचति नावाभ्यामृत उज्जेष्यथेति ताभ्यामेतं भागमकुर्वन्नेक-
कपालं प्रतिष्ठित्यै द्यावापृथिव्यं ग्राम्या वा अन्या ओषधय आरण्या अन्यास्ता अस्यैतेनोभय्यरिष्टा
भवन्ति सोम ओषधीनामधिराजस्तस्यैष उद्धारो यदकृष्टपच्यमुद्धार एवास्यैष भाग एव यदारण्यं
तस्यैतेनाग्रं क्रियते यत् फालकृष्टं तस्येतरेण वत्सः प्रथमजो दक्षिणा रेत एव ह्येषोऽप्रजातः
प्रजननाय सर्वस्मै वा एषोऽभिषिच्यते यदाग्रायणं राजसूये भवत्यन्नमेवावरुन्द्धे तदस्य स्वदितमिष्टं
भवत्यानीतो वा एष देवानां य आहिताग्निरदन्त्यस्यान्नं यदनिष्ट्वाग्रायणेन नवस्याश्नीयाद् देवानां
भागं प्रतिक्लृप्तमद्यादार्तिमार्छेत् तस्मान्नानिष्ट्वाग्रायणेन नवस्याशितव्यमेतेन वै देवा अग्रं पर्यायँस्त-
दाग्रायणस्याग्रायणत्वमग्रमेव समानानां पर्येति य एवं विद्वानाग्रायणेन यजते ॥७॥ १७
संवत्सरं वा एतस्य च्छन्दाँसि यातयामानि भवन्ति यस्सोमेन यजते छन्दाँसि देविकाश्छन्दाँ-
स्येवायातयामानि पुनर्यामाणि कुरुते पष्ठौह्यप्रवीता दक्षिणाशा वा एषाशामेष उपाभिषिच्यत आशामे-

वास्मै करोति पशुकामो देविकाभिर्यजेत च्छन्दाँसि देविका मिथुनं छन्दाँसि गायत्र्यनुमती राका
त्रिष्टुप्सिनीवाली जगती कुहूरनुष्टुब्धाता वषट्कारो यद् द्वे अवरे द्वे परे तन्मिथुनं यद्धाता वषट्कार-
स्तन्मिथुनं तस्मादेवास्मै मिथुनात् पशून् प्रजनयति ॥ या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा
राका या पूर्वामावस्या सा सिनीवाली योत्तरा सा कुहूश्चन्द्रमा एव धाता यत् पूर्णोऽन्यां वसत्यूनो-
ऽन्यां तन्मिथुनं यत् पश्यन्त्यन्या नान्यां तन्मिथुनं यच्चन्द्रमा अमावस्याया अधि प्रजायते
तन्मिथुनं तस्मादेवास्मै मिथुनात् पशून् प्रजनयति प्रजाकामो देविकाभिर्यजेत धातारमुत्तमं कुर्यात्
स्त्रियो वै देविकाः पुमान् धाता पराचीः प्रजा रेतो दधते पराचीष्वेवैतद् रेतो धीयते तदाहुर्न वै तेन
पराधत्ते यत् पूर्वा प्रवीयत इति व्यवदध्याद्धातारँ सर्वा एवैना वृषामोदिनीः करोति ॥ विन्दते
पुत्रं पश्चाचर इव तु भवति स्त्रीभिर्ह्येनं पश्चात् परिणयति यदाजायेत धातारं पुरस्तात् कृत्वाथैतामेव
निर्वपेदग्रमेवैनं परिणयत्यामयावी देविकाभिर्यजेत धातारं मध्ये कुर्यात् संवत्सरो वै धाता संवत्सरो
हि वा एतस्य लुब्धोऽथैतस्यामयति संवत्सरमेवास्मै मध्यतः कल्पयित्वाथैनमेतस्मान्मिथुनात् पुनः
प्रजनयतीश्वराणि वा एनमेतानि च्छन्दाँस्यशान्तानि निर्मृजः पशुमालभेत शान्त्या अनिर्मार्गाय ॥
वीरस्था वा अन्ये पशवोऽवीरस्था अन्ये ये पुरस्तात् पुरोडाशास्ते वीरस्था ये पश्चात् पुरोडाशास्ते-
ऽवीरस्था ये वीरस्था भुञ्जन्तस्त उपतिष्ठन्ते येऽवीरस्थाः परा ते भवन्ति ये पुरस्तात् पुरोडाशास्ते
वीरस्थाः प्रजापतिं ते प्रतिष्ठामभिसृज्यन्ते यासु स्थालीषु सोमा भवन्ति तासु देविकाः कुर्याद्
रेतोधा हि सोमस्सर्ववेदसी देविकाभिर्यजेत पशुभिर्वा एष व्यृध्यते यस्सर्वं ददाति च्छन्दाँसि
देविकाः पशवश्छन्दाँस्यत्रैष जघन्यं पशून् पश्यति यत्रैनान् विभजति यत्रैवैनाञ्जघन्यं पश्यति तत
एनान् पुनः प्रजनयति य एव कश्च सोमेन यजेत स देविकाभिर्यजेत च्छन्दाँसि देविकाश्छन्दाँ-
स्येवायातयामानि पुनर्यामाणि कुरुते ॥८॥ १८—२१
सँ सोमेन
स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेण देवीं देवेन शुक्रां शुक्रेणामृताममृतेन सृजामि २२
सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥ २३
पुनातु ते परिस्रुतँ सोमँ सूर्यस्य दुहिता । वारेण शश्वता तना ॥ २४
वायुः पूतः पवित्रेण प्रत्यङ् सोमो अतिद्रुतः । इन्द्रस्य युज्यस्सखा ॥

[९] मै. २,३,८ (३३—४१) । वा. १९,१,३—४,३; १०,३१; २०.३३; २३,३८ । काण्व. २१,१,३—५, २२,१८; २१.४५; २५,४० । तै. सं. १,८,२१; ३,२,८,३ । तै. ब्रा. १,४.३, २,६,१.३ । [पुनातु (०ति) ते०... तना । ऋ. ९,१,६ । वायुः पूतः पवित्रेण० । अथर्व. ६,५१.१ । इन्द्रस्य युज्यस्स ०। ऋ. १,२२,१९; सा. १६७१]

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ २५
उपयामगृहीतोऽस्यच्छिद्रां त्वाच्छिद्रेणाश्विभ्यां जुष्टां गृह्णाम्येष ते योनिरश्विभ्यां त्वोपयाम-
गृहीतोऽस्यच्छिद्रां त्वाच्छिद्रेण सरस्वत्यै जुष्टां गृह्णाम्येष ते योनिस्सरस्वत्यै त्वोपयामगृहीतोऽस्य-
च्छिद्रां त्वाच्छिद्रेणेन्द्राय सुत्राम्णे जुष्टां गृह्णाम्येष ते योनिरिन्द्राय त्वा सुत्राम्णे ॥ स्वाद्वीं त्वा
स्वादुनेति ब्रह्मणैवैनाँ सँसृजति तिस्रो रात्रीस्सँसृष्टा वसति तिस्रो हि रात्रीस्सोमः क्रीतो वसत्य-
श्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्वेत्येताभ्यो ह्येषा देवताभ्यः पच्यते वायुः
पूतः पवित्रेणेति व्यृद्धस्यातिपवितस्यैतया पुनीयादेका पुरोरुगेकधैवास्मिन् वीर्यं दधात्यनिरुक्ता
प्राजापत्यानिरुक्तः प्रजापतिः प्रजापतिमेवाप्नोति ॥९॥ २६–२७
विश्वरूपो वै त्रिशीर्षासीत् त्वष्टुः पुत्रोऽसुराणां स्वस्रीयस्स सोममेकेन शीर्ष्णापिबदन्नमेकेनावयन्
सुरामेकेनापिबन् स इन्द्रोऽमन्यतायं वावेदं भविष्यतीति तेन समलभत तेन युगशरमपद्यत स तक्षाणं
तिष्ठन्तमब्रवीदाधावास्येमानि शीर्षाणि च्छिन्द्धीति तस्य तक्षोपाद्रुत्य परशुना शीर्षाण्यच्छिनत्
तस्मात् तक्ष्णशिरो धृतं तस्मादस्यान्नमन्नाद्यं तस्य यत् सोमपानँ शिर आसीत् स कपिञ्जलो-
ऽभवद् यदन्नादनँ स तित्तिरियत् सुरापानँ स कलविङ्कस्तस्मात् स नितनतपमिव वदति॥ स त्वष्टा
पुत्रहतो वीन्द्रँ सोममाहरत् तमघस्सहस्रशलेऽसुनोदथो आहुश्शतशल इति तमस्येन्द्रः प्रास-
हापहृत्य नाड्या निरपिबत् स विष्वङ् सोमपीथेन व्यार्च्छत तस्मात् सोमो नानुपहूतेन पातवै सोम-
पीथेन व्यर्धुको भवति तस्य यन्नस्तोऽमुच्यत तौ सिंहा अभवतां यदक्षीभ्यां तौ शार्दूलौ यत्
कर्णाभ्यां तौ वृकौ यदधस्तात् सा सौत्रामणी यत् प्रथमं निरष्ठीवत् तत् कुवलमभवद् यद् द्वितीयं
तद्बदरं यत् तृतीयं तत् कर्कन्धु तमश्विना अभिषज्यतां तमयाजयतामेतया सौत्रामण्या स यैरेव तद्वीर्यै-
र्व्यार्ध्यत तान्यस्मिन्नाप्त्वाधत्तामेतया यजेत यँ सोमोऽतिपवेत वीर्येण वा एष व्यृध्यते यँ सोमो-
ऽतिपवते यावदेव वीर्यं तदस्मिन् दधात्येवैव राजसूयेऽपि भवति वीर्येण वा एष व्यृध्यते यो राजसूये-
नाभिषिच्यते वृत्रँ हि हन्ति यावदेव वीर्यं तदस्मिन् दधात्येतयैव ब्राह्मणो वा राजन्यो वा बुभूषन्
यजेतैतावद्वै वीर्यं यावदेव वीर्यं तदस्मिन् दधाति तदाहुरार्तयज्ञो वा एष नानार्त एतया यजेतेति
तदाहुर्यष्टव्यमेव सर्वो हि पुरुष आर्तस्सर्वो बुभूषति तस्माद्यष्टव्यं यदाश्विनोऽश्विनौ ह्यभिषज्यतां यत्
सारस्वतो वाग्वै सरस्वती वाचा ह्यभिषज्यताम्॥ यदैन्द्र इन्द्रे हि तद्वीर्यमधत्तां कुवलसक्तुभिराश्विनँ
श्रीणाति बदरसक्तुभिरैन्द्रं कर्कन्धुसक्तुभिस्सारस्वतं वाग्वै सरस्वती वाच्येवास्य स्वाद्यानं दधात्यथो

[कुविदङ्ग यवमन्तो० । ऋ. १०,१३१,२; अथर्व. २०,१२५,२]
[१०] मै. २,३,९; ४,१ (४८:१) । तै. सं. २,५,१ ।

येनमसौ वामश्लीलमभिवदति सैनं पुनः कल्याणमभिवदाति सिंहा अध्वर्युर्मनसा ध्यायेच्छार्दूलौ प्रतिप्रस्थाता वृकौ यजमानस्सुरा भवति येरेव तद्वीर्यैर्व्यृध्यते तान्यस्मिन्नाप्त्वा धत्तः॥१०॥ २८-३०

ब्राह्मणस्य मूर्धन् सादयेत् तेन मेध्यात्वं वै सुरा मेध्यमत्वं तेन मेध्यैका पुरोरुगेका याज्यैकधैवास्मिन् वीर्यं दधाति सर्वहुतं जुहोति सर्वमेवास्मिन् वीर्यं दधाति ब्राह्मणं पाययेत् तेन हविष्क्रियत आत्मनाशयान्मखेव वीर्यं धत्ते तद् तन्न हस्यं पाप्मा वै सुरा मध्यत एष पाप्मना गृहीतो यत् समयाल्येति मध्यत एवैनं पाप्मनो मुञ्चति यदुत्तरेऽग्नौ जुहुयान्न पाप्मना व्यावर्तेत क्रियेत भेषजं यद् दक्षिणेऽग्नौ जुहोति वि पाप्मना वर्तते क्रियते भेषजं यद् विक्षारयति वीव खेष क्षरिति ॥ यद् वा एतस्य व्याधि यत् श्रामाय पितृस्तदगन्यत् पितृमतीभिरभिमन्त्रयन्त पितृभ्य एवैनमधिसमीरयन्ति यत् तिसृभिस्तिसृभिस्तृतीये हि लोके पितरो यच्चत्वार आभ्य एवैनं चतसृभ्यो दिग्भ्योऽधिसमीरयन्ति शताक्षरा भवति शतायुर्वै पुरुषश्शतवीर्य आयुरेव वीर्यमवरुन्द्धे क्लीबात् सीसेन लोकमानि क्रीणात्यनृतं वै क्लीबोऽनृतं सीसमनृतं सुरानृतेनैवानृतादध्यनृतं क्रीणाति वडवा दक्षिणा सुन्वरी खेषा सृत्वरीव सुरा समृद्ध्यै ॥११॥ ३१-३२

आश्विनमजमालभेत सारस्वतीं मेषीमैन्द्रमृषभं वा वृष्णि वैवमेव वपाभिश्वरन्ति यदैन्द्री वपानामुत्तमा भवतीन्द्र एवास्मिंस्तदधिभवति यत् प्रचरन्त ऐन्द्रेण पुनः प्रथमेन प्रचरन्तीन्द्रमेव तत् पुनरालभ्य सेन्द्रत्वाय यदाश्विनोऽश्विनौ ह्यभिषज्यतां यत् सारस्वती वाग्वै सरस्वती वाच्येव प्रतितिष्ठत्यैन्द्री वपानामुत्तमा भवत्यैन्द्रः पुरोडाशानां प्रथमो वीर्यं वा इन्द्रो वीर्य एवैनमभिसंधत्तः प्रसवायैव सावित्रो निर्वरुणत्वाय वारुणो मध्यतो ह्येष वरुणगृहीतः पश्चाद् वा एषा सृष्टा प्रतीचीनशीर्ष्णी यदुपरिष्टात् पुरोडाशा भवन्त्यपिहित्या एवाच्छिद्रत्वाय सह समवत्तं भवति सहेडामुपह्वयन्ते संहित्या एवाथो इडाया अविदोहाय ॥ यद्वै सौत्रामण्या व्यृद्धं तदस्यास्समृद्धं यदन्यदेवत्याः पशवो भवन्त्यन्यदेवत्याः पुरोडाशा एतद् वा अस्या व्यृद्धं सदथ समृद्धं नाना वै तैर्वीर्याण्यवरुन्द्धेऽथ वै प्रजापतेर्वीर्यमासीदथ माल्व्यं यद्वीर्यमासीत् तद् पुरस्तात् पर्यहरत सोमो वाव स ततो ब्राह्मणमसृजत तस्माद् ब्राह्मणस्सर्वो ब्रह्मणि धीरो यन्माल्व्यमासीत् तत्पश्चात् पर्यहित सुरा वाव सा ततो राजन्यमसृजत तस्माज्ज्यायांश्च कनीयांश्च स्नुषा च श्वशुरश्च सुरां पीत्वा सह लालपत आसते पाप्मा वै माल्व्यं तस्माद् ब्राह्मणस्सुरां न पिबति पाप्मना नेत्संसृज्या इति तदेतत् क्षत्रियाय ब्राह्मणं ब्रूयाच्चैनं सुरा पीता हिनस्ति य एवं विद्वान् सुरां पिबति प्रजापतेर्वा एषा तनूर्वीर्यं प्रजापतिर्वीर्यमेवास्मिन् दधाति ॥१२॥ ३३-३४

[११] मै. २,३,९; ४,२ (४८, २)। [१२] मै. २,४,२ (२)।

स्वर्भानुर्वा आसुरस्सूर्यं तमसाविध्यत् स न व्यरोचत तस्माद्देवास्तमोऽपालुम्पन् यत् प्रथममपालुम्पन् साविष्कृष्णाभवद्यद् द्वितीयं सा फल्गुर्यत् तृतीयं सा वलक्षी यदध्यस्थादपालुम्पन् साविवशाभवदथ वा इयं तर्ह्यलोमकासीत् तां देवा अदित्यै कामायालभन्त तयास्यां लोमान्यरोहयंस्ततो वा इयं लोमान्यगृह्णात् तामेतामेवमालभेतादित्यै कामाय यमेव कामं कामयते तं स्पृणोत्यमुतो वा आदित्यस्यार्वाङ् रश्मिरवातिष्ठचात्वालमभि तदिमं मिथुनं समभवतां साविवशाभवदथ वा इमास्तर्ह्यफला ओषधय आसंस्ता देवा आदित्येभ्यः कामेभ्य आलभन्त तया सु फलमग्राहयंस्ततो वा इमाः फलमगृह्णंस्तं एते एवमालभेतादित्या अन्यां कामायादित्येभ्योऽन्यां कामेभ्य उभाभ्यामेव वृष्टिभ्यां कामायालभते सारस्वतीं मेषीमालभेत यस्माद् वागपक्रामेद् वाग्वै सरस्वती सरस्वत्येतस्मादपक्रामति यस्माद् वागपक्रामति यत् सारस्वती वाचमेव समक्षमाप्त्वावरुन्द्धेऽपन्नदती भवति सर्वत्वायानास्कन्ना समृद्ध्यै यस्त्रेतानामुत्तमो जायेत तमूर्जे आलभेतोर्क्कामो नाना वा एतौ स्तना अभिजायेते अथैष ऊर्जमेवाभिजायत ऊर्जमेवैतेनाप्त्वावरुन्द्ध औदुम्बरो यूपो भवति देवा वै यत्रोर्जं व्यभजन्त तत उदुम्बरोऽजायत यदौदुम्बर ऊर्जं एवावरुद्ध्या एतमेव सौमापौष्णमालभेत प्रजाकामो वा पशुकामो वा सौम्यो वै रेतोधाः पूषा प्रजनयिता सोम एवास्मै रेतो दधाति पूषा प्रजनयति विन्दते प्रजां वा पशून् वा यतरस्मै कामायालभते वायवे श्वेतमजमालभेत बुभूषन् वायुर्वै देवानां क्षेपिष्ठस्तमेव भागधेयेनोपधावति स एनमाशिष्ठं श्रियमभिप्रणयति स निमार्ष्टि स प्रधन्वति स एवैनं श्रियमभिप्रणयति ॥ स एव आचोपचे उत पुण्यो भवत्युतो यथेव तथेव वायवे नियुत्वते श्वेतमजं पिशङ्कर्णमालभेत सजातकामो वायुं वा इमाः प्रजा नस्योता इत्थं चेत्थं चानुचरन्ति प्राणो वायुर्वायुर्देवानां विशो नेता नियुतो देवानां विशस्तमेव भागधेयेनोपधावति सोऽस्मै विशं निनयति यन्नियुत्वत आरम्भणमेव कुरुतेऽनिर्मार्गाय वायवे श्वेतमजमालभेत कामेभ्योऽणु वा एष कामयते यः कामयते वायुर्देवानामण्वनुवाति तमेव भागधेयेनोपधावति सोऽस्य कामाननुवाति॥१३॥ ३५-३६

आ नो मित्रावरुणा प्र वाहवा ॥ ३७

इन्द्रावरुणयोरहं सम्राजोरव आवृणे । ता नो मृडात ईदृशे ॥ ३८

नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।

इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥ ३९

[१३] मै. २,५,१-२ (१-२)।
[१४] मै. ४.११.९; १४ १२ (६५–६६; १६६)। वा. ९.१८; २१,३—४.८—११, ३३,४२: ३४,३०; ३ ११; १३,१४; १५,२०,३५। काण्व. १०.२४; २३,३-४,८-१०,१२; ३२,४२; ३३.२४, ३,१८; १४,१४, १९,४१, ५७। [आ नो मित्रावरुणा० । ऋ. ३.६२,१६; ७,६५ ४; सा. २२०,६६३; तै. सं. १,८,२२,३; तै. ब्रा.२, ८,६.७। इन्द्रावरुणयोरहं० । ऋ. १,१७,१; तै. सं. २,५,१२,२ । नू न इन्द्रावरुणा० । ऋ. ६,६८,८]

त्वं नो अग्ने स त्वं नो अग्ने शं नो भवन्तु वाजे वाजे ॥ ४०

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।

तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः ॥ ४१

एना वयं वयमिन्द्रवन्तोऽभिष्याम वृजने सर्ववीराः ।

तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः ॥ ४२

अग्निर्मूर्धा ॥ ४३

यं सीं अग्ने तवोतिभिस्सुवीराभिस्तिरते वाजभर्मभिः । यस्य त्वं सख्यमावरः ॥ ४४

अग्ने वाजस्याग्ने श्री ते ॥ ४५

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।

जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥ ४६

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।

इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥ ४७

इयं दुहन् सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुन्वते ।

अग्ने घृतस्नुस्त्रिर्ऋतानि दीद्यद् वर्तिर्यज्ञं परियन् सुक्रतूयसि ॥ ४८

शीर्ष्णायूंषि तव जातवेदः ॥१४॥ ४९

दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥ ५०

[त्वं नो अग्ने० । ऋ. ९.६९,८–९,६२; ४,१,४; ५,१०,२,७; ८.७१,१; १०.८७.२०; १४१, ६; सा. ६, १४०४; अथर्व. ३,२०,५; ८,३,१९; तै. सं. २,५,१२,३। स त्वं नो अग्ने० ऋ. ४,१,५; तै. सं. २,५,१२,३। शं नो भवन्तु० ऋ. ७,३८,७; तै. सं. १,७,८,२; नि. १२.४४। वाजे वाजे० । ऋ. ७,३८,८; तै. सं. १,७, ८.१ ३७,१२,१। विश्वाहेन्द्रो अधिवक्ता० । ऋ. १,१००.१९; १०२,११। तन्नो मित्रो०...उत द्यौः। ऋ. १.९४.१६; ९५,११; ९६.९; ९८.३, १००,१९; १०१,११; १०२,११; १०३.८, १०५,१९; १०६,७; १०७,३; १०८,१३; १०९,८; ११०,९; १११,५, ११२,२५; ११३,२०; ११४,११; ११५,६। एनावयं० । ऋ. १ १०५,१९; नि. ५,११। अग्निर्मूर्धा० । ऋ. ८.४४.१६; सा. २७,१५३९; तै. सं १,५,५,१; ४,४,१,१; तै. ब्रा. ३, ५,७,१। यं सीं अग्ने० । ऋ. ८,१९,३०; सा. १०८, १८२२; तै. सं. ३,२,११,१। अग्ने वाजस्य० । ऋ. १,७९,४; सा. ९९,१४६४; तै. सं. ४,४,४,५। अग्ने श्री ते० । ऋ. ३,२०,२; तै. सं. ३,२ ११,१। सं वां कर्मणा० । ऋ. ६,६९ १; तै. सं, ३,२ ११,१। उभा जिग्यथुर्न परा० । ऋ. ६,६९, ८; अथर्व. ७,४४,१; तै. सं. ३,२,११,२; ७,१,६,७। इयं दुहन् सुदुघां० । ऋ. १०,१७६,६। शीर्ष्णायूंषि तव० । ऋ. ३,१७,३; तै. सं. ३,२,११,२]
[१५] मै. ४७,३५,३७; ३१,१-२; १८,४१; ३,४३। काण्व. ३९,४०,४२; ३७.१-२, २०,२९; ३,३६। [दूतं वो विश्ववेदसं० । ऋ. ४,८,१; सा. १२]

स हि वेदा वसुधितिं महाँ आरोधनं दिवः । स देवाँ एह वक्षति ॥ ५१

स वेद देव आनमं देवाँ ऋतायते दमे । दाति प्रियाणि चिद् वसु ॥ ५२

स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते । विद्वाँ आरोधनं दिवः ॥ ५३

ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः । य ईं पुष्यन्त इन्धते ॥ ५४

ते राया ते सुवीर्यैस्ससवांसो विशृण्विरे । ये अग्ना दधिरे दुवः ॥ ५५

अभि त्वा शूर नोनुमस्त्वामिद्धि हवामहे ॥ ५६

यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।

न त्वा वज्रिन् सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥ ५७

बोधा सु मे मघवन् वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।

इमा ब्रह्म सधमादे जुषस्व ॥ ५८

ता अस्य नमसा सहो रेवतीर्न इमं मे वरुण तत्त्वायामि ॥ ५९

रदत् पथो वरुणस्सूर्याय प्राणांसि समुद्रिया नदीनाम् ।

सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः ॥ ६०

प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय ।

वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय ॥ ६१

उपमसृक्षि वाजयुर्वचस्यां चनो दधीत नाद्यो गिरो मे ।

अपां नपादाशुहेमा कुवित् स सुपेशसस्करोति जोषिषद्धि ॥ ६२

[स हि वेदा वसुधितिं० । ऋ. ४.८,२ । स वेद देव आनमं० । ऋ. ४,८,३ । स होता सेदु० । ऋ. ४, ८,४ । ते स्याम ये० । ऋ. ४.८,५ । ते राया ते० । ऋ. ४,८,६ । अभि त्वा शूर० । ऋ. ७,३२,२२; सा. २३३,६८०; अथर्व. २०,१२१,१; तै. सं. २,४,१४,२। त्वामिद्धि हवामहे० । ऋ. ६,४६,१; सा. २३४,८०९; अथर्व. २०.९८.१; तै. सं. २,४ १४,३ । यद् द्याव इन्द्र० । ऋ. ८,७०,५; सा. २७८,८६२; अथर्व. २०,८१, १, ९२,२०; तै. सं. २,४,१४,३; तै. आ. १,७,५; नि. १३,१। बोधा सु मे मघवन्० । ऋ. ७,२२,३; सा. ९,२९; अथर्व. २०,११७,३ । ता अस्य नमसा० । ऋ. १,८४,१२; सा. १००७; अथर्व. २०,१०९,३। रेवतीर्न० । ऋ. १,३०,१३; सा. १५३,१०८४; अथर्व. २०,१२२,१; तै. सं. १,७,१३,५; २,२,१२,८; ४,१४, ४ । इमं मे वरुण० । ऋ. १,२५,१९; सा. १५८५; तै. ब्रा. २,१,११,६, । तत्त्वायामि० । ऋ. १,२४,११; तै. सं. २,१,११,६ । रदत् पथो० । ऋ. ७,८७,१ । प्र सम्राजे बृहदर्चा० । ऋ. ५,८५,१। उपमसृक्षि वाजयु० । ऋ. २,३५,१]

इमं स्वस्मै हृदं आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत्।
अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ॥ ६३
आपो रेवतीः ॥ ६४
आपः पृणीत भेषजं वरूथं तन्वे मम। ज्योक् च सूर्यं दृशे ॥१५॥ ६५
[१०९]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां पयस्स्थानकं नाम द्वादशं स्थानकं संपूर्णम् ॥१२॥

अथ त्रयोदशं स्थानकम्।

पशुबन्धम्।

तिस्रोऽजाश्श्वेता मल्हा गर्भिणीरालभेत ब्रह्मवर्चसकाम आग्नेयीं वसन्ता सौरीं ग्रीष्मे बार्हस्पत्यां
शरदि यदाग्नेयी मुखत एव तया तेजो धत्ते यत् सौरी मध्यत एव तया रुचं धत्ते यद् बार्हस्पत्योप-
रिष्टादेव तया ब्रह्मवर्चसं धत्ते संवत्सरं पर्यालभ्यन्ते वीर्यं वै संवत्सरस्संवत्सरमेव वीर्यमाप्नोति य-
च्छ्वेता रुच एव तद्रूपं गर्भिणीर्भवन्तीन्द्रियं वै गर्भ इन्द्रियमेवावरुन्द्धे तिस्रो मल्हा गर्भिणीरालभेत
यं पर्यम्युर्वायव्यां श्वेतां सारस्वतीं मेषीमादित्यामजामघोरामां मेषीं वा मनसा वा एत एतं पर्य-
मन्ति मनो वायुर्यद् वायव्या मनसैवैषां मनांसि शमयति वाचा वा एत एतं पर्यमन्ति वाक् सरस्वती
यत् सारस्वती वाचैवैषां वाचं शमयत्यप्रतिष्ठितो वा एष यं पर्यमन्तीयमदितिर्यदादित्यास्यामेव
प्रतितिष्ठत्यनपिमन्त्रो वा एष एतेषु यं पर्यमन्ति वाचो मन्त्रो गर्भो यद् गर्भिणीर्वाच एवैनं गर्भमक-
रपिमन्त्रमेनं करोत्यप वा एतस्मादिन्द्रियं क्रामति यं पर्यमन्तीन्द्रियं गर्भो यद्गर्भिणीरिन्द्रियमेवा-
वरुन्द्धेऽग्नये वैश्वानराय कृष्णं पेत्वमालभेत यस्समान्तमभिद्रुह्येद् यो वाभिदुद्रुक्षेत् संवत्सरो वा अग्नि
वैश्वानरस्संवत्सरायैष सममते यस्सममते संवत्सरमेवाप्त्वा काममवरुणमभिद्रुह्यति प्राजापत्यमजं तूपरं
विश्वरूपमालभेत सर्वेभ्यः कामेभ्यः प्रजापतिर्योनिर्योनेरेव प्रजायते प्रजापतिः प्रदाता तमेव भाग-
धेयेनोपधावति सोऽस्मै सर्वान् कामान् प्रयच्छत्यश्वस्येव वा एतस्य शिरो गर्दभस्येव कर्णौ पुरुषस्येव
श्मश्रूणि गोरिव पूर्वौ पादा अवेरिवापरौ शुन इव लोमान्यजो भवत्येतावन्तो वै ग्राम्याः पशवस्ता-
नेवैतेनाप्त्वावरुन्द्धे द्वादश धेनवो दक्षिणा तार्प्यं हिरण्यमधीवासः प्रजापतेर्यास्साामिधेन्यस्तास्सा-

[इमं स्वस्मै हृद०। ऋ. २,३५,२। आपो रेवतीः०। ऋ. १०,३०,१२। आपः पृणीत भेषजं०। ऋ. १,
२३,२१; १०,९,७; अथर्व. १,६,३]

[१] मै. २,५,१—२ (१—२)। तै. सं. २,१,१—२।

मिधेन्यः प्रजापतेर्या आप्रियस्ता आप्रियो हिरण्यगर्भवत्याघार एतस्य सूक्तस्य याज्यानुवाक्ये एतेन
ह वा उपकेतू रराधऽर्भ्नोति य एतेन यजते द्वादशधा ह त्वै स प्राशित्राणि परिजहार तत्र द्वादश
द्वादश धेनूर्ददौ यद् द्वादश ददाति सैव तस्य प्रतिमा यत् तार्प्यं हिरण्यमधीवासमपरिमितमेव
तेनावरुन्द्धे ॥१॥ १

वारुणं कृष्णं पेत्वमेकशितिपादमालभेतामयावी ज्योगामयावी प्रजापतिः प्रजा असृजत ता
एनमत्यचरँस्ता अतिचरन्तीर्वरुणेनाग्राहयत् ता जिह्माः पन्ना अशेरत वरुणगृहीतास्ताः कृष्णः पेत्व
आप्रवत तस्याभिहाय पादमगृह्णात् स प्रावृह्यत स एकशितिपादभवत् ताः प्रजापता अनाथन्त
सोऽपश्यद्योऽयमवरुणगृहीतस्तेनैना वरुणान्मुञ्चानीति तं वारुणमालभत तेनैना वरुणादमुञ्चद्वरुण-
गृहीत एष य आमयावी यद्वारुणो वरुणादेवैनं मुञ्चति ॥ द्वीपे यजेतापो वै वरुणस्समक्षमेवैनं वरु-
णान्मुञ्चति प्रजापतिः पशून् सृष्ट्वा वरुणं वरमभ्यसृजत् स एतमवृणीत तस्माद्वरुणदेवत्यः पाप्मनैष
गृहीतो य आमयावी कृष्ण इव पाप्मा यत् कृष्णः पाप्मानमेवापहते यदेकशितिपाद्वरुणपाशमेव तेन
प्रमुञ्चत आग्नेयमजमालभेत वारुणं कृष्णं पेत्वं बुभूषन्नृद्ध्या एवाग्नेयो वरुणगृहीत एष योऽलं भूत्यै
सन्न भवति यद्वारुणो वरुणादेवैनं मुञ्चत्यर्धं वै पुरुषस्याग्नेयमर्धं वारुणमस्थान्याग्नेयानि मांसानि
वारुणानि तयोरेवैनं भागधेयेन निष्क्रीणाति ॥ सोऽनृणो भूत्वा भवत्येव वारुणं कृष्णं वृष्णिम-
भिचरन्नालभेत मृत्युर्वै वरुणो मृत्युनैवैनं ग्राहयत्येतद्वै पाप्मनो रूपं कृष्ण इव पाप्मा यत् कृष्णः
पाप्मनैवैनमभिषुवति ॥ २–४

पशुं बध्नामि वरुणाय राज्ञ इन्द्राय भागमृषभं केवलो हि।
गात्राणि देवा अभिसंविशन्तु यमो गृह्णातु निर्ऋतिस्सपत्नान् ॥ ५

इत्येता वै देवताः पुरुषस्येशते ताभ्य एवैनमधिनिष्क्रीय मृत्युर्यमो मृत्युनैवैनं ग्राहयति॥२॥ ६

वैष्णवं वामनमालभेत भ्रातृव्यवान् विष्णुर्वा इमांल्लोकानुदजयत् स एभ्यो लोकेभ्योऽसुरान्
प्राणुदतेमानेव लोकानुजयत्येभ्यो लोकेभ्यो भ्रातृव्यं प्रणुदते विषमे यजेत विषमा इव हीमे लोका
ऐन्द्रामारुतं पृश्निसक्थमालभेत यस्मात् क्षत्रियाद् विडभ्यर्धश्चरेत् क्षत्रं वा इन्द्रो विण्मरुतः क्षत्रायैव
विशमनुनियुनक्ति पृश्निसक्थो भवति विशमेवास्मै पश्चादुपदधात्यसंसर्गायैन्द्रमुत्सृष्टिमालभेत पशु-
काम इन्द्रो वै वलमपावृणोत् तं सहस्रमनूदैत् तस्यैषोऽग्रत उदतृणत् स समैषदुत्तितृत्सन्निमांल्लो-
कान् पश्यँस्तस्मादेष समीषितः प्रतीषितग्रीवस्तमेतं पुरस्तात् सहस्रस्यालभेत प्र सहस्रं पशूनाप्नोति

[२] मै. २,५,६ (६-८)। तै. सं. २,१,२।
[३] मै. २,५,३,८-९ (४,१०-११)। तै. सं. २,१,३-५; २,५.३।

वलमेवापवृणोति यदा सहस्रं पशून् प्राप्नुयादथ वैष्णवं वामनमालभेत प्रतिष्ठित्या एतस्मिन् वै तत्
सहस्रमध्यतिष्ठत् स व्यैषदधिष्ठीयमानस्तस्मादेष तिर्यङ्ङिव वीषितस्ता एता एवमभित आलभेत
सहस्रस्य परिगृहीत्यै यज्ञो वै दक्षिणामभ्यकामयत तां समभवत् सा गर्भमधत्त तमववृज्य प्राद्रवत्
तमववृक्तं शयानमदितिरचायत् तमाहरत् तमधस्तादूर्वोरुपास्यत सोऽधस्तादूर्वोरवर्धत तस्मादेष
तिर्यङ्ङिव वीषितोऽधस्ताद्धयूर्वोरवर्धत तं विष्णुरचायत् तमभ्यवदत् तस्मिन् प्रश्नमैतां तं
विष्णवेऽन्वब्रुवँस्तस्मादाहुः कर्तुरेव पुत्र इति येन वामनेनेत्संददित्यै चरुं पुरस्तान्निर्वपेदतिर्वा एत-
मवर्धयत् तस्या एवैनमधिनिष्क्रीणाति वेनानृणेन निष्क्रीतेन मेध्येन प्रसूतेनर्भ्नोत्येव सौम्यं बभ्रु-
मृषभं प्रथमकुसिन्धमालभेत यो राज्य आशंसेत सोमो वै देवानां राजा सोम एतस्य देवता यो राज्य
आशंसते स्वामेव देवतां भागधेयेनोपधावति सैनं राज्याय परिणयति यत् प्रथमकुसिन्धो वीर्यस्य
तद्रूपमिन्द्राय वज्रिणे रोहितमृषभं प्रथमकुसिन्धमालभेत राजन्यायाभिचरते वा बुभूषते वैन्द्रो वै
राजन्यो देवतया वज्रोऽस्य वीर्यं वज्रमेवास्मिन् दधाति तेन विजयति भवत्येव यत् प्रथमकुसिन्धो
वीर्यस्य तद्रूपं य एकाष्टकायां जायेत तमुत्सृजेद् यदि द्वौ जायेयातां ता उभा उत्सृजेद् यदि संवत्सरे
द्वितीयो जायेत तं संवत्सरेऽनूत्सृजेदाग्नेयमष्टाकपालं निर्वपेज्जातयोराग्नेया वै पशवस्तस्मादेवैना अधिनि-
ष्क्रीणात्यग्नये वैश्वानराय द्वादशकपालं निर्वपेत्संवत्सरे पर्येते संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरादेवैना
अधिनिष्क्रीणात्या मेध्याभ्यां भवितोस्संवत्सरे संवत्सरेऽग्नये वैश्वानराय द्वादशकपालं निर्वपेत् सं-
वत्सरो वा अग्निर्वैश्वानरस्संवत्सरादेवैना अधिनिष्क्रीणाति ॥ ताभ्यां सर्वतो निष्क्रीताभ्यां मेध्याभ्यां
प्रसूताभ्यामृध्नोत्येवैतस्यां वा इन्द्रोऽजायत स देवानां वीर्यावत्तमस्तस्माद् य एकाष्टकायां पशूनां
जायते स वीर्यावान् भवति वीर्यावान् भवति य एवं विद्वानेताभ्यां यजत इन्द्रायाभिमातिघ्ने
पूर्वमालभेत पाप्मा वा अभिमातिः पाप्मानमेवापहत इन्द्राय वृत्रतुर उत्तरं पाप्मा वा अभिमातिः
पाप्मानमेवापहत्यार्थैतेन वृत्रतूर्भवति स्वाराज्यमुपैति नास्मादन्यस्समानेषु वसीयान् भवति य एवं
विद्वानेताभ्यां यजते शतमन्यस्य दक्षिणाश्वोऽन्यस्य पूर्ववाडया एव कौच द्वा एतद् ब्राह्मणा
अनेवमुत्सृष्टा आलभेत ताभ्यामेवर्भ्नोति तत्र यत् किंच ददाति तद् दक्षिणा ॥ ३ ॥ ७–८

इन्द्राय मन्युमते ललाममृषभमालभेत संग्रामे मन्युना वै वीर्यं करोतीन्द्रियेण जयति मन्युं चैवेन्द्रि-
न्द्रियं च जित्यै दधाति यल्ललामः पुरस्तान्मन्योस्सम्पृक्त्यै देवाश्च वा असुराश्च संयत्ता आसँस्ते न
व्यजयन्त तेऽब्रुवन् ब्रह्मणा नो मेनी विजयेतामिति त ऋषभौ समवासृजन्श्वैत्रेयोऽरुणस्तूपरो देवाना-
मासीच्छ्येनेयश्श्येतोऽयश्मश्रुरसुराणां तौ समहतां तं श्वैत्रेयस्समयाभिनत् सा या वाक् पराजिता-

[४] मै. २,५,३—४,८-९ (३-४,१०—११)। तै. सं. २,१,३—५; २,५,३।

सीत् सावाच्यपतद् याजयत् सोर्ध्वा तस्माद् यस्यावाची वाक् सोऽनार्त्विजीनोऽसुर्यो हि स वर्णस्तस्माद्
यस्योर्ध्वा वाक् स आर्त्विजीनो देवत्रेव हि स बार्हस्पत्यमरुणं तूपरमभिचरन्नालभेत ब्रह्म वै बृहस्पति-
र्ब्रह्मणैवैनमभिप्रयुङ्क्त एतेन वै देवा असुरानस्तृण्वत यत् तूपरस्स्तृत्या इन्द्रो वै वृत्रमहँस्तं हतस्सप्त-
भिर्भोगैः पर्यहँस्तस्य मूर्ध्नो वैदेहीरुदायँस्ताः प्राचीरायँस्तस्मात् ताः पुरस्स जघन्यमृषभं वैदेहमन्वयन्त-
ममन्यतेममिदानीमालभेय तेन त्वा इतो मुच्येयेति तमालभत तेन नामुच्यत स आग्नेयमजमालभ-
तैन्द्रमृषभं तेन वै स तानग्निना पाप्मनो भोगानपिदह्यार्थैन्द्रेणेन्द्रियं वीर्यमात्मन्नधत्त ततो वै सो-
ऽभवदाग्नेयजमालभेतैन्द्रमृषभं बुभूषन् यः पाप्मगृहीत इव मन्येत पाप्मा वै स तं सप्तभिर्भोगैः
पर्यहन् पाप्मन एष भोगैः परिहतो योऽलं भूत्यै सन्न भवति यदाग्नेयोऽग्निनैव पाप्मनो भोगान-
पिदह्यार्थैन्द्रेणेन्द्रियं वीर्यमात्मन् धत्ते भवत्येव ॥ देवाश्च वा असुराश्चास्मिंल्लोक आसँस्तेऽसुरा देवा-
ननुदन्तास्माल्लोकात् ते देवाः प्रजापता एवानाथन्त स एता असृजतर्षभं च वशां च यमं च यम्यं
च तस्माद् यौ यमौ मिथुनौ जायेते ऋषभ एवान्यो भवति वशान्या स वैष्णुवारुणीं वशामाल-
भतैन्द्रमृषभं तेन वै स तान् वरुणेनासुरान् ग्राहयित्वा विष्णुना यज्ञेन प्राणुदतार्थैन्द्रेणेन्द्रियं वीर्य-
मात्मन्नदधादेषु ततो देवा अभवन् परासुरा अभवँस्ता एता एवमालभेत यो भ्रातृव्येन व्यायच्छेत
वैष्णुवारुणीं वशामैन्द्रमृषभं वरुणेनैव भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्रणुदतेऽथैन्द्रेणेन्द्रियं
वीर्यमात्मन् धत्ते भवत्यात्मना परास्य भ्रातृव्यो भवत्योषधिभ्यो वेहतमालभेत प्रजाकाम ओषधीनां
वा एषा प्रिया ता एतां घ्नतोः परिधावन्ते तस्मादेषा सर्वेषां पशूनां प्रियाप ओषधय आपोऽसत्
खनन्ति ता एव भागधेयेनोपधावति ता अस्मै प्रजां खनन्ति यावन्तस्तां वाशितामन्वाधावन्ति ते
दक्षिणा समृद्ध्या ऐन्द्रीं सूतवशामालभेत राजन्याय बुभूषत इन्द्रो वा एतस्या अजायत स पुनः
प्रत्यवैक्षत सोऽमन्यत यो वा इतोऽपरो जनिष्यते स मे भ्रातृव्यो भविष्यतीति तं प्रत्यवमृश्य
योनिं न्यवेष्टयत् तस्मादेषा नापरं सूत ऐन्द्रो राजन्यो देवतया स्वादेवैनं योनेर्जनयति भूत्यै भवत्येव
यस्तस्या अधिजायेत तमैन्द्रमालभेतेन्द्रियकाम इन्द्रियं वा एतदेतस्या अधिजायते तदेव समक्ष-
माप्त्वावरुन्द्धे ब्राह्मणस्पत्यमतिष्ठायमालभेत यः कामयेतातिष्ठायस्स्यामित्यग्रेवै जिह्वा ब्रह्मणस्पति-
स्सर्वमेपातितिष्ठति रूपेणैवैनं समर्धयति सैनमातिष्ठायं करोति ॥ ४ ॥ ९–१०

आग्नेयमजमालभेत सौम्यमृषभं यस्य पिता पितामहः पुण्यस्स्यादथ तन्न प्राप्नुयादग्निस्सर्वा
देवता मुखत एव देवता आलभत इन्द्रियेण वा एष सोमपीथेन व्यृध्यते यस्य पिता पितामहः पुण्यो
भवत्यथ तन्न प्राप्नोति सौम्यो ब्राह्मणो देवतयेन्द्रियमस्य सोमपीथो यत् सौम्य इन्द्रियेणैवैनं सोम-
पीथेन समर्धयति द्यावापृथिव्यां धेनु पर्यारिणीमालभेत निरुद्धो ज्योङ्निरुद्धो द्यावापृथिव्योर्वा एष

[५] मै. २,५,५ (५)। तै. सं. २,१,५।

निर्ऋतो यो निरुद्धो ज्योगनिरुद्धो यद् द्यावापृथिव्या द्यावापृथिव्योरेवैनमाभजति पर्यारी वा एष यो निरुद्धो ज्योगनिरुद्धः पर्यारिण्यस्य देवता यत् पर्यारिणी स्व एवास्य तेन पशुरेतस्या एव वायव्यं वत्सं च आलभेत वायुर्वा अनयोर्वत्सस्स इमे आप्याययति स प्रदापयति तमेव भागधेये-नोपधावति सोऽस्मा इमे प्रदापयत्यैन्द्राग्नमेतमनुसृष्टमालभेत यस्य पिता पितामहस्सोमं न पिबेदथ स पिपासेदिन्द्रियेण वा एष सोमपीथेन व्यृध्यते यस्य पिता पितामहस्सोमं न पिबत्याग्नेयो ब्राह्मणो देवतयेन्द्रियमस्य सोमपीथो यदैन्द्राग्नस्स्वयैव देवतया सोमपीथमनुसंतनोत्यनुसृष्टो वा एतस्य सोमपीथो यस्य पिता पितामहस्सोमं न पिबति यदनुसृष्टस्स्व एवास्य तेन पशुर्यदेतौ द्विवत्यस्य तद्रूपं त्वाष्ट्रं शुण्ठमालभेत यः कामयेत रूपकाशो मे पुत्रो जायेतेति त्वष्टा वै रूपाणां विकर्ता तमेव भागधेयेनोपधावति सोऽस्मै रूपाणि विकरोत्याश्विनं कृष्णललाममालभेत भ्रातृव्यवान् देवा वा असुरानह्नोऽनुदन्त तेषां यत् स्वमासीद् यद्विसं यद्वेद्यं तेन रात्रीं समवायँस्ते देवा एतमाश्विनं कृष्ण-ललाममपश्यँस्तमालभन्त तेनैनान् रात्रीमन्ववायन् द्यावापृथिवी वा अश्विनौ तान् द्यावापृथिवीभ्या-मेवावस्तान्निबाध्यादित्येन परस्ताद्रात्र्या अनुदन्त तेषां यत् स्वमासीद् यद्विसं यद्वेद्यं तदवृञ्जत ततो देवा अभवन् परासुरा अभवन् द्यावापृथिवी वा अश्विनौ द्यावापृथिवीभ्यामेवावस्ताद् भ्रातृव्यं निबा-ध्यादित्येन परस्तादहोरात्रयोः प्रणुदते तस्य यत् स्वं यद्विसं यद्वेद्यं तद् वृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवति॥ यल्ललामोऽह्नस्तद्रूपं यत् कृष्णो रात्र्यास्तदुभयोरेवैनं वर्णयोः प्रणुदत इन्द्रो वै विलि-स्तेङ्गां दानवीमकामयत सोऽसुरेष्वचरत् स्त्र्येव स्त्रीष्वभवत् पुमान् पुंसु स निर्ऋतिगृहीत इवामन्यत स एतमैन्द्रानैर्ऋतं त्रिपुँसकमपश्यत्तेन रूपेणाचरत् तमालभत तस्य यदनवदानीयमासीत् तेन पूर्वेण प्राचरद्दक्षिणा परेत्य स्वकृत इरिणे जुशाणा निर्ऋतिर्वेत् स्वाहेत्यथेतरं पुनरेत्यैन्द्रं समस्थापयत् स निर्ऋतिमेव पूर्वां निरवदायाथैन्द्रेणेन्द्रियं वीर्यमात्मन्नधत्त ततो वै सोऽभवदैन्द्रानैर्ऋतं त्रिपुँसकमाल-भेत बुभूषन् यो निर्ऋतिगृहीत इव मन्येत तस्य यदनवदानीयँ स्यात् तेन पूर्वेण प्रचरेद्दक्षिणा परेत्य स्वकृत इरिणे जुशाणा निर्ऋतिर्वेत् स्वाहेत्यथेतरं पुनरेत्यैन्द्रं संस्थापयेन्निर्ऋतिमेव पूर्वां निरव-दायाथैन्द्रेणेन्द्रियं वीर्यमात्मन् धत्ते भवत्यैवैन्द्रं विशालमृषभमालभेत संग्रामे यः कामयेतायँ संग्रामो न विजयेतेतीन्द्रो वै संग्रामस्य विनेतेन्द्रो विजापयिता तमेव भागधेयेनोपधावति स एनान् विनयति यद्विशालो वियतां तद्रूपमिन्द्राय वियनाय विशालमृषभमालभेत जनतयोस्संयर्षे यः कामयेतोभे जनते ऋच्छेयमित्युभे एव जनते ऋच्छति ते अन्यान्यां प्रती चरतो यद्विशाल आक्रस्कमेवैने गम-यति ॥५॥ ११-१२

आग्निवारुणीमनड्वाहीमालभेतानाज्ञातयक्ष्मगृहीतोऽनाज्ञातयक्ष्मा वा एतां विन्दो या स्त्री सत्य-

[६] मै. २,५,४ (४) । तै. सं. २,१,५।

नड्वाही तस्मादेनामनाज्ञातयक्ष्मगृहीत आलभेताग्निस्सर्वा देवता यदेवास्य देवताभिर्निषितं तदग्निना मुञ्चति यद्वरुणगृहीतं तद्वरुणेन यद्वाहिनी तेनाग्नेयी यत् स्त्री सती दान्ता तेन वारुणी तस्मादाग्नि-वारुणी भवति त्वाष्ट्रमँसेपादमालभेत पशुकामो मिथुनो वा एष योँऽसेपात्त्वष्टा मिथुनस्य प्रजनयिता तमेव भागधेयेनोपधावति सोऽस्मा एतस्मान्मिथुनात् पशुन् प्रजनयति वारुणँ श्यामशितिकण्ठमा-लभेत यं ज्येमानं यक्ष्मो गृह्णीयाद् रुणो वा एतं गृह्णाति यं ज्येमानं यक्ष्मो गृह्णाति यद् वारुणो वरुणादेवैनं मुञ्चति पाप्मनैष गृहीतो य आमयावी श्याम इव पाप्मा यच्छ्यामः पाप्मानमेवापहते यच्छितिकण्ठो वरुणपाशमेव तेन प्रमुञ्चत आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणँ सोमं पिपास-िपेदश्विनौ वै देवानामसोमपा आस्तां तौ पश्चात् सोमपीथं प्राप्नुतामश्विना एतस्य देवता यः पश्चात् सोमपस्ता एव भागधेयेनोपधावति ता एनँ सोमपीथाय परिणयतस्तायदिव यजेत स्तायदिव हि दुर्ब्राह्मणो ब्राह्मणो बुभूषति धूम्र इव वा एष यो दुर्ब्राह्मणो यद्धूम्रो धूम्रिमाणमेवापहते यल्ललामो मुखत एव तेन तेजो धत्ते सारस्वतीं धेनुष्टरीमालभेत यं भ्रातृव्या नीव श्वासयेरन् वाचा वा एत एतं निश्वासयन्ते वाक् सरस्वती यत् सारस्वती वाचैवैषां वाचं प्रतिशृणाति ॥ धेनुर्वा एषा सती न दुहे तस्माद्धेनुष्टर्युच्यते यद्धेनुष्टरी वाचमेवैषाँ स्तरीकरोति सारस्वतीं धेनुष्टरीमालभेत यमज-न्निवाँसमभिशँसेयुरशान्ता वा एतं वागृच्छति यमजन्निवाँसमभिशँसन्ति वाक् सरस्वती यत् सारस्वती वाचैवैषां वाचँ शमयति धेनुर्वा एषा सती न दुहे तस्माद्धेनुष्टर्युच्यते यद्धेनुष्टरी वाचमेवैषाँ स्तरी-करोति सावित्रं पुनरुत्सृष्टमालभेत यः पुरा पुण्यो भूत्वा पश्चात् पापीयान् स्याद्यया वा एष देवतया पुरा पुण्यो भवति सा हि वा एतमनुसृजत्यथैष पापीयान् भवति सविता श्रियः प्रसविता तमेव भागधेयेनोपधावति स एनं पुनश्श्रियै प्रसुवति पापो वा एष पुरा भूत्वा पश्चाच्छ्रियं प्राप्नोति योऽन-ड्वान् भूत्वोक्षा भवति यथैव स श्रियं प्राप्नोत्येवमेनँ श्रियं प्रापयति ॥६॥ १३-१४

त्रीँल्ललामानृषभान् वसन्तालभेत त्रीञ्छितिककुदो ग्रीष्मे त्रीञ्छितिभसदश्शरदि यल्ललामा मुखत एव तेन तेजो धत्ते यच्छितिककुदो मध्यत एव तेन रुचं धत्ते यच्छितिभसद उपरिष्टादेव तेन ब्रह्मवर्चसं धत्ते संवत्सरं पर्यालभ्यन्ते वीर्यं वै संवत्सरस्संवत्सरमेव वीर्यमाप्नोति नव भवंति नव प्राणाः प्राणानेवा-त्मन् धत्त ऐन्द्रास्स्युर्बुभूषन् यजेतासौ वा आदित्य इन्द्रस्स एतैरभवत् स एतैस्तेजो वीर्यमात्मन्नधत्त भवत्येव तेजो वीर्यमात्मन् धत्ते य एवं विद्वानेतैर्यजते प्राजापत्यँ सर्वरूपं दशममालभेत संवत्सरे पर्यंते संवत्सरस्याप्त्यै प्रजापतिर्योनिर्योना एव प्रतितिष्ठति ॥ सर्वरूपो भवति सर्वस्याप्त्यै सर्व-स्यावरुद्ध्यै दश भवन्ति दश प्राणाः प्राणा वीर्यं वीर्य एव प्रतितिष्ठति द्यावापृथिव्ये धेनू

[७] मै. २,५,४:७ (४,६) । तै. सं. २,१,५,७–८ ।

संमातरा आलभेतान्नकामो द्यावापृथिवी वा अन्नाद्यस्येशाते अमुतो वर्षत्यस्यां प्रतितिष्ठत्येते अन्नाद्यस्य प्रदात्री ते एव भागधेयेनोपधावति ते अस्मा अन्नाद्यं प्रयच्छतस्संमातरौ भवत-स्संमातरा इव हीमे एतयोरेव वायव्यं वत्सं च आलभेत वायुर्वा अनयोर्वत्सस्स इमे आप्या-ययति स प्रदापयति तमेव भागधेयेनोपधावति सोऽस्मा इमे प्रदापयति बार्हस्पत्यँ शिति-पृष्ठमालभेत ब्रह्मवर्चसकामो ब्रह्म वै बृहस्पतिर्बृहस्पतिर्ब्रह्मवर्चसस्य प्रदाता तमेव भागधेयेनो-पधावति सोऽस्मै ब्रह्मवर्चसं प्रयच्छति ॥ पृष्ठमिव वा एष भवति यो भवति यच्छितिपृष्ठः पृष्ठमेवैनं करोत्याश्विनं कृष्णललाममालभेतानुजावरोऽश्विनौ वै देवानामानुजावरौ ता अग्रं पर्यैताम-श्विना एतस्य देवता य आनुजावरस्ता एवान्वारभते ता एनमग्रं परिणयतः पाप्मनैष गृहीतो य आनुजावरः कृष्ण इव पाप्मा यद् कृष्णः पाप्मानमेवापहते यल्ललामो मुखत एव तेन तेजो धत्त आश्विनं कृष्णललाममालभेतामयाव्यश्विनौ वै देवानां भिषजा अश्विना एतस्य देवता य आम-यावी ता एव भागधेयेनोपधावति ता एनं भिषज्यतः पाप्मनैष गृहीतो य आमयावी कृष्ण इव पाप्मा यद् कृष्णः पाप्मानमेवापहते यल्ललामो मुखत एव तेन तेजो धत्ते ॥ त्वाष्ट्रं त्रिपुँसक-मालभेत प्रजाकामो वा पशुकामो वा प्रजापतिर्वै प्रजास्सिसृक्षमाणस्स द्वितीयं मिथुनं नाविन्दत स एतद्रूपं कृत्वाङ्गुष्ठेनात्मानँ समभवत् ततः प्रजा असृजत त्वष्टा मिथुनस्य प्रजनयिता तमेव भाग-धेयेनोपधावति सोऽस्मा एतस्मान्मिथुनात् पशून् प्रजनयत्येतेन वै रूपेण प्रजापतिः प्रजा असृजत येनैव रूपेण प्रजापतिः प्रजा असृजत तस्मादेव रूपात् प्रजया च पशुभिश्च प्रजायत ऐन्द्रं त्रिपुँसक-मालभेत यः षण्ढकल्वाटिर्भीषादिन्द्रो वा एतां त्वचमेतं पाप्मानमपाहत तमेव भागधेयेनोपधावति सोऽस्मात् तां त्वचं तं पाप्मानमपहन्त्यृषभो दक्षिणा वीर्यं वा ऋषभो वीर्यमेवास्मिन् दधाति॥७॥ १५-१८

छन्दाँसि वै यज्ञमभ्यमन्यन्त स वषट्कारोऽभ्यद्य गायत्र्याश्शिरोऽच्छिनत् ततो यो रसो-ऽस्रवत् सा वशाभवद्यत्प्रथममस्रवत् तद्वशाया वशात्वं यत् प्रथममस्रवल्लोहितं वाव तदस्रवत् तद्बृहस्प-तिरभ्यगृह्णात् सा या रोहिणी साभवत् तस्मात् सा बार्हस्पत्या यद् द्वितीयमस्रवत् तन्मित्रावरुणा उपागृह्णीतां सा या द्विरूपा साभवत् तस्मात् सा मैत्रावरुणी यत् तृतीयमस्रवत् तद्विश्वे देवा उपा-गृह्णन् सा या बहुरूपा साभवत् तस्मात् सा वैश्वदेवी ॥ यदुदौक्षत तद्बृहस्पतिरभ्यगृह्णात् स उक्षा-भवत् तदुक्ष्ण उक्षत्वं यदन्यमुच्यत तानीमान्यन्यानि रूपाणि बार्हस्पत्यां रोहिणीमालभेत ब्रह्मवर्चस-कामो रसेन वा एष व्यृध्यते योऽलं ब्रह्मवर्चसाय सन् ब्रह्मवर्चसी भवति च्छन्दसामेष रसो ब्रह्म बृहस्पतिर्ब्रह्मणैवास्मिंस्तेजो रसं दधाति ब्रह्मवर्चसी भवति मैत्रावरुणीं द्विरूपामालभेत वृष्टिकामो-

[८] मै. २,५,७ (९) । तै. सं. २,१,७–८ ।

ऽहोरात्रे वै मित्रावरुणा अहोरात्रे पर्जन्योऽनुवर्षति नक्तं वा हि दिवा वर्षत्येतौ वर्षस्येशाते ता एव भागधेयेनोपधावति ता अस्मै प्रीतौ वृष्टिं निनयतो मैत्रावरुणीं द्विरूपामालभेत प्रजाकामोऽहोरात्रे वै मित्रावरुणा अहोरात्रे प्रजा अनुप्रजायन्ते नक्तं वा हि दिवा वा प्रजायन्तेऽहोरात्रे एवैना अनुप्रजन-यति ॥ वैश्वदेवीं बहुरूपामालभेत कामेभ्यः कामा वै विश्वे देवास्तानेव भागधेयेनोपधावति तेऽस्मै स सर्वान् कामान् प्रयच्छन्ति बार्हस्पत्यमुक्षाणमालभेत बुभूषन् रसेन वा एष व्यृध्यते योऽलं भूत्यै सन्न भवति च्छन्दसामेष रसो ब्रह्म बृहस्पतिर्ब्रह्मणैवास्मिन् भूतिं रसं दधाति भवत्येव सौरीं श्वेतामाल-भेत रुक्कामोऽसौ वा आदित्यो रुचः प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै रुचं प्रयच्छति ब्राह्म-णस्पत्यां बभ्रूमभिचरन्नालभेत ब्रह्म वै ब्रह्मणस्पतिर्ब्रह्मणैवैनमाभिप्रयुङ्क्त एतद्वै ब्रह्मणो रूपं यद्बभ्रू रूपेणैवैनत्सँश्यति ॥८॥ १९-२१

धाता रातिस्सवितेदं जुषन्तां प्रजापतिर्वरुणो मित्रो अग्निः ।

त्वष्टा विष्णुः प्रजया संरराणा यजमानाय द्रविणं दधात ॥ २२

आवर्तय निवर्तया वर्तन वर्तय नि निवर्तन वर्तय ।

इन्द्र नन्दबल भूम्याश्चतस्रस्स्रक्त्यस्ताभ्यस्त्वा वर्तयामसि ॥ २३

वि ते भिनद्मि तकरिं वि योनिं वि परीणहम् ।

वि मातरं च पुत्रं च वि गर्भं च जरायु च ॥ २४

बहिष्टे अस्तु बालिति पुरुदस्मवद् विश्वरूपमिन्दुः पवमानो गर्भमानञ्ज धीरः ।

एकपादं द्विपादं त्रिपादं चतुष्पादं भुवनानुप्रथन्ताम् ॥ २५

गर्भो यस्ते यज्ञियो योनिर्यस्ते हिरण्ययः । अङ्गान्यह्रुता यस्य तं देवास्समचीक्लृपन्॥२६

मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ २७

नमो महिम्न उत चक्षुषे ते मरुतां पितरुत तद्गृणीमः ।

हुतो याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः ॥ २८

देवानामेष उपनाह आसीदपां पतिरोषधीनाम् ।

सोमस्य द्रप्समवृणीत पूषा बृहन्नद्रिरभवद्यत् तदासीत् ॥ २९

[९] मै. २,५,१०; १,३,३८; २,७,१६; ४,१०,३; ११,१ (१३—१६; १०७; १२५; ६४; ३१) तै. सं. ३,१,९, १०। वा. ८,१७,२९-३०,३१; १३,३१ । काण्व. ९,१६; २८-२९,३१, १४,३४ । [धाता रातिस्सवितेदं०। अथर्व. ७,१७,४ । मही द्यौः पृथिवी० । ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,९,३ । हुतो (सृता) याहि (०त) पथिभिर्देवयानैः । ऋ. ७,३८,८; अथर्व. ९,४,३ । तै. सं. १,७,८,२; ४,७,१२,१ । ओषधीषु प्रतितिष्ठा शरीरैः । ऋ. १०, १६,३, अथर्व. १८.२, ७; तै. सं. ४,६,३,३ । देवानामेष (०नां भाग) .. आसीत् (च्छरीरम्)। अथर्व. ९,४,५]

पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणाम् ।
गर्भो जरायुः प्रतिधुक् पीयूष आमिक्षा मस्तु घृतमस्य योनिः ॥ ३०
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥९॥ ३१

यदाष्टापद्यभूदित्यनुबुध्येत धाता रातिस्सवितेदं जुषन्तामिति स्रुवणाहवनीय उद्द्रुयादवनाम्य
एवैनाम्निवेदयत्यावर्तय निवर्तयेतीन्द्रमेव दिग्भ्य आवर्तयति प्रायश्चित्त्यै त्रि ते भिनद्मि तकरीमिति
प्रैव जनयत्यन्तरा श्रोणी निघ्नन्ति प्रजननाय पुरुदस्मवदिति पात्रमुपदधात्यस्कन्दायैकपाद् द्विपाद्
मिति प्रथयत्येव यदवद्येदवदानान्यतिरेचयेद्यन्नावद्येन् पशोरालब्धस्य नावद्येदानिमात्र्छेत् पुरस्ता-
दन्यद्बाभ्या अवद्येत् पश्चादन्यत् पुरस्ताद्धि नाभ्याः प्राणः पश्चादपान एतावान् वै पशुर्यावानेव
पशुस्तस्यावद्यत्यच्छम्बट्कारं यद्रसमवदानेषु व्यानयति तेनैव सर्वेषामङ्गानामवत्तं भवत्यष्टापृड्
हिरण्यं दक्षिणाष्टापदी वा एषात्मा नवमोऽष्टापृडमेतत्रेमिर्नवमः पशोरास्यै तृतीयेऽन्तरकोश उष्णी-
षेणावेष्टितं भवति विबिलानिव कोशान् कुर्यादेवमेव हि पशुर्लोम चर्म माँसमस्थि मज्जा पशुमेवाप्नोति
तद्विष्णवे शिपिविष्टाय जुहोति यो वै पशूनां भूमा यदतिरिक्तं तद्विष्णोश्शिपिविष्टमतिरिक्तं वा
एतदतिरिक्तँ शिपिविष्टमतिरिक्तेनैवातिरिक्तमाप्नोत्यथो अतिरिक्त एवातिरिक्तं दधाति ॥ गर्भो यस्त
यज्ञिय इति यज्ञियमेवैनं करोति योनिर्यस्ते हिरण्यय इति हिरण्ययमेवैनं करोत्यङ्गान्यहुता यस्य ते
देवास्समचीक्लृपन्निति समेवैनं कल्पयति मही द्यौः पृथिवी च न इति पशुश्रपण उपवपत्यनयोर्वा
एष गर्भोऽनयोरेवैनं प्रतिष्ठापयति नमो महिम्न उत चक्षुषे त इति व्यृद्धेन वा एष पशुना चरति
यस्यैतानि न क्रियन्ते यदेतानि करोति सर्वमेवैनँ सवीर्यँ सयोनिं सतनूमृद्ध्यै संभरति ॥१०॥
३२-३३

आ वायो भूष शुचिपा उप नस्सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ ३४

आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते चक्षुस्सू-
र्याय स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याँ स्वाहा किक्किटा ते वाचँ सरस्वत्यै स्वाहा किक्किटा ते
प्राणं वाताय स्वाहा ॥ ३५

[पिता वत्सानां०...योनिः (रेत) । अथर्व. ९,४,४ । द्रप्सश्चस्कन्द०...होत्राः ऋ. १०,१७,११; अथर्व. १८,४,२८]

[१०] तै. सं. ३,४,१ । (नवमानुवाके द्रष्टव्यम्) ।

[११] मै. १,३,६ (१०) । तै. सं. ३,४,२ । वा. ७,७, । काण्व. ७,६ । [आ वायो भूष शुचिपा० । ऋ. ७,९२, १; तै. सं. १,४,४,१; ३,४,२,१]

वशासि वशिनी सकृद्यत्ते मनसा गर्भमाशयत् ।
वशा त्वं वशिनी गच्छ देवान् सत्यास्सन्तु यजमानस्य कामाः ॥ ३६

अजासि रयिष्ठाः पृथिव्याँ सीद । ऊर्ध्वान्तरिक्षमुपतिष्ठस्व दिवि ते बृहद्भास्स्वाहा ॥ ३७

तन्तुं तन्वं रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयसि जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥ ३८

तपसो हविरसि प्रजापतेर्वर्णो गात्राणां ते गात्रभाग्भूयासँ सूर्यो दिवो दिविषद्भ्यो धाता क्षत्रस्य
वायुः प्रजानां बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मते ज्योतिष्मतीं जुहोतु स्वाहा ॥११॥ ३९

इमे वै सहास्तां ते वायुर्व्यवात् ते गर्भमदधातां ततोऽजा वशाजायत तामग्निरग्रसत तां प्रजा-
पतिरेतेन पुरोडाशेन निरक्रीणाद्यदाग्नेयः पुरोडाशो भवति निष्क्रीत्यै यद्वायुर्व्यवात् तस्माद्वायव्या यद्
द्यावापृथिवी गर्भमदधातां तस्माद् द्यावापृथिव्येमे वै सहास्तां ते यथा वेणू संधाय्येते एवँ समधा-
य्येताँ सा या वागासीत् साजा वशाभवत् तस्मात् सारस्वती भवत्यसौ वा आदित्य इमे अभ्यक्र-
न्दत् ते गर्भमदधातां ततोऽजा वशाजायत तस्मात् सौरी भवति वायव्यामालभेत बुभूषन् क्षिप्रा
देवताजिरं भूतिमुपैति द्यावापृथिव्यामालभेत कृषिमवस्यत् प्रतिष्ठा वा एतस्मा एष्टव्या यः कृषिम-
वस्यति यद् द्यावापृथिव्या द्यावापृथिव्योरेव प्रतितिष्ठति वर्षुकोऽस्मै पर्जन्यो भवति तामेतां कण्वा-
स्सौश्रवसा विदुस्सारस्वतीमालभेत यस्माद्वागपक्रामेद्वाग्वै सरस्वती सरस्वत्येतस्मादपक्रामति यस्मा-
द्वागपक्रामति यत् सारस्वती वाचमेवावरुन्द्धे तामेतां गर्भाः प्रावरेया विदुस्सौरीमालभेत रुक्कामो-
ऽसौ वा आदित्यो रुचः प्रदाता सोऽस्मै रुचं प्रयच्छति तामेतां यस्का गैरिक्षिता विदुराग्नेन्द्रीमा-
लभेत पुरोधाकाम आग्नेयो वै ब्राह्मण ऐन्द्रो राजन्यो ब्रह्म चैव क्षत्रं च सयुजौ करोति तामेतां कापेया
विदुरग्नीषोमीयामालभेतान्नकामोऽग्निर्वै देवानामन्नादस्सोमोऽन्नमग्निनैवान्नमत्ति सोमेनावरुन्द्धे ताम-
तामारुणयो विदुरा वायो भूष शुचिपा उपा न इति य एव प्राजनयत् तस्मादेनामध्यवरुन्द्ध आकूत्यै
त्वेत्याकूत्यै ह्येषालभ्यते कामाय त्वेति कामाय ह्येषालभ्यते समृधे त्वेति समृधे ह्येषालभ्यते किक्किटा
ते मनः प्रजापतये स्वाहेति प्रजापतिमेवास्या मनो गमयति किक्किटा ते चक्षुस्सूर्याय स्वाहेति सूर्य-
मेवास्याश्चक्षुर्गमयति किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याँ स्वाहेति द्यावापृथिवी एवास्याश्श्रोत्रं गमयति
किक्किटा ते वाचँ सरस्वत्यै स्वाहेति सरस्वतीमेवास्या वाचं गमयति किक्किटा ते प्राणं वाताय
स्वाहेति वातमेवास्याः प्राणं गमयति ॥ किक्किटा त इति जुहोति तस्मात् किक्किटाकारं ग्राम्याः

[१२] तै. सं. ३,४,३ ।

पशव उपतिष्ठन्ते किक्किटाकाराद्दारण्याः प्रत्रसन्ति पञ्चैतानि जुहोति पाङ्क्ताः पशवो यावानेव
पशुस्तँ स्वर्गं लोकं गमयति वशासि वशिनीत्याशिषमेवाशास्ते सकृद्यत्ते मनसा गर्भमाशयदिति प्रैव
जनयत्यजासि रयिष्ठाः पृथिव्याँ सीदेतीमानेवैनांल्लोकानामयत्यूर्ध्वान्तरिक्षमुपतिष्ठस्व दिवि ते बृह-
द्भास्स्वाहेति स्वर्गमेवैनांल्लोकान् गमयति तन्तुं तन्वं रजसो भानुमन्विहीत्याशिषमेवाशास्ते ज्योति-
ष्मतः पथो रक्ष धिया कृतानिति रक्षसामपहत्या अनुल्बणं वयसि जोगुवामप इत्यनुल्बणमेवैनां
तनुते मनुर्भव जनया दैव्यं जनमिति प्रैव जनयति तपसो हविरसि प्रजापतेर्वर्णो गात्राणां ते गात्र-
भाग्भूयासमित्याशिषमेवाशास्ते ॥ यदप्सु प्रवपति व्यृद्धिस्सा यदग्नौ जुहोति स्वगाकृतिस्सा यन्मेध
आलभते व्यृद्धा तेनाप्रजातेव तर्हि वीध्रसमृद्धा वा एषा वीध्र एवैतया यजेत त्रयाणां चाविपावरुद्धा
संवत्सरसदो गृहमेधिनस्सहस्रयाजिनस्त एवैतया यजेरन् सूर्यो देवो दिविषद्भ्यो धाता क्षत्रस्य वायुः
प्रजानां बृहस्पतिस्त्वा प्रजापतये ज्योतिष्मते ज्योतिष्मतीं जुहोतु स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनां
प्रजापतये ज्योतिष्मते ज्योतिष्मतीं जुहोति ॥१२॥ ४०-४२

अग्निर्वै जातो न व्यरोचत सोऽकामयत तेजस्वी स्यामिति सोऽग्नये तेजस्विनेऽजं कृष्णग्रीवमा-
लभत ततो वै स तेजस्व्यभवत् सोऽकामयत सर्वत्र विभवेयमिति सोऽग्नये विभुमतेऽजं कृष्णग्रीव-
मालभत ततो वै स सर्वत्र व्यभवत् सोऽकामयत सर्वत्रापिभागस्स्यामिति सोऽग्नये भागिनेऽजं
कृष्णग्रीवमालभत ततो वै स सर्वत्रापिभागोऽभवद्यः कामयेत तेजस्वी स्याँ सर्वत्र विभवेयँ सर्वत्रा-
पिभागस्स्यामिति स एतानाग्नेयानजान् कृष्णग्रीवानालभेत तेजस्व्येव भवति सर्वत्र विभवति सर्व- ४३
त्रापिभागो भवति ॥१३॥

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः ॥ ४४
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवस्सविता धर्म साविषत् ॥ ४५
अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिषु । अश्वा भवथ वाजिनः ॥ ४६
वायुर्वा त्वा मनुर्वा त्वा गन्धर्वास्सप्तविंशतिः ।
ते अग्रे अश्वमयुञ्जँस्ते अस्मिञ्जवमादधुः ॥ ४७

[१४] मै. १,११,१-२ (१—१४) । वा. ९,१,५—१०,१३-१८; ११,७; ३०,१; १८,३०; २२,१०—११ । [वाजस्य नु प्रसवे० । माध्य० काण्व. १०,१,७-१०, १४,१८-२४; २०,१; १२,७; ३४,१; २३,१०-१२ । वाजस्य नु प्रसवे० । ऋ. १,७३,१९; अथर्व. १,४,४; तै. सं. १,७,७,१; ७,३,४ । अप्स्वन्तरमृतमप्सु० । ऋ. १,२३,१९; अथर्व. १,४,४; तै. सं. १,७,७,१]

अपां नपादाशुहेमन्य ऊर्मिः प्रतूर्तिः ककुद्मान् । वाजसास्तेन वाजँ सेषम् ॥ ४८

देवस्य सवितुः प्रसवे सत्यसवस्य वर्षिष्ठं नाकं रुहेयं देवस्य वयँ सवितुः प्रसवे सत्यसवनस्य
बृहस्पतेर्वाजिनो वाजजितो वाजं जेष्म ॥ वाजं वाजिनो जयताध्वनस्स्कभ्नुवन्तो योजना मिमानाः
काष्ठां गच्छत ॥ ४९-५०

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवस्स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षाँसि सनेम्यस्मद्युयवन्नमीवाः ॥ ५१
वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ ५२
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्यवो महो ये धना समिथेषु जभ्रिरे ॥ ५३
एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवासु बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनुसँसनिष्यदत् पथामङ्कांस्यन्वापनीफणत् ॥ ५४
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनुवाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णस्सहोर्जा तरित्रतः ॥१४॥ ५५
त्वमिमा ओषधीस्सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ ५६
या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैस्सुमना अहेडन् राजन् सोम प्रति हव्या गृभाय ॥ ५७
सदा सुगः पितुमाँ अस्तु पन्था मध्वा देवा ओषधीस्संपिपृक्त ।
भगो मे अग्ने सख्ये न मृध्या उद्रायो अश्याँ सदनं पुरुक्षोः ॥ ५८

[शं नो भवन्तु० । ऋ. ७,३८,७; तै. सं. १,७,८,२; नि. १२,४४ । वाजे वाजेऽवत वाजिनो० । ऋ. ७,३८,८; तै. सं. १,७,८,२; ४,७,१२,१ । ते नो अर्वन्तो० । ऋ. १०,६४,६; तै. सं. १,७,८,२ । एष (उत) स्य वाजी० । ऋ. ४,४०,४; तै. सं. १,७,८,३; नि. २,२८ । उत स्मास्य द्रवत० । ऋ. ४,४०,३; तै. सं. १,७,८,३]

[१५] मै. ४,१४,१; १०,३; १२,१,६; ११,१; १३,५, १४,८; ९,१८; २,१३,२३ (४-५; ७६; १४९; ९; ३९; १०४; ८४; २३; २१६; ११७) । तै. सं. ५,७,२ । वा. ३४,२२, ७,३२, १९,५०, २७,४५ । काण्व. ३३,१३; ७,३२, २१,४९ । त्वमिमा ओषधीस्सोम० । ऋ. १,९१,२२; तै. ब्रा. २,८,३,१ । या ते धामानि दिवि० । ऋ. १,९१,४, तै. सं. २,३,१४,१; तै. ब्रा. २,८,३,२ । सदा सुगः पितुमाँ० । ऋ. ३,५४,२१]

स्वदस्व हव्या समिषो दिदीह्यस्मद्र्यक् संमिमीहि श्रवांसि ।
विश्वां अग्ने पृत्सु ताञ्जेषि शत्रूनहा विश्वा सुमना दीदिही नः ॥ ५९
आ यं ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥ ६०
सुकर्माणस्सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।
शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥ ६१
इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनि ॥ ६२
शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ ६३
विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥ ६४
ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यन्तु देवाः ॥ ६५
मही द्यौष्पृथिवी भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे ।
सुपेशसा द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ६६
शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे ।
शतं यो नश्शरदोऽनयदिन्द्रो विश्वस्य दुरितस्य पारम् ॥ ६७
इमे चत्वारो रजसो विमाना अन्तरा द्यावापृथिवी वियन्ति पन्थानः ।
तेषामज्यानिं यतमो न आवहात् तस्मै नो देवाः परिदत्त सर्वे ॥ ६८
वसन्तो ग्रीष्मो मधुमन्ति वर्षाश्शरद्धेमन्तस्सुविते दधात ।
तेषां वयं सुमतौ यज्ञियानां ज्योग्जीता अहतास्स्याम ॥ ६९
संवत्सराय परिवत्सरायेदावत्सरायानुवत्सरायोद्वत्सराय कृणुता बृहन्नमः ।
तेषां वयं सुमतौ यज्ञियानां निवात एषामभये स्याम ॥ ७०
इयं स्वस्तिस्संवत्सरीया परिवत्सरीयेदावत्सरीयानुवत्सरीयोद्वत्सरीया ।
सा नः पिपर्त्वहृणीयमानेनाह्नेदमहरशीय स्वाहा ॥ ७१

[स्वदस्व हव्या समिषो० । ऋ. ३,५४,२२ । आ यं ये अग्निमिन्धते० । ऋ. ८,४५,१; सा. १३३,१३३८; तै. ब्रा. २,४,५,७; नि. ६,१४ । सुकर्माणस्सुरुचो० । ऋ. ४,२,१७; अथर्व. १८,३,२२ । इयं वामस्य मन्मन० । ऋ. ७,९४,१; सा. ९१६ । शुचिं नु स्तोमं० । ऋ. ७,९३,१; तै. सं. १,१४,१; तै. ब्रा. २,४,८,३ । विश्वे देवा ऋतावृध० । ऋ. ६,५२,१० । तै. सं. २,४,१४,५ । ये के च ज्मा महिनो० । ऋ. ६,५२,१५ । तेषां (वयं) वयं सुमतौ यज्ञियानां (०पद्य) ० । ऋ. ६,४७,१३; १०,१३१,७; अथर्व. ७,९२,१; २०,१२५,७; तै. सं. १,७,१३,५; नि. ६,७]

आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ ७२
अग्निः प्राश्नातु प्रथमस्स हि वेद यथा हविः । शिवा अस्मभ्यमोषधीः करोतु विश्वचर्षणिः ॥ ७३
भद्रान्नश्श्रेयस्समनैष्ट देवास्त्वयावसेन समशीमहि त्वा ।
स नः पितो मधुमाँ आविशेह शिवस्तोकाय तन्वे न एधि ॥ ७४
एतमु त्यं मधुना संयुतं यवं सरस्वत्या अधि मनावचर्कृषुः ।
इन्द्र आसीत् सीरपतिश्शतक्रतुः कीनाशा आसन्मरुतस्सुदानवः ॥१५॥ ७५
शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥ ७६
एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ ।
संजानते मनसा संचिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥ ७७
ओषधीरिति मातरः ॥ ७८
या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ ७९
गावो भगो गाव इन्द्रो मे अच्छान् गावस्सोमस्य प्रथमस्य भक्षः ।
इमा या गावस्स जनास इन्द्र इच्छामीद्धृदा मनसा चिदिन्द्रम् ॥ ८०
न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुपयन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य विचरन्ति यज्वनः ॥ ८१
रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः । विश्वा अधि श्रियोऽधित ॥ ८२
उप ते गा इवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषी ॥ ८३

[आ नः प्रजां जनयतु० । ऋ. १०,८५,४३]
[१६] वा. ३६,१२; १२,७५,७८; ७,४१-४२; ८,४१; ३३,३१; १३,४६; ३४,८,१०, ११,६३ । काण्व. ३६,११; १३,७६,७९; ८,२३—२४; ९,६—७; ३२,३१; १४,४८; ३३,३—४; १२,६५ । [शं नो देवीरभिष्टय० । ऋ. १०,९,४; सा. ३३; अथर्व. १,६,१; तै. ब्रा. १,२,१,१; २,५,८,५; तै. आ. ४,४२,४ । एवेद्यूने युवतयो० । ऋ. १०,३०,६ । ओषधीरिति मातरः० । ऋ. १०,९७,४; तै. सं. ४,२,६,१; नि. ६,३ । या ओषधीः पूर्वा जाता० । ऋ. १०,९७,१; तै. सं. ४,२,६,१; नि. ९,२८ । गावो भगो गाव इन्द्रो० । ऋ. ६,२८,५; अथर्व. ४,२१,५; तै. ब्रा. २,८,८,१२ । न ता अर्वा रेणुककाटो० । ऋ. ६,२८,४; अथर्व. ४,२१,४; तै. ब्रा. २,४,६,९ । रात्री व्यख्यदायती० । ऋ. १०,१२७,१; तै. ब्रा. २,४,६,१० । उप ते गा इवाकरं० । ऋ. १०,१२७,८; तै. ब्रा. २,४,६,१०]

उदु त्यं चित्रं देवानाम् ॥ ८४
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि ।
इषे तोकाय नो दधः प्र ण आयूंषि तारिषः ॥ ८५
यत् ते नाम सुहवं सुप्रणीतेऽनुमते अनुमतं सुदानु ।
तेन त्वं सुमतिं देव्यस्मे इषं पिन्व विश्ववारं सुवीरम् ॥ ८६
राकामहं सुहवां सुष्टुती हुवे शृणोतु नस्सुभगा बोधतु त्मना ।
सीव्यत्वपस्सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् ॥ ८७
यास्ते राके सुमतयस्सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ॥ ८८
सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥ ८९
या सुबाहुस्स्वङ्गुरिस्सुषूमा बहुसूवरी । तस्यै विश्पत्न्यै हविस्सिनीवाल्यै जुहोतन ॥ ९०
कुहूमहं सुकृतं विद्मनापसमस्मिन् यज्ञे सुहवां जोहवीमि ।
या नो ददाति श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम ॥ ९१
कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्शृणोतु ।
स्वसा देवानां महयन्त्यस्मै रायस्पोषं चिकितुषे दधातु ॥ ९२
धाता दधातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन वावनत् ॥ ९३
प्रजापती रमयतु प्रजा इह धाता दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥१६॥ ९४

[९३८]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां पशुबन्धो नाम त्रयोदशं स्थानकं संपूर्णम् ॥१३॥

[उदु त्यं० । (९८ इति द्रष्टव्यम्) । चित्रं देवानाम्० । ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; तै. आ. ३,९; तै. आ. १,७,६; २,१३,१; नि. १२,१६ । अन्विदनुमते त्वं० । ऋ. खि. ३,४; अथर्व. ७,२०,२ । यत् ते नाम सुहवं० । अथर्व. ७,२०,४ । राकामहं सुहवां० । ऋ. २,३२,४; अथर्व. ७,४८,१; तै. सं. ३,३,११,५; नि. ११,३१ । यास्ते राके सुमतयः० । ऋ. २,३२,५; अथर्व. ७,४८,२; तै. सं. ३,३,११,५ । सिनीवालि पृथुष्टुके० । ऋ. २,३२,६; अथर्व. ७,४६,१; तै. सं. ३,१,११,३; नि. ११,३२ । या सुबाहुस्स्वङ्गुरि० । ऋ. २,३२,७; अथर्व. ७,४६,२; तै. सं. ३,१,११, ४; ३,१,११,४ । कुहूमहं सुकृतं (सुवृतं) ० । ऋ. खि. ३,१; अथर्व. ७,४७,१; तै. सं. ३,३,११,५ । कुहूर्देवानाममृतस्य० । ऋ. खि. ३,२; अथर्व. ७,४७,२; तै. सं. ३,३,११,५ । धाता दधातु नो रयिं० । ऋ. खि. ३,५; अथर्व. ७,१७,१—२; तै. सं. ३,३,११,३]

अथ चतुर्दशं स्थानकम् ।

वाजपेयम् ।

इन्द्राय वाचं वदतेन्द्राय वाचं संवदतेन्द्रं वाजं जापयतेन्द्र वाजं जय ॥ १
आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा चा मा सोमो अमृतत्वेन गम्यात् ॥ २
एषा वस्सा सत्या संवागभूद्यामिन्द्रेण समदध्वम् ।
अजीजपत वनस्पतय इन्द्रं वाजं विमुच्यध्वम् ॥ ३
वाजिनो वाजजितो वाजं जित्वा बृहस्पतेर्भागमवजिघ्रत वाजिनो वाजजितो वाजं जिगीवांसो
बृहस्पतेर्भागे निमृजतां पत्नी३ स्वो रोहावेहि स्वो रोहावेहि स्वो रोहाव स्वो रोहाव स्वो रोहाव
स्वो रोहावायुर्यज्ञेन कल्पतां मनो यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं
यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां
यज्ञो यज्ञेन कल्पतां स्वर्देवा अगन्म प्रजापतेः प्रजा अभूवन्नमृता अभूम वाजाय स्वाहा प्रसवाय
स्वाहापिजाय स्वाहा क्रतवे स्वाहा वाक्पतये स्वाहा वसवे स्वाहा स्वर्मूर्ध्ने स्वाहा मूर्ध्ने वैयश-
नाय स्वाहा व्यश्नुवन आन्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहा प्रजापतये
स्वाहाधिपतये स्वाहान्नाय त्वा वाजाय त्वा वाजजित्यै त्वा ॥१॥ ४
वाजस्य नु प्रसवस्सुषुवेऽग्रे सोमो राजौषधीष्वप्सु ।
ता अस्मभ्यं मधुमतीर्भवन्तु वयं राष्ट्रे जागृयाम पुरोहिताः ॥ ५
वाजस्येदं प्रसव आबभूवेमा विश्वा भुवनानि सर्वतः ।
अदित्सन्तं दापयति प्रजानन् सोमो रयिं सहवीरं नियंसत् ॥ ६
वाजस्य नु प्रसवश्शिश्रिये देवीमा विश्वा भुवनानि सम्राट् ।
स विराजा पर्येति प्रजानन् प्रजां पुष्टिं वर्धयमानो अस्मे ॥ ७
सोमं राजानमवस इन्द्रं दानाय चोदय । विष्णुं वाचं सरस्वतीं सवितारं च वाजिनम् ॥ ८
प्र नो यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः । प्र वाग्देवी ददातु नः ॥ ९

---

[१] मै. १,११,३ (१६) । वा. ९,११—१२,१९—२१ । काण्व. १०,१५—१७,२५—२८ ।
[२] मै. १,११,४ (१७—२६) । वा. ९,२३-३० । काण्व. १०,३२—३९ । वाजस्येदं प्रसव० । अथर्व. ३,२०,८ । सोमं राजानमवसे० । ऋ. १०,१४१,३; सा. ९१; अथर्व. ३,२०,४,७ तै. सं. १,७,१०,३ । प्र नो यच्छत्वर्यमा० । ऋ. १०,१४१,२; अथर्व. ३,२०,३; तै. सं. १,७,१०,२]

अग्ने अच्छा वदेह नः प्रत्यङ् नस्सुमना भव ।
प्र नो रास्व विशस्पते धनदा असि नस्त्वम् ॥ १०
इन्द्रवायू सुसंदृशा सुहवेह हवामहे । यथा नस्सर्व इज्जनस्संगमे सुमना असत् ॥ ११
सोमं राजानं वरुणमग्निमन्वारभामहे । आदित्यं विष्णुँ सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १२

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँ सरस्वत्या वाचा यन्तुर्यन्त्रेणेममुम-
मामुष्यायणममुष्याः पुत्रं बृहस्पतेस्साम्राज्येनाभिषिञ्चामीन्द्रस्य साम्राज्येनाभिषिञ्चामि ॥२॥ १३

उपयामगृहीतोऽसि ध्रुवदं त्वा नृषदमायुस्सदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपया-
मगृहीतोऽस्यप्सुषदं त्वा घृतसदं भूतसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतोऽसि
पृथिविषदं त्वान्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा ॥ उपयामगृहीतो-
ऽसि ग्रह विश्वजनीन न्यन्तर्विप्र आ सती ॥ १४-१५

यास्तिस्रः परमजा दैव्यः कोशस्समुब्जितः । तासां त्रिशिश्न्यानामिषमूर्जं समग्रभम् ॥ १६
एष ते योनिरिन्द्राय त्वोपयामगृहीतोऽसि ॥ १७
अपां रसमुदयँसँ सूर्ये शुक्रँ समाभृतम् । अपां रसस्य यो रसस्तं वो गृह्णाम्युत्तमम् ॥ १८
एष ते योनिरिन्द्राय त्वा ॥ १९
अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः ।
स प्रत्युदैद्धरुणं मध्वो अग्रँ स्वा यत् तनू तन्वमैरयत ॥ २०
उपयामगृहीतोऽसि प्रजापतये त्वैष ते योनिः प्रजापतये त्वा ॥ २१
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ २२
उपयामगृहीतोऽसि प्रजापतये त्वैष ते योनिः प्रजापतये त्वा ॥३॥ २३

अग्निरेकाक्षरामश्विनौ द्व्यक्षरां विष्णुस्त्र्यक्षराँ सोमश्चतुरक्षराँ सविता पञ्चाक्षरां पूषा षडक्षरां मरुत-
स्सप्ताक्षरां बृहस्पतिरष्टाक्षरां मित्रो नवाक्षरां वरुणो दशाक्षरामिन्द्र एकादशाक्षरां विश्वे देवा द्वाद-

[अग्ने अच्छा वदेह नः० । ऋ. १०,१४१,१; अथर्व. ३,२०,२; तै. सं. १,७,१०,२ । इन्द्रवायू सुसंदृशा० ।
ऋ. १०,१४१,४; अथर्व. ३,२०,६ । देवस्य त्वा सवितुः० अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]
[३] मै. १,११,४, (२६—३३) । । वा. ९,२—४; १०,३२; १९,६; २३,३८ । काण्व. १०,३—५; ११,४०;
२१,५; २५,४० । [कुविदङ्ग यवमन्तो० । ऋ. १०,१३१,२; अथर्व. २०,१२५,२; तै. सं. १,८,२१,१; ५,
२,११,२ तै. ब्रा. २,६,१,३]
[४] मै. १,११,१० (३९) । वा. ९,३१—३४ । काण्व. १०,४०—४३ । तै. सं. १,७,११ ।
पाठ० १८

शाक्षरां वसवस्त्रयोदशाक्षरां रुद्राश्चतुर्दशाक्षरामादित्याः पञ्चदशमदितिष्षोडशं प्रजापतिस्सप्तदशोऽ-
ग्निरेकाक्षरया वाचमुदजयदश्विनौ द्व्यक्षरया प्राणापाना उदजयतां विष्णुस्त्र्यक्षरया त्रीनिमांल्लोकानु-
दजयत् सोमश्चतुरक्षरया चतुष्पदः पशूनुदजयत् सविता पञ्चाक्षरया पञ्च दिश उदजयत् पूषा षड-
क्षरया षड्ऋतूनुदजयन्मरुतस्सप्ताक्षरया शक्वरीमुदजयन् बृहस्पतिरष्टाक्षरयाष्टौ दिश उदजयच्चतस्रो
दिशश्चतस्र उपदिशा मित्रो नवाक्षरया नव प्राणानुदजयद्वरुणो दशाक्षरया विराजमुदजयदिन्द्र एका-
दशाक्षरया त्रिष्टुभमुदजयद्विश्वे देवा द्वादशाक्षरया जगतीमुदजयन् वसवस्त्रयोदशाक्षरया त्रयोदशं
मासमुदजयन् रुद्राश्चतुर्दशाक्षरया चतुर्दश रात्रीरुदजयन् या इमा अन्तरार्धमासा आदित्याः पञ्च-
दशमदितिष्षोडशं प्रजापतिस्सप्तदशोऽग्निरेकाक्षरया मामुदजयदिमां पृथिवीमश्विनौ द्व्यक्षरया प्रमाम-
न्तरिक्षं विष्णुस्त्र्यक्षरया प्रतिमाँ स्वर्गं लोकँ सोमश्चतुरक्षरयास्त्रीन्नक्षत्राणि सविता पञ्चाक्षरया पङ्क्ति-
मुदजयद्या हाक्षरपङ्क्तिस्सा पङ्क्तिश्चतुर्धा हि तस्याः पञ्च पञ्चाक्षराणि ॥ पूषा षडक्षरया गाय-
त्रीमुदजयच्चतुर्धा हि तस्याष्षट् षडक्षराणि मरुतस्सप्ताक्षरयोष्णिहमुदजयँश्चतुर्धा हि तस्यास्सप्त सप्ता-
क्षराणि बृहस्पतिरष्टाक्षरयानुष्टुभमुदजयच्चतुर्धा हि तस्या अष्टा अष्टाक्षराणि मित्रो नवाक्षरया बृहतीमुद-
जयच्चतुर्धा हि तस्या नव नवाक्षराणि वरुणो दशाक्षरया विराजमुदजयदिन्द्र एकादशाक्षरया त्रिष्टु-
भमुदजयद्विश्वे देवा द्वादशाक्षरया जगतीमुदजयन् वसवस्त्रयोदशाक्षरया त्रयोदशं मासमुदजयन् रुद्रा-
श्चतुर्दशाक्षरया चतुर्दश रात्रीरुदजयन् या इमा अन्तरार्धमासा आदित्याः पञ्चदशमदितिष्षोडशं
प्रजापतिस्सप्तदशः ॥४॥ २४--२५

देवा वै नानैव यज्ञानपश्यन्निममहमिमं त्वमित्यथैतँ सर्वेऽपश्यँस्तस्मिन्नायतन्त तस्मिन्नाजिमयुस्तं
बृहस्पतिरुदजयद्बृहस्पतिर्वै देवानां पुरोहितो यद्वै पुरोहितो ब्रह्म शृणोति तद् राज्ञे तेनेन्द्रमयाजयत्
स स्वाराज्यमगच्छत् स एष स्वाराज्यो यज्ञस्स्वाराज्यं गच्छति य एतेन यजते यद्बृहस्पतिरुदजयत्
तस्माद्ब्राह्मणो यजेत यदिन्द्रमयाजयत् तस्माद्राजन्यो देवा वै नानैव यज्ञानाहरन्नथैतं प्रजापति-
राहरत् तस्मिन् देवा अपित्वमैच्छन्त तेभ्यश्छन्दाँस्युज्जितीः प्रायच्छदथैतेन प्रजापतिरयजत स
स्वाराज्यमगच्छत् स एष स्वाराज्यो यज्ञस्स्वाराज्यं गच्छति य एतेन यजतेऽन्नं वै वाजो य एवं
विद्वानन्नमत्ति वाजयत्येनँ सोमो वाजपेयो य एवं विद्वान् सोमं पिबति वाजमेव गच्छति यावन्तो
हि देवास्सोममपिबँस्ते वाजमगच्छँस्तस्मात् सर्व एव सोमं पिपासति वाग्वै वाजस्य प्रसवस्सा
वाग्दृष्टा चतुर्धा व्यभवदेषु लोकेषु त्रीणि तुरीयाणि पशुषु तुरीयं या दिवि सा बृहति सा स्तन-
यित्नौ यान्तरिक्षे सा वाते सा वामदेव्ये या पृथिव्याँ साग्नौ सा रथन्तरे या पशुषु तस्या यदत्य-
रिच्यत तां ब्राह्मणे न्यदधुस्तस्माद् ब्राह्मण उभे वाचौ वदति दैवीं च मानुषीं च करोति वाचा वीर्यं

[५] मै. १,११,५ (३४) ।

य एवं वेद ॥ या बृहद्रथन्तरयोस्तयैनं यज्ञ आगच्छति या पशुषु तयैनं यज्ञमाह वा एनमप्रति-
ख्याताद्गच्छति य एवं वेद यावती हि वाक्तां वेद वाचा हि दीयते वाचा प्रदीयते यो
गाथानाराशँसीभ्याँ सनोति तस्य न प्रतिगृह्यमनृतेन हि स सनोत्यनृतँ हि गाथानृतं नाराशँसी
मत्तस्य न प्रतिगृह्यमनृतँ हि मत्तो यदा हि सोऽमत्तो भवत्यथ तं तत्तुपति ॥ ५ ॥ २६-२७

सप्तदशैते द्वया ग्रहाः प्राजापत्यास्सप्तदशो वै पुरुषः प्राजापत्यश्चत्वार्यङ्गानि शिरोग्रीवमात्मा
वाक् सप्तथी दश प्राणा अङ्गेऽङ्गे वै पुरुषस्य पाप्मोपाश्लिष्टो यत्प्रतिपङ्क्तं ग्रहान् गृह्णात्यङ्गादङ्गा-
देवैनं पाप्मनो मुञ्चति श्रीर्वै सोमः पाप्मा सुरोपयामा यदागते काले ग्राव्णस्सोमैरुद्द्रवन्ति प्रत्यञ्च-
स्सुरोपयामैः पाप्मनैवैनं विपुनाति तस्मादाहुर्वाजपेययाजी त्वै पूत इति पाप्मना ह्येनं विपुनाति
पञ्चैते ग्रहा गृह्यन्ते पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्ध ऐन्द्रास्सर्वे भवन्त्येकधैवास्मिन्निन्द्रियं दधाति ॥
परं वा एतद्देवानामन्नं यत् सोमः परममेतन्मनुष्याणामन्नाद्यं यत् सुरा यत् सोमग्रहाश्च सुराग्रहाश्च
सह गृह्यन्ते परेणैवान्नेनावरमन्नाद्यमवरुन्द्धे ब्रह्मणो वा एतत् तेजो यत् सोमोऽन्नस्य शमलं
सुरा यत् सोमग्रहाश्च सुराग्रहाश्च सह गृह्यन्ते ब्रह्मण एव तेजसा तेज आत्मन् धत्तेऽन्नस्य
शमलेन शमलमपहते देवलोकमेव सोमग्रहैरभिजयति मनुष्यलोकँ सुराग्रहैरात्मानमेव सोमग्रहै-
स्स्पृणोति पत्नीँ सुराग्रहैस्तस्मादाहुर्वाजपेययाजी त्वा अमुष्मिंल्लोके संभवतीति यज्ञेन ह्यस्या-
मिजितं देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगायेति सावित्र्या परुषि परुषि जुहोत्युत्स-
न्नयज्ञो वा एष को ह तद्वेद यावदेतस्याधियन्ति यावन्न सर्वत्वायैव प्रसवाय वाजस्य नु प्रसवे
मातरं महीमिति रथमुपावहरतीयमदितिरनया चैव सवित्रा च प्रसूत उपावहरति वाजस्योज्जित्या
अप्स्वन्तरमृतमप्सु भेषजमित्यश्वान् पल्पूलयत्यप्सुजा वा अश्वस्स्वादेवैनान्योनेर्जनयत्यथो मेध्याने-
वैनान् यज्ञियान् करोति वायुर्वा त्वा मनुर्वा त्वेति युनक्ति न वा एतान्मनुष्यो योक्तुमर्हति देवता-
भिरेवैनान्युनक्त्यपां नपादाशुहेमन्निति रराटानि प्रतिमार्ष्टि पूर्वमेवोदितमनुवदति ॥६॥ २८-२९

सप्तदशस्सर्वो भवति सप्तदशः प्रजापतिः प्रजापतिमेवाप्नोति दुन्दुभीन्निर्ह्रादयन्ति वाग्वा एषैकारण्यं
प्राविशत् तामेवोज्जयति देवस्य सवितुः प्रसवे सत्यसवस्येति सवितृप्रसूत एव वज्रं रोहति देवस्य वयं
सवितुः प्रसवे सत्यसवनस्येति सवितृप्रसूत एव रथमभ्यातिष्ठति वाजस्योज्जित्यै ब्रह्मान्वेति प्रजापति-
र्वै ब्रह्मा यज्ञस्य प्रजापतिरिन्द्रमसुवत प्रजापतिरेवैनं वज्रादधि प्रसुवति साम गायति सत्यं वै साम
सत्येनैवैनमुज्जापयति वाजिनामृचोऽन्वाह वाजस्योज्जित्या अनुदिष्टे रथैर्धावन्ति दक्षिणया वै देवा-
स्स्वर्गं लोकमायन् यदनुदिष्टे रथैर्धावन्ति दक्षिणयैव स्वर्गं लोकमेति॥ दर्भमयं वासो भवति पवित्र-

[६] मै. १,११,६ (३५) । वा. ९,१,५—७, ११,७; ३०,१ । काण्व. १०,१,७,९—१०; १२,७; ३४,१ ।
[७] मै. १,११,६—७ (३५—३६) । वा. ९,९—१०,१२—१३,१९ । काण्व. १०,१३—१४,१७,२५-२६ ।

त्वायोज्जितीर्वाचयति वाग्वा उज्जितयो वाचमेवोज्जयति देवा वा ओषधीषु पक्वास्वाजिमयुस्ता बृह-
स्पतिरुदजयत् स नीवाराभिरवृणीत तन्नीवाराणां नीवारत्वं बृहस्पतिर्वा एतमुदजयत् तमेव भागिनं
करोति चात्वालेऽवदधातीह वा असा आदित्य आसीत् तं देवा आभ्यां परिगृह्यामुं लोकमगमयन्
स्वर्गस्य लोकस्य समष्ट्या आ मा वाजस्य प्रसवो जगम्यादिति पुनरागतेषु जुहोति यमेव ते वाज-
मुज्जयन्ति तमात्मन् धत्त एषा वस्सा सत्या संवागभूद्यामिन्द्रेण समदध्वम् ॥ अजीजपत वनस्पतय
इन्द्रं वाजं विमुच्यध्वमिति यजुषैव युज्यन्ते यजुषा विमुच्यन्ते वाजिनौ वाजजिता इति युग्या अव-
घ्रापयति भागिना एवैनौ करोति वाजिनो वाजजित इत्यनुदिशति सर्वानेवैनान् प्रीणाति ॥७॥
३०-३२

अर्धवशां च सुरोपयामाँश्च हरन्ति य आजिं धावन्ति तेभ्यो यमेव ते वाजमुज्जयन्ति तं तेन
परिक्रीणाति मधुष्ठालं ब्रह्मणे हरन्ति ब्रह्मण एव तेन परिक्रीणाति ककुभो राजपुत्रः प्राश्नाति वीर्यं
वै ककुब्वीर्यं राजपुत्रो वीर्य एवं वीर्यं दधाति पत्नी३ स्वो रोहावेति स्वरेव रोक्ष्यन् पत्न्या संवदते
पत्न्या एवैष यज्ञस्यान्वारम्भोऽथो मिथुनमेव यज्ञमुखे दधाति प्रजननायायुर्यज्ञेन कल्पतामित्ये-
तावान् वै पुरुषस्सर्व एव भूत्वा स्वर्गं लोकमेति गौधूमं चषालं भवति प्राजापत्या वै गोधूमा अर्षं
प्रत्योपधीनाँ सहैवान्नाद्येन स्वर्गं लोकमेति वाजाय स्वाहा प्रसवाय स्वाहेति त्रयोदशैता आहुतय-
स्त्रयोदश मासास्संवत्सरस्संवत्सरस्स्वर्गो लोकस्संवत्सरमेवास्मै स्वर्गं लोक उपाधात् तस्मिन्नधि
प्रतितिष्ठत्यूषपुटैरर्पयन्ति प्राजापत्या वा ऊषा अन्नाद्येनैवैनमर्पयन्त्येति वा एषोऽस्माल्लोकाद्योऽमुं
लोकं गच्छति यदूषपुटैरर्पयन्ति तेनास्माल्लोकान्नैति बस्ताजिनं च रुक्मं चाभ्यवरोहति पशवो वै
बस्ताजिनं यद्बस्ताजिनमभ्यवरोहति पशुष्वेव प्रतितिष्ठति तेजो हिरण्यं यद्रुक्ममभ्यवरोहति तेजस्येव
प्रतितिष्ठति शतमानो भवति शतायुर्वै पुरुषश्शतवीर्य आयुरेव वीर्यमवरुन्द्धे वाजप्रसव्याभिरन्नस्या-
न्नस्य जुहोत्यन्नाद्यस्यावरुद्ध्यै सप्तभिस्सप्त वै छन्दाँसि च्छन्दोभिरेवान्नाद्यमवरुन्द्धे वाग्वै छन्दाँसि
वाचैवान्नाद्यमवरुन्द्धे देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँ सरस्वत्या वाचा
यन्तुर्यन्त्रेणेममुमामुष्यायणममुष्याः पुत्रं बृहस्पतेस्साम्राज्येनाभिषिञ्चामीति यदि ब्राह्मणो यजेत
बृहस्पतिसवो ह्येष इन्द्रस्येति यदि राजन्य इन्द्रसवो ह्येषः ॥८॥ ३३

अथैतेऽतिग्राह्या यदेव परमन्नाद्यमनवरुद्धं तस्यावरुद्ध्या अथैते पशवो यज्ञक्रतूनामवरुद्ध्यै यदा-
ग्नेयोऽग्निष्टेतमं तेनाप्नोत्यग्निप्रतिष्ठानो ह्यग्निष्टोमो यदैन्द्राग्न उक्थानि तेनाप्नोत्यैन्द्राग्नानि ह्युक्थानि

[८] मै. १,११,७—८ (३६—३७) । वा. ९,२१; १८,२८—२९; २२,३२—३३ । काण्व. १०,२८; १०,४०,
४२; २४,४५—४६ । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]
[९] मै. १,११,९ (३८) । मा. श्रौ. ७,१,५,६ ।

यदैन्द्रष्षोडशिनं तेनाप्नोत्यैन्द्रो हि षोडश्यात्मानमेवाग्निष्टोमेन स्पृणोति प्राणापानावुक्थेन वीर्यं षोडशिनस्स्तोत्रेण वाचमतिरात्रेण प्रजां बृहत्स्तोत्रेणास्मिन्नेव लोकेऽग्निष्टोमेन प्रतितिष्ठत्यन्तरिक्ष उक्थेन स्वर्गे लोके षोडशिनस्स्तोत्रेण ये देवयानाः पन्थानस्तेष्वतिरात्रेण नाके बृहत्स्तोत्रेणैतावन्तो वै देवलोका यावन्त एव देवलोकास्तानाप्नोत्यथैषा सारस्वती मेषी यदेवादस्सप्तदशं स्तोत्रमत्यरिच्यत तस्यावरुद्ध्या अथैषा मारुती पृश्निर्वशा देवाश्च वा असुराश्चास्मिंल्लोक आसंस्ते देवा नेमेऽसुरास्ते देवा एतां मारुतीं पृश्निं वशामपश्यंस्तामालभन्त तया लोकं द्वितीयमवृञ्जतासुरलोकं यस्यावद्यन्ति स देवलोको यस्य नावद्यन्ति सोऽसुरलोको लोकमेवैतया द्वितीयं वृङ्क्ते भ्रातृव्यलोकं द्वितीये हि लोके भ्रातृव्यस्सारस्वत्येतेषां पशूनामुत्तमा भवति सारस्वत इतरेषां सप्तदशानामुत्तमो वाग्वै सरस्वती वाचैव यज्ञं संतनोति यद्वै विद्वान् यज्ञस्य न करोति यदविद्वानन्तरेति तच्छिद्रं तद्वाचैव सरस्वत्या कल्पयति सप्तदशैते प्राजापत्याः पशव आलभ्यन्ते सप्तदशः प्रजापतिः प्रजापतिमेवाप्नोत्येकरूपा भवन्त्येकधैवास्मिन् वीर्यं दधाति सारस्वत उत्तमो भवति वाग्वै सरस्वती वाच्येव प्रतितिष्ठति ॥ ९ ॥ ३४

रथन्तरं साम भवत्यौशीय ऊर्ज्या इयं वै रथन्तरमस्यामेवाप्यभिषिच्यते वियोनिर्वै वाजपेयोऽनिरुक्तस्सन् प्राजापत्योऽनिरुक्तसामा तेन वियोनिर्यदनिरुक्ताः प्रातस्सवास्तेन संयोनिरनिरुक्ताः प्रातस्सवा अनिरुक्तः प्रजापतिः प्रजापतिमेवाप्नोति वाजवतीभिर्माध्यंदिने स्तुवन्त्यन्नं वै वाजोऽन्नाद्यस्यावरुद्ध्यै चित्रवतीभिरार्भवे पवमाने स्वर्गस्य लोकस्य समष्ट्या आप्त्रादशमुत्तममुक्थानां भवत्युत्तर एवं स्तोत्रं अभिसंतनोति बृहद् साम भवति यद्वा अतिरिच्यतेऽमुं तल्लोकमभ्यतिरिच्यते बृहत्त्वा अमुं लोकमाप्नुवन्तीन्द्रियं वीर्यं बृहदिन्द्रिय एवं वीर्ये प्रतितिष्ठति वैष्णवीषु शिपिविष्टवतीषु स्तुवन्त्येषा वै प्रजापतेः पशूनामतनूर्या शिपिविष्टवती तस्माच्छिपिविष्टवतीषु स्तुवन्त्यतिरिक्तं वा एतदतिरिक्तं शिपिविष्टमतिरिक्तेनैवातिरिक्तमाप्नोति ॥१०॥ ३५

[९७३]

इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां वाजपेयं नाम चतुर्दशं स्थानकं संपूर्णम् ॥१४॥

[१०] मै. १,११,९ (३८) । मा. श्रौ. ७,१,५,६ ।

अथ पञ्चदशं स्थानकम् ।

श्रीराजसूयम् ।

अनुमत्या अष्टाकपालो धेनुर्दक्षिणा ये प्रत्यञ्चश्शम्यामतिशीयन्ते स नैर्ऋत एककपालो भवति ता उभौ सह शृतौ कुर्वन्ति तयोर्नैर्ऋतेन पूर्वेण प्रचरन्ति दक्षिणा परेत्य स्वकृत इरिण एकोल्मुकं निधाय विस्रंसिकायाः काण्डाभ्यां जुहोति जुषाणा निर्ऋतिर्वेतु स्वाहा वासो भिन्नान्तं दक्षिणा-स-उदञ्चोऽवशीयन्ते तानुदक् परेत्य वल्मीकवपामुद्धृत्य जुहोतीदमहममुष्यामुष्यायणस्य क्षेत्रियमवयजे स्वाहेदमहममुष्यामुष्यायणस्य क्षेत्रियमपिदधामीत्यपिदधात्यादित्येभ्यो भुवद्वद्भ्यो घृते चरुर्वरो दक्षिणाग्रावैष्णव एकादशकपालोऽनड्वान् वामनो दक्षिणाग्नीषोमीय एकादशकपालो हिरण्यं दक्षिणैन्द्राग्न एकादशकपाल ऋषभोऽनड्वान् दक्षिणाग्नेयोऽष्टाकपालो महेन्द्रीयं दधि वासः क्षौमं दक्षिणा सौम्यश्श्यामाकश्चरुर्बभ्रुः पिङ्गलो दक्षिणैन्द्राग्नो द्वादशकपालो वैश्वदेवश्चरुर्द्यावापृथिव्य एककपालो वत्सः प्रथमजो दक्षिणा ॥१॥ १

आग्नेयोऽष्टाकपालस्सौम्यश्चरुस्सावित्रोऽष्टाकपालस्सारस्वतश्चरुः पौष्णश्चरुर्वायवे नियुत्वते पयो वा यवागूर्वैन्द्राय शुनासीराय द्वादशकपालस्सौर्य एककपाल उष्टारौ दक्षिणा सीरं वा द्वादशायोगमाग्नेयोऽष्टाकपालो वारुणो यवमयो दशकपालो रौद्रो गावीधुकश्चरुरैन्द्रं सान्नाय्यं धेनुरनड्वाही दक्षिणापां न्ययनादपामार्गानाहरन्ति तान् सक्तून् कुर्वन्ति तान् पर्णमयेन स्रुवेण जुहोति दक्षिणा परेत्य स्वकृत इरिणे देवस्य सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिन्द्रस्यौजसा रक्षोहासि स्वाहा हतं रक्षोऽवधिष्म रक्षो वरो दक्षिणा ॥ ये देवाः पुरस्सदोऽग्निनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यस्स्वाहा ये देवा दक्षिणात् सदो यमनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यस्स्वाहा ये देवाः पश्चात् सदो मरुन्नेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यस्स्वाहा ये देवा उत्तरात् सदो मित्रावरुणनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यस्स्वाहा ये देवा उपरिषदस्सोमनेत्रा अवस्वद्वन्तो रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यस्स्वाहा ॥ इदमहं रक्षोऽभिसंमूहाम्यग्ने संदह रक्षस्संदग्धं रक्षोऽग्नये पुरस्सदे रक्षोघ्ने स्वाहा यमाय दक्षिणात् सदे रक्षोघ्ने स्वाहा मरुद्भ्यः पश्चात् सद्भ्यो रक्षोहभ्यस्स्वाहा मित्रावरुणाभ्यामुत्तरात् सद्भ्यां रक्षोहभ्यां स्वाहा सोमायोपरिषदेऽवस्वद्वते रक्षोघ्ने स्वाहा रथः पञ्चवाही दक्षिणा ॥ २ ॥ २-४

[१] मै. २,६,१–२ (१-८) । तै. सं. १,८,१; २,६,१ । वा. २९,६०; ३,१०; ९,३५ । काण्व. ३१,४९; ३,११-१२ । शत. ब्रा. ५,२,३,२; मा. श्रौ. ९,१,१ ।

[२] मै. २,६,३ (९-१२) । तै. सं. १,८,७ । वा. ९,३५—३६,३८ । काण्व. ११,१-४ । शत. ब्रा. ५,२,४,५ । मा. श्रौ. ९,१,१. । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

अनुमत्यै चरू राकायै चरुस्सिनीवाल्यै चरुः कुह्वै चरुर्धात्रे द्वादशकपालः पष्ठौह्यप्रवीता दक्षिणा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यस्स्वाहाद्भ्यस्स्वाहौषधीभ्यस्स्वाहा वनस्पतिभ्यस्स्वाहा पतयद्भ्यस्स्वाहा परिप्लवेभ्यस्स्वाहा चराचरेभ्यस्स्वाहा सरीसृपेभ्यस्स्वाहाग्नावैष्णव एकादशकपाल ऐन्द्रावैष्णवश्चरुर्वैष्णवस्त्रिकपालो वामनो दक्षिणा सौमापौष्णश्चरुरैन्द्रापौष्णश्चरुः पौष्णश्चरुश्श्यामो दक्षिणाग्नये वैश्वानराय द्वादशकपालो हिरण्यं दक्षिणा वारुणो यवमयश्चरुरश्वो यभ्रुर्दक्षिणा ॥ ३ ॥ ५

बार्हस्पत्यश्चरुः पुरोहितस्य गृहे शितिपृष्ठो दक्षिणैन्द्र एकादशकपालो राज्ञो गृह ऋषभो दक्षिणादित्यै चरुर्महिष्या गृहे धेनुर्दक्षिणा नैर्ऋतश्चरुः कृष्णानां व्रीहीणां नखनिर्भिन्नानां परिवृक्त्या गृहे कृष्णा कूटा वण्डापस्फुरा दक्षिणाग्नेयोऽष्टाकपालस्सेनान्यो गृहे हिरण्यं दक्षिणाश्विनो द्विकपालस्संग्रहीतुर्गृहे सवात्यौ दक्षिणा सावित्रोऽष्टाकपालः क्षत्तुर्गृहे श्येतो दक्षिणा वारुणो यवमयो दशकपालस्सूतस्य गृहे बभ्रुर्महानिरष्टो दक्षिणा मारुतस्सप्तकपालो वैश्यस्य ग्रामण्यो गृहे पृश्निः पष्ठौही दक्षिणा पौष्णश्चरुर्भागदुघस्य गृहे श्यामो दक्षिणा रौद्रो गावीधुकश्चरुरक्षावपस्य च गोव्यच्छस्य च गृहेऽसिर्वालावृतो वध्रिर्वालप्रतिग्रथिता भरासी दामभूषा वत्सतरो वा शबलो दक्षिणेन्द्राय सुत्राम्ण एकादशकपाल इन्द्रायांहोमुच एकादशकपालो राज्ञो गृह ऋषभो दक्षिणा ॥ ४ ॥ ६

स्वयमवपन्नाया अश्वत्थशाखायाः पात्रं भवति श्वेतां श्वेतवत्सां दुहन्ति तत् स्वयं मूर्च्छति स्वयं मथ्यते स्वयं विलीयतेऽथ मैत्राबार्हस्पत्यं हविर्निर्वपति तान् द्वेधा तण्डुलान् विभजति ये क्षोदीयांसस्तं बार्हस्पत्यं चरुं शृतं कुर्वन्ति स यदा शृतो भवत्यथ तत् पात्रमाश्वत्थमपिधाय पवित्रवत्याज्यमानयति तत् स्वयंपत्त आवपति स मैत्रश्चरुस्स्वयंशृतो भवत्यर्धं वेद्याः कुर्वन्त्यर्धं स्वयंकृतमर्धं बर्हिषो दान्त्यर्धं स्वयंदिनमर्धमिध्मस्य कुर्वन्त्यर्धं स्वयंकृतं शितिपृष्ठो बार्हस्पत्यस्य दक्षिणाश्वो मैत्रस्य सा वै श्वेता श्वेतवत्साग्नये गृहपतय आशूनामष्टाकपालस्सवित्रे प्रसवित्रे सतीनानामष्टाकपालस्सोमाय वनस्पतये श्यामाकश्चरुर्बृहस्पतये वाचस्पतये नैवारश्चरुरिन्द्राय ज्येष्ठाय हायनाना-

[३] मै. २,६,४ (१३) । तै. सं. १,८,८ । शत. ब्रा. ५,२,५ । मा. श्रौ. ९,१,१ । वा. ३९,१—२; २२,२७-३०। काण्व. ३९,१; २४,३९-४१,४३ । [पृथिव्यै स्वाहा । अथर्व. ५,९,२; ६ । अन्तरिक्षाय स्वाहा । अथर्व. ५,९,३—४ । दिवे स्वाहा । अथर्व. ५,९,१,५ । सूर्याय स्वाहा । अथर्व. १९,४३,३ । चन्द्रमसे स्वाहा । अथर्व. १९,४३,४ । स्वाहाद्भ्यस्स्वाहौषधीभ्यः । अथर्व. १९,४३,७]

[४] मै. २,६,५—६ (१४-१६) । तै. सं. १,८,९-१० । शत. ब्रा. ५,३,१—२; २,४; ३,२ । मा. श्रौ. ९,१, १-२ ।

[५] मै. २,६,६ (१५-१६) । तै. सं. १,८,९—१० । वा. ९,३९-४०; १०,१८; १७,८०,८१-८३ । काण्व. ११, ९-१०,६६; १८,८०,८१-८३ । शत. ब्रा. ५,३,२,३; ५,३,३,२ । मा. श्रौ. ९,१,१—७ ।

मेकादशकपालो मित्राय सत्यस्य पतय आम्बानां चरुर्वरुणाय धर्मणस्पतये यवमयो दशकपालो रुद्राय पशुपतय गावीधुकश्चरुस्सविता त्वा प्रसवानां सुवतामग्निर्गार्हपत्यानां सोमो वनस्पतीनां बृहस्पतिर्वाचामिन्द्रो ज्यैष्ठ्यानां मित्रस्सत्यानां वरुणो धर्मणां रुद्रः पशूनां ते देवा असपत्नमिमं सुवध्व महते क्षत्राय महते ज्यैष्ठ्याय महते राज्याय महते जानराज्याय महते विश्वस्य भुवनस्याधिपत्याय ॥५॥ ७

देवीरापो अपां नपाद्राष्ट्रदास्स्थ राष्ट्रं दत्त स्वाहा वृषोर्मिरसि राष्ट्रदास्स्थ राष्ट्रं दत्त स्वाहा वृषसेनोऽसि राष्ट्रदास्स्थ राष्ट्रं दत्त स्वाहापां पतिरसि राष्ट्रदास्स्थ राष्ट्रं दत्त स्वाहा प्रहावरीस्स्थ परिवाहिणीस्स्थौजस्विनीस्स्थ व्रजक्षितस्स्थ सूर्यवर्चसस्स्थ सूर्यत्वचसस्स्थ मान्दास्स्थ वशास्स्थ शक्करीस्स्थ मरुतामोजस्स्थ जनभृतस्स्थ विश्वभृतस्स्थानाधृष्टास्स्थापामोषधीनां रसश्श्रविष्ठास्स्थ राष्ट्रदास्स्थ राष्ट्रं दत्त स्वाहा ॥ ८

अपो देवीर्मधुमतीरगृभ्णामूर्जस्वती राजसूयाश्चितानाः ।
याभिर्मित्रावरुणा अभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः ॥ ९
देवीरापो मधुमतीस्संसृज्यध्वं महि क्षत्रं क्षत्रियाय वन्वानाः ।
अनाधृष्टास्सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीः ॥ १०

अनिभृष्टमसि वाचो बन्धुस्तपोजास्सोमस्य दात्रं शुक्रा वश्शुक्रेण पुनामि चन्द्रा वश्चन्द्रेण पुनामि देवो वस्सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिस्स्वाहा राजसूयाः ॥ ११

सधमादो द्युम्न्या ऊर्ज एका अनाधृष्टा अपस्यो वसानः ।
पस्त्यासु चक्रे वरुणस्सधस्थमपां शिशुर्मातृतमास्वन्तः ॥ १२

रुद्र यत्ते क्रिवि परं नाम तस्मै हुतमसि यमेष्टमसि स्वाहा सोम इन्द्रो वरुणो मित्रो अग्निस्ते देवा धर्मधृतो धर्मं धारयन्तां तेऽस्मै वाचं सुवन्ताम् ॥६॥ १३

क्षत्रस्य योनिरसि क्षत्रस्योल्बमसि क्षत्रस्य नाभिरस्याविद आवेदयताविन्नो अग्निर्गृहपतिराविन्न इन्द्रो वृद्धश्रवा आविन्नौ मित्रावरुणौ धृतव्रता आविन्ने द्यावापृथिवी ऋतावृधा आविन्ना देव्यदितिराविन्नः पूषा विश्ववेदा आविन्नोऽयमसावामुष्यायणोऽमुष्याः पुत्रोऽमुष्यां विश्येष ते जनतं

[६] मै. २,६,७-८ (१७-२४) । वा. ६,२७; १०,१—४,६-७,२० । काण्व. ६,३९; १०,८; ११,५—८, १३—१४,३० ।

[७] मै. २,६,९-११ (२५-३०) । वा. १०,५,८-१६,१८-१९,२२,२३,२६; २०,२; ९,५,४०; २१,६,२०,२७, ३९,१ । काण्व. ११,१०,१२-१३,१५—२४,२६,२८,३२,३३,३६; २२,९३; २४,६,३७; ३९,१ । तै. सं. १,८, १०-१५ । शत. ब्रा. ५,३,५,८-९, २०; ५,४,२,३—७; ५,४,२,५ ।

राजा सोमो अस्माकं ब्राह्मणानां राजेन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्याच्छत्रुबाधनास्स्थ
पात प्राचः पात प्रतीचः पातानूचः पात तिरश्चो मित्रोऽसि वरुणोऽसि ॥ १४

हिरण्यवर्णमुषसो व्युष्टा अयस्स्थूणमुदितौ सूर्यस्य ।
आरोहथो वरुण मित्र गर्तं तत्र चक्राथे अदितिं दितिं च ॥ १५

समिधमातिष्ठ गायत्री त्वा छन्दसावतु त्रिवृत्स्तोमो रथन्तरँ सामाग्निर्देवता ब्रह्म द्रविणमुग्रा-
मातिष्ठ त्रिष्टुप्त्वा छन्दसावतु पञ्चदशस्स्तोमो बृहत् सामेन्द्रो देवता क्षत्रं द्रविणं प्राचीमातिष्ठ जगती
त्वा छन्दसावतु सप्तदशस्स्तोमो वैरूपँ साम मरुतो देवता विड् द्राविणमुदीचीमातिष्ठानुष्टुप् त्वा छन्द-
सावत्वेकविंशस्स्तोमो वैराजँ साम मित्रावरुणौ देवता पुष्टं द्रविणमूर्ध्वामातिष्ठ पङ्क्तिस्त्वा छन्दसा-
वतु ॥ त्रिणवत्रयस्त्रिंशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो द्रविणँ सोमस्य त्विषिरसि
त्विषिमाँ असि तवेव मे त्विषिर्भूयात् प्रत्यस्तं नमुचेश्शिरोऽवेष्टा दन्दशूका मृत्योः पाहि दियोत्पा-
ह्यग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय
स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाँशाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा सोमस्य
त्वा द्युम्नेनाग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण विश्वेषां त्वा देवानां क्रतुनाभिषिञ्चाम्यति
दिवस्पाहीन्द्रस्य योनिरसि जनय ॥ १६-१७

समाववृत्रन्नधरागुदक्ता अहिं बुध्न्यमन्वीयमानाः ।
ताः पर्वतस्य वृषभस्य पृष्ठे नावो वियन्ति सुषिचो न वाणीः ॥७॥ १८

इन्द्रस्य वज्रोऽसि वाजसास्त्वयायँ वाजँ सेन्मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि विष्णोः
क्रमोऽसि मरुतां प्रसवे जयासि मनस्समिन्द्रियेणैष वज्रो वाजसातमस्तेन नौ पुत्रो वाजँ सेदियदस्या-
युरस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्ङसि वर्चोऽसि वर्चो मे धेहि मित्रोऽसि वरुणोऽसि सं विश्वै-
र्देवैर्नमो मात्रे पृथिव्यै ॥ १९

प्रति त्यन्नाम राज्यमधायि स्वां तन्वं वरुणोऽसुषोत् ।
शुचेर्मित्रस्य व्रत्या अभूमामन्महि महद्वतस्य नाम ॥ २०
सर्वे व्राता वरुणस्याभूवन्वि मित्रयुरस्तीनतारीत् ।
अशूशुभन्त यज्ञिया ऋतेन नि त्रितो नो जरिमाणमानट् ॥ २१

[अग्नये स्वाहा । अथर्व. १९,४३,१ । सोमाय स्वाहा । अथर्व. १९,४३,५ । समावृत्र० (ता अधरादु-दीचीरावृत्र) न वाणीः (पुराणीः) । अथर्व. ११,२,४१]

[८] मै. २,६,११-१३ (३१—४४) । वा. ९,५; १०,५,२०,२३—२८; ११,६,१०,२७,२३.६५; १२,१४; ३९,१ । काण्व. ११,१२-१३,३३-४०; १३,१५; ११,२९; २५,६७; २४,६,३७; ३९,१ । [इयदस्यायुर्मे धेहि (वाः) । अथर्व. २,१७,४]

स्योनासि सुषदासि स्योनामासीद सुषदामासीद ॥ २२
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥ २३
अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुतामोजसे स्वाहा॥२४
हँसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ २५

ब्रह्मा३स्त्वं ब्रह्मासि सवितासि सत्यसवो ब्रह्मा३स्त्वं ब्रह्मासि मित्रोऽसि सुशेवो ब्रह्मा३स्त्वं
ब्रह्मासीन्द्रोऽसि सत्यौजा ब्रह्मा३स्त्वं ब्रह्मासि वरुणोऽसि विश्वौजा एष वज्रस्तेन मे रध्य दिशो
अभ्युभूदयम् ॥ २६

प्रजापते नहि त्वदन्य एता विश्वा जातानि परि ता बभूव ।
यत् कामास्ते जुहुमस्तन्नो अस्तु ॥ २७
असा अमुष्य पुत्रोऽमुष्यासौ पुत्रः । वयँ स्याम पतयो रयीणाम् ॥ २८
अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाग्नये गृहपतये स्वाहा ॥८॥ २९

सावित्रोऽष्टाकपालश्श्येतो दक्षिणा सारस्वतश्चरुः पष्ठौह्यप्रवीता दक्षिणा पौष्णश्चरुश्श्यामो दक्षिणा
बार्हस्पत्यश्चरुश्शितिपृष्ठो दक्षिणैन्द्र एकादशकपाल ऋषभो दक्षिणा वारुणो यवमयो दशकपालो
बभ्रुर्महानिरष्टो दक्षिणा त्वाष्ट्रोऽष्टाकपालश्शुण्ठो दक्षिणाग्नेयोऽष्टाकपालस्सौम्यश्चरुर्वैष्णवस्त्रिकपाल
आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणैन्द्र एकादशकपाल ऋषभो दक्षिणा ॥ वैश्वदेवश्चरुर्धेनुः पिशङ्गी
दक्षिणा मैत्रावरुण्यामिक्षा वशा दक्षिणा बार्हस्पत्यश्चरुश्शितिपृष्ठो दक्षिणाग्नेयोऽष्टाकपालस्सौम्यश्चरु-
स्सावित्रोऽष्टाकपालो बार्हस्पत्यश्चरुरग्नये वैश्वानराय द्वादशकपालस्त्वाष्ट्रोऽष्टाकपालो दक्षिणो रथ-
वाहनवाहो दक्षिणा सारस्वतश्चरुः पौष्णश्चरुर्मैत्रश्चरुर्वारुणश्चरुरदित्यै चरुः क्षेत्रस्य पतये चरुरितरो
रथवाहनवाहो दक्षिणा सवित्रे द्वादशकपालोऽश्विभ्यां पूष्ण एकादशकपालस्सरस्वत्यै सत्यवाचे
चरुस्तिसृधन्वँ शुष्कदृतिर्दण्ड उपानहौ तद्दक्षिणाश्वो वा शोणकर्णः ॥९॥ ३०-३१

त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यंदिनः पवमानस्सप्तदशानि पृष्ठानि सप्तदश
आर्भवः पवमान एकविंशोऽग्निष्टोमश्चतुस्त्रिंशाः पवमाना अभिषेचनीयस्य पञ्चदशान्याज्यानि सप्त-

[निषसाद धृतव्रतो० । ऋ. १,२५,१०; तै. सं. १,८,१६,१; तै. ब्रा. १,७,१०,२; २,६,५,१ । अग्नये स्वाहा । अथर्व. १९,४३,१ । सोमाय स्वाहा । अथर्व. १९,४३,५ । हँसश्शुचिषद्वसु० । ऋ. ४,४०,५; तै. सं. १,८,१५,२; ४,२,१,५; तै. आ. १०,१०,२ । प्रजापते नहि (नत्वदेता०) । ऋ. १०,१२१,१०; अथर्व. ७,७९,४; ८०,३; तै. सं. १,८,१४,२; ३,२,५,६; तै. ब्रा. २,८,१,२; ३,५,७,१; नि. १०,४३]

[९] मै. २,६,१३ (४५) । वा. २९,६० । काण्व. ३१,४९ । शत. ब्रा. ५,४,५,६; मा. श्रौ. ९,१,५ ।

दशानि पृष्ठान्येकविंशोऽग्निष्टोमश्चोक्थानि च सप्तदशो दशपेयस्सर्व एकविंशं बहिष्पवमानं केशवप-
नीयस्य सप्तदशान्याज्यानि सप्तदशो माध्यंदिनः पवमानः पञ्चदशानि पृष्ठानि पञ्चदश आर्भवः
पवमानस्त्रिवृदग्निष्टोमश्चोक्थानि चैकविंशष्षोडशी पञ्चदशी रात्री त्रिवृत्सन्धिरथैष द्विरात्रो व्युष्टि-
स्तस्य यावन्ति संवत्सरस्याहोरात्राणि तावतीस्स्तोत्रीयाः ॥१०॥ ३२

युञ्जानः प्रथमं मनस्तत्वाय सविता धियः। अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत्॥३३
युक्तेन मनसा वयं देवस्य सवितुस्सवे । स्वर्ग्यया शक्त्या ॥ ३४
युक्त्वाय सविता देवान् स्वर्यतो धिया दिवम् ।
बृहज्ज्योतिः करिष्यतस्सविता प्रसुवाति तान् ॥ ३५
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ ३६
युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ ३७
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः ।
यः पार्थिवानि विममे स एतशो रजाँसि देवस्सविता महित्वना ॥ ३८
देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ॥ ३९
दिव्यो गन्धर्वः केतपः केतं पुनातु वाचस्पतिर्वाचं नस्स्वदतु ॥ ४०
इमं मे देव सवितर्यज्ञं प्रणय देवाव्यम् । सखिविदँ सत्राजितं धनजितँ स्वर्विदम् ॥ ४१
ऋचा स्तोमँ समर्धय गायत्रेण रथन्तरम् । बृहद्गायत्रवर्तनि ॥११॥ ४२
प्र देवं देव्या धिया भरता जातवेदसम् । हव्या नो वक्षदानुषक् ॥ ४३
अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते । रथो न योरभीवृतो घृणीवाञ्चेतति त्मना ॥ ४४

[११] मै. २,७,१ (१—८) । वा. ११,१—८; ५,१४; ३७,२; ९,१; ३०,१ । काण्व. १२,१-८; ५,१०; ३७,२; तै. सं. १,२,१३,१; ४,१,१,१; तै. आ. ४,२,१ । युञ्जते मन उत० । ऋ. ५,८१,१; १०,२१; ३४,१ । [युञ्जते मन उत० । ऋ. ५,८१,१; तै. सं. ४,१,१,२ । यस्य प्रयाणमन्वन्य० । ऋ. ५,८१,३; वां ब्रह्म० । ऋ. १०,१३,१; अथर्व. १८,३,३९; तै. सं. ४,१,१,२ (९१—९७; १-०, २२५, ६१—९१; ३३) । का. ३४, तै. सं. ४,१,१,२]

[१२] मै. २,७,२६; ४,१०,३—४; ४,११,१; १३,१; (९१—९७; १-०, २२५, ६१—९१; ३३) । का. ३४, १५; ११,३५-३६, ४२; ४,१०; ८,३२; १३, ३२; ११,३१—३४; १५,२२; ३१,१६ । काण्व. ३३,९; १२, ३५-३६,४२; ४,१३; ९,३१; १४ ३४; १२,३१—३४; १६,४३; ३५,१६ । [प्र देवं देव्या धिया० । ऋ. १०,१७६,२; तै. सं. ३,५,११,२] अयमु ष्य प्र देवयुः । ऋ. १०,१७६,३; तै. सं. ३,५,११,२ ।

अयमग्निरुरुष्यत्यमृतादिव जन्मनः । सहसश्चित् सहीयान् देवो जीवातवे कृतः ॥ ४५
इडायास्त्वा पदे वयं नाभा पृथिव्या अधि ।
जातवेदो निधीमह्यग्ने हव्याय वोढवे ॥ ४६
अग्ने विश्वेभिस्स्वनीक देवैरूर्णावन्तं प्रथमस्सीद योनिम् ।
कुलायिनं घृतवन्तँ सवित्रे यज्ञं नय यजमानाय साधु ॥ ४७
सीद होतर्नि होता ॥ ४८
त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन् दीद्यद्बोधि गोपाः ॥ ४९
अञ्जन्ति त्वामध्वरे देवयन्तो वनस्पते मधुना दैव्येन ।
यदूर्ध्वस्तिष्ठाद् द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥ ५०
उच्छ्रयस्व वनस्पते वर्ष्मन् पृथिव्या अधि । सुमिती मीयमानो वर्चो धा यज्ञवाहसे ॥ ५१
समिद्धस्य श्रयमाणः पुरस्ताद्ब्रह्म वन्वानो अजरँ सुवीरम् ।
आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगाय॥ ५२
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ५३
ऊर्ध्वो नः पाह्यँहसो नि केतुना विश्वँ समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः ॥ ५४
युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥ ५५
अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन् भागमीमहे ॥ ५६

[अयमग्निरुरुष्यति० । ऋ. १०,१७६,४; तै. सं. ३,५,११,१ । इड(ळा)यास्त्वा पदे वयं० । ऋ. ३,२९,४; तै. सं. ३,५,११,१ । अग्ने विश्वेभिस्स्वनीक० । ऋ. ६,१५,१६; तै. सं. ३,५,११,२ । सीद होत:० । ऋ. ३,२९,८; तै. सं. ३,५,११,२; ४,१,३,३ । नि होता० । ऋ. २,९,१; तै. सं. ३,५,११,२; ४,१,३,१ । त्वं दूतस्त्वमु नः० । ऋ. २,९,२; तै. सं. ३,५,११,२ । अञ्जन्ति त्वामध्वरे० । ऋ. ३,८,१; तै. ब्रा. ३,६,१,१, नि. ८,१८ । उच्छ्रयस्व वनस्पते० । ऋ. ३,८,३; तै. ब्रा. ३,६,१,१ । समिद्धस्य श्रयमाणः० । ऋ. ३,८,२; तै. ब्रा. ३,६,१,१ । ऊर्ध्व ऊ षु ण ऊतये० । ऋ. १,३६,१३; सा. ५७; तै. सं. ४,१,४,२; तै. ब्रा. ३,६,१,२ । ऊर्ध्वो नः पाह्यंहसो० । ऋ. १,३६,१४; तै. ब्रा. ३,६,१,२ । युवा सुवासाः परीवीत० । ऋ. ३,८,४; तै. ब्रा. ३,६,१,३ । अभि त्वा देव सवित:० । ऋ. १,२४,३; तै. सं. ३,५,११,३]

मही द्यौः पृथिवी च नस्त्वामग्ने पुष्करादधि तमु त्वा दध्यङ्ङृषिस्तमु त्वा पाथ्यो वृषाग्नी
रक्षाँसि सेधत्युत श्रुवन्तु जन्तवः ॥ ५७

आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति । विशामग्निं स्वध्वरम् ॥ ५८

प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ निषीदतु ॥ ५९

आ जातं जातवेदसि प्रियं शिशीतातिथिम् । स्योन आ गृहपतिम् ॥ ६०

अग्निनाग्निस्समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥ ६१

त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन् सता । सखा सख्या समिध्यसे ॥ ६२

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु । स्वेषु क्षयेषु वाजिनम् ॥ ६३

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकं महिमानस्सचन्त यत्र पूर्वे साध्यास्सन्ति देवाः ॥ १२ ॥ ६४

होता यक्षदग्निं समिधा सुषमिधा समिद्धं नाभा पृथिव्यास्संगथे वामस्य वर्ष्मन् दिव इडस्पदे वेत्वा-
ज्यस्य होतर्यज होता यक्षत् तनूनपातमदितेर्गर्भं भुवनस्य गोपां मध्वाद्य देवो देवेभ्यो देवयानान्
पथो अनक्तु वेत्वाज्यस्य होतर्यज होता यक्षदग्निमिड ईडितो देवो देवाँ आ वक्षद्दूतो हव्यवाडमूर
उपेमं यज्ञमुपेमां देवो देवहूतिं वेत्वाज्यस्य होतर्यज होता यक्षद्बर्हिस्सुष्टरीमोर्णम्रदा अस्मिन् यज्ञे
वि च प्र च प्रथताँ स्वासस्थं देवेभ्य एमेनदद्य वसवो रुद्रा आदित्यास्सदन्तु प्रियमिन्द्रस्यास्तु
वेत्वाज्यस्य होतर्यज होता यक्षद्दुर ऋष्वाः कवष्यो कोषधावनीरुदाताभिर्जिहतां वि पक्षोभिश्श्रयन्ताँ
सुप्रायणा अस्मिन् यज्ञे विश्रयन्तामृतावृधो व्यन्त्वाज्यस्य होतर्यज होता यक्षदुषासानक्ता बृहती
सुपेशसा नॄः पतिभ्यो योनिं कृण्वाने संस्मयमाने इन्द्रेण देवैरेदं बर्हिस्सीदतां वीतामाज्यस्य होत-

[मही द्यौः पृथिवी० । ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,९,३ । त्वामग्ने पुष्करादध्य० । ऋ. ६,१६,१३; सा. ९; तै. सं. ३,५,११,३; ४,१,३,२; ४,४,१ । तमु त्वा दध्यङ्ङृषि० । ऋ. ६,१६, १४; तै. सं. ३,५,११,३; ४,१,३,२ । तमु त्वा पाथ्यो वृषा० । ६,१६,१५; तै. सं. ३,५,११,४; ४,१,३,३; अग्नी रक्षांसि सेधति० । ऋ. ७,१५,१०; अथर्व. ८,३,२६; तै. ब्रा. २,४,१,६ । उत श्रुवन्तु जन्तवः० । ऋ. १,७४,३; सा. १३८०; तै. सं. ३,५,११,४ । आ यं हस्ते न खादिनं० । ऋ. ६,१६,४०; तै. सं. ३,५,११,४ । प्र देवं देववीतये० । ऋ. ६,१६,४१; तै. सं. ३,५,११,४ । आ जातं जातवेदसि० । ऋ. ६,१६,४२; तै. सं. ३,५,११,४ । अग्निनाग्निस्समिध्यते० । ऋ. १,१२,६; सा. ८४४; तै. सं. १,४,४६,३; ३,५,११,५; तै. ब्रा. २,७,१२,३ । त्वं ह्यग्ने अग्निना० । ऋ. ८,४३,१४; तै. सं. १,४,४६,३; ३,५,११,५ । तं मर्जयन्त सुक्रतुं० । ऋ. ८,८४,८; तै. सं. ३,५,११,५ । यज्ञेन यज्ञमयजन्त० । ऋ. १,१६४,५०; १०,९०,१६; अथर्व. ७,५,१; तै. सं. ३,५,११,५; तै. आ. ३,१,७; शत. ब्रा. १०,२,२,२]

[१२] मै. ४,१३,२, (१०) । वा. २८,१-१०,२६-३६; २१,२९-४० । काण्व. ३०,१—१०,२४—३४; २३,३०-४१ । तै. ब्रा. ३,६,२ ।

र्यज होता यक्षद्दैव्या होतारा मन्द्रा पोतारा कवी प्रचेतसा स्विष्टमद्यान्यः करत् स्वभिगूर्तमन्यस्स्व-
तवसेमं यज्ञं दिवि देवेषु धत्तां वीतामाज्यस्य होतर्यज होता यक्षत् तिस्रो देवीरपसामपस्तमा अच्छि-
द्रमद्येदमपस्तन्वतां देवेभ्यो देवीर्देवमपो व्यन्त्वाज्यस्य होतर्यज होता यक्षत् त्वष्टारमचिष्टुमपाकं
रेतोधां विश्रवसं यशोधां पुरुरूपमकामकर्शनँ सुपोषः पोषैस्स्यात् सुवीरो वीरैर्वेत्वाज्यस्य होतर्यज
होता यक्षद्वनस्पतिमुपावस्रक्षद्धियो जोष्टारँ शशमन्नरस्स्वदात् स्वधितिर्ऋतुथाद्य देवो देवेभ्यो हव्य-
वाड्वेत्वाज्यस्य होतर्यज होता यक्षदग्निं स्वाहाज्यस्य स्वाहा मेदसस्स्वाहा स्तोकानाँ स्वाहा स्वाहा-
कृतीनाँ स्वाहा हव्यसूक्तीनाँ स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु होतर्यज ॥१३॥
६५

[१०३८]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां श्रीराजसूयं नाम पञ्चदशं स्थानकं संपूर्णम् ॥१५॥

अथ षोडशं स्थानकम् ।

अग्निवीशिका ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसि गायत्रेण च्छन्दसा
पृथिव्यास्सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभर त्रैष्टुभेन च्छन्दसाभ्रिरसि नार्यसि त्वया वयमग्निं शकेम
खनितुँ सधस्थ आ जागतेन च्छन्दसा ॥ १

हस्त आधाय सविता बिभ्रदभ्रिं हिरण्ययीम् । अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ २

आनुष्टुभेन च्छन्दसा ॥ ३

प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् । दिवि ते जन्म परममन्तरिक्षे तव नाभिः ॥ ४

पृथिव्यामधि योनिरित् ॥ ५

युञ्जाथाँ रासभं युवमस्मिन् यामे वृषण्वसू । अग्निं भरन्ता अस्मयुम् ॥ ६

योगे योगे तवस्तरं वाजे वाजे हवामहे । सखाय इन्द्रमूतये ॥ ७

प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्ये मयोभूरेहि । उर्वन्तरिक्षं वीहि ॥ ८

स्वस्ति गव्यूतिरभयानि कृण्वन् पूष्णा सयुजा सह पृथिव्यास्सधस्थादग्निं पुरीष्यमङ्गिरस्वदा-
भराग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामोऽग्निं पुरीष्यमङ्गिरस्वद्भरामः ॥१॥ ९

[१] मै. २,७,१-२ (१—१९) । वा. ११,९—१६ । काण्व. १२,९—१६ । मा. श्रौ. ६,१,१ । तै. सं. ४,१,२—३ ।
[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७ । योगे योगे तवस्तरं० । ऋ. १,३०,७; सा. १६३, ७४३; अथर्व. १९,२४,७; २०,२६,१; तै. सं. ४,१,२,१]

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।

अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥ १०

आगत्य वाज्यध्वानं सर्वा मृधो विधूनुत । अग्निं सधस्थे महति चक्षुषा निचिकीषते ॥ ११

आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् ।

भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम् ॥ १२

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षँ समुद्रो योनिः ।

विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः ॥ १३

उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन् ।

वयँ स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः ॥ १४

उदक्रमीद् द्रविणोदा वाज्यर्वाकस्सु लोकँ सुकृतं पृथिव्याः ।

ततः खनेम सुप्रतीकमग्निं स्वो रुहाणा अधि नाक उत्तमे ॥ १५

जिघर्म्यग्निं मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।

पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नं रभसं विदानम् ॥ १६

आ त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषेथाः ।

मर्यश्रीस्स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्हृषाणः ॥ १७

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ १८

परि त्वाग्ने पुरं वयं विप्रँ सहस्य धीमहि । धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् ॥ १९

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।

त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥२॥ २०

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्यास्सधस्थे अग्निं पुरीष्यमङ्गि-
रस्वत् खनामि ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतँ शिवं प्रजाभ्यो अहिंसन्तं पृथि-
व्यास्सधस्थे ॥ अग्निं पुरीष्यमङ्गिरस्वत् खनामि ॥ २१-२२

[२] मै. २,७,२ (१९—२९) । वा. ११,१७—२७ । काण्व. १२,१७—२७ । तै. सं. ४,१,२,३ । मा. श्रौ. ६,१,१ ।
[अन्वग्नि (प्रत्यग्नि) रुषसा० । ऋ. ४,१३,१; अथर्व. ७,८२,४—५; १८,१,२७—२८ । जिघर्म्यग्निं मनसा (हविषा)० । ऋ. २,१०,४; तै. सं. ४,१,२,४ । आ त्वा (विश्वतः) जिघर्मि (प्रत्यञ्चं)० । ऋ. २,१०,५; तै. सं. ४,१,२,५ । परि वाजपतिः० । ऋ. ४,१५,३; सा. ३०; तै. सं. ४,१,२,५; तै. ब्रा. ३, ६,४,१ । परि त्वाग्ने पुरं वयं० । ऋ. १०,८७,२२; अथर्व. ७,७१,१; ८,३,२२; तै. सं. १,५,६,४; ४,१,२,५ । त्वमग्ने द्युभिस्त्वमाशु० । ऋ. २,१,१; तै. सं. ४,१,२,५; तै. आ. १०,७६,१; खि. ६,१; १३,१]
[३] मै. २,७,२—३ (३०-४१) । वा. ११,२८-३७ । काण्व. १२,२८-३७ । मा. श्रौ. ६,१,१ । तै. सं. ४,१,३-३ ।
[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

अपां पृष्ठमसि योनिरग्नेस्समुद्रमभितः पिन्वमानम् ।

वर्धमानो महाँ आ च पुष्करे दिवो मात्रया वरिणा प्रथस्व ॥ २३

शर्म च स्थो वर्म च स्थो अच्छिद्रे बहुले उभे ।

व्यचस्वती संवसाथां भर्तमग्निं पुरीष्यम् ॥ २४

संवसाथाँ स्वर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ॥ २५

पुरीष्योऽसि विश्वभराः ॥ अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥ २६-२७

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ २८

तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् ॥ २९

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणे रणे ॥ ३०

सीद होतस्स्व उ लोके चिकित्वान् सादया यज्ञँ सुकृतस्य योनौ ।

देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ ३१

नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असदत् सुदक्षः ।

अदब्धव्रतप्रमतिर्वसिष्ठस्सहस्रंभरश्शुचिजिह्वो अग्निः ॥ ३२

सँसीदस्व महाँ असि शोचस्व देववीतमः ।

वि धूममग्ने अरुषं विविग्धि सृज प्रशस्त दर्शतम् ॥ ३३

जनिष्ट हि जेन्यो अग्रे अह्नाँ हितो हितेष्वरुषो वनेषु ।

दमे दमे सप्त रत्ना दधानोऽग्निर्होता निषसादा यजीयान् ॥३॥ ३४

अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः ।

तासामास्थानादुज्जिहतामोषधयस्सुपिप्पलाः ॥ ३५

सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम् ।

यो देवानां चरसि प्राणथेन तस्मै देव वषडस्तु तुभ्यम् ॥ ३६

सुजातो ज्योतिषा शर्म वरूथमासदत्स्वः । वासो अग्ने विश्वरूपँ संव्ययस्व विभावसो ॥ ३७

[त्वामग्ने पुष्करादध्य० । ऋ. ६,१६,१३; सा. ९; तै. सं. ३,५,११,३; ४,१,३,२; ४,४,१ । तमु त्वा दध्यङ्० । ऋ. ६,१६,१४; तै. सं. ३,५,११,३; ४,१,३,२ । तमु त्वा पाथ्यो० । ऋ. ६,१६,१५; तै. सं. ३, ५,११,४; ४,१,३,३ । सीद होतस्स्व उ लोके० । ऋ. ३,२९,८; तै. सं. ३,५,११,२; ४,१,३,३ । नि होता होतृषदने० । ऋ. २,९,१; तै. सं. ३,५,११,२; ४,१,३,३ । सँसीदस्व महाँ असि० । ऋ. १,३६,९; तै. सं. ४,१,३,३; तै. आ. ४,५,२ । जनिष्ट हि जेन्यो अग्रे० । ऋ. ५,१,५; तै. सं. ४,१,३,४]
[४] मै. २,७,४ (४५-६१) । वा. ११,३८—५२; ३६,१४—१६ । काण्व. १२,३८—५३, ३६,१४-१६]

उदु तिष्ठ स्वध्वरावा नो देव्या कृपा ।
दृशे च भासा बृहता सुशुक्वभिराग्ने याहि सुशस्तिभिः ॥ ३८
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ३९
स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु ।
चित्रश्शिशुः परि तमाँस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गाः ॥ ४०
स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः ॥ ४१
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी अभिशुचो मान्तरिक्षं मा वनस्पतीन् ॥ ४२
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरा ॥ ४३
वृषाग्निं वृषणं भरन्नपां गर्भँ समुद्रियम् । अग्न आयाहि वीतये ॥ ४४
ऋतँ सत्यमृतँ सत्यम् ॥ ४५
ओषधयः प्रतिगृह्णीताग्निमेतँ शिवमायन्तमभ्यत्र युष्मान् ।
व्यस्यन् विश्वा अनिरा अमीवा निषीदन्नो अप दुर्मतिं जहि ॥ ४६
ओषधयः प्रतिमोदध्वं पुष्पवतीस्सुपिप्पलाः ।
अयं वो गर्भ ऋत्वियः प्रत्नँ सधस्थमासदत् ॥ ४७
वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः ।
सुशर्मणो बृहतश्शर्मणि स्यामग्नेरहँ सुहवस्य प्रणीतौ ॥ ४८
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ ४९
यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ ५०
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥४॥ ५१

[उदु तिष्ठ स्वध्वरावा० । ऋ. ८,२३,५; तै. सं. ४,१,४,१ । ऊर्ध्व ऊ षु ण ऊतये० । ऋ. १,३६,१३; सा. ५७; तै. सं. ४,१,४,१; तै. ब्रा. ३,६,१,२ । स जातो गर्भो असि० । ऋ. १०,१,२; तै. सं. ४,१,४,२ । अग्न आयाहि वीतये० । ऋ. ६,१६,१०; सा. १,६६०; तै. सं. २,५,७,३; २,५,८,१; तै. ब्रा. ३,५,२,१ । वि पाजसा पृथुना० । ऋ. ३,१५,१; तै. सं. ४,१,५,१ । आपो हि ष्ठा मयो० । ऋ. १०,९,१; सा. १८३७; अथर्व. १,५,१; तै. सं. ४,१,५,१; ५,६,१,४; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,११; नि. ९,२७ । यो वश्शिवतमो० । ऋ. १०,९,२; सा. १८३८; अथर्व. १,५,२; तै. सं. ४,१,५,१; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,११ । तस्मा अरं गमाम० । ऋ. १०,९,३; सा. १८३९; अथर्व. १,५,३; तै. सं. ४,१,५,१; ५,६,१,४; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,१२]

पाठ० २०

मित्रस्सँसृज्य पृथिवीं भूमिं च ज्योतिषा सह ।
सुजातं जातवेदसमयक्ष्माय त्वा सँसृजामि प्रजाभ्यः ॥ ५२
रुद्रास्सँसृज्य पृथिवीं बृहज्ज्योतिस्समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥ ५३
सँसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् ।
हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु ताम् ॥ ५४
सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥ ५५
उखां करोतु शक्त्या बाहुभ्यामदितिर्धिया ।
माता पुत्रं यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥ ५६
मखस्य शिरोऽसि वसवस्त्वा कुर्वन्तु गायत्रेण च्छन्दसाङ्गिरस्वद् ध्रुवासि पृथिव्यसि धारया
मयि प्रजां रायस्पोषं गौपत्यँ सुवीर्यँ सजातान् यजमानाय रुद्रास्त्वा कुर्वन्तु त्रैष्टुभेन च्छन्दसा-
ङ्गिरस्वद् ध्रुवास्यन्तरिक्षमसि धारया मयि प्रजां रायस्पोषं गौपत्यँ सुवीर्यँ सजातान् यजमानाया-
दित्यास्त्वा कुर्वन्तु जागतेन च्छन्दसाङ्गिरस्वद् ध्रुवासि द्यौरसि धारया मयि प्रजां रायस्पोषं गौपत्यँ
सुवीर्यँ सजातान् यजमानाय विश्वे त्वा देवा वैश्वानराः कुर्वन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वद् ध्रुवासि
दिशोऽसि धारया मयि प्रजां रायस्पोषं गौपत्यँ सुवीर्यँ सजातान् यजमानायादित्या रास्नास्यदिति-
स्ते बिलं गृह्णातु ॥ ५७
कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये । तां पुत्रेभ्यस्संप्रायच्छददितिश्श्रपयानिति॥५८
वसवस्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वदा-
दित्यास्त्वा धूपयन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेन च्छन्द-
साङ्गिरस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयतु ॥५॥ ५९
अदितिस्त्वा देवी विश्वदेव्यावती पृथिव्यास्सधस्थे अङ्गिरस्वत् खनत्ववट देवानां त्वा पत्नी-
र्देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थे अङ्गिरस्वद्दधतूखे धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्या-
स्सधस्थे अङ्गिरस्वदभीन्धतामुखे वरुत्रीस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थे अङ्गिरस्वच्छ्रप-
यन्तूखे ग्नास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थे अङ्गिरस्वत् पचन्तूखे जनयस्त्वाच्छिन्नपत्रा
देवीर्विश्वदेव्यावतीः पृथिव्यास्सधस्थे अङ्गिरस्वत् पचन्तूखे ॥ ६०

[५] मै. २,७,५-६ (६२-६९) । वा. ११,५३-६०; ३७,८ । काण्व. १२,५४-६१; ३७,८ । तै. सं. ४,१,४-६ । मा. श्री. ६,१,२-२ ।
[६] मै. २,७,६ (६९-७४) । वा. ११,६१-६५ । काण्व. १२,६२-६६ । तै. सं. ४,१,६; ४,१,९-१० । मा. श्री. ६,१,२—३ ।

मित्रस्य चर्षणीधृतश्श्रवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ६१
देवस्त्वा सवितोद्वपतु सुपाणिस्स्वङ्गुरिः । सुबाहुरुत शक्त्या ॥ ६२
अव्यथमाना पृथिव्यामाशा दिश आपृण । उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम् ॥ ६३
मित्रैतां त उखां परिददाम्यभित्त्या एषा मा भेदि वसवस्त्वाच्छृन्दन्तु गायत्रेण च्छन्दसाङ्गिर-
स्वद्रुद्रास्त्वाच्छृन्दन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वदादित्यास्त्वाच्छृन्दन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्वे
त्वा देवा वैश्वानरा आच्छृन्दन्त्वानुष्टुभेन च्छन्दसाङ्गिरस्वत् ॥६॥ ६४
आकूतिमग्निं प्रयुजँ स्वाहा मनो मेधामग्निं प्रयुजँ स्वाहा चित्तं विज्ञातमग्निं प्रयुजँ स्वाहा वाचो
विधृतिमग्निं प्रयुजँ स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानराय स्वाहा ॥ ६५
विश्वो देवस्य नेतुर्मर्तो वरेत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वरेत पुष्यतु ॥ ६६
स्वाहा मा सु भित्था मा सु रिषोऽम्ब धृष्णु वीरयस्व सु । अग्निश्चेदं करिष्यथः ॥ ६७
दृँहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥ ६८
द्रवन्नस्सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ६९
परस्या अधि संवतोऽवराँ अभ्यातर । यत्राहमस्मि ताँ अव ॥ ७०
परमस्याः परावतो रोहिदश्व उपागहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ॥ ७१
यदग्ने कानि कानि चा ते दारूणि दध्मसि । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य॥ ७२
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ ७३
रात्रीं रात्रीमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥ ७४
नाभा पृथिव्यास्समिधानो अग्निं रायस्पोषाय बृहते हवामहे ।
इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥ ७५

[मित्रस्य चर्षणीधृतो० । ऋ. ३,५९,६; तै. सं. ३,४,११,५; ४,१,६,३; तै. आ. ४,३,२ । देवस्त्वा० (मा. सुपाणिः (सुबाहुः)० । ऋ. २,३२,७; अथर्व. ७,४६,२; तै. सं. ३,१,११,४]
[७] मै. २,७,७ (७५—९१) । वा. ११,६६—८२; ४,८; २२,२१ । काण्व. १२,६७—८३; ४,९; २४,२२ । तै. सं. ४,१,९—१० । मा. श्री. ६,१,३ । [विश्वो देवस्य० । ऋ. ५,५०,१; तै. सं. १,२,२,१; ४,१,९,१ । द्रवन्नस्सर्पिरासुतिः० । ऋ. २,७,६; तै. सं. ४,१,९,२ । परस्या अधि संवतो० । ऋ. ८,७५,१५; तै. सं. २,६,११,३; ४,१,९,२ । यदग्ने कानि कानि० । ऋ. ८,१०२,२०; अथर्व. १९,६४,३; तै. सं. ४,१,१०,१ । यदत्त्युपजिह्विका० । ऋ. ८,१०२,२१; तै. सं. ४,१,१०,१; नि. ३,२०]

यास्सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्ताँस्ते अग्नेऽपि दधाम्यास्ये ॥ ७६
दँष्ट्राभ्यां मलिम्लूनग्ने जम्भ्येभिस्तस्करानुत ।
हनुभ्याँ स्तेनान् भगवस्ताँस्त्वं खाद सुखादितान् ॥ ७७
ये जनेषु मलिम्लवस्स्तेनासस्तस्करा वने । ये कक्षेष्वघायवस्ताँस्ते दधामि जम्भयोः॥ ७८
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान् दिप्साच्च सर्वाँस्तान् मष्मषा कुरु ॥ ७९
सँशितं मे ब्रह्म सँशितं वीर्यं बलम् । सँशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः ॥ ८०
उदेषां बाहू अतिरमुद्वर्चो अथो बलम् ।
क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वाँ अहम् ॥७॥ ८१
दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुश्श्रिये रुचानः ।
अग्निरमृतो अभवत् सहोभिर्यदेनं द्यौरजनयत् सुरेताः ॥ ८२
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकँ समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदाः ॥ ८३
विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत् सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥ ८४
सुपर्णोऽसि गरुत्मान् त्रिवृत् ते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ स्तोम आत्मा छन्दाँस्यङ्गानि
यजूँषि नाम साम ते तनूर्वामदेव्यं यज्ञायज्ञीयं पुच्छं धिष्ण्याश्शफास्सुपर्णोऽसि गरुत्मान् दिवं गच्छ
स्वः पत ॥ विष्णोः क्रमोऽसि सपत्नहा गायत्रं छन्द आरोह पृथिवीमनुविक्रमस्व विष्णोः क्रमो-
ऽस्यभिमातिहा त्रैष्टुभं छन्द आरोहान्तरिक्षमनुविक्रमस्व विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं
छन्द आरोह दिवमनुविक्रमस्व विष्णोः क्रमोऽसि शत्रूयतो हन्तानुष्टुभं छन्द आरोह दिशोऽनु-
विक्रमस्व ॥ ८५-८६

[सँशितं मे ब्रह्म० । अथर्व. ३,१९,१]
[८] मै. २,७,८ (९३—१०७) । वा. १२,१—१७,२१,२५ ३३,४०; १०,२४; १७,७० । काण्व. १३,१-१८,२२,२६, ३४,४१; ११,३४; १८,७० । तै. सं. ४,१,१०; ४,२,१ । मा. श्री. ६,१,३ । [दृशानो रुक्म उर्व्या० । ऋ. १०,४५,८; तै. सं. १,३,१४,५; ४,१,१०,४; ४,२,२,४ । नक्तोषासा समनसा० । ऋ. १,९६,५; १,११३,३ (च.पा.) । तै. सं. ४,१,१०,४; ६,५,२; ७,१२,३ । विश्वा रूपाणि० । ऋ. ५,८१,२; तै. सं. ४,१,१०,४; नि. १२,१३ । विष्णोः क्रमोऽसि सपत्नहा० । अथर्व. १०,५,२५-३५]

अक्रन्ददग्निस्स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधस्समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ८७
अग्नेऽभ्यावर्तिन्नभि नो निवर्तस्वायुषा वर्चसा प्रजया धनेन सन्या मेधया ॥ ८८
अग्ने अङ्गिरश्शतं ते सन्त्वावृतस्सहस्रं त उपावृतः ।
अधा पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥ ८९
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥ ९०
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ ९१
आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् । विशस्त्वा सर्वा वाञ्छन्त्वस्मे राष्ट्रमधिश्रय ॥ ९२
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ९३
अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात् ।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥ ९४
हंसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ९५
सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनां तपसा मार्चिषाभिशोचोऽन्तरस्यां शुक्रज्योतिर्विभाहि ॥ ९६
अन्तरग्ने रुचा त्वमुखायाँ सदने स्वे । तस्यास्त्वँ हरसा तपञ्जातवेदश्शिवो भव ॥ ९७
शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् ।
शिवाः कृत्वा दिशस्सर्वास्स्वं योनिमिहासदः ॥८॥ ९८

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ ९९

[अक्रन्ददग्निस्स्तनयन्निव० ऋ. १०,४५,४; तै. सं. १,३,१४,२; ४,२,१; २,२,२ । आ त्वाहार्षमन्तरभू०। ऋ. १०,१७३,१; अथर्व. ६,८७,१; तै. सं. ४,२,१,४; तै. ब्रा. २,४,२,८ । उदुत्तमं वरुण पाश० । ऋ. १, २४,१५; अथर्व. ७,८३,३; १८,४,६९; तै. सं. १,५,११,३; ४,२,१,३; नि. २,१३ । अग्ने बृहन्नुषसामूर्ध्वो० । ऋ. १०,१,१; तै. सं. ४,२,१,४ । हंसश्शुचिषद्वसु० । ऋ० ४,४०,५; तै. सं. १,८,१५,२; ४,२,१,५; तै. आ. १०,१०,२]

[९] मै. २,७,९ (१०८-११६) । क. १२,१,६,१८—२८,३३ । काण्व. १३,१,७,१९-२९,३४ । तै. सं. ४,२,२ । मा. श्रौ. ६,१,३ । [दिवस्परि प्रथमं० । ऋ. १०,४५,१; तै. सं. १,३,१४,५; ४,२,२,१; नि. ४,२४]

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा ।
विद्मा तमुत्सं यत आजगन्थ विद्मा ते नाम परमं गुहा यत् ॥ १००
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवाँसमृतस्य योनौ महिषा अहिन्वन् ॥ १०१
अक्रन्ददग्निस्स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधस्समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ १०२
उशिक् पावको अरतिस्सुमेधा मर्त्येष्वग्निरमृतो निधायि ।
इयर्ति धूममरुषो भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥ १०३
श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणस्सोमगोपाः ।
वसुस्सूनुस्सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥ १०४
विश्वस्य जज्ञे भुवनस्य राजा रोदसी अपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायञ्जना यदग्निमयजन्त पञ्च ॥ १०५
यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि द्युम्नं देवहितं यविष्ठ्य ॥ १०६
आ तं भज सौश्रवसेष्वग्न उक्थ आभज शस्यमाने ।
प्रियस्सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥ १०७
दृशानो रुक्म उर्विया व्यद्यौद् दुर्मर्षमायुश्श्रिये रुचानः ।
अग्निरमृतो अभवद् वयोभिर्यदेनं द्यौरजनयत् सुरेताः ॥ १०८
त्वामग्ने यजमाना अनु द्यून् विश्वा वसु दधिरे वार्याणि ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो अपव्रन् ॥९॥ १०९
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वँ सुप्रतीको विभावसुः ॥ ११०

[विद्मा ते अग्ने त्रेधा० । ऋ. १०,४५,२; तै. सं. ४,२,२,१ । समुद्रे त्वा नृमणा० । ऋ. १०,४५,३; तै. सं. ४,२,२,१ । अक्रन्ददग्नि० (अष्टमानुवाके द्रष्टव्यम्) । उशिक् पावको० । ऋ. १०,४५,७; तै. सं. ४,२,२,२ । श्रीणामुदारो धरुणो० । ऋ. १०,४५,५; तै. सं. ४,२,२,३ । विश्वस्य (केतु०) जज्ञे० । ऋ. १०,४५,६; तै. सं. ४,२,२,२ । यस्ते अद्य० । ऋ. १०,४५,९; तै. सं. ४,२,२,३ । आ तं भज० । ऋ. १०,४५,१०; तै. सं. ४,२,२,३ । दृशानो रुक्म० । (अष्टमानुवाके द्रष्टव्यम्) । त्वामग्ने यजमाना० । ऋ. १०,४५,११; तै. सं. ४,२,२,४]

[१०] मै. २,७,१० (११८-१३०) । कपि. २५,१ । वा. ११,८३; १२,३०-४३; ३,१ । काण्व. १२,८४; १३,३१-४४; ३,१ । तै. सं. ४,२,३ । मा. श्रौ. ६,१,४]

प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्ट्वम् ।
बृहद्भिर्भानुभिर्भासन् मा हिंसीस्तन्वा प्रजाः ॥ १११
अक्रन्ददग्निस्स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधस्समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ११२
अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ ११३
समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥ ११४
प्र प्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिश्शिवो नः ॥ ११५
आपो देवीः प्रतिगृह्णीत भस्मैतत् स्योने कृणुध्वं सुरभा उ लोके ।
तस्मै नमन्तां जनयस्सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् ॥ ११६
अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ ११७
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥ ११८
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । संसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासदः ॥ ११९
पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थेऽन्तरस्यां शिवतमः ॥ १२०
पुनरूर्जा सह रय्या ॥
१२१
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुष्टे तन्वं वन्दे अग्ने ॥ १२२
स बोधि सूरिर्मघवा वसुदावा वसुपतिः । युयोध्यस्मद् द्वेषांसि ॥१०॥ १२३
अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदाद्यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥ १२४

[अक्रन्ददग्नि० । (अष्टमानुवाके द्रष्टव्यम्) । समिधाग्निं दुवस्यत० । ऋ. ८,४४,१; तै. सं. ४,२,३,१; तै. ब्रा. १,२,१,२ । प्र प्रायमग्निर्भरतस्य० । ऋ. ७,८,४; तै. सं. २,५,१२,४; ४,२,३,२ । अप्स्वग्ने सधि० । ऋ. ८,४३,९; तै. सं. ४,२,३,२; १२,३ । गर्भो अस्योषधीनां० अथर्व. ५,२५,७; ६,९५,३ । पुनरूर्जा सह रय्या० । ऋ. १०,१५९,१०,१६० । बोधा मे अस्य० । ऋ. १,१४७,२; तै. सं. ४,२,३,४; नि. ३,२० । स बोधि सूरिर्मघवा० । ऋ. १,६,४; तै. सं. ४,२,३,४]

[११] मै. २,७,११ (१३१-१४४) । कपि. २५,२ । वा. १२,४४-४६,४९-६२; ३,२४; ५,३; १५,४६,१७,६१ । काण्व. १३,४५-४८,५८-६२; ३,२०; ५,३; १६,७८; १८,६१ । तै. सं. ४,२,४-५ । मा. श्रौ. ६,१,५ । [अपेत वीत वि च० । ऋ. १०,१४,९; अथर्व. १८,१,५५; तै. सं. ४,२,४,१; तै. ब्रा. १,२,१,१६; तै. आ. १,२७,५; ६,६,२]

संज्ञानमसि कामधरणं मयि ते कामधरणं भूयादग्नेर्भस्मास्यग्नेः पुरीषमसि चितस्थ परिचित ऊर्ध्वश्चितश्श्रयध्वम् ॥ १२५
अयँ सो अग्निर्यस्मिन् सोममिन्द्रस्सुतं दधे जठरे वावशानः ।
सहस्रिणं वाजमत्यं न सप्तिं ससवान् सन् स्तूयसे जातवेदः ॥ १२६
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचिषे धिष्ण्या ये ।
यास्स्वावस्तादुपतिष्ठन्त आपो या वा परो रोचने सूर्यस्य ॥ १२७
अग्ने यत् ते दिवि वर्चः पृथिव्यां यत् पर्वतेष्वोषधीष्वप्सु ।
येनान्तरिक्षमुर्वाततन्थ त्वेषस्स भानुरर्णवो नृचक्षाः ॥ १२८
पुरीष्यासो अग्नयः प्रवणेन सजोषसः । जुषन्तां हव्यमाहुतमनमीवा इषो महीः ॥ १२९
इडामग्ने पुरुदंसँ सनिं गोश्शश्वत्तमँ हवमानाय साध ।
स्यान्नस्सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ १३०
अयं ते योनिरृत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ १३१
चिदसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद परिचिदसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ १३२
समितँ संकल्पेथाँ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभिसंवसानौ ॥ १३३
सं वां मनांसि सं व्रता समु चित्तान्याकरम् ।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि ॥ १३४
अग्ने त्वं पुरीष्यो रयिमान् पुष्टिमाँ असि ।
शिवाः कृत्वा दिशस्सर्वास्स्वं योनिमिहासदः ॥ १३५
भवतं नस्समनसौ समोकसा अरेपसौ ।
मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसौ शिवौ भवतमद्य नः ॥ १३६

[अयं सो अग्निर्यस्मिन्० । ऋ. ३,२२,१; तै. सं. ४,२,४,२ । अग्ने दिवो अर्णमच्छा० । ऋ. ३,२२,३; तै. सं. ४,२,४,२ । अग्ने यत्ते दिवि० । ऋ. ३,२२,२; तै. ब्रा. ४,२,४,२ । पुरीष्यासो अग्नयः । ऋ. ३, २२,४; तै. सं. ४,२,४,३ । इडा(ळा)मग्ने पुरुदंसं० । ऋ. ३,१,२३; ५,११; ६,११; ७,११, १५,७; २२,५; २३,५; सा. ७६; तै. सं. ४,२,४,३ । अयं ते योनिरृत्वियो० । ऋ. ३,२९,१०; अथर्व. ३,२०,१; तै. सं. १, ५,५,२; ४,२,४,३; ७,१३,५; तै. ब्रा. १,२,१,१६; २,५,८,८ । सं वां (वो) मनांसि० । ऋ. परि. ३६,४; अथर्व. ६,९४,१]

मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योना अभारुखा।
तां विश्वे देवा ऋतुभिस्संविदानाः प्रजापतिर्विश्वकर्मा विमुञ्चतु ॥११॥ १३७
यदस्य पारे रजसश्चित्रं ज्योतिरजायत। तन्नः पर्षदति द्विषोऽग्ने वैश्वानर द्युमत् ॥ १३८
असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्विहि।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ १३९
यत् ते अस्मिन् घोर आसन् जुहोम्येषां बन्धानामवसर्जनाय कम्।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिरिति त्वाहं परि वेद विश्वतः ॥ १४०
नमस्तु ते निर्ऋते तिग्मतेजोऽयस्मयं विचृता बन्धमेतम्।
यमेन त्वं यम्या संविदानोत्तमे नाके अधि रोहयेनम् ॥ १४१
यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचर्त्यम्।
तं ते विष्याम्यायुषो नु मध्येऽधा विपितः पितुमद्धि प्रसूतः ॥ १४२
निवेशनस्संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥ १४३
सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्। धीरा देवेषु सुम्नया ॥ १४४
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम्।
गिरा च श्रुष्टिस्सभरा असन्नो नेदीय इत् सृण्यः पक्वमायत् ॥ १४५
पूषा युनक्तु सविता युनक्तु बृहस्पतिस्सविता देवो अग्निः ॥ १४६
शुनँ सुफाला वितुदन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः।
शुनासीरा हव्यजुष्टिं जुषाणेदं बीजमवतमुप्यमानम् ॥ १४७
लाङ्गलं पवीरवँ सुशेवँ सोमपित्सरु।
उदिद्वपति गामविं प्रस्थावद्रथवाहनं प्रफर्व्यं च पीवरीम् ॥ १४८
घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमतं मरुद्भिः।
ऊर्जो भागं मधुमत् पिन्वमानास्मान् सीते पयसाभ्याववृत्स्व ॥ १४९

[१२] मै. २,७,१२ (१४५-१६०)। कपि. २५,३। वा. १२,६२-७३। काण्व. १३,६३-७४। [तन्नः(स नः)पर्षदति द्विषः०। ऋ. परि. २६,७; ३५,१। नमस्तु ते निर्ऋते०। अथर्व. ६,६३,२-३; ६,८४,३-४। यं ते(यस्ते) देवी०। अथर्व. ६,६३,१। निवेशनस्संगमनो० (रायो बुध्नः)०। ऋ. १०,१३९,३; अथर्व. १०,८,४२; तै. सं. ४,२,५,४। सीरा युञ्जन्ति कवयो०। ऋ. १०,१०१,४; अथर्व. ३,१७,१; तै. सं. ४,२,५,५। युनक्त सीरा वि युगा०। ऋ. १०,१०१,३; अथर्व. ३,१७,२; तै. सं. ४,२,५,५; नि. ५,२८। शुनँ सु(नः)फाला०। ऋ. ४,५७,८; अथर्व. ३,१७,५; तै. सं. ४,२,५,६। लाङ्गलं पवीरवं०। अथर्व. ३,१७,३। घृतेन सीता मधुना०। अथर्व. ३,१७,९]
पाठ० २१

विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारम्। ज्योतिरापाम ॥ १५०
कामं कामदुघे धुक्ष्व मित्राय वरुणाय च।
इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः ॥१२॥ १५१
या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहँ शतं धामानि सप्त च॥ १५२
शतं वो अम्ब धामानि सहस्रमुत वो रुहः। अधा शतक्रत्वो यूयमिमं मे अगदं कृत॥ १५३
पुष्पवतीः प्रसूमतीः फलिनीरफला उत। अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः॥ १५४
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे। रपाँसि विघ्नतीरित रक्षश्चातयमानाः ॥ १५५
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत् सनवाथ पूरुषम्॥ १५६
अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्। आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये॥ १५७
यदोषधयस्समग्मत राजानस्समिता इव। विप्रस्स उच्यते भिषग्रक्षोहामीवचातनः ॥ १५८
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनँ सनिष्यन्तीनामात्मानं तव पूरुष ॥ १५९
अति विश्वाः परिष्ठास्स्तेन इव व्रजमक्रमुः। ओषधयः प्राचुच्यवुर्यत् किंचित् तन्वो रपः॥ १६०
यास्त आतस्थुरात्मानमाविविशुः परुष्परुः।
तास्ते यक्ष्मं विबाधन्तामुग्रो मध्यमशीरिव ॥ १६१
यदहं वाजयन्निमा ओषधीर्हस्त आदधे।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ १६२
निष्कृतिर्नाम वो माताथो त्वमसि निष्कृतिः।
सराः पतत्रिणीस्स्थ यदामयति निष्कृत ॥ १६३
साकं यक्ष्म प्रपत चाषेण किकिदीविना।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १६४

[१३] मै. २,७,१३ (१६६-१८१)। कपि. २५,४। वा. १२,७५-९४। काण्व. १३,७६-९५। तै. सं. ४,२,६। मा. श्री. ६,१,६। [या ओषधयः(ओषधी)०। ऋ. १०,९७,१; तै. सं. ४,२,६,१; नि. ९,२८। शतं वो अम्ब०। ऋ. १०,९७,२; तै. सं. ४,२,६,१। पुष्पवतीः(ओषधीः)०। ऋ. १०,९७,३; तै. सं. ४,२,६,१। ओषधीरिति मातरः०। ऋ. १०,९७,४; तै. सं. ४,२,६,१; नि. ६,३। अश्वत्थे वो निषदनं०। ऋ. १०,९७,५; तै. सं. ४,२,६,२। अश्वावतीं सोमावतीं०। ऋ. १०,९७,७; तै. सं. ४,२,६,४। यदोषधय(यत्रौषधीः) स्समग्मत०। ऋ. १०,९७,६; तै. सं. ४,२,६,२। उच्छुष्मा ओषधीनां०। ऋ. १०,९७,८; तै. सं. ४,२,६,३। अति विश्वाः परिष्ठा०। ऋ. १०,९७,१०; तै. सं. ४,२,६,३। यास्त आतस्थु(यस्यौषधीः प्रसर्पथ)०। ऋ. १०,९७,१२। यदहं(यदिमा)वाजय०। ऋ. १०,९७,११; तै. सं. ४,२,६,२; नि. ३,१५। निष्कृति(इष्कृ०)र्नाम वो०। ऋ. १०,९७,९; तै. सं. ४,५,६,२। साकं यक्ष्म प्रपत०। ऋ. १०,९७,१३; तै. सं. ४,२,६,४]

अन्या वो अन्यामवत्वन्यान्यस्या उपावत।
तास्सर्वास्संविदाना इदं मे प्रावता वचः ॥ १६५
अवपतन्तीरवदन् दिवोऽन्तेभ्यस्परि। यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १६६
याः फलिनीर्या अफला अकोशाः कोशिनीश्च याः।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँहसः ॥ १६७
याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वँहसः ॥ १६८
यास्सोमराज्ञीर्वरुणस्य राज्ञो यासां विश्वे देवा अधिपतयश्च सर्वे।
या अन्तरिक्षे दिवि याः पृथिव्यां ता नस्स्तुता ओषधीः पारयन्तु ॥१३॥ १६९
मा नो हिंसीज्जनिता यः पृथिव्या यो दिवँ सत्यधर्मा व्यानट्।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥ १७०
अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह। वपां ते अग्निरिषितो अरोहत् ॥ १७१
अग्ने यत् ते शुक्रं यच्चन्द्रं यत् पूतं यच्च यज्ञियम्। तद्देवेभ्यो भरामसि ॥ १७२
इषमूर्जमहमित आदृतस्य योनिं महिषस्य धाराम्।
आ नो गोषु विशत्वा तनूषु जहामि सेदिमनिराममीवाम् ॥ १७३
अग्ने तव श्रवो वयो महि भ्राजन्त्यर्चयो विभावसो।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥ १७४
पावकवर्चाश्शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना।
पुत्रः पितरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥ १७५
ऊर्जो नपाज्जातवेदस्सुशस्तिभिर्मन्दस्व धीतिभिर्हितः।
त्वे विश्वे संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ १७६

[अन्या वो अन्यामव०। ऋ. १०,९७,१४; तै. सं. ४,२,६,३। अवपतन्तीरवदन्०। ऋ. १०,९७,१७; अथर्व. ६,१०९,२; तै. सं. ४,२,६,५। याः फलिनीर्या०। ऋ. १०,९७,१५; अथर्व. ६,९६,१; ७,११,१; ८,७,२७; १४,२,३५; तै. सं. ४,२,६,४। याश्चेदमुपशृण्वन्ति०। ऋ. १०,९७,२१; तै. सं. ४,२,६,५]
[१४] मै. २,७,१४ (१८४-१८७,१८९-१९६)। कपि. २५,५। वा. १२,१०२-११३। काण्व. १३,१०१-११२। तै. सं. ४,२,७। मा. श्री. ६,१,६ [मा नो हिंसीज्जनिता०। ऋ. १०,१२१,९; तै. सं. ४,२,१,१। कस्मै देवाय...विधेम। अथर्व. ४,२,१-८। अग्ने तव श्रवो वयो०। ऋ. १०,१४०,१; सा. १८१६; तै. सं. ४,२,७,१। पावकवर्चाश्शुक्रवर्चा०। ऋ. १०,१४०,२; सा. १८१७; तै. सं. ४,२,७,२। ऊर्जो नपाज्जातवेदः०। ऋ. १०,१४०,३; सा. १८१८; तै. सं. ४,२,७,२]

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं रयिम् ॥ १७७
ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः।
श्रुत्कर्णँ सप्रथस्तमं त्वा युजा विप्रासो मानुषा युगा ॥ १७८
निष्कर्तारमध्वरस्य प्रचेतस क्षयन्तँ शवसे महे।
रातिं वामस्य सुभगां महीमिषं पृणक्षि दर्शतं क्रतुम् ॥ १७९
आप्यायस्व समेतु ते विश्वतस्सोम वृष्ण्यम्। भवा वाजस्य संगथे ॥ १८०
सं ते पयाँसि समु यन्तु वाजास्सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवाँस्युत्तमानि धिष्व ॥१४॥ १८१
अपां पृष्ठमसि योनिरग्नेस्समुद्रमभितः पिन्वमानम्।
वर्धमानो महाँ आ च पुष्करे दिवो मात्रया वरिणा प्रथस्व ॥ १८२
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतस्सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्च वि वः ॥ १८३
हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १८४
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ १८५
नमो अस्तु सर्पेभ्यो ये के च पृथिव्यामधि।
ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः ॥ १८६
येषु वा यातुधाना ये वा वनस्पतीँरनु। येऽवटेषु शेरते तेभ्यस्सर्पेभ्यो नमः ॥ १८७

[इरज्यन्नग्ने प्रथयस्व०। ऋ. १०,१४०,४; सा. १८१९; तै. सं. ४,२,७,२। ऋतावानं महिषं०। ऋ. १०,१४०,६; सा. १८२१; तै. सं. ४,२,७,३। नि(इ)ष्कर्तारमध्वरस्य०। ऋ. १०,१४०,५; सा. १८२०; तै. सं. ४,२,७,३। आप्यायस्व समेतु०। ऋ. १,९१,१६; ९,३१,४; तै. सं. ३,२,५,३; ४,२,७,४; ताण्ड्य ब्रा. १,५,८। सं ते पयाँसि समु०। ऋ. १,९१,१८; तै. सं. ४,२,७,४]
[१५] मै. २,७,१५ (१९७-१९८, २००-२११)। वा. १३,२-१३; २३,१; २५,१०। काण्व. १४,२-१५; २५,१; २७,१४। तै. सं. ४,२,८,९; १,२,१४। मा. श्री. ६,१,७। [ब्रह्म जज्ञानं प्रथमं०। अथर्व. ४,१,१; ५,६,१। हिरण्यगर्भः समवर्तताग्रे०। ऋ. १०,१२१,१; अथर्व. ४,२,७; तै. सं. ४,१,८,३; २,८,२; ताण्ड्य ब्रा. ९,९,१२; नि. १०,२३। द्रप्सश्चस्कन्द पृथिवी०। ऋ. १०,१७,११; अथर्व. १८,४,२८; तै. सं. ३,१,८,३; ४,२,८,२; ९,५; तै. आ. ६,६,१। नमो अस्तु सर्पेभ्यो०। ऋ. परि. १५,११। येषु(या)वा(इषवो)यातुधाना०। ऋ. परि. १५,१०]

ये वादो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येऽप्सु सदांसि चक्रिरे तेभ्यस्सर्पेभ्यो नमः ॥ १८८
कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १८९
तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो विसृज विष्वगुल्काः ॥ १९०
प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥ १९१
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ १९२
ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ १९३
अग्नेस्त्वा तेजसा सादयामीन्द्रस्य त्वौजसा सादयामि ॥ १९४
अयमग्निस्सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ १९५
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिस्सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥१५॥ १९६
ध्रुवासि धरुणास्तृता विश्वकर्मणा मा त्वा समुद्र उद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीं दृंह
प्रथोऽसि पृथिव्यसि भूरसि भूमिरस्यदितिरसि तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ १९७
काण्डात् काण्डात् प्ररोहन्ती परुषस्परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ १९८
या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यै ते देवीष्टके विधेम हविषा वयम् ॥ १९९

[ये वादो रोचने दिवो० । ऋ. परि. १०,९ । कृणुष्व पाजः प्रसितिं० । ऋ. ४,४,१; तै. सं. १,२,१४,१; नि. ६,१२ । तव भ्रमास आशुया० । ऋ. ४,४,२; तै. सं. १,२,१४,१ । प्रति स्पशो विसृज० । ऋ. ४,४,३; तै. सं. १,२,१४,१ । उदग्ने तिष्ठ प्रत्यातनुष्व० । ऋ. ४,४,४; तै. सं. १,२,१४,२ । ऊर्ध्वो भव प्रतिविध्या० । ऋ. ४,४,५; अथर्व. १३,१,३ ; तै. सं. १,२,१४,२ । अयमग्निस्सहस्रिणो० । ऋ. ८,७५,४; तै. सं. २,६,११, १; ४,४,४,१ । भुवो यज्ञस्य रजसश्च० । ऋ. १०,८,६; तै. सं. ४,४,४,१; तै. ब्रा. ३,५,७,१]
[१६] मै. २,७,१४; २,७,१६—१७ (९७; २२२,२२४—२२६,२२५,२३७—२३८) । क. २५,६ । वा. १३,१६—२४,३२-३३, ३८—४० ८,३९; ९,४ । काण्व. १४,१६—२२,२७—२८,३४—३५,४०—४२; ९,३१; ६,५ । तै. सं. ४,२, ९ । मा. श्री. ६,१,७]

यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥ २००
या वो देवास्सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिस्सर्वाभी रुचं नो धत्त बृहस्पते ॥ २०१
विराड् ज्योतिरधारयत् स्वराड् ज्योतिरधारयदषाढासि सहमाना सहस्वारातिं सहस्व पृतनायत-
स्सहस्रवीर्यासि सा मा जिन्व ॥ २०२
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ २०३
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यस्सखा ॥ २०४
सरित् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा यश्चिक्रित्रे ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्ये अग्नेः ॥ २०५
ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वाभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य
चाग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान् ध्रुवासि धरुणा सहस्रदा असि सहस्राय
त्वा ॥१६॥ २०६
आदित्यं गर्भं पयसा समञ्जन् सहस्रस्य प्रतिमां विश्वरूपम् ।
परिवृङ्धि हरसा माभिमंस्थाश्शतायुषं कृणुहि चीयमानः ॥ २०७
वातस्य जूतिं वरुणस्य नाभिमश्वं जज्ञानं सरिरस्य मध्ये ।
शिशुं नदीनां हरिमद्रिबुध्नमग्ने मा हिंसीः परमे व्योमन् ॥ २०८
अजस्रमिन्द्रमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानस्स गां मा हिंसीरदितिं विराजम् ॥ २०९
वरूत्रीं त्वष्टुर्वरुणस्य नाभिमविं जज्ञानां रजसः परस्मात् ।
महीं साहस्रीमसुरस्य मायां तामग्ने हेडः परि ते वृणक्तु ॥ २१०
यो अग्निरग्नेस्तपसोऽधि जातश्शोकात् पृथिव्या उत वा दिवस्परि ।
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥ २११

[मही द्यौः पृथिवी च० । ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,९,३ । विष्णोः कर्माणि पश्यत० । ऋ. १,२२,१९; सा. १६७१; अथर्व. ७,२६,६; तै. सं. १,३,६,२ । सरित्(सम्यक्)स्रवन्ति सरितो० । ऋ. ४,५८,६; तै. सं. ४,२,९,६]
[१७] मै. २,७,१७(२३९—२४६) । कपि. २५,८ । वा. १३,४१ – ४५,४७—५१ । काण्व. १४,४३-४७,४९-५३ । तै. सं. ४,२,९—१० । मा. श्री. ६,१,७]

इमं मा हिंसीर्द्विपादं पशूनां सहस्राक्ष मेध आ चीयमानः ।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो निषीद ॥ २१२
मयुं ते शुचं द्विष्मस्तं ते शुगृच्छतु ॥ २१३
इमं मा हिंसीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु ।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ॥ २१४
गौरं ते शुचं द्विष्मस्तं ते शुगृच्छतु ॥ २१५
इमं साहस्रं शतधारमुत्सं व्यच्यमानं सरिरस्य मध्ये ।
घृतं दुहानामदितिं जनायाग्ने मा हिंसीः परमे व्योमन् ॥ २१६
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ॥ २१७
गवयं ते शुचं द्विष्मस्तं ते शुगृच्छतु ॥ २१८
इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम् ।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन् ॥ २१९
मेषमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ॥ २२०
मेषं ते शुचं द्विष्मस्तं ते शुगृच्छतु ॥ २२१
अजो ह्यग्नेरजनिष्ट शोकात् सो अपश्यज्जनितारमग्ने ।
तेन देवा देवतामग्रमायंस्तेन रोहमायन्नुप मेध्यासः ॥ २२२
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ॥ २२३
शरभं ते शुचं द्विष्मस्तं ते शुगृच्छतु ॥१७॥ २२४
अपां त्वेमन् सादयाम्यपां त्वोद्मन् सादयाम्यपां त्वा भस्मनि सादयाम्यपां त्वा ज्योतिषि साद-
याम्यपां त्वायने सादयाम्यर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि सरिरे त्वा सदने
सादयाम्यपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादयाम्यपां त्वा सदने सादयाम्यपां त्वा सधस्थे
सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि गायत्रेण
त्वा छन्दसा सादयामि त्रैष्टुभेन जागतेनानुष्टुभेन पाङ्क्तेन त्वा छन्दसा सादयामि ॥१८॥ २२५
अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः प्राणायनो गायत्री वासन्ती गायत्र्यै गायत्रं
गायत्रादुपांशुरुपांशोस्त्रिवृत् त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि

[अजो ह्यग्नेरजनिष्ट० । अथर्व. ४,१४,१; ९,५,१३]
[१८] मै. २,७,१८ (२२७) । कपि. २५,९ । वा. १३,५३ । काण्व. १४,५५ । तै. सं. ४,३,१ । मा. श्री. ६,१,८ ।
[१९] मै. २,७,१९; २,८,१ (२२८; १-२) । कपि. २५,९ । वा. १३,५४-५५; १३,५६-५८; १५,५९-६० । काण्व. १३,५५-५६; १४,५६-६५; १६,६०-६१ । तै. सं. ४,३,२ ।

प्रजाभ्योऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब् ग्रैष्मी त्रिष्टुभस्स्वारं
स्वारादन्तर्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशाद्बृहद्भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो
गृह्णामि प्रजाभ्योऽयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या
ऋक्सममृक्समाच्छुक्रश्शुक्रात् सप्तदशस्सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षु-
र्गृह्णामि प्रजाभ्य इदमुत्तरात् स्वस्तस्य श्रोत्रं सौवं शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऐडमैडान्मन्थी मन्थिन
एकविंश एकविंशाद्वैराजं विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमु-
परि मतिस्तस्या वाङ् मात्या हेमन्तो वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्या निधनवन्निधनवत आग्रायण
आग्रायणात् त्रिणवत्रयस्त्रिंशौ त्रिणवत्रयस्त्रिंशाभ्यां शाक्वररैवते विश्वकर्मर्षिः प्रजापतिगृहीतया त्वया
वाचं गृह्णामि प्रजाभ्यः ॥ २२६
लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योना असीषदन् ॥ २२७
ता अस्य सूददोहसस्सोमं श्रीणन्ति पृश्नयः ।
जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः ॥१९॥ २२८
समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ २२९
तनूनपात् पथ ऋतस्य यानान्मध्वा समञ्जन् स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ २३०
आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिस्सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ २३१
प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ २३२
व्यचस्वतीरुर्विया विश्रयन्तां पतिभ्यो न जनयश्शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ २३३

[ता अस्य सूददोहस० । ऋ. ८,६९,३; तै. सं. ४,२,४,४; तै. ब्रा. ३,११,६,२]
[२०] मै. ३,१३,३; ५(११-१२,१४-२१; ३४) । वा. २९,२५-२६,२८-३६ । काण्व. ३१,३७-३८,४०-४८ । [समिद्धो अद्य मनुषो० । ऋ. १०,११०,१; अथर्व. ५,१२,१; तै. ब्रा. ३,६,३,१; नि. ८,५ । तनूनपात्पथ ऋतस्य० । १०,११०,२; अथर्व. ५,१२,२; तै. ब्रा. ३,६,३,१; नि. ८,६ । आजुह्वान ईड्यो० । ऋ. १०,११०,३; अथर्व. ५,१२,३; तै. ब्रा. ३,६,३,२ । नि. ८,८ । प्राचीनं बर्हिः प्रदिशा० । ऋ. १०,११०,४; अथर्व. ५,१२,४; तै. ब्रा. ३,६,३,२; नि. ८,९ । व्यचस्वतीरुर्विया० । ऋ. १०,११०,५; अथर्व. ५,१२,५; तै. ब्रा. ३,६,३,३; नि. ८,१०]

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥ २३४
दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ २३५
आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसस्सदन्तु ॥ २३६
य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ २३७
उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिश्शमिता देवो अग्निस्स्वदन्तु हव्यं मधुना घृतेन ॥ २३८
सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥२०॥ २३९

अग्निर्होता नो अध्वरे वाजी सन् परिणीयते । देवो देवेषु यज्ञियः ॥ २४०
परि त्रिविष्टध्वरं यात्यग्नी रथीरिव । आ देवेषु प्रयो दधत् ॥ २४१
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ २४२
अजैदग्निरसनद्वाजं नि देवो देवेभ्यो हव्यावाट् प्राङ्गोभिर्हिन्वानो धेनाभिः कल्पमानो यज्ञस्यायुः प्रतिरन्नुप प्रेष्य होतर्हव्या देवेभ्यो दैव्याश्शमितार उत च मनुष्या आरभध्वमुपनयत मेध्या दुर आशासाना मेधपतये मेधं प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता

[आ सुष्वयन्ती यजते० । ऋ. १०,११०,६; अथर्व. ५,१२,६; तै. ब्रा. ३,६,३,३; नि. ८,११ । दैव्या होतारा प्रथमा०। ऋ. १०,११०,७; अथर्व. ५,१२,७; तै. ब्रा. ३,६,३,३; नि. ८,१२। आ नो यज्ञं भारती०। ऋ. १०,११०,८; अथर्व. ५,१२,८; तै. ब्रा. ३,६,३,४; नि. ८,१३ । य इमे द्यावापृथिवी० । ऋ. १०,११०, ९; अथर्व. ५,१२,९; तै. ब्रा. ३,६,३,४; नि. ८,१४ । उपावसृज त्मन्या० । ऋ. १०,११०,१०; अथर्व. ५, १२,१०; तै. ब्रा. ३,६,३,४; नि. ८,१७ । सद्यो जातो व्यमिमीत० । ऋ. १०,११०,११; अथर्व. ५,१२,११; तै. ब्रा. ३,६,३,४; नि. ८,२१]

[२१] मै. ४,१३,४-५(२२-३३)। वा. ११,२५; ४,२०, १,१५; २१,४१ । काण्व. १२,२५; ४,२६; १,२१; २३,४२; तै. ब्रा. ३,६,४,६; ७-९ । [अग्निर्होता नो अध्वरे० । ऋ. ४,१५,१; तै. ब्रा. ३,६,४,१ । परि त्रिविष्टध्वरं० । ४,१५,२; तै. ब्रा. ३,६,४,१ । परि वाजपतिः० । ऋ. ४,१५,३; सा. ३०; तै. सं. ४,१,२,५; तै. ब्रा. ३,६,४,१। अजैदग्निरसद्वाजं । तै. ब्रा. ३,६,५ । स्तृणीत बर्हिः० । ऋ. १,१३,५]

संगभ्योऽनु सखा सयूथ्यः ॥ उदीचीनाँ अस्य पदः कृणुतात् सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादन्तरिक्षमसुं पृथिवीं शरीरमेकधास्य त्वचमाच्छयतात् पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वाच्छ्येनमस्य वक्षः कृणुतात् प्रशसा बाहू शला दोषणी कश्यपेवांसाच्छिद्रे श्रोणी कवषोरूस्रेकपर्णाष्ठीवन्ता षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठुयोच्च्यावयताद्गात्रं गात्रमस्यानूनं कृणुतादूवध्यगोहं पार्थिवं खनतादस्रा रक्षस्संसृजताद्वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवदध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगो ॥ २४३--२४४
जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् । हव्या जुह्वान आसनि ॥ २४५
इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व ।
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥ २४६
घृतवन्तः पावक ते स्तोकाश्श्चोतन्ति मेदसः ।
स्वधर्मन् देववीतये श्रेष्ठं नो धेहि वार्यम् ॥ २४७
तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य ।
ऋषिश्श्रेष्ठस्समिध्यसे यज्ञस्य प्राविता भव ॥ २४८
तुभ्यं श्चोतन्त्यध्रिगो शचीवस्स्तोकासो अग्ने मेदसो घृतस्य ।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥ २४९
ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे ।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान् देवशो विहि ॥ २५०
होता यक्षद्बृहस्पतिं छागस्य वपाया मेदसो जुषतां हविर्होतर्यज होता यक्षदश्विना छागस्य वपाया मदसो जुषतां हविर्होतर्यज होता यक्षत् सरस्वतीं मेष्या वपाया मेदसो जुषतां हविर्होतर्यज होता यक्षदिन्द्रं मेषस्य वपाया मेदसो जुषतां हविर्होतर्यज ॥२१॥ २५१
[१२८९]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायामग्निचीशिका नाम षोडशं स्थानकं संपूर्णम् ॥१६॥

[उदीचीनाँ०। ऐ.ब्रा.२,६। जुषस्व सप्रथस्तमं०। ऋ. १,७५,१; तै. ब्रा. ३,६,७,१ । इमं नो यज्ञममृतेषु० । ऋ. ३,२१,१; तै. ब्रा. ३,६,७,१ । घृतवन्तः पावक ते० । ऋ. ३,२१,२; तै. ब्रा. ३,६,७,१ । तुभ्यं स्तोका घृतश्चुतो० । ऋ. ३,२१,३; तै. ब्रा. ३,६,७,२ । तुभ्यं श्चोतन्त्यध्रिगो०। ऋ. ३,२१,४; तै. ब्रा. ३,६,७,२। ओजिष्ठं मे मध्यतो० । ऋ. ३,२१,५; तै. ब्रा. ३,६,७,२]

अथ सप्तदशं स्थानकम्।

ध्रुवक्षितिः।

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साध्या । १
उख्यस्य केतुं प्रथमं जुषाणाश्विनाध्वर्यू सादयतामिह त्वा ॥
कुलायिनी घृतवती पुरंधिस्स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्यू सादयतामिह त्वा॥२
स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय ।
पितेवैधि सूनव आ सुशेवस्स्वावेशया तन्वा संविशस्वाश्विनाध्वर्यू सादयतामिह त्वा ॥ ३
अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू सादयतामिह त्वा ॥ ४
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशाम् ॥ ५
अधिपत्नीं भुवनानामूर्मिर्द्रप्सो अपामसि । ६
विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा ॥
सजूरृतुभिस्सजूर्विधाभिस्सजूर्देवैस्सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥ सजूरृतुभिस्सजूर्विधाभिस्सजूर्वसुभिस्सजू रुद्रैस्सजूरादित्यैस्सजूर्विश्वैर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्यू सादयतामिह त्वा ॥ प्राणं मे पाहि व्यानं मे पाह्यपानं मे पाहि चक्षुर्म उर्व्या विभाहि श्रोत्रं मे श्लोकयापः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात् पाहि दिवो वा वृष्टिमेरय ॥१॥ ७-९

त्रियविर्वयो गायत्री छन्दो दित्यवाड् वयस्त्रिष्टुप् छन्दः पञ्चाविर्वयो विराट् छन्दस्त्रिवत्सो वय उष्णिहा छन्दस्तुर्यवाड् वयोऽनुष्टुप् छन्दः पष्ठवाड्वयो बृहती छन्द उक्षा वयः ककुप् छन्दो धेनुर्वयो जगती छन्दोऽनड्वान् वयः पङ्क्तिश्छन्द ऋषभो वयस्सतोबृहती छन्दो बस्तो वयो युवलं छन्दो वृष्णिर्वयो विशालं छन्दो व्याघ्रो वयोऽनाधृष्यं छन्दस्सिंहो वयश्छादिश्छन्दः पुरुषो वयस्तन्द्रं छन्दः क्षत्रं वयो मयन्दं छन्दो विष्टम्भो वयोऽधिपतिश्छन्दो मूर्धा वयः प्रजापतिश्छन्दो विश्वकर्मा वयः परमेष्ठी छन्दः ॥२॥ १०

[१] मै. २,८,१-२ (३-९) । कपि. २५,१० । वा. १४,१—५,७—८ । काण्व. १५,१—८ । तै. सं. ४,३,४ । मा. श्रौ. ६,२,१ ।
[२] मै. २,८,२ (९) । कपि. २६,१ । वा. १४,९—१० । काण्व. १५,९—१३ । तै. सं. ४,३,४—५ ।

इन्द्राग्नी अव्यथमानामिष्टकां दृंहतं युवम् ।
पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधसे ॥ ११
राज्ञ्यसि प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगाधिपत्न्यासि बृहती दिगायुर्मे पाहि प्राणं मे पाहि व्यानं मे पाह्यपानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे पिन्व वाचं मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽस्त्रीवयश्छन्दः पङ्क्तिश्छन्दः उष्णिहा छन्दोऽनुष्टुप्छन्दो विराट् छन्दो बृहती छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दःपृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दस्समा छन्दो नक्षत्राणि छन्दो वाक् छन्दो मनश्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छन्दोऽग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वे देवा देवतेन्द्रो देवता वरुणो देवता बृहस्पतिर्देवता मूर्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरण्यायुषे त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा यन्त्री राडयन्त्र्यासि यमनी ध्रुवासि धरित्रीषे त्वोर्जे त्वा रय्यै त्वा पोषाय त्वा ॥३॥ १२

आशुस्त्रिवृद्भ्रान्तः पञ्चदशो व्योमा सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभीवर्तस्सविंशो धरुण एकविंशो वर्चो द्वाविंशस्संभरणस्त्रयोविंशो योनिश्चतुर्विंशो गर्भाः पञ्चविंश ओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा त्रयस्त्रिंशो ब्रध्नस्य विष्टपं चतुस्त्रिंशो नाकष्षट्त्रिंशो वीवर्तो अष्टाचत्वारिंशो धर्त्रं चतुष्टोमोऽग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रं स्पृतं पञ्चदशस्स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रं स्पृतं सप्तदशस्स्तोमो मित्रस्य भागोऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वातस्पृत एकविंशस्स्तोमो वसूनां भागोऽसि रुद्राणामाधिपत्यं चतुष्पात् स्पृतं चतुर्विंशस्स्तोम आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्भास्स्पृताः पञ्चविंशस्स्तोमोऽदित्या भागोऽसि पूष्ण आधिपत्यमोजस्स्पृतं त्रिणवस्स्तोमो देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यं समीचीर्दिशस्स्पृताश्चतुष्टोमस्स्तोमो यवानां भागोऽस्ययवानामाधिपत्यं प्रजास्स्पृताश्चतुश्चत्वारिंशस्स्तोम ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं निशान्तं त्रयस्त्रिंशस्स्तोमः ॥४॥ १३

एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत् तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत् पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत् सप्तभिरस्तुवत सप्तर्षयो-

[३] मै. २,८,३ (१०—११) । कपि. २६,२ । वा. १४,११,१३,१७—२२ । काण्व. १५,१४,१६—२४ । तै. सं. ४, ३,६—७ । मा. श्रौ. ६,२,१ ।
[४] मै. २,८,४—५ (१२—१३) । कपि. २६,३ । वा. १४,२३—२६ । काण्व. १५,२५—३१ । तै. सं. ४,३,८-९। मा. श्रौ. ६,२,१ ।
[५] मै. २,८,३(१४)। कपि. २६,४ । वा. १४,२८—३१ । काण्व. १५,३२-३५ । तै. सं. ४.३.१० । मा. श्रौ. ६.२.१।

ऽसृज्यन्त धाताधिपतिरासीन्नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुव-
तार्तवा असृज्यन्तर्तवोऽधिपतय आसँस्त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिरासीत्
पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत् सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधि-
पतिरासीन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्तामेकविंशत्यास्तुवतैकशफाः
पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत् त्रयोविंशत्यास्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाधिपतिरासीत्
पञ्चविंशत्यास्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत् सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैतां
वसवो रुद्रा अनुव्यायँस्त एवाधिपतय आसन्नवविंशत्यास्तुवत वनस्पतयोऽसृज्यन्त सोमोऽधिपति-
रासीदेकत्रिंशतास्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसँस्त्रयस्त्रिंशतास्तुवत भूतान्यशा-
म्यत् प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥५॥ १४

अग्ने जातान् प्रणुदा नस्सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमना अहेडञ्छर्मन्ते स्याम त्रिवरूथ उद्भौ ॥ १५
सहसा जातान् प्रणुदा नस्सपत्नान् प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयँ स्याम प्रणुदा नस्सपत्नान् ॥ १६
चतुश्चत्वारिंशस्स्तोमो वर्चो द्रविणँ षोडशस्स्तोम ओजो द्रविणम् ॥ १७
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥ १८

एवश्छन्दो वरिवश्छन्दश्शम्भूश्छन्दः परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यचश्छन्दस्सिन्धु-
श्छन्दस्समुद्रं छन्दस्सरिरं छन्दः ककुप्छन्दस्त्रिककुप्छन्दः काव्यं छन्दोऽङ्कुपं छन्दः क्षुरो भ्रज-
श्छन्दोऽक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्द आच्छच्छन्दः प्रच्छच्छन्दस्संय-
च्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरं छन्दो निकायं छन्दो वीवधश्छन्दो गिरश्छन्दो भ्राजश्छन्द-
स्सँस्तुप्छन्दोऽनुष्टुप्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विशालं छन्दो विष्प-
र्धाश्छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दो अङ्कलक्षं छन्दः ॥६॥ १९

रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्मणे त्वा धर्मं जिन्वान्वितिरसि दिवे त्वा दिवं
जिन्व संधिरस्यन्तरिक्षाय त्वान्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टम्भोऽसि
वृष्ट्यै त्वा वृष्टिं जिन्व प्रवास्यह्ने त्वाहर्जिन्वानुवासि रात्र्यै त्वा रात्रीं जिन्वोशिगसि वसुभ्यस्त्वा

[६] मै. २,८,७ (१५—१९) । कपि. २६,५ । वा. १५,१-५ । काण्व. १६,१—८ । तै. सं. ४,३,१२ । मा. श्रौ. ६,
२,२ । [अग्ने जातान् प्रणुदा० । अथर्व. ७,३४,१ । सहसा जातान् प्रणुदा० । अथर्व. ७,३५,१]
[७] मै. २,८,८(२०) । कपि. २६,६ । वा. १५,६-७,८) काण्व. १६,९-१२,१४-१५ । तै. सं. ४,४,१ । मा. श्रौ. ६,२,२ ।

वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदितिरस्यादित्येभ्यस्त्वादित्याञ्जिन्वौजोऽसि पितृ-
भ्यस्त्वा पितॄञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व रेवद-
स्योषधीभ्यस्त्वौषधीर्जिन्वाभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वाधिपतिरसि प्राणाय त्वा प्राणं
जिन्व धरुणोऽस्यपानाय त्वापानं जिन्व सँसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व वयोधा असि श्रोत्राय त्वा
श्रोत्रं जिन्व त्रिवृदसि त्रिवृते त्वा सवृदसि सवृते त्वा प्रवृदसि प्रवृते त्वानूवृदस्यनूवृते त्वा सँरो-
होऽसि विरोहोऽसि प्ररोहोऽस्यनूरोहोऽसि वसुकोऽसि वस्यष्टिरसि वेषश्रीरसि देवस्य सवितुः प्रसवे
बृहस्पतये स्तुत ॥७॥ २०

राज्ञ्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याँ
श्रयत्वाज्यमुक्थमव्यथाय स्तभ्नातु रथन्तरँ साम प्रतिष्ठित्या अन्तरिक्षमृषयस्त्वा प्रथमजा देवेषु दिवो
मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिस्ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यज-
मानं च सादयन्तु विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदश-
स्त्वा स्तोमः पृथिव्याँ श्रयतु प्रउगमुक्थमव्यथाय स्तभ्नातु बृहत् साम प्रतिष्ठित्या अन्तरिक्षमृषय-
स्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिस्ते त्वा सर्वे संविदाना
नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु सम्राडसि प्रतीची दिगादित्यास्ते देवा अधिपतय-
स्सोमो हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याँ श्रयतु मरुत्वतीयमुक्थमव्यथाय स्तभ्नातु
वैरूपँ साम प्रतिष्ठित्या अन्तरिक्षमृषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता
चायमधिपतिस्ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु स्वराडस्युदीची
दिङ् मरुतस्ते देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तैकविंशस्त्वा स्तोमः पृथिव्याँ श्रयतु निष्के-
वल्यमुक्थमव्यथाय स्तभ्नातु वैराजँ साम प्रतिष्ठित्या अन्तरिक्षमृषयस्त्वा प्रथमजा देवेषु दिवो मात्रया
वरिणा प्रथन्तु विधर्ता चायमधिपतिस्ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च
सादयन्त्वधिपत्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयो बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिंशौ
त्वा स्तोमौ पृथिव्याँ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथाय स्तभ्नीतां शाक्वररैवते सामनी प्रति-
ष्ठित्या अन्तरिक्षमृषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिस्ते
त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥८॥ २१

अयं पुरो हरिकेशस्सूर्यरश्मिस्तस्य रथकृत्सश्च रथौजाश्च सेनानीग्रामण्यौ पुञ्जिकस्थला च कृतस्थला

[८] मै. २,८,९(२१) । कपि. २६,७ । वा. १५,१०—१४ । काण्व. १६,१६—३० । तै. सं. ४,४,२ । मा. श्रौ. ६,२,१ ।
[९] मै. २,८,१० (२२) । कपि. २६,८ । वा. १५,१५—१९; १६,६४—६६ । काण्व. १६,३१—४०; १७,६४ । तै.
सं. ४,४,३ । मा. श्रौ. ६,२,२ ।

चाप्सरसौ यातुधाना हेती रक्षाँसि प्रहेतिस्ते नः पान्तु ते नोऽवन्तु ते यं द्विष्मो यश्च नो
द्वेष्टि तमेषां जम्भे दधाम्ययं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ मेनका
च सहजन्या चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः प्रहेतिस्ते नः पान्तु ते नोऽवन्तु
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधाम्ययं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानी-
ग्रामण्यौ प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिस्सर्पाः प्रहेतिस्ते नः पान्तु ते नोऽवन्तु
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधाम्ययमुत्तरात् संयद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानी-
ग्रामण्यौ विश्वाची च घृताची चाप्सरसा आपो हेतिर्वातः प्रहेतिस्ते नः पान्तु ते नोऽवन्तु ते यं
द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधाम्ययमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्या
उर्वशी च पूर्वचित्तिश्चाप्सरसा अवस्फूर्जन्हेतिर्विद्युत् प्रहेतिस्ते नः पान्तु ते नोऽवन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥९॥
२२

आयोष्ट्वा सदने सादयाम्यवतश्छायायां नमस्समुद्राय नमस्समुद्रस्य चक्षसे ॥ २३
प्रोथदश्वो न यवसेऽविष्यन् यदा महस्संवरणे व्यस्थात् ।
आदस्य वातो अनुवाति शोचिरध स्म ते व्रजनमस्तु कृष्णम् ॥ २४

प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणाय व्यानायापानाय विश्वं
ज्योतिर्यच्छाग्निष्टेऽधिपतिर्विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणाय
व्यानायापानाय विश्वं ज्योतिर्यच्छ वायुष्टेऽधिपतिः परमेष्ठी त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं
विश्वस्मै प्राणाय व्यानायापानाय विश्वं ज्योतिर्यच्छ सूर्यस्तेऽधिपतिर्मधुश्च माधवश्च वासन्तिका ऋतू
अग्नेरन्तश्श्लेषोऽसि ॥
२५

कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः ।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ॥ २६
येऽग्नयस्समनसोऽन्तरा द्यावापृथिवी ।
इमे वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु ॥ २७

शुक्रश्च शुचिश्च ग्रैष्मा ऋतू नभश्च नभस्यश्च वार्षिका ऋतू इषश्चोर्जश्च शारदा ऋतू सहश्च सह-
स्यश्च हैमन्तिका ऋतू तपश्च तपस्यश्च शैशिरा ऋतू अग्नेरन्तश्श्लेषोऽसि ॥ २८

[ते नोऽवन्तु० । अथर्व. ३,२७,१—६]
[१०] मै. २,८,१२,१३ (२४-२९,३१-३३) । कपि. २६,९ । वा. १३,२४-२५; १४,६,१५-१६,२७; १५,५७-५८,
६३-६५; १७,१—३ । काण्व. १४,२४—२६; १५,५,१५—१६,३१; १६,७९,८३—८५ १८,१—४ । तै.
सं. ४,४,११ । मा. श्रौ. ६,६,१ । [प्रोथदश्वो न० । ऋ. ७,३,२; ऋ. १२२०; तै. सं. ४,४,११]

कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः ।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ॥ २९
येऽग्नयस्समनसोऽन्तरा द्यावापृथिवी ।
इमे शैशिरा ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु ॥ ३०

सहस्रस्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि साहस्रोऽसि सहस्राय त्वेमा मे अग्न
इष्टका धेनवस्सन्त्वेका च दश च दश च शतं च शतं च सहस्रं च सहस्रं चायुतं चायुतं च प्रयुतं
च प्रयुतं च नियुतं च नियुतं चार्बुदं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च ता मे
अग्न इष्टका धेनवस्सन्त्वृतवस्स्थतावृध ऋतुष्ठास्स्थर्तुस्पृशो घृतश्चुतो मधुश्चुत ऊर्जस्वतीस्स्वधायिनीर्विराजो
नाम कामदुघास्ता मे अग्न इष्टका धेनवस्सन्तु ॥१०॥ ३१

तत् पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ३२
नमस्ते रुद्र मन्यव उतो त इषवे नमः । बाहुभ्यामुत ते नमः ॥ ३३
या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥ ३४
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥ ३५
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नस्सर्वमिज्जगदयक्ष्मं सुमना असत् ॥ ३६
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव ॥ ३७
असौ यस्ताम्रो अरुण उत बभ्रुस्सुमङ्गलः ।
ये चेमे रुद्रा अभितो दिक्षु श्रितास्सहस्रशोऽवैषां हेड ईमहे ॥ ३८
असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नुतैनमुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ॥ ३९
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥ ४०

[सहस्रं च०...चार्बुदं च । श्र. परि. ३३,७ (द्वि. पा.) ।
[११] मै. २,९,१—२ (३,२४—२८) । कपि. २७,१ । वा. १६,१—१४ । काण्व. १७,१—१४ । तै. सं. ४,५,१ । मा.
श्रौ. ६,२,४ । [यथा नस्सर्वमिज्ज० । ऋ. १०,१४१,४; अथर्व. ३,२०,६ । अहींश्च सर्वाञ्जम्भय० । ऋ.
१,१९१,८; अथर्व. ४,९,९]

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥ ४१
विज्यं धनुः कपर्दिनो विशल्यो बाणवानुत । अनेशन्नस्येषव आभुरस्य निषङ्गथिः ॥ ४२
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः । तयास्मान् विश्वतस्त्वमयक्ष्मेण परिभुज ॥ ४३
परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥ ४४
नमस्ते त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ ४५
अवतत्य धनुस्त्वँ सहस्राक्ष शतेषुधे । निशीर्य शल्यानां मुखँ शिवो नस्सुमना भव ॥ ४६
या त इषुश्शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो मृड जीवसे ॥११॥ ४७

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमश्शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतस्पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमस्सूतायाहन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम आक्रन्दयत उच्चैर्घोषाय सत्त्वानां पतये नमो नमः कृत्स्नवीताय धावते पत्तीनां पतये नमो नमस्सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचराय परिचरायारण्यानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमस्सृकायिभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः॥१२॥४८

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमस्स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमश्शयानेभ्य आसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमस्सभाभ्यस्सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम आव्याधिनीभ्यो विविध्यद्भ्यश्च वो नमो नम उगणाभ्यस्तृँहतीभ्यश्च वो नमो नमो व्रातेभ्यो

[१२] मै. २,९,३ (२९)। कपि. २७,२। वा. १६,१७-२२। काण्व. १७,१७—२२। तै. सं. ४,५,२—३।
[१३] मै. २,९,४—५ (३०—३१)। कपि. २७,३। वा. १६,२२—२९। काण्व. १७,२२—२९। तै. सं. ४,५,३-५।
मा. श्रौ. ६,२,४।

व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमस्सेनाभ्यस्सेनानिभ्यश्च वो नमो नमो रथिभ्यो वरूथिभ्यश्च वो नमो नमो महद्भ्योऽर्भकेभ्यश्च वो नमो नमो युवभ्य आशिनेभ्यश्च वो नमो नमः क्षत्तृभ्यस्संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमो नमश्श्वनिभ्यो मृगयुभ्यश्च वो नमो नमश्श्वभ्यश्श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमश्शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमो व्युप्तकेशाय च कपर्दिने च नमस्सहस्राक्षाय च शतधन्वने च ॥१३॥ ४९

नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृध्वने च नमोऽग्र्याय च प्रथमाय च नम आशवे चाजिराय च नमश्शीभाय च शीघ्र्याय च नम ऊर्म्याय चावस्वन्याय च नमो नाद्याय च द्वीप्याय च नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो बुध्न्याय च जघन्याय च नमस्सोभ्याय च प्रतिसर्याय च नम आशुषेणाय चाशुरथाय च नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमश्शूराय चावभेदिने च नमश्श्रुताय च श्रुतसेनाय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय खल्याय च नमश्श्लोक्याय चावसान्याय च नमश्श्रवाय च प्रतिश्रवाय च नमो वन्याय च कक्ष्याय च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमस्स्वायुधाय च सुधन्वने च ॥१४॥ ५०

नमस्स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमो नाद्याय च वैशन्ताय च नमः कुल्याय च सरस्याय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नमो वीध्र्याय चातप्याय च नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमस्सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमश्शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमो हन्त्रे च हनीयसे च नमोऽग्रेवधाय च दूरेवधाय च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमश्शंकराय च मयस्कराय च नमश्शिवाय च शिवतराय च नमः किंशिलाय च क्षयणाय च नम इरिण्याय च प्रपथ्याय च नमः पुलस्तिने च कपर्दिने च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय

[१४] मै. २,९,५—७ (३२—३३)। कपि. २७,४। वा. १६,२९—३६। काण्व. १७,२९—३६। तै. सं. ४,५,४-८।
[१५] मै. २,९,६—८ (३२—३४)। कपि. २७,५। वा. १६,३७-४६। काण्व. १७,३७-४६। तै. सं. ४,५,६-९।
मा. श्रौ. ६,२,४।

चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः फेन्याय च शष्प्याय च नमस्सिकत्याय च प्रवाह्याय च नमो ह्रदव्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमश्शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नमः पांसव्याय च रजस्याय च नमस्सूर्म्याय चोर्म्याय च नमः पर्ण्याय च पर्णशदाय च नम आखिदते च प्रखिदते च नमोऽभिघ्नते चापगुरमाणाय च नम आखिदाय च विखिदाय च ॥१५॥ ५१

नमो वः किरिकेभ्यो देवानाँ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षीणकेभ्यो नम आनिर्हतेभ्यः ॥ ५२

द्रापे अन्धसस्पते दरिद्र नीललोहित । आसां प्रजानामेषां पुरुषाणामेषां पशूनाम् ।
मा भेर्मा रोङ् मा नः किञ्चनाममत् ॥ ५३
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा नश्शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ५४
या ते रुद्र शिवा तनूश्शिवा विश्वाह भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥ ५५
परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५६
मीढुष्टम शिवतम शिवो नस्सुमना भव ।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान उचर पिनाकं बिभ्रदुचर ॥ ५७
विकिरिद विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रँ हेतयोऽन्यमस्मन्निवपन्तु ताः॥५८
सहस्रधा सहस्राणि हेतयस्तव बाह्वोः । तासामीशानो भगवः पराचीना मुखा कुरु ॥ ५९
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६०
येऽस्मिन् महत्यर्णवेऽन्तरिक्षे भवा अधि ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६१
ये नीलग्रीवाश्शितिकण्ठा दिवं रुद्रा उपश्रिताः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६२

[१६] मै. २,९,९ (३५-५३)। कपि. २७,६। वा. १६,४६-६६। काण्व. १७,४६-६४। तै. सं. ४,५,९-१०। मा. श्रौ. ६,२,४। [मा भे (मे)र्मा०...ममत्। अथर्व. ६,५७,३। इमा रुद्राय०...नातुरम्। ऋ. १,११४, १। परि णो (नो)रुद्रस्य०। ऋ. २,३३,१४; अथर्व. ४,२१,७]

ये नीलग्रीवाश्शितिकण्ठाश्शर्वा अधः क्षमाचराः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६३
ये वनेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६४
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६५
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६६
ये पथीनां पथिरक्षय ऐडमृदा यव्युधः । तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६७
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६८
य एतावन्तो वा भूयाँसो वा दिशो रुद्रा वितस्थिरे ।
तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ६९

नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि । नमो अस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि । नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमो अस्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥१६॥ ७०

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि संभृताम् ।
तां न ऊर्जं धत्त मरुतस्संरराणा अश्मन्ते क्षुद्धं द्विष्मस्तं ते शुगृच्छतु ॥ ७१
समुद्रस्य त्वावकयाग्ने परिव्ययामसि ।
अन्यांस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यँ शिवो भव ॥ ७२

[ते नो मृडयन्तु (मृडत)० ...दधामि(दध्मः)। अथर्व. ३,२६,१-६; २७,१-६]

[१७] मै. २,१०,१ (१-१३)। कपि. २८,१। वा. १७,१,४-१५; ११,८३; ३६,२०। काण्व. १८,१,५-१५; १२,८४; ३६,२०। तै. ४,६,१। मा. श्रौ. ६,२,४।

हिमस्य त्वा जरायुणाग्ने परिव्ययामसि ।
अन्याँस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यँ शिवो भव ॥ ७३
उप ज्मन्नुप वेतसेऽवतर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरागहि ।
सेमं नो यज्ञं पावकवर्णँ शिवं कृधि ॥ ७४
अपामिदं न्ययनँ समुद्रस्य निवेशनम् ।
अन्याँस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यँ शिवो भव ॥ ७५
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥ ७६
पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न केतुना ।
तूर्वन् न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥ ७७
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।
अन्याँस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यँ शिवो भव ॥ ७८
नृषदे वेडप्सुषदे वेडप्सुषदे वेड् बर्हिषदे वेट् स्वर्विदे वेट् ॥ ७९
ये देवा देवानां यज्ञिया यज्ञियानाँ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन् स्वयं पिबन्तु मधुनो घृतस्य ॥ ८०
ये देवा देवेभ्यो अधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य ।
येभ्यो नर्ते पवते धाम किंचन न ते दिवो न पृथिव्या अधि स्नुषु ॥ ८१
प्राणदा व्यानदा अपानदा वर्चोदा वरिवोदाः ।
अन्याँस्ते अस्मत् तपन्तु हेतयः पावको अस्मभ्यँ शिवो भव ॥१७॥ ८२
स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायस्सुवीर्यस्य तं दात् पर्षन्नो अति सश्चतो अरिष्टान् ॥ ८३
तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश्चिद्यस्य नीलवत् सधस्थं नभो न रूपमरुषं वसानाः ॥ ८४
बृहस्पतिः प्रथमं जायमानः ॥ ८५

[हिमस्य त्वा०...परिव्ययामसि । ऋ. खि. १०,१; अथर्व. ६,१०६,३ । अपामिदं न्ययन०० । ऋ. १०, १४२,७; अथर्व. ६,१०६,२; तै. सं. ४,६,१,३ । अग्ने पावक रोचिषा० । ऋ. ५,२६,१; सा. १५९१; तै. सं. १,३,१४,८; ५,५,३; ४,६,१,२ । पावकया यश्चित० । ऋ. ६,१५,५; तै. सं. ४,६,१,२]

[१८] वा. २९,१९; २०,५०-५२; काण्व. ३१,२४; २२,३४-३७ [स आ नो योनिं० । ऋ. ७,९७,४ । तं शग्मासो अरुषासो० । ऋ. ७,९७,६ । बृहस्पतिः प्रथमं जायमान० । ऋ. ४,५०,४; अथर्व. २०,८८,४; तै. ब्रा. २,८,२,७]

तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणँ हुवेम ॥ ८६
स हि शुचिश्शतपत्रस्स शुन्ध्युर्हिरण्यवाशीरिषिरस्स्वर्षाः ।
बृहस्पतिस्स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ८७
एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सुप्रजा वीरवन्तो वयँ स्याम पतयो रयीणाम् ॥ ८८
प्र वां दँसाँस्यश्विना अवोचमस्य पतिस्स्याँ सुगवस्सुवीरः ।
उत पश्यन्नश्नुवन् दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥ ८९
अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदँसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥ ९०
यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।
तेन नश्शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥ ९१
त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥ ९२
सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥ ९३
सरस्वत्यभि नो नेषि वस्यो मापस्फरीः पयसा मा न आधक् ।
जुषस्व नस्सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥ ९४
इमा जुह्वाना ॥ ९५
पावीरवी कन्या चित्रायुस्सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रँ शरणँ सजोषा दुराधर्षं गृणते शर्म यँसत् ॥ ९६
इन्द्रस्सुत्रामा । तस्य वयम् ॥ ९७

[तमा नो अर्कममृताय० । ऋ. ७,९७,५ । स हि शुचिश्शतपत्र० । ऋ. ७,९७,७; तै. ब्रा. २,५,५,४ । एवा पित्रे विश्वदेवाय० । ऋ. ४,५०,६; अथर्व. २०,८८,६; तै. सं. १,८,२२,२ । प्र वां दँसाँस्यश्विना० । ऋ. १,११६,२५ । अतारिष्म तमस० । ऋ. ७,७३,१ । यो ह स्य वां रथिरा० । ऋ. ७,६९,५; तै. सं. १, ८७,८ । त्रिव(व)न्धुरेण त्रिवृता० । ऋ. १,११८,२ । सरस्वतीं देवयन्तो हवन्ते० । ऋ. १०,१७,७; अथर्व. १८,१,४१ । सरस्वत्यभि नो नेषि० । ऋ. ६,६१,१४; तै. ब्रा. २,४,३,१ । इमा जुह्वाना० । ऋ. ७,९५,५; तै. ब्रा. २,४,६,१ । पावीरवी कन्या चित्रायु० । ऋ. ६,४९,७; तै. सं. ४,१,११,२ । इन्द्रस्सुत्रामा स्ववाँ० । ऋ. ६,४७,१२; १०,१३१,६; अथर्व. ७,९१,१; २०,१२५,६; तै. सं. १,७,१३,४ । तस्य वयम्० । ऋ. ६,४७,१३; १०,१३१,७; अथर्व. ७,९२,१; २०,१२५,७; तै. सं. १,७,१३,५; नि. ६,७]

त्रातारमिन्द्रमवितारमिन्द्रँ हवे हवे सुहवँ शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः ॥ ९८
उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत् करिष्यन् ।
अग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥ ९९
अध स्मा ते चर्षणयो यदेजानिन्द्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ॥ १००
स्वस्तये वाजिभिश्च प्रणेतः ॥१८॥ १०१
युवँ सुराममश्विना नमुचा आसुरे सचा । विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥ १०२
होता यक्षदश्विना सरस्वतीमिन्द्रँ सुत्रामाणँ सोमानाँ सुराम्णां जुषन्तां व्यन्तु पिबन्तु सोमान् सुराम्णो होतर्यज ॥ १०३
पुत्रमिव पितरा अश्विनोभेन्द्रावतं काव्यैर्दँसनाभिः ।
यत् सुरामं व्यपिबश्शचीभिस्सरस्वती त्वा मघवन्नभिष्णक् ॥ १०४
आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम ॥ १०५
अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्यास्त्वया दत्तं काम्यं राध आगात् ।
शं यत् स्तोतृभ्य आपये भवात्युरुशँसाय सवितर्जरित्रे ॥ १०६
एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नश्शर्म त्रिवरूथं वियँसत् पातं नो द्यावापृथिवी उपस्थे ॥ १०७
तस्त्वा यामि ॥ १०८
यदत्र शिष्टं रसिनस्सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
तेनाहमद्य मनसा सुतस्य सोमं राजानमिह भक्षयामि ॥ १०९

[त्रातारमिन्द्रमवितार० । ऋ. ६,४७,११; सा. ३३३; अथर्व. ७,८६,१; तै. सं. १,६,१२,५ । उग्रो जज्ञे वीर्याय० । ऋ. ७,२०,१ । अध स्मा ते चर्षणयो० । ऋ. ६,२५,७ । स्वस्तये वाजिभिश्च० । ऋ. ३,३०,१८]

[१९] मै. ३,११,४; ४,१२,५ (३०-३४, ११८-११९) । वा. १०,३३-३४; २०,७६-७७; २१,२,४१; १८,४९; १९,७,३५,३७ । काण्व. ११,५६-५७; २२,६१-६२; २३,२,४३; २०,१९; २१,६,३५,३९ । [युवँ सुराममश्विना० । ऋ. १०,१३१,४; अथर्व. २०,१२५,४; तै. ब्रा. १,४,२,१ । पुत्रमिव पितरा० । ऋ. १०,१३१,५; अथर्व. २०,१२५,५; तै. ब्रा. १,४,२,१ । आ देवो यातु० । ऋ. ७,४५,१; तै. ब्रा. २,८,६,१ । अस्मभ्यं तद्दिवो अद्भ्यः० । ऋ. २,३८,११ । एवा वन्दस्व वरुणं० । ऋ. ८,४२,२; तै. ब्रा. २,५,८,४ । तस्त्वा यामि० । ऋ. १,२४,११; तै. सं. २,१,११,६]

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
अहानीव सूर्यो वासराणि प्र ण आयूँषि जीवसे सोम तारीः ॥ ११०
नाना हि देवैश्चकृषे सदो वां मा सँसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा माँ हिँसिष्टं यत् स्वं योनिमाविशाथः ॥ १११
त्वँ सोम सुरया संविदानः प्रजामन्यः क्षत्रमन्यः पिपर्तु ।
युवं नो अत्र वरिवः कृणुतं वयँ स्याम पतयो रयीणाम् ॥ ११२
इन्द्राग्नी मेतं निर्ह्वेथां यँ सोमं पपिमा वयम् ।
इहैषो अस्तु भक्षितश्शिवश्शिवाभिरूतिभिः ॥ ११३
द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वं भुवनँ समेति यदन्तरा पितरं मातरं च ॥ ११४
यस्ते राजन् वरुण द्रुहः पाशो गायत्रच्छन्दाः पृथिवीमन्वाविवेश ब्रह्मणि प्रतिष्ठितस्तं त एतदवयजे तस्मै स्वाहा यस्ते राजन् वरुण द्रुहः पाशस्त्रिष्टुप् छन्दा अन्तरिक्षमन्वाविवेश क्षत्रे प्रतिष्ठितस्तं त एतदवयजे तस्मै स्वाहा यस्ते राजन् वरुण द्रुहः पाशो जगच्छन्दा दिवमन्वाविवेश विशि प्रतिष्ठितस्तं त एतदवयजे तस्मै स्वाहा यस्ते राजन् वरुण द्रुहः पाशोऽनुष्टुप् छन्दा दिशोऽन्वाविवेश पशुषु प्रतिष्ठितस्तं त एतदवयजे तस्मै स्वाहा ॥१९॥ ११५
[१४०४]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकाया भुवक्षितिर्नाम सप्तदशं स्थानकं संपूर्णम् ॥१७॥

[इषिरेण ते मनसा० । ऋ. ८,४८,७; नि. ४,७ । द्वे सृती (स्रुती) अशृणवं० । ऋ. १०,८८,१५; तै. ब्रा. १,४,२,३; २,६,३,५; शत. ब्रा. १४,९,१,४]

अथाष्टादशं स्थानकम् ।

चमाः ।

अग्निस्तिग्मेन शोचिषा यंसद्विश्वं न्यत्रिणम् । अग्निर्नो वंसते रयिम् ॥ १
य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः परमच्छदवरा आविवेश ॥ २
विश्वकर्मा विमना यो व्योमा धाता विधाता परमो न संदृक् ।
स नो महानि समिषो महत्त्वां यत्र सप्तर्षीन् परं एकमाहुः ॥ ३
त आयजन्त द्रविणा समस्मा ऋषयः पूर्वे जनिमानि भूना ।
असूर्ता सूर्ते रजसि न सत्ता ये भूतानि समकृण्वन्निमानि ॥ ४
यो नः पिता जनिता यो विधाता यो नस्सतो अभ्या सज्जिनाय ।
यो देवानां नामधा एको अस्ति तं संप्रश्नं भुवना यन्त्यन्या ॥ ५
न तं विदाथ य इदं जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ ६
विश्वकर्मा चेदजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भं व्युदधात् पुरुत्रा ॥ ७
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवास्समपश्यन्त विश्वे ॥ ८
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवास्समपश्यन्त विश्वे ।
अजस्य नाभा अध्येकमर्पितं तत्रेदं विश्वं भुवनमधि श्रितम् ॥१॥ ९

[१] मै. २,१०,२-३(१४-१५; २४-३०)। कपि. २८,२। वा. १७,१६-१७,२६-३१। काण्व. १८,१६-१७,२६-३१। तै. सं. ४,६,१—२। मा. श्रौ. ६,२,५। [अग्निस्तिग्मेन शोचिषा०। ऋ. ६,१६,२८; सा. २२; तै. सं. ४,६, १-२। मा. श्रौ. ६,२,५। य इमा विश्वा भुवनानि०। ऋ. १०,८१,१; तै. सं. ४,६,२,१। विश्वकर्मा विमना०। ऋ. १०,८२,२; तै. सं. ४,६,२,१; नि. १०,२६। त आयजन्त द्रविणा०। ऋ. १०,८२,४; तै. सं. ४,६,२,२; नि. ६,१५। यो नः पिता जनिता०। ऋ. १०,८२,३; अथर्व. २,१,३; तै. सं. ४,६,२,१, तै. आ. १०,१,४। न तं विदाथ य०। ऋ. १०,८२,७; तै. सं. ४,६,२,२; नि. १४,१०। परो दिवा पर एना०। ऋ. १०,८२,५, तै. सं. ४,६,२,२। तमिद्गर्भं प्रथमं दध्र०। ऋ. १०,८२,६; तै. सं. ४,६,२,२]

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदिदन्ता अदद्दन्त पूर्व ॥ १०
किं स्विदासीद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥ ११
किं स्विदासीदारम्भणमधिष्ठानं कतमत् स्वित् कथासीत् ।
यदिद्भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ १२
यो विश्वचक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमते सं यजत्रैर्द्यावापृथिवी जनयन् देव एकः ॥ १३
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषा स्वधावस्स्वयं यजस्व तन्वं जुषाणः ॥ १४
विश्वकर्मन् हविषा वावृधानस्स्वयं यजस्व तन्वं स्वाहिते ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥ १५
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशस्समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत् ॥ १६
वाचस्पतिं विश्वकर्माणमूतये मनोयुजं वाजे अद्या हुवेम ।
स नो नेदिष्ठं हवनान्यागमद्विश्वशंभूरवसे साधुकर्मा ॥२॥ १७

उदेनमुत्तरां नयाग्ने घृतेनाहुतः । रायस्पोषेण संसृज प्रजया च बहुं कृधि ॥ १८
इन्द्रेमं प्रतरं कृधि सजातानामसद्वशी । समेनं वर्चसा सृज देवेभ्यो भागदा असत् ॥ १९
यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवा अधिब्रुवन्नयं च ब्रह्मणस्पतिः ॥ २०

[२] मै. २,१०,२-३ (१६-२३)। कपि. २८,२। वा. ८,४५-४६; १७,१८-२५। काण्व. ८,२६-२८, १८,१८-२५। तै. सं. ४,६,१-२। मा. श्रौ. ६,२,५। [चक्षुषः पिता मनसा०। ऋ. १०,८२,१; तै. सं. ४,६,२,४। किं स्विद्वनं क उ स०। ऋ. १०,८१,४; तै. सं. ४,६,२,५; तै. ब्रा. २,८,९,६। किं स्विदासीदारम्भण०। ऋ. १०,८१,२; तै. सं. ४,६,२,४। यो (विश्वतश्चक्षुरुत)विश्वतो०। ऋ. १०,८१,३; अथर्व. १३,२,२६; तै. सं. ४,६,२,४; तै. आ. १०,१,३। या ते धामानि परमाणि०। ऋ. १०,८१,५; तै. सं. ४,६,२,५। विश्वकर्मन् हविषा वावृधान०। ऋ. १०,८१,६; सा. १५८९; तै. सं. ४,६,२,६; नि. १०,२७। वाचस्पतिं विश्वकर्माण०। ऋ. १०,८१,७, तै. सं. ४,६,२,५]

[३] मै. २,१०,४-५ (३१-३३, ४४-५५)। कपि. २८,३। वा. १७,५०-६४, १२,५६; १५,६१। काण्व. १८, ५०—६४; १३,५७; १६,८२। तै. सं. ४,६,३—४। मा. श्रौ. ६,२,५। [उदेनमुत्तरां नयाग्ने०। अथर्व. ६,५,१। इन्द्रेमं प्रतरं०... असत्। अथर्व. ६,५,२। तस्मै देवा (सोमो)०। ऋ. १०,१७३,३ (उत्तरार्धः); अथर्व. ६,५,३; ८७,३]

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वं सुप्रतीको विभावसुः ॥ २१
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात् ॥ २२
समिद्धे अग्ना अधि मामहान उक्थपत्र ईड्यो गृभीतः ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमशमन्त देवाः ॥ २३
दैव्याय धर्त्रे जोष्ट्रे देवश्रीश्श्रीमनाश्शतपयाः परिगृह्य यज्ञमयान् ॥ २४
हरिकेशस्सूर्यरश्मिः पुरस्तात् सविता ज्योतिरुदयानजस्रम् ।
तस्य पूषा प्रसवे याति देवस्संपश्यन् विश्वा भुवनानि गोपाः ॥ २५
देवा देवेभ्यो अध्वरीयन्तो अस्थुर्वीतं शमितं शमिता यजध्यै ।
तुरीयो यज्ञो यत्र हव्यमेति ततो वाका आशिषो नो जुषन्ताम् ॥ २६
विमान एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाची अभिचष्टे घृताची अन्तरा पूर्वमपरं च केतुम् ॥ २७
उक्षा समुद्रे अरुणस्सुपर्णः पूर्वस्य योनिं पितुराविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसः पात्यन्तौ ॥ २८
इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः । २९
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ ३०
सुम्नहूर्यज्ञ आ च वक्षत् । यक्षदग्निर्देवो देवाँ आ च वक्षत् ॥
वाजस्य मा प्रसवेनोद्ग्राभेणोदजीगृभम् ।
अधा सपत्नाँ इन्द्रो मे निग्राभेणाधराँ अकः ॥ ३१
उद्ग्राभश्च निग्राभश्च ब्रह्म देवा अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥३॥ ३२
क्रमध्वमग्निना नाकमुख्यं हस्तेषु बिभ्रतः । दिवः पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम् ॥ ३३
प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्ने भवेह ।
विश्वा आशा दीद्यद्विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥ ३४

[हरिकेशस्सूर्यरश्मि (सूर्यरश्मिर्हरिकेशः)०। ऋ. १०,१३९,१; तै. सं. ४,६,३,३। विमान (नृचक्षा) एष दिवो०। ऋ. १०,१३९,२; तै. सं. ४,६,३,३। उक्षा समुद्रे (०ग्नो)०। ऋ. ५,४७,३; तै. सं. ४,६,३,३। इन्द्रं विश्वा अवीवृधन्०। ऋ. १,११,१; सा. ३४३,८२७; तै. सं. ४,६,३,४; तै. ब्रा. २,७,१५,५] ... क्ण्व. १८,६५—७६,७९। तै. सं. ४,६,५।

[४] मै. २,१०,६ (५६-६७)। कपि. २८,४। वा. १७,६५-७६,७९। मा. श्रौ. ६,२,५। [क्रमध्वमग्निना०। अथर्व. ४,१४,२]

पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ॥ ३५
स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥ ३६
अग्ने प्रेहि प्रथमो देवायतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिस्सजोषास्स्वर्यन्तु यजमानास्स्वस्ति ॥ ३७
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकं समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदाः ॥ ३८
अग्ने सहस्राक्ष शतमूर्धञ्छततेजश्शतं ते प्राणास्सहस्रं व्यानाः । त्वं साहस्रस्य राय ईशिषे तस्मै
ते विधेम वाजाय स्वाहा । सुपर्णोऽसि गरुत्मान् । पृष्ठे पृथिव्यास्सीद भासान्तरिक्षमापृण ज्योतिषा
दिवमुत्तभान । तेजसा दिश उद्दृंह ॥ ३९
आजुह्वानस्सुप्रतीकः पुरस्तादग्ने स्वं योनिमासीद साध्या ।
अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ ४०
तां सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् ।
यामस्य कण्वो अदुहत् प्रपीनां सहस्रधारां पयसा महीं गाम् ॥ ४१
अग्ने विधेम ते परमे जन्मन् विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथ यजा तं प्र त्वे हवींषि जुहुमस्समिद्धे ॥ ४२
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वां शश्वन्त उपयन्ति वाजाः ॥ ४३
सप्त ते अग्ने समिधस्सप्त जिह्वास्सप्तर्षयस्सप्त धाम प्रियाणि ।
सप्त होत्रा अनुविद्वान् सप्त योनीरापृणस्वा घृतेन ॥४॥ ४४
आशुश्शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरश्शतं सेना अजयत् साकमिन्द्रः ॥ ४५

[पृथिव्या अहमुदन्तरिक्ष०। अथर्व. ४,१४,३। स्वर्यन्तो नापेक्षन्त०। अथर्व ४,१४,४। अग्ने प्रेहि प्रथमो०। अथर्व. ४,१४,५। नक्तोषासा समनसा०। ऋ. १,९६,५; ११३,३; सा. १७५१ (च. पा.)। तै. सं. ४,१,१०,४; ६,५,२; ७,१२,३। तां सवितुर्वरेण्यस्य०। अथर्व. ७,१५,१। अग्ने (विधेम)ते परमे०। ऋ. २,९,३; तै. सं. ४,६,५,४। प्रेद्धो अग्ने दीदिहि०। ऋ. ७,१,३; सा. १३७५; तै. सं. ४,६,५,४]

[५] मै. २,१०,४ (३४—४३)। कपि. २८,५। वा. १७,३३—४१,४३। काण्व. १८,३३—४१,४३। तै. ४,६,३,४। मा. श्रौ. ६,१,५। आशुश्शिशानो वृषभो०। ऋ. १०,१०३,१; सा. १८४९; अथर्व. १९,१३,२; तै. सं. ४,६,४,१; नि. १,१५]

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ ४६
स इषुहस्तैस्स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ ४७
बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन् सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ ४८
बलविज्ञायस्स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिषत्वा सहोजिज्जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥ ४९
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाता अनुवीरयध्वमिन्द्रं सखायो अनु संरभध्वम् ॥ ५०
अभि गोत्राणि सहसा गाहमानोऽदयो वीरश्शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माकं सेना अवतु प्र युत्सु ॥ ५१
इन्द्र एषां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये ॥ ५२
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ ५३
अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता भरेष्वा ॥५॥ ५४

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च सत्यश्चर्तपाश्चात्यँहा ईदृङ् चान्यादृङ्

[संक्रन्दनेनानिमिषेण० ऋ. १०,१०३,२; सा. १८५०; अथर्व. १९,१३,३; तै. सं. ४,६,४,१। स इषुहस्तैः सनिषङ्गिभिः० ऋ. १०,१०३,३; सा. १८५१; अथर्व. १९,१३,४; तै.सं. ४,६,४,१। बृहस्पते परिदीया०। ऋ. १०,१०३,४; सा. १८५२; अथर्व. १९,१३,८; तै. सं. ४,६,४,१। बलविज्ञायस्स्थविरः०। ऋ. १०,१०३, ५; सा. १८५३; अथर्व. १९,१३,५; तै. सं. ४,६,४,२। गोत्रभिदं गोविदं०। ऋ. १०,१०३,६; सा. १८५४; अथर्व. ६,९७,३; १९,१३,६; तै.सं. ४,६,४,२। अभि गोत्राणि सहसा०। ऋ.१०,१०३,७; सा. १८५५; अथर्व. १९,१३,७; तै. सं. ४,६,४,२। इन्द्र एषां (आसां) नेता०। ऋ. १०,१०३,८; सा. १८५६; अथर्व. १९,१३,९; तै. सं. ४,६,४,३। इन्द्रस्य वृष्णो वरुणस्य०। ऋ. १०,१०३,९; सा. १८५७; अथर्व. १९,१३,१०; तै. सं. ४,६,४,३। अस्माकमिन्द्रस्समृतेषु०। ऋ. १०,१०३,११; सा. १८५९; अथर्व. १९,१३,११; तै. सं. ४,६,४,३]

[६] मै. २,११,१ (१)। कपि. २८,६। वा. १७,८०—८१,८६। काण्व. १८,८०—८४,८६। तै. सं. ४,६,५। मा. श्रौ. ६,२,५।

च सदृङ् च प्रतिसदृङ् च मितश्च संमितश्च सभरा ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चान्तिमित्रश्च दूरेअमित्रश्च गणः ईदृक्षास एतादृक्षास ऊ षु णस्सदृक्षासः प्रतिसदृक्षास एतन मितासश्च संमितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्नेवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥६॥ ५५

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे प्राणश्च मे व्यानश्च मेऽपानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च म आयुश्च मे जरा च मे ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघ्मा च मे वृद्धं च मे वृद्धिश्च मे ॥७॥ ५६

सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे क्रीडा च मे मोदश्च मे वशश्च मे त्विषिश्च मे सूक्तं च मे सुकृतं च मे जातं च मे जनिष्यमाणं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे संविच्च मे ज्ञात्रं च मे विश्वं च मे महश्च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे ॥८॥ ५७

ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषाश्च मे सुदिनं च म ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे ॥ विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मेऽक्षितिश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे नीवाराश्च मे श्यामाकाश्च मेऽणवश्च मे प्रियङ्गवश्च मे गोधूमाश्च मे मसूराश्च मे मुद्गाश्च मे खल्वाश्च मे॥९॥५८-५९

[७] मै. २,११,२ (२)। कपि. २८,७। वा. १८,१-४। काण्व. १९,१३-१६। तै. सं. ४,७,१-२। मा. श्रौ. ६,२,५।
[८] मै. २,११,३ (३)। कपि. २८,८। वा. १८,५,७—८,११। काण्व. १९,१७-२०। तै. सं. ४,७,२—३।
[९] मै. २,११,३—४ (३—४)। कपि. २८,९। वा. १८,६,९—१०,१२। काण्व. १९,२१—२४। तै. सं. ४,७,३—४।

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपु च मे श्यामं च मे लोहितायसं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च मे वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इत्या च मे गतिश्च मेऽग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे धाता च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे ॥१०॥ ६०

अंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपांशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रायणश्च मे क्षुल्लकवैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयश्च मे माहेन्द्रीयश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे पूतभृच्च मेऽधवनीयश्च मे ग्रावाणश्च मेऽधिषवणे च मेऽवभृथश्च मे स्वगाकारश्च मेऽग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तां व्रतं चर्तुश्च संवत्सरश्च तपश्चाहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥११॥ ६१

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च मेऽनड्वांश्च मे धेनुश्च म ऋषभश्च मे वेहच्च म एका च मे तिस्रश्च मे तिस्रश्च मे त्रयस्त्रिंशच्च मे चतस्रश्च मेऽष्टौ च मेऽष्टौ च मेऽष्टाचत्वारिंशच्च मे ॥ वाजश्च प्रसवश्चापिजश्च क्रतुश्च व्यश्नियश्च वसुश्च स्वर्मूर्धा च मूर्धा वैयश्नो व्यश्न्य आन्त्योऽन्त्यो भौवनो भुवनस्य पतिः प्रजापतिरियं ते राण्मित्रा यन्तासि यमन ऊर्जे त्वा वृष्ट्यै त्वा प्रजानां त्वाधिपत्यायायुर्यज्ञेन कल्पतां मनो यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा

[१०] मै. २,११,५ (५)। कपि. २८,१०। वा. १८,१३—१८। काण्व. १९,२५—३०। तै. सं. ४,७,५—८।
[११] मै. २,११,५—६ (५-६)। कपि. २८,११। वा. १८,१९-२३। काण्व. १९,३१—३५। तै. सं. ४,७,५—११। मा. श्रौ. ६,२,५।
[१२] मै. २,११,६ (६)। कपि. २९,१। वा. १८,२४—२९। काण्व. १९,३६—४३। तै. सं. ४,७,९—११। मा. श्रौ. ६,२,५। बृहच्च रथन्तरं च० । अथर्व. ८,१०,६]

यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतामृक् च साम च स्तोमश्च यजुश्च बृहच्च रथन्तरं च स्वर्देवा अगन्म प्रजापतेः प्रजा अभूमामृता अभूम वेट् स्वाहा ॥१२॥ ६२-६३

वाजस्य नु प्रसव इति षट् ॥ ६४
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयस्समिद्धाः ।
विश्वे मा देवा अवसागमन्निह विश्वमस्तु द्रविणं वाजे अस्मिन् ॥ ६५
आ मा वाजस्य वाजस्य नु ॥ ६६
वाजो मा सप्त प्रदिशश्चतस्रो वा परावतः । वाजो मा विश्वैर्देवैर्धनसाता इहावतु ॥ ६७
वाजो मे अद्य प्रसुवाति दानं वाजो देवान् हविषा वर्धयाति ।
वाजस्य हि प्रसवे नन्नमीति विश्वा आशा वाजपतिर्जयेयम् ॥ ६८
वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति ।
वाजस्य हि प्रसवे नन्नमीति सर्वा आशा वाजपतिर्भवेयम् ॥ ६९
सं मा सृजामि पयसा पृथिव्यास्सं मा सृजाम्यद्भिरोषधीभिः ।
सोऽहं वाजं सनाम्यग्ने ॥ ७०
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशस्सन्तु मह्यम् ॥१३॥ ७१

ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ताभ्यस्स्वाहा वट् सुषुम्णस्सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ताभ्यस्स्वाहा वट् संहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ताभ्यस्स्वाहा वड् भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्स्तवा नाम स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ताभ्यस्स्वाहा वट् प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्क्सामान्यप्सरस एष्टयो नाम स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ताभ्यस्स्वाहा वडिषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जो

[१३] मै. २,१२,१ (१—६)। कपि. २९,२। वा. ९,१९; १८,३०—३६। काण्व. १०,२५; २०,१—७। तै. सं. ४, ७,१२। मा. श्रौ. ६,२,५। [विश्वे अद्य मरुतो०। ऋ. १०,३५,१३; तै. सं. ४,७,१२,१। वाजस्य नु०। अथर्व. ७,६,४]
[१४] मै. २,१२,२—३ (७—८)। कपि. २९,३। वा. १८,३८—४५। काण्व. २०,८—१५। तै. सं. ३,४,७; ४,७, १२—१३। मा. श्रौ. ६,२,५—६।

नाम सं न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वट् ताभ्यस्स्वाहा वट् ॥ सं नो भुवनस्य पते यस्यं त
उपरि गृहा विराट्पते ॥ अस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा ॥ समुद्रोऽसि नभस्वा-
नार्द्रदानुश्शंभुर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुतां गणश्शंभुर्मयोभूरभि मा वाहि स्वाहा-
वस्युरसि दुवस्वाञ्छंभुर्मयोभूरभि मा वाहि स्वाहा ॥१४॥ ७२-७५

अग्निं युनज्मि शवसा घृतेन दिव्यँ सुपर्णं वयसा बृहन्तम् ।
तेन वयं पतेम ब्रध्नस्य विष्टपँ स्वो रुहाणा अधि नाक उत्तमे ॥ ७६
इमौ ते पक्षा अजरौ पतत्रिणो याभ्यां रक्षाँस्यपहँस्यग्ने ।
ताभ्यां वयं पतेम सुकृतामु लोकं यत्रर्षयो जग्मुः प्रथमाः पुराणाः ॥ ७७
इन्दुर्दक्षश्श्येन ऋतावा हिरण्यपक्षश्शकुनो भुरण्युः ।
महान् सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिंसीः ॥ ७८
दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् ।
विश्वायुश्शर्म सप्रथा नमस्पथे विश्वस्य मूर्धन्नधितिष्ठसि श्रितः ॥ ७९
समुद्रे ते हृदयमन्तरायुरुद्रो देह्युदधिं भिन्धि ।
दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो मा वृष्ट्यावा ॥ ॥१५॥ ८०

समास्त्वाग्न ऋतवा वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशः पृथिव्याः ॥ ८१
सं चेध्यस्वाग्ने प्र च वोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसस्सन्तु मान्ये ॥ ८२
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः ।
सपत्नहाग्ने अभिमातिजित्स्वे गये जागृह्यप्रयुच्छन् ॥ ८३
इहैवाग्ने अधिधारया रयिं मा त्वा निक्रन् पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥ ८४

[१५] मै. २,१२,३ (९—१३) । कपि. २९,४ । वा. १८,५१—५५ । काण्व. २०,११—१५ । तै. सं. ४,७,१२-१३ । मा. श्रौ. ६,२,५—६ ।
[१६] मै. २,१२,५ (२५-३४) । कपि. २९,४ । वा. २७,१-१०; २०,२३; ३५,१४; ३८,२४ । काण्व. २९.१—१०; ११,६; ३५.४७; ३८,२४ । तै. सं. ४,१,७ । [समास्त्वाग्न ऋतवो० । अथर्व. २,६,१ । सं चेध्यस्वाग्ने० । अथर्व. २,६,२ । त्वामग्ने वृणते० । अथर्व. २,६,३ । इहैवाग्ने अधिधारया० । अथर्व. ७,८२,३]

क्षत्रेणाग्ने स्वेन संरभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानां मध्यमेष्ठेयाय राज्ञामग्ने विहव्यो दीदिहीह ॥ ८५
अति निहो अति स्रिधो अत्यचित्तिमति निर्ऋतिमद्य ।
विश्वा ह्यग्ने दुरिता तर त्वमथास्मभ्यँ सहवीरं रयिं दाः ॥ ८६
अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह ।
विश्वा अमीवाः प्रमुञ्चन्मानुषेभ्यश्शिवेभिरद्य परिपाहि नो वृधे ॥ ८७
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ८८
उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ८९
बृहस्पते सवितर्बोधयैनँ सँशितं चित्संतरां सँशिशाधि ।
वर्धयैनं महते सौभगाय विश्व एनमनुमदन्तु देवाः ॥ ९०
क्षत्रभृदग्निरनिभृष्टतेजास्सहस्रियो द्योततामिध्यमानः ।
वर्ष्मन् पृथिव्या अधि जातवेदा उदन्तरिक्षमारुहदगन् द्याम् ॥१६॥ ९१
ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः ।
द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ९२
तनूनपादसुरो विश्ववेदा देवो देवेषु देवः ।
पथो अनक्ति मध्वा घृतेन मध्वा यज्ञं नक्षति प्रीणानः ॥ ९३
नराशँसो अग्ने सुकृद्देवस्सविता विश्ववारः । अच्छायं यन्ति शवसा घृताचीः ॥ ९४
ईडाना वह्निं नमसाग्निं स्रुचो अध्वरेषु प्रयत्सु । स यक्षदस्य महिमानमग्नेः ॥ ९५
स्तनी मन्द्रस्सुप्रयक्षुः । वसुश्रेष्ठो वसुधातमश्च ॥ ९६
द्वारो देवीरन्वस्य विश्वा व्रता ददन्ते अग्नेः । उरुव्यचसो धाम्ना पत्यमानाः ॥ ९७

[क्षत्रेणाग्ने स्वेन० । अथर्व. २,६,४ । अति निहो अति० । अथर्व. २,६,५ । अनाधृष्यो जातवेदा० । अथर्व. ७,८४,१ । शिवेभिरद्य०...वृधे० । ऋ. ६,७१,३; तै. सं. १,४,२४,१; तै. ब्रा. २,४,४,७ । अमुत्रभूया०... । अथर्व. ७,५३,१ । उद्वयं तमसस्परि० । ऋ. १,५०,१०; अथर्व. ७,५३,७; तै. सं. ४,१,७,४; तै. ब्रा. २,४, ४,९; ६,६,४; तै. आ. ६,३,२ । बृहस्पते सवित० । अथर्व. ७,१६,१]
[१७] मै. २,१२,६ (३५-४६) । कपि. २९,५ । वा. २७,११—२२ । काण्व. २९,११—२२ । तै. सं. ४,१,८ । [ऊर्ध्वा अस्य० । अथर्व. ५,२७,२ । तनूनपादसुरो० । अथर्व. ५,२७,१—२ । मध्वा यज्ञं० । अथर्व. ५,२७,३ । नराशँसो अग्ने० । अथर्व. ५,२७,३—४ । ईडाना वह्निं० । अथर्व. ५,२७,४—५ । स्तनी (तरी)मन्द्रस्सु (मन्द्रासु)० । अथर्व. ५,२७,६ । द्वारो देवीरन्वस्य० । अथर्व. ५,२७,७—८]

ते अस्य योषणे दिव्यो न योनिरुषासानक्ताग्नेः । इमं यज्ञमवतामध्वरं नः ॥ ९८
दैव्या होतारोर्ध्वमिममध्वरं नोऽग्नेर्जिह्वयाभिगृणीतम् । कृणुतं नस्स्विष्टम् ॥ ९९
तिस्रो देवीर्बर्हिरेदँ सदन्त्विडा सरस्वती भारती महीर्गृणानाः ॥ १००
तन्नस्तुरीपमद्भुतं पुरुक्षु । त्वष्टः पोषाय विष्य नाभिमस्मे ॥ १०१
वनस्पतेऽवसृज रराणस्त्मना देवेषु । अग्निर्हविश्शमिता सूदयाति ॥ १०२
अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदं जुषन्ताम् ॥१७॥ १०३

येनर्षयस्तपसा सत्रमासतेन्धाना अग्निं स्वराभरन्तः ।
तस्मिन्नहं निदधे नाके अग्निं यमाहुर्मनवस्स्तीर्णबर्हिषम् ॥ १०४
तं पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृह्णानास्सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ १०५
आ वाचो मध्यमरुहद्भुरण्युरयमग्निस्सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥ १०६
अयमग्निर्वीरतमो वयोधास्सहस्रियो द्योततामप्रयुच्छन् ।
विभ्राजमानस्सरिरस्य मध्य उपप्रयाहि दिव्यानि धामन् ॥ १०७
संप्रच्यवध्वमुप संप्रयाताग्ने पथो देवयानान् कृणुध्वम् ।
पुनः कृण्वन्ता पितरा युवानान्वाताँसीत् त्वयि तन्तुमेतम् ॥ १०८
उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सँसृजेथामयं च ।
अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ १०९
येन सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे ॥ ११०
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ १११

[ते अस्य (आ सुष्वयन्ती)योषणे० । अथर्व. ५,२७,८ । दैव्या होतारा० (पूर्वार्धः) । अथर्व. ५,२७,९ । तिस्रो देवी०(उत्तरार्धः) । अथर्व. ५,२७,९ । तन्नस्तुरीपमद्भुतं० । अथर्व. ५,२७,१० । वनस्पतेऽवसृज० । अथर्व. ५,२७,११ । अग्ने स्वाहा कृणुहि० । अथर्व. ५,२७,१२]
[१८] मै. २,१२,३—४ (१५—१९,२१—२४) । कपि. २९,६ । वा. १५,४९—५३; १८,५६—५७,६१—६२; ३,१४; १२,५२ । काण्व. १६,७१—७८; २०,२६-२७,३१—३२; ३,२२; १३,४५; ३२,३ । तै. सं. ४,७,१३; ३,१२,१० । मा. श्रौ. ६,२,६ । [येन सहस्रं वहसि० । अथर्व. ९,५,१७ । अयं ते योनिर्ऋत्वियो० । ऋ. ३,२९,१०; अथर्व. ३,२०,१; तै. सं. १,५,५,२; ४,२,४,३; ७,१३,५; तै. ब्रा. १,२,१,१६; २,५,८,८]

इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्वाँ अथर्वभिः ।
इष्टो अग्निराहुतस्स्वाहाकृतः पिपर्तु नः । इष्टँ हविस्स्वगेदं देवेभ्यो नमः ॥१८॥ ११२
जुहूँ संमार्ष्टि यज्ञमुखं वै जुहूर्यज्ञमुखमेवालभते जुह्वा वै देवा विराजमह्वयँस्तज्जुह्वा जुहूत्वमग्निर्वै
विराडग्निमेवैतद्विराजँ ह्वयति च्छन्दाँसि वै देवेभ्योऽपाक्रामन् यज्ञे भागधेयमिच्छमानानि न
वो भागधेयानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीतं प्रायच्छन्ननुवाक्यायै याज्यायै देवतायै
वषट्काराय यच्चतुर्गृहीतेन जुहोति च्छन्दाँस्येव भागधेयवन्ति करोति सावित्राणि जुहोति प्रसूत्या
एति वा एतद्यज्ञमुखाद्यदनाग्नेयमग्रे यज्ञस्य क्रियते यदष्टौ कृत्वो गृहीत्वाष्टा एतानि जुहोत्यष्टाक्षरा
गायत्री गायत्रोऽग्निस्तेन यज्ञमुखान्नैति प्रसूत्यै सावित्राणि युञ्जते मन इति मनस्वन्ति मनो ह्यग्रे
युज्यते मनसा यज्ञस्तायतेऽग्निर्ज्योतिरिति ज्योतिष्मत् सविता वा एतत् पृथिव्या ज्योतिस्समभरद्य-
देवास्यात्र न्यक्तं तदेतेन संभरति षड्ृचो भवन्ति षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति द्वे यजुषी द्विपा-
द्यजमानः प्रतिष्ठित्यै यदि कामयेत देवतां यज्ञयशसेनाहुत्यार्पयेयमित्यृचमन्ततः कुर्याद्देवतामेव
यज्ञयशसेनाहुत्यार्पयति यदि कामयेत यजमानं यज्ञयशसेनाहुत्यार्पयेयमिति यजुरन्ततः कुर्याद्यज-
मानमेव यज्ञयशसेनाहुत्यार्पयत्यृचा स्तोमँ समर्धयेति समृद्ध्यै गायत्रेण रथन्तरं बृहद्गायत्रवर्तनीतीयं वै
रथन्तरमसौ बृहद्यष्ट्या आहुत्या वा अभिक्रममन्वभिक्रम्य यजमानो वसीयान् भवत्याहुत्या अपक्रमम-
न्वपक्रम्य पापीयान् भवति सकृत् सर्वाण्यनुद्रुत्योत्तमेन जुहुयादाहुत्या एवाभिक्रममन्वभिक्रामति
वसीयान् भवत्येकैकेन जुहुयाद्यदि कामयेत सदृङ् यजमानस्स्यादिति यजूँष्येव नाना वीर्याणि करो-
त्यष्टा एतानि भवन्त्याहुतिर्नवमी त्रिवृतमेव यज्ञमुखँ संपादयति त्रिवृद्धि यज्ञमुखमूर्ध्वस्तिष्ठञ्जुहो-
त्यूर्ध्वो हि तिष्ठन् वीर्यावत्तरः पूर्णया स्रुचा जुहोति पूर्णः प्रजापतिः प्रजापतिमेवाप्नोति ॥१९॥ ११३
त्वँ ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता ।
त्वँ सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥ ११४
अधा होता न्यसीदो यजीयानिडस्पद इषयन्नीड्यस्सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनुग्मन् ॥ ११५
वृतेव यन्तं बहुभिर्वसव्यैस्त्वे रयिं जागृवाँसो अनुग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवाँसम् ॥ ११६

[१९] मै. ३,१,१ (१) । कपि. २९,७ । तै. सं. ५,११ । शत. ब्रा. ६,३,१,१ । वा. ५,१४; ११,४; ३७,२ । काण्व. ५,१०; १२,४; ३७,२ । [युञ्जते मन० । ऋ. ५,८१,१; तै. सं. १,२,१३,१; ४,१,१,१; तै. आ. ४,२,१]
[२०] मै. ४,१३,६ (४७—५९) । तै. ब्रा. ३,६,१० । [त्वँ ह्यग्ने प्रथमो० । ऋ. ६,१,१; तै. ब्रा. ३,६,१०,१ । अधा होता न्यसीदो० । ऋ. ६,१,२; तै. ब्रा. ३,६,१०,१ । वृतेव यन्तं बहुभिः० । ऋ. ६,१,३; तै. ब्रा. ३,६,१०,१]

पदं देवस्य नमसा व्यन्तश्श्रवस्यवश्श्रव आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥ ११७
त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुष्याणाम् ॥ ११८
सपर्येण्यस्स प्रियो विक्ष्वग्निर्होता मन्द्रो निषसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥ ११९
तं त्वा वयं सुध्यो नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥ १२०
विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥ १२१
सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर्विश्वेत् स वामा दधते त्वोतः ॥ १२२
अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥ १२३
आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्युस्तरुत्रः ।
बृहद्भिर्वाजैस्स्थविरेभिरस्मे रेवद्भिरग्ने वितरं विभाहि ॥ १२४
नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ॥ १२५
पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन् वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥२०॥ १२६

होता यक्षद्बृहस्पतिं छागस्य हविष आवयदद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घसन्नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतश्श्रोणितश्शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करदेवं बृहस्पतिर्जुषताँ हविर्होतर्यज होता

[पदं देवस्य नमसा० । ऋ. ६,१,४; तै. ब्रा. ३,६,१०,२; नि. ४,१९ । त्वां वर्धन्ति क्षितय:० । ऋ. ६,१,५; तै. ब्रा. ३,६,१०,२ । सपर्येण्यस्स प्रियो० । ऋ. ६,१,६; तै. ब्रा. ३,६,१०,३ । तं त्वा वयं सुध्यो० । ऋ. ६,१,८; तै. ब्रा. ३,६,१०,३ । विशां कविं विश्पतिं० । ऋ. ६,१,८; तै. ब्रा. ३,६,१०,३ । सो अग्न ईजे० । ऋ. ६,१,९; तै. ब्रा. ३,६,१०,४ । अस्मा उ ते महि० । ऋ. ६,१,१०; तै. ब्रा. ३,६,१०,४ । आ यस्ततन्थ० । ऋ. ६,१,११; तै. ब्रा. ३,६,१०,५ । नृवद्वसो सदमिद्धे० । ऋ. ६,१,१२; तै. ब्रा. ३,६,१०,५ । पुरूण्यग्ने पुरुधा० । ऋ. ६,१,१३; तै. ब्रा. ३,६,१०,५]
[२१] मै. ४,१३,७ (६१-६७) । वा. २१,४३-४७; २८,४१ । काण्व. २३,४४-४६; २३,५२ । तै. ब्रा. ३,६,११-१२,

यक्षदश्विना छागस्य हविष आत्तां घस्तां करत एवमश्विना जुषेताँ हविर्होतर्यज होता यक्षत् सरस्वतीं मेष्या हविष आवयद् घसत् करदेवँ सरस्वती जुषताँ हविर्होतर्यज होता यक्षदिन्द्रं मेषस्य हविष आवयद् घसत् करदेवमिन्द्रो जुषताँ हविर्होतर्यज ॥ १२७
देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् ।
प्रदक्षिणिद्रशनया नियूयर्तस्य वक्षि पथिभी रजिष्ठैः ॥ १२८

होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित यत्र बृहस्पतेश्छागस्य हविषः प्रिया धामानि यत्राश्विनोश्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेष्या हविषः प्रिया धामानि यत्रेन्द्रस्य मेषस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथाँसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतान् प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयस इव कृत्वी करदेवं देवो वनस्पतिर्जुषताँ हविर्होतर्यज ॥ १२९
वनस्पते रशनयाभिधाय पिष्टतमया वयुनानि विद्वान् ।
वहा देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचः ॥ १३०
पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँ ऋतुपते यजेह ।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वँ होतृणामस्यायजिष्ठः ॥ १३१

होता यक्षदग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाड् बृहस्पतेश्छागस्य हविषः प्रिया धामान्ययाडश्विनोश्छागस्य हविषः प्रिया धामान्ययाट् सरस्वत्या मेष्या हविषः प्रिया धामान्ययाडिन्द्रस्य मेषस्य हविषः प्रिया धामान्ययाड्वनस्पतेः प्रिया पाथाँस्ययाड् देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत् स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वराञ्जातवेदा जुषताँ हविर्होतर्यज ॥ आ देवानामिडामग्ने ॥ १३२-१३३
अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्य जातवेदः ।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥२१॥ १३४[१५३८]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां यमा नामाष्टादशं स्थानकं संपूर्णम् ॥१८॥

॥ संपूर्णा च इठिमिका ॥

[देवेभ्यो वनस्पते० । तै. ब्रा. ३,६,११,२ । देवो वनस्पतिर्जुषतां० । तै. ब्रा. ३,६,११,४ । वनस्पते रशनया० । ऋ. १०,७०,१०; तै. ब्रा. ३,६,१२,१; नि. ६,७ । पिप्रीहि देवाँ० । ऋ. १०,२,१; तै. सं. ४,३,१३,४; तै. ब्रा. ३,५,७,५; ६,११,४; काठ. २,१५; २०,१५ । आ देवानाम्० । ऋ. ३,१,१७; १०,९,३; ७०,२; अथर्व. १९,५९,३; तै. सं. १,१,१४,३ । इडा(ळा)मग्ने० । ऋ. ३,१,२३; ५,११; ६,११; ७,११; १५,७; २२,५; २३,५; ना. ७६; तै. सं. ४,२,४,३ । अग्निं सुदीतिं० । ऋ. ३,१७,४; तै. ब्रा. ३,६,९,१]

अथ मध्यमिका ।

एकोनविंशं स्थानकम् ।

सावित्रा ।

सावित्रैरभ्रिमादत्ते प्रसूत्या इयं वै गायत्र्यन्तरिक्षं त्रिष्टुब् द्यौर्जगती दिशोऽनुष्टुप् छन्दोभिरेवैनाभ्यो लोकेभ्य आवर्तयन्नुभयतःक्ष्णुद्भवत्यन्यतःक्ष्णुदेन्ये कालेनेयदश्वं क्रियतेऽश्वमर्कोऽर्कोऽग्निरश्वस्यार्कस्यावरुद्धया अरत्निमात्रीं कुर्यात् पुरुषेण वै यज्ञस्संमितो यज्ञपुरुषासंमितां व्याममात्रीं कुर्यादेतावद्वै पुरुषे वीर्यं वीर्येण संमितामपरिमितां कुर्यादपरिमितस्यावरुद्ध्यै यो वृक्षः फलग्राहिस्तस्य कुर्यादेष वै वनस्पतीनां वीर्यावत्तमस्सवीर्यत्वाय कल्माषीं वैणवीं सुषिरां कुर्यादग्निर्वै देवेभ्योऽपाक्रामत् स वेणुं प्राविशत् स एतानि वर्माण्यनह्यत यानि पर्वाण्येतं लोकमन्वचरयत् सुषिरस्स यत्र यत्रावसत् तदभिरदहत् तत् कल्माषमभवद्यत् कल्माषी वैणवी सुषिरा भवति सा ह्याग्नेयीतमा समृद्ध्या अथो यदेवास्यात्र न्यक्तं तस्यावरुद्ध्यै ॥१॥ १

अग्निर्वै देवेभ्योऽपाक्रामत् स यत्र यत्रागच्छत् तं प्रजापतिरन्वपश्यत् प्राजापत्योऽश्वो यदश्वेन यन्त्यग्निरेवानुख्यात्या एतेन वै देवा असुरानुत्तममभ्यभवन् यदश्वेन यन्ति भ्रातृव्यस्याभिभूत्या एतं वै रक्षाँसि नातरन् यदश्वेन यन्ति रक्षसामतीत्या अश्वं पूर्वं नयन्ति गर्दभमपरं पापवसीयसस्य व्यावृत्त्यै तस्मात् पुण्यं पूर्वं यन्तं पापीयान् पश्चादन्वेति गर्दभेन संभरति तस्मादेष समावत् पशूनां रेतो दुधानानां कनिष्ठोऽग्निर्ह्यस्य रेतो निरदहद्यदेतेनास्यामूर्जमर्कं संभरति तस्मादेषोऽस्यां जीवितन्तमः ॥ प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् ... युक्तं राजनं युवमित्यश्वगर्दभयोरेवैष योगे योगे तवस्तरं वाजे वाजे हवामहे सखाय इन्द्रमूतय इन्द्रियं हि वाजायाग्निश्चीयते प्रतूर्वन्नेह्यवक्रामन्नशस्तीरिति वहुर्वै भवतो भ्रातृव्यो भवत्येष योऽग्निं चिनुते वज्रोऽश्वः पाप्मा शस्तिर्भ्रातृव्यो वज्रेणैव पाप्मानं भ्रातृव्यमवक्रामति रुद्रस्य गाणपत्ये मयोभूरेहीति रौद्रा वै पशवो रुद्रमेव पशुभिर्याच्यात्मने कर्म कुरुत उर्वन्तरिक्षं वीहीत्यन्तरिक्षं देवत्यो ह्येष एतर्हि पूष्णा सयुजा सहेति पूषा वा अध्वनां संनेता समष्ट्यै ॥ पृथिव्यास्सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरेति पुरीषायतनो वा अग्निरङ्गिरस एतमग्रे देवताभिस्समभरन् सायतनमेवैनं देवताभिस्संभरत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम इति ब्रूयाद्येन संगच्छेत सर्वो वै पुरुषोऽग्निमान्वाजमेवास्य वृङ्क्ते प्रजापतये प्रोच्याग्निर्वेदव्यो गर्भे प्रोच्य स हि प्राजापत्यतम इयं वाव

[१] मै. ३,१,२ (२) । कपि. २९,८ । शत. ब्रा. ६,३,१,३० ।
[२] मै. ३,१,३ (३) । कपि. २९,८ । वा. ११,१२—१६,१८ । काण्व. १२,१०—१६,१८ । तै. सं. ५,१,२ । शत. ब्रा. ६,३,२,३,१—५ । [योगे योगे तवस्तरं० । ऋ. १,३०,७; सा. १६३,७४३; अथर्व. २०,२६,१; तै. सं. ४,१,२,१]

प्रजापतिस्तस्या एष कर्णो यद्वल्मीको यद्वल्मीकवपामुद्धृत्याभिमन्त्रयते प्रजापतय एव प्रोच्याग्निं चिनुते शृण्वन्त्येनमग्निं चिक्यानमसा अग्निमचेष्टेति कर्णो हि कर्णायाह ॥२॥ २-४

अन्वग्निरुषसामग्रमख्यदित्यनुख्यात्या आगत्य वाज्यध्वानँ सर्वा मृधो विधूनुत इति मृध एवैतयापहत आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वमित्येवैच्छद्वा एतं पूर्वया प्रजापतिरविन्ददुत्तरयेच्छत्येव पूर्वया विन्दत्युत्तरया द्यौस्ते पृष्ठं पृथिवी सधस्थमिति वज्री वा अश्वः प्राजापत्यो लोमभिरुभयादतः पशूनति दद्भिरन्यतोदतो वज्रेणैव भ्रातृव्यमवगृह्णाति यत्र वै यज्ञस्यानुरूपं क्रियते तत् पशवोऽनुरूपा जायन्ते ॥ उत्क्रामोदक्रमीदित्यनुरूपाभ्यामुत्क्रमयति तस्मात् पशवोऽनुरूपा जायन्ते द्वाभ्यां द्विपाद्यजमानः प्रतिष्ठित्यै यां वा अनग्ना अध्वर्युराहुतिं जुहोत्यन्धोऽध्वर्युर्भवति रक्षाँसि यज्ञं घ्नन्त्यग्निर्वै वरुणानीरभ्यकामयत तस्य तेजः परापतत् तद्धिरण्यमभवद्यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति समृद्ध्यै नान्धोऽध्वर्युर्भवति रक्षाँसि यज्ञं घ्नन्ति जिघर्म्यग्निं मनसा घृतेनेति मनो वै वाचः क्षेपीयो मनसैवाहुतिमाप्नोति प्रतिक्षियन्तं भुवनानि विश्वेति तस्मादेष सर्वाः प्रजाः प्रत्यङ्क्षियते व्यचिष्ठमन्नं रभसं विदानमित्यन्नमेवास्मै स्वदयत्या त्वा जिघर्मि वचसा घृतेनेति पूर्वमेवोदितमनुवदत्यरक्षसा मनसा तज्जुषेथा इति रक्षसामपहत्यै मर्यश्रीस्स्पृहयद्वर्णो अग्निरित्यपचितिमेवास्मिन् दधाति द्वाभ्यां जुहोति द्विपाद्यजमानः प्रतिष्ठित्यै ॥ यज्ञमुखे यज्ञमुखे वै यज्ञं रक्षाँसि जिघाँसन्ति यत् परिलिखति रक्षसामपहत्यै तिसृभिः परिलिखति त्रय इमे लोका एभ्य एव लोकेभ्यो रक्षाँस्यपहन्ति परि वाजपतिः कविरिति गायत्र्या परिलिखति ब्रह्म वै गायत्री ब्रह्मणैवैनं परिगृह्णाति परि त्वाग्ने पुरं वयमित्यनुष्टुभा वाग्वा अनुष्टुप् सर्वाणि छन्दाँसि परिभूर्वाचैव सर्वाणि छन्दाँसि परिगृह्णाति त्वमग्ने द्युभिरिति त्रिष्टुभा वीर्यं वै त्रिष्टुब् वीर्येणैवैनं परिगृह्णात्यनुष्टुभा मध्यतः परिलिखति वाग्वा अनुष्टुब् वाचमेव मध्यतो दधाति तस्मान्मध्यतो वाग्वदति तेजो वै गायत्री यज्ञोऽनुष्टुबिन्द्रियं त्रिष्टुप् तेजसा चैवेन्द्रियेण च यज्ञमुभयत आत्मन् परिगृह्णाति ॥३॥ ५-७

सावित्राभ्यां खनति प्रसूत्यै धूममेव पूर्वेण विन्दति ज्योतिरुत्तरेण द्वाभ्यां द्विपाद्यजमानः प्रतिष्ठित्या अपां पृष्ठमसि योनिरग्नेरिति पुष्करपर्णमादत्तेऽपाँ ह्येतत् पृष्ठं योनिरग्नेः पुष्करपर्णेन संभरति

[३] मै. ३,१,४ (४—६) । कपि. ३०,१ । वा. ११,१७—२७ । काण्व. १२,१७—२७ । [अन्वग्निरुषसा० । अथर्व. ७,८२,४; १८,१,२७-२८ । आ त्वा (जिघर्म्यग्नि)० । ऋ. २,१०,४; तै. सं. ४,१,२,४ । आ विश्वतः प्रत्यञ्चं० । ऋ. २,१०,५; तै. सं. ४,१,२,५ । परि वाजपतिः० । ऋ. ४,१५,३; सा. ३०; तै. सं. ४,१,२,५; तै. ब्रा. ३,६,४,१ । परि त्वाग्ने पुरं वयं० । ऋ. १०,८७,२२; अथर्व. ७,७१,१; ८,३,२२; तै. सं. १,५,६,४; ४,१,२,५ । त्वमग्ने द्युभिस्त्वमा० । ऋ. २,१,१; तै. सं. ४,१,२,५; तै. आ. १०,७६,१; नि. ६,१; १३,१]
[४] मै. ३,१,५ (७) । कपि. ३०,२ । वा. ११,२९—३४ । काण्व. १२,२९—३४ । तै. सं. ५,१,४—५ । शत. ब्रा. ६,४,१,८

स्वेनैवैनं योनिना संभरति शान्त्या अनुद्दाहाय कृष्णाजिनेन संभरति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञँ संभरत्यस्कन्दाय न हि यज्ञे यज्ञस्स्कन्दत्येतद्वै ब्रह्मणो रूपं यत् कृष्णाजिनं ब्रह्मणा चैवैन-मृक्सामाभ्यां च संभरति शर्म च स्थो वर्म च स्थ इति सँस्तृणातीयं वै पुष्करपर्णमसौ कृष्णाजिनमिमे एवैतत् सँस्तृणात्यच्छिद्रे बहुले उभे इत्यच्छिद्रे हीमे बहुले उभे व्यचस्वती इति तस्मादिमे व्यचस्वती भर्तमग्निं पुरीष्यमिति पुरीष्यो ह्येष संवसाथाँ स्वर्विदा समीची उरसा त्मनेति तस्मादिमे नाना सती समीची अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमिदिति ज्योतिरेवास्मिन्नजस्रं दधाति पुरीष्योऽसि विश्वभरा इति पुरीष्यो ह्येष विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्न इति प्रजापतिर्वा अथर्वा प्रजापतिरेतमग्रेऽमन्थत् प्रजापतिरेवैनं जनयति तमु त्वा दध्यङ्ङृषिरिति दध्यङ् वा आथर्वण-स्तेजस्व्यासीत् तेनैवैनँ संभरति तमु त्वा पाथ्यो वृषेति पूर्वमेवोदितमनुवदति चतसृभिस्संवपति चत्वारि वै छन्दाँसि च्छन्दोभिरेवैनँ संवपति गायत्रीभिर्ब्राह्मणस्य संवपेद्गायत्रो हि ब्राह्मणस्त्रिष्टुब्भी राजन्यस्य त्रैष्टुभो हि राजन्यो जगतीभिर्वैश्यस्य जागतो हि वैश्यो यथाछन्दसमेवोभयीभिस्संवपेद्य कामयेत वसीयान् स्यादिति तेजो वै गायत्रीन्द्रियं त्रिष्टुप् तेजश्चैवास्मिन्निन्द्रियं च समीची दधात्य-ष्टाभिस्संवपत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तँ संभरति सीद होतरिति देवता एवास्मिन् सँसादयति नि होतेति मनुष्यानेव सँसीदस्वेति वयाँस्येव जनिष्ट हि जेन्यो अग्रे अह्नामिति देव-
मनुष्यानेवास्मिन् सँसन्नान् प्रजनयति॥४॥ ८

अपो देवीरुप सृज मधुमतीरित्योषधीनां प्रतिष्ठित्यै तासामास्थानादुज्जिहतामोषधयस्सुपिप्पला इति तस्मादोषधयः फलं गृह्णन्ति सं ते वायुर्मातरिश्वा दधात्विति तस्माद्वायुर्वृष्टिं वहति प्राणो वै वायुः प्राणमेवास्मिन् दधाति तस्मै देव वषडस्तु तुभ्यमिति षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्मादृतुमृतुं वर्षति यत् प्रत्यक्षं वषट् कुर्याद्यातयामा वषट्कारस्स्याद्यन्न वषट् कुर्याद्रक्षाँसि यज्ञँ हन्युस्तस्मै देव वषडस्तु तुभ्यमिति परोक्षं न यातयामा वषट्कारो भवति न रक्षाँसि यज्ञं घ्नन्ति ॥ यदाज्येन जुहुयाच्छुचा पृथिवीमर्पयेदपो निनयति शान्त्या अनुद्दाहाय सुजातो ज्योतिषेत्येतर्हि वा एष जायते यर्हि संभ्रियते जात एवास्मिञ्ज्योतिर्दधाति शर्म वरूथमासदत् स्वरिति ब्रह्म वै शर्म वरूथं ब्रह्मण्येवैनं प्रतिष्ठापयति वासो अग्ने विश्वरूपँ संव्ययस्व विभावस इति च्छन्दाँसि वा अग्ने-र्वासश्छन्दोभिरेवैनं परिदधात्यनुष्टुब् वा अग्नेः प्रिया तनूः प्रिययैवैनं तन्वा परिदधाति वेदुको वासो

[तमु त्वा दध्यङ्ङृषि०। ऋ. ६,१६,१४; तै. सं. ३,५,११,३; ४,१,३,२। तमु त्वा पाथ्यो०। ऋ. ६,१६,१५; तै. सं. ३,५,११,४; ४,१,३,३]

[५] मै. ३,१,५-६ (७-८)। कपि. ३०,३। वा. ११,३८-५२; ३६,१४-१६। काण्व. १२,३८-५३; ३६,१४-१६। तै. सं. ५,१,५-६; ६,१,४-५। शत. ब्रा. ६,४,१,६; ४,३।

काठ० २६

भवति य एवं वेद ॥ वरुणमेनिर्वा एष उपनद्ध उदुतिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इत्यूर्ध्वामेव वरुणमेनिमुत्सुवति द्वाभ्यां द्विपाद्यजमानः प्रतिष्ठित्यै स जातो गर्भो असि रोदस्योरितीमे वै रोदसी अनयोरेष गर्भोऽनयोरेवैनं प्रतिष्ठापयत्यग्ने चारुर्विभृत ओषधीष्विति तस्मादग्निस्सर्वा अन्वोषधीः प्र मातृभ्यो अधि कनिक्रदद्गा इत्योषधयो वा एतस्य मातरस्ताभ्य एवैनमधिप्रणयति स्थिरो भव वीड्वङ्ग इति गर्दभ एव स्थेमानं दधाति तस्मादेष पशूनां भारभारितमश्शिवो भव प्रजाभ्यो मानुषी-भ्यस्त्वमङ्गिर इत्यभि वा एष एतर्हि प्रजाश्शोचयति शान्त्यै ॥ मा द्यावापृथिवी अभि शुचो मान्त-रिक्षं मा वनस्पतीनित्येभ्य एवैनं लोकेभ्यश्शमयति प्रैतु वाजी कनिक्रददिति समष्ट्यै मा पाद्यायुषः पुरेत्यायुरेवास्मिन् दधाति तस्माद्गर्दभस्सर्वमायुरेति तस्माद्गर्दभे प्रमीते बिभ्यति वृषाग्निं वृषणं भर-न्निति वृषा ह्येष वृषाणं भरत्यपां गर्भँ समुद्रियमित्यपाँ ह्येष गर्भस्समुद्रियोऽग्न आयाहि वीतय इत्यग्निना वै देवा इदमग्रे व्यायन् वीत्यै प्रच्युतो वा एष एतस्मादायतनादगतः प्रतिष्ठाँ स यजमानं चैवाध्वर्युं च ध्यायत्यृतँ सत्यमृतँ सत्यमितीयं वा ऋतमसौ सत्यमनयोरेवैनं प्रतिष्ठापयत्योषधयः प्रतिगृह्णीताग्निमेतँ शिवमायन्तमभ्यत्र युष्मानित्योषधयो वा एतस्य भागधेयं ताभिरेवैनँ सम्यञ्चं दधात्यथो याभ्य एनं प्रच्यावयति तास्वेनं प्रतिष्ठापयति ॥ पुष्पवतीस्सुपिप्पला इति तस्मादोषधयः फलं गृह्णन्ति द्वाभ्यामुपावहरति द्विपाद्यजमानः प्रतिष्ठित्यै वि पाजसेति वि स्रंसयति वरुणमेनिमेव विष्यत्यापो हि ष्ठा मयोभुव इत्यप उपसृजत्यापश्शान्ताश्शान्ताभिरेवास्य शुचँ शमयति विसृभिस्त्रि-वृद्वा अग्निर्यावानेवाग्निस्तस्य शुचँ शमयत्यजलोमैस्सँसृजत्येषा वा अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तन्वा सँसृजति शर्कराभिर्धृत्या अर्म्यैः कपालैस्सँसृजत्यारण्यानेव पशूञ्छुचार्पयति यद्ग्राम्यैस्सँसृजेद् ग्राम्यान् पशूञ्छुचार्पयेत् तस्मादेते समावत् पशूनां प्रजायमानानां कनिष्ठाश्शुचा ह्येत ऋताः ॥५॥
९-१३

मित्रस्सँसृज्य पृथिवीमिति वरुणमेनिर्वा एषा मित्रेणैव वरुणमेनिमुपैति रुद्रस्सँसृज्य पृथिवीँ सँसृष्टां वसुभी रुद्रैरित्येताभिर्वा एतां देवताभिः प्रजापतिस्समसृजत् ताभिरेवैनाँ सँसृजति प्रान्यै-र्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनमेव करोत्यथो मध्यत एव यज्ञस्याशिषमवरुन्द्धे मखस्य शिरोऽसीति

[उदुतिष्ठ स्वध्वरावा०। ऋ. ८,२३,५; तै. सं. ४,१,४,१। ऊर्ध्व ऊ षु ण०। ऋ. १,३६,१३, सा. ५७, तै. सं. ४,१,४,२; तै. ब्रा. ३,६,१,२। स जातो गर्भो०। ऋ. १०,१,२, तै. सं. ४,१,४,२। अग्न आयाहि वीतये०। ऋ. ६,१६,१०; सा. १,६६०। तै. सं. २,५,७,३; ८,१; तै. ब्रा. ३,५,२,१। आपो हि ष्ठा०। ऋ. १०,९,१; सा. १८३७; अथर्व. १,५,१; तै. सं. ४,१,५,१; ५,६,१,४; ७,४,१९,४; तै. आ. ४,४२,४; १०,१, ११; नि. ९,२७]

[६] मै. ३,१,६—७ (८-९)। कपि. ३०,४। वा. ११,५३-६०। काण्व. १२,५४-६१। तै. सं. ५,१,६-७। शत. ब्रा. ६,४,३३, ६,५,१,२।

यज्ञो वै मखो यज्ञस्यैव शिरः करोति वसवस्त्वा कुर्वन्तु गायत्रेण च्छन्दसेत्येताभिर्वा एतां देवताभिः प्रजापतिरकरोत् ताभिरेवैनां करोति त्र्युद्धिं करोति त्रय इमे लोका इमानेव लोकानाप्नोति पञ्चोद्धिं करोति पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धे ॥ धारया मयि प्रजामित्याशीरेवैषा छन्दसां दोहोऽरत्निमात्रीं कुर्यात् पुरुषेण वै यज्ञस्संमितो यज्ञपुरुषासंमितां यावद्बाहुभ्यां पर्याप्नुयात् तावतीं कुर्यादेतावद्वै पुरुषे वीर्यं वीर्येण संमितां प्रादेशमात्रीं कुर्यादेतावद्वै मुखं मुखं देवानामग्निर्मुखेन संमितामपरिमितां कुर्यादपरिमितस्यावरुद्ध्यै चतुस्स्तनां कुर्याददित्या दोहाय षट्स्तनामृतूनां दोहायाष्टास्तनां गायत्र्या दोहाय द्विस्तनां द्यावापृथिव्योर्दोहाय नवाश्रिमभिचरणीयां कुर्यात् त्रिवृद्वज्रो वज्रमेव भ्रातृव्याय प्रहरत्यदित्या रास्नास्यदितिस्ते बिलं गृह्णात्विति यजुषा बिलं करोत्ययजुषा हि मनुष्याः कुर्वन्ति मानुषेणैवैनां पात्रेण व्यावर्तयन्ति यद्वा एषा पुरा पक्तोर्भिद्येतार्तिं यजमान आर्छेद्धन्त्येतास्य यज्ञः कृत्वाय सा महीमुखामिति देवताभ्य एवैनाँ संप्रयच्छति वसवस्त्वा धूपयन्तु गायत्रेण च्छन्दसेत्ये-ताभिर्वा एतां देवताभिः प्रजापतिरधूपयत् ताभिरेवैनां धूपयत्यश्वशकेन धूपयति प्राजापत्यो वा अश्वो यज्ञः प्रजापतिस्सयोनित्वाय सप्तभिर्धूपयति शिरो वा एतद्यज्ञस्य यदुखा सप्त प्राणाश्शीर्षन्नेव १४-१५
प्राणान् दधाति तस्मात् सप्त शीर्षण्याः प्राणाः ॥६॥

अदितिस्त्वा देवी विश्वदेव्यावतीतीयं वा अदितिरदित्यैवादित्यां खनत्यस्या अक्रूरंकाराय न हि स्वस्वँ हिनस्ति देवानां त्वा पत्नीरिति देवानां वा एतां पत्नीरग्रेऽश्रादधुस्ताभिरेवैनां दधाति धिषणास्त्वेति विद्या वै धिषणा विद्ययैवैनामभीन्द्धे वरुत्रीस्त्वेति होत्रा वै वरुत्रीर्होत्राभिरेवैनाँ श्रपयति ग्नास्त्वेति च्छन्दाँसि वै ग्नाश्छन्दोभिरेवैनां पचति जनयस्त्वाच्छिन्नपत्रा इति देवानां वै पत्नी-र्जनयस्ता एतामग्रेऽपचँस्ताभिरेवैनां पचति ॥ द्विष्पचन्त्वित्याह तस्माद् द्विस्संवत्सरस्य सस्यं पच्यते षड्भिः पचति षड्वा ऋतव ऋतुभिरेतां देवानां पत्नीरपचँस्तैरेवैनां पचति वरुणमेनिर्वा एषाभीद्धा मित्रस्य चर्षणीधृत इति मित्रेणैव वरुणमेनिमुपैति देवस्त्वा सवितोद्वपत्विति सावित्र्योद्वपति प्रसूत्या अव्यथमाना पृथिव्यामाशा दिश आपृणेति तस्मादग्निस्सर्वा दिशो विभात्युत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमिति दृंहत्येवैनां यद्वा एषा भिद्येतार्तिं यजमान आर्छेद्धन्त्येतास्य यज्ञो मित्रैतां त उखां परिददामीति ब्रह्म वै मित्रो ब्रह्मण एवैनां परिददाति ॥ यदि भिद्येत तैः कपालैस्सँसृज्यान्यां कुर्यात् सैव ततो यज्ञस्य निष्कृतिर्वसवस्त्वाच्छृन्दन्तु गायत्रेण च्छन्दसेति च्छन्दोभिर्वा एषा क्रियते छन्दोभिर्धूप्यते छन्दोभिः पच्यते ॥ छन्दाँस्येव च्छन्दोभिराच्छृन्दन्ति स्वेनायतनेनामुयं वै पात्रम-

[७] मै. ३,१,८ (१०-१२)। कपि. ३०,५। वा. ११,६१-६५। काण्व. १२,६२-६६। तै. सं. ५,१,७। शत. ब्रा. ६,५,४। [मित्रस्य चर्षणी०। ऋ. ३,५९,६; तै. सं. ३,४,११,५; ४,१,६,३; तै. आ. ४,३,२]

नाच्छृणं यदाच्छृणत्ति देवत्रैव करोत्यजक्षीरेणाच्छृणत्ति सा ह्याग्नेयीतमा समृद्ध्या अथो परमेणैव पयसा ॥७॥ १६-१९

अथैतेऽग्निभ्यः कामेभ्यः पशव आलभ्यन्ते कामा वा अग्नयस्सर्वानेवैतैः कामानभिजयति सर्वान् कामान् स्पृणोति यत् पशून्नालभेतानवरुद्धा अस्य पशवस्स्युर्यत् संस्थापयेद्यातयामानि शीर्षाणि स्युर्यन्न सँस्थापयेद्यज्ञं विच्छिन्द्याद्यद् पशूनालभते तेनैव पशूनवरुन्द्धे यत् पर्यग्निकृतानुत्सृजति शीर्ष्णा-मयातयामत्वायैकेन सँस्थापयति यज्ञस्य संतत्या अविच्छेदाय प्राजापत्येन यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रतिष्ठापयति न यज्ञं विच्छिनत्त्यैन्द्रा वा एते पशवो ये मुष्करा यदैन्द्रास्सन्तोऽग्निभ्य आलभ्यन्ते देवताभ्यस्समदं करोत्याग्नेयीस्त्रिष्टुभो याज्यानुवाक्याः कुर्यादैन्द्रीर्वै त्रिष्टुभस्तेनैवैन्द्राः क्रियन्ते न देवताभ्यस्समदं करोत्यथैष वायव्यश्श्वेतस्तूपरस्सर्वान् वा एष पशून् प्रत्यालभ्यते यत्तू-परोऽश्वं तेन पशूनां प्रत्यालभ्यते यच्छ्मश्रुणः पुरुषं तेन यदष्टाशफोऽष्टाशफान् पशूँस्तेन नियुत्वती याज्यानुवाक्ये कुर्याद्यजमानस्य धृत्या अनुन्मादाय यन्न नियुत्वती स्यातामुद्वा माद्येद्यजमानः प्र वा पतेद्वायुमती शुक्रवती वायुर्वा अग्नेस्तेजस्तस्माद्यद्वातो वाति तदग्निरन्वेति स्वमेव तत् तेजो-ऽन्वेति वायुर्वै पशूनां प्रियं धाम प्राणो वायुर्यद्वायव्य एतमेवैनमभिसंजानाना: पशव उपतिष्ठन्ते वायव्या कार्या३ प्राजापत्या३ इति मीमाँसन्ते यद्वायव्यां कुर्यात् प्रजापतेरियाद्यत् प्राजापत्यां वायो-रियाद्य एव कश्चाग्नौ पशुरालभ्यते तस्याग्नये वैश्वानराय पुरोडाशं कुर्याद्यद्वायव्यः पशुस्तेन वायो-र्नैति यत् प्राजापत्यः पुरोडाशस्तेन प्रजापतेर्नैति यद् द्वादशकपालो द्वादशमासस्संवत्सरस्संवत्सरो-
ऽग्निर्वैश्वानरस्तेन वैश्वानरत्वान्नैति ॥८॥ २०

आग्नावैष्णवमेकादशकपालं निर्वपत्यग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालभते मुखं वै देवानामग्निः परोऽन्तो विष्णुर्यज्ञस्यैवान्तौ समग्रहीदथादित्येभ्यो घृते चरुरादित्या वा इत उत्तमा अमुं लोकमायन्नादित्या इमाः प्रजा आदित्यानां नेदिष्ठिनीस्स्वामेव देवतामुपैति घृते भवति घृत-भागा ह्यादित्या अथाग्नये वैश्वानराय द्वादशकपालस्संवत्सरो वा अग्निर्वैश्वानरो द्वादशमासस्संवत्सर-स्संवत्सरस्याप्त्यै ॥ योऽयोनिमग्निं चिनुते यजमानस्य योनिमनु प्रविशति स एनं निर्दहति संवत्सरो वा अग्निर्वैश्वानरस्संवत्सरोऽग्नेर्योनिर्यदग्नये वैश्वानराय योनिमन्तमेवैनं चिनुत एषा वा अग्नेः प्रिया तनूर्या वैश्वानरी यदग्नये वैश्वानराय प्रियाया एवास्य तन्वे हविष्कृत्वा प्रियां तन्वमादत्ते कामो वा अग्निर्वैश्वानरो यदग्नये वैश्वानराय निर्वपत्यश्नुते तं कामं यस्मै कामाय दीयते यद् द्वादशकपालो द्वादशमासस्संवत्सरो या वै प्रजा भ्रँशन्ते संवत्सरात् ता भ्रँशन्ते याः प्रतितिष्ठन्ति संवत्सरे ताः प्रतितिष्ठन्ति संवत्सर एव प्रतिष्ठायाग्निं बिभर्ति ॥९॥ २१-२२

[८] मै. ३,१,१० (१५-१६)। कपि. ३०,६। तै. सं. ५,१,८,१। [९] मै. ३,१,१० (१६)। कपि. ३०,७।

षडाघीतयजूंषि जुहोति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयत्यृतुभिरस्या वीर्यमुपच्छते सप्तैतानि जुहोति सप्त प्राणाः प्राणैरेवैनं दीक्षयति नाना जुहोति तस्मान्नानावीर्याः प्राणाश्चक्षुश्श्रोत्रं वागनुष्टु-भोत्तमं जुहोति वाग्वा अनुष्टुब् वाचमेवोत्तमां दधाति तस्माद्वाक् प्राणानामुत्तमा विहितं वदत्यनुष्टुब् वै सर्वाणि छन्दाँसि पशवश्छन्दाँस्यन्नं पशवः पशूनेवान्नाद्यमवरुन्द्धे यज्ज्योतिषि प्रवृणक्ति भूतं तेनावरुन्द्धे यदक्तुषु भविष्यत् तेनाक्तुषु प्रवृज्या भविष्यद्धि भूयो भूतान्मा सु भित्था मा सु रिष इति दृंहत्येवैनामरिष्टा त्वमुदिहि यज्ञे अस्मिन्निति समष्ट्यै द्वाभ्यां प्रवृणक्ति द्विपाद्यजमानः प्रति-ष्ठित्यै ॥ परीष्या वृभृथो गर्भो दीक्षितोऽन्न इव वा एष भवत्यत एवैनं जनयति मथित्वा गतश्रे-रवद्ध्याकृतो हि स स्वामेव देवतामुपैत्यन्यत आहृत्यावदध्यायं कामयेत भ्रातृव्यमस्मै जनयेयमिति भ्रातृव्यमेवास्मै जनयति भृज्जनादवदध्यादन्नकामस्य भृज्जने वा अन्नं क्रियते सयोन्येवान्नमव-रुन्द्धे यो वृक्ष उपरि दीप्येत तस्यावदध्यात् स्वर्गकामस्यैष वा अग्नीनाँ स्वर्ग्यस्स्वर्गस्य लोकस्य समष्ट्यै द्रुघ्नस्सर्पिरासुतिरिति क्रुमुकं लिखितं घृतेनाक्त्वावदधात्यग्नेर्वै प्रिया तनूस्तया क्रुमुकं प्राविशत् तेजो घृतं प्रियामेवास्य तन्वं तेजसा समनक्ति मुञ्जानवदधात्यूर्ग्वै मुञ्जा ऊर्जमेवास्मा अपिदधाति परस्या अधि संवत इत्यौदुम्बरीमूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपिदधाति परमस्याः परावत इति वैकङ्कतीमग्नेर्वै सृष्टस्य विकङ्कतं भा आर्छत् तदेवावरुन्द्धे यदग्ने कानि कानि चेति न ह स्म वै पुराग्निरपरशुवृक्णं दहति तदस्मा एताभिः प्रयोग ऋषिरस्वदयद्यदेताभिस्समिध आदधाती-ध्ममेवास्मै स्वदयति स्वदितमस्यान्नं भवति य एवं वेद छन्दाँसि वा अग्नेर्योनिर्यच्छन्दोभिरादधाति स्वयैवैनं योनिनानुबिभर्ति रात्रीं रात्रीमप्रयावं भरन्त इत्याशिषमेवाशास्ते नाभा पृथिव्यास्समिधानो अग्निमिति पृतना एवैतया जयति ॥ यास्सेना अभीत्वरीरित्यग्निं वै जातं रक्षाँस्यजिघाँसँस्ते देवा एता ऋचोऽपश्यँस्ताभिरक्षाँस्यपाघ्नन् यदेताभिस्समिध आदधाति रक्षसामपहत्या अथैतन्मा-लिम्लवं देवाश्च वा असुराश्चास्पर्धन्त ते देवा एतन्मालिम्लवमपश्यँस्तेनासुरानभ्यभवन् यदेतेन समिध आदधाति भ्रातृव्यस्याभिभूत्यै तस्माद्याँ समामग्निं चिन्वन्ति प्राहुकास्स्तेनं भवन्ति यास्सेना अभीत्वरीरित्यौदुम्बरी देवा वै यज्ञोर्जं व्यभजन्त तत उदुम्बरोऽजायत जातायैवास्मा ऊर्जमपिदधाति दंष्ट्राभ्यां मलिम्लूनग्न इत्याश्वत्थीमेष वै वनस्पतीनाँ सपत्नसाहो विजित्यै यर्हि दँष्ट्राभ्यामिति भृधायं द्विष्यात् तं मनसा ध्यायेन्मनो वै वाचः क्षेपीय आहुतिमेवैनं भूतामग्रयेऽपिदधाति ये जनेषु मलिम्लव इति वैकङ्कतीमग्नेर्वै सृष्टस्य विकङ्कतं भा आर्छत् तदेवावरुन्द्धे यो अस्मभ्यमरातीयादिति

[१०] मै. ३,१,९ (१३-१४); कपि. ३०,८; वा. ११,६८-८२। काण्व. १२,६९-८३। तै. सं. ५,१,९-१०। शत.ब्रा. ६,६,१,१५। [द्रुघ्नस्सर्पिरा०। ऋ. २,७,६. तै. सं. ४,१,९,२। परस्या अधि०। ऋ. ८,७५,१५; तै. सं. २,६,११,३; ४,१,९,२। यदग्ने कानि कानि०। ऋ. ८,१०२,२०; अथर्व. १९,६४,३; तै. सं. ४,१,१०,१। सँशितं मे०। अथर्व. ३,१९,१।

शमीमयीं शान्त्यै निन्दाद्यो अस्मान् दिप्साच्चेति तस्मादग्निचितो नाश्लीलं कीर्तयेत् सँशितं मे ब्रह्मेति ब्रह्मणैव क्षत्रँ सँश्यति क्षत्रेण ब्रह्म तस्माद्ब्रह्मपुरोहितं क्षत्रमत्यन्यानि क्षत्राणि तस्माद्ब्रह्म क्षत्र-वदत्यन्यान् ब्राह्मणानुदेयां बाहू अतिरमुद्वर्चो अथो बलमित्याशिषमेवाशास्ते क्षिणोमि ब्रह्मणामित्रा-नुन्नयामि स्वाँ अहमिति यथायजुः ॥१०॥ २३-२५

दृशानो रुक्म उर्विया व्यद्यौदिति रुक्मं प्रतिमुञ्चेत मृत्युर्वा अग्निरमृतँ हिरण्यममृतेनैव मृत्यो-रन्तर्धत्त एकविंशतिनिर्बाधो भवति प्रतिष्ठित्या एकविंशतिर्देवलोकास्तेभ्य एव भ्रातृव्यं निर्बाधते बहिष्टान्निर्बाधं कुर्यादस्मादेवैनं लोकान्निर्बाधत उभयतः पर्यस्यति प्रतिमुञ्चमान उभाभ्यामेवैनं लोकाभ्यां निर्भजति नक्तोषासेत्यहोरात्राभ्यामेवैनं परिगृह्णाति देवा अग्निं धारयन् द्रविणोदा इति प्राणा वै देवा द्रविणोदाः प्राणैरेवैनं दाधार षड्यामँ शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैनं परि-गृह्णाति द्वादशोद्यामं भवति द्वादश मासास्संवत्सरस्संवत्सरेणैवैनं परिगृह्णाति मौञ्जं भवत्यूर्ग्वै मुञ्जा ऊर्जैनं परिगृह्णाति ॥ नाधोनाभि बिभृयादग्निरस्य रेतो निर्दहेदूर्ध्वं नाभ्या बिभृयादूर्ध्वं नाभ्यास्स-देवमग्निस्सर्वा देवतास्सदेव एव देवता बिभर्ति विश्वा रूपाणीति सावित्र्या प्रतिमुञ्चते प्रसूत्या आसीनः प्रतिमुञ्चते तस्मादासीनाः प्रजाः प्रजायन्त सुपर्णोऽसि गरुत्मानित्यग्नेर्वा एते संभारा अग्नि-मेवैतैस्संभरत्येतद्वा अग्नेः प्रियं धाम तदेवावरुन्द्धे दिवं गच्छ स्वः पतेति स्वर्गस्य लोकस्य समष्ट्या असुराणां वा इमे लोका आसँस्ते देवा विष्णुमब्रुवन् यावदयं कुमारो विक्रमते तावन्नो दत्तेति स सकृदेवेमां व्यक्रमत गायत्रीं छन्दस्सकृदन्तरिक्षं त्रिष्टुभं छन्दस्सकृद्दिवं जगतीं छन्दस्सकृद्दिशो-ऽनुष्टुभं छन्दस्ते देवा इमांल्लोकानसुराणामविन्दन्त ततो देवा अभवन् परासुरा अभवन् य एवं विद्वान् प्रक्रमान् प्रक्रामतीमानेव लोकान् भ्रातृव्यस्य विन्दते भवत्यात्मना परास्य भ्रातृव्यो भव-त्यक्रन्ददग्निरित्येतया वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामावारुन्द्धाग्नेरेवैतया प्रियं धामावरुन्द्धेऽग्ने-ऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्येति पुनरेति तस्माद्ग्राम्याः पशवस्सायमरण्याद्ग्राममायान्ति चतसृभिश्चतुष्पादा हि पशवो दक्षिणा पर्यावर्तते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तर आ त्वाहार्ष-मित्या ह्येनँ हरति विशस्त्वा सर्वा वाञ्छन्त्वस्मे राष्ट्रमधिश्रयेति यं कामयेत राष्ट्रँ स्यादिति तं

[११] मै. ३,२,१ (१); कपि. ३२,१। वा. १०,२४; १२,१-१६,२१,२५,३३,४०-४१; १७,७०। काण्व. ११,३४; १३,१-१५,२२,२६,३४,४१-४२; १८,७०। तै. सं. ५,१,९-१०। शत. ब्रा. ६,६,४; ७,२। [दृशानो रुक्म०। ऋ. १०,४५,८; तै. सं. १,३,१४,५; ४,१,१०,४; २,२,४। नक्तोषासा समनसा०। ऋ. १,९६,५; १,११३, ३ (च.पा.); तै. सं. ४,१,१०,४; ६,५,२; ७,१२,३। विश्वा रूपाणि०। ऋ. ५,८१,२; अथर्व. ७,७३,६; तै. सं. ४,१,१०,४; नि. १२,१३। अक्रन्ददग्नि०। ऋ. १०, ४५,४; तै. सं. १,३,१४,२; ४,२,१; २,२,२। पुनरूर्जा सह रय्या०। सा. १८३२-१८३३। आ त्वाहार्ष०। ऋ. १०,१७३,१; अथर्व. ६,८७,१; तै. सं. ४, २,१,४; तै. ब्रा. २,४,२,८]

मनसा ध्यायेद्राष्ट्रमेव भवत्युदुत्तमं वरुण पाशमस्मदिति शुनश्शेपो वा एतामाजीगर्तिर्वरुणगृहीतो-ऽपश्यत् तया वै स वरुणपाशादमुच्यत वरुणपाशमेवैतया प्रमुञ्चतेऽग्ने बृहन्नुषसामूर्ध्वो अस्थादिति पाप्मा वै तमः पाप्मानमेवैतयापहते हँसश्शुचिषदिति साम्रान्येवैतया प्रीणाति सदित्यभिपूर्वमेवैनँ करोति प्रतिष्ठापयत्यासन्द्याँ सादयति क्षुयते वा एषोऽग्नीनां य उखायां ध्रियते तस्मादासन्द्याँ सादयति यदश्मसादयेत् प्रपादुका गर्भास्स्युरुपरि सादयति गर्भाणां धृत्या अप्रपादाय तिसृभिरुपतिष्ठते त्रयः प्राणाः प्राणो व्यानोऽपानस्तानेव यजमाने दधाति त्रय इमे लोका एष्वेव लोकेष्वृध्नोति ॥११॥ २६-२७

अथैतद्वात्सप्रमेतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामावारुन्द्धाग्नेरेवैतेन प्रियं धामावरुन्द्ध एतेन वै स ऋषीणामधिवादमपाजयत् पाप्मानमेवैतेनाधिवादमपजयत्येतेन वै सोऽभिशस्तीरजयदभि-शस्तीरेव जयति य एवं विद्वानेतेनोपतिष्ठते यत् प्रक्रमान् प्रक्रामति ग्रामं तेन दाधार यदुपतिष्ठते क्षेमं तेन पूर्वेद्युः प्रक्रामत्यपरेद्युरुपतिष्ठते तस्माद्ग्रामेऽन्यासां प्रजानां मनः क्षेमेऽन्यासां तस्माद्याया-वरः क्षेमस्य ईशे तस्माद्यायावरः क्षेम्यमध्यवस्यत्येकादशं भवत्येकादशाक्षरा त्रिष्टुब् वीर्यं त्रिष्टुब् वीर्य-मेवावरुन्द्धे ॥ एकेषं वै पुरान आसीत् तत एतदपश्योऽग्रये द्वीपमाधानमपश्यँस्तस्माद् द्वीपमग्रय आधानं कुर्वन्ति तामिदमनुकृतिं द्वीपमनः क्रियत उदु त्वा विश्वे देवा इति प्राणा वै विश्वे देवाः प्राणैरेवैनमुद्यच्छते मनुष्या वै विश्वे देवा मनुष्यैरेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरिति यस्मा एवैनं चित्तायोद्यच्छते तेनैनँ समर्धयति प्रेदग्ने ज्योतिष्मान् याहीत्यभि वा एष एतर्हि प्रजाश्शोचयति शान्त्या अक्रन्ददग्निरित्यनुमन्त्रयेत यदि क्ष्वेदेत्क्रन्दतव ह्यनसा वहन्ति तस्मादनस्वी च रथी चाति-थीनामपचितमा अन्नपते अन्नस्य नो देहीत्यन्नमेवास्मै स्वदयत्यनमीवस्य शुष्मिण इत्ययक्ष्मस्ये-त्येवैतदाह प्र प्रदातारं तारिष ऊर्जं नो देहि द्विपदे चतुष्पद इत्याशिषमेवाशास्ते समिधाग्निं दुवस्यतेति घृतेनाक्त्वा समिधमादधाति यथा ब्राह्मणायातिथये सर्पिष्मन्तं पचत्येवमेव तद्गायत्र्या ब्राह्मणस्या-दध्याद्गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यो जगत्या वैश्यस्य जागतो हि वैश्यो यथाछन्दसमेवापो देवीः प्रतिगृह्णीत भस्मैतदित्यप्सु भस्म प्रवपत्यापो वा अग्नेर्योनिस्स्वयैवैनं योनिं

[उदुत्तमं वरुण०। ऋ. १,२४,१५; अथर्व. ७,८३,३; १८,४,६९; सा. ५८९; तै. सं. १,५,११,३; ४,२,१,३; नि. २,१३। अग्ने बृहन्नुषसा०। ऋ. १०,१,१; तै. सं. ४,२,१,४। हँसश्शुचिषद्०। ऋ. ४,४०,५; तै.सं. १,८,१५,२; ४,२,१,५; तै. ब्रा. १०,१०,२]

[१२] मै. ३,२,१ (२); कपि. ३२,१; वा. ११,८३; १२,६,९—१०,१२,३०—३३,३४,३८—४३; ३,१; काण्व. १२,८४; १३,७,१०-११,२२,३२-३४,३६,३९-४४; ३,१; तै. सं. ५,२,१-२; शत. ब्रा. ६,७,४; ६,८,४; [अक्रन्ददग्नि०। ऋ. १०,४५,४; तै. सं. १,३,१४,२; ४,२,१; २,२,२। समिधाग्निं दुवस्यत०। ऋ. ८,४४,१; तै. सं. ४,२,१,१; तै. ब्रा. १,२,१,९]

गमयति तिसृभिस्त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति परा वा एषोऽग्निं वपति योऽप्सु भस्म प्रवपति सँसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासद इति ज्योतिरेवास्मिन् दधात्यूर्जा वा एष पशुभिर्व्यृध्यते योऽप्सु भस्म प्रवपति पुनरूर्जा सह रय्येति पुनरेवोर्जं पशूनवरुन्द्धे बोधा मे अस्य वचसो यविष्ठेति तस्मात् प्रजास्सुषुपुषीः प्रबुध्यन्ते स बोधि सूरिर्मघवेति तस्मात् पशवः प्रेत्वान-श्चरित्वा पुनरेत्य यथालोकं निषीदन्ति द्वाभ्यां द्विपाद्यजमानः प्रतिष्ठित्यै ॥१२॥ २८-२९

देवं बर्हिस्सुदेवं देवैस्स्यात् सुवीरं वीरैर्वस्तोर्वृज्येताक्तोः प्रभ्रियेतात्यन्यान् राया बर्हिष्मतो मदेम वसुवने वसुधेयस्य वेतु यज देवीर्द्वारस्संघाते वीड्वीर्यामञ्छ्रिथिरा ध्रुवा देवहूतौ वत्स ईमेनास्तरुण आमिमीयात् कुमारो वा नवजातो मैना अर्वा रेणुककाटः प्रणग्वसुवने वसुधेयस्य व्यन्तु यज देवी उषासानक्ताद्यास्मिन् यज्ञे प्रयत्यह्वेतामपि नूनं दैवीर्विशः प्रायासिष्टाँ सुप्रीते सुधिते वसुवने वसु-धेयस्य वीतां यज देवी जोष्ट्री वसुधिती ययोरन्याघा द्वेषाँसि यूयवदान्या वक्षद्वसु वार्याणि यज-मानाय वसुवने वसुधेयस्य वीतां यज देवी ऊर्जाहुती इषमूर्जमन्या वक्षत् सग्धिं सपीतिमन्या नवेन पूर्वं दयमानास्स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज-देवा दैव्या होतारा पोतारा नेष्टारा हताघशँसा आभरद्वसू वसुवने वसुधेयस्य वीतां यज देवीस्ति-स्रस्तिस्रो देवीरिडा सरस्वती भारती द्यां भारत्यादित्यैरस्पृक्षत् सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवेडया वसुमत्या सधमादं मदेम वसुवने वसुधेयस्य व्यन्तु यज देवो नराशँसस्त्रिशीर्षा षडक्षश्शतमिदेनँ शितिपृष्ठा आदधति सहस्रमीं प्रवहन्ति मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिस्स्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज देवो वनस्पतिर्वर्षप्रावा घृतनिर्णिग्द्यामग्रेणास्पृक्षदान्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणाद्दृँहीद्वसुवने वसुधेयस्य वेतु यज देवं बर्हिर्वारितीनां निधेधासि प्रच्युतीनामप्रच्युतं निकामधरणं पुरुस्पार्हं यशस्वदेना बर्हिषान्या बर्हीँष्यभिष्याम वसुवने वसुधेयस्य वेतु यज देवो अग्निस्स्विष्टकृत्सुद्रविणा मन्द्रः कविस्सत्ययजी होता होतुर्होतुरायजीयानग्ने यान् देवानयाड्याँ अपिप्रेर्ये ते होत्रे अमत्सत तान् समनैषीर्होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमँ स्विष्टकृच्चाग्ने होता-भूर्वसुवने वसुधेयस्य नमोवाके वीहि यजाग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशान् बध्नन् बृहस्पतये छागं सूपस्था अद्य देवो वनस्पतिरभवद्बृहस्पतये छागेन बध्नन्नश्विभ्यां छागँ सूपस्था अद्य देवो वनस्पतिरभवत् सरस्वत्यै मेष्या बध्नन्निन्द्राय मेषँ सूपस्था अद्य देवो वनस्पतिरभवदिन्द्राय मेषणाक्षँस्तान्मेदस्तः प्रतिपचताग्रभीपतावीवृधन्त पुरोडाशैस्त्वामद्यर्षे

[पुनरूर्जा सह रय्या०। सा. १८३२-१८३३। बोधा मे अस्य०। ऋ. १,१४७,२; तै. सं. ४,२,३,४; नि. ३,२०। स बोधि सूरिर्मघवा०। ऋ. २,६,४; तै. सं. ४,२,३,४]

[१३] मै. ४,१३,८-९ (६८-६९); वा. २१,४८-६१; २८,३५-४६। काण्व. २३,४७-६०; ३०,१२-२३,३५-४६। तै. ब्रा. १२-२३,३,५,१०; ३,६,१३; १५।

आर्षेयर्षीणां नपादवृणीतायं यजमानो बहुभ्य आ संगतेभ्य एष मे देवेषु वसु वार्यायक्ष्यत इति
ता या देवा देवदानान्यदुस्तान्यस्मा आ च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो
मानुषस्सूक्तवाकाय सूक्तं ब्रूहि ॥१३॥ ३०

अग्न आयूँष्यग्ने पवस्वाग्ने पावक रोचिषा ॥ ३१

स नः पावक दीदिवोऽग्ने देवाँ इहावह । उप यज्ञँ हविश्च नः ॥ ३२

अग्निश्शुचिव्रततम उदग्ने शुचयस्तव सुत्रामाणं महीमू षु ॥ ३३

तँ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता । अग्निँ हव्याय वोढवे ॥ ३४

अग्निं दूतं पुरो दधे ॥ ३५

स हव्यवाडमर्त्य उशिग् दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥ ३६

अग्निँ स्तोमेन बोधय समिधानो अमर्त्यम् । हव्या देवेषु नो दधत् ॥ ३७

प्रेद्धो अग्न इमो अग्ने ॥ ३८

पीपिवाँसँ सरस्वतस्स्तनं यो विश्वदर्शतः । धुक्षीमहि प्रजामिषम् ॥ ३९

ये ते सरस्वन्नूर्मयो मधुमन्तो घृतश्च्युतः । तेभिर्नोऽविता भव ॥ ४०

दिव्यँ सुपर्णं वायसं बृहन्तमपां पतिं वृषभमोषधीनाम् ।
अभीपतो वृष्ण्या तर्पयन्तँ सरस्वन्तमवसे जोहवीमि ॥ ४१

[१४] मै. १,३,८६; ५,८,१०-१२; २,१०,६,६६; ६,१५; ३,११,९०; ४,१०,१७,२३,२५-२६,२८-३०,३८,६०; १२,९६ । वा. १९,३८; ३५,१६; ८,३८; १७,८-९,७३; २२,१५-१७ । काण्व. ८,१९-२०, २१,४०; २९, ३७-३८; ३५,४८; १८,९-१०,७३; २४,१९-२०,२२ । [अग्न आयूँषि० । ऋ. ९,६६,१९; सा. ६२७,१४६४, १५१८; तै. सं. १३,१४,७; ४,२९,१; ५,५,१; ६,६,२; तै. ब्रा. २,६,३,४; तै. आ. २,५,१ । अग्ने पवस्व० । ऋ. ९,६६,२१; सा. १५१०, तै. सं. १,३,१४,८; ५,५,२; ६,६,२; तै.ब्रा. २,६,३,४; तै.आ. २,५,१ । अग्ने पावक रोचिषा० । ऋ. ५,२६,१; सा. १५२१; तै. सं. १,३,१४,८; ५.५,३; ४,६,१,२ । स नः पावक दीदिवो० । ऋ. १,१२,१०; तै. सं. १,३,१४,८; ५,५,३; ४,६,१,३ । अग्निश्शुचिव्रततम० । ऋ.८,४४,२१; तै. सं. १,३,१४, ८; ५,५,३ । उदग्ने शुचयस्तव० । ऋ. ८,४४,१७; सा. १५३४; तै. सं. १,३,१४,८; ५,५,३, २,४,१४,४ । सुत्रामाणं० । ऋ. १०,६३.१०; अथर्व. ७,६,३; तै. सं. १,५,११,५ । महीमू षु० । अथर्व. ७,६,२; आ. स. २,१ । तँ हि शश्वन्त ईड(ळ)ते० । ऋ. ५,१४,३; तै. सं. ४,३,१३,८ । अग्निं दूतं पुरो दधे० । ऋ. ८,४४,३ । स हव्यवाड(ळ)मर्त्य० । ऋ. ३,११,२; तै. सं. ४,१,११,४ । अग्निँ स्तोमेन० । ऋ. ५,१४,१; तै. सं. ४,१,११.४ । प्रेद्धो अग्न० । ऋ. ७,१,३; सा. १३७५, तै. सं. ४,६,५,४ । इमो अग्ने० । ऋ. ७,१, १८; तै. सं. ४,३,१३,६ । पीपिवांसं० । ऋ. ७,९६,६; तै. सं. ३,१,११,२ । ये ते सरस्वन्नूर्मयो० । ऋ. ७,९६,५; तै. सं. ३,१,११,३; नि. १०,२४ । दिव्यँ सुपर्णं वायसं० । ऋ. १,१६४,५२; अथर्व. ७,३९,१; तै. सं. ३,१,११,३]

काठ० २७

यस्य व्रतमुपतिष्ठन्त आपो यस्य व्रते पशवो यन्ति सर्वे ।
यस्य व्रते पुष्टिपतिर्निविष्टस्तँ सरस्वन्तमवसे जोहवीमि ॥१४॥ ४२
[१५८०]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां सावित्रा नामैकोनविंशं स्थानकं संपूर्णम् ॥१९॥

अथ विंशं स्थानकम् ।

अपेतवीतम् ।

अपेत वीत वि च सर्पतात इति देवयजनमध्यवस्यति यो वा अस्या अधिपतिं देवयजनमनि-
र्याच्याग्निं चिनुते यमाय तेऽग्नयश्चीयन्ते यमोऽस्या अधिपतिर्यममेवास्या अधिपतिं देवयजनं निर्या-
च्यात्मनेऽग्निं चिनुत इष्वग्रेण ह वा अस्या अनामृतमिच्छन्तो न विविदुर्यदेतेन देवयजनमध्यवस्य-
त्यस्या एवानामृतेऽग्निं चिनुत उवाच ह सनाच्छव एतन्मा कतिपयथं यजुरायतनादचुच्यवदिति
दिवः प्रिये धामन्नग्निश्चेतव्य ऊषा वै दिवः प्रियं धाम यदूषानुपवपति दिव एव प्रिये धामन्नग्निं
चिनुत इष्टका वा एता वैश्वानरीरपरिमिता यत् सिकता यत् सिकता उपवपति ता एवावरुन्द्धेऽग्नेर्वा
एषा वैश्वानरस्य प्रिया तनूर्यत् सिकता यत् सिकता उपवपति तामेवावरुन्द्धेऽयँ सो अग्निरित्येतद्वि-
श्वामित्रस्य सूक्तमेतेन वै विश्वामित्रोऽग्नेः प्रियं धामावारुन्द्धाग्नेरेवैतेन प्रियं धामावरुन्द्धे चतस्रः
प्राचीरुपदधाति चत्वारि वै च्छन्दाँसि छन्दोभिर्देवास्स्वर्गं लोकमायँस्तेषां दिशस्समव्लीयन्त त एता
दिश्या अपश्यँस्ताभिर्दिशोऽदृँहन् यद् द्वे पुरस्तात् समीची उपदधाति द्वे पश्चाद्दिशां विधृत्या अष्टा
एता उपदधात्यष्टाक्षरा गायत्री गायत्री स्वर्गं लोकमञ्जसा वेद स्वर्गस्य लोकस्य प्रज्ञात्या अष्टा
एता उपदधात्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तं चिनुतेऽष्टा एता उपधाय त्रयोदश लोकं-
पृणयोपदधाति ता एकविंशतिस्संपद्यन्त एकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठा गार्हपत्य एकविंशस्यैव
प्रतिष्ठामनु गार्हपत्येन प्रतितिष्ठति प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद पञ्चचितीकं चिन्वीत प्रथमं
चिन्वानः पाङ्क्तो वै यज्ञः पाङ्क्ताः पशवो यज्ञं चैव पशूँश्चावरुन्द्धे त्रिचितीकं चिन्वीत द्वितीयं
चिन्वानस्त्रय इमे लोका एष्वेव लोकेष्वृध्नोत्येकचितीकं चिन्वीतोत्तमं चिन्वान एकधैव स्वर्गं
लोकमेति पञ्च चितयः पञ्च पुरीषाणि तद्दश दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रतितिष्ठ-
त्यस्थि वा इष्टका माँसं पुरीषं यदिष्टकां पुरीषेणाभ्यूहति तस्मादस्थि माँसेन च्छन्नं न दुश्चर्मा भवति

[यस्य व्रतमुपतिष्ठत० । अथर्व. ७,४०,१]

[१] मै. ३,२,३ (३) । कपि. ३२,३ । वा. १२,४५,५७,६१ । काण्व. १३,४६,५८,६२ । [अपेत वीत वि० । ऋ. १०,१४,९; अथर्व. १८,१,५५; तै. सं. ४,२,४,१; तै. ब्रा. १,२,१,१६; तै. आ. १,२७,५, ६,६,१]

य एवं वेद समितँ संकल्पेथामिति संनिवपति क्षत्रं वा एता अग्नीनां यश्चोखायां भ्रियते यश्च चीयते
ब्रह्मणा क्षत्रँ समेति ब्रह्म यजुर्ब्रह्मणैवैनौ संनिवपति चतुर्भिस्संनिवपति चत्वारि वै छन्दाँसि च्छन्दो-
भिरेवैनौ संनिवपत्येषा वा अग्नेः प्रिया तनूर्यच्छन्दाँसि प्रिययैवैनौ तन्वा सँशास्ति यत्संन्युप्य
विहरति तस्माद्ब्रह्मणा क्षत्रँ समेति ब्रह्मणा व्येति मातेव पुत्रं पृथिवी पुरीष्यमित्यृतुभिरेवैनं दीक्षयित्व-
र्तुभिर्विमुञ्चति प्रजापतिर्विश्वकर्मा विमुञ्चत्विति प्रजापतिमेवास्या विमोक्तारं करोति ॥१॥ १

अथैता नैर्ऋतीस्तिस्रः कृष्णास्तुषपक्वा यत् कृष्णा एष हि तं वर्णस्सचते यं निर्ऋतिर्गृह्णात्येतद्वै
निर्ऋत्या भागधेयं यत्तुषा रूपेण चैव भागधेयेन च निर्ऋतिं निरवदयते यदस्य पारे रजस इति
वैश्वानर्यादत्ते स्वदयत्येवेमां दिशँ हरन्त्येतां हि तं दिशँ हरान्ति यं निर्ऋतिर्गृह्णात्येषा वै निर्ऋत्या
दिक् स्वायामेव दिशि निर्ऋतिं निरवदयते स्वकृत इरिण उपदधात्येतद्वा अस्या निर्ऋतिगृहीतं
यत्रैवास्या निर्ऋतिगृहीतं निर्ऋतिं निरवदयते ॥ पराचीरुपदधाति पराचीमेव निर्ऋतिं निरवदयते यं ते देवी
तिस्र उपदधाति त्रेधाविहितो वै पुरुषो यावानेवास्यात्मा तस्मान्निर्ऋतिं निरवदयते यं ते देवी
निर्ऋतिराबबन्धेति शिक्यमधिन्यस्यति नैर्ऋतो वै पाशो निर्ऋतिपाशादेवैनं मुञ्चति पितृलोकं वा एते
निगच्छान्ति ये दक्षिणा नैर्ऋतीभिश्चरन्ति देवलोक आहवनीयो यदाहवनीयमुपतिष्ठते देवलोकमेवा-
पावर्तते त्रिष्टुभोपतिष्ठते वीर्यं वै त्रिष्टुब् वीर्यमेवास्मिन् दधात्येकयैकयैवास्मिन् वीर्यं दधाति ॥२॥ २-३

यावान् पुरुष ऊर्ध्वबाहुस्तावता वेणुना विमिमीत एतावद्वै पुरुषे वीर्यं वीर्येणैवैनं विमिमीते त्रीन्
पुरुषान् प्राञ्चं मिमीते चतुरस्तिर्यञ्चं तस्मात् सप्त पुरुषानभ्यग्निचिदश्नमत्ति त्रीन् परस्तात् त्रीनवस्ता-
दात्मा सप्तमोऽरत्निमात्रं पक्षयोरुपदधाति प्रादेशमात्रं पुच्छे पुरुषेण वै यज्ञस्संमितो यज्ञपुरुषासंमितं
तस्मात् पक्षप्रवयाँसि वयाँसि षड्गवेन कृषति षड्वा ऋतव ऋतुभिरेव तिस्रस्तिस्रस्सीतास्संपादयति
त्रिवृद्ध्यग्निस्ता द्वादश संपद्यन्ते ॥ द्वादश मासास्संवत्सरस्संवत्सरस्यैव विधामनुविधीयतेऽथो
ऋतुभिरेव कृष्ट्वा संवत्सरे प्रतितिष्ठतीयं वा अग्नेरतिदाहादबिभेत् सैतद् द्विगुणं कृष्टं चाकृष्टं चाकुरुत
यत् कृष्टं चाकृष्टं च भवत्यस्या अनतिदाहायाथो द्विगुणेनैवास्या वीर्यमुद्यच्छत एतावन्तो वै पशवो
द्विपादश्च चतुष्पादश्च तानेतदग्नौ प्रतिदधाति यदुदीच उत्सृजेद्रुद्राय पशूनपिदध्यादपशुस्स्याद्यद्दक्षिणा
पितृभ्यो निधुवेद्यत् प्रतीचो रक्षाँसि हन्युर्दक्षिणा प्राचस्सृजत्यभ्युत्सृजति सूर्यो वै पशूनां प्राणः
प्राणमेवैनानभ्युत्सृजत्योषधीनामृग्भिरोषधीनां फलानि वपति रूपेणैवान्नमवरुन्द्धेऽन्नस्यान्नस्य वपति
सर्वमेवान्नमवरुन्द्धे यस्य न वपति तेन व्यृध्यते यस्य न वपेत् तन्मनसा ध्यायेत् तेनैव तदवरुन्द्धे

[२] मै. ३,२,४ (४-६) । कपि. ३२,४ । वा. १२,६५ । काण्व. १३,६६ । तै. सं. ५,२,४-५ । [यं ते देवी० । अथर्व. ६,६३,१]

[३] मै. ३,२,४-५ (६-७) । कपि. ३२,५ । तै. सं. ५,२,५-६ ।

चतुर्दशभिर्वपति सप्त वै ग्राम्या ओषधयस्सप्तारण्यास्ता एवोभयीरवरुन्द्धेऽन्नमर्कोऽर्कोऽग्निरर्क एवैत-
दर्कश्चीयते कृष्टे वपति कृष्टे ह्याशिष्ठमोषधयः प्रतितिष्ठन्त्यनुसीतं प्रजात्यै द्वादशसु सीतासु वपति द्वादश
मासास्संवत्सरस्संवत्सरेणैवास्मा अन्नं पचति ॥३॥ ४-५

दिग्भ्यो लोष्टान् समस्यति दिग्भ्य ऊर्जँ संभरत्यूर्ज्येवाग्निं चिनुते यां जनतां द्विष्यात् तस्या
दिश आहरेदिषमूर्जमहमित आदीतीषमेवास्या ऊर्जमादत्ते क्षोधुका भवत्युत्तरवेदिं निवपत्युत्तरवेद्याँ
ह्यग्निश्चीयतेऽथो यज्ञपरुरेव नान्तरेति पशवो वा उत्तरवेदिः पशूनेवावरुन्द्धेऽग्ने तव श्रवो वय इति
षड्चेन निवपति षड्वा ऋतवस्संवत्सरस्संवत्सरोऽग्निर्वैश्वानरो रूपेणैव वैश्वानरमवरुन्द्धेऽष्टाक्षरा प्रथमा-
ष्टाशफाः पशवः पशूनेवावरुन्द्ध ऊनातिरिक्ता मिथुनाः प्रजात्यै समुद्रं वै नामैतत् प्रजापतेश्छन्द-
स्समुद्रात् पशवः प्रजायन्ते पशूनां प्रजात्या इन्द्रो वै वृत्राय वज्रं प्राहरत् स त्रेधाभवत् स्फ्य-
स्तृतीयं यूपस्तृतीयं रथस्तृतीयं यदशीर्यत ताश्शर्कराः पशुर्वा अग्निर्वज्रश्शर्करा यच्छर्कराभिः परि-
मिनोति वज्रेणैवास्मै पशून् परिगृह्णाति तस्मात् पशवो वज्रेण विधृतास्तस्मात् स्रेयानस्थेयसो नादत्ते
दशभिर्दशभिः परिमिनुयादन्नकामस्य दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रतितिष्ठति नवभि-
र्नवभिरभिचरतस्त्रिवृद्वज्रो वज्रमेव भ्रातृव्याय प्रहरति सप्तभिस्सप्तभिः पशुकामस्य सप्त प्राणाः
प्राणेभ्योऽधि पशवः प्रजायन्ते पशूनां प्रजात्या अपरिमित्य शर्करास्सिकता व्यूहेयं कामयेतापशु-
स्स्यादित्यपरिगृहीतमेवास्य रेतः परासिञ्चत्यपशुर्भवति परिमित्य शर्करास्सिकता व्यूहेद्यं कामयेत
पशुमान् स्यादिति परिगृहीतमेवास्मै रेतस्सिञ्चति पशुमान् भवति च्छन्दाँसि वा अग्नेर्योनिस्सोमो
रेतोधा यच्छन्दोभिर्न्युप्य सौम्य व्यूहति योना एव रेतो दधाति व्यूहति तस्माद्योनौ गर्भा वर्धन्ते
समानप्रभृतयो भवन्ति नानोदर्कास्तस्मात् समानाद्योनेर्नानारूपाः प्रजायन्ते गायत्र्या ब्राह्मणस्य
व्यूहेद्गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यो जगत्या वैश्यस्य जागतो हि वैश्यो
यथाछन्दसमेव ॥४॥ ६

उपाँश्वन्वाहानिरुक्तो वा एतर्ह्यग्निर्यर्ह्यव्यावृत्तस्तस्मादुपाँश्वन्वाह च्छन्दाँस्यन्वाह च्छन्दोभिर्वा
अग्निरुत्तरवेदिमानशे तस्माच्छन्दाँस्यन्वाह सूर्यस्य वा एतदध्वानं यन्ति यदश्वं प्राञ्चं च प्रत्यञ्चं
चाक्रमयन्ति तस्मादसा आदित्यः प्राङ् चैति प्रत्यङ् च प्राजापत्योऽश्वो यदश्वमाक्रमयति प्रजा-
पतिनैवैनं चिनुतेऽपां पृष्ठमसि योनिरग्नेरिति पुष्करपर्णमुपदधाति स्व एवैनं योनौ चिनुते शान्त्या
अनुदाहाय ॥ वर्धमानो महाँ आ च पुष्कर इति वर्धते क्षेप यो भवति दिवो मात्रया वरिणा

[४] मै. ३,२,५ (७) । कपि. ३२,६ । वा. १२,१०६ । काण्व. १३,१०५ । तै. सं. ५,२,५,६ । [अग्ने तव श्रवो० । ऋ. १०,१४०,१; सा. १८१६; तै. सं. ४,२,७,२]

[५] मै. ३,२,६ (८) । कपि. ३२.७ । वा. ११,२९; १३,२-५; २३,१; २५,१० । काण्व. १२,२९; १४,२-५; २५,१; २७,१४ । तै.सं. ५,२,६-८]

प्रथस्वेति प्रथयत्येव ब्रह्म जज्ञानं प्रथमं पुरस्तादिति रुक्ममुपदधाति ब्रह्ममुखाभिर्वै प्रजापतिः प्रजाभिराह्नोद्‌द्या एकविंशतिनिर्बाधो भवति प्रतिष्ठित्या एकविंशतिर्देवलोकास्तेभ्य एव भ्रातृव्यं निर्बाधते-ऽथस्तान्निर्बाधान् कुर्याद्भ्रातृव्यस्य निगृहीत्यै न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्यो यत् पृथिव्यां चिन्वीतौषधीश्शुचा निर्दहेद्यदन्तरिक्षे वयांसि यद्दिवि दिवममृतं हिरण्यं यद्रुक्ममुपदधात्यमृत एवाग्निं चिनुते ॥ हिरण्यगर्भस्समवर्तताग्र इति पुरुषं हिरण्मयमुपदधाति यजमानलोकमेवैतेन दाधाराथो मध्येज्योतिषमेवाग्निं चिनुते द्रप्सश्चस्कन्देत्यभिमृशति होत्रास्वेवैनं सत्ये प्रतिष्ठापयति सर्पशीर्षिरुपतिष्ठते मृत्युव एवैनं परिदधात्यथो या सर्वे त्विषिस्तामेवावरुन्द्धे यदुपदध्यात् प्रमायुकस्स्याद्यत् समीचीनमितरच्छीर्षिरुपदध्याद्ग्राम्यान् पशून् दंशुकास्स्युर्यद्विषूचीनमारण्यान् यजुरेव वदेत् तेनैव तां त्विषिमवरुन्द्धे तेन शान्तमेतस्माद्ध वै पुराग्निचितमादित्वान्त सर्वा हेतास्त्विषीरवारुद्ध याग्नौ या सर्पे या सूर्येऽथैतद्रामदेवस्य राक्षोघ्नं यज्ञमुखे यज्ञमुखे वै यज्ञं रक्षांसि जिघांसन्ति रक्षसामपहत्यै पश्चार्धं प्राङ्क्रोऽग्निर्यावानेवाग्निस्तस्माद्रक्षांस्यपहन्ति सर्वा दिशोऽनुपरिचारं जुहोति दिग्भ्य एव रक्षांसि हन्ति स्रुचा उपदधातीमे एवैतदुपधत्ते तूष्णीमुपदधाति न हीमे यजुषामुमर्हत्यात्मा वै पुरुषो बाहू स्रुचौ यत् स्रुचा उपदधाति सात्मत्वाय दक्षिणतो वै देवानां रक्षांस्याहुतीर्निष्कावमादंस्तानि कार्ष्मर्यमयेनान्तरदधत यत् कार्ष्मर्यमयीं दक्षिणत उपदधाति रक्षसामन्तर्हित्यै ॥ घृतेन पूरयति वज्रो वै कार्ष्मर्यो वज्रो घृतं वज्र एव वज्रं दधाति गायत्र्योपदधाति गायत्रो वा अग्निर्गायत्रच्छन्दास्स्वेनैवैनं छन्दसा समर्धयति दध्नौदुम्बरीं पूरयत्यन्नं वै दध्यूर्गुदुम्बरोऽन्न एवोर्जं दधाति त्रिष्टुभोपदधात्यैन्द्री वै त्रिष्टुबन्नमिन्द्रियमिन्द्रियमेवान्नाद्यमवरुन्द्ध इयं वै कार्ष्मर्यमय्यसा औदुम्बरी यदौदुम्बरीमुत्तरामुपदधाति तस्मादसा अस्या उत्तरा मूर्धन्वती मूर्धवैताभ्यां क्रियते विराज्यग्निश्चेतव्यस्स्रुग्वै विराड् यत् स्रुचा उपदधाति विराज्येवाग्निं चिनुते ॥५॥ ७-१०

यां वा अविद्वानध्वर्युरिष्टकां प्रथमामुपदधाति तया यजमानस्य प्राणमपिदधाति प्रजायाश्च पशूनां च स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै प्राजापत्योऽश्वो यदश्वमुपघ्रापयति प्रजापतिनैवैनं चिनुत इयं वै स्वयमातृण्णामेवैतदुपधत्ते यदि मन्येत पूर्वो मातिक्रान्तो भ्रातृव्य इति प्राचीमुदूहेय एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्यस्तमनया प्रणुदते यदि मन्येत पश्चान्मे भ्रातृव्य इति प्रतीचीमपोहेय एवास्य पश्चाद्भ्रातृव्यस्तमनयापनुदते प्र श्रेयांसं भ्रातृव्यं नुदते प्रति पापीयांसं नुदते॥ यदि

[ब्रह्म जज्ञानं प्रथमं० । अथर्व. ४,१,१, ५,६,१ । हिरण्यगर्भस्समवर्तताग्र० । ऋ. १०,१२१,१; अथर्व. ४२,७; तै. सं. ४,१,८,३; २,८,२; ... ६,२,१२; नि. १०,२३ । द्रप्सश्चस्कन्द पृथिवी० । ऋ. १०,१७,११; अथर्व. १८,४,२८; तै. सं. ३,१,८,३; ४,२,८,२; ६,५; तै. आ. ६,६,१]

[६] मै. ३,२,६-७ (८—९) । कपि. ३२,८ । वा. १३,२० । काण्व. १४,२० । तै. सं. ५,२,६-९ ।

मन्येत सदङ् मयेति विचालयेद्या वा इयं प्रजा व्यधूनुत परा ता अभवन्नियमेवैनं विधूनुतेऽथैषा दूर्वेष्टका पशुर्वा अग्निर्न पशव आयवसे रमन्ते पशुभ्य एवैतदायतनं करोति पशूनां धृत्यै काण्डात् काण्डात् प्ररोहन्तीति प्रतिष्ठित्यै सहस्रेण शतेन चेति सहस्रवती प्रजापतिना संमिता गच्छति साहस्रीं पुष्टिं पशूनां य एवं विद्वानेतामुपधत्तेऽथैषा वामभृदेतया वै देवा असुराणां वामं पशूनवृञ्जत वाममेवैतया पशून् भ्रातृव्यस्य वृङ्क्ते द्वियजुर्भवति भ्रातृव्यलोकमेव द्वियजुषा वृङ्क्ते द्वितीये हि लोके भ्रातृव्यो हिरण्यशीर्ष्णी भवति हिरण्यज्योतिरेव स्वर्गं लोकमेति ॥ प्रबाहुक्वाचा आहनौ भवतस्तस्मात् प्रबाहुगस्या अथैते रेतस्सिचा असौ वै स्वराडियं विराडुत्तानायाँ स्त्रियां पुमान् रेतस्सिञ्चत्यसा अस्यां रेतस्सिञ्चतीयं प्रजनयत्यग्निरत्ति सरेतसमग्निं चिनुते प्रजायतेऽन्यन्नं य एवं विद्वानेते उपधत्ते स्वराडसीति दक्षिणत उपदधाति तस्माद्दक्षिणतः पुमान् स्त्रियमुपशये यदि पूर्ववयसे चिन्वीतोभे सह प्रथमायां चित्यामुपदध्यात् समीची एवास्मै रेतस्सिञ्चतोऽन्यतरामुपदध्याद्यं द्विष्यात् तस्य रेतसैवैनं व्यर्धयति यद्युत्तरवयसे चिन्वीत प्रथमायामन्यां चित्यामुपदध्यादुत्तमायामन्यां रेत एव सिक्तमाभ्यां परिगृह्णात्यृतव्ये उपदधात्यृतूनां विधृत्यै द्वे द्वे उपदधाति द्वौ द्वौ ह्यृतवोऽथैषा त्र्यालिखिता देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा एतां त्र्यालिखितामपश्यँस्तामुत्तरलक्ष्माणमुपादधत तदसुरा नान्ववायँस्ततो देवा अभवन् परासुरा अभवन् य एवं विद्वानेतामुत्तरलक्ष्माणमुपधत्ते भ्रातृव्यस्यानन्ववायाय भवत्यात्मना परास्य भ्रातृव्यो भवत्यधरलक्ष्माणमुपदध्याद्यं द्विष्यात् तस्यासुरयोनिमेवैनमनुपराभावयतीमे वै लोकास्त्र्यालिखितेमानेवैतया लोकानाप्नोति यस्या मृद उखां कुर्वन्ति तस्या एतां कुर्यात् तेनैवास्य सर्वा इष्टका ज्योतिष्मतीर्यजुष्मतीर्भवन्ति ॥६॥ ११-१३

मेधो वा एष पशूनां यत् कूर्मो यत् कूर्ममुपदधात्येतमेवैनं मेधमभिसंजानानाः पशव उपतिष्ठन्ते जीवन्तमुपदधाति स हि मेध्यश्चतुष्पाद्भवति चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठति मही द्यौः पृथिवी च न इति द्यावापृथिव्योरेवैतया रूपे दाधार दध्ना च मधुना चाभ्यनक्त्यपां वा एष ओषधीनां रसो यन्मधु यन्मधुनाभ्यनक्त्यपामेवौषधीनां रसमवरुन्द्धे मेधो वा एष पशूनामूर्ग्दधि यद्दध्नाभ्यनक्ति पशूनामेव मेध ऊर्जं दधातीष्टकचिद्वा अन्योऽग्निः पशुचिदन्यो यज्जीवन्तं कूर्ममुपदधाति तेनैवैनं पशुचितं करोत्येष वै स्वर्गस्य लोकस्योत्तमपदी यथा क्षेत्रवित् प्रजानन्नञ्जसान्यान्नयत्येवमेवैनमेष स्वर्गं लोकमभिनयति ॥ विष्णोर्नाभा अग्निश्चेतव्यो योऽनाभिमग्निं चिनुते यजमानस्य नाभिमनुप्रविशति स एनं निर्दहत्येषा वै विष्णोर्नाभिर्यदुलूखलमुपदधाति विष्णोरेव नाभा अग्निं चिनुत औदुम्बरं

[७] मै. ३,२,७ (९) । कपि. ३२,९ । वा. ८,३२; १३,३२ । काण्व. ९,३१; १४,३४ । तै. सं. ५,२,९ ।
[मही द्यौः पृथिवी० । ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,९,३]

भवत्यूर्ग्वा उदुम्बर ऊर्जमेव मध्यतो दधाति यजमाने च प्रजासु च तस्मान्मध्यतः प्रजा ऊर्गूर्जयति ॥ प्रादेशमात्रं भवत्येतावती हि विष्णोर्नाभिर्विष्णव्या कर्मण्यव्योपदधाति कर्म ह्येतत् क्रियतेऽथैषोखाँजो वा एतच्छीर्ष्णः संभियते यदुखौज एव वीर्यमवरुन्द्ध एषां वा एतल्लोकानां ज्योतिरवरुन्द्धे ज्योतिर्मध्यतो दधाति मध्येज्योतिषमग्निं चिनुते तस्मान्मध्यतो ज्योतिरुपासते सिकताभिः पूरयति स्वेनायतनेनाग्नेर्वा एतद्वैश्वानरस्य भस्म यत् सिकता रूपेणैव वैश्वानरमवरुन्द्धे यदूनामुपदध्यात् क्षोधुको यजमानस्स्यात् पूर्णामुपदधात्यक्षोधुको यजमानो भवत्यनुपदस्यदन्नमत्ति घृतेन पूरयत्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धयति ॥७॥ १४-१६

एकविंशतिं मापान् प्रतिन्युप्य पुरुषशीर्षमाहरत्यमेध्या वै माषा अमेध्यं पुरुषशीर्षममेध्येनैवामेध्यं क्रीणात्येकविंशतिर्भवन्त्येकविंशो वै पुरुषो यावानेवास्यात्मा तं क्रीणाति सप्तधातृण्णां वल्मीकवपां प्रतिनिदधाति अर्बुदं वा एतत् प्राणैस्सप्त शीर्षण्याः प्राणाः प्राणैरेवैनत् समर्धयति यमगाथा गायति यमलोकादेवैनद्वृङ्क्ते तिस्रो गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते तस्माद्गायते न देयं गाथा हि तद्वृङ्क्तेऽप वा एतस्मादिन्द्रियं क्रामति प्राणाश्शीर्षन् वीर्यं चक्षुश्श्रोत्रं वाग्घ्येतदिन्द्रियं वा एतदमेध्यं मृतशीर्षमिति वा एतदाहुर्मेध्यं हिरण्यं यद्धिरण्यशल्कैः प्रत्यस्यति मेध्यमेवैनत्करोत्यनुत्कामामपिधाय प्रत्यस्यति प्रतिष्ठामेवैनत्कृत्वापिधाय प्राणैस्समर्धयति सहस्रदा असि सहस्राय त्वेति पुरुषशीर्षमुपदधाति पुरुषो ह स्वै सहस्रं पशून् यच्छति सहस्रमन्वे पशवो यन्मध्ये पुरुषशीर्षमुपदधाति सवस्याग्रधैतानि पशुशीर्षाण्येता ह वै साहस्रीरिष्टकास्सोमदक्षः कौश्रेयस्याममपर्णायोपदधौ ततो वै साहस्रीं पुष्टिं पशूनां जगाम गच्छति साहस्रीं पुष्टिं पशूनां य एवं विद्वानेता उपधत्ते पुरस्तात् प्रतीचीनमश्वस्य शिर उपदधाति पश्चात् प्राचीनमृषभस्य गोअश्वानेवास्मिन् समीचो दधाति समीचीनान्युपदध्यायं कामयेत पशुमान् स्यादिति समीच एवास्मिन् पशून् दधाति विषूचीनान्युपदध्यायं कामयेतापशुस्स्यादिति विषूचानेवास्मात् पशून् करोति ॥ नान्तरा पशुशीर्षाणि व्यवेयादध्वर्युर्वसिष्ठो वै नामैषोऽग्निः प्राणानस्य वृतेत प्रमीयेतैकमुपवार्यैतस्स्वैरुपतिष्ठेत तद्धा सर्वतोऽनुपरिहारं सादयेत् तेनैव सर्वाण्युपश्रीयन्ते नार्तिमार्छेत्यध्वर्युर्न श्रेयं न्येत्येतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तानेवास्मै सर्वानुपारण्यमनु ते दिशामीति ग्राम्येभ्य एव पशुभ्य आरण्यान् पशूनुचमनुत्सृजति तस्मादेते समावत् पशूनां प्रजायमानानां कनिष्ठाश्शुचा हित ऋताः ॥८॥ १७-१८

पशुर्वा अग्निः पशोरियं योनिर्विक्रियते रेतोऽपस्या यदपस्या उपदधाति योना एव रेतो दधाति यदा वै पशुस्संवत्सरेऽथ जायते पशवश्छन्दस्या यदपस्या अनु छन्दस्या उपदधाति

[८] मै. ३,२,७ (९) । कपि. ३२,१० । तै. सं. ५,२,९ ।
[९] मै. ३,२,८ (१०) । कपि. ३२,११ । तै. सं. ५,२,९-१० ।

पशूनां प्रजात्यै पञ्चोपदधाति पाङ्क्ताः पशवो यावानेव पशुस्तं प्रजनयतीयं वा अग्नेरतिदाहादबिभेत् सैता अपस्या असृजत ता उपाधत्त यदपस्या उपधीयन्तेऽस्या अनतिदाहायोवाच हेयमददित्से ब्रह्मणान्नं यस्यैता उपधीयन्त इत्यत्ति ब्रह्मणान्नं य एवं विद्वानेता उपधत्ते पञ्च पुरस्तात् प्रतीचीरुपदधाति तस्मात् पुरस्तात् प्रत्यङ् पशुर्जायते पञ्च दक्षिणत उदीचीस्तस्माद्दक्षिणतः पुमान् स्त्रियमुपशये ॥ पञ्च पश्चात् प्राचीस्तस्मात् पश्चात् प्राचीनं रेतो धीयते पञ्चोत्तराच्छन्दस्याः पशवो वै छन्दस्या उत्तरादायतनाः पशवः पशूनेव प्रजातान् स्वमायतनमभिपर्यूहति पशूनामहिंसायै नोत्तरादपस्या उपदध्याद्यदुपदध्यादभीपतः प्रजा वरुणो गृह्णीयादपस्या अनु प्राणभृत उपदधाति रेतस्येव सिक्ते प्राणं मनश्चक्षुश्श्रोत्रं वाचं दधाति तस्मात् प्राणन् पश्यञ्छृण्वन् वदन् पशुर्जायतेऽयं पुरो भूरिति याः प्राणवतीस्ताः पुरस्तादुपदधाति प्राणमेव पुरस्ताद्दधाति तस्मात् प्राङ् पशुः प्राणित्ययं दक्षिणा विश्वकर्मेति या मनस्वतीस्ता दक्षिणतो मन एव दक्षिणतो दधाति तस्माद्दक्षिणोऽर्धो मनस्वितरस्तस्माद्दक्षिणतो मन उपचरन्त्ययं पश्चाद्विश्वव्यचा इति याश्चक्षुष्मतीस्ताः पश्चाच्चक्षुरेव पश्चाद्दधाति तस्मात् प्राङ् पशुः पश्यतीदमुत्तरात् स्वरिति याश्श्रोत्रवतीस्ता उत्तराच्छ्रोत्रमेवोत्तराद्दधाति तस्मादुत्तरात् पशुर्भूयश्शृणोतीयमुपरि मतिरिति या वाङ्मतीस्ता मध्ये वाचमेव मध्यतो दधाति तस्मान्मध्यतो वाग्वदत्यक्ष्णयोपदधाति तस्मादक्ष्णयाङ्गानि पशवो हरन्तो यन्ति याः पुरस्तादुपादधात् ताभिर्वसिष्ठ आर्ध्नोद्या दक्षिणतस्ताभिर्भरद्वाजो याः पश्चात् ताभिर्जमदग्निर्या उत्तरात् ताभिर्विश्वामित्रो या मध्ये ताभिर्विश्वकर्मा य एवमेतासामृद्धिं वेदर्ध्नोति य एवमासां क्लृप्तिं वेद कल्पतेऽस्मै य एवमासां बन्धुतां वेद बन्धुमान् भवति य एवमासां निदानं वेद निदानवान् भवति य एवमासामायतनं वेदायतनवान् भवति य एवमासां प्रतिष्ठां वेद गच्छति प्रतिष्ठां निदानवानायतनवान् भवति य एवं वेद ॥९॥ १९-२०

अथैता आश्विनीरुत्सन्नयज्ञो वा एष यदग्निः को ह तद्वेद यावदेतस्य न क्रियते यावन्न चीयते तदेताभिः कल्पयति तद्भिषज्यति पञ्चैता उपदधाति पाङ्क्तोऽग्निर्यावानेवाग्निस्तस्मै भेषजं करोत्यग्नेरेवैताभिर्दिशः कल्पयत्यदित्यास्त्वा पृष्ठे सादयामीतीमानेवैतया लोकान् दाधारर्तव्या उपदधात्यृतूनां क्लृप्त्यै पञ्चोपदधाति पञ्च वा ऋतवो यावन्त एवर्तवस्तान् कल्पयति समानप्रभृतयो भवन्ति समानोदर्कास्समानप्रभृतयो ह्यृतवस्समानोदर्का एकया व्याहृत्या व्यावर्तयति तस्मादृतवो व्यावर्तन्ते ॥ तस्मात् समानस्य संवत्सरस्य नानारूपाण्याश्विनीरन्वृतव्या उपदधाति रेतस्येव हित ऋतूनुपदधाति तस्माद्रेतो हितमृतूननु प्रजायत ऋतव्या अनु वायव्या उपदधात्यृतुष्वेव प्राणं दधाति तस्मादेते समानाः परियन्तो न जीर्यन्ति तस्मादृतूननु वायुरावरीवर्ति वायव्या अन्वपस्या उपदधाति

[१०] मै. ३,२,९ (११) । कपि. ३२,१२ । वा. १४,५ । काण्व. १५,५ । तै. सं. ५,३,१-२ ।

तस्माद्वायुर्वृष्टिं वहति वृष्टिमेवैताभिरवरुन्द्धे यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारँ सादयति तस्माद्दतुमृतुं वर्षत्यपस्या अनु वयस्या उपदधाति पशवो वै वयस्या यदपस्या अनु वयस्या उपदधाति तस्मात् पशवो नानामनसो नानाव्रता अप एवाभि समनसोऽपस्या उपधाय वयस्या उपदध्याद्यं कामयेत पशुमान् स्यादिति संज्ञानं वा एतत् पशूनां यदापः पशूनामेव संज्ञानेऽग्निं चिनुते पशुमान् भवति वयस्या उपधायापस्या उपदध्याद्यं कामयेतापशुस्स्यादिति पशूनामेवासंज्ञानेऽग्निं चिनुतेऽपशुर्भवति॥ चतस्रः पुरस्तादुपदधाति तस्मात् पुरस्तात् पशुरणीयाँस्तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे मूर्धन्वतीस्तस्मात् पुरस्तात् पशूनां मूर्धा पञ्च पञ्चाभितः पशोस्सयत्वाय तस्मात् प्राङ् पशुः प्रवणो बस्तो वय इति दक्षिणत उपदधाति वृष्णिर्वय इत्युत्तरादँसा एवास्योपदधाति व्याघ्रो वय इति दक्षिणे पक्षे सिंहो वय इत्युत्तरस्मिन् पक्षयोरेव वीर्यं दधाति व्याघ्रो वय इति पूर्वाँ सिंहो वय इत्यपरां तस्मात् पुरो व्याघ्रो जायते पश्चात् सिंहः पुरुषो वय इति मध्ये तस्मात् पुरुषः पशूनामधिपतिः

॥१०॥ २१-२३

इन्द्राग्नी अव्यथमानामिष्टकां दृँहतं युवमित्योजो वै वीर्यमिन्द्राग्नी अन्तरिक्षमेषा चितिश्शिथिलमिवान्तरिक्षं प्रजा अन्तरिक्षं प्रजास्वेवौजो वीर्यं दधाति स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै प्राजापत्योऽश्वो यदश्वमुपघ्रापयति प्रजापतिनैवैनं चिनुतेऽथैता दिश्या देवानां वै स्वर्गं लोकं यतां तेषां दिशस्समव्लीयन्त त एता दिश्या अपश्यँस्ताभिर्दिशोऽदृँहन् यदेता उपधीयन्ते दिशां विधृत्यै राज्ञ्यसि प्राची दिगिति तस्मादेषा दिशां राज्ञी विराडसि दक्षिणा दिगिति तस्मादेषा दिशां विराजति सम्राडसि प्रतीची दिगिति तस्मादत्र साम्राज्यँ स्वराडस्युदीची दिगिति तस्मादत्र स्वाराज्यमधिपत्न्यसि बृहती दिगिति तस्मादेषा दिशामधिपत्न्येतान्येव सर्वाणि भवति य एवं विद्वानेता उपधत्त आयुर्मे पाहीति दश पुरस्तादुपदधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेवास्मिन् दधाति ज्योतिर्मे यच्छेत्युत्तमां ज्योतिरेवोत्तमं दधाति तस्माद्वाक् प्राणानां ज्योतिरुत्तमं दशैता उपदधाति दशाक्षरा विराड्विराट् छन्दसां ज्योतिश्चक्षुर्ज्योतिश्चक्षुरेव प्रजानां पुरस्ताद्धाति मा छन्द इति दक्षिणत उपदधाति तस्माद्दक्षिणावृतो मासाः पृथिवी छन्द इति पश्चात् प्रतिष्ठित्या अग्निर्देवतेत्युत्तरादोजो वा अग्निरोज एवोत्तराद्धाति तस्मादुत्तरादभिप्रयायी जयति द्वादश दक्षिणत उपदधाति द्वादश पश्चाद् द्वादशोत्तरात् ताष्षट्त्रिँशत् संपद्यन्ते षट्त्रिंशदक्षरा बृहती बृहती छन्दसाँ स्वाराज्यमानशे स्वाराज्यं गच्छति य एवं विद्वानेता उपधत्ते षट्त्रिंशदेताष्षट्त्रिंशदक्षरा बृहती बार्हताः पशवोऽन्तरिक्षमेषा चितिः पशवोऽन्तरिक्षं पशुष्वेव पशून् दधात्यादित्यधामानो वा

[११] मै. ३,२,९ (११)। कपि. ३२,१३। वा. १४,११,१३,१७-२२; १५,१०-१४। काण्व. १५,१४,१६-२४; १६, १६-२८। तै. ५,३,१-२।

काठ० २८

अन्ये प्राणा अङ्गिरोधामानोऽन्ये ये पुरस्तात् त आदित्यधामानो ये पश्चात् तेऽङ्गिरोधामानो मूर्धासि राडिति पुरस्तादुपदधाति य आदित्यधामानः प्राणास्ताँस्तद्दाधार यन्त्री राडिति पश्चाद्येऽङ्गिरोधामानः प्राणास्ताँस्तद्दाधार सप्त पुरस्तादुपदधाति सप्त पश्चात् तस्मादधरः प्राण उत्तरेषां प्राणानामर्धभाक् प्रजापतिः प्रजास्सृष्ट्वा तासामकामयत मूर्धा स्यामिति स एता मूर्धन्या अपश्यत् ताभिर्निरजिहीत तासां मूर्धाभवत् तन्मूर्धन्यानां मूर्धन्यात्वं मूर्धैव समानानां भवति य एवं विद्वानेता उपधत्ते

॥११॥ २४

आशुस्त्रिवृदिति पुरस्तादुपदधाति यज्ञमुखं वै त्रिवृद्यज्ञमुखमेव पुरस्ताद्वियातयति व्योमा सप्तदश इति दक्षिणतोऽन्नं वै सप्तदशस्सप्तदशँ संवत्सरमन्नमनुप्रजायतेऽन्नमेव दक्षिणतो भवति तस्माद्दक्षिणेन हस्तेन पुरुषोऽन्नमत्ति यत् सप्तदशवतीर्दक्षिणत उपदधाति तस्माद्दक्षिणं पक्षं वयाँस्यनुपरिप्लवन्त एकविँशवती पश्चात् प्रतिष्ठित्यै पश्चाद्धि वयाँसि प्रतितिष्ठन्ति पञ्चदशवतीमुत्तरादोजो वै पञ्चदश ओज एवोत्तराद्धाति तस्मादुत्तरादभिप्रयायी जयत्यग्नेर्भागोऽसि दीक्षाया आधिपत्यमिति पुरस्ताद् द्वौ त्रिवृता अभिपूर्वमेव यज्ञमुखे वियातयति पञ्चदशवतीर्दक्षिणतस्सप्तदशवतीमुत्तरात् पक्षयोस्सयत्वायान्नं वै सप्तदशो यत् सप्तदशवतीमुभयत उपदधात्यन्नमेवोभयतो दधाति तस्मादुभाभ्याँ हस्ताभ्यां परिगृह्य पुरुषोऽन्नमत्त्येकविंशवती भवति प्रतिष्ठित्या अग्नेर्भागोऽसि दीक्षाया आधिपत्यमित्येतद्वै देवा एताभिरस्पृण्वन्नेतदेतद्देवैताभिस्स्पृणोति ता एतास्स्पृतयो नामेष्टका एकयास्तुवत प्रजा अधीयन्तेत्येतदेतद्वै देवा एताभिरसृजन्तैतद्देवैताभिस्सर्वमवरुन्द्धेऽर्कयस्य वा एषा विधामनु विधीयतेऽन्नमर्कोऽर्कोऽग्निरत्त्यन्नं यस्यैषैवं विदुषो विधीयते ॥१२॥ २५

देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा एतां चतुर्थीं चितिमपश्यँस्तामन्यथानूच्यान्यथोपादधत तदसुरा नान्ववायँस्ततो देवा अभवन् परासुरा अभवन् य एवं विद्वानेतां चतुर्थीं चितिमुपधत्ते भ्रातृव्यस्यानन्ववायाय भवत्यात्मना परास्य भ्रातृव्यो भवत्याशुस्त्रिवृदिति पुरस्तादुपदधाति यज्ञमुखं वै त्रिवृद्यज्ञमुखमेव पुरस्ताद्धाति व्योमा सप्तदश इति दक्षिणतोऽन्नं वै सप्तदशोऽन्नमेव दक्षिणतोऽवरुन्द्ध एकविंशवती पश्चात् प्रतिष्ठित्यै पञ्चदशवतीमुत्तरादोजो वै पञ्चदश ओज एवोत्तराद्धाति तस्मादुत्तरादभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्ताद् द्वौ त्रिवृता अभिपूर्वमेव यज्ञमुखे दधात्यभीवर्तस्सविंश इति दक्षिणतोऽन्नं वै सविंशोऽन्नमेव दक्षिणतोऽवरुन्द्धे वर्चो द्वाविंश इति पश्चाद्यद् द्वे द्विपाद्यजमानः प्रतिष्ठित्यै यद्विंशतिर्द्वे विराजा अन्नं विराड् विराज्येवान्नाद्ये प्रतितिष्ठति तपो नवदश इत्युत्तरात् तस्मात् सव्यो हस्तयोस्तपस्वितरो बाहुकुचनं

[१२] मै. ३,२,१० (१२)। कपि. ३२,१४। वा. १४,२३-२४,२८। काण्व. १५,२५-२७,३२। तै. सं. ५,३,३-५।
[१३] मै. ३,२,१० (१२)। कपि. ३२,१५। वा. १४,२३। काण्व. १५,२५-२६। तै. सं. ५,३,३-५।

निगच्छति योनिश्चतुर्विँश इति पुरस्ताद्यज्ञमुखं वै चतुर्विंशो यज्ञमुखमेव पुरस्ताद्धाति गर्भाः पञ्चविंश इति दक्षिणतोऽन्नं वै पञ्चविंशोऽन्नमेव दक्षिणतोऽवरुन्द्धे यद्दश दशाक्षरा विराडन्नं विराज्येवान्नाद्ये प्रतितिष्ठति ॥ यत् पञ्चदश वज्रः पञ्चदशो वज्रमेवोपरिष्टाद्धाति रक्षसामपहत्या ओजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रतितिष्ठति संभरणस्त्रयोविंश इत्युत्तरात् तस्मात् सव्यो हस्तयोस्संभार्यतरः क्रतुरेकत्रिंश इति पुरस्ताद्वाग्वा एकत्रिंशो वाचमेव यज्ञमुखे दधाति ब्रध्नस्य विष्टपं चतुस्त्रिंश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमसा आदित्यो ब्रह्मवर्चसमेव दक्षिणतोऽवरुन्द्धे प्रतिष्ठा त्रयस्त्रिंश इति पश्चात् त्रयस्त्रिंशद्देवता देवतास्वेव प्रतितिष्ठति नाकष्षट्त्रिंश इत्युत्तरात् स्वर्गो वै लोको नाकस्स्वर्ग एव लोके यजमानं प्रतिष्ठापयति ॥१३॥ २६-२७

२८

एह्यू षु ब्रवाणि ते ॥ २९

यत्रो क्व च ते मनो दक्षं दधस उत्तरम् । तत्रा सदः कृणवसे ॥ ३०

नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो । अथा दुवो वनवसे ॥ ३१

आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः ॥ ३२

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः ॥ ३३

स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत् ततन्थ भानुना ॥ ३४

अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ ३५

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥

अग्निर्वृत्राणि जङ्घनदग्निनाग्निस्समिध्यतेऽग्निं स्तोमेन बोधयाग्निर्मूर्धा प्रेद्धो अग्नेऽग्निं होतारं ३६

मन्ये ॥

[१४] मै. ४,१०,१-२; १२,१ (१३,३०,३७-४४, ३)। का. २६,१३; ११,४६; २२,१५; ३३,९; ३,१२; १३,१४; १५,२०,४५-४७; १७,७६। काण्व. १२,४७; २४,१९; ३२,९; ३,१८; १४,१४; १६,४२,६७-६९; १८,७६। यत्रो (यत्र) क्व च ते मनो०। ऋ. ६,१६,१७; सा. ७, ७०५। [एह्यू षु ब्रवाणि०। ऋ. ६,१६,१६; सा. ७, ७०५। आग्निरगामि भारतो०। ऋ. ६,१६,१९। स ७०६। नहि ते पूर्तमक्षिप०। ऋ. ६,१६,१८; सा. ७०७। स हि विश्वाति०। ऋ. ६,१६,२०। स प्रत्नवन्नवीयसाग्ने०। ऋ. ६,१६,२१; तै. सं. २,२,१२.१; तै. ब्रा. २, ४,८,१। अग्न आयाहि वीतये०। ६,१६,१०; सा. १, ६६०; तै. सं. २,५,७,३; ८,१; तै. ब्रा. ३,५,२,१। अग्निं दूतं वृणीमहे०। ऋ. १,१२,१; सा. ३, ७९०; अथर्व. २०,१०१,१; तै. सं. २,५,८,५; तै. ब्रा. ३,५,२,३। अग्निर्वृत्राणि जङ्घनद्०। ऋ. ६,१६,३४; सा. ४, १३९६; तै. सं. ४,३,१३,१; तै. ब्रा. ३,५,६,१। अग्निनाग्निस्समिध्यते०। ऋ. १,१२,६; सा. ८४४; तै. सं १,४,४६,३; ३,५,११,५; तै. ब्रा. २,७,१२,३। अग्निं स्तोमेन बोधय०। ऋ. ५,१४,१; तै. सं. ४,१,११,४। अग्निर्मूर्धा दिवः०। ऋ. ८,४४,१६; सा. २७, १५३२; तै. सं. १,५,५,१; ४,४,१,१; तै. ब्रा. ३,५,७,१। प्रेद्धो अग्ने०। ऋ. ७,१,३; सा. १३७५; तै. सं ४,६,५,४। अथर्व. २०,६७,३; तै. सं ४,४,४,८; नि. ६,८] अग्निं होतारं मन्ये०। ऋ. १,१२७,१; सा. ४६५, १८१३;

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्ण ज्योतिः । अग्ने विश्वेभिस्सुमना अनीकैः ॥ ३७

अध ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीर्ऋतस्य बृहतो बभूथ ॥ ३८

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः । भसन्नु ष प्र पूर्व्य इषं वुरीतावसे ॥ ३९

अग्नेस्स्तोमं मनामहे सिध्रमद्य दिवस्पृशः । देवस्य द्रविणस्यवः ॥१४॥ ४०

वैश्वानरो न ऊतये ॥ पृष्टो दिवि ॥ ४१-४२

पर्जन्याय प्रगायत दिवस्पुत्राय मीढुषे । स नो यवसमिच्छतु ॥ ४३

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।

मयोभुवो वृष्टयस्सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः ॥ ४४

समिधो अग्न आज्यस्य व्यन्तु तनूनपादग्न आज्यस्य वेत्विडो अग्न आज्यस्य व्यन्तु बर्हिरग्न आज्यस्य वेतु दुरो अग्न आज्यस्य व्यन्तु दुरो अग्न आज्यस्य व्यन्त्विडो अग्न आज्यस्य व्यन्तु बर्हिरग्न आज्यस्य वेतु दुरो अग्न आज्यस्य व्यन्तूषासानक्ताग्न आज्यस्य वीतां दैव्या होताराग्न आज्यस्य वीतां तिस्रो देवीरग्न आज्यस्य व्यन्तु ॥ स्वाहाग्निं स्वाहा सोमँ स्वाहाग्निं स्वाहा सोमँ स्वाहा सवितारँ स्वाहा सरस्वतीँ स्वाहा पूषणँ स्वाहा मरुतस्स्वतवसस्स्वाहा विश्वान् देवान् स्वाहा द्यावापृथिवी स्वाहाग्निं होतारँ स्वाहा देवा आज्यपा जुषाणा आज्यस्य व्यन्तु त्वमग्ने सप्रथा असि त्वँ सोम महे भगमग्निर्मूर्धा भुवो यज्ञस्य वृषा सोम या ते धामानि वद्विश्वा रूपाणि पावका न

[एभिर्नो अर्कैर्भवा०। ४,१०,३; सा. १७७९; तै. सं. ४,४,४,७। अध (अधा) ह्यग्ने क्रतोर्भद्रस्य०। ऋ. ४,१०,२; सा. १७७८; तै. सं. ४,४,४,७। अग्ना यो मर्त्यो दुवो०। ऋ. ६,१४,१। अग्नेस्स्तोमं मनामहे०। ऋ. ५,१३,२; सा. १४०५]

[१५] मै. ३,१६,४; ४,१०,१-३,६; ११,१; १२,५ (६४-६५; ३-४,१०;४५-४६; ७२,७४,७६,७९-८४,८९-९०, १३२; १०,१५,३३-३४; १३६)। का. १८,७२-७३; २६,८; २१,१०-१६,२९—४०,४८—५८; ३,१२;१३, १४—१५,३२; १५,२३,४०; ४,३७; १२,३; २०,८४; ८,३२; ३४,४१; २८,१२—२२,३५—४५; ९,१६, २८। काण्व. २०,४१-४२; २८,८; २३,१०,१२—१७,३०—४१,४७—५७; ३,१८; १४,१४—१५,३४; १६,४१,४४; ४,४९; १३,३; २२,९९; ०,३१; ३३,३३; ३०,११—२२,३४—४५; १०,१२,१४। [वैश्वानरो न ऊतये०। अथर्व. ६,३५,१; आ. श्री. सू. २,११। पृष्टो दिवि०। ऋ. १,९८,२; तै. सं. १,५,११,१; ४, ४,१२,५; तै. ब्रा. ३,११,६,४। पर्जन्याय प्रगायत०। ऋ. ७,१०२,१; तै. ब्रा. २,४,५,५; तै. आ. १,२९,१। इदं वचः पर्जन्याय०। ऋ. ७,१०१,५; तै. आ. १,२९,१। त्वमग्ने सप्रथा असि०। ऋ. ५,१३,४; सा. १४०७; तै. ब्रा. २,४,१,६; नि. ६,७। त्वँ सोम महे०। ऋ. १,९१,७; तै. ब्रा. २,४,५,३। अग्निर्मूर्धा० (चतुर्दशानुवाके द्रष्टव्यम्)। भुवो यज्ञस्य०। ऋ. १०,८,६; तै. सं. ४,४,४,१; तै. ब्रा. ३,५,७,१। वृषा सोम०। ऋ. ९,६४,१; सा. ५०४, ७८१; तै. सं. ४,२,११,३; ३,१३,३। या ते धामानि०। ऋ. १,९१,४,१९; १०, ८१,५; तै. सं. १,२,१०,१; २,३,१४,१; ४,६,२,५; तै. ब्रा. २,८,३,२। विश्वा रूपाणि०। ऋ. ५,८१,२; तै. सं. ४,१,१०,४; नि. १२,१३। पावका नः०। ऋ. १,३,१०; सा. १८९; तै. ब्रा. २,४,३,१; नि. ११,२६]

आ नो दिवः पूषा गा अन्वेतु नष्टुकं ते अन्यत् ॥ ४५-४६
इहेह वस्स्वतवसो मरुतस्सूर्यत्वचः । शर्मा सप्रथा आवृणे ॥ ४७
प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहाँसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥ ४८
विश्वे देवा ये के च ज्मा मही द्यौर्घृतवती पिप्रीहि देवाना देवानां देवं बर्हिर्वसुवने वसुधेयस्य
वेतु देवीर्द्वारो वसुवने वसुधेयस्य व्यन्तु देवी उषासानक्ता वसुवने वसुधेयस्य वीतां देवी जोष्ट्री
वसुवने वसुधेयस्य वीतां देवी ऊर्जाहुती वसुवने वसुधेयस्य वीतां देवा दैव्या होतारा वसुवने
वसुधेयस्य वीतां देवीस्तिस्रस्तिस्रो देवीर्वसुवने वसुधेयस्य व्यन्तु देवो नराशंसो वसुवने वसुधेयस्य
वेतु देवो अग्निस्स्विष्टकृच्छं नो भवन्तु वाजे वाजे ॥१५॥ ४९
[१६२९]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायामेतवीतं नाम विंशं स्थानकं संपूर्णम् ॥२०॥

अथैकविंशं स्थानकम् ।

पञ्चचूडम् ।

अग्नेर्भागोऽसि दीक्षाया आधिपत्यमिति पुरस्तादुपदधाति यज्ञमुखं वा अग्निर्यज्ञमुखं दीक्षा यज्ञ-
मुखं त्रिवृद्यज्ञमुखमेव पुरस्ताद्धाति नृचक्षसां भागोऽसि धातुराधिपत्यमिति दक्षिणतो ये वै विद्वाँस-
स्ते नृचक्षसोऽन्नं धाता प्रजननँ सप्तदशः प्रजाभ्य एव प्रजाताभ्योऽन्नमपिदधाति तस्माज्जातोऽन्न-
मभ्यायच्छति मित्रस्य भागोऽसि वरुणस्याधिपत्यमिति पश्चात् प्राणो वै मित्रोऽपानो वरुणः प्राणा-
पाना एव यजमाने दधातीन्द्रस्य भागोऽसि विष्णोराधिपत्यमित्युत्तरादोजो वा इन्द्र ओजो विष्णु-
रोजः पञ्चदश ओज एवोत्तरद्धाति तस्मादुत्तरादभिप्रयायी जयति ॥ वसूनां भागोऽसि रुद्राणा-
माधिपत्यमिति पुरस्ताद्यज्ञमुखं वै वसवो यज्ञमुखं रुद्रा यज्ञमुखं चतुर्विंशो यज्ञमुखमेव पुरस्ताद्धा-

[आ नो दिव० । ऋ. ५,४३,११; तै. सं. १,८,२२,१ । पूषा गा अन्वेतु न:० । ऋ. ६,५४,५; तै. सं. ४,१,११,२; तै. आ. २,४,१,५ । शुक्रं ते अन्यत्० । ऋ. ६,५८,१; सा. ७५; तै. सं. ४,१,११,२; तै. आ. १,२,४; १०,१; ४,५,६; नि. १२,१७ । इहेह वस्स्वतवसो० । ऋ. ५,५९,११; तै. आ. १४,३ । प्र चित्रमर्कं गृणते० । ऋ. ६,६६,९; तै. सं. ४,१,११,३; तै. ब्रा. २,८,५,२; नि. ३,२१ । विश्वे देवा० । ५,५१,१३; ६,९,५; ५२, १०,१४; १०,२४,५; तै. सं. २,४,१४,५ । ये के च ज्मा० । ऋ. ६,५२,१५ । मही द्यौ:० । ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,६,३ । घृतवती० । ऋ. ६,७०,१; सा. ३७८ । पिप्रीहि देवाना (देवाँ)० । ऋ. १०,२,१; तै. सं. ४,३,१३,४; तै. ब्रा. ३,५,७,५; ६,११,४ । शं नो भवन्तु० । ऋ. ७,३८,७; तै. सं. १, ७,८,१; नि. १२,४४ । वाजे वाजे० । ऋ. ७,३८,८; तै. सं. १,७,८,२; ४,७,१२,१]
[१] मै. ९,८,५; ३,२,१० (१३, १२) । कपि. ३२,१६ । वा. १४,२४-२६ । काण्व. १५,२७-३१ । तै. सं. ५,३,४ ।

त्यादित्यानां भागोऽसि मरुतामाधिपत्यमिति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं पञ्च-
विंशोऽन्नमेव दक्षिणतोऽवरुन्द्धेऽदित्या भागोऽसि पूष्ण आधिपत्यमिति पश्चात् प्रतिष्ठा वा अदितिः
प्रतिष्ठा पूषा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यमित्युत्त-
राद्ब्रह्म वै बृहस्पतिर्ब्रह्म चतुष्टोमो ब्रह्मवर्चसमेवोत्तराद्धाति सवितृप्रसूती भवति तस्मादुदीची
ब्राह्मणेभ्यस्सनिः प्रसूता धर्त्रं चतुष्टोम इति पुरस्ताद्यज्ञमुखं वै चतुष्टोमो यज्ञमुखमेव
पुरस्ताद्धाति ॥ यवानां भागोऽस्ययवानामाधिपत्यमिति दक्षिणतो मासा वै यवा अन्नं मासा
अन्नमेव दक्षिणतोऽवरुन्द्ध ऋभूनां भागोऽसि विश्वेषां देवानामाधिपत्यमिति पश्चात् त्रयस्त्रिंशद्देवता
देवतास्वेव प्रतितिष्ठति वीवर्तो अष्टाचत्वारिंश इत्युत्तरात् तस्माद्वस्तौ समावद्वीर्यौ अर्क्यस्य वा एषा
विधामनु विधीयतेऽन्नमर्कोऽर्कोऽग्निरत्त्यन्नं यस्यैवं विदुषो विधीयते या मुख्यास्ताः पुरस्तादुपद-
धात्यास्य मुख्यो जायते य एवं वेद या अन्नवतीस्ता दक्षिणत आस्यान्नादो जायते य एवं वेद
याः प्रतिष्ठावतीस्ताः पश्चाद्गच्छति प्रतिष्ठां य एवं वेद या ओजस्वतीस्ता उत्तरादास्य बली जायते
य एवं वेद य एवमेतासामृद्धिं वेदर्भ्नोति ॥१॥ १-३

अग्ने जातान् प्रणुदा नस्सपत्नानिति पुरस्तादुपदधाति य एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्यस्तं तया
प्रणुदति सहसा जातानिति पश्चाद्य एवास्य पश्चाद्भ्रातृव्यस्तं तयापनुदते प्र श्रेयाँसं भ्रातृव्यं नुदते
प्रति पापीयाँसं नुदते चतुश्चत्वारिंशस्स्तोम इति दक्षिणतष्षोडशस्स्तोम इत्युत्तराद्वज्रो वै षोडशो
वज्रस्त्रिष्टुप् त्रैष्टुभश्चतुश्चत्वारिंशस्सव्यापग्रहणो वज्रो दक्षिणाविसर्जनो भ्रातृव्यमेव पराणुद्य तस्मै वज्र-
मनुविसृजति चतुश्चत्वारिंशस्स्तोम इति दक्षिणत उपदधाति ब्रह्मवर्चसं वै चतुश्चत्वारिंशो ब्रह्मवर्चस-
मेव दक्षिणतोऽवरुन्द्धे षोडशस्स्तोम इत्युत्तरादोजो वै षोडश ओज एवोत्तराद्धाति तस्मादुत्तराद-
भिप्रयायी जयति ॥ पृथिव्याः पुरीषमसीति मध्ये पुरीषं वा आत्मनो मध्यँ सात्मानमेवाग्निं चिनुते
ता एता अभ्रातृव्या नामेष्टका नास्य भ्रातृव्यो भवति य एवं विद्वानेता उपधत्तेऽथैता विराजो
विराजमेव पशुपूत्तमां दधाति तस्मात् पशुमानुत्तमां वाचं वदति दश दशोपदधाति सयत्वाय देवा
वै स्वर्गं लोकं यन्तस्तेषां यानि च्छन्दाँस्यनिरुक्तानि स्वर्ग्याण्यासँस्तैस्सह स्वर्गं लोकमायँस्तान्यृषयो-
ऽनुप्राजिज्ञासन्त तानीष्टकाभिर्निरमिमत तानीमानि च्छन्दाँसि यान्ययज्ञवाहानि यान्येव देवानां
छन्दाँस्यनिरुक्तानि स्वर्ग्याणि तैस्सह स्वर्गं लोकमेति य एवं विद्वानेता उपधत्ते ॥ अथैते स्तोम-
भागा बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामाहरद्यदेत उपधीयन्ते यज्ञस्य प्रतिष्ठित्यै बृहस्पतिर्वा एतद्
तेजो यज्ञस्य समभरद्यदेत उपधीयन्ते सतेजसमेवाग्निं चिनुते प्रजापतिः प्रजा असृजत तास्स्तोमभागै-

[२] म. ३,२,१०; ३,१ (१२,१) । कपि. ३२,१७ । वा. १५,१—३ । काण्व. १६,१—३ । तै. सं. ५,३,३-५ ।
[अग्ने जातान् प्रणुदा० । अथर्व. ७,३४,१ । सहसा जातान्० । अथर्व. ७,३५,१]

रेवासृजत यदेत उपधीयन्ते प्रजननाय दक्षिणतो वै देवानां यज्ञोऽन्लीयत तँ स्तोमभागैः
प्रत्युदस्तभ्नुवन् यदेते दक्षिणत उदञ्च उपधीयन्ते यज्ञस्य प्रत्युत्तब्ध्यै सप्त सप्तोपदधाति सवीर्यत्वाय
शीन्मध्ये प्रतिष्ठित्या अथैता नाकसदो नाकसद्भिर्वै देवास्स्वर्गं लोकमायन् यदेता उपधीयन्ते स्वर्गस्य
लोकस्याभिजित्यै ॥ न वा अमुं लोके जग्मुषे किञ्चनाकं तन्नाकसदां नाकसत्त्वं ता एतास्सर्वपृष्ठा
नामेष्टका यदेव किञ्च पृष्ठा नामेष्टका यदेव किञ्च पृष्ठानां तेजस्तदवरुन्द्धे य एवं विद्वानेता उपधत्ते-
ऽथैताः पञ्चचूडा यजमानायतनं वै पत्न्यो यन्नाकसत्सु पञ्चचूडा उपदधाति नाक एव यजमानं
प्रतिष्ठापयत्यप्सरसो वा एता एतद्रूपं कृत्वा पत्न्यो भूत्वामुष्मिँल्लोके यजमानमुपशेरते पश्चात् प्राची-
मेकामुपदधाति तस्माद् पश्चात् प्राची पत्न्यन्वास्ते तनूपानीर्वा एता यजमानस्य सर्वमायुरेति य एवं
विद्वानेता उपधत्ते एता वै देवतास्स्वर्ग्यास्ताभिरेव स्वर्गं लोकमेत्येता वै देवता अभिचरणीया यं
द्विष्यात् तं ब्रूयादमुं वो जम्भे दधामीत्येताभ्य एवैनं देवताभ्य आवृश्चति ताजक् प्रधन्वति ॥२॥
४-७

आयोस्त्वा सदने सादयामीत्यायुर्वा उत्तमं दधाति तस्मादायुः प्राणानामुत्तमँ स्वयमातृण्णा भवति
प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै प्राजापत्योऽश्वो यदश्वमुपघ्रापयति प्रजापतिनैवैनं चिनुते-
ऽथैषा विकर्णी देवानां वा एषा विक्रान्तिर्यद्विकर्णी देवानामेवैनं विक्रान्तिमनु विक्रमयति वायुमती
प्राणो वै वायुरायुस्स्वयमातृण्णायुश्चैवास्मिन् प्राणं च समीची दधाति सं वा एनमेतदिन्द्धे यच्चिनोति
दीपयति वायुमत्या संवत्सरमुख्यं भृत्वाग्निं चिन्वीत ॥ संवत्सरो वा अग्निर्वैश्वानरस्तस्याहोरात्राणीष्टका
आप्तेष्टकमेवैनं चिनुत ऋध्नोति यदेवं चिनुयात् प्रियवैनं तन्वा व्यर्धयेद्यदेवं चिनुते प्रियवैवैनं तन्वा
समर्धयति सतनूरेवैद्वैश्वानरश्चीयत ऋतव्या उपदधात्यृतूनां विधृत्यै द्वे द्वे उपदधाति द्वौ द्वौ ह्यृतव-
श्चतस्रो मध्यमायां चित्यामुपदधात्यन्तरिक्षमिव वा एषा या मध्यमा चितिश्शिथिलमिवान्तरिक्षं
चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठत्यृतुभ्यो वा एता देवा निरमिमत तदृतव्यानामृतव्यात्वमायन्तमा-
यन्तमृतुं प्रतितिष्ठति य एवं विद्वानेता उपधत्ते ॥ नानाप्रभृतयो भवन्ति समानोदर्कास्तस्मात् समान-
स्य संवत्सरस्य नाना रूपाण्येकामुपधायेष्टकामुपधात्यग्नेर्वा एषा वैश्वानरस्य योनिर्यदेवका स्व
एवैना योना उपदधाति ग्राम्या अनुदाहायर्भ्नोति य एवं विद्वानेता उपधत्तेऽथैता विश्वज्योतिषः
प्राणभृतो वा एता यजमानस्य प्राणमेव प्रथमया दाधार व्यानं द्वितीययापानं तृतीययैता वै देवता-
स्स्वर्ग्यास्ताभिरेव स्वर्गं लोकमेत्येता वै देवता ज्योतिष्मतीरग्निरेवास्मिँल्लोके ज्योतिर्भवति वायु-
रन्तरिक्षे सूर्यो दिवि सर्वेऽस्मा इमे लोका ज्योतिष्मन्तो भवन्त्यधिपतिवतीर्भवन्त्याधिपत्यमेवैताभि-

[३] मै. २,८,१४; ३,२,८ (१४,१०) । कपि. ३२,१८ । वा. १३,५४—५५; १५,५९—६०, ६३ । काण्व. १३, ५५—५६; १६,८०—८१,८४ । तै. सं. ५,३,७]

गच्छति लोकं पृण च्छिद्रं पृणेति यदेवास्योनं यच्छिद्रं तदापूरयत्यथो सीद ध्रुवा त्वमिति दृँहत्ये-
वैनामिन्द्राग्नी त्वा बृहस्पतिरित्योजो वै वीर्यमिन्द्राग्नी ओजसैवैनं वीर्येण चिनुते ता अस्य सूद-
दोहस इति तस्मात् परुषि परुषि सूदस्सोमँ श्रीणन्ति पृश्नय इत्यन्नं पृश्न्यन्नमेवावरुन्द्धे त्रिष्वारोचने
दिव इति त्रीणि सवनानि सवनेष्वेवैनं चिनुतेऽनुष्टुबनुचरा भवति प्राणो वा अनुष्टुप् तस्मात् प्राण-
स्सर्वाण्यङ्गान्यनुसंचरति वाग्वा अनुष्टुब् यदेवास्यात्र न क्रियते यन्न चीयते तद्वाचा कल्पयति
तद्धिपज्यति ॥३॥ ८-१०

या आग्नेयीर्गायत्रीर्मूर्धन्वतीस्ताभिस्तिसृभिस्तिस्रः पूर्वार्ध उपदधात्यथ त्रिष्टुब्भिरथ जगतीभि-
रथानुष्टुब्भिरथ पङ्क्तिभिरथ यत् किञ्चाग्नेयं छन्दस्तिस्र एकेन च्छन्दसा तिस्र एकेन सर्वमग्निमनूप-
दधात्येतौँ ह वै यज्ञसेनश्चैत्रश्चितिं विदांचकार तया ह वै स आनर्धर्भ्नोति य एवं विद्वानेता उपधत्ते
पशवो वै छन्दाँसि वामं देवानां पशून्त्व वामं भ्रातृव्यस्य वृङ्क्ते ॥ आत्मा वा आहवनीयो
भ्रातृव्यो धिष्ण्यो यद्गार्हपत्य उपदध्याद्भ्रातृव्ये वामं पशून् दध्यादाहवनीय उपदधात्यात्मन्नेव
वामं पशून् धत्ते सैषोत्तरवेदिर्नाम चितिस्तस्मादेता उत्तमायां चित्यामुपधीयन्त उत्तमस्समानानां
भवति य एवं विद्वानेता उपधत्ते पशुर्वा अग्निरग्निमुखान् प्रजापतिः पशूनसृजत यत् पञ्च चितय-
स्तस्मात् पाङ्क्ताः पशव उच्यन्ते यत् तिस्रस्त्रिवृद्ध्यग्निर्यद् द्वे द्विपाद्यजमानः प्रतिष्ठित्यै अक्षरं लोम
अक्षरं चर्म अक्षरं माँसं अक्षरमस्थि अक्षरो मज्जा तद्दश दशाक्षरं विराट् तस्माद्विराजः पशव उच्यन्ते
यो जानुदघ्नस्स गायत्रचियो नाभिदघ्नस्स त्रिष्टुप् चियः पुरुषमात्रस्स जगच्चिच्छ्येनचितं पक्षिणं
चिन्वीत स्वर्गकामश्श्येनो वै वयसां क्षेपिष्ठस्स्वर्गस्य लोकस्य समष्ट्या अलजचितं पक्षिणं चतुस्सीतं
चिन्वीत प्रतिष्ठाकामश्चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठति ॥ कङ्कचितँ शीर्षण्वन्तं चिन्वीत यः कामयेत
सशीर्षामुष्मिँल्लोके स्यामिति सशीर्षैवामुष्मिँल्लोके भवति ॥ प्रउगचितं चिन्वीत यदि मन्येत
पूर्वो मातिक्रान्तो भ्रातृव्य इति प्रउगचिता वै देवा असुरान् प्राणुदन्त य एनान् पूर्वेऽतिक्रान्ता
आसन् य एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्यस्तं तेन प्रणुदत उभयतःप्रउगं चिन्वीत यदि मन्येत पश्चान्मे
भ्रातृव्य इति य एवास्य पश्चाद्भ्रातृव्यस्तं तेनापनुदते प्र श्रेयाँसं भ्रातृव्यं नुदते प्रति पापीयाँसं
नुदते ॥ रथचक्रचितं चिन्वीताभिचरन् रथचक्रचितं ह स्म वै देवा असुरेभ्यो वज्रमियच्छ्यस्त्वेत्य-
भ्यवसृजन्ति वज्रमेव भ्रातृव्याय प्रहरति स्तृणुत एनँ समूह्यं चिन्वीत पशुकामः पशवो वै पुरीषं
पशूनेवास्मै समूहति सर्वत उत्तरवेदिं निर्वपति पशवो वा उत्तरवेदिः पशूनेवावरुन्द्धे ॥ परिचाय्यं
चिन्वीत सजातकामः परीव वै सजाता विशन्ति सजातैरेवैनं परिचिनोति ॥ द्रोणचितं चिन्वीता-

[ता अस्य सूददो० । ऋ. ८,६९,३; तै. सं. ४,२,४,४; तै. आ. ३.११,६,२]
[४] मै. ३,३,२—३; ३,४,७ (२—३; ७) । कपि. ३२,१९—२० । तै. सं. २,८,११—१२; ५,४,११ ।

सकामः पात्रेण वा अन्नमद्यते तेनैव मुखेनान्नमत्ति ॥ श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति श्मशानचिता वै यमोऽमुष्मिंल्लोक आर्ध्नोत् पितृलोक एवर्ध्नोति ॥ गायत्रचितं पक्षिणं चिन्वीत स्वर्गकामोऽग्निर्वै तत् पक्षी भूत्वा स्वर्गं लोकमपतद्यदाहुर्गायत्री पक्षिणी भूत्वा स्वर्गं लोकमपतदिति स्वर्गस्य लोकस्य समष्ट्या अन्येऽग्नय ऊर्ध्वाश्चीयन्ते न्यञ्चोऽन्ये य ऊर्ध्वाश्चीयन्ते तेऽमुष्मै लोकाय ये न्यञ्चस्तेऽस्मै यदूर्ध्वस्तिष्ठन् हिरण्यशल्कैः प्रोक्षति तेनैवैनमूर्ध्वं चिनुते स्वर्गस्य लोकस्य समष्ट्यै ॥४॥ ११-१९

दीक्षया विराडाप्तव्या तिस्रो रात्रीर्दीक्षितस्स्यात् त्रिपदा विराड्विराजमेवाप्नोति षड् रात्रीर्दीक्षितस्स्यात् षड्वा ऋतव ऋतवस्संवत्सरस्संवत्सरो विराड्विराजमेवाप्नोति दश रात्रीर्दीक्षितस्स्याद्दशाक्षरा विराड्विराजमेवाप्नोति द्वादश रात्रीर्दीक्षितस्स्याद् द्वादश मासास्संवत्सरस्संवत्सरो विराड्विराजमेवाप्नोति त्रयोदश रात्रीर्दीक्षितस्स्यात् त्रयोदश मासास्संवत्सरस्संवत्सरो विराड्विराजमेवाप्नोति पञ्चदश रात्रीर्दीक्षितस्स्यात् पञ्चदशार्धमासस्य रात्रयोऽर्धमासशस्संवत्सर आप्यते संवत्सरो विराड्विराजमेवाप्नोति चतुर्विंशतिं रात्रीर्दीक्षितस्स्याच्चतुर्विंशतिस्संवत्सरस्यार्धमासा अर्धमासशस्संवत्सर आप्यते संवत्सरो विराड्विराजमेवाप्नोति मासं दीक्षितस्स्याद्यो वै मासस्स संवत्सरस्संवत्सरो विराड्विराजमेवाप्नोति चतुरो मासो दीक्षितस्स्याच्चतुरो वा एतं मासो वसवोऽबिभरुस्ते पृथिवीमाजयन् गायत्री छन्दोऽष्टौ रुद्रास्तेऽन्तरिक्षमाजयँस्त्रिष्टुभं छन्दो द्वादशादित्यास्ते दिवमाजयञ्जगतीं छन्दस्ततो वै ते व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां तस्माद् द्वादश मासो भृत्वाग्निं चिन्वीत द्वादश मासास्संवत्सरस्संवत्सरोऽग्निर्वैश्वानरस्तस्याहोरात्राणीष्टका आप्तेष्टकमेवैनं चिनुत ऋध्नोति व्यावृतमेव गच्छति श्रैष्ठ्यं समानानां गायत्रं पुरस्ताद्गायति शिरो वै देवानां गायत्रं गायत्रोऽग्निस्तस्माद्गायत्रं पुरस्ताद्गायत्याग्निपावमान्यामयं वाव यः पवते स प्राणो मुखं देवानामग्निर्मुखत एव प्राणं दधाति तस्मान्मुखतः प्राणो रथन्तरमुत्तराद्गायति बृहद्दक्षिणतः पक्षा एवास्योपदधातीयं वै रथन्तरमसौ बृहदाभ्यामेवैनं परिगृह्णाति यज्ञायज्ञीयं पुच्छे गायति श्रोण्यां वामदेव्यमात्मा वै यज्ञायज्ञीयं तनूर्वामदेव्यं सात्मानमेवैनं संतनुं चिनुते हृदयमपिकक्षे तस्मादपिकक्षे हृदयमनूचं भवति तस्मादनस्थकं हृदयमर्क्यैः परिगायत्यर्को वा अग्निरर्कमेवार्क्यैः परिगायति शान्त्यै ॥५॥ २०

संवत्सरो वा अन्तरा तमस्स्वर्गो लोको ज्योतिष्मतीरेतास्साहस्रीरिष्टका यद्धिरण्यशल्कैः प्रोक्षति ज्योतिषैवास्मै संवत्सरं विवासयति सहस्रस्य प्रमासि सहस्रस्य प्रतिमासीति सहस्रसंमिता ह्यिमे लोका घ्नन्ति वा एतदग्नेर्यदस्यात्र न क्रियते यन्न चीयतेऽमृतं हिरण्यं यद्धिरण्यशल्कैः प्रोक्षत्यमृतेनैवास्य

[५] मै. ३,३,५ (७) । कपि. ३२,२० ।
[६] मै. ३,३,४ (४) । कपि. ३२,२१ । वा. १५,६५; १७,२-३ । काण्व. १६,८५; १८,२—४ ।

तन्वं पृणक्तीमा मे अग्न इष्टका धेनवस्सन्त्विति धेनूरेवैनाः कुरुते ता एनं कामदुघा अमुष्मिंल्लोक उपतिष्ठन्ते रुद्रं वै देवा यज्ञान्निरभजन् स देवानायतयाभिपर्यावर्तत ते देवा एतच्छतरुद्रियमपश्यँस्तेनैनमशमयन् यच्छतरुद्रियं जुहोति तेनैवैनं शमयति ॥ जानुदघ्नेऽग्रे जुहोत्यस्या एव रुद्रमवयजतेऽथ नाभिदघ्नेऽन्तरिक्षादेव रुद्रमवयजतेऽथ पुरुषमात्रेऽमुष्या एव रुद्रमवयजत इत एवोर्ध्वं रुद्रमवयजतेऽथ पुरुषमात्रेऽथ नाभिदघ्नेऽथ जानुदघ्नेऽमुत एवार्वाञ्चं रुद्रमवयजते तत् षट् संपद्यते षड्वा ऋतव ऋतुभ्य एव रुद्रं निरवयजते गवीधुकासक्तुभिर्वा जर्तिलैर्वा कुसयसर्पिषा वा मृगक्षीरेण वा जुहोति यद्ग्राम्येण जुहुयाद्ग्रामावचारिणं रुद्रं कुर्यादारण्येनैवारण्यमभि रुद्रं निरवयजतेऽर्कपर्णेन जुहोत्यर्को वा अग्निरर्केणैवैनमर्कादधि निरवयजत उत्तरस्य पक्षस्य या चरमेष्टका तस्यां जुहोत्येषा वै रुद्रस्य दिक् स्वायामेव दिशि रुद्रं प्रतिहृत्यावयजते पशुर्वा अग्निरेतर्हि वा एष जायते यर्हि चीयते यथा वत्सो जातस्स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति स यजमानं चैवाध्वर्युं च ध्यायति यच्छतरुद्रियं जुहोति भागधेयेनैवैनं शमयत्यङ्गिरसो वै स्वर्गं लोकं यन्तस्तेऽजायां घर्मं प्रासिञ्चन् सा शोचन्ती पर्णं परामृशत् सोऽर्कोऽभवत् तदर्कस्यार्कत्वं यदर्कपर्णेन जुहोति सयोनित्वाय यं द्विष्यात् तस्य संचरे पशूनां न्यस्येद्यः प्रथमः पशुराक्रामति स आर्तिमार्छन्ति या उत्तमास्ता यजमानं वाचयेदेता वै देवतास्स्वर्ग्यास्ताभिरेव स्वर्गं लोकमेत्येता वै देवता अभिचरणीया यं द्विष्यात् तं ब्रूयादमुं वो जम्भे दधामीत्येताभ्य एवैनं देवताभ्य आवृश्चति ताजक् प्रधन्वति ॥६॥ २१-२२

अश्मन्नूर्जं पर्वते शिश्रियाणामित्यद्भिः परिषिञ्चति प्रजापतेर्वा एष रसो यदापः प्रजापतेरेवैनं रसेन तर्पयति स एनं तृप्तः प्रीतोऽक्षुध्यन्नुपतिष्ठतेऽश्मन्ते क्षुधं द्विष्मस्तं ते शुगृच्छत्विति यमेव द्वेष्टि तमस्य क्षुधा च शुचा चार्पयति त्रिः परिषिञ्चति त्रय इमे लोका एभ्य एवैनं लोकेभ्यश्शमयति त्रिः पुनरपरिषिञ्चन् पर्येति तत् षट् संपद्यते षड्वा ऋतव ऋतुभ्य एवैनं शमयति यद्यभिचरेत् त्रिः पुनरपरिषिञ्चन् परीत्य या दक्षिणा श्रोणिस्तस्यां प्रक्षिणीयादिदमहममुमामुष्यायणममुष्य पुत्रं प्रक्षिणामीति यैवाग्नौ शुक्तामादाय तयैनमर्पयति तं भिद्यमानमन्वार्तिमार्छति यन्नाम गृह्णाति मूलमेवास्य च्छिनत्ति ॥ वरुणमेनिर्वा एष संचितो मण्डूकेन विकर्षति मण्डूकस्यायुषा व्येति न ग्राम्यान् पशून् हिनस्ति नारण्याँस्तस्मादेतं वसन्ता च प्रावृषि चाभिगच्छति शुचा ह्येष ऋतोऽवकया च वेतसशाखया च विकर्षत्यपां वा एतच्छरो यदवकापामेतत् पुष्पं यद्वेतस आपश्शान्ताश्शान्ताभिरेवास्य शुचं शमयति तिसृभिस्त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्य शुचं शमयति प्रजापतिः प्रजा असृजत ता अक्षुध्यँस्ताभ्योऽन्नं प्रायच्छत् ता अशुचन्नोऽभूदित्यन्नं पावकं यत् पावकवतीर्भवन्त्यन्नाद्याय

[७] मै. ३,३,५—६ (५—८) । वा. १७,१—१५; ३६,२० । काण्व. १८,१—१५; ३६,२० । तै. सं. ५,४,४—५ ।

कमसा अग्निश्चिक्यानाय भवति सप्तभिर्विकर्षयति सप्त वै छन्दाँसि च्छन्दोभिरेवास्य शुचँ शमयति ॥ संलुप्योत्करेऽध्यत्यष्टाभिर्विकर्षत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्य शुचँ शमयति ॥ संलुप्योत्करेऽध्य- ... पञ्चगृहीत स्यत्येषा वा अस्याँ शुक्छुच्येवास्य शुचं दधाति यं द्विष्यात् तमभ्यस्येच्छुचैवैनमर्पयति पञ्चगृहीत आज्ये पञ्च हिरण्यशल्कानवास्यति तेजो वै हिरण्यमायुर्घृतं तेजसैवास्यायुर्व्याघारयत्यथो पङ्क्त्यै वाहुत्याग्निमालभते नमस्ते हरसे शोचिष इत्यधिक्रामति नमस्कृत्य हि श्रेयाँसमुपचरन्त्यक्ष्णया व्याघारयत्यजामित्वाय नृषदे वेडिति प्रतिष्ठित्यै हुतादो वा अन्ये देवा अहुतादोऽन्येऽग्निचिदस्वैतानुभयानवरुन्द्धे यज्जुहोति चाव चोक्षति तानेव प्रीणाति तानवरुन्द्धे तेऽस्योभये प्रीता यज्ञे भवन्ति ॥ गुरुमुष्टिनावोक्षति स हि प्राजापत्यतमस्तेनास्य न हुतं भवति नाहुतं कृष्णाजिनस्योपानहौ कुरुते ब्रह्मणो वा एतद्रूपं यत् कृष्णाजिनं मृत्युरग्निर्ब्रह्मणैव मृत्योरन्तर्धत्तेऽन्तर्मृत्योर्धत्तेऽन्तरश्नायादन्यतरामुपानहं कुर्वीतान्तर्मृत्योर्धत्तेऽवान्नाद्यं रुन्द्धे प्राणैर्वा एष पशुभिर्व्यृध्यते योऽग्निं चिनुते तं प्रथमोऽधिक्रामति प्राणदा व्यानदा इति प्राणैरेवैनं समर्धयति वर्चोदा वरिवोदा इति प्रजा वै वर्चः पशवो वरिवः प्रजया चैवैनं पशुभिश्च समर्धयति प्राणदा अपानदा इत्यवरोहति रूपेणैव द्वाभ्यां द्विपाद्यजमानः प्रतिष्ठित्यै ॥७॥ २३-२६

इन्द्रो वै वृत्रमहँस्तँ हतष्षोडशभिर्भोगैरसिनात्सोऽग्निना पाप्मनो भोगानपिदह्य वैश्वकर्मणाभ्यां पाप्मनो निरमुच्यत यदाग्नेय्या जुहोत्यग्निनैव पाप्मनो भोगानपिदह्य वैश्वकर्मणाभ्यां पाप्मनो निर्मुच्यते सकृत् सर्वाभ्यां ... मुच्यत एकैकया जुहुयाद्यदि कामयेत चिरं पाप्मनो मुच्येतेति चिरमेव पाप्मनो मुच्यते ॥ षोडशं ननूद्द्रुत्योत्तमया जुहुयाद्यदि कामयेताजिरं पाप्मनो मुच्येतेत्यजिरमेव पाप्मनो मुच्यते ॥ षोडशं भवति षोडशकलः पुरुषो यावानेवास्यात्मा तं पाप्मनो मुञ्चत्यथो षोडशभिर्हि स तं भोगैरसिनात् स्नानासूक्ताभ्यां जुहोति सूक्तयोर्नानावीर्यत्वाय समिध आदधाति भागधेयमेवास्मा अपिदधाति यथा जनमेष्यतेऽवसं करोत्येवमेवैतदग्नय आतिथ्यं क्रियते विस्र आदधाति त्रिवृद्ध्यग्निर्यावानेवाग्निस्तस्मा आतिथ्यं करोत्यौदुम्बरीर्भवन्त्यूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपिदधाति घृतेनानक्त्येतद्वा अग्नेः प्रियं धाम यद् घृतं प्रियमेवास्मै धामातिथ्यं करोत्युद्दु त्वा विश्वे देवा इति प्राणा वै विश्वे देवाः प्राणैरेवैनमुद्यच्छते मनुष्या वै विश्वे देवा मनुष्यैरेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरिति यस्मा एवैनं चित्तायोद्यच्छते तेनैनँ समर्धयति ॥ पञ्च दिश इति दिश एवैनमनुप्रणयति द्वे परिगृह्यवती भवतो रक्षसामपहत्यै हरिकेशस्सूर्यरश्मिरिति सावित्री प्रसूत्यै देवा

[नमस्ते हरसे शोचिषे० । श्री. सू. २,१२]
[८] मै. ३,३,७—८ (९—१०) । वा. १२,३१,५६; १५,६१; १७,५३—६४ । काण्व. १३,३२,५७; १६,८२; १८, ५३—६४ । [हरिकेशः सूर्यरश्मि० (सूर्यरश्मिर्हरि०)० । ऋ. १०,१३९,१; तै. सं. ४,६,३,३]

देवेभ्यो अध्वरीयन्तो अस्थुरित्याशिषामेवैष दोहो विमान एष इति स्वर्गस्यैवैष लोकस्य विमान उक्षा समुद्रो अरुणस्सुपर्ण इत्यश्मानमाग्नीध्रे सादयत्यनारम्भणमिव वा एतदनायतनमिव यदन्तरिक्षमन्तरिक्षमाग्नीध्रं यदाग्नीध्रे सादयत्यायतनमेव करोति मध्ये दिवो निहितः पृश्निरश्मेत्यन्नं पृश्न्यन्नमेवावरुन्द्धे द्वाभ्याँ सादयति द्विपाद्यजमानः प्रतिष्ठित्यै ॥ षड्भिराग्नीध्राद्यन्ति षड्वा ऋतव ऋतुभिरेव चतसृभिरा पुच्छाच्चत्वारि वै छन्दाँसि च्छन्दोभिरेवेन्द्रमितीन्द्रियमेवावरुन्द्धेऽवीवृधन्निति वृद्धिमेवोपैति वाजा इत्यन्नं वै वाजा अन्नमेवावरुन्द्धेऽनुष्टुभा वैश्वदेव्या यन्ति वाग्वा अनुष्टुब् वैश्वदेवी वाक् सर्वाणि वा एषा रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेतया यन्ति सुम्नहूरिति यज्ञो वै सुम्नं यज्ञमेवावरुन्द्धे वाजस्य मा प्रसवेनोद्ग्राभेणोदजीगृभमिति ब्रह्म वा उद्ग्राभो ब्रह्म निग्राभोऽसा आदित्य उद्यन्नुद्ग्राभ एष निम्रोचन्निग्राभो ब्रह्मणैवात्मानमुद्गृह्णाति ब्रह्मणा भ्रातृव्यमवगृह्णात्यथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यतामित्योजो वै वीर्यमिन्द्राग्नी ओजसैव वीर्येण भ्रातृव्यं विनुदते ॥८॥ २७-३०

क्रमध्वमग्निना नाकमिति स्वर्गस्य लोकस्याक्रमः प्राचीमनु प्रदिशं प्रेहि विद्वानिति देवलोकमेवोपावर्तते विश्वा आशा दीद्यद्विभाहीति तस्मादग्निस्सर्वा दिशो विभाति पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहमित्येषामेवैते लोकानाँ संक्रमास्स्वर्यन्तो नापेक्षन्त इति स्वर्गस्य लोकस्य समष्ट्या अग्ने प्रेहि प्रथमो देवायतामिति देवेषु चैव मनुष्येषु च चक्षुर्दधातीयक्षमाना भृगुभिस्सजोषा इति स्वर्गमेवैनं लोकं गमयति पञ्चभिरधिक्रामति पाङ्क्तोऽग्निर्यावानेवाग्निस्तस्मै नमस्कृत्याधिक्रामति ॥ नक्तोषासाग्ने सहस्राक्षेति सँहिताभ्यां जुहोत्यहोरात्रे एव संदधाति तस्मादहोरात्रे सँहिते कृष्णायाश्श्वेतवत्साया जुहोत्यह्नेवास्मै रात्रीं प्रदापयति नानारूपा वै पशवो नानाव्रतास्त एतदेव प्रत्तिमरूपयत् पयसा जुहोत्येतदेवैनमभिसंजानानाः पशव उपतिष्ठन्ते दध्ना स्वयमातृण्णायां जुहोत्यसौ वै स्वयमातृण्णोर्गद्ध्यमुष्यामेवोर्जं दधाति तस्मादमुतोऽर्वाचीमूर्जमुपजीवन्ति सुपर्णोऽसि गरुत्मानिति गायत्र्या सादयत्यस्यामेवैनमाक्रमयति भासान्तरिक्षमापृणेति त्रिष्टुभान्तरिक्षमेवैनमाक्रमयत्याजुह्वानस्सुप्रतीकः पुरस्तादिति जगत्यामुष्यामेवैनमाक्रमयत्येताभिरेवैनं देवताभिस्सयुजं कृत्वा

विमान एष० । ऋ. १०,१३९,२; तै. सं. ४,६,३,३ उक्षा समुद्रो अरुणः । ऋ. ५,४७,३; तै. सं. ४,६,३,३ । इन्द्रं विश्वा अवीवृधन्० । ऋ. १,११,१; सा. ३४३,८२७; तै. सं. ४,६,३,४; तै. ब्रा. २,७,१५,५]
[९] मै. ३,३,९ (११) । वा. १७,६५—७६,७९; १९,२,४ । काण्व. १८,६५—७६,७९; २१,२,४ । तै. सं. ५,४,७ । [क्रमध्वमग्निना० । अथर्व. ४,१४,२ । पृथिव्या अहमुदन्तरिक्ष० । अथर्व. ४,१४,३ । स्वर्यन्तो नापेक्षन्त० । अथर्व. ४,१४,४ । अग्ने प्रेहि प्रथमो० । अथर्व. ४,१४,५ । नक्तोषासा समनसा० । ऋ. १,९६,५; ११३,३ (च. पा.); सा. १७५१; तै. सं. ४,१,१०,४; ६,५,२; ७,१२,३]

प्रतिष्ठापयति त्रिसृभिस्त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति ॥ तां सवितुरिति सावित्र्या-दधाति प्रसूत्या औदुम्बरीमूर्ग्वा उदुम्बर ऊर्जमेवास्मा अपिदधात्यग्निं वा ह वा अग्निचिद्दुहेऽग्निर्वाग्नि-चितं दुहे कण्वो ह वा एतस्य श्रायसो दोहं विदांचकार यथा गां प्रत्तां दुह एवमेवैतयाग्निमग्नि-चिद्दुहेऽग्ने त्रिधेम त इत्यृद्ध्यै वैकङ्कतीमग्रेवैं मृत्युस्य विकङ्कतं मा आछेन् तदेवावरुन्द्धे प्रेद्धो अग्ने दीदिहि पुरो न इति शमीमयीं शान्त्यै विराजैषा वै शमी कर्णकवत्येषा ह वै सोमदक्षः कौश्रेयस-श्विणः पप्रच्छ विद यूयं शमी३कर्णकवती३मिति यैवारण्ये तां विद्मेति पशवो वा एतस्याः कर्णः पशूनेवावरुन्द्धे ॥ एतां ह स्म वै देवा असुरेभ्यो वज्रं शतघ्नीमियद्ध्यस्त्वेत्यभ्यवसृजन्ति वज्रमेव भ्रातृ-व्याय प्रहरति स्रुग्वत एनं सप्त ते अग्ने समिध इति साप्तान्येवैतया प्रीणाति पूर्णया स्रुचा जुहोति यथा वत्साय जाताय स्तनमपिदधात्येवमेवास्मा एतद्भागधेयमपिदधाति दध्ना पुरस्ताज्जुहोत्याज्ये-नोपरिष्टादूर्ग्वै दधि तेज आज्यमूर्जं चैवास्मिंस्तेजश्च समीची उत्तमे दधात्यथो इमे एवास्मै प्रदाप-यति ॥९॥ ३१-३४

अथैतदप्रतिरथमेतेन वै देवा असुरानप्रत्यभ्यजयँस्तदप्रतिरथस्याप्रतिरथत्वमप्रत्येवैतेन भ्रातृव्य-मभिजयत्येषा वै गायत्री ज्योतिष्पक्षा तयैव स्वर्गं लोकमेति दशर्चं भवति दशाक्षरा विराडन्नं विराज्येवान्नाद्ये प्रतितिष्ठत्येतेन ह स्म वै भरद्वाजः प्रतर्दनं संनह्यतेति ततो वै स राष्ट्रमभवद्यं कामयेत राष्ट्रं स्यादिति तमेतेन संनह्येद्राष्ट्रमेव भवति तदेतद्रुवनच्यवं नाम हविरास्थानादास्थाना-देवैतेन भ्रातृव्यं नुदते संग्रामे कुर्यात् तेजनो वा बान्धुको वेष्मस्स्याद्यद्भारा: प्रतिवेष्टन्ते प्रत्य-मित्राणां सेना वेष्टतेऽग्नये वैश्वानराय द्वादशकपालस्संवत्सरो वा अग्निर्वैश्वानर एषा संवत्सरस्य प्रिया तनूर्या वैश्वानरी यदग्नये वैश्वानराय प्रियाया एवास्य तन्व आतिथ्यं करोति ॥ क्षत्रं वैश्वानरो विण्मरुतो यद्वैश्वानरं मारुता अनुहूयन्ते क्षत्रायैव विशमनुनियुनक्त्युच्चैर्वैश्वानरस्य यजत्युपांशु मारुता-ञ्जुहोति तस्मात् क्षत्रं विशमतिवदति पशवो अग्निरग्निमुखान् प्रजापतिः पशूनसृजत पशवो मरुतो यद्वैश्वानरं मारुता अनुहूयन्ते पशूनां प्रजात्यै यत् प्राङ् पर्यावर्तेत देवविशा मुखेद्यद्दक्षिणा पितृदेवत्य-स्स्याद्यत् प्रत्यङ् रक्षसां स्याद्यदुदङ् मानुषस्स्यादृजुः प्रतिष्ठितो होतव्यो यजमानस्य प्रतिष्ठित्या अथैते मारुतास्सप्त सप्तकपालास्सप्त सप्त हि मरुतो सप्तधा गणा गणेन गणमनुद्रुत्य जुहोति गणश एव मरुतस्तर्पयति ॥ योऽरण्येऽनुवाक्यो गणस्तेन मध्ये जुहोति क्षत्रं वा एष मरुतां विडितरे क्षत्रमेव विशो मध्यमेष्टं करोति यदि कामयेत विशा क्षत्रं हन्यामिति योऽरण्येऽनुवाक्यो गणस्तमितरैर्गणै-र्मोहयेद्विशैव क्षत्रं हन्ति यदि कामयेत क्षत्रेण विशं हन्यामिति त्रिष्टुभौ याज्यानुवाक्ये कुर्यादोजो

[तां सवितुर्वरेण्यस्य० । अथर्व. ७,१५,१ । विधेम ते० । ऋ. २,९,३; तै. सं. ४,६,५,४ । प्रेद्धो अग्ने० । ऋ. ७,१,३; सा. १३७५ तै. सं. ४,६,५,४]

[१०] मै. ३,३,७; १० (९,१०) । वा. १७,८०; १७,८६ । काण्व. ३१,५१; १८,८६ । तै. सं. ५,४,७-८ ।

वै वीर्यं त्रिष्टुबोज एव वीर्यं विश आदाय तां क्षत्रायापिदधाति यं कामयेत क्षत्रान्नुदेयेति योऽरण्ये-ऽनुवाक्यो गणस्तेनाग्निष्ठं रथवाहनं विचालयेदेतद्वै राजन्यस्य क्षत्रं विभर्ति क्षत्रमेव मरुतां क्षत्रेणैवैनं क्षत्रान्नुदत इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मान इत्येतद्वै देवानामनुवर्त्म देवानामेवानुवर्त्मना यजमाना-यानुवर्त्म करोति सं वा एनमेतदिन्द्धे यच्चिनोति दीपयति मरुन्नामैः ॥१०॥ ३५-३७

वसोर्धारां जुहोति वसोर्मे धारासदिति वा एषा हूयते घृतस्य वा एषा धारामुष्मिंल्लोके यजमान-मुपतिष्ठते संततं जुहोत्यन्नाद्यस्य संतत्या अविच्छेदाय यं द्विष्यात् तस्य विच्छिन्द्यादन्नाद्यमेवास्य विच्छिनत्ति घृतेन जुहोति तेजो वै घृतं तेजो वसोर्धारा तेजस्येव तेजो दधात्यक्लृप्तस्य वा एषा क्लृप्त्यै हूयतेऽनवरुद्धस्यावरुद्ध्या अनभिजितस्याभिजित्यै प्राणश्चापानश्चेति प्राणापाना एव यजमाने दधात्यन्नं च चक्षुश्चेत्येतद्वा अन्नस्य रूपं रूपेणैवान्नमवरुन्द्धे द्वादशैतानि द्वादशानि जुहोति द्वादश मासास्संवत्सरस्संवत्सरेणैवान्नाद्यमवरुन्द्धे ॥ अग्निश्चापश्चेत्येषा वा अन्नस्य योनिस्सयोन्येवा-न्नमवरुन्द्धेऽर्धेन्द्राणि जुहोति देवतानामवरुद्ध्यै यदर्धेन्द्राणि जुहोति तस्मादिन्द्रो देवतानां भूयिष्ठ-भागिन्द्रमुत्तरं करोतीन्द्रिय एव यजमानं प्रतिष्ठापयत्यँशुश्च रश्मिश्चेति यज्ञमुखं वा अँशुश्च रश्मिश्च यज्ञमुखमेवावरुन्द्धे स्रुचश्च चमसाश्चेत्येतानि वै यज्ञस्य रूपाणि रूपैरेव यज्ञमवरुन्द्धेऽवभृथश्च स्वगा-कारश्चेति प्रतिष्ठित्या अग्निश्च घर्मश्चेतद्वा अग्नेर्ब्रह्मवर्चस्यं तदेवावरुन्द्धे त्र्यविश्च त्र्यवी चेत्येतावन्ति वै पशूनां वयाँसि सवयस एव पशूनवरुन्द्ध एका च तिस्रश्चेति मनुष्यच्छन्दसं वा एका च तिस्रश्च मनुष्यच्छन्दसमेवावरुन्द्धे चतस्रश्चाष्टौ चेति देवच्छन्दसं वै चतस्रश्चाष्टौ च देवच्छन्दसमेवावरुन्द्धे ॥ युग्मदयुजौ स्तोमौ मिथुनौ प्रजात्यै मिथुनमेव ह्युत्तरेण करोति प्र चतुरुत्तरेण जनयत्येका च तिस्रश्चेत्या त्रयस्त्रिंशतो जुहोति त्रयस्त्रिंशद्देवता देवता एवावरुन्द्धे चतस्रश्चाष्टौ चेत्यष्टाचत्वारिंशतोऽष्टाचत्वारिं-शदक्षरा जगती जागताः पशवः पशूनेवावरुन्द्धेऽस्मिन्नेव लोके मनुष्यच्छन्दसेनभ्रोत्यमुष्मिन् देव-च्छन्दसेनोभौ लोका आजयति वाजश्च प्रसवश्चेति त्रयोदशैता व्याहृतयस्त्रयोदशमासस्संवत्सरोऽन्तत एव संवत्सरं रोहत्यायुर्यज्ञेन कल्पतामिति यज्ञस्यैवैषा क्लृप्तिर्ऋक् च साम चेत्यन्नाद्यं वै वसोर्धारा-न्नाद्यमेव वसोर्धारयावरुध्यान्नादो भूत्वा स्तोमश्च यजुश्चेति देवक्षत्रं वै स्तोमश्च यजुश्चान्तत एव देवक्षत्रं प्रावस्यति ॥११॥ ३८-४०

देवा वै वाजप्रसव्यु आजिमयुस्तदग्निरुदजयद्यद्वाजप्रसव्यं जुहोत्यन्नाद्यस्योज्जित्या अन्नस्यान्नस्य जुहोति सर्वमेवान्नमवरुन्द्धे यस्य न जुहोति तेन व्यृध्यते यस्य न जुहुयात् तदिधर्मेऽपि प्रोक्षेत् तेनैव

[११] मै. ३,४,१-२ (१-२) । वा. १८,१-१४,१९,२१-२२,२४-२७,२९ । काण्व. १९,१३-२६,३१, ३३-३४,३६-३८,४२-४३ । तै. सं. ५,४,८ ।

[१२] मै. ३,४,३-४ (३-४) । वा. १७,६०; १८,३०,४५ । काण्व. १८,६०; २१,१,१५ । तै. सं. ५,४,९ ।

तदेवरुन्द्ध औदुम्बरेण स्रुवेण जुहोत्यूर्ग्वा उदुम्बर ऊर्जैवान्नाद्यमवरुन्द्धेऽग्नेर्वा एषोऽभिषेकस्तस्मादग्नि-चिद्वर्षति न धावेद्यद्धावेदवत्यन्नाद्याद्धावत्ययैते राष्ट्रभृतः क्षत्रं वा एषोऽग्नीनां यच्चीयत एतं वा एतस्य राष्ट्रं बिभ्रति तद्राष्ट्रभृतां राष्ट्रभृत्त्वं तैरेवास्मै राष्ट्रं संप्रयच्छति षडेते षड्वा ऋतव ऋतुभिरेवास्मै राष्ट्रं संप्र-यच्छत्यथो ऋतुष्वेव प्रतितिष्ठति ॥ मिथुनो आहुतयः प्रजात्यै द्वादश द्वादश मासास्संवत्सरस्संवत्सरेणै-वास्मै राष्ट्रं संप्रयच्छत्यथो संवत्सर एव प्रतितिष्ठति रथमुखे त्रयोदशीं जुहोति वज्रो वै रथो वज्रेणैव दिशोऽभिजयति तां दिशोऽभिजिता रथेनेयते वातहोमाञ्जुहोति वातमेवावरुन्द्धेऽग्निचितं ह त्वा एषो-ऽमुष्मिंल्लोकेऽभिपवते त्रिर्जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमवरुन्द्ध इमेऽस्मै लोका वातं धुन्वन्त्यञ्जलिना जुहोति हस्तावदानो वै वायुर्न वै वायुमवदानैरामुमर्हत्येकधैवैनमाप्नोति समुद्रोऽसि नभस्वानित्येतानि वै वातस्य रूपाणि रूपैरेव वातमवरुन्द्धे ॥ प्राणो वै गायत्री गायत्रं हविर्धानं व्यानस्त्रिष्टुप् त्रैष्टुभमाग्नीध्रमपानो जगती जागतं सदो मध्ये दिवो निहितः पृश्निरश्मेत्यमुर्वीवं स पृश्निरश्मामुमेवं प्राणापानयोर्व्यवदधाति प्राणापानयोर्विधृत्या एकविंशतिं होत्रीय उपदधात्येक-विंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठित्या एकादश ब्राह्मणाच्छंस्य एकादशाक्षरा त्रिष्टुब् वीर्यं त्रिष्टुब् वीर्यमेवावरुन्द्धेऽष्टौ अष्टा इतरेष्वष्टाक्षरा गायत्री गायत्र्यामेव प्रतितिष्ठति षण्मार्जालीये षड्वा ऋतव ऋतव एते दक्षिणा पर्यहरन् पितर ऋतवस्तस्मादेत्र षड्डुपधीयन्ते ॥१२॥ ४१-४३

इयं वामस्य मन्मनश्शुचिं नु स्तोमं मरुतो यद्व वो दिवो या वश्शर्मेमं मे वरुण तत्त्वा यामि कया नश्चित्रः ॥
४४

कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु काचिदृष्वः ।
पुरु दाशुषे विचयिष्ठो अँहोऽथा दधाति द्रविणं जरित्रे ॥ ४५
उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥ ४६

[पृश्निरश्मेव दिवा (मध्ये दिवो०) । श्र. ५,४७,३; तै. सं. ४,६,३,३]

[१३] मै. १,२,११८; २,७,१०२; ३,४,१६; ४,१०,४९-५०,१०२-१०३,१०६,१०८-१०९,११२,११४-११५, ११७-११८,१२२-१२३,१२५-१२६,१२९; ११,९,७३,९६-९८; १३,३९; १४,१०४,२५२-२५४, ... । वा. ३२,१-४; १८,४९; २७,३९; ३६,४; १२,१६; ३३,३५; १७,३२-३३; ८,३५ । काण्व. २३, ... ८,३६-३७; १८,२२-२३ । [इयं वामस्य मन्मनः०। ऋ. ७,९४,१; सा. ९१६ । शुचिं नु स्तोमं० । ऋ. ७,९३,१; तै. सं. १,१४,१; तै. ब्रा. २,४,८,३ । मरुतो यद्ध वो दिवः । ऋ. ८,७,११; तै. सं. १,५,११,४ । या वश्शर्म० । ऋ. १,८५,१२; तै. सं. १,५,११,५; तै. ब्रा. २,८,५,६ । इमं मे वरुण० । ऋ. १,२५,१९; सा. १५८५; तै. ब्रा. २,१,११,६ । तत्त्वा यामि ब्रह्मणा०। ऋ. १,२४,११; तै. सं. २,१,११,६ । कया नश्चित्र० । ऋ. ४,३१,१; सा. १६९,६८२; अथर्व. २०,१२४,१; तै. सं. ४,२,११,२; तै. ब्रा. ४,४४,२ । कया तच्छृण्वे शच्या० । ऋ. ४,२०,९ । उदुत्तमं मुमुग्धि नो० । ऋ. १,२५,२१; तै. ब्रा. २,४,२,६]

उदुत्तमं वरुण पाशमस्मत् त्वं नो अग्ने स त्वं नो अग्ने ॥ ४७
अनेकवन्तमूतयेऽग्निं गीर्भिर्हवामहे । स नः पर्षदति द्विषः ॥ ४८
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठस्स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि ॥ ४९
सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥ ५०
यो नो मर्तो मरुतो दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशं प्रति पू मुचीष्ट तपिष्ठेन तपसा हन्तना तम् ॥ ५१
गृहमेधा रिशादसो मरुतो मापभूतन । प्रमुञ्चन्तो नो अँहसः ॥ ५२
प्र बुध्न्या व ईरते महाँसि प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ॥ ५३
क्रीडं वश्शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभिप्रगायत ॥ ५४
अत्यासो न ये मरुतस्स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाश्शिशवो न शुभ्रा वत्सासो न प्रक्रीडिनः पयोधाः ॥ ५५
इन्द्राग्नी अपवृत्रमा तू न इन्द्र त्वं महाँ इन्द्र ॥ ५६
विश्वकर्मन् हविषा वावृधानस्स्वयं यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥ ५७
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्याहुवेम ।
स नो नेदिष्ठं हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा ॥१३॥ ५८

[उदुत्तमं वरुण० । ऋ. १,२४,१५; अथर्व. ७,८३,३; १८,४,६९; तै. सं. १,५,११,३; ४,२,१,३; नि. २,१३ । त्वं नो अग्ने० । ऋ. ४,१,४; तै. सं. २,५,१२,३ । स त्वं नो अग्ने० । ऋ. ४,१,५; तै. सं. २,५,१२,३ । अने(नो)कवन्तमूतये० । ऋ. परि. ३५,१; २६,७(च. पा.) । सैनानीकेन सुविदत्रो० । ऋ. ९,९,६; तै. सं. ४,३,१३,२ । सांतपना इदं हवि० । ऋ. ७,५९,९; अथर्व. ७,७७,१; तै. सं. ४,३,१३,३ । यो नो मर्तो(मरुतो)० । ऋ. ७,५९,८; अथर्व. ७,७७,२; तै. सं. ४,३,१३,३ । गृहमेधा (०स)रिशादसो० । ऋ. ७,५९,१०; तै. सं. ४,३,१३,५ । प्र बुध्न्या व ईरते० । ऋ. ७,५६,१४; तै. सं. ४,३,१३,६ । क्रीडं(०ळं) वश्शर्धो० । ऋ. १,३७,१; तै. सं. ४,३,१३,६; नि. ७,२ । अत्यासो न ये० । ऋ. ७,५६,१६; तै. सं. ४,३,१३,७ । इन्द्राग्नी नवति पुरो० । ऋ. ३,१२,६; सा. १५७६, १७०४; तै. सं. १,१,१४,१ । अपवृत्रम्० । ऋ. ६,६०,१; तै. सं. ४,२,११,१; तै. ब्रा. ३,५,७,३ । आ तू न इन्द्र० । ऋ. १,१०,११; ३,४१,१; ४,३२,१; ८,८१,१; सा. १६७, १८१, ७२८; अथर्व. २०,२३,१ । त्वं महाँ इन्द्र० । ऋ. १,६३,१; ४,१७,१ । विश्वकर्मन् हविषा वावृधानः० । ऋ. १०,८१,६; सा. १५८९; तै. सं. ४,६,२,६; नि. १०,२७ । वाचस्पतिं विश्व-कर्माणं० । ऋ. १०,८१,७; तै. सं. ४,६,२,५]

उशन्तस्त्वा हवामह उशन्तस्समिधीमहि । उशन्नुशत आवह पितॄन् हविषे अत्तवे ॥ ५९
त्वं सोम प्रचिकितो मनीषा त्वं रजिष्ठमनुनेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥ ६०
त्वया हि नः पितरस्सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधीरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥ ६१
त्वं सोम पितृभिस्संविदानोऽनु द्यावापृथिवी आततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥ ६२
बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा नश्शं योररपो दधात ॥ ६३
आहं पितॄन् सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ६४
उपहूताः पितरस्सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आगमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ६५
अग्निष्वात्ताः पितर एह गच्छत सदस्सदस्सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥ ६६
अग्निष्वात्ता ऋतावृधः पितरो मृडता सु नः । प्रमुञ्चन्तु नो अंहसः ॥ ६७
अग्निष्वात्तानृतुमतो हवामहे नराशंसे सोमपीथं य आनशुः ।
त आगमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ६८
स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन् मनूनाम् ।
विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन् द्रविणोदाः ॥ ६९

[१४] मै. १,३,१००-१०१; १०,४३; २,७,१५४; ४,९,१८९,२०१; १०,१३०,१३३-१३८,१४१-१४३,१४५, १४८-१४९; १४,५६ । या. १९,५१-५७,५९,६१,६५,७०; २७,२७,३१; १२,६७; ७,४१-४२; ८,४१, ३३, ३१; १३,४६ । काण्व. २१,५२-५८,६१,६५,७०; २९,२५-२६; १३,६८; ८,२३-२४; ९,६-७; ३२,३१; १४,४८ । [उशन्तस्त्वा (नि धीमहि) हवामह० । ऋ. १०,१६,१२; अथर्व. १८,१,५६; तै. सं. २,६,१२, १ । त्वं सोम प्रचिकितो० । ऋ. १,९१,१; तै. सं. २,६,१२,१ । त्वया हि नः० । ऋ. ९,९६,११; तै. सं. २,६,१२,१ । त्वं सोम पितृभिः० । ऋ. ८,४८,१३; तै. सं. २,६,१२,२ । बर्हिषदः पितर० । ऋ. १०,१५,४; अथर्व. १८,१,५१; तै. सं. २,६,१२,२; नि. ४,२१ । आहं पितॄन् सुविदत्रां० । ऋ. १०,१५,३; अथर्व. १८, १,४५; तै. सं. २,६,१२,३ । उपहूताः पितर० । ऋ. १०,१५,५; अथर्व. १८,३,४५; तै. सं. २,६,१२,३ । अग्निष्वात्ताः पितर० : ऋ. १०,१५,११; अथर्व. १८,३,४४; तै. सं. २,६,१२,२ । स पूर्वया निविदा० । ऋ. १,९६,२]

काठ० ३०

यो अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥ ७०
त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि ।
त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ॥ ७१
वायुरग्रेगाः प्र याभिर्यासि ॥ ७२
सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा इन्द्राय सुम्नया ॥ ७३
शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ७४
उदु त्यं चित्रं देवानाम् ॥ ७५
इन्द्रं वयं शुनासीरमस्मिन् यज्ञे हवामहे । इह देवं सुराधसम् ॥ ७५
इन्द्रं वयं धनपतिं स्वनुमन्वारभामहे । स नः पितेव पुत्रेभ्य ईशानश्शर्म यच्छतु ॥१४॥ ७७
[१७०६]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां पञ्चचूडं नामैकविंशं स्थानकं संपूर्णम् ॥२१॥

[यो अग्निः कव्यवाहनः० । ऋ. १०,१६,११ । त्वदग्ने काव्या० । ऋ. ४,११,३ । प्र याभिर्यासि० । ऋ. ७,९२,३; तै. सं. २,२,१२,७ । सीरा युञ्जन्ति कवयो० । ऋ. १०,१०१,४; अथर्व. ३,१७,१; तै. सं. ४,२,५,५ । शुनं हुवेम मघवा० । ऋ. ३,३०,२२; ३१,२२; ३२,१७; ३४,११; ३५,११; ३६,११; ३८,१०; ३९,९; ४३,८; ४८,५; ४९,५; ५०,५; १०,८९,१८; १०४,११; सा. ३२९; अथर्व. २०,११,११; तै. ब्रा. २,४,४,३ । उदु त्यं जातवेदसं० । ऋ. १,५०,१; सा. ३१; अथर्व. १३,२,१६; २०,४७,१३; तै. सं. १, २,८,२; ४,४३,१; नि. १२,१५ । चित्रं देवानाम्० । ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; ऐ. आ. ३,९; तै. आ. १,७,६; २,१३,१; नि. १२,१६]

अथ द्वाविंशं स्थानकम्।

स्वर्गम् ।

स्वर्गाय वै लोकाय देवरथो युज्यते कामाय मनुष्यरथोऽग्निं युनज्मि शवसा घृतेनेति देवरथमेव
युनक्ति स एनं युक्तस्स्वर्गं लोकमभिवहति यत् सर्वाभिर्युञ्ज्यायुक्तोऽस्याग्निस्स्यादप्रतिष्ठिता आहुतय-
स्तिसृभिर्युनक्ति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं युनक्ति तस्मिन् युक्ते यज्ञस्समाधीयते द्वाभ्यां नापि-
युनक्त्याहुतीनां प्रतिष्ठित्यै द्वाभ्यां यज्ञायज्ञीयस्य स्तोत्रेऽभिमृशत्येतावान् वै यज्ञो यावानेवाग्निष्टोमो
यज्ञमेवाग्निष्टोमस्त्वमन्ततस्स्वर्गं लोकमनुसमारोहति ॥
भूमा त्वा अस्यात ऊर्ध्वं क्रियते यावानेव यज्ञो यावानग्निष्टोमस्त्वमन्ततस्स्वर्गं लोकमनुसमारोहति ॥
सं वा एतमेता अग्नी तपतो यश्चाग्निष्टोमो यश्च वैश्वानरोऽपस्वतीभ्यामभिमृशति शान्त्यै द्वाभ्यां
द्विपाद्यजमानः प्रतिष्ठित्यै समास्त्वाग्न ऋतवो वर्धयन्त्विति समाभिरेवर्तून्वर्धयत्यृतुभिस्संवत्सरं सं
दिव्येन दीदिहि रोचनेनेति तस्मादग्निस्सर्वा दिशो विभाति प्रत्यौहतामश्विना मृत्युमस्मादित्याम-
याविन एतान् कुर्यान्मृत्युमेवास्मात् प्रतिनुदत्युद्वयं तमसस्परीति पाप्मा वै तमः पाप्मानमेवैतया-
पहते ज्योतिष्पश्यन्त उत्तरमित्यसौ वा आदित्यो ज्योतिरुत्तममुष्यैवादित्यस्य सायुज्यं गच्छति ॥
या अपस्वतीस्ताः कुर्याच्छान्त्यै चतुर्विंशतिं चतुर्विंशतिस्संवत्सरस्यार्धमासा न वै संवत्सरस्तिष्ठते
नास्य श्रीस्तिष्ठते यस्यैताः क्रियन्तेऽथैता आप्रियः प्रजापतिः प्रजास्सृष्ट्वा स रिरिचान इवामन्यत
स एता आप्रीरपश्यत् ताभिरात्मानमाप्रीणीत यज्ञः प्रजापतिर्यदाप्रियो भवन्ति यज्ञमेवाप्रीणात्यूना-
तिरिक्ता मिथुनाः प्रजात्यै लोमशं वै नामैतत् प्रजापतेश्छन्दो लोमशाः पशवः प्रजायन्ते पशूनां
प्रजात्यै सर्वाणि वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता अग्नेश्चित्यस्य भवन्ति
१-३
॥१॥

यथा वै पुनराधेय एवं पुनश्चितिर्यो वा अग्न्याधेयेन नर्ध्नोति पुनराधेयं स आधत्ते यद्यग्निना
चित्येन नर्ध्नुयात् पुनश्चितिं चिन्वीतर्ध्नोत्येवात्मा वै प्रथमा चितिः प्रजा द्वितीया नपात् तृतीया
तृतीयमग्निं चिन्वानो मध्यमायामेताश्चित्यामुपदध्यादनुसंतत्यै नपात् को वै नामैषोऽग्निस्त्वस्त्वं य
एवं विद्वानेता उपधत्तेऽष्टा एता उपदधात्यष्टाक्षरा गायत्री गायत्र्यामेव प्रतितिष्ठति यां वा अनि-
ष्टकेऽग्निचिदाहुतिं जुहोति स्रवति सा तां स्रवन्तीं यज्ञोऽनु परास्रवति यज्ञं यजमानो यदेता उपधी-
यन्त आहुतीनां प्रतिष्ठित्यै ॥ ताः प्रतितिष्ठन्तीर्यज्ञोऽनु प्रतितिष्ठति यज्ञं यजमानोऽष्टा उ ता उपदधा-

[१] मै. ३,४,४; ६(४,६) । वा. १८,५१; २०,२१; २७,१,१०; ३५,१४; ३८,२४ । काण्व. २०,२१; २२,६; २९,१, १०; ३५,४७; ३८,२४ । तै. सं. ५,४,१० । [समास्त्वाग्न ऋतवो० । अथर्व. २,६,१ । उद्वयं तमसस्परि० । ऋ. १,५०,१०; अथर्व. ७,५३,७; तै. सं. ४,१,७,४; तै. ब्रा. २,४,४,९; ६,६,४; तै. आ. ६,३,२]
[२] मै. ३,४,५ (५) । तै. सं. ५,४,१० ।

न्त्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तं चिनुतेऽष्टा एता उपधाय पुरीषेणाभ्यूहत्यष्टाक्षरा
गायत्री ब्रह्म गायत्री ब्रह्मणैवैनं चिनुते गायत्र्या छन्दसैकादश लोकंपृणयोपधाय पुरीषेणाभ्यूहत्ये-
कादशाक्षरा त्रिष्टुब् वीर्यं त्रिष्टुब् वीर्येणैवैनं चिनुते त्रिष्टुभा छन्दसा द्वादश लोकंपृणयोपधाय पुरीषे-
णाभ्यूहति द्वादशाक्षरा जगती जागताः पशवः पशुभिरेवैनं चिनुते ॥ जगत्या छन्दसा तिस्र-
श्चितयस्त्रीणि पुरीषाणि तत् षट् संपद्यते षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति तदाहुरुत्तरवेदिर्वावैषा
योऽस्य पूर्वोऽग्निश्चितस्स्यात् तमन्ववसाय यजेतेति यथा दीप्यमाने भूयोऽभ्यादधात्येवमेवास्मिं-
स्तदधि पूर्वं तेजो दधाति तदाहुः कश्श्रेयांसं विपुसं वोषयितुमर्हतीति यद्यजत आहुत्यैवैनं वर्षयति
गृहान् वा एतत् कुरुते यदग्निं चिनुते यद्वा अन्यतो विन्दते गृहाँस्तदाहरति यदीष्ट्या यजेत यदि
पशुना यदि सोमेन योऽस्य पूर्वोऽग्निश्चितस्स्यात् तमन्ववसाय यजेत यथान्यतो वित्त्वा गृहानाहर-
त्येवमेव तत् ॥२॥
४-६

संवत्सरमुख्यं भृत्वा द्वितीये संवत्सरे पर्यंते आग्नेयमष्टाकपालं निर्वपेदैन्द्रमेकादशकपालं वैश्वदेवं
द्वादशकपालं बार्हस्पत्यं चरुं वैष्णवं त्रिकपालं तृतीये संवत्सरे पर्यंतेऽभिजिता यजेत यदष्टाकपालो-
ऽष्टाक्षरा गायत्र्याग्नेयं गायत्रं प्रातस्सवनं प्रातस्सवनमेव तेन दाधार गायत्रीं छन्दो यदेकादशकपाल
एकादशाक्षरा त्रिष्टुबैन्द्रं त्रैष्टुभं माध्यन्दिनं सवनं माध्यन्दिनमेव तेन सवनं दाधार त्रिष्टुभं छन्दो यद्
द्वादशकपालो द्वादशाक्षरा जगती वैश्वदेवं जागतं तृतीयसवनं तृतीयसवनमेव तेन दाधार जगतीं
छन्दो यद्बार्हस्पत्यो ब्रह्म वै बृहस्पतिर्ब्रह्म वै तेन दाधार यद्वैष्णवो यज्ञो वै विष्णुर्यज्ञमेव तेन दाधार
यदभिजिता यजतेऽभिजित्यै यत् संवत्सरमुख्यं बिभर्तीमं तेन लोकं स्पृणोति यद् द्वितीयं चिनुते-
ऽन्तरिक्षं तेन स्पृणोति यद्यजतेऽमुं तेन लोकं स्पृणोत्येतं वै पर आट्णारः कक्षीवाँ औशिजस्त्रसदस्युः
पौरुकुत्सः प्रजाकामा अचिन्वत ततो वै ते सहस्रं सहस्रं पुत्रानविन्दन्त प्रथत एव तं भूमानं गच्छति
यं तेऽगच्छन् य एवं विद्वानेतं चिनुते ॥३॥
७

प्रजापतिर्वा एतमग्रेऽग्निमचिनुतर्तुभिस्संवत्सरं वसन्तेन पूर्वार्धं ग्रीष्मेन दक्षिणं पक्षं वर्षाभिरुत्तरं
शरदा पुच्छं हेमन्तेन मध्यं ब्रह्मणा वावास्य तत् पूर्वार्धमचिनुत क्षत्रेण दक्षिणं पक्षं विशोत्तरं पशुभिः
पुच्छमाशया मध्यमेतावद्वावास्ति यावदेवास्ति तत् स्पृणोति शृण्वन्त्येनमग्निं चिक्यानमत्यन्नं रोचते
का प्रथमा चितिः किं पुरीषमित्याहुर्ब्रह्मवादिन इयं वाव प्रथमा चितिरोषधयः पुरीषमन्तरिक्षं
द्वितीया वयांसि पुरीषं द्यौस्तृतीया नक्षत्राणि पुरीषं यज्ञश्चतुर्थी दक्षिणा पुरीषमात्मा पञ्चमी प्रजा
पुरीषं यद् त्रिचितीकं चिन्वीत यज्ञं दक्षिणामात्मानं प्रजामन्तरियात् तस्मात् पञ्चचितीकश्चेतव्यो

[३] तै. सं. ५,६,५ । [४] मै. ३,४,८ (१३,१७) । तै. सं. ५,६,१० ।

यत् तिस्रधितयश्चिवृद्धयग्निर्यद् द्वे द्विपाद्यजमानस्त्रय इमे लोका एष्वेव लोकेष्वृभ्नोति ॥४॥ ८

सजूरब्द आयवोभिस्सजूरुषा अरुणीभिस्सजूस्सूर एतशेन सजोषा अश्विना दंसोभिस्सजूर्वैश्वानर इडया घृतेन स्वाहा ॥ ९

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ १०
युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव । नि होता पूर्व्यस्सदः ॥ ११
अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः ॥ १२

अग्नेर्यान्यस्यग्नेरग्नियान्यसि वायोर्यान्यसि वायोर्वायुयान्यसि देवानां यान्यसि देवानां देवयान्यस्यन्तरिक्षस्य यान्यस्यन्तरिक्षस्यान्तरिक्षयान्यस्यन्तरिक्षसदस्यन्तरिक्षे सीद ॥ यवा आयवा ऊमा एशा अब्दस्सगरस्सुमेकस्सलिलाय त्वा मृडीकाय त्वा सर्वीकाय त्वा केताय त्वा प्रचेतसे त्वा दिवे त्वा ज्योतिषे त्वा विवस्वते त्वादित्येभ्यस्त्वर्चे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा सूर्याय त्वा पुरोवातसनिरस्यभ्रसनिरसि विद्युत्सनिरसि स्तनयित्नुसनिरसि वृष्टिसनिरसि प्राच्या त्वा दिशाग्निना देवतया गायत्रेण च्छन्दसाग्नेश्शिर उपदधामि गायत्रेण च्छन्दसा छन्दसाग्नेश्शीर्ष्णाग्नेश्शिर उपदधामि ॥ दक्षिणया त्वा दिशेन्द्रेण देवतया त्रैष्टुभेन च्छन्दसाग्नेः पार्श्वमुपदधामि त्रैष्टुभेन च्छन्दसा छन्दसाग्नेः पार्श्वेनाग्नेः पार्श्वमुपदधामि प्रतीच्या त्वा दिशा सवित्रा देवतया जागतेन च्छन्दसाग्नेः पुच्छमुपदधामि जागतेन च्छन्दसा छन्दसाग्नेः पुच्छेनाग्नेः पुच्छमुपदधाम्युदीच्या त्वा दिशा मित्रावरुणाभ्यां देवतयानुष्टुभेन च्छन्दसाग्नेः पार्श्वमुपदधाम्यानुष्टुभेन च्छन्दसा छन्दसाग्नेः पार्श्वेनाग्नेः पार्श्वमुपदधाम्यूर्ध्वया त्वा दिशा बृहस्पतिना देवतया पाङ्क्तेन च्छन्दसाग्नेः पृष्ठमुपदधामि पाङ्क्तेन च्छन्दसा छन्दसाग्नेः पृष्ठेनाग्नेः पृष्ठमुपदधामि ॥ संयच्च प्रचेताश्चाग्नेस्सोमस्य सूर्यस्य ते तेऽधिपतयस्ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधाम्युग्रा च भीमा च पितॄणां यमस्येन्द्रस्य ते तेऽधिपतयस्ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ध्रुवा च पृथिवी च सवितुर्मरुतां वरुणस्य ते तेऽधिपतयस्ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि यन्त्री च यमनी च

[५] मै. २,१२,३; ३,३,४ (८, ८); ४ । का. १९,७३; ७,४२; १३,३६-३७,३९,४६; ३३,४; ५,२६, ६,१,५५; ३७,१९; १९,६४-६६ । काण्व. १३,७५; ८,२४; ९,७; १४,३८-३९,४८; ३२,४; ५,३३; ६,१,३६; ३७,१८; १७,६४ । तै. सं. ४,४,६ । [चित्रं देवानां० । ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; ऐ. ब्रा. ३,९; मै. ब्रा. १,७,६; २,१३,१; नि. १२,१६ । युक्ष्वा हि देवहूतमां० । ऋ. ८,७५,१; तै. सं. २,६,११,१ । अग्ने युक्ष्वा हि ये० । ऋ. ६,१६,४३; सा. २५, १५८३; तै. सं. ४,२,९,५ । यं द्विष्मो यश्च नो० । अथर्व. ३,२७,१-६]

मित्रावरुणयोर्मित्रस्य धातुस्ते तेऽधिपतयस्ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि प्राची च प्रतीची च वसूनां रुद्राणामादित्यानां ते तेऽधिपतयस्ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥५॥ १३-१६

सजूरब्द आयवोभिरिति संवत्सरो वा अब्दो मासा आयवा उषा अरुणीस्सूर एतश इमे अश्विना संवत्सरोऽग्निर्वैश्वानरः पशव इडा पशवो घृतं संवत्सरं पशवोऽनु प्रजायन्ते संवत्सरादेवास्मै पशून् प्रजनयति दर्भस्तम्बे जुहोति यद्वा अस्या अनामृतं यद्वीर्यं तदेतदुत्सर्पति यदेवास्या अनामृतं यद्वीर्यं तस्मिञ्जुहोति नाग्निं चिक्यानः प्रमीयते यस्यैवं जुह्वति चित्रं देवानामुदगादनीकमिति पुरुषशीर्षे जुहोत्यहर्वै मित्रो रात्री वरुण एतावद्वावास्ति यावदेवास्ति तत् स्पृणोति सौर्यर्चा जुहोति तस्मात् पुरुष एवं सूर्यं प्रत्यङ् पशूनां न्यङ्ङोऽन्ये यत् समान्यर्चा द्विर्जुहोति तस्मात् समानस्य पुरुषस्य द्वौ पादौ ॥ यो ह वा अग्निं योग आगते न युनक्ति न युञ्जानेषु युङ्क्ते युक्ष्वा हि देवहूतमाँ अग्ने युक्ष्वा हि ये तवेत्यग्निमेवैतद्योग आगते युनक्ति युङ्क्ते युञ्जानेषु य एवं वेद द्वाभ्यां युनक्त्यस्थूरि ह्येवं यो ह वा अग्निं विमोक आगते न विमुञ्चति न विमुञ्चमानेषु विमुञ्चते मातेव पुत्रं पृथिवी पुरीष्यमित्यग्निमेवैतद्विमोक आगते विमुञ्चति वि विमुञ्चमानेषु मुञ्चते य एवं वेदाथैतास्संयानीरेता वै देवतास्स्वर्ग्यास्ताभिरेव स्वर्गं लोकमेत्येषा वै गायत्री ज्योतिष्पक्षा तयैव स्वर्गं लोकमेति ॥ यथा नावोदकादुदकमभिसंयात्येवं वा एताभिरग्निचिदमुत्र यथालोकं संयाति तत् संयानीनां संयानीत्वमथैतान्यृतुनामान्यृतूनेवावरुन्द्धे सुमेक इति संवत्सरो वै सुमेकस्संवत्सरमेवावरुन्द्धेऽथैता आदित्येष्टका आदित्या वा एतस्य तेज आददते योऽग्निं चिक्यानो नेव रोचते यदेता उपधीयन्ते यथा दीप्यमाने भूयोऽभ्यादधात्येवमेवास्मिंस्तदधि पूर्वं तेजो दधाति नास्यादित्यास्तेज आददते यथासौ देवेष्वेवं मनुष्येषु भवत्यथैता घृतेष्टकास्तेजो वा अग्निस्तेजो घृतं तेजस्येव तेजो दधात्यथैता वृष्टिसनयो वृष्टिमेवैताभिरवरुन्द्ध एताभिर्वा अग्निचितेऽमुत्र यथाकामं वर्षति तद्वृष्टिसनीनां वृष्टिसनित्वमथैता आत्मैतद्ध वा उवाच शङ्ख कौप्यः पुत्रमग्निं चिकिवाँसमचैरग्नी३मित्यचैषं ही३त्यथ कथा न सर्वात्मागा इति तद्धि नूनं न विदांचकर्थेति यदेता उपधीयन्ते सात्मानमेवाग्निं चिनुते पुनर्नितुन्ना भवन्ति प्राण एव प्राणमुपसंदधात्यथैषा षष्ठी चितिर्योऽग्निं चिक्यानो नेव प्रतितिष्ठेत् स एतां षष्ठीं चितिमुपदधीत षड्वा ऋतवस्संवत्सर ऋतुष्वेव संवत्सरे प्रतितिष्ठत्येता वै देवतास्स्वर्ग्यास्ताभिरेव स्वर्गं लोकमेत्येता वै देवता अभिचरणीया यं द्विष्यात् तं ब्रूयादमुं वै जम्भे दधामीत्येताभ्य एवैनं

[६] मै. २,१२,३; ३,३,४-५ (८; ४-५) । कपि. ३४ । वा. १२,६१,७४; ७,४२; १३,३६-३७,४६, ३३,४ । काण्व. १३,६२,७५; ८,२४; ९,७; १४,३८-३९,४८; ३२,४ । तै. सं. ५,६,४ । [चित्रं देवानां० । युक्ष्वा हि० । अग्ने युक्ष्वा० । (पञ्चमानुवाके द्रष्टव्यम्)]

देवताभ्य आवृश्चति ताजक् प्रधन्वति ॥६॥ १७-१९

अग्निना वै देवास्स्वर्गं लोकमायँस्तान् परा च आवृत्तान् पश्चादन्ववेत्य रक्षाँस्यजिघाँसँस्ते देवा एता वितृण्णीरपश्यँस्ताभी रक्षाँस्यपाघ्नत यद् द्वे पुरस्तादुपदधाति द्वे पश्चाच्चक्षुषोरेवोभयतो दधाति रक्षसामपहत्यै स्वयमातृण्णा भवन्ति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै चतस्रस्तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे स्वर्गाय वै लोकायाग्निश्चीयते यदेकादशिनीं कुर्याद्वज्रेण पुरस्तादवगृह्णीयादस्वर्ग्यस्स्याद्यदनेकादशिनीमनवरुद्धा अस्य पशवस्स्युरेकयूप एकादश पशूनालभेत तेनैव स्वर्ग्यस्तेन पशूनवरुन्द्धे ॥ न पक्षसंमितां मिनुयाद्यत् पक्षसंमितां मिनुयात् कनीयाँसं यज्ञक्रतुमुपेयात् पापीयस्यस्यात्मनः प्रजा स्यादेतद्ध वा उवाच जातश्शाकायन्यश्शङ्ख कौप्यं पक्षसंमितामेकादशिनीममेष्टेति श्रुत्वा कनीयाँसं यज्ञक्रतुमुपागात् पापीयस्यस्यात्मनः प्रजा भविष्यतीति सतो वै तं पराभूतं मन्यन्ते वेदिसंमितां मिनुयाज्ज्यायाँसमेव यज्ञक्रतुमुपैति नास्यात्मनः प्रजा पापीयसी भवति कस्मै कमग्निश्चीयत इत्याहुर्देवा मा वेदन्निति वा अग्निश्चीयते य एवं विद्वानग्निं चिनुते विदुरेनं देवाः कस्मै कमग्निश्चीयत इत्याहुर्गृही मेऽसन्निति वा अग्निश्चीयते य एवं विद्वानग्निं चिनुते गृहवान् भवति कस्मै कमग्निश्चीयत इत्याहुरन्नमदानीति वा अग्निश्चीयते य एवं विद्वानग्निं चिनुतेऽन्नाद्यं व्रतं चरेदग्निं चित्वा प्रथमं चित्वा न रामामुपेयाद् द्वितीयं चित्वा नान्येषां स्त्रियस्तृतीयं चित्वा न काञ्चन रेतो वा एतन्निधत्ते यदग्निं चिनुते यदुपेयाद्रेतसा व्यृध्येत तदाहुर्य एषाम् रेतस्सिचा इष्टके ते अग्निचितो रेतो बिभृतस्तस्मादुपेत्येति सहस्रेष्टकं चिन्वीत प्रथमं चिन्वानस्सहस्रसंमितो ह्ययं लोको द्वे सहस्रे द्वितीयं चिन्वानोऽन्तरिक्षेण संमितं त्रीणि सहस्राणि तृतीयं चिन्वानस्त्रय इमे लोका एभिर्लोकैस्संमितं प्रजापतिर्वा उख्यमग्निमबिभस्तेन प्रजा असृजत ता अनुप्राविशत् सोऽब्रवीत् स एव मे प्रजानामृषभो मेतस्संचिनवदित्यग्निः प्रजापतिर्यदग्निं चिनुते प्रजापतिमेव संचिनोत्यृभ्नोति तच्चिन्वस्य चित्यत्वं तं वसुभ्यः प्रायच्छन् तेन वसवस्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त तं वसवो रुद्रेभ्यः प्रायच्छँस्तेन रुद्रास्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त तं रुद्रा आदित्येभ्यः प्रायच्छँस्तेनादित्यास्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्तोखा सहस्रतमी य एवमुख्यां सहस्रतमीं वेद गच्छति साहस्रीं पुष्टिं पशूनाम् ॥७॥ २०-२१

यथारूपमग्निश्चेतव्यो यो वै यथारूपमग्निं चिनुते नास्यापरूपं जायते गायत्र्या प्रथमां चितिं संचितामभिमृशेत् त्रिष्टुभा द्वितीयां जगत्या तृतीयामनुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीं यथारूपमेवाग्निं चिनुते नास्यापरूपं जायते प्राणो वै प्रथमा चितिर्व्यानो द्वितीयापानस्तृतीया प्राणापानैरेवैनं

[७] मै. ३,४,८; ९,७ (१३,१७, २७) । कपि. ३५,१ । तै. सं. ५,५,७ ।
[८] मै. ३,४,८ । कपि. ३५,२ । वा. ७,४२; १३,४६ । काण्व. ८,२४; ९,७; १४,४८ । तै. सं. ५,५,७]

समिन्द्ध इडाया वा एषा विभक्तिः पशव इडा पशुभिरेवैनं चिनुते प्रजापतये प्रोच्याग्निश्चेतव्यो यो वै प्रजापतयेऽप्रोच्याग्निं चिनुत आर्तिमार्छत्यश्वा अभितस्तिष्ठेताँ श्याव उत्तराच्छ्वेतो दक्षिणतस्ता आलभ्यमिष्टकामिष्टकामुपदध्यादेतद्वै प्रजापते रूपं प्राजापत्योऽश्वः प्रजापतय एवं प्रोच्याग्निं चिनुते नार्तिमार्छति ॥ हिरण्यपात्रं मधोः पूर्णं ब्रह्मणे ददाति मधव्यो भवति शतमानं शतायुर्वै पुरुषश्शतवीर्य आयुरेव वीर्यमवरुन्द्धे चित्रं देवानामुदगादनीकमिति चित्रवत्यावेक्षते चित्रमेव भवति मध्यन्दिनेऽश्वमवघ्रापयत्यसौ वा आदित्य इन्द्र एष प्रजापतिः प्राजापत्योऽश्वः प्रत्यक्षमेवैनमृभ्नोति योऽग्नेरग्निं वेदाप्नोति तं कामं यस्मै कामायाग्निश्चीयते प्रयास्यन्नग्निं चितमुपतिष्ठेत दीक्षया त्वापं तपसा त्वापँ सुत्यया त्वापमवभृथेन त्वापं वशया त्वापमिति तत् पञ्च संपद्यते पञ्च वा ऋतव ऋतवस्संवत्सरस्संवत्सरोऽग्निर्वैश्वानर आप्नोति तं कामं यस्मै कामायाग्निश्चीयते ॥ एकेष्टकेत्याहुर्ब्रह्मवादिनो वागेवैकेष्टकेति ब्राह्मण एवैकेष्टकेतीम एव लोका एतद्ध स्म वा आहुश्शर्कराख्यातिस्र एव वयमिष्टका अग्निं चित्यं विद्मानेव लोकानिति ससत्योऽग्निश्चेतव्यो भूरिति प्रथमां वितृण्णीमभिमृशेद्भुवरिति द्वितीयाँ स्वरिति तृतीयामेतद्वै वाचस्सत्यँ ससत्यमेवाग्निं चिनुते ससत्यमाग्निमचेष्टा३मुपसत्या३मित्याहुर्ब्रह्मवादिनस्स ह त्वं ससत्यं चिनुते य एवं चिनुते कस्यै देवताया अग्निश्चीयत इत्याहुर्ब्रह्मवादिनः प्रजापतय एव तस्य किं हविरित्यात्मैव ॥८॥ २२-२४

आपो वा इदमासन् सलिलमेव स प्रजापतिः पुष्करपर्णे वातो भूतोऽलेलीयत स प्रतिष्ठां नाविन्दत स एतमपां कुलायमपश्यत् स एतं प्रजापतिरपां मध्येऽग्निमचिनुत सेयमभवत् ततः प्रत्यतिष्ठदियं वावाग्निस्तस्माद्यदस्यां खनन्त्यभीष्टकां तृन्दन्त्यभि शर्करां यां पुरस्तादुपादधात् तच्छिरोऽभवत् सा प्राची दिग्यां दक्षिणत उपादधात् स दक्षिणः पक्षोऽभवत् सा दक्षिणा दिग्यां पश्चादुपादधात् तत् पुच्छमभवत् सा प्रतीची दिग्यामुत्तरादुपादधात् स उत्तरः पक्षोऽभवत् सोदीची दिग्यां मध्य उपादधात् तत् पृष्ठमभवत् सोर्ध्वा दिगियं वावाग्निः पञ्चेष्टको य एवं वेद प्रजायते गच्छति प्रतिष्ठामाग्नेयो वै ब्राह्मणस्तस्माद्ब्राह्मणाय सर्वासु दिक्ष्वर्धुकँ स्वाँ ह्येव दिशमन्वेति सर्वा ह वा इयं वयोभ्यो नक्तं दृशे दीप्यते तस्मादिमां वयाँसि नक्तं नाध्यासतेऽपां वा एष कुलायस्तस्मादेतमापः प्रहारुका अपाँ ह्येष कुलायः ॥९॥ २५

यदि मन्येत पूर्वो मातिक्रान्तो भ्रातृव्य इति बहिष्पवमानस्य पुरस्तादष्टौ लोकंपृणयोपदध्यान्माध्यन्दिनस्य पवमानस्य पुरस्तादेकादशार्भवस्य पवमानस्य पुरस्ताद् द्वादशायं वाव यः पवते स पवमानो वायुरग्नेस्तेजो य एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्यस्तं तेजसा प्रणुदते यदि मन्येत पश्चान्मे

[चित्रं देवानां० । (पञ्चमानुवाके द्रष्टव्यम्)]
[९] कपि. ३५,३ । तै. सं. ५,६,४ । [१०] कपि. ३५,४ । वा. ३,२२; १८,६७ । काण्व. ३,३०; २०,३६]

भ्रातृव्य इति पश्चादेतेषां पवमानानामुपदध्यादयं वाव यः पवते स पवमानो वायुरग्नेस्तेजो य
एवास्य पश्चाद्भ्रातृव्यस्तं तेजसापनुदते प्र श्रेयाँसं भ्रातृव्यं नुदते प्रति पापीयाँसं नुदते ॥ स एष
सवनचित् प्रजापतिर्वा उख्यमग्निमबिभस्तस्य शिरः प्रावर्तत तेन देवा अश्राम्यँस्तस्यैतच्छिरः प्रत्य-
दधुर्यदुखा तत् संवत्सरमरोहदग्निः प्रजापतिर्यत् संवत्सरमुख्यं बिभर्ति प्रजापतेरेव शिरः प्रतिदधाति
तस्मात् संवत्सरमुख्यो भर्तव्यो यदर्वाक् संवत्सरादरुश्चिदेव सः ॥ २६-२७

येन देवा ज्योतिषोर्ध्वा उदायन् येनादित्या वसवो येन रुद्राः ।
येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानस्स्वस्ति ॥ २८

इति घृतेनाक्त्वा समिधमादधाति समिद्भिरेवैषाथो यजमानायैवैतत् स्वस्त्ययनं क्रियते ॥ २९

येऽग्नयः पुरीषिण आविष्टाः पृथिवीमनु । तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥ ३०

इति स्वमग्निं चितमुपतिष्ठेत सर्वमायुरेत्युप त्वाग्ने दिवे दिव इत्येतेन त्रियृचेनान्येषामाशीरेव सा
॥१०॥ ३१

यर्हि धिष्ण्या उपधीयन्ते तर्हि बार्हस्पत्याभिस्तिसृभिस्तिस्रो दक्षिणत उपदधात्यथ यामीभिस्ति-
सृभिस्तिस्रः पूर्वा अथ रौद्रीभिस्तिसृभिस्तिस्र उत्तराद्दक्षिणतः पशुश्रपणस्याथ वारुणीभिस्तिसृभि-
स्तिस्रोऽवभृथे दक्षिणतो वै देवानां यज्ञं रक्षाँस्यजिघाँसँस्तानि ब्रह्मणापाघ्नत ब्रह्म बृहस्पतिर्यद्बार्ह-
स्पत्या दक्षिणत उपधीयन्ते रक्षसामपहत्या अथ यामीरेताभिर्वा असिताय देवलायेमे लोका अर्वा-
ञ्चश्च पराञ्चश्च प्राभुर्यस्यैता उपधीयन्ते समस्मा इमे लोका अर्वाञ्चश्च पराञ्चश्च भान्त्यथ रौद्रीरेष वै
रुद्रः पशुश्रपण एवेश्वरो वा एष एतमतोऽनूत्थाय हन्तोर्यद्रौद्रीरुपदधाति तेनैव रुद्रं शमयत्यथ
वारुणीरापो वै वरुण ईश्वरो वा एष एतमवभृथादनूदेत्य वरुणो ग्रहीतोर्यद्वारुणीरुपदधाति निर्वरुण-
त्वाय ॥११॥ ३२

यद्युख्ये भ्रियमाणेऽयं देवः प्रजा अभिमन्येत या आग्नेयीर्भिषग्वतीस्ताभिस्तिसृभिस्तिस्रस्समिध
आदध्यादेष वावैतत् प्रजा अभिमन्यते यद्भिषग्वतीभिरादधाति भेषजमेव करोति शान्तिरेव सा
यद्युख्ये भ्रियमाणे कामयेत वर्षेदिति यास्सौरी रश्मिवतीस्ताभिस्तिसृभिस्तिस्रस्समिध आदध्यादेष
वावैतत् प्रजाश्शुचार्पयति यर्हि पर्जन्यो न वर्षति यद्रश्मिवतीभिरादधाति वृष्टिमेव निनयति ताजक्
प्रवर्षति ॥ यद्युख्ये भ्रियमाणे कामयेत न वर्षेदिति यास्सौरीर्भ्राजस्वतीस्ताभिस्तिसृभिस्तिस्रस्समिध
आदध्याद्भ्राज एव करोति न ताँ समां वर्षति यद्युख्ये भ्रियमाणे नश्येदेताभिश्चतसृभिरुपतिष्ठेताग्ने-
ऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्येति विन्दत्येव ॥१२॥ ३३-३४

[उप त्वाग्ने दिवे दिवे० । ऋ.१,१,७; सा. । १४; तै. सं. १,५,६,२] [११] कपि. ३५,५ ।
[१२] कपि.३५,६। वा.१२,७-१०,४०-४१। काण्व.१३,८-११,४१-४२। [पुनरूर्जा सह रय्या०। सा.१८३२-१८३३]
काठ० ३१

प्राचीनवँशं कुर्वन्ति प्राची वै देवानां दिग्देवलोकमेवोपावर्तते पुरं आदित्योऽसा अमुमेवादित्य-
मुपोत्क्रामति परिश्रिते याजयन्ति देवलोकमेव परिगृह्य तस्मिन्नेनं दीक्षयन्त्येति वा एषोऽस्माल्लोका-
द्योऽमुं लोकं गच्छत्यन्तर्हित इव वा इतोऽसौ लोकस्तक्षिप्वतीरोकान् कुर्यात् तेनास्माल्लोकान्नैत्या-
ग्नावैष्णवमेकादशकपालं निर्वपत्यग्निर्वै सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालभ्य दीक्षामुपैति
पवित्रं वा अग्निर्यज्ञो विष्णुः पवित्रपूत एवं यज्ञमालभते यदष्टाकपालस्तेनाग्नेयो यत् त्रिकपालस्तेन
वैष्णवस्तेनो भस्मान्नैत्याग्नावैष्णवमेकादशकपालं निर्वपत्यग्निर्वै देवानामवमो विष्णुः परमो यथा
तेजन्या अन्तौ संगृह्णात्येवमेवैतदुभयतस्संगृह्य मध्यतो देवता आवपते पुरोडाशस्स्याद्ब्रह्मवर्चस-
कामस्य शिरो वा एतद्यज्ञस्य यत् पुरोडाशो ब्रह्मवर्चसं पुरोडाशो ब्रह्मवर्चसी भवति चरुर्घृते स्याद
प्रजाकामस्य वा पशुकामस्य वा मिथुनं वा एतद्यद्घृतं च तण्डुलाश्च धेन्वा घृते पयोऽनडुहस्तण्डुला
मिथुनमेव यज्ञमुखे दधाति प्रजननाय यतो वा एतद्रूपं यच्चरुरेजतेव होति दीक्षितोऽमुं लोकममु
ह्युप लोकमभिदीक्षते यच्चरुर्भवति समृद्ध्या आङ्क्तेऽभ्युङ्क्तेऽश्नाति वासः परिधत्त एता वै पुरुषस्य
तन्वस्सर्वतनूरेव भूत्वा दीक्षामुपैति च्छिद्रो वै पुरुषोऽन्तरादमेध्यो यदश्नाति मेध्यत्वायैवाच्छिद्र-
त्वायैवमिव वा अमुष्मिंल्लोके यथा दीक्षमाणो यथा मन्येतेत्थं मे नोपतप्स्यतीति तथा व्रतयेदथो
यतः कनीयो दीक्षितस्सन् व्रतयिष्यन् स्यात् तथा प्राश्नीयात् केशश्मश्रु वपते नखान्निकृन्तते दतो
धावतेऽमृतं वा एतत् पुरुषस्यामेध्यममेध्यमेवापहत्य मेधमुपैति स्नात्यङ्गिरसो वा अप्सु दीक्षां
निधाय स्वर्गं लोकमायन् यत् स्नाति तामेव दीक्षामालभते ग्रीवादघ्ने स्नेयं ग्रीवादघ्ने हि ते तां
निधायायन् यावत्येव कियति चाद्भिश्चेत् स्नाति तेनैव तां दीक्षामालभते न वहन्तीभिस्स्नायाद्य-
द्वहन्तीभिस्स्नायात् क्षत्रं यश ऋच्छेन्न कूप्याभिस्स्नायाद्यत् कूप्याभिस्स्नायाद्विशं यश ऋच्छेत्
स्थावराभिस्स्नेयमेता वा अपां दीक्षिताः पशुमतीर्यास्स्थावरा लोमशास्संतता लोमशाः पशवो
यजमानमेव यशसार्पयति तीर्थे स्नेयं तीर्थमेव समानानां भवति॥१३॥ ३५

समिद्दिशामाशया नस्स्वर्विन्मधुरतो माधवः पात्वस्मान् ।
अग्निर्देवो दुष्टरीतुरदब्ध इदं ब्रह्म जिन्वन्तु पात्वस्मान् ॥ ३६
रथंतरँ सामभिः पात्वस्मान् गायत्री छन्दसां विश्वरूपा ।
त्रिवृद्दिष्टया स्तोमो अह्नाँ समुद्रो वात इदमोजः पिपर्तु ॥ ३७

[१३] मै. ३,६,१ (१) । कपि. ३५,६ । तै. सं. ६,१,१-२ ।
[१४] मै. ३,१६,४; २,७,१९८; १३,११०-१११; ३,१२,१८; २०; (५०-६१,६३-६७) । वा. १३,४; १८,७२-७३; २३,१,३; २५,१०-११; २६,८; ३४,८ । काण्व. १४,४; २०,४१-४२; २,५,१,३; २७,१४-१५; २८,८; ३३,३ । तै. सं. ४,४,१२]

उग्रा दिशामभिभूतिर्वयोधाश्शुचिश्शुक्रो अहन्योजस्ये ।
इन्द्राधिपत्यैः पिपृतादतो नो महि क्षत्रं विश्वतो धारयेदम् ॥ ३८
बृहत् साम क्षत्रभृद्वृद्धवृष्ण्यं त्रिष्टुभौजश्शुभितमुग्रवीरम् ।
इन्द्र स्तोमेन पञ्चदशेनौज इदं वातेन सगरेण रक्ष ॥ ३९
प्राची दिशाँ सहाशया नो विश्वे देवाः प्रावृषाह्नाँ स्वर्वित् ।
इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टँ सहस्रियँ सहस्वत् ॥ ४०
वैरूपेण साम्ना तच्छकेयं जगत्यैनं विक्ष्वावेशयामि ।
विश्वे देवास्सप्तदशेन मध्यमिदं क्षत्रँ सलिलं वातमुग्रम् ॥ ४१
यन्त्री दिशां क्षत्रमिदं दाधारोपस्थाशा मित्रवतीदमोजः ।
मित्रावरुणा शरदाह्नां जिगत्नू अदब्धक्षत्रमिदमस्त्वोजः ॥ ४२
वैराजे सामन्नधि मे मनीषानुष्टुभा संभृतं दुष्टरँ सहः ।
इदं क्षत्रं मित्रवदार्द्रदान्वोजो मित्रावरुणा रक्षतमाधिपत्यैः ॥ ४३
सम्राड् दिशाँ सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्टया पिपर्तु नः ।
अवस्युवाता बृहती न शक्करीमं यज्ञमवतु या घृताची ॥ ४४
स्वर्वती सुदुघा या पयस्वतीमं यज्ञमवतु या घृताची ।
त्वं नो गोपा अवितोत यन्ता बृहस्पते याम्यां युङ्ग्धि वाचम् ॥ ४५
ऊर्ध्वा दिशां रन्तिराशौषधीनाँ संवत्सरेण सविता नो अह्नाम् ।
रेवत् सामातिच्छन्दा उ च्छन्दोऽजातशत्रुस्सुहवो न एधि ॥ ४६
स्तोम त्रयस्त्रिंशे भुवनस्य पत्नि विवस्वद्वाते अभि नो गृणीहि ।
घृतवती सवितुराधिपत्ये पयस्वती रन्तिराशा नो अस्तु ॥ ४७
४८
हिरण्यगर्भो यः प्राणतः ॥
विराड् दिशां विष्णुपत्न्यघोरास्येशाना सहसो या मनोता ।
विश्वव्यचा इषयन्ती सुभूता शिवा नो अस्त्वदितिरुपस्थे ॥ ४९
विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना सहसो विष्णुपत्नी ।
बृहस्पतिर्मातरिश्वोत वायुस्संध्वाना वाता अभि नो गृणन्तु ॥ ५०

[हिरण्यगर्भस्समवर्तताग्रे० । ऋ. १०,१२१,१; अथर्व. ४,२,७; तै. सं. ४,१,८,३। २,८,२; तत्कनां. अं. ९,९,१२; नि. १०,२३ । यः प्राणतो निमिषतो० । ऋ. १०,१२१,३; अथर्व. ४,२,२; तै. सं. ४,१,८,४; ७,५, १६,१ । विष्टम्भो दिवो धरुणः० । ऋ. ९,८९,६]

वैश्वानरो न ऊतये पृष्टो दिव्यन्विदनुमते त्वं यत् ते नाम ॥१४॥ ५१

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवस्समिन्धते ।
विश्वस्यां विशि प्रविविशानमीमहे स नो मुञ्चत्वँहसः ॥ ५२
यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम् ।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वँहसः ॥ ५३
इन्द्रस्य मन्वे प्रथमस्य प्रचेतसो वृत्रघ्नस्स्तोमा उप मामिहागुः ।
यो दाशुषस्सुकृतो हवमुप गन्ता स नो मुञ्चत्वँहसः ॥ ५४
यस्संग्रामं जयति सं वशी युधा यः पुष्टानि सँसृजति त्रयाणि ।
स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वँहसः ॥ ५५
वायोस्सवितुर्विदथानि मन्महे या आत्मन्वद्भिभृथो यौ च रक्षथः ।
यौ विश्वस्याधिपा बभूवथुस्तौ नो मुञ्चतमागसः ॥ ५६
उप श्रेष्ठा न आशिषो देवयोर्धर्मे अस्थिरन् ।
स्तौमि वायुँ सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ ५७
मन्वे वां मित्रावरुणा तस्य वित्तँ सत्यौजसा दृंहणा यं नुदेथे ।
या राजाना सरथं याथ उग्रा तौ नो मुञ्चतमागसः ॥ ५८
यो वां रथ ऋजुरश्मिस्सत्यधर्मा मिथूचरन्तमुपयाति दूषयन् ।
स्तौमि मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ ५९
रथीतमौ रथीनाँ हुव ऊतये शुभं गमिष्ठा सुयमेभिराशुभिः ।
ययोर्वाँ देवौ देवेष्वनिषितमोजस्तौ नो मुञ्चतमागसः ॥ ६०
यद्यातं वहतुँ सूर्यायास्त्रिचक्रेण सँसदमिच्छमानौ ।
स्तौमि देवा आश्विना नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ ६१

[वैश्वानरो न ऊतये० । अथर्व. ६,३५,१, आ. श्रौ. सू. १,११ । पृष्टो दिवि० । ऋ. १,९८,२; तै. सं. १,५,११,१; तै. ब्रा. ३,११,६,४ । अन्विदनुमते त्वं० । ऋ. परि. ३,४; अथर्व. ७,२०,२]
[१५] मै. ३,१६,५ (७०-८३, ८५-८३) । वा. १८,७२-७३; २६,८; ३४,८ । काण्व. २०,४१-४२; २८,८; ३३,३ । तै. सं. ४,७,१५ । [अग्नेर्मन्वे प्रथमस्य० । अथर्व. ४,२३,१ । यस्येदं प्राणन्निमिष० । अथर्व. ४,२३,७ । इन्द्रस्य मन्वे० । अथर्व. ४,२४,१ । यस्संग्रामं जयति० । अथर्व. ४,२४,७ । वायोस्सवितुः० । अथर्व. ४,२५,१ । उप श्रेष्ठा न० । अथर्व. ४,२५,७ । मन्वे वां मित्रावरुणा० । अथर्व. ४,२९,१-२ । यो वां रथ० । अथर्व. ४,२९,७ । रथीतमौ (प्र सुमतिं) रथीनाँ० । अथर्व. ४,२५,६ । स्तौमि देवा (भया-द्यावा)० । अथर्व. ४,२८,७]

मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे ।
आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥ ६२
तिग्ममायुधमीडितं सहस्वद्दिव्यं शर्धः पृतनासु जिष्णु ।
स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥ ६३
विश्वेषां देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे ।
आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥ ६४
यदिदमभिदासति पौरुषेयाद्दैव्याद्देवेभ्यस्तु द्विपदश्चतुष्पदः ।
स्तौमि विश्वान् देवान्नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥ ६५
अग्निदनुमते त्वं यत् ते नाम वैश्वानरो न ऊतये पृष्टो दिवि ॥ ६६
ये अग्रयेतामभितोऽभितो जोऽभिर्ये प्रतिष्ठि अमवतां वसूनाम् । ते नो मुञ्चतमंहसः ॥ ६७
उर्वी रोदसी वरिवः कृणुतं क्षेत्रस्य पत्नी अधिवोचतं नः ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमंहसः ॥१५॥ ६८
[१७७४]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां स्वर्गं नाम द्वाविंशं स्थानकं संपूर्णम् ॥२२॥

[मरुतां (देवानां) मन्वे० । अथर्व. ४,२७,१ । तिग्ममायुधमीडितं० । अथर्व. ४,२७,७ । विश्वेषां (मरुतां देवानां०) अथर्व. ४,२७,१ । यदिदमभि० । अथर्व. ४,२६,७ । अग्निदनुमते० । ऋ. परि. १,४ । अथर्व. ७,२०,१ । वैश्वानरो न ऊतय० । अथर्व. ६,३५,१; आ. श्रौ. सू. २,११ । पृष्टो दिवि० । ऋ. १,९८, २; तै. सं. १,५,११,१; तै. ब्रा. ३,११,६,४ । ये अग्रयेतामभि० । अथर्व. ४,२६,१-२]

अथ त्रयोविंशं स्थानकम् ।

दीक्षितम् ।

हविर्वै दीक्षितो न हविरनभिघृतं मेधमश्नुते यदभ्यनक्त्यभ्युवैनं घारयति मेध्यत्वाय घृतं देवानां निष्पक्वं मनुष्याणामायुतं गन्धर्वाणाँ स्वयंविलीनमादित्यस्य नैतद्देवत्रा न मनुष्यत्रा यन्नव-नीतं नैष देवत्रा न मनुष्यत्रा यो दीक्षितः प्रच्युतोऽस्माल्लोकादप्राप्तोऽमुं यन्नवनीतेनाभ्यङ्क्ते समृद्ध्यै वासः परिधत्तेऽग्नेस्तूषः पितॄणां नीविरोषधीनां प्रघातो वायोर्वातपा विश्वेषां देवानामोतवश्च तन्तवश्च नक्षत्राणामतीरोकास्सर्वदेवत्यं वासस्सर्वदेवत्यो दीक्षितस्सर्वाभिरेवैनं देवताभिस्सम-र्धयत्याङ्क्त इन्द्रं वै वृत्रं जघ्निवांसं रक्षाँस्यसचन्त तान्यञ्जनगिरिणान्तरधत्त रक्षाँस्येतं सचन्ते यो दीक्षते भवति हि यदाङ्क्ते रक्षसामन्तर्हित्या इन्द्रो वै वृत्रमहँस्तस्य चक्षुः परापतत् तत् त्रिककुभं प्राविशद्यदाङ्क्ते तस्यैव चक्षुषोऽवरुद्ध्यै द्विर्दक्षिणमाङ्क्ते सकृत् सव्यं चितृधत्तो मुखत एव यज्ञ-मालभते त्रिर्दक्षिणमाङ्क्ते द्विस्सव्यं पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धे दक्षिणं पूर्वमाङ्क्ते सव्यं हि पूर्वे मनुष्या आञ्जते व्यावृत्त्यै यजुषाङ्क्तेऽयजुषा हि मनुष्या आञ्जते व्यावृत्त्यै पराचीनमानक्ति न निधावत्याचपराचं हि मनुष्या आञ्जते व्यावृत्त्या इषीकयाङ्क्ते शलल्या हि मनुष्या आञ्जते व्यावृत्त्यै ॥ संतूला भवति मैत्री वै संतूला वारुणी परिशीर्णा मैत्रो दीक्षितस्समृद्ध्या ऊनमिव वा एतच्छिद्रमिव यच्चक्षुर्यदाङ्क्ते तदेवापूरयत्यच्छिद्रत्वाय पावयतीन्द्रो वै वृत्रमहँस्तमप्स्वभ्यध्यहँस्तासां या यज्ञिया मेध्या आसँस्ता उदक्रामँस्ता ओषधयोऽभवन् यत् तेजस्ते दर्भास्तस्मात् ते पवित्रं तस्माद्दर्भैरपः पुनन्ति यद्दर्भपिञ्जूलैः पावयत्यपामेवैनमोषधीनां तेजसा पावयति द्वाभ्यां पावयति द्वे सत्यं चानृतं च सत्येनैवास्यानृतं पावयति द्वौ प्राणश्चापानश्च त्रिभिः पावयति त्रिषत्या हि देवा अथो त्रयो हि प्राणाः प्राणो व्यानोऽपानस्तानेव यजमाने दधाति पञ्चभिः पावयति पाङ्क्तः पुरुषो यावानेवास्यात्मा तं पावयति सप्तभिः पावयति सप्त वै छन्दाँसि छन्दो-भिरेवैनं पावयति नवभिः पावयति नव प्राणाः प्राणैरेवैनं पावयत्येकविंशत्या पावयत्ये-कविंशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविंशो यावानेवास्यात्मा तं पावयति चित्पतिस्त्वा पुनात्विति ब्रह्म वै चित्पतिर्ब्रह्मणैवैनं पावयति वाक्पतिस्त्वा पुनात्विति स हि पावयिता देवस्त्वा सविता पुनात्विति सवितृप्रसूत एवैनं देवताभिः पावयत्यच्छिद्रेण पवित्रेणेत्य-च्छम्बट्कारमेवैनं पावयति सूर्यस्य रश्मिभिरित्यादित्यस्यैवैनं तन्वा पावयति तस्य ते पवित्रपते पवित्रेणेति यज्ञो वै पवित्रपतिर्यज्ञेनैवैतत् पुनीते यस्मै कं पुने तच्छकेयमिति यज्ञ शकेयमित्येवै-तदाहान्वञ्चं पावयत्यन्वङ्वै पुरुषं प्राणो यदा वै प्राणस्तिर्यङ् भवत्यथ प्रमीयते यत् तिर्यञ्चं पावयेत

[१] मै. ३,६,२—३ (२—५) । कपि. ३५,७ । वा. ४,४ । काण्व. ४,५ । तै. सं. ६,१,१ ।

तिर्यञ्चमस्य प्राणं कुर्यात् प्रमीयेतान्वञ्चमेवास्य प्राणं करोति बर्हिष्पावयति मनुष्यलोक एवैनं पावयित्वा पूतं देवलोकं प्रणयति ॥१॥
१-२
गर्भो दीक्षितो योनिर्दीक्षितविमितमुल्वं दीक्षितवसनं जरायु कृष्णाजिनमेतस्माद्वै योने-रिन्द्रोऽजायत कुलायमेवैतदासीनं कुलायोपचरति तस्माद्दीक्षितं नान्यत्र दीक्षितविमितात् सूर्योऽभिनिम्रोचेन्नान्यत्राभ्युदियात् स्वादिव योनिः प्रजायत आकूत्यै प्रयुजे अग्नये स्वाहे-त्याकूत्या वै यज्ञः प्रयुज्यते यत्रैव यज्ञमाकुरुते तदेनमालभते मेधायै मनसे अग्नये स्वाहेति मेधया वै मनसाभिगच्छति यजतो स्य इति यज्ञमेवालभते दीक्षायै तपसे अग्नये स्वाहेति दीक्षया वै तपसा यज्ञं प्राप्नोति यज्ञमेवावरुन्द्धे सरस्वत्यै पूष्णे अग्नये स्वाहेति वाग्वै सरस्वती पशवः पूषा वाचा पशुभ्यो यज्ञ आलभ्यते वाचैव पशुभ्योऽधि यज्ञमालभत आपो देवीर्बृहतीर्विश्वशंभुव इत्यापो वै यज्ञो दिवि यज्ञोऽन्तरिक्षे पृथिव्यां ब्रह्म बृहस्पतिरत्रात्र वै यज्ञो यत्र यत्रैव यज्ञस्तत एनं ब्रह्मणा-लभते पञ्चैतानि जुहोति पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धे यज्ञस्य वा एते संभारा यदेतानि यजूँषि यदेतानि न जुहुयादसंभृतोऽस्य यज्ञस्स्याद्यदेतानि जुहोति यावानेव यज्ञस्तं संभरत्यदीक्षितो वा एकयाहुत्यादन्ति ह स्म वा एतस्य पुरान्नं यस्यैतानि न हूयन्ते यदेतानि जुहोति दीक्षितत्वायैव द्वितीयत्वायाग्नये स्वाहाग्नये स्वाहेति जुहोत्यग्निस्सर्वा देवतास्सर्वा एव देवता अवरुन्द्धे पञ्चैतानि जुहोत्यौद्ग्रभणं षष्ठं षड्वा ऋतुष्वेव प्रतितिष्ठति ॥ यज्ञस्सृष्टः प्र यजुरब्लिनात् प्र साम तमृगेवापच्छ-न्द सामानि द्वादश यजूँषि तस्मादृग्भिर्बहिष्पवमानं स्तुवन्त्यृचौद्ग्रभणं जुह्वति यदौद्ग्रभणं जुहोति यज्ञमेव सृष्टं प्रत्यृचा यच्छति द्वादशभिर्ह स्म वै काठकोऽपि औद्ग्रभणं जुह्वत्येतदेव स द्वादश-गृहीतं कृत्वा जुहुयात् तेनैव तदाप्नोति पूर्णया स्रुचा जुहोति पूर्णः प्रजापतिः प्रजापतिमेवाप्नोति यद्-नेया जुहुयाद्धाद्व्यायच्छेत् कुर्यात् कामं वै पूर्णं यं हि कामं कामयते तं पूर्णस्य कुरुते यमेव कामं कामयते तमवरुन्द्धे ॥ स्वं छन्दसि यज्ञः प्रतिष्ठाप्योऽनुष्टुब् वै प्रजापतेस्स्वं छन्दो यज्ञः प्रजा-पतिर्यदनुष्टुभौद्ग्रभणं जुहोति स्व एव छन्दसि यज्ञं प्रतिष्ठापयति छन्दःप्रतिष्ठानो वै यज्ञस्सं यथाछन्दसं छन्दस्सु प्रतिष्ठाप्यस्सैवानुष्टुप् तस्यास्सप्ताक्षरमेकं पदमष्टाक्षराणि त्रीणि तेषां सप्तानां यानि त्रीणि तान्यष्टा उपयन्ति तान्येकादश सा त्रिष्टुब् यानि चत्वारि तान्यष्टा उपयन्ति तानि द्वादश सा जगती यान्यष्टौ सा गायत्र्येवमितरानुष्टुप् स्वाहाकारेण पङ्क्तिरेतावन्ति वै छन्दाँसि यज्ञमेव यथाछन्दसं छन्दस्सु प्रतिष्ठापयति ॥ यज्ञस्सृष्टो देवताभिरालभ्यो विश्वो देवस्य नेतुरिति यदेतद्गती तेन सावित्री मर्त इति पितृदेवत्या विश्व इति वैश्वदेवी द्युम्नमिति बार्हस्पत्या पुष्यत्विति

[२] मै. ३,६,४-५ (६-७) । कपि. ३५,८ । वा. ४,७-८; ११,६७; २२,२१ । काण्व. ४,८-९; १२,६८, २४,२१ । तै. सं. ६,१,२ । [विश्वो देवस्य नेतु० । ऋ. ५,५०,१; तै. सं. १,२,२,१; ४,१,१,१]

पौष्णी सारस्वतस्स्वाहाकार एतावतीर्वै देवता यज्ञमेव सृष्टं देवताभिरालभते यज्ञस्सृष्टस्त्रेधा प्राविशदृचं तृतीयेन साम तृतीयेन यजुस्तृतीयेन तस्य या प्रिया तनूरासीत् तया यजुः प्राविशत् तस्माद्यजुषो नोच्चैः कीर्तयितव्यं यज्ञस्य प्रियां तन्वमुदूर्णोत्यब्रह्मवर्चसी भवति नग्नंभावुकः ॥२॥
३-६
यज्ञो वै देवेभ्योऽपाक्रामत् कृष्णो भूत्वा तस्मात् पुनरुपावर्तमानादृक्सामे अपाक्रामतां ते कृष्णं प्राविशतां यज्ञं मन्यमाने शुक्लं साम कृष्णमृग्यत् कृष्णाजिनेन दीक्षत ऋक्सामे एवालभतेऽहोरात्रे वै मिथुनं समभवतां तयोरोजो वीर्यमपाक्रामत् तत् कृष्णं प्राविशद्यत् कृष्णाजिनेन दीक्षतेऽहोरात्रयो-रेवौजो वीर्यमालभते द्यावापृथिवी वै मिथुनं समभवतां तयोस्तेजो यज्ञियमपाक्रामत् तत् कृष्णं प्रावि-शद्यत् कृष्णाजिनेन दीक्षते द्यावापृथिव्योरेव तेजो यज्ञियमालभत ऋक्सामयोश्शिल्पे स्थ इत्यृक्सामे एवालभते यथा नावा तरिष्यन्तं एनं संपारयत ओर्द्वचश्शर्मासि शर्म मे यच्छेति देवताश्च वा एषं यज्ञं चाभ्यारोहति यत् कृष्णाजिनमारोहति यदा वै श्रेयान् कामयतेऽथ पापीयाँसं प्रतिनुदते देव-ताभ्यश्चैव यज्ञाय च नमस्करोत्यप्रतिनोदायाशुमवन्ति वा अन्यानि छन्दाँस्यासन्ननाशुमवन्त्य-न्यानि तान्याजिमयुर्यान्याशुमवन्त्यासँस्तानि प्रधक्ष्यामह इति भीषा कृष्णं प्राविशँस्तानीमानि यज्ञं वहन्ति यान्यनाशुमवन्त्यासँस्तानिमान्वक्ष्यामह इति भीषा कृष्णं प्राविशँस्तानीमानि छन्दाँसि यान्ययज्ञवाहानि तानि स्वाराज्यमगच्छन् स्वाराज्यं गच्छति य एवं वेद यत् कृष्णाजिनेन दीक्षत आशुमवन्ति चैवानाशुमवन्ति चोभयानि छन्दाँस्यवरुन्द्धे ॥ होत्रा वै देवेभ्योऽपाक्रामँस्तद्वषट्कारो-ऽप्यचरत् कृष्णो भूत्वास्कन्नं वै वषट्कारोद्धविस्तस्मात् कृष्णाजिने हविरध्यपन्ति हविर्वै दीक्षित-स्तस्मात् कृष्णाजिनमध्यास्ते तस्मान्न निष्ठीवति हविषोऽस्कन्दाय बर्हिष्टाद्वै पशूनां यज्ञश्च देवता-श्चान्तरान्मेदो यद्बहिर्लोमं कृष्णाजिनं कुर्यादन्तर्हितो यजमानो यज्ञाच्च देवताभ्यश्च स्याद्यदन्तर्लोम-मन्तर्हितो यज्ञो देवताभ्यो द्वे समस्येदन्तर्मांसे बहिर्लोम्नी यद्येकं स्यात् पादं प्रतिषीव्येदनन्तर्हितो यजमानो यज्ञाच्च देवताभ्यश्च भवत्यनन्तर्हितो यज्ञो देवताभ्यो विष्णोश्शर्मासि शर्म यजमानस्येति विष्णुर्वै यज्ञो वैष्णवो यजमानो विष्णुनैव यज्ञेनात्मानमुभयतस्सयुजं कुरुते यज्ञो यदसृज्यत तस्यो-ल्बमन्ववेष्टत तद्दीक्षितवसनमभवद्गर्भो दीक्षितो यद्दीक्षितवसनं परिधत्ते स्वेनैव योनिनात्मानमोर्णुते तस्मान्महत् कार्यमेवमिव ह्युल्बेन गर्भ आवृत इव च्छन्न इव न प्रत्यक्षं वदेद्वाचोऽपावयामत्वाय ॥३॥
७-८
अङ्गिरसो वै स्वर्गं लोकं यन्तस्ते मेखलास्संन्युकिरँस्तेतश्शरं उदतिष्ठद्यच्छरमयी मेखला भवति

[३] मै. ३,६,६—७ (८—११) । कपि. ३५,९ । वा. ४,९—१० । काण्व. ४,१०-११ । तै. सं. ६,१,३ ।
[४] मै. ३,६,७-८ (११-१४) । कपि. ३६,१ । तै. सं. ६,१,३,३ ।

तामेव मेखलामालभते देवा वै यत्रोर्जं व्यभजन्त ततश्शर उदतिष्ठद्यच्छरमयी मेखला भवति तामे-
वोर्जमालभत ऊर्ग्वै मेखला मध्यं प्रति परिव्ययत्यूर्जमेव मध्यतो दधाति यजमाने च प्रजासु च
तस्मान्मध्यतः प्रजा ऊर्गूर्जयति नाभिं प्रति परिव्ययत्यूर्ध्वं वै पुरुषस्य नाभ्या मेध्यमवाचीनममेध्यं
मेध्यस्य चामेध्यस्य च व्यावृत्त्यै त्रिवृद्भवति त्रिवृता वै स्तोमेन प्रजापतिः प्रजा असृजत त्रिवृद्वज्रो
वज्रमेव भ्रातृव्याय प्रहरतीन्द्रो वै वृत्राय वज्रं प्राहरत् तस्य यत् प्राशीर्यत स शरोऽभवत् तच्छरस्य
शरत्वं वज्रो वै शरो यच्छरमयी मेखला भवति वज्रमेव भ्रातृव्याय प्रहरति स्तृणुत एनं यं द्विष्यात्
तं परिव्ययन् ध्यायेद्वज्रेणैवैनं समर्पयति मेखला पुंसो भवति योक्त्रं स्त्रियास्स्त्री वै मेखला पुमान्
योक्त्रं मिथुनमेव यज्ञमुखे विपर्यूहेते प्रजननाय वज्रो वै मेखला क्षुदुदारं पाप्मा भ्रातृव्यो यन्मेखलां
परिव्ययते वज्रेणैव पाप्मानं भ्रातृव्यमपहते ॥ यज्ञो वै देवेष्वासीद्दक्षिणा पितृषु स यज्ञो दक्षिणा-
मभ्युकामयत तं पितरोऽब्रुवन् देवेषु नो भागधेयमिच्छेति तेऽब्रुवँस्तृतीयसवनभागा आसन्निति
तस्मात् पितृभ्यस्तृतीयसवनं क्रियते तमह्वयत् तां हूतोऽधावन् तस्मात् पुमान् स्त्रिया हूतो धावति
तस्माच्छ्रोत्रियस्त्रीकामतमस्स हि यज्ञस्य नेदिष्ठं तां समभवत् तदिन्द्रोऽचायत् सोऽमन्यत यो वा
इतो जनिष्यते स एवेदं भविष्यतीति तं योनिं प्राविशत् तस्मादजायत स पुनः प्रत्यवैक्षत सोऽम-
न्यत यो वा इतोऽपरो जनिष्यते स मे सपत्नो भविष्यतीति तमनुहाय निर्वेष्टयाच्छिनत् सा
विपाणाभवद्यद्विषाणा भवति यज्ञस्यैव रेत इन्द्रस्य योनिं दक्षिणाया योनिमालभते पञ्चावृद्भवति
पञ्चभिर्हि स तां निर्वेष्टयाच्छिनदिन्द्रस्य योनिरसीतीन्द्रस्य ह्येषा योनिः कृष्यै त्वा सुमनस्याया
इति तस्मात् कृष्टं पच्यत उत्कृधीति तस्मादूर्ध्वा ओषधय उत्पच्यन्ते यजुषा कण्डूयतेऽयजुषा हि
मनुष्याः कण्डूयन्ते व्यावृत्त्यै यदयजुषा कण्डूयेत वरुणवत् कण्डूयेतापि गर्भाः पामना जायेरन्
वाग्वै देवान् मनुष्यान् प्रविशन्त्यैत्तस्या यदत्यरिच्यत तद्वनस्पतीन् प्राविशत् सैषा वनस्पतिषु
वाग्वदति या दुन्दुभौ या नाड्यां या तूणवे यद्दण्डो भवति वाचं एवातिरिक्तमवरुन्द्धे तं मैत्रा-
वरुणाय प्रयच्छति वाचमेवास्मै तत् प्रयच्छति तां शश्वदृत्विग्भ्यो विभजति तस्मादस्य वाङ् नोपद-
स्यत्यास्यदसः कार्युस्तावती ह्यीय वाग्वदत्यथो एतावति हि वाचा वीर्यं क्रियते यो वृक्षः फलग्रहि- ९-१०
स्तस्य कुर्यात् फलग्रहिरसानीति ॥४॥

स्वाहा यज्ञं मनस इति मनसा वै यज्ञ आलभ्यते वातयोनिर्यज्ञो दिवि यज्ञोऽन्तरिक्षे पृथिव्या-
मत्रात्र वै यज्ञो यत्र यत्रैव यज्ञस्तत एनं मनसालभते तं यत्वास्ते यज्ञमेव तद्यत्वास्ते यद्विसृजेद्यज्ञं
विसृजेद्यदि विसृजेत् पुनर्दीक्षयेद्यत् पुनर्दीक्षयेदाहुतीरभिरेचयेद्गायत्रीं वैष्णवीमनुब्रूयाद्गाग्वै गायत्री

[५] मै. ३,६,८—९ (१७—२०)। कपि. ३६,२। वा. १,५; २,१८; ४,६, ११,१४,१६। काण्व. १,८; २,५३; ४,७,१४—१६,१९,२१। तै. सं. ६,१,४]

काठ० ३२

यज्ञो विष्णुर्वाचैव यज्ञं संतनोति बार्हस्पत्यामुत्तरामनुब्रूयाद्ब्रह्म वै बृहस्पतिर्ब्रह्मणा यज्ञस्यार्तं नि-
ष्क्रियते ब्रह्मणैव यज्ञस्यार्तं निष्करोति त्वमग्ने व्रतपा असीत्यग्नये व्रतपतयेऽनुब्रूयाद्व्रतपतिं वा एतस्य
व्रतं गच्छति यो दीक्षितस्सन् व्रतं चरत्यग्निर्देवानां व्रतपतिर्व्रतपतेरेवाधि व्रतमालभतेऽदीक्षिष्टाय-
मसा आमुष्यायण इति त्रिरुपांश्वाह त्रिरुच्चैर्देवेभ्यश्चैव मनुष्येभ्यश्च यज्ञं प्राह नक्षत्रं दृष्ट्वा वाचं
विसृजते दिवा वै मनुष्या यज्ञेन चरन्ति नक्तं देवा अह्नैव रात्रीमभिसंतत्य देवेभ्यो यज्ञं संप्रयच्छति
गोपीथाय व्रतं कृणुतेति यज्ञं कुरुतेत्येवैतदाह पाङ्क्तयेषा व्याहृतिः पाङ्क्तो यज्ञो वाच एवैतत्
सम्यगुद्यते नोत्तानो दीक्षितश्शयीत यदुत्तानश्शयीत देवलोकमुपावर्तेत न न्यङ् शयीत यन्न्यङ्
शयीत पितृलोकमुपावर्तेत ॥ जनो वा इतः पितरो दूरे जनादागच्छति प्रमायुकस्स्यात् तिर्यङ्ङेव
शयीतान्तरिक्षदेवत्यो वै दीक्षितस्स्वमेव लोकं स्वमायतनमुपावृत्य शये नाग्नेः पराङ् शयीताग्निस्सर्वा
देवता देवताभ्य आवृश्च्येताग्निमेवाभ्यावृत्य शयीताग्निस्सर्वा देवता देवता एवाभ्यावृत्य शये देवीं
धियं मनामह इति मार्जयते ब्रह्मणा सतेजस्त्वायाथो आपो मे नेद्दीक्षामवमुष्णान्नित्यन्नं वै मनुष्येभ्य
उदवीभत्सत तद्देवा अपियँस्ता आपोऽब्रुवन्नुपावर्तस्व वयं त एतान् स्वदयिष्याम इति तदुपावर्तत
यद्दीक्षितो मार्जयतेऽन्नाद्यस्यावरुद्ध्यै ॥ तस्माद्ब्राह्मण आहार्य आहृते हस्ता अवनेनिर्जितान्नाद्यस्या-
वरुद्ध्यै न वा एतेन हुतं व्रतयितव्यं नाहुतं यो दीक्षितो ये देवा मनुजाता इति व्रतयति प्राणा वै
देवा मनुजातास्तत्रायामेव देवतायां हुतं व्रतयति तेनास्य न हुतं भवति नाहुतमग्ने त्वं सु जागृहीति
स्वप्स्यन्नग्निमभिमन्त्रयेत बहु वा एष सुप्तो व्रत्यं निगच्छत्यग्निर्देवानां व्रतपतिर्व्रतपतय एव व्रतं
संप्रदाय काममृधते त्वमग्ने व्रतपा असीति प्रबुध्याग्निमभिमन्त्रयेत व्रतपतये वा एष व्रतं संप्रयच्छ-
त्यग्निर्देवानां व्रतपतिर्व्रतपतेरेवाधि व्रतमालभते ॥५॥ ११-१३

न दीक्षितेन होतव्यं हविर्वै दीक्षितो रुद्रोऽग्निर्यज्जुहुयाद्धविर्भूतमात्मानं रुद्रायापिदध्यायन्न
जुहुयाद्यज्ञं विच्छिन्द्यात् तदेतद्व्रतमपरस्मिन्नग्ना अधिश्रित्य पूर्वमग्निमभिसंचरति तेनैव यज्ञं संतनोति
यथा वि गौरूधः कुरुत एवमेष देवेभ्यो यज्ञं संभरति यो दीक्षते यज्जुहुयाद्यज्ञं विदुह्यात् सेवयेद्य-
थोपधीते सुत एवं तद्यदुपरि जुहोति सकृदेव याम आगते देवेभ्यो यज्ञं दुहे सर्वं वा एतस्य हवि-
र्भूतं यो दीक्षितो निरादिश्य हि दीक्षते तस्य योऽन्नमत्ति यज्ञं गिरति तस्य यज्ञेनैव प्रायश्चित्तिः॥
पाशेन वा एषोऽभिहितो यो दीक्षितो वरुण्यः पाशस्तस्य योऽन्नमत्ति वरुण एनं ग्राहुको भवति
तस्माद्रुद्रस्य निगस्य चान्नं नाद्याद्देवानां वा एतत् परिपूतं यो दीक्षितो मनुष्याणामिन्न्वै परिपूतं
तुरभ्यत्रायं तस्माद्दीक्षितस्यान्नं नाद्यात् त्रेधा वा एतस्य पाप्मानं विभजन्ते यो दीक्षितो योऽन्नमत्ति

[त्वमग्ने व्रतपा असि०। ऋ. ८,११,१; अथर्व. १९,५९,१; तै. सं. १,१,१४,४; २,३,१]
[६] मै. ३,६,९—१० (२०—२१)। कपि. ३६,३। वा. ४,१,१६; ६,२७। काण्व. ४,१,२२; ६,३९; १०,८। तै. सं. ६,१,४; ३,१,१,४।

स तृतीयं योऽश्लीलं कीर्तयति स तृतीयं यो नाम गृह्णाति स तृतीयं तस्माद्दीक्षितस्य नान्न-
मद्यान्नाश्लीलं कीर्तयेन्न नाम गृह्णीयाद्दानाय वा एष दीक्षतेऽथैतदनृतं करोति यत् प्रतिगृह्णाति गर्भो
दीक्षितो हिनस्ति गर्भं प्रतिगृहीतं पूषा सनीनां सोमो राधसामिति पूषा हि सनीनामीष्टे सोमो
राधसां रास्वेयत् सोमेति सोमो वा एतदेतस्मै रासते यद्दनुत आ भूयो भरेत्यागमे ह्येनं भूयो
देवस्सविता वसोर्वसुदावेति सवितृप्रसूत एव प्रतिगृह्णात्यात्मनोऽहिंसायै देवेभ्यो वै यज्ञो न प्राभवत्
तं दक्षिणाभिस्समभावयन् यद्दीक्षितो भृतिं वनुते यज्ञमेव संभावयति तस्माद् द्वादश रात्रीर्दीक्षितो
भृतिं वन्वीत यावानेव यज्ञस्तं संभावयति॥ देवेभ्यो वा अन्या दक्षिणा नीयन्ते मनुष्येभ्योऽन्यास्ता
एता अनुदिशति वायवे त्वेति या नश्यति निर्ऋत्यै त्वेति यावसीदति रुद्राय त्वेति यां रुद्रो हन्ति
या सँशीर्यते वरुणाय त्वेति याप्सु या श्लेष्मेण यमाय त्वेति यान्येन मृत्युनैता वै देवेभ्यो नीयन्ते
मनुष्येभ्य इतरास्ता एताः पुण्यब्राह्मण एताभिर्भूय उपर्योत्पृभोति य एवं वेद देवीरापो अपां नपादि-
त्यपोऽतिगाहते यदेवासां यज्ञियं यद्धविष्यं तत् परिवृणक्त्यनवक्लेशायाग्निर्वै दीक्षितश्शमयन्त्यग्निमापो
यजुषातिगाहते शान्त्यै शान्तिर्ह्यापोऽथो तेज एवात्मन् भूयस्समाधत्ते यदयजुषातिगाहेत विग्रदिनी-
रापस्स्युर्यजुषातिगाहते ॥ तस्मादापस्संतता अविच्छिन्ना धावन्ति यदि नाव्यां तरेदरणी च रथं चाधाय
तरेदग्निर्वै सर्वा देवता यज्ञो रथो देवताभिश्चैव यज्ञेन च सह तरत्या पाराद्गन्तोर्लोष्टं विमृणन्नासीत तेनास्या
नैते सत्येद्ययं ते योनिर्ऋत्विय इति यथायजुरेदमगन्म देवयजनं पृथिव्या इति देवयजनमध्यवस्य-
त्यृक्सामाभ्याँ संतरन्तो यजुर्भिरित्यृक्सामाभ्यां चैव देवताभिश्च देवयजनमभिसंतरति॥६॥ १४-१७

देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वताग्निहोत्रं दर्शपूर्ण-
मासौ चातुर्मास्यान्येष वाव तर्हि यज्ञ आसीत् ते देवा एतं सौम्यमध्वरमपश्यँस्तमाहरँस्तेऽदीक्षयँस्ते-
ऽग्निहोत्रं व्रतमकुर्वताग्निहोत्रं वाव व्रतं तस्माद्याग्निहोत्रस्य स्कन्नस्य प्रायश्चित्तिस्सा व्रतस्य स्कन्नस्य
प्रायश्चित्तिस्तस्माद् द्विव्रतो दीक्षितस्स्याद् द्विर्ह्यग्निहोत्रं जुह्वति तेषां यत् पौर्णमासमासीत् तमग्नी-
षोमीयं पशुमकुर्वत यः पूर्वेद्युरालभ्यते यद्दार्शं तमाग्नेयं योऽनुसवनमालभ्यते वैश्वदेवं प्रातस्सवनम-
कुर्वत वरुणप्रघासान्माध्यन्दिनं सवनं साकमेधाँस्तृतीयसवनं तृतीयसवने पितृयज्ञमवाकल्पयँस्तृतीय-
सवने त्र्यम्बकाँस्तेऽसुरा अपक्रामन्तोऽब्रुवन्न वा इमे ध्वर्तवा अभूवन्निति तदध्वरस्याध्वरत्वं ततो
देवा अभवन् परासुरा अभवन् य एवं विद्वान् दीक्षते यमेवं विद्वान् दीक्षयति भवत्यात्मना परास्य १८
भ्रातृव्यो भवति ॥७॥

स्वर्गं वा एतेन लोकं प्रयन्ति यत् प्रायणीयं तत् प्रायणीयस्य प्रायणीयत्वं छिद्यते वा एषो-

[७] मै. ३,६,१० (२१)। कपि. ३६,४। वा. ४,११। काण्व. ४,१४।
[८] मै. ३,७,१ (१)। कपि. ३६,५। तै. सं. ६,१,५।

ऽस्माल्लोकाद्योऽमुं लोकं गच्छति यदादित्यमुदयनीयं भवत्यस्मिन्नेव लोके प्रतितिष्ठति देवा वा
असुरान् हत्वा वैरदेयादीषमाणास्ते दिशोऽमोहयन्नेन्न इदमन्योऽनु प्रजानादिति तदाहुस्साध्या वै
नाम देवा आसन् पूर्वे देवेभ्यस्ते दिशो मोहयित्वा स्वर्गं लोकमायन्नेष इमं लोकमन्योऽनु प्रजा-
नादिति ता इमेऽवरे देवा अनु प्राजिज्ञासन्त ता न प्राजानन् सादितिरब्रवीद्वार्यं वृणा अहं व इमा
दिशः प्रवक्ष्यामि मत्प्रायण एव यज्ञोऽसन्मदुदयन इति तस्मादादित्यं प्रायणीयं भवत्यादित्य-
मुदयनीयं वार्यवृतं ह्यस्याः पथ्यां स्वस्तिं यजतेत्यब्रवीत् तया प्राचीं दिशं प्रज्ञास्यथेत्यग्निं यजते-
त्यब्रवीत् तेन दक्षिणां सोमं यजतेत्यब्रवीत् तेन प्रतीचीं सवितारं यजतेत्यब्रवीत् तेनोदीचीमहमेवेमा
उभौ लोकौ वेदेत्यब्रवीदियमदितिस्तस्या इयमूर्ध्वा दिगूर्ध्वा एव तेन स्वर्गं लोकमायँस्ता एता एवं
देवता इज्यन्ते दिशां क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्यै पथ्यया वै स्वस्त्या देवाः प्राचीं दिशं
प्राजानन्नग्नीषोमा अनुसमपश्यतां सविता प्रासुवदियमदितिरस्यामधि यज्ञं प्राश्नमतन्वत ॥ यज्ञमुखं
वा एतत् संश्रियते यत् प्रायणीयं वाक्पथ्या स्वस्तिर्यत् पथ्यां स्वस्तिं यजति वाचमेव तत् संभर-
यति प्राणापाना एवाग्नीषोमाभ्यां संभरति प्रसवायैव सवितेयमदितिरस्यामधि यज्ञमुखं संभरयति
क्लृप्त्यै वा एतन्निरूप्यते यत् प्रायणीयं मरुतां देवविशा देवविशां वै कल्पमानां मनुष्यविशानु-
कल्पते यन्मरुत्वद्याज्यायाः पदं भवति स्वस्ति राये मरुतो दधातनेति देवविशामेव कल्पयति तां
कल्पमानां मनुष्यविशानुकल्पते पथ्यां स्वस्तिं यजति तस्मादसा आदित्योऽच्छिन्नं पुर उदेति
पश्चान्निम्रोचति पथ्यां ह्येष स्वस्तिमनुसंचरत्यग्निं यजति तस्माद्दक्षिणतोऽग्र ओषधयः पच्यमाना
आयन्त्याग्नेया ह्योषधयस्सोमं यजति तस्मादापः प्रतीचीर्भूयिष्ठा धावन्ति सौमीर्ह्यापस्सवितारं यजति
तस्मादयमुत्तराद्भूयिष्ठं पवते सवितृप्रसूतो ह्येष पवतेऽदितिं यजति तस्मादियमुपरिष्टात् प्रजाभ्यो
वर्षति पञ्चैता देवता यजति पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धेऽग्रये षष्ठमवद्यति षड्वा ऋतुष्वेव प्रति-
तिष्ठति दश याज्यानुवाक्या भवन्ति दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रतितिष्ठति स्विष्टकृते
द्वादशी भवतो द्वादश मासास्संवत्सरस्संवत्सरस्याप्त्यै सप्तदश सामिधेन्यो भवन्ति सप्तदशो वै
संवत्सरः पञ्चर्तवो द्वादश मासा एष वाव स संवत्सरस्संवत्सरादेवाधि यज्ञमुखं प्रतनुते ॥८॥
१९-२०

पथ्यां स्वस्तिं यजति वाग्वै पथ्या स्वस्तिर्वाचमेव तदात्मनस्स्पृणोत्यग्निं यजति यदेवास्य
शुष्कमग्निदाह्यं तत् तेन स्पृणोति सोमं यजति यदेवास्यार्द्रमात्मनोऽनग्निदाह्यं तत् तेन स्पृणोति
प्रसवायैव सविता समिष्ट्यै प्रतिष्ठित्या अदितिः पथ्यया स्वस्त्या प्रयन्ति पथ्यया स्वस्त्योद्यन्ति
वाग्वै पथ्या स्वस्तिर्वाचैव प्रयन्ति वाचोद्यन्त्यादित्यं प्रायणीयं भवत्यादित्यमुदयनीयमस्मिन्नेव

[९] मै. ३,७,२ (२)। कपि. ३६,६। तै. सं. ६,१,५।

लोकेऽर्ध्नुयश्च यज्ञमुखेन प्रतितिष्ठति दिशो वै स्वर्गो लोक एतद्देवत्या दिशो यत् प्रायणीयेन यजते दिश एव स्वर्गं लोकमभ्यातिष्ठति यथा वै तेजन्यृतत एवं यज्ञ ऊयते यदादित्यं प्रायणीयं भवत्यादित्यमुदयनीयं वर्मा एवैता अन्ततो नयति इविषोऽप्रसंसाय याः प्रायणीयस्यानुवाक्यास्ता उदयनीयस्य याज्या या याज्यास्ता अनुवाक्या येनैव प्रयन्ति तेनोद्यन्ति प्रतिपदत्वाय प्रतिप्रज्ञात्यै व्यतिषजेद्याज्यानुवाक्या यं द्विष्यात् तस्य प्रैनमस्माल्लोकाच्च्यावयति नामुं प्रापयति यथा पथ उदेत्येवं तदुभयत एवैनं छिनत्त्यननुयाजं प्रायणीयं स्यादप्रयाजमुदयनीयं समानं वा एतद्धविस्संतत्या आत्मा वै प्रयाजाः प्रजानुयाजा यदेवं कुर्यादात्मानं च प्रजां चान्तरियादप्रजाः प्रमीयेत प्रयाजवती एवानुयाजवती स्यातां समानं वा एतद्धविस्समानी देवता समानं मेक्षणं तेनैव यज्ञं संतनोति नात्मानं न प्रजामन्तरेति ॥ सँस्थाप्या३श्च सँस्थाप्या३मिति मीमांसन्ते स्रवति वै यज्ञोऽसँस्थितस्सँ स्रवन्तं यजमानोऽनु परास्रवति प्रजया च पशुभिश्च सँस्थाप्यमेव पत्नीं तु न संयाजयेदमेध्या वा एषानृता नेश्वरा स्वर्गं लोकं गन्तोस्तामुदयनीये संयाजयति यथा प्रवासी स्वमायतनमागच्छत्येवमेवैतत् पत्नीं यजमानोऽस्मिँल्लोकेऽपि प्रतितिष्ठति दीक्षिताश्च हि वा ईजाना अदन्त्यथ न वसीयाँसो भवन्ति दीक्षितो वै तर्हि यर्हि प्रायणीयेन यजते दीक्षितस्तर्हि यर्ह्यवभृथादुदेति प्रायणीयस्य निष्काष उदयनीयमभिनिर्वपत्युदयनीयस्यैव नाश्नीयादीक्षिताश्नमेव परिवृणक्ति वसीयान् भवति ॥९॥

२१-२२

कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेतां सा कद्रूस्सुपर्णीमात्मरूपमजयदियं वै कद्रूर्द्यौस्सुपर्णी छन्दाँसि वै सौपर्णानि सा कद्रूस्सुपर्णीमब्रवीत् तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मानं निष्क्रीणीष्वेति सा सुपर्णी छन्दांस्यब्रवीदेतस्मै वै पितरौ पुत्रान् बिभृत इदशान् मा स्पृणवानितो मा निष्क्रीणीतेति सा जगत्युदपतच्चतुर्दशाक्षरा सती सा प्राप्य न्यवर्तत तस्या द्वे अक्षरे अहीयेतां सा पशूंश्च दीक्षां चादायापतत् तस्मात् पशुमन्तं दीक्षोपनमति तस्मादाहुर्जगती छन्दसां पशव्यतमेति सा त्रिष्टुबुदपतत् त्रयोदशाक्षरा सती साप्राप्य न्यवर्तत तस्या द्वे अक्षरे अहीयेत, सा दक्षिणां च तपश्चादायापतत् तस्मात् त्रिष्टुभो लोके दक्षिणा नीयन्त एतद्वाव तपो यत् स्वं ददाति तस्मादाहुर्माध्यन्दिनं सवनानां तपस्वितममिति सा गायत्र्युदपतच्चतुरक्षरा सती साजया कर्णगृह्योदपतत् तमस्या अजाऽभ्यारुणत् तदजाया अजात्वं सा तानि च चत्वार्यक्षराणि सोमं चादायापतत् साष्टाक्षराभवद्ब्रह्मवादिनो वदन्ति कस्माद्गायत्री कनिष्ठा छन्दसां सती यज्ञमुखं परीयाय कस्मात् तेजस्वितमेति यदेवादस्सोममाहरत् तस्माद्गायत्री यज्ञमुखं तस्मात् तेजस्वितमा सा पद्भ्यां द्वे सवने आहरन् मुखेन तृतीयं यन्मुखेनाहरत् तदधयत् तस्माद् द्वे सवने शुक्रवती धीतमिव तृतीयसवनं

[१०] मै. ३,७,३ (३)। कपि. ३७,१। तै. सं. ६,१,६।

तस्मादृजीषं तृतीयसवनेऽभिषुण्वन्ति यत् तृतीयसवन आशिरमवनयन्ति तृतीयसवनमेव तत् संभरन्तो मन्यन्ते ॥१०॥ २३

इन्द्राग्नी श्नथद्वृत्रमिन्द्रावरुणयोरहं नू न इन्द्रावरुणा सं वां कर्मणोभा जिग्यथुरस्मे इन्द्राबृहस्पती बृहस्पतिं नः ॥ २४

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा शृणीतमचितो न्योषतं हतं नुदेथां निशिशीतमत्रिणः ॥ २५
इन्द्रासोमा समघशँसमभ्यघं तपुर्ययस्तु चरुरग्निमाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥ २६
इन्द्रा नु पूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥ २७
यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषाभवत् सचा ॥ २८
इन्द्रापर्वता बृहता रथेन वामीरिष आवहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिडया मदन्ता ॥ २९
ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।
शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥ ३०
ऋभुर्ऋभुभिरभि वस्स्याम विभ्वो विभुभिश्शवसा शवाँसि ।
वाजो अस्माँ अवतु वाजसाता इन्द्रेण युजा तरुषेम वृत्रम् ॥ ३१
शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम् ।
शच्या हरी धनुतरा अतष्टेन्द्रवाहा ऋभवो वाजरत्नाः ॥ ३२
वर्धीं वृत्रं भूरि चकर्थ विश्वाहेन्द्र एनाङ्कुषेण ॥११॥ ३३

[११] मै. २,४,३७; ४,१०,१२५—१२६; ११,८५,८६; १२,२,८६,१२७—१२८,१६३। [इन्द्राग्नी नवतिं०। ऋ. ३,१२,६; सा. १५७६, १७०४; तै. सं. १,१,१४,१। श्नथद्वृत्रं०। ऋ. ६,६०,१; तै. सं. ४,२,११,१; तै. ब्रा. ३,५,७,३। इन्द्रावरुणयोरहं०। ऋ. १,१७,१; तै. सं. २,५,१२,२। नू न इन्द्रावरुणा०। ऋ. ६,६८,८। सं वां कर्मणा०। ऋ. ६,६९,१; तै. सं. ३,२,११,१। उभा जिग्यथुर्नः०। ऋ. ६,६९,८; अथर्व. ७,४४,१, तै. सं. ३,२,११,२; ७,१,६,७। अस्मे इन्द्राबृहस्पती०। ऋ. ४,४९,४; तै. सं. ३,३,११,१। बृहस्पतिं (०स्पतिर्नः) नः०। ऋ. १०,४२,११; ४३,११; ४४,११; अथर्व. ७,५१,१, २०,१७,११; ८९,११, ९४,११; तै. सं. ३,३,११,१। इन्द्रासोमा तपतं०। ऋ. ७,१०४,१; अथर्व. ८,४,१। इन्द्रासोमा समघशंसं०। ऋ. ७,१०४,२; अथर्व. ८,४,२; नि. ६,११। इन्द्रा नु पूषणा०। ६,५७,१; सा. २०२। यदिन्द्रो अनयद्रितो०। ऋ. ६,५७,४; सा. १४८। इन्द्रापर्वता बृहता०। ऋ. ३,५३,१; सा. ३३८। ममत्तु नः परिज्मा०। ऋ. १,१२२,३; तै. सं. २,१,११,१। ऋभुर्ऋभुभिरभि वस्स्याम०। ऋ. ७,४८,२; नि. ५,२। शच्याकर्त पितरा०। ऋ. ४,३५,५। वर्धीं वृत्रं०। ऋ. १,१६५,८; तै. ब्रा. २,८,३,६। भूरि चकर्थ०। ऋ. १,१६५,७; नि. ६,७। विश्वाहेन्द्र (०हेन्द्रो)०। ऋ. १,१००,१९, १०२,११। एनाङ्कुषेण०। ऋ. १,१०५,१९; नि.५,११]

त्वमग्ने बृहद्वयो दधासि देव दाशुषे । कविर्गृहपतिर्युवा हव्यवाडग्निरजरः ॥ ३४

पितरो विश्वविभावा सुदृशीको अस्मे सुगार्हपत्यास्समिषो दीदिह्यस्मद्र्यक्संमिमीहि श्रवाँसि य इमा विश्वा जातानि विश्वा रूपाणि ॥ ३५

त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ॥ ३६
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ ३७
उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन् ॥ ३८
हँसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥ ३९
त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ४०
भुवस्त्वमिन्द्र ब्रह्मणा महान् भुवो विश्वेषु सवनेषु यज्ञियः ।
भुवो नॄँश्च्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ॥ ४१
मित्रस्य चर्षणीधृतश्श्रवो देवस्य सानसि । सत्यं चित्रश्रवस्तमम् ॥ ४२
मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभिचष्टे सत्याय हव्यं घृतवद्विधेम ॥ ४३
प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥ ४४

[१२] मै. १,५,३०; २,७,७०,६५; ४,९,३१; १२,१६५,१६७—१६८,१७१—१७५,१७७—१८१। का. ११,६१; १२,३; १६,१६; १७,१७। काप्र. १२,६४; १६,३; १७,१६; १८,१७। [त्वमग्ने बृहद्वयो०। ऋ. ८,१०२, १; तै. सं. ३,४,११,१। य इमा विश्वा जातानि०। ऋ. ५,८२,९। विश्वा रूपाणि प्रति०। ऋ. ५,८१,२; तै. सं. ४,१,१०,४; नि. १२,१३। त्वं च सोम नो वशो०। ऋ. १,९१,६; तै. सं. ३,४,११,१। ब्रह्मा देवानां पदवीः०। ऋ. ९,९६,६; सा. ९४३; तै. सं. ३,४,११,१; तै. आ. १०,१०,१; नि. १४,१३। उदप्रुतो न वयो०। ऋ. १०,६८,१; अथर्व. २०,१६,१; तै. सं. ३,४,११,३। हँसैरिव सखिभिः०। ऋ. १०,६७,३; अथर्व. २०,९१,३; तै. सं. ३,४,११,३। त्वं सुतस्य पीतये०। ऋ. १,५,६; अथर्व. २०,६९,४; तै. सं. ३,४, ११,४। भुवस्त्वमिन्द्र ब्रह्मणा०। ऋ. १०,५०,४; तै. सं. ३,४,११,४। मित्रस्य चर्षणी०। ऋ. ३,५९,६; तै. सं. ३,४,११,५; ४,१,६,३; तै. ब्रा. ४,३,२। मित्रो जनान्यातयति०। ऋ. ३,५९,१; तै. सं. ३,४, ११,५; तै. ब्रा. ३,७,२,३; नि. १०,२२। प्र स मित्र मर्तो०। ऋ. ३,५९,२; तै. सं. ३,४,११,५; नि. २,१३]

यत्किंचेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥ ४५
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता विष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥ ४६
यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥ ४७
मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥१२॥ ४८

[१८११]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां दीक्षितं नाम त्रयोविंशं स्थानकं संपूर्णम् ॥२३॥

अथ चतुर्विंशं स्थानकम्।

साक्षीति।

या श्येताक्षी कृष्णवाला कृष्णशफा न तया क्रीणीयाद्धतं वा अस्या एतत् परिपिष्टं पितृदेवत्या सा प्रमायुकस्स्याद्या द्विरूपा न तया क्रीणीयाद्वार्त्रघ्नी सा जिनाति वा जीयते वोत तया राजन्यस्य क्रीणीयान्न हि तस्यान्तरास्ति जिनाति वा हि स जीयते वा याधीलोधकर्णी तया षोडशिनं क्रीणीयादतिरिक्तं वा एतद्रूपाणामतिरिक्तष्षोडश्यतिरिक्तेनैवातिरिक्तमाप्नोति या बभ्रुरेकहायनी तया क्रीणीयाद्वाग्वै सोमक्रयणी पुरुषो वाग्यदेकहायन्या क्रीणाति तस्मादेकहायनः पुरुषो वाचं वदति यज्ज्यायस्या क्रीणाति तस्माज्ज्यायान् वदति ॥ छन्दाँसि वा अमुष्माल्लोकात् सोममाहरन् गायत्री श्येनो भूत्वा तं गन्धर्वा अन्तरा पर्यमुष्णन् विश्वावसुस्स तिस्रो रात्रीरुपहृतोऽवसत् तस्मात् तिस्रो रात्रीस्सोमः क्रीतो वसति तं देवाः पुनरयाचन्त तमेभ्यो न पुनरददुस्तेऽब्रुवन् गवा निष्क्रीणामेति तेऽमन्यन्त यज्ञेन विक्रेष्यामहे यद्गवा निष्क्रेष्याम इति तेऽब्रुवन् स्त्रीकामा वै गन्धर्वा वाचँ स्त्रियं कृत्वा मायामुपावसृजँस्तेऽमन्यन्त प्रजया व्यक्रेष्महि ये वाचा व्यक्रेष्महीति तेऽन्वार्तीयन्तास्माकँ सोमोऽस्माकँ सोमक्रयणीति ते गन्धर्वा अब्रुवन् विह्वयामहा इति ते ब्रह्म गन्धर्वा अवदन्नगायन् देवास्सा देवान् गायत उपावर्तत तस्माद्गायन्तँ स्त्री कामयते न ब्रह्म वदन्तमद्भुताद्धि सा ब्रह्मणे

[यत्किंचेदं वरुण०। ऋ. ७,८९,५; अथर्व. ६,५१,३; तै. सं. ३,४,११,६। कितवासो यद्रिरिपुर्न०। ऋ. ५,८५,८; तै. सं. ३,४,११,६। यथा नो अदितिः०। ऋ. १,४३,२; तै. सं. ३,४,११,२। मा नस्तोके तनये०। ऋ. १,११४,८; तै. सं. ३,४,११,२; ४,५,१०,३]

[१] मै. ३,७,३—४ (३—६)। कपि. ३७,२। का. ४,३४। काप्र. ४,४३। तै. सं. ६,१,६।

तस्मादाहुरक्रीता सोमेन सोमक्रयण्यस्ति देवान् हि सा पुनरुपावर्ततेति तेऽब्रुवन् स्त्रीकामा वै
गन्धर्वा बहु वै गन्धर्वेषु मिथुनीभवन्ती संभरन्त्यचारीरषः प्रविश्योदेहीति तस्या यद्धृतं परिपिष्ट-
मासीत् तज्जरती कूटा भूत्वोदैत् तेऽब्रुवन् पितृदेवत्या वा इयमिति तस्मात् तां पितृभ्यो घ्नन्ति
तेऽब्रुवन् पुनः प्रविश्योदेहीति सा पष्ठौही वार्त्रघ्नी द्विरूपा भूत्वोदैत् सा तेन रूपेणापास्तृणुत तस्मात्
सा वरोऽतिवरेण्यो नैनं वरो हिनस्ति य एवं विद्वान् वरं वृणीते तेऽब्रुवन् पुनः प्रविश्योदेहीति सा
बभ्रुरेकहायनी भूत्वोदैत् तयाक्रीणँस्तस्मात् सा सोमक्रयणी तदस्या रूपम् ॥१॥ १-२

सोमक्रयण्या तृतीयसवनमवरुध्यं पशवो वै तृतीयसवनं यद्गवा क्रीणाति तेनैव तृतीयँ सवन-
मवरुन्द्धे रोहिते चर्मन् मिमीते तस्माद्रोहितरूपं पशवो भूयिष्ठा न विचेतवा अनुमन्येत न विचीय-
मानस्योपद्रष्टा स्यात् सोम ओषधीनामधिराजो ग्रसितमस्य निष्खिदति क्षोधुको भवति तस्मात्
सोमविक्रयी क्षोधुकोऽपामन्ते क्रीणाति सरसमेवैनं क्रीणाति हिरण्येन क्रीणाति सतेजसमेवैनं
क्रीणात्यजया क्रीणाति सतपसमेवैनं क्रीणाति धेन्वा क्रीणाति साशिरमेवैनं क्रीणात्यनडुहा क्रीणाति
वह्वयेव यज्ञस्यावरुन्द्धे वत्सतरेण च वत्सतर्या च क्रीणाति मिथुनमेवास्य क्रीणात्यृषभेण क्रीणाति
सेन्द्रमेवैनं क्रीणाति तदाहुः प्रजापतिना वा एष विक्रीणीते यदृषभेण विक्रीणीत इति य एव कश्च
साण्डस्स्यादरेतास्तेन क्रीणीयात् तेनैव सेन्द्रं क्रीणाति न प्रजापतिना विक्रीणीते दशभिः क्रीणाति
दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रतितिष्ठति ॥२॥ ३

जूरसीति वाग्वै सोमक्रयणी जवते हि वाचेत्थं चेत्थं च पश्यन् सोमक्रयणीं जुहोति वाग्वै
सोमक्रयणी पश्यत्यैवैनां यच्छति धृता मनसेति मनसा हि वाग्धृता जुष्टा विष्णव इति यज्ञो वै
विष्णुर्यज्ञायैवैनां जुष्टां करोति तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहेति यो वा एत-
स्यास्तन्वो यन्त्रमश्नुते भवति स सवितृत एवास्यास्तन्वो यन्त्रमश्नुते स्वाहाकारेणैवैनां यच्छत्य-
मुष्मा आदित्याय प्रोच्य सोमः क्रेतव्यो देव सूर्य सोमं क्रेष्याम इत्यमुष्मा एवादित्याय प्रोच्य
सोमं क्रीणाति ॥ चिदसीति वाग्वै सोमक्रयणी शास्त्येवैनां तस्माच्छिष्टाः प्रजा जायन्ते मना
असीति मनसा हि वाग्धृता धीरसीति ध्यायते हि वाचेत्थं चेत्थं च दक्षिणासीति दक्षिणा ह्येषा
यज्ञियासीति यज्ञिया ह्येषा क्षत्रियासीति क्षत्रिया ह्येषाथो यँ ह्येषा जुषते स क्षत्रियो भवत्यदिति-
रस्युभयतश्शीर्ष्णीत्यदितिर्ह्येषोभयतश्शीर्ष्ण्युभयतो ह्येषा यज्ञं परिभूरादित्यं प्रायणीयं भवत्यादित्य-
मुदयनीयँ सा मा सुप्राची सुप्रतीची भवेति सुप्राचीमेवैनां सुप्रतीचीं कुरुते मित्रस्त्वा पदि बध्नात्विति

[२] मै. ३,७,४ (६) । कपि. ३७,३ । तै. सं. ६,१,९—१० ।
[३] मै. ३,७,५-६ (७-८) । कपि. ३७,४ । वा. ४,१७-२०; ६,९ । काण्व. ४,२३-२७; ६,१० । तै. सं. ६,१,७ ।
काठ० ३३

यत् पदि बद्धा स्यात् पितृदेवत्या स्याद्वाग्वै सोमक्रयणी वरुण्यः पाशो वाग्वरुणगृहीता न वदेयत्
कर्णगृहीता स्याद्वार्त्रघ्नी स्याद्यदनालब्धायता ॥ मित्रस्त्वा पदि बध्नात्विति ब्रह्म वै मित्रो ब्रह्मणैवैनं
पदि बध्नाति पूषाध्वनस्पात्विती यं वै पूषास्या एवैनां परिददातीन्द्रायाध्यक्षायेतीन्द्रो वै देवाना-
मोजिष्ठस्तमेवास्या अध्यक्षं करोत्यनु त्वा माता मन्यतामनु पितेति पिता च ह्येतस्या माता चानु-
मन्तारौ सा देवि देवमच्छेहीन्द्राय सोममिति देवी ह्येषा देवमच्छैतीन्द्राय सोमं रुद्रस्त्वावर्तयत्विति
रुद्रो वै देवानां क्षेपिष्ठस्तमेवास्याः परस्तात् करोत्यपरानँशाय स्वस्ति सोमसखा पुनरेहीति पुन-
रेवास्या आवृत्तायै स्वस्ति करोति ॥३॥ ४-६

दक्षिणेन पदा दक्षिणानि पदान्यनुनिंक्रामति तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरष्षट् पदान्य-
नुनिंक्रामति षडृतव ऋतुष्वेव प्रतितिष्ठति षट् पृष्ठानि तान्येवावरुन्द्धे सप्तमं पदमभिगृह्णाति सप्त
ग्राम्याः पशवस्तानेवावरुन्द्धे सप्तधेयँ वाग्वदति तामेवाप्नोति वस्व्यसि रुद्रासीति देवनामानि वा
एषैतानि प्रपद्यत इयमसीयमसीत्येवैतदाह यद्यद्धवत्यथो वाचं एवैतत् सम्यगुद्यते बृहस्पतिस्त्वा
सुम्ने रण्वातु रुद्रो वसुभिराचक इति ब्रह्म वै बृहस्पती रुद्रो देवानामोजिष्ठो गा एव देवानामोजिष्ठौ
ताभ्यामेनामन्ततो यच्छति ॥ पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इत्येष हि पृथिव्यां मूर्धा
यद्देवयजनमिडायास्पदे घृतवति स्वाहेतीडा वा एषा तस्या एतद्घृतवत् पदं स्वाहाकारेणैवैनां यच्छ-
तीदमहं रक्षसो ग्रीवा अपिकृन्तामीति भ्रातृव्यो वै रक्षो भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति स्फ्येन पदं
परिलिखति वज्रो वै स्फ्यः पशवः पदं वज्रेणैवास्मै पशून् परिगृह्णाति यावद् घृतं विषावेत् तावद-
भिपरिलिखेत् पशवो वै घृतं पशूनेवावरुन्द्धे स्थाल्यां पदं संवपत्यादित्यां वै पशवः पृथिव्यदितिः
पृथिव्यास्स्थाली संभृता स्व एवैनान् योनौ दधात्यस्मे रमस्वास्मे ते राय इति यत् त्वे राय इति
ब्रूयादितरस्मै पशून् संप्रयच्छेदध्वर्युरपशुस्स्यान्मे राय इत्यात्मन्नेव पशून् यच्छते ॥ त्वष्टृद्धा वा एषा-
हुतिर्यामनग्नौ जुहोति यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति संमृद्ध्या अनग्नौ वा एतामाहुतिं
जुहोति तामीश्वराणि रक्षाँस्यनूदय्य हन्तोर्यदपो निनयति शान्त्या एव रक्षसामपहत्या अयोनीन्वा
एतत् पशूंन्छुचार्पयति यदेषां पदं परिस्वायाहरति यदपो निनयति पशूनेव शुचो मुञ्चति सोम-
क्रयण्या पत्नीं संख्यापयति पत्न्या एवैष यज्ञस्यान्वारम्भोऽथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय
त्वष्टृमन्तस्त्वा सपेमेत्यतो ह्रीमाः प्रजाः प्रजायन्ते प्रजननाय ॥४॥ ७-९

हस्ते हिरण्यं कृत्वा मिमीते सत्यं वै हिरण्यँ सत्येनैवैनं मिमीतेऽमृतं वै हिरण्यममृतेनैवैनं मिमीत

[४] मै. ३,७,६-७ (८-११) । कपि. ३७,५ । वा. ४,२१-२२, ५,२२,२६; ६,१ । काण्व. ४,२८-२९; ५,२८,३३;
६,१ । तै. सं. ६,१,८ ।
[५] मै. ३,७,४ (६) । कपि. ३७,६ । वा. ४,२४-२५ । काण्व. ४,३३-३५ । तै. सं. ६,१,९ ।

आस्माकोऽसीति स्वमेवैनं कुरुते शुक्रस्ते ग्रह इति शुक्रमेवास्य गृह्णात्यभि त्यं देवं सवितारमिति सवितृ-
प्रसूत एवैनं देवताभिर्मिमीतेऽतिच्छन्दसा मिमीते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैनां
गमयति यज्ञं च यजमानं चैकैकया मिमीत आसामेव वीर्याण्याप्नोति तस्मादिमाः कामं न्यंचामः
कामं प्रसारयामो यत् सर्वाभिस्सह मिमीत हस्तमासां वीर्यमभिसंमियादङ्गुष्ठेन प्रतिमिमीते तस्मादेषं
एतासां वीर्याणि प्रत्युदेव सृजेन्न न्युचेयन्क्रयचेत् पाशं कुर्याद्वरुण्युः पाशो वरुण एनं ग्राहुकस्स्याद्य-
दुत्सृजति वरुणपाशादेवात्मानं परिवृणक्ति ॥ द्विर्मिमीते द्वे हि शुक्रिये सवने दश कृत्वो मिमीते
दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रतितिष्ठति यत् परिमितं मिमीत परिमितं जीवनँ स्याद-
परिमितं मिमीते तस्मादिदमपरिमितं जीवनं यत् परिमितं मिमीत यजमानायैव स्यादपरिमितं
मिमीते तेन सदस्येभ्योऽपि क्रियते प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्त्विति प्रजा वा अंशवः प्रजास्वेव
प्राणं दधाति चतुर्गृहीतमाज्यं भवति चतुष्पादः पशवः पशूनेवास्मै गृह्णात्येतद्रूपा वै पशवो यद् घृतं
सरूपानेव पशूनवरुन्द्धे ॥ इयं ते शुक्र तनूरिदं वर्च इति हिरण्यं घृतेऽवदधात्येषा वा अग्नेः प्रिया
तनूर्यद् घृतं तेजो हिरण्यं प्रियामेवास्य तन्वं तेजसा समर्धयति रेतो वै हिरण्यं पशवो घृतं यद्धिरण्यं
घृतेऽवदधाति पशुष्वेव रेतो दधाति तस्मादनस्थकाद्रेतसोऽस्थन्वन्तो गर्भाः प्रजायन्ते बध्नावदधाति
गर्भाणां धृत्या अप्रपादाय निष्टक्युं बध्नाति तस्माद्योनिर्गर्भा मुच्यन्ते यदनिष्टक्यं बध्नीयान्न योने-
र्गर्भा मुच्येरन् यजुषावदधाति यजुषोद्धरति यजुषैव युनक्ति यजुषा विमुञ्चति तस्मात् पराचीः
प्रजा रेतो दधतेऽर्वाचीः प्रजायन्ते ॥५॥ १०-१२

न पूर्वस्मिन् पदमुपवपेद्देवानां वा एष प्रदग्धाहुतीनां रुद्रोऽग्निः पशवः पदं रुद्राय पशूनपि-
दध्यादपशुस्स्याद्गार्हपत्य उपवपति गार्हपत्यं वै पशवोऽनूपतिष्ठन्त एष पशूनां योनिस्स्व एवैनान्
योनौ दधाति यत्र शान्तमिवानङ्गारँ स्यात् तदुपवपेच्छान्त्या अनुद्दाहाय सोमं ते क्रीणामीति सोम-
स्यैवैतद्राज्ञो वीर्याणि महिमानं व्याचष्टे न कलाशः पणेत यत् कलाशः पणते सोमस्य राज्ञो वीर्य-
मवतिरति यजमानस्यावर्तिं व्याचष्टे क्षोधुको भवतीयमिति ब्रूयात् तस्या आत्मा तस्या रूपं तस्याः
प्रजा तस्याः पय इति न सोमस्य राज्ञो वीर्यमवतिरति न यजमानस्यावर्तिं व्याचष्टेऽक्षोधुको
भवति ॥ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेनेति शुक्रमेवास्य शुक्रेण क्रीणाति चन्द्रं
चन्द्रेणामृतममृतेन शक्म यत् ते गोरस्मे ते चन्द्राणीत्यात्मन्नेवास्य वीर्यं धत्ते तेन निर्वीर्येण भूतेन
विक्रीणीते तपसस्तनूरसीति तपसो ह्येषा तनूः प्रजापतेर्वर्ण इत्यग्निर्वै प्रजापतेरग्निजा अजास्सहस्रपोषं
पुष्यन्तीत्येषा हि पशूनाँ सहस्रपोषं पुष्यत्यतो ह्येष श्रीजनयन्त्यथो द्वौ परमेण पशुना क्रीयस इति

[अभि त्यं देवं० । अथर्व. ७,१४,१; श्रौ. सू. ४,६]
[६] मै. ३,७,७-८ (१०-१४) । कपि. ३७,७ । वा. ४,२६-३१ । काण्व. ४,३६-४४ । तै. सं. ६,१,१०-११]

परमो ह्येषा पशूनामस्मे ते बन्धुरित्यात्मन्नेवास्या वीर्यं धत्ते तया निर्वीर्यया भूतया विक्रीणीते ॥
छन्दाँसि वा अमुष्माल्लोकात् सोममाहरँस्तत् तमोऽन्तराधीयत सा गायत्र्यजया ज्योतिषोदपतत्
सास्यै प्रारोचयदेतर्हि वा एष एतस्मा आह्रियते यर्हि क्रीयते तम इदमन्तरा यदजया क्रीणाति
प्रैवास्मै रोचयति मित्रो न एहि सुमित्रधा इति वरुणो वा एष भूत्वा यजमानमभ्यैति मित्रमेवैनं
कुरुतेऽपोर्णुते यथा श्रेयाँसमायान्तं पापीयान् प्रत्यपोर्णुत एवमेव तदिन्द्रस्योरुमाविश दक्षिण-
मितीन्द्रो वा एतमग्र ऊरा आधत्तेन्द्रो यजमानस्स्व एवैनं योनौ दधाति स्वान्नभ्राडिति सोमक्रयणा
ननुदिशत्येते वा एतद्गन्धर्वा अगोपायन्नमुष्मिंल्लोके तं गायत्र्याहरन्नेष्टापोत्रोः प्रति गोपीथं तस्मादेवे
होत्रे व्यृद्धे व्यृद्धसोमपीथे तस्मान्न नेष्ट्रा न पोत्रा भवितव्यं तस्मादेतौ सँसचन्ता इव यजतस्तमेते-
ऽन्वायन्नेते वा एतस्य गन्धर्वाः पुष्टिं हरन्ति तस्मात् सोमविक्रयी न पुष्यति यदि कृच्छ्रायेतोपैव
हरेत् तेभ्यो ह्येष गन्धर्वेभ्योऽधि क्रीयत उदायुषेति यथायजुरुर्वन्तरिक्षं वीहीत्यन्तरिक्षदेवत्यो ह्येष
एतर्ह्यपि पन्थामगन्महीति रक्षाँसि वा एतमेतर्हि सचन्ते प्रच्युतमितोऽप्राप्तमदो रक्षाँस्येव घ्नन्
एत्यनसाच्छ यान्ति महिमानमेवास्याच्छ यन्त्यनसा वहन्ति तस्मादनोवाह्यमोषधयः पच्यन्ते
यच्छीर्ष्णा हरेयुश्शीर्षहार्यमोषधयः पच्येरन्नदित्यास्त्वगस्यदित्यास्सदने सीदेत्यादित्यो वै सोमः
पृथिव्यदितिः पृथिव्या अनस्संभृतँ स्व एवैनं योनौ दधाति वारुणो वै सोमस्वं देवतया व्यर्धयति
यन्मित्रं करोति यद्वारुण्या सादयति स्वयैवैनं देवतया समर्धयति वनेषु व्यन्तरिक्षं ततानेति वाससा
पर्यानह्यति सर्वदेवत्यं वै वाससर्वाभिरेवैनं देवताभिस्समर्धयति सूर्यस्य चक्षुरारुहमिति कृष्णाजिनं
पुरस्तात् प्रत्यानह्यन्ति रक्षाँसि वा एतमेतर्हि जिघाँसन्ति स्वर्गं लोकमभ्यारोहन्तमसा आदित्यो-
ऽपरिपरः पन्थास्तमेवैनमभ्यारोहयति स्वर्गस्य लोकस्य समष्ट्यै ॥६॥ १३-१५

प्रच्यवस्व भुवनस्पत इति भूतानाँ ह्येष पतिर्विश्वान्यभि धामानीति देवता वै विश्वा धामानि
देवता एवैनमभि प्रच्यावयति श्येनो भूत्वा परापतेति श्येनो वै वयसां क्षेपिष्ठश्श्येनमेवैनं कृत्वा
रक्षाँस्यतिसृजति यजमानस्य नो गृहे सँस्कृतमिति यजमानायतनमेवैनं करोत्यथो यजमानस्यैव गृहे
देवताभिस्सँस्कृतं कुरुते नमो मित्रस्य वरुणस्य चक्षस इति वरुणो वा एष भूत्वा यजमानमभ्येति
मित्रमेवैनं कुरुत आसन्दीमुद्गृह्णन्ति यथा मनुष्यराजायावस्थितायासन्दीमुद्गृह्णन्त्येवमेव तदग्निना
प्रतितिष्ठतेऽग्निस्सर्वा देवता देवताभिरेवैनं प्रतितिष्ठतेऽग्नीषोमौ वा एतर्हि यजमानमभि संधत्तो यत्
पशुना प्रतितिष्ठते तमेवाभ्यामपिदधात्यग्नीषोमाभ्यां वा एष आत्मानं मेधायालभते यो दीक्षते यत्

[वनेषु व्यन्तरिक्षं० । ऋ. ५,८५,२; तै. सं. १,२,८,१]
[७] मै. ३,७,८ (१४) । कपि. ३७,८ । वा. ४,३४-३५ । काण्व. ४,४६-४७ । तै. सं. ६,१,११ । [नमो मित्रस्य
वरुणस्य० । ऋ. १०,३७,१; तै. सं. १,२,९,१]

पशुमालभत आत्मान तन । इष्टीणाति यन्मूत्रस्य मुखो द्विदेवत्यस्य रूपं लोमशः पीवा पुरुषरूपस्तमालभत तस्य योऽश्नाति पुरुषमत्ति तस्मात् तस्य नाशितव्यं क्षुध्यति वै दीक्षितः क्षुध एष निष्क्रयण आलभ्यते तस्य योऽश्नाति क्षोधुको भवति तस्मात् तस्य नाशितव्यमग्नीषोमाभ्यां वै वीर्येणेन्द्रो वृत्रमहन् स एष वार्त्रघ्नः पशुर्विजित्या आलभ्यते तस्मादस्याशितव्यं देवता वा एनं पूर्वेद्युरालभ्यमानं नाभिप्राच्यवन्त परस्मायज्ञक्रतोर्निरेष्याम इति तमग्नीषोमा एवाभिप्राच्यवेतां पराचीरितरा यज्ञमभ्यवसृजन्त तस्मादेषोऽग्नीषोमीय आलभ्यते तस्मादग्नीषोमाभ्यां ग्रहो न गृह्यते॥ तौ देवानुपावर्तमानौ तयोर्वेन् प्रियं धामासीत् तदपन्यदधातां तद्देवा अन्वैष्टुमध्रियन्त ते प्रबाहुगिच्छन्त आयंस्ते नवं वा इदं मुमनित्यब्रुवन्नवमित्यब्रुवँस्तन्नवनीतस्य नवनीतत्वं यत् मुममिति तत् सर्पिरस्सर्पिर्हि यदजोऽविन्दत् तदाज्यस्याज्यत्वं स घृङ्ङकरोत् तद् घृतस्य घृतत्वं तस्मादजो घृङ्ङकरिश्चरति तत् पशुनन्वाकुर्वंस्तत् पशवस्समभरंस्तेनैतेन पशुभ्योऽधिजायन्ते ता अब्रुवतां वार्यं वृणावहा अवमेव नौ भागधेयमस्तु यो नौ प्रियं धामाविन्ददिति तस्मादेषोऽग्नीषोमीय आलभ्यते तस्मादस्याशितव्यं वार्यवृतो हि ॥७॥ १६--१७

विमुक्तोऽन्योऽनड्वान् भवत्यविमुक्तोऽन्योऽथातिथ्यं निरुप्यते यज्ञस्य संतत्या अविच्छेदाय यदमौ विमुक्तौ स्यातां पितृदेवत्यँ हविस्स्याद्विच्छिन्नो यज्ञोऽसंततोऽनवरुद्धो यदमा अविमुक्तौ वार्त्रघ्नँ हविस्स्यात् संततो यज्ञोऽविच्छिन्नोऽवरुद्धो यद्विमुक्तोऽन्यो भवत्यविमुक्तोऽन्यो वार्त्रघ्नँ हविर्भवत्यपितृदेवत्यँ संततो यज्ञोऽविच्छिन्नोऽवरुद्धः पत्नीमन्वारम्भयित्वा निर्वपति पत्नी वै पारीणह्यस्येशेऽनुमतमेव प्रसूतं देवेभ्यो हविर्निर्वपति पत्न्या एवैष यज्ञस्यान्वारम्भोऽथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय ॥ यावन्तो वै पुण्यमन्वायन्ति सर्वेभ्यस्तेभ्य आतिथ्यं क्रियते छन्दाँसि सोमं राजानं क्रीतमन्वायन्नग्नेस्तनूरसि विष्णवे त्वेति गायत्र्यैतन्निर्वपति सोमस्य तनूरसि विष्णवे त्वेति त्रिष्टुभैतन्निर्वपत्यतिथेरातिथ्यमसि विष्णवे त्वेति जगत्यैतन्निर्वपत्यग्नये त्वा रायस्पोषदे विष्णवे त्वेत्यनुष्टुभैतन्निर्वपति श्येनाय त्वा सोमभृते विष्णवे त्वेति गायत्र्यैतन्निर्वपति गायत्री वा एतमाहरदमुष्माल्लोकात् तस्मात् सा पुनर्याम्णी तस्मात् पुनः प्रयुज्यते यच्छन्दोभिर्निर्वपति छन्दाँस्येव भागधेयवन्ति करोति पञ्च कृत्वो निर्वपति पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धे विष्णवे त्वा विष्णवे त्वेति विष्णुर्वा एतर्हि यज्ञो यदनिरुक्तस्तस्माद्वैष्णवः पुरोडाशो भवति त्रिकपालः कार्यस्स हि वैष्णवो नवकपालस्तेनैव त्रिकपालस्त्रयो हि ते त्रिकपाला नवकपालो भवति नव प्राणाः प्राणैरेव यज्ञमुखे त्रेधा तेज एव त्रिवृतं यज्ञमुखेऽधिवियातयति यत् त्रिकपालस्तेन वैष्णवो यत् षट् तेन छन्दसां तेनोभयस्माकैति ॥ पशुरालभ्यस्सोमाय राज इत्याहुर्मनुष्य-

[८] मै. ३,७,९ (१०)। कपि. ३८,२। श. ५,१। काण्व. ५,१। तै. सं. ६,२,१।

राजावेक्ष्यै पशुरालभ्यत इत्यग्निं मन्थन्त्याग्नेया वै पशवस्तदेवास्मै पशुमालभतेऽग्निस्सर्वा देवतास्सर्वा एव देवतास्सोमाय च छन्दोभ्यश्चागतेभ्यो जनयत्याश्ववालः प्रस्तारो भवत्यैक्षवा उद्यावा अश्व इव वै प्रजापतिरासीत् तस्यैते वाला आसन् यदश्ववाला एतौ बाहू या उद्यावौ तं देवा अन्वारभ्य स्वर्गं लोकमायन् यदाश्ववालः प्रस्तारो भवत्यैक्षवा उद्यावौ प्रजापतिमेवान्वारभते स्वर्गस्य लोकस्य समष्ट्यै प्रजापतेर्वा एतानि पक्ष्माणि येऽश्ववाला यदाश्ववालः प्रस्तारो भवति प्रजापतेरेवाधि यज्ञमुखं प्रतनुते ॥ रक्षाँसि वै देवानां यज्ञमजिघाँसँस्तानि काष्मर्येणापाघ्नत यत् काष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै यद्धै देवा एतेनाकुर्वत तेनाभुवँस्तदस्य कर्मण्यत्वं कर्मण्यो वै नामैष यज्ञमुख एवैतेनभ्नोति सप्तदश सामिधेन्यो भवन्ति सप्तदशो वै संवत्सरः पञ्चर्तवो द्वादश मासा एष वाव स संवत्सरस्संवत्सरादेवाधि यज्ञमुखं प्रतनुते ॥ शिरो वा एतद्यज्ञस्य यदातिथ्यं ग्रीवा उपसदो यत् सँस्थापयेन्मुखतो यज्ञे सँस्थापयेच्छिरो ग्रीवाभ्यो यज्ञस्यावच्छिन्द्यादिडान्तं भवति शिर एव ग्रीवासु यज्ञस्य प्रतिदधाति नवकपालो भवति तस्मान्नवधा पुरुषस्य शिरो विष्यूतमुपसदो वा एतस्यानुयाजास्तानूनप्त्रमाशीस्तस्मादननुयाजं भवति ॥८॥ १८-२२

देवा वा अन्योऽन्यस्य श्रैष्ठ्याय नातिष्ठन्त ते चतुर्धा व्युदक्रामन्नग्निर्वसुस्सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैस्ते देवाः पापीयाँसोऽभवन् वसीयाँसोऽसुरास्तेऽविदुः पापीयाँसो वै स्मे भवन्ति वसीयाँसोऽसुरा इति ते प्रियास्तन्वस्समवाद्यन्त ते ब्रुवन्नेषां नस्तन्न पारयाद्यो नोऽन्योऽन्यस्मै द्रुह्यादिति तस्मात् सतानूनप्त्रिणे न द्रोग्धवै यद् द्रुह्यति प्रियायै तन्वै द्रुह्यति यत् तन्वस्समवाद्यन्त तत् तानूनप्त्रस्य तानूनप्त्रत्वं ततो देवा अभवन् परासुरा अभवन् य एवं विद्वाँस्तानूनप्त्रमुपैति भवत्यात्मना परास्य भ्रातृव्यो भवत्यसौ वा आदित्य इन्द्रस्तस्य ते श्रैष्ठ्यायातिष्ठन्त तिष्ठन्तेऽस्य समानाश्श्रैष्ठ्याय य एवं वेदैतस्मिन् वै ते तास्तन्वस्संन्यदधत तस्मादेष तेजिष्ठं तपति तस्मात् सूर्यदेवत्यास्सोमा भूयिष्ठा हूयन्त आज्येन वै वज्रेण देवा वृत्रमघ्नन् स्रुग्भ्यां बाहुभ्यां सोमो वृत्रो घ्नन्ति वा एतत् सोमं यदस्याज्येनान्तिकं जुह्वत्यँशुरँशुस्ते देव सोमाप्यायतामिति यदेवास्य घ्नन्ति यन्निवमयन्ति तदाप्याययन्ति यन्ति वा एतेऽस्माल्लोकाद्ये सोममाप्याययन्त्येष्टा रायः प्रेषे भगायेत्यस्मिन्नेव लोके प्रतितिष्ठन्ति पितरं च वा मातरं च हिनस्ति यो गर्भँ हन्त्यनयोर्गर्भस्सोमो राजा नमो दिवे नमः पृथिव्या इत्याभ्यामेव निह्नुते किं दीक्षया स्तृणोतीत्याहुः किमवान्तरदीक्षयेत्यात्मानमेव दीक्षया स्तृणोति प्रजामवान्तरदीक्षया संतरां मेखलामायच्छते ॥ कनीयो व्रतमुपैति तस्मादात्मनः प्रजाँहीयसी यत् परस्सत्यां विसृजते तस्मात् परोवरीयः प्रजया पुत्रेण पौत्रेण प्रथतेऽग्निर्वै दीक्षितश्शमयन्त्यग्निमापो मदन्तीनां मार्जयते मदन्तीनां व्रतयत्यशान्त्यै शान्तिर्ह्यापोऽथो तेज एवात्मन् भूयस्समाधत्ते न

[९] मै. ३,७,१० (१६—१८)। कपि. ३८,२। श. ५,७—८। काण्व. ५,९—१२। तै. सं. ६,२,२।

वा एतेन हुतं व्रतयितव्यं नाहुतं यो दीक्षितोऽग्निर्वै रुद्रोऽग्निरेष तन्वं विपरिधत्ते या ते अग्ने रुद्रिया तनूरिति व्रतयति स्वायामेव देवतायाँ हुतं व्रतयति तेनास्य न हुतं भवति नाहुतम् ॥९॥ २३-२४

देवाश्च वा असुराश्च संयत्ता आसँस्तेषामसुराणामिमाः पुर आसन्नयस्मयीयं रजतान्तरिक्षँ हरिणी द्यौस्ते देवास्संघातँ संघातं पराजयन्त तेऽविदुरनायतना हि वै स्मस्तस्मात् पराजयामह इति त एताः पुरः प्रत्यकुर्वत हविर्धानं दिव आग्नीध्रमन्तरिक्षात् सदः पृथिव्यास्तेऽब्रुवन्नुपसदमुपायामोपसदा वै महापुरं जयन्तीति त उपसदमुपायँस्तानुपसद्भिरेभ्यो लोकेभ्यो निरघ्नँस्तस्मादाहुरुपसदा वै महापुरं जयन्तीति त एभ्यो लोकेभ्यो निर्हता ऋतून् प्राविशँस्ते षडुपायँस्तानुपसद्भिरेवर्तुभ्यो निरघ्नन् द्वाभ्याममुष्माल्लोकाद् द्वाभ्यामन्तरिक्षाद् द्वाभ्यां पृथिव्यास्त ऋतुभ्यो निर्हतास्संवत्सरं प्राविशँस्ते द्वादशोपायँस्तानुपसद्भिरेव संवत्सरान्निरघ्नँश्चतसृभिरमुष्माल्लोकाच्चतसृभिरन्तरिक्षाच्चतसृभिः पृथिव्यास्ते संवत्सरान्निर्हता अहोरात्रे प्राविशँस्ते यत् सायमुपायँस्तेनैनान् रात्र्या अनुदन्त यत् प्रातस्तेनाह्नस्तस्माद्ग्रीष्मायं प्रातस्तनमाप्यायते प्रातस्सायन्तनं तानुपसद्भिरेभ्यो लोकेभ्यो नुदमाना आयँस्ततो देवा अभवन् परासुरा अभवन् सर्वेभ्य एवैभ्यो लोकेभ्यो भ्रातृव्यं नुदमान एति य एवं विद्वानुपसद उपैति भवत्यात्मना परास्य भ्रातृव्यो भवति ॥ न द्वादशाग्निष्टोमस्य कुर्याद्दशान्ता निर्मृज्युर्न तिस्रोऽहीनस्योपरिष्टाद्यज्ञक्रतुर्गरीयानभिषीदेद्ग्रीवा निश्शृणीयादार्तिमार्छेद् द्वादशाहीनस्य कुर्याच्छान्त्या अनिर्मार्गाय तिस्रोऽग्निष्टोमस्य भ्रातृव्यवधै सयत्वाय ते देवा असुरानिमाँल्लोकान्नान्वैतुमधृष्णुवँस्तानग्निना मुखेनान्ववायन् यदग्निमन्त्युपसदां प्रतीकानि भवन्ति यथा क्षेत्रपतिः क्षेत्रेऽन्ववनयत्येवमेवैतदग्निना मुखेनेमाँल्लोकानभिजयन्तो यन्ति यो ह वै देवान् साध्यान् वेद सिध्यत्यस्मा इमे वाव लोका देवास्साध्यास्सिद्धं ह्यस्मै सिद्धमस्मै सिद्धममुष्मै य एवं वेद सिध्यत्यस्मै ॥१०॥

२५-२६

[१८४८]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां सार्षीति नाम चतुर्विंशं स्थानकं संपूर्णम् ॥२४॥

[१०] मै. ३,८,१-२ (१—३)। कपि. ३८,३। तै. सं. ६,२,३

अथ पञ्चविंशं स्थानकम्।

इषुः।

इषुं वा एता देवास्समस्कुर्वन् यदुपसदोऽग्निँ शृङ्गँ सोमँ शल्यं विष्णुं तेजनं तेऽब्रुवन् यो न ओजिष्ठस्स इमां विसृजत्विति ते रुद्रमब्रुवँस्त्वं वै न ओजिष्ठोऽसि त्वमिमां विसृजेति सोऽब्रवीद्वार्यं वृणा अहमेव पशूनामीशा इति तेऽमन्यन्त यदयं पशूनामीशिष्यते सर्वान्निर्णेष्यतीति तेऽब्रुवन् सप्ताहानीशासै न पराचीनमिति तस्मात् सप्ताहानि रुद्रः पशूनामीशे रक्षाँसि पराचीनं घ्नन्ति तां व्यसृजत् तया पुरस्समरुजयत् समरुजत् तद्रुद्रस्य रुद्रत्वं विसृष्टिमेव भ्रातृव्याय विसृजति य एवं विद्वानुपसद उपैति न पुनरपक्रामेद्यतरो वै संयत्तयोः पुनरपक्रामति परा स जयति ॥ समेष एतर्हि यतते य उपसद उपैति सकृदेव पराङतिक्रम्याश्रावयति यज्ञस्याभिजित्यै रक्षसामपहत्यै न प्रयाजा भवन्ति नानुयाजाः पुरो वा एते यज्ञस्य यत् प्रयाजानुयाजा यत् प्रयाजानुयाजान् कुर्यात् पुरो यज्ञस्य कुर्याद्दुरतिव्यथँ स्यादतीक्ष्णामिषुं कुर्याच्चतुर्व्रतो भवति चत्वारि हीष्वाः पर्णानि त्रिव्रतो भवति त्रिपन्धिर्हीषुश्शृङ्गँ शल्यस्तेजनं द्विव्रतो भवति द्विपन्धिर्हीषुश्शल्यश्च तेजनं चैकव्रतो भवत्येका ह्येवेषुरिषुमेवैतां सँस्कृत्य तां श्वो भ्रातृव्याय विसृजत्यथो व्रतमेवाप्नोति ॥ ग्रीवा वा एता यज्ञस्य यदुपसदो न प्रयाजा भवन्ति नानुयाजास्तस्माद्ग्रीवाः प्रतिपुरुषस्याणिष्ठं तास्सवीर्याः प्रयुज्यन्ते तस्माद्ग्रीवा अणिष्ठास्सतीर्वीर्यावत्तमास्तिस्र उपसदो भवन्ति त्रय इमे लोकास्तस्मात् पुरुषस्य त्रयस्स्कन्दा अतिषक्ताभिर्यजति तस्माद्ग्रीवा अतिषक्ता अथो अयातयाम्न्यायातयाम्न्यैव यजति सच्छन्दसो याज्यानुवाक्याः कुर्याद्यद्विच्छन्दसस्स्युरपरिचितो होतारँ हन्युर्भिद्वतीः पुरां भित्त्यै ॥१॥

१-३

देवाश्च वा असुराश्च यज्ञे संयत्ता आसन् स यज्ञोऽविभेद्यतरेऽभिजेष्यन्ति ते मा विमथिष्यन्त इति स न्यलयत तं देवा अभिजित्यान्वैच्छँस्ते प्रबाहुगिच्छन्त आयँस्तमिन्द्र उपर्युपर्यत्यक्रामत् सोऽब्रवीत् को मायमुपर्युपर्यत्यक्रमीदित्यहमेष कृच्छ्रे हन्तेत्यथ कस्त्वमित्यहमेष कृच्छ्रादाहर्तेत्येमूषो नामायं वराह इत्यब्रवीदेकविंशत्याः पुरामश्ममयीनां पारे यत्किंचासुराणां वामं वसु तेन तिष्ठति तं जहि य एष कृच्छ्रे हन्तावोचथा इति तमिन्द्रो दाल्भूष्याभिविसृज्य पराभिनत् सोऽब्रवीदेष हतस्तमाहर य एष कृच्छ्रादाहर्तावोचथा इति तं विष्णुरपासङ्ग आहरद्यज्ञो वै विष्णुर्यज्ञेनैवैषां तद्यज्ञमवृञ्जत पशुभिः पशूनिन्द्रियेणेन्द्रियं ततो देवा अभवन् परासुरा अभवन् यज्ञो वै विष्णुर्यज्ञेनैवैतद्यज्ञं भ्रातृव्यस्य वृङ्क्ते पशुभिः पशूनिन्द्रियेणेन्द्रियं भवत्यात्मना परास्य भ्रातृव्यो भवति देवयजन-

[१] मै. ३,८,१—२ (१—६)। कपि. ३८,४। तै. सं. ६,२,३।
[२] मै. ३,८,३ (११)। कपि. ३८,५। तै. सं. ६,२,४।

मिच्छन्ति यज्ञमेवेच्छन्ति यद्विन्दन्ति यज्ञमेव विन्दन्ति यदुदीचीनं प्राचीनं प्रवणँ स्यात् तस्मिन् यजेत यज्ञकाम एवमेव हि स यज्ञोऽशयद्यज्ञस्यानुवित्त्यै यत् समं प्रतिष्ठितं तस्मिन् यजेत गतश्रीः प्रतिष्ठा वा एतस्मा एष्टव्या यो गतश्रीरेतद्भूम्याः प्रतिष्ठितं यत् समं प्रतिष्ठामेवास्मै विन्दति गच्छति प्रतिष्ठां त्र्युन्नते यजेत भ्रातृव्यवाँस्त्र्युन्नतेन वै विष्णुरिमांल्लोकानुदजयत् स एभ्यो लोकेभ्योऽसुरान् प्राणुदतेमानेव लोकानुञ्जयत्येभ्यो लोकेभ्यो भ्रातृव्यं प्रणुदते ॥ यस्यैकधा मध्य उन्नतँ स्यात् तस्मिन् यजेत स्वर्गकामोऽतो वै देवास्स्वर्गं लोकमायन् स्वर्गस्य लोकस्य समष्ट्यै यत्रौषधयो बह्वीरन्या अन्या इव स्युस्तस्मिन् यजेत पशुकाम ओषधयो वै पशवो भूमानमेव पशूनामुपैति यत्रौषधयः कृच्छ्रशः पर्यायशः परीयुस्तस्मिन् यजेत पशुकामोऽतो वै देवाः पशूनुदसृजन्त पशूनेवोत्सृजते यद्दक्षमलोमकं तस्मिन् याजयेद्यं द्विष्याद्वृद्धं वा एतदोषधिभिर्यद्दक्षमलोमकमोषधयः पशवः पशुभिरेवैनं व्यर्धयति ॥ यत् समया देवयजनं पन्था विधावेत् तस्मिन् याजयेद्यं कामयेत व्येनं प्रजया पशुभिश्छिन्द्यामित्येतद्वै विच्छिन्नं नाम देवयजनं व्येनं प्रजया पशुभिश्छिनत्ति यदन्तरापश्च देवयजनं च पन्था विधावेत् तस्मिन् याजयेद्यं कामयेत नैनमपरो यज्ञ उपनमेदित्येतद्वै परिवर्म नाम देवयजनं पर्येणमपरो यज्ञो वृणक्ति यत्रापस्सर्वतस्समवद्रवेयुस्तस्मिन् यजेतान्नकामो दिग्भ्यो वा एतस्मा अन्नँ हरन्ति यस्मै हरन्त्यापोऽन्नँ सर्वाभ्य एव दिग्भ्योऽन्नाद्यमवरुन्द्धे तदेतत् समापं नाम देवयजनं नीपतमभिवर्तसमानानां भवति ॥२॥ ४-६

यत्रापः प्राचीराहवनीयात् प्रतीचीर्गार्हपत्याद्धवद्रवेयुस्तस्मिन् याजयेद्यमुदके वा पात्रे वा विवाहे वा मीमाँसेरन् पाप्मना वा एषोऽनुषक्तो यमुदके वा पात्रे वा विवाहे वा मीमाँसन्ते पाप्मनैवैनं व्यावर्तयति यत्रापो दक्षिणा परिप्लूय पश्चात् प्राची रमेरँस्तस्मिन् यजेत बुभूषन्नापो वै सर्वा देवता एतद्देवताभिर्जुष्टं देवयजनं यदेवं देवताभिरेव जुष्टे देवयजने यजते भवत्येव यत्रापो दक्षिणत उदीची रमेरँस्तस्मिन् यजेत सजातकाम आपो वै सर्वा देवता देवतास्सजातास्सजातानामेवैनं प्रार्धं करोति कृत्रिमे यजेत बुभूषन्नात्मा वै देवयजनं करोत्येवैनं यत्राग्निं चापश्च पश्यन् प्रातरनुवाकमनुब्रूयात् तस्मिन् यजेत यः कामयेत यज्ञो मापर उपनमेदित्यग्निर्वै सर्वा देवता आपो यज्ञ उपैनमपरो यज्ञो नमति देवताश्च हि यज्ञं च पश्यन् यजते यत्राग्निमपस्सूर्यं पश्यन् प्रातरनुवाकमनुब्रूयात् तस्मिन् यजेत ब्रह्मवर्चसकाम एतद्वै त्रिशुक्रियं नाम देवयजनं ब्रह्मवर्चसी भवति यत् पुरस्तादाप्तँ स्याद्देवयजनं तस्मिन् यजेत भ्रातृव्यवान् भ्रातृव्याय वा एष लोक उच्छिष्यते यः पुरस्ताद्देवयजनस्योच्छिष्यत एतावन्तमेवास्मै लोकमुच्छिंषत्यलोकमेनं करोति यो ह वै विद्वान् देवयजनं यजत ऋध्नोत्यभि-

[३] मै. ३,८,४ (१४)। कपि. ३८,६ । तै. सं. ६,२,६ ।
काठ० ३४

र्वाव देवयजनमग्नौ हि सर्वा देवता इज्यन्ते यत्रैव क्वचाग्निमाधाय यजेत तेनैवर्ध्नोति ब्राह्मणा वाव देवयजनं यत्र ब्राह्मणा बहवस्संराधयेयुस्तस्मिन् यजेत तेनैवर्ध्नोति ॥३॥ ७

वेदिं विमिमीते त्रिंशता पश्चात् प्रक्रमैर्मिमीते षट्त्रिंशता प्राचीं चतुर्विंशत्या पुरस्ताद्विराजैवैनां पश्चात् परिमिमीते बृहत्या प्राचीं गायत्र्या पुरस्ताच्छन्दोभिरेवैनाँ सर्वतः परिमिमीते विराज्येव प्रतितिष्ठति यद्विराजमभिसंपादयति स्फ्येन स्तम्बयजुर्हरतीन्द्रो वै वृत्राय वज्रं प्राहरत् स त्रेधाभवत् स्फ्यस्तृतीयं यूपस्तृतीयं रथस्तृतीयं वज्रो वै स्फ्य एतावती पृथिवी यावती वेदिर्वज्रेणैव पृथिव्या भ्रातृव्यं निर्भजति त्रिर्हरति त्रय इमे लोका एभ्य एवैनं लोकेभ्यो निर्भजति ॥ तूष्णीं चतुर्थँ हरत्यपरिमितादेवैनं निर्भजतीन्द्रो वै वृत्रँ हत्वा तमनयाभिन्यदधाद्यं तूष्णीं चतुर्थँ हरत्यनयैव भ्रातृव्यमभिनिदधाति मूलं छिनत्ति भ्रातृव्यस्यैव मूलं छिनत्त्युद्घ्नन्ति तस्माच्छिशिर ओषधयः पराभवन्ति बर्हिस्स्तृणाति तस्माद्वसन्ता पुनराभवन्त्यपाररुमदेवयजनं पृथिव्या देवयजनाज्जहीति भ्रातृव्यो वा अररुर्भ्रातृव्यमेव पृथिव्या अपहन्ति द्रप्सस्ते द्यां मा स्कानिति यो वा अस्या रसस्स द्रप्सस्तमिमाः प्रजा उपजीवन्ति तमेवास्यां यच्छति तस्मात्स्कन्दायारुर्द्यां मा पप्तादिति भ्रातृव्यो वा अररुर्भ्रातृव्यमेव स्वर्गाल्लोकात् प्रतिनुदते ॥ विषाद्वै नामासुर आसीत् स पृथिवीं विषेणालिम्पत् तस्या न कश्चनाश्नाद्य आश्नात् सोऽरुप्यद्यदुद्घ्नन्ति यदेवास्या अमेध्यमयज्ञियं तदपघ्नन्त्यपि मूलमनुखनेदाविद्धस्य निष्कृत्या अधो दूरं खनेदधो वा अस्या वीर्यं वीर्यस्याभितृत्त्यै तस्मात् सुकृष्टे व्रीहियवाः पच्यन्ते तदाहुरुत्तरार्धे वा अस्या वीर्यं तदिमाः प्रजा उपजीवन्ति तस्मान्नातिखेयेत्या प्रतिष्ठायाः खनेद्यजमानस्य प्रतिष्ठित्यै दक्षिणत उद्धनां कुर्याद्देवयजनस्य रूपं रक्षसामपहत्यै पुरीषवतीं पशवो वै पुरीषं पशूनेवावरुन्द्धे ॥४॥ ८-१०

स्फ्येन वेदिं परिगृह्णाति वज्रो वै स्फ्य एतावती पृथिवी यावती वेदिर्वज्रेणैव पृथिव्या भ्रातृव्यं निर्भज्य छन्दोभिरात्मने परिगृह्णाति वसवस्त्वा परिगृह्णन्तु गायत्रेण छन्दसेति दक्षिणतस्तेजो वै ब्रह्म गायत्री तेजसैवैनं दक्षिणतः परिगृह्णाति रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छन्दसेति पश्चादोजो वै वीर्यं त्रिष्टुबोजसैवैनां पश्चात् परिगृह्णात्यादित्यास्त्वा परिगृह्णन्तु जागतेन छन्दसेत्युत्तराज्जगता वै पशव उत्तरादायतनाः पशवः पशुभ्य एवैतदायतनं करोति पशूनां धृत्या अथो तेजसा चोभयतः पशून् परिगृह्णाति पुरा क्रूरस्य विसृपो विरप्शिन्निति यद्वा अस्यास्तेजो यज्ञियं तददश्चन्द्रमसि तदेवावरुन्द्धे ॥ इध्माबर्हिषी प्रोक्षति शुष्काणि वा एतान्यमेध्यान्यारण्यादाहृतान्यापो मेध्या यज्ञिया यदद्भिः प्रोक्षति मेध्ये एवैने यज्ञिये करोति वेदिं प्रोक्षति मेध्यामेवैनां यज्ञियां करोत्यथो यदेवास्या

[४] कपि. ३९,१ । वा. १,२५—२६ । काण्व. १,४१,४३ ।
[५] मै. ३,८,५—६ (१५—१६) । कपि. ३९,२ । वा. १.२७—२८ । काण्व. १,४४—४५ ।

उद्घ्नन्तः क्रूरं कुर्वन्ति तच्छमयति बर्हिस्स्तृणाति प्रजा वै बर्हिः पृथिवी वेदः प्रजा एव पृथिव्यां प्रतिष्ठापयति सर्वां वेदिमनुस्तृणाति तस्मात् पृथिवीँ सर्वामन्वोषधयो बहुलँ स्तृणीयादक्षोधुको यजमानो भवत्यनग्रंभावुकोऽध्वर्युर्बर्हिषि प्रस्तरँ सादयति यजमानो वै प्रस्तरः प्रजा बर्हिर्यजमानमेव प्रजास्वधिसादयत्युत्तरँ सादयत्युत्तरो हि यजमानो यजमानाद्व्यावृत्तँ सादयति व्यावृत्तो हि यजमानो यजमानेनाक्त्वा प्रस्तरे प्रहरति यजमानो वै प्रस्तरो हविर्भूतमेवैनँ स्वर्गं लोकं गमयति नात्यग्रं प्रहरेद्यदत्यग्रं प्रहरेद्वृक्णकेशीर्जनयस्स्युरभ्यासरिणीर्निशुका अग्रमग्र आदीपयत्यग्रेणैवाग्रँ समर्धयत्यृजुं प्रहरेत् स्वर्गकामस्यर्जुमेवैनँ स्वर्गं लोकं गमयति यं द्विष्यात् तस्य हृर्छयेत् स्वर्गादेवैनं लोकाद्धृर्छप्रहरेत् स्वर्गकामस्यर्जुमेवैनँ स्वर्गं लोकं गमयति यं द्विष्यात् तस्य हूर्छयेत् स्वर्गादेवैनं लोकाद्धूर्छ-

यति ॥ न्यञ्चं प्रहरेद्वृष्टिकामस्य या वा इव आहुतिरुदयते सामुतो वृष्टिं च्यावयति स्वयैवाहुत्या दिवो वृष्टिं निनयत्यूर्ध्वं प्रहरेद्यदि कामयेत पुमानस्य पुत्रो जायेतेत्यूर्ध्व एव हि पुमान् प्रथयित्वा प्रहरेद्यदि कामयेत स्त्री जायेतेत्येवमेव हि स्त्री प्रथितेव यजमानो वै प्रस्तर एति वा एतदस्माल्लोकाद्यत् प्रस्तरं प्रहरति यत् तृणमुपगृह्णात्यस्मिन्नेवैनं लोके यच्छत्यनुप्रहरति यदेवास्यावमृशन्तः क्रूरं कुर्वन्ति यद्विच्छिन्दन्तस्तच्छमयत्यगा३नग्नी३दित्यगन्नित्यगन् स्वर्गं लोकमित्येवैतदाह श्रावय ११-१२
श्रौषदिति स्वर्गमेवैनं लोकं गतँ श्रावयति ॥५॥

देवाश्च वा असुराश्च संयत्ता आसँस्तान् यदस्यास्तेजो यज्ञियमासीत् तत् सिंहीरूपमिव महिषीरूपमिव भूत्वान्तरातिष्ठत् तेऽविदुर्यतरान्वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति तां देवा उपामन्त्रयन्त सात्रवीद्वार्यं वृणै मामेव पूर्वामग्नेराहुतिरश्नवाता अथ मया यूयँ सर्वान् कामान् व्यश्नवाथेति सा देवानुपावर्तत ततो देवा अभवन् परासुरा अभवन् यस्यैवं विदुष उत्तरवेदिर्न्युप्यते यथैवं विद्वान्भवति भवत्यात्मना परास्य भ्रातृव्यो भवति दश पश्चात् तिरश्ची पदानि भवन्ति दशोभयतः प्राच्यपरिमिता पुरस्ताद्विराजा संमिता यद्वा असुराणां वित्तमासीत् तद्देवा वेद्याविन्दन्त तद्वेद्या वेदित्वं यद्वेद्यं तदुत्तरवेद्या तदुत्तरवेद्या उत्तरवेदित्वं यस्यैवं विदुषो वेदिश्च क्रियत उत्तरवेदिश्च न्युप्यते वित्तं चैव वेद्यं च भ्रातृव्यस्य विन्दते प्रजापतेर्वै नासिकाशीर्यत सोत्तरवेदिरभवद्यज्ञः प्रजापतिर्यदुत्तरवेदिं निर्वपति प्रजापतेरेव नासिकां मुखतः प्रतिदधाति चत्वारि वा एतस्या नामानि नासिका कशारिसिंह्युत्तरवेदिस्तप्तायन्यसीति वप्ता ह्येनानैद्वित्तायन्यसीति वित्ता ह्येनानैदवतान् मा नाथितमिति नाथितान् ह्येनानावदवताद्व्यथितमिति व्यथितान् ह्येनानावदग्ने अङ्गिरो योऽस्यां पृथिव्यामसि यो द्वितीयस्यां यस्तृतीयस्यामिति यदेवास्यैषु लोकेषु श्लिष्टं यद्व्यक्तं तदवरुन्द्धे विदेदग्निर्नभो नामेति॥ यद्वा अग्नेर्वामं वस तन्नभस्तेनेमां पृथिवीं प्राविशआनुदभमधस्तस्माज्ञानुदभ्रं खेयं तस्यैव वामस्य

[६] मै. ३,८,५ (१५) । कपि. ३९,३—४ । वा. ५,९—१०; ३३,३० । काण्व. ५,१३—१४; ३२,३० । [विभ्राड् बृहत् पिबतु० । ऋ. १०,१७०,१; सा. ६२८, १४५३]

वसोरनुवित्त्यै सिंहासि महिष्यसीति सिंहीरूपमिव हि तन्महिषीरूपमिव भूत्वान्तरातिष्ठद्देवेभ्यः प्रथस्वेति प्रथयत्येवैनान् देवेभ्यः कल्पस्वेति कल्पयत्येवैनान् देवेभ्यश्शुन्धस्वेति शुन्धत्येवैनान् देवेभ्यश्शुम्भस्वेति शुम्भत्येवैनां विभ्राड् बृहत् पिबतु सोम्यं मध्वित्यन्तान् कल्पयति देवपात्रं वा उत्तरवेदिर्देवपात्रेणैव देवतास्तर्पयत्यथो देवताभ्य एव देवपात्रं निवेदयति ॥ यतीन् वै सालावृकेया आदँस्त आदीयमानास्संमृश्यमाना उत्तरवेदिं समुदक्रामँस्तानाभ्यधृष्णुवँस्तेषामेकोऽस्मयत तत एनानभ्यधृष्णुवँस्तेषामेकैकमावर्हमादँस्तस्मान्न मोघहासिना भव्यं यन्निस्सारयति यदेवास्या अभिमृतममेध्यं तन्निस्सारयति प्रोक्षत्येतावती वा इयं पृथिव्यासीद्यावत्युत्तरवेदिस्ताँ समन्त रक्षाँसि संप्राकम्पन्त तानि देवा विनुधैताभिर्देवताभिस्समन्तं परिन्यदधुर्यत् प्रोक्षत्येतद्देवत्या वा इमा दिशो रक्षाँस्येव विनुधैताभिर्देवताभिस्समन्तमात्मानं परिनिदधाति ॥ गोपीथायैतद्वा एतां पूर्वामग्नेराहुतिरश्नुते यदाघारयत्यथादोऽब्रवीन्मामेव पूर्वामग्नेराहुतिरश्नवाता अथ मया यूयँ सर्वान् कामान् व्यश्नवाथेत्यथ वा एषां तर्ह्यसुरास्सपत्ना आसँस्तेऽकामयन्त सपत्नान् सहेमहीति सिंहासि सपत्नसाही स्वाहेति सपत्नाँस्तेनासहन्त तेऽकामयन्त पशून् विन्देमहीति सिंहासि रायस्पोषवनिस्स्वाहेति पशूँस्तेनाविन्दन्त तेऽकामयन्त प्रजां विन्देमहीति सिंहासि सुप्रजावनिस्स्वाहेति प्रजां तेनाविन्दन्त तेऽकामयन्तादित्यास्स्यामेति सिंहास्यादित्यवनिस्स्वाहेत्यादित्यास्तेनाभवँस्तस्मादिमा आदित्याः प्रजास्तेऽकामयन्त यज्ञियास्स्यामेति सिंहास्यावह देवान् देवायते यजमानाय स्वाहेति यज्ञियास्तेनाभवँस्तेऽकामयन्त स्वर्गं लोकमियामेति भूतेभ्यस्त्वेति ॥ देवा वै भूतास्स्वर्गमेव तेन लोकमायन् यस्यैवं विदुष उत्तरवेदिर्व्याघार्यते यश्चैवं विद्वान् व्याघारयति सर्वानेवैतया कामान् व्यश्नोतीमे वै लोका आधृता आसँस्ते संप्राकम्पन्त तान् देवा एतैर्यजुर्भिर्व्यदृंहन् यदेतैः परिधीन् परिदधात्येषां लोकानां विधृत्या अग्निर्वै देवेभ्योऽपाक्रामत् स यां प्रथमां प्रावसत् तां पशुध्वसद्भृष्णेरन्तरागृह्णं तस्मादूर्णास्तुका भवति यां द्वितीयां तां वनस्पतिषु पीतुदारौ तस्मात् पीतुदारुर्भवति यां तृतीयां तामोषधिषु सुगन्धितेजने तस्मात् सुगन्धितेजनो भवति यदेते संभारा भवन्ति यदेवास्यात्र श्लिष्टं यद्व्यक्तं तदेतैस्संभरति स पुनरुपावर्तमानश्शरीरमधूनुत तस्य यन्माँसमासीत् तद्गुल्गुल्वभवद्यदस्थि स पीतुदारुर्यानि लोमानि स सुगन्धितेजनो यदेते संभारा भवन्ति यदेवास्यात्र श्लिष्टं यद्व्यक्तं तदेतैस्संभरत्यग्नेस्सर्वत्वायाग्नेः कुलायमस्यग्नेः पुरीषमसीति कुलायमिव ह्येतत् पुरीषमिव यज्ञः प्रत्यष्ठादिति यज्ञस्य प्रतिष्ठित्यै ॥६॥ १४-१८

चत्वारो वै देवानाँ होतार आसन् भूपतिर्भुवनपतिर्भूतानां पतिर्भूतस्तेषां त्रयो होत्रेण प्रामीय

[७] मै. ३,८,६ (१७) । कपि. ३९,५ । वा. १,२; ८,६० । काण्व. १,३; ९,४६ ।

न्शाषो यज्ञस उदक्षिप्यत स प्रमपादविभेद् स न्वलयत स समुद्रं प्राविशत् स यत् समुद्रे मस्मा-कुरुत स एष कर्दमस्तं मत्स्यः प्राब्रवीत् तमब्रवदभिगन्ता त्वा हतादिति तस्मान्मत्स्यमभिगन्ता हन्ति ग्रसो हि स तत उद्द्रुत्य नडं प्राविशत् तस्मान्नडो दग्धः क्रूर इव बर्बरस्तमश्वश्श्वेतोऽयमृश-मन्वविन्दत् तं प्रत्यौषत् तस्मात् स प्रत्युष्टकुसस्सोऽक्रन्दत् सा या वागासीत् स सुश्लोकश्यकुनि-रभवत् तस्मादेँ स नष्टेषमभ्यवक्रन्दति विन्दन्त्येवा तं देवा अनुविद्यानयन्निदं नो होता भविष्यसीति स प्रमयादबिभेत् तं भ्रातरः प्रमीता अब्रुवन् वयं त इतो वयं भविष्यामो देवेषु नो भागधेय-मिच्छेति तेऽब्रुवन् यत्किंच हविर्भूतं बहिष्परिधि स्कन्दात् तदेषां भागधेयमित्येते वाव ते परिधयो यदि हविर्भूतं बहिष्परिधि स्कन्देद्भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यनुमन्त्र-येतैते वै देवास्स्कन्नभागा य एव देवास्स्कन्नभागास्तानेनद्गमयति यज्ञो वा एतेषां मध्यमो यज-मानो दक्षिणार्ध्यो भ्रातृव्य उत्तरार्ध्यस्स्थविष्ठं मध्यमं कुर्यादणिष्ठं दक्षिणार्ध्यं क्रधिष्ठमुत्तरार्ध्यं स्थविष्ठं प्रथमं परिदधाति प्रथमो हि यज्ञो वर्षिष्ठं दक्षिणार्ध्यं यथा यजमानो दक्षिणतो यज्ञमुप-सीदत्येवं तत् पश्चेवोत्तरार्ध्यं पश्चेव हि भ्रातृव्यो यज्ञेनैवैतद्यजमानं प्रतरां करोति यज्ञेन भ्रातृव्यमप-नुदतेऽक्त्वा दक्षिणार्ध्यं प्रहरति मुखत एव यजमानं प्रीणात्यथो हविर्भूतमेवैनं स्वर्गं लोकं गमयत्यु-पवपत्युत्तरार्ध्यं भ्रातृव्यमेवं तदुपवपत्यथ ह स्माहार्यलः काहोडिः किमु स यजेत यो यज्ञस्य स्कन्नेन न वसीयानित्स्यादिति यत्र स्कन्देत् तदपो निनीय भूपतये स्वाहेति प्राक् प्रादेशेन मिमीत भुवन-पतये स्वाहेति दक्षिणा भूतानां पतये स्वाहेति प्रत्यग्जनं वा एतद्यज्ञस्यैति यत् स्कन्दतीयं वाव जनो यो वा इमामेति न स पुनरागच्छति जनमेवैतस्य यज्ञस्य यां कामयत आशिषं तामवरुन्द्धे ॥ दिशो मिमीते दिशो वै यज्ञस्य स्कन्नस्याशीर्गच्छति दिग्भ्य एव यज्ञस्याशिषमवरुन्द्धे प्रादेशेन मिमीत एतावद्वै पुरुषे वीर्यं यावदस्य प्राणा अभि यावदेवास्मिन् वीर्यं तेनैनत् संभरत्यपो नि-नयति म्रियते वा एतद्यज्ञस्य यत् स्कन्दत्यद्भिस्तान्तमभिषिञ्चन्त्यापस्सर्वा देवता देवता एवैनत् प्रवेशयति यदि प्रातस्सवने स्कन्देद्देवाञ्जनमगन् यज्ञस्तस्य यज्ञस्य मेष्टस्य वीतस्य द्रविणेहागम्या इत्यनुमन्त्रयेत यदि मध्यन्दिनेऽप ओषधीर्जनमगन् यज्ञस्तस्य मेष्टस्य वीतस्य द्रविणेहागम्या इत्यनुमन्त्रयेत यदि तृतीयसवने पितॄञ्जनमगन् यज्ञस्तस्य मेष्टस्य वीतस्य द्रविणेहागम्या इत्यनु-मन्त्रयेत यदि नक्तं द्यावापृथिवी जनमगन् यज्ञस्तस्य मेष्टस्य वीतस्य द्रविणेहागम्या इत्यनुमन्त्रयेत यदि तिरोह्नयेषु गन्धर्वाञ्जनमगन् यज्ञस्तस्य मेष्टस्य वीतस्य द्रविणेहागम्या इत्यनुमन्त्र-येतैता वै देवता यज्ञस्य स्कन्नस्याशीर्गच्छन्त्येता एव देवता यथादेवतं प्रत्युपसृत्य यां कामयते यज्ञस्याशिषं तामवरुन्द्धे यस्यैवं विदुषो यज्ञस्य स्कन्नमनुमन्त्रयन्ते यश्चैवं विद्वाननुमन्त्रयते वसीयान् भवति ॥७॥ १९-२०

हविर्धाने प्रणेनेक्ति मेध्ये एवैने यज्ञिये करोति ग्रन्थीन् विचृतन्ति देवग्रन्थीनेव ग्रन्थिष्यन्तो मनुष्यग्रन्थीन् विचृतन्ति हविर्वै हविर्धाने स्तीर्णे बर्हिषि हविरासादयन्ति तस्मात् स्तीर्णे बर्हिषि हविर्धाने प्रवर्तयन्ति पत्न्युपानक्ति पत्न्या एवैष यज्ञस्यान्वारम्भोऽथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय त्रिः प्राचीनमुपानक्त्यसंख्यातँ हि तिरश्चीनं मनुष्या उपाञ्जन्ति व्यावृत्त्यै यजुषोपान-क्त्ययजुषा हि मनुष्या उपाञ्जन्ति व्यावृत्त्यै दक्षिणत उपानक्ति दक्षिणतो ह्येते उदीची मनुष्यलोक-मुपावर्तेते मानुषमेवैनयोरुत्तरं करोति ॥ यदुत्तरादुपाञ्ज्यान्नान्यतरं च्यवन लोकमुपावर्तेयातां स्वर्गाय वा एते लोकाय प्रवर्तेते यद्धविर्धाने युञ्जते मन इति सावित्र्या जुहोति सवितृप्रसूते एवैने स्वर्गं लोकं गमयति हविर्वै हविर्धाने न हविरनभिघृतं मेधमश्नुते यदभ्यनक्त्यभ्येवैने घारयति मेध्यत्वाय शुष्को वा एष निर्ऋतिगृहीतो यदक्षो नभ्याभ्यामुभयतो बद्ध उपधिभ्यां संदष्टो यदुपानक्ति मेध्य-मेवैनं यज्ञियं करोति घोषो वै नामासुर आसीत् स वनस्पतीन् प्राविशत् तं देवा गृहीत्वोभयतो-ऽबध्नन् यत् स्वेदेदसुर्या वाग्यज्ञमववदेद्रक्षाँसि यज्ञमन्ववेत्य हन्युरनुगृह्णन्तो यान्ति रक्षसामन्तर्वायाय वर्त्मना वै यज्ञं रक्षाँस्यन्ववेत्य जिघाँसन्ति वैष्णव्या वर्त्मञ्जुहोति विष्णुर्वै यज्ञो विष्णुनैव यज्ञा-द्रक्षाँस्यपहन्ति व्यृद्धा वा एषाहुतिर्यामनग्नौ जुहोति यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति समृद्ध्यै स्वर्गं वा एते लोकं प्रेतो यद्धविर्धाने गायत्र्या दक्षिणस्य वर्त्मञ्जुहोत्यस्यामेवैने आक्रमयति त्रिष्टु-भोत्तरस्यान्तरिक्ष एवैने आक्रमयत्याहवनीयं गमयति स्वर्गमेवैने लोकं गमयति स्वर्गो हि लोक आहवनीयस्त्रीन् पुरस्तात् प्रक्रमानुच्छिंषति त्रय इमे लोका इमानेवास्मिँल्लोकानुच्छिंषति ॥ दिवो वा विष्ण उत वा पृथिव्या इति दक्षिणस्य हविर्धानस्य मेथीमुपमिनोति विष्णुर्वै यज्ञो मुखत एव यज्ञस्याशिषमवरुन्द्धे तां परुषि परुष्याशासान एति विष्णोर्नु कं वीर्याणि प्रवोचमित्युत्तरस्य वैष्णवं वै हविर्धानँ स्वयैवैनद्देवतया समर्धयति विष्णोः पृष्ठमसीति च्छदिरुपरिष्टादधिनिदधातीदमेव तेन करोति यदिदमुत्तरार्धँ शीर्ष्णो विष्णो रराटमसीति पुरस्ताद्रराटमेव तेन करोति विष्णोश्श्नप्त्रे स्थ इत्यभितश्श्नप्त्रे एव तेन करोति ॥ तिर्यञ्चं पुरस्ताद्वँशं विषीव्यन्ति तस्मात् तिरश्ची पुरुषस्य भ्रुवौ विष्णोस्स्यूरसि विष्णोर्ध्रुवोऽसीति वैष्णवं वै हविर्धानँ स्वयैव देवतया सीव्यति स्वया देवतया ग्रन्थिं ग्रथ्नाति यं प्रथमं ग्रन्थिं ग्रथ्नीयात् तं प्रथमं विचृतेदात्मनो गोपीथाय यदन्यं पूर्वं विचृतेदमेहेनाध्वर्युः प्रमीयेतोपरिष्टाच्छम्यास्संनह्यन्ति पश्चादुपमिन्वन्त्यधस्ताद्धि मनुष्या युञ्जन्ति पुरस्तादुपमिन्वन्ति व्यावृत्त्यै ॥ शिरो वा एतद्यज्ञस्य यद्धविर्धानं पुरस्ताद्वर्षीयो भवति पश्चात् क्रधीयस्तस्मात् पुरस्ताद्

[८] मै. ३,८,७ (१९,२१) । कपि. ४०,१ । वा. ५,१४,१९-२१; ११,४; ३७,२ । काण्व. ५.१९,२४—२७, ११,४, ३७,२ । तै. सं. ६.२,९ । [युञ्जते मन० । ऋ ५.८१,१; तै. सं. १,२,१३,१, ४,१,१,१; तै. आ. ४,२,१ । दिवो वा विष्ण० । अथर्व. ७,२६,८ । विष्णोर्नु कं वीर्याणि० । ऋ. १,१५४,१; अथर्व. ७,२६,१; तै. सं. १,२,१३,३]

पुरुषस्य शिरो वर्षीयः पश्चात् क्रधीयो वैष्णवमसि विष्णवे त्वेति संमितमभिमन्त्रयते वैष्णवं वै हविर्धानँ स्वयैवैनद्देवतया समर्धयति प्र तद्विष्णुस्स्तवते वीर्येणेति त्रीन् प्रक्रमान् यजमानं प्राञ्चं प्रक्रमयति विष्णुमेवैनं भूतमिमांल्लोकान् गमयति ॥८॥ २१-२५

शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा दक्षिणस्य हविर्धानस्याधस्तात् परिलिखत्येतद्वा एतयोः पर्व मुखत एव यज्ञस्य प्राणान् प्रतिदधाति तस्मान्मुखतः प्राणाश्चतुरः परिलिखति चत्वारो हि प्राणाः प्रादेशं प्रादेशं विपरिलिखत्येतावदेतावद्ध्यस्मिऽभि प्राणा असंभिन्दन्तः खनन्ति प्राणानामसं-भेदाय यत् संभिन्द्यात् प्राणान् संभिन्द्यात् प्रमीयेत तान् पर एकधा संतृन्दन्ति तस्मात् प्राणाः पर एकधा संतृण्णा देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते सवितृप्रसूत एवैनान् देवताभिरादत्त इदमहं रक्षसो ग्रीवा अपिकृन्तामीति भ्रातृव्यो वै रक्षो भ्रातृव्यस्यैव ग्रीवा अपिकृन्ततीदमहं यो नस्समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामीति ॥ प्राणा वा उपरवाः प्राणेभ्य एव भ्रातृव्य-मन्तरेति तानक् प्रधन्वति बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वदेति बृहतीं ह्येष इन्द्राय वाचं वदति रक्षोहणं वलगहनं वैष्णवीमिति रक्षसामपहत्यै यद्वैष्णवीमिति यज्ञो वै विष्णुस्स्वयैवैनं देव-तया समर्धयति देवाश्च वा असुराश्च व्यस्पर्धन्त तेऽसुरा देवानां प्राणेषु वलगान्न्यखनँ-स्तान् बाहुमात्रेऽन्वविन्दँस्तस्माद्बाहुमात्राः खेयाः प्राणानामनुवित्त्या इदमहं तान् वलगानुद्वपामि यान्नस्समानो यानसमानो निचखानेति यदेवास्यात्र भ्रमं यदभिचरितं तदनुविद्योद्वपति तस्मादेते मिथस्त्यास्तस्माद्दामथाविनमनुमर्शयन्ति ॥ सम्राडसि स्वराडसीति साम्राज्यमेवैतैरुपैति गायत्रेण च्छन्दसावबाढो वं त्रिष्टुभेन जागतेनेत्येतावन्ति वै छन्दाँसि च्छन्दोभिरेव भ्रातृव्य-मवबाधते किमत्र भद्रं तन्नौ सहेत्याशिषमेवाशास्ते निरस्तो वलगोऽवबाढो दुरस्युरिति यथायजु रक्षोघ्नो वलगघ्नः प्रोक्षामि वैष्णवानिति रक्षसामपहत्यै यद्वैष्णवानिति यज्ञो वै विष्णुस्स्वयैवैनं देव-तया समर्धयति रक्षोघ्नो वलगघ्नोऽवसिञ्चामि वैष्णवानिति रक्षसामपहत्या अथो यदेवैषां खनन्तः क्रूरं कुर्वन्ति तच्छमयति यद्वैष्णवानिति यज्ञो वै विष्णुस्स्वयैवैनं देवतया समर्धयति रक्षोघ्नो वलग-घ्नोऽवस्तृणामि वैष्णवानिति रक्षसामपहत्यै यद्वैष्णवानिति यज्ञो वै विष्णुस्स्वयैवैनं देवतया समर्ध-यत्यवसिञ्चत्यव च स्तृणाति तस्मात् प्राणा अन्तरतो लोमशा उदन्वन्तो रक्षोहणौ वलगहनौ प्रोक्षामि वैष्णवी इति रक्षसामपहत्यै यद्वैष्णवी इति यज्ञो वै विष्णुस्स्वयैवैनं देवतया समर्धयत्यृक्षे वा एते हते अमेध्ये आपो मेध्या यज्ञिया यदद्भिः प्रोक्षति मेध्ये एवैने यज्ञिये करोति हनू वा एते यज्ञस्य यदधिषवणे अवितृण्णे भवतस्तस्माद्धनू अवितृण्णे पुरस्ताद्वँहीयसी पश्चाद्वरीयसी एवमेव हि

[प्र तद्विष्णुस्स्तवते० । ऋ. १,१५४,२; अथर्व. ७,२६,२—३; ऐ. ब्रा. १,३,३,४; नि. १,२०]
[९] मै. ३,८,८ (२२) । कपि. ४०,२ । वा. ५,२२-२६; ६,१ । काण्व. ५,२८-३३; ६,१ । तै. सं. ६,२,११ ।
[देवस्य त्वा सवितु० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

हनू ह्यङ्गुलमन्तराधिषवणे भवति तस्मादियमन्तरा हनू रास्नाकेव रक्षोहणौ वलगहना उपदधामि वैष्णवी इति रक्षसामपहत्यै यद्वैष्णवी इति यज्ञो वै विष्णुस्स्वयैवैने देवतया समर्धयति रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी इति रक्षसामपहत्यै यद्वैष्णवी इति यज्ञो वै विष्णुस्स्वयैवैनं देवतया समर्धयति ॥ पर्यूहति तस्माद्धनू अनग्ने अमुषिते वस्थैरोष्ठाभ्यां सृक्काभ्यां श्मश्रुभिश्शिरो वा एतद्यज्ञ-स्य यद्धविर्धानं प्राणा उपरवा हनू अधिषवणे दन्ता ग्रावाणो जिह्वाधिषवणं चर्म मूर्धा द्रोणकलशो यज्ञः प्रजापतिर्मुखतो वा इदं प्रजापतेस्सोमं निष्पिबन्ति तस्मादजीर्णं जग्धमिव प्सातमिवैवँ हि दद्भिः प्सातं भवति यो विराजं यज्ञमुखे दोह्यां वेद दुह एनामियं वाव विराट् तस्या एतदूधो यदधि-षवणे स्तना उपरवा वत्सा ग्रावाणस्त्वगधिषवणं चर्मर्त्विजो दुह्नन्ति य एवं विराजं यज्ञमुखे दोह्यां वेद दुह एनाम् ॥९॥ २६-२९

शिरो वा एतद्यज्ञस्य यद्धविर्धानं ग्रीवा आग्नीध्रमुदरँ सद ऊर्गुदुम्बरो यत् सदस्यौदुम्बरीं मिनो-त्यूर्जमेव मध्यतो दधाति यजमाने च प्रजासु च तस्मान्मध्यतः प्रजा ऊर्गूर्जयत्यस्मै वै लोकायौ-दुम्बरी मीयतेऽमुष्मै यूपस्तस्मादितः पराञ्चं यूपं प्रोक्षत्यमुतोऽर्वाचीमौदुम्बरीमनयोर्लोकयोर्विधृत्या ऊर्ग्वा उदुम्बरो यदमुतोऽर्वाचीमौदुम्बरीं प्रोक्षत्यमुत एवार्वाचीमूर्जं च्यावयत्यस्मिन्नेव लोक ऊर्जं न्यनक्ति प्रजापतेर्वा उद्गातोर्गुदुम्बर्याँ श्रयते प्रजास्वेवोर्जं न्यनक्ति देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते सवितृप्रसूत एवैनां देवताभिरादत्त इदमहं रक्षसो ग्रीवा अपिकृन्तामीति भ्रातृव्यो वै रक्षो भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति ॥ शुन्धन्तां लोकाः पितृषदना इति शुन्धत्येवैनमथो यदेवास्य खनन्तः क्रूरं कुर्वन्ति तच्छमयति यवमतीरवसिञ्चत्यूर्ग्वै यवा ऊर्गुदुम्बरोऽन्न एवोर्जं दधाति पितृषदनं त्वा लोकमास्तृणामीति यद्वा एतामपबर्हिषं मिनुयुर्गर्तमित्स्यादस्या उत्तरार्ध ओष-धयोऽस्या एवैनामुत्तरार्धे मिनोत्यगर्तमितमेवाकरुद्द्याँ स्तभानान्तरिक्षं पृण दृँहस्व पृथिव्यामिति दृँहत्येवैनां नितानस्त्वा मारुतो निहन्त्विति मनो वै नितानः प्राणा मारुतास्स्वयैवैनां देवतयाव-हरति ॥ नितानो ह स्म वै मारुतो देवानामौदुम्बरीं मिनोति तेनैवैनां मिनोति मित्रावरुणयोर्ध्रुवेण धर्मणेति मित्रेण वा इमाः प्रजाश्शान्ता वरुणेन विधृताः क्लृप्त्या एव विधृत्यै ब्रह्मवनिं त्वा क्षत्र-वनिमित्याशिषमेवाशास्ते ब्रह्म दृँह क्षत्रं दृँहेत्याशिषमेवास्मा आशिष्टां दृँहति घृतेन द्यावापृथिवी आपृणेथामिति घृतेन द्यावापृथिवी व्युनत्ति तस्मादोषधयोऽनभ्यक्ता रेभन्ते घृतेनौदुम्बरीमभिजुहोति तेजो वै घृतमन्नमुदुम्बरोऽन्न एव तेजो दधात्यान्तमेव वनस्पतिषु चौषधिषु च रसं दधाति ॥ विश्वजनस्य च्छायासीति विश्वजनस्य ह्येषा छाया गोत्राद्गोत्राद्ध्येतत् संप्रसर्पन्त्यौदुम्बरीमभि

[१०] मै. ३,८,९ (२३) । कपि. ४०,३ । वा. ५,२६-२७,३० । काण्व. ५,३३-३६,३८ । [देवस्य त्वा सवितु:० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

च्छदींषि संमुखानि कुर्याद्दैवीर्वा एता विशो यदोषधय ओषधयश्छदींषि यजमान औदुम्बरी यजमानमेव प्रजा अभिसंमुखाः करोति च्छदिर्भवत्यथान्तर्वर्तस्तस्मात् पुरुषस्य माँसमथ पर्शुरुदरं वा एतद्यज्ञस्य यत् सदस्तिर्यङ् मिन्वन्ति तस्मात् पुरुषेऽशितं ध्रियते यदन्वङ् मिनुयुर्न पुरुषेऽशितं ध्रियेत पुरुषेण वै यज्ञस्संमितो यज्ञेन पुरुषो यत् सद उभयतश्छिद्रं तस्मात् पुरुष उभयतश्छिद्रो विषीव्यन्ति तस्मात् पुरुषोऽन्तरतो विष्यूत इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोऽसीत्यैन्द्रं वै सदस्स्वयैव देवतया सीव्यति स्वया देवतया ग्रन्थिं ग्रभ्नात्यैन्द्रमसीन्द्राय त्वेति संमितमभिमन्त्रयत ऐन्द्रं वै सदस्स्वयैवैनं देवतया समर्धयति ॥ नव च्छदींषि कुर्याद्यद्यग्निष्टोमस्स्यात् तेजसा त्रिवृता संमितं पञ्चदश यद्युक्थ्यः पञ्चदशेन संमितं वज्रः पञ्चदशो वज्रेण संमितँ सप्तदश यद्यतिरात्रस्सप्तदशेन संमितं प्रजापतिस्सप्तदशः प्रजापतिना संमितमेकविंशतिं प्रतिष्ठाकामस्य कुर्यादेकविंशो वै स्तोमानां प्रतिष्ठा प्रतिष्ठित्या अथो यज्ञक्रतूनामेव व्यावृत्त्यै या अन्ततस्स्थूणास्ताः कधिष्ठाः कुर्याद्यदि कामयेत वर्षेदिति नीचैरिव हि द्यौर्वर्षिष्यन्ती भवति ता वर्षिष्ठाः कुर्याद्यदि कामयेत न वर्षेदित्युच्चैरिव हि द्यौरवर्षिष्यन्ती भवति यानि दक्षिणानि च्छदींषि तान्युत्तराणि कुर्याद्यजमानलोके वा एतानि यानि दक्षिणानि भ्रातृव्यलोक उत्तराण्युत्तरमेव यजमानमयजमानाद्भ्रातृव्यात् करोत्युत्तरो हि यजमानोऽयजमानात् ॥१०॥　　　३०-३४

[१८८९]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायामिषुर्नाम पञ्चविंशं स्थानकं संपूर्णम् ॥२५॥

अथ षड्विंशं स्थानकम् ।

धिष्ण्यम् ।

धिष्ण्या न्युप्यन्तेऽनयोर्लोकयोर्विधृत्यै न्यन्य उप्यन्ते नान्ये न्युप्यन्त इमं तैर्लोकं दाधार ये न न्युप्यन्तेऽमुं तैः पराङ् वासौ लोकोऽनिरुक्तोऽग्निर्वै देवेभ्योऽपाक्रामत् स पृथिवीं प्राविशत् तं जानुदघ्नेऽन्वविन्दँस्तस्माज्जानुदघ्नं खेयमनुविधैवैताभिवपति चात्वालाभिवपत्येषा वा अग्नेर्योनिस्स्वादेवैनान्योनेर्निवपति यो वेद्यास्तीर्थं वेद न सदस्यामार्तिमार्छति प्राचीनमाग्नीध्रात् प्रतीचीनं चात्वालात् तेन संचरेदेतद्वै वेद्यास्तीर्थं य एवं वेद न सदस्यामार्तिमार्छति न प्रत्यङ् सदोऽतीयादध्वर्युरुदरं वा एतद्यज्ञस्य यत् सद उदरं यज्ञस्य संकर्षेत् प्रमीयेत जनो वा एषोऽध्वर्योर्जनमेति जनता जनतामभीत्य जिनाति यद्यतीयादैन्द्रया संचरेदैन्द्रं वै सदस्स्वयैव देवतया संचरति न प्राङ् हविर्धानँ शिरो वा एतद्यज्ञस्य यद्धविर्धानँ शिरो यज्ञस्य संकर्षेत् प्रमीयेत यद्यतीयाद्वैष्णव्या संचरेद्वैष्णवं वै हविर्धानँ स्वयैव देवतया संचरति तदाहुः क्षेत्रपत्ययैव संचरेदितीयं क्षेत्रस्य पतिस्तेनास्या नैत्यमुष्मिन् वै लोके सोम आसीत् तं धिष्ण्या अगोपायँस्तं गायत्र्याहरच्छेष्टापोत्रोः प्रतिगोपीथं तस्मादेते होत्रे व्यृद्धे व्यृद्धसोमपीथे तस्मात्र नेष्टा न पोत्रा भवितव्यं तस्मादेतौ सँसचन्त्या इव यजतस्तमेतेऽन्वायन् द्वितीयानि नामानि कृत्वा तस्माद्ब्राह्मणो द्विनामार्धुकस्तं पर्यविशन् भागधेयमिच्छमानास्तेभ्य एतद्भागधेयकल्पयद्यद्धिष्ण्यान् व्याघारयति स्वेनैवैनान् भागधेयेन समर्धयति तेषां ये नेदिष्ठं पर्यविशँस्ते सोमपीथं प्राप्नुवन्नाहवनीय आग्नीध्रो होत्रीयस्तस्मादेत उपर्युपरि वषट्कुर्वन्तं न हिंसन्ति प्रीता हि न प्रत्यङ् धिष्ण्यानतिसर्पेदध्वर्युः प्राणा वै धिष्ण्याः प्राणान् संकर्षेत् प्रत्यङ् होतारं नाभिर्वा एषा यज्ञस्य यद्धोतोर्ध्वं नाभ्याः प्राणोऽवाचीनमपानोऽपाने प्राणं दध्यात् प्रमीयेत ॥ दक्षिणतो वै देवानां यज्ञं रक्षाँस्यभ्यजयँस्तमाग्नीध्रात् पुनरपाजयन् यदाग्नीध्राद्धिष्ण्यान् विहरन्ति यज्ञस्याभिजित्यै रक्षसामपहत्यै जम्भो वै नामासुर आसीत् स देवानां यज्ञमगिरत् स आग्नीध्रमपि नागिरद्यदाग्नीध्राद्धिष्ण्यान् विहरन्ति तेन यज्ञो जीवस्तेन मेध्योऽङ्गारान् पूर्वयोस्सवनयोर्विहरन्ति शुक्रवती हि ते शलाकान् दीप्यमानाँस्तृतीयसवने तेन तच्छुक्रवत् सर्वाण्यस्य सवनानि शुक्रवन्ति भवन्ति य एवं वेद ॥ प्राचीभिर्वा आहुतिभिर्देवा अन्यानसुरान् प्राणुदन्त प्रतीचीभिरन्यान् प्रत्यञ्चो धिष्ण्या व्याघार्यन्ते प्राचीरन्या आहुतयो हूयन्ते भ्रातृव्यस्य विनुत्त्या अग्नेर्वा एता वैश्वानरस्य प्रियास्तन्वो यद्धिष्ण्या यद्धिष्ण्यान् व्याघारयति ता एवैतत् समुद्धर्षयत्यग्निर्वा एष वैश्वानर उपावसृज्यते यदग्निष्टोमस्स ईश्वरोऽशान्तो यजमानं च सदस्याँश्चाभ्युपः प्रोर्णुवीत यजमान आत्मनोऽनभिदाहाय सवने वै यज्ञस्याशिष ईरते यत् प्रोर्णुवीत ताम्य आत्मान-

[१] मै. ३,८,१० (२४-२६) । कपि. ४०,४ । तै. सं. ६,३,१-२; ६,५,८,६ ।

मन्तर्दध्यात्माभिं वै पितरोऽभिसंजानत आविर्नाभिं कुर्वीतामीव कर्णौ प्रोर्णुवीत नाशीर्म्य आत्मानमन्तर्दधाति जानन्त्येनं पितरो घ्नन्ति वा एतत् सोमं यदभिषुण्वन्ति यावन्तः प्रसुप्तास्स्युस्ते सर्वेऽग्निष्टोममुपगायेयुरन्तो वा अग्निष्टोमोऽन्तमेवैनमागस्य समीरयन्तीन्द्रियायं वै कं ब्राह्मणस्सोमं पिबति यदुपगायेदिन्द्रियं निस्स्वरेत् तस्मान्नोपगेयं संवत्सरो वा अग्निष्टोमो द्वादशाग्निष्टोमस्य स्तोत्राणि द्वादश मासास्संवत्सरस्संवत्सरं प्रजा अनुप्रजायन्ते यदग्निष्टोमस्य स्तोत्रेऽप उपप्रवर्तयति मिथुनं वा आपो रेतः प्रसिक्तं प्रजननाय यद्वै पत्नी यज्ञे करोति तन्मिथुनं यत् पत्न्यप उपप्रवर्तयति मिथुन एव रेतः प्रसिच्य प्रजननाय यद्वै पत्नी यज्ञे करोति तन्मिथुनं यत् पत्न्यप उपप्रवर्तयति प्रजाः प्रजायन्ते वृषाणमेवास्यामपिसृजति स्युद्राग्रा पत्नीं संख्यापयति वृषा वा उद्गाता पत्न्याः प्रजाः प्रजायन्ते वृषाणमेवास्यामपिसृजति स्युद्राग्रा पत्नीं संख्यापयति देवतान्तरतो ह्येषा प्रजननायोरुम्यां प्रवर्तयत्यूरुभ्याँ हि प्रजाः प्रजायन्ते प्रजननायान्तरत इव तु देवतान्तरतो ह्येषा वीर्यं करोति दृष्टमुपर्युद्दहेदाग्नीध्रमुपस्या जायते न दक्षिणा प्रवर्तयेदक्षिणा प्रवर्तयेत् पितृभ्यः प्रजां निपृष्वेदुदीचीः प्राची प्रवर्तयत्येषा वै मनुष्याणां दिङ् मनुष्यलोक एवैना उपप्रजनयति ॥१॥　　　१-३

उपसद्भिर्वै देवा इमाँल्लोकान् व्यजयँस्तान् वैसर्जनैरभिव्यसृजन्त यथा ग्रामस्संग्रामादिसृज्यते तद्वैसर्जनानां वैसर्जनत्वं प्राञ्चँ सोममिमे प्रणयन्ति प्राचीं पत्नीमुदानयन्तीमानेवैताँल्लोकानभिप्रयन्त्यग्निना वै मुखेन देवा इमाँल्लोकानभ्यजयन् गार्हपत्येनेममाग्नीध्रेणान्तरिक्षमाहवनीयेनामुं यदाहवनीयोऽमुं तेन स्वर्गाय वा एष पत्य इमं तेन लोकमभिजयति यदाग्नीध्रोऽन्तरिक्षं तेन यदाहवनीयोऽस्यामाक्रमयति यदाग्नेय्याग्नीध्रे लोकाय प्रहियते द्वाभ्यां गार्हपत्ये जुहोति द्विपाद्यजमानोऽस्यामेवैनमाक्रमयति यदाग्नेय्याग्नीध्रे जुहोत्यन्तरिक्ष एवैनमाक्रमयति यद्वैष्णव्याहवनीये जुहोति स्वर्गमेवैनं लोकं गमयति स्वर्गो हि लोक आहवनीयो रक्षाँसि वा एतमेतर्हि जिघाँसन्ति प्रच्युतमितोऽप्राप्तमदस्त्वँ सोमेति सौम्या गार्हपत्ये जुहोति सौमीरिमाः प्रजाः प्रजाभ्य एवैनं प्राह जुषाणो अप्तुरिति प्रमुमेवैनं करोत्येमामतिनयति यदाग्नेय्याग्नीध्रे जुहोत्यग्निमेवैनं करत्यान्तरिक्षमपिनयति यद्वैष्णव्याहवनीये जुहोति स्वर्गमेवैनं लोकं गमयति स्वर्गो हि लोक आहवनीयस्सर्वेभ्यो वा एष आह्रियते मनुष्येभ्यः पितृभ्यो देवेभ्यस्त्वँ सोमेति सौम्या गार्हपत्ये जुहोति सौमीरिमाः प्रजाः प्रजाभ्य एवैनं प्राह जुषाणो अप्तुरिति पितृभ्य एवैनं प्राह यदाग्नेय्याग्नीध्रे जुहोत्यग्निस्सर्वा देवता देवताभ्य एवैनं प्राह ॥ वैष्णवो वै सोमस्तं देवतया व्यर्धयति यदन्यामन्यां देवतां करोति यद्वैष्णव्याहवनीये जुहोति स्वयैवैनं देवतया समर्धयति सर्वान् वा एतद्वरुणो गृह्णाति यदीक्षिते मनुष्यान् पितॄन् देवाँस्त्वँ सोमेति सौम्या गार्हपत्ये जुहोति सौमीरिमाः प्रजाः प्रजा एव वरुणपाशान्मुञ्चति जुषाणो अप्तुरिति पितॄनेव वरुणपाशान्मुञ्चति

[२] मै. ३,९,१ (१) । कपि. ४०,५ । पा. १,१४,१९; ४,३०; ५,६,३९-४० । काण्व. १,२०,३१; ४,४१; ५,७-८, ४८-५० । तै. सं. ६,३,१ ।

यदाग्नेय्याग्नीध्रे जुहोत्यग्निस्सर्वा देवता देवता एव वरुणपाशान्मुञ्चति सोऽनृण इमाँल्लोकानभिविसृजमान एति तद्वैसर्जनानां वैसर्जनत्वम् ॥ तस्मादाहुरपि वा एतर्ह्यरण्येभ्यः पशुभ्यो विसृजत इत्याग्नीध्रे ग्रावाणवायव्यानि सादयति प्राञ्चँ सोमं प्रणयत्येतैर्वा एतं घ्नन्ति हन्तृभिरेवैनं व्यावर्तयति न हन्तॄन् प्रतिपद्यते य एवं वेद पुरस्तात् प्रतिपद्येत रुद्रो वा अग्निः पशवोऽश्वो रुद्राय पशून्निदध्यात् पशुस्स्यात् पश्चात् प्राञ्चः प्रपद्यन्ते श्रीर्वै सोमः पश्चादिव प्राङ् श्रियमाप्नोति तस्मात् पश्चात् प्राचीः प्रजाः क्षेत्राण्यभिजयन्तीर्यन्ति पुरस्ताद्धतश्रीः प्रपद्येत पुरस्तादेव प्रत्यङ् श्रियमाप्नोतीममेव लोकमभि प्रतितिष्ठति पश्चात् सोमं प्रपादयन्ति पुरस्तादयजमानः प्रपद्यत उभयत एवास्मै श्रियं परिगृह्णात्युर्वन्तरिक्षं वीहीत्यन्तरिक्षदेवत्यो ह्येष एतर्ह्यदित्यास्सदस्यदित्यास्सदने सीदेत्यादित्यो वै सोमः पृथिव्यदितिः पृथिव्या अनस्संभृतँ स्व एवैनं योनौ दधाति ॥ देव सवितरेष ते सोम इति सविता वै देवानामधिपतिर्मनुष्या एतमतः प्राचीनं गोपायन्ति तस्मा एवैनँ संप्रयच्छति गोपीथायैवैनं देव सोम देवानुपागा इति देवो ह्येष देवानुपैतीदमहं मनुष्यान् सह प्रजया सह रायस्पोषेणेति सहैव प्रजया पशुभिरिमं लोकमुपावर्तते नमो देवेभ्यस्स्वधा पितृभ्य इति नमो हि देवानाँ स्वधा पितॄणां निर्द्विहो निर्वरुणस्य पाशान्मुक्षीयेति द्रुह एवैनं वरुणपाशान्मुञ्चति स्वरभिव्यख्यमितीमे वै लोकास्स्वरिमानेव लोकानभिविपश्यत्यग्ने व्रतपा इत्यग्निना वा एष व्रतं विपरिषज्ते तान्नग्नेः सैनमीश्वरा हिंसितोरग्निनैवैतत् तन्वं यथायथं कुरुत एतर्हि वा एष देवैस्तन्वं विसृजते तद्वैसर्जनानां वैसर्जनत्वं यात्मनस्तां पूर्वां ब्रूयाद्दितरस्य पूर्वां ब्रूयादीश्वरो निकमो यं द्विष्यात् तस्योत्तरं ब्रूयादग्निर्वै रुद्रो रुद्रायैवैनमपिदधाति ताजक् प्रधन्वति ॥२॥　　　४-७

न दीक्षितेन होतव्यं हविर्वै दीक्षितो रुद्रोऽग्निर्यज्जुहुयाद्धविर्भूतमात्मानं रुद्रायापिदध्यात्तन्न जुहुयाद्यन्नपरुत्तरियाद्यदि क्रीतसोमस्स्यादाग्नीध्रीक्षितस्याग्नौ जुहुयाद्धिसृष्टो हि तर्हि यज्ञः प्रेता आहुतयो भवन्ति यद्यक्रीतोऽरणी चाज्यं चादाय परेत्याग्निं मथित्वा वैष्णव्यर्चा यूपस्यान्ते जुहुयाद्वैष्णवो वै यूपस्स्वयैवैनं देवतयाच्छैत्यत्यन्यानगां नान्यामुपागामित्यति ह्यन्यानेति नान्यानुपैति यात्साजुजोषं परि तानवृजमिति यान् हि न जुषते परि तान् वृणक्त्यर्वाक् त्वा परेभ्योऽविदं परोऽवरेभ्य इत्यर्वाङ्ह्येनं परेभ्यो विन्दति परोऽवरेभ्यस्तं त्वा जुषामहे वनस्पते देवयज्याया इति देवयज्यायै ह्येनं जुषते जुष्टं विष्णव इति यज्ञो वै विष्णुर्यज्ञायैवैनं जुष्टं करोति देवस्त्वा सविता मध्वानक्त्विति घृतं वै देवानां मधु मध्येमेवैनं यज्ञियं करोत्योषधे त्रायस्वैनमिति वज्रमेव करोति स्वधिते मैनं हिंसीरिति वज्रो वै स्वधितिर्हिंसायै यः प्रथमश्शकलः परापतति तस्माहरेदेतं वा एतस्य परापतन्तं

[३] मै. ३,९,२-३ (२-३) । कपि. ४१,३ । पा. ४,१; ५,४२-४३; ६,१,१५; ३७,११ । काण्व. ४,१,५,५१-५५; ६,१,१०; ३७,११ । तै. सं. ६,३,३ ।

तेजोऽनुपरापतति सतेजसमेवैनं मिनोति ॥ यो दक्षिणावृत्तं वृश्चेद्दक्षिणस्य य उदङ्ङावृत्तो न तँ स्पृण्यस्स य ऊर्ध्वशाख ऊर्ध्वशकलस्तं वृश्चेदेष वै वृष्यो य एव वृष्यस्तं वृश्चति योऽशुष्काग्रो बहुशाखो बहुपर्णस्तं वृश्चेदोषधयो वै वनस्पतयः पशव ओषधयः पशुभिरेवैनं समर्धयति यश्शुष्काग्रोऽशाखोऽपर्णस्तं वृश्चेद्यं द्विष्यात् तस्यौषधयो वनस्पतयः पशव ओषधयः पशुभिरेवैनं व्यर्धयति य उदङ् प्राङुपनतस्तं वृश्चेदेष वै मेधमभ्युपनतो य एव मेधमभ्युपनतस्तं वृश्चति द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या संभवेति वज्रो वै यूप एषां लोकानामहिंसाया उदश्चं प्राञ्चं प्रश्रयत्येष वै देवलोको देवलोकमेवैनमुपप्रश्रयति ॥ वनस्पते शतवल्शो विरोहेत्याव्रश्चने जुहोति वनस्पतिष्वेव भूमानं दधाति तस्मादेत आव्रश्चनाद्भूयांसो जायन्ते सहस्रवल्शा वि वयं रुहेमेत्याशिषमेवाशास्ते यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायेति महते ह्येष सौभाग्याय प्रणीयते यो यज्ञाय प्रणीयते य आरोहस्तं वृश्चेद्यं द्विष्यात् तस्यायोनिर्वा एषोऽनायतनो य आरोहोऽयोनिमेवैनमनायतनं करोति यस्त्वारुढं वृश्चेदेष वै योनिमानायतनवान् यस्त्वारुढयोनिमन्तमेवायतनवन्तं यजमानं करोति गुल्फदघ्ने वृश्चेत् परहि गुल्फो यज्ञपरुषा संमितं जानुदघ्ने वृश्चेत् परहि जानु यज्ञपरुषा संमितं यावत्यनक्षसङ्गस्स्यात् तावति वृश्चेद्यज्ञपरुषा संमितं पशूनामप्रतिनोदाय ॥३॥ ८–१०

पशुसंमितो व्रष्टव्यो दशारत्निर्दश वै पशोः प्राणा आत्मैकादशोऽष्टा अश्रयो द्वे परुषी आत्मैकादशः पशुसंमितमेव वृश्चति स्तोमसंमितो व्रष्टव्यो नवारत्निस्तेजसा त्रिवृता संमितः पञ्चदशारत्निर्व्रष्टव्यः पञ्चदशेन संमितो वज्रः पञ्चदशो वज्रेण संमितस्सप्तदशारत्निर्व्रष्टव्यस्सप्तदशेन संमितः प्रजापतिस्सप्तदशः प्रजापतिना संमित एकविंशत्यरत्निर्व्रष्टव्य एकविंशेन संमितोऽसा आदित्यः एकविंशोऽमुनादित्येन संमितस्सप्तविंशत्यरत्निर्व्रष्टव्यस्सप्तविंशेन संमितस्त्रिणवा इमे लोका एभिर्लोकैस्संमितस्त्रयस्त्रिंशदरत्निर्व्रष्टव्यस्त्रयस्त्रिंशेन संमितस्त्रिंशद्देवता देवताभिस्संमितश्छन्दस्संमितो व्रष्टव्यः पञ्चारत्निः पङ्क्त्या छन्दसा संमितष्षडरत्निरतिच्छन्दसा संमितस्सप्तारत्निश्शक्वर्या संमितोऽष्टारत्निर्गायत्र्या संमितो नवारत्निर्बृहत्या संमितो दशारत्निर्विराजा संमित एकादशारत्निस्त्रिष्टुभा संमितो द्वादशारत्निर्जगत्या संमितस्त्रयोदशारत्निस्साध्यैर्देवैस्संमितो बृहत्परिमितो व्रष्टव्यो यूपाद्वै देवास्स्वर्गं लोकमायन् स्वर्गस्य लोकस्य समष्ट्यै य एव कश्च पुरुषाद्वर्षीयान् स्यात् तं वृश्चेदेषा वै यूपस्य मात्रा यावानेव यूपस्तं वृश्चति चषालं भवति चषालाद्वै देवास्स्वर्गं लोकमायन् स्वर्गस्य लोकस्य समष्ट्या इन्द्रो वै वृत्राय वज्रं प्राहरत् तस्य यावदालब्धमासीत् तत् प्राशीर्यत तच्चषालं प्रत्यवृञ्जन् यच्चषालं भवति इन्द्रिय एवालब्ध्वा अशिथिलत्वायैवञ्जन्येदायद्धि तदालब्धमासीच्च यूपस्यातिरेचयेद्यदतिरेचयेद्वु-

[वनस्पते शतवल्शोः० ऋ. ३,८,११; तै. सं. १,३,५,१]

[४] मै. ३,९,२ (२)। कपि. ४१,१।

दिनीर्जनयस्युर्यावदुत्तममङ्गुलिकाण्डं तावदतिरेचयेद्यज्ञपरुषा संमितं पशूनामप्रतिनोदाय यद्वै यज्ञस्यातिरिच्यते साध्यान्तद्देवानभ्यतिरिच्यते यज्ञस्य तदतिरिच्यते यद्यूपस्यातिरिच्यते साध्यानेव तेन देवान् प्रीणात्यन्यस्य वृक्षस्य चषालं कुर्याद्यस्य च यूपस्स्याद्यं कामयेत भ्रातृव्यमस्मै जनयेयमिति भ्रातृव्या वा एतस्यान्ये वनस्पतयो भ्रातृव्यमेवास्य लोकमभ्यारोहयत्यलोकमेनं करोति ॥४॥ ११

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेति यूपं प्रोक्षत्येभ्य एवैनं लोकेभ्यः प्रोक्षत्यस्मै वै लोकायौदुम्बरी मीयतेऽमुष्मै यूपस्तस्मादितः पराञ्चं यूपं प्रोक्षत्यमुतोऽर्वाचीमौदुम्बरीमनयोर्लोकयोर्विधृत्यै देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते सवितृप्रसूत एवैनां देवताभिरादत्त इदमहं रक्षसो ग्रीवा अपिकृन्तामीति भ्रातृव्यो वै रक्षो भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति शुन्धन्तां लोकाः पितृषदना इति शुन्धत्येवैनमथो यदेवास्य खनन्तः क्रूरं कुर्वन्ति तच्छमयति यवमतीरवसिञ्चत्यन्नं वै यवास्तेजो यूपोऽन्न एव तेजो दधात्यन्नं वै यवा वज्रो यूपोऽन्न एव वज्रं दधाति ॥ पितृषदनं त्वा लोकमास्तृणामीति यद्वा एतमपवर्हिषं मिनुयुर्गर्तमित्स्यादस्या उत्तरार्ध ओषधयोऽस्या एवैनमुत्तरार्धे मिनोत्यगर्तमितमेवाकस्स्वावेशोऽस्यग्रेगा नेतृणामिति यूपशकलमवास्यत्यृक्षो वा एष तष्टोऽपशव्यस्सत्वचसमेवैनं मिनोति घृतेन द्यावापृथिवी आपृणेथामिति घृतेनैव द्यावापृथिवी व्युनत्ति तस्मादोषधयोऽनभ्यक्ता रेभन्ते देवस्त्वा सविता मध्वानक्त्विति घृतं वै देवानां मधु मेध्यमेवैनं यज्ञियं करोति॥ सुपिप्पला ओषधीस्कृधीति चषालं प्रतिमुञ्चत्योषधीरेव फलं ग्राहयति तस्मादेता अकृष्टपच्याः पच्यन्ते घृतेनाग्निष्ठामनक्ति तेजो वै घृतं यजमानोऽग्निष्ठास्तेजसैव यजमानँ समर्धयत्यान्तँ संततमनक्ति तेजसस्संतत्या अविच्छेदाय यं द्विष्यात् तस्य विच्छिन्द्यात् तेजसैवैनं व्यर्धयति सर्वतोऽनक्ति सर्वत एवैनं तेजसा समर्धयति द्यामग्रेणास्पृक्ष आन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृँहीरिति वज्रो वै यूप एषां लोकानां विधृत्यै ॥ ता वां वास्तूनीति वैष्णव्यावहरति वैष्णवो वै यूपस्स्वयैवैनं देवतयावहरति विष्णोः कर्माणि पश्यतेति वैष्णव्या कल्पयति वैष्णवो वै यूपस्स्वयैवैनं देवतया कल्पयत्यग्निं प्रत्यग्निष्ठां कुर्यात् तेजो वा अग्निर्यजमानोऽग्निष्ठास्तेजसैव यजमानँ समर्धयति यं द्विष्यात् तस्येत्थं वेत्थं वा नमयेत् तेजसैवैनं व्यर्धयति ब्रह्मवनिं त्वा क्षत्रवनिमित्याशिषमेवाशास्ते ब्रह्म दृँह क्षत्रं दृँहेत्याशिषमेवास्मा आशिष्टां दृँहति तद्विष्णोः परमं पदमिति वैष्णव्योदीक्षते वैष्णवो वै यूपस्स्वयैवैनं देवतयोदीक्षते ॥५॥ १२–१५

[५] मै. ३,९,३ (३)। कपि. ४१,३। वा. ५,२६-२८; ६,१-५,२५; १३,३३; ३७,१९। काण्व. ५,३३-३६; ६,१-६, ३६; १४,३५; ३७,१८। [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७। शुन्ध (०म०)न्तां लोकाः०। अथर्व. १८,४,६७। विष्णोः कर्माणि०। ऋ. १,२२,१९; सा. १६७१, अथर्व. ७,२६,६, तै. सं. १, ३,६,२। तद्विष्णोः परमं पदं०। ऋ. १,२२,२०; सा. १६७२; अथर्व. ७,२६,७; तै. सं. १,३,६,२; ४,२,९,३]

अर्धं वेद्यां यूपावटस्य कुर्यादर्धं बहिर्वेदि परिमितस्य चापरिमितस्य चावरुद्ध्यै नाविरुपरस्य कुर्याद्यदाविरुपरस्य कुर्याद्गर्तमित्स्यात्परिवीतमवसृजेद्यदपरिवीतमवसृजेत् क्षोधुको यजमानस्यापशुमायुकोऽध्वर्युरूर्ध्वं रशना मध्यं प्रतिपरिव्ययत्यूर्जमेव मध्यतो दधाति यजमाने च प्रजासु च तस्मान्मध्यतः प्रजा ऊर्गुँजयत्यरशनं मिनुयाद्यं द्विष्यात् तस्योर्गं रशनोर्जैवैनं व्यर्धयत्यूर्ध्वामुद्गृहेदवार्चीं यं द्विष्यात् तस्योर्गं रशनोर्जैवैनं व्यर्धयत्युपरि दूरे परिव्ययेद्यदि कामयेत वर्षेदित्यङ्ग्यो वा एष ओषधिभ्यो वर्षति यर्हि वर्षत्योषधयो रशनौषधीरेव नेदीयो वृष्ट्याः करोति ताजक् प्रवर्षत्यथो दूरे परिव्ययेद्यदि कामयेत न वर्षेदित्यङ्ग्यो वा एष ओषधिभ्यो वर्षति यर्हि वर्षत्योषधयो रशनौषधीरेव दवीयो वृष्ट्याः करोति चिरं प्रवर्षति परिवीरसि परि त्वा दैवीर्विशो व्ययन्तामिति दैवीर्वा एता विशो यदोषधय ओषधयो रशना यजमानो यूपो यजमानमेव प्रजा अभिसंमुखाः करोति परीमं रायो मनुष्यमिति पशवो वै रायः पशुभिरेवैनँ समर्धयत्यन्तरिक्षस्य सानूपेपेति स्वरुमुपोहत्यन्तरिक्षदेवत्यो ह्येष एतर्हि परीवास्माल्लोकादथोऽमुष्मात् स्वयैवैनं देवतयापोहति पितृणामुपरं मनुष्याणामूर्ध्वंहपरादोषधीनां रशनां प्रति विश्वेषां देवानामूर्ध्वं रशनाया इन्द्रस्य चषालं साध्यानामतिरिक्तमेवमिव वा एषु लोकेषु पितरो मनुष्या देवास्सर्वदेवत्यो यूपस्सर्वाभिरेवैनं देवताभिस्समर्धयत्यग्नेरर्वादुपनतं यूपस्य कुर्याद्धविष्टाभिर्णतमग्नेर्वा अर्वादुपनतेन यजमानाय लोकं करोति बहिष्टाभिर्णतेन भ्रातृव्यं यज्ञान्निर्णुदते ॥ यज्ञेन वै देवास्स्वर्गं लोकमायँस्तेऽकामयन्तेमं नो लोकमन्यो नानुप्रजानीयादिति ते दिशोऽयोपयन् यदिशोऽयोपयँस्तद्यूपस्य यूपत्वं तेऽमुं लोकं गत्वा व्यतृप्यँस्तेऽविदुरमुतःप्रदानाद्वा इहाजगामेति त एतं पुनः प्रायच्छँस्तेनार्धुवँस्तेष वै यज्ञस्य तन्तुरेष उत्तमपदी यथा वै मयूखात् तन्त्रं तायत एवमतो यज्ञस्तायते तँ ह स वा एतं पुरात्रैव जुहुति यत् स्वरुं जुहोत्येतस्यैव निष्क्रीत्यै सोऽस्य निष्क्रीतः प्रीतस्स्वगाकृत इमांल्लोकाननुपतिष्ठते द्यां ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्म स्वाहेतीमानेवैनं लोकान् गमयति ॥६॥ १६–१७

साध्या वै नाम देवा आसन् पूर्वे देवेभ्यस्तेषां न किंचन स्वमासीत् तेऽग्निं मथित्वाग्नौ जुह्वत आसत तस्माद्वन्धोः पशवोऽजायन्त तस्मादाग्नेयास्सर्वे पशव उच्यन्ते यदग्निं मथित्वा पशुमालभते प्रजातमेवैनमालभतेऽथो यथापूर्वमेव करोति तदाहुः पशुमालभ्याग्निर्मथितव्य इत्यग्निस्सर्वा देवतास्सर्वा एव देवताः पशव आलब्धाय जनयति पशुना सर्वाणि सवनानि पशुमन्ति वीर्यावन्ति कर्तव्यानि यद्वपया प्रातस्सवने चरन्ति तेन तत् पशुमद्वीर्यावद्यद्दक्षिणाभिर्माध्यन्दिने तेन तत् पशुमद्वीर्यावद्यदितरेण पशुना तृतीयसवने तेन तत् पशुमद्वीर्यावत् सर्वाण्यस्य सवनानि पशुमन्ति वीर्या-

[६] मै. ३,९,४ (४-१४)। कपि. ४१,४। वा. ६,६। काण्व. ६,७।

[७] मै. ३,९,५—६ (१५—१६) कपि. ४१,५। वा. ५,२-३, ६,७—८। काण्व. ५,२-३; ६,८—९।

वन्ति भवन्ति य एवं वेद ॥ सर्वाभ्यो वा एष दिग्भ्य ऋद्ध्या आलभ्यते यत् पशुर्यत् प्राञ्चमाप्रीणन्ति देवलोकं तेनाभिजयति यदुदञ्चमाप्रीतं नयन्ति मनुष्यलोकं तेनाभिजयति यद्दक्षिणतः परिहृत्यावद्यन्ति पितृलोकं तेनाभिजयन्ति यत् प्रतीचीनँ समवत्तँ हरन्त्येतां तेन दिशमभिजयति यदूर्ध्वस्तिष्ठञ्जुहोति स्वर्गं तेन लोकमभिजयति पशुना वै देवास्स्वर्गं लोकमायँस्ते शरीरमभून्वत स्वर्गो वपा यद्वपया प्रातस्सवने चरन्ति स्वर्गस्य लोकस्य समष्ट्यै यदितरेण पशुना तृतीयसवने शरीरस्य निष्क्रीत्यै याद्रा बहुपर्णा तयोपाकुर्यादोषधयो वै वनस्पतयः पशव ओषधयः पशुभिरेवैनँ समर्धयति या शुष्कापर्णा तयोपाकुर्याद्यं द्विष्यात् तस्यौषधयो वै वनस्पतयः पशव ओषधयः पशुभिरेवैनं व्यर्धयति ॥ घोरो वा अन्यो वज्रश्शिवोऽन्यो यश्शुष्कस्स घोरो य आर्द्रस्स शिवो य एव शिवस्तेनोपाकरोति बर्हिषोपाकरोति पशवो वै बर्हिः पशुभिरेवास्मै पशूनुपाकरोत्युपावीरसीत्युप ह्येषोऽवस्युप देवान् दैवीर्विशः प्रागुरिति दैवीर्वा एता विशो यत् पशवः पशूनेवास्मा उपाकरोति वह्नीरुशिज इत्यृत्विजो वै वह्नय उशिज ऋत्विग्भ्य एवैनानुपाकरोति बृहस्पते धारया वसूनीति ब्रह्म वै बृहस्पतिर्ब्रह्मणा प्रजाः प्रजायन्ते ब्रह्मणैवैनाः प्रजनयति देव त्वष्टर्वसु रणेति त्वष्टा वै रूपाणां विकर्ता सोऽस्मै रूपाणि विकरोति रेवती रमध्वमिति ब्रह्म वै बृहस्पतिः पशवो रेवतीर्ब्रह्मणैवास्मै पशून् यच्छत्यग्नेर्जनित्रमसीत्यग्नेर्ह्येतज्जनित्रं वृषणौ स्थ इति न ह्यमुष्काः प्रजाः प्रजायन्ते प्रजननायोर्वश्यस्यायुरसि पुरूरवा असीति माता वा उर्वश्यायुर्गर्भः पिता पुरूरवा रेतो घृतं यद् घृतेनारणी समनक्ति मिथुन एव रेतो दधाति गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमित्येतावन्ति वै छन्दाँसि च्छन्दोभी रेतो हितं प्रजायते छन्दोभिरेवास्मै रेतो हितं प्रजनयति ॥ दक्षिणा वर्तयत्येषा वा आदित्यस्य प्रजानिष्णुस्तनूस्तामेवानुप्रजायतेऽग्नी वा एतर्हि यजमानमभिसंधत्तो भवतं नस्समनसा इति समनसा एवैनौ करोति मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदस इत्यात्मनोऽहिंसायै शिवौ भवतमद्य न इति शिवा एवैनौ कुरुते रक्षसां वा एतेऽनवजयाय परिधीयन्ते यत् परिधयो यदुपर्युपरि प्रहरेद्रक्षोभ्यस्तीर्थं कुर्यात् संधिना वा प्रहरत्यग्रेण वा तीर्थेनैव स्रुवेण जुहोति संजग्मानाभ्यामेवाभ्यां भागधेयमपिदधाति ॥७॥ १८–२१

सावित्रीमन्वाह सवितृप्रसूत एवैनं प्रजनयत्येकदेवत्यामन्वाहैकधैवैनं प्रजनयति यद् द्विदेवत्यामनुब्रूयाद्भ्रातृव्यमस्मै द्वितीयं जनयेद् द्यावापृथिव्यामन्वाह प्रजानां प्रजातानां परिगृहीत्यै न धूमवतीमनुब्रूयादिन्द्रो वै यद्वृत्रमहँस्तस्य यत्र यत्र व्यृद्धमासीत् ततो धूम उदायत व्यृद्धाद्वा एष जातो व्यर्धुकमस्मै भवति यदि मथ्यमानो न जायेत रक्षोघ्नीमनुब्रूयाद्रक्षसामपहत्या अनवानमनुब्रूयादवानं वा अनु यज्ञं रक्षाँसि जिघाँसन्ति रक्षोभ्य एवातीर्थं करोति गायत्रीं ब्राह्मणस्यानुब्रूयाद्गायत्रो

[८] मै. ३,९,५-६ (१५-१६)। कपि. ४१,६। वा. ६,८—१०। काण्व. ६,९-११]

हि ब्राह्मणस्त्रिष्टुभं राजन्यस्य त्रैष्टुभो हि राजन्यो जगतीं वैश्यस्य जागतो हि वैश्यो यथाछन्दसमेव॥ देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते सवितृप्रसूत एवैनां देवताभिरादत्त ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामीति यो वै यज्ञियो मेध्यस्स ऋतस्य पाशस्तेनैवैनमालभतेऽमुष्मै जुष्टमिति यस्या एव देवताया आलभते तस्या एव जुष्टं करोति धर्षा मानुषँ इति वज्रो वै यूपः पशवो मानुषा वज्रेणैवास्मै पशून् यच्छत्यृक्षो वा एष तष्टोऽमेध्यो यत् पशुं नियुनक्ति मेध्यमेवैनं यज्ञियं करोति॥ पुरस्ताद्धि पशवो मेधमुपतिष्ठन्ते देवता एतस्मिन् प्राणा यत् पुरस्तात् प्रत्यञ्चमाप्रीणन्ति देवतानामेवैनमर्धमाप्रीणन्त्यद्भ्यस्त्वौषधीभ्य इत्यद्भ्यो वा एष ओषधिभ्य आलभ्यते यत् पशुरद्भ्य एवैनमोषधिभ्यः प्रोक्षत्यनु त्वा माता मन्यतामनु पितेति पिता च ह्येतस्य माता चानुमन्तारा आपो वै सर्वा देवतास्सर्वदेवत्यः पशुस्सर्वाभिरेवैनं देवताभिस्समर्धयति बहु वा एषोऽमेध्यमयज्ञियं निगच्छति यत् पशुरापो मेध्या यज्ञिया यदद्भिः प्रोक्षति मेध्यमेवैनं यज्ञियं करोत्यपां पेरुरसीत्यप उपगृह्णाति यान्यन्तरतोऽवदानानि तानि तन्मेध्यानि करोति स्वात्तँ हव्यं देवेभ्यो घृतवदित्युरः प्रत्युपोक्षति यान्यधस्तादवदानानि तानि तन्मेध्यानि करोति सर्वत उपोक्षति सर्वत एवैनं मेधेन समर्धयति शिरो वा एतद्यज्ञस्य यदाघार आत्मा पशुर्यदाघारमाघार्य पशुं समनक्ति शिर एव यज्ञस्यात्मन् प्रतिदधाति सं ते वायुः प्राणेन गच्छतामिति वायुमेवास्य प्राणं गमयति सं यजत्रैरङ्गानीति देवता वै यजत्रा देवता एवास्याङ्गानि गमयति सं यज्ञपतिराशिषेत्याशिषैव यजमानँ समर्धयति॥८॥ २२-२४

ऋत्विजो वृणीते छन्दाँसि वा ऋत्विजश्छन्दाँस्येव तद्वृणीते तैरस्य वृतैर्युक्तैर्वषट्काराः पुरो युज्यन्ते होतारं वृणीते जगतीं तच्छन्दसां वृणीतेऽग्निधं वृणीते पङ्क्तिं तच्छन्दसां वृणीतेऽध्वर्यूं वृणीतेऽतिच्छन्दसं तच्छन्दसां वृणीतेऽन्तरा होतारं चाध्वर्यूं चाग्निधं वृणीते तस्मादग्निर्मध्यत ओषधीः प्रविष्टो यदुत्तमस्संयजति तस्मादुपरिष्टान्मथ्यमानो जायते मैत्रावरुणं वृणीते गायत्रीं तच्छन्दसां वृणीते ब्राह्मणाच्छँसिनं वृणीते त्रिष्टुभं तच्छन्दसां वृणीते पोतारं वृणीत उष्णिहं तच्छन्दसां वृणीते नेष्टारं वृणीते ककुभं तच्छन्दसां वृणीते॥ पश्चाजमिव वा एतच्छन्दो यदनुष्टुप् पश्चाजेवैषा होत्रा यदच्छावाक्या तस्मादच्छावाकमुपैव ह्वयन्ते न वृणतेऽथैता आप्रियः प्रजापतिः प्रजास्सृष्ट्वा स रिरिचान इवामन्यत स एता आप्रीरपश्यत् ताभिरात्मानमाप्रीणीत यज्ञः प्रजापतिर्यज्ञात्मा यजमानो यदेताः पूर्वार्धे यज्ञस्य क्रियन्ते मुखत एव यजमानमाप्रीणाति प्रयाजान् यजति प्राणा वै प्रयाजाः प्राणानेव तत् प्रयजति तत् प्रयाजानां प्रयाजत्वमनवानमाप्रीणीयाद्यं कामयेत सर्वमायुरियादिति प्राणा वै प्रयाजा अविच्छिन्नानेवास्मिन् प्राणान् प्रतिदधाति सर्वमायुरेत्यात्मा वै पशोर्वपात्मा

[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]
[९] मै. ३,९,८ (१८-२०)। कपि. ४१,७। तै. सं. ६,३,७,५।

यजमानस्याप्रीर्यदुत्तमाप्रीर्वपां परिशय आत्मैवात्मानं परिशये यज्ञस्य संतत्या अविच्छेदायैकादश प्रयाजा एकादशानुयाजा एकादशोपयज एतावतीर्वै देवतास्सर्वदेवत्यः पशुस्सर्वाभिरेवैनं देवताभिस्समर्धयति त्रयस्त्रिंशद्वै देवतास्सोमपास्त्रयस्त्रिंशदसोमपा अष्टौ वसव एकादश रुद्रा द्वादशादित्या वषट्कारश्च प्रजापतिश्च ते सोमपाः प्रयाजा अनुयाजा उपयजस्तेऽसोमपास्तस्मात् ते बहिर्यज्ञं क्रियन्ते सोमेन वै तद्देवान् सोमपान् प्रीणाति पशुनासोमपाँस्तेऽस्योभये प्रीता यज्ञे भवन्त्येतद्ध वा उवाच श्यापर्णस्सायकायनोऽपाढं कैशिनं यत्रैनमदस्सोमाभ्रयति यदि वै मा सोमाभ्रेष्यस्युभयैर्मा देवैस्सह नेष्यसि सोमपैश्चासोमपैश्च विदेवस्ते यज्ञोऽवहास्यतेऽथो यग्रश्चं मा नेष्यान्ति ततस्त्वामीत्य ज्यास्यन्तीति ते मीमाँसित्वेतो नो भयं नास्तीति दक्षिणा प्रत्यञ्चं निन्युस्ततः कुन्तयः पञ्चालानभीत्य जिनान्ति य एवंविदँ सोमाभ्रयत्युभयैरेनं देवैस्सह नयति सोमपैश्चासोमपैश्च विदेवोऽस्य यज्ञोऽवहीयतेऽथो यग्रश्चमेनं नयन्ति तत एनमभीत्य जिनान्ति॥९॥ २५-२६

देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत ततो देवा एतमुपाँशुमपश्यँस्त एतस्मिन् यज्ञँ सँस्थाप्यमपश्यँस्तस्मिन्नेव यज्ञँ समस्थापयन्नष्टौ कृत्वोऽभ्यषुण्वन् गायत्रीं तच्छन्द आप्नुवन्नेकादश कृत्वस्त्रिष्टुभं तद् द्वादश कृत्वो जगतीं तत् त्रिर्व्यगृह्णन् सवनान्येव तदाप्नुवँस्ते देवा यावानेव यज्ञस्तं परिगृह्योपोदतिष्ठन् होतुं तेऽसुरा अपश्यञ्जुहुति वै देवा इति तान् वज्रमुद्यत्याभ्यपतँस्तान् देवा अन्तर्यामेनान्तरदधँतेभ्यो लोकेभ्यस्ततो देवा अभवन् परासुरा अभवन् यस्यैवं विदुष उपाँशुं जुहुति यश्चैवं विद्वाञ्जुहोत्येभ्य एव लोकेभ्यो भ्रातृव्यमन्तर्धत्ते भवत्यात्मना परास्य भ्रातृव्यो भवत्यथ ह स्माहारुण औपवेशिः किमु स यजेत य उपाँशौ यज्ञँ सँस्थाप्यं न विद्यादित्यष्टौ कृत्वोऽभिषुणोति गायत्रीं तच्छन्द आप्नोत्येकादश कृत्वस्त्रिष्टुभं तद् द्वादश कृत्वो जगतीं तत् त्रिर्विगृह्णाति सवनान्येव तदाप्नोत्युपाँशा एवैवद्यज्ञस्सँस्थाप्यते न सँस्थितेनारिष्टेनाघात्येन प्रचरत्यष्टा अष्टा अभिषुणुयाद्ब्रह्मवर्चसकामस्याष्टाक्षरा गायत्री गायत्रीमेव यज्ञमुखेऽधि वियातयति गायत्र्यामेवैतत् तेजसि स्वे योनौ स्वर्गे लोके यज्ञमुखं तायते मुख्यो भवति य एवं वेद नोपयामगृहीतोऽसीति ब्रूयादियं वा उपयामोऽनया प्राणानपिहन्यान्न पवित्रं वितन्वन्त्यन्तरिक्षं वै पवित्रमन्तरिक्षेण प्राणान् परिगृह्णीयात् प्रमीयेतायं वाव यः पवते स प्राणस्तस्येदमपग्राहं प्राणिमो यन्नोपयामगृहीतोऽसीत्याह न पवित्रं वितन्वन्ति तस्मादयमपरिगृहीतः काममित्थं चेत्थं च पवते तस्मात् कामं प्राणिमः प्राणपवित्रो वा उपाँशुः प्राणैरेवैनं पावयति षडँशून् परि-

[१०] मै. ४,५,५,६ (१४-१९)। कपि. ४१,८। वा. ७,४,८-९,११-१२,१६,२०,२१,२५,३०-४०; ८,१,७-९,११, ३३-३५,३८-४१,४४-४७; १९,८; २०,३३; २३,२,४। काण्व. ३,५०; ७,४,७-८; १०-११,१५,२१,२४, २७,३०—४०; ८,६—८,११,१४—१६,१९-२९; ११,७; १२,१८; १५,२,४। तै. सं. ६,४,६।

गृह्णाति तस्मात् षट् प्राणा द्वन्द्वं पावयति तस्मात् प्राणा द्वन्द्वमुपाँशुसवनादुपाँशुं निगृह्णाति प्राणो वा उपाँशुसवनः प्राण उपाँशुः प्राणादेव प्राणं निगृह्णात्युत्तर उपाँशुसवनो भवत्यधरेऽँशवः प्राणो वा २७
उपाँशुसवनः प्रजा अँशवः प्रजास्वेवं प्राणं दधाति तस्मात् प्राण उत्तमः॥१०॥ २८

ऋत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वर्धन् सुरेक्णाः। मर्त आनाश सुवृक्तिम्॥ २९
इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिस्सीद। वीहि शूर पुरोडाशम्॥ ३०
उप नस्सूनवो गिरश्शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः॥ ३१
ता नश्शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु॥ ३२
बृहस्पते जुषस्व नो अग्न आयाहि वीतय एन्द्र सानसिं रयिम्॥
आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः। ३३
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवे दिवे॥ ३४
आ नो मित्रावरुणा॥
आ विबाध्या परिरापस्तमाँसि च ज्योतिष्मन्तं रथमृतस्य तिष्ठसि। ३५
बृहस्पते भीममभिमित्रदम्भनं रक्षोहणं गोत्रभिदँ स्वर्विदम्॥ ३६
पञ्च व्युष्टीः॥
सखे सखायमभ्यावववृत्स्वाशुर्न चक्रं रथ्येऽवरोध्यास्मभ्यं दस्म रँह्या।
अग्ने मृडीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु। ३७
तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि॥
अग्निं होतारं मन्ये दास्वन्तं वसुँ सूनुँ सहसो जातवेदसं विप्रं न जातवेदसम्।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। ३८
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः॥११॥

[११] मै. २,१३,५५,८२। ४,१०,३७; ११,६३,६५, १२,६५; १४,१६६। वा. ११,४६; १५,४७, २५,१४; ३३,७७। काण्व. १२,४७; १६,६९; २७,१८; ३२,७७। [ऋत्वा दा अस्तु०। ऋ. ६,१६,२६; तै. ब्रा. २,४,६,२ : नि. ४,१९। उप नस्सूनवो गिर०। ऋ. ६,५२,९; सा. १५९५; तै. सं. २,४,१४,५। ता नश्शक्तं पार्थिवस्य०। ऋ. ५,६८,३; सा. ११४५,१४६५। बृहस्पते जुषस्व नो०। ऋ. ३,६२,४; तै. सं. १,८,२२,२। अग्न आयाहि वीतये०। ऋ. ६,१६,१०; सा. १,६६०; तै. सं. २,५,७,३; ८,१; तै. ब्रा. ३,५,२,१। आ नो भद्राः क्रतवो०। ऋ. १,८९, १; नि. ४,१९। आ नो मित्रावरुणा०। ऋ. ३,६२,१६; ७,६५,४; सा. २२०, ६६३; तै. सं. १,८,२२,३; तै. ब्रा. २,८,६,७। आ विबाध्या परिराप०। ऋ. २,२३,३। सखे सखायमभ्या०। ऋ. ४,१,३। अग्निं होतारं मन्ये०। ऋ. १,१२७,१; सा. ४६५, १८१३; अथर्व. २०,६७,३; तै. सं. ४,४,४,८; नि. ६,८]

द्रष्ट्रे नम उपद्रष्ट्रे नमोऽनुद्रष्ट्रे नमः ख्यात्रे नम उपख्यात्रे नमोऽनुख्यात्रे नमश्शृण्वते नम उपशृण्वते नमस्सते नमोऽसते नमो जाताय नमो जनिष्यमाणाय नमो भूताय नमो भविष्यते नमश्चक्षुषे नमश्श्रोत्राय नमो मनसे नमो वाचे नमो ब्रह्मणे नमश्श्रान्ताय नमस्तपसे नमः॥१२॥
३९
[१९२१]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां धिष्ण्यं नाम षड्विंशं स्थानकं संपूर्णम्॥२६॥

अथ सप्तविंशं स्थानकम्।

वाचस्पतिः।

वाचस्पतये पवस्वेति वाच आधिपत्याय पवस्वेत्येवैतदाह तस्मादेतया कामं वदामश्च प्र चानिमः प्रजापतिर्वा इदमासीत् तस्य वाग्द्वितीयासीत् तां मिथुनँ समभवत् सा गर्भमधत्त सास्मादपाक्रामत् सेमाः प्रजा असृजत सा प्रजापतिमेव पुनः प्राविशद्वाचस्पतये पवस्वेत्येतस्मादेव मिथुनात् प्रजया च पशुभिश्च प्रजायते वाचस्पतये पवस्वेति ब्रह्म वै वाचस्पतिर्ब्रह्मणैवैनं पावयति वृष्णो अँशुभ्यां गभस्तिपूत इतीन्द्रो वै वृषा तस्य हस्तौ गभस्ती ताभ्यामेवैनं पावयति॥ देवो देवानां पवित्रमसीति देवताभ्य एवैनं निदिशति मधुमतीर्न इषस्सोमेन हि सोमं पुनन्ति येषां भागोऽसीति देवताभ्य एवैनं निदिशति मधुमतीर्न इषस्कृधीति देवता वा इषो देवेभ्य एवैनं मधुमन्तं करोति स्वंकृतोऽसीति प्राणमेव स्वं कुरुत उर्वन्तरिक्षं वीहीत्यन्तरिक्षदेवत्यो ह्येष एतर्हि विश्वेभ्य इन्द्रियेभ्य इति देवेषु चैव मनुष्येषु च प्राणं दधाति मनस्त्वाष्ट्विति मनसा हि प्राणो धृतस्स्वाहा त्वा सुभो सूर्यायेति सोमो वै सुभूरमुष्मिन्नादित्ये देवानां प्रियास्तन्वस्ता एव तर्पयत्यथो स्वाहाकारेणैवास्मिन्नाहुतीश्श्रीणाति॥ सर्वहुतं जुहोति तस्मात् पराङ् प्राण ऋजुस्तिष्ठञ्जुहोति पुरुषेणैव यज्ञस्संमितः प्राणापानाभ्यां पुरुषस्संततः प्राणापानयोरसँशराय नाध्वर्युर्विहूर्छति य एवं वेदोत्तरादुपाँशुं जुहुयाद्दक्षिणतोऽन्तर्यामं देवरथो वा एष यद्यज्ञस्तस्यैतौ रश्मी यदुपाँश्वन्तर्यामौ देवरथस्यैव पुरस्ताद्रश्मी विहरति संवत्सरस्य क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्यै तामनुकृतिं मनुष्यरथस्य रश्मी विह्रियेते ऋजू होतव्यौ प्राणानामव्यतिहारायोध्वमुन्मृज्याद्यदि कामयेत न वर्षेदित्यमुत्रैव वृष्टिं परिगृह्णात्यवाचीनमवमृज्याद्यदि कामयेत वर्षेदिति या वा इतराहुतिरुद्यते सामुतो वृष्टिं च्यावयति

[१] मै. ४,५,५ (१४)। कपि. ४२,१। वा. ७,१—३,६; ८,४०, ९,३०,३७। काण्व. ७,१-३,५। ८,३१, १०,३९; ११,४। तै. सं. १,४,५]

सौम्यैवाहुत्या दिवो वृष्टिं निनयति ॥ देवेभ्यस्त्वा मरीचिपेभ्य इति परिधौ निमार्ष्टि प्राणा वै देवा मरीचिपास्तानेव प्रीणात्यथो परिधीनामेवैष सोमपीथोऽन्तरतो निमार्ष्टि तस्मात् प्राणा अन्तरतो वि या एतद्यज्ञं छिनत्ति यत् पुराभिषोतोस्सँस्थां गमयति यदँशूननभिषुतानपिसृजति यज्ञस्य संतत्या अविच्छेदाय षडँशूनपिसृजति तस्मात् षट् प्राणा द्वन्द्वं तस्मात् प्राणा द्वन्द्वमार्द्रास्सन्तोऽसँश्लिष्टा भवन्ति तस्मात् प्राणा आर्द्रास्सन्तोऽसँश्लिष्टा यो ह वै सोमस्य सोमपीथं वेद न सोमपीथाच्छिद्यते नास्य प्रजा यत् ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेत्येष वै सोमस्य सोमपीथस्सोममेवैतत् सोमस्य तर्पयति न सोमपीथाच्छिद्यते नास्य प्रजा य एवं वेद यद्यभिचरेत् ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद इत्याददीत प्रहर्षिणो मदिरस्य मदे वृषासा अस्त्वय त्वा होष्यामीति वृषैवैनं करोति सर्वदेवत्यो वै सोमस्सर्वा वा एतर्ह्येतस्मिन् देवता आशँसन्ते मह्यँ होष्यति मह्यँ होष्यतीति देवता एवैनमाहुतिमभीप्सन्तीरुदहन्त्या तमितोस्तिष्ठति प्राणस्यैवास्यान्तं गच्छति यद्यजुर्वदति देवेभ्य एवैनमावृश्चत्युपाँशुनाभिचरति प्राणो वा उपाँशुः प्राणेनैवास्य प्राणमभिचरति ताजक् प्रधन्वति ॥१॥ १-५

देवा वै सोमायाभिषुताय पात्रं नाविन्दन्त येनेमं विगृह्णीमहीति त इमामेव देवपात्रमपश्यँस्तमनयैव व्यगृह्णतैवं वाव देवपात्रमस्यास्थाली: कुर्वन्त्यस्या वायव्यानि प्र श्रेयसः पात्रमाप्नोति य एवं वेद ब्राह्मणं पात्रेण मीमाँसेत तद्वतमुपयामगृहीतोऽसीतीयं वा उपयामो यदत्र स्कन्दत्यनया तद्यतं नास्य सोमस्स्कन्दति य एवं वेदोपयामगृहीतोऽसीत्युपयामगृहीता ह्यतस्सोमा भवन्ति पवित्रं वितन्वन्ति पवित्रपूता ह्यतस्सोमा भवन्ति स्वर्भानुर्वा आसुरस्सूर्यं तमसाविध्यत् स न व्यरोचत तस्माद्देवास्तमोऽपालुम्पन् यत् प्रथममपालुम्पन् साविष्कृष्णाभवद्यद् द्वितीयँ सा फल्गुर्यत् तृतीयँ सा बलक्षी ॥ तस्मात् तस्याः पवित्रं कुर्वन्त्यादित्यस्यैवैनं तन्वा पावयत्यन्तर्यच्छ मघवन् पाहि सोममित्येभ्य एव लोकेभ्यो भ्रातृव्यमन्तर्यच्छ मधुमतीर्न इषस्कृधीति देवता वा इषो देवेभ्य एवैनं मधुमन्तं करोति स्वंकृतोऽसीत्यपानमेव स्वं कुरुत उर्वन्तरिक्षं वीहीत्यन्तरिक्षदेवत्यो ह्येष एतर्हि विश्वेभ्य इन्द्रियेभ्य इति देवेषु चैव मनस्येषु चापानं दधाति मनस्त्वाष्टिति मनसा ह्यपानो धृतस्स्वाहा त्वा सुभो सूर्यायेति सोमो वै सुभूरसुष्मित्रादित्ये देवानां प्रियास्तन्वस्ता एव तर्पयत्यथो स्वाहाकारेणैवास्मिन्नाहुतीश्श्रीणाति ॥ यदि कुर्यादन्तर्यामपात्रमूर्ध्वं सोमोऽन्तरिक्षमन्तर्यामोऽन्तरिक्ष एव रसं दधात्यूर्ध्वं पशुपुरांश्चन्तर्यामौ वै पशवोऽनुप्रजायन्त इतरान् ग्रहानन्वन्याः प्रजास्ता असन्नौ जुहोति तस्मादसन्नाः पशवस्सदर्दि प्रजायन्ते तस्मात् सद्यो जाताः पशवः प्रतितिष्ठन्ति संवत्सरे पुरुषः

[देवस्य त्वा सवितुः । अथर्व. १९,५१,२; तै. आ. ८,७]
[१] मै. ४,५,६—७ (१९—२२) । कपि. ४२,२ । श. ७,१—६ । काण्व. ७,१,५ । तै. सं. ६,४,६ ।

प्राणाय त्वेत्युपाँशुपात्रँ सादयति व्यानाय त्वेत्युपाँशुसवनमपानाय त्वेत्यन्तर्यामपात्रं व्यानेन वा इमौ प्राणापानौ विधृतौ प्राङ् च प्रत्यङ् च न क्षीयेते नायमूर्ध्व उत्क्रामति नेतरोऽवाङ् संक्रामति व्यानमेव मध्यतो दधाति प्राणापानयोर्विधृत्यै ॥ शुक्रमुपाँशुरेतोऽन्तर्याम इन्द्रियं प्रजास्सोमपीथ एतौ ह स्म वै तद्रजनः कौणेयो ग्रहौ धयन्मन्यते यच्छुक्रं धयति यदेतौ पूर्वार्धे यज्ञस्य क्रियेते मिथुनमेव यज्ञमुखे दधाति प्रजननाय तस्मादाहुः प्राणापानौ वै प्रजा अनुप्रजायन्त इति पुरुषेण वै यज्ञस्संमितः प्राणापानाभ्यां पुरुषस्संततो यदेते प्रातस्सन्ने आ तृतीयसवनाच्छयाते प्राणापानाभ्यामेव यज्ञँ संतनोति तस्मात् पुरुषात् सुप्तात् प्राणापानौ नापक्रामतस्ते पुनस्तृतीयसवने प्रयुज्येते तस्मात् सुप्त्वा प्रबुध्यते तस्माद्वा अवाञ्चौ प्राणौ ॥२॥ ६-९

प्राण उपाँशुरपानोऽन्तर्यामो वागैन्द्रवायवो यदुपाँश्वन्तर्यामा ऐन्द्रवायवोऽनुगृह्यते प्राणापानयोरेव वाचमुपरिष्टाद्दधाति तस्मात् प्राण्यापान्य पुरुषो वाचं वदति देवा वै प्रातस्सवनमुद्यमं नाशक्नुवँस्तृतीयसवने तर्हि वायुरासीत् तं देवाः प्राञ्चं पर्यहरन् प्राणो वायुरैन्द्रो यज्ञो यदैन्द्रवायवः प्रातस्सवने गृह्यते प्राणेनैव यज्ञं परिगृह्य पुरस्तादुद्यच्छन्ते वायव्यो वा एष पुरासीत् सा वाक् सृष्टा न व्यावर्तताध्वनदेव स इन्द्रोऽब्रवीन्मह्यमत्रापिगृह्यतामहमेतां व्यावर्तयिष्यामीति तत एतमैन्द्रवायवमगृह्णन् सेयं वागिन्द्रियेण व्यावृत्ता वदति स एष सोमो वाचो व्यावृत्त्यै गृह्यते व्यावृत्तं पापीयसा वदति य एवं वेद प्रजानाँ सृष्टानां तौ समभिधेतां ता न प्राण्यापानमशक्नुवन्नापान्य प्राणितुं स इन्द्रोऽब्रवीन्मह्यमत्रापि गृह्यतामहमेतौ प्राणापानौ विदधिष्य इति तत एतमैन्द्रवायवमगृह्णन् वायव इन्द्रवायुभ्यामनुब्रूहीतीन्द्रं मध्ये करोति वायुमभितः प्राणापानयोर्विधृत्या इन्द्रियं वै व्यानो व्यानेन वा इमौ प्राणापानौ विधृतौ प्राङ् च प्रत्यङ् च न क्षीयेते नायमूर्ध्व उत्क्रामति नेतरोऽवाक् संक्रामति व्यानमेव मध्यतो दधाति प्राणापानयोर्विधृत्यै ॥ त्रिर्विगृह्णाति तस्मात् त्रिर्वाग्वदति शनकैरुच्चैरथ सूर्ध्वं देवा वै वायुमब्रुवँस्त्वया मुखेन वृत्रँ हनामेति सोऽब्रवीद्वार्यं वृणै मदग्रा एव ग्रहा गृह्यान्ता इति तस्माद्वाय्वग्रा ग्रहा गृह्यन्ते वार्यवृतो ह्यस्य स इन्द्रोऽब्रवीन्मह्यमत्रापि गृह्यतामथ त्वै स्तरिष्यामह इति त एतमैन्द्रवायवमगृह्णँस्ततो वृत्रमघ्नन् स एष सोमो वार्त्रघ्नो विजित्यै गृह्यते सोमो वै वृत्रस्स हतोऽपूयत् ते देवा वायुमब्रुवन्निमं नो विवाहीति सोऽब्रवीद्वार्यं वृणै मद्देवत्यान्येव पात्राण्युच्यान्ता इति तं व्यवात् तस्माद्गन्धमपाहन् स एष पशौ प्रमीते तस्मात् तस्मान्नापिगृह्यँ सोमस्य हि स राज्ञो गन्धो नैनं राजयक्ष्मो विन्दति य एवं वेद तस्माच्छुक्तं विषजन्ति तस्मादपि तृतीयं वायोः पात्रमथ वायव्यान्युच्यन्ते वार्यवृतानि ह्यस्य ॥३॥ १०-११

[३] मै. ४,५,८ (२३) । कपि. ४२,३ । तै. सं. ६,४,७—८ ।

नाना वा एतौ पुरा सोमा अगृह्णन् मित्राय वरुणाय च ताः प्रजा अशान्ता अविधृता अन्यान्यां मर्तीरचरँस्ते देवा अब्रुवन् सहेमं गृह्णाम मित्रेण वरुणँ शमयाम वरुणेन मित्रमिति ततो वा एतँ सहागृह्णँस्ते मित्रेणैव वरुणमशमयन् वरुणेन मित्रं ता इमाः प्रजा मित्रेण शान्ता वरुणेन विधृता यन्मैत्रावरुणो गृह्यते क्लृप्त्या एव विधृत्यै देवा वै मित्रमब्रुवन् वृत्रँ हनामेति नेत्यब्रवीन्मित्रोऽहमस्मि न हिनस्मीति हनामेवेत्यब्रुवन् सोऽब्रवीद्वार्यं वृणै पयसा मे सोमं श्रीणानिति तस्मात् पयसा मैत्रावरुणँ श्रीणन्ति वार्यवृतं ह्यस्य ततो वृत्रमघ्नँस्तस्माद्राजन्येनाध्यक्षेण वैश्यं घ्नन्ति तं मित्रस्सन्नृतमकरिति वरुणोऽगृह्णादप पशवोऽक्रामन् स मित्रो वरुण एवानाथत सोऽब्रवीत् सह ना एष सोमो गृह्यतामथ त्वातो मोक्ष्यामीति ततो वा एतँ सहागृह्णँस्तेनैनं वरुणादमुञ्चन्मैत्रावरुणो गृह्यते निर्वरुणत्वाय पशवो वै पयः पशूनाँ हि पयो यत् पयसा मैत्रावरुणँ श्रीणाति पशुभिरेवैनँ समर्धयत्यसोमो वा एष इत्याहुरोषधय एताः पय एव सोम इति यत् पयसा मैत्रावरुणँ श्रीणाति सोममेवैनं करोत्यथो यदेवास्याभिषुण्वन्तो घ्नन्ति यत् क्रूरं कुर्वन्ति तच्छमयति ॥ शृतेन श्रीणाति मैत्रं वै शृतं वारुणं प्रतिधुक् स्वेनैवैनौ भागधेयेन समर्धयति मैत्रो ब्राह्मणो वारुणो राजन्यो यदेष मैत्रावरुणो गृह्यते तस्माद्ब्रह्मपुरोहितं क्षत्रं यज्ञस्य वै शिरोऽच्छिद्यताथ तदश्विना असोमपौ भिषजौ देवानामास्तां तौ देवा अब्रुवन् भिषजौ वै स्थ इदं यज्ञस्य शिरः परिधत्तमिति ता अब्रुवतां वार्यं वृणावहै सोमपीथो नौ देवेष्वस्तु ग्रहो नौ गृह्यतामिति तौ देवा बहिष्पवमानेन पावयित्वा ताभ्यां शुचिभ्यां मेध्याभ्यां भूताभ्यां ग्रहमगृह्णँस्तस्मात् स्तुते बहिष्पवमान आश्विनो गृह्यते तस्माद्ब्राह्मणो बहिष्पवमानमासीत पवित्रं हि तत् तस्माद्यं द्विष्यात् तं बहिष्पवमानात् परिबाधेत पवित्रादेवैनं परिबाधते तौ देवानुपावर्तमानौ तयोर्या भिषज्या तनूरासीद् तां त्रेधा विन्यदधातामग्नौ तृतीयं ब्राह्मणे तृतीयमप्सु तृतीयं यं कामयेतामयाविनं जीवेदित्यपैरन्वे ब्राह्मणाय प्रोच्यापः परिब्रूयादेतावद्वै भेषजं यावदेव भेषजं तदस्मै करोति जीवति सर्वमायुरेति न पुरायुषः प्रमीयते ॥४॥ १२-१३

प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते तस्मात् प्राणा एकनामानस्ते द्विपात्रा हूयन्ते तस्मात् प्राणा द्वन्द्वं येन यजुषा प्रयच्छति तेन प्रतिगृह्णाति प्राणानाँ संतत्यै प्रतिष्ठात्यै नानुवषट् करोति यदनुवषट् कुर्यात् प्राणान् सँस्थापयेत् प्रमीयेत यजमानुयजति तस्मात् प्राणा असँस्थिता आ च परा च चरन्ति द्विदेवत्याः पूर्वे भक्षयितव्या३ इडोपहूया३ इति मीमाँसन्ते ॥ इडैव पूर्वोपहूया यज्ञस्य यथापूर्वत्वाय प्राणा वै द्विदेवत्याः पशव इडा यदेवं कुर्यात् पशुभिः प्राणानन्तरियात् प्रमीयेत द्विदेवत्या एव पूर्वे भक्षयितव्या अन्तरे वै प्राणाः परे पशवः प्राणानेवात्मन् धित्वा पशूनुपहूते ॥

[४] मै. ४,५,८; ६,२ (२३—२४; ८) । कपि. ४२,४ । तै. सं. ६,४,७—९ ।
[५] मै. ४,६,१—२ (१—८) । कपि. ४२,५ । श. ९,२०; १०,१८ । काण्व. ११,१०,२६ । तै. सं. ६,४,९ ।

ये वा इमे पुरुषे प्राणास्ते द्विदेवत्या वाक् च प्राणश्चैन्द्रवायवश्चक्षुश्च मनश्च मैत्रावरुणश्श्रोत्रं चात्मा चाश्विनोऽग्निर्होतासीत् स वषट्कृत्याताम्यदाहितास्येडासीत् तस्य देवा द्विदेवत्यैरन्वैन्दन् प्राणा वै द्विदेवत्याः प्राणैरेवैनं तदभ्यधिन्वन् स इडोपहूतेति प्रत्यपद्यत प्राणा वै द्विदेवत्या यद् द्विदेवत्यान् भक्षयति प्राणैरेवात्मानमभिधिनोति तस्माद् द्विदेवत्या एव पूर्वे भक्षयितव्यास्ते हि पूर्वे भक्षिता आश्विनो दशमो गृह्यते ॥ दश हि प्राणास्तं तृतीयं जुहोति शिर एव प्राणानभिसँहरति समन्तं परिहृत्य भक्षयति श्रोत्रं वा आश्विनस्तस्मात् पुरुषस्सर्वतश्शृणोति रक्षाँसि वा एतत् पात्रँ सचन्ते यद्यज्ञे रिक्तमविमुक्तं भवति पुरोडाशमैन्द्रवायवस्य पात्रेऽवदधाति पयस्यां मैत्रावरुणस्य धानामाश्विनस्य रक्षसामपहत्यै तस्मात् प्राणा अदस्ता अरिक्ता दक्षिणस्य हविर्धानस्याधस्तात् सादयत्येतद्वा एतयोरग्निमद्धीर्यावद्यदेवाग्निमद्धीर्यावत् तस्मिन् सादयति पुरुषेण वै यज्ञस्संमितः प्राणापानैः पुरुषस्संततो यदेतानि प्रातस्सन्नान्या तृतीयसवनाच्छेरे प्राणापानैरेवं यज्ञँ संतनोत्येकया च दशभिश्चेत्येतां प्रतिविमुञ्चति यदर्वाग्विमुञ्चेत् प्राणान् विच्छिन्द्याद्यत् परः प्राणानतिरेचयेत् प्रमीयेत प्राणो वै वायुः प्राणा द्विदेवत्याः प्राणेनैव प्राणान् विमुञ्चति बहु वायव्यं प्रातस्सवने शस्यत एकैव तृतीयसवने तस्माद्बहवो मुखप्राणा एकोऽवाङ्यदि कामयेतावगतमपरुन्ध्युरपरुद्धोऽवगच्छेदितीदमहममुमामुष्यायणममुष्याः पुत्रममुष्या विश उद्दूहामीत्यध्वर्योः पात्रमुद्दूहेदिदमहममुमामुष्यायणममुष्याः पुत्रममुष्यां विश्यभ्यूहामीति प्रतिप्रस्थातुः पात्रमभ्यूहेदध्वर्युर्वै श्रेयान् पापीयानपरुद्धोऽवगतमेवापरुणद्ध्यपरुद्धमवगमयति ताजग्व्यवगच्छेते व्यत्यूहेत् पात्राणि यदि कामयेत पापवसीयसँ स्यादित्यध्वर्योः पात्राणां लोके प्रतिप्रस्थातुः पात्राणि सादयेत् प्रतिप्रस्थातुः पात्राणां लोकेऽध्वर्योः पात्राणि सादयेदध्वर्युर्वै श्रेयान् पापीयान् प्रतिप्रस्थाता पापीयाँसमेव वसीयसो लोके सादयति वसीयाँसं पापीयसः पापवसीयसं करोत्येतद्ध वै विपूजनस्सौराकिः पापवसीयसं विदांचकार ॥५॥ १४-१७

यदि कामयेत यजमानादयजमानं भ्रातृव्यं पूर्वं कुर्यामिति प्रतिप्रस्थाता पूर्वो गृहीत्वा स पूर्वो निरूहेद्यजमानो वै श्रेयान् पापीयानस्माद्भ्रातृव्योऽयजमानो भ्रातृव्यमेवास्मात् पूर्वं करोत्यध्वर्यालोके तिष्ठञ्जुहोत्यध्वर्युर्वै श्रेयान् पापीयान् प्रतिप्रस्थाता भ्रातृव्यमेवास्य लोकमभ्यारोहयत्यलोकमेनं करोति नयत्राश्रावयेदध्वर्युरप्रतिष्ठानस्स्यात्स्थानालम्भ्य पात्रमाश्रावयेदेतद्वा अध्वर्योस्स्वमस्वस्स्याद्यत्राग्र आहुतिं जुहोति तदुत्तरा जुहुयाद्यत्र वा अग्र आहुतिं जुहोति तद्देवताः परिविशन्ति यदन्यत्रा जुहुयाद्देवताभ्यस्समर्दं कुर्यात् साक्षादेव देवेभ्यो भागधेयँ संप्रयच्छति ॥ नाना वा एतौ पुराग्नी आस्तां पशोश्चाहवनीयश्च तस्मात् पुरा रुद्रः पशूनघातुक आसीत् पशवो वै पशवः पशवोऽश्वो

[६] मै. ४,६,२ (२,४,८) । कपि. ४१,६ ।

रुद्रोऽग्निर्यदाहुतीस्संसृजति रुद्राय पशूनपिदधात्यपशुर्भवति तस्मादिदानीं रुद्रः पशून् घातुको मध्येऽग्नेर्जुहुयादाज्याहुतीश्च पश्चाहुतीश्चाभितस्सोमाहुती रुद्रमेव पशुभिः परिवृणक्त्यघातुकस्तत्र रुद्रः पशून् भवति यत्रैवंविदध्वर्युर्भवति ॥६॥ १८-१९

आयुस्संधत्तं प्राणँ संधत्तमिति प्राणानेव संधत्तस्तस्मात् प्राणा द्वन्द्वँ संजग्माना दिवा पृथिव्येतीमानेव लोकान् समर्धयतो निरस्ता शण्डामर्कौ सह तेन यं द्विष्म इत्येतावान् वै यज्ञो यावच्छुक्रामन्थिना एतावती पृथिवी यावत्युत्तरवेदिरनृतँ शण्डामर्का अनृतं भ्रातृव्योऽनृतमेव भ्रातृव्यमेतावता यज्ञाच्च पृथिव्याश्च निर्भजतश्शुक्रस्याधिष्ठानमसि मन्थिनोऽधिष्ठानमसीति समिद्ध एव जुहुतोऽग्निर्वा आहुत्या अतिद्रवादविभेद्यच्छल्कौ प्रास्यत आहुत्या अनतिद्रवाय ॥ चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ यच्छल्कौ प्रास्यतश्चक्षुषोरेवान्तर्धत्तोऽप्रदाहाय तस्मा इन्द्राय सुतमाजुहोत तस्मै सूर्याय सुतमाजुहोतेति चक्षुषोर्व्यावृत्त्यै तस्मात् समानँ सच्चक्षुर्द्वेधा सर्वहुतौ जुहुतस्सर्वमेव प्रजासु चक्षुर्धत्तो यः पात्राणां ग्रहाणाँ सोमानां मिथुनं वेद तस्मादेव मिथुनात् प्रजायते स्थालीभिरन्यान् ग्रहान् गृह्णन्ति वायव्यैरन्याँस्तत्पात्राणां मिथुनँ श्रीणन्त्यन्यान् ग्रहान्नान्याँस्तद्ग्रहाणां मिथुनमाशीर्वन्तोऽन्ये सोमा भवन्ति नान्ये तत् सोमानां मिथुनं तस्मादेव मिथुनात् प्रजायते ॥७॥ २०-२१

देवाश्च वा असुराश्च संयत्ता आसन् बृहस्पतिर्देवानां पुरोहित आसीच्छण्डामर्का असुराणां ते न व्यजयन्त स इन्द्रोऽवेदुभये हि वै ब्रह्मण्वन्तस्स्मस्तन्न विजयामह इति ता उपामन्त्रयत अब्रुवतां वार्यं वृणावहै सोमपीथो नौ देवेष्वस्तु ग्रहौ नौ गृह्येतामिति ताभ्यामेता इन्द्रश्शुक्रामन्थिनौ प्रायच्छदात्मनस्सन्तौ तद्भागधेयमभ्यैतां तस्माद्राष्ट्रमपुरोहितं पराभावुकं तस्माद्भ्रातृव्यायानृतं वदेत् सोऽमन्यत यदिमा आभ्यामसुरब्रह्मास्याँ होष्यामि तदन्वसुरा आभविष्यन्ति यन्न होष्यामि तदन्वाभविष्यन्तीति ता आददानोऽपानुदतापनुत्ता शण्डामर्कौ सह तेन यं द्विष्म इति ततो देवा अभवन् परासुरा अभवन् यस्यैवं विदुषश्शुक्रामन्थिनौ जुह्वति यस्यैवं विद्वाँसौ जुहुतो भ्रातृव्यस्यापनुत्त्यै भवत्यात्मना परास्य भ्रातृव्यो भवति प्रजापतेर्वा अक्ष्यश्वयत् तस्य कनीनिका परापतत् सा विकङ्कतं प्राविशत् तस्मिन्नाध्रियत सा यवं प्राविशत् तस्मिन्नाध्रियत वैकङ्कतं मन्थिनः पात्रं भवति सक्तुभिश्श्रीणाति प्रजापतेरेव चक्षुसंभरति यजमानदेवत्यो वै शुक्रो भ्रातृव्यदेवत्यो मन्थी हिरण्येन शुक्रँ श्रीणाति तेजो वै हिरण्यं तेजसैव यजमानँ समर्धयति तस्मादन्यतरच्चक्षुषोस्तेजस्वितरं तस्मादहरेकरूपँ सक्तुभिर्मन्थिनँ श्रीणाति तेज एव भ्रातृव्यस्य विनयति

[७] मै. ४,६,३ (९—१५)। कपि. ४३,१। वा. ७,१२-१३,१७—१८। काण्व. ७,१२,१७। तै. सं. ६,४,१०।
[८] मै. ४,६,३ (९—१५)। कपि. ४३,१। वा. ७,१२—१३,१७—१८। काण्व. ७,१२,१७। तै. सं. ६,४,१०।
काठ० ३७

तस्माद्रात्री बहुरूपानभिध्वँसयन्नितराणि पात्राणि श्रीणीयाद्यदभिध्वँसयेदक्ष्यामयः प्रजा विन्देदन्धम्भावुको यजमानस्स्यात् प्रजापतेर्वा एते चक्षुषी यच्छुक्रामन्थिनौ यज्ञः प्रजापतिर्यत् प्राञ्चा उद्द्रुत्य जुहुतस्सवनमुखयोरेव चक्षुषी धत्तस्तस्माद् द्वे सवने शुक्रवती असौ वा आदित्यश्शुक्रश्चन्द्रमा मन्थी यदपिगृह्य प्राञ्चा उदद्रवतस्तस्मादेतौ प्राञ्चौ यन्तौ न पश्यन्ति यदनपिगृह्य पुरस्तात् प्रत्यञ्चौ तिष्ठन्तौ जुहुतस्तस्मात् प्रत्यञ्चौ यन्तौ पश्यन्ति ॥ प्राचीभिर्वा आहुतिभिर्देवा अन्यानसुरान् प्राणुदन्त प्रतीचीभिरन्यान् प्रत्यञ्चौ तिष्ठन्तौ शुक्रामन्थिनौ जुहुतः प्राचीरितरा आहुतयो हूयन्ते भ्रातृव्यस्य विनुत्त्यै न वा एतौ मनुष्याः प्रच्यवमर्हन्ति तुथोऽसि जनधाया देवास्त्वा शुक्रपाः प्रणयन्तु तुथोऽसि जनधाया देवास्त्वा मन्थिपाः प्रणयन्त्विति स्वयैवैनौ देवतया प्रणयति सुवीराः प्रजाः प्रजनयन् परीहि सुप्रजाः प्रजाः प्रजनयन् परीहीति वीरमेवात्रीषु प्रजासु धत्तो भूमानमाद्यासु तस्मादेतासु वीर आजायते तस्मादितरा अद्यमाना न क्षीयन्ते ॥ शुक्रं वा अन्वत्रीः प्रजाः प्रजायन्ते मन्थिनमाद्या अग्निः प्रजनयिता यदभितोऽग्निं विपरिद्रुत्यजुह्वत उभयीरेवैतदत्रीश्चाद्याश्च प्रजाः प्रजनयतोऽवरिफन्ता इयोत्तरवेदिं परीयातां सपर्वास्य सुप्रकाशो जायते प्रजापतेर्वा एषा नासिका यदुत्तरवेदिश्चक्षुषी शुक्रामन्थिनौ यज्ञः प्रजापतिर्यत् प्राञ्चा उद्द्रुत्य जुहुतो नासिकाया एव पुरस्ताच्चक्षुषी धत्त एतद्ध्येतस्याः पूर्वमभितस्तिष्ठन्तौ जुहुतस्तस्मान्नासिकामभितश्चक्षुषी अनाधृष्टासीति निगृह्णीतस्तस्मादक्षि धाने नीपतमम् ॥८॥ २२-२४

देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत तेऽसुरा भूयाँसश्श्रेयाँस आसन् कनीयाँसः पापीयाँस आनुजावरतरा इव देवास्ते देवा एतमाग्रायणमपश्यँस्तमगृह्णत तेनाग्रं पर्यायन् यदग्रं पर्यायँस्तदाग्रायणस्याग्रायणत्वं य आनुजावरस्स्यात् ॥ २५

विदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यँ सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ २६

इत्येतया पुरोरुचाग्रायणं गृहीतं भ्रातृव्यमेव वृक्त्वाग्रं पर्येति ॥ वाग्वै देवेभ्योऽपाक्रामद्यज्ञे भागधेयमिच्छमाना ते देवा एतावद्यज्ञस्य मनसातन्वत सान्तर्यन्ति मेत्याग्रायणं प्रतिन्यागच्छद्यदाग्रायणं गृहीत्वा वाचं विसृजते वाचमेव यज्ञ आगतां युनक्ति मृगस्येव वै यज्ञस्याभित्सार आत्मा यज्ञस्याग्रायणो यद्वाचं यच्छति यज्ञमेवाभित्सरति यद्विसृजते यज्ञमेव यत्वा वाचं विसृजते प्रजापतिर्वा आग्रायणः प्राजापत्या एत ऋत्विजस्त्रयो वृता युक्ता यज्ञे भवन्ति प्रस्तोतोद्गाता प्रतिहर्ता यद्धिङ्करोत्युद्गातॄनेव वृणीते तेऽस्य वृता युक्ता यज्ञे भवन्ति ॥ द्वयोर्धारयोः प्रातस्सवने गृह्णाति

[९] मै. ४,६,४ (१६-१८)। वा. ७,१९-२०; ३३,३९। काण्व. ७,२०-२१; ३२,५९। तै. ब्रा. ६,४,११।
[विदद्यदी सरमा०। ऋ. ३,३१,६। तै. ब्रा. २,५,८,१०]

तिसृणां मध्यन्दिने चतसृणां तृतीयसवने नव वै पुरुषे प्राणा आत्मा यज्ञस्याग्रायणः प्राणानेवात्मानमभिसंपादयते वि वा एतद्यज्ञं छिन्दन्ति यन्नाना सवनानि सँस्थापयन्त्यात्मा यज्ञस्याग्रायणो यदाग्रायणँ सवने सवनेऽभिगृह्णात्यात्मनैव यज्ञँ संतनोति ये देवा दिव्येकादश स्थेति त्रयस्त्रिंशद्देवता- भिरेव यज्ञँ संतनोति प्रजापतिर्वा आग्रायणो यत् प्रस्कन्दयति रेत एव दधाति यदुपगृह्णाति प्रैव भिरेव यज्ञँ संतनोति प्रजापतिर्वा आग्रायणो यत् प्रस्कन्दयति रेत एव दधाति यदुपगृह्णाति प्रैव जनयति स्थाल्या गृह्णाति सोऽविज्ञातो भवति येन होष्यन्तीति तस्माद्गर्भेणाविज्ञातेन भ्रूणहा स्थाल्या गृह्णाति वायव्येन जुहोति तस्मात् स्त्री निर्वीर्यानिर्वीर्यः पुमान् परा स्थालीमस्यन्ति न वायव्यं तस्मात् स्त्रियं जातां परास्यन्ति न पुमाँसं यदि ग्रह उपदस्येदाग्रायणाद्गृह्णीयाद्यद्याग्रायण उपदस्येद्ग्रहेभ्यो गृह्णीयात् पिता वा आग्रायणः पुत्रा ग्रहा यद्वै पुत्रस्योपदस्यति पितरँ स उपधावति स एष प्रायश्चित्त्या एव सोमो गृह्यते ब्रह्मवादिनो वदन्ति कस्माद्गायत्र्ययातयाम्न्यभिनिवर्ततँ सर्वाणि सवनानि वहतीति वत्सो वा एष गायत्र्या यदाग्रायणो यदाग्रायणँ सवने सवनेऽभि- गृह्णाति तस्माद्गायत्र्ययातयाम्न्यभिनिवर्ततँ सर्वाणि सवनापि वहति तस्माद्गौर्वत्सादपाक्रियमाणा पुनरभिनिवर्तते प्रजापतिः प्रजास्सृष्ट्वा ता अभिहिङ्करोत् प्रजापतिराग्रायणो यदाग्रायणं गृहीत्वा हिङ्करोति तस्माद्गौर्वत्सं जातमभिहिङ्करोति ॥९॥ २७-२९

इन्द्रो वै वृत्राय वज्रमुदयच्छत सोऽब्रवीद्वीर्यं वा इदं मय्यस्ति तत् ते प्रदास्यामि मा मे प्रहारिति तदस्मै प्रायच्छत् सोऽवेदस्ति वावास्मिन् वीर्यमिति तस्मै द्वितीयं तस्मै तृतीयमुदयच्छत सोऽब्रवीद्वीर्यं वा इदं मय्यस्ति तत् ते प्रदास्यामि मा मे प्रहारिति तदस्मै प्रायच्छद्यज्ञं वावास्मै तत् प्रायच्छदुक्थ्यमेवैतावान् यज्ञो यावानुक्थ्योऽन्तश्श्लेषणाय त्वा इतरे ग्रहा गृह्यन्ते त्रिः प्रायच्छत् तस्मादेतं त्रिर्विगृह्णन्ति यदेकँ सन्तं बहुधा विगृह्णन्ति तस्मादेको बहूनां ग्रामणीश्शिरो वै यज्ञस्योक्थ्योऽङ्गान्युक्थानि चक्षुषी शुक्रामन्थिनौ यदेतौ भूयिष्ठास्सोमा अनुहूयन्ते तस्माच्चक्षुस्सर्वाण्यङ्गानि प्रति यदुक्थ्यपात्रं भूयिष्ठास्सोमा अन्वायन्ति तस्मादेकं पुण्यं यन्तं बहवोऽनुयन्ति ॥ वि वा एतद्यज्ञं छिन्दन्ति यन्नाना सवनानि सँस्थापयन्त्यात्मा यज्ञस्योक्थ्यो यदुक्थ्यं सवने सवने विगृह्णाति तेनैव यज्ञँ संतनोतीन्द्राय त्वा बृहद्वत इत्यैन्द्रो वै यज्ञस्तस्मै त्वा विष्णवे त्वेति विष्णुर्वै यज्ञो विष्णुनैव यज्ञेन यज्ञँ संतनोति यथा वा उभयतोयुक्तं यथोभयतोवीवधमेवं पुरोरुक् च ग्रहश्चावैषोऽपुरोरुक् को गृह्यत ईश्वरो यज्ञो विवृहो यदुक्थ्यं विगृह्णाति तेनैष सयुक्तेन सवीवधँ शिरो वै यज्ञस्योक्थ्योऽङ्गान्युक्थानि पश्चाद्वै प्राङ् यज्ञ उक्थ्यैश्शिरोऽभिसंततो यदुक्थ्यमवनयति पश्चादेव प्राञ्चं यज्ञमुक्थैश्शिरोऽभिसंतनोति तस्मात् पश्चात् पश्चात् प्राङ् पुरुषस्त्वावभिश्शिरोऽभिसंततस्त्वचा

[ये देवा(०सो) दिव्येकादश०। ऋ. १,१३९,११; तै. सं. १,४,१०,१]
[१०] मै. ४,६,५ (१९-३१)। वा. ७,९,२२;। काण्व. ७,८,२४। तै. सं. ६,५,१।

छन्नश्श्रीर्वै सोमो यदि कामयेताध्वर्युरात्मानं यशसार्पयेयमित्यन्तराहवनीयं च हविर्धानं चावनयेदेष वा अध्वर्योर्लोकस्स्व एव लोकेऽध्वर्युरात्मानं यशसार्पयति यदि कामयेत यजमानं यशसार्पयेयमित्यन्तरा सदोहविर्धाने अवनयेदेष वै यजमानस्य लोकस्स्व एव लोके यजमानं यशसार्पयति यदि कामयेत सदस्यान् यशसार्पयेयमिति सद आलभ्यावनयेदेष वै सदस्यानां लोकस्स्व एव लोके सदस्यान् यशसार्पयत्यात्मा वै यज्ञस्याग्रायणोऽङ्गान्युक्थ्यो यदाग्रायणमुक्थ्योऽनुगृह्यत आत्मन्नेव यज्ञस्याङ्गानि प्रतिदधाति तस्मादात्मन्नङ्गानि प्रतिहितानि ॥१०॥ ३०-३१

[१९५२]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां वाचस्पतिर्नाम सप्तविंशं स्थानकं संपूर्णम् ॥२७॥

अथाष्टाविंशं स्थानकम् ।

आयुष्यम् ।

आयुर्वै ध्रुव उत्तमो गृह्यते तस्मादायुः प्राणानामुत्तमं नवमो गृह्यते नव हि प्राणा एकाकिनमुत्तरस्मिन् हविर्धाने सादयति तस्मादेकाकी प्राणानामर्धभागवाङ् प्राणो ध्रुवं वा अनु मनुष्याः प्रजायन्त इतरान् ग्रहानन्वन्याः प्रजा अनुपोप्ते ध्रुवँ सादयत्युपोप्त इतरान् ग्रहाँस्तस्मात् पुरुषो माँसेन प्रतितिष्ठत्यस्थ्ना पशवो राजपुत्रो गोपायति राजन्यो वै प्रजानामधिपतिरायुर्ध्रुव आयुरेव प्रजानां गोपायत्यथो क्षत्रमेव गोपायते यदि कामयेतावगतमपरुन्ध्युरपरुद्धोऽवगच्छेदित्यध्रुवं त्वा ध्रुवक्षितिमध्रुवाणामध्रुवतममच्युतानामच्युततमममुष्या विश उद्वहामीति ध्रुवमुद्वहेद् ध्रुवो वा एष योऽवगतोऽध्रुवोऽपरुद्धोऽवगतमेवापरुणद्ध्यपरुद्धमवगमयति ताजग्व्यवगच्छेते यदेवं कुर्यादायुः प्रजानां विचालयेत् तृणमेतेन मन्त्रेणोपर्युपर्यतिहरेत् तेनैवापरुद्धमवगमयति नायुः प्रजानां विचालयति देवक्षेत्रं वै वेदिरेतावती पृथिवी यावती वेदिर्देवक्षेत्रेणैवैनं मनुष्यक्षेत्रान् वदति पूर्णं गृह्णीयाद्यं कामयेत सर्वमायुरियादिति पूर्णमेवास्मा आयुर्गृह्णाति सर्वमायुरेत्यल्पं गृह्णीयाद्यं कामयेताल्पमायुरियादित्यल्पमेवास्मायुष्करोति ताजक् प्रधन्वत्युपर्युपाधं गृह्णीयाद्यं कामयेतोत्तरमायुरियादित्युत्तरमेवैनमायुर्गमयति॥ यथारूपमस्मा आयुः परिगृह्णात्युभयतोवैश्वानरं गृह्णाति तस्मात् प्राणा उभयतोवैश्वानरा मूर्धानं दिवो अरतिं पृथिव्या इति देवेषु चैवं मनुष्येषु चायुर्दधाति पुरुषेण वै यज्ञस्संमित आयुषा पुरुषस्संततो यदेष प्रातर्गृहीत आ तृतीयसवनाच्छय आयुषैव यज्ञँ संतनोति प्रातर्वा एतौ गृह्येते गायत्र्या लोक आग्रायणश्च ध्रुवश्च ता आ तृतीयसवनाच्छयाते जगत्या लोकात् तस्माद्गायत्र्ययातयाम्न्युत्तरे सवने प्रत्येत्येतदेवाभि भागधेयं प्राणो वै गायत्र्यायुर्ध्रुवो यदेष प्रातस्सन्न आ तृतीयसवनाच्छये

[१] मै. ४,६,६ (३३-५४)। कपि. ४४,१। वा. ७,२४; ३३,८। काण्व. ७,२६, ३२,८। तै. सं. ६,५,२।
[मूर्धानं दिवो०। ऋ. ६,७,१। सा. ६७; ११४०। तै. सं. १,४,१३,१]

तस्माद्यावदेवायुस्तावान् प्राण आयुर्वै ध्रुवो रुद्रोऽग्निर्नैकाकी होतव्य आयुः प्रजानां प्रदध्यात् प्रमायुकास्स्युर्होतुश्चमसेऽवनयति वैश्वदेवो वै होता वैश्वदेवीरिमाः प्रजाः प्रजास्वेवायुर्दधात्यध्रुवं वा एनमेतद् करोति यदवनयत्येतस्य वा अध्रुवत्वमनु प्रजाभ्यो न कल्पते दृँहन्तां दैवीर्विशः कल्पन्तां मनुष्या दिवि दिव्यानि सन्त्वन्तरिक्षे वयाँसि पृथिव्यां पार्थिवानीति ध्रुवमवनयति यथायतनमेव प्रजा दृँहन्त्याहृत उक्थेऽवनयेत् स्तुतेनैव शस्त्रमभिसंतनोति यदाहृतेऽवनयेदुक्थमतिरेचयेद्यच्छस्ते ग्रहमतिरेचयेद्या मध्यमा परिधानीया तस्यामवनयत्यङ्गानि वा एतानि यज्ञस्य यदुक्थामदान्यायुर्ध्रुवोऽर्धं वै पुरुषस्यात्मनोऽङ्गान्यर्धमायुरन्ता एवाभितस्संधायायुर्मध्यतो दधाति कस्मात् सत्यादित्याहुर्ब्रह्मवादिन आयस्त्वरमाणा न क्षीयन्ते न प्रदस्यन्तीत्येतमेव सोमपीथं प्रतीक्षमाणा यद् ध्रुव एष क्षेना अपनुदते प्रत्यङ्ङासीनोऽवनयत्यन्वीपमेवैना अवार्जति न सामि प्रस्तावयेताग्निष्टोममेवासीतायुर्वै ध्रुव आयुर्व्यवस्तावयेत्तावान् वै यज्ञो यावानेवाग्निष्टोमो यदाग्निष्टोममास्ते प्राणस्यैवास्यान्तं गच्छति सर्वमायुरेत्युदरं वा एतद्यज्ञस्य यत् सदस्तद् द्रवन्ति निस्सर्पन्तो यज्ञः प्रजापतिर्यदाग्निष्टोममास्ते प्रजापतेरेवोदरं न रिणक्त्यप्रमायुको भवति ॥१॥ १–२

देवा वा असुरान् हत्वा वैरदेयादीषमाणास्त ऋतून् संवत्सरममोहयँस्तस्य देवाः क्लृप्तिमैच्छँस्त ऋतुग्रहैरेवाकल्पयन् यदृतुग्रहा गृह्यन्ते संवत्सरस्य क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्या उभौ सह प्रथमं गृह्यते उभौ सेतौ सह संवत्सरं कल्पयितुमुपप्रेत उभौ सहोत्तमँ संवत्सरमेव कल्पयित्वोभौ सह विमुच्येते उभयतोमुखे ऋतुपात्रे भवत उभयतोमुखा ह्यृतवो न हि तद्विद्म यतरत ऋतूनां मुखं नान्योऽन्यमभिप्रपद्येयातां यदभिप्रपद्येयातामृतुर्ऋतुमन्यायुकस्स्याद्यदतीतस्तस्मादाहुरश्वा इवर्तू समप्रावामिति द्वादशैते गृह्यन्ते द्वादश मासास्संवत्सरस्संवत्सरस्य क्लृप्त्यै संवत्सरो वै स्वर्गो लोकस्तस्यैत आक्रमास्संक्रमा यदृतुग्रहा रोहमेवैतै रोहति स्वर्गस्य लोकस्य समष्ट्यै षडन्ये भवन्ति षडन्येऽसौ वा आदित्य ऋतुस्तस्मादेष षण्मास उदङ्ङेति षड् दक्षिणा षडृतुना षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति चतुर्ऋतुभिश्चतुष्पादाः पशवस्संवत्सरं पशवोऽनुप्रजायन्ते संवत्सरादेवास्मै पशून् प्रजनयति द्विर्ऋतुना पुनर्द्विपाद्यजमानः पशुष्वेवोपरिष्टाद् प्रतितिष्ठति ॥ सोमपाना वा एते सोमपा इन्द्रस्य सजाता यदृतुग्रहा ऋतुना सोमं पिबन्त्विति ह्याह नर्तुरिति नर्तवे जुह्वति तेषामेते स्वे पात्रे याभ्यामेनाञ्जुह्वति तस्मात् सजातस्स्वेन पात्रेण बलिं हरत्यास्मै बलिं हरन्ति य एवं वेद व्यवहारं भक्षयन्त्ययातयामत्वाय तस्मादृतुमृतुं वर्षति तेन देवास्संवत्सरं कल्पयित्वा स्वर्गं लोकं प्रज्ञाय त एतद्यज्ञस्य ज्योतिरुपरिष्टाददधुर्यदैन्द्राग्नो गृह्यते ज्योतिरेव मुखतो यज्ञस्य दधाति संवत्सरस्य क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्यै ॥ तस्मात् संवत्सरं ज्योतिरुपर्युपरि चरत्यृतुपात्रेणैन्द्राग्नं गृह्णाति

[२] मै. ४,६,७-८ (५४-५६) । कपि. ४४,२ । तै. सं. ६,५,३—४ ।

क्षत्रं वा इन्द्राग्नी विडृतवो विश्येव क्षत्रमध्यूहति विश्वे वै देवास्तृतीयसवनभागास्सन्तस्ते प्रातस्सवनमभ्यकामयन्त तान् प्रजापतिरेतस्मिन् ग्रहे तर्पयितव्यानपश्यद्यद्वैश्वदेवः प्रातस्सवने गृह्यते विश्वानेव देवान् प्रातस्सवने तर्पयति तानस्य तृप्तान् प्रीतानुत्तरे सवने अभिविसृज्येते शुक्रपात्रेण वैश्वदेवं गृह्णात्यसौ वा आदित्यश्शुक्रो वैश्वदेवीरिमाः प्रजास्तस्मादेष सर्वाः प्रजाः प्रत्यङ् मा३म्प्रति मा३म्प्रतीति हि मन्यन्ते ॥२॥ ३–५

माध्यन्दिनेन वै सवनेनेन्द्रो वृत्रमहन् मरुद्भिर्वीर्येण मरुत्वतीयँ स्तोत्रं भवति मरुत्वतीयमुक्थं मरुत्वतीया ग्रहास्सर्वत एव यजमानं वीर्येण समर्धयति सर्वतो वृत्रँ हन्ति प्रतिहितिरेव प्रथमो मरुत्वतीयोऽपायतिर्द्वितीयो विसृष्टिं तृतीयेन विसृजति वज्रमेव प्रथमेन मरुत्वतीयेनोद्यच्छते प्र द्वितीयेन हरति स्तृणुते तृतीयेन यं द्विष्यादमरुत्वतीयाँस्तस्य गृह्णीयाद्वीर्यं वै मरुतो वीर्येणैवैनं व्यर्धयतीन्द्रो वै वृत्रँ हनिष्यन् प्रदानं देवेभ्यः प्रायच्छद्दक्षिणास्स मरुत्वतीयैरेव वृत्रमहँस्तस्मान्मरुत्वतेऽनूक्ते न देयँ हतो हि तर्हि वृत्रो विजितं भवति नो प्रतिगृह्णीयात् प्रतिष्ठितान् पशून् प्रच्यावयत्यपशुर्भवतीन्द्रो वै वृत्रँ हत्वा स महेन्द्रोऽभवत् सोऽन्यान् देवानत्यमन्यत स एतं ग्रहमुद्धारमुदहरत महेन्द्रीयं तस्माद्राजा संग्रामं जित्वा निराजं निरजते ते तं देवा अब्रुवन् सर्वं वा अवोचथा अस्तु नोऽत्रापीति कथं वोऽपि स्यादिति विराजैतस्य ग्रहस्य यजत्विति देवपात्रं वै विराड् यद्विराजा यजति देवपात्रेणैव देवतास्तर्पयति ।। तस्माद्यद्राजा संग्रामं जयत्यपि तत्र सूतग्रामणीनां गायत्र्या वै त्रिवृदायतनवाँस्त्रिष्टुभा पञ्चदशो जगत्यैकविंशोऽथैषा विराडायतनमेव यत् सप्तदशो यद्विराजा यजति सप्तदशमेवायतनवन्तं करोति यं द्विष्यात् त्रिष्टुभा तस्य यजेदोजो वै वीर्यं त्रिष्टुबोजसैवैनं वीर्येणायतनाच्छिनत्ति सोऽनायतनः पराभवति देवा वा असुरान् हत्वा वैरदेयादीषमाणास्ते यज्ञं मध्यतः प्राविशन्नेतां वाव तद्वचं प्राविशन् विराजमेव यद्विराजा यजति देवतानामभीष्ट्या आदित्या वै स्वर्गं लोकं यन्तस्तेऽङ्गिरसोऽस्मिँल्लोके सह यज्ञेन प्रत्यौहँस्तेऽङ्गिरस आदित्यानब्रुवन् कतिभ्यो वो हव्यं वक्ष्याम इति त्रयस्त्रिंशत इत्यब्रुवन् दश वसव इन्द्र एकादशो दश रुद्रा इन्द्र एकादशो दशादित्या इन्द्र एकादशस्त्रिंशदेता देवतास्त्रिंशद् व्यक्षरो वषट्कार एकाक्षरा वाक्तेनैन्द्रं कल्पन्तेऽस्य देवता हव्ये यथादेवतमस्य हव्यं गच्छति वृणत एनमार्त्विज्याय य एवं वेद यावतीर्हि देवतास्ता हव्यं गमयति ॥३॥ ६–७

माध्यन्दिनाद्वै सवनाद्देवास्स्वर्गं लोकमायँस्तेषामेत आक्रमास्संक्रमा यद्दक्षिणा यद्दक्षिणा ददाति सेतुमेव कीर्त्वा स्वर्गं लोकमेति यावद्वा इह प्राणद्ददाति तावन्तोऽमुष्मिँल्लोके प्राणास्तस्माद्बहु देयं

[३] मै. ४,६,८ (५६) । कपि. ४४,३ । तै. सं. ६,५,५ ।

[४] मै. ४,८,२—३ (५—६) । कपि. ४४,४ । वा. ७,४५-४६ । काण्व ९,१०-११ । तै. सं. ६,६.१ ।

तस्मादिह बहु दत्तं प्रशँसन्ति ज्यायाँसमेव सेतुं किरत एतर्हि वै देवता नेदिष्ठाद्व्यानमन्ति तस्मादेष एतर्हि तेजिष्ठं तपति यावन्नेदिष्ठादेव स्वर्गं लोकमारोहति सौरीभ्यां जुहोति स्वर्गस्य लोकस्य समष्ट्यै द्वाभ्यां द्विपाद्यजमानोऽस्यामेवैनमाक्रामयति यदाग्नेय्याग्नीध्रे जुहोत्यन्तरिक्ष एवैनमाक्रामयति ॥ यद्ददाति स्वर्गमेवैनं लोकं गमयति द्यां गच्छ स्वर्गच्छेति स्वर्गस्य लोकस्य समष्ट्यै रूपं वो रूपेणाभ्यागां वयसा वय इत्येतद्वै पशूनां रूपं यद् घृतं यद्धिरण्यं रूपमेवैषां रूपेणाभ्येति वयसा वयस्तुथो वो विश्ववेदा विभजत्विति सत्यं वै तुथो विश्ववेदास्सत्येनैवैनान् ब्रह्मणा विभजत्येतद् ते अग्ने राध एति सोमच्युतमित्याग्नेया वै पशवस्ते सोमे दीयन्ते तान् मित्रस्य पथा नयेति मित्रस्यैवैनान् पथा नयत्यन्तराग्नीध्रं च सदश्च नयत्येतेन वै पथा देवास्स्वर्गं लोकमायँस्तमेवैना अपिपादयति ॥ दक्षिणतो वै देवानां यज्ञं रक्षाँस्यजयँस्तमाग्नीध्रात् पुनरपाजयन् यदाग्नीध्राद्दक्षिणा दक्षिणा नयन्ति यज्ञस्याभिजित्यै रक्षसामपहत्या आग्नेय्याग्नीध्रे जुहोत्याग्नेया वै पशवः पशूनां निष्क्रीत्यै वारुण्या द्वितीयया जुहुयाद्यद्यश्वं वानो वा रथं वा दास्यन् स्याद्वारुणा ह्यश्वा वारुणा वनस्पतयोऽग्निस्सर्वा देवता देवतानामभीष्ट्या उपबर्हणं ददात्येतद्वै छन्दसां रूपं रूपेणैव च्छन्दाँस्यवरुन्द्धे हिरण्यं ददाति हिरण्यज्योतिष एवैनास्स्वर्गं लोकं गमयत्यरुद्राता मधुमती देवत्रा गच्छेति स्वर्गमेवैना लोकं गमयति ॥ प्र दातारमाविशेति तस्मादमुष्मिँल्लोक आगामुका ऋतस्य पथा प्रेत चन्द्रदक्षिणा इति यो वै यज्ञियो मेध्यस्स ऋतस्य पन्थास्तेनैवैना नयति ब्राह्मणमद्यर्ध्यासं पितृमन्तं पैतृमत्यमिति यो वै श्रोत्रिय आर्षेयस्स पितृमान् पैतृमत्यस्तं विदेयमित्येवैतदाह स हि सुधातुदक्षिणो यामब्राह्मणाय ददाति वनस्पतयस्तया प्रयन्ते यां कण्वकश्यपेभ्यो ददाति नीहारस्तया प्रयते यां ब्राह्मणायाश्रोत्रियाय ददाति मरीचयस्तया प्रयन्ते याँ श्रोत्रियायार्षेयाय ददाति स यामुष्मिँल्लोक ऋध्नोत्यस्मिँश्चास्य लोके पुनर्भोगाय भवति तस्मात् स एवैष्टव्यो वि स्वः पश्य व्यन्तरिक्षमिति सदः प्रेक्षते ॥ सोमपा वा एते ब्राह्मणास्तेषां तेजस्वीनि चक्षूँष्यगतीयन्ति वा एते ददते त एनमीश्वराः प्रतिनुदस्तेभ्य एव नमस्करोत्यप्रतिनोदायात्रिहिरण्यं ददाति स्वर्भानुर्वा आसुरस्सूर्यं तमसाविध्यत् तमत्रिरेवाग्रेऽन्वविन्दद्यदत्रिहिरण्यं ददाति स्वर्गस्य लोकस्य समष्ट्यै यद्यात्रेयं न विन्देद्य आर्षेयस्सँहितस्तस्मै दद्यात् तेनैवर्ध्नोत्यसुरा वै देवेभ्यो दक्षिणामनयँस्तां प्रत्यनुदन्त तेऽब्रुवन्नश्लीलदेषेति तेभ्योऽपरामनयँस्तां प्रत्यनुदन्त तेऽब्रुवन्नृम्णमेषामादिति तेभ्योऽपरामनयँस्तां प्रत्यनुदन्त तेऽब्रुवन्नुद्राप्मीदेषेत्येता ह वै तद्विरभ्यनूवाच ॥ ८–१२

अव द्रप्सो अँशुमतीमतिष्ठदियानः कृष्णो दशभिस्सहस्रैः ।

आवत् तमिन्द्रश्शच्या धमन्तमप स्नेहितीर्नृमणा अधत्ताम् ॥ १३

[अव द्रप्सो अंशुमती० ऋ. ८,९६,१३; सा. ३२३; अथर्व. २०,१३७,७; तै. आ. १,६,३]

इति सा सालावृकी संभूयासुरान् प्राविशत् सैनानिरदहत् तस्माद्दक्षिणा प्रतिनुत्ता न प्रतिगृह्या न गोषु चालयेत् सालावृकयैवैनं भूत्वा प्रविशति सैनं निर्दहति ॥४॥ १४

यद्गां ददात्यायुस्तेन स्पृणोति यद्वासो ददाति दीर्घं तेनायुष्कुरुते यदश्वं ददाति सूर्यभ्राजमेवैनं करोति यदनो यद्रथं ददाति शरीराणि तेन स्पृणोति यदविं यदजां ददाति माँसानि तेन स्पृणोति यदोदनं यन्मन्थं ददाति यदेवास्यान्तरात्मं तत् तेन स्पृणोति यद्वरं ददात्यात्मानं तेन स्पृणोत्यात्मा हि वरो यद्ब्रह्मणे ददाति बार्हस्पत्यो वै ब्रह्मा बृहस्पतिमेव तेन प्रीणाति यदुद्गात्रे ददाति प्राजापत्यो वा उद्गाता प्रजापतिमेव तेन प्रीणाति यद्धोत्रे ददाति वैश्वदेवो वै होता सर्वा एवास्य तेन देवता अभीष्टाः प्रीता भवन्ति यदध्वर्युभ्यां ददात्याश्विनौ वा अध्वर्यू अश्विना एव तेन प्रीणाति यदृत्विग्भ्यो ददाति होत्रा वा ऋत्विजो होत्रा एवास्य तेनाभीष्टाः प्रीता भवन्ति ॥ यद् सदस्येभ्यो ददाति यमेव ते सोमं पिबन्ति तं तेन निष्क्रीणाति यां ब्राह्मणाय श्रोत्रियायानृत्विजे प्रसृप्ताय ददाति यामेव स विद्यां वेद सास्य तेनाभीष्टा प्रीता भवति यामब्राह्मणायाश्रोत्रियायानृत्विजे प्रसृप्ताय ददाति यामेव स विद्यां वेद सास्य तेनाभीष्टा प्रीता भवति यामकामो ददाति तस्मात् क्षत्रं ब्रह्मात्ति यां याचितो ददाति भ्रातृव्यं तया जिन्वति यां बहिर्वेदि ददाति नैनँ सा गच्छति यां ज्ञातयेऽनृत्विजे प्रसृप्ताय ददाति पाप्मानं तन्निधत्ते यां ज्येष्ठाय याँ श्रोत्रियाय ददाति येनैव स तदिन्द्रियेण भवति तदस्याभीष्टं प्रीतं भवति ॥५॥ १५–१६

आदित्या वा असुरान् हत्वा वैरदेयादीषमाणास्ते देवान् प्राविशन् द्विदेवत्यान् वाव तत् प्राविशन्नेते हि देवानाँ सह भूयिष्ठास्तस्मादादित्यो द्विदेवत्येभ्यो गृह्यत उच्छिष्टाद्वा आदित्या जातास्तस्मादेष उच्छिष्टस्सोमो गृह्यत उच्छेषणभागा वा आदित्यास्तस्मादेष उच्छिष्टस्सोमो गृह्यते परिश्रिते गृह्णाति रुद्रो वा अग्निः पशव आदित्यः पशूनां गोपीथाय रुद्रं वै देवा यज्ञान्निरभजँस्ते समवादिग्रन्नेष ते मातरि भाग इत्यादित्यान्तमेतावदागमयित्यैतत् प्रति यज्ञादन्तरदधुर्यत् परिश्रित आदित्यं गृह्णाति रुद्रमेव यज्ञादन्तर्दधाति ॥ पशवो वा आदित्यो यदेष भूयिष्ठस्सोमो गृह्यते तस्मात् पशवोऽद्यमाना न क्षीयन्ते यदा बहवोऽन्तर्वेदि स्युरथ गृह्णीयात् तानेवाम्नायमवरुन्द्धे यदास्य भ्रातृव्योऽन्तर्वेदि स्यादथ गृह्णीयादेष वै यजमानस्य स्वो लोको यद्वेदिः पशव आदित्यस्स्व एव लोके भ्रातृव्यस्य पशून् वृङ्क्ते बृहतीः पुरोरुचो भवन्ति पशवो वै बृहतीः पशव आदित्यः पशुष्वेव पशून् दधाति सोममग्रे गृह्णात्यथ दध्यथ सोममूर्ग्वै दधि पशव आदित्य ऊर्जमेव पशुषु मध्यतो दधाति भृतातङ्क्यं भवति तस्मादामा पक्वं दुहे यदि कामयेत वर्षेदिति या दिव्या वृष्टिस्तया त्वा

[५] मै. ४,८,३ (६) । कपि. ४४,५ ।

[६] मै. ४,६,९ (५९-६३) । कपि. ४४,६ । तै. सं. ६,५,६ ।

श्रीणामीति दध्नोपरिष्टाच्छ्रीणीयात् पशवो वै दधि पशव आदित्यः पशुभ्य एव वर्षति यर्हि वर्षति पशुभ्य एव वृष्टिं निनयत्युपाँशुसवनेन मेक्षयति प्राणो वा उपाँशुसवनः पशव आदित्यः पशुष्वेव प्राणं दधाति विवस्व आदित्यैष ते सोमपीथ इत्येष वाव स उपाँशुसवनस्साक्षादेवैनँ सोमपीथेन समर्धयति यद्युद्गृहीतस्य स्तोकोऽवपद्यते ताजक् प्रवर्षति गृहीत्वापिदधाति गर्भाणां धृत्या अप्रपादाय तं दशमे स्तोत्रे प्रच्यावयति तस्माद्दशमे मासि गर्भा हिताः प्रजायन्तेऽन्यत्रेक्षमाणो जुहोति रुद्रो वा अग्निः पशव आदित्यः पशूनां गोपीथाय यदीक्षेत ब्राह्मण उपद्रष्टा पशून् गृह्णीयात् पशूनामेव प्रदीयमानानामनुपद्रष्टा भवति ॥६॥ १७-१८

अन्तर्यामपात्रेण सावित्रं गृह्णाति पशवो वा अन्तर्यामस्सवितृप्रसूताः पशवः प्रजायन्ते सवितृप्रसूत एवैनान् प्रजनयति तमसन्नं जुहोति तस्मादसन्नाः पशवस्सदप्रजायन्ते देवा वै तृतीयसवनमुद्यमं नाशक्नुवन् प्रातस्सवने तर्हि सवितासीत् तं देवा अब्रुवँस्त्वयेदमुद्यच्छामहा इति नेत्यब्रवीन्मुख्योऽहमस्मि न प्रत्यङ्ङुपक्रमिष्यामीति मुख्य एवात्रास इत्यब्रुवन् मुख्य इहाथ त्वयोद्यच्छामहा इति तत् सवित्रोदयच्छन्त यत् सावित्रो गृह्यते तृतीयसवनस्योद्यत्या अभि त्वा देव सवितरित्येतया प्रातस्सवने मुख्यस्समन्तं वै तत् सविता यज्ञं पर्यभवत् समन्तं भ्रातृव्यं परिभवति य एवं वेदान्तर्यामपात्रेणाग्रायणात् सावित्रं तृतीयसवने गृह्णाति ॥ प्रातर्वा एष गृह्यते गायत्र्या लोके यदाग्रायणस्तं तृतीयसवने विगृह्णाति जगत्या लोके तस्मादाग्रायणात् सावित्रो गृह्यते सविता हि देवानां गायत्रस्सावित्रस्य सँस्रावे वैश्वदेवमभिगृह्णाति समानो वा एष ग्रहस्संतत्यै वैश्वदेवीरिमाः प्रजास्सवितृप्रसूताः प्रजाः प्रजायन्ते सवितृप्रसूता एवैनाः प्रजनयति सुशर्मासि सुप्रतिष्ठान इति सोमे हि सोममभिगृह्णात्यथो सुशर्माणमेवोत्तरमधरस्मै करोति सुप्रतिष्ठानमधरमुत्तरस्मै बृहदुक्षे नम इति बृहद्धि देवानां नमः पितृणामुक्थभागा वै पितरोऽस्तोमभाजो यत्रैवैभ्य उक्थँ शँसति तदेभ्यो ग्रहं गृह्णाति ॥७॥ १९-२०

प्रजननं वै पात्नीवतो यद्वै किंच यज्ञे पात्नीवतं क्रियते प्रजननमेव तदुपाँशुपात्रेण गृह्णाति प्राणो वा उपाँशुः प्राणात् प्रजाः प्रजायन्ते प्रजननायोपाँशुना प्रयन्त्युपाँशुपात्रेणोद्यन्ति प्राणो वा उपाँशुः प्राणेनैव प्रयन्ति प्राणेनोद्यन्ति बृहस्पतिसुतस्य त इति ब्रह्म वै बृहस्पतिर्ब्रह्मणः प्रजाः प्रजायन्ते ब्रह्मणैवैनाः प्रजनयतीन्द इति रेत एव दधातीन्द्रियावत इतीन्द्रियं वै प्रजास्सोमपीथोऽग्ना३इ पत्नीवानिति मिथुनमेव करोति सजूस्त्वष्ट्रा सोमं पिबेति त्वष्टा वै रूपाणां विकर्ता सोऽस्मै रूपाणि विकरोत्येष वै ग्रहः पत्नीभ्यो नातिष्ठत तं देवा आज्यं वज्रं कृत्वाघ्नन् यत् पात्नीवतँ

[७] मै. ४,७,१ (१)। कपि. ४४,७। तै.सं. ६,५,७ [अभि त्वा देव सवित०। ऋ. १,२४,३, तै. सं.३,५,११,३]
[८] मै. ४,७,४ (११)। कपि. ४४,८। वा. ८,९—१०। काण्व. ८,८-११। तै. सं. ६,५,८।

श्रीणाति स्तृत्यै संपातेन श्रीणाति संतत्या उपरिष्टाच्छ्रीणाति तस्मात् स्त्र्यखलतिर्भावुका मृतं वा एतँ सोमं जुहोत्यमृतानितराँस्तस्मात् स्त्री निर्वीर्यानिर्वीर्यः पुमान्नेतस्य होता यजति पश्चेव हि स पश्चात् प्राणान् परिहरेदग्निर्यजति पुरो हि स पुरः प्राणान्नानुयजति यदनुयजेदग्निना प्राणानन्तरियात् प्रमीयेत स्तृतं वा एतँ सोमं भक्षयति तस्मादग्निस्पण्डको भावुकः प्रजननं वै पात्नीवतस्तस्माद्बहुपशुर्भावुकस्सह पात्रेण नेष्टारमभिसर्पति पत्नीरिव सोमपीथं गमयति नोपस्थ आसीत यदुपस्थ आसीत पण्डकस्स्यादन्तरा नेष्टारं च धिष्ण्यं च व्यवसर्पति स्त्रीणां वै नेष्टा पुमान् धिष्ण्यो मिथुन एव रेतो दधाति ॥८॥ २१

इन्द्रो वै वृत्रमहँस्तस्य मूर्धानमुदरुजत् स द्रोणकलशोऽभवत् ततो यस्सोमस्समस्रवत् स हारियोजनोऽभवदिन्द्रो वै वृत्रँ हत्वा तस्य क्लोम्नो हृदयात् सोमँ समसिश्चत् स हारियोजनोऽभवत् सोऽमन्यत यदिममशृतमद्वितीयँ होष्यामि तदन्वसुरा आभविष्यन्ति यन्न होष्यामि तदन्वाभविष्यन्तीति स सँस्थितस्सोम आसीत् प्रहृताः परिधयोऽथोपोदतिष्ठद्धोतुं तमग्निरब्रवीन्न मय्येतमशृतमद्वितीयँ होष्यसीति तस्मिन् धाना आवपत् तँ शृतं द्वितीयवन्तमजुहोद्यद्धाना आवपति शृतत्वायैव द्वितीयत्वाय ये वै ते वृत्रे पशव आसँस्त एवैते पशूनेवैतत् कामदुघोऽवरुन्द्धे कामं कामँ ह्येतेषां कुरुत ऋक्सामे वा इन्द्रस्य हरी तयोरेतद्भागधेयम् ॥ यद्धारियोजन आधानानि परिधयो यत् प्रहृतेषु परिधिषु हारियोजनं जुहोति निराधानाभ्यामेवाभ्यां घासमपिदधाति प्रजापतिर्वा आग्रायण आग्रायणादेष सोमोऽतिरिच्यते यद्वै यज्ञस्यातिरिच्यते प्रजापतिं तदभ्यतिरिच्यते यदेतमतिरिक्तँ सोमं जुहोति तस्मादयमतिरिक्तः प्रजापतिः प्रजा एवाभिवपते द्रोणकलशेनोन्नेता हारियोजनं जुहोत्यतिरिक्तं वा एतत् पात्राणां यद् द्रोणकलशोऽतिरिक्त एष ऋत्विजां यदुन्नेतातिरिक्त एष सोमानां यद्धारियोजनोऽतिरिक्तेनैवातिरिक्तमाप्नोत्युन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तस्यावरुद्ध्यै ये वै ते वृत्रे पशव आसँस्त एवैते यत् संभिन्द्यात् सँशारुका एनमल्पाः पशवो भुञ्जन्त उपतिष्ठेरन् हिनस्ति हि यन्न संभिन्द्यादसँशारुका एनं बहवः पशवो भुञ्जन्त उपतिष्ठेरन् न हि हिनस्ति समिव गृह्णीयादुभयमेव करोत्यसँशारुका एनं बहवः पशवो भुञ्जन्त उपतिष्ठन्ते निरिव धयेद्य एव तत्र सोमपीथस्तस्यावरुद्ध्या उत्तरवेद्यां निवपति पशवो वा उत्तरवेदिः पशवो हारियोजनीः पशुष्वेव पशून् दधाति ॥९॥ २२-२३

पात्राणि प्रयुज्यन्तेऽनयोर्लोकयोर्विधृत्यै प्रान्यानि युज्यन्ते नान्यानि यानि प्रयुज्यन्त इमं तैर्लोकं दाधार यानि न प्रयुज्यन्तेऽमुं तैः पराङ् ह्यसौ लोकोऽनिरुक्त उपाँशुपात्रं प्रयुज्यतेऽजा

[९] मै. ४,७,४ (११)। कपि. ४४,९। वा. ८,११। काण्व. ८,१२। तै. सं. ६,५,९।
[१०] मै. ४,८,८ (१६)। कपि. ४५,१। तै. सं. ६,५,१०,१, ६,५,११,१—३।

एव तत् पशूनामनुप्रजायन्ते त्रिर्विगृह्णाति तस्मात् सा.त्रीञ्जनयत्यथो द्वौ यदुपाँशुपात्रं प्रयुज्यतेऽजा एव तेन पशूनां दाधारान्तर्यामपात्रं प्रयुज्यतेऽवय एव तत् पशूनामनुप्रजायन्ते यदन्तर्यामपात्रं प्रयुज्यतेऽवीरेव तेन पशूनां दाधारर्तुपात्रे प्रयुज्येते अश्वा एव तत् पशूनामनुप्रजायन्ते तस्मात् तयोरश्वस्येव शफोऽधस्ताद्यदृतुपात्रे प्रयुज्येते अश्वानेव तेन पशूनां दाधारोक्थ्यपात्रं प्रयुज्यत आरण्या एव तत् पशवोऽनुप्रजायन्ते तस्मात् तान् धृतान् ग्राममागतान् घ्नन्ति यदुक्थ्यपात्रं प्रयुज्यत आरण्यानेव तेन पशून् दाधार शुक्रपात्रं प्रयुज्यतेऽत्रीरेव तत्प्रजा अनुप्रजायन्ते मन्थिपात्रं प्रयुज्यत आद्या एव तत् प्रजा अनुप्रजायन्ते यदेते प्रयुज्येते उभयोरेवैतदत्रीश्चाद्याश्च प्रजा दाधारर्तुप्रयुज्यत आद्या... पात्रे शुक्रपात्रात् पूर्वे प्रयुज्येते असौ वा आदित्यश्शुक्रो रश्मय ऋतवस्तस्मादेते पूर्वे प्रयुज्येते पूर्वे ह्येव एतस्मादवरमादित्यपात्रं प्रयुज्यते गाव एव तत् पशूनामनुप्रजायन्ते यदादित्यपात्रं प्रयुज्यते गा एव तेन पशूनां दाधाराग्रायणपात्रं प्रयुज्यते सर्वा एव तत् प्रजा अनुप्रजायन्ते यदाग्रायणपात्रं प्रयुज्यते सर्वा एव तेन प्रजा दाधार द्रोणकलशः प्रयुज्यते प्रजापतिर्वै द्रोणकलशो यद् द्रोणकलशः प्रयुज्यते तस्मादिदं प्रजापतिः प्रजा वेद तस्मादयं क्षयोऽस्त्येतावन्तो वै प्रातर्ग्रहा गृह्यन्ते ते स्तोत्रवन्त उक्थवन्तो निदानवन्त आयतनवन्तः कर्तव्या नवैतान् गृहीत्वा नवभिर्बहिष्पवमानँ स्तुवन्ति तेन ते स्तोत्रवन्तो यत् पुनरेत्याश्विनं गृह्णाति सोमेनैव स स्तोत्रवान् यदुपाँश्वन्तर्यामौ हुतौ होतानुमन्त्रयते तेन ता उक्थवन्तौ ॥ यदैन्द्रवायवं तेनैन्द्रवायव उक्थवान् यन्मैत्रावरुणं तेन मैत्रावरुण उक्थवान् यदाश्विनं तेनाश्विन उक्थवान् यच्छिष्केवल्यं तेन शुक्रमन्थिना उक्थवन्तौ यद्वैश्वदेवं तेनाग्रायण उक्थवान् यदुक्थान्युक्थशँसिनश्शँसन्ति तेनोक्थ्य उक्थवानेतावन्तो वै प्रातर्ग्रहा गृह्यन्ते तानेतत् स्तोत्रवत उक्थवतो निदानवत आयतनवतः करोति निदानवानायतनवान् भवति य एवं वेद ॥१०॥ २४-२५
[१९७७]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायामायुष्यं नामाष्टाविंशं स्थानकं संपूर्णम् ॥२८॥

अथैकोनत्रिंशं स्थानकम्।

दीर्घजिह्वी।

देवाश्च वा असुराश्च संयत्ता आसँस्ते देवास्संघातँ संघातं पराजयन्त तेऽविदुरनायतना हि वै स्मस्तस्मात् पराजयामहा इति त एताः पुरोऽकुर्वत ता एषामनायतना नाध्रियन्त त एतान् पुरोडाशँ अपश्यँस्ताननुसवनं निरवपँस्तैः पुरोऽदँहन् सवनानि वाव ते पुरोऽकुर्वत यत् पुरोऽदँहँस्तत् पुरोडाशानां पुरोडाशत्वं यदनुसवनं पुरोडाशान्निर्वपति सवनानां धृत्यै विजित्यै तस्मादनुसवनं पुरोडाशस्य प्राश्नीयात् सोमपीथस्य धृत्यै यतो घृताक्तँ स्यात् ततः प्राश्नीयादाज्येन वै वज्रेण देवा वृत्रमघ्नन् सोमो वृत्रस्सोमपीथस्यायाताय तदाहुर्न वा अन्येनाज्यादहीने समष्टुमर्हतीति सर्वमेतद्धविर्भूतं यत् किंचोत्पुनन्ति यदेवानुत्पूतँ स्यात् तस्य नाश्नीयाद्दीर्घजिह्वी वै देवानां यज्ञमवालेट् प्रातस्सवनं तन्मथायत् सा पयस्याभवत् तस्मादामिक्षा विमदितेव यत् पयस्या प्रातस्सवने भवति प्रातस्सवनस्य समृद्ध्यै मैत्रावरुणी प्रातस्सवने भवति नोत्तरे सवने अश्नुवे प्राणापानौ वै मित्रावरुणौ प्राणापाना एव मुखतः परिहरते तस्मान्मुखतः प्राणापानौ न वै स्तोत्रेण न शस्त्रेण पङ्क्तिर्यज्ञेऽवकल्पते पञ्चैतानि हवींषि पङ्क्तिमेवैतद्यज्ञेऽवकल्पयति ॥ हविष्पङ्क्तिर्वै यज्ञो नाराशँसपङ्क्तिः पाङ्क्तः पञ्चैतानि हवींषि तेन हविष्पङ्क्तिर्द्विनाराशँसा प्रातस्सवने द्विनाराशँसा माध्यन्दिन एकनाराशँसा तृतीयसवने तेन नाराशँसपङ्क्तिरग्नीषोमीयः पशुस्त्रीणि सवनानि वशानूबन्ध्या तेन पाङ्क्तो य एवमेतानि यज्ञस्य रूपाण्यनुवेदर्ध्नोति देवाश्च वा असुराश्च संयत्ता आसँस्ते देवेभ्यो महिमानोऽपाक्रामँस्तेऽसुरानगच्छँस्तेऽसुरा देवानां बहूनि शतान्यघ्नँस्तानीमानि च्छन्दाँसि यान्ययज्ञवाहानि ते देवा अबिभयुरित्थं वाव नस्सर्वानसुरा अवपत्स्यन्तीति तान्युपामन्त्रयन्त तेऽब्रुवन् वार्यँ वृणामहा इति ते परिवापपुरोडाशमवृणत तद्भागधेयमभ्यायन्नृक्सामे वावैभ्यस्तदपाक्रामतां पशवो वागिन्द्रियं प्राणापानौ स इन्द्रोऽमन्यतेमे वावेदमभूवन्निति तेषाँ सायुज्यमगच्छद्धरिवाँ इन्द्रो धाना अत्त्वित्यृक्सामे वा इन्द्रस्य हरी ऋक्सामयोरेव तत् सायुज्यमगच्छत् पूषण्वान् करम्भमिति पशवो वै पूषा पशूनामेव तत् सायुज्यमगच्छत् सरस्वतीवान् भारतीवान् परिवाप इति वाग्वै सरस्वती वाच एव तत् सायुज्यमगच्छदिन्द्रस्यापूप इतीन्द्रियं वा इन्द्र इन्द्रियस्यैव तत् सायुज्यमगच्छन्मित्रावरुणयोः पयस्येति प्राणापानौ वै मित्रावरुणौ प्राणापानयोरेव तत् सायुज्यमगच्छदेतेषामेव महिम्नाँ सायुज्यं गच्छति सर्वमायुरेति पशुमान् भवति न यज्ञियामार्तिमार्छति य एवं वेद ॥१॥ १-२

[१] मै. ३,१०,५—६ (१३—१४)। कपि. ४५,२। वा. १९,२१। काण्व. २१,२१।

नीदं वा एतद्यज्ञस्य क्रियते यद्यजुषा क्रियत उच्चैर्ऋचा च साम्ना च क्रियते यदृचः पुरोरुचो
भवन्ति द्रविण एव प्रत्युत्तब्ध्या अशिथिलत्वाय प्रैषचाह प्र यजुषा यच्छति गमयति ग्रहणचर्चा वै
स्तोत्राय गृह्यते यजुषा शस्त्राय तस्मादेते सँहिते सँहिते हि स्तोत्रं च शस्त्रं च पराङ् वा एतर्हि
यज्ञः पराचीर्देवतास्तृतीयसवने यजमानादाग्नेय्या पुरस्तात् सौम्यं परियजति वैष्णव्योपरिष्टादग्निर्वै
सर्वा देवता विष्णुर्यज्ञो देवताश्चैव यज्ञं चालभते घ्नन्ति वा एतद् सोमं यदभिषुण्वन्ति तस्यैषानु-
स्तरणी यत् सौम्यो दक्षिणार्धेऽग्नेर्जुहोति दक्षिणा हि पितॄणां सकृदवद्यति सकृदवत्तँ हि पितॄणां
यन्मेक्षणेन द्वितीयमवद्यति तेनैव सकृदवत्तं भवत्युद्गातृभ्यो हरन्ति सोमदैवत्यं वै साम साम्न-
स्सवीर्यत्वाय सतनूत्वाय प्राश्या३ न प्राश्या३ इति मीमाँसन्ते यद् प्राश्नीयात् प्राकारुकस्स्याद्यन्न
प्राश्नीयादहविस्स्यादवजिघ्रेदुभयमेव करोति योऽकमकाशाय सन्नं नाद्यात् स प्राश्नीयात् परं वा
एतदन्नं यत् पितरः परमैवाक्षेनावरमन्नाद्यमवरुन्द्धे भेषजं वा एतद्देवा यज्ञायाकुर्वन् यत् सौम्यस्तदेष
भिषज्यस्तस्मादामयाविना प्राश्यः शिरो मन्दन्तां सोमप्रतीका मन्दन्तां व्यशेम देवहितं यदायु-
रिन्द्रपीतो विचक्षणो व्यशेम देवहितं यदायुर्हृदिस्पृक् क्रतुस्पृग्वर्चोधा असि वर्चो मे धेहि ॥ ३
यन्मे मनो यमं गतं यद्वा मे अपरागतम्। राज्ञा सोमेन तद्वयमस्मासु धारयामसि ॥ ४
इति सौम्यमवेक्षेत यद्वा इद प्राकरोति यदस्यात्मनो मीयते पितॄँस्तद्गच्छति यत् सौम्यमवेक्षते
तदेवात्मन् यच्छते परीव पश्येद्यत् परिपश्यत्यात्मानमेव परिपश्यति सह त्वा अमुष्मिँल्लोके सर्वतनूर्य
एवं विद्वान् सौम्यमवेक्षते वीर्यं वा उपसदो निर्वीर्यं तृतीयसवनं ता यहियज्ञं क्रियन्ते यत् सौम्येन
तृतीयसवने चरन्ति तृतीयसवन एव वीर्यं दधत्येता हि देवता उपसत्स्विज्यन्त आग्नेय्या पुरस्तात्
सौम्यं परियजति इतो नेदग्निमभिप्रयाता इति वैष्णव्योपरिष्टादग्निष्टोमे नेत्सौम्यमभिप्रपद्याता इत्यु-
भयत एव परिस्तृणात्यनभिप्रपादायाग्नेय्या घृतस्य यजति सौम्या सौम्यस्य वैष्णव्योपरिष्टाद्घृतस्य
यथापूर्वमेव देवताः कल्पयति ॥२॥
५
प्राणा वै संस्थितयजूँषि नवैतानि यजूँषि नवभिर्बहिष्पवमानं स्तुवन्ति नव प्राणाः प्राणैरेव
प्रयन्ति प्राणैरुद्यन्ति संततं जुहोति प्राणानां संतत्या अविच्छेदाय यं कामयेत प्रमीयेतेति नव
कृत्वो गृहीत्वायजुष्कैकैकं जुहुयात् प्राणा वै संस्थितयजूँषि प्राणेभ्य एवैनमन्तरेति ताजक् प्रधन्वति
विश्वरूपो वै त्वाष्ट्रो यज्ञस्य व्यृद्धं च समृद्धं चापश्यत् षडेतान्यृग्म्याणि यदेवास्य व्यृद्धं तत्
तैस्समर्धयति त्रीणि यजूँषि समृद्धमेव तत् षडृग्म्याणि षड्वा ऋतव ऋतुष्वेव प्रतितिष्ठति त्रीणि

[२] मै. ४,७,२-३ (९-१०)। कपि. ४५,३। श. ४,२६; ३,१७; ४,२। काण्व. २,४८; ३,२३; ४,४। तै. सं. ६,५,७-८।
[३] मै. १,३,३६; ४,८,४-५ (११४-११९, १२१-१२३; ७-८)। कपि. ४५,४। श. ३,४८,८,२३-२७; २०, १८-१९,९,२२-२३; ३८,२५। काण्व. ३,४६; ९,१३-२६; २१-८; २२,४,७; ३८,२४। तै. सं. ६,६,३]

यजूँषि त्रय इमे लोका एष्वेव लोकेष्वृध्नोति ॥ यद्वै यज्ञस्यातिरिच्यते वरुणस्तद्गृह्णाति यज्ञस्यैतद-
तिरिच्यते यदृजीषं यदौदुम्बरी यदधिषवणे तेनापोऽवभृथमवयन्त्यापो वै वरुणो निर्वरुणत्वाय न
वहन्तीष्वभ्यवेयुः पशवो वा ऋजीषं पशूनस्य निर्मृज्युरपशुस्स्यान्नोदञ्चोऽभ्यवेयुर्यदुदञ्चोऽभ्यवेयु-
रभीपतः प्रजा वरुणो गृह्णीयान्न दक्षिणा यद्दक्षिणा पितृभ्यः प्रजा निधूवेयुरुदञ्चः प्राञ्चोऽभ्यवयन्ति
पश्चाद्धि प्राङ् यज्ञो वरुणपाशान्मुच्यमान एति स्थावरास्स्ववयन्ति स्थावरा वै प्रत्यक्षं वरुणो वरुण
एव वरुणमवयजत उरुँ हि राजा वरुणश्चकार शतं ते राजन् भिषजस्सहस्रमिति यथायजुरग्नेरनीक-
मप आविवेशेत्याघारमाघारयति समिद्ध्या एषोद्दीप्त्यै यत्र तृणं वा दारु वा पश्येत् तत् प्रत्या-
घारयेदग्निमत्येव जुहोति समृद्ध्या अपबर्हिषः प्रयाजान् यजति प्रजा वै बर्हिः प्रजा एव मृत्योरुत्सृज-
त्याज्यभागौ यजति प्राणापानौ वा आज्यभागौ प्राणापाना एव प्रजानां वरुणपाशान्मुञ्चत्यथैष
वारुणो निर्वरुणत्वायैककपालो भवति न वै पुरुषं कपालैराप्तुमर्हत्येकधैवैनमाप्नोत्यग्नीवरुणाभ्याँ
समवद्यत्युभयत एवैनं वरुणपाशान्मुञ्चत्यग्नेश्च वरुणाच्च सर्वो वा एष यज्ञस्तस्य बहु क्रियते बहु न
क्रियते यत् सँस्थापयेद्यज्ञं वरुणेन ग्राहयेद्यन्न सँस्थापयति यज्ञमेव वरुणपाशादुत्सृजति समुद्रे ते हृदय-
मप्स्वन्तरिति समुद्रयोनिर्वै यज्ञस्स्वमेवैनं योनिं गमयति यज्ञस्य त्वा यज्ञपत इत्याहुतिमेव करोत्य-
वभृथ निचुङ्कुणेत्युभयस्मादेवैनमेतद्देवकृताच्च मनुष्यकृताच्चैनसो मुञ्चति देवीराप एष वो गर्भ
इत्यपां वा एष गर्भस्स्वमेवैनं योनिं गमयत्यभिष्ठितो वरुणस्य पाशोऽवहतो वरुणस्य पाश इति
वरुणपाशमेवावहन्त्यप्सुधौतस्य ते देव सोमेति बिन्दुमाचामति य एव तत्र सोमपीथस्तस्याव-
रुद्ध्यै ॥ यदाचामेद्वरुण एनं ग्राहुकस्स्यान्नीव गृह्णीतोभयमेव करोति प्रत्यस्तो वरुणस्य पाशो
नमो वरुणस्य पाशायेति वरुणपाशमेव प्रत्यस्यत्युदेत प्रजामायुर्वर्चो दधाना इत्याशिषमेवाशास्ते ॥
एधोऽस्येधिषीमहीति वरुणमेव निरवदायैधन्तमुपयन्ति समिदसि समेधिषीमहीत्याशिषमेवाशास्ते
तेजोऽसि तेजो मयि धेहीति तेज एवात्मन् धत्तेऽपो अद्यान्वचारिषं रसेन समगन्महीति यथायजुः
॥३॥ ६-९
यज्ञस्य वै शिरोऽच्छिद्यत ततो यो रसोऽस्रवत् सा वशाभवद्यद्वशानूबन्ध्या भवति यज्ञस्य स-
रसत्वाय मित्रो वै यज्ञस्य स्विष्टं गृह्णाति वरुणो दुरिष्टं यन्मैत्रावरुणी वशानूबन्ध्या भवत्युभयत एव
यज्ञं प्रमुच्य यजमानाय संप्रयच्छति मित्राच्च वरुणाच्च यथा लङ्गलेनोर्वरां प्रभिनत्त्येवमृक्सामाभ्यां

[उरुं हि राजा०। ऋ. १,२४,८; तै. सं. १,४,४५,१। एधोऽस्येधिषीमहि०। अथर्व. ७,८९,४। तेजोऽसि तेजो०...धेहि। अथर्व. १९,३,१२। अपो (आपो) अद्यान्वचारिषं०। ऋ. १,२३,२३; १०,९,९, अथर्व. ७,८९,१; ९,१,१४ (उत्तरार्धः); १०,५,४६; तै. सं. १,४,४५,३, ४६,२, तै. ब्रा. २,६,६,५]
[४] मै. ४,८,६ (९)। कपि. ४५,५। तै. सं. ६,६,७।

यज्ञः प्रभिद्यते यथा मत्यमन्ववास्यत्येवं तद्यद्वशानूबन्ध्या यज्ञस्य शान्त्या अनुबध्यते यत् प्रथम-
मस्रवत् तद्बृहस्पतिरुपागृह्णाद्यद् द्वितीयं तन्मित्रावरुणौ यत् तृतीयं तद्विश्वे देवा यदि तिस्रोऽनूबन्ध्या-
स्स्युर्मैत्रावरुणीं प्रथमां कुर्यादथ वैश्वदेवीमथ बार्हस्पत्यां यज्ञस्य सर्वत्वाय सरसत्वायात्रात्र हि
यज्ञस्य रसोऽयातयामा वा एतस्य देवताश्च ब्रह्म च यस्सोमेन यजते यदेते वैश्वदेवी च बार्हस्पत्या
च भवतो देवतानां चैव ब्रह्मणश्चायातयामत्वाय वैश्वदेवी मध्ये भवति वैश्वदेवीरिमाः प्रजाः प्रजा-
स्स्वेव रेतो दधात्युपाँशु यजत्यनिरुक्तँ हि रेतो बार्हस्पत्युत्तमा भवति ब्रह्म वै बृहस्पतिरन्तमेवा-
गत्य ब्रह्मवर्चसे प्रतितिष्ठति ॥ यथा वा अनड्वान् यथाश्वो विमुक्तोऽपक्रामत्येवँ सोमेनेजानाद्देवताश्च
यज्ञश्चापक्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं निर्वपत्यग्निर्वै सर्वा देवताः पाङ्क्तो यज्ञो देवताश्चैव
यज्ञं चालभते गायत्रो वा अग्निर्गायत्रच्छन्दास्तं छन्दसा व्यर्धयति यत् पञ्चकपालं कुर्यात्यष्ट-
कपालः कार्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्रच्छन्दास्स्वेनैवैनं छन्दसा समर्धयति पाङ्क्ते
याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेन यज्ञात्रैति ॥४॥ १०-११
उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधमग्निजिह्वे-
भ्यस्त्वर्तायुभ्यो वातापिभ्यः पर्जन्यात्मभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यः पृथिव्यै त्वान्तरिक्षाय
त्वा दिवे त्वा सते त्वासते त्वा भूताय त्वा भव्याय त्वा यतः प्रजा अच्छिद्रा अजायन्त तस्मै त्वा
प्रजापतये विभूदाव्ने जुहोमि स्वाहाभि सोमोऽपः कामयतेऽभि सोममापो यथा गावस्संजानाना-
स्संगच्छन्त्यान्त्यां मन्येऽयं वा एतौ संजानानौ संगत्यान्योऽन्यस्येन्द्रियं वीर्यामिहैत उभयमेतत्
प्राजापत्यं यत् सोमश्चापश्चायामेष रसो यदधि यद्वै पुत्रौ युध्येते पिता ताभ्यां कल्पयति स्व एवैनौ
लोके स्वेन भागधेयेन पिता शमयति सह त्वै यज्ञेन समृद्धेन यजते यस्यैष गृह्यते दध्ना सर्वाणि
सवनानि पशुमन्ति वीर्यावन्ति कर्तव्यानि यत् पयस्यया प्रातस्सवने चरन्ति तेन तत् पशुमद्वीर्या-
वद्यद्दधिघर्मेण मध्यन्दिने तेन तत् पशुमद्वीर्यावद्यदाशिरा तृतीयसवने तेन तत् पशुमद्वीर्यावत्
सर्वाण्यस्य सवनानि पशुमन्ति वीर्यावन्ति भवन्ति य एवं वेद ॥५॥ १२
देवा वा असुरान् यज्ञमभिजित्य ते प्रबाहुग्ग्रहान् गृह्णाना आयन् स प्रजापतिरमन्यत यः प्रथमो
ग्रहीष्यते स एवेदं भविष्यतीति स एतमँशुमपश्यत् तं पराङ् प्राणन्न गृहीत स पराङ् श्रियोऽन्त-
मगच्छद्वृषश्चैतं गृह्णीत पराङेव प्राण्यात्पापान्यात् पराङेव श्रियोऽन्तं गच्छति यदपानित्यार्ति-
मार्छति प्र वा मीयते सर्वज्यानिं वा जीयते यदि कामयेत सदृक्षयजमानस्स्यादिति न प्राण्यान्ना-

[५] मै. १,३,३५ (१४)। कपि. ४५,६। श. १,११,२०; ५,८६; ६,१,९,२५; ७,३; ३७,१९। काण्व. १,१४,३४; ५,३३; ६,१,१०,३६; ७,३; ३७,१८। तै. सं. ३,५,८।
[६] मै. ४,७,७ (१४)। कपि. ४५,७। तै. सं. ६,६,१०।

पान्यात् सदृङ्ङेव भवति चतुस्स्रक्ति पात्रं भवति चतस्रो दिशस्सर्वास्वेव दिक्ष्वृध्नोति ॥ हिरण्येन
सँस्पर्शयत्यमृतं वै हिरण्यममृतेनैवैनँ संदधाति सकृदभिषुतस्य गृह्णाति न वै प्रजापतिं सवनैराप्तु-
मर्हत्येकधैवैनमाप्नोति नर्चमन्वाह न यजुर्वदति न वै प्रजापतिं वाचाप्तुमर्हति मनसैवैनमाप्नोति योऽँशो-
रायतनं वेदायतनवान् भवति वामदेव्यमेवाँशुं गृह्णन् वामदेव्यं मनसा ध्यायेदेतद्वा अँशोरायतन-
मायतनवान् भवति य एवं वेद हिरण्यमभिव्यनित्यायुर्वै हिरण्यमायुष्येवात्मानमभिधिनोत्यद्भिः
प्रत्युक्षत्यमृतं वा आपोऽमृतेनैवैनँ संरम्भयति ॥६॥ १३-१४
अथैतेऽतिग्राह्या यदेव परमोजो वीर्यमनवरुद्धं तस्यावरुद्ध्यै यदाग्नेयस्तेजो वा अग्निस्तेज एव
तेन पुरस्ताद्धत्ते यदैन्द्र इन्द्रियं वा इन्द्र इन्द्रियमेव तेन मध्यतो धत्ते यत् सौर्यो ब्रह्मवर्चसमसा
आदित्य उपरिष्टादेव तेन ब्रह्मवर्चसं धत्ते तेजो वा अग्निरिन्द्रियमिन्द्रो ब्रह्मवर्चसमसा आदित्यस्तेजसा
चैव ब्रह्मवर्चसेन चेन्द्रियमुभयत आत्मन् परिगृह्णात्युपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्याश्चक्रियौ
पृष्ठानि यदेते न गृह्येरन्नुपरिष्टाद्गरीयाँसि पृष्ठानि प्राञ्चं यज्ञँ संमृण्युर्यदेते गृह्यन्ते पुरस्तादेव
यज्ञमुपस्तभ्य चक्रिया उपास्यति सयत्वाय प्रातस्सवने गृह्णीयादेतद्वै सवनानां वीर्यावत्तमं वीर्या-
देवैनानधिगृह्णाति ॥ देवा वै सर्वे एव सदृशा आसन्न व्यावृतमगच्छँस्तत एत एतान् ग्रहानपश्य-
न्नाग्नेयमग्निरैन्द्रमिन्द्र ऐन्द्रँ सूर्यस्सौर्यं ततो वै ते व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानां यस्यैते गृह्यन्ते व्यावृतमेव
गच्छति श्रैष्ठ्यँ समानानां प्रजापतिर्वै देवेभ्यो भागधेयानि व्यादिशद्यज्ञमेव सोऽमन्यतात्मानमन्तर-
गामिति तस्य याः प्रियास्तिस्रस्तन्व आसँस्ता अपन्यधत्तैतान् वाव स तद्ग्रहानपन्यधत्त येन यज्ञेने-
स्सेत् तस्मिन्नेतान् ग्रहान् गृह्णीयात् सर्वमेवैनँ सवीर्यँ सयोनिं सतनूमृद्ध्यै संभरति ॥ वृत्रे वा एते
पुरासन् स इन्द्रो वृत्रँ हत्वा स एतमाग्नेयमविन्दत तमग्नये प्रायच्छदेतं मे धारयेति स सौर्यमविन्दत
तँ सूर्याय प्रायच्छदेतं मे धारयेति स ऐन्द्रं विश्वेतरौ पुनरयाचत ता अस्मै न पुनरदत्तां त
इमाँल्लोकान् व्युपायन्नग्निरिममिन्द्रोऽन्तरिक्षँ सूर्योऽमुमेतैर्वै ते ग्रहैरेषु लोकेष्वार्धुवन्नेतैरेषां लोकाना-
माधिपत्यं पर्यायन् सर्वेष्वेवैषु लोकेष्वृध्नोत्येषां लोकानामाधिपत्यं पर्येति यस्यैते गृह्यन्ते ॥ यद्वै विराज-
स्तेजस्तदाग्नेयो यच्छक्वर्यास्तदैन्द्रो यद्रेवत्यास्तत् सौर्यो यत्रैतानि सामानि स्युस्तदेतान् गृह्णीयात्
साम्नाँ सतेजस्त्वायाथैते होमाश्च भक्षणानि चैतैर्वै यम्भाविश्ववयसा इमाँल्लोकानर्वाचश्च पराचश्च
प्राजानीतां यस्यैते गृह्यन्ते समस्मा इमे लोका अर्वाञ्चः पराञ्चश्च भान्त्येतेषां वै वीर्येणाग्निरिव
ऊर्ध्वो भात्यर्वाङ् सूर्यस्तपति तिर्यङ् वायुः पवते सुप्रज्ञानो वा इत इत्थमसौ लोकोऽमुतो ह त्वा
अर्वाङ् दुष्प्रज्ञानँ स ह त्वा इमं लोकममुतोऽर्वाङ् प्रजानाति यस्यैते गृह्यन्ते ॥७॥ १५-१८
आग्नेयसौम्यो बार्हस्पत्यस्ते समानमर्धमालभ्यन्ते यदाग्नेयस्तेजो वा अग्निस्तेजस्स एव तेन

[७] मै. ४,७,३ (८-१०)। कपि. ४५,८। तै. सं. ६,६,८। [८] मै. ४,७,९ (१७-२१)। तै. सं. ६,६,४।

पुरस्ताद्धत्ते यत् सौम्य इन्द्रियं वै सोम इन्द्रियमेव तेन मध्यतो धत्ते यद्बार्हस्पत्यो ब्रह्म वै बृहस्पति-रुपरिष्टादेव तेन ब्रह्मवर्चसं धत्ते तेजो वा अग्निरिन्द्रियँ सोमो ब्रह्म बृहस्पतिस्तेजसा चैव ब्रह्मवर्चसेन चेन्द्रियेणोभयत आत्मन् परिगृह्णाति दक्षिणतो वै देवानां यज्ञं रक्षाँस्यजिघाँसन् या देवता ओजीयसीस्ताभ्यो दक्षिणत आलभ्यन्ते रक्षसामपहत्यै किं तदेकादशिन्यां क्रियत इत्याहुर्ब्रह्मवादिनो यस्माद्विट् क्षत्रस्योपाशारमवस्यतीति या देवता ओजीयसीस्ताभ्यो दक्षिणत आलभ्यन्ते ॥ या अवलीयसीस्ताभ्य उत्तरां तस्माद्विट् क्षत्रस्योपाशारमवस्यति दक्षिणत उद्धनां कुर्याद्देवयजनस्य रूपं रक्षसामपहत्यै तस्माद्दक्षिणतस्तीर्थानां गाधं येऽग्निष्ठास्त्रयस्तान् समान् कुर्यादग्निं वै पशवोऽनूप-तिष्ठन्ते पशूनामुपस्थित्या आत्मा वा अग्निष्ठो भ्रातृव्या अस्येतरौ तौ ऋधीयाँसौ कुर्यादधरमेव भ्रातृव्यं कुरुते यौ परौ ता अग्निष्ठेन समौ तौ हि तस्य स्वा आ परार्धादेवं मिनुयात् पापवसीयसस्य व्यावृत्त्या अथो अधरमेव भ्रातृव्यं कुरुते येऽग्निष्ठादुदीचीनं तान् वर्षीयसः कुर्याद्यदि कामयेत विट् क्षत्रादोजीयसी स्यादिति विशमेव क्षत्रादोजीयसीं करोति ॥ येऽग्निष्ठाद्दक्षिणात् तान् वर्षी-यसः कुर्याद्यदि कामयेत क्षत्रं विश ओजीयस्स्यादिति क्षत्रमेव विश ओजीयः करोति सर्वान् समान् कुर्याद्यदि कामयेत पापवसीयसँ स्यादिति पापवसीयसमेव करोति तिरश्ची मीयते दिशां विधृत्या ऊर्ध्वा मीयन्त एषां लोकानां विधृत्यै न यूपं बहिर्वेदि मिनुयान्न वेद्या अतिरेचयेद्यजमानो वै यूप एतावती पृथिवी यावती वेदिर्यद्यूपं बहिर्वेदि मिनुयात् पृथिव्या यजमानं निर्भजेद्यद्वेद्या अतिरेचये-द्भ्रातृव्याय लोकमुच्छिंपेत् समां वेद्यन्तेन मिनुयान्न पृथिव्या यजमानं निर्भजति न भ्रातृव्याय लोकमुच्छिंपत्युपरसंमितां मिनुयाद्यदि कामयेत पितृलोक ऋध्नुयादिति पितृलोक एवर्ध्नोति रशना-संमितां मिनुयाद्यदि कामयेत मनुष्यलोक ऋध्नुयादिति मनुष्यलोक एवर्ध्नोति चषालस्संमितां मिनु-याद्यदि कामयेत देवलोक ऋध्नुयादिति देवलोक एवर्ध्नोति सर्वेष्वेवैषु लोकेष्वृध्नोति रथाक्षेण मिमीते वज्रो वै यूपो वज्रो रथो वज्र एव वज्रं दधाति सर्वेऽग्निष्ठाः कार्या या अग्निष्ठा अश्रयस्ता अग्निमभि-पर्यूहेत् तेनैव सर्वेऽग्निष्ठाः क्रियन्ते ॥ यदग्निष्ठाद्रशना विहरन्ति तेनैव सर्वेऽग्निष्ठाः क्रियन्ते द्वे द्वे रशने यूपमृच्छतस्तस्मात् स्त्रियः पुँसोऽविरिक्तास्तस्मादुतैको बह्वीर्जाया विन्दते नैका बहून् पतीनुप-शयो द्वादशो भवति द्वादशमासस्संवत्सरस्संवत्सरस्याप्त्यै तं दक्षिणतः परिहृत्य निदधाति दक्षिणतो वै देवानां यज्ञं रक्षाँस्यजिघाँसन् वज्रो यूपो रक्षसामपहत्यै यद्यभिचरेत् पुरुषपशुं कुर्यादिदमह-ममुमामुष्यायणममुष्याः पुत्रं नियुनज्मीति रशनां यूपेऽधिन्यस्येद्वज्रो वै यूपो वज्र एवैनं नियुनक्ति ताजक् प्रधन्वति यदि नाभिचरेदारण्यं पशुं निर्दिशेत् तस्य नाश्नीयादुपशयं वा अन्वारण्याः पशव उपतिष्ठन्त एकादशिनीं ग्राम्या यदेकादशिन्या वेदिर्मीयते तस्माद्ग्राम्याः पशव आविरिव शान्ता इव
यदुपशयो गुहेव शये तस्मादारण्याः पशवो गुहेव निलायमिव प्रलायमिव चरन्ति ॥८॥ १९-२२

प्रजापतिः प्रजास्सृष्ट्वा स रिरिचान इवामन्यत स एतामेकादशिनीमपश्यत् तामाहरत् तयात्मान-माप्रीणीत यो रिरिचान इव मन्येत स एतामेकादशिनीमाहरेद्यस्मिन्नेव कस्मिंश्च यज्ञे दश वै पुरुषे प्राणा आत्मैकादशो यावानेवास्यात्मा तमाप्रीणात्यग्निस्सर्वा देवता अग्ना एवैता देवता उपालभ्यन्त आत्मा वा आग्नेयो वाक् सरस्वती यत् सारस्वती वाचमेव मिथुनमात्मन्नुपनियुङ्क्तेऽथ सौम्य-स्सोमो रेतोधा मिथुन एव रेतो दधात्यथ पौष्णः पशवो वै पूषा प्रैव जनयत्यथ बार्हस्पत्यो ब्रह्म वै बृहस्पतिर्ब्रह्मैव पशुष्वधिवियातयत्यथ वैश्वदेवो वैश्वदेवीरिमाः प्रजाः प्रजा एव ब्रह्मन्ननुनियुन-क्त्यथैन्द्रः क्षत्रं वा इन्द्रः क्षत्रमेव प्रजास्वधिवियातयत्यथ मारुतो विड्वै मरुतो विशमेव क्षत्रायानु-नियुनक्त्यथैन्द्राग्न ओजो वै वीर्यमिन्द्राग्नी ओजसैव वीर्येण विशं क्षत्रायोपोहति प्रसवायैव सावित्रो निर्वरुणत्वाय वारुणः प्रजापतिः प्रजा असृजत ता अस्मादपाक्रामँस्ता ऊर्ध्वा आयँस्ता अकामय-तोप मा वर्तेरन्निति सोऽतप्यत स आत्मानं मेधायालभत ता एनमुपावर्तन्त ता अस्मादबिभयुस्ता न्याच्यन्त तस्मात् पशवो न्यक्नास्ता आरादचरँस्ता एनं बलिभिरुपायन् देवयजनेन पृथिवी बर्हि-षौषधयः प्रोक्षणीभिराप इध्मेन च यूपेन च वनस्पतयः पशुभिरजावय आशिरा चाज्येन च गाव एते वै देवा बलिहृतो यज्ञः प्रजापतिस्तस्मा एते सर्वा हैवं बलिं हरन्त्यास्मै बलिं हरन्ति य एवं वेद ॥ तेषामपक्रमादबिभेत् तेषां द्वन्द्वं वीर्याण्यात्मन्नुपन्ययुङ्क्तात्मा वा आग्नेयो वाक् सरस्वती-न्द्रियँ सोमो वाचं चैवेन्द्रियं चात्मन्नुपनियुङ्क्तेऽथ पौष्णोऽथ बार्हस्पत्यः पशवो वै पूषा ब्रह्म बृहस्पतिः पशूँश्चैव ब्रह्म चात्मन्नुपनियुङ्क्तेऽथ वैश्वदेवोऽथैन्द्रो वीर्यं वै विश्वे देवास्सह इन्द्रो वीर्यं चैव सहश्चात्मन्नुपनियुङ्क्तेऽथ मारुतोऽथैन्द्राग्नो बलं वै मरुत ओज इन्द्राग्नी बलं चैवौजश्चात्मन्नुपनियुङ्क्ते
प्रसवायैव सावित्रो निर्वरुणत्वाय वारुणः ॥९॥ २३-२४

आग्नेयँ सारस्वतीं सौम्यं बार्हस्पत्यं तान् सहालभेत ब्रह्मवर्चसकामः प्रजाकामः पशुकामः पुरोधाकामो यदाग्नेय आग्नेयो हि ब्राह्मणो यत् सारस्वती वाग्वै सरस्वती वाचँ हि वदति यत् सौम्यस्सोमँ हि पिबति यद्बार्हस्पत्यो ब्रह्म वै बृहस्पतिर्ब्रह्मैव चतुष्पात् संपाद्य प्रतिष्ठापयति ब्रह्म-वर्चसी भवत्यथ पौष्णः पशवो वै पूषा पशूनेव ब्रह्मन्ननुनियुनक्त्यथैन्द्राग्नोऽथैन्द्रः क्षत्रं वा इन्द्राग्नी क्षत्रमिन्द्रः क्षत्रमेव संपाद्य प्रतिष्ठापयत्यथो क्षत्रेणैव पशून् ब्रह्मण उपोहत्याग्नेयो मध्ये भवत्यैन्द्रा अभित आग्नेयो वै ब्राह्मण ऐन्द्रो राजन्यो ब्रह्मणैव क्षत्रं मध्यतो व्यवसर्पति प्र पुरोधामाप्नोति य एवं वेदेन्द्राग्नी पशूनां भूयिष्ठभाजौ करोत्यग्नेराग्नेय इन्द्रस्यैन्द्र ऐन्द्राग्नस्सह तस्माद्ब्राह्मणश्च राजन्यश्च प्रजानां भूयिष्ठभाजा अथ वैश्वदेवोऽथ मारुतो विड्वै विश्वे देवा विण्मरुतो विशमेव संपाद्य तां क्षत्रायानुनियुनक्ति ब्रह्ममुखमेव क्षत्रं करवा तस्मै विशमनुनियुनक्ति प्रसवायैव सावित्रो निर्वरुणत्वाय

[९] मै. ४,७,८ (१५)। कपि. ४६,२। तै. सं. ६,६,५। [१०] कपि. ४६,३।

वारुणस्सम्यगेव ब्रह्म समूहति सम्यक् क्षत्रँ समीचीं विशं यत्रैव क्लृप्तैकादशिन्यालभ्यते कल्पते तत्र प्रजाभ्यो ब्राह्मण एव ब्राह्मणो भवति राजन्यो राजन्यो वैश्यो वैश्य एकादशिन्या वा इदमक्लृप्तमनु प्रजाभ्यो न कल्पत एषा वावैकादशिनी तामेतां कापेया विदुस्तामेवामातिरात्रचरमा-
मालभेत सत् त्रियेयमितरायामिदं प्रजा आपद्य चरन्त्यह्नामेवैषा विधैतद्देवत्यान्यहानि ॥१०॥ २५
[२००२]

॥ इति श्रीयजुषि काठके चरकशाखायां मध्यमिकायां दीर्घजिह्वी नामैकोनत्रिंशं स्थानकं संपूर्णम् ॥२९॥

अथ त्रिंशं स्थानकम्।

पात्नीवतम्।

प्रजननं वै पात्नीवतो यद्वै किंच यज्ञे पात्नीवतं क्रियते प्रजननमेव तत् पराङ् वा एतर्हि यज्ञः पराचीर्देवतास्त्वाष्ट्रो भवति पराचीष्वेव देवतासु त्वष्टारं वृषाणमपिसृजति सोऽस्मै मिथुनं करोति वज्रो वा एष पुरस्तात् संमीयते यदेकादशिनी स ईश्वरः प्रत्यञ्चं यज्ञँ संपुरो यत् पात्नीवतो मीयते प्रत्युत्तब्ध्यै सयत्वाय मनोर्वै कपालान्यासँस्तैर्यावतो यावतोऽसुरानभ्युपादधात्ते पराभवन्नथ तर्हि त्रिष्टावरुत्री आस्तामसुरब्रह्मौ ता असुरा अब्रुवन्निमानि मनुकपालानि याचेथामिति तौ प्रातरि-त्वाना अभिप्रापद्येतां वायवेऽग्ना३इ वायव इन्द्रा३ इति किंकामौ स्थ इत्यब्रवीदिमानि नौ कपालानि देहीति तान्याभ्यामददात् तान्यरण्यं पराहृत्य समपिंष्टां तन्मनोर्गावोऽभिव्यतिष्ठन्त तान्यृषभस्स-मलेट् तस्य रुवतो यावन्तोऽसुरा उपाशृण्वँस्ते पराभवँस्तौ प्रातरित्वाना अभिप्रापद्येतां वायवेऽग्ना३इ वायव इन्द्रा३ इति किंकामौ स्थ इत्यब्रवीदनेन त्वर्षभेन याजयावेति तत् पत्नी यजुर्वदन्ती प्रत्यपद्यत तस्या द्यां वागातिष्ठत् तस्या वदन्त्या यावन्तोऽसुरा उपाशृण्वँस्ते पराभवँस्तस्मान्नक्तँ स्त्री चन्द्रतरं वदति तौ प्रातरित्वाना अभिप्रापद्येतां वायवेऽग्ना३इ वायव इन्द्रा३ इति किंकामौ स्थ इत्यब्रवी-दनया त्वा पत्न्या याजयावेति सा पर्यग्निकृतासीदथेन्द्रोऽचायन्मनुँ श्रद्धादेवं त्रिष्टावरुत्री असुरब्रह्मौ जायया व्यर्धयत इति स आगच्छत् सोऽब्रवीदाभ्यां त्वा याजयानीति नेत्यब्रवीन्न वा अहमनयो-
रीश इत्यतिथिपतिर्वावातिथेरीश इत्यब्रवीत् ता अस्मै प्रायच्छत् स प्रतिवेशो वेदिं कुर्वन्नास्त ता १
अपृच्छतां कोऽसीति ब्राह्मण इति कतमो ब्राह्मण इति ॥

किं ब्राह्मणस्य पितरं किमु पृच्छसि मातरम्।
२
श्रुतं चेदस्मिन् वेद्यँ स पिता स पितामहः ॥

इति ता अविन्तामिन्द्रो वा इति तौ प्रापततां तयोर्याः प्रोक्षणीराप आसँस्ताभिरनुविसृज्य

[१] मै. ४,८,१ (१-४)। कपि. ४६,४। तै. सं. ६,६,६।

शीर्षे अच्छिनत् तौ वृषश्च यवापश्चाभवतां तस्मात् तौ वर्षेषु शुष्यतोऽद्भिर्हि हतौ वा पर्यग्निकृता-मुदासृजत् तयार्ध्नोत् ता इमा मनाव्याः प्रजा यत् पर्यग्निकृतं पात्नीवतमुत्सृजति यामेव मनुर्ऋद्धि-मार्ध्नोत् तामृध्नोति सँस्थाप्या३ न सँस्थाप्या३ इति मीमाँसन्ते स्रवति वै यज्ञोऽसँस्थितस्तँ स्रवन्तं यजमानोऽनु परास्रवति प्रजया च पशुभिश्च सँस्थाप्य एव यज्ञस्य प्रतिष्ठित्यै यदि सँस्थापयेद्यावन्ति पशोरवदानानि तावन्त्याज्यस्यावद्येदयातयामँ ह्येतत् प्राजापत्यं यदाज्यमयातयामो देवानां प्रजा-
पतिस्तदेव सँस्थापयति तदु न सँस्थापयत्युभयमेव करोति ॥१॥ ३

ऐन्द्रवायवाग्रा अग्रे गृह्णन्तेऽथ शुक्राग्रा अथाग्रायणाग्रा गायत्रो वा ऐन्द्रवायवस्त्रैष्टुभश्शुक्रो जागत आग्रायण एतावन्ति वै छन्दाँसि च्छन्दोभिर्देवास्स्वर्गं लोकमायँश्छन्दोभिरेव स्वर्गं लोक-मेत्याग्रायणश्चतुर्थेऽहञ्जागतो वा आग्रायणो जगन्मुख एष त्रिरात्रो यदेव च्छन्द आप्नोति तेनोत्तरं त्रिरात्रं प्रतनुत ऐन्द्रवायवाग्राः पञ्चमेऽहन् गायत्रो वा ऐन्द्रवायवः प्राणो गायत्री प्राणमेव मध्यतो दधाति तस्मान्मध्यतः प्राणश्शुक्राग्राष्षष्ठेऽहँस्त्रैष्टुभो वै शुक्रस्त्रिष्टुबन्त एष त्रिरात्रोऽन्तमेवैनमभ्यु-द्दृहति शुक्राग्रा एव सप्तमेऽहँस्त्रैष्टुभो वै शुक्रस्त्रिष्टुम्मुख एष च्छन्दोमः प्रत्युत्तब्ध्यै सयत्वायाथो यदेव च्छन्द आप्नोति तेनोत्तरं त्रिरात्रं प्रतनुत आग्रायणाग्रा अष्टमेऽहञ्जागतो वा आग्रायणो जग-न्मध्य एष च्छन्दोमश्छन्दसामेव व्यूहमनुव्यूहत्यैन्द्रवायवाग्राः प्रायणीय ऐन्द्रवायवाग्रा उदयनीये प्राणो वा ऐन्द्रवायवः प्राणेनैव प्रयन्ति प्राणेनोद्यन्ति प्राणा वै ग्रहास्तानेतन्मोहयति यद्व्यतिहारं गृह्णाति यदग्रान् यदग्रान् गृह्णीयात् तं धारयन्ना सादयितोरासीत प्राणा वै ग्रहाः प्राणानेवा-यतनश आपादयत्यथोत्तरं प्रसृता गृह्णन्त एवँ ह वै केशिनो दाल्भ्यस्य वँशव्रश्चने ग्रहाञ्जगृहुस्स होवाच लुशाकपिः खार्गलिः कथं ग्रहानग्रहीष्टेतीत्थमित्थमिति हास्मा ऊचुस्स होवाच त्र्यनीकमस्य
प्रजा भविष्यतीति ततः पञ्चालास्त्रेधाभवन् यस्यैवं ग्रहा गृह्णन्ते त्र्यनीकमस्य प्रजा भवति ॥२॥ ४

ऐन्द्रवायवाग्रान् गृह्णीत यः कामयेत यथापूर्वं प्रजाभ्यः कल्पेतेति यज्ञस्य वै क्लृप्तमनु प्रजाभ्यः कल्पते यज्ञस्याक्लृप्तमनु न कल्पते यथापूर्वमेव प्रजाभ्यः कल्पयति न कनीयाञ्ज्यायाँसमतिक्राम-त्यैन्द्रवायवाग्रान् गृह्णीयादामयाविनः प्राणेन वा एष व्यृध्यते यस्यामयति प्राण ऐन्द्रवायवः प्राणे-नैवैनँ समर्धयति मैत्रावरुणाग्रान् गृह्णीरन् येषां दीक्षितानां प्रमीयेत प्राणापानाभ्यां वा एते व्यृध्यन्ते येषां दीक्षितानां प्रमीयते प्राणापानौ वै मित्रावरुणौ प्राणापाना एव मुखतः परिहरन्ते तस्मान्मुखतः प्राणापाना आश्विनाग्रान् गृह्णीतानुजावरोऽश्विनौ वै देवानामानुजावरौ ता अग्रं पर्यै-तामश्विना एतस्य देवता य आनुजावरस्ता एवान्वारभते ता एनमग्रं परिणयतः शुक्राग्रान् गृह्णीत

[२] कपि. ४९,५। तै. सं. ७,२,८। [३] कपि. ४६,६। तै. सं. ७,२,७।

गतश्रीरसौ वा आदित्यश्शुक्र एषोऽन्तोऽन्तं मनुष्यश्रियो गत्वा निवर्ततेऽन्वादेवान्तमालभते न ततः पापीयान् भवति यादृङ् सन् यजते मन्थ्यग्रान् गृहीताभिचरन्नार्तपात्रं वा एतद्यन्मन्थिपात्रं मृत्युनैवैनं ग्राहयत्युक्थ्याग्रान् गृहीताभिचर्यमाणस्सर्वेषां वा एतत् पात्राणामिन्द्रियं वीर्यं यदुक्थ्यपात्रं सर्वेणैवैनामिन्द्रियेणार्तिप्रयुङ्क्ते ॥ ५

मा त्वत्क्षेत्राण्यरणानि गन्म मा पस्फरीः पयसा मा न आधक् ।
मा वयमेनोऽन्यकृतं भुजेम सस्त्वत्पभि नो नेषि वस्यः ॥ ६

इति मृत्योर्वै क्षेत्राण्यरणानि तेनैव मृत्योः क्षेत्राणि न गच्छत्याग्रायणाग्रान् गृह्णीत यस्य पिता पितामहः पुण्यस्स्यादथ तन्न प्राप्नुयाद्वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो भवत्यथ तन्न प्राप्नोत्युप इवैतद्यज्ञस्य वागिव यदाग्रायणो वाचैवैनमिन्द्रियेण समर्धयति पूर्णान् ग्रहान् गृह्णीयादामयाविनः प्राणान् वा एतस्य शुगृच्छति यस्यामयति प्राणा ग्रहाः प्राणानेवास्य शुचो मुञ्चति पूर्णान् ग्रहान् गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत् प्राणान् वा एतर्हि प्रजानां शुगृच्छति यर्हि पर्जन्यो न वर्षति प्राणा ग्रहाः प्राणानेव प्रजानां शुचो मुञ्चति ताजक् प्रवर्षति ॥३॥ ७

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु ॥ ८
उपयामगृहीतोऽस्यदित्यै त्वा चतुरूध्न्यै ॥ ९
उदीरयत मरुतस्समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ।
न वो दस्रा उपदस्यन्ति धेनवश्शुभं यातामनु रथा अवृत्सत ॥ १०
उपयामगृहीतोऽस्यदित्यै त्वा चतुरूध्न्यै ॥ ११
महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् ॥ १२

उपयामगृहीतोऽस्यदित्यै त्वा चतुरूध्न्यै ॥ एष ते योनिरदित्यै त्वा चतुरूध्न्यै ॥ वृष्टिर्वै देवेभ्योऽपाक्रामत् सैषु लोकेष्वश्रयत तां देवा अन्वेष्टुमध्रियन्त त एतं ग्रहमपश्यँस्तमगृह्णत तेनैभ्यो लोकेभ्यो वृष्टिं संप्राच्यावयँस्तमेतं वृष्टिकामो गृह्णीत क्षेत्रस्य पते मधुमन्तमूर्मिमित्यसौ वै क्षेत्रस्य पतिरमुतो वर्षत्युदीरयत मरुतस्समुद्रत इति मरुतस्सृष्टां वृष्टिं नयन्ति महीमू षु मातरं सुव्रतानामितीयमदितिरस्यां वर्षत्येता वै देवता वर्षस्येशते ता एवोपधावत्येभ्य एव लोकेभ्यो वृष्टिं

[४] मै. १,३,७०,७२; २,४,३१,३३; ४,१०,३४ । कपि. ३६,७ । वा. ८,१; २३,५ । काण्व. ३,५०; २३,५ । [क्षेत्रस्य पते मधुमन्तं० । ऋ. ४,५७,२; तै. सं. १,१,१४,३; नि. १०,१६ । उदीरयत (०रयथा मरुत० । ऋ. ५,५५,५; तै. सं. २,४,८,२ । महीमू षु मातरं० । तै. सं. १,५,११,५; ७,१,१८,१; तै. ब्रा. ३,१,१,३; तै. आ. १,१३,२; मा. श्रौ. ७,२,६; कपि. ४६,७]

संप्रच्यावयति चतुस्स्तनं पात्रं भवति चतस्रो दिशो दिग्भ्य एव वृष्टिं संप्रच्यावयति यं प्रथमं स्तनमनुपद्यते तस्या दिशोऽभ्येतद्वर्षत्यपि पात्रे क्रियमाणे वर्षति मृन्मयेन गृह्णाति दारुमयेण जुहोति न हि मृन्मयमाहुतिमानशे ॥४॥ १३-१५

उपयामगृहीतोऽसि प्रजापतये त्वा प्रजाभ्य एष ते योनिः प्रजापतये त्वा प्रजाभ्य उपयामगृहीतोऽसि प्रजाभ्यस्त्वा प्रजापतय एष ते योनिः प्रजाभ्यस्त्वा प्रजापत उपयामगृहीतोऽस्यन्तरिक्षाय त्वा वनस्पतिभ्य एष ते योनिरन्तरिक्षाय त्वा वनस्पतिभ्य उपयामगृहीतोऽसि वनस्पतिभ्यस्त्वान्तरिक्षायैष ते योनिर्वनस्पतिभ्यस्त्वान्तरिक्षायोपयामगृहीतोऽस्यद्भ्यस्त्वौषधीभ्य एष ते योनिरद्भ्यस्त्वौषधीभ्य उपयामगृहीतोऽस्योषधीभ्यस्त्वाद्भ्य एष ते योनिरोषधीभ्यस्त्वाद्भ्यः ॥ १६

उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ १७
उपयामगृहीतोऽसि सूर्याय त्वैष ते योनिस्सूर्याय त्वा ॥ १८
वाचस्पतिं विश्वकर्माणमूतये मनोयुजं वाजे अद्या हुवेम ।
स नो नेदिष्ठं हवनान्यागमद्विश्वशम्भूरवसे साधुकर्मा ॥ १९
उपयामगृहीतोऽसीन्द्राय त्वा विश्वकर्मण एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ॥ २०
महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् ॥ २१

उपयामगृहीतोऽस्यदित्यै त्वैष ते योनिरदित्यै त्वा ॥ संततिर्वा एते ग्रहा यथा वै शालैवं संवत्सरो यथा शालायाः पक्षसी एवं संवत्सरस्य पक्षसी यथा मध्यमो वंश एवं दिवाकीर्त्यं यदेते न गृह्येरन् विषूची संवत्सरस्य पक्षसी व्यवस्रंसेयातामार्तिमार्छेयुर्यदेते गृह्यन्ते यथा शालायाः पक्षसी मध्यमं वंशमभिसमायच्छन्त्येवमेवैतत् संवत्सरस्य पक्षसी दिवाकीर्त्यमभिसंतन्वन्ति ते सर्वे सह दिवाकीर्त्ये गृह्यन्ते यथा वै मध्यमो वंश एवं दिवाकीर्त्यं यद्वै सौबलस्स्यादवशीर्येत ॥ यदेते न गृह्यन्ते द्रढिम्न एवानुनद्ध्या अशिथिलत्वाय शुक्राग्रा एतदहर्गृह्यन्ते त्रैष्टुभो वै शुक्रस्त्रैष्टुभमेतदहः प्रत्युत्तब्ध्यै सयत्वाय सौर्य एतदहः पशुरालभ्यते सौर्यो ग्रहो गृह्यतेऽसौ वा आदित्य एतदहस्तमेव प्रत्यक्षमृध्नुवन्ति षडेतदहरतिग्राह्या गृह्यन्ते पशुस्सप्तमस्सप्त प्राणा असा आदित्यश्शिरः प्रजानां शीर्षन्नेव प्राणान् दधाति तस्मात् सप्त शीर्षण्याः प्राणा इन्द्रो वै वृत्रं हत्वा स इमांल्लोकानभ्यजयत्

[५] मै. १,३,७०,७२,९१,९४,१००; २,१०,२२, ४,१०,३४ । वा. ७,४१; ८,१,४०-४१,४५-४६; १७,२३, ११,५; २३,२,४ । काण्व. ३,५०; ८,२२-२३,२६-२८; ९,६; १८,२२; २३,५; २५,२,४; ३२,३१ । [उदु त्यं जातवेदसं० । ऋ. १,५०,१; सा. ३१; अथर्व. १३,२,१६, २०,४७,१३; तै. सं. १,२,८,२; ४,४३,१; नि. १२,१५ । वाचस्पतिं विश्वकर्माणं० । ऋ. १०,८१,७; तै. सं. ४,६,२,५ । महीमू षु मातरं० । (चतुर्थानुवाके द्रष्टव्यम्)]

तस्यासौ लोकोऽनभिजित आसीत् तं विश्वकर्मा भूत्वाभ्यजयद्वैश्वकर्मणो गृह्यतेऽमुष्य लोकस्याभिजित्यै यन्ति वा एतेऽस्माल्लोकाद्ये वैश्वकर्मणं गृह्णते पराञ्च इव ह्येते न रोहन्ति त ईश्वराः प्रमेतोरादित्यं ये गृह्णीरन्नियमदितिरस्यामेव तेन प्रतितिष्ठन्त्या परार्धात् संवत्सरस्यान्यमन्यं गृह्णीरन् विश्वान्यन्यत्र कर्माणि कुर्वाणा यन्त्यस्यामन्येन प्रतितिष्ठन्ति ता उभौ सह महाव्रते गृह्येते अन्तमेवागत्योभयोर्लोकयोरृध्नुवन्ति वैश्वकर्मणेनामुष्मिन्नादित्येनास्मिन्नर्क्यमुक्थं भवत्यन्नं वा अर्क्यमन्नाद एव तेन प्रतितिष्ठन्ति ॥५॥ २४

अग्नये त्वा प्रवृहामि गायत्रेण च्छन्दसेन्द्राय त्वा प्रवृहामि त्रैष्टुभेन च्छन्दसा विश्वेभ्यस्त्वा देवेभ्यः प्रवृहामि जागतेन च्छन्दसा ॥ २५

अग्निः प्रातस्सवने पात्वस्मान् वैश्वानरो विश्वकृद्विश्वशंभूः ।
स नः पावको द्रविणं दधात्वायुष्मन्तस्सहभक्षास्स्याम ॥ २६
विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः ।
सुमेधसः प्रियमेषां वदन्तो वयं स्याम पतयो रयीणाम् ॥ २७
इदं तृतीयस्सवनं कवीनामृतेन ये चमसमैरयन्त ।
सौधन्वना अमृतमानशानास्स्विष्टं नोऽभि वस्यो नयन्तु ॥ २८

शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपे सूर्यस्य रश्मिषु रेशीनां त्वा पत्मन्नाधूनोमि मान्दानां त्वा पत्मन्नाधूनोमि कृशनानां त्वा पत्मन्नाधूनोमि मन्दनानां त्वा पत्मन्नाधूनोमि देवयानीनां त्वा पत्मन्नाधूनोमि ॥ २९

आ सीमुग्रा अचुच्यवुर्दिवो धारामसश्चत । ककुभं रूपमृषभस्य रोचते बृहत् ॥ ३०

सोमस्सोमस्य पुरोगाश्शुक्रश्शुक्रस्य पुरोगा यत् ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा ॥ त्रिर्वसुभ्यो अवपथास्त्री रुद्रेभ्यो अवपथास्त्रिरादित्येभ्यो अवपथा येन रूपेण प्रजापतयेऽवपथास्तेन मह्यं पवस्वोशिक्त्वं देव सोम गायत्रेण च्छन्दसाग्नेः पाथ उपेहि वशी त्वं देव सोम त्रैष्टुभेन च्छन्दसेन्द्रस्य पाथ उपेह्यस्मत् सखा देव सोम जागतेन च्छन्दसा विश्वेषां देवानां पाथ उपेहि ॥६॥ ३१-३२

देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा एतमदाभ्यमपश्यँस्तमगृह्णताग्नये त्वा प्रवृहामि गायत्रेण च्छन्दसेति देवताश्चैव तच्छन्दाँसि चामुष्णन्नग्निः प्रातस्सवने पात्वस्मानिति सवनान्येव तदामुष्णँश्शुक्रं ते शुक्रेण गृह्णामीत्यहोरात्रयोरेव तद्रूपे आमुष्णन्

[६] मै. १,३,३६ (९६-९९) । मा. श्रौ. ७,१,१ । वा. ८,४७-५० । काण्व. ८,२९-३२ । तै. सं. ३,१,९ ।
[७] मै. ४,७,७ (१४) । वा. ८,४७-५० । काण्व. ८,२९-३२ । तै. सं. ६,६,९ ।

रेशीनां त्वा पत्मन्नाधूनोमीत्यपामेव तद्रूपाण्यामुष्णँस्ते देवा यावानेव यज्ञस्तं परिगृह्याजुहवुस्तँ हुतमसुरा अन्वबुध्यन्त तेऽब्रुवन्नदभन्न इति तदस्यादाभ्यत्वमथो यदेनान् दब्धुं नाशक्नुवँस्तदस्यादाभ्यत्वँ स एव भ्रातृव्यस्यैव दब्ध्यै गृह्यते ॥ निग्राभ्याणां गृह्णाति सोमो वै दभ्रो गृह्णाति सोमो हि दधि चतुस्स्रक्ति पात्रं भवति चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठति घ्नन्ति वा एतत् सोमं यदभिषुण्वन्ति तस्यैषातिमोक्षिणी तनूर्यदादाभ्यस्तामेवान्वहुताँ हुतस्स्वर्गं लोकमभ्यतिमुच्यते तदनु यजमानो यज्ञात् सा हि यजमानस्स ह त्वा अमुष्मिल्लोके सर्वतनूर्यस्यैष गृह्यते वि वा एतद्यज्ञं छिनत्ति यत् पुराभिषोतोस्सँस्थां गमयति यदंशूननभिषुतानपिसृजति यज्ञस्य संतत्या अविच्छेदाय ॥ न सामानुक्थोऽग्रहोऽस्तीत्याहुरनायतनस्स इति त्रिर्वसुभ्यो अवपथा इत्येतदुक्थमेषाशीर्गौरिवीतँ साम देवा वै यद्ब्रह्म व्यभजन्त ततो यदत्यरिच्यत तद्गौरिवीतमभवदतिरिक्तं वै गौरिवीतमतिरिक्ता अतिग्राह्या अतिरिक्तेनैवातिरिक्तमाप्नोति यत्र गौरिवीतँ साम स्यात् तदपि बहूनतिग्राह्यान् गृह्णीयात् तेनैवैनान् सामवत उक्थवतो निदानवत आयतनवतः करोति निदानवानायतनवान् भवति य एवं वेद ॥७॥ ३३-३५

प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः । ता अस्मै प्रतिवेदय चिकित्वाँ अनुमन्यताम् ॥ ३६
पशुपतेः पशवो विरूपास्सदृशा उत । तेषां यं वव्रिरे देवास्तँ स्वराडनुमन्यताम् ॥ ३७
प्रजानन्तः प्रतिगृह्णन्ति पूर्वे प्राणमङ्गेभ्यो अधिनिश्चरन्तम् ।
हुतो याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः ॥ ३८
ये बध्यमानमनुबध्यमाना अन्वैक्षन्त मनसा चक्षुषा च ।
अग्निष्टाँ अग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया संविदानः ॥ ३९
य आरण्याः पशवो विश्वरूपा विरूपास्सन्तो बहुधैकरूपाः ।
वायुष्टाँ अग्रे प्रमुमोक्तु देवो विश्वकर्मा प्रजया संरराणः ॥ ४०
येषामीशे पशुपतिः पशूनां चतुष्पाद उत ये द्विपादः ।
निष्क्रीतास्ते यज्ञियं भागं यन्तु रायस्पोषा यजमानं विशन्तु ॥ ४१
प्रमुञ्चमाना भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।
उपाकृतं शशमानं यदस्थात् प्रियं देवानामप्येतु पाथः ॥ ४२

[८] मै. १,२,१५ (१०२,१०७–१०८) । तै. सं. ३,१,४ । [प्रजानन्तः प्रति० । अथर्व. २,३४,५ । ये बध्यमानमनु० । अथर्व. २,३४,३ । य (ये) आरण्या(ग्राम्याः)० । अथर्व. २,३४,४ । येषामीशे (य ईशे) पशुपतिः० । अथर्व. २,३४,१ । प्रमुञ्चमाना (प्रमुञ्चन्तो)० । अथर्व. २,३४,२]

नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिस्सह देवयानः ।
सम्यगायुर्यज्ञो यज्ञपतौ दधातु ॥ ४३
उपेत शमितारो देवानां दसितँ हविः । पशोः पाशं प्रमुञ्चत पाशं यज्ञपतेरधि ॥ ४४
अदितिः पाशान् प्रमुमोक्त्वेतान्नमः पशुभ्यः पशुपतयेऽस्तु ।
यो नो द्वेष्टयधरस्स पदीष्ट तस्मिन् पाशान् प्रतिमुञ्चाम एतान् ॥ ४५
त्वामु त्ये दधिरे प्रथमं विचक्ष्यँ शृतंकर्तारमुत यज्ञियं च ।
अग्ने सदक्षस्सतनूर्हि भूत्वाथ वह हव्यं देवेभ्यो जातवेदः ॥ ४६
जातवेदो वपया गच्छ देवाँस्त्वँ हि होता प्रथमो बभूथ ।
घृतस्याग्ने तन्वा संभव सत्यास्सन्तु यजमानस्य कामाः ॥८॥ ४७

प्रजापतेर्वै पशवो जाताश्च जायमानाश्च रुद्रस्य जाता व्यृद्धेन वा एष पशुना चरति य एतयो-
स्सन्तं पशुं तमनिर्याच्यैतयोरालभते ययोरेव पशुस्तयोरेवैनं निर्याच्य तेनानुमतेन प्रसूतेनर्ध्नोत्येव
जीवन् पशुस्स्वर्गं लोकं गमयितव्य इत्याहुर्न मृतस्स्वर्गं लोकं गन्तुमर्हतीति प्रजानन्तः प्रतिगृह्णन्ति
पूर्व इति जीवन्तमेवैनँ स्वर्गं लोकं गमयति ये च वै ग्राम्याः पशवो ये चारण्यास्त एतमालभ्यमान-
मनुध्यायन्ति स ईश्वरो यजमानोऽपशुः पराभवितोर्ये वध्यमानमनुवध्यमाना य आरण्याः पशवो
विश्वरूपा इति पशूनामेवैषा संप्रमुक्तिः पञ्चैतानि जुहोति पाङ्क्ताः पशवो यावानेव पशुस्तँ स्वर्गं
लोकं गमयति ॥ यदवघ्रापयति तमेव निर्दिष्टमालभते पशुर्वै यज्ञो यज्ञात् स यजमान एतत्
पशुमालभत इत्याहुः क्वैतर्हि यजमानो भवतीति नाना प्राणो यजमानस्य पशुनेति प्राणा एवैनयो-
र्व्यावर्तयति यज्ञेन वा एनमेतद्व्यर्धयति यन्नाना प्राण इत्याह सम्यगायुर्यज्ञो यज्ञपतौ दधात्विति
यज्ञेनैवैनँ समर्धयत्यधिरज्जू वा एता अमुष्मिल्लोके पशुश्च यजमानश्च ययोरेतेन पाशं न प्रमुञ्चत्यु-
पेत शमितारो देवानां दसितँ हविः पशोः पाशं प्रमुञ्चत पाशं यज्ञपतेरधीति पाशमेवैनयोः प्रमुञ्चति
वरुणपाशँ स ह त्वा अमुष्मिल्लोकेऽपरज्जुर्यस्यैवं क्रियते यद्यभिचरेद्यो नो द्वेष्टयधरस्स पदीष्ट
तस्मिन् पाशान् प्रतिमुञ्चाम एतानिति स्तम्भं वा दारु वाभिदध्यात् पाशमेवास्मिन् प्रतिमुञ्चति
वरुणपाशमाहवनीयं वा एतद्व्यर्धयति यत् पशुश्रपणं करोति त्वामु त्ये दधिरे प्रथमं विचक्ष्यमिति
मेध्यमेवैनं यज्ञियं करोति जातवेदो वपया गच्छ देवानिति स्वर्गमेवैनं लोकं गमयति यद्यद्वा
ऋषीणां च देवानां च यज्ञस्यापूतमासीत् तदेतैरपुनत यदेवास्य यज्ञस्यापूतं तदेतैः पुनीत आव्यं
वा एतैस्तेऽपाजयँस्तदपाव्यानामपाव्यत्वमाव्यमेवैतैरपजयति ॥९॥ ४८–४९

[९] तै. सं. ३,१,५।

काठ० ४०

तृतीयस्यां वै दिवि सोम आसीत् तं गायत्र्याहरत् तस्य पर्णमच्छिद्यत स पर्णोऽभवत् तत्
पर्णस्य पर्णत्वं तस्मात् सर्वे वृक्षाः पर्णवन्तोऽथैष एव पर्ण उच्यते यत् पर्णशाखा भवति तमेव
सोममवरुन्द्धे देवा वै ब्रह्मन् समवदन्त तत् पर्ण उपाशृणोत् सुश्रवा वै नामैष न बधिरो भवति य
एवं वेद यत् पर्णशाखया प्रार्पयति ब्रह्मणैवैनाः प्रार्पयति प्रजापतिः पशूनसृजत तानयं देवोऽभ्यु-
मन्यत तं शम्याशमयत् तच्छम्याश्शमीत्वं यच्छमीशाखया प्रार्पयति शान्त्या अपां वा एतदोषधीनां
तेजो यद्दर्भा यद्दर्भपिञ्जूलैः प्रार्पयत्यपामेवैना ओषधीनां तेजसा प्रार्पयतीषे त्वोर्जे त्वेतीषमे-
वोर्जं यज्ञे दधाति वायवस्स्थेति वायुर्वा अन्तरिक्षस्याध्यक्षोऽन्तरिक्षदेवत्याः पशवो वायुरेवैनानन्त-
रिक्षाय परिददाति प्र वा एनानेतदाकरोति यद्वायवस्स्थेत्याहारण्यस्येव हि वायुरुपायवस्स्थेति यज-
मानायैवं पशूनपाकरोति देवो वस्सविता प्रार्पयत्विति प्रसूत्यै श्रेष्ठतमाय कर्मण इति यज्ञो वै श्रेष्ठ-
तमं कर्माप्यायध्वमघ्न्या देवभागमिति वत्सेभ्यश्च वा एता मनुष्येभ्यश्च पुराप्यायन्तेऽथैतर्हि देवेभ्य
एवैना आप्याययति प्रजावतीरनमीवा अयक्ष्मा इति प्रजावतीरेवैना अनमीवा अयक्ष्माः करोति ॥
मा वस्स्तेन ईशत माघशँस इत्याशिषमेवाशास्ते परि वो रुद्रस्य हेतिर्वृणक्त्विति रुद्रमेव पशुभिः
परिवृणक्त्यघातुकोऽस्य रुद्रः पशून् भवति यस्यैवं विदुषो यश्चैवं विद्वान् हविषे गाः प्रार्पयति ध्रुवा
अस्मिन् गोपतौ स्यातेति दृँहत्येवैना बह्वीरिति भूमानमेवैना गमयति यजमानस्य पशून् पाहीति
यजमानस्य पशूनां गोपीथाय प्रतीचीं शाखामुपगूहति तस्माद्ग्राम्याः पशवस्सायमारण्याद्ग्राममायन्ति
यत् पराचीमुपगूहेदरण्ये हीयेरन् ॥१०॥ ५०–५१

[२०५३]

॥ इत्येकोत्तरशतशाखाध्वर्युप्रभेदभिन्ने श्रीयजुषि काठके चरकशाखायां मध्यमिकायां
पात्नीवतं नाम त्रिंशं स्थानकं संपूर्णम् ॥३०॥
॥ संपूर्णा चेयं मध्यमिका ॥

[१०] मै. ४,१,१ (१—८)। कपि. ४६,८। वा. १,१; १६,५०। काण्व. १,१-३; १७,५०। तै. ब्रा. ३,२,१।
[मा वस्स्तेन ईशत०। ऋ. ६,२८,७ (उत्तरार्धः); अथर्व. ४,२१,७। परि वो (णो) रुद्रस्य०। ऋ.
२,३३,१४; अथर्व. ४,२१,७]

अथ ओरिमिका।

अथैकत्रिंशं स्थानकम्।

पुरोडाश-ब्राह्मणम् ।

प्रजापतिर्वा ओषधीः परुश्शो वेद प्राजापत्योऽश्वो यदश्वपर्श्वा बर्हिर्दात्योषधीनामहिंसायै देवस्य
त्वा सवितुः प्रसव इति सवितृप्रसूत एवैनां देवताभिरादत्ते गोपदसीति रयिमेव यजमाने दधाति
प्रत्युष्टं रक्ष इति यज्ञमुखादेव रक्षाँस्यपहन्ति प्रेयमगाद्धिषणा बर्हिरच्छेति विद्या वै धिषणा विद्यये-
वैनदच्छैति मनुना कृता स्वधया वितष्टेति मनुना ह्येषा कृता स्वधया वितष्टोर्वन्तरिक्षं वीहीति
समष्ट्या इन्द्रस्य परिषूतमसीति यद्वा इदं किंच तदिन्द्रस्य परिषूतं यथा श्रेयसे प्रोच्य कर्म करो-
त्येवमेवैतदिन्द्राय प्रोच्य बर्हिर्दाति यावत् परिदिशति यत् तत् सर्वं न दाति यज्ञस्य तदतिरिच्यते
यद्वै यज्ञस्यातिरिच्यते भ्रातृव्यं तेन वर्धयत्येकँ स्तम्बं परिदिशेत् तँ सर्वं दायाद्यज्ञस्यानतिरेकाय
यत् सर्वं दायान्न पशुभ्यो जीवनमुच्छिंषेदेकां वा श्रुष्टिं द्वे वोच्छिंषेन्न यज्ञस्यातिरेचयत्युत्पशुभ्यो
जीवनँ शिंषति मावो मोपरि परुस्त ऋध्यासमित्यृद्ध्या आच्छेत् ता ते मा रिषदिति यावद्यावद्वा
अविद्वानध्वर्युर्बर्हिषो दाति तावदस्यात्मनो मीयते नास्यात्मनो मीयते य एवं वेद देव बर्हिश्शत-
वल्शं विरोहेत्योषधिष्वेव भूमानं दधाति सहस्रवल्शा वि वयं रुहेमेत्याशिषमेवाशास्तेऽदित्या
रास्नासीतीयमदितिरस्या एवैनद्रास्नां करोतीन्द्राण्यास्संनहनमितीन्द्राणी वा अग्रे देवतानां समनह्यत
सार्ध्नोदृद्ध्यै बर्हिस्संनह्यति प्रजा वै बर्हिः प्रजानामपरावापाय तस्मात् स्नाव्ना प्रजास्संतताः ॥ पूषा
ते ग्रन्थिं ग्रथ्नात्विति पुष्टिर्वै पूषा पुष्टिमेव यजमाने दधाति स ते मास्थादित्यहिंसाया इन्द्रस्य त्वा
बाहुभ्यामुद्यच्छ इतीन्द्रस्यैवैनद्बाहुभ्यामुद्यच्छते बृहस्पतेस्त्वा मूर्ध्नाहरामीति ब्रह्म वै बृहस्पतिर्ब्रह्मणै-
वैनद्धरति देवंगममसीति बहु वा एतस्य पूर्वेद्युराह्रियमाणस्य स्कन्दत्यस्कन्नमेवैनद्देवेभ्यस्संप्रयच्छति
तदाहरन्ति कवयः पुरस्तादिति ब्राह्मणा वै कवयो ब्राह्मणा ह्येतदाहरन्ति देवेभ्यो जुष्टमिह बर्हिरासद
१–२
इति देवेभ्य एवैनज्जुष्टं करोति ॥१॥

वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमिति वसूनां वा एतद्भागधेयं यत् पवित्रं
तेभ्य एवैनं करोति प्रजापतिः प्रजा असृजत तस्योखे अस्रँसेतां स एते उखे अपश्यत् ताभ्यामादत्त
यदेते उखे भवतः प्रजापतेरेवोखे प्रतिदधात्ययक्ष्मा वः प्रजया सँसृजामीत्ययक्ष्मा एवैनाः

[१] काठ. १,२,५—९ (३१)। मै. ४,१,२ (९—१९)। कपि. ४७,१। वा. १,७,१०,११,१४,१९-३०; ५,४३; १२,
१००। काण्व. १,१०,१३,३६,४०,४६-४७, ५,५५। तै. ब्रा. ३,२,२। [देवस्य त्वा सवितुः०। अथर्व. १९,
५१,२; ऐ. ब्रा. ८,७। शतवल्शं (०ह्शं) विरोह०। ऋ. ३,८,११; तै. सं. १,३,५,१]
[२] काठ. १,३,११—१४। मै. ४,१,३ (१०-२६)। कपि. ४७,२। वा. १,१-४। काण्व. १,४-७। तै. ब्रा. ३,२,३

करोति रायस्पोषेण बहुला भवन्तीरिति भूमानमेवैना गमयति मधुमद् घृतवत् पिन्वमाना
इति मधुमदेव घृतवद्देवेभ्यो हव्यं करोति जीवा जीवन्तीरुप वस्सदेमेत्याशिषमेवाशास्ते ॥
मातरिश्वनो घर्मोऽसीत्यन्तरिक्षं वै मातरिश्वनो घर्मो द्यौरसि पृथिव्यसीति दिवमेवैनां पृथिवी-
मकर्विश्वधायाः परेण धाम्नाहृतासि मा ह्वारिति दृँहत्येवैनां पवित्रमपिदधात्योषधीनां चैव
पशूनां च पयस्सँसृजति सा विश्वायुस्सा विश्वव्यचास्सा विश्वधाया इत्यसौ वै विश्वायुरन्तरिक्षं
विश्वव्यचा इयं विश्वधाया इमानेव लोकान् यथापूर्वं प्रदापयतीमेऽस्मै लोका यथापूर्वं प्रत्ता दुह्रे तिस्रो
यजुषाभिमन्त्रयते त्रय इमे लोका एष्वेव लोकेषु रसं दधाति तस्मादिमाँल्लोकान् प्रजा उपजीवन्त्युप-
जीवनीयो भवति य एवं वेद ॥ हुतस्स्तोको हुतो द्रप्स इत्यनुमन्त्रयतेऽस्कन्दायाग्नये बृहते
नाकाय स्वाहेतीयं वा अग्निर्बृहन्नाको बहु वा एतस्य दुह्यमानस्य स्कन्दत्यस्यामेवैनत् प्रतिष्ठापय-
त्यस्कन्दाय न दारुपात्रेण दुह्यादग्निमद्वै दारुपात्रं यातयामेन हविषा यजेत तद्ध ह स्माहुर्दार्वेयाः
पुरोडाशमुखं वै हविर्न वा इत इतः पुरोडाशँ हविषो यामोऽस्ति दोग्धव्यमेवेति न शूद्रो
दुह्यादसतो वा एष संभूतोऽसत् स्याद्यद्वाव पवित्रमत्येति तद्धविरग्निहोत्रमेव शूद्रो न दुह्यात् तद्धि
नोत्पुनन्ति संपृच्यध्वमृतावरीरिति प्रत्यानयति शृतत्वाय शृतकामा हि देवाः ॥ इन्द्रस्य त्वा भागँ
सोमेनातनच्मीति सोममेवैनं करोति सोमो वै देवानां परोक्षँ सान्नाय्यं तस्य ह त्वै सोमपीथस्संवत्वो
य एवं विद्वान् सान्नाय्येन यजतेऽदस्तमसि विष्णव इति यज्ञो वै विष्णुर्यज्ञायैवैनददस्तं करोति न
मृत्पात्रेणापिदध्याद्यन्मृत्पात्रेणापिदध्यात् पितृदेवत्यँ हविस्स्याद्दारुपात्रेणापिदधात्यग्निमद्वै दारुपात्र-
मग्निरेव हव्यं रक्षत उदन्वत् कुर्यादापो रक्षोघ्नी रक्षसामपहत्यै विष्णो हव्यं रक्षस्वेति विष्णुरेव हव्यं
रक्षत आपो जागृतेत्यापो वै यज्ञस्य गोप्त्रीस्ताभ्य एवैनत् परिददाति ॥२॥ ३–६

अपः प्रणयत्यापो वै यज्ञो यज्ञमेव तत्या प्रचरत्यापो देवानां प्रियं धाम देवानामेव प्रियं धाम
प्रणीय प्रचरत्यापो रक्षोघ्नी रक्षसामपहत्या आपो वज्रो वज्रमेव भ्रातृव्याय प्रहरत्यापश्श्रद्धा श्रद्ध
वा असै देवाश्श्रन्मनुष्या दधते यस्यैवं विदुषो यस्यैवं विद्वानपः प्रणयति कर्मणे वामिति हस्ता
अवनेनिक्ते कर्म ह्येतत् क्रियते वानस्पत्यमसि प्रत्युष्टं रक्ष इति यज्ञमुखादेव रक्षाँस्यपहन्त्युर्वन्तरिक्षं
वीहीति समष्ट्यै धूरसि धूर्व धूर्वन्तमिति धुर्यो वा एषोऽग्निर्यदनालभ्यातीयाद्यजमानँ शुचार्पयेद् द्वौ
वै पुरुषस्य भ्रातृव्यौ यं च द्वेष्टि यश्चैनं द्वेष्टि ता एवास्य शुचार्पयति ॥ देवानामसि वह्नितममिति
देवेभ्य एवैनद्वाह्नि करोति विष्णोः क्रमोऽस्यक्रुतमसि हविर्धानं दृँहस्व मा ह्वारिति दृँहत्येवै-
नन्मित्रस्य त्वा चक्षुषा प्रेक्ष इति मित्रमेवैनत् कुरुत उरु त्वा वातायेति यद्वै किंच वातो नाभिवाति

[३] काठ. १,४,१५-१७। मै. ४,१,४-५ (२७, २८-३८)। कपि. ४७,३। वा. १.६-११,१९। काण्व. १,९-१५,
४६। तै. ब्रा. ३,२,४।

तद्वरुणस्यावरुण्यत्वमेवैनत् देवस्य त्वा सवितुः प्रसव इति सवितृप्रसूत एवैनं देवताभ्यो निर्वपत्यमुष्मै जुष्टमिति यस्या एव देवतायै निर्वपति तस्या एनज्जुष्टं करोति यच्छन्तु त्वा पञ्चेति पञ्च वा ऋतव ऋतूनेव प्रीणाति तेऽस्मै प्रीताः कल्पन्ते कल्पन्तेऽस्मा ऋतवो य एवं वेद ॥ रक्षायै त्वा नाराल्या इति रक्षसामपहत्या इदं देवानामिदं नस्सहेति व्यावृत्त्यै स्वरभिव्यख्यमिति तम इव वा एष प्रपद्यते यरीणहं स्वरेवाभिविपश्यतीमे वै लोका हविषो गृहीतादुदवेपन्त तान् देवा एतेन यजुषादृंहन् दृंहन्तां दुर्या द्यावापृथिव्योरिति इमानेव लोकान् दृंहन्त्युर्वन्तरिक्षं वीहीति अयाम्यायुकोऽध्वर्युस्स्यादुर्वन्तरिक्षं प्रेहीत्यव्यायुकोऽध्वर्युर्भवति य एवं वेदाग्ने हव्यं रक्षस्वेत्युपसादयत्यग्निरेव हव्यं रक्षते ॥३॥ ७-९

विष्णोर्मनसा पूते स्थ इति पुनात्येवैने देवो वस्सवितोत्पुनात्विति सवितृप्रसूत एवैना देवताभिरुत्पुनाति देवस्य त्वा सवितुः प्रसव इति सवितृप्रसूत एवैनं देवताभ्यः प्रोक्षत्यमुष्मै जुष्टमिति यस्या एव देवतायै प्रोक्षति तस्या एनज्जुष्टं करोति शुन्धन्तां पात्राणि देवयज्याया इति देवेभ्य एवैतानि शुन्धन्त्यवधूतं रक्षोऽवधूता अरातय इति रक्षसामपहत्या अदित्यास्त्वगसीतीयमदितिरस्या एवैनत् त्वचं करोत्यधिषवणमसि वानस्पत्यमित्यधिषवणमेवैनत् करोत्यग्नेस्तनूरसि वाचो विसर्जनमित्यग्नेर्वा तनूर्वाचो विसर्जनं यदा हि पशव ओषधीरश्नन्त्यथ वाचं विसृजन्ते बृहद्ग्रावासि वानस्पत्य इति ग्रावाणमेव कृत्वा हविष्करोति हविष्कृदेहीति य एव देवानां हविष्कृत्तं ह्वयति त्रिर्ह्वयति त्रिसत्या हि देवा अद्रिरसि श्लोककृदपहतं रक्षोऽपहता अरातय इति रक्षसामपहत्यै वर्षं संघातं संघातं जयेमेति संघातं संघातमेव भ्रातृव्यं जयति ॥ मनोर्वै श्रद्धादेवस्य यजमानस्यासुरघ्नी वाग्यज्ञायुधानि प्रविष्टासीत् तेषां यावन्तोऽसुरा उपाशृण्वँस्ते पराभवन् य एवं विद्वान् भ्रातृव्याणां मध्येऽवसाय यजेत यावन्तोऽस्य भ्रातृव्या यज्ञायुधानामुपशृण्वन्ति तेषामिन्द्रियं वीर्यं वृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवति वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्त्विति मिथुनमेव करोत्यस्मा वै देवाः पशुभ्यो रक्षांसि निरवादयन्त तुषैरोषधिभ्यः परापूतं रक्षः परापूता अरातय इत्येतावतैव यज्ञाद्रक्षांसि निरवदयते निरस्तो अघशंस इति भ्रातृव्यो वा अघशंसो भ्रातृव्यमेव निरस्यति वायुर्व इव ऊर्जं विविनक्त्विति वायुर्वै देवानां पवित्रं पुनात्येवैनान् सुफलीकृतान् करोति मेध्यानेवैनान् यज्ञियान् करोति त्रिः फलीकरोति त्रिसत्या हि देवाः ॥४॥ १०-११

अवधूतं रक्षोऽवधूता अरातय इति रक्षसामपहत्या अदित्यास्त्वगसीतीयमदितिरस्या एवैनं त्वचं करोति धिषणासि पार्वती प्रति त्वादित्यास्त्वग्वेत्तु पृथिवीं दृंहेति पृथिवीमेव दृंहति धिषणासि

[देवस्य त्वा सवितुः०। अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

[४] काठ. १,५,१८–२०। मै. ४,१,६-७ (३९-४९)। कपि. ४७,४। वा. १,१९-१६,३१; ४,४; १०,६। काण्व. १,१६,१८–२६,४८–४९; ४,५; ११,१३। तै. ब्रा. ३,२,५।

[५] काठ. १,६,२१। मै. ४,१,७ (४५–४९)। कपि. ४७,५। वा. १,१६,१९–२०। काण्व. १,२६,३१–३४।

उपसृजत्यमृतं वा आपोऽमृतमेव हव्यं करोति समाप ओषधीभिस्समोषधयो रसेनेत्यन्या वा एतासामन्या जिन्वन्त्योषधयो यद्वो रेवती रेवत्यं यद्वो हविष्या हविष्यं यद्वो जगतीर्जगत्यमित्यापो वै रेवतीरोषधयो मधुमतीः पशवो जगतीरप ओषधीः पशूंस्तानेवास्मा एकधा संसृज्य मधुमतः करोति ॥ जनयत्यै त्वेति संयौति मिथुनमेव करोति मखस्य शिरोऽसीति यज्ञो वै मखो यज्ञस्यैव शिरः करोति घर्मो विश्वायुरुरु प्रथस्वोरु ते यज्ञपतिः प्रथतामिति प्रथयत्येव प्रत्युष्टं रक्ष इति यज्ञमुखादेव रक्षांस्यपहन्ति घर्मो वा एषोऽर्धमासेऽर्धमासे प्रवृज्यते यत् पुरोडाशस्स ईश्वरोऽशान्तो यजमानस्य पशून्निर्दहो यत् पर्यग्नि करोति पशुमेव करोति शान्त्या अनिर्दाहाय त्रिः परिहरति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यश्शमयति पुरोडाशं वा अधिश्रितं रक्षांस्यजिघांसन् स नाको नाम दिवि रक्षोहाग्निस्सोऽस्माद्रक्षांस्यपाहन् देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधि नाक इति रक्षसामपहत्या अग्निस्ते तन्वं मा हिंसीदित्यहिंसायै त्वचं ग्राहयति ॥ तस्मान्मस्तिष्कः परितो यानि वा इमानि शीर्ष्णः कपालानि तानि कपालानि यो मस्तिष्कस्स पुरोडाशो यत्राभिवासयेदाविर्मस्तिष्कस्स्याद्यदभिवासयति तस्माद्गुहा मस्तिष्को भस्मनाभिवासयति तस्मादस्थि मांसेन छन्नं वेदेनाभ्यूहति तस्माच्छिरः केशैश्छन्नं ते देवास्तन्नाविन्दन्त यस्मिन् यज्ञस्य क्रूरं मार्क्ष्यामह इति सोऽग्निरब्रवीदहं वस्तं जनयिष्यामि यस्मिन् यज्ञस्य क्रूरं मार्क्ष्यध्व इति सोऽपोऽङ्गारेणाभ्यपातयत् तत एकतोऽजायत द्वितीयं ततो द्वितस्तृतीयं ततस्त्रितो यदात्मनो निरमिमीत तदात्मीयानामात्मीयत्वं यदद्भ्यो निरमिमीत तदाप्यानामाप्यत्वमन्तर्वेदि निनयति तदेवावरुन्द्ध उल्मुकेनाभिधारयति शृतत्वाय शृतकामा हि देवास्तेऽतिमृजाना आयन् सूर्याभ्युदिते तेऽमृजत सूर्याभ्युदितस्सूर्याभिनिम्रुक्ते सूर्याभिनिम्रुक्तः कुनखिनि कुनखी श्यावदति श्यावदन् परिवित्ते परिवित्तः परिविविदाने परिविविदानोऽग्रेदिधिषौ अग्रेदिधिषुर्दिधिषूपत्यां दिधिषूपतिर्वीरहणि वीरहा ब्रह्महणि ब्रह्महा भ्रूणहनि भ्रूणहनमेनो नात्येति ॥७॥ १८-२०

देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते सवितृप्रसूत एवैनं देवताभिरादत्त इन्द्रस्य बाहुरसि दक्षिणस्सहस्रभृष्टिश्शततेजा इति वज्रो वै स्फ्यो वज्रमेव संश्यति भ्रातृव्याय प्रहरिष्यन् पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषमित्योषधीनामहिंसायै व्रजं गच्छ गोस्थानमिति छन्दांसि वै व्रजो गोस्थानश्छन्दांस्येवास्मै व्रजं गोस्थानं करोति वर्षतु ते द्यौरिति वृष्टिमेव निनयति बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैरिति द्वौ वै पुरुषस्य भ्रातृव्यौ यं च द्वेष्टि यश्चैनं द्वेष्टि तावेवास्य बध्नाति परमस्यां पृथिव्यां शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तं ... यां मा स्कानिति यो वा अस्या रसस्स

[८] काठ. १,७,२४। मै. ४,१,१० (६०–६३)। कपि. ४७,८। वा. १,२४–२६। काण्व. १,४०–४३। तै. ब्रा. ३,२,९। देवस्य त्वा सवितुः०। अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

पार्वतेयी प्रति त्वा पार्वती वेत्तु दिवं दृंहेति दिवमेव दृंहति दिवस्स्कम्भन्यसीति शम्यामुपदधातीमे वै सहास्तां ते शम्यामात्रं शम्यामात्रं व्यैतां यत्त्रश्शम्या यच्छम्यामुपदधात्यनयोरेव विधृत्यै ॥ धान्यमसि धिनुहि देवानित्येतस्य वै यजुषो वीर्येण यावदेका देवता कामयेत यावदेका तावदस्या आहुतेः प्रथते प्राणाय त्वा व्यानाय त्वापानाय त्वेति प्राणं व्यानमपानं तानेव यजमाने दधाति दीर्घामनु प्रसृतिमायुषे त्वेत्यायुरेवास्मिन् दधाति देवो वस्सविता हिरण्यपाणिः प्रतिगृह्णात्विति प्रेव वा एते स्कन्दन्ति प्रतिष्ठित्या अदब्धेन वश्चक्षुषावपश्यामीति चक्षुषो गोपीथाय रायस्पोषाय सुप्रजास्त्वायेत्याशिषमेवाशास्ते ॥५॥ १२-१३

निर्दग्धं रक्षो निर्दग्धा अरातय इति रक्षसामपहत्या अपाग्ने अग्निमामादं जहीति य आमात् क्रव्यात् तमपहत्य यज्ञिये देवयजन उपदधाति यदधस्तादङ्गारमुपवर्तयत्यस्मिंस्तेन लोके ज्योतिर्धत्ते यदुपरिष्टादधिवर्तयत्यन्तरिक्षे तेन ज्योतिर्धत्तेऽसा एवास्यादित्योऽमुष्मिँल्लोके ज्योतिर्भवति सर्वेऽस्मा इमे लोका ज्योतिष्मन्तो भवन्ति त्रीणि समीचीनान्युपदधाति त्रयः प्राणाः प्राणो व्यानोऽपानस्तानेव यजमाने दधाति त्रय इमे लोका एष्वेव लोकेष्वृध्नोति ॥ ध्रुवमसि पृथिवीं दृंहेति पृथिवीमेव दृंहत्यायुर्दृंहि प्राणं देहीत्याशिषमेवाशास्ते धरुणमस्यन्तरिक्षं दृंहेत्यन्तरिक्षमेव दृंहति चक्षुर्दृंहीत्याशिषमेवाशास्ते धर्त्रमसि दिवं दृंहेति दिवमेव दृंहत्योजो देहि बलं देहीत्याशिषमेवाशास्ते धर्मासि दिशो दृंहेति दिश एव दृंहति रयिं देहि पोषं देहीत्याशिषमेवाशास्ते यन्त्रमस्याशा दृंहेत्याशा एव दृंहति रूपं देहि वर्णं देहीत्याशिषमेवाशास्ते ॥ प्रजापतिर्वै यदग्रे समभवत् स एतावच्छ एव समभवदेकं वा अग्रे शीर्ष्णः कपालं संभवत्यथ द्वितीयमथ तृतीयमथ चतुर्थमथ पञ्चममथ षष्ठमथ सप्तममथाष्टमं यदष्टौ समीचीनान्युपदधात्यात्मानमेवैतद्यजमानस्संस्कुरुते तं संस्कृतममुष्मिँल्लोकेऽनुपरैति यदष्टा उपदधाति गायत्रीं तच्छन्द आप्नोति ॥ यदेकादश त्रिष्टुभं तद्यद् द्वादश जगतीं तच्छन्दस्संमितान्येवोपदधाति चितस्स्थ परिचित इति सर्वाण्येव यजुष्मन्ति करोति भृगूणामङ्गिरसां तपसा तप्यध्वमित्येतासामेवैनानि देवतानां तपसा तपति यानि घर्मे कपालान्युपचिन्वन्ति वेधस इत्यसौ वा आदित्यो घर्मस्तस्य दिशः कपालानि ता एवैतद्विमुञ्चति यथायतनं पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चतामितीन्द्रवायू एवैषां विमोक्तारौ करोति ॥६॥ १४-१७

देवस्य त्वा सवितुः प्रसव इति सवितृप्रसूत एवैनद्देवताभ्यस्संवपत्यमुष्मै जुष्टमिति यस्या एव देवतायै संवपति हविरेव करोत्यपि तस्या एनज्जुष्टं करोति पवित्रवति संवपति हविरेव करोत्यप

[६] काठ. १,७,२२–२३। मै. ४,१,८ (५०–५४)। कपि. ४७,६। वा. १,१७–१८। काण्व. १,२७,३०। तै. ब्रा. ३,२,६-७।

[७] काठ. १,८,२४। मै. ४,१,९ (५५–५९)। कपि. ४७,७। वा. १,२१–२३; ११,५७; ३७,८। काण्व. १,३६-३९; १२,५९; ३७,८। तै. ब्रा. ३,२,८। [देवस्य त्वा सवितुः०। अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]

द्रप्सस्तमिमाः प्रजा उपजीवन्ति तमेवास्यां यच्छति तस्यास्कन्दायाररुर्यां मा पप्तादिति भ्रातृव्यो वा अररुर्भ्रातृव्यमेव स्वर्गाल्लोकात् प्रतिनुदतेऽररुर्वै नामासुर आसीत् सोऽविभेदयज्ञेन नो देवा अभिभविष्यन्तीति स पृथिवीं विषेणालिम्पदमेध्यां कुर्वन्निन्द्रो वै वृत्रमहँस्तस्येमां लोहितमन्वधावत् तदमेध्याभवद्यदुद्धन्ति यदेवास्या अमेध्यमयज्ञियं तदपहन्त्यररुर्वै नामासुर आसीत् सोऽविभेद्देवा मा पृथिव्या नोत्स्यन्त इति स पृथिवीमुपस्रुच्याशयत् तमिन्द्रोऽच्यायत् तमपाररुमदेवयजनं पृथिव्या देवयजनाज्जहीति पृथिव्या अपाहन् स दिवमपतदररुर्द्यां मा पप्तादिति तं दिवः प्रत्यनुदत ततो देवा अभवन् परासुरा अभवन् यस्यैवं विदुषस्तम्बयजुर्ह्रियते यस्यैवं विद्वान् हरत्येभ्य एव लोकेभ्यो भ्रातृव्यं निर्भजति भवत्यात्मना परास्य भ्रातृव्यो भवत्यसुराणां वा इयं पृथिव्यासीत् ते देवा अब्रुवन् दत्त नोऽस्या इति ते वै स्वयं वृध्वमित्यब्रुवन् सोऽग्निरेव प्राचीं दिशमुदजयद्वसवो दक्षिणां रुद्राः प्रतीचीमादित्या उदीचीं ते देवा इमामसुराणामविन्दन्त ततो देवा अभवन् परासुरा अभवन् य एवं विद्वानेताभिर्देवताभिर्वेदिं परिगृह्णातीमामेव भ्रातृव्यस्य विन्दते भवत्यात्मना परास्य भ्रातृव्यो भवति ॥ पृथिव्या वै मेध्यं चामेध्यं च व्युदक्रामत् प्राचीनमुदीचीनं मेध्यमुदक्रामत् प्रतीचीनं दक्षिणामेध्यं प्राचीमुदीचीं वेदिं प्रवणां कुर्यान्मेध्यामेवैनां यज्ञियां करोत्यथो मेध्यस्य चामेध्यस्य च व्यावृत्त्यै प्राञ्चौ बाहू उन्नयत्याहवनीयमेव परिगृह्णाति प्रतीची श्रोणी गार्हपत्यमेव परिगृह्णाति मूलं वै रक्षांस्यनूत्पिबन्ति न नखेन छिन्द्याद्यन्नखेन छिन्द्यात् कुनखी स्यात् स्फ्येन छिनत्ति वज्रो वै स्फ्यो वज्रेणैव रक्षांसि हन्ति ॥८॥ २१-२२

घृतं च वै मधु च प्रजापतिरासीद्यतो मध्वासीत् ततः प्रजा असृजत तस्मान्मधोः प्रजननमिवास्ति तस्मान्मधुना न प्रचरन्ति यातयामं हि तद् घृतेन प्रचरन्त्ययातयामं ह्येतत् प्राजापत्यं यदाज्यमयातयामा देवानां प्रजापतिर्गार्हपत्येऽधिश्रयति पत्न्यवेक्षते पत्न्या एवैष यज्ञस्यान्वारम्भोऽथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय यद्वै पत्नी यज्ञे करोति तन्मिथुनं यत् पत्न्यवेक्षते मिथुनमेव करोत्यमेध्यं वा एतदयज्ञियं यद् पत्न्यवेक्षत आहवनीयेऽधिश्रयति मेध्यमेवैनद्यज्ञियं करोति देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत स इन्द्र एतमवकाशमपश्यत् तेनावैक्षत तेनासुरानभ्यभवत् ततो देवा अभवन् परासुरा अभवन् य एवं विद्वानेतेनाज्यमवेक्षतेऽभ्येव भ्रातृव्यं भवति भवत्यात्मना परास्य भ्रातृव्यो भवति प्रत्युष्टं रक्ष इति यज्ञमुखादेव रक्षांस्यपहन्त्यनिशितास्स्थ सपत्नक्षयणीरित्यनिशिता एवैनाः करोति स्रुचस्संमार्ष्टि पुनात्येवैनास्स्रुवमग्रे संमार्ष्टि पुमांसमेवासामग्रे संश्यत्यथ जुहूमथोपभृतमथ ध्रुवामसौ वै जुहूरन्तरिक्षमुपभृदियं ध्रुवेमानेव

[९] काठ. १,१०,३२-३३। मै. ४,१,१२ (७३,७४-७६)। कपि. ४७,९। वा. १,२९। काण्व. १,४९। तै. ब्रा. ३,३,४।

लोकान् यथापूर्वं संमार्ष्टि यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृच्चतुर्जुह्वां गृह्णन् भूय आज्यं गृह्णात्यष्टौ गृह्णन्नुपभृति कनीयो भ्रातृव्यमेवास्मा उपस्तिं करोति ॥९॥ २३

देवीरापो अग्रेगुव इति यज्ञमेव प्रणयति प्रेमं यज्ञं नयत प्र यज्ञपतिं तिरतेत्याशिषमेवाशास्ते- ऽग्नेर्वै मेधोऽपाक्रामत् कृष्णो भूत्वा स वनस्पतीन् प्राविशत् प्रोक्षितास्स्य कृष्णोऽस्याखरेष्ठा अग्नये त्वा जुष्टं प्रोक्षामीति तमेव मेधमवरुन्द्धेऽथो यस्या एव देवतायै प्रोक्षति तस्या एनं जुष्टं करोति वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामीति प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रतिष्ठापयत्यूर्जो पृथिवीं गच्छतेति पृथिव्यामेवोर्जं दधाति तस्मात् पृथिवीं प्रजा उपजीवन्त्युपजीवनीयो भवति य एवं वेद ॥ बह्वीरासादयेद्यावतीर्वै प्रोक्षणीरासादयति तावतीरस्यामुष्मिंल्लोक आपस्तस्माद्बह्वीरासाद्याः पुरस्तात् प्रस्तरं गृह्णाति मुख्यमेव यजमानं करोति यावद्धस्तेन पर्याप्नुयात् तावन्तं गृह्णीयाद्दक्षोधुको यजमानो भवत्यनग्नंभावुकोऽध्वर्युर्न विधूनुयाद्यद्विधूनुयात् प्रजां चास्य पशूंश्च विधूनुयान्न प्रमृज्याद्यदेवास्य स्वं यद्वित्तं यद्वेद्यं तत् प्रमार्ष्टि न प्रमृज्याद्यदेवैनमागमिष्यद्भवति तत् प्रविनुदते ॥ दक्षिणतस्संनहनं स्तृणाति तस्माद्दक्षिणतो नीविः प्रस्तरं धारयन् परिधीन् परिदधाति यजमानो वै प्रस्तरस्स्वयमेवैतद्यजमान आत्मानं परिदधाति रक्षसामपहत्यै संहितान् परिधीन् परिदधाति रक्षसामनन्ववायाय न पुरस्तात् परिदधात्यसा एवास्मादादित्य उद्यन् पुरस्ताद्रक्षांस्यपहन्त्यूर्ध्वे समिधा आदधात्युपरिष्टादेव रक्षांसि हन्ति द्वे आदधाति मिथुनमेव करोति ॥ सवितुर्बाहू स्थो देवजनानां विधरणिरिति सवितुर्ह्येतौ बाहू देवजनानां विधरणिर्वसूनां रुद्राणामादित्यानां सदनमसीति या एव देवता अभ्यजयंस्ताभ्य एनत् सदनं करोति जुहेहि घृताचीत्येतद्वा आसां प्रियं धाम यद्घृतवत् प्रियेणैवैना धाम्ना समर्धयति ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहीति यथाहैव ते भागस्तं गोपायस्वेत्येवमेवैतद्विष्णुमाहैतं त आज्यं तद्गोपायस्वेति ॥१०॥ २४–२७

भुवनमसि विप्रथस्वेति प्रथयत्येवाग्निर्यष्टेदं नम इति नमस्कृत्य हि श्रेयांसमुपचरन्ति जुह्वेह्यग्निस्त्वाह्वयति देवयज्याया इत्यग्निस्सर्वा देवतास्सर्वा एव देवता अवरुन्द्ध उपभृदेहि देवस्त्वा सविताह्वयति देवयज्याया इति सवितृप्रसूत एव प्रचरति नार्तिमार्छत्यङ्घ्रिणा विष्णू मा वामवक्रमिषमिति यथायजुः पाहि माग्ने दुश्चरितादा मा सुचरिते भजेति पाप्मानमेवापहते विजिहाथां मा मा संताप्तमित्यात्मनोऽहिंसायै लोकं मे लोककृतौ कृणुतमित्याशिषमेवाशास्ते विष्णोस्स्थानमसि इति

[१०] काठ. १,११,३४,३७। मै. ४,१,१२ (७८—८२)। कपि. ४७,१०। वा. १,१२—१३; २,१,५—६। काण्व. १,१७—१८; २,१,६—८। तै. ब्रा. ३,३,६।
[११] काठ. १,११,३८-४९। मै. ४,१,१४ (८३-९४)। कपि. ४७,११। वा. २,८-९,१५—१८। काण्व. २,११-१२, १४—३०। तै. ब्रा. ३,३,७।
काठ० ४१

प्रतिष्ठित्या ऊर्ध्वो अध्वरो दिविस्पृगिति यज्ञो वा अध्वरो यज्ञस्योर्ध्वत्वायाहुतो यज्ञो यज्ञपतेरिति समृद्ध्या इन्द्रवान् बृहद्भास्स्वाहेत्यैन्द्रो वै यज्ञो मुखत एवेन्द्राय यज्ञं संप्रयच्छति सेन्द्रोऽस्य यज्ञो भवति सं ज्योतिषा ज्योतिरिति ज्योतिर्वै यज्ञो यज्ञ एव यज्ञमनुसंतनोति वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयोज्जयामीति य एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्यस्तं तेन प्रणुदते वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयामुं प्रतिनुद इति य एवास्य पश्चाद्भ्रातृव्यस्तं तेनापनुदते प्र श्रेयांसं भ्रातृव्यं नुदते प्रति पापीयांसं नुदते ॥ पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेतीमानेवैनं लोकान् गमयत्यक्तं रिहाणा व्यन्तु वय इति स्वदयत्येव मरुतां पृषती वशा पृश्निर्भूत्वा दिवं गच्छेति यजमानो वै प्रस्तरो हविर्भूतमेवैनं स्वर्गं लोकं गमयति ततो नो वृष्टिमेरयेति वृष्टिमेवावरुन्द्धेऽहीनः प्राण इति प्राणानेवैतदध्वर्युर्मुखतः कल्पयति चक्षुष्पा असि चक्षुर्मे पाहीति चक्षुषो गोपीथाय यं परिधिं पर्यधत्था अग्ने देव पणिभिरिष्यमान इत्यग्निस्सर्वा देवतास्सर्वा एव देवता अवरुन्द्धे यजमानं प्रथतेति प्रथयत्येवाथो भूमानं गमयति संस्रावभागास्स्थेति परिधीनभिजुहोति स्वेनैवैनान् भागधेयेन समर्धयति ॥११॥ २८–२९

अग्नेऽदब्धायोऽशीततन इति यदेवान्तर्यन्ति यत् क्रूरं कुर्वन्ति तच्छमयत्यविषं नः पितुं कृधीत्यन्नमेवास्मै स्वदयति सुषीन्योनीन् सुषदां पृथिवीमिति सुषदेवैनं सादयति वेदिर्वै देवेभ्योऽपाक्रामत् तां वेदेनान्वविन्दंस्तद्वेदस्य वेदत्वं यद्वेदो भवति वेद्या अनुवित्त्यै स्त्री वै वेदिः पुमान् वेदो यद्वेदेन वेदिं संमार्ष्टि मिथुनमेव करोति प्रजापतेर्वा एतानि श्मश्रूणि यद्वेदो यां पत्नीं कामयेत पुत्रं विन्देतेति तस्या उपस्थ आस्येन्मिथुनमेव करोति वि वा एतद्यज्ञं छिनत्ति यदर्धमासे संस्थां गमयति यद्वेदं संततमाहवनीयात् स्तृणाति तेनैव यज्ञं संतनोति तं संततमुत्तरेऽर्धमास आलभते ॥ एष वै वनस्पतीनां परिवेष्टा यदुपवेषो य एवं वेदादब्धा अस्य वेशा भवन्ति पुरस्तात् प्रत्यञ्चमुपहन्ति तस्मात् प्रतीचीनावसिता वेशा भवन्ति स्वविमत उपहन्त्यनतिवादिना एनं वेशा भवन्ति सर्पेभ्यो वै यत्र क्रियते सर्प उपवेषो वल्मीक उत्करो यदुपवेषमुत्कर उपहन्ति तस्मात् सर्पाणां वल्मीको गृहाः ॥१२॥ ३०–३१

यो ह वै स्रुचां योगमविद्वानध्वर्युरध्वर्य इति हूतः प्रतिशृणोत्या देवताभ्यो वृश्च्यतेऽप्रजा अपशुर्भवत्यथ यस्स्रुचां योगं विद्वानध्वर्युरध्वर्य इति हूतः प्रतिशृणोति न देवताभ्य आवृश्च्यते प्रजावान् पशुमान् भवत्याश्रावयेति जुहूं तेन युनक्त्यस्तु श्रौषडित्युपभृतं तेन यजेति ध्रुवां तेन ये यजामह इत्याज्यधानीं तेन वषट्कारेण स्रुवमसौ वै जुहूरन्तरिक्षमुपभृदियं ध्रुवा दिश आज्यधान्यसा

[१२] काठ. १,१२,५०। वा. २,२०—२१। काण्व. २,३६,३९। तै. ब्रा. ३,३,९,९—११; ३,३,११,१—२।
[१३] मै. ४,१,११ (६५—७२)। कपि. ४७,९। तै. ब्रा. ३,२,१।

आदित्यस्स्रुवोऽसौ वा अस्यै प्रयच्छतीयममुष्यै तस्माद्यज्जुह्वां तेन ध्रुवामाप्याययति यद् ध्रुवायां तेन जुहूमसौ ह्यस्यै प्रयच्छतीयममुष्यै संततमस्मा अविच्छिन्नं प्रदीयते य एवं वेद ॥१३॥ ३२

स्योनो मे सीद सुषदः पृथिव्यामुरुः पृथुः प्रथमानस्स्वर्गे ।
स्रुवोऽसि घृतादनिशितस्सपत्नक्षयणो दिवि सीदान्तरिक्षे पृथिव्यामुत्तमोऽहं भूयासमधरे मत्सपत्नाः ॥ ३३

आरोह पथो जुहु देवयानान् यत्रर्षयो जग्मुः प्रथमाः पुराणाः ।
हिरण्यपक्षाजिरा संभृताङ्गा वहासि सा सुकृतां यत्र लोक उत्तमोऽहं भूयासमधरे मत्सपत्नाः॥ ३४

अवाहं बाध उपभृता द्विषन्तं जातान् भ्रातृव्यान् ये च जनिष्यमाणाः । ३५
दुहे यज्ञं सुदुघामिव धेनुमुत्तमोऽहं भूयासमधरे मत्सपत्नाः ॥
यो नो वाचा मनसा दुर्हृणायुर्हृदारातीयन्नभिदासदग्ने । ३६
इदमस्य चित्तमधरं ध्रुवाया उत्तमोऽहं भूयासमधरे मत्सपत्नाः ॥
यन्मे अग्ने अस्य यज्ञस्य रिष्याद्यद्वा स्कन्दादाज्यस्योत विष्णो । ३७
तेन हन्मि सपत्नं दुर्हृणायुमैनं दधामि निर्ऋत्या उपस्थे ॥
यो नः कनिष्ठमिह कामयाता अस्मिन् यज्ञे यजमानाय मह्यम् । ३८
अप तमिन्द्राग्नी भुवनान्नुदेतां प्रजां विदेय वाजवतीं सुवीराम् ॥
अयं वेदः पृथिवीमन्वविन्दद्गुहा हितां गह्वरेषु । ३९
स मह्यं लोकं यजमानाय विन्दत्वच्छिद्रं यज्ञं भूरिरेताः कृणोतु ॥
स्तृणीत बर्हिः परिधत्त वेदिं जामि मा हिंसीरमुया शयानाम् । ४०
दर्भैस्स्तृणीत हरितैस्सुवर्णैर्निष्का एते यजमानस्य सन्तु ॥
अस्मिन् मे यज्ञ उप भूयो अस्त्वविक्षोभाय परिधीन् दधामि । ४१
धर्ता विधर्ता धरुणो धरीयान् विश्वा द्वेषांसि वीतो नुदन्ताम् ॥
चतुश्शिखण्डा युवतिस्सुपत्नी विनीयमाना महते सौभगाय । ४२
घृतं दुहानादितिर्जनाय सा मे धुक्ष्व सर्वान् भूतिकामान् ॥
वेदेन वेदिं विविदुः पृथिव्यां सा पप्रथे पृथिवी पार्थिवाय । ४३
गर्भं बिभर्ति भुवनेष्वन्तस्ततो यज्ञस्तायते विश्वदानीम् ॥

[१४] मै. २,१२,१ (६)। वा. १८,३६। काण्व. २०,७। तै. ब्रा. ३,७,६,९।

विशो यन्त्री नुदमाने अरातिं विश्वं जातमरणं दुर्हृणायुम् ।
सीदन्ती देवी सुकृतस्य लोके विश्वा द्वेषांसि वीतो नुदेताम् ॥ ४४
आप्यायतां ध्रुवा घृतेन यज्ञिया यज्ञं प्रति देवयद्भ्यः ।
सूर्याया ऊधो अदितेरुपस्थ उरुधारेव दोहतां यज्ञे अस्मिन् ॥ ४५
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशस्सन्तु मह्यम् ॥१४॥ ४६

समृतयज्ञो वा एष यद्दर्शपूर्णमासौ कस्य वा ह देवता यज्ञमागच्छन्ति कस्य वा न बहूनां समानमहर्यजमानानां यो वै देवताः पूर्वेद्युर्गृह्णाति तस्य श्वो भूते यज्ञमागच्छन्ति ममाग्ने वर्चो विहवेष्वस्त्विति पूर्वमग्निं गृह्णात्यग्निस्सर्वा देवता देवता एव पूर्वेद्युर्गृह्णाति ताश्श्वो भूतेऽभियजते बर्हिषा वै पूर्णमासे व्रतमुपयन्ति वत्सैरमावास्यायां पुरा वत्सानामपाकर्तोर्दम्पती अश्नीतो हस्ता अवनिज्य दक्षिणतोऽग्नेस्तिष्ठन् ब्रूयादग्ने व्रतपते व्रतमालभ इत्यग्निर्वै व्रतपतिर्ब्राह्मणो व्रतभृद्व्रतपतय एव प्रोच्य व्रतमालभते समस्मै व्रतमृध्यते यदि निम्रुक्ते सूर्ये व्रतमालभेताग्निमुपस्थायैतद्यजुर्वदेदग्निर्हि स तर्हि प्रविष्टोऽग्निर्होतोप तं हुव इति पात्रमभिमृशति येन हविर्निर्वप्स्यन् भवति दुर्ग्रहा वै देवता दुर्ग्रहो यज्ञो देवताश्चैवैतद्यज्ञं च गृह्णात्या देवा यन्तु सुमनस्यमाना इत्येता वै देवानां देवहूतयो यन्त्यस्य देवा देवहूतिं न यज्ञाच्छिद्यते य एवं वेद व्यन्तु देवा हविषो मे अस्येत्याशिषमेवाशास्ते ॥ पुनज्मि त्वा ब्रह्मणा दैव्येनेति परिधिषु परिधीयमानेषु वदत्यग्नेर्वा एष यागो ब्रह्मणैवाग्निं युनक्ति युक्तोऽस्य हव्यं देवेभ्यो वहत्यङ्गिरसो मास्य यज्ञस्य प्रथमानुवाकैरवन्त्विति सामिधेनीनामेवैष योगस्तासां युक्तानां यां कामयत आशिषं तामवरुन्द्धे समिद्धो अग्निराहुत इति समिद्भिरेवैना मनोऽसि प्राजापत्यं मनसा मा भूतेनाविशेति मन इव वै प्रजापतिः प्राजापत्यो यज्ञो यज्ञमेव संतनोति वागस्यैन्द्री सपत्नक्षयणी वाचा मेन्द्रियेणाविशेतीन्द्रियं वै वागिन्द्रियमेवावरुन्द्धे॥ न वै तद्विदुर्यदि ब्राह्मणा वसन्त्वा यजन्ति ब्राह्मणा वा यदि तस्य वर्षेरन् यस्य वा यस्य ब्रुवते यस्यैवार्षेयं वृणानो यजते तं तदिष्टं गच्छति नेतरमुपनमति तत् प्रवरं प्रवृणाने ब्रूयाद्देवाः पितरो देवा योऽस्मि स सन् यज इति य एव कश्च सन् यजते तं तदिष्टमागच्छति नेतरमुपनमति देवेभ्य एव पितृभ्यो यज्ञं परिददाति तमस्य ते गोपयन्ति समिष्टापूर्तेन गच्छति स्वर्गं लोके तदस्याक्षय्यमपरिमितं भवति वसन्तमृतूनां प्रीणामीति पञ्च वा ऋतव ऋतूनेव प्रीणाति तेऽस्मै प्रीताः कल्पन्तेऽस्मा ऋतवो य एवं वेद ॥१५॥ ४७–४९[२१०१]

॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायां पुरोडाश-ब्राह्मणं नामैकत्रिंशं स्थानकं संपूर्णम् ॥३१॥

[१५] मै. १,४,५ (३४)। तै. सं. १,६,७। [ममाग्ने वर्चो विहवेषु० ऋ. १०,१२८,१; अथर्व. ५,३,१; तै. सं. ४,७,१४,१। पुनज्मि त्वा (ते) ब्रह्मणा० : ऋ. १,८२,६]

अथ द्वात्रिंशं स्थानकम् ।

यजमान-ब्राह्मणम् ।

अग्नीषोमाभ्यां यज्ञश्चक्षुष्मानित्यग्नीषोमौ वै यज्ञस्य चक्षुषी यज्ञस्यैव चक्षुषा चक्षुरात्मन् धत्ते चक्षुष्मान् भवति य एवं वेदाग्निरन्नस्यान्नपतिरित्यग्निर्वै देवानामन्नादस्स एनं मनुष्येष्वन्नाद्यं प्रापयत्यन्नादो भवति य एवं वेद दब्धिरस्यदब्धो भूयासममुं दभेयमित्येतया वै दब्ध्या देवा असुरानदभ्नुवँस्तयैव भ्रातृव्यं दभ्नोति नैनं दिप्सन् दभ्नोति य एवं वेदाग्नीषोमौ वृत्रहणा इत्यग्नीषोमाभ्यां वै वीर्येणेन्द्रो वृत्रमहँस्ताभ्यामेव भ्रातृव्यं स्तृणुत इन्द्राग्न्योरहं देवयज्ययौजस्वान् वीर्यावान् भूयासमित्योजो वै वीर्यमिन्द्राग्नी ओज एव वीर्यमात्मन् धत्त इन्द्रस्याहं देवयज्ययेन्द्रियावान् भूयासमितीन्द्रियं वा इन्द्र इन्द्रियमेवात्मन् धत्ते ॥ महेन्द्रस्याहं देवयज्यया जेमानं भूमानं गमेयमिति जेमानमेव भूमानमुपैतीन्द्रस्याहं विमृधस्य देवयज्ययासपत्नो भूयासमित्यसपत्न एव भवतीन्द्रस्याहमिन्द्रियावतो देवयज्यया पशुमान् भूयासमितीन्द्रियं वै पशवः पशूनेवात्मन् धत्ते सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयमिति वाग्वै सरस्वती वाचैवान्नाद्यमवरुन्द्धे पूष्णोऽहं देवयज्यया पुष्टिमान् पशुमान् भूयासमिति पुष्टिर्वै पूषा पुष्टिमेवावरुन्द्धेऽदित्या अहं देवयज्यया प्रतिष्ठां गमेयमितीयमदितिरस्यामेव प्रतितिष्ठति ॥ विश्वेषामहं देवानां देवयज्यया प्राणानां सायुज्यं गमेयमिति प्राणानामेव सायुज्यं गच्छति द्यावापृथिव्योरहं देवयज्यया प्रजनिषीय प्रजया पशुभिरिति प्रजापतिमेवोपैत्यग्नेरहं स्विष्टकृतो देवयज्ययायुः प्रतिष्ठां गमेयमित्यायुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठति यो देवताश्च यज्ञं च यज्ञे तर्पयितव्यान् वेद तृप्यति प्रजया पशुभिरुपैनं सोमपीथो नमत्येतर्हि वै सर्वा देवता यर्हि स्विष्टकृदेतर्हि ह्येनास्सर्वास्संयजत्येष खलु वाव प्रत्यक्षं यज्ञो यत् स्विष्टकृदसौ तृप्यद्यज्ञमिति देवताश्चैवैतद्यज्ञं च यज्ञे तर्पयति तृप्यति प्रजया पशुभिरुपैनं सोमपीथो नमत्ययाडग्निरग्नेः प्रिया धामानीति ब्रह्मवर्चसं तेनावरुन्द्धे सोमस्यायाट् प्रिया धामानीति क्षत्रं तेनाग्नीषोमयोरयाट् प्रिया धामानीत्युपाँश्वनिरुक्तं तेनावरुन्द्धेऽग्नीषोमयोरयाट् प्रिया धामानीत्युच्चैर्निरुक्तं तेनानिरुक्तं च वा इदं निरुक्तं च तस्यैवोभयस्यावरुद्ध्या अथो शुष्कहरिते एवावरुन्द्धे यद्वै शुष्कं तदाग्नेयं यद्धरितं तत् सौम्यँ शुष्कं च वा इदँ हरितं च तस्यैवोभयस्यावरुद्ध्यै देवानामाज्यपानामयाट् प्रिया धामानीति प्रयाजानुयाजा वै देवा आज्यपास्तानेवोभयान् प्रीणाति तेऽस्योभये प्रीता यज्ञे भवन्ति ॥१॥ १-३

बृहतो मा वाजेन वाजय वामदेव्यस्य मा वाजेन वाजयेति वामदेवो वा एतद्द्रोणामपश्यत्

[१] काठ. ५,१,१-२ । मा. २१,४६-४७ । काण्व. २३,४५-४६ । तै. सं. १,६,११,५ ।
[२] काठ. ५,२,४-९ । मै. १,४,१ (५,१२) । वा. २,२०; ३८,१४,२७-२८ । काण्व. २,१८; ३८,१४,१६ ।

पशव इडा पशुष्वेव पशून् दधाति जुष्टे जुष्टिं ते गमेयमुपहूत उपहवं तेऽशीयेति आशीर्वै यज्ञो यज्ञस्यैवैतामाशिषमाशास्ते सुहवा मेहीति सुहवामेवैनां कुरुते सह रायस्पोषेणेति सहैवैवं रय्याभ्यैत्यस्मास्विन्द्र इन्द्रियं दधात्वितीडाया वा एष दोह इडामेवैतद्दुहेऽस्मान् रायो मघवानस्सचन्तामिति पशवो वै रायो मघवानः पशूनेवात्मन् धत्तेऽस्माकं सन्त्वाशिष इत्याशिषमेवाशास्ते संजयन् क्षेत्राणि सहसाहमिन्द्र कृण्वाणो अन्याँ अधरान् सपत्नानित्यधरमेव भ्रातृव्यं कुरुते ॥ ब्रह्म तेजो मे पिन्वस्व क्षत्रमोजो मे पिन्वस्वेत्येतदेवासा इडा सर्वं दुहे सर्वँ हास्यैतद्भवति य एवं वेद मयि त्यदिन्द्रियं महदितीन्द्रियं वा आप इन्द्रियमेवात्मन् धत्ते ब्रह्म पिन्वस्व कल्पन्तां दिश इत्यसौ वा आदित्यो ब्रह्मस्स यदोदेत्यथ दिशः कल्पन्ते य एवं वेद यामब्राह्मणः प्राश्नाति सा स्कन्नाहुतिस्तस्या वै वसिष्ठ एव प्रायश्चित्तिं विदांचकार ब्रह्म पिन्वस्वेति पुरोडाशमभिमृशति दक्षिणीयेष्वेव यज्ञं प्रतिष्ठापयत्यस्कन्नमविक्षुब्धमपि ह वा अस्य यामब्राह्मणः प्राश्नाति सा हुतैव भवत्यथ ह स्माह कपिवनो भौवायनः किमु स यजेत यो गामिव यज्ञं न दुहे सुदोहतरो वा एष गोरिति सं यज्ञपतिराशिषेति यजमानो यजमानभागं प्राश्नाति यजमानो वै यज्ञपतिर्यज्ञो यजमानभागो यद्यजमानो यजमानभागं प्राश्नाति यज्ञपता एव यज्ञं प्रतिष्ठापयति ॥२॥ ४-५

देवस्याहं बर्हिषो देवयज्यया प्रजावान् भूयासमिति बर्हिषा वै प्रजापतिः प्रजा असृजत प्रजामेव सृजते देवस्याहं नराशँसस्य देवयज्यया पशुमान् भूयासमिति नराशँसेन वै प्रजापतिः पशूनसृजत पशूनेव सृजते देवस्याहमग्नेस्स्विष्टकृतो देवयज्ययायुः प्रतिष्ठां गमेयमित्यायुरेवात्मन् धत्ते प्रति यज्ञेन तिष्ठत्या माशिषो दोहकामा इत्याशिषो वै दोहकामा यजमानमुपतिष्ठन्ते ता यथा धेनवोऽदुग्धा अपक्रामन्त्येवं त्वस्माद्यजमानादपक्रामन्त्यथ य एवं वेदाशिष एवैष दुहे सा मे सत्याशीर्देवान् गम्यादिति सत्यामेवाशिषं देवान् गमयित्वा वरं वृणीते ॥ जुष्टाज्जुष्टतरेति जुष्टादेवैनां जुष्टतरां करोति पन्यात् पन्यतरेति पन्यादेवैनां पन्यतरां करोत्यरेडता मनसा देवान् गच्छेत्येवैतदाह यो देवयानः पन्थास्तेन देवान् गच्छेति य एव देवयानः पन्थास्तमेवैनमपिपादयति रोहितेन त्वाग्निर्देवतां गमयतु हरिभ्यां त्वेन्द्रो देवतां गमयत्विति यजमानो वै प्रस्तरो हविर्भूतमेवैनँ स्वर्गं लोकं गमयति यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छेति स्वमेवैनं योनिं गमयति यो यज्ञस्यायुर्वेद सर्वमायुरेति यज्ञस्यायुरसि यज्ञो म आयुर्दधात्वित्येतद्वै यज्ञस्यायुर्य एवं वेद सर्वमायुरेति यद्वै युक्तो विमुक्तश्शमरथं दा करोति प्र वा क्षिणाति वि ते मुञ्चामि रशनां वि रश्मीनिति विमोक एवास्यैष स्वर्गमेव

[३] काठ. ५,३,१०-१५ । मै. १,४,१; ५ (६-९,११,३४) । वा. ८,२२ । काण्व. ९,२२ । तै. सं. १,७,४; १,६,४ ।
[वि ते मुञ्चामि० । अथर्व. ७,७८,१-२]

लोकं देवता गमयित्वा प्रतिष्ठाप्य विमुञ्चति विष्णोश्शम्योर्यज्ञस्यान्त इति विष्णुर्वै यज्ञोऽन्तत एव यज्ञं प्रतिष्ठापयति ॥३॥ ६-७

इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिरिति यज्ञस्य वा एष दोहो यज्ञमेवैतद्दुहे तस्य यज्ञसंष्टस्य स्विष्टस्य द्रविणमागच्छत्वित्याशिषमेवाशास्तेऽङ्गिरसो मेऽस्य यज्ञस्य प्रातरनुवाकैरहौषुरित्याशिषामेवैष दोहो वसुर्यज्ञो वसुमान् यज्ञ इति वसुमन्तमेव यज्ञं कुरुते तस्य यज्ञस्य वसोर्वसुमतो वसु मागच्छत्वित्याशिषमेवाशास्ते सोमो रेतोधा इति सोमो वै देवानां रेतोधास्सोम एवास्मै रेतोधा रेतो दधाति त्वष्टा रूपाणां विकर्तेति त्वष्टा वै रूपाणां विकर्ता सोऽस्मै रूपाणि विकरोति देवानां पत्नीरग्निर्गृहपतिर्मिथुनं यजमानस्येत्येतद्वै दर्शपूर्णमासयोर्मिथुनं दर्शपूर्णमासयोरेव मिथुनेन मिथुनमात्मन् धत्ते तयोरहं देवयज्यया मिथुनेन प्रजनिषीयेति प्र प्रजया प्र पशुभिर्जायते या वा एतस्य पत्नी सैतर्हि संप्रति यथादासीताग्निरस्याः प्रजा निर्दहेद्यदाह पत्न्येष ते पत्नि लोक इति लोकमेवास्यै करोत्यनिर्दाहुकोऽस्या अग्निः प्रजा भवति सं पत्नी पत्या सुकृतेषु गच्छतामिति पत्न्या एवैष यज्ञस्यान्वारम्भस्सह स्वर्गे लोके भवतस्स्वाहा स्वाहेष्टेभ्यो वषडनिष्टेभ्य इति स्विष्टिश्च वै दुरिष्टिश्च यज्ञे संयेते यस्य स्विष्टिर्यज्ञं युवते स वसीयान् भवति यस्य दुरिष्टिर्यज्ञं युवते स पापीयान् भवति स्विष्टयैवास्य यज्ञँ समर्धयति वसीयान् भवत्यथाथाग्नेऽस्यनाभिशस्तिश्चेत्ययपा वै नामैवाग्नेस्तनूरया सर्वाश्चैवेति खलु वा आहुर्यां च विद्म यज्ञस्य प्रायश्चित्तिं यां च न विद्म यच्च यज्ञस्य क्रियते यच्च न क्रियते तस्यैषोभयस्य प्रायश्चित्तिस्सरस्वत्यै वेशभगिन्यै स्वाहेति वेशयमनं वा एतदपि ह वा एनमाजीवन्त उपासते ब्राह्मणस्य वा राजन्यस्य वोपास्मह इति य एवं वेद यज्ञस्य त्वा प्रमयाभिमयोन्मया प्रतिमया परिगृह्णामीति गायत्री वै यज्ञस्य प्रमा त्रिष्टुबभिमा जगत्युन्मानुष्टुप् प्रतिमैतावन्ति वै छन्दाँसि यज्ञं वहन्ति तैरेवैनं परिगृह्णाति तेष्वेनं प्रतिष्ठापयति ॥४॥ ८

पूर्णमसि पूर्णं मे भूया इति येभ्य एव कामेभ्य ऊनस्तानापूरयतेऽग्निर्वै भूयाँसं यजमानं प्रदहति संतर्दे स्मायन्त्यग्नेऽतिमुच्यमाना अनु यजमानोऽतिमुच्यतेऽथो अङ्गिरसैवैतदग्नेरात्मानमन्तर्धत्तेऽप्रदाहाय सर्वं वा एतस्य यज्ञो मृष्टश्शुचामिषीदति यद्बृहा यद् यजवः प्राच्या दिशा देवा ऋत्विजो मार्जयन्तामित्येता वै यज्ञस्य मृष्ट्य एताश्शान्तयो मृष्टोऽस्य यज्ञो भवति शान्तोऽघातुकः पशुपतिः पशून् पृथिवीं विष्णुर्व्यक्रँस्त गायत्रेण छन्दसेति विष्णुमुखा वै देवाश्छन्दोभिरेभ्यो लोकेभ्यो-

[४] काठ. ५,४,२६-२३ । मै. १,४,१,३,८ (१०,१७-१०,१७) । वा. २,२० । काण्व. २,३६-३७ । तै. सं. ३,५,४ । तै. ब्रा. ३,३,९,११ ।
[५] काठ. ५,५,६ । मै. १,४,२,३, १,८,४-५ (११, ३६, ९-१७) । वा. १,३१; २,२५-२७, १५,८, १९,०, २०, २३, ३८,२५ । काण्व. १,४१, २,४६-५०, २६,२३, २२,८, २२,८, ३८,२४ ।

ऽसुरान् प्राणुदन्त विष्णुमुख एवैतद्यजमानश्छन्दोभिरेभ्यो लोकेभ्यो भ्रातृव्यं प्रणुदतेऽगन्म स्वरिति स्वरेव गच्छति सं ज्योतिषाभूमेति ज्योतिर्वै यज्ञो यज्ञ एव यज्ञमनुसंतनोति सूर्यस्यावृतमन्वावर्त इत्यमुष्यैवादित्यस्यावृतमन्वावर्ततेऽथो एवँ हि यज्ञ आवर्ततेदमहं योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तस्य प्राणं निवेष्टयामीति यमेव द्वेष्टि तस्य प्राणं निवेष्टयति तेजोऽसि तेजो मयि धेहीति तेज एवात्मन् धत्ते समहं प्रजया सं मया प्रजेति प्रजामेवात्मन् धत्ते समहं रायस्पोषेण सं मया रायस्पोष इति पशवो वै रायस्पोषः पशूनेवात्मन् धत्तेऽग्नेस्तेजसा तेजस्वी भूयासमिति तेज एवात्मन् धत्ते वायोरायुषायुष्मान् भूयासमित्यायुरेवात्मन् धत्ते सूर्यस्य वर्चसा वर्चस्वी भूयासमिति वर्च एवात्मन् धत्त इन्द्रस्येन्द्रियेणेन्द्रियावान् भूयासमितीन्द्रियं वा इन्द्र इन्द्रियमेवात्मन् धत्ते ॥ धाता मे धाम्ना सुधां दधात्विति धातैवास्मै धाम्ना सुधां दधाति प्रजापतेः प्रजया प्रजावान् भूयासमिति प्रजामेवात्मन् धत्ते प्र वा एषोऽस्माल्लोकाच्च्यवते यः प्रक्रमान् प्रक्रामति छन्दोभिर्हि पराङ् रोहति स ईश्वरः प्रमेतोरग्ने गृहपत इति गार्हपत्यमुपतिष्ठतेऽस्मिन्नेव लोके प्रतितिष्ठति ॥५॥ ९-१०

देवाञ्जनमगन् यज्ञ इति जनं वा एतद्यज्ञस्यैति यत् स्कन्दति जनादेव यज्ञस्याशिषमवरुन्द्धे पञ्चानां त्वा वातानां धर्त्राय गृह्णामीत्ययं वाव यः पवते स यज्ञः पाङ्क्तो यज्ञो यज्ञमेवास्मै गृह्णाति पञ्चानां त्वा सलिलानां धर्त्राय गृह्णामीति पशवो वै सलिलं पशूनेवास्मै गृह्णाति पञ्चानां त्वा पृष्ठानां धर्त्राय गृह्णामीति यज्ञो वै पृष्ठानि यज्ञमेवास्मै गृह्णात्येतेन वै दर्शपूर्णमासौ पृष्ठवन्तौ पञ्चानां त्वा दिशां धर्त्राय गृह्णामीति पञ्च वै दिशो दिश एवास्मै गृह्णाति सर्वा दिशोऽभिजयति सर्वा अस्य दिशोऽभिजिता भवन्ति पञ्चानां त्वा पञ्चजनानां धर्त्राय गृह्णामीति ॥ छन्दाँसि वै पञ्च पञ्चजना यज्ञश्छन्दाँस्युपैनं यज्ञो नमति भूरस्माकं हव्यं देवानामाशिषो यजमानस्येति भूतिमेवात्मने गृह्णाति हव्यं देवेभ्य आशिषो यजमानस्य चरोस्त्वा पञ्चबिलस्य धर्त्राय गृह्णामीतीमे लोकाश्चरुः पञ्चबिल इमानेवास्मै लोकान् गृह्णाति धामासि प्रियं देवानामनाधृष्टं देवयजनमिति प्रज्ञात आज्यग्रहः पथागान्न यज्ञाद्धूर्छति नास्माद्यज्ञो ह्वर्छति य एवं वेद यज्ञो वै देवेभ्योऽपाक्रामत् तं वेदेनान्वविन्दँस्तद्वेदस्य वेदत्वं यद्वेदो भवति यज्ञस्यानुवित्त्यै स्त्री वै वेदिः पुमान् वेदो यद्वेदेन वेदिं संमार्ष्टि मिथुनमेव करोति प्रजापतेर्वा एतानि श्मश्रूणि यद्वेदो यां पत्नीं कामयेत पुत्रं विन्देतेति तस्या उपस्थ आस्येन्मिथुनमेव करोति ॥ शिरो वा एतद्यज्ञस्य यत् पुरोडाशः केशा वेदो यद्वेदेन

[योऽस्मान् द्वेष्टि०...द्विष्मः० । अथर्व. ३,२७,१-६; ७,८१,५ । तेजोऽसि तेजो मयि धेहि । अथर्व. ७,८९,४; १९,३१,१२]
[६] काठ. ५,६,१८-२६ । मै. १,४,१,३-४,८-९ (९,१३-११,१५; ३७-४०) । कपि. ४,५ । वा. १,५, ३१; २,२८; ८,६०; १५,५० । काण्व. १,८,४९; २,५३; ९,४६; १६,७२ ।

पुरोडाशँ समुन्मार्ष्टि यज्ञस्य सर्वत्वायौषधयो वै वेदः पशव ओषधय एष पशूनां गोष्ठो यदन्तराग्नी
यद्वेदमन्तराग्नी स्तृणाति स्व एव गोष्ठे भ्रातृव्यस्य पशून् वृङ्क्ते दुरनुवेदो वा अमुत्र यज्ञो यद्वेदो
भवति यज्ञस्यानुविरत्यै वि वा एतद्यज्ञश्छिद्यते यदर्धमासेऽर्धमासे सँस्थां गच्छति यत् संततमाहव-
नीयात् स्तृणाति यज्ञमेव संतनोति तँ संततमुत्तरेऽर्धमास आलभते ॥ यज्ञहनो वै देवा यज्ञमुष-
स्सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य ये देवा यज्ञहनो
यज्ञमुषः पृथिव्यामध्यासत इति य एव पृथिव्यां यज्ञहनश्च यज्ञमुषश्च देवास्तानतीत्यान्तरिक्षं गच्छति
गच्छेम सुकृतो वयमित्याशिषमेवाशास्ते ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽध्यासत इति य एवा-
न्तरिक्षे यज्ञहनश्च यज्ञमुषश्च देवास्तानतीत्य दिवं गच्छति गच्छेम सुकृतो वयमित्याशिषमेवाशास्ते ये
देवा यज्ञहनो यज्ञमुषो दिव्यध्यासत इति य एव दिवि यज्ञहनश्च यज्ञमुषश्च देवास्तानतीत्य स्वर्गं
लोकं गच्छति गच्छेम सुकृतो वयमित्याशिषमेवाशास्ते ॥ गोमाँ अग्नेऽविमाँ अश्वी यज्ञ इति गोमन्त-
मेवाविमन्तमश्विनं यज्ञं कुरुते नृवत् सखा सदमिदप्रमृष्य इति नृवत् सखा ह्येष सदमिदप्रमृष्य इडावाँ
एषो असुर प्रजावानित्याशिषमेवाशास्ते दीर्घो रयिः पृथुबुध्नस्सभावानिति प्रथयत्येवाग्ने व्रतमचा-
रिषमित्यग्निर्वै देवानां व्रतपतिर्व्रतपतय एव व्रतँ संप्रयच्छति ॥६॥ ११-१५

देवतानां वा एतदायतनं यदाहवनीयो यदन्तराग्नी तत् पशूनां मनुष्याणां गार्हपत्योऽन्वाहार्य-
पचनः पितॄणां पूर्वं चाग्निमपरं च परिस्तरितवा आह मनुष्याणामिध्वै नवावसानं प्रियं नवावसान-
मेवाकृन् मेध्यत्वाय सर्वा ह वा अस्य यक्ष्यमाणस्य देवता यज्ञमागच्छन्ति य एवं वेदाग्नेस्तनूरसि
वाचो विसर्जनमिति पुरोडाशीयानावपति देवतानां वा एष ग्रहो देवता एवैतदग्रहीदथ ह स्माहारुण
औपवेशिरहुतासु वा अहमाहुतिषु देवता हव्यं गमयामि सँस्थितेन यज्ञेन सँस्थां गच्छानीति
य एवं वेदाहुतास्वेवास्याहुतिषु देवता हव्यं गच्छति सँस्थितेन यज्ञेन सँस्थां गच्छत्यपः प्रणेष्यन्
वाचं यच्छेदौलूखलेन वै दृषदा देवा यज्ञमुखाद्रक्षाँस्यपाघ्नन्मनसा वै प्रजापतिर्यज्ञमतनुतौलूखल-
स्योद्वदितोरध्वर्युश्च यजमानश्च वाचं यच्छेतां प्रजापतिरेव भूत्वा मनसा यज्ञं तत्वा तेन सर्वाणि सह
यज्ञायुधानि प्रहृत्यानि मानुषं तत् क्रियते नैकमेकं पितृदेवत्यं तद् द्वे द्वे प्रहृत्ये याज्यानुवाक्ययो
रूपमुपवसत्युभयाँस्तत् पशूनवरुन्द्धे ग्राम्याँश्चारण्याँश्च यद्ग्राम्यस्य नाश्नाति तेन ग्राम्यान्
पशूनवरुन्द्धे यदारण्यस्याश्नाति तेनारण्यानथो इन्द्रियं वा एतद्यदारण्यमिन्द्रियमेवावरुन्द्धे ॥ न
माषाणामश्नीयादमेध्या वै माषा न तस्य सायमश्नीयाद्येन प्रातर्यक्ष्यमाणस्स्यादप्रतिजग्धेन वै
हव्येन देवा वसीयोभूयमगच्छन् प्रतिजग्धेनासुराः पराभवन्नप्रतिजग्धेन वै तद्धव्येन यजमानो

[गोमाँ अग्नेऽविमाँ० । ऋ. ४ २,५; तै. सं. १,६,६,४; ३,१,११,१]
[७] मै. १,४,१० (४१-४४) । वा. १,६५ । काण्व. १,९३ । तै. सं. १,६,८ ।
काठ० ४२

वसीयोभूयं गच्छति यो वै श्रद्धामनारभ्य यजते पापीयान् भवत्यापश्श्रद्धा न वाचा गृह्णाति न यजु-
षाति वा एता वाचं नेदन्त्यति वर्षं मनस्तु नातिनेदन्ति तद्यदपो ग्रहीष्यन् स्यादिमां तर्हि मनसा
ध्यायेदियं वा एतासां पात्रमनयैवैना गृह्णाति श्रद्धामेवारभ्य यजते वसीयान् भवति ॥७॥
१६-१७
[११२९]
॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायां यजमान-ब्राह्मणं नाम द्वात्रिंशं स्थानकं संपूर्णम् ॥३२॥

अथ त्रयस्त्रिंशं स्थानकम्।

सत्त्राणि।

गावो वै सत्त्रमासत शृङ्गाणि सिषासन्तीस्तासां दशमे मासि शृङ्गाण्यजायन्त ता अब्रुवन्नराव्
स्मोत्तिष्ठामाव तं काममरुत्स्महि यस्मै कामाय न्यसदामेति तासामु त्वा अब्रुवन्नर्धा वा यावती-
र्वासामहा एव द्वादशौ मासौ संवत्सरँ संपाद्योत्तिष्ठामेत्युत्तिष्ठन्तीरु त्वा अनुवन्नेवास्मासु श्रद्धाभूदिति
तासां या द्वादशौ मासा आसत तासाँ शृङ्गाणि प्रावर्तन्त श्रद्धया वाश्रद्धया वा ता इमा
यास्तूपरास्तस्माद् द्वादश मासास्तूपराः प्रेत्वरीश्चरन्ति दश शृङ्गिणीरुभयीर्वाव ता आर्ध्नुवन् या-
श्शृङ्गाण्यसन्वन्याश्चोर्जमवारुन्धतर्ध्नुवन्ति दशसु मास्सूत्तिष्ठन्त ऋध्नुवन्ति द्वादशसु य एवं विदुस्तदेत-
द्गवामयनं तस्मादेतेन यन्ति पदेन वा एतद्यन्ति विन्दति ह खलु वै पदेन यँस्तस्मादेतद्गोसनि
॥१॥ १

अतिरात्रः परमो यज्ञक्रतूनामित्याहुर्ब्रह्मवादिनः कस्मात् तं प्रथममुपयन्तीति यद्वा अतिरात्रमुप-
यन्त्यग्निष्टोमं प्रथममुपयन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रं यथापूर्वमेव यज्ञक्रतूनुपेत्यैतानालभ्य
परिगृह्य सोमं पिबन्त आसते ज्योतिष्टोमं प्रथममुपयन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव तत्
स्तोमान् प्रयुङ्क्ते विराजं ज्योतिष्टोमोऽभिसंपन्न एकया गौरतिरिक्त एकयायुरूनस्ते सँस्तुता विराजम-
भिसंपद्यन्ते द्वे चर्चा अतिरिच्येते स्वर्गो वै लोको विराड् द्विपादो यजमानास्स्वर्ग एव तल्लोके विराजि
द्विपादो यजमानाः प्रतितिष्ठन्ति ॥ रथन्तरं पृष्ठं भवतीयं वै पृथिवी रथन्तरमिमामेव तदालभ्यासते
रथन्तरं दिवा भवति रथन्तरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने ब्रह्मसामं
बृहद्भवति तन्मध्यतो दधाति रथन्तरस्य विधृत्यै तेनाजाम्यतिरात्राच्चतुर्विंशमहरुपयन्ति चतुर्विंशति-
स्संवत्सरस्यार्धमासा अर्धमासशस्संवत्सर आप्यतेऽर्धमासश एव तत् संवत्सरमाप्नुवन्ति तस्य
षष्टिश्च त्रीणि च शतानि स्तोत्रीयाष्षष्टिश्च वै त्रीणि च शतानि संवत्सरस्याहान्यहश्शस्संवत्सर

[१] तै. सं. ७,५,१–१ । [२] तै. सं. ७,४,१०; ७.५.१ ।

आप्यतेऽहश्श एव तत् संवत्सरमाप्नुवन्त्युक्थ्यो भवति पशवो वा उक्थानि पशूनेवावरुन्धते बृहत् पृष्ठं
भवति स्वर्गो वै लोको बृहत् स्वर्गमेव तेन लोकमाप्नुवन्ति त्रयस्त्रिंशो नाम साम माध्यन्दिने पवमाने
भवति त्रयस्त्रिंशद्देवास्तद्देवा नाप्नुवन्त्येतस्मै वै संवत्सरमुपयन्त्यापन् देवानापन् स्वर्गं लोकमव-
पशूनरुत्सतापन् संवत्सरमर्धमासश आपन्नहश्शस्तच्चतुर्विंशेऽहन् सर्वा देवताः परिगृह्य सोमं
पिबन्त आसते ये वा इतः पराञ्चं संवत्सरमुपयन्ति नैनं ते स्वस्ति समश्नुवतेऽथो येऽमुतोऽर्वाञ्च- २-३
मुपयन्ति ते हैनँ स्वस्ति संतरन्त्येतद्वा अमुतोऽर्वाञ्चमुपयन्ति यदेवम् ॥२॥

ज्योतिष्टोमं प्रथममुपयन्त्यस्मिंस्तेन लोके प्रतितिष्ठन्ति गोष्टोमं द्वितीयमुपयन्त्यन्तरिक्षे तेन
प्रतितिष्ठन्त्ययं वै लोको ज्योतिरन्तरिक्षं गौरसा
प्रतितिष्ठन्त्यायुष्टोममुत्तममुपयन्त्यस्मिंस्तेन लोके प्रतितिष्ठन्त्ययं वै लोको ज्योतिरन्तरिक्षं गौरसा
एवायुर्यदेतान् स्तोमानुपयन्त्येष्वेव तल्लोकेषु सत्त्रिणः प्रतितिष्ठन्तो यन्ति विराजं ज्योतिष्टोमो-
ऽभिसंपन्न एकया गौरतिरिक्त एकयायुरूनस्ते सँस्तुता विराजमभिसंपद्यन्त ऊर्ग्वै विराड् यदेतैस्स्तोमै
र्यन्त्यूर्जमेवैतत् सत्त्रिणोऽवरुन्धाना यन्ति ते न क्षुधार्तिमार्छन्त्यक्षोधुका भवन्ति क्षुत्संबाधमाना
इव हि सत्त्रिणोऽग्निष्टोमा अभितः प्रधी ता उक्थ्या मध्ये नभ्यं तदेतद्वै परियद्देवचक्रं यदेतेन
षडहेन यन्ति देवचक्रमेव तत् समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवत उभयतोज्योतिषा यन्ति
षडहेन यन्ति देवचक्रमेव तत् समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवत उभयतोज्योतिषा यन्ति षडहेन यन्ति पञ्चा
स्वर्गो वै लोको ज्योतिरुभयत एव तत् स्वर्गे लोके सत्त्रिणः प्रतितिष्ठन्तो यन्ति षडहेन यन्ति षड्वा
स्वर्गो वै लोको ज्योतिरुभयत एव तत् स्वर्गे लोके सत्त्रिणः प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि संपद्यन्ते दश वै पुरुषे
ऋतव ऋतुष्वेव तत् प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि संपद्यन्ते दश वै पुरुषे
प्राणास्स्तनौ द्वादशौ तत् पुरुषमनुपर्यावर्तन्ते त्रयष्षडहा भवन्ति तान्यष्टादशाहानि संपद्यन्ते नवान्या-
नि नव प्राणास्तत् प्राणाननुपर्यावर्तन्ते चत्वारष्षडहा भवन्ति तानि चतुर्विंशतिरहानि संपद्यन्ते
चतुर्विंशतिस्संवत्सरस्यार्धमासा अर्धमासशस्संवत्सर आप्यते तत् संवत्सरमनुपर्यावर्तन्ते पञ्च षडहा
भवन्ति तानि त्रिंशदहानि संपद्यन्ते दश हस्त्या अङ्गुलयो दश पद्या दश प्राणास्तत् त्रिंशत् त्रिंश-
दक्षरा विराड्वैराजः पुरुषस्तत् पुरुषमनुपर्यावर्तन्तेऽप्रतिष्ठितस्संवत्सर इति खलु वा आहुर्वर्षीयान्
प्रतिष्ठाया इत्येतावद्वै संवत्सरस्य ब्राह्मणं यावन्मासो मासि मास्येव प्रतितिष्ठन्तो यन्ति य एवं ४
विदुः ॥३॥

नवैतान्यहानि नव वै स्वर्गा लोकाश्चतस्रो दिशश्चत्वारोऽन्तर्देशा ऊर्ध्वा नवमी यदेतान्यहान्युप-
यन्ति नवस्वेव तत् स्वर्गेषु लोकेषु सत्त्रिणः प्रतितिष्ठन्तो यन्त्यग्निष्टोमाः परसामानः कर्तव्या
इत्याहुरग्निष्टोमसंमितो वै स्वर्गो लोक इति द्वादशाग्निष्टोमस्तोत्राणि द्वादश मासास्संवत्सरस्संवत्सर
स्स्वर्गो लोकस्तस्मात् तदाहुस्तत्र वृद्धर्यमुक्थ्या एव परसामानः कर्तव्या इति पशवो वा उक्थानि

[३] तै. सं. ७,४,११ । [४] तै. ब्रा. १,२,२ ।

पशूनामवरुद्ध्यै विश्वजिदभिजिता अग्निष्टोमा उक्थ्यास्सप्तदशाः परसामान एकविंशं दिवाकीर्त्यं ते
सँस्तुता विराजमभिसंपद्यन्ते द्वे चर्चा अतिरिच्येते स्वर्गो वै लोको विराड् द्विपादो यजमानास्स्वर्गं
एव तल्लोके विराजि द्विपादो यजमानाः प्रतितिष्ठन्ति ॥ यत् परो रथन्तरं तत् प्रथमेऽहन् कर्तव्यं
बृहद् द्वितीये वैरूपं तृतीये वैराजं चतुर्थे शाक्वरं पञ्चमे रैवतँ षष्ठे तदु पृष्ठेभ्यो न यन्ति संतत्य एते
ग्रहा गृह्यन्तेऽतिग्राह्याः परसामसु यदेते गृह्यन्त इमानेवैतल्लोकान् संतत्य स्वर्गं लोकं यजमाना
आरोहन्ति मिथुना एते ग्रहा गृह्यन्तेऽतिग्राह्याः परसामसु यदेते गृह्यन्ते मिथुनमेवैतैरवरुन्धते सौर्य
एष ग्रहो गृह्यतेऽतिग्राह्य एकविंशेऽहँस्तस्य प्रत्यक्षं नाम न ग्रहीतवै तेजस्वितर इव वाश्वतरः प्रदा-
हाद्वा भय्यं किलासंभावाद्वाया विष्ठा जनयन् कर्वराणीत्येष प्राजापत्योऽनिरुक्तो ग्रहो गृह्यतेऽतिग्राह्य
एकविंशेऽहन् समन्त आयुष्या पशव्यो यो ह खलु वाव प्रजापतिस्स एवेन्द्रस्तदु देवेभ्यो न
यन्ति ॥४॥ ५-६

प्रथमे मासि पृष्ठान्युपयन्ति मध्यम उपयन्त्युत्तम उपयन्ति यत् प्रथमे मासि पृष्ठान्युपयन्त्य-
स्मिंस्तेन लोके प्रतितिष्ठन्ति यन्मध्यम उपयन्त्यन्तरिक्षे तेन प्रतितिष्ठन्ति यदुत्तम उपयन्त्यमुष्मिंस्तेन
लोके प्रतितिष्ठन्ति मासि मासि पृष्ठान्युपेत्यानीत्याहुः पृष्ठानि वै यज्ञस्य दोह इति तदाहुरेकं वा
एतद्देवानामहर्यत् संवत्सरो यां वै त्रिरेकस्याह्न उपसीदन्ति दहँ सापराभ्यां दोहाभ्यां दुहे तत्
कुतस्सा धोक्ष्यति यां द्वादश कृत्व उपसीदेयुरिति सकृत् पृष्ठान्युपेयुरुत्तमे मासि समुद्रं खलु वा
एतेऽनवारमपारं प्रस्नान्ति ये संवत्सरमुपयन्ति बृहद्रथन्तराभ्यामेतव्यं बृहद्रथन्तरे वै देवानां प्लव-
स्तद्देवानां प्लवेन समुद्रमर्णवं तरन्ति यथा मध्ये समुद्रस्य प्लवमन्ववर्जेयुरेवं तद्यत् पुरा संवत्सरा-
द्बृहद्रथन्तरे उत्सृजेयुरनुत्सर्गं बृहद्रथन्तराभ्यां गत्वा प्रतिष्ठां गत्वा सकृत् पृष्ठान्युपेयुरुत्तमे मासि
सर्वेभ्यो वै कामेभ्यस्संधिर्दुहे तत् सर्वान् कामान् यज्ञं पृष्ठानि संवत्सराद्दुहे ॥५॥ ७

एकविंश एष एतेन वै देवा एकविंशेनादित्यमितस्स्वर्गं लोकमारोहयन् स एष इत एकविंश-
स्तस्य दशावस्तादहानि दश परस्तात् स एष उभयतो विराजि प्रतिष्ठित उभयतो हि वा एष
विराजि प्रतिष्ठितस्तस्मादन्तरेमौ लोकौ यत् सर्वेषु स्वर्गेषु लोकेषु प्रतितिष्ठन्नेति देवा वा आदि-
त्यस्य स्वर्गाल्लोकादवपादादबिभयुस्तं त्रिषु स्वर्गेषु लोकेष्वादधुस्तस्य पराचोऽतिपादादबिभयुस्तं
परस्तात् त्रिभिस्स्वर्गैर्लोकैः प्रत्यस्तभ्नुवन् स एष उभयतष्षट्सु स्वर्गेषु लोकेषु प्रतिष्ठितो धृत्यै
प्रतिष्ठाया अनवपादायानतिपादाय ॥ देवा वै सप्तदशानां प्रम्लयादबिभयुस्तान् सर्वैस्स्तोमैरवस्ताद्
पर्यार्षन् सर्वैस्स्तोमैः परस्तात् तस्मादभिजित् सर्वस्तोमोऽवस्तात् सप्तदशानां विश्वजित् सर्वस्तोमः

[५] तै. सं. ७,५,३ । [६] तै. ब्रा. १,२,४ ।

परस्तात् सप्तदशानां धृत्या अप्रच्युत्याय देवा वा आदित्यस्य स्वर्गाल्लोकादवपादादबिभयुस्तं ये त्रय्यं स्वर्गाणां लोकानामधिपतयस्तेभ्यादयुश्चतुर्विंशा वै स्तोमा त्रय्यं स्वर्गाणां लोकानामधिपतयस्तद्यदेकविंशस्याहुस्त्रयोऽवस्तात् सप्तदशास्त्रयः परस्तात् ते त्रयश्चतुर्विंशा द्वौ द्वौ तेषु वा एष आहितो धृत्यै प्रतिष्ठाया अनवपादायानतिपादाय ॥ त्रय्यंन् हि वा एष स्वर्गाणां लोकानामाहितस्तस्मादृतेभ्यो भूतेभ्य उत्तरो त्रय्यं स्थानानामाधिपत्यं पर्येति य एवं वेद देवा वा आदित्यस्य स्वर्गाल्लोकादवपादादबिभयुस्तं पञ्चभी रश्मिभिरुदवयन् रश्मयो दिवाकीर्त्यानि तस्मादेकविंशेऽहन् पञ्च दिवाकीर्त्यानि क्रियन्ते ये गायत्रे ते गायत्रीवृत्तयोः पवमानयोर्महादिवाकीर्त्यं होतुः पृष्ठं विकर्णं ब्रह्मसामं भासमग्निष्टोमस्तद्यदेकविंशेऽहन् पञ्च दिवाकीर्त्यानि क्रियन्त आदित्यमेव तत् पञ्चभी रश्मिभिरुद्वयन्ति धृत्यै प्रतिष्ठाया अनवपादायानतिपादाय ॥ अथैतानि स्पराणि स्परैर्वै देवा आदित्याय स्वर्गं लोकमस्पृण्वन् यदस्पृण्वंस्तत् स्पराणां स्परत्वं स्पृण्वन्त्यस्मै स्पराणि स्वर्गं लोकं य एवं विद्वानेतैस्स्तुतेऽथैतानि पराणि परैर्वै देवा आदित्यं स्वर्गं लोकमपारयन् यदपारयंस्तत् पराणां परत्वं पारयन्त्येनं पराणि स्वर्गं लोकं य एवं विद्वानेतैस्स्तुतेऽनुष्टुभो वै यदयातयामरूपं तानि पराणि तस्मादनुष्टुप्सु पराणि क्रियन्ते यदनुष्टुप्सु पराणि क्रियन्तेऽनुष्टुभमेव तत् सर्वायां कुर्वन्ति स्वर्गस्य लोकस्य समष्ट्यै ॥६॥ ८-११

उत्सृज्या३न्नोत्सृज्या३मिति मीमांसन्ते तदाहुरुत्सृज्यमेव प्राणापाना वा एते संवत्सरस्य यत् पूर्णमासा यन्नोत्सृजेयुस्संवत्सरमपिनह्येयुरमेहेन सत्त्रिणो म्रियेरन् पौर्णमास्यां चामावस्यायां चोत्सृज्यमित्याहुरेते हि यज्ञं वहत इति तदाहुरेतयोस्त्वाव नोत्सृज्यं ये अवान्तरा यज्ञं भेजाते इति या प्रथमा व्यष्टका तस्यामुत्सृज्यमित्याहुरेष हि मासो विशर इति नादिष्टमुत्सृजेयुर्यदादिष्टमुत्सृजेयुर्यादृशे पुनः पर्याप्लावे मध्ये षडहस्य संपद्यत इति षडहैर्मासैं संपाद्य यत् सप्तममहस्तदुत्सृजेयुस्सं षडहं तन्वन्त्युत्संवत्सरं श्रामयन्ति यदहरुत्सृजेयुस्तदग्नये वसुमतेऽष्टाकपालं पुरोडाशं प्रातर्निर्वपेयुरैन्द्रं दधीन्द्राय मरुत्वत एकादशकपालं मध्यन्दिने विश्वेभ्यो देवेभ्य ऋतुमद्भ्यो द्वादशकपालमपराह्णे प्राजापत्यः पशुस्स्यादग्नेर्वै वसुमतः प्रातस्सवनं यदग्नये वसुमतेऽष्टाकपालं पुरोडाशं प्रातर्निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्त्यननुसर्गाय सोमो वा एष ओषधीषु प्रविष्टो यदैन्द्रं दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्ति सवनमष्टाभिरुपयन्ति ये खलु वाव प्रातः पशव उपाक्रियन्ते ते वसव इन्द्रस्य वै मरुत्वतो माध्यन्दिनं सवनं यदिन्द्राय मरुत्वत एकादशकपालं पुरोडाशं मध्यन्दिने निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्त्यननुसर्गाय ॥ सवनमेकादशभिरुपयन्ति विश्वेषां वै

[७] तै. सं. ७,५,७।

देवानामृतुमतां तृतीयसवनं यद्विश्वेभ्यो देवेभ्य ऋतुमद्भ्यो द्वादशकपालं पुरोडाशमपराह्णे निर्वपन्ति देवतामेव तद्भागिनीं कुर्वन्त्यननुसर्गाय सवनं द्वादशभिरुपयन्ति प्राजापत्यः पशुर्भवति यज्ञो वै प्रजापतिर्यज्ञस्याननुसर्गायाभीवर्त इतष्षण्मासो ब्रह्मसामं भवति ब्रह्म वा अभीवर्तो ब्रह्मणैव तत् स्वर्गं लोकमभिवर्तयन्तो यन्ति ॥ प्रतिकूलमिव हीतस्स्वर्गो लोकस्समानाः प्रगाथा भवन्त्यन्यान्यन्यानि सामानि लोका वै सामानि स्वर्गा ऋचो लोकैरेव तत् स्वर्गाल्लोकानभ्यारोहन्तो यन्ति समानं साम भवत्यन्या अन्या ऋचस्स्वर्गा वै सामानि लोका ऋचो लोकैरेव तत् स्वर्गाल्लोकानभ्यारोहन्त आयन्ति ॥ १२-१४

इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥ १५

इत्यमुत आयतां षण्मासो ब्रह्मसामं भवत्ययं वै लोको ज्योतिः प्रजा ज्योतिरिममेव तल्लोकं पश्यन्तोऽभिवदन्त आयन्त्ययं हि लोको लोकानां प्रतिष्ठा ॥७॥ १६

अथैते परसामानस्तेषां परसाम्नां यत् प्रथमं तदुत्तमं यदुत्तमं तत् प्रथमं यन्मध्ये मध्य एव तत् तद्येनैवैते यन्ति तेनामुतः पुनरायन्त्येषां लोकानां संतत्यै प्रतिज्ञात्यै ते विश्वजित उपरिष्टात् प्रत्यवरोहिणस्स्तोमानुपयन्ति तदाहुर्जितं वा एते पराजयन्ते निर्वृत्तान् प्रत्यवरोहिणस्स्तोमानुपयन्ति निवर्तन्ते स्वर्गाल्लोकात् प्रत्यश्रमु यज्ञं तन्वत इति ते तथा पञ्च मासो यन्ति षष्ठस्य च मासस्त्रीनभिप्रवान् द्वे चाहनी गोआयुषी ते पृष्ठान्युपयन्ति पृष्ठानि वै यज्ञस्य दोहो यज्ञं दोहामहै पशूँश्चामृतं च प्राश्नमु यज्ञं तनवामहा इत्यृतवो वै पृष्ठान्यृतुष्वेव तत् प्रतितिष्ठन्तो यन्ति स्वर्गो वै लोकः पृष्ठानि स्वर्ग एव तल्लोके प्रतितिष्ठन्तो यन्ति ॥ देवक्षत्रं वा आयुषस्तोमा देवक्षत्रमेव तदभ्यारोहन्तो यन्ति ते छन्दोमानुपयन्ति पशवो वै छन्दोमाः पशूनेवावरुन्धते ते दशममहरुपयन्ति प्रजननं प्राजापत्यं प्रतिष्ठां प्रजननमेव तत् प्रजां प्रतिष्ठामवरुन्धते ते महाव्रतीयमहरुपयन्ति तदाहुर्विषुवान् वा एतदहर्यन्महाव्रतीयं विषुवत्युपेत्यमित्यथाहुः प्राजापत्यं वा एतदहर्यन्महाव्रतीयं तदुत्तमार्धे संवत्सरस्योपेत्यमिति यो वै षण्मास्यो जायते यस्सप्तमास्यः प्र वै स मीयते न तेन भोगमश्नुते ॥ संवत्सरे खलु वाव रेतो हितं प्रजायते तद्यदुत्तमार्धे संवत्सरस्य महाव्रतीयमहरुपयन्ति संवत्सर एतद्रेतो हितं प्रजनयन्ति यथर्त्वेवर्तून् कल्पयन्ति यथापूर्वं प्रजां प्रजनयन्ति ते पञ्चविंशं स्तोममुपयन्ति पुरुषस्तोमं दश हस्त्या अङ्गुलयो दश पद्या द्वौ बाहू द्वे सक्थ्या आत्मा पञ्चविंशो

[इन्द्र क्रतुं न आभर०। ऋ. ७,३२,२६; सा. २५९,१४५६; अथर्व. १८,३,६७; २०,७९,१; तै. सं. ७,५,७,४]

यदेतं स्तोममुपयन्ति स्वादेव तत् स्तोमात् सत्त्रिण आत्मानं प्रजनयन्ति भूत्यै तदाहुः प्राजापत्यं वा एतदहर्यन्महाव्रतीयं तस्मिन् सर्वे ग्रहा ग्रहीतव्यास्सर्वमिव हि प्रजापतिर्विव्याचेत्येको ग्रहीतव्य एको हि प्रजापतिस्त्रयो ग्रहीतव्यास्त्रय इमे लोका एष्वेव लोकेष्वृध्नुवन्ति ॥ पञ्च ग्रहीतव्याः पाङ्क्तो यज्ञो यज्ञमेवावरुन्धते सप्त ग्रहीतव्यास्सप्त ग्राम्याः पशवस्तानेवावरुन्धते नव ग्रहीतव्या नव प्राणाः प्राणेष्वेव प्रतितिष्ठन्ति पञ्चदश ग्रहीतव्याः पञ्चदशार्धमासस्य रात्रयोऽर्धमासशस्संवत्सर आप्यतेऽर्धमासश एव तत् संवत्सरमाप्नुवन्ति सप्तदश ग्रहीतव्याः प्रजापतिस्सप्तदशः प्रजापतिमेवाप्नुवन्त्येकविंशतिर्ग्रहीतव्या असा आदित्य एकविंशोऽमुमेवादित्यमाप्नुवन्ति सप्तविंशतिर्ग्रहीतव्यास्त्रिणवा इमे लोका एष्वेव लोकेष्वृध्नुवन्ति त्रयस्त्रिंशद्ग्रहीतव्यास्त्रयस्त्रिंशद्देवता देवतास्वेव प्रतितिष्ठन्ति ॥८॥ १७-२०

[५१३९]

॥ इति श्रीयजुषि काठके चरकशाखायामिठिमिकायां सत्राणि नाम त्रयस्त्रिंशं स्थानकं संपूर्णम् ॥३३॥

अथ चतुस्त्रिंशं स्थानकम् ।

एकादशिनी ।

एकादशिनीभिर्यन्ति प्राणा वा एकादशिनीः प्राणेष्वेव तत् प्रतितिष्ठन्तो यन्ति तदाहुर्यदेकादशिनीभिरिवुरहानि वातिरिच्येरन् पशवो वा नोपमेनाह्नोत्तमः पशुस्संपद्येतेति तद्यदेकादशिनीकामास्युः प्रथमे मास्येकादशिनीमुपेयुरुत्तमे च प्राणा वा एकादशिनी प्राणानेव मुखतः प्रतिपद्यन्ते प्राणेष्वन्ततः प्रतितिष्ठन्त्यैन्द्राग्नः खल्वेवाच्युतः पशुस्स्यात् प्राणापानौ वा इन्द्राग्नी प्राणापानयोरेव तत् प्रतितिष्ठन्तो यन्ति तेजो वा इन्द्राग्नी तेजस्येव तत् प्रतितिष्ठन्तो यन्त्योजो वै वीर्यमिन्द्राग्नी तेजस्येव वीर्ये प्रतितिष्ठन्तो यन्तीन्द्राग्नी सर्वा देवता यदैन्द्राग्नः पशुर्भवति सर्वा एव तद्देवताः प्रीणन्तो यन्ति ॥ यदहो रथंतरं साम स्यादाग्नेयं तदहः पशुमालभेरन् यदहर्बृहदैन्द्रं तदहस्तदैन्द्राग्न एव यदहो रथंतरं साम स्यादाग्नेन्द्रं तदहः पशुमालभेरन् यदहर्बृहदैन्द्राग्नं तदहस्तदनुपूर्वं देवते कल्पयन्ति यथापूर्वं पशुमालभन्त इन्द्राग्निभ्यामेव यन्ति बार्हस्पत्यं शितिपृष्ठं षष्ठेऽहन्नालभेरन् ब्रह्म वै बृहस्पतिर्ब्रह्मण्येव तद्यज्ञस्यान्ततः प्रतितिष्ठन्ति बार्हस्पत्यः खलु वाव शितिपृष्ठो देवतया द्यावापृथिव्यां धेनुं सप्तमेऽहन्नालभेरन् प्रथमे छन्दोमे द्यावापृथिवी वै यज्ञस्य प्रतिष्ठा द्यावापृथिव्योरेव तद्यज्ञस्यान्ततः प्रतितिष्ठन्ति द्यावापृथिव्या खलु वाव धेनुर्देवतया वायव्यं वत्समष्टमेऽहन्नालभेरन् मध्यमे छन्दोमे प्राणो वै वायुः प्राण एव तद्यज्ञस्यान्ततः प्रतितिष्ठन्ति ॥ वायव्यः खलु वाव वत्सो देवतया वाचे पृश्निं नवमेऽहन्नालभेरन्नुत्तमे छन्दोमे वाग्वै पृश्निः प्रतिष्ठा वाच्येव तद्यज्ञस्यान्ततः

प्रतितिष्ठन्ति वाग्देवत्या खलु वाव पृश्निर्देवतयादित्यां वशां शमेऽहन्नालभेरन्नियं वा अदितिरियं प्रतिष्ठास्यामेव तद्यज्ञस्यान्ततः प्रतितिष्ठन्त्यादित्या खलु वाव वशा देवतया वैश्वकर्मणमृषभं महाव्रतीयेऽहन्नालभेरन्निन्द्रो वै वृत्रं हत्वा विश्वकर्माभवत् प्रजापतिः प्रजासृष्ट्वा विश्वकर्माभवत् संवत्सरो विश्वकर्मेत्याहुर्यमिमाः प्रजा अनुप्रजायन्त इति त्रिरूपस्स्यादुभयतएतो यत् प्रथमं रूपं तेनैन्द्रो यद् द्वितीयं तेन प्राजापत्यो यत् तृतीयं तत् संवत्सरस्य रूपमिन्द्रो वृषा प्रजापतिर्वृषा संवत्सरोऽस्य वृषेत्याहुर्यमिमाः प्रजा अनुप्रजायन्त इति तस्मादृषभस्स्यात् ॥१॥ १-३

असुर्यं वा एतस्माद्वर्णं कृत्वा तेज इन्द्रियं वीर्यं प्रजा पशवोऽपक्रामन्ति यस्य यूपो विरोहति स ईश्वर ईजानः पापीयान् भवितोस्त्वाष्ट्रं बहुरूपमालभेत त्वष्टा वै रूपाणां विकर्ता तमेव भागधेयेनोपधावति सोऽस्मै तेज इन्द्रियं वीर्यं प्रजां पशून् पुनरुपावर्तयत्यार्तिं वा एते नियन्ति येषां दीक्षितानां प्रमीयते तं यदववृजेयुः क्रूरकृतामिवैषां लोकस्स्यादाहर दहेति ब्रूयुस्तं दक्षिणार्धे वेद्यां निधाय सर्पराज्ञ्या ऋग्भिस्स्तुयुरियं वै सर्पराज्ञ्यस्या एवैनमधिसमीरयन्ति तदाहुर्व्यृद्धं वा एतद्यत् स्तुतमननुशस्तमिति होता प्रथमो दीक्षितानां प्राचीनावीतं कृत्वा मार्जालीयं परीयायामीरनुब्रुवन् सर्पराज्ञ्या ऋचां कीर्तयन्नियं वै सर्पतो राज्ञस्या एवैनमधिसमीरयन्ति धुवन्त्येवैनमेतदथो न्येवास्मै ह्नुवते तम इव वा एते नियन्ति येषां दीक्षितानां प्रमीयते ॥ अग्न आयूंषि पवस इत्येतां सोमस्य प्रतिपदं कुर्वीरन् पुनत एवात्मानमायुरेवात्मन् दधतेऽथो ज्योतिष्मन्त एव यन्त्यप्रतिष्ठिता वा एते येषां दीक्षितानां प्रमीयते रथंतरसामैषां सोमस्स्यादियं वै पृथिवी रथंतरमस्यामेव प्रतितिष्ठन्ति ॥२॥ ४-५

यद्यक्रीतमपहरेयुरन्यः क्रीतव्यो यदि क्रीतं यो नेदिष्ठं स्यात् स आहृत्याभिषुत्यो राजाहाराय तु किंचिद्दीयते नास्य स परिक्रीतो भवति यदि सोमं न विन्देयुः पूतीकानभिषुणुयुर्यदि न पूतीकानार्जुनानि गायत्री वै सोममपाहरच्छ्येनो भूत्वा तस्य सोमरक्षिरनुविसृज्य नखमच्छिनत् ततो योंऽशुरमुच्यत स पूतीकोऽभवत्पूतीका वै नामैते यत्पूतीकानभिषुण्वन्त्यूतिमेव यज्ञाय कुर्वन्तीन्द्रो वै वृत्रमहंस्तस्य यल्लोहितमासीत् तान्यार्जुनानि लोहिततूलान्यभवन्नथ यो ग्रीवाभ्यः प्रवृढास्यो रसस्समस्रवत् तान्यार्जुनानि बभ्रुतूलान्यभवन् सोमो वा एषोऽमुर्य इव तु तस्मान्नाभिषुत्यः प्रतिधुक् च प्रातः पूतीकाश्च दधि मध्यन्दिने पूतीकाश्च शृतं चापराह्णे पूतीकाश्चेन्द्रियेण वा एष

[२] तै. ब्रा. १,४,६,५-७; १,४,७,१। का. १९,३८; ३५,१६। कप. ८,१९; २१,४०; २९,३७; ३५,४८। [अग्न आयूंषि पवस०। ऋ. ९,६६,१९; सा. ६२७,१४६४,१५१८। तै. सं. १,३,१४,७; ४,२९,१; ५,५,१; ६,६,२; तै. ब्रा. २,६,३,४; तै. आ. २,५,१]
[३] तै. ब्रा. १,४,७, ५-७।

सोमपीथेन व्यृध्यते यस्य सोममपाहरन्ति स ओषधीश्च पशूँश्च प्रविशति यदेतदुभयमभिषुण्व-
न्त्योषधिभ्यश्चैव पशुभ्यश्चाधि सोमपीथं पुनरवरुन्द्धे ॥३॥ ६

यदि सोमौ सँसुतौ स्यातां महति रात्र्याः प्रातरनुवाकमुपाकुर्यात् पूर्व एव यज्ञं पूर्वो देवताः
पूर्वश्छन्दाँसि वृङ्क्ते वृषण्वतीं प्रतिपदं कुर्यादिन्द्रो वै वृषा प्रातस्सवनादेवैषामिन्द्रं वृङ्क्ते
तदाहुस्सवनमुखे सवनमुखे कर्तव्येति सवनमुखात् सवनमुखादेवैषामिन्द्रं वृङ्क्ते संवेशायोपवेशाय
गायत्र्यै छन्दसेऽभिभुवे स्वाहा संवेशायोपवेशाय त्रिष्टुभे जगत्या अनुष्टुभे छन्दसेऽभिभुवे स्वाहेत्ये-
तावन्ति वै छन्दाँसि च्छन्दोभिर्देवा असुराणां छन्दाँस्यवृञ्जत च्छन्दोभिरेवैषां छन्दाँसि वृङ्क्ते ॥
सजन्यँ शस्यं विहव्यँ शस्यमगस्त्यस्य कयाशुभीयँ शस्यमेतावद्वावास्ति यावदेवास्त्यन्तरिक्षाद्दिवः
पृथिव्या अहोरात्राभ्यां तेभ्य एनान् सर्वेभ्यो निर्भजति यदि प्रातस्सवने कलशो दीर्येत वैष्णवीषु
शिपिविष्टवतीषु माध्यन्दिने पवमाने स्तुयुर्यद्वै यज्ञस्यातिरिच्यते विष्णुं तच्छिपिविष्टमभ्यतिरिच्यते-
ऽतिरिक्तं वा एतदतिरिक्तँ शिपिविष्टमतिरिक्तेनैवातिरिक्तमाप्नोति यदि मध्यन्दिन आर्भवस्य
पवमानस्य पुरस्ताद्वषट्कारनिधनँ साम कुर्युर्यदि तृतीयसवन एतदेव वषट्कारो वै यज्ञस्य प्रतिष्ठा
प्रतिष्ठामेवैनं गमयन्ति ॥४॥ ७-८

आसन्दीमारुह्योद्गाता महाव्रतेनोद्गायति प्रेङ्खमारुह्य होता महदुक्थमनुशँसत्यधिष्ठानेऽधिष्ठाया-
ध्वर्यू प्रतिगृणीतः कूर्चेष्वितर आसतेऽन्तरिक्षं वा अन्नममुतो वै प्रदीयतेऽस्यां प्रजायते तदन्तरिक्षाय
जायते यदन्तरिक्ष आसीना महाव्रतेन चरन्त्यन्नाद्यस्योपाप्त्या अथो देवसाक्ष्य एवो परिपद्य याज-
यन्ति स्वर्गमु लोकमाक्रममाणा यन्त्यभिगरापगरौ भवतः प्र वा अन्यस्सत्रिणश्शँसति निन्दत्यन्यो
यः प्रशँसति यदेवैषाँ सुष्टुतँ सुशस्तं तत् स प्रशँसत्यथ यो निन्दति यदेवैषाँ दुष्टुतँ दुश्शस्तं तत् सो-
ऽपहन्ति शूद्रार्यौ चर्मन् व्यायच्छेते ॥ देवाश्च वा असुराश्चादित्ये व्यायच्छन्त तं देवा अभ्यजय-
न्नार्यं वर्णमुज्जापयत्यात्मानमेवोज्जापयत्यन्तर्वेद्यार्यस्स्याद्बहिर्वेदि शूद्रश्श्वेतं चर्म परिमण्डलं स्या-
दादित्यस्य रूपँ सर्वासु स्रक्तिषु दुन्दुभयो वदन्ति या दिक्षु वाक्तां तेनावरुन्धते भूमिदुन्दुभिर्भवति
यास्यां वाक्तां तेनावरुन्धते वीणा वदन्ति या पशुषु वाक्तां तेनावरुन्धते काण्डवीणा वदन्ति यौष-
धिषु वाक्तां तेनावरुन्धते नाडीतूणवा वदन्ति या वनस्पतिषु वाक्तां तेनावरुन्धते वाणश्शततन्तु-
र्भवति शतायुर्वै पुरुषश्शतवीर्य आयुरेव वीर्यमवरुन्द्धे ॥ ब्रह्मचारी च पुँश्चली चर्तीयेते सर्वा हि भूते
वाचो वदन्ति मिथुनं चरन्ति संवत्सरं वा एते प्रजायमानास्सत्त्रमासते तेषाँ संवत्सरेणैव प्रजनन-
मन्तर्धीयते यन्मिथुनं चरन्ति संवत्सरस्यैव प्रजननस्योपाप्त्यै कुम्भिनीरुपाचरन्ति समृद्ध्या इदंमधुरं
गायन्तीस्संनद्धकवचाः परियन्ति महाव्रतमेव महयन्त्यथो सेन्द्रताया एव ब्रह्मणो वा अन्या

[४] तै. सं. ७,५,५ । पञ्चविंश ब्रा. ९,४ ।　[५] तै. सं. ७,५,८-१० । तै. ब्रा. १,२,६,६—७ ।

त्विषिः क्षत्रस्यान्या यद्दीक्षितोऽधिकृष्णाजिनस्सा ब्रह्मणस्त्विषिर्यत् संनद्धकवचोऽधिज्यधनुस्सा
क्षत्रस्य त्विषिस्तदुभयं भवत्युभयोस्त्विष्योरवरुद्ध्यै ॥५॥ ९-११

प्रजापतिर्वा आत्मनोऽधि द्वादशाहं निरमिमीत संवत्सरः प्रजापतिस्स चतुर्णां मासां तिस्रस्तिस्रो
रात्रीरादत्त सा दीक्षाभवत् स उत्तरेषां चतुर्णां तिस्रस्तिस्रो रात्रीरादत्त ता उपसदोऽभवन् स उत्तरेषां
चतुर्णां तिस्रस्तिस्रो रात्रीरादत्त सा सुत्याभवत् तस्मादाहुर्यावान् संवत्सरस्तावान् द्वादशाह इति
सर्वस्माद्ध्येष संवत्सरादधि निर्मितस्स प्रथमं चाहरसृजतेहीडं च सामेमं लोकमग्निं ज्योतिर्द्वितीयं
चाहरसृजतोर्ध्वेडं च सामान्तरिक्षं लोकं वायुं ज्योतिस्तृतीयं चाहरसृजतेडाभिरैडं च सामामुं लोकँ
सूर्यं ज्योतिश्चतुर्थं चाहरसृजत परिस्तुब्धेडं च साम यस्मिंश्च लोके तेजो ज्योतिः पञ्चमं चाहरसृज-
ताध्यर्धेडं च साम यस्मिंल्लोके सत्यं ज्योतिष्षष्ठं चाहरसृजत होइडं च साम यस्मिंल्लोके ब्रह्म
ज्योतिस्सप्तमं चाहरसृजत पुनर्नितुन्नां चेडां यस्मिंश्च लोके तपो ज्योतिरष्टमं चाहरसृजत विष्वगेडं
च साम यस्मिंश्च लोक ऋतं ज्योतिर्नवमं चाहरसृजत होइडं च साम यस्मिंश्च लोके ब्रह्म ज्योति-
र्दशमं चाहरसृजत द्वीडं च साम यस्मिंल्लोकेऽमृतं ज्योतिः प्राण एव प्रायणीयोऽपान उदयनीय-
स्तस्माद्यावदेव प्रायणीये क्रियते तावदुदयनीये क्रियते यावान् हि प्राणस्तावानपान एतां-
ल्लोकानेतानि सामान्येतानि ज्योतींष्येतानि तेजाँस्यवरुन्द्धे य एवं विद्वान् द्वादशाहेन यजते ॥६॥
१२

प्रजापतिरकामयत प्रजास्सृजेयेति स एतमात्मन् द्वादशाहमपश्यत् तमात्मनो निरमिमीत तेन
प्रजा असृजत तं गायत्री छन्दोऽन्वसृज्यत साकामयताहमिमँ सर्वतः परिभवेयमिति तं तेजसा
मुखतः पर्यभवदोजसा मध्यतश्छन्दसोपरिष्टात् सर्वतो वै सा तं व्यत्यशयत् सर्वतो भ्रातृव्यं व्यति-
शये य एवं वेद द्वे रूपे संवत्सरस्य मासा अन्यदृतवोऽन्यद्यत् षडृतवस्तेनाप्तो यद् द्वादश मासा-
स्तेनाप्त उभाभ्यामेव रूपाभ्याँ संवत्सरमाप्नोति ब्रह्म वै गायत्री क्षत्रं द्वादशाहोऽन्वेनं क्षत्रं बुध्यते प्र
पुरोधामाप्नोति य एवं वेद ॥ यज्ञं वा अन्यानि च्छन्दाँस्यभ्यसृज्यन्त स्वाराज्यमेव बृहत्यभ्यसृज्यत
तस्माद्बृहत्या न वषट्कुर्वन्ति यद्वषट्कुर्युः पशूनग्नौ प्रदध्युर्वचसाप्त्वा पशूनवरुन्धते वाचि वा एते
चत्वारः पशवो गौरश्वोऽजाविस्तस्माद्वाचा हूताः पशव उदायन्ति वाचा सिद्धा आवर्तन्ते बृहतीं
वा एत आप्नुवन्ति य एता रात्रीरासते षट्त्रिंशदेता रात्रयष्षट्त्रिंशदक्षरा बृहती बृहती स्वर्गं लोकं
प्रवेद स्वर्गं लोकमाप्नुवन्ति य एता रात्रीरासते देवलोकान् वा एत आप्नुवन्ति य एता रात्रीरासते
षट्त्रिंशदेता रात्रयष्षट्त्रिंशद्देवलोका अष्टौ वसव एकादश रुद्रा द्वादशादित्या वषट्कारश्च प्रजापति-
श्च त्रय इमे लोकास्तान् सर्वान् देवलोकानाप्नुवन्ति य एता रात्रीरासत उभये वै देवाश्च मनुष्या-

श्चाष्यावृत्ता आसँस्ते देवा एतं द्वादशाहमुपायँस्ते दीक्षयैवात्मानमपुनतोपसद्भिर्यज्ञँ समभरन्त हित्वा
शरीरँ सुत्यया स्वर्गं लोकमायन् य एवं विद्वान् द्वादशाहमुपैति दीक्षयैवात्मानं पुनीत उपसद्भिर्यज्ञँ
संभरते हित्वा शरीरँ सुत्यया स्वर्गं लोकमेति प्रजापतिर्वा एतँ स्वर्गकाम आहरत् स न प्राभवदेका-
दशाहो वा एष स एतमतिरात्रमुपरिष्टादुभयतः पर्यहरत् समानो वा एष उभयतः परिह्रियते
स्वर्गस्य लोकस्य समष्ट्यै ॥७॥ १३-१४

प्रजापतिरकामयत प्रजायेयेति स द्वादशाहेनायजत तेन प्राजायत प्रैव जायते य एवं वेदापो
वै यज्ञिया मेध्या असृज्यन्त तदेका अपि नासृज्यन्तासृग्वाव तन्नासृज्यत तदस्नोऽसृक्त्वं तस्मा-
द्यदेवासृक् छिद्यतेऽथ यज्ञियो मेध्यो भवति पुरुषसंमितो वा एष यस्सत्रियं प्रतिगृह्णाति पुरुषं वै
सोऽत्ति यं खलु वै पुरुषमत्ति न तस्यास्मिंल्लोके नामुष्मिन्नपिभवति प्राणो वै पूर्वोऽतिरात्रोऽपान
उत्तर इयं वै पूर्वोऽतिरात्रोऽसा उत्तरोऽग्निर्वै पूर्वोऽग्निष्टोमस्सूर्य उत्तरोऽन्तरौ वा एता अनयोस्तस्मा-
दन्तरौ प्रयुज्येते तदाहुर्यदग्निष्टोमप्रायणो यज्ञः कस्मादतिरात्रौ पूर्वौ प्रयुज्येते इत्यथाहुश्चक्षुषी वा
एते यज्ञस्य यदतिरात्रौ कनीनिके अग्निष्टोमा इति यदग्निष्टोमौ पूर्वौ प्रयुञ्जीरन् बहिष्कनीनिके
निरादध्युरन्धाः प्रजायेरन् यदतिरात्रौ पूर्वौ प्रयुज्येते चक्षुषी एव यज्ञस्य प्रतिधाय मध्यतः
कनीनिके प्रतिदधाति भूतं वै पूर्वोऽतिरात्रो भव्यमुत्तरस्सदिमानि दशाहानि मध्ये सद्भवति य एवं
वेद यो ह वै गायत्रीं ज्योतिष्पक्षां वेद ज्योतिष्मता भासा स्वर्गं लोकमेति या अतिरात्रौ तौ पक्षौ
या अग्निष्टोमौ ते ज्योतिषी येऽष्टा अन्तर उक्थ्यास्स आत्मैषा वै गायत्री ज्योतिष्पक्षा य एवं
गायत्रीं ज्योतिष्पक्षां वेद ज्योतिष्मता भासा स्वर्गं लोकमेति ॥ पक्षिणो वा एते भवन्ति पक्षिणा
भूत्वा यत्र कामयन्ति तत् परापातमासत एष वै प्रजापतिर्द्वादशधा विनिहितो यद् द्वादशाहो या
अतिरात्रौ तौ पक्षौ या अग्निष्टोमौ ते चक्षुषी येऽष्टा अन्तर उक्थ्यास्स आत्मा स एष प्रजापतिरेव
यद्वै सत्त्रिणस्स्तृण्वन्ति तत् सत्त्रस्य सत्त्रत्वं प्राणा वै सत् प्राणानेव तत् स्तृण्वन्ति सर्वांशं वा
एते प्रजानां प्राणैरासते ये सत्त्रमासते तस्मात् पृच्छन्ति किमेते सत्त्रिण इति प्रियः प्रजानामुत्थितो
भवति य एवं वेद ॥८॥ १५-१६

प्रजापतिरकामयत स्यामिति स द्वादशाहेनायजत तेनाभवत् तस्मादाहुर्बुभूषतो यज्ञ इति तं मासा
दीक्षितमदीक्षिता अयाजयँस्तस्माद्दीक्षितमदीक्षिता याजयन्ति तेभ्य इषमूर्जमददात् सेयं मासेष्वाभोत्
प्रजापतिदत्ताध्नुवन्मासाः प्रतिगृह्णभ्रोति य एवं विद्वान् ददात्यृभ्नोति यः प्रतिगृह्णाति पीवा दीक्षेत
यदस्याङ्गानामीयते जुहोत्येव तत् स यथा वसन्तो नवदाव्यश्शोभमान उत्तिष्ठत्येवमेव नवदाव्य-

[८] तै. सं. ७,२,९ ।

श्शोभमान उत्तिष्ठति तपो वै यज्ञस्य श्लेष्म यथा वै रथस्य श्लेष्मैवं यज्ञस्य तपो योऽतपस्वी
भवत्यसँश्लिष्टोऽस्य यज्ञस्तपस्वी स्याद्यज्ञमेव सँश्लेषयतेऽर्धमसा वावासँस्तेऽकामयन्त मासास्स्यामेति
ते द्वादशाहमुपायँस्त्रयोदशं ब्रह्माणं कृत्वा तस्मिन् द्दष्टोदतिष्ठँस्तस्मात् सोऽनायतन इतरानुपजीवति
तस्माद् द्वादशाहस्य त्रयोदशेन न ब्रह्मणा भवितव्यं द्वादश दीक्षेरन् संवत्सरायतना द्वादश
मासास्संवत्सरस्संवत्सरायतना एवर्ध्नुवन्ति त्रयोदश दीक्षेरन् संवत्सरायतनास्त्रयोदश मासास्सं-
वत्सरस्संवत्सरायतना एवर्ध्नुवन्ति पञ्चदश दीक्षेरन्नर्धमासायतनाः पञ्चदशार्धमासस्य रात्रयो-
ऽर्धमासायतना एवर्ध्नुवन्ति सप्तदश दीक्षेरन् प्राजापत्यायतनाः प्रजापतिस्सप्तदशः प्राजापत्या-
यतना एवर्ध्नुवन्त्येकविंशतिर्दीक्षेरन् रुक्कामा असा आदित्य एकविंश एष रुचः प्रदाता
स एभ्यो रुचं प्रयच्छति चतुर्विंशतिर्दीक्षेरन् ब्रह्मवर्चसकामाश्चतुर्विंशत्यक्षरा गायत्री तेजो
गायत्री ब्रह्मवर्चसं तेज एव ब्रह्मवर्चसमवरुन्धते सप्तविंशतिर्दीक्षेरँस्त्रिणवायतनास्त्रिणवा इमे
लोकास्त्रिणवायतना एवर्ध्नुवन्ति त्रिंशद्दीक्षेरन् मासायतनास्त्रिंशन्मासो रात्रयो मासायतना
एवर्ध्नुवन्ति त्रयस्त्रिंशद्दीक्षेरन् देवतायतनास्त्रयस्त्रिंशद्देवता देवतायतना एवर्ध्नुवन्ति चतुश्चत्वारिंश-
द्दीक्षेरन्नोजस्कामा वीर्यकामाश्चतुश्चत्वारिंशदक्षरा त्रिष्टुबोजो वीर्यं त्रिष्टुबोज एव वीर्यमवरुन्धते-
ऽष्टाचत्वारिंशद्दीक्षेरन् पशुकामा अष्टाचत्वारिंशदक्षरा जगती जागताः पशवः पशूनेवावरुन्धते-
ऽपरिमिता दीक्षेरन्नपरिमितस्यावरुद्ध्या अपरिमितः प्रजापतिः प्रजापतिमेवाध्नुवन्त्यृतवो वावा-
सन्ननुयावरा मासास्ते मासा अकामयन्तर्तूनाप्नुयामेति ते द्वादशाहमुपायँस्त्रयोदशं ब्रह्माणं
कृत्वा त ऋतूञ्छिशिरेण निभाग्य वसन्तमूर्जमेषामभ्युदतिष्ठन् य एवं विद्वाञ्छिशिरे दीक्षते तपसैव
भ्रातृव्यं निभाग्येषमूर्जमस्याभ्युत्तिष्ठति शिशिरं वा एतस्य प्रयाणं वसन्तोऽवसानमृध्नोति य एवं
विद्वाञ्छिशिरे दीक्षते ॥९॥ १७

ब्रह्मवादिनो वदन्ति किं प्रथमेनाह्ना द्वादशाहस्यावरुन्द्ध इति तेजो ब्रह्मवर्चसं किं द्वितीयेनेति
वाचमन्नाद्यं किं तृतीयेनेति त्रीनिमांल्लोकान् किं चतुर्थेनेति चतुष्पदः पशून् किं पञ्चमेनेति चतस्रो
दिश ऊर्ध्वां पञ्चमीं किं षष्ठेनेति षडृतून् किं सप्तमेनेति सप्तपदाँ शक्वरीं किमष्टमेनेत्यष्टाक्षरां गायत्रीं
किं नवमेनेति नव प्राणान् किं दशमेनेति दशाक्षरां विराजं किमेकादशेनेत्येकादशाक्षरां त्रिष्टुभं
किं द्वादशेनेति द्वादशाक्षरां जगतीमेतावद्वावास्ति यावदेवास्ति तत् सर्वमाप्त्वावरुन्द्ध ऋध्नोति
वसीयान् भवति य एवं विद्वान् द्वादशाहेन यजते ॥१०॥ १८

चतुर्वै तास्तिस्रस्तिस्रस्तासां याः प्रथमा आत्मानं ताभिः पुनीते या द्वितीया मेध्यस्ताभि-

[१०] तै. सं. ७,३,२ ।　[११] तै. सं. ७,२,१०,३—४ ।

यैक्षियो भवति यास्तृतीया गात्राणि तामिर्निर्णेनिक्तेऽथ याश्चतुर्थीर्यदेवास्यान्तरतो यद्बहिष्टाच्छमलं तत् तामिर्धूनुते पुरुषं खलु वा एतेऽदन्ति यद् द्वादशाहेन याजयन्ति यः पाशवमत्ति माँसँ सोऽत्ति यो वाजिनं लोहितँ स यो धाना अस्थि स य आज्यं मज्जानँ स यः परिवापं केशान् स यः पुरोडाशं मस्तिष्कँ स यो राद्धानं भक्षयति स्वेदँ स यः करम्भं निष्पदँ स एष ह खलु वै सत्रियमत्ति योऽनृतं वदति स्वदितमस्य सत्रियं भवति नास्य सत्रियं जग्धं भवति य एवं वेद ॥११॥ १९

द्वादश दीक्षितो भवति जायत एव तत् तद्धि जातं यत् तपसोऽधि जायते न यत् स्त्रिया द्वादश दीक्षितो भवति द्वादश वै पुरुषेऽमेध्यानि लोम च तनूश्चासृक् च मांसं चास्थि च मज्जा च स्नेहश्च प्लीहा चाश्रु च दूषीका च स्वेदश्च यच्च प्रस्रावयत एतानि वै पुरुषे द्वादशामेध्यानि यद् द्वादश दीक्षितो भवति तान्येवापहते द्वादश दीक्षितो भवति द्वादशोपसदो द्वादश प्रसुतस्ताष्षट्त्रिँशत् संपद्यन्ते षट्त्रिँशदक्षरा बृहती बार्हताः पशवो बृहत्यामेवैतत् पशूनाप्नोति बृहत्यामेवैतत् पशूनाप्त्वावरुन्द्धे ततो यानि चत्वार्यक्षराण्युत्क्रामन्ति सा चतुष्पदानुष्टुब् वागनुष्टुब् वाच्येवैतत् पशूनाप्नोति वाच्येवैतत् पशूनाप्त्वावरुन्द्धे तस्माद्वाचा पशवो नाम जानते वाचा सिद्धानि वर्तन्ते ॥१२॥
२०

प्रजापतिरकामयत भूयान् स्याँ श्रेयान् स्यामृध्नुयामिति स द्वादशाहेनादीक्षत तेनायजत स आर्ध्नोत् तस्मादेको द्वादशाहेन यजतैको हि स आर्ध्नोत् प्रजापतिरेव प्रजापतेरेवर्द्धमन्वृध्नोति य एवं विद्वानेको द्वादशाहेन यजते तेन तिस्रो देवता रोचना अदीक्षन्त तेनायजन्त ता आर्ध्नुवँस्तस्मात् त्रयो द्वादशाहेन यजेरँस्त्रयो हि त आर्ध्नुवन्निम एव लोका एषामेव लोकानामृद्धमन्वृध्नुवन्ति य एवं विद्वाँसस्त्रयो द्वादशाहेन यजन्ते तेन षड् देवता अदीक्षन्त तेनायजन्त ता आर्ध्नुवँस्तस्मात् षड् द्वादशाहेन यजेरन् षड्ढि त आर्ध्नुवन्नृतव एवर्तूनामेवर्द्धमन्वृध्नुवन्ति य एवं विद्वाँसष्षड् द्वादशाहेन यजन्ते तेन द्वादश देवता अदीक्षन्त तेनायजन्त ता आर्ध्नुवँस्ते पूर्वपक्षेष्वार्ध्नुवन्नपरपक्षाननूद्यायन्त तस्माद् द्वादश द्वादशाहेन यजेरन् द्वादश हि त आर्ध्नुवन् मासा एव मासानामेवर्द्धमन्वृध्नुवन्ति य एवं विद्वाँसो द्वादश द्वादशाहेन यजन्त उपसत्सु त्रयोदशो दीक्षेतोत हि तं विदुरुत न विदुरुत वै त्रयोदशं मासं विदुरुत न विदुः ॥१३॥ २१

प्रजापतिर्मनसि सारस्वतो वाचि विसृष्टायां धाता दीक्षायां ब्रह्म व्रते सविता भृत्यामन्धोऽच्छेतो दिष्यस्सुपर्णः प्रतिख्यातोऽदितिः प्रायणीये पञ्चषा न्युप्तो रुद्रो विचीयमानश्छन्दाँसि मीयमानो वरुण उपनद्धः पूषा सोमक्रयण्यां भगः पण्यमानोऽसुरः क्रीतश्शिपिविष्ट ऊरा आसाद्यमानो बृहस्पति-

[११] तै. सं. ७,२,१०,३ । [१४] अथ० प्राय० सूत्र ३,१ । तै. सं. ४,४,९ ।

रुत्थितो वायुरधिह्रियमाणोऽधिपतिः प्रोक्षमाणोऽग्नीषोमीयः पशा अतिथिर्दुरोणसदातिथ्ये वरुणस्सम्राडासन्द्यामासाद्यमान ऐन्द्राग्नो अग्नौ मथ्यमान ऐन्द्राग्नोऽग्नौ प्रह्रियमाणे साम तानूनप्त्रे तपोऽवान्तरदीक्षायां पृथिव्युपसद्यन्तरिक्षमुपसादि द्यौरुपसादि यज्ञस्य प्रमाभिमोन्मा प्रतिमा वेद्यां क्रियमाणायां पशव उत्तरवेद्यां द्यौर्हविर्धानेऽन्तरिक्षमाग्नीध्रे पृथिवी सदसि ॥१४॥ २२

प्राण उपरवेषु भ्रातृव्या धिष्ण्येषु पशवा बर्हिषि वेद्याँ स्तीर्यमाणायामप्सु वैसर्जने प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे वैष्णव आसन्नकर्मणि हस्तो विसृष्टो वैष्णवो यूप ओषधयो रशनायां मेघ आप्रीषु हविः पर्यग्निकृतः पितृदेवत्यस्संज्ञप्यमाने यज्ञस्य मिथुनं पत्नेजनीषु रक्षसां भागधेयं वपायामुद्धृष्यमानायां यज्ञस्य संततिर्वसतीवरीषु परिह्रियमाणास्विन्द्राग्न्योर्धेनुर्दक्षिणायामुत्तरवेद्याश्श्रोण्यामासन्ना मित्रावरुणयोर्धेनुरुत्तरस्यामुत्तरवेद्याश्श्रोण्यामासन्ना विश्वेषां देवानामाग्नीध्रे छन्दाँस्युपवसथे हविरुपावहृतस्सारस्वतः प्रातरनुवाकेऽथ वा न्युप्तः प्रजापतिर्विभज्यमाना देवता विभक्त इन्द्रो वृत्रहेन्द्रोऽभिमातिहेन्द्रो वृत्रतूरुन्नीयमान आयुरुपाँश्वन्तर्यामयोर्यमोऽभिषुतः ॥१५॥ २३

निभूयपूराधवनीये सुपूतपूः पूतभृति शुक्रश्रीः क्षीरश्रीः ककुहस्सक्तुश्रीः पात्रेषु वायुर्बहिष्पवमाने होत्राः प्रवरे वसवः प्रयाजेषु यद्देवत्यस्सोमस्तद्देवतयः पशुर्वैश्वदेव उन्नीयमान ऐन्द्राग्न उन्नीतो रुद्रो हूयमानो वाग्घुतो मारुतो गणोऽभ्यावृत्तो मित्रः प्रतिख्यात इन्द्र आसन्नो भक्षो भक्ष्यमाणस्सखा भक्षितः पितरो नाराशँस आग्नेयं प्रातस्सवनमैन्द्रं माध्यन्दिनँ सवनं यज्ञो दक्षिणायामैन्द्राणि पृष्ठानि वैश्वदेवं तृतीयसवनं वैश्वानरोऽग्निष्टोम ऐन्द्रावारुणं मैत्रावरुणस्य स्तोत्रमैन्द्राबार्हस्पत्यं ब्राह्मणाच्छँसिन ऐन्द्रावैष्णवमच्छावाकस्यैन्द्रष्षोडशी रात्री पत्न्याग्नेयो रथंतरस्संधिस्सौर्यमाश्विनमहर्यज्ञ आदित्या अनुयाजेषु यदन्तरा क्रियते समुद्रो वरुणोऽवभृथे समुद्र ऋजीषे यदवारे तीर्थं तत् प्रायणीयं यत्पारे तीर्थं तदुदयनीयं वैष्णवो वशायां ब्रह्मा समिष्टयाम् ॥१६॥ २४

यथा वै रथ एकैकमरमभिप्रतितिष्ठन् वर्तत एवं यज्ञ एकैकां तन्वमभिप्रतितिष्ठन्नेति पुरा प्रचरितोराग्नीध्रे होतव्या एतद्ध वा उवाच वासिष्ठस्सात्यहव्याऽस्कान् सोम इत्युक्ते मा स्वक्षेत प्रचरत प्रातर्वावाद्याहँ सोमँ समस्थापयमिति नास्य सोमस्स्कन्दति य एवं वेद स ह स्म वै स आसन्द्यामासीनस्सक्तुभिरुपमथ्य सोमं पिबत्यहं वाव सर्वतो यज्ञं वेद य एता वेद न मामेष हिंसिष्यतीति नैनँ सोमः पीतो न पेयो हिनस्ति य एवं विद्वान् सोमं पिबति तँ ह स्म यदाहुः कस्मात् त्वमिदमासीनस्सक्तुभिरुपमथ्य सोमं पिबसीति देवतास्वेव यज्ञं प्रतिष्ठापयामीत्यब्रवीद्यस्यैवं विदुषो यस्यैवं विद्वान् यज्ञार्त्यां यज्ञप्रायश्चित्तिं जुहोति देवतास्वेव यज्ञं प्रतिष्ठापयति ॥ यज्ञार्तिं प्रतिजुहुयात्

[१५] अथ० प्राय० सूत्र ३,२ । तै. सं. ४,४,९ । [१६] अथ० प्राय० सूत्र ३,३ । तै. सं. ४,४,९ ।
[१७] गोप० ब्रा० २,२,१० ।

यद्योनिस्त्वाय त्रयस्त्रिंशद्वै यज्ञस्य तन्व एकान्नत्रिँशत् स्तोमभागास्त्रीणि सवनानि यज्ञश्चतुर्थस्स्तोमभागैरेवैतत् स्तोमभागान् प्रतियुङ्क्ते सवनैस्सवनानि यज्ञेन यज्ञँ सर्वा ह वा अस्य यज्ञस्य तन्वः प्रयुक्ता भवन्ति सर्वा आशास्सर्वा अवरुद्धा देवस्य सवितुः प्रसवे बृहस्पतये स्तुतेति यद्वै सविता देवेभ्यः प्रासुवत् तेनार्ध्नुवन् सवितृप्रसूता एव स्तुवन्त्यृध्नुवन्त्यृध्यन्ते ह वा अस्य स्तोमा ऋध्यते यज्ञ ऋध्यते यजमानायर्ध्यते प्रजाया ऋध्यते पशुभ्य ऋध्यते ब्रह्मणे यस्यैवं विदुषो यस्यैवं विद्वान् ब्रह्मा भवति ॥१७॥
२५-२६

यो वै स्तोमभागानामायतनाश्च प्रतिष्ठिताश्च विद्यात् स समृतसोमस्य ब्रह्मा स्याद्बहिष्पवमाने प्रस्तुते ब्रूयात् स्तुतेषे स्तुतोर्जे स्तुत देवस्य सवितुः प्रसवे बृहस्पतिप्रसूता इत्येता वै स्तोमभागानामायतनप्रतिष्ठिता य एवं विद्यात् स समृतसोमस्य ब्रह्मा स्वायां दिशँ सोमौ सँस्तुतौ स्यातां तां दिशं परीक्षेतेदमहममुमामुष्यायणममुष्याः पुत्रं शुचा विध्यामीत्यृत्विजामेकं ब्रूयाच्छुचैवैनान् विध्यति यो वै स्तोमभागानामायतनाश्च प्रतिष्ठिताश्चाविद्वान् ब्रह्मा भवति स विष्वग्वीर्येण व्यृध्यते बहिष्पवमाने प्रस्तुते स्तुतेषे स्तुतोर्जे स्तुत देवस्य सवितुः प्रसवे बृहस्पतिप्रसूता इत्युपर्युपरि ब्रह्माणमतीक्षेतावरमेव द्विषन्तं कुरुते ब्रह्मन् सोमोऽस्कानिति यज्ञोऽस्कानित्येवैतदाह यत्र स्कन्देत् तदपो निनीय ॥
२७

अभूद्देवस्सविता वन्द्यो नु न इदानीमह्न उपवाच्यो नृभिः ।
वि यो रत्ना भजति मानवेभ्यश्श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥ २८

इत्यभिमन्त्रयेतापो वै सर्वा देवता देवतास्वेव यज्ञं प्रतिष्ठापयति यत्र वै ब्रह्मान्यस्मै भूयो दीयमानं पश्यति सोऽर्वाचीनप्रवणस्सोमो भवति यदि ब्रह्मान्यस्मै भूयो दीयमानं पश्येदिदमहममुष्यामुष्यायणस्येन्द्रियं वीर्यं वृञ्ज इति यजमानं ब्रूयादिन्द्रियमेवास्य वीर्यं वृङ्क्ते ॥१८॥ २९

अग्नि नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् । दूरेदृशं गृहपतिमथर्युम् ॥ ३०
अग्निनाग्निस्समिध्यते कविर्गृहपतिर्युवा । हव्यवाड् जुह्वास्यः ॥ ३१
सप्त ते अग्ने समिधस्सप्त जिह्वास्सप्तर्षयस्सप्त धाम प्रियाणि ।
सप्त होत्रा अनु विद्वान् सप्त योनीँरापृणस्वा घृतेन ॥ ३२

[१८] [अभूद्देवस्सविता वन्द्यो० । ऋ. ४,५४,१; तै. ब्रा. ३,७,१३,४]
[१९] मै. १,६,१०; ७,५-६; ८,५६; ४,१०,३६,१०८—१०९; १३,५४६—५५७ । कपि. ४८,१ । वा. २,१३; ८,६१; १७,७९; २१,३—४ । काण्व. २,४२; १८,७९; २३,१—४ । [अग्नि नरो दीधितिभि० । ऋ. ७,१,१; सा. ७२; १३७३, वि. ५,१० । अग्निनाग्निस्समिध्यते० । ऋ. १,१२,६; सा. ८४४; तै. सं. १,४,४६,३; ३,५,११,५; तै. ब्रा. २,७,१२,३]

मनो ज्योतिर्जुषतामाज्यस्यारिष्टं यज्ञँ समिमं तनोतु ।
इमं यज्ञँ सप्ततन्तुं ततं न आ देवा यन्तु सुमनस्यमानाः ॥ ३३
त्रयस्त्रिंशत् तन्तवो यान्वितन्वत इमं यज्ञँ स्वधया ये ददन्ते ।
तेषां छिद्रं प्रतिदध्मो यदत्र स्वाहायं यज्ञो अप्येतु देवान् ॥ ३४
यन्मे मनसश्छिद्रं यद्वाचो यच्च मे हृदः ।
अयं देवो बृहस्पतिस्सं तत् सिञ्चतु राधसा ॥ ३५
विश्वकर्मा हविरिदं जुषाणस्संतानैर्यज्ञँ समिमं तनोतु ।
या व्युष्टा उषसो याश्च निम्रुचस्तास्संदधातु हविषा घृतेन ॥ ३६
अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि ।
अयास्सन् मनसा कृतोऽयास्सन् हव्यमूहिषेऽया नो धेहि भेषजम् ॥ ३७
त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः ।
यजिष्ठो वह्नितमश्शोशुचानो विश्वा द्वेषाँसि प्रमुमुग्ध्यस्मत् ॥ ३८
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुणं रराणो वीहि मृडीकँ सुहवो न एधि ॥१९॥ ३९
[११७८]

॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायामेकादशिनी नाम चतुस्त्रिंशं स्थानकं संपूर्णम् ॥३४॥

अथ पञ्चत्रिंशं स्थानकम् ।

प्रायश्चित्तिः ।

भद्रं कर्णेभिश्शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ १
स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्दधातु ॥ २

[त्वं नो अग्ने वरुणस्य० । ऋ. ४,१,४; तै. सं. २,५,१२,३ । स त्वं नो अग्नेऽवमो० । ऋ. ४,१,५; तै. सं. २,५,१२,३]

[१] कपि. ४८,१ । मै. १,१०,६६; ४,९,२५४; १०,२३; १४,२८ । वा. २५,१९—२१; १७,७९ । काण्व. २७, २३—२६, १८,७६ । [भद्रं कर्णेभिश्शृणुयाम० । ऋ. १,८९,८; सा. १८७४; तै. आ. १,१,१ । स्वस्ति न इन्द्रो० । ऋ. १,८९,६; सा. १८७५; तै. आ. १,१,१; ११,३; १०,१,१]

पृषदश्वा मरुतः पृश्निमातरश्शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवस्सूरचक्षसो विश्वे मा देवा अवसागमन्निह ॥ ३
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ४
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वाँ शश्वन्त उपयन्ति वाजाः ॥ ५
श्रुत्कर्णाय कवये वेद्याय वचोभिर्नाकमुपयामि शँसन् ।
यतो भयमभयत्वं नो अस्त्वग्ने देवानामव हेड इक्ष्व ॥ ६
अग्निं वो देवमग्निभिस्सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ ७
घृतप्रतीको घृतपृष्ठो अग्निर्घृताहवनो घृतमस्य धाम ।
घृतप्रुषो हरितस्त्वावहन्तु घृतं पिबन् यजताद्देव देवान् ॥१॥ ८

इमो अग्ने वीततमानि हव्याजस्रा वक्षि देवतातिमच्छ । प्रति न ईँ सुरभीणि व्यन्तु ॥ ९
सप्त ते अग्ने त्रयस्त्रिँशद्यन्मे मनसो विश्वकर्माग्निं युनज्मीन्धानास्त्वाग्निर्न ईडित ईडितव्यैर्देवैः
पार्थिवैः पातु वायुर्न ईडित ईडितव्यैर्देवैरन्तरिक्ष्यैः पातु सूर्यो न ईडित ईडितव्यैर्देवैर्दिव्यैः पातु
विष्णुर्न ईडित ईडितव्यैर्देवैर्दिश्यैः पात्वग्निर्यजुर्भिः पूषा स्वगाकारैस्त इमं यज्ञमवन्तु ते मामव-
न्त्वनु व आरभेऽनु मारभध्वम् ॥२॥ १०

पृथिवि विभूवरि सिनीवाल्युरंध आचित्ते मनस्ते भुवो विवस्ते य ऊर्मिर्हविष्य इन्द्रियावांस्तं
व ऋध्यासँ सोमस्याज्यमसि हविषो हविर्ज्योतिषो ज्योतिर्विश्वेषां देवानां भागधेयीस्स्थ देववीतये
वो गृह्णामि ॥ ११
सं वस्सिञ्चन्तु मरुतस्सं पूषा सं धाता समिन्द्रस्सं बृहस्पतिः ।
सं वोऽयमग्निस्सिञ्चतु प्रजया च धनेन च । आयुष्मन्तं कृणोत मा ॥ १२

[पृषदश्वा मरुतः० । ऋ. १,८९,७ । शतमिन्नु शरदो० । ऋ. १,८९,९ । प्रेद्धो अग्ने दीदिहि० । ऋ. ७,१,३; सा. १३७५, तै. सं. ४,६,५,४ । श्रुत्कर्णाय कवये० । अथर्व. १९,३,४ । अग्निं वो देवमग्निभिः०। ऋ. ७,३,१; सा. १९१९]
[२] कपि. ४८,३ । मै. १,५,२०, ६,३०; ७,५, ८,५९, २,१०,२४,२९, १२,९; ४,७,५ । वा. १७,७९; ८,६१, १८,५१; ३,१८ । काण्व. १८,७९, २०,२१; ३,२४ । [विश्वकर्मा० । ऋ. १०,८२,२, तै. सं ४,६,२,१, नि. १०,२६]
[३] कपि. ४८,४ । मै. २,४,२४; ७,५९—६१; १३,१,११—१२, १३,१३; ४,९,२४६—२४८, ४,१२,९३ । वा. ६,२७, ११,५०—५२; ३६,१४—१६ । काण्व. ६,३९—४०; १२,५१—५३; ३६,१४—१६ ।
काठ० ४४

मान्दा वशाः ॥ १३
आपो देवीर्घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत्ताः ।
तीव्रो रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसागन् ॥ १४
आदित् पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्म आसाम् ।
मेने भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः ॥ १५
समन्या यन्त्युप यन्त्यन्यास्समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपां नपातं परितस्थुरापः ॥ १६
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ १७
यो वश्शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ १८
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ १९
स ईं वृषा जनयँस्तासु गर्भँ स ईँ शिशुर्धयति तं रिहन्ति ।
सो अपां नपादूर्जयन्नप्स्वन्तर्वसुधेयाय विधते विभाति ॥ २०
इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणो रायस्पोषः प्रजायताम् ॥ २१
अयं यज्ञो वर्धतां गोभिरश्वैरियं वेदिस्स्वपत्या सुवीरा ।
इदं बर्हिरति बर्हींष्यन्यैमं यज्ञं विश्वे अवन्तु देवाः ॥ २२
स आ दमे सुदुघा यस्य धेनुस्स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादनभिम्लातवर्णोऽन्यस्येवेह तन्वा विवेष ॥३॥ २३
स्कन्ना द्यौस्स्कन्ना पृथिवी स्कन्नं विश्वमिदं हविः ।
स्कन्नादो विश्वा भूतानि प्र स्कन्नं जायतां हविः ॥ २४
इह गावोऽयं यज्ञः ॥ २५

[समन्या यन्त्युप० । ऋ. २,३५,३; सा. ६०७, तै. सं. २,५,१२,१ । आपो हि ष्ठा० । ऋ. १०,९,१, सा. १८३७; अथर्व. १,५,१; तै. सं. ४,१,५,१, ५,६,१,४; ७,४,१९,४; तै.आ.४,४२,४; १०,१,११; नि. ९,२७। यो वश्शिवतमो० । ऋ. १०,९,२; सा. १८३८, अथर्व. १,५,२, तै. सं. ४,१,५,१; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,११ । तस्मा अरं गमाम० । ऋ. १०,९,३; सा. १८३९; अथर्व. १,५,३; तै. सं. ४,१,५,१; ५,६,१,४, ७,४,१९,४; तै. आ. ४,४२,४, १०,१,१२ । स ईं वृषा जनयँस्तासु (०यन्तासु)० । ऋ. २,३५,१३ । इह गावः प्रजा० । अथर्व. २०,१२७,१२ । स (स्व) आ दमे सुदुघा० । ऋ. २,३५,७]
[४] कपि. ४८,५ । [इह गावः० । अथर्व. २०,१२७,१२ । अयं यज्ञः० । ऋ. १,१७७,४]

पयस्वतीराप ओषधयः पयस्वन्मामकं वचः ।
अपां पयस्वदित् पयस्तेन नस्सह वर्धताम् ॥ २६
यद्वामृक्षच्छकुनिर्मुखेन निर्ऋते तव । अग्निष्टत् सर्वँ शुन्धतु हव्यवाड् घृतसूदनः ॥ २७
यद्वामृक्षच्छ्वपान्मुखेन निर्ऋते तव । अग्निष्टत् सर्वँ शुन्धतु हव्यवाड् घृतसूदनः ॥ २८
भूतिर्दध्ना घृतेन वर्धतां यज्ञं यज्ञाय मुञ्चतु स्वाहा घृतेन वर्धतां भूतिर्मुञ्चेमं यज्ञं मुञ्चं यज्ञपति-
महसस्स्वाहा ॥ २९
यास्ते अग्ने समिधो अप्स्वन्तर्वर्मन् पृथिव्या उप सूर्ये याः ।
तास्ते गच्छन्त्वाहुतीर्घृतस्य देवान्यु यजमानाय शर्म ॥४॥ ३०

यज्ञस्य हि स्थ ऋत्विजा इन्द्राग्नी कल्पना युवम् ।
हुताहुतस्य तृम्पतमहुतस्य हुतस्य च ॥ ३१
हुतस्य चाहुतस्य चाहुतस्य हुतस्य च ।
पीतापीतस्य सोमस्यास्य हव्यस्येन्द्राग्नी वीतं पिबतमागतम् ॥ ३२
मेमं यज्ञं तमो विदन्मर्त्विजो मो इमाः प्रजाः ।
मा यस्सोमं पिबादिमं संसृष्टमुभयं कृतम् ॥ ३३
मा नो ध्वारिपुः पितरो मोत देवा मा नस्सबन्धुरुत वान्यबन्धुः ।
मा नो दुश्शँसो अघशँस ईशताहुतोऽयं यज्ञो अप्येतु देवान् ॥ ३४
सप्तर्त्विजस्सप्त सदाँस्येषां दश क्षिपो अश्विना पञ्चवाजा ।
सर्वे सप्त सदाँस्येषां दश क्षिपो अश्विना पञ्चवाजा ।
प्राणो व्यानोऽपानो मन आकूतमग्निस्स्वाहा देवा हविरिदं जुषन्ताम् ॥५॥ ३५
आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः । प्रत्नानि पाति काव्यः ॥ ३६
गोपा इन्दो नृपा अस्यश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ॥ ३७
आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य योनिरमृतं विजायते ।
समीचीनास्सुदानवः प्रीणन्ति तन्नरो हितमवमेहन्ति पेरवः ॥ ३८
ये स्थ त्रय एका-
दश ...

[पयस्वतीराप (०रोषधयः)० । ऋ. १०,१७,१४, अथर्व. ३,२४,१; १८,३,५६; तै. सं. १,५,१०,१]
[५] कपि. ४८,६ । [यज्ञस्य हि स्थ ऋत्विजा० । ऋ. ८,३८,१; सा. १०७३; तै. ब्रा. ३,७,८,३]
[६] कपि. ४८,७ । [आत्मा यज्ञस्य रंह्या० । ऋ. ९,६,८ । गोपा इन्दो नृपा० । ऋ. ९,२,१०, सा. १०४५ । आत्मन्वन्नभो दुह्यते० । ऋ. ९,७४,४]

व आरभेऽनु मारभध्वम् ॥६॥ ३९
वसवस्त्वोदीरयन्तु रुद्रास्त्वोदीरयन्त्वादित्यास्त्वोच्छ्रयन्तु विश्वे त्वा देवा दृंहन्तु ॥ ४०
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
देवा ह धर्मणा ध्रुवा यजमानः पशुभिर्ध्रुवः ॥ ४१
दिवि दिव्यान् दृँहान्तरिक्षेऽन्तरिक्ष्यान् दृँह पृथिव्यां पार्थिवान् दृँह ॥ ४२
आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्यज्ञो अधिभ्रशत् ॥ ४३
ध्रुवं ध्रुवेण हविषा हविरेव सोमं नयामसि ।
यथा न इन्द्रः केवलीर्विशो बलिहृतस्करत ॥ ४४
स्वाहा दिवं आप्यायस्व स्वाहान्तरिक्षादाप्यायस्व स्वाहा पृथिव्या आप्यायस्वायुर्धा असि
ध्रुवायुर्मे धेहि वयोधा असि ध्रुव वयो मे धेहि तनूपा असि ध्रुव तन्वं मे पाहि चक्षुष्पा असि ध्रुव
चक्षुर्मे पाहि वर्चोधा असि ध्रुव वर्चो मे धेहि ॥ ४५
अध्वर्योऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय ।
विश्वस्मै भूताय ध्रुवो अस्तु देवास्सं पिन्वस्व घृतवद्देव यज्ञ ॥ ४६
इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलत् । इन्द्र इवेह ध्रुवस्तिष्ठेह यज्ञमु धारय ॥ ४७
इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा हविः ।
तस्मै सोमो अधिब्रुवत् तस्मा उ ब्रह्मणस्पतिः ॥ ४८
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामसि ॥७॥ ४९
असवे स्वाहा वसवे स्वाहा वसुधेयाय स्वाहा भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये
स्वाहा भूताय स्वाहा ॥ ५०

[७] कपि. ४८,९ । मै. १,३,४८; २,७,१०१, ४,६,४० । वा. २,१६,२६; ३,१७; १४,१७; २२,१ । काण्व. २,३३, ४८; ३,२३, १५,१७, २४,१ । [ध्रुवा द्यौर्ध्रुवा पृथिवी० । ऋ. १०,१७३,४; अथर्व. ६,८८,१, तै. ब्रा. २, ४,२,८ । आ त्वाहार्षमन्त० । ऋ. १०,१७३,१; अथर्व. ६,८७,१; तै. सं. ४,२,१,४, तै. ब्रा. २,४,२,८ । ध्रुवं ध्रुवेण हविषा० । ऋ. १०,१७३,६; अथर्व. ७,९४,१; तै. सं. ३,२,८,६ । अध्वर्योऽयं यज्ञो अस्तु०। तै. सं. ३,१,९,३ । इहैवैधि माप च्योष्ठाः० । ऋ. १०, १७३,२; अथर्व. ६,८७,२; तै. ब्रा. २,४,२,८ । इम-मिन्द्रो अदीधरद्० । ऋ. १०,१७३,३, अथर्व. ६,८७,३; तै. ब्रा. २,४,२,९]
[८] कपि. ४८,९ । मै. २,५,१५; ७,२००, ३,१२,१३ । वा. २,२, ७,२६, ९,२०; १३,५, १८,२८, २२,३० । काण्व. २,३; ७,२९; १०,२७, १४,५; १९,४०, २४,४२ ।

द्रप्संश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ ५१
यस्ते द्रप्सस्स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थे ।
अध्वर्योर्वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्कृतम् ॥ ५२
यो द्रप्सो अंशुः पतितः पृथिव्यां परिवापात् पुरोडाशात् करम्भात् ।
धानासोमान्मन्थिन इन्द्र शुक्रात् स्वाहाकृतमिन्द्राय तं जुहोमि ॥ ५३
यस्ते द्रप्सो मधुमाँ इन्द्रियावान् स्वाहाकृतः पुनरप्येति देवान् ।
अध्वर्योर्वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्कृतम् ॥ ५४
यस्ते द्रप्सस्स्कन्दति यस्ते अंशुरवश्च यः परो दिवः ।
अयं देवो बृहस्पतिस्सं तं सिञ्चतु राधसा ॥८॥ ५५

विसृष्टधेनास्सलिला घृतश्च्युतो वसन्तो ग्रीष्मो मधुमन्ति वर्षाः ।
शरद्धेमन्त ऋतवो मयोभुव उदग्रुतो नभसी संवसन्ताम् ॥ ५६
आ नः प्रजामां देवानां त्वमग्ने व्रतपा असि ॥ ५७
यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष्टद्विश्वमापृणाति विद्वान् येभिर्देवाँ ऋतुभिः कल्पयाति ॥ ५८
मधुश्च माधवश्च वासन्तिका ऋतू शुक्रश्च शुचिश्च ग्रैष्मा ऋतू नभश्च नभस्यश्च वार्षिका ऋतू
इषश्चोर्जश्च शारदा ऋतू सहश्च सहस्यश्च हैमन्तिका ऋतू तपश्च तपस्यश्च शैशिरा ऋतू त इमं यज्ञमवन्तु
ते मागवन्त्वनु च आरभेऽनु मारभध्वम् ॥९॥ ५९

अंसवे स्वाहा वसवे स्वाहा विभवे स्वाहा विवस्वते स्वाहा शूषाय स्वाहा संसर्पाय स्वाहा मलिम्लुचाय स्वाहा गणश्रिये स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहाभिभवे स्वाहाधिपतये स्वाहा दिवापतये स्वाहेन्द्रस्य ग्रहोऽस्यगृहीतो ग्राह्यो देवानां पुरसि तां त्वा प्रविशामि तां त्वा प्रपद्ये सह गृहैस्सह प्रजया सह पशुभिस्सहर्त्विग्भिस्सह सदस्यैस्सह सोम्यैस्सह दक्षिणीयैस्सह यज्ञेन सह यज्ञपतिना ॥ इन्द्राग्नी परिधी मम धाता देव पुरां कृतां तस्येन्द्रग्रह प्रपद्ये सगुस्साश्वस्सपूरुषस्सह

[द्रप्सश्चस्कन्द पृथिवी (प्रथमां)० । ऋ. १०,१७,११; अथर्व. १८,४,२८; तै. सं. ३,१,८,३; ४,२,८,२; ६,५, तै. आ. ६,६,१ । यस्ते द्रप्सस्स्कन्दति० । ऋ. १०,१७,१२; तै. सं. ३,१,१०,१ । यो द्रप्सो अंशुः मधुमाँ० । तै. सं. ३,१,१०,१-२ । यस्ते द्रप्सस्स्कन्दति (स्कन्नो)० । ऋ. १०,१७,१३]
[९] कपि. ४८,१० । मै. २,८,१२ । वा. १३,२५ । काण्व. १४,२६ ।
[१०] कपि. ४८,८, ४८,११ । मै. ३,१०,११(१३) । वा. २०,३० । काण्व. २४,४२ । तै. ब्रा. ३,१०,७ । [चन्द्राय स्वाहा० । अथर्व. १९,४३,४]

यन्मेऽस्ति तेन ॥ अरिष्टया अव्यथ्यै संवेशायोपवेशाय गायत्र्यै छन्दसेऽभिभुवे स्वाहारिष्टा
अव्यथ्यै संवेशायोपवेशाय त्रिष्टुभे जगत्या अनुष्टुभे छन्दसेऽभिभुवे स्वाहा ॥१०॥ ६०-६२
द्यौश्च त्वा पृथिवी च श्रीणीतामहश्च त्वा रात्री च श्रीणीतां वाक् च त्वा मनश्च श्रीणीतामापश्च त्वौषधयश्च श्रीणन्त्वृक् च त्वा साम च श्रीणीतां स्तोमश्च त्वा यजुश्च श्रीणीतां बृहच्च त्वा रथन्तरं च श्रीणीतां यज्ञश्च त्वा दक्षिणा च श्रीणीतां सूर्यश्च त्वा चन्द्रमाश्च श्रीणीतां दर्शश्च त्वा पूर्णमासश्च श्रीणीतां ब्रह्म च त्वा क्षत्रं च श्रीणीतामर्कश्च त्वाश्वमेधश्च श्रीणीतां श्रीतस्त्वं श्रीतोऽहमिन्दुरिन्दुमवागँस्तस्य त इन्द इन्द्रियावत इन्द्रपीतस्य सर्वगणस्सर्वगणस्योपहूत उपहूतस्य भक्षयामि ॥११॥
६३
विश्वा अग्ने त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥ ६४
या देव्यष्टकास्यपसामपस्तमा स्वपा असि ।
तस्यै त एना हविषा विधेम त्वं यज्ञे वरुणस्यावया असि ॥ ६५
श्रुत्कर्णाय ॥ ६६
अनुमतेऽनुमन्यस्व न इदं यद्भेषजं कृणुमहे तनूषु ।
यद्वो तोकेषु तनुषु प्रजासु यद्गोष्वोषधीष्वप्सु ॥१२॥ ६७
हिरण्यगर्भः ॥ ६८
तदित् पदं न विचिकेत विद्वान् यन्मृतः पुनरप्येति जीवान् ।
त्रिवृद्भुवनं यद्रथवृज्जीवो गर्भो न मृतस्स्वाहा ॥ ६९
आप्यायस्व सं ते पयांसि ॥ ७०
आप्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः । भवा नस्सुश्रवस्तमस्सखा वृधे ॥१३॥ ७१
अप्स्वग्ने ॥ ७२

[११] कपि. ४८,११ । वा. ८,१२ । काण्व. ८,१३ ।
[१२] कपि. ४८,१२ । [विश्वा अग्ने (उत) त्वया० । ऋ. १,७,३ । श्रुत्कर्णाय कवये० । अथर्व. १९,३,४]
[१३] कपि. ४८,१३ । मै. २,७,१९८; १३,११०; ३,१२,१८; ४,१३,७१ । वा. १२,११२—११४; १३,४; १९,१; २५,१० । काण्व. १३,१११—११३, १४,४; २५,१; २७,१४ । [हिरण्यगर्भः समवर्तताग्रे० । ऋ. १०, १२१,१; अथर्व. ४,२,७; तै. सं. ४,१,८,३; २,८,२; ताण्ड्य ब्रा. ९,९,१२; नि. १०,२३ । तदित् पदं न विचिकेत० । तै. ब्रा. ३,७,१०,६ । आप्यायस्व समेतु ते० । ऋ. १,९१,१६; ९,३१,४; तै. सं. ३,२,५,३; ४,२, ७,४; ताण्ड्य ब्रा. १,५,८ । सं ते पयांसि० । ऋ. १,९१,१८; तै. सं. ४,२,७,४ । आप्यायस्व मदिन्तम० । ऋ. १,९१,१७; तै. सं. १,४,३२,१; तै. आ. २,१७,१]
[१४] कपि. ४८,१३ । मै. २,७,१९४ । वा. १२,३६ । काण्व १३.३७ । [अप्स्वग्ने सधिष्टव० । ऋ. ८,४३,९; तै. सं. ४,२,३,२; ११,३]

तपोऽप्स्वग्ने अन्तराँ अमित्रान्तपा शंसमररुषः परस्य ।
तपो वसो चिकितानो अचित्तान् वि ते तिष्ठन्तामजरा अयासः ॥ ७३
यो नस्सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥ ७४
स स्मा कृणोतु केतुमा नक्तं चिद्दूर आ सते ।
पावको यद्वनस्पतीन् प्र स्मा मिनात्यजरः ॥ ७५
नहि ते अग्ने तन्वः क्रूरमानंश मर्तः । कपिर्बभस्ति तेजनं स्वं जरायु गौरिव ॥ ७६
मेष इव यदुप च वि च चर्वति यदप्सरद्रुपरस्य खादति ।
शीर्ष्णा शिरो वक्षसा वक्ष एजयन्नंशु वमस्ति हरितेभिरासभिः ॥ ७७
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
न्यङ् नियन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥१४॥ ७८
अग्निना तपोऽन्वाभवत् सूर्येण तेजो वायुना प्राणा इन्द्रेण देवा यमेन पितरस्सरस्वत्या मनुष्यास्समुद्रेण स्तोमा वामदेव्येन सामानि गायत्र्या छन्दांसि मण्या रूपाणि हिरण्येन वर्चांसि तिरश्चिराजिना सर्पा अजगरेणाप्स्वप्सव्याश्श्येनेन पतत्रिणो व्याघ्रेणारण्याः पशवस्सुपर्णेन वयांस्यश्वत्थेन वनस्पतय ओदनेनान्नानि यवेनौषधयोऽश्ववृषभेनाश्वाः (?) पशवो वृषभेण गावो वृष्णिनावयो बस्तेनाजाश्चन्द्रमसा नक्षत्राणि ब्राह्मणेन वाचो वाचा देवतास्स्त्रियो विराड् ग्राव्णा पर्वतास्समुद्रेणापोऽग्निस्सत्यं सत्येनर्तमृतेन तपस्तपसा परमेष्ठी परमेष्ठिना मृत्युर्मृत्युना प्रजाः प्रजाभिस्संगरस्तन्नभि प्रजापतिस्तेदेवैरन्वाभूविरनु च भूयासमिति च भूयासं ब्राह्मणानां श्रेष्ठश्च भूयासम् ॥१५॥ ७९
यस्य द्रोणकलश उपदस्यति कलशमेव तस्योपवायन्तं प्राणोऽनूपदस्यति प्राणो हि सोमस्तदाहुः यो वा अनपेर्दित्यो वा एतत् पयो हिरण्यमेवापोऽभ्यवनयेद्धिरण्यमभ्युक्षयेदमृतं वा आप आयुर्हिरण्यममृतादेवाप्यायुरारम्भेन् घ्नते चत्वारो वरा देया ब्रह्मण उद्गात्रे होत्रेऽध्वर्यव एते वै यज्ञस्येन्द्रास्तानेव प्रीणाति सैव तत्र प्रायश्चित्तिर्यस्य चमस उपदस्यति चमसमेव तस्योपवायन्तं प्राणोऽनूपदस्यति प्राणो हि सोमो यमध्वर्युरन्तमं ग्रहं गृह्णीयात् तस्य संपातमवनयेत् प्रायश्चित्त्यै वै सोमो गृह्यते प्रायश्चित्त्यैवास्मै प्रायश्चित्तिं करोति सर्वमायुरेति सैव तत्र

[तपोऽप्स्वग्ने अन्तराँ० । ऋ. ३,१८,२; तै. आ. ४,५,२ । यो नस्सनुत्यो अभिदासत्० । ऋ. ६,५,४ । स स्मा कृणोतु (०ति) केतुमा० । ऋ. ५,७,४ । नहि ते अग्ने तन्वः० । अथर्व. ६,४९,१; तै. आ. ६,१०,१ । मेष इव यदुप० । अथर्व. ६,४९,२ । सुपर्णा वाचमक्रतोप० । ऋ. १०,९४,५; अथर्व. ६,४९,३]
[१५] तै. सं. ७,३,१४ । [१६] कपि. ४८,१ ।

प्रायश्चित्तिर्यस्य ग्रावापिशीर्यते पशुभिर्व्यृध्यते पशवो हि ग्रावाणो द्युतानस्य मारुतस्य ब्रह्मसाम्नेन
स्तुवीरन् पशवो वै द्युतानो मारुतस्स्वेनैवैनं साम्ना संदधाति पशुमान् भवति सैव तत्र प्रायश्चित्तिः
प्रजापतये स्वाहेत्यभक्षणीयानुपरवेष्ववनयेत् प्राजापत्यो वै सोमः प्रतिष्ठामेवैनं गमयति सैव तत्र
प्रायश्चित्तिर्यस्य सोममभिदहेद्द्रहानध्वर्युस्स्याशयेत स्तोत्राण्युद्गाता शस्त्राणि होताथ यथापूर्वं यज्ञेन
चरेयुः पञ्च वरा देयाः पाङ्क्तो यज्ञो यज्ञमेवावरुन्द्धेऽवभृथं गत्वा पुनरुदेत्य पुरा द्वादश्याः
पुनर्दीक्षेत यद् द्वादशीमतिनयेदन्तर्धीयेत तत्र तां दक्षिणा दद्याद्याः पूर्वस्मिन् दास्यन् भवति सैव
तत्र प्रायश्चित्तिः ॥१६॥ ८०
सर्वान् वा एषोऽग्नौ कामान् प्रवेशयते योऽग्निमन्वाधाय व्रतमुपैति स यदनिष्ट्वा प्रयायादकाम-
प्रीता एनं कामा नानु प्रयायुरतेजा अवीर्यस्स्यात् स प्रयास्यञ्जुहुयात् ॥ ८१
तुभ्यं ता अङ्गिरस्तम विश्वास्सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥ ८२
इति कामानेवास्मिन् दधाति कामप्रीता एनं कामा अनु प्रयान्ति तेजस्वी वीर्यवान् भवति संततिर्वा एषा यज्ञस्य योऽग्निमन्वाधाय व्रतमुपैति स यदनिष्ट उद्वायाद्विच्छित्तिरेवास्य सा प्राङुदेत्य मनसोपतिष्ठेत मन इव वै प्रजापतिः प्राजापत्यो यज्ञो यज्ञमेव संतनोति भूरिति व्याहरेद्भूर्वै प्रजापतिर्भूतिमेवोपैत्यायुषा वा एष वीर्येण व्यृध्यते यस्याहिताग्नेरग्निरपक्षायति स यावच्छम्यया
पराविध्येद्यदि तावदपक्षायेत् तं संभरेत् ॥ ८३
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व ।
संवेशनस्तन्वे चारुरेधि प्रियो देवानां परमे जनित्रे ॥ ८४
इति ब्रह्मणैवैनं संभरति सैव तत्र प्रायश्चित्तिर्यदि परस्तरामपक्षायेदनुप्रयाय वसेत् सैव तत्र प्रायश्चित्तिरोषधीर्वा एतस्य पयः पशून् प्रविशति यस्य हविषेऽपाकृता वत्सा धयन्ति वायव्या यवागूं निर्वपेद्वायुर्वै पयसः प्रदाता तमेव भागधेयेनोपधावति सोऽस्मै पयः प्रयच्छत्यथोत्तरस्मै हविषे
वत्सानपावर्तयेत् सैव तत्र प्रायश्चित्तिः ॥१७॥ ८५
अर्धं वा एतस्य यज्ञस्य मीयते यस्य सायं दुग्धं हविरार्तिमार्छतीन्द्राय व्रीहीन्निरुप्योपवसेत् पयो वा ओषधयः पय एवारभ्योपवसति यत् प्रातस्स्यात् तच्छृतं कुर्युरैन्द्रं इतरः पुरोडाशस्स्यात् पयो वा ओषधयः पयसैवास्मै पयः प्रदापयत्यथोत्तरस्मै हविषे वत्सानपावर्तयेत् सैव तत्र प्रायश्चित्तिरुभयान् वा एष देवान् भागधेयेन व्यर्धयति यं यजमानस्य सायं च प्रातश्च गृहमागच्छन्ति

[१७] कपि. ४८,१५ । वा. १२,११६ । काण्व. १३,११५ । तै. ब्रा. ३,७,१,१-६ । [तुभ्यं ता अङ्गिरस्तम० । ऋ. ८,४३,१८; तै. सं. १,३,१४,३; तै. ब्रा. ३,७,१,१ । इदं त एकं पर ऊ त० । ऋ. १०,५६,१; सा. ६५, अथर्व. १८,३,७; तै. ब्रा. ३,७,१,३, तै. आ. ६,३,१; ४,२]
[१८] कपि. ४८,१६ । तै. ब्रा. ३,७,१,६-९; ३,७,२,९-७ । वा. ३,६३ । काण्व. ३,७९ ।

यस्य सायं प्रातर्दुग्धं हविरार्तिमार्छेत्योदनं पञ्चशरावं निर्वपेदग्निं देवतानां प्रथमं यजेदग्निमुखा एवं
देवताः प्रीणात्यग्निं वा अन्वन्या देवता इन्द्रमन्यास्ता एवोभयीः प्रीणात्यथोत्तरस्मै हविषे वत्सा-
नपावर्तयेत् सैव तत्र प्रायश्चित्तिर्यत् कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानस्स्याद्यदनायतने निन-
येदनायतनस्स्यान्मध्यमेन पर्णेन द्यावापृथिव्ययर्चान्तःपरिधि निनयेद् द्यावापृथिवी वै यज्ञस्य
प्रतिष्ठा प्रतिष्ठामेवैनं गमयति सैव तत्र प्रायश्चित्तिर्यत् प्रयाजेष्वनिष्टेषु प्राङङ्गारस्स्कन्देदध्वर्यवे च
यजमानाय चार्तिं स्याद्यद्दक्षिणा ब्रह्मणे च यजमानाय चार्तिं स्याद्यत् प्रत्यङ् होत्रे च पत्न्यै चार्तिं
स्याद्यदुदङ्ङग्नीधे च यजमानस्य च पशुभ्योऽर्तिं स्यात् तं प्रहरेत् ॥ ८६

सहस्रशृङ्गो वृषभो जातवेदास्स्तोमपृष्ठो घृतवान् सुप्रतीकः ।
मा मा हासीन्नाथितो नेत्त्वा जहानि सहस्रपोषस्स गोपोषं च यच्छ ॥ ८७

इति ब्रह्मणैवैनं प्रहरति सैव तत्र प्रायश्चित्तिरर्धं वा एतस्य यज्ञस्य मीयते यस्य व्रत्येऽहन्
पत्न्यनालम्भुका भवति तामपरुध्य यजेत सर्वेणैव यज्ञेन यजते तामिष्ट्वोपह्वयेत ॥ ८८

सा त्वमस्यमोऽहममोऽहमस्मि सा त्वम् । ता एहि संरभावहै पुंसे पुत्राय कर्तवे ।
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ ८९

इत्यर्ध एवैनामाभजति सैव तत्र प्रायश्चित्तिः ॥१८॥ ९०

यदवघृष्टेन जुहुयादपरूपमस्यात्मञ्जायेत यत् प्रत्येयात् पापीयान् स्याद्यन्न जुहुयादार्ति-
मार्छेत् ॥ ९१

मित्रो जनान्यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवद्विधेम ॥ ९२

इति मैत्र्यर्चा समिधमाधाय होतव्यं मित्रो वै यज्ञस्य शान्तिर्मित्रेणैवैनच्छमयति तद्धुत्वाथान्यां
दुग्ध्वा पुनर्होतव्यं सैव तत्र प्रायश्चित्तिर्यत् कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानस्याद्यन्न जुहु-
यादार्तिमार्छेत् प्राजापत्ययर्चा वल्मीकवपायामवनयेत् प्राजापत्यो वै वल्मीको यज्ञः प्रजापतिर्यज्ञ
एवं यज्ञं प्रतिष्ठापयति तद्धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यं सैव तत्र प्रायश्चित्तिः ॥ यदि पूर्वस्या-
माहुत्यां हुतायामुत्तराहुतिस्स्कन्देद् द्विपाद्भिः पशुभिर्यजमानो व्यृध्येत यदभिजुहुयाच्चतुष्पाद्भिः
पशुभिर्यजमानो व्यृध्यते॥ ९३-९४

[सहस्रशृङ्गो वृषभो० । ऋ. ७,५५,७; अथर्व. ४,५,१; १३,१,१२ । सा त्वमस्यमो० । अथर्व. १४,२,७१;
तै. ब्रा. ३,७,१,९]
[१९] कपि. ४८,१७ । तै. ब्रा. ३,७,२ । [मित्रो जनान्यातयति० । ऋ. ३,५९,१; तै. सं. ३,४,११,५; तै. ब्रा.
३,७,२,३; नि. १०,२२]

यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि गामय ॥ ९५

इति वानस्पत्ययर्चा समिधमाधाय होतव्यं वनस्पतिनैवास्यार्तो चानार्तो चाहुती विदाधार
तद्धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यं सैव तत्र प्रायश्चित्तिः ॥१९॥ ९६

देवाश्च वा असुराश्चास्मिल्लोके आसन् स प्रजापतिरकामयत परासुरान्नुदेय प्रजास्सृजेयेति स
एतानि चातुर्मास्यान्यपश्यत् स चातुर्मास्यैरेवासुरान् प्राणुदत चातुर्मास्यैः प्रजा असृजत य
एवं विद्वांश्चातुर्मास्यैर्यजते परा भ्रातृव्यं नुदते प्र प्रजया प्र पशुभिर्जायतेऽग्निष्टोमाद्वैश्वदेवं
यज्ञक्रतुं निर्माय प्रजापतिः प्रजा असृजतोक्थ्याद्वरुणप्रघासान् यज्ञक्रतुं निर्माय प्रजा वरुणे-
नाग्राहयदतिरात्रात् साकमेधान् यज्ञक्रतुं निर्मायेन्द्रो वृत्रमहन् वैश्वदेवेन वै सोऽसुरान् प्राणु-
दत वैश्वदेवेन प्रजा असृजत ॥ सृष्टा वा अन्याः प्रजा आसन्नसृष्टा अन्या अथ प्रजापतिरकामयत
प्रजास्सृजेयेति संवत्सरो वै यज्ञो यज्ञः प्रजापतिस्स एते आत्मनोऽधि पयसी निरमिमीतोधन्युं च
वहं चाथैताभ्यो देवताभ्य एतानि हवींषि भागं निरवपत् तैः प्रजा असृजतताभ्यो वै ताः प्रजाः
प्राजायन्ततैव एतानि पञ्च हवींषि पञ्च ऋतवस्तत एवं प्रजायतेऽग्निरेव प्रावापयत् सोमो रेतो-
ऽदधान्मिथुनं वा अग्निश्च सोमश्च सविता प्रासुवत् संवत्सरो वै सविता द्वादश मासास्संवत्सरस्तस्माद्
द्वादशकपालोऽथो वैश्वदेवत्वायैव द्वादशकपाल उपांशु यजत्यनिरुक्तो हि संवत्सरस्सरस्वत्येव
सृष्टासु वाचमदधात् पूषणं प्रतिष्ठामभ्यसृजन्त॥ वाग्वै सरस्वती पशवः पूषा मिथुनं वाक् च पशव-
श्च मध्यतो वै प्रजा विसृज्यन्तेऽन्ततो मिथुनाद्विषूचीः प्रजायन्ते तदेतत् प्रजापतेरेवाधि मध्यतः
प्रजा विसृज्यन्तेऽथादोऽन्ततो मिथुनादुभयतो विषूचीः प्रजायन्ते वार्त्रघ्नानि वा एतानि हवींष्य-
ग्निना वा अनीकेनेन्द्रो वृत्रमहन् सोमेन राज्ञा सवित्रा प्रसूतस्सरस्वत्या चैत्र्या पूषा वीर्येणान्वतिष्ठत
विजितिरेवैतानि हवींषि ॥२०॥ ९७-९९

[१२७७]

॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायां प्रायश्चित्तिर्नाम पञ्चत्रिंशं स्थानकं संपूर्णम् ॥३५॥

[यत्र वेत्थ वनस्पते० । ऋ. ५,५,१०; तै. ब्रा. ३,७,२,५]
[२०] कपि. ४८,१८ । मै. १,१०,५ (९८) । तै. ब्रा. १,६,१—२ ।

अथ षट्त्रिंशं स्थानकम्।

चातुर्मास्यानि।

इन्द्रस्य वै वृत्रं जघ्नुष इन्द्रियं वीर्यमपाक्रामत् तदिदं सर्वमनुप्राविशदप ओषधीर्वनस्पतींस्तेन
देवा अश्राम्यंस्त इदं समनयन् यत् सान्नाय्यं मिथुनं वै दधि च पयश्च यत् संसृष्टं मण्डमिव मास्त्विव
परीव ददृशे गर्भ एव स तपसो वै प्रजाः प्रजायन्ते तपस्त्वमेतद्गच्छति यच्छृतत्वं गच्छति तत
एव प्रजायते यद्वैश्वदेव्यामिक्षया प्रजा असृजत तस्मादिमा वैश्वदेवीः प्रजास्स्तोका वै विश्वे देवा-
स्तानेवैतद्यजत्यमुतःप्रदानाद्धि प्रजा उपजीवन्ति ॥ योनिर्वा एष प्रजानां तं मरुतोऽभ्य-
कामयन्त तेऽहोगृहीता असृज्यन्त यत् स्वतवद्भ्यस्स्वत्वायैव निष्कृत्यै पशवो वै मरुतः
प्रजननायैष पशूनां सप्तकपालो भवति सप्त हि मरुतो निरवत्त्या एव मारुतोऽथो ग्राम्यमेवैतेनान्ना-
द्यमवरुन्द्धे ता वैश्वदेवेन सृष्टा विषूचीर्व्युदायंस्ता द्यावापृथिव्येन पर्यगृह्णात् प्रजानामेवैष सृष्टानां
परिगृहीत्यै यदेककपालस्तेन प्राजापत्यः प्रजापतिमेवैतद्देवता अभि प्रतितिष्ठति यजमानो वा एक-
कपाल आहवनीयस्स्वर्गो लोकस्सर्वहुतं जुहोति हविर्भूतमेवैनं स्वर्गं लोकं गमयत्यात्मा वा एककपालः
पशवो घृतं यद् घृतेनाभिपूरयति पशुभिरेवैनं समर्धयति यदाभिपूरयेदभुञ्जन्त एनं पशव उपतिष्ठेरन्नपरं
होनं पशुभ्यः करोत्याविःपृष्ठः कार्य उत्तरमेवैनं पशुभ्यः करोति भुञ्जन्त एनं पशव उपतिष्ठन्ते तत्
तन्न सर्वमभ्येव पूरयेन्न हि पशवो न भुञ्जन्ति बर्हिषदं करोति प्रतिष्ठित्यै यजमानं वै हूर्छन्तं प्रजा
अनुहूर्छन्ति यजमानं प्रतितिष्ठन्तमनु प्रतितिष्ठन्त्यृजुः प्रतिष्ठितो होतव्यो यजमानस्य प्रतिष्ठित्यै
॥१॥ १-२

त्रेधासंनद्धस्तर्हि भवति त्रेधासंनद्ध इध्मस्त्रेधाविहितानि हि संवत्सरेण चातुर्मास्यानि वसन्ता
यजेत प्रजननाय प्रवणे यजेत प्रजननाय प्रस्वो भवन्ति प्र मा जनयानीति नोत्तरवेदिमुपवपन्ति
प्रजननायाग्निं मन्थत्यग्निं वै पशवोऽनुप्रजायन्ते प्रजननायाथो वृषाणमेवैतं यजमानाय जनयति
पशवो वै पृषदाज्यं नानारूपाः पशवस्तस्मान्नानारूपमाग्नेयं घृतमैन्द्रं दध्यैन्द्राग्नं पृषदाज्यं देवतया
प्राणापानौ वा इन्द्राग्नी मिथुनं प्राणापानौ मिथुनयोनयः प्रजास्तस्मादेव मिथुनात् प्रजायते ॥ यदि
प्राणापानौ वा इन्द्राग्नी मिथुनं प्राणापानौ मिथुनयोनयः प्रजास्तस्मादेव मिथुनात् प्रजायते ॥ यदि प्रावृषि यजेत सकृदुप-
वसन्ता यजेत द्विरुपस्तृणीयात् सकृदभिघारयेदोषधीरेव प्रतिष्ठापयति यदि प्रावृषि यजेत सकृदुप-
स्तृणीयाद् द्विरभिघारयेद्वृष्ट्यैव पशूनभिजिघर्ति प्राणेभ्यो वै प्रजाः प्रजायन्ते प्राणा एतानि नव
हवींषि नव प्राणा आत्मा देवता तत एव प्रजायते नव प्रयाजा नवानुयाजा द्वा आज्यभागा अष्टौ

[१] मै. १,१०,५; ७ (२८-३०) । तै. ब्रा. १,६,१-३ ।
[२] मै. १,१०,७—८ (३०—३१) । तै. ब्रा. १,६,३ ।

हवींष्यग्नये समवद्यते वाजिनो यजति तत् त्रिंशत् त्रिंशदक्षरा विराडन्नं विराड् विराज्येवान्नाद्ये
प्रतितिष्ठति त्रिंशदक्षरा वै विराड् विराजो योनेः प्रजाः प्रजायन्ते विराज एवैना योनेः प्रजनयति॥
त्रिंशत् त्रिंशद्वै रात्रयो मासो यो वै मासस्स संवत्सरस्संवत्सरः प्रजापतिस्तदेतत् प्रजापतेश्चैव विराज-
श्चाधि मिथुनात् प्रजायत एकैकया वा आहुत्या द्वादश द्वादश रात्रीरयुवन्त ता यावतीस्संवत्सरस्य
रात्रयस्तावतीस्संख्याने संवत्सरमेव भ्रातृव्याद्युवते वैश्वदेवेन वै ते चतुरो मासोऽयुवन्त वरुण-
प्रघासैः परांश्चतुरस्साकमेधैः परांश्चतुरस्तानेव भ्रातृव्याद्युवते यच्चतुरश्चतुरो मासोऽयुवन्त तच्चातु-
र्मास्यानां चातुर्मास्यत्वम् ॥२॥ ३-५

वैश्वदेवेन यजते प्रजाकामो वा पशुकामो वा न वरुणप्रघासैर्न साकमेधैस्सर्वो वै पुरुषस्साहस्रो
जायते यावत्तरसं त्वै गच्छति प्रजननमेतद्धविर्यद्वैश्वदेवं प्रजननमेव यजते स्वां मात्रां गच्छानीति
यदा सहस्रं पशून् गच्छेदथ वरुणप्रघासैर्यजेत यदेव तत् सहस्रमगंस्तस्याहोऽवयजत ऋतुयाजी वा
अन्यश्चातुर्मास्ययाज्यन्यो यो वसन्तोऽभूत् प्रावृडभूच्छरदभूदिति यजते स ऋतुयाजी यस्त्रयोदशं
मासं संपादयति स त्रयोदशं मासमभियजते स चातुर्मास्ययाजी त्रीन् ऋजूनिष्ट्वा चतुर्थमुत्सृजेद् द्वौ
परा ऋजू इष्ट्वा तृतीयमुत्सृजेद्ये वै त्रयस्संवत्सरास्तेषां षट्त्रिंशत् पूर्णमासा यौ द्वौ तयोश्चतुर्विंशतिर्ये
षट्त्रिंशत्यधि ते चतुर्विंशतिमुपयन्त्येष वाव स त्रयोदशो मासस्तमेवैतत् संपादयति तमभियजते॥
यद्बर्हिः प्रयाजेषु यजत्योषधीस्तद्यजति यद्बर्हिरनुयाजेषु फलं तद्यजति यद्बर्हिर्वीरिणीनां यदेव फला-
दधि प्रजायते तत् तद्यजति यद्दुरो यजत्युपस्थं तद्यजति यदुषासानक्ता व्युष्टिं चैव निम्रुक्तिं च
तद्यजति यज्जोष्ट्री यदेव जातं यज्जनिष्यमाणं तद्यजति यदूर्जाहुती यदेवात्ति च पिबति च तत्
तद्यजति यद्दैव्या होतारेमे वै दैव्या होतारेम एव तद्यजति यत् तिस्रो देवीर्वाग्वै तिस्रो देवीर्वाचमेव
तद्यजति च्छन्दांसि वै वाक् छन्दांस्येव तद्यजति नराशंसं यजति तनूनपाद्वै यज्ञः प्रसूवो नराशंसो-
ऽप्रसूतः प्रसूतो वा एतर्हि यज्ञस्तस्मान्नराशंसमनुयाजेषु यजति त्वष्टारं यजति स हि रूपाणि वि-
करोति वनस्पतिं यजत्यूर्ग्वै सोमो वनस्पतिस्सौमीरिमाः प्रजाः प्रजास्वेवोर्जं दधाति ॥३॥ ६-७

वाजिनो यजति पशवो वै वाजिनस्तानेव तद्यजति न वा एष सुयज्ञ इव संस्थिते हि यज्ञे प्रहृतेषु
परिधिषु जुहोति यदनवानं होता यजति तेन यज्ञः क्रियतेऽनुयजत्यग्निस्समिष्टिरग्निः प्रतिष्ठिति-
स्समिष्ट्या एव प्रतिष्ठित्यै पशवो वै वाजिनो यत् संस्थापयेत् तान् संस्थापयेदसंस्थिता ह्येते सदादि
प्रजायन्ते बर्हिरनुनिषिञ्चन् गृह्णात्यृषभेष्वेव रेतो दधाति प्रजा वै बर्ही रेतो वाजिनं प्रजास्वेव रेतो-
दधात्यूर्ध्वज्ञुरासीनो यजत्यूर्ध्वज्ञुर्हि पशुः पशौ रेतो दधाति समुपहूय भक्षयन्ति सोमपीथ इव ह्येष

[३] मै. १,१०,८-९ (३१-३२) । तै. ब्रा. १,६,३ ।
[४] मै. १,१०,९ ((३२-३४) । तै. ब्रा. १,६,३ ।

सर्वे ऋत्विजः प्राश्नन्ति वाजिनो मे यज्ञं वहानित्यात्मना प्राश्नीयादात्मन्नेव वाजं धत्ते ॥४॥ ८
ता वैश्वदेवेन सृष्टास्तस्मिंस्तमभिमन्यरुणोऽगृह्णाद्यो आहुरति वै तास्वमचरँस्ता अतिचरन्तीर्वरुणे-
नाग्राहयदिति तस्मात् पिता नातिचरितवै वैश्वदेवेन वै प्रजापतिः प्रजा असृजत तस्य मरुतो हव्यं
घ्यमघ्नत तर्होऽहोगृहीता अनृत्यन्त ताभ्यो भेषजमैच्छत् तदात्मन्नेवैच्छत् स एतदात्मनोऽधि पयो
निरमिमीत तेनाभ्योऽहोऽवायजदँहसो वा एषावेष्टिर्यद्वरुणप्रघासा जन्याद्वै वरुणो गृह्णाति तस्माद्वरुण-
प्रघासा यावद्वै कुमारेऽग्नो जात एनस्तावदेतस्मिन्नेनो भवति यो वरुणप्रघासैर्यजतेऽथैतानि पञ्च
हवींषि संतत्यै ॥ सावित्रोऽष्टाकपालो गायत्रो हि देवानाँ सवितैन्द्राग्नो द्वादशकपालो वैश्वदेवत्वाय
यद्वै तत् प्रजा वरुणगृहीता अवेव्लीयन्तेव तदाश्विन्द्राग्नी बलमधत्तां न वै ताः प्राणँस्ता अप्राणन्ती-
र्वरुणोऽगृह्णात् प्राणापानौ वा इन्द्राग्नी प्राणापाना एवैतन्मध्यतो धीयेते शिथिला वै ताः प्रजा
वरुणोऽगृह्णादोजो वीर्यमिन्द्राग्नी ओज एवैतद्वीर्यं मध्यतो धीयते निरवत्त्या एव मारुती निर्वरुण-
त्वाय वारुणी कन्त्वाय कायो यद्वा आभ्यस्तद्वरुणगृहीताभ्यः कमभवत् तस्मात् कायः प्रजापतिर्वै
ताः प्रजा वरुणेनाग्राहयत् प्रजापतिः क आत्मनैवैना वरुणान्मुञ्चत्यृतं वै सत्यं यज्ञोऽनृतँ स्त्र्यनृतमेषा
करोति या पत्युः क्रीता सत्यथान्यैश्चरत्यनृतमेव निरवदायर्तं सत्यमुपैति यद्वाचयति मेध्यामेवैनां
यज्ञियां करोति न मिथु ब्रूयाद्यन्मिथु ब्रूयात् प्रियतमेन यातयेत् ॥५॥ ९–१०

आमयेषा भवन्ति सर्वस्याँहसोऽवेष्ट्यै यन्मृज्जैर्पुर्विन्त्वकर्मँहोऽवेष्टँ स्यात् पात्रेभ्यो वै ताः प्रजा
वरुणोऽगृह्णायत् पात्राणि पात्रेभ्य एवैना वरुणान्मुञ्चति प्रतिपुरुषं भवन्ति प्रतिपुरुषमेवाँहोऽवयजत
एकमधि भवति गर्भेभ्य एवं तेनाँहोऽवयजतेऽश्वाद्वै ताः प्रजा वरुणोऽगृह्णाच्छूर्पेणान्नं बिभ्रति
तस्माच्छूर्पेण हूयते स्त्रीपुंसौ जुहुतो मिथुना एवं प्रजा वरुणान्मुञ्चतः पुरस्तात् प्रत्यञ्चौ तिष्ठन्तौ
जुहुतः पुरस्तादेवाग्नेरँहोऽवयजतो यत् पात्राणि ये एवं द्विपादः पशवो मिथुनास्तेषां तेन पुरस्ता-
दँहोऽवयजतो यन्मेषश्च मेषी च ये एवं चतुष्पादः पशवो मिथुनास्तेषां तेनोपरिष्टादँहोऽवयजत
उभयत एवाँहोऽवयजतः पुरस्ताच्चोपरिष्टाच्च ॥ पात्राणि हुत्वाग्निं संमार्ष्टि यत्राँहोऽवायाक्षुस्तस्मि-
न्नुप्ते देवता यजानीति यद्वै प्रजा वरुणो गृह्णाति शमीं च यवं च न गृह्णाति हेमन्तौ हि वरुण-
स्तस्मादेतौ हेमन्त्ये शुष्यतो या एवावरुणगृहीतौ ताभ्यामेना वरुणान्मुञ्चति वरुण्यो वै यवो वरुण-
देवत्यस्त्वेनैव भागधेयेन वरुणं निरवदयतेऽथैता अनृतपशु अनृताद्वै ताः प्रजा वरुणोऽगृह्णाद्यदेता
अनृतपशु अनृतादेवैना वरुणान्मुञ्चति स्त्रीपुंसौ भवतो मिथुना एवं प्रजा वरुणान्मुञ्चति लोमशौ
भवतो मेध्यत्वाय यावन्तो हि पशवो लोम जगृहुस्ते मेधं प्रापुश्शमीपर्णानि भवन्ति शन्त्वाय

[५] मै. १,१०,१०-११ (३५-३६)। तै. ब्रा. १,४,४; १,६,४-५।
[६] मै. १,१०,११-१२ (३६-३७)। तै. ब्रा. १,६,४-५। मा. श्रौ. १,७,४।

भूर्जो वै नामैष वृक्षः कार्युः वा एतस्य स्रुचः प्रजापतिर्वा अन्नाद्यं नावारुन्ध तच्छतेध्मेनावारुन्ध
परश्शतानि कार्याण्यन्नाद्यस्यावरुद्ध्यै सहस्रेध्मो ह त्वा अँहसोऽवेष्टिं विव्याच परस्सहस्राणि
कार्याण्यँहसोऽवेष्ट्यै ॥६॥
११–१२

यतीन् वै सालावृकेया आदँस्तेषामेतानि शीर्षाणि यत् खर्जूरास्सोमपीथ एष उदीयति यत् करी-
राणि यत् करीराणि भवन्ति सोमपीथमेवावरुन्द्धे प्रजापतेर्वा एतज्ज्येष्ठं तोकं यत् पर्वतास्ते पक्षिण
आसँस्ते यत्र यत्राकामयन्त तत् परापातमासताथ वा इयं तर्हि शिथिलासीत् तेषामिन्द्रः पक्षान-
च्छिनत् तैरिमामदृँहद्ये पक्षा आसँस्ते जीमूता अभवँस्तस्मात् ते गिरिमुपप्लवन्ते योनिर्ह्येषामेष तस्मा-
द्गिरौ भूयिष्ठं वर्षति यत् प्राक्षरत् तानि करीराणि तदेतत् प्रावृष्युज्जीमूताः प्लवन्ते यजन्ते वरुण-
प्रघासैर्वृष्टिमेव संतनोति तस्मात् तर्हि भूयिष्ठं वर्षति वृष्टिं हि संतनोति न वैश्वदेव उत्तरवेदिमुपवपन्त्यु-
पात्र वपन्ति प्रजाता एव प्रजाः परिगृह्णाति योत्तरा वेदिर्या अग्रीः प्रजास्तासाँ सा योनिस्तास्ता-
मनुप्रजायन्ते या दक्षिणा वेदिर्या आद्याः प्रजास्तासाँ सा योनिस्तास्तामनुप्रजायन्त उभयीरेवैत-
दग्रीश्चाद्याश्च प्रजाः प्रजनयत्ययं वाव हस्त आसीन्नायं यैषा द्वितीया वेदिस्तयेमं द्वितीयँ हस्तमविन्दँ-
स्तस्मादेष एतस्य परिवेष्टापरजो हि तस्मात् कनीयाञ्ज्यायाँसं परिवेवेष्टि समे कार्ये समौ हीमौ
हस्ता असंभिन्ने भवतोऽँहसोऽवेष्ट्यै यत् संभिन्द्युरनवेष्टमँहस्स्यादेकस्फ्यामनु संभिन्दन्त्यनुसंतत्या
उपोत्तरां वपन्ति न दक्षिणामनभ्यारोहाय ॥ क्षत्रं वै वरुणो विण्मरुतो नाना यजन्ति पापवसीयसस्य
व्यावृत्त्यै यदध्वर्युः करोति तत् प्रतिप्रस्थाता करोति तस्माद्यद्राजा करोति तद्विट्करोति न वैश्वदेवे
त्रिंशदाहुतयस्सन्ति न साकमेधेषु वरुणप्रघासेषु वाव त्रिंशदाहुतयो वैराजः पुरुषो दश हस्त्या अङ्गुल्यो
दश पद्या दश प्राणास्तत् त्रिंशत् त्रिंशदक्षरा विराड्वैराजः पुरुषो यदेतर्ह्यवभृथमवैत्यात्मानमेवाँहोऽवयजते
यद्वै यज्ञस्य स्वगाकृतिं न प्राप्नोति वरुणस्तद्गृह्णाति यन्निष्कापेणावभृथमवैति यदेव वरुणगृहीतं तेन
वरुणं निरवदयतेऽथो यदेवात्र वरुणस्य न्यक्तं तस्य निरवत्त्या अनपेक्षमाणा आयान्ति वरुणस्या-
नन्ववायायैधोऽस्येधिषीमहीति वरुणमेव निरवदायैधतुमुपयन्ति समिदसि समेधिषीमहीत्याशिष-
मेवाशास्ते तेजोऽसि तेजो मयि धेहीति तेज एवात्मन् धत्ते ॥७॥ १३–१४

प्रजास्सृष्ट्वाँहोऽवेज्य सोऽकामयत वृत्रँ हन्यामिति स एताभिर्देवताभिस्सयुग्भूत्वोपप्लायत
मरुद्भिर्विशाग्निनानीकेन स वृत्रमभीत्य वृत्रं दष्ट्वोरुस्तम्भगृहीतोऽतिष्ठदनभिधृष्णुवँस्तं मरुत ऐषीकै-
र्वातरथैरघ्नँयन्त तेऽस्यैषँस्तेऽस्य यत्र मर्मागच्छँस्तदचेष्टत् सं वा एनं तदतपँस्तस्मात् सांतपना

[७] मै. १,१०,१२-१३ (३७-३८)। वा. २०,२३; ३८,२५। काण्व. २२,७; ३८,२४। तै. ब्रा. १,६,४-५।
[एधोऽस्येधिषी महि० । अथर्व. ७,९४,४]
[८] मै. १,१०,१४ (३९)। तै. ब्रा. १,६,६,३।

यत्रैषा वै साकमेधा अग्निना वा अनीकेनेन्द्रो वृत्रमहन्ननीकत्वायैवैषोऽग्निर्देवानाँ सेनानीस्सेनो-
त्थापनीयमेवैतदिन्द्रो वै वृत्राय वज्रमुद्यमं नाशक्नोत् स एतं मरुद्भ्यो भागं निरवपत् तं मरुतो
वीर्याय समतपन् स तेन वीर्येण वज्रमुदयच्छत् सं वा एनं तदतपँस्तस्मात् सांतपना मध्यंदिने
निरुप्यस्तर्हि क्षुमा अन्तौ तपति चरुर्भवति तँ हि सर्वतस्तपति देवा वै वृत्रस्य मर्म नाविन्दँस्तं
मरुतः क्षुरपविना व्ययुस्सं वा एनं तदतपँस्तस्मात् सांतपनाः ॥८॥ १५

ते श्वो वृत्रँ हनिष्यन्त उपावसँस्तेऽब्रुवन् कस्य वाहेदं श्वो भविता कस्य वा पचतेति त एत-
मोदनमपचन्त ते पशूनचिकयुर्यतरान् वा इमे श्वः कमितारस्ते जेतार इति तेभ्य एतेन प्रातिष्ठँस्ता-
नेतेनायच्छन् पशूनामेवैषा यतिस्ते श्वोविजयिनोऽवसँस्तेऽब्रुवन् कस्य वाहेदं श्वो भविता कस्य वा
पचतेति त एतमोदनमपचन्त तेऽब्रुवन् माहुतमश्निष्मेति ते मरुद्भ्यो गृहमेधेभ्योऽजुहवुः पशवो
वै मरुतो गृहमेधास्तेभ्य एव तदजुहवुस्ते संयत्ता आसँस्तेऽसुरा देवेभ्यः क्षुधं प्राहिण्वँस्तां देवाः
प्रतिश्रुत्यैतमोदनमपचन्त सा देवेषु लोकमविन्त्वा पुनरसुरान् प्राविशत् सैनान्निरदहदपि प्रतिवेश
ओदनं पचेत भ्रातृव्यायैव क्षुधं प्रहिणोति सैनं निर्दहति ॥ यद्वै चातुर्मास्यानां पाकयज्ञस्यैव तदेषां
पशव्यं गृहमेधो वै पाकयज्ञो न प्रयाजा इज्यन्ते नानुयाजा न सामिधेनीरन्वाहाज्यभागौ यजति
तेन यज्ञः क्रियतेऽग्नये समवद्यत्यग्निस्समिष्टिरग्निः प्रतिष्ठितिस्समिष्ट्या एव प्रतिष्ठित्यै पशवो वै
गृहमेधाः पशव इडा तस्मादिडामुपह्वयन्ते निष्कासो निधीयते संतत्यै तेषां वा उभयेषामिन्द्रः
प्रावसत् ते देवा एतमिन्द्राय भागं न्यदधुरस्माच्छ्वो निहितभागो वृणाता इति रुवथो वषट्कारो-
ऽथो असुराणामेव तद्वृषभमन्वाह्वयन्त्यस्मान् प्रजनयादित्यृषभमाह्वयतीन्द्रमेव तन्निह्वयतेऽथो पुष्टिमेव
भ्रातृव्यस्य वृङ्क्ते ॥९॥
१६–१७

सवत्सा गावो वसन्ति साकमेधत्वाय यत् पत्नी नाश्नीयादसाकमेधास्स्युर्यत् पत्न्यश्नाति साक-
मेधत्वाय निर्ऋतिर्वा एतद्यज्ञस्य गृह्णाति यत् स्त्र्यश्नाति निर्ऋतिर्वै स्त्री स्त्रिया एष हस्तो यद्दर्वि-
र्यद्दर्व्या जुहोति निर्ऋत्यैव निर्ऋतिं निरवदयते यद्वै यज्ञस्य स्वगाकृतिं न प्राप्नोति निर्ऋतिस्तद्गृह्णाति
निर्ऋतिगृहीता वै दर्विस्तर्हि लेपावचरति यद्दर्व्या जुहोति निर्ऋतिगृहीतयैव निर्ऋतिं निरवदयते स
श्वो वृत्रँ हन्तुमुपप्लायत तं मरुतः परिक्रीडन्त आयँस्तेऽस्याप्त्वा व्यनयँस्त एनमभ्यवर्धयँस्तस्मात्
क्रीडयस्ते संयत्ता आसँस्ते देवा असुराणां परमन्नं न परापश्यँस्ते मरुतः क्रीडीन् क्रीडतोऽपश्यँस्ते-
ऽविदुर्जितमनसो वा इम इति तेभ्य एतं भागं निरवपँस्ततोऽजयन् विजित्या एवैषोऽसौ वा आदित्य
इन्द्रो रश्मयः क्रीडयस्ताकं रश्मिभिः प्रचरन्ति विजित्यै ॥ देवा वै वृत्रँ हतं न व्यजानँस्तं मरुतो-

[९] मै. १,१०,१५-१६ (४०-४१)। तै. ब्रा. १,६,६,४; १,६,७।
[१०] मै. १,१०,१६ (४१)। तै. ब्रा. १,६,७।

ऽभ्यक्रीडँस्तस्मात् क्रीडयोऽथैतानि पञ्च हवींषि संतत्या अथैन्द्राग्न इन्द्राग्नी वै तं वज्रेणाभ्यौहतामथो
आहुरिन्द्राग्नी अस्मै वज्रमनुविभृतामित्यथैन्द्र एतेन वा इन्द्रो वृत्रमहन् स एतमुद्धारमुदहरतोद्धार
एवास्यैष भाग एवाथ वैश्वकर्मणो विश्वा मे कर्म कृतानीति विश्वकर्मा ह्यभवद्वृत्रँ हत्वाग्ने वेहोत्रं
वेदृत्यमित्याघारमाघारयत्याहुतीनाँ संपत्त्यै त्रिंशत्त्वाय ॥१०॥ १८–१९

प्रजास्सृष्ट्वाँहोऽवेज्य वृत्रँ हत्वा तेऽमृतत्वमकामयन्त स्वर्गो वै लोकोऽमृतत्वं द्वादश मासास्संव-
त्सरस्स्वर्गो लोको यद् द्वादशाहुतयोऽमृतत्वमेव तेन स्पृणोति सं वा एतत् संवत्सरमकक्षदापद्वा
एतत् सवत्सरं यत् षट् षट् संपादयति षड्वा ऋतव ऋतूनेवैतत् पुनरपिपादयति तानपिपद्यमानान-
न्वपिपद्यते ततः प्रजायतेऽति वा एतत् संवत्सरमगाद्यद् द्वादशाहुतयस्संवत्सरमेवाभिपर्यावर्तत
आपद्वा एतत् संवत्सरं पितर ऋतवस्तमेव प्रजनयति तं प्रजायमानमनुप्रजायत एतद्वा अस्य संवत्सरो-
ऽभीष्टोऽभूदभीष्टा ऋतवोऽथास्य पितरोऽनभीष्टा यदेष पितृयज्ञस्तेनास्य पितरोऽभीष्टाः प्रीता
भवन्ति ॥ दक्षिणतो निरुप्यं दक्षिणा हि पितॄणामुभयतो निरुप्यमुभये हीज्यन्ते तत् तन्न सूक्ष्यं
दक्षिणत एव निरुप्यं दक्षिणा हि पितॄणाँ षट्कपालः पुरोडाशो भवति षड्वा ऋतव ऋतव एवास्य
तेनाभीष्टाः प्रीता भवन्ति न वै धानाभिर्न मन्थेन यज्ञो यदेष पुरोडाशस्तेन यज्ञः क्रियतेऽथैता
धानास्सुधा वा एता अमुष्मिल्लोकेऽपरिमितास्संवत्सरस्य रात्रयस्ता एवास्यैताभिरभीष्टाः प्रीता
भवन्ति न वै धानाभिर्न पुरोडाशेन पितृयज्ञो यदेष मन्थस्तेन पितृयज्ञोऽभिवान्यवत्साया दुग्धे
भवति सा हि पितॄणां नेदिष्ठमेकयोपमन्थत्येकलोका हि पितरो दक्षिणोपमन्थति दक्षिणा हि
पितॄणामनारभ्योपमन्थति तद्धि पितॄन् गच्छति ॥११॥ २०–२१

न प्राच्युद्धरत्या पितृयज्ञो हि न दक्षिणा यज्ञो ह्युभे दिशा अन्तरोद्धरन्त्युभये हीज्यन्त उभयानेव
व्यश्नोति देवाँश्च पितॄँश्च चतुस्स्रक्तिर्वेदिर्भवति सर्वासु हि दिक्षु पितरः परिश्रिते याजयन्त्यन्तर्हिता
ह्यमुष्मादादित्यात् पितरोऽथो अन्तर्हिता हि देवेभ्यश्च मनुष्येभ्यश्च पितर उपमूलं बर्हिर्दाति तेन
पितॄणां यदतेमूलं तेन देवानामुभये हीज्यन्ते समन्तं बर्हिस्स्तृणन् पर्येति समन्तँ हीम ऋतवः परि-
विष्टा एति वा एषोऽस्माल्लोकाद्यः पितृयज्ञं पर्येति यदस्तृणन् पुनः पर्येतीममेव लोकमुपावर्तते-
ऽमुष्मिन् वै पूर्वस्मिन् देवता यजन्ति यत् तत्र यजेदाहुतीस्सँसृजेत् समदं कुर्याद्गार्हपत्ये शृतं कुर्वन्ति
तेन यज्ञः क्रियत ओदनपचनादग्निमाहरन्ति तदु स्विन्नान्यत आह्रियत उशन्तस्त्वा हवामह इत्य-
न्वाहोशन्तो हि पितरोऽनुष्टुभमन्वाहान्तो वा अनुष्टुबन्तः पितरोऽथो अनुष्टुब्भि सर्वाणि च्छन्दाँस्ये-

[११] मै. १,१०,१७ (४२)। तै. ब्रा. १,६,८।
[१२] मै. १,१०,१७-१८ (४२-४६)। वा. १९,७०। काण्व. २१,७०। तै. ब्रा. १,६,८-९।
[उशन्तस्त्वा०...अत्तवे० । ऋ. १०,१६,१२। अथर्व. १८,१,५६; १८,३,३४]

कामन्वाहैकलोका हि पितरस्त्रिरन्वाह तृतीये हि लोके पितरो यदेकामन्वाह तेन पितृणां यत् त्रिरन्वाह
तेन देवानामुभये हीज्यन्ते नार्षेयं वृणीते न होतारं मृत्योरेवैना उत्सृजत्यपबर्हिषः प्रयाजान् यजति
प्रजा वै बर्हिः प्रजा एव मृत्योरुत्सृजति संव्ययते वै मनुष्येभ्यः करिष्यन् दक्षिणतो देवेभ्य
उपव्ययतेऽथात्र प्राचीनावीतेन भव्यं व्यावृत्त्यै दक्षिणतोऽवदायोदङ्ङतिक्रम्य दक्षिणावृत्य जुहोति
दक्षिणा हि पितृणाम् ॥१२॥ २२

सोममग्रे यजति सोमो वै पितृणां देवता पितृदेवत्यो हि सोमो यत् सोमं पितृमन्तं यजति
सोमपाँस्तत् पितॄन् यजति यद्बर्हिषदो यज्वनस्तद्यदग्निष्वात्तान् गृहमेधिनस्तद्यदग्निं कव्यवाहनं द्वे
वा अग्नेस्तन्वौ हव्यवाहन्या देवेभ्यो हव्यं वहति कव्यवाहन्या पितृभ्योऽग्निस्समिष्टिरग्निः प्रतिष्ठिति-
स्समिष्टया एव प्रतिष्ठित्यै पञ्च पञ्च कृत्वोऽवद्यति पञ्च ह्यृतवस्स्वधा नम इति वषट्करोति स्वधा
हि पितृणां नमस्कारो देवानां द्वे वै देवानां याज्यानुवाक्ये अन्यया यच्छति गमयत्यन्ययाथात्र
तिस्रः कार्या व्यावृत्त्यै द्वे अनुवाक्ये एका याज्या परे वै देवेभ्यः पितरो यैषा तृतीयाभ्येवैतया
प्रयच्छति ॥ देवान् वै पितॄन् मनुष्याः पितरोऽनुप्रपिबन्ते देवानेवैतत् पितॄनयाड्यत् स्रक्तिषु नि-
दधाति तेन मनुष्यान् पितॄन् यजति त्रिर्निदधाति त्रीन् हीदं पुरुषानभिस्मरन्तीन् परानन्वाचष्टे त्रयो
वै पिता पुत्रः पौत्रोऽनुसंतत्यै सर्वासु स्रक्तिषु निदधाति सर्वा एव दिशो गमयति सर्वासु हि दिक्षु
पितरो नास्यां निदध्याद्यदस्यां निदध्यान्मृत्युनैनान् परिगृह्णीयात् तामेवानूद्यन्ति यत् तस्यां निमार्ष्टि
तेनैव तान् प्रीणात्यत्र पितरो मादयध्वमिति निष्क्रामन्ति त आहवनीयमुपायन्ति सुसंदृशं त्वा वयमि-
ति त आ तमितोस्तिष्ठन्त्यन्तं वा एते प्राणस्य गच्छन्ति ये पितृयज्ञमुपयन्त्यग्निमेवोपद्रष्टारं कृत्वान्तं
प्राणस्य गच्छन्ति परेत पितरस्सोम्यास इति पुनरायन्त्यनुपक्ता वा एतान् पितरो व्यावृत्त्या अमीमदन्त
पितर इति प्रपद्यन्ते त ऊर्णां वा दशां वा न्यस्यन्ति यदेव तत्र निगच्छन्ति तस्य निरवत्त्या अपः
परिषिञ्चति मार्जयत्येव पुनरपरिषिञ्चन् पर्येत्यमुं वा एते लोकं निगच्छन्ति ये पितृयज्ञमुपयान्ति
प्रजापतिस्त्वा एनानत उन्नेतुमर्हति यदेतामनिरुक्तां प्राजापत्यामन्वाहाया विष्टा जनयन् कवराणीति
प्रजापतिरेवैनाँस्तत उन्नयति पितॄन् वा एतद्यज्ञोऽगन् पङ्क्त्या पुनरायन्ति पाङ्क्तो यज्ञस्सहैव यज्ञे-
नायान्ति पितॄन् वा एतस्य मनो गच्छति मनो न्वह्वामह इति तदेव पुनरुपह्वयते॥१३॥२३-२४

एतद्वा अस्य संवत्सरोऽभीष्टोऽभूदभीष्टाः पितरोऽथास्य रुद्रा अनभीष्टा रुद्रास्त्र्यम्बका यदेते
त्र्यम्बकास्तेनास्य रुद्रा अभीष्टाः प्रीता भवन्ति प्रतिपुरुषं भवन्ति प्रतिपुरुषमेव रुद्रं निरवदयत

[१३] मै. १,१०,३; १८-१९ (१०-१८, ४४-४७)। वा. २,३१; ३,५२; १९,५८। काण्व. २,५६; ३,६०; २१,५९।
तै. ब्रा. १,६,८-९।
[१४] मै. १,१०,४; २० (२२-२७, ४८-५०)। वा. ३,५७-६१। काण्व. ३,६५-७०। तै. ब्रा. १,६,१०।
काठ० ४६

एकोऽधि भवति गर्भेभ्य एव तेन रुद्रं निरवदयत एककपाला भवन्ति न वै पुरुषं कपालैराप्नुमर्ह-
त्येकधैवैनमाप्नोत्यभिघार्या३ नाभिघार्या३ इति मीमाँसन्ते अभिघार्या एव न हि हविरनभिघृतं
यदभिघारयेद्रुद्रं पशूनन्ववनयेत् तस्मान्नाभिघार्या एकोल्मुकँ हरन्त्येकोल्मुकँ हि रुद्राणां धूपाय-
द्धरन्ति धूपायद्धि रुद्राणां पराचीनँ हरन्ति पराञ्चमेव रुद्रँ हरन्तीमां दिशँ हरन्त्येतस्यां वै दिशि
रुद्राणां गृहा गृहेष्वेव रुद्रं निरवयजते॥ रुद्राखुं ते पशुं करोमीत्याखुकिरा एकमुपवपति पशुभ्य एव
रुद्रं निरवदयते तस्मात् तान् पशुपतिर्घातुकश्चतुष्पथे याजयन्ति चतुष्पथे वै रुद्राणां गृहा गृहेष्वेव
रुद्रं निरवयजत एष ते रुद्र भागस्सह स्वस्राम्बिकया तं जुषस्व स्वाहेति शरद्वै रुद्रस्य स्वसाम्बिका
तामेषोऽन्ववचरति तस्मादेष शरदि भूयिष्ठं हन्ति तयैवैनँ सह निरवदयते मध्यमेन पर्णेन जुहोति
तद्धयरक्षोहतं यद्ग्राम्येण जुहुयाद्रुद्रः पशूनन्ववनयेत् तस्मादारण्येन हूयतेऽवाम्ब रुद्रमदिमहीत्य-
नृणा एवाभूवन भेषजं गवेऽश्वाय पुरुषाय चेत्यनृणा एव भूत्वा भेषजमक्रत ॥ त्र्यम्बकं यजामह
इति परियन्ति या पतिकामा स्यात् सापि परीयात् पतिवेदनमेवास्यै कुर्वन्ति तानुदस्य प्रतिलभन्ते-
ऽनृणा एव भूत्वा भगं प्रतिलभन्ते तान् यजमानाय समावपन्ति भगमेवास्मै समावपन्ति या पति-
कामा स्यात् तस्यै समावपेयुर्भगमेवास्यै समावपन्ति तान् मूते कृत्वा वृक्ष आसजन्त्येष ते रुद्र
भागस्तेनावसेन परो मूजवतोऽतीहीति गिरिर्वै रुद्रस्य योनिस्तत एषोऽभ्यवचरति स्वेनैवैनं भाग-
धेयेन स्वं योनिं गमयत्यनपेक्षमाणा आयान्ति रुद्रस्यानन्ववायायैधोऽस्येधिषीमहीति रुद्रमेव निर-
वदायैधतुमुपयन्ति समिदसि समेधिषीमहीत्याशिषमेवाशास्ते तेजोऽसि तेजो मयि धेहीति तेज
एवात्मन् धत्तेऽम्बी वै स्त्री भगानाम्नी तस्मात् त्र्यम्बका अप्रतिष्ठितो वा एष यस्याप्रतिष्ठितँ हवि-
रप्रतिष्ठितास्त्र्यम्बका न प्रयाजा इज्यन्ते नानुयाजा न सामिधेनीरन्वाहादित्यै चरुं निर्वपतीयं वा
अदितिरियं प्रतिष्ठास्यामेव प्रतितिष्ठति ॥१४॥ २५-२७

अपां यो द्रवणे रसस्तमहमस्मा अमुष्मा आमुष्यायणाय तेजसे वर्चसे गृह्णाम्यपां य ऊर्मौ रस-
स्तमहमस्मा अमुष्मा आमुष्यायणायौजसे क्षत्राय गृह्णाम्यपां यो मध्ये रसस्तमहमस्मा अमुष्मा
आमुष्यायणाय प्रजायै पुष्ट्यै गृह्णाम्यपां या यज्ञिया तनूस्तामहमस्मा अमुष्मा आमुष्यायणायायुषे
दीर्घायुत्वाय गृह्णामि ॥ २८

रथे अक्षेषु वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ २९

[एधोऽस्येधिषीमहि०। अथर्व. ७,९४,४]
[१५] वा. १२,५६; १४,१३; १५,११-१३,६१; १७,६१। काण्व. १३,५७; १५,१६, १६,१९,२२,२५,८२; १८,९१।
तै. ब्रा. २,७,७। [रथे अक्षेषु वृषभस्य०। अथर्व. ६,३८,२]

या हस्तिनि द्वीपिनि या हिरण्ये गोष्वश्वेषु पुरुषेष्वन्तः।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ ३०
सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ ३१
या राजन्ये दुन्दुभावायतायामश्वस्य क्रन्दे पुरुषस्य मायौ।
इन्द्रं या देवी सुभगा जजान सेयमागाद्वर्चसा संविदाना ॥ ३२

राडसि विराडसि सम्राडसि स्वराडसीन्द्राय त्वा मधुमते मधुमन्तँ श्रीणामीन्द्राय त्वौजस्वत
ओजस्वन्तँ श्रीणामीन्द्राय त्वा पयस्वते पयस्वन्तँ श्रीणामीन्द्राय त्वायुष्मत आयुष्मन्तँ श्रीणामि
वर्चोऽसि तन्मे नियच्छ तत् ते नियच्छाम्योजोऽसि तन्मे नियच्छ तत् ते नियच्छामि पयोऽसि
तन्मे नियच्छ तत् ते नियच्छाम्यायुरसि तन्मे नियच्छ तत् ते नियच्छामि ॥ ३३

वर्चस्वदस्तु मे मुखं वर्चस्वच्छिरो अस्तु मे।
वर्चस्वान् विश्वतः प्रत्यङ् वर्चसा संपिपृग्धि मा ॥ ३४
ओजस्वदस्तु मे मुखमोजस्वच्छिरो अस्तु मे।
ओजस्वान् विश्वतः प्रत्यङ्ङोजसा संपिपृग्धि मा ॥ ३५
पयस्वदस्तु मे मुखं पयस्वच्छिरो अस्तु मे।
पयस्वान् विश्वतः प्रत्यङ् पयसा संपिपृग्धि मा ॥ ३६
आयुष्मदस्तु मे मुखमायुष्मच्छिरो अस्तु मे।
आयुष्मान् विश्वतः प्रत्यङ्ङायुषा संपिपृग्धि मा ॥ ३७

इदमहं गायत्रेण च्छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्नाग्निना देवतया तेजस्ते वर्च आददे-
ऽसा इदमहं त्रैष्टुभेन च्छन्दसा पञ्चदशेन स्तोमेन बृहता साम्नेन्द्रेण देवतयौजस्ते क्षत्रमाददेऽसा
इदमहं जागतेन च्छन्दसा सप्तदशेन स्तोमेन वैरूपेण साम्ना विश्वैर्देवैर्देवतया प्रजां ते पुष्टिमाददे-
ऽसा इदमहमानुष्टुभेन च्छन्दसैकविंशेन स्तोमेन वैराजेन साम्ना प्रजापतिना देवतयायुस्ते दीर्घा-
युत्वमाददेऽसौ ॥ ३८

इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥ ३९

[या हस्तिनि द्वीपिनि०। अथर्व. ६,३८,२। सिंहे व्याघ्र उत०। अथर्व. ६,३८,१। या राजन्ये दुन्दु-
भा०। अथर्व. ६,३८,४। इममग्न आयुषे वर्चसे०। मै. २,३,१७; अथर्व. २,२८,५; तै. ब्रा. २,७,७,५]

विश्वकर्मा विश्वदेवो विश्वजिद्विश्वदर्शतः। वै त्वा घृतस्य धारया श्रैष्ठ्याय समसूषत ॥ ४०
यतो वातो मनोजवा यतः क्षरन्ति सिन्धवः।
तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥ ४१
अभि त्वा वर्चसासिचं यज्ञेन पयसा सह।
यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥ ४२
इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ ४३

अपां यो द्रवणे रसस्तेनाहमिमममुमामुष्यायणममुष्याः पुत्रं तेजसे ब्रह्मवर्चसायाभिषिञ्चाम्यपां
य ऊर्मौ रसस्तेनाहमिमममुमामुष्यायणममुष्याः पुत्रमोजसे क्षत्रायाभिषिञ्चाम्यपां यो मध्ये रसस्ते-
नाहमिमममुमामुष्यायणममुष्याः पुत्रं प्रजायै पुष्ट्या अभिषिञ्चाम्यपां या यज्ञिया तनूस्तयाहमिमम-
मुमामुष्यायणममुष्याः पुत्रमायुषे दीर्घायुत्वायाभिषिञ्चामि ॥१५॥ ४४

[२३२१]

॥ इति श्रीयजुषि काठके चरकशाखायामौरिमिकायां चातुर्मास्यानि नाम षट्त्रिंशं स्थानकं संपूर्णम् ॥३६॥

अथ सप्तत्रिंशं स्थानकम्।

सवाः।

प्रजापतिः प्रजा असृजत ता अस्मादपाक्रामँस्ता अकामयतोप मावर्तेरन्निति स एतमोदनमपचत्
सोऽन्नमेव भूत्वैकधातिष्ठत् ता अन्यत्रान्नमविन्दन्ता ताः प्रजापतिमेवैकधान्नायायाभिसमावर्तन्त
यावतीर्ह वै कियतीश्च प्रजा वाचं वदन्ति ता एनमेकधान्नायायाभिसमावर्तन्ते य एतेनाभिषिच्यते
स एष ओदनसवो राडसि विराडसीत्येतानीव सर्वाणि भवन्ति सर्वाण्यन्नानि भवन्ति सर्वे पुरुषा-
स्सर्वाण्येवान्नान्यवरुन्द्धे सर्वान् पुरुषान् हिरण्यं ब्रह्मणे ददाति तेजस्तेन परिक्रीणाति तिसृधन्वं
राजन्यायौजस्तेन परिक्रीणात्यष्ट्रां वैश्याय पुष्टिं तेन परिक्रीणाति माषकमण्डलुं शूद्रायायुस्तेन
परिक्रीणाति हिरण्यमावध्नाति तदेवास्मिन् प्रतिष्ठापयति॥ यदोदनं प्राश्नात्येतदेव सर्वमवरुध्य तद-
स्मिन्नेकधा दधाति रोहिण्यां क्रियते यद् ब्राह्मणा रोहिणी तस्माद्यद्धाति सूर्ये क्रियत एतद्वै प्रजापते

[जरदष्टिर्यथासत्०। ऋ. परि. १७,८; अथर्व. ८,५,२१। तासां त्वा सर्वासा०। अथर्व. ४,८,५(उत्तरार्धः)।
अभि त्वा वर्चसासिचं०। अथर्व. ४,८,६, तै. ब्रा. २,७,१५,४। इन्द्रं विश्वा अवीवृधन्०। ऋ. १,११,१;
सा. ३४३,८२७; तै. सं. ४,६,३,४ तै. ब्रा. २,७,१५,५]
[१] मै. १,८,१,९; २,५,६। तै. ब्रा. २,७,९।

रूपं यदेष उदेति सर्वा वा एतं प्रजाः प्रतिनन्दन्ति दिदृक्षेण्यो ह दर्शनीयो भवत्यवेत्योऽवभृथा३
नावेत्या३ इति मीमाँसन्ते यदर्भपिञ्जूलैः पावयति तदेवावैति तदु नावैत्युभयमेव करोति द्वाभ्यां
पावयति द्वे सत्यं चानृतं च सत्येनैवास्यानृतं पावयति द्वौ प्राणश्चापानश्च त्रिभिः पावयति त्रिपत्या
हि देवा अथो त्रयो हि प्राणाः प्राणो व्यानोऽपानः पञ्चभिः पावयत्यपां वा एतदोषधीनां तेजो
यद्दर्भा यद्दर्भपिञ्जूलैः पावयत्यपामेवैनमोषधीनां तेजसाभिषिञ्चति ॥१॥ १-२

आग्नेयोऽष्टाकपालस्सौम्यश्चरुस्सावित्रोऽष्टाकपालो बार्हस्पत्यश्चरुरग्नीषोमीय एकादशकपाल-
स्सारस्वतश्चरुर्वारुणो यवमयो दशकपालो द्यावापृथिव्य एककपालो यदाग्नेय आग्नेयो हि ब्राह्मणो यत्
सौम्यस्सौम्यो हि ब्राह्मणो यत् सावित्रः प्रसवायैव सावित्रो यद्बार्हस्पत्यो ब्रह्म वै बृहस्पतिरेतद्ब्राह्म-
णस्य वाक्पत्यं यदग्नीषोमीय आग्नेयो हि सौम्यो ब्राह्मणस्तौ यदा संगच्छेते अथ वीर्यावान् भवति
यत् सारस्वतो वाग्वै सरस्वत्येतद्ब्राह्मणस्य प्रत्यक्षं वाक्पत्यं यद्वारुणो निर्वरुणत्वायैव वारुणो यो
ह्येव कश्च सन् सूयते स वारुणो यद् द्यावापृथिव्य इन्द्रो वै वृत्राय वज्रमुदयच्छत तं द्यावापृथिवी
नान्वमन्येतां तमेतेन भागधेयेनान्वमन्येतां वज्रस्य वा एषोऽनुमानोऽनुमतवज्रस्सूयाता इति यदष्टौ
हवींष्यष्टाक्षरा गायत्री ब्रह्म गायत्री ब्रह्मणा सूयाता इति कृष्णाजिनेऽध्यभिषिच्यत ऋक्सामयोर्वा
एतद्रूपं यत् कृष्णाजिनमृक्सामयोरेवाध्यभिषिच्यते हिरण्येन घृतमुत्पुनाति तेजस एव रुचे यद्
घृतेनाध्यभिषिच्यते तेन ह श्रेष्ठ्यं प्राप्नोति ॥२॥ ३

आग्नेयोऽष्टाकपालः पौष्णश्चरुस्सावित्रोऽष्टाकपालो वैश्वदेवश्चरुस्त्वाष्ट्रोऽष्टाकपालो वारुणो यवमयो
दशकपालो मारुतस्सप्तकपालो मारुती पृश्निर्वशा यदाग्नेय ऋद्ध्या एवाग्नेयोऽग्निमुखा ह्यृद्धिर्यत् पौष्णः
पुष्ट्यै पूषा पुष्टिर्वैश्यस्य यद् सावित्रः प्रसवायैव सावित्रो यद्वैश्वदेवो वैश्वदेवो हि वैश्यो यत् त्वाष्ट्र-
स्त्वष्टा हि रूपाणि विकरोति यद्वारुणो निर्वरुणत्वायैव वारुणो यो ह्येव कश्च सन् सूयते स वारुणो
यन्मारुतो मारुतो हि वैश्यो यत् सप्त हवींषि सप्त हि मरुतोऽथैषा मारुती पृश्निर्वशा तस्या अग्नये
समवत्तं भवत्यथाभिषिच्यते विड्वै मरुतो विश एव मध्यतोऽभिषिच्यते तस्मादेष विशः प्रियो विशो
हि मध्यतोऽभिषिच्यत ऋषभचर्मेऽध्यभिषिच्यते स हि प्रजनयिता प्रजननाय दध्नाभिषिच्यते मृदु
दधि मृदुमेवैनं करोति ॥३॥ ४

नराशँसस्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवश्शुचयो धियंधास्स्वदन्ति देवा उभयानि हव्या ॥ ५

[१] मै. १,१०,१; २,६,९ । तै. ब्रा. ७,३ ।
[३] मै. १,१०,१; २,६,९ । तै. ब्रा. २,७,२ ।
[४] मै. ४,१३,१३ । तै. ब्रा. २,७,५ । [नराशँसस्य महिमान० । ऋ. ७,२,२; तै. ब्रा. ३,६,३,१; नि. ८,७]

यो वै सोमेन यजते स देवसवो यः पशुना यजते स देवसवो य इष्टया यजते स मनुष्यसव
एतं वै पृथ्यै देवा अन्वमन्यन्त तेनैनमभ्यभिषिञ्चन् सोऽप्यारण्यानां पशूनामसूयत यावतीर्वै
कियतीश्च प्रजा वाचं वदन्ति तासाँ सर्वासाँ सूयते य एतेनाभिषिच्यते निह्नुत्यैवैतदभिषिच्यते
नाराशँस्यर्चा मनुष्या हि नराशँसो यत् किंच राजसूयेऽनुत्तरवेदिकं तदत्र सर्वं क्रियतेऽथैष मारुत
एकविंशतिकपालस्तस्याग्नये समवत्तं भवत्यथाभिषिच्यते त्रिर्वै सप्त सप्त मरुतो विण्मरुतो विश एव
मध्यतोऽभिषिच्यते तस्मादेष विशः प्रियो विशो हि मध्यतोऽभिषिच्यते ॥४॥ ६

सं ते पयाँसि समु यन्तु वाजास्सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवाँस्युत्तमानि धिष्व ॥ ७

न वै सोमेन सोमस्य सवोऽस्त्यभिषिक्तो हि सोमो घ्नन्ति हि सोमं न हि हतस्सूयते सौम्या
त्रिष्टुभाभिषिच्यते सा हि सोमसवस्सौम्याँ सूतवशायामध्यभिषिच्यते सा हि रेतोधा रेतस्सोमो यत्
किंच राजसूयेऽन्यत् स्तोमेभ्यस्तदत्र सर्वं क्रियतेऽथैष मारुत एकविंशतिकपालस्तस्याग्नये समवत्तं
भवत्यथाभिषिच्यते त्रिर्वै सप्त सप्त मरुतो विण्मरुतो विश एव मध्यतोऽभिषिच्यते तस्मादेष विशः
प्रियो विशो हि मध्यतोऽभिषिच्यते ॥५॥ ८

यद्वै राजसूयँ स वरुणसवो यद्वाजपेयँ स सम्राट् सवः प्रजापतिस्साम्राज्यं परमेष्ठी स्वाराज्यं गौरेव
स एष गोसवो यथैव ह गौरेवमिव भवति य एतेनाभिषिच्यते प्रतिदुहाभिषिच्यते तद्धि स्वाराज्यं
बृहत्साम तद्धि स्वाराज्यमयुतं दक्षिणा तद्धि स्वाराज्यं पवमाने कण्वरथंतरं प्रोहन्ति दक्षिणत
आहवनीयस्यानुद्धृतेऽभिषिच्यत इयं वै गौरस्या एवानन्तर्हितोऽभिषिच्यते षट्त्रिँशस्स्तोमो भवति
पशुस्तोमो वा एष तेन गोसवः ॥६॥ ९

त्रिवृत्स्तोमो ब्रह्मवर्चसं वै त्रिवृद्ब्रह्मवर्चसेनैवाभिषिच्यते रथंतरँ साम ब्रह्मवर्चसं वै रथंतरं ब्रह्म-
वर्चसेनाभिषिच्यतेऽग्निष्टोमस्स्तोमो ब्रह्मवर्चसं वा अग्निष्टोमो ब्रह्मवर्चसेनैवाभिषिच्यते प्रवर्ग्यः
प्रवृज्यते ब्रह्मवर्चसं वै प्रवर्ग्यो ब्रह्मवर्चसेनैवाभिषिच्यते परिस्रजी होतारुणो मिर्मिरस्त्रिशुक्रिय एतद्वै
ब्रह्मवर्चसस्य रूपं रूपेणैव ब्रह्मवर्चसमवरुन्द्ध एकं वा एतत् सवनं यदेकस्स्तोम एकं छन्द एकादशै-
कादशानुसवनं दद्यात् सवनानां व्यावृत्त्यै त्रयस्त्रिँशत् संपद्यन्ते त्रयस्त्रिँशद्देवता देवता एवावरुन्द्धेऽश्वं
चतुस्त्रिँशं ददाति प्रजापतिश्चतुस्त्रिँशः प्रजापतिमेवाप्नोति बृहस्पतये वै देवा न श्रदद्धत तमेतेन

[५] मै. २,७,१९६ । तै. ब्रा. २,७,४ । वा. १२,११३ । काण्व. १३,११२ । [सं ते पयाँसि समु० । ऋ. १,९१,
१८; तै. सं. ४,२,७,४]
[६] तै. ब्रा. २,७,६ । [७] तै. ब्रा. २,७,१ ।

प्रजापतिरयाजयत् ततोऽस्मै श्रदद्धत स एष बृहस्पतिसवो ब्रह्मवर्चसकाम एतेन यजेत ब्रह्मवर्चसी
भवति तस्यैषैव नियतिः प्रजास्सर्वा ब्राह्मणीर्ब्रह्मवर्चसिनीर्भवन्ति ॥७॥ १०

पञ्चदशस्स्तोम ओजो वै वीर्यं पञ्चदश ओजसैव वीर्येणाभिषिच्यते बृहत्सामौजो वै वीर्यं बृह-
दोजसैव वीर्येणाभिषिच्यत उक्थ्यस्स्तोम ओजो वै वीर्यमुक्थान्योजसैव वीर्येणाभिषिच्यत ऐन्द्रँ
स्तोत्रं च शस्त्रं च त्रैष्टुभाः पवमाना ओजो वै वीर्यं त्रिष्टुबोजसैव वीर्येणाभिषिच्यत इन्द्रं वै सर्वा
मृधस्सर्वा नाष्ट्रास्सर्वाणि रक्षाँस्यजिघाँसँस्तमेतेन प्रजापतिरयाजयत् स सर्वा मृधस्सर्वा नाष्ट्रास्सर्वाणि
रक्षाँस्यतरदिन्द्रो यजमानो यदेतेन यजते सर्वा एव मृधस्सर्वा नाष्ट्रास्सर्वाणि रक्षाँसि तरति स एष
इन्द्रसवः ॥८॥ ११

सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै ।
अथास्मभ्यं सवितर्वार्याणि दिवो दिव आसुवा भूरि पश्वः ॥ १२
भूतो भूतेषु चरति प्रविष्टस्स भूतानामधिपतिर्बभूव ।
तस्य मृत्यौश्चरति राजसूयँ स राजा राज्यमनुमन्यतामिदम् ॥ १३
येभिश्शिल्पैः पप्रथानामदृँहद्येभिर्द्यामभ्यपिंशत् प्रजापतिः ।
येभिर्वाचं विश्वरूपेभिरव्ययँस्तेनेममग्न इह वर्चसा समङ्ग्धि ॥ १४
येभिरादित्यस्तपति प्र केतुभिर्येभिस्सूर्यो ददृशे चित्रभानुः ।
येभिर्वाचं पुष्कलेभिरव्ययँस्तेनेममग्न इह वर्चसा समङ्ग्धि ॥ १५
आयं भातु शवसा पञ्च कृष्टीरिन्द्र इव ज्येष्ठो भवतु प्रजानाम् ।
अस्मिन्नस्तु पुष्कलं चित्रभान्वायं पृणातु रजसा विमानम् ॥ १६
यत् ते शिल्पं कश्यप रोचनावदिन्द्रियावत् पुष्कलं चित्रभानु ।
यस्मिन् सूर्या अर्पितास्सप्त साकं तस्मिन् राजानमधि विश्रयेमम् ॥ १७
व्याघ्रो वैय्याघ्रे अधि विक्रमस्व दिशो महीः ।
विशस्त्वा सर्वा वाञ्छन्त्वापो दिव्याः पयस्वतीः ॥ १८
या आपो दिव्याः पयसा संबभूवुर्या अन्तरिक्ष्या उत पार्थिवासः ।
तासां त्वा सर्वासां रुचाभिषिञ्चामि वर्चसा ॥ १९

[९] मै. २,६,१०; २,१०,४२ । वा. ८,४३; १३,४६; १४,६१; १७,६१; ३३,४४ । काण्व. ८,२५; २३,५७; १६,
८२,३८,६१; ३२,४४ । तै. ब्रा. २,७,१५—१६; २,७,८ [सावीर्हि देव प्रथमाय० । अथर्व. ७,१४,३ ।
भूतो भूतेषु चरति० । अथर्व. ४,८,१ । व्याघ्रो वैय्याघ्रे अधि० । अथर्व. ४,८,४ । या आपो दिव्याः
पयसा० । अथर्व. ४,८,५]

अभि त्वा वर्चसासिचं यज्ञेन पयसा सह ।
यथासो मित्रवर्धनस्तथा त्वा सविता करत् ॥ २०
इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानाँ सत्पतिं पतिम् ॥ २१
अभि प्रेहि वीरयस्वोग्रश्चेत्ता सपत्नहा । आतिष्ठ मित्रवर्धनस्तुभ्यं देवा अधिब्रुवन् ॥ २२
आतिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनँ सु ते मनो ग्रावा कृणोतु वग्नुना ॥ २३
आतिष्ठन्तं परि विश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत् तदस्यासुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥ २४
अनु त्वेन्द्रो मदत्वनु बृहस्पतिरनु सोमो अन्वग्निरावीत् ।
अनु त्वा विश्वे अवन्तु देवास्सप्त राजानो य उदाभिषिक्ताः ॥ २५
अनु त्वा मित्रावरुणा इहावतामनु द्यावापृथिवी ओषधीभिः ।
सूर्योऽहोभिरनु त्वावतु चन्द्रमा नक्षत्रैरनु त्वावीत् ॥ २६
द्यौश्च त्वा पृथिवी च प्रचेतसा यज्ञो बृहद्दक्षिणा त्वा पिपर्तु ।
अनु स्वधा चिकितां सोमो अग्निरनु त्वावतु सविता सवेन ॥ २७
एना व्याघ्रं परिषस्वजानाँ सिंहं हिन्वन्ति महते धनाय ।
मर्मृज्यन्ते द्वीपिनमप्स्वन्तरुक्षं न सुम्भुस्तस्थिवाँसम् ॥९॥ २८

बोधश्च मा प्रतीबोधश्च पुरस्ताद्गोपायतामस्वप्नश्च मानवद्राणश्च दक्षिणतो गोपायतां गोपायमानश्च
मा रक्षमाणश्च पश्चाद्गोपायतां जागृविश्च मारुन्धती चोत्तराद्गोपायताम् ॥ २९
अनमित्रं नो अधरागनमित्रमुदक् कृधि । इन्द्रानमित्रं नः पश्चादनमित्रं पुरस्कृधि ॥ ३०
अनमित्रैरहोभिस्सचीमहि विश्वे देवा ह्यनमित्रा न उपसस्सन्तु निम्रुचः ॥ याष्षडुर्वीः पञ्च
प्रदिशस्ता नः पान्तु मित्रधा नो मित्रे दधाता अभयं नो अस्तु ॥ ३१-३२

[अभि त्वा वर्चसासिचं० । अथर्व. ४,८,६ । इन्द्रं विश्वा अवीवृधन्० । ऋ. १,११,१; सा.
३४३,८२७; तै. सं. ४,६,३,४; तै. ब्रा. २,७,१५,५ । अभि प्रेहि वीरयस्व० अथर्व. ४,८,२ । आतिष्ठ वृत्र-
हन् रथं० । ऋ. १,८४,३; तै. सं. १,४,३७,१ । आतिष्ठन्तं परि विश्वे० । ऋ. ३,३८,४; अथर्व. ३,८,३;
तै. ब्रा. २,७,८,१ । द्यौश्च (ना) त्वा पृथिवी च प्रचेतसा० । ऋ. १०,३६,२; अथर्व. ६,५३,१ । एना व्याघ्रं
परिषस्व० । अथर्व. ४,८,७]
[१०] [बोधश्च मा प्रतिबोधश्च० । अथर्व. ८,१,१३ । अनमित्रं नो अधरा० । अथर्व. ६,४०,३]

ये रात्रीमनुतिष्ठथ ये च भूतेषु जागृथ । पशून् ये सर्वान् रक्षथ ते न आत्मसु जागृत ॥ ३३
बोध प्रतिबोधास्वप्नानवद्राण गोपायमान रक्षमाण जागृवऽरुन्धति ये देवास्तनूपास्स्थ ते म इह
तन्वं पात बोध प्रतीबोधेत्यसौ वा आदित्यो बोधोऽग्निः प्रतीबोधोऽस्वप्नानवद्राणेति चन्द्रमा वा
अस्वप्नो यः पवते सोऽनवद्राणो गोपायमान रक्षमाणेत्यहर्वै गोपायमानो रात्री रक्षमाणो जागृवे-
ऽरुन्धतीति यज्ञो वै जागृविर्दक्षिणारुन्धत्येते वै देवा राष्ट्रभृतस्तानेवेह्न आत्मनो गोपीथाय ॥१०॥
३४

ये राष्ट्रभृतो ये राष्ट्रस्यानुभर्तारस्तेभ्यो राष्ट्रीयः परिदेय इमे वाव ते प्राणास्तेभ्य एवैनं परिददाति
तेषामेताः पत्न्यस्तानेता अनु ताभ्योऽत्रापि कार्यं ताभ्य एवैतत् क्रियते ता हुता अनु पुरोधाकामः
कुर्वीत ब्रह्म चैव क्षत्रं च सयुजौ करोति यदि क्षत्रमभिचरेत् स न इदं ब्रह्म पात्विति ब्रूयाद्ब्रह्म क्षत्र-
मपि ब्रह्मणि वै क्षत्रं प्रतिष्ठितं ब्रह्मण एव क्षत्रमन्तरेति ताजक् प्रधन्वत्यपरुरुत्स्यमानः कुर्वीत संग्रामे
कुर्वीत ये राष्ट्रभृतो ये राष्ट्रस्यानुभर्तारस्तानेवोपासरत् तेऽस्मै राष्ट्रमनुबिभ्रति य एषां लोकानां द्वन्द्वं
राष्ट्रभृतो वेद नास्य राष्ट्रं व्यथते ॥ अग्निश्चास्यां मनश्च वायुश्चान्तरिक्षस्य यज्ञश्च सूर्यश्च दिवश्चन्द्रमाश्च
रथस्सप्तथस्सं हि भयादपवहति त्रिपप्ताः कत्रचिनस्त्रिपप्ता निपङ्गिणस्त्रिपप्ता आयुधिनस्तेभ्यो
राष्ट्रीयः परिदेय इमे वाव ते प्राणास्तेभ्य एवैनं परिददात्यभितो वा अग्निष्टोमे देवासुरा यत्ता
आसन्नग्निष्टोमे देवा उक्थेष्वसुरास्ते देवा यदोक्थान्यागच्छन् यदोक्थान्यभ्यजयन्नथेन्द्रोऽब्रवीत्
कश्चाहं चेदमाहरिष्याव इत्यहं चेत्यब्रवीद्वरुणस्त्वं वरुणोऽन्वतिष्ठतेन्द्र आहरत् सोऽब्रवीत् कश्चाहं
चेदमाहरिष्याव इत्यहं चेत्यब्रवीद्बृहस्पतिस्त्वं बृहस्पतिरन्वतिष्ठतेन्द्र आहरत् सोऽब्रवीत् कश्चाहं चेद-
माहरिष्याव इत्यहं चेत्यब्रवीद्विष्णुस्त्वं विष्णुरन्वतिष्ठतेन्द्र आहरदेताभिर्वै देवताभिस्सायुज्येन देवा
असुराणां राष्ट्रमाददतैताभिरेव देवताभिस्सायुज्येन भ्रातृव्याद्राष्ट्रमादाय तद्राष्ट्रं कृत्वा ये राष्ट्रभृतो
ये राष्ट्रस्यानुभर्तारस्तेभ्य एनत् संप्रयच्छत्येतद्धि भृतैतन्मा रिपदित्यसौ वा आदित्यो राष्ट्रभृतयो
राष्ट्रभृतस्तेभ्य एवैनत् संप्रयच्छत्येतद्धि भृतैतन्मा रिपदिति य एषं सप्तथः प्रजापतिरेवैष यन्मध्ये
जुहुयाद्यत्रधून्वीतैनं परोगव्यूति होतव्युस्तथा हैनं न व्यवधूनुत ऊर्ध्वस्तिष्ठञ्जुहोत्यूर्ध्वो हि तिष्ठन्
वीर्यावत्तरः पूर्णया स्रुचा जुहोति पूर्णः प्रजापतिः प्रजापतिमेवाप्नोति ॥११॥ ३५–३६

देवाश्च वा असुराश्च समावदेव यज्ञेऽकुर्वत यदेव देवा अकुर्वत तदसुरा अकुर्वत ते देवा एतान्
राष्ट्रभृतोऽपश्यँस्तेषामग्निं चौषधीश्च प्रथमेनावृञ्जत सूर्यं च मनाँसि च द्वितीयेन चन्द्रमसं च नक्षत्राणि

[ये रात्री(०त्रिं०)मनुतिष्ठथ०। अथर्व. १९,४८,५]
[११] मै. २,१,१२ (२१)। [१२] मै. १,९,२०; १०,२८; २,५,३; ३,१०,१४; ४,३,४। तै. सं. ३,४,८।
काठ० ४७

च तृतीयेन यज्ञं च दक्षिणां च चतुर्थेन तेऽसुरा अयज्ञा अदक्षिणा अनक्षत्रा यत् किंचाकुर्वत तां
कृत्यामेवाकुर्वत तस्मान्नादक्षिणं गृहे हविष्कुर्वीत यत् कुरुते कृत्यां कुरुते प्रजापतिं चक्सोमानि च
पञ्चमेन वायुमप ओषधीरूर्जं षष्ठेनैतावद्वावास्ति यावदेवास्ति तदेषामेतैरवृञ्जत य एष सप्तथः
प्रजापतिरेवैष तेनैनाद् प्राणुदन्त ततो देवा अभवन् परासुरा अभवन्नेतैर्यजेत भ्रातृव्यवानेताव-
द्वावास्ति यावदेवास्ति तदेतैर्भ्रातृव्यस्य वृङ्क्ते य एष सप्तथः प्रजापतिरेवैष तेनैनं प्रणुदते भवत्या-
त्मना परास्य भ्रातृव्यो भवत्येतैर्याजयेद्राजानं संग्रामे संयत्त एतावद्वावास्ति यावदेवास्ति तदेषा-
मेतैर्वृङ्क्ते य एष सप्तथः प्रजापतिरेवैष तेनैनान् प्रणुदते जित्यै जयत्येवैतैर्याजयेद्यद्राष्ट्रं शिथिल-
मिवावहतं स्यात् तेषां यावन्तो रथास्स्युस्तान् सर्वान् योजयित्वा यच्छ्रेष्ठस्स्यात् तस्य दक्षिणं
रथचक्रं प्रवृह्य नाड्यां जुहुयाद्वीर्यं वै रथो वीर्येणैवैषां राष्ट्रं विसंश्यति रथचक्रं विगृह्णन्ति वज्रो वै
रथो वज्रेणैवैषां पाप्मानं विगृह्णन्ति यदि क्लृप्ताहुतिरत्येति कल्पत एभ्यो यस्य नाड्यां जुहोति
स दक्षिणा समृद्ध्यै ॥१२॥ ३७

कोऽसि कतमोऽसि को नामासि कस्मै त्वा कतमस्मै त्वा काय त्वा कामस्य त्वासन्नसा अपि-
दधामि स त्वं नो देव गायत्रेण च्छन्दसाह्ने परिपाहि मृडोऽसि मृडसे द्विपदे चतुष्पद आदित्यो-
ऽसि वृष्णो अश्वस्य रेतो देवानां यातुरसि यातुमेऽस्यसुमाद्धि तं जहि स त्वं नो देव त्रैष्टुभेन
च्छन्दसा रात्र्यै परिपाहि मृणोऽसि मृणामुष्य द्विपदश्चतुष्पदस्स्कम्भोऽसि वरुणस्य राज्ञो वरुणस्य
पाशस्सोऽमुमह्ने बधान श्लेष्कोऽसि निर्ऋत्याः पाशस्सोऽमुं रात्र्यै बधानाग्नये वीतमन्यवे स्वाहा ॥
३८

येनेन्द्रो वृत्रं निरहँश्छन्दसस्स्वादनुष्टुभः । तेनाहमद्य शँसेनामुं निर्हन्म्योकसः ॥१३॥ ३९

देवाश्च वा असुराश्च संयत्ता आसन्नसुरेषु तर्ह्यमृतमासीच्छुष्णे दानवे तच्छुष्ण एवान्तरास्येऽबि-
भर्यान् देवानामघ्नँस्तदेव तेऽभवन् यानसुराणां ताञ्छुष्णोऽमृतेनाभिव्यानीत् ते समानन् स इन्द्रो-
ऽवेदसुरेषु वा अमृतँ शुष्णे दानव इति मध्वष्ठीला भूत्वा प्रपथेऽशयत् ताँ शुष्णोऽभि व्याददात्
तस्येन्द्रश्श्येनो भूत्वास्यादमृतं निरमुष्णात् तस्मादेष वयसां वीर्यावत्तम इन्द्रस्य ह्येषैका तनूरमृत-
मेष बिभर्ति य एवं वेद यं कामयेतामयाविनं जीवेदिति तं व्यादायाभिव्यन्यादमृतेनैवैनमभि-
व्यनिति जीवति सर्वमायुरेति न पुरायुषः प्रमीयते ॥ देवाश्च वा असुराश्च संयत्ता आसँस्ते देवा
असुरानघ्नँस्तेषां य उदशिष्यन्त ते देवानन्वरोहँस्त एनान् वृञ्जानाः प्रत्यस्यमाना आयँस्ते देवा-
स्समितिमकुर्वत त एतौ ब्रह्मयातुं च देवयातुं चापश्यँस्ता एभ्यः प्रत्यवासृजँस्ता एनान्निरदहतां

[१३] वा. ७,२९; २०,४। काण्व. ९,४; २१,९५। [१४] मै. १,९,२०; १०,२८; २,५,३; ३,१०,१४; ४,३,४।

ता एनान् वृञ्जानौ प्रत्यस्यमाना ऐतां तेषां येऽत्यमुच्यन्त ते मनुष्यान् प्राविशँस्तज्जन्मानो यातु-
धानाः क्रव्याद इतरे न ह वा अस्य यातुधाना न क्रव्यादो न पिशाचा न रक्षाँसीशते नैनं शप्तं
नाभिचरितमागच्छति य एवं वेद ॥ तद्यदेनं यातुधान इति ब्रूयुर्नापह्नुवीतैतौ ह्येव तस्य यातू को-
ऽसि कतमोऽसीत्येष वै ब्रह्मयातुस्तस्मा एवैनमपिदधाति स त्वं नो देव गायत्रेण च्छन्दसाह्ने परि-
पाहीत्यह्न एवात्मानं परिददाति मृडोऽसि मृडसे द्विपदे चतुष्पद इति द्विपदश्चैवास्मै चतुष्पदश्च
पशून् परिददात्यादित्योऽसि वृष्णो अश्वस्य रेतो देवानां यातुरसि यातुमेऽस्यसुमद्धि तं जहीत्येष
वै देवयातुस्तस्मा एवैनमपिदधाति स त्वं नो देव त्रैष्टुभेन च्छन्दसा रात्र्यै परिपाहीति रात्र्या
एवात्मानं परिददाति मृणोऽसि मृणामुष्य द्विपदश्चतुष्पद इति द्विपदश्चैवास्मै चतुष्पदश्च पशून-
पिदधाति ॥ स्कम्भोऽसि श्लेष्कोऽसीत्येतौ वै यमश्चा अहश्च रात्री च ता इदं मनुष्यान् वृञ्जानौ
प्रत्यस्यमाना इतस्ताभ्यामेवैनमपिदधाति ता एनं वृञ्जानौ प्रत्यस्यमाना इतो यदा प्रब्लयव्यथित
इव मन्येताग्नये वीतमन्यवे स्वाहेति जुहुयादीश्वरो वा अभिचरोऽशान्तः प्रत्यङ्क्ता शान्त्यै॥१४॥
४०–४३

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा कामाय स्वाहा स्वप्नाय स्वाहाह्ने स्वाहा रात्र्यै
स्वाहा तृप्तस्त्वं तृप्तोऽहं तृप्तो मे प्राणस्तृप्तो मे व्यानस्तृप्तो मेऽपानस्तृप्तं मे चक्षुस्तृप्तं मे श्रोत्रं तृप्ता
मे वाक् तृप्तो म आत्मा द्यौर्मे पिता पृथिवी मे माता सूर्यो मे चक्षुर्वातो मे प्राणोऽस्तृतो नामाह-
मस्मि स इदं द्यावापृथिव्योरात्मानं परिददे तयोश्श्रये तयोः पराक्रमे गोपीथाय पिपृतं मा मा
मा हिंसिष्टं पाहि द्विषः पाहि रिपः पाह्यदेव्या अभिशस्त्या अश्मासि तनूपानस्स म इह तन्वं
पाहि ॥ त्वयि मे मर्म बृहस्पतौ प्राणस्स मा मृत्योः पात्वुद्वावमुन्मनीपामुदिन्द्रियमुत्प्रजामुत्पशू-
नेतँ स ऋच्छतु यो मैतस्या दिशोऽभिदासतीन्द्राग्नी मैतस्या दिशो गोपायतां पितरो मैतस्या
दिशो गोपायन्तु सविता मैतस्या दिशो गोपायतु मित्रावरुणौ मैतस्या दिशो गोपायतां बृहस्पति-
र्मैतस्या दिशो गोपायत्वायुष्टदायुपतिं स्वधावो गोपा नस्स्थ रक्षितारो मा नः कश्चित् प्रखान्मा
४४–४५
प्रमेष्महि ॥१५॥

यान् वा असुरा देवेभ्यो न्यदधत तान् देवा अन्वपश्यन् यान् देवा असुरेभ्यस्तानसुरा नान्व-
पश्यँस्ततो देवा अभवन् परासुरा अभवन् यत्रान्यो नानुपश्येत् तदेताभिर्दधीत भ्रातृव्यस्यानु-
पश्यत्यै मेवत्यात्मना परास्य भ्रातृव्यो भवति पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहेति त्रय

[१५] मै. ३,१२,१२। वा. २२,२७,२९; ३९,१। काण्व. २४,३७,३९; ३९,१। [पृथिव्यै स्वाहा। अथर्व. ५,९,२,
६। अन्तरिक्षाय स्वाहा। अथर्व. ५,९,३,४। दिवे स्वाहा। अथर्व. ५,९,१,५]
[१६] (पञ्चदशानुवाके द्रष्टव्यम्।)

इमे लोका एभ्य एवैनं लोकेभ्यः परिददाति कामाय स्वाहेत्यायुर्वै परमः काम आयुरेव तेन
स्पृणोति स्वप्नाय स्वाहेति यो एवैनँ स्वपन्तं नाष्ट्रा दिप्सन्ति स्वप्न एनं ताभ्यः पात्यह्ने स्वाहा
रात्र्यै स्वाहेति द्वौ वा ऋतू अहश्च रात्री च ताभ्यामेवैनं परिददाति सप्तैता आहुतीर्जुहोति सप्त प्राणा-
स्तानेवास्मिन् दधाति तानस्मिन्नधि विपावयति तानस्मादनपगान् करोति ॥ घृतेनाश्मानमनक्त्येषं
हुतहुतस्यात्मा तेजो घृतं यावानेवास्यात्मा तं तेजसानक्ति सर्वतोऽनक्ति सर्वत एवैनं तेजसा समर्ध-
यति तृप्तस्त्वं तृप्तोऽहमिति प्राणानेवास्यैतन्महिम्नो व्याचष्टे प्राणा हि महिमानो द्यौर्मे पिता पृथिवी
मे माता सूर्यो मे चक्षुर्वातो मे प्राण इत्येताभ्य एव देवताभ्य आत्मानं परिददात्यस्तृतो नामाहमस्मि
स इदं द्यावापृथिव्योरात्मानं परिदद इति द्यावापृथिव्योरेवात्मानं परिदत्ते तयोश्श्रये तयोः पराक्रम
इति यो वा अनयोः पराक्रमते न स व्यथतेऽनयोरेव पराक्रँस्त गोपीथाय पिपृतं मा मा मा हिंसिष्ट-
मित्यात्मनोऽहिंसायै पाहि द्विषः पाहि रिपः पाह्यदेव्या अभिशस्त्या इत्याशिषमेवाशास्ते ॥ सर्वतो-
ऽश्मानं परिहरत्येषं हुतं सर्वतः पातीयान्तं लोष्टमुद्द्रुजत्येतावान् ह्यात्मा बाहुमात्रमवटं खनत्येता-
वान् हि पुरुषस्तमवधायाथाश्मानमथ हिरण्यमस्या एवैनमुत्तरार्धे निदधात्यनिखातो भवति नाभिं
प्रति निखनति नाभिर्वै प्राणान् दाधार ये चोर्ध्वा ये चावाञ्चः प्राणानां धृत्यै हिरण्येन
संस्पर्शयत्यमृतं वै हिरण्यममृतेनैवैनँ संदधात्युद्वावमुन्मनीपाममित्येतानि वा अस्य निखनेत्
तान्येवोद्धरत्यात्ममात्रीं वेदिर्भवत्यात्ममात्रं हि वर्म यन्नात्ममात्री स्यान्नात्मने क्रियेतैतावती पृथिवी
यावती वेदिरस्या एवैतदन्तेषु पुरोऽधित देवपुरा एवाकृताथो एता एव देवता एतासां दिशां
परस्पा अकृत गोपीथाय ॥१६॥ ४६–४८

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यँस्तं वसिष्ठ एव प्रत्यक्षमपश्यत् सोऽबिभेदितरेभ्यो मर्षिभ्यः
प्रवक्ष्यतीति सोऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य
ऋषिभ्यो मा प्रवोच इति तस्मा एतान् स्तोमभागानब्रवीत् ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त
स्तोमो वा एतेषां भागस्तत् स्तोमभागानां स्तोमभागत्वं रश्मिरसि क्षयाय त्वा क्षयं जिन्वेति क्षयो
वै देवा देवेभ्य एव यज्ञं प्राह प्रेतिरसि धर्मणे त्वा धर्मं जिन्वेति धर्मो मनुष्या मनुष्येभ्य एव यज्ञं
प्राहान्वितिरसि दिवे त्वा दिवं जिन्व संधिरस्यन्तरिक्षाय त्वान्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै
त्वा पृथिवीं जिन्वेति त्रय इमे लोका एभ्य एव लोकेभ्यो यज्ञं प्राह विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं
जिन्वेति वृष्टिमेवावरुन्द्धे प्रवास्यनुवासीति मिथुनमेव करोत्युशिगसि वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतो-
ऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदितिरस्यादित्येभ्यस्त्वादित्याञ्जिन्वेत्यष्टौ वसव एकादश रुद्रा

[१७] काठ. १७,७,२०। मै. २,८,८ (२०)। कपि. २६,६। वा. १५,६–७,९। काण्व. १६ ९–१२,१४–१५।
तै. सं. ३,५,२; ४,४,१। गोप० ब्रा. २,२,१३–१४। मा. श्रौ. ६,२,२। तै. सं. ३,५,२।

द्वादशादित्या वाग्द्वात्रिँशी स्वरस्त्रयस्त्रिँशस्त्रयस्त्रिँशद्देवता देवतास्व एव यज्ञं प्रतिष्ठापयत्योजोऽसि पितृभ्यस्त्वा पितॄञ्जिन्वेति देवानेव पितॄननुसंतनोति तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्वेति प्रजा एव पशूननुसंतनोति पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्वेति प्रजा एव पशूननुसंतनोति रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वेत्योषधीष्वेव पशून् प्रतिष्ठापयत्यभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेति वज्रो वै षोडशी भ्रातृव्योऽन्वेवैनं सज्जाद्देशोऽन्वैव्यात्रृचोऽधिपतिरसि प्राणाय त्वा प्राणं जिन्वेति प्राणमेवावरुन्द्धे धरुणोऽस्यपानाय त्वापानं जिन्वेत्यपानमेवावरुन्द्धे संसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्वेति चक्षुरेवावरुन्द्धे वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्वेति श्रोत्रमेवावरुन्द्धे ॥ एतद्वै पुरुषमकरथातः प्राणानुवैति प्रजापतिमेव त्रिवृदसि त्रिवृते त्वा सवृदसि सवृते त्वा प्रवृदसि प्रवृते त्वानूवृदस्यनूवृते त्वेति मिथुनमेव करोति संरोहोऽसि विरोहोऽसि प्ररोहोऽस्यनुरोहोऽसीति प्रजापतिरेव वसुकोऽसि वस्यष्टिरसि वेषश्रीरसीति प्रतिष्ठितिरेव देवस्य सवितुः प्रसवे बृहस्पतये स्तुतेति यद्वै सविता देवेभ्यः प्रासुवत् तेनार्ध्नुवन् सवितृप्रसूता एव स्तुवन्त्यृध्नुवन्ति यस्यैवं विदुषो यस्यैवं विद्वान् स्तोमभागैर्ब्रह्मा भवति वसीयान् भवति ॥१७॥ ४९–५०

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेणामृताममृतेन मधुमतीं मधुमता सृजामि सँ सोमेन सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥ ५१

परीतो षिञ्चता सुतँ सोमो य उत्तमँ हविः ।
दधन्वान् यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥ ५२

वायुः पूतः पुनातु ते ॥ ५३

ब्रह्म क्षत्रं पवते तेज इन्द्रियँ सुरया सोमस्सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नं यजमानाय धेहि ॥ ५४

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुत भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥ ५५

उपयामगृहीतोऽस्यश्विभ्यां त्वा जुष्टं गृह्णामि सरस्वत्या इन्द्राय सुत्राम्ण एष ते योनिस्तेजसे त्वा वीर्याय त्वा बलाय त्वा ॥ ५६

[१८] काठ. १२.९ (४९-५०) । मै. २.११.४; ४,३,८; ३,११,७ (३१; ३६-४१; ४९-५६) । वा. १०,३२; १९,१, ३-४,६; २०,३३; २३,३८ । काण्व. ११,८४; २१,१,३—५; २२,१८; २५,४० । तै. सं. १,८,२१; ३,२,८३ । तै. ब्रा. १,४,३; २,६,१,३ । [परीतो षिञ्चता सुतँ० । ऋ. ९.१०७,१; सा. ५१२; १३१३; तै. ब्रा. २,६, १,१ । वायुः पूत० । अथर्व. ६,५१,१ । पुनातु (०ति) ते० । ऋ. ९,१,६; तै. सं. १,८,२१,१; तै. ब्रा. २,६, १,२ । कुविदङ्ग यवमन्तो० । ऋ. १०.१३१,२; अथर्व. २०,१२५,२; तै. सं. १,८,२१,१; ५,२,११,२; तै. ब्रा. २,६,१,३]

नाना हि वां देवकृतँ सदस्कृतं मा सँसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिँसीस्स्वं योनिमाविशन् ॥ ५७

उपयामगृहीतोऽस्याश्विनं तेजस्सारस्वतं वीर्यमैन्द्रं बलमेष ते योनिर्मोदाय त्वानन्दाय त्वा महसे त्वा ॥ ५८

या व्याघ्रं विषूचिकोभौ वृकं च रक्षति । श्येनं पतत्रिणँ सिँहँ सोमं पात्वँहसः ॥ ५९

संपृचस्स्थ सं मा भद्रेण पृङ्क्त विपृचस्स्थ वि मा पाप्मना पृङ्क्त ॥१८॥ ६०

[१३८१]

॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायां सवा नाम सप्तत्रिंशं स्थानकं संपूर्णम् ॥३७॥

अथाष्टात्रिंशं स्थानकम् ।

सौत्रामणी ।

सोमो राजामृतँ सुत ऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ १

सोममद्भ्यो व्यपिबच्छन्दसा हँसश्शुचिषत् ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ २

अद्भ्यः क्षीरं व्यपिबत् क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ३

अन्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रम् ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४

रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृत उल्बं जहाति जन्मना ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ५

वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ६

दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः । अश्रद्धामनृतेऽदधाच्छ्रद्धाँ सत्ये प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ७

[१] मै. ३,११,६ (३९-४८) । वा. १९,७२—७९ । काण्व. २१,७२—७६ । तै. ब्रा. २,६,२ ।

दृष्ट्वा परिस्रुतो रसँ शुक्रेण शुक्रं व्यपिबत् पयस्सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियँ विपानँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥१॥ ८

सुरावन्तं बर्हिषदँ सुवीरं यज्ञँ हिन्वन्ति महिषा नमोभिः ।
दधानास्सोमं दिवि देवतासु मदेमेन्द्रं यजमानास्स्वर्काः ॥ ९

यस्ते रसस्संभृत ओषधीषु सोमस्य शुष्मस्सुरया सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विना इन्द्रमग्निम् ॥ १०

यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमं तँ शुक्रं मधुमन्तमिन्दुँ सोमं राजानमिह भक्षयामि ॥ ११

यदत्र रिप्तँ रसिनस्सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि ॥ १२

पितृभ्यस्स्वधायिभ्यस्स्वधा नमः पितामहेभ्यस्स्वधायिभ्यस्स्वधा नमः प्रपितामहेभ्यस्स्वधायिभ्यस्स्वधा नमोऽक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरश्शुन्धध्वम् ॥ १३

पुनन्तु मा पितरस्सोम्यासः पुनन्तु मा पितामहाः ।
पुनन्तु प्रपितामहाः पवित्रेण शतायुषा ॥ १४

पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ १५

अग्न आयूँषि पवसे ॥ १६

पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ १७

पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँरनु ॥ १८

यत् ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥ १९

पवमानस्सुवर्जनः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ २०

उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ २१

वैश्वदेवी पुनती देव्यागाद्यस्या इमास्तन्वो वीतपृष्ठाः ।
तया मदन्तस्सधमादेषु वयँ स्याम पतयो रयीणाम् ॥ २२

[१] मै. ३,११,७; १० (७७-८०; ८८-१०४) । वा. १९,३२—४८ । काण्व. २१,३२—५० । तै. ब्रा. २,६,३,६ । अग्न आयूँषि पवसे० । ऋ. ९,६६,१९; सा. ६२७; १५१८; तै. सं. १,३,१४,७; ४,२९,१; ५,५,२, ६,६,४; तै. ब्रा. २,६,३,४; तै. आ. २,५,१ । पुनन्तु मा (माँ) देवजना० । ऋ. ९,६७,२७; अथर्व. ६,१९,१; तै. ब्रा. १,४,८,१; २,६,३,४ । यत्ते पवित्रमर्चिष्यग्ने० । ऋ. ९,६७,२३; तै. ब्रा. १,४,८,२ । पवमानस्सुवर्जनः पवित्रेण० । ऋ. ९,६७,२२ । उभाभ्यां देव सवितः० । ऋ. ९,६७,२५; अथर्व. ६,१९,३ । वैश्वदेवी पुनती० । ऋ. खि. १०,२; अथर्व. ६,६२,२ । वयँ स्याम पतयो रयीणाम् (च. पा.) । ऋ. ४,५०,६; ५,५५,१०; ८,४०,१२; ४८,१३; १०,१२१,१०; अथर्व. ६,६४,२]

ये समानास्समनसः पितरो यमराज्ये । तेषां लोकस्स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ २३

ये समानास्समनसो जीवा जीवेषु मामकाः ।
तेषाँ श्रीर्मयि कल्पतामस्मिँल्लोके शतँ समाः ॥ २४

द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च ॥ २५

इदं हविः प्रजननं मे अस्तु दशवीरँ सर्वगणँ स्वस्तये ।
आत्मसनि प्रजासनि पशुसन्यभयसनि लोकसनि ।
अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त ॥ २ ॥ २६

सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञँ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यम् ॥ २७

तदस्य रूपममृतँ शचीभिस्तिस्रो दधुर्देवतास्संरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य माँसमभवन्न लाजाः ॥ २८

तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अन्तरम् ।
अस्थि मज्जानं मासरैः कारोतरेण दधतो गवां त्वचि ॥ २९

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः ।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥ ३०

पयसा शुक्रममृतं जनित्रँ सुराया मूत्राज्जनयन्ति रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊवध्यं वातँ सब्वं तदारात् ॥ ३१

इन्द्रस्सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमानं वरुणो भिषज्यन् मतस्ने वायव्यैर्न मिनाति पित्तम् ॥ ३२

अन्त्राणि स्थाली मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभिरासन्दी नाभिरुदरं न माता ॥ ३३

कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः ।
प्लाशिर्व्यक्तश्शतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ॥ ३४

मुखँ सदस्य शिर इत्सतेन जिह्वा पवित्रमश्विनासन् सरस्वती ।
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ॥ ३५

[द्वे स्रुती अशृणवं० । ऋ. १०.८८,१५; तै. ब्रा. १,४, २,३; २,६,३,५; शत. ब्रा. १४,९; १,४]
[३] मै. ३,११,९ (७२—८७) । वा. १९,८०-९५ । काण्व. २१,७७-९२ । तै. ब्रा. २,६,४ ।

अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा शृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसितं वसाते ॥ ३६
अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥ ३७
इन्द्रस्य रूपमृषभो बलाय कर्णाभ्याँ श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् ॥ ३८
आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन् यशसे श्रियै शिखा सिंहस्य लोम त्विषिरिन्द्रियाणि ॥ ३९
अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैस्समधात् सरस्वती ।
इन्द्रस्य रूपँ शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधाना ॥ ४०
सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपां रसेन वरुणेन साम्नेन्द्रँ श्रियै जनयन्नप्सु राजा ॥ ४१
तेजः पशूनाँ हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
आश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममृतस्सोम इन्दुः ॥३॥ ४२

क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि स्योनासि सुषदासि स्योनामासीद सुषदामासीद मा त्वा
हिँसीन्मा मा हिँसीः ॥ ४३
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥ ४४
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसा-
याभिषिञ्चामि देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँ सरस्वत्या भैषज्येन
वीर्यायान्नाद्यायाभिषिञ्चामि देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिन्द्रस्ये-
न्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि कोऽसि को नामासि कस्मै त्वा काय त्वा सुश्लोका३
सुमङ्गला३ सत्यराजा३न् ॥ ४५
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणो अमृतँ सम्राट् चक्षुर्विराट्छ्रोत्रम् ॥ ४६

[४] मै. ३,११,८ (६१-७१) । वा. १०,२७; २०,१—१३ । काण्व. ११.३७; २१.९३-१०६ । तै. ब्रा. २.६.५ । देवस्य त्वा [निषसाद धृतव्रतो० । ऋ. १,२५,१०; तै. सं. १,८.१६,१; तै. ब्रा. १,७,१०,२, २,६,५,१ । ऐ. ब्रा. ८,७] सवितुः० । काठ. १,२,५; अथर्व. १९,५१,२ ।

जिह्वा मे भद्रं वाङ् महो मनो मन्युस्स्वराड् भामः ।
मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥ ४७
बाहू मे बलमिन्द्रियँ हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥ ४८
पृष्टीर्मे राष्ट्रमुदरमँसौ ग्रीवाश्च श्रोण्यौ । ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥ ४९
नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ।
आनन्दनन्दा अण्डौ मे भगस्सौभाग्यं पसः ॥ ५०
जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ।
प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ॥ ५१
प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन् प्रति प्राणेषु प्रतितिष्ठामि पुष्टे ।
प्रति द्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ॥ ५२
त्रयो देवा एकादश त्रयस्त्रिंशास्सुराधसः । बृहस्पतिप्रसूता देवस्य सवितुस्सवे ॥ ५३
देवा देवैरवन्तु मा प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयास्सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूँषि
सामभिस्सामान्यृग्भिर्ऋचो याज्याभिर्याज्या वषट्कारैर्वषट्कारा आहुतिभिराहुतयो मे कामान् समर्ध-
यन्तु भूस्स्वाहा ॥ ५४
लोमानि प्रयतिर्मम त्वङ् म आनतिरागतिः ।
माँसं म उपनतिर्वस्वस्थि मज्जा म आनतिः ॥४॥ ५५

यद्देवा देवहेडनं देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वँहसः ॥ ५६
यदि दिवा यदि नक्तमेनाँसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वँहसः॥ ५७
यदि जाग्रद्यदि स्वप्न एनाँसि चकृमा वयम् । सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वँहसः॥५८
यद्ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये । यच्छूद्रे यदर्य एनश्चकृमा वयम् ।
यदेकस्याधि धर्मणि तस्यावयजनमसि ॥ ५९
यदापो अघ्न्या वरुणेति शपामहे ततो वरुण नो मुञ्चावभृथ निचुङ्कुण निचेरुरसि निचुङ्कुणो-
ऽव देवैर्देवकृतमेनोऽयाडव मर्त्यैर्मर्त्यकृतमुरोरा नो देव रिषस्पाहि ॥ ६०
समुद्रे ते हृदयमप्स्वन्तस्सं त्वा विशन्त्वोषधीरुतापः ॥ ६१

[५] मै. ३,११,१०; १,३,३९; २,१२,५; ४,९,२७ (१०५—११२; ११८—११९; ३४; १५६) वा. २०,१४-२३; ८,२५; २७,१०; ३५,१४; ३८,२४—२५ । काण्व. २२,१—८; ९,२५; २९,१०; ३५,४७; ३८,२४ । तै. सं. १,४ ४५ । [यद्देवा देवहेडनं० । अथर्व. ६,११४,१ । यदि दिवा यदि० । अथर्व. ६,११५,१ । यदि जाग्र-द्यदि स्वप्न० । अथर्व. ६,११४,१—२ । यदापो अघ्न्या वरुणेति० । अथर्व. ७,८३,२; १९,४४,९]

सुमित्रा ण आप ओषधयो भवन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः॥६२
द्रुपदादिवेन्मुमुचानस्स्विन्नस्स्नात्वी मलादिव ।
पूतं पवित्रेणेवाज्यमापश्शुन्धन्तु मैनसः ॥ ६३
उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ६४
प्रत्यस्तो वरुणस्य पाशः प्रतियुतो वरुणस्य पाशः ॥ एधोऽस्येधिषीमहि समिदसि ॥ तेजो-
ऽसि तेजो मयि धेहि ॥ ६५-६७
अपो अद्यान्वचारिषं रसेन समगन्महि । पयस्वानग्न आगमं तं मा सँसृज वर्चसा ॥ ६८
समाववर्ति पृथिवी समुषास्समु सूर्यः । वैश्वानरज्योतिर्भूयासं विभुं कामं व्यश्नवै ॥ ६९
भूस्स्वाहा ॥५॥ ७०

समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः ।
त्रिभिर्देवैस्त्रिंशता वज्रबाहुर्जघान वृत्रं वि दुरो ववार ॥ ७१
नराशँसः प्रति शूरो मिमानस्तनूनपात् प्रति यज्ञस्य धाम ।
गोभिर्वपावान् मधुना समञ्जन् हिरण्यैश्चन्द्री यजतु प्रचेताः ॥ ७२
ईडितो देवैर्हरिवाँ अभिष्टिराजुह्वानो हविषा शर्धमानः ।
पुरंदरो गोत्रभिद्वज्रबाहुरायातु यज्ञमुप नो जुषाणः ॥ ७३
जुषाणो बर्हिर्हरिवान्न इन्द्रः प्राचीनँ सीदत् प्रदिशा पृथिव्याः ।
उरुप्रथाः प्रथमानँ स्योनमादित्यैरक्तं वसुभिस्सजोषाः ॥ ७४
इन्द्रं दुरः कवष्यो धावमाना वृषाणं यन्तु जनयस्सुपत्नीः ।
द्वारो देवीरभितो विश्रयन्ताँ सुवीरा वीरं प्रथमाना महोभिः ॥ ७५
उषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
पेशस्वती तन्तुना संव्ययन्ती देवानां देवं यजतस्सुरुक्मे ॥ ७६
दैव्या मिमाना मनसा पुरुत्रा होतारा इन्द्रं प्रथमा सुवाचा ।
मूर्धन् यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः ॥ ७७

[द्रुपदादिव मुमुचानः० । अथर्व. ६,११५,३ । उद्वयं तमसस्परि० । ऋ. १,५०,१०; अथर्व. ७,५३,७; तै.सं.४,१,७,४; तै. ब्रा. २,४,४,९; ६,६,४; तै. आ. ६,३,२ । एधोऽस्येधिषीमहि० । अथर्व. ७,८९,४ । तेजोऽसि तेजो मयि धेहि० । अथर्व. ७,८९,४; १९,३१,१२ । अपो (आपो) अद्यान्वचारिषं० । ऋ. १,२३,२३; १०,९,९; तै. सं. १,३,४५,३; ४६,२; तै. ब्रा. २,६,६,५ ।
[६] मै. ३,११,२ (१-११) । वा. २०,३६—४६ । काण्व. २२,२१—३१ । तै. ब्रा. २,६,८ ।

तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा वृषणं न पत्नीः ।
अच्छिन्नं तन्तुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः ॥ ७८
त्वष्टा दधदिन्द्राय शुष्ममपाकोऽचिष्टुर्यशसे पुरूणि ।
वृषा यजन् वृषणं भूरिरेता मूर्धन् यज्ञस्य समनक्तु देवान् ॥ ७९
वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्जठरं पृणानस्स्वदाति यज्ञं मधुना घृतेन ॥ ८०
स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा हव्यमुन्दन् मूर्धन् यज्ञस्य जुषताँ स्वाहा ॥६॥ ८१

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः ।
स्तुतश्श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाक् ॥ ८२
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अँहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ॥ ८३
तँ सध्रीचीरूतयो वृष्ण्यानि पौँस्यानि नियुतस्सश्चुरिन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आविशन्ति ॥ ८४
सत्यमित् तन्न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान् ।
अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रम् ॥ ८५
प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु ।
इन्द्राभर दक्षिणेना वसूनि पतिस्सिन्धूनामसि रेवतीनाम् ॥ ८६
स शेवृधमधिधा द्युम्नमस्मे महि क्षत्रं जनाषाडिन्द्र तव्यम् ।
रक्षा च नो मघोनः पाहि सूरीन् राये च नस्स्वपत्या इषे धाः ॥७॥ ८७

समिद्धो अग्निरश्विना तप्तो घर्मो विराट् सुतः ।
दुहे धेनुस्सरस्वती सामँ शुक्रमिहेन्द्रियम् ॥ ८८

[७] मै. ४,१२,३; १४,१८ (४९; २५३-२७८) । तै. ब्रा. २,६,९ । [आ चर्षणिप्रा वृषभो० । ऋ. १,१७७,१; तै. ब्रा. २,४,३,११ । विवेष यन्मा धिषणा० । ऋ. ३,३२,१४; तै. सं. १,६,१२,३; २,५,१२,५; तै. ब्रा. २, ६,९,१ । तँ सध्रीचीरूतयो० । ऋ. ३,३६,३; तै. ब्रा. २,४,५,२; ६,९,१ । सत्यमित् तन्न त्वावाँ० । ऋ. ६,३०,४; तै. ब्रा. २,६,९,१ । प्र ससाहिषे० । ऋ. १०,१८०,१; तै. सं. ३,४,११,४; तै. ब्रा. २,६,९,१; ३,५,७,४ । स शेवृधमधिधा० । ऋ. १,५४,११; तै. ब्रा. २,६,९,१]
[८] मै. ३,११,३ (१३—२३) । वा. २०,५५—६६ । काण्व. २२,४१—५१ । तै. ब्रा. २,६,१२ । [समिद्धो अग्नि-रश्विना० । अथर्व. ७,७३,१]

तनूपा भिषजा सुतेऽश्विनोभा सरस्वती । मध्वा रजाँसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥ ८९
इन्द्रायेन्दुं सरस्वती नराशँसेन नग्नहुम् । अधातामश्विना मधु भेषजं भिषजा सुते ॥ ९०
आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् । इडाभिरश्विना इषँ समूर्जँ सं रयिं दधुः॥ ९१
अश्विना नमुचेस्सुतँ सोमँ शुक्रं परिस्रुता । सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥ ९२
कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः ।
इन्द्रो न रोदसी दुघे दुहे कामान् सरस्वती ॥ ९३
उषासा नक्तमश्विना दिवेन्द्रँ सायमिन्द्रियैः । संजानाने सुपेशसा समञ्जाते सरस्वत्या॥ ९४
पातं नो अश्विना दिवा पाहि नक्तँ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रँ सचा सुते ॥ ९५
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा । तीव्रं परिस्रुता सोममिन्द्रायासुषवुर्मदम् ॥ ९६
अश्विना भेषजं मधु भेषजं नस्सरस्वती । गोभिर्न सोममश्विना मासरेण परिस्रुतम् ।
समधातां सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥८॥ ९७

अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती ।
आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥ ९८
यमश्विना सरस्वती हविषेन्द्रमवर्धयन् । स बिभेद बलं मघं नमुचा आसुरे सचा ॥ ९९
तमिन्द्रं पशवस्सचाश्विनोभा सरस्वती । दधाना अभ्यनूषत हविषा यज्ञ इन्द्रियम् ॥ १००
य इन्द्र इन्द्रियं दधुस्सविता वरुणो भगः । स सुत्रामा हविष्पतिर्यजमानाय सश्चत॥ १०१
सविता वरुणो दधद्यजमानाय दाशुषे । आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥ १०२
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत॥ १०३
अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रँ सरस्वती यजमानमवर्धयन् ॥ १०४
ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । सरस्वती हविष्मतीन्द्र कर्मसु नोऽवत ॥ १०५
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम्॥ १०६
युवँ सुराममश्विना नमुचा आसुरे सचा । विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥ १०७
पुत्रमिव पितरा अश्विनोभेन्द्रावथुः काव्यैर्दँसनाभिः ।
यत् सुरामं व्यपिबश्शचीभिस्सरस्वती त्वा मघवन्नभिष्णक् ॥ १०८

[९] मै. ३,११,४ (९४—३०,३२-३७) । वा. २०,६७-७९; १०,३३-३४ । काण्व. २२,५२—६४; ११,४६-४७ । तै. ब्रा. २,६,१२—१३ । [युवँ सुराममश्विना० । ऋ. १०,१३१,४; अथर्व. २०,१२५,४; तै. ब्रा. १,४,२, १ । पुत्रमिव पितरा० । ऋ. १०,१३१,५; अथर्व. २०,१२५,५; तै. ब्रा. १,४,२,१]

यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टा आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनय चारुमग्नये ॥ १०९
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥९॥ ११०

समिद्धो अग्निस्समिधा सुषमिद्धो वरेण्यः । गायत्री छन्द इन्द्रियं त्रियविर्गौर्वयो दधुः॥ १११
तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती । उष्णिहा छन्द इन्द्रियं दित्यवाड् गौर्वयो दधुः॥ ११२
इडाभिरग्निरीड्यस्सोमो देवो अमर्त्यः । अनुष्टुप् छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥ ११३
सुबर्हिरग्निः पूषण्वाँ स्तीर्णबर्हिरमर्त्यः । बृहती छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधुः ॥ ११४
दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ।
पङ्क्तिश्छन्द इहेन्द्रियं तुर्यवाड्गौर्वयो दधुः ॥ ११५
उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः । त्रिष्टुप् छन्द इहेन्द्रियं पष्ठवाड्गौर्वयो दधुः॥ ११६
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।
जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः ॥ ११७
तिस्र इडा सरस्वती भारती मरुतो विशः ।
विराट् छन्द इहेन्द्रियं धेनुर्गौर्न वयो दधुः ॥ ११८
त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना ।
द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥ ११९
शमिता नो वनस्पतिस्सविता प्रसुवन् भगम् ।
ककुप् छन्द इहेन्द्रियं वशा वेहद्वयो दधुः ॥ १२०
स्वाहा यज्ञं वरुणस्सुक्षत्रो भेषजं करत् ।
अतिच्छन्द इन्द्रियं बृहदृषभो गौर्वयो दधुः ॥१०॥ १२१

वसन्तेनर्तुना देवा वसवस्त्रिवृता स्तुतम् । रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥ १२२
ग्रीष्मेण देवा ऋतुना रुद्राः पञ्चदशे स्तुतम् ।
बृहता यशसा बलँ हविरिन्द्रे वयो दधुः ॥ १२३

[यस्मिन्नश्वास ऋषभास० । ऋ. १०,९१,१४; तै. ब्रा. १,४,२,१ । अहाव्यग्ने हविरास्ये० । ऋ. १०,९१, १५; तै. ब्रा. १,४,२,१]
[१०] मै. ३,११,११ (११३—१२३) । वा. २१,१२—२२ । काण्व. २३,१३—२३ । तै. ब्रा. २,६,१८ ।
[११] मै. ३,११,१२ (१२४—१२९) । वा. २१,२३,२८ । काण्व. २३,२४—२९ । तै. ब्रा. २,६,१९ ।

वर्षाभिर्ऋतुनादित्यास्स्तोमे सप्तदशे स्तुतम् । वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः॥ १२४
शारदेनर्तुना देवा एकविंश ऋभवस्स्तुतम् । वैराजेन श्रिया श्रियँ हविरिन्द्रे वयो दधुः॥ १२५
हेमन्तेनर्तुना देवास्त्रिणवे मरुतस्स्तुतम् । बलेन शक्वरीस्सहो हविरिन्द्रे वयो दधुः ॥ १२६
शैशिरेणर्तुना देवास्त्रयस्त्रिंशेऽमृतँ स्तुतम् ।
सत्येन रेवतीः क्षत्रँ हविरिन्द्रे वयो दधुः ॥११॥ १२७

बृहस्पतिपुरोहिता देवा देवानां देवा देवाः प्रथमजा देवा देवेषु पराक्रमध्वं प्रथमा द्वितीयेषु
द्वितीयास्तृतीयेषु त्रिरेकादशास्त्रयस्त्रिंशा अनु व आरभ इदं शकेयं यदिदं करोमि ते मावत ते मा
जिन्वतास्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यां देवहूत्याम् ॥ १२८
योऽस्य कौष्ठ्य जगतः पार्थिवस्यैक इद्वशी । यमं भङ्ग्यश्रवो गाय यो राजानपरोध्यः॥ १२९
यमं गाय भङ्ग्यश्रवो यो राजानपरोध्यः । येनापो नद्यो धन्वानि येन द्यौः पृथिवी दृढा॥ १३०
हिरण्यकेशान् सुधुरान् हिरण्याक्षानयश्शफान् ।
अश्वाननश्यतो दानं यमो राजाभितिष्ठति ॥ १३१
अयं योऽसि यस्य त इदं शिर एतेन त्वमत्र शीर्षण्वानेधि ।
इदमस्माकं भुजे भोगाय भूयात् ॥ १३२
उदीचे अधि मातुः पृथिव्या विश आविश महतस्सधस्थात् ।
आशुं त्वाजौ दधिरे देवयन्तो हव्यवाहं भुवनस्य गोपाम् ॥ १३३
धनंजयं संदहमानः पृतन्यूनग्न इषमूर्जं यजमानाय धेहि ।
विश्वाः पृतनास्संदहमानस्संहोमिरेकं नो धेहि बहुधा विरूपं यत् प्रजा अनु जीवन्ति सर्वाः॥
१३४
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये त्वा वैश्वानराय त्रैष्टुभेन
च्छन्दसाहरामि देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये त्वा वैश्वानरायानु-
ष्टुभेन च्छन्दसा रात्रीमुपदधे ॥
१३५
पुनस्त्वादित्या रुद्रा वसवस्समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयामि सत्यास्सन्तु यजमानस्य कामाः ॥ १३६

[१२] मै. १,१,२१,२३; २,७२; ३,९; ७,४; ९,५; ११,२६; २,६,१०; ७,९,२०-२८, ३०; ३,५,३; ८०२; ११, ६१; ४,१,९,४२,६०; ९,१,९९, १३,३२—४४ । काठ. १,२,५ । वा. ११,२५—२६; १२,४४ । काण्व. १२,२५—२६,८२; १३,४५ । [योऽस्य कौष्ठ्य० । तै. आ. ६,५,२ । देवस्य त्वा सवितुः० । अथर्व. १९,५१,२; ऐ. ब्रा. ८,७ । पुनस्त्वादित्या रुद्रा० । ऋ. १०,११६,८; अथर्व. १२,२,६; तै. सं. ४,१,३,४; ५,२,२,५]

अग्निर्होता नो अध्वरे वाजी सन् परिणीयते । देवो देवेषु यज्ञियः ॥ १३७
परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव । आ देवेषु प्रयो दधत् ॥ १३८
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥ १३९
परि त्वाग्ने पुरं वयं विप्रँ सहस्य धीमहि । धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् ॥ १४०
परि प्रागाद्देवो अग्नी रक्षोहामीवचातनः । सेधन् विश्वा अप द्विषो दहन् रक्षाँसि विश्वहा॥ १४१
चितस्स्थ परिचित ऊर्ध्वश्रितश्श्रयध्वम् । प्रजामस्मै रयिमस्मै नियच्छत ॥१२॥ १४२

व्रजं कृणुध्वँ स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वस्सुस्रोचमसो दृँहता तम् ॥ १४३
अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीडुजम्भम् ।
दश स्वसारो अग्रुवस्समीचीः पुमाँसं जातमभिसंरभन्ताम् ॥ १४४
साकँ हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानुरोहति ॥ १४५
अपास्मदेतु निर्ऋतिर्नेहास्या अपि किं चन । अगोतां नाम्नीं पाप्मानँ सर्वं तदपहन्महे॥ १४६
अपास्य नैर्ऋतान् पाशान् मृत्योरेकशतं चये ।
अपास्य ये सिनाः पाशा मृत्योरेकशतँ सुवे ॥ १४७
ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे । तांस्ते यज्ञस्य मायया सर्वानवयजामहे॥ १४८
देवीमहँ निर्ऋतिं बाधमानः पितेव पुत्रं दमये वचोभिः ।
या जायमानस्य जायमानस्य शिरो देवी प्रति सुरिर्विचष्टे ॥ १४९
शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥ १५०
ऊर्जं बिभ्रद्वसुवनिस्सुमेधा गृहाणां मोदमाना सुवर्चाः ।
अघोरेण चक्षुषाहँ शिवेन गृहाणां पश्यन् वय उत्तिरामि ॥ १५१

[अग्निर्होता नो अध्वरे० । ऋ. ४,१५,१; तै. ब्रा. ३,६,४,१ । परि त्रिविष्ट्यध्वरं० । ऋ. ४,१५,२; तै. ब्रा. ३,६,४,१ । परि वाजपतिः० । ऋ. ४,१५,३; सा. ३०; तै. सं. ४,१,२,५; तै. सं. ३,६,४,१ । परि त्वाग्ने पुरं वयं० । ऋ. १०,८७,२२; अथर्व. ७,७१,१; ८,३,२२; तै. सं. १,५,६,४; ४,१,२,५]
[१३] मै. २,७,१५२; ४,१२,३५ । वा. १२,५३; ३५,११; ३६,१२-१३ । काण्व. १३,५४; ३५,५४; ३६,११—१३ । [व्रजं कृणुध्वं० । ऋ. १० १०१,८; अथर्व. १९,५८,४ । अजीजनन्नमृतं मर्त्यासो० । ऋ. ३,२९,१३; तै. ब्रा. १,२,१,१९ । साकँ हि शुचिना० । ऋ. २,५,४ । शं नो देवीरभिष्टय० । ऋ. १०,९,४; सा. ३३; अथर्व. १,६,१; तै. ब्रा. १,२,१,१; २,५,८,५; तै. आ. ४,४२,४]

गृहाणामायुः प्र वयं तिराम गृहा अस्माकं प्रतिरन्त्वायुः ।
येन देवा ज्योतिषोर्ध्वा उदायन् येनादित्या वसवो येन रुद्राः ।
येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानस्स्वस्ति ॥ १५२
स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नश्शर्म सप्रथाः ॥ १५३

वाक्त्वा समुद्र उपदधातु प्रजावनिं रायस्पोषवनिं मयं वाजिनाय मही ध्रुवा सलिलासि ज्योतिष्मती सा स्वर्गं लोकं प्रजानीहि प्रजापतिः प्रजापतौ सादयतु तयाङ्गिरस्वद् ध्रुवा सीद ॥१३॥
१५४

उदस्थाद्धनजिद्गोजिदश्वजिद्धिरण्यजित् सूनृतया परीवृतः ।
एतच्चक्रेण सविता रथेनोर्जो भागं पृथिवीमेत्यापृणन् ॥ १५५
सं वरत्रान् दधातन निराहावं कृणोतन ।
सिञ्चामहा अवतं वयमुद्रिणं विश्वाहादस्तमक्षितम् ॥ १५६
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतस्सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः ॥ १५७
अनाप्ता या वः प्रथमा यस्यां कर्माणि कुर्वते ।
वीरान्नो अत्र मा दभँस्तद्व एतत् पुरो दधे ॥ १५८
पर्यू षु प्रधन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईयसे ॥ १५९
सहस्रधारेऽव ते समस्वरन् दिवो नाके मधुजिह्वा असश्चतः ।
तस्य स्पशो न निमिषन्ति भूर्णयः पदे पदे पाशिनस्सन्ति सेतवः ॥ १६०

मलिम्लुचो नामासि त्रयोदशो मास इन्द्रस्य शर्मासीन्द्रस्य वर्मासीन्द्रस्य वरूथमसि तं त्वा प्रपद्ये सगुस्साश्वस्सपुरुषः ॥ सह यन्मेऽस्ति तेन स मे शर्म च वर्म च भव गायत्रीं लोमभिः प्रविशामि त्रिष्टुभं त्वचा प्रविशामि जगतीं मांसेन प्रविशाम्यनुष्टुभमस्थ्ना प्रविशामि पङ्क्तिं मज्ज्ञा प्रविशामि ॥ १६१-१६२

[स्योना पृथिवी० । ऋ. १,२२,१५; अथर्व. १८,२,१९; तै. आ. १०,१,१०; नि. ९,३२]
[१४] मै. २,७,१६२; १९७ : वा. १३,३ । काण्व. १४,३ । [सं वरत्रान् दधातन० । तै. सं. ४,२,५,५ । ब्रह्म जज्ञानं प्रथमं० । अथर्व. ४,१,१; ५,६,१; काठ. १६,२०,१८३; २०,५,८; तै. सं. ४,२,८,२ । अनाप्ता या (ये) वः० । अथर्व. ४,७,७ । पर्यू षु प्रधन्व० । ऋ. ९,११०,१; सा. ४२८; १३६४; अथर्व. ५,६,४ । सहस्रधारेऽव समस्वरन्० । ऋ. ९,७३,४; अथर्व. ५,६,३]
काठ० ४९

ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नाति विध्यन्ति शूराः ।
तन्नस्त्रायतां तन्वस्सर्वतो महदायुष्मन्तो जरामुपगच्छेम जीवाः ॥१४॥ १६३
[१५४४]

॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायां सौत्रामणीनामाष्टात्रिंशं स्थानकं संपूर्णम् ॥३८॥

अथैकोनचत्वारिंशं स्थानकम् ।

यदक्रन्दः ।

यदक्रन्दः प्रथमं जायमान उद्यन् समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १
अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह ।
बृहस्पतिस्सवितेन्द्रस्तदाह पूषा माधात् सुकृतस्य लोके ॥ २
आस्यादुदस्थादजनिष्ट विप्रो व्यास्यन् मृधो अशिशीत बाहू ।
समपृक्षि ज्योतिषा सूर्यस्य परा बाधस्व निर्ऋतिं पराचैः ॥ ३
प्रजापतिस्त्वा सादयतु ॥ ४
दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम् ।
विश्वायुश्शर्म सप्रथा नमस्पथे वयस्स्वस्सदः ॥ ५
प्राचीनमूर्ध्वमधरागपागुदग्देवाः पान्तु यजमानममृतमृतात् ।
तेन ब्रह्मणा तेन च्छन्दसा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ ६
आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च ।
रायश्च स्थ स्वपत्यस्य पत्नीस्सरस्वती तद्गृणते वयो धात् ॥ ७

अर्थेतस्स्थान्वगतोऽग्नेर्वस्तेजसा देवताभिर्गृह्णामि शर्म च स्थ वर्म च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि ज्योतिषे वां शुक्रास्स्थ वीर्यावतीरिन्द्रस्य व इन्द्रियावतो देवताभिर्गृह्णाम्यमृतं च स्थ सत्यं च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि चक्षुषे वां मन्द्रास्स्थाभिभुवो विश्वेषां वो देवानां देवताभ्यो गृह्णामि रक्षोघ्नीश्च स्थारातिघ्नीश्च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि रेतसे वामधिपतिरस्यूर्जस्वानादित्यानां वो देवानां देवताभिर्गृह्णामि सपत्नघ्नीश्च

[ऐन्द्राग्नं वर्म बहुलं० । अथर्व. ८,५,१९]
[१] मै. १,५,३०; ६,१७,२०; २,७,३२; १२,१२; ४,९,२१२ । वा. ११,३०; १३,१७; १८,५४; २९,१२ । काण्व. १२,३०; १४,१७; २०,२४; ३१,२४ । [यदक्रन्दः प्रथमं जायमान० । ऋ. १,१६३,१; तै. सं. ४,२,८,१; ६,७,१ । अभ्यस्थाद्विश्वा पृतना० । तै. सं. ४,२,८,१ । आपो रेवतीः क्षयथा० । ऋ. १०,३०,१२]

स्थाभिमातिघ्नीश्च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि प्रजाभ्यो वां व्रजक्षितस्स्थोर्ध्वश्रितो बृहस्पतेर्वो ब्रह्मणा देवताभिर्गृह्णामि वसु च स्थ वामं च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि तेजसे वां क्षत्रभृतस्स्थौजस्विनीर्मित्रावरुणयोर्वो देवयोर्देवताभिर्गृह्णामि भूतं च स्थ भव्यं च स्थ देवस्य वस्सवितुः प्रसवे मधुमतीस्सादयामि वर्चसे वां दिवि श्रयस्वान्तरिक्षमापृण पृथिव्यां
८
कल्पस्व ॥१॥

यददस्संप्रयतीरहा अनदता हते । तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः ॥ ९
यत् प्रेषिता वरुणेनाच्छीभँ समवल्गत । तदिन्द्र आप्नोद्यतीर्वस्तस्मादापो अनुष्ठन ॥ १०
अपकामँ स्यन्दमाना अवीवरत वो हिकम् । ११
इन्द्रो वश्शक्तिभिर्देवीस्तस्माद्वार्नाम वः प्रियम् ॥
एको देवो अप्यतिष्ठत् स्यन्दमाना उपेत्य । उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥ १२
आपो देवीर्घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत्ताः । १३
तीव्रा रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसागन् ॥ १४
तपो योनिरसि प्राजापत्यं विश्वाभिस्त्वा धीभिरुपदधामि ॥
ये यज्ञं समगृभ्णन् देवा देवेभ्यस्परि । १५
तान् गायत्री नयतु प्रजानती स्वर्गे लोके अमृतं दुहाना ॥
ये ज्योतींषि संदधति स्वरारोहन्तो अमृतस्य लोकम् । १६
ते यन्तु प्रजानन्तो यज्ञं दधानास्सुकृतस्य लोकम् ॥
यः पन्था विततो देवयानश्छन्दोभिर्विगृहीत एति । १७
तेनातिष्ठ दिवमन्तरिक्षं यज्ञं गृहीत्वा सुकृतस्य लोकम् ॥
ये पशवो मेध्यासो यज्ञस्य योनिमभिसंबभूवुः । १८
तान् ददन्ते कवयो विपश्चितो यज्ञं दुहानास्सुकृतस्य लोके ॥
यो वज्रस्सहस्रधारो द्यावापृथिव्योरधि निर्मितः । १९
तेनैतु यजमानस्स्वस्त्या दिवोऽधि पृष्ठमस्थात् ॥

[१] मै. २,१३,१-२; २,७,१५ (७-१२,१५; १९९) । वा. १०,५; २२,६,२०; ३१,१७ । काण्व. ११,१२; २४,६; ३५,१७ । तै. सं. ५,६,१ । [यददस्संप्रयतीरहा० । अथर्व. ३,१३,१; तै. सं. ५,६,१,२ । यत् प्रेषिता वरुणेना० । अथर्व. ३,१३,२; तै. सं. ५,६,१,२ । अपकामँ स्यन्दमाना० । अथर्व. ३,१३,३; तै. सं. ५,६,१,३ । एको (वो) देवो अप्यतिष्ठत्० । अथर्व. ३,१३,४ । आपो देवी(भद्रा)र्घृतमिदाप० । अथर्व. ३,१३,५; तै. सं. ५,६,१,३]

आयवे स्वाहायुष्कृते स्वाहायोः परमने स्वाहा विष्णवे स्वाहा बृहस्पतये स्वाहा ॥ २०
अद्भ्यस्संभृतः पृथिव्या रसो विश्वकर्मणस्समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवमाजानमग्रे ॥ २१

त्रिवृत् ते अग्ने शिरस्तन्मे अग्ने शिरः पञ्चदशौ ते अग्ने बाहू तौ मे अग्ने बाहू सप्तदशस्ते अग्न आत्मा स मे अग्न आत्मैकविंशौ ते अग्न ऊरू तौ मे अग्न ऊरू त्रिणवौ ते अग्ने अष्ठीवन्तौ तौ मे अग्ने अष्ठीवन्तौ त्रयस्त्रिंशं ते अग्ने प्रतिष्ठानं तन्मे अग्ने प्रतिष्ठानं त्रिवृत् ते अग्ने शिरस्तेन माभिपाहि पञ्चदशौ ते अग्ने बाहू ताभ्यां माभिपाहि सप्तदशस्ते अग्न आत्मा तेन माभिपाह्येकविंशौ ते अग्न ऊरू ताभ्यां माभिपाहि त्रिणवौ ते अग्ने अष्ठीवन्तौ ताभ्यां माभिपाहि त्रयस्त्रिंशं ते अग्ने प्रतिष्ठानं तेन माभिपाहि ॥२॥ २२

प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं व्यचस्वतीं प्रथस्वतीं प्रथोऽसि पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृँह पृथिवीं मा हिंसीर्विश्वस्मै प्राणाय व्यानायापानायोदानाय प्रतिष्ठायै चरित्रायाग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २३
चित्तिं जुहोमि मनसा यथा देवा इहागमन् । वीतिहोत्रा ऋतावृधः ॥ २४
समुद्रस्य वयुनस्य परमञ्जुहोमि विश्वकर्मणे । विश्वाहादाम्यँ हविः ॥ २५

स्वाहोदपुरा नामास्यन्नेन विष्टा वसवो रक्षितारोऽग्निरधि वियत्तो अस्यां तां त्वा प्रपद्ये सा मे शर्म च वर्म च भव तया देवतयाङ्गिरस्वद् ध्रुवा सीद ज्योतिरसि ज्योतिर्मे यच्छ पृथिवीं दृँह पृथिव्या मा पाहि तया देवतयाङ्गिरस्वद् ध्रुवा सीद भूरसि भुवनस्य रेत इष्टका स्वर्गो लोको मनसा त्वान्वारोहामि सूरसि स्वरसीष्टका स्वर्गे लोके वाचा त्वान्वारोहामि यास्ते अग्न आर्द्रा योनयो याः कुलायिनीर्ये ते अग्न इन्दवो या उ नाभयो यास्ते अग्ने तन्व ऊर्जो नाम ताभिस्त्वमुभयीभिस्संविदानास्स्वयंचित्यानास्तन्वो निषीद ॥ २६
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नस्सन्त्वोषधीः ॥ २७
मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥ २८

[अद्भ्यस्संभृतः पृथिव्या० । तै. आ. ३,१३; १०,१,३]
[२] मै. २,७,१६; ८,१४; १०,६; १२,५; ३,४,६; ४,९,१६ । (२१८,२२०—२२५,२२९—२३०,२३२—२३४; ३३; २५; ६; ६८-६९; २१२) । वा. ८,३२; १२,५३; १३,१७,२७—३२; १७,७८; २७,१ । काण्व. ९,३१; १३,५४; १४,१७,२९—३४; १८,७८; २९,१ । चित्तिं जुहोमि० । तै. सं. ५,५,४,३ । मधु वाता ऋतायते० । ऋ. १,९०,६; तै. सं. ४,२,९,३; तै. आ. १०,१०,२; शत० ब्रा. १४,९,३,११ । मधु नक्तमुतोषसो० । ऋ. १,९०,७; तै. सं. ४,२,९,३; तै. आ. १०,१०,२; शत. ब्रा. १४,९,३,११]

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥ २९
सँसर्पन् त्रीन् समुद्रान् स्वर्गानपां पतिर्वृषभ इष्टकानाम्।
तत्र गच्छ यत्र पूर्वे परेताः पुरीषं वसानस्सुकृतस्य लोकम् ॥ ३०
अपां गम्भीरं गच्छ मा त्वा सूर्यः परिताप्सीन्माग्निर्वैश्वानरः।
अनु त्वा दिव्या वृष्टिस्सचतामच्छिद्राः प्रजा अभिविपश्य ॥ ३१
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः ॥ ३२
स्पृशा देवेभिरमृतेनागादुखा स्वसारमधि वेदिमस्थात्।
सत्यं पूर्वैर्ऋषिभिश्चाकॢपानोऽग्निः प्रविद्वाँ इह तद्दधातु ॥ ३३
पृथिवि पृथिव्यां सीद माता मातरि माता स्योना स्योनायाम् ॥ ३४
ऋतुं देवानाममृतत्वमीमहेऽग्निं सधस्थे सदनेष्वच्युतम्।
वैश्वानरं ब्रह्मणा विश्वव्यचसँ स्तोमस्य धामन्निदधे पुरीष्यम् ॥ ३५
न्यधुर्माग्नया कवयो वयोधसमग्निं सधस्थे सदनेषु सुक्रतुम्।
वैश्वानरं ब्रह्मणा विश्वव्यचसँ स्तोमस्य धामन् न्यधां पुरीष्यम् ॥ ३६
समिध्यमानं समिधा समिन्धतेऽग्निं सधस्थे सदनेष्वद्भुतम्।
वैश्वानरं ब्रह्मणा विश्वव्यचसँ स्तोमस्य धामन् पवमानमाभृतम् ॥ ३७
समास्त्वाग्ने ॥३॥ ३८

विश्वकर्मा दिशां पतिः प्रजापतिस्स नः पशून् पातु स मां पातु तया देवतयाङ्गिरस्वद् ध्रुवा सीद प्रजापतिर्दिशां पतिः प्रजापतिस्स नः पशून् पातु स मां पातु तया देवतयाङ्गिरस्वद् ध्रुवा सीद रुद्रो दिशां पतिर्वरुणो दिशां पतिरग्निर्दिशां पतिः प्रजापतिस्स नः पशून् पातु स मां पातु तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ मा छन्दस्तद् पृथिव्यग्निर्देवता प्रमा छन्दस्तदन्तरिक्षं वातो देवता प्रतिमा छन्दस्तद् द्यौस्सूर्यो देवताऽस्त्रीवयश्छन्दस्तद्दिशस्सोमो देवता विराट् छन्दस्तद्वाग्वरुणो देवता गायत्री छन्दस्तदजा बृहस्पतिर्देवता त्रिष्टुप् छन्दस्तद्धिरण्यमिन्द्रो देवता जगती छन्दस्तद्गौः प्रजापतिर्देवतानुष्टुप् छन्दस्तदायुर्मित्रो देवतोष्णिहा छन्दस्तच्चक्षुः पूषा देवता बृहती छन्दस्तद्दृष्टिः पर्जन्यो

[मधुमान्नो वनस्पति०। ऋ. १,९०,८. तै. सं. ४,२,९,३; तै. आ. १०.१०,२; शत. ब्रा. १४,९,३,१३। मही द्यौः पृथिवी च न०। ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,९,२। समास्त्वाग्ने०। अथर्व. २.६.१]
[४] मै. २,१३,१४ (९६-९७)। वा. १४,१८-२०; १२,५३; १३,१९,२४; १४,६,१२,१४; १५,५८,६४। काण्व. १५,१८-२२; १३,५४; १४,१९,२५; १५,५,१९-१६; १६,७९,८४। तै. सं. ४,३,७,१; ५,५,५।

देवता पङ्क्तिश्छन्दस्तदश्वः परमेष्ठी देवता तेन ब्रह्मणा तेन च्छन्दसा तया देवतयाङ्गिरस्वद् ध्रुवास्सीदत ॥४॥ ३९-४०

ऋतसदसि सत्यसदसि तेजस्सदसि वर्चस्सदसि यशस्सदसि गृणानासि धामासि धाम्ने त्वा धामभ्यस्त्वा धामसु सीद सनिरसि सन्ये त्वा सनेयं वित्तिरसि वित्त्यै त्वा विदेयं कर्मासि कर्मणे त्वा क्रियासँ शक्तिरसि शक्त्यै त्वा शकेयं भूतिरसि भूत्यै त्वा भूयासं गूर्दोऽसि गूर्दाय त्वा गूर्देभ्यस्त्वा गूर्दे सीद क्षत्रं पाहि क्षत्रं पिन्व क्षत्रं जिन्व क्षत्रं यच्छ क्षत्रमसि क्षत्राय त्वा क्षत्रेभ्यस्त्वा क्षत्रे सीद विश्वेषु त्वा पार्थिवेषु सादयामि विश्वेषु त्वान्तरिक्षेषु सादयामि विश्वेषु त्वा दिव्येषु सादयामि विश्वासु त्वाप्सु सादयामि विश्वासु त्वौषधिषु सादयामि विश्वेषु त्वा वनस्पतिषु सादयामि विश्वासु त्वा दिक्षु सादयामि विश्वासु त्वा प्रदिक्षु सादयामि ॥ दिवि सीद स्वर्जिदसि पृतनाजिदसि भूरिजिदस्यभिजिदसि विश्वाजिदसि सर्वजिदसि सत्राजिदसि धनजिदसि भ्राडसि विभ्राडसि प्रभ्राडसि सपत्नहनं त्वा वज्रँ सादयामि रक्षोहनं त्वा वज्रँ सादयामि पिशाचहनं त्वा वज्रँ सादयामि यातुधानहनं त्वा वज्रँ सादयाम्यरातिहनं त्वा वज्रँ सादयाम्यभिमातिहनं त्वा वज्रँ सादयामि शत्रुहणमसि शत्रुहणं भ्रातृव्यहणमसुरहणं त्वेन्द्रं वज्रँ सादयामि ॥५॥ ४१-४२

उद्यदस्युदितिरस्युद्यत्यस्याक्रममाणास्याक्रामन्त्यस्याक्रान्तिरसि संक्रममाणासि संक्रामन्त्यसि संक्रान्तिरसि स्वर्गासि स्वरसीषि सीदोर्जि सीद भगे सीद द्रविणे सीद सुभूते सीद पृथिव्या यज्ञिये सीद विष्णोः पदे सीदेडायाः पदे सीद घृतवति सीद पिन्वमाने सीद संवत्सरे सीद परिवत्सरे सीदेदावत्सरे सीदानुवत्सरे सीदोद्वत्सरे सीदैकस्यां सीद दशसु सीद शते सीद सहस्रे सीदायुते सीद प्रयुते सीद नियुते सीदार्बुदे सीद न्यर्बुदे सीद बद्वे सीद समुद्रे सीद मध्ये सीदान्ते सीद परार्धे सीद ॥ पिन्वमानासि पिन्वमानाय त्वा पिन्वमानेभ्यस्त्वा पिन्वमाने सीदर्तमस्यृताय त्वर्तेभ्यस्त्वर्ते सीद सत्यमसि सत्याय त्वा सत्येभ्यस्त्वा सत्ये सीद संधिरसि संधये त्वा संधिभ्यस्त्वा संधिषु सीद सँश्लिडसि सँश्लिषे त्वा सँश्लिड्भ्यस्त्वा सँश्लिट्सु सीद संपदसि संपदे त्वा संपद्भ्यस्त्वा संपत्सु सीद ॥६॥ ४३-४४

प्राची दिग्गायत्री छन्दो रथन्तरँ सामाग्निर्देवता वसन्त ऋतुस्त्रिवृत्स्तोमः पञ्चदशवर्तनिस्त्र्यविर्वयः कृतमयानां पुरोवातो वातस्सानग ऋषिर्दक्षिणा दिक् त्रिष्टुप् छन्दो बृहत्सामेन्द्रो देवता ग्रीष्म ऋतुः पञ्चदशस्स्तोमस्सप्तदशवर्तनिर्दित्यवाड्वयस्त्रेतायानां दक्षिणाद्वातो वातः प्रत्न ऋषिः प्रतीची

[६] वा. २७,४५। काण्व. २९,४९।
[७] मै. २,७,२० (२४९-२५२)। वा. १५,१०-१९; ४,१२; १६,६४-६६। काण्व. १६,१६-१७,१९-२०, २२-२३,२५-२६,२८-२९; ४,१६; १७,६४। तै. सं. ४,३,३।

दिग्जगती छन्दो वैरूपँ साम मरुतो देवता वर्षा ऋतुस्सप्तदशस्स्तोम एकविंशवर्तनिस्त्रिवत्सो वयो द्वापरोऽयानां पश्चाद्वातो वातस्सनातन ऋषिरुदीची दिगनुष्टुप् छन्दो वैराजँ साम विश्वे देवा देवता शरदृतुरेकविंशस्स्तोमस्त्रिणववर्तनिस्तुर्यवाड्वय आस्कन्दोऽयानामुत्तराद्वातो वातः पुराण ऋषिरूर्ध्वा दिक् पङ्क्तिश्छन्दश्शाक्वरं रैवतँ साम मित्रावरुणौ देवता हेमन्तशिशिरा ऋतू त्रिणवस्स्तोमस्त्रयस्त्रिंशवर्तनिः पष्ठवाड्वयोऽभिभूरयानां विष्वग्वातो वातस्सुपर्ण ऋषिः पितरः पितामहाः परेऽवरेभ्यस्ते नः पान्तु ते नोऽवन्त्वस्मिन् ब्रह्मन्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्यां देवहूत्यां तेन ब्रह्मणा तेन च्छन्दसा तया देवतयाङ्गिरस्वद् ध्रुवास्सीदत ॥७॥ ४५

आयुषः प्राणँ संतनु प्राणाद्व्यानँ संतनु व्यानादपानँ संतन्वपानाच्चक्षुस्संतनु चक्षुषश्श्रोत्रँ संतनु श्रोत्राद्वाचँ संतनु वाच आत्मानँ संतन्वात्मनः पृथिवीं संतनु पृथिव्या अन्तरिक्षँ संतन्वन्तरिक्षाद्दिवँ संतनु दिवस्स्वस्संतनु पृथिवी यज्ञामावस्या गर्भो वनस्पतयो जराय्वग्निर्वत्सोऽग्निहोत्रं पीयूषोऽन्तरिक्षं यज्ञा धाता गर्भो रुद्रा जरायु वायुर्वत्सो घर्मः पीयूषो द्यौर्वशा स्तनयित्नुर्गर्भो नक्षत्राणि जरायु सूर्यो वत्सो वृष्टिः पीयूष ऋग्वशा बृहद्रथन्तरे गर्भः प्रैषनिविदो जरायु यज्ञो वत्सो दक्षिणा पीयूषो विड्वशा राजन्यो गर्भः पशवो जरायु राजा वत्सो बलिः पीयूषः ॥८॥ ४६

नृमस्कृदसि वाग्विस्कृदसि प्राच्यस्यूर्ध्वास्यन्तरिक्षमसि तेजोदां त्वा तेजसि सादयामि वर्चोदां त्वा वर्चसि सादयामि पयोदां त्वा पयसि सादयामि यशोदां त्वा यशसि सादयामि द्रविणोदां त्वा द्रविणे सादयामि पृथिव्यास्त्वा द्रविणे सादयाम्यन्तरिक्षस्य त्वा द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा द्रविणे सादयाम्यप्सुषदसि वयस्सदसि श्येनसदसि गृध्रसदसि सुपर्णसदसि ॥ ४७
या देव्यसीष्टक आयुर्दा उपशीवरी। सा मामुपशेष्व जायेव पतिमित् सदा ॥ ४८
या देव्यसीष्टके प्राणदा व्यानदा अपानदाश्चक्षुर्दाश्श्रोत्रदा वाग्दा आत्मदाः पृथिविदा अन्तरिक्षदा द्यौदास्स्वर्दाः कुमारीदाः प्रफर्वीदाः प्रथमौपशदा युवतिदा उपशीवरी ॥ सा मामुपशेष्व जायेव पतिमित् सदा ॥९॥ ४९-५०
इयमेव सा या प्रथमा व्यौच्छत् सावास्वन्तश्चरति प्रविष्टा।
वधूर्जिगाय नवगज्जनित्री त्रय एनां महिमानस्सचन्ते ॥ ५१

[अग्मिन्‌ ब्रह्मन्य०…। अथर्व. ५,२४,१-१७]
[८] तै. ब्रा. १,५,७।
[९] मै. २,१३,१६; १८ (९९,१०१)। वा. १३,५३। काण्व. १४,५४। तै. सं. ४,४,७; ६। मा. श्रौ. ६,२,३।
[१०] मै. २,१३,१० (७१-८०)। तै. सं. ४,३,११। [इयमेव सा या प्रथमा०। अथर्व. ८,९,११; तै. सं. ४,३,११,१]

छन्दस्वती उषसौ पेपिशाने समानं योनिमनुसंचरेते।
सूर्यपत्नी विचरतः प्रजानती केतुमती अजरे भूरिरेतसा ॥ ५२
ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मासो अनु रेतसागुः।
प्रजामेका रक्षत्यूर्जमेका क्षत्रमेका रक्षति देवयूनाम् ॥ ५३
चतुष्टोममदधाद्या तुरीया यज्ञस्य पक्षा ऋषयो भवन्ती।
गायत्री त्रिष्टुब्जगती विराडर्कं युञ्जानास्स्वराभरन्निदम् ॥ ५४
पञ्चभिर्धाता विदधा इदं यत् तासाँ स्वसॄरजनन् पञ्च पञ्च।
तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः ॥ ५५
पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च।
पञ्च दिशः पञ्चदशेन क्ऌप्तास्समानमूर्ध्नीरभि लोकमेकम् ॥ ५६
ज्योतिष्मती प्रतिमुञ्चते नभ उषा देवी सूर्यस्य व्रतेन।
विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे ॥ ५७
त्रिंशत् स्वसार उपयन्ति निष्कृतँ समानं केतुं प्रतिमुञ्चमानाः।
ऋतूँस्तन्वते कवयः प्रजानतीर्मध्येछन्दसः परियन्ति भास्वतीः ॥ ५८
शुक्रर्षभा नभसा ज्योतिषागाद्विश्वरूपा शबल्यग्निकेतुः।
समानमर्थँ स्वपस्यमाना बिभ्रती जरामजर उष आगाः ॥ ५९
ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानाम्।
एका सती बहुधोषो व्युच्छाजीर्णा त्वं जरय सर्वमन्यत् ॥ ६०
ऋतस्य धाम प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति।
सूर्यस्यैका चरति निष्कृतानि घर्मस्यैका सवितैकां नियच्छते ॥ ६१
एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रम्।
तेन दस्यून् व्यसहन्त देवा हन्तासुराणामभवच्छचीभिः ॥ ६२

[छन्दस्वती (छन्दः पक्षे) उषसौ (उषसा)०। अथर्व. ८,९,१२; तै. सं. ४,३,११,१। ऋतस्य पन्थामनु०। अथर्व. ८,९,१३; तै. सं. ४,३,११,१। चतुष्टोम० (अग्नीषोमा०)। अथर्व. ८,९,१४; तै. सं. ४,३,११,२। पञ्चभिर्धाता विदधा०। तै. सं. ४,३,११,२। पञ्च व्युष्टीरनु०। अथर्व. ८,९,१५; तै. सं. ४,३,११,४; काठ. २६,११,३६। ज्योतिष्मती प्रतिमुञ्चते०। तै. सं. ४,३,११,३। त्रिंशत् स्वसार उपयन्ति०। तै. सं. ४,३,११,३। शुक्रर्षभा नभसा०। तै. सं. ४,३,११,५। ऋतूनां पत्नी प्रथमे०। तै. सं. ४,३,११,५। ऋतस्य धाम०। तै. सं. ४,३,११,५। एकाष्टका तपसा०। तै. सं. ४,३,११,३]

अनानुजामनुजां मामकर्त सत्यं वदन्त्यनुयच्छ एतत् ।
भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त ॥ ६३
अभून्नु नस्सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदन्नु गाधम् ।
भूयासमस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त ॥ ६४
प्रथमा ह व्युवास सा धेनुरभवद्यमे । सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥१०॥ ६५

अग्निनर्वाषाट् ऋत्वा शचीपतिस्सौहार्देन स्वर्गो यज्ञेन मघवान्मन्युना वृत्रहा वृषभेन त्वष्टा वषट्-
कारेणर्षभाक् पृथिव्या स्तृणीकोऽश्वेन गयस्साम्ना तनूमानृग्भिरन्नादस्तपसानाधृष्टस्सूर्येण विराडृ-
तुभिः प्राभवत् संवत्सरेण पर्यभवदभीषाट् चामीषाश्चाभिवयाश्चोर्ध्ववयाश्च सवयाश्च बृहद्वयाश्च
सासहांश्च सहीयाँश्च सहमानश्च सहस्वाँश्चाभि त्वा शूर नोनुमस्त्वामिद्धि हवामहे ॥११॥ ६६

कया नश्चित्र आभुवदूती सदावृधस्सखा । कया शचिष्ठया वृता ॥ ६७
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ ६८
अभी षु णस्सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥ ६९
इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥ ७०
इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । अविन्दच्छर्यणावति ॥ ७१
अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥ ७२
तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥ ७३
इन्द्रस्स दामने कृत ओजिष्ठस्स बले वृधी । द्युम्नी शुक्री स सोम्यः ॥ ७४

। अनानुजामनुजां०। तै. सं. ४,२,११,३ । अभून्नु नस्सुमतौ०। तै. सं. ४,३,११,४ । प्रथमा ह व्युवास०। अथर्व. २,१०,१; तै. सं. ४,३,११,५]

[११] वा. २७,३५,३७ । काण्व. २९,४०,४२ । तै. सं. ४.४,८ । [अभि त्वा शूर नोनुमः० । ऋ. ७.३२,२२; सा. २३३,६८०, अथर्व. २०.१२१,१, तै. सं. २,४,१४,१ । त्वामिद्धि हवामहे० । ऋ. ६,४६,१; सा. २३४,८०९; अथर्व. २०.९८ १; तै. सं. २,४ १४,३]

[१२] मै. २, १३,६, ९ (२२—३२ ६२—७०) । वा. २७,३५—४२,४४, ३६ ४—६ । काण्व. २९ ४०—४८; ३६.४-६ । [कया नश्चित्र०। ऋ. ४,३१,१; सा. १६९; ६८२, अथर्व. २०,१२४,१; तै. सं ४,२,११,२, तै. आ. ४,४२,२ । कस्त्वा सत्यो मदानां० । ऋ. ४,३१,२; सा. ६८३; अथर्व. २०,१२४,२; तै. आ. ४,४२,३ । अभी षु णस्सखीनां० ऋ. ४,३१.३; सा. ६८४; अथर्व. २०,१२४,३; तै. आ. ४,४२,३ । इन्द्रो दधीचो अस्थभिः० । ऋ. १,८४,१३, सा. १७९; ९१३; अथर्व. २०,४१,१; तै. ब्रा. १,५,८,१। इच्छन्नश्वस्य यच्छिरः० । ऋ. १,८४,१४; सा. ९१४; अथर्व. २०,४१,२; तै. ब्रा. १,५,८,१ । अत्राह गोरमन्वत० । ऋ. १, ८४,१५; सा. १४७; ९१५; अथर्व. २०,४१,३; तै. ब्रा. १,५,८,१; नि. ४,२५ । तमिन्द्रं वाजयामसि० । ऋ. ८,९३,७; सा. ११९; १२२२; अथर्व. २०,४७,१, १३७,१२; तै. ब्रा. १,५,८,३; २,४,१,३ । इन्द्रस्स दामने कृत० । ऋ. ८,९३,८; सा. १२२३; अथर्व. २०,४७,२; १३७,१३; तै. ब्रा. १,५.८,३]

गिरा वज्रो न संभृतस्सबलो अनपच्युतः । ववक्ष उग्रो अस्तृतः ॥ ७५
इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥ ७६
इन्द्र इद्धर्योस्सचा संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥ ७७
इन्द्र वाजेषु नो वह सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ ७८
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतस्स्वर्दृशमीशानमिन्द्र तस्थुषः । ईशानमिन्द्र तस्थुषः ॥ ७९
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ८०
त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः । त्वां काष्ठास्वर्वतः ॥ ८१
स त्वं नश्चित्र वज्रहस्त धृष्णुया महस्स्तवानो अद्रिवः ।
महस्स्तवानो अद्रिवो गामश्वं रथ्यमिन्द्र संकिर सत्रा वाजं न जिग्युषे ॥ ८२
यज्ञा यज्ञा वो अग्नये गिरा गिरा च चक्षसे ।
प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शँसिषम् ।
प्रियं मित्रं न शँसिषम् ॥ ८३
ऊर्जो नपातँ स हिनायमस्मयुर्दाशेम हव्यदातये दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥१२॥ ८४
अग्ने देवाँ इहावह जज्ञानो वृक्तबर्हिषे । असि होता न ईड्यः ॥ ८५

[गिरा वज्रो न संभृत० । ऋ. ८,९३.९; सा. १२२४, अथर्व. २०,४७,३, १३७,१४; तै. ब्रा. १,५,८,३ । इन्द्रमिद्गाथिनो० । ऋ. १,७,१; सा. १९८; ७९६; अथर्व. २०,३८.४, ४७,४; ७०,७; तै. सं. १,६,१२,२; तै. ब्रा. १,५.८.१, नि. ७,२ । इन्द्र इद्धर्योस्सचा० । ऋ. १,७,२, सा. ५९७; ७९७; अथर्व. २०,३८,५; ४७, ५; ७० ८; तै. ब्रा. १,५,८,२ । इन्द्र वाजेषु नो० । ऋ. १,७,४; सा. ५९८; ७९८; अथर्व. २०,७०,१०; तै. ब्रा. १,५,८,२ । अभि त्वा शूर नोनुमः० । (एकादशानुवाके द्रष्टव्यम्) । न त्वावाँ अन्यो दिव्यो० । ऋ. ७,३२,२३; सा. ६८१; अथर्व. २०,१२१.२ । त्वामिद्धि हवामहे० । (एकादशानुवाके द्रष्टव्यम्) । स त्वं नश्चित्र वज्रहस्त० । ऋ. ६,४६,२; सा. ८१०; अथर्व. २०,९८.२ । यज्ञा यज्ञा वो० । ऋ. ६,४८,१; सा. ३५; ७०३ । ऊर्जो नपातं स० । ऋ. ६,४८,२; सा. ७०४]

[१३] मै. २,१३,५; २० (१९;१०३) । वा. १३,३९; १२,५३; १३,१९,२४; १४,६,१२,१४; १५,५७-५८, ६४ । काण्व. १४.४१; १३,५४; १४,१९,२५; १५,५,१५—१६, १६,७९,८४ । तै. ब्रा. ३,११,६,३-४ । मा. श्रौ. ६.२,३ । [अग्ने देवाँ इहावह जज्ञानः० । ऋ. १,१२,३; सा. ७९२, अथर्व. २०,१०१,३; तै. ब्रा. ३,११, ६,२]

अगन्म महो नमसा यविष्ठं यो दीदाय समिद्धस्स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ ८६
मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम् ।
त्वामर्भस्य हविषस्समानमित्त्वां महो वृणते नान्यं त्वत् ॥ ८७
मनुष्वत् त्वा निधीमहि मनुष्वत् समिधीमहि ।
अग्ने मनुष्वदङ्गिरो देवान् देवयते यज ॥ ८८
अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।
अग्नी राये स्वाभुवँ सं प्रीतो याति वार्यमिषँ स्तोतृभ्य आभर ॥ ८९
अग्निर्देवता कृत्तिका नक्षत्रं प्रजापतिर्देवता रोहिणी नक्षत्रं मरुतो देवतेन्वका नक्षत्रं रुद्रो दवता
बाहुर्नक्षत्रमदितिर्देवता पुनर्वसुर्नक्षत्रं बृहस्पतिर्देवता तिष्यो नक्षत्रँ सर्पा देवताश्लेषा नक्षत्रं
पितरो देवता मघा नक्षत्रं भगो देवता फल्गुनीर्नक्षत्रमर्यमा देवतोत्तराः फल्गुनीर्नक्षत्रँ सविता
देवता हस्तो नक्षत्रं त्वष्टा देवता चित्रा नक्षत्रं वायुर्देवता निष्ट्या नक्षत्रमिन्द्राग्नी देवता विशाखं
नक्षत्रं मित्रो देवतानूराधा नक्षत्रमिन्द्रो देवता ज्येष्ठा नक्षत्रं निर्ऋतिर्देवता मूलं नक्षत्रमापो देवताषाढा
नक्षत्रं विश्वे देवा देवतोत्तरा अषाढा नक्षत्रं विष्णुर्देवताश्वत्थो नक्षत्रं वसवो देवता श्रविष्ठा नक्षत्रं
वरुणो देवता शतभिषङ् नक्षत्रमज एकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्न्यो देवतोत्तरे प्रोष्ठपदा नक्षत्रं
पूषा देवता रेवती नक्षत्रमश्विनौ देवताश्वयुजौ नक्षत्रं यमो देवतापभरणीर्नक्षत्रमग्ने रुचस्स्थ प्रजापते-
स्सोमस्य धातुर्भूयासं प्रजनिषीय तेन ब्रह्मणा तेन च्छन्दसा तया देवतयाङ्गिरस्वद् ध्रुवास्सीदत ९०
॥१३॥ ९१
अग्निर्मूर्धायमग्निस्त्वामग्ने पुष्करादधि ॥
हुवे वस्सुद्योत्मानँ सुवृक्तिं विशामग्निमतिथिं सुप्रयसम् ।
मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ॥ ९२

[अगन्म महो (महा) नमसा०। ऋ. ७,१२,१; सा. १३०४; तै. ब्रा. ३,११,६,२ । मेधाकारं विदथस्य०। ऋ. १०,९१,८; सा. ९८४; तै. ब्रा. ३,११,६,३ । मनुष्वत् त्वा निधीमहि० । ऋ. ५,२१,१; तै. ब्रा. ३,११, ६,३ । अग्निर्हि वाजिनं विशे० । ऋ. ५,६,३; सा. १७३८; तै. ब्रा. ३,११,६,४]

[१४] मै. २,१३,७ (३३,३७—३८,४२—४४) । वा. ३,१२,४०; ११,३२, १३,१४; १५,२०—२२,२७—२८,३१, ४१; २६,१२ । काण्व. ३,१८; १२,३२, १४,१४; १६,४१—४३,४८—४९,५२—५३,६३ । तै. सं. ४,४,५ । [अग्निर्मूर्धा दिवः० । ऋ. ८,४४,१६, सा. २७; १५३२; तै. सं. १,५,५,१; ४,४,१,१, तै. ब्रा. ३,५,७,१ । त्वामग्ने पुष्करादधि० । अयमग्निः० । ऋ. ८,७५,४; ३,१६,१, सा. ६०; तै. सं. २,६,११,१; ४,४,४,१ । हुवे वस्सुद्योत्मानँ० । ऋ. ६,१६,१३, सा. ९; तै. सं. ३,५,११,३, ४,१,३,१ २,४,१ । ऋ. २,४,१]

पुरो वो मन्द्रं दिव्यँ सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिस्स हि नो विभावा स्वध्वरा करति जातवेदाः ॥ ९३
का त आकूतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥ ९४
जनस्य गोपा अजनिष्ट जागृविरग्निस्सुदक्षस्सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यश्शुचिः ॥ ९५
त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वने वने ।
स जायसे मथ्यमानस्सहो महत्त्वामाहुस्सहसस्पुत्रमङ्गिरः ॥ ९६
यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे ।
इन्द्रेण देवैस्सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥ ९७
त्वामग्ने हविष्मन्तो देवं मर्तास ईडते । मन्ये त्वा जातवेदसँ स हव्या वक्ष्यानुषक् ॥ ९८
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ॥ ९९
यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो । महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ १००
आ ते अग्न इधीमहि ॥ १०१
आ ते अग्न ऋचा हविश्शुक्रस्य शोचिषस्पते ।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यँ हूयत इषँ स्तोतृभ्य आभर ॥ १०२
अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषँ स्तोतृभ्य आभर ॥१४॥ १०३
अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् । दूरेदृशं गृहपतिमथर्युम् ॥ १०४

[पुरो वो मन्द्रं दिव्यँ० । ऋ. ६,१०,१। का त आकूति (उपेति) मनसो० । ऋ. १,७६,१ । जनस्य गोपा अजनिष्ट० । ऋ. ५.११,१; सा. ९०७; तै. सं. ४,४,४,२ । त्वामग्ने अङ्गिरसो गुहा० । ऋ. ५,११,६; सा. ९०८; तै. सं. ४.४,४,२ । यज्ञस्य केतुं प्रथमं० । ऋ. ५,११,२; सा. ९०९; तै. सं. ४,४,४,३ । त्वामग्ने हविष्मन्तो० । ऋ. ५,९,१, तै. ब्रा. २,४,१,४ । त्वां चित्रश्रवस्तम० । ऋ. १,४५,६. तै. सं. ४,४,४,३ । यद्वाहिष्ठं तदग्नये० । ऋ. ५ २५,७; सा. ८६; तै. सं. १.१.१४.४ । आ ते अग्न इधीमहि० । ऋ. ५,६,४. सा. ४१९; १०२२; अथर्व. १८,४,८८; तै. सं. ४,४ ४.६ । आ ते अग्न ऋचा० । ऋ. ५,६,५; सा. १०२३; तै.सं. ४,४,४,६ । अग्निं तं मन्ये० । ऋ. ५,६,१; सा. ४२५; १७३७]

[१५] मै. २,१०,६; १३,८; ४,१०,१, १२,५ (६६; ४६,४९-५१,५५; ९३; १२२-१२४) । वा. १५,३२,३५-३८, ४७; १७,७६ । काण्व. १६,५४,५७—६०,६९, १८,७६ । तै. सं. ४.४,४ । [अग्निं नरो दीधितिभिः० । ऋ. ७,१,१, सा. ७२,१३७३; नि. ५,१०]

तमग्निमस्ते वसवो न्यृण्वन् सुप्रतिचक्षमवसे कुतश्चित् ।
दक्षाय्यो यो दम आस नित्यः ॥ १०५
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वां शश्वन्त उपयन्ति वाजाः॥ १०६
एना वो अग्निं नमसोर्जो नपातमाहुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १०७
अग्न आयाह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १०८
उदस्य शोचिरस्थादाजुह्वानस्य मीढुषः ।
उद्धूमासो अरुषासो दिविस्पृशस्समग्निमिन्धते नरः ॥ १०९
अग्ने वाजस्य गोमत ईशानस्सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः॥ ११०
स इधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ १११
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥ ११२
भद्रो नो अग्निराहुतो भद्रा रातिस्सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥ ११३
यस्समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥ ११४
तदग्ने द्युम्नमाभर यत् सासहत् सदने कंचिदत्रिणम् । मन्युं जनस्य दूढ्यः ॥ ११५
अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनुवष्टि शोचिषाजुह्वानस्य सर्पिषः ॥ ११६
यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिश्शुक्र मन्मभिः ।
परिज्मानमिव द्यां होतारं चर्षणीनाम् ।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥ ११७

[तमग्निमस्ते वसवो० । ऋ. ७,१,२; सा. १३७४ । प्रेद्धो अग्ने दीदिहि० । ऋ. ७,१,३; सा. १३७५; तै.सं. ४,६,५,४ । एना वो अग्निं० । ऋ. ७,१६,१; सा. ४५,७६९; तै. सं. ४,४,४,४; नि.३,२१ । अग्न आयाह्यग्निभि० । ऋ. ८,६०,१; सा. १५४२; अथर्व. २०,१०३,२ । उदस्य शोचिरस्थाद्० । ऋ. ७,१६,३; तै. सं. ४, ४,४,५ । अग्ने वाजस्य गोमतः० । ऋ. १,७९,४; सा. ९९; १५६१; तै. सं. ४,४,४,५ । स इधानो वसुष्कवि० । ऋ. १,७९,५; सा. १५६२; तै. सं. ४,४,४,५ । क्षपो राजन्नुत० । ऋ. १,७९,६; सा. १५६३; तै.सं. ४,४,४,५ । भद्रो नो अग्निराहुतो० । ऋ. ८,१९,१९; सा. १११; १५५१ । यस्समिधा य आहुत्या० । ऋ. ८,१९,५ । तदग्ने द्युम्नमाभर० । ऋ. ८,१९,१५; सा. ११३ । अग्नि होतारं मन्ये० । ऋ. १,१२७,१; सा. ४६५; १८१३; अथर्व. २०,६७,३; तै. सं. ४,३,४,८; नि. ६,८ । यजिष्ठं त्वा यजमाना० । ऋ. १,१२७,२; सा. १८१४]

एवेन सद्यः पर्येषि पार्थिवं मुहुर्गीरितो वृषभः कनिक्रदत् दधद्रेतः कनिक्रदत् ।
शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः ।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥ ११८
अचेत्यग्निश्चिकितिर्हव्यवाट् स सुमद्रथः ।
अग्निश्शुक्रेण शोचिषा बृहत् सूर्यो अरोचत ॥ ११९
भन् मृध्राण्यप द्विषो दहन् रक्षाँसि विश्वहा ।
अग्निर्विश्वस्य राजति । अग्निर्विश्वं विराजति । अग्निस्सर्वं विराजति ॥१५॥ १२०
[१९६४]

॥ इति श्रीयजुषि काठके चरकशाखायामोरिमिकायां यद्क्रन्दो नामैकोनचत्वारिंशं स्थानकं संपूर्णम् ॥३९॥

अथ चत्वारिंशं स्थानकम् ।

हिरण्यगर्भः ।

हिरण्यगर्भस्समवर्ततताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १
यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव ।
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ २
य ओजोदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ ३
येन द्यौरुग्रा पृथिवी च दृढा येन स्वस्स्तभितं येन नाकम् ।
यो अन्तरिक्षं विममे वरीयः कस्मै देवाय हविषा विधेम ॥ ४

[एवेन सद्यः पर्येति० । ऋ. १,१२८,३ । अचेत्यग्निश्चिकितिः (०तुः)० । ऋ. ८,५६,५; सा. ४४७ । भ्रन्मृध्राण्यप द्विषो० । ऋ. ८,४३,२६]

[१] मै. २,१३,२३ (११०—११७) । वा. १२,१०२; १३,४; २३,१-३; २५,१०-१३; २७,२५—२६; १९,३४; ३२,३,६—७ । काण्व. १३,१०१; १४,४; २५,१-३; २७,१४—१७; २९,३३—३५; ३१,४६ । तै. सं. ४,१, ८,३ । मा. श्रौ. ६,२,३ । [हिरण्यगर्भस्समवर्तताग्रे० । ऋ. १०,१२१,१; अथर्व. ४,२,७; ११,५,१; तै. सं. ४,१,८,३; २,८,२; ताण्ड्य ब्रा. ९,९,१२; नि. १०,२३ । यः प्राणतो निमिषतश्च० । ऋ. १०,१२१,३; अथर्व. ४,२,२; तै. सं. ४,१,८,४; ७,५,१६,१ । य ओजोदा (आत्मदा)० । ऋ. १०,१२१,२; अथर्व. ४,२,१; १३,३,२४; तै. सं. ४,१,८,४; ७,५,१७,१ । येन द्यौरुग्रा० । ऋ. १०,१२१,५; ऋ. परि. ३३,१२; अथर्व. ४,२,४; तै. सं. ४,१,८,५]

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यस्मिन्नधि विततस्सूर एति कस्मै देवाय हविषा विधेम ॥ ५
यस्येमे विश्वे गिरयो महित्वा समुद्रं यस्य रसया सहाहुः ।
दिशो यस्य प्रदिशः पञ्च देवीः कस्मै देवाय हविषा विधेम ॥ ६
आपो ह यन्महतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां निरवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ ७
आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः ।
संवत्सरं ऋतुभिश्चाक्लृपानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥१॥ ८

प्राणापानाभ्यां त्वा सयुजा युजा युनज्म्याधाराभ्यां त्वा सयुजा युजा युनज्मीन्द्राग्निभ्यां
त्वा सयुजा युजा युनज्मि च्छन्दोभिस्त्वा स्तोमैभिस्त्वोक्थेभिस्त्वा तेजसे त्वा वर्चसे त्वा रय्यै त्वा
पोषाय त्वा सजातानां मध्यमेष्ठ्याय मया त्वा सयुजा युजा युनज्मि ॥ ९

त्वामग्ने वृषभं चेकितानं पुनर्युवानं जनयन्नुपागाम् ।
अस्थूरि णौ गार्हपत्यानि सन्तु तिग्मेन नौ ब्रह्मणा सँशिशाधि ॥ १०
संवत्सरस्य प्रतिमां ये त्वा रात्र्युपासते ।
तेषामायुष्मतीं प्रजां रायस्पोषेण सँसृज ॥ २ ॥ ११
यो अप्स्वन्तरग्निर्यो वृत्रे यः पुरुषे यो अश्मनि ।
य आविवेश भुवनानि विश्वा तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १२
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश ।
वैश्वानरस्सहसा पृष्टो अग्निस्स नो दिवा स रिषः पातु नक्तम् ॥ १३

[य इमे द्यावापृथिवी० । ऋ. १०,१२१,६; अथर्व. ४,२,३; तै. ब्रा. ३,६,३,४; नि. ८,१४ । यस्येमे विश्वे गिरयो (हिमवन्तो)० । ऋ. १०,१२१,४; अथर्व. ४,२,५; तै. सं. ४,१,८,४ । आपो ह यन्महतीः० । ऋ. १०,१२१,७; अथर्व. ४,२,६; तै. सं. ४,१,८,६; ४,१,८,५; तै. आ. १,२३,८ । कस्मै देवाय०-विधेम । ऋ. १०,१२१,१—९; अथर्व. ४,२,१—८ । आ नः प्रजां जनयतु० । ऋ. १०,८५,४३; अथर्व. १४,२,४०]

[२] मा. २,२७; १२,२१—२२; १५,८; १९,६ । काण्व. २,२०; १५,२२—२४; १६,१३; २१,५ । [अस्थूरि णौ (णो) गार्हपत्यानि० । ऋ. ६,१५,१९ (उत्तरार्धः); तै. ब्रा. ३,५,१२,१ । संवत्सरस्य प्रतिमां० । अथर्व. ३,१०,३; तै. सं. ५,७,२,१]

[३] मै. २,१३,११,१३ (८६; ९०—९३,९५) । वा. ८,३६; १२,४३; १३,१९; १४,६,१२,१४; १५,५८,६४; १८, ७१ । काण्व. ८,१७; १३,४३; १४,१९; १५,५,१५—१६; १६,७१,८४; २०,४१ । तै. सं. ४,४,५; ५,५,९,१; [यो अप्स्वन्तरग्नियों (ये अग्नयो)० । अथर्व. ३,२१,१ । पृष्टो दिवि पृष्टो० । ऋ. १,९८,२; तै. सं. १, ५,११,१; तै. ब्रा. ३,११,६,४; कठ. ४,१६,१३८]

यस्सोमे अन्तर्यो गोष्वन्तर्वयाँसि य आविवेश यो मृगेषु ।
य आविवेश द्विपदो यश्चतुष्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १४
विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीमन्तरिक्षं यच्छान्तरिक्षं दृँहान्तरिक्षं मा
हिँसीर्विश्वस्मै प्राणाय व्यानायापानायोदानाय प्रतिष्ठायै चरित्राय वायुष्ट्वाभिपातु मह्या स्वस्त्या
छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद् ध्रुवा सीदान्तरिक्षमसि द्यौर्ब्रह्मणा विष्टं रुद्रा रक्षितारो वायुरधि-
विपत्तो अस्यां तां त्वा प्रपद्ये सा मे शर्म च वर्म च भव तया देवतयाङ्गिरस्वद् ध्रुवा सीद तेजो-
ऽसि तेजो मे यच्छान्तरिक्षं दृँहान्तरिक्षं मा पाहि तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ १५
हुतादमग्निं यमु काममाहुर्यं दातारं प्रतिग्रहीतारमाहुः ।
यं जोहवीमि पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १६
येनेन्द्रस्य रथँ संबभूवुर्वैश्वानर उत विश्वदाव्यः ।
धीरो यश्शक्रः परिभूरदाभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १७
वेदिरसि सुधां मे धेहि वरुणस्य कुक्षी स्थो मा मा संताप्तं तार्क्ष्यारिष्टनेमेऽभि मा सच स्वस्त्या
छर्दिषा शंतमेन नमोऽग्नेर्वैश्वानरस्य हरसे नमश्शरवे त्रायमाण त्रायस्व नो इन्द्रराधि नो ब्रूहि ॥ १८
वर्च आधायि मे तनूस्सह ओजो महद्बलम् । त्रयस्त्रिंशद्वीर्याणि तान्यग्निः प्रददातु मे ॥ १९
आ मा वर्चोऽग्निना दत्तमेतु महि राधस्सह ओजो महद्बलम् ।
दीर्घायुत्वाय शतशारदाय प्रतिगृह्णामि महत इन्द्रियाय ॥ २०
अग्ने दुध्राग्ने कव्याग्ने किंशिलाग्ने वन्याग्ने कक्ष्य या त इषुर्युवा नाम तस्यै ते विधेम तया नः
पाहि तस्यै ते स्वाहा ॥३॥ २१

रोहितेषु त्वा जीमूतेषु सादयाम्यरुणेषु त्वा जीमूतेषु सादयामि कृष्णेषु त्वा नीलेषु त्वासितेषु
त्वा जीमूतेषु सादयाम्यम्बा नामासि दुला नामासि नितत्नी नामासि चुपुणीका नामास्यभ्रयन्ती
नामासि मेघयन्ती नामासि वर्षयन्ती नामासि ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि

[यस्सोमे (यः सोमे)अन्तर्यो० । अथर्व. ३,२१,२ । हुतादमग्निं यमु० (यो देवो विश्वादयमु) । अथर्व. ३,२१,४ (पूर्वार्धः) । यं जोहवीमि०...तत् । अथर्व. ३,२१,३ (उत्तरार्धः) । येनेन्द्रस्य रथँ (य इन्द्रेण सरथं)० । अथर्व. ३,२१,३ (पूर्वार्धः) । धीरो यश्शक्रः (यो धीरः शक्रः)० । अथर्व. ३,२१,४ (उत्तरार्धः) । तेभ्यो अग्निभ्यो हुतमस्त्वेतत् । अथर्व. ३,२१,१—७ । वर्च आधायि (आ धेहि) मे० । अथर्व. १९,३७,१ (पूर्वार्धः) । त्रयस्त्रिंशद्वीर्याणि (०तान्यानि)० । अथर्व. १९,३१,२ (उत्तरार्धः) । आ मा (इदं) वर्चोऽग्निना० । अथर्व. १९,३७,१ (पूर्वार्धः) । सह ओजो महद् (वयो) बलम् । अथर्व. १९,३७,१-२ (द्वि.च.) दीर्घायुत्वाय (इन्द्रियाय)० । १९,३७,२ (उत्तरार्धः) । अग्ने दुध्राग्ने कव्याग्ने० । तै. सं. ५,५,९,१]
[४] मै. २,१३,१९ (१०२) । तै. सं. १,४,३४; ४,४,५,१ । तै. आ. ३,१९ ।

ज्योतिर्विदं त्वा सादयामि ज्वलन्तीं त्वा सादयामि दीप्यमानां त्वा सादयामि मल्मलाभवन्तीं त्वा सादयामि रोचमानां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि भास्वतीं त्वा सादयामि बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयाम्यजस्रां त्वा सादयामि प्रसवाय त्वोपयामाय त्वा काटाक्षाय त्वार्णवाय त्वा सिन्धवे त्वा समुद्राय त्वा सरसे त्वा विश्वव्यचसे त्वा धर्णसाय त्वा द्रविणाय त्वा सुभूताय त्वान्तरिक्षाय त्वा ॥४॥ २२

द्यौरपराजितामृतेन नष्टादित्या रक्षितारस्सूर्योऽधिवियत्तो अस्यां तां त्वा प्रपद्ये सा मे शर्म च वर्म च भव तया देवतयाङ्गिरस्वद् ध्रुवा सीद स्वरसि स्वर्मे यच्छ दिवं दृँह दिवो मा पाहि तया देवतयाङ्गिरस्वद् ध्रुवा सीद परमेष्ठी त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं व्यचस्वतीं प्रथस्वतीं भास्वतीं रश्मिवतीमा या द्यां भास्या पृथिवीमुर्वन्तरिक्षं दिवं यच्छ दिवं दृँह दिवं मा हिंसीर्विश्वस्मै प्राणाय व्यानायापानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २३

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत्॥२४

प्राणोऽसि व्यानोऽस्यपानोऽसि श्रोत्रमसि चक्षुर्नाम तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २५

यत् तेऽचितं यदु चितं ते अग्ने यदूनं यद्वात्रातिरिक्तम् ।
विश्वे देवा अङ्गिरसश्चिनवन्नादित्यास्ते चितिमापूरयन्तु ॥ २६
यास्ते अग्ने समिधो यानि धाम या जिह्वा जातवेदो यो अर्चिः ।
ये ते अग्ने मेडवो य इन्दवस्तेभिरात्मानं चिनुहि प्रजानन् ॥ २७
चित्तिमचित्तिं चिनवो विविद्वान् पृष्ठेव वीता वृजिना च मर्तान् ।
राये च नस्स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥ २८
वयमग्ने धनवन्तस्स्यामालं यज्ञायोत दक्षिणायै ।
ग्रावा वदेदभि सोमस्यांशुमिन्द्रं शिक्षेमेन्दुना सुतेन ॥ २९
रायस्पोषं नो धेहि जातवेद ऊर्जो भागं मधुमत् सूनृतावत् ।
दधाम यज्ञं सुनवाम सोमं यज्ञेन त्वामुपशिक्षेम शक्र ॥ ३०
ईशानं त्वा शुश्रुमा वयं धनानां धनपते ।
गोमदग्ने अश्ववद्भूरि पुष्टं हिरण्यवदन्नवद्धेहि मह्यम् ॥ ३१

[५] मै. २,१३,१३ (९५)। वा. १२,५३; १३,१९; १४,६,१२,१४; १५,५८,६४। काण्व. १३,५४; १४,१९; १५,५,१५—१६; १६,७९,८४। तै. सं. ४,४,५-६। [उक्षान्नाय वशान्नाय०। ऋ. ८,४३,११; अथर्व. ३,२१,६; २०,१,३; तै. सं. १,३,१४,७। यत् तेऽचितं यदु०। तै. ब्रा. ३,११,६,१। यास्ते अग्ने समिधो०। तै. सं. ५,५,४,४। चित्तिमचित्तिं चिनवो०। ऋ. ४,२,११; तै. सं. ५,५,४,४]

दुहां ते द्यौः पृथिवी पयो जगरंस्त्वा सोदको विसर्पतु ।
प्रजापतिनात्मानमाप्रीणेऽरिक्तो म आत्मा ॥ ३२
यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो वनस्पतिषु ।
यो रुद्रो विश्वा भुवनाविवेश तस्मै रुद्राय नमो अस्तु देवाः ॥५॥ ३३

पिता मातरिश्वाच्छिद्रा पदा धादच्छिद्रोशिजः कवयः पदानुतक्षिषुस्सोमो विश्वविभेता नेषद्बृह-
स्पतिरुक्थामदानि शँसिषत् ॥ ३४

यदक्रन्दः ॥ ३५

यमेन दत्तं त्रित एनमायुनगिन्द्र एनं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट ॥ ३६
असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ ३७
त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तस्समुद्रे ।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥ ३८
इमा ते वाजिन्नवमार्जनानीमा शफानाँ सनितुर्निधाना ।
अत्रा ते भद्रा वृषभा अगृभ्णामृतस्य या अभिरक्षन्ति गोपाः ॥ ३९

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽस्यनुवत्सरोऽस्युद्वत्सरोऽसि देवस्य त्वा सवितुः प्रसवे-
ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिन्द्रवन्तं त्वा सादयामि धामच्छदसि स्वे योनौ सीद स्वे
पृथिव्या योनौ सीदर्तवस्ते कल्पन्तां मासास्ते कल्पन्तामर्धमासास्ते कल्पन्तामहोरात्राणि ते कल्प-
न्तामङ्गानि ते कल्पन्तां परूँषि ते कल्पन्ताँ शरीराणि ते कल्पन्तामेत्या प्रेत्या सं चा च प्र च
सारयाग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रस्सूर्यो ज्योतिर्ज्योतिस्सूर्यः ॥ ४०

इमँ स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये ।
उत्सं जुषस्व मधुमन्तमूर्मिं समुद्रियँ सदनमाविशस्व ॥६॥ ४१

[६] मै. १,६,१७,५१; ८,२,२०; ४,९,२१६। वा. ३,९; १७,८७; २७,४५; २९,१२—१६। काण्व. ३,९-१०; १९,१; २९,४९; ३१,२४-२८। तै. सं. ५,६,८,६; ४,६,७; ५,५,१०,६। [यदक्रन्दः प्रथमं०। ऋ. १,१६३,१; तै. सं. ४,२,८,१; ६,७,१। यमेन दत्तं त्रित०। ऋ. १,१६३,२; तै. सं. ४,६,७,१; नि. ४,१३। असि यमो अस्यादित्यः०। १,१६३,३; तै. सं ४,६,७,१। त्रीणि त आहुर्दिवि०। ऋ. १,१६३,४; तै. सं. ४,६,७,१। इमा ते वाजिन्नव०। ऋ. १,१६३,५; तै. सं. ४,६,७,२। संवत्सरोऽसि परिवत्सरोऽसि०। अथर्व. ६, ५५,३। इमं स्तनमूर्जस्वन्तं०। तै. सं. ५,५,१०,६]

समुद्रादूर्मिर्मधुमाँ उदारदुपाँशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ ४२
वयं नाम प्रब्रवाम घृतस्यास्मिन् यज्ञे धारयामा नमोभिः ।
उप ब्रह्मा शृणवच्छस्यमानं चतुश्शृङ्गोऽवमीद्गौर एतत् ॥ ४३
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥ ४४
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।
इन्द्र एकँ सूर एकं जजान वेनादेकँ स्वधया निष्टतक्षुः ॥ ४५
एता अर्षन्ति हृद्यात् समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥ ४६
सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ ४७
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ ४८
अभि प्रवन्त समनेव योषाः कल्याण्यस्स्मयमानासो अग्निम् ।
घृतस्य धारास्समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥ ४९
कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभिचाकशीमि ।
यत्र सोमस्सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते ॥ ५०
अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ते ॥ ५१
धामन्ते विश्वं भुवनमधिश्रितमन्तस्समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥७॥ ५२

[७] मै. १,६,२६—२८; २,७,२३७। वा. १३,३८; १७,८९—९९। काण्व. १४,४०; १९,३—१२। [समुद्रादूर्मिर्मधुमाँ०। ऋ. ४,५८,१; तै. आ. १०,१०,२। वयं नाम प्रब्रवाम०। ऋ. ४,५८,२; तै. आ. १०,१०,२। चत्वारि शृङ्गा त्रयो०। ऋ. ४,५८,३; तै. आ. १०,१०,२; नि. १३,७। त्रिधा हितं पणिभि०। ऋ. ४,५८,४; तै. आ. १०,१०,२। एता अर्षन्ति हृद्यात्०। ऋ. ४,५८,५; वा. १३,३८ (उत्तरार्धः)। सम्यक् स्रवन्ति०। ऋ. ४,५८,६; वा. १३,३८ (पूर्वार्धः); तै. आ. ४,२,९,६। सिन्धोरिव प्राध्वने०। ऋ. ४,५८,७। कन्या इव वहतु०। ऋ. ४,५८,९। अभि प्रवन्त समनेव०। ऋ. ४,५८,८; नि. ७,१७। अभ्यर्षत सुष्टुतिं०। ऋ. ४,५८,१०; अथर्व. ७,८२,१। धामन्ते विश्वं०। ४,५८,११]

पितुं नु स्तोषं महो धर्माणं तविषीम् । यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ ५३
स्वादो पितो मधो पितो वयं त्वा ववृमहे । अस्माकमविता भव ॥ ५४
उप नः पितवाचर शिवश्शिवाभिरूतिभिः । मयोभूरद्विषेण्यस्सखा सुशेवो अद्वयाः ॥ ५५
तव त्ये पितो रसा रजाँस्यनु विष्ठिताः । दिवि वाता इव श्रिताः ॥ ५६
तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो । प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ ५७
त्वे पितो महानां देवानां मनो हितम् । अकारि चारु केतुना तवाहिमवसावधीत् ॥ ५८
यददः पितो अजगन् विवस्व पर्वतानाम् । अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः॥५९
यदपामोषधीनां परिंशमारिशामहे । वातापे पीव इद्भव ॥ ६०
यत् ते सोम गवाशिरो यवाशिरो भजामहे । वातापे पीव इद्भव ॥ ६१
करम्भ ओषधे भव पीवो वृक्क उदारथिः । वातापे पीव इद्भव ॥ ६२
तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥८॥ ६३

मह्यमापो मधुमदेरयन्त मह्यं ज्योतिरभरत् सूर्यस्तत् ।
मां देवा अनु विश्वे तपोजा मह्यं देवस्सविता व्यचो धात् ॥ ६४
अहमस्तभ्नां पृथिवीमुत द्यामहमृतूँरजनँ सप्त साकम् ।
अहं वाचं परि सर्वां बभूव य इन्द्राग्नी असनँ सखायौ ॥ ६५
अहं द्यावापृथिवी आवभूवाहं विश्वा ओषधीस्सप्त सिन्धून् ।
मह्यं विशस्समनमन्त दैवीरहमुग्रश्शतहव्यो बभूव ॥ ६६
रायो जातस्सहसे वृद्धः क्षत्राणां क्षत्रभृत्तमो वयोधाः ।
महान् महित्वा संस्तभ्नो क्षत्रे राष्ट्रे च जागृहि ॥ ६७

[८] वा. ३४,७। काण्व. ३३,२। [पितुं नु स्तोषं०। ऋ. १,१८७,१; नि. ९,२५। स्वादो पितो मधो०। ऋ. १, १८७,२। उप नः पितवाचर०। ऋ. १,१८७,३। तव त्ये पितो रसा०। ऋ. १,१८७,४। तव त्ये पितो ददतः०। ऋ. १,१८७,५। त्वे पितो महानां०। ऋ. १,१८७,६। यददः (०दो) पितो०। ऋ. १,१८७,७। यदपामोषधीनां०। ऋ. १,१८७,८। यत् ते सोम गवाशिरो०। ऋ. १,१८७,९। करम्भ ओषधे भव०। ऋ. १,१८७,१०। तं त्वा वयं पितो०। १,१८७,११]

[९] मै. २,१२,२५; ३,४,६। वा. ९,४०; १०,१८; १८,३७। काण्व. ११,१०,२६; २०,७। [मह्यमापो मधु०। अथर्व. ३,६१,१। अहमस्तभ्नां (अहं विवेच) पृथिवीमुत०। अथर्व. ६,६१,२। अहं द्यावापृथिवी० (अजान पृथिवी०)। अथर्व. ६,६१,३]

नय कुत्स इन्द्रो राजा सविता त्वाभिषिञ्चतु ।
मित्रो वायुर्बृहस्पतिर्धाता क्षत्रं दधातु ते ॥ ६८

अदितिस्त्वा सुष्वतु राजन् महते क्षत्राय महते ज्यैष्ठ्याय महते राज्याय महते जानराज्याय महते विश्वस्य भुवनस्याधिपत्याय समास्त्वाग्ने देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै वाचो यन्तुर्यन्त्रेणेममसुमामुष्यायणममुष्याः पुत्रममुष्यैस्साम्राज्येनाभिषिञ्चामीन्द्रस्य साम्राज्येनाभिषिञ्चामि ॥९॥ ६९

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ ७०
मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् ॥ ७१
मयि देवा द्रविणमायजन्तां ममाशीरस्तु मम देवहूतिः ।
दैव्या होतारो वनिषन्त पूर्वेऽरिष्टास्स्याम तन्वा सुवीराः ॥ ७२
मह्यं यजन्तां मम यानीष्टाकूतिस्सत्या मनसो मे अस्तु ।
एनो मा निगां कतमच्चनाहं विश्वे देवा अनुतिष्ठन्तु मेह ॥ ७३
अग्निर्मन्युं प्रतिनुदन् पुरस्तादद्ब्धो गोपः परिपातु विश्वतः ।
अपाञ्चो यन्तु निवतो दुरस्यवोऽमैषां चित्तं प्रबुधा विनश्यतु ॥ ७४
धाता धातॄणां भुवनस्य यस्पतिर्देवं सवितारमभिमातिषाहम् ।
इमं यज्ञं बृहस्पतेऽश्विनोमेन्द्रावत काम्यैर्दसनाभिः ॥ ७५
प्रयीष्वद्वीरुरु यस्कृणोत विश्वे देवा इह वीरयध्वम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ ७६

[देवस्य त्वा सवितुः० । अर्थ. १९,५१,२; ऐ. ब्रा. ८,७]

[१०] मै. २,३,२ । क. ३४,३६ । काप. ३३,३३ । तै. सं. ४,७,१४ । [ममाग्ने वर्चो० । ऋ. १०,१२८,१; अथर्व. ५,३,१; तै. सं. ४,७,१४,१ । मम देवा विहवे० । ऋ. १०,१२८,२; अथर्व. ५,३,३; तै. सं. ४,७,१४,१ । मयि देवा द्रविणम्० । ऋ. १०,१२८,३; अथर्व. ५,३,५; तै. सं. ४,७,१४,१ । मह्यं यजन्ता (०न्तु) मम० । ऋ. १०,१२८,४; अथर्व. ५,३,४; तै. सं. ४,७,१४,१ । अग्नि (अग्ने) म०र्मन्युं प्रतिनुदन् । ऋ. १०,१२८,६; अथर्व. ५,३,२; तै. सं. ४,७,१४,२ । धाता धातॄणां भुवनस्य० । ऋ. १०,१२८,७; अथर्व. ५,३,९; तै. सं. ४,७,१४,३ । प्रयी (देवीः) षट्दुर्वीरुरु णः (नः) कृणोत० । ऋ. १०,१२८,५; अथर्व. ५,३,६; तै. सं. ४,७,१४,२]

उरुव्यचा नो महिषश्शर्म यँसदास्मिन् हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्व मृडेन्द्र मा नो रीरिषो मा परा दाः ॥ ७७
तिस्रो देवीर्महि नश्शर्म यच्छत प्रजायै नस्तन्वे यच्च पुष्टम् ।
मा नो वधीदभिभा मो अशस्तिर्मा नो वृधद्वृजना द्वेष्या या ॥ ७८
ये नस्सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामवबाधामहे तान् ।
आदित्या रुद्रा उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ॥ ७९
अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः ।
इमं नो यज्ञं विहवे जुषस्वेह कृण्मो हरिवो मेदिनं त्वा ॥१०॥ ८०
तव श्रिये व्यजिहीत पर्वतो गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं बृहस्पते निरपामौब्जो अर्णवम् ॥ ८१
बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसर्तप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ ८२
बृहस्पतिस्समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।
अपस्सिषासन् स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥ ८३
यमो दाधार पृथिवीं यमो द्यामुत सूर्यम् ।
यमाय सर्वमित् तस्थे यत् प्राणद्वायुरक्षितम् ॥ ८४
यथा पञ्च यथा षड् यथा पञ्चदशर्षयः । यमं यो विद्यात् स ब्रूयाद्यथैकर्षिर्विजानते ॥ ८५
त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् ।
गायत्री त्रिष्टुप् छन्दाँसि सर्वा ता यम आहिता ॥ ८६
मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ ८७

[उरुव्यचा नो महिषः० । ऋ. १०,१२८,८; अथर्व. ५,३,८; तै. सं. ४,७,१४,३ । तिस्रो देवीर्महि० । अथर्व. ५,३,७ । ये नस्सपत्ना अप ते० । ऋ. १०,१२८,९; अथर्व. ५,३,१०; तै. सं. ४,७,१४,४ । अर्वाञ्चमिन्द्रममुतो० ऋ. परि. २८,१; अथर्व. ५,३,११; तै. सं. ४,७,१४,४]

[११] मै. १,२,११८; २,७,१०२, ३,४,१६; ४,१०,४९,१०४,१०६; १४,५०,२५२—२५४ । वा. १२,१९; १८,४९; २१,१-२; २६,३ । काण्व. १३,१३; २०,१९; २३,१-२; २८,४ । तै. आ. ६,५,२ । [तव श्रिये व्यजिहीत० । ऋ. २,२३,१८ । बृहस्पते अति यदर्यो० । ऋ. २,२३,१५; तै. सं. १,८,२२,२ । बृहस्पतिस्समजयद्वसूनि० । ऋ. ६,७३,३; अथर्व. २०,९०,३; तै. ब्रा. २,८,२,८ । यमो दाधार पृथिवीं० । तै. आ. ६,५,२ । यथा पञ्च यथा० । तै. आ. ६,५,२ । त्रिकद्रुकेभिः पतति० । ऋ. १०,१४,१६; अथर्व. १८,२,६; तै. आ. ६,५,३ । मृडा (०ळा) नो रुद्रोत० । ऋ. १,११४,२; तै. सं. ४,५,१०,२]

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः ।
सुम्नायन्निद्विशो अस्माकमाचरारिष्टवीरा जुहवाम ते हविः ॥ ८८
त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे निह्वयामहे ।
आरे अस्मद्दैव्यं हेडो अस्यतु सुमतिमिद्वयमस्या वृणीमहे ॥ ८९
अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनांसि शिश्रथः कृतानि ॥ ९०
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ९१
इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ ९२
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशँस मा न आयुः प्रमोषीः ॥११॥ ९३

हव्यं प्रीणीहि हव्यँ श्रीणीहि हव्यँ श्रपय ॥ हव्यं पच हव्यमसि हव्याय त्वा हव्यवाडसि हव्ये सीद ॥
९४-९५

स्वयं कृण्वानस्सुगमप्रयावं तिग्मशृङ्गो वृषभश्शोशुचानः ।
प्रत्नं सधस्थमनुपश्यमान आ तन्तुमग्निर्दिव्यं ततान ॥ ९६
त्वं नस्तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः ।
त्वयाग्ने पृष्ठं वयमारुहेमाथा देवैस्सधमादं मदेम ॥ ९७
अतिसर्गं ददतो मानवाय स्वर्गं पन्थामनुपश्यमानाः ।
अजुषन्त मरुतो यज्ञमेत वृष्टिद्यावानममृतँ स्वर्विदम् ॥ ९८
आवर्तमानो भुवनस्य मध्ये प्रजा विकृण्वञ्जनयन् विरूपम् ।
संवत्सरः परमेष्ठी धृतव्रतो यज्ञं नः पातु रजसः परस्मात् ॥ ९९
प्रजां पिपर्तु परिवत्सरो नो धाता दधातु सुमनस्यमानः ।
वह्वीस्साकं बहुधा विश्वरूपा एकव्रता मामभिसंविशन्तु ॥१२॥ १००

[अश्याम ते सुमतिं० । ऋ. १,११४,३ । त्वेषं वयं रुद्रं० । ऋ. १,११४,४ । अव ते हेडो (०ळो) वरुण० । ऋ. १,२४,१४; तै. सं. १,५,११,३ । उदुत्तमं वरुण पाशं० । ऋ. १,२४,१५; वा. १२,१२; अथर्व. ७,८३,३; १८,४,६९; तै. सं. १,५,११,३; ४,२,१,३; नि. २,१३ । इमं मे वरुण श्रुधी० । ऋ. १,२५,१९; वा. २१,१; तै. सं. २,१,११,६ । तत्त्वा यामि ब्रह्मणा० । ऋ. १,२४,११; तै. सं. २,१,११,६]

[१२] मै. २,१३,२२ (१०५—१०९) । तै. ब्रा. २,४,२,५—६ । आ. श्रौ. ६,१,६ । [धाता दधातु सुमनस्यमानः । अथर्व. ७,१९,१ [illegible] १३,१,३५ (व. च.)]

यदाकूतात् समसुस्रोद्धृदो वा मनसस्संभृतं चक्षुषो वा ।
तमनुप्रेहि सुकृतस्य लोकं यत्रर्षयो जग्मुः प्रथमाः पुराणाः ॥ १०१
एतँ सधस्थाः परि वो ददामि यमावहाच्छेवधिं जातवेदाः ।
अन्वागन्ता यजमानस्स्वस्ति तँ स्म जानीत परमे व्योमन् ॥ १०२
एतं जानीत परमे व्योमन्नग्ने सधस्था विद लोकमस्य ।
यदागच्छात् पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै ॥ १०३
इमँ स्तनमिष्टो यज्ञः ॥ १०४
येन सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे ॥ १०५
येनाग्ने सुकृतः पथा मधोर्धारा व्यानशुः । तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ १०६
येनाग्ने दक्षिणावन्तं यज्ञं वहन्त्यृत्विजः । तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे ॥ १०७
प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा । ऋचेमं यज्ञं नो नय स्वर्देवेषु गन्तवे ॥ १०८
यत्र धारा मधुमतीस्सदा स्यन्दन्ते अक्षिताः । तदग्निर्वैश्वकर्मणस्स्वर्देवेषु नो दधत् ॥ १०९
अपूपकूला नद्यस्सदा स्यन्दन्ते अक्षिताः । तदग्निर्वैश्वकर्मणस्स्वर्देवेषु नो दधत् ॥ ११०
उपक्षरन्ति मधुनो घृतस्य कुल्याः पूर्णास्सदमक्षीयमाणाः ।
तदग्निर्वैश्वकर्मणस्स्वर्देवेषु नो दधत् ॥ १११
यास्ते अग्ने या वो देवाः ॥ ११२
रोचय मा ब्राह्मणेष्वथो राजसु रोचय ।
रोचय मा विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥ ११३
स्वर्णघर्मस्स्वाहा स्वर्णशुक्रस्स्वाहा स्वर्णसूर्यस्स्वाहा स्वर्णार्कस्स्वाहा स्वर्णाग्निस्स्वाहा ॥१३॥
११४

ईडे अग्निं विपश्चितं गिरा यज्ञस्य साधनम् । श्रुष्टीवानं धितावानम् ॥ ११५
अग्ने शकेम ते वयं यमं देवस्य वाजिनः । अति द्वेषाँसि तरेम ॥ ११६

[१३] मै. १,४,१०, २,७,११६—११७; १२,२५,२३ । वा. १३,२२-२३; १७,८७, १८,४६-४८,५०,५६,५८-६०, ६२—६५ । काण्व. १४,२२—२३; १९,१; २०,१६—१८,२०,२६,२८ – ३०,३२—३५ । तै. सं. ५,७,७ । [यदाकूतात् सम० । तै. सं. ५,७,७,१ । एतँ सधस्थाः० । अथर्व. ६,१२३,१; तै. सं. ५,७,७,१ । एतं जानीत (जानीत स्मैनं) परमे० । अथर्व. ६,१२३,२]

[१४] मै. १,५,२,१३—१४; ४,१०,३,६—७,६०; ११,३५—३९,६७—६९; १२,११५ । वा. ३,११; १३,१४; १५,२० । काण्व. ३,१८;१४,१४; १६,४१ । [ईडे(०ळे) अग्निं विपश्चितं० । ऋ. ३,२७,२; तै. ब्रा. २,४,२,४ । अग्ने शकेम ते वयं० । ऋ. ३,२७,३, तै. ब्रा. २,४,२,५]

पृथुपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः ।
अग्निर्यज्ञस्य हव्यवाट् ॥ ११७
तं सबाधो यतस्रुच इत्था धिया यज्ञवन्तः ।
आचक्रुरग्निमूतये ॥ ११८
नवं नु स्तोममग्नये दिवश्श्येनाय जीजनम् ।
वस्वः कुविद्वनाति नः ॥ ११९
स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा ।
अग्ने यज्ञस्य चेततः ॥ १२०
उप त्वा रण्वसंदृशं प्रयस्वन्तस्सहस्कृत ।
अग्ने ससृज्महे गिरः ॥ १२१
उप छायामिव घृणेरगन्म शर्म ते वयम् ।
अग्ने हिरण्यसंदृशः ॥ १२२
अग्ने मृड महाँ असि य ईमा देवयुं जनम् ।
इयेथ बर्हिरासदम् ॥ १२३
स मानुषीषु दूडभो विक्षु प्रावीरमर्त्यः ।
दूतो विश्वेषां भुवद् ॥ १२४
और्वभृगुवच्छुचिमप्नवानवदाहुवे ।
अग्निं समुद्रवाससम् ॥ १२५
आ सवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥ १२६
हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः ।
अग्निं समुद्रवाससम् ॥ १२७

[पृथुपाजा अमर्त्यो० । ऋ. ३,२७,५; तै. ब्रा. ३,६,१,३ । तँ सबाधो यतस्रुच० । ऋ. ३,२७,६; तै. ब्रा. ३,६,१,३ । नवं नु स्तोममग्नये० । ऋ. ७,१५,४; तै. ब्रा. २,४,८,१ । स्पार्हा यस्य श्रियो० । ऋ. ७,१५,५; तै. ब्रा. २,४,८,१ । उप त्वा रण्वसंदृशं० । ६,१६,३७; सा १७०५ । उप छाया (च्छाया०) मिव घृणेः० । ऋ. ६,१६,३८; तै. ब्रा. २,४,४,६ । अग्ने मृड(०ळ) महाँ० । ऋ. ४,९,१; सा. २३ । स मानुषीषु दूड(ळ) भो० । ऋ. ४,९,२ । और्वभृगुवच्छुचिम० । ऋ. ८,१०२,४; सा. १८; तै. सं. ३,१,११,८ । आ सवं सवितुः । ऋ. ८,१०२,६; तै. सं. ३,१,११,८ । हुवे वातस्वनं० । ऋ. ८,१०२,५; तै. सं. ३,१,११,८]

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
वायोरनीके अस्थिरन् ॥ १२८
यस्य त्रिधात्ववृतं बर्हिस्तस्थावसंदिनम् ।
आपश्चिन्निदधा पदम् ॥ १२९
अग्निर्मूर्धा ॥ १३०
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।
तव ज्योतींष्यर्चयः ॥ १३१
ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः ।
स्तोता स्यां तव शर्मणि ॥ १३२
त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः ।
त्वां वर्धन्तु नो गिरः ॥ १३३
अदब्धस्य स्वधावतो दूतस्य रेभतस्सदा ।
अग्नेस्सख्यं वृणीमहे ॥ १३४
अग्निश्शुचिव्रततमश्शुचिर्विप्रश्शुचिष्कविः ।
शुची रोचत आहुतः ॥१४॥ १३५
[१७९९]

॥ इत्येकोत्तरशतशाखाध्वर्युप्रभेदभिन्ने श्रीयजुषि काठके चरकशाखायामोरिमिकायां हिरण्यगर्भं नाम चत्वारिंशं स्थानकं संपूर्णम् ॥४०॥

॥ श्रीग्रन्थत्रये मध्यपठिताश्च याज्यानुवाक्याः संपूर्णाः ॥

॥ अस्मिन् ग्रन्थत्रयाभ्यन्तरे याज्यानुवाक्या नाम चतुर्थो ग्रन्थः ॥

॥ संपूर्णा चेयमोरिमिका ॥

[उप त्वा जामयो गिरो० । ऋ. ८,१०२,१३, सा. १३,१५७०; तै. ब्रा. १,८,८,१ । यस्य त्रिधात्ववृतं० । ऋ. ८,१०२,१४; सा. १५७१ । अग्निर्मूर्धा दिवः० । ऋ. ८,४४,१६; सा. २७; १५३२; तै. सं. १,५,५,१; ४,४,१,१; तै. ब्रा. ३,५,७,१ । उदग्ने शुचयस्तव० । ऋ. ८,४४,१७; सा. १५३४; तै. सं. १,३,१४,८; ५,५,३; २,४,१४,४ । ईशिषे वार्यस्य हि० । ऋ. ८,४४,१८; सा. १५३३ । त्वामग्ने मनीषिणस्त्वाँ० । ऋ. ८,४४,१९ । अदब्धस्य स्वधावतो० । ऋ. ८,४४,२० । अग्निश्शुचिव्रततम० । ऋ. ८,४४,२१; तै. सं. १,३,१४,८; ५,५,३]

अथाश्वमेधः ।

(पञ्चमो ग्रन्थः ।)

अथ प्रथमं वचनम् ।

पन्थानुवचनम् ।

ये ते पन्थानस्सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिस्सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ १
नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते
नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि
लोकमस्मै यजमानाय देहि नम आदित्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि २
॥१॥ ३
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥
इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या । ४
तया देवास्सुतमावभूवुर्ऋतस्य सामन् सरमारपन्ती ॥
तया देवास्सुतमावभूवुर्ऋतस्य सामन् सरमारपन्ती ॥ अभिधा असि भुवनमसि ॥ यन्तासि धर्तासि सोऽग्निं वैश्वानरं सप्रथसं गच्छ स्वाहाकृतः
अभिधा असि भुवनमसि ॥ यन्तासि धर्तासि सोऽग्निं वैश्वानरं सप्रथसं गच्छ स्वाहाकृतः
पृथिव्यां स्वगा त्वा देवेभ्यस्स्वाहा त्वा प्रजापतये यन्ता राड्यन्तासि यमनो धर्तासि धरुणः
कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा सते त्वासते ५-६
त्वाद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः ॥२॥
विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽसि मयोऽस्यत्योऽसि नरोऽस्यर्वासि सप्तिरसि वाज्यसि
वृषासि नृमणा असि ययुर्नामास्यादित्यानां पत्वान्वेह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्यां स्वाहा विश्वेभ्यो
देवेभ्यस्स्वाहा प्रजापतये स्वाहा सर्वाभ्यो देवताभ्य इह धृतिस्स्वाहेह विधृतिस्स्वाहेह रन्तिस्स्वाहेह
रमतिस्स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला ७
एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं गोपायत ॥३॥

[१] तै. सं. ७,५,२४ । वा. ३४,२७ । काण्व. ३३,२१ । [ये ते पन्थान (पन्थाः) स्सवितः० । ऋ. १,३५,११, तै. सं. ७,५,२४,१]
[२] मै. ३,१२,१ (१—९) । वा. २२,२—५ । क०१. २४,१—५ । तै. सं. ७,१,११ । देवस्य त्वा सवितुः० । काठ. १,२,५; अथर्व. १९,५१,२; ऐ. ब्रा. ८,७]
[३] मै. ३,१२,४ (६) । वा. २२,१९ । क०१. २४,२४—२५ । तै. सं. ७,१,१२,१ ।

आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा
पलायिताय स्वाहापलायिताय स्वाहा वल्गते स्वाहा परावल्गते स्वाहा यते स्वाहा प्रयते स्वाहा
॥४॥ ८
अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहापां मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा
पूष्णे स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥५॥ ९
पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यस्स्वाहा
प्राच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा
दिग्भ्यस्स्वाहावान्तरदिशाभ्यस्स्वाहा समाभ्यस्स्वाहा शरद्भ्यस्स्वाहाहोरात्रेभ्यस्स्वाहार्धमासेभ्य-
स्स्वाहा मासेभ्यस्स्वाहर्तुभ्यस्स्वाहा संवत्सराय स्वाहा सर्वस्मै स्वाहा ॥६॥ १०
अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहापां
मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥७॥ ११
पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहाग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे
स्वाहाह्ने स्वाहा रात्र्यै स्वाहर्जवे स्वाहा साधवे स्वाहा सुक्षित्यै स्वाहा क्षुधे स्वाहाशितिम्ने स्वाहा
रोचाय स्वाहा हिमाय स्वाहा शीताय स्वाहातपाय स्वाहारण्याय स्वाहा स्वर्गाय स्वाहा लोकाय
स्वाहा वृत्ताय स्वाहा सर्वस्मै स्वाहा ॥८॥ १२
भुवो देवानां कर्मणापसर्तस्य पथ्यासि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि
वसन्तेन त्वर्तूनां हविषा दीक्षयामि भुवो देवानां कर्मणापसर्तस्य पथ्यासि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन

[४] मै. ३,१२,३ (५) । वा. २२,७—८ । काण्व. २४,९—१० । तै. सं. ७,१,१३ ।
[५] मै. ३,१२,२ (४) । वा. १०,५; २२,६,२७, ३९,१ । काण्व. ११,१२; २४,६,३७; ३९,१ । तै. सं. ७,१,१४ । [अग्नये स्वाहा । अथर्व. १९,४३,१ । सोमाय स्वाहा । अथर्व. १९,४३,५ । वायवे स्वाहा । अथर्व. १९,४३,२]
[६] मै. ३,१२,७—८,१० (९-१०,१२) । वा. २२,६,२४,२७—२९; १०,५; ३९,१—२ । काण्व. २४,६,३४,३७—४१,४३; ११,१२; ३९,१ । तै. सं. ७,१,१५ । [पृथिव्यै स्वाहा । अथर्व. ५,९,२; ६ । अन्तरिक्षाय स्वाहा । अथर्व. ५,९,३—४ । दिवे स्वाहा । अथर्व. ५,९,१; ५ । सूर्याय स्वाहा । अथर्व. १९,४३,३ । चन्द्रमसे स्वाहा । अथर्व. १९,४३,४]
[७] मै. ३,१२,२; ५ (४,७) । वा. १०,५; २२,६,२०,२७; ३९,१ । काण्व. ११,१२; २४,६,२५-२८,३७; ३९,१ । तै. सं. ७,१,१६ । मा. श्रौ. ९,२,१ । [अग्नये स्वाहा । (पञ्चमानुवाके द्रष्टव्यम्)]
[८] मै. ३,१२,७; १० (९,१२) । तै. सं. ७,१,१७ । [पृथिव्यै स्वाहा । (षष्ठानुवाके द्रष्टव्यम्)]
[९] मै. ४,१०,३३—३४ । वा. २१,५-६ । काण्व. २३,५-६ । तै. सं. ७,१,१८]

त्वा छन्दसा पुनज्मि ग्रीष्मेन स्वर्तूनाँ हविषा दीक्षयामि ध्रुवो देवानां कर्मणापसर्तस्य पथ्यास्या-
दित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा पुनज्मि वर्षाभिस्स्वर्तूनाँ हविषा दीक्षयामि ध्रुवो
देवानां कर्मणापसर्तस्य पथ्यासि विश्वेभिर्देवेभिर्देवतयानुष्टुभेन त्वा छन्दसा पुनज्मि शरदा स्वर्तूनाँ
हविषा दीक्षयामि ध्रुवो देवानां कर्मणापसर्तस्य पथ्यास्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा
पुनज्मि हेमन्तशिशिराभ्यां स्वर्तूनाँ हविषा दीक्षयामि ध्रुवो देवानां कर्मणापसर्तस्य पथ्यास्याहं
दीक्षामरुहमृतस्य पत्नीं गायत्रेण च्छन्दसा ब्रह्मणा चर्तँ सत्येऽधाँ सत्यमृतेऽधाँ सुत्रामाणं महीम्
पु ॥९॥ १३

हिंकाराय स्वाहेंकृताय स्वाहा क्रन्दते स्वाहावक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय
स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहापानाय स्वाहा संदीयमानाय स्वाहा संदिताय
स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यते स्वाहा पलायिताय स्वाहोपरँस्यते
स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषत्स्यते स्वाहा
निषीदते स्वाहा निषण्णाय स्वाहासिष्यते स्वाहासीनाय स्वाहासिताय स्वाहा निपत्स्यते स्वाहा निपद्य-
मानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते
स्वाहा संमीलते स्वाहा संमीलिताय स्वाहा स्वप्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रभोत्स्यते
स्वाहा प्रबुध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागृताय स्वाहा
शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा वीक्षमाणाय स्वाहा वीक्षिताय
स्वाहा संहास्यते स्वाहा संजिहानाय स्वाहोज्जिहानाय स्वाहा विवर्त्स्यते स्वाहा विवर्तमानाय
स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय
स्वाहा विधूताय स्वाहोत्क्रँस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चंक्रमिष्यते स्वाहा
चंक्रम्यमाणाय स्वाहा चंक्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय स्वाहा कण्डूयिताय
स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति
तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत् करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यस्स्वाहा
प्रजननाय स्वाहा ॥१०॥ १४

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृतस्य
पन्था असि देवानां छायामृतस्य नाम तत् सत्यं यत् त्वं प्रजापतिरसि ॥ १५

[सुत्रामाणं पृथिवीं० । ऋ. १०.६३.१०; अथर्व. ७.६.३; तै. सं १,५,११,५; तै. आ. १,१३,२ । महीमू षु० । तै. सं. १,५,११,५; ७,१,१८,२; तै. ब्रा. ३,१,३,३; तै. आ. १,१३,२; मा श्रौ. ७,२,६; कपि. ४६,७]
[१०] मै. ३,१२,३ (५) ; वा. २२,७—८ । काण्व. २४,७—१२ । तै. सं. ७,१,१३; १९ ।
[११] तै. सं. ७,१,२०]

अधि यदस्मिन् वाजिनीव शुभस्स्पर्धन्ते दिवस्सूर्येण विशः ।
अपो वृणानः पवते कवीयन् पशून्न गोपा इर्यः परिज्मा ॥११॥ १६

[१८४५]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे पन्थानुवचनं नाम प्रथमं वचनं संपूर्णम् ॥१॥

अथ द्वितीयं वचनम् ।

गणानुवचनम् ।

एकस्मै स्वाहा द्वाभ्याँ स्वाहा त्रिभ्यस्स्वाहा चतुर्भ्यस्स्वाहा पञ्चभ्यस्स्वाहा षड्भ्यस्स्वाहा सप्तभ्य-
स्स्वाहाष्टाभ्यस्स्वाहा नवभ्यस्स्वाहा दशभ्यस्स्वाहैकान्नविंशत्यै स्वाहा विंशत्यै स्वाहा नवविंशत्यै
स्वाहा त्रिंशते स्वाहैकान्नचत्वारिंशते स्वाहा चत्वारिंशते स्वाहा नवचत्वारिंशते स्वाहा पञ्चाशते
स्वाहैकान्नषष्ट्यै स्वाहा नवषष्ट्यै स्वाहा सप्तत्यै स्वाहैकान्नाशीत्यै स्वाहाशीत्यै स्वाहा नवाशीत्यै
स्वाहा नवत्यै स्वाहैकान्नशताय स्वाहा शताय स्वाहा द्वाभ्याँ शताभ्याँ स्वाहा सर्वस्मै स्वाहा
॥१॥ १

एकस्मै स्वाहा त्रिभ्यस्स्वाहा पञ्चभ्यस्स्वाहा सप्तभ्यस्स्वाहा नवभ्यस्स्वाहैकादशभ्यस्स्वाहैकान्न-
विंशत्यै स्वाहैकविंशत्यै स्वाहा नवविंशत्यै स्वाहैकत्रिंशते स्वाहैकान्नचत्वारिंशते स्वाहैकचत्वारिंशते
स्वाहा नवचत्वारिंशते स्वाहैकपञ्चाशते स्वाहैकान्नषष्ट्यै स्वाहैकषष्ट्यै स्वाहा नवषष्ट्यै स्वाहैकसप्तत्यै
स्वाहैकान्नाशीत्यै स्वाहैकाशीत्यै स्वाहा नवाशीत्यै स्वाहैकनवत्यै स्वाहैकान्नशताय स्वाहा शताय
स्वाहा सर्वस्मै स्वाहा ॥२॥ २

द्वाभ्याँ स्वाहा चतुर्भ्यस्स्वाहा षड्भ्यस्स्वाहाष्टाभ्यस्स्वाहा दशभ्यस्स्वाहाष्टादशभ्यस्स्वाहा
विंशत्यै स्वाहा त्रिंशते स्वाहाष्टात्रिंशते स्वाहा चत्वारिंशते स्वाहाष्टाचत्वारिंशते स्वाहा पञ्चाशते
स्वाहाष्टपञ्चाशते स्वाहा षष्ट्यै स्वाहाष्टाषष्ट्यै स्वाहा सप्तत्यै स्वाहाष्टासप्तत्यै स्वाहाशीत्यै स्वाहाष्टा-
शीत्यै स्वाहा नवत्यै स्वाहाष्टानवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥३॥ ३
त्रिभ्यस्स्वाहा पञ्चभ्यस्स्वाहा यथा द्वितीय एवं चतुर्थोऽन्यत् प्रभृतेः ॥४॥ ४

चतुर्भ्यस्स्वाहाष्टाभ्यस्स्वाहा द्वादशभ्यस्स्वाहा षोडशभ्यस्स्वाहा विंशत्यै स्वाहा चतुर्विंशत्यै

[अधि यदस्मिन् वाजिनीव० । ऋ. ९.९४.१; सा. ५३९; तै. सं. ७.१,२०,१]
[१] मै. ३,१२,१५ (१७) । वा. २३,३४ । काण्व. २४,४७ । तै. सं. ७,२,११ ।
[२] तै. सं. ७,२,१२ । [३] तै. सं. ७,२,१३ । [४] तै. सं. ७,२,१४ । [५] तै. सं. ७,२,१५ ।

स्वाहाष्टाविंशत्यै स्वाहा द्वात्रिंशते स्वाहा षट्त्रिंशते स्वाहा चत्वारिंशते स्वाहाष्टाचत्वारिंशते स्वाहा
द्वापञ्चाशते स्वाहा षट्पञ्चाशते स्वाहा षष्ट्यै स्वाहा चतुष्षष्ट्यै स्वाहाष्टाषष्ट्यै स्वाहा द्वासप्तत्यै स्वाहा
षट्सप्तत्यै स्वाहाशीत्यै स्वाहा चतुरशीत्यै स्वाहाष्टाशीत्यै स्वाहा द्वानवत्यै स्वाहा षण्णवत्यै स्वाहा
शताय स्वाहा सर्वस्मै स्वाहा ॥५॥ ५

पञ्चभ्यस्स्वाहा दशभ्यस्स्वाहा पञ्चदशभ्यस्स्वाहा विंशत्यै स्वाहा पञ्चविंशत्यै स्वाहा त्रिंशते
स्वाहा पञ्चत्रिंशते स्वाहा चत्वारिंशते स्वाहा पञ्चचत्वारिंशते स्वाहा पञ्चाशते स्वाहा पञ्चपञ्चाशते
स्वाहा षष्ट्यै स्वाहा पञ्चषष्ट्यै स्वाहा सप्तत्यै स्वाहाशीत्यै स्वाहा पञ्चाशीत्यै स्वाहा नवत्यै स्वाहा
पञ्चनवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥६॥ ६

दशभ्यस्स्वाहा विंशत्यै स्वाहा त्रिंशते स्वाहा चत्वारिंशते स्वाहा पञ्चाशते स्वाहा षष्ट्यै स्वाहा
सप्तत्यै स्वाहाशीत्यै स्वाहा नवत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा ॥७॥ ७

विंशत्यै स्वाहा चत्वारिंशते स्वाहा षष्ट्यै स्वाहाशीत्यै स्वाहा शताय स्वाहा सर्वस्मै स्वाहा
॥८॥ ८

पञ्चाशते स्वाहा शताय स्वाहा द्वाभ्याँ शताभ्याँ स्वाहा त्रिभ्यश्चतुर्भ्यः पञ्चभ्यष्षड्भ्यस्सप्तभ्यो-
ऽष्टाभ्यो नवभ्यश्शतेभ्यस्स्वाहा सहस्राय स्वाहा सर्वस्मै स्वाहा ॥९॥ ९

शताय स्वाहा सहस्राय स्वाहायुताय स्वाहा प्रयुताय स्वाहा नियुताय स्वाहार्बुदाय स्वाहा
न्यर्बुदाय स्वाहा बद्वाय स्वाहा समुद्राय स्वाहा मध्याय स्वाहान्ताय स्वाहा परार्धाय स्वाहापसे
स्वाहा व्युष्ट्यै स्वाहोदेष्यते स्वाहोद्यते स्वाहोदिताय स्वाहा स्वर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै
स्वाहा ॥१०॥ १०

[१८४५]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे गणानुवचन नाम द्वितीयं वचनं संपूर्णम् ॥२॥

[६] तै. सं. ७,२,१६ । [७] तै. सं. ७,२,१७ । [८] तै. सं. ७,२,१८ । [९] तै. सं. ७,२,१९ ।
[१०] वा. २२,३४ । काण्व. २४,४७ । तै. सं. ७,२,२० ।

अथ तृतीयं वचनम् ।

अनुवचनम् ।

अर्वाङ् यज्ञस्संक्रामत्वमुष्मादधि मामभि । ऋषीणां यः पुरोहितः ॥ १
निर्देवं निर्वीर्यं कृत्वा विष्कन्धं तस्मिन् हीयतां योऽस्मान् द्वेष्टि ।
शरीरं यज्ञशमलं कुसीदं तस्मिन् सीदतु योऽस्मान् द्वेष्टि ॥ २
यज्ञ यज्ञस्य यत् तेजस्तेन संक्राम मामभि ।
ब्राह्मणानृत्विजो देवान् यज्ञस्य तपसा तेऽसा अहमाहुवे ॥ ३
इष्टेन पक्वमुप ते हुवेऽसा अहम् । सं ते वृञ्जे सुकृतँ सं प्रजां पशून् ॥ ४
प्रैषान् सामिधेनीराघारा आज्यभागा आश्रुतं प्रत्याश्रुतमाम्मृणामि ते ।
प्रयाजानुयाजान् स्विष्टकृतमिडामाशिष आवृञ्जे स्वः ॥ ५
अग्निनेन्द्रेण सोमेन सरस्वत्या विष्णुना देवताभिः ।
याज्यानुवाक्याभ्यामुप ते हुवेऽसा अहं यज्ञमाददे ते वषट् कृतम् ॥ ६
स्तुतँ शस्त्रं प्रतिगरं ग्रहमिडामाशिष आवृञ्जे स्वः ।
पत्नीसंयाजानुप ते हुवेऽसा अहँ समिष्टयजुराददे तव ॥ ७
पशून् सुतं पुरोडाशान् सवनान्योत यज्ञम् ।
देवान् सेन्द्रानुप ते हुवेऽसा अहमग्निमुखान् सोमवतो ये च विश्वे ॥१॥ ८

भूतं भव्यं भविष्यद्वषट् स्वाहा नम ऋक्साम यजुर्वषट् स्वाहा नमो गायत्री त्रिष्टुब्जगती वषट्
स्वाहा नमः पृथिव्यन्तरिक्षं द्यौर्वषट् स्वाहा नमोऽन्नं कृषिर्वृष्टिर्वषट् स्वाहा नमः पिता पुत्रः पौत्रो
वषट् स्वाहा नमः प्राणो व्यानोऽपानो वषट् स्वाहा नमो भूर्भुवस्स्वर्वषट् स्वाहा नमः ॥२॥ ९

आ मे गृहा भवन्त्वा प्रजा म आ मा यज्ञो विशतु वीर्यावान् ।
आपो देवीर्यज्ञिया माविशन्तु सहस्रस्य मा भूमा मा प्रहासीत् ॥ १०

[१] तै. सं. ७,३,११ । वा. १,२५-२६; २,१५ । काण्व. १,४२-४३; २,३० । [अर्वाङ् यज्ञस्संक्रामतु० । तै. सं. ७,३,११,१ । निर्देवं निर्वीर्यं कृत्वा० । तै. सं. ७,३,११,१ । यज्ञ यज्ञस्य यत्० । तै. सं. ७,३,११,१ । इष्टेन पक्वमुप० । तै. सं ७,३,११,२ । प्रैषान् सामिधेनी० । तै. सं. ७,३,११,२ । अग्निनेन्द्रेण सोमेन० । तै. सं. ७,३,११,२ । स्तुतँ शस्त्रं प्रतिगरं० । तै. सं. ७,३,११,३ । पशून् सुतं पुरोडाशान्० । तै. सं. ७,३,११,३]
[२] तै. सं. ७,३,१२ । [३] तै. सं. ७,३,१३ ।

आ मे ग्रहा भवन्त्वा पुरोरुक् स्तुतशस्त्रे मात्रिशतौ समीची ।
आदित्या रुद्रा वसवो मे सदस्यास्सहस्रस्य मा भूमा मा प्रहासीत् ॥ ११
आ माग्निष्टोमो विशतूक्थ्यश्चातिरात्रो मा विशत्वापिशर्वरः ॥
तिरोअह्न्या मा सुहुता आविशन्तु सहस्रस्य मा भूमा मा प्रहासीत् ॥३॥ १२

अग्निना तपोऽन्वाभवद्वाचा ब्रह्म मणिना रूपाणि हिरण्येन वर्चोऽद्भिः पृथिवीं वायुनान्तरिक्षँ सूर्येण दिवं चन्द्रमसा नक्षत्राणि यमेन पितॄन् राज्ञा मनुष्यान् फलेन नाद्यानजगरेण सर्पान् व्याघ्रेणारण्यान् पशूञ्छ्येनेन पतत्रिणो व्रीहिनान्नानि यवेनौषधीरुदुम्बरेणोर्जं न्यग्रोधेन वनस्पतीन् धृष्णाश्वान् वृषभेण गा वृष्णिनावीर्बस्तेनाजा गायत्र्या छन्दाँसि त्रिवृता स्तोमान् रथन्तरेण सामानि ब्राह्मणेन वाचम् ॥४॥ १३

स्वाहाधिमाधीताय स्वाहा स्वाहाधीतं मनसे स्वाहा स्वाहा मनः प्रजापतये स्वाहा काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहादित्यै स्वाहादित्यै मह्यै स्वाहादित्यै सुमृडीकायै स्वाहा सरस्वत्यै स्वाहा सरस्वत्यै पावकायै स्वाहा सरस्वत्यै बृहत्यै स्वाहा पूष्णे स्वाहा पूष्णे प्रपथ्याय स्वाहा पूष्णे नरंधिषाय स्वाहा त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहा विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहा विश्वो देवस्य नेतुः ॥५॥ १४

दद्भ्यस्स्वाहा हनुभ्याँ स्वाहोष्ठाभ्याँ स्वाहा नासिकाभ्याँ स्वाहा मुखाय स्वाहा चक्षुर्भ्याँ स्वाहा श्रोत्राभ्याँ स्वाहा पार इक्षवोऽवारीयेभ्यः पक्ष्मभ्यस्स्वाहावार इक्षवः पारीयेभ्यः पक्ष्मभ्यस्स्वाहा शीर्ष्णे स्वाहा भ्रूभ्याँ स्वाहा ललाटाय स्वाहा मूर्ध्ने स्वाहा मस्तिष्काय स्वाहा केशेभ्यस्स्वाहा वहाय स्वाहा ग्रीवाभ्यस्स्वाहा स्कन्धेभ्यस्स्वाहा कीकसाभ्यस्स्वाहा पृष्टिभ्यस्स्वाहा पाजस्याय स्वाहा पार्श्वाभ्याँ स्वाहाँसाभ्याँ स्वाहा दोषभ्याँ स्वाहा बाहुभ्याँ स्वाहा जङ्घाभ्याँ स्वाहा श्रोणिभ्याँ स्वाहोरुभ्याँ स्वाहाष्ठीवद्भ्याँ स्वाहा जङ्घाभ्याँ स्वाहा भसदे स्वाहा शिखण्डेभ्यस्स्वाहा वालधानाय स्वाहाण्डाभ्याँ स्वाहा शेपाय स्वाहा रेतसे स्वाहा प्रजाभ्यस्स्वाहा प्रजननाय स्वाहा पद्भ्यस्स्वाहा शफेभ्यस्स्वाहा लोमभ्यस्स्वाहा त्वचे स्वाहा लोहिताय स्वाहा माँसाय स्वाहा स्नावभ्यस्स्वाहास्थिभ्यस्स्वाहा मज्जभ्यस्स्वाहाङ्गेभ्यस्स्वाहात्मने स्वाहा सर्वस्मै स्वाहा ॥६॥ १५

अञ्ज्येताय स्वाहाञ्जिसक्थाय स्वाहा शितिपदे स्वाहा शितिककुदे स्वाहा शितिरन्ध्राय स्वाहा

[४] तै. सं. ७,३,१४।
[५] मै. १,२,१३; २,७,७६। वा. ४,८; ११,६७; २२,२०-२१। काण्व. ४,९; १२,६८; २४,२६-२९। तै. सं. ७,३,१५ [विश्वो देवस्य नेतु:०। ऋ. ५,५०,१; तै. सं. १,२,२,१; ४,१,९,१]
[६] वा. ३९,१०। काण्व. ३९,९। तै. सं. ७,३,१६। [७] तै. सं. ७,३,१७।

शितिपृष्ठाय स्वाहा शित्यँसाय स्वाहा पुष्पकर्णाय स्वाहा शित्योष्ठाय स्वाहा शितिभ्रवे स्वाहा शितिभसदे स्वाहा श्वेतानूकाशाय स्वाहाञ्जये स्वाहा ललामाय स्वाहासितज्ञवे स्वाहा कृष्णैताय स्वाहा रोहितैताय स्वाहारुणैताय स्वाहेदृशाय स्वाहा कीदृशाय स्वाहा तादृशाय स्वाहा सदृशाय स्वाहा विसदृशाय स्वाहा सुसदृशाय स्वाहा रूपाय स्वाहा सर्वस्मै स्वाहा ॥७॥ १६

कृष्णाय स्वाहा श्वेताय स्वाहा पिशङ्गाय स्वाहा सारङ्गाय स्वाहारुणाय स्वाहा गौराय स्वाहा बभ्रवे स्वाहा नकुलाय स्वाहा शोणाय स्वाहा रोहिताय स्वाहा श्यावाय स्वाहा श्यामाय स्वाहा पालवाय स्वाहा सुरूपाय स्वाहा सरूपाय स्वाहा विरूपाय स्वाहानुरूपाय स्वाहा प्रतिरूपाय स्वाहा शबलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा पृश्निसक्थाय स्वाहा सर्वस्मै स्वाहा ॥८॥ १७

ओषधीभ्यस्स्वाहा मूलेभ्यस्स्वाहा तूलेभ्यस्स्वाहा पर्वभ्यस्स्वाहा वल्शेभ्यस्स्वाहा पुष्पेभ्यस्स्वाहा फलेभ्यस्स्वाहा गृहीतेभ्यस्स्वाहागृहीतेभ्यस्स्वाहावपन्नेभ्यस्स्वाहा शयानेभ्यस्स्वाहा सर्वस्मै स्वाहा ॥९॥ १८

वनस्पतिभ्यस्स्वाहा मूलेभ्यस्स्वाहा तूलेभ्यस्स्वाहा स्कन्धेभ्यस्स्वाहा शाखाभ्यस्स्वाहा पर्णेभ्यस्स्वाहा पुष्पेभ्यस्स्वाहा फलेभ्यस्स्वाहा गृहीतेभ्यस्स्वाहागृहीतेभ्यस्स्वाहावपन्नेभ्यस्स्वाहा शयानेभ्यस्स्वाहा शिष्टाय स्वाहा परिशिष्टाय स्वाहातिशिष्टाय स्वाहा सँशिष्टाय स्वाहोच्छिष्टाय स्वाहा रिक्ताय स्वाहारिक्ताय स्वाहा प्ररिक्ताय स्वाहा संरिक्ताय स्वाहोद्रिक्ताय स्वाहा सर्वस्मै स्वाहा ॥१०॥ १९

[२८४४]

॥इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थेऽनुवचनं नाम तृतीयं वचनं संपूर्णम् ॥३॥

अथ चतुर्थं वचनम्।

मेषानुवचनम्।

मेषस्त्वा पचतैरवतु लोहितग्रीवश्छागैश्शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृत्स्तोमैरवन्तीस्स्थावन्तीस्त्वावन्तु प्रियं त्वा प्रियाणां वर्षिष्ठमाप्यानां गणानां त्वा गणपतिँ हवामहे वसो मम प्रियाणां त्वा प्रियपतिँ हवामहे वसो मम निधीनां त्वा निधिपतिँ हवामहे वसो मम ॥१॥ १

[८] तै. सं. ७,३,१८। वा. २५,१। कण्व. २७,२। [९] तै. सं. ७,३,१९। वा. २२,२८-२९। काण्व. २४,४०-४१।
[१०] तै. सं. ७,३,२०। वा. २२,२८—२९। कण्व. २४,४०—४१।
[१] मै. ३,१२,२१। वा. २३,१९। काण्व. २५,२१। तै. सं. ७,४,१२। [गणानां त्वा गणपति० हवामहे। ऋ. २,२३,१]

कूप्याभ्यस्स्वाहा कुल्याभ्यस्स्वाहा स्थाल्याभ्यस्स्वाहावट्याभ्यस्स्वाहा खल्याभ्यस्स्वाहा ह्रद्याभ्यस्स्वाहा सूद्याभ्यस्स्वाहा पल्वल्याभ्यस्स्वाहा वैशन्तीभ्यस्स्वाहा सरस्याभ्यस्स्वाहा वर्ष्याभ्यस्स्वाहावर्ष्याभ्यस्स्वाहा प्रुष्वाभ्यस्स्वाहा ह्रादुनिभ्यस्स्वाहा स्थावराभ्यस्स्वाहा स्यन्दमानाभ्यस्स्वाहा नादेयीभ्यस्स्वाहा सैन्धवीभ्यस्स्वाहा समुद्रियाभ्यस्स्वाहा सर्वाभ्यस्स्वाहा ॥२॥ २

अद्भ्यस्स्वाहा वहन्तीभ्यस्स्वाहा समुद्रं वहन्तीभ्यस्स्वाहा समन्तं वहन्तीभ्यस्स्वाहोग्रं वहन्तीभ्यस्स्वाहा भीमं वहन्तीभ्यस्स्वाहा शीमं वहन्तीभ्यस्स्वाहा शीघ्रं वहन्तीभ्यस्स्वाहाम्भोभ्यस्स्वाहा नभोभ्यस्स्वाहा महोभ्यस्स्वाहा ॥३॥ ३

यो अर्वन्तं जिघाँसति तमभ्यमीति वरुणः। परो मर्तः परश्श्वा ॥ ४
अहं च त्वं च वृत्रहन् सँसनुयाव वरीष्वा।
अरातीवा चिदद्रिवोऽनु नौ शूर मँसते भद्रा इन्द्रस्य रातयः ॥ ५
अभि क्रत्वेन्द्र भूरथ ज्मन्न ते विव्यङ् महिमानं रजाँसि।
स्वेना हि वृत्रँ शवसा जगन्थ न शत्रुरन्तं विविद्युधा ते ॥४॥ ६

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि धेह्युपाकृताय स्वाहालब्धाय स्वाहा हुताय स्वाहा ॥५॥ ७

मयोभूर्वातो अभिवात्तुस्रा ऊर्जस्वतीरोषधीराविशन्ताम्।
पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र नो मृड ॥ ८
यास्सरूपा विरूपा एकरूपा यासामग्निर्निष्टया नामानि वेद।
या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥ ९
या देवेषु तन्वमैरयन्त यासाँ सोमो विश्वा रूपाणि वेद।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि ॥ १०

[२] तै. सं. ७,४,१३।
[३] वा. २२,२५,२९; ३९,२। काण्व. २४,३५,४१; ३९,२। तै. सं. ७,४,१४।
[४] मै. ३,१२,३। वा. २२,५। काण्व. २४,५। तै. सं. ७,४,१५। [अहं च त्वं च वृत्रहन्०। ऋ. ८,६२,११; तै. सं. ७,४,१५,१; नि. १,३। अभि क्रत्वेन्द्र भूरथ(०ध)०। ऋ. ७,२१,६; तै. सं. ७,४,१५,१]
[५] तै. सं. ७,४,१६।
[६] मै. ४,१०,३३—३४। वा. ११,५—६। काण्व. १३,५—६। तै. सं. ७,४,१७। [मयोभूर्वातो अभि०। ऋ. १०,१६९,१; तै. सं. ७,४,१७,१; नि. १,१७। यास्सरूपा विरूपा०। ऋ. १०,१६९,२; तै. सं. ७,४,१७,१। या देवेषु तन्वम्०। ऋ. १०,१६९,३; तै. सं. ७,४,१७,१]

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैर्यज्ञियैस्संविदानः।
बह्वीर्भवन्तीरुप नो गोष्ठमाशुस्तासां वयं प्रजया सँसदेम ॥ ११
इह धृतिस्स्वाहेह विधृतिस्स्वाहेह रन्तिस्स्वाहेह रमतिस्स्वाहा महीमू षु सुत्रामाणम् ॥६॥ १२

कस्स्विदेकाकी चरति क उ स्विज्जायते पुनः।
किं स्विद्धिमस्य भेषजं किं स्वदावपनं महत् ॥ १३
सूर्य एकाकी चरति चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥ १४
का स्विदासीत् पूर्वचित्तिः किं स्विदासीद्बृहद्वयः।
का स्विदासीत् पिलिप्पिला का स्विदासीत् पिशङ्गिला ॥ १५
द्यौरासीत् पूर्वचित्तिरश्व आसीद्बृहद्वयः।
अविरासीत् पिलिप्पिला रात्रिरासीत् पिशङ्गिला ॥ १६
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिम्।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ १७
वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहुर्भुवनस्य नाभिम्।
सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम ॥७॥ १८

अम्बे अम्बाल्यम्बिके न मा नयति कश्चन। ससस्त्यश्वकस्सुभगे काम्पीलवासिनि ॥ १९
स्वर्गे लोके संप्रोर्णुवाथामाहमजामि गर्भधमा त्वमजासि गर्भधं तौ सह चतुरः पदस्संप्रसारयावहै वृषा वां रेतोधा रेतो दधातूत्सक्थ्योर्गृदं धेह्यञ्जिमुदञ्जिमन्वज ॥ २०
यस्स्त्रीणां जीवभोजनो य आसां बिलधावनः।
प्रियस्स्त्रीणामपीच्यो य आसां कृष्णे लक्ष्मणि सर्दिगृर्दिं परावधीत् ॥ २१
अम्बे अम्बाल्यम्बिके न मा नयति कश्चन। ससस्त्यश्वकः ॥ २२

[प्रजापतिर्मह्यमेता०। ऋ. १०,१६९,४; तै. सं. ७,४,१७,२। महीमू षु०। तै. सं. १,५,११,५; ७,१,१८,२; तै. ब्रा. ३,१३,३; तै. आ. १,१३,२, मा. श्री. ७,२,६; कपि. ४६,७। सुत्रामाणम्। ऋ. १०,६३,१०; अथर्व. ७,६,३; तै. सं. १,५,११,५; तै. आ. १,१३,२; काठ. २,३,११]
[७] मै. ३,१२,१९ (२५—२८)। वा. २३,९—१२,४५-४७,५३-५४,६१-६२। काण्व २५,१०-१३,४७-४९, ५५-५६,६३-६४। तै. सं. ७,४,१८। [कस्स्विदेकाकी चरति०। आ. सू. १०,९। सूर्य एकाकी चरति०। आ. सू. १०,९। पृच्छामि त्वा परमन्तं०। ऋ. १,१६४,३४; अथर्व. ९,१०,१३। वेदिमाहु:(इयं वेदि:)०। ऋ. १,१६४,३५; अथर्व. ९,१०,१४]
[८] मै. १,५,३; ११,२०; १३,१ (३०-३२; १-५)। वा. ११,५०-५२; २३,१८-२७,३०-३२; ३६,१४-१६। काण्व. १२,५१-५३; ३६,१४-१६; २५,२०-२९,३२-३४,४०। तै. सं. ७,४,१९।

ऊर्ध्वामेनामुच्छ्रयताद्वेणुभारं गिरा इव । अथास्या मध्यमेधतां शीते वाते पुनन्निव ॥ २३

अम्ब इत्युक्तम् ॥ २४

यद्धरिणी यवमत्ति न पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ॥ २५

अम्ब इत्युक्तम् ॥ २६

इयं यका शकुन्तिकाहलमिति वञ्चति । आहतं गभे पसो निजल्गलीति धानिका ॥ २७

अम्ब इत्युक्तम् ॥ २८

माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः ।
प्रसुलामीति ते पिता गभे मुष्टिमतंसयत् ॥ २९

दधिक्राव्णो अकारिषमापो हि ष्ठेति तिस्रः ॥८॥ ३०

भूर्भुवस्स्वर्वसवस्त्वाञ्जन्तु गायत्रेण च्छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन च्छन्दसादित्यास्त्वाञ्जन्तु
जागतेन च्छन्दसा ॥ ३१

यद्वातो अपो अगमदिन्द्रस्य तन्वं प्रियाम् ।
एतं स्तोतरेतेन पथा पुनरश्वमावर्तयासि नः ॥ ३२

लाजी३ञ्छाची३न्यशो ममा३ यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापते ॥ ३३

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ ३४

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ ३५

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥९॥ ३६

प्राणाय स्वाहा व्यानाय स्वाहापानाय स्वाहा स्नावभ्यस्स्वाहा संतानेभ्यस्स्वाहा परिसंतानेभ्य-

[दधिक्राव्णो अकारिषं० । ऋ. ४,३९,६; १०,१८६,१; सा. ३५८ । अथर्व. ४,१०,६; २०,१३७,३ । आपो हि ष्ठा मयो० । ऋ. १०,९,१; सा. १८३७; अथर्व. १,५,१; तै. सं. ४,१,५,१; ५,६,१,४; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,११; नि. ९,२७ । यो वः शिवतमो० । ऋ. १०,९,२; सा. १८३८; अथर्व. १,५,२; तै. सं. ४,१,५,१; ५,६,१,४; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,११ । तस्मा अरं गमाम वो० । ऋ. १०, ९,३; सा, १८३९; अथर्व. १,५,३; तै. सं. ४,१,५,१; ५,६,१,४; ७,४,१९,४; तै. आ. ४,४२,४; १०,१,११]

[९] मै. ३,१२,१८—१९; १६,३ (२२—२४; २९—३०) वा. २३,५—८; २९,३७ । काण्व. २५,५—९; ३१,१२ । तै. सं. ७,४,२० । [युञ्जन्ति ब्रध्नमरुषं० । ऋ. १,६,१; सा. १४६८; अथर्व. २०,२६,४; ४७,१०; ६९,९; तै. सं. ७,४,२०,१ । युञ्जन्त्यस्य काम्या० ऋ. १,६,२; सा. १४६९; अथर्व. २०,२६,५; ४७,११; ६९,१०; तै. सं. ७,४,२०,१ । केतुं कृण्वन्नकेतवे० । ऋ. १,६,३; सा. १४७०; अथर्व. २०,२६,६; ४७,१२; ६९,११; तै. सं. ७,४,२०,१; तै. ब्रा. ३,९,४,३]

[१०] मै. ३,१२,१९ । वा. २२,२३,३४; २३,१८; ३९,३ । काण्व. २४,३३,३७; २५,२०; ३९,२; तै. सं. ७,४,२१ ।

स्स्वाहा पर्वभ्यस्स्वाहा संधानेभ्यस्स्वाहा शरीरेभ्यस्स्वाहा यज्ञाय स्वाहा दक्षिणायै स्वाहा स्वर्गाय
स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥१०॥ ३७

[१८८१]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे मेधानुवचनं नाम चतुर्थं वचनं संपूर्णम् ॥४॥

अथ पञ्चमं वचनम् ।

मितानुवचनम् ।

सिताय स्वाहासिताय स्वाहाभिहिताय स्वाहानभिहिताय स्वाहा युक्ताय स्वाहायुक्ताय स्वाहा-
युक्ताय स्वाहोद्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा
संवञ्चते स्वाहानुवञ्चते स्वाहोद्वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहोपरताय स्वाहा
सर्वस्मै स्वाहा ॥१॥ १

पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय
स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघायिताय स्वाहा मेघिताय स्वाहा मेघाय स्वाहा
नीहाराय स्वाहा निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते
स्वाहा विद्योतमानाय स्वाहा संविद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रँ
स्तनयते स्वाहा वर्षिष्यते स्वाहा वर्षते स्वाहाभिवर्षते स्वाहा परिवर्षते स्वाहा संवर्षते स्वाहा-
नुवर्षते स्वाहा प्रोषिष्यते स्वाहा प्रुष्णते स्वाहा परिप्रुष्णते स्वाहा शीकायिष्यते स्वाहा शीकायते
स्वाहा शीतिकाय स्वाहोद्ग्रहीष्यते स्वाहोद्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लवमानाय
स्वाहा विप्लुताय स्वाहातप्स्यते स्वाहातपते स्वाहोग्रमातपते स्वाहर्ग्भ्यस्स्वाहा यजुर्भ्यस्स्वाहा
सामभ्यस्स्वाहाङ्गिरोभ्यस्स्वाहा वेदेभ्यस्स्वाहा गाथाभ्यस्स्वाहा नाराशँसीभ्यस्स्वाहा रैभीभ्यस्स्वाहा
सर्वस्मै स्वाहा ॥२॥ २

दत्वते स्वाहादन्तकाय स्वाहा प्राणिने स्वाहाप्राणकाय स्वाहा नासिकावते स्वाहानासिकाय
स्वाहा मुखवते स्वाहामुखकाय स्वाहाक्षण्वते स्वाहानक्षकाय स्वाहा कर्णवते स्वाहाकर्णकाय स्वाहा

[१] तै. सं. ७,४,२१ ।

[२] मै. ३,१२,१२ । वा. २२,२६—२७,२९; ३९,१ । काण्व. २४,३६—३७ ४१; ३९,१ । तै. सं. ७,५,११ । [पृथिव्यै स्वाहा । अथर्व. ५,९,२; ६ । अन्तरिक्षाय स्वाहा । अथर्व. ५,९,३—४ । दिवे स्वाहा । अथर्व. ५,९,१,५]

[३] वा. ३९,१० । काण्व. ३९,९ । तै. सं. ७,५,१२ ।

शीर्षण्वते स्वाहाशीर्षकाय स्वाहा पादवते स्वाहापादकाय स्वाहा प्राणते स्वाहाप्राणते स्वाहा वदते
स्वाहावदते स्वाहा पश्यते स्वाहापश्यते स्वाहा शृण्वते स्वाहाशृण्वते स्वाहा मनस्विने स्वाहामन-
स्काय स्वाहा रेतस्विने स्वाहारेतस्काय स्वाहा प्रजाभ्यस्स्वाहाप्रजननाय स्वाहा लोमवते स्वाहा-
लोमकाय स्वाहा त्वचे स्वाहात्वक्काय स्वाहा चर्मवते स्वाहाचर्मकाय स्वाहा लोहितवते स्वाहालोहि-
ताय स्वाहा माँसन्वते स्वाहामाँसकाय स्वाहा स्नावभ्यस्स्वाहास्नावकाय स्वाहास्थन्वते स्वाहानस्थ-
काय स्वाहा मज्जन्वते स्वाहामज्जकाय स्वाहाङ्गवते स्वाहानङ्गकाय स्वाहात्मन्वते स्वाहानात्मकाय
स्वाहा सर्वस्मै स्वाहा ॥३॥ ३

अग्निः पशुरासीत् तेनायजन्त स एतं लोकमजयद्यस्मिन्नग्निस्स ते लोकस्तं जेष्यस्यथावजिघ्र
वायुः पशुरासीत् तेनायजन्त स एतं लोकमजयद्यस्मिन् वायुस्स ते लोकस्तं जेष्यस्यथावजिघ्रादित्यः
पशुरासीत् तेनायजन्त स एतं लोकमजयद्यस्मिन्नादित्यस्स ते लोकस्तं जेष्यस्यथावजिघ्र ॥४॥ ४

द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षँ समुद्रो योनिस्सूर्यस्ते चक्षुर्वातः प्राणश्चन्द्रमाश्श्रोत्रं दिशः
पादा अवान्तरदिशाः पर्शवो नक्षत्राणि रूपं मासाश्चार्धमासाश्च परूँष्यृतवोऽङ्गानि संवत्सरो महिमा
॥५॥ ५

आयासाय स्वाहावयासाय स्वाहा वियासाय स्वाहा प्रयासाय स्वाहा संयासाय स्वाहोद्यासाय
स्वाहा शोकाय स्वाहा शुचे स्वाहा शुचये स्वाहा तपसे स्वाहा तप्यत्यै स्वाहा क्षुधे स्वाहा
भ्रूणहत्यायै स्वाहा सर्वस्मै स्वाहा ॥६॥ ६

जुम्बकाय स्वाहावभृथाय स्वाहा सर्वस्मै स्वाहा ॥७॥ ७

मृत्यवे स्वाहावभृथाय स्वाहा सर्वस्मै स्वाहा ॥८॥ ८

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्द्ध्यै मह्यँ संनत्या अमुष्मै कामा-
यायुषे त्वा प्राणाय त्वा व्यानाय त्वापानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा पोषाय त्वा
घोषाय त्वाराद्घोषाय त्वा प्रच्युत्यै त्वा कस्त्वा विमुञ्चति स त्वा विमुञ्चतु विष्णुस्त्वा विमुञ्चत्वस्य
यज्ञस्यर्द्ध्यै मह्यँ संनत्या अमुष्मै कामायायुषे त्वा प्राणाय त्वा व्यानाय त्वापानाय त्वा व्युष्ट्यै त्वा
रय्यै त्वा राधसे त्वा पोषाय त्वा घोषाय त्वाराद्घोषाय त्वा प्रतिष्ठित्यै त्वा ॥९॥ ९

[४] वा. २३,१७ । काण्व. २५,१९ । तै. सं. ५,७,२६ ।
[५] वा. ११,२० । काण्व. १२,२० । तै. सं. ५,७,२५ ।
[६] वा. ३९,११—१२ । काण्व. ३९,१०—११ । तै. सं. १,४,३५ ।
[७] वा. २५,९ । काण्व. २७,१३ । [८] वा. ३९,१३ । काण्व. ३९,१२ ।
[९] वा. ३,६,२०; ३,२३; ७,३; १३,३१—३४ । काण्व. २,९,३४; ३,४१; ७,३; १५,२३—२४ । तै. सं. ७,५,१३ ।

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय
ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यस्सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो
मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविँशाभ्यां वैराजाभ्याँ शारदाभ्यां पयस्या बृहस्पतये पाङ्क्ताय
त्रिणवाय शाक्वराय हैमन्तिकाय चरुस्सवित्र आतिच्छन्दसाय त्रयस्त्रिँशाय रैवताय शैशिराय द्वादश-
कपालोऽदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः
॥१०॥ १०

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ११

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते
तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥११॥ १२

अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः ।
स प्रत्युदैद्धरुणं मध्वो अग्रँ स्वा यत् तनू तन्वमैरयत ॥ १३

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य तेऽन्तरिक्षं महिमापो वयाँसि रूपं वायुष्टे
तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥१२॥ १४

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १५

उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि तस्य ते पृथिवी महिमौषधयो वनस्पतयो
रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥१३॥ १६

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामस्मिन् राष्ट्रे राजन्य इषव्यश्शूरो महारथो जायतां
दोग्ध्री धेनुर्वोढानड्वानाशुस्सप्तिर्जिष्णू रथेष्ठाः पुरंधिर्योषा सभेयो युवास्य यजमानस्य वीरो जायतां

[१०] मै. ३,१५,१० । वा. २९,६० । काण्व. ३१,४९ । तै. ७,५,१४ ।

[११] मै. ३,१२,१६ (१८-१९) । वा. २३,१—२,४; १३,४; २५,१० । काण्व. २५,१—२,४; १४,४; २७,१४ । तै. सं. ७,५,१६ । [हिरण्यगर्भस्समवर्तताग्रे० । ऋ. १०,१२१,१; अथर्व. ४,२,७; तै. सं. ४,१,८,३; ९,८,१; ताण्ड्य ब्रा. ९,९,१२; नि. १०,२३ ।

[१२] मै. १,१०,३; ३,१२,१६—१७ (१६; १९; २१) । वा. २३,१—२,४ । काण्व. २५,१—२,४ । तै. सं. १,७,१२, २ । [अया विष्ठा जनयन्० । अथर्व. ७,३,१]

[१३] मै. ३,१२,१७ (२०—२१) । वा. २३,३—४; २५,११ । काण्व. २५,३—४; २७,१५ । तै. सं. ७,५,१६—१७ । [यः प्राणतो निमिषतो० । ऋ. १०,१२१,३; अथर्व. ४,२,१—२]

[१४] मै. ३,१२,६ (८) । वा. २२,२२ । काण्व. २४,३०—३२ । तै. सं. ७,५,१८ ।

निकामें निकामे नः पर्जन्यो वर्षतु फलवतीर्न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥१४॥
१७

आक्रान् वाजी पृथिवीमग्निं युजमकृत वाज्यर्वाक्रान् वाज्यन्तरिक्षं वायुं युजमकृत वाज्यर्वा द्यां
वाज्याक्रँस्त सूर्यं युजमकृत वाज्यर्वायुष्टे वाजिन्युङ्क्तु त्वारभे स्वस्ति मा संपारय वायुष्टे वाजि-
न्युङ्क्तु त्वारभे स्वस्ति मा संपारयादित्यस्ते वाजिन्युङ्क्तु त्वारभे स्वस्ति मा संपारय प्राणधृगसि
प्राणं मे दँह व्यानधृगसि व्यानं मे दँहापानधृगस्यपानं मे दँह चक्षुरसि चक्षुर्मे धेहि श्रोत्रमसि श्रोत्रं
मयि धेह्यायुरस्यायुर्मे धेहि सर्वमायुर्गेषम् ॥१५॥ १८

क्रमैरत्यक्रमीद्वाजी विश्वैर्देवैर्यज्ञियैस्संविदानस्स नो नय सुकृतस्य लोकं तस्य ते वयँ स्वधया
मदेम ॥१६॥ १९

जज्ञि बीजं वर्ष्टा पर्जन्यः पन्था सस्यँ सुपिप्पला ओषधयस्स्वधिचरणेयँ सूपसदनोऽग्निस्स्वध्यक्ष-
मन्तरिक्षँ सूपवाः पवमानस्सूपस्थाना द्यौश्शिवमसौ तपन् यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासा-
स्त्रिंशिनो मासाः क्लृप्ता ऋतवश्शान्तस्संवत्सरः ॥१७॥ २०

आग्नेयोऽष्टाकपालस्सौम्यश्चरुस्सावित्रोऽष्टाकपालस्सारस्वतश्चरुः पौष्णश्चरू रौद्रो गावीधुकश्चरुरग्नये
वैश्वानराय द्वादशकपालो मृगाखरे यदि नागच्छेदग्नयेऽँहोमुचेऽष्टाकपालस्सौर्यं पयो वायव्य आज्य-
भागः ॥१८॥ २१

अग्नयेऽँहोमुचेऽष्टाकपाल इन्द्रायाँहोमुच एकादशकपालो वायांसावित्र आगोमुग्भ्यां चरुर्मित्रा-
वरुणाभ्यामागोमुग्भ्यां पयस्याश्विभ्यामागोमुग्भ्यां धाना मरुद्भ्य एनोमुग्भ्यस्सप्तकपालो विश्वेभ्यो
देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशकपालो द्यावापृथिवीभ्यामँहो-
मुग्भ्यां द्विकपालः ॥१९॥ २२

अग्नये संमनमत् पृथिव्यै संमनमद्यथाग्निः पृथिव्या समनमदेवं मह्यं भद्रास्संनतयस्संनमन्तु
वायवे संमनमदन्तरिक्षाय संमनमद्यथा वायुरन्तरिक्षेण समनमदेवं मह्यं भद्रास्संनतयस्संनमन्तु सूर्याय
संमनमद्दिवे संमनमद्यथा सूर्यो दिवा समनमदेवं मह्यं भद्रास्संनतयस्संनमन्तु वरुणाय संमनमदद्भ्य-

[१५] मै. २,७,२१। वा. ४,३; ११,१९। काण्व. ४,४; १२,१९। तै. सं. ७,५,१९।
[१६] तै. सं. ५,७,२४। [१७] तै. सं. ७,५,२०।
[१८] मै. १,१०,१; २,६,९। वा. १९,६०। काण्व. ३१,४९। तै. सं. ७,५,२१।
[१९] मै. ३,१५,११ (११)। तै. सं. ७,५,२२।
[२०] तै.-सं. ७,५,२३।

स्संमनमद्यथा वरुणोऽद्भिस्समनमदेवं मह्यं भद्रास्संनतयस्संनमन्तु साम्ने संमनमदृचे संमनमद्यथा
सामर्चा समनमदेवं मह्यं भद्रास्संनतयस्संनमन्तु ब्रह्मणे संमनमत् क्षत्राय संमनमद्यथा ब्रह्म क्षत्रेण
समनमदेवं मह्यं भद्रास्संनतयस्संनमन्तु राज्ञे संमनमद्विशे संमनमद्यथा राजा विशा समनमदेवं मह्यं
भद्रास्संनतयस्संनमन्तु रथाय संमनमदश्वेभ्यस्संमनमद्यथा रथोऽश्वैस्समनमदेवं मह्यं भद्रास्संनतय-
स्संनमन्तु ॥२०॥ २३

समिद्दिशां कया नः ॥ २४

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत् स जीवात् ॥२१॥ २५

[१९०६]

इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे मितानुवचनं नाम पञ्चमं वचनं संपूर्णम्॥५

अथ षष्ठं वचनम्।

जीमूतानुवचनम्।

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वँ स त्वा वर्मणो महिमा पिपर्तु ॥ १
धन्वना गा धन्वनाजिं जयेम धन्वना तीव्रास्समदो जयेम ।
धनुश्शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ २
वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रियँ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयँ समने पारयन्ती ॥ ३
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यताँ संविदाने आर्त्नी इमे विस्फुरन्ती अमित्रान् ॥ ४
वह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिस्सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ५

[२१] मै. ३,१६,४ (६९)। तै. सं. ४,२,११,३। [को अद्य युङ्क्ते धुरि गा०। ऋ. १,८४,१६; सा. ३४१; अथर्व. १८,१,६; तै. सं. ४,२,११,३; नि. १४,२५]
[१] मै. ३,१६,३ (३१-४९)। वा. २९,३८-५७। काण्व. ३१,१३-२३। तै. सं. ४,६,६। [जीमूतस्येव भवति०। ऋ. ६,२५,१; तै. सं. ४.६,६,१। धन्वना गा०। ऋ. ६,७५,२; तै. सं. ४,६,६,१; नि. ९,१७। वक्ष्यन्तीवेदागनीगन्ति०। ऋ. ६,७५,३; तै. सं. ४,६,६,१; नि. ९,१८। ते आचरन्ती०। ऋ. ६,७५,४; तै. सं. ४,६,६,२; नि. ९,४०। वह्वीनां पिता०। ऋ. ६,७५,५; तै. सं. ४,६,६,२; नि. ९,१४]

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥ ६
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिस्सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ॥ ७
रथवाहनँ हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मँ सदेम विश्वाहा वयँ सुमनस्यमानाः ॥ ८
स्वादुषँसदः पितरो वयोधाः कृच्छ्रेश्रितश्शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्रास्सतोवीरा उरवो व्रातसाहाः ॥ ९
ब्राह्मणासः पितरस्सोम्यासश्शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरिताद्दतावृधो रक्षा माकिर्नो अघशँस ईशत ॥ १०
सुपर्णं वस्ते मृगो अस्या दन्तो गोभिस्संनद्धा पतति प्रसूता ।
यत्रा नरस्सं च वि च द्रवन्ति तत्रास्मभ्यमिषवश्शर्म यँसन् ॥ ११
यत्रा नरस्सं च वि च द्रवन्ति तत्रास्मभ्यमिषवश्शर्म यँसन् ॥
वृजीते परिवृङ्धि नोऽश्मा भवतु नस्तनूः । सोमो अधिब्रवीतु नोऽदितिश्शर्म यच्छतु ॥
१२

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाँसं परिपातु विश्वतः ॥ १३
अश्वाजनि प्रचेतसोऽश्वान् समत्सु चोदय ॥ १४
आजङ्घन्ति सान्वेषां जघनाँ उपजिघ्नते ।
वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणस्सुवीरः ।
गोभिस्संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ १५
दिवः पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतँ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रँ हविषा रथं यज ॥ १६

[रथे तिष्ठन्नयति०। ऋ. ६,७५,६; तै. सं. ४,६,६,२; नि. ९,१६। तीव्रान् घोषान्०। ऋ. ६,७५,७; तै. सं. ४,६,६,३। रथवाहनँ हविरस्य०। ऋ. ६,७५,८; तै. सं. ४,६,६,३। स्वादुषँसदः पितरो०। ऋ. ६,७५,१०; तै. सं. ४,६,६,३। सुपर्णं वस्ते ६,७५,९; तै. सं. ४,६,६,३। ब्राह्मणासः पितरः०। ऋ. ६,७५,१२; वृ (ऋ)जीते परिवृङ्धि०। ऋ. ६,७५,११; मृगो०। ऋ. ६,७५,११; तै. सं. ४,६,६,४; नि. २,५; ९,१९। आजङ्घन्ति तै. सं. ४,६,६,४। अहिरिव भोगैः०। ऋ. ६,७५,१४; तै. सं. ४,६,६,५; नि. ९,१५। वनस्पते वीड्वङ्गो०। ऋ. ६,४७,२६; अथर्व. सान्वेषां०। ऋ. ६,७५,१३; तै. सं. ४,६,६,५; नि. ९,२०। दिवः पृथिव्याः०। ऋ. ६,४७,२७; अथर्व. ६,१२५,२; ६,१२५,१; तै. सं. ४,६,६,५; नि. २,५; ९,१२। तै. सं. ४,६,६,५]

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ १७
उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून् ॥ १८
आक्रन्दय बलमोजो न आधा निष्टनिहि दुरिता बाधमानः ।
अपप्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ १९
आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥१॥ २०

समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः ।
वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ॥ २१
घृतेनाञ्जन् सं पथो देवयानान् प्रजानन् वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशस्सचन्ताँ स्वधामस्मै यजमानाय धेहि ॥ २२
ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेध्यश्च सप्ते ।
अग्निष्ट्वा देवैर्वसुभिस्सजोषाः प्रीतं वह्निं वहतु जातवेदाः ॥ २३
स्तीर्णं बर्हिस्सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिरक्तमदितिस्सजोषास्योनं कृण्वाना सुविते दधातु ॥ २४
एता उ वस्सुभगा विश्ववारा वि पक्षोभिश्श्रयमाणा उदातैः ।
ऋष्वास्सतीः कवयश्शुम्भमाना द्वारो देवीस्सुप्रयाणा भवन्तु ॥ २५
अन्तरा मित्रावरुणा चरन्ती मुखं यज्ञानामभिसंविदाने ।
उषासा वाँ सुहिरण्ये सुशिल्पे ऋतस्य योना इह सादयामि ॥ २६
प्रथमा वाँ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ २७

[इन्द्रस्य वज्रो०। ऋ. ६,४७,२८; अथर्व. ६,१२५,३; तै. सं. ४,६,६,६। उपश्वासय पृथिवी०। ऋ. ६,४७,२९; अथर्व. ६,१२६,१; तै. सं. ४,६,६,६; नि. ९,१३। आक्रन्दय बलमोजो०। ऋ. ६,४७,३०; अथर्व. ६,१२६,२; तै. सं. ४,६,७,७। आमूरज प्रत्यावर्तय०। ऋ. ६,४७,३१; अथर्व. ६,१२६,३; तै. सं. ४,६,६,७]
[२] मै. ३,१६,२ (१७-२७)। वा. २९,१-११। काण्व. ३१,१-११। तै. सं. ५,१,११। मा. श्रौ. ९,२,५। [घृतेनाञ्जन् सं पथो०। तै. सं. ५,१,११,१। ईड्यश्चासि वन्द्यश्च०। तै. सं. ५,१,११,१। स्तीर्णं बर्हिस्सुष्टरीमा०। तै. सं. ५,१,११,२। एता उ वस्सुभगा०। तै. सं. ५,१,११,२। अन्तरा मित्रावरुणा०। तै. सं. ५,१,११,३। प्रथमा वाँ सरथिना०। तै. सं. ५,१,११,३]

आदित्यैर्नो भारती वष्टु यज्ञं सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिस्सजोषा यज्ञं नो देवीरमृतेषु धत्त ॥ २८
त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेदं विश्वं भुवनं जजान बहोः कर्तारमिह यक्षि होतः ॥ २९
अश्वो घृतेन त्मन्या समक्त उप देवाँ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ ३०
प्रजापतेस्तपसा वावृधानस्सद्यो जातो मधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥२॥ ३१

यदक्रन्दः ॥ ३२
आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिस्सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ ३३
अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानडादिद्ग्रसिष्ठ ओषधीरजीगः ॥ ३४
अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवाममिरे वीर्यं ते ॥ ३५
हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥ ३६
ईर्मान्तासस्सिलिकमध्यमासस्सँ शूरणासो दिव्यासो अत्याः ।
हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥ ३७
तव शरीरं पतयिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान् ।
तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति ॥ ३८

[आदित्यैर्नो भारती० । तै. सं. ५,१,११,३ । अश्वो घृतेन त्मन्या० । तै. सं. ५,१,११,४ । प्रजापते स्तपसा वावृधानः० । तै. सं. ५,१,११,४]

[१] वा. २९,१२,१७—२४ । काण्व. ३१,२४,२९—३६ । तै. सं. ४,६,७ । [यदक्रन्दः प्रथमं । ऋ. १,१६३,१; तै. सं. ४,६,७,१; ६,७,१ । आत्मानं ते मनसा० । १,१६३,६; तै. सं. ४,६,७,२ । अत्रा ते रूपमुत्तमं० । ऋ. १,१६३,७; तै. सं. ४,६,७,३; नि. ६,८ । अनु त्वा रथो अनु० । ऋ. १,१६३,८; तै. सं. ४,६,७,३ । हिरण्यशृङ्गोऽयो० । ऋ. १,१६३,९; तै. सं. ४,६,७,४ । ईर्मान्तासस्सिलिक० । ऋ. १,१६३,१०; तै. सं. ४,६,७,४; नि. ४,१३ । तव शरीरं पतयिष्ण्वर्वन्० । ऋ. १,१६३,११; तै. सं. ४,६,७,४]

उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पश्चाद् कवयो यन्ति रेभाः ॥ ३९
उप प्रागात् परमं यत् सधस्थमर्वाँ अच्छा पितरं मातरं च ।
अद्या देवाञ्जुष्टतमो हि गम्या अथाशास्ते दाशुषे वार्याणि ॥३॥ ४०

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परिख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वार्याणि ॥ ४१
यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति ।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येतु पाथः ॥ ४२
एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेवः ।
अभिप्रियं यत् पुरोडाशमर्वता त्वष्टेदेनँ सौश्रवसाय जिन्वन्ति ॥ ४३
यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
तत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः परिवेदयन्नजः ॥ ४४
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शँस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आपृणध्वम् ॥ ४५
यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनँ संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ४६
उप प्रागात् सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्तु देवानां पुष्टे चकृमा सुबन्धुम् ॥ ४७
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृणँ सर्वा ता ते अपि देवेष्वस्तु ॥ ४८

[उप प्रागाच्छसनं० । ऋ. १,१६३,१२; तै. सं. ४,६,७,४ । उप प्रागात् परमं० । ऋ. १,१६३,१३; तै. सं. ४,६,७,५]

[४] मै. ३,१६,१ (१—१०,१३) । वा. २५,२४—३३,३६ । काण्व. २७,२८—३७,४० । तै. सं. ४,६,८—९ । [मा नो मित्रो वरुणो० । ऋ. १,१६२,१; तै. सं. ४,६,८,१; नि. ९,३ । यन्निर्णिजा रेक्णसा० । ऋ. १,१६२,२; तै. सं. ४,६,८,१ । एष च्छागः पुरो० । ऋ. १,१६२,३; तै. सं. ४,६,८,१ । यद्धविष्यमृतुशो० । ऋ. १,१६२,४; तै. सं. ४,६,८,२ । होताध्वर्युरावया० । ऋ. १,१६२,५; तै. सं. ४,६,८,२ । यूपव्रस्का उत ये० । ऋ. १,१६२,६; तै. सं. ४,६,८,२ । उप प्रागात सुमन्मे० । ऋ. १,१६२,८; तै. सं. ४.६.

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोश्शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ ४९
यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधँ शृतपाकं पचन्तु ॥ ५०
यन्नीक्षणं माँस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परिभूषन्त्यश्वम् ॥४॥ ५१
यत् ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ५२
ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुस्सुरभिर्निर्हरेति ।
ये चार्वतो माँसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥ ५३
मा त्वाग्निर्ध्वनयेद्धूमगन्धिर्मोखा भ्राजन्त्यभिविक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रतिगृभ्णन्त्यश्वम् ॥ ५४
निक्रमणं निषदनं विवर्तनं यच्च पड्वीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ ५५
यत् ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ ५६
यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्वीशं प्रिया देवेष्वायामयन्ति ॥ ५७
चतुस्त्रिँशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिस्समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या विशस्त ॥ ५८
एकस्त्वष्टुरश्वस्य विशस्ता द्वा यन्तारा भवतस्तथर्तुः ।
या ते गात्राणामृतुथा कृणोमि ता ता पिण्डानां प्रजुहोम्यग्नौ ॥ ५९

[यदश्वस्य क्रविषो० । ऋ. १,१६२,९; तै. सं. ४,६,८,३ । यदूवध्यमुदरस्या० । ऋ. १,१६२,१०; तै. सं. ४,६,८,४ । यन्नीक्षणं माँस्पचन्या० । ऋ. १,१६२,१३; तै. सं. ४,६,९,१]

[५] मै. ३,१६,१७; ३,१६,१ (१०६; ११—१९,१४—१६) । वा. २५,३४—३५,३७ —४५ । काण्व. २७,३८—३९, ४१—४३ । तै. सं. ४,६,८,४; ४,६,९,१ । [यत् ते गात्रादग्निना० । ऋ. १,१६२,११; तै. सं. ४,६,८,४ । ये वाजिनं परि० । ऋ. १,१६२,१२; तै. सं. ४,६,९,१ । मा त्वाग्निर्ध्वनये० । ऋ. १,१६२,१५; तै. सं. ४,६,९,२ । निक्रमणं निषदनं० । ऋ. १,१६२,१४; तै. सं. ४,६,९,१ । यत् ते सादे महसा० । ऋ. १, १६२,१७; तै. सं. ४,६,९,२ । यदश्वाय वास० । ऋ. १,१६२,१६; तै. सं. ४,६,९,२ । चतुस्त्रिँशद्वाजिनो देव० । ऋ. १,१६२,१८; तै. सं. ४,६,९,३ । एकस्त्वष्टुरश्वस्य० ; ऋ. १,१६२,१९; तै. सं. ४,६,९,३]

मा त्वा तपत् प्रिय आत्मापियन्तं मा स्वधितिस्तन्व आतिष्ठिपत् ते ।
मा ते गृध्नुरविशस्तातिहाय च्छिद्रा गात्राण्यसिना मिथू कः ॥ ६०
न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिस्सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ ६१
सुगव्यं नो वाजी स्वश्व्यं पुँसः पुत्राँ उत विश्वपुषं रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनते हविष्मान् ॥५॥ ६२
[१०६८]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे जीमूतानुवचनं नाम षष्ठं वचनं संपूर्णम् ॥६॥

अथ सप्तमं वचनम् ।

इन्द्रानुवचनम् ।

इन्द्राय राज्ञे सूकरो वरुणाय राज्ञे कृष्णो यमाय राज्ञ ऋश्य ऋषभाय राज्ञे गवयश्शार्दूलाय राज्ञे
गौरः पुरुषराजाय मर्कटः क्षिप्रश्येनस्य वर्तिका नीलङ्गोः कृमिस्सोमाय राज्ञे कुलङ्गस्सिन्धोश्शिशु-
मारो हिमवतो हस्ती ॥१॥ १

मयुः प्राजापत्य उलो हलिक्ष्णो वृषदँशस्ते धातुस्सरस्वत्यै शारिश्श्येता पुरुषवाक् सरस्वते शुक-
श्श्येतः पुरुषवागारण्योऽजो नकुलश्शका ते पौष्णा वाचे क्रौञ्चः ॥२॥ २

अपां नप्त्रे झषो नाक्रो मकरः पुलीरयस्ते कूवरस्य वाचे पैङ्गराजो भगाय कुषीतक आती
वाहसो दर्विदा ते वायव्या दिग्भ्यश्चक्रवाकः ॥३॥ ३

बलायाजगर आखुस्सृजया शयाण्डकस्ते मैत्रा मृत्यवेऽसितो मन्यवे स्वजः कौम्भीनसः पुष्कर-
सादो लोहिताहिस्ते त्वाष्ट्राः प्रतिश्रुत्कायै वाहसः ॥४॥ ४

[मा त्वा तपत् प्रिय० । ऋ. १,१६२,२०; तै. सं. ४,६,९,३, । न वा उ एतन्म्रियसे० । ऋ. १,१६२,२१; तै. सं. ४,६,९,४; तै. आ. ३,७,७,१४ । सुगव्यं नो वाजी० । ऋ. १,१६२,२२; तै. सं. ४,६,९,४]
[१] मै. ३,१४,११ (११) । वा. २४,३० । काण्व. २६,३४ । तै. सं. ५,५,११ ।
[२] मै. ३,१४,१२-१४ (१२—१४) । वा. २४,३१—३३ । काण्व. २६,३५—३७ । तै. सं. ५,५,१२ ।
[३] मै. ३,१४,२—३,१५—१६ (२—३,१५ - १६) । वा. २४,२१—२२, ३४—३५ । काण्व. २६,२५—२६, ३८—३९ । तै. सं. ५,५,१३ ।
[४] मै. ३,१४,१४ (१४) । वा. २४,३३ । काण्व. २६,३७ । तै. सं. ५,५,१४ ।

पुरुषमृगश्चन्द्रमसे गोधा कालका दार्वाघाटस्ते वनस्पतीनामेण्यह्ने कृष्णो रात्र्यै पिगः क्ष्विङ्क्षा
नीलशीर्ष्णी तेऽर्यम्णो धातुः कक्कटः ॥५॥ ५

सौरी बलाकश्शर्यो मयूरश्श्येनस्ते गन्धर्वाणां वसूनां कपिञ्जलो रुद्राणां तित्तिरी रोहित्कुण्डृणाची
गोलत्तिका ता अप्सरसामरण्याय सृमरः ॥६॥ ६

पृषतो वैश्वदेवो बिद्धो न्यङ्कुः कशस्तेऽनुमत्या अन्यवापोऽर्धमासानां मासां कश्यपः कुवयिः
कुटरुर्दात्यौहस्ते सिनीवाल्यै बृहस्पतये शित्पुटः ॥७॥ ७

शका भौमी पाङ्क्तः कशो मन्थीलवस्ते पितृणामृतूनां जहका संवत्सराय लोपा कपोत उलूक-
श्शशस्ते नैर्ऋताः कृकवाकुस्सावित्रः ॥८॥ ८

रुरू रौद्रः कृकिलासश्शकुनिः पिप्पका ते शरव्यायै हरिणो मारुतो ब्रह्मणे शार्गस्तरक्षुः कृष्णश्श्वा
चतुरक्षो गर्दभस्त इतरजनानामग्नये धूङ्क्षा ॥९॥ ९

अलज आन्तरिक्ष उद्रो मद्गुः प्लवस्तेऽपामदित्यै हँससाचिरिन्द्राण्यै कीर्शा गृध्रश्शितिकक्षी
वार्ध्रीणसस्तेऽदित्या द्यावापृथिव्या श्वावित् ॥१०॥ १०

सुपर्णः पार्जन्यो हँसो वृको वृषदँशस्त ऐन्द्रा अपामुद्रोऽर्यम्णो लोपाशस्सिँहो नकुलो व्याघ्रस्ते
महेन्द्राय कामाय परस्वान् ॥११॥ ११

[२९७९]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे इन्द्रानुवचनं नाम सप्तमं
वचनं संपूर्णम् ॥७॥

[५] मै. ३,१४,१६-१७ (१६-१७)। वा. २४,३५-३६। काण्व. २६,३९-४०। तै. सं. ५,५,१५।
[६] मै. ३,१४,१८ (१८)। वा. २४,३७। काण्व. २६,४१। तै. सं. ५,५,१६।
[७] मै. ३,१४,२० (२०)। वा. २४,३९। काण्व. २६,४३। तै. सं. ५,५,१७।
[८] मै. ३,१४,१९ (१९)। वा. २४,३८। काण्व. २६,४२। तै. सं. ५,५,१८।
[९] मै. ३,१४,२०-२१ (२०-२१)। वा. २४,३९—४०। काण्व. २६,४३-४४। तै. सं. ५,५,१९।
[१०] मै. ३,१४,१६; २० (१६; २०)। वा. २४,३४,३९। काण्व. २६,३९,४३। तै. सं. ५,५,२०।
[११] मै. ३,१४,१५; १७-१८ (१५; १७-१८)। वा. २४,३४-३७। काण्व. २६,३८-४१। तै. सं. ५,५,२१।
काठ-५५

अथाष्टमं वचनम्।

पेत्वानुवचनम्।

आग्नेयः कृष्णग्रीवस्सारस्वती मेषी बभ्रुस्सौम्यः पौष्णश्श्यामश्शितिपृष्ठो बार्हस्पत्यश्शिल्पो वैश्व-
देव ऐन्द्रोऽरुणो मारुतः कल्माष ऐन्द्राग्नस्संहितोऽधोरामस्सावित्रो वारुणः पेत्वः ॥१॥ १

अश्वस्तूपरो गोमृगस्ते प्राजापत्या आग्नेयौ कृष्णग्रीवौ त्वाष्ट्रौ लोमशसक्थौ शितिपृष्ठौ बार्ह-
स्पत्यौ धात्रे पृषोदरस्सौर्यो बलक्षः पेत्वः ॥२॥ २

अग्नयेऽनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्णौ रजतनाभी वैश्वदेवौ पिशङ्गौ तूपरौ
मारुतः कल्माष आग्नेयः कृष्णोऽजस्सारस्वती मेषी वारुणः कृष्ण एकशितिपात् पेत्वः ॥३॥ ३

[२९८२]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे पेत्वानुवचनं नामाष्टमं
वचनं संपूर्णम् ॥८॥

अथ नवमं वचनम्।

रोहितानुवचनम्।

रोहितो धूम्रलोहितः कर्कन्धुरोहितस्ते प्राजापत्या बभ्रुररुणबभ्रुश्शुकबभ्रुस्ते रौद्राश्श्येतश्श्येताक्ष-
श्श्येतग्रीवस्ते पितृदेवत्यास्तिस्रः कृष्णा वशा वारुण्यस्तिस्रश्श्वेता वशास्सौर्यो मैत्राबार्हस्पत्या धूम्र-
ललामास्तूपराः ॥१॥ १

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गुर्लोहितोर्णी बलक्षी तास्सारस्वत्यः पृषती क्षुद्र-
पृषती स्थूलपृषती ता वैश्वदेव्यस्तिस्रश्श्यामा वशाः पौष्ण्यस्तिस्रो रोहिण्यो वशा मैत्र्य ऐन्द्राबार्ह-
स्पत्या अरुणललामास्तूपराः ॥२॥ २

शितिबाहुरन्यतश्शितिबाहुस्समन्तशितिबाहुस्त ऐन्द्रवायवाश्शितिरन्ध्रोऽन्यतश्शितिरन्ध्रस्सम-
न्तशितिरन्ध्रस्ते मैत्रावरुणाश्शुद्धवालस्सर्वशुद्धवालो मणिवालस्त आश्विनास्तिस्रश्शिल्पा वशा वैश्व-
देव्यस्तिस्रश्श्येनीः परमेष्ठिने सौमापौष्णाश्श्यामललामास्तूपराः ॥३॥ ३

[१] मै. ३,१३,२ (६)। वा. २९,५८। काण्व. ३१,५०। तै. सं. ५,५,२२।
[२] मै. ३,१३,२ (६)। वा. २४,१। काण्व. २६,१-३। तै. सं. ५,५,२३।
[३] मै. ३,१३,१२; १४ (१६,१८)। वा. २९,५९। काण्व. ३१,५१। तै. सं. ५,५,२४।
[१] मै. ३,१३,३ (७)। वा. २४,२। काण्व. २६,३-४। तै. सं. ५,६,११। मा. श्रौ. ९,२,४।
[२] मै. ३,१३,३,५ (७; ९)। वा. २४,२,४। काण्व. २६,३-४,६-८। तै. सं. ५,६,१२।
[३] मै. ३,१३,३-४,६ (७-८,१०)। वा. २४,२-३,५। काण्व. २६,४-५,९। तै. सं. ५,६,१३।

उन्नत ऋषभो वामनस्त ऐन्द्रावरुणाश्शितिककुच्छितिपृष्ठश्शितिभसत् त ऐन्द्राबार्हस्पत्याश्शिति-
पाच्छित्योष्ठश्शितिभ्रूस्त ऐन्द्रावैष्णवास्तिस्रस्सिध्मा वशा वैश्वकर्मण्यस्तिस्रो धात्रे पृषोदराः पौष्णा-
श्श्येतललामास्तूपराः ॥४॥ ४

कर्णास्त्रयो यामास्सौम्यास्त्रयश्शितिङ्गा अग्नये यविष्ठाय त्रयो नकुलास्तिस्रो रोहिण्यस्त्र्यव्यस्ता
वसूनां तिस्रोऽरुणा दित्यौह्यस्ता रुद्राणाँ सौमेन्द्रा बभ्रुललामास्तूपराः ॥५॥ ५

शुण्ठास्त्रयो वैष्णवा अधीलोधकर्णास्त्रयो विष्णव उरुक्रमाय लप्सुदिनस्त्रयो विष्णव उरुगायाय
पञ्चाव्यस्तिस्र आदित्यानां त्रिवत्सास्तिस्रोऽङ्गिरसामाग्नेन्द्राः कृष्णललामास्तूपराः ॥६॥ ६

इन्द्राय राज्ञे त्रयश्शितिपृष्ठा इन्द्रायाधिराजाय त्रयश्शितिककुद इन्द्राय स्वराजे त्रयश्शितिभस-
दस्तिस्रस्तुर्यौह्यस्साध्यानां तिस्रः पष्ठौह्यो विश्वेषां देवानामैन्द्रावैष्णवा गौरललामास्तूपराः ॥७॥ ७

अदित्यै त्रयो रोहितैता इन्द्राण्यै त्रयः कृष्णैताः कुह्वै त्रयोऽरुणैतास्तिस्रो धेनवो राकायै त्रयो-
ऽनड्वाहस्सिनीवाल्या आग्नावैष्णवा रोहितललामास्तूपराः ॥८॥ ८

सौम्यास्त्रयः पिशङ्गास्सोमाय राज्ञे त्रयस्सारङ्गाः पार्जन्या नभोरूपास्तिस्रोऽजा मल्हा इन्द्राण्यै
तिस्रो मेष्य आदित्या द्यावापृथिव्या मालङ्गास्तूपराः ॥९॥ ९

वारुणास्त्रयः कृष्णललामा वरुणाय राज्ञे त्रयो लोहितललामा वरुणाय रिशादसे त्रयोऽरुणललामा-
श्शिल्पास्त्रयो वैश्वदेवास्त्रयः पृश्नयस्सर्वदेवत्या ऐन्द्रासौराश्श्यामललामास्तूपराः ॥१०॥ १०

[२९९२]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे रोहितानुवचनं नाम
नवमं वचनं संपूर्णम् ॥९॥

[४] मै. ३,१३,७—८ (११—१२)। वा. २४,६—७। काण्व. २६,१०—११। तै. सं. ५,६,१४। [७] तै. सं. ५,६,१७। [८] तै. सं. ५,६,१८।
[५] तै. सं. ५,६,१५। [६] तै. सं. ५,६,१६।
[९] तै. सं. ५,६,१९। [१०] तै. सं. ५,६,२०।

अथ दशमं वचनम्।

सोमानुवचनम्।

सोमाय स्वराजेऽनोवाहा अनड्वाहा इन्द्राग्निभ्यामोजोदाभ्यामोष्टारा इन्द्राग्निभ्यां बलादाभ्याँ
सीरवाहा अवी द्वे धेनू भौमी दिग्भ्यो वडवे द्वे धेनू भौमी वैराजे पुरुषी द्वे धेनू भौमी वायव
आरोहणवाहा अनड्वाहौ वारुणी कृष्णे वशे आराड्यौ दिव्या ऋषभौ परिमरौ ॥१॥ १

एकादश प्रातर्गव्याः पशव आलभ्यन्ते छगलः कल्माषः किकिदिवीविदीगयस्तौ त्वाष्ट्रौ सौरी-
र्नव श्वेता वशा अनूबन्ध्या भवन्त्याग्नेय ऐन्द्राग्न आश्विनस्ते विशालयूप आलभ्यन्ते ॥२॥ २

पिशङ्गास्त्रयो वासन्तास्सारङ्गास्त्रयो ग्रैष्माः पृषन्तस्त्रयो वार्षिकाः पृश्नयस्त्रयश्शारदाः पृश्निसक्था-
स्त्रयो हैमन्तिका अवलिप्तास्त्रयश्शैशिरास्संवत्सराय निवक्षसः ॥३॥ ३

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीञ्छरदे वर्तिका हेमन्ताय
ककराञ्छिशिराय विकरान् ॥४॥ ४

गायत्री त्रिष्टुब्जगत्यनुष्टुप् पङ्क्त्या सह । बृहत्युष्णिहा ककुप् सूचीभिश्शिम्यन्तु त्वा ॥ ५
द्विपदा या चतुष्पदा त्रिपदा या च षट्पदा ।
सच्छन्दा या च विच्छन्दास्सूचीभिश्शिम्यन्तु त्वा ॥ ६
महानाम्नी रेवतयो विश्वा आशाः प्रसूवरीः ।
मेघ्या विद्युतो वाचस्सूचीभिश्शिम्यन्तु त्वा ॥ ७
रजता हरिणीस्सीसा युजो युज्यन्ते कर्मभिः ।
अश्वस्य वाजिनस्त्वचि सूचीभिश्शिम्यन्तु त्वा ॥ ८
नारीस्ते पत्नयो लोम विचिन्वन्तु मनीषया ।
देवानां पत्नीर्विशस्सूचीभिश्शिम्यन्तु त्वा ॥ ९

कुविदङ्ग ॥५॥ १०

[१] तै. सं. ५,६,२१। [२] तै. सं. ५,६,२२। [३] तै. सं. ५,६,२३।
[४] मै. ३,१४,१ (१)। वा. २४,२०। काण्व. २६,२४। तै. सं. ५,५,११—२४। मा. श्रौ. ९,२,४।
[५] मै. ३,१२,२१ (३३-३८)। वा. २३,३३-३८; १०,३१; १९,६। काण्व. २५,३५-४०; ११.४५; ११,५।
तै. सं. ५,२,११। [कुविदङ्ग०। ऋ. १०,१३१.२; अथर्व. २०,१२५,२; तै. सं. १,८,२१,१; ५,२,११,२;
तै. ब्रा. २,६,१.३]

कस्त्वा छ्यति कस्त्वा विशास्ति कस्ते गात्राणि शिम्यति ।
क उ ते शमिता कविः ॥ ११
ऋतवस्त ऋतुथा पर्व शमितारो विशासतु ।
संवत्सरस्य धायसा शिमीभिश्शिम्यन्तु त्वा ॥ १२
दैव्या अध्वर्यवस्त्वा छ्यन्तु वि च शासतु ।
गात्राणि पर्वशश्शिमाः कृण्वन्तु शिम्यन्तः ॥ १३
अर्धमासाः परूंषि ते मासाश्छ्यन्तु शिम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टं सूदयन्तु ते ॥ १४
पृथिवी तेऽन्तरिक्षेण वायुश्छिद्रं भिषज्यतु ।
द्यौस्ते नक्षत्रैस्सह रूपं कृणोतु साधुया ॥ १५
शं ते परेभ्यो गात्रेभ्यश्शमस्त्ववरेभ्यः ।
शमस्थभ्यो मज्जभ्यश्शम्वस्तु ते तन्वे भुवत् ॥६॥ १६
[३००८]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे सोमानुवचनं नाम दशमं वचनं संपूर्णम् ॥१०॥

अथैकादशं वचनम् ।

नमस्कारवचनम् ।

अग्नये नमो गायत्र्यै नमस्त्रिवृते नमो रथन्तराय नमो वसन्ताय नमः प्राच्यै दिशे नमः प्राणाय नमो वसुभ्यो नमः ॥१॥ १

इन्द्राय नमस्त्रिष्टुभे नमः पञ्चदशाय नमो बृहते नमो ग्रीष्माय नमो दक्षिणायै दिशे नमो व्यानाय नमो रुद्रेभ्यो नमः ॥२॥ २

मरुद्भ्यो नमो जगत्यै नमस्सप्तदशाय नमो वैरूपाय नमो वर्षाभ्यो नमः प्रतीच्यै दिशे नमोऽपानाय नम आदित्येभ्यो नमः ॥३॥ ३

विश्वेभ्यो देवेभ्यो नमोऽनुष्टुभे नम एकविंशाय नमो वैराजाय नमश्शरदे नम उदीच्यै दिशे नमस्समानाय नमश्चन्द्रमसे नमः ॥४॥ ४

[६] वा. २३.३९-४४ । काण्व. २५,८१-८६ । तै. सं. ५,२,१२ ।

मित्रावरुणाभ्यां नमः पङ्क्त्यै नमस्त्रिणवत्रयस्त्रिंशाभ्यो नमश्शाक्वररैवताभ्यां नमो हेमन्तशिशिराभ्यां नम ऊर्ध्वायै दिशे नम उदानाय नमो विष्णवे नमः ॥५॥ ५

पृथिव्यै नमोऽग्नये नमो भूताय नमश्चक्षुषे नमोऽन्तरिक्षाय नमो वायवे नमो भव्याय नमश्श्रोत्राय नमो दिवे नमस्सूर्याय नमो भविष्यते नमो मनसे नमः ॥६॥ ६
[३०१४]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे नमस्कारवचनं नामैकादशं वचनं संपूर्णम् ॥११॥

अथ द्वादशं वचनम् ।

अलिवन्दानुवचनम् ।

अलिवन्दाय स्वाहा बलिवन्दाय स्वाहा सर्वस्मै स्वाहा ॥१॥ १
[३०१५]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे अलिवन्दानुवचनं नाम द्वादशं वचनं संपूर्णम् ॥१२॥

अथ त्रयोदशं वचनम् ।

शादानुवचनम् ।

शादं दद्भिरवकान् दन्तमूलैस्तेगान् दंष्ट्राभ्यां मण्डूकाञ्जम्भैरादकां खादेनोर्जं संसीदेनारण्यं जाम्बीलेन मृदं बर्स्वैश्शर्कराभिरवकामवक्राभिश्शर्करामुत्सादेन जिह्वामवक्रन्देन तालुं सरस्वतीं जिह्वाग्रेण ॥१॥ १

वाजं हनुभ्यामप आस्येनादित्याञ्छ्मश्रुभिरुपयाममधरोष्ठेन सदुत्तरेणान्तरेणानूकाशं प्रकाशं प्रकाशेन बाह्यं स्तनयित्नुं निर्बाधेन सूर्याग्नी चक्षुर्भ्यां विद्युतं कनीनिकाभ्यामशनिं मस्तिष्केण बलं मज्जभिः ॥२॥ २

कूर्माञ्छफैरच्छराभिः कपिञ्जलान् साम कुष्ठिकाभिर्जवं जङ्घाभिरगदं जानुभ्यां वीर्यं गुहाभ्यां भयं प्रचलाभ्यां गुहोपपक्षाभ्यामश्विना अंसाभ्यामदितिं शीर्ष्णा निर्ऋतिं निर्जाल्मकशीर्ष्णा ॥३॥ ३

[१] मै. ३,१५,१ (१) । वा. २५,१ । काण्व. २७,१ । तै. सं. ५,७,११ । मा. श्रौ. ९,२,५ ।
[२] मै. ३,१५,१-२ (१-२) । वा. २५,१-२ । काण्व. २७,१-३ । तै. सं. ५,७,१२ ।
[३] मै. ३,१५,३ (३) । वा. २५,३ । काण्व. २७,५-६ । तै. सं. ५,७,१३ ।

योक्त्रं गृध्राभिर्युगमानतेन चित्तं मन्याभिस्संक्रोशान् प्राणैः प्रकाशेन त्वचं पराकाशेनान्तरां मशकान् केशैरिन्द्रं स्वपसा वहेन बृहस्पतिं शकुनिसादेन रथमुष्णिहाभिः ॥४॥ ४

मित्रावरुणौ श्रोणिभ्यामिन्द्राग्नी शिखण्डाभ्यामिन्द्राबृहस्पती ऊरुभ्यामिन्द्राविष्णू अष्ठीवद्भ्यां सवितारं पुच्छेन गन्धर्वाञ्छेपेनाप्सरसो मुष्काभ्यां पवमानं पायुना पवित्रं पोत्राभ्यामाक्रमणं स्थूराभ्यां प्रतिक्रमणं गृष्ठाभ्याम् ॥५॥ ५

इन्द्रस्य क्रोडोऽदित्यै पाजस्यं दिशां जत्रवो जीमूतान् हृदयौपशाभ्यामन्तरिक्षं पुलितता नभ उदर्येणेन्द्राणीं प्लीह्ना वल्मीकान् क्लोम्ना गिरीन् प्लाशिभिस्समुद्रमुदरेण वैश्वानरं भस्मना ॥६॥ ६

पूष्णो वनिष्ठुरन्धाहेस्स्थूरगुदा सर्पान् गुदाभिर्ऋतून् पृष्टिभिर्दिवं पृष्ठेन वसूनां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृतीयाङ्गिरसां चतुर्थी साध्यानां पञ्चमी विश्वेषां देवानां षष्ठी ॥७॥ ७

ओजो ग्रीवाभिर्निर्ऋतिमस्थभिरिन्द्रं स्वपसा वहेन रुद्रस्य विचलस्स्कन्धोऽहोरात्रयोर्द्वितीयोऽर्धमासानां तृतीयो मासश्चतुर्थ ऋतूनां पञ्चमस्संवत्सरस्य षष्ठः ॥८॥ ८

आनन्दनन्दथुभ्यां कामं प्रत्यासाभ्यां भयं शितीमद्भ्यां प्रशिषं प्रशासाभ्यां सूर्याचन्द्रमसौ वृक्काभ्यां श्यामशबलौ मतस्नाभ्यां व्युष्टिं रूपेण निम्रुक्तिमरूपेण ॥९॥ ९

अहर्मांसेन रात्रीं पीवसापो यूषेण घृतं रसेन श्यां वसया दूषीकाभिर्ह्रादुनिमश्रुभिः प्रुष्वां दिवं रूपेण नक्षत्राणि प्रतिरूपेण पृथिवीं चर्मणा कर्वीं छव्योपाकृताय स्वाहालब्धाय स्वाहा हुताय स्वाहा ॥१०॥ १०

अग्नेः पक्षतिस्सरस्वत्या निपक्षतिस्सोमस्य तृतीयापां चतुर्थ्योषधीनां पञ्चमी रुद्रस्य षष्ठी मरुतां सप्तमी बृहस्पतेरष्टमी मित्रस्य नवमी वरुणस्य दशमीन्द्रस्यैकादशी विश्वेषां देवानां द्वादशी द्यावापृथिव्योः पार्श्वं यमस्य पाटोरः ॥११॥ ११

वायोः पक्षतिस्सरस्वतो निपक्षतिश्चन्द्रमसस्तृतीया नक्षत्राणां चतुर्थी सवितुः पञ्चमी संवत्सरस्य

[४] मै. ३,१५,३ (३) । वा. २५,३ । काण्व. २७,५ । तै. सं. ५,७,१४ ।
[५] मै. ३,१५,६ (६) । वा. २५,६ । काण्व. २७,९ । तै. सं. ५,७,१५ ।
[६] मै. ३,१५,७ (७) । वा. २५,८ । काण्व. २७,११-१२ । तै. सं. ५,७,१६ ।
[७] मै. ३,१५,९ (९) । वा. २५,७ । काण्व. २७,१० । तै. सं. ५,७,१७ ।
[८] तै. सं. ५,७,१८ । [९] तै. सं. ५,७,१९ । [१०] तै. सं. ५,७,२० ।
[११] मै. ३,१५,४ (४) । वा. २५,४ । काण्व. २७,७ । तै. सं. ५,७,२१ ।
[१२] मै. ३,१५,५ (५) । वा. २५,५ । काण्व. २७,८ । तै. सं. ५,७,२२ ।

षष्ठी सर्पाणां सप्तम्यर्यम्णोऽष्टमी धातुर्नवमी त्वष्टुर्दशमीन्द्राण्या एकादश्यदित्या द्वादशी द्यावापृथिव्योः पार्श्वं यम्याः पाटोरः ॥१२॥ १२

पन्थामनूवृग्भ्यां संततिं स्नावन्याभ्यां शुकान् पित्तेन हरिमाणं यक्ना हलीक्ष्णान् पापवातेन कूश्माञ्छकपिण्डैश्शर्वर्तानूवध्येन शुनो विशसनेन सर्पांल्लोहितगन्धेन वयांसि पक्वगन्धेन पिपीलिकाः प्रशादेन ॥१३॥ १३
[३०१८]

॥ इति श्रीयजुषि काठके चरकशाखायामश्वमेधनामनि पञ्चमे ग्रन्थे शादानुवचनं नाम त्रयोदशं वचनं संपूर्णम् ॥१३॥

॥ इत्येकोत्तरशताध्वर्युशाखाप्रभेदभिन्ने श्रीयजुषि काठके चरकशाखायामश्वमेधो नाम पञ्चमो ग्रन्थः संपूर्णः ॥५॥

॥ संपूर्णा च चरकशाखा ॥

इति काठक-संहिता समाप्ता ।

[१३] तै. सं. ५,७,२३ ।

मैत्रायणी संहिता

ॐ

अथ यजुर्वेदीय

मैत्रायणी-संहिता ।

प्रथमं काण्डम् ।

अथ प्रथमः प्रपाठकः ।

दर्श-पूर्णमासौ ।

[श्रीगणेशाय नमः ॥ ओम् ॥ नमो यजुर्वेदाय ॥]

॥ ॐ ॥ इषे त्वा सुभूताय, वायव स्थ, देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणा,
आप्यायध्वमघ्न्या देवेभ्य इन्द्राय भागं, मा व स्तेन ईशत माघशꣳसो ध्रुवा अस्मिन्
गोपतौ स्यात बह्वीः,—र्यजमानस्य पशून् पाहि ॥ १ ॥ १
गोपदसि, प्रत्युष्टꣳ रक्षः, प्रत्युष्टारातिः ॥ २
प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा ।
तयावहन्ते कवयः पुरस्तात् ॥ ३
देवानां परिपूतमसि विष्णो स्तुपोऽतिसृष्टो गवां भागो देवस्य त्वा सवितुः प्रसव३वेऽश्वि-
नोर्बाहुभ्यां पूष्णो हस्ताभ्यां, बर्हिर्देवसदनं दामि ॥ ४
अतस्त्वं बर्हिः शतवल्शꣳ विरोह, सहस्रवल्शा वि वयꣳ रुहेम ॥ ५
अयुपिता योनि,—रदित्या रास्नासीन्द्राण्याः संनहनं, पूषा ते ग्रन्थिं ग्रथ्नातु, सं ते मा
स्थादि,—न्द्रस्य त्वा बाहुभ्यामुद्यच्छे, बृहस्पतेर्मूर्ध्नाहराम्यु३,—र्वन्तरिक्षꣳ वी,—हादित्या-
स्त्वा पृष्ठे सादयामि ॥२॥ ६

[१] मै. ४,१,१ । तै. १,१,१ । काठ. १,१ । कपि. १,१ । वा. १,१ । काण्व. १,१-३ । मा. श्रौ. १,१,१ । [मा व स्तेन...शꣳ । अथर्व. ४,२१,७]
[२] मै. ४,१,२ । तै. १,१,२ । काठ. १,२ । कपि. १,२ । मा. श्रौ. १,१,१ । [देवस्य त्वा० । अथर्व. १९,५१,२]

मै० १

शुन्धध्वं दैव्याय कर्मणे, वसूनां पवित्रमसि शतधारꣳ सहस्रधारमच्छिद्रतनुः ॥ द्यौरसि,
पृथिव्यसि, मातरिश्वनो घर्मः ॥ विश्वहोतुर्धामन् त्सीद ॥ पोषाय त्वा,—ऽदित्या रास्नासि,
कामधुक्षः, सा विश्वायुरस्त्वसौ, कामधुक्षः, सा विश्वभूरस्त्वसौ, कामधुक्षः, सा विश्व-
कर्मास्त्वसौ, हुत स्तोको, हुतो द्रप्सो, ऽग्ने पाहि विप्रुषः, सुपचा देवेभ्यो हव्यं पचा,—
ऽग्नये त्वा बृहते नाकाय स्वाहा द्यावापृथिवीभ्यामि,—न्द्राय त्वा भागꣳ सोमेनातनच्मि, विष्णो
हव्यꣳ रक्षस्वा,—ऽऽपो जागृत ॥३॥ ७-१०
वेषाय वां, कर्मणे वाꣳ, सुकृताय वां, देवीरापोऽग्रेगुवोऽग्रेणीयोऽग्रेऽस्य यज्ञस्य प्रेता,
—ऽग्रꣳ यज्ञं नयताग्रꣳ यज्ञपतिꣳ, युष्मानिन्द्रोऽवृणीत वृत्रतूर्ये, यूयमिन्द्रमवृणीध्वꣳ वृत्रतूर्ये,
प्रोक्षिता स्थ, सꣳसीदन्तां दैवीर्विशो, वानस्पत्यासि, वर्षवृद्धमस्यु३,—र्वन्तरिक्षꣳ वीहि,
प्रत्युष्टꣳ रक्षः, प्रत्युष्टाराति,—र्धूरसि, ध्वर ध्वरन्तꣳ यो अस्मान् ध्वराद्, यꣳ वयं ध्वराम
तं ध्वर ॥४॥ ११
देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्,—हुतमसि हविर्धानं, दृꣳहस्व,
मा ह्वा,—र्विष्णोः क्रमोऽस्त्व,—रु वाताय, मित्रस्य वश्चक्षुषा प्रेक्षे, देवस्य वः सवितुः प्रसव३वे-
ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ, यच्छन्तु पञ्च, गोपीथाय वो नारातये, ऽग्नये वो जुष्टा-
न्निर्वपाम्यमुष्मै वो जुष्टानि,—दं देवानामिदमु नः सह, दृꣳहन्तां दुर्या, स्वाहा द्यावापृथिवी-
भ्यां, निर्वरुणस्य पाशादमुक्षि, स्वरभिव्येख्यं ज्योतिर्वैश्वानरमु३,—र्वन्तरिक्षꣳ३ वीह्य,—दित्या
व उपस्थे सादयामि ॥ ५ ॥ १२
देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः । १३
अग्नये वो जुष्टान् प्रोक्षाम्यमुष्मै वो जुष्टान्, यद्वोऽशुद्ध आलेभे तं शुन्धध्व,—मदित्यास्त्व-
गस्य,—वधूतꣳ रक्षो, ऽवधूतारातिर,—दित्यास्त्वगसि, प्रति त्वादित्यास्त्वग्वेत्तु, पृथुग्रावासि
वानस्पत्यः, प्रति त्वादित्यास्त्वग्वेत्त्व,—ग्निजिह्वासि वाचो विसर्जनमा,—युषे वो, बृहद्ग्रावासि
वानस्पत्यो, देवेभ्यो हव्यꣳ शमीष्व, सुशमि शमीष्व, कुटरुरसि मधुजिह्व—स्त्वया वयꣳ

[३] मै. ४,१,३ । तै. १,१,३ । काठ. १,३ । कपि. १,३ । वा. १,२-४ । काण्व. १,४-७ । मा. श्रौ. १,१,३ ।
[४] मै. ४,१,४ । तै. १,१,४-५ । काठ. १,४ । कपि. १,४ । वा. १,६-८,११,१२ । काण्व. १,९-११,१७,१८ । मा. श्रौ. १,२,१ ।
[५] मै. ४,१,५ । तै. १,१,४ । काठ. १,४ । कपि. १,४ । वा. १,८-११ । काण्व. १,१२-१५ । मा. श्रौ. १,२,१ ।
[६] मै. ४,१,६ । तै. १,१,६ । काठ. १,५ । कपि. १,५ । वा. १,१२-१६ । काण्व. १,१६,१८-२४ । मा. श्रौ. १,२,२ ।

संघातꣳ संघातं जेष्मे,—पमावदो,—र्जमावद, रायस्पोषमावद ॥ ६ ॥ १४
वर्षवृद्धमसि, प्रति त्वा वर्षवृद्धꣳ वेत्तु, परापूतꣳ रक्षः, परापूतारातिः, प्रविद्धो
रक्षसां भागो, ऽदित्यास्त्वगस्य,—वधूतꣳ रक्षो, ऽवधूतारातिर,—दित्यास्त्वगसि, प्रति
त्वादित्यास्त्वग्वेत्तु, धिषणासि पार्वती, प्रति त्वादित्यास्त्वग्वेत्तु, धिषणासि पार्वती, प्रति
त्वा पार्वती वेत्त्व,—दित्या स्कम्भोऽसि, धान्यमसि, धिनुहि देवान्, प्राणाय त्वा,—ऽपानाय
त्वा, व्यानाय त्वा, दीर्घामनु प्रसितिꣳ सꣳस्पृशेथामा,—ऽऽयुषे वो, मित्रस्य वश्चक्षुषावेक्ष्ये, १५
देवो वः सविता हिरण्यपाणिरुपगृह्णातु ॥ ७ ॥
निर्दग्धꣳ रक्षो, निर्दग्धारातिः, समुद्रं मा धां, ध्रुवमसि, पृथिवीं दृꣳहा,—ऽपाग्ने-
ऽग्निमामादं जहि, निः क्रव्यादं नुदस्वा,—ऽग्ने देवयजनꣳ वह, धरुणमस्य,—न्तरिक्षं दृꣳह,
घर्त्रमसि, दिवं दृꣳह, धर्मासि, विश्वा विश्वानि दृꣳह, चिदसि, परिचिदसि, विश्वासु
दिक्षु सीद, सजातानस्मै यजमानाय परिवेशय, सजाता इमꣳ यजमानं परिविशन्तु, वसूनाꣳ १६
रुद्राणामादित्यानां भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम् ॥
यानि घर्मे कपालान्युपचिन्वन्ति वेधसः । १७
पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चताम् ॥ ८ ॥
देवस्य वः सवितुः प्रसव३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ संवपामि ।
देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः ॥ १८
समापा ओषधीभिर्गच्छन्ताꣳ समोषधयो रसेन ।
सꣳ रेवतीर्जगतीः शिवाः शिवाभिः समसृक्षतापः ॥ १९
—र्धर्म धर्मे श्रयस्वो,—रु प्रथस्वो,
सीदन्तु विशो, जनयत्यै त्वा, घर्मोऽसि विश्वायु, २०
—रु ते यज्ञपतिः प्रथताꣳ, सं ते तन्वा तन्वः पृच्यन्ताम् ॥ २१
परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥
देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाके पृथिव्या, अग्ने ब्रह्म गृह्णीष्व ॥९॥ २२

[७] मै. ४,१,७ । तै. १,१,५-६ । काठ. १,५-६ । कपि. १,६ । वा. १,१६,१९,२० । काण्व. १,२५,३१-३४ । मा. श्रौ. १,२,२ ।
[८] मै. ४,१,८ । तै. १,१,७ । काठ. १,७ । कपि. १,७ । वा. १,१७-१८ । काण्व. १,२७-३० । मा. श्रौ. १,२,३ ।
[९] मै. ४,१,९ । तै. १,१,८ । काठ. १,८,१० । कपि. १,८,१० । वा. १,२१-२२;११,२५ । काण्व. १,३६-३८;१२, २५ । मा. श्रौ. १,२,३ । [परि वाजपतिः... दाशुषे । ऋ० ४,१५,३ । सा. ३०]

देवस्य त्वा सवितुः प्रसव३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददा, इन्द्रस्य बाहुरसि
दक्षिणः सहस्रभृष्टिः शततेजा, वायुरसि तिग्मतेजाः, पृथिवि देवयजनि मा हिꣳसिषं तामोषधीनां
मूलꣳ, व्रजं गच्छ गोस्थानꣳ, वर्षतु ते पर्जन्यो, बधान देव सवितः शतेन पाशैः परमस्यां
परावति यो अस्मान् द्वेष्टि यं च वयं द्विष्मस्तमत्र बधान, सोऽतो मा मोचि, मा वः शिवा
ओषधयो मूलꣳ हिꣳसिषꣳ, व्रजं गच्छ गोस्थानꣳ, वर्षतु ते पर्जन्यो, बधान देव सवितः
शतेन पाशैः परमस्यां परावति यो अस्मान् द्वेष्टि यं च वयं द्विष्मस्तमत्र बधान, सोऽतो मा
मोचि, द्रप्सस्ते दिवं मा स्कान्, व्रजं गच्छ गोस्थानꣳ, वर्षतु ते पर्जन्यो, बधान देव
सवितः शतेन पाशैः परमस्यां परावति यो अस्मान् द्वेष्टि यं च वयं द्विष्मस्तमत्र बधान, सोऽतो
मा मोचि, वसवस्त्वा परिगृह्णन्तु गायत्रेण छन्दसा, रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छन्दसा,
ऽऽदित्यास्त्वा परिगृह्णन्तु जागतेन छन्दसा, ऽपाररुं पृथिव्या अदेवयजनꣳ, सत्यसदस्यृ,—
तसदसि, घर्मसदसि ॥ २३
पुरा क्रूरस्य विसृपो विरप्शिन उदादाय पृथिवीं जीरदानुम् ।
तामैरयꣳश्चन्द्रमसि स्वधाभिस्तां धीरासः कवयोऽनुदिश्यायजन्त ॥ १० ॥ २४
प्रत्युष्टꣳ रक्षः, प्रत्युष्टाराति,—रायुः प्राणं मा निर्मार्जी,—श्चक्षुः श्रोत्रं मा निर्मार्जी,—
र्वाचं पशून् मा निर्मार्जी,—र्यज्ञं प्रजां मा निर्मार्जी,—स्तेजोऽसि, शुक्रमसि, ज्योतिरस्य,—
मृतमसि, वैश्वदेवमसि ॥ २५
हविरसि वैश्वानरमुब्जीतशुष्मꣳ सत्यौजाः ।
सहोऽसि सहस्वारातिꣳ सहस्व पृतनायतः ॥ २६
सहस्रवीर्यमसि, तन्वा जिन्वा,—ऽऽज्यस्याज्यमसि हविषो हविः सत्यस्य सत्यꣳ,
सत्याभिहितꣳ सत्येन त्वाभिघारयाम्य,—दब्धेन त्वा चक्षुषावेक्षे रायस्पोषाय सुप्रजास्त्वाय ॥ २७
धामासि प्रियं देवानामनाधृष्टं देवयजनम् । देववीत्यै त्वा गृह्णामि ॥ २८
देवीरापः शुद्धा यूयं देवान् युयुध्वꣳ, शुद्धा वयꣳ सुपरिविष्टाः परिवेष्टारो वो भूयास्म,
कृष्णोऽस्याखरेष्ठो, अग्नये घृतं भव, वेदिरसि, बर्हिषे त्वा जुष्टं प्रोक्षामि, बर्हिरसि, वेद्यै
त्वा जुष्टं प्रोक्षामि, स्वाहा पितृभ्यो घर्मपावभ्यः ॥११॥ २९

[१०] मै. ४,१,१० । तै. १,१,९ । काठ. १,९ । कपि. १,९ । वा. १,२४-२८ । काण्व. १,४०-४५ । मा. श्रौ. १,२,४ ।
[११] मै. ४,१,१२-१३ । तै. १,१,१० । काठ. १,१०-११ । कपि. १,१०-११ । वा. १,२९-३१, २,१; ६,११ । काण्व. १,४६,४७,४९; २,१-४; ६,१७ । मा. श्रौ. १,२,५ ।

पूषा ते ग्रन्थिं विष्यतु,　विष्णो स्तूपोऽसि,—ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यो,
गन्धर्वोऽसि विश्वावसुर्विश्वस्मादीषमाणो,　यजमानस्य परिधिरिड ईडितः,　इन्द्रस्य बाहुरसि
दक्षिणो,　यजमानस्य परिधिरिड ईडितो,　मित्रावरुणौ त्वोत्तरतः परिधत्तां,　यजमानस्य
परिधिरसीड ईडितः ॥ ३०
नित्यहोतारं त्वा कवे द्युमन्तः समिधीमहि ॥ ३१
वर्षिष्ठे अधि नाके पृथिव्याः सूर्यस्त्वा रश्मिभिः पुरस्तात् पातु कस्याश्चिदभिशस्त्या,
विश्वजनस्य विधृती स्थो,　वसूनां रुद्राणामादित्यानां सदोऽसि सूचां योनि,—र्द्यौरसि जन्मना
जुहूर्नाम प्रिया देवानां प्रियेण नाम्ना,　ध्रुवे सदसि सीद,—अन्तरिक्षमसि जन्मनोपभृन्नाम प्रिया
देवानां प्रियेण नाम्ना,　ध्रुवे सदसि सीद,　पृथिव्यसि जन्मना ध्रुवा नाम प्रिया देवानां प्रियेण
नाम्ना,　ध्रुवे सदसि सीद,　ऋषभोऽसि शाक्वरो वषट्कारस्य त्वा मात्रायां सादयामि ॥ ध्रुवा
असदन्नृतस्य योनौ सुकृतस्य लोके,　ता विष्णो पाहि ॥ पाहि यज्ञं,　पाहि यज्ञपतिं,　पाहि
मां यज्ञन्यम् ॥ विष्णूनि स्थ,　वैष्णवानि धामानि स्थ प्राजापत्यानि ॥१२॥ ३२-३५
सुयमे मेऽद्य स्तं स्वावृतौ घृतावृता,　अग्नाविष्णू विजिहाथां,　मा मा हिंसिष्टं,
लोकं मे लोककृतौ कृणुतं,　मा मोदोषिष्टमात्मानं मे पातं,　शिवौ भवतमद्य नो,　विष्णो
स्थामासी,—द इन्द्राविष्णू वीर्यमकृणोद्देवताभिः समारभ्य ॥ ३६
ऊर्ध्वो अध्वरो दिविस्पृगह्रुतो यज्ञो यज्ञपतेः ।
इन्द्रवान् त्स्वर्वान् बृहद्भाः ॥ ३७
वीहि मधोर्घृतस्य,　स्वाहा,　सं ज्योतिषा ज्योतिः ॥ ३८
वाजस्य मा प्रसवेनोद्ग्राभेणोदजिग्रभत् ।
अधा सपत्नानिन्द्रो मे निग्राभेणाधरां अकः ॥ ३९
उद्ग्राभं च निग्राभं च ब्रह्म देवां अवीवृधन् ।
अधा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यताम् ॥ ४०
वसुभ्यस्त्वा,—पावसुरसि,　विश्वावसुरस्य,—सुमी रिहाणा व्यन्तु वयो,　वशा पृश्निर्भूत्वा
मरुतो गच्छ,　ततो नो वृष्टिमावह ॥ ४१

[१२] मै. ४,१,१३ । तै. १,१,१०-११ । काठ. १,११ । कपि. १,११ । वा. २,२-६ । काण्व. २,२-९ । मा. श्रौ. १,२,६ ।
[नित्यहोतारं (वीतिहोत्रं) त्वा…समिधीमहि । ऋ. ५,२६,३ । सा. १४२३)
[१३] मै. ४,१,१४ । तै. १,१,१२-१३ । काठ. १,१२ । कपि. १,१२ । वा. २,७-९;१६,१८,२१;८,२१;१७,६३-६४ ।
काण्व. २,१०,१२,१४,१६,३०,३१;९,२१,१८,६३-६४ । मा. श्रौ. १,३, १-४ ।

संस्रावभागा स्थेषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवाः ।
इमां वाचमभि विश्वे गृणन्तः स्वाहा देवा अमृता मादयन्ताम् ॥ ४२
देवा गातुविदो गातुं वित्त्वा गातुमित,　मनसस्पत इमं नो यज्ञं दिवि देवेषु वाते
धाः,　स्वाहा ॥१३॥ ४३ [४३]

॥ इति प्रथमकाण्डे प्रथमः प्रपाठकः ॥१॥
अथ द्वितीयः प्रपाठकः ।

अध्वरः ।

आपो देवीः शुन्धत मा मधुमन्तं मधुमतीर्देवयज्यायै ॥ १
ओषधे त्रायस्वैनं स्वधिते मैनं हिंसीः । या ते शिवतमा तनूस्तयैनमुपस्पृश ॥ २
देवश्रूरिमान् प्रवपे,　स्वस्त्युत्तरं अशीय ॥ ३
हिरण्यवर्णाः शुचयः पावकाः प्रचक्रमुर्हित्वावद्यमापः ।
शतं पवित्रा वितता ह्यासु ताभिर्मा देवः सविता पुनातु ॥ ४
आपो मा मातरः सूदयन्तु घृतेन मा घृतप्वः पुनन्तु ।
विश्वं हि रिप्रं प्रवहन्तु देवीरुदिदाभ्यः शुचिरा पूत एमि ॥ ५
विष्णोः शर्मासि,　शर्म मे यच्छो,—र्जे त्वा,　महीनां पयोऽस्योषधीनां रसो,　वर्चोधा
असि,　वर्चो मे धेहि ॥ वृत्रस्यासि कनीनिका चक्षुषो मे वयोधा,　अन्तरहं त्वया द्वेषो
अन्तररातीर्दधे महता पर्वतेन,　चक्षुष्पा असि,　चक्षुर्मे पाहि ॥ चित्पतिस्त्वा पुनातु,
वाचस्पतिस्त्वा पुनातु ॥ ६-८
देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः ॥ ९
तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तं शकेयम् ॥१॥ १०
आकूत्यै प्रयुजे अग्नये स्वाहा,　मेधायै मनसे अग्नये स्वाहा,　दीक्षायै तपसे अग्नये स्वाहा,
सरस्वत्यै पूष्णे अग्नये स्वाहा ॥ ११
आपो देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उरो अन्तरिक्षः ।
बृहस्पतिर्नो हविषा वृधातु ।　स्वाहा ॥ १२

[१] मै. ३,६,२-३ । तै. १,२,१ । काठ. २,१ । कपि. १,१३ । वा. ४,१-४ । काण्व. ४,२-५ । मा. श्रौ. २,१,१ ।
[हिरण्यवर्णाः (एकादः) अथर्व. १.३३.१] [आपो (अस्मान्) मा० । ऋ. १०,१७,१०; अथर्व. ६,५१,१]
[२] मै. ३,६,४;५,८ । तै. १,२,२ । काठ. २,२-३ । कपि. १.१४-१६ । वा. ४,७-१०;५-६ । काण्व. ४,८-११,६,७ ।
मा. श्रौ. २,१,२ । [विश्वो देवस्य० ऋ० ५।५०।१]

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ।　स्वाहा ॥ १३
ऋक्सामयोः शिल्पे स्थ,—स्ते वामारभे,　ते मा पातं,　विष्णोः शर्मासि,
शर्म मे यच्छ,　नमस्ते अस्तु,　मा मा हिंसीः ॥ १४
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संशिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥ १५
स्वर्याग्नी द्यावापृथिवी उरो अन्तरिक्षापः ॥ ओषधय उप मा दीक्षायां दीक्षापतयो ह्वयध्वं,
देव सवितस्त्वं दीक्षायां दीक्षापतिरसी,—त्वं मा सन्तं पा,—ह्यूर्गस्याङ्गिरस्यूर्णम्रदा,　ऊर्जं
मयि धेही,—न्द्रस्य योनिरसि,　गोपाय मा,　नमस्ते अस्तु,　मा मा हिंसीः ॥ १६-१७
कृषिं सुसस्यांस्कृधि सुपिप्पला ओषधीस्कृधि ।
विषाणे विष्यैतं ग्रन्थिं यदस्य गुःपितं हृदि मनो यदस्य गुःपितम् ॥ १८
बृहन्नसि वानस्पत्यः,　सुद्युम्नो द्युम्नं यजमानाय धेहि,　नक्षत्राणां मातीकाशात् पाहि ॥ १९
आ वो देवास ईमहे वामं प्रयत्यध्वरे ।
यद्वो देवास आगुरे यज्ञियासो हवामहे ॥ २०
स्वाहा यज्ञं मनसः स्वाहा दिवः स्वाहा पृथिव्याः स्वाहोरोरन्तरिक्षात् स्वाहा वातात्
परिगृह्णामि,　स्वाहा ॥२॥ २१
नक्षत्राणां मकाशान्वा पीषं,　व्रतं चरत ॥ २२
दैवीं धियं मनामहे सुमृडीकामभिष्टये ।
वर्चोधां यज्ञवाहसं सुतीर्था नो असद्वशे ॥ २३
ये देवा मनुजाता मनोयुजः सुदक्षा दक्षपितरस्ते नोऽवन्तु,　ते नः पान्तु,　तेभ्यः स्वाहा ॥ २४
शिवाः पीता भवत यूयमापो अस्माकं योना उदरे सुशेवाः ।
इरावतीरनमीवा अनागसः शिवा नो भवत जीवसे ॥ २५
कामो हविषां मन्दिष्ठोऽग्ने त्वं सु जागृहि वयं सु मन्दिषीमहि ।
गोपाय नः स्वस्तये प्रबुधे नः पुनस्कृधि ॥ २६

[३] मै. ३,६,९,१० । तै. १,२,३ । काठ. २,४ । कपि. १,१९ । वा. ४,११,१२,१४-१६;६,२७ । काण्व. ४,१५-१७,
१९-२१. ६,३९,४०; १०,८ । मा. श्रौ. २,१,३ ।

पुनर्मनः पुनरायुर्न आगात् पुनः प्राणः पुनराकूतमागात् ।
वैश्वानरोऽदब्धस्तनूपा अपबाधतां दुरितानि विश्वा ॥ २७
त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ।
त्वं यज्ञेष्वीड्यो व्रतमस्मासु धारय ॥ २८
पूषा सनीनां सोमो राधसां,　मा पूर्णन् पूर्त्यो विराधिष्ट,　मा वयमायुषा वर्चसा च,
रास्त्वेयत् सोमा,—ऽऽ भूयो भर,　देवः सविता वसोर्वसुदावा,　वायुर्गोपा,—स्त्वष्टाधिपतिः,
पूषा प्रतिग्रहीता,　दैवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमस्तं वो मा क्रमीषं,
याः पशूनामृषभे वाचस्ताः सूर्यो अग्रे शुक्रो अग्रे ताः प्रहिणोमि यथाभागं वो अत्र,　शिवा नः
पुनरायन्तु वाचो,　वायवे त्वा,　वरुणाय त्वा,　रुद्राय त्वा,　निर्ऋत्यै त्वे,—न्द्राय त्वा,
मरुद्भ्यस्त्वा ॥३॥ २९
इयं ते शुक्र तनूरिदं वर्च,—स्तया संभव,　भ्राजं गच्छ,　जूरसि धृता मनसा जुष्टा विष्णवे,
तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय,　स्वाहा,　शुक्रमसि,　चन्द्रमस्य,—मृतमसि,
वैश्वदेवमसि,　चिदसि,　मनासि,　धीरसि,　दक्षिणासि,　यज्ञियासि क्षत्रियास्य,—दिति-
रस्युभयतः शीर्ष्णी,　सा नः सुप्राची सुप्रतीची भव,　मित्रस्त्वा पदि बध्नातु,　पूषाध्वनः पात्वि,
—न्द्रायाध्यक्षाया,—नु त्वा माता मन्यतामं,—नु पिता,　ऽनु भ्राता सगर्भ्यो,　ऽनु सखा
सयूथ्यः,　सा देवि देवमच्छेही,—न्द्राय सोमं,　रुद्रस्त्वावर्तयतु,　स्वस्ति सोमसखा पुनरेहि,
वस्व्यसि,　रुद्रास्य,—दितिरस्या,—दित्यासि,　चन्द्रासि,　रुद्रासि,　बृहस्पतिष्ट्वा सुम्ने
रम्णातु,　रुद्रो वसुभिराचके,　पृथिव्यास्त्वा मूर्धन्नाजिघर्मि यज्ञिया इडायास्पदे घृतवति-
स्वाहा,　ऽस्मे रमस्वा,—ऽस्मे ते राय,—स्तव,　राय,—स्तव तव रायो,　मा रायस्पोषेण वि-
योष्म,—स्त्वष्टीमन्तस्त्वा सपेम ॥४॥ ३०
सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकाम् । यदेतशेभिरीयसे भ्राजमानो विपश्चिता ॥ ३१
अपि पन्थामगन्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥३२

[पुनर्मनः पुनरा० । अथर्व. ६. ५३. ३ । त्वमग्ने व्रतपा० । ऋ० ८. ११. १; अथर्व० १९. ५९. १]
[४] मै. ३,७,५-७ । तै. १,२,४-५ । काठ. २,५ । कपि. १,१७-१८ । वा. ४,१७-२२ । काण्व. ४,१६-२१ ।
मा. श्रौ. २,१,३; २,४,२ ।
[५] मै. ३,७,७ । तै. १,२,६-७ । काठ. २,६ । कपि. १,१९ । वा. ४, ३२,२९,१४-२७ । काण्व. ४,३२,३९,४४,४१ ।
मा. श्रौ. २,१,३-४ ।

आस्माकोऽसि, शुक्रस्ते ग्रह, स्वाहा त्वा विचिक्षयः ॥ ३३
अभि त्यं देव२ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवस२ रत्नधामभि प्रियं मतिम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ ३४
प्रजाभ्यस्त्वा, प्रजास्त्वानुप्राणन्तु, प्रजाः पाहि, शुक्रं ते शुक्र शुक्रेण चन्द्रं चन्द्रेणा-
मृतममृतेन क्रीणामि देव सोमः शक्म यत्ते गोर,—स्मे ते चन्द्राणि, तपसस्तनूरसि प्रजापतेर्वर्णः,
सहस्रपोषं पुष्यन्ति, परमेण पशुना क्रियस्वा,—ऽस्मे ते बन्धुः सुवाङ्गभ्राडङ्घारे बम्भारेऽस्तरहस्तः
कृशान एते वः सोमक्रयणा, स्तान् रक्षध्वं, मा वो दभन्, दुश्चक्षा वो मावक्षत् ॥५॥ ३५
स्वजा असि, स्वभूरस्य,—स्मै कर्मणे जात, ऋतेन त्वा गृह्णाम्य,—तेन नः पाहि मित्रो
ना एहि सुमित्रधः सह रायस्पोषेणे,—न्द्रस्योरुमाविश दक्षिणमुशन्नुशन्त२ स्योनः स्योनम् ॥ ३६
उदायुषा स्वायुषोदोषधीना२ रसेन । उत्पर्जन्यस्य धाम्नोदस्थाममृतं अनु ॥ ३७
उ३र्वन्तरिक्ष२ वीहि,—दित्याः सदा आसीद ॥ ३८
अस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥ ३९
वनेषु३ व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्न्यासु ।
हृत्सु क्रतु२ वरुणं दि३क्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ ॥ ४०
धूरसि, धूर्व धूर्वन्त२ यो अस्मान् धूर्वा,—यं२ वयं धूर्वाम तं धूर्व ॥ ४१
वारुणमसि, वरुणस्त्वोत्तभ्नातु, वरुणस्य स्कम्भोऽसि ॥ ४२
प्रच्यवस्व भुवनस्पते विश्वान्यभि धामानि ।
मा त्वा परिपरिणो मा परिपन्थिनो मा त्वा वृका अघायवो विदन् ॥ ४३
श्येनो भूत्वा परापत यजमानस्य नो गृहं स२स्कृतम् । देवेभ्यः सुत्यायै ॥ ४४
नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृत२ सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय श२सत ॥ ४५
वारुणमसि, वरुणस्त्वोत्तभ्नातु, वरुणस्य स्कंभसर्जनमसि ॥ ४६

[अभि त्यं देवं० । अथर्व० ७,१४,१-२]
[६] मै. ३,७,८,९ । तै. १,२,८-१० । काठ. २,७ । कपि. १,१९; २,१ । वा. ४,२७,२८,३०,३१,३४-३६; ५,१ । काण्व. ४,३८,४०,४२,४३,४६-४८; ५,१ । मा. श्रौ. २,१,४,५ । [अस्तभ्नाद्द्यां (द्यामृषभो) वृषभो० । ऋ० ३,३०,९; ८,४२,१] [वनेषु (३) व्यन्तरिक्षं० । ऋ. ५,८५,२] [नमो मित्रस्य० । ऋ० १०,३७,१]

विचृत्तो वरुणस्य पाशः, प्रत्यस्तो वरुणस्य पाशो, नमो वरुणस्य पाशाया,—ऽग्नेस्तनू-
रसि, विष्णवे त्वा, सोमस्य तनूरसि, विष्णवे त्वा,—ऽतिथेरातिथ्यमसि, विष्णवे त्वा,
—ऽग्नये त्वा रायस्पोषदे, विष्णवे त्वा, श्येनाय त्वा सोमभृते, विष्णवे त्वा, वारुणमसि,
वरुणोऽसि धृतव्रतो, वरुणस्य ऋतसदनमासीद, वरुणाय त्वा ॥६॥ ४७
अग्नेर्जनित्रमसि, वृषणौ स्था, उर्वश्यस्या,—युरसि, पुरूरवा असि, गायत्रमसि,
त्रिष्टुबसि, जगदसि ॥ भवतं नः समनसौ समोकसौ सचेतसा अरेपसौ ॥ मा यज्ञ२ हि२सिष्टं मा
यज्ञपतिं जातवेदसौ, शिवौ भवतमद्य नः ॥ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज
एषः ॥ तस्मै विधेम हविषा वयं, मा देवाना२ यूयुपाम भागधेयम् ॥ आपतये त्वा गृह्णामि
परिपतये त्वा गृह्णामि, तनूनप्त्रे शक्मने शाक्वराय शक्मन ओजिष्ठाया,—ऽनाधृष्टमस्य,—नाधृष्यं
देवानामोजः ॥ अभिशस्तिपा अनभिशस्तेन्यम् ॥ अनु म इद२ व्रत२ व्रतपतिर्मन्यतामनु दीक्षां
दीक्षापतिरञ्जसा, सत्यमुपागा२, सुविते मा धा, अग्ने व्रतपते या मम तनूरेषा सा त्वय्य,
—ग्ने व्रतपते या तव तनूरिय२ सा मयि, सह नौ व्रतपते व्रतिनोर्व्रतान्य२,—शुर२शुष्टे देव
सोमाप्यायतामिन्द्रायैकधनविदा, आ त्वमिन्द्राय प्यायस्वा, तुभ्यमिन्द्रः प्यायतामा,—प्यायय
सखीन्त्सन्या मेधया, स्वस्ति ते देव सोम सुत्यमशीय स्व३स्त्यौदचमेष्टा राया, एष्टा वामनि,
प्रेषे भगाय, ऋतमृतवादिभ्यो, नमो दिवे, नमः पृथिव्यै ॥ ४८--५५
या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गहनेष्ठा ।
त्वेष२ वचो अपावधीरुग्र२ वचो अपावधीः ॥ स्वाहा ॥ ५६
या ते अग्ने रजाशया, या ते अग्ने हराशया, या ते अग्ने रुद्रिया तनूस्तया नः पाहि,
तस्यै ते स्वाहा ॥ ७ ॥ ५७
तप्तायनी मेऽसि, वित्तायनी मेऽस्य,—वतान्मा नाथितं,—मवताद्व्यथितं,—मग्ने अङ्गिरो-
३योऽस्यां पृथिव्यामध्यस्यायुना नाम्नेहि, वसवस्त्वा हरन्तु गायत्रेण छन्दसा, वित्स्व यज्ञपते,
—यत्तेऽनाधृष्टं धामानाधृष्यं तेन त्वादधे, अग्ने अङ्गिरो यो द्वितीयस्यां पृथिव्यामध्यस्यायुना
नाम्नेहि, रुद्रास्त्वा हरन्तु त्रैष्टुभेन छन्दसा, वित्स्व यज्ञपते,—यत्तेऽनाधृष्टं धामानाधृष्यं तेन

[७] मै. ३,७,१०; ३,८,२; ३,९,५ । तै. १,२,१०-११ । काठ. २,८ । कपि. २,२-३ । वा. ५,१-८ । काण्व. ५, २-११ । मा. श्रौ. १,७,१, २,२,१ । [अग्नाव (अ) ग्निश्चरति० । अथर्व० ४,३९,९]
[८] मै. ३,८,५ । तै. १,२,१२ । काठ. २,९ । कपि २,३ । वा. ५,९-१३; ३३,३० । काण्व. ५,१३-१८; ३३,३० । मा. श्रौ. १,७,३ । [विभ्राड् बृहत्पिबतु० । ऋ० १०,१७०,१ । सा० ६२८,१४५३]

त्वादधे, अग्ने अङ्गिरो यस्तृतीयस्यां पृथिव्यामध्यस्यायुना नाम्नेह्यादित्यास्त्वा हरन्तु जागतेन
छन्दसा, वित्स्व यज्ञपते,—यत्तेऽनाधृष्टं धामानाधृष्यं तेन त्वादधे, विदेरग्ने नभो नाम यत्ते,
सि२हीरसि, महिषीरसि, देवेभ्यः शुन्धस्व, देवेभ्यः शुम्भस्वे,—न्द्रघोषास्त्वा पुरस्ताद्वसुभिः
पान्तु, पितरस्त्वा मनोजवा दक्षिणतः पान्तु, रुद्रास्त्वा प्रचेतसः पश्चात् पान्तु, विश्वकर्मा
त्वादित्यैरुत्तरात् पातु, सि२हीरसि सपत्नसाही, स्वाहा, सि२हीरसि रायस्पोषवनिः, स्वाहा,
सि२हीरसि सुप्रजावनिः, स्वाहा, सि२हीरस्यादित्यवनिः सजातवनिः, स्वाहा, सि२हीर-
स्या,—वह देवान् देवायते यजमानाय, स्वाहा, भूतेभ्यस्त्वा, विश्वायुरसि, पृथिवीं दृ२ह,
ध्रुवक्षितिरस्य,—न्तरिक्षं दृ२हाच्युत,—क्षिदसि, दिवं दृ२हा,—ऽग्नेर्भस्मास्य,—ग्नेः पुरीषमस्य, ५८
—ग्नेः कुलायमसि ॥
विभ्राड् बृहत् पिबतु सोम्यं मध्वायुर्दधद्यज्ञपता अविहुतम् ।
वातयुतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा विराजति ॥८॥ ५९
देवश्रुतौ देवेष्वाघोषेथाम् ॥ ६०
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ ६१
अप जन्यं भयं नुद मा चक्रा अवृत्सत । गृह२ सोमस्य गच्छतं गच्छदिन्द्रस्य निःकृतम् ॥ ६२
इद२ विष्णुर्विचक्रमे त्रेधा निदधे पदा । समूढमस्य पा२सुरे ॥ ६३
इरावती धेनुमती हि भूत२ सूयवसिनी मनवे यशस्ये ।
व्यस्कभ्ना रोदसी विष्ण एते दाधर्थ पृथिवीमभितो मयूखैः ॥ ६४
सुवागावद देव दुर्यं अरिष्यन्नरिष्यतः ॥ ६५
आ नो वीरो जायतां कर्मण्योऽभिशस्तिपा अनभिशस्तेन्यः ।
यं बहवोऽनुजीवान्यो बहूनामसद्वशी ॥ ६६
वैष्णवमसि, विष्णुस्त्वोत्तभ्नातु ॥ ६७
दिवो विष्ण उत वा पृथिव्या उरोर्वा विष्णो बृहतो अन्तरिक्षात् ।
हस्तौ पृणस्व बहुभिर्वस३व्यैरात् प्रयच्छ दक्षिणादोत सव्यात् ॥ ६८

[९] मै. ३,८,७ । तै. १,२,१३ । काठ. २,१० । कपि. २,४ । वा. ५,१४-२१ । काण्व. ५,१९-२७ । मा. श्रौ. २,२,२ । [युञ्जते मन० । ५,८१,१] [इदं (२) विष्णुर्वि० । ऋ. १,२२,१७; अथर्व. ७,२६,४; सा. २२२; १६६९] [इरावती धेनुमती० । ऋ. ७,९९,३] [दिवो (वा) विष्णो० । अथर्व. ७,२६,८]

विष्णोर्नु क२ वीर्याणि प्रवोच२ यः पार्थिवानि विममे रजा२सि ।
यो अस्कभायदुत्तर२ सधस्थ२ विचक्रमाणस्त्रेधोरुगायः ॥ ६९
विष्णोः पृष्ठमसि, विष्णो ररांटमसि, विष्णोः श्निप्त्रे स्थो, विष्णोः स्यूरसि,
विष्णोर्ध्रुवोऽसि, वैष्णवमसि, विष्णवे त्वा ॥ ७०
प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥९॥ ७१
देवस्य त्वा सवितुः प्रस३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽभ्रिरसि, नारिर,—
सीदमह२ रक्षसो ग्रीवा अपिकृन्तामी,—दमह२ यो मे समानो योऽसमानोऽरातीयति तस्य ग्रीवा
अपिकृन्तामि, बृहन्नसि बृहद्रावा, बृहतीमिन्द्राय वाच२ वद रक्षोहण२ वलगहन२ वैष्णवी२,
सम्राडसि सपत्नहे,—दमहं तान्वलगानुद्वपामि यान्मे समानो यानसमानो निचखान यं कुल्फदघ्ने,
निरस्तो वलगः, स्वराडस्यभिमातिहे,—दमहं तान्वलगानुद्वपामि यान्मे सजातो यानसजातो
निचखान यं जानुदघ्ने, निरस्तो वलगो, विराडसि रक्षोहे,—दमहं तान्वलगानुद्वपामि यान्मे
सबन्धुर्यानसबन्धुर्निचखान यं नाभिदघ्ने, निरस्तो वलगः, सत्रराडस्यशस्तिहे,—दमहं ता-
न्वलगानुद्वपामि यान्मे, भ्रातृव्यो यानभ्रातृव्यो निचखान यं अ२सदघ्ने, निरस्तो वलगः,
सर्वराडस्यरातीयतो हन्ते,—दमहं तान्वलगानुद्वपामि यान्मे सजन्यो यानसजन्यो निचखान यं
शीर्षदघ्ने, निरस्तो वलगः ॥ ७२
संमृश इमानायुषे वर्चसे च देवानां निधिरसि द्वेषोयवनः ।
युयो३ध्यस्मद्द्वेषा२सि यानि कानि च चकृम ॥ ७३
देवानामिदं निहित२ यदस्त्यथाभाहि प्रदिशश्चतस्रः । कृण्वानो अन्यं अधरान् त्सपत्नान् ॥१०॥ ७४
पृथिव्यै त्वा,—ऽन्तरिक्षाय त्वा, दिवे त्वा, शुन्धन्तां लोकाः पितृषदना, यवोऽसि,
यावय द्वेषो अस्मद्,—यवयारातिं, पितृषदनं त्वा लोकमवस्तृणामि ॥ ७५
उच्छ्रयस्व वनस्पते सजूर्देवेन बर्हिषा ।
नितानस्त्वा मारुतो निहन्तु मित्रावरुणौ ध्रुवेण धर्मणा ॥ ७६

[विष्णोर्नु कं० । ऋ. १,१५४,१; अथर्व. ७,२६,१] [प्र तद्विष्णु० । ऋ. १,१५४,२; अथर्व. ७,२६,२-३]
[१०] मै. ३,८,८ । तै. १,३,१-२ । काठ. २,११ । कपि. २,५ । वा. ५,२२-२४ । काण्व. ५,२८-३० । मा. श्रौ. १, २,३; १,८,२ । [देवस्य त्वा० । अथर्व. १९,५१,२]
[११] मै. ३,८,९ । तै. १,३,१-२ । काठ. २,१२ । कपि. २,६ । वा. ५,२६-३०,२५ । काण्व. ५,३३-३८,३१,३२ । मा. श्रौ. २,२,३; १,८,२ ।

ब्रह्मवनिं त्वा क्षत्रवनिं पर्यूहामि, ब्रह्म दृꣳह, क्षत्रं दृꣳह रायस्पोषं दृꣳह, प्रजां
दृꣳह, सजातानस्मै यजमानाय दृꣳह ॥ घृतेन द्यावापृथिवी आपृण, विश्वजनस्य छायासि ॥
७७-७८
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः॥७९॥
इन्द्राय त्वेन्द्रस्य स्यूरसी,—न्द्रस्य ध्रुवोऽसी,—न्द्रमसी,—न्द्राय त्वा, रक्षोघ्नो वो वलगघ्नः
प्रोक्षामि वैष्णवान्, रक्षोहणं त्वा वलगहनमवसिञ्चामि वैष्णवꣳ, रक्षोहणं त्वा वलगहनमवस्तृ-
णामि वैष्णवꣳ, रक्षोघ्नी वाꣳ वलगघ्नी उपदधामि वैष्णवी, रक्षोघ्नी वाꣳ वलगघ्नी पर्यूहामि
वैष्णवी, रक्षोहणं त्वा वलगहनमास्तृणामि वैष्णवम् ॥११॥
८०
विभूरसि प्रवाहणो, वह्निरसि हव्यवाहनः, श्वात्रोऽसि प्रचेतास्तु,—थोऽसि विश्ववेदा,
अवस्युरसि दुवस्वा,—न्नहारिरसि कम्भारिरसि,—गसि कविः, शुन्ध्युरसि मार्जालीयः, सम्रा-
डसि कृशानुः, परिषद्योऽस्यास्तꣳरव्यो, नभोऽसि प्रतक्वा, मृष्टोऽसि हव्यसूदनः, संगरोऽसि
विश्ववेदा, ऋतधामासि स्वर्ज्योतिः, समुद्रोऽसि विश्वव्यचा, अꣳहोऽस्येकपाद,—हिरसि
बुध्न्यः, कव्योऽसि कव्यवाहनो, रौद्रेणानीकेन पाहि माग्ने, पिपृहि मा, नमस्ते अस्तु,
मा मा हिꣳसीः ॥१२॥
८१
त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः । उरु यन्तासि वरूथꣳ स्वाहा ॥ ८२
जुषाणो अप्तुराज्यस्य वेतु । स्वाहा ॥ ८३
अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।
युयोꣳध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिꣳ विधेम ॥ ८४
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतवने पिब प्र प्र यज्ञपतिं तिर । स्वाहा ॥ ८५
एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथꣳ वियꣳसत्पातं नो द्यावापृथिवी उपस्थे ॥ ८६
उꣳर्वन्तरिक्षꣳ वीहि,—दित्याः सदा आसीद, देव सवितरेष ते सोम,—स्तꣳ रक्षस्व,

[परि त्वा गिर्वणो० । ऋ. १,१०,१२]
[१२] मै. ३,८,१० । तै. १,३,३ । काठ. २,१३ । कपि. २,७ । वा. ५,३१-३४ । काण्व. ५,३९-४३ । मा. श्रौ. १,२,४ ।
[१३] मै. ३,९,१ । तै. १,३,४ । काठ. ३,१ । कपि. २,८ । वा. ५,३५,३६, ३८-४० । काण्व. ५,४४,४५,४८-५० ।
मा. श्रौ. १,२,४ । [अग्ने नय० । ऋ. १,१८९,१; अथर्व. ४,३९,१०] [उरुविष्णो० । अथर्व. ७,२६,३]

मा त्वा दभन्, दुश्चक्षास्ते मावक्ष्यदे,—तत्त्वं देव सोम देवानुपावृत, इदमहं मनुष्यान् त्सह
रायस्पोषेण प्रजया चोपावर्ते, नमो देवेभ्यः, स्वधा पितृभ्यो, निर्वरुणस्य पाशादमुक्षि,
स्वरभिव्यख्यं ज्योतिर्वैश्वानरं,—मग्ने व्रतपते या तव तनूर्मय्यभूदेषा सा त्वं,—य्यग्ने व्रतपते या
मम तनूस्त्वय्यभूदियꣳ सा मयि, पुनर्नौ व्रतपते प्रतिनोव्रतानि, यथायथं नौ व्रतपते व्रति-
नोर्व्रतानि, वि व्रतानि सृजावहै ॥ १३॥
८७
अत्यन्यानगां, नान्यानुपागाम,—र्वाक् त्वा परेभ्यः परोऽवरेभ्योऽविदं, तं त्वा जुषामहे
देवयज्यायै जुष्टꣳ विष्णवे, विष्णवे त्वा ॥
८८
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतवने पिब प्र प्र यज्ञपतिं तिर । स्वाहा ॥ ८९
ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीः । या ते शिवतमा तनूस्तयैनमुपस्पृश ॥ ९०
यं त्वामयꣳ स्वधितिस्तिग्मतेजाः प्रणिनाय महते सौभगाय ।
दिवमग्रेण मा हिꣳसी,—रन्तरिक्षं मध्येन, पृथिव्याः संभव, भ्राजं गच्छ ।
वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयꣳ रुहेम ॥ ९१
पृथिव्यै त्वा,—ऽन्तरिक्षाय त्वा, दिवे त्वा, शुन्धन्तां लोकाः पितृषदना, यवोऽसि,
यावय द्वेषो अस्मद्य,—वयारातिं, पितृषदनं त्वा लोकमवस्तृणामि ॥ स्वावेशोऽस्यग्रेगा नेतृणां,—
मधि त्वा स्थास्यति, तस्य वित्स्व ॥ घृतेन द्यावापृथिवी आपृण, देवस्त्वा सविता मध्वानक्तु॥
इन्द्रस्य चषालमसि, सुपिप्पला ओषधीस्कृधि, दिवमग्रेणोत्तभाना,—ऽन्तरिक्षं मध्येनापृण,
पृथिवीमुपरेण दृꣳह ॥
९२-९५
ता ते धामान्युश्मसि गमध्यै गावो यत्र भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरि ॥ ९६
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ ९७
ब्रह्मवनिं त्वा क्षत्रवनिं पर्यूहामि, ब्रह्म दृꣳह, क्षत्रं दृꣳह, रायस्पोषं दृꣳह, प्रजां
दृꣳह, सजातानस्मै यजमानाय दृꣳह ॥ ९८

[१४] मै. ३,९,२-४ । तै. १,३,५-६ । काठ. ३,२-३ । कपि. २,९-१० । वा. ५,४२,४१,४३; ६,१-६ ।
काण्व. ५, ५२,५१,५३-५५; ६,१-७ । मा. श्रौ. १,८,१-२ । [शुन्धन्तां (शुम्भन्तां) लोकाः ।
अथर्व. १८,४,६७] [याते धामा० । ऋ. १,१५४,६] [विष्णोः कर्माणि० । ऋ. १,२२,१९;
अथर्व. ७,२६,६; सा. १६७१]

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ ९९
परिवीरसि, परि त्वा दैवीर्विशो व्ययन्तां, परीमꣳ यजमानं मनुष्यान्सह रायस्पोषेण
प्रजया च व्ययन्तां, दिवः सानूपेष, दिवं ते धूमो गच्छत्व,—न्तरिक्षं ज्योतिः, पृथिवीं भस्म,
स्वाहा ॥१४॥
१००
इषे त्वो,—पावीरस्यु,—पो देवान् दैवीर्विशः प्रागुर्वह्नय उशिजो, बृहस्पते धारया वसूनि,
हव्या ते स्वदं, देव त्वष्टर्वसुरण्वे, रेवती रमध्वं, देवस्य त्वा सवितुः प्रसꣳवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यामाददे, ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चाम्य,—ग्नये त्वा जुष्टं, धर्षा मा-
नुषा, अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षाम्य,—नु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु
सखा सयूथ्यो, ऽनुमानावह देवान् देवायते यजमानाया,—ऽपां पेरुरसि, स्वात्तꣳ सद्धविरापो
देवीः स्वदन्तु, सं ते वायुर्वातेन गच्छताꣳ सꣳ यजत्रैरङ्गानि सꣳ यज्ञपतिराशिषा, घृतेनाक्तौ
पशुꣳस्त्रायेथाम् ॥
१०१
यं बध्यमानमनु बध्यमाना अन्वैक्षन्त मनसा चक्षुषा च ।
अग्निष्टं अग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया सꣳरराणः ॥ १०२
रेवति प्रेधा यज्ञपतिमाविशो,—रो अन्तरिक्ष सजूर्देवेन वातेन ॥ १०३
स्वेनास्य हविषो यज समस्य तन्वा भव । वर्षीयो वर्षीयसो यज्ञꣳ यज्ञपतौ धाः ॥ १०४
स्वर्विदसि, स्वर्विन्दा स्वरिहिꣳ, स्वर्मेहꣳ, स्वः पशुभ्यो, लोकविदसि, लोकꣳ
विन्दा लोकमिहि, लोकं मह्यं, लोकं पशुभ्यो, नाथविदसि, नाथꣳ विन्दा नाथमिहि,
नाथं मह्यं, नाथं पशुभ्यो, गातुविदसि, गातुꣳ विन्दा गातुमिहि, गातुं मह्यं, गातुं
पशुभ्यः ॥
१०५
न वा एतन्म्रियसे नोत रिष्यसि देवां इदेषि पथिभिः शिवेभिः ।
यत्र यन्ति सुकृतो नापि दुःकृतस्तत्र त्वा देवः सविता दधातु ॥ १०६
अमितार उपेतन यज्ञं देवेभिरन्वितम् । पाशात् पशुं प्रमुञ्चत बन्धाद्यज्ञपतिं परि ॥ १०७
अदितिः पाशान् प्रमुमोक्त्वेतान् पशोः पाशान् पशुपतेरधि ।

[तद्विष्णोः परमं० । ऋ. १,२२,२०; अथर्व. ७,२६,७; सा. १६७२]
[१५] मै. ३,९,६,७ । तै. १,३,७-८ । काठ. ३,४-६ । कपि. २,११-१३ । वा. ६,७-११, १२,१६ । काण्व. ६,८-१५;
१५,१८ । मा. श्रौ. १,८,३ । [न वा (उ) एतन्म्रि० । ऋ. १,१६२,२१; १०,१७,४; अथर्व. १८,२,५५]

यो नो द्वेष्टयधरः स पद्यतां तस्मिन् पाशान् प्रतिमुञ्चाम एतान् ॥ १५ ॥ १०८
नमस्त आताना,—नर्वा प्रेहि यजमानाय घृतस्य कुल्यामनु सह रायस्पोषेण, देवीरापः
शुद्धा यूयं देवान् युयुध्वꣳ, शुद्धा वयꣳ सुपरिविष्टाः परिवेष्टारो वो भूयास्म, वाचमस्य मा
हिꣳसीः, प्राणमस्य मा हिꣳसी,—श्चक्षुरस्य मा हिꣳसीः, श्रोत्रमस्य मा हिꣳसी,—र्यत्ते
क्रूरꣳ यदास्थितं तदेतेन शुन्धस्व, देवेभ्यः शुम्भस्व, गात्राण्यस्य मा हिꣳसीश्च,—रित्राणस्य
मा हिꣳसी,—र्नाभिमस्य मा हिꣳसी,—र्मेढ्रमस्य मा हिꣳसीः, पायुमस्य मा हिꣳसीः,
शमञ्जः ॥
१०९
ओषधे त्रायस्वैनꣳ स्वधिते मैनꣳ हिꣳसीः ।
या ते शिवतमा तनूस्तयैनमुपस्पृश ॥
११०
पृथिव्यै त्वा, रक्षसां भागोऽसी,—दमहꣳ रक्षोऽवबाध, इदमहꣳ रक्षोऽधमं तमो नया,
—मीषे त्वोर्जे त्वा, देवेभ्यः शुन्धस्व, देवेभ्यः शुम्भस्व ॥ घृतेन द्यावापृथिवी प्रोर्णुवाताम्,
—ग्नये त्वा जुष्टं, नमः सूर्यस्य संदृशे ॥ उꣳर्वन्तरिक्षꣳ वीहि, प्रत्युष्टꣳ रक्षः, प्रत्युष्टारातिः,
—र्वायोः स्तोकानां, प्रयुता द्वेषाꣳसि, स्वाहो,—र्ध्वनभसं मारुतं देवं गच्छतम् ॥१६॥
१११-११३
जुष्टं देवेभ्यो हव्यं घृतावद,—ग्नये त्वा जुष्टꣳ, रेडस्य,—ग्निष्ट्वा श्रीणात्वा,—पस्त्वा समरिण-
न्वा,—तस्य त्वा प्राज्यै पूष्णोरꣳह्या ऊष्मणोऽव्यथिषेऽपामोषधीनाꣳ रसो, घृतं घृतपावानः
पिबत, वसाꣳ वसापावानः पिबता,—न्तरिक्षस्य हविरसि, स्वाहा त्वा वाताय, दिशः
प्रदिश आदिशो विदिश उद्दिशो दिश, ऐन्द्रः प्राणो अङ्गे अङ्गे निदिध्य,—दैन्द्रोऽपानो अङ्गे
अङ्गे निबोभुवदै,—न्द्रो व्यानो अङ्गे अङ्गे विबोभुवत् ॥
११४
देव त्वष्टर्भूरि ते सत्समेतु सलक्ष्म यद्विषुरूपं बभूव ।
देवत्रा यन्तमवसे सखायो अनु त्वा माता पितरो मदन्तु ॥१७॥
११५
समुद्रं गच्छ स्वाहा,—ऽन्तरिक्षं गच्छ स्वाहा, देवꣳ सवितारं गच्छ स्वाहा,—ऽहोरात्रे गच्छ

[१६] मै. ३,१०,१ । तै. १,३,८-९ । काठ. ३,६ । कपि. २,१३ । वा. ६,१२-१६ । काण्व. ६,१६-२१
मा. श्रौ. १,८,३ ।
[१७] मै. ३,१०,४ । तै. १,३,१० । काठ. ३,७ । कपि. २,१४ । वा. ६,१८-२० । काण्व. ६,२३-२७ ।
मा. श्रौ. १,८,५ ।

स्वाहा, मित्रावरुणौ गछ स्वाहा, द्यावापृथिवी गछ स्वाहा, छन्दांसि गछ स्वाहा, सोमं
गछ स्वाहा, यज्ञं गछ स्वाहा, दिव्यं नभो गछ स्वाहा,—ऽग्निं वैश्वानरं गछ स्वाहा, मनो
हार्दिं यछ,—पथीभ्यस्त्वा ॥ ११६

धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च यदापो अघ्न्या वरुणेति शपामहे ।
ततो वरुण नो मुञ्च ॥ ११७
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ११८
सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै सन्तु ।
यो अस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ १८ ॥ ११९ [१६२]

॥ इति प्रथमकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥

अथ तृतीयः प्रपाठकः ।

ग्रहाः ।

हविष्मतीरिमा आपो हविष्मान् देवो अध्वरः ।
हविष्मं आ विवासति हविष्मं अस्तु सूर्यः ॥ १
अग्नेर्वोऽपन्नगृहस्य सदसि सादयामि, देवानां भागधेयी स्थे,—न्द्राग्न्योर्भागधेयी स्थ,
मित्रावरुणयोर्भागधेयी स्थ, विश्वेषां देवानां भागधेयी स्थ, सुम्नायुव सुम्न्याय सुम्नं धत्त २
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा । ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यछ ॥ ३
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः ।
शृणोतु ग्रावाणो विदुषो नु यज्ञं शृणोतु देवः सविता हवं मे ॥ ४
देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमस्तं देवेभ्यः शुक्रपेभ्यो दात येषां
भाग स्थ स्वाहा, कार्ष्यसि, समुद्रस्य वोऽक्षित्या उन्नये, वसूनां रुद्राणामादित्यानां पत्नी-
जनी स्थ, वसवो रुद्रा आदित्या एता वः पत्नीजनी स्थ, समुद्रे गन्धर्वेष्ठामन्वातिष्ठत वातस्य
पत्मनेडिता, वामी ते संदृशि विश्वं रेतो धेषीय तव वामीरनु संदृशि ॥ ५

[१८] मै. ३,१०,७ । तै. १,३,११ । काठ. ३,८ । कपि. २,१५ । वा. ६,२१-२२; १२,१२ । काण्व. ६,२८-३१, १३,१३ । मा. श्रौ. १,८,६ । [धाम्नो धाम्नो... नः ॥ १ ॥ उदुत्तमं वरुण...स्याम ॥ ३ ॥ ऋ. १,२४,१५; सा. ५८९; अथर्व. ७,८३,२-३]
[१] मै. ४,५,१-४ । तै. १,३,१२-१३ । काठ. ३,९ । कपि. २,१६ । वा. ६,२३-२९ । काण्व. ६,३३,३४,३६,३८-४२ । मा. श्रौ. २,२,५; २,३,१-२ । [यमग्ने पृत्सु मर्त्य० । ऋ. १,२७,७; सा. १४१५]
३

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥ ६
जुष्टो वाचो भूयासं, जुष्टो वाचस्पति,—र्यद्वाचो मधुमत्तस्मै स्वाहा, स्वाहा सरस्वत्यै॥१॥
७
निग्राभ्या स्थ देवश्रुत,—स्तर्पयत मा,—युर्मे तर्पयत, तर्पयत मा, प्राणं मे तर्पयत,
तर्पयत मा,—ऽपानं मे तर्पयत, तर्पयत मा, व्यानं मे तर्पयत, तर्पयत मा, चक्षुर्मे तर्पयत,
तर्पयत मा, श्रोत्रं मे तर्पयत, तर्पयत मा, मनो मे तर्पयत, तर्पयत मा, वाचं मे
तर्पयत, तर्पयत मा—ऽऽत्मानं मे तर्पयत, तर्पयत मा, प्रजां मे तर्पयत, तर्पयत मा,
गृहान् मे तर्पयत, तर्पयत मा, पशून् मे तर्पयत, तर्पयत मा, गणैर्मा मा वितीतृपत, तर्प-
यत मा ॥२॥ ८
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे, ग्रावास्यध्वरकृद्देवेभ्यो,
गभीरमिममध्वरं कृधि ॥ ९
इन्द्राय त्वा सुषुत्तमं मधुमन्तं पयस्वन्तम् ।
इन्द्राय त्वाभिमातिघ्ने इन्द्राय त्वा वसुमते रुद्रवता इन्द्राय त्वादित्यवते ॥ १०
अग्नये त्वा रायस्पोषदे, विष्णवे त्वा, श्येनाय त्वा सोमभृते, विष्णवे त्वा ॥ ११
श्वात्रा स्थ वृत्रतुरो राध्वं गूर्ता अमृतस्य पत्नीः ।
ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबत ॥ १२
यत्ते सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरा अन्तरिक्षे तेनास्मै यज्ञपतय उरु राये कृध्य,
—धि धात्रे वोचो, मा भे,—र्मा संविक्था, ऊर्जं धत्स्वो,—र्जमस्मासु धेहि, धिषणे
ईडिते इडेथा,—मूर्जं दधाथा,—मूर्जमस्मासु धत्तं, मा वां हिंसिषं, मास्मान् युवं हिं-
सिष्टम् ॥ ३ ॥ १३
वाचस्पतये पवस्व विष्णो अंशुभ्यां गभस्तिपूतः ॥ देवो देवानां पवित्रमसि येषां भागोऽसि ॥

[२] काठ. ३,१० । कपि. २,१७ । वा. ६,३०-३१ । काण्व. ६,४३-४४ । मा. श्रौ. २,३,२; २,४,१ ।
[३] मै. ४,५,४ । तै. १,४,१ । काठ. ३,१० । कपि. २,१७ । वा. ६,३०,३२-३५ । काण्व. ६,४३ ४५-४८ । मा. श्रौ. २,३,३ ।
[४] मै. ४,५,५,७ । तै. १,४,२,१ । काठ. ४,१ । कपि. ३,१,२,१७ । वा. ७,१-३,६, ६,३६ । काण्व. ७,१-३,५; ६,४९ । मा. श्रौ. २,३,३,४ । [प्रागपागुदगधराग० । अथर्व. २०,१३४,१-६]

मधुमतीर्न इषस्कृधि, स्वाकृतोऽस्यु,—र्वन्तरिक्षं वीहि, विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः
पार्थिवेभ्यो, मनस्त्वाष्टु, स्वाहा त्वा सुभव सूर्याय, देवेभ्यस्त्वा मरीचिपेभ्यः, प्राणाय त्वा,
यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा, प्रागपागधरागुदगेतास्त्वा दिश
१४-१६
आधाव,—न्त्वम्ब निस्सर, समरिर्विदाम् ॥ ४ ॥ १७
उपयामगृहीतोऽसि ॥
अन्तर्यछ मघवन् पाहि सोममुरुष्य रायः समिषो यजस्व ।
अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम् । १८
सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन् मादयस्व ॥ १९
वाक्त्वाष्टु, स्वाहा त्वा सुभव सूर्याय, देवेभ्यस्त्वा मरीचिपेभ्योऽपानाय त्वा ॥५॥
आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥ २०
उपयामगृहीतोऽसि, वायवे त्वा ॥ २१
इन्द्रवायू इमे सुता उप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ॥ २२
उपयामगृहीतोऽसि, वायव इन्द्रवायुभ्यां त्वै,—ष ते योनिः, सजोषोभ्यां त्वा ॥६॥ २३
अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवम् ॥ २४
उपयामगृहीतोऽसि, मित्रावरुणाभ्यां त्वै,—ष ते योनिरृतायुभ्यां त्वा ॥७॥ २५
या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ॥ २६
उपयामगृहीऽतोऽस्य,—श्विभ्यां त्वै,—ष ते योनि,—र्माध्वीभ्यां त्वा ॥ ८ ॥ २७
उपयामगृहीतो,—ऽसि, देवेभ्यस्त्वो—पयामगृहीतोऽसि, विश्वेदेवेभ्यस्त्वो,—पयाम- २८
गृहीतोऽसि, विश्वेभ्यस्त्वा देवेभ्यः ॥

[५] मै. ४,५,६ । तै. १,४,३ । काठ. ४,१ । कपि. ३,१ । वा. ७,४-६ । काण्व. ७,४,५ । मा. श्रौ. २,३,४ ।
[६] मै. ४,५,८ । तै. १,४,४ । काठ. ४,२ । कपि. ३,२ । वा. ७,७,८ । काण्व. ७,६,७ । मा. श्रौ. २,३,५ । [आ वायो भूष० ऋ. ७,९२,१ । इन्द्रवायू इमे० ऋ. १,२,४]
[७] मै. ४,५,८; ४,६,५ । तै. १,४,५ । काठ. ४,२ । कपि. ३,२ । वा. ७,९,१० । काण्व. ७,८,९ । मा. श्रौ. २,३,५ । [अयं वां मित्रा० । ऋ. १,४७,१ (द्वि. पादः), २,४१,४]
[८] मै. ४,६,१ । तै. १,४,६ । काठ. ४,२ । कपि. ३,२ । वा. ७,११ । काण्व. ७,१० । मा. श्रौ. २,३,६ । [या वां कशा० । ऋ. १,२२,३]
[९] तै. ३,२,२० । काठ. ४,२ । कपि. ३,२ । मा. श्रौ. २,३,८ ।

दितेः पुत्राणामदितेरकारिषमुरुशर्मणां बृहतां वरूथिनाम् ।
येषां नामानि विहितानि धामशश्चित्रैर्यजन्ति भुवनाय जीवसे ॥ २९
उपयामगृहीतोऽसि, विष्णोस्त्वोरुक्रमे गृह्णामि, विष्ण उरुक्रमैष ते सोम,—स्तं रक्ष-
स्व, मा त्वा दभन् दु,—श्चक्षास्ते मावख्यद,—यं वसुः पुरोवसुर्वाक्पा वाचं मे पात्व,—यं
वसुर्विदद्वसुश्चक्षुःपाश्चक्षुर्मे पात्व,—यं वसुः संयद्वसुः श्रोत्रपाः श्रोत्रं मे पातु ॥ ९ ॥ ३०
अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ ३१
उपयामगृहीतोऽसि, षण्डाय त्वै,—ष ते योनि,—र्वीरतायै त्वा ॥१०॥ ३२
तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठराजं बर्हिषदं स्वर्दृशम् ।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे ॥ ३३
उपयामगृहीतोऽसि, मर्काय त्वै,—ष ते योनिः, प्रजाभ्यस्त्वा ॥११॥ ३४
अपनुत्तौ षण्डामर्कौ सह तेन यं द्विष्मो, ऽछिन्नस्य ते देव सोम दक्षस्य रायस्पोषस्य सुवी-
र्यस्याभिग्रहीतारः स्याम ॥ तुथोऽसि जनधाया, देवास्त्वा शुक्रपाः प्रणयन्तु, तुथोऽसि जनधाया
देवास्त्वा मन्थिपाः प्रणयन्त्वनाधृष्टासि, सुवीराः प्रजाः प्रजनयन् परीहि, सुप्रजाः प्रजाः
प्रजनयन्नभिपरीहि ॥ ३५-३६
इन्द्रेण मन्युना युजावबाधे पृतन्यतः । घ्नता वृत्राण्यप्रति ॥ ३७
संजग्मानौ दिवा पृथिव्या शुक्रौ शुक्रशोचिषा तौ देवौ शुक्रमन्थिना आयुर्यज्ञे धत्तमायुर्यज्ञ-
पतौ, पूमांसं गर्भमाधत्तं गविण्योः प्राणान् पशुषु यछतं, शुक्रस्याधिष्ठानमसि, मन्थिनो-
ऽधिष्ठानमसि, निरस्तः षण्डो, निरस्तो मर्कः सह तेन यं द्विष्मः ॥ ३८
या प्रथमा संस्कृतिर्यज्ञे अस्मिन् यः परमो बृहस्पतिश्चिकित्वान् ।
यो मध्यमो वरुणो मित्रो अग्निस्तस्मा इन्द्राय सुतमाजुहोत तस्मै सूर्याय सुतमाजुहोत
॥१२॥ ३९

[१०] मै. ४,६,३ । तै. १,४,८ । काठ. ४,३ । कपि. ३,३ । वा. ७,१६,१२ । काण्व. ७,१५,११ । मा. श्रौ. २,३,५ । [अयं वेनश्चोदय० । ऋ. १०,१२३,१]
[११] मै. ४,६,३ । तै. १,४,९ । काठ. ४,३ । कपि. ३,३ । वा. ७,१२,१६ । काण्व. ७,११,१५ । [तं प्रत्नथा पूर्वथा० । ऋ. ५,४४,१]
[१२] मै. ४,६,३ । काठ. ४,४ । कपि. ३,३ । वा. ७,१२-१५,१७,१८ । काण्व. ७,१२-१४,१७-१९ । तै. ब्रा. १, १,१,१-५ । ताण्ड्य-ब्रा. १,४,३ । मा. श्रौ. २,४,१ ।

ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ ४०

उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो, जिन्व यज्ञं, जिन्व यज्ञपतिम्, अभि सवनानि पाहि, तस्त्वा विष्णुः पातु, विशं त्वं पाहीन्द्रियेण, एष ते योनिर्, विश्वेभ्यस्त्वा देवेभ्यः ॥ १३ ॥ ४१

उपयामगृहीतोऽसि ॥ ४२

इन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवम् । यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वा ॥ ४३
एष ते योनिर्, इन्द्राय त्वो, पयामगृहीतोऽसि, देवेभ्यस्त्वा देवायुवं गृह्णामि, पुनर्हविरसि, देवेभ्यस्त्वा देवायुवं ग्रह्णामि यज्ञस्यायुषे ॥१४॥ ४४

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ ४५

उपयामगृहीतोऽसि, वैश्वानराय त्वा ॥ ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम, एष ते योनिर्, वैश्वानराय त्वा ॥ ४६–४७

ध्रुवं ध्रुवेण हविषा वः सोमं नयामसि ।
यथा नः सर्वा इज्जनः संगमे सुमना असत् ॥ ४८
दिवि दिव्यान् दृꣳहान्तरिक्षे अन्तरिक्ष्यान् पृथिव्यान् पार्थिवान् ॥१५॥ ४९

उपयामगृहीतोऽसि, मधवे त्वा, माधवाय त्वा, शुक्राय त्वा, शुचये त्वा, नभसे त्वा, नभस्याय त्वे, षाय त्वो, र्जाय त्वा, सहसे त्वा, सहस्याय त्वा, तपसे त्वा, तपस्याय त्वा ॥१६॥ ५०

[१३] मै. ४,६,४ । तै. १,४,१० । काठ. ४,५ । कपि. ३,४ । वा. ७,१९–२० । काण्व ७,२०–२३ । मा. श्रौ. २,३,५ ।
[ये देवासो० । ऋ. १,१३९,११; अथर्व. १९,२७,११–१३]
[१४] मै. ४,६,५ । तै. १,४,१२ । काठ. ४,५,६ । कपि. ३,४ । वा. ७,२२,२३ । काण्व ७,२४,२५ । मा. श्रौ. २,३,५; २,४,३ ।
[१५] मै. ४,६,६ । तै. १,४,१३ । काठ. ४,५ । कपि. ३,५ । वा. ७,२४–२५ । काण्व. ७,२६–२८ । मा. श्रौ. २,३,५ ।
[मूर्धानं दिवो० । ऋ. ६।७।१; सा. ११४०; ध्रुवं ध्रुवेण...रसत् । ऋ. १०,१७३,६, अथर्व. ७,९४.१]
[१६] मै. ४,६,७ । तै. १,४,१४ । काठ. ४,७ । कपि. ३,५ । वा. ७,३० । काण्व. ७,३० । मा. श्रौ. २,४,२ ।

इन्द्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यम् । अस्य पातं धियेषिता ॥ ५१
उपयामगृहीतोऽसी, न्द्राग्निभ्यां त्वै, ष ते योनिर्, इन्द्राग्निभ्यां त्वा ॥१७॥ ५२

ओमासश्चर्षणीधृतो विश्वे देवास आगत । दाश्वाꣳसो दाशुषः सुतम् ॥ ५३
उपयामगृहीतोऽसि, विश्वेभ्यस्त्वा देवेभ्य, एष ते योनिर्, विश्वेभ्यस्त्वा देवेभ्यः ॥१८॥ ५४

इन्द्र मरुत्व इह पाहि सोमꣳ यथा शार्याते अपिबः सुतस्य ।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः ॥ ५५
उपयामगृहीतोऽसी, न्द्राय त्वा मरुत्वत एष ते योनिर्, इन्द्राय त्वा मरुत्वते ॥१९॥ ५६

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ ५७
उपयामगृहीतोऽसी, न्द्राय त्वा मरुत्वत, एष ते योनिर्, इन्द्राय त्वा मरुत्वते ॥२०॥ ५८

मरुत्वन्तꣳ वृषभꣳ वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवे ॥ ५९
उपयामगृहीतोऽसी, न्द्राय त्वा मरुत्वत, एष ते योनिर्, इन्द्राय त्वा मरुत्वते ॥२१॥ ६०

मरुत्वाꣳ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।
आसिञ्चस्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रदिवः सुतानाम् ॥ ६१

[१७] मै. ४,६,८ । तै. १,४,१५ । काठ. ४,७ । कपि. ३,५ । वा. ७,३१ । काण्व. ७,३१ । मा. श्रौ. २,४,२,३ ।
[इन्द्राग्नी आगत२०। ऋ. ३।१२।१; सा. ६६९]
[१८] मै. ४,६,८ । तै. १,४,१६ । काठ. ४,७ । कपि. ३,५ । वा. ७,३३ । काण्व. ७,३३ । मा. श्रौ. २,४,२ ।
[ओमासश्चर्षणी० । ऋ. १।३।७]
[१९] मै. ४,६,८ । तै. १,४,१८ । काठ. ४,८ । कपि. ३,६ । वा. ७,३५ । काण्व. ७,३५ । मा. श्रौ. २,४,४ ।
[इन्द्र मरुत्व इह । ऋ. ३।५१।७]
[२०] मै. ४,६,८ । तै. १,४,१८ । तै. ब्रा २,८,३,४–५ । काठ. ४.८ । कपि. ३,६ । वा. ३३,६४; ७,३५ । काण्व. ३२,६४; ७,३५, । मा. श्रौ. २,४,४ । [जनिष्ठा उग्रः० । ऋ. १०।७३।१]
[२१] मै. ४,६,८ । तै. १,४,१७ । काठ. ४,८ । कपि. ३,६ । वा. ७,३६ । काण्व. ७,३६ । [मरुत्वन्तꣳ (न्तं) वृषभꣳ । ऋ. ३।४७।५]
[२२] मै. ४,६,८ । तै. १,४,१९ । काठ. ४,८ । कपि. ३,६ । वा. ७,३८ । काण्व. १८,१० । [मरुत्वाꣳ (त्वाँ) इन्द्र वृषभो० । ऋ. ३।४७।१]

उपयामगृहीतोऽसी, न्द्राय त्वा मरुत्वत, एष ते योनिर्, इन्द्राय त्वा मरुत्वते ॥२२॥ ६२
सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ।
जहि शत्रूꣳरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः ॥ ६३
उपयामगृहीतोऽसी, न्द्राय त्वा मरुत्वत, एष ते योनिर्, इन्द्राय त्वा मरुत्वते ॥२३॥ ६४
महाꣳ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाꣳ इव । स्तोमैर्वत्सस्य वावृधे ॥ ६५
उपयामगृहीतोऽसि, महेन्द्राय त्वै, ष ते योनिर्, महेन्द्राय त्वा ॥२४॥ ६६
महाꣳ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥ ६७
उपयामगृहीतोऽसि, महेन्द्राय त्वै, ष ते योनिर् महेन्द्राय त्वा ॥२५॥ ६८
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥ ६९
उपयामगृहीतोऽस्या, ऽऽदित्येभ्यस्त्वा ॥
कदा चन प्रयुच्छस्युभे नि पासि जन्मनी । ७०
तुरीयादित्य सवनं त इन्द्रियमातस्थावमृतं दिवि ॥ ७१
उपयामगृहीतोऽस्या, ऽऽदित्येभ्यस्त्वा ॥ ७२
यज्ञो देवानां प्रत्येतु सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोऽर्वाची सुमतिर्ववृत्यादꣳहोश्चिद्या वरिवोवित्तरासत् ॥ ७३
अदब्धेभिः...
इदं पुरस्तादुत पश्चादुदङꣳ विश्वस्य भुवनस्य राजा ।
अहꣳ सूर्यमयतो ददर्श यदन्तरिक्षं तदु नः पिताभूत् ॥ ७४

[२३] मै. ४,६,८ । तै. १,४,२० । कपि. ३,६ । वा. ७,३७ । काण्व. ७,३८ । मा. श्रौ. २,४,६ ।
[सजोषा इन्द्र सगणो० । ऋ. ३।४७।२]
[२४] मै. ४,६,८ । तै. १,४,२० । काठ. ४,८ । कपि. ३,६ । वा. ७,४० । काण्व. ७,४० । मा. श्रौ. ७,२,४ ।
[महाँ (हाँ) इन्द्रो य० । ऋ. ८।६।१; अथर्व. २०।१३८।१; सा. १६०७]
[२५] मै. ४,६,८ । तै. १,४,२१ । काठ. ४,८ । कपि. ३,६ । वा. ७,३९ । काण्व. ७,३९ । मा. श्रौ. २,४,६ । [महाँ (हाँ) इन्द्रो नृवदा । ऋ. ६।१९।१]
[२६] मै. ४,६,९ । तै. १,४,२२; ४,४,८,२२ । काठ. ४,१० । कपि. ३,८ । वा. ८,२–४,९ । काण्व. ८,१–३,९ । मा. श्रौ. २,५,१ । [कदा चन स्तरीरसि० । ऋ. ८।५१।७; कदा चन प्रयुच्छस्युभे० । ऋ. ८।५२।७; यज्ञो देवानां० । ऋ. १।१०७।१]

उरुꣳमय पृथिवी मीꣳन्त्यादो दिव्यं नभः ।
उभो दिव्यस्य नो धातरीशानो विष्या धृतिम् ॥ २६ ॥ ७५
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परिपाहि नो वृधे ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ ७६
उपयामगृहीतोऽसि, सावित्रोऽसि जनधाया, जिन्व यज्ञं, जिन्व यज्ञपतिम्, अभि सवनानि पाहि, तस्त्वा विष्णुः पातु, विशं त्वं पाहीन्द्रियेण ॥ २७ ॥ ७७
उपयामगृहीतोऽसि ॥ सुशर्मासि सुप्रतिष्ठानो, बृहदुक्षे नमः ॥ एष ते योनिर्, विश्वेभ्यस्त्वा देवेभ्यः ॥ २८ ॥ ७८–७९
उपयामगृहीतोऽसि, बृहस्पतिसुतस्य त इन्द इन्द्रियावतः ॥ पत्नीवन्तं ग्रहꣳ राध्यासम् ॥ अग्ना३इ पत्नीवा३न् त्सजूस्त्वष्ट्रा सोमं पिब ॥ २९ ॥ ८०–८२
उपयामगृहीतोऽसि, हरिरसि हारियोजनो हरिवान् हर्योः स्थाता, स्तुतस्तोमस्य ते देव सोम शस्तोक्थस्येष्टयजुषः ॥ हरिवतो हारियोजनस्य हरिवन्तं ग्रहꣳ राध्यासम् ॥ हर्योर्धाना हरिवतीः सहसोमा इन्द्राय, रय्यै त्वा, पोषाय त्वा ॥ ३० ॥ ८३–८५
अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ८६
उपयामगृहीतोऽस्य, ग्नये त्वायुष्मत, एष ते योनिर्, ग्नये त्वायुष्मते ॥ ३१ ॥ ८७
ओजस्तदस्य तित्विष उभे यत् समावर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ८८
उपयामगृहीतोऽसी, न्द्राय त्वौजस्वत, एष ते योनिर्, इन्द्राय त्वौजस्वते ॥३२॥ ८९

[२७] मै. ४,७,१ । तै. १,४,२४ । काठ. ४,१० । कपि. ३,८ । वा. ३३,६९,८४; ८,७ । काण्व. ३२,६९,८४; ८,६ । मा. श्रौ. २,५,१ । [अदब्धेभिः सवितः० । ऋ. ६।७१।३; शिवेभिरद्य० । अथर्व. ७।८४।१, रक्षा माकिर्नो० । अथर्व. १९।४७।६]
[२८] मै. ४,७,१ । तै. १,४,२६ । काठ. ४,१० । कपि. ३,८ । वा. ८,८ । काण्व. ८,७ । मा. श्रौ. २,५,१ ।
[२९] मै. ४,७,४ । तै. १,४,२७ । काठ. ४,११, । कपि. ३,९ । वा. ८, ९,१० । काण्व. ८,८,१०–११ । मा. श्रौ. २,५,२ ।
[३०] मै. ४,७,४ । तै. १,४,२८ । काठ. ४,११ । कपि ३,९ । वा. ८,११,१२ । काण्व. ८,१२–१३ । मा. श्रौ. २,५,४ ।
[३१] मै. ४,७,३ । मै. १,४,२९ । काठ. ४,११ । कपि. ३,९ । वा. १९,३८; ३५,१६; ८,३८ । काण्व. ८,१९,१०–११, ४०; २१,३७; ३५,४८ । मा. श्रौ. ७,२,२ ।
[अग्ना (ग्न) आयूꣳषि० ऋ. ९,६६,१९; सा. ६२७; १४६४; १५१८]
[३२] तै. १,४,३० । काठ. ४,११ । कपि. ३,९ । वा. ८,३९ । काण्व. ८,२१ ।

अदृश्रमस्य केतवो वि रश्मयो जनं अनु । भ्राजन्तो अग्नयो यथा ॥ ९०

उपयामगृहीतोऽसि, सूर्याय त्वा भ्राजस्वत, एष ते योनिः, सूर्याय त्वा भ्राजस्वते ॥
॥३३॥ ९१

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् । ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥ ९२

उपयामगृहीतोऽसी,—न्द्राय त्वा हरिवत, एष ते योनि,—रिन्द्राय त्वा हरिवते ॥३४॥ ९३

उपयामगृहीतोऽसि, प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि, रातं देवेभ्यो दक्षाय दक्षवृधम,—ग्निहोत्रेभ्यस्त्वा ऋतायुभ्या इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यः, पृथिव्यै त्वा,—ऽन्तरिक्षाय त्वा, दिवे त्वा,—ऽद्भ्यस्त्वौषधीभ्यो वनस्पतिभ्यस्त्वा, प्राणाय त्वा,—ऽपानाय त्वा, व्यानाय त्वा, सते त्वा,—ऽसते त्वा, भूताय त्वा, भव्याय त्वा, येन प्रजा अछिद्रा अजायन्त तस्मै त्वा प्रजापतये विश्वकर्मणे विश्वव्यचसे विभूदाव्ने विश्वं भागं
जुहोमि, स्वाहा ॥ ९४

तिस्रो जिह्वस्य समिधः परिज्मनोऽग्नेरकृण्वन्नुशिजो अमृत्यवे ।
तासामेकामदधुर्मर्त्ये भुजं लोकमु द्वे उप जामी ईयतुः ॥३५॥ ९५

अग्निः प्रातःसवनात् पात्वस्मान् वैश्वानरो विश्वभूर्विश्वशंभूः ।
स नः पावको द्रविणं दधात्वायुष्मन्तः सहभक्षा स्याम ॥ ९६

अग्नये त्वा प्रवृहामि गायत्रेण छन्दसे,—न्द्राय त्वा प्रवृहामि त्रैष्टुभेन छन्दसा,—ऽऽदित्येभ्यस्त्वा प्रवृहामि जागतेन छन्दसा, रशीनां त्वा पत्मन्नाधूनोमि, मान्दानां त्वा पत्मन्नाधूनोमि, मन्दनानां त्वा पत्मन्नाधूनोमि, पूतनानां त्वा पत्मन्नाधूनोमि, पस्त्यानां त्वा पत्मन्नाधूनोमि, माध्वीनां त्वा पत्मन्नाधूनोमि, मधूयानां त्वा पत्मन्नाधूनोमि, देवयानीनां त्वा पत्मन्नाधूनोम्यु,—पयामगृहीतोऽसि, शुक्रं त्वा शुक्र शुक्राय गृह्णाम्यह्नो रूपे सूर्यस्य रश्मिषु ॥ ९७

[३३] तै. १,४,३१ । काठ. ४,११ । कपि. ३,९-१० । वा. ८,४० । काण्व. ८,११ । [अदृश्रमस्य केतवो० । ऋ. १, ५०,३ । अथर्व. १३,२,१८; २०,४७,१५ । सा. ६३४]
[३४] मै. ४,७,६ । तै. १,४,३८ । काठ. ४,११ । कपि. ३,९ । वा. ८,३५ । काण्व. ८,१६ । मा. श्रौ. २,५,१ । [इन्द्रमिद्धरी वहतो० । ऋ. १,८४,२ । सा. १०३०]
[३५] तै. ३,५,८ । काठ. ३०,५,६ । मा. श्रौ. ७,२,४ ।
[३६] मै. ४,७,७ । तै. ३,१,९,५; ३,३,३ । काठ. ३०,६ । वा. ८,४८-५० । काण्व. ८,३०-३२ । मा. श्रौ. ७,१,१ । मै. ४

आ समुद्रा अचुच्यवुर्दिवो धारा असश्चत ॥ ९८

ककुभꣳ रूपꣳ वृषभस्य रोचते, बृहद्वसूनामाधीतौ रुद्राणां कर्मण्यादित्यानां चेतसी,—न्द्राय त्वा विभूवसे जुहोम्यु,—शिक्त्वं देव सोम गायत्रेण छन्दसाग्नेर्धामोपेहि, वशीक्त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य धामोपेह्य,—स्मत्सखा देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहि ॥३६॥ ९९

उदु त्यं जातवेदसं देवꣳ वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ १००
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥ १०१

द्यां गछ, स्वर्गछ, रूपꣳ वो रूपेणाभ्येमि वयसा वय,—स्तुथो वो विश्ववेदा विभजतु वर्षिष्ठे अधि नाके पृथिव्याः ॥ १०२

एतत्ते अग्ने राध एति सोमच्युतं, तन्मित्रस्य पथा नय ॥ १०३
अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन् ।
अयꣳ शत्रून् जयतु जर्हृषाणोऽयꣳ वाजं जयतु वाजसातौ ॥ १०४

ऋतस्य पथा प्रेत चन्द्रदक्षिणा, ब्राह्मणमद्य ऋध्यासं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातुदक्षिणम् ॥ वि स्वः पश्य३ व्यन्तरिक्षꣳ, यत स्वः सदस्यै,—रस्मद्दाता मधुमतीर्देवत्रा गछत, प्रदातारमाविशता,—ऽनवहायास्मान् देवयानेन पथा सुकृतां लोके सीदत, तन्नः सꣳस्कृतम् ॥३७॥
१०५-१०६

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्वरुणो मित्रो अग्निः ।
विष्णुस्त्वष्टा प्रजया सꣳरराणो यजमानाय द्रविणं दधातु ॥ १०७

[३७] मै. ४,८,२,३ । तै. १,४,४३ । काठ. ४,९ । कपि. ३,७ । वा. ७,४१,४२,४४-४६; १३,४६; ८४१; ३३,३१ । काण्व. ८,२३,२४;९,६-७,९-१२, ३२,३१;१४,४८ । मा. श्रौ. ७,२,५ । [उदुत्यं जातवेदसं० । ऋ. १,५०,१ । अथर्व. १३,२,१६,२०,४७,१३ । सा. ३१ । चित्रं देवानां० । ऋ. १,११५,१ । अथर्व. १३,२,३५, । सा. ६२९]
[३८] मै. ४,८,४ । तै. १,४,४४ । काठ. ४,१२ । कपि. ३,१० । वा. २,२१,२४;८,१७,१५,१६,१४,१८-२२ । काण्व. २,३९.४४;९,१७,१५.१४,१८-२१ । मा. श्रौ. २,५,४ । [धाता रातिः सविते० । अथर्व. ७,१७,४ । समिन्द्र णो मनसा० । ऋ. ५,४२,४ । सं वर्चसा पयसा० । अथर्व. ६,५३,३ । यानावह (याँ२ऽआवह) । अथर्व. ७,९७,३ । सुगा वो देवाः० । अथर्व. ७,९७,४ । यज्ञ यज्ञं गच्छ० । अथर्व. ७,९७,५-६ । देवा गातुविदो० । अथर्व. ७,९७,७-८]

समिन्द्र नो मनसा नेषि गोभिः सꣳ सूरिभिर्हरिवः सꣳ स्वस्त्या ।
सं ब्रह्मणा देवकृतꣳ यदस्ति सं देवानाꣳ सुमतौ यज्ञियानाम् ॥ १०८
सꣳ वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनु नो मार्ष्टु तन्वो यद्विरिष्टम् ॥ १०९
सुगा वो देवाः सदना कृणोमि य आजग्मेदꣳ सवनं जुषाणाः ।
यक्षिवाꣳसः पपिवाꣳसश्च विश्वेऽस्मे धत्त वसवो वसूनि ॥ ११०
यानावह उशतो देव देवाꣳस्तान् प्रेरय स्वे अग्ने सधस्थे ।
वहमाना भरमाणा हवीꣳष्यसुं घर्मं दिवमातिष्ठतानु ॥ १११
यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगयाडृधगुताशमिष्ठ विद्वान् प्रजानन्नुपयाहि यज्ञम् ॥ ११२
यज्ञ यज्ञं गछ, यज्ञपतिं गछ, स्वꣳ योनिं गछ, स्वाहै,—ष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीर,—स्तेन संभव, भ्राजं गछ, देवा गातुविदो गातुꣳ वित्त्वा गातुमित, मनसस्पत
इमꣳ यज्ञं दिवि देवेषु वाते धा, स्वाहा ॥ ३८ ॥ ११३

उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ ११४
शतं ते राजन् भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु । ११५
आरे बाधस्व निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत् ॥ ११६
अग्नेरनीकमप आविवेशापां नपात् प्रतिरक्षदसुर्यान् ॥ ११७
दमेदमे समिधꣳ यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत् ॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः । ११८
यज्ञस्य ते यज्ञपते सूक्तोक्तौ नमोवाके विधेम स्वाहा ॥

[३९] मै. ४ ८,५, । तै. १,४,४५ । काठ. ४,१३ । कपि. ३,११ । वा. ८,११,२३-२५,२७;३,४८;२०,१८,१९,२२, २३; ३८.२५ । काण्व. ८,१२; ९,२३-२६,११,४,७; ३८,२४;३.५६ । [उरुꣳ हि राजा० । ऋ. १,२४,८ । उदु ते (त्ये) मधुमत्तमा...इव । कण्वा इव भृगवः० । ऋ. ८,३,१५-१६ । अथर्व. २०,१०,१-२;२०,५९,१-२ । सा. २५१,१३६१; १३६३ । एधोऽस्येधिषी (य) महि० । अथर्व. ७,८९,४; १९.३१,१२ । अपो (आपो) अद्यान्वचा० । ऋ. १,२३,२३; १०,९,९; अथर्व. ७,८९,१; ९,१,१४; १०,५,४६]

अवभृथ निचुङ्कुण निचेरुरसि निचुङ्कुणो, गृहं गृहो,—ऽव नो देवैर्देवकृतमेनो यक्ष्य,—व मर्त्यैर्मर्त्यकृतं चिकित्वा,—ऽनुरोरा नो देव रिषस्पाह्य,—प्सु धौतस्य ते देव सोमनृभिष्टुतस्य यस्ते गोसनिर्भक्षो यो अश्वसनिस्तस्य त उपहूता उपहूतस्य भक्षयामि, विचृत्तो वरुणस्य पाशः, प्रत्यस्तो वरुणस्य पाशो, नमो वरुणस्य पाशाया,—श्वेतवैशीयो ना उक्षुपाभिः ॥ ११९

उदु ते मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ १२०
कण्वा इव भृगवः सूर्या इव विश्वमिद्धितमानशुः ।
उदितः प्रजामुत वर्चो दधाना युष्मान् राय उत यज्ञा असश्चतः ॥ १२१
गायत्रं छन्दो अनु सꣳरभध्वमथा स्यात सुरभयो गृहेषु ।
एधोऽस्येधिषीमहि समिदसि समेधिषीमहि ॥ १२२
अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि ।
पयस्वानग्न आगमं तं मा सꣳसृज वर्चसा ॥ ३९ ॥ १२३ [१८५]

॥ इति प्रथमकाण्डे ग्रहो नाम तृतीयः प्रपाठकः ॥ ३ ॥

अथ चतुर्थः प्रपाठकः ।

यजमान-ब्राह्मणम् ।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम । १
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥
अग्ने व्रतपते व्रतमालप्स्ये, तच्चे प्रब्रूमस्तं,—नो गोपाय, तच्छकेयम् ॥ २
अग्निꣳ होतारमुप तꣳ हुवे देवान् यज्ञियानिह यान्यजामहै ।
आयन्तु देवा हविषो मे अस्या देवा यन्तु सुमनस्यमानाः ॥ ३
युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः ।
इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ ४

[१] मै. १,४,५ । तै. १,५,१०,३, १,६,२-४ । काठ. ४,१४; ५,१-४ । वा. १,५; २,१८,१०; १८,५६ । काण्व. १,८; २,५३,१८; २०,२६ । मा. श्रौ. १,४,१ ।

अस्मास्विन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् ।
अस्माकः सन्त्वाशिषः ॥ ५
आमाशिषो दोहकामा इन्द्रवन्तो हवामहे । धुक्षीमहि प्रजामिषम् ॥ ६
सा मे सत्याशीर्देवान् गम्याज्जुष्टाज्जुष्टतरा पण्यात् पण्यतरा ॥ ७
अरेडता मनसा देवान् गछ, यज्ञो देवान् गछतु, यज्ञो देवान् गम्यात् ॥ ८
वि ते मुञ्चामि रशनाः वि रश्मीन् वि योक्त्राणि परिचर्तनानि ।
धत्तादस्मभ्यं द्रविणेह भद्रं प्र मा ब्रूताद्भागधां देवतासु ॥ ९
इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिः ।
अङ्गिरसो मे अस्य यज्ञस्य प्रातरनुवाकैरहृषुः ॥ १०
तस्य मा यज्ञस्येष्टस्य वीतस्य द्रविणेहागम्या,—दसुर्यज्ञो, वसुमान्यज्ञ,—स्तस्य मा यज्ञस्य
वसोर्वसुमतो वस्विहागछत्व,—दो मागछत्व,—दो मागम्यात् ॥ १ ॥ ११

सं यज्ञपतिराशिषा, संदसि, सन्मे भूयाः, पूर्णमसि, पूर्णं मे भूयाः, सर्वमसि, सर्वं मे भूयाः, अक्षितमस्य,—क्षितं मे भूयाः, प्राच्या दिशा देवा ऋत्विजो मार्जयन्तां, दक्षिणया दिशा मासाः पितरो मार्जयन्तां, प्रतीच्या दिशा गृहाः पशवो मार्जयन्ता,—मुदीच्या दिशापा ओषधयो वनस्पतयो मार्जयन्ता,—मूर्ध्वया दिशा यज्ञः संवत्सरो मार्जयतां, विष्णुः पृथिव्यां व्यक्रंस्त गायत्रेण छन्दसा, निर्भक्तः स यं द्विष्मो, विष्णुरन्तरिक्षे व्यक्रंस्त त्रैष्टुभेन छन्दसा, निर्भक्तः स यं द्विष्मो, विष्णुर्दिवि व्यक्रंस्त जागतेन छन्दसा, निर्भक्तः स यं द्विष्मो, ऽगन्म३ स्वः, सं ज्योतिषाभूमे,—दमहममुष्य प्राणं निवेष्टयामि, तेजोऽसि, समहं प्रजया, सं मया प्रजा, समहं पशुभिः, सं मया पशवो, ऽग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासं, सुगृहपतिस्त्वं मया गृहपतिना भूया, अस्थूरिणौ गार्हपत्यं दिदाश्यतं हिमाद्वायू, रायाःसि संपृचानो असंपृचानौ तन्वो, ऽसा अनु मा तन्व,—छिन्नो दिव्यस्तन्तु,—र्मा मानुषश्छेदि, दिव्याद्धाम्नो मा छित्सि मा मानुषा,—ज्ज्योतिषे तन्तवे त्वा ॥
॥ २ ॥ १२

[२] मै. १,४,६,७ । तै. १,६,५-६ । काठ. ५,५ । वा. ६,१०, २,२५,२७ । काण्व. ६,१२, २,४६-४७,४९-५० । मा. श्रौ. १,४,३, २,३,६ । कात. श्रौ. ३,७,४,१०-११ ।

ये देवा यज्ञहनः पृथिव्यामध्यासते । अग्निर्नस्तेभ्यो रक्षतु गछेम सुकृतो वयम् ॥ १३
ये देवा यज्ञमुषः पृथिव्यामध्यासते । अग्निर्नस्तेभ्यो रक्षतु गछेम सुकृतो वयम् ॥ १४
यास्ते रात्रयः सवितर्देवयानीः सहस्रयज्ञमभि संबभूवुः ।
गृहैश्च सर्वैः प्रजयान्वग्ने३ स्वो रुहाणास्तरता रजांसि ॥ १५
ये देवा यज्ञहनो अन्तरिक्षे अध्यासते ।
वायुर्नस्तेभ्यो रक्षतु गछेम सुकृतो वयम् ॥ १६
ये देवा यज्ञमुषो अन्तरिक्षे अध्यासते । वायुर्नस्तेभ्यो रक्षतु गछेम सुकृतो वयम् ॥ १७
अगन्म मित्रावरुणा वरेण रात्रीणां भागो युवयोर्यो अस्ति ।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ १८
ये देवा यज्ञहनो दिव्यध्यासते । सूर्यो नस्तेभ्यो रक्षतु गछेम सुकृतो वयम् ॥ १९
ये देवा यज्ञमुषो दिव्यध्यासते । सूर्यो नस्तेभ्यो रक्षतु गछेम सुकृतो वयम् ॥ २०
येनेन्द्राय समभरन् पयांस्युत्तमेन हविषा जातवेदः ।
तेनाग्ने त्वमुत वर्धया मां सजातानां मध्ये श्रैष्ठ्या आ धेहि मा ॥ २१
वेदोऽसि, वेदो मा आभर, तृप्तोऽहं, तृप्तस्त्वम् ॥ २२
घृतवन्त कुलायिनं रायस्पोषं सहस्रिणम् । वेदो वाजं ददातु मे ॥ २३
निर्द्विषन्तं निररातिं दह, रुद्रास्त्वायछन्त्वा,—ऽऽदित्यास्त्वास्तृणन् ॥ २४
गोमं अग्नेऽविमं अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।
इडावानेषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावान् ॥ २५
सं पत्नी पत्या सुकृतेषु गछतां यज्ञस्य युक्तौ धुर्या अभूथाम् ॥ २६
आपृणानो विजहुता अरातिं दिवं ज्योतिरुत्तममारभेयां स्वाहा ॥ २७
पत्नि पत्न्येष ते लोको, नमस्ते अस्तु, मा मा हिंसी,—र्या सरस्वती वेशयमनी तस्यै स्वाहा ॥ २८
या सरस्वती वेशभगीना तस्यास्ते भक्तिवानो भूयास्म ॥ २९
अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि ।
अयाः सन् मनसा कृत्तोऽयाः सन् हव्यमूहिषेऽया नो धेहि भेषजं स्वाहा ॥ ३ ॥ ३०

[३] मै. १,४,८ । तै. ३,५,४; १,६,६,४ । काठ. ५,६,४ । वा. १५,५०, ३,६३; ४,९ । काण्व. १६,७२; ४,११ । मा. श्रौ. १,४,३,१; १,३,५ । (गोमं (माँ) अग्नेऽविमं (माँ)० । ऋ. ४,२,५]

देवान्जनमगन्यज्ञ,—स्ततो मा यज्ञस्याशीरागछतु, पितॄन् जनमगन्यज्ञ,—स्ततो मा यज्ञस्याशीरागछतु, मनुष्यान्जनमगन्यज्ञ,—स्ततो मा यज्ञस्याशीरागछत्व,—प ओषधीर्वनस्पतीन्जनमगन्यज्ञ,—स्ततो मा यज्ञस्याशीरागछतु, पञ्चजनं जनमगन्यज्ञ,—स्ततो मा यज्ञस्याशीरागछतु, पञ्चानां त्वा वातानां धर्त्राय गृह्णामि, पञ्चानां त्वा दिशां धर्त्राय गृह्णामि, पञ्चानां त्वा सलिलानां धर्त्राय गृह्णामि, पञ्चानां त्वा पृष्ठानां धर्त्राय गृह्णामि, पञ्चानां त्वा पञ्चजनानां धर्त्राय गृह्णामि, चरोस्त्वा पञ्चबिलस्य धर्त्राय गृह्णामि ॥ ३१
धामासि प्रियं देवानामनाधृष्टं देवयजनम् । देववीत्यै त्वा गृह्णामि ॥ ३२
भूरस्माकं, हव्यं देवानामा,—ऽऽशिषो यजमानस्य, देवताभ्यस्त्वा देवताभिर्गृह्णामि ॥४॥ ३३
समृद्धयज्ञो वा एष यद्दर्शपूर्णमासौ, कस्य वाह यक्ष्यमाणस्य देवता यज्ञमागछन्ति कस्य वा न, बहूनां समानमहर्यजमानानां यः पूर्वेद्युरग्निं गृह्णाति स श्वो भूते देवता अभियजते, समाप्ने वचो विहवेष्वस्ति,—ति पूर्वमग्निं गृह्णाति, देवता वा एतत् पूर्वेद्युरग्रहीत्, ताः श्वो भूतेऽभियजते, बर्हिषा वै पूर्णमासे व्रतमुपयन्ति वत्सैरमावास्यायां, पुरा वत्सानामपाकर्तोर्दम्पत्योश्नीयातां, हस्ता अवनिज्य दक्षिणतोऽग्निमुपतिष्ठेता,—ऽग्ने व्रतपते व्रतमालप्स्या, इत्यग्निर्वै देवानां व्रतपतिर्ब्राह्मणो व्रतभृद्, व्रतपतय एव प्रोच्य व्रतमालभते, ऽग्निं होतारमुप तं हुवा, इति येन हविर्निर्वप्स्यन्त्स्यात्तदभिमृशेद्, देवतानां वा एष ग्रहो, देवता वा एतदग्रही,—त्पुनन्ति त्वा ब्रह्मणा देवतेन,—ति परिधिषु परिधीयमानेषु वदेद,—वैर्वा एष योगो, ऽग्निमेतद्युनक्ति, युक्तोऽस्मै हव्यं वहत्व,—स्मास्विन्द्र इन्द्रियं दधात्वि,—तीडायामुपहूयमानायां वदेदि,—डाया वा एष दोहा, इडां वा एतद्दु, ऽयो इन्द्रियं वा इडे,—न्द्रियमेवात्मन्धत्ता, आमाशिषो दोहकामा, इत्याशिषो वै दोहकामा यजमानमभिसर्पन्ति, ता दक्षिणतो यजमानलोकमुपतिष्ठन्ते, ता यथा धेनवोऽदुग्धा अपक्रामन्त्येवमस्मादाशिषोऽदुग्धा अपक्रामन्ति य एवं न वेदा,—ऽथ य एवं वेदाशिष एव दुहे, सा मे सत्याशीर्देवान् गम्यादि,—ति प्रस्तरे प्रह्रियमाणे वदेत्, सत्यां वा एतदाशिषं देवान् गमयित्वाथ वरं वृणीत, एतद्ध स्म वा आहौपावृजानः श्रुतेहं, सहस्रेणेष्ट्वा कमु स्विदतोऽधि वरं वरिष्यामहा, इति सहस्रेण यक्षीय,—ति ह स्म वाव ततः पुराह, वि ते मुञ्चामि रशनां वि रश्मीनि,—ति परिधिषु प्रह्रियमाणेषु

[४] मै. १,४,९ । तै. १,६,१ । काठ. ५,६ । वा. ८,६०; १,३१ । काण्व. ९,१४; १,४९ । मा. श्रौ. १,४,१ ।
[५] मै. १,४,१ । तै. १,६,७; १,७,४,३ । काठ. ३१,१५; ३२,२-३ ।

वदेद्, देवता वा एतत् स्वर्गं लोकं गमयित्वा प्रतिष्ठाप्य व्युमौगि,—ष्टो यज्ञो भृगुभिरिति, यज्ञस्य वा एष दोहो, यज्ञमेतद्दुह, एतद्ध स्म वा आह कपिवनो भौवायनः, किमु स यज्ञेन यजेत यो गामिव यज्ञं न दुहीते, सुदोहतरो हि गोरिति ॥५॥ ३४

सं यज्ञपतिराशि,—षेति यजमानो यजमानभागं प्राश्नाति, यजमानो वै यज्ञपति,—र्यज्ञो यजमानभागो, यद्यजमानो यजमानभागं प्राश्नाति यज्ञपता एवं यज्ञं प्रतिष्ठापयति, यदि प्रवसेत्समिष्टयजुषा सह जुहुया,—दुग्रा एवं यज्ञं प्रतिष्ठापयति, यद्धविर्निर्वप्स्यन्नग्नौ निष्टप्यग्नेरेव यज्ञं निर्मिमीते, ऽथ यद्धविर्निर्वप्स्यन्यजमानाय प्राह यज्ञपतेरेवाधि यज्ञं निर्मिमीते, ऽग्निर्वै भूयांसं प्रदहत्ये,—तं वै लोकं यजमानोऽन्वतिमुच्यते यदेता आपोऽतिसृज्यन्ते, ऽछिन्नं स्रावयितव्या, अद्भिर्वा एतद्यजमानोऽग्नेरात्मानमन्तर्धत्ते, द्वया वै देवा यजमानस्य गृहमागछन्ति सोमपा अन्येऽसोमपा अन्ये हुतादोऽन्येऽहुतादोऽन्ये, एते वै देवा अहुतादो यद्ब्राह्मणं, एतद्देवत्य एष यः पुरानीजान, एते वा एतस्य प्रजाया पशूनामीशते३, तेऽस्याः प्रीता इषमूर्जमादायापक्रामन्ति, यदन्वाहार्यमन्वाहरति तामेव तेन प्रीणाति, दक्षिणतः मन्द्रयः परिहितवा आह, दक्षिणावतैव यज्ञेन यजता, आहुतिभिरेव देवान् हुतादः प्रीणाति, तेऽस्मै प्रीता इषमूर्जं नियछन्ति ॥ ६ ॥ ३५

संदसि, सन्मे भूया, इत्याशिषो वा एता,—स्ता एवावरुन्धे, पूर्णमसि, पूर्णं मे भूया, इति पूर्णो ह वा अमुत्राग्निः संभवति, सर्वमसि, सर्वं मे भूया, इति सर्वो ह वा अमुत्राग्निः संभवत्य,—क्षितमस्य,—क्षितं मे भूया, इत्यक्षितो ह वा अमुत्राग्निः संभवति, प्राच्या दिशा देवा ऋत्विजो मार्जयन्तामि,—त्येता वै यज्ञस्य मृष्टय, एताः शान्तयस्ता, वैजवापयो विदामक्रं,—स्तैषां मृष्टो यज्ञः शान्तो भूदघातुकः पशुपतिः पशूं,—स्तद्य एवं वेद मृष्ट एवास्य यज्ञः शान्तो भवत्य,—घातुकः पशुपतिः पशून्, विष्णुः पृथिव्यां व्यक्रंस्त गायत्रेण छन्दसे,—ति विष्णुमुखा वै देवा असुरानेभ्यो लोकेभ्यः प्रणुद्य स्वर्गं लोकमायंस्त,—द्विष्णुमुखो वा एतद्यजमानो भ्रातृव्यमेभ्यो लोकेभ्यः प्रणुद्य स्वर्गं लोकमेत्य,—गन्म३ स्वरि,—ति स्वर्गमेव लोकमेति, सं ज्योतिषाभू,—मेति ज्योतिर्हि स्वर्गो लोक, इदमहममुष्य प्राणं निवेष्ट-

[६] मै. १,४,२ । तै. १,७,३ । वा. ६,१० । काठ. ६,१२ ।
[७] मै. १,४,० । तै. १,७,५-६ । काठ. ३१,१५ । वा. २,२५,२७ । काण्व. २,४६,४७,४९,५० ।

यामी,—ति प्राणमेवास्य निवेष्टयती,—त्थं पर्यावर्तत, एवꣳ हि यज्ञः पर्यावर्तते, ऽथो अमुष्य वा एतदादित्यस्यावृतमनु पर्यावर्तते, तेजोऽसी,—त्याह, तेजो३ह्यग्निः, स वै हित्वा प्रजां च पशूꣳश्च स्वरेति, यदाह, समहं प्रजया, सं मया प्रजा, समहं पशुभिः, सं मया पशवा, इति प्रजायां चैवं पशुषु च प्रतितिष्ठत्य,—ग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ, सुगृहपतिस्त्वं मया गृहपतिना भूया, इत्यंग्रहणौ संजीयतः, सर्वमायुरितो, नाति नीतः, पुत्रस्य नाम गृह्णाति, प्रजामेवानु समतानीत्, स वै मानुषमेवाभ्युपावर्तते, मनुष्यस्य हि नाम गृह्णाति, यदाहाछिन्नो दिव्यस्तन्तुर्मा मानुषश्छे,—दीति दिव्यं चैवं मानुषं च समतानीद्, दिव्याद्धाम्नो मा छित्सि मा मानुषा,—दित्युभा इमं लोकं जयतः, सह स्वर्गे लोके भवतः ॥ ७ ॥ ३६

इति य एवं देवा यज्ञहनश्च यज्ञमुषश्च पृथिव्यां ताꣳस्तीर्त्वान्तरिक्षमारुहद्, य एवं देवा यज्ञहनश्च यज्ञमुषश्चान्तरिक्षे ताꣳस्तीर्त्वा दिवमगन्, य एवं देवा यज्ञहनश्च यज्ञमुषश्च दिवि ताꣳस्तीर्त्वा सुजातानां मध्ये श्रैष्ठ्या आधादेनꣳ, शिरो वा एतद्यज्ञस्य यत्पुरोडाशः, केशा वेदो, यद्वेदेन पुरोडाशꣳ संमार्ष्टि यज्ञस्य सर्वत्वायाथो मेध्यत्वाय, यज्ञो वै देवेभ्यस्तिरोऽभवत्, तं देवा वेदेनाविन्दꣳ,—स्तद्वेदस्य वेदत्वꣳ, यद्वेदेन वेद्यामास्ते यज्ञमेवास्मै विन्दति, पत्न्यै वेदं प्रयछति, दुरनुवेदो वा अमुत्र यज्ञो, यज्ञमेवास्मै विन्दति, त्रिः प्रयछति, त्रिषत्या हि देवा, उपस्था आस्यते, पुंमाꣳसं जानुका भवति, पशवो वै वेद, ओषधयो३ ह्येष, एष खलु वै पशूनां लोको यदन्तराग्नी, स्वे वा एतं लोके यजमानो भ्रातृव्यस्य पशून् वृङ्क्ते, ऽर्धमासेऽर्धमासे वै यज्ञो विछिद्यते, संततमाहवनीयात् स्तृणन्नेति यज्ञस्य संतत्यै, तꣳ संततमुत्तरेऽर्धमा३सेऽभियजते, गोमं अग्नेऽविमं अश्वी यज्ञ, इति गोमन्तमेवाविमन्तमश्विनꣳ यज्ञमकरि,—डावानेषो असुर प्रजावान् दीर्घो रयिः पृथुबुध्नः सभावा,—नित्याशिषमेवाशास्ते, सं पत्नी पत्या सुकृतेषु गछतामित्येष वै पत्न्या यज्ञस्यान्वारम्भः, सह स्वर्गे लोके भवतो, या वा एतस्य पत्नी सैतꣳ संप्रति पश्चादन्वास्ते, यत् संप्रति पश्चादन्वासीत प्रजामस्या निर्दहेद्, यदाह पत्नि पत्न्येष ते लोक, इति लोकमेवास्या अकर,—न्निर्दाहुकोऽस्याः प्रजा भवति, या सरस्वती वेशयम,—नीति वेशयमनꣳ, वेशनेवास्मै तेन यछत्यु,—तास्याजीवन्तः सजाता उपासते, वाचामिन्वस्य ब्राह्मणस्य वा राजन्यस्य वोपास्महा, इति माꣳसं तु न पचेयु,—

[८] मै. १,४,३। तै. ३,५,४। तै. ब्रा. ३,३,९,११। काठ. ३१,४,६। (गोमाँ अग्ने०) ऋ. ४,२,५।
मै० ५

स्तस्मिन्नग्नौ यत् पचेयुः क्रव्यादं कुर्यु,—र्न हि तस्मिन्नग्नौ माꣳसं पचन्ति यस्मिन्नाहुतीर्जुहुत्य,—याश्चाग्नेऽस्यनभिशस्ति,—श्चेत्यया वै नामैषाग्नेः प्रिया तनू,—र्या मर्याधेयेणे,—ति खलु वा आहु,—र्यच्चैवात्र यज्ञे क्रियते यच्च न, या चैवात्र यज्ञस्य प्रायश्चित्तिꣳ विद्म या च न तस्यैषोभयस्य प्रायश्चित्तिः ॥ ८ ॥ ३७

देवान् जनमगन्यज्ञ, इति स्कन्नमभिमन्त्रयेत, जनꣳ वा एतद्यज्ञस्य गछति यत् स्कन्दति, जनो३ ह्ययमस्मद्दधि, यज्ञस्य वा एतज्जनं गतस्याशिषमवरुन्धे, पञ्चानां त्वा वातानां धर्त्राय गृह्णामीति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालब्धा,—ऽयꣳ वाव यः पवत एष यज्ञ,—स्तमेवाग्रहीत, पञ्चानां त्वा दिशां धर्त्राय गृह्णामी,—तीमा एव पञ्च दिशोऽग्रहीत्, पञ्चानां त्वा सलिलानां धर्त्राय गृह्णामीति, पशवो वै सलिलं, पशूनेवाग्रहीत्, पञ्चानां त्वा पृष्ठानां धर्त्राय गृह्णामी,—ति पृष्ठान्येवाग्रहीत्, तेनास्य पृष्ठवन्तौ दर्शपूर्णमासौ संतता अविछिन्नौ भवतः, पञ्चानां त्वा पञ्चजनानां धर्त्राय गृह्णामीति, छन्दाꣳसि वै पञ्च पञ्चजना,—श्छन्दाꣳस्येवाग्रही,—चरोस्त्वा पञ्चबिलस्य धर्त्राय गृह्णामी,—तीमे वै लोकाश्चरुः पञ्चबिल, इमानेव लोकानग्रहीन् ॥ ३८

धामासि प्रियं देवानामनाधृष्टं देवयजनम् । देववीत्यै त्वा गृह्णामि ॥ ३९

इति प्रज्ञात आज्यग्रहः पर्यागाद्, भूरस्माकꣳ, हव्यं देवाना, माशिषो यजमानस्यै,—ति भूतिमेवात्मन आशास्ते, हव्यं देवेभ्य, आशिषो यजमानस्य, देवताभ्यस्त्वा देवताभिर्गृह्णामी,—ति देवताभ्य एवैनं देवताभिरग्रहीत् ॥९॥ ४०

देवतानाꣳ वा एतदायतनꣳ यदाहवनीयो, यदन्तराग्नी तत् पशूनां, मनुष्याणां गार्हपत्यः, पितॄणामोदनपचनः, सर्वा ह वा अस्य यक्ष्यमाणस्य देवता यज्ञमागछन्ति य एवꣳ वेद, पूर्वं चाग्निमपरं च परिस्तरीतवा आह, मनुष्याणाꣳ वै नवावसानं, प्रियं नवावसानमेवाकर्मेभ्यस्त्राया,—ऽग्नेर्जिह्वासि वाचो विसर्जन,—मिति पुरोडा३श्यानावपति, देवतानाꣳ वा एष ग्रहो, देवता वा एतद्ग्रही,—देतद्ध स्म वा आहारुण औपवेशि,—रहुतासु वा आहमाहुतिषु देवता हव्यं गमयामि, संꣳस्थितेन यज्ञेन सꣳस्थां गछानी,—ति तद्य एवꣳ वेदाहुतास्वेवास्याहुतिषु देवता हव्यं गछति संꣳस्थितेन यज्ञेन सꣳस्थां गछत्यु,—लूखलाभ्याꣳ वै दृषदा हविष्कृदेहि ॥ इति

[९] मै. १,४,४। काठ. ३२,६। वा. १,३१। काण्व. १,४९। मा. श्रौ. ३,१।
[१०] तै. १,६,८। काठ. ३२.७। वा. १.१५। काण्व. १.२३।

देवा यज्ञाद्रक्षाꣳस्यपाघ्नत यदोलूखला उद्वादयन्ति दृषदो समाघ्नन्ति ॥ हविष्कृदेहि ॥ इत्याह रक्षसामपहत्या, अपः प्रणीय वाचꣳ यछति, मनसा वै प्रजापतिर्यज्ञमतनु,—तौलूखलयोरद्रेदितोरध्वर्युश्च यजमानश्च वाचꣳ यछेतां, प्रजापतिरेव भूत्वा मनसा यज्ञं तन्वाते, न सर्वाणि सह यज्ञायुधानि प्रहृत्यानि, मानुषं तत् क्रियते, नैकमेकं, पितृदेव३त्यं तद् द्वे द्वे सह प्रहृत्ये, याज्यानुवाक्ययो रूपमुपवसत्य,—मयाꣳस्तेन पशूनवरुन्धे ग्राम्याꣳश्चारण्याꣳश्च, यद्ग्राम्यस्य नाश्नाति तेन ग्राम्यानवरुन्धे, ऽथ यदारण्यस्याश्नाति तेनारण्या,—नयो इन्द्रियꣳ वा आरण्य,—मिन्द्रियमेवात्मन्धत्ते, न माषाणामश्नीयाद,—यज्ञिया वै माषा, न तस्य सायमश्नीयाद्यस्य प्रातर्यक्ष्यमाणः स्याद,—प्रतिजग्धेन वै देवा हव्येन वसीयोभूयमगछन् प्रतिजग्धेनासुराः पराभवꣳस्त,—दप्रतिजग्धेन वा एतद्धव्येन यजमानो वसीयोभूयं गछति, परास्य भ्रातृव्यो भवति, यो वै श्रद्धामनालभ्य यजते पापीयान् भवत्या,—ऽऽपो वै श्रद्धा, न वाचा गृह्णन्ति न यजुषा,—ऽति वा एता वाचं नेदन्त्यति वक्त्रं, मनस्तु नातिनेदन्ति, यद्यपो गृह्णीयादिमा तर्हि मनसा ध्याये,—दियꣳ वा एतासां पात्र,—नयैवैना अग्रहीत्, श्रद्धामालभ्य यजते, न पापीयान् भवति ॥१०॥ ४१-४४

ब्रह्मवादिनो वदन्ति, प्रेध्ममुक्षन्ति प्र हवि,—रिध्मः प्रथम आहुतीनां, कस्मादन्येषाꣳ हविषाꣳ याज्यानुवा३क्याः सन्ति, कस्मादिध्मस्य नेति ॥ अग्नये समिध्यमानायानुब्रूहि ॥ इति पुरोनुवाक्या सामिधेनी,—र्याज्योपवाको वषट्कारो, यत्र वै यज्ञस्यातिरिक्तं क्रियते तद्यजमानस्यातिरिक्तमात्मन् जायते, यदनाप्नꣳ वै यज्ञश्छिद्यते क्षोधुको यजमानो भवति, परिधानीयया सामिधेनीनामुत्तममिध्मस्य समर्धय,—त्यक्षोधुको यजमानो भवति, नास्यातिरिक्तमात्मन् जायते, यो वै प्रजापतिꣳ सप्तदशꣳ य३ज्ञेऽन्वायत्तꣳ वेद नास्य यज्ञो व्यथते, प्रजापतौ यज्ञेन प्रतितिष्ठति ॥ ओ श्रावय ॥ इति चतुरक्षरम् ॥ अस्तु श्रौषट् ॥ इति चतुरक्षरम् ॥ यज ॥ इति द्व्यक्षरम् ॥ ये यजामहे ॥ इति पञ्चाक्षरं, द्व्यक्षरो वषट्कार, एष वै प्रजापतिः सप्तदशो य३ज्ञेऽन्वायत्तो. यद्यनुवाक्याया एति यदि याज्याया, अतश्चैदेवं नैति नास्य यज्ञो व्यथते, प्रजापतौ यज्ञेन प्रतितिष्ठति, न वै तद्विद्म यदि ब्राह्मणा वा स्मोऽब्राह्मणा वा यदि तस्य वा ऋषे३स्मोऽन्यस्य वा यस्य ब्रूमहे, यस्य ह३त्वेव ब्रुवाणो यजते तं तदिष्टमागछति, नेतरमुपनमति, तत् प्रवरे प्रवर्यमाणे ब्रूयात् ॥ देवाः पितरः पितरो देवा, योऽस्मि स सन्करामि, योऽस्मै स संयुजे,

[११] तै. १,६,११।

शुनं म इष्टꣳ शुनꣳ शान्तꣳ शुनं कृतं भूयात् ॥ इति तद्य एवं कश्च स संन्यजते तं तदिष्टमागछति, नेतरमुपनमति ॥ यज्ञस्य त्वा प्रमयाभिमया परिमयोन्मया परि गृह्णामि ॥ इति गायत्री वै यज्ञस्य प्रमा, त्रिष्टुबभिमा, जगती परिमा,—ऽनुष्टुबु,—न्मैतानि वै छन्दाꣳसि यज्ञꣳ वहन्ति, तैरेवैनं परिगृह्णाति ॥११॥ ४५--५९

केशिनꣳ वै दार्भ्यं गन्धर्वाप्सरसोऽपृछन्, कथा यजमानो यजमानेन भ्रातृव्येण सदृङ्ङसी,—त्यहꣳ वेदा, इत्यब्रवीत्, तेऽब्रुवन्,—ङ्गा नो यज्ञꣳ व्याचक्ष्वा, इति तेभ्यो यज्ञꣳ व्याचष्ट, तेऽब्रुवꣳ,—स्तेनेन यजमानो यजमानाद् भ्रातृव्यात् पापीयान्त्स्यादिति, तेऽब्रुवꣳ,—स्तथा वै ते यज्ञꣳ विधास्यामो यथा यजमानो यजमानं भ्रातृव्यमभिभविष्यसी,—ति तस्मा आहुतीर्यज्ञꣳ व्यदधु,—स्ततः केशी षाण्डिकमौद्भारिमभ्यभव,—दभि भ्रातृव्यꣳ यज्ञेन भवति य एवꣳ वेद, प्राणो वा आघारः, पूर्वार्धे होतव्यो, मुखत एवास्य प्राणं दधाति, प्राणो वा आघारो, मध्यतो होतव्यो, मध्यत एवास्य प्राणं दधात्या,—ऽऽघारं भूयिष्ठमाहुतीनां जुहुयात्, प्राणो वा आघारः, प्राणमेवास्य भूयिष्ठं करोति, संततमाघारमाघारयेत्,—प्राणो वा आघारः, प्राणस्य संतत्या, ऊर्ध्वमाघारमाघारयेत् स्वर्गकामस्य, यजमानो वा आघारो, यजमानमेव स्वर्गं लोकं गमयति, यं द्विष्यात्तस्य न्युञ्चमाघारयेत्, पापीयान् भवत्य,—भिक्रामन्ती वा एकाहुति,—रपक्रामन्त्येका, प्रतिष्ठितैका, यामभिक्रामं जुहोति साभिक्रामन्ती, यामपक्रामं जुहोति सापक्रामन्ती, याꣳ समानत्र तिष्ठन् जुहोति सा प्रतिष्ठिता, यं कामयेता,—ऽभितरꣳ वसीयाञ्छ्रेयान् त्स्या,—दिति तस्याभिक्रामं जुहुयात्, तेन सोऽभितरꣳ वसीयाञ्छ्रेयान् भवत्य,—थ यं कामयेता,—पतरं पापीयान् त्स्यादिति, तस्यापक्रामं जुहुयात्, तेन सोऽपतरं पापीयान् भवत्य,—थ यं कामयेत, न वसीयान् त्स्यान्न पापीयानिति, तस्य समानत्र तिष्ठन् जुहुयात्,—तेन स न वसीयान्न पापीयान् भवत्यृ,—तवो वै प्रयाजाः, समानत्र होतव्या ऋतूनां प्रतिष्ठित्यै, यामग्नेराज्यभागस्य सोत्तरार्धे होत३व्या, ततो योत्तरा सा रक्षोदेव३त्या, या सोमस्याज्यभागस्य सा दक्षिणार्धे होत३व्या, ततो या दक्षिणा सा पितृदेव३त्यै,—तद्वा अन्तराहुतीनां लोकः, क्लृप्ता अस्याहुतयो यथापूर्वꣳ हूयन्ते य एवꣳ वेद, यां धूमे जुहोति वा तमसि जुहोति, ततो यजमानोऽरोचुको भवति, यामङ्गारेषु जुहोति सान्धाहुति,—स्ततो यजमानस्य

[१२] तै. १,६,३,१; १,७,१।

चक्षुः प्रमायुकं भवत्य्,—र्दं ज्योतिष्मति होत३व्ये, ऽप्रोचुको यजमानो भवति, नास्य चक्षुः प्रमीयते, यामब्राह्मणः प्राश्नाति सा स्कन्नाहुति,—स्तस्या वसिष्ठ एवं प्रायश्चित्ति२ विदांचकार ॥ कं नु प्राहि ॥ इति पुरोडाशमभिमृशेद्, भजतां भागी, मा भागो भक्त, ब्राह्मणानामिदं२ हविः सोम्यानां२ सोमपानां, नेहाब्राह्मणस्यास्ति, कुर्वतो मे मा क्षेष्ट, ददतो मे मोपदसत् ॥ इति दक्षिणाग्निष्वेव यज्ञे प्रतिष्ठापयन्त्यस्कन्नमविक्षुभ्य,—मुद यामब्राह्मणः प्राश्नाति सास्य हुतैव भवति ॥ १२ ॥ ६०–६३

यस्याज्यमनुत्पूत२ स्कन्दति सा वै चित्रा नामाहुति,—स्ततो यजमानस्य चित्रं प्रमायुकं भवति, चित्रं देय२ सैव तस्य प्रायश्चित्ति,—र्थ यस्योत्पूत२ स्कन्दति सा वै स्कन्ना नामाहुति,—स्ततो यजमानः प्रमायुको भवति, वरो देयः, सैव तस्य प्रायश्चित्ति,—र्थ यस्य पुरोडाशो दुःशृतो भवत्यस्तद्धविर्यदैवत्य२, यदा तद्धविः संतिष्ठेताथ चतुःशरावमोदनं पक्त्वा ब्राह्मणेभ्यो जीवतण्डुलमिवोपहरेद्, सैव तस्य प्रायश्चित्ति,—र्थ यस्य पुरोडाशौ क्षायतस्तं२ यज्ञ२ वरुणो गृह्णाति, यदा तद्धविः संतिष्ठेताथ तदेव हविर्निर्वपेद्, यज्ञो हि यज्ञस्य प्रायश्चित्ति,—र्थ योऽदक्षिणेन यज्ञेन यजते त२ यजमान२ विधा,—ददक्षिणेन हि वा अय२ यज्ञेन यजते, ऽथ न वसीयान् भवती,—त्यूर्वरा समृद्धा देयाद्, सैव तस्य प्रायश्चित्ति,—र्थ यस्य कपालं भिद्येत तत् संदध्याद्, गायत्र्या त्वा शताक्षरया संदधामि ॥ इति वाग्वै गायत्री शताक्षरा, वाचैवैनत् संदधात्य,—थ यस्य कपालं नश्यति त२ वा इय२ स्वर्गाल्लोकादन्तर्दधाति, यदा तद्धविः संतिष्ठेताथाग्नये वैश्वानराय द्वादशकपालं निर्वपे,—दिय२ वा अग्निर्वैश्वानर, इमामेव भागधेयेनोपासरत् स्वर्गस्य लोकस्यानन्तर्हित्या, अथ यस्याहुतिर्बहिष्परिधि स्कन्दति सा वै जीवनडाहुति,—राग्नीध्रं ब्रूयात् ॥ एता२ संकृप्य जुहुधि ॥ इत्यग्निर्वै सर्वा देवताः, सर्वाभिरेवास्य देवताभिर्हुतं भवति, पूर्णपात्रमग्नीधे देय२, सैव तस्य प्रायश्चित्ति,—र्यजमानो वै जुहू,—र्भ्रातृव्य उपभृ,—त्स प्रक्षिणन्नेव होतव्य२, यत् प्रक्षिणीयाद्यजमानं प्रक्षिणीयाद्, व्यूषन्नेव होतव्यं, देवयज्ञो वा एता यदाहुतयो, यं द्विष्यात्तं तर्हि मनसा ध्यायेद्, देवयज्ञैरेवैन२ विपृषति, स्तृणुत एवं, पशवो वा आहुतयो रु३द्रोऽग्निः स्विष्टकृ,—त्स यद् होत३व्य२, यत् सह जुहुयाद्रुद्रायास्य पशूनपिदध्या,

—दुत्तरार्धपूर्वार्धे होत३व्यमाहुतीनामसंसृष्ट्या, अथो एवमस्य रुद्रः पशूननभिमानुको भवति ॥१३॥ ६४–६७

आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासा आलप्स्यमानो, ऽग्निर्वै सर्वा देवता विष्णुर्यज्ञो, देवताश्चैव यज्ञं चालभ्य दर्शपूर्णमासा आलभते, जयानु त्वो जुहुति, देवाश्च वा असुराश्चास्पर्धन्त, स प्रजापतिरेतान् जयानपश्यत्, तानिन्द्राय प्रायच्छत्, तैः संस्तम्भं२ संस्तम्भमसुरानजयत्, संस्तम्भं२ संस्तम्भं भ्रातृव्यं जयति यस्यैते हूयन्ते ॥ आकूतं चाकूतिश्च ॥ इति यज्ञो वा आकूतं, दक्षिणाकूतिः ॥ चित्तं च चित्तिश्च ॥ इति मनो वै चित्त२, वाक्चित्तिः ॥ आधीतं चाधीतिश्च ॥ इति प्रजा वा आधीतं, पशव आधीतिः ॥ विज्ञातं च विज्ञातिश्च ॥ इत्यृग्वै विज्ञात२, साम विज्ञातिः ॥ भगश्च क्रतुश्च ॥ इति प्रजापतिर्वै भगो, यज्ञः क्रतुः ॥ दर्शश्च पूर्णमासश्च ॥ इति दर्शपूर्णमासा एवं तद् द्वादश, द्वादश मासाः संवत्सरः, संवत्सरमेवाप्त्वावरुन्द्धे, प्रजापतिः प्रायच्छज्जयानिन्द्राय वृष्ण, उग्रः पृतनासु जिष्णुः ॥ तेभिर्वाज२ वाजयन्तो जयेम तेभिर्विश्वाः पृतना अभिष्याम ॥ इति त्रयोदशीमाहुतिं जुहुया,—दस्ति मासस्त्रयोदश,—स्तमेवैतयाप्त्वावरुन्द्धे ॥ अग्ने बलदः सहा ओजः क्रममाणाय मे दा अभिशस्तिकृतेऽनभिशस्तेन्याय ॥ अस्या जनताया२ श्रैष्ठ्याय स्वाहा ॥ इति जुहुयाद्, यत्र कामयेत, चित्रमस्यां जनताया२ स्यामिति, चित्रमह तस्यां जनतायां भवति, शबलं त्वस्यात्मन् जायते ॥१४॥ ६८–८५

अग्नये भगिनेऽष्टाकपालं निर्वपेद्यः कामयेत, भग्युन्नाद स्यामिति, प्रजापतिर्वै भगो, यज्ञः क्रतुः, स इमाः प्रजा भगेनाभिरक्षति, तस्मात् सर्वो मन्यते, मा भगोऽरिष्यति मा भगोऽरिष्यतीति, यदग्नये भगिने भगमेव साक्षादाप्त्वावरुन्धे, भग्युन्नादो भवत्य,—मा सह दर्शपूर्णमासा आलभ्या, उद्वा अन्यः शृङ्गे सितो मुच्यते, दर्शो वा एतयोः पूर्वः पूर्णमास उत्तरो, ऽथ पूर्णमासं पूर्वमालभन्ते, तदयथापूर्वं क्रियते, तत् पूर्णमासमालभमानः सरस्वत्यै चरुं निर्वपेत् सरस्वते द्वादशकपाल,—ममावा३स्या वै सरस्वती पूर्णमासः सरस्वा,—नुभा एवैनौ यथापूर्वं कल्पयित्वालभता, ऋद्धया, ऋध्नोत्येवा,—ऽथो मिथुनत्वाय ॥१५॥ ८६ [३७१]

॥ इति प्रथमकाण्डे यजमान-ब्राह्मणं नाम चतुर्थः प्रपाठकः ॥४॥

अथ पञ्चमः प्रपाठकः ।

अग्न्युपस्थानम् ।

उपप्रयन्तो अध्वरं मन्त्र२ वोचेमाग्नये । आरे अस्मे च शृण्वते ॥ १
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपा२ रेता२सि जिन्वति ॥ २
उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दाताराविषा२ रयीणामुभा वाजस्य सातये हुवे वाम् ॥ ३
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्र२ विभ्व२ विशे विशे ॥ ४
अस्य प्रत्नामनु द्युत२ शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ॥ ५
अयं ते योनिरृत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह तनो नो वर्धया रयिम् ॥ ६
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ना आयू२षि तारिषत् ॥ ७
अग्न आयू२षि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ८
अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ ९
अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधत् पोष२ रयिं मयि ॥ १०
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥ ११
स नः पावक दीदिवोऽग्ने देवा इहावह । उप यज्ञ२ हविश्च नः ॥ १२

[१] श. १,५,४,६ । तै. १,५,५ । काठ. ६,९ । कपि. ४,८ । वा. ३,११-१३; १५,१६,२४; १२,११; १५,२०; १५. ३६; ३३,६; १२,४२; १५,४६; ३३,३२; १९,३८; ३५,१६; २६,९; ८,३८; १७,८-९ । काण्व. ३,१७-१९,११, [illegible] । मा. श्री. १,६,२ । [उपप्रयन्तो अध्वर० ऋ. १,७४,१; साम. १३७९ । अग्निर्मूर्धा दिवः० ऋ. ८,४४,१६; सा. २७; १५३२ । उभा वामिन्द्राग्नी० ऋ. ६,६०,१३ । अयं ते योनिरृत्वियो० ऋ. ३,२९,१०; अथर्व. ३,२०,१ । अयमिह प्रथमो० ऋ. ४,७,१ । अस्य प्रत्नामनु० ऋ. ९,५४,१ । सा. ७५५ । दधिक्राव्णो० ऋ. ४,३९,६; १०,१८६,१; अथर्व. ४,१०,६; २०,१३७,३; सा. ३५८ । प्र ना (ण) आयूंषि तारिषत्० ऋ. १,२४,१२; अथर्व. [illegible]; सा. १८७;१८८० । अग्न आयूंषि पवस० ऋ. ९,६६,१९; सा. ६२७; [illegible] । अग्निरृषिः पवमानः० ऋ. ९,६६,२०; सा. १५१९ । अग्ने पवस्व स्वपा० ऋ. ९,६६,२१ । अग्ने पावक० ऋ. ५,२६,१; सा. १५७१ । स नः पावक० ऋ. १,१२,१० । अग्निः शुचिव्रततमः० ऋ. ८,४४,२१ । उदग्ने शुचयस्तव० ऋ. ८,४४,१७; सा. १५३४ । शुक्रा भ्राजन्त ईरते० अथर्व. १३,१,१ ।

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचता आहुतः ॥ १३
उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योती२ष्यर्चयः ॥ १४
अग्नीषोमा इम२ सु मे शृणुत२ वृषणा हवम् । प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १५
अग्निस्तिग्मस्तिग्मतेजाः प्रति रक्षो दहतु सहतामरातिम् । अपाघश२सं नुदताम् ॥ १६
अग्ने सपत्नसाह सपत्नान् मे सहस्व । मा मा तितीर्षन्तारीत् ॥ १ ॥ १७

त्वमग्ने सूर्यवर्चा असि, सं मामायुषा वर्चसा सृज, सं त्वमग्ने सूर्यस्य ज्योतिषागथाः ॥ १८
समृषीणा२ स्तुतेन सं प्रियेण धाम्ना समहमायुषा सं२ वर्चसा सं प्रजया सं२ रायस्पोषेण ग्मीय ॥ १९

इन्धानास्त्वा शत२ हिमा द्युमन्तः समिधीमहि ।
वयस्वन्तो वयस्कृत२ सहस्वन्तः सहस्कृतम् । अग्ने सपत्नदम्भन२ सुवीरासो अदाभ्यम् ॥ २०
अग्नेः समिदस्य,—भिशस्त्या मा पाहि, सोमस्य समिदसि, परस्पा म एधि, यमस्य समिदसि, मृत्योर्मा पाह्या,—ऽऽयुर्दा अग्नेऽस्यायुर्मे धेहि, वर्चोधा अग्नेऽसि, वर्चो मे धेहि, चक्षुष्पा अग्नेऽसि, चक्षुर्मे पाहि, श्रोत्रपा अग्नेऽसि, श्रोत्रं मे पाहि, तनूपा अग्नेऽसि तन्वं मे पाहि, यन्मे अग्न ऊनं त३न्वस्तन्मा आपृणा,—ऽग्ने यत्ते तपस्तेन तं प्रति तप यो अस्मान् द्वेष्टि यं च वयं द्विष्मो, ऽग्ने यत्ते शोचिस्तेन तं प्रतिशोच यो अस्मान् द्वेष्टि यं च वयं द्विष्मो, ऽग्ने यत्ते अर्चिस्तेन तं प्रत्यर्च यो अस्मान् द्वेष्टि यं च वयं द्विष्मो, ऽग्ने यत्ते हरस्तेन तं प्रति हर यो अस्मान् द्वेष्टि यं च वयं द्विष्मो, ऽग्ने यत्ते तेजस्तेन तं प्रतितितिग्धि यो अस्मान् द्वेष्टि यं च वयं द्विष्मो, ऽग्ने रुचां पते नमस्ते रुचे, मयि रुचं धा,—श्चित्रावसोः स्वस्ति ते पारमशीयार्वाग्वसोः स्वस्ति ते पारमशीया,—ऽम्भः स्था,—ऽम्भो वो भक्षीय, महः स्थ, महो वो भक्षीयो,—र्जः स्थो,—र्ज२ वो भक्षीय, रायस्पोषः स्थ, रायस्पोष२ वो भक्षीय ॥ रेवती रमध्वमस्मिन्योना अस्मिन्गो३ष्ठे, ऽय२ वो बन्धु,—रितो मापगात, बह्वीर्भवत, मा मा हासिष्ट ॥ स२हितासि विश्वरूपा, मोर्जा विशा गौपत्येना प्रजया रायस्पोषेण ॥ मयि वो राय श्रयन्ता२, सहस्रपोष२ वोऽशीय ॥ २ ॥ २१–२४

उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्ता एमसि ॥ २५

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानꣳ स्वे दमे ॥ २६
स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ २७
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः ।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ २८
वसुरग्निर्वसुश्रवा अछा नक्षि द्युमत्तमꣳ रयिं दाः ।
स नो बोधि श्रुधी हवमुरुष्या नो अघायतः समस्मात् ॥ २९
अभ्यस्थाꣳ विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह ।
बृहस्पतिः सवितेन्द्रस्तदाह पूषा ना आधात् सुकृतस्य लोके ॥ ३०
ऊर्जा वः पश्याम्यूर्जा मा पश्यत । रय्या वः पश्यामि रय्या मा पश्यत ॥ ३१
संपश्यामि प्रजा अहमिडप्रजसो मानवीः । सर्वा भवन्तु नो गृहे ॥ ३२
इडा स्थ मधुकृतः स्योना माविशतेरमदः । सहस्रपोषꣳ वोऽशीय ॥ ३३
भुवनमसि सहस्रपोषपुषि, तस्य नो रास्व, तस्य ते भक्तिवानो भूयास्मे,—डासि
व्रतभृद्, त्वयि व्रतꣳ, व्रतभृदसि ॥३॥ ३४
महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षꣳ वरुणस्य ॥ ३५
नहि तेषाममा सतां नाध्वसु वारणेषु च । ईशे रिपुरघशꣳसः ॥ ३६
ते हि पुत्रासो अदितेश्छर्दिर्यछन्त्यजस्रम् । प्र दाशुषे वार्याणि ॥ ३७
सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तꣳ य औशिजः ॥ ३८
यो रेवान्यो अमीवहा वसुवित् पुष्टिवर्धनः । स नः सिषक्तु यः शिवः ॥ ३९
मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ४०
कदा च न स्तरीरसि कदा च न प्रयुछसि ॥ ४१

[३] मै. १,५,१० । तै. १,५,६ । काठ. ७,१ । कपि. ५,१ । वा. ३,२२-२६ । काण्व. ३,३०-३४ । [उप त्वाग्ने दिवे० । ऋ. १,१,७; सा. १४ । राजन्तमध्वराणां० । ऋ. १,१,८ । स नः पितेव० । ऋ. १,१,९ । अग्ने त्वं नो अन्तम० । ऋ. ५,२४,१; सा. ४४८,११०७ । तं त्वा शोचिष्ठ० । ऋ. ५,२४,४; सा. ११०९ । वसुरग्निर्वसु० । ऋ. ५,२४,२; सा. ११०८ स नो बोधि० । ऋ. ५,२४,३ ।]
[४] मै. १,५,११ । तै. १,५,६ । काठ. ७,२ । कपि. ५,२ । वा. ३,३१-३३,२८,२९,३४,३६; ११.६२; ८,२-३ । काण्व. ३,३९-४१,३६,३७,४२,४४; ८,१-२, १२,६४ । मा. श्रौ. १,६,२ । [सोमानꣳ स्वरणं० । ऋ. १,१८,१; सा. १३९; १४६३ । यो रेवान्यो० । ऋ. १,१८,२ । महि त्रीणामवोऽस्तु० । ऋ. १०,१८५,१ । नहि तेषाममा० । ऋ. १०,१८५,२ । ते हि पुत्रासो० । ऋ. १०,१८५,३ । कदा चन स्तरीरसि० । ऋ. ८,५१,७; सा. ३०० । परि ते दूडभो० । ऋ. ४,९,८ । मित्रस्य चर्षणी० । ऋ. ३,५९,६]
मै० ६

परि ते दूडभो रथोऽस्माँ अश्नोतु विश्वतः । येन रक्षसि दाशुषः ॥ ४२
निम्रदोऽसि३,—न्यहं तं मृध्यासꣳ यो अस्मान् द्वेष्टि यं च वयं द्विष्मो, ऽभिभूरस्य३,—
भ्यहं तं भूयासꣳ यो अस्मान् द्वेष्टि यं च वयं द्विष्मः, प्रभूरसि, प्राहं तमति भूयासꣳ यो
अस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ पूषा मा पथिपाः पातु, पूषा मा पशुपाः पातु, पूषा माधिपाः
पातु, प्राची दिगग्निर्देवता, यो मैतस्या दिशो अभिदासादग्निꣳ सा ऋछतु, दक्षिणा दिगिन्द्रो
देवता, यो मैतस्या दिशो अभिदासादिन्द्रꣳ सा ऋछतु, प्रतीची दिङ्मरुतो देवता, यो
मैतस्या दिशो अभिदासान्मरुतः सा ऋछतू,—दीची दिङ्मित्रावरुणौ देवता, यो मैतस्या दिशो
अभिदासान्मित्रावरुणौ सा ऋछतु,—र्ध्वा दिक् सोमो देवता, यो मैतस्या दिशो अभिदासात्
सोमꣳ सा ऋछतु, धर्मो मा धर्मणः पातु, विधर्मो मा विधर्मणः पात्वा,—ऽऽयुश्च प्राणश्च चक्षुश्च
विचक्षुश्च प्राङ् चापाङ् चो,—रुक उरुकस्य ते वाचा वयꣳ सं भक्तेन गमेमह्यग्ने गृहपते॥४॥४३-४४

यस्य वा अग्निहोत्रे स्तोमो युज्यते स्वर्गमस्मै भवत्य,—यज्ञो वा एष यत्र स्तोमो न युज्यत,
उपप्रयन्तो अध्वर,—मितीयꣳ वा उपोति,—रित एव स्तोमꣳ युनक्त्य,—थो इमामेव स्तोममुपयुन-
क्त्य,—थो या एव प्रजा भूतानामन्वतीस्ता एव स्तोममुपयुनक्त्य,—स्य प्रत्नामनु द्युत,—मि-
त्यसौ वै लोकः प्रत्न,—ममुत एव स्तोमꣳ युनक्त्य,—थो देवा वै प्रत्ना, तानेव स्तोममुपयुन-
क्त्यु,—भयत एव स्तोमꣳ युनक्तीतश्चामुतश्च, देवान् वा एष प्रयुज्य स्वर्गं लोकमेति, यदाहो-
पोपेन्नु मघवन् भूया इन्नु ता, इतीयꣳ वा उपोति,—रस्यामेव प्रतितिष्ठत्य,—थ यदुपवत् पदमाह
या एव प्रजा आभविष्यन्तीस्ता एव स्तोममुपयुनक्ति, परि ते दूडभो रथा, इत्युभयत एवैतया
स्तोमꣳ युक्तं परिगृह्णातीतश्चामुतश्चा,—ऽग्निर्मूर्धा,—ति स्वर्गो वै तेन, दिवः ककु,—दिति स्वर्गो तेन,
पतिः पृथिव्या अय,—मिति मिथुना तेना,—ऽपाꣳ रेताꣳसि जिन्वती,—ति रेतस्वती पशव्या
सर्वसमृद्धा, गायत्र्योपास्थित, गायत्रो३ह्यग्निर्गायत्रछन्दाः, स्वेनैवैनं छन्दसोपास्थितो,—भा
वामिन्द्राग्नी आहुवध्या, इत्युभौ३ह्येतौ सहा,—ऽमुꣳ षा अयं दिवा भूत्वे प्रविशति, तस्मादसौ
दिवा रोचत, इमामसौ नक्तं, तस्मादयं नक्तꣳ, यदुभा वामित्याहोभा एवैना अछम्बट्का-
रमुपतिष्ठत, उभयोर्लोकयो रोचतेऽस्मिꣳश्चामुष्मिꣳश्च, त्रिष्टुभोपास्थिता,—ऽयमिह प्रथमो धायि

[५] मै. १,५,१ । तै. १,५,७ । काठ. ७,४ । कपि. ५,३ । वा. ३,११-१६,३४,३६; ८,९; १५,२६; ३३,६ । काण्व.३, १७-२२,४२,४४, ८,१; १६,४७; ३२,६ । [उपप्रयन्तो अध्वरं० । ऋ. १,७४,१; सा.१३७९ । अग्निर्मूर्धा दिवः० । ऋ. ८,४४,१६; सा. २७,१५३२ । उभा वामिन्द्राग्नी० । ऋ. ६,६०,१३ । अयं ते योनिर्ऋ० ऋ. ३, २९,१०; अथर्व. ३,२०,१ । अयमिह प्रथमो० । ऋ. ४,७,१ । अस्य प्रत्ना० । ऋ. ९,५४,१; सा. ७५५]

धातृभि,—रित्यग्नि३र्ह्यस्यां प्रथमोऽधीयत, होता यजिष्ठो अध्वरेष्वीड्या, इत्येष हि होता
यजिष्ठो अध्वरेष्वीड्यो यमप्नवानो भृगवो विरुरुचु,—रित्यप्नवानो३ह्येतं भृगवो व्यरोचयन्, वनेषु
चित्रꣳ विभ्वꣳ विशे विशा, इत्येष३ह्येदꣳ सर्वꣳ विभू,—र्जगत्योपास्थिता,—ऽस्य प्रत्नामनु
द्युत,—मिति स्वर्गो वै लोकः प्रत्नꣳ, स्वर्ग एव लोके प्रतितिष्ठत्य,—यं ते योनिर्ऋत्विया,
इत्येष३ह्येतस्य योनिर्ऋत्वियो, ऽग्निः सूर्यस्या,—ऽनुष्टुभोपास्थित ॥५॥ ४५

उपप्रयन्तो अध्वर,—मिति प्रवापयत्येवैतया,—ऽग्निर्मूर्धा,—ति प्रवापित एवैतया रेतो दधा-
त्यु,—भा वामिन्द्राग्नी आहुवध्या, इति प्राणापानौ वा इन्द्राग्नी, प्राणापानौ वा एतन्मुखतो
यज्ञस्य धीयेते ॥ अयमिह प्रथमो धायि धातृभि,—रिति गर्भमेवाधा,—दस्य प्रत्नामनु द्युत,—
मित्युधरेवाक,—रयं ते योनिर्ऋत्विया, इत्यजीजनदेवावीवृधच्च, षड्भिरुपतिष्ठते, षड्वै पृष्ठानि,
पृष्ठान्येवाचीक्लृपद्, दधिक्राव्णो अकारिष,—मिति दधिक्रावत्योपतिष्ठत, एषा वा अग्नेर्दधिक्रा-
वती प्रिया तनूः पशव्या सर्वसमृद्धा,—ऽग्नेरेवैतया प्रियं धामोपैत्य,—थो पशुमान् भवत्य,—थो
आत्मानमेवैतया यजमानः पुनीते, सप्तभिरुपतिष्ठते, सप्तपदा शक्करी, शाक्कराः पशवः,
पशूनेवावरुन्धे, जीर्यति वा एष आहितः, पशु३र्ह्यग्नि,—स्तदेतान्येवाग्न्याधेयस्य हवीꣳषि
सꣳवत्सरे सꣳवत्सरे निर्वपेत, तेन वा एष न जीर्यति, तेनैनं पुनर्णवं करोति, तन्न सूक्ष्य,
—मेताभिरेवाग्नेयपावमानीभिरग्न्याधेयस्य याज्यानुवाक्याभिरुपस्थेय,—स्तेन वा एष न जीर्यति,
तेनैनं पुनर्णवं करोति, द्वादशभिरुपतिष्ठते, द्वादश मासाः सꣳवत्सरः, सꣳवत्सरमेवा
प्त्वावरुन्द्धे ऽग्नीषोमीयया त्रयोदश्योपस्थेयो, ऽस्ति मासस्त्रयोदशस्तमेवैतयाप्त्वावरुन्द्धे॥६॥
४६-४७

कस्मात् सायमग्निमुपतिष्ठन्ते कस्मात् प्रातर्नेत्य,—सौ वा आदित्यः
ब्रह्मवादिनो वदन्ति,
सायमासुवति, तस्मात्सायमुपतिष्ठन्त, एष प्रातः प्रसुवति, तस्मात् प्रातर्नोपतिष्ठन्ते, तस्मात्
सायमहुतेऽग्निहोत्रेऽग्निहोत्रिणा नाशितव्यं, तस्माद् प्रातरहुते नाशित३व्यं, तस्मात् सायम-
तिथये प्रत्येनसः, पुण्यत्वात् तु प्रातर्ददति, प्रातरवनेगेन प्रातरुपस्थेयो, ऽथिश्चिव उश्रीष-
माने वा हस्ता अवनेनिजीत, तत्र विहव्यस्य चतस्रा ऋचो वदेत् प्रातरवनेगे चतस्रः, प्रातरव-
नेगेन वा अनाप्तमाप्नोत्य,—नवरुद्धमवरुन्द्धे, तदनाप्तमेवैतेनाप्नोत्य,—नवरुद्धमवरुन्द्धे, ऽग्निभेद्धा

[६] मै. १,५,१ । तै. १,५,७ । काठ. ७,४ । कपि. ५,३-४ ।
[७] तै. १,५,९ । काठ. ७,५ । कपि. ५,४ ।

एष उद्धत,—स्तं देवाश्छन्दोभिः पर्यस्तृणन्, यदुपतिष्ठते छन्दोभिरेवैनं परिस्तृणात्यु,—भयमस्मा
अक,—रग्नीषोमीयया पूर्वपक्षं उपस्थेयो, ऽग्नीषोमीयो वै पूर्वपक्षो, ऽपरपक्षायैवैनं परिददा,—
त्यैन्द्राग्न्यापरपक्ष उपस्थेय, ऐन्द्राग्नो वा अपरपक्षः, पूर्वपक्षायैवैनं परिददाति, सर्वा ह
वा एनं देवताः संप्रदायमनपेक्षं गोपायन्ति य एवꣳ विद्वानग्निमुपतिष्ठते ॥७॥ ४८
त्वमग्ने सूर्यवर्चा असी,—ति वसीयसे श्रेयस आशिषमाशास्ते, सं मामायुषा वर्चसा सृजे,—
त्यात्मना आशास्ते, सं त्वमग्ने सूर्यस्य ज्योतिषागथा, इति सह३ह्येते तर्हि ज्योतिषी
भवतः, संमृषीणाꣳ स्तुतेनेति, छन्दाꣳसि वा ऋषीणाꣳ स्तुतं, छन्दोभिरेवैनꣳ समर्धयति,
सं प्रियेण धाम्ने,—त्याहुतयो वा अग्नेः प्रियं धामाहुतिभिरेवैनꣳ समर्धयति, समहमायुषा सꣳ
वर्चसा सं प्रजया सꣳ रायस्पोषेण ग्मीये,—त्याशिषमेवाशास्ता, इन्धानास्त्वा शतꣳ हिमा, इति
पृतनाजिद्ध्याहुति,—स्तया राज३न्या उपतिष्ठेत, यदा हि राज३न्यः पृतना जयत्यथो भवत्यु,—
ताग्राजन्या उपतिष्ठेत, सत्रो हि पृतना जिगीषति, सत्रो बुभूषति, मनोर्वै दश जाया
आसन्, दशपुत्रा नवपुत्राऽष्टपुत्रा सप्तपुत्रा षट्पुत्रा पञ्चपुत्रा चतुष्पुत्रा त्रिपुत्रा द्विपुत्रैकपुत्रा,
ये नवासꣳस्तानेक उपसमक्राम३द्, येऽष्टौ तान् द्वौ, ये सप्त ताꣳस्त्रयो, ये षट् ताꣳश्चत्वारो,
ऽथ वै पञ्चैव पञ्चासꣳ,—स्ता इमाः पञ्च दशत इमान् पञ्च निरभजन्, यदेव किंच मनोः स्वमा-
सीत्, तस्मात् ते वै मनुमेवोपाधावन्, मना अनाथन्त, तेभ्य एताः समिधः प्रायछत, ताभिर्वै
ते तान् निरदहꣳ,—स्ताभिरेनान् पराभावयन्, परा पाप्मानं भ्रातृव्यं भावयति य एवꣳ विद्वानेताः
समिध आदधात्य,—ग्नेः समिदस्य,—भिशस्त्या मा पाही,—त्यभिशस्त्या एनं पाति, सोमस्य
समिदसि, परस्पा म एधी,—ति परस्पा अस्य भवति, यमस्य समिदसि, मृत्योर्मा
पाही,—ति मृत्योरेनं पात्ये,—तद्ध स्म वा आह नारदं, इदꣳ वावाग्न्युपस्थानमासे,—त्यभि-
शस्त्या एनं पाति, परस्पा अस्य भवति, मृत्योरेनं पाति ॥८॥ ४९
आयुर्दा अग्नेऽस्या,—ऽऽयुर्मे धेही,—त्यायुरेवास्मिन् दधाति, वर्चोदा अग्नेऽसि, वर्चो मे
धेही,—ति वर्च एवास्मिन् दधाति, चक्षुष्पा अग्नेऽसि, चक्षुर्मे पाही,—ति चक्षुरेवास्य पाति,
श्रोत्रपा अग्नेऽसि, श्रोत्रं मे पाही,—ति श्रोत्रमेवास्य पाति, तनूपा अग्नेऽसि, तन्वं मे पाही,—

[८] मै. १,५,१ । तै. १,५,७ । काठ. ७,६ । कपि. ५,५ । वा. ३,१९,१८ । काण्व. ३,२६,२७,२४,२५ ।
[९] मै. १,५,२ । तै. १,५,७-८ । काठ. ७,६-७ । कपि. ५,५ । वा. ३,१७,१८,२०-२२ । काण्व. ३,२३,२४,२६, २७-२९ ।

ति तन्वमेवास्य पाति, यन्मे अग्न ऊनं तन्वस्तन्मा आपृणे,—ति यदेवास्यात्मन ऊनं यत्
प्रजाया यत् पशूनां तदेवैतेनाप्याययति, तदाप्यायनवत्यं,—ग्ने यत् ते तपा, इत्येता वा अग्नेस्त३न्वो
ज्योतिष्मती,—रेतद् स्म वा आहारुणं औपवेशि,—र्यान् वसीयसः श्रेयस आत्मनो भ्रातृव्यानभि-
प्राज्ञानीमाभिष्टानवस्तनभिर्ज्योतिष्मतीभिः पराभावयामि,—ति परा पाप्मानं भ्रातृव्यं भावयति य
एवं विद्वानग्निमुपतिष्ठते, उभे रुचौ पत्ते नमस्ते रुचे, मयि रुचं धा, इति शान्तमेवं रुचमा-
त्मन् धत्ते, तेजस्वी ब्रह्मवर्चसी भवति, चित्रावसो स्वस्ति ते पारमशीये,—ति रात्रिर्वै चित्रावसु,
—रहर्वामसु,—रग्निर्वै रात्रि,—रसा आदित्योऽह,—रेते वै भक्षे, ते इद्धे, त्रिराह, त्रिसत्या हि
देवा, रोचते ह वा अस्य यज्ञो वा भद्रं वा य एवं वेदा,—ऽम्भः स्था,—ऽम्भो वो भक्षीये,—
त्यम्भो ३ह्येता, महः स्थ, महो वो भक्षीये,—ति महो ३ह्येता, ऊर्जः स्थो,—र्जं वो भक्षीये,
—त्यूर्जो ३ह्येता, रायस्पोषः स्थ, रायस्पोषं वो भक्षीये,—ति रायस्पोषो ३ह्येता, रेवती
रेमध्वमस्मिन् योना अस्मिन् गोष्ठे, इति स्व एवैना योनौ स्वे गोष्ठे संवेशयत्य,—यं वो
बन्धु,—रिती मोपगात, बहीर्भवत, मा मा हासिष्टे,—त्याशिषमेवाशास्ते, वत्समालभते,
वत्सनिकान्ता हि पशव, एष वै सहस्रपोषस्येशे, पुष्यति सहस्रं, न सहस्राद् व्यपद्यते य
एवं वेद, संहितासि विश्व,—रूपेति रूपेण रूपेण ३ह्येषा संहिता, रूपेणैवैना समर्ध-
यति, नोमासामप्रदी,—निमित्रमाभिरकृतो,—ते हि यदा मित्रस्य नाम गृह्णाति मित्रमेवैनेन
कुरुते ॥९॥ ५०
सप्त वै बन्धुमतीरिष्टका अग्नौ चित्या उपधीयन्ते, ता वै ता अमुष्मा एव लोकाय, सप्त
ग्राम्या इष्टका,—स्ता अत्रोपधेया, गौश्चाश्वश्चाजश्च गर्द३भोऽजा चाविश्च पुरुषो, यद्धामाल-
भते गवैव चिता भवन्त्य,—थो आलभ्य एवोपधीयन्ते, पराङ् वा एष छन्दोभिः स्वर्गं लोक-
मन्यन्यदन्वच्छन्दः समारोह,—मुपत्वाग्ने दिवे दिवा, इति यदेतेन गायत्रेण तृचेनोपतिष्ठत,
इयं वै गाय३,—त्र्यस्यामेव प्रतितिष्ठत्य,—ग्ने त्वं नो अन्तमा, इत्येषा वा अग्नेस्तनूः प्रिया
तनूरुरु३ध्या, तामेव प्रैति, नैनमभिदासन्त्स्तृणुते, चतसृभिर्द्विपदाभिरुपतिष्ठते, चतुष्पादो
वै पशवो, द्विपाद् यजमानो, गृहा गार्हपत्यो, गृहेषु चैव पशुषु च प्रतितिष्ठ,—त्यूर्जा वः
पश्या,—म्यूर्जा मा पश्यते,—त्यूर्जैनाः पश्यत्य,—र्जैनं पश्यन्ति, रय्या वः पश्यामि, रय्या

[१०] मै. १,५,३ । तै. १,५,८ । काठ. ७,७–८ । वा. ३,२२,२५ । काण्व. ३,३०,३३ । [उप त्वाग्ने…एमसि० । ऋ. १,१,७ सा. १४ । अग्ने त्वं नो…बरूथ्यः । ऋ. ५,२४,१; सा. ४४८; ११०७]

मा पश्यते,—ति रय्यैनाः पश्यति, रय्यैनं पश्यन्ति ॥ ५१
संपश्यामि प्रजा अहमिडप्रजसो मानवीः । सर्वा भवन्तु नो गृहे ॥ ५२
इत्यैडीश्च वा इमाः प्रजा मानवीश्च, ता एवावारुन्द्ध, ता आद्या अकुर्त,—डाः स्थ मधुकृता,
इतीडा ३ह्येता मधुकृतः, स्योना माविशतेरमदा, इतीरमदो ३ह्येता, भुवनमसि सहस्रपोष-
पुषी,—ति भुवनं ३ह्येतत् सहस्रपोषपुषि, तस्य नो रास्व, तस्य ते भक्तिवानो भूयास्म,—
त्याशिषमेवाशास्ता, इडासि व्रतभृदि,—तीडा ३ह्येषा व्रतभृत्, त्वयि व्रतं, व्रतभृदसी,—ति
व्रतभृ३द्ध्येषा ॥१०॥ ५३
महि त्रीणामवोऽस्त्वि,—ति प्राजापत्येन तृचेनोपतिष्ठते, प्राजापत्या वा इमाः प्रजा,—स्ता
एवावारुन्द्ध, ता आद्या अकृता,—ऽथो प्रजापतिमेवोपैति, प्रजापता एव देवतासु प्रतितिष्ठति,
सोमानं स्वरण,—मिति ब्राह्मणस्पत्ययोपतिष्ठते, ब्रह्मणि प्रतितिष्ठत्य,—थो ब्रह्मवर्चसमेवावरुन्द्धे,
यो वै ब्रह्मणि प्रतिष्ठितेन स्पर्धते पूर्वोऽस्मात् पद्यत, उभयीर्वा अग्निहोत्रिणो देवता आशंसन्ते
याभ्यश्च जुहोति याभ्यश्च न, मित्रस्य चर्षणीधृता, इति मैत्र्योपतिष्ठत, उभयत एवैतया
मित्रमकृतेतश्चामुतश्च, कदा च न स्तरीरसी,—त्यैन्द्रीभ्यां बृहतीभ्यामुपतिष्ठत, ऐन्द्रा वै
पशव,—स्तानेवावारुन्द्ध, तानाद्यानकृत, परि ते दूडभो रथा, इत्यसौ वा आदित्यो दूडभो
रथ, एष वा इमा उभौ लोकौ समीयते, सर्वमेवैतया परिगृह्णाति, निम्रदोऽसि, ३न्यहं
तं मृध्यासं यो अस्मान् द्वेष्टि यं च वयं द्विष्म, इति पार्ष्ण्यावगृह्णीयाद्यदि पापीयसा स्पर्धेता,—
ऽभिभूरस्य,—३म्यहं तं भूयासं यो अस्मान् द्वेष्टि यं च वयं द्विष्म, इति दक्षिणतः पदोऽवगृ-
ह्णीयाद्यदि सदृशेन स्पर्धेत, प्रभूरसि, प्राहं तमतिभूयासं यो अस्मान् द्वेष्टि यं च वयं द्विष्म,
इति प्रपदेनावगृह्णीयाद्यदि श्रेयसा स्पर्धेत, सर्वानेवैनानभिभवति, सर्वानतिभवति, सर्वानं-
तिक्रामति, पूषा मा पथिपाः पात्वि,—तीयमेव, पूषा मा पशुपाः पात्वि,—त्यन्तरिक्षमेव,
पूषा माधिपाः पात्वि,—त्यसा एवेमानेव लोकाननुपासर,—देभ्यो लोकेभ्य आत्मानं परिधत्तेऽहिं-
साये, प्राची दिगग्निर्देवते,—ति तनूपानामेव दिक्षु निधत्ते, ऽथ येन स्पर्धते येन वा व्यभि-
चरते स एता एव देवता ऋत्वा पूर्वः पराभवति, सप्त वै पुरुषे महिमान,—स्ते वा एनेनेड्या,
—स्ते वै ते सप्तऋषय एव, प्राणा वै सप्तऋषयः, प्राणान् वा एतदीट्टा, ईट्टे ह वै स्वान्

[११] मै. १,५,४ । तै. १,५,८ । काठ. ७,९ । वा. ३,३१,२८, ११,६१; ३,३४,३६; ८,१; ३३,२७; ६,११, १०, १९; ३५,११, ३६,२३, ३८,२३ । काण्व. ३,३९,३६; १२,६४; ३,४४,४२; ८,१; ३२,२७, ६,३१, २२,४; ३५,४५; ३६,२३; ३८,२३ । [महि त्रीणामवो० । ऋ. १०,१८५,१ । मित्रस्य चर्षणी…स्तमम् । ऋ. ३,५९,६]

प्राणान्, वृङ्क्ते भ्रातृव्यस्य प्राणान्, नैनमभिदासन्त्स्तृणुते य एवं वेद, धर्मो मा धर्मणः
पातु, विधर्मो मा विधर्मणः पात्वा,—ऽयुश्च प्रायुश्च चक्षुश्च विचक्षुश्च प्राङ् चापाङ् चोरुकं,
इत्ययं वा उरुकं, एष विभजति, तद्यदेष भजति तदेतस्मिन्नेव पुनराभजत्य,—ग्ने गृहपते-
ऽग्निं समिन्धे यजमान, एतद्वै यजमानस्य स्वं यदग्नि,—रेतदग्नेर्यजमान, आयतनमिव
वा एतत् क्रियते, ज्योतिषे तन्तवे त्वे,—त्यन्तराग्नी उपविश्य वदे,—द्यामेव पुरं आशिषमाशास्ते
या पश्चात् तामात्मन् धत्ते ॥११॥ ५४
ददन्मा, इति वै दीयते, सदुर्दि वा एष ददाति योऽग्निहोत्रं जुहोति, यद्यन् कामयेत
तत् तदग्निहो३त्रग्निं याचे,—दुप हैनं तन्नमति, तदाहु,—ऋच्छति वा एष देवान् य एनान्
त्सदुर्दि याचतीति, तस्मात् तर्हि नोपस्थेयो, यमो वा अम्रियत, ते देवा यम्या यममपाब्रुवं,—
स्ता यद्यपृच्छन्त्साब्रवीद,—द्यामृतेति, तेऽब्रुवन्, न वा इयमिममित्थं मृष्यते, रात्रीं सृजा-
महा, इत्यहर्वाव तर्ह्यासीन्न रात्रि,—स्ते देवा रात्रिमसृजन्त, ततः श्वस्तनमभवत्, ततः सा तम-
मृष्यत, तस्मादाहु,—रहोरात्राणि वाव यमं मर्षयन्तीति, सा वै रात्रिः सृष्टा पशूनभिसममिलत्,
ते देवाश्छन्दोभिरेव पशूनन्वैच्छं,—श्छन्दोभिरेनान् पुनरुपाह्वयन्त, यदुपतिष्ठते छन्दोभिर्वा
एतत् पशूननुपश्यति, छन्दोभिरेनान् पुनरुपह्वयते, ऽथो आहु,—र्वरुणो वै स तद् रात्रिर्भूत्वा
पशूनग्रसतेति, ते देवाश्छन्दोभिरेव वरुणात् पशून् प्रामुञ्चं,—श्छन्दोभिरेनान् पुनरुपाह्वयन्त यदुप-
तिष्ठते छन्दोभिर्वा एतद् वरुणात् पशून् प्रमुञ्चति छन्दोभिरेनान् पुनरुपह्वयते, यज्ञो यज्ञो वै समृच्छते,
ऽशाकम्भविष्टो मन्यन्ते, सोम एव समृच्छता, इत्यग्नीषोमीयायाः पुरस्ताद्धविष्यस्य चतस्रा ऋचो
वदे,—दग्नेर्वस्य पुरोडाशस्य द्वे याज्यानुवाक्ये कुर्या,—द्देतेनैव हवींष्यासन्नान्यभिमृशेद्,
वृ३हत्केऽन्यस्य यज्ञो नास्मान्यो यज्ञं वृङ्क्ते, सयज्ञो भवत्ययज्ञा इतरः ॥१२॥ ५५
अग्निं वा एते चित्यं चिन्वते य आहिताग्नयो दर्शपूर्णमासिन,—स्तेषां वा अहोरात्राण्येवेष्टका
उपधीयन्ते, यत्र पञ्च रात्रीः संहिता वसेत् तज्जुहुयात्, पञ्च रात्रयः पञ्चाहानि सा दशेन्
संपद्यते, तदेव कर्तवा, अयुते तद्, दशस्तेव रात्रिष्वन्तमं होत३व्यं, तथा यदं क्रियते,
न सर्वेषु युक्तेषु होतव्यं, वास्तौ जुहुयाद्, ऽयुक्तेष्व,—यतं क्रियते, सर्वाण्यन्यानि

[१२] तै. १,५,९ । काठ. ७,१० । कपि. ५,६ ।
[१३] तै. ३,४,१० । मा. श्रौ. १,६,४ । [अमीवहा…एधि नः० । ऋ. ७,५५,१ । वास्तोष्पते प्रति…चतुष्पदे० । ऋ. ७,५४,१]

युक्तानि स्युं,—रग्निष्ठस्य दक्षिणो युक्तः स्यात्, सव्यस्य योक्त्रं परिहृत,—मथ जुहुया,—न्न वास्तौ
जुहोति, यदमुत्क्रियते, तन्न संस्र्युं, सर्वेष्वेव युक्तेषु होतव्यं, वास्तोष्पत्यं ३ह्येतं,—
न्न हीनमन्वाहर्तवै, रुद्राय हि तद्धीयते, यद्धीनमन्वाहरेयू रुद्रं भूतमन्वाहरेयु,—र्यद्यनुवाहः
स्यात् पूर्वं तं प्रवहेयुरप वोद्धरेयु,—र्यद्धीयेत हीयेतैव तं,—दथ जुहुयात् ॥ ५६
अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः ॥ ५७
वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ १३ ॥ ५८
पशून्मे शंस्य पाहि, तान्मे गोपायास्माकं पुनरागमात् ॥ अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणाः
सहस्रमपानां,—स्त्वं साहस्रस्य राय ईशिषे, तस्मै ते विधेम वाजाय ॥ प्रजां मे नर्य पाहि,
तां मे गोपायास्माकं पुनरागमा,—दग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासं, सुगृहप-
तिस्त्वं मया गृहपतिना भूया, अन्नं मे बुध्य पाहि, तन्मे गोपायास्माकं पुनरागमात् ॥५९-६१
इमान् मे मित्रावरुणौ गृहान् गोपायतं युवम् ।
अविनष्टानविह्रुतान् पूषन्नानभिरक्षत्वास्माकं पुनरागमात् ॥ ६२
पशून्मे शंस्य पाहि, तान्मे गोपायास्माकं पुनरागमा,—दित्याहवनीयमुपतिष्ठत, आहव-
नीयायैव पशून् परिदाय प्रैत्य,—ग्ने सहस्राक्ष शतमूर्ध,—न्नित्ति सहस्राक्षो ३ह्येष शतमूर्धा, शतं
ते प्राणाः सहस्रमपानां, इति शतं ३ह्येतस्य प्राणाः सहस्रमपानां,—स्त्वं साहस्रस्य राय
ईशिषे, तस्मै ते विधेम वाजाये,—त्याशिषमेवाशास्ते ॥ प्रजां मे नर्य पाहि, तां मे गोपाया-
स्माकं पुनरागमा,—दिति गार्हपत्यमुपतिष्ठते, गार्हपत्यायैव प्रजां परिदाय प्रैत्य,—ग्ने गृहपते
सुगृहपतिरहं त्वया गृहपतिना भूयासं, सुगृहपतिस्त्वं मया गृहपतिना भूया, इत्यग्रहणी
संजीयतः, सर्वमायुरितो, नार्ति ३नीतो, ऽन्नं मे बुध्य पाहि, तन्मे गोपायास्माकं
पुनरागमा,—दिति दक्षिणाग्निमुपतिष्ठते, दक्षिणाग्नय एवान्नं परिदाय प्रैति ॥ ६३-६४
इमान् मे मित्रावरुणौ गृहान् गोपायतं युवम् ।
अविनष्टानविह्रुतान् पूषन्नानभिरक्षत्वास्माकं पुनरागमात् ॥ ६५
इत्यहोरात्रे वै मित्रावरुणौ, पशवः पूषा, ऽहोरात्राभ्यां चैव मित्रावरुणाभ्यां च गृहान्परिदाय
प्रैति ॥ अग्निं समाविदि ॥ इत्याह, भस्म त्वा उपतिष्ठते ॥ पशून्मे शंस्याजुगुप,—स्तान्मे

[१४] काठ. ७,३,११ । कपि. ६,१ । वा. ३,३७; १७,७१; २,२७ । काण्व. ३,४६; १८,७१; २,४९ । मा. श्रौ. १,६,३ ।

पुनर्देहि ॥ इत्याहवनीयं पुनरेत्योपतिष्ठत, आहवनीयेनैव पशून्गुप्तानात्मन्धत्ते ॥ अग्ने सहस्राक्ष
शतमूर्धञ्छतं ते प्राणाः सहस्रमपाना,—स्त्वꣳ साहस्रस्य रायं ईशिषे, तस्मै ते विधेम वाजाय ॥
प्रजां मे नर्याजुगुप,—स्तां मे पुनर्देहि ॥ इति गार्हपत्यं पुनरेत्योपतिष्ठते, गार्हपत्येनैव प्रजां
गुप्तामात्मन्धत्ते ॥ अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ, सुगृहपतिस्त्वं मया
गृहपतिना भूया, अन्नं मे बुध्न्याजुगुप,—स्तन्मे पुनर्देहि ॥ इति दक्षिणाग्निं पुनरेत्योपतिष्ठते,
दक्षिणाग्निनैवान्नं गुप्तमात्मन् धत्ते ॥ ६६–७५

इमान् मे मित्रावरुणौ गृहान् जुगुपतꣳ युवम् ।
अविनष्टानविहुतान् पूर्षानभ्यरक्षीदास्माकं पुनरागमात् ॥ ७६

इत्यहोरात्रे वै मित्रावरुणौ, पशवः पूषा, ऽहोरात्राभ्यां चैवं मित्रावरुणाभ्यां च गृहान्
गुप्तानात्मन् धत्ते ॥ १४ ॥ ७७ [४४८]

॥ इति प्रथमकाण्डे अग्न्युपस्थानं नाम पञ्चमः प्रपाठकः ॥५॥

अथ षष्ठः प्रपाठकः ।

आधानम् ।

प्र वो वाजा अभिद्यवो हविष्मन्तो घृताच्या । देवान् जिगाति सुम्नयुः ॥ १
उप त्वा जुह्वो मम घृताचीर्यन्तु हर्यत । अग्ने हव्या जुषस्व नः ॥ २
उदग्ने तव तद् घृतादर्ची रोचत आहुतम् । निꣳसानं जुह्वो मुखे ॥ ३
प्रजा अग्ने सꣳवासयेहाशाश्च पशुभिः सह । राष्ट्राण्यस्मिन् धेहि यान्यासन्त्सवितुः सवे ॥४
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम् ॥ ५
आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ ६
त्रिꣳशद्धामा विराजति वाक् पतङ्गाय हूयते । व्यख्यन्महिषो दिवम् ॥ ७
अन्तश्चरत्यर्णवे अस्य प्राणादपानतः । प्रति वाꣳसरो अहभिः ॥ ८

[१] तै. १,५,३; ५,७,९ । काठ० ७,१२,१३ । कपि० ६,२,४; ७,२ । तै. ब्रा. १,२,१,१३,१६; १,१,७,१; १,१,४,८ । वा. ३,४,१४,६,८,७, १३,३४,१ (प्र. पा.); ३,५; १९,३८; ३५,१६ (प्र. पा.) । काण्व. ३,४,२०,६,८,७; १४,३६,१ (प्र. पा); ३,५; ८,१९; २१,४०; २९,३७; ३५,४८ (प्र. पा.) । मा. श्रौ. १,५,१–३ । [प्र वो वाजा० । ऋ. ३,२७,१] [आयं गौ० । ऋ. १०,१८९,१ । अथर्व. ६,३१,१; २०,४८,४ । सा. ६३० । त्रिꣳशद्धामा० । ऋ. १०,१८९,३ । अथर्व. ६,३१,३; २०,४८,६ । सा. ६३१ । अन्तश्चरत्य० । ऋ. १०,१८९,२ । अथर्व. ६,३१,२; २०,४८,५ । सा. ६३२ ।]

इतो जज्ञे प्रथमꣳ स्वाद्योनेरधि जातवेदाः ।
स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा च देवेभ्यो हव्या वहतु प्रजानन् ॥ ९
यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्यं आविवेश ।
तमात्मनि परिगृह्णीमसीह नेदेषो अस्मानवहाय परायत् ॥ १०

दोह्या च ते दुग्धभृच्चोर्वरी, तं ते भागधेयं प्रयच्छामि, ताभ्यां त्वादधे, घर्मः शिर,—स्त्वं
दुर्यमग्निः संप्रियः पशुभिर्भव, पुरीषमसि, यत् ते शुक्र शुक्रं ज्योतिस्तेन रुचा रुचमश्नीथाः॥
११

मयि गृह्णाम्यहमग्रे अग्निꣳसह प्रजया वर्चसा धनेन ।
मयि क्षत्रं मयि रायो दधामि मदेम शतहिमाः सुवीराः ॥ १२

भूर्भुवो, ऽङ्गिरसां त्वा देवानाꣳ व्रतेनादधे, ऽग्नेष्ट्वा देवस्य व्रतेनादधा, इन्द्रस्य त्वा
मरुत्वतो व्रतेनादधे, मनोष्ट्वा ग्रामण्यो व्रतेनादधे ॥ १३

आच्छेदि त्वा छन्दो दधे द्यौर्महासि भूमिर्भूना ।
तस्यास्ते देव्यदित उपस्थेऽन्नादमग्निमन्नपत्यायादधे ॥ १४
अग्न आयूꣳषि पवसे, ऽग्निर्ऋषिरि,—ग्ने पवस्व ॥१॥ १५

या वाजिन्नग्नेः पवमाना प्रिया तनूस्तामावह, या वाजिन्नग्नेः पावका प्रिया तनूस्तामावह,
या वाजिन्नग्नेः शुचिः प्रिया तनूस्तामावह ॥ १६

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य ते पक्षा हरिणस्य बाहू उपस्तुत्यं जनिम तत् ते अर्वन् ॥ १७

ओजसे बलाय त्वोद्यच्छे वृष्णे शुष्माय, सपत्नतूरसि वृत्रतूः ॥ १८

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह ।
विश्वा आशा दीद्यद्विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥ १९

[१] मै. १,६,७; २,८,१२ । तै. ४,२,८,२; ३,५,११,१; १,८,१६,१; ४,६,५,५; ४,४,११ । काठ. ७,१३–१४, ४०,७; ३९,१ । कपि. ६,३–४; ७,२ । वा. ११,८३; २९,१२; १७,६६; ३४,२५; १७,७९,८९–९१; १०,२७; २०,२; ३४,५३,५७; १३,२५; १४,६,१५,१६,२७; १५,५७ । काण्व. १२, ८४; ३१,२४, १८,६६,७९; ३३,९; १९,३–५; ११,३७; २१,९३, ३३,४१.४५; १४,२६; १५,५,१६,३१; १६,७९ । तै. ब्रा. १,१,७,१–३ । मा. श्रौ. १,५,४–५ । [यदक्रन्दः प्रथमं० । ऋ. १,१६३,१ । इडा (ळा) यास्त्वा पदे० । ऋ. ३,२९,४ । समुद्रादूर्मि०...आततान (आविवेश) । ऋ. ४,५८,१–३ । निषसाद धृत० । ऋ. १,२५,१० । उत नोऽहिर्बुध्न्यः । ऋ. ६,५०,१४ । प्र नूनं ब्रह्मण० । ऋ. १,४०,५]

अभ्यस्थाꣳ विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह ।
ब्राह्मणो मनुष्याणां, ग्रीष्मे राज३न्यस्यादध्याद्, ग्रीष्मे वा इन्द्रो वृत्रमहन्, वृत्रं खलु वै राज३-
न्यो बुभूषन् जिघाꣳसति, शरदि वैश्यस्यादध्या,—दन्नꣳ वै शर,—दन्नेन वैश्यो भद्रो भवत्य,
—न्नाद्यमस्मा अवरुन्द्ध, यद्यन्यस्मिन्नृता आदधीत यदि वा अस्मै स एक ऋतुः शिवः स्याद-
थास्मा इतरेऽशिवा दुर्योणा भवेयु,—स्तद्यस्यैतत्सैन् फल्गुनीपूर्णमास एव तस्यादध्यात्, तदस्मै
सर्व ऋतवः शिवा भवन्ति, सर्व एनमृतवो जिन्वन्ति, सꣳवत्सरस्य वा एतदा३स्यꣳ यत्
फल्गुनीपूर्णमा३स्यमह,—र्यत् फल्गुनीपूर्णमा३स्यमहरादध्यात् सꣳवत्सरस्यैनमास्यन्नपिदध्याद्,
द्व्यहे वा पुरेकाहे वाधेय,—स्तद् द्वितीयस्य ऋतोरभिगृह्णाति, नैनꣳ सꣳवत्सरस्यास्यन्नपिदधाति,
तद्यद् द्वितीयस्य ऋतोरभिगृह्णाति द्वितीयमेव सपत्नस्य भ्रातृव्यस्येन्द्रियं पशून् क्षेत्रꣳ वृञ्जान एति,
कृत्तिकासु ब्राह्मणस्यादध्या,—दाग्नेयीः कृत्तिका, आग्नेयो ब्राह्मणः, स्व एवैनꣳ योनौ स्वेऽहन्ना-
धत्ते, प्रजापतेर्वा एतच्छिरो यत् कृत्तिका, अग्निरास्यꣳ, शीर्ष्णान्नमद्यते, ऽन्नाद्यमस्मा अवरुन्धे,
सप्त कृत्तिकाः, सप्त शीर्षन् प्राणाः, प्राणानस्मिन् दधाति, रोहिण्यां पशुकामस्यादध्यात्,
सोमस्य वा एतन्नक्षत्रꣳ यद्रोहिणी, सोमो रेतोधा, रेतोऽस्मिन् दधात्यृ,—क्षा वा इयमग्र

[९] काठ. ८,१ । कपि. ६,६ । तै. ब्रा. १,१,२ । मा. श्रौ. १,५,१ ।

आसीत्, तस्यां देवा रोहिण्याꣳ वीरुधोऽरोहयꣳ,—स्तद्यथेमा अस्याꣳ वीरुधो रूढा एवमस्मिन्
पशवो रोहन्ति य एवꣳ विद्वान् रोहिण्यामग्निमाधत्ते, रोहिण्याꣳ स्वर्गकामस्यादध्याद्,
रोहिण्याꣳ वै देवाः स्वरायन्, त्स्वरेवैति, कालकाञ्जा वा असुरा इष्टका अचिन्वत, दिवमा-
रोक्ष्याम, इति तानिन्द्रो ब्राह्मणो ब्रुवाण उपैत्, स एतामिष्टकामप्युपाधत्त, प्रथमा इव
दिवमाक्रमन्ता,—ऽथ स तामावृहत्, तेऽसुराः पापीयाꣳसो भवन्तोऽपाभ्रꣳशन्त, या उत्तमा
आस्तां तौ युमश्वा अभवताꣳ, येऽघुरे त ऊर्णावाभयो, यां तामिष्टकामावृहत् सा चित्राभवद्,
यः सपत्नवान् भ्रातृव्यवान् वा स्यात् स चित्रायामग्निमादधीत, तद्यथैतस्यामावृढायामसुराः
पापीयाꣳसो भवन्तोऽपाभ्रꣳशन्तैवमस्य सपत्नो भ्रातृव्यः पापीयान्भवन्नपभ्रꣳशते य एवꣳ विद्वाꣳ-
श्चित्रायामग्निमाधत्ते, यः कामयेत, भगवन्नादः स्यामिति, स पूर्वासु फल्गुनीष्वग्निमादधीत,
भगस्य वा एतदहर्यत् पूर्वाः फल्गुनी,—र्भगवन्नादो भवत्य,—थ यः कामयेत, दानकामा मे
प्रजाः स्युरिति, स उत्तरासु फल्गुनीष्वग्निमादधीता,—ऽर्यम्णो वा एतदहर्यदुत्तराः फल्गुनी,—
र्दानमर्यमा, दानकामा अस्मै प्रजा भवन्ति, तासु राज३न्यस्यादध्याद्, दानꣳ ह्येष प्रजानामु-
पजीवति, दानमर्यमा, दानकामा अस्मै प्रजा भवन्ति, प्रजापतेर्वा एतौ स्तनौ यत्पौर्णमासी
चामावास्या च, यत्पौर्णमास्याꣳ वामावास्यायाꣳ वाग्निमाधत्ते प्रजापतिमेव प्रत्तं दुहे, देवा-
नाꣳ वा एते सदोहविर्धाने यत्पौर्णमासी चामावास्या च, यत्पौर्णमास्याꣳ वामावास्यायाꣳ ४९
वाग्निमाधत्त उभे पुण्याहे उभे यज्ञिये ॥ ९ ॥

न पुरा सूर्यस्योदितोर्मन्थितवा, असु३र्या विदेवा आधीयत, उद्यत्सु रश्मिषु मन्थ्य,—स्तत्स-
देवः सेन्द्र उभयोरह्नो रूपं आधीयते, चतुर्विꣳशत्या प्रक्रमेष्वाधेय,—श्चतुर्विꣳशत्यक्षरा वै गाय-
त्री, गायत्रमग्नेश्छन्दः, स्व एवैनꣳ योनौ स्वे छन्दस्याधत्ते, तद्यस्यैतत्सैदपरिमित एव तस्यादु-
ध्यात्, क्षेष्णु वै परिमित,—मपरिमितमेवास्मै जीवनमवरुन्द्धे, ऽग्निर्वै सृष्टः प्रजापतेरध्युदक्रा-
मत्, स प्रजापतिरबिभे,—दुद एवासा अभूदिदमहमिति, तस्मिन्ननुनिष्क्रम्याजुहो,—देनर्हि खलु
वा एष सृज्यते यह्याधीयते, तदाहु,—र्म्णा एवानुद्रुत्याधाग्निहोत्रꣳ होत३व्यमिति, तन्नैव
कर्तवा, अयुतं तत् कुण्ड्याग्नीयं तद्यज्ञस्य क्रियते यद्योनिः परमवरं कुर्याद,—प्रजनिष्णुः स्या,—

[१०] काठ. ८,३ । कपि. ६,८ । बा. ३,१ । काण्व. ३,९-१० ।

द्वीꣳष्येव पूर्वाणि निरुप्याथ सायमग्निहोत्रं जुहुयात् ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ इति तत्सायं
ज्योतिषा रेतो मध्यतो दधाति ॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ इति प्रातस्तत्सायं ज्योतिषाꣳ
रेतो मध्यतो हितं ॥ प्रातः प्रजनयामक,—देवाश्च वा असुराश्च संꣳयत्ता आस,—न्नथेन्द्रोऽग्निमाधत्त,
ते देवा अबिभयु,—रिद एवासामग्निं गोपायमानोऽग्निहोत्रं गोपायमानो भविष्यति, न ना उपै-
ष्यत्य,—भि नो जेष्यन्तीति, तेऽब्रुवन्, यदेव त्वं किंच करवो यद्धनो यजिनो यद्विन्दासै तच्चे-
ऽग्निहोत्रं कुर्मो, ऽथेहीति, स वा ऐत्, तस्माद्राजन्यस्याग्निहोत्रमहोत३व्यꣳ, य३द्ध्येवैवꣳ किंच
करोति यद्धन्ति यजिनाति यद्विन्दते यदेनꣳ विश उपतिष्ठन्ते तद्राजन्यस्याग्निहोत्रꣳ होतव्यꣳ,
राजन्यस्याग्निहोत्रा३म् होत३व्या,—मिति मीमाꣳसन्ते, यद्धुत्वा न जुहुयाद्धि यज्ञं छिन्द्या,—
ज्जीयेत वा प्र वा मीयेत, पौर्णमासीममावास्याꣳ वा प्रति होत३व्य,—मयो अग्न्युपस्थानꣳ वा
चयित३व्य,—स्तेनास्य दर्शपूर्णमासौ संतता अविछिन्नौ भवतः ॥१०॥ ५०-५५

यं कामयेत, पशुमान्त्स्यादिति, यो बहुपुष्टस्तस्य गृहादग्निमाहरेयु,—र्यथा वा एवꣳ सृ-
ज्यमानं पशवोऽन्वसृज्यन्तैवमेनमाह्रियमाणं पशवोऽन्वाय,—न्त्येष हि रुद्रो यदग्नि,—रथ यं कामये-
ता,—ऽन्नादः स्यादिति, तस्य भ्राष्ट्राद्दक्षिणाग्निमाहरेयु,—रेष वा अग्नीनामन्नादो, ऽन्नकरणं भ्रा-
ष्ट्र,—मन्नाद्यमस्मा अवरुन्द्धे, तदाहु,—र्यथा वृषलो निजः पुल्कुकश्चिकित्सेदेवꣳ स, इति स
मन्थ्य एव, स शꣳ यजमानाय भवति शं पशुभ्यो, यः सोमेनायक्ष्यमाणोऽग्निमादधीत न पुरा
सꣳवत्सराद्धवीꣳषि निर्वपेद्, रुद्रोऽस्य पशूनभिमानुकः स्या,—देते वै पशवो यद्व्रीहयश्च
यवाश्च, तेषां चतुःशरावमोदनं पक्त्वा ब्राह्मणेभ्यो जीवतण्डुलमिवोपहरेत्, तद्याभ्यो देवताभ्यो-
ऽग्निमाधत्ते यत्ताभ्यो न जुहुयात्ताभ्या आवृश्चेता,—ऽनुध्यायी क्षोधुकः स्यात्, ताभ्या आज्यस्य
होत३व्यं, तेन ताभ्यो नावृश्चते, ऽननुध्याय्यक्षोधुको भवति, सꣳवत्सरे हवीꣳषि निर्वपति,
तदस्य सꣳवत्सरान्तर्हितो रुद्रः पशून्न हिनस्ति, सꣳवत्सरमग्निहोत्रमहौषीत्, तत्तपोऽविदत्, स
सर्वेण साकꣳ स्वर्गं लोकꣳ समारुक्षत्, त्रिर्वा इदꣳ विराड् व्यक्रमत गार्हपत्यमाहवनीयꣳ सभ्यं,
तद्विराजमाप,—दन्नꣳ वै विरा,—डन्नꣳ वावैतदापन्, मध्याविदेवनं राजन्यस्य जुहुयाद्वारुण्य
ऋचा, वरुणो वै देवानाꣳ राजा, राज्यमस्मा अवरुन्द्धे, हिरण्यं निधाय जुहोत्य,—ग्निम-
त्येव जुहोत्यायतनवत्य,—न्धोऽध्वर्युः स्याद्यदनायतने जुहुयाच्, शतमस्मा अक्षान् प्रयच्छेद्,

[११] काठ. ८,७,११ । कपि. ७,३-४ ।

तान्निर्विनुयात्, प्रतायुर्वै पुरुषः प्रतवीर्यो, आयुरेव वीर्यमाप्नोति, गामस्य तदहः सभायां
दिव्येयुः,—स्तस्याः पञ्च षि न हि रस्य,—स्तां समासङ्क्या उपहरेत्, तया यदहीयात् तद्ब्राह्-
मणेभ्यो देयं, तद् संम्यमवरुन्द्धे ॥ ११ ॥ ५६

यस्या रात्र्याः प्रातरग्निमाधास्यमानः स्यात्ता रात्रीं चतुःशरावमोदनं पक्त्वा ब्राह्मणेभ्यो जीव-
तण्डुलमिवोपहरे,—ददितिर्वै प्रजाकामौदनमपचत्, सोच्छिष्टमाश्नात्, तस्या धाता चार्यमा चाजा-
येताम्, सापरमपचत्, सोच्छिष्टमाश्नात्, तस्या मित्रश्च वरुणश्चाजायेताम्, सापरमपचत्,
सोच्छिष्टमाश्नात्, तस्या अंशश्च भगश्चाजायेताम्, सापरमपचत्, सैक्षतो,—च्छिष्टं मेऽश्नत्यां
द्वौ द्वौ जायेते, इतो नूनं मे श्रेयः स्यादिति पुरस्तादश्नीयामिति, सा पुरस्तादश्नित्वोपाहरत्,
ता अन्तरेव गर्भः सन्ता अवदता,—मावमिदं भविष्यावो यदादित्या इति, तयोरादित्या निर्हन्ता-
रमैच्छन्,—स्तौ अंशश्च भगश्च निरहताम्, तस्मादेतौ यज्ञे न यजन्ते, ऽंशप्रासोऽंशस्य
भागधेयं, अन्नं भगोऽगच्छत्, तस्मादाहु,—र्भगो गन्तवेऽयु,—स्तत्र भगेन संगच्छता इति, स
या इन्द्र ऊर्ध्वं एव प्राणमुदश्रयत, मृदमितरमाण्डमवापयत, स वाव मार्ताण्डो यस्येमे मनुष्याः
प्रजा, सा वा अदितिरादित्याननुधावत,—दस्त्वेव म इदं, मा म इदं मोघं परापतदिति,
तऽब्रुव,—न्ययेषोऽस्माकमेव प्रजातं, न नोऽतिमन्याता, इति स वाव विवस्वानादित्यो यस्य
मनुश्च वैवस्वतो यमश्च, मनुरेवास्मिंल्लोके यमोऽमुष्मिं,—स्तेते वै देवयानान् पथो गोपायन्ति,
यदादित्यास्त इयक्षमाणं प्रतिनुदन्ते, यो वा एतेभ्योऽप्रोच्याग्निमाधत्ते तमेते स्वर्गाल्लोकात्प्रतिनु-
दन्ता, उच्छिष्टभागा वा आदित्या, यदुच्छिष्टे विवर्तयित्वा समिधमादधाति तदादित्येभ्योऽ-
न्वार्धेयं प्राह, नैनं स्वर्गाल्लोकात् प्रतिनुदन्ते, संवत्सरमुत्सृजेताग्निमाधास्यमानो, नास्याग्निं
गृहादरेयु,—र्नान्यत आहरेयुः, संवत्सरे वृद्धा गर्भाः प्रजायन्ते, प्रजातमेनं वृद्धमाधत्ते,
द्वादश रात्रीरुत्सृजेत, द्वादश वै रात्रयः संवत्सरस्य प्रतिमा, संवत्सरे वृद्धा गर्भाः प्रजा-
यन्ते, प्रजातमेनं वृद्धमाधत्ते, तिस्र उत्सृजेत, त्रयो वा इमे लोका, इमानेव लोकानाप्तो-
मोत्यै,—काममुत्सृजेतं,—को वै प्रजापतिः प्रजापतिमेवाप्नोति, पुरूरवा वा ऐड उर्वशीमविन्दत
देवीं, तस्या आयुरजायत, स देवान्स्वर्गं लोकं यतोऽन्वैद्, तेऽब्रुवं,—स्त्वदयं देवा
इमः, ऽकायं मनुष्यो गमिष्यतीति, सोऽब्रवीद्, बहवो वै मे समामा,—स्ते मा वक्ष्यन्ति,
किमयं देव्याः पुत्रो देवेभ्यो मातुर्भ्रातृभ्य आहार्षी,—दस्त्वेव मे किंचिदिति, तस्मा अग्निर्यज्ञियो

[११] काठ. ७,१५; ८,१०। कपि. ६,५; ७,६। तै. ब्रा. १,१,६।

तमन्वं प्रायच्छत्, तामुत्सङ्गेऽवधायाहरत्, तामुखायामवादधात्, सोऽश्वत्थ आरोहोऽभवद्,
योखा सा शमी, तस्मादेतौ यज्ञावचरौ, पुण्यजन्मानो ह्य,—मित्रं वरुणं ब्रह्मचर्यमागच्छत्
प्रवसन्तं, तस्य जायां समभवत्, तं पुरस्तादायन्तं प्रतिक्षाय प्रत्यङ् निरद्रवत्, सोऽवेत्,
सर्वं वा इन्द्रियं नृम्णं रेतो निर्लिप्य हरतीति, तदनुपराहाय निरलुम्पद्, यद्रेता आसीत्सोऽश्वत्थ
आरोहोऽभवद्, यदुल्बं सा शमी, तस्मादेतौ यज्ञावचरौ, पुण्यजन्मानौ हि, प्रजापतिः
प्रजाः सृष्ट्वा रिरिचानोऽमन्यत, सोऽश्वो भूत्वा संवत्सरं न्यङ् भूम्याः शिरः प्रतिनिधाया-
तिष्ठत्, तस्याश्वत्थो मूर्ध्न उदभिनत्, तदश्वत्थस्याश्वत्थत्वं, तस्मादेष यज्ञावचरः, प्राजा-
पत्यो हि ॥१२॥ ५७

मनुर्वै प्रजाकामोऽग्निमाधास्यमानो देवताये देवताया अजुहोत्, ततो मित्रावरुणयोराहुत्या
प्रफर्व्युदतिष्ठत्, तस्या घृतं पदोरक्षरत्, सा मित्रावरुणा ऐत्, ता अब्रूता,—माहुत्या वै
त्वमावयोरजनिष्ठा, मनोस्त्वं त्वमसि, तं परेहीति, सा मनुमैत्, सोऽब्रवी,—दसुरा वा इमे
पुण्यमन्या अग्निमादधते, तान् परेहीति, सा परेत्, तेऽमुमग्ना आदधताथेममथेमं, सा पुन-
रैत्, तामपृच्छत्, किमभ्यगन्निति, साब्रवी,—दमुमेवाग्ना आधिषताथेममथेममिति, सोऽब्रवीद्,
सकृद्वावासुराः श्रियोऽन्तमगुः, परा तु भविष्यन्तीति, सोऽब्रवीद्, देवा वा इमे पुण्य-
मन्या अग्निमादधते, तान् परेहीति, सा परैत्, त इममग्ना आदधताथामुमथेमं, सा पुनरैत्,
तामपृच्छत्, किमभ्यगन्निति, साब्रवी,—दिममेवाग्ना आधिषताथामुमथेममिति, सोऽब्रवीत्,
सकृद्वाव देवाः सर्वेण साकं स्वर्गं लोकं समारुक्ष,—न्नितः प्रदानात्तु यज्ञमुपजीविष्यन्तीति,
यः सर्ववेदसं दास्यंन्त्स्यात्स इममग्ना आदधीताथामुमथेमं, तद्यथैव देवाः सर्वेण साकं
स्वर्गं लोकं समारोहन्नेवमेव यजमानः सर्वेण साकं स्वर्गं लोकं समारोहति य एवं विद्वानग्नि-
माधत्ते,—सोऽब्रवी,—दपुयो वा इमे पुण्यमन्या अग्निमादधते, तान्परेहीति, सा परैत्, त
इममग्ना आदधताथेममथामुं, सा पुनरैत्, तामपृच्छत्, किमभ्यगन्निति, साब्रवी,—दि-
ममेवाग्ना आधिषता,—ऽथेममथामुमिति, सोऽब्रवी,—दहं वावाग्न्याधेयं विदांचकार, सर्वेषु
वा एषु लोकेष्वृध्युयः प्रत्यष्ठुरिति, प्रति प्रजया च पशुभिश्च तिष्ठति य एवं विद्वानग्निमाधत्ते,
यदमुमाधायेममादध्यादप तदादध्याद्, यद्वावेममाधायामुमादध्यादप तदादध्यात्, तदिममेवाधा-
यथेममथामुं, तथा समृद्धा आधीयते, प्राचीनप्रवण आधेय,—स्तथा समृद्धा आधीयते,

[१३] काठ. ८,४। कपि. ६,९। तै. ब्रा. १,१,४।

प्राचीनं मध्यमाहवनीयादाधेय,—स्तथा समृद्धा आधीयते, या वै सा प्रफर्व्यासीत् सा गौरभवत्
सेडा सा मानवी घृतपदी मैत्रावरुणी ॥१३॥ ५८ [५०६]

॥ इति प्रथमकाण्डे आधानं नाम षष्ठः प्रपाठकः ॥६॥

अथ सप्तमः प्रपाठकः ।

पुनराधानम् ।

यत्त्वा क्रुद्धः परोवप मन्युना सुमनस्तर । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि ॥ १
यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवः पुनराभरन् ॥ २
यत्ते भामेन विचकर्नानीमानो हृदस्परि । पुनस्तदिन्द्रश्चाग्निश्च वसवः समचीक्लृपन् ॥ ३
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ अग्ने ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ ४
अपाविश्वत्तन्तवो ये वितन्वत इमं च यज्ञं सुधया ददन्ते ।
तेभिश्छिद्रमपिदध्मो यदत्र स्वाहा यज्ञो अप्येतु देवान् ॥ ५
मनो ज्योतिर्जुषतामाज्यस्य विच्छिन्नं यज्ञं समिमं दधातु ।
इमं यज्ञं समितं तनुतां नो आ देवा यन्तु सुमनस्यमानाः ॥ ६
बृहस्पतिर्नो हविषा घृतेन विच्छिन्नं यज्ञं समिमं दधातु ।
या इष्टा उषसो याश्च याऽश्व्यास्ताः संदधामि मनसा घृतेन ॥ ७
अग्नेऽभ्यावर्तिन्नभि मा वर्तस्वायुषा वर्चसा प्रजया धनेन सन्या मेधया रय्या पोषेण ॥ ८
अग्ने अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः ।
तासां पोषस्य पोषेण पुनर्नो नष्टमाकृधि पुनर्नो रयिमाकृधि ॥ ९
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥ १०
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ ११
सलिलः सलिगः संगृरस्ते न आदित्या हविषो जुषाणा व्यन्तु स्वाहा, केतः सुकेतः संकेतस्ते
न आदित्या हविषो जुषाणा व्यन्तु स्वाहा, देवजते विवस्वन्नादित्य ते नो देवाः सत्यां देवहूतिं
देवेष्वासुवध्व,—मादित्येभ्यः स्वाहा ॥१॥ १२

[१] ऋ. १०,४,५। तै. १,५,३; १,५,१०; ४,२,१,२,३; ४,२,३,४। काठ. ८,१४; ३८,१२। कपि. ८,२। वा. १२,
४४; ८,६२; २,१३; १२,७-१०,४०,४१। काण्व. १२,८५; १३,४५; २,७६; १३,८-११,४१,४२। [यत्त्वा
क्रुद्ध० । अथर्व. १२,२,५। पुनस्त्वादित्या रुद्रा० । ऋ. १०,११६,८; अथर्व. १२,२,६]

अग्नेर्वै भागः पुनराधेयं,—मेतं वै भागं प्रेप्सन् व्यर्धयति, यद्यादधानो मन्येत, वि स्या
ऋध्यता, इत्युत्साद्य पुनरादधीत, यमेव भागं प्रेप्सन् व्यर्धयति तं प्राप्याधीयत्येवं, सर्वमे-
वाग्नेयं क्रियते, यत्किंच सर्वमेवाग्नये भागं प्रदाय सर्वामृद्धिमृध्नोति, न संभाराः संभृत्या, न
यजुः कर्तव्यं, इत्याहुः, संभृतसंभारो ह्येष कृतयजु,—स्तदाहुः, संभृत्या एव संभाराः,
कार्यं यजुरिति, पुनरुत्स्यूतं वासो देयं पुनर्णवो रथः पुनरुत्सृष्टोऽनड्वा,—नेतानि वै पुनरा-
धेयस्य रूपाणि, रूपाण्येवास्याप्त्वावरुन्द्धे, ऽग्निर्वा उत्सीदन्नप ओषधीरभ्युत्सीदति, दर्भा वा
आपा ओषधयो, यद्दर्भा उपोलपा भवन्त्यद्भ्य एवैनमोषधीभ्योऽध्याप्त्वावरुन्द्धे, देवा असु-
रैर्विजयमुपयन्तोऽग्नौ प्रियास्तन्वः संन्यदधत, यन्नो जयेयुरिमा अभ्युपधावेम, यद्यु जयेमेमा
अभ्युपावर्तेमहीति, ता देवा जित्वान्वैच्छन्, त्सर्वेषां नः सहेति, सोऽग्निरब्रवीद्, य एवं मा
मद्देवत्य आदधातै स एताभिस्तनूभिः संभवादिति, तं देवा आदधत, त एताभिस्तनूभिः
समभवन्, पशवो वै देवानां प्रियास्तन्वः, पशुभिरेव समभवं,—स्तद्य एवं विद्वान् पुनरा-
धेयमाधत्त एताभिरेवाग्नेस्तनूभिः संभवति, पशवो वै देवानां प्रियास्तन्वः, पशुभिरेव संभवति,
मनुः पुष्टिकामा आधत्त, स इमान् पोषानपुष्यत्, तेन ऋद्धं, त्वष्टा पशुकामा आधत्त, त
इमे त्वाष्ट्राः पशवः प्राजायन्त, तेन ऋद्धं, प्रजापतिः प्रजाकामा आधत्त, ता इमाः प्रजाः
प्राजापत्याः प्राजायन्त, तेन ऋद्धं, यो वै तमग्ना आधत्त स तेन वसुना समभवत्,
तत् पुनर्वसोः पुनर्वसुत्वं, तस्मात् पुनर्वसा आधेयः, पुनर्हि स तेन वसुना समभवद्, यो वै
तमाधत्ताभ्रौत्, स तस्मादनुराधास्वाधेया ऋद्ध्या, ऋध्नोत्येवा,—ऽथो मिथुनत्वाय ॥२॥ १३

अग्निर्वा उत्सीदन्त्संवत्सरमभ्युत्सीदति, सप्तदश सामिधेनीः कार्याः, पञ्च ऋतवो,
द्वादश मासा, एष संवत्सरः, संवत्सरादेवैनमध्याप्त्वावरुन्द्धे, तदाहुः, पञ्चदश
सामिधेनीः कार्या न सप्तदश,—त्येतद्वै संवत्सरस्य संक्रमणतम,—मेतेनाशिष्टमाप्यते, पञ्च-
दश सामिधेनीः, पञ्चदशार्धमासस्य रात्रय,—स्ताभिरेव ता आप्यन्ते, यावन्ति वै सामिधे-
नीनामक्षराणि तावन्ति संवत्सरस्याहानि, तैरेव तान्याप्यन्ते, ऽग्निर्वा उत्सीदन्त्संवत्सरम-
भ्युत्सीदति, पङ्क्ता ऋतवः संवत्सरे,—स्तस्मात् पङ्क्तिमत्कयः, संवत्सरो वा अग्निर्वैश्वानरो,
यत् पङ्क्तिमत्कयः संवत्सरादेवैनमध्याप्त्वावरुन्द्धे, ऽथ यदग्निर्बहुधा विह्रियत इमान् पोषान्

[२] तै. १,५,१-२। काठ. ८,१५। कपि. ८,३। मा. श्रौ. १,६,५।
[३] तै. १,५,२। काठ. ९,१। कपि. ८,४। मा. श्रौ. १,६,५।

पुपोष, तस्मादग्निरेतावतीर्विभक्तीरानशे नान्या देवता,—य यद् यक्षराः सतीश्चतुरक्षराः क्रियन्त,
आचतुरं हि पशवो द्वन्द्वं मिथुना, ऋतवो वै प्रयाजा, अङ्गमृतवो, यत् प्रयाजाननन्तरियाद-
ङ्गमन्तरियाद्, यज्ञमुखं वै प्रयाजा, यत् प्रयाजाननन्तरियाद्यज्ञमुखमन्तरियात्, तद्यस्यैतत्संस्यो-
परिष्टात् प्रयाजानां विभक्तीः कुर्याद्, वीर्यं वै प्रयाजा, वीर्यं विभक्तयो, वीर्याद्देवाधि
वषट्करोति, ताजग्वृद्धिमभिक्रामति, नानाग्नेयं क्रियते, ऽथ कस्मात्सह विभक्तयः प्रयाजैरिति,
संवत्सरं वै प्रयाजाः परीज्यन्ते, कस्मादाग्नेयं क्रियते, तस्मान्नानाग्नेयम् ॥३॥ १४

पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा । पुनर्नः पाह्यंहसः ॥ १५

इति पुरस्तात् प्रयाजानां जुहुयात् ॥ १६

सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि ॥ १७

इत्युपरिष्टादनुयाजानां जुहुया,—दूर्जा वा एष पशुभिरुत्सीदन्सहोत्सीदति, पुनरूर्जा निव-
र्तस्वे,—ति तदूर्जमेव पशून् पुनरवरुन्द्धे, ऽथो तानेव भागिनः करोत्य,—थो उभयत एव यज्ञ-
स्याशिष ऋध्नोति, नानाग्नेयं क्रियते, ऽथ कस्मादाज्यभागा इज्येते इति, चक्षुषी वा एते यज्ञस्य
यदाज्यभागौ, यदाज्यभागा अन्तरियाच्चक्षुषी यज्ञस्यान्तरियाद,—ग्न आयूंषि पवसा, इति
सोमस्य लोके कुर्याद्, यदाग्नेयी तेनाग्नेयी, यत् पावमानी तेन सौमी, नानाग्नेयं क्रियते, न
सोममन्तर्यन्त्य,—ग्निर्मूर्धा दिवः ककुदि,—ति प्रजाकामो वा पशुकामो वा सोमस्य लोके कुर्याद्,
यन्मिथुना तेन प्रजननवती, यद्रेतस्वती तेन सौमी, यज्ञेन वा एष व्यृध्यते यो ऽग्निमुत्साद-
यते, पाङ्क्तो यज्ञो, यत् पञ्चकपालो यज्ञमेव पुनरालभते, ऽष्टाकपालः कार्यो, गायत्रो
ह्यग्निर्गायत्रच्छन्दा, आग्नेयं वा एतत् क्रियते यद् पुनराधेयं, तस्मादष्टाकपाल,—स्तन्न सूक्ष्यं,
पञ्चकपाल एव कार्युः, पञ्चमाद्वा अध्यृतोः षष्ठ ऋतुरभवत्, समानमेतद्यत् पञ्चमश्च ऋतुः
षष्ठश्च, यत् पञ्चकपालः संवत्सरादेवैनमध्याप्त्वावरुन्द्धे, प्रजननं वा ऋतवो, ऽग्निः
प्रजनयिता, यत् पञ्चकपालः प्रजननादेवैनं प्रजनयिता प्रजनयति ॥४॥ १८

वीरहा वा एष देवानां यो ऽग्निमुत्सादयते, शतदायो वीरो, यदेताः शताक्षराः पङ्क्तयो
भवन्ति वीरं वा एतद्देवानामवदयते, ऽन्यस्मै वै कमाधेयमन्यस्मै पुनराधेयं, न वै तदाधेयेन

[४] मै. १,७,१ । तै. १,५,२ । काठ. ९,१-३ । कपि. ८,४-५ ।
[५] तै. १,५,२; ४,४ । काठ. ९,२-३ । कपि. ८,५-६ ।

स्पृणोति यस्मै कं पुनराधेयं, पुनराधेयेन वाव तत्स्पृणोति, जरा वै देवहितमायु,—रेतावतीर्हि
समा एति यदेताः शताक्षराः पङ्क्तयो भवन्ति, यावद्देवायुर्वा३यं तदाप्नोति, तत्स्पृणोति,
तदवरुन्द्धा, आयुषा वा एष वीर्येण व्यृध्यते यो ऽग्निमुत्सादयता, आयुर्वा३यं हिरण्यं, य-
द्धिरण्यं ददात्यायुषैवैनं वीर्येण समर्धयति, शतमानं भवति, शतायुर्वै पुरुषः शतवीर्या,
आयुरेव वीर्यमाप्नोत्या,—दित्या वा इत उत्तमाः स्वर्गं लोकमायं,—स्ते व्यतृष्यन्नि,—तः प्रदा-
नाद्धि देवा यज्ञमुपजीवन्ति, ते वा एवं पुनरादधत, त आर्ध्नुवन्ना,—दित्या वा अस्मिंल्लोके
ऋद्धा आदित्या अमुष्मिन्, पशवोऽस्मिन्नृतवोऽमुष्मिं,—स्तद्य एवं विद्वान् पुनराधेयमाधत्त
उभयोरेव लोकयोर्ऋध्नोत्यस्मिंश्चामुष्मिंश्च, सलिलः सलिगः सगरस्ते न आदित्या हविषो
जुषाणा व्यन्तु स्वाहा, केतः सुकेतः सकेतस्ते न आदित्या हविषो जुषाणा व्यन्तु स्वाहा,
देवजूते विवस्वन्नादित्य ते नो देवाः सत्यां देवहूतिं देवेष्वासुवध्वमादित्येभ्यः स्वाहे,—त्येतैर्वै ते तं
पुनरादधत, त आर्ध्नुवं,—स्तद्यदेतैः पुनराधत्तेऽथ अध्नोत्या,—दित्या हि पुनराधेयम् ॥५॥
१९ [५२५]

॥ इति प्रथमकाण्डे पुनराधानं नाम सप्तमः प्रपाठकः ॥७॥

अथाष्टमः प्रपाठकः ॥

अग्निहोत्र-ब्राह्मणम् ।

प्रजापतिः प्रजा असृजत, स वा अग्निमेवाग्रे मूर्धतोऽसृजत, स यतोऽग्निमसृजत तत् पर्यु-
मार्ट्, ततो लोहितमवाहरत्, तन्न्युमार्ट्, तत उदुम्बरः समभवत्, तस्मादुदुम्बरः प्राजापत्य,—
स्तस्माल्लोहितं फलं पच्यते, सोऽस्मात् सृष्टः पराङैद्भागधेयमिच्छमानः, स तदेव नाविन्दद्
प्रजापतिर्यदहोष्यत्, स स्वं चक्षुरादायाजुहोत् ॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ इति तद्वा अद-
श्चक्षुर्मन्यन्ते यदसा आदि३त्यो, ऽमुं वा एतदस्मिन् जुह्वतो मन्यन्ते, सत्यं वै चक्षुः,
सत्येनाग्निहोत्रं जुहोति य एवं विद्वान् जुहोति, भविष्णुः सत्यं भवति य एवं वेद, कस्मै
कमग्निहोत्रं हूयता, इति ब्रह्मवादिनो वदन्त्य,—ग्नये वा एतद्भूत्यै गुप्त्यै हूयते, यत् सायं
जुहोति रात्र्यै तेन दाधार, यत् प्रातरह्ने तेना,—ग्नौ सर्वान् यज्ञान् संस्थापयन्त्य,—थ कस्मा-

[१] काठ. ६,१-२ । कपि. ४,१ । तै. ब्रा. २,१,२ । वा. ३,९ (प्र. पा.) । काण्व. ३,९ (तृ. पा.) ।

देवदेवाग्निहोत्रमुच्यता, इति ब्रह्मवादिनो वदन्ति, होत्रा वै देवेभ्योऽपाक्रामन्नग्निहोत्रे भाग-
धेयमिच्छमाना, यत् ॥ अग्निहोत्रम् ॥ इत्याह तेन होत्रा आभजति, तेनैना भागिनीः करोत्ये,—
षां वा अग्रेऽग्ना आहुतिरहूयत, तदग्निहोत्रस्याग्निहोत्रत्वं, सोऽस्मात् सृष्टः पराङैद्भाग-
धेयमिच्छमानः, स तदेव नाविन्दत् प्रजापतिर्यदहोष्यत्, तं स्वा वागभ्यवद,—ज्जुहुधीति,
स इत एवोन्मृज्याजुहोत्। स्वाहा ॥ इति स्वा ह्येनं वागभ्यवदत्, तत् स्वाहाकारस्य जन्म,
तस्मादग्निहोत्रे स्वाहाकारं,—स्तस्माल्ललाटे च पाणौ च लोम नास्त्य,—तो हि स तदादायाजुहोत्,
तस्माद्यस्य दक्षिणतः केशा उन्मृष्टास्तमाहु,—र्ज्येष्ठलक्ष्मीति, प्रजापति३र्ह्येतदग्रे ज्येष्ठ उद-
मृष्टा,—नेन संमिता स्रुक्कार्या,—नेन वा अग्रेऽग्ना आहुतिरहूयत, तस्या आहुत्याः पुरुषो
ऽसृज्यत, द्वितीयामजुहोत्, ततोऽश्वोऽसृज्यत, तस्मादश्व उभयादन्न,—न्तर्हितो हि
पुरुषादसृज्यत, तस्मादेनं प्रत्यञ्चं तिष्ठन्तं मन्यन्ते, ऽश्वो नु पुरुषा, इति तृतीयामजुहोत्,
ततो गौरसृज्यत, चतुर्थीमजुहोत्, ततोऽविरसृज्यत, पञ्चमीमजुहोत्, ततोऽजासृज्यत,
षष्ठीमजुहोत्, ततो यवोऽसृज्यत, सप्तमीमजुहोत्, ततो व्रीहिरसृज्यत,—ते सप्त ग्राम्याः
पशवोऽसृज्यन्त, तानेवावरुन्द्धे य एवं विद्वानग्निहोत्रं जुहोति ॥१॥ १-६

अष्टमीमजुहोत्, ततो वसन्तोऽसृज्यत, नवमीमजुहोत्, ततो ग्रीष्मोऽसृज्यत, दश-
मीमजुहोत्, ततो वर्षा असृज्यन्त,—कादशीमजुहोत्, ततः शरदसृज्यत, द्वादशीमजुहोत्,
ततो हेमन्तोऽसृज्यता,—ग्रता त्रयोदश्याहुतिरासीद,—थ शिशिरमसृज्यत, तस्मादेतदृतूना-
मशान्तं क्रूरं,—महुताद्धि समभव,—दहुतादसृज्यत, तदाहु,—र्ब्रह्मवादिन, ऋतवः पूर्वे
ऽसृज्यन्ता३ पशवा३, इत्युत ऋतव उत पशवा, इति ब्रूया,—दुभये३ह्येते सहासृज्यन्त,
स वा एनमित एव पुनः प्राविश,—देतद्वा अग्निधानं हस्तस्य यत् पाणिं,—स्तस्मादेतो हस्त-
स्याग्निनैतमां विदहति, यद्धन्यमानो हस्तौ प्रतिप्रसारय,—त्यग्नौ वा एतत्पर्यञ्चनमिच्छते,
ऽग्निं वै पशवः प्रविशन्त्यग्निः पशून्, प्र ह वा एनं पशवो विशन्ति प्र स पशून् य एवं
वेद,—तद्ध स्म वा आह नारदो, यत्र गां शयानां निर्जानाति मृतामिनामविद्वान् मन्यते, ऽत्यग्निं
३ह्येते प्रविशन्त्यग्निरेतां,—स्तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्ति, न ३ह्येत ऋ३तेऽग्नें,
—यज्जातः पशूनविन्दत तज्जातवेदसो जातवेदस्त्वं, तामप्सु प्रासिञ्चत्, सापो न्यदहत्,

[२] काठ. ६,२-३ । कपि. ४,१-२ ।

ता अग्नये वज्रोऽभवं,—स्तस्माद्धर्वींषि प्रोक्षताग्निरग्निं न प्रोक्ष्यो, यदग्निप्रोक्षेद्वज्रेणेनु यज्ञेन
यजेत, तां वै प्रजापतिरन्वैच्छत्, तामप्स्वन्वविन्दत्, तामोषधीषु न्यमार्ट्, तस्मादोषध-
योऽनभ्यक्ता रेभन्ता, ओषधीभ्यः पशवः, पशुभ्यो मनु३ष्या, अनभ्यक्तो ह रेभते य
एवं वेद, तयो वसन्ताशिशिरे कक्षः स उपाधेय, एतद्वै तदग्नेः प्रियं धाम,—पो वाव
साहुतिः श्रायत्य,—ग्नेरेवैतया प्रियं धामोपैत्य,—थो पशुमान् भवत्य,—थो आत्मानमेवैतया
यजमानः पुनीते, सह वा एता आस्तामग्निश्च सूर्यश्च समाने योना अयुसि लोहिते, स आदित्य
ऊर्ध्व उदद्रवत्, तस्य रेतः परापतत्, तदग्निर्योनिनोपागृह्णात्, तदेनं व्यदहत्, तस्मा-
दयोऽत्रपु प्रतिधुक् क्षीरं विदहति, तस्मादेतज्जुह्वति, पशूनां वा एतत् पयो यद्
व्रीहियवौ, तस्मादेतज्जुह्वति, नातिश्रृतं का३र्यं, रेतः शोषयेद्, यद्विष्यन्देतोन्मादुको
ऽस्य प्रजायामाजायेता, ऽमुष्य वा एतदादित्यस्य रेतो हूयतेऽमेध्यमश्रृतं, समुदन्तं होत३-
व्यं, तद्धि श्रृतं मेध्यं मिथुनं प्रजनिष्णुः ॥२॥ ७

स्थाल्यां दुहत्य,—नया वा एतदुपसीदन्ति, नहीमामितो नैतः स्कन्दत्यस्कन्नत्वाया,—य-
कृती भवत्यूर्ध्वकपाला सदेवत्वाय, सा हि सदेवा, ऽसु३र्यं वा एतत् पात्रं यत्कुलालकृतं
चक्रवृत्तं, यत्र स्कन्देत्तदपो निनये,—दापो वै शान्ति,—रापो निष्कृति,—रापो भेषजा,
यत्र वा एता अस्या उपयन्ति तत् प्रशस्ततरा ओषधयो जायन्ते बंहीयसी,—र्यदि दुह्यमानावभि-
न्द्यादन्यया स्थाल्या निर्णिज्य दोह्या, यज्ञो हि यज्ञस्य प्रायश्चित्ति,—र्यदवश्रितं स्कन्देद्य-
द्युद्वास्यमानं यद्युद्वासितं यद्युन्नीयमानं यद्युन्नीतं यदि पुरः परार्हतं होमाय पुनरवनीया-
न्याभिर्दुह्या, यज्ञो हि यज्ञस्य प्रायश्चित्ति,—र्वारुणीमृचमनूच्य वारुण्या होत३व्यं, वरुणो वा
एतद्यज्ञस्य गृह्णाति यदार्छन्ति, निष्कृतिरेवैषा प्रायश्चित्ति,—रप्रतिषेक्यं स्यात्तेजस्कामस्य ब्रह्मवर्च-
सकामस्या,—ऽथो तुस्तूर्षमाणस्या,—ऽथो यः कामयेत, वीरो मा आजायेते,—त्यप्रतिषिक्तो वै
घर्म,—स्तेजो ब्रह्मवर्चसं, तेजस्वी ब्रह्मवर्चसी भवति, स्तृणुते यं तुस्तूर्षता, आ हास्य वीरो
जायता, आज्येन होत३व्यं यस्याप्रतिषेक्यं स्या,—देतद्वा अप्रतिषिक्तं, न तु स्कन्नस्य प्राय-
श्चित्तिरस्त्य,—थो न पशुमानिव भवति, पशूनां वा एतत् पयः प्रवृज्यते, शुचं पशुषु दधाति,
तेजोऽशान्तं पशूनिर्दहति, तस्मात् प्रतिषेक्यमेव स्याद्, यदाद्भिः प्रतिषिञ्चेद्वरो विनयेद्,

[३] काठ. ६,३ । कपि. ४,२ । तै. ब्रा. २,१,३ । मा. श्रौ. १,६,१; १,३,१ ।

गांदोहसंनेजनेन प्रतिषिच्यं, तद्धि नापो न पय,—स्तदाहुः, स्कन्दति वा एतद्, यर्हि वा एतद्दोहनात् पर्याक्रियते तर्हि स्कन्नम्,—न्तर्हिता३ह्यस्या वनस्पतया, इति तदुद्भिरेव प्रतिषिच्यꣳ, स्तोकेनैकेन न हरो विनयति, शुचं पशूनाꣳ शमयति, पशवो वै तेजो ब्रह्मवर्चसं, मिथुनꣳ वा आपश्च पयश्च, मिथुनात् खलु वै प्रजाः पशवः प्रजायन्ते, तन्मिथुनं, तस्मादेवं मिथुनाद्यजमानः प्रजया च पशुभिश्च प्रजायत, कोऽनेन होत३व्यꣳ यस्य प्रतिषे३क्यꣳ स्यादे,—ष हि प्रतिषिक्तः शान्तो मेध्यो मिथुनः प्रजनिष्णुः ॥३॥ ८

प्रजापतिः प्रजा असृजत, ता वै तपसैवासृजत, स वै स वाचमेवायच्छत, तपो वा एष उपैति यो वाचꣳ यच्छति, सृष्टिः प्रजानामग्निहोत्रं,—मुमयत एव प्रजा असृजत इतश्चामुतश्च, निमुक्ते यर्ये वाग्यन्तव्याथो दुग्धानामावामेश्चो अधिश्रित, उन्नीयमान एव यन्त३व्या,—स्तदेव कल्पतमम् ॥ उद्धृतः स्व ॥ इत्यवेक्षेत ॥ उदुहं प्रजया पशुभिर्भूयासम् ॥ इति प्रजायाः पशूनाꣳ सृष्ट्या, अथो अ३भ्येवैनद्धारयति मेध्यत्वाया, ऽग्निहोत्रे वै दंपती व्यभिचरेते, पूर्वो यजमानस्य लोकोऽपरः पत्न्या, यत् प्राचीनमुद्धासयेद्यजमानः प्रमीयेत, यत् प्रतीचीनं पत्नी, कं धर्मेमभ्युदवीवसा, इति ब्रह्मवादिनो वदन्त्यु,—दीचीनमेवोद्वास्य,—मंग्रहणी संजीयतः, संवेनापुरितो, नाति नीत,—श्चतुरुन्नयति, चतुष्पदस्तेन पशूनवरुन्द्धे, द्विर्जुहोति, द्विपदस्तेन, य कामयेता, ऽनुज्येष्ठं प्रजया ऋध्नुयादिति, तस्य पूर्वमग्रा उन्नयेदथ कनीयोऽथ कनीयो, ऽनुज्येष्ठं प्रजया ऋध्नोति, तदाहुः, कनीयाꣳसꣳ वा एष यज्ञक्रतुमुपैति कनीयसीं प्रजां कनीयसः पशून् कनीयोऽन्नाद्यं, पापीयान् भवति, संमितमिवाग्रा उन्नयेदथ भूयोऽथ भूयः, पूर्णमुत्तमꣳ, यज्ञस्याभिक्रान्त्यै, तदाहु,—र्ज्यायाꣳसꣳ वा एष यज्ञक्रतुमुपैति भूयसीं प्रजां भूयसः पशून् भूयोऽन्नाद्यꣳ, वसीयान् भवत्य,—थैकोऽस्य पुत्रः कुनिष्ठो भवतीति, यदि कामयेत, सर्वे सदृशाः स्युरिति, सर्वान् त्समावदुन्नयेत, सर्वे ह सदृशा भवन्ति, न पश्चादुपसादये,—दपक्रान्तिः सा यज्ञस्य, यत्रैवोन्नयेत् तत्सादयेत, प्रतरꣳ वा यज्ञस्याभिक्रान्त्या, अनुख्यायिनꣳ वा एतदपरं करोति यदपरस्मिꣳस्तपन्ति पूर्वस्मिन् जुहुति, समेवाग्निꣳ हरन्ति, तेनैवैनं प्रीणात्य,—थो अग्निहोत्रस्य वा एतत् पवित्र,—मपूपोदेवैन,—दपरस्माद्वै पूर्वꣳ सृष्टं, समेतावन्तरमयꣳ,—स्तस्मात् पुरोऽनूद्धृत्य जुहोति ॥ आयुर्मे यच्छ ॥ इति सादयत्या,—युरेवास्मिन् यच्छति ॥ वर्चो मे यच्छ ॥ इति सादयति, वर्च एवास्मिन् यच्छत्यो,—पृथीवीं इमां रुद्रां

[४] काठ. ६,४-५ । कपि. ४,३-४ । तै. ब्रा. २,१,३-४ । मा. श्रौ. १,६,१ ।

विषेणाश्नꣳ,—स्ताः पशवो नालिशन्त, ते देवाः प्रजापतिमेवोपाधावन्, त्स प्रजापतिरब्रवीद्, वार्यꣳ वृणै, भागो मेऽस्त्विति, वृणीष्वे,—त्यब्रुवन्, त्सोऽब्रवी,—न्मदेव३त्यैव समिदुसदिति, तस्मात् प्राजापत्या समिद्, देवेषु ह्यस्यैषा वार्यवृता, द्वे समिधौ का३र्ये, द्वे ह्याहुती, एकैव कार्ये,—को हि प्रजापतिरे,—कधा खलु वै समिद्ध, उत बह्वीराहुतयो हूयन्ते, ता अग्निनान्वैवाकरोत्, ता अस्वदयत्, ताः पुनर्णवा अजायन्त,—तर्हि खलु वा अग्निहोत्रिणे दर्शपूर्णमासिने सर्वा ओषधयः स्वदन्ते, यत्समिधमादधाति सर्वा एवास्मा ओषधीः स्वधयामकः ॥४॥ ९-१७

भूर्भुवः स्वः॥ इति पुरस्ताद्धोतोर्वदेदे,—तद्वै ब्रह्म,—तत्सत्यमे,—तद्दतं, न वा एतस्माद्दतं यज्ञोऽस्ति, तस्मादेवꣳ वदितव्यम्॥ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ॥ इति गर्भिण्या वाचा गर्भं दधाति, मिथुनया वाचा मिथुनं प्रजनयति, यद्वाचा च जुहोति यजुषा च तन्मिथुनꣳ, यत्तूष्णीं च जुहोति मनसा च तन्मिथुनꣳ, स्थाणुर्वै पूर्वाहुतिर,—तिहाय पूर्वामाहुतिमुत्तरा होतव्या, स्थाणुमेवं छम्बट्कुरोत्यु,—त्तराहुतिर्भूयो होतव्या यज्ञस्याभिक्रान्त्यै, पशूनेव पूर्वयाहुत्या स्पृणोति ब्रह्मवर्चसमुत्तरया, ऽऽग्नेयीं सायमाहुति,—स्तया रेतः सिञ्चति, तद्रेतः सिक्तꣳ रात्र्यै गर्भं दधाति, तत्सौर्या प्रातः प्रजनयामकरि,—यꣳ होतव्याथ परांथ पुनुरवस्तात् प्रातरवस्ताद्धि प्रजानां प्रजातिः, प्रजननꣳ हि सौरी, तन्न सूक्ष्यं, परापरेवं होतव्या यज्ञस्याभिक्रान्त्या, उदङ्ङुद्दिशति ॥ अनाभो मृड, धूर्ते नमस्ते अस्तु, रुद्र मृड ॥ इत्येता वै रुद्रस्य तन्वः क्रूरा एतानि नामान्ये,—ताभिर्वा एष पशूञ्छमायते, ता एवास्य भागधेयेन शमयत्य,—वाचीनꣳ सायमवमार्ष्टि, तस्मात्सायमवाची प्रुष्वे,—त्यूर्ध्वं दिवोन्मार्ष्टि, तस्मादूर्ध्वा दिवैति, पराचीनमिव वा एतद्यदग्निहोत्रꣳ, यत्पुरस्ताद्याजुषꣳ वदति धृत्या अनिर्मार्गाय, यो वा अग्निहोत्रस्य वैश्वदेवꣳ वेदाघातुक एनं पशुपतिर्भवत्यघातुकोऽस्य पशुपतिः पशून्, प्राङासीनो जुहोति, देवाꣳस्तेन प्रीणाति, हुत्वोञ्शिꣳषति, पशूनेव यजमानायोञ्शिꣳषत्यु,—दङुदिशति, रुद्रं तेन निरवदयते, दक्षिणतो निमार्ष्ट्यो,—षधीश्च तेन पितॄꣳश्च प्रीणाति, प्राश्नाति, मनु३ष्याꣳस्तेन प्रीणात्य,—ङ्गुल्या प्राश्नाति, यदुत्वाय न दुतो गमयेद्, यद्दुतो गमयेत् सर्पा एनं घातुकाः स्युः, सर्पानेव शमयत्यहिꣳसायै ॥ पूषासि ॥ इति यजुर्वदेत्, पशवो वै पूषा, पशूनेवावरुन्द्धे, ऽशान्तो वा एषोऽप्रीतः, पुरुषमेधꣳ वा एष प्रतीक्षते यजमानमेव हव्यꣳ, यद-

[५] काठ. ६,५ । कपि. ४,४,६ । वा. ३,९ । काण्व. ३,९ । तै. ब्रा. २,१,४ । मा. श्रौ. १,६,१ ।

ग्निहोत्रहवण्यां निर्वपत्यशान्तस्तेनाग्निहोत्रहवण्यां प्रतप्य हस्तोऽनुवेयो, हस्तो वा प्रतप्याग्निहोत्रहवण्यामवधेय,—स्तेनैवैनꣳ शमयति, तेन प्रीणाति, शान्त एनं प्रीतो न हिनस्ती,—त्थं पर्यावर्तत, एवꣳ हि पशवः पर्यावर्तन्ते, ऽथो अमुष्य वा एतदादित्यस्यावृतमनु पर्यावर्तते, होत३व्यं गार्हपत्या३ं होत३व्यामि,—ति मीमाꣳसन्ते, ऽनुख्यायी वा एष रुक्षो, होतव्यमेव ॥ अग्ने गृहपते परिषद्य जुषस्व स्वाहा ॥ इति जुहुयात्, तेनैवैनꣳ शमयति, तेन प्रीणात्य,—थो तेनैवैनमननुख्यायिनमरुक्षं करोत्य,—थ यत्पूर्वामाहुतिꣳ हुत्वोत्तराꣳ होष्यन्प्रतीक्षते तेनैवैनꣳ शमयति, तेन प्रीणात्य,—थो तेनैवैनमननुख्यायिनमरुक्षं करोत्य,—थ यत्पूर्वामाहुतिꣳ हुत्वोत्तराꣳ होष्यन् प्रतीक्षते तेनैवैनꣳ शमयति, तेन प्रीणात्य,—थो तेनैवैनमननुख्यायिनमरुक्षं करोत्य,—थ यदेवास्य गृह उपक्रियते यदेनमग्निमभिता आसीना याचन्ति तेनैवैनꣳ शमयति, तेन प्रीणात्य,—थो तेनैवैनमननुख्यायिनमरुक्षं करोति ॥५॥ १८-२७

द्वे दुहन्त्यग्निहोत्राय, ज्यायान्वा एकस्या दुग्धादग्निहोत्रिणो लोको, यद् द्वे दुहन्ति ज्यायाꣳसꣳ वा एतं लोकꣳ यजमानोऽभिजयति, मनुश्च वा इदं मनायी च मिथुनेन प्राजनयताꣳ, यत्स्थान्या च दोहनेन च दुहन्ति मिथुनादेव प्रजायते ॥ सजातवेदो दिवा पृथिव्या जुषाणो अस्य हविषो वीहि स्वाहा ॥ इति जुहुयाद,—या वा अस्य जातवेदस्या तनूः क्रूरे,—तया वा एष पशूञ्छमायते, तामेवास्य भागधेयेन शमयति, यदि तदति शमायेत ॥ अग्ने दुःशीततनो जुषस्व स्वाहा ॥ इति जुहुया,—द्या वा अस्य शूनदी तनूः क्रूरे,—तया वा एष पशूञ्छमायते, तामेवास्य भागधेयेन शमयति, यदि तदति शमायेत॥ द्वादश रात्रीः सायꣳ सायं जुहुयाद्, द्वादश वै रात्रयः संवत्सरस्य प्रतिमा, संवत्सरो वा अग्निर्वैश्वानरः,—स्तमाहिताग्नयो दर्शपूर्णमासिन इन्धते, तेषाꣳ वा अर्वत्र एवं दोहानि, ये स्वविष्ठा अङ्गारास्ते मासा, ये क्षोदिष्ठास्तेऽर्धमासा, अहोरात्राणि हेमुरा, यत्संभूतं ज्योतिस्तद्वैश्वदेवꣳ, यल्लोहितं तद्वारुणꣳ, यत्सुवर्णं तद्बार्हस्पत्यꣳ, यत्र लोहितं न सुवर्णं तन्मैत्रꣳ यदङ्गारेषु व्यवशान्तेषु लेलायतीव भाति तद्देवानामा३स्यम्,—थो अमुष्य च वा एतदादित्यस्य तेजो मन्यन्तेऽन्नं, तस्मात्तर्हि होत३व्यꣳ, य३ इध्मा अग्निरिद्धवाति तद्विनीत्या,—विर्वै नामैषाहुति,—राविर्भूय देवमनुष्येषु गच्छति य एवꣳ वेद, न समिद्धमिद्धोतवा, अप्रतिष्ठिता साहुति,—र्नो यथा ग्रीवावस्थेदे,—युता सा, तस्यैव होत३व्यꣳ यथाग्निꣳ व्युषेयाद, सा हि यता, सा प्रतिष्ठिता, तस्मान्महानग्निहोत्रस्येध्मः का३र्यो,

[६] काठ. ६,७ । कपि. ४,६ ।

यो वै बहु दुदिवान्बहीजा३नोऽग्निमुत्सादयते ऽक्षित्तद्वै तस्य, तदीजाना वै सुकृतोऽमुं लोकं नक्षन्ति, ते वा एते यन्नक्षत्राणि, यदाहु,—र्ज्योतिरवापादि तारकावापादीति, ते वा एतेऽवपद्यन्त, आप्त्वा स्विते त इदꣳ यथालोकꣳ सचन्ते यदामुतः प्रच्यवन्ते, ऽथ यो बहु दुदिवान् बहीजानोऽग्निहोत्रं जुहोति दर्शपूर्णमासौ यजते चातुर्मास्यैर्यजते बहूनि सत्राण्युपैति तस्य वा एतदक्षय्यमपरिमितं, तिरो वा ईजानाद्यज्ञो भवति, तदाम्यामिवाग्निभ्यां दग्ध३व्यः, स्वꣳ वा एतद्दिष्टमन्वारोह,—त्यपरेण दग्ध३व्या३ः पूर्वेणा३, इति मीमाꣳसन्त, उभौ समाहृत्या,—न्तरा दग्ध३व्य,—स्तदेवक्षततमं गृह्णीयान्नक्तमग्नि,—मसु३र्या वै रात्रि,—र्ज्योतिषैव तमस्तरति, दिवा ह वा अस्मा अस्मिंल्लोके भवति, प्रास्मा असौ लोको भाति य एवꣳ वेद॥ भूर्भुवः स्वः ॥ इति पुरस्ताद्धोतोर्वदे,—देभ्यो वा एतल्लोकेभ्या इष्टका उपदधाति स्वर्गस्य लोकस्य समष्ट्यै, यत्सायं जुहोति सहस्रं तेन कामदुघा अवरुन्द्धे, यत्प्रातः सहस्रं तेन, यदस्याग्निराधीयते सहस्रं तेन, यमराज्यꣳ वा अग्निष्टोमेनाभिजयति, सोमराज्यमुक्थ्येन, सूर्यराज्यꣳ षोडशिना, स्वाराज्यमतिरात्रेण,—तानि वै सर्वाणीन्द्रोऽभव,—देतानि सर्वाणि भवति य एतैर्यजते, सर्वमेतद्भवति य एवꣳ वेद, हविष्मान् वा एको, देवयाज्येकः, सहस्रयाज्येको, योऽग्निहोत्रं जुहोति स हविष्मान्, यो दर्शपूर्णमासौ यजते स देवयाजी, यश्चातुर्मास्यैर्यजते स सहस्रयाज्य-ग्निहोत्रे वै सर्वे यज्ञक्रतवः सर्वान् यज्ञक्रतूनवरुन्द्धे य एवꣳ विद्वानग्निहोत्रं जुहोति ॥६॥ २८-३५

प्रियमेधा वै सर्वे सह ब्रह्माविदु,—स्तेऽग्निहोत्रेण समराधयꣳ,—स्तेषां त्रिरेकोऽजुहोद् द्विरेकः सकृदेकꣳ,—स्तेषाꣳ यस्त्रिरजुहोत्तमपृच्छन्, कस्मै त्वमहौषीरिति, सोऽब्रवीत्, त्रेधा वा इदं,—मग्नये प्रजापतये सूर्याये,—त्यथ यो द्विरजुहोत्तमपृच्छन्, कस्मै त्वमहौषीरिति, सो ऽब्रवीद्, द्वेधा वा इदं,—मग्नये च प्रजापतये च सायꣳ, सूर्याय च प्रजापतये च प्रातरि,—त्यथ यः सकृदजुहोत्तमपृच्छन्. कस्मै त्वमहौषीरिति, सोऽब्रवी,—देकधा वा इदं, प्रजापतय एवेति, तेषाꣳ यो द्विरजुहोत् स आर्ध्नोत्, तस्येतरे साजात्यमुपायन्, ऋध्नोति य एवꣳ विद्वानग्निहोत्रं जुहो,—त्युपास्य समानाः साजात्यꣳ यन्ति, प्रदोषमग्निहोत्रꣳ होत३व्यꣳ, व्युष्टायां प्रातर्वृद्धान् गर्भान् प्रजनयति, तदाहुः, परा वा एतस्याग्निहोत्रं पतति यस्य प्रदोषं न जुह्वतीति, यदि मन्येत, ऋतुमत्यनेषमिति ॥ भूर्भुवः स्वः ॥ इति पुरस्ताद्धोतोर्वदेत, तेनैव सर्वं नान्तरेति ॥ दोषा वस्तो-

[७] काठ. ६,६,८ । कपि. ४,५,७ ।

नमः स्वाहा ॥ इति जुहुयाद्, ऋतुमेव नात्यनै,—द्धोतव्या३म् होतव्या३मि,—ति मीमाꣳसन्ते, यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियाद्धोतव्यमेवा,—ऽग्नये वा एतद्धूत्यै गुप्त्यै हूयते, प्रजननं तु छम्बट्करोति, यदि मन्येत, ऋतुमत्यनैषमिति ॥ भूर्भुवः स्वः ॥ इति पुरस्ताद्धोतोर्वदेत्, तेनैव सर्वं नान्तरेति ॥ प्रातर्वस्तोर्नमः स्वाहा ॥ इति जुहुयाद्, ऋतुमेव नात्युनैत्, तद्यथा कारुद्वेषिणो जुहुत्येवमस्य हुतं भवति, यस्याग्निमनुद्धृतꣳ सूर्योऽभिनिम्रोचेद्यो ब्राह्मणो बहुवित्सं उद्धरेत्, संवेणैवैनं ब्रह्मणाद्धुरत्य,—ग्निहोत्रेणानुद्रवेद्, भागधेयेनैवैनं प्रणयत्य,—थो भागधेयेनैवैनꣳ समर्धयति, वरो दक्षिणा, सर्वत एवैनं दिग्भ्यो वरेण च्यावयति, यस्योभा अनुगता अभिनिम्रोचेद्यस्य वाभ्युदियात् पुनराधेयमेव तस्य प्रायश्चित्ति,—र्यथा वै पथो वर्तनी एवं दर्शपूर्णमासौ, यथान्तरैवमग्निहोत्रमेवꣳ वा अग्निहोत्रिणे दर्शपूर्णमासिने स्वर्गो लोकोऽनुभात्यु,—पान्यानि हवीꣳष्यपि वसन्त्य,—थ कस्मादग्निहोत्रं नोपवसन्तीति, ब्रह्मवादिनो वदन्ति, प्रततꣳ वा एतदपरिमितमसꣳस्थितम,—श्नाति माꣳसं,—मुपस्त्रियमेति, तस्मान्नोपवसन्ति, पशुव्रतेन भवितव्यं, तूष्णीमिव पशवः संभवन्ति, ते मेध्या, यत्तूष्णीꣳ स्त्रियमुपैति मेध्यतरस्तेन भवति, हिंकृत्योपेयादे,—वमिव हि पशव उपयन्ति मेध्यत्वाय, सꣳस्थाप्या३म् सꣳस्थाप्या३मि,—ति मीमाꣳसन्ते, ऽग्निहोत्रꣳ यत्सꣳस्थापयेत्तृणमकृत्वानुप्रहरेत्, सा ह्यग्निहोत्रस्य सꣳस्थितिस्त,—दाहु,—र्यदा वै जीयते यदा प्रमीयते यदार्तिमार्छत्यथाग्निहोत्रꣳ सैतिष्ठता इति, तन्न सꣳस्थाप्य, मनसा वा इमां प्रजापतिः पर्यगृह्णादि,—यꣳ वा अग्निहोत्रस्य वेदि,—र्यमुपयाम, ओषधयो बर्हिः, प्रंष्वा प्रोक्षणी,—दिशः परिधयो, यत् किंचाभ्याधीयते स इध्मो, यजमानो यूप, उन्नीयमाने स्वेयुमे,—वमिव हि यूपः समृद्धयै, मध्यतो वा एष यज्ञः प्रततो यदग्निहोत्रं, तस्मादग्निहोत्री दर्शपूर्णमासी सर्वं बर्हिष्यं ददाति, मध्यतो३ह्येतद्यज्ञस्य दीयते यदग्निहोत्रं, होतव्यꣳ राजन्यस्याग्निहोत्रा३म् होतव्या३मि,—ति मीमाꣳसन्त, आमादिव वा एष यद्राजन्यो, बहु वा एषोऽयज्ञियममेध्यं चरत्य,—त्युनन्न जिनाति ब्राह्मण, तस्माद्राजन्यस्याग्निहोत्रमहोतव्य—मृतꣳ वै सत्यमग्निहोत्रं, ब्राह्मण ऋतꣳ सत्यं, तस्माद्ब्राह्मणस्यैव होतव्यम,—थो ब्राह्मणायैवास्याग्रतो गृह आहरेयुस्त,—द्धुतमेवास्याग्निहोत्रं भवत्य,—थो य ऋतमिव सत्यमिव चरेत् तस्य होतव्यमनुसंतत्यै ॥७॥ ३६-४४

याग्निहोत्रायोपसृष्टा निषीदेद्यस्यान्नं नाद्यात् तस्मै तां दद्याद,—र्तिꣳ वा एषा यजमानस्या-

[८] तै. २,२,४,६-८; ४,२,५,१ । का १३,३४-३५; ३५,१९ (च. पा.); ५,३; ११,६० । काण्व. १४,३६-३७; ३५, ५१ (च. पा.); ५,३; १३,६१ । मा. श्रौ. ३,३ ।

नुत्सच निषीदति, तयैवैनाꣳ सह निरवदयते, गृहे तु तस्य ततः परो नाश्नीयाद्, यद्श्रीयादार्तिमार्छेद्, यस्याहुतेऽग्निहोत्रे पूर्वोऽग्निरनुगच्छेदग्निना च सहाग्निहोत्रेण चोद्द्रवेद्, भागधेयेनैवैनं प्रणयत्य,—थो भागधेयेनैवैनꣳ समर्धयत्य,—थाभिमन्त्रयेत ॥ ४५

इत एव प्रथमं जज्ञे अग्निरेभ्यो योनिभ्यो अधि जातवेदाः ।
स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा च देवेभ्यो हव्यां वहतु प्रजानन् ॥ ४६

इत्येते वा एतस्य योनयः, स्वेभ्य एवैनꣳ योनिभ्योऽधि प्रजनयति ॥ इषे राये रमस्व सहसे द्युम्नायोर्जेऽपत्याय ॥ इत्येतान्येवावरुन्द्धे, ऽथो रमयत्येवैनम् ॥ सम्राडसि स्वराडसि, सुषदा सीद ॥ इति सुषदैवैनꣳ सादयति ॥ सारस्वतौ त्वोत्सौ प्रावताम् ॥ इत्यृक्सामे वै सारस्वता उत्सौ, ताभ्यामेवैनं प्रावति, ताभ्याꣳ समर्धयत्य,—ग्नये ज्योतिष्मतेऽष्टाकपालं निर्वपेद्वारुणꣳ यवमयं चरुꣳ यस्याहुतेऽग्निहोत्रे पूर्वोऽग्निरनुगच्छेत्, तमो वा एतस्य यज्ञꣳ युवते यस्याहुतेऽग्निहोत्रे पूर्वोऽग्निरनुगच्छति, यदग्नये ज्योतिष्मते ज्योतिषैवास्य यज्ञꣳ समर्धयति, वारुणी रात्रि,—र्यद्वारुणो वरुणादेवास्याधि यज्ञꣳ स्पृणोति, यस्याहुतेऽग्निहोत्रेऽपरोऽग्निरनुगच्छेत् तत एव प्राञ्चमुद्धृत्यान्ववसायाग्निहोत्रं जुहुयाद,—थाभिमन्त्रयेत ॥ भवतं नः समनसौ समोकसौ सचेतसा अरेपसा, इति समनसा एवैनौ करोति यजमानस्याहिꣳसाया, एतौ वै तौ या आहुर्ब्रह्मवादिनो, नकः कुञ्जिद्धौ व्याघ्रौ विव्याचे,—त्यग्नयेऽग्निमतेऽष्टाकपालं निर्वपेद्यस्याग्ना अग्निमभ्युद्धरेयु,—र्देवताभ्यो वा एष समदं करोति यस्याग्ना अग्निमभ्युद्धरन्ति, यदग्नयेऽग्निमते देवता एवास्मै भूयसीर्जनयति, वसीयान् भवति ॥८॥ ४७-५४

अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥ ५५

इत्यभिमन्त्रयेत यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियाद्,—नुक्शायैवैनत् पुनरवरुन्द्धे, तदाहुर,—मुꣳ वा एष लोकꣳ समारोहयति सह प्रजया पशुभिश्च यजमानस्य, तस्मादुत बहुराहिताग्निरपशुर्भवतीति, तदुपस्थेयः ॥ इहैव क्षेम्य एधि, मा प्रहासीर्मामुमामुष्यायणम् ॥ इत्यस्मिन् न्वावैनमेतं लोके दाधार, सह प्रजया पशुभिश्च यजमानो वसीयान् भवति, मैत्रं

[देवेभ्यो...प्रजानन्– ऋ. १०,१६,९; अथर्व. १२,२.८]
[९] मा. श्रौ. ३,३-४ । का. ११,१७; ८,६१; ५,१५ [अन्वग्नि (प्रत्यग्नि) रुषसा...आ (विवेश; ततान) ततन्थ– अथर्व० ७,८२,४-५; १८,१,२७ । प्रत्यग्निरुषसा०– (प्र. पा.) ऋ. ४,१३,१ ।

चरुं निर्वपेत्सौर्यमेककपालꣳ यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदिया,—न्मित्रो वा एतस्य यज्ञꣳ स्पृणोत्य,—थ यत् सौ३र्योऽमुनैवास्यादित्येन पुरस्ताद्यज्ञꣳ समर्धयति, यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियादग्निꣳ समाधाय वाचꣳ यत्वा दंपती सर्वाह्णमुपासीयातां, द्वयोर्गवोः सायमग्निहोत्रं जुहुयाद,—मयुमेवास्मै भागधेयं प्रयच्छति सायन्तनं च प्रातस्तनं च, यद्वै पुरुषस्यामयत्याश्नाती३ नाश्नाती३, इति वै तमाहु,—र्नाश्नातीति, वेदाहुस्तद्वाव सोऽमृतेति, यन्नाश्नीतो न व्याहरतोऽन्वेवैनमम्नातां, तपसैनं पुनरवरुन्धाते, अग्नये व्रतपतयेऽष्टाकपालं निर्वपेद,—यस्याग्निरनुगच्छेद्यजुषा, अग्निर्वै देवानाꣳ व्रतपति,—स्तमेव भागधेयेनोपासरत्, स एनꣳ व्रतमालम्भयति यस्याग्नि-रुपक्षायेद्, यत्रैवैनमनुपरागच्छेत् तत समाधायान्ववसायाग्निहोत्रं जुहुयाद,—ति वा एतदग्निर्यद-रुपक्षायेद्, यत्रैवैनमनुपरागच्छति तत एनं पुनरवरुन्द्धे, ऽग्नये पथिकृतेऽष्टाकपालं निर्वपेद्यस्याग्निरुपक्षायेद्, बहिष्पथꣳ वा एष एति यस्याग्निरुपक्षायत्य,—ग्निर्वै देवानां पथिकृत्, तमेव भागधेयेनोपासरत्, स एनं पन्थामपिनयत्य,—नड्वान् दक्षिणा, स हि पन्थामपिवहत्य,—ग्नये शुचयेऽष्टाकपालं निर्वपेद्यस्याभ्यादाव्येन सꣳसृज्येता,—ऽशुचितर इव वा एष यदभ्यादा३व्यो, यदग्नये शुचये शुचिमेवैनं मेध्यं करोत्य,—ग्नये क्षामवतेऽष्टाकपालं निर्वपेद्यस्याहिताग्नेः स३तोऽग्निर्गृहान् दहेद,—ग्निर्वा एतस्य क्षामो गृहानभ्युच्यति, स दहत्येवापुरꣳ, यदग्नये क्षामवते यैवास्य क्षामा तनूस्तामेवास्य भागधेयेन शमयत्य,—दाहुकोऽस्यापरमग्निर्गृहान् भवति, यस्याग्निरनुगच्छेत् तस्य एवावक्षाणेभ्योऽधि मन्थितव्य,—स्तदेनꣳ स्वाद्योनेः प्रजनयति, यदि न तावक्षानि स्युर्भस्मनारणी सꣳस्पृश्य मन्थितव्यः, स्वादेवैनꣳ योनेः प्रजनयत्य,—ग्नये पावकवतेऽष्टाकपालं निर्वपेद्यस्याग्निरनुगच्छे,—न्न हि वा एतस्मा अपिधीयतेऽथैषोऽनुगच्छ,—त्योषधयो वै पावका, ओषधीरेवास्मै पावका भागधेयमपिदधाति प्रजननाय ॥५६-५८

त्रयस्त्रिꣳशत् तन्तवो यꣳ वितन्वत इमं च यज्ञꣳ सुधया ददन्ते ।
तेषां छिन्नं प्रत्येतद्दधामि स्वाहा घर्मो अप्येतु देवान् ॥ ५९

तेमिश्छिद्रमपिदध्मो यदत्र स्वाहा यज्ञो अप्येतु देवान् ॥

इति जुहुयाद्यद्यनो वा रथो वान्तरा वियायादि,—तावन्तो वै यज्ञस्य तन्तवो, देवता वा एता,—स्तान्वा एतत्समवृक्षद्, ताः संदधात्ये,—तद्ध स्म वा आहु,—र्दाक्षायणास्तन्तून् त्समवृक्षद्, स्वान्वा एतत्समवृक्षत्, ताः संदधात्ये,—दꣳ विष्णुर्विचक्रमा, इति पदꣳ गोपयति, गामन्वत्यावर्तयेति, गौर्हि यज्ञिया मेध्ये,—

[इदं विष्णुर्वि० ऋ. १,२२,१७; अथर्व. ७,२६,४; सा. २२२; १६६९]

विष्णोः स्विदेव यज्ञस्य विक्रान्तमकर३पोऽन्वातिपिश्चति शान्त्यै ॥९॥ ६०

रौद्रं गवि सद्, वायव्यमुपावसृष्टमा,—ऽश्विनं दुह्यमानꣳ, सौम्यं दुग्धꣳ, वारुणमधिश्रितं, मैत्रꣳ शरोगृहीतं, मारुतं बिन्दुमत्, पौष्णमुदन्तꣳ, सारस्वतꣳ विष्यन्दꣳ, वैष्णवं प्रतिनीयमानꣳ, स्व३र्ग्यमुद्वासितं, त्वष्टुरुन्नीयमानं, धातुरुन्नीतꣳ, वैश्वकर्मणमुद्यतꣳ, सावित्रं प्रणीयमानं, द्यावापृथिवीयं प्रह्रियमाणमै,—न्द्राग्नमुपसन्नं, प्राजापत्यꣳ समिधि, वैश्वदेवꣳ हुतम् ॥१०॥ ६१[५८६]

॥ इति प्रथमकाण्डे अग्निहोत्र-ब्राह्मणं नाम अष्टमः प्रपाठकः ॥८॥

अथ नवमः प्रपाठकः ।

चतुर्होतारः ।

चित्तिः स्रुक्, चित्तमाज्यꣳ, वाग्वेदि,—राधीतं बर्हिः, केतो अग्नि,—र्विज्ञातमग्नीद्, वाचस्पतिर्होता, मन उपवक्ता, प्राणो हविः, सामाध्वर्युरि,—न्द्रं गच्छ स्वाहा, पृथिवी होता, द्यौरध्वर्युस्त्व,—ष्टाग्नी,—न्मित्र उपवक्ता, वाचस्पते वाचो वीर्येण संभृततमेनायक्षसे, यज्ञपतये वार्यमा स्वस्क,—र्वाचस्पतिः सोममपा,—ज्जजनदिन्द्रमिन्द्रियाय, सोमः सोमस्य पिबतु, शुक्रः शुक्रस्य पिबतु, श्रातास्त इन्द्र सोमा वातापयो हवनश्रुतो, ऽग्निर्होता,—ऽश्विनाध्वर्यू, रुद्रो अग्नीद्, बृहस्पतिरुपवक्ता, वाचस्पते हिंन्विधे नामन् विधेम ते नाम, विधेस्त्वमस्माकं नाम, वाचस्पतिः सोममपादा,—ऽस्मासु नृम्णं धात्, सोमः सोमस्य पिबतु, शुक्रः शुक्रस्य पिबतु, श्रातास्त इन्द्र सोमा वातापयो हवनश्रुतो, महाहविर्होता, सत्यहविरध्वर्यु,—श्चित्तपाजा अग्नीद,—श्चित्तमना उपवक्ता,—ऽनाधृष्यश्चाप्रतिधृष्यश्चाभिगरा, अयास्य उद्गाता, विधे नामन् विधेम ते नाम, विधेस्त्वमस्माकं नाम, मा देवानां तन्तुश्छेदि मा मनुष्याणां, नमो मात्रे पृथिव्यै ॥१॥ १

अग्निर्यजुर्भिः, सविता स्तोमै,—रिन्द्र उक्थामदै,—र्बृहस्पतिश्छन्दोभि,—रदितिरंशु बर्हिषा,—ऽऽदित्या आज्यै,—र्मरुतः सदोहविर्धानै,—र्विष्णुर्दीक्षातपोभ्यां, मित्रावरुणौ धिष्ण्यै,—रश्विना आशिरा, त्वष्टा समिधा, पूषा स्वाहाकारै,—र्वाग्वायोः पत्नी, पथ्या पूष्णः,

[१] मै. १,९,३-६ । काठ. ९,८ । कपि. ८,११ ।
[२] मै. १,९,८ । काठ. ९,१० ।

पृषिश्चपदेः, सेनेन्द्रस्य, धेना बृहस्पते,—र्गायत्री वसूनां, त्रिष्टुब् रुद्राणां, जगत्यादित्यानाम,—नुष्टुब् मित्रस्य, विराड् वरुणस्य, पङ्क्तिर्विष्णो,—र्दीक्षा सोमस्य ॥२॥ २

प्रजापतिर्वा एक आसीत्, सोऽकामयत, यज्ञो भूत्वा प्रजाः सृजेयेति, स दशहोतारꣳ यज्ञमात्मानꣳ व्यधत्त, स चित्तिꣳ स्रुचमकुरुत, चित्तमाज्यꣳ, वाचꣳ वेदिमा,—ऽधीतं बर्हिः, स दशधात्मानꣳ विधाय मिथुनं कृत्वायतनमैच्छत्, स वै त्रिवृतमेव प्राणानामायतनमचायत्, तैः प्रजा असृजतो,—र्य उदतृणत् पूर्वपक्षः पञ्चदशो,—स्तेन देवानसृजत, ते देवा ऊर्ध्वा आप्यायन्तो,—र्य आप्यायते य एवꣳ वेदा,—ऽथ योऽवातृणदपरपक्षः पञ्चदशो,—स्तेनासुरानसृजत, तेऽसुरा अवाञ्चः प्राध्वꣳसन्त, प्रास्य भ्रातृव्यो ध्वꣳसते य एवꣳ वेद, दिवा देवानसृजत नक्तमसुराꣳ,—स्ते देवाः शुक्ला अभवन् कृष्णा असुराः, सत्येन देवानसृजतानृतेनासुराꣳ,—स्ते देवाः सत्यमभवन्ननृतमसुरा, दक्षिणेन हस्तेन देवानसृजत सव्येनासुराꣳ,—स्ते देवा वीर्यवन्तोऽभवन्नवीर्या असुरा,—स्ततो देवा अभवन् परासुरा,—स्तद्य एवꣳ वेद भवत्यात्मना, परास्य भ्रातृव्योऽभवति, सोऽमन्यत, क्व होष्यामीति, स तदेव नाविन्दत् प्रजापतिर्यत्राहोष्य,—च्छो अस्मान्यद्वौ न्वमासीत् प्राणात्, स वा इन्द्रमेवान्तरात्मनायतनमचायत्, स इन्द्रं गत्स्वाहेति,—त्वेपानद्वीꣳशेयेꣳ वै प्राणो, वीꣳर्यमिन्द्रो, वीर्य एव वीर्यमजुहोत् ॥३॥
३

ते वै चतुर्होतारो न्यसीदन् सोमगृहपतय, इन्द्रं जनयिष्याम इति पृथिवी होतासीद्, द्यौरध्वर्युस्त्वष्टाग्नी,—र्मित्र उपवक्ता, ते वा एतं ग्रहा अगृह्णत, वाचस्पते वाचो वीर्येण संभृततमेनायक्षसे, यज्ञपतये वार्यमा स्वस्कारिति, तं एकविꣳशमायतनमचायꣳ, स्तेनेन्द्रमजनयꣳ,—स्त इन्द्रं जनयित्वाब्रुवन्, त्स्वरयामेति, ते वै पञ्चहोतारो न्यसीदन् वरुणगृहपतयो, ऽग्निर्होतासीद्,—श्विनाध्वर्यू, रुद्रो अग्नीद्, बृहस्पतिरुपवक्ता, यदश्विनेति, तेन पञ्चहोता, ते वा एतं ग्रहा अगृह्णत, वाचस्पते हिन्विधे नामन् विधेम ते नाम, विधेस्त्वमस्माकं

[३] मै. १,९,१ । काठ. ९,११ । तै. आ. ३,२,३ ।
[४] मै. १,९,१ । काठ. ९,११-१२ । कपि. ८,१२ । श. १,१०,२१,२४; २,११; ५,२२,२६; ६,१९,३०; ९,३०, ३८; ११,९,२८; १८,३७; २०,३; ३७,१; ३८,१; ७,३७-३८ । कात्या. १,१३, ३६,४०; २,२१,५,२८,३३; ६, १,१०,४३; १०,३१; ११,४; १२,९,२८; २०,७; २१,९३; ३७,१,३८,१; ९,१०-१४ । मा. श्रौ. ११,१,५,२, १४ ।

नामेति, तं त्रिणवमायतनमचायꣳ,—स्तꣳ सेतुं कृत्वा स्वरायꣳ,—स्तेन पशूनसृजन्त, तान्वरुणाभ्योऽनयन् यमायाश्वमनयꣳ,—स्तस्यार्धमिन्द्रियस्यापाक्रामत्, स एतं प्रतिग्रहमपश्यत् ॥ देवस्य त्वा सवितुः प्रसꣳवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि, यमाय त्वा मह्यꣳ वरुणो ददाति, सोऽमृतत्वमशीय, मयो दात्रे भूया,—न्मयो मह्यं प्रतिग्रहीत्रे ॥ इतिꣳसोऽर्धमिन्द्रियस्योपाधत्ता,—ऽर्धमिन्द्रियस्योपधत्ते य एवꣳ विद्वानश्वं प्रतिगृह्णात्य,—थ योऽविद्वान् प्रतिगृह्णात्यर्धमस्येन्द्रियस्यापक्रामति, रुद्राय गामनयꣳ,—स्तस्य तृतीयमिन्द्रियस्यापाक्रामत्, स एतं प्रतिग्रहमपश्यत् ॥ रुद्राय त्वा मह्यꣳ वरुणो ददाति, सोऽमृतत्वमशीय, मयो दात्रे भूया,—न्मयो मह्यं प्रतिग्रहीत्रे ॥ इति स तृतीयमिन्द्रियस्योपाधत्त, तृतीयमिन्द्रियस्योपधत्ते य एवꣳ विद्वान् गां प्रतिगृह्णात्य,—थ योऽविद्वान् प्रतिगृह्णाति तृतीयमस्येन्द्रियस्यापक्रामत्य,—ग्नये हिरण्यमनयꣳ,—स्तस्य चतुर्थमिन्द्रियस्यापाक्रामत्, स एतं प्रतिग्रहमपश्यत् ॥ अग्नये त्वा मह्यꣳ वरुणो ददाति, सोऽमृतत्वमशीय, मयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे ॥ इति स चतुर्थमिन्द्रियस्योपाधत्त, चतुर्थमिन्द्रियस्योपधत्ते य एवꣳ विद्वान् हिरण्यं प्रतिगृह्णात्य,—थ योऽविद्वान् प्रतिगृह्णाति चतुर्थमस्येन्द्रियस्यापक्रामति, बृहस्पतये वासोऽनयꣳ,—स्तस्य पञ्चममिन्द्रियस्यापाक्रामत्, स एतं प्रतिग्रहमपश्यत् ॥ ग्नास्त्वाकृन्तन्न,—पसोऽतन्वत, धियोऽवयन्, बृहस्पतये त्वा मह्यꣳ वरुणो ददाति, सोऽमृतत्वमशीय, मयो दात्रे भूया,—न्मयो मह्यं प्रतिग्रहीत्रे ॥ इति स पञ्चममिन्द्रियस्योपाधत्त, पञ्चममिन्द्रियस्योपधत्ते य एवꣳ विद्वान् वासः प्रतिगृह्णात्य,—थ योऽविद्वान् प्रतिगृह्णाति पञ्चममस्येन्द्रियस्यापक्रामत्यु,—त्तानायाङ्गिरसायाप्राणदनयꣳ,—स्तस्य षष्ठमिन्द्रियस्यापाक्रामत्, स एतं प्रतिग्रहमपश्यत् ॥ उत्तानाय त्वाङ्गिरसाय मह्यꣳ वरुणो ददाति, सोऽमृतत्वमशीय, मयो दात्रे भूया,—न्मयो मह्यं प्रतिग्रहीत्रे ॥ इति स षष्ठमिन्द्रियस्योपाधत्त, षष्ठमिन्द्रियस्योपधत्ते य एवꣳ विद्वानप्राणत् प्रतिगृह्णात्य,—थ योऽविद्वान् प्रतिगृह्णाति षष्ठमस्येन्द्रियस्यापक्रामति ॥ क इदं कस्मा अदात्, कामः कामायादात्, कामो दाता, कामः प्रतिग्रहीता, कामाय त्वा प्रतिगृह्णामि, कामैतत्ते ॥ इति समुद्रो वै कामो, दक्षिणा कामो, दक्षिणयैव दक्षिणां प्रतिगृह्णाति, यो वै तां देवताꣳ वेद याग्रे दक्षिणामनयददक्षिणीयो ह भवति, नयति दक्षिणाम् ॥४॥ ४-१६

ते वै स्वयन्तोऽब्रुव,—न्नतो नो यूयं प्रयच्छत, केनायतनेनात्रैव वेत्स्यथे,—त्यब्रुवꣳ,—स्ते वै सप्तहोतारो न्यसीदन्नर्यमगृहपतयो, महाहविर्होतासीत्, सत्यहविरध्वर्युर,—च्चित्तपाजा

[देवस्य त्वा सवितुः— अथर्व. १९,५१,२ । कोदात्कस्मा०— अथर्व. ३,२९,७]
[५] मै. १,९,२ । काठ. ९,१२-१३ ।

अग्नीद्,—च्चित्तमना उपवक्ता,—ऽनाधृष्यश्चाप्रतिधृष्यश्चाभिगरौ, अयास्य उद्गाता, ते वा एतं ग्रहमगृह्णत, विधे नामन्विधेम ते नाम, विधेस्त्वमस्माकं नामेति, तं त्रयस्त्रिꣳशमायतनमचायꣳ,—स्तेनेदꣳ समतन्वन्, त्सप्तहोत्रा च वा इदꣳ संततं त्रयस्त्रिꣳशेन च, यदिदं देवमनुष्या अꣳन्योऽन्यस्मै संप्रयच्छन्ते, प्राणो वै दशहोता, चक्षुश्चतुर्होता, श्रोत्रं पञ्चहोता, वाक्चात्मा च सप्तहोता,—ऽग्निहोत्रꣳ वै दशहोता, दर्शपूर्णमासौ चतुर्होता, चातुर्मास्यानि पञ्चहोता, सौम्योऽध्वरः सप्तहोता,—ऽऽयुषे कमग्निहोत्रꣳ हूयते, सर्वमायुरेति य एवꣳ वेद, चक्षुषे कं दर्शपूर्णमासा इज्येते, न चक्षुषो गृहे य एवꣳ वेद, श्रोत्राय कं चातुर्मास्यानीज्यन्ते, न श्रोत्रस्य गृहे य एवꣳ वेद, वाचे चात्मने च कꣳ सौम्योऽध्वर इज्यते, न वाचो नात्मनो गृहे य एवꣳ वेद, प्रजापतिर्वै दशहोतै,—कः संभूयिष्ठमाम् व्याहृतीना,—मेकः संभूयिष्ठो भवति य एवꣳ वेद, तेजसे कं पूर्णमा इज्यते, सौम्यो वै ब्राह्मणो देवतया गायत्रच्छन्दा, गायꣳत्रोऽग्निः, स्वे वावास्मा एतद्देवते संप्रस्थे अक्र,—न्नौस्यान्यो योगक्षेमस्येशा, आयुषे कममावास्येज्यते, संमीव वा एषं आम्रियते, सर्वमायुरेति य एवꣳ वेद, स्वर्गाय लोकाय कꣳ सौम्योऽध्वर इज्यत, एति स्वर्गं लोकꣳ य एवꣳ वेद, दशहोत्राग्निहोत्रमुन्नीतमभिमृशेद्, दशहोत्रा वै देवा अग्निहोत्रमसृजन्त, प्रज्ञातमेनत् सृष्टमालभ्य, चतुर्होत्रा दर्शपूर्णमासा अभिमृशे,—च्चतुर्होत्रा वै देवा दर्शपूर्णमासा असृजन्त, प्रज्ञाता एनौ सृष्टा आलभ्य, पञ्चहोत्रा चातुर्मास्यान्यभिमृशेत्, पञ्चहोत्रा वै देवाश्चातुर्मास्यान्यसृजन्त, प्रज्ञातान्येनानि सृष्टान्यालभ्य, सप्तहोत्रा सौम्यमध्वरमभिमृशेत्, सप्तहोत्रा वै देवाः सौम्यमध्वरमसृजन्त, प्रज्ञातमेनꣳ सृष्टमालभ्य, दशहोतारꣳ वदेत् पुरस्तात् सामिधेनीनां, प्रजापतिर्वै दशहोता, यज्ञमुखꣳ सामिधेन्यो, मिथुनꣳ वावास्यैतद्यज्ञमुखे दधाति, चतुर्होतारꣳ वदेत् पुरस्तात् प्रयाजानां, चतुर्होत्रा वै देवा इन्द्रमजनयन्नि,—न्द्रꣳ वावास्यैतद्यज्ञेऽजीजनद्, सेन्द्रेण यज्ञेन यजते, पञ्चहोतारꣳ वदेत् पुरस्ताद्धविषां, पञ्चहोत्रा वै देवाः पशूनसृजन्त, परासुरानभावयन्, पशूनेव सृजते, परा भ्रातृव्यं भावयति, सप्तहोतारꣳ वदेत् पुरस्तादनुयाजानाꣳ, सप्तहोत्रा वै देवाः स्वरायन्, त्स्वरेवैति, दशहोतारꣳ वदेत् पुरस्ताद् बहिष्पवमानस्य, प्रजापतिर्वै दशहोता, यज्ञमुखं बहिष्पवमानं, मिथुनꣳ वावास्यैतद्यज्ञमुखे दधाति, चतुर्होतारꣳ वदेत् पुरस्तादाज्यानां, पञ्चहोतारꣳ वदेत् पुरस्तान्माध्यंदिनस्य पवमानस्य, सप्तहोतारꣳ वदेत् पुरस्तादार्भवस्य पवमा-

नस्य, सप्तहोत्रा वै देवाः स्वरायन्,—त्स्वरेवैति, यो वै चतुर्होतॄननुसवनं तर्पयितꣳव्यान् वेद तृप्यति प्रजया च पशुभि,—र्श्रेते वै चतुर्होतारोऽनुसवनं तर्पयितꣳव्या, यद् ब्राह्मणा बहुविदस्तानेव तर्पयति, तं एनं तृप्ताः प्रजया च पशुभिश्च तर्पयन्ति ॥५॥ १७

यः प्रजया पशुभिर्न प्रजायेत स द्वादशाहानि वरासी परिधाय तप्तं पिबन्नधः शयीत, तपो वै तप्त्वा प्रजापतिर्विधायात्मानं मिथुनं कृत्वा प्रजया च पशुभिश्च प्राजायता,—ऽविहितो हि वा एषो ऽमिथुनो, ऽथैष न प्रजायते, तत्तप एव तप्त्वा विधायात्मानं मिथुनं कृत्वा प्रजया च पशुभिश्च प्रजायते, प्रजापतिर्वै दशहोता, ज्यायान् वै प्रजापतिर्होमात्, तस्मात्तं न जुहति, प्राण्यापाने,—दपाने एव प्राणं जुहोति, संग्रामिणं चतुर्होत्रा याजये,—च्चतुर्गृहीतमाज्यं कृत्वा चतुर्होतारꣳ व्याचक्षीत, पूर्वेण ग्रहेणार्धं जुहुयादुत्तरेणार्धं, चतुर्होत्रा वै देवा इन्द्रमजनय,—न्यतरस्मिन् खलु वै संग्रामे इन्द्रो भवति स जयती,—न्द्रꣳ वावास्यैतत्संग्रामेऽजीजन,—ज्जयति संग्रामं, प्रजाकामं चतुर्होत्रा याजये,—च्चतुर्गृहीतमाज्यं कृत्वा चतुर्होतारꣳ व्याचक्षीत, पूर्वेण ग्रहेणार्धं जुहुयादुत्तरेणार्धं, चतुर्होत्रा वै देवा इन्द्रमजनय,—न्यतरस्मिन् खलु वै संग्रामे इन्द्रो भवति स जयती,—न्द्रꣳ वावास्यैतत् संग्रामेऽजीजन,—ज्जयति संग्रामं, प्रजाकामं चतुर्होत्रा याजये,—च्चतुर्गृहीतमाज्यं कृत्वा चतुर्होतारꣳ व्याचक्षीत, पूर्वेण ग्रहेणार्धं जुहुयादुत्तरेणार्धं, चतुर्होत्रा वै देवा इन्द्रमजनयन्, प्रजामस्मै जनयति, नैव त्वपरोऽनुजायते, तेजस्वी तु भवति, सर्वेण ह्येनमिन्द्रियेण जनयति, पशुकामं पञ्चहोत्रा याजये,—च्चतुर्गृहीतमाज्यं कृत्वा पञ्चहोतारꣳ व्याचक्षीत, पूर्वेण ग्रहेणार्धं जुहुयादुत्तरेणार्धं, पञ्चहोत्रा वै देवाः पशूनसृजन्त, पशूनेव सृजते, भ्रातृव्यवन्तं पञ्चहोत्रा याजये,—च्चतुर्गृहीतमाज्यं कृत्वा पञ्चहोतारꣳ व्याचक्षीत, पूर्वेण ग्रहेणार्धं जुहुयादुत्तरेणार्धं, पञ्चहोत्रा वै देवा असुरान् पराभावयन्, परा पाप्मानं भ्रातृव्यं भावयति, स्वर्गकामं पञ्चहोत्रा याजये,—च्चतुर्गृहीतमाज्यं कृत्वा पञ्चहोतारꣳ व्याचक्षीत, पूर्वेण ग्रहेणार्धं जुहुयादुत्तरेणार्धं, पञ्चहोत्रा वै देवाः स्वरायन्, त्स्वरेवैति, यो यज्ञस्य सꣳस्थामनु पापीयान्मन्येत तꣳ सप्तहोत्रा याजयेत्, सप्तहोत्रा वै देवा इदꣳ समतन्वन्, त्संमतत तादृक्, तादृङ् पुनर्भवति यादृक् सन्यजते ॥६॥ १८

[६] मै. १,९,१ । काठ. ९,१४ ।

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति, यदे॑को य॒ज्ञश्च॑तु॒र्होता॒थ॒ कस्मा॑त् सर्वे॒ चतु॑र्होतार उच्यन्ता॒ इति॒, च॒त्वा-
रो॒ वा ए॒ते य॒ज्ञा,—स्तेषां॒ च॒त्वारो॒ होता॒रस्ते,—चतु॒र्होतॄणां चतुर्होतृत्वं, चु॒तु॒र्णामेकः॑ सꣳवत्स॒रं
नाश्नी॑या॒त्, तद् व्र॒तम्,—अꣳ वै चतु॒र्होता॒रो, ऽन्नवान्भवति॒ य ए॒वꣳ वेदा,—ऽथ॒ यम॒नूचा॒नꣳ सन्तं॒
नोप॒न॒मे॒त्सोऽर॒ण्यं पर॑त्य ब्राह्म॒णमु॒पद्र॒ष्टारं॒ कृत्वा चतु॒र्होतॄ॒न् व्या॒चक्षी॒त, ब्रह्म॒णो वा ए॒तद्दु॒द॒रु॒णꣳ
यच्चतु॒र्होता॒रो, ब्राह्म॒णं उ॒पद्र॒ष्टा,—प॒द्र॒ष्टु॒रे॒वान्ते॒ ब्रह्मा॒विरु॒क्,—स्तदे॒नमा॒वि॒र्भू॒तमा॒वि॒दं॒ गमय॒त्यं,—य॒
यौ वि॒ञ्शपे॒याता॒म्,—हं भूयो॒ वेदा॒हं भूयो॒ वे॒दे,—त्ये॒षं वा॒व भूयो॒ वेद॒ यश्चतु॒र्होतॄ॒न् वे॒द, चतु॒र्होता॒रो॒
वै य॒ज्ञस्य॒ योनि॒,—श्चतु॒र्होतृ॒भ्योऽधि॒ य॒ज्ञो निर्मि॒तो, नैन॒ꣳ विश॒सꣳ हिनस्ति॒, चतु॒र्होता॒रꣳ व-
देह॒स॒र्गेऽह॒र्न॒क्त॒का॒मो, ऽन्नꣳ वै चतु॒र्होता॒रो, ऽन्तो॒ द॒श॒मम॒हरं,—न्त॒मे॒व ग॒त्वान्नाद्य॒म॒व॒रु॒न्द्ध,
ए॒तद्वा अ॒स्यैत॒र्ह्य॑प्र॒युक्त॒मे॒,—वद॒न॒वरु॒द्धं तदे॒व प्र॒यु॒ङ्क्ते, तद॒वरु॒न्द्ध, इ॒यꣳ वै स॒र्परा॒ज्ञी, त॒स्या॒
वा ए॒तदु॒क्थꣳ यच्चतु॒र्होता॒रो॒, होता वदति, स्तु॒तꣳ वा ए॒तद॒नु॒शꣳस॒ति॒, न हि स्तु॒तम॒न॒नु-
श॒स्त॒मस्ति॒ ॥७॥ १९

दे॒वाश्च॒ वा असु॒राश्चास्पर्धन्त॒, ते वै स॒मावु॒दे॒व य॒ज्ञं कु॒र्वा॒णा आ॒य॒न्, यदे॒व दे॒वा अकु॒र्वत॒ त-
द॒सुरा अकुर्वत॒, तेन॒ व्या॒वृ॒त॒मग॒च्छꣳ,—स्ते दे॒वा अ॒ब्रुव॒न्ने,—त॒मꣳ य॒ज्ञं ति॒रं उ॒पर्य॑सु॒रेभ्य॒स्त॒ꣳ-
स्या॒मु॒हा इति॒, तमे॒ताव॒च्छ्ल आ॒दायो॒दक्राम॒,—दृ॒ग्भिर्य॑जु॒र्भिः, स॒वि॒ता स्तोमै॒रिं,—न्द्र॒ उक्थाम॒दै,
—र्बृ॒ह॒स्पति॒श्छन्दो॒भि॒रिति॒, तं ति॒रं उ॒पर्य॑सु॒रेभ्यो॒ऽतन्वत॒, तमे॒षाꣳ य॒ज्ञम॑सु॒रा नान्वव॒ाय॒ꣳ,—
स्तेन॒ वा ए॒नानपा॒नुद॒न्त॒, ततो॒ दे॒वा अभ॒वन्, परा॑सु॒रा,—स्तद्य॒ एवꣳ वेद॒ ति॒रं उ॒परि॒ भ्रा॒तृ॒व्या-
द्य॒ज्ञं त॒नु॒ते, भव॒त्या॒त्मना॒, परा॑स्य॒ भ्रा॒तृ॒व्यो भवत्य॒,—तैरे॒व जु॒हु॒यात् सम॒तय॒ज्ञे, च॒तु॒र्भिश्च-
तु॒र्भिरन्वाक्य॒ायं पु॒रस्ता॒त् प्रा॒वरनु॒वा॒कस्यै,—तावा॒न्वै य॒ज्ञो, यावा॒ने॒व य॒ज्ञस्तꣳ वृ॒ङ्क्ते, सय॒ज्ञो
भव॒त्य,—य॒ज्ञा इत॒र, ए॒तैरे॒वं जु॒हु॒यात् पु॒रस्ता॒द्दी॒क्षाया॒, ए॒षा वै प्र॒त्यक्षं दी॒क्षा, ता॒मे॒वाल॒भ्यै,—
तैरे॒व जु॒हु॒यात् पु॒रस्ता॒द्द्वा॒द॒शा॒हस्यै,—ष वै प्र॒त्यक्षं द्वाद॒शाहं,—स्त॒मे॒वाल॒भ्यै,—तैरे॒वाति॒थ्य॒म॒भि॒मृ॒शेद्,
य॒ज्ञेनै॒व य॒ज्ञमाल॒भ्य, द॒क्षि॒ण॒तो वै दे॒वान॒सु॒रा य॒ज्ञम॒जय॒ꣳ,—स्त उद॒ञ्चः पत्नी॑भिः स॒हाग्नी॒ध्रं प्रा-
वि॒श॒ꣳ,—स्तान् पत्नी॑भिः स॒ह प्र॒क्षा॒य जि॒ह्रि॒य॒तोऽसु॒रा अ॒पाव॒र्त॒न्त॒, तांꣳस्तत॒ ए॒वानू॒त्याया॒जय॒ꣳ,

[७] काठ. ९,१५।
[८] मै. १,९,२। काठ. ९,१५।

—स्ततो॒ दे॒वा अभ॒वन्, परा॑सु॒रा,—स्तद्य॒ ए॒वꣳ वेद॒ भव॒त्या॒त्मना॒, परा॒स्य॒ भ्रा॒तृ॒व्यो भवति॒,
नास्य॒ भ्रा॒तृ॒व्यो गृ॒हान्नं प॒शू॒न॒भ्यारो॑ह॒त्य,—भि भ्रा॒तृ॒व्यस्य गृ॒हा॒ना॒भि प॒शू॒ना॒रो॒ह॒ति॒ य ए॒वꣳ वेदे,—
तान्ये॒वाग्नी॒ध्रेऽनु॒ब्रू॒याद्,—ग्नी॒द्ध्रे पा॒त्नी॒व॒तस्य॒ यजति, तृ॒प्ता पत्नी॒ रेतो॒ ध॒त्ते, प्र प्र॒जया॒ च प॒शु॒भिश्च॒
प्रजा॒यत, ए॒तैरे॒व जु॒हु॒याद॒न्त॒रा त्वष्टा॒रं च॒ पत्नी॒श्च सꣳवत्स॒रं प्र॒जाका॒मो, मिथु॒नꣳ वै त्वष्टा॒ च॒
पत्नी॒श्च॒, त्वष्टा॒रꣳ वा ए॒तन्मि॒थु॒नेऽप्य॒स्मात् प्र॒ज॒न॒नाय॒, तन्मि॒थु॒नं, तस्मा॒दे॒व मि॒थु॒नाद्य॒ज॒मानः
प्र॒जया॒ च प॒शु॒भिश्च॒ प्रजा॒यते, वि॒न्दते॒ प्र॒जामा,—स्य॒ वी॒रो जा॒यते॒, यदि॒ सꣳवत्स॒रं जु॒हु॒या॒
वि॒न्दे॒श्चा॒ह॒त्यम् ॥८॥ २०[६०६]

॥ इति प्रथमकाण्डे चातुर्होतृको नाम नवमः प्रपाठकः ॥९॥

अथ दशमः प्रपाठकः।

चातुर्मास्यानि।

आ॒ग्ने॒३यो॒ऽष्टाक॒पालः, सौ॒म्यश्च॒रुः, सा॒वि॒त्रो द्वाद॒शकपालः, सारस्व॒तश्च॒रुः, पौ॒ष्णश्च॒रु,
—र्मा॒रु॒तः स॒प्तक॒पालो, वैश्वदे॒३व्या॒मि॒क्षा, द्यावा॒पृ॒थि॒वीया॒ एक॒कपालो, वा॒जिना॒ꣳ वाजि॒नमा,
—ग्ने॒३यो॒ऽष्टाक॒पालः, सौ॒म्यश्च॒रुः, सा॒वि॒३त्रोऽष्टाक॒पालः, सारस्व॒तश्च॒रुः, पौ॒ष्णश्च॒रु॒रै,—
न्द्रा॒ग्नो द्वाद॒शकपालो, मारु॒३त्या॒मि॒क्षा, वारु॒३ण्या॒मि॒क्षा, का॒य एक॒कपालो, वा॒जिना॒ꣳ
वाजि॒नम्,—ग्नयेऽनीकवते प्रा॒तर॒ष्टाक॒पालो, म॒रुद्भ्यः॒ सांतप॒नेभ्यो॒ म॒ध्यंदि॒ने च॒रुं,—र्म॒रुद्भ्यो॒ गृह-
मे॒धेभ्यः॒ सर्वा॑सां दु॒ग्धे सा॒यमो॒द॒नं, इ॒न्द्रस्य॒ निष्का॒पो, म॒रुद्भ्यः॒ क्री॒डिभ्यः॒ सा॒कꣳ र॒श्मिभिः॒ स॒प्त-
क॒पाल, आ॒ग्ने॒३यो॒ऽष्टाक॒पालः, सौ॒म्यश्च॒रुः, सा॒वि॒३त्रोऽष्टाक॒पालः, सारस्व॒तश्च॒रुः, पौ॒ष्ण-
श्च॒रु॒रै,—न्द्रा॒ग्नो द्वाद॒शकपाला॒, इ॒न्द्राय वृ॒त्रघ्ने च॒रुं,—र्वैश्वक॒र्म॒ण एक॒कपाल, आ॒ग्ने॒३यो॒ऽष्टा-
क॒पालः, सौ॒म्यश्च॒रुः, सा॒वि॒३त्रोऽष्टाक॒पालः, सारस्व॒तश्च॒रुः, पौ॒ष्णश्च॒रु,—र्वा॒यव्या॒ यवा॒गूः
प्र॒ति॒धु॒ग्वं,—न्द्रा॒य शु॒ना॒सी॒राय॒ द्वाद॒शकपालः, सौ॒र्य एक॒कपाल॒ः पट्क॒पालः पु॒रो॒डा॒शो॒ धा॒ना॒
म॒न्थः, प्र॒ति॒पु॒रु॒षं पु॒रो॒डा॒शा॒ एक॒श्चाध्या॒वि॒त्य॒श्च॒रुः ॥१॥ १

अग्ने॒ वेर्होत्रꣳ, वेर्दू॒त्यम्,—व॒तां अ॒ध्व॒रो अ॒स्था॒द,—व॒तां नो॒ द्यावा॒पृ॒थि॒वी, स्वि॒ष्ट॒कृ॒दि॒न्द्रा॒य
दे॒वेभ्यो॒ भवा,—ऽस्य॒ घृ॒तस्य॒ ह॒विषो॒ जु॒षा॒णो वी॒हि स्वाहा॑ ॥ २

[१] तै. १,८,२; ३,४,७। काठ. ९,४-५। कपि. ८,७-८। मा. श्रौ. १,७,१,५।
[२] तै. १,८,३-४। काठ. ९,४-५। कपि. ८,७-८। वा. २,९; ३,४४-४७,४९,५०;२०,१७। काण्व. २,१३-१४; ३,५२-५५; २२,४। मा. श्रौ. १,७,४।

प्र॒घा॒स्या॒न् हवामहे म॒रुतो॒ य॒ज्ञवा॑हसः। क॒र॒म्भेण॑ स॒जोष॑सः ॥ ३
मो षू ण॑ इन्द्रात्र पृ॒त्सु दे॒वास्तु॒ स्म ते शुष्मिन्नव॒याः ॥ ४
म॒ही चि॒द्यस्य॑ मी॒ढुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वन्द॑ते॒ गीः ॥ ५
यद्ग्रामे॒ यदर॑ण्ये॒ यत् स॒भाया॒ꣳ यदि॑न्द्रि॒ये।
यदे॑न॒श्चकृ॒मा व॒यꣳ यद॒प्स॒श्चकृ॒मा व॒यम्।
तदे॑क॒स्यापि॒ चेत॑सि॒ तदे॑क॒स्यापि॒ धर्म॑णि। ६
तस्य॒ सर्व॒स्याꣳह॒सोऽव॒यज॑नमसि ॥
अक्र॒न् कर्म॑ कर्म॒कृतः॑ स॒ह वा॒चा म॑यो॒भुवा ७
दे॒वेभ्यः॒ कर्म॑ कृ॒त्वास्तं॒ प्रेत॑ सुदानवः ॥
पू॒र्णा द॑र्वे॒ परा॑ पत॒ सुपू॑र्णा॒ पुन॒राप॑त। ८
व॒स्नेव॒ वि॒क्री॒णाव॒हा इष॒मूर्जꣳ शतक्रतो ॥
दे॒हि मे॒ ददा॑मि ते॒ नि मे॑ धेहि॒ नि ते॑ दधौ। ९
अ॒पा॒मि॒त्यमि॑व॒ संभ॑र॒ क्वा अम्बा॒ददते ददत् ॥२॥ १०

अत्र॑ पितरो मादयध्वम् ॥
सु॒संदृ॑शं त्वा व॒यꣳ व॒सो म॑घवन् मन्दिषी॒महि।
प्र नू॒नं पू॒र्णब॑न्धुर स्तु॒तो या॑सि॒ वशा॒ँ अनु॒ योजा॒ न्वि॑न्द्र ते॒ हरी॑ ॥ ११
यद॒न्तरि॑क्षं पृथि॒वीमु॒त द्याꣳ यन्मा॒तरं॑ पि॒तरꣳ वा जिहिꣳसि॒म।
अ॒ग्निर्न॒स्तस्मा॒देन॑सो॒ गार्ह॑पत्या॒ उन्नि॑नेतु दुष्कृ॒ताज्जा॒तवे॑दाः ॥ १२
अमी॑मदन्त पि॒तरो॒, नमो॑ वः पितर इ॒षे, नमो॑ वः पितर ऊ॒र्जे, नमो॑ वः पितरः शु-
ष्माय॑, नमो॑ वः पितरो॒ रसा॑य, नमो॑ वः पितरो॒ यज्जी॒वं तस्मै॑, नमो॑ वः पितरो॒ यद्घो॒रं
तस्मै॑, स्व॒धा वः॑ पितरो॒, नमो॒ नमो॑ वः पितरः ॥ ए॒षा यु॒ष्माकं॑ पितर, इ॒मा अ॒स्माकं॑, १३-१४
जी॒वा वो॒ जीव॑न्तः इ॒ह सन्तः॑ स्याम ॥

[मो षू ण इन्द्रात्र०। ऋ. १,१७३,१२। यदेनश्चकृमा वयम्०। अथर्व. १०,३,८। पूर्णा दर्वे (दर्वि) परा०। अथर्व. ३,१०,७]
[३] मै. १,१०,१९। तै. १,८,५; १,७,१२,२। काठ. ९,६। कपि. ८,९। वा. २,३१,३२; ३,५१-५५; १५,४४; १७,७७; १९,५८। काण्व. २,५६,५७; ३,५९-६३; १६,६६; १८,७७; २१,५९। मा. श्रौ. १,७,६; १,१,१। अमीमदन्त...नमो वः...स्याम— अथर्व १८,४,८१-८५।
[सुसंदृशं त्वा वयं०। ऋ. १,८२,३। यदन्तरिक्षं पृथिवी०। अथर्व. ६,१२०,१।

परे॑तन पितरः सो॒म्यासो॑ गम्भी॒रेभिः॑ प॒थिभिः॑ पू॒र्व्येभिः॑।
द॒धा॒थ नो॑ द्रवि॑णꣳ यच्च॑ भ॒द्रꣳ र॒यिं च॑ नः स॒र्ववी॑रं॒ नि य॑च्छत ॥ १५
अया॑ वि॒ष्ठा ज॒नय॑न् कर्व॑राणि॒ स हि घृणि॑रु॒रुर्वरा॑य गा॒तुः।
स प्र॒त्युदै॑द्ध॒रुणो॒ मध्वो॒ अग्रꣳ॒ स्वाꣳ यत् त॒नूं त॒३न्वा॒मैर॑यत ॥ १६
अक्ष॒न्नमी॑मदन्त॒ ह्यव॑ प्रि॒या अ॑धूषत।
अस्तो॑षत॒ स्वभा॑नवो॒ विप्रा॒ नवि॑ष्ठया म॒ती योजा॒ न्वि॑न्द्र ते॒ हरी॑ ॥ १७
मनो॒ न्वाहु॑वामहे नाराश॒ꣳसेन॒ स्तोमे॑न। पि॒तॄ॒णां च॒ मन्म॑भिः ॥ १८
आ न॑ एतु॒ मनः॒ पुनः॒ क्रत्वे॒ दक्षा॑य जी॒वसे। ज्योक् च॒ सूर्यं॑ दृ॒शे ॥ १९
पुन॑र्नः पि॒तरो॒ मनो॒ ददा॑तु॒ दैव्यो॒ जनः॑। जी॒वꣳ व्रातꣳ सचेमहि ॥ २०
अग्ने॒ तम॒द्याश्वं॒ न स्तोमैः॒ क्रतुं॒ न भ॒द्रꣳ हृ॑दि॒स्पृश॑म्। ऋ॒ध्यामा॑ त॒ ओहैः॑ ॥३॥ २१

आखुं॑ ते रुद्र प॒शुं क॑रो॒म्ये,—ष ते॑ रुद्र भा॒ग,—स्तं जु॑षस्व स॒ह स्वस्राम्बि॒कया॒ स्वाहा॑ ॥ २२

अवा॑म्ब रु॒द्रम॑दिम॒ह्यव॑ दे॒वं त्र्य॑म्बकम्।
यथा॑ नो॒ वस्य॑स॒स्कर॒द्यथा॑ नः॒ श्रेय॑स॒स्कर॑त् ॥ २३
यथा॑ नो॒ भूय॑स॒स्कर॒द्यथा॑ नः प्र॒तरं॑ ति॒राद्यथा॑ नो व्यवसा॒यया॑त्।
भे॒ष॒जं गवे॒ अश्वा॑य॒ पुरु॑षाय भेष॒जम्।
अथो॑ अ॒स्मभ्यं॑ भेष॒जꣳ सुभे॑ष॒जꣳ यथास॑ति सु॒गं मे॒षाय॑ मे॒ष्यै ॥ २४
त्र्य॑म्बकꣳ यजामहे सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्।
उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ मामृता॑त् ॥ २५
रु॒द्रैष ते॑ भा॒ग,—स्तेना॑व॒सेन॑ प॒रो मूज॑व॒तोऽती॑हि ॥ २६
पिना॑कहस्तः॒ कृत्ति॑वासा॒ अव॑ततधन्वा ॥४॥ २७

दे॒वाश्च॒ वा असु॒राश्चा॒स्मिँल्लो॒क आ॑सन्, तत् प्र॒जाप॑तिरकामयत॒, प्रासु॒रान्नु॒देय॒, प्र॒जाः सृ॑जे॒येति॒,

आ यात (परेतन) पितरः०। अथर्व. १८,४,६२-६३। अया विष्ठा०। अथर्व. ७,३,१। अक्षन्नमी०। ऋ. १,८२,२, अथर्व. १८,४,६१। मनो न्वाहुवामहे०। ऋ. १०,५७,३। आ न एतु०। ऋ. १०,५७,४। क्रत्वे दक्षाय जीवसे। अथर्व. ६,१९,२। ज्योक् च सूर्यं दृशे। अथर्व. १,६,३। पुनर्नः पितरो०। ऋ. १०,५७,५। अग्ने तमद्याश्व०। ऋ. ४,१०,१; सा. ४३४,१७७७]
[४] मै. १,१०,२०। तै. १,८,६। काठ. ९,७। कपि. ८,१०। वा. ३,५७-६१। काण्व. ३,६५-६८,७०,(६९)। [त्र्यम्बकं यजामहे...मृतात्। ऋ. ७,५९,१२। त्र्यम्बकं यजामहे... इतः। अथर्व. १४,१,१७]

स चातुर्मास्यान्यपश्यत्,—चातुर्मास्यैर्वै सोऽसुरान् प्राणुदत, चातुर्मास्यैः प्रजा असृजत, तद्य एवं२ विद्वा२श्चातुर्मास्यैर्यजते प्र भ्रातृव्यं नुदते प्र प्रजया च पशुभिश्च प्रजायते, ऽग्निष्टोमाद्धि वैश्वदेवं२ यज्ञक्रतुं निर्मीय प्रजापतिः प्रजा असृजत,—उक्थ्याद्वरुणप्रघासान् यज्ञक्रतुं निर्मायेमाः प्रजा वरुणेनाग्राहय,—दतिरात्रात् साकमेधान् यज्ञक्रतुं निर्मायेन्द्रो वृत्रमहन्, त्वष्टा वा अन्याः प्रजा आसृज-सृष्टा अन्या, अथ प्रजापतिरकामयत, प्रजाः सृजेयेति, संवत्सरो वै यज्ञो, यज्ञः प्रजापतिः, स एतं मिथुनं पयसि आत्मन्नपश्यदन्यं च दध्यं वा,—ऽथैताभ्यो देवताभ्य एतानि हवी२षि भागं निरवपद्, तैः प्रजा असृजत, ऋतुभ्यो वै ताः प्रजाः प्राजायन्त, ऋतवो वा एतानि पञ्च हवी२षि, पञ्च ह्यृतव,—स्ततः प्रजायते, ऽग्निरिवं प्राजनयद्, सोमो वै रेतोऽदधा,—न्मिथुनं२ वा अग्निश्च सोमश्च, सविता प्रासुवत् प्रजननाय, संवत्सरो वै सविता, द्वादश मासाः संवत्सरं,—स्तस्माद्द्वादशकपालो, ऽथो वैश्वदेवत्वायैव द्वादशकपाल, उपा२शु यजत्य,—निरुक्तो हि संवत्सरः, सरस्वत्येव सृष्टासु वाचमदधात्, पूर्वां प्रतिष्ठामभ्यसृज्यन्त, वाग्वै सरस्वती, पशवः पूषा, मिथुनं२ वाक्च पशवश्च, मध्यतः प्रजापतिनासृज्यन्ता,—ऽन्ततो मिथुनाद्विषूचीः प्राजायन्त, तन्मध्यत एवैतद् प्रजापतिना सृज्यन्ते, ऽथाद्यो ऽन्ततो मिथुनाद्विषूचीः प्रजायन्ते, वार्त्रघ्नानि वा एतानि हवी२ष्य,—ग्निना वा अनीकेनेन्द्रो वृत्रमहन्, त्सोमेन राज्ञा सवितृप्रसूतः सरस्वत्या चेत्रा पूष्णा२ वी३र्येणान्वतिष्ठत, विजितिर्वा एतानि हवी२षी,—न्द्रो वै वृत्रमहन्, त्स विष्वङ् वीर्येण व्यार्छन्, तदिदं२ सर्वं प्राविशदप ओषधीर्वनस्पती२,—स्तं देवा अश्राम्य२,—स्तं समनय२,—स्तं साक्षात्यस्य साक्षाद्यत्त्वं, तद्य एवं२ विद्वान्त्साक्षात्येन यजत ऋध्नो-ति ॥५॥ २८

मिथुनं२ वै दधि च शृतं चा,—ऽथ यद् सं२सृष्टमाण्डमिव मस्तिव परीव ददृशे गर्भ एवं सं, तपसो वै ताः प्रजाः प्राजायन्त, तपस्त्वं२ वा एतद्गच्छति यं शृतत्वं गच्छति, ततः प्रजायते, ऽथैषा वैश्वदेव्यामिक्षा, प्रजापतिः प्रजा असृजत, ता वैश्वदेवेनैवासृजत, तस्मादिमा वैश्वदेवीः प्रजा, विश्वान् देवान् यजति, स्तोका वै विश्वे देवा,—स्तान् वा एतद्यजत्य,—थो अमुतःप्रदानाद्धि मनुष्या यज्ञमुपजीवन्ति, योनिर्वा एष प्रजानां, तं मरुतोऽभ्यकामयन्त, ततोऽ२होगृहीता असृज्यन्त, यत्स्वतवसः स्वत्वायैव निष्कृत्यै, प्रजननो वा एष पशूनां२, यन्मा-

[५] तै. ब्रा. १,६,१-२ ।
[६] काठ. ३६,१ । तै. ब्रा. १,६,२ ।

रुतः सप्तकपालो भवति, सप्त हि मरुतो, विण्मरुतो, ऽथो निरवपस्या एव मारुतो, ऽथो ग्राम्यमेवैतेनान्नाद्यमवरुन्द्धे ॥६॥ २९

तां वैश्वदेवेन सृष्टा विषूचीर्व्युदाय२,—स्ताः प्रजापतिर्द्यावापृथिवीयेन पर्यगृह्णाद्, यद् द्यावापृथिवीयः प्रजाना२ सृष्टानां परिगृहीत्यै, यदेककपालस्तेन प्राजापत्यः, प्रजापता एव देवतासु प्रतितिष्ठति, यजमानो वा एककपाल, आहवनीयः स्वर्गो लोको, यत् सर्वहुतं करोति हविर्भूतमेवैनं२ स्वर्गं लोकं गमयति, यजमानं२ वै हृच्छन्तं प्रजा अनुहृच्छन्ति, यजमानं प्रतितिष्ठन्तं प्रजा अनुप्रतितिष्ठ,—न्त्यृजुहोत३व्यः प्रतिष्ठित्यै, सर्वहुतं करोति प्रतिष्ठित्यै, यजमानो वा एककपालः, पशवो घृतं, तदभिपूर्यः, पशुभिरेवैनं२ समर्धयति, यदभिपूरयेदधरमेनं पशुभ्यः कुर्या,—दभुञ्जन्त एनं पशवा उपतिष्ठेयु,—रातिः पृष्ठः कार्यः, पशुभ्य एवैनमुत्तरमक,—भुञ्जन्त एनं पशवा उपातिष्ठन्ते, तन्न सूक्ष्यं,—मभिपूर्य एद, न हि पशवो न भुञ्जन्ति, यत् प्राङ् पद्येत यजमानः प्रमीयेत, यद्दक्षिणा प्रजामस्य निर्दहेद्, यत् प्रत्यङ् पत्नी प्रमीयेत, यदुदङ् पशूनस्य निर्दहेद्, यदुत्तानः पतेत् पर्जन्योऽवर्षुकः स्यात्, पुनरादायाभिघार्य होत३व्यो यजमानस्य प्रतिष्ठित्यै, वरो दक्षिणा, वरेणैव वरं२ स्पृणोत्या,—त्मा हि वरं,—स्त्रेधासंनद्धं बर्हिर्भवति, त्रेधासंनद्ध इध्म,—स्त्रेधाविहितानि चातुर्मास्यानि, संवत्सरं२ वै चातुर्मास्यानि, संवत्सरेणाग्निं मन्थन्त्य,—ग्निं२ वै प्रजा अनुप्रजायन्ते, प्रजननो वा एष मथ्यते, ऽथो प्राणं२ वा एतद्यजमानाय जनयन्ति, वसन्ता यष्टव्यं प्रजननाय, प्रवणे यष्टव्यं प्रजननाय, नोत्तरवेदिमुपवपन्ति प्रजननाय, प्रस्वो भवन्ति, प्र मा जनयानीति, पशवो वै पृषदाज्यं, नानारूपा वै पशव,—स्तस्मान्नानारूपमाग्नेयं घृतमि,—न्द्रं दध्यै,—न्द्राग्नं पृषदाज्यं देवतया, प्राणापानौ वा इन्द्राग्नी, मिथुनं प्राणापानौ, मिथुनयोनयः प्रजा, मिथुनात् खलु वै प्रजाः पशवः प्रजायन्ते, तन्मिथुनं, तस्मादेव मिथुनाद्यजमानः प्रजया च पशुभिश्च प्रजायते, यदि वसन्ता यजेत द्विरुपस्तृणीयात्, सकृदभिघारये,—दोषधयो वै पशवा, ओषधीष्वेव पशून् प्रतिष्ठापयति, यदि प्रावृषि यजेत सकृदुपस्तृणीयाद्, द्विरभिघारयेद्, वृष्ट्यैव पशूनभि-जिघर्ति ॥७॥ ३०

प्राणेभ्यो वै ताः प्रजाः प्राजायन्त, प्राणा वा एतानि नव हवी२षि, नव हि प्राणा,

[७] काठ. ३६,१-२ । तै. ब्रा. १,६,३ ।
[८] काठ. ३६,२-३ । तै. ब्रा. १,६,३ ।

आत्मा देवता, ततः प्रजायते, नव प्रयाजा, नवानुयाजा, द्वा आज्यभागा, अष्टौ हवी२ष्य,—ग्ने समवद्यति, वाजिनो यजति, तत् त्रि२श,—त्रि२शदक्षरा विराड्, विराजेव प्रतितिष्ठति, विराजो वै योनिः प्रजापतिः प्रजा असृजत, विराजो वा एतद्योनेर्यजमानः प्रजायते, त्रि२शत् त्रि२शद्ध रात्रयो मासो, यो मासः स संवत्सरः, संवत्सरः प्रजापति,—स्तत् प्रजापतेश्च वा एतद्विराजश्च योनेर्मिथुनाद्यजमानः प्रजायता, एकैकया वा आहुत्या द्वादश द्वादश रात्रीरयुवत, ता यावतीः संख्यानि तावतीः संवत्सरस्य रात्रयः, संवत्सरमेव भ्रातृव्याद्युवते, वैश्वदेवेन चतुरो मासोऽयुवत, वरुणप्रघासैः परा२श्चतुरः, साकमेधैः परा२श्चतुर,—स्तानेव भ्रातृव्याद्युवत, ऋतुपात्रं वा अन्यच्चातुर्मास्ययाजिन्यो, यो, वसन्तोऽभूत् प्रावृडभूच्छरदभूदि,—ति यजते स ऋतुयाज्य,—थ यस्त्रयोदशं मास२ संपादयति त्रयोदशं मासमभियजते स चातुर्मास्ययाजी३न्,—ऊर्ज२स्वी शिष्ट्वा चतुर्थमुत्सृजेत, ऊर्जं द्वौ परा इष्ट्वा तृतीयमुत्सृजेत, ये वै त्रयः संवत्सरास्तेषा२ षट्त्रि२शत् पूर्णमासा, यौ द्वौ तयोश्चतुर्वि२शति,—स्त३व्येऽमी षट्त्रि२शन्त्यधि तानस्यां चतुर्वि२शत्यामुपसंपादय,—स्त्वेष वाव स त्रयोदशो मास,—स्तमेवैतत् संपादयति, तमभियजते, वैश्वदेवेन यजेत पशुकामो, न वरुणप्रघासैर्न साकमेधैः, सवो वै पुरुषः साहस्रो जायते, यावत्सर्व३स्त्वेवेति, प्रजननं२ वा एतद्वविर्यद्वैश्वदेवं२ यद्वैश्वदेवेन यजते प्रजननाय वा एतद्यजते, स्वां मात्रां गच्छानीति, स यदा सहस्रं पशून् गच्छेदथ वरुणप्रघासैर्यजेत, यदेवादः सहस्रमग२स्तस्यैवैद२होऽवयजति ॥८॥ ३१

यद्धविः प्रयाजेषु यजन्त्योषधीस्तद्यजति, यद्धविरनुयाजेषु फलं तद्, यद्धविर्वाजिना२ यदुवादः फलाद् प्रजायते यद्देवतद्यजति, यदूर्ग् उदस्यं तद्, यदुपासानक्ता व्युष्टिं चैव निम्रुक्तिं च, यज्जोष्ट्री यदेव जातं च जनिष्यमाणं च, यद्धोत्रा दैव्या हौ-तारेमे एव, यत्तिस्रो देवी,—र्वाग्वै तिस्रो देवी,—र्वाचं२ वा एतद्यजत्य,—थो छन्दा२सि वै वाक्, छन्दा२सि वा एतद्यजति, तनूनपाद्धि यज्ञोऽप्रसूतो, नराश२सः प्रसूत,—स्तस्मात् तनूनपातं प्रयाजेषु यज,—त्यप्रसूतो हि तर्हि यज्ञ,—स्तस्माद् नराश२समनुयाजेषु यजति, प्रसूतो हि तर्हि यज्ञो, वनस्पति२ यजति, सोमो वै वनस्पतिः, सौम्यो इमाः प्रजाः, प्रजास्वेव रसं दधाति, त्वष्टारं२ यजति, त्वष्टा हि रूपाणि विकरोति, वाजिनो यजति, पशवो वै वाजिन,—स्तान् वा

[९] काठ. ३६,३-४ । तै. ब्रा. १,६,३ ।

एतद्यजत्य,—थो छन्दा२सि वै वाजिन,—श्छन्दा२सि वा एतद्यजति, पशवो वै वाजिन,—स्तान्त्सं२स्थाप्य२, यत्स२स्थापयेत् तानेव स२स्थापये,—दस२स्थिता३ह्येते सुदुदि प्रजायन्ते, न वा एष संयज्ञ इव, स२स्थिते हि प्रहृतेषु परिधिषु जुहोति, यदव्यवान२ यजति तेन यज्ञः क्रियते, ऽनुयजति समिष्ट्या एव प्रतिष्ठित्यै, बर्हिरनुप्रिश्रन् गृह्णात्यृ,—षभेष्वेव रेतो दधात्यु,—पाशुरासीनो यजत्यु,—पांशवो हि पशवः पशुषु रेतो दधत्य,—थो ऊर्ध्वं ह्येव प्रजापतिः प्रजा असृजत, दिग्भ्यो जुहोती,—मा एव दिशो रसेन व्यनक्ति, प्राचीमुत्तमां जुहोति, प्राचीमेव दिशं पुनरुपावर्तन्ते, समुपह्वयन्ते, सोमपीथ इव३ह्येषं, ऋत्विजः प्राश्नन्ति॥ वाजिनो मे यज्ञं२ वहान्॥ इति समावभ्यो भक्षगन्ति, समावभ्य एव वाजं२ विभजन्त, आत्मना प्राश्नात्या,—त्मन्नेव वाजं धत्ते ॥ ९ ॥ ३२-३४

तां वैश्वदेवेन सृष्टास्तस्मि२स्तरुणिमनि वरुणोऽगृह्णात्, तदाहुर,—ति वै ताः प्रजापतिमचर२,—स्ता अतिचरन्तीर्वरुणेनाग्राहयत्, तस्मात् पिता नातिचरितवा इति, वैश्वदेवेन वै प्रजापतिः प्रजा असृजत, तस्य मरुतो हव्यं२ व्यमथ्नत, ततोऽ२होगृहीता असृज्यन्त, ताभ्यो भेनुजमैच्छन्, तद्वा आत्मन्नेवैच्छन्, स एतत् पय आत्मनोऽधि निरमिमीत, तेनाभ्योऽ२होऽवायजत्, तदं२हसो वा एषावेष्टिर्यद्वरुणप्रघासा, यद्वरुणप्रघासैर्यजेत सर्वस्या२हसोऽवेष्ट्यै, जग्धाद्धि ताः प्रजा वरुणोऽगृह्णात्, तस्माद्वरुणप्रघासा, यावत् कुमा३रेऽश्मो जातं एनस्तावदस्मिन्नेनो भवति यो वरुणप्रघासैर्यजते, सावि३त्रोऽष्टाकपालो भवति, गायत्रो वै देवाना२ सविता द्वादशकपाल ऐन्द्राग्नो देवतया, यद्वै तद्वरुणगृहीता अवेम्लीयन्तेव तदास्विन्द्राग्नी बलमधत्ता२, शिथिरा वै ताः प्रजा वरुणोऽगृह्णात्, तास्विन्द्राग्नी बलमधत्ता,—मोजो वै वीर्यमिन्द्राग्नी, ओजो वा एतद्वीर्यं मध्यतः प्रजानां धीयते, न वै ताः प्राणं२,—स्ता अप्राणतीर्वरुणोऽगृह्णात्, प्राणापानौ वा इन्द्राग्नी, प्राणापानौ वा एतन्मुखतः प्रजानां धीयते, अथैतानि पञ्च हवी२षि संतत्यै, निरवत्त्यै मारुती, निर्वरुणत्वाय वारुणी, कत्त्वाय कायो, यद्वै तद्वरुणगृहीताभ्यः कर्मभवत् तस्मात् कायः, प्रजापतिर्वै कः, प्रजापतिर्वै ताः प्रजा वरुणेनाग्राहयद्, यत् काय आत्मन्नेवैना वरुणान् मुञ्चति ॥१०॥ ३५

ऋतं२ वै सत्यं२ यज्ञो, ऽनृत२स्त्र्य,—नृतं२ वा एषा करोति या पत्युः क्रीता सत्यथान्यैश्चरत्य,—नृतमेव निरवदाय ऋतं२ सत्यमुपैति यन्मिथुया प्रतिप्रब्रुयात्, प्रियतमेन याजयेद,—य

[१०] काठ. ३६,५ । तै. ब्रा. १,६,५ ।
[११] काठ. ३६,६ । मा. श्रौ १,७,४ । तै. ब्रा. १,६,५; १,४,४ ।

यद्वाचयुति मध्यामेवैनां करोत्या,—मपेषा भवन्ति सर्वस्याꣳहसोऽवेष्ट्यै, यद्धृज्येयुरनवेष्टमꣳहः स्यात्, पात्रेभ्यो वै ताः प्रजा वरुणोऽगृह्णाद्, यत् पात्राणि पात्रेभ्य एवैना वरुणान् मुञ्चति, प्रतिपुरुषं भवन्ति, प्रतिपुरुषमेवाꣳहोऽवयजत्यै,—कमधि भवति, गर्भेꣳस्तेन निरवदयते, ऽन्नाद्वै ताः प्रजा वरुणोऽगृह्णाच्छूर्पेणान्नं बिभ्रति, तस्माच्छूर्पेण जुहुतः, स्त्रीपुꣳसौ जुहुतो, मिथुना एवं प्रजा वरुणान् मुञ्चतः, पुरस्तात् प्रत्यञ्चौ तिष्ठन्तौ जुहुतः, पुरस्ताद्वाꣳहोऽवयजतो, यत् पात्राणि, य एव द्विपादः पशवो मिथुनास्तेषामेतत् पुरस्तादꣳहोऽवयजतो, ऽथ यन्मेषश्च मेषी च, य एव चतुष्पादः पशवो मिथुनास्तेषामेतदुपरिष्टादꣳहोऽवयजत, उभयत एवाꣳहोऽवयजतः पुरस्ताच्चोपरिष्टाच्च ॥ ११ ॥ ३६

यद्वै प्रजा वरुणो गृह्णाति शम्यं चैवं यवं चापि न गृह्णाति, हेमन्तो हि वरुणो, या एवावरुणगृहीता ताभ्यामेवैना वरुणान् मुञ्चति, वरुणो वै यवो वरुणदेवꣳत्यः, स्वेनैवैना भागधेयेन वरुणान् मुञ्चत्यं,—नृताद्वै ताः प्रजा वरुणोऽगृह्णाद्, यदेता अनृतपशू अनृतादेवैना वरुणान् मुञ्चतो, मिथुनौ भवतो, मिथुना एवं प्रजा वरुणान् मुञ्चतो, लोमशौ भवतो मेध्यत्वाय, ये हि पशवो लोम जगृहुस्ते मेधं प्रापुः, शमीपर्णानि भवन्ति शंत्वाय, भूर्जो वै नामैष वृक्षः, कार्या एतस्य स्रुचः, प्रजापतिर्वा अन्नाद्यमवरुन्धं नाशक्नोत्, त शतेध्मेनावरुन्द्ध, परःशतानि कार्याण्यन्नाद्यस्यावरुद्ध्यै, सहस्रेध्मो हꣳत्वेवाꣳहसोऽवेष्टिꣳ विव्याच, परःसहस्राणि कार्याणि सर्वस्याꣳहसोऽवेष्ट्यै, यदा पात्राणि जुहुत्यथाग्निꣳ समार्ष्टि, यस्मिन्नेवाꣳहोऽवायाक्षुस्तस्मिन्नुत्पूते देवता यजा, इतीन्द्रो वै यतीन्त्सालावृकेयेभ्यः प्रायच्छत्, तेषाꣳ वा एतानि शीर्षाणि यत् खर्जूराः, सोमपीथो वा एꣳषोऽस्या उदैपद्, यत् करीराणि, सौम्यानि वै करीराणि, सौमी हꣳत्वेवाहुतिरमुतो वृष्टिं च्यावयति, यत् करीराणि भवन्ति वृष्ट्या अन्नाद्यस्यावरुद्ध्यै ॥१२॥ ३७

प्रजापतेर्वा एतज्ज्येष्ठं तोकꣳ यत् पर्वता,—स्ते पक्षिण आसꣳ,—स्ते परापातमासत यत्र यत्राकामयन्ता,—ऽथ वा इयं तर्हि शिथिरासीत्, तेषामिन्द्रः पक्षानछिनत्, तैरिमामदृꣳहद्, ये पक्षा आसꣳस्ते जीमूता अभवꣳ,—स्तस्मादेते सदा पर्वतमुपप्लवन्ते, योनिर्ह्येषामेष, ततो यः प्रथमो रसः प्राक्षरत् तानि करीराण्यभवꣳ,—स्तदेतदुत प्रावृषि जीमूताः प्लवन्ते, यजन्ते वरुणप्रघासैः,

[१२] काठ. ३६,६-७। तै. ब्रा. १,६,४,५।
[१३] काठ. ३६,७। वा. २०,२३,३८,२५। काण्व. २२,७; ३८,२४।

करीराणि भवन्ति, वृष्टिं तैः संतनोति, तस्मात् तर्हि भूयिष्ठꣳ वर्षति, वृष्टिꣳ हि संतनोति, न वै वैश्वदेव उत्तरवेदिमुपवपन्त्यु,—पात्र वपन्ति, प्रजाताः प्रजाः प्रतिगृभ्णादिति, येयमुत्तरा वेदिर्या अत्रीः प्रजास्तासामेषा योनि,—स्ता एतामनुप्रजायन्ते, येयं दक्षिणा वेदिर्या आद्याः प्रजास्तासामेषा योनि,—स्ता एतामनुप्रजायन्त, उभयीरेव प्रजाः प्रजनयत्यत्रीश्चाद्याश्चा,—ऽयꣳ वाव हस्ता आसीन्नायं, तद्येयं दक्षिणा वेदिस्तयेममविन्दꣳ,—स्तस्मादेष एतस्य परिवेष्टा, कनीयान् हि, तस्मात् कनीयान् ज्यायाꣳसं परिवेवेष्टि, समे प्राची भवतः, समाꣳहीमौ प्राञ्चौ हस्ता असंभिन्ने भवतः सर्वस्याꣳहसोऽवेष्ट्यै, यत्संभिद्युरनवेष्टमꣳहः स्यादं,—कस्या पश्चात् संभिनत्त्यनुसंतत्या, उपेमाꣳ वपति, नैमामन्वभ्यारोहयत्, क्षत्रꣳ वा इन्द्रो, विण्मरुतो, नाना यजतः पापवसीयसस्य व्यावृत्त्यै, यदेवाध्वर्युः करोति तत् प्रतिप्रस्थाता करोति, तस्माद्यद्राजा करोति तद्विट्करोति, न वै वैश्वदेवे त्रिꣳशदाहुतयः सन्ति न साकमेधेषु, वरुणप्रघासेषु वाव त्रिꣳशदाहुतयो, वैराजो वै पुरुषो, दश हस्त्या अङ्गुल्यो दश पाद्या दश प्राणा, यत्तर्ह्यवभृथमभ्यववयन्ति यजमानस्य निर्वरुणत्वाय, यद्वै यज्ञस्य स्वगाकृतिं न प्राप्नोति तद्वरुणो गृह्णाति, यन्निष्कार्येणावभृथमभ्यववयन्ति, यदेवात्र वरुणस्य न्युक्तं तस्यैषा निरवत्ति,—रनपेक्षमाणा आयन्ति वरुणस्यानन्ववायाय, परोगोष्ठं मार्जयन्ते, परोगोष्ठमेव वरुणं निरवदयन्ता, एधोऽस्येधिषीमहीति, निर्वरुणा एवं भूत्वैधितुमुपयन्ति, समिदसि समेधिषीमहीं,—ति समिद्धया एवं ॥१३॥ ३८

प्रजाः सृष्ट्वाꣳहोऽवयज्य सोऽकामयत, वृत्रꣳ हन्यामिति, स एताभिर्देवताभिः सयुग्भूत्वा मरुद्भिर्विशाग्निनानीकेनोपप्लायत, स वृत्रमेत्य वृत्रं दृष्ट्वोरुस्कम्भगृहीतोऽनभिधृष्णुवन्नतिष्ठत्, तं मरुतोऽध्यैयन्त, तेऽत्यैषꣳ,—स्तस्य यदा मर्मागच्छन्नथाचेष्टत्, सꣳ वा एनं तदतपꣳ,—स्तस्मात् सांतपना, अग्निना वा अनीकेनेन्द्रो वृत्रमहꣳ,—स्तदनीकत्वायैवैषो, ऽथो अग्निर्वै देवानाꣳ सेनानी,—स्तत्सेनोत्थापनीयमेवैतदि,—न्द्रो वै वृत्राय वज्रमुद्यमं नाशक्नोत्, स एवं मरुद्भ्यो भागं निरवपत्, तꣳ वीर्याय समतपꣳ,—स्ते तेन वीꣳर्येणोदयच्छन् तसꣳ वा एनं तदतपꣳ,—स्तस्मात् सांतपना, मध्यंदिने चरुर्निरुप्य,—स्तर्हि भो अन्तो तपति, चरुः स्याद्, तꣳ हि सर्वतस्तपति, देवा वै वृत्रस्य मर्म नाविन्दꣳ,—स्ते मरुतः क्षुरपविना व्ययुः, सꣳ वा एनं तदतपꣳ,—स्तस्मात् सांतपनाः ॥१४॥ ३९

[एधोऽस्येधिषीय (महि) समिदसि समेधिषीय (महि)। अथर्व. ७,९४,४]
[१४] काठ. ३६,८। तै. ब्रा, १,६,६,३।

ते वै श्वो भूते वृत्रꣳ हनिष्यन्ता उपावसꣳ,—स्तेऽब्रुवन्, कस्य वाहेदꣳ श्वो भविता कस्य वा पचतेति, त एतमोदनमपचꣳ,—स्तेन पशूनाचिकयु,—स्तेऽविदु,—र्यतरान् वा इमं उपावत्स्यन्ति त इदं भविष्यन्तीति, तेभ्यो वा एतेन प्रातिष्ठꣳ,—स्तानेतेनायच्छꣳ,—स्तत् पशूनाꣳ वावैषा युति,—स्ते वै श्वोविजयिनोऽवसꣳ,—स्तेऽब्रुवन्, कस्य वाहेदꣳ श्वो भविता कस्य वा पचतेति, त एतमोदनमपचꣳ,—स्तेऽब्रुवन्, माहुतमशिष्मेति, तं मरुद्भ्यो गृहमेधेभ्योऽजुहवुः, पशवो वै मरुतो गृहमेधाः, पशुभ्यो वै ते तमजुहवु,—स्ते वै सꣳयत्ता आसꣳ,—स्तेऽसुरा देवेभ्यः क्षुधं प्राहिण्वꣳ,—स्तां देवाः प्रतिश्रुत्यैतमोदनमपचन्, त्सा देवेषु लोकमवित्ता पुनरसुरान् प्राविशत, ततो देवा अभवन्, परासुरा,—स्तथ एवꣳ विद्वानेतमोदनं पचति भवत्यात्मना, परास्य भ्रातृव्यो भवत्य,—पि प्रतिवेशं पचेद्भ्रातृव्यायैव क्षुधं प्रहिणोति, यद्वै चातुर्मास्यानां पाकयज्ञस्येव तदेषां पशव्यं, पशव्यो गृहमेधो, न प्रयाजान् यजति नानुयाजान्, न सामिधेनीरन्वाहा,—ऽऽज्यभागौ यजति यज्ञताया, अग्नये समवद्यत्य,—ग्निर्वै समिष्टिर,—ग्निः प्रतिष्ठितिः, समिष्ट्या एवं प्रतिष्ठित्या, इडामुपह्वयन्ते, पशवो वा इडा, पशव्यो गृहमेध,—स्तस्मादिडामुपह्वयन्ते, निष्कार्यं निदधात्यनुसंतत्यै ॥१५॥ ४०

तेषाꣳ वा उभयेषामिन्द्रः प्रावसत्, ते देवा एतमिन्द्राय भागं न्यदधुर,—स्माञ् श्वो निहितभागो वृणता, इत्युपभर्ममाह्वयन्ती,—न्द्रꣳ वा एते निह्वयन्ते, रुवथो वषट्कारो, ऽथो असुराणाꣳ वा एतदुपभर्ममत्याह्वयन्त्य,—स्मान् प्रजनयादिति, संवत्सा गावो वसन्ति साकमेधत्वाय, यत्स्त्र्यश्नाति साकमेधत्वाय, यत्स्त्री नाश्नीयादसाकमेधाः स्युर,—थ यꣳत्स्त्र्यश्नाति साकमेधत्वाय, निर्ऋतिर्वा एतं यज्ञस्य गृह्णाति यꣳत्स्त्र्यश्नाति, निर्ऋतिर्हि स्त्री, निर्ऋतिगृहीता वै दर्वि,—स्तस्माꣳ ह्युवचरत्ये,—वं खलु वै स्त्रिया हस्तो यद्दर्वि,—र्यद्दर्व्या जुहोति निर्ऋतिगृहीतयैव निर्ऋतिं निरवदयते, स वै श्वो भूते वृत्रꣳ हन्तुमुपप्लायत, तं मरुतः परिक्रीडन्त आसꣳ,—स्तेऽस्याप्त्वा व्यनयꣳ३,—स्तेऽभ्युधर्षयꣳ,—स्तस्मात् क्रीडय,—स्ते वै सꣳयत्ता आसꣳ,—स्ते देवा असुराणां परमन्तं न परापश्यꣳ,—स्ते मरुतः क्रीडीन् क्रीडतोऽपापश्यꣳ,—स्तांजितमनसो वा इमं इति, तेभ्यो वा एतं भागं निरवपꣳ,—स्ततो वा अजयꣳ,—स्तांजित्वा एवैꣳषो, ऽसौ वा आदित्य इन्द्रो, रश्मयः क्रीडयः, साकꣳ रश्मिभिः प्रचरन्ति विजित्यै, देवा वै वृत्रꣳ हत्वा न व्य-

[१५] काठ. ३६,९। तै. ब्रा. १,६,६,४।
[१६] काठ. ३६,९-१०। तै. ब्रा. १,६,७।

जानꣳ,—स्ते मरुतः क्रीडयोऽभ्यक्रीडꣳ,—स्तस्मात् क्रीडयो, ऽथैतानि पञ्च हवीꣳषि संतत्या, अथैष ऐन्द्राग्न, इन्द्राग्नी एवास्मै वज्रमन्वबिभृतामि,—न्द्राग्नी अस्मै वज्रमभ्यवहतामं,—थैष ऐन्द्र, उद्धारꣳ वा एतमिन्द्र उदहरत, वृत्रꣳ हत्वा तदुद्धारं एवास्यैष भागं एवं, तस्माद् राजा संग्रामं जित्वोदाजमुदजते, ऽथैष वैश्वकर्मणो, विश्वानि मे कर्माणि कृतान्यासन्निति, विश्वकर्मा हि, सोऽभवद्वृत्रꣳ हत्वा,—ऽथैष आघारं आहुतीनाꣳ संतत्यै त्रिꣳशत्वाय ॥१६॥ ४१

प्रजाः सृष्ट्वाꣳहोऽवयज्य वृत्रꣳ हत्वा ते देवा अमृतत्वमेवाकामयन्त, स्वर्गो वै लोकोऽमृतत्वꣳ, संवत्सरः स्वर्गो लोको, यद् द्वादशाहुतयोऽमृतत्वमेव तेन स्पृणोत्या,—पद्वा एतत् संवत्सरमे,—ति वा एतत् संवत्सरमक्रमीद्, यद् द्वादशाहुतयः संवत्सरमेव पुनरभिपर्यावर्तता, आपद्वा एतत् संवत्सरꣳ, सꣳ वा एतत् संवत्सरमकक्षद्, यत् षट् षट् संपादयति, षड्वा ऋतव,—स्तान् वा एतत् संपादयति, तानेविपादयति, तानुपिपद्यमानानन्वापिपद्यता, आपद्वा एतत् संवत्सरं, पितरो वा ऋतव,—स्तान् वा एतत् प्रजनयति, तान् प्रजायमानाननु प्रजायते, ततः प्रजायत, एतद्वा अस्य संवत्स३रो३ऽभीष्टोऽभूद,—भीष्टा ऋतवो, ऽथ वा अस्य पितरोऽनभीष्टा, यदेष पितृयज्ञस्तेनैवास्य पितरोऽभीष्टाः प्रीता भवन्ति, दक्षिणतो निरुप्यं, दक्षिणा हि पितृणामं,—थो आहु,—रुभयत एवं निरुप्यामि,—त्युभये३हीज्यन्ते, तन्न सूक्ष्यं, दक्षिणत एवं निरुप्यं, दक्षिणा हि पितृणाꣳ, षट्कपालः पुरोडाशो भवति, षड्वा ऋतव,—स्त एवास्यैतेनाभीष्टाः प्रीता भवन्ति, न वै धानाभिर्न मन्थेन यज्ञो, यदेष पुरोडाशस्तेन यज्ञो, ऽथैता धानाः, स्वधा वा एता अमुष्मिंल्लोके, ऽथो अपरिमिता वै संवत्सरस्य रात्रय,—स्ता एवास्यैताभिरभीष्टाः प्रीता भवन्ति, न वै धानाभिर्न पुरोडाशेन पितृयज्ञो, यदेष मन्थस्तेन पितृयज्ञो, ऽभिवान्याया गोर्दुग्धे स्यात्, सा हि पितृणां, नेदिष्ठं दक्षिणासीना उपमन्थति, दक्षिणा हि पितृणामि,—कयोपमन्थत्यें,—का हि पितृणा,—मिक्षुशलाकयोपमन्थति, सा हि पितृणां, न प्राच्युद्धत्या, पितृयज्ञो हि, न दक्षिणा, यज्ञो३खु,—भे दिशा अन्तरोद्धन्त्यु,—भये३हीज्यन्त, उपमूले बर्हिर्दाति, तेन पितृणाꣳ, यदुतमूलं तेन देवान्स,—मुभये३हीज्यन्ते, परिश्रयन्त्य,—न्तर्हिता वा अमुष्मादादित्यात् पितरो, ऽथो अन्तर्हिता हि देवेभ्यश्च मनुष्येभ्यश्च पितर,—स्तस्मात् परिश्रयन्ति, समन्तं, बर्हिः परिस्तृणाति, समन्तꣳ३हीमं ऋतवः परिविष्टा, अथो समन्तान्मा पितरोऽभिसमागच्छानि,—त्यमुष्मिन् वै पूर्वस्मिन्नितरा देवता

[१७] काठ. ३६, ११-१२। तै. ब्रा. १,६,८।

इज्यन्ते, यदत्र जुहुयादाहुती संसृजेत्, समदं कुर्यात्, गार्हपत्ये श्रृतं कुर्वन्ति यज्ञवाया, ओदनपचनादग्निमाहरन्ति, तत् स्विष्टान्यता आहरन्ति ॥१७॥ ४२

उशन्तस्त्वा हवामह उशन्तः समिधीमहि । उशन्नुशत आवह पितॄन् हविषे अत्तवे ॥ ४३

इत्यन्वाहो,—शन्तो हि पितरो, ऽनुष्टुभमन्वाहा,—ऽन्तो वा अनुष्टुब,—न्तः पितर,—स्तस्मादनुष्टुभमन्वाह,—कामन्वाह,—कलोका हि पितरस्त्रि,—रन्वाह, तृतीये हि लोके पितरो, यदेकामन्वाह तेन पितॄणां, यन्त्रिस्तेन देवाना,—मुभये ह्रीज्यन्ते, न होतारं वृणीते नार्षेयं, मृत्योरेनेना उत्सृजत्य,—बर्हिषः प्रयाजान् यजति, प्रजा वै बर्हिः, प्रजा एव मृत्योरुत्सृजति, संव्ययते वै मनुष्येभ्यः करिष्यन्, दक्षिणतो देवेभ्या उपव्ययते, ऽथात्र प्राचीनावीतिन भव्य व्यावृत्त्यै, दक्षिणतोऽवदायोदङ्ङतिक्रम्य दक्षिणा तिष्ठन् जुहोति, दक्षिणा हि पितॄणां, सोममग्रे यजति, सोमो वै पितॄणां देवता, पितृदेवत्यः सोमो, यत् सोमं पितृमन्तं यजति सोमपांस्तत् पितॄन् यजति, यद्बर्हिषदो यजनुस्तद्, यदग्निष्वात्तान् गृहमेधिनस्तद्, यदग्निं कव्यवाहनं, द्वे वा अग्नेस्तन्वौ, हव्यवाहन्या देवेभ्यो हव्यं वहति कव्यवाहन्या पितृभ्यः, समिष्ट्या एव प्रतिष्ठित्यै, द्वे वै देवानां याज्यानुवाक्ये, श्रोण्यया यच्छति, गमयत्यन्यया,—ऽथात्र तिस्रः कार्याः, परे हि देवेभ्यः पितर,—स्तयैषा तृतीयात्येवैतया प्रादात्, पञ्च कृत्वोऽवद्यति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य ॥ स्वधा नमः ॥ इति वषट्करोति, स्वधाकारः पितॄणां, नमस्कारो देवाना,—मुभये ह्रीज्यन्ते, स्रक्तिषु निदधाति, देवान् वै पितॄन् मनुष्या अनुप्रपिबन्ते, देवानेव पितॄनुपात्, त्रीन्निदधाति, त्रींश्चेदीदं पुरुषानभि स्म,—स्त्रीन् परानन्वाचष्टे, त्रयो हि परे, पिता पुत्रः पौत्रोऽनुसंतत्यै, सर्वासु स्रक्तिषु निदधाति, सर्वासु हि दिक्षु पितरः, सर्वा एवैनं दिशो गमयति, नामुष्यां निदधाति, यदमुष्यां निदध्यान्मृत्युनैनाः परिवेशयेत्, तामेवानुद्यन्त्य,—थ यत्तस्यां निमार्ष्टि तामेव तेन प्रीणाति ॥१८॥

४४-४६

अत्र पितरो मादयध्वमि,—त्युक्त्वा परायन्ति, त आहवनीयमुपतिष्ठन्ते, सुसंदृशं त्वा वयमि,—त्या तमित्वोत्तिष्ठन्त्य,—मीमदन्त पितरा, प्रात्योपद्रष्टारं कृत्वान्तं प्राणस्य गच्छन्त्य,—मीमदन्त पितरा,

[१८] काठ. ३६, १२-१३ । तै. ब्रा. १,६,९ । वा. १९,७० । काण्व. २१,७० ।
[उशन्तस्त्वा ...... अत्तवे- ऋ. १०,१६,१२; अथर्व० १८,१,५६; १८,२,३४]
[१९] मै. १,१०,३ । काठ. ३६,१३ । तै. ब्रा. १,६,९,८ । वा. २,३१; ३,५२; १९,५८ । काण्व. २,५६; ३,६०; २१,५९ ।

इत्युक्त्वा प्रपद्यन्ते, त ऊर्णां दशां वा न्यस्यन्ति, यदेवात्र निर्गच्छन्ति तस्यैषा निरवत्तिः, परेतन पितरः सोम्यासा, इत्याहा,—ऽनुषक्ता वा एतान् पितरः स्युर्व्यावृत्त्यै, समन्तमपः परिषिञ्चन् पर्येति, मार्जनमेवैषां, तदपरिषिञ्चन् पुनः पर्ये,—त्यमुं वा एते लोकं निर्गच्छन्ति ये पितृयज्ञेन चरन्ति, प्रजापतिरस्त्वेवैनांस्तता उन्नेतुमर्हन्ति, यत् प्राजापत्यामृचमन्वाह प्रजापतिरेवैनांस्तता उन्नयत्य,—थ यदपरिषिञ्चन् पुनः पर्येत्यमुं वा एते लोकं पुनरुपावर्तन्ते, पितॄन् वा एतद्यज्ञोऽगन्, पाङ्क्तो यज्ञो, यत् पङ्क्त्या पुनरायन्ति सहैव यज्ञेनायन्ति, मनस्वतीभिरायन्ति, मन एव पुनरुपह्वयन्ते ॥१९॥ ४७

एतद्वा अस्य संवत्सरोऽभीष्टोऽभूदभीष्टा ऋतवो, ऽथ वा अस्य रुद्रा अनभीष्टा, यदेते त्र्यम्बकास्तेनैवास्य रुद्रा अभीष्टाः प्रीता भवन्त्यै,—ककपाला भवन्ति, न वै पुरुषः कपालैराप्य, एकधैवैनमाप्नोत्य,—यो एका वा इयं,—मस्यामेव प्रतितिष्ठत्य,—भिघार्या३ नाभिघार्या३, इति मीमांसन्ते, यदभिघारयेद् रुद्रायास्य पशूनपिदध्यात्, तन्न सृक्ष्य,—मभिघार्या एवं, न हि हविरनभिघृतमस्त्ये,—कोल्मुकं हरन्त्ये,—कोल्मुकं हि रुद्राणां, धूपायद्धरन्ति, धूपायद्धि रुद्राणामे,—तां दिशं हरन्त्ये,—षा हि रुद्राणां दिक्, पुराचीनं हरान्ति, पराञ्चमेव रुद्रं हरन्त्या,—खुं ते रुद्र पशुं करोमी,—त्याखुकिरा एकमुपवपति, पशुभ्यस्तेन निरवदयते, तस्मात् तान् पशुपतिर्घातुक,—श्चतुष्पथे याजये,—च्चतुष्पथे वै रुद्राणां गृहा, गृहेष्वेव रुद्रं निरवदयत, एष ते रुद्र भाग,—स्तं जुषस्व सह स्वस्राम्बिकया स्वाहेति, शरद्धि रुद्रस्य योनिः, स्वसाम्बिकै,—तां वा एषोऽन्वभ्यवचरति, तस्माच्छरदि भूयिष्ठं हन्ति, तयैवैनं सह निरवदयते, मध्यमपर्णेन जुहोति, तद्ध्यरक्षो हतमारण्येन जुहो,—त्यरण्य एवं रुद्रं निरवदयते, यत् पात्रेण जुहुयाद्रुद्रं प्रजास्वन्ववनयेत्, तस्मादारण्येन जुहोत्य,—म्ब रुद्रमदिमही,—त्युनूर्णा एवाब्रुवन्, भेषजं गवि अश्वाय पुरुषाय भेषजमि,—त्युनूर्णा एव भूत्वा भेषजमक्रत, त्र्यम्बकं यजामहा, इति परियन्ति, तत्रापि पतिकामा पर्येति, पतिवेदनमेवास्या,—स्तांतानूर्ध्वानुदस्य प्रतिलभन्ते, भगमेव प्रतिलभन्ते, तान् यजमानाय समावपन्ति, भगमेवास्मै समावपन्ति, या पतिकामा स्यात् तस्यै समावपेयु,—र्भगमेवास्यै समावपन्ति, तान् मूते कृत्वा वृक्ष आसजति ॥ रुद्रैष ते भाग,—स्तेनावसेन परो मूजवतोऽतीहि पिनाकहस्तः कृत्तिवासा अवततधन्वा ॥ इति गिरिर्वै रुद्रस्य योनिर,—तो वा एषोऽन्वभ्यवचारं प्रजाः शमायते, स्वेनैवैनं भागधेयेन स्वं योनिं गमयत्य,—नपेक्षमाणा आयन्ति रुद्रस्यानन्ववायाय, परोगोष्ठं

[२०] मै. १,१०,४ । काठ. ३६,१४ । तै. ब्रा. १,६,१० । वा. ३,५७-६१ । काण्व. ३,६५-७० ।

मार्जयन्ते, परोगोष्ठमेव रुद्रं निरवदयन्ते, ऽम्बा वै स्त्री भगनाम्नी, तस्मात् त्र्यम्बका, यस्य वै हविरप्रतिष्ठितमप्रतिष्ठितः सो, ऽप्रतिष्ठिता अस्य त्र्यम्बका, आदित्यं घृते चरुं निर्वपेत् पुनरेत्य गृहेष्वि,—यं वा अदितिरि,—यं प्रतिष्ठा, यदादित्येनोऽस्यामेव प्रतितिष्ठति ॥२०॥

४८-५० [६५६]

॥ इति प्रथमकाण्डे चातुर्मास्यानि नाम दशमः प्रपाठकः ॥१०॥

अथैकादशः प्रपाठकः ।

वाजपेयः ।

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिव्यो गन्धर्वः केतपूः केतं पुनातु वाचस्पतिर्वाचमद्य स्वदातु नः ॥ १
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्यामिदं विश्वं भुवनमाविवेश तस्यां देवः सविता धर्मं साविषत् ॥ २
अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तिषु । अश्वा भवत वाजिनः ॥ ३
वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविंशतिः । ते अग्रे अश्वमयुञ्जंस्ते अस्मिन् जवमादधुः ॥ ४
अपां नपादाशुहेमन् य ऊर्मिः प्रतूर्तिः ककुद्मान् वाजसाः । तेन वाजं सेषम् ॥ ५
देवस्य सवितुः प्रसवे सत्यसवसो वर्षिष्ठं नाकं रुहेयम् ॥ ६
देवस्य वयं सवितुः प्रसवे सत्यसवनस्य बृहस्पतेर्वाजिनो वाजजितो वाजं जेष्म ॥१॥ ७
वाजं वाजिनो जयताध्वानं स्कभ्नुवन्तो योजना मिमानाः ॥ ८
काष्ठां गच्छत ॥
९
शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ १०

[१] १,११,६-७ । तै. १,७,७ । काठ. १३,१४ । वा. ९,१, ११,७; ३०,१; ९,५; १८,३०; ९,६,७,१०, (९),१३ । काण्व. १०,१; ११,७; ३४,१; १०,७; २०,१; १०,९,१०,८; (१४), १८ । मा. श्री. १,७,१-२ ।
[वाजस्य नु० ...... साविषत् । अथर्व. ७,६,४ । अप्स्वन्तर० ...... सेषम् । ऋ. १,२३,१९; अथर्व. १,४,४]
[२] तै. १,७,८ । काठ. १३,१४ । वा. ९,१३,१६; २१,१०; ९,१८; २१,११; ९,१७,१४,१५ । काण्व. १०,१९,२२, २३,१०,१२; १०,२४,२३; २३,११; १०,२०,२१ । मा. श्री. ७,१,२ ।
[शं नो भवन्तु० ...... मीवाः । ऋ. ७,३८,७ ।]

वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥ ११
ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्यवो महो ये धना समिथेषु जभ्रिरे ॥ १२
एष स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिपक्ष आसन् ।
क्रतुं दधिक्रा अनु संसनिष्यदत् पथामङ्कांस्यन्वापनीफणत् ॥ १३
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ।
श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः ॥२॥ १४
आ मा वाजस्य प्रसवो जगम्यादा मा द्यावापृथिवी विश्वशंभूः ।
आ मा गन्त पितरो विश्वरूपा आ मा सोमो अमृतत्वेन गम्यात् ॥ १५

इन्द्राय वाचं वदते,—न्द्राय वाचं संवदते,—न्द्रं वाजं जापयते,—न्द्र वाजं जये,—यं वः सा सत्या संधाभूद्यामिन्द्रेण समधद्ध्व,—मजीजपत वनस्पतया, इन्द्राय वाचं विमुच्यध्वं, वाजिनो वाजजितो वाजं जित्वा बृहस्पतेर्भागमवजिघ्रतं, वाजिनो वाजजितो वाजं जित्वा बृहस्पतेर्भागे निमृज्येथां, स्वो रोहावेहि, स्वो रोहावेहि, स्वो रोहावा,—ऽऽयुर्यज्ञेन कल्पते, प्राणो यज्ञेन कल्पते, चक्षुर्यज्ञेन कल्पते, श्रोत्रं यज्ञेन कल्पते, मनो यज्ञेन कल्पते, वाग्यज्ञेन कल्पते, ब्रह्मा यज्ञेन कल्पते, पृष्ठं यज्ञेन कल्पते, स्वर्यज्ञेन कल्पते, यज्ञो यज्ञेन कल्पते, वाजाय स्वाहा, प्रसवाय स्वाहा,—ऽपिजाय स्वाहा, क्रतवे स्वाहा,—ऽहर्पतये स्वाहा, वाक्पतये स्वाहा, वसवे स्वाहा, स्वर्मूर्ध्ना वैयश्नो व्यश्नियआन्त्योऽन्त्यो भौवनो, भुवनस्य पतयेऽधिपतये स्वाहा,—श्राय त्वा, वाजाय त्वा, वाजजित्यायै त्वे,—यं त्वो,—र्जे त्वा, रय्यै त्वा, पोषाय त्वा, स्वर्देवा अगामा,—ऽमृता अभूम, प्रजापतेः प्रजा अभूम ॥३॥
१६

[वाजे-वाजेऽवत० ...... देवयानैः । ऋ. ७,३८,८ । तेनो अर्वन्तो० ...... जभ्रिरे । ऋ. १०,६४,६ । एष स्य वाजी० ...... स्वाहा । ऋ. ४,४०,४ । उत स्मास्य० ...तरित्रतः । ऋ.४,४०,३,]
[३] मै. १,११,७-८ । तै. १,७, ८-९ । काठ. १४,१ । वा. ९,१९,११,१२,९,२१; १८,२९; २२,३३; ९,२०; १८,२८ २२,३२; ९,२१; १४,२२ । काण्व. १०,२५-२६, २५-२७,१३,२९,२८; १९,४२-४३; २४,४६; १०,२७; १९, ४०; २४,४५; १०,३१; १५,२४। मा. श्री. ७,१,३ ।

अग्ने अछा वदेह नः प्रत्यङ् नः सुमना भव। प्र नो यछ विशस्पते धनदा असि नस्त्वम्॥
प्र नो यछत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता प्र वाग्देवी ददातु नः॥
अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वाचꣳ विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनम्॥
सोमꣳ राजानꣳ वरुणमग्निमन्वारभामहे। आदित्यान् विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम्॥
इन्द्रवायू सुसंदृशा सुहवेह हवामहे। यथा नः सर्व इज्जनः संगमे सुमना असत्॥ १७-२१

वाजस्येमं प्रसवः सुषुवेऽग्रे सोमꣳ राजानमोषधीष्वप्सु।
स विराजं पर्येतु प्रजानन् प्रजां पुष्टिꣳ वर्धयमानो अस्मे॥ २२
वाजस्येमां प्रसवः शिश्रिये दिवꣳ स ओषधीः समनक्तु घृतेन।
ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः॥ २३
वाजस्येदं प्रसव आबभूवेमा च विश्वा भुवनानि सर्वतः॥ २४
अदित्सन्तं दापयतु प्रजानन् रयिं च नः सर्ववीरं नियछतु॥ २५

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्या वाचा यन्तुर्यन्त्रेण बृहस्पतिꣳ साम्राज्यायाभिषिञ्चामी,—न्द्रꣳ साम्राज्यायाभिषिञ्चाम्यु,—पयामगृहीतोऽसि, नृषदं त्वा नृषदमायुषदमिन्द्राय जुष्टं गृह्णाम्ये,—ष ते योनि,—रिन्द्राय त्वो,—पयामगृहीतोऽसि, पृथिवीषदं त्वान्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्ये,—ष ते योनि,—रिन्द्राय त्वो,—पयामगृहीतोऽस्य,—प्सुषदं त्वा घृतसदं भूतसदमिन्द्राय जुष्टं गृह्णाम्ये,—ष ते योनि,—रिन्द्राय त्वो,—पयामगृहीतोऽसि, ग्रह विश्वजनीन नियन्तर्विप्राय्याम ते॥ २६

यास्तिस्रः प्रथमजा दिव्यः कोशः समुक्षितः। तासाꣳ विशिश्नानामिषमूर्जꣳ समग्रभम्॥ २७

इन्द्राय त्वा जुष्टं गृह्णाम्ये,—ष ते योनि,—रिन्द्राय त्वो,—पयामगृहीतोऽसि॥ २८

अपाꣳ रसमुद्वयसꣳ सूर्ये शुक्रꣳ समाभृतम्। अपाꣳ रसस्य यो रसस्तं ते गृह्णाम्युत्तमम्॥
२९

[४] तै. १,७,१०,१२। काठ. १४,२-३। वा. ९,२८,२९,२७,२६; ३३,८६; ९,२३-२५,३०,२,४,३; १०,३२; १९,६; २३,३८,९,४। काण्व. १०,३५,३७,३८,३६,३२-३४,३९, ९-५; ११,४५; २०,५;२५,४०,२,४। मा. श्रौ. ७,१, १.३; ७,२,५-६ [अग्ने अच्छा०। ऋ. १०.१४१.१; अथर्व० ३,२०,२। प्र नो यच्छ०। ऋ. १०, १४१,२, अथर्व.३,२०, ३। अर्यमणं बृहस्पति०। ऋ. १०.१४१,५; अथर्व. ३,२०,७। सोमꣳ राजा०। ऋ० १०,१४१,३; अथर्व. ३,२०,४; सा.९१। इन्द्रवायू सुसंदृशा०। ऋ. १०,१४१.४; अथर्व. ३,२०,६। अदि-(उतादि) त्सन्तं०। अथर्व. ३,२०,८। वाजस्य नु प्रसव०। अथर्व ३,२०,८। देवस्य त्वा- अथर्व.०१९,५१,२

इन्द्राय त्वा जुष्टं गृह्णाम्ये,—ष ते योनि,—रिन्द्राय त्वा॥ ३०
कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वꣳ वियूय।
इहेहैषां कृणुत भोजनानि ये बर्हिषा नम उक्तिं न जग्मुः॥ ३१
उपयामगृहीतोऽसि, प्रजापतये त्वा जुष्टं गृह्णाम्ये,—ष ते योनिः, प्रजापतये त्वा॥ अयां
विष्ठा, प्रजापतये त्वा॥४॥ ३२-३३

देवा वै नाना यज्ञानपश्य,—न्नथ वा एतꣳ सर्वेऽपश्यꣳ,—स्तस्मिन् वा अयतन्त, तस्मिन् वाजिमुषु,—स्तं बृहस्पतिरुदजयद्, बृहस्पतिर्वै देवानां पुरोहितो, यद्वै पुरोहितो ब्राह्मणꣳ शृणोति, तद्राजा, तेनेन्द्रमयाजयत्, स स्वाराज्यमगछत्, स एष स्वाराज्यो यज्ञः, स्वाराज्यं गछति य एतेन यजते, यद् बृहस्पतिरुदजयत् तस्माद् ब्राह्मणो यजेत, यदिन्द्रमयाजयꣳ स्तस्माद्राजन्यो, देवा वै नाना यज्ञानाहरन्नि,—ममहमिमं त्वमि,—त्यथ वा एतं प्रजापतिराहरत्, तस्मिन् वा अपित्वमैछन्त, तेभ्यश्छन्दाꣳस्युज्जितीः प्रायछद,—थ वा एतेन प्रजापतिरयजत, स स्वाराज्यमगछत्, स एष स्वाराज्यो यज्ञः, स्वाराज्यं गछति य एतेन यजते, ऽन्नꣳ वै वाज,—स्तद्य एवꣳ विद्वानन्नमत्ति वाजयति ह वा एनमन्नमद्यमानꣳ, सोमो वै वाजपेय,—स्तद्य एवꣳ विद्वान् त्सोमं पिबति वाजꣳ ह गछति, यावन्तो हि देवाः सोममपिबꣳस्ते वाजमगछꣳ,—स्तस्मात् सर्वः सोमं पिपासति, वाजꣳ ह गछति, वाग्घि वाजस्य प्रसवः, सा वै वाक् सृष्टा चतुर्धा व्यभव,—देषु लोकेषु त्रीणि तुरीयाणि, पशुषु तुरीयꣳ, या पृथिव्याꣳ साग्नौ सा रथन्तरे, यान्तरिक्षे सा वाते सा वामदेव्ये, या दिवि सा बृहति सा स्तनयित्नाव्, अथ पशुषु, ततो या वागत्यरिच्यत तां ब्राह्मणे न्यदधु,—स्तस्माद् ब्राह्मण उभयीꣳ वाचꣳ वदति यश्च वेद यश्च न, या बृहद्रथन्तरयोर्यज्ञादिनं तयागछति, या पशुषु तय ऋतेयज्ञं, तद्य एवꣳ वेदाह वा एनमप्रतिक्षातं गछति, यावती वाक्ताꣳ हि वेद, वाचा हि दीयते, वाचा प्रदीयते, यो गाथानाराशꣳसीभ्याꣳ सनोति न तस्य प्रतिगृह्य,—मनृतेन हि स तत् सनोति, न मत्तस्य, यदा हि तस्य मदो व्येत्यथ तं तत् तपति॥५॥ ३४

सप्तदश वा एते द्वया ग्रहाः प्राजापत्याः, सप्तदशः पुरुषः प्राजापत्यं,—श्चत्वार्यङ्गानि शिरो-ग्रीवमात्मा, वाक् सप्तमी, दश प्राणा, अङ्गेऽङ्गे वै पुरुषस्य पाप्मोपश्लिष्टो, यच्चतिषजन्

[कुविदङ्ग यवमन्तो०। ऋ. १०,१३१,२; अथर्व. २०,१२५,२।]
[५] काठ. १४,५
[६] मै. १,११,१। काठ. १४,६-७। वा. ९,१; ११,७; ३०,१; ९,५-७। काण्व. १०,१; १२,७; ३४,१; १०,७,९-१०।

ग्रहान् गृह्णात्यङ्गादङ्गादेवैनं पाप्मनो मुञ्चति, श्रीर्वै सोमः, पाप्मा सुरोपयामा, आगते काले प्राञ्चः सोमैरुत्क्रामन्ति, प्रत्यञ्चः सुरोपयामैः, पाप्मनैवैनꣳ विपुनन्ति, तस्मादाहु,—र्वाजपेययाज्येव पूत इति, पाप्मना ह्येनꣳ विपुनन्ति, देव सवितः प्रसुव यज्ञं, प्रसुव यज्ञपतिं भगायेति, परुषि परुषि जुहोत्यु,—त्सन्नयज्ञो वा एष, को ह तद्वेद यदेतस्य क्रियते यन्न, सर्वत्वायैव प्रसवाय, वाजस्य नु प्रसवे मातरं महीमि,—ति रथमुपावहरती,—यꣳ वा अदितिर,—स्यामेवैनं प्रसूतꣳ सवित्रा चोपावहरति वाजस्योज्जित्या, अप्स्वन्तरमृतमप्सु भेषज-मि,—त्यश्वान् त्स्नपयन्त्य,—प्सुजा वा अश्वा, स्वादेवैनान् योनेर्जनयन्ति, वायुर्वा त्वा मनुर्वा त्वे,—ति युनक्ति, न वा एतन्मनुष्या योक्तुमर्हन्ति, देवताभिरेवैनान् युनक्त्य,—पां नपादाशुहेम,—न्निति रराटानि प्रतिमार्ष्टि, पूर्वमेव यजुरुदितमनु वदति, दुन्दुभीन्निह्रादयन्ति, वाग्वा एषैकारण्यं प्राविशत्, तामेवोज्जयत्य,—थो या वनस्पतिषु वाक्तामेवावरुन्द्धे, सप्तदशः सर्वो भवति, प्रजापतिर्वै सप्तदशः, प्रजापतिमेवाप्नोत्यु,—त्सन्नयज्ञो वा एष, सꣳवत्स-
राद्धा अध्युत्सन्नयज्ञोऽवरुध्यते, सꣳवत्सरादेवैनमध्याप्त्वावरुन्द्धे॥६॥ ३५

देवस्य सवितुः प्रसवे सत्यसवसो वर्षिष्ठं नाकꣳ रुहेयमि,—ति ब्रह्मा रथचक्रꣳ सर्पति, सवितृप्रसूत एव यज्ञꣳ सर्पति वाजस्योज्जित्या, अथो प्रजापतिर्वै ब्रह्मा यज्ञस्य, प्रजापतिरेवे-नꣳ यज्ञादधि प्रसुवति वाजस्योज्जित्यै,—साम गायते, सत्यꣳ वै साम, सत्येनैवोज्जयत्यु,—न्नꣳ वै वाजो, ऽन्नाद्यस्योज्जित्यै, देवस्य वयꣳ सवितुः प्रसवे सत्यसवज्जितिर्वाजयत्य,—न्नꣳ वै वाजो, ऽन्नाद्यस्योज्जित्यै, सवितृप्रसूत एवं रथमभ्यातिष्ठति, वाजस्योज्जित्यै, वाजिनामृचोऽन्वाह वाजस्योज्जित्या, आजिं धावन्ति वाजस्योज्जित्या, यदनुदिष्टे रथैर्धावन्ति दक्षिणया त्या, अनुदिष्टे रथैर्धावन्ति, दक्षिणयैव स्वर्गं लोकमेति, देवा ओषधीषु पक्वास्वा-जिमयु,—स्तां बृहस्पतिरुदजयत्, स एतान्त्रिवारान् न्यवृणीत, तन्निवाराणां निवारत्वं, बृहस्पतिर्वै तामुदजयत्, तमेव भागिनं करोत्यहिꣳसायै, तमधश्चात्वालꣳ हरन्ती,—दं वा असावादित्य आसीत्, तमितोऽध्यमुं लोकमहरꣳ,—स्तद्यतोऽध्यमुं लोकमहरन् यच्चात्वालेऽव-दधति यजमानमेवं स्वर्गं लोकꣳ हरन्त्या, मा वाजस्य प्रसवो जगम्यादि,—ति रथेषु पुनरासु वा एतद्यजमानः सह स्वर्गं लोकमे,—त्यथैष नैवारः सप्तदशशरावो, तेषु जुहोति, यमेव वाजमुदजैषुस्तमात्मन्धत्ते, ऽजीजपत वनस्पतया, इन्द्राय वाचꣳ विमु-

[७] मै. १,११,१,३। काठ. १४,७-८। वा. ९,९,१०,१३,१९,१२। काण्व. १०,१३ १४,१७,२५,२६।

च्यध्वमि,—ति रथविमोचनीयं जुहोति, यजुषैव युज्यन्ते, यजुषा विमुच्यन्ते, वाजिनो वाजजितो वाजं जित्वा बृहस्पतेर्भागमवजिघ्रतमि,—ति भागिना एवैना अक,—र्वाजिनो वाजजितो वाजं जित्वा बृहस्पतेर्भागे निमृज्येथामि,—ति सर्वानेवैनान् प्रीणात्य,—र्धवशां च सुरोपयामाꣳश्च हरन्ति य आजिं धावन्ति, तेभ्यो यमेव वाजमुदजैषुस्तं परिक्रीणीते, मधुष्ठालं ब्रह्मणे, ब्रह्मण एव तेन परिक्रीणीते, कर्कुभो राजपुत्रः प्राश्नाति, वीर्यꣳ वै ककुब्, वीर्यमेवात्मन् धत्ते॥७॥
३६

स्वो रोहावेहि, स्वो रोहावेहि, स्वो रोहावेति, स्वर्वा एतद्रोक्ष्यन् पत्न्या सꣳवदते, ऽथो अन्वारम्भो वा एष यज्ञस्य, पत्न्या सह स्वर्गे लोके भवता, आयुर्यज्ञेन कल्पते, प्राणो यज्ञेन कल्पता, इत्येतावान् वै पुरुषो, यावानेव पुरुषस्तमाप्नोति, स सर्वो भूत्वा स्वर्गं लोकमेति, दर्भमयꣳ वासो भवति पवित्रत्वाय, गोधूमं चषालं, प्राजापत्या वै गोधूमा, अथो प्रत्यासामोषधीनाꣳ सहैवान्नाद्येनामुं लोकमेति, वाजाय स्वाहा, प्रसवाय स्वाहेति, त्रयोदश वा एता आहुतय,—स्त्रयोदश मासाः सꣳवत्सरः, सꣳवत्सरꣳ वावास्मा एतदुपदधाति स्वर्गे लोके, तस्मिन्नेव प्रतितिष्ठ,—त्यन्नाय त्वा, वाजाय त्वा, वाजजित्यायै त्वे,—त्यूषपुटैरर्पयन्ति, प्राजापत्या वा ऊषाः, श्वः श्वो भूयाꣳसो भवन्त्य,—न्नाद्येनैवैनमर्पयन्त्ये,—ति वा एषोऽस्माल्लोकादमुं लोकमेति, यदूषपुटैरर्पयन्ति तेनास्माल्लोकान्नैति, तेनास्मिल्लोके धृतो हिरण्यमभ्यवरोहति, तेजो वै हिरण्यं, तेजस्येव प्रतितिष्ठति, बस्ताजिनमभ्यवरोहति, पशवो वै बस्ताजिनं, पशुष्वेव प्रतितिष्ठ,—त्यन्नस्यान्नस्य जुहोति वाजप्रसव्याभि,—रन्नꣳ वै वाजो, ऽन्नाद्यस्यावरुद्धया, उभयं ग्राम्यं चारण्यं च जुहोत्युभयस्यान्नाद्यस्यावरुद्धया, औदुम्बरेण स्रुवेण जुहो,—त्यूर्ग्वा उदुम्बर, ऊर्जोऽवरुद्ध्यै, सप्तभिर्जुहोति, सप्त वै छन्दाꣳसि, छन्दोभिरेवास्मा अन्नाद्यमवरुन्द्धे, ऽथ वाग्वै छन्दाꣳसि, वाचैवास्मा अन्नाद्यं प्रयछति॥८॥
३७

अथैतेऽतिग्राह्या, यद्देवादः परमन्नाद्यमनवरुद्धं तस्यैतेऽवरुद्ध्यै गृह्यन्ते, ऽथैते पशवा आलभ्यन्ते यज्ञक्रतूनामवरुद्ध्यै, यदाग्नेयोऽग्निष्टोमं तेनावरुन्द्धे, यदैन्द्राग्न उक्थ्यं तेन, यदैन्द्रो वृष्णिः षोडशिनं तेन, यत् सारस्वती मेषी यद्देवादः सप्तदशꣳ स्तोत्रमनाप्तमनवरुद्धं तदे-

[८] मै. १,११,३। काठ. १४,८। वा. ९,२१; १८,२९; २२,३३; १८,२८; २२,३१। काण्व. १०,२८; १९,४१; २४,४३; १९,४०; २४,४५।
[९] मै. १,३,३१। काठ. १४,९-१० मा. श्रौ. ७,१ ' ६।

वैतदाप्नोति, तद्वाकुर्वन्, ऽयैषा वशा, देवाश्च वा असुराश्चास्पर्धन्त, नैमे देवा आसन्नेमेऽसुरा, स्ते देवा एतां वशामपश्यꣳ, स्तया लोकं द्वितीयमवृञ्जतासुरलोकꣳ, यस्यावद्यति स देवलोकोꣳ, यस्य नावद्यति सोऽसुरलोक, स्तं लोकमेवैतया द्वितीयꣳ यजमानो वृङ्क्ते भ्रातृव्यलोकमेव, सारस्वꣳत्यन्त्यैवानूत्तमा भवति, सारस्वत्यन्वेषां प्रथमा, वाग्वै सरस्वती, वाचा यज्ञः संततो, वाचैव यज्ञꣳ संतनोति, यद्वै यज्ञस्य विद्वांस्करोति यच्चाविद्वानन्तरेति तच्छिद्रं, तद्वाचैव सरस्वत्या कल्पय, त्यनिरुक्तः प्रातःसवः, प्रजापतिमेव तेनाप्नोति, विषोनिर्वै वाजपेयः प्राजापत्यः, स निरुक्तसामा, यदनिरुक्तः प्रातःसवस्तेन सयोनि रथन्तरꣳ साम भवत्योशीया, उज्जित्या, अयो इयꣳ वै रथन्तरम्, स्यामिव सूयते, वाजवतीर्माध्यन्दिने पवमाने भवन्त्य, न्नꣳ वै वाजो, ऽन्नाद्यस्यावरुद्ध्यै, चित्रवतीरार्भवे पवमाने भवन्ति स्वर्गस्य लोकस्य समष्ट्यै, शिपिविष्टवतीषु स्तुवत, एषा वै प्रजापतेः पशुष्ठास्तनूर्यच्छिपिविष्टं, तस्माच्छिपिविष्टवतीषु स्तुवत, आष्टादꣳष्ट्रमुत्तममुक्थानां भव, त्युत्तरे एव स्तोत्रे अभिसंतनोति, यद्वै यज्ञस्यातिरिच्यतेऽमुं तं लोकमभ्यतिरिच्यते, बृहꣳस्त्वेवामुं लोकमाप्तुमर्हती, न्द्रियꣳ वै वीर्यं बृहद्, यद् बृहता स्तुवत, इन्द्रियं वा एतद्वीर्यं तदो यज्ञस्य यजमानः प्रतितिष्ठति ॥९॥ ३८

अग्निरेकाक्षराꣳदजयद्, श्विनौ द्व्यक्षराꣳ, विष्णुस्त्र्यक्षराꣳ, सोमश्चतुरक्षराꣳ, सविता पञ्चाक्षरां, पूषा षडक्षरां, मरुतः सप्ताक्षरां, बृहस्पतिरष्टाक्षरां, मित्रो नवाक्षराꣳ, वरुणो दशाक्षरा, मिन्द्र एकादशाक्षराꣳ, विश्वे देवा द्वादशाक्षराꣳ, वसवस्त्रयोदशाक्षराꣳ, रुद्राश्चतुर्दशाक्षरा, मादित्याः पञ्चदशाक्षरा, मदितिः षोडशाक्षरां, प्रजापतिः सप्तद३शो, ऽग्निरेकाक्षरया वाचमुदजयद्, श्विनौ द्व्यक्षरया प्राणापानावुदजयताꣳ, विष्णुस्त्र्यक्षरया त्रीनिमाꣳल्लोकानुदजयद्, सोमश्चतुरक्षरया चतुष्पदः पशूनुदजयत्, सविता पञ्चाक्षरया पञ्च दिशा उदजयत्, पूषा षडक्षरया षड्ऋतूनुदजय, न्मरुतः सप्ताक्षरया सप्तपदाꣳ शक्वरीमुदजयन्, बृहस्पतिरष्टाक्षरयाष्टौ दिशा उदजय, च्चतस्रो दिशश्चतस्रोऽङ्कुशली, मित्रो नवाक्षरया नव प्राणानुदजयद्, वरुणो दशाक्षरया विराजमुदजय, दिन्द्र एकादशाक्षरया त्रिष्टुभमुदजयद्, विश्वे देवा द्वादशाक्षरया जगतीमुदजयन्, वसवस्त्रयोदशाक्षरया त्रयोदशं मासमुदजयन्, रुद्राश्चतुर्दशाक्षरया चतुर्दशं मासमुदजय, न्नादित्याः पञ्चदशाक्षरया पञ्चदशं मासमुदजय, न्नदितिः षोड-

[१०] तै. १,७,११। काठ. १४,४। वा. ९,३१-३४। काण्व. १०,५०-५३।

शाक्षरया षोडशं मासमुदजयत्, प्रजापतिः सप्तद३शो, ऽग्निरेकाक्षरयोदजयन्मामिमां पृथिवी, मश्विनौ द्व्यक्षरया प्रमामन्तरिक्षꣳ, विष्णुस्त्र्यक्षरया प्रतिमाꣳ स्वर्गं लोकꣳ, सोमश्चतुरक्षरयाश्रीवीर्नक्षत्राणि, सविता पञ्चाक्षरयाक्षरपङ्क्तिमुदजयद्, या३ह्यक्षरपङ्क्तिः सा पङ्क्ति, श्चतुर्धा ३ह्येतस्याः पञ्च पञ्चाक्षराणि, पूषा षडक्षरया गायत्रीमुदजय, च्चतुर्धा ३ह्येतस्याः षट् षडक्षराणि, मरुतः सप्ताक्षरयोष्णिहमुदजयꣳ, श्चतुर्धा ३ह्येतस्याः सप्त सप्ताक्षराणि, बृहस्पतिरष्टाक्षरयानुष्टुभमुदजय, च्चतुर्धा ३ह्येतस्या अष्टा अष्टा अक्षराणि, मित्रो नवाक्षरया बृहतीमुदजय, च्चतुर्धा ३ह्येतस्या नव नवाक्षराणि, वरुणो दशाक्षरया विराजमुदजय, च्चतुर्धा ३ह्येतस्या दश दशाक्षराणी, न्द्र एकादशाक्षरया त्रिष्टुभमुदजय, च्चतुर्धा ३ह्येतस्या एकादशैकादशाक्षराणि, विश्वे देवा द्वादशाक्षरया जगतीमुदजयꣳ, श्चतुर्धा ३ह्येतस्या द्वादश द्वादशाक्षराणि, वसवस्त्रयोदशाक्षरया त्रयोदशं मासमुदजयन्, रुद्राश्चतुर्दशाक्षरया चतुर्दशं मासमुदजय, न्नादित्याः पञ्चदशाक्षरया पञ्चदशं मासमुदजय, न्नदितिः षोडशाक्षरया षोडशं मासमुदजयत्, प्रजापतिः सप्तद३शो, ऽग्नये एकाक्षराय छन्दसे स्वाहा, ऽश्विभ्यां द्व्यक्षराय छन्दसे स्वाहा, विष्णवे त्र्यक्षराय छन्दसे स्वाहा, सोमाय चतुरक्षराय छन्दसे स्वाहा, सवित्रे पञ्चाक्षराय छन्दसे स्वाहा, पूष्णे षडक्षराय छन्दसे स्वाहा, मरुद्भ्यः सप्ताक्षराय छन्दसे स्वाहा, बृहस्पतयेऽष्टाक्षराय छन्दसे स्वाहा, मित्राय नवाक्षराय छन्दसे स्वाहा, वरुणाय दशाक्षराय छन्दसे स्वाहे, न्द्रायैकादशाक्षराय छन्दसे स्वाहा, विश्वेभ्यो देवेभ्यो द्वादशाक्षराय छन्दसे स्वाहा, वसुभ्यस्त्रयोदशाक्षराय छन्दसे स्वाहा, रुद्रेभ्यश्चतुर्दशाक्षराय छन्दसे स्वाहा, ऽदित्येभ्यः पञ्चदशाक्षराय छन्दसे स्वाहा ऽदित्यै षोडशाक्षराय छन्दसे स्वाहा, प्रजापतिः सप्तदशः ॥१०॥

३९[६९५]

॥ इति प्रथमकाण्डे वाजपेयाभिधान एकादशः प्रपाठकः ॥११॥

॥ इति प्रथमकाण्डं समाप्तम् ॥

अथ द्वितीय काण्डम् ।

अथ प्रथमः प्रपाठकः।

काम्या इष्टयः ॥१॥

ऐन्द्राग्नमेकादशकपालं निर्वपेद्यस्य सजाता वीयायु, रोजो वै वीर्यमिन्द्राग्नी, ओजसैवैनान् वीर्येण पुनरुपास्यत, ऐन्द्राग्नमेकादशकपालं निर्वपेद्भ्रातृव्यवा, नोजो वै वीर्यमिन्द्राग्नी, ओजसैवैनान् वीर्येणाभिभवत्यै, न्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामो योऽलं प्रजायै सन् प्रजां न विन्देत, प्रजापतेर्वा इन्द्राग्नी प्रजामपगूहतां, ता एतेन भागधेयेनोपाधावत्, ता अस्मै प्रजां पुनरदत्ता, मिन्द्राग्नी खलु वा एतस्य प्रजामपगूहतो योऽलं प्रजायै सन् प्रजां न विन्दते, तो एव भागधेयेनोपासरद्, ता अस्मै प्रजां पुनर्दत्तो, विन्दद्वती याज्यानुवाक्ये भवतो विन्त्या एवै, न्द्राग्नमेकादशकपालं निर्वपेत् संग्राममभिप्रया, नोजो वै वीर्यमिन्द्राग्नी, ओजसैवैनꣳ वीर्येणाभिप्रयात्यै, न्द्राग्नमेकादशकपालं निर्वपेत् संग्रामꣳ सꣳयत्यो, जो वै वीर्यमिन्द्राग्नी, ओजसैवैनꣳ वीर्येण जयति, स यदा संग्रामं जयेदैन्द्राग्नमेकादशकपालं निर्वपे, दोजसा वा एष वीर्येण व्यृध्यते यः संग्रामं जयत्यो, जो वीर्यमिन्द्राग्नी, ओजसैवैनꣳ वीर्येण समर्धयत, ऐन्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं जनतामभिप्रयं, नोजो वै वीर्यमिन्द्राग्नी, ओजसैवैनाꣳ वीर्येणाभिप्रयाति, पूषा वीर्यस्यानुप्रदाता, सोऽस्मै वीर्यमनुप्रयच्छत्यै, न्द्राग्नमेकादशकपालं निर्वपेत् पौष्णं चरुं क्षेत्रस्य पतये चरुं क्षेत्रमध्यवस्य, न्नोजो वै वीर्यमिन्द्राग्नी, ओजसैवास्मै वीर्येण लोकꣳ विन्दतः, पूषा वीर्यस्यानुप्रदाता, सोऽस्मै वीर्यमनुप्रयच्छती, यं क्षेत्रस्य पत्न्य, स्यामेव प्रतितिष्ठति ॥१॥ १

अग्नये वैश्वानराय द्वादशकपालं निर्वपेत् कामाय, सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सरे कामं आप्यते, सꣳवत्सरमेवाप्त्वा, सोऽस्मै काममाप्नोति यत्कामो भवत्य, ग्नये वैश्वानराय द्वादशकपालं निर्वपेत् समान्तममभिक्रोक्ष्यन्, त्सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सराय समम्यते, सꣳवत्सरमेवाप्त्वावरुन्धे काममभिद्रुघस्य, ग्नये वैश्वानराय द्वादशकपालं निर्वपेत् सनिं प्रेष्यन्, त्सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सराय प्रतिगृह्यते, सꣳवत्सरमेवाप्त्वा सताꣳ सनिꣳ वनुते, स यदा वन्वीतायाग्नये वैश्वानराय द्वादशकपालं निर्वपेत्, सꣳवत्सरो वा अग्नि-

[१] तै. २,२,१। काठ. ९,१७।
[२] तै. २,२,६। काठ. १०,३-४।

वैश्वानरः, सꣳवत्सरमेव प्रयुङ्क्ते, सꣳवत्सरं एतस्मै वनुते, तमेव भागिनमक, स्तꣳ व्यृमाग्, यं द्विष्यात्तस्मै दक्षिणां दद्यात्, पाशेन वा एष चरति, तमेवास्मिन् प्रतिमुञ्चत्यै, कहायनो गौर्दक्षिणा, स हि सꣳवत्सरस्य प्रतिमा, ऽग्नये वैश्वानराय द्वादशकपालं निर्वपेदन्नमत्स्यन्, त्सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सरायैवैनदप्युधात्, स यदानन्नमद्यादथाग्नये वैश्वानराय द्वादशकपालं निर्वपेद्, यदेवादोऽनन्नमत्ति तदस्मै सꣳवत्सरः स्वदयति, स्वदितमेवात्ति, सीसं दक्षिणा कृष्णꣳ वा वासो, ऽनन्नꣳ वै सीसम, न्नं कृष्णमु, न्नेनैवानन्नमुपहत्यान्नाद्यमात्मन् धत्ते, ऽग्नये वैश्वानराय द्वादशकपालं निर्वपेत् संग्राममभिप्रयान्, त्सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सरेणैवैनमभिप्रयात्य, ऽग्नये वैश्वानराय द्वादशकपालं निर्वपेत् संग्रामꣳ सꣳयत्य, यतरो वै संगृभाणयोरायतनवत्तरो भवति स जयती, यꣳ वा अग्निर्वैश्वानरं, इमामेवायतनमकृता, ऽस्यां पराकꣳस्त, जयति संग्रामꣳ, स यदा संग्रामं जयेदथाग्नये वैश्वानराय द्वादशकपालं निर्वपेत्, सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सरमेव प्रयुङ्क्ते, सꣳवत्सरं एतस्मै जयति, तमेव भागिनमक, स्तꣳ व्यृमाग्, ग्नये वैश्वानराय द्वादशकपालं निर्वपेद्यः कामयेता, ऽन्नेन राज्ञमान्यवान् व्रीहीन् वादुघीयेति, सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्स३रोऽन्नाद्यस्य प्रदाता, तमेव भागधेयेनोपासरत्, सोऽस्मा अन्नाद्यं प्रयच्छत्य, ग्नये वैश्वानराय द्वादशकपालं निर्वपेद्, वारुणꣳ यवमयं चरुमामयाविनꣳ याजयेद्, वरुणगृहीतो वा एष य आमयावी, वरुणादेवैनं तेन मुञ्चत्य, सौ वा आदि३त्योऽग्निर्वैश्वान३रो, ऽमुना वा एनमेतं निगृहीतꣳ वरुणो गृह्णाति, तत एनं मुक्त्वा यावानेवास्यात्मा तꣳ वरुणान् मुञ्चति, वारुणं चरुं निर्वपेद्यत्रमेयमीयन्त, मग्नये वैश्वानराय द्वादशकपालं भूतिकामꣳ याजयेद्, वरुणगृहीतो वा एष यो भूतिकामो, वरुणादेवैनं तेन मुञ्चती, याꣳश्चर्कभवत्ये, तावान् वा आत्मा, यावानेवास्यात्मा तꣳ वरुणान् मुक्त्वा, ऽसौ वा आदि३त्योऽग्निर्वैश्वान३रो, ऽमुमेनेमन्वारम्भयत्य, मुष्यैनमादित्यस्य मात्रां गमयति ॥२॥ २

अग्नये जातवेदसेऽष्टाकपालं निर्वपेद्दधिक्राव्णा एकादशकपालमग्नये वैश्वानराय द्वादशकपालꣳ यः सर्ववेदसीं प्रथमामिष्टिमालभेता, ऽग्निर्वा एतस्य तद्वेद यत्रास्येष्टꣳ यत्र सुकृतम्, ग्निरेवास्मै तद्विन्दत्य, मेध्यो वा एष यः सर्वं ददाति, तद्दधिक्राव्णैवैनं मेध्यं करोति, सꣳवत्सरो वा अग्निर्वैश्वानरः, सꣳवत्सरो वा एतस्य तद्वेद यत्रास्येष्टꣳ यत्र सुकृतꣳ, सꣳवत्सर एवास्मै तद्विन्दत्य, ग्नये सुरभिमतेऽष्टाकपालं निर्वपे, दभिशस्यमानꣳ याजयेद्, रथप्रोतꣳ वै दुग्धी-

[३] तै. २,२,३-५। का. ३,२। काव. ३,२। [अग्नये जातवेदसे। ऋ० ५,५,१]

मम्युश२स२,—स्तं कौलकावतीं अब्रूतां, तथा त्वा याजयिष्यावो यथा तेऽग्निमत्स्यन्ति, यत्र
ग्राम्यस्य पशोर्नोपशृणवस्तद्गच्छ, यस्त्वा कश्चोपायत् तूष्णींमिवास्वेति, त२ ह स्म वैन्याघ्रा उप-
घ्रायं तूष्णींमिवापक्रामन्ति, तौ वै तत्रैव श्वो भूते यज्ञायुधैरन्वेत्याग्निं मथित्वाग्नये सुरभिमतेऽष्टा-
कपालं निरवपतां, ततो वा एनं न पर्यग्नन्, यमभिश२सेयुस्तमेतया याजयेद्, दुरभि वा
एतमारयमभिश२सन्त्ये,—षा वा अग्नेर्भेषजा तनूर्यत्सुरभि,—र्भेषजमेवास्मा अकः, सुरभिमेन-
मकः, शमयत्येवां,—ऽग्नये पवमानायाष्टाकपालं निर्वपेद्धिक्राव्णा एकादशकपालमग्नये वैश्वानराय
द्वादशकपालं पुनरैत्य गृहेषु, पवमान एवैनं पुनात्य,—ग्निर्निष्पत्यं,—पूतो वा एष यमभिश२-
सन्ति, नैनं दधिक्रावा चन पावयांक्रियादि,—ति खलु वा आहु,—स्तद् दधिक्रावैवैनं पावयति,
स२वत्सरो वा अग्निर्वैश्वानरः, स२वत्सर एवैन२ स्वदयत्या,—ग्नेयमष्टाकपालं निर्वपेदग्नीषोमीयमे-
कादशकपालं द्यावापृथिवीयं द्विकपाल२ यः संग्रामं जिगीषेन्नृज्याय२ वा जिज्यासेद्, ऋद्धया एवा-
ग्ने३यो, ऽग्नीषोमाभ्या२ वै वी३र्येणेन्द्रो वृत्रमहन्, वृत्रं खलु वा एष हन्ति यः संग्रामं जयति
नृज्याय२ वा जिनाति, वंद्वाग्निमेवैतं,—दिन्द्रो वै वृत्राय वज्रमुदयच्छत्, तं द्यावापृथिवी नान्वम-
न्येतां, तमेतेन भागधेयेनान्वमन्येता२, यद् द्यावापृथिवीयो वज्रस्यानुमत्या, अथो अनुमतवज्रो
ऽसदिति, स यदा संग्रामं जयेन्नृज्याय२ वा जिनीयादथाग्नेयमष्टाकपालं निर्वपेदैन्द्राग्नमेकादशक-
पालं द्यावापृथिवीयं द्विकपालं, ऋद्धया एवाग्ने३यां, ऽग्नीषोमाभ्या२ वै वी३र्येणेन्द्रो वृत्रमहन्,
त्सं ओजसा वा वीर्येण व्याध्यत, स एतमैन्द्राग्नमपश्यत्, तेनौजो वीर्यमात्मन्नधत्ता,—जसा
वा एष वीर्येण व्यृध्यते यः संग्रामं जयति नृज्याय२ वा जिनात्यो,—जो वीर्यमिन्द्राग्नी, ओज-
सैवैन२ वीर्येण समर्धयतो, ऽथ यद् द्यावापृथिवीयो, या यं एवास्मै वज्रमन्वम२सातां ताभ्यामेष
भागः क्रियते ॥३॥ ३

अग्नीषोमीयमेकादशकपालं निर्वपेद्ब्राह्मणः कामाया,—ऽग्नीषोमीयो वै ब्राह्मणो देवतया, स्वा-
मेवदेवतां कामाय भागधेयेनोपासरत्, ता अस्मै काम२ समर्धयतो यत्कामो भवत्य,—ग्नीषोमीयमे-
कादशकपालं निर्वपेद्ब्राह्मणो भूतिकाम२ याजयेद्, देवा वै सत्रमासत कुरुक्षे३त्रेऽग्निः सोमा इन्द्र,—
स्तेऽब्रुवन्, यतमं नः प्रथम२ यश ऋच्छात्तं नः सहेति, तेषा२ वै सोम यश आर्छत्, तम-
भिसमगच्छन्त, तस्मात्सोममभिसंगच्छन्ते, स हि यशस्वितम,—स्तद्ध सोमो न्यकामयत, स
गिरिमगच्छत्, तमग्निरन्वगच्छत्, तौ गिरा अग्नीषोमौ समभवतां, तस्मात्सदुदि गिरा अग्निर्दहति
गिरौ सोमः, स वा इन्द्रः शिथिर इवामन्यत, ३मोऽग्नीषोमा अन्वगच्छत्, तां अब्रवीद्,

[४] तै. २,३,३; २,४,४,३। काठ. १०,१।
मै० १४

याजयतं मेति, त२ वा एतयाग्नीषोमा अयाजयतां, तस्मि२स्तेजोऽग्निरदधादिन्द्रिय२ सोम,—स्ते-
ता इन्द्रोऽभवद्, यो भूतिकामः स्यात्तमेतया याजयेत्, तेज एवास्मिन्नग्निर्दधातीन्द्रिय२ सोमो,
भवत्येवा,—ऽग्नीषोमीयमेकादशकपालं निर्वपेत् श्यामाक२ वसन्ता ब्रह्मवर्चसकामो, ऽग्नीषोमौ वै
ब्रह्मवर्चसस्य प्रदातारौ, ता एव भागधेयेनोपासरत्, ता अस्मै ब्रह्मवर्चसं प्रयच्छतो, वसन्ता
यजेत, वसन्तो वै ब्राह्मणस्य ऋतुः, स्व एवास्मा ऋतौ ब्रह्मवर्चसं प्रयच्छतो, यत्पुरोडाशस्ते-
नाग्नेयो, यत् श्यामाकस्तेन सौम्यः, सर्वमेवाग्नीषोमाभ्या२ हव्य२ संप्रादात्, ता अस्मै सर्वं
ब्रह्मवर्चसं प्रयच्छतः, सौमाग्नी स२याज्ये स्यातां, तेजो वा अग्निरिन्द्रिय२ सोम,—स्तेजसा च
वावास्मा एतदिन्द्रियेण चोभयतो ब्रह्मवर्चसं परिगृह्णाति, सौमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशु-
कामः, सोमो वै रेतोधाः, पूषा पशूनां प्रजनयिता, सोम एवास्मै रेतो दधाति, पूषा पशून्
प्रजनयति, सौमेन्द्रं चरुं निर्वपेत् पुरोधाकामः, सौम्यो वै ब्राह्मणो देवतय,—न्द्रो राजन्यो,
ऽनपदोष्यं खलु वै सोमः प्रयच्छति, तमेव भागधेयेनोपासरत्, सोऽस्मा अनपदोष्य२ राष्ट्रं
प्रयच्छत्या,—ग्निवारुणं चरुं निर्वपेत् समान्तमभिद्रुह्यामयावी वा,—ऽनृत२ वा एष करोति यः समान्त-
मभिद्रुह्यति, देवता वा एष आरद्योऽनृतं करोत्य,—ग्निर्वै सर्वा देवता, अत्र वै सापि देवता
यामारत्तत एनं मुञ्चति, यद्वारुणो वरुणादेवैनं तेन मुञ्चति, तत् काजव२ वा एतत् क्रियते
सर्वस्याविष्टिः सर्वस्य प्रायश्चित्तिः ॥४॥ ४

सौमारौद्रं घृते चरुं निर्वपेच् शुक्लाना२ व्रीहीणां ब्रह्मवर्चसकामः, स्वर्भानुर्वा आसुरः सूर्यं तमसा-
विध्यत्, त२ सोमारुद्रा अभिषज्यतां, तस्य वा एतेनैव शमलमपाहता,—मेतेनास्मि२स्तेजोऽध-
त्ता२, यो ब्रह्मवर्चसकामः स्यात्तमेतया याजयेच्, शमलमेवास्यापहन्ति, तेजोऽस्मिन् दधाती,—
या२श्वरुर्भवत्ये,—तावान् वा आत्मा, यावानेवास्यात्मा तावदस्मि२स्तेजो दधाति, शुक्ला व्रीहयो
भवन्ति, श्वेता गा आज्याय दुहन्ति, तेज एवैतत्संश्रियते, घृतं प्रोक्षणं भवति, घृतेन मार्जयन्ते,
घृते भवति, भूय एवास्मि२स्तेजो दधाति, यस्या रात्र्याः प्रातर्यक्ष्यमाणः स्यान्नास्य ता२रा-
त्रीमपो गृहान् प्रहरेयुरा,—पो वै शान्तिः, शमयेयुरेवं, परिश्रिते याजयन्ति तेजसः परिगृहीत्यै,
साक२ रश्मिभिः प्रचरन्ति, साकमेवास्य रश्मिभिः शमलमपघ्नन्ति, तिष्यापूर्णमासे याजयेत्, सो-
मो वै चन्द्रमा, रुद्रस्तिष्यः, संप्र३त्येवैना उपासरत्, प्राचीन२ वै सौमीरोषधयः, प्रतीचीन२
रौद्री,—र्न हि प्राचीन२ शुष्यन्ति, शुष्यन्ति प्रतीचीनं, मनोर्श्चो भवन्ति, मनुर्वै यत्कि-
चावदत्तद्भेषजमेवावदत्, तद्भेषजत्वायैवं,—ताः शंकरीर्भवन्ति शंक्त्यै, नाराश२सीर्भवन्ति

[५] तै. २,२,१०। काठ. ११,५।

शान्त्यै, फिलासत्वाद्वा एतस्य, भयमेति ह्युपहन्ति, सौमापौष्णं चरुं निर्वपेन्नेमपिष्टं पशुकामः,
सौम्यो वै ब्राह्मणो देवतया, पशवः पूषा, स्वा२ वा एतद्देवतां पशुभिर्व२हयते, त्वचमे-
वाकृत ॥५॥ ५

सौमारौद्रं चरुं निर्वपेत् कृष्णाना२ व्रीहीणामभिचरन्, त्सौमीर्वा ओषधय,—स्तत एनं निर्या-
च्य रुद्रायास्य पशूनपिदधाति, कृष्णा व्रीहयो भवन्ति, तमो वै कृष्णं, मृत्युस्तमो, मृत्यु-
नैवैनं ग्राहयति, शरमयं बर्हिर्भवति, वैभीदक इध्मः, शृणादिति शरमयं बर्हिर्भवति,
विभिन्त्यै वैभीदक इध्मः, सौमारौद्रं चरुं निर्वपेदुदश्रित्यविचितानां२ व्रीहीणा२ यः कामयेत द्वि-
तीयमस्य लोके जनेयामिति, सौमीर्वा इमाः प्रजा, द्वितीयमेवास्य लोके जनयति, नेम२
शरमयं बर्हिर्भवति नेमम शरमयं, नेमो वैभीदक इध्मो नेमोऽवैभीदको, द्वितीयमेवास्य लोके
जनयति, सौमारौद्रीमामिक्षां निर्वपेदामयाविन२ याजये,—दाग्नेयो वै प्रमीतः, सौम्यो जीव,—
शुभयत एवैनं निष्क्रीणाति, पयो वै पुरुषः, पय एतस्यामयति, पयसैवास्य पयो निष्क्री-
णात्य,—पिनद्धाक्षो होता स्यात्, तमरण्यं पराणीय विक्शापयेत, तस्मा अनड्वाहं दद्यात्, वे
मीत, तस्याश्नीयात, यत्तस्य नाश्नीयात् प्रमीयेत ॥६॥ ६

आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्नभिचर्यमाणो वा, सरस्वतीमप्याज्यस्य यजे,—द-
ग्निर्वै सर्वा देवता, देवताभिरेवास्य देवताः प्रतिचरति, विष्णुर्यज्ञो, यज्ञेन यज्ञ२, वा-
क्सरस्वती, वाचा वाचं, तद्भिचर्याभिप्रायुक्ता,—ऽयो प्रतिचर्यात्येव प्रायुक्ता,—ऽऽग्नावैष्णवं घृते
चरुं निर्वपेच्चक्षुष्कामो, ऽग्निर्वै मनुष्याणां चक्षुषः प्रदाता विष्णुर्देवाना,—मेतौ वै चक्षुषः प्रदातारौ,
ता एव भागधेयेनोपासरत्, ता अस्मै चक्षुः प्रयच्छतो, धेन्वा वै घृतं पयोऽनडुहस्तण्डुला,—स्त-
न्मिथुनं, मिथुनं चक्षु,—र्मिथुनेनैवास्मै मिथुनं चक्षुर्जनयतः, पयो वै घृतं, पयश्चक्षुः, पयसैवास्मै
पयश्चक्षुर्जनयत,—स्तेजो वै घृतं, तेजश्चक्षु,—स्तेजसैवास्मै तेजश्चक्षुर्जनयतो, हिरण्यं ददात्या,—
युर्वै हिरण्य,—मायुश्चक्षु,—रायुषैवास्मा आयुश्चक्षुर्दधाति, शतमानं भवति, शतायुर्वै पुरुषः
शतवीर्या, आयुरेव वीर्यमाप्नोत्या,—ग्नावैष्णवमेकादशकपालं निर्वपेदभिचर्यमाणो, ऽग्निर्वै सर्वा
देवता, विष्णुर्यज्ञो, देवताश्चैव यज्ञं चास्तृत्यै मध्यतः प्रविशत्या,—ग्नावैष्णवमेकादशकपालं
निर्वपेत् संग्रामे, सरस्वतीमप्याज्यस्य यजे,—दग्निर्वै सर्वा देवता, देवताभिरेवास्य देवताः

[६] तै. २,२,१०। काठ. ११,५।
[७] तै. २,२,९। काठ. १०,१।

प्रणुदते, विष्णुर्यज्ञो, यज्ञेन यज्ञ२, वाक्सरस्वती, वाचा वाच२, यदि मन्येत,
प्रति पुरस्ताच्चरन्तीति, द्वे पुरोनुवाक्ये कुर्यादेका२ याज्या२, सममेव द्वाभ्यां क्रियते, ऽत्ये-
कया प्रयुङ्क्त, आग्नावैष्णवं प्रातरष्टाकपालं निर्वपेत् सारस्वतं चरुं बार्हस्पत्यं चरुमा,—ग्नावैष्णव-
मेकादशकपालं मध्यंदिने सारस्वतं चरुं बार्हस्पत्यं चरुमा,—ग्नावैष्णवं द्वादशकपालमपराह्णे सार-
स्वतं चरुं बार्हस्पत्यं चरु२ यस्य भ्रातृव्यः सोमेन यजेता,—ऽग्निर्वै सर्वा देवता, देवताभिरेवास्य
देवता आप्नोति, विष्णुर्यज्ञो, यज्ञेन यज्ञ२, वाक्सरस्वती, वाचा वाचं, ब्रह्म बृहस्प-
ति,—र्ब्रह्मणैवास्य ब्रह्माप्नोति, कपालैश्छन्दा२सि, पुरोडाशैः सवनानि, मैत्रावरुणमेक-
कपालं निर्वपेत् पयस्या२ वा,—ऽनूबन्ध्यामेवैतेनाप्नोति, सैषाध्वरकल्पेष्टि,—र्यज्ञमेवैतयाप्नोति॥७॥
७

आग्निमारुतं चरुं निर्वपेद् वृष्टिकामः, समान्या मृदश्चरुं च कुर्युः कुम्भं च, यस्मिन्नेवाग्नौ
चरुं पचेयुस्तस्मिन् कुम्भं धूपयेयु,—र्धूमो वा अस्यामुं गच्छति नार्चि,—स्तस्मादेतं धूपयन्ति, न
पचन्ति, यदा हवी२ष्यासादयेयुरथ दक्षिणाया२ श्रोण्यां कुम्भमासाद्योदकेन पूरयेयु,—र्यदि पुरा
स२स्थानाद्धीयेता,—ऽद्य वर्षिष्यती,—ति ब्रूयाद्, यदि सं२स्थिते, श्वो वष्टे,—ति ब्रूयाद्, यदि
चिरमिव वीयेत, नाद्धा विद्म,—ति ब्रूया,—दग्निर्वा इतो वृष्टिमीट्टे, मरुतोऽमुतश्च्यावयन्त्ये,—
ते वै वृष्ट्याः प्रदातार,—स्तानेव भागधेयेनोपासरत्, तेऽस्मै वृष्टिं प्रयच्छन्ति, मारुतं चरुं निर्व-
पेत् पयसि प्रैयङ्गवं ग्रामकामो वा पशुकामो वा, पृश्नीनां गवां दुग्धे पृश्नीनां गवामाज्य२ स्यात्,
तत्रापि गोमूत्रस्याश्चोतयेयुः, पृश्निर्वै यददुहत् स प्रियङ्गुरभवदि,—य२ वै पृश्निर्गवा, तस्या वा
एतत् पयो यत् प्रियङ्गवः, स्वेनैवैनां पयसाच्छेति, प्रियवती याज्यानुवाक्ये भवतः, प्रियमेन२
सजातानां करोति, द्विपदा च चतुष्पदा च भवतो, द्विपदश्चैवास्मै चतुष्पदश्च पशूनवरुन्द्धे,
यथा वत्सं ऊधरभ्यायच्छति वत्स२ वा गौरेवमेन२ सजाता अभ्यायच्छन्ति, मारुतं त्रयोदशकपालं
निर्वपेद्यस्य यमौ पुत्रौ गावौ वा जायेयातां, निर्ऋता२ वै पुरुषो यमौ जातं आशास्तेऽपशूनां
गौ,—र्यत् त्रयोदश, प्रजापतिर्वै त्रयोदशो, प्रजापतिमेवाप्नोति, यद् द्वादश२ स२वत्सरात् तेन,
यद्वापृत्यनुवाक्या स२वत्सरात् तेन, यज्जगती याज्या पशुभ्यस्तेन, यन्मारुतीष्टिः पशुभ्यस्तेन,
मारुत२ सप्तकपालं निर्वपेद्यत्र विद्राजानं जिज्यासे,—दगस्त्यस्य कयाशुभीय२ सामिधेनीश्च स्युर्या-
ज्यानुवाक्याश्चा,—ऽगस्त्यो वै मरुद्भ्य उक्ष्णः प्रौक्षत्, तानिन्द्रायालभत, ते वज्रमादायाभ्यु-

[८] तै. २,२,११।

पशू२,—स्तान् वा एतेनाशमयद्, तेष् शमयत्येवैतेन, सप्तकपालो भवति, सप्त हि मरुतो,
विग्मरुतः, स्वेनैवैनान् भागधेयेन शमयति ॥८॥ ८

ऐन्द्रमेकादशकपालं निर्वपे,—न्मारुत२ सप्तकपाल२ राज३न्यं भूतिकाम२ याजये,—दैन्द्रो वै
राजन्यो देवतया, मारुती विं,—ड्डिन्द्रियेणैवास्मै विशमुपयुनक्त्य,—नुकामस्मै विशमविवादिनीं
करोत्यै,—न्द्रमेकादशकपालं निर्वपेन्मारुत२ सप्तकपाल२ यः कामयेत, विशे च क्षत्राय च समदं
कुर्यामि,—त्यैन्द्रस्यैन्द्रीमनूच्य मारुत्या यजे,—न्मारुतस्य मारुतीमनूच्यैन्द्र्या यजेद्, स्व एवैभ्यो
भागधेये समदं करोति, यदि कामयेता,—ऽतुभुम२ स्यादिति, पूर्वा३र्धेऽन्यां जनतायां गां
निदुष्यांज्जघना३र्धेऽन्यामिति, ते संगच्छेते, तावदतुभुं भवति, यदि कामयेत, कल्पेते-
स्वे,—ति एव हविषी निरुप्य यथापूर्व२ यजेद्, कल्पतेऽहै,—न्द्रमेकादशकपालं निर्वपेन्मारुत२
सप्तकपालमभिचर,—न्नुपरिष्टादैन्द्रस्यावद्यैदुपस्तान्मारुतस्यो,—भयत एवैनानादीपयति ज्येष्ठतश्च
कनिष्ठतश्चै,—न्द्रमेकादशकपालं निर्वपे,—न्मारुतीमामिक्षा२ राज३न्यं ग्रामकाम२ याजये,—न्मध्य
आमिक्षायाः पुरोडाशं निधायोभयस्यावद्ये, क्षत्र२ वा इन्द्रो, विण्मरुतो, विश२ वा एत-
न्मध्यतः प्रविशति, पर्यूहमवद्यति, विशैवैनं पर्यूहति, मारुतमेकविं२शतिकपालं निर्वपेद-
भिचरन्, देवविशो वै मरुतो, न वै विशो घ्नन्ति, देवविश एवैनं निर्याच्य स्तृणुते,
सं बर्हिषदं कृत्वा समया स्फ्येन विहन्याद् ॥ इदमहमामुष्यायणस्येन्द्रवज्रेण शिरश्छिनद्मि ॥
इतीन्द्रवज्रेणैवास्य शिरश्छिनत्त्य,—ष यत्स्फ्यो, वज्रो वै स्फ्यो, वज्रेणैवैन२ स्तृणुते ॥
९-११

एना व्याघ्रं परिषस्वजानाः सि२हं नृजन्ति महते धनाय ।
महिषं नः सुभ्वं तस्थिवा२सं मर्मृज्यन्ते द्वीपिनम३प्स्वन्तः ॥ १२
इति वज्रो वा आपो, यदुदप्सु मर्यज्जुमैति वज्रेणैवैन२ स्तृणुते ॥९॥ १३

अग्नये पथिकृतेऽष्टाकपालं निर्वपेद्यस्य प्रज्ञातेष्टिरतिपद्येत, बहिष्पथ२ वा एष एति यस्य प्रज्ञा-
तेष्टिरतिपद्यते, ऽग्निर्वै देवानां पथिकृत्, तमेव भागधेयेनोपासरत्, स एनं पन्थामपिनयत्य,—
नड्वान् दक्षिणा, स हि पन्थामभिवहत्य,—ग्नये व्रतपतयेऽष्टाकपालं निर्वपेद्य आहिताग्निः सन् प्रव-
सति प्रवसेद्, बहु वा एष व्रतमतिपादयति य आहिताग्निः सन् प्रवसति, व्रत्ये ह्यहनि स्त्रिय२ वोपैति
मा२स२ वाश्नात्य,—ग्निर्वै देवाना२ व्रतपति,—स्तमेव भागधेयेनोपासरत्, स एन२ व्रतमालम्भय-

[९] तै. २,२,११। [एना व्याघ्रं......प्स्वन्तः। अथर्व. ४,८,७]
[१०] तै. २,२,२। काठ. १०,५-७।

त्य,—ग्नये व्रतभृतेऽष्टाकपालं निर्वपेद्य आहिताग्निः सन्नश्रु कुर्या,—दानीतो वा एष देवाना२ य
आहिताग्नि,—स्तस्मादेतेनाश्रु न कर्तवै, न हि देवा अश्रु कुर्वन्त्य,—ग्निर्वै देवाना२ व्रतभृ,—द्व-
ग्निमेतस्य व्रतमग२,—स्तस्मादेवाधिव्रतमालभते, ऽग्नये यविष्ठायाष्टाकपालं निर्वपेदभिचर्यमाणो,
याभिरेवैनमितरः प्रयुक्तिभिरभिप्रयुङ्क्ते ता अस्माद्यविष्ठो यौयावा,—ऽग्नये वाजसृतेऽष्टाकपालं नि-
र्वपेत् संग्रामे, वाज२ वा एष सिसीर्षति यः संग्रामे जिगीषत्य,—ग्निर्वै देवाना२ वाजसृत्, तमेव
भागधेयेनोपासरत्, सोऽस्मै वाजं धावत्य,—ग्नयेऽनीकवतेऽष्टाकपालं निर्वपेत् संग्रामे, य३श्चग्वा
अग्नेरनीकमेति न तत् प्रतिधृषे, ऽग्निरेवास्मा अनीकानि जयति, विष्णुमप्याज्यस्य यजे,—देवो
वै विष्णुरिमाँल्लोकानुदजयद्, विष्णोरेवोज्जितिमन्विमाँल्लोकाननुजयति, एभ्यो लोकेभ्यो भ्रातृव्यं
नुदते, ऽग्नये रुद्रवतेऽष्टाकपालं निर्वपेद्यः कामयेत, रुद्रायास्य पशूनपिदध्यामित्य,—ग्निर्वै रुद्रो,
रुद्रायैवास्य पशूनपिदधाति, यदि कामयेत, शाम्येदित्य,—ग्नये सुरभिमतेऽष्टाकपालं निर्वपे,—
देषा वा अग्नेर्भेषजा तनूर्यत् सुरभि,—र्भेषजमेवास्मा अकः, सुरभिमेनमकः, शमयत्येवा,—
ऽग्नयेऽन्नवतेऽन्नादायान्नपतयेऽष्टाकपालं निर्वपेद्यः कामयेता,—ऽन्नवानन्नादोऽन्नपतिः स्यामित्य,—
ग्निर्वै देवानामन्नवानन्नादोऽन्नपति,—स्तमेव भागधेयेनोपासरत्, स एनमन्नवन्तमन्नादमन्नपतिं
करोति ॥१०॥ १४

अग्नये रक्षो३घ्नेऽष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभीया,—दिन्द्र२ वै रक्षा२स्यसचन्त, ३सोऽ-
ग्निं प्राविशत्, तानि वा एनमभिसममृशन्, त्स एता विप्रुषोऽजनयत या इमाः स्कूयमानस्य वि-
प्रवन्ते, तानि वा अग्निनैवापाहता,—ऽग्निर्वै देवाना२ रक्षोहा, तेनैव रक्षा२स्यपहते, नक्त२
याजये,—न्नक्त२ वै रक्षा२सि प्रेरते, यह्येव प्रेरते तर्ह्येनान्यपहते, वामदेवस्य पञ्चदश सामि-
धेनीश्च स्युर्याज्यानुवाक्याश्च, वामदेवश्च वै कुसितायी चाजीमयातामात्मनोः, सा कुसितायी
वामदेवरथस्य कूबरमछिनत्, सापूरं न्यालवत, युग२ वा छेत्स्यामीषा२ वेति, ३सोऽग्नि-
मुख्यमवैक्षत, स एतं मन्त्रमपश्यत्, तामर्चिरुदौषत्, सार्चिषा दह्यमाना ह्रदं प्राविशत्, स
वाव कौसितो ह्रदो, रक्षा२सि वै स तेनापाहत, तद्रक्षा२स्येवैतेनापहत, आग्नेयमष्टाकपालं
निर्वपेद्यो राष्ट्रे स्पर्धेत यो वा कामयेता,—ऽन्नादः स्यादिति, देवाश्च वा असुराश्चास्पर्धन्त, तान्
गायत्री सर्वमन्नं परिगृह्यान्तरातिष्ठत्, तेऽविदु,—र्यतरान् वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति,
तस्या२ वा उभय ऐछन्त, तां नाम्नोपैप्सन्॥ दाभि॥ इत्यसुरा आह्वयन्॥ विश्वकर्मन्॥ इति देवाः,

[११] तै. २,२,२। काठ. १०,५,७।

सा नान्यतर२श्चनोपावर्तत, तां देवा एतेन यजुषावृञ्जत ॥ ओजोऽसि, सहोऽसि, बलमसि,
भ्राजोऽसि, देवानां धाम नामासि, विश्वमसि विश्वायुः, सर्वमसि सर्वायुरभिभूः ॥ इति
स२वत्सरो वै गायत्री, स२वत्सरो वै तदतिष्ठत्, स२वत्सर२ वा एषां तदन्नाद्यमवृञ्जत, तत्
स२वत्सरमेवैतदन्नाद्य२ यजमानो भ्रातृव्यस्य वृङ्क्ते, सैषा गायत्रीष्टि,—र्यो आह, राष्ट्रस्य
सध्वर्गो इति ॥ ११ ॥ १५-२१

ऐन्द्राबार्हस्पत्य२ हविर्निर्वपेद्यो राष्ट्रीयो नैव प्रस्तिघ्नुया,—ददितिर्वै प्रजाकामौदनमपचत्,
सोच्छिष्टमाश्नात्, त२ वा इन्द्रमन्तरेव गर्भ२ सन्तमपश्ययेन दाम्नापौम्भत्, सोऽपोम्भोऽजायत,
त२ वा एतेन बृहस्पतिरयाजयदैन्द्राबार्हस्पत्येन, तस्य तद्दाम स्वयमेव व्यपद्यत्, स इमा दिशो
वज्रेणाभिपर्यावर्तत, यो राष्ट्रीयो नैव प्रस्तिघ्नुयात् तमेतेन याजयेदैन्द्राबार्हस्पत्येन, परितो
हि वा एष पाप्मना,—ऽथैष न प्रस्तिघ्नोति, बृहस्पतये निरुप्यता, इन्द्राय क्रियते, मुञ्चत
एवैनं द्रवति, वज्रेणेमा दिशोऽभिपर्यावर्तते ॥ १२ ॥ २२[७१७]

॥ इति मध्यमकाण्डे प्रथमः प्रपाठकः ॥१॥

अथ द्वितीयः प्रपाठकः ।

आदित्या मार्ग२ वः करिष्याम्यहममुष्यायणमवगमयत ॥ इति ब्रूयाद्धविर्निर्वप्स्यन्, त्स
एतमादित्यं घृते चरुं निर्वपे,—दादित्या वा इमाः प्रजा,—स्ता एवोपासरत्, ता एनमवगम-
यन्ति, सुताश्वस्या मयूखा अन्तर्वेदि प्रमीर२,—स्तान त्स२स्थिते रथवाहनस्य मध्यमिषायाम-
विहन्याद् ॥ इदमहमादित्यान् बध्नाम्यामुष्यावगमः ॥ इत्यादित्यान् वा एतद्बध्नाति, त एनं
मोक्षमाणा अवगमयन्ति, विशो वी३र्यमपाक्रामत्, तदश्वत्थं प्राविशत्, स तेन वीर्येण भर्म-
गामवद्, तद्विश एवैतेन वी३र्यमवरुन्द्धे, यदि समम नावगच्छेदिध्मे तानपि कृत्वैतदेव हविर्नि-
र्वपे,—दादित्या वा इमाः प्रजा,—स्ता एवोपासरत्, ता एनमवगमयन्ति, यद्येव सप्तसु,
त्रिर्वै सप्त सप्तादित्या,—स्तानेवोपासरत्, ता एनमवगमयन्ति, यद्येकतयीषु द्वयीषु वावगच्छेद-
परोधुका एन२ स्यु,—रेष यत्सर्वास्ववगच्छति तथा ह्यनपरोध्योऽवगच्छति, स यदावगच्छेदादि-

[१२] तै. २,४,१३। काठ. ११,४। मा. श्री. ५,१,७।
[१] तै. २,३,१। काठ. ११,६।

त्येभ्यो धारयद्भ्यो घृते चरुं निर्वपे,—दादित्या वा अपरोद्धार, आदित्या अवगमयितार,—स्त
एनं दाधति ॥ १-४
अदितेऽनुमन्यस्व सत्याशीरिह मनः ॥ ५
इति निरुद्धस्य राज्ञः पदमाददीत, तद्यः पुरस्ताद् ग्राम्यवादीव स्यात् तस्य सभाया अभिवातं
परीत्य विध्य२सयेयुः ॥ ६
प्रेत मरुतः स्वतवस एना विश्पत्याभु२ राजानमर्भि ॥ ७
इति तस्य गृहाद् व्रीहीनाहरेयु,—स्ता२स्त्रेधा विचिनुयाद्, ये कृष्णास्तान् कृष्णाजिने उपनह्य
निदध्याद्, ये शुक्लास्तमादित्यं घृते चरुं निर्वपे,—दादित्या वा इमाः प्रजा,—स्ता एत्रोपासरत्, ता
एनमवगमयन्त्य,—थ येभ्योऽपि विचिनुयात् तानुदङ् परेत्य वल्मीकवपामुद्धृज्य जुहुयात्॥ ८
यदुग्रं ते घोरं आसन् जुहोम्येषां बन्धानां प्रमोचनाय ।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिं त्वाहं परिवेद विश्वतः ॥ ९
इति निर्ऋतिगृहीतो वा एष यो निरुद्धो, निर्ऋत्या एवैनं तेन मुञ्चत्ये,—तद्वै विशमत्राग,—
थैष वा अस्य राज्यमन्ववगत्, त३श्चेऽमी कृष्णा व्रीहयस्त२ वारुणं घृते चरुं निर्वपेद्, वरुणो वै
देवाना२ राजा, स राज्यस्यावगमयिता, तमेव भागधेयेनोपासरत्, स एन२ राज्यमवगमय-
त्ये,—तद्वै नानाविश्य,— मुमयीमेवैतेन विशमवगच्छति दैवीं च मानुषीं च ॥१॥ १०
सौर्यं घृते चरुं निर्वपेच्छुक्लाना२ व्रीहीणां ब्रह्मवर्चसकामः, शतमानो रुक्मो रज३तोऽधस्तात्
स्याच्, शतमानो रुक्मो हरित उपरिष्टा,—दिदं वा असा आदित्य आसीत्, तमाभ्यां परिगृह्यो-
परिष्टादासा प्रजानां न्यदधु,—रुपरिष्टाद्वा असा आदित्य इमाः प्रजा अधिपश्याती,—य२ वै रजता-
सौ हारिण्या,—भ्यामेवैनं परिगृह्योपरिष्टादासां प्रजानां निदधात्यु,—परिष्टादिमाः प्रजा अधिप-
श्याति, पञ्च कृष्णलान्यपि प्रयाजेषु जुहुया,—द्दैवी असा आदित्य इमान्, पञ्च ऋतूनन्व
तेजस्वी,—मा एवैनं पञ्च दिशोऽनु तेजस्विनं करोति, प्राजापत्यं घृते चरुं निर्वपेच्, शत-
कृष्णलमायुष्कामो, देवा असुरान् हत्वा मृत्योरबिभयु,—स्ते देवाः प्रजापतिमेवोपाधाव२,—
स्तान् वा एतया प्रजापतिरयाजयत्, ततो देवा अमृतत्वमगछ,—न्नमृत२ वै हिरण्य,—ममृत-
मायु,—रमृतेनैवैष्वमृतमायुराप्स्यदधाद्, य आयुष्कामः स्यात् तमेतया याजये,—देतद्वै मनुष्य-
स्यामृतत्व२ यत् सर्वमायु,—रमृत२ वै हिरण्य,—ममृतमायु,—रमृतेनैवास्मिन्नमृतमायुराप्स्वा

[१] तै. २,३,१। काठ. ११,४।

दधाति, तेन स सर्वमायुरेति, न पुरायुषः प्रमीयते, शतकृष्णलो भवति, शतायुर्वै पुरुषः शतवीर्यो, आयुरेव वीर्यमाप्नोति, चत्वारि चत्वारि कृष्णलान्यवद्यति समृद्ध्यै, सर्वं ब्रह्मणे परिहर्तवा आह, सर्वे ब्रह्मणि यज्ञं प्रतिष्ठापयति, सर्वमस्मिन् ब्रह्मा वायुं दधात्य,-थो ब्रह्म वै ब्रह्मा, ब्रह्मणैवास्मिन् ब्रह्मायुर्दधाति ॥ २ ॥ ११

बार्हस्पत्यं चरुं निर्वपेत्, पुरोधाकाम,-स्तस्य बार्हस्पत्ये ज्योतिष्मती याज्यानुवाक्ये स्यातां, ब्रह्म वै बृहस्पति,-र्बार्हस्पत्यो ब्राह्मणो देवतया, स्वामेव देवतां पुरोधाया उपासरत्, स्वैनं देवता पुरोधां गमयति, यद्वै लेलाय वीव भाति तज्ज्योति,-स्तस्माज्ज्योतिष्मती, यदि नैव पुरोधां गच्छेदथैन्द्राबार्हस्पत्यꣳ हविर्निर्वपेद्, ब्रह्म चैव क्षत्रं च सयुजा अक,-स्ताजगेनं पुरोदधते, बार्हस्पत्यं चरुं निर्वपेत् पयसि ग्रामकामो वा पशुकामो वा, तस्य बार्हस्पत्ये गणवती याज्यानुवाक्ये स्याताꣳ, यो बहुपुष्टस्तस्य गृहात् क्षीरमाहरेयुः, स्यात् स्वासां गवां दुग्धꣳ, स्यादुदकं, पुष्टिरेवैषा संभ्रियते, ब्रह्म वै बृहस्पति,-र्बृहस्पतिश्छन्दाꣳसि, छन्दोभिर्बृहस्पतिर्गणी, स्वाꣳ वा एतद्देवतां, भूयिष्ठेनार्पयति, सजातैरेनं गणिनं करोति, ब्राह्मणस्पत्यं चरुं निर्वपेत् संग्रामे, तस्य ब्राह्मणस्पत्ये वीरवती वयस्वती याज्यानुवाक्ये स्यातां, छदिर्दर्शे याजये,-दु-द्र्हिः प्रस्तरः स्याद्, बाणवन्तः परिधयो, वयाꣳसि परं ग्राममाविशन्ति, तथा विज्ञेयं, जेष्यामा इति, ब्रह्म वै ब्रह्मणस्पति,-र्ब्रह्मैवोपासरद्, ब्राह्मणस्पत्यं चरुं निर्वपेद्यत्र कामयेत, ब्रह्मबलꣳ स्यादिति, तस्य ब्राह्मणस्पत्ये मरुत्वती याज्यानुवाक्ये स्यातां, ब्रह्म वै ब्रह्मणस्पति,-र्विण्मरुतो, ब्रह्मणि वा एतद्विशमधि विनाशयति द्रढिम्नेऽशिथिरत्वाय ॥३॥ १२

बार्हस्पत्यं चरुं निर्वपेद्धार्मुतं पशुकामः, प्रजापतिः पशूनसृजत, तेऽस्मात् सृष्टाः पराञ्च आयꣳ,-स्तान् बृहस्पतिश्चान्वैतां, तौ यत्रावसꣳस्ततः शक्रो गर्मुदजायत, तꣳ वा अब्रवी,-दनेन मा याजयेति, तेन वा एनमयाजयत्, तं पशव उपावर्तन्त, यः पशुकामः स्यात्, तमेतेन याजये,-दुप हैनं पशवा आवर्तन्ते, यदा हि स तमेतेनायाजयदथ तं पशव उपावर्तन्त, सौमापौष्णं चरुं निर्वपेद्धार्मुतं पशुकामः, प्रजापतिः पशूनसृजत, तेऽस्मात् सृष्टाः पराञ्च आयꣳ,-स्तेषां पूषणमधिपामकरोत्, तौ यत्रावसꣳस्ततः शक्रो गर्मुदजायत, तꣳ वा आहर,-दनेन मे प्रतिष्ठेति, स सोमोऽब्रवी,-न्मम वा अकृष्टपच्यमिति, तꣳ सौमापौष्णं निरवपत्, तं पशव उपावर्तन्त, यः पशुकामः स्यात्, तमेतेन याजये,-दुप हैनं पशवा आव-

[३] तै. २,३,३; २,१,४।
[४] तै. २,२,४। काठ. १०,११।

र्तन्ते, यदा हि स तमेतेनायाजयदथ तं पशव उपावर्तन्त, सोमो वै रेतोधाः, पूषा पशूनां प्रजनयिता, सोम एवास्मै रेतो दधाति, पूषा पशून्, प्रजनयति, प्राजापत्यं चरुं निर्वपेद्धार्मुतं पशुकामः, पृश्नीनां गवां दुग्धे पृश्नीनां गवामाज्यꣳ स्यात्, तत्रापि गोमूत्रस्याश्चोतयेयुः, पृश्निर्वै यदद्रुहत्स गर्मुदभव,-दियꣳ वै पृश्निर्गावा, तस्या वा एतच्च, शिरो यद्दुग्ध-मुत,-स्तस्मादेतदाण्डमिव पीयूष इव, तं प्राजापत्यं चरुं निर्वपेत् पशुकामः, प्राजापत्या वै पशवः, प्रजापतिः पशूनां प्रजनयिता, तमेव भागधेयेनोपासरत्, सोऽस्मै पशून् प्रजनयति, वास्त्वमयꣳ रौद्रं चरुं निर्वपेद्यत्र रुद्रः प्रजाः शमायेत, वास्तोर्वै वास्त्वं जातꣳ, वास्त्वमयं खलु वै रुद्रस्य, स्वेनैवैनं भागधेयेन शमयति, तया निषादस्थपतिꣳ याजयेत्, सा हि तस्येष्टिः, कूटं दक्षिणा कर्णो वा गर्दभः ॥४॥ १३

परमेष्ठिने द्वादशकपालं निर्वपेद्यः कामयेत, परमेष्ठी स्यामिति, परमेष्ठी वा एष देवानाꣳ गः परमेष्ठी, परमेष्ठी राजन्यो मनुष्याणां, तमेव भागधेयेनोपासरत्, स एनं परमेष्ठिनं करोति, तस्मै धनुश्च तिस्रश्च प्रयच्छेत् ॥ अग्निष्टे तेजः प्रयच्छत्विन्द्र इन्द्रियं पित्र्यां बन्धुताम् ॥ इत्यग्निरेवास्मै तेजः प्रयच्छती,-न्द्र इन्द्रियं पित्र्यां बन्धुताꣳ, वैश्वदेवं द्वादशकपालं निर्वपेद्भ्रातृव्यवाꣳ,-स्तं बर्हिषदं कृत्वा समया स्फ्येन व्यूहेत् ॥ इदमहं मां चामुं च व्यूहामि ॥ इति यं द्विष्यात्तꣳ, यदुधोऽवमृद्येत यच्च स्फ्य आश्लिष्येत् तद्विष्णव उरुक्रमायावद्येद्, विष्णुरेवैना अन्तरा विक्रमते, तं पुनः समूहेत् ॥ इदमहं मां चामुं च समूहामि ॥ इति योऽस्य प्रियः स्यात्तꣳ, वैश्वदेवीर्वा इमाः प्रजा,-स्ताभिरेवैतरꣳ व्यूहति, ताभिरात्मानꣳ समूहती,-न्द्राण्यं चरुं निर्वपेत् सेनाया-मुत्तिष्ठन्त्याꣳ, सेना वा इन्द्राणी, ब्रह्मणैवैनां पुरस्तान्मुखतो जित्यै सꣳश्यति, बल्बजा अपीध्मे स्युः, शक्रो वा एतेऽध्युत्थिता, न्यायेनैवैनामभिनयति, यत्तस्याꣳ सेनायाꣳ विन्देत् सा दक्षिणा, वाचस्पतये चरुं निर्वपेच्छ्रीकामो, यो वै वाचोऽध्यक्षः स वाचस्पति,-स्तच्छ्रीकरणमेवैतत् ॥ ५ ॥ १४-२०

अग्नये वसुमते सतीनानामष्टाकपालं निर्वपेत्, सोमाय रुद्रवते श्यामाकं चरु,-मिन्द्राय मरुत्वते नैवारमेकादशकपालꣳ, वरुणायादित्यवते यवमयं चरुं, देवा अ३न्योऽन्यस्य श्री,-र्हे

[५] काठ. १०,१०।
[६] तै. ब्रा. २,४,४। काठ. १०,११। वा. ३३,८६; १९,५८। काण्व. १३,५९।

विष्ठमानाश्चतुर्धा व्युदक्राम,-न्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैस्तान् वा एतया बृहस्पतिरयाजयत् संज्ञान्या,-तं इन्द्रमेवाभिसमावर्तन्ते,-न्द्रमभिसमजानत, तद्य एतया यजते तमेवाभिसमावर्तन्ते, तमभिसंजानते, तदाहु,-रैन्द्र एकादशकपालः का३र्या इती,-न्द्रꣳ हि तेऽभिसमावर्तन्ते,-न्द्रमभिसमजानत ॥ २१

संज्ञानं नो दिवा पशोः संज्ञानं नक्तमर्वतः ।
संज्ञानं नः स्वेभ्यः संज्ञानमरणेभ्यः संज्ञानमाश्विना युवमिहास्मभ्यं नियच्छतम् ॥ २२
समिन्द्र रायो समिषा रभेमहि सꣳ वाजैः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वत्या रभेमहि ॥ २३
इन्द्रवायू सुसंदृशा सुहवेह हवामहे । यथा नः सर्वा इज्जनः संगमे सुमना असत् ॥ २४
सꣳ वो मनाꣳसि सꣳ व्रता समाकूतीरनꣳसत ।
अमी ये विव्रताः स्थ तान्वः संनमयामसि ॥ २५
समाना वा आकूतानि समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥ २६
समानो मन्त्रः समितिः समानी समानꣳ व्रतꣳ सह चित्तमेषाम् ।
समानं क्रतुमभिमन्त्रयध्वꣳ समानेन वो हविषा जुहोमि ॥ २७
संगच्छध्वꣳ संजानीध्वꣳ सꣳ वो मनाꣳसि जानताम् ।
देवा भागꣳ यथा पूर्वे संजानाना उपासते ॥ ६ ॥ २८

आग्नेयमष्टाकपालं निर्वपेत् सावित्रं चरुꣳ वायव्याꣳ यवागूं प्रतिधुग्वा भौममेककपालꣳ यस्य हिरण्यं नश्येद्यो वा हिरण्यꣳ विन्देद,-ग्निर्वा अग्रे हिरण्यमविन्दत्, स सवित्राऽनꣳत्रयत, न खलु वै हिरण्यं नश्येद्यो वा हिरण्यꣳ विन्दे,-दग्निर्वा अग्रे हिरण्यमविन्दत्, विश्वा एवाप्रियः, प्रसवाय सावि३त्रो, किं चन वायुनानभिगतमस्त्य,-स्याꣳ वै स तदविन्दद्, विश्वा एवाप्रियः, प्रसवाय सावि३त्रो, किं चन वायुनानभिगतमस्त्य,-स्याꣳ वै स तदविन्दद्,-स्याꣳ हि स तदविन्द,-देते वै प्रदातार,-स्तानेव ऽभिनीत्यै वायव्या,-ऽध यत्र३मो, ऽस्याꣳ हि स तदविन्द,-देते वै प्रदातार,-स्तानेव यैरेवाविन्दत्तान् भागधेयेनोपासरत्, तेऽस्मै प्रयच्छन्ति, स यदा विन्देदथैतेभ्य एव निर्वपेद्,

[संज्ञानं नः स्वेभ्यः.......नि यच्छतम् । ऋ. परि. ३६,२; अथर्व. ७,५२,१ । समिन्द्र रायो.......रभेमहि। ऋ. १,५३,५; अथर्व. २०,२१,५। इन्द्रवायू सुसंदृशा.......असत्। ऋ. १०,१४१,४; अथर्व. ३,२०,६। स ꣳ वो (वां) मनाꣳसि.......संनमयामसि । अथर्व. ६,९४,१ । समाना (...नी) वा (व).......सुसहासति । ऋ. १०,१९१,४; अथर्व. ६,६४,३। समानो मन्त्रः....... (अभिसंविशध्वम्) जुहोमि । ऋ. १०,१९१,३; अथर्व. ६,६४,२ । संगच्छध्वꣳ.......उपासते । ऋ. १०,१९१,२; अथर्व. ६,६४,१]

[७] तै. २,३,५। काठ. ११,२।

भागिनः करोत्यहिꣳसायै, प्रजापतिर्वै सोमाय राज्ञे दुहितॄरददान्नक्षत्राणि, स रोहिण्यामेवावसन्नेतरासु, ता अनुपेयमानाः पुनरगच्छꣳ,-स्तꣳ राजयक्ष्मेणाग्राहयत्, स निरस्रवत्, तस्माद्राजयक्ष्मगृहीतो निःस्रवति, स वै प्रजापतिमेवोपाधावत्, तं प्रजापतिरब्रवीद्, ऋतं मृहीति, स ऋतमब्रवीद्, यथा सर्वास्वेव समावद्वसानीति, तस्मादेष सर्वास्वेव समावद्वसति, तस्मै वै प्रजापतिः प्रायश्चित्तिमैच्छत्, तस्मा अमावास्यायाꣳ वैश्वदेवं चरुं निरवपत्, तेनास्मै प्रायश्चित्तिमविन्द३त्, सोऽमुमाप्यायमानमन्वाप्यायत, वसीयानभवद्, यो राजयक्ष्मगृहीतः स्यात् तस्मा अमावास्यायाꣳ वैश्वदेवं चरुं निर्वपे,-देतेन वै स तस्मै प्रायश्चित्तिमाविन्दत्, तेनैवास्मै प्रायश्चित्तिꣳ विन्दत्य,-मुमेवाप्यायमानमन्वाप्यायते, वसीयान् भवति ॥७॥ २९

प्रजापतिर्वै देवेभ्यो भागधेयानि व्यकल्पयत्, स इन्द्रोऽब्रवीद्, यदतिरिच्यते तन्ममेति, तद्वा इन्द्रियमेवात्यरिच्यत, तदिमांल्लोकाननूर्ध्वमनूदश्रयत, तदेकेनाप्नो,-द्द्वाभ्यां, तत् तृतीयेनाप्त्वावारुन्द्ध, यत् त्रयः पुरोडाशा भवन्त्येभ्यो वा एतं लोकेभ्य इन्द्रियꣳ वीर्यमाप्त्वावरुन्द्धा, उत्तर उत्तरः पुरोडाशो ज्यायान् भवत्यु,-त्तर उत्तरो हि लोको ज्याया,-निन्द्राय राज्ञे प्रथम, इन्द्राय स्वराज्ञे मध्यम, इन्द्रायाधिराजायोत्तम, एतानि वै सर्वाणीन्द्रोऽभवद्राज्यꣳ स्वाराज्यमाधिराज्य,-मेतानि सर्वाणि भवति य एतैर्यजते, सर्वमेतद्भवति य एवꣳ वेद, प्रथमामनूच्य मध्यमया यजे,-न्मध्यमामनूच्योत्तमया यजे,-दुत्तमामनूच्य प्रथमया यजे,-देवमस्य सर्वा अनुवा३क्या भवन्ति सर्वा याज्या एषां लोकानां प्रतिप्रज्ञात्या अथो अनुसंतत्या, इन्द्राय घर्मवते सूर्यवता एकादशकपालं निर्वपेत्तेजस्काम,-स्तेजो वै घर्म,-स्तेजः सूर्य,-स्तेज एवावरुन्द्धा, इन्द्रायेन्द्रियवता एकादशकपालं निर्वपेत् पशुकाम, इन्द्रियꣳ वै पशवा, इन्द्र इन्द्रियस्य प्रदाता, तमेव भागधेयेनोपासरत्, सोऽस्मा इन्द्रियं पशून् प्रयच्छति ॥८॥ ३०

इन्द्रायार्कवतेऽश्वमेधवता एकादशकपालं निर्वपे,-दभिरुद्धꣳ याजये,-दन्तꣳ वा एष गतो यो निरुद्धो, ऽन्तोऽर्को, ऽन्तोऽश्वमेधो, ऽन्तेनैवास्मा अन्ते कल्पयति, वशा दक्षिणा, वशं मा नयादिती,-न्द्रायार्कवतेऽश्वमेधवता एकादशकपालं निर्वपेद्यः कामयेत, जने म ऋध्येते-स्य,-न्तो वा एषा ऋद्धीनाꣳ यज्ञानां, ऽन्तो, ऽर्को, ऽन्तोऽश्वमेधो, ऽन्तेनैवास्मा अन्ते कल्पयति, वशा दक्षिणा, वशं मा नयादिती,-न्द्रायार्कवतेऽश्वमेधवता एकादशकपालं निर्वपेद्-

[८] तै. २,३,६। काठ. १०,१०,८।
[९] तै. २,२,७-८। काठ. १०,८।

हन्त्री,—यदा वै श्रियोऽन्नं गच्छन्त्यथ पापीयान् भवत्य,—न्नोऽर्को, ऽन्नोऽश्वमेधो, ऽन्नमेवालब्ध न पापीयान् भवती,—न्द्रायार्कवतेऽश्वमेधवता एकादशकपालं निर्वपेद्यः कामयेत, महायज्ञो मोपनमे,—दित्येते वा इन्द्रस्य यज्ञिये तन्वा यदर्कश्चाश्वमेधश्च, ते एवालब्ध, ताभ्यां महायज्ञमालभता, इन्द्राय घर्मवते सर्ववता एकादशकपालं निर्वपे,—दिन्द्राय मन्युमते मनस्वता एकादशकपाल,—मिन्द्रायेन्द्रियवता एकादशकपाल,—मिन्द्रायार्कवतेऽश्वमेधवता एकादशकपालं भूतिकाम२ याजये,—द्विद२ वा इन्द्रस्य घर्मश्च सर्वश्चे,—दमस्य मन्युश्च मनश्चे,—दमस्यैन्द्रश्चेन्द्रियं चे,—दमस्यार्कश्चाश्वमेधश्च,—तानि वै सर्वाणीन्द्रोऽभव,—देतानि सर्वाणि भवति य एवं यजते, सर्वमेतद्भवति य एव२ वेद ॥९॥ 31

इन्द्रायां२होमुचा एकादशकपालं निर्वपे,—दामयाविन२ याजये,—द्देषा वा इन्द्रस्य भेषजा तन्र्यद२होमु,—क्तेनैव भागधेयेनोपासरत्, स एनमं२हसो मुञ्चती,—न्द्राय त्रात्र एकादशकपालं निर्वपेद्यो ज्यान्या मारणादपरोधाद्वा बिभीया,—दिन्द्रो वै त्राते,—न्द्रोऽपरोद्धा, तमेव भागधेयेनोपासरत्, स एनं त्रायता, इन्द्रायान्वृजवा एकादशकपालं निर्वपेज्ज्येष्ठबन्धु,—रिन्द्रिय२ वै ज्येष्ठबन्धु,—रिन्द्रियेणैवैनानन्वृजून् कुरुता, इन्द्राय प्रवभ्रायैकादशकपालं निर्वपेत् संग्रामे, प्रवभ्रो वा इन्द्रो वृत्राय वज्रं प्राहरत्, प्रवभ्र एवैभ्यो वज्रं प्रहरती,—न्द्राय वै मृधायैकादशकपालं निर्वपेत् संग्रामे, मृधो वा एष विहन्ति यः संग्रामं जयति, मृध एव विहता, इन्द्रायाभिमातिघ्न एकादशकपालं निर्वपेत् संग्रा३मे, ऽभिमातीर्वा एष हन्ति यः संग्रामं जयत्य,—भिमातीरेव हता, इन्द्रायाभिमातिषाहा एकादशकपालं निर्वपेद्यः कामयेत, विपृहेया,—ऽभयं मे स्यादिती,—न्द्रो वै वृत्राय वज्रमुदयच्छत्, तं दानवा नान्वमन्यन्त, तमेतेन भागधेयेनान्वमन्यन्त, ततो वै३सोऽभिमातीरहन्, वृत्रमहन्, वृत्रं खलु वा एष हन्ति यः संग्रामं जयति, तद्वार्त्रघ्नमेवैतत् ॥१०॥ 32

ऐन्द्रमेककपालं निर्वपे,—न्निरुद्ध२ याजये,—दा प्रेहि परमस्याः परावता, इति याज्यानुवाक्ये स्यातां, परावत२ वा एष गतो यो निरुद्धः, परावत एवैनमभ्याप्त्वावगमयत्यै,—न्द्रं त्रयोदशकपालं निर्वपे,—न्निरुद्ध२ याजये,—दतिरिक्त२ वै त्रयोदश,—मतिरिक्तो निरुद्धो, ऽतिरिक्तादेवैनमतिरिक्तमाप्त्वावगमयती,—न्द्राय वज्रिणा एकादशकपालं निर्वपे,—दिन्द्राय वृत्रघ्न एकादशकपाल,—मिन्द्राय वृत्रतुरा एकादशकपाल२ यस्य भ्रातृव्यः सोमेन यजेत, वज्र२ वा एष भ्रातृव्यायोच्छ्रयति यः सोमेन यजते, यद्वज्रिणे, वज्रेणैवास्य वज्र२ स्तृणुते, यद्वृत्रघ्ने,

[१०] तै. २,२,७-८। काठ. १०,९।

भ्रातृव्यो वै वृत्रो, हन्त्येवैन२, यद्वृत्रतुरे, भ्रातृव्यो वै वृत्रं,—स्तरत्येवैन,—मिन्द्राय क्षेत्रंजयायैकादशकपालं निर्वपेद्यः क्षेत्रे पशुषु वा विवदेते,—न्द्रो वै देवानां क्षेत्रंजयं,—स्तमेव भागधेयेनोपासरत्, सोऽस्मै क्षेत्रं पशून् जयती,—न्द्रायाधिराजायैकादशकपालं निर्वपेद्यत्र राजानः सदृशा इव स्यु,—रिन्द्रो वै देवानामधिराजे,—स्तमेव भागधेयेनोपासरत्, स एनमाधिराज्यं गमयति ॥११॥ 33

इन्द्राय मन्युमते मनस्वता एकादशकपालं निर्वपेत् संग्रामे, मन्युना वै वीर्यं क्रियत, इन्द्रियेण जयति, वीर्यं चैवेन्द्रियं च जित्यै दधाति, मन्यवे चरुं निर्वपेत् संग्रामे, मन्युना वै वीर्यं क्रियते, वीर्यमेवैषु जित्यै दधाति, य जीवग्राहं गृह्णीयुस्त२ विकृन्तेयु,—र्मन्योः स्विदेवं सत्यमक,—रिन्द्राय मनस्वता एकादशकपालं निर्वपेद्यः कामयेत, पुण्यः स्यामनाधृष्य इति, मनो वै श्रीस्त्विषिः, श्रियमेवास्मि२स्त्विषिं दधाति, स२वत्सरं नु पुरा मनसो न कीर्तयेत्, स२वत्सरेण वा अनाप्तमाप्यते, स२वत्सरेणैवास्मा आप्त्वा तेजः श्रियं त्विषिं दधाति ॥१२॥ 34

यस्य साम्नाय्यं चन्द्रमा अभ्युदियात्त्रेधा पुरोडा३श्याः स्युस्ता२स्त्रेधा कुर्याद्, ये मध्यमास्तमग्नये दा३त्रेऽष्टाकपालं निर्वपेद्, ये स्थविष्ठास्तमिन्द्राय प्रदात्रे दधं२श्चरु२, ये क्षोदिष्ठास्त२ विष्णवे शिपिविष्टाय शृते चरु,—मग्निर्वै मध्यमस्य दाते,—न्द्रो ज्येष्ठस्य प्रदाता,—ऽथ यत् क्षोदिष्ठं तच् शिपिविष्टं, तदाप्नोति, पशूनेव, सोमो वा एतस्यातिरिच्यते यस्य साम्नाय्यं चन्द्रमा अभ्युदेति, स वै पशूनेवाभ्यतिरिच्यते, यः पशुकामः स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्याद्, ये पुरोडा३श्याः स्युस्ता२स्त्रेधा कुर्याद्, ये क्षोदिष्ठास्तमग्नये सनिमतेऽष्टाकपालं निर्वपेद्, ये मध्यमास्त२ विष्णवे शिपिविष्टाय शृते चरु२, ये स्थविष्ठास्तमिन्द्राय प्रदात्रे दधं२श्चरु,—मग्निरेवास्मै तद्विन्दति यदीह, विष्णुस्तद्यदन्तरिक्षा, इन्द्रस्तद्यद्दिवि, संत्वानो गा इच्छन्ति, यदेते तण्डुला विभाज्यन्ते, संत्वानो वा एत एष्टारोऽभिरोद्धार एवा,—ऽऽग्नेयमष्टाकपालं निर्वपेद्व्रतश्री,—स्तस्य गौर्धेनुर्दक्षिणा, स प्राङ् प्रयाय वैष्णवं त्रिकपालं, तस्य वडबा धेनुर्दक्षिणा, स प्राङ् प्रयाय गिरिं गत्वादो वा प्राजापत्यं घृते चरुं, तस्य पुरुषी धेनुर्दक्षिणा, यदाग्नेयं इमां तेनाक्रमते, यद्वैष्ण३वोऽन्तरिक्षं तेन, यत् प्राजाप३त्योऽमुं तेनु लोक२, यत् प्राङ् प्रयात्यभि स्विदेवाक्रमीद्, यद्गिरिं गच्छत्यपो वान्त२ स्विदेवागन्, यत् तिस्रो धेनवो

[१२] तै. २,२,८,२। काठ, १०,८।
[१३] तै. २,३,२,६,७। काठ. ११,१।

दक्षिणा, त्रयो वा इमे लोका, इमानस्मै लोकान् धेनुरक,—रिमानस्मै लोकान् प्रदापयति, प्रेशान्ह वा अस्मा इमांल्लोकान् दुहे य एव२ वेद, सोमेन्द्रं चरुं निर्वपेच्छ्यामाक२ सोमवामिना, इन्द्रो वै त्वष्टुः सोममपिबदनुपहूयमान,—स्तस्योर्ध्वः सोमपीथोऽपतत्, ते श्यामाका अभवन्, सोमपीथेन वा एष व्यृध्यते यः सोम२ वमिति, यत् सौम्यः, सोमपीथेनैवैन२ समर्धयती,—न्द्रियेण वा एष वीर्येण व्यृध्यते यः सोम२ वमिति, यदैन्द्रं, इन्द्रियेणैवैन२ वीर्येण समर्धयति, शिथिरं इव हि वा एतस्य सोमपीथो, ऽथैष सोम२ वमिति, यच्च श्यामाकस्तण्डुलैः श्रीणाति सोमपीथस्य धृत्यै ॥१३॥ 35 [७०२]

॥ इति मध्यमकाण्डे द्वितीयः प्रपाठकः ॥२॥

अथ तृतीयः प्रपाठकः।

आग्नेयमष्टाकपालं निर्वपेन्मैत्रावरुणीं पयस्यामामयाविन२ याजयेद्, क्रूद्धा एवाग्नेयो, ऽग्नो अस्यान्वन्तमेवैनं कृत्वा प्रतिष्ठापयती,—खरा वै पयस्या क्रूते पशोरशान्ता निर्मृजः, पशुरेप्यालब्धः शान्त्या अनिर्मार्गाये,—ते वै पशवो यद् व्रीहयश्च यवाश्च, यद् व्रीहिमयः पुरोडाशो भवति तेनैव पशुरालभ्यते शान्त्या अनिर्मार्गाय, मैत्रावरुणीं ब्राह्मणस्य स्या,—न्मैत्रावरुणो हि ब्राह्मणो देवतये,—न्द्रवारुणीं राजन्यस्य स्या,—दैन्द्रवारुणो हि राजन्यो देवतया,—ऽग्निवारुणीं वैश्यस्य स्या,—दग्निर्वै सर्वा देवता, अत्र वैश्यस्यापि देवता,—ऽऽमयाविन२ याजयेत्, स्वामेव देवतां प्रायश्चित्त्या उपासरद्, वरुणगृहीतो वा एष य आमयावी, वरुणादेवैनं तेन मुञ्चति, पयो वै पुरुषः, पय एतस्यामयति, पयसैवास्य पयो निष्क्रीणाति, यद्यूहति, विकृन्त्य हि मन्थं मध्यतो निर्हरन्ति, तद्यथाम२ वा अस्यैतन्मध्यतो निर्हरन्त्य,—थ यत् पुनः समुद्धाग्नये समवद्यति यथा मन्थं निर्हृत्योपप्रयच्छ प्रैत्यन्त्येवं तद्भूतिकाम२ याजयेत्, स्वामेव देवतां प्रायश्चित्त्या उपासरद्, वरुणगृहीतो वा एष यो भूतिकामो, वरुणादेवैनं तेन मुञ्चति, पयो वै पुरुषः, पय एष इच्छति यो भूतिमिच्छति, पयसैवास्मै पयोऽवरुन्द्धे, यद्व्यूहति यज्ञस्य गोपीथाया,—ऽथ यत् पुनः समूहति भूत्यैवैन२ समूहति, ग्रामकाम२ याजयेत्, स्वामेव देवतां प्रायश्चित्त्या उपासरद्, वरुणगृहीतो वा एष यो ग्रामकामो, वरुणादेवैनं तेन मुञ्चति, पयो वै पुरुषः, पय एष इच्छति यो ग्राममिच्छति, पयसैवास्मै पयोऽवरुन्द्धे, यद्व्यूहति यज्ञस्य

[१] तै. २,३,१३। काठ, १२,१। ११,११।

गोपीथाया,—ऽथ यत् पुनः समूहति ग्रामेणैवैन२ समूहत्यै,—कपालान् जुहोत्यै,—त्रात्र वै वरुणस्य पाशा,—स्तेत एनं मुञ्चति, यन्नाग्ना जुहुयाद्, विकृष्टः स यज्ञस्या,—ऽग्नौ सर्वे होत३व्याः सम्मृद्ध्यै ॥ या वां मित्रावरुणा ओजस्या तनूस्तया वा२ विधेम, तयेमममुं मुञ्चतम२हसो, या वां मित्रावरुणौ सहस्या तनूस्तया वा२ विधेम, तयेमममुं मुञ्चतम२हसो, या वां मित्रावरुणौ यातव्या तनूस्तया वा२ विधेम, तयेमममुं मुञ्चतम२हसो, या वां मित्रावरुणौ रक्षस्या तनूस्तया वा२ विधेम, तयेमममुं मुञ्चतम२हसो, या वां मित्रावरुणा ओजस्या सहस्या यातव्या रक्षस्या तनूस्तया वामविधाम, तयेमममुममौक्तम२हसो, यस्ते राजन् वरुण देवेषु पाशस्तं त एतेनावयजे, तस्मै ते स्वाहा, यस्ते राजन् वरुणाप्सु पाशस्तं त एतेनावयजे, तस्मै ते स्वाहा, यस्ते राजन् वरुण द्विपात्सु चतुष्पात्सु पशुषु पाशस्तं त एतेनावयजे, तस्मै ते स्वाहा, यस्ते राजन् वरुणौषधीषु वनस्पतिष्वप्सु पृथिव्यां दिक्षु पाशस्तं त एतेनावयजे, तस्मै ते स्वाहा ॥ एते वै वरुणस्य पाशा,—स्तेत एनं मुञ्चति ॥ १ ॥ 1-3

वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान्, देवाश्च वा असुराश्चास्पर्धन्त, ते देवाः संग्रहणेनायजन्त, ते यत्किंचासुराणा२ स्वमासीत् तत् समगृह्ण,—न्मना२सि वावैषां तत् समगृह्ण२,—स्तेऽमनसः पराभवन्, भ्रातृव्यवान् यजेत, मनोग्रहण२ वा एतं,—न्मना२सि वा एतद्भ्रातृव्याणा२ संगृह्णाति, तेऽमनसः पराभवन्ति, ग्रामकामो यजेत, मनोग्रहण२ वा एतं,—न्मना२सि वा एतत् सुजातानां२ संगृह्णाति, तेऽस्मान्मनोगृहीता नापयन्ति, सर्वेषा२ सजातानां गृहादाज्यमाहरेयु,—र्यावतामेव कियतां च गृहादाज्यमाहरन्ति तेषा२ सर्वेषां मना२सि संगृह्णाति, तेऽस्मान्मनोगृहीता नापयन्त्या,—मनेन जुहोत्या,—मनस एवैनान् करोति ॥ आमनस्य देव ये सुजाताः समनसस्तानहं कामये हृदा, ते मां कामयन्ता२ हृदा, तान्मा आमनसस्कृधि स्वाहा,—ऽऽमनस्य देव ये पुत्राः समनसस्तानहं कामये हृदा, ते मां कामयन्ता२ हृदा, तान्मा आमनसस्कृधि स्वाहा,—ऽऽमनस्य देव याः स्त्रियः समनसस्ता अहं कामये हृदा, ता मां कामयन्ता२ हृदा, तान्मा आमनसस्कृधि स्वाहा,—ऽऽमनस्य देव ये पशवः समनसस्तानहं कामये हृदा, ते मां कामयन्ता२ हृदा, तान्मा आमनसस्कृधि स्वाहा ॥ एते वै सुजाताः सुजाता इव पुत्रा इव स्त्रिय इव पशव इव, तैरात्मानमभिसं२युङ्क्ते, तैर्भवति, पृषती गौर्धेनुर्दक्षिणा, सा हि वैश्वदेव्य,—थ

[२] तै. २,३,९। काठ. १२,२।

यद्वैश्वदेव्यथ यद्वैश्वदेवीष्टि,—र्वैश्वदेवीर्वा इमाः प्रजा,—स्ता एवावारुन्द्ध, ता आद्या अकृत,
बहिरात्मं२ वै प्रयाजानुयाजा, आत्मा देवता, यत् प्रयाजानुयाजानां पुरस्ताद्वोपरिष्टाद्वा जुहुयां-
द्बहिरात्मं२ सुजातान् दधीता,—ऽथ यन्मध्यतो जुहोति, मध्यत एव सुजातानात्मन् धत्ते,
यदि कामयेत, ताजग्गेयुस्ताजक् परेयुरिति, दारुमयेण जुहुया,—च्चराचरा हि वनस्पतयो,
यदि कामयेत, ध्रुवाः स्युः कृच्छ्रादियुरिति, मृन्मयेन जुहुयात् ॥ ध्रुवा ३हीयं, ध्रुवोऽसि,
ध्रुवस्त्वं देवेष्वेधि, ध्रु३वोऽहं२ सुजातेषु भूयासं प्रियः सुजातानामुग्रश्चेत्ता वसुवि,—दुग्रोऽस्यु,—
ग्रस्त्वं देवेष्वेध्यु,—३ग्रोऽहं२ सुजातेषु भूयासं प्रियः सुजातानामुग्रश्चेत्ता वसुवि,—दभिभूरस्य,—
भिभूस्त्वं देवेष्वेध्य,—भिभूरहं२ सुजातेषु भूयासं प्रियः सुजातानामुग्रश्चेत्ता वसुवित्, परिभूरसि,
परिभूस्त्वं देवेष्वेधि, परिभूरहं२ सुजातेषु भूयासं प्रियः सुजातानामुग्रश्चेत्ता वसुवित्, सूरिरसि,
सूरिस्त्वं देवेष्वेधि, सूरिरहं२ सुजातेषु भूयासं प्रियः सुजातानामुग्रश्चेत्ता वसुवित् ॥ एते वै सुजा-
तास्तानस्मिन् दधाति, तानस्माद्दनपक्रामिणः करोति ॥ २ ॥　४-८

अथैषोऽश्वः प्रतिगृह्यते, स वा उभयतोदन् प्रतिगृहीतो निर्बभस्त्यस्येन्द्रियं च पशू२श्च,
वरुणो वा अश्वो वरुणदेव३त्यो, यो वा अश्वं प्रतिगृह्णाति वरुण२ स प्रसीदति, तदश्वहविषा
यष्टव्यं निर्वरुणत्वाय, चतुष्कपाला भवन्ति, चतुष्पाद्वा अश्वः, कपालैरेवैनमाप्नोति, या-
वन्तोऽश्वास्तावन्तः पुरोडाशा भवन्ति, सर्वत एवैनं मुञ्चत्यै,—कोऽधिभवति, यन्नोपस्मरति
तस्मा एव स, यः पुनः प्रतिग्रहीष्यन् त्स्यान्न स यजेत, यदि पुनः प्रतिगृह्णीयात् पुनर्वरुणं
प्रसीदे,—दथ यः पुनः प्रतिग्रहीष्यन् त्स्यात् तस्य वारुणा नेमाः स्युः सौर्यवारुणा नेमा, यद्वा-
रुणा, वरुणादेवैनं तेन मुञ्चत्य,—थ यत्सौर्याः, स्वामेव देवतामुपप्रतिगृह्णात्यात्मनोऽहि२साया,
एकवि२शतिः सामिधेनीर्भवन्त्य,—सा आदित्य एकवि२शः, प्रजापतिरसा आदित्यः, प्राजा-
पत्योऽश्वो, यावानेवाश्वस्तमाप्नोति, सर्वे वा अन्ये पशवो योनिमन्तः पुरुषयोनयो, ऽयोनि-
रश्वोऽप्सुजा, यदेषोऽपोनप्त्रीयश्चरुर्भवति योनिमन्तमेवैनमकः, स्व एवैन२ योनौ प्रतिष्ठापयति ॥
यस्ते राजन् वरुण गायत्रच्छन्दाः पाशो ब्रह्मन् प्रतिष्ठितस्तं त एतेनावयजे, तस्मै ते स्वाहा,
यस्ते राजन् वरुण त्रिष्टुप्छन्दाः पाशः क्षत्रे प्रतिष्ठितस्तं त एतेनावयजे, तस्मै ते स्वाहा, यस्ते रा-
राजन् वरुण जगच्छन्दाः पाशो विशि प्रतिष्ठितस्तं त एतेनावयजे, तस्मै ते स्वाहा, यस्ते रा-
जन् वरुणानुष्टुप्छन्दाः पाशो दिक्षु प्रतिष्ठितस्तं त एतेनावयजे, तस्मै ते स्वाहा ॥ छन्दा२सि वै

[३] तै. २,३,१२ । काठ. १९,६ ।
मै० १६

वरुणस्य पाशा,—स्तैरेनं गृह्णाति, यैरेनं गृह्णाति तैरेनं मुञ्चत्य,—पोनप्त्रीयाभ्यां द्वाभ्यां जुहोति,
य एवाप्स३व्यो वरुणस्तत एनं मुञ्चति ॥ ३ ॥　९-११

अग्नेरायुरसि, तेनास्मा अमुष्मा आयुर्देही,—न्द्रस्य प्राणोऽसि, प्राणं देह्यमुष्मै यस्य ते प्राणः,
स्वाहा, पितॄणां प्राणोऽसि, प्राणं दत्तामुष्मै येषा२ वः प्राणः, स्वाहा, विश्वेषां देवानां
प्राणोऽसि, प्राणं दत्तामुष्मै येषा२ वः प्राणः, स्वाहा, बृहस्पतेः प्राणोऽसि, प्राणं देह्यमु-
ष्मै यस्य ते प्राणः, स्वाहा, प्रजापतेः प्राणोऽसि, प्राणं देह्यमुष्मै यस्य ते प्राणः स्वाहा ॥
१२

यन्नवमैत्तन्नवनीतमभवद्यदसर्पत् तत् सर्पिः । यदध्रियत तद् घृतम् ॥　१३
घृतस्य पन्थाममृतस्य नाभिमिन्द्रेण दत्तं प्रयतं मरुद्भिः ।
तत्त्वा विष्णुरन्वपश्यत् तत्त्वेडा गव्यैरयत् ॥　१४

पावमानस्य त्वा स्तोमेन गायत्रस्य वर्तन्योपा२शोस्त्वा वी३र्येणोत्सृजे, बृहता त्वा रथंतरेण
त्रैष्टुभ्या वर्तन्या शुक्रस्य त्वा वी३र्येणोद्धरे, ऽग्निष्ट्वा मात्रया जागत्या वर्तन्या देवस्त्वा सविता-
न्नयतु जीवात्वै जीवनस्यायै ॥　१५

इदं२ वर्चो अग्निना दत्तमागान्महि राधः सह ओजो बल२ यत् ।
दीर्घायुत्वाय शतशारदाय प्रतिगृभ्णामि महते इन्द्रियाय ॥　१६
इममग्ना आयुषे वर्चसे कृधि तिग्ममोजो वरुण सोम राजन् ।
मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथासत् ॥　१७

अग्निरायु,—स्तस्य मनुष्या आयुष्कृत,—स्तेनायुषायुष्मानेधि, ब्रह्मायु,—स्तस्य ब्राह्मणा आ-
युष्कृत,—स्तेनायुषायुष्मानेधि, यज्ञ आयु,—स्तस्य दक्षिणा आयुष्कृत,—स्तेनायुषायुष्माने-
ध्य,—मृतमायु,—स्तस्य देवा आयुष्कृत,—स्तेनायुषायुष्मानेध्य,—श्विनोः प्राणोऽसि, तौ ते
प्राणं दत्तां, तेन जीव, मित्रावरुणयोः प्राणोऽसि, तौ ते प्राणं दत्तां, तेन जीव, बृह-

[४] तै. २,३,१० । काठ. ११,७ । वा. ३४,५१ । काण्व. ३३,४० [इदं२ वर्चो०... सहओजोवयो बलम् । इन्द्रियाय त्वा०... शतशारदाय । अथर्व० १९,३७,१-२ । इममग्न०। अथर्व० २,२८,५ । जरदष्टिर्यथासत् । ऋ० परि० २७,८। अथर्व० ८,५,२१ । दीर्घायुत्वाय शतशारदाय । अथर्व० १,३५,१; ८,५,२१, १९,२,६]

स्पतेः प्राणोऽसि, स ते प्राणं ददातु, तेन जीव, प्रजापतेः परमेष्ठिनः प्राणोऽसि, स ते
प्राणं ददातु, तेन जीव ॥४॥　१८

आग्नावैष्णवमेकादशकपालं निर्वपेत्, सारस्वतं चरुं बार्हस्पत्यं चरुं पूर्वेद्युरामयाविन२ याजये,—
दग्निर्वै सर्वा देवता, विष्णुर्यज्ञो, देवताभिश्चैवास्मिन् यज्ञेन चायुर्दधाति, वाक्सरस्वती,
ब्रह्म बृहस्पति,—र्वाचा चैवास्मिन् ब्रह्मणा चायुर्दधात्य,—थो प्राणा वै देवताः, प्राणान् वा एतत्
पूर्वेद्युर्गृहीत्वोपवसति, स श्वो भूत आग्नेयमष्टाकपालं निर्वपेत्, सौम्यं पयसि चरुमादित्यं घृते
चरु२ वारुणं चरु२ युवमयमियन्तमग्नये वैश्वानराय द्वादशकपालमामयाविन२ याजयेद्, यो वै प्र-
मीयतेऽग्निं तस्य शरीरं गच्छति सोम२ रसो, यदाग्नेयः, शरीरमेवास्य तेन निष्क्रीणाति,
यत् सौम्यो, रसं तेन, यावानेव तं निष्क्रीये,—य२ वा अदिति,—रस्यामधि प्रजाः प्रजाय-
न्ते, ऽस्यामेवैनमधिप्रजनयती,—या२श्चरुर्भवत्ये,—तावान् वा आत्मा, यावानेवास्यात्मा
त२ वरुणान्मुक्त्वा, स२वत्सरो वा अग्निर्वैश्वानरः, स२वत्सरं एवैनं प्रतिष्ठापयति, स२व-
त्सरायुपमेनं करोत्य,—ग्नेरायुरसि, तेनास्मा अमुष्मा आयुर्देहीत्य,—ग्निर्वै मनुष्याणामायुषः प्र-
दाता, सोऽस्मा आयुः प्रयच्छति, पञ्चभिर्जुहोति, पाङ्क्तः पुरुषो, यावानेव पुरुषस्त२
समीरयति, यावानेव पुरुषस्त२ समीरयित्वा,—ऽय२ वाव यः पवत एष प्राणं, आभ्यो वा
एष दिग्भ्योऽधिपवत, एतदेव३त्या वा इमा दिशो, यथादेवत२ वावैनमेतदाभ्यो दिग्भ्योऽधि
समीरयित्वा प्राणानस्मिन् दधाति ॥　१९

यन्नवमैत्तन्नवनीतमभवद्यदसर्पत् तत् सर्पिः । यदध्रियत तद् घृतम् ॥　२०

इति घृतस्य वा एतन्महिमानमुदाचष्टे, ऽथो महयत्येवैनन्, पावमानस्य त्वा स्तोमेन गाय-
त्रस्य वर्तन्योपा२शोस्त्वा वी३र्येणोत्सृजा, इति यथा वा इदं२ वध्यमुत्सृजत्युद्धरत्युन्नयत्येवं
त,—देतावद्वा अस्ति स्तोमा ग्रहाश्छन्दा२सि, यावदेवास्ति तेनास्मा आयुर्दधाति, यज्ञेनास्मा
आयुर्दधाति, सर्वे ऋत्विजः पर्याहुः, सर्वे वा एत एतस्मै चिकित्सन्ति, सर्व एवास्मा आ-
युर्दधाति, ब्रह्मणो हस्तमालभ्य पर्याहु,—र्ब्रह्म वै ब्रह्मा, ब्रह्मणैवास्मिन् ब्रह्मायुर्दधाति, हि-
रण्यादधि घृतं निष्पाययन्त्य,—मृत२ वै हिरण्य,—मायुर्घृत,—ममृतादेवैनमध्यायुर्निष्पाययन्ति
निरिव धयत्या,—युरेवात्मन् धत्ते, तदस्मा आबध्नात्या,—युषैन२ समर्धयत्या,—प्नेय्यावभात्य,—

[५] तै. २,३,११ । काठ. ११,८ ।

ग्निर्वै सर्वा देवता, सर्वाभिरेवास्मिन् देवताभिरायुर्दधात्य,—ग्निरायु,—स्तस्य मनुष्या आयुष्कृ-
त,—स्तेनायुषायुष्मानेधीति, यो वै देवानायुष्मतश्चायुष्कृतश्च वेद सर्वमायुरेति, न पुरायुषः
प्रमीयत, एते वै देवा आयुष्मन्तश्चायुष्कृतश्च यदिमे प्राणा,—स्तेऽस्मिन्नायुर्दधात्य,—श्विनोः प्राणो-
ऽसि, तौ ते प्राणं दत्तां, तेन जीवे,—तीमे वा एते प्राणा,—स्तानस्मिन् दधाति, तान-
स्माद्दनपक्रामिणः करोति, दश देया, दश३ह्यात्मन् प्राणाः, प्राणानस्मिन् दधात्यं,—श्वो
देयो, वासो देय२, हिरण्यं देयं, गौर्देयो, वरो देयो, वर्हु देयम् ॥५॥　२१

आग्नेयमष्टाकपालं निर्वपेदैन्द्रं पञ्चकपालं दधि मधु घृतं धाना उदकं, तत्स२सृष्टं भवत्य,—
र्यम्णो चरुर्भवत्यृ,—द्धया एवाग्नेय, ऐन्द्रः पञ्चकपालः, पाङ्क्तो यज्ञः, पङ्क्ती याज्यानु-
वा३क्ये, पाङ्क्ताः पशवः, पाङ्क्तः पुरुषो, यावानेव पुरुषस्तमाप्नोति, स सर्वो भूत्वा
पशूनाप्नोति, पशव इव३ह्येतत् स२सृष्ट,—मथो यावन्त एव पशवस्तानस्मै स२सृजति, तदा-
हु,—रैन्द्रं एकादशकपालः का३र्या, इत्यैन्द्रा हि पशवो, ऽथो आहुः, प्राजापत्यं का३र्य-
मिति, प्राजापत्या हि पशवः, प्रजापतिः पशूनां प्रजनयिता, तमेव भागधेयेनोपासरत्,
सोऽस्मै पशून् प्रजनयत्य,—र्यम्णोऽर्यम्णो चरु,—र्यो ददाति सोऽर्यमा, दानमर्यमा, दानकामा
अस्मै प्रजा भवन्त्य,—ग्नये भ्राजस्वतेऽष्टाकपालं निर्वपेत् सौर्यं चरु,—मग्नये भ्राजस्वतेऽष्टाकपालं
चक्षुष्काम२ याजये,—दग्नेर्वै मनु३ष्या नक्तं चक्षुषा पश्यन्ति सूर्यस्य दिवा,—तौ वै चक्षुषः प्रदा-
तारौ, ता एव भागधेयेनोपासरत्, ता अस्मै चक्षुः प्रयच्छतः, समान२ वै चक्षुर्दधातु, यत्
समानी देवता चरुमभितो भवति नानानमेवास्मै चक्षुषी प्रतिदधाति, यावदन्यतरेणाक्ष्णा पश्य-
ति तावदुभाभ्यां पश्येद्यच्चरुरन्तरा न स्या,—दथ यच्चरुरन्तरा भवति, तस्मादिदमन्तरा चक्षुषो-
र्विधृत्यै, शुक्ला व्रीहयो भवन्ति, श्वेता गा आज्याय दुहन्त्ये,—वमिव३ह्यसा आदित्यः समृ-
द्ध्यै, पयसि भवति, पयो वै घृतं, पयश्चक्षुः, पयसैवास्मै पयश्चक्षुर्दधाति, सौरीभिरा-
दधाति, चक्षुरस्मिन् दधाति ॥६॥　२२

देवा असुराणा२ वेशत्वमुपाय,—न्निन्द्रस्तु नाप्युपैत्, तेषा२ वा इन्द्रियाणि वी३र्याण्यपाक्रा-
म,—न्नग्ने रथंतर,—मिन्द्रस्य बृहद्, विश्वेषां देवाना२ वैरूप२, सवितुर्वैराजं, त्वष्टू रेवती,

[६] तै. २,३,८ । काठ. ११,४-५ ।
[७] तै. २,३,७ । काठ. ११,५ ।

मुर्तारश्शर्करी, तानि वा इन्द्रोऽन्वपाक्रमत, तैरात्मानमभिसमयुङ्क्त, तैरभवद्, यो भूतिका-
मः स्यात् तमेतया याजये,—देतैरेवेन्द्रियैर्वीर्यैरात्मानमभिसंयुङ्क्ते, तैर्भवति, द्वादशकपालो
भवति वैश्वदेवत्वायो,—तानानि कपालान्युपदधाति, तस्त्विषुरसकृर्निर्दोहाया,—ऽभिशस्य-
मानं याजयेद्, यस्य वै देवा अन्नमदन्त्यदन्ति तस्य मनुष्या अन्नं, सर्वा वा एता देवताः,
सर्वा वावास्यैतद्देवता अन्नमजीघस,—दुदन्ति हास्य मनुष्या अन्नम् ॥ इन्द्राय राथंतरायानुब्रूहि॥
इति रथंतरस्या ऋचमनूच्य बृहत ऋचा यजेत् ॥ इन्द्राय बार्हतायानुब्रूहि ॥ इति बृहत ऋचमनूच्य
रथंतरस्य ऋचा यजेद् ॥ इन्द्राय वैरूपायानुब्रूहि ॥ इति वैरूपस्या ऋचमनूच्य वैराजस्य ऋचा य-
जेत् ॥ इन्द्राय वैराजायानुब्रूहि ॥ इति वैराजस्या ऋचमनूच्य वैरूपस्य ऋचा यजेत् ॥ इन्द्राय रैव-
तायानुब्रूहि ॥ इति रैवतीमनूच्य शक्वर्या यजेद् ॥ इन्द्राय शाक्वरायानुब्रूहि ॥ इति शक्वरीमनूच्य
रेवत्या यजे,—देतैरेवैनमिन्द्रियैरेताभिर्देवताभिर्व्यतिषजति, पर्यूहमेवास्ये,—तैरेवैनमिन्द्रियैरेता-
भिर्देवताभिः पर्यूहति, पशवो वै बृहत्य,—श्री रुद्रो, यद् बृहत्या वषट्कुर्याद्रुद्रायास्य पशू-
नपिदध्या,—देषो बृहतीं संपादयाम्नी पशवोऽनुप्रजायन्ते, ऽनुवाक्यायाश्चत्वार्यक्षराणि याज्या-
मभ्यूह्य,—नुष्टुभं च संपादयति पङ्क्तिं च, वाग्वा अनुष्टुप्, प्रजापतिः पङ्क्तिं,—र्वाचि
वा एतत् प्रजापतिमप्यस्रात् प्रजननाय, तन्मिथुनं, तस्मादेव मिथुनाद्यजमानः प्रजया च पशु-
भिश्च प्रजायते ॥७॥ २३-३५

स्वाद्वीं त्वा स्वादुना तीव्रां तीव्रेण शुक्रां शुक्रेण ।
देवीं देवेनामृतामृतेन सृजामि सं सोमेन ॥ ३६
सोमोऽस्यश्विभ्यां पच्यस्व, सरस्वत्यै पच्यस्वे,—न्द्राय सुत्राम्णे पच्यस्व ॥ ३७
पुनातु ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥ ३८
वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिस्रुतः । इन्द्रस्य युज्यः सखा ॥ ३९

[८] तै. १,८,२१; ३,२,८,३। तै. ब्रा. १,४,३; २,६,१,३। काठ. १२,९। वा. १९,१,४,३,६; १०,३१-३२; २३,३८; ७,४,८-१२,१६,२०,२५,३०-४०; ८,१,७-९,११,३३-३५,३८-४१,४४-४७; ९,२-४; १०,३२; १९,६,८; २०,३३; २३,२,४; २६,३-१०। १९,३५,७,४३। काण्व. २१,१,४,३,५; ११,४४-४५; २५,४०; ७, ४,७,८,१०, ११,१५,२१,२४,२७,३०-४०; ८,६-८,१२,१४-१६,१९-२९; १०,२-५; ११,४५; २१,५,७; २२,१८; २५,२,४; २८,४-११; २१,३५; २१,६,४९] [पुनातु (ति) ते०...तना। ऋ० ९,१,६। वायोः पूतः...सखा। अथर्व० ६,५१,१। इन्द्रस्य युज्यः सखा। ऋ० १,२२,१९; सा. १६७१]

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुत भोजनानि ये बर्हिषा नम उक्तिं न जग्मुः ॥ ४०
उपयामगृहीतोऽस्य,—च्छिद्रां त्वाच्छिद्रेणा,—ऽश्विभ्यां जुष्टं गृह्णाम्ये,—ष ते योनि,—रश्विभ्यां
त्वो,—पयामगृहीतोऽस्य,—च्छिद्रां त्वाच्छिद्रेण, सरस्वत्यै जुष्टं गृह्णाम्ये,—ष ते योनिः, सरस्व-
त्यै त्वो,—पयामगृहीतोऽस्य,—च्छिद्रां त्वाच्छिद्रेणे,—न्द्राय सुत्राम्णे जुष्टं गृह्णाम्ये,—ष ते योनि,—
रिन्द्राय त्वा सुत्राम्णे ॥ ४१
यदत्र शिष्टं रसिनः सुतस्य यमस्येन्द्रो अपिबच् शचीभिः ।
अहं तमस्य मनसा घृतेन सोमं राजानमिह भक्षयामि ॥ ४२
नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमन् ।
सुरा त्वमसि शुष्मिणी सोम एष मा मा हिंसिष्टं स्वं योनिमाविशन्तौ ॥ ४३
द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् ।
याभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥ ४४
ये भक्षयन्तो न वसून्यानृधुर्यानग्नयो अन्वतप्यन्त धिष्ण्याः ।
या तेषामवया दुरिष्टिः स्विष्टिं नस्तां विश्वकर्मा कृणोतु ॥ ४५
अयज्ञियान्यज्ञियान्मन्यमानः प्राणस्य विद्वान्त्समरे न धीरः ।
एनो महच्चकृवान् बद्ध एष तं विश्वकर्मन् प्रमुञ्चा स्वस्तये ॥ ४६
यजमानमृष्या एनसाहुर्विहाय प्रजामनुतप्यमानाः ।
मधव्यौ स्तोका अप तौ रराध सं नस्ताभ्यां सृजतु विश्वकर्मा ॥८॥ ४७
कुवलसक्तुभिराश्विनं श्रीणाति, बदरसक्तुभिरैन्द्रं, कर्कन्धुसक्तुभिः सारस्वतं, वाग्वै
सरस्वती, वाचैवास्मिन्त्स्वादुमानं दधात्य,—थ यैनमसा अश्लीलं वाग्भिर्वदत्य,—त्युपविष्ट
व्याधिष्टेति, सैनं पुनः कल्याणं वदति, सिंहो अध्वर्युर्घ्यायति, व्याघ्रौ प्रतिप्रस्थाता,
वृकौ यजमान, एषा सुरा भवति, स यैरेव तदिन्द्रियैर्वीर्यैर्व्यृध्यते तान्यस्मिन्नाप्त्वा धत्तो,

[कुविदङ्ग यवमन्तो०...जग्मुः। ऋ. १०,१३१,२; अथर्व० २०,१२५,२ ।
ये भक्षयन्तो०। अथर्व० २,३५,१ । अयज्ञियान्य० (अदान्यान्त्सो०)—स्वस्तये। अथर्व० २,३५,३।
यजमानमृ० (यज्ञपतिमृ०—) विश्वकर्मा । अथर्व० २,३५,२]
[९] काठ. १२,१०,११।

ब्राह्मणस्य मूर्धन्त्साद्या मेध्यत्वाया,—ऽन्नं वै सुरा, मेध्यं वा अन्नं, तेन मेध्यं,—का पुरोरु-
ग्—का याज्या,—कधास्मिन् वीर्यं दधाति, ब्राह्मणः पावयितव्य,—स्तेन हविः क्रियत, आत्म-
नार्पया,—ऽऽत्मन्नेव वीर्यं धत्ते, ऽग्नौ सर्वा होतव्याः समृद्ध्यै, मध्यतो वा एष पाप्मना गृहीतो
यत् समया व्येति, मध्यत एवैनं पाप्मनो मुञ्चति, यदाहवनीये जुहुयाद्न पाप्मना व्यावर्तेत,
क्रियेत भेषजं,—मथ यद्दक्षिणे जुहोति वि पाप्मना वर्तते, क्रियते भेषजं,—मथ यद्विक्षारयन्त्य,—
थमिव ह्येष विक्षरति शतक्षरो भवति, शतायुर्वै पुरुषः शतवीर्या, आयुरेव वीर्यमाप्नोति,
यद्वा एतस्य व्यात्रि यत्प्राणापि पितॄन् वा एतस्य तद्गन, यत् पितृमतीभिरनुमन्त्रयन्ते पितृभ्य
एवैनं तेन समीरयन्ति, यत् त्रिस,—स्तृतीये हि लोके पितरो, ऽथ यथान्तरा, द्विरभ्य
एवैनं तेन समीरयन्ति ॥९॥ ४८[८००]

॥ इति मध्यमकाण्डे तृतीयः प्रपाठकः ॥३॥

अथ चतुर्थः प्रपाठकः ।

विश्वरूपो वै त्वाष्ट्र आसीत् त्रिशीर्षासुराणां स्वस्रीयः, स सोममेकेन शीर्ष्णापिबत् सुराम-
केना,—ऽन्नमेकेनादयत् स इन्द्रोऽमन्यता,—ऽयं वावेदं भविष्यती,—ति तेन समलभत, तेन
युगर्धं समपतद्, स तक्षाणं तिष्ठन्तमब्रवी,—दायुवं,—मान्वस्य शीर्षाणि छिन्धी,—ति तस्य
तक्षोपस्कंद्य परशुना शीर्षाण्यच्छिनत्, तस्मात्तक्ष्णो शिरो धृतं, तस्मादुस्यान्नमन्नाद्यं, तस्य
यत् सोमपं शिर आसीत् स कपिञ्जलोऽभवद्, यत् सुरापं स कुलविङ्को, येनान्नमाव-
यत् स तित्तिरिः, स वै त्वष्टा पुत्रे हते सोममाहरद्द इन्द्रं, तमधः शतबलेऽसुनो,—देषो आहुः
सहस्रशला, इति तस्मिन् वा इन्द्र उपहवमैच्छत, तं नोपाह्वयत, तं प्रासहादाय नाड्या निर-
पिबत्, स सोमपीथेन व्यार्ध्यत, तस्मात् सोमो नानुपहूतेन पेयः, सोमपीथेन ह व्यृधुको
भवति, यदितोऽमुच्यत तौ सिंहा अभवतां, यदितस्तौ व्याघ्रौ, यदितस्तौ वृकौ,
यत् प्रथमं निरष्ठीवत्तत्कुवलमभवद्, यद् द्वितीयं तद्बदरं, यत्तृतीयं तत् कर्कन्धु,—र्यदधस्तात्
सा सुरा, तं वा एतयाश्विना अयाजयतां सौत्रामण्या, स वैरेव तदिन्द्रियैर्वीर्यैर्व्यृध्यत
तान्यस्मिन्नाप्त्वाधत्तां, सोमेनातिपूयमानं याजये,—दिन्द्रियेण वा एष वीर्येण व्यृध्यते यं
सोमोऽतिपवते, यावदेवेन्द्रियं वीर्यं तदस्मिन्नाप्त्वा दधाति, राजसूयेनाभिषिषिचानं

[१] तै. २,३,१। काठ. १२,१०।

याजये,—दिन्द्रियेण वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चते, यावदेवेन्द्रियं वीर्यं तद-
स्मिन्नाप्त्वा दधाति, भूतिकामं याजये,—दिन्द्रियेण वा एष वीर्येण व्यृध्यते योऽलं भूत्यै सन्न
भवति, यावदेवेन्द्रियं वीर्यं तदस्मिन्नाप्त्वा दधाति, ज्योगामयाविनं याजये,—दिन्द्रि-
येण वा एष वीर्येण व्यृध्यते यस्य ज्योगामयति, यावदेवेन्द्रियं वीर्यं तदस्मिन्नाप्त्वा दधा-
ति, नानार्तेन यष्टव्य,—मित्याहु,—रार्तयज्ञ इव ह्येष, तदाहु,—र्यष्टव्यमेव, सर्वो हि
पुरुष आर्तः, सर्वो बुभूषति, यदाश्विनस्य,—श्विनौ ह्यभिषज्यतां, यत् सारस्वती, वाग्वै
सरस्वती, वाचा ह्यभिषज्यतां, यदैन्द्री,—न्द्रे हि तौ तानीन्द्रियाणि वीर्याण्याप्त्वाधत्ताम्॥१॥ १
सीसेन क्लीबात् क्रायी,—ऽनृतं वै सीस,—मनृतं क्लीबो, ऽनृतं सुरा,—ऽनृतेनैवानृतादनृतं
क्रीणाति, तदाहुः, काश्या वडवा दक्षिणेति, स्त्वरी वडवा ह्येषा, स्त्वरी वडवा,—
ऽश्विनं प्रथममालभन्ते, ऽथ सारस्वती,—मथैन्द्र,—मेवमेव वपाभिश्चरती,—न्द्र एवैषु तदधिभ-
वत्य,—न्द्रः पुनः प्रचरतां प्रथमो भवती,—न्द्रं वा एतत् पुनरालभन्ते सेन्द्रियत्वाय,—न्द्री व-
पानामुत्तमा भवत्य,—न्द्रः पुरोडाशानां प्रथमो, वीर्यं वा इन्द्रो, वीर्य एवैनमभिसंधत्तः,
प्रसवाय सावित्रो, निर्वरुणत्वाय वारुणो, मध्यतो ह्येष वरुणगृहीतः, पश्चाद्वा एषा सृष्टा
प्रतीचीनशीर्ष्णी, यदुपरिष्टात् पुरोडाशो भवत्यपिहित्या अच्छिद्रत्वाय, सह समवत्तं भवति, सहे-
डामुपह्वयन्ते संहित्या, अथो इडाया अविदोहाय, यद्वै सांत्रामण्या व्यृद्धं तदस्याः समृद्धं,
यदन्यदेवत्याः पुरोडाशा भवन्त्यन्यदेवत्याः पशवस्तदस्या व्यृद्धं सत् समृद्धं,—मर्धं वै प्रजाप-
तेरात्मनो धैर्यमासी,—दर्धं माल्व्यं, यद्धैर्यं तत् पुरस्तादकुरुत, यन्माल्व्यं तत् पश्चात् पर्यौ-
हत, यद्धैर्यं, सोमो वै स, ततो ब्राह्मणमसृजत, तस्माद्ब्राह्मणः सर्व एव ब्रह्माभि धीरो,
यन्माल्व्यं, सुरा वै सा, ततो राजन्यमसृजत, तस्माज्ज्यायांश्च कनीयांश्च स्नुषा च
श्वशुरश्च सुरां पीत्वा विलालपत आसते, माल्व्यं हि तत्, पाप्मा वै माल्व्यं, तस्माद्ब्राह्मणः
सुरां न पिबेत्, पाप्मनात्मानं नेत्संसृजा इति, तदुतैतद्राष्ट्रीयाय ब्राह्मणं ब्रूयात्, तद्य एवं
विद्वान्त्सुरां पिबति न हैनं हिनस्ति,—रणात्ये,—षा वै प्रजापतेर्वीर्यवती तनूं,—र्वीर्यं प्रजापति,—र्वीर्यम-
स्मिन् दधाति ॥ २ ॥ २
ततो यः सोमोऽत्यरिच्यत तमग्ना उपप्रावर्तयत् । स्वाहिन्द्रशत्रुर्वर्धस्व ॥ ३

[२] काठ. १२,११-१२।
[३] तै. २,४,१२। काठ. १२,३। वा. २,१०। काण्व. २।१८।

इतीन्द्रस्याहिन२ शत्रुमचिकीर्षं,—दिन्द्रमस्य शत्रुमकरोत्, तथा वाक् स्वयमेव ३ध्येत्, स
ये२ सोमं प्रावर्तयद्यस्मि२श्चाग्रा उपप्रावर्तयत् ता अग्नीषोमा देवते प्राणापानौ अभिसमभवता२,
स यावदूर्ध्वबाहुः पराविध्यत् तावति व्यरमत, यदि वा प्रवणं तावदासीद्, यदि वाग्नेरधि
तावदासीत्, स वा इषुमात्रमेवाह्ना तिर्यङ्ङवर्धते,—षुमात्रमन्वङ्ङ्,—त्यथो आहु,—रहोरात्रे
एवेषुमात्रं तिर्यङ्ङवर्धते,—षुमात्रमन्वङ्ङ्,—त्यथो आहुरर्धमासं,—मथो मासं,—मथो स२वत्स-
रमिति, स वा इमाः सर्वाः स्रोत्याः पर्यशयत्, तस्माद्वा इन्द्रोऽबिभेत्, तस्माद् त्वष्टाबिभेत्,
तस्येन्द्रः प्रतिमैछत्, तमस्मै प्रायछत्, तस्मै त्वष्टा वज्रमसिञ्चत्, तपो वै स वज्र आसीत्,
तमुद्यमं नाशक्नो,—दथ वै तर्हि विष्णुरन्या देवतासीत्, सोऽब्रवीद्, विष्णा एही,—दमाहरि-
ष्यावो येनायमिदमिति, स त्रेधात्मान२ विन्युधत्ता,—ऽभिपर्यावर्तादबिभे,—दुस्यां तृतीय,—म-
न्तरिक्षे तृतीयं, दिवि तृतीय२, स यदस्यां तृतीयमासीत्, तेन वज्रमुदयछद्, विष्णवनुष्ठितः
स वज्रमुद्यतं दृष्ट्वाबिभेत्, सोऽब्रवी,—दस्ति वा इदं त्वयस्मिन्नन्तर्वी३र्यं, तत् ते प्रदास्यामि,
मा मा वधीरिति, तद्वा अस्मै प्रायछत्, तत् प्रत्यगृह्णात् ॥ अधा मा ॥ इति, तद्विष्णवेऽ-
तिप्रायछत्, तद्विष्णुः प्रत्यगृह्णात् ॥ ४—६

अस्मास्विन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माक२ सन्त्वाशिषः ॥७

इति सोऽब्रवी,—दस्ति वा अस्मिन्नन्तर्वी३र्यमिति, स यदन्तरिक्षे तृतीयमासीत्, तेन वज्रमुदय-
छद्, विष्णवनुष्ठितः स वज्रमुद्यतं दृष्ट्वाबिभेत्, सोऽब्रवी,—दस्ति वा इदं त्वयस्मिन्नन्तर्वी३र्यं,
तत् ते प्रदास्यामि, मा मा वधीरिति, तद्वा अस्मै प्रायछत्, तत् प्रत्यगृह्णात्॥ द्विर्माधाः॥ इति
तद्विष्णवेऽतिप्रायछत्, तद्विष्णुः प्रत्यगृह्णात् ॥ ८-१०

अस्मास्विन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम्। अस्माक२ सन्त्वाशिषः॥११

इति सोऽब्रवी,—दस्ति वा अस्मिन्नन्तर्वी३र्यमिति, स यद्दिवि तृतीयमासीत् तेन वज्रमुदयछद्,
विष्णवनुष्ठितः स वज्रमुद्यतं दृष्ट्वाबिभेत्, सोऽब्रवी—दस्ति वा इदं त्वयस्मिन्नन्तर्वी३र्यं, तत् ते
प्रदास्यामि, मा मा वधीः॥ संधां नु संदधावहै यथा त्वामेव प्रविशानीति, सोऽब्रवीद्, यन्मां
प्रविशेः किं मे ततः स्यादिति, सोऽब्रवीत्, त्वामेवेन्धीय, तव भोगाय त्वां प्रविशेयमिति,
तद्वा अस्मै प्रायछत्, तत् प्रत्यगृह्णात् ॥ त्रिर्माधाः ॥ इति तद्वाव त्रैधातव्या, सहस्र२ वा
अस्मै तत् प्रायछदृचः सामानि यजू२षि, यद्वा इदं किं च तत् त्रैधात३व्या, तदाप्नोति पशू-
नेव ॥३॥ १२-१५

मै० १७

उदर२ वै वृत्रः, पाप्मा क्षुद्भ्रातृव्यः पुरुषस्य, यत् तप उपैति पाप्मान२ वा एतत्,
स्तृणुते भ्रातृव्यं क्षुधमेव, तस्मिन् वा अददेता२, सैषानस्या अध्यूध्नी वागवदत् ॥ १६
उभा जिग्यथुर्न पराजयेथे न पराजिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्र२ वि तदैरयेथाम् ॥ १७
इति सत्यमाहेत्य,—ब्रवीद्, द्वे एव तृतीये आहर्तुरेकं प्रतिग्रहीतुरिति, तौ वै तत्रैवाति-
ष्ठेतां, तस्मादैन्द्रावैष्णवं, त्रिरात्रस्य वा उपेप्सायै त्रैधातव्याह्रियते, यावद्वै त्रिरात्रेणोपाप्नोति
तावत् त्रैधात३व्ययावरुन्द्धे, तस्मादाहुः, सहस्रदक्षिणेत्यु,—ष्णिहाककुभा अन्वाह, गायत्री
वा उष्णिहा,—ऽथ यान्येतानि चत्वार्यक्षराण्युच्यन्धि, चतुष्पादो वा एते पशवो, यथा वा इदं
पुरोडाशे पुरोडाशोऽध्येव२ वा एतद्यदृच्यध्यक्षराणि, प्राणो वै गायत्री, प्राणेन पशवो यता,
यदुष्णिहाककुभा अन्वाह पशूना२ यत्यै ॥ १८
अग्ने त्री ते वाजिना त्री षधस्था तिस्रस्ते जिह्वा ऋतजात पूर्वीः ।
तिस्र उ ते तन्वो देववातास्ताभिर्नः पाहि गिरो अप्रयुछन् ॥ १९
इति परिदधाति वीरताया, अथो रूपताया एव, यज्जगत्या परिदध्यादन्तं गछे,—दथ
यत् त्रिष्टुभा परिदधाति नान्तं गछत्यो,—जो वै वीर्यं त्रिष्टु,—बोजस्येव वी३र्ये प्रतितिष्ठति॥४॥
२०

सर्वाभ्यो देवताभ्यो यज्ञ आहृत्या, इत्याहुः, सर्वो वा एष यज्ञः, सर्वाभ्यो हि देवता-
भ्यो यज्ञ आह्रियते, सर्वाणि छन्दा२स्यन्वाह, सर्वाणि हि छन्दा२सि यज्ञे प्रयुज्यन्ते, ऽभि-
चरन्नाहरेत्, सर्वो वा एष यज्ञः, सर्वेणैवैन२ यज्ञेनाभिचरत्य,—दक्षिणस्तु स्या,—त्स्तस्त्विन्मे-
निमक,—मेनिर्ह्यदक्षिणो, ऽथ यो, यक्ष्य, इत्युक्त्वा न यजेत तमेतेन याजयेत्, सर्वो वा
एष यज्ञः, सर्वेणैवास्मै यज्ञेन प्रायश्चित्ति२ विन्दत्यु,—त्तर उत्तरः पुरोडाशो ज्यायान् भवत्यु,—त्तर
उत्तरो हि लोको ज्यायान्, यथा वा इयमेवमसा, अथ वा अन्तरिक्षं, नास्या रूपं नामु-
ष्या,—स्तस्माद्यवमयो मध्यतो, ऽथो एवमिव३ह्यन्तरिक्षस्य रूपं, द्वादशकपालो भवति, यद्वै
त्रिस्त्रिस्तत् त्रैधातव्यायाः समृद्ध्यै२, सर्वेणामतिघातमवद्यत्यछम्बट्कारायु, यावता हि न प्राप्नु-

[४] तै. २,४,१२,६,७; २,४,११; ३,२,११ । काठ. १२,३-४। [उभा जिग्यथुर्न०...येथाम्। ऋ० ६,६९,८; अथर्व० ७,४४,१। अग्ने त्री ते वाजिना०...अप्रयुच्छन्। ऋ० ३,२०,२।
[५] तै. २,४,११। काठ. १२,३-४।

यावत्तावता छम्बट्कुर्या,—देतद्वै तद्यदाहु,—श्छम्बण्णासा इति, वास इव वै यज्ञ ऊयते, यत्ता-
प्यानि विपीव्यन्ति यजुषा तद्रूप२, यद्वेनवो दीयन्त उक्थामदानां तद्, यद्धिरण्यं दीयते चन्द्रं
गीयता, इति वै सामाहुः, साम्नां तद्रूपं,—मेतेन वै सृञ्जया अयजन्त, ते श्रियोऽन्तमगछ२,—
स्तस्मान्नातिबहु यष्टव्य,—मीश्वरो हि पराङतिपत्तो,—र्यो वा एतेन यजते वि स छिनत्ति, पुत्रो
याजयितव्योऽनुसंतत्यै ॥५॥ २१
आग्नेयमष्टाकपालं निर्वपे,—दैन्द्रमेकादशकपालं बार्हस्पत्यं चरुं भूतिकाम२ याजये,—दिन्द्रो वै
शिथिर इवामन्यत, ३सोऽग्निं च बृहस्पतिं चाब्रवीद्, याजयतं मेति, त२वा एतयाग्निश्च बृह-
स्पतिश्चायाजयतां, तस्मि२स्तेजोऽग्निरदधा,—दिन्द्रियमिन्द्रो, ब्रह्म बृहस्पति,—स्तता इन्द्रो-
ऽभवद्, यो भूतिकामः स्यात् तमेतया याजयेत्, तेज एवास्मिन्नग्निर्दधाती,—न्द्रियमिन्द्रो,
ब्रह्म बृहस्पति,—र्भवत्येव, यदस्मि२स्त्रीणि वी३र्याण्यधत्तां तस्मात् त्रिधातु,—रैन्द्र इतरा,
अभिस२श्लेषयन्ति सेन्द्रियत्वाय ॥६॥ २२
पुरोवात जिन्व रावट् स्वाहा, वातवान् वर्षन् भीम रावट् स्वाहा, स्तनयन् वर्षन्नुग्र रावट्
स्वाहा,—ऽतिरात्र२ ववर्ष्वान् पूर्त रावट् स्वाहा, बहु ह वा अयमवर्षीदिति, श्रुत रावट् स्वाहा,
तपति वर्षन् विराड् रावट् स्वाहा, ऽवस्फूर्जन् विद्युद्वर्ष२स्त्वेष रावट् स्वाहा, नशन्यवस्फूर्जन्
वर्षन् भूत रावट् स्वाहा ॥ २३
मान्दा वशा ज्योतिष्मतीरमस्वरीः शुन्ध्यो अप्रा उन्दतीः सुफेनाः ।
मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह नोऽवत ॥ २४
वृष्णो अश्वस्य संदानमसि, वृष्ट्यै त्वोपनह्यामि ॥ २५
देवा वसव्या अग्ने सोम सूर्यापो दत्तोदधिं भिन्त ।
दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत ॥ २६
देवाः शर्मण्या मित्रावरुणार्यमन्नपो दत्तोदधिं भिन्त ।
दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत ॥ २७
देवाः सपीतयोऽपां नपान्नराश२सापो दत्तोदधिं भिन्त ।
दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत ॥ २८
दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन । यत् पृथिवी२ व्युन्दन्ति ॥ २९

[७] तै. २,४,७-८। काठ ११,९। वा. १८,५५। कण्व. २०,२५। [दिवा चित्तमः०...व्युन्दन्ति। ऋ० १,३८,९।

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः ।
प्र पर्जन्यः सृजता२ रोदसी अनु धन्वना यन्तु वृष्टयः ॥ ३०
उदीरयता मरुतः समुद्रतो दिवो वृष्टि२ वर्षयता पुरीषिणः ।
न वो दस्रा उपदस्यन्ति धेनवः शुभे कर्मन्नु रथा अवृत्सत ॥ ३१
सृजा वृष्टिं दिवं, आद्भिः समुद्रं पृण, ये देवा दिविभागाः स्थ ये अन्तरिक्षभागा ये
पृथिवीभागास्त इदं क्षेत्रमाविशत, त इदं क्षेत्रमनुविविशत ॥७॥ ३२
वृष्टिर्वै देवेभ्योऽन्नाद्यमपाक्रामत्, तत इद२ सर्वमशुष्यत्, ते देवाः प्रजापतिमेवोपाधाव२,—
स्तान् वा एतया प्रजापतिरयाजयत् कारीर्या, तेभ्यो वृष्टिमन्नाद्यमवरुन्द्धे, यत्र पर्जन्यो न
वर्षेत्तदेतया ज्येष्ठ२ वा पुरोहित२ वा याजयेद्, वृष्टिर्वा एतेभ्योऽन्नाद्यमपक्रामति यत्र पर्जन्यो न
वर्षति, यत् कारीर्या याजयन्ति वृष्ट्या अन्नाद्यस्यावरुद्ध्या, अष्टौ वातहोमा अष्टौ दिशा,
इति दिग्भ्य एवैवेवृष्टिमावर्तयन्ति, मान्दा वशा ज्योतिष्मतीरमस्वरी,—रित्येतानि वा अपां नाम-
धेयानि, यथा वा इदं नामग्राह,—मसा असा, इति ह्वयत्ये,—व२ वा एतदपो नामधेयैश्च्या-
वयति, वृष्णो अश्वस्य संदानमसीति, वृषा ह्यश्वो, वृषा पर्जन्यः, समृद्ध्यै वृष्ट्यै त्वोप-
नह्यामीति, वृष्ट्यै ह्युपनह्यति, देवा वसव्या अग्ने सोम सूर्ये,—ति देवताभिरेवान्वह२ वृष्टिमि-
छति, यदि न वर्षेत्त्रैव वसेयु,—रहोरात्राभ्यामेव वृष्टिं च्यावयन्ति, करीराणि भवन्ति वृष्ट्या
अन्नाद्यस्यावरुद्ध्यै, मधुयुतानि भवन्त्य,—पा२ वा एष ओषधीना२ रसो, ऽपामेवैना ओषधी-
ना२ रसेनाछैति, रसेनैनाश्च्यावयत्य,—ग्नये धामछदेऽष्टाकपालं निर्वपे,—न्मारुत२ सप्तकपाल२
सौर्यमेककपाल२ वृष्टिकाम२ याजये,—दग्निर्वा इतो वृष्टिमीट्टे, मरुतोऽमुतश्च्यावयन्ति, ता२
सूर्यो रश्मिभिर्वर्षत्ये,—ते वै वृष्ट्याः प्रदातार,—स्तानेव भागधेयेनोपासरत्, तेऽस्मै वृष्टिं प्रय-
छन्ति, सृजा वृष्टिं दिव आद्भिः समुद्रं पृण,—तीमाश्चैवामूश्च संसृजा,—ऽभिरमूरछैति, ये देवा
दिविभागाः स्थ ये अन्तरिक्षभागा ये पृथिवीभागास्त इदं क्षेत्रमाविशत, त इदं क्षेत्रमनुविवि-
शते,—तीमानेव लोकान् वृष्ट्यै संमृशति ॥८॥ ३३[८३१]

॥ इति मध्यमकाण्डे चतुर्थः प्रपाठकः ॥४॥

आ यं नरः०...वृष्टयः। ऋ० ५,५३,६। उदीरयता (था) मरुतः०...त्सत। ऋ० ५,५५,५]
[८] तै. २,४,९-१०। काठ. ११,१०।

अथ पञ्चमः प्रपाठकः।

काम्याः पशवः।

सौम्यं बभ्रुं लोमशं पिङ्गलमालभेत पशुकामः, सौमीर्वा ओषधयः, ओषधयः पशवो, यत्, सौम्यः, प्रत्यक्षमेवास्मै पशूनालभते, लोमशो भवत्ये,—तद्वै पुष्ट्या रूपं, पुष्टिमेवावरुन्द्धे, बभ्रुः पिङ्गलो भवति सोमस्य रूपं२ समृद्ध्यै, यस्त्रैतानामुत्तमो जायेत तं२ सौमापौष्णमालभेत पशुकामः, सोमो वै रेतोधाः, पूषा पशूनां प्रजनयिता, सोम एवास्मै रेतो दधाति, पूषा पशून्, प्रजनयति, स्तन२, वा एतेषां द्वा अभिजायेते, ऊर्जं तृतीया, ऊर्जं पशव, ऊर्जमेवास्या ऊर्जं पशूनाप्त्वावरुन्द्धे, त्रिर्वा एषा स२वत्सरस्यान्यान् पशून् परिविजायते, एतद्वै पुष्ट्या रूपं, पुष्टिमेवावरुन्द्धे, भागिनीर्वा अन्याः प्रजा, अभागा अन्या, यदौदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बरो भागिनीः करोति, मासि मासि वा एषोऽवान्तरमन्येभ्यो वनस्पतिभ्यः पच्यत, एतद्वै पुष्ट्या रूपं, पुष्टिमेवावरुन्द्धे, प्राजापत्यं तूपरमालभेत पशुकामः, प्राजापत्या वै पशवः, प्रजापतिः पशूनां प्रजनयिता, तमेव भागधेयेनोपासरत्, सोऽस्मै पशून्, प्रजनयति, योनिर्वै प्रजापति,—योनेरेव प्रजायते, सर्वेषा२ वा एष पशूना२ रूपाणि प्रति, पुरुषस्येव श्मश्रूण्य,—श्वस्येव शिरो, गर्दभस्येव कर्णौ, शुन इव लोमानि, गोरिव पूर्वौ पादा, अवेरिवापरा, अजः खलु वै सर्वाण्येव पशूना२ रूपाण्याप्त्वावरुन्द्धे, सर्वाण्येनं पशूना२ रूपाण्युपतिष्ठन्ते, हिरण्यगर्भेवस्याधारो, याः प्रजापतेः सामिधेनीस्ताः सामिधेनी,—याः प्रजापतेराप्रियस्ता आप्रियो, हिरण्यं देय२ सशुक्रत्वाय, तार्प्यं देय२ सयोनित्वाया,—ऽधीवासो देयो, यज्ञस्य तेन रूपाण्याप्त्वावरुन्द्ध, एतेन वा उपकेरू रराध, ऋध्नोति य एतेन यजते, द्वादशवा ह त्वै स प्राशित्रे परिजहार, तत्र द्वादश द्वादश वरान् ददौ, यद् द्वादश दीयन्ते तस्यैषा प्रतिमा, श्वेत२ वायव्या आलभेत, भूतिकाम२ याजयेद्, वायुर्वै देवानामोजिष्ठः क्षेपिष्ठः, स एनं भूत्यै निनयति, तदाहु,—रभृता देवतेश्वरा निर्मृज ईश्वरैनमार्तिं निनेतोरिति, तदेति सैवेनं भूत्यै निनयति, श्वेत२ वायवे नियुत्वता आलभेत, ग्रामकाम२ याजयेद्, वायुर्वा इमाः प्रजा नस्योता इत्थं चेत्थं च नेनीयते, यद्वायवे, वायुरेवास्मै नस्योता२ विशं निनयति, नियुत्वती याज्यानुवाक्ये भवतो, ग्राममस्मिन् दाधार, श्वेतो भवति, ब्रह्मणो रूपं२ समृद्ध्यै, श्वेत२ वायवे नियुत्वता आलभेता,—ऽमवार्तिन२ याजयेत्,

[१] तै. २,१,१। काठ. १२,१३; १३,१।

प्राणो वै वायुः, प्राणो हि वा एतस्यापक्रान्तो, ऽथैतस्यामयति, यद्वायवे, वायुरेवास्मै प्राणं निनयति, नियुत्वती याज्यानुवाक्ये भवतः, प्राणमस्मिन् दाधार, श्वेतो भवति, ब्रह्मणो रूपं२ समृद्ध्यै, श्वेत२ वायवे नियुत्वता आलभेत, पशुकाम२ याजयेत्, प्राणो वै वायुः, प्राण२ वा एतत् पशवः प्रतिधावान्ति यद्वर्षेषु वातं प्रतिजिघ्रति, यद्वायवे, वायुरेवास्मै पशून् निनयति, नियुत्वती याज्यानुवाक्ये भवतः, पशूनस्मिन् दाधार, श्वेतो भवति, ब्रह्मणो रूपं२ समृद्ध्यै ॥१॥
1

स्वर्भानुर्वा आसुरः सूर्यं तमसाविध्यत्, तस्य देवास्तमोऽपाघ्नन्, यत् प्रथमं तमोऽपाघ्नन्त्साविः कृष्णाभवद्, यद् द्वितीय२ सा लोहिनी, यत् तृतीय२ सा वलक्षी, यदध्यस्थादुपाकृन्तत्साविर्वशाभवत्, तेऽब्रुवन्, देवपशुमिमं कामायालभामहा, इत्ययं वा इयं तर्ह्यक्षासीदुलोमिका, तेऽब्रुव२,—स्तस्मै कामायालभामहै यथास्यामोषधयश्च वनस्पतयश्च जायन्ता इति, ता२ वै तस्मै कामायालभन्त, ततोऽस्यामोषधयश्च वनस्पतयश्चाजायन्त, यः प्रजाकामो वा पशुकामो वा स्यात् स एतामवि२ वशामालभेत, प्र प्रजया च पशुभिश्च जायते, ऽथो आहु,—र्यः प्रथमस्तमस्यपहते सूर्यस्य रश्मिर्यूपस्य चषाले वातनोत्साविर्वशाभवदिति, तदुभयेनैवं देवपशुरालभ्यते, यद्यस्यास्तज्जन्म यदि वेतरं तत् कामाय कामायैवाविर्वशालभ्यते, आग्नेयमजमालभेत, वारुणं पेत्वं भूतिकाम२ याजये,—दाग्नेयानि वै पुरुषस्यास्थानि, वारुणं मा२सं,—माग्नेयेनैवास्याग्नेयं निष्क्रीणाति, वारुणेन वारुणं, भवत्येवं, सारस्वतीं मेषीमालभेत यो वाचो गृहीत, वाग्वै सरस्वती, वाचैवास्य वाचं भिषज्यत्यं,—पन्नदती भवति सर्वत्वाया,—नाविस्कन्ना समृद्ध्यै, श्वेता मल्हा आलभेत ब्रह्मवर्चसकाम आग्नेयीं बार्हस्पत्या२ सौरी२, वसन्ता आग्नेयीं, प्रावृषि बार्हस्पत्या२, शिशिरे सौरी२, यदाग्नेयी, तेजस्तयावरुन्द्धे, यद्बार्हस्पत्या, ब्रह्मवर्चसं तया, यत् सौरी, रुचं तया, त्रिवृद्वावास्मा एतत् समृद्धं ब्रह्मवर्चसं दधाति, स२वत्सरं पर्यालभ्यन्ते, स२वत्सरेण वा अनाप्तमाप्यते, स२वत्सरेणैवास्मा आप्त्वा तेजो ब्रह्मवर्चसं दधाति, श्वेता भवति, ब्रह्मणो रूपं२ समृद्ध्यै, वायव्यामजामालभेत, सारस्वतीं मेषीमदित्या अजामभिशस्यमान२ याजयेद्, वायुर्वा एतस्याश्लीलं गन्धं जनता अनुविहरति यमभिश२सन्त्ये,—पश्हीद२ सर्वमुपगच्छति, यद्वायवे, वायुरेवास्य तं गन्धं२ सुरभिमकः, सोऽस्य सुरभिर्गन्धो जनता अनुवितिष्ठते, वाचा वा एतमभिश२सन्ति यमभिश२सन्ति, वाक्सरस्वती, यत् सारस्वती,

[२] तै. २,१,२। काठ. १२,१३; १३,१।

वाचैवैषा२ वाच२ शमयत्यं,—प्रतिष्ठितो वा एष यमभिश२सन्ती,—य२ वा अदिति,—रियं प्रतिष्ठा, यदादित्या,—ऽस्यामेव प्रतितिष्ठती,—न्द्रियेण वा एष वीर्येण व्यृध्यते यमभिश२सन्ती,—न्द्रियं२ वी३र्यं गर्भो, यद्गर्भिणीर्भवन्तीन्द्रियेणैवैन२ वीर्येण समर्धयन्ति ॥२॥
2

देवाश्च वा असुराश्चास्पर्धन्त, ते वै समावदेव यज्ञे कुर्वाणा आयन्, यदेव देवा अकुर्वत तदसुरा अकुर्वत, ते न व्यावृतमगच्छ२,—स्ते देवा एत२ वामनं पशुमपश्य२,—स्त२ वैष्णवमालभन्त, ततो वै विष्णुरिमाँल्लोकानुदजयत्, ततो देवा असुरानेभ्यो लोकेभ्यः प्राणुदन्त, ततो देवा अभवन्, परासुरा, यः सपत्नवान् भ्रातृव्यवान् वा स्यात् स एत२ वामन२ वैष्णवमालभेता,—ऽतो वै विष्णुरिमाँल्लोकानुदजयद्, विष्णोरेवोज्जितिमन्विमाँल्लोकानुज्जयति, प्रैभ्यो लोकेभ्यो भ्रातृव्यं नुदते, विषम इवालभेत, विषमानिव ३हीमाँल्लोकान् देवा उदजय,—न्निमानिव लोकानुज्जयती,—न्द्रो वै वृत्रमहन्, त्सं प्राऽपद्यत, स पद्यमाना इन्द्र२ सर्वैभिर्भोगैः पर्यगृह्णात्, तस्मादिष्वन्नः पशवो व्युदाय,—न्वृधेतो वैदेहीरुदाय२,—स्तस्मात् तासां पुरो जन्म पुर ओक,—स्तासां जघनतः ककुभो वैदे३हो ऽनूदैत्, तमचाय,—दयं२ वाव मास्माद२हसो मुञ्चेदिति, तमैन्द्रमालभेता,—ऽऽग्नेयं तु पूर्वमजमालभत, स वा अग्निनैव वृत्रस्य भोगानपिदह्यथैन्द्रेणेन्द्रियं२ वीर्यमात्मन्नधत्त, यः पाप्मना तमसा गृहीतो मन्येत स एतमैन्द्रमृषभमालभेता,—ऽऽग्नेयं तु पूर्वमजमालभेता,—ऽग्निनैव पाप्मनो भोगानपिदह्याथैन्द्रेणेन्द्रियं२ वीर्यमात्मन् धत्ता, इन्द्रो वै बलमपावृणोत्, ततः सहस्रमुदैत्, तस्य सहस्रस्याग्रतः कुब्र उदैत्, तस्मादेत२, साहस्री लक्ष्मी,—रि त्याहुर्यश्च वेद यश्च ना,—ऽथो आहु,—रिम२ वा एष लोकं पश्यन्नभ्युदैत्, स समैषत्, स एषं समीषितः कुब्र, इति तमैन्द्रमालभेत पशुकाम, ऐन्द्रा वै पशवा, इन्द्रः पशूनां प्रजनयिता, तमेव भागधेयेनोपासरत्, सोऽस्मै पशून्प्रजनयति, स यदा सहस्रं पशून्गच्छेदथैत२ वामन२ वैष्णवमालभेतै,—तस्मिन्वै तत्सहस्रं प्रत्यतिष्ठत्, स तिर्यङ् व्यैषत्, तस्मादेष तिर्यङिव वीषित, एतेन वै स तत् सहस्रं पर्यगृह्णात्, तत् सहस्रस्य वा एष परिगृहीत्या अविक्षोभाय, देवाश्च वै पितरश्चास्मिँल्लोक आस२,—स्तद्यत् किंच देवाना२ स्वमासीत् तद्यमाऽवृणत्, ते देवाः प्रजापतिमेवोपाधावन्, त्सं प्रजापतिरेतौ मिथुनौ पशू अपश्यदृषभं च वशां च, तावालभत, वैष्णववारुणीं तु पूर्वा२ वशामालभत, तान् वै वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदता,—

[३] तै. २,१,३-४। काठ. १३,३-४।

ऽथैन्द्रं देवेष्वालभत, तैनैष्विन्द्रियाणि वीर्याण्याप्त्वादधाद्यः सपत्नवान् भ्रातृव्यवान् वा स्यात् स एतौ मिथुनौ पशू आलभेत ऋषभं च वशां च, वैष्णववारुणीं तु पूर्वा२ वशामालभेत, वरुणेनैवैनान् ग्राहयित्वा विष्णुना यज्ञेन प्रणुदते, ऽथैन्द्रेणेन्द्रियं२ वीर्यमात्मन् धत्ते ॥३॥
3

सावित्रं पुनरुत्सृष्टमालभेत यः पुरा पुण्यः सन् पश्चात् पापत्वं गच्छेत्, सविता वै श्रियः प्रसविता, तमेव भागधेयेनोपासरत्, स एन२ श्रियै प्रसुवति, पापो वा एष पुरा सन् पश्चात् श्रियमश्नुते यः पुरानुद्धान्त्सन् पश्चात्क्षत्त्वं गच्छति, यथैष श्रियमश्नुत एवमेवैन२ श्रियं गमयत्यो,—षधीभ्यो वेहतमालभेत प्रजाकामा, ओषधीना२ वा एषा श्रिये,—ता वा एता२ सुताः परिबान्ता, ओषधयः खलु वा एतस्य प्रजामपगूहन्ति योऽलं प्रजायै सन् प्रजां न विन्दते, ता (एवं भागधेयेनोपासरत्, ता अस्मै प्रजां पुनर्ददत्यां,—पो वा ओषधया, आपो ह३त्वेवासत् खनन्ति, ता अस्मै प्रजां खनन्ति, द्यावापृथिवीये धेनू संमातरा आलभेतान्नकामो, य३द्व्यसौ वर्षति तदस्यां प्रतितिष्ठति, द्यावापृथिवी वा अन्नस्येशाते, ते) एवं भागधेयेनोपासरद्, ते अस्मा अन्नाद्यं प्रयच्छतः, स वत्से२ वायवा आलभेत, वायुर्वा अनयोर्वत्सो, वायुरिमे प्रदापयति, प्रत्ते ह वा इमे दुहे य एव२ वेदे,—न्द्री२ सूतवशामालभेत, राज३न्यं भूतिकाम२ याजये,—देतस्या वा अधीन्द्रोऽजायत, स जायमान एत२ योनिं निरवर्तयत्, सा सूतवशाभव,—दथो आहु,—रेतदेव सकृदिन्द्रियं२ वी३र्यं तेजो जनयित्वा नापुर२ सूता आश२सत्, सा सूतवशाभव,—दितीन्द्रियेण वा एष वीर्येण व्यृध्यते योऽलं भूत्यै सन्न भवत्यै,—न्द्री भवती,—न्द्रियमस्मिन् दधात्यं,—थ यस्त२ विन्देय२ सूत्वा सूतवशा भवति तमैन्द्रमालभेत तेजस्काम,—स्तदेवेन्द्रियं२ वी३र्यं तेज आप्नोति, सारस्वतीं धेनुष्टरीमालभेत यः क्षेत्रे पशुषु वा विवदेत, वाग्वै सरस्वती, वाचैवैषा२ वाच२ वृङ्क्ते२, धेनुर्वा एषा सती न दुहे, तद्यमेवैषा२ वाचं करोति, द्यावापृथिवीयां धेनुं पर्यारिणीमालभेत यो राजन्योऽभ्यर्धो विशश्चरेद्, द्यावापृथिवीभ्या२ हि वा एष निर्मुक्तो, ऽथैषोऽभ्यर्धो विशश्चरति, द्यावापृथिवी एवैन२ विशि प्रतिष्ठापयतः, पर्यारिणी भवति, पर्यारीव३ह्येतद्राष्ट्र२, यदभ्यर्धो विशश्चरति द्यावापृथिवी एवैन२ विशि प्रतिष्ठाप्य, स श्वो भूते वत्से२ वायवा आलभेत, वायुर्वा अनयोर्वत्सो, वायुरिमौ क्षयी विशं च प्रदापयति, प्रत्तौ ह वा इमौ क्षयो विशं च दुहे य एव२ वेद ॥४॥ 4

[४] तै. २,१,५। काठ. १३,४-७।

(एष कोष्ठान्तर्गतो भागः केषुचित् लिखितेषु पुस्तकेषु नोपलभ्यते।)

आग्नेयमजमालभेत, सौम्यं बभ्रुमृषभं पिङ्गलं भूतिकामं याजयेद्, —द्वया एवाग्नेयं, इन्द्रियेण वा एष वीर्येण व्यृध्यते योऽलं भूत्यै सन्न भवति, यत् सौम्यः, स्वयैवास्मै देवतयेन्द्रियं वीर्यमाप्त्वावरुन्द्धे, भवत्येव, बभ्रुः पिङ्गलो भवति, सोमस्य रूपं समृद्ध्यै, गोमृगं वायवा आलभेता, —ऽभिशस्यमानं याजये, —दपूतो वा एष यमभिशंसन्ति, वायुर्वै देवानां पवित्रं, वायुनैवैनं पवित्रेण पुनाति, नैव वा एष ग्रामे नारण्ये यमभिशंसन्ति, नैव खलु वा एष ग्राम्यः पशुर्नैवारण्य, —स्तस्मादस्यैष देवतया पशूनां समृद्ध ऐन्द्राग्नमनुसृष्टमालभेत यस्य पिता पितामहः सोमं न पिबे, —दिन्द्रियेण वा एष वीर्येण व्यृध्यते यस्य पिता पितामहः सोमं न पिबति, यदैन्द्रं, इन्द्रियेणैवैनं वीर्येण समर्धयति, देवताभिर्वा एष व्यृध्यते यस्य पिता पितामहः सोमं न पिबति, यदाग्ने३यो, ऽग्निर्वै सर्वा देवता, देवताभिरेवैनं समर्धयत्य, —नुसृष्टो भवत्य, —नुसृष्ट इव ३ह्येतस्य सोमपीथो यस्य पिता पितामहः सोमं न पिबति, तस्मादस्यैष देवतया पशूनां समृद्धस्त्वाष्ट्रमवलिप्तमालभेत पशुकाम, —स्त्वाष्ट्रा वै पशव, —स्त्वष्टा पशूनां प्रजनयिता, तमेव भागधेयेनोपासरत्, सोऽस्मै पशून् प्रजनयति, सौमापौष्णं नपुंसकमालभेत, पण्डकं याजयेद्, यत्र तू भूमेर्जायेत तत् प्रजिज्ञासेता, —ऽत्र वा एतस्य जायमानस्येन्द्रियं वी३र्यमपाक्रामत्, तदेवास्मा इन्द्रियं वीर्यमाप्त्वा दधाति, सोमश्च वा एतस्य पूषा च जायमानस्येन्द्रियं वीर्यमयुवेता, —मियं वै पूषा, —पधयः सोमो, यत् सौमापौष्णः, स्वयैवास्मै देवतयेन्द्रियं वीर्यमाप्त्वावरुन्द्धे, भवत्येव, यान्यनवदानीयानि तैर्नैर्ऋतैः पूर्वैः प्रचरन्ति, निर्ऋतिगृहीता वा एषा स्त्री या पुंरूपा, निर्ऋतिगृहीत एष पुमान्यः स्त्रीरूपो, निर्ऋत्या एवैनं तेन मुञ्चति, न वै नैर्ऋत्याहुतिरग्निमानशे, यदङ्गारेषु जुहोति तत् स्विदग्नौ जुहोति तदु न, यत्र वा अद इन्द्रो वृषणश्वस्य मेनासीत् तदेनं निर्ऋतिः पाप्मागृह्णात्, स यं पाप्मानमपाहत स नपुंसकोऽभवद्, यः पाप्मना तमसा गृहीतो मन्येत स एतमैन्द्रं नपुंसकमालभेत, येनैवेन्द्रः पाप्मानमपाहत तेन पाप्मानमपहते, ऽथेन्द्रेणेन्द्रियं वीर्यमात्मन् धत्ते, प्रजापतिः पशूनसृजत, स वा एतमेवाग्रे नपुंसकमसृजत, तं पशवोऽन्वसृज्यन्ता, —ऽथो आहु, —रेतमेवाग्रे सृष्टं त्वष्ट्रे च पत्नीभ्यश्च नपुंसकमालभत, तेन प्रजा असृजतेति, यः प्रजाकामो वा पशुकामो वा स्यात् स एतं त्वष्ट्रे च पत्नीभ्यश्च नपुंसकमालभेत,

[५] तै. २,१,५। काठ. १३,५।
मै॰ १८

मिथुनं वै त्वष्टा च पत्नीश्च, त्वष्टारं वा एतन्मिथुनेऽप्यसृजात् प्रजननाय, तन्मिथुनं,
तस्मादेवं मिथुनाद्यजमानः प्रजया च पशुभिश्च प्रजायते ॥५॥ ५
प्रजापतिः प्रजा असृजत, ता एनं सृष्टा अत्यमन्यन्त, ता अतिमन्यमाना वरुणेनाग्राहयत,
ता वरुणगृहीताः कृष्णः पेत्वोऽध्यस्कन्दत्, तस्यानुहाय पादमगृह्णात्, तस्य शफः प्रावृहत्, स
एकशितिपादभवत्, तमचाय, —दयं वावासां प्रजानामवरुणगृहीतो, ऽनेनेमाः प्रजा वरुणान्
मुञ्चानी, —ति तं वारुणमालभत, तत इमाः प्रजा वरुणात् प्रामुच्यन्त, तद्वरुणप्रमोचनीय
एवैष, यो ज्योगामयावी स्यात् तमेतेन याजयेद्, वरुणेन हि वा एष पाप्मना गृहीतो, ऽथै-
तस्य ज्योगामयति, यद्वारुणो, वरुणादेवैनं तेन मुञ्चत्यै, —कशितिपाद्भवत्ये, —वमिव हि तस्य
रूपमासीत् समृद्ध्यै, द्वीपे याजये, —देता वै प्रत्यक्षं वारुणीर्यदापः, स्वे वा एतद्योनौ
प्रत्यक्षं वरुणमवयजति, समन्तमापः परिवहन्ति रक्षसामनन्ववायाय, वारुणं कृष्णं पेत्वमा-
लभेताभिचरन्, यद्वारुणो, वरुणेनैवैनं ग्राहयित्वा स्तृणुते, कृष्णो भवति, तमो वै कृष्णं,
मृत्युस्तमो, मृत्युनैवैनं ग्राहयत्ये, —तद्वै पाप्मनो रूपं यत् कृष्णं, कृष्णं इव हि पाप्मा,
पाप्मनैवैनमभिप्लवति, तं नियुञ्ज्यात् ॥ ६
पशुं बध्नामि वरुणाय राज्ञा इन्द्राय भागमृषभं केवलो हि।
गात्राणि देवा अभिसंविशन्तु यमो गृह्णातु निर्ऋतिः सपत्नान् ॥ ७
इत्येताभ्य एवैनं देवताभ्यो निर्याच्य, मृत्युर्वै यमो, मृत्युनैवैनं ग्राहयत्य, —ग्नये वैश्वानराय
कृष्णं पेत्वमालभेत समान्तमभिद्रोक्ष्यन्, त्संवत्सरो वा अग्निर्वैश्वानरः, संवत्सराय सम-
र्ष्यते, संवत्सरमेवाप्त्वावृक्तं काममभिद्रुह्यत्या, —श्विनं कृष्णललाममालभेता, —ऽनुजावरं स्या-
जये, —दश्विनौ वै देवानामानुजावरा, अश्विना एतस्य देवते य आनुजावर, —स्तौ एव भागधेये-
नोपासरत्, ता एनमग्रं परिणयतः, कृष्णो भवति, पाप्मानमेवापहते, ललामो भवति, मुखतो
ऽस्मिंस्तेजो दधात्या, —श्विनं कृष्णललाममालभेता, —ऽऽमयाविनं याजये, —दश्विनौ वै देवानां
भिषजा, अश्विना एतस्य देवते य आमयावी, तौ एवं भागधेयेनोपासरत्, ता एनं भिषज्यतः,
कृष्णो भवति, पाप्मानमेवापहते, ललामो भवति, मुखतोऽस्मिंस्तेजो दधाति ॥६॥ ८
छन्दांसि वै यज्ञाय नातिष्ठन्त, स वषट्कारोऽभिहृत्य गायत्र्याः शिरोऽछिनत्, तस्माच्

[६] तै. २,१,२। काठ. १३,२,७।
[७] तै. २,१,७-८। काठ. १३,८।

शीर्ष्णश्छिन्नाया रसोऽक्षरत् वा वशा अभवं, —स्तद्वशानां वशात्वं, —मथो आहु, —र्वंशं वै ता अक्षरं, —स्ता वशा अभवं, —स्तद्वशानां वशात्वं, —मित्यथो आहु, —र्वसा वै सासीत्, तद्वसा वा एता इति, ततो यः प्रथमो रसः प्राक्षरत् तं बृहस्पतिरुपागृह्णात्, सा रोहिणी बार्हस्पत्या, ततो३योऽत्यक्षरत् तं मित्रावरुणौ, सा द्विरूपा मैत्रावरुणी, ततो३योऽत्यक्षरत् तं विश्वे देवाः, सा बहुरूपा वैश्वदेवी, ततो३योऽत्यक्षरत् तमग्निश्च मरुतश्च, सा पृश्निराग्निमारुत्य, —थो आहुः, कृष्णशबलीत्य, —थ या विप्रुषा आसंस्तानीमान्यन्यानि रूपाणि, ततो यः प्रथमो द्रप्सः परापतत् तं बृहस्पतिरभिहायाभ्यगृह्णात्, स उक्षाभवत्, तदुक्ष्ण उक्षत्वं, —मथो आहु, —र्यदेवता अनुव्यौक्षत स उक्षाभवत्, तदुक्ष्ण उक्षत्वमिति, तं ब्राह्मणस्पत्यमालभेत, ब्राह्मणं भूतिकामं याजयेद्, ब्रह्म वै ब्रह्मणस्पति, —र्ब्राह्मणस्पत्यो ब्राह्मणो देवतया स्वयैवास्मै देवतयेन्द्रियं वीर्यमाप्त्वावरुन्द्धे, भवत्येव, रोहिणीं बार्हस्पत्यामालभेत ब्रह्मवर्चसकामो, ब्रह्म वै बृहस्पति, —र्बार्हस्पत्यो ब्राह्मणो देवतया, स्वयैवास्मै देवतयाप्त्वा तेजो ब्रह्मवर्चसं दधाति, रोहिणी भवति, ब्रह्मणो रूपं समृद्ध्यै, मैत्रावरुणीं द्विरूपामालभेत पशुकामो, ऽहोरात्रे वै मित्रावरुणा, अहोरात्रे अनु पशवः प्रजायन्ते, ता एव भागधेयेनोपासरत्, ता अस्मै पशून् प्रजनयत, —श्छन्दसां वा एष रस, —श्छन्दसामेवास्मै रसेन पशून् धत्ते, द्विरूपा भवति समृद्ध्यै, वैश्वदेवीं बहुरूपामालभेत यस्मै कामाय कामयेत, सर्वा वा एता देवता, सर्वा वा एतद्देवताः कामाय भागधेयेनोपासरत्, ता अस्मै कामं समर्धयन्ति यत् कामो भवति, छन्दसां वा एष रस, —श्छन्दसामेवास्मै रसेन दधति, बहुरूपा भवति समृद्ध्या, आग्निमारुतीं पृश्निमालभेत वृष्टिकामो, ऽग्निर्वा इतो वृष्टिमीट्टे, मरुतोऽमुतश्च्यावयन्त्य, —ते वै वृष्ट्याः प्रदातार, —स्तानेव भागधेयेनोपासरत्, तेऽस्मै वृष्टिं प्रयच्छन्ति, छन्दसां वा एष रसो, रसो वृष्टि, —श्छन्दसामेवास्मै रसेन रसं वृष्टिं निनयन्ति, पृश्निर्भवति, पृश्निमातरो हि मरुतो, भौमीं कृष्णशबलीमालभेतान्नकाम, इयं वा अन्नस्य प्रदात्रिका, तामेव भागधेयेनोपासरत्, सास्मा अन्नाद्यं प्रयच्छति, न चर्माप्याहरेयु, —रन्नं वै चर्मा, —ऽनन्नं कृष्णं, —मन्नेनैवानन्नमपहत्यान्नाद्यमात्मन् धत्ते, यद्वै तच् शीर्ष्णश्छिन्नात्तेज इन्द्रियं वीर्यं परापतत् सा बभ्रुर्वशाभवत्, तदेषा वशा, —ऽमुमेवतरा, —स्तां ब्राह्मणस्पत्यामालभेताभिचरन्, ब्रह्म वै ब्रह्मणस्पति, —र्ब्राह्मणस्पत्यो ब्राह्मणो देवतया, यावदेवं ब्रह्म तेनैनं सर्वेणाभिचरति, तेजसैनं प्रछिनत्ति, स्तृणुत एवं, बभ्रुर्भवति, ब्रह्मणो रूपं समृद्ध्यै, सौरीं श्वेतामालभेत ब्रह्मवर्चसकामो, ऽसौ वा आदित्यो ब्रह्मवर्चसस्य प्रदाता, तमेव भागधेयेनोपासरत्, सोऽस्मै ब्रह्मवर्चसं प्रयच्छति, श्वेता भवति, ब्रह्मणो रूपं समृद्ध्यै, मैत्रा-

वरुणीं कृष्णकर्णीमालभेत वृष्टिकामो, ऽहोरात्रे वै मित्रावरुणा, अहोरात्रे अनुवर्षत्ये, —तद्वा अह्नो
रूपं यच् शुक्लं, यत् कृष्णं तद्रात्रे, —र्द्विरूपा भवति समृद्ध्यै ॥७॥ ९
इन्द्राय मन्युमते मनस्वते ललाममालभेत संग्रामे, मन्युना वै वीर्यं क्रियत, इन्द्रियेण ज-
यति, वीर्यं चैवैष्विन्द्रियं च जित्यै दधाति, ललामो भवति, पुरस्ता३द्धयर्यं मन्युं, —रथो
ब्रह्मणैवैनान् पुरस्तान्मुखतो जित्यै संश्यती, —न्द्रायाभिमातिघ्ने ऋषभमालभेत भ्रातृव्यवा, —न
भिमातिर्वै पाप्मा भ्रातृव्य, इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहते, स इन्द्राय वृत्रतुरा
आलभेता, —ऽभिमातिर्वै पाप्मा भ्रातृव्य, इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहत्य वृत्रतूरेवा-
भूत्, स्वाराज्यमेवं गछति, वृत्रतू, —रिति३ह्येतमाहुर्यः स्वाराज्यं गछत्यै, —न्द्रामारुतं पृश्नि-
सक्थमालभेत, राज३न्यं ग्रामकामं याजये, —दैन्द्रो वै राजन्यो देवतया, मारुती विं, —डि-
न्द्रियेणैवास्मै विशमुपयुनक्ति, पृश्निसक्थो भवति, पश्चादेवास्मै विशमुपदधात्यं, —नुकामस्मै
विशमविवादिनीं करोती, —न्द्राय वज्रिण ऋषभमालभेत, राज३न्यं भूतिकामं याजयेद्, यदा
वै राजन्यो वज्री भवत्यथ भूतिं गछति, यद्वज्रिणे, वज्रमेवास्मा आधात्, तेन विजितिं भूतिं
गछति, स एनं भूत्यै श्रेम्णं इन्द्धे, यद्वज्रिणा, इति तदस्याभिचरणीयं, यं द्विष्यात् तं
तर्हि मनसा ध्यायेद्, वज्रमेवास्मै प्रहरति, स्तृणुत एवं, सौम्यं बभ्रुमृषभं पिङ्गलमालभेत
योऽलं राज्याय सन् राज्यं न प्राप्नुयात्, सोमो वै राजितस्य देवता, सोमो हि राजा, स्वा-
मेव देवतां राज्यायोपासरत्, सैनं देवता राज्यं गमयति, बभ्रुः पिङ्गलो भवति, सोमस्य
रूपं समृद्ध्यै ॥८॥ १०
यः प्रथम एकाष्टकाया जायेत यस्तमालप्स्यमानः स्यात् स आग्नेयमष्टाकपालं निर्वपे, —दग्निर्वै
पशूनां योनिः, स्वादेवैनान् योनेर्निष्क्रीणात्यो मेध्यान्कृतो, —ग्नये वैश्वानराय द्वादशकपालं
मासि मासि निर्वपेत्, संवत्सरो वा अग्निर्वैश्वानरः, संवत्सरादेवैनं निष्क्रीणाति, स यदा
मेधं गच्छेदथैन्द्रायाभिमातिघ्ने आलभेता, —ऽभिमातिर्वै पाप्मा भ्रातृव्य, इन्द्रियेणैवाभिमातिं पाप्मा-
नं भ्रातृव्यमपहते, ऽश्वोऽच्युतवहो दक्षिणै, —ष वै व्यावृत्तः पाप्मना, पाप्मनैवैनं व्याव-
र्तयत्य, —थ योऽपरस्यामेकाष्टकायां जायेत तमेवमेवोत्सृज्याथैन्द्राय वृत्रतुरा आलभेता, —ऽभिमा-
तिर्वै पाप्मा भ्रातृव्य, इन्द्रियेणैवाभिमातिं पाप्मानं भ्रातृव्यमपहत्य वृत्रतूरेवाभूत्, स्वाराज्य-

[८] तै. २,१,३; २,५,३। काठ. १३,४।३।
[९] तै. २,१,३,५; २,५,३। काठ १३,३;४।

नमो महिम्नें चक्षुषे मरुतां पितस्तदहं गृणे ते ।
हुतो याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः ॥ १३
देवानामेष उपनाह आसीदपां पतिर्वृषभ ओषधीनाम् ।
सोमस्य द्रप्समवृणीत पूषा बृहन्नद्रिरभवद् यत् तदासीत् ॥ १४
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ १५
पिता वत्सानां पतिरघ्न्यानामुतायं पिता महतां गर्गराणाम् ।
वत्सो जरायु प्रतिधुक् पीयूष आमिक्षामस्तु घृतमस्य योनिः ॥ १६
त्वां गावोऽवृणत राज्याय त्वां वर्धन्ति मरुतः स्वर्काः ।
वर्ष्मन् क्षत्रस्य ककुभिः शिश्रियाणस्ततो न उग्रो विभजा वसूनि ॥१०॥ १७

वायव्यमजमालभेतै,—न्द्रं वृष्णिं वृषभं वा वारुणं पेत्वं भूतिकामं याजयेद्, यद्वायव्ये, वायुरेवैनं भूत्यै निनयती,—न्द्रियेण वा एष वीर्येण व्यृध्यते योऽलं भूत्यै सन्न भवति, यदैन्द्र, इन्द्रियेणैवैनं वीर्येण समर्धयति, वरुणगृहीतो वा एष योऽलं भूत्यै सन्न भवति, यद्वारुणो, वरुणादेवैनं तेन मुञ्चत्ये,—तानेवाभिचरन्नालभेत, यद्वायवे, वायुरेवास्मै वज्रं संश्यत्यै,—न्द्रो वै वज्र, इन्द्रियेण खलु वै वज्रः प्रह्रियते, यदैन्द्रो, वज्रमेवास्मै प्रहरति, यद्वारुणो, वरुणेनैवैनं ग्राहयित्वा स्तृणुते, सौर्यं बलक्षं पेत्वमालभेत ब्रह्मवर्चसकामो, ऽसौ वा आदित्यो ब्रह्मवर्चसस्य प्रदाता, तमेव भागधेयेनोपासरत्, सोऽस्मै ब्रह्मवर्चसं प्रयच्छति, यद्बलक्षः समृद्धस्तेन, यदलूनः समृद्धस्तेन, यत् पीवा समृद्धस्तेन, त्रिवृद्धावास्मा एतत् समृद्धं ब्रह्मवर्चसं दधात्यादित्यं बहुरूपमालभेत यस्याश्विने शस्यमाने सूर्यो नोदियात्, पराचीर्वा एतस्मै व्युच्छन्ति यस्याश्विने शस्यमाने सूर्यो नोदेति, यदादित्यो, ऽमुमेवास्मा उन्नयति, बहुरूपो भवति, बहूनि वै रश्मीनां रूपाणि, रश्मीनामेवास्मै रूपाण्याप्त्वोन्नयत्य,—मिवै सृष्टो न व्यरोचत, सोऽग्नये तेजस्विनेऽजं कृष्णग्रीवमालभत. तेन तेजस्व्यभवत्, सोऽकामयत,

[हुतो (दृता) याहि (त) पथिभिर्देवयानैः । ऋ० ७,३८,८; अथर्व. ९,४,३ । देवानामेष (-नां भाग) ...आसीत् (०च्छरीरम्)। अथर्व. ९,४,५ । द्रप्सश्चस्कन्द०...होत्राः । ऋ० १०,१७,११; अथर्व. १८,४,२८ । पिता वत्सानां०...योनिः (रेतः)। अथर्व. ९,४,४ । त्वां गावोऽवृणत०...वसूनि । अथर्व. ३,४,२।

[११] तै. २,१,४ ।

मेव गच्छति, वृत्रन्,—रिति होवमाहुर्यः स्वाराज्यं गच्छति, शतमेव्यूक्षवहा दक्षिणे,—तं वै व्यावृत्ताः पाप्मना, पाप्मनैवैनं व्यावर्तयन्ति, शतं भवन्ति, शतायुर्वै पुरुषः शतवीर्य, आयुरेव वीर्यमाप्नोति, देवाश्च वा असुराश्चास्पर्धन्त, तेऽब्रुवन्, ब्रह्मणि नोऽस्मिन् विजयेषा,—मित्युत्तमस्तूपरश्चैत्रेयो देवानामासीत् श्वेतोऽयःशृङ्गः शैनेयोऽसुराणां, तेऽसुरा उक्षोदिनोऽचर,—न्नयंतोऽस्माकं तुव रेतोऽभीषामिति, तौ वै समलभेतां, तस्य देवाः क्षुरपवि शिरोऽकुर्वं,—स्तस्यान्तरा शृङ्गे शिरो व्यवधाय विष्वञ्चं व्युरुजद्, यासुरी वागवदत्तैमा प्राविशद्, योऽब्रुवत्, सा वनस्पतीं,—स्तस्माद्ब्राह्मणो मृन्मयेन न पिबे,—दसुर्या वाचाऽत्मानं नेत्संसृजा, इति तथ एवं विद्वानिमृत्पात्रयो भवत्युज्जितमेव वाचं उपैति, तं ब्राह्मणस्पत्यमालभेताभिचरन्, ब्रह्म वै ब्रह्मणस्पति,—र्ब्राह्मणस्पत्यो ब्राह्मणो देवतया, यावदेव ब्रह्म तेनैनं सर्वेणाभिचरति, तेजसैनं प्रछिनत्ति, स्तृणुत एवा,—ऽरुणस्तूपरो भवत्ये,—वमिव हि तस्य रूपमासीत्, समृद्ध्यै, देवा असुरान् हत्वेभ्यो लोकेभ्यः प्राणुदन्त, ते रात्रीं प्राविशं,—स्तानश्विना अनुप्राविशतां, तौ तमः पर्यगृह्णात्, तौ एतमाश्विनमजिंमालभेतां, तेन तमो ऽपामाता,—मुमा एना आदित्यः पुरस्ताज्ज्योतिषा प्रत्यागच्छत्, स आभ्यां तमोऽध्यपाहन्, यः पाप्मना तमसा गृहीतो मन्येत स एतमाश्विनमजिमालभेत, येनैवाश्विनौ तमोऽपामातां तेनु पाप्मानमपहते, ऽसा एनमादित्यः पुरस्ताज्ज्योतिषा प्रत्यागच्छति, सोऽस्मात्तमोऽध्यपहन्ति ॥ ९ ॥ ११

असौ वा आदित्यस्तेजोऽभिव्यौच्यत, तत् इदं सर्वं तमोऽभवत्, स प्रजापतिरेतान् दशऋषभानपश्य,—द्यो आह,—रिन्द्रोऽपश्यदिति, तानैन्द्रानालभत, तैरस्मिन्निन्द्रियाणि वीर्याण्याप्त्वादधाद्, यद्बहुलोमा आलभ्यन्त मुखतोऽस्मिंस्तैस्तेजोऽदधाद्, यच् शितिककुद उपरिष्टाचैं,—यच् श्वेतानूकाशाः पश्चाचैं,—स्ततो वा असा आदित्यः सर्वतस्तेजस्व्यभवद्, यस्तेजस्कामः स्यात् स एतानैन्द्रानृषभानालभेत, यद्बहुलोमा आलभ्यन्ते मुखतोऽस्मिंस्तैस्तेजो दधाति, यच् शितिककुद उपरिष्टाचैं,—यच् श्वेतानूकाशाः पश्चाचैः, सर्वत एवैनं तेजस्विनं करोत्य,—मुष्यैनमादित्यस्य मात्रां गमयति, प्राजापत्यं दकुमं द्वादशं मासा आलभेत, द्वादश मासाः संवत्सरः, संवत्सरमेवाप्त्वावरुन्द्धे, नवालभ्यन्ते, नव वै प्राणाः, प्राणाः खलु वै पुरुषे वीर्यं, प्राणानस्मिन् वीर्यं दधाति, दशालभ्यन्ते, दशाक्षरा विराड्, विराडेतान्येवेन्द्रियाणि वीर्याण्यात्मन्धित्वे,—यं विरा,—डस्यामेव प्रतितिष्ठति ॥ १२

[१०] तै. २,१,४; ३,१,९ । काठ. १३,७,९ । वा. १३,५९,१८ ३१,११ । काण्व. १४,५; १०,२४; ३३,११ ।

सर्वत्र विभवेयमिति, सोऽग्नये विभूतिमतेऽजं कृष्णग्रीवमालभत, तेन सर्वत्र व्यभवत्, सोऽकामयत, सर्वत्राविभागः स्यामिति, सोऽग्नये भागिनेऽजं कृष्णग्रीवमालभत, तेन सर्वत्राविभागोऽभवत्, सोऽकामयत, दानकामा मे प्रजाः स्युरिति, सोऽग्नये दात्रेऽजं कृष्णग्रीवमालभत, तेनास्मै दानकामाः प्रजा अभवन्, यः कामयेत, तेजस्वी स्यां, सर्वत्र विभवेयं, सर्वत्राविभागः स्यां, दानकामा मे प्रजाः स्युरिति, स एतानजान् कृष्णग्रीवानालभेत, तेजस्वी भवति, सर्वत्र विभवति, सर्वत्राविभागो भवति, दानकामा अस्मै प्रजा भवन्ति, प्राजापत्यं बहुरूपमालभेत पशुकामः, प्राजापत्या वै पशवः प्रजापतिः पशूनां प्रजनयिता, तमेव भागधेयेनोपासरत्, सोऽस्मै पशून् प्रजनयति, बहुरूपो भवति, बहूनि वै पशूनां रूपाणि, पशूनामेवास्मै रूपाण्याप्त्वावरुन्द्धे, याम्यं शुकहरिमालभेत शुण्ठं वा यः कामयेत, यमलोके ऋध्नुयामित्ये,—तेन वै यमोऽमुष्मिल्लोके आर्ध्नोद्, यमोऽमुष्य लोकस्याधिपत्यमानशे, तमेव भागधेयेनोपासरत्, स एनममुष्य लोकस्याधिपत्यं गमयत्ये,—र्ध्नोति वा एतेन यमलोके ऋध्नोति, परे वयसि यद्दृश्यं, ताजग्वै प्रमीयते, शुण्ठो वा भवति शुकहरिर्वा,—यो ह्येतस्य देवतया पशूनां समृद्धः ॥११॥ १८ [८१]

॥ इति मध्यमकाण्डे पशुबन्ध नाम पञ्चमः प्रपाठकः ॥५॥

अथ षष्ठः प्रपाठकः ।

राजसूयः ।

अनुमत्या अष्टाकपालं निर्वपन्ति ये प्रत्यञ्चः शम्यामतिशीयन्ते, तन्नैर्ऋतमेककपाल,—मुमां मुह कृत्वा कुर्वन्ति, नैर्ऋतेन पूर्वेण प्रचरन्ति, दक्षिणा परेत्य स्वकृता इरिण एकोल्मुकं निधाय बिल्वं समिकायाः कोण्डाभ्यां जुहोति ॥ कृष्णा निर्ऋतिर्वेतु स्वाहा ॥ वासः कृष्णं भिन्नान्तं दक्षिणा, पुनरेत्यानुमत्या अष्टाकपालेन प्रचरन्ति, धेनुर्दक्षिणा,—ऽथ ये उदञ्चः शम्यामतिशीयन्ते तानुदङ् परेत्य वल्मीकवपामुद्धृत्य जुहुयात् ॥ इदमहममुष्यामुष्यायणस्य क्षेत्रियमवयजे ॥ तत् पुनरपिदधाति ॥ इदमहममुष्यामुष्यायणस्य क्षेत्रियमपिदधामि ॥ श्वो भूते आदित्येभ्यो भुवद्वद्भ्यो घृते चरुं,—वरो दक्षिणा, श्वो भूते आग्नावैष्णव एकादशकपालो, ऽनड्वान् वामनो दक्षिणा,

[१] तै. १,८,१ । काठ. १५,१ । वा. २९,६०; ३,१०;(९,३५) । काण्व. ३१,४९; ३,११-१९ । शत. ब्रा. ५,२,३,२ । मा. श्रौ. ९,१,१ ।

श्वो भूतेऽग्नीषोमीया एकादशकपालो, हिरण्यं दक्षिणा, श्वो भूत ऐन्द्राग्न एकादशकपालो, ऽनड्वानृषभो दक्षिणा, श्वो भूत आग्नेयोऽष्टाकपालो, माहेन्द्रं दधि, वासः क्षौमं दक्षिणा॥१॥ १-७

ऐन्द्राग्नमेकादशकपालं निर्वपेदाग्नेन्द्रं वा, वैश्वदेवश्चरुः, सौम्यः श्यामाकश्चरुं,—र्द्यावापृथिवीया एककपालो, वत्सः प्रथमजो दक्षिणा, सीरं द्वादशायोगं दक्षिणोष्टारो वानड्वान्॥२॥८

आग्नेयोऽष्टाकपालो, वारुणो यवमयश्चरू, रौद्रो गावीधुकश्चरुं,—रैन्द्रं दधि, धेनुरनड्वाही दक्षिणा,—ऽपां न्ययनादपामार्गानाहरन्ति, तान् त्सक्तून् कृत्वा दक्षिणा परेत्य स्वकृता इरिण एकोल्मुकं निधाय पर्णमयेन स्रुवेण जुहोति ॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिन्द्रस्यौजसा, रक्षोहासि, स्वाहा, हतं रक्षो, ऽवधिष्म रक्षः ॥ वरो दक्षिणा॥ ये देवाः पुरःसदो अग्निनेत्रा रक्षोहणस्ते नोऽवन्तु, ते नः पान्तु, तेभ्यः स्वाहा, ये देवा दक्षिणात्सदो यमनेत्रा रक्षोहणस्ते नोऽवन्तु, ते नः पान्तु, तेभ्यः स्वाहा, ये देवाः पश्चात्सदो मरुन्नेत्रा रक्षोहणस्ते नोऽवन्तु, ते नः पान्तु, तेभ्यः स्वाहा, ये देवा उत्तरात्सदो मित्रावरुणनेत्रा रक्षोहणस्ते नोऽवन्तु, ते नः पान्तु, तेभ्यः स्वाहा, ये देवा उपरिषदोऽवस्वद्वन्तः सोमनेत्रा रक्षोहणस्ते नोऽवन्तु, ते नः पान्तु, तेभ्यः स्वाहे,—दमहं रक्षोऽभिसमूहाम्य,—ग्ने संदह रक्षः, संदग्धं रक्षो, ऽग्नये पुरःसदे स्वाहा, यमाय दक्षिणात्सदे स्वाहा, मरुद्भ्यः पश्चात्सद्भ्यः स्वाहा, मित्रावरुणाभ्यामुत्तरात्सद्भ्यां स्वाहा, सोमायोपरिषदेऽवस्वद्वते रक्षोघ्ने स्वाहा, रथः पञ्चवाही दक्षिणा ॥३॥ ९-१२

अनुमत्यै चरुं, राकायै चरुः, सिनीवाल्यै चरुः, कुह्वै चरुं,—र्धात्रे द्वादशकपालः, पष्ठौही दक्षिणा,—ऽग्नावैष्णव एकादशकपाल, ऐन्द्रावैष्णवश्चरुं,—र्वैष्णवस्त्रिकपालो, वामनो दक्षिणा, सौमापौष्ण एकादशकपाल, ऐन्द्रापौष्णश्चरुः पौष्णश्चरुः, श्यामो दक्षिणा,—ऽग्नये वैश्वानराय द्वादशकपालो, वारुणो यवमयश्चरुं,—र्हिरण्यं चाश्वश्च दक्षिणा ॥४॥ १३

बार्हस्पत्यश्चरुर्ब्रह्मणो गृहे, शितिपृष्ठो दक्षिणै,—न्द्र एकादशकपालो राज्ञो गृहे, ऋषभो

[२] तै. १,८,२; २,६,१ । काठ. १५,१ ।
[३] तै. १,८,७ । काठ. १५,१ । वा. ९,३५,३६,३८ । काण्व. ११,१-४ । शत. ब्रा. ५,२,४,५ । मा. श्रौ. ९,१,१ ।
[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२]
[४] तै. १,८,८ । काठ. १५,३ । शत. ब्रा. ५,२,५ । मा. श्रौ. ९,१,१ ।
[५] तै. १,८,९ । काठ. १५,४ । शत. ब्रा. ५,३,१ । मा. श्रौ. ९,१,१ ।

दक्षिणा,—ऽऽदित्यश्चरुर्महिष्या गृहे, धेनुर्दक्षिणा, नैर्ऋतश्चरुर्नखावपूतानां परिवृक्तया गृहे,
श्येनी वण्डापुस्फुरा दक्षिणा,—ऽऽग्नेयोऽष्टाकपालः सेनान्यो गृहे, हिरण्यं दक्षिणा,—ऽश्विनो
द्विकपालः संग्रहीतुर्गृहे, सुव३त्यौ दक्षिणा, सावित्रोऽष्टाकपालः क्षत्तुर्गृहे, श्येतो दक्षिणा,
वारुणो यवमयो दशकपालः सूतस्य गृहे, बभ्रुर्महानिरष्टो दक्षिणा, मारुतः सप्तकपालो वैश्य-
स्य ग्रामण्यो गृहे, पृश्निः पष्ठौही दक्षिणा, पौष्णश्चरुर्भागदुघस्य गृहे, श्यामो दक्षिणा,
वैष्णवस्त्रिकपालस्तक्षरथकारयोर्गृहे, सर्वायसानि दक्षिणा, रौद्रो गावीधुकश्चरुरक्षावापस्य गृहे
गोविकर्तस्य च,—ऽसिर्वालापितस्थो दक्षिणा शबलो वा त्रिवत्सोऽभिधानी वा केसरपाशा ॥५॥
१४

इन्द्रायांहोमुच एकादशकपालं निर्वपेदि,—न्द्राय सुत्राम्ण एकादशकपाल,—मृषभो दक्षि-
णा, स्वयंरुग्णाया अश्वत्थशाखायाः पात्रं भवत्य,—थ श्वेतां श्वेतवत्सां दुहन्ति, तत् स्वयं
मूर्छति, स्वयं मथ्यते, स्वयंविलीनमाज्यं भवत्य,—थ मैत्राबार्हस्पत्यं हविर्निर्वपन्ति, ये
क्षौदिष्ठास्तण्डुलास्तं बार्हस्पत्यं चरुं शृतं कुर्वन्ति, तत्र तत् पात्रमपिधायाज्यमासिच्य ये स्थवि-
ष्ठास्तण्डुलास्तानावपन्त्यु,—भौ सह शृतौ कुर्वन्ति, मैत्रेण पूर्वेण प्रचरन्त्यं,—श्वो मैत्रस्य दक्षि-
णा, शितिपृष्ठो बार्हस्पत्यस्या,—ऽग्नये गृहपतय आपतन्तानामष्टाकपालं निर्वपेत्, सोमाय व-
नस्पतये श्यामाकं चरुं, सवित्रे प्रसवित्रे सुतीनानामष्टाकपालं, बृहस्पतये वाचस्पतये नवारं
चरु,—मिन्द्राय ज्येष्ठाय हायनानामेकादशकपालं, मित्राय सत्यस्य पतये नाम्बानां चरुं,
वरुणाय धर्मस्य पतये यवमयं चरुं, रुद्राय पशुपतये गावीधुकं चरुम्॥ सविता त्वा प्रसवा-
नां सुवता,—मग्निर्गार्हपत्यानां, सोमो वनस्पतीनां बृहस्पतिर्वाचा,—मिन्द्रो ज्येष्ठानां,
मित्रः सत्यानां, वरुणो धर्मणां, रुद्रः पशूनां, ते देवा असपत्नमिमं सुवध्वममुमामु-
ष्यायणममुष्याः पुत्रममुष्यां विशि महते क्षत्राय महते जानराज्याय, शुक्रज्योतिश्च चित्रज्यो-
तिश्च सत्यज्योतिश्च ज्योतिष्मांश्च सत्यश्च ऋतपाश्चात्यंहा ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेण-
श्चान्तिमित्रश्च दूरेऽमित्रश्च गणं ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः ॥६॥
१५-१६

देवीरापो अपां नपाद्राष्ट्रदाः स्थ, राष्ट्रं दत्त, स्वाहा, देवीरापो अपां नपाद्राष्ट्रदाः स्थ,
राष्ट्रममुष्मै दत्त, वृषोर्मिरसि, वृषसेनोऽस्य,—पां पतिरस्यं,—प्रवहावरीः स्थ, परिवाहिणीः

[६] तै. १,८,९-१० । काठ. १५,४-५ । वा. ९,३९-४०;१०,१८;१७,८०,८२,८३। काण्व. ११,९-१०,२६;१८,८०,
८२,८३। शत. ब्रा. ५,३,२,४;५,३,३,१ । मा. श्रौ. ९,१,१-२ ।
[७] तै. १,८,११ । काठ. १५,६ । वा. १०,१-४ । काण्व. ११,६-७ । शत. ब्रा. ५,३,४,४ । मा. श्रौ. ९,१,२ ।
मै० १९

स्था,—जस्विनीः स्थ, मान्दाः स्थ, व्रजक्षितः स्थ, सूर्यवर्चसः स्थ, सूर्यत्वचसः स्थ,
मरुतामोजः स्थ, वशाः स्थ, शक्वरीः स्थ, विश्वभृतः स्थ जनभृतोऽपामोषधीनां रसः,
श्रविष्ठाः स्थ, राष्ट्रदाः स्थ, राष्ट्रममुष्मै दत्त ॥७॥ १७
देवीरापो मधुमतीः संसृज्यध्वं महि क्षत्रं क्षत्रियाय वन्वानाः ।
अनाधृष्टाः सीदतौजस्वतीर्महि वर्चः क्षत्रियाय दधतीः ॥ १८
अपो देवीर्मधुमतीरगृभ्णामूर्जस्वती राजसूयायाचिताना ।
याभिर्मित्रावरुणा अभ्यषिञ्चं स्ताभिरिन्द्रमनयन्नत्यरातीः ।
अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रम् ॥ १९
शुक्रा वः शुक्रेण पुनामि चन्द्रा वश्चन्द्रेण पुनामि ॥ २०
देवो वः सविता पुनात्वच्छिद्रेण पवित्रेण । वसोः सूर्यस्य रश्मिभिः ॥ २१
स्वाहा राजसूयाः ॥ २२
सधमादो द्यु३म्न्या ऊर्जा एका अनाधृष्टा अप३स्यो वसानाः ।
पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वन्तः ॥ २३
रुद्र यत्ते गिरिपरं नाम तस्मिन् हुतमसि, यमेष्टमसि, स्वाहा, सोमा इन्द्रो वरुणो मित्रो
अग्निस्ते देवा धर्मधृतो धर्मं धारयन्तु ॥८॥ २४
क्षत्रस्य योनिरसि, क्षत्रस्योल्बमसि, क्षत्रस्य नाभिरस्या,—वित्तो अग्निर्गृहपति,—रावित्ता
इन्द्रो वृद्धश्रवा, आवित्तौ मित्रावरुणौ धृतव्रता, आवित्ते द्यावापृथिवी ऋतावृधा, आवित्तः
पूषा विश्ववेदा, आवित्ता देव्यदिति,—रावित्तोऽयमसा आमुष्याय३णोऽमुष्याः पु३त्रोऽमुष्यां
विशि महते क्षत्राय महते जानराज्याय,—ष ते जनते राजा, सोमोऽस्माकं ब्राह्मणानां राजे,—
न्द्रस्य वज्रोऽसि वार्त्रघ्न,—स्त्वयायं वृत्रं वध्याच्, शत्रुबाधनाः स्थ, पात प्राञ्चं, पात
प्रत्यञ्चं, पात तिर्यञ्चं, पातान्वञ्चं, पातोर्ध्वं, दिग्भ्य एवैनं पात, मित्रोऽसि, वरुणो-
ऽसि ॥ २५
हिरण्यवर्णमुषसो व्युष्टा अयःस्थूणमुदितौ सूर्यस्य ।

[८] तै. १,८,१२ । काठ. १५,६। वा. १,१२,३१;४,४;१०,४,१,६,७,२०;१,१। काण्व. १,१६,४८;४,५;११,८,५,१३,
२४,३० १,१, । शत. ब्रा. ५,३,४,३,२७,२८;५,३,५,१६ । मा. श्रौ. ९,१,२-३ ।
[९] तै. १,८,१२ । काठ. १५,७ । वा. १०,८,९,२६;२०,१;९,४०;१०,२६,१८ । काण्व. ११,१५-१७,३६;२१,९३,
११,१०,२६,२४ । शत. ब्रा. ५,३,५,२० ।

आरोहथो वरुण मित्र गर्तं ततश्चक्षाथे अदितिं दितिं च ॥९॥ २६
समिधमातिष्ठ, गायत्री त्वा छन्दसामवतु, त्रिवृत्स्तोमो, रथन्तरं साम,—ऽग्निर्देवता,
ब्रह्म द्रविण,—मुग्रामातिष्ठ, त्रिष्टुप्त्वा छन्दसामवतु, पञ्चदशः स्तोमो, बृहत् साम,—न्द्रो
देवता, क्षत्रं द्रविणं, प्राचीमातिष्ठ, जगती त्वा छन्दसामवतु, सप्तदशः स्तोमो, वै-
रूपं साम, विश्वे देवा देवता, विड् द्रविण,—मुदीचीमातिष्ठा,—ऽनुष्टुप्त्वा छन्दसामवत्वे,—
कविंशः स्तोमो, वैराजं साम, मित्रावरुणौ देवता, पुष्टं द्रविण,—मूर्ध्वामातिष्ठ, प
ङ्क्तिस्त्वा छन्दसामवतु, त्रिणवत्रयस्त्रिंशौ स्तोमौ, शाक्वररैवते सामनी, बृहस्पतिर्देव-
ता, फलं द्रविणं, सोमस्य त्विषिरसि, त्विषिमत्त्वेव मे त्विषिर्भूयात् ॥ २७
प्रत्यस्तं नमुचेः शिरोऽवेष्टा दन्दशूकाः । मृत्योः पाहि दिद्योः पाहि ॥१०॥ २८
अग्नये स्वाहा, सोमाय स्वाहा, सवित्रे स्वाहा, सरस्वत्यै स्वाहा, पूष्णे स्वाहा, बृ-
हस्पतये स्वाहे,—न्द्राय स्वाहा, घोषाय स्वाहा, श्लोकाय स्वाहा,—ऽंशाय स्वाहा, भगाय
स्वाहा, क्षेत्रस्य पतये स्वाहा, सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेस्तेजसेन्द्रस्येन्द्रियेण विश्वेषां त्वा देवानां
क्रतुनाभिषिञ्चामी,—न्द्रस्य योनिरसि, जनयाति शून् पाहि ॥ २९
समाववृत्रन्नधरागुदक्ता अहिं बु३ध्न्यमन्वीयमानाः ।
ताः पर्वतस्य वृषभस्य पृष्ठान्नावो वियन्ति सुसिचो न वाणीः ॥ ३०
इन्द्रस्य वज्रोऽसि वाजसनि,—स्त्वयायं वाजं से—,न्मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा
युनज्मि, विष्णोः क्रमोऽसि, सपत्नहा मरुतां प्रसवे जया,—ऽऽप्तं मनः, समिन्द्रियेणे,—ष
वज्रो वाजसातम,—स्तेन नौ पुत्रो वाजं सेत् ॥११॥ ३१
इयुदस्या,—युरस्या,—युर्मे धेहि, युङ्ङसि, वर्चोऽसि, वर्चो मे धेह्यू,—र्गस्यू,—र्जं मयि

[१०] तै. १,८,१३-१४ । काठ. १५,७ । वा. १०,५,१०-१५ । काण्व. ११,१८-२३ । शत. ब्रा. ५,४,१,३-७ । मा.
श्रौ. ९,१,३ ।
[११] तै. १,८,१३-१५ । काठ. १५,७-८ । वा. १०,५,१९,२२,२३,९,५,२२,६,२०,२७;२९,१ । काण्व. ११,१२-१३,
१८,३२,३३;१४,६,३७;३९,१ । शत. ब्रा. ५,३,५,८-९;५,४,२,५ । मा. श्रौ. ९,१,३। [अग्नये स्वाहा । अथर्व.
१८,३२,३३;१४,६,३७;३९,१ । अथर्व. १९,४३,५ । इन्द्राय स्वाहा । अथर्व. १९,४,३,६। समाववृत्र० (ता
१९,४३,१ । सोमाय स्वाहा । अथर्व. १९,४३,५ । इन्द्राय स्वाहा । अथर्व. १९,२,४२। विष्णोः क्रमोऽसि सपत्नहा । अथर्व
अधरागुदीचीरावृ०) न वाणीः (पुराणीः) । अथर्व. १९,२,४१। विष्णोः क्रमोऽसि सपत्नहा । अथर्व
१०,५,२५-३५]
[१२] तै. १,८,१५-१६;१०,२;१४,२ । काठ. १५,८ । वा. १०,५,२५-२७,२३,२६-२८,२४,२०;२३,६५;२२,६,२०,
२७;३९,१,१२,१४ । काण्व. ११,१२-१३,३३,३५-४०,३४;१३,१५,११,२९;२५,६७;२४,६,३७,३९,१ । [इय-
दस्यायुर्मे धेहि (वाः) । अथर्व. २,१७,४]

धेहि, मित्रोऽसि, वरुणोऽसि, सदसि, समहं विश्वैर्देवै,—र्नमो मात्रे पृथिव्यै, मा मा
माता पृथिवी हिंसीत् ॥ ३२
प्रति त्यन्नाम राज्यमधायि स्वां त३न्वं वरुणोऽसुषोत् ।
शुचेर्मित्रस्य व्रत्या अभूमामन्महि महद्वतस्य नाम ॥ ३३
सर्वे व्राता वरुणस्याभूम नि मित्रयुररतीनतारीत् ।
अशूशुभन्त यज्ञिया ऋतेन नि त्रितो जरिमाणं न आनट् ॥ ३४
स्योनासि सुषदा, स्योनामासीद, सुषदामासीद ॥ ३५
निषसाद धृतव्रतो वरुणः प३स्त्यास्वा । साम्राज्याय सुक्रतुः ॥ ३६
अग्नये स्वाहा, सोमाय स्वाहे,—न्द्रस्यौजसे स्वाहा, मरुतां बलाय स्वाहा ॥ ३७
हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ३८
ब्रह्मा३ंस्त्वं ब्रह्मासि, सवितासि सत्यसवो, ब्रह्मा३ंस्त्वं ब्रह्मासि, मित्रोऽसि सुशेवो,
ब्रह्मा३ंस्त्वं ब्रह्मासी,—न्द्रोऽसि सत्यौजा, ब्रह्मा३ंस्त्वं ब्रह्मासि, वरुणोऽसि विश्वौजाः॥३९
एष वज्र,—स्तेन मे रध्य, दिशो अभ्यभूदयम् ॥ ४०
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यस्मै कं जुहुमस्तन्नो अस्तु॥४१
असा अमुष्य पु३त्रो, ऽमुष्यासौ पुत्रः ॥ ४२
वयं स्याम पतयो रयीणाम् ॥१२॥ ४३
अपां नप्त्रे स्वाहो,—र्जो नप्त्रे स्वाहा,—ऽग्नये गृहपतये स्वाहा॥ सावि३त्रोऽष्टाकपालः, श्येतो
दक्षिणा, सारस्वतश्चरु,—र्धेनुर्दक्षिणा, पौष्णश्चरुः, श्यामो दक्षिणा, बार्हस्पत्यश्चरुः,
शितिपृष्ठो दक्षिणै,—न्द्र एकादशकपाल, ऋषभो दक्षिणा, वारुणो यवमयो दशकपालो,
बभ्रुर्महानिरष्टो दक्षिणा, त्वा३ष्ट्रोऽष्टाकपालो, ऽंसेपाच् शुण्ठोऽधिरूढाकर्णो वा दक्षिणा,—
ऽऽग्ने३योऽष्टाकपालो, हिरण्यमष्टापुडं दक्षिणा, सौम्यश्चरु,—र्बभ्रुर्दक्षिणा, वैष्णवस्त्रिकपालो,

[निषसाद धृतव्रतो०...सुक्रतुः ऋ. १,२५,१० । अग्नये स्वाहा । अथर्व. १९,४३,१ । सोमाय स्वाहा ।
अथर्व. १९,४३,५ । इन्द्राय स्वाहा । अथर्व. १९,४३,६ । हंसः शुचिषद्वसु०... ऋतम् । ऋ. ४,४०,५ ।
प्रजापते न त्वदेता०.. ...रयीणाम् । ऋ. १०,१२१, १० । अथर्व. ७,७९,४;८०,३]
[१३] तै. १,८,१६-१७,१९,२० । काठ. १५,८-९ । वा. १०,२३;२९,६० । काण्व. ११,३३;३१,४९ । शत. ब्रा. ५,
४,५,६ । मा. श्रौ. ९,१,५]

वामनी दक्षिणा,—ऽऽग्नेयोऽष्टाकपालो, हिरण्यं दक्षिणा, बार्हस्पत्यश्चरुः, शितिपृष्ठो दक्षि-
णा,—न्द्र एकादशकपाल, ऋषभो दक्षिणा, वैश्वदेवश्चरुः, पिशङ्गो दक्षिणा, मैत्रावरुण्या-
मिक्षा, वशा दक्षिणा,—ऽऽग्नेयोऽष्टाकपालः, सौम्यश्चरुः, सावित्रो द्वादशकपालो, बार्ह-
स्पत्यश्चरु,—र्वैश्वानरीय द्वादशकपाल,—स्त्वाष्ट्रोऽष्टाकपालो, दक्षिणो रथवाहनवाहो दक्षि-
णा, सारस्वतश्चरुः, पौष्णश्चरु,—र्मैत्रश्चरु,—र्वारुणश्चरु,—रदित्यै चरुः, क्षेत्रस्य पतये चरुः,
सव्यो रथवाहनवाहो दक्षिणा, मारुती पृश्निः, पष्ठौही गर्भिण्यादित्या,—जा मल्हा गर्भिणी
सवित्रे प्रसवित्रे, सतीनानामष्टाकपालोऽश्विभ्यां, पूष्ण एकादशकपालः, सरस्वत्यै सत्यवाचे
चरुर्दण्ड उपानहौ शुष्कदृतिः सा दक्षिणा ॥१३॥ ४४-४५ [८९६]

॥ इति मत्स्यमकाण्डे राजसूयो नाम षष्ठः प्रपाठकः ॥६॥

अथ सप्तमः प्रपाठकः।

अग्निचितिः।

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः। अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १
युक्तेन मनसा वयं देवस्य सवितुः सवे। स्वर्ग्याय शक्त्यै ॥ २
युक्त्वाय सविता देवान्त्स्वर्यतो धिया दिवम्।
बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥ ३
युञ्जते मनः ॥ ४
युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरिः।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ ५
यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः।
यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना ॥ ६
देव सवितः ॥ ७
इमं मे देव सवितर्यज्ञं प्रणय देवायुवम्। वसुविदं सत्राजितं धनजितं स्वर्विदम्।
ऋचा स्तोमं समर्धय गायत्रेण रथन्तरम्। बृहद्गायत्रवर्तनि ॥ ८

[१] मै. ३,१,१-२। तै. ४,१,१। काठ. १५,११,१६,१। वा. ११,१-११,५,१४,३७,२,९,१,३०,१। काण्व. १२,१-- ११,५,१९,३७,२,१०,१ ३४,१। मा. श्रौ. ६,१,१। [युञ्जते मन०.......परिष्टुतिः। ऋ. ५,८१,१। युजे वां ब्रह्म०...तस्थुः। ऋ. १०,१३,१। अथर्व. १८,३,३९। यस्य प्रयाण०...महित्वना। ऋ. ५,८१,३]

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे, नारिरसि, गायत्रेण
छन्दसा पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदाभरा, त्रैष्टुभेन छन्दसा,—ऽभ्रिरसि, नारिरसि,
त्वया वयमग्निं शकेम खनितुं सधस्था आ जागतेन छन्दसा ॥ ९
हस्त आधाय सविता बिभ्रदभ्रिं हिरण्ययीम्।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १०
आनुष्टुभेन छन्दसा ॥१॥ ११
प्रतूर्तं वाजिन्नाद्रव वरिष्ठामनु संवतम्।
दिवि ते जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरित् ॥ १२
युञ्जाथां रासभं युवमस्मिन् यामे वृषण्वसू। अग्निं भरन्ता अस्मयुम् ॥ १३
योगे योगे तवस्तरं वाजे वाजे हवामहे। सखाय इन्द्रमूतये ॥ १४
प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभूरेहि ॥ उर्वन्तरिक्षं वीहि ॥ स्वस्तिगव्यू-
तिरभयानि कृण्वन् पूष्णा सयुजा सह ॥ अग्निं पुरीष्यमङ्गिरस्वदाभरा,—ऽग्निं पुरीष्यमङ्गिरस्वदच्छेमो,
ऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥ अन्वग्निः ॥ १५-१९
आगत्य वाज्यध्वानं सर्वा मृधो विधूनुते। अग्निं सधस्थे महति चक्षुषा निचिकीषति॥ २०
आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम्। भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम्॥ २१
द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षं समुद्रो योनिः।
विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः ॥ २२
उत्क्राम महते सौभगायास्मादास्थानाद् द्रविणोदा वाजिन्।
वयं स्याम सुमतौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः ॥ २३
उदक्रमीद् द्रविणोदा वाज्यर्वाकः सु लोकं सुकृतं पृथिव्याः।
ततः खनेम सुप्रतीकमग्निं स्वो रुहाणा अधि नाक उत्तमे ॥ २४

[देवस्य त्वा० .. हस्ताभ्याम्। अथर्व. १९,५१,१।]
[२] मै. ३,१,३-४। तै. ४,१,२-३। काठ. १६,१-३। वा. ११,११,-२८। काण्व. १२,११-२८। मा. श्रौ. ६,१,१। [योगे-योगे०...मूतये। ऋ. १,३०,७; अथर्व. १९,२४,७;२०,२६,१, सा. १६३,७४३। (अन्वग्निः) प्रत्यग्निरुषसा०। ऋ. ४,१३,१, अथर्व. ७,८२,४-५;१८,१,२७-२८]

आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नं रभसं दृशानम् ॥ २५
आ विश्वतः प्रत्यञ्चं जिघर्म्यरक्षसा मनसा तज्जुषस्व।
मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्हृषाणः ॥ २६
परि वाजपतिः ॥ २७
परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि। धृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् ॥ २८
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ २९
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सधस्थे अग्निं पुरी-
ष्यमङ्गिरस्वत् खनामि, ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतं शिवं प्रजाभ्यो
ऽहिंसन्तं पृथिव्याः सधस्थे अग्निं पुरीष्यमङ्गिरस्वत् खनामः ॥ २ ॥ ३०
अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानम्।
वर्धमानो मह आ च पुष्करे दिवो मात्रया वरिणा प्रथस्व ॥ ३१
शर्म च स्थो वर्म च स्थो अछिद्रे बहुले उभे।
व्यचस्वती संवसेथां भर्तमग्निं पुरीष्यम् ॥ ३२
संवसेथां स्वर्विदा समीची उरसा त्मना। अग्निं भरिष्यन्ती अन्तर्ज्योतिष्मन्तमजस्रमित् ॥ ३३
पुरीष्योऽसि विश्वभरा, अथर्वा त्वा प्रथमो निरमन्थदग्ने ॥ ३४
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः ॥ ३५
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरन्दरम् ॥ ३६

[आ त्वा जिघर्मि०...दृशानम्। ऋ. २,१०,४। आ विश्वतः० जर्हृ (० र्भु) षाणः। ऋ. २,१०,५। परि वाजपति०...दाशुषे। ऋ. ४,१५,३; सा. ३०। परि त्वाग्ने०...भङ्गुरावताम्। ऋ. १०,८७,२२; अथर्व. ७,७१,१;८,३,२२। देवस्य त्वा०। अथर्व. १९,५१,२]
[३] मै. ३,१,५। तै. ४,१,३। काठ. १६,३। वा. ११,२९-३७;१३,२;१५,२२;३८,१७;३,१५;१५,२६;३३,६,३,१४; १२,४२;१५,४६। काण्व. १२,२९-३७;१४,२;१६,२३ ३८,१०;३,४२;१६,२०;३०,६;३,४०;१३,४३;१६,७८। [त्वामग्ने पुष्करा०...वाघतः। ऋ. ६,१६,१३; सा. ९। तमु त्वा दध्यङ्ङ०...पुरन्दरम्। ऋ. ६,१६,१४।

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयं रणे रणे ॥ ३७
सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञं सुकृतस्य योनौ।
देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥ ३८
नि होता होतृषदने विदानस्त्वेषो दीदिवां असदत्सुदक्षः।
अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः ॥ ३९
संसीदस्व महां असि शोचस्व देववीतमः। वि धूममग्ने अरुषं मेध्य सृज प्रशस्त दर्शतम् ॥ ४०
जनिष्व हि जेन्यो अग्रे अह्नां हितो हितेष्वरुषो वनेषु।
दमे दमे सप्त रत्ना दधानोऽग्निर्होता निषसाद यजीयान् ॥ ४१
अयमिह ॥ ४२
इमं स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥ ४३
अयं ते ॥ ३ ॥ ४४
अपो देवीरुपसृजा मधुमतीरयक्ष्माय प्रजाभ्यः।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥ ४५
सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम्।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम् ॥ ४६
सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः।
वासो अग्ने विश्वरूपं संव्ययस्व विभावसो ॥ ४७
उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा।
दृशा च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥ ४८
ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता।

[तमु त्वा पाथ्यो०...रणे। ऋ. ६,१६,१५। सीद होतः स्व०...वयो धाः। ऋ. ३,२९,८। नि होता होतृ०...अग्निः। ऋ. २,९,१। संसीदस्व०...दर्शतम्। ऋ. १,३६,९। अयमिह०...विशेविशे। ऋ. ४,७,१। इमं स्तोम०......तव। ऋ. १,९४,१; अथर्व. २०,१३,३; सा. ६६,१०६४। अयं ते०...... रयिम्। ऋ. ३,२९,१०, अथर्व. ३,२०,१]
[४] मै. ३,१,५-६। तै. ४,१,४। काठ. १६,४। वा. ११,३८—४७। काण्व. १२,३८-४७। मा. श्रौ. ६,१,१। [उदु तिष्ठ०...सुशस्तिभिः। ऋ. ८,२३,५। ऊर्ध्व ऊ षु ण०...महे। ऋ. १,३६,१३। सा. ५७]

ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ४९
संजातो गर्भो असि रोदस्योरग्ने चारुर्विभृता ओषधीषु ।
चित्रः शिशुष्परि तमांꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गाः ॥ ५०
स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीष्यवाहनः ॥ ५१
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी हिꣳसीर्मान्तरिक्षं मा वनस्पतीन् ॥ ५२
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरी३ष्यं मा पाद्यायुषः पुरा ॥ ५३
वृषाग्निꣳ वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आयाहि वीतये ॥ ५४
ऋतꣳ सत्यमृतꣳ सत्यं,—मग्निं पुरीष्यमङ्गिरस्वद्भरामः ॥४॥ ५५
ओषधयः प्रतिगृभ्णीताग्निमेतꣳ शिवमायन्तमभ्यत्र युष्मान् ।
व्यस्यन् विश्वा अनिरा अमीवा निषीदन्नो अप दुर्मतिं जहि ॥ ५६
ओषधयः प्रतिमोदध्वमेनं पुष्पवतीः सुपिप्पलाः ।
अयꣳ वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥ ५७
वि पाजसा पृथुना शोशुचानो बाधस्व रिपून् रक्षसो अमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥ ५८
आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ ५९
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ ६०
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ६१
मित्रः सꣳसृज्या पृथिवीं भूमिं च ज्योतिषा सह ।
सुजातं जातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजाभ्यः ॥ ६२
रुद्राः सꣳसृज्या पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥
६३

[स जातो गर्भो०......वभ्राः । ऋ. १०,१,२ । अग्न आयाहि वीतये । ऋ. ६,१६,१०; सा. १,६६० ।]
[५] मै. ३,१,६ । तै. ४,१,४-५ । काठ. १६,४-५ । वा. ११,४७-५७; ३६,१४-१६। काण्व. १२,४८-५८,३६,१४-१६ । मा. श्रौ. ६,१,२ । [वि पाजसा०...प्रणीतौ । ऋ. ३,१५,१; । आपो हि ष्ठा०...चक्षसे । ऋ. १०, ९,१; अथर्व. १,५,१; सा. १८३७ । यो वः शिवतमो०...मातरः । ऋ. १०,९,२; अथर्व. १,५,२; सा. १८३८ तस्मा अरं गमाम०...च नः । ऋ. १०,९,३; अथर्व. १,५,३; सा. १८३९]

सꣳसृष्टाꣳ वसुभी रुद्रैर्धीरैः कर्मण्या३ं मृदम् । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु ताम् ॥
६४
सिनीवाली सुकपर्दा सुकुरीरा स्वोपशा । सा तुभ्यमदिते मह्योखां ददातु हस्तयोः ॥ ६५
उखां कृणोतु शक्त्या बाहुभ्यामदितिर्धिया ।
माता पुत्रꣳ यथोपस्थे साग्निं बिभर्तु गर्भ आ ॥५॥ ६६
मखस्य शिरोऽसि, वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वद्ध्रुवासि, पृथिव्य-
सि, धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातानस्मै यजमानाय, रुद्रास्त्वा
कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वद्ध्रुवास्य,—न्तरिक्षमसि, धारया मयि प्रजाꣳ रायस्पोषं
गौपत्यꣳ सुवीर्यꣳ सजातानस्मै यजमानाया,—ऽऽदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाङ्गिरस्वद्ध्रुवे,
ध्रुवासि, द्यौरसि, धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातानस्मै यजमानाय,
विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाङ्गिरस्वद्ध्रुवे, ध्रुवासि, दिशोऽसि, धारया
मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातानस्मै यजमानाया,—ऽऽदित्या रास्नास्य,—दितिष्टे
बिलं गृभ्णातु ॥ ६७
कृत्वाय सा महीमुखां मृन्मयीꣳ योनिमग्नये । तां पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति ॥६८
वसवस्त्वा धूपयन्त्वङ्गिरस्व,—द्रुद्रास्त्वा धूपयन्त्वङ्गिरस्व,—दादित्यास्त्वा धूपयन्त्वङ्गिरस्व,—दि-
न्द्रस्त्वा धूपयत्वङ्गिरस्वद्, वरुणस्त्वा धूपयत्वङ्गिरस्वद्, विष्णुस्त्वा धूपयत्वङ्गिरस्वद्, बृहस्पतिष्ट्वा
धूपयत्वङ्गिरस्व,—ददितिष्ट्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत् खनत्ववट, देवानां
त्वा पत्नीर्देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे, धिषणा त्वा देवी विश्वदेव्यवती
पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धामुखे, ग्नास्त्वा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गि-
रस्वच्छ्रपयन्तूखे, वरूत्री त्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत् पचतामुखे,
जनयस्त्वाछिन्नपत्रा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वत् पचन्तूखे ॥ ६९
मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ७०
देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्या ॥ ७१

[६] मै. ३,१,७,८ । तै. ४,१,५-६ । काठ. १६,५-६ । वा. ११,५७-६५;३७,८ । काण्व. १२,५९-६६;३७,८ । मा. श्रौ. ६,१,२ । [मित्रस्य चर्षणी०...स्तमम् । ऋ. ३,५९,६ । देवस्त्वा सविता० । ऋ. १,३१,७; अथर्व. ७,४६,२]

उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम् । अव्यथमाना पृथिव्याशा दिश आपृण ॥ ७२
मित्रैतां त उखां परिददाम्यभित्त्या, एषा मा भेदि ॥ ७३
वसवस्त्वाछृन्दन्तु गायत्रेण छन्दसाङ्गिरस्वद्, रुद्रास्त्वाछृन्दन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वद्-
ख, आदित्यास्त्वाछृन्दन्तु जागतेन छन्दसाङ्गिरस्वद्, विश्वे त्वा देवा वैश्वानरा आछृन्दन्त्वा-
७४
नुष्टुभेन छन्दसाङ्गिरस्वद् ॥६॥
आकूतमग्निं प्रयुजꣳ स्वाहा, मनो मेधामग्निं प्रयुजꣳ स्वाहा, चित्तꣳ विज्ञातमग्निं प्रयुजꣳ
स्वाहा, वाचो विधृतमग्निं प्रयुजꣳ स्वाहा, प्रजापतये मनवे स्वाहा,—ऽग्नये वैश्वानराय स्वाहा॥
७५
विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नꣳ वृणीत पुष्यसे । स्वाहा ॥ ७६
मा सु भित्था मा सु रिषो दृꣳहस्व वीरयस्व सु । अम्ब धृष्णु वीरयस्वाग्निश्चेदं करिष्यथः ॥
७७
दृꣳहस्व देवि पृथिवि स्वस्तये आसुरी माया स्वधया कृतासि ।
जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ॥ ७८
द्रवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः । सहसस्पुत्रो अद्भुतः ॥ ७९
परस्या अधि संवतोऽवरं अभ्यातर । यत्राहमस्मि तं अव ॥ ८०
परमस्याः परावतो रोहिदश्व इहागहि । पुरीष्यः पुरुप्रियो अग्ने त्वं तरा मृधः ॥ ८१
यदग्ने यानि कानि चा ते दारूणि दध्मसि । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ ८२
यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ ८३
रात्रीꣳ रात्रीमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै ।
रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेशा रिषाम ॥ ८४
नाभा पृथिव्याः समिधानो अग्निꣳ रायस्पोषाय बृहते हवामहे ।

[७] मै. ३,१,९ । तै. ४,१,९-१० । काठ. १६,७ । वा. ११,६६-८०,४,८,११,२१,२८,१,३४,१५ । काण्व. १२,६७-८३, ४,९,१४,२९;३०,१;३३,९। मा. श्रौ. ६,१,३। [विश्वो देवस्य०...(स्वाहा) । ऋ. ५,५०,१ । द्रवन्नः सर्पिरा० ...अद्भुतः । ऋ. २,७,६ । परस्या अधि०...अव । ऋ. ८,७५,१५ । यदग्ने या (का) नि कानि०...यविष्ठ्य। ऋ. ८,१०२,२०; अथर्व. १९,६४,३। यदत्त्युप० यविष्ठ्य। ऋ. ८,१०२,२१; अथर्व. १९,६४,३

इरंमदं बृहदुक्थꣳ यजत्रं जेतारमग्निं पृतनासु सासहिम् ॥ ८५
याः सेना अभीत्वरीराव्याधिनीरुगणा उत ।
ये स्तेना ये च तस्करास्ताꣳस्ते अग्नेऽपिदधाम्यास्ये ॥ ८६
ये जनेषु मलिम्लवः स्तेनासस्तस्करा वने ।
ये कक्षेष्वघायवस्ताꣳस्ते दधामि जम्भयोः ॥ ८७
दꣳष्ट्राभ्यां मलिम्लूनग्ने जम्भाभ्यां तस्करं उत ।
हनुभ्याꣳ स्तेनान् भगवस्ताꣳस्त्वं खाद सुखादितम् ॥ ८८
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्यो अस्मान् दिप्साच्च सर्वाꣳस्तान् मस्मसा कुरु ॥ ८९
उदेषां बाहू अतिरमुद्वर्चो अथो बलम् ।
क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वां अहम् ॥ ९०
सꣳशितं मे ब्रह्म सꣳशितꣳ वी३र्यं बलम् ।
सꣳशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः ॥ ९१
ब्रह्म क्षत्रꣳ सयुजा न व्यथेते ब्रह्माह क्षत्रं जिन्वति क्षत्रियस्य ।
क्षत्रं ब्रह्म जिन्वति ब्राह्मणस्य यत् समीची कृणुतो वीर्याणि ॥७॥ ९२
दृशानो रुक्म उर्व्या विभाति दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽभवद्वयोभिर्यदेनं द्यौरजनयत् सुरेताः ॥ ९३
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन्द्रविणोदाः ॥ ९४
विश्वा रूपाणि प्रतिमुञ्चते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे ।
वि नाकमख्यत् सविता वरेण्योऽनु प्रयाणमुषसो विराजति ॥ ९५
सुपर्णोऽसि गरुत्मांꣳ,—स्त्रिवृत्ते शिरो, गायत्रं चक्षु,—र्बृहद्रथन्तरे पक्षौ, स्तोम आत्मा,
छन्दाꣳस्यङ्गानि, यजूꣳषि नाम साम ते तनू,—र्वामदेव्यꣳ यज्ञायज्ञियं पुच्छं, धिष्ण्याः शफाः॥
९६

[सꣳशितं मे०...पुरोहितः । अथर्व. ३,१९,१]
[८] मै. ३,२,१। तै. ४,१,१०;४,२,१। काठ. १६,८। वा. १२,१-७,११-१७,२५;१७,७०;१२,११,३३;१०,२४। काण्व. १३,१-८,१२-१८,२६,१२,३४,१८,७०;११,३४ । मा. श्रौ. ६,१,३। [दृशानो रुक्म०...रेताः। ऋ. १०,४५, ८ । नक्तोषासा०...णोदाः। ऋ. १,९६,५ । विश्वा रूपाणि०...विराजति। ऋ. ५,८१,२;अथर्व. ७,७३,६]

सुपर्णोऽसि गरुत्मान्, दिवं गच्छ, स्वः पत ॥ विष्णोः क्रमोऽसि सपत्नहा, गायत्रं छन्द
आरोह, पृथिवीमनुविक्रमस्व, विष्णोः क्रमोऽस्यभिमातिहा, त्रैष्टुभं छन्द आरोहा,ऽन्तरिक्ष-
मनुविक्रमस्व, विष्णोः क्रमोऽस्यरातीयतो हन्ता, जागतं छन्द आरोह, दिवमनुविक्रमस्व,
विष्णोः क्रमोऽसि शत्रूयतो हन्ता,ऽऽनुष्टुभं छन्द आरोह, दिशोऽनुविक्रमस्व ॥ ९७-९८

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः ॥ ९९

अग्नेऽभ्यावर्तिन्,—अग्ने अङ्गिरः, पुनरूर्जा, सह रय्या ॥ १००

आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् । विशस्त्वा सर्वा वाञ्छन्त्वस्मै राष्ट्राणि धारय ॥ १०१

उदुत्तमं२ वरुण पाशमस्मत् ॥ १०२

अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात् ।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः ॥ १०३

हꣳसः शुचिषत् ॥ १०४

सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् ।
मैनामर्चिषा मा तपसाभिशोचीरन्तरस्या२ शुक्रज्योतिर्विभाहि ॥ १०५

अन्तरग्ने रुचा त्वमुखायाः२ सदने स्वे । तस्यै त्व२ हरसा तपं जातवेदः शिवो भव ॥ १०६

शिवो भूत्वा मह्यमग्ने अथो सीद शिवस्त्वम् ।
शिवाः कृत्वा दिशः सर्वाः स्वं२ योनिमिहासदः ॥८॥ १०७

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जनते स्वाधीः ॥ १०८

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते सद्म विभृतं पुरुत्रा ।
विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं२ यत आबभूथ ॥ १०९

[विष्णोः क्रमोऽसि सपत्नहा । अथर्व. १०,५,२५-३५ । अक्रन्ददग्नि०... ...भात्यन्तः ।
ऋ. १०,४५,४ । आ त्वाहार्षमन्त०...भ्रशत् । ऋ. १०,१७३,१; अथर्व. ६,८७,१ । उदुत्तमं वरुण०...
स्याम । ऋ. १,२४,१५; अथर्व. ७,८३,३; १८,४,६९; सा. ५८९ । अग्ने (प्र) बृहन्नुषसा०...न्यप्राः । ऋ. १०,
१,१ । हꣳसः शुचिषत्० । ऋ. ४,४०,५; तै. सं. १,८,१५,२; ४,२,१,५; तै. आ. १०,१०,२]
[९] मै. ३,२,२ । तै. ४,२,२ । काठ. १६,९ । वा. १२,२८-२९ । काण्व. १३,१९-३० । मा. श्रौ. ६,१,३ । [दिव-
स्परि०...स्वाधीः । ऋ. १०,४५,१ । विद्मा ते अग्ने० । ऋ. १०,४५,२; अथर्व. १,१३,३; १३,३,२१ ।

समुद्रे त्वा नृमणा अ३प्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवा२ समृतस्य योनौ महिषा अगृभ्णन् ॥ ११०

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः ।
वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥ १११

उशिक् पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो निधायि ।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥ ११२

अक्रन्ददग्निः ॥
विश्वस्य जज्ञे भुवनस्य राजा रोदसी अपृणाज्जायमानः ।
वीडुं चिदद्रिमभिनत् परायन् जना यदग्निमयजन्त पञ्च ॥ ११३

नक्तोषासा ॥
यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं२ वस्यो अच्छाभि द्युम्नं देवहितं२ यविष्ठ्य ॥ ११४

आ तं भज सौश्रवसेष्वग्न उक्थ उक्था आभज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनददुज्जनित्वैः ॥ ११५

त्वामग्ने यजमाना अनु द्यून् दूतं कृण्वाना अयजन्त हव्यैः ।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो विवव्रुः ॥ ११६

अस्ताव्यग्निर्नृणा२ सुशेवो वैश्वानर ऋषिभिः सोमगोपाः ।
अद्वेष्ये द्यावापृथिवी हुवे देवा धत्त रयिमस्मे सुवीरम् ॥९॥ ११७

उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवस्त्वं२ सुप्रतीको विभावसुः ॥
११८

प्रेदग्ने ज्योतिष्मान् याहि शिवेभिरर्चिभिष्ट्वम् ।
बृहद्भिर्भानुभिर्भासन् मा हिꣳसीस्तन्वा प्रजाः ॥ ११९

[समुद्रे त्वा नृमणा० । ऋ. १०,४५,३ । श्रीणामुदारो० । ऋ. १०,४५,५ । उशिक्पावको० । ऋ. १०,४५,७ ।
अक्रन्ददग्निः० । ऋ. १०,४५,४ । विश्वस्य जज्ञे (केतु) भुवनस्य० । ऋ. १०,४५,६ । नक्तोषासा० । ऋ. १,
९६,५ यस्ते अद्य० । ऋ. १०,४५,९ । आ तं भज० । ऋ. १०,४५,१० । त्वामग्ने यजमाना० । ऋ. १०,
४५,११ । अस्ताव्यग्निर्नृणा२(०नरा२)० । ऋ. १०,४५,१२]
[१०] मै. ३,२,२ । तै. ४,२,३ । काठ १६,१० । कपि. २५, १ । वा. १२,३०-४३,९-१०,६,२१;३,११ ।

अक्रन्ददग्निः ॥ १२०

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन ॥ १२१

प्र प्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः ॥ १२२

आपो देवीः प्रतिगृभ्णीत भस्मैतत् स्योने कृणुध्वं२ सुरभा उ लोके ।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनत् ॥ १२३

अप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे । गर्भे सञ्जायसे पुनः ॥ १२४

गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि ॥ १२५

प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । संसृज्य मातृभिष्ट्वं ज्योतिष्मान् पुनरासदः ॥ १२६

पुनरासद्य सदनमपश्च पृथिवीमग्ने । शेषे मातुर्यथोपस्थे अन्तरस्या२ शिवतमः ॥ १२७

पुनरूर्जा, सह रय्या ॥ १२८

बोधा मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्वधावः ।
निन्दति त्वो अनु त्वो ववन्द वन्दारुं ते तन्वं२ वन्दे अग्ने ॥ १२९

स बोधि सूरिर्मघवा वसुदावा वसुपतिः ।
युयोध्यस्मद् द्वेषाꣳसि यानि कानि च चकृम ॥१०॥ १३०

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः ।
अदादिदं२ यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ॥ १३१

अग्नेर्भस्मास्य,—अग्नेः पुरीषमसि, सञ्ज्ञानमसि कामधरणं, मयि ते कामधरणं भूयात् ॥ १३२

अयं२ सो अग्निर्यस्मिन् त्सोममिन्द्रः सुतं दधे जठरे वावशानः ।
सहस्रियं२ वाजमत्यं न सप्तिं२ ससवान् त्सं२स्तूयसे जातवेदः ॥ १३३

अग्ने दिवो अर्णमच्छाजिगास्यच्छा देवा ऊचिषे धिष्ण्या ये ।

काण्व. १३,३१-४४,१०-१२,७,२२;३,१ । मा. श्रौ. ६,१,३ । [अक्रन्ददग्नि० । ऋ. १०,४५,४ । समिधाग्निं
दुवस्यत० । ऋ. ८,४४,१ । प्र प्रायमग्निर्भरत० । ऋ. ७,८,४ । अप्स्वग्ने सधिष्टव० । ऋ. ८,४३,९ । गर्भो अस्यो
षधीनां० । अथर्व. ५,२५,७; ६,९५,३ । बोधा मे अस्य० । ऋ. १,१४७,२ । स बोधि सूरिर्मघवा० । ऋ. ५,६,४]
[११] मै. ३,२,३ । तै. ४,२,४-५ । काठ. १६,११ । कपि. २५,२ । वा. १२,४४-४९,४७-६२;३,१४, १२,४६,५,३ ।
काण्व. १३,४६-५८,५८-६२,३,२०;१३,७८;५,३ । मा. श्रौ. ६,१,५ । अपेत वीत वि० । ऋ. १०,१४,९;
अथर्व. १८,१,५५ । अयं२ सो० । ऋ. ३,२२,१ । अग्ने दिवो० । ऋ. ३,२२,३]

याः परस्ताद्रोचनाः सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः ॥ १३४

अग्ने यत्ते दिवि वर्चः पृथिव्यां२ यत् पर्वतेष्वोषधीष्वप्सु ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ १३५

पुरीष्यासो अग्नयः प्रवणेन सजोषसः । जुषन्ता२ हव्यमाहुतमनमीवा इषो महीः ॥ १३६

इडामग्ने पुरुदꣳसं२ सनिं गोः शश्वत्तमं२ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ १३७

अयं ते ॥ चिदसि, तया देवतयाङ्गिरस्वद् ध्रुवा सीद, परिचिदसि, तया देवतयाङ्गिर-
स्वद् ध्रुवा सीद, चितः स्थ, परिचितः स्थो,—र्ध्वचितः श्रयध्वम् ॥ १३८-१३९

समितं२ सङ्कल्पेथा२ सम्प्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि सꣳवसानौ ॥ १४०

सं२ वां मनाꣳसि सं२ व्रता समु चित्तान्याकरम् ।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं२ यजमानाय धेहि ॥ १४१

त्वमग्ने पुरीष्यो रयिमान् पुष्टिमा असि । शिवाः कृत्वा दिशः सर्वाः स्वं२ योनिमिहासदः ॥
१४२

भवतं नः ॥ १४३

मातेव पुत्रं पृथिवी पुरीष्यमग्निं२ स्वे योना अभारुखा ।
तां२ विश्वैर्देवैर्ऋतुभिः सꣳविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु ॥११॥ १४४

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ १४५

नमः सु ते निर्ऋते तिग्मतेजोऽयस्मयꣳ विचृता बन्धमेतम् ।
यमेन त्वं२ यम्या सꣳविदानोत्तमे नाके अधि रोहयैनम् ॥ १४६

यद्दस्य ते ॥ १४७

यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचृत्यम् ।
तं ते विष्याम्यायुषो न मध्यादथा जीवः पितुमद्धि प्रमुक्तः ॥ १४८

[अग्ने यत्ते दिवि० । ऋ. ३,२२,२ । पुरीष्यासो अग्नयः । ऋ. ३,२२,४ । इडामग्ने पुरुदꣳसं० । ऋ. ३,५,११,
६,११,१२,५; सा. ७६ । अयं ते० । ऋ. ३,२९,१०; अथर्व. ३,२०,१ । सꣳवां मना२सि० । अथर्व. ६,९४,१]
[१२] मै. ३,२,४ । तै. ४,२,५ । काठ. १६,१२ । कपि. २५,३ । वा. १२,६२-७१,७३ । काण्व. १३,६३-७२,७४ ।
मा. श्रौ ६,१,५ । [नमः सु ते निर्ऋते० । अथर्व. ६,६३,२-३;६,८४,३-४ । यं ते(यस्ते)देवी० । अथर्व. ६,६३,१]

यदुस्य पारे रजसो महश्चित्रं ज्योतिरजायत । तन्नः पर्षदति द्विषोऽग्ने वैश्वानर ॥ १४९
स्वाहा, भूत्यै नमः ॥ १५०
निवेशनः संगमनो वसूनाꣳ विश्वा रूपाण्यभिचष्टे शचीभिः ।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ॥ १५१
येन देवा ज्योतिषोर्ध्वा उदायन्येनादित्या वसवो येन रुद्राः ।
येनाङ्गिरसो महिमानमानशुस्तेन यन्तु यजमानाः स्वस्ति ॥ १५२
पूषा युनक्तु सविता युनक्तु बृहस्पतिर्वो युनक्तु । अग्नेस्तेजसा सूर्यस्य वर्चसा ॥ १५३
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥ १५४
युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीया इत्सृण्यः पक्वमायत् ॥ १५५
लाङ्गलं पवीरवꣳ सुशेवꣳ सोमपित्सरु ।
उदिद्वपतु गामविं प्रस्थावद्रथवाहनं प्रफर्व्यं च पीवरीम् ॥ १५६
शुनꣳ सुफाला वितुदन्तु भूमिꣳ शुनं कीनाशो अभ्येतु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तनास्मै ॥ १५७
शुनं नरो लाङ्गलेनानड्वद्भिर्भगः फालैः सीरपतिर्मरुद्भिः ।
पर्जन्यो बीजमीरयानो धिनोतु शुनासीरा कृणुतं धान्यं नः ॥ १५८
शुनासीरा प्रकृपतं कृणुतं धान्यं बहु । भूमिरियमृत्वियवती तां फाला उपजिघ्नतु ॥ १५९
घृतेन सीता मधुना समज्यताꣳ विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जो भागं मधुमत् पिन्वमानास्मान्त्सीते पयसाभ्याववृत्स्व ॥ १६०
उद्योजनमन्तर्याममीषां खृगꣳल्यꣳ शत्रम् । अष्टां ताडं प्रतीनाहा उभे मण्डूक्यौ युजे ॥ १६१
उदस्याद्गोजिदश्वजिद्धिरण्यजित् सूनृतया परीवृतः ।

[निवेशनः सङ्गमनो०... पथीनाम् । ऋ. १०,१३९,३; अथर्व. १०,८,४२; तै. सं. ४,२,५,४ । सीरा युञ्जन्त०...सुम्नया (यौ) । ऋ. १०,१०१,४; अथर्व. ३,१७,१; तै. सं. ४,२,५,५ । युनक्त सीरा वि०... पक्वमेयात् । ऋ. १०,१०१,३; अथर्व. ३,१७,२; तै. सं. ४,२,५,५; नि. ५,२८ । लाङ्गलं पवी० । अथर्व. ३,१७,३ । शुनꣳ सु० ...कर्तनास्मै । ऋ. ४,५७,८; अथर्व. ३,१७,५; तै. सं. ४,२,५,६ । शुनं नरो (शुनं वाहाः शुनं नरो)० । ऋ. ४,५७,४; अथर्व. ३,१७,६; तै. आ. ६,६,२ । शुना सीरा० । ऋ. ४,५७,५; अथर्व. ३,१७,७; तै. आ. ६,६,२; नि. ९,४१ । घृतेन सीता० । अथर्व. ३,१७,९]

मै० २१

एकचक्रेण सविता रथेनोर्जो भागं पृथिव्या यात्यापृणन् ॥ १६२
इमामिन्द्र हस्तच्युतिꣳ संच्युतिं जयन्नच्युतिम् । संव्रतिमिन्द्र संगृभितिमूर्जꣳ संपीतिमुल्कवे ॥
१६३
उष्टारयोः पील्वयोरथो आबन्धनीययोः । सर्वेषाꣳ विद्म वो नाम वाहाः कीलालपेशसः ॥
विमुच्यध्वमघ्न्या देवयाना अतारिष्ट तमसस्पारमस्य । ज्योतिरापाम ॥ १२ ॥ १६४-१६५
या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा । मन्वे नु बभ्रूणामहꣳ शतं धामानि सप्त च ॥
१६६
शतꣳ वो अम्ब धामानि सहस्रमुत वो रुहः । अधा शतक्रतो यूयमिमं मे अगदं कृत ॥ १६७
पुष्पवतीः प्रसूवरीः फलिनीरफला उत । अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ॥ १६८
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे । रपाꣳसि विघ्नतीरित रपश्चातयमानाः ॥ १६९
अश्वत्थे वो निवेशनं पर्णे वो वसतिः कृता । गोभाजा इत्किलासथ यत्सनवाथ पूरुषम् ॥
१७०
यदोषधयः संगच्छन्ते राजानः समिता इव । विप्रः स उच्यते कवी रक्षोहामीवचातनः ॥ १७१
निष्कृतिर्नाम वो माताथा त्वमसि संकृतिः । सराः पतत्रिणीः स्थन यदामयति निष्कृत ॥
१७२
अश्वावतीꣳ सोमवतीमूर्जयन्तीमुदोजसम् । आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥ १७३
यदिमा वाजयन्नहमोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ १७४
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष ॥ १७५
अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः । ओषधयः प्राचुच्यवुर्यत् किंच तन्वो रपः ॥
१७६

[१३] तै. ४,२,६ । काठ. १६,१३ । कपि. २५,४ । वा. १२,७५-८९,९१;३५,४ । कण्व. १३,७६-९०,९२;३५,३८ । मा. श्रौ. ६,१,६ । [या ओषधयः (ओषधीः)०...सप्त च । ऋ. १०,९७,१; तै. सं. ४,२,६,१; नि. ९,२८ । शतꣳ वो अम्ब०...कृत । ऋ. १०,९७,२; तै. सं. ४,२,६,१ । (ओषधीः प्रतिमोदध्वं) पुष्पवतीः प्रसूवरीः० । ऋ. १०,९७,३; अथर्व. ८,७,२७; तै. सं. ४,२,६,१ । ओषधीरिति० । ऋ. १०,९७,४; तै. सं. ४,२,६,१; नि. ६,३ । सनेयमश्वं०......पूरुष । अथर्व. ४,९,७ । अश्वत्थे वो०......पूरुषम् । ऋ. १०,९७,५; तै. सं. ४,२,६,२ । यदोषधयः (यत्रौषधीः)०...तनः । ऋ. १०,९७,६; तै. सं. ४,२,६,२ । निष्कृतिर्नाम०... निष्कृत (निष्कृथ) । ऋ. १०,९७,९; तै. सं. ४,५,६,२ । अश्वावतीꣳ सोमा०......तये । ऋ. १०,९७,७; अथर्व. ८,७,२७; तै. सं. ४,२,६,४ । यदिमा वाज०...यथा । ऋ. १०,९७,११; तै. सं. ४,२,६,२; नि. ३,१५ । उच्छुष्मा ओष०...पूरुष । ऋ. १०,९७,८; तै. सं. ४,२,६,३ । अति विश्वा०......रपः । ऋ. १०,९७,१०; तै. सं. ४,२,६,३ ।

यास्त आविविशुर्गात्मानꣳ या आतस्थुः परुः परुः ।
तास्ते यक्ष्मꣳ विबाधन्तामुग्रो मध्यमशीरिव ॥ १७७
साकꣳ यक्ष्म प्रपत चाषेण किकिदीव्या । साकꣳ वातस्य ध्राज्या साकं नश्य निहाकया ॥
१७८
अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।
ताः सर्वाः सꣳविदाना ओषधयः प्रावत वाचं मे ॥ १७९
याः फलिनीर्या अफला अकोशा याश्च कोशिनीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥
१८०
अवपतन्तीरवदन्दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १८१
दिवं ब्रूमो नक्षत्राणि भूमिꣳ यक्षाणि पर्वतान् ।
समुद्रान्नद्यो वेशन्ताꣳस्ते नो मुञ्चन्त्वꣳहसः ॥ १८२
ब्रूमो राजानꣳ वरुणं धातारमुत पूषणम् । त्वष्टारमग्रियं ब्रूमस्ते नो मुञ्चन्त्वꣳहसः ॥ १३ ॥
१८३
मा नो हिꣳसीज्जनिता यः पृथिव्या यो दिवꣳ सत्यधर्मा व्यानट् ।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम ॥ १८४
अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितो अरोहत् ॥ १८५
अग्ने यत्ते शुक्रꣳ यच्चन्द्रꣳ यत् पूतꣳ यच्च यज्ञियम् । तद्देवेभ्यो भरामसि ॥ १८६
इषमूर्जमहमित आदि घृतस्य धारां महिषस्य योनिम् ।
आ नो गोषु विशत्वौषधीषु जहामि सेदिमनिराममीवाम् ॥ १८७
कामं कामदुघे धुक्ष्व प्रजाभ्या ओषधीभ्यः । इन्द्रायाग्नये पूष्णे मित्राय वरुणाय च ॥ १८८

[यास्त० (यस्यौषधीः)......रिव । ऋ. १०,९७,१२ । साकꣳ यक्ष्म० ...कया । ऋ. १०,९७,१३; तै. सं. ४,२,६,४ । अन्या वो०... वाचं मे (वचः) । ऋ. १०,९७,१४; तै. सं. ४,२,६,३ । याः फलिनीर्या०...हसः । ऋ. १०,९७,१५; अथर्व. ६,९६,१;७,११२,१;८,७,२७;१४,२,४५; तै. सं. ४,२,६,४ । अवपतन्तो०... पूरुषः । ऋ. १०,९७,१७; अथर्व. ६,१०९,२; तै. सं. ४,२,६,५ । दिवं ब्रूमो०... हसः । अथर्व. ११,६,१० । ब्रूमो राजानꣳ०...हसः । अथर्व. ११,६,२-३ । ते नो मुञ्चन्त्वꣳहसः । ऋ. १०, ९७,१५; अथर्व. ११,६,१-८,१०-११]

[१४] मै. ३,२,५ । तै. ४,२,७ । काठ. १६,१४ । कपि. २५,५ । वा. १२,१०२-११३,७२;१३,४;१३,१,३;२५,१० -१३; २७,२५-२६;३२,६-७ । कण्व. १३,१०२-११२,७३;१४४;२५,१,३;२७,१४-१७;२९,३३-३६ । मा. श्रौ. ६,१,६ । [मा नो(मा) हिꣳसीज्जनिता० ... । ऋ. १०,१२१,९ तै. सं. ४,२,७,१ । कस्मै देवाय० ... । अथर्व. ४,२,१-८]

अग्ने तव श्रवो वयो महि भ्राजन्त्यर्चयो विभावसो ।
बृहद्भानो शवसा वाजमुꣳक्थ्यं दधासि दाशुषे कवे ॥ १८९
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
पुत्रो मातरा विचरन्नुपावस्योभे पृणासि रोदसी ॥ १९०
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिꣳ रयिम् ॥ १९१
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ १९२
ऋतावानं महिषꣳ विश्वदर्शतमग्निꣳ सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥ १९३
दुष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसो महः ।
रातिꣳ वामस्य सुभगां महीमिषं दधासि सानसिं क्रतुम् ॥ १९४
आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥ १९५
सं ते पयाꣳसि समु यन्तु वाजाः संꣳ वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व ॥ १४ ॥ १९६
ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ १९७

[अग्ने तव श्रवो०...कवे । ऋ. १०,१४०,१; सा. १८१६; तै. सं. ४,२,७,१ । पावकवर्चाः०...रोदसी(उभे) । ऋ. १०,१४०,२; सा. १८१७; तै. सं. ४,२,७,३ । इरज्यन्नग्ने०...रयिम् (क्रतुम्) । ऋ. १०,१४०,४; सा. १८१९; तै. सं. ४,२,७,२ । ऊर्जो नपाज्जात०... वामजाताः । ऋ. १०,१४०,३; सा. १८१८; तै. सं. ४,२,७,२ । ऋतावानं महिषꣳ...युगा । ऋ. १०,१४०,६; सा. १८२१; तै. सं. ४,२,७,३ । दुष्कर्तारमध्व० ... क्रतुम् (रयिम्) । ऋ. १०,१४०,५; सा. १८२०; तै. सं. ४,२,७,३ । आप्यायस्व समेतु०...सङ्गथे । ऋ. १,९१,१६; ९,३१,४; तै. सं. ३,२,५,३;४,२,७,४; ताण्ड्य ब्रा. १,५,८ । सं ते पयाꣳसि०...धिष्व । ऋ. १,९१,१८; सा. ६०३; तै. सं. ४,२,७,४]

[१५] मै. ३,२,६ । तै. ४,२,८-९;१२,१४ । काठ. १६,१५-१६ । वा. १३,३-१६,१८-२१,२३,१,२५,१०;३१,३; १५,२१,२३;५,१३,२७;१२,५३;१३,२५;१३,१९,२४,२५;१४,६,१२,१४-१६,२७;१५,५७-५८,६४;१७,४५; ६,३;३६,१५ । कण्व. १४,३-१६,१८-२१,२५,१;२७,१४;२९,३३;१६ ४२,४४;५,१८,३६,६,३;१३,५४;१४, २५-२६;१५,५,१५,१६,३१;१६,७९,८४;२९,५०;३५,१७; मा. श्रौ. ६,१,७ । [ब्रह्म जज्ञानं०...विवः । अथर्व. ४,१,१; ५,६,१]

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १९८
अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १९९
द्रप्सश्चस्कन्द ॥ २००
नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥
२०१
य इषवो यातुधानानां ये वनस्पतीनाम् । येऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ २०२
ये अमी रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥ २०३
कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवां इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ २०४
तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः ॥ २०५
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत् ॥ २०६
उदग्ने तिष्ठ प्रत्यातनुष्वन्यमित्रां ओषतात्तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥ २०७
ऊर्ध्वो भव प्रति विध्याध्यस्मदाविः कृणुष्व दैव्यान्यग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ २०८

[हिरण्यगर्भः समवर्त०... । ऋ. १०,१२१,१; अथर्व. ४,२,७; तै. सं. ४,१,८,३; २,८,२; ताण्ड्य. ९,९,१२; नि. १०,२३ । कस्मै देवाय०... ऋ. १०,१२१,१-९; अथर्व. ४,२,१-८ । द्रप्सश्चस्कन्द पृथिवी० ऋ. १०,१७, ११; अथर्व. १८,४,२८; तै. सं. ३,१,८,३; ४,२,८,२; ९,५; तै. आ. ६,६,१ । नमो अस्तु सर्पेभ्यो०... । ऋ. परि. १५,११ । य (या) इषवो यातु०... नमः । ऋ. परि. १५,१० । ये अमी (येऽदो) रोचने०... नमः । ऋ. परि. १५,९ ये वामी० । व. व. १३,९ । कृणुष्व पाजः०...पिष्ठैः । ऋ. ४,४,१; तै. सं. १,२,१४,१; नि. ६,१२ । तव भ्रमास०... गुल्काः । ऋ. ४,४,२; तै. सं. १,२,१४,१ । प्रति स्पशो०...धर्षीत । ऋ. ४,४,३; तै. सं. १,२,१४,१ । उदग्ने तिष्ठ०...शुष्कम् । ऋ. ४,४,४; तै. सं. १,२,१४,१ । ऊर्ध्वो भव०... शत्रून् । ऋ. ४,४,५; अथर्व. ३,१,३; तै. सं. १,२,१४,२]

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ २०९
अग्नेष्ट्वा तेजसा सादयामि, तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २१०
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥ २११
इन्द्रस्य त्वौजसा सादयामि, तया देवतयाङ्गिरस्वद् ध्रुवा सीद, ध्रुवासि धरुणास्तृता वि-
श्वकर्मणा सुभृता, मा त्वा समुद्र उद्वधीन्मा सुपर्णो,—ऽव्यथमाना पृथिवीं दृꣳह, तेजोऽसि,
तेजो मे यच्छ, पृथिवीꣳ यच्छ, पृथिवीं दृꣳह, पृथिवीं मा हिꣳसीः, पृथिव्या मा पाहि,
ज्योतिरसि, ज्योतिर्मे यच्छा,—ऽन्तरिक्षꣳ यच्छा,—ऽन्तरिक्षं दृꣳहा,—ऽन्तरिक्षं मा हिꣳसी,—र-
न्तरिक्षान्मा पाहि, स्वरसि, स्वर्मे यच्छ, दिवꣳ यच्छ, दिवं दृꣳह, दिवं मा हिꣳसी,—
र्दिवो मा पाहि ॥ २१२
यास्ते अग्न आर्द्रा योनयो याः कुलायिनीर्ये ते अग्न इन्दवो या उ नाभयः ।
ताभिष्ट्वमुभयीभिः सꣳविदानः प्रजानꣳस्त३न्वेह निषीद ॥ २१३
काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥ २१४
या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यै ते देवीष्टके विधेम हविषा वयम्॥१५॥२१५
यास्ते अग्ने सूर्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि ॥ २१६
या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचं नो धेहि बृहस्पते ॥ २१७
विराड् ज्योतिरधारयत्, स्वराड् ज्योतिरधारयत्, सम्राड् ज्योतिरधारयद्, भूरसि भुवनस्य
रेता इष्टका स्वर्गो लोको, मनसा त्वान्वारोहाम्य,—ग्निर्ज्योतिर्ज्योतिरग्नि,—स्तया देवतयाङ्गिरस्वद्
ध्रुवा सीद, भुवरसि, भुवनस्य रेता इष्टका स्वर्गो लोको, वाचा त्वान्वारोहामि, सूर्यो ज्यो-
तिर्ज्योतिः सूर्य,—स्तया देवतयाङ्गिरस्वद् ध्रुवा सीद, बृहस्पतिष्ट्वा सादयतु पृथिव्याः पृष्ठे ज्योति-
ष्मतीꣳ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय, विश्वं ज्योतिर्यच्छा,—ऽग्नि-

[अयमग्निः सहस्रिणः०... रयीणाम् । ऋ. ८,७५,४ तै. सं. २,६ ११,१; ४,४,४,१ । भुवो यज्ञस्य०...हव्यवाहम् । ऋ. १०,८,६; तै. सं. ४,४,४,१; तै. ब्रा. ३,५,७,१ । विधेम हविषा वयम् । अथर्व. १,३१,१]
[१६] मै. ३,२,७ । तै. ४,२,९ । काठ. १६,१६; ३९,३ । वा. १३,१९-३२,५,१५;(१५,६२);११,२,१७,७०; १०,१६-१७; २०,२; १८,४६-४७; ८,३२ । काण्व. १४,११-३४,५,२०,(१६,८३); १३,२; १८,७०; ११,३६-३७, ११,९३ । २०,१६-१७,३१ । मा. श्रौ. ६,१,७

रेऽधिपति,—स्तया देवतयाङ्गिरस्वद् ध्रुवा सीद, विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्यो-
तिष्मतीꣳ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय, विश्वं ज्योतिर्यच्छ,
वायुष्टेऽधिपति,—स्तया देवतयाङ्गिरस्वद् ध्रुवा सीद, परमेष्ठी त्वा सादयतु दिवः पृष्ठे ज्योति-
ष्मतीꣳ विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय, विश्वं ज्योतिर्यच्छ, सूर्य-
स्तेऽधिपति,—स्तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २१८
अषाढासि सहमाना सहस्वारातीꣳ सहस्व पृतनायतः ।
सहस्रवीर्यासि सा मा जिन्व ॥ २१९
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः॥ २२०
मधु नक्तमुतोषसो मधुमत् पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ॥ २२१
मधुमान्नो वनस्पतिर्मधुमं अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ २२२
अपां त्वा सद्मन्त्सादयामि समुद्रस्योद्वर्वतच्छायायां, नमः समुद्राय, नमः समुद्रस्य च-
क्षसे, अनु त्वा दिव्या वृष्टिः सचतां, मा त्वा सूर्योऽभिताप्सीन्माग्निर्वैश्वानरो, ऽच्छिन्नपत्राः
प्रजा अनुवीक्षस्व ॥ २२३
त्रीन्त्समुद्रान्त्समसृपत् स्वर्गानपां पतिर्वृषभ इष्टकानाम् ।
तत्र गच्छ यत्र पूर्वे परेताः पुरीषꣳ वसानः सुकृतस्य लोकम् ॥ २२४
मही द्यौः पृथिवी च न इमꣳ यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः ॥ २२५
इदꣳ विष्णुः ॥ २२६
अव स्मा ते वनस्पते वातो विवात्यग्रमित् । उतो न्विन्द्राय पातवे सुनु सोममुलूखल॥२२७
नकोषासा ॥ २२८
स्मृता देवेभिरमृतेनागादुक्था स्वसाराणि वेदिमस्थात् ।
सर्वं पूर्वेभिरिभिः सꣳविदानो अग्निः पुरीषं इदं तद् कृणोतु ॥ २२९
पृथिवि पृथिव्याꣳ सीद मातुर्मातरि मातः ।

[मधु वाता०...षधीः । ऋ. १,९०,६; तै. सं. ४,२,९,३; तै. आ. १०, १०,२; श. ब्रा. १४,९ ३,११ । मधु नक्तमुतोषसो०......पिता । ऋ. १,९०,७; तै. सं. ४,२,९,३; तै. आ. १०, १०,२; श. ब्रा. १४,९,३,१२ । मधुमान्नो वनस्पति०...गावः । ऋ. १,९०,८; तै. सं. ४,२,९,३; तै. आ. १०,१०,२; श. ब्रा. १४,९,३,१३ । मही द्यौ०...भरीमभि । ऋ. १,२२,१३; तै. सं. ३,३,१०,२; ५,११,३; ४,२,९,३ । इदꣳ विष्णुः० ।... ऋ. १,२२,१७; सा. २२२; १६६९; अथर्व. ७,२६,४; तै. सं. १,२,१३,१; नि. १२,१९ । अव स्मा (स्म) ते । ऋ. ३,२२,७; ७,३,२; सा. १२२० । नक्तोषासा० । ऋ. १,९६,५; तै. सं. ४,१,१०,४; ६,५,२; ७,१२,३]

स्योनासि सुषदा स्योनामासीद सुषदामासीद ॥ २३०
निषसाद धृतव्रतो वरुणः प३स्त्यास्वा । साम्राज्याय सुक्रतुः ॥ २३१
क्रतुं देवानां महिमानमीमहे अग्निꣳ सधस्थे सदनेष्वद्भुतम् ।
वैश्वानरं ब्रह्मणा विश्वव्यचसꣳ स्तोमस्य धामन्निदधे पुरीष्यम् ॥ २३२
न्यग्घुर्मात्रायां कवयो वयोधसो अग्निꣳ सधस्थे सदनेष्वच्युतम् ।
वैश्वानरं ब्रह्मणा विश्वव्यचसꣳ स्तोमस्य धामन्निहितं पुरीष्यम् ॥ २३३
समिध्यमानꣳ समिधा समिन्धते अग्निꣳ सधस्थे सदनेषु सुक्रतुम् ।
वैश्वानरं ब्रह्मणा विश्वव्यचसꣳ स्तोमस्य धामन् पवमानमाभृतम् ॥ १६ ॥ २३४
अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरꣳ वहन्त्याशवः ॥ २३५
युक्ष्वा हि देवहूतमं अश्वं अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ २३६
सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्ये अग्नेः ॥ २३७
ऋचे त्वा, रुचे त्वा, भासे त्वा, ज्योतिषे त्वा,—ऽभूदिदꣳ विश्वस्य भुवनस्य वाजिन-
मग्नेर्वैश्वानरस्य चा,—ऽग्निस्तेजसा तेजस्वान्, रुक्मो वर्चसा वर्चस्वान्, त्सहस्रदा असि,
सहस्राय त्वा ॥ २३८
आदित्यं गर्भं पयसा समङ्ग्धि सहस्रस्य प्रतिमाꣳ विश्वरूपम् ।
परिवृङ्ग्धि हरसा माभिमꣳस्थाः शतायुषं कृणुहि चीयमानः ॥ २३९
वातस्य जूतिꣳ वरुणस्य नाभिमश्वं जज्ञानꣳ सलिलस्य मध्ये ।
शिशुं नदीनाꣳ हरिमद्रिबुध्नमग्ने मा हिꣳसीः परमे व्योमन् ॥ २४०
अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गां मा हिꣳसीरदितिꣳ विराजम् ॥ २४१

[निषसाद धृतव्रतो० । ऋ. १,२५,१०; तै. सं. १,८,१६,१; तै ब्रा. १,७,१०,२,२,६,५,१]
[१७] तै. ४,२,९-१० । काठ. १६,१६-१७ । कपि. २५,८ । वा. १३,३६-४५,४७-५१; ३३,४; १७,९४ । काण्व. १४ ३८-४७,४९-५३; ३२,४; १९,७ । मा. श्रौ. ६,१,७ । [अग्ने युक्ष्वा हि०...शवः । ऋ. ६,१६,४३; सा. २५; १३८१, तै. सं. ४,२,९,५ । युक्ष्वा हि देवहूतमं (मॉ)...सदः । ऋ. ८,७५ १; तै. सं. २,६,११,१ । समिध्यमान्ति (सम्यक्स्र०)...अग्नेः । ऋ. ४,५८,६; तै. सं. ४,२,९,४ । अजोरेश्य (? ह्य)न्न०...मेध्यासः । अथर्व. ४,१४,१; ९,५,१३]

त्वष्टुर्वरुत्रीꣳ वरुणस्य नाभिमविं जज्ञानाꣳ रजसः परस्मात् ।
महीꣳ साहस्रीमसुरस्य मायामग्ने मा हिꣳसीः परमे व्योमन् ॥ २४२
यो अग्निरग्नेस्तपसोऽधि जातः शोकात् पृथिव्या उत वा दिवस्परि ।
येन इमाः प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥ २४३

इमं मा हिꣳसीर्द्विपादं पशुꣳ सहस्राक्षो मेधाय चीयमानो, मयुमारण्यमनु ते दिशामि, तेन चिन्वानस्तन्वं निषीद, मयुं ते शुगृच्छतु, यं द्विष्मस्तं ते शुगृच्छत्वि,—मं मा हिꣳसीरेकशफं पशुं कनिक्रदꣳ वाजिनꣳ वाजिनेषु, गौरमारण्यमनु ते दिशामि, तेन चिन्वानस्तन्वं निषीद, गौरं ते शुगृच्छतु, यं द्विष्मस्तं ते शुगृच्छत्वि,—मꣳ साहस्रꣳ शतधारमुत्सꣳ व्यच्यमानꣳ सलिलस्य मध्ये घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन् ॥ गवयमारण्यमनु ते दिशामि, तेन चिन्वानस्तन्वं निषीद, गवयं ते शुगृच्छतु, यं द्विष्मस्तं ते शुगृच्छत्वि,—मं-मूर्णायुꣳ वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदां त्वष्टुर्देवानां प्रथमं जनित्रमग्ने मा हिꣳसीः परमे व्योमन् ॥ मेषमारण्यमनु ते दिशामि, तेन चिन्वानस्तन्वं निषीद, मेषं ते शुगृच्छतु, यं द्विष्मस्तं ते शुगृच्छत्व,—जो ह्यग्नेरजनिष्ट शोकात्, सो अपश्यज्जनितारमग्ने, तेन देवा देवतामग्रमायꣳ,—स्तेन रोहमायन्नुप मेध्यासः, शरभमारण्यमनु ते दिशामि, तेन चिन्वानस्तन्वं निषीद, शरभं ते शुगृच्छतु, यं द्विष्मस्तं ते शुगृच्छतु ॥१७॥ २४४-२४६

अपां त्वेमन्त्सादयाम्य,—पां त्वोद्मन्त्सादयाम्य,—पां त्वायने सादयाम्य,—पां त्वा ज्योतिषि सादयाम्य,—पां त्वा भस्मनि सादयामि, समुद्रे त्वा सदने सादयाम्य,—र्णवे त्वा सदने सादयामि, सलिले त्वा सदने सादयाम्य,—पां त्वा क्षये सादयाम्य,—पां त्वा सधिषु सादयाम्य,—पां त्वा सदने सादयाम्य,—पां त्वा सधस्थे सादयाम्य,—पां त्वा योनौ सादयाम्य,—पां त्वा पुरीषे सादयाम्य,—पां त्वा पाथसि सादयामि, गायत्रेण त्वा छन्दसा सादयामि, त्रैष्टुभेन त्वा छन्दसा सादयामि, जागतेन त्वा छन्दसा सादयाम्या,—नुष्टुभेन त्वा छन्दसा सादयामि, पाङ्क्तेन त्वा छन्दसा सादयामि ॥१८॥ २४७

अयं पुरो भू,—स्तस्य प्राणो भौवायनो, वसन्तः प्राणायनो, गायत्री वासन्ती, गायत्र्या गायत्रं, गायत्रादुपाꣳशु,—रुपाꣳशोस्त्रिवृत्, त्रिवृतो रथन्तरꣳ, वसिष्ठ ऋषिः, प्रजा-

[१८] मै. ३,२,८ । तै. ४,३,२ । काठ. १६,१८ । कपि. २५,९ । वा. १३,५३ । काण्व. १४,५५ । मा. श्रौ. ६,१,८ । मै० २२

पतिगृहीतया त्वया प्राणं गृह्णामि, प्रजाभ्योऽयं दक्षिणा विश्वकर्मा, तस्य मनो वैश्वकर्मणं, ग्रीष्मो मानसः,—स्त्रिष्टुब् ग्रैष्मी, त्रिष्टुभः स्वारꣳ स्वारादन्तर्यामो, ऽन्तर्यामात् पञ्चदशः, पञ्चदशाद् बृहद्, भरद्वाज ऋषिः, प्रजापतिगृहीतया त्वया मनो गृह्णामि, प्रजाभ्योऽयं पश्चाद् विश्वव्यचा,—स्तस्य चक्षुर्वैश्वव्यचसꣳ, वर्षाणि चाक्षुषाणि, जगती वार्षी, जगत्या ऋक्समं,—मृक्समाच् छुक्रः, शुक्रात् सप्तदशः, सप्तदशाद्वैरूपं, जमदग्निरृषिः, प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि, प्रजाभ्य इदमुत्तरात्स्व,—स्तस्य श्रोत्रꣳ सौवꣳ, शरच्छ्रौत्र्य,—नुष्टुप् शारद्य,—नुष्टुभ ऐडं,—मैडान्मन्थी, मन्थिन एकविꣳशः, एकविꣳशाद्वैराजꣳ, विश्वामित्र ऋषिः, प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि, प्रजाभ्य इयमुपरि मति,—स्तस्या वाङ् मात्या, हेमन्तो वाच्यः, पङ्क्तिर्हैमन्ती, पङ्क्त्या निधनव,—न्निधनवत आग्रायणं, आग्रायणात् त्रिणवत्रयस्त्रिꣳशौ, त्रिणवत्रयस्त्रिꣳशाभ्याꣳ शाक्वररैवते, विश्वकर्मा ऋषिः, प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ॥१९॥ २४८

प्राची दिग्, वसन्त ऋतु,—रग्निर्देवता, ब्रह्म द्रविणं, गायत्री छन्दो, रथन्तरꣳ साम, त्रिवृत् स्तोमः, स उ पञ्चदशवर्तनिः, सानुगा ऋषि,—स्त्र्यविर्वयः, कृतमयानां, पुरोवातो वातः, पितरः पितामहाः परेऽवरे ते नोऽवन्तु, ते नः पान्त्वस्मिन् ब्रह्मण्यस्यां पुरोधायामस्मिन् कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ दक्षिणा दिग्, ग्रीष्म ऋतु,—रिन्द्रो देवता, क्षत्रं द्रविणं, त्रिष्टुप्छन्दो, बृहत्साम, पञ्चदशः स्तोमः, स उ सप्तदशवर्तनिः, सनातना ऋषि,—र्दित्यवाड् वय,—स्त्रेतायानां, दक्षिणाद्वातो वातः, पितरः पितामहाः परेऽवरे ते नोऽवन्तु, ते नः पान्त्वस्मिन् ब्रह्मण्यस्यां पुरोधायामस्मिन् कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ प्रतीची दिग्, वर्षा ऋतु,—र्विश्वे देवा देवता, विड् द्रविणं, जगती छन्दो, वैरूपꣳ साम, सप्तदशः स्तोमः, स उ एकविꣳशवर्तनि,—रहभूना ऋषि,—स्त्रिवत्सो वयो, द्वापरोऽयानां, पश्चाद्वातो वातः, पितरः पितामहाः परेऽवरे ते नोऽवन्तु, ते नः पान्त्वस्मिन् ब्रह्मण्यस्यां पुरोधायामस्मिन् कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ उदीची दिक्, शरदृतु,—र्मित्रावरुणौ देवता, पुष्टं द्रविण,—मनुष्टुप्छन्दो, वैराजꣳ सामैकविꣳशः स्तोमः, स उ त्रिणववर्तनिः, पुराणा ऋषि,—स्तुर्यवाड् वयो, ऽभिभवोऽयाना,—मुत्तराद्वातो वातः, पितरः

[१९] तै. ४,३,२ । काठ. १६,१९ । कपि. २५,९ । वा. १३,५४-५८ । काण्व. १४,५९-६५ ।
[२०] तै. ४,३,३। वा. १५,१०-१९;४,११;१६,६४-६६। काण्व. १६,१६-१७,१९-२०,२२-२३,२५-२६,२८-२९; ४,१६;१७,६४ । आसिन्ब्रह्म०... देवहूतौ (देवहूत्यां स्वाहा) । अथर्व. ५,२४,१-१७]

पितामहाः परेऽवरे ते नोऽवन्तु, ते नः पान्त्वस्मिन् ब्रह्मण्यस्यां पुरोधायामस्मिन् कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ ऊर्ध्वा दिं,—ग्घेमन्तशिशिरा ऋतू, बृहस्पतिर्देवता, फलं द्रविणं, पङ्क्तिश्छन्दः, शाक्वररैवते सामनी, त्रिणवः स्तोमः, स उ त्रयस्त्रिꣳशवर्तनिः, सुपर्णा ऋषिः, पष्ठवाड् वय, आस्कन्दोऽयाना,—मुपरिष्टाद्वातो वातः, पितरः पितामहाः परेऽवरे ते नोऽवन्तु, ते नः पान्त्वस्मिन् ब्रह्मण्यस्यां पुरोधायामस्मिन् कर्मण्यस्यामाशिष्यस्यां देवहूतौ ॥ २० ॥
२४९-२५३ [११४९]

॥ इति मध्यमकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥

अथाष्टमः प्रपाठकः ।

लोकं पृण छिद्रं पृणाथा सीद ध्रुवा त्वम् । इन्द्राग्नी त्वा बृहस्पतिरस्मिन् योना असीषदन् ॥१
ता अस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः । जन्मन्देवानाꣳ विशस्त्रिष्वा रोचने दिवः ॥२
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवꣳ योनिमासीद साध्या ।
उख्यस्य केतुं प्रथमं जुषाणा अश्विनाध्वर्यू सादयतामिह त्वा ॥ ३
कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः ।
अभि त्वा रुद्रा वसवो गृणन्त्विदं ब्रह्म पिपृहि सौभगाय ।
अश्विनाध्वर्यू सादयतामिह त्वा ॥ ४
स्वैर्दक्षैर्दक्षपितेह सीद देवानाꣳ सुम्ने बृहते रणाय ।
पितेवैधि सूनव आ सुशेवः स्वावेशया तन्वा सꣳविशस्व ।
अश्विनाध्वर्यू सादयतामिह त्वा ॥ ५
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ।
अश्विनाध्वर्यू सादयतामिह त्वा ॥ ६
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीꣳ विष्टम्भनीं दिशाम् ।
भुवनस्याधिपत्नीमूर्मिर्द्रप्सो अपामसि । अश्विनाध्वर्यू सादयतामिह त्वा ॥ ७

[१] मै. ३,२,८-९ । तै. ४,३,४ । काठ. १७,१ । कपि. २५,१० । वा. १२,५४-५५;१४,१-५,७;१५,५९-६० । काण्व. १३,५५-५६;१६,८०-८१;१५,१-६ । मा. श्रौ. ६,२,१ । [ता अस्य सूददो०...दिवः। ऋ. ८,६९,३; १,८४,११, अथर्व. २०,१०९,२; सा. १००६; तै. सं. ४,२,४,४; तै. ब्रा. ३,११,६,२ ।]

सजूरृतुभिः, सजूर्विधाभिः, सजूर्देवैः, सजूर्देवैर्वयुनाधै,—रग्नये त्वा वैश्वानराया,—ऽश्विनाध्वर्यू सादयतामिह त्वा, सजूरृतुभिः, सजूर्विधाभिः, सजूर्वसुभिः, सजूरृतुभिः, सजूर्विधाभिः, सजू रुद्रैः, सजूरृतुभिः, सजूर्विधाभिः, सजूरादित्यैः, सजूरृतुभिः, सजूर्विधाभिः, सजूर्विश्वैर्देवैर्वैश्वानरैः, सजूर्देवैर्वयुनाधै,—रग्नये त्वा वैश्वानराया,—ऽश्विनाध्वर्यू सादयतामिह त्वा ॥१॥ ८

प्राणं मे पाह्य,—पानं मे पाहि, व्यानं मे पाहि, चक्षुर्म उर्व्या विभाहि, श्रोत्रं मे श्लोकया,—ऽपः पिन्वौ,—षधीर्जिन्व, द्विपादव, चतुष्पात् पाहि, दिवो वा वृष्टिमेरय, क्षत्रꣳ, वयो, मयन्दं छन्दो, विष्टम्भो वयो, ऽधिपतिश्छन्दो, मूर्धा वयः, प्रजापतिश्छन्दो, विश्वकर्मा वयः, परमेष्ठी छन्द,—स्त्र्यविर्वय,—स्त्रिष्टुप्छन्दो, दित्यवाड् वयो, विराट् छन्दः, पञ्चाविर्वयो गायत्री छन्द,—स्त्रिवत्सो वय, उष्णिहा छन्द,—स्तुर्यवाड् वयो, ऽनुष्टुप्छन्दः, पष्ठवाड् वयो, बृहती छन्द, उक्षा वयः, ककुप्छन्द, ऋषभो वयः, सतोबृहती छन्दो, ऽनड्वान्वयः, पङ्क्तिश्छन्दो, धेनुर्वयो, जगती छन्दो, बस्तो वयो, पुथलं छन्दो, वृष्णिर्वयो, विशालं छन्दः, पुरुषो वय,—स्तन्द्रं छन्दः, सिꣳहो वय,—श्छदिश्छन्दो, व्याघ्रो वयो, ऽनाधृष्यं छन्दः ॥२॥ ९

इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतꣳ युवम् ।
पृष्ठेन द्यावापृथिवी आपृणान्तरिक्षं च विबाधस्व ॥ १०

राज्ञ्यसि प्राची दिग्, विराडसि दक्षिणा दिक्, सम्राडसि प्रतीची दिक्, स्वराडस्युदीची दिं,—गधिपत्न्यस्यूर्ध्वा दि,—गायुर्मे पाहि, प्राणं मे पाह्य,—पानं मे पाहि, व्यानं मे पाहि, चक्षुर्मे पाहि, श्रोत्रं मे पाहि, मनो मे पिन्व, वाचं मे जिन्वा,—ऽऽत्मानं मे पाहि, ज्योतिर्मे यच्छ, मा छन्दः, प्रमा छन्दः, प्रतिमा छन्दो, ऽस्रीवीश्छन्दः, पङ्क्तिश्छन्द, उष्णिहा छन्दो, गायत्री छन्द,—स्त्रिष्टुप्छन्दो, जगती छन्दो, ऽनुष्टुप्छन्दो, विराट् छन्दो, बृहती छन्दः, पृथिवी छन्दो, ऽन्तरिक्षं छन्दो, द्यौश्छन्दो, नक्षत्राणि छन्दः, समा छन्दः, कृषिश्छन्दो, वाक्छन्दो, मनश्छन्दो, गौश्छन्दो, ऽश्वश्छन्दो, ऽजा छन्दो, हिरण्यं छन्दो, ऽग्निर्देवता, वातो देवता, सूर्यो देवता, चन्द्रमा देवता,

[१] तै. ४,३,४—५ । काठ. १७,१-२ । कपि. २५,१०,२६,१ । वा. १४,८—१० । काण्व. १५,७-१३ ।
[२] मै. ३,२,९ । तै. ४,३,६-७ । काठ. १७,३ । कपि. २६,२ । वा. १४,११,१३,१८—२२ । काण्व. १५,१४,१६, १७—२४ । मा श्रौ. ६,२,१ ।

वसवो देवता, रुद्रा देवता,—ऽदित्या देवता, मरुतो देवता,—न्द्रो देवता, वरुणो देवता,
बृहस्पतिर्देवता, विश्वे देवा देवता, मूर्धासि राड्, ध्रुवासि धरुणा, धर्त्र्यसि धरण्या,—
ऽऽयुषे त्वा, वर्चसे त्वा, कृष्यै त्वा, क्षेमाय त्वा, यन्त्री राड्, यन्त्र्यसि यमनी,
धर्त्र्यसि धरित्री,—षे त्वो,—र्जे त्वा, रय्यै त्वा, पोषाय त्वा ॥ ३ ॥ ११

आशुस्त्रिवृद्,—भ्रान्तः पञ्चदशो, व्योमा सप्तदशः, प्रतूर्तिरष्टादश,—स्तपो नवदशो,
ऽभीवर्तः सविꣳशो, धरुण एकविꣳशो, वर्चो द्वाविꣳशः, संभरणस्त्रयोविꣳशो, योनि-
श्चतुर्विꣳशो, गर्भाः पञ्चविꣳशं, ओजस्त्रिणवो, विराट् त्रिꣳशः, क्रतुरेकत्रिꣳशो, वि-
धृतिर्द्वात्रिꣳशः, प्रतिष्ठा त्रयस्त्रिꣳशो, ब्रध्नस्य विष्टपं चतुस्त्रिꣳशो, नाकः षट्त्रिꣳशो,
विवर्तोऽष्टाचत्वारिꣳशो, धर्त्रं चतुष्टोमः ॥ ४ ॥ १२

अग्नेर्भागोऽसि, दीक्षाया आधिपत्यं, ब्रह्म स्पृतं, त्रिवृत्स्तोमा, इन्द्रस्य भागोऽसि,
विष्णोराधिपत्यं, क्षत्रं स्पृतं, पञ्चदशः स्तोमो, नृचक्षसां भागोऽसि, धातुराधिपत्यं,
जनित्रꣳ स्पृतꣳ, सप्तदशः स्तोमो, मित्रस्य भागोऽसि, वरुणस्याधिपत्यं, दिवो वृष्टिर्वातः
स्पृतं, एकविꣳशः स्तोमो, ऽदित्या भागोऽसि, पूष्ण आधिपत्य,—मोजः स्पृतं, त्रिणवः
स्तोमो, वसूनां भागोऽसि, रुद्राणामाधिपत्यं, चतुष्पात् स्पृतं, चतुर्विꣳशः स्तोम,
आदित्यानां भागोऽसि, मरुतामाधिपत्यं, गर्भाः स्पृताः, पञ्चविꣳशः स्तोमः, सवितुर्भागो-
ऽसि, बृहस्पतेराधिपत्यꣳ, समीचीर्दिशः स्पृता,—श्चतुष्टोमः स्तोमो, यवानां भागोऽस्य,—
यवानामाधिपत्यं, प्रजाः स्पृता,—श्चतुश्चत्वारिꣳशः स्तोम, ऋभूणां भागोऽसि, विश्वेषां
देवानामाधिपत्यं, भूतं निशान्तꣳ स्पृतं, त्रयस्त्रिꣳशः स्तोमः ॥ ५ ॥ १३

एकयास्तुवत, प्रजा अधीयन्त, प्रजानां पतिरधिपतिरासीत्, तिसृभिरस्तुवत, ब्रह्मासृ-
ज्यत, ब्रह्मणस्पतिरधिपतिरासीत्, पञ्चभिरस्तुवत, भूतान्यसृज्यन्त, भूतानां पतिरधिपति-
रासीत्, सप्तभिरस्तुवत, सप्तऋषयोऽसृज्यन्त, धाताधिपतिरासी,—न्नवभिरस्तुवत, पितरोऽ-
सृज्यन्ता,—ऽदितिरधिपतिरासी,—देकादशभिरस्तुवता,—ऽऽर्तवा असृज्यन्त, ऋतवोऽधिपतय आ-
सꣳ,—स्त्रयोदशभिरस्तुवत, मासा असृज्यन्त, सꣳवत्सरोऽधिपतिरासीत्, पञ्चदशभिरस्तुवत,

[४] तै. ४,३,८ । काठ. १७,४ । कपि. २६,३ । वा. १४,२३ । काण्व. १५,२५—२६ । मा. श्रौ. ६,२,१ । [ब्रध्नस्य विष्टपं । अथर्व. ११,३,५०]
[५] मै. ३,२,१० । तै. ४,३,९ । काठ. १७,४ । कपि. २६,३ । वा. १४,२४—२६ । काण्व. १५,२७-३१ । मा. श्रौ. ६,२,१ ।
[६] मै. ३,२,१० । तै. ४,३,१० । काठ. १७,५ । कपि. २६,४ । वा. १४,२८—३१ । काण्व. १५,३२—३५ । मा. श्रौ. ६,२,१

क्षत्रमसृज्यते,—न्द्रोऽधिपतिरासीत्, सप्तदशभिरस्तुवत, ग्राम्याः पशवोऽसृज्यन्त, बृहस्पतिर-
धिपतिरासी,—न्नवदशभिरस्तुवत, शूद्रार्यौ असृज्येता,—महोरात्रे अधिपत्नी आस्ता,—मेकविꣳ-
शत्यास्तुवते,—कशफमसृज्यत, वरुणोऽधिपतिरासीत्, त्रयोविꣳशत्यास्तुवत, क्षुद्राः पशवो
ऽसृज्यन्त, पूषाधिपतिरासीत्, पञ्चविꣳशत्यास्तुवता,—ऽऽरण्याः पशवोऽसृज्यन्त, वायु-
रधिपतिरासीत्, सप्तविꣳशत्यास्तुवत, वनस्पतयोऽसृज्यन्त, सोमोऽधिपतिरासी,—न्नव-
विꣳशत्यास्तुवत, द्यावापृथिवी व्यैताꣳ, वसवो रुद्रा अनुव्यायꣳ,—स्त उ एवाधिपतय आ-
स,—न्नेकत्रिꣳशतास्तुवत, प्रजा असृज्यन्त, यवाश्चायवाश्चाधिपतय आसꣳ,—स्त्रयस्त्रिꣳशता-
स्तुवत, भूतान्यशाम्यन्, प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥६॥ १४

अग्ने जातान् प्रणुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमना अहेडन् शर्मꣳस्ते स्याम त्रिवरूथा उद्भौ ॥ १५
सहसा जातान् प्रणुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयꣳ स्याम प्रणुदा नः सपत्नान् ॥ १६
चतुश्चत्वारिꣳशो स्तोमो, वर्चो द्रविणꣳ, षोडशी स्तोमा, ओजो द्रविणम् ॥ १७
अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः ।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥ १८

तया देवतयाङ्गिरस्वद् ध्रुवा सीदै,—वश्छन्दो, वरिवश्छन्द, आछच्छन्दो, मनश्छन्दः,
शंभूश्छन्दः, परिभूश्छन्दः, सिन्धुश्छन्दो, व्यचश्छन्दः, समुद्रं छन्दः, सलिलं छन्दः,
ककुप्छन्द,—स्त्रिककुप्छन्दः, काव्यं छन्दो, ऽङ्कुपं छन्दो, ऽक्षरपङ्क्तिश्छन्दः, पदप-
ङ्क्तिश्छन्दो, विष्टारपङ्क्तिश्छन्दः, क्षुरो भृजश्छन्दः, पक्षश्छन्दः, प्रच्छच्छन्दः, सꣳ-
यच्छन्दो, वियच्छन्दो, बृहच्छन्दो, रथन्तरं छन्दो, निकायं छन्दो, वीवधं छन्दो,
गिरश्छन्दो, भृजश्छन्दः, सꣳस्तुप्छन्दो, ऽनुष्टुप्छन्दा, एवश्छन्दो, वरिवश्छन्दो,
वयश्छन्दो, वयस्कृच्छन्दो, विशालं छन्दो, विष्पर्धाश्छन्द,—श्छदिश्छन्दो, दूरोहणं
छन्द,—स्तन्द्रं छन्दो, ऽङ्काङ्कं छन्दः ॥७॥ १९

रश्मिना क्षयाय क्षयं जिन्व, प्रेत्या धर्मणे धर्मं जिन्वा,—ऽन्वित्या दिवे दिवं जिन्व, संधि-

[७] मै. ३,२,१० । तै. ४,३,१२ । काठ. १७,६ । कपि. २६,५ । वा. १५,१-५। काण्व. १६,१—८। मा. श्रौ. ६,१,१।
[अग्ने जातान्प्रणुदा० । अथर्व. ७,३४,१ । सहसा जातान्प्रणु० । अथर्व. ७,३५,१]
[८] मै. ३,३,१ । तै. ४,४,१ । काठ. १७,७ । कपि. २६,६ । वा. १५,६,७,९ । काण्व. १६,९—१२,१४—१५ । मा. श्रौ ६,२,२ ।

नान्तरिक्षायान्तरिक्षं जिन्व, प्रतिधिना पृथिव्यै पृथिवीं जिन्व, विष्टम्भेन वृष्ट्यै वृष्टिं जिन्व,
प्रवयाह्नाऽहर्जिन्वा,—ऽनुयाया रात्र्यै रात्रीं जिन्वो,—शिजा वसुभ्यो वसून् जिन्व, प्रकेतेन रुद्रेभ्यो
रुद्रान् जिन्व, सुदितिनादित्येभ्य आदित्यान् जिन्व, तन्तुना प्रजाभ्यः प्रजा जिन्वो,—जमा पि-
तृभ्यः पितॄन् जिन्व, पृतनाषाहा पशुभ्यः पशून् जिन्व, रेवतौषधीभ्य ओषधीर्जिन्वा,—ऽभि-
जिता युक्तग्राव्णेन्द्रायेन्द्रं जिन्वा,—ऽधिपतिना प्राणाय प्राणं जिन्व, धरुणेनापानायापानं जिन्व,
सꣳसर्पेण चक्षुषे चक्षुर्जिन्व, वयोधसाधीतायाधीतं जिन्व, त्रिवृता त्रिवृते त्रिवृज्जिन्व, प्रवृता
प्रवृते प्रवृज्जिन्व, सवृता सवृते सवृज्जिन्वा,—ऽनुवृतानुवृतेऽनुवृज्जिन्व, विरोहेण विरोहाय विरोहं
जिन्व, प्ररोहेण प्ररोहाय प्ररोहं जिन्व, सꣳरोहेण सꣳरोहाय सꣳरोहं जिन्वा,—ऽनुरोहेणानु-
रोहायानुरोहं जिन्व, वसुकेन वसुकाय वसुकं जिन्व, वेषश्रिया वेषश्रियै वेषश्रीं जिन्व, व-
स्पृष्ट्या वस्पृष्ट्यै वस्पृष्टिं जिन्वा,—ऽऽक्रान्त्याक्रान्त्या उत्क्रान्ति जिन्वो,—त्क्रान्त्योत्क्रान्त्या
आक्रान्ति जिन्व ॥८॥ २०

राडसि, प्राची दिग्, वसवस्ते देवा अधिपतयो, ऽग्निर्हेतीनां प्रतिधर्ता, त्रिवृत्त्वा स्तोमः
पृथिव्याꣳ श्रयत्वा,—ज्यमुक्थमव्यथायै स्तभ्नोतु, रथन्तरꣳ साम प्रतिष्ठित्या अन्तरिक्षा, ऋ-
षयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु, विधर्ता चायमधिपतिश्च, ते त्वा सर्वे
सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु, विराडसि, दक्षिणा दिग्,
रुद्रास्ते देवा अधिपतया, इन्द्रो हेतीनां प्रतिधर्ता, पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु,
प्रउगमुक्थमव्यथायै स्तभ्नोतु, बृहत्साम प्रतिष्ठित्या अन्तरिक्षा, ऋषयस्त्वा प्रथमजा देवेषु दिवो
मात्रया वरिणा प्रथन्तु, विधर्ता चायमधिपतिश्च, ते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे
लोके यजमानं च सादयन्तु, सम्राडसि प्रतीची दि,—गादित्यास्ते देवा अधिपतयः, सोमो
हेतीनां प्रतिधर्ता, सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु, मरुत्वतीयमुक्थमव्यथायै स्तभ्नोतु,
वैरूपꣳ साम प्रतिष्ठित्या अन्तरिक्षा, ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु,
विधर्ता चायमधिपतिश्च, ते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च साद-
यन्तु, स्वराडस्युदीची दिङ्, मरुतस्ते देवा अधिपतयो, वरुणो हेतीनां प्रतिधर्ते,—कविꣳशस्त्वा
स्तोमः पृथिव्याꣳ श्रयतु, निष्केवल्यमुक्थमव्यथायै स्तभ्नोतु, वैराजꣳ साम प्रतिष्ठित्या अ-
न्तरिक्षा, ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु, विधर्ता चायमधिपतिश्च,
ते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्त्व,—धिपत्न्यस्यूर्ध्वा

[९] मै. ३,३,१ । तै. ४,४,२ । काठ. १७,८ । कपि. २६,७ । वा. १५,१०-१४ । काण्व. १६,१६—२० । मा. श्रौ. ६,२,२ ।

दिग्, विश्वे ते देवा अधिपतयो, बृहस्पतिर्हेतीनां प्रतिधर्ता, त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ
पृथिव्याꣳ श्रयताꣳ, वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नुताꣳ, शाक्वररैवते सामनी प्रति-
ष्ठित्या अन्तरिक्षा, ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु, विधर्ता चायम-
धिपतिश्च, ते त्वा सर्वे सꣳविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥९॥ २१

अयं पुरो हरिकेशः सूर्यरश्मि,—स्तस्य रथकृत्स्नश्च रथौजाश्च सेनानीग्रामण्यौ, पुञ्जिकस्थला च
क्रतुस्थला चाप्सरसौ, यातुधाना हेती, रक्षाꣳसि प्रहेति,—स्तेभ्यो नमो अस्तु, ते नो मृडन्तु,
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो, ऽयं दक्षिणा विश्वकर्मा, तस्य रथस्वनश्च
रथेचित्रश्च सेनानीग्रामण्यौ, मेनका च सहजन्या चाप्सरसौ, दड्क्ष्णवः पशवो हेतिः, पौ-
रुषेयो वधः प्रहेति,—स्तेभ्यो नमो अस्तु, ते नो मृडन्तु, ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां
जम्भे दध्मो, ऽयं पश्चा विदद्वसु,—स्तस्य रथप्रोतश्चासमरथश्च सेनानीग्रामण्या, आम्लोचन्ती
च प्रम्लोचन्ती चाप्सरसौ, व्याघ्रा हेतिः, सर्पाः प्रहेति,—स्तेभ्यो नमो अस्तु, ते नो मृड-
न्तु, ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो, ऽयमुत्तरात्सꣳयद्वसु,—स्तस्य सेनजिच्च
सुषेणश्च सेनानीग्रामण्यौ, विश्वाची च घृताची चाप्सरसा आपो हेति,—र्वातः प्रहेति,—स्तेभ्यो
नमो अस्तु, ते नो मृडन्तु, ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मो, ऽयमुपर्यर्वाग्वसु-
सु,—स्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्रामण्या, उर्वशी च पूर्वचित्तिश्चाप्सरसा, अवस्फूर्जद्धे-
ति,—र्विद्युत्प्रहेति,—स्तेभ्यो नमो अस्तु, ते नो मृडन्तु, ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे
दध्मः ॥ १० ॥ २२

प्राच्या त्वा दिशा सादयाम्य,—ग्निना देवेन देवतया गायत्रेण छन्दसाग्नेः शिर उपदधामि,
गायत्रस्य छन्दसोऽग्नेः शीर्ष्णाग्नेः शिर उपदधामि, दक्षिणया त्वा दिशा सादयामी,—न्द्रेण
देवेन देवतया त्रैष्टुभेन छन्दसाग्नेः पक्षमुपदधामि, त्रैष्टुभस्य छन्दसोऽग्नेः पक्षेणाग्नेः पक्षमुपदधा-
मि, प्रतीच्या त्वा दिशा सादयामि, विश्वेभिर्देवेभिर्देवतया जागतेन छन्दसाग्नेः पुच्छमुपदधा-
मि, जागतस्य छन्दसोऽग्नेः पुच्छेनाग्नेः पुच्छमुपदधाम्यु,—दीच्या त्वा दिशा सादयामि, मित्रा-
वरुणाभ्यां देवाभ्यां देवतयानुष्टुभेन छन्दसाग्नेः पक्षमुपदधाम्या,—नुष्टुभस्य छन्दसोऽग्नेः पक्षेणाग्नेः
पक्षमुपदधाम्यू,—र्ध्वया त्वा दिशा सादयामि, बृहस्पतिना देवेन देवतया पाङ्क्तेन छन्दसाग्नेः
पृष्ठमुपदधामि, पाङ्क्तस्य छन्दसोऽग्नेः पृष्ठेनाग्नेः पृष्ठमुपदधामि ॥११॥ २३

[१०] मै. ३,३,१ । तै. ४,४,३ । काठ. १७,९ । कपि. २६,८ । वा. १५,१५—१९;१६,६४—६६ । काण्व. १६, २१—४०;१७,६४। मा. श्रौ. ६,२,२। [ते नो मृडन्तु (०डतु)...दध्मः। अथर्व. ३,२६,१—६;२७,१—६]
[११] मै. ३,३,१ । मा. श्रौ. ६,२,२ ।

मधुश्च माधवश्च वासन्तिका ऋतू, अग्नेरन्तःश्लेषोऽसि ॥ २४
कल्पेतां द्यावापृथिवी कल्पन्तामापा ओषधयः ।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ॥ २५
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी ।
वासन्तिका ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु ॥ २६
शुक्रश्च शुचिश्च ग्रैष्मा ऋतू, नभश्च नभस्यश्च वार्षिका ऋतू, इषश्चोर्जश्च शारदा ऋतू,
सहश्च सहस्यश्च हैमन्तिका ऋतू, तपश्च तपस्यश्च शैशिरा ऋतू, अग्नेरन्तःश्लेषोऽसि ॥ २७
कल्पेतां द्यावापृथिवी कल्पन्तामापा ओषधयः ।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः ॥ २८
ये अग्नयः समनसोऽन्तरा द्यावापृथिवी ।
शैशिरा ऋतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु ॥१२॥ २९

पुरोवातसंनिरस्य,—भ्रसंनिरसि, विद्युत्संनिरसि, स्तनयित्नुसंनिरसि, वृष्टिसंनिरस्य,—
ग्नेर्योन्यस्य,—ग्नेरग्नेर्यान्यासि, वायोर्योन्यसि, वायोर्वायोर्यान्यासि, देवानांऽ योन्यसि, देवानां
देवयान्यसि, विश्वेषां देवानांऽ योन्यसि, विश्वेषां देवानां देवयान्यसि, संयान्यस्य,—न्त-
रिक्षसदस्यन्तरिक्षे सीदा,—ऽम्बा च वुला च नितत्नी च स्तनयन्ती चाभ्रयन्ती च मेघयन्ती च
चुपुणीका, सलिलाय त्वा, संदीकाय त्वा, संतीकाय त्वा, केताय त्वा, सुकेताय त्वा,
संकेताय त्वा, विवस्वते त्वा, दिवे त्वा ज्योतिष, आदित्येभ्यस्त्वा ॥ १३ ॥ ३०
उदपुरा नामास्यन्नेन विष्टा, तां त्वा प्रैम्यात्मना पुरुषैर्गोभिरश्वैरायुषा वर्चसा प्रजया
धनेन सन्या मेधया रय्या पोषेण, मनुष्यास्ते गोप्तारो, ऽग्निरधिपति,—स्तया देवतयाङ्गिरस्वद्
ध्रुवा सीदा,—ऽपराजिता नामासि, ब्रह्मणा विष्टा, तां त्वा प्रैम्यात्मना पुरुषैर्गोभिरश्वैरायुषा
वर्चसा प्रजया धनेन सन्या मेधया रय्या पोषेण, मरुतस्ते गोप्तारो, वायुरधिपति,—स्तया दे-
वतयाङ्गिरस्वद् ध्रुवा सीदा,—ऽधिद्यौर्नामास्य,—मृतेन विष्टा, तां त्वा प्रैम्यात्मना पुरुषैर्गोभिर-

[१२] मै. ३,३,३ । तै. ४,४,११ । काठ. १७,१० । कपि. २६,९ । वा. १३,२५;१४,६,१५—१६,२७;१५,५७। काण्व. १४,२६;१५,५,१६,३१;१६,७९ ।
[१३] तै. ४,४.६ । मा. श्रौ. ६,२,२ ।
[१४] मै. ३,३,४ । तै. ४,४,५,२,११;४.४,३,३ । काठ. १७,१० । कपि. २६,९ । वा. १५,६२-६५;१२,७;२०,१२; १३,१७-१९,२४;१४,११,१४,१५,५८,६४;१७,२-३। काण्व. १६,८३-८५;१३,८;११,७,१४,१७-१९,२४-२५, १५,१५-१६,१८,१-४ । मा. श्रौ. ६,६,१ ।
मै० २१

श्वैरायुषा वर्चसा प्रजया धनेन सन्या मेधया रय्या पोषेण, विश्वे ते देवा गोप्तारः, सूर्योऽधि-
पति,—स्तया देवतयाङ्गिरस्वद् ध्रुवा सीद, प्रजापतिष्ट्वा सादयतु पृथिव्याः पृष्ठे, भूरसि,
भूमिरसि, प्रथोऽसि, पृथि३व्यस्य,—दितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री, पृथि-
वींऽ यच्छ, पृथिवीं दृंह, पृथिवीं मा हिंसीः, पृथिव्या मा पाहि विश्वस्मै प्राणायापानाय
व्यानायोदानाय प्रतिष्ठायै चरित्राया,—ऽग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन,
विश्वकर्मा सादयत्वन्तरिक्षस्य पृ३ष्ठे, ऽन्तरिक्षंऽ यच्छा,—ऽन्तरिक्षं दृंहा,—ऽन्तरिक्षं मा हिंऽ-
सी,—रन्तरिक्षान्मा पाहि विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय,
वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन, परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यच-
स्वतीं प्रथस्वतीं भास्वतींऽ रश्मीवतीमा या दिवं भास्या पृथिवीमो३र्वन्तरिक्षं, दिवंऽ
यच्छ, दिवं दृंह, दिवं मा हिंसी,—र्दिवो मा पाहि विश्वस्मै प्राणायापानाय व्यानायो-
दानाय प्रतिष्ठायै चरित्राय, सूर्यस्त्वाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन ॥ ३१
प्रोथदश्वो न यवसेऽविष्यन् यदा महः संवरणाद्व्यस्थात् ।
आदस्य वातो अनुवाति शोचिरध स्मा ते व्रजनं कृष्णमस्तु ॥ ३२
आयोष्ट्वा सदने सादयामि समुद्रस्योद्मन्नवतश्छायायां, नमः समुद्राय, नमः समुद्रस्य च-
क्षसे, सहस्रस्य मासि, सहस्रस्य प्रमासि, सहस्रस्य प्रतिमासि, सहस्रस्य संमासि,
सहस्रस्योन्मासि, साहस्रोऽसि, सहस्राय त्वे,—मा मे अग्ना इष्टका धेनवः सन्त्वे,—का च शतं
च, शतं च सहस्रं च, सहस्रं चायुतं चा,—ऽयुतं च प्रयुतं च, प्रयुतं चायुतं चा,—ऽर्बुदं च
न्यर्बुदं च, समुद्रश्च मध्यं चा,—ऽन्तश्च परार्धश्चे,—मा मे अग्ना इष्टका धेनवः सन्तु षष्टिः सहस्र-
मयुतमक्षीयमाणा, ऋतुष्ठाः स्थ ऋतावृधो घृतश्चुतो मधुश्चुता ऊर्जस्वतीः पयस्वतीः स्वधायिनीः
कुलायिनी,—स्ता मे अग्ना इष्टका धेनवः सन्तु विराजो नाम कामदुघा अमुत्रामुष्मिंल्लोके ॥ १४ ॥
३३ [११८९]

॥ इति मध्यमकाण्डेऽष्टमः प्रपाठकः ॥८॥

[वर्चसा प्रजया (च) धनेन । ऋ. १.२३,२३; अथर्व. १४,१,४८;१९.३१.७ । प्रोथदश्वो न०...मस्तु । ऋ. ७,३,२; सा. १२२०; सहस्रं च नियुतं चार्बुदं च । ऋ. परि. ३३,७ (द्वि. पा.) ।

अथ नवमः प्रपाठकः ।

आ त्वा वहन्तु हरयः सुचेतसः श्वेतैरश्वैरिह केतुमद्भिः ।
वातजवैर्बलवद्भिर्मनोजवैरस्मिन् यज्ञे मम हव्याय शर्व ॥ १
देवानां च ऋषीणां चासुराणां च पूर्वजम् । महादेवंऽ सहस्राक्षंऽ शिवमावाहयाम्यहम् ॥ २
तत् पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ३
तद्गाङ्गौच्याय विद्महे गिरिसुताय धीमहि । तन्नो गौरी प्रचोदयात् ॥ ४
तत् कुमाराय विद्महे कार्त्तिकेयाय धीमहि । तन्नः स्कन्दः प्रचोदयात् ॥ ५
तत् कराटाय विद्महे हस्तिमुखाय धीमहि । तन्नो दन्ती प्रचोदयात् ॥ ६
तच्चतुर्मुखाय विद्महे पद्मासनाय धीमहि । तन्नो ब्रह्मा प्रचोदयात् ॥ ७
तत् केशवाय विद्महे नारायणाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥ ८
तद्भास्कराय विद्महे प्रभाकराय धीमहि । तन्नो भानुः प्रचोदयात् ॥ ९
तत् सोमराजाय विद्महे महाराजाय धीमहि । तन्नश्चन्द्रः प्रचोदयात् ॥ १०
तज्ज्वलनाय विद्महे वैश्वानराय धीमहि । तन्नो वह्निः प्रचोदयात् ॥ ११
तद्ध्यानजपाय विद्महे महाजपाय धीमहि । तन्नो ध्यानः प्रचोदयात् ॥ १२
तत् परमात्माय विद्महे वैनतेयाय धीमहि । तन्नः सृष्टिः प्रचोदयात् ॥१॥ १३
नमस्ते रुद्र मन्यव उतो त इषवे नमः । नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥ १४
यां ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्त३न्वा शंतमया गिरिशन्ताभिचाकशीहि ॥ १५
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥ १६
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वा इज्जगदयक्ष्मं सुमना असत् ॥ १७
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वान् जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव ॥ १८

[१] काठ. १७,११ । तै. आ. १०,१,५ । मा. श्रौ. ११,५ । [आ त्वा वहन्तु हरयो । ऋ. १,१६,१ ।]
[२] तै. ४,५,१ । काठ. १७,११ । कपि. २७,१ । वा. १६,१-१४ । काण्व. १७,१-१४ । मा. श्रौ. ६.१,४ । [यथा नः०...... असत् । ऋ. १०,१४१,४; अथर्व. ३,२०,६ । अहींश्च सर्वा० (अदृष्टान्स०) । ऋ. १,१९१, ८; अथर्व. ४,९,९]

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।
ये चेमे अभितो रुद्रा दिक्षु श्रिताः सहस्रशोऽवैषांऽ हेड ईमहे ॥ १९
असौ योऽवसर्पति नीलग्रीवो विलोहितः । उतैनं गोपा अदृश्रन्नुतैनमुदहार्यः ॥ २०
उतैनंऽ विश्वा भूतानि स दृष्टो मृडयातु नः ॥ २१
नमो नीलकपर्दाय सहस्राक्षाय मीढुषे । अथो ये अस्य सत्वान इदं तेभ्योऽकरं नमः ॥ २२
नमस्ता आयुधायानातताय धृष्णवे । उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने ॥ २३
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्त इषवः परा ता भगवो वप ॥ २४
अवतत्य धनुष्ट्वंऽ सहस्राक्ष शतेषुधे । प्रशीर्य शल्यानां मुखंऽ शिवो नः सुमना भव ॥ २५
विज्यं धनुः कपर्दिनो विशल्यो बाणवं उत । अनेशन्नस्य या इषव आभुरस्य निषङ्गथिः ॥ २६
परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः । अथो य इषुधिस्तवारे अस्मिन्निधेहि तम् ॥ २७
या ते हेतिर्मीढुष्टम शिवं बभूव ते धनुः । तयास्मान् विश्वतस्त्वमयक्ष्मया परिभुज ॥२॥ २८
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो, नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये
नमो, नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो, नमः शष्पिञ्जराय त्विषीमते पथीनां
पतये नमो, नमो बभ्लुशाय व्याधिनेऽन्नस्य पतये नमो, नमो रुद्रायाततायिने क्षेत्रस्य
पतये नमो, नमो भवस्य हेत्यै जगतस्पतये नमो, नमः सूतायाहन्त्याय वनानां पतये नमो,
नमो रोहिताय स्थपतये वृक्षाणां पतये नमो, नमो मन्त्रिणे वाणिजाय, कक्षाणां पतये नमो,
नमो भुवन्तये वारिवस्कृतायौ,—षधीनां पतये नमो, नमः सहमानाय निव्याधिन, आ-
व्याधिनीनां पतये नमो, नम आक्रन्दयत उच्चैर्घोषाय सत्वानां पतये नमो, नमः कृत्स्नवीता-
य धावते पत्तीनां पतये नमो, नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो, नमो वञ्चते
परिवञ्चते स्तायूनां पतये नमो, नमो निचेरवे परिचराया,—ऽरण्यानां पतये नमो, नमो
निषङ्गिण इषुधिमते तस्कराणां पतये नमो, नमः सृकायिभ्यो जिघांऽसद्भ्यो मुष्णतां पतये नमो,
नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो, नम उष्णीषिणे गिरिचराय कुलुञ्चानां
पतये नमो नमः ॥ ३ ॥ २९
नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो, नमा इषुमद्भ्यो धन्वायिभ्यश्च वो नमो, नम आ-
तन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो, नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो, नमोऽस्यद्भ्यो

[३] तै. ४,५,२-३ । काठ. १७,१२ । कपि. २७,२ । वा. १६,१७-२१ । काण्व १७,१७-२१ ।
[४] तै. ४,५,३-४ । काठ. १७,१३ । कपि. २७,३ । वा. १६,२२-२० ... २-२६ । मा. श्रौ. ६,१,४ ।

विध्यद्भ्यश्च वो नमो, नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो, नमः शयानेभ्य आसीनेभ्यश्च
वो नमो, नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो, नमः सभाभ्यः सभापतिभ्यश्च वो नमो,
नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो, नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो, नम
उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो, नमो गणेभ्यो गणपतिभ्यश्च वो नमो, नमो व्रातेभ्यो व्रात-
पतिभ्यश्च वो नमो, नमः कृत्स्नेभ्यः कृत्स्नपतिभ्यश्च वो नमो, नमो विरूपेभ्यो विश्वरूपेभ्यश्च
वो नमो, नमः सेनाभ्यः सेनानीभ्यश्च वो नमो, नमो रथिभ्यो वरूथिभ्यश्च वो नमो,
नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो, नमो बृहद्भ्योऽर्भकेभ्यश्च वो नमो, नमो युवभ्य
आशीनेभ्यश्च वो नमो नमः ॥ ४ ॥ ३०

नमो ब्राह्मणेभ्यो राजन्येभ्यश्च वो नमो, नमः सूतेभ्यो विश्येभ्यश्च वो नमो, नमस्तक्ष-
भ्यो रथकारेभ्यश्च वो नमो, नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो, नमो निषादेभ्यः पुञ्जि-
ष्ठेभ्यश्च वो नमो, नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो, नमः श्वभ्यः श्वपतिभ्यश्च वो नमो,
नमो भवाय च शर्वाय च, नमो रुद्राय च पशुपतये च, नमो व्युप्तकेशाय च कपर्दिने च,
नमो नीलग्रीवाय च शितिकण्ठाय च, नमः सहस्राक्षाय च शतधन्वने च, नमो गिरिशाय च
शिपिविष्टाय च, नमो मीढुष्टमाय चेषुमते च, नमो ह्रस्वाय च वामनाय च, नमो बृहते
च वर्षीयसे च, नमो वृद्धाय च सुवृध्वने च, नमोऽग्रीयाय च प्रथमाय च, नम आशवे
चाजिराय च, नमः शीभ्याय च शीघ्र्याय च, नम ऊर्म्याय चावस्वन्याय च, नमो द्वीप्या-
य च स्रोतस्याय च ॥ ५ ॥ ३१

नम आशुषेणाय चाशुरथाय च, नमो बिल्मिने च कवचिने च, नमो वर्मिणे च वरूथिने
च, नमः शूराय चावभिन्दते च, नमः श्रुताय च श्रुतसेनाय च, नमो ज्यायसे च कनी-
यसे च, नमः पूर्वजाय चापरजाय च, नमो मध्यमाय चापगल्भाय च, नमो जघन्याय
च बुध्न्याय च, नमः सोभ्याय च प्रतिसराय च, नमो याम्याय च क्षेम्याय च, नमो
ऽवसान्याय च श्लोक्याय च, नम उर्वर्याय च खल्याय च, नमो वन्याय च कक्ष्याय च,
नमः श्रवाय च प्रतिश्रवाय च, नमः पथ्याय च सृत्याय च, नमो नाद्याय च वैशन्ताय
च, नमो नीप्याय च सिद्याय च, नमोऽवट्याय च कूप्याय च, नमः सूद्याय च
सरस्याय च ॥ ६ ॥ ३२

[५] तै. ४,५,४-५ । काठ. १७,१३-१४ । कपि. २७,३-४ । वा. १६,२७-३१ । काण्व. १७,२७-३१ ।
[६] तै. ४,५,६—७ । काठ. १७,१४—१५ । कपि. २७,४—५ । वा. १६,३२—३५ । काण्व १७,३२—३५ ।

नमो दुन्दुभ्याय चाहनन्याय च, नमो धृष्णवे च प्रमृशाय च, नमो निषङ्गिणे चेषुधिमते
च, नमस्तिग्मेषवे चायुधिने च, नमः स्वायुधाय च सुधन्वने च, नमो मेघ्याय च वि-
द्युत्याय च, नमो वर्ष्याय चावर्ष्याय च, नमो वीध्रियाय चातप्याय च, नमो वात्याय
च रेष्मण्याय च, नमो वास्तव्याय च वास्तुपाय च, नमः सोमाय च रुद्राय च, नम-
स्ताम्राय चारुणाय च, नमः शङ्गवे च पशुपतये च, नम उग्राय च भीमाय च, नमो
ऽग्रेवधाय च दूरेवधाय च, नमो हन्त्रे च हनीयसे च, नमो वृक्षेभ्यो हरिकेशेभ्यो, नमस्ता-
राय, नमः शंभवे च मयोभवे च, नमः शंकराय च मयस्कराय च, नमः शिवाय च
शिवतराय च ॥ ७ ॥ ३३

नमः शिखण्डिने च पुलस्तिने च, नमः किꣳशिलाय च क्षेणाय च, नम इरिण्याय च
प्रपथ्याय च, नमो गृह्याय च गोष्ठ्याय च, नमो गेह्याय च तल्प्याय च, नमः कूल्याय
च तीर्थ्याय च, नमः पार्याय चावार्याय च, नमः प्रतरणाय चोत्तरणाय च, नमः प्रवा-
ह्याय च सिकत्याय च, नमः फेन्याय च शष्प्याय च, नमो नीविष्याय च ह्रद्याय च,
नमः काट्याय च गह्वरेष्ठ्याय च, नमः शुष्क्याय च हरित्याय च, नमः पाꣳसव्याय च
रजस्याय च, नमो लोप्याय चोलप्याय च, नम ऊर्म्याय च सूर्म्याय च, नमः पर्णाय च
पर्णशदाय च, नमोऽपगुरमाणाय चाभिघ्नते च, नम आखिदते च प्रखिदते च, नम
आखिदाय च प्रखिदाय च ॥ ८ ॥ ३४

नमो गिरिकेभ्यो देवानाꣳ हृदयेभ्यो, नमो विचिन्वत्केभ्यो, नम आक्षिणकेभ्यो, नम
आनृहतेभ्यः ॥ ३५

द्रापे अन्धसस्पते दरिद्र नीललोहित ।
एषां पुरुषाणामासां प्रजानां मा भेर्मा रुङ् मो च नः किं चनाममत् ॥ ३६
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा नः शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ ३७
या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥ ३८

[७] तै. ४,५,७—८ । काठ. १७,१५ । कपि. २७,४—५ । वा. १६,३५—४१ । काण्व १७,३५—४१ ।
[८] तै. ४,५,८—९ । काठ. १७.१५ । कपि. २७,५ । वा. १६,४२—४६ । काण्व. १७,४२— ४६ ।
[९] तै. ४,५,९—१० । काठ. १७,१६ । कपि. २७,६ । वा. १६,४६—६६ । काण्व. १७,४६-६४ । मा. श्रौ. ६,१,४ ।
[मा भे (मे) मा०......मत् । अथर्व. ६,५७,३ । इमा रुद्राय०......तुरम् । ऋ. १,११४,१ ।]

परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ३९
मीढुष्टम शिवतम शिवो न एधि सुमना भव ।
अवतत्य धनुष्ट्वमक्रुद्धः सुमना भव । पिनाकं बिभ्रदागहि कृत्तिꣳ वसाना उच्चर ॥ ४०
त्र्यम्बक विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्रꣳ हेतयोऽन्यामस्मन्नि वपन्तु ताः ॥ ४१
सहस्राणि सहस्रशो हेतयस्तव बाह्वोः । तासामीशानो मघवन् पराचीना मुखा कृधि ॥ ४२
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
४३
ये अस्मिन् महत्यर्णवे अन्तरिक्षे भवा अधि । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४४
ये नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
४५
ये नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
४६
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
४७
ये भूतानामधिपतयो विशिखासः कपर्दिनः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४८
ये पथां पथिरक्षय ऐलबृदा यो युधः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ४९
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५०
ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ५१
य एतावन्तो वा भूयाꣳसो वा दिशो रुद्रा वितस्थिरे ।
तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥
५२
नमो अस्तु रुद्रेभ्यो ये दिवि येषाꣳ वर्षमिषव,—स्तेभ्यो दश प्राचीर्दश दक्षिणा दश
प्रतीचीर्दशोदीचीर्दशोर्ध्वा,—स्तेभ्यो नमो अस्तु ते नो मृडन्तु, ते यं द्विष्मो यश्च नो द्वेष्टि तमे-
षां जम्भे दध्मो, नमो अस्तु रुद्रेभ्यो ये अन्तरिक्षे येषाꣳ वात इषव,—स्तेभ्यो दश प्राचीर्दश

[परि णो रुद्रस्य० । ऋ. २,३३,१४; अथर्व. ४,२१,७ । ते नोऽवन्तु० दध्मः । अथर्व. ३,२७,१-६ ।]

दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा,—स्तेभ्यो नमो अस्तु, ते नो मृडन्तु, ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मो, नमो अस्तु रुद्रेभ्यो ये पृथिव्याꣳ येषामन्नमिषव,—स्तेभ्यो
दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वा,—स्तेभ्यो नमो अस्तु, ते नो मृडन्तु,
ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥ ९ ॥ ५३
अघोरेभ्यो अथ घोरेभ्यो अघोरघोरतरेभ्यश्च ।
सर्वतः शर्वशर्वेभ्यो नमस्ते रुद्र रूपेभ्यो नमः ॥ ५४
यः पथः समनुयाति स्वर्गं लोकं गामिव सुप्रणीती । तेन त्वं भगवान् याहि पथा ॥ ५५
इमे हिरण्यवर्णाः स्वꣳ योनिमाविशन्ता ॥ ५६
गच्छ त्वं भगवान् पुनरागमनाय पुनर्दर्शनाय सहदेव्याय सहवृषाय सहगणाय सहपार्षदाय
यथाहुताय नमोनमाय नमःशिवाय नमस्ते अस्तु, मा मा हिꣳसीः ॥ आवाहितमावाहित,
नमस्कृत नमस्कृत, विसर्जितꣳ विसर्जित, पथं गच्छ पथं गच्छ, दिवं गच्छ दिवं गच्छ,
स्वर्गच्छ स्वर्गच्छ, ज्योतिर्गच्छ ज्योतिर्गच्छ नमस्ते अस्तु, मा मा हिꣳसीः ॥१०॥ ५७-५८
[११४०]

॥ इति मध्यमकाण्डे नवमः प्रपाठकः ॥ ९ ॥

अथ दशमः प्रपाठकः ।

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि संभृताम् ।
तां न इषमूर्जं धत्त मरुतः सꣳरराणा, अश्मꣳस्ते क्षुं,—न्मयि त ऊ,—र्यं द्विष्मस्तं ते
शुगृच्छतु ॥ १
समुद्रस्य त्वावकयाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥ २
हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावको अस्मभ्यꣳ शिवो भव ॥ ३
उप ज्मन्नुप वेतसेऽवतर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरागहि ।
सेमं नो यज्ञं पावकवर्णꣳ शिवं कृधि ॥ ४
अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ ५

[१०] तै.-आ. १०,१९ ।
[१] मै. ३,३,५-६ । तै. ४,६,१ । काठ. १७,१७ । कपि. १८,१ । वा. १७,१,४-१५,११.८३;३६,२० । काण्व. १८,
१,५—१५,१९,८४;३६,२० । मा. श्रौ. ६,१,४ । [हिमस्य त्वा०......परिव्ययामसि । ऋ. परि. १०,१ ।
अथर्व. ६,१०६,३ । अपामिदं न्ययन०...भव । ऋ. १०,१४२,७; अथर्व. ६,१०६,१; तै. सं. ४,६,१,१ ।]

अग्ने पावक रोचिषा, स नः पावक दीदिवः ॥ ६
पावकया यश्चितयन्त्या कृपा क्षामन् रुरुच उषसो न केतुना ।
आ यो घृणे न ततृषाणो अजरस्तूर्वन्य यामन्नेतशस्य नू रणे ॥ ७
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे नमः ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ ८
द्रुषदे वण्, नृषदे वट्, अप्सुषदे वड्, बर्हिषदे वड्, वनसदे वट्, स्वर्विदे वट् ॥ ९
अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्र दातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे ॥ १०
ये देवा देवानाꣳ यज्ञिया यज्ञियानाꣳ संवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञे अस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य ॥ ११
ये देवा देवेभ्यो अधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य ।
येभ्यो न ऋते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु ॥ १२
प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ १ ॥ १३
अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् । अग्निर्नो वनते रयिम् ॥ १४
य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः ।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराꣳ आविवेश ॥ १५
किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥ १६
किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ १७

[अग्ने पावक रोचिषा । ऋ. ५,२६,१; सा. १५२१; तै. सं. १,३,१४,८;५,५,३;४,६,१,२ । स नः पावक दीदिवः । ऋ. १,१२,१०; तै. सं. १,३,१४,८;५,५,३;४,६,१,३ । पावकया यश्चित०... नू रणे (अजर।)। ऋ. ६,१५,५; तै. सं. ४,६,१,२]

[२] मै. ३,३,७ । तै. सं. ४,६,१—२ । काठ. १८,१—२ । कपि. २८,१ । वा. ८,४५;१७,१६—२३ । काण्व. ८,२६-२८;१८.१६-२४ । मा. श्रौ. ६,२,५ । [अग्निस्तिग्मेन०...रयिम् । ऋ. ६,१६,२८; अथर्व. ८,३,२३, सा. २२, तै. सं. ४,६,१,५, । य इमा विश्वा०...विवेश । ऋ. १०,८१,१, तै. सं. ४,६.२,१। किꣳ स्विद्वनं०। ऋ.१०, ८१,४, तै. सं. ४,६,२,५, तै. ब्रा. २,८,९,६ । किꣳ स्विदासी०...चक्षाः। ऋ. १०,८१,२, तै. सं. ४,६,२,४]
मै० २४

यो विश्वचक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्याममधमत्सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥ १८
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयꣳ यजस्व तन्वं जुषाणः ॥ १९
विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त दैवीरयमुग्रो विहव्यो यथासत् ॥ २०
विश्वकर्मन् हविषा वावृधानः स्वयꣳ यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥ २१
वाचस्पतिꣳ विश्वकर्माणमूतये मनोयुजꣳ वाजे अद्या हुवेम ।
स नो नेदिष्ठा हवना जुजोष विश्वशंभूरवसे साधुकर्मा ॥ २ ॥ २२
चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्वा आदिद् द्यावापृथिवी अप्रथेताम् ॥ २३
विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऋषीन् पर एकमाहुः ॥ २४
त आयजन्त द्रविणा समस्मिन्नृषयः पूर्वे जरितारो न भूना ।
असूर्ता सूर्ते रजसि निषत्ता ये भूतानि समकृण्वन्निमानि ॥ २५
यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान ।
यो देवानां नामधा एक एव तꣳ संप्रश्नं भुवना यन्त्यन्या ॥ २६
परो दिवः पर एना पृथिव्याः परो देवेभ्यो असुरꣳ यदस्ति ।
कꣳ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त सर्वे ॥ २७

[यो विश्वचक्षुरुत (०तश्चक्षु०) एकः । ऋ. १०,८१,३; अथर्व. १३,२,२६; तै. सं. ४,६,२,४, तै. आ. १०, १,३ । या ते धामानि०...जुषाणः (वृधानः)। ऋ. १०,८१.५; तै. सं. ४,६,२,५ । विश्वकर्मन् हविषा वावृधानः०। ऋ. १०,८१,६; सा. १५८९, तै. सं. ४,६,२,६; नि. १०,२७। वाचस्पतिꣳ०...साधुकर्मा। ऋ. १०,८१,७; तै. सं. ४,६,२,५]

[३] तै. ४.६,२ । काठ. १८.२-१ । कपि. २८,२ । वा. १७.२५-३१ । काण्व. १८.२५—३१ । [चक्षुषः पिता०...ताम् । ऋ. १०,८२.१; तै. सं ४,६.२,४ । विश्वकर्मा विमने (०मना)...एकमाहुः । ऋ. १०,८२,२; तै. सं. ४,६,२,१; नि. १०,२६ । त आयजन्त०...निमानि । ऋ. १०,८२,४; तै, सं. ४,६,२,२; नि. ६,१५ । यो नः पिता०...यस्त्यन्या । ऋ. १०,८२,३, अथर्व. २,१.३; तै. सं. ४,६,२,१; तै. आ. १०,१,४ । परो दिव। (दिवा)०...सर्वे (पूर्वे) । ऋ. १०,८२,५, तै. सं. ४,६,२,२]

तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ।
अजस्य नाभा अध्येकमर्पितꣳ यस्मिन् विश्वा भुवनाधि तस्थुः ॥ २८
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भꣳ व्यदधुः पुरुत्रा ॥ २९
न तꣳ विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ ३ ॥ ३०
उदेनमुत्तरं नयाग्ने घृतेनाहुत । समेनꣳ वर्चसा सृज प्रजया च बहुं कृधि ॥ ३१
इन्द्रेमं प्रतरं नय सजातानामसद्वशी । रायस्पोषेण संꣳसृज देवेभ्यो भागदा असत् ॥ ३२
यस्य कुर्मो गृहे हविस्तमग्ने वर्धया त्वम् । तस्मै देवा अधिब्रवन्नयं च ब्रह्मणस्पतिः ॥ ३३
आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः ॥ ३४
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वꣳ युधो नरा इषुहस्तेन वृष्णा ॥ ३५
स इषुहस्तैः स निषङ्गिभिर्वशी संꣳस्रष्टा स युध इन्द्रो गणेन ।
संꣳसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ॥ ३६
बृहस्पते परिदीया रथेन रक्षोहामित्रां अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ ३७
अभि गोत्राणि सहसा गाहमान आदायो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयोध्योऽस्माकꣳ सेना अवतु प्र युत्सु ॥ ३८

[तमिद्गर्भं०...तस्थुः । ऋ. १०,८२,६; तै. सं. ४,६,२,३ । न तं०... श्चरन्ति । ऋ. १०,८२,७; तै. सं. ४,६,२,२; नि. १४,१०]

[४] मै. ३,३,८ । तै. ४,६.३-४ । काठ. १८,३,५ । कपि. २८,३,५ । वा. १७,५०-५२,३३-४१,४३ । काण्व. १८, ५०-५२,३३-४१,४३ । मा. श्रौ. ६,२,५ । [उद्देनमुत्तरं (रां)... कृधि । अथर्व. ६,५,१ । इन्द्रेमं०... असत् । अथर्व. ६,५,२ । यस्य कुर्मो०... । ऋ. १०,१७३,३; अथर्व. ६,५,३;८७,३ । तस्मै देवा असत् । अथर्व. ६,५,२ । यस्य कुर्मो०... । ऋ. १०,१७३,३, अथर्व. ६,८७,३;५,३; तै. ब्रा. २,४,२,९ । आशुः (सोमो)० ... ब्रह्मणस्पतिः । ऋ. १०,१०३,१; सा. १८४९; अथर्व. १९,१३,२, तै. सं. ४,६,४,१; नि. १,१५ । संक्रन्दशिशानो०... । ऋ. १०,१०३,१; सा. १८५०; अथर्व. १९,१३,३; तै. सं. ४,६,४,१ । स इषुहस्तै०... नेना०... वृष्णा । ऋ. १०,१०३,२; सा. १८५०; अथर्व. १९,१३,४; तै. सं. ४.६,४,२ । बृहस्पते परि०...रथानाम् । रस्ता । ऋ. १०,१०३,३, सा. १८५१; अथर्व. १९,१३,४; तै. सं. ४,६,४,१ । अभि गोत्राणि०...युत्सु । ऋ. १०, ऋ. १०,१०३,४, सा. १८५२, अथर्व. १९,१३,८; तै. सं. ४,६,४,१ । १०३,७; सा. १८५५, अथर्व. १९,१३,७; तै. सं. ४,६,४,२]

बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजिज्जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥ ३९
गोत्रभिदं गोविदꣳ वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाता अनुवीरयध्वमिन्द्रꣳ सखायो अनु संꣳरभध्वम् ॥ ४०
इन्द्र एषां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये ॥ ४१
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ ४२
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकꣳ या इषवस्ता जयन्तु ।
अस्माकꣳ वीरा उत्तरे भवन्त्वस्मानु देवा अवता भरेष्वा ॥ ४ ॥ ४३
उदु त्वा ॥ ४४
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात् ॥ ४५
समिद्धे अग्ना अधि मामहान उक्थपत्रा ईड्यो गृभीतः ।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमशमन्त देवाः ॥ ४६
दैव्याय धात्रे देष्ट्रे देवश्रीः श्रीमनाः शतपात् । परिगृह्य यज्ञमायन् ॥ ४७
हरिकेशः सूर्यरश्मिः पुरस्तात् सविता ज्योतिरुदयां अजस्रम् ।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन् विश्वा भुवनानि गोपाः ॥ ४८
देवा देवेष्वध्वर्यन्तो अस्थुर्वीतꣳ शमित्रा शमितꣳ यजध्यै ॥ ४९
तुरीयो यज्ञो यत्र हव्यमेति ततो वाका आशिषो नो जुषन्ताम् ॥ ५०

[बलविज्ञायः०... गोवित् (गोविदन्) । ऋ. १०,१०३.५; सा. १८५३; अथर्व. ८,५,१. १९,१३,५। तै. सं. ४,६,४,२ । गोत्रभिदं०...रभध्वम् । ऋ. १०.१०३.६; सा. १८५४, अथर्व. ६.९७,३;१९,१३,६; तै. सं. ४,६,४,२ । इन्द्र एषां (आसां) नेता०...मध्ये । ऋ. १०,१०३,८; सा. १८५६, अथर्व. १९,१३,९; तै. सं. ४,६.४,३ । इन्द्रस्य वृष्णो०...मुदस्थात् । ऋ. १०,१०३,९, सा. १८५७; अथर्व. १९,१३,१०, तै. सं. ४,६.४,३ । अस्माकमिन्द्रः०...भरेष्वा (इषेषु)]

[५] मै. ३,३,८ । तै. ४,६,३ । काठ. १८,३ । कपि. २८,३,५ । वा. १७,५३-६३,२,१५;१२,३२,५६;१३,५८;१४, १०;१५,६१;२२,३२ । काण्व. १८,५३-६३;२,३०;१२,३२,५७;१६,८२; मा. श्रौ. ६,२,५ । [हरिकेशः सूर्यरश्मिः (सूर्यरश्मिर्हरि०)... गोपाः । ऋ. १०,१३९,१; तै. सं. ४,६,३,३]

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमꣳ रथीनाꣳ वाजानाꣳ सत्पतिं पतिम् ॥ ५१
विमान एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम् ।
स विश्वाचीरभिचष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥ ५२
उक्षा समुद्रे अरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥ ५३
सहस्रहृदयेऽश्ना च वशाचक्षुदुरिद्रिवो देवं आ च वक्षत् ।
देवहृदये आ च वशाचक्षुदुरिद्रिवो देवं आ च वक्षत् ॥ ५४
वाजस्य मा प्रसवेनेति द्वे ॥ ५ ॥ ५५
क्रमध्वमग्निना नाकमुख्यꣳ हस्तेषु बिभ्रतः ।
दिवः पृष्ठꣳ स्वर्गत्वा मिश्रा देवेभिराध्वम् ॥ ५६
प्राचीमनु ॥ ५७
अग्ने प्रेहि प्रथमो देवायतां चक्षुर्देवानामुत मर्त्यानाम् ।
इयक्षमाणा भृगुभिः सह स्वर्यन्तु यजमानाः स्वस्ति ॥ ५८
पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहम् ॥ ५९
स्वर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति रोदसी ।
यज्ञꣳ ये विश्वतोधारꣳ सुविद्वाꣳसो वितेनिरे ॥ ६०
नक्तोषासा,—ऽग्ने सहस्राक्ष ॥ ६१
सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्याः सीद ।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद् दृꣳह ॥ ६२

[इन्द्रं विश्वा० ...पतिम् । ऋ. १,११,१; सा. ३४३;८२७; तै. सं. ४,६,३,४; तै. ब्रा. २,७,१५,५ । विमान (नृचक्षा) एष०...केतुम् । ऋ. १०,१३९,२; तै. सं. ४,६,३,३ । उक्षा समुद्रे (समुद्रो)०...त्यन्तौ । ऋ. ५,४७,३; तै. सं. ४,६,३,३]

[६] मै. ३,३,९ । तै. ४,६,५ । काठ. १८,४ । कपि. २८,४ । वा. १७,६५-७१;१२,१ । काण्व. १८,६५-७८;१३,१ । मा. श्रौ. ६,२,५ । [क्रमध्वमग्निना०...राध्वम् । अथर्व. ४,१४,२ । अग्ने प्रेहि०...स्वस्ति । अथर्व. ४,१४,५ । पृथिव्या अहमुदन्त०... महम् । अथर्व. ४,१४,३ । स्वर्यन्तो नापेक्षन्ता०— वितेनिरे । अथर्व. ४,१४,४ । अथर्व. ४,१४,५ । नक्तोषासा समनसा०। ऋ. १,९६,५; तै. सं. ४,१,१०,४; ६,५,२,७,१२,३]

आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वꣳ योनिमासीद साध्या ।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥ ६३
ताꣳ सवितुर्वरेण्यस्य चित्रामाहꣳ वृणे सुमतिꣳ विश्वजन्याम् ।
यामस्य कण्वो अदुहत् प्रपीनाꣳ सहस्रधारां पयसा महीं गाम् ॥ ६४
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे ।
यस्माद्योनेरुदारिथा यजा तं प्र त्वे समिद्धे जुहुरे हवीꣳषि ॥ ६५
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । ताꣳ शश्वन्ता उपयन्ति वाजाः ॥ ६६
अग्ने तमद्य, सप्त ते अग्ने ॥ ६७
चित्तिं जुहोमि मनसा यथा देवा इहागमन् । वीतिहोत्रा ऋतावृधः ॥ ६८
समुद्रस्य वो वयुनस्य पत्मन् जुहोमि विश्वकर्मणे । विश्वाहादाभ्यꣳ हविः ॥६॥ ६९
[१३०९]

॥ इति मध्यमकाण्डे दशमः प्रपाठकः ॥ १० ॥

अथैकादशः प्रपाठकः ।

शुक्रज्योतिश्च चित्रज्योतिश्च, सत्यज्योतिश्च ज्योतिष्माꣳश्च, सत्यश्च ऋतपाश्चात्यꣳहाः,
ऋतजिच्च सत्यजिच्च, सेनजिच्च सुषेणश्चा,—ऽन्तिमित्रश्च दूरेऽमित्रश्च, गणं ऋतश्च सत्यश्च,
ध्रुवश्च धरुणश्च, धर्ता च विधर्ता च विधारय, ईदृङ् चैतादृङ् च, सदृङ् च प्रतिसदृङ् च,
मितश्च संमितश्च संभरा, ईदृक्षास एतादृक्षास ऊ षु णः, सदृक्षासः प्रतिसदृक्षासा एतन,
मितासश्च संमितासो न ऊतये संभरसो मरुतो यज्ञे अस्मि,—न्निन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो,
यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्नेवमिमꣳ यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो
भवन्तु ॥ १ ॥ १
वाजश्च मे प्रसवश्च मे, प्रयतिश्च मे प्रसितिश्च मे, धीतिश्च मे क्रतुश्च मे, स्वरश्च मे

[ताꣳ सवितुर्वरेण्य०... गाम् । अथर्व. ७,१५,१ । विधेम ते परमे०...हवीꣳषि । ऋ. १,९,३; तै. सं. ४,६,५,४ । प्रेद्धो अग्ने०...वाजाः । ऋ. ७.१,३; सा. १३७५; तै. सं. ४,६,५,४ । अग्ने तमद्य (०याश्वं) ०...ओहैः । ऋ. ४,१०,१; सा. ४३४,१७७७; तै. सं. ४,४,४,७]

[१] तै. ४,६,५ । काठ. १८,६ । कपि. २८,६ । वा. १७,८०-८४,८६ । काण्व. १८,८०-८४.८६ । मा. श्रौ. ६,१,५ ।
[२] मै. ३,४,१ । तै. ४,७,१-२ । काठ. १८,७ । कपि. २८,७ । वा. १८,१-४ । काण्व. १९,१३-१६ । मा. श्रौ. ६,२,५ ।

श्लोकश्च मे, श्रवश्च मे श्रुतिश्च मे, ज्योतिश्च मे स्वश्च मे, प्राणश्च मेऽपानश्च मे, व्यानश्च मेऽसुश्च
मे, चित्तं च म आधीतं च मे, वाक् च मे मनश्च मे, चक्षुश्च मे श्रोत्रं च मे, दक्षश्च मे
बलं च म, ओजश्च मे सहश्च म, आयुश्च मे जरा च म, आत्मा च मे तनूश्च मे, शर्म
च मे वर्म च मे, ऽङ्गानि च मेऽस्थानि च मे, परूꣳषि च मे शरीराणि च मे,
ज्यैष्ठ्यं च म आधिपत्यं च मे, मन्युश्च मे भामश्च मे, ऽमश्च मेऽम्भश्च मे, जेमा च मे
महिमा च मे, वरिमा च मे प्रथिमा च मे, वर्ष्मा च मे द्राघ्मा च मे, वृद्धं च मे वृद्धिश्च
मे ॥ २ ॥
२
सत्यं च मे श्रद्धा च मे, जगच्च मे धनं च मे, वशश्च मे त्विषिश्च मे, क्रीडा च मे मोदश्च
मे, सूक्तं च मे सुकृतं च मे, जातं च मे जनिष्यमाणं च मे, वित्तं च मे वेद्यं च मे,
भूतं च मे भव्यं च म, ऋद्धं च म ऋद्धिश्च मे, सुगं च मे सुपथं च मे, क्लृप्तं च मे
क्लृप्तिश्च मे, मतिश्च मे सुमतिश्च मे, शं च मे मयश्च मे, प्रियं च मेऽनुकामश्च मे,
कामश्च मे सौमनसश्च मे, भगश्च मे द्रविणं च मे, भद्रं च मे श्रेयश्च मे, वसीयश्च मे यशश्च
म, ऋतं च मेऽमृतं च मे, ऽयक्ष्मं च मेऽनामयच्च मे, जीवातुश्च मे दीर्घायुत्वं च मे,
ऽनमित्रं च मेऽभयं च मे, सुखं च मे शयनं च मे, सूषाश्च मे सुदिनं च मे ॥ ३ ॥ ३
यन्ता च मे धर्ता च मे, क्षेमश्च मे धृतिश्च मे, विश्वं च मे महश्च मे, संविच्च मे ज्ञात्रं
च मे, सूश्च मे प्रसूश्च मे, सीरं च मे लयश्च म, ऊर्क् च मे सूनृता च मे, पयश्च मे रसश्च
मे, घृतं च मे मधु च मे, सग्धिश्च मे सपीतिश्च मे, कृषिश्च मे वृष्टिश्च मे, जैत्रं च म औद्भिद्यं
च मे, रयिश्च मे रायश्च मे, पुष्टं च मे पुष्टिश्च मे, विभु च मे प्रभु च मे, पूर्णं च मे
पूर्णतरं च मे, कुयवं च मेऽक्षितिश्च मे, ऽन्नं च मेऽक्षुच्च मे, व्रीहयश्च मे यवाश्च मे,
माषाश्च मे तिलाश्च मे, ऽणवश्च मे प्रियङ्गवश्च मे, श्यामाकाश्च मे नीवाराश्च मे, गोधूमाश्च
मे मसूराश्च मे, खल्वाश्च मे खलकुलाश्च मे ॥ ४ ॥
४
पर्वताश्च मे गिरयश्च मे, सिकताश्च मे वनस्पतयश्च मे, ऽश्मा च मे मृत्तिका च मे,
हिरण्यं च मेऽयश्च मे, सीसं च मे त्रपु च मे, श्यामं च मे लोहितायसं च मे, ऽग्निश्च म

[३] तै. ४,७,२-३ । काठ. १८,८-९ । कपि. २८,८-९ । वा. १८,५-६,८,११ । काण्व. १९,१७-१८,२०,२२ ।
[४] तै. ४,७,३-४ । काठ. १८,९ । कपि. २८,८-९ । वा. १८,७,९,१०,१२ । काण्व. १९,१९,२१,२३-२४ ।
[५] तै. ४,७,५-८ । काठ. १८,१०-११ । कपि. २८,१०-११ । वा. १८,१३-२१ । काण्व. १९,२५-३३ ।

आपश्च म, ओषधयश्च मे वीरुधश्च मे, कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे, ग्राम्याश्च मे पशव
आरण्याश्च यज्ञेन कल्पन्ताꣳ, वित्तं च मे वित्तिश्च मे, भूतं च मे भूतिश्च मे, ऽर्थश्च म एम
च म, इत्या च मे गतिश्च मे, कर्म च मे शक्तिश्च मे, वसु च मे वसतिश्च मे, ऽग्निश्च
म इन्द्रश्च मे, सोमश्च म इन्द्रश्च मे, सविता च म इन्द्रश्च मे, सरस्वती च म इन्द्रश्च
मे, पूषा च म इन्द्रश्च मे, ऽदितिश्च म इन्द्रश्च मे, धाता च म इन्द्रश्च मे, त्वष्टा च म
इन्द्रश्च मे, मित्रश्च म इन्द्रश्च मे, वरुणश्च म इन्द्रश्च मे, विष्णुश्च म इन्द्रश्च मे, बृहस्पतिश्च
म इन्द्रश्च मे, वसवश्च म इन्द्रश्च मे, रुद्राश्च म इन्द्रश्च म, आदित्याश्च म इन्द्रश्च मे,
मरुतश्च म इन्द्रश्च मे, पृथिवी च म इन्द्रश्च मे, ऽन्तरिक्षं च म इन्द्रश्च मे, द्यौश्च म
इन्द्रश्च मे, नक्षत्राणि च म इन्द्रश्च मे, समा च म इन्द्रश्च मे, कृषिश्च म इन्द्रश्च मे,
वृष्टिश्च म इन्द्रश्च मे, दिशश्च म इन्द्रश्च मे, विश्वे च मे देवा इन्द्रश्च मे, ऽꣳशुश्च मे रश्मि-
श्च मे, ऽधिपतिश्च मेऽदाभ्यश्च म, उपाꣳशुश्च मेऽन्तर्यामश्च म, ऐन्द्रवायवश्च मे मैत्रावरुण-
श्च म, आश्विनश्च मे प्रतिप्रस्थानश्च मे, शुक्रश्च मे मन्थी च म, आग्रायणश्च मे वैश्वदेवश्च
म, ऐन्द्राग्नश्च मे क्षुल्लकवैश्वदेवश्च मे, ध्रुवश्च मे वैश्वानरश्च मे, मरुत्वतीयाश्च मे निष्केव-
ल्यश्च मे, सावित्रश्च मे सारस्वतश्च मे, पात्नीवतश्च मे हारियोजनश्च मे, स्रुचश्च मे
चमसाश्च मे, वायव्यानि च मे द्रोणकलशश्च मे, ऽधिषवणे च मे ग्रावाणश्च मे, पूतभृच्च मे
ऽपूतभृच्च मे, बर्हिश्च मे वेदिश्च मे, ऽवभृथश्च मे स्वगाकारश्च मे ॥ ५ ॥ ५
अग्निश्च घर्मश्चा,—ऽर्कश्च सूर्यश्च, प्राणश्चाश्वमेधश्चा,—ऽदितिश्च पृथिवी च, दितिश्च द्यौश्च,
शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्ता,—मृतश्च व्रतं च, सꣳवत्सरश्च तपश्चा,—ऽहोरात्रे
ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पेता,—मेका च तिस्रश्चा त्रयस्त्रिꣳशत,—श्चतस्रश्चाष्टौ चाष्टा-
चत्वारिꣳशत,—स्त्र्यविश्च त्र्यवी च, दित्यवाट् च दित्यौही च, पञ्चाविश्च पञ्चावी च, त्रिव-
त्सश्च त्रिवत्सा च, तुर्यवाट् च तुर्यौही च, पष्ठवाट् च पष्ठौही चो,—क्षा च वशा च,
ऋषभश्च वेहच्च, धेनुश्चानड्वाꣳश्च, स्तोमश्च यजुश्चा, ऋक् च साम च, दीक्षा च
तपश्च, बृहच्च रथन्तरं चौ,—षधयो वनस्पतयो दिशश्च मे यज्ञेन कल्पन्ता,—मन्नाय त्वा,
वाजाय त्वा, वाजजित्यायै त्वे,—षे त्वो,—र्जे त्वा, रय्यै त्वा, पोषाय त्वा ॥६॥ ६
[१३१५]

॥ इति मध्यमकाण्डे एकादशः प्रपाठकः ॥ ११ ॥

[६] मै. ३,४,१ । तै. ४,७,९-११ । काठ. १८,११-१२ । कपि. २८,११;२९,१ । वा. १८,२२-२९;१,२,१४, १९ । काण्व. १९,३४-३९,४१,४३,१५,२४;१,११ मा. श्रौ. ६,२,५ । [बृहच्च रथन्तरं (च) । अथर्व. ८,१०,६]

अथ द्वादशः प्रपाठकः।

विश्वे नो अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः।
विश्वे नो देवा अवसागमन्निह विश्वमस्तु द्रविणꣳ वाजो अस्मे ॥ १
वाजो मे सप्त प्रदिशश्चतस्रो वा परावतः। वाजो मा विश्वैर्देवैर्धनसाता इहावतु ॥ २
वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति।
वाजस्य हि प्रसवे नन्नमीति विश्वा आशा वाजपतिर्भवेयम् ॥ ३
वाजो मे अद्य प्रसुवाति दानꣳ वाजो देवान् हविषा वर्धयाति।
वाजो हि मा सर्ववीरं चकार सर्वा आशा वाजपतिर्जयेयम् ॥ ४
सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः।
सोऽहꣳ वाजꣳ सनेयमग्ने ॥ ५
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ १ ॥ ६

ऋताषाडृतधामाग्निर्गन्धर्व,—स्तस्यौषधयोऽप्सरसो मुदा नाम, स न इदं ब्रह्म क्षत्रं पातु,
ता न इदं ब्रह्म क्षत्रं पान्तु, तस्मै स्वाहा वट्, ताभ्यः स्वाहा वट्, सꣳहितो विश्वसामा
सूर्यो गन्धर्व,—स्तस्य मरीचयोऽप्सरस आयुवो नाम, सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व,—स्त-
स्य नक्षत्राण्यप्सरसो बेकुरयो नाम,—षिरो विश्वव्यचा वातो गन्धर्व,—स्तस्यापोऽप्सरसा ऊर्जो
नाम, भुज्युः सुपर्णो यज्ञो गन्धर्व,—स्तस्य दक्षिणा अप्सरसा एष्टयो नाम, बृहस्पतिर्विश्वकर्म-
न्द्रो गन्धर्व,—स्तस्य मरुतोऽप्सरसा ओजो नाम, प्रजापतिः परमेष्ठी मनो गन्धर्व,—स्तस्य
ऋक्सामान्यप्सरसः स्तवा नामा,—ऽमृडयो दूरेहेतिर्मृत्युर्गन्धर्व,—स्तस्य प्रजा अप्सरसो भीरवो
नाम, स नो भुवनस्य पते यस्य त उपरि गृहा विराट्पतेऽस्मै ब्रह्मणेऽस्मै क्षत्राय महि शर्म
यछ, यस्य ते विश्वा आशा अप्सरसः प्लीया नाम स न इदं ब्रह्म क्षत्रं पातु, ता न इदं ब्रह्म
क्षत्रं पान्तु, तस्मै स्वाहा वट्, ताभ्यः स्वाहा वट् ॥ २ ॥ ७
समुद्रोऽसि नभस्वानार्द्रदानुः, शंभूर्मयोभूरभि मा वाहि स्वाहा,—ऽवस्युरसि दुवस्वान्, शंभू-
र्मयोभूरभि मा वाहि स्वाहा, मारुतोऽसि मरुतां गणः, शंभूर्मयोभूरभि मा वाहि स्वाहा,

[१] मै. ३,४,३। तै. ४,७,१२। काठ. १८,१३। कपि. २९,२। वा. १८,३१-३६;३३,५२। काण्व. २०,२-७;३२,५२। मा. श्रौ. ६,२,५। [विश्वे (नो) अद्य मरुतो०...अस्मे। ऋ. १०,३५,१३; तै. सं. ४,७,१२,१]
[२] तै. ३,४,७। काठ. १८,१४। कपि. २९,३। वा. १८,३८-४४। काण्व. २०,८-१४। मा. श्रौ. ६,२,५।

सजूरब्दा आयवभिः, सजूरुषा अरुणीभिः, सजोषा अश्विना दꣳसोभिः, सजूः स्वरा
एतशेन, सजूर्वैश्वानर इडया घृतेन स्वाहा ॥ ८
अग्निꣳ युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसं बृहन्तम्।
तेन वयं पतेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणा अधि नाक उत्तमे ॥ ९
इमौ ते पक्षा अजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने।
ताभ्याꣳ वयं पतेम सुकृतामु लोकꣳ यत्रा ऋषयो जग्मुः प्रथमा ये पुराणाः ॥ १०
इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः।
महान्त्सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिꣳसीः ॥ ११
दिवो मूर्धासि नाभिः पृथिव्या ऊर्गपामोषधीनाम्।
विश्वायुः शर्म सप्रथा नमस्पथे विश्वस्य मूर्धन्नधितिष्ठसि श्रितः ॥ १२
समुद्रे ते हृदयमन्तरायुरपो दत्तोदधिं भिन्त।
दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्यावत ॥ १३
वि ते मुञ्चामि रशनाꣳ वि रश्मीन् वि योक्त्राणि परिचर्तनानि।
धत्तादस्मभ्यं द्रविणेह भद्रं प्र मा ब्रूताद्भागदां देवतासु ॥ १४
इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिः।
इष्टो अग्निराहुतः पिपर्तु न इष्टꣳ हविः स्वगेदं देवेभ्यो नमः ॥ ३ ॥ १५
येना ऋषयस्तपसा सत्रमासतेन्धाना अग्निꣳ स्वराभरन्तः।
यस्मादृमनवः स्तीर्णबर्हिषं तस्मिन्नहं निदधे नाके अग्निम् ॥ १६
तं पत्नीभिरनुगछेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥ १७
आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुताꣳ ये पृतन्यवः ॥ १८
अयमग्निर्वीरतमो वयोधाः सहस्रियो ज्योततामप्रयुछन्।

[३] मै. ३,४,४-५। तै. ४,७,१२-१३। काठ. १८,१४;१५,१८। कपि. २९,३-४। वा. १८,४५;११,७४;१८,५१-५७। काण्व. २०,१५,१३,७५;२०,२१-२७। मा. श्रौ. ६,२,५-६। [वि ते मुञ्चामि०...देवतासु। अथर्व. ७,७८,१—२]

विभ्राजमानः सलिलस्य मध्या उप प्रयाहि दिव्यानि धामन् ॥ १९
अग्ने च्यवस्व समनुप्रयाह्याविष्पथो देवयानान् कृणुष्व।
इदमिदꣳ सुकृतमारभस्व यत्रा ऋषयो जग्मुः प्रथमा ये पुराणाः ॥ २०
संप्रच्यवध्वमुप संप्रयाताविष्पथो देवयानान् कृणुध्वम्।
एभिः सुकृतैरनुगछेम देवा यत्र नः पूर्वे पितरः परेताः ॥ २१
उद्बुध्यस्वाग्ने प्रतिजागृह्येनमिष्टापूर्ते सꣳसृजेथामयं च।
पुनः कृण्वन्तः पितरो युवानोऽन्वाताꣳसुस्त्वं तन्तुमेतम् ॥ २२
येन वहसि सहस्रꣳ येनाग्ने सर्ववेदसम्। तेनेमꣳ यज्ञं नो वह स्वर्देवेषु गन्तवे ॥ २३
२४
अयं ते ॥ ४ ॥
समास्त्वाग्न ऋतवो वर्धयन्तु सꣳवत्सरा ऋषयो यानि सत्या।
सं दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः ॥ २५
सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥ २६
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने सꣳवरणे भवा नः।
सपत्नहाग्ने अभिमातिजिद्भव स्वे गये जागृह्यप्रयुछन् ॥ २७
इहैवाग्ने अधिधारया रयिं मा त्वा निक्रन् पूर्वचित्तो निकारिणः।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥ २८
क्षत्रेणाग्ने स्वेन सꣳरभस्व मित्रेणाग्ने मित्रधेये यतस्व।
सजातानां मध्यमेष्ठेयाय राज्ञामग्ने विहव्यो दीदिहीह ॥ २९
अति निहो अति स्रिधो अत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता तर त्वमथास्मभ्यꣳ सहवीरꣳ रयिं दाः ॥ ३०

[४] तै. ४,७,१३। काठ. १८,१८। कपि. २९,६। वा. १५,४९-५६;१८,६१-६२;३,१४;१२,५२। काण्व. १६,७१-७८;२०,३१-३२,३,२०;१३,५३। मा. श्रौ. ६,२,६। [येन वहसि०...गन्तवे। अथर्व. ९,५,१७। अयं ते०। ऋ. ३,२९,१०; अथर्व. ३,२०,१; तै. सं. १,५,५,२;४,२,४,३;७,१३,५; तै. ब्रा. १,२,१,१६;२,५,८,८]
[५] मै. ३,४,६। तै. ४,१,७। काठ. १८,१६। कपि. २९,४। वा. २७,१—१०;२०,२१;३५,१४;३८,२४। काण्व. २९,१—१०;२२,६;३५,४७;३८,२४। [समास्त्वाग्न०...। अथर्व. २,६,१। सं चेध्यस्वाग्ने०...मान्य। अथर्व. २,६,२। त्वामग्ने वृणते०...प्रयुच्छन्। अथर्व. २,६,३। इहैवाग्ने अधि०......अनिष्टृतः। अथर्व. २,६,४। अति निहो०...दाः। अथर्व. २,६,५। अथर्व. ७,८२,३। क्षत्रेणाग्ने स्वायु०...दीदिहीह। अथर्व. २,६,४।]

अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह।
व्यमीवाः प्रमुञ्चन्मानुषाणाꣳ शिवेभिरद्य परिपाहि नो वृधे ॥ ३१
बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्संतरꣳ सꣳशिशाधि।
वर्धयैनं महते सौभगाय विश्वे चैनमनुमदन्तु देवाः ॥ ३२
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः।
प्रत्यूहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ॥ ३३
उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ ५ ॥ ३४
ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः।
द्युमत्तमा सुप्रतीकस्य सूनोः ॥ ३५
तनूनपादसुरो विश्ववेदा देवो देवेभ्यो देवयानान् पथो अनक्तु मध्वा घृतेन।
मध्वा यज्ञं नक्षति प्रीणानः ॥ ३६
नराशꣳसो अग्निः सुकृद्देवः सविता विश्ववारः। अछायमेति शवसा घृतेन ॥ ३७
ईडानो वह्निर्नमसाग्निꣳ स्रुचो अध्वरेषु प्रयत्सु। स यक्षदस्य महिमानमग्नेः ॥ ३८
स ई मन्द्रा सुप्रयसा स्तरीमन्। बर्हिषो मित्रमहाः। वसुश्रेष्ठो वसुधातमश्च ॥ ३९
द्वारो देवीरन्वस्य विश्वा व्रता ददन्ते अग्नेः। उरुव्यचसो धाम्ना पत्यमानाः ॥ ४०
ते अस्य योषणे दिव्ये न योना उषासानक्ता। इमꣳ यज्ञमवतामध्वरं नः ॥ ४१
दैव्या होतारा ऊर्ध्वमिममध्वरं नोऽग्नेर्जिह्वाभिगृणीतम्। कृणुतं नः स्विष्टम् ॥ ४२

[अनाधृष्यो जातवेदा०...वृधे। अथर्व. ७,८४,१। शिवेभिरद्य०...वृधे। ऋ. ६,७१,३। बृहस्पते सवित०...देवाः। अथर्व. ७,१६,१। अमुत्रभूया०...शचीभिः। अथर्व. ७,५३,१। उद्वयन्तमसस्परि०...। ऋ. १,५०,१०; अथर्व. ७,५३,७; तै. सं. ४,१,७,४; तै. ब्रा. २,४,४,९;६,६,४; तै. आ. ६,३,२]
[६] मै. ३,४,६। तै. ४,१,८। काठ. १८,१७। कपि. २९,५। वा. २७, ११-२२। काण्व. २९,११-२२। [ऊर्ध्वा अस्य०...सूनोः। अथर्व. ५,२७,१। तनूनपादसुरो०...घृतेन। अथर्व. ५,२७,१-२। मध्वा यज्ञं०...। अथर्व. ५,२७,३। नराशꣳसो अग्निः०—घृतेन। अथर्व. ५,२७,३-४। ईडानो वह्निर्न०—मग्नेः। अथर्व. ५,२७,४-५। स ई (तरी) मन्द्रा०—वसुधातम(र) श्च। अथर्व. ५,२७,६। द्वारो देवी०—पत्यमाना। (ने)। अथर्व. ५,२७,७-८। आ सुष्वयन्ती यजते उपाके। ऋ. १०,११,६; अथर्व. ५,२७,८;११,९; तै. ब्रा. ३,६,१,३; नि. ८,११। ते अस्य०—नः। अथर्व. ५,२७,८। दैव्या (देवा) होतारा०स्विष्टम्। अथर्व. ५,२७,९]

तिस्रो देवीर्बर्हिरिदꣳ स्योनमिडा सरस्वती मही । भारती गृणाना ॥ ४३

तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टः सुवीर्यम् । रायस्पोषꣳ विष्य नाभिमस्मे ॥ ४४

वनस्पतेऽवसृजा रराणस्त्मना देवेभ्यः । अग्निर्हव्यꣳ शमिता सूदयाति ॥ ४५

अग्ने स्वाहा कृणुहि जातवेद इन्द्राय देवेभ्यः । विश्वे देवा हविरिदं जुषन्ताम् ॥ ६ ॥ ४६

[१३६१]

॥ इति मध्यमकाण्डे द्वादशः प्रपाठकः ॥ १२ ॥

अथ त्रयोदशः प्रपाठकः ।

समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यः पृणन्ति ।
तमु शुचिꣳ शुचयो दीदिवाꣳसमपां नपातं परितस्थुरापः ॥ १

हिरण्यवर्णः स हिरण्यसंदृगपां नपात्सेदु हिरण्यवर्णः ।
हिरण्ययात्परि योनेर्निषद्य हिरण्यदा ददत्यन्नमस्मै ॥ २

हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निꣳ या गर्भं दधिरे विरूपास्ता न आपः शꣳ स्योना भवन्तु ॥ ३

यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम् ।
मधुश्चुतः शुचयो याः पावकास्ता न आपः शꣳ स्योना भवन्तु ॥ ४

यासां देवा दिवि कृण्वन्ति भक्षꣳ या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपः शꣳ स्योना भवन्तु ॥ ५

शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोपस्पृशत त्वचं मे ।
सर्वाꣳ अग्नीꣳरप्सुषदो हुवे मयि वर्चो बलमोजो नि धत्त ॥ ६

यददः संप्रयतीरहावनदता हते ।

[तिस्रो देवी०—गृणाना । अथर्व. ५,२७,९ । तन्नस्तुरी०—मस्मे । अथर्व. ५,२७,१०। वनस्पतेऽव०... सूदयाति (स्वदयतु)। अथर्व. ५,२७,११ । अग्ने स्वाहा०—जुषन्ताम्। अथर्व. ५,२७,१२]

[१] तै. ५,६,१ । काठ. ३६,२ ; वा. ११,४०-४२;३६;१४-१६;४;१३,१७,५४३, काण्व. १२,५१-५३;३६,१४-१६; ४,१८,२३;५,५४ । मा. श्रौ. ६,१,६ । [समन्या यन्त्युप०...तस्थुरापः । ऋ. २,३५,३; सा. ६०७; तै. सं. २,५,१२,१ । हिरण्यवर्णः (०रूपः) स०... मस्मै । ऋ. २,३५,१०; नि. ३,१६ । हिरण्यवर्णाः शुचयः०.. भवन्तु । अथर्व. १,३३,१ । यासाꣳ राजा वरुणो०... । ऋ. ७,४९,३, अथर्व. १,३३,२,४ । तै. सं. ५,६, १,१ । यासां देवा दिवि०... भवन्तु । अथर्व. १,३३,३ । शिवेन मा चक्षुषा०... । १,३३,४ । मधुश्चुतः (घृतश्चुतः) शुचयो०। ऋ. ७,४९,३; अथर्व. १,३३,४ । यददः संप्रयती०...सिन्धवः। अथर्व. ३,१३,१]

तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः ॥ ७

संप्रच्युता वरुणेन यच्च् शीभꣳ समवल्गत ।
तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनुष्ठन ॥ ८

अपकामꣳ स्यन्दमाना अवीवरत वो हि कम् ।
इन्द्रो वः शक्तिभिर्देवीस्तस्माद्वार्नाम वो हितम् ॥ ९

एको वो देवो अप्यतिष्ठत् स्यन्दमाना यथावशम् ।
उदानिषुर्महीरिति तस्मादुदकमुच्यते ॥ १०

आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्नासाम् ।
तीव्रो रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसागन् ॥ ११

आपो देवीर्घृतमिन्वा ऊ आपो अग्नीषोमौ बिभ्रत्याप इत्ताः ।
मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपꣳ यदा वः ॥ १२

आपो हि ष्ठेति तिस्रः ॥ दिवि श्रयस्वा,—ऽन्तरिक्षे यतस्व, पृथिव्याः संभव, भ्राजं
गच्छ ॥ १ ॥ १३-१४

तपो योनिरसि, विश्वाभिस्त्वा धीभिरच्छिद्रामुपदधाम्यृ,—तꣳ योनिः, सत्यꣳ योनि,—
र्ब्रह्म योनिः, क्षत्रꣳ योनिः, पृथिवी योनि,—रन्तरिक्षꣳ योनि,—र्द्यौर्योनि,—र्दिशो
योनिः ॥ २ ॥ १५

प्राणादपानꣳ संतन्व,—पानाद्व्यानꣳ संतनु, व्यानाच्चक्षुः संतनु, चक्षुषः श्रोत्रꣳ संतनु,
श्रोत्रात् पृथिवीꣳ संतनु, पृथिव्या अन्तरिक्षꣳ संतन्व,—न्तरिक्षाद्दिवꣳ संतनु, दिवो दिशः
संतनु, दिग्भ्यः स्वर्गं लोकमनुसंतनु ॥ ३ ॥ १६

[संप्रच्युता (यत्प्रेषिता)०...अनुष्ठन । अथर्व. ३,१३,२ । अपकामꣳ स्यन्दमाना०... हितम्। अथर्व. ३,१३,३ । एको वो देवो०...मुच्यते । अथर्व. ३,१३,४ । आदित्पश्याम्युत०...साम् । अथर्व. ३,१३,६ (प्र. च.) । तीव्रो रसो०...सागन् (गमेत्) । अथर्व. ३,१३,५ (द्वि. च.) । आपो देवी (भद्रा) घृत ०...इत्ताः । अथर्व. ३,१३,५ (प्र. च.) । मन्ये भेजानो०...... यदा वः । अथर्व. ३,१३,६ (द्वि. च)। आपो हि ष्ठा०... चक्षसे । ऋ. १०,९,१; सा. १८३७; अथर्व. १,५,१; तै. ४,१,५,१;५,६,१,४;७,४,१९,४; तै. आ. ४,४२,४;१०,१,११; नि. ९,२७। यो व शिव०...मातरः। ऋ. १०,९,२; सा. १८३८; अथर्व. १,५,२; तै. सं ४,१,५,१;७,४,१९,४; तै. आ. ४,४२,४;१०,१,११ । तस्मा अरंगमाम०...यथाचनः। ऋ. १०,९,३; सा. १८३९; अथर्व. १,५,३; तै. सं. ४,१,५,१;५,६,१,४;७,४,१९,४; तै. आ. ४,४२,४;१०,१,११]

[२] मै. ३,२,६ । काठ. ३९,२ ।

[३] तै. आ. १,५,७ । काठ. ३९,८ ।

ऋचा त्वा छन्दसा सादयामि, वषट्कारेण त्वा छन्दसा सादयामि, हिंकारेण त्वा छन्दसा
सादयामि, प्रस्तावेन त्वा छन्दसा सादयाम्यु,—द्गीथेन त्वा छन्दसा सादयामि, प्रतिहारेण
त्वा छन्दसा सादयामि, स्तुतेन त्वा छन्दसा सादयामि, निधनेन त्वा छन्दसा साद-
यामि ॥ ४ ॥
१७

दूतꣳ वो विश्ववेदसꣳ हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ॥ १८

अगन्म महा नमसा यविष्ठꣳ यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुꣳ रोदसी अन्तरुर्वी स्वाहुतꣳ विश्वतः प्रत्यञ्चम् ॥ १९

अयमिह ॥
२०

दधन्वे वा यदीमनु वोचद् ब्रह्माणि वेरु तत् । परि विश्वानि काव्या नेमिश्चक्रमिवाभवत् ॥ २१

ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आभर ॥ ५ ॥ २२

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥ २३

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥ २४

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति ॥ २५

इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रꣳ वाणीरनूषत ॥ २६

इन्द्रो दीर्घाय चक्षस आ सूर्यꣳ रोहयद्दिवि । वि गोभिरद्रिमैरयत् ॥ २७

इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा । इन्द्रो वज्री हिरण्ययः ॥ २८

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च । उग्र उग्राभिरूतिभिः ॥ २९

[५] मै. ब्रा. ३,११,६,३; तै. सं. ३,३,२,३; ४,१२,७; ४,४,४,६; ५,१३,७,८ काठ. १२,१५,३९,१३। वा. ३,१५; १५,३६;३३,६ । काण्व. ३,४१,१६,४७,३२,६ । [दूतꣳ यो विश्व०.. गिरा । ऋ. ४,८,१; सा. १२। अगन्म महा नमसा०...प्रत्यञ्चम्। ऋ. ७,१२,१; सा. १३०४; तै. ब्रा. ३,११,६,२ । अयमिह०...। ऋ. ४,७,१; तै. सं. १,५,५,१ । दधन्वे वा०...भुवत् । ऋ. २,५,३; सा. ९४ । ओभे (उभे) सुश्चन्द्र०...आभर । ऋ. ५,६,९; सा. १०४२]

[६] काठ. ३९,१२ । तै. ब्रा. १,५,८,१-२ । [इन्द्रो दधीचो०...नव । ऋ. १,८४,१३; सा. १७९;९१३; अथर्व. २०,४१,१ । अत्राह गोरमन्वत०...गृहे । ऋ. १,८४,१५; सा. १४७,९१५; अथर्व. २०,४१,३; नि. ४,२५ । इच्छन्नश्वस्य०...वति । ऋ. १,८४,१४; सा. ९१४, अथर्व. २०,४१,२ । इन्द्रमिद्गाथिनो०...नूषत । ऋ. १,७,१; सा. १९८,७९६; अथर्व. २०,३८,४;४७,४;७०,७; तै. सं. १६,१२,२; नि. ७,२ । इन्द्रो दीर्घाय०... रयत् । ऋ. १,७,३; सा. ७९९; अथर्व. २०,३८,६;४७,६;७०,९ । इन्द्रा (इन्द्र) इद्धर्यो०... । ऋ. १,७,२; सा. ५९७,७९७; अथर्व. २०,३८,५;४७,५;७०,८ । इन्द्र वाजेषु०...रूतिभिः । ऋ. १,७,४; सा. ५९८,७९८; अथर्व. २०,७०,१०]

तमिन्द्रꣳ वाजयामसि महे वृत्राय हन्तवे । स वृषा वृषभो भुवत् ॥ ३०

इन्द्रः स दामने कृत ओजिष्ठः स बले हितः । द्युम्नी श्लोकी स सोम्यः ॥ ३१

गिरा वज्रो न संभृतः सबलो अनपच्युतः । ववक्ष उग्रो अस्तृतः ॥ ६ ॥ ३२

अयमग्निः सहस्रिणो, ऽग्निर्मूर्धा, त्वामग्ने पुष्करादधि ॥ ३३

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥ ३४

अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥ ३५

अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशददर्शि पाजो महान् देवस्तमसो निरमोचि ॥ ३६

जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥ ३७

त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ् शिश्रियाणꣳ वने वने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥ ३८

तुभ्येदमग्ने मधुमत्तमꣳ वचस्तुभ्यं मनीषा इयमस्तु शꣳ हृदे ।
त्वां गिरः सिन्धुमिवावनीर्महीरापृणन्ति शवसा वर्धयन्ति च ॥ ३९

सꣳ समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इडस्पदे समिध्यसे स नो वसून्याभर ॥ ४०

[तमिन्द्रꣳ वाजयामसि०...भुवत् । ऋ. ८,९३,७; सा. ११९,१२२२, अथर्व. २०,४७,१,१३७,१२, तै. ब्रा. २,४,१,३ । इन्द्रः स दामने०...सोम्यः । ऋ. ८,९३,८; सा. १२२३; अथर्व. २०,४७,२;१३७,१३। गिरा वज्रो न०...अस्तृतः । ऋ. ८,९३,९; सा. १२२४, अथर्व. २०,४७,३,१३७,१४]

[७] तै. ४,४,४;१,८,२२,३ । काठ. ३९,१४, (२,१५;११,१२), वा. १५,२०-२२;२४—२५,२७-२८,३०-३१, ४१-४२;३,१२;१३,१४,११,३२,३६,७। काण्व. ३,१८;१४,१४;११,३२;१६,४१-४३,४६,४८-४९,५१,५३,६१-६४;३६,७ । [अयमग्निः सहस्रिणो०...। ऋ. ८,७५,४; तै. सं. २,६,११,१;४.४,४,१ । अग्निर्मूर्धा दिवः०। ऋ. ८,४४,१६; सा. २७,१५३२; तै. सं. १,५,५,१;४,४,१,१; तै. ब्रा. ३,५,७,१ । त्वामग्ने पुष्करादधि०। ऋ. ६,१६,१३; सा. ९, तै. सं. ३,५,११,३;४,१,३,२;४,४,१ । अबोध्यग्निः समिधा०...मछ (०च्छ)। ऋ. ५, १,१; सा. ७३,१७४६; अथर्व. १३,२,४६; तै. सं. ४,४,४,१ । अवोचाम कवये०... । ऋ. ५,१,१२, तै. सं. ४, ४,४,१ । अबोधि होता०...मोचि । ऋ. ५,१,२; सा. १७४७; नि. ६,१३ । जनस्य गोपा०... शुचिः । ऋ. ५,११,१; सा. ९०७; तै. सं ४,४,४,२ । त्वामग्ने अङ्गिरसो०... मङ्गिरः । ऋ. ५,११,६; सा. ९०८; तै. सं. ४,४,४,२ । तुभ्येदमग्ने०... । ऋ. ५,११,५ । सꣳ समिद्युवसे० भर । ऋ. १०,१९१,१; अथर्व. ६,६३,४, तै. सं २,६,११,४;४,४,४]

अग्निं॑ वः पूर्व्यं गिरा देवमीडे वसूनाम् । सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥ ४१
त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे ॥ ४२
आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषꣳ स्तोतृभ्य आभर ॥ ४३
अग्निं तं मन्ये यो वसुरस्तꣳ यꣳ यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषꣳ स्तोतृभ्य आभर ॥ ४४
सो अग्निर्यो वसुर्गृणे सꣳ यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सꣳ सुजातासः सूरय इषꣳ स्तोतृभ्य आभर ॥ ७ ॥ ४५
एना वो अग्निं नमसोर्जो नपातमाहुवे । प्रियं चेतिष्ठमरतिꣳ स्वध्वरꣳ विश्वस्य दूतममृतम् ॥
४६
त्वमग्ने गृहपतिस्त्वꣳ होता नो अध्वरे । त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ॥ ४७
देवो वो द्रविणोदाः पूर्णाꣳ विवष्ट्वासिचम् । उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥
४८
अग्ने वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥ ४९
स इधानो वसुः कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ ५०
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥ ५१
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदिस्पृशम् । ऋध्यामा त ओहैः ॥ ५२
अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः । रथीरृतस्य बृहतो बभूथ ॥ ५३

[अग्निꣳ वः पूर्व्यं गिरा०...। ऋ. ८,३१,१४, तै. सं. १,८,२२,३ । त्वां चित्रश्रवस्तम०...वोढवे । १,४५,६; तै. सं. ४,४,४,३ । आ ते अग्न०...आभर । ऋ. ५,६,४; सा. ४१९,१०२१; अथर्व. १८,४,८८; तै. सं. ४,४,४,६ । अग्निं तं मन्ये०...आभर । ऋ. ५,६,१; सा. ४२५,१७३७ । सो अग्निर्यो०... आभर । ऋ. ५,६,२, सा. १७३९ । स्तोतृभ्या (०भ्य) आभर । ऋ. ५,६,१,२,९;८,९३,१९; सा. १५८६]
[८] तै. ४,४,४ । काठ. ३९,१५ । वा. १५,३२-३३,३५-३७,४४-४५,४७;१०,२४,१२,१४;४,२५;३,२५,१५,४८, २५,४७ । काण्व. १६,५४-५५,५७-५९,६६-६७,६९,११,३४;१३,१५;४,३४;३,३३;१६,७०;२७,४५ । [एना वो अग्नि०.. मृतम् । ऋ. ७,१६,१; सा. ४५,७४९; तै. सं. ४,४,४,४; नि. ३,२१ । त्वमग्ने गृहपति०... वार्यम् । ऋ. ७,१६,५; सा. ६१ । अग्ने वाजस्य गोमता (तः)० । ऋ. १,७९,४; सा. ९९,१५६१, तै. सं. ४,४,४,५। स इधानो०...दीदिहि । ऋ. १,७९,५; सा. १५६२, तै. सं. ४,४,४,५। क्षपो राजन्नुत०...प्रति। ऋ. १,७९,६; सा. १५६३; तै. सं. ४,४,४,५ । अग्ने तमद्याश्वं०...ओहैः । ऋ. ४,१०,१; सा. ४३४,१७७७, तै. सं. ४,४,४,७ । अधा ह्यग्ने०...बभूथ । ऋ. ४,१०,२; सा. १७७८, तै. सं. ४,४,४,७]

आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम । प्र ते दिवो न स्तनयन्त शुष्माः ॥ ५४
अग्निꣳ होतारं मन्ये दास्वन्तꣳ वसुꣳ सूनुꣳ सहसो जातवेदसꣳ विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा । घृतस्य विभ्राष्टिमनु शुक्रशोचिषः ॥ ५५
आजुह्वानस्य सर्पिषः ॥ हꣳसः शुचिषत्,—दृभिं त्वं देवꣳ सवितर्,—अग्ने त्वं नो अन्तमः ॥
अधा ह्यग्ने, एना ह्यग्ने ॥ ८ ॥ ५६-५८
आयाहि सुषुमा हि त इन्द्र सोमं पिबा इमम् । एदं बर्हिः सदो मम ॥ ५९
आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना । उप ब्रह्माणि नः शृणु ॥ ६०
ब्रह्माणस्त्वा वयꣳ युजा सोमपामिन्द्र सोमिनः । सुतावन्तो हवामहे ॥ ६१
अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ६२
न त्वावं अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ६३
त्वामिद्धि हवामहे साता वाजस्य कारवः । त्वाꣳ वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥
६४
स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वꣳ रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ६५
कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ ६६

[आभिष्टे अद्य०...शुष्मैः। ऋ. ४,१०,४; तै. सं. ४,४,४,७। अग्निꣳ होतारं मन्ये०...सर्पिषः। ऋ. १,१२७ १; सा. ४६५, १८१३; अथर्व २०,६७,३; तै. सं. ४.४.४,८; नि. ६.८ । हꣳसः शुचिषद्०। ऋ. ४,४०,५; तै. सं. १,८ १५,२;४.२,१,५; तै. आ. १०,१०.२। अभि त्वं देवꣳ० । अथर्व ७.१४,१ । अग्ने त्वं नो अन्तमः०। ऋ. ५ २४,१; सा. ४४८,११०७; तै. सं. १,५.६.२;४,४,४,८ । अधा ह्यग्न० । ऋ. ५,१६.४]
[९] मै. ४.१२,४ ५;४.९,२७; तै. २,४,१४,२-३;४.२,११.२;४.४,१२,५। तै. आ. ४,४२,३। काठ. ३९.१२। वा. २७ ३५ ४२,४४;३६.४-६ । काण्व. २९.४०-४८;३६,४ ६ । मा. श्रौ. ६,२.३ । [आयाहि शुषुमा०...। ऋ. ८,१७,१; सा. १९१ ६६६, अथर्व २०,३,१;३८,१;४७.७। आ त्वा ब्रह्मयुजा०...शृणु। ऋ. ८,१७,२, सा. ६६७ अथर्व. २०.३,२;३८,२;४७.८। ब्रह्माणस्त्वा वयꣳ०... महे ऋ. ८.१७,३; सा. ६६८, अथर्व. २०.३,३,३८,३;४७,९। अभि त्वा शूर०...तस्थुषः। ऋ. ७,३२,२२; सा. २३३,६८०; अथर्व. २०,१२१,१; तै. सं. २,४.१४ २ । न त्वावं (त्वावाँ) अन्यो०... महे। ऋ. ७,३२ २३; सा. ६८१; अथर्व. २०.१२१,२। त्वामिद्धि हवामह०... स्वर्वतः । ऋ. ६,४६,१; सा. २३४.८०९; अथर्व. २०.९८.१; तै. सं. २,४,१४.३। स त्वं नश्चित्र०... जिग्युषे। ऋ. ६,४६,२; सा. ८१०; अथर्व. २०.९८,२ । कया नश्चित्र०...वृता। ऋ. ४,३१ १; सा. १६९,६८२; अथर्व. २०,१२४.१; तै. सं. ४,२,११.२; तै. आ. ४,४२,२]

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥ ६७
अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः ॥ ६८
यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे ।
प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शꣳसिषम् ॥ ६९
ऊर्जो नपातꣳ स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्ववितो भुवद्वृध उत त्राता तनूनाम् ॥ ९ ॥ ७०
ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्र्युत प्रजानाम् ।
एका सती बहुधोषो व्युच्छाजीर्णा त्वं जरय सर्वमन्यत् ॥ ७१
को विराजो मिथुनत्वं प्रवेद ऋतून्को अस्याः क उ वेद रूपम् ।
दोहान्को वेद कतिधा विदुग्धाः कति धामानि कति ये विवासाः ॥ ७२
इयमेव सा या प्रथमा व्यौच्छत्साप्स्वन्तश्चरति प्रविष्टा ।
वधूर्जिगाय नवगज्जनित्री त्रय एना महिमानः सचन्ते ॥ ७३
छन्दस्वती उषसा पेपिशाने समानꣳ योनिमनु संचरेते ।
सूर्यपत्नी विचरतः प्रजानती केतुमती अजरे भूरिरेतसा ॥ ७४
ऋतस्य पन्थामनु तिस्र आगुस्त्रयो घर्मासो अनु रेतसागुः ।
प्रजामेका जिन्वत्यूर्जमेका क्षत्रमेका रक्षति देवयूनाम् ॥ ७५
चतुष्टोममदधाद्या तुरीया यज्ञस्य पक्षा ऋषयो भवन्ती ।
गायत्रीं त्रिष्टुभं जगती विराजमर्कꣳ युञ्जानाः स्वराभरन्निदम् ॥ ७६
पञ्चभिर्धाता विदधा इदं तासां स्वसृजनन्पञ्च पञ्च ।
तासामु यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः ॥ ७७
ऋतस्य धामन्प्रथमा व्युष्युपामेका महिमानं बिभर्ति ।
सूर्यस्यैका चरति निष्कृतानि घर्मस्यैका सवितैकां नियच्छते ॥ ७८

[कस्त्वा सत्यो मदानां०...वसु। ऋ. ४,३१,२; सा. ६८३; अथर्व. २०,१२४,२; तै. आ. ४,४२ ३। अभी षु णः०... भ्यूतिभिः (स्यूतये)। ऋ. ४ ३१,३; सा. ६८४; अथर्व. २०,१२४.३; तै. आ. ४.४२,३। यज्ञा यज्ञा वो०... ऋ. ६.४८.१; सा. ३५,७०३। ऊर्जो नपातꣳ०... ऋ. ६,४८ २;सा. ७०४] [को विराजो०...विवासाः (व्युष्टीः)। अथर्व. ८.९.१०। इयमेव सा
[१०] तै. ४,३.११। काठ ३९.१०। सा०... सचन्ते (जनित्री)। अथर्व. ८.९.११। छन्दस्वती (छन्दः पक्षे) उषसा (सा) रेतसा (०सा)। अथर्व. ८,९ १२। ऋतस्य पन्था०... यूनाम् अथर्व. ८९.१३। चतुष्टोम०(अग्नीषोमा०) ...भरन्निदम् (०न्तीम्। अथर्व. ८,९.१४]

इदꣳ श्रेयो मन्यमानो वा आगामहꣳ वो अस्मि सख्याय शेवः ।
समानजन्मा क्रतुरस्त्येकः सर्वः सर्वा विचरतु प्रजानन् ॥ ७९
भूयास्म ते सुमतौ विश्ववेदा आष्टाः प्रतिष्ठामविदो हि गाधम् ।
सत्यꣳ वदन्तीर्महिमानमापान्या वो अन्यामति मा प्रयुक्त ॥ ८०
रुशद्विधाना समना पुरस्तात्प्रजानती यामुमुषा अयासीत् ।
ब्रह्मद्विषस्तमसा देवनत्रूनभिवहन्ती विश्ववारा व्युवाट् ॥ ८१
पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमृतवोऽनु पञ्च ।
पञ्च दिशः पञ्चदशेन क्लृप्ताः समानमूर्ध्नीरभि लोकमेकम् ॥ ८२
त्रिꣳशत्स्वसारा उपयन्ति निष्कृतꣳ समानं केतुं प्रतिमुञ्चमानाः ।
ऋतूꣳस्तन्वते कवयः प्रजानतीर्मध्येछन्दसः परियन्ति भास्वतीः ॥ ८३
ज्योतिष्मतीः प्रतिमुञ्चते नभो देवी रात्री सूर्यस्य व्रतानि ।
विपश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे ॥ ८४
प्रथमा ह व्युवास सा धेनुरभवद्यमे ।
सा नः पयस्वती दुहा उत्तरामुत्तराꣳ समाम् ॥ १० ॥ ८५
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषस्पातु नक्तम् ॥ ८६
त्वꣳ यविष्ठ दाशुषो नॄꣳष्पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ८७
अग्ने धामानि तव जातवेदो देव स्वधावोऽमृतस्य नाम ।
याश्च माया मायिनाꣳ विश्वमिन्व त्वे पूर्वीः संदधुः पृष्टबन्धो ॥ ११ ॥ ८८
यवा अयवा ऊमा एवा अब्दः सगरः सुमेकौ, ऽग्ने कक्षां,—ग्ने किꣳशिला,—ऽग्ने दुधा,—ऽग्ने
वन्या,—ऽग्ने कक्ष्यं, या ता इषुर्युवा नाम तया विधेम, तस्यै ते नम,—स्तस्यास्त उप पत्सुवो
जीवा भूयास्म, तं यं द्विष्मो यश्च नो द्वेष्टि तमस्या जम्भे दध्मः ॥ १२ ॥ ८९

[इदꣳ (इत्थं) श्रेयो०...प्रजानन । अथर्व. ८.९,२२ । पञ्च व्युष्टीरनु०... मेकम्। अथर्व. ८,९,१५ । प्रथमा ह व्युवास०... समाम्। अथर्व. २.१०.१]
[११] मै. ३,१६,४। तै. १,५,११,१। काठ. ४०.३;७,१६। वा. १८.७३,७७;१३,५२। काण्व. २०,४२,४६;१४,५४। [पृष्टो दिवि पृष्टो०...नक्तम्। ऋ. १,९८,२; तै. सं. १,५,११,१; तै. आ. ३.११.६,४। त्वꣳ यविष्ठ दाशुषो० त्मना। ऋ. ८.८४,३;सा. १२४६। अग्ने धामानि(भूरीणि)तव०... बन्धो। ऋ. ३,२०,३,तै. सं.३,१,११,६]
[१२] तै. ४.४.७.२;५,५,९। काठ. ४०,३। वा. १५,१५-१९;१६,६४-६६। काण्व. १६,३२,३४,३६,३८,४०;१७, ६४। मा. श्रौ. ६,२,३। [यं द्विष्मो०... दध्मः। अथर्व. ३,२७१-६]

यो अ३प्स्वन्तर्गग्नियों वृत्रे यः पुरुषे यो अश्मनि ।
य आविवेशौषधीर्यो वनस्पतीꣳस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ९०
यः सोमे अन्तर्यो गोष्वन्तर्वयाꣳसि य आविवेश यो मृगेषु ।
य आविवेश द्विपदो यश्चतुष्पदस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ९१
येनेन्द्रस्य रथꣳ संबभूवुर्यो वैश्वानर उत विश्वदाव्यः ।
धीरो यः शक्रः परिभूरदाभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ९२
विश्वादमग्निꣳ यमु काममाहुर्यं दातारं प्रतिग्रहीतारमाहुः ।
यं जोहवीमि पृतनासु सासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ ९३
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥ ९४
वैश्वानरज्येष्ठेभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ॥ १३ ॥ ९५

मा छन्दः,—स्तत्पृथिवी छन्दः,—ग्निर्देवता, तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा
सीद ॥ प्रमा छन्दः,—स्तदन्तरिक्षꣳ, वायुर्देवता, प्रतिमा छन्दः,—स्तद् द्यौः सूर्यो देवता,—
ऽस्त्रीवीश्छन्दः,—स्तद्दिशः, सोमो देवता, गायत्री छन्दः,—स्तदजा, बृहस्पतिर्देवता, त्रि-
ष्टुप्छन्दः,—स्तद्धिरण्यꣳ,—मिन्द्रो देवता, जगती छन्दः,—स्तद्गौः, प्रजापतिर्देवता,—ऽनुष्टुप्छन्दः,
—स्तदायुः,—मित्रो देवता,—ष्णिक्छन्दः,—स्तच्चक्षुः, पूषा देवता, विराट् छन्दः,—स्तदश्वो,
वरुणो देवता, बृहती छन्दः,—स्तत्कृषिः, पर्जन्यो देवता, पङ्क्तिश्छन्दः,—स्तत्पुरुषः, परमेष्ठी
देवता, तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ १४ ॥ ९६–९७
पृथिव्यसि जन्मना वशा, साग्निं गर्भमधत्थाः, सा मया संभव,—ऽन्तरिक्षमसि जन्मना
वशा, सा वायुं गर्भमधत्थाः, सा मया संभव, द्यौरसि जन्मना वशा, सादित्यं गर्भम-
धत्थाः, सा मया संभव, नक्षत्राण्यसि जन्मना वशा, सा चन्द्रमसं गर्भमधत्थाः, सा
मया संभव, ऋगसि जन्मना वशा, सा साम गर्भमधत्थाः, सा मया संभव, विडसि

[१३] तै. ४,७,१४,७ । काठ. ४०,३,५ । [यो अप्स्वन्त० (ये अग्नयो०)...तत् । अथर्व. ३,२१,१ । यः सोमे अन्तर्यो०... । अथर्व. ३,२१,२ । येनेन्द्रस्य रथꣳ(य इन्द्रेण सरथं)... । अथर्व. ३,२१,३ । धीरो यः शक्रः (यो धीरः०) । अथर्व ३,२१,४ (द्वि. च.) । विश्वादमग्निꣳ यमु (यो देवो विश्वाद्यमु)० । अथर्व ३,२१,४ (प्र. च.) । यं जोहवीमि०...तत् । अथर्व. ३,२१,३ (द्वि. च.) । उक्षान्नाय वशान्नाय०...माग्नये । ऋ. ८,४३,११; अथर्व. ३,२१,६;२०,१,३; तै. सं. १,३,१४,७ । वैश्वानरज्येष्ठे०...तत् । अथर्व. ३,२१,६]
[१४] मै. २,८,३ । तै. ४,३,७,१ । काठ. ३९,४ । वा. १४,१८-२०;१९,५३;१३,१९,२४;१४,६,११,१४;१५,५८,६४ । काण्व. १५,१८-२२,१३,५४;१४,१९,२४;१५,५,१५,१६;१६,७२,८४]
[१५] काठ. ३९,८ । वा. ११,५८ । काण्व. १२,५६ । मा. श्रौ. ६,२,३]

जन्मना वशा, सा राजानं गर्भमधत्थाः, सा मया संभव, वागसि जन्मना वशा, सा
प्राणं गर्भमधत्थाः, सा मया संभवा,—ऽऽपोऽसि जन्मना वशा, सा यज्ञं गर्भमधत्थाः,
सा मया संभव ॥ १५ ॥
९८
या देव्यसीष्टके कुमार्युपशीवरी सा मोपशेष्व जायेव सदमित्पतिꣳ, या देव्यसीष्टके प्रफ-
र्व्युपशीवरी सा मोपशेष्व जायेव सदमित्पतिꣳ, या देव्यसीष्टके युवतिरुपशीवरी सा मोपशेष्व
जायेव सदमित्पतिꣳ, या देव्यसीष्टक आयुर्दाः प्राणदा अपानदा व्यानदाश्चक्षुर्दाः श्रोत्रदाः
पृथिव्यामन्तरिक्षे दिवः पृष्ठ उपशीवरी सा मोपशेष्व जायेव सदमित्पतिꣳ, या देवीः स्थेष्टका
सुशेवा उपशीवरीस्ता मोपशेध्वं जाया इव सदमित्पतिम् ॥ १६ ॥
९९
संवयसे त्वा,—ऽभिवयसे त्वो,—र्ध्ववयसे त्वा, बृहद्वयसे त्वा, सहीयसे त्वा, सहमा-
नाय त्वा, सासह्यै त्वा, सहस्वते त्वा,—ऽभीषाहे त्वा,—ऽभिभ्वे त्वा,—ऽभिमातिषाहे त्वा,
—ऽभिमातिघ्ने त्वा ॥ १७ ॥
१००
भूयस्कृदसि, वरिवस्कृदसि, प्राच्यस्यू,—र्ध्वास्य,—न्तरिक्षसद्यो,—जोदा त्वौजसि साद-
यामि, पयोदा त्वा पयसि सादयामि, तेजोदा त्वा तेजसि सादयामि, यशोदा त्वा यशसि
सादयामि, वर्चोदा त्वा वर्चसि सादयामि, पृथिव्यास्त्वा द्रविणे सादयाम्य,—न्तरिक्षस्य
त्वा द्रविणे सादयामि, दिवस्त्वा द्रविणे सादयामि, दिशां त्वा द्रविणे सादयामि, द्रवि
णोदां त्वा द्रविणे सादयाम्य,—प्सुषदसि, गृध्रसदसि, श्येनसदसि, सुपर्णसदसि,
नाकसदसि ॥ १८ ॥
१०१
ज्योतिष्मतीं त्वा सादयामि, ज्योतिष्कृतं त्वा सादयामि, ज्योतिर्विदं त्वा सादयाम्यू,—
र्ध्वज्योतिषं त्वा सादयामि, बृहज्ज्योतिषं त्वा सादयामि, विश्वज्योतिषं त्वा सादयाम्य,—
जस्रां त्वा सादयामि, भास्वतीं त्वा सादयामि, दीप्यमानां त्वा सादयामि, रोचमानां
त्वा सादयामि, ज्वलन्तीं त्वा सादयामि, मल्मलाभवन्तीं त्वा सादयामि, जाग्रतीं त्वा
सादयामि, बोधयन्तीं त्वा सादयामि ॥ १९ ॥
१०२
कृत्तिका नक्षत्र,—मग्निर्देवता,—ऽग्ने रुचः स्थ, प्रजापतेः सोमस्य धातु,—ऋचे त्वा, रुचे
त्वा, भासे त्वा, ज्योतिषे त्वा, तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा
सीद, रोहिणी नक्षत्रं, प्रजापतिर्देवता,—न्वगा नक्षत्रं, मरुतो देवता, बाहुर्नक्षत्रꣳ, रुद्रो

[१६] काठ. ३९,९ । मा. श्रौ. ६,२,३ ।
[१७] मा. श्रौ. ६,२,३ ।
[१८] तै. ४,४,७,६ । काठ. ३९,९ । वा. १३,५३ । काण्व. १४,५५ । मा. श्रौ. ६,२,३ ।
[१९] तै. १,४,३४ । तै. आ. ३,१९ । काठ. ४०,४ । वा. १३,५३ । काण्व. १४,५५ । मा. श्रौ. ६,२,३ ।

देवता, पुनर्वसू नक्षत्र,—मदितिर्देवता, तिष्यो नक्षत्रं, बृहस्पतिर्देवता,—ऽऽश्रेषा नक्षत्रꣳ,
सर्पा देवता, मघा नक्षत्रं, पितरो देवता, फल्गुनी नक्षत्रं, भगो देवता, फल्गुनी नक्षत्र,
—मर्यमा देवता, हस्तो नक्षत्रꣳ, सविता देवता, चित्रा नक्षत्रं, त्वष्टा देवता, निष्ट्या
नक्षत्रꣳ, वायुर्देवता, विशाखे नक्षत्र,—मिन्द्राग्नी देवता,—ऽनूराधा नक्षत्रं, मित्रो देवता,
ज्येष्ठा नक्षत्रꣳ, वरुणो देवता, मूलं नक्षत्रं, निर्ऋतिर्देवता,—ऽऽषाढा नक्षत्र,—मापो देवता,
—ऽऽषाढा नक्षत्रꣳ, विश्वे देवा देवता,—ऽभिजिन्नक्षत्रं, ब्रह्मा देवता, श्रोणा नक्षत्रꣳ, वि-
ष्णुर्देवता, श्रविष्ठा नक्षत्रꣳ, वसवो देवता, शतभिषं नक्षत्र,—मिन्द्रो देवता, प्रोष्ठपदा
नक्षत्र,—महिर्बुध्न्यो देवता, प्रोष्ठपदा नक्षत्र,—मज एकपाद्देवता, रेवती नक्षत्रं, पूषा देव-
ता,—ऽश्वयुजा नक्षत्र,—मश्विनौ देवता, भरणीर्नक्षत्रꣳ, यमो देवता, ब्राह्मणो नक्षत्रꣳ,
सोमो देवता,—ऽग्ने रुचः स्थ, प्रजापतेः सोमस्य धातु,—ऋचे त्वा, रुचे त्वा, भासे त्वा,
ज्योतिषे त्वा, तेन छन्दसा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥ २० ॥ १०३
समीची नामासि, प्राची दिक्, तस्यास्तेऽग्निरधिपति,—रसितो रक्षिता, यश्च तेऽधिपति-
र्यश्च रक्षिता ताभ्यां नमो अस्तु, तौ नो मृडतां, ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे
दध्म, ओजस्विन्या नामासि, दक्षिणा दिक्, तस्यास्त इन्द्रोऽधिपति,—स्तिरश्चिराजी रक्षिता,
यश्च तेऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु, तौ नो मृडतां, ते यं द्विष्मो यश्च नो द्वेष्टि
तमेनयोर्जम्भे दध्मः, प्राची नामासि, प्रतीची दिक्, तस्यास्ते सोमोऽधिपतिः, स्वजो
रक्षिता, यश्च तेऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु, तौ नो मृडतां, ते यं द्विष्मो यश्च
नो द्वेष्टि तमेनयोर्जम्भे दध्मः, सुषदा नामास्यु,—दीची दिक्, तस्यास्ते वरुणोऽधिपतिः,
पृदाकू रक्षिता, यश्च तेऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु, तौ नो मृडतां, ते यं
द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मो, ऽवस्था नामास्य,—वाची दिक्, तस्यास्ते विष्णु-
रधिपतिः, कल्माषग्रीवो रक्षिता, यश्च तेऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु, तौ नो
मृडतां, ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मो, ऽधिपत्नी नामास्यू,—र्ध्वा दिक्,
तस्यास्ते बृहस्पतिरधिपति,—श्चित्रो रक्षिता, यश्च तेऽधिपतिर्यश्च रक्षिता ताभ्यां नमो अस्तु,
तौ नो मृडतां, ते यं द्विष्मो यश्च नो द्वेष्टि तमेनयोर्जम्भे दध्मः ॥ २१ ॥ १०४

[२०] तै. ४,४,१० । काठ. ३९,१३ । वा. १३,३९;१४,५३;१३,१९,२२,१४,६,११,१४;१५,५७-५८,६४ । काण्व. १४,४२,१३,५४;१४,१९,२२;१५,५,१५-१६,१६,७२,८४ । मा. श्रौ. ६,२,३ ।
[२१] तै. ५,५,१० । [यं द्विष्म०...जम्भे दध्मः । अथर्व. ३,२७,१-६]

स्वयं कृण्वानः सुगमप्रयावं तिग्मशृङ्गो वृषभः शोशुचानः ।
प्रत्नꣳ सधस्थमनुपश्यमाना आ तन्तुमग्निर्दिव्यं ततान ॥ १०५
त्वं तन्तुरुत सेतुरग्ने त्वं पन्था भवसि देवयानः ।
त्वयाग्ने पृष्ठꣳ वयमारुहेम यत्र देवैः सधमादं मदेम ॥ १०६
अतिसर्गं ददतो मानवा योर्ध्वं पन्थामनुपश्यमानाः ।
अजुषन्त मरुतो यज्ञमेतꣳ वृष्टिद्यावानममृतꣳ स्वर्विदम् ॥ १०७
आवर्तमानो भुवनस्य मध्ये प्रजाः कृण्वन् जनयन् विरूपाः ।
सꣳवत्सरः परमेष्ठी धृतव्रतो यज्ञं नः पातु रजसः परस्मात् ॥ १०८
प्रजां ददातु परिवत्सरो नो धाता दधातु सुमनस्यमानः ।
बह्वीः साकं बहुधा विश्वरूपा एकव्रता मामभिसंविशन्तु ॥ २२ ॥ १०९
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ ११०
यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव ।
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ १११
य ओजोदा बलदा यस्य विश्व उपासते प्रशिषꣳ यस्य देवाः ।
यस्य छायामृतꣳ यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ ११२
यस्येमे विश्वे गिरयो महित्वा समुद्रꣳ यस्य रसया सहाहुः ।
दिशो यस्य प्रदिशः पञ्च देवीः कस्मै देवाय हविषा विधेम ॥ ११३

[२२] काठ. ४०,१२ । तै. ब्रा. २,४,२,५-६ । मा. श्रौ. ६,२,६ । [धाता दधातु सुमनस्यमानः । अथर्व. ७,१९,१;१३,१,३५]
[२३] मै. २,७,१५;३,१२,१६-१७ । तै. ४,१,८,३ । काठ. ४०,१, । वा. ११;१०१;१३,४;२३,१-३;२५,१०-१३, २७,२५-२६;११,३४;३२,३,६-७ । काण्व. १३,१०१;१४,४;२५,१,३;२७,१४-१७;२९,३३-३५;३१,४६ । मा. श्रौ. ६,२,३ । [हिरण्यगर्भः समवर्त०......विधेम । ऋ. १०,१२१,१; अथर्व. ४,२,७;११,५,१ तै. सं. ४,१,८,३;२,८,२; ताण्ड्य. ब्रा. ९,९,१२, नि. १०,२३ । यः प्राणतो०... विधेम । ऋ. १०,१२१,३; अथर्व. ४,२,२; तै. सं. ४,१,८,४;७,५,१६,१ । य ओजोदा (आत्मदा)०...विधेम । ऋ. १०,१२१,२; अथर्व. ४, २,१,१३,३,२४; तै. सं. ४,१,८,४;७,५,१७,१ । यस्येमे विश्वे गिरयो (हिमवन्तो)०... । विधेम । ऋ. १०,१२१,४; अथर्व. ४,२,५; तै. सं. ४,१,८,४]

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितꣳ येन नाकः ।
यो अन्तरिक्षꣳ विममे वरीयः कस्मै देवाय हविषा विधेम ॥ ११४
यं इमे द्यावापृथिवी तस्तभाने अधारयद्रोदसी रेजमाने ।
यस्मिन्नधि विततः सूरा एति कस्मै देवाय हविषा विधेम ॥ ११५
आपो ह यन्महतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां निरवर्ततासुः कस्मै देवाय हविषा विधेम ॥ ११६
आ नः प्रजां जनयतु प्रजापतिर्धाता दधातु सुमनस्यमानः ।
सꣳवत्सरं ऋतुभिः सꣳविदानो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ २३ ॥ ११७

[१४७८]

॥ इति मध्यमकाण्डे त्रयोदशः प्रपाठकः ॥ १३ ॥

॥ इति मध्यकाण्डं समाप्तम् ॥

[येन द्यौरुग्रा०...विधेम । ऋ. १०,१२१,५; अथर्व. ४,२,४; तै. सं. ४,१,८,५ । य इमे द्यावा पृथिवी० । (यं क्रन्दसी अवसा) तस्तभाने०... ऋ. १०,१२०,९; अथर्व. ५,१२,९; तै. ब्रा. ३,६,३,४; नि. ८,१४ । आपो ह यन्वहु० (-यत्बृह०)... विधेम । विधेम । ऋ. १०,१२१,६; अथर्व. ४,२,३; तै. सं. ४,१,८,५ । कस्मै देवाय०...विधेम । ऋ. १०,१२१,७; अथर्व. ४,२,६; तै. सं. २,२,१२,१;४,१,८,५; तै. आ. १,२३ ८ । आ नः प्रजां०... । ऋ. १०,८५,४३; अथर्व. १४,२,४०] ऋ. १०,१२१,१-९; अथर्व. ४,२,१-८ ।

अथ तृतीयं काण्डम् ।

अथ प्रथमः प्रपाठकः ।

अग्निचितिब्राह्मणम् ।

जुहूमग्रे संमार्ष्टि, जुहूर्वै यज्ञमुखं, मुखतो वा एतद्यज्ञमालभ्य, जुꣳह्वा वै देवा विराजम-
हयन्त, तज्जुह्वा जुहूत्वं,—मन्नꣳ वै विरा,—डन्नं जुहू,—रꣳकोऽग्नि,—र्यज्जुह्वा जुहोत्यन्नस्य
चार्कस्य चावरुद्ध्या, अष्टौ कृत्वो जुह्वां गृह्णात्य,—ष्टाक्षरा गायत्री, गायत्री यज्ञमुखꣳ,
यज्ञमुखमेवालभ्य, यत्सावित्राणि हूयन्ते प्रसूत्या, अथो यजुषामेव नानावीर्यत्वाया,—ऽग्निर्वै
यत्र यत्रागछत् तꣳ सवितान्वपश्यद्यत्सावित्राणि हूयन्तेऽग्नेरेवानुख्यात्या, अग्निं ज्योतिर्निचाय्य
पृथिव्या अध्याभरदिति, सविता वा एतदग्रे ज्योतिः पृथिव्याः संभरत्, तस्मादेवमाह,
युक्तिमन्ति च जुहोति मनस्वती च, युक्तेन हि मनसा यज्ञस्तायते, षड्गृमाणि भवन्ति,
षड्वा ऋतव, ऋतुष्वेव प्रतितिष्ठत्ये,—ति वा एष यज्ञमुखाद्ꣳयोऽन्यामाग्नेय्या अग्रे देवतामुपैति,
यत्सावित्राणि न स्युरियात्सावित्रात् प्रसवा,—दष्टौ वा एतानि यजूꣳष्य,—ष्टाक्षरा गायत्री, गायत्री
यज्ञमुखं, तेन यज्ञमुखान्नैति, यदु सावित्राणि तेन सावित्रात् प्रसवान्नैति, छन्दोभिर्जुहोति,
छन्दोभिर्वा एतदग्नये बलिꣳ हारयति, बहवो हास्य बलिहृतो भवन्त्य,—ग्नै यज्ञस्य नेदीयो,
यजुर्यजमानस्य, यदि कामयेत, यज्ञꣳ यज्ञयशसेनार्पयेय,—मित्यृगुत्तमानि कुर्याद्, यज्ञꣳ
वा एतद्यज्ञयशसेनार्पयति, यदि कामयेत, यजमानꣳ यज्ञयशसेनार्पयेयमिति, यजुरुत्तमानि
कुर्याद्, यजमानꣳ वा एतद्यज्ञयशसेनार्पयत्या,—हुतीनाꣳ वा अभिक्रान्त्या यजमान ऋध्नोति,
यं कामयेत, ऋध्नुयादिति, तस्य सकृत्सर्वाण्यनुद्रुत्य जुहुयाद्, ऋध्नोत्ये,—व यं कामयेत,
पापीयान्त्स्यादिति, तस्य नाना जुहुयात्, पापीयान् भवत्यृ,—चा स्तोमꣳ समर्धये,—त्याह,
समृद्ध्या एव, गायत्रेण रथन्तरमिती,—यꣳ वै गायत्री,—यꣳ रथन्तर,—मसौ बृह,—दनयोर्वा
एषां लोकयोर्व्याप्त्या अन्ततः क्रियते, ऽष्टौ वा एतानि यजूꣳष्य,—ष्टाक्षरा गायत्र्य,—क्षरशो
वा एतद्गायत्रीं प्रीणात्य,—थ यदाहुतिर्नवमी तेन त्रिवृतो यज्ञमुखान्नै,—त्यथ यदेकामाहुतिमष्टा-
भिर्यजुर्भिर्जुहोति तस्मादेकस्मै सते बहवो बलिꣳ हरान्ति, बहवो हास्य बलिहृतो भवन्ति,

[१] मै. २,७,१ । तै. ५,१,१ । कपि. २९,७ । श. ब्रा. ६,३,१,१ ।

यजुरुत्तमानि भवन्ति, ब्रह्म वै यजु,—र्ब्रह्मणि वा एतदन्ततो यज्ञस्य यजमानः प्रतितिष्ठति ॥१॥ १
सावित्रैरभ्रिमादत्ते प्रसूत्यै, चतुर्भिरादत्ते, चत्वारि वै छन्दाꣳसि, छन्दोभिरेवादत्ते,
ऽथो ब्रह्म वै छन्दाꣳसि, ब्रह्मणैवादत्त, इयꣳ वै गायꣳत्र्य,—न्तरिक्षं त्रिष्टुब्, द्यौर्जगती,
दिशोऽनुष्टुप्, सवितृप्रसूतो वा एतदेभ्यो लोकेभ्यश्छन्दोभिर्दिग्भ्यश्चाग्निꣳ संभरति, यत्र वा
अꣳदोऽग्निर्होत्रादुदपाक्रामत्स सर्वेषु भूतेष्ववसद्, याꣳ वनस्पतिष्ववसत्ताꣳ वेणा अवसत्, स
यत्र निरदहत् तानि कल्माषाण्यभवन्, येन समचरत्तत्सुषिरꣳ, यत्रावसत् तत् पर्व, यद्वैणव्य-
भ्रिर्भवति स्वेनैवैनꣳ योनिना संभरति, यो वै वनस्पतीनां फलग्रहितमः स एषाꣳ वीर्यवत्तमो,
वेणुर्वै वनस्पतीनां फलग्रहितमः, स एषाꣳ वीर्यवत्तमो, ऽन्नꣳ वै फल,—मन्नमꣳर्को, ऽꣳर्को
ऽग्नि,—रर्केण वा एतदन्नमर्कमग्निꣳ संभरति, व्याममात्री काꣳर्य,—तावद्वै पुरुषे वीर्यꣳ, वीर्य-
संमिता क्रियते, ऽथो एतावान् वै पुरुषे महिमा, महिम्नोऽवरुद्ध्या, अरत्निमात्री कार्या
यज्ञपुरुषासंमिता, प्रादेशमात्री काꣳर्या विष्णुना यज्ञेन संमितो,—भयतःक्ष्णुत्काꣳर्याभयस्यान्ना
द्यस्यावरुद्ध्या, अन्यतःक्ष्णुत्कार्या, अन्यतःक्ष्णुद्धि फाल,—स्तावन्तमर्कं करोत्य,—न्नꣳ वा
अꣳर्को, ऽन्नाद्यस्यावरुद्ध्या, औदुम्बरी कार्या,—र्ग्वा उदुम्बर, ऊर्जोऽवरुद्ध्या, अपरिमिता
कार्यापरिमितस्यावरुद्ध्यै, य एवं कश्च वृक्षः फलग्राहिस्तस्य काꣳर्यान्नाद्यस्यावरुद्ध्यै ॥२॥ २
अश्वेन वै देवा अग्रे विजितिꣳ व्युजयन्त, यदश्वेन यन्ति, विजित्या, अग्निर्वै यत्र यत्रा-
गछत् तं प्रजापतिरन्वपश्यत्, प्राजापत्योऽश्वो, यदश्वेन यन्त्यग्नेरेवानुख्यात्यै, प्रजापतिर्वा
अग्निꣳ संभरिष्यन्त्स एभ्यो लोकेभ्योऽश्वं निर्माय दिग्भ्यश्चाग्निꣳ समभरद्, यदाह, दिवि ते
जन्म परममन्तरिक्षे तव नाभिः पृथिव्यामधि योनिरिदिति, यथादेवतꣳ वा एतदेभ्यो लोकेभ्यो
ऽश्वं निर्माय दिग्भ्यश्चाग्निꣳ संभरति, युञ्जाथाꣳ रासभꣳ युव,—मित्याह, युक्त्या एवं,
ऽग्निर्वा एतस्याग्रे सूर्यस्य योने रेतो निर-
गर्दभेन संभरत्ये,—ष हि पशूनामनुपजीवनीयतमो,
दहत्, तस्मादेष समावद्वन्यैः पशुभी रेतो धत्ते, ऽथ कनिष्ठो, ऽश्वं पूर्वं नयन्ति गर्दभमपरं
पापवसीयसस्य व्यावृत्त्यै, तस्माच्छ्रेयाꣳसं पूर्वꣳ यन्तं पापीयान् पश्चादन्वेति, यदि काम-
येत, पापवसीयसꣳ स्यादिति, गर्दभं पूर्वं नयेयुरपरमश्व,—मेतेन वै विपृजुनः सौराकिः
पापवसीयसं चकार, तत् पापवसीयसमेवैतेन करोति, योगे योगे तवस्तर,—मित्यूतिमत्या
वाजवत्या यन्त्य,—न्नꣳ वै वाजो, गातुरूति,—रन्नाय च खलु वै गातवे चाग्निश्चीयते,

[२] मै. २,७,१ । काठ. १९,१ । कपि. २९,८ । श. ब्रा. ६,३,१,३० ।
[३] मै. २,७,२ । तै. ५,१,२ । काठ. १९,२ । कपि. २९ ८ । श. ब्रा. ६,३,२,३,१-५ । वा. ११,१४-१६ । काण्व. १२, १४-१६ । [योगे-योगे तवस्त० । ऋ. १,३०,७; सा. १६३,७४३; अथर्व. २०,२६,१; मै. सं. ४,१,२,१]

यदूतिमत्या वाजवत्या यन्त्यन्नस्य च गातोश्चावरुद्ध्यै, भवति वा एष ꣳयोऽग्निं चिनुते, सर्वो वै
भवत इरस्यति, वज्री वा एष प्राजापत्यो यदश्वो, यदाह, प्रतूर्तं वाजिन्नावक्राम वज्रशस्तीरिति, वज्रेण
वा एतदशस्तीररातीयन्तमवक्रामति, रौद्रा वै पशवो, ऽग्नी रुद्रो, यद्रुद्रात् पशूननिर्याच्याग्निं
चिन्वीत रुद्रोऽस्य पशूनभिमानुकः स्याद्, यदाह, रुद्रस्य गाणपत्यान्मयोभूरेहीति, रुद्राद्वा
एतत् पशून्निर्याच्याग्निं चिनुते, ऽपातुकोऽस्य पशुपतिः पशून् भवत्यु,—ꣳर्वन्तरिक्षꣳ वीहीत्याहैषां
लोकानाꣳ विधृत्यै, रक्षाꣳसि वा एतं जिघाꣳसन्त्यग्निꣳ संभरिष्यन्तो, यदाह, स्वस्तिग-
व्यूतिरभयानि कृण्वन्निति, स्वस्तिमेवाभ्यामकः, पुरीषꣳ वा अग्नेरायतन,—मङ्गिरस एतमग्रे
समभरद्, यदाहा,—ऽग्निं पुरीष्यमङ्गिरस्वदाभरेति, सायतनमेवैनं देवताभिः संभरति, येन
पुरुषेण संगछेत तमभिमन्त्रयेता,—ऽग्निं पुरीष्यमङ्गिरस्वदछेमा इति, वाजमेव तेन तस्माद् वृङ्क्ते,
प्रजापतये प्रोच्याग्निश्चेतꣳव्या, इत्याहु,—र्यतः सूर्यस्योदयनं ततो वल्मीकवपामुपघ्नन् ब्रूया,—दग्निं
पुरीष्यमङ्गिरस्वद्भरिष्यामा इती,—यꣳ वै प्रजापति,—स्तस्या एष कर्णो यद्वल्मीक,—स्तस्मा एव
प्रोच्याग्निं चिनुते, शृण्वन्ति हैनमग्निं चिक्यान,—मसा अग्निमचेष्टेति, तस्मात् पापीयाञ्छ्रेयस
कर्ण आह, कर्णः कर्णायाह ॥ ३ ॥ ३
अन्वग्निरुषसामग्रमख्यदित्या,—हा,—ऽनुख्यात्या एवा,—ऽऽगत्य वाज्यध्वानꣳ सर्वा मृधो विधू-
नुता इति, मृध एव व्यास्थत्तछद्, वा एतं प्रजापतिः पूर्वयर्चा,—ऽविन्ददुत्तरयै,—षदेवैनं पूर्वय-
र्चा,—ऽविन्ददुत्तरया, द्यौस्ते पृष्ठं पृथिवी सधस्थमिति, द्यौꣳर्ह्येतस्य पृष्ठं, पृथिवी सधस्थ,—
मात्मान्तरिक्षꣳ, समुद्रो योनिरित्या,—त्मा ꣳह्येतस्यान्तरिक्षꣳ, समुद्रो योनि,—र्विख्याय च-
क्षुषा त्वमभितिष्ठ पृतन्यत इति, पृतन्यन्तमेवाभितिष्ठति, यं द्विष्यात्तं ब्रूयात् ॥ अमुमभितिष्ठ॥
इति तमेवाभितिष्ठत्यु,—त्क्रामेत्या,—हो,—त्क्रान्त्या एवं, यत्र वै यज्ञस्यानुरूपं क्रियते तद्यज-
मान ऋध्नोत्यु,—त्क्रामोदक्रमी,—दित्यनुरूपꣳ वा एतत् क्रियते यज्ञस्यावरुद्ध्यै, कृष्णो वै
भूत्वाग्निरश्वं प्राविशत्, स एतदगछद्यत्र मृगशफो,—यदश्वस्य पदे जुहोत्यग्निमत्येव जुहोत्यायतनव-
त्य,—न्धोऽध्वर्युः स्याद्यदनायतने जुहुया,—देतद्वै तद्यदाहु,—र्मृगशफमन्वराडिति, मनस्वती-
भ्यां जुहोति, मनसा ह्याहुतीराप्यन्ते, त्रिष्टुब्भ्यां जुहोतीन्द्रियस्यावरुद्ध्या, अन्नवतीभ्यां

[४] मै. २,७,२ । तै. ५,१,२-३ । काठ. १९,३-४ । कपि. ३०,१ । श. ब्रा. ६,३,३,१ । वा. ११,१७-२२ । काण्व. १२ १७-२२ । [अन्वग्निरुषसा० । अथर्व. ७,८२,४; १८,१,२७-२८]

जुहोत्यग्निश्चस्यावरुद्ध्यै, गायत्र्या परिलिखत्य,—स्यां एवैनं तेन परिगृह्णाति, त्रिष्टुभा,—ऽन्तरिक्षाचैना,—ऽनुष्टुभा परिलिखत्य,—नुष्टुब्वै सर्वाणि छन्दांसि परिभूः,—स्तस्मादनुष्टुभा परिलिखति, माविभ्रंशग्निर्मादसे प्रसूत्यै, द्वाभ्यां खनति, द्विपाद्यजमानः प्रतिष्ठित्यै, शुन्वा अत्र प्रजा ऋछति यत्राग्निः खायते चीयते वा, यदाह, शिवं प्रजाभ्योऽहिंसन्तमिति, प्रजाभ्य एवैनं शिवमकः ॥ ४ ॥

४-६

अपां पृष्ठमसी,—त्याहा,—ऽपां ह्येतत् पृष्ठं, पृष्ठेनैवैनत् पृष्ठमकर्योनिरग्नेरिति, योनिर्वा एषोऽग्नेर्यत् पुष्करपर्णं, नाभिर्वक्कः, सयोनिमेवं सनाभिः संभ्रियते, दिवो मात्रया वरिणा प्रथस्वे,—त्यनयोरेवैनं मात्रया वरिणा प्रथयति, शर्म च स्थो वर्म च स्था, इति कृष्णाजिनं च पुष्करपर्णं च संस्तृणाती,—मे एवास्मा एतद् द्यावापृथिवी संस्तृणाति, व्यचस्वती संवसेथामिति, न वा एतन्मनुष्या यन्तुमर्हन्त्या,—भ्यामेवैनं परिगृह्णाति, कृष्णाजिनेन संभरत्ये,—ष हि पशूनामनुपजीवनीयतमो, ऽथो आरण्यानेव पशूञ्छुचार्पयति, लोमतः संभरत्य,—तो वै कृष्णाजिनस्य मेध्यं, यज्ञेनैव यज्ञं संभरति, पुष्करपर्णेन संभरति, योनिर्वा एषोऽग्नेर्यत् पुष्करपर्णं, स्वेनैवैनं योनिना संभरति, गायत्रीभिर्ब्राह्मणस्य संभरति, गायत्रो हि ब्राह्मणो,—स्त्रिष्टुभा राजन्यस्य, त्रैष्टुभो हि राजन्यो, जगतीभिर्वैश्यस्य, जागतो हि वैश्यो यं कामयेत, ऋभ्रुयादिति, तस्य गायत्रीभिश्च त्रिष्टुब्भिश्च संभरेद्, ऋध्नोति, पुरीष्योऽसि विश्वभरा अथर्वा त्वा प्रथमो निरमन्थदग्न इति, प्रजापतिर्वा अथर्वा, स एतमग्रेऽमन्थत्, सोऽजनयत्, स्व एवैनं मन्थति, स जनयति, तिसृभिः संभरति, त्रयो वा इमे लोका, एभ्य एवैनं लोकेभ्यः संभरति, यजुस्तुरीयं, दिग्भ्य एवैनं तेन संभरति, पुरोवातं वै वातं वर्षमनुप्रतितिष्ठति, वर्षमन्वोषधयो, ओषधीरनु पशवः, पशूननु मनुष्या, एता वै प्रतिष्ठा,—स्तां यजमानोऽवरुन्द्धे, ऽपो देवीरुपसृजा मधुमती,—रित्याहौषधीनां प्रतिष्ठित्यै, तासामास्थानादुज्जिहतामोषधयः सुपिप्पला इति, तस्मादेतासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः, सं ते वायुर्मातरिश्वा दधात्विति, तस्मादेतस्या यत्कृष्यते यत् खायते तत् संधीयते, यद् घृतेन जुहुयाच् शुचैनामर्पये,—दप यदप उपसृजति शमयत्येवैनं, यो देवानां चरसि

[५] मै. २,७,३। तै. ५,१,४-५। काठ. १९,४-५। कपि. ३०,२-३। श. ब्रा. ६,४,१,६। वा. ११,२९-३२,३८-४३। काण्व. १२,२९-३२,३८-४३।

प्राणथेन कस्मै देव वषडस्तु तुभ्यमिति, षड्वा ऋतव, ऋतुषु वा एतद् वृष्टिं प्रतिष्ठापयति, तस्मात्सर्व ऋतवो वृष्टिमन्तः, सुजातो ज्योतिषेति, स्वर्ग्यमेवैनमक,—र्वासो अग्ने विश्वरूपं संव्ययस्व विभावसा इति, छन्दांसि वा अग्नेर्वास,—श्छन्दांस्येव वस्ते, छन्दोभिरेवैनं परिददात्यागाम्मुकमेनमस्मिँल्लोके वासो भवत्य,—नग्नोऽमुष्मिँल्लोके भवति य एवं वेद, वरुणमेनिर्वा एष एत,—र्हि उदुतिष्ठ स्वध्वरे,—त्यूर्ध्वमेव वरुणमेनिमुत्सृजति, द्वाभ्यामुत्सृजति, द्विपाद्यजमानः प्रतिष्ठित्यै, स जातो गर्भो असि रोदस्योरित्य,—नयोर्वा एष गर्भ, आभ्यामेषोऽधिजायत, आभ्यामेवैनमधिजनयत्य,—ग्ने चारुर्विभृता ओषधीष्विति, तस्मात् सर्वास्वोषधीष्वग्निः, प्र मातृभ्यो अधि कनिक्रदद्गा इत्यो,—षधयो वा एतस्य मातर,—स्ताभ्या एवैनमधिप्रच्यावयतै,—छद्वा एवं प्रजापतिः पूर्वेणार्धकृचैना,—ऽनूत्तरेणातिष्ठतै,—पीदेवैनं पूर्वेणार्धकृचैना,—ऽनूत्तरेणास्थित ॥ ५ ॥

७

स्थिरो भव वीड्वङ्ग इति गर्दभ आदधाति, वीर्यमस्मिन् दधाति, तस्मात् सर्वेषां पशूनां गर्दभो वीर्यवत्तमो, वीर्यं ह्यस्मिन् दधाती,—श्वरो वा एषोऽन्तरिक्षसंक्रुत्वो प्रजा हिंसितो,—र्यदाह, शिवो भव प्रजाभ्य इति, प्रजाभ्य एवैनं शिवमक,—र्मा पार्थायुषः पुरेत्या,—युरेवास्मिन् दधाति समष्ट्यै, वृषाग्निं वृषणं भरन्निति, वृषा ह्येष वृषणं भर,—न्नपां गर्भं समुद्रियमित्य,—पां ह्येष गर्भः समुद्रियो, ऽग्न आयाहि वीतय इत्य,—ग्निना वै मुखेन देवा इमाँल्लोकानभ्युजय,—न्नग्निना वा एतन्मुखेन यजमान इमाँल्लोकानभिजयत्य,—तं सत्यमृतं सत्य,—मृते चैवं सत्ये च प्रतितिष्ठती,—यं वा ऋत,—मसौ सत्य,—मनयोरेव प्रतितिष्ठत्य,—हर्वा ऋतं, रात्रिः सत्य,—महोरात्रयोरेव प्रतितिष्ठत्यो,—षधयः प्रतिगृभ्णीताग्निमेतमित्यो,—षधीरेवैनं सम्यञ्चं दधाति, पुष्पवतीः सुपिप्पला इत्यो,—षधीरेव फलं ग्राहयति, तस्मादोषधयः शीर्षन् फलं गृह्णन्ति, वरुणमेनिर्वा एष एतर्ह्युपनद्धो, वि पाजसा पृथुना शोशुचाना इत्य,—नुरूपेणैव वरुणमेनिं विष्यति, द्वाभ्यां विष्यति, द्विपाद्यजमानः प्रतिष्ठित्या, आपो हि ष्ठा मयोभुवा इत्य,—प उपसृजत्या,—पो वा अशान्तस्य शमयित्रिका,—स्तस्मादप उप-

[उदु तिष्ठ० । ऋ. ८,२३,५; तै. सं. ४,१,४,१। स जातो गर्भो० । १०,१,२; तै. सं. ४,१,४,१]
[६] मै. २,७,४-५। तै. ५,१,५-६। काठ. १९,५-६। कपि. ३० ४। श. ब्रा. ६,४,४,३। वा. ११,४४-५०,५३-५४; ३६,१४। काण्व. १२,४४-४७,४९-५१,५४—५५,३६,१४। [अग्ना (ग्न) आयाहि वीतये । ऋ. ६,१६,१०; सा. १,६६०; तै. सं. २,५,७,३;८,१; तै. ब्रा. ३,५,२,१ । वि पाजसा पृथुना० ऋ. ३,१५,१; तै. स. ४,१,५ १ । आपो हि ष्ठा० । ऋ. १०,९,१; सा. १८३७; अथर्व. १,५,१; तै. सं. ४,१,५,१;५,६,१,४;७,४,१९,४; तै. आ. ४,४२,४;१०,१,११; नि. ९,२७]

सृजति शान्त्यै, तिसृभिरुत्सृजति, त्रिवृद्ध्यग्नि,—र्वरुणमेनिर्वा एष एतर्हि, मित्रः संसृज्या पृथिवीमिति, मित्रेणैव वरुणमेनिं संसृजति, रुद्राः संसृज्य पृथिवीमित्ये,—ता वा एतामग्रे देवताः प्रजापतये समसृजं,—स्ताभिरेवैनां संसृजति, पञ्चभिः संसृजति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य ॥ ६ ॥

८

मखस्य शिरोऽसी,—त्याह, यज्ञो वै मख,—स्तस्य वा एतच् शिरो यदुखा, मुखतो वा एतद्यज्ञमालभ्य, वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसेति, छन्दोभिश्च वा एषा देवताभिश्च क्रियते, छन्दोभिश्चैवैनां देवताभिश्च करोति, ध्रुवासि पृथिव्यसीति, छन्दसामेवैषाग्नी,—रदित्या रास्ना,—स्यदितिष्टे बिलं गृभ्णात्विति, यजुषा करोत्य,—यजुषा हि मनुष्याः कुर्वन्ति व्यावृत्त्यै, तां पुत्रेभ्यः प्रायछ,—ददितिः श्रपयानित्या,—दित्यां वा इदं सर्वो यन्मनुष्याः,—स्तेभ्य एवैनां संप्रादात, त्र्युद्धिः कार्या, त्रयो वा इमे लोका, एषां वा एषा लोकानामुखा प्रतिमा क्रियते, ऽष्टस्तना कार्या, गायत्र्या रूपं, चतुस्तना कार्यादित्या दोहाय, द्विस्तना कार्या,—ऽन्तरिक्षं वा उखे,—मौ लोकौ स्तनौ, प्रत्ती ह वा इमौ लोकौ दुहे य एवं वेद, व्याममात्री कार्यै,—तावद्वै पुरुषे वीर्यं, वीर्यसंमिता क्रियते, ऽथो एतावान् वै पुरुषे महिमा, महिम्नोऽवरुद्ध्या, अरत्निमात्री कार्या यज्ञपुरुषासंमिता, प्रादेशमात्री कार्या विष्णुना यज्ञेन संमिता,—ऽथो प्रजापतेरेवानतिवादाय सप्तभिर्धूपयति, सप्त वै शीर्षन् प्राणाः, शिर एतद्यज्ञस्य यदुखा, शीर्षन् वा एतद् प्राणान् दधाति, सप्तभिर्धूपयति, सप्त वै छन्दांसि, छन्दोभिरेवैनां धूपयत्य,—थो ब्रह्म वै छन्दांसि, ब्रह्मणैवैनां धूपयति, वैष्णवं वा एतद् पात्रं, तस्मादेवं देवतया व्यर्धयति यदन्याभिर्देवताभिर्धूपयति, यदाह, विष्णुस्त्वा धूपयत्वाङ्गिरस्वदिति, स्वयैवैनं देवतया समर्धयत्य,—श्वशकेन धूपयति, वृषा ह्यश्वो वृषाग्निः समृद्ध्या, अथो प्राजापत्यो वा अश्वः, प्राजापत्योऽग्नि,—स्तस्मादश्वशकेन धूपयति सयोनित्वाय ॥ ७ ॥

९

प्रजापतिर्वा अमन्यत, यो वा अस्यां अग्नि विखनिष्यत्यार्तिं स आरिष्यतीति, स एतमपश्यद,—दितिष्ट्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत्खनत्ववटेती,—यं वा अदितिर्देवी विश्वदेव्यवत्य,—नया वै स तदस्यामखनदहिंसायै, न हि स्वः स्वं हिनस्ति,

[७] मै. २,७,६। तै. ५,१,६-७। काठ. १९,६। कपि. ३०,४। श. ब्रा. ६,५,१,१, वा. ११,५७-६०;३७,८। काण्व. १२,५९-६१;३७,८]

देवानां त्वा पत्नीर्देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखा इ,—त्योषधयो वै देवानां पत्नीर्देवीर्विश्वदेव्यवतीरोषधीष्वेवैनां प्रतिष्ठापयति, धिषणा त्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वदभीन्धतामुखा इति, वाग्वै धिषणा देवी विश्वदेव्यवती, वाचैवैनामभीन्द्धे, ग्नास्त्वा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वच् श्रपयन्तूखा इति, छन्दांसि वै ग्नास्त्वा देवीर्विश्वदेव्यवती,—श्छन्दोभिरेवैनां श्रपयति, वरूत्री त्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत्पचतामुखा इ,—त्यहोरात्रे वै वरूत्री देवी विश्वदेव्यवती, अहोरात्राभ्यामेवैनां पचति, जनयस्त्वाछिन्नपत्रा देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वत्पचन्तूखा इति, नक्षत्राणि वै जनयोऽछिन्नपत्रा देवीर्विश्वदेव्यवती,—र्नक्षत्रैरेवैनां पचत्ये,—ता वा एतामग्रे देवताः प्रजापतयेऽपच,—स्तस्मादेतानि पङ्क्तिमन्ति यजूंषि, तैरेवैनां पचति, द्वाभ्यां पचति, द्विपाद्यजमानः प्रतिष्ठित्यै, वरुणमेनिर्वा एष एतर्ह्यभीद्धो, मित्रस्य चर्षणीधृता इति, मित्रेणैव वरुणमेनिमुपैति, देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिरिति, सवितृप्रसूत एवैनामुद्वपत्यात्मनोऽहिंसाया, उत्तिष्ठ बृहती भवे,—त्याह धृत्या एवा,—ऽव्यथमाना पृथिव्यामाशा दिश आपृणेति, तस्मादग्निः सर्वा दिश आभाति ॥ मित्रैतां त उखां परिददाम्यभित्त्या, एषा मा भेदि ॥ इति मित्रायैवैनां परिददात्यभित्त्यै, यदि मित्रायापरित्ता भिद्येत पुनः कार्या स्याद्, वसवस्त्वाछृन्दन्तु गायत्रेण छन्दसेति, छन्दोभिश्च वा एषा देवताभिश्च क्रियते, छन्दोभिश्चैवैनां देवताभिश्चाछृणत्ति, स्वेनायतनेनाजक्षीरेणाछृणत्त्या,—ग्नेयं वा एतत् पयो यदजक्षीर,—माग्नेयमेतत् पात्रं यदुखां, स्वेन वा एतत् पयसा स्वं पात्रमाछृणत्ति, परमं वा एतत् पयो यदजक्षीरं, परममेतत् पात्रं यदुखां, परमेण वा एतत् पयसा परमं पात्रमाछृणत्ति ॥ ८ ॥

१०-१२

षडेतान्याधीतयजूंषि जुहोति, षड्वा ऋतव, ऋतुभिर्वा एतत् पृथिव्या वीर्यं युछते, नाना जुहोति, नानावीर्या ह्येमे प्राणाः, प्राणानां विधृत्यै, यं कामयेत, बधिरः स्यादिति, तस्य सकृत्सर्वाण्यनुद्रुत्य जुहुयात्, प्राणानस्य संभिनत्ति, बधिरो भवति, तस्माद्बधिरो वाचा वदति, न शृणोति, वाचं ह्यस्येन्द्रियमनुपद्यते, प्राणा वा एतानीतराणि

[८] तै. ५,१,७। काठ. १९,७। कपि. ३०,५। श. ब्रा. ६,५,४। वा. ११,६१-६५। काण्व. १२,६१-६६।
[मित्रस्य चर्षणी० । ऋ. ३,५९,६; तै. सं. ३,४,११,५;४,१,६,३; तै. आ. ४,३,२,। सुपाणिः (सुबाहुः) स्वङ्गुरिः० । ऋ. २,३२,७; अथर्व. ७,४६,२, तै. सं. ३,१,११,४]
[९] मै. २,७,७। तै. ५,१,९-१०। काठ. १९,९-१०। कपि. ३०,७-८। श. ब्रा. ६,६,१,१५। वा. ११,६८-८१ काण्व. १२,६९—८२।

छन्दाꣳसि, वागनुष्टुब्, यदनुष्टुभा सप्तमं जुहोति वाचꣳ वा एतत् प्राणेषूपसंदधाति, तस्मादियꣳ वाक्सप्तमी प्राणानां, मा सु भित्था मा सु रिषा, इति प्रवृणक्त्य,—सुरमाया वा एषासीत्, तां देवा एतेन यजुषावृञ्जता,—ऽऽसुरीं माया स्वधया कृतासीति, तन्मायामेवैतेन यजमानो भ्रातृव्यस्य वृङ्क्ते, द्वाभ्यां प्रवृणक्ति, द्विपाद्यजमानः प्रतिष्ठित्यै, प्रवृञ्ज्याद्भूतिकामस्य, भविष्यद्वा इदमुपजीवामो, भविष्यदेवोपैति, श्वः श्वः श्रेयान् भवति, जातमेवदध्याद्गतश्री,—र्जातो वा एष यो गतश्री,—र्जातिमेवैनं जनयति, श्रेष्ठादाहुरेयं कामयेता,—ऽन्नादः स्यादित्ये,—ष वा अग्नीनामन्नादो, ऽन्नकरणं श्रेष्ठ,—मन्नाद्यमस्मा अवरुन्द्धे, प्रदावादाहरेयं कामयेत, प्रसेनेनास्य राष्ट्रं जायुकꣳ स्यादिति, प्रसेनेनास्य राष्ट्रं जायुकं भवति, यतः कुतश्चाहृत्यावदध्याद्यं कामयेता,—ऽस्य पाप्मा भ्रातृव्यो द्वितीयो जायेतेत्ये,—तद्वै यजमानस्यायतनꣳ, स्वे वावास्मा एतदायतने पाप्मानं भ्रातृव्यं द्वितीयं जनयति, द्रवन्नः सर्पिरासुतिरिति, क्रुमुकं घृतान्वक्तमादधात्ये,—षा वा अग्नेः प्रिया तनूर्यत्क्रुमुकं,—स्तेजो घृतं, प्रिययैवैनं तन्वा तेजसा च समर्धयति, परस्या अधि सꣳवता, इत्यौदुम्बरीं, देवा यत्रोर्जꣳ व्यभजन्त तत उदुम्बर उदतिष्ठद्, यदौदुम्बर्यू,—र्जमेवावरुन्द्धे, परमस्याः परावता, इति वैकङ्कती,—मेधं सृष्टस्य भा अपाक्रामत्, तद्विकङ्कतं प्राविशद्, यद्वैकङ्कती, भा एवावरुन्द्धे, यदग्ने यानि कानि चे,—ति शमीमयीꣳ शान्त्या, अग्नये वै न किंचनापरशुवृक्णमस्वदन्त, तस्मै वा एतया सृष्टः प्रयोगिः सर्वमस्वदयद्, यदग्ने यानि कानि चेति, तदग्नय एवैतया सर्वꣳ स्वदयति, सर्वमस्मै स्वदितं भवति, रात्रीꣳ रात्रीमप्रयावं भरन्त इत्या,—शिषमेवाशास्ते, नाभा पृथिव्याः समिधानो अग्निमिति, पृतनाजितमेवैनमक,—रग्निꣳ वै सृष्टꣳ रक्षाꣳस्यजिघाꣳसꣳ,—स्तानि वा एताभिरेवापाहत, याः सेना अभीत्वरीरिति, तदग्निरेवैताभी रक्षाꣳस्यपहन्त्ये,—ता एव समिधा आदध्यायत्र रक्षोभ्यो बिभीयाद्, रक्षसामपहत्या, अथो प्राहुका ह ताꣳ समाꣳ स्तेनान् भवन्ति, तैल्वकीमभिचरन्नादध्या,—देषं वै वनस्पतीनाꣳ वज्र,—स्तमेवाभ्यवजेत,—न्मनसा ध्याये,—न्मनो वा आशी,—र्यो वाचे आहुतिमेवैनं भूतमग्नयेऽपिदधाति,

[द्रवन्नः सर्पिरासुतिः० । ऋ. २,७,६; तै.सं. ४,१,९,१। परस्या अधि० । ऋ. ८,७५,१५; तै.सं.२,६,११,१; ४,१,९,१ । यदग्ने यानि (कानि) कानि० । ऋ. ८,१०२,२०; अथर्व. १९,६४,३; तै. सं. ४,१,१०,१ । सर्वं तदस्तु ते । ऋ. ८,१०२,२१; अथर्व. १९,६४,३; तै. सं. ४,१,१०,१; नि. ३,२०]

मै० १८

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जना इति, तस्मादग्निचितोऽश्लीलं न कीर्तयितवꣳ, नो
अग्निविदः, सꣳशितं मे ब्रह्म सꣳशितꣳ वीर्यं बलमिति, ब्रह्मणा वा एतत् क्षत्रꣳ सꣳ
श्यति, क्षत्रेण ब्रह्मा,—ऽथो ब्रह्म चैवं क्षत्रं च सयुजा अक,—रेतद्वा एषाभ्यनूक्ता ॥ ब्रह्म क्षत्रꣳ
सयुजा न व्यथेते इति, ब्रह्माह क्षत्रं जिन्वति क्षत्रियस्य ।
क्षत्रं ब्रह्म जिन्वति ब्राह्मणस्य यत्समीचीं कृणुतो वीर्याणि ॥ ९ ॥ १३-१४
अग्निभ्यः ॥ इति कामायालभ्यन्ते, यत्कामो भवति सꣳ हास्मै स कामो नमत्या,—ग्नीणन्ति, यज्ञियानेवैनान्मेध्यान् कुर्वन्ति, पर्यग्निकृतानुत्सृजन्त्ययातयामत्वायै,—केन सꣳस्थापयन्ति यज्ञस्य संतत्या अविच्छेदाय, पुष्करा भवन्ति सेन्द्रियत्वाय, त्रिष्टुभो याज्यानुवाक्या भवन्तीन्द्रियस्यावरुद्ध्या, अथैष योऽग्नये वैश्वानराय द्वादशकपालः, सꣳवत्सरो वा अग्निर्वैश्वानरं, एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः, प्रिययैवैनं तन्वा समर्धयत्य,—थो अयातयामत्वायैवा,—ऽयातयामा हि वैश्वानरः, श्वेतꣳ वायवे नियुत्वत आलभेत तेजस्कामो, वायुर्वा अग्नेस्तेज,—स्तस्माद्वायुमग्निरन्वेति, यद्वायवेऽग्नेः सतेजस्त्वाय, यद्वायव एकधा स्यादुन्मादुको यजमानः स्याद्, यन्नियुत्वते द्वितीयत्वाया,—ऽथो धृत्या अनुन्मादाय, सर्वेषाꣳ वा एष पशूनाꣳ रूपाणि प्रति, यद्वायव एकधा स्यादुन्मादुको यजमानः स्याद्, यदेष प्राजापत्यो द्वादशकपालो द्वितीयत्वाया,—ऽथो धृत्या अनुन्मादाया,—ऽथैष आग्नावैष्णव एकादशकपालो, ऽग्निर्वै सर्वा देवता, विष्णुर्यज्ञो, देवताश्चैव यज्ञं चालब्धा,—ऽथैष आदित्यो घृते चरु,—रादित्या वा इत उत्तमाः स्वर्गं लोकमायꣳ,—स्तेभ्य एव प्रोच्य स्वर्गं लोकमेत्या,—दित्या वा अस्मिल्लोक ऋद्धा, आदित्या अमुष्मिन्, पुरोडाशेन वै देवा अस्मिल्लोक आर्ध्नुवꣳ,—श्चरुणामुष्मि,—न्नस्मिन्नेव लोके पुरोडाशेन ऋध्नोति, चरुणामुष्मि,—न्नथैष योऽग्नये वैश्वानराय द्वादशकपालो,
देवायतनꣳ वा अग्निर्वैश्वानरो, देवायतन एवं प्रतिष्ठाप्याग्निं बिभर्त्यै,—षो कामो वै वैश्वानरो,
यत्कामो भवति सꣳ हास्मै स कामो नमति ॥ १० ॥ १५-१६
[१४९४]

॥ इत्युपरिकाण्डे शुक्लप्रमोगः प्रथमः प्रपाठकः ॥ १ ॥

[सꣳशितं मे० । अथर्व. ३,१९,१]
[१०] तै. ५,१,८,१ । काठ. १९,८ । कपि. ३०,६ ।

अथ द्वितीयः प्रपाठकः।

दृशानो रुक्म उर्व्या विभाती,—ति रुक्मं प्रतिमुञ्चते, ऽमृतꣳ वै हिरण्यं, मृत्योरेतद्रूपꣳ यदग्नि,—र्यत् पाशोऽमृतेनैव मृत्युमन्तर्धत्ते, ऽथैते निर्बाधा, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा एतान्निर्बाधानपश्यꣳ,—स्तैरसुरानेभ्यो लोकेभ्यो निरबाधन्त, तन्निर्बाधानां निर्बाधत्वं, तदेतैरेव निर्बाधैर्यजमानो भ्रातृव्यमेभ्यो लोकेभ्यो निर्बाधता, एकविꣳशतिनिर्बाधो भवति प्रतिष्ठित्या, उपरिष्टान्निर्बाधं दिभर्त्य,—धस्तान्निर्बाधꣳ सादयति भ्रातृव्यस्य विनुत्त्यै, नक्तोषासा समनसा विरूपा इत्य,—होरात्राभ्यामेवाग्निमाधत्ते, धापयेते शिशुमेकꣳ समीची, इत्येतꣳ ह्येतेयो रुक्मो ह्येतं धापयेते शिशुमेकꣳ समीची, द्यावाक्षामा रुक्मो अन्तर्विभातीत्ये,—ष ह्येतयो रुक्मो ऽन्तर्विभाति, देवा अग्निं धारयन्द्रविणोदा इति, प्राणा वै देवा द्रविणोदाः, प्राणैरेवाग्निं धत्ते, विश्वा रूपाणि प्रतिमुञ्चते कविरिति, विश्वा हि रूपाण्यग्निः, प्रासावीद्भद्रं द्विपदे चतुष्पदा, इत्याह प्रसूत्या एवं, वि नाकमख्यत्सविता वरेण्या इति, सवितृप्रसूत एवाग्निं बिभर्त्यै,—नु प्रयाणमुषसो विराजतीति, तस्मादुषसो व्युष्टिमन्वग्निराधीयते, सुपर्णोऽसि गरुत्मा,—न्स्त्रिवृत्ते शिरो, गायत्रं चक्षुरित्य,—ग्निर्वा एषा संभृति,—रग्निमेतत्संभरति, तस्मात्सर्वैरङ्गैः पशुर्जायते, पशुरूपोऽग्नि,—र्दिवं गच्छ स्वः पते,—त्याह स्वर्गस्य संभरति, तस्मात्सर्वैरङ्गैः पशुर्जायते, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा एतान् क्रमानपश्यꣳ,—स्तैरसुरानेभ्यो लोकेभ्यः प्राणुदन्त, तानेनपजय्यमजयꣳ,—स्तदेतैरेव क्रमैर्यजमानो लोकस्य समष्ट्या, अथैते क्रमा, भ्रातृव्यमेभ्यो लोकेभ्यः प्रणुदते, ऽनपजय्यꣳ ह जयति, यद्युपाꣳ शिक्यं भवति, यद्वा ऋतव, ऋतुभिरेवाग्निं परिगृह्णात्य,—परिनाभि बिभर्त्यु,—परिनाभि ह्यात्मनः संदेवꣳ, संदेव एवं देवता आत्मन् बिभर्ति, यदधोनाभि बिभृयाच्चोनिं निर्दहे,—दथोऽवधीनं घातुकꣳ स्यात्, प्रक्रामति, तस्माद् ग्राम्याः पशवः प्ररते, ऽथ यत् पुनरभ्यावर्तते तस्मात् पुनः समावर्तन्त, ऊर्जा वा एषा पशुभिरुत्क्रामन्त्सहोत्क्रामति, पुनरूर्जा निवर्तस्वेति, तदूर्जमेव पशून् पुनरेवारुन्द्धे, पुनर्वतीर्भवन्ति संमृद्ध्यै, चतसृभिरभ्यावर्तते, चतुष्पादो वै पशवः, पशूनेवावरुन्द्धे,

[१] तै. ५,१,१०;९। काठ. १९,११। कपि. ३०,१। श. ब्रा. ६,६,४;७,१। वा. १२,१–४,९–१५,१५,४०–४१;१७,७०; [दृशानो रुक्म. ऋ. १०,४५,८; तै. १०,२४ । काण्व. १३,१–६,१०–१६,१६,४१–४२,१८,७०;११,३४। नक्तोषासा समनसा० (वर्णमा०)। ऋ. १,९६,५; तै. सं. ४,१,१०,४;५, सं. १,३,१४,५;४,१,१०,४,१,१,४। विश्वा रूपाणि० । ऋ. ५,८१,२; अथर्व. ७,७३,६; तै. सं. ४,१,१०,४; नि. १२,१३] ५,१,७,११,३।

वरुन्द्ध, इत्थं पर्यावर्तव, एवꣳ हि यज्ञः पर्यावर्तते, ऽथो अमुष्य वा एतदादित्यस्यावृतमनुपर्यावर्तता, आ त्वाहार्षमन्तरभूरित्यन्त ह्येष एतर्हि,—दुत्तमꣳ वरुण पाशमस्मदिति, वरुणपाशमेवोन्मुञ्चत आत्मनोऽहिꣳसाया, अग्ने बृहन्नुषसामूर्ध्वो अस्थादिति, ज्योतिषैवैनꣳ समर्धयति, हꣳसः शुचिषद्वसुरन्तरिक्षसद्,—दिति सादयति, सप्त एवैनꣳ होत्रासु प्रतिष्ठापयत्य,—थो सप्त वा एतेन सामान्यग्नेश्रेभोत्या,—ऽऽसप्तमात्पुरुषादन्नादो भवति, रेतो वा अग्नि,—रन्तरिक्षꣳ वै रेतोऽनुषिच्यते, यदुखो निदध्यादधृताः पशूनां गर्भाः प्रपादुकाः स्यु,—रथ यदुपरि सादयत्यन्तरिक्षसदमेवैनमकर्गर्भाणां धृत्यै, सूयते ५। एषोऽग्नीनाꣳ यच्छ्रीयते, तस्मादेष आसन्दीसद्, सीद त्वं मातुरस्या उपस्था इती,—यꣳ व। अग्नेर्योनिः, स्व एवैनꣳ
योनौ सꣳवेशयति, तिसृभिरुपतिष्ठते, त्रिवृद्ध्यग्निः ॥ १ ॥ १
अथैतद्वात्सप्र,—मेतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामाराध्नोत्, तदग्नेरेवैतेन प्रियं धाम राध्नोत्या,—र्गोत्मकमेनं प्रियं भवति, वत्सप्रियꣳ वै भालन्दनमृषयोऽध्यवद,—न्स्तेना इति, स एतत् सूक्तमपश्यत्, तेनाधिवादमपाजयत्, तेनापचितिमगच्छत्, तदधिवादमेवैतेनापजयत्य,—पचितिमेव गच्छति, द्वादशभिरुपातिष्ठते, द्वादश मासाः सꣳवत्सरः, सꣳवत्सरमेवाप्त्वावरुन्द्धे, त्रिष्टुभो भवन्तीन्द्रियस्यावरुद्ध्या, अन्येद्युः प्रक्रामयत्य,—न्येद्युरुपातिष्ठते, योगक्षेमꣳ वा एतत् प्रजानां दाधार, तस्माद्यायावरा अन्याः प्रजाः, क्षेम्या अन्या, अथ यत् प्रक्रम्योपतिष्ठते तस्माद्यायावरः क्षेम्यमभिप्रयाति, तस्माद्यायावरस्य क्षेम्योऽन्नं बभूव, यदहश्चेष्यमाणः स्यात्तदहरुभयꣳ समस्येत्, प्र च क्रामेदुप च तिष्ठेत, योगक्षेमꣳ वा एतदुभायꣳ यजमानो भ्रातृव्यस्य वृङ्क्ता, उदु त्वा विश्वे देवा इति, विश्वे ह्येदं देवाः स्मो यन्मनुष्या, अग्ने भरन्तु चित्तिभिरिति, यस्मा एवं चित्तायाग्निराधीयते तेनैनं चित्तेन समर्धयति, प्रेदग्ने ज्योतिष्मान् याहीति, ज्योतिषैवैनꣳ समर्धयित्वा प्रवापयत्य,—क्रन्ददग्निः स्तनयन्निव द्यौरित्य,—नुब्रूयाद्, यद्यर्थक्षु उरक्षेद्देदीश्वरो वा एष उरक्षेदुन् यजमानस्य प्रजा

[आ त्वाहार्षं० । ऋ. १०,१७३,१; अथर्व. ६,८७,१; तै. सं. ४,२,१,४; तै. ब्रा. २,४,२,८ । उदुत्तमं वरुण० । ऋ. १,२४,१५; अथर्व. ७,८३,३;१८,४,६९; सा. ५८९; तै. सं. १,५,११,३;४,२,१,३; नि. २,१३। अग्ने(अग्ने) बृहन्नुषसा० । ऋ. १०,१,१; तै.सं. ४,२,१,४। हꣳसः शुचिषद्० । ऋ. ४,४०,५; तै. सं. १,८,१५,२;४, २,१,५; तै. आ. १०,१०,२]

[२] तै. ५,२,१–२ । काठ.-१९,१२। कपि. ३१,१। श. ब्रा. ६,७,४,६,६,४ । वा. १२,६,९,११,३०-३३,४०-४२; १७,५३ । काण्व. १३,७,१०,१२,३१–३३,४१–४३,१८,५३ । [भक्रामन्दति ०... । ऋ. १०,४५,४;

पशुभिश्चिनुत,—स्तेनक्रुदितमेवास्याक,—रथो ह्यनविरथैवाग्निपमाह्मास्ते, समिधाग्निं दुवस्यतेँ,—
ति गायत्र्या ब्राह्मणस्यादध्याद्, गायत्रो हिँ ब्राह्मणं,—स्त्रिष्टुभा राजन्यस्य, त्रैष्टुभो हिँ राज३-
न्यो, द्वाभ्यां गायत्रीभ्या२ वैश्यस्य, यँ हिँ द्वे गाय३त्र्यौ सा जगत्यं,—थो ब्रह्मणे वा
एतद्विशमनुकं करोति, यदि भस्म प्रतियदेताप्सु प्रवेशये,—दापो वा अग्नेर्योनिः, स्व एवैन-
योनौ दधाति, पुरीषं कुर्याद् पशुकामस्य, पशवो वैँ पुरीषं, पशुमान् भवती,—ष्टका वा
सं२युयान्, तेनास्य सर्वा आग्नेयीरिष्टका भवन्त्यु,—र्जी वा एषं पशुभिरुत्सीदन्त्सहोत्सीदति,
पुनरूर्जा निवर्तस्वेति, तदूर्जमेव पशून् पुनरवरुन्द्धे, बोधा मे अस्य वचसो यविष्ठे,—ति बोधद्व-
तीभ्यामुपतिष्ठते, तस्माद् प्रजाः सुप्त्वा पुनः प्रबुध्यन्ते, द्वाभ्यामुपतिष्ठते, द्विपाद्यजमानः
प्रतिष्ठित्यै ॥ २ ॥
२
अपेत वीत वि च सर्पतात, इत्याह, यमदेव३त्यो वा अयं लोको, य३मोऽमुष्य
लोकस्याधिपत्यमानश, यद्यमादेवयजनमनियाच्याग्निं चिन्वीतायमदेवत्योऽस्याग्निः स्यादस्वर्ग्यो,
यदाहा,—ऽऽदादिदं२ यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मा इति, यमाद्वा एतेना-
स्या देवयजनं निरयाचिष्ट, स्मृते देवयजनेऽग्निं चिनुते, यमदेवत्योऽस्याग्निर्भवति स्वर्ग्यं,
उद्घ्नन्ति, यदेवास्या अयज्ञियममेध्यं तदुद्घ्नन्ति, व्याममात्रमुद्घ्नन्त्ये,—तावद्वै पुरुषे
वीर्य२, वीर्यसम्मिते चीयते, ऽथो एतावान् वैँ पुरुषे महिमा महिम्नोऽवरुद्ध्या, अवो-
क्षति, यदेवास्या उद्घ्नन्तः क्रूरमक्र२स्तदक्रूरमक,—स्तच्च शमयत्यं,—थो आपो वा अग्नेर्यो-
निः, स्व एव योनौ चीयते, ऽग्नेर्भस्मास्यग्नेः पुरीषमसी,—ति सिकता निवपत्य,—ग्नेर्वा
एतद्वैश्वानरस्य भस्म यत्सिकता, स्व एव भस्म२श्चीयते, योनिर्वै सिकता, रेत ऊषा,
यत्सिकता न्युप्योषानिर्वपति योनौ वा एतद्रेतो दधाति, तस्माद्योनौ रेतो हितं, तस्माद्योनि
रेतः प्रजायते, प्रजापतिः प्रजा असृजत, ता वा ऊषेभ्य एव योनिरसृजत, प्रजनन२ वा
ऊषाः, प्रजनने वा एतदग्निं श्रीयत, इमे यँ सहास्तां, ते वियती अब्रूता,—मस्तु नौ प्रियं
धाम सहे,—त्यापो वा अम्या यज्ञिया मेध्या,—स्ता अमूं,—रूपा अमुष्या यज्ञिया मेध्या,—स्तं

तै. सं. १,३,१४,२,४,२,१,२,२,२ । समिधाग्निं० । ऋ. ८,४४,१; तै. सं.४,२,३,१; तै. ब्रा. १,२,१,९ ।
बोधा मे अस्य० ... । ऋ.१, १४७,२; तै. सं. ४,२,३,४; नि. ३,२०]
[३] तै. सं. ५,२,३ । काठ. २०,१ । कपि. ३२,३ । वा. १२,४५,६०—६१;५,३ । काण्व. १३,४६,६१—६२;५,३ ।
[अपेत वीत वि० ... । ऋ. १०,१४,९; अथर्व. १८,१,५५; तै. सं. ४,२,४,१; तै. ब्रा. १,२,१,१६; तै.आ.१,
२७,५ ६,६,१]

इमे, यदापश्चोषाश्च भवन्ति यदेवैनयोर्यज्ञियं मेध्यं तदवरुन्द्धे, ऽथो अनयोरेवैनं प्रियं धाम-
भिधत्ते, संज्ञान२ वा ऊषा, उभये वा एतान् पशवोऽभिसंजानते, ये ग्राम्याः पशवो ये
चारण्या, उभये हैनं पशवोऽभिसंजानते, चतस्रः प्राचीः सादयति, चत्वारि वै छन्दा२-
सि, छन्दोभिर्वै देवाः स्वर्गं लोकमाय२,—स्ते दिशा आक्रमन्त, ता अव्लीयन्त, ता
एताभिरदृ२हन्, यदेता उपधीयन्ते दिशां धृत्यै, पशवो वा इष्टका, गार्हपत्य२ वै पशवो
ऽनूपतिष्ठन्ते, द्वे समीची पुरस्तादुपदधाति, द्वे समीची पश्चा,—दुभयत एवास्मै समीचः
पशूननुपदधाति पशूनां परिगृहीत्या, अष्टौपदधात्यु,—ष्टाक्षरा गायत्री, गाय३त्रोऽग्नि,—
र्यावानेवाग्निस्तं चिनुता, एकवि२शतिः का३र्या प्रतिष्ठित्यै, प्रतिष्ठा ह्येकवि२शो, ऽथो
एकवि२शतिविधो हिं गार्हपत्य,—स्त्रिचितिकः का३र्य,—स्त्रयो वा इमे लोका, इमानेव
लोकानाप्नोति, पञ्चचितिकः का३र्यः, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य, चतुर्भिः
संनिवपति, चत्वारि वै छन्दा२सि, छन्दोभिरेव संनिवपत्य,—थो ब्रह्म वै छन्दा२सि,
ब्रह्मणैव संनिवपति, क्षत्र२ वा एषोऽग्नीना२ यच्छ्रीयते, क्षत्र२ य उख्यो, ब्रह्म यजु,-
—र्यद्यजुषा संनिवपति ब्रह्मणा वा एतत् क्षत्र२ संनयति, तस्माद्ब्रह्मणा क्षत्र२ सं चैति वि च,
द्वौ वा एतौ व्याघ्रौ संपद्येते, ता ईश्वरा अशान्तौ यजमान२ हिं२सितो,—र्यदाह, भवतं नः
समनसौ समोकसौ सचेतसा अरेपसा इति, शमयत्येव, शान्त एव न्युप्यते यजमानस्या-
हिं२साया, ऋतुभिर्वै पृथिव्या वी३र्यमुद्धृतं, तदृतुभिः पुनर्विमुच्यते, यदाह, प्रजा-
पतिर्विश्वकर्मा विमुञ्चत्विति, प्रजापतिरेवैना२ विश्वकर्मा विमुञ्चति ॥ ३ ॥ ३
अथैता नैर्ऋती,—स्तिस्रस्तुषपक्वा भवन्त्ये,—तद्वै नैर्ऋतमन्नस्य यत्तुषाः, कृष्णा भवन्त्ये,-
—तद्धि निर्ऋत्या रूपं,—मेतां दिश२ हरन्त्ये,—षा हि निर्ऋत्या दिक्, ताः स्वकृत इरिणे परा-
चीर्निदधात्ये,—तद्वै निर्ऋतिगृहीतं पृथिव्या, निर्ऋतिगृहीत एव निर्ऋतिं निरवदयते, प्राण-
मेवास्य प्रथमया मुञ्चत्यु,—पानं द्वितीयया, व्यानं तृतीयया,—ऽथो त्र्यक्षरो वै पुरुषो,
यावानेव पुरुषस्तं निर्ऋत्याः पाप्मनो मुञ्चति, निर्ऋतिर्वै कर्मण उपद्रष्ट्रिका, ता२ वा एते-
स्त्वेन भागधेयेन शमयित्वाथ सवितृप्रसूतोऽग्निं चिनुते, यं ते देवी निर्ऋतिराबबन्धेति,

[४] तै ५,२,४,—५ । काठ. २०,२—३ । कपि. ३१,४-५ । वा. १२,६५—६६ । काण्व. १३,६६—६७ ।
[यं ते देवी० । ... अथर्व. ६,६३,१]

जालमिष्टकास्वभ्यस्यति, निर्ऋतिपाशमेवोन्मुञ्चत आत्मनोऽहिं२सायै ॥ ४
यदुस्यं पारे रजसो महश्चित्रं ज्योतिरजायत । तन्नः परिषदति द्विषोऽग्ने वैश्वानरः ॥ ५
त्वाहैस्यपः परिषिञ्चन् पर्येति निर्ऋत्या अनन्ववायाय, भूत्यै नमा, इत्युक्त्वावर्तते,
भूतिरेव भूत्वावर्तत आत्मनोऽहिं२साया, अनपेक्षमाणा आयन्ति निर्ऋत्या अनन्ववायाय,
परोगोष्ठं मार्जयन्ते, परोगोष्ठमेव निर्ऋतिं निरवदयन्त, इन्द्रियेण वा एष वीर्येण व्यृध्यते
यो नैर्ऋतीरुपधत्ते, निवेशनः संगमनो वसूना,—मित्यैन्द्र्या गार्हपत्यमुपतिष्ठत, इन्द्रियेणै-
वात्मान२ समर्धयति, त्रिष्टुभोपतिष्ठता, ओजो वै वीर्यं त्रिष्टुबो,—जस्येव वी३र्ये प्रतिति-
ष्ठति, गार्हपत्योऽग्रे चीयते प्रतिष्ठित्यै, गार्हपत्ये वै देवाः प्रतिष्ठाय प्राञ्चः स्वर्गं लोकमु-
भिजेयन्त आयन्, यावान् पुरुष ऊर्ध्वबाहुस्तावता वेणुना विमिमीत, एतावद्वै पुरुषे वीर्य२,
वीर्येणैव विमिमीते, ऽथो एतावान् वै पुरुषे महिमा, महिम्नोऽवरुद्ध्यै, यो वै वनस्पतीनां
फलग्रहितमः स एषा२ वीर्यवत्तमो, वेणुर्वै वनस्पतीनां फलग्रहितमः, स एषा२ वीर्यवत्तमो,
ऽन्न२ वै फल,—मन्नम३र्को, ऽ३र्कोऽग्नि,—रर्केण वा एतदन्नमर्कमग्नि२ विमिमीते, सप्त
पुरुषान् प्रमिमीते, सप्तभ्य एव पुरुषेभ्यो लोक२ विन्दत्या,—ऽऽसप्तमात्पुरुषादन्नादो भवत्य,—
रत्निमात्रं पक्षयोरन्वुपदधाति, पक्षौ वृहद्वे वयः, पद्भिः कृषति, पड्वा ऋतव, ऋतु-
भिरेव कृषती,—त्यंमन्याववर्तन्त, कृषन्त्ये,—षा हि देवानामावृ,—दथो अमुष्य वा एतदादित्य-
स्यावृतमनुपर्यावर्तन्ते, तिस्रस्तिस्रः सीताः संपादयति, त्रिवृ३द्व्यग्नि,—र्द्वादश सीता भवन्ति,
द्वादश मासाः स२वत्सरः, स२वत्सरस्य वा एषं विधामनुविधीयत, इय२ वा अबिभे,—द्-
भिर्मातिधक्ष्यतीति, यत्कृषन्त्यस्या वा एतद् द्विगुणं क्रियतेऽनतिदाहाया,—ऽथो पृथिव्या वा
एतद् द्विगुणेनाश्वी३र्यमुत्सृजन्त, एषा दिग्वहत्सृजन्त्ये,—षा हि देवानां दिं,—गथो स्वर्गमे-
वैनं लोकमनुत्सृजन्ति ॥ ४ ॥
६
कृष्टे वपति, कृष्टे ह्योषधयः प्रतिष्ठिताः प्रतितिष्ठन्त्यं,—न्नस्यान्नस्य वपत्योषधीनामग्निं,—र्ब्रह्म
वा अन्न, ब्रह्मणैवास्मा अन्नाद्यमवरुन्द्धे, चतुर्दशभिर्वपति, द्वादश मासाः स२वत्सरो,
ऽन्न२ वै एते चतुर्दशे अहोरात्रे वैति, तत स२वत्सरेण च वावास्मा एतदहोरात्राभ्यां चान्नाद्य-
मवरुन्द्धे, ऽन्न२ वै फल,—मन्नम३र्को, ऽ३र्कोऽग्नि,—रर्केण वा एतदन्नमर्कमग्नि२ वपति,

[निवेशनः संगमनो० (रायो बुध्नः०) । ऋ. १०,१३९,३; अथर्व. १०,८,४२; तै. सं. ४,२,५,४]

यस्यान्नस्य निवपति यत्तस्याश्रीयाद्यान्यवरुद्धानि तैर्व्यृध्येते,—न्मे तस्यापिकुर्या,—दथो तन्मनसा
ध्यायेत, तेनैव तदवरुन्द्धे, यदि सर्वं न स२विन्देद्यद्ग्राम्यानुग्राम्धृग्धृतान् वपेद्, यद्वा ग्राम्यं
तेनान्नाद्यमवरुन्द्धे, यन्मध्वारण्यं तेन, तेनैव तदुभयमवरुन्द्धे, ऽथैते संभारा, दिग्भ्यो
वा एतत् पृथिव्या ऊर्ज२ संभरत्यु,—र्ज्यग्निः श्रीयते, यां जनतां कामयेत, क्षोधुका स्यादि-
ती,—षमूर्जमहमित आदीति, तस्या अर्धादाददीत, क्षोधुका ह सा जनता भवति, कामं
कामदुघे धुक्ष्वेत्य,—भिमृशति, तेनास्य सर्वा इष्टकाः कामदुघा भवन्त्यु,—त्तरवेदिं निवपत्यु-
त्तरवेदिर्मित्ये,—वास्याग्निः श्रीयते, ऽथो यज्ञपुरूपोऽनन्तर्हित्या, अग्निर्वा एष न्युप्यते यदुत्त-
रवेदि,—र्यदुत्तरवेदिं न्युप्याग्निं चिनोत्यग्नौ वा एतदग्निः श्रीयते, ऽग्ने तव श्रवो वया, इति
सिकता निवपत्ये,—ता वै वैश्वानरीरिष्टका अपरिमिता, एतदग्नेरपरिमितं चीयते, ऽग्नेर्वा
एतद्वैश्वानरस्य सूक्त,—मेषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः, प्रियाया२ वा एतत्तन्वामग्निः श्रीयते,
सतन्रकौ निधीयते, लोमश२ वा एतच्छन्दः पशव्युमनातिरिक्तं प्रजननायाशीत्यक्षर,—मेतेन
वै देवाः स्वर्गं लोकमाय२,—स्तदस्याशीत्यक्षरत्व२, समुद्र२ वा एतच्छन्दो, योनिः
समुद्रः, सोमो रेतोधा, यत्सौमीभ्या२ व्यूहति योनौ वा एतद्रेतो दधाति, तस्माद्योनौ
रेतो हितं,—माप्यायनवती भवत,—स्तस्माद्योनौ रेता आप्यायते, छन्दोभिर्वा अग्निरुत्तरवेदिम-
भिप्रह्रियते, या अग्नौ प्रह्रियमाणेऽन्वाहस्ता तर्हि मनसा ध्याये,—च्छन्दोभिरेवैनमुत्तरवेदिमभि-
प्रहरति, मनसान्वाहा,—ऽनिरुक्तमिव ३ह्येतदव्यावृत्त२, व्यावृतं पाप्मना भ्रातृव्येण गच्छत्य,-
—श्वं पुरस्तान्नयन्ति रक्षसामपहत्या, आक्रमयन्ति, य एवैनेन भ्रातृव्यः सदृङ् त२ वज्रेणाव-
बाधन्ते, प्राञ्चं प्रक्रमयन्ति, य एवैनं भ्रातृव्योऽति त२ वज्रेण प्रणुदते, प्रत्यञ्चमभ्याव-
र्तयन्ति, य एवैनं भ्रातृव्योऽनु त२ वज्रेण प्रतिनुदते, तद् भ्रातृव्यस्य वा एषं विनोदः,
कृष्णो वै भूत्वाग्निरश्वं प्राविशत, स एतद्गच्छद्यत्र मृगशफो, यदश्वमाक्रमयन्ति, यद्देवा-
त्राग्नेर्युक्तं तस्यावरुद्ध्यै ॥ ५ ॥ ७
तपो योनिरसीति, पुष्करपर्णमुपदधाति, योनिर्वा ए३षोऽग्नेर्यत्पुष्करपर्णं, नाभिर्वैधुका,
सयोनिरेव सनाभिः श्रीयत, इय२ वा अबिभे,—दग्निर्मातिधक्ष्यतीति, यत्पुष्करपर्णमुपदधात्यस्या

[५] मै. २,७,१३ । तै. ५,२,५—६ । काठ. १९,३—४ । कपि. ३१,५—७ । वा. १२,७१,१०६ । काण्व. १३,७१,
१०५ । [अग्ने तव श्रवो० ... । ऋ. १०,१४०,१; सा.१८१६; तै. सं. ४,२,७,१]

अनुविदाहाया,—ऽथस्तान्नाभि सादयत्योषधीनां प्रतिष्ठित्वा, अथो ३येऽ३ष्स्वग्नयस्तानेवा-
वरुन्द्धे, प्रजापतिः प्रजा असृजत, याः पुरा ब्रह्मणोऽसृजत ताभिर्नाराध्नो,—दथ या
ब्रह्ममुखा असृजत ताभिरराध्नोद्, यद् ब्रह्म, जज्ञानं प्रथमं पुरस्ता,—दिति रुक्ममुपदधात्यं,
द्धया, ऋष्नोत्येवा,—ऽथो मिथुनत्वाय, न पृथिव्यामग्निश्चेत३व्यो नान्तरिक्षे न दिवी,—
त्याहु,—रमृत२ वै हिरण्य,—ममृते वा एतदग्निश्चीयते, श्मशानचितो वा एते चीयन्ते,
चित्यां चित्या२ हिरण्यशकलमुपास्यति, तेन वा एषोऽश्मशानचित, तेन स्वर्गो, ऽथैष
पुरुषो हिरण्ययो, यजमानलोकमेवैष दाधारे,—ष ह ३त्वेव यजमानोऽग्निनामुष्मिल्लोके सम्यङ्
यस्यैष उपधीयते, ऽथो मध्ये ज्योतिरेव चीयते, द्रप्सश्चस्कन्द पृथिवीमनु द्यामि,—त्यभि-
मृशति, होत्रास्वेवैनं प्रतिष्ठापयत्यं,—थैतानि सर्पनामानि, मृत्युर्वै सर्पनामानि, यदुपद-
ध्यात् प्रमायुकः स्यात्, तस्मादनुदिशति, सोमे वा एका त्विषि,—र्व्याघ्र एका, सर्प
एका, ता एवावरुन्द्धे, वामदेवस्य राक्षोघ्नेन व्याघारयत्ये,—तेन वै वामदेवः कुसिताय्याः
शिर आदीपयद्, रक्षसामपहत्यै, पञ्चभिर्व्याघारयति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्त-
मालब्धा,—ऽथो यावानेव यज्ञस्तस्माद्रक्षा२स्यपहन्त्यं,—थैते स्रुचौ, कार्ष्मर्यमयी दक्षिणतः
सादयति रक्षसामपहत्यै, दक्षिणतो वै देवाना२ यज्ञ२ रक्षा२स्यजिघा२स२,—स्तानि कार्ष्मर्ये-
णैवापाघ्नत, यत् कार्ष्मर्यमयीं दक्षिणतः सादयति, रक्षसामपहत्यै, घृतस्य पूर्णा भवत्ये,
—षा वा अग्नेः प्रिया तनूर्यद् घृतं, प्रिययैवैनं त३न्वा समर्धयति, गायत्र्या सादयति,
तेजो वै गायत्री ब्रह्मवर्चसं, तेज एव ब्रह्मवर्चसमवरुन्द्धा, औदुम्बरीमुत्तरतः सादयति दध्नः
पूर्णा,—मूर्ग्वा उदुम्बरो, ऽन्नं दध्यू३,—र्जमेवास्यान्नं दधाति, त्रिष्टुभा सादयत्यो,—जो वै
वीर्यं त्रिष्टु,—बोज एव वी३र्यमवरुन्द्धे, पूर्णे सादयत्यं,—क्षिते यजमानलोकमुपतिष्ठेते, मूर्ध-
न्वतीभ्या२ सादयति, मूर्धन्योऽसानीति, विराज्यग्निश्चेत३व्या, इत्याहुः, स्रुचौ वै
विराजौ, यत्स्रुचा उपदधाति विराजि वा एतदग्निश्चीयते, ऽथैषा स्वयमातृण्णे,—य२ वै
प्रथमा स्वयमातृण्णा,—ऽन्तरिक्षं द्वितीया,—ऽसौ तृतीये,—मानेव लोकानुपधत्ते, ऽश्ममुपघ्राय्य
सादयति, प्रजापतिचित एवास्य भवत्यं,—थो प्राणानामुत्सृष्ट्यै, भूरसी,—ति प्राचीमुदूहेय-

[६] मै. २,७,१५ । तै. ५,२,६–८ । काठ. २०,५–६ । कपि. ३१,७-८ । वा. १३,३,५,१८,२० । काण्व. १४,३,
५,१८,२० । [ब्रह्म जज्ञानं० । अथर्व. ४,१,१;५,६,१ । द्रप्सश्चस्कन्द पृथिवी० ... । ऋ.१०,१७,११;
अथर्व. १८,४,२८; तै. सं. ३,१,८,३;४,२,८,२;९,५; तै. आ. ६,६,१]
मै० १९

येनं भ्रातृव्योऽतीव स्याद्, भूमिरसी,—ति प्रतीची२ यच्छन्वं,—दितिरसि भूमिरसी,—ति तिर-
श्ची२ यदि सदं,—इडियं२ वा अदिति,—रनया वा एतद्यजमानो भ्रातृव्यं प्रभुतं प्रणुदते, ऽनया
प्रतिनुदते, ऽनया विनुदते, तद्भ्रातृव्यस्य वा एष विनोदः, काण्डात्काण्डात्प्ररोहन्ती,—
ति दूर्वेष्टकामुपदधात्यो,—षधीनां प्रतिष्ठित्यै, काण्डात्काण्डा३द्ध्येषा प्रतितिष्ठतीति, पशवो
वा इष्टका, न वै पशवा आयवसे रमन्ते, यद्दूर्वेष्टकामुपदधात्यायतनमिव वा एतत् क्रियते,
पशूना२ यत्या, अथैषा वामभृद् द्वियजु,—र्यजमानलोकमन्येन दाधार, भ्रातृव्यलोक-
मन्येन वृङ्क्त, एतया वै देवा असुराणा२ वामं पशूनवृञ्जत, तद्वामभृतो वामभृत्त्वं,
छन्दा२सि वै देवाना२ वामं पशव,—श्छन्दा२स्येवैतया वामं पशून् यजमानो भ्रातृव्यस्य वृङ्क्ते,
ऽथैते रेतःसिचा, इय२ विरा,—डसौ स्वरा,—डसा एव रेतः सिञ्चती,—यं प्रजनयत्य,—ग्नि-
रत्यन्नादो भवति यस्यैते उपधीयेते, यदि पुत्री चिन्वीत प्रथमायां चित्यामन्यामुपदध्या,—
दुत्तमायामन्या२, रेतसः सिक्तस्य परिगृहीत्यै, यद्यपुत्रः प्रथमायां चित्यामुभे उपधेये,
सम्यञ्चौ हि भूत्वा रेतः सिञ्चतः ॥ ६ ॥ ८
अथैता विश्वज्योतिष, एषु वा एतल्लोकेषु ज्योतिष्मन्तमग्निं निधत्ते, ऽथो प्राणाना२
विधृत्या, अथैषा त्र्यालिखिते,—मे वै लोकास्त्र्यालिखिते,—मानेव लोकानुपाधत्त, उभये
वा एतामुपादधत देवाश्च वा असुराश्चो,—परिष्टाल्लक्ष्माणं देवा उपादधता,—ऽधस्ताल्लक्ष्माणमसुरा,
—स्ततो देवा अभव,—न्परासुरा, उपरिष्टाल्लक्ष्माणमुपदधीत भ्रातृव्यवान्यो वास्य प्रियः स्यात्,
तस्य भवत्यात्मना, परास्य भ्रातृव्यो भवत्ये,—षं वा असपत्नेष्टका,—ऽसपत्नो भवति य
एतामुपधत्ते, ऽथो देवलक्ष्म२ वा एषा, देवलक्ष्ममेवोपधत्ते, या सोपाया अधि मृदुच्
शिष्यते तस्या एतां कुर्यात्, तेनास्य सर्वा आग्नेयीरिष्टका भवन्त्यं,—थैष कूर्मः, श्मशानचितो
वा एते चीयन्ते, जीवः कूर्म उपधेय,—स्तेन वा एषोऽश्मशानचित्, तेनोत्पाती, पशू-
ना२ वा एष मेधु, एत२ वै मेधं पश्यन्त एनं पशवोऽमुष्मिल्लोक उपतिष्ठन्ते, प्रत्यञ्च२
सादयति, प्रत्यञ्चो हि पशवो मेधमुपतिष्ठन्ते, द्यावापृथिवीयया सादयति, द्यावापृथिवी
हि पशवोऽनूपतिष्ठन्ते, पशुभिरेवैन२ सम्यञ्चं दधाति, विष्णोर्नाभ्यामग्निश्चेत३व्या,
इत्याहुः, प्रादेशमात्रमुलूखलं कार्य,—मेतावान् वै विष्णु,—र्विष्णोर्वा एतन्नाभ्यामग्निश्चीयत,

[७] तै. ५,२,८-९ । काठ. २०,६-७ । कपि. ३१,८-९ ।

ऊ३र्ज्यग्निश्चेत३व्या, इत्याहु,—रूर्ग्वा उदुम्बरो, यदौदुम्बरमुलूखलं भवत्यूर्जि वा एतदग्निश्ची-
यते, वैष्णव्या सादयति, वैष्णव२ ३ह्युलूखल२, स्वयैव देवतया,—ऽथैषोपा, पृथिव्यां
वा एतदोजो वी३र्य२ संश्रियता, ओजो वा एतद्वीर्यं मध्य३तोऽग्नेर्धीयते, ऽथो मध्ये ज्योति-
रेव चीयते, यद्रिक्तामवेक्षेत क्षोधुको यजमानः स्या,—दथ यत् पूर्णामवेक्षते तथा हाक्षोधुको
भवति, सिकताभिः पूरयित३व्या,—ऽग्नेर्वा एतद्वैश्वानरस्य भस्म यत् सिकताः, स्वेनैवैना
भस्मना प्रीणाति, दध्नः पूरयितव्यो,—र्वै दध्यू,—र्जमेवावरुन्द्धे, घृतस्य पूरयित३व्ये,—
षा वा अग्नेः प्रिया तनूर्यद् घृतं, प्रिययैवैनं त३न्वा समर्धयति, मधोः पूरयितव्या,—ऽऽ
हास्य प्रजाया मधव्यो जायते व्यृध्यै,—न्द्रियाणि वै पशुशीर्षाण्ययज्ञियान्यमेध्यानि, यच्छि-
रोत्रेषु हिरण्यशकलान्यप्यस्यतीन्द्रियेणैवैनानि वीर्येण समर्धयति, मेध्यान्येनानि यज्ञियानि करो-
त्य,—धं२ वै पुरुषः सहस्रस्य, यच्छन्त्यर्धमितरे पशव,—स्तस्मादेतन्मध्यत उपदधात्य,—भिता
इतराणि, पशोः सवीर्यत्वाया,—ऽथो सायतनत्वाय, यं कामयेत, पशुमान्त्स्यादिति,
तस्य समीचीनानि पशुशीर्षाण्युपदध्यात्, समीच एवास्मै पशूनुपदधाति, पशुमान् भवत्यं,—
ध यं कामयेता,—ऽपशुः स्यादिति, तस्य विषूचीनानि पशुशीर्षाण्युपदध्याद्, विषूच एवा-
स्मै पशूननुपदधात्य,—पशुर्भवत्ये,—ता वै साहस्रीरिष्टकाः पश्विष्टका,—स्ताः सोमदक्षः कौश्रेयो
विदांचकार, ताः श्यापर्णायोपदधौ, स सहस्रं पशून् प्राप, प्र सहस्रं पशूनाप्नोति यस्यै-
ता उपधीयन्ते, यविष्ठो वै नाम३षोऽग्नि,—स्तस्मादिन्द्रवान्तरा न व्येतवै, यद्वीयान्
प्राणानस्य युवेतो,—त्सर्गैरुपतिष्ठत, आरण्यानेव पशूञ्छुचमनूत्सृजति ॥ ७ ॥ ९
पुरुषशीर्षमुपदधात्ये,—ष हि पशूना२ वीर्यवत्तमो, वीर्यमस्मिन् दधात्यं,—कुमुपदधात्ये,—
कर्धास्मिन् वीर्यं दधाति, सौर्या पुरुषशीर्षमभिजुहोति स्वर्गस्य लोकस्य समष्ट्यै, सौरी वा
एषा सती मैत्रावरुण्य,—हर्वै मित्रो, रात्रिर्वरुणो, ऽहोरात्रयोरेव प्रतितिष्ठत्य,—र्धर्चाभ्यां
जुहोती,—य२ वा अर्धर्च३चो, ऽसा अर्धर्च३चो, ऽनयोरेव प्रतितिष्ठत्यं,—थ यदेकय
ऋचा द्विर्जुहोति तस्मादेकः सन् पुरुषो द्विपाद्, यद्वा एतदृक्चाकृयोनि२ वा एतद्युक्,—यदेता
अपस्याः सादयति तस्मिन्नेव योनौ रेतो दधाती,—य२ वा अधिभे,—दग्निर्मातिधक्ष्यतीति,
सैता इष्टका अपश्य,—दथो आहुः, प्रजापतिरपश्यदिति, ता उपाधत्ते, यदेता उपधीयन्ते-

[८] मै. २,८,१ । तै. ५,२,९–१० । काठ. २०,८–९ । कपि. ३२,१०—११ । वा. १३,४४-४५,१५,४९—६० ।
काण्व. १३,४४-४६;१६,८०-८१ ।

ऽस्या अनुविदाहार्य, यदिदन्न,—मिति होवाचेय२, य एता उपदधाता इत्य,—न्नादो
भवति यस्यैता उपधीयन्ते, तस्माद्रेतसः सिक्तादिप पशुः संभवति, यदेताश्छन्दस्याः,
पशवो वै छन्दा२सि, यद्दक्षिणत उपदध्यादभीपतः प्रजा वरुणो गृह्णीया,—दथ यदुत्तरत उपदधा-
त्यपवाहत एवा,—ऽथैताः प्राणभृत,—स्तस्मिन् पशौ संभृते प्राणं चक्षुः श्रोत्र२ वाचं तानि दधा-
त्य,—क्ष्णया सादयति, पशु२ वा एतदाक्रमयति, तस्मात् पशवोऽक्ष्णयाङ्गानि प्रहरन्तो
यन्ति, दशभिर्दशभिर्वा अता इष्टकाभिर्ऋषय आर्ध्नुव२,—स्ता ऋद्धीर्ऋध्नोति यस्यैता उपधीयन्ते,
ऽथैताः स२यतो, रेतो वा एतत् सिच्यते यदग्निश्चीयते, यदेता उपधीयन्ते रेतसः सिक्तस्य
स२स्यत्यै, लोकं पृण छिद्रं पृणत्ये,—षा वा अछिद्रेष्टका, अछिद्रा वा एतया चितयश्चीयन्त,
इन्द्राग्नी त्वा बृहस्पतिरित्यो,—जो वै वीर्यमिन्द्राग्नी, ओजसा वा एतद्वीर्येणाग्निश्चीयते, ता
अस्य सूददोहसा, इति परुषि परुष्येव रसं दधाति, सोम२ श्रीणन्ति पृश्नया इत्य,—न्न२
वै पृश्न्य,—न्नमेवावरुन्द्धे, जन्मन्देवाना२ विशा, इत्याह, प्रजात्या एव, त्रिष्वा
रोचने दिव इति, सवनानि वै त्रीणि रोचनानि, सवनचितमेवैनमकरनुष्टुब् वा एषा,
वाग्वा अनुष्टुप्, प्राणो वै वाग्, यदेषा सर्वा इष्टका अनुसंचरति तस्मात् प्राणः सर्वाण्य-
ङ्गान्यनुसंचरत्या,—ग्नेयी वा एषा वर्णेन स्वेन वा एतच्छन्दसाग्निश्चीयते, नाध्वर्युः सर्वार्ति-
मार्छति य एव२ वेद ॥ ८ ॥ १०
उत्सन्नयज्ञो वा एष यदग्निश्चित्यः, को ह तद्वेद यदेतस्य क्रियते यं,—न्नाश्विनौ वै देवाना-
भिषजा अक्लृप्तस्य कल्पयितारौ, यदेता आश्विनीरुपधीयन्तेऽक्लृप्तस्य क्लृप्त्यै, पञ्चोपदधाति,
पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालब्धा,—ऽथो यावानेव यज्ञस्तमचीक्लृप,—दथैता आश्विनी-
र्ऋतव्या अनूपधीयन्ते, रेतसे वा एतत्सिक्ताय ऋतूननुपाधात्, तस्मात् सर्वेष्वृतुषु रेतो हितं,
तस्मात् सर्वानृतून् रेतोऽनुप्रजायते, ऽथैता ऋतव्या वायव्या अनूपधीयन्ते, तस्मात् सर्वा-
नृतून् वायुरन्वावरीवर्त्यं,—थैता वायव्या अपस्या अनूपधीयन्ते, तस्मात् पशवो नानाव्रताः
सन्तोऽप एवाभि संव्रता,—श्चतस्रः पुरस्तादुपदधाति, चतुर्विध२ हि शिरः, प्राणश्चक्षुः श्रोत्र२
वाङ्, मूर्धन्वतीभिः सादयति, मूर्धन्योऽसानीति, पञ्च पश्चाभिता उपदधाति, पशोः
सवीर्यत्वाया,—ऽथो सायतनत्वाय, तस्मात् पशुः पश्चाद्वरीयाच् श्रोणिमुत्तर,—स्तस्मादु प्राङ्
स२हाना, इन्द्राग्नी अव्यथमानामिष्टकां द२हत२ युवमित्य,—न्तरिक्ष२ वा एषा चिति,—

[ता अस्य सूददो० ... । ऋ. ८,६९,३; तै. सं. ४,२,४४; तै. ब्रा. ३,११,९,००]

न्तरिक्षमिमाः प्रजा, इन्द्राग्नी वै देवानामोजोभृता, ओजो वीर्यमिन्द्राग्नी, ओजो वा एतद्वीर्यं मध्यतः प्रजानां धीयते, ऽथैता दिश्या, देवा वै स्वर्गं लोकमाय२,—स्ते दिशा आक्रमन्त, ता अब्लीयन्त, ता एताभिरदृ२हन्, यदेता उपधीयन्ते दिशां धृत्यै, पञ्चोपदधाति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य, दशैताः पुरस्तात् सादयति, दशाक्षरा विराड्, विराट् खलु वै चक्षुर्ज्योतिश्छन्दसां चक्षुर्वा एतज्ज्योतिः पुरस्तात् पशोर्दधाति, तस्मादिदं पुरस्ताच्चक्षु,—रेषो अन्न२ वै विरा,—डन्न२ वा एतन्मुखतो दधाति, मा छन्दः, प्रमा छन्दः, प्रतिमा छन्दा इती,—यं२ वै मा, ऽन्तरिक्षं प्रमा, ऽसौ प्रतिमे,—मानेव लोकाननुपधत्ते, ऽथो देवछन्दसानि वा एतानि, देवछन्दसान्येवोपधत्ते, द्वादश द्वादशाभिता उपदधाति, तत् षट्त्रि२शत्, षट्त्रि२शदक्षरा बृहती, बृहती खलु वै छन्दसा२ स्वाराज्यमानशे, गच्छति स्वाराज्य२ यस्यैता उपधीयन्ते, पशवो वै बृहती, पशवो मध्यमा चिति,—स्तस्मादेतस्यां चित्यामेता उपधीयन्त, आदित्यधामानो वा उत्तरे प्राणा, अङ्गिरोधामानोऽधरे, मूर्धासि राडिति, य उत्तरे प्राणास्तानेताभिर्दाधार, यन्त्री राडिति, येऽधरे प्राणास्तानेताभिर्दाधार, तदेषा२ वा एताः प्राणाना२ विधृत्यै, समावद्भाजः सादयति, समावद्भाजो हीमे प्राणाः, प्राणाना२ विधृत्यै, यं द्विष्यात् तस्यान्यथा सादयेत्, प्राणानस्य मोहयति, प्रमायुको भवति, मूर्धन्वतीभिः सादयति, मूर्धन्योऽसानीति ॥ ९ ॥ १२

त्रिवृद्वतीं पुरस्तात् सादयति, त्रिवृद्धि यज्ञमुखं, मुखतो वा एतद्यज्ञमुखं दधाति, सप्तदशवतीं दक्षिणतो, ऽन्न२ वै सप्तदशो, ऽन्न२ वा एतद्दक्षिणतो दधाति, तस्माद्दक्षिणेन हस्तेनान्नमद्यते, तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यवत्तर,—स्तस्माद्दक्षिणमर्ध२ वया२स्यनुपर्यावर्तन्ते, पञ्चदशवतीमुत्तरत, ओजो वै पञ्चदश, ओजो वा एतदुत्तरतो दधात्ये,—कवि२शवतीं पश्चात् प्रतिष्ठित्यै, त्रिवृद्वतीं पुरस्तात् सादयति, त्रिवृद्धि यज्ञमुखं, मुखतो वा एतद्यज्ञमुखं दधाति, पञ्चदशवतीं दक्षिणतः सादयति, सप्तदशवतीमुत्तरतः, पक्षयोः सवीर्यत्वाया,—थो सायतनत्वाय, तस्मादुभाभ्या२ हस्ताभ्यामन्नमद्यते, ऽथो वज्रो वै पञ्च-

[९] मै. ३,८,१–३ । तै. ५,३,१–२ । काठ. २०,१०–११ । कपि. ३१,१२–१३ । वा. १४,११,१८,२१–२२ । काण्व. १५,१४,१८,२३–२४ ।
[१०] मै. ३,८,६–७ । तै. ५,३,३–५ । काठ. २०,१२–१३ । कपि. ३२,१४–१७ । वा. १४,२३–२४;१५,१–३ ।

दशो, वज्रेण वा एतद्यजमानो भ्रातृव्यमुभयतो निर्भजत्ये,—कवि२शवतीं पश्चात् प्रतिष्ठित्यै, प्रतिष्ठा ह्येकवि२शो, ऽर्कस्य वा एष विधामनुविधीयते, ऽसावर्को, ऽन्नादो भवति यस्यैता उपधीयन्ते, ऽग्नेर्भागोऽसि, दीक्षाया आधिपत्यं, ब्रह्म स्पृतं त्रिवृत्स्तोमा इति, स्पृतो वै नामैता इष्टका, एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदस्पृणोद्, यद्युदेवैताभिर्यजमानः कामयते तत्तत्स्पृणोत्यृ,—तयास्तुवत, प्रजा अधीयन्तेति, सृष्टयो वै नामैता इष्टका, एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदसृजत, यद्युदेवैताभिर्यजमानः कामयते तत्तत्सृजते, अग्ने जातान् प्रणुदा नः सपत्नानिति, पुरस्तात् सादयति, य एव जाताः सपत्नास्तानेतया प्रणुदते, प्रत्यजातान् जातवेदो नुदस्वे,—ति पश्चाद्, य एव जाताः सपत्नास्तानेतया प्रतिनुदते, तद्भ्रातृव्यस्य वा एष विनोद,—श्चतुश्चत्वारि२शी स्तोमो, वर्चो द्रविणमिति दक्षिणतः सादयति, षोडशी स्तोमा, ओजो द्रविण,—मित्युत्तरत,—श्चतुश्चत्वारि२शदक्षरा वै त्रिष्टुब्, वज्रस्त्रिष्टुब्, वज्रः षोडशी, सव्यापग्रहणो वै वज्रो दक्षिणाप्रहरणः, सव्यापग्रहण२ वा एतद्वज्रं दक्षिणाप्रहरण२ यजमानो भ्रातृव्याय प्रहरति, पुरीषवतीं मध्यतः सादयति, पुरीषमिव ह्यीदं मध्यतः पशोः, पुरीषं मध्यमात्मनः, सात्मानमेवाग्निं चिनुते, ऽथैता विराजो, वाग्वै विराट्, पशवो वा एता इष्टकाः, पशुषु वा एतदुत्तमा२ वाचं दधाति, तस्मात् पशुमानुत्तमा२ वाच२ वदति ॥ १० ॥ १२

[१५०६]

॥ इत्युपरिकाण्डे दाशनो नाम द्वितीयः प्रपाठकः ॥ २ ॥

अथ तृतीयः प्रपाठकः।

अथैताः स्तोमभागा, एता२ वै बृहस्पतिरसुरेभ्योऽधि यज्ञस्य प्रतिष्ठामाहरद्, यदेता उपधीयन्ते यज्ञस्य प्रतिष्ठित्यै, यज्ञो वै देवानामपद्यत, तं देवाः स्तोमभागाभिः प्रत्युदस्तभ्नुवन्, यदेता उपधीयन्ते यज्ञस्योत्तब्ध्यै, प्रजापतिर्वा एतत् पृथिव्या अग्नेस्तेजः समभरद्, तदग्नेरेवैतत्तेजः संभ्रियते, ऽथैता नाकसदो, नाक२ ह वा अस्मा अग्निं चिक्यानाय भवति,

काण्व. १५,२५–२८;१६,१–३ । [अग्ने जातान्प्रणुदा० । अथर्व ७,३४,१ । सहसा जातान्प्रणुदा० । अथर्व. ७,३५,१]
[१] मै. २,८,८–१० । तै. ५,३,५–७ । काठ. २१,१–३ । कपि. ३१,१७ ।

न वै तत्र किं चन जग्मुषे कं, तस्मान्नाकसदो, नाकसत्सु पञ्चचूडा अध्युपदधाति स्वर्गस्य लोकस्य समष्ट्या, एष ह वेलेव यजमानः पत्नीभिरग्निनामुष्मिँल्लोके सम्यङ् यस्यैता उपधीयन्ते, ऽथो मध्ये ज्योतिरेव चीयत, एता वा अमुष्मिँल्लोके यजमानस्य पत्नी,—स्तस्मादग्निचिता स्त्रीं नोपेया,—ष्टी हि सा, पश्चात् प्राचीमुत्तमामुपदधाति, पश्चाद्ध्येतं प्राची पत्न्यन्वास्ते, ऽथैताः क्लृप्तयः, प्रजापतिः प्रजा असृजत, ता एन२ सृष्टा अत्यमन्यन्त, स प्रजापतिरेता इष्टका अपश्यद्, ता उपाधत्त, ततो वा अकल्पत, यदेता उपधीयन्ते प्रजानां क्लृप्त्या, अथैता वृष्टिसनयो, वृष्टिर्वै देवेभ्योऽन्नाद्यमपाक्रामत्, तत इद२ सर्वमशुष्यत्, ते देवाः प्रजापतिमेवोपाधावन्, स प्रजापतिरेता इष्टका अपश्यत्, ता उपाधत्त, ताभ्यो वृष्टिमन्नाद्यमवारुन्द्ध, यदेता उपधीयन्ते वृष्ट्या अन्नाद्यस्यावरुद्ध्या, आयवेन२ वा उत्तमां चिति,—रन्या अन्या इष्टका उपदधात्य,—न्यानन्यानेवास्मै पशून् प्रजनयति, प्राणो वै स्वयमातृण्णाया,—यव्या, समीची उपदधात्या,—युश्चैव प्राणं च सयुजा अक,—रथो समीचीनाभ्या२ ह्यायुषा च प्राणेन च भुङ्क्ते, प्राणो वै स्वयमातृण्णा, तामुत्तमामुपदधात्या,—युर्म२ ह्यायु,—र्यदन्यामुत्तरामुपदध्याद् प्राणमस्यापिदध्यात्, प्रमायुकः स्यात्, तस्मात्तामुत्तमामुपदधात्या,—युर्म२ ह्यायुः ॥ १ ॥ १

अथैषां छन्दश्चिति,—श्छन्दा२सि वै देवाना२ वामं पशव,—श्छन्दा२स्येवैतया वामं पशून् यजमानोऽवरुन्द्ध, एता२ वै यज्ञसेनश्चैत्र उपदध्रे, स आनर्ध, ऋध्नोति य एतामुपधत्ते, गायत्रीभिः पुरस्तात् सादयति, तेजो वै गायत्री ब्रह्मवर्चसं, तेज एव ब्रह्मवर्चसमवरुन्द्धे, तिस्र उपदधाति, त्रिवृद्ध्यग्नि,—र्मूर्धन्वतीभिः सादयति, मूर्धन्योऽसानीति, त्रिष्टुब्भिर्दक्षिणत, ओजो वै वीर्यं त्रिष्टु,—बोज एव वीर्यमवरुन्द्धे, जगतीभिः पश्चा,—ज्जागताः पशवः, पशूनेवावरुन्द्धे, अनुष्टुब्भिरुत्तरतो, ऽनुष्टुब्वै सर्वाणि छन्दा२सि, सर्वाण्येवास्य छन्दा२स्युपहितानि भवन्त्ये,—षु पङ्क्ती,—रेषु बृहती,—रेषोष्णिहा, ऽथु ककुभौ, ऽथु विराज, एवमस्य यथापूर्वं छन्दा२स्युपहितानि भवन्ति, द्विपदा उत्तमाः सादयति, द्विपाद्यजमानः प्रतिष्ठित्यै, छन्दा२सि वै देवाना२ वामं पशवो, यजमानायतन२ वा आहवनीयो, भ्रातृव्यायतनं धिष्ण्या, यत्पश्चादुपदध्याद् भ्रातृव्यायतने वामं पशून् दध्या,—देव यत्पुर उपदधाति यजमानायतने वा एतद्वामं पशून् दधात्य,—ष्टावुपदधात्य,—ष्टाक्षरा गायत्री, गायत्रोऽग्नि,—र्यावानेवाग्निस्तं चिनुते, ऽष्टौ गायत्रीभिः पुरस्ताद्बहिःपवमाने-

[२] मै. २,८,११ । तै. ५,३,८ । काठ. २१,४ । कपि. ३१,१९ ।

स्योपदध्याद्यद्येनं भ्रातृव्योऽतीव स्या,—देकादश त्रिष्टुब्भिः पुरस्तान्माध्यंदिनस्य पवमानस्य, द्वादश जगतीभिः पुरस्तादार्भवस्य पवमानस्यै,—ता एव पश्चात् पवमानानामुपदध्याद्यद्येनं भ्रातृव्योऽतीव स्यात्, प्राणो वै पवमानो, ऽग्नेस्तेजः पवमान,—स्तेजसा वा एतद्यजमानो भ्रातृव्यं प्रभूतं प्रणुदते, तेजसा प्रतिनुदते, तेजसा विनुदते, तद् भ्रातृव्यस्य वा एष विनोदो, जानुदघ्नं प्रथमं चिन्वानश्चिन्वीत गायत्रीचितं, नाभिदघ्नं द्वितीयं चिन्वानश्चिन्वीत त्रिष्टुप् चितं, चुबुकदघ्नं तृतीयं चिन्वानश्चिन्वीत जगच्चित२, यज्ज्याया२सं चित्वा कनीया२सं चिन्वीत कनीया२स२ यज्ञक्रतुमुपेयात्, कनीयसीं प्रजां, कनीयसः पशून्, कनीयोऽन्नाद्यं, पापीयान्त्स्या,—दथ यत्कनीया२सं चित्वा ज्याया२सं चिनुते ज्याया२समेव यज्ञक्रतुमुपैति, भूयसीं प्रजां, भूयसः पशून् भूयोऽन्नाद्य२, वसीयान् भवत्ये,—षा वा अग्नेरुत्तरवती नाम चिति,—रुत्तरमुत्तर२ श्वः श्वः श्रेयान् भवति य एव२ वेद ॥ २ ॥ २

पञ्चचितिकः कार्यः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशव,—स्तस्मात् पञ्चचितिकः, पञ्च चितयः, पञ्च पुरीषाणि, तद्विराज२ संपद्यते, तद्यद्विराज२ संपद्यते तदग्नेः स्तोत्रं कार्य२, यत् पञ्चचितिकः स्यादियाद्विराजो, यद्दशचितिक इयाद्यज्ञाच्च पशुभ्यश्च, यत्पञ्चचितिकस्तेन यज्ञाच्च पशुभ्यश्च नैत्य,—थ यत्पञ्च चितयः पञ्च पुरीषाणि तेन विराजो नैति, तदुभाभ्या२ वावास्मा एतद्वर्णाभ्यां पशूनवरुन्द्धे, यदेषा पाङ्क्त२ यच्च वैराजं, द्व्यक्षरं लोम, द्व्यक्षरा त्वग्, द्व्यक्षरं मा२सं, द्व्यक्षरमस्थि, द्व्यक्षरो मज्जा, तद्दश, दशाक्षरा विराड्, वैराजाः पशवः, पशूनेवावरुन्द्धे, पञ्चचितिकः कार्य, इमे वै लोकास्तिस्रश्चितयो, यजमानो द्वे, यजमान२ वा एतदेषु लोकेषु प्रतिष्ठापयामुकः, का प्रथमा चितिः, किं पुरीषमि,—त्याह,—रियं२ वाव प्रथमा चिति,—रोषधयः पुरीषं, का द्वितीया चितिः, किं पुरीषमि,—त्याह,—रन्तरिक्ष२ वाव द्वितीया चिति,—र्वया२सि पुरीषं, का तृतीया चितिः, किं पुरीष,—मित्याह,—रसौ वाव तृतीया चिति,—र्नक्षत्राणि पुरीषं, का चतुर्थी चितिः, किं पुरीष,—मित्याह,—र्यज्ञो वाव चतुर्थी चिति,—र्दक्षिणा पुरीषं, का पञ्चमी चितिः, किं पुरीष,—मित्याह,—र्यजमानो वाव पञ्चमी चितिः, प्रजा पुरीष,—मेतावद्वा अस्ति, यावद्वेवास्ति तत् स्पृणोति, तदवरुन्द्धे, ऽथैता ऋतव्याः, स२वत्सरो वा अग्निर्वैश्वानर, एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानर,—स्तस्य वा अहोरात्राण्येवेष्टका उपधीयन्ते, द्वे द्वे उपदधाति प्रति-

[३] मै. २,८,१२ । तै. ५,४,२ । काठ. २१,५ । कपि. ३१,२० ।

छिरया, अवकामुपास्य सादयति शान्त्या अनिर्दाहाय, चतस्रो मध्यमायां चित्यामुपदधात्यं,
—प्रतिष्ठितमिव ह्यन्तरिक्षं, प्रतिष्ठित्यै, द्वादशोपदधाति, द्वादश मासाः संवत्सरः,
संवत्सरो वा अग्निर्वैश्वानरः, एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः, प्रियायां वा एतत्तन्वाम-
ग्निश्रीयते, संतनूरक्षी निधीयते, ऽग्नेरन्तःश्ले३षोऽसीत्ये,—तस्य ह ३त्वेवाग्निः संश्लिष्टो
यस्यैता उपधीयन्ते, संश्लिष्टो वा एतस्याग्निर्यस्यैता उपधीयन्ते, कल्पेतां द्यावापृथिवी इति,
कल्पते ह वा अस्मा अग्निं चिक्यानाय, प्र समानानां ज्यैष्ठ्यमाप्नोति य एवं वेद, सं वा
एतदग्निमिन्द्धे यच्चिनोति, तं दीपयत्येवं ऋतव्याभिः ॥ ३ ॥ ३

तमो वै स्वर्गं लोकमन्तरा तिष्ठत्ये,—ता वै ज्योतिष्मतीरिष्टका यद्धिरण्यशकलैः प्रोक्षति,
विवासयति वा एतद्यजमानाय, ज्योतिरस्मिन् दधाति, सहस्रं भवन्ति, साहस्रो वै प्रजा-
पतिः, प्रजापतिमेवाप्नोति, यावद्वै सहस्रं तावदि३तोऽसौ लोकः, स्वर्गस्य लोकस्य समष्ट्या,
इमा मे अग्ना इष्टका धेनवः सन्त्विति, धेनवो वै नामैता इष्टका, एताभिर्वै प्रजापतिर्यद्यदका-
मयत तत्तददुह, यद्यदेवैताभिर्यजमानः कामयते तत्तद्दुहे, ऋतुष्ठाः स्थ ऋतावृधा इत्य,—तुष्ठा
एवैना अकृत ऋतावृधो, घृतश्चुतो मधुश्च्युता इति, घृतश्चुत एवैना अकृत मधुश्च्युता, ऊर्ज-
स्वतीः पयस्वतीरित्यू,—र्जस्वतीरेवैना अकृत पयस्वतीः, स्वधायिनीः कुलायिनीरिति, कुला-
यिनी३र्ह्येता विराजो नाम, कामदुघा इति, यत्र वा अदो देवेभ्यः कामदुघाः काममदुह्र तदेता
अपि दुदुह्रे, तत् पुष्टिमेवैताभिरवरुन्द्धे, ऽमुत्रामुष्मिँल्लोक इत्य,—मुष्मै हि लोकायाग्निश्चीयते,
रुद्रं वै देवा यज्ञादन्तरायं,—स्तानायतयाभिपर्यावर्तत, तस्माद्वा अबिभयु,—स्ते देवाः
प्रजापतिमेवोपाधाव,—न्त्स प्रजापतिरेवं शतरुद्रियमपश्यत, तेनैनमशमयत, तद्य एवं वेद
वेदाह वा एनं प्रजापति,—र्नैनमेष देवो हिनस्ति, यत्र रुद्रः प्रजाः शमायेत तदुदङ् परेत्ये,—
तदेव वदं श्चक्रम्येत, स्वायां वा एतद्दिशि स्वेन भागधेयेन रुद्रं शमयति, जानुदघ्ने प्रथमं
जुहोत्य,—स्या एवैनं तेन शमयति, नाभिदघ्ने द्वितीय,—मन्तरिक्षात्तेन, छुबुकदघ्ने तृतीयं,
दिवस्तेन, त्रिर्जुहोति, त्रयो वा इमे लोका, एभ्यो वा एतं लोकेभ्यो रुद्रं शमयति,
त्रिरमुतः पुनः प्रत्यवहारं जुहोति, यानेवेतो रुद्रान् यजति तानमुतोऽवयजति, त्रिरितो
जुहोति, त्रिरमुत,—स्तत् षट्, षड्वा ऋतव, ऋतुभ्यो वा एतद्रुद्रमवयजति, समावच्छो
विभाजं जुहोति, समावद्भाजो हि रुद्राणां भागा, द्वासाहानि जुहोति, द्वासाहेवै स तमश-

[४] मै. २,८,१४ । तै. ५,४,२—३ । काठ. २१,६ । कपि. ३२,२१ । वा. १७,२—३ । काण्व. १८,२—४ ।

मयद्, द्वासाहेवैनं शमयत्य,—र्कपर्णेन जुहोत्य,—र्कैण वा एतदर्कमवयजति, यत् पात्रेण
जुहुयाद्रुद्रं प्रजास्वन्ववनयेत्, तस्मादारण्येन जुहोति, पशुर्वा अग्निः, स वै तर्ह्येव जायते यर्हि
चीयते, स भागधेयमिच्छति, यथा वत्सो जातः स्तनमिच्छति सोऽध्वर्युं च यजमानं च प्रेक्षते,
यच्छतरुद्रियं जुहोति स्वेनैवैनं भागधेयेन शमयति, यासा उत्तरार्धे जघनार्धे श्रोणिस्तस्या
होत३व्यं, स्वायां वा एतद्दिशि स्वेन भागधेयेन प्रतिहत्य रुद्रं शमयत्यं,—ङ्गिरसो वै
स्वर्यन्तोऽजायां घर्मं प्रासिञ्च,—न्त्सा शोचन्ती पर्णं परामृश३त्, सोऽर्कोऽभवद्, यदर्कपर्णेन
जुहोत्यर्केण वा एतदर्कमवयजति, यं द्विष्यात्तस्य पशूनां संचरे न्यस्येद्, यः प्रथम आक्रमति
स आर्तिमार्छति ॥ ४ ॥ ४

अश्मन्नूर्जं पर्वते शिश्रियाणा,—मित्यपः परिषिञ्चन् पर्येति, प्रजापतेर्वा एष रसः, प्रजा-
पतेरेव रसेन परिषिञ्चत्यं,—श्म ते क्षुदित्यं,—श्मानमेव क्षुधार्पयति, मयि त ऊर्गित्या,—त्मे-
न्नेवोर्जं धत्ते, यं द्विष्मस्तं ते शुगृच्छत्विति, यमेव द्वेष्टि तमग्नेः शुचार्पयति, त्रिः परिषिञ्चन्
पर्येति, त्रयो वा इमे लोका, एभ्यो वा एतं लोकेभ्योऽग्नेः शुचं शमयति, त्रिः परिषिञ्चन्
पर्येति, त्रिरपरिषिञ्चं,—स्तत् षट्, षड्वा ऋतव, ऋतुभ्यो वा एतदग्नेः शुचं शमयति,
यद्यभिचरेद्वेतदेव यजुर्वदन्नपरिषिञ्चन् पुनः परीयाद्, यैवाग्नेः शुक्तयैनमर्पयति यद्यभिचरेत् ॥
इदमहममुष्यामुष्यायणममुष्मात् पुत्रममुष्या दिशि प्रक्षिणामि ॥ इति कुम्भं जघन्यायां श्रोण्यां
प्रक्षिणीयाद्, यत् प्रक्षिणाति तस्यैवार्तिमन्वार्तिमार्छत्यं,—थ यन्नामु गृह्णात्यायतनमेवास्य छिन-
त्त्या,—ग्नेयपावमान्यां गायत्रं गायते, प्राणो वै पवमानः, शिरो गायत्री, यदाग्नेयपावमान्यां
गायत्रं गायते शीर्षन्वा एतत् प्राणान् दधाती,—यं वै रथन्तर,—मन्तरिक्षं वामदेव्यं,—मसौ
बृहत्, त्रिधातुर्वा एतदर्को निधीयत, आत्मा वै वामदेव्यं, प्रतिष्ठा यज्ञायज्ञियं, बृहद्रथन्तरे
पक्षौ, यद्बृहद्रथन्तरे अभितो गायत आत्मन्नेव पक्षौ धत्ते, यज्ञं वै देवानां रक्षांस्यजिघांस-
न्,—स्तानि बृहद्रथन्तराभ्यामेवापाघ्नत, यद्बृहद्रथन्तरे अभितो गायते रक्षसामपहत्यै, प्रजा-
पतेर्हृदयमापिपक्षे गायते, तस्मादिदमपिपक्ष आत्मनो हृदयमनूचं गायते, तस्मादुनस्थूकं
हृदय,—म३कर्यैः सामभिरर्कं परिष्टुवन्ति, संतनूरक्षौ निधीयते ॥ ५ ॥ ५–७

वरुणमेनिर्वा एष एतदभीद्धस्तिष्ठति, स एनं तर्ह्यधीयात्, तस्य प्राणेन वीयान्, मण्डू-
केनाध्येति तस्यैव प्राणेन व्येति, न ग्राम्यान् पशून् हिनस्ति नारण्या,—न्नवकया विकर्षत्य,
—पां वा एषा योनिर्यदवका,—ऽपां वा एतद्योनिनाग्नेः शुचं शमयत्य,—पां वा एतद्रूपं

[५] मै. २,१०,१ । तै. ५,४,४ । काठ. २१,७ । वा. १७,१ । काण्व. १८,१ ।

यदवका,—ऽपां वा एतद्रूपेणाग्नेः शुचं शमयति, वेतसेनाध्येत्य,—पां वा एतत् पुष्पं यद्वेत३सो,
ऽपां वा एतत् पुष्पेणाग्नेः शुचं शमयति, सप्तभिर्विकर्षति, सप्त वै छन्दांसि, छन्दो-
भिर्वा एतदग्नेः शुचं शमयत्यं,—थो ब्रह्म वै छन्दांसि, ब्रह्मणा वा एतदग्नेः शुचं शमयत्य,—
ग्निर्वै सृष्टो भागधेयमैच्छत्, स प्रजापतिमेवोपाधावत्, तस्मा अन्नं प्रायच्छत् कत्वाय, तदस्मि
न्नेव सृष्टो, —
कमभव,—दन्नं वै कं,—मन्नेन वा एतदग्निमुपचरति कत्वाय, कं हास्मा अग्निं चिक्यानाय
भवति, पराश्वमध्येति, पराङ् हि पशुः शान्तरथो, पराङ् हि पशुः पशौ रेतो दधात्य,—
न्यांस्ते अस्मत्तपन्तु हेतय:, पावको अस्मभ्यं शिवो भवेत्यं,—न्नं वै पावकं,—मन्नेन वा
एतदग्नेः शुचमन्तर्धत्ते, हिरण्यशकलैर्व्याघारयत्य,—मृतं वै हिरण्यं, तेजोऽग्नि,—रमृतेन वा
एतत्तेजो व्याघारयति, पञ्चभिर्व्याघारयति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य,
द्वया वै देवा यजमानस्य गृहमागच्छन्ति, यद्भा मधुमंश्लिष्टेन व्यवोक्षति तानेव प्रीणाति,
सर्वमनु व्यवोक्षति, सर्वानेवैतान् प्रीणाति, तिसृभिर्व्यवोक्षति, त्रिवृ३द्ध्यग्नि,—स्त्रिष्टुब्भिर्व्य-
वोक्षतीन्द्रियस्यावरुद्ध्या, अन्नवतीभिर्व्यवोक्षत्यन्नाद्यस्यावरुद्ध्यै, दर्भगुरुमुष्टिना व्यवोक्षति,
सं हि प्राजापत्यः, प्राणैर्वा एष व्यृध्यते ३योऽग्निमध्येति, यदाह, प्राणदा अपानदा
इति, प्राणानेवात्मन् धत्ते, प्रजया च वा एष पशुभिश्च व्यृध्यते ३योऽग्निमध्येति, प्रजां वै
वर्चः, पशवो वरिवो, यदाह, वर्चोधा वरिवोधा इति, प्रजां चैव पशूंश्चात्मन्धित्वा-
वरोहति ॥ ६ ॥ ८

इन्द्रो वै वृत्रमहन्,—न्त्स प्राहन्यत, स पद्यमाना इन्द्रं षोडशभिर्भोगैः पर्यगृह्णात्, स वा
अग्निनैव वृत्रस्य भोगानपिदह्य वैश्वकर्मणाभ्यां पाप्मनस्तमसो निरमुच्यता,—ऽग्निस्तिग्मेन शोचिषे,-
—ति यज्जुहोत्यग्निना वा एतत् पाप्मनो भोगानपिदह्य वैश्वकर्मणाभ्यां पाप्मनस्तमसो निर्मुच्यते,
नाना जुहोति सूक्तयोर्नानावीर्यत्वाय, षोडशगृहीतेन जुहोति, षोडशभिर्हि स तं भोगैः पर्य-
गृह्णा,—देतेन वै स वृत्रस्य भोगेभ्यो निरमुच्यत, तत् पाप्मन एवैतेन भोगेभ्यो निर्मुच्यते,
ऽथैतदप्रतिरथ,—मेतेन वै देवा असुरान् प्रत्यजयं,—स्तदप्रतिरथस्याप्रतिरथत्वं, तदप्र३त्ये-

[६] मै. २,१०,१ । तै. ५,४,४—५ । काठ. २१,७ । वा. १७,४ ५,७,११,१५,३६,२० । काण्व. १८,५ ६,८,
११,१५,३६,२० ।
[७] मै. २,१०,२–३ । तै. ५,४,५ । काठ. २१,८ । वा. १७,१६ । काण्व. १८,१६ । [अग्निस्तिग्मेन शोचिषा० ।
ऋ. ६,१६,२८, साम० २२; तै. सं. ४,६,१,५]

वैतेन यजमानो भ्रातृव्यं जयत्ये,—तेनैव याजयेत्, संग्रामे जयति संग्रामं,—मेतेनैव याजयेद्
भ्रातृव्यवन्तं यो वास्य प्रियः स्यात्तं, भवत्यात्मना, परास्य भ्रातृव्यो भवत्ये,—तेन वै
भरद्वाजः प्रतर्दनं दैवोदासिं समनह्यत्, स राष्ट्रमभवद्, यं कामयेत, राष्ट्रियमयं राष्ट्रं
स्यादिति, तमेतेन संनह्येद्, राष्ट्रं ह भवत्ये,—तेन वै देवा विराजमभ्यजयन्, दशा-
न्वाह, दशाक्षरा विराड्, विराजमेवैतेनाभिजयति, दक्षिणतो वै देवानां यज्ञं रक्षांस्
स्यजिघांसं,—स्तानि वा अप्रतिरथेनैवापाघ्नत, यद् ब्रह्माप्रतिरथं दक्षिणतो वदत्यथो
रक्षसामपहत्यै ॥ ७ ॥ ९

उदेनमुत्तरं नये,—ति समिधा आदधाति, प्रह्रियमाणायैवास्मै भागमक,—स्तिस्र आदधाति,
त्रिवृ३द्ध्यग्नि,—रुदु त्वा विश्वे देवा इति, विश्वे ३ह्येते देवाः स्मो यन्मनु३ष्या, अग्ने भरन्त
चित्तिभिरिति, यस्मा एवं चित्तायाग्निराधीयते तेनैनं चित्तेन समर्धयति, पञ्च दिशो दैवीर्यज्ञ-
मवन्तु देवीरिती,—मा एवैनं पञ्च दिशोऽनु तेजस्विनं करोत्यु,—र्थपत्रा इडयो गृभीत इत्यु,—
र्थपत्रो ३ह्येष परिगृह्य यज्ञमावक्षिति, परिगृह्य ३ह्येतं यन्ति, हरिकेशः सूर्यरश्मिः पुर-
स्तादित्य,—सौ वा आदित्यो हरिकेशः सूर्यरश्मिः पुरस्तात्, सविता ज्योतिरुदयं अजस्र,—
मित्याह प्रसूत्या एवं, तस्य पूषा प्रसवे याति विद्वानिति, पशवो वै पूषा, पशूनेवावरुन्द्धे,
ततो वाका आशिषो नो जुषन्तामित्या,—शिषां वा एष दोह, आशिष एवं दुहा, इन्द्रं
विश्वा अवीवृध,—न्निति वृधद्वत्या यन्ति, वृद्धिमेवोपयन्त्य,—नुष्टुभा यन्ति, वाग्वा अनुष्टुब्,
वैश्वदेवी वाग्, वैश्वदे३वोऽग्नि,—स्तस्मादनुष्टुभा यन्ति, पङ्क्तिभिराग्नीध्रायन्ति, षड्वा ऋतव,
ऋतुभिरेव यन्ति, विमान एष दिवो मध्य आस्ता, इत्यश्मानं सादयति, विमानो
३ह्यसा आदित्यः स्वर्गस्य लोकस्य, सुम्नहूर्यज्ञ आ च वक्षद्, यक्षदग्निर्देवो देवं आ च
वक्षदित्या,—शीरेवैषा देवहूर्यज्ञ आ च वक्षद्, यक्षदग्निर्देवो देवं आ च वक्षदित्या,—शिष
एवैष परिग्रहो, वाजस्य मा प्रसवेनोद्ग्राभेणोदजिग्रभदित्य,—सौ वा आदित्य उद्ग्राभ, एष
निग्राभ, उद्यन्वा एतद्यजमानमुद्गृह्णाति, निम्रोचन्नस्य भ्रातृव्यं निगृह्णात्यु,—द्ग्राभश्च निग्राभ-

[८] मै. २,१०,४—५ । तै. ५,४,६ । काठ. २१,८ । वा. १२,३१; १७,५०,५३—५९,६१—६४,११,५६; १५,६१।
काण्व. १३,३२; १८,५०,५३—५९,६१—६४,१३,५७,१६,८१ । [उदेनमुत्तरं (रां) ० । अथर्व. ६,५,१ ।
हरिकेशः सूर्यरश्मि० (सूर्यरश्मिर्हरिकेशः)० । ऋ. १०,१३९,१, तै. सं. ४,६,३,३। इन्द्रं विश्वा०...
पतिम् । ऋ. १,११,१; सा. ३४३,८२७, तै. सं. ४,६,३,४; तै. ब्रा. २,७,१५,५ । विमान (नुचक्षा) एष०
। ऋ. १०,१३९,२; तै. सं. ४,६,३,३]

न्तरिक्षमिमाः प्रजा, इन्द्राग्नी वै देवानामोजोभृता, ओजो वीर्यमिन्द्राग्नी, ओजो वा एतद्वीर्यं मध्यतः प्रजानां धीयते, ऽथैता दिश्या, देवा वै स्वर्गं लोकमायꣳ,—स्ते दिशा आक्रमन्त, ता अव्लीयन्त, ता एताभिरदृꣳहन्, यदेता उपधीयन्ते दिशां धृत्यै, पञ्चोपदधाति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य, दशैताः पुरस्तात् सादयति, दशाक्षरा विराड्, विराट् खलु वै चक्षुर्ज्योतिश्छन्दसां चक्षुर्वा एतज्ज्योतिः पुरस्तात् प्रशोदधाति, तस्मादिदं पुरस्ताच्चक्षु,—रयो अशुꣳ वै विरा,—डन्नꣳ वा एतन्मुखतो दधाति, मा छन्दः, प्रमा छन्दः, प्रतिमा छन्दा इती,—यꣳ वै मा, ऽन्तरिक्षं प्रमा, ऽसौ प्रतिमे,—मानेव लोकानुपधत्ते, ऽथो देवछन्दसानि वा एतानि, देवछन्दसान्येवोपधत्ते, द्वादश द्वादशाभिता उपदधाति, तत् षट्त्रिꣳशत्, षट्त्रिꣳशदक्षरा बृहती, बृहती खलु वै छन्दसाꣳ स्वाराज्यमानशे, गच्छति स्वाराज्यꣳ यस्यैता उपधीयन्ते, पशवो वै बृहती, पशवो मध्यमा चिति,—स्तस्मादेतस्यां चित्यामेता उपधीयन्त, आदित्यधामानो वा उत्तरे प्राणा, अङ्गिरोधामानोऽधरे, मूर्धासि राडिति, य उत्तरे प्राणास्तानेवाभिर्दाधार, यन्त्री राडिति, येऽधरे प्राणास्तानेताभिर्दाधार, तद्वेपाꣳ वायेताः प्राणानाꣳ विधृत्यै, समावद्वीर्याः सादयति, समावद्वीर्या ३हीमे प्राणाः, प्राणानाꣳ विधृत्यै, यं द्विष्यात्
तस्यास्वयां सादयेत्, प्राणानस्य मोहयति, प्रमायुको भवति, मूर्धन्वतीभिः सादयति,
मूर्धन्योऽसानीति ॥ ९ ॥ १२

त्रिवृद्वती पुरस्तात् सादयति, त्रिवृद्धै यज्ञमुखं, मुखतो वा एतद्यज्ञमुखं दधाति, सप्तदशवती दक्षिणतो, ऽन्नꣳ वै सप्तदशो, ऽन्नꣳ वा एतद्दक्षिणतो दधाति, तस्माद्दक्षिणेन हस्तेनान्नमद्यते, तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यवत्तर,—स्तस्माद्दक्षिणमर्धꣳ वयाꣳस्यनुपर्यावर्तन्ते, पञ्चदशवतीमुत्तरत, ओजो वै पञ्चदश, ओजो वा एतदुत्तरतो दधात्ये,—कविꣳशवती पश्चात् प्रतिष्ठित्यै, त्रिवृद्वतीं पुरस्तात् सादयति, त्रिवृद्धै यज्ञमुखं, मुखतो वा एतद्यज्ञमुखं दधाति, पञ्चदशवतीं दक्षिणतः सादयति, सप्तदशवतीमुत्तरतः, पक्षयोः सवीर्यत्वाया,—थो सायतनत्वाय, तस्मादुभाभ्याꣳ हस्ताभ्यामन्नमद्यते, ऽथो वज्रो वै पञ्च-

[९] मै. २,८,१—३ । तै. ५,३,१—२ । काठ. २०,१०—११ । कपि. ३१,१२—१३ । वा. १४,११,१८,२१—२२ । काण्व. १५,१४,१८,२३—२४ ।

[१०] मै. २,८,६—७ । तै. ५,३,३—४ । काठ. २०,१२—१३ । कपि. ३१,१४—१७ । वा. १४,२३—२४;१५,१-३ ।

दशो, वज्रेण वा एतद्यजमानो भ्रातृव्यमुभयतो निर्भजत्ये,—कविꣳशवती पश्चात् प्रतिष्ठित्यै, प्रतिष्ठा ह्येकवि३ꣳशो, ऽर्कस्य वा एष विधामनुविधीयते, ऽन्नमर्को, ऽन्नादो भवति यस्यैता उपधीयन्ते, ऽग्नेर्भागोऽसि, दीक्षाया आधिपत्यं, ब्रह्म स्पृतं त्रिवृत्स्तोमा इति, स्पृतो वै नामैता इष्टका, एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदस्पृणोद्, यद्युदेवैताभिर्यजमानः कामयते तत्तत्स्पृणोत्ये,—कयास्तुवत, प्रजा अधीयन्तेति, सृष्टयो वै नामैता इष्टका, एताभिर्वै प्रजापतिर्यद्यदकामयत तत्तदसृजत, यद्युदेवैताभिर्यजमानः कामयते तत्तत्सृजते, अग्ने जातान् प्रणुदा नः सपत्नानिति, पुरस्तात् सादयति, य एव जाताः सपत्नास्तानेतया प्रणुदते, प्रत्यजातान् जातवेदो नुदस्वे,—ति पश्चाद्, य एव जाताः सपत्नास्तानेतया प्रतिनुदते, तद्भ्रातृव्यस्य वा एष विनोद,—श्चतुश्चत्वारिꣳशी स्तोमो, वर्चो द्रविणमिति दक्षिणतः सादयति, षोडशी स्तोमा, ओजो द्रविण,—मित्युत्तरत,—श्चतुश्चत्वारिꣳशदक्षरा वै त्रिष्टुब्, वज्रस्त्रिष्टुब्, वज्रः षोडशी, सव्यापग्रहणो वै वज्रो दक्षिणाप्रहरणः, सव्यापग्रहणꣳ वा एतद्वज्रं दक्षिणाप्रहरणꣳ यजमानो भ्रातृव्याय प्रहरति, पुरीषवती मध्यतः सादयति, पुरीषमिव ३हीदं मध्यतः पशोः, पुरीषं मध्यमात्मनः, सात्मानमेवाग्निं चिनुते, ऽथैता विराजो, वाग्वै विराट्, पशवो वा एता इष्टकाः, पशुषु वा एतदुत्तमाꣳ वाचं
दधाति, तस्मात् पशुमानुत्तमाꣳ वाचꣳ वदति ॥ १० ॥ १२

[१५०६]

॥ इत्युपरिकाण्डे दाशतो नाम द्वितीयः प्रपाठकः ॥ २ ॥

अथ तृतीयः प्रपाठकः ।

अथैताः स्तोमभागा, एताꣳ वै बृहस्पतिरसुरेभ्योऽधि यज्ञस्य प्रतिष्ठामाहरद्, यदेता उपधीयन्ते यज्ञस्य प्रतिष्ठित्यै, यज्ञो वै देवानामपद्यत, तं देवाः स्तोमभागाभिः प्रत्युदस्तभ्नुवन्, यदेता उपधीयन्ते यज्ञस्योत्तब्ध्यै, प्रजापतिर्वा एतत् पृथिव्या अग्नेस्तेजः समभरत्, तदुमेरेवैतत्तेजः संभ्रियते, ऽथैता नाकसदो, नाकꣳ ह वा अस्मा अग्निं चिक्यानाय भवति,

काण्व. १५,२५—२८;१६,१—३ । [अग्ने जातान्प्रणुदा० । अथर्व ७,३४,१ । सहसा जातान्प्रणुदा० । अथर्व. ७,३५,१]

[१] मै. २,८,८—१० । तै. ५,३,५—७ । काठ. २१,१—३ । कपि. ३१,१७ ।

नो वै तत्र किं चन जग्मुषे कं, तस्मान्नाकसदो, नाकसत्सु पञ्चचूडा अध्युपदधाति स्वर्गस्य लोकस्य समष्ट्या, एषं ह ३त्वेव यजमानः पत्नीभिरमुष्मिँल्लोके सम्यङ् यस्यैता उपधीयन्ते, ऽथो मध्ये ज्योतिरेव चीयत, एता वा अमुष्मिँल्लोके यजमानस्य पत्नी,—स्तस्मादमिथिता स्त्री नोपेत्ये,—ष्या हि सा, पश्चात् प्राचीमुत्तमामुपदधाति, पश्चा३द्ध्येते प्राची पत्न्यन्वास्ते, ऽथैताः कल्पयः, प्रजापतिः प्रजा असृजत, ता एनꣳ सृष्टा अन्यमन्यन्त, स प्रजापतिरेता इष्टका अपश्यत्, ता उपाधत्त, ततो वा अकल्पत, यदेता उपधीयन्ते प्रजानां क्लृप्त्या, अथैता वृष्टिसनयो, वृष्टिर्वै देवेभ्योऽन्नाद्यमपाक्रामत्, तत इदꣳ सर्वमशुष्यत्, ते देवाः प्रजापतिमेवोपाधावन्, स प्रजापतिरेता इष्टका अपश्यत्, ता उपाधत्त, तेभ्यो वृष्टिमन्नाद्यमवारुन्द्ध, यदेता उपधीयन्ते वृष्ट्या अन्नाद्यस्यावरुद्ध्या, आवपनꣳ वा उत्तमा चिति,—रन्या अन्या इष्टका उपदधात्य,—न्यानन्यानेवास्मै पशून् प्रजनयति, प्राणो वै स्वयमातृण्णायु,—र्वायव्या, समीची उपदधात्या,—युश्चैव प्राणं च सयुजा अक,—रथो समीचीनाभ्याꣳ ह्यायुषा च प्राणेन च भुङ्क्ते, प्राणो वै स्वयमातृण्णा, तामुत्तमामुपदधात्यु,—त्तमꣳ ह्यायु,—र्यदन्यामुत्तरामुपदध्यात् प्राणमस्यापिदध्यात्, प्रमायुकः स्यात्, तस्मात्तामुत्तमामुपद-
धात्यु,—त्तमꣳ ह्यायुः ॥ १ ॥ १

अथैषा छन्दश्चिति,—श्छन्दाꣳसि वै देवानाꣳ वामं पशव,—श्छन्दाꣳस्येवैतया वामं पशून् यजमानोऽवरुन्द्ध, एताꣳ वै यज्ञसेनश्चैत्र उपदधे, स आनर्ध, ऋध्नोति य एतामुपधत्ते, गायत्रीभिः पुरस्तात् सादयति, तेजो वै गायत्री ब्रह्मवर्चसं, तेज एव ब्रह्मवर्चसमवरुन्द्धे, तिस्र उपदधाति, त्रिवृ३द्ध्यग्नि,—र्मूर्धन्वतीभिः सादयति, मूर्धन्योऽसानीति, त्रिष्टुब्भिर्दक्षिणत, ओजो वै वीर्यं त्रिष्टु,—बोज एव वी३र्यमवरुन्द्धे, जगतीभिः पश्चा,—ज्जागताः पशवः, पशूनेवावरुन्द्धे, ऽनुष्टुब्भिरुत्तरतो, ऽनुष्टुब्वै सर्वाणि छन्दाꣳसि, सर्वाण्येवास्य छन्दाꣳस्युपहितानि भवन्त्य,—थ पङ्क्ती,—रथ बृहती,—रथोष्णिहो, ऽथ ककुभो, ऽथ विराज, एवमस्य यथापूर्वं छन्दाꣳस्युपहितानि भवन्ति, द्विपदा उत्तमाः सादयति, द्विपाद्यजमानः प्रतिष्ठित्यै, छन्दाꣳसि वै देवानाꣳ वामं पशवो, यजमानायतनꣳ वा आहवनीयो, भ्रातृव्यायतनं धिष्ण्या, यन्नश्चोपदध्याद् भ्रातृव्यायतने वामं पशून् दध्या,—दथ यत्पुर उपदधाति यजमानायतने वा एतद्वामं पशून् दधात्य,—ष्टावुपदधात्य,—ष्टाक्षरा गायत्री, गायत्रोऽग्नि,—र्यावानेवाग्निस्तं चिनुते, ऽष्टौ गायत्रीभिः पुरस्ताद्बहिःपवमाने-

[२] मै. २,८,११ । तै. ५,३,८ । काठ. २१,३ । कपि. ३१,१९ ।

स्योपदध्याद्यदेनं भ्रातृव्योऽतीव स्या,—देकादश त्रिष्टुब्भिः पुरस्तान्माध्यंदिनस्य पवमानस्य, द्वादश जगतीभिः पुरस्तादार्भवस्य पवमानस्ये,—ता एव पश्चात् पवमानानामुपदध्याद्यदेनं भ्रातृव्योऽतीव स्यात्, प्राणो वै पवमानो, ऽग्नेस्तेजः पवमान,—स्तेजसा वा एतद्यजमानो भ्रातृव्यं प्रभूतं प्रणुदते, तेजसा प्रतिनुदते, तेजसा विनुदते, तद् भ्रातृव्यस्य वा एष विनोदो, जानुदघ्नं प्रथमं चिन्वानश्चिन्वीत गायत्रीचितं, नाभिदघ्नं द्वितीयं चिन्वानश्चिन्वीत त्रिष्टुप् चितं, चुबुकदघ्नं तृतीयं चिन्वानश्चिन्वीत जगच्चितꣳ, यज्ज्यायाꣳसं चित्वा कनीयाꣳसं चिन्वीत कनीयाꣳसꣳ यज्ञक्रतुमुपेयात्, कनीयसीं प्रजां, कनीयसः पशून्, कनीयोऽन्नाद्यं, पापीयान्त्स्या,—दथ यत्कनीयाꣳसं चित्वा ज्यायाꣳसं चिनुते ज्यायाꣳसमेव यज्ञक्रतुमुपैति, भूयसीं प्रजां, भूयसः पशून् भूयोऽन्नाद्यꣳ, वसीयान् भवत्ये,—षा वा अग्ने-
रुत्तरवती नाम चिति,—रुत्तरमुत्तरꣳ श्वः श्वः श्रेयान् भवति य एवꣳ वेद ॥ २ ॥ २

पञ्चचितिकः का३र्यः, पाङ्क्तो यज्ञः, पाङ्क्ताः पशव,—स्तस्मात् पञ्चचितिकः, पञ्च चितयः, पञ्च पुरीषाणि, तद्विराजꣳ संपद्यते, तद्यद्विराजꣳ संपद्यते तदुग्रैः स्तोत्रैः का३र्यꣳ, यत् पञ्चचितिकः स्याद्विराड्विराजो, यद्दशचितिक इयाद्यज्ञाच्च पशुभ्यश्च, यत्पञ्चचितिकस्तेनु यज्ञाच्च पशुभ्यश्च नैत्य,—थ यत्पञ्च चितयः पञ्च पुरीषाणि तेन विराजो नैति, तदुभाभ्याꣳ वावास्मा एतद्वर्णाभ्यां पशूनवरुन्द्धे, यदेषा पाङ्क्तꣳ यच्च वैराजं, द्व्यक्षरं लोम, द्व्यक्षरा त्वग्, द्व्यक्षरं माꣳसं, द्व्यक्षरमस्थि, द्व्यक्षरो मज्जा, तद्दश, दशाक्षरा विराड्, वैराजाः पशवः, पशूनेवावरुन्द्धे, पञ्चचितिकः कार्य, इमे वै लोकास्तिस्रश्चितयो, यजमानो द्वे, यजमानꣳ वा एतदेषु लोकेषु प्रतिष्ठापयामुकः, का प्रथमा चितिः, किं पुरीषमि,—त्याहु,—रियꣳ वाव प्रथमा चिति,—रोषधयः पुरीषं, का द्वितीया चितिः, किं पुरीषमि,—त्याहु,—रन्तरिक्षꣳ वाव द्वितीया चिति,—र्वयाꣳसि पुरीषं, का तृतीया चितिः, किं पुरीष,—मित्याहु,—रसौ वाव तृतीया चिति,—र्नक्षत्राणि पुरीषं, का चतुर्थी चितिः, किं पुरीष,—मित्याहु,—र्यज्ञो वाव चतुर्थी चिति,—र्दक्षिणा पुरीषं, का पञ्चमी चितिः, किं पुरीष,—मित्याहु,—र्यजमानो वाव पञ्चमी चितिः, प्रजा पुरीष,—मेतावद्वा अस्ति, यावद्देवास्ति तत् स्पृणोति, तदवरुन्द्धे, ऽथैता ऋतव्याः, सꣳवत्सरो वा अग्निर्वैश्वानर, एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरं,—स्तस्य वा अहोरात्राण्येवेष्टका उपधीयन्ते, द्वे द्वे उपदधाति प्रति-

[३] मै. २,८,१२ । तै. ५,४,१ । काठ. २१,५ । कपि. ३१,२० ।

छिरया, अवकामुपास्य सादयति शान्त्या अनिर्दाहाय, चतस्रो मध्यमायां चित्यामुपदधात्य,
—प्रतिष्ठितमिव ३ह्यन्तरिक्षं, प्रतिष्ठित्यै, द्वादशोपदधाति, द्वादश मासाः संवत्सरः,
संवत्सरो वा अग्निर्वैश्वानर, एषा वा अग्नेः प्रिया तनूर्यद्वैश्वानरः, प्रियाया२ वा एतत्तन्वाम-
भिश्रीयते, संतनूरकौ निधीयते, ऽग्नेरन्तःश्ले३षोऽसीत्ये,—तस्य ह ३त्वेताभिः संश्लिष्टो
यस्यैता उपधीयन्ते, संश्लिष्टो वा एतस्याग्निर्यस्यैता उपधीयन्ते, कल्पेतां द्यावापृथिवी इति,
कल्पते ह वा अस्मा अग्निं चिक्यानाय, प्र समानानां ज्यैष्ठ्यमाप्नोति य एवं२ वेद, सं२ वा
एतदग्निमिन्द्धे यच्चिनोति, तं दीपयत्येव ऋतव्याभिः ॥ ३ ॥ ३

तमो वै स्वर्गं लोकमन्तरा तिष्ठत्ये,—ता वै ज्योतिष्मतीरिष्टका यद्धिरण्यशकलैः प्रोक्षति,
विवासयति वा एतद्यजमानाय, ज्योतिरस्मिन् दधाति, सहस्रं भवन्ति, साहस्रो वै प्रजा-
पतिः, प्रजापतिमेवाप्नोति, यावद्वै सहस्रं तावदि३तोऽसौ लोकः, स्वर्गस्य लोकस्य समष्टया,
इमा मे अग्न इष्टका धेनवः सन्त्विति, धेनवो वै नामैता इष्टका, एताभिर्वै प्रजापतिर्यद्यदका-
मयत तत्तददुह, यद्यदेवैताभिर्यजमानः कामयते तत्तदुहे, ऋतुष्ठाः स्थ ऋतावृधा इत्यृ,—तुष्ठा
एवैना अकृत ऋतावृधो, घृतश्चुतो मधुश्च्युता इति, घृतश्चुत एवैना अकृत मधुश्चुता, ऊर्ज-
स्वतीः पयस्वतीरित्यू,—र्जस्वतीरेवैना अकृत पयस्वतीः, स्वधायिनीः कुलायिनीरिति, कुला-
यिनी३र्ह्येता विराजो नाम, कामदुघा इति, यत्र वा अदो देवेभ्यः कामदुघाः काममदुह्र तदेता
अपि दुदुह्रे, तत् पुष्टिमेवैताभिरवरुन्द्धे, ऽमुत्रामुष्मिल्लोक इत्य,—मुष्मै हि लोकायाग्निश्चीयते,
रुद्रं२ वै देवा यज्ञादन्तराय२,—स्तानायतयाभिपर्यावर्तत, तस्माद्वा अबिभयु,—स्ते देवाः
प्रजापतिमेवोपाधाव,—न्त्स प्रजापतिरेतच्छतरुद्रियमपश्यत्, तेनैनमशमयत्, तद्य एवं२ वेद
वेदाह वा एनं प्रजापति,—नैनमेष देवो हिनस्ति, यत्र रुद्रः प्रजाः शमायेत तदुदङ् परेत्ये,—
तद्वै वद२श्वक्रम्येत, स्वाया२ वा एतद्दिशि स्वेन भागधेयेन रुद्रं२ शमयति, जानुदघ्ने प्रथमं
जुहोत्य,—स्यां एवैनं तेन शमयति, नाभिदघ्ने द्वितीय,—मन्तरिक्षात्तेन, छुबुकदघ्ने तृतीयं,
दिवस्तेन, त्रिर्जुहोति, त्रयो वा इमे लोका, एभ्यो वा एतं लोकेभ्यो रुद्रं२ शमयति,
त्रिरमुतः पुनः प्रत्यवहारं जुहोति, यानेवैतो रुद्रान् यजति तानमुतोऽवयजति, त्रिरितो
जुहोति, त्रिरमुत,—स्तत् षट्, षड्वा ऋतव, ऋतुभ्यो वा एतद्रुद्रमवयजति, समावच्छो
विभाजं जुहोति, समावद्भाजो हि रुद्राणां भागा, द्वासाहानि जुहोति, द्वासाहेवै स तमश-

[४] मै. २,८,१४ । तै. ५,४,२—३ । काठ. २१,६ । कपि. ३२,२१ । वा. १७,२—३ । काण्व. १८,२—४ ।

मयद्, द्वासाहेरेवैनं२ शमयत्य,—र्कपर्णेन जुहोत्य,—र्केण वा एतदर्कमवयजति, यत् पात्रेण
जुहुयाद्रुद्रं प्रजास्वन्ववनयेत्, तस्मादारण्येन जुहोति, पशुर्वा अग्निः, स वै तर्ह्येव जायते यर्हि
चीयते, स भागधेयमिच्छति, यथा वत्सो जातः स्तनमिच्छति सोऽध्वर्युं च यजमानं च प्रेप्सते,
यच्छतरुद्रियं जुहोति स्वेनैवैनं भागधेयेन शमयति, यासा उत्तरार्धे जघनार्धे श्रोणिस्तस्या२
होत३व्य२, स्वाया२ वा एतद्दिशि स्वेन भागधेयेन प्रतिहृत्य रुद्रं२ शमयत्य,—ङ्गिरसो वै
स्वर्यन्तोऽजायां घर्मं प्रासिञ्च,—न्त्सा शोचन्ती पर्णं परामृश३त, सोऽर्कोऽभवद्, यदर्कपर्णेन
जुहोत्यर्केण वा एतदर्कमवयजति, यं द्विष्यात्तस्य पशूनां२ संचरे न्यस्येद्, यः प्रथम आक्रमति
स आर्तिमार्छति ॥ ४ ॥ ४

अश्मन्नूर्जं पर्वते शिश्रियाणा,—मित्यपः परिषिञ्चन् पर्येति, प्रजापतेर्वा एष रसः, प्रजा-
पतेरेव रसेन परिषिञ्चत्य,—श्मं२स्ते क्षुदित्य,—श्मानमेव क्षुधार्पयति, मयि त ऊर्गित्या,—त्मे-
न्नेवोर्जं धत्ते, यं द्विष्मस्तं ते शुगृच्छत्विति, यमेव द्वेष्टि तमग्नेः शुचार्पयति, त्रिः परिषिञ्चन्
पर्येति, त्रयो वा इमे लोका, एभ्यो वा एतं लोकेभ्योऽग्नेः शुचं२ शमयति, त्रिः परिषिञ्चन्
पर्येति, त्रिरपरिषिञ्चं२,—स्तत् षट्, षड्वा ऋतव, ऋतुभ्यो वा एतदग्नेः शुचं२ शमयति,
यद्यभिचरेद्देतदेवं यजुर्वदन्नपरिषिञ्चन् पुनः परीयाद्, यैवाग्नेः शुक्तयैनमर्पयति यद्यभिचरेत् ॥
इदमहममुष्यामुष्यायणममुष्मात् पुत्रममुष्या२ दिशि प्रक्षिणामि ॥ इति कुम्भं जघन्याया२ श्रोण्या
प्रक्षिणीयाद्, यत् प्रक्षिणाति तस्यैवार्तिमन्वार्तिमार्छत्य,—थ यन्नाम गृह्णात्यायतनमेवास्य छिन-
त्त्या,—ग्नेयपावमान्यां गायत्रं गायते, प्राणो वै पवमानः, शिरो गायत्री, यदाग्नेयपावमान्यां
गायत्रं गायते शीर्षन्वा एतत् प्राणान् दधाती,—यं२ वै रथन्तर,—मन्तरिक्ष२ वामदेव्य,—मसौ
बृहत्, त्रिधातुर्वा एतदर्को निधीयत, आत्मा वै वामदेव्यं, प्रतिष्ठा यज्ञायज्ञियं, बृहद्रथन्तरे
पक्षौ, यद्बृहद्रथन्तरे अभितो गायत आत्मन्नेव पक्षौ धत्ते, यज्ञं२ वै देवाना२ रक्षा२स्यजिघा२-
स२,—स्तानि बृहद्रथन्तराभ्यामेवापाघ्नत, यद्बृहद्रथन्तरे अभितो गायते रक्षसामपहत्यै, प्रजा-
पतेर्हृदयमापिपक्षे गायते, तस्मादिदमपिपक्षं आत्मनो हृदयमनूचं गायते, तस्मादुरस्युक२
हृदय,—म३र्क्यैः सामभिरर्कं परिष्टुवन्ति, संतनूरकौ निधीयते ॥ ५ ॥ ५-७

वरुणमेनिर्वा एष एतर्ह्यभीद्धस्तिष्ठति, स एनं तर्ह्यधीयात्, तस्य प्राणेन वीयान्, मण्डू-
केनाध्येति तस्यैव प्राणेन व्येति, न ग्राम्यान् पशून् हिनस्ति नारण्या,—नवकया विकर्षत्य,
—पा२ वा एषा योनिर्यदवका,—ऽपा२ वा एतद्योनिनाग्नेः शुचं२ शमयत्य,—पा२ वा एतद्रूपं२

[५] मै. २,१०,१ । तै. ५,४,४ । काठ. २१,७ । वा. १७,१ । काण्व. १८,१ ।

यदवका,—ऽपा२ वा एतद्रूपेणाग्नेः शुचं२ शमयति, वेतसेनाध्येत्य,—पां२ वा एतत् पुष्पं२ यद्वेत३सो,
ऽपा२ वा एतत् पुष्पेणाग्नेः शुचं२ शमयति, सप्तभिर्विकर्षति, सप्त वै छन्दांसि, छन्दो-
भिर्वा एतदग्नेः शुचं२ शमयत्यं,—ग्नो ब्रह्म वै छन्दांसि, ब्रह्मणा वा एतदग्नेः शुचं२ शमयत्य,—
ग्निर्वै सृष्टो भागधेयमैच्छत्, स प्रजापतिमेवोपाधावत्, तस्मा अन्नं प्रायच्छत् कत्वाय, तदस्मै
कमभव,—दन्नं२ वै कं,—मन्नेन वा एतदग्निमुपचरति कत्वाय, कं२ हास्मा अग्निं चिक्यानाय
भवति, पराङ्क्रमध्येति, पराङ् हि पशुः शान्तरथो, पराङ् हि पशुः पशौ रेतो दधात्य,—
न्यांस्ते अस्मत्तपन्तु हेतयः, पावको अस्मभ्यं२ शिवो भवेत्य,—न्नं२ वै पावकं,—मन्नेन वा
एतदग्नेः शुचमन्तर्धत्ते, हिरण्यशकलैर्व्याघारयत्य,—मृतं२ वै हिरण्यं, तेजोऽग्नि,—रमृतेन वा
एतत्तेजो व्याघारयति, पञ्चभिर्व्याघारयति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य,
द्वया वै देवा यजमानस्य गृहमागच्छन्ति, यद्दध्ना मधुसंश्लिष्टेन व्युक्षति तानेव प्रीणाति,
सर्वमनु व्यवोक्षति, सर्वानेवैनान् प्रीणाति, तिसृभिर्व्यवोक्षति, त्रिवृ३द्ध्यग्नि,—स्त्रिष्टुब्भिर्व्य-
वोक्षतीन्द्रियस्यावरुद्ध्या, अन्नवतीभिर्व्यवोक्षत्यन्नाद्यस्यावरुद्ध्यै, दर्भगुरुमुष्टिना व्यवोक्षति,
सं२ हि प्राजापत्यः, प्राणैर्वा एष व्यृध्यते ३योऽग्निमध्येति, यदाह, प्राणदा अपानदा
इति, प्राणानेवात्मन् धत्ते, प्रजया च वा एष पशुभिश्च व्यृध्यते ३योऽग्निमध्येति, प्रजा वै
वर्चः, पशवो वरिवो, यदाह, वर्चोधा वरिवोधा इति, प्रजां चैव पशू२श्चात्मन्धित्वा- ८
वरोहति ॥ ६ ॥

इन्द्रो वै वृत्रमहन्,—न्त्स प्राह्नवयत, स पद्यमाना इन्द्रं२ षोडशभिर्भोगैः पर्यगृह्णात्, स वा
अग्निर्वै वृत्रस्य भोगानुपिदह्य वैश्वकर्मणाभ्यां पाप्मनस्तमसो निरमुच्यता,—ऽग्निस्तिग्मेन शोचिषे,-
—ति यज्जुहोत्यग्निना वा एतत् पाप्मनो भोगानुपिदह्य वैश्वकर्मणाभ्यां पाप्मनस्तमसो निर्मुच्यते,
नाना जुहोति स्वर्क्योर्नानावीर्यत्वाय, षोडशगृहीतेन जुहोति, षोडशभिर्हि स तं भोगैः पर्य-
गृह्णा,—देतेन वै स वृत्रस्य भोगेभ्यो निरमुच्यत, तत् पाप्मन एवैतेन भोगेभ्यो निर्मुच्यते,
ऽथैतदप्रतिरथ,—मेतेन वै देवा असुरान् प्रत्यजय२,—स्तदप्रतिरथस्याप्रतिरथत्वं, तदप्र३त्ये-

[६] मै. २,१०,१ । तै. ५,४,४—५ । काठ. २१,७ । वा. १७,४ ५,७,११,१५,३६,२० । काण्व. १८ ५ ६,८,
१२,१५,३६,२० । [अग्निस्तिग्मेन शोचिषा० ।
[७] मै. २,१०,२-३ । तै. ५,४,५ । काठ. २१,८ । वा. १७,३६ । काण्व. १८,३६ । [... ऋ. ६,१६,२८, साम० २१, मै. सं. ४,६,१,५]

वैतेन यजमानो भ्रातृव्यं जयत्ये,—तेनैव याजयेत्, संग्रामे जयति संग्राम,—मेतेनैव याजयेद्
भ्रातृव्यवन्तं२ यो वास्य प्रियः स्यात्तं, भवत्यात्मना, परास्य भ्रातृव्यो भवत्ये,—तेन वै
भरद्वाजः प्रतर्दनं दैवोदासिं२ समनह्यत्, स राष्ट्रमभवद्, यं कामयेत, राष्ट्रियमयं२ राष्ट्रं२
स्यादिति, तमेतेन संनह्येद्, राष्ट्रं२ ह भवत्ये,—तेन वै देवा विराजमभ्यजयन्, दशा-
न्वाह, दशाक्षरा विराड्, विराजमेवैतेनाभिजयति, दक्षिणतो वै देवाना२ यज्ञं२ रक्षा२-
स्यजिघा२स२,—स्तानि वा अप्रतिरथेनैवापाघ्नत, यद् ब्रह्माप्रतिरथं दक्षिणतो वदत्येति
रक्षसामपहत्यै ॥ ७ ॥ ९

उदेनमुत्तरं नये,—ति समिधा आदधाति, प्रह्रियमाणायैवास्मै भागमक,—स्तिस्र आदधाति,
त्रिवृ३द्ध्यग्नि,—रुदु त्वा विश्वे देवा इति, विश्वे ३ह्येते देवाः स्मो यन्मनु३ष्या, अग्ने भरन्त
चित्तिभिरिति, यस्मा एव चित्तायाग्निराधीयते तेनैनं चित्तेन समर्धयति, पञ्च दिशो दैवीर्यज्ञ-
मवन्तु देवीरिती,—मा एवैनं पञ्च दिशोऽनु तेजस्विनं करोत्यु,—त्थपत्रा इडयो गृभीत इत्यु,—
त्थपत्रो ३ह्येष परिगृह्य यज्ञमावक्षिति, परिगृह्य ३ह्येतं२ यन्ति, हरिकेशः सूर्यरश्मिः पुर-
स्तादित्य,—सौ वा आदित्यो हरिकेशः सूर्यरश्मिः पुरस्तात्, सविता ज्योतिरुदयं२ अजस्र,—
मित्याह प्रसूत्या एवं, तस्य पूषा प्रसवे याति विद्वानिति, पशवो वै पूषा, पशूनेवावरुन्द्धे,
ततो वाका आशिषो नो जुषन्तामित्या,—शिषा२ वा एष दोह, आशिष एवं दुहा, इन्द्रं२
विश्वा अवीवृध,—न्निति वृधद्वत्या यन्ति, वृद्धिमेवोपयन्त्य,—नुष्टुभा यन्ति, वाग्वा अनुष्टुब्,
वैश्वदेवी वाग्, वैश्वदे३वोऽग्नि,—स्तस्मादनुष्टुभा यन्ति, षड्भिराग्नीध्रायन्ति, षड्वा ऋतव,
ऋतुभिरेव यन्ति, विमान एष दिवो मध्य आस्ता, इत्यश्मानं२ सादयति, विमानो
३ह्यसा आदित्यः स्वर्गस्य लोकस्य, सुम्नहूर्यज्ञ आ च वक्षद्, यक्षदग्निर्देवो देवं२ आ च
वक्षदित्या,—शीरेवैषा देवहूर्यज्ञ आ च वक्षद्, यक्षदग्निर्देवो देवं२ आ च वक्षदित्या,—शिष
एवैष परिग्रहो, वाजस्य मा प्रसवेनोद्ग्राभेणोदजिग्रभदित्य,—सौ वा आदित्य उद्ग्राभ, एष
निग्राभ, उद्यन्वा एतद्यजमानमुद्गृह्णाति, निम्रोचन्नस्य भ्रातृव्यं निगृह्णात्यु,—द्ग्राभश्च निग्राभ-

[८] मै. २,१०,४—५ । तै. ५,४,६ । काठ. २१,८ । वा. १२,३१;१७,५०,५३—५९,६१—६४,१२,५६;१५,६१।
काण्व. १३,३२;१८,५०,५३—५९,६१—६४,१३,५७;१६,८२ । [उदेनमुत्तरं (तां) ० । अथर्व. ६,५,१ ।
हरिकेश। सूर्यरश्मि० (सूर्यरश्मिर्हरिकेशः)० । ऋ. १०,१३९,१, तै. सं. ४,६,३,३। इन्द्रं विश्वा०...
पतिम् । ऋ. १,११,१; सा. ३४३,८२७, तै. सं. ४,६,३,४; तै. ब्रा. २,७,१५,५ । विमान (नुचक्षा) ष्व०
। ऋ. १०,१३९,२, तै. सं. ४,६,३,३]

क्षेति, ब्रह्म वा उद्ग्राभो, ब्रह्म निग्राभो, ब्रह्मणा वा एतद्यजमानमुद्गृह्णाति, ब्रह्मणास्य
भ्रातृव्यं निगृह्णात्यं,—या सुपर्णानिन्द्राग्नी मे विषूचीनान्व्युस्यतामित्यो,—जो वै वीर्यमिन्द्राग्नी,
ओजसा वा एतद्वीर्येण यजमानो भ्रातृव्य२ं विष्वञ्च२ं विनुदते, चतुर्भिराहवनीयायन्ति, चत्वारि
वै छन्दा२ंसि, छन्दोभिरेव यन्त्यं,—यो ब्रह्म वै छन्दा२ंसि, ब्रह्मणैव यन्ति ॥ ८ ॥ १०

क्रमध्वमग्निना नाकमित्त्या,—ह स्वर्गस्य लोकस्य समष्ट्यै, दिवः पृष्ठ२ं स्वर्गत्वेति, पृष्ठेन
हि यन्त्यं,—त्रं नो धेहि द्विपदे चतुष्पदा इति, द्विपात्सु चैवं चतुष्पात्सु च पशुपुर्जे दधाती,-
—पक्षमाणा भृगुभिः सहेति, भृगवो ह्येते यज्ञेनाभिवर्धन्ते, पृथिव्या अहमुदन्तरिक्षमारुह,
—मन्तरिक्षाद्दिवमारुहमित्ये,—षा२ं वा एषं लोकाना२ं समारोहः, पञ्चभिराक्रमते,
पाङ्क्तो यज्ञो, यज्ञेन वा एतद्यज्ञमन्यारोहत्यप्रतिनोदाय, कृष्णायाः श्वेतवत्सायाः पयसा
जुहोत्यं,—हर्वै वत्सो, रात्रिर्माता, ऽह्ने वा एतद्रात्रीं प्रदापयति, प्रत्ते ह वा अहोरात्रे दुहे य एव२ं
वेद, सर्वे वै पशवो नानारूपाः सन्तः पय एवं प्रत्येकरूपा, यदेव प्रत्येकरूपास्तदेनान् प्रत्यवरुन्द्धे,
नक्तोषासा, ऽग्ने सहस्राक्ष, सुपर्णोऽसि गरुत्मान्, पृष्ठे पृथिव्याः सीदे,—त्येषु वा एतं लोकेषु
ज्योतिष्मन्तमग्निं निधत्ते, ऽथो प्राणाना२ं विधृत्यै, द्वाभ्या२ं सादयति, द्विपाद्यजमानः
प्रतिष्ठित्या, आजुह्वानः सुप्रतीकः पुरस्तादित्या,—ह स्वर्गस्य लोकस्य समष्ट्यै, ता२ं
सवितुर्वरेण्यस्य चित्रामिं३त्ये,—त२ं वै कण्वः श्रायस३सोऽग्नेर्दोह२ं विदांचकारा,—ऽग्नेर्वा एष दोहो,
ऽग्नि२ं वा एतेनाग्निचिद्दुहे, सर्वान् ह वा अस्मा अग्निर्दोहान्त्सर्वान् कामान् दुहे य एव२ं वेद,
विधेम ते परमे जन्मन्नग्ने, इत्याह, क्रद्धया एवं, प्रेद्धो अग्ने दीदिहि पुरो न इत्ये,—षा
वै कर्णकवती सुम्यजस्रं ज्योति,—रेतस्म२ं वावास्मा एतज्ज्योतिरप्यधा,—द्रुता२ं वै वासिष्ठः
सात्यहव्यः सत्रिणा आसीनान् पप्रछ, विद कर्णकवती२ं सूर्मीमिति, विद्मेति होतुर्वा वनेषु
ता२ं विद्मेति, पशवो वा एतस्याः कर्णाः, पशुमान्भवत्ये,—ता२ं वै वज्र२ं शतघ्नी२ं विघ्नीं
देवा असुरेभ्य उपप्रावर्तय२,—स्तैषा२ं शततर्हमत२ह२,—स्तदेतामेव वज्र२ं शतघ्नी२ं विघ्नी२ं

[९] मै. ३,१०,६ । तै. ५,४,७ । काठ. २१,९ । वा. १७,६४—६७,७०—७२; १९,२; १५,४४ । काण्व. १८,६५—६७,७०—७९; १३,२,१६,६६ । [क्रमध्वमग्निना० । अथर्व. ४,१४,२ । पृथिव्या अहमुदन्तरिक्ष० । अथर्व. ४,१४,३ । नक्तोषासा समनसा (वर्णमा०) । ऋ. १,९६,५; तै. सं. ४,१,१०,४;६,५,२;७,१२,३ । ता२ं सवितुर्वरेण्यस्य० । अथर्व. ७,१५,१ । विधेम ते परमे० । ऋ. २,९,३; तै. सं. ४,६,५,४ । प्रेद्धो अग्ने० । ऋ. ७,१,३; साम० १३७९; तै. सं. ४,६,५,४]

यजमानो भ्रातृव्यायोपप्रावर्तयति, शततर्ह२ं ह द२ंहत्यं,—ग्ने तमद्यें,—ति पङ्क्त्या जुहोति,
यजमानो वै पङ्क्ति,—र्यजमान२ं वा एतद्विराजि प्रतिष्ठापयामुक,—रथो पङ्क्तयै वाहुत्या यज्ञमा-
लभते, सप्त ते अग्ने समिधः सप्त जिह्वा इत्ये,—तावतीर्वा अग्नेस्तन्वः षोढा सप्त सप्त, यो वा
अस्यैता अग्नि चिक्यानो वितर्पयति वि ह तृष्यति, ता एवास्य तर्पयति, चित्तिं जुहोमि मन-
सेत्ये,—षा वा अग्नेरदाभ्याहुतिर्वैश्वकर्मणी, नैनं भ्रातृव्यो दभ्नोत्य,—ग्निं चिक्यानं प्र समानानां
ज्यैष्ठ्यमाप्नोति य एव२ं वेदा,—ऽग्निर्वा अमन्यत, न वा अहमिदमभागधेयं,—स्तेजो य२ंस्यामी-
ति, तदेतेन भागधेयेनायछ,—देतद्वा अग्निरग्निहोत्रं,—मग्नि२ं वा एतेनाग्निचिद्यछति, सर्वान् ह
वा अस्मा अग्निर्दोहान्त्सर्वान् कामान् दुहे य एव२ं वेद, स२ं वा एतदग्निमिन्द्धे यच्चिनोति, तं
दीपयत्येवाग्निरग्निहोत्रेण ॥ ९ ॥ ११

अथै३षोऽग्नये वैश्वानराय द्वादशकपालः, स२ंवत्सरो वा अग्निर्वैश्वानरः, स२ंवत्सरमेव
प्रीणात्यं,—थो प्राहुतायैवास्मै भागमुक,—राहुतीना२ं वै प्रतिष्ठित्या यजमानः प्रतितिष्ठत्या,—हु-
तीनामप्रतिष्ठित्या न प्रतितिष्ठति, यदेतं जुहोत्याहुतीनां प्रतिष्ठित्यै, ताः प्रतितिष्ठन्तीर्यज्ञोऽनु-
प्रतितिष्ठति, यज्ञ२ं यजमानो, ऽथो कामो वै वैश्वानरो, यत् कामो भवति स२ं हास्मै स
कामो नमति, यत्प्राङ् पर्यावर्तेत दैवीर्विशो मुखेयु,—र्यद्दक्षिणा यमदेवत्या स्याद्, यत्प्रत्यङ्
सौ३र्यो, यदुदङ् रौद्रं, ऋजु होत३व्यः प्रतिष्ठित्यै, सर्वहुतं करोति प्रतिष्ठित्यै, क्षत्र२ं वै
वैश्वानरो, विण्मारुता, यदेत२ं हुत्वा मारुतान् जुहोति विश२ं वा एतत् क्षत्राय नियुनक्त्यं,-
—थो विशमेव क्षत्रायानुकां करोत्य,—ग्निमुखान् वै प्रजापतिः पशूनसृजत, पशवो मारुता,
यदेत२ं हुत्वा मारुतान् जुहोत्यग्निमुखानेवास्मै प्रजापतिः पशून् प्रजनयति, सप्तकपाला भवन्ति,
सप्त सप्त मारुता गणा,—स्तस्मात् सप्तकपाला, गणेन गणेन जुहोति, गणश एव मरुतः
प्रीणाति, योऽरण्येऽनुवाक्यो गणस्तन्मध्यतो जुहुयात्, क्षत्र२ं वा एष, मरुता२ं विडितरे,
विशो वा एतत् क्षत्रं मध्यमेष्टं करोति, यदि कामयेत, विशा क्षत्र२ं हन्यामिति, योऽरण्ये
ऽनुवाक्यो गणस्तमितरैर्गणैर्मोहयेद्, विशा वा एतत् क्षत्र२ं हन्ति, यदि कामयेत, क्षत्रेण
विश२ं हन्यामिति, योऽरण्येऽनुवाक्यो गणस्तेनेतरान् गणान् मोहयेत, क्षत्रेण वा एतद्विश२ं
हन्ति, तस्य त्रिष्टुभौ याज्यानुवाक्ये स्याता,—मोजो वै वीर्यं त्रिष्टु,—बोजो वा एतद्वीर्य२ं विशि

[अग्ने तमद्याश्वं० । ऋ. ४,१०,१; साम. ४३४,१७७७; तै. सं. ४,४,४,७ ।]
[१०] काठ. २१,१० । वा. १७,८६ । काण्व. १८,८६ ।

आदाय क्षत्रायापिदधाति, यदि कामयेत, क्षत्रेणास्य क्षत्र२ं हन्यां, प्र स्वादायतनाच्च्यवे-
तेति, योऽरण्येऽनुवाक्यो गणस्तेनाग्निष्ठ२ं रथवाहन२ं व्युह्येत, क्षत्र२ं वा एष मरुतामग्निष्ठ२ं
रथवाहनं, क्षत्रियस्य क्षत्रं बिभर्ति, क्षत्रेणैवास्य क्षत्र२ं हन्ति, प्र स्वादायतनाच्च्यवता,
इन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो इत्ये,—वैं देवानामनुवर्त्म, दैवीं च वावास्मा एतद्विशं मानुषीं
चानुवर्त्मानीं करोति, स२ं वा एतदग्निमिन्द्धे यच्चिनोति, तं दीपयन्त्येव मारुतैः ॥ १० ॥ १२
[१०१८]

॥ इत्युपरिकाण्डे स्तोमभागो नाम तृतीयः प्रपाठकः ॥ ३ ॥

अथ चतुर्थः प्रपाठकः ।

वसोर्धारां जुहोत्यस्तृतस्य क्लृप्त्या अक्षान्तस्य शान्त्या अनभिजितस्याभिजित्या अनवरुद्धस्या-
वरुद्ध्यै, संततं जुहोति प्राणाना२ं संतत्या एषां लोकाना२ं संतत्या अन्नाद्यस्य संतत्या, अवि-
छिन्नं जुहोत्यन्नाद्यस्याविछेदाय, यद्विछिन्द्यात् प्राणान् विछिन्द्याद्, यं द्विष्यात्तस्य विछिन्द्या,-
—दन्नाद्यमस्य विछिन्नत्यश्वबालं चेत्ये,—तानि वा अश्वस्य रूपाणि, रूपैरेवाश्वमवरुन्द्धेऽग्निश्चा-
पश्चेत्ये,—षा वा अश्वस्य योनिः, सयोन्येवाश्वमवरुन्द्धे, वसोर्मे धारास,—दिति वसोर्धारां
जुहोति, घृतस्य वा एषा धारा यजमानममुष्मिंल्लोके उपतिष्ठन्ते, द्वादश द्वादशाति जुहोति,
द्वादश मासाः स२ंवत्सरः, स२ंवत्सरमेवावरुन्द्धे, ऽथैन्द्राणि जुहोत्य,—थैन्द्रैर्वै देवा इन्द्रिय२ं
वी३र्यमसुराणामवृञ्जत,—न्द्रियमेवैतैर्वी३र्य२ं यजमानो भ्रातृव्यस्य वृङ्क्ते, देवाश्च वा असुराश्चा-
स्पर्धन्त, ते देवा इन्द्रमब्रुव२,—स्त्वया मुखेनेमान् जयामेति, सोऽब्रवीद्, भागो मेऽ-
स्त्विति, वृणीध्वं,—त्यब्रुव,—न्सोऽब्रवी,—दु३ष्वो वा अहं देवतानामसानीति, ततो वा अज-
य२,—स्तस्माद्देवेषु उ धेनमं देवताना२ं, यदैन्द्राणि हूयन्ते विजित्या, इन्द्रोत्तमानि भवन्ती,—
न्द्रिय२ं वै वी३र्यमिन्द्र, इन्द्रियं वा एतद्वीर्ये ततो यज्ञस्य यजमानः प्रतितिष्ठन्य२,—द्युञ्च
रश्मिश्चेति, यज्ञमुख२ं वा अ२ंशुश्च रश्मिश्च, यज्ञमुखमेवावरुन्द्धेऽधिपतिश्चादाभ्यश्चेति, नैनं
भ्रातृव्यो दभ्नोत्यग्निं चिक्यानं, प्र समानानां ज्यैष्ठ्यमाप्नोति य एव२ं वेद,—तं ग्रहा भवन्त्ये,-
—तानि वै यज्ञस्य रूपाणि, रूपैरेव यज्ञमवरुन्द्धे, स्रुचश्च चमसाश्चे,—ति यज्ञायुधानि संभरति,

[१] मै. ३,१२,५ । तै. ५,४,८ । काठ. २१,११ । वा. १८,१६,२१ । काण्व. १९,३१,३३ ।

यज्ञायुधान्येवं संभृत्य यज्ञं प्रयुङ्क्ते, पात्राणि जुहोति, पात्रैर्वा अन्नमद्यते, ऽनुरूपेणैवान्ना-
द्यमवरुन्द्धे, बर्हिश्च वेदिश्चे,—त्याशीरेवैषा, ऽवभृथश्च स्वगाकारश्चे,—ति प्रतिष्ठित्यै ॥ १॥ १

अग्निश्च घर्मश्चेत्ये,—तद्वा अग्नेर्ब्रह्मवर्च३स्य२, रुचं चैवैतेन ब्रह्मवर्चसं चावरुन्द्धे, तेजस्वी
ब्रह्मवर्चसी भवत्यृ,—तुश्च व्रतं चेत्य,—होरात्रे वा ऋतुश्च व्रतं चा,—ऽहोरात्रे एवास्यैतेनाभीष्टे प्रीते
भवता, एका च तिस्रश्चेति, देवछन्दस२ं वा एका च तिस्रश्च, देवछन्दसमेवावरुन्द्धे,
चतस्रश्चाष्टौ चेति, मनुष्यछन्दस२ं वै चतस्रश्चाष्टौ च, मनुष्यछन्दसमेवावरुन्द्धे, देवलोके
एवं देवछन्दसेन क्रभ्नोति, मनुष्यलोके मनुष्यछन्दसेनै,—का च तिस्रश्च चतस्रश्चाष्टौ चेति,
रोहो वा एष एषां लोकाना२ं, संक्रान्तिः स्वर्गस्य लोकस्य, द्व्युत्तरेण वै स्तोमेनादित्याः
स्वर्गं लोकमाय२,—श्चतुरुत्तरेणाङ्गिरसो, यदेतौ स्तोमौ जुहोति स्वर्गस्य लोकस्य समष्ट्यै,
युग्मदयुजौ वा एतौ स्तोमौ मिथुनौ प्रजननाय, रेत एवं द्व्युत्तरेण दधाति, रेतो हितं चतुरु-
त्तरेण प्रजनयत्यें,—का च तिस्रश्चे,—त्या त्रयस्त्रि२ंशतस्त्रयस्त्रि२ंशद्देवता,—स्ता एवास्यैतेनाभीष्टाः
प्रीता भवन्ति, चतस्रश्चाष्टौ चेत्य,—ष्टाचत्वारि२ंशतो, ऽष्टाचत्वारि२ंशदक्षरा जगती, जागताः
पशवः, पशूनेवावरुन्द्धे, त्र्यविश्च त्र्यवी चेत्ये,—तानि वै वया२ंसि पशूनां, पशव एव
पशूनेवरुन्द्धा, आयुर्यज्ञेन कल्पते, प्राणो यज्ञेन कल्पता इति, यज्ञस्य वा एषा क्लृप्ति,—
र्यज्ञमेवैतदचीक्लृपद्, वाजाय स्वाहा, प्रसवाय स्वाहेति, त्रयोदश वा एता आहुतय,—
स्त्रयोदश मासाः स२ंवत्सरः, स२ंवत्सर२ं वावास्मा एतदुपदधाति स्वर्गे लोके, तस्मिन्नेव
प्रतितिष्ठति, स्तोमश्च यजुश्चे,—त्यन्न२ं वै स्तोमश्च यजुश्चा,—ऽन्न२ं वा एतदात्मन्धित्वाश्नादो
भूत्वा देवक्षेत्रमन्ततः प्रावसत्य,—ग्निर्वै वसु,—स्तस्य वा एषा धारा, सर्वान् ह वा अस्मा
अग्निर्दोहान्त्सर्वान् कामान् दुहे य एव२ं वेद, स२ं वा एतदग्निरन्नाद्यमिन्द्धे यच्चिनोति, तं
दीपयत्येव वसोर्धारया ॥ २ ॥ २

वाजप्रसव्यं जुहोति, वाज२ं वा एतेनाग्निरन्नाद्यमुदजयद्वाजमेवैतेनान्नाद्य२ं यजमाना
उज्जयत्यं,—न्नस्यान्नस्य जुहोति वाजप्रसव्याभि,—रन्न२ं वै वाजोऽन्नाद्यस्यावरुद्ध्या, उभयं
ग्राम्यं चारण्यं च जुहोत्युभयस्यान्नाद्यस्यावरुद्ध्या, औदुम्बरेण स्रुवेण जुहोत्यू,—र्ग्वा उदुम्बर,

[२] मै. ३,११,६ । तै. ५,३,८ । काठ. २१,११ । वा. १८,२२-२९ । काण्व. १९,३४—४३ ।
[३] मै. २,१२,१—३ । तै. ५,४,९ । काठ. २१,१२ । वा. १८,३०,३७,३८—४३,४५ । काण्व. २०,१,७,८—१३,१५ ।

ऊर्जोऽवरुद्ध्यै, देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्या
वाचो यन्तुर्यन्त्रेण बृहस्पतिꣳ साम्राज्यायाभिषिञ्चामीत्य,—भिषिञ्चेद्, यदि ब्राह्मणो
यजेत, बृहस्पतिसवो ह्येष, इन्द्रꣳ साम्राज्यायाभिषिञ्चामीत्य,—भिषिञ्चेद्, यदि राजन्यो
यजेते,—न्द्रसवो ह्येषं, कृष्णाजिनें ब्रह्मवर्चसकाममभिषिञ्चेद्, ब्रह्मणो वा एतदृक्सामयो
रूपं,—मृक्सामे ब्रह्मवर्चसं, ब्रह्मवर्चसमेवावरुन्द्धे, बस्ताजिने पशुकामं, पशवो वै बस्ताजिनं,
पशूनेवावरुन्द्धे, सूयते वा एषोऽग्नीनाꣳ यश्चीयते, स्वेनैवैनꣳ सवेन समर्धयति, देवा
ओषधीषु पक्वास्वाजीमयु,—स्ता अग्निरुदजय,—दुग्रेवा एषोऽभिषेको, ऽन्नस्य वा एतत् सूयते,
सर्वानाꣳ वा एष एको, बृहस्पतिसवो वा एष बार्हस्पत्यो ब्राह्मणो देवतया, स्वेनैव सवेन
सूयते, तदाहु,—र्होतव्यमेवं, न हि सुपुवाणः कं चन प्रत्यवरोहतीति, सुपुवाणो वा एष
देवतया योऽग्निं चिनुते,—दृतवो वै सुपुवाणस्य राष्ट्रमनुविशन्ति, षड्वा ऋतव, ऋतवो राष्ट्रभृतो,
यत् षड्भिर्जुहोत्यृतुष्वेवास्य राष्ट्रं प्रतिष्ठापयति, तेऽस्मै राष्ट्रमनुविशन्ति, द्वादशगृहीतेन जुहोति,
द्वादश मासाः संवत्सरः, संवत्सरमेवाप्त्वावरुन्द्धे, मिथुना वा एता आहुतय,—स्तस्मै
स्वाहा वट्, ताभ्यः स्वाहा वडिति, तस्मिन्नेव मिथुने रेतो दधाति, रथशीर्षे सप्तमं जुहोति
दिशामभिजित्यै, दिश एवाभिजिता रथेन जीयन्ते, ऽथैते वातहोमा, अग्निचितो वा अमु-
त्राहोरात्रे, अग्निचितेऽयꣳ वायुः पवते, प्राणो वै वायुः, प्राणमेवावरुन्द्धे, ऽञ्जलिना जुहोति,
न ह्येतस्यावदानमस्त्यं,—यो परिगृहीत्या एवं, प्राणो वै वायु,—र्हस्तः प्राणायोपक्लृप्ततम,—
स्तस्मादञ्जलिना जुहोति, त्रिर्जुहोति, त्रयो वा इमे लोका, इम एवास्मै लोका वातं
धुन्वन्ति, समुद्रोऽसि नभस्वानार्द्रदानुरित्ये,—तानि वै वायो रूपाणि, रूपैरेव वायुमवरुन्द्धे,
मारुतोऽसि, मरुतां गण इति, मारुतो हि वायुः, सꣳ वा एतदग्निमिन्द्धे यच्चिनोति,
तं दीपयत्येव वातहोमैः ॥ ३ ॥　　३
प्राणो वै गायत्री, गायत्रꣳ हविर्धान,—मपानो जगती, जागत ꣳसदो, व्यानस्त्रिष्टुप्,
त्रैष्टुभमाग्नीध्र,—मसुः पृश्नि,—र्मध्ये दिव्यो निहितः पृश्निरश्मे,—त्ययमुꣳ वावास्यैतन्मध्यतः
प्राणापानानाꣳ व्यवदधाति प्राणानां धृत्या, अश्मनवमा आग्नीध्रे सादयति, नव वै प्राणाः,
प्राणान् वावास्यैतद्यजमानलोके दधात्येकविꣳशतिꣳ होत्रिये प्रतिष्ठित्यै, प्रतिष्ठा ह्येकविꣳशं,

[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२]
[४] मै. २,१२,३ । तै. ५,४,१० । काठ.२१,१२;२२,१। वा.१७,६० (तृ. पा.); १८,५१। काण्व. १८,६० (तृ. पा.);
२०,२१। [पृश्निर्मध्ये दिवो० (मध्ये दिवो निहितः पृश्निरश्मा)। ऋ. ५,४७,३; तै. सं. ४,६,३,२]

एकादश ब्राह्मणाच्छꣳस्या, एकादशाक्षरा त्रिष्टुप्, वीर्यं त्रिष्टुप्, वीर्य एव प्रतितिष्ठत्य,—
ष्टाष्टा इतरेष्व,—ष्टाक्षरा गायत्री, ब्रह्म गायत्री, ब्रह्मण्येव प्रतितिष्ठति, षण्मार्जालीये,
षड्वा ऋतव, ऋतवो वा एतं दक्षिणतः पर्यहरन्त, पितरो वा ऋतवो, ऽथो षड्वै छन्दाꣳसि,
छन्दाꣳसि वावास्यैतद्यज्ञमुखे युनक्ति, सजूरब्दो आयवोभिरित्ये,—ता वा अग्नेर्देवताः पुरस्ता-
द्भागा,—स्ता एव प्रीणात्यं,—यो अत्र वै देवानां प्रियास्तन्व,—स्ता एवावरुन्द्धे, सजूरब्दो
आयवोभिरिति, संवत्सरो वा अब्द, ऋतवा आयवाना, संवत्सर एवास्यैतेना ऋतवो-
ऽभीष्टाः प्रीता भवन्ति, सजूरुषा अरुणीभिरित्यु,—षसमेव प्रीणाति, सजोषा अश्विना दꣳ-
सोभिरित्य,—होरात्रे वा अश्विना, ऽहोरात्रे एवास्यैतेनाभीष्टे प्रीते भवतः, सजूः सूर एतशेनेति,
सूर्यमेव प्रीणाति, सजूर्वैश्वानर इडया घृतेन स्वाहेति, संवत्सरो वै वैश्वानरः, पशवा
इडा, पशवो घृतꣳ, संवत्सरा एवास्यैतेन पशवोऽभीष्टाः प्रीता भवन्ति, दर्भस्तम्बे जुहो-
त्ये,—षा वा अस्यामृतचित्तनं,—रमृते वा एतदग्निश्चीयते, हिरण्यं निधाय जुहोत्य,—ग्निमत्येव
जुहोत्यायतनवत्य,—न्धोऽध्वर्युः स्यादनायतने जुहुयात्, स्वर्गाय वै लोकाय देवरथो युज्यते,
कामाय मनुष्यरथो, ऽग्निꣳ युनज्मि शवसा घृतेनेत्य,—ग्निꣳ वा एतद्युनक्ति, तेन युक्तेन
स्वर्गं लोकं गछति, यत् सर्वाभिर्युञ्ज्यायुक्तोऽस्य यज्ञः स्यादप्रतिष्ठिता आहुतयो, द्वाभ्यां
नापियुनक्त्याहुतीनां प्रतिष्ठित्यै, ताः प्रतितिष्ठन्तीर्यज्ञोऽनुप्रतितिष्ठति, यज्ञꣳ यजमानस्तिसृ-
भिर्युनक्ति, त्रिवृद्ध्यग्नि,—र्यावानेवाग्निस्तꣳ युनक्ति, तस्मिन् युक्ते सर्वꣳ हव्यꣳ समाधी-
यते, पञ्चभिर्युनक्ति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालब्ध, सꣳ वा एतमेतौ तपतो
यश्चीयते यश्च वैश्वानरो, यदप्सुमतीभ्यां पुरस्ताद्यज्ञायज्ञियस्य संमृशति शान्त्या, एषा वै
यज्ञस्य मात्रा यदग्निष्टोमो, भूम ह्येवास्यातु ऊर्ध्वं क्रियते ॥ ४ ॥　　४
यो वा अग्निꣳ योगा आगते न युङ्क्ते न युञ्जानेषु युङ्क्ते, ऽग्ने युक्ष्वा हि ये तवेत्य,—ग्निꣳ
वा एतद्योगा आगते युङ्क्ते, युङ्क्ते युञ्जानेषु, यो वा अग्निꣳ विमोक आगते न विमुञ्चते न
विमुञ्चमानेषु विमुञ्चते, वि ते मुञ्चामि रशनाꣳ वि रश्मीनित्य,—ग्निꣳ वा एतद्विमोक आगते विमु-
ञ्चते, वि मुञ्चमानेषु मुञ्चते, यथा वै पुनराधेयमेवं पुनश्चितिं,—र्यो वा आर्षेयेन ऋध्नोति पुनः

[५] तै.५,४,१० । काठ. २२,२ । कपि. ३४।

स आधत्ते, ह्योऽग्निं चिक्यानो मन्येत, वि स्या ऋध्यता इति, स एतां पुनश्चितिमुपदधीता,
—ऽपि प्रथमं चिन्वानश्चिन्वीता ऋद्ध्या, ऋध्नोत्येवा,—ऽथो मिथुनत्वाय, याꣳ वा अग्निचिद्-
निष्टकां आहुतिं जुहोति स्रवति सा, ताꣳ स्रवन्तीꣳ यज्ञोऽनुस्रवति, यज्ञꣳ यजमानो,
यदेतां पुनश्चितिमुपदधात्याहुतीनां प्रतिष्ठित्यै, ताः प्रतितिष्ठन्तीर्यज्ञोऽनु प्रतितिष्ठति, यज्ञꣳ
यजमानो, ऽष्टावुपदधात्य,—ष्टाक्षरा गायत्री, गायत्रोऽग्नि,—र्यावानेवाग्निस्तं चिनुते,
ऽष्टौ लोकंपृणा उपधाय पुरीषेणाभ्यूहत्य,—ष्टाक्षरा गायत्री, ब्रह्म गायत्री, गायत्र्यैवैनं छन्दसा
ब्रह्मणा चिनुता, एकादश लोकंपृणा उपधाय पुरीषेणाभ्यूहत्ये,—कादशाक्षरा त्रिष्टुप् वीर्यं,
त्रिष्टुभैवैनं छन्दसा वीर्येण चिनुते, द्वादश लोकंपृणा उपधाय पुरीषेणाभ्यूहति, द्वादशाक्षरा
जगती, जागताः पशवो, जगत्यैवैनं छन्दसा पशुभिश्चिनुत, एषा वा अग्नेरुत्तरवेदि,—रेतं-
दग्निरुत्तरवेदिमाꣳश्चीयते, योऽस्याग्निः पुरा चितः स्यात्तमन्ववसाय यजेत, यथा वा इदं
दीप्यमाने भूयोऽभ्यादधात्येवꣳ वावास्मिन्नेतदभिपूर्वं भूयस्तेजो दधाति, तदाहुः, कः श्रेयाꣳ-
सꣳ विपुसं बोधयिष्यतीति, यद्यजुता आहुत्यैवैनꣳ व्युर्धयति, गृहान्वा एष कुरुते ह्योऽग्निं
चिनुते, यद्वा अन्यतो विन्दते गृहाꣳस्तदाहरति, यं इष्ट्या वा पशुना वा सोमेन वा यजेत
योऽस्याग्निः पुरा चितः स्यात्समन्ववसाय यजेत, यथा वा इदमन्यतो वित्त्वा गृहानाहरत्येवं तत्त-
दाहुः, पुनर्वा स्वा एतद्यज्ञे क्रियते, यत्रैव क्व च यजेत तदेतां एकविꣳशतिमुपधाय यजेत
प्रतिष्ठित्यै, प्रतिष्ठा ह्येकविꣳश इति ॥ ५ ॥　　५
समास्त्वाग्न ऋतवो वर्धयन्त्विति, समाभिश्चैवैनमृतुभिश्च समिन्द्धे, सं दिव्येन दीदिहि
रोचनेनेति, ज्योतिष्मन्तमेवैनं चिनुते, विश्वा आभाहि प्रदिशश्चतस्रा इति, तस्मादग्निः
सर्वा दिशा आभात्य,—मुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चा, इत्यामयाविनः कुर्या,-
—न्मृत्युर्वै यमो, ब्रह्म बृहस्पति,—र्यावदेव ब्रह्म तेनैनं भिषज्यति, प्रत्यूहतामश्विना मृत्यु-
मस्मादित्य,—श्विनौ वै देवानां भिषजौ, ता अस्मान्मृत्युं प्रत्यूहता, उद्वयं तमसस्परीति,
पाप्मानमेवं तमोऽपहत्य स्वर्गं लोकमभ्यारोहत्या,—हुतो वै हैतनामनः सुर्वेतरापाग्नेरमश्वित्यस्य

[६] मै. २,१२,५–६ । काठ. २२,१ । वा. २७,१,९–१०;२०,२१;३५,१४,३८,२४ । काण्व. २९,१,९—१०;२२,
६,३५,४७,३८,२४ । [समास्त्वाग्न० (०न)। अथर्व. २,६,१ । अमुत्रभूयादध० । अथर्व.७,५३,१ ।
उद्वयन्तमसस्परि स्वः० । ऋ. १,५०,१०; अथर्व. ७,५३,७; तै. सं. ४,१,७,४; तै. ब्रा. २,४,४,९;६,६,४;
तै. आ. ६,३,१]

होतासीत्, तमब्रुवन्, या अप्सुमतीस्ता इछेति, तस्मै वा एता गन्धर्वाप्सरसः प्राब्रुवन्,
यदप्सुमतीः सामिधेनीर्भवन्ति शान्त्यै, चतुर्विꣳशतिमन्वाह, चतुर्विꣳशत्यक्षरा वै गायत्री,
गायत्री यज्ञमुखꣳ, यज्ञमुखमेवालब्धा,—ऽथो चतुर्विꣳशतिर्वा अर्धमासाः संवत्सरं, एषा वा
अस्थिता श्रीर्यत्संवत्सरो, न वा एष श्रियेलयति, न हास्य श्रीरिलयति, गायत्रीरन्वाह,
तेजो वै गायत्री ब्रह्मवर्चसं, तेज एवं ब्रह्मवर्चसमवरुन्द्धे, त्रिष्टुभोऽन्वाहौ,—जो वै वीर्यं त्रिष्टु,-
—बोज एवं वीर्यमवरुन्द्धे, यद्गायत्र्यश्च त्रिष्टुभश्च भवन्ति तेनैव तदुभयमवरुन्द्धे, या आग्ने-
यीरनिरुक्तास्ताः कार्या, अनिरुक्तमिव ह्येतदव्यावृत्तꣳ, व्यावृतं पाप्मना भ्रातृव्येण गछति,
ता अग्नीषोमीयस्य पशोः कुर्यात्, को हि देवक्षेत्रे द्विरभ्यारोक्ष्यतीति, तिस्रो रात्रीर्भृत्वाग्नि-
श्चेतव्या, इत्याहु,—स्त्रिपदा विराड्, विराजमेवाप्नोति षड्रात्रीर्भृत्वाग्निश्चेतव्या, इत्याहुः,
षड्वा ऋतवः संवत्सरः, संवत्सरमनु विराडायत्ता, विराजमेवाप्नोति, दश रात्रीर्भृत्वा-
ग्निश्चेतव्या, इत्याहु,—र्दशाक्षरा विराड्, विराजमेवाप्नोति, द्वादश रात्रीर्भृत्वाग्निश्चेत-
व्या, इत्याहु,—र्द्वादश मासाः संवत्सरः, संवत्सरमनु विराडायत्ता, विराजमेवाप्नोति,
चतुर्विꣳशति रात्रीर्भृत्वाग्निश्चेतव्या, इत्याहु,—श्चतुर्विꣳशतिर्वा अर्धमासाः संवत्सरः,
संवत्सरमनु विराडायत्ता, विराजमेवाप्नोति, मासं भृत्वाग्निश्चेतव्या, इत्याहु,—र्मासशः
एवं संवत्सरमाप्नोत्य,—ष्टौ वा एतन्मासो वसवोऽबिभ्रु,—स्त इमं लोकमाजयन् गायत्रीं
छन्दा, एकादश रुद्रा,—स्तेऽन्तरिक्षं लोकमाजयꣳस्त्रिष्टुभं छन्दो, द्वादशादित्या,—
स्तेऽमुं लोकमाजयन् जगतीं छन्द,—स्त आर्भुव,—न्नृध्नोति य एवꣳ विद्वान्संवत्सरमग्निं बिभर्ति,
तस्मादाहुः, संवत्सरभृत एवाग्निरित्यु,—पैता आप्रियः प्रजापतिः प्रजाः सृष्ट्वा रिरिचानोऽम-
न्यत, स एता आप्रीरपश्यद्, ताभिरात्मानमाप्रीणीता,—ऽग्निर्वै प्रजापति,—र्यदेता
आप्रियो भवन्त्यग्निमेवैताभिर्यजमाना आप्रीणाति, लोमशꣳ वा एतच्छन्दः पशव्यमूनातिरिक्तं
प्रजननाय, विराजो भवन्ति, विराड् वै सर्वाणि छन्दाꣳसि, सर्वाण्येवास्य छन्दाꣳस्युप-
हितानि भवन्ति, ता विश्वचितः कुर्यात्, प्राणा वा एता ज्यायसीरिव च कनीयसीरिव च
भवन्ति, ज्यायाꣳस इव च ह्येमे कनीयाꣳस इव च प्राणाः, प्राणानेवात्मन् धत्ते ॥ ६ ॥　　६
यस्याग्निरुख्योऽनुगछति यथा पुत्रो जातः प्रमीयत एवं तद्, यद्यनुगछेत् तामेवोषां पुनः

[७] तै. ५,४,११ । का. ३,५,३७,७,२९;८,५३;२२,८,३६,३ । काप. ३,५,४५;९,५,३७;२५,९;३६,३ ।

परान्धीत,—षा वा अग्नेर्योनिः, स्वदितेनां वैनेः प्रजनयती,—श्वरो वा एषो प्रजनितो३र्योऽग्निं
चिनुते ॥ ७

यास्ते अग्न आर्द्रा योनयो याः कुलायिनीर्ये ते अग्न इन्दवो या उ नाभयः ।

ताभिष्ट्वमुभयीभिः संविदानः प्रजानंस्त३न्वेह निषीद ॥ ८

इति यदुषाद्रां योनिमति शान्त्यै, प्रजा वै कुलायं, पशवः कुलायं, यत्कुलायिनीः
प्रजात्यै, हविर्भूतो वा एष ३योऽग्निं चिनुते, ३योऽग्निं चित्वान्यस्य स्त्रियमुपैति यथा हविः
स्कन्नमेवं स्याद्, यथा हविषि स्कन्ने प्रायश्चित्तिमिच्छन्त्येवमस्मै प्रायश्चित्तिमिच्छेयु,—र्यद्युपेया-
न्मैत्रावरुण्यामिक्षया यजेत, मैत्रावरुण्यामेवोपेत्यात्मनोऽस्कन्नत्वाय, पशुर्वा अग्नि,—र्यो वै पशुं
पुरस्तादुपचरति हिनस्ति वा एनं सं, तस्मात् पुरस्तात् प्रत्यञ्चं नाक्रामति, तस्माद् पश्चात्
प्राञ्चमुपचरत्यात्मनोऽहिंसायै, यो वै यथावृत्तमग्निं चिनुते यथारूपं प्रजाश्च ऋतवश्च कल्पन्ते,
या दक्षिणावृतस्ता दक्षिणत उपदधाति, याः सव्यावृतस्ता उत्तरत,—स्त्र्यालिखिताः पश्चात् प्राची-
रुपदधाति, यथावृत्तं वा एतदग्निं चिनुते यथारूपं प्रजाश्च ऋतवश्च कल्पन्ते, संसत्योऽग्निश्चेत३-
व्या, इत्याहुः॥ भूर्भुवः स्वः॥ इति पुरस्तात् स्वयमातृणां, यावदेतद्वै वाचः सत्यं संसत्यमेवाग्निं
चिनुते, प्राणो वै स्वयमातृण्णा, ऽमृतं हिरण्यं, यद्धिरण्येष्टकामुपधाय स्वयमातृण्णामुप-
दधात्य,—मृत एवास्य प्राणान् दधाति, तेजोऽसि तेजो मे यच्छे,—ति हिरण्येष्टका उपदधात्ये,—
ताभिर्वा इमे लोका विधृता, अथो एताभिरेवाग्निं चिनुत, इमे लोकाः प्रमान्ति, देवा असु-
रान् हत्वा मृत्योरबिभयु,—स्ते छन्दांस्यपश्यं,—स्तानि प्राविशं,—स्तेभ्यो यद्यदच्छदयंस्तेना-
त्मानमच्छादयन्त, तच्छन्दसां छन्दस्त्वं, चितिं चितिमुपधायाग्नेय्या धाम छन्दोऽभिमृशति,
स्वामेव देवतामुपप्रविशत्यात्मनोऽहिंसायै ॥ श्येनचितिं चिन्वीत स्वर्गकामः, श्येनो वै भूत्वा
गाय३त्र्यग्ने लोकमपतत् स्वर्गस्य लोकस्य समष्ट्यै, रथचक्रचितिं चिन्वीत भ्रातृव्यवान्,
रथचक्रं वै वज्रं कृत्वा देवा असुरेभ्य उपप्रावर्तयं,—स्तेषां शततर्हमतृंहं,—स्तदेतामेव
वज्रं कृत्वा यजमानो भ्रातृव्यायोपप्रवर्तयति, शततर्हं ह तृंहति, प्रौगचितिं चिन्वीत
भ्रातृव्यवा,—नुभयतो वै देवानसुराः पर्ययत्ता आसन्, पुरस्तादन्ये, पश्चादन्ये, तान्वा
एतेन व्यनुदन्त, तद्भ्रातृव्यस्य वा एषं विनोदो, द्रोणचितिं चिन्वीतान्नकामो, द्रोणेन वा
अन्नमद्यते, ऽनुरूपेणैवान्नाद्यमवरुन्द्धे, पश्चादरुमवत्यनुरूपत्वाय, श्मशानचितिं चिन्वीत यः

कामयेता,—ऽञ्जसा पितृलोकमुपेयामित्यं,—ञ्जसा पितृलोकमुपैत्यु,—प चान्यं चिन्वीत ग्रामकामो,
यथैवैतमुपाचिनोत्येवमस्मै ग्राममुपचिनोति, समूह्यं चिन्वीत पशुकामो, यथैवैतं समूहत्येव-
मस्मै दिग्भ्यः पशून्त्समूहति ॥ ७ ॥
९-१२

प्रजापतिर्वा एतमग्रेऽग्निमचिनुत ऋतुभिः संवत्सरं, वसन्तेन पुरस्तादचिनुत, ग्रीष्मेण
दक्षिणं पक्षं, वर्षाभिरुत्तरं, शरदा पुच्छं, हेमन्तेन मध्यं, ब्रह्मणैव पुरस्तादचिनुत,
क्षत्रेण दक्षिणं पक्षं, विशोत्तरं, पशुभिः पुच्छ,—माशया मध्य,—मेतावद्वा अस्ति, यावदे-
वास्ति तत् स्पृणोति, तदवरुन्द्धे, स्वर्गाय वै लोकायाग्निश्चीयते, वज्र एकादशिनी, यदे-
कादशिनीं मिनुयाद्वज्रः पुरस्तादवगृह्णीया,—दस्वर्ग्यः स्याद्, यन्न मिनुयादपशुः स्यादेकयूपं,
एकादश पशवो नियुज्या,—स्तेन पशव्या,—स्तेन स्वर्गो, यत्पक्षसंमितां मिनुयात् कनीयां-
सं यज्ञक्रतुमुपेयात् कनीयसीं प्रजां कनीयसः पशून् कनीयोऽन्नाद्यं, पापीयान्त्स्या,—दथयद्वे-
दिसंमितां मिनोति ज्यायांसं चिनुते ज्यायांसमेव यज्ञक्रतुमुपैति भूयसीं प्रजां भूयसः पशून्
भूयोऽन्नाद्यं, वसीयान् भवत्ये,—षा वा अग्नेरुत्तरवती नाम चिति,—रुत्तरमुत्तरं श्वः श्वः
श्रेयान् भवति य एवं वेद, द्वेधा वा अग्निं चिक्यानस्य यश इन्द्रियं गच्छत्य,—ग्निं वा गच्छ-
त्यात्मानं वा ॥
१३

रुचं नो धेहि ब्राह्मणेषु रुचं राजसु धारय ।

रुचं विश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥ १४

इति यज्जुहोत्यात्मानं वा एतदग्नेर्यशसार्पयती,—श्वरो वा एष दुश्चर्मा भवितो३र्योऽग्निमध्येति॥
१५

तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोध्युरुशंसमा न आयुः प्र मोषीः ॥ १६

इति यज्जुहोति शान्तिर्वा एषाग्नेर्गुप्तिरात्मनो, वयो वा अग्नि,—स्तस्मादग्निचिता पक्षिणो
नाशित३व्यं नो अग्निविदा, यदश्नीयात्तमेवाश्नीयात्, स एनमार्तिं निनयेत्, प्रजापतिर्वा
एतमग्रेऽग्निमचिनुत ज्यैष्ठ्यकामः, स ज्यैष्ठ्यं महिमानमगच्छ,—ज्ज्यैष्ठ्यं महिमानं गच्छति य
एवं विद्वानग्निं चिनुते, प्रजापतिः प्रजाः सृष्ट्वा ता अनुप्राविशत्, सोऽब्रवीद्, यो मेतः

[८] तै. ५,५,७। काठ. २२,४। कपि. ३५,१-२। वा. १८,४८—४९:२२,२। काण्व. २०,१८—१९,२३,१।
[तत्त्वा यामि ब्रह्मणा०। ऋ. १,२४,११: तै. २,१,११,६]

संचिनवदध्युवत्स इति, तं देवाः समाचिन्वं,—स्त आर्ध्नुवं,—स्तंचिन्यस्य चित्यत्वं, तथ्य
एवं विद्वानग्निं चिनोति प्रजापतिमेव संचिनोत्यृ,—ध्नोति, तस्मादाहुः, प्रजापतिचित एवा-
ग्निरिति ॥ ८ ॥
१७

देवेभ्यो वा अग्निं चिक्यानेभ्यो न व्यौछ३त, तेऽग्ना आहुतिमजुहवु,—स्तेभ्यमग्ने व्युछ,
तथास्मभ्यं विवस्स्वतीति, तयाग्नये व्यौछ३द्, व्यग्नया औछ,—दाहुत्यै व्यौछन्, तस्या
आहुत्यै यज्ञेन व्यौछद्, व्याहुत्या औछ,—द्यज्ञाय व्यौछन्, तस्मै यज्ञाय दक्षिणया व्यौछद्,
वि यज्ञायौछद्दक्षिणायै व्यौछन्, तस्यै दक्षिणायै ब्राह्मणेन व्यौछद्, वि दक्षिणाया औछद्
ब्राह्मणाय व्यौछन्, तस्मै ब्राह्मणाय ब्रह्मणा व्यौछद्, वि ब्राह्मणायौछ,—द्ब्रह्मणे व्यौछन्,
तस्मै ब्रह्मणे तपसा व्यौछ,—देता वै तपःपरार्ध्या व्युष्टयः, श्वोवसीयस्यस्मै व्युछति य एवं
विद्वान् व्युष्टीरुपधत्ते, यो वै यथापूर्वं व्युष्टीर्वेद यथापूर्वमस्मै व्युछत्यौ,—षसीं वाव प्रथमां
व्युष्टिर्व्यैश,—दिति वा आहु,—र्यदीषस्युदेति, यद् व्युछति, यदग्निरग्नीयते, यत्सूर्य उदेति,
यद्धस्ता अवनेनिक्ते, यदश्नाति, यत् पिबत्ये,—ता वै यथापूर्वं व्युष्टयो, यथापूर्वमस्मै
व्युछति य एवं विद्वान् व्युष्टीरुपधत्ते ॥ ९ ॥
१८

यो वा अग्निमयोनिमनायतनं चिनुतेऽयोनिरनायतनो भवत्यो,—पो वा अग्नेर्योनि,—र्यत् कुम्भेष्टका
उपदधाति योनिमन्तमेवायतनवन्तमग्निं चिनुते, योनिमानायतनवान् भवत्य,—घरसपत्नोऽग्निश्चेत-
३व्या, इत्याहु,—रापो वा अग्नेः सपत्नो, यत् कुम्भेष्टका उपदधात्यघरसपत्नमेवाग्निं चिनुते,
ऽघरोऽस्मात् पाप्मा भवत्य,—घरः सपत्नः, शुग्वा अग्नि,—रापः शान्ति,—र्यत् कुम्भेष्टका उपदधाति
शान्त्यै, यत्कुम्भाश्च कुम्भ्यश्च तन्मिथुनं, यद् द्वन्द्वं प्रजात्यै, द्वादशोपदधाति, द्वादश
मासाः संवत्सरः, संवत्सरमेवाप्त्वावरुन्द्धे, नैवारश्चरुस्त्रयोदशो भवत्य,—स्ति मासस्त्रयो-
दश,—स्तमेवैतेनाप्त्वावरुन्द्धे, पयसि भवति, यत्पयो, ग्राम्यं तेनान्नाद्यमवरुन्द्धे, यन्नीवा-
रा, आरण्यं तेन, तेनैव तदुभयमवरुन्द्धे ॥ १० ॥
१९

[१५३७]

॥ इत्युपरिकाण्डे वसोर्धारीयः चतुर्थः प्रपाठकः ॥ ४ ॥

अथ पञ्चमः प्रपाठकः ।

आ वा एष प्रजापतये वृश्चते यः शिर उपदधाति नैतुराण्यङ्कान्य,—स्थिचिदस्य श्मशानचिद्भव-
ति, यदेता पुरुषचितिमुपदधाति न प्रजापतया आवृश्चते, ऽनस्थिचिदस्याश्मशानचिद्भवति,
षट्त्रिंशतमेता उपदधाति, षट्त्रिंशदक्षरा बृहती, बार्हता: पशवो, बार्हतः पुरुषः,
पुरुषस्य प्रतिमोपधीयते, स ३ह्येष धीयत, एष ह ३त्वेव यजमानोऽमुं लोके नाति प्रमीयते
यस्यैता उपधीयन्ते ॥ १ ॥
१

अथैताः पश्चापश्चीनाः, शिथिरं इव वा अग्निश्चित्यो, यत्पश्चापश्चीना उपदधात्य,—मे-
धृत्या अशिथिरत्वाय, पञ्चोपदधाति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य, भूय-
स्कृदसि, वरिवस्कृदसीत्य,—मा एव भूमानं दधाति, भूयाम् प्रजया पशुभिर्भवत्य,—प्सुषदसि,
गृध्रसदसीति, वयो वा अग्निः, समिक्ष्युमेवैनं वयः करोति, वयो भूत्वा स्वर्गं लोकमेति
यस्यैता उपधीयन्ते ॥ २ ॥
२

चितः स्थ परिचितः स्थेति, शर्कराः परिश्रयति, यच्च शर्करा अपरिश्रित्य सिकता निर्वपे-
द्रेतः सिक्तं परासिच्येता,—ऽथ यच्च शर्करा अपरिश्रित्य सिकता निर्वपति रेतसः सिक्तस्य परि-
गृहीत्यै ॥ ३ ॥
३

वि वा एष यज्ञश्छिद्यते यदसंस्थितं पशुमुत्सृजन्ति, सं ह स्म वा एतमाशोकेयः स्था-
पयत्या,—ज्येन संस्थाप्य यज्ञस्य संतत्या अविछेदाय ॥ ४ ॥
४

स्वर्गं वा एष लोकमन्वारोहति ३योऽग्निं चिनुते, यदन्वारोहान् जुहोति स्वर्गमेवैनं लोकं
गमयित्वाथ कर्म चरति ॥ ५ ॥
५

[१५४१]

॥ इत्युपरिकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥

अथ षष्ठः प्रपाठकः ।

अध्वरादीनां त्रयाणां विधिः ।

आग्नावैष्णवमेकादशकपालं निर्वपे,—दग्निर्वै सर्वा देवता, विष्णुर्यज्ञो, देवताश्चैव यज्ञं
चालभ्या,—ऽग्निर्वै यज्ञस्या३न्तोऽवस्ताद्, विष्णुः पुरस्ता,—दुभयत एव यज्ञस्यान्ता आलभ्य,
वदाहु,—र्न ऋतं इन्द्राय३श्नोऽस्तीवति, यदष्टाकपालस्तेनाग्नेयो, यत् त्रिकपालस्तेन वैष्णवो,

[१] काठ. २२,१३।

यदेकादशकपालः संपद्यते तेनैन्द्रो, ऽग्निर्वै यज्ञस्य पवित्रं, विष्णुर्यज्ञः, पवित्रपूतमेवं
यज्ञमालभ्य, मेधस्य वा एतद्यज्ञस्य रूपं यत्पुरोडाश,—स्तस्मात् पुरोडाश एवं कार्य,—श्चरू
कुर्वन्ति, धेन्वा वै घृतं पयो, ऽनडुहस्तण्डुला,—स्तन्मिथुनं, मिथुनमेवास्य यज्ञमुखं
दधाति, तेजो वै घृतं, तेजस एवं प्रजायते, पुरुषो वा एष मेधायालभ्यते, पुरुषस्येव
ह्येषा प्रतिमा, यत इव हि रूपं तस्माच्चरुरेवं कार्यो, वेदिमति दीक्षते, विन्दा, इति वै
वेदिमति दीक्षते, विन्दते ह वै यो वेदिमति दीक्षते, ऽथो यज्ञपथ एवादीक्षिष्ट, वेद्या वै
देवा इममसुराणामविन्दत,—मामेव विन्दते यो वेदिमति दीक्षते, ऽथो यज्ञपथमेवालभ्य,
प्राचीनवंशं कुर्वन्ति दिशो, यदिमाः व्यकल्पयन्निमामेव देवेभ्योऽकल्पय,—न्निमां पितृभ्य,
इमामसुरेभ्य, इमां मनुष्येभ्यो, देवतामेव उपैति यो दीक्षते, देवानामेव दिशमुपावर्तते,
प्राचीनामेव दिशमुपावर्तते, ऽथो देवक्षेत्रमेव प्रावस्यति परिश्रयन्त्य,—न्तर्हितो वै देवात्क्षया-
न्मानुषः क्षयो, मानुषादेवैनं क्षयादन्तर्दधत्य,—थो रक्षसामनन्ववायाये,—ति वा एषोऽस्मा-
ल्लोकाद्यो दीक्षते, जनं ह्येति, देवलोकमभ्यारोहति, परिश्रयन्त्यतिरोकान्कुर्वन्ति, तेना-
स्माल्लोकान्नैति, तेनास्मिल्लोके धृतः पुरस्तात् प्रायणं कुर्यात् स्वर्गकामस्या,—ऽसौ वा आदित्यः
स्वर्गो लोको, ऽमुष्यैनमादित्यस्य सामक्षं गमयति, दक्षिणतः प्रायणं कुर्याद्यं कामयेत,
पितृलोकं ऋध्नुयादित्ये,—षा वै पितृणां दिक्, पितृलोकं एवं ऋध्नोति, पश्चात् प्रायणं कुर्यात्
प्रजाकामस्य, पश्चाद्धि रेतो धीयते, रेतो दीक्षितो, रेतोऽस्मिन्दधात्यु,—त्तरतः प्रायणं
कुर्याद्यं कामयेत, मनुष्यलोकं ऋध्नुयादित्ये,—षा वै मनुष्याणां दिङ्, मनुष्यलोकं एवं ऋध्नोत्यु,-
—त्तरतः पुरस्तात् प्रायणं कुर्याद्यं कामयेतो,—भयोर्लोकयोर्ऋध्नुयादित्यु,—भयोर्वा एतल्लोकयो,—
रुभयोरेव लोकयोर्ऋध्नोति, सर्वतः प्रायणं कुर्याद्यं कामयेत, सर्वासु दिक्ष्वित्यृध्नुयादिति,
सर्वासु दिक्ष्वित्यृध्नोति ॥ १ ॥ १
केशश्मश्रु वपते, दतो धावते, नखानिकृन्तते, स्नाति, मृता वा एषा त्वं,—गमेध्यं वा
अस्यैतदात्मनि शमलं तदेवापहते, मेध्य एवं मेधमुपैत्य,—प्सु दीक्षां प्रवेशयित्वा देवाः स्वर्गं लोक-
मायन्, यदप्सु स्नाति तामेव दीक्षामालभते, ऽथ यदपोऽवभृथमभ्यवैति ता वा एतद्दीक्षां पुन-
रप्सु प्रवेशयत्यो,—षधे त्रायस्वैन,—मित्याह त्रात्या एवं, स्वधिते मैनं हिंसीरिति, वज्रो वै

[२] मै. १,२,१ । तै. ६,१,१। काठ. २२,१३; २३,१ । कपि. ३५,७ । मा. ४,१-२; ५,४२; ६,१५ । काण्व. ४,१-४;
५,५४, ६,२० ।

स्वधितिः, स ईश्वरोऽशान्तो यजमानं हिंसितो,—र्यत्तृणमन्तर्दधाति यजमानस्याहिंसायै,
देवश्रुदिमान् प्रवपा इति, देवश्रु ह्येतान् प्रवपते, स्वस्त्युत्तरं अशीयेति, स्व३स्त्यस्य यज्ञ-
स्योदृचमशीये,—ति वा एतदाहा,—ऽऽपो मा मातरः सूदयन्त्वित्या,—पो हि यज्ञो, घृतेन मा
घृतप्वः पुनन्त्विति, देवताभिरेवात्मानं पावयते, विश्वं हि रिप्रं प्रवहन्तु देवीरिति, यदेवास्य
रिप्रममेध्यमात्मनि शमलं तदस्मादधि प्रवहन्त्यु,—दिदाभ्यः शुचिरा पूत एमीति, शुचिरेवाभ्यो
याज्ञियो मेध्यः पूत उदेति, हविर्वै दीक्षितो, यदा वै हविर्यजुषा प्रोक्षत्यथ हविर्भवति,
यद्यजुषा स्नपयति हविरेवैनमक,—रश्नाति, प्राणा वा अशनं, प्राणानेवात्मन्धित्वा दीक्षते,
सुषिरो वै पुरुषः, स वै तर्ह्येव सर्वो यर्ह्याशितो, यदाशितो भवति मेध्य एवं मेधमुपैति,
यथा वा इदं दीक्षितं एवं वा एषोऽमुष्मिल्लोकं एव वा अत्याशितस्य तिष्ठति, तस्मान्नात्या-
शितेन भवितव्यं, तन्न सूक्ष्य,—माशितेनैव भवितव्यं, यथैव कनीयः कनीयोऽश्नीया-
देवमश्नीयाद्, यद्धि दीक्षितः सन् कनीयोऽश्नाति तेन दीक्षित आङ्क्ते, ऽभ्यङ्क्ते, वासः
परिधत्त, एता वै पुरुषस्य तन्वः, सतनूरेव मेध्यमुपैति, नवनीतेनाभ्यङ्क्ते, घृतं देवाना,—
मायुतं मनुष्याणां, निष्पक्वं गन्धर्वाणां, स्वयंविलीनं पितृणां, सर्वदेवत्यं वा एतत्,
तस्मान्नवनीतेनाभ्यङ्क्ते, दर्भपिञ्जूलाभ्यां समायौति, तत्स्विदभ्यञ्जनमक,—रथो अङ्गेष्वेवैतद्
धारयति मेध्यत्वाय, महीनां पयोऽसीत्या,—ह, महीनां ह्येतत्पयो, ऽपामोषधीनां रसा
इत्य,—पां ह्येष ओषधीनां रसो, वर्चोधा असि, वर्चो मे धेहीत्याशिषमेवाशास्ते ॥२॥ २
प्रस्वाङ्क्ते प्रजात्या, ईषीकयाङ्क्ते, शलल्या हि मनुष्या आञ्जते, सतूलयाङ्क्ते,
ऽपतूलया हि मनुष्या आञ्जते, दक्षिणं पूर्वमाङ्क्ते, सव्यं हि पूर्वं मनुष्या आञ्जते,
त्रिरन्यत्त्रिरन्यदाङ्क्ते, ऽपरिमितं हि मनुष्या आञ्जते, न पुनर्निषेवयति, पुनरावर्तं हि
मनुष्या आञ्जता, इन्द्रो वै वृत्रमहं,—स्तस्य कनीनिका परापतत्, सा त्रिककुभमगछत्, तदा-
ञ्जनं त्रैककुभमाङ्क्ते, सत्यं वै चक्षु,—र्नैव वाचं श्रद्दधाति, सत्यमेवालभ्य दीक्षामुपैत्य,—
न्तरहं त्वया द्वेषो अन्तरारातीर्दधे महता पर्वतेनेति, पर्वतेन वा एतद् द्वेषोऽरातीरन्तर्धत्ते,
चक्षुःपा असि, चक्षुर्मे पाहीत्या,—शिषमेवाशास्त, ऊर्ध्वं चावाञ्चं च पावयत्यू,—र्ध्वश्च ह्ययमर्वा-
वाङ् च प्राणो, यं द्विष्यात्तमक्ष्णया पावयेत्, प्राणानस्य मोहयति, प्रमायुको भवति,

[३] मै. १,२,१ । तै. ६,१,१ । काठ. २३,१ । कपि. ३५,७ । मा. २,१६;१४,१७;१,१२,३१;४,४;१०,६ । काण्व. १,
३३;१५,१७;१,१६,४८।४,५;११,१३ । [चक्षुःपा असि० (चक्षुर०) ।अथर्व. २,१७,६]

चित्पतिस्त्वा पुनात्विति, यज्ञो वै चित्पति,—र्वाचस्पतिस्त्वा पुनात्विति, वाचस्पतिरेवैनं
यज्ञाय पावयति, देवस्त्वा सविता पुनात्विति, सवितृप्रसूत एवैताभिर्देवताभिर्मेधायात्मानं
पावयते, ऽछिद्रेण पवित्रेणेत्य,—सद्वा अछिद्रं पवित्रं यत्सूर्यस्य रश्मयो, ऽछिद्रेणैवैनं पवित्रेण
पुनाति, तस्य ते पवित्रपते पवित्रपूतस्येति, यज्ञो वै पवित्रपति,—र्यज्ञाय खलु वा एष कमा-
त्मानं पावयते ॥ यज्ञं शकेयम्॥ इतीन्द्रो वै वृत्रमप्स्वध्यहं,—स्तासां यद्यज्ञियं मेध्यमासीत्त-
दुदक्रामत्, ता इमा ओषधयोऽभवं,—स्तासां वा एतत्तेजो यद्दर्भा, एता वै शुष्का आपो,
यद्देवासां स्तेजस्तदवरुन्द्धे, त्रयीर्वा आपो, दिव्याः पार्थिवाः समुद्रिया,—स्ताः सर्वा दर्भा
विवस्थैत्, तस्माद्दर्भैः पवित्रं, द्वाभ्यां पावयति, द्वे पवित्रे, द्विपाद्यजमानो, यावानेवा-
स्यात्मा तं पावयति, त्रिः पावयति, त्रिषत्या हि देवा, अथो त्रयो वा इमे प्राणाः,
प्राणोऽपानो व्यानो, यावानेवास्यात्मा तं पावयति, सप्तभिः पावयति, सप्त वै छन्दांसि,
सि, छन्दोभिरेवैनं पावयत्य,—थो ब्रह्म वै छन्दांसि, ब्रह्मणैवैनं पावयत्ये,—कविंशत्या
पावयति, दश हस्त्या अङ्गुलयो दश पाद्या, आत्मैकविंशो, यावानेवास्यात्मा तं पाव-
यति, त्रया वै नैर्ऋता, अक्षाः स्त्रियः स्वप्नो, यद्दीक्षते तेनाक्षैश्च स्त्रीभिश्च व्यावर्तते,
यो प्रथमो दीक्षितो रात्रीं जागर्ति तया स्वप्नेन व्यावर्तते, यो प्रथमो दीक्षितो वसति यज्ञं तया-
वरुन्द्धे, यां सोमे क्रीते प्रजा तया, यां श्वःसुत्यया पशूंस्तया ॥ ३ ॥ ३-५
आकूत्यै प्रयुजे अग्नये स्वाहेत्या,—कूत्या वा आकूतिर्यक्ष्यते स्य इति, प्रयुजः खलु वा एनं
यज्ञाय प्रयुञ्जते, मेधायै मनसे अग्नये स्वाहेति, मेधया हि मनसा यज्ञमश्नुते, दीक्षायै तपसे
अग्नये स्वाहेति, दीक्षया हि तपसा यज्ञमश्नुते, सरस्वत्यै पूष्णे अग्नये स्वाहेति, वाग्वै सर-
स्वती, वाचा व्याहरति, यक्ष्यते स्य इति, पूषा खलु वा एनं यज्ञं प्रापिपयिषत् एनमपूपुष,-
—दापो देवीर्बृहतीर्विश्वशंभुवा इत्या,—पो हि यज्ञो, द्यावापृथिवी उरो अन्तरिक्षेति, द्यावा-
पृथिवी वा अन्वन्तरिक्षं यज्ञ उपश्रित,—स्तत एवं यज्ञमालभ्य, बृहस्पतिर्नो हविषा वृधातु
स्वाहेति, ब्रह्म वै बृहस्पति,—र्ब्रह्मणा वा एतत् पुरस्तात् सर्वान् कामानाप्त्वा दीक्षामालभते,—
यत्र वा अस्य यज्ञः श्रितो यत्र यत्रोपश्रितस्ततस्ततो वा एतत् सर्वं ब्रह्मणा यज्ञं संभृत्यालभ्य,
न वा एकाहुतिर्दीक्षितं करोति, यदेतानि जुहोति द्वितीयत्वाय, प्रजापतिर्वै यत्किंच मनसा-

[४] मै. १,२,२ । तै. ६,१,२ । काठ. २३,२ । कपि. ३५,८ । मा. ४,७ । काण्व. ४,८ ।

दीधेत्तदाधीतयजुर्भिरेवाप्नोत्, तदाधीतयजुषामाधीतयजुष्ट्वं, तथ एवं विद्वानाधीतयजूंषि
जुहोति यदेव किंच मनसा दीध्यज्जुहोति तदाप्नोत्ये,—ते वै यज्ञस्य संभारा, एष ह त्वेवं
संभृतसंभारेण यज्ञेन यजते यस्यैतानि हूयन्त, एतद्ध स्म वा आहारुण औपवेशिः, किमु स
यज्ञेन यजेत यो यज्ञस्य संभारान्न विद्यादिति, पञ्चभिर्जुहोति, पाङ्क्तो यज्ञो, यावानेव
यज्ञस्तमालभ्य, षड्भिर्जुहोति, षड्वा ऋतव, ऋतुष्वेव प्रतितिष्ठति, यज्ञो वै सृष्टः, प्र
सामान्यलिनात्, प्र यजु,—स्तं वा ऋगेवायछ,—देका वा एनमृगयछद्, द्वादश यजूंषि,
नव सामानि, तस्मान्नवभिर्बहिष्पवमाने स्तुवते, नव ह्येनं सामान्ययछं,—स्तस्माद्वात्संव-
त्सरविदो द्वादशभिरौद्ग्रभणं जुह्वति, द्वादश ह्येनं यजूंष्यायछ,—न्नेतर्हि खलु वा एष सृज्यते
यर्हि दीक्षते, यदृचौद्ग्रभणं जुहोति यज्ञं वा एतत् सृष्टमृचायछति, तस्मादारुणिविद ऋचौ-
द्ग्रभणं जुह्वत्ये,—का ह्येनमृगयछत् ॥ ४ ॥ ६
यज्ञो वै प्रजापतिः, प्राजापत्यमेतच्छन्दो यदनुष्टुब्, यदनुष्टुभा जुहोति स्वेनैवैनं छन्दसा-
वरुन्द्धा, एकया जुहोत्ये,—को हि प्रजापति,—रनिरुक्तया जुहोत्य,—निरुक्तो हि प्रजापतिः,
पूर्णया जुहोति, पूर्णो हि प्रजापति,—र्यदूनया जुहुयाद्भ्रातृव्याय लोकमुच्छिंषे,—दथ यत्पूर्णया
जुहोति न भ्रातृव्याय लोकमुच्छिंषत्यू,—र्जो वा एतद्रूपं यत् पूर्णं, यत् पूर्णया जुहोति
यज्ञे वा एतदूर्जं दधाति, विश्वो देवस्य नेतु,—रिति सावित्रं, मर्तो वुरीत सख्य,—मिति
पितृदेवत्यं, विश्वो राय इषुध्यती,—ति वैश्वदेवं, द्युम्नं वृणीत,—ति बार्हस्पत्यं,
पुष्यसा, इति पौष्णं, सारस्वतः स्वाहाकारः, सर्वदेवत्या वा एषा ऋक्, तस्मादेषैका
सत्यौद्ग्रभणं परिबभूव, सर्वाभ्यो देवताभ्यो यज्ञ आलभ्या, इत्याहुः, सर्वदेवत्या वा
एषा ऋग्, यदेतया ऋचौद्ग्रभणं जुहोति सर्वाभ्यो वा एतद्देवताभ्यो यज्ञमालभते, ऽनुष्टुभो वा
एतस्याः सत्यास्त्रीण्यष्टाक्षराणि पदान्येकं सप्ताक्षरं, यत्सप्ताक्षरं तस्य चत्वार्यक्षराण्येकस्मिन्
पद उपयन्ति, त्रीण्येकस्मिन्, यत्र चत्वार्युपयन्ति सा जगती, यत्र त्रीणि सा त्रिष्टुब्,
यदष्टाक्षरं तेन गायत्री, यदनुष्टुप्तेनानुष्टुप्, सर्वैरेवास्य छन्दोभिर्हुतं भवति, छन्दःप्रतिष्ठानो
वै यज्ञ,—श्छन्दःसु वावास्यैतद्यज्ञं प्रतिष्ठापयामकः, स्वाहाकारेण खलु वा एषा पङ्क्तिः,
पाङ्क्तो यज्ञः पङ्क्तिप्रायणः पङ्क्त्युदयनः, पङ्क्तिप्रायणमेवास्य यज्ञं पङ्क्त्युदयनमक,—रथो

[५] मै. १,२,२ । तै. ६,१,२ । काठ. २३,२ । कपि. ३५,८ । वा. ४,८;११,६७;२२,२१ । काण्व. ४,९;१२,६८,२४,
२९ । [विश्वो देवस्य०... स्वाहा । ऋ. ५,५०,१; तै. सं. १,२,२,१;४,१,९,१]

यामैं छन्दांसि, वाचं वा एतन्मध्यत आप्त्वावरुन्द्धे. तस्मादियं वाङ् मध्यतो वदति,
मध्यतो ह्यीयं वाक्, प्रजापतिर्वै स्वां दुहितरमभ्यध्यायत्, तस्य रेतः परापतत्, तं देवा
अग्निसमगच्छन्त, तस्माद्दीक्षितो न ददाति. न पचत्य,—थैनमभिसंगच्छन्ते, तदुदगृभ्णं,-
—स्तदीद्धमग्नावाद्धमनस्य, तेन यज्ञमतन्वत, यज्ञो यदग्रे व्यभवत् स त्रेधा व्यभवत्, स वा
ऋक्षु तृतीयेनाश्रयत, सामसु तृतीयेन, यजुःषु तृतीयेन, या वा अस्य प्रिया तनूरासीत्
तया यजुरश्रयतो,—थर्चा क्रियेत, उच्चैः साम्नो,—पांशु यजुषा, यज्ञस्य ह्यत्र प्रिया तनू,-
—र्यद्यजुषोच्चैः कुर्याद्यज्ञस्य प्रियां तन्वमुद्धृतां कुर्या,—दब्रह्मवर्चसी स्याद्ब्रह्मभावुकः ॥ ५ ॥ ७
आहिताग्निर्वा एष सन्नाग्निहोत्रं जुहोति, न दर्शपूर्णमासौ यजते, तया आहुतिभाजो देवतास्ता
अनुध्यायिनीः करोति, कर्शयत आत्मानं, तेनैवास्य तद्धुतं भवति, देवा असुरान् हत्वेभ्यो
लोकेभ्यः प्राणुदन्त, तेषामेको मनुष्यान् प्राविश,—त्तदिदं रिप्रं पुरुषेऽन्त,—र्यो कृष्णमिव
चक्षुष्यन्त,—स्तस्मादीया,—दसुरमेवापहते, यदा वै पुरुषे न किंचनान्तर्भवति, यदास्य कृष्णं
चक्षुषोर्नश्यत्य,—थ मेध्यो, यदि कुर्यात्कं कुर्या,—दसुर्यो वै रात्रि,—रसूर्यमेवासुर्यं क्रियते,
वाचं वा एतद्दीक्षयन्ती,—ति ह स्माहारुण औपवेशि,—र्ये उतान्नानोऽन्यन्नानोऽथ दीक्षितवादं
वदति स वाव दीक्षित इति, सायं प्रातर्वै मनुष्याणां देवहितमशनमतिर्नाय सायमशनमतिर्नाय
प्रातरशनं व्रतं व्रतयति, शनुर्यस्य व्यावृत्त्या, अदन्ती,—ति वै गा आहु,—रक्षन्ती,—ति
मनुष्यान्, जुहुधी,—ति देवेभ्यो, ऽथवा एतमाहुः॥ व्रतमुपेहि व्रत्य॥ इति, व्रतं ह्येतस्य,
मेतेन यज्ञः संततो, व्रतेनैव यज्ञं संतनोत्य,—भ्यर्धो वा ऋक्सामे यज्ञादास्तां, तयोर्यो
महिमाना आस्तां तो अपनिधाय यज्ञमुपावर्तेतां, तौ महिमाना अहोरात्रे अभवतां, तयोर्वा
एतद्रूपं यत् कृष्णाजिनस्य, यच्छुक्लं तदह्नो रूपं, यत् कृष्णं तद्रात्रे,—स्तौ वा एतन्म-
हिमाना अन्वारभते संपारणाय, स मा पारयता इत्य,—होरात्रे मिथुनं समभवतां, तयोस्ते-
जोऽपाक्रामत्, तत् कृष्णं प्राविशत्, तद्वा एतदन्वारभते, द्यावापृथिवी मिथुनं समभवतां,
तयोर्वीर्यमपाक्रामत्, तत् कृष्णं प्राविशत्, तद्वा एतदन्वारभते, यथा वा इदं नावं पारं
तरिष्यन्नारोहत्येवं वा एतदृक्सामे आरुक्षत्, ते एनमा यज्ञस्योदृचः संपारयतो, यतो वै
लोमानि कृष्णाजिनस्य ततो यज्ञो, यतो यज्ञस्ततो देवता, यद्बहिर्लोमं पर्यूर्णुवीतान्तर्हितो

[६] मै. १,२,२ । तै. ६,१,३ । काठ. २३,३ । कपि. ३५,८ । श. ३,१—१०; ३,६३;१८,५३;१९,७;१०,१,३६, २१,३७,१०,३८,१६ । काण्व. ४,१०-१३,२०,२३,२१,६,९३;३६,२१,३७,१९;३८,१६ ।

दीक्षितो यज्ञात्स्याद्, यदन्तर्लोममन्तर्हितो यज्ञो देवताभ्यो, द्वे विषूची प्रतिमुच्ये, अनन्त-
र्हितो दीक्षितो यज्ञाद्भवत्य,—नन्तर्हितो यज्ञो देवताभ्यो, यद्येकं स्यादन्तं प्रतिमुञ्चेत्,
तेनैव तदुभयमाप्नोति, हविर्वै दीक्षितो, यदन्यत्र कृष्णाजिनादासीत यथा हविः स्कन्नमेवं
स्याद्, यथा हविषे स्कन्नाय प्रायश्चित्तिमिच्छन्त्येवमस्मै प्रायश्चित्तिमिच्छेयु,—श्छन्दांसि च वा
एष देवताश्चाभ्यारोहति, तान्येनमीश्वराणि प्रतिनुदो, यदाह, नमस्ते अस्तु, मा मा हिं-
सीरिति, नमस्कारो वा एषोऽप्रतिनोदाय, देवता वै यज्ञस्य शर्म, यज्ञो यजमानस्य, यदाह,
विष्णोः शर्मासि, शर्म मे यच्छेति, देवता वा एतद्यज्ञस्य शर्माक,—र्यज्ञं यजमानस्य,
प्रोर्णुते, प्रावृत इव हि दीक्षितो, ऽथो एतद्धि दीक्षितस्य रूपं यत् प्रावृतं, तस्मात्
प्रोर्णुते, वासः परिधत्ते, सर्वदेवत्यं वै वासः, सर्वाभिर्वा एतद्देवताभिरात्मानं परि-
श्रयन्ति ॥ ६ ॥
८–१०
यज्ञस्य वै सृष्टस्योल्बमन्वलम्बत तद्वासः क्षौममभवत्, तस्मात् क्षौमेण दीक्षयन्ति यज्ञस्य
सयोनित्वाय, प्राचीनमात्रा पत्नी दीक्षयन्ती,—न्द्रस्य वै प्राचीनमात्रे,—न्द्रियं स्त्रियाः प्रजा,
यत् प्राचीनमात्रा पत्नी दीक्षयन्तीन्द्रियमस्यां दधाति, योनिर्वै दीक्षितस्य दीक्षितविमितं,
जरायु कृष्णाजिनं,—मुल्बं दीक्षितवासो, नाभिर्मेखला, गर्भो दीक्षितः, स्वं वा एतद्योनिं
दीक्षितं आशयेत्, तस्माद्दीक्षितेन दीक्षितविमितान्नानृतुभिः क्रम्यु,—मेष ह्येतस्य योनि,—
रेतो ह्येषोऽधि प्रजायते गर्भो दीक्षितो, यद्वत आविःकुर्वीत दुत्वन्तो गर्भा जायेरन्, यद्दनृतु
स्मयेत तेजोऽस्य परापातुकं स्यात्, तस्मान्नानृतु स्मेतव्यं तेजसोऽपरापाताया—ऽजातो वै
पुरुषः, स वै यज्ञेनैव जायते, स वै तर्ह्येव जायते यर्ह्यदः सोमे क्रीते प्रोर्णुता, इतोऽग्रे
प्रोर्णुते, ऽथो ह्यग्रे पुरुषो जायते, स वै तर्ह्येव सर्वो जायते यर्ह्युदोऽपोऽवभृथमभ्यवैति,
तर्हि स तस्मात् सर्वो निर्मुच्यते, त्रिवृता वै स्तोमेन प्रजापतिः प्रजा असृजत, यत् त्रिवृन्मे-
खला भवति प्रजननाय, त्रिवृद्धि वज्र उदरं वृत्रः पाप्मा क्षुद् भ्रातृव्यः पुरुषस्य, यन्मेखला
पर्यस्यते वज्रमेव सपत्नाय भ्रातृव्याय प्रहरति, यं द्विष्यात्तं तर्हि मनसा ध्यायेद्, वज्रमेवास्मै
प्रहरति, स्तृणुत एवा,—ऽङ्गिरसो वै स्वर्यन्तो यत्र मेखलाः संन्यास्यंस्ततः शरोऽजायत,
तस्माच्छरमय्यू,—र्गो औषधया, ऊर्जं वा एतन्मध्यत आत्मनो धत्ते प्रजानां च, योक्त्रेण

[नमस्ते अस्तु । अथर्व. १,१३,१; ११,४,२]
[७] तै. ६,१,३ । काठ. २३,१—४ । कपि. ३६,१ ।

पत्नी संनह्यते, मेखलया दीक्षितो, ऽथो मिथुनत्वायो,—र्ध्वं वै पुरुषस्य नाभेर्मेध्य,—मवा-
चीनममेध्यं, यन्मेखलां पर्यस्यते मेध्यस्य चामेध्यस्य च विधृत्यै, देवताभ्यो वा एष मेधा-
यात्मानमालभते यो दीक्षते, बद्धोत इव वा एतदात्मानं यन्मेखलां पर्यस्यते, तस्माद्वा
एतस्याश्नमन्नाद्यं,—मार्त इव ह्येष बद्धं,—स्तस्माद् बद्धस्याश्नमन्नाद्यं, यथा वा इदं गरगीर्णं
वा एषोऽग्निमुखो यो दीक्षितस्याश्नमत्ति, यज्ञेन ह्येवास्य तता उन्मुक्ति,—र्हविर्वै दीक्षितो,
यदस्य जुहुयाद्धविरेव जुहुयात्, प्रमायुकः स्यात्, सर्वाभ्यो वा एष देवताभ्य आवृश्चते यो
दीक्षते, यदस्य जुहुयाद्यज्ञमस्य विदुहा,—दुपघातोऽस्य यज्ञः स्यात्, तं वा एतदागते
काले सर्वं संस्कृतं यज्ञं देवताभ्यो दुहेत, त्रेधा वा एतस्य पाप्मानं विभजन्ते यो
दीक्षते, ह्योऽस्याश्नमत्ति स तृतीयं, योऽस्याश्लीलं कीर्तयति स तृतीयं, या एनं पिपी-
लिका दशन्ति तास्तृतीयं, तस्माद्वा एतस्याश्नमन्नाद्यं, तस्मादस्याश्लीलं न कीर्तयितव्यं,
तस्माद्दीक्षितवासोऽमत्र्यं,—मत्र हि ताः पिपीलिका या एनं दशन्ति ॥ ७ ॥ ११
दक्षिणा वै देवेष्वासीद्, यज्ञोऽसुरेषु, तां दक्षिणां यज्ञोऽभ्युदक्रामयत्, तामभिपर्या-
वर्तत, तां समभवत्, स इन्द्रोऽवेद्, यो वा अस्मायोनेः संभविष्यति स इदं भविष्यतीति
तामिन्द्रः प्राविशत्, तता इन्द्रः समभवत्, तता इन्द्रोऽजायत, स जायमानोऽवेद्, यो
वा अस्मायोनेरन्यो संभविष्यति मादृक्संभविष्यतीति, तया सहोपवेष्ट्यमजायत, यन्न्यवेष्टय-
त्तस्मादिर्विष्टिता, यान्निवेष्ट्यमाना श्यावाभवत् तस्मात् कृष्णा,—न्द्रं च वा एष प्रेप्सति दक्षिणां
च—न्द्रस्य च खलु वा एतद्योनिमालभ्य दक्षिणायाश्चात्मानं,—मथो सयोनिमेवं यज्ञमालभते,
कृषिं सुसस्यामकृषा इति, विषाणया भूम्यामुपहन्ति, कृषिमेवास्य सस्येन समर्धयति,
यजुषा कण्डूयते, यद्धस्ता हि मनुष्याः कण्डूयन्ते व्यावृत्त्यै, यजुषा कण्डूयते, तस्मात् प्रजा
अपामसविष्णवः, पामभविष्णवः प्रजाः स्युर्यद्यजुषा कण्डूयेत, सुपिप्पला ओषधीस्कृधी,—
ति, शिरः कण्डूयता, ओषधीरेव फलं ग्राहयति, तस्मादोषधयः शीर्षन् फलं गृह्णन्ति,
वाग्वै सृष्टा चतुर्धा व्यभवत्, ततो या अत्यरिच्यत सा वनस्पतीन् प्राविशत्, सैषा
याक्षे या दुन्दुभौ या तूणवे या वीणायां दुन्दं प्रयच्छति तामेवास्मै वाचं प्रयच्छत्य,—
थो वज्रमेवास्मै प्रयच्छति गोपीथाया,—ऽस्पद्मं प्रयच्छत्ये,—तावती ह्यीयं वाग्यदुत्यं,—थो

[८] मै. १,२,१ । तै. ६,१,३-४ । काठ. २३,४—५ । कपि. ३६,१—२ । श. २१,२९-४७,५३,६४,६८,१—११, २३—३४,४,६ । काण्व. २३,३०—४६,२५,६६;३०,१—११,२४,—३४,४,७ ।

एतावती हि वाचो वीर्यं क्रियते, यद्वर्षीयांसं प्रयच्छेत् स्वां वाचं मैत्रावरुणो विभुजेत,
तं श्वःसुत्यायां मैत्रावरुणाय प्रयच्छति, तां श्वो भूते मैत्रावरुण ऋत्विग्भ्यो विभजति ॥
होतर्यज पोतर्यज नेष्टर्यज ॥ इति सा सह वषट्कारेणाहवनीयं गच्छति, तां पुरोऽध्वर्यु-
र्विभजति ॥ होतर्यज पोतर्यज नेष्टर्यज ॥ इत्यध्वर्युः पुरो वाचं विभजति, मैत्रावरुणः
पश्चात् ॥ स्वाहा यज्ञं मनसा ॥ इति मनसा यज्ञमभिगच्छन्ति, तत एवं यज्ञमालभ्य,
स्वाहा दिवः स्वाहा पृथिव्या इति, द्यावापृथिवी वा अन्वन्तरिक्षं यज्ञं उपश्रित,—स्तत एवं
यज्ञमालभ्य, स्वाहोरोरन्तरिक्षादित्य,—न्तरिक्षं वै यज्ञो, यदि वातो यदि वा पर्शुस्तत
एवं यज्ञमालभ्य, स्वाहा वातात्परिगृह्णामि स्वाहेत्य,—यं वाव यः पवत एष यज्ञस्तमेवालभ्य,
वाचं यच्छति, यज्ञं वा एतद्यच्छति, यद्वाचं विसृजेद्यज्ञं विसृजेत, तदाहुः,
पुनर्दीक्षयित्वा वाग्यन्तव्येति, यत् पुनर्दीक्षयेदाहुतीरतिरेचयेद्, वैष्णवीमनूच्य वाग्यन्तव्या,
विष्णुर्वै यज्ञो, यज्ञमेवालभ्या,—ऽऽग्नावैष्णवीमनूच्य वाग्यन्तव्या, ऽग्निर्वै सर्वा देवता,
विष्णुर्यज्ञो, देवताश्चैव यज्ञं चालभ्य, सारस्वतीमनूच्य वाग्यन्तव्या, वाग्वै सरस्वती.
वाचा यज्ञः संततो, वाचैव यज्ञं संतनोति, बार्हस्पत्यामनूच्य वाग्यन्तव्या, ब्रह्म वै
बृहस्पति,—र्ब्रह्मणा यज्ञः संहितो, ब्रह्मणैव यज्ञं संदधाति ॥ ८ ॥ १२–१८
दीक्षितोऽयमसा आमुष्यायणः ॥ इत्युद्वदति वा आह, प्रियो वै देवानां दीक्षितो,
देवेभ्य एवैनं प्राह, त्रिराह, त्रिषत्या हि देवा, अथो त्रयो वा इमे लोका, एभ्य एवैनं
लोकेभ्य आवेदयति, तस्माद्दीक्षितं दूरात्च् शृण्वन्त्ये,—भ्यो ह्येनं लोकेभ्य आवेदयति,
नक्षत्रं दृष्ट्वा वाचं विसृजते, द्वौ वा ऋतू, अहश्च रात्रिश्चा,—ऽन्यमेवं ऋतुं संप्राप्य वाचं
विसृजते, व्रतं चरते,—ति वाचं विसृजते, व्रतं ह्येतस्य, व्रतेन यज्ञः संततो, व्रते-
नैव यज्ञं संतनोति, दैवीं धियं मनामहा, इति यजुषा हस्ता अवनेनिक्ते, यजुषा हि
मनुष्या अवनेनिजते व्यावृत्त्यै ब्रह्मणः सदेवत्वाया,—ऽथो आपो मे दीक्षां नैत्प्रमुष्णानित्य,—
न्नं वै मनुष्येभ्य उदक्रामत्सत्, तद्देवा मनुष्येष्वदिधीर्षं,—स्तदापोऽब्रुवन्, वयं व एतां
शुन्धामा,—ऽथोपावर्तस्वेति, ततोऽन्नं मनुष्यानुपावर्तन्त, तं इदमन्नं मनुष्येषु धृतं, तस्माद्
ब्राह्मणं आहार्या, आहुते हस्ता अवनेनिजीता,—ऽन्नाद्यस्यावरुद्ध्या, अथो अन्नाय वा एत-

[९] मै. १,२,३ । तै. ६,१,४ । काण्व. २३,५—६ । बा. ४,११,१६;६,२७ । काण्व. ४,१५—१६,२१—२२;१, ३९—४० ।

दात्मानं पावयते, यं देवा मनुजाता मनोयुजा, इति व्रतं व्रतयत्ये,—ते वै देवा मनुजाता
मनोयुजो यदिमे प्राणा, एषा वा अस्मिन्नेतर्हि देवता, तां प्रीणाति, तस्यां हुतं व्रतयति,
यदैतोऽन्यथा व्रतयेत् प्राणैरेनं व्यर्धयेत्, प्रमायुकः स्यात्, त्वमग्ने व्रतपा असी,—ति
वदेत्स्वप्स्यन्त्सुप्त्वा वा प्रबुध्य, यदि वा दीक्षितवादं वदे,—दग्निर्वै देवानां व्रतपति,—
स्तस्मादेवाधि व्रतमालभते, नोत्तानः शयीत, यदुत्तानः शयीतेमे लोका ययेयु,—र्नाग्नेरधि
पराङ् पर्यावर्तेत, यत् पर्यावर्तेत यज्ञात् पर्यावर्तेत, नान्यत्रदीक्षितं दीक्षितविमितान्तसूर्योऽभिनि-
म्रोचे,—न्नाभ्युदियाद्, दीक्षितव्रतमेव तद्, यज्ञो वै देवानां न समभवत्, तं भूत्या समभाव-
यन्, यद्भूतिं वनुते यज्ञस्य संभूत्यै, रास्वेयत्सोमे,—ति यद्ब्रूया,—देतावदस्य स्या,—न्न भूयो,
यदाहा,—ऽऽभूयो भरेत्य,—परिमितस्यावरुद्ध्यै, देवः सविता वसोर्वसुदाव,—ति सवितृ-
प्रसूत एवै,—ताभिर्देवताभिरुप प्रतिगृह्णात्यात्मनोऽहिंसायै, वायुर्गोपास्त्वष्टाधिपतिः, पूषा
प्रतिग्रहीते,—ति वायुमेवासां गोप्तारमक,—स्त्वष्टारमधिपतिं, पूषणं प्रतिग्रहीतार,—मापो वै
यज्ञो, यदपो दीक्षितोऽवगाहेत यज्ञमेवक्रश्नीयाद्, यदाह, दैवीरापो अपां नपा,—दिति यदे-
वासां यज्ञियं मेध्यं तन्नाक्रामति, यदपो दीक्षितोऽवगाहेत विहृदिनीः स्यु,—स्तस्मान्नाव-
गाहेत, यद्यवगाहेत लोष्टं विमृणं स्तरेत्, तमेव सेतुमनुसंतरति, न वै दीक्षितं तरन्तं देवता
अनुतरन्त्य,—रणिभ्यां सह तरति, सहैव देवताभिस्तरति, न वै दीक्षितं तरन्तं यज्ञोऽनु-
तरति, रथाङ्गेन सह तरति, सहैव यज्ञेन तरति ॥ ९ ॥　१९-२०

अमुं वा आदित्यं सर्वा वाचो गछन्ति, ता उद्यति सर्वाः सृज्यन्ते, यदाह, याः पुशू-
नामृषभे वाचा इति, सृज्यमानां वा एतद्वाचं पुनरालभते, वायवे त्वे,—ति नष्टामनुदिशति,
वरुणाय त्वे,—त्यप्सु मग्नां, रुद्राय त्वे,—ति महादेवाहतां, निर्ऋत्यै त्वे,—त्यवसन्ना,—
मिन्द्राय त्वे,—ति श्लेष्कहुतां या वा सं शीर्येत, मरुद्भ्यस्त्वे,—ति ह्रादुनिहता,—मेते वै
देवा भूत्या स्कन्नभागा,—स्तानेव प्रीणाति, देवेभ्यो वा अन्या दक्षिणा दीयन्ते, मनुष्येभ्योऽ
न्या, एता वै देवेभ्यः प्रत्यक्षं दक्षिणा दीयन्त, एताभिर्वै भूयोऽवरुन्द्धे, यद् चैताभि,—
र्देवाश्च वा असुराश्चास्पर्धन्त,—तावान्वै तर्हि यज्ञ आसी,—दग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि,

[त्वमग्ने व्रतपा असि० । ८,११,१; अथर्व. १९,५१,१, तै. सं. १,१,१४,४;२,३,१]

[१०] मै. १,२,३ । काठ. २३,७ । कपि. ३६,४ ।

मै० ३३

ते देवा यज्ञमपश्यं,—स्तेनादीक्षन्त, तेषां यदग्निहोत्रमासीत्तद्व्रतमुपायं,—स्तस्माद्विव्रतेन
भवितव्यं, द्विर्ह्यग्निहोत्रं हूयते, यदग्नीषोमीयं पूर्णमासे हविरासीत् तमग्नीषोमीयं पूर्वेद्युः पशु-
मालभन्त, यदैन्द्राग्नममावास्यायां तमाग्नेयं श्वो भूते पशुमालभन्त, वैश्वदेवं प्रातःसवनम-
कुर्वत, वरुणप्रघासान्माध्यंदिनं सवनं, साकमेधान् पितृयज्ञं, त्र्यम्बकास्तत्तृतीयसवनं,
तस्मात् तृतीयसवने विश्वं रूपं शस्यते, विश्वं ह्येतद्रूपं, तमेषां यज्ञमसुरा णान्वायं,—
स्तेन वा एनानपानुदन्त, ततो देवा अभवन्, परासुरा,—स्तय एवं वेद भवत्यात्मना,
परास्य भ्रातृव्यो भवति, तं, ऽध्वृतोऽयमभूदित्य,—पाक्राम,—स्तदध्वरस्याध्वरत्वं,
तस्मादेकव्रतेन भवितव्यं, सकृद्ध्यग्निहोत्रं हूयते ॥ १० ॥　२१
[१५६३]

॥ इत्युपरिकाण्डे आग्नावैष्णवं नाम षष्ठः प्रपाठकः ॥ ६ ॥

अथ सप्तमः प्रपाठकः।

अक्लृप्तं वा इदमासीद्, दिशो वा इमा न प्रजानं,—स्तद्देवा अन्योऽन्यस्मिन्नैछं,—
स्तन्नाविन्दं,—स्ते देवा अदितिमब्रुवं,—स्त्वया मुखेनेमा दिशः प्रजानामेति, साब्रवीद्,
भागो मेऽस्त्विति, वृणीष्वेत्य,—ब्रुव,—न्त्सोऽब्रवी,—न्मद्देवत्यमेव प्रायणीयमस्त,—न्मद्देवत्यमुद-
यनीयं, मामेवानुप्रायाथ, मामनूद्यायेति, स एष आदित्यश्चरु,—रदितिं वा एतदनुप्रयन्त्य,-
—दितिमनूद्यन्ति, ततो वा इमा दिशः प्राजानन् पथ्यां यजुती,—मामेव तेन दिशः प्राजानन्,
यदग्निमिमां तेन, यत्सोममिमां तेन, यत्सवितारमिमां तेन, यददिति,—मियं वा अदिति,-
—रूर्ध्वां वा अस्यां दि,—गूर्ध्वामेव तेन दिशं प्राजानं,—स्ततो वा अकल्पता,—ऽक्लृप्तस्य वै
क्लृप्त्यै प्रायणीय,—स्तय एवं विद्वान् प्रायणीयेन चरति कल्पते, कल्पन्ते हास्मा ऋतव,—
स्ततो वा इमा दिशोऽन्वपश्यन्, यत् पथ्यां यजुतीमामेव तेन दिशमन्वपश्यन्, यदग्नी-
षोमौ, चक्षुषी वा अग्नीषोमा, अनु ताभ्यां समपश्यन्, यत्सवितारं, सवितृप्रसूता
एवेमा दिशोऽन्वपश्यन्, यददिति,—मियं वा अदिति,—रस्यां वै प्रतिष्ठाय देवा यज्ञ-
मतन्वत, यत् पथ्यां यजुति, वाग्वै पथ्या, वाचमेवावरुन्द्धे, यदग्निं देवतास्तेन,
यत् सोमं यज्ञं तेन, यत् सवितारं प्रसूत्यै, यददिति,—मादित्या वा इमाः प्रजा,—स्ता

[१] तै. ६,१,५ । काठ. २३,८—९ । कपि. ३६,५—६ ।

एवावरुद्ध, ता आद्या अकुत, यद्वै यज्ञस्यान्तर्यन्ति तच्छिद्रं, तेन यज्ञः स्रवति, तेन
यजमानोऽग्नये समवद्यत्य,—ग्निर्वै संमिति,—रग्निः प्रतिष्ठितिः, संमित्या एवं प्रतिष्ठित्या अग्नि
प्रथमं यजत्यग्निमुत्तमं, समानी वा एषा देवता पाङ्क्तत्वाय, पाङ्क्तो यज्ञो, यावानेव
यज्ञस्तमालभ्य, स्वस्तिं यजति यज्ञस्य स्वस्त्यै, पथ्यां यजति, वाग्वै पथ्या, वाच-
मेवानुप्रयन्ति, तामुत्तमामुदयनीये यजति, वाग्वै पथ्या, वाचमेवानूद्यन्ति, मरुत्वतीः
पथ्याया ऋचो भवन्ति, देवविशो वै मरुतो, देवविशामेवाचीक्लृपत्, तां शान्तां क्लृप्तां
मनुष्यविशा अनुकल्पन्ते, स्तेनभविष्णुर्हविर्भवति ॥ १ ॥　१

जुषाणेनान्य आज्यभागा इज्यन्ते, ऽथात्र ऋचोभयतो यजति द्रढिम्नेऽशिथिरत्वाय,
सप्तदश सामिधेनीः कार्याः, पञ्च ऋतवो, द्वादश मासा, एष संवत्सरः, संवत्सरा-
द्देवाधि यज्ञमुखं प्रतनुते, तदाहुः, पञ्चदश सामिधेनीः कार्या, न सप्तदश, संवत्सरी-
यस्यैवायनस्य, सप्तदश कार्याः संवत्सरस्या ऋद्ध्या इति, तन्न संस्थं, सप्तदशैव कार्याः,
प्रयाजवत् स्यात् प्रायणीयमननुयाज,—मनुयाजवत् स्यादुदयनीयमप्रयाज,—मुभयतो वा एतत्
प्रयाजानुयाजा यज्ञमभिसंधीयते, समानो ह्येष यज्ञो, निष्कार्यं च मेक्षणं च निदधाति,
तेन यज्ञः संतत, आत्मा वै प्रयाजाः, प्रयाजानुयाजा देवक्षेत्रं, यज्ञो देवक्षेत्रमाक्रममाणः
प्रजामन्तरियाद्, यदनुयाजानन्तरियात् प्रयाजवत् स्यात् प्रायणीयमनुयाजव,—दनुयाजवत्
स्यादुदयनीयं प्रयाजवत्, पयसि प्रायणीयः स्यात्, पयस्युदयनीयो, ऽपां वा एतच्
शुक्रिय,—मपामेव शुक्रियमवरुन्द्धे, पशवो वै शुक्रियं, पशूनेवावरुन्द्धे, ऽथो प्रायणे च
वावास्मा एतदुदयने च पशून् दधात्या,—दित्यः प्रायणीयः स्या,—दादित्य उदयनीय, इयं
वा अदिति,—रस्यां वा एतद्यज्ञमुखेन प्रतितिष्ठत्य,—स्यामुपरिष्टाद्, यत्र वै यज्ञस्याग्रेऽग्रे समृद्धं
क्रियते क्रियमाणं क्रियमाणं ह वा अस्य समृध्यते, संस्थाप्यं प्रायणीयं यज्ञस्य समृद्ध्यै,
याः प्रायणीयेऽनुवाक्यास्ता उदयनीये याज्याः स्यु,—र्या उदयनीयेऽनुवाक्यास्ताः प्रायणीये
याज्याः स्युः, पथः प्रतिप्रज्ञात्या, अथो अनुसंतत्यै, यदतोऽन्यथा कुर्युश्छम्बट्कुर्युः ॥२॥
२

इयं वै कद्रू,—र्वाक् सुपर्णी, छन्दांसि सौपर्णानि गायत्री त्रिष्टुब्जगती, सा वै कद्रूः
सुपर्णीमात्मानमपजत्, साब्रवीत्, सोममाहर, तेनात्मानं निष्क्रीणीष्वेति, सा छन्दांसि

[२] तै. ६,१,५ । काठ. २३,९ । कपि. ३६,६ ।

[३] तै. ६,१,६ । काठ. २३,१० । कपि. ३७,१ ।

प्रैष्य,—दमुतः सोममाहरत, तेन मा निष्क्रीणीतेति, ततो जगत्युदपतत्, सा पशुभि-
श्चागछद्दीक्षया च, तस्मात् पशवा इति जगतीमाहु,—स्तस्माद्यदा पशून् विन्दतेऽथ दीक्षते,
ततस्त्रिष्टुबुदपतत्, सा दक्षिणया चागछत् तपसा च, तस्मात् त्रिष्टुभो लोके दक्षिणा दीयन्ते,
तस्माद् मध्यंदिने तपस्तपनीयमिति, ततो गायत्र्युदपतत्, सा सोममाहरत्, तमाह्रियमाणं
सामिगन्धर्वो विश्वावसुरामुष्णात्, स तिस्रो रात्रीरुपहृतोऽवसत्, तस्मात्तिस्रो रात्रीः क्रीतो वसति,
तेऽब्रुवन्, पुनर्याचामहा इति, ते देवा अब्रुव,—न्त्स्त्रीकामा वै गन्धर्वा, वाचमेव संभृत्य
यथा योषितमनपक्षेयतमेव तया निष्क्रीणामेति, तं वै निरक्रीणं,—स्तस्मादाहु,—र्वाग्वै
सोमक्रयणी, वाचं वा एतद्देवा निष्क्रीणातीति, तेऽब्रुव,—न्ननुतीयामहा इति, ताम-
न्वातीयन्त, तदनृतस्य जन्म, तय एवं विद्वान्त्सत्यानृता वाचं वदति न हैनं द्रुणाति,
तेऽब्रुवन्, विह्वयामहा इति, तां व्यह्वयन्त, गाथां देवा अगायन्, ब्रह्म गन्धर्वा अवद,-
—न्त्सा देवानुपावर्तत, तस्माद्विवाहे गाथा गीयते, तस्माद्गायन्त्स्त्रियाः प्रिय,—स्तय एवं
विद्वान् गाथां गायन् हस्तं गृह्णाति, सं हि जीवतः, सर्वमायुरितो, नार्तिं नीत,—स्त-
दाहु,—रा वै सा पुनरगछ,—न्नैव किं चन सोमक्रयणीति ॥ ३ ॥　३

या द्विरूपा सा वार्त्रघ्नी, यत्तया क्रीणीयाज्ज्यायुकमस्य राष्ट्रं स्या,—दथ यस्य तादृश्यनुस्तरणी
भवति ताजगेषामपुरः प्रमीयते, या रोहिणी कृष्णाक्षी कृष्णवाला कृष्णशफा सा पितृदेव-
त्या, यत्तया क्रीणीयात् प्रमायुको यजमानः स्या,—दथ यस्य तादृश्यनुस्तरणी भवत्यृतुमद्वेषा-
मपुरः प्रमीयते, यारुणा बभ्रुलोम्नी श्वेतोपकाशा शुच्यदक्षी तत्सोमक्रयण्या रूपं, स्वेनैव रूपेण
क्रीयते, काणा स्यादखर्वा श्रोणा सप्तशफा, तथा सर्वया क्रीयता, एकहायन्या क्रेतव्या,
वाग्वै सोमक्रयणी, तस्मात् प्रजाः संवत्सरे वाचं वदन्त्य,—प्सु क्रय्यां, ओषधयो वै
सोमा, आपा ओषधीनां रस,—स्तथा स रसः क्रियते, क्रये वा अह्नं सोमस्य तृतीयं
सवनमवरुन्द्धे, वेदे,—ति ह स्माहारुण औपवेशिः, पशवो वै तृतीयं सवनं, पशूनां चर्म,
यच्चर्मणि निवपति तेनैव तृतीयं सवनमवरुन्द्धे, रोहिते निवपति, तस्मात् पशूनां रोहित-
रूप,—मानडुहे निवपत्य,—नड्वान्वै सर्वाणि वयांसि पशूनां, सर्वाण्येव वयांसि पशूनामा-
प्त्वावरुन्द्धे, ऽथो वह्नेर्यज्ञस्यावरुन्द्धे, सोमं विचिन्वन्ति पापवसीयस्य व्यावृत्त्या, अथो

[४] मै. १,२,५ । तै. ६,१,६,१ । काठ. २४,१—२ । कपि. ३७,१-३ । वा. ४,२५ । काण्व. ४,३४ ।

देवैम्य एवैन२ शुन्धन्ति, नाध्वर्युः सोम२ विचिनुया,—द्यं यजमानो, न यजमानस्य पुरुषा नोपद्रष्टारो विचीयमानस्य स्युः,—यदुपद्रष्टारो विचीयमानस्य स्युः क्षुधं प्रजा नीयु,—र्वार्तियजमानं गृह्णीयाद्, क्षोधुकोऽध्वर्युः स्यात् ॥ शुन्ध सोममापक्व निरस्य ॥ इति ब्रूयाद्, ग्रसितं२ वा एतत् सोमस्य यदापक्वं, ग्रसितमेवं सोमस्य निष्खिदन्ति ये सोम२ विचिन्वन्ति, तस्मात् सोमविक्रयिणो बहु क्रीणन्तो बहु विन्दमानाः क्षोधुका, ग्रसितं२ ह्येते सोमस्य निष्खिदन्त्या,—स्मा३कोऽसीत्य,—भिस्मारं एवास्य,—पे शुक्रस्ते ग्रहा, इति शुक्रमेवास्य गृह्णात्य,—भि त्यं देवं२ सवितार,—मिति सवित्रप्रसूत एवं गृह्णात्य,—तिछन्दसा गृह्णाति, सर्वाणि वै छन्दा२स्यतिछन्दाः, सर्वैरेवैनं छन्दोभिर्गृह्णाति, वर्ष्म वा एषा छन्दसा२, वर्ष्मैन२ समानानां गमयति, पशुभिर्गृह्णाति, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालभ्य,—कैकामुत्सर्जं मिमीते, ऽयातयाम्न्यायातयाम्न्यैव मिमीत, एतावती वा आसामेकैकस्या वीर्यमाप्यते, तस्मादिमाः कामं प्रसारयति, कामं प्रन्युञ्चति, दश कृत्वो मिमीते, दशाक्षरा विराड्, विराजमेवाप्नोत्यं,—यो वैराजाः पशवः, पशूनेवावरुन्द्धे, द्विर्गृह्णाति, द्वे हि सवने, यावान्वै सोमो गृहीतः स यजमानस्य, यमभ्यूहति स सदस्यानां, प्रजाभ्यस्त्वेत्य,—भ्यूहति, गोत्राद्गोत्राद्धि प्रसर्पन्त्यो,—पधयो वै सोमो, ऽपरिमितं जीवन२, यत्परिमितं गृह्णीयात् परिमितं जीवन२ स्या,—दथ यदभ्यूहत्यपरिमितस्यावरुद्ध्यै, यजमानो वै प्रजापतिः, प्रजा अ२शवो, यत्सोममुपनह्यति प्रजाना२ वा एतत् प्राणमुपनह्यति, यदाह, प्रजास्त्वानुप्राणन्त्विति, प्राणमासु दाधार, क्षौमेणोपनह्यत्यो,—षधे२ वै क्षौम,—मोषधयः सोमस्य योनिः, स्व एवैन२ योनौ दधाति, यज्ञो यदग्रे देवानामगच्छत२ रक्षा२स्यजिघा२स,—न्तसं देवता व्यवामर्पत्, सर्वदेवत्य२ वै वासो, यत्क्षौममुपनह्यति सर्वाभिर्वा एतद्देवताभिर्यज्ञाद्रक्षा२स्यपहन्त्यं,—थो सर्वाभिरेव देवताभिर्यज्ञ२ समर्धयति ॥ ४ ॥

४-६

चतुर्गृहीतमाज्यं भवति, चतुष्पादो वै पशवः, पशूनेवावरुन्द्धे, हिरण्यमवधाय जुहोत्या,—ग्नेर्वै घृत,—मग्निजं२ हिरण्य२, सतेनुरेव सतेजा हूयत, एषा वा अग्नेः प्रिया तनूर्यद् घृतं, तेजो हिरण्य२, यद्धिरण्यमवधाय जुहोत्यग्नेर्वा एतत् प्रियां त३न्वं तेजसा समर्धयत्यं,—थो रूपाण्येव ग्राहयति, पशवो वै घृत२, रेतो हिरण्य२, यद्धिरण्यमवधाय जुहोति पशुषु वा

[अभि त्यं देव९० । अथर्व. ७,१४,१; श्री. सू. अ. ४, सं ६,]
[५] मै. १,२,४ । तै. ६,१,९ । काठ. २४,३ । कपि. ३७,४ । वा. ४,१७—१९ । काण्व. ४,२३—२५ ।

एतद्रेतो दधाति, तस्मादनस्थकाद्रेतसोऽस्थन्वन्तः पशवः प्रजायन्ते, बद्धेन जुहोति, तस्मात् पशूनां गर्भा अप्रपादुकाः, प्रपादुकाः पशूनां गर्भाः स्युर्यदबद्धेन जुहुया,—ज्जूरसीति, यद्वाव जवत, इत्थमसा३दित्थमसा३दिति, तदस्या जूत्वं, धृता मनसेति, मनसा हि वाचं दाधार, जुष्टा विष्णवा इति, यज्ञायैवैनां जुष्टा२ विष्णवेऽक,—स्तस्यास्ते सत्यसवसः प्रसव इति, वाचा हि प्रसूतं क्रियते, तन्वो यन्त्रमशीय स्वाहेत्या,—ऽऽशिषमेवाशास्ते, शुक्रमसि, चन्द्रमसीत्यु,—द्धरति स्वर्गस्य लोकस्य समष्ट्यै, वाग्वै सोमक्रयणी, शास्ति वावैनामेतत्, तस्मात् प्रजाः सृष्टाः प्रजायन्ते, वत्सो जातः स्तनमिच्छति, स्तनं कुमार इच्छति, चिदसीति, यद्वाव चिकित्सत, इत्थमसा३दित्थमसा३दिति, तदस्याश्चित्त्वं, मनासीति, यद्धि मनसा मन्यते यन्मनसाभिगच्छति तद्वाचा वदति, धीरसीति, यद्वावध्यायती,—त्थमसा३दित्थमसा३दिति, तदस्या धीत्वं, दक्षिणासीति, यत्स्विद्वाचा दीयते तदस्या दाक्षिणात्वं२, यज्ञियासीति, वाग्घि यज्ञिया, क्षत्रियासीति, य२ हि वाग्जुषते स क्षत्रियो, ऽदितिरस्युभयतःशीर्ष्णीति, यत्स्विदादित्यः प्रायणीय आदित्य उदयनीयस्तदस्या उभयतःशीर्षत्वं२, सा नः सुप्राची सुप्रतीची भवेति, सुप्राची ३ह्येषा प्रायणीये सुप्रतीच्युदयनीये॥५॥

७

यत्कर्णगृहीतया क्रीणीयाद्वार्त्रघ्नी स्याद्, यच्च शृङ्गाभिहितया मनुष्यदेव३त्या, यत् पदि बद्धया पितृदेव३त्या, यदबद्धयायता स्याद्, यदाह, मित्रस्त्वा पदि बध्नात्विति, मित्रस्यैवैनां पाशेन यच्छति, पूषाध्वनः पात्विती,—य२ वै पूषे,—यमेवास्या अध्वान२ संभरती,—न्द्रायाध्यक्षायेती,—न्द्रो वै देवानामोजिष्ठ,—स्तमेवास्या अध्यक्षमक,—रनु त्वा माता मन्यतामनु पितेत्य,—नुमत एवैनं मात्रा पित्रा भ्रात्रा सख्या क्रीणाति, सा देवि देवमच्छेहीति, देवी ३ह्येषा, देवः सोमा, इन्द्राय सोममिती,—न्द्राय ३ह्येषा सोममच्छेति, रुद्रस्त्वावर्तयत्विति, रुद्रमेवास्याः पुरस्ताद्दधाति, स्वस्ति सोमसखा पुनरेहीति, प्रत्यक्षमेवालब्ध, रुद्राय वा एतत् पशूनपिदधाति, यदाह, रुद्रस्त्वावर्तयतु, यदाह, स्वस्ति सोमसखा पुनरेहीति, स्वस्तिमेवास्यै पुनरावृत्तायै दधाति, वाग्वै सोमक्रयणी, सा देवरूपाणि प्रविशति, यदाह, वस्व्यसि, रुद्रासीती,—दमसीदमसीति, वाग्वैनामेतदाह यद्यद्भवति, यद्वा एतत् किंच वदत्येता२ वा एतदाप्त्वावरुन्द्धे, षट् पदान्यनु निष्क्रामति, षड्वा अहानि वाग्विभज्यते, न वै

[६] मै. १,२,४ । तै. ६,१,७—८ । काठ. २४,३—४ । कपि. ३७,४—५ । वा. ४,१९—२२ । काण्व. ४,१६—१९ ।

षष्ठमहर्वागतिवदति, सर्वा वै षष्ठेऽहन्वागाप्यते, यावत्येव वाक्तामाप्नोति, दक्षिणेनार्धेन दक्षिणमर्धमनु निष्क्रामति, तस्माद्दक्षिणेन हस्तेनाक्रमयते, तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यवत्तर,—स्तस्माद्दक्षिणमर्ध२ वया२स्यनु पर्यावर्तन्ते, सप्तमे पदे जुहोति, सप्त छन्दा२सि, छन्दा२सि वाग्, यावत्येव वाक्तामाहुत्याप्त्वावरुन्द्धे, सप्त छन्दा२सि, सप्त होत्राः, सप्त ग्राम्याः पशवः, पशू२स्तानेवावरुन्द्धे, बृहस्पतिष्ट्वा सुम्ने रम्णात्विति, ब्रह्म वै बृहस्पति,—र्ब्रह्मणैवैना२ यच्छति, रुद्रो वसुभिराचिक्र इति, रुद्रमेवास्या वसुभिराक्रतारमकः, पृथिव्यास्त्वा मूर्धन्नाजिघर्मीत्ये,—ष वै पृथिव्या मूर्धा यद्देवयजन,—मिडायास्पद इति, गौर्वा इडा, तस्या वा एतत् पदं, घृतवति स्वाहेति, स्वाहाकारेणैवैना२ यच्छति ॥ ६ ॥

८

हिरण्यं निधाय जुहोत्य,—ग्निमत्येव जुहोत्यायतनवत्य,—थोऽध्वर्युः स्यादयदनायतने जुहुयात्, पशवो वै घृतं, पशवः पद२, वज्र२ स्फ्यो, यत्स्फ्येन पदं परिलिखति वज्रेण वा एतद्यजमानाय पशून परिगृह्णाति, त्रिषाण्यानुपरिलिखति, सयोनीनेवास्मै पशून परिगृह्णाति, स्थाल्यां पद२ स२वपत्य,—स्यां वा एषाधिश्रियते, इय२ हि पशूना२ योनिः, स्व एवैनान योनौ दधाति, शोचन्ति वा एतत् पशवो योनेश्च्छिन्ना, यदुप उपसृजति शमयत्येवं, यजमानाय पदं प्रयच्छति, तदध्वर्युः पशुमेवति, यजमानाय हि पशून्त्संप्रादाद्, यदाह, तव रायो इति, तदध्वर्युः पशुभ्यामज्ञति, तेनाध्वर्युः पशुमान् गृहेषु पदं निदधाति, गृहेष्वेवास्य पशून दधाति, स्वर्गो वै लोक आहवनीयो, यदाहवनीय उपवपेदन्यलोकेऽस्य पशून दध्याद्, गार्हपत्या उपवपति, गार्हपत्य२ हि पशवोऽन्वपतिष्ठन्ते, पशुभिरेवैन२ समर्धं दधाति, पशवो वै पद,—मग्नी रुद्रो, यदग्निमत्युपवपेद्रुद्रायास्य पशून दध्याद्, यत्र शान्तं तदुपोप्यं पशूनामप्रदाहाय, यत्सोमक्रयण्या पत्नी२ संकशयन्ति मिथुनत्वाय, त्वष्टृमन्तस्त्वेति, त्वष्टा हि रूपाणि विकरोति, संवमीति, संवाद्धि प्रजाः प्रजायन्ते, सूर्यस्य चक्षुरारुहमित्ये,—ष वा अपरिपरः पन्था अरक्षस्यो येनामा आदित्य एत्य,—ष्ण्य वा एतदादित्यस्य पथ इति, वृणक्ति विन्दते वस्विति, वसो३ह्येष विन्दते यः सोमं क्रीणाति॥ सोमविक्रयिन्त्सोमं ते क्रीणानि महान्तं बहुं बहु शोभमानं, कल्यया ते क्रीणानि, कृष्ट्या ते क्रीणानि, शकेन ते क्रीणानि, पदा ते क्रीणानि ॥ इति, गौर्वा एतन्मुद्रिमानुमुदाचष्टे, ऽशो महयत्येवैना,—मेवो अक्षरशो वा एतद्गां मिमीते, सुवाहेनमार्हकारे वस्मारा इत्ये,—ते वै देवाना२ सोमरक्षय,

[७] मै. १,२,४—५। तै. ६,१,८-१०। काठ. २४,५-६। कपि. ३७,५,७। वा. ४,२७,२९,३२। काण्व. ४,३९,४१,४४।

एतेभ्यो वा अधि छन्दा२सि सोममाहर२,—स्तेभ्य एवैनानुदिशत्य,—थो यदेवात्र यज्ञस्योपश्लिष्टं तत् परिक्रीणीते, दशभिः क्रीणाति, दशाक्षरा विराट्, तथा वैराजः क्रियत, एकादशभिः क्रीणाति, दश वै पशोः प्राणा, आत्मैकादश,—स्तथा सर्वः क्रियते, धेन्वा क्रीणात्या,—शिरमेवास्य क्रीणात्य,—थो वाचमेव गृह्णाति, हिरण्येन क्रीणाति, शुक्रमेवास्य क्रीणात्य,—थो तेज एव गृह्णाति, वाससा क्रीणाति, सर्वदेवत्यमेवास्य क्रीणात्य,—जया क्रीणाति, तप एवास्य क्रीणाति, यत्र वा अदश्छन्दा२सि सोममाहर२स्तानि तमसा न प्राजान२,—स्ततो गाय३त्र्यजामादायोदपतत्, सा वा एभ्यः प्रारोचयत, ततो वै छन्दा२सि सोममाहर२,—स्तत् सोमं ना अजा,—मिति वावाजानडुहा क्रीणाति, वह्यैवास्य क्रीणात्यृ,—षभेण क्रीणाति, सैन्द्रमेव क्रीणाति, यदृषभेण क्रीणीयात् प्रजापतिना विक्रीणीते, वत्सतरेण साण्डेन क्रय्यस्यैन्द्रमहः क्रीणाति, न प्रजापतिना विक्रीणीते, मिथुनाभ्यां गोभ्यां क्रीणाति, मिथुनमेवास्य क्रीणाति ॥ ७ ॥

९-११

सोमो वा अमुत्रासीत्, तं देवा गायत्रीं प्राहिण्व,—न्नमु२ सोममाहरेति, सा वितत२ यज्ञमेवापश्यत, सैक्षत, यद्यज्ञस्यान्तरेण्याम्यात्मानमन्तरेष्यामीति, तस्यै वा एत२ सोमो जीवग्रहं प्राब्रवीत्, स्वजा असि, स्वंभूरसीति, सोमस्य वा एष जीवग्रहः, सोमस्य वा एतज्जीवग्रहं गृह्णीते, नाध्वर्युः संन्नार्तिमार्च्छति य एवं२ वेद, वरुणो वा एष एतर्हि वरुणदेव३त्यो यदेवनद्धो वरुण एनं भूत्वा प्रविशेद्, यदाह, मित्रो ना एहि सुमित्रधा इति, मित्रमेवैनमकः, शमयत्येवं,—न्द्रस्योरुमाविश दक्षिणमित्यु,—न्द्रो वै यज्ञ, इन्द्रः सोमस्य योनिः, स्व एवैन२ योनौ दधाती,—न्द्रो वा एतमग्र आगतमूरू न्यगृह्णीत, ता२ वा एतदनुकृतिमूरा आसादयतेऽपोर्णुते, यथा श्रेयस्यायत्यपोर्णुत एवं तं,—दु३वन्तरिक्ष२ ३वीहीत्य,—न्तरिक्षदेव३त्यो वा एष एतर्हि, प्रच्युत इतोऽ[illegible]मुत्रादित्याः सदा आसीदेत्या,—दित्यो वै यज्ञो, ऽदितिः सोमस्य योनिः, स्व एवैन२ योनौ दधाति, वरुण२ वा एनमेतत्सन्तं मित्रमक,—स्तदेन२ स्वया देवतया व्यर्धयति यदाह ॥ १२

अस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥ १३

[८] मै. १,२,६ । काठ. २४,७—८ । कपि. ३७,७—८ । वा. ४,२७,३०-३१,३३-३४,३६ । काण्व. ४,३८,४१-४३, ४५-४६,४८ । [अस्तभ्नाद् द्यामृषभो० । ऋ. ८,४२,१;३,३०,९, (प्र. पा.); तै. सं. १,२,८,१]

इति वरुणमेवैनमकः, स्वयैवैनं देवतया समर्धयति, वनेषु व्यन्तरिक्षं ततानेति वाससा पर्यौणह्यति, सर्वदेवत्यं वै वासः, सर्वाभिर्वा एतद्देवताभिर्यज्ञं क्रीतं परिश्रयति, धूरसि, ध्वर ध्वरन्तमित्याह रक्षसां ध्वरायै रक्षसामन्तरित्यै, वारुणमसि, वरुणस्त्वोत्तभ्नात्विति, वारुणं ह्येष एतर्हि वरुणदेवत्यं, मनसाछ यन्ति, महिमानमेवास्याछयन्त्यनसा वहन्ति, तस्मादनोवाह्यमोषधयः फलं पच्यन्ते, शीर्षाहार्यमोषधयः फलं पच्येरन्यत्सोमं क्रीतं शीर्ष्णा हरेयुस्तस्माद्विरा ओषधयः शीर्षाहार्यं फलं पच्यन्ते, शीर्ष्णा हि सोमं क्रीतं हरन्ति, प्रच्यवस्व भुवनस्पत इति, भूतानां ह्येष पतिर्विश्वान्यभि धामानीति, विश्वानि ह्येष धामान्यभि प्रच्यवते, मा त्वा परिपरिणो मा परिपन्थिनो मा त्वा वृका अघायवो विदन्निति, यत्र वा एनमद आह्रियमाणं सामिगन्धर्वा विश्वावसुरमुष्णात्ताद्दंशेभ्यो वावास्मा एतद्रक्षोभ्यो भीषां स्वस्तिमक, वरुणो वा एष क्रीतो यजमानस्य गृहमौक्षते, स ईश्वरोऽशान्तो यजमानं हिंसितोर्यदाह, नमो मित्रस्य वरुणस्य चक्षसा इति, शमयत्येवं, शान्त एवौक्षते यजमानस्याहिंसायै, सर्वाभ्यो वा एष देवताभ्या उक्षते, यदेकोल्मुकेन प्रतितिष्ठेत् पितृदेवत्योऽस्य यज्ञः स्यादग्निमुद्धत्समाधेयो, ऽग्निर्वै सर्वा देवताः, सर्वाभिर्वा एतद्देवताभिर्यज्ञमायन्तं प्रतितिष्ठत्यग्नीषोमौ वा एतौ संभवतो, यजमानं वा एता अभिसंभवेतां यजमानस्य वा पशूंस्तर्ह्य एष पशुर्धार्यते तमेव भागधेयमभिसंभवतो, देवता वा एतं पशुं धार्यमाणं नाभिप्राच्यवन्ताऽस्मिन् यज्ञ आशंसमाना३ग्नोऽयमितरस्तमग्नीषोमा उपप्राच्यवेतां, तस्मादेषोऽग्नीषोमीयो, ऽग्नीषोमाभ्यां वा एष मेधायाऽत्मानमालभते, यो दीक्षते स वा एतेनैव पशुनात्मानं निष्क्रीणीते, स्थूलः पीवा स्यादात्मनो निष्क्रीत्यै, तस्मादग्नीषोमीयस्य पशोर्नाशितव्यं, पुरुषो ह्येतेनात्मानं निष्क्रीणीते, तस्मादग्नीषोमीये संस्थिते यजमानस्य गृहेऽशितव्यं, तर्हि निष्क्रीतोऽनृणो, वार्त्रघ्नं वा एतद्, सोमो वै वृत्रः, पूर्वेद्युर्वा इन्द्रो वृत्रमहन्, पूर्वेद्युर्वावैनमेतत्सुत्वाथापरेद्युरभिषुणोति, वरुणपाशाभ्यां वा एषोऽभिधीयते यो दीक्षते, ऽहोरात्रे वरुणपाशौ, यर्हि वा सं स्थापयेदनुन्मुक्तो वरुणपाशाभ्यां स्यान्नक्तं संस्थाप्यो, वरुणपाशाभ्यामेवोन्मुच्यत आत्मनोऽहिंसायै ॥ ८ ॥ १४

[यनेषु व्यन्तरिक्षं० । ऋ. ५,८५,२; तै. सं. १,२,८,१]

युक्तोऽन्योऽनड्वान् भवति, विमुक्तोऽन्यो, ऽथातिथ्यं निर्वपति यज्ञस्य संतत्यै, पत्न्या हस्तान्निर्वपति, पत्नी वै पारिणह्यस्येशे, पत्न्यैव रातमनुमतं क्रियते, यद्वै पत्नी यज्ञे करोति तन्मिथुनं, मिथुनत्वाय वै पत्न्या हस्तान्निर्वपत्ये, य वै पत्न्या यज्ञस्यान्वारम्भो यद्यज्ञं करोत्यन्वारम्भाय वै पत्न्या हस्तान्निर्वपत्यग्नेस्तनूरसि, विष्णवे त्वेति, गायत्री तेन छन्दसा गृह्णाति, सोमस्य तनूरसि, विष्णवे त्वेति, त्रिष्टुभं तेना, ऽतिथेरातिथ्यमसि, विष्णवे त्वेति, जगतीं तेना, ऽग्नये त्वा रायस्पोषदे, विष्णवे त्वेत्यनुष्टुभं तेन, श्येनाय त्वा सोमभृते, विष्णवे त्वेति, गायत्री वै श्येनः सोमभृत्, तां वा एतत् पुनरालभतेऽयातयाम्नीं पाङ्क्तत्वाय, पाङ्क्तो यज्ञो, यावानेव यज्ञस्तमालब्धे, तद्वै छन्दांस्यग्रहीत्, तैश्छन्दोभिर्गृहीतैर्यज्ञं गृह्णाति, यावन्तो वा अतिथिमन्वायन्त्यपि तेषां भाग, श्छन्दांसि वा एतममुतोऽन्वायन्ति, तेभ्य एष भागः क्रीयते, वरुणो वै यज्ञः क्रीतो, विष्णुः प्रततः, प्रततो वा एतर्हि यज्ञस्तस्माद्वैष्णवो नवकपालो भवति, त्रिवृतं वा एतद्यज्ञमुखे व्यायातयन्ति त्रिवृता प्रयन्ति, ते वै त्रयस्त्रिकपाला, स्त्रिकपालो वैष्णवो देवतया, विष्णुं वै देवा आनयन्वामनं कृत्वा, यावदयं त्रिर्विक्रमते तदस्माकमिति, स वा इदमेवाग्रे व्यक्रमता, ऽथेदमथादस्तस्मात् त्रिकपालो वैष्णवः, सोमस्य वा एतदातिथ्यं यदातिथ्यं, मथवा एतदग्नेरातिथ्यं यदग्ना अग्निं मन्थन्त्यथो यज्ञाय वा एतत् क्रीताय देवतां जनयन्त्यथो तेज एवास्मै जनयन्त्यथो उपसत्सु वावास्मा एतद्वीरं जनयन्त्या, ऽऽहास्य वीरो जायते, ये वै देवाः साध्या यज्ञमत्यमन्यन्त तेषां वा एतद्यदतिरिक्तं यज्ञे क्रियते, ऽतिरिक्तं वा एतद्यज्ञे क्रियते यद्वमा अग्निं जुहुति, यद्वपालादुपर्यूपस्य तदेवैनां स्पृशति, संस्थाप्या३म् संस्थाप्या३मिति मीमांसन्ते, यत्संस्थापयेद्यज्ञमुखे यज्ञं संस्थापये, दातिथ्यं वा उपसदां प्रयाजास्तान्नप्रमाशी, स्तस्मादिडान्तमेव कार्य, मातिथ्यं वा उपसदां प्रयाजा, स्तस्मात्ता अप्रयाजा, उपसदो वा आतिथ्यस्यानुयाजा, स्तस्मात्तास्तिस्र, स्त्रयो ह्यनुयाजा, शिरो वा आतिथ्यं, ग्रीवा उपसदो, ऽथैष इतरो यज्ञः संहितः, प्रजापतेर्वा एतानि पक्ष्माणि यदश्ववारा, अस्य भ्रुवा इक्षुकाण्डे, यज्ञमुखं प्रजापति, र्यज्ञमुखादेवाधि यज्ञमुखं प्रतनुते, ऽश्वो वै मेध्यो, यज्ञः प्रजापतिः, प्राजापत्योऽश्व, स्तस्मादाश्ववारः प्रस्तरः, कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै ॥ ९ ॥ १५

[९] मै. १,२,६। तै. ६,२,१। काठ. २४,८। कपि. ३८,१। वा. ५,१। काण्व. ५,१।

देवा अन्योन्यस्य श्रैष्ठ्ये तिष्ठमानाश्चतुर्धा व्युदक्रामन्नग्निर्वसुभिः, सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैस्तान्वा एतेन बृहस्पतिरयाजयत्, तेषामिन्द्रोऽभवत्, तद्य एतेन यजते भवति, ते वा अन्योन्यस्याभिद्रोहादबिभयुस्तेषां याः प्रियास्तन्व आसंस्ताः समवाद्यंस्ताः समवामृशन् ॥ यो नस्तदपाद्यो नोऽन्योन्यस्मै द्रुह्यादिति एव स निर्ऋच्छात्॥ इति, ते यदा समवामृशंस्ततो देवा अभवन् परासुरा, स्तद्य एवं विद्वांसः समवमृशन्ति भवन्त्यात्मना, परैषां भ्रातृव्या भवन्ति, यं कामयेत, ऋध्नुयादिति, तं प्रथममवमर्शयेद्, ऋध्नोति, यदि कामयेत, सर्वे सदृशाः स्युरिति, सर्वान्त्सहावमर्शयेत्, सर्वे ह सदृशा ऋध्नोति, यदि कामयेत, सर्वे सदृशाः स्युरिति, सर्वान्त्सहावमर्शयेत्, सर्वे ह सदृशा भवन्ति, ये वै ते समवामृशन्नपि वा इदानीं तेऽन्योन्यस्मै न द्रुह्यन्ति, तस्मात् तानूनप्त्रिणे न द्रोग्धवै, यद् द्रुह्येत् प्रियायै तन्वै द्रुह्येद्, ते वा अमुष्मिन्नादित्ये प्रियास्तन्वः संन्यदधत, तस्मादेष तेजिष्ठं तपति, तस्मात् सर्वदेवत्या हि सर्वे सौमा गृह्यन्ते, ऽथो अत्र वै देवानां प्रियास्तन्व, स्ता एवावरुन्द्ध, आपतये त्वा गृह्णामीत्यग्नये तेन वसुभ्यो गृह्णाति, परिपतये त्वेति, सोमाय तेन रुद्रेभ्यस्तनूनप्त्र इतीन्द्राय तेन मरुद्भ्यः, शक्मने शाक्वरायेति, वरुणाय तेनादित्येभ्य, एतेभ्यो वै तद्देवेभ्योऽग्रे गृह्यते, तेभ्य एवैनद्गृह्णाति, चतुर्गृह्णाति, चतुर्धा हि ते व्युदक्राम, न्नापतये त्वा गृह्णामीत्या, त्मानमेव तेन गृह्णाति, परिपतये त्वेति, प्रजां तेन, तनूनप्त्र इति, यज्ञं तेन, शक्मने शाक्वरायेति, पशूंस्तेन, यो वै देवान्त्साध्यान् वेद सिध्यति ह वा अस्मै, यत्र कामयेत, इदं मे सिध्येदिती, मे वै लोका देवाः साध्या, आत्मानमेव दीक्षया स्पृणोति, प्रजामवान्तरदीक्षया संवत्सरं सुलामायछते, कनीयो व्रतमुपैत्य, न्तरा ह्यात्मानं प्रजा, द्विव्रतेन भवितव्यं, द्वौ वा ऋतू अहश्च रात्रिश्च, यदकृत्वतः स्यात्पत्नीमन्तरियाद्, या ते अग्ने रुद्रिया तनूरिति व्रतं व्रतयत्ये, षा वा अस्मिन्नेतर्हि देवता, तां प्रीणाति, तस्यां हुतं व्रतयति, यदितोऽन्यथा व्रतयेद्रुद्र एनमभिमानुकः स्याद्, देवताभिर्वा एष सायुज्यं गच्छति, यो दीक्षते यच्च शीताभिर्मार्जयेत शमयेयुरथो स्यात्, अथो तेजो वै मदन्ती, यथेदमद्भिरग्निरुपसृष्ट एवं स्यादथ यत्तप्ताभिर्मार्जयते शान्त्या, १६–१८ [१५८१]
—स्तेज एवावरुन्द्धे ॥ १० ॥

॥ इत्युपरिकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥

[१०] मै. १,२,७। तै. ६,२,२। काठ. २४,९। कपि. ३८,२। वा. ५,५–६। का. ५,५–८।

अथाष्टमः प्रपाठकः।

असुराणां वा एषु लोकेषु पुर आस, न्नयस्मय्यस्मिंल्लोके, रजतान्तरिक्षे, हरिणी दिवि, ते देवाः संस्तम्भं संस्तम्भं पराजयन्ता, ऽनायतना ह्यासंस्त एताः प्रतिपुरोऽमिन्वत, हविर्धानं दिव्याग्नीध्रमन्तरिक्षे, सदः पृथिव्यां, तेऽब्रुवन्नुपसीदामो, पसदा वै महापुरं जयन्तीति, त उपासीदंस्तदुपसदामुपसत्त्वं, तानेभ्यो लोकेभ्यः प्राणुदन्त, त एभ्यो लोकेभ्यः प्रणुत्ता अहरश्रयन्त, यत्प्रातरुपसदमुपायन्नह्न एनांस्तेन प्राणुदन्त, तेऽह्नः प्रणुत्ता रात्रीमश्रयन्त, यत्सायमुपसदमुपायन्. रात्र्या एनांस्तेन प्राणुदन्त, ततो देवा अभवन् परासुरा, स्तद्य एवं विद्वानुपसदमुपैत्यहोरात्राभ्यामेव भ्रातृव्यमेभ्यो लोकेभ्यः प्रणुदते, भवत्यात्मना, परास्य भ्रातृव्यो भवत्य, थ वै तर्हि नेषुरासीत, ते देवा एतामिषुं समस्कुर्व, न्नग्निमनीकं, सोमं शल्यं विष्णुं कुल्मलं, तेऽब्रुवन्, क इमामिषुमस्यतीति, ते देवा अब्रुव, न्नयमेव रुद्र इति, सोऽब्रवीद्, भागो मेऽस्त्विति, वृणीष्वे, त्यब्रुवन् स सोऽब्रवी, देवमेकश्चनेषुमस्तामीमांसाता इति, तस्मादेतस्यैपुरस्तां न मीमांसितव्या ॥ सत्यं हम्॥ इत्येव ब्रूयात्, तां वै रुद्रो व्यसृज, देष हि देवानां क्रूरतम, स्तयेमाः पुरोऽभिन, दग्निना वै स तास्तेजसाभिनद्, तस्मादग्निः प्रथमं इज्यते, यदन्या देवताः पूर्वा यजेदवीर्यवतीः स्यु, रष्टौ कृत्वो जुह्वां गृह्णाति, चतुरुपभृति, पूर्वार्धो हीषोः समाहिततमः, सकृद्व पराङतिक्रामति, सकृद्ध्येषुः पराच्यपत, दतिक्रम्याश्रावयति, यज्ञस्याभिजित्यै, यदनतिक्रम्याश्रावयेदनभिजितोऽस्य यज्ञः स्यात्, स्रुवेणोपसदो जुहोति, पुरां वा एष जितानामन्वारोहं, एकामेकाहं जुहोत्ये, कामेकाहं, मेकां हि त एकाहमजयन्नेकामेकाहं, तिस्र उपसदो जुहोति, त्रयो वा इमे लोका, एषां लोकानामभिजित्या, अग्निना वै मुखेन देवा इमांल्लोकाननन्ववायन्नुपसद्भिरसुरान् पराणुदा, ऽग्निना वा एतन्मुखेन यजमान इमांल्लोकाननन्ववैत्युपसद्भिर्भ्रातृव्यं पराणुद, याः सायमनुवाक्यास्ताः प्रातर्याज्याः स्यु, र्याः प्रातरनुवाक्यास्ताः सायं याज्याः स्यु, स्तशोमयीवीर्यवतीर्भवन्ति ॥ १ ॥ १–३

अयः प्रथमायामवधाय जुहोति, रजतं मध्यमायां, हरितमुत्तमाया, मेतद्वै बृहस्पति-

[१] तै. ६,२,३। काठ. २४,१०;२५,१। कपि. ३८,३–४।
[२] मै. १,२,७। काठ. २५,१। कपि. ३८,४। वा. ५,७;११,३५। काण्व. ५,९–११;११,३५।

देवेभ्यः पूर्वमेनमकरोद्, यत्र पुरं पुष्पेषुस्तदेतामिषुंहुवाद, सुरो वा एषा यज्ञस्य, तस्माद्यत्किंच प्राचीनमग्नीषोमीयात्तदुपांशु चरन्त्य,—थ वा एतदग्नीषोमीयं प्रति वाचं विसृजन्ते, यज्ञमेवाप्त्वा वाचं विसृजन्ते, वृत्रं वै देवा वज्रं कृत्वा सोममघ्न,—न्स्रुची बाहू, तस्मात् स्रुची सौमीमाहुतिं नाश्नाते, अंशविषुची एतेन सोमं यदस्य स्रुचौ चाज्यं चान्तिकमभार्षु,—यदाहा,—ऽंशुरंशुष्टे देव सोमाप्यायतामिति, यदेवास्य मन्तः क्रूरमक्रंस्तदक्रूरमक,—स्तदाप्यायति, सर्वे ऋत्विजा आप्याययन्ति, सर्वे हि तान्तं भिषज्यन्ति, यन्ति वा एते ऽस्माल्लोकाद्ये सोममाप्याययितुमुद्यन्तु:, पराञ्चो हि यन्ती,—श्वराः प्रमेतो,—यदाहे,—ष्टा राया एष्टा वामानि प्रेषे भगायेति, तेनास्माल्लोकादेति, तेनास्मिँल्लोके धृता, अनयोर्वा एष गर्भ, आन्यामिव आवृश्चते यः सोमं हन्ति, यदाह, नमो दिवे नमः पृथिव्या इत्या,—भ्यामेव नमोऽक,—रातिथ्यं वा उपसदां प्रयाजा,—स्तानुनष्त्रमाशी,—स्तस्मान्न होतारं वृणीते नार्षेयम् ॥ सीद होतः ॥ इत्येवाह चतुर्व्रतस्त्रिस्र,—श्चत्वारिहीषोः पर्वाणि, त्रिव्रतस्तिस्र,—स्त्रिपन्धिहीषुः, मध्यं मुल्वः कुल्मुलं, द्विव्रतस्तिस्रो, द्विपन्धिहीषुः, शल्यश्च कुल्मुलं चै,—कव्रतस्तिस्र, एका ३थेदेषु,—रेषा वै परोवरीयसी दीक्षा कनीयो व्रतमुपैति, ज्यायांसं लोकमभिजयत्यं,—कव्रतस्तिस्रो, द्विव्रतस्तिस्र,—स्त्रिव्रतस्तिस्र,—श्चतुर्व्रतस्तिस्र, एषा वा उत्क्रामन्ती स्वर्गकामस्यो,—त्तरमुत्तरं श्वः श्वः श्रेयान्भवति य एवं वेद, यद् द्वादशाग्निष्टोमस्योपसदः स्युरशान्ता निर्दहेयु,—र्यद्द्वि३कोऽहीनस्य, यथा गरीयान् भारं उपजिहा निश्रिणात्येवं तद्, तस्मिन्न एवाग्निष्टोमस्योपसदः का३र्या, द्वादशाहीनस्य सवीर्यत्वाय ॥ २ ॥ ४—६

अम्बयो वै देवेभ्यो यज्ञ आसीद, तेनाविदु,—रिह वा स इहे, वेत्यं,—स्तिपर्श, इति त्वविदु,—स्तेन वै संसृष्टिमैछं,—स्तं प्रेषमैछं,—स्तमाविन्दं,—स्तं यथा स्पुर्पुपरि नात्यपतं,—स्तमिन्द्र उपर्युपर्यत्यक्रामत्, तमचायत्, सोऽवे,—दचिकेद मेति, सोऽब्रवी३द, कोऽसा हन्त्य,—हं दुर्गे हन्तेत्यं,—थ कस्त्वमसीत्य,—हं दुर्गादाहर्तेति, सोऽब्रवीद्, दुर्गे वै हन्तावोचथा, अयं वराह आमुखं एकविंशत्याः पुरां पारेऽश्ममयीनां, तस्मिन्नसुराणां वसु वामं वन्दं,—स्तं जहीति, तस्येन्द्रो दर्भपुञ्जील्यां भ्यायत्य पुरस्तात्त्रिशां हृदयं प्रावृष,—देतद्वा एषाभ्यनूक्ता ॥ ७

[सीद होतः० । ऋ. ३,२९,८; तै. सं. ३,५,११,२,४,१,३,३]
[३] तै. ६,२,४ । काठ. २५,२ । कपि. ३८,५

अतिविद्धा विथुरेणा चिदस्ताऽत्रिःसप्त सानु संहिता गिरीणाम् ।
न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥ ८

इति सोऽब्रवीद्, दुर्गाद्वा आहर्तावोचथा, एतमाहरेति, तं वै विष्णुराहरद्, यज्ञो वै विष्णु,—र्यज्ञो वै तद्यज्ञमसुरेभ्योऽध्याहरद्, यज्ञेन वै तद्यज्ञं देवा असुराणामविन्दन्तै,—तद्वा एषाभ्यनूक्ता ॥ ९

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः ।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥ १०

इति तद्वै देवा यज्ञमविन्दन्, यद्वै तद्यज्ञमविन्दंस्तद्देवयजनस्य देवयजनत्वं, यद्देवयजनमिच्छन्ति यज्ञमिच्छन्ति, यद्विन्दन्ति यज्ञं विन्दन्ति, यद्वाव यजमानो जोषयते तद्देवयजनं, यज्ञं वावैतद्यजमानो जोषयतेऽसुराणां वा इयमग्र आसीद्, यावन्निषद्य पराप्श्यंस्तद्देवानां, ते देवाः सलावृकीमब्रुवन्, यावदियं त्रिः समन्तं पर्येति तदस्माकमिति, सा वा इमां त्रिः समन्तं पर्यैत्तद्वै देवा इमामविन्दन्त, तद्वेद्या वेदित्वं, विष्णुं वै देवा आनयन्वामनं कृत्वा, यावदयं त्रिर्विक्रमते तदस्माकमिति, स वा इदमेवाग्रे व्यक्रमता,—ऽथेदमथाद,—स्तद्वै देवा इदं सर्वमविन्दन्त, तद्वेद्या वेदित्वं, सर्वा वा इयं पृथिवी वेदि,—रियं मेखल,—मिति ३त्वेवास्या यजमानः परिगृह्णीते, यावद्यावद्वै यजमानो वेद्याः कुरुते तावत्तावत्तत्पृथिव्या जयति, तस्मान्महती का३र्या ज्यायसी ज्यायसी, देवाश्च वा असुराश्चास्पर्धन्त, तद्यत्किंचासुराणां स्वमासीत् तद्देवा वेद्याविन्दन्त, तद्वेद्या वेदित्वं, तेषां यत् प्रियं वस्वासीत्तेनापाधाव,—न्ननेन चिन्मुच्यामहा इति, तद्देवा उत्तरवेद्याविन्दन्त, तदुत्तरं वै श्रेयो विदामहीति, तदुत्तरवेद्या उत्तरवेदित्वं, तद्य एवं विद्वान्वेदिं चोत्तरवेदिं च कुरुतेऽभिपूर्वमेव सपत्नस्य भ्रातृव्यस्य वसु वेदो वृञ्जानं एति ॥ ३ ॥ ११

षट्त्रिंशत् प्रक्रमाः प्राची, चतुर्विंशतिरग्रेण, त्रिंशज्जघनेन, तथा विराजा संमिता,—ऽथो छन्दांसि वै विराट्, छन्दांसि वावास्यैतद्यज्ञमुखे युनक्त्ये,—तद्वा एषाभ्यनूक्ता ॥ १२

[अतिविद्धा विथुरेणा०... चकार । ऋ. ८,९६,२ । विश्वेत्ता विष्णुराभरद्० । ऋ. ८,७७,१०; नि. ५,४]
[४] तै. ६,२,४,६ । काठ. २५,३ । कपि. ३८,६ ।

इन्द्राणी पत्या सुजितं जिगायोदंशेन पतिविद्ये बिभेद ।
त्रिंशद्यस्या जघनं योजनान्युपस्था इन्द्रं स्थविरं बिभर्ति ॥ १३

इति, यद्वाव प्राचीनप्रवणं तद्देवयजनं, प्राञ्चं हि तं श्रयानमविद,—न्नथ यत् प्राचीनप्रवणमुदीचीनापनतं तद्यजेत, यः कामयेता,—मयोर्लोकयोरभिजयामित्यु,—मयोर्वा एतल्लोकयो,—रुभयोरेव लोकयोरभिजोत्य,—थ यस्य देवयजनस्योत्तरादन्यद्देवयजनं तद्यजेत, यः कामयेता,—ऽभि मोत्तरो यज्ञो नमेदित्ये,—तद्वा उत्तरावत्याम् देवयजन,—मभ्येनमुत्तरो यज्ञो नमत्य,—थ यस्य देवयजनस्य मध्यतो बहुला ओषधयस्तत्पशुकामो यजेत, पशवो वा ओषधयः, पशुमान् भवति, यत्सम प्रतिष्ठितं तद्भूतश्रीर्यजेत, प्रतिष्ठितं वा एतत्, प्रतिष्ठित एष यो गतश्री,—स्तदेवैनं प्रतिष्ठापयति, पापो हि स, ततः प्रच्यवमानो, ऽथ यस्य देवयजनस्याप: पुरस्तात्तद्यजेत, यः कामयेता,—ऽभि मोत्तरो यज्ञो नमेदित्ये,—तद्वै पुरोहविर्नाम देवयजन,—मभ्येनमुत्तरो यज्ञो नमत्य,—थ यस्य देवयजनस्य पन्थाः पुरस्तादिरिणं वा कर्तो वा भ्रातृव्यवान् यजेतै,—तद्वा आर्तं देवयजनं सदेवं, यदि देवयजनाद्देवयजनमुच्छिंषेद्भ्रातृव्याय लोकमुच्छिंषे,—दथ यस्य देवयजनस्याहवनीयादन्या प्राचीरापो धावन्ति गार्हपत्यादन्याः प्रतीचीस्तद्यजेत यं तन्त्रे वा पात्रे वा मीमांसेर,—न्ननुषक्तो हि वा एष पाप्मना, ऽथैतं मीमांसन्त, एतद्वै व्यावृत्तं पाप्मना, पाप्मनैवैनं व्यावर्तयन्ति, यद्वै यज्ञः संतिष्ठते प्राचीनमस्य संमृद्धमेति प्रतीचीनं व्यृद्धं, पशवो वै यज्ञस्य संमृद्ध,—मापः खलु वै पशवो, यत् प्रत्यक्कूलमुपसम्भवेयापोऽयज्ञस्य व्यृद्धेन व्यृध्येता,—ऽथ यत् प्राङ्वमुपसम्भवैति यज्ञस्य वा एतत् संमृद्धेन संमृध्यते, यत्र प्सुवृतं तद्भ्रातृव्यवान् यजेत, यस्याहवनीयं च हविर्धानं चान्तरा स्याद्, यस्य हविर्धानं च सदश्चान्तरा स्याद्, यस्य सदश्च गार्हपत्यं चान्तरा स्याद्,—मतो वै विष्णुरिमांल्लोकानुदजयद, विष्णोरेवानुजितमन्विमांल्लोकानुज्जयति, प्रैभ्यो लोकेभ्यो भ्रातृव्यं नुदते, ऽथ यस्य देवयजनस्य दक्षिणत उद्धतं तद्भ्रातृव्यवान् यजेतै,—तां वै दिशं देवा असुरान् प्रणुद्य स्वर्गं लोकमाय,—न्नसैभ्योऽमुमादित्यं पुरिधिं पर्यदधुरपुनरावाया,—तां वा एतद्दिशं यजमानो भ्रातृव्यं प्रणुद्य स्वर्गं लोकमेत्यं,—स्मा अमुमादित्यं पुरिधिं परिदधात्यपुनरावाय, स्थले यजेत यः कामयेतो,—भयेषां देवमनुष्याणां प्रकाशं गच्छेयमिति, प्रकाशो वै नामैतद्देवयजन,—मुभयेषां देवमनुष्याणां प्रकाशं गच्छत्य,—भिशस्यमानं याजयेत्, परोक्षं गुहा वने परोक्षं

पृष्ठान्यपेयुः, परोक्षं वा एष यमभिशंसन्ति, परोक्षमेवास्माद्दुहा पापीयां वाचं करोत्य,—थ यस्य होता प्रातरनुवाकमनुब्रुवन्नग्निमुपः सूर्यं तानि पश्येत्, तद् ब्रह्मवर्चसकामो यजेत, ब्रह्मवर्चसं वा अग्नि,—र्ब्रह्मवर्चसमापो, ब्रह्मवर्चसमसा आदित्यो ब्रह्मवर्चसमेव संदधाति, ब्रह्मवर्चसी भवत्य,—थ यस्य देवयजनस्यान्या अन्या मध्यतो बहुला ओषधयो, ऽतो वा अङ्गिरसः पशूनसृजन्त, तत् पशुकामो यजेता,—ऽथ यस्य देवयजनस्य मध्यत उद्धत,—मतो वा अङ्गिरसः स्वर्गं लोकमायं,—स्तत्स्वर्गकामो यजेत, निर्वस्केऽभिचरन् यजेत, यद्वैवैतं निर्णयत्येवं तं निर्णयति यमभिचरति, यत् कार्यमिव स्यात् तद्यजेत, यः कार्य इव स्या,—दात्मा वै देवयजनं, करोत्येवैनं, ये युवान आर्षेया ऋत्विजो वह्वयस्तद्देवयजनं, तस्मादाहु,—र्युवैवार्त्विजीना इत्य,—भिवीवं देवयजनं, तद्य एवं विद्वान् यत्रैव क्वचाग्निमाधाय यजते देवयजन एव यजते ॥ ४ ॥ १४

यद्वा अस्या यज्ञियं मेध्यं यत्सदेवं तदुत्क्रम्यातिष्ठदन्तरा देवासुरान्त्संयतान्त्सिंहीरूपमिव भूत्वा, तेऽविदु,—र्यतरान्वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति, तस्यां वा उभय ऐछन्त, सा नान्यतरांश्चनोपावर्तत, तां देवा अपाशासु,—रुप नः आवर्तस्वे,—ति साब्रवीद्, भागो मेऽस्त्विति, वृणीष्वे,—त्यब्रुव,—न्त्साब्रवी,—न्मामेव पूर्वामग्नेर्व्याघारयात, स यत्कामो मां व्याघारयात्तमेव स काममश्नुवदिति, तां देवाः पूर्वामग्नेर्व्याघारयं,—स्ततो देवा अभवन्, परासुरा,—स्तद्य एवं विद्वानेतां पूर्वामग्नेर्व्याघारयति भवत्यात्मना, परास्य भ्रातृव्यो भवति, यद्वै तदुत्क्रम्यातिष्ठदन्तरा देवासुरान्त्संयत्तान्त्सिंहीरूपमिव भूत्वा, सा वा उत्तरवेदि,—स्तपनी मेऽसीति, तप्ता हि तं तामविन्दन्त, वित्तायनी मेऽसीति, वित्ता हि तं तामविन्दन्ता,—ऽवतान्मा नाथितमिति, नाथितां हि सा तानावद,—व्यताव्यथितमिति, व्यथितां हि सा तानावु,—देतद्देतद्वा एतया देवा असुराणामविन्दन्तै,—तदेतदेवैतया यजमानो भ्रातृव्यस्य वृङ्क्ते, उग्रे अङ्गिरो ३योऽस्यां पृथिव्यामध्यसीति, य एवैषु त्रिषु लोकेष्वग्नयस्तानेवावरुन्द्धे, विदेरग्ने नमो नाम यत्त इति, नमो हि नाम ३सोऽग्निरासीदानुदग्ने खेयु,—मेतावती वा अस्याः पृथिव्यां जीवं यज्ञियं, तदेवावरुन्द्धे, सिंहीरसि, महिषीरसीति, सिंहीरूप-

[५] मै. १,१,८ । तै. ६,२,७—८ । काठ. २५,६ । कपि. ३९,१—४ । वा. ५,९—१२;३२,३० । कण्व. ५, १३—१८;३२,३० ।

श्राव्योऽपप्रैष्यति, देवताभ्यो वै पूर्वमाशुश्रव,—दथ वा अत्र पशोराश्रावयति, तस्मादाश्राव्योऽपप्रैष्यत्यु,—भये वा एतं बध्यमानमनुबध्यन्ते ये ग्राम्याः पशवो ये चारण्या, ये बध्यमानमनु बध्यमाना अन्वैक्षन्त मनसे,—ति यज्जुहोति तेषां वा एषोन्मोक्षो; यन्न जुहुयादनुन्मुक्ताः स्युरु३र्वन्तरिक्षं ३वीहीत्य,—न्तरिक्षदेव३त्यो वा एष एतर्हि, रक्षांसि वा एतं जिघांसन्ति, प्रेच्युतमितोऽप्राप्तममुत्रा,—ऽग्निं पुरस्ताद्धरन्ति रक्षसां पराणुत्त्यै रक्षसामपहत्या, अथो हव्याय वा एतद् प्रणीयमानाय देवताः पुरस्ताद्धरन्त्य,—ग्निं पुरस्ताद्धिहरन्त्यस्कन्नत्वाय, पशोर्वै मारणायानीयमानस्याहवनीयं मेध्योऽभ्युपक्रामति, यो वै तर्हि पशुमन्वारभते तं यज्ञस्याशीर्गच्छति, यदाह, रेवति प्रेधा यज्ञपतिमाविशेति, यत्र वा एतत् क्व च यजमानं सन्तं यज्ञस्याशीर्गच्छति, वपाश्रपणीभ्यामन्वारभते, तत्स्विदुभयमक,—रुरो अन्तरिक्ष सजूर्देवेन वातेनेत्य,—न्तरिक्षं वै पशवो, वातः प्राणः, प्राणानस्मिन् दधाति, त्मनास्य हविषो यजेति, देवता एवं प्रीणाति, समस्य तन्वा भवेति, पुनरेवैनं संभावयति, वर्षीयो वर्षीयसा इति, तेन यजमानो वसीयान् भवति, यद्यज्ञे पशुमाहुर्यत्तमभिमन्यन्ते ३क तर्हि यज्ञो भवतीति, यदाह, यज्ञं यज्ञपतौ धा इति, यज्ञपतौ वा एतद्यज्ञं प्रतिष्ठाप्याथ पशुमालभन्ते, स्कन्दति वा एतद्धविर्यद्विश्रोतति यद्विलिप्यते यत्तृणमुपास्यत्यस्कन्नत्वाय, प्रत्यञ्चं संज्ञपयन्ति, प्रत्यञ्चो हि पशवो मेधमुपतिष्ठन्त उदीचीनपादं स्यावृत्त्यै ॥ ७ ॥ १७

ऋत्विजो वृणीते, छन्दांसि वा ऋत्विज,—श्छन्दांसि वा एतद्वृणीते, यद्धोतारं वृणीते जगतीं तद्वृणीते, यदध्वर्युं पङ्क्तिं तद्, यदग्नीधमतिच्छन्दसं तद्, यन्मैत्रावरुणं गायत्रीं तद्, यद् ब्राह्मणाच्छंसिनं त्रिष्टुभं तद्, यत्पोतारमुष्णिहं तद्, यन्नेष्टारं ककुभं तद्, यदाह ॥ अग्निर्दैवीनां विशां पुरएता ॥ इति, यजमानं वा एतद्वृणीते, स वृतो वषट्करोति, नाच्छावाकं वृणीते, पश्चाजेव वा एषा, होत्राः स्व३र्ग्या, यदच्छावाक्या द्विदेवत्याः शंसति, द्विपाद्यजमानः प्रतिष्ठित्या, अथ यदग्नीधं मध्यतो वृणीते तस्मादयमग्निर्मध्यत ओषधीनां, यदुत्तमः सं स्वयंजता संस्वयंजति तस्मादुपरिष्टान्मथ्यमानः प्रजायत, एतद्वा अस्य छन्दांसि वृतानि युक्तान्यभूवन्, यद्वृता वषट्कुर्युश्चीतृप्यं यज्ञस्याशीर्गच्छे,—दथ यद्वृता वषट्कुर्वन्त्येकधा वा एतद्यजमाने यज्ञस्याशीः प्रतितिष्ठति, तस्मादेकः पशोर्वषट्करोत्ये,—कं हि वृणुते,

[८] मै. ६,३,७,५। काठ. २६,९। कपि. ४१,७।

दश वै पशोर्देवता, दशास्मिन् प्राणा, यद्दश प्रयाजा, या एवास्मिन् देवतास्ता एतद्युनक्त्य,—थ य एष एकादशो, यस्या एव देवतायै पशुरालभ्यते तामेवैतद्युनक्त्य,—थ यदेकादशानुयाजा, या एवैतद्देवता अयाक्षीत् ता एतैरनुप्रीणाति, हतो वा एष मृ३तोऽमुत्र भूतो, दश वै पशो-र्देवता, दशास्मिन् प्राणाः, प्राणाः खलु वै पशोर्देवता, यद्दश प्रयाजाः प्राणानेवास्य प्रयज-त्या,—त्मा वै प्राणानामेकादशो, आत्मा वपा पशो,—र्यदेष एकादशः परिशय आत्मा वा एत-दात्मानं परिशये, ऽथ यदेकादशानुयाजाः प्राणानस्मिन् दधाति ॥ ८ ॥ १८ – २०

[१६२७]

॥ इत्युपरिकाण्डे संक्रान्ता नाम नवमः प्रपाठकः ॥ ९ ॥

अथ दशमः प्रपाठकः।

पत्नी वै प्रच्यवमानाममुष्यादित्यस्य लोकमभिप्रच्यवेत, हिनस्ति खलु वा एष तꣳ योऽस्य लोकमभिप्रच्यवते, यदाह, नमस्त आतानेत्य,—मुष्मा एव नमोऽक,—रनर्वा प्रेहीत्युनेनाः प्रेही,—ति वा एतदाह यजमानाय, घृतस्य कुल्यामनु सह रायस्पोषेणेत्या,—शिषमेवाशास्ते, देवीरापः शुद्धा यूयं देवान् युयुढ्वमित्य,—पो वा एतद्रूपन्ति, पूताभिराभिः पूताश्चरन्ति, तस्माद्वा एता बहु रिप्रममेध्यं चरन्तीमापो न हिꣳसन्ति, हतो वा एष मृ३तोऽमुत्र भू३तो,-ऽद्भ्यो वै प्रजाः प्रजायन्ते, पत्नी प्रजनयति, यदद्भिरभिषिञ्चति पुनरेवैनं प्रजनयति, सर्वान् प्राणान्त्संमृशति सर्वाण्यङ्गान्ये,—तावान् हि पशुः, पशोर्वै मार्यमाणस्य प्राणाञ्छुगृ-च्छति, यदाह, वाचमस्य मा हिꣳसीः, प्राणमस्य मा हिꣳसीरित्य,—द्भिर्वास्यैतत् प्राणाञ्छुचो मुञ्चति, यत्ते क्रूरꣳ यदास्थितं तद्देतेन शुन्धस्व, देवेभ्यः शुम्भस्वेति, यदेवास्य गमयन्तः क्रूरमक्रꣳस्तदक्रूरमक,—स्तच्च शमयति, ये वा एते स्तोका अवपद्यन्ते त इमाम-शान्ता ऋच्छन्ति, तत इमाञ्छुगृच्छति, यदाह, शमद्भ्य इति, शमयत्येवै, शान्ता एवे-मामृच्छन्त्यहिꣳसाया, ओषधे त्रायस्वैनमित्या,—ह त्रात्या एवं, स्वधिते मैनꣳ हिꣳसीरिति,

[१] मै. १,२,१६। तै. ६,३,८—९। वा. ६,१२-१३,१५-१६;५,१०;१,१,२१;७,३०;१४,२२;१,७,२९;६,११; २२,१८;३९,१३। काण्व. ६,१४—१५,१९—२२;५,१४;१,१,३७;७,३०;१५,१४;१,१०,४६,१४,३९।३९,२१। मै० ३७

वज्रो वै स्वधिति,—र्वज्रादेवास्मा एतदन्तर्दधात्यहिꣳसायै, सर्वाभ्यो वै देवताभ्यः पशुराल-भ्यते, यदाह, रक्षसां भा३गोऽसीत्ये,—तेन वा एतद्भागधेयेन रक्षाꣳसि पशोर्निर्भजती,—द-महꣳ रक्षोऽवबाध, इदमहꣳ रक्षोऽधमं तमो नयामीत्या,—ह रक्षसां ध्वरायै रक्षसाम-न्तरित्यै, पशवो वै वपा, यदुपतृन्द्यात् पशून् हिꣳस्याद्, यन्नोपतृन्द्यादयताः स्यु,—र्यत्र तन्निष्ठं तदुपतृन्द्यात् पशूनाꣳ यत्या, इषे त्वोर्जे त्वेती,—षे ३ह्येषोर्जे ३ह्येषा, देवेभ्यः शुन्धस्व, देवेभ्यः शुम्भस्वेति, देवेभ्य एवैनाꣳ शुन्धति, देवेभ्यः शुम्भति, घृतेन द्यावापृथिवी प्रोर्णुवातामिति, घृतेनैव द्यावापृथिवी प्रोर्णोत्य,—मुष्मै त्वा जुष्टमिति, यस्या एव देवतायै पशुरालभ्यते तस्या एनं जुष्टमक,—र्नमः सूर्यस्य संदृशा इत्य,—मुष्मा एव नमोऽक,—रित्थं पर्यावर्तत, एवꣳ हि यज्ञः पर्यावर्तते, ऽथो अमुष्य वा एतदादित्यस्यावृतमनु पर्यावर्तत, उ३र्वन्तरिक्षꣳ ३वीहीत्य,—न्तरिक्षदेव३त्यो वा एष एतर्हि, रक्षाꣳसि वा एतं जिघाꣳसन्ति, प्रच्युतमितोऽप्राप्तममुत्र, काष्मर्यमयी वपाश्रपणी भवतो रक्षसामपहत्यै, यस्मा एवामुतोऽग्नि पुरस्ताद्धरन्ति तस्मा इतो देवता वा एतद्धव्यमनुपर्यावर्तमानमेति, चरमत उपप्रतिगृह्णात्यच्छम्ब-ट्काराय, यदतिहरे देतमेवातिहरेद्, विश्वतोमुखो ३ह्यग्निः, प्रत्युष्टꣳ रक्षः, प्रत्युष्टारातिः,—रित्याह रक्षसां ध्वरायै रक्षसामन्तरित्यै, वायोः स्तोकाना,—मिति तृणमुपास्यति स्तोकानाꣳ विधृत्यै, वायु३र्ह्येतानमुतो विसृजति प्रजानां क्लृप्त्या, अग्रꣳ वा एतद्ध-व्यस्या,—ऽग्रमोषधीना,—मग्रेणैवाग्रꣳ समर्धयत्य,—थो अग्राय वा एतद्धव्यस्याग्रमोषधीनामिध्मं चिनोति, हविषो वा एते स्तोकाः, स्कन्दति वा एतद्धविर्यद्विश्वोतति यद्विलिप्यते, यदाह ॥ १

जुषस्व सप्रथस्तमꣳ वचो देवप्सरस्तमम् । हव्या जुह्वान आसनि ॥ २

इति तेनैवास्य ते हुता अस्कन्ना वषट्कृता भवन्ति, नानादेव३त्या वा एकाद-शिन्यां पशवा आलभ्यन्ते, ऽथात्राग्नेयी प्रथमानूच्यते, ऽग्निर्वै सर्वा देवता, अत्र वै सापि देवता यस्या आलभ्यते तामेवैनद्गमयति, यर्हि लोहिनीव शृता तर्हि रौद्री, यत्तर्हि जुहुया-द्रुद्रायास्य पशूनपिदध्याद्, यर्हि श्येनीव शृता तर्ह्याग्नेयी, तर्हि होत३व्या, तथास्य रुद्रः पशूननभिमानुको भवति, क्रूरꣳ वा एतर्हि पशुर्यर्ह्यभिशृतो, यद्वपामभिघारयै

[जुषस्व सप्रथस्तमꣳ... आसनि । ऋ. १,७५,१; तै. ब्रा. ३,६,७,१]

पृषदाज्यमभिघारयेद्रुद्रायास्य पशूनपिदध्या,—दथ यत् पृषदाज्यमभिघार्य वपामभिघारयति यथा-पूर्वꣳ वा एतत् पशुमुपैत्य,—थो एवमस्य रुद्रः पशूननभिमानुको भवति, पुरस्तात् स्वाहाकारा वा अन्ये देवा, उपरिष्टात् स्वाहाकारा अन्ये, त उभयेऽस्ये मेध्येऽवरुध्यन्ते ॥ स्वाहा देवेभ्यः ॥ इति पुरस्ताद्वपाया जुहुयात् ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥ इत्युपरिष्टात्, तथास्य त उभयेऽवरुद्धा भवन्ति, पशोर्वै मार्यमाणस्य प्राणाञ्छुगृच्छति, प्राणान्त्संगृह्य वपा-मुपविसृजे,—दात्मा वपा पशो,—रात्मन्नेवास्य प्राणान् दधाति, दक्षिणस्य पूर्वपदस्यावदेय,—मिति ह स्माहुर्दाक्षायणा,—स्तथास्य सर्वस्य पशोरवत्तं भवतीति, स्वाहोर्ध्वनभसं मारुतं देवं गच्छत,—मिति वपाश्रपणी अनुप्रास्यत्य,—र्ध्वनभसो वा एते मारुतस्य भागधेयं, तमेवैनेन गमयती,—मे वा एते विषूची अनुप्रास्यत्य,—नयोर्विधृत्यै ॥ १ ॥ ३-७

पुरुषꣳ वै देवा मेधायालभन्त, तस्य मेधोऽपाक्रामत्, सोऽश्वं प्राविशत् तेऽश्वमालभन्त, तस्य मेधोऽपाक्रामत्, स गां प्राविशत्, ते गामालभन्त, तस्य मेधोऽपाक्रामत्, तस्य मेधोऽपाक्राम३त, सोऽजं प्राविश३त्, तेऽ-सोऽविं प्राविशत्, तेऽविमालभन्त, तस्य मेधोऽपाक्रामत्, स यवं प्राविशत्, ते यवमालभन्त, तस्य मेधो-जमालभन्त, तस्य मेधोऽपाक्रामत्, ते व्रीहिमालभन्त, तꣳ व्रीहा आप्नुवन्, ऽपाक्रामत्, स व्रीहिं प्राविशत्, सुषिरो वै तर्हि पशुर्यर्हि यद्व्रीहिमयः पुरोडाशो भवति मध्यतो वा एतत् पशोर्मेधो धीयते, द्वादशकपालो भवति, वपामुत्खिदन्ति, यद्व्रीहिमयः पुरोडाशो भवत्यपिहित्या असुषिरत्वाय, प्रजननायैकादशकपालः का३र्या, द्वादश मासाः संवत्सरः, संवत्सरमनु पशवः प्रजायन्ते, पशुष्वेवास्य पशून् दधाति, एकादशाक्षरा त्रिष्टु,—बैन्द्रमेतच्छन्दो यत्त्रिष्टु,—बैन्द्राः पशवः, देवा अ३न्योऽन्यस्मै पशुमालभꣳ स्वर्गं लोकमायꣳ,—स्तेऽमन्यन्ता,—ऽनेन वै नोऽन्ये लोकमन्वा-रोक्ष्यन्तीति, तस्य मेधं प्लाक्षारय,—न्त्स प्लक्षोऽभवत्, तत् प्लक्षस्य प्लक्षत्वं, क्लोम्नो वै तꣳ हृदयात् प्लाक्षारयꣳ,—स्तस्मादेतत् सुषिरꣳ यत् प्लक्षशाखाया अवद्यति, मेधादेवाध्यवद्यति, पृषदाज्यस्योपहत्य पृच्छति ॥ शृतꣳ हविः शमिता ॥ इति शृतत्वाय, त्रिराह त्रिषत्या हि देवा, अथो यथेदं ब्राह्मणेभ्य ओदनं पक्वं प्राहैवꣳ वा एतद्देवेभ्यो हविः शृतं प्राहो,—त्तरतः परीत्याभि-घारयति पशूनामवरुद्ध्यै, प्राणापानौ वै पृषदाज्यं,—मात्मा हृदयꣳ, यत्पृषदाज्येन हृदयमनक्ति मध्यतो वा एतत् पशोः प्राणापानौ दधाति, सोमस्य वा एतद्धविर्यद्धवि,—रथ वा एतत्

[२] तै. ६,३,९—१०।

पशोर्यदुत्तरबर्हिर्बर्हिः, श्रद्धा एतद्धव्यमुक,—रस्कन्नमविक्षुब्धं मे हव्यं देवता गच्छदिति, देवानाꣳ वै सर्वेषां मनाꣳसि गच्छति पशा आलभ्यमाने, मनो वै मनोता, यन्मनोताया अन्वाह मनाꣳ-स्येवैषाꣳ संभावयति, हतो वा एष मृ३तोऽमुत्र भूतो, मनो वै मनोता, यन्मनोताया अन्वाह पुनरेवैनꣳ संभावयति ॥ २ ॥ ८-१०

हृदयस्यावद्यति, मनस एव तेनावद्यत्य,—थो यावानेव पशुस्तस्यावत्तं भवति, जिह्वाया अवद्यति, वाच एव तेनावद्यत्य,—थो एतया ह्यग्रा ओषधीनाꣳ रसं प्राश्नाति, श्येनस्याव-द्यति, वक्षस एव तेनावद्यत्य,—थो अत्र हि स रसः प्रतितिष्ठति दोष्णोऽवदाय पार्श्वयोरवद्यति यज्ञस्य परिगृहीत्यै, यक्नोऽवद्यति, मध्यस्यैव तेनावद्यति, मतस्नयोरवद्यति, रूपस्यैव तेनावद्यति, श्रोण्या अवदाय गुदस्यावद्यति, तदुत्तमस्यावद्यत्य,—त्तमꣳ ह्यायु,—र्यदुन्यस्यो-त्तरस्यावद्येत प्राणमस्यापिदध्यात्, प्रमायुकः स्यात्, तस्मात्तस्योत्तमस्यावद्यत्य,—त्तमꣳ ह्यायु,—हृदयस्यावदाय जिह्वाया अवद्यति, यथापूर्वꣳ वा एतत् पशुमुपैत्य,—थो एवमस्य सर्वस्य पशो-रवत्तं भवत्ये,—कादश कृत्वोऽवद्यति, दश वै पशोः प्राणा, आत्मैकादशो,—स्तथास्य सर्वस्य पशोरवत्तं भवत्ये,—कादश वा एतान्यवदानानि, तानि द्विर्द्विरवद्यति, तद् द्वाविꣳशति,—स्त्रीणि त्र्यङ्गाणि, तत् पञ्चविꣳशतिः, पञ्चविꣳशेन वै स्तोमेन मनुः प्रजा असृजत, तन्म-नुस्तोमो वा एष प्रजननायै,—तद्धि सर्वस्य पशोरवत्त,—मथ वै प्राणस्यापानस्य व्यानस्य तेषाम-नवत्तꣳ, यत् त्र्यङ्गाणामवद्यति तेनैव प्राणस्यापानस्य व्यानस्य तेषामवत्तं भवति, विश्वरूपो वै त्वाष्ट्रः पशूनभ्यवमत्, तस्मात् पशवो विश्वरूपा, अभिवान्तो वै पशुः पुरितं,—स्तस्मात् पृष्टीनां मज्जा नाद्यः, स वा अधस्तान्न प्राप्नो,—देतद्धि जीवं, तस्मादतोऽवद्यत्य,—क्ष्णयाङ्गानामवद्यति, पशुꣳ वा एतदाश्रुभयति, तस्मात् पशवोऽक्ष्णयाङ्गानि प्रहरन्तो यन्त्या,—ग्नेयो वै सर्वः पशु,—रथ वा उतान्यस्यै देवताया आलभ्यते, यद्दोष्णः पूर्वार्धादग्नयेऽवद्यति गुदस्य मध्यतः श्रोण्या जघानतस्तथास्य सर्वस्य पशोरग्नयेऽवत्तं भवति, त्रेधा गुदं करोति, त्रेधा ३ह्येतर्हि पशु,—३स्त्य-ङ्गाणि समवत्तमवदानानि, यावानेव पशुस्तस्मिन्नायुर्दधाति, त्रेधा मेदः करोति, मेदोरूपा हि पशवः, सर्वाणि वै पशोर्मेधतोऽङ्गानि मेद्यन्ति, यावानेव पशुस्तस्मिन् मेदो रूपं दधाति, बहुमर्या यज्ञकुणपीं,—ति ह स्माह यज्ञवचा राजस्तम्बायनः प्र वा इतो मनुष्याः पशुं च्यावयन्ति,

[३] तै. ६,३,१०।

नामुत्र गच्छन्तीति, यद्धिरण्यमवधाय जुहोति हिरण्यज्योतिषमेवैनꣳ स्वर्गं लोकं गमयति ॥ ३ ॥
११
वसाहोमं प्रयौति, रसं वा एतत्प्रयौति, स्वधितिना प्रयौत्ये,—तेन हीतेरषामङ्गानामवद्यति,
तत्स्विददवदानमक,—रयो वज्रेणैवाहुतिमवरुन्द्धे, यूप एतयान्वितꣳ समर्पयन्त्यू,—र्ध्वं रसो गूरू,—
र्जो वा एतद्रसेन पशुꣳ समर्धयन्त्य,—थो यावानेव पशुस्तस्मिन्त्संदधाति, पार्श्वेनापिदधात्यूर्जः
परिगृहीत्यै, हतो वा एष पृ३क्षोऽमुत्र भूतो, यत्पशुꣳ संमृशति पुनरेवैनꣳ संभावयति,
हव्यं पूर्वं देवता गमयित्वाथ शरीरमन्वारोहयितु३न्य,—मित्याहुर्यदाहुतीर्हुत्वा पशुꣳ संमृशति
हव्यꣳ वा एतत् पूर्वं देवता गमयित्वाथ शरीरमन्वारोहयत्य,—र्धर्चे जुहोती,—यꣳ वा अर्ध-
ऋ३चो, ऽसा अर्धर्चो, ऽन्तरेमे अन्तरिक्ष,—मन्तरिक्षमिमाः प्रजाः, प्रजास्वेव रसं दधाति,
वनस्पतिꣳ यजति, सोमो वै वनस्पतिः, सौमीरिमाः प्रजाः, प्रजास्वेव रसं दधाति, प्राणा-
पानौ वै पृषदाज्य,—मात्मा हवि,—र्यत्पृषदाज्यं जुहोत्यात्मन्वा एतत् पशोः प्राणापानौ दधाति,
दिग्भ्यो जुहोती,—मा एव दिशो रसेन व्युनक्ति, प्राचीमुत्तमां जुहोति, प्राचीमेव दिशं पुनरुपा-
वर्तन्ते, ऽग्यूमीꣳ होत्रे हरन्ति, वैश्वदेवो वै होता, वैश्वदेवीरिमाः प्रजा, ऊवः खलु वै
प्रजा अनूपजीवन्ति, सर्वा एवैनाः पयस्विनीः करोति, गुदेनोपयजति, प्राणो वै गुदः,
प्राणादधि प्रजाः प्रजायन्ते प्रजननाय, स्थविमत उपयजति, स्थविमतो हि प्रजाः प्रजायन्ते,
यदणिमत उपयजेत् प्रजननमपिहन्याद्, तस्मात् स्थविमत उपयजत्य,—संभिन्दन्नुपयजति प्राणा-
नामसंभेदाय, यत्संभिन्द्याद् प्राणान्त्संभिन्द्याद्, यं द्विष्यात्तस्य संभिन्द्यात्, प्राणानस्य
संभिनत्ति, नोपयज्यꣳ, यदुपयजेत् प्राणानुपयजेत्, प्रमायुकः स्याद्, तदाहु,—रुपयज्यु-
मेव, प्रजननꣳ वा उपयजो, ऽपि ह स प्रजायते य उपयजतीत्याभारद्वाजो,—ति ह स्माह
शुचिवृक्षो गौपालायनः, किं तर्हि प्रजा आसन्यर्हि यज्ञो नानोपयद्भिरासी,—त्स प्रजाः प्राजा-
यन्त, नौषधयः फलमगृह्णन्, यदा वाव यज्ञ उपयद्भिः समभवदथ प्रजाः प्राजायन्ता,—ऽथौ-
षधयः फलमगृह्ण,—न्नेकादश प्रयाजा, एकादशानुयाजा, एकादशोपयज,—स्तत्त्रयस्त्रिꣳशत्,
त्रयस्त्रिꣳशद्देवता,—स्ता एवास्यैताभिरभीष्टाः प्रीता भवन्त्ये,—तद्वा अस्य पशोरन्तर्वाणिष्ठोऽन-
भीष्टोऽभूद्, यास्य मात्रा तामेनं गमयति, स्व३र्ग्यो वै सर्वः पशु,—र्यदन्यत्राहवनीयाज्जुहु-

[४] मै. १,१,१७ । तै. ६,३,११ ।

याद्स्वर्ग्यः स्याद्, पशुश्रपणादग्निमाहरन्ति तेन स्व३र्ग्यः सर्वः पशु,—र्यत एव पूर्वमवादात्ततोऽ-
परमवद्यति, तस्मात् समानाद्योनेर्नानारूपाः पशवः प्रजायन्ते, यज्ञो वै देवानामत्यने,—दत्
देवा उपयद्भिरभ्यवयन्ननतिनेदाय, यदेता उपयजो भवन्ति यज्ञमेवैताभिरपिवपन्त्यनतिनेदाय,
यदाथा वै पुरुषः प्रत्यङ् छिद्र एवꣳ यज्ञः प्रत्यङ् छिद्रं,—स्तं देवा उपयद्भिरप्यदधुरछिद्रत्वाय,
यदेता उपयजो भवन्ति यज्ञमेवैताभिरपिदधात्यछिद्रत्वाय ॥ ४ ॥ १२
ये केचावाचीनमेकादशिन्याः पशवस्तानुत्तरमर्धꣳ यूपस्य नियुञ्ज्याद्, रौद्रा वै पशवो,
ऽग्निर्विधृति,—र्दक्षिणे हविर्धाने सोममासादयन्ति, तथास्य रुद्रः पशूननभिमानुको भवति,
पात्रेषु वा अहमध्वर्युं चानध्वर्युं च विजानामी,—ति ह स्माहारुणं औपवेशिः, कति पात्राणी,-
—ति पृछेद्, द्वादश पात्राण्यु,—पाꣳशुसवनस्त्रयोदशꣳ, यत्तन्मीमाꣳसन्ते, पात्रा३न्न-
पात्रा३मिति, मीमाꣳसन्ते हि त्रयोदशं मासं, मासा३न्न मासा इति, पञ्च प्रातःसवने
पुरोडाशा,—श्चत्वारो माध्यंदिने सवने, चत्वारस्तृतीयसवने, इतो वा एता निरमिमीत
प्रजापति,—रात्मन एव, यत एवैता निरमिमीत तदेतैरपिधीयते, देवाश्च वा असुराश्चास्पर्ध-
न्ता,—ऽऽयतनवन्तोऽसुरा आस,—न्ननायतना देवा, इमे लोका असुराणामायतनमासꣳ,—स्ते
देवाः सꣳस्तम्भꣳ सꣳस्तम्भं पराजयन्ता,—ऽनायतना ह्यासꣳ,—स्ते वै सवनान्येवायतनमचायꣳ,-
—स्तानि प्राविशꣳ,—स्तानि नाध्रियन्त, ते वै पुरोडाशानेव सवनानामायतनमचायꣳ,—स्ता-
न्निरवपꣳ,—स्तान्यध्रियन्त, ततो देवा अभवन्, परासुरास्त,—य एवꣳ वेदायतनवान्
भवति, भवत्यात्मना, परास्य भ्रातृव्यो भवति, तस्मादनुसवनं पुरोडाशा
निरूप्याः सवनानां धृत्यै, तस्मादनुसवनं पुरोडाशः प्राश्यः सोमपीथस्य धृत्यै, घृतꣳ वै
देवा वज्रं कृत्वा सोममघ्न,—न्नभि खलु वा एतं घारयन्ति, यत् प्राश्नीयात् सोमपीथꣳ हन्याद्,
यन्न प्राश्नीयात् सोमपीथेन व्यृध्येत, यत्रानभिघृतं तत् प्राश्यः सोमपीथस्य धृत्यै, तन्न
स्कन्द्यं, प्राश्य एवे,—न्द्रो वै वृत्रमहꣳ,—स्तस्मै किं चनाधिनोत्, तं पुरोडाश एवाधिनोत्,
तस्मात् पुरोडाशः प्राश्यः सोमपीथस्य धृत्यै, पञ्च प्रातःसवने पुरोडाशाः, पुरोडाशः
परिवापो धानाः करम्भः पय३स्या, सा पुरोडाशपङ्क्ति,—र्द्विनाराशꣳसाः प्रातःसवने,

[५] काठ. २९,१ । वा. १९,२१ । काण्व. २१,२१ ।

द्विनाराशꣳसा माध्यंदिने सवना, एकनाराशꣳसास्तृतीयसवने, सा नाराशꣳसपङ्क्ति,—स्त्रीणि
सवनान्यवभृथो, ऽनुव३न्ध्या सवनानां पञ्चमी, सा सवनपङ्क्ति,—रेषा वै सा पङ्क्तिर्यामा-
हुर्ब्रह्मवादिनो, वेत्थ तां पङ्क्तिꣳ यया न स्तुवते न शꣳसन्त्य,—थ यज्ञꣳ वहन्त्य,—थ यज्ञꣳ
सꣳस्थापयन्ता इति ॥ ५ ॥ १३
देवाश्च वा असुराश्चास्पर्धन्त, तेषाꣳ वा इन्द्रियाणि वीर्या३ण्यपाक्राम,—न्नृक्सामे वा एभ्य-
स्तदपाक्रामतां, पशवो वागिन्द्रियं प्राणापानौ, तैर्वा इन्द्रोऽकामयत, सायुज्यं गछेयमिति॥
हरिवꣳ इन्द्रो धाना अत्तु ॥ इत्यृक्सामे वा इन्द्रस्य हरी, ऋक्सामाभ्यामेव सायुज्यमगछत् ॥
पूषण्वान्करम्भः ॥ इति, पशवो वै पूषा, पशुभिरेव सायुज्यमगछत् ॥ सरस्वतीवान् भारती-
वान् परिवापः॥ इति, वाग्वै सरस्वती, वाचैव सायुज्यमगछत्॥ इन्द्रस्यापूपः॥ इतीन्द्रियꣳ वा
इन्द्र, इन्द्रियेणैव सायुज्यमगछत् ॥ मित्रावरुणयोः पयस्या ॥ इति प्राणापानौ वै मित्रावरुणौ,
प्राणापानाभ्यामेव सायुज्यमगछत्, ततो देवा अभवन्, परासुरा,—स्तद्य एवꣳ वेदैतैरिन्द्रि-
यैर्वीर्यैरेताभिर्देवताभिः सायुज्यं गछति, भवत्यात्मना, परास्य भ्रातृव्यो भवति, दीर्घजिह्वी वै
देवानां प्रातःसवनमवालेद्, तदमायत्, सा पयस्याभवत्, तस्मात् पय३स्या विमदित-
रूपेव मैत्रावरुणी प्रातःसवने स्यात्, प्राणापानौ वै मित्रावरुणौ, प्राणापानौ वा एतन्मुखतो
यज्ञस्य धीयेते, न पुरः पर्याकुर्यात्, यत्पुरः पर्याकुर्यादुदात्ततः प्रजा हन्यादृक्सामेनन्ववजयाय,
यूपः पुरस्तान्मीयते, यदेतेन यूपं पशुꣳ हरेयुस्तदनु रक्षाꣳसि यज्ञमवजयेयु,—रन्तराग्निं च यूपं
च हन्यो रक्षसामनन्ववजयाय ॥ ६ ॥
१४-२४
समुद्रं गछ स्वाहेत्यु,—दस्युꣳ वा एतद्गजन्त्य,—न्तरिक्षं गछ स्वाहेति, रेत एवैतद्दधाति,
देवꣳ सवितारं गछ स्वाहेत्या,—ह प्रसूत्या एवा,—होरात्रे गछ स्वाहेत्य,—होरात्रे ह्यनु प्रजाः
प्रजायन्ते, मित्रावरुणौ गछ स्वाहेति, प्राणापानौ वै मित्रावरुणौ, प्राणापानावेवासु
दधाति, द्यावापृथिवी गछ स्वाहेत्याभ्यामेवैनाः सृष्टाः परिगृह्णाति, छन्दाꣳसि गछ
स्वाहेति, वाग्वै छन्दाꣳसि, वाचमेवासु दधाति, सोमं गछ स्वाहेत्य,—न्नꣳ वै सोमो,
ऽन्नमेवासु दधाति, यज्ञं गछ स्वाहेति, यज्ञिया एवैना अक,—र्दिव्यं नभो गछ स्वाहेति,

[६] काठ. २९,१—२ ।
[७] मै. १,२,१८ । तै. ६,४,१ । वा. ६,२१ । काण्व. ६,२८—२९ ।

वृष्टिमेवाभ्यो निनयन्त्य,—ग्निꣳ वैश्वानरं गछ स्वाहेति, सꣳवत्सरो वा अग्निर्वैश्वानरः,
सꣳवत्सरं एवैनाः प्रतिष्ठापयति, सꣳवत्सरायुषमेनाः करोति, मनो हार्दिꣳ यछ,—त्याह
प्राणानां गोपीथायौ,—षधीभ्यस्त्वेत्यो,—षधीष्वेव रसं दधाति, यो वै विद्वान् वाविद्वान् वोप-
यजो मिथुनयोप यजति प्राणान् वा एतन्मिथुनयाकुरुते, यदाह, मनो हार्दिꣳ यछेति,
प्राणान् वा एतद्वशः कल्पयते, पशुर्वा आलब्धः शोचति, तस्य मध्यꣳ शुगभिसमेति,
सा हृदयेध्यागछति, यत् पुरुषमुपस्पृशेन्मनु३ष्यान्छुगृछेद्, यद्गामुपस्पृशेत् पशून्छुगृछेद्,
यदाऽऽरूपस्पृशेद्वनस्पतीꣳ शुगृछेद्, यत्तृणमुपस्पृशेदोषधीः शुगृछेद्, यदुदकमुपस्पृशेदपः शुगृछेद्,
यदार्द्रमनुदकं तच् शान्तं, तत्रोपोप्यं, तद्देवताꣳ शुचमवयजति ॥ ७ ॥ २५
[१६५१]

॥ इत्युपरिकाण्डे पात्नीवन्तो नाम दशमः प्रपाठकः ॥ १० ॥

अथैकादशः प्रपाठकः ।

सौत्रामणी ।

समिद्धा इन्द्र उषसामनीके पुरोरुचा पूर्वकृद्वावृधानः ।
त्रिभिर्देवैस्त्रिꣳशता वज्रबाहुर्जघान वृत्रꣳ वि दुरो ववार ॥ १
नराशꣳसः प्रति शूरो मिमानस्तनूनपात्प्रति यज्ञस्य धाम ।
गोभिर्वपावान्मधुना समञ्जन् हिरण्यैश्चन्द्री यजति प्रचेताः ॥ २
ईडितो देवैर्हरिवाꣳ अभिष्टिराजुह्वानो हविषा शर्धमानः ।
पुरंदरो गोत्रभिद्वज्रबाहुरायातु यज्ञमुप नो जुषाणः ॥ ३
जुषाणो बर्हिर्हरिवान्न इन्द्रः प्राचीनꣳ सीदत् प्रदिशा पृथिव्याः ।
उरुप्रथाः प्रथमानꣳ स्योनमादित्यैरक्तꣳ वसुभिः सजोषाः ॥ ४
इन्द्रं दुरः कव३ष्यो धावमाना वृषाणꣳ यन्तु जनयः सुपत्नीः ।
द्वारो देवीरभितो विश्रयन्ताꣳ सुवीरा वीरं प्रथमाना महोभिः ॥ ५

[१] काठ. ३८,६ । तै. ब्रा. २,६,८ । वा. २०,३६—४६ । काण्व. २२,११—३१ ।

उपासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् ।
पेशस्वती तन्तुना सꣳवयन्ती देवानां देवꣳ यजतः सुरुक्मे ॥ ६

दैव्या मिमाना मनसा पुरुत्रा होतारा इन्द्रं प्रथमा सुवाचा ।
मूर्धन्यज्ञस्य मधुना दधाना प्राचीनं ज्योतिर्हविषा वृधातः ॥ ७

तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा वृषणं न पत्नीः ।
अच्छिन्नं तन्तुं पयसा सरस्वतीडा देवी भारती विश्वतूर्तिः ॥ ८

त्वष्टा दधदिन्द्राय शुष्ममपाकोऽचिष्टुर्यशसे पुरूणि ।
वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवान् ॥ ९

वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्जठरं पृणानः स्वदातु हव्यं मधुना घृतेन ॥ १०

स्तोकानामिन्दुं प्रति शूर इन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्रुषा मनसा हव्यमुन्दन्त्स्वाहाकृतं जुषताꣳ हव्यमिन्द्रः ॥ १ ॥ ११

होता यक्षत्समिधाग्निमिडस्प३देऽश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजं मधुशष्पैर्न तेज इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज, होता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजं पथा मधुमदाभरन्नश्विनेन्द्राय वी३र्यं बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज, होता यक्षन्नराशꣳसं न नग्नहुं पतिꣳ सुराया भेषजं मेषः सरस्वती भिषग्रथो न च३न्द्र्यश्विनोर्वपा इन्द्रस्य वी३र्यं बदरैरुपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज, होता यक्षदिडेडित आजुह्वानः सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजꣳ यवैः कर्कन्धुभिर्मधु लाजैर्न मासरं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज, होता यक्षद्बर्हिरूर्णम्रदा भिषङ् नासत्या भिषजाश्विनाश्वा शिशुमती भिषग्धेनुः सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज, होता यक्षद्दुरो दिशः कव३ष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशा इन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वती शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज, होता यक्षत्सुपेशसोषे नक्तं दिवाश्विना संजानाने सुपेशसा सम-

[२] तै. ब्रा. २,६,११ । वा. २१,२९—३९ । काण्व. २३,३०—४० ।
मै० ३८

ञ्जाते सरस्वत्या त्विषिमिन्द्रेण भेषजꣳ, श्येनो न रंहसा हृदा पयः सोमः परिस्रुता घृतं मधु वीतामाज्यस्य होतर्यज, होता यक्षद् दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवि दिवा नक्तं न भेषजैः शूषꣳ सरस्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु वीतामाज्यस्य होतर्यज, होता यक्षत्तिस्रो देवीर्न भेषजं त्रयस्त्रिधातवोऽपसो रूपमिन्द्रो हिरण्ययमश्विनेडा न भारती वाचा सरस्वती मह इन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज, होता यक्षत्त्वष्टारꣳ रूपकृतꣳ सुपेशसꣳ वृषभं नर्यापसं त्वष्टारमिन्द्रमश्विना भिषजं नः सरस्वतीमोजो न जूतिरिन्द्रियꣳ वृको न रभसो भिषग्यशः सुराया भेषजꣳ श्रिया न मासरं पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज, होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुं भीमं न मन्युꣳ राजानꣳ व्याघ्रं नमसाश्विना भामꣳ सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज, होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वाहा मेदसां पृथक् स्वाहा छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहा ऋषभमिन्द्राय सिꣳहाय सहस इन्द्रियꣳ स्वाहाग्निं न भेषजैः स्वाहा सोममिन्द्रियैः स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारꣳ वरुणं भिषजां पतिꣳ स्वाहा वनस्पतिं प्रियं पाथो न भेषजैः स्वाहा देवा आज्यपा जुषाणो अग्निर्भेषजं पयः सोमः परिस्रुता घृतं मधु व्यन्त्वाज्यस्य होतर्यज ॥ २ ॥ १२

समिद्धो अग्निरश्विना तप्तो घर्मो विराट् सुतः ।
दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रियम् ।
तनूपा भिषजा सु३तेऽश्विनोभा सरस्वती । मध्वा रजाꣳसीन्द्रियमिन्द्राय पथिभिर्वह ॥ १३
इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ।
अधातामश्विना मधु भेषजं भिषजा सुते ॥ १४
आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् ।
इडाभिरश्विना इषꣳ समूर्जꣳ सꣳ रयिं दधुः ॥ १५
अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रं परिस्रुता । सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥ १६
कव३ष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिशः ।
इन्द्रो न रोदसी उभे दुहे कामान्त्सरस्वती ॥ १७

[३] काठ. ३८,८ । तै. ब्रा. २,६,१२ । वा. २०,५५—६६ । २१,४१—५१ । [समिद्धो अग्निरश्विना०… । अथर्व. ७,७३,२]

उषासा नक्तमश्विना दिवेन्द्रꣳ सायमिन्द्रियैः । संजानाने सुपेशसा समञ्जाते सरस्वत्या ॥ १८
पातं नो अश्विना दिवा पाहि नक्तꣳ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रꣳ सचा सुते ॥ १९
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा । तीव्रं परिस्रुता सोममिन्द्राय सुषुवुर्मदम् ॥ २०
अश्विना भेषजं मधु भेषजं नः सरस्वती ।
इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳ रूपमधुः सुते ॥ २१
ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता ।
कीलालमश्विभ्यां मधु दुहे धेनुः सरस्वती ॥ २२
गोभिर्न सोममश्विना मासरेण परिस्रुता ।
समधाताꣳ सरस्वत्या स्वाहेन्द्रे सुतं मधु ॥ ३ ॥ २३
अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती । आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥ २४
यमश्विना सरस्वती हविषेन्द्रमवर्धयन् ।
स बिभेद बलं मघं नमुचा आसुरे सचा ॥ २५
तमिन्द्रं पशवः सचाश्विनोभा सरस्वती ।
दधाना अभ्यनूषत हविषा यज्ञ इन्द्रियम् ॥ २६
य इन्द्र इन्द्रियं दधुः सविता वरुणो भगः ।
स सुत्रामा हविष्पतिर्यजमानाय सश्चत ॥ २७
सविता वरुणो दधद्यजमानाय दाशुषे । आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥ २८
वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम् । सुत्रामा यशसा बलं दधाना यज्ञमाशत ॥ २९
युवꣳ सुराममश्विना नमुचा आसुरे सचा । विपिपाना सरस्वतीन्द्रं कर्मस्वावत ॥ ३०

होता यक्षदश्विनौ सरस्वतीमिन्द्रमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो मदा मासरेण परिस्रुता शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुत,—स्तानश्विना सरस्वतीन्द्रो जुषन्ताꣳ सोम्यं मधु, पिबन्तु, मदन्ताꣳ, व्यन्तु, होतर्यज ॥ ३१

[४] काठ. ३८,८—९ । वा. २०,६७—७९; २०,३३—३४; २१,४२ । काण्व. २२,५२—६४; २२,४६—४७, २३,४३ । तै. ब्रा. २,६,१२ । [युवꣳ सुराम०…पत । ऋ. १०,१३१,४; अथर्व. २०,१२५,४; तै. ब्रा. १,४,२,१ ।

पुत्रमिव पितरा अश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः ।
यत्सुरामꣳ व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥ ३२
अश्विना गोभिरिन्द्रियमश्वेभिर्वी३र्यं बलम् । हविषेन्द्रꣳ सरस्वती यजमानमवर्धयन् ॥ ३३
ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । सरस्वती हविष्मतीन्द्रं कर्मस्ववतु ॥ ३४
ता भिषजा सुकर्मणा सा सुदुघा सरस्वती ।
स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥ ३५
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिꣳ रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥ ३६
यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥ ४ ॥ ३७

देवं बर्हिः सरस्वती सुदेवमिन्द्रायाश्विना तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियꣳ, वसुवने वसुधेयस्य वेतु, यज देवीर्द्वारो, अश्विना भिषजेन्द्रꣳ सरस्वती प्राणान्न वीर्यं नसि द्वारो दधुरिन्द्रियꣳ, वसुवने वसुधेयस्य व्यन्तु, यज देवी उषासा, अश्विना सुत्रामेन्द्रꣳ सरस्वती बलं न वाचमास्य उषाभ्यां दधुरिन्द्रियꣳ, वसुवने वसुधेयस्य वीताꣳ, यज देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्धयन्, श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियꣳ, वसुवने वसुधेयस्य वीताꣳ, यज देवी ऊर्जाहुती दुघे, सुदुघेन्द्रꣳ सरस्वत्यश्विना भिषजावतꣳ शुक्रं न ज्योतिः स्तनयोराहुती धत्त इन्द्रियꣳ, वसुवने वसुधेयस्य वीताꣳ, यज देवा देवाना भिषजा होतारा इन्द्रमश्विना वषट्कारैः सरस्वती त्विषिं न हृदये मतिꣳ होतृभ्यां दधुरिन्द्रियꣳ, वसुवने वसुधेयस्य वीताꣳ, यज देवीस्तिस्रः,—स्तिस्रो देवीरश्विनेडा सरस्वती शूषं न मध्ये नाभ्या इन्द्राय दधुरिन्द्रियꣳ, वसुवने वसुधेयस्य व्यन्तु, यज देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथो, रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि, वसु-

[पुत्रमिव पितरा० । ऋ. १०,१३१,५; अथर्व. २०,१२५,५; तै. ब्रा. १,४,२,१ । अहाव्यग्ने हविरास्ये० । ऋ. १०,९१,१५; तै. ब्रा. १,४,२,१ । यस्मिन्नश्वास० । ऋ. १०,९१,१४; तै. ब्रा. १,४,२,२]
[५] वा. २१,४८—५८; २८,१५—१६,१८—२१,३८—३९,४१,४४—४५ । काण्व. २३,४७—५७; ३०,१५—१६,१८—२१,३८—३९,४१,४४—४५ । तै. ब्रा. २,६,१४ ।

वने वसुधेयस्य वेतु, यज देवाँ देवैर्वनस्पतिर्हिरण्यपर्णो अश्विभ्या२ सरस्वत्या सुपिप्पल इन्द्राय
पच्यते मध्वोजो न मूर्तिवृषभो न भाम२, वनस्पतिर्नो दधदिन्द्रियाणि, वसुवने वसुधेयस्य वेतु,
यज देवं बर्हिर्वारितीनामध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या स्योनमिन्द्र ते सद ईशाया मन्यु२
राजानं बर्हिषा दधुरिन्द्रियं२, वसुवने वसुधेयस्य वेतु, यज देवो अग्निः स्विष्टकृद्देवान्यक्षद्य-
थायथ२ होतारा इन्द्रमश्विना वाचा वाच२ सरस्वतीमग्नि२ सोम२ स्विष्टकृत्स्विष्ट इन्द्रः सुत्रामा
सविता वरुणो भिषग्,—इष्टो देवो वनस्पतिः, स्विष्टा देवा आज्यपाः, स्विष्टो अग्निरग्निना
होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिं२ स्वधां२, वसुवने वसुधेयस्य वेतु,
यज ॥ ५ ॥ ३८

सोमो राजामृत२ सुत ओषधीनामपा२ रसः ।
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ३९
अद्भ्यः क्षीरं२ व्यपिबत् क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४०
अद्भ्यः सोम२ व्यपिबच्छन्दोभिर्ह२सः शुचिषत् ।
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४१
अन्नात्परिस्रुतो रस ब्रह्मणा क्षत्र२ व्यपिबत् ।
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४२
रेतो मूत्र२ विजहाति योनिं प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृत उल्वं जहाति जन्मना ॥ ४३
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४४
दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।
अश्रद्धामनृतेऽदधाच्छ्रद्धा२ सत्ये प्रजापतिः ॥ ४५
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४६

[६] काठ. ३८,१ । वा. १९,७२—७९ । काण्व. २१,७२—७९ । तै. ब्रा. २,६,२ ।

वेदेन रूपे व्यपिबत् सुतासुतौ प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ४७
दृष्ट्वा परिस्रुतो रस२ शुक्रेण शुक्र२ व्यपिबत् पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं२ विपान२ शुक्रमन्धसः । इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥ ६ ॥ ४८
परीतो षिञ्चता सुत२ सोमो य उत्तम२ हविः ।
दधन्वाँ यो नर्यो अ३प्स्वन्तरा सुषाव सोममद्रिभिः ॥ ४९
सोमोऽस्यश्विभ्यां पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥ ५०
पुनातु ते परिस्रुत२ सोम२ सूर्यस्य दुहिता । वारेण शश्वता तना ॥ ५१
वायुः पूतः पवित्रेण प्राङ् सोमो अतिद्रुतः । इन्द्रस्य युज्यः सखा ॥ ५२
वायोः पूतः पवित्रेण प्रत्यङ् सोमो अतिस्रुतः । इन्द्रस्य युज्यः सखा ॥ ५३
ब्रह्म क्षत्रं पवते तेज इन्द्रियं२ सुरायाः सोमः सुत आसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्न२ यजमानाय धेहि ॥ ५४
कुविदङ्ग, नाना हि वाम् ॥ ५५
या व्याघ्रं२ विषूचिकोभौ वृकं च रक्षति । श्येनं पतत्रिण२ सि२ह२ सेमं पात्व२हसः ॥ ५६
सुरावन्तं बर्हिषद२ सुवीर२ यज्ञ२ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमं दिवि देवतासु मदेमेन्द्र२ यजमानाः स्वर्काः ॥ ५७
यस्ते रसः संभृत ओषधीषु सोमस्य शुष्मः सुराया२ सुतस्य ।
तेन जिन्व यजमानं मदेन सरस्वतीमश्विना इन्द्रमग्निम् ॥ ५८
यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमं त२ शुक्रं मधुमन्तमिन्दु२ सोम२ राजानमिह भक्षयामि ॥ ५९

[७] काठ. ३८,२ । वा. १९,२—७,१०,३२—३५;६,४;१०,३१—३२;१३,३३;२३,३८ । काण्व. २१,१—६,९, ३१—३५;६,५,११,४४—४५;१४,३५;२५,४० । तै. ब्रा. २,६,१,३ । [परीतो षिञ्चता० । ऋ. ९,१०७,१; सा. ५१२,१३१३; तै. ब्रा. २,६,१,१ । पुनातु (०नाति) ते परिस्रुतं० । ऋ. ९,१,६; तै. सं. १.८,२१,१; तै. ब्रा. २,६,१,२ । वायुः (०योः) पूतः पवित्रेण० । अथर्व. ६,५१,१ । इन्द्रस्य युज्यः सखा । ऋ. १, २२,१९; सा. १६७१; अथर्व. ६,५१,१;७,२६,६; तै. सं. १,३,६,२। कुविदङ्ग यवमन्तो०। ऋ. १०,१३१,२; अथर्व. २०,१२५,२; तै. सं. १,८,२१,१;५,२,११,२; तै. ब्रा. २,६,१,३]

यदत्र शिष्ट२ रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः ।
अहं तदस्य मनसा शिवेन सोम२ राजानमिह भक्षयामि ॥ ७ ॥ ६०
देवस्य त्वा सवितुः प्रस३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ ६१
सर्वा देवा एकादश त्रयस्त्रि२शाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे देवा देवैरवन्तु त्वा ॥ ६२
प्रथमास्त्वा द्वितीयैरभिषिञ्चन्तु, द्वितीयास्त्वा तृतीयै,—स्तृतीयास्त्वा सत्येन, सत्यं त्वा
ब्रह्मणा, ब्रह्म त्वा यजुर्भि,—र्यजू२षि त्वा सामभिः, सामानि त्वा ऋग्भि,—र्ऋचस्त्वा
पुरोनुवाक्याभिः, पुरोनुवाक्यास्त्वा याज्याभि,—र्याज्यास्त्वा वषट्कारै,—र्वषट्कारास्त्वाहुतिभि-
रभिषिञ्चन्त्वा,—हुतयस्ते कामान्समर्धयन्तु,—सा अश्विनोस्त्वा तेजसा ब्रह्मवर्चसायाभिषि-
ञ्चामि, सरस्वत्यास्त्वा वीर्येण यशसेऽन्नाद्यायाभिषिञ्चामी,—न्द्रस्य त्वेन्द्रियेणौजसे बलायाभि-
षिञ्चामि, भूः स्वाहा ॥ ६३
शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणो अमृत२ सम्राट् चक्षुर्विराट् श्रोत्रम् ॥ ६४
जिह्वा मे भद्र२ वाङ्महो मनो मन्युः स्वराड् भामः ।
मोदाः प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सहः ॥ ६५
बाहू मे बलमिन्द्रियं२ हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥ ६६
पृष्टीर्मे राष्ट्रमुदरम२सौ ग्रीवाश्च श्रोणी ।
ऊरू अरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥ ६७
नाभिर्मे चित्त२ विज्ञानं पायुर्मेऽपचितिर्भसत् ।
आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ॥ ६८
लोमानि प्रयतिर्मम त्वङ् म आनतिरागतिः ।
मा२सं म उपनतिर्वस्वस्थि मज्जा म आनतिः ॥ ६९
जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ।
प्रति ब्रह्मन् प्रतितिष्ठामि क्षत्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ॥ ७०

[८] काठ. ३८,४ । वा. २०,३,५—१३ । काण्व. २१,९३—९४,९६-१०६ । तै. ब्रा. २,६,५ ।
[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२]

प्रति प्रजायां प्रतितिष्ठामि पुष्टे, प्रति प्राणेषु प्रतितिष्ठाम्यात्मन्, द्यावापृथिव्योः प्रति-
तिष्ठामि यज्ञे ॥ ८ ॥ ७१
सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञ२ सविता सरस्वतीन्द्रस्य रूप२ वरुणो भिषज्यन् ॥ ७२
तदस्य रूपममृत२ शचीभिस्तिस्रो दधुर्देवताः स२रराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मा२समभवन्न लाजाः ॥ ७३
तदश्विना भिषजा रुद्रवर्तनी सरस्वती वयति पेशो अन्तरम् ।
अस्थि मज्जानं मासरं कारोतरेण दधतो गवां त्वचि ॥ ७४
सरस्वती मनसा पेशल२ वसु नासत्याभ्या२ वयति दर्शत२ वपुः ।
रस परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥ ७५
पयसः शुक्रममृतं जनित्र२ सुराया मूत्राज्जनयन्त रेतः ।
अपामतिं दुर्मतिं बाधमाना ऊवध्य२ वातात्स३व्व्रं तदारात् ॥ ७६
इन्द्रः सुत्रामा हृदयेन सत्यं पुरोडाशेन सविता जजान ।
यकृत् क्लोमान२ वरुणो भिषज्यन्मतस्ने वायव्यैर्न मिनाति पित्तम् ॥ ७७
आन्त्राणि स्थालीर्मधु पिन्वमाना गुदाः पात्राणि सुदुघा न धेनुः ।
श्येनस्य पत्रं न प्लीहा शचीभिरासन्दी नाभिरुदरं न माता ॥ ७८
कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः ।
प्लाशिर्व्यक्तः शतधार उत्सो दुह्रे न कुम्भी स्वधां पितृभ्यः ॥ ७९
मुख२ सदस्य शिर इत्सतेन जिह्वा पवित्रमश्विनासन्त्सरस्वती ।
चप्यं न पायुर्भिषगस्य वालो वस्तिर्न शेपो हरसा तरस्वी ॥ ८०
अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां छागेन तेजो हविषा घृतेन ।
पक्ष्माणि गोधूमैः कुवलैरुतानि पेशो न शुक्रमसित२ वसाते ॥ ८१
अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतं ग्रहाभ्याम् ।
सरस्वत्युपवाकैर्व्यानं नस्यानि बर्हिर्बदरैर्जजान ॥ ८२
इन्द्रस्य रूपमृषभो बलाय कर्णाभ्या२ श्रोत्रममृतं ग्रहाभ्याम् ।
यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखे ॥ ८३

[९] काठ. ३८,३ । वा. १९,८०—९५ । काण्व. २१,७७—९२ । तै. ब्रा. २,६,४ ।

आत्मन्नुपस्थे न वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोम ।
केशा न शीर्षन् यशसे श्रियै शिखा सिꣳहस्य लोम त्विषिरिन्द्रियाणि ॥ ८४
अङ्गैरात्मानं भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपꣳ शतमानमायुः शुक्रं न ज्योतिरमृतं दधाना ॥ ८५
सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं बिभर्ति ।
अपाꣳ रसेन वरुणो न साम्नेन्द्रꣳ श्रियै जनयन्नप्सु राजा ॥ ८६
तेजः पशूनाꣳ हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वती सुतासुताभ्याममृतः सोम इन्दुः ॥ ९ ॥ ८७
पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः ।
पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ८८
पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ।
पवित्रेण शतायुषा सर्वमायुर्व्यश्नवै ॥ ८९
अग्न आयूꣳषि पवसे ॥ ९०
पवमानः ३स्वर्जनः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ ९१
पुनन्तु मा देवजनाः पुनन्तु मनवो धिया ।
पुनन्तु विश्वा भूता मा जातवेदः पुनाहि मा ॥ ९२
पवमानः पुनातु मा क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥ ९३
उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनाहि विश्वतः ॥ ९४
पवित्रेण पुनाहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूꣳरनु ॥ ९५

[१०] काठ. ३८,२,५ । वा. ३,४५,५४;१९,३७—४८;२०,१४-१८,२०,२३;६,२२;१२,९०;३५,१६ । काण्व. ३,५३,६२;२१,३८—५०;२२,१-५,८;६,३०;१३,९१;३५,४८ । तै. ब्रा. २,६,३,६ । [अग्ना (०ग्न) आयूꣳषि० । ऋ. ९,६६,१९;सा. ६२७,१४६४,१५१८; तै. ब्रा. १,६,३,४; तै. आ. २,५,१; तै. सं. १,३,१४,७;४, २९,१;५,५,१;६,६,२ । पवमानः ३स्वर्जनः (सो अद्य०)...मा । ऋ. ९,६७,२२ । पुनन्तु मा (मां) देवजनाः० । ऋ. ९,६७,२७; तै. ब्रा. १,४,८,१;२,६,३,४ । पवमानः पुनातु० (आ त पतु०)। [आ न पतु० । वा. य. ३,५४] । ऋ. १०,५७,४; अथर्व. १,६,३;. तै. सं. १,८,५,२ । क्रत्वे दक्षाय जीवसे । अथर्व. ६,१९,२ । उभाभ्यां देव सवितः । ऋ. ९,६७,२५; अथर्व. ६,१९,३ ।]

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनीमहे ॥ ९६
वैश्वदेवी पुनती देव्यागाद्यस्या बह्वयस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु वयꣳ स्याम पतयो रयीणाम् ॥ ९७
वैश्वानरो रश्मिभिर्मा पुनातु वातः प्राणेनेषिरो मयोभूः ।
द्यावापृथिवी पयसा पयोभिर्ऋतावरी यज्ञिये मा पुनीताम् ॥ ९८
बृहद्भिः सवितस्तिभिर्वर्षिष्ठैर्देव मन्मभिः । अग्ने दक्षैः पुनीमहे ॥ ९९
ये समानाः समनसः पितरो यमराज्ये ।
तेषाꣳ लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥ १००
ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्मयि कल्पतामस्मिंल्लोके शतꣳ समाः ॥ १०१
द्वे सृती ॥ १०२
इदꣳ हविः प्रजननं मे अस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये ।
आत्मसनि प्रजासनि क्षेत्रसनि पशुसनि लोकसन्यभयसनि ॥ १०३
अग्निः प्रजां बहुलां मे कृणोत्वन्नं पयो रेतो अस्मासु धेहि ॥ १०४
यद्देवा देवहेडनं देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ १०५
यदि स्वपन्यदि जाग्रदेनाꣳसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ १०६
यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ।
सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥ १०७
धाम्नो धाम्नो ॥ यद्रामे ॥ १०८-१०९
पवित्रमसि यज्ञस्य पवित्रꣳ यजमानस्य ।
तन्मा पुनातु सर्वतो विश्वस्माद्देवकिल्बिषात्सर्वस्माद्देवकिल्बिषात् ॥ ११०

[यत्ते पवित्रमर्चि० । ऋ. ९,६७,२३; तै. ब्रा. १,४,८,१ । वैश्वदेवी पुनती० । ऋ. परि. १९,२ । यद्देवा देवहेडनं० । अथर्व. ६,११४,१ । यदि (जाग्र०) स्वपन्यदि० । अथर्व. ६,११५,२ । यदि दिवा (०द्विद्वांसो)० । अथर्व. ६,११५,१ । धाम्नो धाम्नो० । अथर्व. ७,८३,२;१९,४४,९ । श्री. पू. अ. ३, खं. ६]

द्रुपदादिवेन्मुमुचानः स्विन्नः स्नात्वी मलादिव ।
पूतं पवित्रेणेवाज्यꣳ विश्वे मुञ्चन्तु मैनसः ॥ १११
समावृतत् पृथिवी समुषाः समु सूर्यः ।
वैश्वानरज्योतिर्भूयासꣳ विभुं कामꣳ व्यशीय भूः स्वाहा ॥ १० ॥ ११२
समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः । गायत्री छन्द इन्द्रियं त्र्यविर्गौर्वयो दधुः ॥ ११३
तनूनपाच्छुचिव्रतस्तनूपाश्च सरस्वती ।
उष्णिक् छन्द इन्द्रियं दित्यवाड् गौर्वयो दधुः ॥ ११४
इडाभिरग्निरीड्यः सोमो देवो अमर्त्यः । अनुष्टुप् छन्द इन्द्रियं पञ्चाविर्गौर्वयो दधुः ॥ ११५
सुबर्हिरग्निः पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः ।
बृहती छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधुः ॥ ११६
दुरो देवीर्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ।
पङ्क्तिश्छन्द इन्द्रियं तुर्यवाड् गौर्वयो दधुः ॥ ११७
उषे यह्वी सुपेशसा विश्वे देवा अमर्त्याः ।
त्रिष्टुप् छन्द इन्द्रियं पृष्ठवाड् गौर्वयो दधुः ॥ ११८
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा । जगती छन्द इन्द्रियमनड्वान् गौर्वयो दधुः ॥
तिस्रो देवीरिडा मही भारती मरुतो विशः । विराट् छन्द इन्द्रियं धेनुर्गौर्न वयो दधुः ॥
त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना । द्विपदा छन्द इन्द्रियमुक्षा गौर्न वयो दधुः ॥
शमिता नो वनस्पतिः सविता प्रसुवन् भगम् । ककुप्छन्द इहेन्द्रियमृषभो गौर्वयो दधुः ॥
स्वाहा यज्ञꣳ वरुणः सुक्षत्रो भेषजं करत् । ११९-१२३
अतिछन्दा इन्द्रियं बृहद्वशा वेहद्वयो दधुः ॥ ११ ॥
वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुतम् । रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥
ग्रीष्मेण ऋतुना देवा रुद्राः पञ्चदशे स्तुतम् । बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥
वर्षाभिर्ऋतुनादित्याः स्तोमे सप्तदशे स्तुतम् । १२४-१२६
वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥

[द्रुपदादिवेन्मुमुचानः (०दिव०) । अथर्व. ६,११५,३]
[११] काठ. ३८,१० । वा. २१,१२—२२ । काण्व. २३,१३—२३ । तै. ब्रा. २,६,१८ ।
[१२] वा. २१,२३—२८ । काण्व. २३,२४—२९ । तै. ब्रा. २,६,१९ ।

शारदेन ऋतुना देवा एकविꣳश ऋभवः स्तुतम् ।
वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥ १२७
हेमन्तेन ऋतुना देवास्त्रिणवे मरुतः स्तुतम् । बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥
शैशिरेण ऋतुना देवास्त्रयस्त्रिꣳशेऽमृतꣳ स्तुतम् ।
सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥ १२ ॥ १२८-१२९
[१७८१]

॥ इत्युपरिष्टाण्डे सौत्रामणीयो नाम एकादशः प्रपाठकः ॥ ११ ॥

अथ द्वादशः प्रपाठकः ।

अश्वमेधः ।

इमामगृभ्णन् रशनामृतस्य पूर्वा आयुनि विदथेषु कव्या ।
सा नो अस्मिन्त्सुत आबभूव ऋतस्य सामन्त्सरमारपन्ती ॥ १
अभिधा असि, भुवनमसि, यन्तासि धर्ता, स त्वमग्निं वैश्वानरꣳ सप्रथसं गच्छ स्वाहा-
कृतः, स्वगा त्वा देवेभ्यः प्रजापतये ब्रह्मन्नश्वं भन्त्स्यामि, देवेभ्यः प्रजापतये, तेन
राध्यासं, तं बधान, देवेभ्यः प्रजापतये, तेन राध्नुहि, प्रजापतये त्वा जुष्टं प्रोक्षामि,
वायवे त्वा जुष्टं प्रोक्षामीन्द्रा,—ऽग्निभ्यां त्वा जुष्टं प्रोक्षामि, विश्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि,
सर्वेभ्यस्त्वा देवेभ्यो जुष्टं प्रोक्षामि ॥ २
यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः । परो मर्तः परः श्वा ॥ १ ॥ ३
अग्नये स्वाहा, सोमाय स्वाहा, ऽपां मोदाय स्वाहा, वायवे स्वाहा, सवित्रे स्वाहा,
त्वष्ट्रे स्वाहा, बृहस्पतये स्वाहे,—न्द्राय स्वाहा, मित्राय स्वाहा, वरुणाय स्वाहा ॥२॥ ४
हिंकाराय स्वाहा, हिंकृताय स्वाहा, क्रन्दते स्वाहा,—ऽवक्रन्दाय स्वाहा, प्रोथते स्वाहा,
प्रप्रोथाय स्वाहा, गन्धाय स्वाहा, घ्राताय स्वाहा, निविष्टाय स्वाहो,—पविष्टाय स्वाहा,

[१] तै. ७,१,११ । काठ. . ५,१,२; ५,४,४ । वा. २२,२—५ । काण्व. २४,२—५ ।
[२] तै. ७,१,१४ । काठ. ५,१,५ । वा. २०,५;२२,६,२७;३९,१ । काण्व. ११,१२;२४,६,३७;३९,१ । [अग्नये स्वाहा । अथर्व. १९,४३,१ । सोमाय स्वाहा । अथर्व. १९,४३,५ । वायवे स्वाहा । अथर्व. १९,४३,२ । इन्द्राय स्वाहा । अथर्व. १९,४३,६]
[३] तै. ७,१,१३;१९ । काठ. ५,१,१०,४ । वा. २२,७-८ । काण्व. २४,७—१२ ।

संहिताय स्वाहा, वल्गते स्वाहा, ऽऽसीनाय स्वाहा, शयानाय स्वाहा, स्वपते स्वाहा,
जाग्रते स्वाहा, कूजते स्वाहा, प्रबुद्धाय स्वाहा, विचृताय स्वाहा, विजृम्भमाणाय स्वाहा,
जवाय स्वाहा, बलाय स्वाहा, ऽयनाय स्वाहा, प्रायणाय स्वाहा, यते स्वाहा, धावते
स्वाहो,—द्द्रावाय स्वाहो,—द्द्रुताय स्वाहा, शूकाराय स्वाहा, शूकृताय स्वाहो,—पस्थिताय
स्वाहा, सꣳस्थानाय स्वाहा, निषण्णाय स्वाहो,—त्थिताय स्वाहा, विष्ठिताय स्वाहा,
विवर्तमानाय स्वाहा, विवृत्ताय स्वाहा, विधून्वानाय स्वाहा, विधूताय स्वाहा, शृण्वते
स्वाहा, शुश्रूषमाणाय स्वाहे,—क्षिताय स्वाहा, वीक्षिताय स्वाहा, वीक्षमाणाय स्वाहा,
निमेषाय स्वाहा, यदत्ति तस्मै स्वाहा, यत् पिबति तस्मै स्वाहा, यन्मेहति तस्मै स्वाहा,
कुर्वते स्वाहा, कृताय स्वाहा ॥ ३ ॥ ५

विभूर्मात्रा, प्रभूः पित्रा,—ऽश्वोऽसि, हयोऽस्य,—त्योऽसि, मयोऽसि, नरोऽस्य,—र्वासि,
सप्तिरसि, वाज्यसि, वृषासि, नृमणा असि, ययुर्नामास्या,—दित्यानां पत्वान्विहि,
देवा आशापाला एतं देवेभ्यो अश्वं मेधाय प्रोक्षितꣳ रक्षते,—ह धृति,—रिह स्वधृति,—रिह रम,
इह रमन्ताम् ॥ ४ ॥ ६

काय स्वाहा, कस्मै स्वाहा, कतमस्मै स्वाहा, सवित्रे स्वाहा, सवित्रे प्रसवित्रे स्वाहा,
सवित्र आसवित्रे स्वाहा, ऽदित्यै स्वाहा, ऽदित्यै मह्यै स्वाहा, ऽदित्यै सुमृडीकायै स्वाहा,
सरस्वत्यै स्वाहा, सरस्वत्यै बृहत्यै स्वाहा, सरस्वत्यै पावकायै स्वाहा, पूष्णे स्वाहा,
पूष्णे प्रपथ्याय स्वाहा, पूष्णे नरंधिषाय स्वाहा, त्वष्ट्रे स्वाहा, त्वष्ट्रे तुरीपाय स्वाहा,
त्वष्ट्रे पुरुरूपाय स्वाहा, विष्णवे स्वाहा, विष्णवे शिपिविष्टाय स्वाहा, विष्णवे निभूयपाय
स्वाहा ॥ ५ ॥ ७

आ ब्रह्मन् ब्राह्मणस्तेजस्वी ब्रह्मवर्चसी जायता,—मा राष्ट्रे राजन्यः शूर इषव्यो महारथो
जायतां, दोग्ध्री धेनु,—र्वोढानड्वा,—नाशुः सप्तिः, सभेयो युवा, पुरंधिर्योषा, जिष्णू
रथेष्ठा अस्य यजमानस्य वीरो जायतां, निकामे निकामे नः पर्जन्यो वर्षतु, फलवतीर्न
ओषधयः पच्यन्ताꣳ, योगक्षेमो नः कल्पताम् ॥ ६ ॥ ८

[४] तै. ७,१,१२ । काठ. ५,१,३ । वा. २२,१९ । काण्व. २४,२४-२५ ।
[५] काठ. ५,३,५ । वा. २२,२० । काण्व. २४,२६-२८ । मा. श्री. ९,२,२ ।
[६] तै. ७,५,१८ । काठ. ५,५,१४ । वा. २२,२२ । काण्व. २४,३०-३२ ।

अग्नये स्वाहा, सोमाय स्वाहे,—न्द्राय स्वाहा, पृथिव्यै स्वाहा, ऽन्तरिक्षाय स्वाहा, दिवे
स्वाहा, दिग्भ्यः स्वाहा, ऽऽशाभ्यः स्वाहो,—र्व्यै दिशे स्वाहा, प्राच्यै दिशे स्वाहा,
नक्षत्रेभ्यः स्वाहा, नक्षत्रियेभ्यः स्वाहा, ऽहोरात्रेभ्यः स्वाहा, ऽर्धमासेभ्यः स्वाहा, मासेभ्यः
स्वाहा, ऋतुभ्यः स्वाहा, ऽऽर्तवेभ्यः स्वाहा, सꣳवत्सराय स्वाहा, द्यावापृथिवीभ्याꣳ स्वाहा,
चन्द्रमसे स्वाहा, सूर्याय स्वाहा, रश्मिभ्यः स्वाहा, वसुभ्यः स्वाहा, रुद्रेभ्यः स्वाहा,
ऽऽदित्येभ्यः स्वाहा, मरुद्भ्यः स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, मूलेभ्यः स्वाहा, शाखाभ्यः
स्वाहा, वनस्पतिभ्यः स्वाहा, पुष्पेभ्यः स्वाहा, फलेभ्यः स्वाहौ, षधीभ्यः स्वाहा ॥ ७ ॥ ९
प्राच्यै दिशे स्वाहा, ऽर्वाच्यै दिशे स्वाहा, दक्षिणायै दिशे स्वाहा, ऽर्वाच्यै दिशे स्वाहा,
प्रतीच्यै दिशे स्वाहा, ऽर्वाच्यै दिशे स्वाहो,—दीच्यै दिशे स्वाहा, ऽर्वाच्यै दिशे स्वाहो,—र्ध्वायै
दिशे स्वाहा, ऽर्वाच्यै दिशे स्वाहा ॥ ८ ॥ १०
आयुषे स्वाहा, प्राणाय स्वाहा, ऽपानाय स्वाहा, व्यानाय स्वाहा, समानाय स्वाहो,—
दानाय स्वाहा, चक्षुषे स्वाहा, श्रोत्राय स्वाहा, मनसे स्वाहा, वाचे स्वाहा ॥ ९ ॥ ११
पृथिव्यै स्वाहा, ऽन्तरिक्षाय स्वाहा, दिवे स्वाहा, सूर्याय स्वाहा, चन्द्रमसे स्वाहा,
नक्षत्रेभ्यः स्वाहा, ऽद्भ्यः स्वाहौ,—षधीभ्यः स्वाहा, वनस्पतिभ्यः स्वाहा, परिप्लवेभ्यः
स्वाहा, सरीसृपेभ्यः स्वाहा, चराचरेभ्यः स्वाहा ॥ १० ॥ १२
अंशवे स्वाहा, वसवे स्वाहा, विभ्वे स्वाहा, विवस्वते स्वाहा, गणश्रिये स्वाहा, गण-
पतये स्वाहा, ऽभिषाहे स्वाहा, ऽभिभ्वे स्वाहा, ऽधिपतये स्वाहा, शूषाय स्वाहा, सꣳसर्पाय
स्वाहा, चन्द्राय स्वाहा, ज्योतिषे स्वाहा, मलिम्लुचाय स्वाहा ॥ ११ ॥ १३

[७] तै. ७,१,१५; ७,३,१९—२० । काठ. ५,१,५—६;५,३,९—१० । वा. २२,६,२४,२७-२९;१०,५;३९,१—२; काण्व. २४,६,३४,३७-४१,४३;११,१२;३९,१। [अग्नये स्वाहा । अथर्व. १९,४३,१। सोमाय स्वाहा । अथर्व. १९,४३,५ । इन्द्राय स्वाहा । अथर्व. १९,४३,६ । पृथिव्यै स्वाहा । अथर्व ५,९,२,६ । अन्तरिक्षाय स्वाहा । अथर्व. ५,९,३—४ । दिवे स्वाहा । अथर्व. ५,९,१;५ । चन्द्रमसे (चन्द्राय) स्वाहा । अथर्व १९,४३,४ । सूर्याय स्वाहा । अथर्व. १९,४३,३]
[८] तै. ७,१,१५ । काठ. ५,१,६ । वा. २२,२४ । काण्व. २४,३४ ।
[९] तै. ७,१,१९ । काठ. ५,४,१० । वा. २२,२३,२३,१८;३९,३ । काण्व. २४,३३;२५,२०;३९,२ ।
[१०] तै. ७,१,१७ । वा. २२,२९ । काण्व. २४,४१ । [पृथिव्यै स्वाहा । अथर्व. ५,९,२;६ । अन्तरिक्षाय स्वाहा; दिवे स्वाहा । अथर्व. ५,९,३—४ । सूर्याय स्वाहा । अथर्व. १९,४३,३ । चन्द्रमसे (चन्द्राय०) स्वाहा । अथर्व. १९,४३,४]
[११] वा. २२,२८-३०;३९,२ । काण्व. २४,३९,४१,४३;३९,१ । [चन्द्राय स्वाहा । अथर्व. १९,४३,४]

धर्णसाय स्वाहा, द्रविणाय स्वाहा, प्रस्रवाय स्वाहो,—द्यामाय स्वाहा, सिन्धवे
स्वाहा, समुद्राय स्वाहा, काटाय स्वाहा, ऽर्णवाय स्वाहा, सरस्वत्यै स्वाहा, विश्वव्यचसे
स्वाहा, सुभूताय स्वाहा, ऽन्तरिक्षाय स्वाहा ॥ १२ ॥ १४
मधवे स्वाहा, माधवाय स्वाहा, शुक्राय स्वाहा, शुचये स्वाहा, नभसे स्वाहा,
नभस्याय स्वाहे,—षाय स्वाहो,—र्जाय स्वाहा, सहसे स्वाहा, सहस्याय स्वाहा, तपसे
स्वाहा, तपस्याय स्वाहा, सꣳसर्पोऽस्यꣳहस्पत्याय स्वाहा ॥ १३ ॥ १५
संवयसे स्वाहा, ऽभिवयसे स्वाहो,—र्ध्ववयसे स्वाहा, बृहद्वयसे स्वाहा, महीयसे स्वाहा,
सहमानाय स्वाहा, सासहये स्वाहा, सहस्वते स्वाहा, ऽभीषाहे स्वाहा, ऽभिभ्वे स्वाहा,
ऽभिमातिषाहे स्वाहा, ऽभिमातिघ्ने स्वाहा ॥ १४ ॥ १६
एकस्मै स्वाहा, द्वाभ्याꣳ स्वाहै,—कान्नशताय स्वाहा, शताय स्वाहै,—कशताय स्वाहा,
व्युष्ट्यै स्वाहा, स्वर्गाय स्वाहा ॥ १५ ॥ १७

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १८
उपयामगृहीतोऽसि, प्रजापतये त्वा जुष्टं गृह्णाम्ये,—ष ते योनिः, सूर्यस्ते महिमा ॥
॥ १६ ॥ १९
यः प्राणतो निमिषतश्च राजा पतिर्विश्वस्य जगतो बभूव ।
ईशे यो अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ २०
उपयामगृहीतोऽसि, प्रजापतये त्वा जुष्टं गृह्णाम्ये,—ष ते योनि,—श्चन्द्रमास्ते महिमा ॥
॥ १७ ॥ २१

[१२] तै. ७,४,१३ । वा. २२,२५ । काण्व. २४,३५ ।
[१३] वा. २२,३१ । काण्व. २४,४४ ।
[१४] वा. २२,३३ । काण्व. २४,४७ ।
[१६] तै. ७,५,१६ । काठ. ५,५,११ । वा. २३,१—२; १३,४; २५,१० । काण्व. २५,१-२; १४,४; २७,१४ । मा. श्री. ९,२,३ । [हिरण्यगर्भः सम०...विधेम । ऋ. १०,१२१,१; अथर्व. ४,२,७; (११,५,१)]
[१७] तै. ७,५,१६ । काठ. ५,५,१३ । वा. २३,३—४; २५,११ । काण्व. २५,३—४; २७,१५ । [यः प्राणतो०... विधेम । ऋ. १०,१२१,३; अथर्व. ४,२,१-२]

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ २२
यद्वातोऽपो अगनीगन् प्रियामिन्द्रस्य तन्वम् ।
एतꣳ स्तोतरनेन पथा पुनरश्वमावर्तयासि नः ॥ १८ ॥ २३
वसवस्त्वाञ्जन्तु गायत्रेण छन्दसा, रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन छन्दसा, ऽऽदित्यास्त्वाञ्जन्तु
जागतेन छन्दसा, भूर्भुवः स्व,—र्लाजी३ शाची३ यव्ये गव्य, एतदन्नमत्त देवा,
एतदन्नमद्धि प्रजापते ॥ २४
कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजं किमावपनं महत् ॥ २५
सूर्य एकाकी चरति चन्द्रमा जायते पुनः । अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥ २६
का स्विदासीत् पूर्वचित्तिः किꣳ स्विदासीद् बृहद्वयः ।
का स्विदासीत् पिलिप्पिला का स्विदासीत् पिशङ्गिला ॥ २७
द्यौरासीत् पूर्वचित्तिरश्व आसीद् बृहद्वयः ।
अविरासीत् पिलिप्पिला रात्रिरासीत् पिशङ्गिला ॥ १९ ॥ २८
प्राणाय स्वाहा, ऽपानाय स्वाहा, व्यानाय स्वाहा ॥ २९
अम्बम्बिके अम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥ ३०
गणानां त्वा गणपतिꣳ हवामहे, प्रियाणां त्वा प्रियपतिꣳ हवामहे, निधीनां त्वा निधि-
पतिꣳ हवामहे वसो मम,—ऽऽहमजानि गर्भधमा,—त्वमजासि गर्भधम् ॥ ३१
तौ सह चतुरः पदः संप्रसारयावः स्वर्गे लोके प्रोर्णुवाताꣳ, वृषा वाजी रेतोधा रेतो दधातु
॥ २० ॥ ३२
गायत्री त्रिष्टुब् जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहा ककुब् देवानां पत्नयो विशः सूचीभिः शमयन्तु त्वा ॥ ३३

[१८] तै. ७,४,२० । वा. २३,५,७ । काण्व. २५,५,७ । मा. श्री. ९,२,४;३ । [युञ्जन्ति ब्रध्नमरुषं०...दिवि । ऋ. १,६,१; साम. १४६८; अथर्व. २०,२६,४;४७,१०;६९,९; तै. सं. ७,४,२०,१]
[१९] तै. ७,४,२०;१८ । काठ. ५,४,९;७ । वा. २३,८—१२ । काण्व. २५,८—१३ । [कः स्विदेकाकी०... महत् । आ. सं. १०,९ । सूर्य एकाकी० ...महत् । आ. सं. १०,९,]
[२०] तै. ७,४,१९ । काठ. ५,४,८ । वा. २३,१८—२० । काण्व. २५,२०-२२ । मा. श्री. ९,२,४ । [गणानां त्वा गणपतिꣳ हवामहे । ऋ. २,२३,१]
[२१] तै. ५,२,११ । काठ. ५,१०,५ । वा. २३,३३—३८;१०,३२;१९,६। काण्व. २५,३५—४०;११,८५;२१,५।

द्विपदा याश्चतुष्पदा त्रिपदा याश्च षट्पदा ।
विछन्दा याश्च सछन्दाः सूचीभिः शमयन्तु त्वा ॥ ३४
रजता: सीसा हरिणीर्युजो युञ्जन्तु कर्मभिः ।
अश्वस्य वाजिनस्त्वचि स्मिमाः कृण्वन्तु शम्यन्तीः ॥ ३५
महानाम्नी रेवतयो दिव्या आशाः प्रस्वरीः ।
मेघ्या विद्युतो वाचः सूचीभिः शमयन्तु त्वा ॥ ३६
योपास्ते पत्नयो लोम विचिन्वन्तु यथायथम् ।
सुपत्नीः पत्नयो वाजिन् प्रजया भक्षीमहि ॥ ३७
कुविदङ्ग ॥ २१ ॥ ३८

[१८१९]

॥ इत्युपरिकाण्डे द्वादशः प्रपाठकः ॥ १२ ॥

अथ त्रयोदशः प्रपाठकः।

ऊर्ध्वामेनामुच्छ्रापय गिरौ भारं हरन्निव ।
अथास्या मध्यमेधतां शीते वाते पुनन्निव ॥ १
यासकौ शकुन्तिकाहलगिति वञ्चति । आहतं पसो निचल्चलीति ॥ २
माता च ते पिता च तेऽग्रं वृक्षस्य रोहतः । प्रतिलामीति ते पिता ॥ ३
यद्धरिणो यवमत्ति न पुष्टं पशु मन्यते । शूद्रा यदर्यजारा न पोषाय धनायति ॥ ४
दधिक्राव्णो अकारिषम् ॥ १ ॥ ५

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः, कृष्णग्रीव आग्नेयो ललाटे पुरस्तात्, सारस्वती मेष्य-
धस्ताद्धन्वोः, श्यामः पौष्णो नाभ्या,—माश्विनावधोरामौ बाह्वो,—स्त्वाष्ट्रौ लोमशसक्थौ
सक्थ्योः, सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयो,—र्वायव्यः श्वेतः पुच्छ, इन्द्राय स्वपस्याय
वेहद्, वैष्णवो वामनः ॥ २ ॥ ६

[कुविदङ्ग यवमन्तो० । ऋ. १०,१३१,२, अथर्व. २०,१२५,२]
[१] तै. ७,४,१९ । वा. २३,२२—२७,३०—३२ । काण्व. २५,१४–२९,३२—३४ । [दधिक्राव्णो अकारिषम्। ऋ. ४,३९,६; साम. ३५८, अथर्व. २०.१३७,३ । तै. सं. १,५,११,४,७,४,१९,४; ताण्ड्य ब्रा. १,६,१७]
[२] तै. ५,५,२२—२३ । काठ. ५,८,२ । वा. २४,१ । काण्व. २६,१—३ । मा. श्रौ. ९,२,४ ।

बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणा, रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्याः,
शितिबाहुरन्यतः शितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः, शितिरन्ध्रोऽन्यतः शितिरन्ध्रः
समन्तशितिरन्ध्रस्ते सावित्राः, पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥ ३ ॥ ७
शुद्धवालः सर्वशुद्धवालो मणिवालस्त आश्विनाः, श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये,
कर्णा यामा, अवलिप्ता रौद्रा, नभोरूपाः पार्जन्याः ॥ ४ ॥ ८
पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः, फल्गूर्लोहितोर्णी बलक्षी ताः सारस्वत्यः,
प्लीहाकर्णः शुण्ठाकर्णोऽधिरूढाकर्णस्ते त्वाष्ट्राः, कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः,
कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्त उषस्याः ॥ ५ ॥ ९
शिल्पा वैश्वदेवी, रोहिणीस्त्र्यवयो वाचे, ऽविज्ञाता अदित्यै, सरूपा धात्रे, वत्सतर्यो
देवानां पत्नीभ्यः ॥ ६ ॥ १०
कृष्णग्रीवा आग्नेयाः, शितिभ्रवो वसूनां, रोहिता रुद्राणां, श्वेता अवरोकिण
आदित्यानां, नभोरूपाः पार्जन्याः ॥ ७ ॥ ११
उन्नतः शितिबाहुः शितिपृष्ठस्त ऐन्द्राबार्हस्पत्या, उन्नत ऋषभो वामनस्त ऐन्द्रावैष्णवाः,
शुकरूपा वाजिनाः कल्माषा आग्निमारुताः, श्यामाः पौष्णाः ॥ ८ ॥ १२
एता ऐन्द्राग्ना, द्विरूपा अग्नीषोमीया, वामना अनड्वाह आग्नावैष्णवा, अन्यतएन्यो मैत्री,
—र्वशा मैत्रावरुण्यः ॥ ९ ॥ १३
कृष्णग्रीवा आग्नेया, बभ्रवः सौम्याः, श्वेता वायव्या, अविज्ञाता अदित्यै,
सरूपा धात्रे, वत्सतर्यो देवानां पत्नीभ्यः ॥ १० ॥ १४
कृष्णा भौमा, धूम्रा आन्तरिक्षा, बृहन्तो दिव्याः, शबला वैद्युताः, सिध्मास्तारकाः ॥
॥ ११ ॥ १५

[३] तै. ५,६,११—१३ । काठ. ५,९,१—३ । वा. २४,२ । काण्व. २६,३—४ । मा. श्रौ. ९,२,४ ।
[४] तै. ५,६,१३;११;१५ । काठ. ५,९,३ । वा. २४,३ । काण्व. २६,५-६ ।
[५] तै. ५,६,१२;१६ । काठ. ५,९,२,६ । वा. २४,४ । काण्व. २६,६-८ ।
[६] तै. ५,६,१३ । वा. २४,५ । काण्व. २६,९ ।
[७] वा. २४,६ । काण्व. २६,१० ।
[८] तै. ५,६,१४,३,१३,३ । वा. २४,७ । काण्व. २६,११ ।
[९] तै. ५,६,११-२३ । वा. २४,८ । काण्व. २६,१२ ।
[१०] तै. ५,६,११—२३ । वा. २४,९ । काण्व. २६,१३ ।
[११] तै. ५,६,११—२३ । वा. २४,१० । काण्व. २६, १४ ।

कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या, उपध्वस्ताः सावित्रा, वत्सतर्यः सारस्वत्यः,
श्यामाः पौष्णाः, पृश्नयो मारुताः, पिशङ्गा वैश्वदेवा, वशा द्यावापृथिवीयाः ॥ १२ ॥ १६
कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या, उपध्वस्ताः सावित्रा, वत्सतर्यः सारस्वत्यः,
श्यामाः पौष्णा, एता ऐन्द्राग्नाः, पृश्नयो मारुताः, कृष्णा वारुणाः, कायास्तूपराः ॥
१७
॥ १३ ॥
अग्नयेऽनीकवते प्रथमजानालभते, मरुद्भ्यः सांतपनेभ्यः सवात्यान्, मरुद्भ्यो गृहमेधिभ्यो
बष्किहान्, मरुद्भ्यः क्रीडिभ्यः संसृष्टान्, मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान् ॥ १४ ॥ १८
कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या, उपध्वस्ताः सावित्रा, वत्सतर्यः सारस्वत्यः,
श्यामाः पौष्णा, एता ऐन्द्राग्नाः, प्राशृङ्गा ऐन्द्रा, बहुरूपा वैश्वकर्मणाः ॥ १५ ॥ १९
कृष्णग्रीवा आग्नेया, बभ्रवः सौम्या, उपध्वस्ताः सावित्रा, वत्सतर्यः सारस्वत्यः,
श्यामाः पौष्णाः, श्वेता वायव्याः, प्राशृङ्गा ऐन्द्राः, सौर्याः श्वेताः ॥ १६ ॥ २०
तुर्यवाह
त्र्यवयो गायत्र्यै, पञ्चावयस्त्रिष्टुभे, दित्यवाहो जगत्यै, त्रिवत्सा अनुष्टुभे,
२१
उष्णिहे ॥ १७ ॥ अनड्वाहः
पष्ठवाहो विराज, उक्षाणो बृहत्या, ऋषभाः ककुभे, धेनवो जगत्या,
२२
पङ्क्त्यै ॥ १८ ॥ २३
धूम्रा वसन्ताय, श्वेता ग्रीष्माय, कृष्णा वर्षाभ्यः ॥ १९ ॥ २४
अरुणाः शरदे, पृषन्तो हेमन्ताय, पिशङ्गाः शिशिराय ॥ २० ॥

[१८४३]

॥ इत्युपरिकाण्डे त्रयोदशः प्रपाठकः ॥ १३ ॥

[१२] तै. ५,६,११—२३ । वा. २४,१४ । काण्व. २६,१८ ।
[१३] तै. ५,६,११—२३ । वा. २४,१५ । काण्व. २६,१९ ।
[१४] तै. ५,६,११-२३ । वा. २४,१६ काण्व. २६,२० ।
[१५] तै. ५,६,११—२३ । वा. २४,१७ । काण्व. २६,२१ ।
[१६] तै. ५,६,११-२३ । वा. २४,१४ । काण्व. २६,१८ ।
[१७] तै. ५,६,११—२३ । वा. २४,१२ । काण्व. २६,१६ ।
[१८] वा. २४,१३ । काण्व. २६,१७ ।
[१९] वा. २४,११ । काण्व. २६,१५ ।
[२०] वा. २४,११ । काण्व. २६,१५ ।

अथ चतुर्दशः प्रपाठकः ।

वसन्ताय कपिञ्जलानालभते, ग्रीष्माय कलविङ्कान्, वर्षाभ्यस्तित्तिरीन्, शरदे वर्तिका,
हेमन्ताय ककरान् ॥ १ ॥ १
समुद्राय शिशुमारानालभते, पर्जन्याय मण्डूका,—नद्भ्यो मत्स्यान्, मित्राय पुलीकयान्,
वरुणाय नाक्रान् ॥ २ ॥ २
सोमाय हंसानालभते, वायवे बलाका, इन्द्राग्निभ्यां कुञ्चान्, मित्राय मद्गून्,
वरुणाय चक्रवाकान् ॥ ३ ॥ ३
अग्नये कुटरूनालभते, वनस्पतय उलूका,—नग्नीषोमाभ्यां चाषा,—नश्विभ्यां मयूरान्,
मित्रावरुणाभ्यां कपोतान् ॥ ४ ॥ ४
सोमाय लबानालभते, त्वष्ट्रे कौलीकान् गोषादी,—र्देवानां पत्नीभ्यः पुलीका, अग्नये
गृहपतये पारुष्णान् ॥ ५ ॥ ५
अह्ने पारावतानालभते, रात्र्यै सीचापू,—रहः संधिभ्यां जतूः, संवत्सराय महतः सुप-
र्णान्, मासेभ्यो दात्यौहान् ॥ ६ ॥ ६
भूम्या आखूनालभते, ऽन्तरिक्षाय पाङ्क्त्रान्, दिवे कशान्, दिग्भ्यो नकुलान्,
बभ्रुकानवान्तरदिशाभ्यः ॥ ७ ॥ ७
प्रजापतये पुरुषान् हस्तिना आलभते, वाचे प्लुषीं,—श्चक्षुषे मशकान्, श्रोत्राय भृङ्गाः
॥ ८ ॥ ८
वसुभ्य ऋश्यानालभते, रुद्रेभ्यो रुरू,—नादित्येभ्यो न्यङ्कून्, विश्वेभ्यो देवेभ्यः पृषता,—
न्त्साध्येभ्यः कुलङ्गान् ॥ ९ ॥ ९

[१] तै. ५,५,११-२४ । काठ. ५,१०,४ । वा. २४,२० । काण्व. २६,२४ । मा. श्रौ ९,२,४ ।
[२] वा. २४,२१ । काण्व. २६,२५ ।
[३] वा. २४,२२ । काण्व. २६,२६ ।
[४] वा. २४,२३ । काण्व. २६,२७ ।
[५] वा. २४,२४ । काण्व. २६,२८ ।
[६] वा. २४,२५ । काण्व. २६,२९ ।
[७] वा. २४,२६ । काण्व. २६,३० ।
[८] वा. २४,२९ । काण्व. २६,३३ ।
[९] वा. २४,२७ । काण्व. २६,३१ ।

ईशानाय परस्वत आलभते, मित्राय गौरान्, वरुणाय महिषान्, बृहस्पतये गवयां२,
—स्त्वष्ट्र उष्ट्रान् ॥ १० ॥ १०
प्रजापतये च वायवे च गोमृगौ, वरुणायारण्यौ मेषौ, यमाय कृष्णो, मनुराजाय
मर्कटः, शार्दूलाय रोहिद्, वृषभाय गवयी, क्षिप्रश्येनाय वर्तिका, नीलङ्गवे कृमिः,
समुद्राय शिशुमारो, हिमवते हस्ती ॥ ११ ॥ ११
मयुः प्राजापत्य, उलो हलिक्ष्णो वृषदंशस्ते धात्रे, दिशां कङ्को, धुङ्क्षाग्नेयी,
कुलविङ्कः पुष्करसादो लोहिताहिस्ते त्वाष्ट्रा, वाचे क्रौञ्चः ॥ १२ ॥ १२
सोमाय कुलङ्ग, आरण्योऽजो नकुलः शका ते पौष्णाः, क्रोष्टा मायो,—रिन्द्रस्य
गौरमृगः, पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै, प्रतिश्रुत्कायै चक्रवाकः ॥ १३ ॥ १३
सौरी बलाका, शार्गः सृजयः शयाण्डकस्ते मैत्राः, श्वाविद्भौमी, सरस्वत्यै शारिः पुरु-
षवाक्, शार्दूलो वृकः पृदाकुस्ते मन्यवे, सरस्वते शुकः पुरुषवाक् ॥ १४ ॥ १४
सुपर्णः पार्जन्य, आतिर्वाहसो दर्विदा ते वायवे, ककवाकुः सावित्रो, हंसो वातस्य,
प्लवो मद्गुर्मत्स्यस्ते नदीपतये, द्यावापृथिवीयः कूर्मः ॥ १५ ॥ १५
पुरुषमृगश्चन्द्रमसो, गोधा कालका दार्वाघाटस्ते वनस्पतीनां, बृहस्पतये वाचस्पतये पैङ्ग-
राजो, ऽलज आन्तरिक्षो, नाक्रो मकरः पुलीकयस्तेऽकूपारस्य, ह्रियै शल्यकः ॥१६॥ १६
एण्यह्नो, मण्डूको मूषिका तित्तिरिस्ते सर्पाणां, लोपाश आश्विनः, कृष्णो रात्र्या,
ऋक्षो जतूः सुषिलीका त इतरजनानां, जहका वैष्णवी ॥ १७ ॥ १७
अन्यवापोऽर्धमासानां,—मृश्यो मयूरः सुपर्णस्ते गन्धर्वाणा,—मपामुद्रः, कश्यपो मासां२,
रोहित्कुण्डृणाची गोलत्तिका ता अप्सरसां, मृत्यवेऽसितः ॥ १८ ॥ १८

[१०] वा. २४,२८। काण्व. २६,३३।
[११] तै. ५,५,११। काठ. ५,७,१। वा. २४,३०। काण्व. २६,३४।
[१२] तै. ५,५,१२। काठ. ५,७,२। वा. २४,३१। काण्व. २६,३५।
[१३] तै. ५,५,११। काठ. ५,७,७। वा. २४,३२। काण्व. २६,३६।
[१४] काठ. ५,७,४—६। वा. २४,३३। काण्व. २६,३७।
[१५] काठ. ५,७,३। वा. २४,३४। काण्व. २६,३८।
[१६] काठ. ५,७,५। वा. २४,३५। काण्व. २६,३९।
[१७] काठ. ५,७,५। वा. २४,३६। काण्व. २६,४०।
[१८] काठ. ५,७,६। वा. २४,३७। काण्व. २६,४१।

वर्षाहूर्ऋतूनां,—माखुः कशो मान्थालवस्ते पितॄणां२, वसुभ्यः कपिञ्जलो, बलायाजगरः,
कपोत उलूकः शशस्ते निर्ऋत्यै, रात्र्यै कृष्णः ॥ १९ ॥ १९
चित्रे आदित्यानां,—मुष्ट्रो घृणावान् वार्ध्रीनसस्ते मत्या, अरण्याय सृमरो, रुरू रौद्रः,
कुवयः कुटरुर्दात्यौहस्ते वाजिनां, कामाय पिकः ॥ २० ॥ २०
खड्गो वैश्वदेव,—स्तरक्षुः श्वा कृष्णः कर्णो गर्दभस्ते रक्षसा,—मिन्द्राय सूकरः, सिंहो
मारुतः, कृकलासः पिप्पका शकुनिस्ते शरव्यायै, विश्वेभ्यो देवेभ्यः पृषतः ॥ २१ ॥ २१
[१८६४]

॥ इत्युपरिकाण्डे चतुर्दशः प्रपाठकः ॥ १४ ॥

अथ पञ्चदशः प्रपाठकः।

शादं दद्भि,—रवकान्दन्तमूलै,—र्मृदं बर्स्वै,—स्तेगान् दंष्ट्राभ्या,—मवक्रन्देन तालु, वाजं२
हनुभ्यां२, सरस्वत्या अग्रजिह्वं, जिह्वाया उत्सादं,—मपं आस्येन, वृषणा आण्डाभ्या,-
—मादित्यान् श्मश्रुभिः, पन्थां भ्रूभ्यां, द्यावापृथिवी वर्तोभ्यां२ विद्युतं कनीनिकाभ्यां,
कर्णाभ्यां२ श्रोत्रे, श्रोत्राभ्यां कर्णा, अवार्याणि पक्ष्माणि पार्या इक्षवः, पार्याणि पक्ष्माण्यवार्या
इक्षवः ॥ १ ॥ १
वातं प्राणेना,—ऽपानेन नासिका,—मुपयाममधरेणौष्ठेन, सदुत्तरेण, शुक्लाय स्वाहा,
कृष्णाय स्वाहा, स्तनयित्नुं निर्बाधेन, मूर्धानं निवेष्येणा,—ऽशनिं मस्तिष्केण, विद्युतं
कनीनिकाभ्यां, प्रकाशेनान्तर,—मनुकाशेन बाह्यं, तेदनीमधरकण्ठेनापः शुष्ककण्ठेन, चित्तं
मन्याभि,—रदितिं२ शीर्ष्णा, निर्ऋतिं निर्जल्येन शीर्ष्णा, प्राणान्त्संक्रोशै, रेष्माणं२ स्तूपेन॥
॥ २ ॥ २
मशकान् केशै,—रिन्द्रं२ स्वपसा, वहेन बृहस्पतिं२, शकुनिसादेन कूर्मान्, शफैराक्रमणं२,
स्थूराभ्यां बलं, कुष्टाभ्यां जवं, जङ्घाभिरध्वानं, बाहुभ्यां जाम्बिलेनारण्यमग्निमुतीरुग्भ्यां२,
रुद्रं२ रोराभ्यां, पूषणं दोर्भ्या,—मश्विना अंसाभ्याम् ॥ ३ ॥ ३

[१९] काठ. ५,७—८। वा. २४,३८। काण्व. २६,४२।
[२०] काठ. ५,७,९। वा. २४,३९। काण्व. २६,४३।
[२१] काठ. ५,७। वा. २४,४०। काण्व. २६,४४।
[१] तै. ५,७,११-१२। काठ. ५,१३,१-२। वा. २५,१। काण्व. २७,१-२। मा. श्रौ. ९,२,५।
[२] तै. ५,७,१२-१४। काठ. ५,१३,२। वा. २५,२। काण्व. २७,३-४।
[३] तै. ५,७,११। काठ. ५,१३,३। वा. २५,३। काण्व. २७,५-६।

अग्नेः पक्षति,—र्वायोर्निपक्षतिः, सोमस्य तृतीया, ऽपां चतुर्थी,—दित्याः पञ्चमी,—ग्नी-
षोमयोः षष्ठी, मरुतां सप्तमी, बृहस्पतेरष्टमी, पूष्णो नवमी, त्वष्टुर्दशमी,—न्द्रस्यैकादशी,
वरुणस्य द्वादशी, यमस्य त्रयोदशी ॥ ४ ॥ ४
इन्द्राग्न्योः पक्षतिः, सरस्वत्या निपक्षति,—रिन्द्रस्य तृतीया, बृहस्पतेश्चतुर्थी, निर्ऋत्याः
पञ्चमी,—न्द्राण्याः षष्ठी, सुपर्णानां२ सप्तमी, विष्णोरष्टम्य,—र्यम्णो नवमी, धातुर्दशमी,—
न्द्रस्यैकादशी, वरुणस्य द्वादशी, यम्यास्त्रयोदशी, द्यावापृथिव्योर्दक्षिणं पार्श्वं२, विश्वेषां
देवानामुत्तरम् ॥ ५ ॥ ५
मरुतां२ स्कन्धा, विश्वेषां देवानां प्रथमा कीकसा, रुद्राणां द्वितीया, ऽऽदित्यानां तृतीया,
वायोः पुच्छ,—मग्नीषोमयोर्भासदौ, क्रुञ्चौ श्रोणिभ्यां, मित्रावरुणा ऊरुभ्या,—मिन्द्रावरुणा
अल्माभ्या,—माक्रमणं कुष्ठाभ्या,—मरुसराभिः कपिञ्जलान् ॥ ६ ॥ ६
इन्द्रस्य क्रोडो, ऽदित्याः पाजस्यं, दिशां जत्रवो, ऽदित्या भस,—ज्जीमूतान् हृदयौ-
पशाभ्या,—मन्तरिक्षं पुरीतता, नभ उदर्येण, वल्मीकान् क्लोम्ना, ग्लौभिर्गुल्मां२,—श्चक्र-
वाकौ मतस्नाभ्यां, दिवं२ वृक्काभ्यां२, हिराभिः स्रवन्ती,—र्गिरीन् प्लाशिभ्या,—मुपलान्
प्लीहा, हृदान् कुक्षिभ्यां२, समुद्रमुदरेण, वैश्वानरं भस्मना ॥ ७ ॥ ७
विधृतिं नाभ्या, घृतं२ रसेना,—ऽपो यूष्णा, मरीचीर्विप्रुषा, नीहारमूष्मणा, शीनं२
वसया, ह्रादुनीर्दूषीकाभिः, प्रुष्वा अश्रुभि,—रक्षां रक्षांसि, चित्राण्यङ्गै,—र्नक्षत्राणि रूपैः,
पृथिवीं त्वचा, जुम्बकाय स्वाहा ॥ ८ ॥ ८
पूषणं२ वनिष्ठुनान्धाहीन्त्स्थूरगुदया, सर्पान् गुदाभि,—र्विह्रुत आन्त्रै,—रपं आस्येन, वृषणा
आण्डाभ्यां२, शेपो वाजिनेन, प्रजां२ रेतसा, चाषान् पित्तेन, प्रदरान् पायुना, कूश्मान्
शकपिण्डैः ॥ ९ ॥ ९

[४] तै. ५,७,१९। वा. २५,४। काण्व. २७,७।
[५] तै. ५,७,२२। वा. २५,५। काण्व. २७,८।
[६] तै. ५,७,१५। काठ. ५,१३,४। वा. २५,६। काण्व. २७,९।
[७] तै. ५,७,१६। काठ. ५,१३,६। वा. २५,८। काण्व. २७,११—१२।
[८] तै. ५,७,२०। वा. २५,९। काण्व. २७,१३।
[९] तै. ५,७,१७। काठ. ५,१३,७। वा. २५,७। काण्व. २७,१०।

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तिकाय पुरोडाशमष्टाकपालं निर्वपती,—न्द्राय त्रैष्टुभाय
पञ्चदशाय बार्हताय ग्रैष्माय पुरोडाशमेकादशकपालं२, विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो
वैरूपेभ्यो वार्षिकेभ्यः पुरोडाशं द्वादशकपालं, मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां२ वैरा-
जाभ्यां२ शारदाभ्यां पयस्यां, बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्कराय हैमन्तिकाय चरुं२,
सवित्र आतिछन्दसाय त्रयस्त्रिंशाय रैवताय शैशिराय पुरोडाशं द्वादशकपाल,—मनुमत्यै चरुं२,
वैश्वानरं द्वादशकपाल,—मदित्यै विष्णुपत्न्यै चरुं, कायमेककपालम् ॥ १० ॥ १०
अग्नयेऽंहोमुचे पुरोडाशमष्टाकपालं निर्वपती,—न्द्रायांहोमुचे पुरोडाशमेकादशकपालं, मित्रा-
वरुणाभ्यामागोमुग्भ्यां पयस्यां२, वायुसवितृभ्यामागोमुग्भ्यां पयो, ऽश्विभ्यामागोमुग्भ्यां धाना,
मरुद्भ्य एनोमुग्भ्यः पुरोडाशं२ सप्तकपालं२, विश्वेभ्यो देवेभ्य एनोमुग्भ्यः पुरोडाशं द्वादशक-
पाल,—मनुमत्यै चरुं२ वैश्वानरं द्वादशकपालं, द्यावापृथिवीभ्यामंहोमुग्भ्यां पुरोडाशं द्विक-
पालम् ॥ ११ ॥ ११
[१८७५]

॥ इत्युपरिकाण्डे पञ्चदशः प्रपाठकः ॥ १५ ॥

अथ षोडशः प्रपाठकः।

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परिख्यन्।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ १
यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति।
सुप्राङजो मेम्यद्विश्वरूपा इन्द्रापूष्णोः प्रियमप्येतु पाथः ॥ २
एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः।
अभिप्रियं२ यत् पुरोडाशमर्वता त्वष्टेदेनं२ सौश्रवसाय जिन्वति ॥ ३

[१०] तै. ७,५,१४। वा. २९,६०। काण्व. ३१,४९।
[११] तै. ७,५,२२।
[१] तै. ४,६,८—९। काठ. ५,६,४—५। वा. २५,२४—३९। काण्व. २७,१८—४३।
{मा नो मित्रो०...वीर्याणि। ऋ. १,१६२,१; तै. सं. ४,६,८,१; नि. ९,३। यन्निर्णिजा रेक्णसा०...पाथः। ऋ. १,१६२,२; तै. सं. ४,६,८,१। एष छागः०... (छाग०) ... जिन्वति। ऋ. १,१६२,३; तै सं. ४,६,८,१]

यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति ।
अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः ॥ ४
उप प्रागात् सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेन२ विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥ ५
होताध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शंस्ता सुविप्रः ।
तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आपृणध्वम् ॥ ६
यूपव्रस्का उत ये यूपवाहाश्चषाल२ ये अश्वयूपाय तक्षति ।
ये चार्वते पचन२ संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ७
यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये तृण२ सर्वा ता ते अपि देवेष्वस्तु ॥ ८
यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच् छमितारः कृण्वन्तुत मेध२ शृतपाकं पचन्तु ॥ ९
यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ १०
यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ११
ये वाजिनं परिपश्यन्ति पक्व२ य ईमाहुः सुरभिर्निर्हरेति ।
ये चार्वतो माꣳसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥ १२
यन्नीक्षणं माꣳस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परिभूषन्त्यश्वम् ॥ १३

[यद्धविष्यमृतुशो० । ऋ. १,१६२,४; तै. सं. ४,६,८,२ । उप प्रागात् सुमन्मे० । ऋ. १,१६२,७; तै. सं. ४,६,८,३; नि. ६,२२ । होताध्वर्युरावया० । ऋ. १,१६२,५; तै. सं. ४,६,८,२ । यूपव्रस्का उत ये० । ऋ. १,१६२,६; तै. सं. ४,६,८,२ । यद्वाजिनो दाम० । ऋ. १,१६२,८; तै. सं. ४,६,८,३ । यदूवध्यमुदरस्या० । ऋ. १,१६२,१०; तै. सं. ४,६,८,४ । यदश्वस्य क्रविषो० । ऋ. १,१६२,९; तै. सं. ४,६,८,३ । यत्ते गात्रादग्निना० । ऋ. १,१६२,११; तै. सं. ४,६,८,४ । ये वाजिनं परि० । ऋ. १,१६२,१२; तै. सं. ४,६,९,१ । यन्नीक्षणं माꣳस्पचन्या० । ऋ. १,१६२,१३; तै. सं. ४,६,९,१]

मै० ४१

यदश्वाय वास उपस्तृणन्त्यधिवास२ या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वायामयन्ति ॥ १४
निक्रमणं निषदनं विवर्तन२ यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ १५
मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभिविक्त जघ्रिः ।
इष्ट२ वीतमभिगूर्त२ वषट्कृतं तं देवासः प्रतिगृभ्णन्त्यश्वम् ॥ १ ॥ १६
समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः ।
वाजी वहन्वाजिनं जातवेदो देवाना२ वक्षि प्रियमा सधस्थम् ॥ १७
तनूनपात् सं पथो देवयानान् प्रजानन्वाज्यप्येतु देवान् ।
अनु त्वा सप्ते प्रदिशः सचन्ता२ स्वधा देवैर्यजमानाय धेहि ॥ १८
ईड्यश्चासि वन्द्यश्चासि वाजिन्नाशुश्चासि मेध्यश्चासि सप्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्रीत२ वह्नि२ वहतु जातवेदाः ॥ १९
स्तीर्णं बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानं पृथिव्याम् ।
देवेभिरक्तमदितिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ २०
एता उ वः सुभगा विश्ववारा वि पक्षोभिः श्रयमाणा उदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्रायणा भवन्तु ॥ २१
अन्तरा मित्रावरुणा चरन्ती मुख२ यज्ञानामभि संविदाने ।
उषासा वा२ सुहिरण्ये सुशिल्पे ऋतस्य योना इह सादयामि ॥ २२
प्रथमा वा२ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा ।
अपिप्रयं चोदना वां मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता ॥ २३
आदित्यैर्नो भारती वष्टु यज्ञ२ सरस्वती सह रुद्रैर्न आवीत् ।
इडोपहूता वसुभिः सजोषाः स्योनं कृण्वाना सुविते दधातु ॥ २४

[यदश्वाय वास० । ऋ. १,१६२,१६; तै. सं ४,६,९,२ । निक्रमणं निषदनं० । ऋ. १,१६२,१४; तै. सं ४,६,९,१ । मा त्वाग्निर्ध(र्ध्व०) नयी० । ऋ. १,१६२,१५; तै. सं. ४,६,९,२]

[२] ५,१,११ । काठ. ५,६,१ । वा. २९,१—११ । कण्व. ३१,१—११ । मा. श्रौ. ९,२,५ ।

त्वष्टा वीरं देवकामं जजान त्वष्टुरर्वा जायत आशुरश्वः ।
त्वष्टेमा विश्वा भुवना जजान बहोः कर्तारमिह यक्षि होतः ॥ २५
अश्वो घृतेन त्मन्या समक्त उप देवाꣳ ऋतुशः पाथ एतु ।
वनस्पतिर्देवलोकं प्रजानन्नग्निना हव्या स्वदितानि वक्षत् ॥ २६
प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साध्या हविरदन्तु देवाः ॥ २ ॥ २७
युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ २८
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २९
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३०
जीमूतस्येव भवति प्रतीक२ यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्व२ स त्वा वर्मणो महिमा पिपर्तु ॥ ३१
धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोतु धन्वना सर्वाः पृतना जयेम ॥ ३२
वक्ष्यन्तीवेदागनीगन्ति कर्णं प्रिय२ सखायं परिषस्वजाना ।
योषेव शिङ्क्ते विततावधि धन्वञ् ज्या इय२ समने पारयन्ती ॥ ३३
ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून् विध्यतः संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ३४
बह्वीनां पिता बहुरस्य पुत्रः चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ ३५

[३] तै. ७,४,२०;४,६,६ । काठ. ५,६,१ । वा. २३,५—६;२९,३७—४४,५२—५४,४६—४७,४९,४८,५१,५०, ५५—५७ । कण्व. २५,५—६;३१,१२—१६,१८,२१,२०,१९,१७,२२—२३ । मा. श्रौ. ९,२,३—४ । अथर्व. २०,२६,४;४७,१०;६९,९; तै. सं. ७,४,२०,१ ।

[युञ्जन्ति ब्रध्नमरुषं० । ऋ. १,६,१; सा. १४६८; अथर्व. २०,२६,५;४७,११;६९,१०; तै. सं. ७,४,२०,१; तै. युञ्जन्त्यस्य काम्या० । ऋ. १,६,२; सा. १४६९; अथर्व. २०,२६,६;४७,१२;६९,११; तै. सं. ७,४,२०,१; तै. केतुं कृण्वन्नकेतवे० । ऋ. १,६,३; सा. १४७०; अथर्व. २०,२६,६;४७,१२;६९,११; तै. सं. ४,६,६,१ । धन्वना गा धन्वनाजिं० । ऋ. मा. ३,९,४,३ । जीमूतस्येव भवति० । ऋ. ६,७५,१; तै. सं. ४,६,६,१; नि. ९,१८ । वक्ष्यन्तीवेदागनी० । ऋ. ६,७५,३; तै. सं. ४,६,६,१; नि. ९,१७ । वक्ष्यन्तीवेदागनी० । ऋ. ६,७५,३; तै. सं. ४,६,६,२; नि. ९,४० । बह्वीनां (०ह्वी०) पिता० । ऋ. ६,७५,५ तै. सं. ४,६,६,२; नि. ९,१४ । ते आचरन्ती० । ६,७५,४; तै. सं. ४,६,६,२; नि. ९,४०]

रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥ ३६
तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रून् रनपव्ययन्तः ॥ ३७
वनस्पते वीड्वङ्गो हि भूया अस्मत् सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि ॥ ३८
दिवस्पृथिव्याः पर्यन्तरिक्षाद्वनस्पतिभ्यः पर्याभृत२ सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्र२ हविषा रथ२ यज ॥ ३९
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ ४०
स्वादुष२सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ४१
ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी उभे स्ताम् ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघश२स ईशत ॥ ४२
ऋजीते परिवृङ्ग्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधिब्रवीतु नोऽदितिः शर्म यच्छतु ॥ ४३
सुपर्ण२ वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म य२सन् ॥ ४४
अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाꣳसं परिपातु विश्वतः ॥ ४५

[रथे तिष्ठन्नयति० । ऋ. ६,७५,६; तै. सं. ४,६,६,२; नि. ९,१६ । तीव्रान्घोषान्कृण्वते० । ऋ. ६,७५, ७; तै. सं. ४,६,६,३ । वनस्पते वीड्वङ्गो० । ऋ. ६,४७,२६; अथर्व. ६,१२५,१; तै. सं ४,६,६,५; नि. ९,५;९,१२ । दिवस्पृथिव्याः० । ऋ. ६,४७,२७; अथर्व. ६,१२५,२; तै. सं. ४,६,६,५ । इन्द्रस्य वज्रो० । ६,४७,२८; अथर्व. ६,१२५,३; तै. सं. ४,६,६,६ । स्वादुषꣳसदः पितरः० । ऋ. ६,७५,९; तै. सं. ४,६,६,३ । ब्राह्मणासः पितरः० । ऋ. ६,७५,१०; तै. सं. ४,६,६,३ । ऋजीते परि० । ऋ. ६, ७५,१२; तै. सं. ४,६,६,४ । सुपर्णं वस्ते० । ऋ. ६,७५,११; तै. सं. ४,६,६,४; नि. ९,५;९,१९ । अहि-रिव भोगैः० । ऋ. ६,७५,१४; तै. सं. ४,६,६,५; नि. ९,१५]

आजङ्घन्ति सान्वेषां जघनाँ उपजिघ्नते । अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ ४६
उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून् ॥ ४७
आक्रन्दय बलमोजो न आधा निष्टनिहि दुरिता बाधमानः ।
अपप्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीडयस्व ॥ ४८
आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्तु नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ३ ॥ ४९
समिद्दिशामाशया नः स्वर्विन्मधु रतो माधवः पात्वस्मान् ।
अग्निर्देवो दुष्टरीतुरदब्ध इदं क्षत्रं रक्षतु पात्वस्मान् ॥ ५०
रथन्तरं सामभिः पात्वस्मान् गायत्री छन्दसां विश्वरूपा ।
त्रिवृन्नो विष्टया स्तोमो अह्ना समुद्रो वात इदमोजः पिपर्तु ॥ ५१
उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्नोजसीने ।
इन्द्राधिपत्यैः पिपृतादतो नो महि क्षत्रं विश्वतो धारयेदम् ॥ ५२
बृहत्साम क्षत्रभृद्वृद्धवृष्णं त्रिष्टुभौजः शुभितमुग्रवीरम् ।
इन्द्रः स्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्षतु ॥ ५३
प्राची दिशां सहयशा यशस्वती विश्वे देवाः प्रावृषाह्ना स्वर्वती ।
वैरूपे सामन्नधि तच्छकेयं जगत्येनं विक्ष्वावेशयामि ॥ ५४
इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टं सहस्रियं सहस्वत् ।
विश्वे देवाः सप्तदशेन वर्च इदं क्षत्रं सलिलवातमुग्रम् ॥ ५५
धर्त्री दिशां क्षत्रमिदं दाधारोपस्थाशानां मित्रवदस्त्वोजः ।
मित्रावरुणा शरदाह्ना चिकित्तमस्मै राष्ट्राय महि शर्म यच्छतम् ॥ ५६

आजङ्घन्ति सान्वेषां० । ऋ. ६,७५,१३; तै. सं. ४,६,६,५; नि. ९,२० । उपश्वासय पृथिवी० । ऋ. ६,४७, २९; अथर्व. ६,१२६,१; तै. सं. ४,६,६,६; नि. ९,१३ । आक्रन्दय बलमोजो० । ऋ. ६,४७,३०; अथर्व. ६,१२६,२; तै. सं. ४,६,७,७; आमूरज प्रत्यावर्तये० । ऋ. ६,४७,३१; अथर्व. ६,१२६,३; तै. सं. ४,६,६,७]

[४] तै. ४,४,१२ । काठ. २२,१४ । वा. १४,८—९,१८,७२—७३,२६,८,२७,३०,३६,४ । काव. ३३,३,४०, ४१—४२,१८,८,२९,४४,३६,४ ।

वैराजे सामन्नधि मे मनीषानुष्टुभा संभृतं वीर्यं सहः ।
इदं क्षत्रं मित्रवदार्द्रदानु मित्रावरुणा रक्षतमाधिपत्यैः ॥ ५७
सम्राड् दिशां सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्ठया नः पिपर्तु ।
अवस्युवाता बृहती न शक्वरी दिशां तेव्युवतु नो घृताची ॥ ५८
स्वर्वती सुदुघा नः पयस्वतीमं यज्ञमवतु या घृताची ।
त्वं गोपाः पुरएतोत पश्चाद्बृहस्पते याम्यां युङ्ग्धि वाचम् ॥ ५९
ऊर्ध्वा दिशां रन्तिराशौषधीनां संवत्सरेण सविता नो अह्ना ।
रेवत्सामातिछन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु ॥ ६०
स्तोमत्रयस्त्रिंशे भुवनस्य पत्नी विवस्वद्वाते अभि नो गृणीहि ।
घृतवती सवितुराधिपत्ये पयस्वती रन्तिराशा नो अस्तु ॥ ६१
अन्वद्य नो अनुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यवाहनो भवतं दाशुषे मयः ॥ ६२
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि ।
क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषत् ॥ ६३
वैश्वानरो न ऊत्या प्रयातु परावतः । अग्निरुक्थेन वाहसा ॥ ६४
पृष्टो दिवि ॥ ६५
ध्रुवा दिशां विष्णुपत्न्यघोरास्येशाना सहसो या मनोता ।
बृहस्पतिर्मातरिश्वोत वायुः संध्वाना वाता अभि नो गृणन्तु ॥ ६६
विष्टम्भो दिवो धरुणा पृथिव्या अस्येशाना जगतो विष्णुपत्नी ।
व्यचस्वतीषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे ॥ ६७
कया नः ॥ ६८
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून् हृत्स्वसो मयोभून् य एषां भृत्यामृणधत् स जीवात् ॥ ४ ॥ ६९

[अन्वद्य (अनु) नो अनु० (०द्यानु०) । ऋ. परि. ३,३; अथर्व. ७,२०,१ । अन्विदनुमते त्वं० । ऋ. परि. ३,४; अथर्व. ७,२०,२ । वैश्वानरो न ऊत्या० । अथर्व. ६,३५,१; आ. श्रौ. सू. .२,११ । पृष्टो दिवि पृष्टो० । ऋ. १,९८,२; तै. सं. १,५,११,१; तै. ब्रा. ३,११,६,४ । विष्टम्भो दिवो धरुणा(०णः)० । ऋ. ९,८९,६ । कया नः० । ऋ. ४,३१,१; सा. १६९,६८२; अथर्व. २०,१२४,१; तै. सं. ४,२,११,२; तै. आ. ४,४२,२ । को अद्य युङ्क्ते० । ऋ. १,८४,१६; सा. ३४१; अथर्व. १८,१,६; तै. सं. ४,२,११,३; नि. १४,२५]

अग्नेर्मन्वे प्रथमस्यामृतानां यं पाञ्चजन्यं बहवः समिन्धते ।
विश्वस्यां विशि प्रविविशिवांसमीमहे स नो मुञ्चत्वंहसः ॥ ७०
यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम् ।
स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वंहसः ॥ ७१
इन्द्रस्य मन्वे प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः ।
यो दाशुषः सुकृतो हवमुप गन्ता स नो मुञ्चत्वंहसः ॥ ७२
यः संग्रामं नयति सं वशी युधे यः पुष्टानि संसृजति त्रयाणि ।
स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वंहसः ॥ ७३
मन्वे वां मित्रावरुणा तस्य वित्तं सत्यौजसा दृंहणा यं नुदेथे ।
या राजाना सरथं याथ उग्रा ता नो मुञ्चतमागसः ॥ ७४
यो वां रथ ऋजुरश्मिः सत्यधर्मा मिथुश्चरन्तमुपयाति दूषयन् ।
स्तौमि मित्रावरुणौ नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ ७५
वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्विभृतो यौ च रक्षतः ।
यौ विश्वस्य परिभू बभूवथुस्तौ नो मुञ्चतमागसः ॥ ७६
उप श्रेष्ठा न आशिषो देवयोर्धामन्नस्थिरन् ।
स्तौमि वायुं सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ ७७
रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः ।
ययोर्वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागसः ॥ ७८
यदयातं वहतुं सूर्यायास्त्रिचक्रेण संसदमिच्छमानौ ।
स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥ ७९
मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे ।
आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥ ८०

[५] तै. ४,७,१५; काठ. २२,१५; वा. १२,३३,३४,८—९,१८,७२ ३६,८ । काव. १३,२४,३३,८,२०,४१,२८,८ २४,१ य: संग्रामं नयति० । अथर्व. ४,२३,७ । इन्द्रस्य मन्वे० । अथर्व. ४,
[अग्नेर्मन्वे प्रथमस्या० । ४,२३,१ । यस्येदं प्राणन्निमि० । अथर्व. ४,२३,७ ।
(ययोः) रथ ऋजु० (सत्य०) । अथर्व. ४,२९,७ । वायोः सवितुर्विदथानि० । अथर्व. ४,२५,१ । यो वा९ उप श्रेष्ठा न० । अथर्व. ४,२५,३ । रथीतमौ (प्र सुमतिं) रथीना० । अथर्व. ४,२५,६ । स्तौमि देवा (मयावर्षौ) ० । अथर्व. ४,२८,७ । मरुतां (देवानां) मन्वे० अथर्व. ४,२७,१]

तिग्ममायुधं वीडितं सहस्वद्दिव्यं शर्धः पृतनासु जिष्णु ।
स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥ ८१
देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे ।
आशून् हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥ ८२
यदिदं माभिशोचति पौरुषेयेण दैव्येन ।
स्तौमि विश्वान् देवान् नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ।
अन्वद्य नो अनुमति,—रन्विदनुमते त्वं, वैश्वानरो न ऊत्या ॥ ८३
त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।
त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥ ८४
उर्वी रोदसी वरिवस्कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रुवाथः ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमंहसः ॥ ८५
ये अप्रथेताममितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनाम् ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमंहसः ॥ ८६
यच्चिद्धि ते पुरुषत्रा युविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।
कृधी ष्वस्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥ ८७
यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः ।
एवो ष्वस्मन्मुञ्चता व्यंहः प्रतार्यग्ने प्रतरं न आयुः ॥ ५ ॥ ८८

[१९६३]

॥ इत्युपरिकाण्डे षोडशः प्रपाठकः ॥ १६ ॥

॥ इत्युपरिकाण्डं समाप्तम् ॥

[तिग्ममायुधं (०मनीकं)० । अथर्व. ४,२७,७ । यदिदं माभिशोचति (०यन्मेदमभि०) । अथर्व. ४,२६,७ । अन्वद्य नो (०अनु नो०) । ऋ. परि. ३,३; अथर्व. ७,२०,१ । अन्विदनुमते० । ऋ. परि. ३,४ । अथर्व. ७,२०,२ । वैश्वानरो न ऊतय० । ६,३५,१; आ. श्रौ. सू. ९,११ । त्वमग्ने शोचिषा० । ऋ. ७,१३,२; तै. सं. १,५,११,२ । स्तौमि द्यावापृथिवी० । अथर्व. ४,२६,७ । ये अप्रथेताममिते० अथर्व. ४,२६,१—१ । यच्चिद्धि ते पुरुषत्रा० । ऋ. ४,१२,४, तै. सं. ४,७,१५,६ । यथा ह त्यद्वसवो० । ऋ. ४,१२,६,१०, १२६,८; तै. सं. ४,७,१५,७]

अथ चतुर्थं काण्डम्।

अथ प्रथमः प्रपाठकः।

पुरोडाशब्राह्मणम्।

वनस्पतीन्वा उग्रो देवं उदौपत्, त२ शम्या अध्यशमय२,—स्तच्छम्याः शमीत्वं२, यच्छमीशाखया वत्सानपाकरोति शान्त्यै, पर्णवती कार्या, पशूना२ वा एतद्रूपं, पशुमान् भवति, यद्दुपर्णा स्याद्दण्डस्य तद्रूपं२, वज्रो दण्डो, वज्रेण पशूनभिप्रवर्तयेत्, तृतीयस्या२ वै दिवि सोम आसीत्, तं गायत्री श्येनो भूत्वाहरत्, तस्य पर्णमछिद्यत, ततः पर्णोऽजायत, तत् पर्णस्य पर्णत्वं, तस्मात् सर्वेऽन्ये वनस्पतयः पर्णिनो, ऽथैष पर्ण उच्यते, यत् पर्णशाखया वत्सानपाकरोति तमेव सोममवरुन्द्धे, देवा वै ब्रह्म समवदन्त, तत् पर्ण उपाशृणोत्, सुश्रवा वै नामैष, न बधिरो भवति य एव२ वेद, ब्रह्म वै पर्णो, यत् पर्णशाखया प्रार्पयति ब्रह्मणैवैनाः प्रार्पयती,—षे त्वो,—र्जे त्वे,—ति पयः२ यज्ञे च यज्ञपतौ चाधाद्, वायवः स्थेति, वायुर्वा अन्तरिक्षस्याध्यक्षो, ऽन्तरिक्षदेवत्याः पशवो, वायुरेवैनानन्तरिक्षाय परिददाति, प्र वा एनानेतदाकरोति, यद्वायवः स्थेत्याहा,—ऽरण्यस्येव हि वायु,—र्देवो वः सविता प्रार्पयत्विति, सवितृप्रसूत एवैनाः प्रार्पयति, श्रेष्ठतमाय कर्मण इति, यज्ञो वै श्रेष्ठतमो, यज्ञायैवैनाः प्रार्पयत्या,—प्यायध्वमघ्न्या देवेभ्य इति, वत्सेभ्यश्च वा एता मनुष्येभ्यश्च पुराप्यायन्ते, ऽथैतर्हि देवेभ्य एवैना आप्याययति, मा वः स्तेन ईशत माघशंसा इत्या,—शिषमेवाशास्ते,
ध्रुवा अस्मिन् गोपतौ स्यात बह्वीरिति, प्रैव जनयति ॥ १
शुद्धा अपः सुप्रपाणे पिबन्तीः ॥ २
इति पुनात्येवैनाः ॥ ३
रुद्रस्य हेतिः परि वो वृणक्तु ॥ ४
इति रुद्रादेवैनास्त्रायन्ते ॥ पूषा वः परस्पा अदितिः प्रेत्वरीया इन्द्रो वोऽध्यक्षोऽनष्टाः पुनरेत ॥ इति त्रयो वा इमे लोका, एभ्य एवैना लोकेभ्यः पुनरावर्तयति, यजमानस्य पशून् पाही,—ति यजमानस्यैव पशूनां गोपीथायाहिंसायै ॥ प्रतीची२ शाखामुपगूहति तस्माद्ग्राम्याः पशवः
सायमरण्याद्ग्राममायन्ति, प्रत्यञ्च एनं पशवो भवन्ति य एव२ वेद ॥ १ ॥ ५–८

[१] मै. १,१,१, । तै. ब्रा. ३,२,१ । काठ. ३०,१० । कपि. ४६,८ । वा. १,१,१६,५० । काण्व. १,१—३:१७,५०।
[मा ध। स्तेन ईशत० । ४,२१,७]
मै. ४२

देवस्य त्वा सवितुः प्रसु३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददा इति, सवितृप्रसूत एवैनां देवताभिराददत्ते, प्रजापतिर्वा ओषधीः परुश्शो वेद, प्राजापत्योऽश्वो, यदश्वपरश्वा बर्हिर्दात्योषधीनामहिंसायै, गोषदसी,—ति रयिं२ यजमाने दधाति, प्रत्युष्ट२ रक्षा, इति रक्षसामपहत्यै, प्रेयमगाद्धिषणा बर्हिरच्छेति, विद्या वै धिषणा विद्ययैवैनदच्छैति, मनुना कृता स्वधया वितष्टेति, मनुना३ह्येषा कृता स्वधया वितष्टा तया वहन्ते कवयः पुरस्तादिति, ब्राह्मणाः
कवया,• ऋषयः कवयः ॥ ९
देवेभ्यो जुष्टमिह बर्हिरासदे ॥ १०
इति देवेभ्य एवैनं जुष्टं करोति, देवानां परिषूतमसीति, यद्वा इदं किंच तद्देवानां परिषूतं२, यथा श्रेयसे प्रोच्य कर्म करोत्येवं२ वा एतद्देवेभ्यः प्रोच्य बर्हिर्दाति, यावत् परिदिशति तत् सर्वं दाति, यत्तत्सर्वं न दाति यज्ञस्य तदतिरेचयति, यद्वै यज्ञस्यातिरिच्यते भ्रातृव्यं तेन वर्धयत्यं,—रु२ स्तम्बं परिदिशति, त२ सर्वं दाति यज्ञस्यानतिरेचाय, विष्णोः स्तुप इति, विष्णोर्वै स्तुपोऽछिद्यत, स पृथिवीं प्राविशद्, यत् प्रथमं नोत्सृजेदार्तिमार्छेद्, देवस्य त्वा सवितुः प्रसु३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां बर्हिर्देवसदनं दामीति, सवितृप्रसूत एवैनद्देवताभिर्दाति ॥ मा घो मोपरि परुस्त ऋध्यासम् ॥ इत्योषधीनामहिंसायै ॥ आछेत्ता ते मारिषम् ॥ इति यावद्यायदेवमविद्वानध्वर्युर्बर्हिर्दाति तावदस्यात्मनो मीयते, नास्यात्मनो मीयते य एव२ वेदा,—ऽतस्त्वं बर्हिः शतवल्शं२ विरोहे,—त्योषधीष्वेव भूमानं दधाति, सहस्रवल्शा वि वयं२ रुहेमे,—त्याशिषमेवाशास्ते, ऽदित्या रास्नासीती,—यं२ वा अदिति,—रस्या एवैनद्रास्नां करोती,—न्द्राण्याः संनहनमिती,—न्द्राणी वा अग्रे देवताना२ समनह्यत ऋद्धिकामा, साभ्यर्ध्नुवा, ऋध्नोति य एव२ वेद, बर्हिः संनह्यति, प्रजा वै बर्हिः, प्रजाना२ संतत्यै प्रजानामपरावापाय, तस्मात् स्नान्ना प्रजाः संतताः, पूषा ते ग्रन्थिं ग्रथ्नात्विति, पुष्टिर्वै पूषा,
पुष्टिं२ यजमाने दधाति, स ते मास्था,—दिति यजमानस्याहिंसायै ॥ ११–१५
आपस्त्वामश्विनौ त्वामृषयः सप्त मामृजुः । बर्हिः सूर्यस्य रश्मिभिरुषसां केतुमारभे ॥ १६
इत्यश्विनौ वै देवानां भिषजौ, तौ एनाद्भिषज्यता, इन्द्रस्य त्वा बाहुभ्यामुद्यच्छा इती,—न्द्र-

[२] मै. १,१,२ । तै. ब्रा. ३,२,२ । काठ. ३१,१ । कपि. ४७,१ । वा. १,१०,११,२४;२,११;५,२२,२६;६,१,९,३०; ९,३०,३८;११,९,२८;१८,३७;२०,३;३७,१;३८,१,१,७,२९ । काण्व. १,१३,३६,४०,२,२२;५,२८,३३;६,१, १०,४३;१०,३९;११,४;१२,९,२८;२०,७;२१,९३;३७,१,३८,१,१,१०,४६ । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२]

स्यैवैनद्बाहुभ्यामुद्यच्छते, बृहस्पतेर्मूर्ध्ना हरामीति, ब्रह्म वै बृहस्पति,—र्ब्रह्मणैवैनद्धरत्यु,—३र्वन्तरिक्ष,—मिति संमिष्टया एवा,—ऽऽदित्यास्त्वा पृष्ठे सादयामीती,—यं२ वा अदितिरस्यामेवैनदसीदत् ॥ बर्हिरसि देवंगमम् ॥ इत्यासन्नमभिमन्त्रयते, बहु वा एतस्य पूर्वेद्युराह्रियमाणस्येह चेह
च स्कन्दत्यं,—स्कन्नमेनद्देवताभ्यः संप्रादायजमानस्याहिंसायै ॥ २ ॥ १७–१९
पू३र्वेद्युरिध्मा बर्हिः कुर्वन्ति, यज्ञमेवारभ्योपवसति, प्रजापतिः प्रजा असृजत, तस्योखे अस्रंसेता२, स एताभ्यामुखाभ्यां प्रत्यधत्त, यदेते उखे भवतः, प्रजापतेरेवोखे प्रतिदधाति, शुन्धध्वं दैव्याय कर्मणा, इति देवेभ्य एवैनानि शुन्धति, वसूनां पवित्रमसीति, वसूना२ वा एतद्भागधेयं, तेभ्य एवैनत् करोति, पवित्रमपिदधात्यो,—षधीनां च पशूनां च पयः सं२सृजति, वाच२ यच्छति यज्ञस्य धृत्यै, धारयन्नास्ते, धारयन्त इव हि दुहन्ति, द्यौरसि पृथि३व्यसीत्या,—स्यामेवैनां प्रवृणक्ति, मातरिश्वनो घर्म इत्य,—न्तरिक्ष२ वै मातरिश्वनो घ३र्मो, ऽन्तरिक्षस्य धृत्यै, कामधुक्षः, सा विश्वायुः, सा विश्वभूः, सा विश्वकर्मेत्य,—सौ वाव विश्वायु,—रन्तरिक्ष२ विश्वभू,—रियं२ विश्वकर्मे,—मान्वा एतल्लोकान् यथापूर्वं प्रदापयत, इमाल्लोकान् यथापूर्वं प्रत्तान् दुहे य एव२ वेद, तिस्रो यजुषाभिमन्त्रयते, त्रयो वा इमे लोका, एषु वा एतं लोकेषु रसं दधाति, तस्मादिमाल्लोकान् प्रजा उपजीवन्ति, इन्द्राय देवेभ्यो हविर्विहं दुग्धि ॥ इति हुतः स्तोको हुतो द्रप्स, इत्यभिमन्त्रयतेऽस्कन्दाय ॥ इन्द्राय देवेभ्यो हविर्विहं दुग्धि ॥ इति
हुतः स्तोको हुतो द्रप्स, इत्यभिमन्त्रयतेऽस्कन्दाय ॥ इति त्रिरुद्धदति, त्रिषत्या हि देवा, न दारुपात्रेण दुह्या,—दग्निमद्वै दारुपात्रं२, यातयामेन हविषा यजेत, तद्धि स्यादुदत्रियाः पुरोडाशमुख२ हवि,—र्नै वा इतं इतः पुरोडाश२ हविषो यामोऽस्ति, दोग्धव्यमेवेति, न शूद्रो दुह्या,—दसतो वा एष संभूतो, ऽमन्तस्याद्,
यद्वै पवित्रमत्येति तद्धवि,—रग्निहोत्रमेव शूद्रो न दुह्यात्, तद्धि नोत्पुनन्ति ॥ २०–२२
संपृच्यध्वमृतावरीरूर्मिणा मधुमत्तमाः । पृश्नतीः पयसा पयो मन्द्रा धनस्य सातये ॥ २३
इति प्रतिनयति शृतत्वाय, शृतकामा हि देवा, इन्द्राय त्वा भाग२ सोमेनातनच्मीति, अदस्तसोममेवैनत् करोति, तस्य ह त्वै सोमपीथः संततो य एव२ विद्वान्त्सांनाय्यं पिबति ॥ अदस्तसौम्यमेवैनत् करोति, विष्णो हव्य२ रक्षस्वे-मसि विष्णवे त्वा ॥ इति, यज्ञो वै विष्णु,—र्यज्ञायैवैनदस्तं करोति, विष्णो हव्य२ रक्षस्वे-ति, यथाहैष ते भागस्त२ रक्षस्वेत्ये,—व२ वा एतद्विष्णुमाहे,—तन्ते हव्यं, तद्रक्षस्वेति,

[३] मै. १,१,३ । तै. ब्रा. ३,२,३ । कठ. ३१,२ । कपि. ४७,२ । वा. १,२,४ । काण्व. १,४,७ ।

न मृत्पात्रेणापिदध्यात्, पितृदेवत्य२ हविः स्याद्, दारुपात्रेणापिदध्या,—दग्निमद्वै दारुपात्र,—मग्निरेव हव्य२ रक्षत्यु,—दन्वत्का३र्य,—मापो वै रक्षोघ्नी,—रपो रक्षा२सि न तरन्ति, रक्षसामपहत्यै ॥ ३ ॥ २४–२६
यो वै श्रद्धामनालभ्य यजते नास्य देवमनुष्या इष्टाय श्रद्दधत्य,—पः प्रणयत्या,—पो वै श्रद्धा, श्रद्धामेवालभ्य यजता, आपो यज्ञो, यज्ञं तत्वा प्रचरत्या,—पो देवानां प्रियं धाम, देवानां प्रियं धाम प्रणीय प्रचरत्या,—पः सत्यं२, सत्यमेवालभ्य यजता, आपो रक्षोघ्नी, रक्षसामपहत्या, आपो वज्रो, वज्रं भ्रातृव्याय प्रहरति स्तृत्या, आपः श्रद्धा, श्रद्धास्य देवाः श्रन्मनुष्या इष्टाय दधते यस्यैवं२ विदुष एवं२ विद्वानपः प्रणयति, दैवीरापोऽग्रेगुवा, इति यज्ञमेव प्रणयति, देवस्य त्वा सवितुः प्रसु३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददा, इति सवितृप्रसूत एवैनद्देवताभिराददत्त उ३र्वन्तरिक्ष,—मिति संमिष्टया एवं, प्रत्युष्ट२ रक्षा, इति रक्षसामपहत्यै, धूरसि, ध्वर ध्वरन्तमिति, धुर्यो वै नामै३षोऽग्निर्यदनालभ्यातीयाद्, यजमान२ शुचार्पयेद्, द्वौ वाव पुरुषस्य भ्रातृव्यौ, यं द्वेष्टि यश्चैनं द्वेष्टि, तौ एवं शुचार्पयति ॥
॥ ४ ॥ २७
देवानामसि वह्नितम२ सस्नितमं पप्रितमं जुष्टतमं देवहूतम,—मिति देवेभ्य एवैनद्वह्नितम२ सस्नितमं पप्रितमं जुष्टतमं देवहूतमं करोत्य,—हुतमसि हविर्धानं, दृंहस्व, मा ह्वा,—रिति दृंहत्येवैनद्, विष्णोः क्रमोऽस्य,—रु वातायेति, यद्वै किंच वातो नाभिवाति तद्वरुणस्या,—वरुण्यमेवैनत् करोति, मित्रस्य वश्चक्षुषा प्रेक्षा, इति मित्रमेवैनान् कुरुते ॥ ऊर्जे गृह्णीत ॥ इत्यूर्ज२ यजमाने दधाति ॥ प्रभूत्यै वः ॥ इति प्रैवैनान् भावयति, देवस्य वः सवितुः प्रसु३वेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या२, यच्छन्तु पञ्च, गोपीथाय वो नारातये, ऽग्नये वो जुष्टान्निर्वपामी,—ति सवितृप्रसूत एवैनान् देवताभिर्निर्वपति, यच्छन्तु पञ्चेति, पञ्च वा ऋतव, ऋतून् वा एतद् प्रीणाति, तेऽस्मै प्रीताः कल्पन्ते, गोपीथाय वो नारातया, इति रक्षसामपहत्या, अग्नये वो जुष्टानित्य,—ग्नय एवैनान् जुष्टान् करोत्य,—थो यस्यै देवतायै निर्वपति तस्या एनान् जुष्टान् करोती,—दं देवानामिदमु नः सहे,—ति व्यावृत्त्यै, दृंहन्तां दुर्या, इति

[४] मै. १,१,४ । तै. ब्रा. ३,२,४,१ । काठ. ३१,३ । कपि. ४७,३ । वा. १,७—८,१०,१२,११,२४,२९,३१। काण्व. १,१०—११,१३,१७,३६,४०,४३,४९ ।
[५] मै. १,१,५ । तै. ब्रा. ३,२,४,४ । काठ. ३१,३ । कपि. ४७,३ । वा. १,७—११ । काण्व. १,१०,१२—१५ ।

हविषो गृहीतादिमे लोका उदवेपन्त, तान्देवा एतेन यजुषादृꣳहन्, यदेतद्यजुर्वदत्येषां लोकानां धृत्यै, निर्ऋत्यस्य पाशादमुक्षी,—ति वरुणपाशादेवैनं निर्मुच्यत आत्मनोऽहिꣳसायै, स्वरभिव्यख्य,—मिति तम इव वा एष प्रपद्यते परीणहꣳ, स्वरेवाभिविपश्यति, ज्योतिर्वैश्वानरमित्य,—सौ वा आदित्यो ज्योतिर्वैश्वानरम् ॥ उरुवन्तरिक्षमन्वेमि ॥ इति यदूरीहीति ब्रूयात्प्रायुकोऽध्वर्युः स्यात् ॥ उरुवन्तरिक्षमन्वेमि ॥ इत्यप्रायुकोऽध्वर्युर्भवत्य,—दित्या च उपस्थे सादयामीती,—यꣳ वा अदिति,—रस्यामेवैनानसीषदत् ॥ अग्ने हव्यꣳ रक्षस्व ॥ इति पुर उपसादयत्य,—ग्निरेव हव्यꣳ रक्षते ॥ ५ ॥ २८--३८

विष्णोर्मनसा पूते स्थः ॥ इति, यज्ञो वै विष्णु,—र्यज्ञायैवैने पुनाति, देवो वः सवितोत्पुनात्वि,—ति सवितृप्रसूत एवैना उत्पुनात्य,—यये वो जुष्टा,—नित्ययमेव एवैनान् जुष्टान् करोत्य,—थो यस्यै देवतायै प्रोक्षति तस्या एनान् जुष्टान् करोति, यद्वोऽशुद्ध आलेभे तच्छुन्धध्व,—मिति शुन्धत्येवैनान्, अदित्यास्त्वगसीती,—यꣳ वा अदिति,—रस्या एवैनस्त्वचं करोत्य,—वधूतꣳ रक्षा, इति रक्षसामपहत्यै, प्रतीचीनग्रीवं कृष्णाजिनमुपस्तृणाति, तस्मात् प्रत्यञ्चः पशवो मेधमुपतिष्ठन्ते, पृथुग्रावासि वानस्पत्य, इति ग्रावाणमेवैनत् करोत्य,—ग्नेर्जिह्वासि वाचो विसर्जनमित्य,—ग्नेर्ह्येषा जिह्वा वाचो विसर्जनꣳ, यदा हि पशवा ओषधीनामश्नन्त्यथ वाचꣳ विसृजन्ता, आयुषे वा, इत्यायुर्यजमाने दधाति, बृहद्ग्रावासि वानस्पत्यं, इति ग्रावाणमेवैनत् करोति, देवेभ्यो हव्यꣳ शमीष्वे,—ति देवेभ्य एवैनत् करोति ॥ अपहतꣳ रक्षः ॥ इति रक्षसामपहत्यै ॥ हविष्कृदेहि ॥ इति यो देवानाꣳ हविष्कृत्तꣳ ह्वयति, त्रिर्ह्वयति, त्रिषत्या हि देवा, मनोर्वै श्रद्धादेवस्य यजमानस्यासुरघ्नी वाग्यज्ञायुधानि प्रविष्टासीत्, तस्या यावन्तोऽसुरा उपाशृण्वꣳस्तावन्तस्तदहनीयन्त,—क्षेवꣳ विद्वान् ब्राह्मणो भ्रातृव्याणां मध्येऽवसाय यजेत, यावन्त एवास्य भ्रातृव्या यज्ञायुधानामुपशृण्वन्ति तेषां तेन इन्द्रियꣳ वीर्यꣳ वृङ्क्ते, कुक्कुटोऽसि मधुजिह्वस्त्वया वयꣳ संघातꣳ संघातं जेष्मेति, संघातꣳसंघातꣳ वावैतेन यजमानो भ्रातृव्यं जयतीष,—मावद,—ऊर्जमावद, रायस्पोषमावदेत्या,—शिषमेवाशास्ते ॥६॥ ३९-४४

[६] मै. १,१,६ । तै. ब्रा. ३,२,५,१ । काठ. ३१,४ । कपि. ४७,४ । वा. १,१२—१६ । काण्व. १,१६,१८—२१, २३—२४,२६ ।

वर्षवृद्धमसि, प्रति त्वा वर्षवृद्धꣳ वेत्वि,—ति प्रतिष्ठित्या, असुरा वै देवाः पशुभ्यो रक्षाꣳसि निरवादयन्त तुषैरोषधीभ्यो, यदाह, परापूतꣳ रक्षः, परापूता अराति,—रित्येतावुतैव यज्ञस्य रक्षाꣳसि निरवदयते ॥ देवो वः सविता विविनक्तु ॥ इति सवितृप्रसूत एवैनान् विविनक्ति ॥ सुविचा विविच्यध्वम् ॥ इत्याशिषमेवाशास्ते, सुफलीकृतान् कुर्यान्, मेध्यानेनान् यज्ञियान् करोति, त्रिः फलीकरोति, त्रिषत्या हि देवा, अदित्यास्त्वगसीती,—यꣳ वा अदिति,—रस्या एवैनस्त्वचं करोत्य,—वधूतꣳ रक्षा, इति रक्षसामपहत्यै, प्रतीचीनग्रीवं कृष्णाजिनमुपस्तृणाति, तस्मात् प्रत्यञ्चः पशवो मेधमुपतिष्ठन्ते, ऽदित्याः स्कम्भोऽसी,—ति शम्यामुपदधाती,—मे वै सहास्तां, ते शम्यामात्रꣳ शम्यामात्रꣳ व्यैताꣳ, यच्छम्यामुपदधात्यनयोरेव विधृत्यै, धान्यमसि, धिनुहि देवानित्ये,—तस्य वै यजुषो वीर्येण यावदेका देवता काम्यते, यावदेका तावदस्या आहुतिः प्रथते, प्रथते प्रजया पशुभिर्य एवꣳ वेद, प्राणाय त्वापानाय त्वा व्यानाय त्वे,—ति प्राणमपानꣳ व्यानं तान् यजमाने दधाति, दीर्घामनु प्रसितिꣳ सꣳस्पृशेथा,—मायुषे वा, इत्यायुरस्मिन् दधाति, मित्रस्य वश्चक्षुषावेक्षा, इति मित्रमेवैनान् कुरुते, देवो वः सविता हिरण्यपाणिरुपगृह्णात्वि,—ति सवितृप्रसूत एवैनानुपगृह्णाति ॥ ७ ॥ ४५-४९

निर्दग्धꣳ रक्षा, इति रक्षसामपहत्यै, यदधस्तादङ्गारमुपवर्तयत्यस्मिꣳस्तेन लोके ज्योतिर्धत्ते, यदुपरिष्टादन्तरिक्षे तेना,—ऽसा अस्मा आदित्योऽमुष्मिल्लोके ज्योतिर्भवत्य,—थो दिवैवास्मा अमुष्मिल्लोके भवति सर्वेऽस्मा इमे लोका ज्योतिष्मन्तो भवन्ति य एवꣳ वेद, त्रीणि समीचीनान्युपदधाति, त्रयो वा इमे लोका, एषां लोकानां धृत्या, अपाग्नेऽग्निमामादं जही,—ति य आमात् क्रव्यात्तमुपहत्य देवयजने यज्ञिया उपदधाति, ध्रुवमसि, पृथिवीं दृꣳहे,—ति पृथिवीमेव दृꣳहति, धरुणमस्य,—न्तरिक्षं दृꣳहे,—त्यन्तरिक्षमेव दृꣳहति, धर्त्रमसि, दिवं दृꣳहे,—ति दिवमेव दृꣳहति, धर्मासि, विश्वा विश्वानि दृꣳहे,—ति दिश एव दृꣳहति, प्रजापतिर्वै यत् समभवत् स एतावच्छ एव समभव,—देकꣳ वा अग्रे शीर्ष्णः कपालꣳ संभवत्य,—थ द्वितीयमथ तृतीयमथ चतुर्थमथ पञ्चममथ षष्ठमथ सप्तममथाष्टमꣳ, यदष्टा उपदधात्यात्मानꣳ वा एतद्यजमानः सꣳस्कुरुते, तꣳ सꣳस्कृतममुष्मिल्लोकेऽनुपरैति, यदष्टा उपदधाति

[७] मै. १,१,७ । तै. ब्रा. ३,२,५,१० । काठ. ३१,४—५ । कपि. ४७,४—५ । वा. १,१६,१९—२० । काण्व. १, २५,३१—३४ ।

[८] मै. १,१,८ । तै. ब्रा. ३,२,६—७ । काठ. ३१,६ । कपि. ४७,६ । वा. १,१७—१८ । काण्व. १,२७—३० ।

गायत्रीं तेन छन्द आप्नोति, यदेकादश त्रिष्टुभं तेन, यद् द्वादश जगतीं तेना,—ऽथो सर्वाण्येव छन्दःसंमितान्युपदधाति ॥ चितः स्थ, परिचितः स्थ ॥ इति यजुष्मन्ति करोति, वसूनाꣳ रुद्राणामादित्यानां भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्व,—मित्येतासामेतानि देवतानां तपसा तपति ॥ ५०-५२

यानि घर्मे कपालान्युपचिन्वन्ति वेधसः । पूष्णस्तान्यपि व्रत इन्द्रवायू विमुञ्चताम् ॥ ५३

इति यजुषैव युज्यन्ते, यजुषा विमुच्यन्ते ॥ ८ ॥ ५४

देवस्य वः सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ संवपामी,—ति सवितृप्रसूत एवैना देवताभिः संवपति, पवित्रवत्सꣳवपति, हविः करोति, देवो वः सवितोत्पुनात्वि,—ति सवितृप्रसूत एवैना उत्पुनात्य,—प उपसृजत्य,—मृतꣳ वा आपो, ऽमृतमेव हविः करोति, समापा ओषधीभिर्गच्छन्ताꣳ, समोषधयो रसेन, सꣳ रेवतीर्जगतीभिरि,—त्यापो वा एतासामन्या जिन्वन्त्या,—पा ओषधीर्जिन्वन्त्यो,—षधीरपः, शिवाः शिवाभिः समसृक्षतापा इत्या,—पो वै रेवती,—रोषधयो मधुमतीः, पशवो जगती,—रप ओषधीः पशूꣳस्तानसꣳसृज्यैकधा मधुमतः करोति ॥ मखस्य शिरोऽसि ॥ इत्याह यज्ञो वै मख,—स्तस्य वा एतच्छिरः क्रीयते, सीदन्तु विशो, जनयत्यै त्वे,—ति मिथुनमेव करोति, घर्मोऽसि विश्वायु,—रुरु प्रथस्वो,—रु प्रथस्वो,—रु ते यज्ञपतिः प्रथतामिति, प्रथयत्येवैनं ॥ प्रति प्रथस्व पृथिवीमुत द्याम् ॥ इतीमे एव प्रथयति, घर्मो वा एषोऽर्धमासेऽर्धमासे प्रवृज्यते, स ईश्वरोऽशान्तस्तेजसा यजमानस्य पशून्निर्दहो यत् पर्यग्नि करोति पशुमेव करोति शान्त्या अनिर्दाहाय, त्रिः पर्यग्नि करोति, त्रयो वा इमे लोका, एभ्य एवैनं लोकेभ्यः शमयति, पुरोडाशꣳ वा अधिश्रितꣳ रक्षाꣳस्यजिघाꣳस,—न्स नाको नाम दिवि रक्षोहाग्निः, सोऽस्माद्रक्षाꣳस्यपाहन्न, यदाह, देवस्त्वा सविता श्रपयतु वर्षिष्ठे अधि नाके पृथिव्या, इति रक्षसामपहत्यै, शिरो वा एतद्यज्ञस्य यत् पुरोडाशः, केशा वेदो, यथा शीर्ष्णः कपालान्येवं कपालानि, यथा मस्तिष्क एवं पुरोडाशः, संभृतः कार्यो मेध्यत्वाय, यत् पुरोडाशं नाभिवासयेदाविर्मस्तिष्कः स्याद्, यदभिवासयति तस्माद्गुहा मस्तिष्कस्त्वचं ग्राहयति, तस्मान्मस्तिष्कः परिवृतो भस्मनाभ्यूहति, तस्मान्माꣳसेनास्थि छिन्नं ज्वालैरभिवासयति, तस्मात् केशैः शिरश्छिन्नꣳ, यत्त्वचमग्राहयित्वा

[९] मै. १,१,९ । तै. ब्रा. ३,२,८ । काठ. ३१,७ । कपि. ४७,७ । वा. १,२१—२२ ११,५७,३७,८ । काण्व. १, ३६—३८,१२,५९,३७,८ ।

भस्मनाभिवासयेत् पलितंभावुकोऽध्वर्युः स्या,—ज्ज्वालैरभिवासयत्यपलितंभावुकोऽध्वर्युर्भवति, ते वै देवास्तं नाविन्दन् यस्मिन् यज्ञस्य क्रूरमाक्ष्यामहा इति, सोऽग्निरब्रवी,—दहꣳ वस्तं जनयिष्यामि यस्मिन् यज्ञस्य क्रूरमाक्ष्यध्वा इति, सोऽपोऽङ्गारेणाभ्युपातयत्, तत एकतोऽजायत, द्वितीयं, ततो द्वित,—स्तृतीयं, ततस्त्रितो, यदद्भ्योऽधिनिरमिमीत तदाप्त्यानामाप्त्यत्वꣳ, यदात्मनोऽधिनिरमिमीत तदात्मेयानामात्मेयत्वं,—मन्तर्वेदि जुहोति, तदेवावरुन्द्ध, उपरिष्टादभिघारयति श्रतत्वाय, श्रतकामा हि देवा,—स्ते देवा अतिमृजाना आय,—न्त्सूर्याभ्युदिते तेऽमृजत, यꣳ सुप्तꣳ सूर्योऽभ्युदेति सूर्याभ्युदितः, सूर्याभिनिम्रुक्ते सूर्याभिनिम्रुक्तः, श्यावदति श्यावदन्, कुनखिनि कुनख्य,—ग्रेदधुष्यग्रेदधुः, परिवित्ते परिवित्तः, परिविविदाने परिविविदानो, वीरहणि वीरहा, भ्रूणहनि भ्रूणहनमेनो नात्येति ॥ ९ ॥ ५५-५९

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददा इति, सवितृप्रसूत एवैनं देवताभिरादत्ते, सहस्रभृष्टिः शततेजा इति, वज्रꣳ वा एतत् सꣳश्यति भ्रातृव्याय प्रहरिष्यन्, पृथिवि देवयजनि मा हिꣳसिषं ता ओषधीनां मूल,—मित्योषधीनामहिꣳसायै, व्रजं गच्छ गोस्थानमिति, छन्दाꣳसि वै व्रजो गोस्थान,—श्छन्दाꣳस्येवास्मै व्रजं गोस्थानं करोति, वर्षतु ते पर्जन्या इति, पर्जन्यादेव वृष्टिꣳ वनुते, बधान देव सवितः शतेन पाशैः परमस्यां परावतीति, द्वौ वाव पुरुषस्य भ्रातृव्यौ यं द्वेष्टि यश्चैनं द्वेष्टि, तावेव बध्नाति परमस्यां परावति, यो अस्मान् द्वेष्टि यं च वयं द्विष्मस्तमत्र बधान, सोऽतो मा मोची,—त्याशिषमेवाशास्ते, द्रप्सस्ते दिवं मा स्कानिति, यो वा अस्या रसः स द्रप्सं,—स्तमिमं प्रजा उपजीवन्ति, तमस्याꣳ सक्त्यस्कन्दाय ॥ अररुस्ते द्यां मा पप्तत् ॥ इत्यररुर्वै नामासुर आसीत्, स पृथिवीमुपमुच्याशयत्, तमिन्द्रोऽजायत, तं,—मपारकं पृथिव्या अदेवयजन,—मित्यपाह,—न्त्स दिवमपिपतिषत्, तम् ॥ अररुस्ते द्यां मा पप्तत् ॥ इति दिवः प्रत्यनुदत, य एवꣳ विद्वाꣳस्तम्बयजुर्हरत्ये,—भ्यो वा एतल्लोकेभ्यो यजमानो भ्रातृव्यं निर्भजति, त्रिः कृत्वो हरति, त्रयो वा इमे लोका, एभ्य एव लोकेभ्यो भ्रातृव्यं निर्भजति, तूष्णीं चतुर्थꣳ हरति, यो लोको निरुक्तोऽपरिमितस्तस्माद् भ्रातृव्यं निर्भजत्य,—सुराणाꣳ वा इयं पृथिव्यासीत्, ते देवा अब्रुवन्, दत्त नोऽस्याः पृथिव्या इति, ते वै स्वयमेव वृण्वामिति, ततो वै वसवः प्राचीं दिशमुदजयन्,

[१०] मै. १,१,१० । तै. ब्रा. ३,२,९ । काठ. ३१,८ । कपि. ४७,८ । वा. १,२४—२६ । काण्व. १,४०—४३ ।

रुद्रा दक्षिणा,—मादित्याः प्रतीचीं, मरुता उदीचीं, ततो वै देवा इमाममसुराणामविन्दन्त,
ततो देवा असुरानेभ्यो लोकेभ्यो निरभजꣳ,—स्ततो देवा अभवन्, परासुरा, यदेवमेताभि-
र्देवताभिर्वेदिं परिगृह्णातीमाꣳ वा एतद्यजमानो भ्रातृव्यस्य वृङ्क्ते, ऽस्या भ्रातृव्यं निर्भजति,
भवत्यात्मना, परास्य भ्रातृव्यो भवति, पृथिव्या वै मेध्यं चामेध्यं च व्युदक्रामत्, प्राची-
नमुदीचीनं मेध्यमुदक्रामद्, दक्षिणा प्रतीचीनममेध्यं, प्राचीमुदीचीꣳ वेदिं प्रवणां कुर्या,—
न्मेध्यानेनान् यज्ञियान् करो,—त्यथो यदेवास्या उद्घ्नन्तः क्रूरमक्रꣳस्तदक्रूरमक,—स्तच्छमयत्य,-
—थो मेध्यस्य चैवामेध्यस्य च व्यावृत्त्यै, प्राञ्चौ बाहू नयत्या,—हवनीयं तेन परिगृह्णाति,
प्रतीची श्रोणी, गार्हपत्यं परिगृह्णाति, मूलꣳ वै रक्षाꣳस्यनूत्पिबन्ति, यन्नखेन छिन्द्यात्
कुनखी स्यात्, स्फ्येन छिनत्ति, वज्रो वै स्फ्यो, वज्रेणैव रक्षाꣳसि हन्ति ॥१०॥ ६०-६४

यो वै स्रुचाꣳ योगमविद्वानध्वर्यो इति हूतः प्रतिशृणोत्या देवताभ्यो वृश्चते, ऽपशुर्भवत्य,-
—थ यः स्रुचाꣳ योगꣳ विद्वानध्वर्यो इति हूतः प्रतिशृणोति न देवताभ्य आवृश्चते, पशुमान्
भवति, द्यौर्जुहू,—रन्तरिक्षमुपभृत्, पृथिवी ध्रुवा, दिश आज्यधान्य,—सा आदित्यः स्रुवः,
स यत् ॥ ओ श्रावय ॥ इत्याह जुहूं तेन युनक्ति ॥ अस्तु श्रौषट् ॥ इत्युपभृतम् ॥ यजेति ध्रु-
वाम् ॥ ये यजामहे ॥ इत्याज्यधानीꣳ, वषट्कारेण स्रुवं, जुह्वा अधि ध्रुवामभिघारयति,
ध्रुवाया अधि जुह्व,—मसौ ह्यस्यै प्रयच्छती,—यममुष्यै, संततमस्मा अन्नाद्यमव्यवछिन्नं प्रदी-
यतेऽस्मिꣳश्च लोकेऽमुष्मिꣳश्च, पूर्वास्य जनतामायतः कीर्तिरागछति य एवꣳ वेद ॥ ११ ॥
६५-७२

घृतं च वै मधु च प्रजापतिरासीद्, यतो मध्वासीत् ततः प्रजा असृजत, तस्मान्मधोः प्र-
जननमस्ति, तस्मान्मधुना न प्रचरन्ति, यातयामꣳ हि तदाज्येन प्रचरन्त्य,—यातयामꣳ वा
एतत् प्राजापत्यं घृतं,—मयातयामा देवानां प्रजापतिर्गार्हपत्येऽधिश्रयति, पत्न्यवेक्षते, ऽन्वा-
रम्भो वा एष यज्ञस्य यत् पत्न्या, यज्ञमेनामन्वारम्भयत्य,—थो यत् पत्नी यज्ञे करोति मिथुनꣳ
वा एतत् क्रियते प्रजात्या, अमेध्यꣳ वा एतदयज्ञियꣳ यत् पत्न्यवेक्षत, आहवनीयेऽधि-
श्रयति, पुनात्येवैनान्, मेध्यमेनद्यज्ञियं करोति, स्फ्यस्य वर्त्म सादयति रक्षसामपहत्यै,

[११] तै. ब्रा. ३,२,१ । कपि. ४७,९ ।
[१२] मै. १,१,११ । तै. ब्रा. ३,३,४ । काठ. ३१,९ । कपि. ४७,९ । वा. ५,१५;१,२९ । काण्व. ५,२०;१,४६ ।

देवस्त्वा सवितोत्पुनात्विति, सवितृप्रसूत एवैनदुत्पुनाति, हविरसि वैश्वानरमिति, द्वादश वा व्या-
हृतयो, द्वादश मासाः सꣳवत्सरः, सꣳवत्सरेण वा एतत्तेज इन्द्रियꣳ वीर्यꣳ यजमानो भ्रातृव्यस्य
वृङ्क्त, उभयतो वैश्वानरं भवत्यु,—भयतो वैश्वानरꣳ ह्येत,—द्विष्टेजा अस्य निर्वीर्यो भ्रातृव्यो
जायते, ऽथो मृध्रतर एव भवति, देवाश्च वा असुराश्च सꣳयत्ता आस,—न्तस इन्द्र एतमवका-
शमपश्यत्, तेनासुरानभ्यभव,—दभि भ्रातृव्यꣳ यज्ञेन भवति य एवꣳ विद्वान् यजता, आ-
ज्येनान्यानि हवीꣳष्यभिघारयन्ति केनाज्य,—मिति ब्रह्मवादिनो वदन्ति सत्येन वा आज्यमभि-
घृतं, यदाह, सत्येन त्वाभिघारयामीति, चक्षुर्वै सत्यं, चक्षुर्यजमानः प्रदधाति, समी-
स्यैतद्यजुर्वदति, न चक्षुः प्रदधात्या,—ज्यꣳ वै यज्ञो, यज्ञो विष्णुः ॥ ७३

इदꣳ विष्णुर्विचक्रमे त्रेधा निदधे पदा । समूढमस्य पाꣳसुरे ॥ ७४

इति यदोदनपचनेऽधिश्रित्याथ गार्हपत्येऽथाहवनीयेऽधिश्रयत्येतद्वाव तत् त्रिर्विष्णुर्विक्रमते,
प्रत्युष्टꣳ रक्षा, इति रक्षसामपहत्यै, स्रुचः संमार्ष्टि, पुनात्येवैना, मेध्या एना यज्ञियाः
करोति ॥ अनिशिताः सपत्नक्षयणीः ॥ इत्यनिशिता ह्येताः सपत्नक्षयणीः, स्रुवꣳ संमार्ष्टि,
पुमाꣳसꣳ वा आसां तदग्रे सꣳश्यत्य,—थ जुहू,—मथोपभृत,—मथ ध्रुवा,—मसा आदित्यः
स्रुवो, द्यौर्जुहू,—रन्तरिक्षमुपभृत्, पृथिवी ध्रुवे,—मान्वा एतल्लोकान् यथापूर्वꣳ संमाष्टर्ये,—
भ्यो लोकेभ्य आत्मानं परिदत्तेऽहिꣳसायै, जुहूमग्रे संमाष्ट्या,—त्मा वै जुहू,—रात्मानमेवो-
पैत्य,—थोपभृतं, प्रजा वा उपभृत्, प्रजामेवोपैति, परेव ह्यात्मनः प्रजा, ऽथ ध्रुवां,
पशवो वै ध्रुवा, पशूनेवोपैति, पर इव हि प्रजायाः पशवो, यदुत्तानाः संमृज्यादप्रतिष्ठायुकꣳ
रेतः स्याद्, यन्नीचीरप्रतिष्ठायुकꣳ रेतः स्यात्, तिरश्चीः संमार्ष्टि, तिर्यग्वै रेतः सिच्यते,
प्रतिष्ठायुकꣳ रेतो भवति, यदग्रेण मुखं दण्डं च संमृज्याद्रक्षोभ्यश्चाभुवेभ्यश्च समदं दध्या,—द-
ग्रेण मुखꣳ संमार्ष्टि, जघनेन दण्डꣳ, न रक्षोभ्यश्चाभुवेभ्यश्च समदं दधात्य,—न्तरतो जुहूं
प्राचीꣳ संमार्ष्टि बहिष्टात् प्रतीचीं, बहिष्टादुपभृतं प्राचीमन्तरतः प्रतीचीꣳ, सर्वतः समाहाय
ध्रुवां प्राणानेवास्य यथापूर्वं कल्पयति, यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृ,—च्चतुर्गृह्य
जुह्वां भूया आज्यं गृह्णात्य,—ष्टौ गृह्णात्युपभृति कनीय, उपरिस्ति भ्रातृव्यमकृत ॥ १२ ॥
७५-७७

[इदं विष्णुर्वि चक्रमे० । ऋ. १,२२,१७; सा. २२२,१६६९; अथर्व. ७,२६,४; तै. सं. १,२,१३,१; नि. १२,१९]

बर्हीरासादयेद्, यावतीर्वै प्रोक्षणीरासादयति तावतीरस्यामुष्मिंल्लोक आप,—स्तस्माद्बर्हीरा-
सादया, अग्नेर्मेधोऽपाक्रामत्, स कृष्णो भूत्वा वनस्पतीन् प्राविशद्, यदाह, कृष्णोऽस्या-
खरेष्ठो, अग्नये घृतं भवेति, तमेव मेधमवरुन्द्धे, वेदिरसि, बर्हिषे त्वा जुष्टं प्रोक्षामीति,
प्रजा वै बर्हिः, पृथिवी वेदि,—रस्याꣳ वा एतत् प्रजा स्वगाकरोति, यदुपरिष्टात् प्रोक्ष्याध-
स्तात् प्रोक्षति तस्मादुपरिष्टाद्वृष्टादधस्तादोषधयो जायन्ते ॥ ऊर्जा पृथिवीꣳ यछत ॥ इत्यस्यामू-
र्जमदधात्, तस्मादिमां प्रजा उपजीवन्ति, विष्णोः स्तूपोऽसी,—ति मुखतः प्रस्तरं गृह्णाति
मुख्यमेनं तेन शीर्षण्यं करोति, यावद्धस्तेन पर्याप्नुयात्तावन्तं गृह्णीया,—दक्षोधुको यजमानो
भवति, नोर्ध्वमुन्मृज्याद्, यदस्य वित्तꣳ वेद्यं तत् प्रमृज्या,—न्नावाचीनमवमृज्याद्,
यदेनमागमिष्यत् तत् प्रतिनुदेत, न विधूनुयात्, प्रजा पशून् विधूनुयाद्, यदुपतिष्ठित्तदुपसं-
गृह्णीयाद्, यथाशितायोपचिनोत्येवमेव तद्दक्षिणतः शुल्बꣳ स्तृणाति, तस्माद्दक्षिणतो नीवी,—
रुरु प्रथस्वोर्णम्रदसमिति, प्रथयत्येवैनद्, स्वासस्थं देवेभ्या इति, देवेभ्य एवैनत् करोति,
प्रस्तरं धारयन् परिधीन् परिदधाति, स्वयꣳ वा एतद्यजमान आत्मानं परिधत्तेऽहिꣳसायै,
न पुरस्तात् परिदधात्यु,—द्यन्वा असा आदित्यो रक्षाꣳस्यपाहतो,—द्यन्नेवास्मा असा आदित्यो
रक्षाꣳस्यपहन्त्यू,—र्ध्वे समिधा आदधात्यु,—परिष्टादस्मात्तेन रक्षाꣳस्यपहन्ति, द्वे आदधाति
मिथुनत्वाय, विधृती स्था इति, विधृती एवैने करोति ॥ अदित्यास्त्वोपस्थे सादयामि ॥
इती,—यꣳ वा अदिति,—रस्यामेवैनमसीषदद्, वसूनाꣳ रुद्राणामादित्यानाꣳ सदोऽसीत्ये,—ता
वा एतामग्रे देवतामभ्युजयꣳ,—स्ताभ्य एवैनत्सदः करोति, द्यौरसि जन्मना जुहूर्नाम प्रिया
देवानां प्रियेण नाम्ना ध्रुवे सदसि सीदेत्ये—तद्वा आसां प्रियं नाम यद् घृतवत्, सदेवा-
वरुन्द्धे, ता विष्णो पाहि, पाहि यज्ञं, पाहि यज्ञपतिं, पाहि माꣳ यज्ञन्यमिति,
यथा हैप ते भागस्तꣳ रक्षस्वेत्ये,—वꣳ वा एतद्विष्णुमाहै,—तत्ता आज्यं, तद्रक्षस्वेति,
वेदिर्देवेभ्योऽपाक्रामत्, तां देवा वेदेनाविन्दꣳ,—स्तद्वेदस्य वेदत्वꣳ, स्त्री वेदिः, पुमान्
वेदो, यद्वेदेन वेदिꣳ संमार्ष्टि मिथुनत्वाय, संततमाहवनीयात् स्तृणन्नेति यज्ञस्य संतत्यै,
तꣳ संततमुत्तरेऽर्धमासेऽभियजते, वनस्पतिनाꣳ वा एष परिवेष्टा यदुपवेष, ऋद्धा अस्य
वेशा भवन्ति य एवꣳ वेद, पुरस्तात् प्रत्यञ्चमुपहन्ति, तस्मात् प्रतीचीनावसिता वेशाः,

[१३] मै. १,१,११—१२ । तै. ब्रा. ३,३,६ । कठ. ३१,१० । कपि. ४७,१० । वा. २,१–३,६ । काण्व. २,१–२, ४,७–९ ।

स्थविमत उपहन्त्य,—नतिवादिन एनꣳ वेशा भवन्ति, सर्वस्मै वै यज्ञे क्षीयते, सर्पा वा
उपवेषो, वल्मीक उत्करो, यदुपवेषमुत्कर उपहन्ति तस्मात् सर्पाणाꣳ वल्मीको गृहाः ॥
॥ १३ ॥ ७८-८२

भुवनमसि ॥ इति भूतिमाशास्ते ॥ विप्रथस्व ॥ इति प्रथयत्येवैन,—दिवं इन्द्रास्तिष्ठन् वीर्यमकृ-
णोद्देवताभिः समारभ्येत्य,—तो हीन्द्रस्तिष्ठन् वीर्यमकृणोद्देवताभिः समारभ्य ॥ जुहे,—ह्यग्निष्ट्वा
ह्वयति, देवान् यक्ष्यावो देवयज्याया, उपभृदेहि, देवस्त्वा सविता ह्वयति, देवान्
यक्ष्यावो देवयज्यायै ॥ इति, न वा एते अविदुषा स्वादाने इव वरुणपाशान् ह्याक्रामत्येता-
भिरेने देवताभिरादत्ते वरुणपाशानामनाक्रमाय, विष्णोः क्रमोऽसीत्य,—तिक्रामति यज्ञस्यान-
वक्रामायो,—र्वो अध्वरो दिविस्पृगह्रुतो यज्ञो यज्ञपत,—रित्यृजुमूर्ध्वमाघारमाघारयति यज्ञस्या-
ह्रुत्यै,—न्द्रवान्त्स्वेवा,—निति सेन्द्रꣳ यज्ञमकृता,—ऽथो इन्द्रियं तेनावरुन्द्धे ॥ वसुमवस्ते छाया-
मुपस्थेयम् ॥ इत्यग्निर्वै वसुमा,—नग्नेरेव छायामुपतिष्ठत, ऋजुमूर्ध्वमाघारमाघारयेत्, प्राणो वा
आघारः, सर्वमायुर्यजमान एति, यं द्विष्यात्तस्याघारं कुब्जं छिन्द्यात्, प्राणमस्य छिनत्ति,
ताजक् प्रमीयते, शिरो वा एतद्यज्ञस्य यदाघारं, आत्माज्यꣳ, यदाघारमाघार्योपभृता समं-
ज्याच्छिरो, यज्ञस्य प्रछिन्द्या,—दाज्यधान्या समनक्ति ॥ ८३-९०

समक्तमग्निना हविः समक्तꣳ हविषा घृतम् ॥ इत्यात्मन् यज्ञस्य शिरः प्रत्यधा,—दथो मनु
एवं यज्ञे प्रतिदधाति, स्तनꣳ स्तनिनीः प्रजा उपजीवन्ति, किमस्तना, इति ब्रह्मवादिनो
वदन्त्य,—मुमी रिहाणा व्यन्तु वया इत्ये,—तद्वाव ता उपजीवन्ति, वशा पृश्निर्भूत्वा मरुतो
गछति, मरुतो वै वृष्ट्या ईशते, तेऽस्मै वृष्टिं निनयन्ति, ततो नो वृष्ट्यावतेति, मरुद्भ्य
एवं वृष्टिꣳ वनुते, चक्षुष्पा अग्नेऽसि, चक्षुर्मे पाहीति, चक्षुरेवास्य पाति, श्रोत्रपा अग्ने-
ऽसि, श्रोत्रं मे पाहीति, श्रोत्रमेवास्य पाति, तनूपा अग्नेऽसि, तन्वं मे पाहीति, तन्व-
मेवास्य पाति, यन्मे अग्न ऊनं तन्वस्तन्मा आपृणेत्या,—शिषमेवाशास्ते ॥ ९१-९२

यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमानः ।
तं त एतमनु जोषं भरामि नेदेष युष्मदपचेतयातै ॥ ९३

[१४] मै. १,१,१३ । तै. ब्रा. ३,३,७,५—११ । कठ. ३१,११ । कपि ४७,११ । वा. २२,३,५,४२,१२,५,२,८, १६-१८,२१,१४,१७,३,१७ । काण्व २४,३,५,५३,१३,६,२,१२,३२-३५,३९,१५,१७,३,१३—२४ ।
[विष्णोः क्रमोऽसि । अथर्व. १०,५,२५-३५]

इति यजुर्भिर्वै पुञ्ज्यन्ते, यजुषा विमुच्यन्ते, सꣳस्रावभागाः स्थेषा बृहन्ता, इति पारिधीन् प्रहृत्याभिजुहोत्य,—भंगो वा एते तान् प्रीणाति, तान्शमयति भागधेयेन, ब्रह्मवादिनो वदन्ति, स त्वा अध्वर्युः स्याद्, यो यतो यज्ञं प्रयुङ्क्ते तद् प्रतिष्ठापयतीति, देवा गातुविदो गातुꣳ वित्त्वा गातुमित, मनसस्पते सुधात्विमꣳ यज्ञं दिवि देवेषु वाते धाः स्वाहेत्य,—तो वा अध्वर्युर्यज्ञं प्रयुङ्क्ते, तदुवेनं प्रतिष्ठापयति ॥ १४ ॥ ९४

[२०५७]

॥ इति खिलकाण्डे प्रथमः प्रपाठकः ॥ १ ॥

अथ द्वितीयः प्रपाठकः ।

गोनामिकः ।

प्रजापतिर्वा एक आसीत्, सोऽकामयत, बहुः स्यां, प्रजायेयेति, स मनसात्मानमध्यायत्, सोऽन्तर्वानभवत्, स विजायमानो गर्भेणाताम्यत्, स तान्तः कृष्णः श्यावोऽभवत्, तस्मात्तान्तः कृष्णः श्याव इव भवति, तस्य वा असुरेवाजीवत्, तेनासुनासुरानसृजत, तदसुराणामसुरत्वꣳ, स यस्तदसुराणामसुरत्वꣳ वेदासुमान् ह भवति, नैनमसुर्जहाति, सोऽसुरान्त्सृष्ट्वा पितेवामन्यत, तेन पितॄनसृजत, तत् पितॄणां पितृत्वꣳ, स यस्तत् पितॄणां पितृत्वꣳ वेद पितेव ह समानानां भवति, यन्त्यस्य पितरो हवं, तस्मै पितॄन्त्ससृजानाय दिवाभवत्, तेन देवानसृजत, तद्देवानां देवत्वꣳ, स यस्तद्देवानां देवत्वꣳ वेद दिवा ह वा अस्मै देवत्रा भवति, यन्त्यस्य देवा देवहूतिꣳ, स देवान्त्सृष्ट्वामनस्यतेव, तेन मनुष्यानसृजत, तन्मनुष्याणां मनुष्यत्वꣳ, स यस्तन्मनुष्याणां मनुष्यत्वꣳ वेद मनस्वान् ह भवति, नैनं मनो जहात्यु,—ते यदतीव वदुल्वांति वा चरति विछन्तेऽस्य मनुष्या मनुर्ये ततो यो योनिरुदशिष्यत सा गौरभवद्, योनिर्वै नामैषा,—ऽद्धा अस्याः प्रत्यक्षं नाम,—ऽथो आहुः, परोक्षमिति, प्र सहस्रं पशूनाप्नोति य एवꣳ वेद, तस्याꣳ वै पयः पर्यपश्यꣳ,—स्तां देवा अदुह्र हरितेन पात्रेणामृतं, दुहेऽमृतꣳ य एवꣳ वेदा,—ऽथ पितरोऽदुह्र रजतेन पात्रेण स्वधां, दुहे स्वधाꣳ य एवꣳ वेदा,—ऽथ मनुष्या अदुह्र दारुपात्रेणान्नꣳ वप्रं, दुहेऽन्नꣳ वप्रं य एवꣳ वेदा,—ऽथासुरा अदुहायस्पात्रेण संवता सुरां, तेऽभव,—न्त्संवत्यस्य भ्रातृव्यो य एवꣳ वेद, तस्मात् संवता न हस्ता अवनेनिजीत, न पिबे,—देते वा अस्या दोहाः, सर्वैरेवास्या दोहैः सर्वैः

कामैर्भुङ्क्ते य एवꣳ वेद चत्वारि वै नभाꣳसि, देवाः पितरो मनुष्या असुराः, सर्वेषु ह वा एतेष्वम्भो नभ इव भवति य एवꣳ वेद, ताꣳ वा अकामयन्त, मयि स्यान्मयि स्यादिति, तां देवाः काम्ये ॥ इत्याह्वयन्त्सा वा एनानभ्यकामयतो,—भये ह वा एनं देवमनुष्या अभिकामयन्ते वारुका एनमार्त्विज्ये भवन्ति य एवꣳ वेद ॥ श्रव्ये ॥ इति मनुष्याः, सा वा एनानशुश्रूषतो,—भये ह वा एनं देवमनुष्याः शुश्रूषन्ते पूर्वास्य जनतामायतः कीर्तिरागच्छति य एवꣳ वेद ॥ इलान्दे ॥ इति पितर,—स्तेभ्यो वा अतिष्ठत, तिष्ठन्त्यस्मिन् पशवो य एवꣳ वेदा,—ऽथ यथासुरा आह्वयꣳस्तेभ्यो वा अत्रसद्, यो द्विष्यात्तस्य तथा गोष्ठ आह्वयेद्रसन्त्यस्मात् पशव, एतैरेव जुहुयात् ॥ गोनामैः सꣳशृङ्ग्या गोर्मूर्धन् पशुकामः ॥ काम्यायै स्वाहा श्रव्यायै स्वाहेलान्दायै स्वाहा ॥ इति गोष्ठो वै नामैषा लक्ष्मीः, स्वे वा एतद्गोष्ठे यजमानो भ्रातृव्यस्य पशून् वृङ्क्त, एतैर्वै ते ता अवृञ्जत, तैरेवैना वृङ्क्ते, सꣳशृङ्गी भवति पशूनां परिगृहीत्यै, यो वै चक्षुषो विभक्तिꣳ वेद चक्षुष्मान् ह भवति, नैनं चक्षुर्जहाति, यद्दिवा पश्यामस्तद्देवानां चक्षुषा पश्यामो, ऽसौ वा आदित्यो देवानां चक्षुः, पश्यन् ह वै देवत्रा करोति, प्र देवयानं पन्थां जानाति य एवꣳ वेद, यज्ज्योत्स्नायां पश्यामस्तत् पितॄणां चक्षुषा पश्याम,—श्चन्द्रमा वै पितॄणां चक्षु,—र्नै ह वा एनममुष्मिंल्लोके चक्षुर्जहाति प्र पितृयाणं पन्थां जानाति य एवꣳ वेद, यत्तमिस्रायां पश्यामस्तन्मनुष्याणां चक्षुषा पश्याम, एतावद्वाव नः स्वं चक्षु,—र्नै ह वा एनमस्मिंल्लोके चक्षुर्जहाति, सर्वमायुरेति य एवꣳ वेद, यदग्नेरन्ते पश्यामस्तदसुराणां चक्षुषा पश्यामा, उग्रं वा एष दीप्यते नि च रिष्यति, दीप्यमानं भ्रातृव्यस्य गृहाद्धरेद्, रयिमेवास्य पुष्टिꣳ हर,—त्यां तु सूर्यस्योदेतोर्जागृयाद, यत्सत्यादार्तिमार्छेत्तज्जागरितव्यꣳ, रयिमेव पुष्टिमनुजागर्ति ॥ १ ॥ १-९

यो वा इडां धेनुꣳ वेद सर्वा ह वा अस्मै दिशो धेनवो भवन्ति, सर्वे प्रतिजना दानकामा,—स्तामिष्वाशनीरामित्रशोचनिर्विदाचकार, तस्मै सर्वा दिशो धेनवो भवन्ति सर्वे प्रतिजना दानकामा,—स्तस्मात् स सर्वैः प्रतिजनैर्व्यवहतोपजनन्त्सर्वा ह्यस्मै दिशो धेनवो भवन्ति सर्वे प्रतिजना दानकामा,—स्तद्य एवꣳ वेद सर्वा एवास्मै दिशो धेनवो भवन्ति सर्वे प्रतिजना दानकामा,—स्तस्या वा इयमेव पादो, ऽन्तरिक्षं पादो, द्यौः पादः, समा पादो, ऽथो आहुः, कृषिः पादा इति, तेन प्रति त्वदानीं तिष्ठति न त्वदानी, यदा

सुमस्यै भवत्येषु प्रतितिष्ठति, यदा न सर्वं भवत्येषु न प्रतितिष्ठति, भवति ह वा अस्य सर्वं नास्य सर्वꣳ व्यृध्यते य एवꣳ वेद, तस्या वा अद एव पृष्ठ—मन्तरिक्षमात्मा,—यमुरो, दिशः पार्श्वे, समुद्रौ कुक्षी, असा आदित्यः शिरो, ऽग्निराश्यꣳ, वातः प्राणो, गायत्र्यभिधानी, सर्वमायुरेति य एवꣳ वेदा,—वरुणरेवादिः, पवमानो वत्स, एष वा एनां प्रस्तौति, प्रत्तान् ह वा इमांल्लोकान् दुहे य एवꣳ वेद, बृहद्रथन्तरे द्वौ स्तनौ, वामदेव्यं च यज्ञायज्ञियं च द्वौ, ओषधीरेव देवेभ्यो रथन्तरेणादुह, पशून् बृहता,—ऽऽपो वामदेव्येन, यशꣳ यज्ञायज्ञियेन, तद्य एवꣳ वेदौषधीरेवास्मै रथन्तरेण दुहे, पशून् बृहता,—ऽऽपो वामदेव्येन, यशꣳ यज्ञायज्ञियेने,—डा वा इदꣳ सर्वꣳ, स सहस्रं पशून् प्राप, प्र सहस्रं पशूनाप्नोति य एवꣳ वेद ॥ २ ॥ १०

यत्र प्राचीनप्रवणꣳ समूलं भूम्या स्यात् तदुपोदये सूर्यस्य हस्ता अवनिज्य दर्भस्तम्बं उदग्रार्वं निनयेद्, कामंकामं मा आवर्तय ॥ इति कामिनैवास्मै काममावर्तयति यत्कामो भवति, यो वै कामꣳ साक्षाद्वेद तावत्य वा एनꣳ स कामा आगच्छति यत्कामो भवति, पशुषु वा अस्यार्ध कामः, पशूनामोषधीष्वो,—षधीनामप्स्वो,—षधीरेव कामेन समसाद्, ता अस्मै कामꣳ समर्धयन्ति यत्कामो भवत्या,—प एवा,—ऽस्यां वा एष व्रिक्रुत्सृष्टश्चरति लोमशो लोमशाया,—स्तस्मादेषा श्रोषसत्त्वेत्य,—ग्निरेवास्या आस्यꣳ, वातः प्राणो, यत्र गोभिः संगच्छेत तद्दूयाद् ॥ प्रशस्ताः स्थ कल्याण्यः ॥ ईतीयꣳ वा एवे,—माꣳ वा एतत् समागमयत, यत्रासुका अस्मात् पशवो भवन्ति य एवꣳ वेद, देवाश्च वा असुराश्चास्पर्धन्ता,—ऽदितिर्देवेष्वासीत्कुस्त्वासुरेषु, ते देवा अमन्यन्त, यद्यमिजेष्यामः कुस्तायाः शिर आहनिष्यामा इति, यद्यमिजेष्यामा, इत्यसुरा अमन्यन्ता,—ऽदित्याः शिर आहनिष्यामा इति, ता देवा अभिजित्याभत, यस्य वै जितꣳ यस्य विजितं तस्यैषा गृहं हन्यत, एषा वै क्षुत, क्षुधꣳ वा एतद्धते, तद्य एवꣳ विद्वानिकाद्रुकायां गोꣳ हते सꣳवत्सरायैव क्षुधꣳ हते, प्रजापतिर्वा एक आसीत्, सोऽकामयत, बहु स्यां प्रजायेयेति, स आत्मानमैक्षत्, स मनोऽसृजत, तन्मन एकधासीत्, तदात्मानमैक्षत्, तद्वाचमसृजत, सा वागेकधासीद्, सात्मानमैक्षत्, सा विराजमसृजत, सा विराडेकधासीद्,

[३] मा. श्रौ. ९,५,१ ।

सात्मानमैक्षत्, सा गामसृजत, सा गौरेकधासीत्, सात्मानमैक्षत्, सेडामसृजत, सेडेकधासीत्, सात्मानमैक्षत्, सेमान् भोगानसृजत, यैरस्या इदं मनुष्या भुञ्जत एते वा अस्या भोगाः, सर्वैरेवास्या भोगैः सर्वैः कामैर्भुङ्क्ते य एवꣳ वेद, गौर्वै वाग्, गौर्विराड्, गौरिडा, गौः खल्वेव गौ,—र्गौरिदꣳ सर्वꣳ, सर्वा ह वा एनमेताः श्रयन्ते य एवꣳ वेद, यद्वै तदात्मानमैक्षत् सेडाभवत्, तदिडाया इडात्वꣳ, स यस्तदिडाया इडात्वꣳ वेदेद्धे ह वै स्वमात्मानं भूत्यै ॥ ३ ॥ ११-१४

या रोहिणी तामरुणा, ता गौरी, ता बभ्रूः ॥ तदिन्द्रा उदाजत वसुर्नाम रूपं पशूनाम् ॥ विन्दते वसु, न वसु रुणद्धि य एवꣳ वेद, या शितिपृष्ठा ता मन्दि,—स्ता मैत्री, ताꣳ शबली, ताꣳ शितिबाहु,—स्ताꣳ शुद्धवाला ॥ तद्बृहस्पतिरुदाजतेडा नाम रूपं पशूनाम् ॥ बह्वीर्ह वा एनमिडाः श्रयन्ते य एवꣳ वेद, या पृषती ता पिशङ्गी, ताꣳ सारङ्गी, ता कल्माषी, ता पृश्नि,—स्ताꣳ श्वेता ॥ तन्मरुता उदाजन्त ज्योतिर्नाम रूपं पशूनाम् ॥ ज्योतिष्मान् भवति य एवꣳ वेद, या सुरूपा ताꣳ श्यामा, ताꣳ श्येनी, ता कृष्णा ॥ तद् प्रजापतिरुदाजतायुर्नाम रूपं पशूनाम् ॥ आयुष्मान् भवति य एवꣳ वेद, चतस्रः प्रथमा,—श्चतस्र उत्तमा, द्विः पञ्चभ्युतं,—स्ता द्विदश, दशाक्षरा विराड्, वैराजाः पशवः, पशूनेवावरुन्द्धे ॥ वस्व्यै हिंकुरु, तस्यै प्रस्तुहि, तस्यै मेऽवरुद्ध्यै ॥ इति पुरस्ताद्बहिःपवमानस्य वदेत् ॥ इडायै हिंकुरु, तस्यै प्रस्तुहि, तस्यै मेऽवरुद्ध्यै ॥ इति पुरस्तादाज्यानाꣳ वदेत् ॥ ज्योतिषे हिंकुरु, तस्यै प्रस्तुहि, तस्यै मेऽवरुद्ध्यै ॥ इति पुरस्तान्माध्यंदिनस्य पवमानस्य वदेत् ॥ आयुषे हिंकुरु, तस्यै प्रस्तुहि, तस्यै मेऽवरुद्ध्यै ॥ इति पुरस्तादार्भवस्य पवमानस्य वदेत् ॥ यज्ञो वै पशूनामायतनꣳ, स्वे वा एतदायतने यजमानो भ्रातृव्यस्य पशून् वृङ्क्ते, ऽनपक्रामुका अस्मात् पशवो भवन्ति ॥ ४ ॥ १५-३२

वसीयस्येहि, श्रेयस्येहि, भूयस्येहि, चित्ता एहि, दधृष्यैही,—डा एहि, सूनृता एहि, इचेदसि, मनासि, धीरसि वस्वी रन्तिः सुमनाः ॥ सूनरि विश्वा त्वा भूतानुप्राणन्तु, विश्वा त्वं भूतानुप्राण, भूयस्यायुरसी,—ष्टिरसि, सरूपवर्णा एहि ॥ ३३-३४

एमामनु सर्पतेमां भद्रां धुर्या अभि । नीव शीर्षाणि मृद्ध्वम् ॥ ३५

[५] वा. ४,१९ । काण्व. ४,२५ । मा. श्रौ. ९,५,१ ।

सा नः सुप्रतूर्तिः प्रिया नः सुहार्णः प्रियवनिर्मघवनिरन्ता एहि, जुष्टा एही,—डा एद्यं,-
—दिता एद्यु,—पहूत उपहवं तेऽशीय, सुहवा ना एहि सह रायस्पोषेण, देवीर्देवीरभि मा
निवर्तध्वम् ॥ ३६
स्योना स्योनेन घृतेन मा समुक्षत ॥ ३७
नमे तदुपदम्भिषर्धृपिब्रह्मा यद्ददौ । समुद्रादुदजनि वः स्रुचा ॥ ३८
वारेग्रे विप्रस्य तिष्ठति शृङ्गेभिर्दशभिर्दिशम् ॥ ५ ॥ ३९
वसीयस्येहीति, ब्रह्म वै वसीयो, ब्रह्म वा एतदुत्याह्वयति, श्रेयस्येहीति, क्षत्रꣳ वै
श्रेयः, क्षत्रꣳ वा एतदुत्याह्वयति, भूयस्येहीति, विड्वै भूयसी, विशꣳ वा एतदुत्याह्वयति,
चित्ता एहीति, मनो वै चित्तं, मनो वा एतदुत्याह्वयति, दधृष्येहीति, वाग्वै दधृषि,
वाचꣳ वा एतदुत्याह्वयती,—डा एहीति, पशवो वा इडा, पशून् वा एतदुत्याह्वयति, सूनृता
एहीत्यं,—न्नꣳ वै सूनृता,—न्नꣳ वा एतदुत्याह्वयत्ये,—ता वै सप्त देवगव्य,—स्ताः क्रीतो वैतहोत्रो
विदांचकार, ताभिरदः कुरूणां कौन्तो पशूनत्याह्वयत्, ताः कुरवो ब्राह्मणेष्वन्वैछꣳ,—स्ताः
कुमारवत्यांश्वदक्षिणा अविन्द,—न्त्सोऽब्रवी,—न्मा संक्ष्यते,—ताभिर्वा अहमेता अत्याह्वयिष्यामी,-
—तराभिरितरा, यानि खलु वा एतासां प्रियाणि धामानि तानि क्रीतो न वेदेति, स संयत्ते
संग्रामे छदिर्दर्शी, एताभिरेवैता अत्याह्वयिष्यामी,—तराभिरितरा, यतरत्र खलु वा एता
अत्याहूयन्ते तत् पशवोऽभिसंक्रामन्ति, यत्र पशवस्तद्देवा, यत्र देवास्तदिन्द्रो, यतरान्वा
एतेऽभिसंक्रामन्ति ते जयन्ति, जयति संग्रामम् ॥ ६ ॥ ४०
सा वै सृष्टाभयान् देवमनुष्यानन्यमन्यत, तां देवा दर्शपूर्णमासाभ्यामुपप्रास्तृणत, ताꣳ
वा एतदाप्नुवन् यदिडां, ताꣳ वा एतदाप्त्वा हरन्तो मन्यन्ते यदिडामुपह्वयन्ते, यर्हि तूष्णी-
मुपह्वयेत तर्ह्येताः सप्त वदेद्, यर्ह्युच्चैस्तर्ह्युत्तराः सप्त, धाम धामासाꣳ वर्णꣳ वर्णमुपगछ,-
—त्या ह वा एनमप्रतिख्यातं गछति य एवꣳ वेद, यत्र स मूला ओषधीरुपगछेत् पशून् वा
तदेता एव सप्त वदेद्, धाम धामासाꣳ वर्णꣳ वर्णमुपगछ,—त्या ह वा एनमप्रतिख्यातं गछति
य एवꣳ वेद, सप्त स्थवीर्येण याजयेद्, यस्य सप्त स्थविराश्चरमामन्तमा स्यु,—र्वसीयस्येहि,
श्रेयस्येही,—त्येतदेतद्देवास्मा अत्याह्वयति, यो वैश्यः शूद्रो वा बहुपुष्टः स्यात्तस्य गवाꣳ सान्दꣳ

[६] मा. श्री. ९,५,१ ।
[७] वा. ३७,१२;२,२६;१०,२५ । काण्व. ३७,१२;२,४८;११,३५ । मा. श्री. ९,५,१ ।

वत्सतरमपमयेत ॥ इलान्दाः स्थ ॥ इतीलान्दा हि पशवः पुष्णा नक्षत्रं पोषयिष्णु ॥ इति विश्येषु
वा एतच्चरति पुष्णा नक्षत्रं पोषयिष्णु, तद्देवोपधापयते, तमपाकुर्वीत ॥ आयुर्मे दा, वर्चो
मे दा, रयिं मे दाः, पुष्टिं मे दाः ॥ इति रयिमेवास्य पुष्टिꣳ हरति, तमितोऽभिसृज्याथे-
तोऽत्याह्वयेद्, वसीयस्येहि, श्रेयस्येही,—त्येतदेतद्देवास्या अत्याह्वयति, नास्य किंचनो-
दशिषद्, ग्रामकामꣳ याजयेत् सारस्वत ऋग्भ्याꣳ, संवत्सरो वै सरस्वा,—न्त्संवत्सरेणैवास्मै
ग्रामं च्यावयति, वसीयस्येहि, श्रेयस्येही,—त्येतदेतद्देवास्या अत्याह्वयति, पशुकामꣳ याज-
येत् सारस्वत ऋग्भ्याꣳ, संवत्सरो वै सरस्वा,—न्त्संवत्सरेणैवास्मै पशूꣳश्च्यावयति, वसी-
यस्येहि, श्रेयस्येही,—त्येतदेवदेवास्मा अत्याह्वयति, सर्वासां दुग्धे चतुःशरावमोदनं पचेद्
ब्राह्मणेभ्यः पशुकामो, यच्चतुःशरावो दिग्भ्य एवास्मै तेन पशूनवरुन्द्धे, यद् ब्राह्मणेभ्यो ब्रह्म-
णस्तेन, न छिन्नं देयं, पशुकाम इव ह्येषं, वासो हिरण्यꣳ वा देय,—मीजानस्यास्य
पशवो भूयाꣳसो भवन्ति ॥ ७ ॥ ४१-४६
प्रजापतिर्वै न व्याहरत्, स आत्मन्येव पुण्यमायछ,—दात्मनः पुण्यं न निरवद,—देतद्वै तद्य-
जुर्वेदन्नान्यथा ब्रूयात् ॥ पुण्यं प्रशस्तम् ॥ इति ब्रूया,—दात्मन्येव पुण्यꣳ यछत्या,—त्मनः पुण्यं
न निर्वदति, यामदानीयाय ददाति तामस्य पशवोऽन्वपक्रामन्ति, यदि मन्येता,—दानीया-
यादामित्येतदेव यजुर्वदे,—न्नमे तदुपदम्भिषर्धृपिब्रह्मा यद्ददा इति, तदेवैतेनापूरयति, तदाप्या-
ययति, समुद्र इव ह वा अस्य व्यच्यमानो न क्षीयते य एवꣳ वेद ॥ वीरवतीर्भूयास्त या नो
वीरवतोऽकर्त ॥ इति पुमाꣳसं जातमभिमन्त्रयेत ॥ भूयसीर्भूयास्त या नो भूयसोऽकर्त ॥ इति
स्त्रियं जाताम् ॥ अन्नादा भूयास्त ये नोऽन्नादानकर्त ॥ इति वलिहृतोऽभिमन्त्रयेत ॥ भूयाꣳसो
भूयास्त ये नो भूयसोऽकर्त ॥ इति सभासदः, पादौ प्रत्यवहरे,—देतं वै पशवा, उपोप ह
वा एनं पशवो यन्ति नापयन्ति य एवꣳ वेद ॥ पुण्या पुण्यमस्थ,—चित्रा चित्रमस्थ,—देडो मे
भगवोऽजनिष्ठा मैत्रावरुण, ऊर्जा मे भगवः सह जनिष्ठाः, सꣳविदं मे विन्द ॥ इति पुमाꣳसं
जातमभिमन्त्रयेतो,—र्जवास्मै सह जायते, गछति पशूनाꣳ संविदम् ॥ पुण्या पुण्यामस्थ,—
चित्रा चित्रामस्थ,—डेडी मे भगवत्यजनिष्ठा मैत्रावरुणी, रायस्पोषेण मे भगवती सह जनिष्ठा,
गात्रं मे विन्द ॥ इति स्त्रियं जाताꣳ, रायस्पोषेणैवास्मै सह जायते, गछति पशूनां गात्रꣳ,

[आयुर्मे दा० । अथर्व. २,१७,४]
[८] मा. श्री. ९,५,२ ।

ये प्राचीनमेकाष्टकाया जायन्ते पूर्वस्य ते सस्यस्योत्तमा, ये प्रतीचीनमपरस्य ते सस्यस्य प्रथ-
मा,—स्तानुभयान्त्सहाभिमन्त्रयेतो,—भयानेनान्त्सहावरुन्द्धे ॥ ८ ॥ ४७-६१
यो वै शक्तिꣳ वेद स तच् शक्नोति यच् शिक्षती,—यꣳ वै शक्ति,—र्यो वा अस्या भूयिष्ठ-
भाग्भवति स तच् शक्नोति यच् शिक्षति, भूयिष्ठभाग्घ वा अस्या भवति य एवꣳ वेद, पशवो
वै शक्ति,—र्यो वै पशूनां भूयिष्ठभाग्भवति स तच् शक्नोति यच् शिक्षति, भूयिष्ठभाग्घ वै पशुमान्
भवति य एवꣳ वेद, तस्या व्रतं न हते,—ति ब्रूयात् ॥ कुरुत, इति ब्रूया,—त्सान्तवत्नी,-
—ति ब्रूया,—द्विजन्या, इति ब्रूयाद्, भुवनमसि सहस्रमिन्द्राय त्वा सृमोऽददात् ॥ इति
सृमो वै नामासुर आसीत्, तस्येयं पृथिवी पशुभिः पूर्णासीत्, तानिन्द्रोऽवृङ्क्त, तस्मा-
दाहु,—रैन्द्राः पशवा इति, यावतीनामिदं करोमि भूयसीनामुत्तराꣳ समां क्रियासम् ॥ इति
गवां लक्ष्म कुर्याद्, भूयसीनामेवोत्तराꣳ समां करोति, पशवो वै सृष्टा एकैकं नक्षत्रमुपाति-
ष्ठन्त, तेन प्राजायन्त, न भूमानमगछꣳ,—स्ते रेवतीमुपातिष्ठन्त, रेवत्यां प्राजायन्त,
रेवत्यां भूमानमगछꣳ,—स्तस्माद्यत्किंच पशूनां कुर्वीत तद्रेवत्यां कुर्वीता,—प ह्येनं पशवस्तिष्ठन्ति,
प्रास्य पशवो भवन्ति य एवꣳ वेद, यस्य दक्षिणतः प्रतिभिन्नं दक्षिणत उपाश्चरत्तत्स्वष्टुलक्ष्म
देवलक्ष्मꣳ यज्ञियꣳ यज्ञकामः कुर्वीता,—प ह्येनꣳ यज्ञो नमति, यस्योभयतः प्रतिभिन्नमुभयत
उपाश्चरत् तद्गायत्रं लक्ष्म पशव्यं पशुकामः कुर्वीत, पशुमान् भवति, यस्योभयतः प्रतिभि-
न्नमुभयत उपाश्चरत् तत् त्रैष्टुभं लक्ष्म पूतस्य रूपं प्रतिष्ठाकामः कुर्वीत, गछति प्रतिष्ठाꣳ,
यत्स्थूणाकर्णीः कुरुते वसिष्ठस्य स्थूणाकर्ण्यो, वसिष्ठो वै रयिमपश्यत्, तामात्मन्नधत्त,
पशुष्वेव रयिं धत्ते, जमदग्नेः कर्करिकर्ण्यो, जमदग्निर्वै पुष्टिमपश्यत्, तामात्मन्नधत्त,
यत्कर्करिकर्णीः कुरुते पशुष्वेव पुष्टिं धत्ते, ऽसुराणाꣳ सास्नाकृत्यः, क्षिप्रं वह्वीर्भवन्ति क्षिप्रं
पराभवन्त्य,—मेध्याः कर्णाः, क्षिप्रं वह्वीर्भवन्ति, यज्ञस्त्वेनाननूपनमतीव, निर्ऋत्याः
छिद्रकर्ण्यो, यच्छिद्रकर्णीः कुर्वीत निर्ऋतिरस्य पशोर्निगृह्णीया,—न्न प्रछिन्द्या कर्ण्यः कार्या
न दात्राकर्ण्यः, पराचीनमिव हि तन्निकृत्त,—मगस्त्यस्य विष्टयकर्ण्यः, कश्यपस्य कम्बुन्युद्ध-
स्ता, इन्द्रस्याकलस्ता, अथो आहुः, प्रजापते,—रित्युभयं ज्येष्ठलक्ष्म ज्यैष्ठ्यकामः कुर्वीत,
प्र समानानां ज्यैष्ठ्यमाप्नोति, प्रजापतिः पशूनसृजत, स वा असृगेव नासृजता,—ऽसृष्टꣳ वा
एतत्, तदुस्रोऽसृक्त्वं, क्रूरं पशूनां कर्ण्या, इति वै सोऽसृग्नासृजत, क्रूरं वा एषं पशूनां
कुरुते योऽक्ष्णुते, यदक्षितास्तेनाक्षिता, अथ यदनक्षिता इति श्रूयन्ते तेनाक्षिता,—स्तदाहु,-

[९] मा. श्री. ९,५,३ ।

—र्न वा एतमेता अमुत्रागछन्ति या अनक्षिता इति, तस्मादक्षितꣳव्या, न तेजनेनाक्ष्णुयाद्,
वज्रो वै तेजनꣳ, यत्तेजनेनाक्ष्णुयाद्वज्रेण पशूनर्पये,—न्न श्यामिनायसा क्रूरं, तदशान्त,—मि-
क्षुकाण्डमप्सु वासयित्वा तेनाक्षितꣳव्या,—स्तद्धि शिवं, तच् शान्तं,—मथो आहु,—र्लोहितेना-
यसेति, तद्धि शिवं, तच् शान्तम् ॥ ९ ॥ ६२-६५
इह प्रजा विश्वरूपा रमन्तामस्मिन् गोष्ठे विश्वभृतो जनित्रीः ।
अग्निं कुलायमभि संविशन्तीः समासृजन्तु पयसा घृतेन ॥ ६६
इति गाः सायमावतीरभिमन्त्रयेता,—ऽग्निर्वा एतासाꣳ योनि,—रग्निः कुलायꣳ, स्व एवैना
योनौ स्वे कुलाये संवेशयति, नास्य पशवो नक्तमार्तिमार्छन्ति य एवꣳ वेद ॥ ६७
सꣳ वः सृजत्वर्यमा सं पोषा सं बृहस्पतिः । समिन्द्रो यो धनंजयः ॥ ६८
संजग्माना अविह्रुता अस्मिन् गोष्ठे पुरीषिणीः । स्वावेशा ना आगत ॥ ६९
इति गाः संसृजेद्या अस्य पुरा स्युर्याश्चान्यतो विन्देत, पशवो वै घृत,—मग्नी रुद्रो,
यज्जुहुयाद्रुद्रायास्य पशूनपिदध्यात्, तत्संसृज्या एवो,—भयीहि, भूयसीर्भवन्ति, सꣳ वः
सृजत्वर्यमेति, यज्ञो वा अर्यमा, यज्ञेनैवैनाः संसृजति, सं पूषेति, पुष्टिर्वै पूषा,
पुष्ट्यैवैनाः संसृजति, सं बृहस्पतिरिति, ब्रह्म वै बृहस्पति,—र्ब्रह्मणैवैनाः संसृजति,
समिन्द्रो यो धनंजय इती,—न्द्रियꣳ वा इन्द्र, इन्द्रियेणैवैनाः संसृजति, रेवती तन्तिः
पृथिवी माता, रेवतीरापा ओषधयः ॥ ता नो हिन्वन्तु सातये धिये जुषे ॥ इति तन्तिꣳ वित-
नुयात्, तामनुमृज्यात् ॥ रय्या त्वा पुष्ट्यानुमार्ज्मि ॥ इति रय्यैवैनां पुष्ट्यानुमार्ष्टि, तस्या
व्रतं न रिक्ता स्या,—न्नोपर्युपरि संचरेयु,—र्नाभिवर्षेन्नाभितपे,—देतद्वै वस्तो रामकायनो विदां-
चकार तन्त्या वितनुनꣳ, स सहस्रं पशून् प्राप, प्र सहस्रं पशूनाप्नोति य एवꣳ वेद ॥
७०-७४
पिता वत्सानां पतिरघ्न्यानामुतायं पिता महतां गर्गराणाम् ।
रेतोधा त्वा यशोधाꣳ रायस्पोषायोत्सृजेत् ॥ ७५
इत्यृषभस्य कर्णं उत्सृजमानो वदेद्, रेतोधामेवैनꣳ यशोधाꣳ रायस्पोषायोत्सृजते, यो

[१०] मा. श्री. ९,५,३ ।
[सꣳ वः सृजत्वर्यमा० । अथर्व. ३,१४,२ । संजग्माना अविह्रुता० अथर्व. ३,१४,३ । पिता वत्सानां० । अथर्व. ९,४,२ (प. पा.) ९,४,४ (पूर्वार्धः)]

वैश्यः शूद्रो वा बहुपुष्टः स्यात्तस्य गवां गोष्ठादेकविंशतिं प्रक्रान्याहुत्यैकविंशतिमाहुतीर्जुहुया,-देकविंशतिर्वै मनुष्यलोका, मनुष्यलोकमेव एवास्मै पशूनवरुन्द्ध, एतैरेव जुहुयाद्गोनामैरग्रे-त्वया गोमेदि पशुकामो, मुखं वा एष पशूनां, मुखत एवास्मै पशूञ्जिनयति ॥ १० ॥
७६

यासामिन्द्र उदाजत वसु नाम रूपं पशूनामुपसं धाम पश्यमानः ॥ तासामयं योनिरयं गोष्ठ इह रयिः पुष्टिः । स्वाहा ॥ इति जुहुयात् ॥ यासां बृहस्पतिरुदाजतेडा नाम रूपं पशूनां संगवे धाम पश्यमानः ॥ तासामयं योनिरयं गोष्ठ इह रयिः पुष्टिः । स्वाहा ॥ इति जुहुयात्॥ यासां मरुत उदाजन्त ज्योतिर्नाम रूपं पशूनां मध्यंदिने धाम पश्यमानाः ॥ तासामयं योनिरयं गोष्ठ इह रयिः पुष्टिः । स्वाहा ॥ इति जुहुयात् ॥ यासां प्रजापतिरुदाजतायुर्नाम रूपं पशूनामपराह्णे धाम पश्यमानः ॥ तासामयं योनिरयं गोष्ठ इह रयिः पुष्टिः । स्वाहा ॥ इति जुहुया,-देतानि वा अह्नो रूपाण्ये,-तेषु वा अह्नो रूपेषु देवाः पशूना रूपाण्यवृञ्जत, तदेतेष्वेवाह्नो रूपेषु यजमानो भ्रातृव्यस्य पशून् वृङ्क्ते, घृतेन जुहोति, पशवो वै घृतं, पशुभिरेव पशून् वृङ्क्ते, तस्मै वस्यै, प्रातरेवान्तर्गोष्ठासु गोषु होतव्यं, सर्वा एनाः सहावरुन्द्ध, एतैरेव जुहुयाद्गोष्वाकृतासु, योनिर्वा एतत् पशूनग्रही,-दविहीनाः परिपरिणस्कृण्वन्त्ये,-तैरेव जुहुयात्संग्रामे, ऽर्धाश्वानभिमन्त्रयेत ॥ मित्रभृतः क्षत्रभृता ओजोभृतो बलभृतो वयं जयेम वयं सहेम, वयं भवेम, वयं पुषेम ॥ इति जयति संग्रामम् ॥ रोहिणीर्वो वृञ्जे गायत्रेण छन्दसा, ऽरुणा वो वृञ्जे त्रैष्टुभेन छन्दसा, गौरीर्वो वृञ्जे जागतेन छन्दसा, बभ्रवो वो वृञ्ज आनुष्टुभेन छन्दसा गर्भान्वो वृञ्जे पाङ्क्तेन छन्दसा, रूपाणि वो वृञ्जे शाक्करेण छन्दसा, सर्वान् वो वृञ्जेऽनाप्तेन छन्दसा, तत् सर्वं, सर्वपदा शक्वरी, शाक्वराः पशवः पशूनेवावरुन्द्धे, गायत्री प्रथमा, गायत्र्युत्तमा, तेजो वै गायत्री ब्रह्मवर्चसं, तेजसा च वा अस्मा एतद् ब्रह्मवर्चसेन चोभयतः पशून् परिगृह्णाति ॥ ११ ॥
७७-९१

प्रजापतिर्वै अग्निमङ्गिरसोऽसृजताग्निं वायुं सूर्यं, ते चत्वारः पितापुत्राः सत्रमासत, ते स्वेदं समवीयुं,-स्तदेमवन्, तद्वा अस्यैतन्नामाभूदिति, सर्वमभूदिति, तद्वा अस्यैते नामनी क्रूरे अशान्ते, तस्मादेते न ग्रहीतव्ये, क्रूरे ह्येते अशान्ते, प्रजापतिर्वै स्वां दुहितरमभ्यकामयतोषसं, सा रोहिदभवत्, तामृश्यो भूत्वाध्यैत्, तस्मा अप-

व्रतमच्छदयत, तमायतयाभिपर्यावर्तत, तस्माद्वा अबिभेत्, सोऽब्रवीत्, पशूनां त्वा पतिं करोम्य,-थ मे मा स्था इति, तद्वा अस्यैतन्नाम पशुपतिरिति, तमभ्यायत्याविध्यत्, सोऽरोदीत्, तद्वा अस्यैतन्नाम रुद्र इति, ते वा अस्यैते नामनी शिवे शान्ते, तस्मादेते कामं ग्रहीतव्ये, शिवे ह्येते शान्ते, ततो यत् प्रथमं रेतः परापतत् तदग्निना पर्यैन्द्, तदासामघ्न्यात्वं, ततो यदुत्यस्रवत्तद् बृहस्पतिरुपागृह्णात्, तदासामुस्रियात्वं,-मशक्रामेति, तदासां शक्करीत्वं, गातुमविदामेति, तदासां गोत्वं,-मेतानि वा आसां नामानि, सर्वैरेवासां नामभिः सर्वैः कामैर्भुङ्क्ते य एवं वेद, पशवो वै सृष्टा एतानि नक्षत्राण्यन्वपाक्रामन् पौर्णमासीमष्टकाममावास्यां चित्रामश्वत्थं, तस्मात्तेषु गोनापाकृत्या, यामपाकुर्यात्तामस्य पशवोऽन्वपक्रामेयुः ॥ १२ ॥
९२

देवा वै सर्वे सहान्तर्वन्तोऽभवं,-स्ते सर्वे सह व्यजायन्त, तदेकवृदशयत् संवृत्तं, तदेवा इत्थं चेत्थं च व्यत्यचरंस्तन्मित्रावरुणा अचायतां, स्याद्वै य एनद्विकुर्यादिति, तद्वा द्विपदीमकुरुतां, सा न प्रत्यतिष्ठत्, तस्या अन्यत आहृत्येमौ प्रत्यधत्तां, तस्मादेवा अबद्धा अस्थं,-न्त्सा चतुष्पदी भूत्वा प्रत्यतिष्ठत्, प्रति प्रजया च पशुभिश्च तिष्ठति य एवं वेद, तस्यां वै पयः पर्यपश्यं,-स्तां देवा अदुह्र हरितेन पात्रेण यज्ञं चामृतं च, दुहे यज्ञं चामृतं च य एवं वेदा,-ऽथ पितरोऽदुह्र रजतेन पात्रेणोर्जं च स्वधां च, दुह ऊर्जं च स्वधां च य एवं वेदा,-ऽथ मनुष्या अदुह्र दारुपात्रेणान्नं च प्रजां च, दुहेऽन्नं च प्रजां च य एवं वेदा,-था ऋषयोऽदुह्र चमसेन छन्दांसि च पशूंश्च, दुहे छन्दांसि च पशूंश्च य एवं वेदा,-ऽथ गन्धर्वाप्सरसोऽदुह्र पुष्करपर्णेन पुण्यं गन्धं, दुहे पुण्यं गन्धं य एवं वेदा,-ऽथ सर्पा अदुह्रालाबुना विषं, दुहे भ्रातृव्याय विषं य एवं वेदा,-ऽथासुरा अदुह्रायस्पात्रेण संवर्ता भूतिं च पराभूतिं च, दुहे भ्रातृव्यायाभूतिं च पराभूतिं च य एवं वेद, तां वा इन्द्रोऽनयेवोपासीदते,-दं सर्वमदुहद्यदिदं किंच, तां दुग्ध्वा प्रत्यनुदत, सा प्रतिनुत्ता कुमना अतिष्ठद् ध्यायन्ती, तां प्रजापतिरचायद्, ध्यायति वा इति, सोऽब्रवीत्, किं ध्यायसीति, साब्रवीद्, ये माधुक्षत ते मा प्रत्यनुदन्तेति, सोऽब्रवी,-न्मा मृक्ष,-स्तथा वै त्वा कर्ष्यामि यथोभयेषां देवमनुष्याणां प्रिया भविष्यसीति, तस्या घृतं पद्भ्योऽक्षरत्, तस्य घृतस्यादाय मुखं व्यमार्ट् ॥ उभयेषां त्वा देवमनुष्याणां प्रियां करोमि ॥ इति तस्मादेषोभयेषां देवमनुष्याणां प्रियै,-तेनैव श्रोत्रियस्य मुखं विमृज्या,-दुभये ह्येतं देवमनुष्या विदु,-रेतेन

कुमार्या, एतेन पतिकामाया, एतद्वै गोवर्चसं न सर्वस्मा इव कुर्याद्, यस्मै तु कुर्वीत तेजस्वी स्यात् ॥ १३ ॥
९३-९५

यो ललामः शितिपात् शितिककुत् शितिभसत् शितिबाहुः, सांशारिः सामक्ताष्टयूथा, प्राष्टी यूपान्वाप्नोति यस्य तादृक्वृषभो भवति, यस्य वालतुषः प्रतिष्ठितः स प्रतिष्ठिता, प्रति प्रजया च पशुभिश्च तिष्ठति यस्य तादृक्वृषभो भवति, यः समन्तः शितिबाहुः सा समन्ता, समन्तः प्रजया च पशुभिश्च भवति यस्य तादृक्वृषभो भवति, यः शितिपृष्ठः सा तुन्दिः, पशुमान् भवति यस्य तादृक्वृषभो भवत्य,-थ यस्यैकरूपस्य सतो लक्ष्म भवति सोदारस्,-त्वास्यामित्रो गा विधावति यस्य तादृक्वृषभो भवति, याजलोम्नी सा पोषयिष्णु,-रजा इव प्रजायन्ते यस्य तादृक्वृषभो भवति, या श्यामा सा पोषयिष्णुः, क्षिप्रं वृद्धाभवन्त्यपनिषादुकास्तु, यारुणा सा पोषयिष्णुः, क्षिप्रं वृद्धाभवन्ति हिमेरवस्तु, या श्वेता सा पोषयिष्णुः, क्षिप्रं वृद्धाभवन्ति दुश्चर्माणस्तु, नाक्षिः काश्यो न पृश्नि,-रमिथुनं त,-दसौ व्याघ्ररूपं वै पृश्नि,-र्बिभ्यत्यस्मात् पशवः, कनीयांसोऽस्य पशवो भवन्ति यस्य तादृक्वृषभो भवति, तदाहु,-र्बीजमेवोत्सृज्यमित्ये,-तद्वा आसां बीजं यद्रोहिनं रूपं, पशुमान् भवति यस्य तादृक्वृषभो भवति, यो धूम्रस्ताम्रबभ्रुः स प्रजापतिः, प्र प्रजया च पशुभिश्च जायते यस्य तादृक्वृषभो भवति, यस्य लोमशा ककुत्स स्तम्बी, स्तम्बीव प्रजया च पशुभिश्च भवति यस्य तादृक्वृषभो भवति, यस्योर्ध्वा ककुत्सा ऊर्ध्वा आप्यायन्त ऊर्ध्वा अस्य पशव आप्यायन्ते यस्य तादृक्वृषभो भवति, यस्य दक्षिणतः पक्षं सा पापी सा संवन्त्य,-थ यस्य सव्यत उक्षतं सा पुण्या सोपाहरन्ती, या उत्पृष्टिस्ता ऊर्ध्वा आप्यायन्त, ऊर्ध्वा अस्य पशव आप्यायन्ते यस्य तादृक्वृषभो भवति, यस्य सव्यतः पक्षं सा पापी सा संवन्त्य,-थ यस्य दक्षिणत उक्षतं सा पुण्या सोपाहरन्ती, या सव्यसाचिनी सा पुण्या सोपाहरन्ती, या सश्रृङ्गी सा गोष्ठं,-स्ता न प्रछिन्द्यादनुसृष्टस्य गोषु स्याता,-मेतौ वै पशूनामस्कन्नं हवि,-रस्कन्नमस्य हविर्भवति यस्यानुसृष्टिर्गोषु भवत्य,-था चास्य वेहद्गोषु स्याता,-मेतौ वै पशूनामृतं विमृतौ, स्थोधुका अस्य पशवो भवन्ति यस्योक्षा च वेहद्गोषु भवतः ॥ १४ ॥
९६ [१२०३]

॥ इति खिलकाण्डे गोनामिको द्वितीयः प्रपाठकः ॥ २ ॥

अथ तृतीयः प्रपाठकः।

राजसूयब्राह्मणम्।

अरातीयन्ति वा अन्ये पुरुषाय नान्ये, येऽरातीयन्ति सा निर्ऋति,-र्ये नारातीयन्ति सानुमति,-स्ताभ्य उभयेभ्यः सह निर्वपन्त्य,-भौ सह शृतौ कुर्वन्ति, नैर्ऋतेन पूर्वेण प्रचरन्ति दक्षिणा परेत्य स्वकृता इरिण, एतद्वै निर्ऋतिगृहीतं पृथिव्यां, निर्ऋतिगृहीत एव निर्ऋतिं निरवदयत, एकोल्मुकं निधाय विस्रंसिकायाः काण्डाभ्यां जुहोति, जुषाणा निर्ऋतिर्वेतु, स्वाहा, वासः कृष्णं भिन्नान्तं दक्षिणैत्ये,-तद्धि निर्ऋत्या रूपं,-मर्धं वै पुरुषस्य निर्ऋतिगृहीत,-मर्धमनिर्ऋतिगृहीतं, यन्निर्ऋतिगृहीतं तदेवास्मात्तेन निरवदयते, पुनरेत्यानुमत्या अष्टाकपालेन प्रचरन्ति निर्ऋतिमेव निरवदाये,-यं वा अनुमतिर्वाग्वा, ऽनुमतमेवैनं सर्वमाक्रमयत्य,-ष्टाकपालो भवति, गायत्री ह्येषा, गायत्री वाग्, धेनुर्दक्षिणे,-तद्ध्यनुमत्या रूपं,-मथ य उदञ्चः शम्यामतिशीयन्ते तानुदङ् परेत्य वल्मीकवपामुद्धृज्य जुहुया,-दिदमहममुष्यामुष्यायणस्य क्षेत्रियमवयजा इति, तत् पुनरपिदधाती,-दमहममुष्यामुष्यायणस्य क्षेत्रियमपिदधामीति, क्षेत्रियं वा एतं गृह्णाति, यं चैनमन्वियं क्षेत्रस्य पत्न्य,-स्यामेव क्षेत्रियमुवयज्याथैनं सर्वमाक्रमयति, श्वो भूत आदित्येभ्यो भुवद्वद्भ्यो घृते चरुरित्या,-दित्या वा इत उत्तमाः स्वर्गं लोकमायं,-स्तेभ्य एव प्रोच्य स्वर्गं लोकमेत्या,-दित्या वा अस्मिल्लोक ऋद्धा, आदित्या अमुष्मि,-न्नुभयोरेव लोकयोरृध्नोति, वरो दक्षिणा, वरेणैव स्वर्गं लोकमभ्यारोहति, श्वो भूत आग्नावैष्णवं एकादशकपाला इत्य,-ग्निर्वै सर्वा देवता, विष्णुर्यज्ञो, देवताश्चैव यज्ञं चालब्धा,-ऽग्निर्वै यज्ञस्यान्तोऽवस्ता,-द्विष्णुः परस्ता,-दुभयत एव यज्ञस्यान्ता उदग्रही,-दुभयत एव यज्ञस्यान्ता उद्गृह्य यथोत्सङ्गं आवपेते,-यं वा एतद्यज्ञमावपते, तस्य यथाकामं निर्वपमाण एत्य,-नड्वान् वामनो दक्षिणा, यद्वही तेनाग्नेयो, यद्वामनस्तेन वैष्णवो, रूपेणैवैनं समर्धयति, श्वो भूतेऽग्नीषोमीया एकादशकपाला इत्य,-ग्नीषोमाभ्यां वै वीर्येणेन्द्रो वृत्रमहन्, वृत्रं खलु वा एष हन्ति यो राजसूयेनाभिषिञ्चते, तद्वा त्रिप्रमेवैतद्धिरण्यं दक्षिणा, सत्यं वै हिरण्यं, सत्येनैव हन्ति, श्वो भूत ऐन्द्राग्नं एकादशकपाला इत्य,-ग्नीषोमाभ्यां वै वीर्येणेन्द्रो वृत्रमह,-न्त्स ओजसा वीर्येण व्यार्ध्यत, स एतमैन्द्राग्नमपश्यत्, तेनौजो वीर्यमात्मन्नधत्ता,-जसा वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चता, ओजो

[१] मै. २,६,१। तै. ब्रा. १,६,१,१—२।

वीर्यमिन्द्राग्नी, ओजसैवैनꣳ वीर्येण समर्धयतो, ऽनड्वानृषभो दक्षिणा, यद्वही तेनाग्नेयो,
यन्मुष्करस्तेनैन्द्रो, रूपेणैवैनꣳ समर्धयति, श्वो भूत आग्ने३योऽष्टाकपालो माहेन्द्रं दधी,—
त्यृद्धया एवाग्नेयं, इन्द्रो वै वृत्रमहन्३,—न्त्सोऽन्यान् देवानत्यमन्यत, स महेन्द्रोऽभवत्,
स एवमुद्धारमुदहरद् वृत्रꣳ हत्वा, तदुद्धार एवा,—ऽस्यैष भाग एव, तस्माद्राजा संग्रामं
जित्वोदाजमुदजयत्, पयसा वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चते, यत् पयः,
पयसैवैनꣳ समर्धयती,—न्द्रियेण वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चते, यदैन्द्र,—मि-
न्द्रियेणैवैनꣳ वीर्येण समर्धयति, देवताभिर्वा एष व्यृध्यते यो राजसूयेनाभिषिञ्चते, सर्व-
देव३त्यꣳ वै वासो, यद्वासः क्षौमं दक्षिणा देवताभिरेवैनꣳ समर्धयति ॥ १ ॥ १

देवा ओषधीषु पक्वास्वाजिमयुः, स इन्द्रोऽवे,—दग्निर्वाविमाः प्रथम उज्जेष्यतीति, सोऽब्रवीद्,
यतरो नौ पूर्व उज्जयेत्तन्नौ सहेति, ता अग्निरुदजयत्, तदिन्द्रोऽनूदजयत्, तस्मादैन्द्राग्न,—मथो
आहु,—राग्नेन्द्रं का३र्यमित्य,—ग्निर्हि ता अग्र उदजयत्, तदुज्जित्या एवा,—ऽऽग्रायणो द्वादशक-
पालो भवति, द्वादश मासाः सꣳवत्सरः, सꣳवत्सराद्धि तदध्यभवत्, सप्तदश सामिधेनीः
का३र्याः, पञ्च ऋतवो द्वादश मासा एष सꣳवत्सरः, सꣳवत्सराद्धि तदधि भवत्यै,—का वै तर्हि
यवस्य मुष्टिरासी,—देका व्रीहे,—रेका माषस्यै,—का तिलस्य, तद्विश्वे देवा अब्रुवन्, वयꣳ वा
एतत् प्रथयिष्यामो, भागो नोऽस्त्विति, तद्विश्वे देवा अप्रथयꣳ,—स्तद्ब्रह्म एव वैश्वदेवो, ऽथो
प्रथयत्येवै,—तेन पयसि स्याद्वैश्वदेवो, वैश्वदेवꣳ हि पयो, ऽथ वा इयमब्रवीन्मयि वा एतद-
ध्यसौ वृष्ट्या पचति, नैतदितोऽध्युज्जेष्यथ, भागो ना अस्त्विति, तद्द्याभ्याꣳ वावैष भागः
क्रियता उज्जित्या, अथो प्रतिष्ठित्या एव, यद् द्यावापृथिवीयः, सौमीर्वा ओषधयः, सोमा
ओषधीनामधिराजं,—स्तस्य वा एष भागो यदकृष्टपच्यो, तदुद्धार एवा,—ऽस्यैष भाग एव,
तस्माद्राजा संग्रामं जित्वोदाजमुदजते, ग्राम्या वा अन्या ओषधय आरण्या अन्या,—स्ता एवा-
स्यैतेनोभयीरवेष्टा भवन्ति, याः फालकृष्टास्तासामेतेनाग्रायणं करोति, या आरण्यास्तासामु-
त्तरेणा,—ऽऽनीतो वा एष देवानाꣳ य आहिताग्नि,—र्यदकृत्वाग्रायणं नवस्याश्नीयाद् देवानां भागं
प्रतिक्लृप्तमश्नीया,—दार्तिमार्छेत्, सर्वेभ्यो वा एषोऽन्येभ्योऽभिषिच्यते यो राजसूय, आग्राय-
३णोऽन्नाद्यस्यावरुद्ध्यै, वत्सः प्रथमजो दक्षिणा, रेत इव ३ह्येषोऽप्रजातः, प्रजात्यै ॥२॥ २
अथैतानि चातुर्मास्यानि, सꣳवत्सरꣳ वै चातुर्मास्यानि परीज्यन्ते, सꣳवत्सरादेवैनान्य-

[२] मै. २,६,२ । तै. ब्रा. १,६,१,१० ।
[३] तै. ब्रा. १,७,१,१ ।
मै. ४५

ध्याप्त्वावरुन्द्ध, उत्सन्नयज्ञो वा एष, सꣳवत्सराद्वा अध्युत्सन्नयज्ञोऽवरुध्यते, सꣳवत्सरा-
देवैनमध्याप्त्वावरुन्द्धे, पशवो वा एते चातुर्मास्येभ्योऽध्यतिरिच्यन्ते, यच् छुनासी३र्यं तेने-
वाप्नोति, वर्ष्य उदके यजेते,—दद्धि पशूनां नेदिष्ट,—मथैतानि पञ्च हवीꣳषि संतत्यै ग्रामकामो
यजेत, वायुर्वा इमाः प्रजा नस्योता इत्थं चेत्थं च नेनीयते, यद्वायवे, वायुरेवास्मै नस्यो-
ताꣳ विशं निनयत्य,—न्नकामो यजेत, सꣳवत्सरो वा इन्द्रः शुनासीरः, सꣳवत्स३रोऽन्ना-
द्यस्य प्रदाता, तमेव भागधेयेनोपासरत्, सोऽस्मा अन्नाद्यं प्रयच्छति, वर्ष्य उदके यजेते,—
त३द्धयन्नाद्यस्य नेदिष्टꣳ वृष्टिकामो यजेत, वायुर्वा इमं समीरयति, स आप्याययति, ततो
वर्षति, सꣳवत्सरो वा इन्द्रः शुनासीरः, सꣳवत्सरमनुवर्षति ॥३॥ ३

देवाश्च वा असुराश्चास्पर्धन्त, स वृत्र इन्द्रमब्रवीत्, त्वं देवानाꣳ श्रेष्ठो, ऽस्म्यहमसुराणाꣳ,
सꣳशक्नवाव, मा ना अ३न्योऽन्यꣳ ऽवधीदिति, तौ वै समामेतामनभिद्रोहाय, तं देवा वृत्र-
ममन्यन्ता,—ऽयꣳ वावेदं भविष्यतीति, त इन्द्र ऐछन्, हनामेममिति, सोऽब्रवीत्, संधा वै
मे सꣳहितानभिद्रोहायेति, तमग्निरब्रवी,—दहमेव त्वेतः पास्यामीति पृथिव्या, अहमन्तरिक्षा-
दिति वरुणो, ऽहं दिव इति रुद्र,—स्ततो वै देवा वृत्रमघ्नन्, वृत्रं खलु वा एष हन्ति यो राज-
सूयेनाभिषिञ्चते, तद्वात्रिघ्नमेवैतद्, देवाश्च वा असुराश्च समयतन्त, तानग्निस्त्रेधात्मानं कृत्वा
प्रत्ययतता,—ऽग्निरेवास्मिंल्लोके भूत्वा, वरुणोऽन्तरिक्षे रुद्रो दिवि, स इन्द्रोऽमन्यता,—ऽयꣳ
वावेदं भविष्यतीति, सोऽब्रवी,—दहꣳ विश्वाभ्या आशाभ्या इति, ततो वा अजयꣳ,—स्तज्जि-
त्या एवैत,—देतेनैव याजयेत् संग्रामे, जयति संग्राम,—मेतेनैव याजयेद्, भ्रातृव्यवन्तꣳ,
यो वास्य प्रियः स्यात्तं, भवत्यात्मना, परास्य भ्रातृव्यो भवति, यद्वै वदिन्द्रस्तुरीय उप-
समपद्यत तस्मादिन्द्रतुरीयं, धेनुरनड्वाही दक्षिणा, यद्वहिनी तेनाग्नेयी, यद्धेनुः सती
दान्ता तेन वारुणी, यद्गौस्तेन रौद्री, यत् पयस्तेनैन्द्री, रूपैरेवैनाꣳ समर्धयती,—न्द्रो वै
नमुचिं नालभत, स रश्मीन् कुलायं कृत्वान्वारोहदमुमादित्यं, तꣳ वा अन्वमन्त्रयत, संधापा
असाविति, सोऽब्रवी,—न्नाहꣳ हनिष्यामीति, सोऽब्रवीत्, संधां वै संदधे यथा त्वा न दिवा
हनानि न नक्तं न शुष्केण नार्द्रेणेति, तस्य वा उपोदये सूर्यस्य नीहारꣳ, संवत्यापां फेनेन

[४] मै. २,६,३ । तै. ब्रा. १,७,१,१ । पा. ९,३६,१९,७१;४,११ । काण्व. ११,१,११,७१;४,१६ । [अपां फेनेन नमुचेः । ऋ. ८,१४,१३; सा. २११; अथर्व. १०,१९,३]

शिरोऽछिनत्, तद्वा एनमन्ववर्तत, मित्रद्रुगसीति, पाप्मा वै नमुचेः शिरः, पाप्मा वा
एनं तदन्ववर्तत, पाप्मानꣳ वै स तेनापाहत, वत पाप्मानमेवैतेनापहते, ऽपां न्ययनादपामा-
र्गानाहरन्त्या,—पो वै रक्षोघ्नी,—रपो रक्षाꣳसि न तरन्ति रक्षसामपहत्यै, वरो दक्षिणा, वरे-
णैव वरꣳ स्पृणोत्या,—त्मा हि वर, आत्मानꣳ हि तस्य तदन्ववर्तत, ये देवाः पुरःसदो
अग्निनेत्रा रक्षोहणस्ते नोऽवन्तु, ते नः पान्तु, तेभ्यः स्वाहेत्ये,—तद्देव३त्या वा इमा दिशो,
यथादेवतꣳ वा एतदाभ्यो दिग्भ्योऽधि रक्षाꣳस्यपहन्त्य,—नुपरिक्रामं जुहोति, संवीम्य एवं
दिग्भ्योऽधि रक्षाꣳस्यपहन्ती,—दमहꣳ रक्षोभिः समूहाम्य,—ग्ने संदह रक्षः, संदग्धꣳ रक्षा,
इत्याह रक्षसां घ्वरायै रक्षसामन्तरित्या, अथ यत् पुनः सनृह्य जुहोति याम्य एव दिग्भ्योऽधि
रक्षाꣳस्यपानुधीत्वा भागिनीः करोत्यहिꣳसायै, रथः पञ्चवाही दक्षिणा, पञ्च दिशः पञ्च देवताः
संमृद्ध्यै ॥ ४ ॥ ४

सौमेनेजानꣳ याजयेत्, सꣳवत्सरꣳ वा एतस्य छन्दाꣳसि यातयामानि भवन्ति यः
सौमेन यजते, छन्दाꣳसि वै देविका,—श्छन्दाꣳसि वावास्मा एतदयातयामानि पुनर्यामाणि
करोति, राजसूयेनाभिषिषिचानꣳ याजयेत्, पष्ठौही दक्षिणा, ऽऽशाꣳ वा एष उपाभिषिञ्चत,
आशा पष्ठौ३ह्या,—शामेवास्मा अकः, पशुकामꣳ याजयेच्, छन्दाꣳसि वै देविकाः, पशव-
श्छन्दाꣳसि, गायत्र्यनुमति,—स्त्रिष्टुब्राका, जगती सिनीवाली, कुहूरनुष्टुब्, धाता
वषट्कारो, या पूर्वा पौर्णमासी सानुमति,—र्योत्तरा सा राका, या पूर्वामावा३स्या सा
सिनीवाली, योत्तरा सा कुहू,—श्चन्द्रमा एव धाता, यद् द्वे अवरे द्वे परे तन्मिथुनꣳ, यत
पूर्यतेऽन्या नान्या तन्मिथुनꣳ, यत् पश्यन्त्यन्या नान्या तन्मिथुनꣳ, यदमावास्याया अधि
चन्द्रमाः प्रजायते तन्मिथुनं, तस्मादेवास्मै मिथुनात् पशून् प्रजनयति, प्रजाकामꣳ याजयेद्,
धातारमुत्तमं कुर्यात्, स्त्रियो वै देविकाः, पुमान् धाता, पराचीर्वै प्रजा रेतो दधते,
पराचीष्वेवासु रेतो दधाति, तदाहु,—र्न वै तेन पराधत्ते यदन्तरा प्रवीयवा, इति व्यवदध्या-
द्धातारं मध्यतः, सर्वा एवैना वृषमोदिनीः करोति, तदाहु,—र्जीयत एव, पश्चावर इव तु
भवति, स्त्रीम्यो ह्येनं पश्चात् परिणयन्तीति, स यदा जायेताथ धात्रे पुरस्तान्निर्वपे,—दग्रꣳ वै ५
धाता, ऽग्रमेवैनं परिणयति ॥ ५ ॥

[५] मै. २,६,४ । तै. ब्रा. १,७,२ ।

आमयाविनꣳ याजयेद्, धातारं मध्यतः कुर्यात्, सꣳवत्सरो वै धाता, सꣳवत्सरो हि
वा एतस्य मुग्धो, ऽथैतस्यामयति, सꣳवत्सरꣳ वावास्मा एतन्मध्यतोऽचीक्लृप,—दथैनमेत-
स्मान्मिथुनात् प्रजनयती,—श्चरीणि वा एतमेतानि छन्दाꣳस्यृते पशोरशान्तानि निर्मृजः,
पशुरप्यालभ्यः शान्त्या अनिर्मार्गाये,—ते वै पशवो यद्व्रीहयश्च यवाश्च, यद्व्रीहिमयः पुरोडाशो
भवति तेनैव पशुरालभ्यते शान्त्या अनिर्मार्गाय, वीरस्था वा अन्ये पशवोऽवीरस्था अन्ये,
ये पुरस्तात् पुरोडाशास्ते वीरस्था, ये पश्चात् पुरोडाशास्तेऽवीरस्था, ये पुरस्तात् पुरोडाशा
भुञ्जतस्त उपतिष्ठन्ते, प्रजापतिꣳ ३ह्येते प्रतिष्ठामभ्यसृज्यन्त, ये पश्चात् पुरोडाशाः परा ते
भवन्ति, यासु स्थालीषु सौमाः स्युस्ते चरवः स्युः, सोमो वै रेतोधाः प्रजननाय, सर्व-
वेदसेनेजानꣳ याजयेत्, पशुभिर्वा एष व्यृध्यते यः सर्वं ददात्य,—त्र वा एष जघन्यं पशून्
पश्यति यत्रैनान् विभजति, यत्रैवैनान् विभजति तत एनान् पुनरवरुन्द्धे, य एवं कश्च
सौमेन यजेत तꣳ याजयेत्, सꣳवत्सरꣳ वा एतस्य छन्दाꣳसि यातयामानि भवन्ति यः
सौमेन यजते, छन्दाꣳसि वै देविका,—श्छन्दाꣳसि वावास्मा एतदयातयामानि पुनर्यामाणि
करोति ॥ ६ ॥ ६

अथैतत् त्रिषꣳयुक्तꣳ, यत् पूर्वं त्रिषꣳयुक्तमित एवास्मै तेनोर्ध्वानिमाँल्लोकान् दाधार,
यदुत्तरं त्रिषꣳयुक्तममुत एवास्मै तेनार्वाच इमाँल्लोकान् दाधार, तदेषाꣳ वावैते लोकानाꣳ
विधृत्यै, यत् पूर्वं त्रिषꣳयुक्तꣳ वीरजननं तद्, यदुत्तरं पशुजननं तद्, यत् पूर्वं त्रिषꣳयुक्तꣳ
वीरानेवास्मै तेन जनयति, यदुत्तरं पशूꣳस्तेन, यत् पूर्वं त्रिषꣳयुक्तꣳ रेत एव तेन दधाति,
यदुत्तरं प्र तेन जनयति, यत् पूर्वं त्रिषꣳयुक्तं तेन यज्ञकामो यजेता,—ऽग्निर्वै सर्वा देवता,
विष्णुर्यज्ञो, देवताश्चैव यज्ञं चालब्ध,—न्द्रो वै यज्ञो, विष्णुर्यज्ञ,—स्तद्यज्ञस्यैवैष आरम्भो, ऽथ
यद्वैष्णवो, विष्णुर्वै यज्ञो, यज्ञ एव प्रतितिष्ठति, यदुत्तरं त्रिषꣳयुक्तं तेन पशुकामो यजेत,
सोमो वै रेतोधाः, पूषा पशूनां प्रजनयिता, सोम एवास्मै रेतो दधाति, पूषा पशून् प्रजन-
यती,—न्द्रियेण वै पशवः प्रजायन्ते, पूषा प्रजनयती,—न्द्रियेणैवास्मै पूषा पशून् प्रजनयत्य,—
थ यत् पौष्णः, पशवो वै पूषा, पशुष्वेव प्रतितिष्ठत्य,—थैतद्वैश्वानरवारुणꣳ, सꣳवत्सरो वा
अग्निर्वैश्वानर,—स्तस्य वा एते स्वा यद्दत्व,—स्तेषाꣳ वा ए३षोऽभिषिक्तो राजा, ऽभिषिक्तो वै
देवानाꣳ वरुण, एतौ वै देवानाꣳ सूता, एतौ सर्वपती, एतौ सर्वस्येशाते, ता एनꣳ

सुवाते, यावन्तो वा एतस्य स्वा अनुका वै त एते,—मनुका देवा वरुण२, यावन्त एवास्य
स्वास्तानस्मा अनुकानविवादिनः करोती,—वा२श्चरुर्भवत्ये,—तावान्वा आत्मा, यावानेवा-
स्यात्मा त२ वरुणान्मुक्त्वा, स२वत्सरो वा अग्निर्वैश्वानरः, स२वत्सर एवैनं प्रतिष्ठापयति,
स२वत्सरायुषमेनं करोति, तस्माद्राजसूयाभिषिक्तस्य जरसा दन्ता अवशीयन्ते, स२वत्सरे
ह्येनं प्रतिष्ठापयति, स२वत्सरायुषमेनं करोति, यो ज्योगामयावी स्यात्तमेतेन याजयेद्, वरु-
णेन हि वा एष पाप्मना गृहीतो, ऽथैतस्य ज्योगामयति, यद्वारुणो, वरुणादेवैनं तेन
मुञ्चती,—वा२श्चरुर्भवत्ये,—तावान्वा आत्मा, यावानेवास्यात्मा त२ वरुणान्मुक्त्वा, स२वत्सरो
वा अग्निर्वैश्वानरः, स२वत्सर एवैनं प्रतिष्ठापयति, स२वत्सरायुषमेनं करोति ॥ ७ ॥ ७

अथैते रत्निनः, क्षत्रस्य वा एतान्यङ्गानि, यस्य वा एतान्योजस्वीनि भवन्ति तद्राष्ट्रमोजस्वी
भवति, तान्येवास्यौजस्वीनि करोति, क्षत्रस्य वा एतान्यङ्गानि, यस्य वा एतानि तेजस्वीनि
भवन्ति तद्राष्ट्रं तेजस्वी भवति, तान्येवास्य ब्रह्मणा तेजस्वीनि करोति, बार्हस्पत्यश्चरुर्ब्रह्मणो
गृह इति, ब्रह्म वै बृहस्पति,—र्बृहस्पतिपुरोहित खलु वै राष्ट्रमृध्नोति, ब्रह्म वा एतत् पुरस्ताद्रा-
ष्ट्रस्यात्यीही,—दधो ब्रह्मण एवं राष्ट्रमनुकं करोत्यै,—न्द्र एकादशकपालो राज्ञो गृह इती,—न्द्रियं२
वा इन्द्र, इन्द्रियं एव प्रतितिष्ठत्या,—दित्यश्चरुर्महिष्या गृह इती,—यं२ वा अदिति,—रस्या
एवैनं मात्रां गमयती,—मामेवैनं प्रजाभ्य उपजीवनीयं करोति, धेनुर्दक्षिणै,—तद्ध्यदित्या रूपं,
नैर्ऋतश्चरुर्नखावपूतानां परिवृक्त्या गृह इति, निर्ऋतिगृहीता हि वा एषा, ऽथैतां परिव्रजन्ति
निर्ऋतिमेव निरवदाये,—यं२ वा अनुमति,—रस्या एवैनं मात्रां गमयती,—मामेवैनं प्रजाभ्य उप-
जीवनीयं करोति, श्येनी कूटापस्फुरा दक्षिणै,—तद्धि निर्ऋत्या रूप,—माग्ने३योऽष्टाकपालः से-
नान्यो गृह इत्य,—ग्निर्वै सर्वा देवता, देवताभिरेवास्य सेनामुखं जित्यै स२श्यति, हिरण्यं
दक्षिणा, सत्य२ वै हिरण्य२, सत्येनैव जयत्या,—श्विनो द्विकपालः संग्रहीतुर्गृह इति, रथे-
ष्ठमेवास्मात्तेन निरवदयते, सव३त्सौ दक्षिणेति, सवत्सा इव हि सव्यस्थसारथी रथमभि,
सावि३त्रोऽष्टाकपालः क्षत्तुर्गृहे प्रसूत्या, अथो सवितैव ३खेष प्रजाभ्यः प्रसुवति, वारुणो यवमयो
दशकपालः सूतस्य गृहे, मारुतः सप्तकपालो वैश्यस्य ग्रामण्यो गृह इति, सूतमुखा वै विट्
क्षत्रमुपतिष्ठते, सूतमुखा२ वावास्मा एतद्विशं मुख३तोऽन्वाद्यायोपदधाति, पौष्णश्चरुर्भागदुघस्य
गृह इति, पुष्टिर्वै पूषा, पुष्टिमेवास्य भागे दधाति, वैष्णवस्त्रिकपालस्तक्षरथकारयोर्गृह इति,

[८] मै. २,६,५ । तै. ब्रा. १,७,३,१—७ ।

विष्णुर्वै यज्ञो, यज्ञ एव प्रतितिष्ठति, रौद्रो गावीधुकश्चरुरक्षावापस्य गृहे गोविकर्तस्य चैत्य,—
न्तत एवास्मात्तेन रुद्रं निरवदयते, ऽथो रुद्र इव ३ह्येतौ पशू अभिमन्येते, एकादश वा एतानि
हवीं२ष्ये,—कादशाक्षरा त्रिष्टुब्, वीर्यं त्रिष्टुब्, वीर्य एव प्रतितिष्ठति, नाना वा एत एतेषा-
माशिषोऽवरुन्धते, यत्सह निर्वपेयुररत्निनः स्यु,—रैन्द्रं एकादशकपालो राज्ञो गृह इती,—न्द्रि-
यं२ वा इन्द्र, एकधा वा एतद्यजमाने यज्ञस्याशीः प्रतितिष्ठत्यै,—न्द्रो हि यजमानः ॥८॥ ८

इन्द्राया२होमुचा एकादशकपालं निर्वपेद्, यदेव किंचार्वाचीनं जनितोरेनः करोति तत एन-
म२होमुङ् मुञ्चती,—न्द्राय सुत्राम्णा एकादशकपाल२, यं एवोपवादी योऽभिदासति तत एन२
सुत्रामा त्रायते, ऽथैतन्मैत्राबार्हस्पत्य२, सत्य२ वै मित्रो, ब्रह्म बृहस्पतिः, सत्यं चैव ब्रह्म
चालभ्य दीक्षते, क्षत्र२ वै मित्रो, ब्रह्म बृहस्पतिः क्षत्रं चैव ब्रह्म चालभ्य दीक्षते, यस्य
राष्ट्र२ शिथिरमिव स्यात्तमेतेन याजयेन्मैत्राबार्हस्पत्येन, क्षत्र२ वै मित्रो, ब्रह्म बृहस्पति,—र्ब्र-
ह्मणि वा एतत् क्षत्रं प्रतिष्ठापयति द्रढिम्नेऽशिथिरत्वाया,—ऽथैते देवस्व, एते वै देवाना२ सुता,
एते सत्वपतय, एते सर्वस्येशते, त एन२ सुवते, तस्माद्वा एतमाहुः, पूर्वेद्युर्वा एष सूयते-
ऽभितश्च सिच्यता इत्य,—थैष मारुत एकवि२शतिकपाल,—स्त्रिर्वै सप्त सप्त मरुतो, विण्मरुतो,
विशो वा एतन्मध्यतः सूयते, तस्माद्वा एष विशः प्रियो, विशो हि मध्यतः सूयते, वरुणस्य
वा अभिषिच्यमानस्येन्द्रियं२ वी३र्यमपाक्रामत्, तत् त्रेधाभवद्, भृगुस्तृतीयमभवच्, श्रायन्तीयं
तृतीय२, सरस्वती तृतीयं प्राविशद्, यद्भार्गवो होता भवति श्रायन्तीयं ब्रह्मसाम२ सारस्वती-
रापस्तदेवेन्द्रियं२ वी३र्यं तेज आप्नोति, वाचा वा एतमभिषिञ्चन्ति यमभिषिञ्चन्ति, वाक्
सरस्वती, सारस्वतीरापो, यत्सारस्वतीभिः सूयते यावत्येव वाक् तया सूयते ॥ ९ ॥ ९

अपा२ वा एतानि चित्राण्य,—पा२ वा एतच्चित्राणि संभरन्त्य,—पामेनं चित्रैरभिषिञ्चन्ति,
चित्रमस्मिन् दधति, तस्माद्वा ए३षोऽभिषिक्तश्चित्र२ राजेति श्रूयते, ऽपा२ ह्येनं चित्रैरभि-
षिञ्चन्ति, चित्रमस्मिन् दधति, यथा वा इदं मधुकृतो मधु संभरन्त्येव२ वा एतदपामोषधीना२
रस२ संभरन्त्य,—पामेनमोषधीना२ रसेनाभिषिञ्चन्ति, रसमस्मिन् दधति, तस्माद्वा एतमाहु,—
रसी राजा पुण्या इत्य,—पा२ ह्येनमोषधीना२ रसेनाभिषिञ्चन्ति, रसमस्मिन् दधति, वरुणसवो
वा एष, वारुणीरापो, यदद्भिरभिषिञ्चति वरुणमेवैनमक,—र्विपुत्रान्वै सरस्वती, सारस्वती-

[९] मै. २,६,६ । तै. ब्रा. १,७,३,७ । [१०] तै. ब्रा. १,७,५,५, ।

रापो, यत्सारस्वतीभिः सूयते विपुत्रान् भवति, षोडश ग्रहा गृह्यन्ते, षोडश होमा हूयन्ते,
तद् द्वात्रि२शद्, द्वात्रि२शदक्षरानुष्टुब्, वागनुष्टुब्, यावत्येव वाक् तया सूयते ॥१०॥ १०

[२१६३]

॥ इति खिलकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥

अथ चतुर्थः प्रपाठकः ।

प्रतीपमन्य ऊर्मिर्युध्यत्यन्वीपमन्यो मिथुनत्वाय, यच्चास्य गृह्णाति यः प्रतीप२ युध्यत्योजसा
वा एष वीर्येण प्रतीप२ युध्यत्यो,—जसा वा एतद्वीर्येण राष्ट्र ओजो वीर्यं दधात्य,—थ यच्चास्य
गृह्णाति योऽन्वीपमीरयति माहिषं तेन तोकं प्रजनयत्य,—थ यन्नदीपतेरपा२ वा एतन्मिथुनं,—म-
पा२ वा एतन्मिथुनेन राष्ट्रे मिथुनं दधात्य,—थ यदेमहावरीणां मध्यमेष्टेयं तेनावरुन्द्धे, ऽथ यन्
परिवाहिणीनां पतेरस्यन्त्यास्तेन तोकं प्रजनयत्य,—थ या आपोऽश्नैरा, ओजसा वा एता
वी३र्येणापोऽश्नैरा, ओजसा वा एतद्वीर्येण राष्ट्र ओजो वीर्यं दधात्य,—थ यत् कूप्यानामुभयीस्ते-
नापोऽवरुन्द्धे, याश्च समुद्रिया याश्चासमुद्रिया ईश्वरो वा एतमेता स्रोत३स्या आपोऽशान्ता निर्मृ-
जो, यत्स्थावराणां गृह्णाति, शान्त्या अनिर्मार्गाय, या आतपति वर्षति याश्च परिदहन्ति ता आपो
ब्रह्मवर्च३स्या,—स्वामी राष्ट्रे ब्रह्मवर्चसं दधात्य,—थ यद्धारदेनीना२ विशस्तेन वी३र्यमवरुन्द्धे,
ऽथ यद् पुष्पाणामारण्यं तेनाथ यदुल्व्याना२, वज्रो वै पशवो, वज्रा उल्व्या, वज्रेण वा
एतद्राष्ट्रे वज्रं दधात्य,—थ यत् पयसः, पयसा वा एतद्राष्ट्रे पयो दधात्य,—थ यद् घृतस्य,—ता
वा आपोऽनाधृष्या,—स्वामी राष्ट्रमनाधृष्यं करोत्य,—थ यन्मधो,—रपा२ वा एष ओषधीना२
रसो, ऽपा२ वा एतदोषधीना२ रसेन राष्ट्रे रसं दधाति, षोडश वा एते ग्रहाः प्राजापत्याः,
समानीतः सप्तदशः, प्रजापतिः सप्तदशः, प्रजापतिमेवाप्नोति ॥ १ ॥ १

देवीरापो मधुमतीः स२सृज्यध्वं महि क्षत्रं क्षत्रियाय वन्वाना इत्ये,—ता हि क्षत्रस्य वन्त्री,—
रनाधृष्टाः सीदतौर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरित्ये,—ता हि क्षत्रस्य धात्री,—रनिभृष्टमसीत्य,-
—निसृष्ट२ ३ह्येव राष्ट्रमक,—रपोजा इति, तपोजा हि राष्ट्र२, सोमस्य दात्रमसीति, सोमस्य

[१] मै. २,६,७ । तै. ब्रा. १,७,५,५ ।
[२] मै. २,६,८ । तै. ब्रा. १,७,६,१-४ । श. १०,४,६-७;१,१०,३१,४,४ । काण्व. ११,८,१३-१४;१,१५,
४८,४,५ ।

३ह्येतद्दात्र२, शुक्रा वः शुक्रेण पुनामि, चन्द्रा वश्चन्द्रेण पुनामीत्या,—युर्वै हिरण्य,—मायुष्या
एवैना अक,—र्वर्चो वै हिरण्य२, वर्चस्या एवैना अक,—र्देवो वः सविता पुनात्वच्छिद्रेण पवित्रे-
णेत्ये,—तद्वा अच्छिद्रं पवित्र२ यत्सूर्यस्य रश्मयो, ऽच्छिद्रेणैवैनाः पवित्रेण पुनाति, स्वाहा राजसूया
इति, राजसूया ३ह्येताः सधमादो द्यु३म्न्या ऊर्जा एका, इति व्यानयति वारुण्या, वारुणी-
र्ह्यापः, स्वैर्येव देवतया, रुद्र यत्ते गिरिपरं नामेति, रुद्रमेवास्मात्तेन निरवदयते, तस्मिन्
हुतमसि, यमेष्टमसि, स्वाहेति, मृत्युर्वै यमो, मृत्युमेवास्मात्तेन निरवदयते, सोमा
इन्द्रो वरुणो मित्रो अग्निस्ते देवा धर्मधृतो धर्मं धारयन्त्वित्ये,—ते वै देवा धर्मधृतो यदिमे प्राणा,
यदेनमेतेभ्योऽप्रोच्याभिषिञ्चेयुरपरोधुका एन२ स्यु,—रथ यदेनमेतेभ्यः प्रोच्याभिषिञ्चन्ति तथा
हैनमनपरोधुका भवन्ति, पर्णस्य वा अग्रेऽन्ते ब्रह्म समवदन्त, तद्वाव सुश्रवा यत्तदशृणोत्,
पर्णमयेनाभिषिञ्चति, ब्रह्माभिषिञ्चति, ब्रह्मवर्चसेनैवैनमभिषिञ्चत्य,—थो ब्रह्म वै ब्रह्मा,
ब्रह्मणैवैनं ब्रह्माभिषिञ्चत्याश्वत्थेन वैश्यो, विशो वी३र्यमपाक्रामत्, तदश्वत्थं प्राविशत्,
स तेन वीर्येण मरुरांभवत्, तद्विश एवैतेन वी३र्यमवरुन्द्धा, औदुम्बरेण भ्रातृव्या, ऊर्ग्वा
उदुम्बरा, ऊर्ज२ वा एतदन्नाद्य२ यजमानो भ्रातृव्यस्य वृङ्क्ते, यो जन्यो मित्र२ स नैयग्रो-
धेन, मित्रेण वै क्षत्र२ व्यवतत,—मवरोधैर्न्यग्रोधो, मित्रेण वा एतत् क्षत्र२ व्यवतनोति
द्रढिम्नेऽशिथिरत्वाय ॥ २ ॥ २

क्षत्रस्य योनिरसि, क्षत्रस्योल्बमसि, क्षत्रस्य नाभिरसीती,—न्द्रो वै यदजायत तस्य वा
एष योनिरासीद्यत्ताप्यमुल्बं पाण्डरं, नाभिरुष्णीषः, सूतवशाया अध्यजायत, सूना चतुः-
प्यूपरासी,—श्रीवागः पीयूष,—स्तस्मान्निवारः पुरोडाशः, पश्चाशतमन्यस्मिन्नक्षण्यानक्त्येकप-
ञ्चाशतमन्यस्मिन्, शतायुर्वै पुरुषः शतवीर्या, आयुरेव वीर्यमाप्नोत्य,—प उपस्पृशत्य,—
मृत२ वा आपो, ऽमृतेनैवैन२ स२स्पर्शयत्या,—विन्नो अग्निर्गृहपतिरिति, गार्हपत्यायै-
वैनमावेदयत्या,—विन्ना इन्द्रो वृद्धश्रवा इती,—न्द्रियं२ वा इन्द्र, इन्द्रियायैवैनमावेदयत्या,—
विन्नौ मित्रावरुणौ धृतव्रता इत्य,—होरात्रे वै मित्रावरुणा, अहोरात्राभ्यामेवैनमावेदयत्या,—
विन्ने द्यावापृथिवी ऋतावृधा इति, द्यावापृथिवीभ्यामेवैनमावेदयत्या,—विन्नः पूषा विश्ववेदा
इति, पशवो वै पूषा, पशुभ्य एवैनमावेदयत्या,—विन्ना देव्यदितिरित्या,—दित्या
वा इमाः प्रजा,—स्ताभ्य एवैनमावेदयत्या,—विन्नोऽयमसा आमुष्याय३णोऽमुष्याः पु३त्रो-

[३] मै. २,६,९ । तै. ब्रा. १,७,६,४ । श. १०,८-९ । काण्व. ११,१५,१७ ।

ऽमुष्याꣳ विशीति, विश एवैनमावेदयति, तस्माद्वा एष विशः प्रियो, विशे ह्येनमा-
वेदयत्ये,—ष ते जनते राजेति, जनताया एवैनमावेदयति, सोमोऽस्माकं ब्राह्मणानाꣳ
राजे,—ति, ब्रह्मोद्धरति, सर्वेभ्य एवैनमन्येभ्यो भूतेभ्य आवेदयति, ब्रह्मोद्धरति,
तस्मादाहु,—र्ब्रह्मोद्धृतमिति, ब्रह्म३ब्रुद्धरती,—न्द्रस्य वज्रोऽसि वार्त्रघ्न,—स्त्वयायꣳ वृत्रꣳ
वध्या,—दिति धनुः प्रयच्छति, वज्रो वै धनु,—र्वज्रो राज३न्यो, वज्रेणैव वज्रꣳ
समर्धयति, शत्रुबाधना स्थे,—ति बाणवतो, ऽन्तो वै बाणवन्तो, ऽन्तो राजन्यो,
ऽन्तेनैवान्तꣳ समर्धयति, त्रीन् प्रयच्छति, तिस्रो वै शरव्या, दिव्या पार्थिवा समुद्रिया,
ता अस्माघोयाव, पात प्राञ्चं, पात प्रत्यञ्चं, पात तिर्यञ्चं, पातान्वञ्चं, पातोर्ध्वं,
दिग्भ्य एनं पातेति, दिग्भ्य एनं पान्ति, मि३त्रोऽसी,—तीममभिमन्त्रयते, मित्रस्य ३ह्येत-
द्रूपꣳ, वरुणोऽसी,—तीमꣳ, वरुणस्य ३ह्येतद्रूपꣳ, हिरण्यवर्णमुषसो व्युष्टा, इत्युग्रता
अभिमन्त्रयेतो,—र्ध्वबाहुस्तिष्ठन्तमभिषिञ्चति, बृहत्साम भवति, स्वर्गमेवैनं लोकमभिसंतनोति ॥
॥ ३ ॥ ३

दिश एनꣳ व्यास्थापयति, वज्रेण वा एतदिमा दिशोऽभिजयति, तस्माद्वा एतस्य सर्वा दिशो-
ऽभिजिता याꣳस्यामभिपर्यावर्तते, दिशो वै स्वर्गो लोकं, एतदेव३त्या वा इमा दिशो, यथा-
देवतꣳ वा एतदाभ्यो दिग्भ्योऽधि स्वर्गं लोकमेति, सोमस्य त्विषिरसि त्विषिमत्, तवेव मे त्विषि-
र्भूया,—दिति व्याघ्रचर्मꣳ विवेष्टयति, सोमे वा एका त्विषि,—र्व्याघ्रे एका, सर्पे एका, ता
एवावरुन्द्धे, प्रत्यस्तं नमुचेः शिरा, इति सीसं पण्डगाय प्रत्यस्यति, पाप्मा वै नमुचेः शिरः,
पाप्मानꣳ वावास्मा एतत् प्रत्यस्यति स्वर्गं लोकमभ्यारोह,—न्नवेष्टा दन्दशूका, इति लोहितायसं
केशवापाय, दन्दशूकानेवास्मात्तेन निरवदयते, तस्माद्वा एतस्य नाभिचारोऽस्ति, यावन्तो हि
मृत्यवस्तानस्माभिरवदयते, मृत्योः पाही,—ति रजतꣳ रुक्ममधस्तादुपोहते, मृत्योर्वा एतद्रूपꣳ
यद् व्या३घ्रो, ऽमृतꣳ हिरण्य,—ममृतेनैव मृत्युमन्तर्धत्ते, दिदिवः पाही,—ति हरितꣳ रुक्म-
मुपरिष्टाद्व्यूहते, दिव्याया एवैनमशन्या योयावे,—यꣳ वै रजता,—ऽसौ हरिण्या,—भ्यामे-
वैनं परिगृह्णा,—ऽऽयुर्वै हिरण्य,—मायुष्या एवैनमभ्यतिक्षरन्ति, वर्चो वै हिरण्यꣳ, वर्चस्या
एवैनमभ्यतिक्षरन्ति, वरुणस्य वा अभिषिच्यमानस्याप इन्द्रियꣳ वी३र्यं निरघ्नन्, यद्रुक्ममन्त-
र्दधातीन्द्रियस्य वी३र्यस्यानिर्घाताय, शतमानो भवति शतक्षरः, शतायुर्वै पुरुषः शतवीर्या,

[४] मै. २,६,१० । तै. ब्रा. १,७,७,१-३;१,७,८ । वा. १०,१०,१४-१५ । काण्व. ११,१८,२२—२३ ।

आयुरेव वीर्यमाप्नोति ॥ ४ ॥ ४
अथैतानि पार्थानि, सꣳवत्सरो वै पार्थानि, सꣳवत्सरꣳ वा एतन्मध्यतः प्रविशति, तस्माद्वा
एष दुःपराणोदः, सꣳवत्सरꣳ हि मध्यतः प्रविशति, गिरी वा एतौ राजसूयस्य, बार्हस्प-
त्यमन्येषामुत्तमं भवत्यैन्द्रमन्येषां प्रथमꣳ, वी३र्यꣳ वै बृहस्पति,—र्वी३र्यमिन्द्रो, वीर्य एवैन-
मभिसंधत्त, आदित्यनामानि वा एतान्या,—दित्या वा इमाः प्रजा,—स्ताभ्य एवं सूयते, सो-
मस्य त्वा द्युम्नेनाग्नेस्तेजसेन्द्रस्येन्द्रियेण विश्वेषां त्वा देवानां क्रतुनाभिषिञ्चामीत्ये,—तैरेवैनमिन्द्रियै-
रेताभिर्देवताभिरभिषिञ्चती,—न्द्रस्य योनिरसि, जनयेत्य,—तो वा अधीन्द्रोऽजायत, स्वादे-
वैनꣳ योनेर्जनयत्य,—ति धून् पाहीत्या,—ह स्वर्गस्य लोकस्य समष्ट्यै, समाववृत्रन्नधरागुदक्ता,
इति समुन्मार्ष्टी,—न्द्रियꣳ वा एतद्वीर्यमभिषिच्यमानस्य व्यवैति, तदेव समुन्मार्ष्टि, तेनैनꣳ
समर्धयत्यै,—न्द्रया त्रिष्टुभा ब्रह्मान्वेत्यै,—न्द्रो वै राजन्यस्त्रिष्टुप्छन्दाः, स्वेनैवैनं छन्दसान्वेत्य,-
—थो प्रजापतिर्वै ब्रह्मा यज्ञस्य, प्रजापतेरधीन्द्रोऽसूयत, प्रजापतेरेवाधि सूयता, इन्द्रस्य
वज्रोऽसि वाजसनि,—स्त्वयायꣳ वाजꣳ से,—दिति रथमुपावहरति, स्वयैव देवतया, मित्रा-
वरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मी,—ति युनक्ति, स्वयैव देवतया, विष्णोः क्रमोऽसि
सपत्नहे,—ति रथमभ्यातिष्ठत्य,—तो वै विष्णुरिमांल्लोकानुदजयद्, विष्णो रेवोज्जितिमन्विमांल्लो-
कानुज्जयति, एभ्यो लोकेभ्यो भ्रातृव्यं नुदते, मरुतां प्रसवे जयेति, मारुत एव गणो भूत्वो-
ज्जयति, राजन्यं जिनात्य,—न्तमेवाक्रमीत्, तदस्य न कश्चनाज्येयं उच्छिष्यते, तस्मै वा-
मिषुमस्यति, तदस्यामोघायास्तमभू,—दापं मनः समिन्द्रियेणेत्यु,—क्त्वा वर्तते, ऽन्तमेव
गत्वावर्तत आत्मनोऽहिꣳसाया, एष वज्रो वाजसातम,—स्तेन नौ पुत्रो वाजꣳ से,—दिति पत्न्यै
धन्वार्ति प्रयच्छत्ये,—ष वै पत्न्या यज्ञस्यान्वारम्भः, सह स्वर्गे लोके भवतः ॥ ५ ॥ ५
इयदस्या,—युरस्या,—युर्मे धेहीत्या,—युरेवास्मिन् दधाति, युङ्ङसि, वर्चोऽसि, वर्चो
मे धेही,—ति वर्च एवास्मिन् दधात्यू,—र्गस्यू,—र्जं मयि धेहीती,—यꣳ वै रजता,—ऽसौ हरिणी,-
—मे एवालभ्यो,—र्ग्वा उदुम्बरा, ऊर्जꣳ वा एतन्मध्यत आत्मनो धत्ते, प्रजानां च मि३त्रो

[५] मै. २,६,११ । तै. ब्रा. १,७,७,४;१,७,८,१ । वा. ९,५;१०,१७,१९—२१;१२,५;(२३,६५)। काण्व. १,७;११, २५,२८—२९,३१;१३,६;(१५,६७) ।
[विष्णोः क्रमोऽसि सपत्नहा० । अथर्व. १०,५,२५-३५]
[६] मै. २,६,१२ । तै. ब्रा. १,७,९,५—६;१,७,१० । वा. ९,२२;१०,५,२३-२८;११,६,२७;३९,१;२०,१,१२,१४। काण्व. १०,३१;११,१२,३३-४०;१३,१५; २१,९३,२४,६,३७;३९, १ ।
[आयुरस्यायुर्मयि (०र्मे) धेहि (त्वाः) । अथर्व. २,१७,४ ।]

ऽसी,—तीममुपावहरति, मित्रस्य ३ह्येतद्रूपꣳ वरुणोऽसी,—तीमꣳ, वरुणस्य ३ह्येतद्रूपꣳ,
संदसि, समहꣳ विश्वैर्देवै,—रिति हस्ता आमिक्षामभ्यवहरति, सद्धा आमिक्षा, सदेवाभ्यव-
हरति, तत्र ते हिरण्ये ददाति, सा दक्षिणा, हिनस्ति खलु वा एष पशून् पृथिवीमभ्यव-
रोह,—न्नमो मात्रे पृथिव्या इति, वाराही उपानहा अभ्यवरोहत्या,—रण्यानेव पशूनभ्यवरोहति,
वराह३स्त्वेवैतꣳ संग्धुमर्हति, तद्वराह एवैनꣳ सम्नोति, प्रति त्यन्नाम राज्यमधायि स्वां
त३न्वꣳ वरुणोऽसुषोदिति, वरुणसवो वा एष, वरुणायैवैनं प्राह, नि त्रितो
जरिमाणं न आनडिति, जरिमाणमेवास्मिन् युनक्ति, स्योनासि सुषदेति, स्योना ३ह्येषा
सुषदा, स्योनामासीद, सुषदामासीदेति, सुषदेवैनꣳ सादयति ॥ ६
७
निषसाद धृतव्रतो वरुणः प३स्त्यास्वा । साम्राज्याय सुक्रतुः ॥
इति, वरुणसवो वा एष, वरुणमेवैनमक,—रग्नये स्वाहा, सोमाय स्वाहे,—न्द्रस्यौजसे
स्वाहा, मरुतां बलाय स्वाहे,—ति रथविमोचनीयं जुहोति, यजुषैव युज्यन्ते, यजुषा विमु-
च्यन्ते, हꣳसः शुचिषद्वसुरन्तरिक्षसदिति, रथꣳ वा एतत् परिवदन्ति, सह सारथिना रथ-
वाहने रथमादधाति, सर्वत्वायैव प्रसवाय, ब्रह्मा३ꣳस्त्वं ब्रह्मासीति, किमभूꣳकिमभू,—मिति
वा एतदाह, सवितासि सत्यसवा इती,—दमसीदमसी,—ति वावैनमेतदाह यद्यद्भत्ये,—षं
वज्र,—स्तेन मे रध्ये,—ति स्फ्यं प्रयच्छति, वज्रो वै स्फ्यो, वज्रेण वा एतद्राष्ट्रꣳ रन्धयते,
तमवरस्परं प्रयच्छति, तेनावरस्परꣳ राष्ट्रꣳ रन्धयमाण एति, तस्माद्वा एत एतस्मा अवरस्परꣳ
रुद्धा, बलिꣳ हरन्ति, तेन स्फ्येनाधिदेवनं कुर्वन्ति, तत्र पष्ठौहीꣳ विदीव्यन्त, आशाꣳ वा
एष उपाभिषिञ्चत, आशा पष्ठौ३ह्या,—शामेवास्मा अक,—स्तन्तश्चतुःशतमक्षाणवोवाह ॥
उद्भिन्नꣳ राज्ञः ॥ इति, चत्वारो वै पुरुषा, ब्राह्मणो राज३न्यो वैश्यः शूद्र,—स्तेषामेवैनमु-
क्लेदयति, ततः पञ्चाक्षान् प्रयच्छन्नाह, दिशो अभ्यभूदयमिती,—मा एवास्मै पञ्च दिशो-
ऽक्षाघाय प्रयच्छति, क्षेत्रं ददाति, तेन क्षेत्री धृतो भवति, वरꣳ वृणीते, सोऽस्मै कामः
समृध्यते यत् कामो भवति, मङ्क्ल्युनाम्नो ह्वयति, यत् पूर्वꣳ व्याहार्षं तन्मेऽमोघमसदित्य,-

[निषसाद धृतव्रतो० । ऋ. १,२५,१०; तै. सं. १,८,१६,१; तै. ब्रा. १,७,१०,२;२,६,५,१ । अग्नये स्वाहा । अथर्व. १९,४३,१ । सोमाय स्वाहा । अथर्व. १९,४३,५ । हꣳसः शुचिषद्वसु० । ऋ. ४,४०,५; तै. सं. १,८,१५,२;४,२,१,५। तै. आ. १०,१०,२]

—सा अमुष्य पु३त्रोऽमुष्यासौ पुत्र, इति नामनी व्यतिषजति स्वर्गस्य लोकस्य समष्ट्यै ॥
॥ ६ ॥ ८-१०
समानो वा एष यज्ञक्रतुः सꣳवत्सरं भवति, वि वा एतद्यज्ञपर्यच्छिद्यते यदवभृथमवयन्ति,
यदपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाग्नये गृहपतये स्वाहे,—ति जुह्वत आयन्ति यज्ञस्य संतत्या अवि-
च्छेदाय, यज्ञो वै देवेभ्यस्तिरोऽभवत्, तं देवाः सꣳसृप्स्वन्वैच्छन्, यत् सावित्रः,
सवितृप्रसूता एवान्वैच्छन्, यत् सारस्वतो, वाग्वै सरस्वती, वा३च्येवान्वैच्छन्, यत्
पौष्णः, पशवो वै पूषा, पशुष्वेवान्वैच्छन्, यद्बार्हस्पत्यो, ब्रह्म वै बृहस्पति,—र्ब्रह्म-
ण्येवान्वैच्छन्, यदैन्द्र, इन्द्रियꣳ वा इन्द्र, इन्द्रिय एवान्वैच्छन्, यद्वारुणो, वरुण एवा-
न्वैच्छन्, यत्त्वाष्ट्रः, सꣳवत्सरो वै त्वष्टा, सꣳवत्सर एवान्वैच्छन्, यदाग्ने३यो, ऽग्निर्वै
सर्वा देवता, देवतास्वेवान्वैच्छन्, यत् सौम्यः, सौमीर्वा ओषधया, ओषधीष्वेवान्वैच्छन्,
यद्वैष्णवो, विष्णुर्वै यज्ञो, यज्ञ एवान्वैच्छꣳ,—स्तꣳ विष्णा अविन्दन् दशमे, तस्मादेष
दशमो, दशमे ह्यविन्दन्, दश चमसा, दश चमसाध्वर्यवो, दश दश चमसाननुभिता आ
दशमात् पुरुषादन्वाचष्टे समृद्ध्यै, दशसमृद्धो ३ह्येष यज्ञ, एतꣳ वै ते तं यज्ञमन्वैच्छꣳ,—स्तं
आभुवꣳ,—स्तद्य एतेन यजत ऋध्नोति, सप्तदशः सर्वो भवति, प्रजापतिर्वै सप्तदशः,
प्रजापतिमेवाप्नोत्यु,—त्सन्नयज्ञो वा एष, सꣳवत्सराद्वा अभ्युत्सन्नयज्ञोऽवरुध्यते, सꣳवत्सरादे-
वैनमध्याप्त्वावरुन्द्धा, इन्द्रो वै वृत्रमहꣳ,—स्तस्येमे रूपाण्युपैतो, चित्राणीयं नक्षत्राण्यसौ,
नक्षत्राणाꣳ वा अवकाशे पुण्डरीकं जायते, क्षत्रस्य वा एतद्रूपं, क्षत्रस्यैव रूपं प्रतिमुञ्चते,
द्वादशपुण्डरीका भवन्ति, द्वादश मासाः सꣳवत्सरः, सꣳवत्सरमेवाप्त्वावरुन्द्धे ॥ ७ ॥ ११
रुक्मो होतु,—राग्नेयो वै होता, न वा एतस्मै व्युच्छति, ३व्येवास्मै वासयति, सौमु-
द्गातुः, सौर्यो वा उद्गाता,—ऽसौ अमुमेवास्मा आदित्यमाप्त्वोन्नयति, प्रावेपा अध्वर्योऽर्यमा
इव क्षुध्ययुः ॥ अश्वः प्रस्तोतुः, प्राजापत्यो वा अश्वः, प्राजापत्यः प्रस्तोता,—ऽथो प्रेव ३ह्येष
प्रोथति, प्रेव प्रस्तोता, धेनुः प्रतिहर्तुः, प्रतीव ३ह्येषा हरति, प्रतीव प्रतिहर्ता, वशा
मैत्रावरुणस्य, वशं मा नयादित्यृ,—षभो ब्राह्मणाच्छꣳसिनः सेन्द्रियत्वाय, वासः पोतुः पवि-
त्रत्वाया,—ऽनड्वान्नेष्टु,—रग्नीधोऽन्यो, युक्त्या एवं, स्थूरि यवाचितमच्छावाकस्य, स्थूरीरिव

[७] मै. २,६,१३ । तै. ब्रा. १,७,१०,६, १,८,१ । वा. १०,२३,३० । काण्व. ११,३३,४३ ।
[८] तै. ब्रा. १,८,२ ।

शेषो होत्रा स्वꣳरग्या यदच्छावाक्या, ऽथो निर्वरुणत्वायैव यद्वा, न वा अस्यै तर्हि सदस्येभ्यो
दक्षिणा दीयन्ते, त एवास्य तेनाभीष्टाः प्रीता भवन्ति, द्वादश पष्ठौहीर्गर्भिणीर्ब्रह्मणो, वाग्
वै धेनु,—र्गर्भो मन्त्रो, वाꣳश्येवास्य मन्त्रं दधात्या,—मन्त्रणीयो ह भवति, धेनुर्भव्या भ-
वन्ति, द्वादश वै पयाꣳसि, तान्यस्मिन् दधाति, तस्माद्वा एतमाहुः, पयस्वी राजा
पुण्या इति, यावद्धि पयस्तदस्मिन् धीयते ॥ ८ ॥ १२-१३

श्रायन्तीयं ब्रह्मसाम भवत्य,—नुष्टुप्सु यज्ञायज्ञियं प्रोहन्ति, वारवन्तीयमग्निष्टोमसाम,—मिन्द्रो
वै वृत्रमहꣳ,—स्तं ओजसा वीर्येण व्यार्ध्यत, स एतत् सामापश्यत्, तेनात्मानꣳ समश्रयत,—
ऽत्ता वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चते, तदेतेनैवात्मानꣳ सꣳश्रयते, ब्रह्म वै यदग्रे
व्यभुवदर्कसाम यज्ञ,—स्तस्य वा एष रसो यद्यज्ञायज्ञियꣳ, यद्यज्ञायज्ञियं गायते ब्रह्मण्येव रसं दधाति,
वाचा वा एष व्यृध्यते यो राजसूयेनाभिषिञ्चते, वागनुष्टुब्, यदनुष्टुप्सु यज्ञायज्ञियं भवति
वाꣳश्येवास्य रसं दधाती,—न्द्रियेण वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चत, इन्द्रियꣳ
वीर्यꣳ वारवन्तीयꣳ, यद्वारवन्तीयमग्निष्टोमसाम भवतीन्द्रियस्य वीꣳर्यस्यावरुद्ध्या, अश्रयन्वात्र
श्रायन्तीयेना,—ऽवारयन्त वारवन्तीयेन, तदिन्द्रियस्यैवैतद्वीर्यस्य परिगृहीत्यै, यत्र वा एन-
मदो दिशो व्यास्थापयति तत् स्व॰ लोकमभ्यारोहति, यदिमं लोकं पुनर्नोपावरोहेदतिजनꣳ वा
गच्छेदुद्वा माद्येद्, यदेता दिशामवेष्टय, इमꣳ वा एतं लोकं पुनरुपावरोहत्य,—कामो यजे-
तै,—तदेवꣳत्या वा इमा दिशो, यथादेवतꣳ वा एतदाभ्यो दिग्भ्योऽध्यन्नाद्यमवरुन्द्धे, यदि
ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिꣳ हुत्वाभिघारयेद्, यदि वैश्यो वैश्वदेवꣳ,
यदि राजन्य ऐन्द्र,—मेकधैवास्मिन्नन्नाद्यं प्रतिष्ठापयति, समानो वा एष यज्ञक्रतुः सꣳवत्सरं भ-
वति, वि वा एतद्यज्ञश्छिद्यते यत्संतिष्ठते, यदेताः प्रयुज उपैति सायमन्याः प्रातरन्या, द्वौ
वा ऋतू अहश्च रात्रिश्च, ता एव प्रयुङ्क्ते, षडन्याः षडन्याः, षड्वा ऋतव, ऋतूनेव प्रयुङ्क्ते,
ता उभयीर्द्वादश, द्वादश मासाः सꣳवत्सरः, सꣳवत्सरमेव प्रयुङ्क्ते, ऽनड्वाही दक्षिणा,
पुंस्त्या एव, मारुती पृश्निः पष्ठौही गर्भिणीति, विड्वै मरुतो, विशो वा एनमेतद्गर्भं करोति,
तस्माद्वा एष विशः प्रियः, प्रियो हि गर्भ, आदित्याजा मलिहा गर्भिणीती,—यꣳ वा अदिति,-
—रस्या वा एनमेतद्गर्भं करोति, तस्माद्वा एष दुःपराणोदो, ऽस्यो हि गर्भो, ऽथैते सत्यदूताः,

[९] तै. ब्रा. १,८,२,५; १,८,३।

प्रसवाय सावित्रो, देवा असुरैर्विजयमुपयन्तोऽश्विनोः पूषणि सत्यं न्यदधत, वाग्वै सरस्वती,
वाचा सत्यं प्रहिणोति ॥ अभ्युषिक्षि राजाभूम् ॥ इति, श्रद्धास्मै सुषुवाणाय दधति, सꣳ-
वत्सरमग्निहोत्रं जुहोत्यनुसंतत्यै ॥ ९ ॥ १४-१६

अग्निष्टोममग्रे ज्योतिष्टोममाहरति, यज्ञमुखꣳ वा अग्निष्टोमो, यज्ञमुखमेवालभ्य सर्वमाक्रम-
ते, ऽथैष त्रिष्टोम,—स्तस्य त्रिवृत् प्रातःसवनं पञ्चदशं माध्यंदिनꣳ सवनं, तेजो वै त्रिवृत्,
क्षत्रं पञ्चदश,—स्तेज एवास्य क्षत्रे दधाति, न वा अत्रापि सप्तदशस्तायते, प्रजापतिर्वै सप्त-
दशो, यज्ञः प्रजापति,—र्यद्यज्ञस्तायते तेन सप्तदशोऽनन्तरितः, पञ्चदशं माध्यंदिनꣳ सवन,—
मेकविꣳशं तृतीयसवनमिति, विड्वा एकविꣳशः, क्षत्रं पञ्चदशो, विशि वावास्यैतत् क्षत्रं प्र-
तिष्ठापयामुकः, सर्वे चतुस्त्रिꣳशाः पवमाना अभिषेचनीयस्य, त्रयस्त्रिꣳशद्देवता,—स्ता एवा-
स्यैतेनाभीष्टाः प्रीता भवन्त्य,—थ य एष चतुस्त्रिꣳशः, प्रजापतिर्वै चतुस्त्रिꣳशः, प्रजापति-
मेवाप्नोति, सꣳशरो वा एष स्तोमानामयथापूर्वꣳ, यद्विषमाः स्तोमा यत्समाः पवमानास्तेनै-
वासꣳशरस्तेन यथापूर्वं,—मात्मना वा अग्निष्टोमेन ऋध्नोत्या,—त्मना पुण्यो भवति, प्रजा वा
उक्थानि, पशव उक्थानि, यदुक्थ्योऽनुसंतत्ये, यो वै सर्वादिति नैनꣳ सर्व उपनमति,
यः सामभ्य एति पापीयान्त्सुषुवाणो भवति, यानि देवराजानाꣳ सामानि यत्तेभ्यो नैति तेनैव
सर्वाप्तत्ये,—तानि वै सामानि यत् पृष्ठानि, यत् पृष्ठान्युपयन्ति तेनैव सामभ्यो नैति, यानि
देवराजानाꣳ सामानि तैरस्मिँल्लोक ऋध्नोति, यानि मनुष्यराजानाꣳस्तैरमुष्मिꣳ,—स्तदुभयोरेवैतै-
र्लोकयोरृध्नोत्यस्मिꣳश्चामुष्मिꣳश्चो,—द्वतीषु स्तुवता, उद्वद्वा अनुष्टुभो रूप,—मानुष्टुभो राजन्य,-
—स्तस्मादुद्वतीषु स्तुवते, ऽनुष्टुप् प्रथमा भवत्य,—नुष्टुबुत्तमा, वाग्वा अनुष्टुब्, वाचा वा
एतत् प्रयन्ति, वाचोद्यन्ति, सौर्यनुष्टुबुत्तमा भवति स्वर्गस्य लोकस्य समष्ट्या, एकविꣳशं
केशवपनीयस्य बहिष्पवमानमेकविꣳशमभिषेचनीयस्योत्तममिति, विड्वा एकविꣳशः, क्षत्रꣳ सप्त-
दशो, विशो वा एतन्मध्यतः सूयते, तस्माद्वा एष विशः प्रियो, विशो हि मध्यतः सूयते
यत्र वा एनमदो दिशो व्यास्थापयति तत्स्वर्गं लोकमभ्यारोहति, यदिमं लोकं पुनर्नोपावरोहेद-
तिजनꣳ वा गच्छेदुद्वा माद्येद्, यदेष प्रतीचीनस्तोम, इमꣳ वा एतं लोकं पुनरुपावरोहति॥१०॥
१७ [२१८०]

॥ इति खिलकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

[१०] तै. ब्रा. १,८,७—८।

अथ पञ्चमः प्रपाठकः।

अध्वरादीनां ग्रहाणां विधिः।

अपो वै वृत्रः पर्यशयत्, ततो या अत्यमुच्यन्त ता जीवा यज्ञिया, गिरिर्वै वृत्रो या अतिमु-
च्यन्ता धावन्ति ता जीवा यज्ञिया, यद्वहन्तीनां गृह्णाति या एव जीवा यज्ञियास्तासामेव
गृह्णाति, प्रतीपमुपमारयत्यक्रम्बट्काराय, सर्वस्यावकाशं गृह्णाति, सेन्द्रा एव गृह्णाति,
हविष्मतीरिमा आप इति, हविष्मतीरेव गृह्णात्या,—विःसूर्यं गृह्य, उत्तरमेव यज्ञक्रतुम-
भिगृह्णात्य,—नुष्टुभा गृह्णात्य,—नुष्टुब् वै सर्वाणि छन्दाꣳसि, सर्वैरेवैनाश्छन्दोभिर्गृह्णाति, वर्ष्म
वा एषा छन्दसाꣳ, वर्ष्मैनꣳ समानानां गमयति, चतुर्भिर्गृह्णाति, त्रिभिः सादयति,
तत् सप्त, सप्तपदा शक्वरी, शाक्वराः पशवः, पशूनेवावरुन्द्धे, ऽपो वै रात्रिर्दिवा भूतं
प्रविशति, तस्मादापो दिवा कृष्णा, अपोऽहर्नक्तं, तस्मादापो नक्तꣳ शुक्ला, यद्दिवा
गृह्णात्युभे एवाहोरात्रे गृह्णाति, दिवा वै मनुष्या यज्ञेन चरन्ति, नक्तं देवा,—स्तस्माद्रात्रिभिः
श्वस्यते, सꣳस्थाप्य वै मनुष्या यज्ञं निःप्रयन्त्या, आपः खलु वै विश्वे देवा, यदपः परि-
हरन्त्यच्छया वा एतद्यज्ञꣳ संप्रादा,—दन्यस्तेऽस्य यज्ञे क्रियते, यद्वै यज्ञस्यान्तर्यन्ति तच्छिद्रं,
तदनु रक्षाꣳसि यज्ञमवयन्त्यापो वै रक्षोघ्नी,—रपो रक्षाꣳसि न तरन्ति, यदपः परिहरन्ति रक्ष-
सामनन्ववायाय, या दिवा गृह्णाति या अत्रीः प्रजास्तासामेता योनि,—स्ता एता अनुप्रजायन्ते,
या नक्तं गृह्णाति या आद्याः प्रजास्तासामेता योनि,—स्ता एता अनुप्रजायन्त, उभयीरिदं प्रजाः
प्रजनयत्यत्त्रीश्चाद्याश्चा,—ऽग्नीध्रे सादयन्त्ये,—तद्वा अनभिजित,—मथो अत्र हि ताꣳ रात्रिं देवता
उपवसन्ति, देवा वै यज्ञस्य श्वस्तनं नापश्यꣳ,—स्ते वा एतदेव यज्ञस्य श्वस्तनमपश्यन् यद्व-
सतीवरी,—र्यद्वसतीवरीर्गृहीत्वोपवसन्ति श्वस्तनꣳ वा एतद्यज्ञस्यालभ्योपवसन्त्य,—थो आपो वै
विश्वे देवाः, सर्वा वा एतद्देवता आलभ्योपवसन्ति यस्यागृहीताः सर्वोऽभिनिम्रोचेद्, य आ-
हिताग्निः सोमयाजी तस्य कुम्भाद्गृह्य,—स्तस्य हि गृहीता अग्निमुपरिष्टाद्धारयेयु,—र्य गृहीया,—
ज्ज्योतिष्मतीरेवैना गृह्णाति, हिरण्यꣳ हस्ते भवत्य,—थ गृह्णाति, सत्यꣳ वै हिरण्यꣳ,
सत्येनैवैना गृह्णाति, वरो दक्षिणा, वरेणैवैना गृह्णाति, यत्तत्र धनमदास्यन्त्स्यात्तद्दयम्॥१॥ १
प्रचरꣳण्यामग्रे गृह्णात्ये,—षा ह्यग्रे प्रचरत्य,—पो वै सोमस्य रसः प्रविष्टो, ऽग्निः सर्वा देवता,
वैश्वदेवीरापो, यज्ञमुखं ग्रावाणः, सवितृप्रसूतो वा एतद् सर्वाभिर्देवताभिरपाꣳ सोमस्य

[१] मै. १,३,१ : तै. सं. ६,४,२ । श. ब्रा. ३,९,२ । का. ६,२३ । काठ. ६,३३ ।
[२] मै. १,३,१ : तै. सं. ६,४,३ : श. ब्रा. ३,९,३,२३ । का. ६,२६—२८ । काठ. ६,३८—३९,३१ ।

रसमर्छति, शृणोत्वग्निः समिधा हवं मा इति, यस्मिन्नेवाग्नौ जुहोति तमेतदाह, शृण्वन्त्वापा
इति, या एवापोऽर्छति ता एतदाह, धिषणा च देवीति, वाग्वै धिषणा देवी, वाचꣳ वा
एतदाह, शृणोत ग्रावाणो विदुषो नु यज्ञमिति यज्ञमुखꣳ हि ग्रावाणः, शृणोतु देवः सविता
हवं मा, इत्याह, प्रसूत्या एव ॥ अप इष्य होतः ॥ इति यज्ञं प्रेष्ये,—ति वा एतदाह॥ प्र
ब्रह्मणा इति, ब्रह्मणैव यज्ञमर्छति, मैत्रावरुणस्य चमसेनार्छत्ये,—ष ह्यग्रे प्रचरत्य,—थो मित्राव-
रुणौ ह्यपामीशाते, यज्ञमुखꣳ वै मित्रावरुणौ, यज्ञमुखमापो, यज्ञमुखेनैव यज्ञमुखमर्छति, यत्र
होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात्तदपोऽध्वर्युर्गृह्णीयाद्, यन्नोपशृणुयाद्बधिरः स्याद्, वाचो
हि छिद्येते, ऽथ यज्जुहोति हविर्भूता एवैना गृह्णात्य,—थो अभिघृता एव तृणं प्रास्य जुहोत्य,-
—ग्निमत्येव जुहोत्या,—यतनवत्यन्योऽध्वर्युः स्याद्, यदनायतने जुहुयाद्, घृतꣳ वै देवा वज्रं
कृत्वा सोममघ्न,—न्नभि खलु वा एता घारयन्ति, तस्मादाहुतिमपप्लावयत्य,—थो आहुतिं नै-
द्वराणीति, कार्ष्यसीत्या,—हुतिमपप्लावयति, समुद्रस्य वोऽक्षित्या उन्नय, इत्युपमारयत्य,-
—पामेवाक्षित्या, अपां वै सोमस्य रसः प्रविष्टः, सोममपाꣳ रसो, ऽपाꣳ खलु वै नपाना-
पाꣳ सोमस्य रसस्येशाते, तौ वा एतदाहुत्या भागधेयेनापाꣳ सोमस्य रसं निरयाचिष्टो,—भे
अहोरात्रे वसतीवरीषु ग्रहीतꣳव्ये, इत्याहुः, पूर्वेद्युरन्यां गृह्णाति, पुरान्याः सूर्यस्योदितो,—
स्तथास्योभे अहोरात्रे वसतीवरीषु गृहीते भवतः, पूर्वेद्युरन्या गृह्णाति, पुरान्याः सूर्यस्योदितो,—
रुभयीरेवैनाः सर्वा गृहीता अक,—र्ऋत्व्या वा एता गृह्यन्ते या मैत्रावरुणस्य चमसे याश्च निग्राꣳ-
भ्या,—स्ता उभयीरुपरिष्टाच्चात्वालस्य संमनक्ति, संज्ञानमाभ्यः करोति, मित्रमाभ्यो ददाति,
चात्वालान्निर्गृह्णन्त, एष वा अपाꣳ योनिः, स्वादेव योनेर्निगृह्णन्तेऽस्कन्नत्वाय॥ अध्वर्योऽध्व-
र्योꣳ ओम् ॥ इत्य,—विदो यज्ञा३,—मिति वा एतदाह ॥ उतमेनन्नमु,—रुतेमे पश्य ॥ अयं मे
रुद्धे, इति वा एतदाह, यदग्निष्टोमो जुहोति, न वा अग्निमग्निष्टोमस्य स्तोत्रेण न शस्त्रेणा-
तियन्त्य,—ग्निष्टोममेव यज्ञक्रतुमनुसंतनोति, यद्युक्थ्यः, परिधिमनक्ति, परे वा अग्नेः परि-
धयः, पराणि परिधिभ्य उक्थान्य,—क्थान्येव यज्ञक्रतुमनुसंतनोति, यद्यतिरात्रे, एतद्देव
यजुर्वदन् हविर्धानं प्रपद्येत, परꣳ वै परिधिभ्यो हविर्धानं, परोक्थेभ्यो रात्री,
रात्रीमेव यज्ञक्रतुमनुसंतनोति, स्तेन मनो, ऽनृतवादिनी वा,—गथ केन सोमा गृह्यन्ते केन
हूयन्ता, इति पृच्छे,—दृतꣳ वै सत्यꣳ हिरण्य,—मृतेनैव सत्येन गृह्यन्त, ऋतेन हूयन्ते ॥२॥
२-९

देवेभ्यो वै मनुष्येभ्यः स्वर्गाय लोकाय यज्ञ आह्रियते, यद्वदे त्वेति, तेन देवेभ्यो, यन्मनसे त्वेति, तेन मनुष्येभ्यो, यदाह, दिवे त्वा सूर्याय त्वेति, तदनु यज्ञꣳ स्वर्गं लोकꣳ समारोहयति, विं वा एतद्यज्ञश्छिद्यते यस्मै कमाह्रियते, तद्धोत्रेणमनु स्वर्गं लोकꣳ समारोहयति, यदाह, दिवि देवेषु होत्रा यच्छेति, होत्राभिर्वै यज्ञः संततो, होत्राभिरेव यज्ञꣳ संतनोति ॥ देवेभ्यः प्रातर्यावभ्योऽनुब्रूहि ॥ इति, छन्दाꣳसि वै देवाः प्रातर्यावाण,—श्छन्दोभ्यो वा एतदनुवाच आह, पुरा वाचः प्रवदितोः प्रातरनुवाकमन्वाह, यजमानायैव वाचं गृह्णाति, न वा एतर्हि यजमानो हस्ता अवनेनिक्ते, यदप्सुमतीं प्रथमामन्वाह, प्रातरवनेनेगो वा एष यजमानस्य, यत्र वा अ३दोऽपः परिहरन्त्य,—श्नो वा एतद्यज्ञꣳ संप्रादा,—द्यदप्सुमतीं प्रथमामन्वाहाश्नो वा एतद्यज्ञं पुनरालभते, सर्वेषाꣳ वै देवानां प्रातरनुवाक, आपः खलु वै विश्वे देवा, यदप्सुमतीं प्रथमामन्वाह सर्वा वा एतद्देवता आप्नोति, सर्वा व्यश्नोति, यथा वै सामिधेनीरेवं प्रातरनुवाक, आसाद्य वै हविः सामिधेनीरन्वाहु,—रेतद् खलु वा एतर्हि हविर्यत्सोम,—स्तस्मात् सोममुपावहृत्यान्वाह, गायत्रीं च संपादयति जगतीं च, तद् द्वे छन्दसी, एकं छन्दोऽभिसंपादयति बृहतीं, त्रिष्टुभं च ककुभं च, तद् द्वे छन्दसी, एकं छन्दोऽभिसंपादयति बृहतीं,—मनुष्टुभं च पङ्क्तिं च, तत् षट् छन्दाꣳस्यै,—कं छन्दोऽभिसंपादयति बृहतीं,—मनुष्टुप्प्रतिपत्कानि छन्दाꣳसि कुर्याद्यज्ञावकीर्णस्य, वाग्वा अनुष्टुब्, वाचैवैनं भिषज्यति, समया त्रिष्टुभं च जगतीं चानुब्रूयात् पशुकामस्य, पशवो वै जगती, पशुमान् भवति, सर्वाणि छन्दाꣳस्यन्वाह, प्रजापतिर्वै छन्दाꣳसि, प्रजापतिमेवाप्नोति, प्रजापतेर्वा एतदुक्थं यत् प्रातरनुवाको, व्युष्टायां पुरा सूर्यस्योदेतोरनुब्रूया,—देष हि प्रजापतेर्लोकः, पवित्रꣳ वै प्रातरनुवाको, यजमानमेवैतेन पुनाति, शतमनुब्रूयादायुःकामस्य, शतायुर्वै पुरुषः शतवीर्या, आयुरेव वीर्यमाप्नोति, सप्त च शतानि विꣳशतिं चानुब्रूयात् पशुकामस्यै,—तावन्ति वै सꣳवत्सरस्याहोरात्राणि, सꣳवत्सरेणैवास्मै पशूनवरुन्द्धे, सहस्रमनुब्रूयात् स्वर्गकामस्य, यावद्वै सहस्रं तावदि३तोऽसौ लोकः, स्वर्गस्य लोकस्य समष्ट्या, अपरिमिता अन्वाहा,—परिमितस्यावरुद्ध्यै, पङ्क्त्या परिदधात्यु,—त्तरमेव यज्ञक्रतुमभिगृह्णाति ॥ ३ ॥ १०-१२

[३] मै. १,३,१ । तै. सं. ६,४,३,१—२ । श. ब्रा. ३,९,३,४ । वा. ६,२५ । काण्व. ६,३६ । मे. ४७

यज्ञस्य वा एताः पत्नीजनीः, पुꣳसामग्नीत्, स्त्रीणां नेष्टा, यदग्नीन्नेष्टुरुपस्थमासीदति, मिथुनꣳ वा एतत् संभवतो, यत्तर्हीषं उपप्रवर्तयति तस्मिन्नेव मिथुने रेतो दधाति, पत्न्युपप्रवर्तयति, पत्न्या हि प्रजाः प्रजायन्त, ऊरुणोपप्रवर्तयत्यु,—रुꣳ ह्यनु प्रजाः प्रजायन्ते, दक्षिणेनोरुणोपप्रवर्तयति, दक्षिणꣳ ह्यूरुमनु प्रजाः प्रजायन्ते, ऽन्तरत उपप्रवर्तयत्य,—न्तरतो हि प्रजाः प्रजायन्ते, यद्दक्षिणा प्रवर्तयेत् पितृलोक एना निधुवे,—दथ यदुदीचीरुपप्रवर्तयति मनुष्यलोकमेवैना उपप्रजनयति, प्राजापत्यो वा उद्गाता, संख्याप्यमानो वा उद्गाता पत्न्या रेत आदत्ते, यदाह, वामी ते संदृशि विश्वꣳ रेतो धेषीयेति, तथा ह नादत्ते, द्वादशे स्तोत्र उपप्रवर्तयति, द्वादश मासाः सꣳवत्सरो, द्वादशाग्निष्टोमे स्तोत्राण्या,—पः शान्ति,—र्यत्तर्हीषं उपप्रवर्तयति, शमयत्येव, देवस्य त्वा सवितुः प्रसव इति, सवितृप्रसूत एवैनमादत्ते, ऽश्विनोर्बाहुभ्यामित्य,—श्विनौ वै देवानामध्वर्यू, पूष्णो हस्ताभ्यामिति, देवताभिरेव, ग्रावासीति, रातं ३ह्येष देवेभ्यः सोम,—मध्वरकृद्देवेभ्यो इत्य,—ध्वरꣳ ३ह्येष देवेभ्यः करोती,—न्द्राय त्वा सुषुत्तमं मधुमन्तं पयस्वन्तमित्यै,—न्द्रो हि यज्ञ, इन्द्रं खलु वा एतर्ह्यन्या देवता अन्वि,—न्द्राय त्वा वसुमते रुद्रवत इति, वसवश्च ह्येनमेतर्हि रुद्राश्चान्वि,—न्द्राय त्वादित्यवत इत्या,—दित्या ह्येनमेतर्ह्यन्व,—ग्नये त्वा रायस्पोषद इत्य,—ग्निर्वै सर्वा देवता, एता ह्येनमेतर्हि देवता अनु, विष्णवे त्वेति, विष्णुर्हि यज्ञो, व्यानो वा उपाꣳशुसवनः, प्रजा अꣳशवो, व्यानꣳ वा एतत् प्रजासु दधाति, श्वात्राः स्थ वृत्रतुरा इत्ये,—ष वा अपाꣳ वै सोमपीथ, एतꣳ वै विश्वामित्रोऽपाꣳ सोमपीथꣳ विदांचकार, तस्मै सिन्धवो घोक्षमनमन्ता,—ऽपाꣳ वा एष सोमपी३थो, ऽपो वा एतत् सोमपीथेन समर्धयति, यो वा अपाꣳ सोमपीथꣳ वेद न ह वा आस्वार्तिमार्छति, करोत्यासु वी३र्यꣳ, यत्ते सोम दिवि ज्योतिरिति, सोमो वै वाज,—स्तस्य चन्द्रमास्तृतीय,—मयꣳ यः पवते स तृतीयꣳ, येन यजन्ते स तृतीयं, गर्भानमुना दाधार, प्राणानेनेन यच्छत्य,—यꣳ यः पवतेऽन्नमनेन दाधार, येन यजन्ते तस्य वै वाजस्य सत्यꣳ वाजिन,—मन्नꣳ वाजिनं, दक्षिणा वाजिनं, ता वा अस्यैतत्तन्वः संभृत्य तꣳ सर्वꣳ संतनु भूतमाप्याययन्ति, वज्रो वै ग्रावा, हन् अधिषवणे, क्रूरमिव वा एतद्यज्ञे क्रियते, यदाह, धिषणे ईडिते ईडेथामिति, शमयत्येव ॥ ४ ॥ १३

[४] मै. १,३,१—३ । तै. सं. ६,४,४ । श. ब्रा. ३,९,४ । वा. ६,३०,३२—३४ । काण्व. ६,४३,४५—४७ । [देवस्य त्वा सवितुः० । अथर्व. १९,५१,२]

वसतीवरीभिः सोममाप्याययन्ति, न हि सोमेन सोम आप्यायते, ऽद्भिर्हि सोम आप्यायते, निग्राभ्याभिरुपाꣳशु,—मतो हीतरे सोमा गृह्यन्ते, प्राणो वा उपाꣳशु,—रङ्गानीतरे ग्रहा, यदन्यत आप्याययेयुः प्राणेन यज्ञꣳ विछिन्द्यु,—रष्टौ कृत्वः प्रातरभिषुणोत्य,—ष्टाक्षरा गायत्री, गायत्रीꣳ वा एतत् प्रातःसवने व्यायातयन्ति, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा उपाꣳशौ यज्ञꣳ सꣳस्थाप्यमपश्यꣳ,—स्तमुपाꣳशौ समस्थापयꣳ,—स्तदुपाꣳशा एव यज्ञः सꣳस्थाप्यो, ऽष्टौ कृत्वः प्रातरभिषुणोत्य,—ष्टाक्षरा गायत्री, गायत्रीमेवाप्नोति, यदेकादश, त्रिष्टुभं तेन, यद् द्वादश, जगतीं तेन, त्रिर्विगृह्णाति, त्रीणि वै सवनानि, सवनान्येवाप्नोत्ये,—तद्वा उपाꣳशौ यज्ञꣳ समतिष्ठिपꣳ,—स्तेन सꣳस्थितेनारिष्टेन भूतेन प्रचरन्ति, त्रिर्विगृह्णाति, त्रयो ३हीमे प्राणाः, प्राणोऽपानो व्यानो, ऽथो त्रयो वा इमे लोका, इमानेव लोकानाप्नोत्य,—सौ वा उपाꣳशुरन्तरिक्षमन्तर्याम, इयमुपयामो, यदुपयामगृहीता गृह्यन्तेऽनया वा एतद्गृह्यन्ते, तदस्कन्ना वा ए३ते, ऽनया हि गृह्यन्ते, यत्स्थाल्या गृह्यन्ते, ऽनया वा एतद्गृह्यन्ते, तदस्कन्ना वा ए३ते, ऽनया हि गृह्यन्ते, यद्दारुमयेण गृह्यन्ते, ऽस्या वा एषाधिक्रियते, तदस्कन्ना वा ए३ते, ऽनया हि गृह्यन्तेऽनया वा एतद्गृह्यन्त, इयꣳ हि वनस्पतीनाꣳ योनि,—स्तदस्कन्ना वा ए३ते, ऽनया हि गृह्यन्त, एष ते योनि,—रिति सादयती,—यꣳ वै सोमस्य योनि,—रस्याः सोमोऽधि जायते, स्व एवैनꣳ योनौ दधाती,—यꣳ वै देवपात्रं, तद्य एवꣳ वेद प्र वसीयसः पात्रमाप्नोति, ब्राह्मणं तु पात्रे न मीमाꣳसेत यः पात्रिय इव स्या,—दनुपयामगृहीतो गृह्यते, ऽनुपयामगृहीतꣳ हि प्रजाः प्राणमुपजीवन्त्य,—सन्नो हि प्रजाः प्राणमुपजीवन्त्य,—पवित्रपूतो गृह्यते, ऽपवित्रपूतꣳ हि प्रजाः प्राणमुपजीवन्ति, पवित्रपूता वा अन्ये सोमा, अथ वा एष वाहूयते, ऽसन्नꣳ हि प्रजाः प्राणमुपजीवन्ति, पवित्रपूता वा अन्ये सोमा, अथ वा एष वाक्पूतो ३ह्ये३षो, ऽꣳशुभिः पावयति, क्पूतो यदुपाꣳशु,—स्तस्माद्वाचस्पतये पवस्वे,—त्याह, वाक्पूतो ३ह्ये३षो, ऽꣳशुभिः पावयति, द्वौ द्वौ ३हीमे प्राणा, प्राणा वा अꣳशवः, प्राणैरेवैनं पावयति, द्वाभ्यां द्वाभ्यां पावयति, द्वौ द्वौ ३हीमे प्राणा, प्राणा वा अꣳशवः, प्राणैरेवैनं पावयति, स्वांकृतोऽसीति, प्राणमेव स्वमकृत, मनस्त्वाष्टिति, मनसैव प्राणमाप्नोति, स्वाहा त्वा सुभव सूर्यायेति, सूर्यदेव३त्या हि देवो देवानां पवित्रमसीति, यत्स्वित्सोमꣳ सोमेन पुनाति, स्वाहा त्वा सुभव सूर्यायेति, सूर्यदेव३त्या हि

[५] मै. १,३,४ । तै. सं. ६,४,५ । श. ब्रा. ४,१,१;४,१,२,२१ । कपि. ४१,९;४२,१—२ । वा. ७,१,३,६ । काण्व. ७. १—३,५ ।

सर्वे सोमा हूयन्ते, ऽथो अत्र वै देवानां प्रियास्त३न्व,—स्ता एवावरुन्द्धे, देवेभ्यस्त्वा मरीचिपेभ्या इति, रश्मयो वै देवा मरीचिपाः, परिधयो रश्मयो, ऽसा आदित्य आहवनीय,—स्तानेव प्रीणात्यु,—र्ध्वस्तिष्ठन् जुहोत्यू,—र्ध्वो हि तिष्ठन् वीर्यवत्तरो, यं द्विष्यात्तस्य जिह्मस्तिष्ठन् जुहुयात्, प्राणानस्य व्लिनाति, जिह्मारुको भवति, यमभिचरेदा तमितोस्तिष्ठे,—दग्निराहुतिमभित्वरमाणस्ताजगनुगच्छति, यदि कामयेत, वर्षेत् पर्जन्या, इति परिमृज्योर्ध्वमुन्मृज्या,—दोषधीभ्यो वा ए३षोऽमुतो वर्षत्यो,—षधीरेव नेदीयो वृष्ट्या अक,—र्यदि कामयेत, वर्षेत् पर्जन्या, इति परिमृज्यावाचीनमवमृज्याद्, वैश्वानरेणैव वृष्टिमपि हन्ति, नापिदध्यो, यदपिदध्यात् प्राणमस्यापिदध्यात, प्रमायुकः स्याद्, यं द्विष्यात्तस्यापिदध्यात्, प्राणमेवास्यापिदधाति, यमभिचरेत् ॥ इदमहममुष्यामुष्यायणस्य प्राणमपिदधामि ॥ इत्यपिदध्यात्, प्राणमेवास्यापिदधाति॥ इदमहममुष्यामुष्यायणस्य प्राणं सादयामि॥ इत्यभिचरन्त्सादयेत्, प्राण एवास्य सादयति, प्रमायुको भवति, प्राणाय त्वेत्य,—नभिचरन्त्सादयेत् ॥ ५ ॥ १४-१८

पवित्रꣳ वितन्वन्ति प्राणापानयोर्विधृत्या, उपयामगृहीतो गृह्यते, ऽपानेन वै प्राणो धृतः, प्राणस्य धृत्या, अन्तरिक्षꣳ वा अन्तर्या३मो, ऽन्तरिक्षमिमाः प्रजा, यदेतत् पात्रꣳ सदवत्सादयति प्रजास्वेव रसं दधाति, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा उपाꣳशुमपश्यꣳ,—स्तमगृह्णत, तं पुरा स्तोत्रात् पुरा शस्त्राद्धोतुमुपोदतिष्ठꣳ,—स्तेऽसुरा अचिकयु,—र्जुहति वा इति, तं वज्रमादायाभ्युपतꣳ,—स्ते देवा अन्तर्याममपश्यꣳ,—स्तमगृह्णत, तेनासुरानेभ्यो लोकेभ्यो ऽन्तरदधत, ततो देवा अभवन्, परासुरा,—स्तथ एवꣳ विद्वानन्तर्यामं गृह्णीते, ऽन्तर्यामेणैव भ्रातृव्य,—मेभ्यो लोकेभ्योऽन्तर्धत्ते, भवत्यात्मना, परास्य भ्रातृव्यो भवति, प्राणापानौ वा उपाꣳश्वन्तर्यामौ, व्यान उपाꣳशुसवनो, यदेष ग्रावान्तरेते पात्रे सार्यते, प्राणापानयोर्विधृत्यै, यो वा एता ईजते, येनैतौ विधृता एष वाव स उपाꣳशुसवनो ग्रावा, प्राणापानौ वा उपाꣳश्वन्तर्यामौ, व्यान उपाꣳशुसवनो, यदेते पात्रे एतं ग्रावाणमा तृतीयात् सवनात्र जुहोति,—स्तस्मात् सुप्तस्य सर्वाण्यन्यानि श्रोत्राण्यपक्रामन्ति प्राणापानौ त्वेनं न जहीतो, ऽथ यत् पुनरदयति, तस्मात् सुप्त्वा पुनः प्रबुध्यन्ते, प्राणापानौ वा उपाꣳश्वन्तर्यामौ, व्यान उपाꣳशुसवनो, यदेते पात्रे एतं ग्रावाणमा तृतीयात् सवनान्न जुहोतस्तस्मात् पक्षिणो वियत्सु पक्षा-

[६] मै. १,३,५ । तै. सं. ६,४,६ । श. ब्रा. ४,१,२ । कपि ४१,९; ४२,१ ।

रेत्येषां होत्रा स्वशन्या यदुद्गावाक्यां, ऽथो निर्वरुणत्वायैव यथा, न वा अस्यै तर्हि सदस्येभ्यो दक्षिणा दीयन्ते, त एवास्य तेनाभीष्टाः प्रीता भवन्ति, द्वादश पष्ठौहीर्गर्भिणीर्ब्रह्मणो, वाग् वै धेनु,—र्गर्भो मन्त्रो, वाचमेवास्य मन्त्रं दधात्या,—मन्त्रणीयो ह भवति, धेनुर्भव्या भवन्ति, द्वादश वै पयांसि, तान्यस्मिन् दधाति, तस्माद्वा एतमाहुः, पयस्वी राजा पुण्या इति, यावद्धि पयस्तदस्मिन् धीयते ॥८॥
१२-१३

श्रायन्तीयं ब्रह्मसामं भवत्य,—नुष्टुप्सु यज्ञायज्ञियं प्रोहन्ति, वारवन्तीयमग्निष्टोमसामं,—मिन्द्रो वै वृत्रमहं,—स्तं ओजसा वीर्येण व्यार्ध्यत, स एतद् सामापश्यत्, तेनात्मानं समश्रयतौ,—जसा वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चते, तदुतेनैवात्मानं संश्रयते, ब्रह्म वै यदग्रे व्यंभुवदेकसाम यजु,—स्तस्य वा एष रसो यद्यज्ञायज्ञियं, यद्यज्ञायज्ञियं गायते ब्रह्मण्येव रसं दधाति, वाचा वा एष व्यृध्यते यो राजसूयेनाभिषिञ्चते, वागनुष्टुब्, यदनुष्टुप्सु यज्ञायज्ञियं भवति वाच्येवास्य रसं दधाती,—न्द्रियेण वा एष वीर्येण व्यृध्यते यो राजसूयेनाभिषिञ्चत, इन्द्रियं वीर्यं वारवन्तीयं, यद्वारवन्तीयमग्निष्टोमसामं भवतीन्द्रियस्य वीर्यस्यावरुद्ध्या, अश्रयन्वा इत्रे श्रायन्तीयेना,—ऽवारयन्त वारवन्तीयेन, तदिन्द्रियस्यैवैतै वीर्यस्य परिगृहीत्यै, यत्र वा एनमदो दिशो व्यास्थापयति तत्र स्व. लोकमभ्यारोहति, यदिमं लोकं पुनर्नोपावरोहेदति जनं वा गच्छेदुद्वा माद्येद्, यदुता दिशामवेष्टय, इमं वा एतं लोकं पुनरुपावरोहत्य,—ऽकामो यजेते,—तदेवर्त्या वा इमा दिशो, यथादेवतं वा एतदाभ्यो दिग्भ्योऽध्यन्नाद्यमवरुन्द्धे, यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वाभिघारयेद्, यदि वैश्यो वैश्वदेवं, यदि राजन्य ऐन्द्रं,—मेकधैवास्मिन्नन्नाद्यं प्रतिष्ठापयति, समानो वा एष यज्ञक्रतुः संवत्सरं भवति, वि वा एतद्यज्ञश्छिद्यते यत्संतिष्ठते, यदुवाः प्रयुज उपैति सायमन्याः प्रातरन्या, द्वौ वा ऋतू अहश्च रात्रिश्च, तौ एवं प्रयुङ्क्ते, षडन्याः षडन्याः, षड्वा ऋतव, ऋतूनेव प्रयुङ्क्ते, ता उभयीर्द्वादश, द्वादश मासाः संवत्सरः, संवत्सरमेव प्रयुङ्क्ते, ऽनड्वाहौ दक्षिणा, युक्त्या एवं, मारुती पृश्निः पष्ठौही गर्भिणीति, विड्वै मरुतो, विशो वा एनमेतद्गर्भं करोति, तस्माद्वा एष विशः प्रियः, प्रियो हि गर्भ, आदित्याजा मलिहा गर्भिणीती,—यं वा अदिति,—रस्या वा एनमेतद्गर्भं करोति, तस्माद्वा एष दुःपराणोदो, ऽस्या हि गर्भो, ऽथैते सत्यदूताः,

[९] तै. ब्रा. १,८,२,५; १,८,३ ।

प्रसवाय सावित्रो, देवा असुरैर्विजयमुपयन्तोऽश्विनोः पूषणि सत्यं न्यदधत, वाग्वै सरस्वती, वाचा सत्यं प्रहिणोति ॥ अभ्युषिक्षि राजाभूम् ॥ इति, श्रद्धास्मै सुपुत्राणाय दधति, संवत्सरमग्निहोत्रं जुहोत्यनुसंतत्यै ॥ ९ ॥
१४-१६

अग्निष्टोममग्रे ज्योतिष्टोममाहरति, यज्ञमुखं वा अग्निष्टोमो, यज्ञमुखमेवालभ्य सर्वमाकुप्तं, ऽथैष त्रिष्टोम,—स्तस्य त्रिवृत् प्रातःसवनं पञ्चदशं माध्यंदिनं सवनं, तेजो वै त्रिवृत्, क्षत्रं पञ्चदश,—स्तेज एवास्य क्षत्रे दधाति, न वा अत्रापि सप्तदशस्तायते, प्रजापतिर्वै सप्तदशो, यज्ञः प्रजापति,—र्यद्यज्ञस्तायते तेन सप्तदशोऽनन्तरितः, पञ्चदशं माध्यंदिनं सवन,—मेकविंशं तृतीयसवनमिति, विड्वा एकविंशः, क्षत्रं पञ्चदशो, विशि वावास्यैवत् क्षत्रं प्रतिष्ठापयामुकः, सर्वे चतुस्त्रिंशाः पवमाना अभिषेचनीयस्य, त्रयस्त्रिंशद्देवता,—स्ता एवास्यैतेनाभीष्टाः प्रीता भवन्त्य,—थ य एष चतुस्त्रिंशः, प्रजापतिर्वै चतुस्त्रिंशः, प्रजापतिमेवाप्नोति, संशरो वा एष स्तोमानामयथापूर्वं, यद्विषमाः स्तोमा यत्समाः पवमानास्तेनैवासंशरस्तेन यथापूर्व,—मात्मना वा अग्निष्टोमेन ऋध्नोत्या,—त्मना पुण्यो भवति, प्रजा वा उक्थानि, पशव उक्थानि, यदुक्थ्योऽनुसंतत्ये, यो वै सर्वादेति नैनं सर्व उपनमति, यः सामभ्या एति पापीयान्त्सुपुत्राणो भवति, यानि देवराजानां सामानि यत्तेभ्यो नैति तेनैव सर्वाप्नोत्ये,—तानि वै सामानि यत् पृष्ठानि, यत् पृष्ठान्युपयन्ति तेनैव सामभ्यो नैति, यानि देवराजानां सामानि तैरस्मिंल्लोके ऋध्नोति, यानि मनुष्यराजानांस्तैरमुष्मिं,—स्तदुभयोरेवैतैर्लोकयोर्ऋध्नोत्यस्मिंश्चामुष्मिंश्चो,—द्वतीषु स्तुवता, उद्वद्वा अनुष्टुभो रूप,—मानुष्टुभो राजन्य,—स्तस्मादुद्वतीषु स्तुवते, ऽनुष्टुप् प्रथमा भवत्य,—नुष्टुबुत्तमा, वाग्वा अनुष्टुब्, वाचा वा एतन् प्रयन्ति, वाचोद्यन्ति, सौर्यनुष्टुबुत्तमा भवति स्वर्गस्य लोकस्य समष्ट्या, एकविंशं केशवपनीयस्य बहिष्पवमानमेकविंशमभिषेचनीयस्योत्तममिति, विड्वा एकविंशः, क्षत्रं सप्तदशो, विशो वा एतन्मध्यतः सूयते, तस्माद्वा एष विशः प्रियो, विशो हि मध्यतः सूयते यत्र वा एनमदो दिशो व्यास्थापयति तत्स्वर्गं लोकमभ्यारोहति, यदिमं लोकं पुनर्नोपावरोहेदति जनं वा गच्छेदुद्वा माद्येद्, यदेष प्रतीचीनस्तोम, इमं वा एतं लोकं पुनरुपावरोहति॥१०॥
१७　[२१८०]

॥ इति खिलकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

[१०] तै. ब्रा. १,८,७—८ ।

अथ पञ्चमः प्रपाठकः ।

अध्वरादीनां त्रयाणां विधिः ।

अपो वै वृत्रः पर्यशयत्, ततो या अत्यमुच्यन्त ता जीवा यज्ञिया, गिरिर्वै वृत्रो या अतिमुह्यानां धावन्ति ता जीवा यज्ञिया, यद्वहन्तीनां गृह्णाति या एव जीवा यज्ञियास्तासामेव गृह्णाति, प्रतीपमुपमारयन्त्यछम्बट्कारायं, सर्वस्यावकाशं गृह्णाति, सेन्द्रा एव गृह्णाति, हविष्मतीरिमा आप इति, हविष्मतीरेव गृह्णात्या,—विःसूर्ये गृह्णा, उत्तरमेव यज्ञक्रतुमभिगृह्णात्य,—नुष्टुभागृह्णात्य,—नुष्टुब् वै सर्वाणि छन्दांसि, सर्वैरेवैनाश्छन्दोभिर्गृह्णाति, वर्ष्म वा एषा छन्दसां, वर्ष्मैनं समानानां गमयति, चतुर्भिर्गृह्णाति, त्रिभिः सादयति, तत् सप्त, सप्तपदा शक्वरी, शाक्वराः पशवः, पशूनेवावरुन्द्धे, ऽपो वै रात्रिर्दिवा भूतं प्रविशति, तस्मादापो दिवा कृष्णा, अपोऽहर्नक्तं, तस्मादापो नक्तं शुक्ला, यद्दिवा गृह्णात्युभे एवाहोरात्रे गृह्णाति, दिवा वै मनुष्या यज्ञेन चरन्ति, नक्तं देवा,—स्तस्माद्रात्रिभिः श्वसन्ते, संस्थाप्य वै मनुष्या यज्ञं निःप्रयन्ता, आपः खलु वै विश्वे देवा, यदपः परिहरन्त्यच्छयो वा एतद्यज्ञं संप्रादा,—दन्वस्तेऽस्य यज्ञे क्रियते, यद्वै यज्ञस्यान्तर्यन्ति तच्छिद्रं, तदनु रक्षांसि यज्ञमवयन्त्यापो वै रक्षोघ्नी,—रपो रक्षांसि न तरन्ति, यदपः परिहरन्ति रक्षसामनन्ववायाय, या दिवा गृह्णाति या अग्रीः प्रजास्तासामेता योनि,—स्ता एता अनुप्रजायन्ते, या नक्तं गृह्णाति या आद्याः प्रजास्तासामेता योनि,—स्ता एता अनुप्रजायन्त, उभयीरेव प्रजाः प्रजनयत्यग्रीश्चाद्याश्चा,—ऽग्नीध्रे सादयन्त्ये,—तद्वा अनभिजित,—मथो अत्र हि तां रात्रिं देवता उपवसन्ति, देवा वै यज्ञस्य श्वस्तनं नापश्यं,—स्ते वा एतदेव यज्ञस्य श्वस्तनमपश्यन् यद्वसतीवरी,—र्यद्वसतीवरीर्गृह्णन्त्योपवसन्ति श्वस्तनं वा एतद्यज्ञस्यालभ्योपवसन्त्य,—थो आपो वै विश्वे देवाः, सर्वा वा एतद्देवता आलभ्योपवसन्ति यस्यागृहीताः सूर्योऽभिनिम्रोचेद्, य आहिताग्निः सोमयाजी तस्य कुम्भाद्गृह्णा,—त्तस्य हि गृहीता अग्निमुपरिष्टाद्धारयेयु,—रथ गृहीत्वा,—ज्योतिष्मतीरेवैना गृह्णाति, हिरण्यं हस्ते भवत्य,—थ गृह्णाति, सत्यं वै हिरण्यं, सत्येनैवैना गृह्णाति, वरो दक्षिणा, वरेणैवैना गृह्णाति, यत्तत्र धनमदास्यन्त्स्यात्तद्देयम्॥१॥ १

प्रचरण्यामग्रे गृह्णात्ये,—पो ह्यग्रे प्रचरन्त्य,—पो वै सोमस्य रसः प्रविष्टो, ऽग्निः सर्वा देवता, वैश्वदेवीरापो, यज्ञमुखं ग्रावाणः, सवितृप्रसूतो वा एतद् सर्वाभिर्देवताभिरपां सोमस्य

[१] तै. १,३,१ । तै. ब्रा. ६,४,२ । श. ब्रा. ३,९,२ । का. ६,२३ । काण्व. ६,२३ ।
[२] तै. १,३,१ । तै. सं. ६,४,३ । श. ब्रा. ३,९,३,२४ । का. ६,२६—२८ । काण्व. ६,३८—३९,४१ ।

रसमच्छैति, शृणोत्वग्निः समिधा हवं मा इति, यस्मिन्नेवाग्नौ जुहोति तमेतदाह, शृण्वन्त्वापा इति, या एवापोऽच्छैति ता एतदाह, धिषणा च देवीति, वाग्वै धिषणा देवी, वाचं वा एतदाह, शृणोत ग्रावाणो विदुषो नु यज्ञमिति यज्ञमुखं हि ग्रावाणः, शृणोतु देवः सविता हवं मा, इत्याह, प्रसूत्या एवं ॥ अप इष्य होतः ॥ इति यज्ञं प्रेष्ये,—ति वा एतदाह॥ प्र ब्रह्मणा इति, ब्रह्मणैव यज्ञमच्छैति, मैत्रावरुणस्य चमसेनाच्छैत्ये,—प ह्यग्रे प्रचरत्य,—थो मित्रावरुणा उ ह्यपामीशाते, यज्ञमुखं वै मित्रावरुणौ, यज्ञमुखमापो, यज्ञमुखेनैव यज्ञमुखमच्छैति, यत्र होतुः प्रातरनुवाकमनुब्रुवत उपशृणुयात्तदपोऽध्वर्युर्गृह्णीयाद्, यन्नोपशृणुयाद्बधिरः स्याद्, वाचो हि छिद्यते, ऽथ यज्जुहोति हविर्भूता एवैना गृह्णात्य,—थो अभिघृता एव तृणं प्रास्य जुहोत्य,—ग्निमत्येव जुहोत्या,—यतनवत्यन्योऽध्वर्युः स्याद्, यदनायतने जुहुयाद्, घृतं वै देवा वज्रं कृत्वा सोममघ्न,—न्नभि खलु वा एता घारयन्ति, तस्मादाहुतिमपप्लावयत्य,—थो आहुतिं नेद्धराणीति, कार्ष्यसीत्या,—हुतिमपप्लावयति, समुद्रस्य वोऽक्षित्या उन्नय, इत्युपमारयत्य,—पामेवाक्षित्या, अपो वै सोमस्य रसः प्रविष्टः, सोममपां रसो, ऽपां च खलु वै नपाच्चापां सोमस्य रसस्येशाते, तौ वा एतदाहुत्या भागधेयेनापां सोमस्य रसं निरयाचिष्टो,—भे अहोरात्रे वसतीवरीषु ग्रहीतव्ये, इत्याहुः, पूर्वेद्युरन्या गृह्णाति, पुरान्याः सूर्यस्योदितो,—स्तथास्योभे अहोरात्रे वसतीवरीषु गृहीते भवतः, पूर्वेद्युरन्या गृह्णाति, पुरान्याः सूर्यस्योदितो,—रुभयीरेवैनाः सद्योगृहीता अक,—र्ऋतव्या वा एता गृह्यन्ते या मैत्रावरुणस्य चमसे याश्च निग्राभ्या,—स्ता उभयीरुपरिष्टाचात्वालस्य समनक्ति, संज्ञानमाभ्यः करोति, मित्रमाभ्यो ददाति, चात्वालान्निर्गृह्णन्त, एष वा अपां योनिः, स्वादेव योनेर्निर्गृह्णन्तेऽस्कन्नत्वाय॥ अध्वर्योऽवेरपा३ ओम् ॥ इत्य,—विदो यज्ञा३,—मिति वा एतदाह ॥ उतमेनन्नमु,—रुतेमं पश्य ॥ अयं मे रुद्धं, इति वा एतदाह, यद्यग्निष्टोमो जुहोति, न वा अग्निमग्निष्टोमस्य स्तोत्रेण न शस्त्रेणातियन्त्य,—ग्निष्टोममेव यज्ञक्रतुमनुसंतनोति, यद्युक्थ्यः, परिधिमनक्ति, परे वा अग्नेः परिधयः, पराणि परिधिभ्य उक्थान्यु,—क्थान्येव यज्ञक्रतुमनुसंतनोति, यद्यतिरात्रं, एतदेव यजुर्वदन् हविर्धानं प्रपद्येत, परं वै परिधिभ्यो हविर्धानं, परोक्थेभ्यो रात्री, रात्रीमेव यज्ञक्रतुमनुसंतनोति, स्तेनं मनो, ऽनृतवादिनी वा,—गथ केन सोमा गृह्यन्ते केन हूयन्ता, इति पृष्ठे,—र्ऋतं वै सत्यं हिरण्य,—मृतेनैव सत्येन गृह्यन्त, ऋतेन हूयन्ते ॥२॥
२-९

देवेभ्यो वै मनुष्येभ्यः स्वर्गाय लोकाय यज्ञ आह्रियते, यद्वदे त्वेति, तेन देवेभ्यो, य-
न्मनसे त्वेति, तेन मनुष्येभ्यो, यदाह, दिवे त्वा सूर्याय त्वेति, तदनु यज्ञꣳ स्वर्गं लोकꣳ
समारोहयति, वि वा एतद्यज्ञश्छिद्यते यस्मै कमाह्रियते, तद्यथेनमनु स्वर्गं लोकꣳ समारोहयति,
यदाह, दिवि देवेषु होत्रा यच्छेति, होत्राभिर्वै यज्ञः संततो, होत्राभिरेव यज्ञꣳ संतनोति ॥
देवेभ्यः प्रातर्यावभ्योऽनुब्रूहि ॥ इति, छन्दाꣳसि वै देवाः प्रातर्यावाण,—श्छन्दोभ्यो वा
एतदनुवाच आह, पुरा वाचः प्रवदितोः प्रातरनुवाकमन्वाह, यजमानायैव वाचं गृह्णाति,
न वा एतर्हि यजमानो हस्ता अवनेनिक्ते, यदप्सुमतीं प्रथमामन्वाह, प्रातरवनेग्यो वा एष य-
जमानस्य, यत्र वा अ३दोऽपः परिहरन्त्य,—श्नौ वा एतद्यज्ञꣳ संप्रादा,—द्यदप्सुमतीं प्रथमा-
मन्वाहाश्नौ वा एतद्यज्ञं पुनरालभते, सर्वेषाꣳ वै देवानां प्रातरनुवाकं, आपः खलु वै विश्वे
देवा, यदप्सुमतीं प्रथमामन्वाह सर्वा वा एतद्देवता आप्नोति, सर्वा व्यश्नोति, यथा वै सा-
मिधेनीरेवं प्रातरनुवाकं, आसाद्य वै हविः सामिधेनीरन्वाह,—रतेव खलु वा एतर्हि हविर्यत्सो-
म,—स्तस्मात् सोममुपावहृत्यान्वाह, गायत्रीं च संपादयति जगतीं च, तद्द्वे छन्दसी,
एकं छन्दोऽभिसंपादयति बृहतीं, त्रिष्टुभं च ककुभं च, तद्द्वे छन्दसी, एकं छन्दोऽभि-
संपादयति बृहतीं,—मनुष्टुभं च पङ्क्तिं च, तत् षट् छन्दाꣳस्ये,—कं छन्दोऽभिसंपादयति
बृहतीं,—मनुष्टुप्प्रतिपत्कानि छन्दाꣳसि कुर्याद्यज्ञावकीर्णस्य, वाग्वा अनुष्टुब्, वाचैवैनं भिषज्यति,
समया त्रिष्टुभं च जगतीं चानुब्रूयात् पशुकामस्य, पशवो वै जगती, पशुमान् भवति,
सर्वाणि छन्दाꣳस्यन्वाह, प्रजापतिर्वै छन्दाꣳसि, प्रजापतिमेवाप्नोति, प्रजापतेर्वा एतदुक्थं
यत् प्रातरनुवाको, व्युष्टायां पुरा सूर्यस्योदेतोरनुब्रूया,—देष हि प्रजापतेर्लोकः, पवित्रꣳ वै
प्रातरनुवाको, यजमानमेवैतेन पुनाति, शतमनुब्रूयादायुःकामस्य, शतायुर्वै पुरुषः शतवीर्या,
आयुरेव वीर्यमाप्नोति, सप्त च शतानि विꣳशतिं चानुब्रूयात् पशुकामस्यै,—तावन्ति वै संꣳ-
वत्सरस्याहोरात्राणि, संꣳवत्सरेणैवास्मै पशूनवरुन्द्धे, सहस्रमनुब्रूयात् स्वर्गकामस्य, यावद्वै
सहस्रं तावदितोऽसौ लोकः, स्वर्गस्य लोकस्य समष्ट्या, अपरिमिता अन्वाहा,—परिमितस्या-
वरुद्धये, पङ्क्त्या परिदधात्यु,—त्तरमेव यज्ञक्रतुमभिगृह्णाति ॥ ३ ॥ १०-१२

[३] मै. १,३,१ । तै. सं. ६,४,३,१—२ । श. ब्रा. ३,९,३,४ । वा. ६,२५ । काण्व. ६,३६ ।
मै. ४७

यज्ञस्य वा एताः पत्नीजनीः, पुꣳसामग्नीत्, स्त्रीणां नेष्टा, यदग्नीन्नेष्टुरुपस्थमासीदति,
मिथुनꣳ वा एतत् संभवतो, यत्त्वष्टारं उपप्रवर्तयति तस्मिन्नेव मिथुने रेतो दधाति, पत्न्युपप्र-
वर्तयति, पत्न्या हि प्रजाः प्रजायन्त, ऊरुणोपप्रवर्तयत्यू,—रुꣳ ह्यनु प्रजाः प्रजायन्ते, दक्षि-
णेनोरुणोपप्रवर्तयति, दक्षिणꣳ ह्यूरुमनु प्रजाः प्रजायन्ते, ऽन्तरतं उपप्रवर्तयत्य,—न्तरतो हि
प्रजाः प्रजायन्ते, यद्दक्षिणा प्रवर्तयेत् पितृलोकं एना निधुवे,—दथ यदुदीचीरुपप्रवर्तयति मनुष्य-
लोकमेवैना उपप्रजनयति, प्राजापत्यो वा उद्गाता, संख्याप्यमानो वा उद्गाता पत्न्या रेता
आदत्ते, यदाह, वामी ते संदृशि विश्वꣳ रेतो धेषीयेति, तथा ह नादत्ते, द्वादशं स्तोत्रं
उपप्रवर्तयति, द्वादश मासाः संꣳवत्सरो, द्वादशाग्निष्टोमे स्तोत्राण्या,—पः शान्ति,—र्यत्त्व-
ष्टारं उपप्रवर्तयति, शमयत्येवं, देवस्य त्वा सवितुः प्रसव इति, सवितृप्रसूत एवैनमादत्ते,
ऽश्विनोर्बाहुभ्यामित्य,—श्विनौ वै देवानामध्वर्यू, पूष्णो हस्ताभ्यामिति, देवताभिरेवं, ग्रो-
वासीति, रातꣳ ह्येषं देवेभ्यः सोम,—मध्वरकृद्देवेभ्यो इत्य,—ध्वरꣳ ह्येषं देवेभ्यः करोती,—
न्द्राय त्वा सुषुत्तमं मधुमन्तं पयस्वन्तमित्यै,—न्द्रो हि यज्ञ, इन्द्रं खलु वा एतर्ह्यन्या देवता
अन्वि,—न्द्राय त्वा वसुमते रुद्रवता इति, वसवश्च ह्येनमेतर्हि रुद्राश्चान्वि,—न्द्राय त्वादित्यवता
इत्या,—दित्या ह्येनमेतर्ह्यन्व,—ग्नये त्वा रायस्पोषद इत्य,—ग्निर्वै सर्वा देवता, एता ह्येनमेतर्हि
देवता अनु, विष्णवे त्वेति, विष्णुर्हि यज्ञो, व्यानो वा उपाꣳशुसवनः, प्रजा अꣳशवो,
व्यानꣳ वा एतत् प्रजासु दधाति, श्वात्राः स्थ वृत्रतुरा इत्ये,—ष वा अपाꣳ वै सोमपीथं,
एतꣳ वै विश्वामित्रोऽपाꣳ सोमपीथꣳ विदांचकार, तस्मै सिन्धवो घोक्षमनमन्ता,—ऽपाꣳ वा एष
सोमपी३थो, ऽपो वा एतत् सोमपीथेन समर्धयति, यो वा अपाꣳ सोमपीथꣳ वेद न ह वा
आस्वार्तिमार्छति, करोत्यासु वी३र्यꣳ, यत्ते सोम दिवि ज्योतिरिति, सोमो वै वाज,—
स्तस्य चन्द्रमास्तृतीय,—मयꣳ यः पवते स तृतीयꣳ, येन यजन्ते स तृतीयं, गर्भानमुना
दाधार, प्राणानिनेन यच्छत्य,—यꣳ यः पवतेऽन्नममुनेन दाधार, येन यजन्ते तस्य वै वाजस्य
सत्यꣳ वाजिन,—मन्नꣳ वाजिनं, दक्षिणा वाजिनं, ता वा अस्यैतत्तन्वः संभृत्य तꣳ सर्वꣳ
संतनु भूतमाप्याययन्ति, वज्रो वै ग्रावा, हनू अधिषवणे, क्रूरमिव वा एतद्यज्ञे क्रियते,
यदाह, धिषणे ईडिते ईडेथामिति, शमयत्येवं ॥ ४ ॥ १३

[४] मै. १,३,१—३ । तै. सं. ६,४,४ । श. ब्रा. ३,९,४ । वा. ६,३०,३१—३४ । काण्व. ६,४३,४५—४७ ।
[देवस्य त्वा सवितुः० । अथर्व. १९,५१,२]

वसतीवरीभिः सोममाप्याययन्ति, न हि सोमेन सोम आप्यायत, ऽद्भिर्हि सोम आप्यायते,
निग्राभ्याभिरुपाꣳशु,—मतो हीतरे सोमा गृह्यन्ते, प्राणो वा उपाꣳशु,—रश्नानीतरे ग्रहा, यदन्यत
आप्याययेयुः प्राणेन यज्ञꣳ विछिन्द्यु,—रष्टौ कृत्वः प्रातरभिषुणोत्य,—ष्टाक्षरा गायत्री, गायत्रीꣳ
वा एतत् प्रातःसवने व्यायातयान्ति, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा उपाꣳशौ यज्ञꣳ
संꣳस्थाप्यमपश्यꣳ,—स्तमुपाꣳशौ समस्थापयꣳ,—स्तदुपाꣳशा एव यज्ञः संꣳस्थाप्यो, ऽष्टौ
कृत्वः प्रातरभिषुणोत्य,—ष्टाक्षरा गायत्री, गायत्रीमेवाप्नोति, यदेकादश, त्रिष्टुभं तेन,
यद् द्वादश, जगतीं तेन, त्रिर्विगृह्णाति, त्रीणि वै सवनानि, सवनान्येवाप्नोत्ये,—तद्वा
उपाꣳशौ यज्ञꣳ समतिष्ठिपꣳ,—स्तेन संꣳस्थितेनारिष्टेन भूतेन प्रचरन्ति, त्रिर्विगृह्णाति, त्रयो
३हीमे प्राणाः, प्राणोऽपानो व्यानो, ऽथो त्रयो वा इमे लोका, इमानेव लोकानाप्नोत्य,—
सौ वा उपाꣳशुरन्तरिक्षमन्तर्याम, इयमुपयामो, यदुपयामगृहीता गृह्यन्तेऽनया वा एत-
द्गृह्यन्ते, तदस्कन्ना वा ए३ते, ऽनया हि गृह्यन्ते, यत्स्थाल्या गृह्यन्ते, ऽनया वा एतद्गृ-
ह्यन्ते, ऽस्या वा एषाधिक्रियते, तदस्कन्ना वा ए३ते, ऽनया हि गृह्यन्ते, यद्दारुमयेण गृ-
ह्यन्ते, ऽस्या वा एषाधिक्रियते, तदस्कन्ना वा ए३ते, ऽनया हि
ह्यन्तेऽनया वा एतद्गृह्यन्त, इयꣳ हि वनस्पतीनाꣳ योनि,—स्तदस्कन्ना वा ए३ते, ऽनया हि
गृह्यन्त, एष ते योनि,—रिति सादयती,—यꣳ वै सोमस्य योनि,—रस्याः सोमोऽधि जायते,
स्व एवैनꣳ योनौ दधाती,—यꣳ वै देवपात्रं, तद्य एवꣳ वेद प्र वसीयसः पात्रमाप्नोति,
ब्राह्मणं तु पात्रे न मीमाꣳसेत यः पात्रिय इव स्या,—दनुपयामगृहीतो गृह्यते, ऽनुपयामगृहीतꣳ
हि प्रजाः प्राणमुपजीवन्त्य,—पवित्रपूतो गृह्यते, ऽपवित्रपूतꣳ हि प्रजाः प्राणमुपजीवन्त्य,—सन्नो
हि प्रजाः प्राणमुपजीवन्त्य,—पवित्रपूतो गृह्यते, ऽपवित्रपूतꣳ हि प्रजाः प्राणमुपजीवन्त्य,—सन्नो
ह्यते, ऽसन्नꣳ हि प्रजाः प्राणमुपजीवन्ति, पवित्रपूता वा अन्ये सोमा, अथ वा एष वा-
क्पूतो यदुपाꣳशु,—स्तस्माद्वाचस्पतये पवस्व,—त्याह, वाक्पूतो ह्ये३षो, ऽꣳशुभिः पावयति,
प्राणा वा अꣳशवः, प्राणैरेवैनं पावयति, द्वाभ्यां द्वाभ्यां पावयति, द्वौ द्वौ ३हीमे प्राणा,
देवो देवानां पवित्रमसीति, यत्स्वित्सोमꣳ सोमेन पुनाति, स्वांकृतोऽसीति, प्राणमेव स्वम-
कृत, मनस्त्वाष्ट्विति, मनुसैव प्राणमाप्नोति, स्वाहा त्वा सुभव सूर्यायेति, सूर्यदेव३त्या हि

[५] मै. १,३,४ । तै. सं. ६,४,५ । श. ब्रा. ४,१,१;४,१,१,२१ । कपि. ४२,९;४२,१—२ । वा. ७,१,३,६ । काण्व. ७,
१—३,५ ।

सर्वे सोमा हूयन्ते, ऽथो अत्र वै देवानां प्रियास्त३न्व,—स्ता एवावरुन्द्धे, देवेभ्यस्त्वा मरीचि-
पेभ्या इति, रश्मयो वै देवा मरीचिपाः, पुरिधयो रश्मयो, ऽसा आदित्य आहवनीय,—स्तानेव
प्रीणात्यू,—र्ध्वस्तिष्ठन् जुहोत्यू,—र्ध्वो हि तिष्ठन् वीर्यवत्तरो, यं द्विष्यात्तस्य जिह्मस्तिष्ठन् जुहु-
यात्, प्राणानस्य व्लिनाति, जिह्मारुको भवति, यद्यभिचरेदा तमितोस्तिष्ठे,—दभिराहुति-
मभित्वरमाणस्ताजगनुगच्छति, यदि कामयेत, वर्षेत् पर्जन्या, इति परिमृज्योर्ध्वमुन्मृज्या,
—दोषधीभ्यो वा ए३षोऽमुतो वर्षत्यो,—षधीरेव नेदीयो वृष्ट्या अक,—र्यदि कामयेत, वर्षेत्
पर्जन्या, इति परिमृज्यावाचीनमवमृज्याद्, वैश्वानरेणैव वृष्टिमपि हन्ति, नाविधेयो, य-
दपिदध्यात् प्राणमस्यापिदध्यात्, प्रमायुकः स्याद्, यं द्विष्यात्तस्यापिदध्यात्, प्राणमेवा-
स्यापिदधाति, यद्यभिचरेत् ॥ इदमहममुष्यामुष्यायणस्य प्राणमपिदधामि ॥ इत्यपिदध्यात्,
प्राणमेवास्यापिदधाति॥ इदमहममुष्यामुष्यायणस्य प्राणं सादयामि॥ इत्यभिचरन्त्सादयेत्, प्राणं
एवास्य सादयति, प्रमायुको भवति, प्राणाय त्वेत्य,—नभिचरन्त्सादयेत् ॥ ५ ॥ १४–१८

पवित्रꣳ वितन्तान्ति प्राणापानयोर्विधृत्या, उपयामगृहीतो गृह्यते, ऽपानेन वै प्राणो धृतः,
प्राणस्य धृत्या, अन्तरिक्षꣳ वा अन्तर्या३मो, ऽन्तरिक्षमिमाः प्रजा, यदेतत् पात्रꣳ संदवत्सा-
दयति प्रजास्वेव रसं दधाति, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा उपाꣳशुमपश्यꣳ,—स्त-
मगृह्णत, तं पुरा स्तोत्रात् पुरा शस्त्राद्धोतुमुपोदतिष्ठꣳ,—स्तेऽसुरा अचिकयु,—र्जुह्वति वा इति,
तं वज्रमादायाभ्युपतꣳ,—स्ते देवा अन्तर्याममपश्यꣳ,—स्तमगृह्णत, तेनासुरानेभ्यो लोकेभ्यो
ऽन्तरदधत, ततो देवा अभवन्, परासुरा,—स्तय एवꣳ विद्वानन्तर्यामं गृह्णीते, ऽन्तर्यामेणैव
भ्रातृव्यं,—मेभ्यो लोकेभ्योऽन्तर्धत्ते, भवत्यात्मना, परास्य भ्रातृव्यो भवति, प्राणापानौ वा
उपाꣳश्वन्तर्यामौ, व्यान उपाꣳशुसवनो, यदेष ग्रावान्वेतेते पात्रे सायते, प्राणापानयोर्वि-
धृत्यै, यो वा एता ईजुते, येनैतौ विधृता एष वाव स उपाꣳशुसवनो ग्रावा, प्राणापानौ
वा उपाꣳश्वन्तर्यामौ, व्यान उपाꣳशुसवनो, यदेते पात्रे एवं ग्रावाणमा तृतीयात् सवनाच्च जु-
हीतस्तस्मात् सुप्तस्य सर्वाण्यन्यानि श्रोत्राण्यपक्रामन्ति प्राणापानौ त्वेनं न जहीतो, ऽथ यत्
पुनरर्दयति, तस्मात् सुप्त्वा पुनः प्रबुध्यन्ते, प्राणापानौ वा उपाꣳश्वन्तर्यामौ, व्यान उपाꣳ-
शुसवनो, यदेते पात्रे एतं ग्रावाणमा तृतीयात् सवनाच्च जहीतस्तस्मात् पक्षिणो विपर्यसु पक्षा-

[६] मै. १,३,५ । तै. सं. ६,४,६ । श. ब्रा. ४,१,२ । कपि ४१,९; ४२,१ ।

नीरयन्तो नावपद्यन्ते, ऽथ यत् पुनरुदैयति तस्मात् पुनरभ्यावृत्यते, प्राणापानौ वा उपांश्वन्तर्यामौ, व्यान उपांशुसवनो, यदेते पात्रे पुनः प्रयुज्येते तस्मादिमौ द्वा अर्धस्तात् प्राणौ, भान्ति वा एतत् सोमं यदभिषुण्वन्त्य,—ध्वर्युः प्रथमोऽभिषुणोति, व्यर्धुको भवति, यत्र मूलं तदुन्निर्धृत्य, एतद्वा अस्य विदेवतमं, तथा हान्यर्धुको ह भवति, यो वै देवक्षेत्रं विद्वांसमर्पयत्यार्तिमार्छति, पात्राणि वाव देवक्षेत्रं, यत्र वा अग्रेऽध्वर्युः सोमं जुहोति तदेनं देवताः प्रत्यासत, इदं नो पुरमा ह रिप्सतीति, यत्तोऽन्यत्र जुहुयाद्यदस्य स्वं तदन्येभ्यः प्रयच्छे,—दस्वो ह भवत्ये,—तद्वा अध्वर्योः स्वं यदाश्रावयति, यदाश्राव्याहुत्वा प्रच्यवेत यदस्य स्वं तस्मात् प्रच्यवेता,—स्वो ह भवत्ये,—तद्वा अध्वर्योः स्वं यद्वायव्यं, यद्वायव्यमनालभ्याश्रावये-द्यदस्य स्वं तस्माच्छिद्येता,—स्वो ह भवति, तद्य एवं विद्वानाश्राव्य हुत्वा वाहुत्वा वा प्रच्यवते यद्वस्य स्वं भवति, न स्वाच्छिद्यते, वायव्यमालभ्याश्रावयति, स्ववानेव भवति ॥ ॥ ६ ॥ १९

ब्रह्मवादिनो वदन्ति, किं तद्यज्ञे क्रियते यस्मादस्तादाना अन्ये पशवो मुखादाना अन्य इति, यदुपांशुं हस्तेन गृह्णते तस्मान्मर्कटः पुरुषो हस्ती ते हस्तादाना, मुखं वै वायव्यं यद्वायव्ये नेतरे ग्रहा गृह्यन्ते तस्मादितरे पशवो मुखादाना. ब्रह्मवादिनो वदन्ति, किं तद्यज्ञे क्रियते यस्मात् सद्यो जाताः पशवः प्रतितिष्ठन्ति संवत्सरे पुरुषा इत्यु,—पांश्वन्तर्यामौ वा अन्वन्ये पशवः, पुरुषस्त्वे यज्ञेन संमितः, प्राणापानौ वा उपांश्वन्तर्यामौ, यदेतौ ग्रहा असन्नौ हूयेते तस्मात् सद्यो जाताः पशवः प्रतितिष्ठन्ति, संवत्सरो वा अग्निष्टोमो, द्वादश मासाः संवत्सरो, यदेत इतरे ग्रहाः साद्यन्ते तस्मात् पुरुषो जातः संवत्सरे प्रतितिष्ठति, यत्ते सोमादाभ्यं नाम जागृवीत्ये,—ष वै सोमस्य सोमपीथः, सोमं वा एतत् सोमपीथेन समर्धयति, यो वै सोमस्य सोमपीथं वेद न सोमपीथाच्छिद्यते, सोमो वा इमा दिशोऽभ्यकामयत, प्रागपागधरागुदगित्वा,—भिरेनं दिग्भिः समूहत्या,—भिः समर्धयति, काममेनं गमयेत्, कामं ह गच्छति, कामुका एनं स्त्रियो भवन्ति, यां कामयेत तां तर्हि मनसा ध्यायेत्, सो हैनं कामयते, ऽम्बु निम्नेति, स्मरे,—ति वा एतदाह, संमरिविद्यामिति, संमनेनु वित्स्वे,—ति वा एतदाह, चत्वारो वै पृक्षेः स्तना आसं,—स्तत्त्रिभिर्देवेभ्यो-

[७] मै. १,३,४। तै. सं. ६,४,४—६। कपि. ४२,२—३। श. ७,२,६,३६। काण्व. ७,१-२,६,४९।
[प्रागपागधरा (गुदगध०) गुदग० । अथर्व. २०,१३४,१—६]

ऽदुहत्, कुशीभिरेकोऽनुनद्ध आसीत्, तं वा इन्द्र एवापश्यत्, तेनैन्द्रायैवादुहत्, तद्ध अस्य कौशिकत्वं, यदाह ॥ ब्राह्मण कौशिका इव ॥ इति चतुर्निग्राभमुपैति, चत्वारि हि पयांसि, यावदेव पयस्तदाप्नोति, त्रिः संभरति, तस्मादेतस्यां त्रयो भागाः प्रातर्मध्यंदिने सायं, चतुर्निग्राभमुपैति, त्रिः संभरति, तत् सप्त, सप्तपदा शक्करी, शाक्कराः पशवः पशूनेवावरुन्द्धे, नव कृत्वो निग्राभमुपैति, त्रिः संभरति, तद् द्वादश, द्वादश मासाः संवत्सरो, द्वादशाग्निष्टोमे स्तोत्राण्ये,—षा यज्ञस्य मात्रा, स्वर्भानुर्वा आसुरः सूर्यं तमसाविध्यत्, तस्य देवास्तमोऽपाघ्नन्, यत् प्रथमं तमोऽपाघ्नन्त्सावि: कृष्णाभवद्, यद् द्वितीयं सा लोहिनी, यत्तृतीयं सा बलक्षी, स स्वेन रूपेण निरमुच्यत, यद्बलक्षः पवित्रं भवति ततः शुक्रो गृह्यते, यजमानस्य वा एतत् पवित्रं, यजमानमेवैतेन पुनात्य,—मोतं स्या,—दात्मन एवैनदकृत, यदन्यत्रोतमपवित्रं तद्यजमानस्य ॥ ७ ॥ २०-२२

वाग्वा ऐन्द्रवायवः, सा वै वागिकधावदद्यावदव्यावृत्तासीत्, स इन्द्रोऽब्रवी,—न्मह्यमपि सोमं गृहीता,—ऽहं व एतां वाचं व्यावर्तयिष्यामीति, स वै वाचैव वाचं व्यावर्तयद्, यदैन्द्रवायवो गृह्यते, वाचो व्यावृत्त्यै, वायवे प्रथमं गृह्णाति, वायव उत्तमं, मध्यत इन्द्राये,—न्द्रियेण वा इयं वाङ् मध्यतो विधृते,—न्द्रियवतीं वाचं वदति य एवं वेद, देवा वै सोममजिघांसं,—स्तं नाशक्नुवन् हन्तुं, वायुर्ह्यस्मिन्नन्तरासीत् प्राण,—स्तं देवा अपाशासु,—रुप ना आवर्तस्वेति, सोऽब्रवीद्, भागो मेऽस्त्विति, वृणीष्वे,—त्यब्रुव,—न्त्सोऽब्रवी,—न्मद्देवत्यान्येव पात्राण्यासन्निति, तस्मादपतुरीयं वायोः पात्र,—मथ वायव्यान्युच्यन्ते, ततो वै देवाः सोममघ्न,—न्त्स हतोऽपूयत्, तस्माद्देवा उदबीभत्सन्त, स वायुरब्रवी,—दहं व एतं सोमं स्वदयिष्यामि, भागो मेऽस्त्विति, वृणीष्वे,—त्यब्रुव,—न्त्सोऽब्रवी,—न्मदग्रा एव ग्रहा गृह्यान्ता इति, तं वायुर्मध्यतो व्यवात्, तमस्वदयत्, तस्माद्वाय्वग्रा ग्रहा गृह्यन्ते, तस्मादु शुक्तं प्रवाते विषजन्ति, देवा वै प्रातःसवनमुद्यमं नाशक्नुवं,—स्तृतीयसवनं तर्हि वायुरासीत्, तं देवाः प्रातःसवनमभिपर्यौहं,—स्तेन प्रातःसवनमुदयच्छन्त, यदैन्द्रवायवः प्रातःसवने गृह्यते, प्राणो वै वायुः, प्राणेन वा एतन्मुखतो यज्ञमुद्यच्छन्ते, देवा वै वृत्रमजिघांसं,—स्तं मित्रोऽब्रवी,—न्मित्रोऽहमस्मि, नाहं हनिष्यामीति,

[८] मै. १,३,६—७। तै. सं. ६,४,७-८। श. ब्रा. ४,७,३—४। कपि. ४२,३-४।

तेऽब्रुवन्, जहीवेति, सोऽब्रवीद्, भागो मेऽस्त्विति, वृणीष्वे,—त्यब्रुव,—न्त्सोऽब्रवीत्, पयसैव मे सोमं श्रीणानिति, तस्मात् पशवोऽपाक्राम,—न्मित्रः सन्क्रूरो ह्यभूदिति, पशूनां हि पयो यन्मैत्रावरुणं पयसा श्रीणाति, पशुभिरेवैनं समर्धं दधाति यन्मैत्रावरुणं पयसा श्रीणाति, द्विदेवत्यत्वाय, यच्च शीतं तेन मैत्रं, यत्तप्तं तेन वारुणं, ब्रह्म वै मित्रः, क्षत्रं वरुणो, ब्रह्मणि च वा एतत् क्षत्रे च पयो दधाति, तस्माद्ब्रह्म च क्षत्रं च पयस्वितमे, ब्रह्म वै ब्राह्मणस्य देवता, अग्निः सोमः सविता बृहस्पतिः सरस्वती, तस्माद्ब्राह्मणमन्ये मनुष्या उपधावन्त्ये,—तस्य हि भूयिष्ठा देवता,—स्तासां त्रिसोऽधान्तरं श्रोत्रियस्या,—ऽग्निर्बृहस्पतिः सरस्वती, तस्माच्छ्रोत्रियमश्रोत्रिया उपधावन्त्ये,—तस्य ह्यवान्तरं भूयिष्ठा देवता,—स्ता मैत्रावरुणं प्रति न्यागच्छन्ति, यन्मैत्रावरुणं पयसा श्रीणाति तास्वेव पयो दधाति, नाना वै पुरा मित्रावरुणाभ्यां सोमा अगृह्यं,—स्ताः प्रजा अन्योन्यस्याः परिहायमाददत, ततो मित्रावरुणाभ्यां सह सोममगृह्यं,—स्ततो वा अकल्पत, यन्मैत्रावरुणं पयसा श्रीणाति, मित्रेण वा एतद्वरुणं कल्पयति, वरुणेन मित्रं, मित्रं वै वृत्रं जघ्निवांसं वरुणोऽगृह्णात्, स दुःख्यनाथत, तेऽब्रुवन्, वरुणे नाथस्वेति, स वरुणेऽनाथत, सोऽब्रवीद्, भागो मेऽस्त्विति, वृणीष्वे,—त्यब्रुव,—न्त्सोऽब्रवीत्, सहैव नौ पयसा सोमं श्रीणानिति, यन्मैत्रावरुणं पयसा श्रीणाति, यजमानस्य निर्वरुणत्वाय, यद्येनं भ्रातृव्योऽतीव स्यादङ्गुल्याङ्गुष्ठमवगृह्णीयाद्, यद्यन्त्वङ्गुष्ठेनाङ्गुलिम् ॥ २३

यो नो मित्रावरुणा अभिदासात् सपत्नो भ्रातृव्य उत्सिपीते बृहस्पते ।
इदमहं तमधरं पादयामि यथाहमुत्तमश्चेतयानि ॥ २४
इत्युत्तमो ह चेतयति ॥ ८ ॥ २५

देवा वै सत्त्रमासत कुरुक्षेत्रे, ऽग्निर्मखो वायुरिन्द्र,—स्तेऽब्रुवन्, यतमो नः प्रथमं क्रामेत् तं नः सहेति, तेषां वै मखं आर्त्त, तं न्वकामयत, तं न समसृजत, तदस्य प्रासहादित्सन्त, स इदं एवं त्रिसोऽजनयते,—तौ धनु,—स्तत्त्रिसृणां च धन्वनश्च जन्म, स प्रतिधायापाक्रामद् तं नाभ्यधृष्णुवन्, स धन्वार्ति प्रतिष्कभ्यातिष्ठत्, स इन्द्रो वम्रीरब्रवी,—देता ज्यामप्यत्तेति, ता अब्रुव,—न्नभिमृताबाह्नं वा अस्या न शक्ष्यामो जीवितुं, भागो नोऽस्त्विति, सोऽब्रवीद्, रसमेवास्या उपजीवाथेति, तस्माद्देवाः शुष्कादार्द्रमुद्विहन्ति, रसं ह्यस्या

[९] तै. आ. ५,१।

उपजीवन्ति, तां वै ज्याम्प्यादं,—स्तस्य धन्वार्तिरुद्यम्य शिरोऽच्छिनत्, स सम्राडभव,—दथैतं त्रेधा व्यगृह्णता,—ऽग्निः पूर्वार्धं,—मिन्द्रो मध्यं, वायुर्जघनार्धं, तस्मादाग्नेयं प्रातःसवन—मैन्द्रं माध्यंदिनं सवनं, वैश्वदेवं तृतीयसवनं, वायुर्हि विश्वे देवाः, प्राणापानौ वा उपांश्वन्तर्यामौ, व्यान उपांशुसवनो, वागिन्द्रवायवो, दक्षक्रतू मैत्रावरुणं, आश्विनः श्रोत्रं, चक्षुषी शुक्रामन्थिना, आत्माग्रायणो, ऽङ्गान्युक्थ्या, आयुर्ध्रुवः, स्तना ऋतुपात्रे, मूर्धा द्रोणकलशः, कुक्षी कलशौ, हनू अधिषवणे, जिह्वाधिषवणं, ग्रावाणो दन्ता, अंशाः परिधयो, नासिकोत्तरवेदिः, शिखा यूपः, शिरो हविर्धानं, पृष्ठमाग्नीध्र,—मुदरं सदो, यदन्तरुदरे तद्धिष्ण्याः पाणी, आग्नीध्रश्च मार्जालीयश्च पार्ष्णी, गार्हपत्यः प्रतिष्ठा वेदि,—रेष वै प्रजापतिः पात्रीयः, स ह त्वा एनं वेद य एवं वेद ॥ ९ ॥ २६

[११०१]

॥ इति खिलकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥

अथ षष्ठः प्रपाठकः।

नवैते प्रातर्ग्रहा गृह्यन्त, इमे वा एते गृह्यन्ते नव प्राणा, आश्विनो दशमो गृह्यते, व्यानो वा एष गृह्यते, नाभिरेव दशमो गृह्यते, तृतीयो हूयते, तृतीयो ह्ययं प्राणः, प्राणानां संतत्यै, सर्वे वा एते ग्रहाः स्तोत्रवन्तः शस्त्रवन्तो निदानवन्तो, निदानवान् भवति य एवं वेद, होता वा अयं प्रातरुपांशुमयजत्, तेनैत उक्थवन्तो, ऽथ यं होता तूष्णींशंसं शंसति तेनैवैत उक्थवन्तो, नवैते प्रातर्ग्रहा गृह्यन्ते, नवभिर्बहिष्पवमाने स्तुवते, तेनैते सामन्वन्तो, हिंकारेणाश्विनः सामन्वा,—नैन्द्रवायवेणैन्द्रवायवो, मैत्रावरुणेन मैत्रावरुणं, ऐन्द्रेण शुक्रामन्थिनौ, वैश्वदेवेनाग्रायणं, उक्थायोक्थ्यो गृह्यत, उक्थाय ध्रुवः, संतत्या ऐन्द्राग्नः, संतत्यै मरुत्वतीया, अध्वर्युर्जुहोति, होता वषट्करोति, प्राणान्वा एतत् प्रयच्छो, येन मन्त्रेणाध्वर्युः प्रयच्छति तेन होता प्रतिगृह्णाति, प्राणानां गोपीथाय, प्रजापतिर्वै स्वयं होतासीत्, सोऽताम्यत्, तं देवा द्विदेवत्यैरभ्यधावन्, प्राणा वै द्विदेवत्या, यदध्वर्युर्द्विदेवत्यान् हुत्वा क्षिप्रं होतारमभ्याद्रवति प्राणैर्वा एतद्धोतारमभिधिनोति,

[१] मै. १,३,८। तै. सं. ६,४,९। काठ. २७,५। कपि. ४२,५।

वषट्कारे वषट्कारे वै होता प्राणस्यान्तं गच्छति, प्राणा वै द्विदेवत्या, यदध्वर्युर्द्विदेवत्यान्
हुत्वा क्षिप्रं होतारमभ्याद्रवति, प्राणैर्वा एतद्धोतारमभिधिनोति, प्राणा वै द्विदेवत्याः,
पशवा इडा, यद् द्विदेवत्यानभक्षयित्वेडामुपह्वयेत पशुभिः प्राणानन्तरियाद्, अथ यद् द्विदेव-
त्यान् भक्षयित्वेडामुपह्वयते प्राणान्वा एतदात्मन्धित्वाथ पशूनुपह्वयत, इन्द्रियं वै सोमः,
पशव इन्द्रियं, यत् सोमं भक्षयतीन्द्रियमेवात्मन् धत्ते, सर्वत आश्विनं परिहारं भक्षयति,
तस्मात् सर्वा दिशः शृणोति ॥ १ ॥ 1

यद्वै पात्रं रिक्तमनुन्मुक्तं तदनु रक्षांसि यज्ञमवयन्ति, यदैन्द्रवायवे पुरोडाशमवदधाति
मैत्रावरुणे पयस्यामाश्विने धाना, अरिक्तत्वाय, वि वा एतद्यज्ञश्छिद्यते यत् सवनानि संतिष्ठन्ते,
यदेतानि पात्राण्या तृतीयात् सवनात् परिशेरे, यज्ञस्य संतत्या अविच्छेदाय, वायव्यायां ग्रस्य-
मानायां पात्राणि विमुञ्चति, प्राणो वै वायुः, प्राणेन यज्ञः संततः, प्राणेनैवं यज्ञं संतनो-
ति ॥ एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशती च तिसृभिश्च वहसे त्रिंशता च नियु-
द्भिर्वाय इह ता विमुञ्च ॥ इत्याह, विमुक्त्या एवा, अथागतं अध्वर्युपात्रं, निरुद्धं प्रतिप्रस्था-
नं, यदि कामयेत, यो बहिस्तं ग्रामे कुर्यां, यो ग्रामे तं बहिरिति ॥ इदमहममुमामुष्या-
यणममुष्याः पुत्रममुष्या विशो निरूहामि ॥ इत्यध्वर्युपात्रं निरुह्य ॥ इदमहममुमामुष्यायणममुष्याः
पुत्रममुष्यां विशि सादयामि ॥ इति प्रतिप्रस्थानं सादयेद्, यो बहिस्तं ग्रामे करोति, यो
ग्रामे तं बहिर्, अध्वर्युपात्रं वै यजमानस्य पात्रं, प्रतिप्रस्थानं भ्रातृव्यस्य, यदि कामयेत,
समावद्वीर्यमेनं भ्रातृव्येण कुर्यामिति, प्रवाहुग्गृह्णीयातां, प्रवाहुक् सादयेतां, प्रवाहुग्जुहुया-
तां, समावद्वीर्यमेवैनं भ्रातृव्येण करोत्य, अध्वर्युपात्रं वै पात्रं, पापीयः प्रतिप्रस्थानं,
यदि कामयेत, पापवसीयसं स्यादिति, पूर्वो गृह्णीयात्, पूर्वः सादयेत्, पूर्वो जुहुया, देन
तेन वै विपूजनः सौराकिः पापवसीयसं चकार, तत् पापवसीयसमेवैतेन करोति, यज्ञस्य वै
सृष्टस्य शिरोऽछिद्यत, तस्मै देवाः प्रायश्चित्तिमैछ, अथ वा एतौ तर्हि देवानां भिषजा आस्ता-
मश्विना असोमपौ, ता उपाधावन्, यथा भिषजमुपधावन्त्येवमिदं यज्ञस्य शिरः प्रतिधत्तामि-
ति, ता अब्रूतां, भागो ना अस्त्वित्ति, वृणाथामित्य, अब्रुवं, अस्ता अब्रूतां, ग्रह नौ
गृह्णन्तु, सोमपीथमश्नवावहा इति, तद्वा अश्विनौ प्रत्यधत्तां, तस्मादाश्विनीभिरभिष्टुवन्त्य,

[२] तै. सं. ६,४,९। काठ. २७,५-६। कपि. ४२,४—५। वा. २७,३३,९,४०;१०,१८। काण्व. २९,२८;१०,१०,२६।
मै० ४८

अश्विनौ हि प्रत्यधत्तां, तौ वै बहिष्पवमानेनैव पावयित्वा ताभ्यां पूताभ्यां यज्ञियाभ्यां
भूताभ्यां ग्रहमगृह्णं, अस्तस्माद्बहिष्पवमाने स्तुत आश्विनौ गृह्येते, तस्माद्ब्राह्मणेन बहिष्पवमान-
मभिसृप्यं, पवित्रं हि तत्, तस्माद्यं द्विष्यात् तं परिबाधेत, तद्वै भेषजं त्रेधा व्यदधु, रग्नौ
तृतीयं, ब्राह्मणे तृतीय, मप्सु तृतीयं, तद्य एवं विद्वान्ब्रैरन्ते ब्राह्मणाय प्रोच्याप्सु भेषजं
करोति समर्धुकं ह भवति, यावद्धि भेषजं तत् क्रियते वास्तुहानि वा एतत् पात्राणि भवन्ति,
यद् ग्रहान् गृहीत्वा बहिष्पवमानं सर्पन्ति वैष्णव्य ऋचा पुनरेत्य संमृशति, विष्णुर्वै यज्ञो, विष्णु-
नैवैनानि यज्ञेन स्वर्गं लोकं समारोहयति ॥ २ ॥ २-८

प्रजापतेर्वा एते चक्षुषी यच्च शुक्रामन्थिना, असा आदित्यः शुक्र, अश्चन्द्रमा मन्थी, तस्य
वै प्रजापतेः सव्यं चक्षुरश्वयत्, ततो ये स्तोका अवापद्यन्त ते रिदं वर्षत्यं, कविश्शतिर्वै ते
ऽवपेद्, अस्तान्वायुरमुतो विसृजति, प्रजानां क्लृप्त्यै, तस्य या कनीनिका परापतत् स यवो-
ऽभवद्, यन्मन्थिनं सक्तुभिः श्रीणाति चक्षुरेवास्य संभावयति, मिथुनं वै सोमश्च सक्तवश्च,
यन्मन्थिनं सक्तुभिः श्रीणाति, मिथुनत्वाया, ऽऽर्तं वा एतत् पात्रं यन्मन्थिपात्रं, यं
द्विष्यादृत्विजां तस्मै हरे, दार्तिमार्छति, षण्डामर्का वा असुराणां पुरोहिता आस्तां, तान्
देवा नाशक्नुवन् हन्तुं, ब्राह्मणवन्तो ह्यासं, अस्तौ देवा अपाशासु, रूप ना आवर्तेथामिति,
ता अब्रूतां, भागो ना अस्त्वित्ति, वृणाथामित्य, अब्रुवं, अस्ता एतौ शुक्रामन्थिना अवृणातां,
ते देवा अमन्यन्त, यदिमा असुरयौ सोमौ होष्याम, अस्तदन्वसुरा आभविष्यन्ति, यन्न होष्या-
मस्तदन्वाभविष्यन्तीति, ता अपनुद्याथेन्द्रायाजुहवु, अस्तस्मादेता अन्यदेवत्यौ गृह्येते, अथै-
न्द्राय हूयेते, अपनुत्तौ षण्डामर्कौ सह तेन यं द्विष्म इति, षण्डामर्कयोरेवैनं सहापनोदेना-
पनुदते ॥ आयुः पाहि, प्रजां पाह्य, मुष्य वीरतां पाहि ॥ इति सादयेद्, योऽस्य प्रियः
स्यात्तस्य, शुक्रं वै प्रति राष्ट्रं मन्थिनं निरुद्धं मध्यता, इति ३ह्येतद्राष्ट्रमाहुर्यन्निरुद्धं भवति,
यदि कामयेत, यो बहिस्तं ग्रामे कुर्यां, यो ग्रामे तं बहिरिति ॥ इदमहममुमामुष्यायणममु-
ष्याः पुत्रममुष्या विशो निरूहामि ॥ इति शुक्रपात्रं निरुह्य ॥ इदमहममुमामुष्यायणममुष्याः पुत्र-
ममुष्यां विशि सादयामि ॥ इति मन्थिपात्रं सादयेद्, यो बहिस्तं ग्रामे करोति, यो ग्रामे

[३] मै. १,३,१०,११—१२। तै. सं. ६,४,१०। काठ. २७,७-८। कपि. ४३,१। वा. ७,१२-१३,१७—१८।
काण्व. ७,१२,१७।

तं बहिर्, आर्तं वा एतत् पात्रं यन्मन्थिपात्रं, यच्च शुक्रपात्रं पुनः प्रयुज्यते तस्मादिमे समा-
वद्वीर्ये, तस्मादुभ्यां समावत् पश्यत्य, असौ वा आदित्यः शुक्र, अश्चन्द्रमा मन्थी, यदु-
पिधाय प्राञ्चा हुतस्तस्मादेतौ प्राञ्चौ यन्तौ न पश्यन्त्यं, अथ यदनपिधाय प्रत्यञ्चौ तिष्ठन्तौ जुहुत-
स्तस्मात् प्रत्यञ्चौ यन्तौ पश्यन्ति, यदुपिधाय प्राञ्चा हुतस्तस्मात् पराङ् प्राणो, ऽथ यदन-
पिधाय प्रत्यञ्चौ तिष्ठन्तौ जुहुतस्तस्मात् पुनरपानो, यदुपिधाय प्राञ्चा हुतस्तस्मात् पराञ्चो गर्भा
धीयन्ते, ऽथ यदनपिधाय प्रत्यञ्चौ तिष्ठन्तौ जुहुतस्तस्मात् प्रत्यञ्चः प्रजायन्ते, चक्षुषी वै
शुक्रामन्थिनौ, नासिकोत्तरवेदि, अर्यदङ्गुष्ठाभ्यामाक्रमेते, चक्षुषी वा एतत् प्रधत्तो, ऽथ यदु-
परिष्टादाक्रमेते तस्मादिमे उपरिष्टाच्चक्षुषी, तुथोऽसि जनधाया, देवास्त्वा शुक्रपाः प्रणयन्त्वि-
ति, या अत्त्रीः प्रजास्तासामेष योनि, अस्ता एतमनुप्रजायन्ते, तुथोऽसि जनधाया, देवास्त्वा
मन्थिपाः प्रणयन्त्विति, या आद्याः प्रजास्तासामेष योनि, अस्ता एतमनुप्रजायन्त, उभयीरेव
प्रजाः प्रजनयत्यत्त्रीश्चाद्याश्च, शुक्रमन्वारभन्ते, तेजो वै शुक्रो ब्रह्मवर्चसं, तेज एवं ब्रह्मवर्च-
समन्वारभन्ता, इन्द्रेण मन्युना युजे, अति शुक्रेण परियन्ति, मन्युना वै युजेन्द्रोऽसुरानबाधा-
धत, मन्युना वा एतद्युजा यजमानो भ्रातृव्यमवबाधते, संजग्मानौ दिवा पृथिव्ये, अयुरत्नी
संधत्त, इमानि वा एतत् संधत्तो यत् पात्रे संदध्यातां, नेदमन्तरा स्या, अदथ यदरत्नी संध-
त्तस्तस्मादिदमन्तरा चक्षुषोर्विधृत्यै, पुमांसं गर्भमाधत्तं गवी३न्योरिति, तदनु स्त्री३ण्यो यज-
मानस्य गावो भवन्ति, वीरं पत्नी जनयति, शुक्रस्याधिष्ठानमसि, मन्थिनोऽधिष्ठानमसी, अ-
ति शकुलौ प्रास्यतः, समिद्धा एषोतयो, अरथो आहुतीनां प्रतिष्ठित्यै, निरस्तः षण्डो, निरस्तो
मर्कः सह तेन यं द्विष्म, इति शकुलौ निरस्यत, एतावांल्लोको यावदुद्धतं, यावानेव लोक-
स्तस्माद्यजमानो भ्रातृव्यं निर्भजति, श्रीणन्त्यन्यान्त्सोमा, अन्यांन्, अस्तत् सोमानां मिथुनं,
यान्श्रीणन्ति ताननुवीध्रति, दारुमयान्यन्यानि पात्राणि,
मृन्मयान्यन्यानि, तत् पात्राणां मिथुनं, यो वै सोमस्य च पात्राणां च मिथुनं वेद मिथुना
एनं पशवा उपतिष्ठन्ते ॥ ३ ॥ ९-१५

ये देवा दिव्येकादश स्थेत्ये, अतावन्तो वै देवा, यावन्त एवं देवा-
प्रजापतिर्वा आग्रायणो, ये देवा दिव्येकादश स्थेत्ये, अतावन्तो वै देवा, यावन्त एवं देवा-

[४] मै. १,३,१३। तै. आ. ६,४,११। काठ. २७,९। वा. ७,१९-२०;३३,५९। काण्व. ७,२०—२१;३२,५९।
[ये देवा (०सो) दिव्येकादशस्थ०। ऋ. १,१३९,११; तै. सं. १,४,१०,१]

स्तेभ्यो गृह्यत, आग्रायणं वै गृहीत्वा देवाः स्वर्गं लोकमाय, अन्पासुरा अभ्रंशन्त ततो देवा
अभवन्, परासुरा, अस्तद्य एवं विद्वानाग्रायणं गृह्णीते, भवत्यात्मना, परास्य भ्रातृव्यो भवति,
य आनुजावरः स्यात् स आग्रायणाग्रान् ग्रहान् गृह्णीता, ऽग्रं ह्याग्रायणो, यद्युभिर्चरेत॥ १६

विदद्यदि सरमा रुग्णमद्रेर्महि पाथः पूर्व्यं सध्र्यक्कः ।
अग्रं नयत्सुपद्यक्षराणामच्छा रवं प्रथमा जानती गात् ॥ १७

इति पुरोरुचं कुर्याद्, रुजेति हैवा, ऽथो वाग्वै सरमा, वाचमेवैषां युङ्क्ते, त्सरो वा
एषा यज्ञस्य, तस्माद्यत्किंच प्राचीनमाग्रायणात्तदुपांशु चरन्त्य, अथ वा एतदाग्रायणं प्रति वाचं
विसृजन्ते, यज्ञमेवाप्त्वा वाचं विसृजन्ते, वाग्वै देवेभ्योऽपाक्रामत्, ते देवास्तूष्णीं यज्ञ-
मतन्वत, सा वागमन्यता, ऽन्तर्यन्ति मा यज्ञाद्यन्तीति, साग्रायणं प्रति न्यद्रवत्, तस्मादा-
ग्रायणं प्रति वाचं विसृजन्ते, हिंकृत्य वाचं विसृजन्ते, प्राणो वै हिंकारो, वाक् प्राणं,
स्तद्वाचं एवैषां युङ्क्ति, त्रिर्हिंकरोति, त्रेधा ३हीयं वाग्वदति, शनैरुच्चैरथ स्वे, यावत्येवे
वाक् सास्य युज्यते, त्रयो वै प्राजापत्या ऋत्विज, उद्गाता प्रस्तोता प्रतिहर्ता, ते वा अस्यै-
तर्ह्यवृत्ता अयुक्ता, यद्धिंकरोति तेनैवास्य ते वृत्ता युक्ता भवन्ति, वाक् च मनश्चावदेता, अहं
श्रेयानस्म्यहं श्रेयानस्मीति, तौ प्रजापतिं प्रश्नमैतां, सा वागब्रवी, अत्रैव मया किं चनान-
भ्युदितं क्रियता इत्य, अथ मनोऽब्रवी, अत्रैव मया किं चनानभिगतं क्रियता इति, स मनसे-
ऽन्वब्रवीत्, सा वागब्रवी, अदहव्यवाडेवाहं तुभ्यमसानीति, तस्मादेषा प्रजापतयेऽहव्यवाद्,
तस्माद्यत्किंचोपांशु क्रियते तदाहुः कृतमेतत् क्रियता इति, प्रजापतये हि क्रियते, द्वाभ्यां
धाराभ्यां प्रातःसवने गृह्णाति, तिसृभ्यो माध्यंदिने सवने, चतसृभ्यस्तृतीयसवने, तन्नव,
नव प्राणा, आत्माग्रायणः, प्राणानेवात्मन् धत्ते, वि वा एतद्यज्ञश्छिद्यते यत् सवनानि संति-
ष्ठन्ते, ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थाप्सुक्षितो महिनैकादश स्थेति, देवता-
भिर्वै यज्ञः संततो, देवताभिरेव यज्ञं संतनोति, प्रजापतिर्वा आग्रायणो, यत् सर्वेषु सवनेष्व-
भिप्रस्कन्दयति प्रजापतिर्वा एतत् प्रजा अभिजिघ्रति, प्रजापतिर्वा आग्रायणो, यत् सर्वेषु सव-
नेषु गृह्णात्यात्मनैव यज्ञं संतनोति, प्रजापतिर्वा आग्रायणो, यदेषोऽतिरिच्यते तस्मात् पुरुषः
पशूना दविष्ठमेत्या, अग्रायणो वै गायत्र्या वत्सं, अस्तं वा एतदा तृतीयात् सवनादभिप्रतिधा-
वति, गायत्र्या वा एते लोके सर्वे सोमा गृह्यन्ते, तां वा एतत् सर्वाणि सवनान्यभिप्रति-

[विदद्यदि सरमा०। ऋ. ३,३१,६; तै. ब्रा. २,५,८,१०]

धावन्त्य,—य यत् स्थाल्या गृह्णतो विज्ञातस्थाल्या होप्यन्ती३ दारुमय्या३ इति, तस्मादविज्ञातेन गर्भेण भ्रूणहा,—ऽथ यत् स्थालीं रिञ्चन्ति न दारुमयं तस्मात् पुमान्दायादः स्त्र्यदाया,—दथ यत् स्थालीं परास्यन्ति न दारुमयं तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसं,—मथ स्त्रिय एवातिरिच्यन्ते ॥ ४ ॥
१८

इन्द्रो वै वृत्राय वज्रमुदयच्छत्, स वज्रमुद्यतं दृष्ट्वाबिभेत्, सोऽब्रवी,—दस्ति वा इदं वीर्यस्मिन्नन्तवीर्ये३, तत्ते प्रदास्यामि, मा मा वधीरिति, तद्वा अस्मै प्रायच्छद्, यज्ञं वा अस्मै तत् प्रायच्छत् पशूनुक्थ्यमेव, यदुक्थ्यो गृह्यते यज्ञस्य च पशूनां चावरुद्ध्या, एतावान्वै यज्ञो यावानुक्थ्यो, ऽन्तः श्लेष्मणमेवान्ये ग्रहाः, उर्वो वा एष यज्ञस्य यदुक्थ्यो, यथा वा इदं मुर्व२ सन्तय प्रस्नात्येवं२ वा एतदुक्थ्यमालभ्य प्रस्नाति, स एनमा यज्ञस्योदृचः संपारयत्य,—क्थानि वा उक्थ्यो, यज्ञस्य संतत्यै गृह्यते, तस्मै त्वा विष्णवे त्वेति, विष्णुर्वै यज्ञो, विष्णुना यज्ञः संततो, विष्णुनैव यज्ञेन यज्ञं संतनोत्ये,—तेन वा इदमुक्थानि संततानि, तस्मात् पुरुषः स्नावभिरनुसंततः, सद आलभ्यावनयति, यज्ञं वा एतत् संतत्य संप्राप्यावनयति, चक्षुर्वै शुक्र,—श्चक्षुरुक्थ्य,—श्चक्षुषी एतत् पुरस्ताद् ध्रियेते, ऽथो यथेदं पुरस्तात् पश्चात् पश्यन्नेवैनं तं,—दथ यदेकः तंस्त्रेधा क्रियते तस्मादेकः श्रेष्ठः पूर्वार्धेऽवस्यति, यदेतौ ग्रहौ भूयिष्ठाः सोमा अनु हूयन्ते, पापवसीयसस्य व्यावृत्त्यै, यदेतत् पात्रं भूयिष्ठाः सोमा अन्वायन्ति, तस्मादेकं श्रेष्ठं यन्तं बहवः पश्चादनुयन्ति, पात्राणि वा अध्वर्युं पुरो विदुर्, उक्थामदानि पूर्वं,—न्द्रयो सदा उपचरत्या,—ग्नीध्राग्नीध्रं२, वैष्णव्या हविर्धानं२, यथादेवतमेवैनान्युपचरति, तथा हैनं न विदुर्, ऽन्तराहवनीयं च हविर्धानं चाध्वर्यौ लोको,—ऽन्तरा हविर्धानं च सदश्च यजमानस्य, सदः सदस्याना२, यदि कामयेता,—ऽध्वर्युं२ यश ऋच्छेदित्य,—न्तराहवनीयं च हविर्धानं चावनयेत्, सोमो वै यश, एषोऽध्वर्योर्लोको, ऽध्वर्युमेव यशसार्पयति, यदि कामयेत, यजमानं२ यश ऋच्छेदित्य,—न्तरा हविर्धानं च सदश्चावनयेत्, सोमो वै यश, एष यजमानस्य लोको, यजमानमेव यशसार्पयति, यदि कामयेत, सदस्यान् यश ऋच्छेदित्य,—न्तः सदस्यावनयेत्, सोमो वै यश, एष सदस्यानां लोकः, सदस्यानेव यशसार्पयति, सद आलभ्यावनयत्यै,—न्द्रं२ वै सद, ऐन्द्राण्युक्थान्यु,—क्थाना२

[५] मै. १,३,१४ । तै. सं. ६,५,१ । काठ. २७,१० । श. ७,१,२२,३५—४०,८,३३—३५,३९,४४—४६ । काण्व ७,८,२४,३५—३६,३८—४०; ८,१३-१६,२१,२५—२८।

संतत्या, उक्थानामनपच्छेदाय ॥ उपयामगृहीतोऽसि, मित्रावरुणाभ्यां त्वा ॥ इति गृह्णाति प्रातःसवने मैत्रावरुणाय ॥ इन्द्राय त्वा ॥ इति ब्राह्मणाच्छंसिने ॥ इन्द्राग्निभ्यां त्वा ॥ इत्यच्छावाकाय ॥ उपयामगृहीतोऽसी,—न्द्राय त्वेन्द्राय त्वा ॥ इति गृह्णाति सर्वेभ्यो माध्यंदिने सवने ॥ उपयामगृहीतोऽसीन्द्रावरुणाभ्यां त्वा ॥ इति गृह्णाति तृतीयसवने मैत्रावरुणाय ॥ इन्द्राबृहस्पतिभ्यां त्वा ॥ इति ब्राह्मणाच्छंसिने ॥ इन्द्राविष्णुभ्यां त्वा इत्यच्छावाकाय,—वमस्य यथोकथं२ यथादेवतं गृहीता भवन्ति ॥ ५ ॥
१९-३२

आयुर्वै ध्रुवं,—स्तमुत्तमं गृह्णात्यु,—त्तमं२ ह्यायुः, स्थाल्या गृह्णात्या,—युषो धृत्यै, पूर्णं गृह्णाति, सर्वमायुरेति, प्राणो वै गायत्र्या,—यूर्ध्रुवो, यदेष आ तृतीयात् सवनात् परिशयेत् तस्मायावदायुस्तावान् प्राणं, आयुर्वै ध्रुवो, यदग्निष्टोममास्ता आयुरेवाप्त्वा निः सर्पन्त्या,—युर्वै ध्रुवो, यत् केवलं जुहुयादायुः प्रजानां प्रदध्यात्, परिधानीयाया२ शस्यमानायामवनयति, स हन्तो, होतुश्चमसेऽवनयति, वैश्वदेवो वै होता, वैश्वदेवीरिमाः प्रजाः, सर्वासु वा एतत् प्रजास्वायुर्दधाति, जनानामित्या,—हुः, सर्वासां२ वा एतत् प्रजानामायुः सर्वाभ्य एव प्रजाभ्यो गृह्यत, उभयतो वैश्वानरो गृह्यत, उभयतो वैश्वानरो ३ह्ययं प्रा३णो, ऽयं२ वाव वैश्वानरो ३योऽयमवाङ् प्राणो, यदेष केवला उत्तरे हविर्धाने साद्यते तस्मादेषोऽर्धभाक् प्राणाना,—मर्धभाजा इतरे, हिरण्येऽधि सादयेदायुःकामस्या,—ऽमृतं२ वै हिरण्य,—मायुर्ध्रु३वो, ऽमृत एवास्यायुर्दधात्यु,—पोप्तेऽन्ये ग्रहाः साद्यन्ते, ऽनुपोप्ते ध्रुवं,—स्तस्मादस्थन्यान्ये पशवः प्रतितिष्ठन्ति, मांसेन पुरुषः, प्राणा वा उपरवा, यदेत उपोप्ते ग्रहाः साद्यन्ते स्वे वा एतद्योनौ साद्यन्ते, पूर्वार्धे वा इमे मुखस्य प्राणा, एतत् खलु वै हविर्धानस्य पूर्वार्धं२ यद्दक्षिणं२ हविर्धानं, तस्माद्दक्षिणे हविर्धाने, प्राणा वा एते इतरे ग्रहा, आयुर्ध्रुवो, नव वै प्राणा, आयुर्दशमं, तस्मादेष दशमो गृह्यते, दशमं२ ह्यायू, राजपुत्रो ध्रुवं गोपायति, सर्वासां२ वा एतत् प्रजानामायुर्गोपायति, तस्माद्राजपुत्रो वीर्यवत्तमो, यद्यभिचरेत् ॥ इदमहममुष्यामुष्यायणस्यायुः प्रवर्तयामि ॥ इति ध्रुवं प्रवर्तये,—दायुरेवास्य प्रवर्तयति, यत् प्रवर्तयेत् सर्वासां प्रजानामायुः प्रवर्तयेच्, शुक् प्रजा ऋच्छे,—दवर्तिर्यजमानं गृह्णीयात्, क्षोधुकोऽध्वर्युः स्यात्, तद्धैच्य एव ॥ ध्रुवं त्वा ध्रुवक्षितिममुमास्थानाच्च्यावयामि ॥ इत्यास्थानादेवैनं च्यावयति, प्रमायुको

[६] मै. १,३,१५ । तै. सं. ६,५,२ । काठ. २८,१ । कपि. ४४,१ । श. २,२६;३,२७;१०,२५ । काण्व. ३,२३;११,३५;२,४८ ।

भवति, ध्रुवं२ वै प्रच्यवमानं२ विश्वा भूताऽनु प्रच्यवन्ते, प्र यजमान आस्थानाच्च्यवते, तदभिमृश्यो, दिवि दिव्यान् दृंहान्तरिक्षे अन्तरिक्ष्यान् पृथिव्यां पार्थिवानिति, यथास्थानं वा एतत् प्रजा दृंहति, स्वे आयतने यजमान,—मायुषा वा एष वीर्येण व्यृध्यते यस्य ध्रुवः स्कन्दत्या,—युर्वै ध्रुवं,—स्तदभिमृश्य ॥ आयुर्धा असि ध्रुवा,—ऽऽयुर्मे धेहि ॥ इत्यायुरेवास्मिन् दधाति, वरो दक्षिणा, परैव वरं२ स्तृणोत्या,—त्मा हि वरः, पुत्रसेनस्य ह वै मैमसेने ध्रुव उपददास, तं२ मृण्वानः स्थैरब्रह्मणं ऋतेनैभ्यो लोकेभ्य आप्याययांचकार ॥ स्वाहा दिवं आप्यायस्व ॥ इति स तृतीयं बभूव ॥ स्वाहान्तरिक्षादाप्यायस्व ॥ इति स द्विभागं बभूव ॥ स्वाहा पृथिव्या आप्यायस्व ॥ इति स पुनरे, तदेतेनैवेभ्यो लोकेभ्यो ध्रुवं आप्याययितव्यो, द्वादशे स्तोत्रेऽवनयति ॥ द्वादश मासाः संवत्सरः, संवत्सरो यज्ञो, यज्ञः प्रजापतिः, प्राजापत्यः पुरुषो, यावानेव पुरुषस्तस्मिन्नायुर्दधाति, यत् स्तूयमानेऽवनयेद्गर्भाः प्रपादुकाः स्यु,—र्यच्च शस्यमाने युवानः प्रमीयेरन्, यच्च शस्त्रे बहिः प्राणान् दध्यात्, सकृच्च शस्त्रायां मध्यतोऽवनीयो, मध्यतो वा एतत् प्रजानामायुर्दधाति ॥ स्वयंभूरसि श्रेष्ठो रश्मिः प्रियो देवानां२ संसदनीयः ॥ तं त्वा सुभव देवा अभिसंविशन्तु ॥ आयुर्धा असि ध्रुवा,—ऽऽयुर्मे धेहि ॥ इत्यायुरेवास्मिन् दधाति ॥ वर्चोधा असि ध्रुव, वर्चो मे धेहि ॥ इति वर्च एवास्मिन् दधाति ॥ इषोऽसि, त्वेषोऽसि, नृम्णोऽसि, व्रतोऽसि, दक्षोऽसि, तस्य त इषस्य त्वेषस्य नृम्णस्य व्रतस्य दक्षस्य भक्षीय, स्वस्य चारणस्य च शूद्रस्य चार्यस्य च, यथा त्वं२ सर्वेषु विश्वदर्शत एवमहं२ विश्वदर्शतो भूयासम् ॥ इति विश्वदर्शतो ह भवत्य,—सौ वा आदित्यः स्वयंभूः श्रेष्ठो रश्मि,—रेतस्य स्वयंभवदेवं२ स्वयं भवति य एवं२ वेद ॥ ६ ॥
३३-५४

अथैते ऋतुग्रहाः, संवत्सरस्य वा एते विधृत्यै गृह्यन्ते, द्वादश मासाः संवत्सरं,—स्तस्माद् द्वादश ऋतुग्रहा, मधुश्च माधवश्च वासन्तिका ऋतू, असम्भा हूयन्ते, ऽसम्भा ३हीमे ऋतवो, नान्योऽन्यमभिप्रपद्यते, यद३न्योऽन्यमभिप्रपद्येत ऋता ऋतुरमीया,—दथ यदन्योऽन्यः प्रपद्यते तस्मादिदमृता ऋतुर्नानिहिताः परिप्लवन्त, उभयतोमुखमृतुपात्र,—मुभयतोमुखा ३हीमे

[आयुर्धा असि (आयुरस्या०) ध्रुवायुर्मे धेहि (दाः) । अथर्व. ३,१७,४]
[७] मै. १,३,१६ । तै. सं. ६,५,३ । काठ. २८,१ । कपि. ४४,१ । श. १३,५५ । काण्व. १४,३६ ।

ऋतवो, न वै तद्विद्म यत् ऋतूनां मुखं२, सह प्रथमं गृह्णाते, सहोत्तमं२, सह युज्येते, सह विमुच्येते, चतुर्दश वा एतत् कुरुतो, ऽति वा एतत्रेचयतो, ऽस्ति मासस्त्रयोदश,—स्तमेवैतेनाप्त्वावरुन्द्ध, ऋतुभ्यो वै प्रजाः प्रजायन्ते, यत् षड्ऋतुना चतुर्ऋतुभि,—र्ऋतुभ्यो वावास्मा एतच्चतुष्पदः पशून् प्रजनयतो, ऽथ यच्चतुर्ऋतुभिर्द्विर्ऋतुन, ऋतुभ्यो वावास्मा एतद् द्विपदः पशून् प्रजनयतो, यद् द्विर्ऋतुना, द्वौ ३हीमा ऋतू, अथ यद् द्वे ऋतुपात्रे, द्वौ द्वौ ३हीमे ऋतवो, नानुयजति, वैश्वानरो वषट्कारो, यदनुयजेद्वैश्वानरमृतुष्वन्ववसृजे,—दन्यो वा इदमासीदव्यावृत्त,—महरासीन्न रात्रि,—स्तद्देवा ऋतुग्रहैर्व्यावर्तयन्, यदृतुग्रहा गृह्यन्ते, ऽहोरात्रयोर्व्यावृत्त्यै, संवत्सरो वै स्वर्गो लोकं,—स्तस्य वा एत आक्रमा यदृतुग्रहा, यदृतुग्रहा गृह्यन्ते, स्वर्गस्य लोकस्याक्रान्त्यै ॥ ७ ॥
५५

आदित्या वा इत उत्तमाः स्वर्गं लोकमायं२,—स्ते वा इतः प्रतिसंहिताः पुरस्तादेवान् यत् सर्वं२, संवत्सरो वै स्वर्गो लोकः, संवत्सरमेतौ कल्पयितुं प्लायेते यदध्वर्यू, यदैन्द्राग्नमृतुपात्रेण गृह्णाति, संवत्सरं२ वा एतदन्वारभते स्वर्गाय लोकाया,—ऽथो ज्योतिरुपरिष्टाद्दधाति स्वर्गस्य लोकस्य समष्ट्या, असौ वा आदित्यः शुक्रः, पुरुषो वैश्वदेवो, यच्च शुक्रपात्रेण वैश्वदेवं गृह्णाति तस्मात् पुरुष एवाभ्रु प्रत्यङ्, सर्वेऽन्ये न्यञ्चः पशवो, देवाश्च वा असुराश्चास्पर्धन्त, ते देवाः प्रातःसवने वैश्वदेवे यज्ञं२ संस्थाप्यमपश्यं२,—स्तं प्रातःसवने समस्थापयन्, यद्वैश्वदेवः प्रातःसवने गृह्यते, प्रातःसवने वा एतद्वैश्वदेवे यज्ञं२ संस्थापयति, तेन संस्थितेनाग्निष्टेन भूतेन प्रचरन्ति, देवा वै सर्वे प्रातःसवनमभ्यायच्छ,—न्नोत्तराभ्यां२ सवनाभ्यामतिष्ठन्त, यद्वैश्वदेवः प्रातःसवने हूयते, प्रातःसवने वा एतद्वैश्वदेवे देवतास्तर्पयन्ति, तास्तृप्ता उत्तरे सवने अभिसृज्यमाना यन्ति, वज्रो वै मरुत्वतीया, वज्र एव प्रथमो, ऽपगूर्तिर्द्वितीयः, स्तृतिरुत्तमो, वज्रो वै धनु,—र्धनुरेव प्रथमः, प्रतिहितिर्द्वितीयो, विसृष्टस्तृतीय,—श्चक्रियो वा एते यज्ञस्य यन्मरुत्वतीया, अक्षो मध्यमः, पक्षसी अभितो, मरुद्भिर्वै वी३र्येणेन्द्रो वृत्रमहन्, न ऋते मरुद्भ्योऽशक्नोद्वी३र्यं कर्तुं२, यन्मरुत्वतीयो ग्रहो गृह्यते मरुत्वतीयं२ शस्यते तेन माध्यंदिनं२ सवनं२ वीर्यवत् कथं२ सवनान्युत्तमन्ति वेच्छे,—ति पृच्छेद्, ऋतुग्रहैः प्रातःसवनमुत्तमं,—न्मरुत्वतीयैर्माध्यंदिनं२ सवनं२, सावित्रेण तृतीयसवनं, मरुत्वतीययोः सत्त्रयोर्दक्षिणा दीयन्ते,

[८] मै. १,३,१७—२१ । तै. सं. ६,४,४—५ । काठ. २८,२—३ । कपि. ४४,२—३ ।

स्त्वे वा एतंद्योनी दक्षिणा दीयन्ते, परिधयो वा एते यज्ञस्य यन्मरुत्वतीया,—स्तस्मान्मरुत्वतीं-
यान् दक्षिणा नातिदीयन्ते, यदतिदुर्याद्, यथा बहिष्परिधि स्कन्नमेवꣳ स्याद्, यदि काम-
येत, विडोजीयसी स्यादबलीयः क्षत्रमिति, यस्या मरुत्वतीयः पूर्वोऽर्धर्चस्तां पुरोरुचं कु-
र्याद्, विशꣳ वा एतदोजीयसीमकरबलीयः क्षत्रꣳ, यदि कामयेत, क्षत्रमोजीयः स्यादबली-
यसी विडिति, यस्या ऐन्द्रः पूर्वोऽर्धर्चस्तां पुरोरुचं कुर्यात्, क्षत्रꣳ वा एतदोजीयोऽकरबली-
यसीꣳ विशं, जामि वा एतद्यज्ञे क्रियते यन्मरुत्वतीयो ग्रहो गृह्यते मरुत्वतीयꣳ शस्यते, पशवो
वै मरुतो, ऽजामि पशव,—स्तेन तदजाम्यृतुपात्रमालभ्य प्रतिगृह्णात्यृ,—तवो वै मरुतः, सꣳ-
वत्सरं ऋतवा, आयुः सꣳवत्सरं, आयुषि वा एतदध्वर्युः श्रयते, वृत्रꣳ वा एष हन्ति यो
मरुत्वतीयान् ग्रहान् गृहीत्वे, माहेन्द्रे सर्वे कामाः, सर्वान् वा एतत् कामानाप्नोति, सर्वान्
व्यश्नोती,—न्द्रो वै वृत्रमह३,—न्त्सोऽन्यान् देवानत्यमन्यत, स महेन्द्रोऽभवत्, स एतमु-
द्धारमुदहरत वृत्रꣳ हत्वा, तदुद्धार एवा,—ऽस्यैष भाग एव, तस्माद्राजा संग्रामं जित्वोदाज-
मुदजते, शुक्रपात्रेण माहेन्द्रं गृह्णाति, वदन्ति ग्रावाणो, वदन्त्यौलूखला, मन्थन्त्याशिर,-
—मिन्द्रे वा एतदग्रा आगुते घोषमकुर्वता,—ऽथो यजमान एव तेजो दधति ॥ ८ ॥ ५६
एतद्वा एषाभ्यनूक्ता ॥ ५७

अष्टौ पुत्रासो अदितेर्ये जातास्त३न्वस्परि । देवाꣳ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यत ॥५८॥
इत्येष वाव स उपाꣳशुसवनो ग्रावा, तस्य वा एष सोमपीथो यदादित्यं मेक्षयन्ति ॥ विव-
स्वन्नादित्यैष ते सोमपीथः ॥ इति सोमपीथेनैवैनꣳ समर्धयति, व्यानो वा उपाꣳशुसवनः,
प्रजा आदित्यो, व्यानꣳ वा एतत् प्रजासु दधाति, पशवो वा आदित्यो, यदभ्रा मध्यतः
श्रीणाति, मध्यतो वा एतत् पशूनां पयो दधात्यं,—थ यत्तत्पात३ङ्क्यं तस्मादामा सती पक्वं
दुहे, यदि कामयेत, वर्षेत् पर्जन्या इति ॥ या दिव्या वृष्टिस्तया त्वा श्रीणामि ॥ इति दभ्रो-
परिष्टादादित्यꣳ श्रीणीयात्, पशवो वा आदित्यः, पशुभ्य ए३षोऽमुतो वर्षति, पशूनेव
वृष्ट्याभिजिघर्ति, यदि कामयेत, गर्भाः श्रीण्येयुरित्यु,—द्धृत्यादित्यमवेक्षेत, गर्भा ह श्रेवुका
भवन्ति, शुक्रवतीवै पूर्वे सवने, अशुक्रꣳ तृतीयꣳ सवनꣳ, यद् द्विदेवत्यानाꣳ सꣳस्रवानवन-
यत्याग्रायणमभिप्रस्कन्दयति, तेन तृतीयसवनꣳ शुक्रवद्, देवा असुरान् हत्वा मृत्योरबिभ-

[९] मै. १,३,१६ । तै. सं. ६,५,६ । काठ. २८,६ ।
मै. ४९

यु,—स्तेनायंविणो न्यश्नन्नेर्षिण एता देवता भूयिष्ठाः प्राविशन्, यद् द्विदेव३त्याꣳस्तस्माद् द्विदे-
वत्येभ्य आदित्यो निर्गृह्यते, बृहतीभ्यां गृह्णाति, पशवो वै बृहतीः, प्रजा आदित्य, एता-
वांलोको यावद्दृतꣳ, यत् संप्रसारयित्वा गृह्णाति लोकꣳ वा एतदुन्नाधं यजमानो भ्रातृव्यस्य
वृङ्क्ते, ऽथो इमा एव प्रजा अन्नाद्यायावरुन्द्धे, यद्यस्य भ्रातृव्यो यजेत बहिर्वेदि तिष्ठेत्,
तथा हैनं नावरुन्द्धे, पशवो वा आदि३त्यो, ऽग्नी रु३द्रो, ऽग्नेरेवास्त३न्वो यद्धिष्ण्या,
यत् संप्रसारयित्वा गृह्णाति रुद्राद्वा एतत् पशूनन्तर्दधात्यपिधायोप निष्क्रामति, पशूनां गोपी-
थाया,—ऽऽदित्यो वै द्विदेवत्यानामनुयाज,—स्तस्मात्तान्नानुयजति, द्विदेव३त्या वा आदित्यस्य
प्रयाजा,—स्तस्मात्तान्नानुयजति, पशवो वा आदि३त्यो, ऽग्नी रुद्रो, ब्राह्मणं उपद्रष्टा,
यदीक्षमाणो जुहुयात् प्रथीयमानानामेषामुपद्रष्टा स्या,—दुन्यत्रेक्षमाणेन होत३व्य,—मनुपद्रष्टैषां
भवति ॥ ९ ॥ ५९-६३ [११६९]

॥ इति खिलकाण्डे षष्ठः प्रपाठकः ॥ ६ ॥

अथ सप्तमः प्रपाठकः ।

गायत्रो वै देवानाꣳ सविता, गायत्र्या एष लोके सोमो गृह्यते, यदाग्रायणं,—स्तस्मा-
दाग्रायणात् सावित्रो निर्गृह्यते, ३सोऽर्द आ तृतीयात् सवनात् परिशयेत् क्रियमाणस्य क्रियमा-
णस्य प्रसवाया,—ऽन्तरिक्षꣳ वा अन्तर्या३मो, ऽन्तरिक्षमिमाः प्रजा, यदन्तर्यामपात्रेण सावित्रं
गृह्णाति, सविता वा एतत् प्रजाः प्रसुवति प्रजननाया,—ऽसन्नो हूयते, ऽसन्ना३हीमाः प्रजा
नेलयन्ति, नानुयजति, यदनुयजेत् सृष्टिं प्रजानाꣳ विछिन्द्या,—दथो समानपात्रौ ३ह्येतौ सोमौ
गृह्येते तस्मान्नानुयजति, देवा वै तृतीयसवनमुद्यमं नाशक्नुवन्, प्रातःसवने तर्हि सवितासीत्,
तं देवास्तृतीयसवनमभिपर्यौहꣳ,—स्तेन तृतीयसवनमुदयच्छन्त, यत् सावित्रस्तृतीयसवने गृह्यते
सवितृप्रसूता वा एतत् तृतीयꣳ सवनमुद्यच्छन्ते, सावित्रस्य सꣳस्रवे वैश्वदेवमभिगृह्णाति, वैश्व-
देवीरिमाः प्रजाः, सवितृप्रसूताः खलु वै प्रजाः प्रजायन्ते, मनो वै सविता, वैश्वदेवीरिमाः
प्रजाः, सर्वासु वा एतत् प्रजासु मनो दधात्या,—ग्रीमतः सवनस्य गृह्णाति, वैश्वदेवत्वाय,

[१] मै. १,३,२७—२८ । तै. सं. ६,५,७ । काठ. २८,७ । कपि. ४४,७ ।

सुशर्मासि सुप्रतिष्ठान इति, यत्स्वित्सोमः सोमे प्रतितिष्ठति, बृहदुक्षे नम इति, यद्बृहदिति
तेन देवेभ्यो, यन्नम इति तेन पितृभ्य, उक्थभाजो वै पितरोऽस्तोमभाज, उक्थायैष गृह्यते
न स्तोत्राय, यत्र गृह्यते तच्च शस्यते स्व आयतने ॥ १ ॥ १
घृतस्य यजत्ये,—ष वै प्रथमो धिष्ण्यानाꣳ यदाहवनीय,—स्तꣳ वा एतदग्रे व्याघारयत्या,—
ग्नावैष्णव्या व्याघारयति, पराङ् वा एतर्हि य३ज्ञो, ऽग्निः सर्वा देवता, विष्णुर्यज्ञो,
देवताश्चैव यज्ञं चालब्ध, घ्नन्ति वा एतत् सोमꣳ यदभिषुण्वन्ति, यत् सौम्यः, सोमꣳ वा
एतत् संभावयन्ति, सोममाप्याययन्त्यं,—वधिपुर्वा एतत् सोमꣳ यदुम्यसुपुवु,—रनुस्तरणी वा
एषा सोमस्य, यत् सौम्यः पितृणामनुस्तरणी, तस्मात् पितृमत्या यजति, दक्षिणा तिष्ठन्
जुहोति, दक्षिणा हि पितृणा,—मुपसदाꣳ वा एतेऽनुयाजा, आग्नावैष्णव्या घृतस्य यजति,
सौम्या सोमस्य, या एवाद उपसत्सु देवता अयाक्षीत्ता एत,—दुमुत्र वा एष भूताय क्रियते,
यद्वा एतस्य व्याधि यत् प्रामायि तदस्यामुं लोकं गच्छत्यं,—थ पूत एवोच्छिष्यते, पवित्रꣳ वै
सौम्यो, यजमानमेवैतेन पुनाति, सामदेव३त्यो वै सोमः, सोमस्य खलु वै सौम्यः,
साम्ने वा एतद् ध्रियते॥ सत्रा त एतद्यदु त इदं ॥ इति परिपश्यति, योऽगतासुः स परिपश्यति, २-४
यो गतासुर्न स परिपश्यति, यदि न परिपश्येदथ वदेत् ॥
यन्मे मनो यमं गतꣳ यद्वा मे अपरागतम् । राज्ञा सोमेन तद्वयमस्मासु धारयामसि ॥ ५
हृदिस्पृक् क्रतुस्पृग्वर्चोधा असि, वर्चो मे धेहि ॥ इत्याशिषमेवाशास्ते ॥ २ ॥ ६-७
अथैतेऽतिग्राह्या, देवा वै सोममगृह्णता,—ऽथ वा एतानिन्द्रोऽगृह्णात्, सोऽवे,—न्न वा अहमि-
मानृते ब्रह्मणः सविष्यामीति, स ब्रह्मोपाधावत्, तान् ब्रह्मणासन्नोद्, ब्रह्म वै गायत्री, तस्मा-
द्गायत्रीभिर्गृह्यन्ते, यद्देवादः परमन्नाद्यमनवरुद्धं तस्यैतेऽवरुद्ध्यै गृह्यन्ते, ये वा अमी वैराजस्य
स्तोमा अतिरिक्तास्तैरेते सामन्वन्तः, सर्वे वा एत ऐन्द्रा, य ऐन्द्र ऐन्द्रः ३सो, ऽसा आदित्य
इन्द्रः, समानमग्निश्चासौ चादित्यो, विराजो वै तेज आग्नेयः, शक्वरीणामैन्द्रो, रेवतीनाꣳ
सौर्यो, यत्र पृष्ठानि युज्येरꣳस्तदेतान् जुहुयात्, साम्नाꣳ सतेजस्त्वाय, सꣳ वा एतद्यज्ञः पश्चात्
स्तोत्रेण च शस्त्रेण चाधीयते, यदतिग्राह्याः, प्रत्युत्तब्ध्यै, चक्रियो वा एते यज्ञस्य यत्

[२] तै. सं. ६,६,७ । कपि. ४५,३ । मा. १,२६; ३,१७; ४,३ । काण्व. २,४८; ३,१३; ४,४।
[३] मै. १,३,३१—३३ । तै. सं. ६,६,८ । कपि. ४६,१—३ । मा. ८,३८—४० । काण्व. ८,१९—२४ ।

पृष्ठान्यु,—पस्तम्भनमतिग्रा३ह्या,—स्तस्मात् प्रातःसवने गृह्याः, प्रत्युत्तब्ध्यै, यदाग्नेयस्तेज-
स्तेनावरुन्द्धे, यदैन्द्र इन्द्रियं तेन, यत् सौर्यो रुचं तेन, त्रिवृद्वावास्मा एतत् समृद्धं ब्रह्म-
वर्चसं दधाति, तेजो वा अग्नि,—रिन्द्रियमिन्द्रो, ब्रह्मवर्चसमसा आदित्यं,—स्तेजसा च वावा-
स्मा एतद्ब्रह्मवर्चसेन चोभयत इन्द्रियं परिगृह्णाति ॥ अग्नेश्च त्वा ब्रह्मणश्च तेजसा जुहोमि तेजोदा,
तेजो मा मा हासी,—न्माहं तेजो हासिषꣳ, स्वाहे,—न्द्रस्य च त्वा क्षत्रस्य चौजसा जुहोम्यो-
जोदा,—मोजो मा मा हासी,—न्माहमोजो हासिषꣳ, स्वाहा, सूर्यस्य च त्वौषधीनां च वर्चसा
जुहोमि वर्चोदाꣳ, वर्चो मा मा हासी,—न्माहꣳ वर्चो हासिषꣳ, स्वाहा,—ऽग्न आयुःकारायु-
ष्माꣳस्त्वं तेजस्वान् देवेभ्येध्या,—युष्मन्तं मा तेजस्वन्तं मनुष्येषु कुर्वि,—न्द्रौजस्कारौजस्वाꣳस्त्वꣳ
सहस्वान् देवेभ्येध्यो,—जस्वन्तं माꣳ सहस्वन्तं मनुष्येषु कुरु, सूर्य भ्राजस्कार भ्राजस्वाꣳस्त्वꣳ
वर्चस्वान् देवेभ्येधि, भ्राजस्वन्तं माꣳ वर्चस्वन्तं मनुष्येषु कुरु ॥ एते होमा भक्षंकाराश्च भव-
न्त्ये,—तेषाꣳ वै वीर्येण बभ्रुविश्ववयसा इमांल्लोकाननर्वाचश्च पराचश्च प्राजानीताꣳ, सꣳ ह वा
अस्मा इमे लोका अर्वाञ्चश्च पराञ्चश्च भान्ति य एवꣳ वेद, सुप्रज्ञाना वा इत इत्थं लोका,
अमुतस्त्या अर्वाञ्चो दुःप्रज्ञाना, एष ह ३त्वेवामुतोऽर्वाच इमांल्लोकान् प्रजानाति यस्यैते हूयन्ते
॥ ३ ॥ ८-१०
उपाꣳशुपात्रेण पात्नीवतं गृह्णाति, प्राणो वा उपाꣳशुः, प्राणेन वा एतत् प्रयन्ति,
प्राणेनोद्यन्त्यं,—थो प्राणानां प्रतिप्रज्ञात्या, अथो यत् प्रथमं पात्रꣳ युज्यते तदुत्तमꣳ विमु-
च्यते, प्राणानां गोपीथाय, होता वा अग्र प्रातरुपाꣳशुमयजद्, यदेतꣳ होता वषट्कुर्या-
द्यत् पुरोऽक्रुस्तत् पश्चात् परिहरेत्, प्रमायुकः स्यात्, तस्मादेतमग्नीद्वषट्करोति, पुरो३ह्यग्नीत्,
प्राणो वा उपाꣳशुः, प्राणादधि प्रजाः प्रजायन्ते, यदुपाꣳशुपात्रेण पात्नीवतं गृह्णाति,
प्रजननाया,—ऽसन्नो हूयते, ऽसन्ना हि प्रजाः प्रजायन्ते, नानुयजति, यदनुयजेत्
प्रजननमपिहन्या,—दथो समानपात्रौ ३ह्येतौ सोमौ गृह्येते, तस्मान्नानुयजति, मिथुनꣳ वै
घृतं च सोमश्च, यत् पात्नीवतं घृतेन श्रीणाति, मिथुनत्वाय, बृहस्पतिसुतस्य ता इति,
ब्रह्म वै बृहस्पति,—र्ब्रह्मणो वै योनिः प्रजापतिः प्रजा असृजत, ब्रह्मणो वा एतद्योनेर्यजमानः

[४] मै. १,३,२९-३० । तै. सं. ६,५,८-९ । काठ. २८,८-९ । कपि. ४४,८-९; ४६,४ । वा. ८,९-११;९,११ ।
का.प. ८,८—१०,१२;१०,११ ।

प्रजायता, इन्द इन्द्रियावता इती,—न्द्रियं हि गर्भो, ऽग्ना३इ पत्नीवा३निति, मिथुनꣳ वा अग्निश्च पत्नीश्च, मुखंस्त्वष्टा सोमं पिबति, त्वष्टा हि रूपाणि विकरोति, घृतꣳ वै देवा वज्रं कृत्वा सोममघ्न,—न्नपि खलु वा एतं घातयन्ति, यत् पात्नीवतं घृतेन श्रीणाती,—न्द्रियेण वा एतत् पत्नी व्यर्धयति, तस्मान्निरिन्द्रिया स्त्री, पुमानिन्द्रियवाꣳ,—स्तस्मात् पुमाꣳसः सभाꣳ यन्ति, न स्त्रियो, यदित्वग्न्स्सोमात् श्रीणीयुर्न पात्नीवतꣳ, स्त्रियः सभामीयु,—र्न पुमाꣳसा, इन्द्रो वै वृत्रमहꣳ,—स्तस्य यन्मूर्धानमुदरुजत् स द्रोणकलशोऽभवत्, ततो यः सोमः समस्रवत् स हारियोजनं,—स्तस्मादेतं द्रोणकलशेन जुहोति, योनिर्ह्यस्यैष, इन्द्रो वृत्रꣳ हत्वा तस्य यत् क्रोष्ठो हृदयाद् सोमꣳ समसिस्रवत् स हारियोजनोऽभवत्, स इन्द्रोऽमन्यत, यद्विममु३ष्ठेꣳ सोमꣳ होष्यामि तदन्वसुरा आभविष्यन्ति, यत्र होष्यामि तदन्वभविष्यन्तीति, तꣳ सꣳस्थिते प्रहृतेषु परिधिष्वजुहोद्यत् सꣳस्थिते प्रहृतेषु परिधिषु जुहोति तस्त्विदुभयमक,—र्जुहोत्यह, सꣳस्थिते जुहोत्य,—तिरिक्तो वा एष ऋत्विजाꣳ य उन्नेता, तस्मादेतं न वृणते, न वषट्करोत्य,—त्येष सोमोऽरेचि, स वा उन्नेतारमेवाभ्यतिरिच्यन्ते, ऽध्वर्युर्वै पर्वान्त्सोमान् जुहोति, यदेतमध्वर्युर्जुहुयादाहुतीः सꣳसृजेत, समदं कुर्यात्, तस्मादेतमुन्नेता जुहोति, प्रजापतिर्वा एतममन्यत सोमꣳ होष्यꣳ,—स्तमग्निरब्रवी,—न्मे मयि स्वमेतममु३ष्ठेꣳ सोमꣳ होष्यस्यमृतमद्वितीयं, द्वितीयमस्त्विति, यद्धानाभिः श्रीणाति, भूतस्वाया,—ऽथो द्वितीयत्वाया,—ऽथैता धाना, यत्र वा अदो देवेभ्यः कामदुघाः काममदुह तदेता अपिदुदुह्रे, तद् पुष्टिमेवैताभिरवरुन्धे, प्रजापतिर्वा आग्रायणो, यदेषोऽतिरिच्यते तस्मादुपर्यतिरिक्तोऽपरिमित इमाः प्रजा अभिप्रवत, ऋक्सामे वा इन्द्रस्य हरी, तयोः परिधय आधानं, निराधानाद् खलु वा अश्वाय घासमपिदधाति, यत् सꣳस्थिते प्रहृतेषु परिधिष्वजुहोद्, यत् सꣳस्थिते प्रहृतेषु परिधिषु जुहोति निराधानाभ्यामेवाभ्यां घासमपिदधाति, पशवो वै धाना, यत् संखादेत् पशवः हिꣳस्याद्, यन्न संखादेदयताः स्युः, संदश्य, रथ्यै स्वा पोषाय त्वेत्यु,—पवपति, तस्त्विदुभयमकः, पशूनाꣳ यत्यै, भुञ्जन्त एनं पशवा उपतिष्ठन्ते ॥ ४ ॥ ११

यज्ञेन वै देवाः स्वर्गं लोकमायꣳ,—स्तेऽमन्यन्ता,—ऽनेन वै नोऽन्ये लोकमन्वारोक्ष्यन्तीति, ते छन्दाꣳस्यपश्यꣳ,—स्तानि व्यत्यषजन्त्स्वर्गस्य लोकस्याननुख्यात्यै, यच्छन्दाꣳसि व्यतिषजति,

[५] तै. सं. ६,६,११,५—६ ।

लोकꣳ वा एतच्छन्दाꣳसि यजमानो भ्रातृव्यस्य मोहयति स्वर्गस्य लोकस्याननुख्यात्यै, देवेषु वा अन्यानि छन्दाꣳस्यास,—न्नसुरेष्वन्यानि, कनीयाꣳसि देवेष्वासन्, ज्यायाꣳस्यसुरेषु, ते देवाः कनीयोभिश्छन्दोभिर्ज्यायाꣳसि छन्दाꣳस्यसुराणामवृञ्जत, यत् कनीयोभिश्छन्दोभिर्ज्यायाꣳसि छन्दाꣳसि विशꣳसति लोकꣳ वा एतच्छन्दाꣳसि यजमानो भ्रातृव्यस्य वृङ्क्ते, लोकमेनमछन्दस्कमकरनुष्टुभꣳ सर्वाणि छन्दाꣳस्यभिसꣳशꣳसति, वाग्वा अनुष्टु,—बानुष्टुभः पुरुष,—स्तस्मात् पुरुषः सर्वा वाचो वदति, पशवो वै छन्दाꣳसि, वागनुष्टु,—बानुष्टुभः पुरुषो, यत् सर्वाणि छन्दाꣳसि सꣳशस्यानुष्टुभमुत्तमाꣳ शꣳसति तस्मात् पुरुष उपरिष्टाद्वाचः पशूनत्ति, सर्वाणि छन्दाꣳसि सꣳशꣳसति, प्रजापतिर्वै छन्दाꣳसि, प्रजापतिमेवाप्नोति, षडक्षराणि स्तोत्राददतिरिच्यन्ते, षड्वा ऋतव, ऋतुष्वेव प्रतितिष्ठति, ततश्चत्वारि शस्त्रे पुनरुपावर्तन्ते, चतुष्पदस्तेन पशूनवरुन्द्धे, ऽथ द्वे एवातिरिच्येते, द्वे विराजमति सत्यं चानृतं च, विराजमेवाप्नोति ॥ ५ ॥ १२

प्रजापतिर्वै देवेभ्यो यज्ञान् व्यकल्पयत्, सोऽमन्यता,—ऽऽत्मानमन्तरगामिति, तेषाꣳ वा इन्द्रियाणि वीर्याणि पुनः समवृङ्क्त, स षोडश्यभव,—दथ वै तर्हीन्द्रो देवानामासीदवमतमः शिथिरतम,—स्तस्मै वा एतꣳ षोडशिनं प्रायच्छत्, तेनेन्द्रोऽभवत्, ततो देवा अभवन्, परासुरा,—स्तद्य एवꣳ विद्वानेतꣳ षोडशिनं गृह्णीते, भवत्यात्मना, परास्य भ्रातृव्यो भवति, प्रजापतिर्वै देवेभ्यस्तनूर्व्यकल्पयत्, तासाꣳ या हरिवत्यासीत् तामात्मन्नशिꣳषत् प्रेष्णा, यद्धरिवती पुरोरुग्ग्रहस्य भवति, यैवास्य हरिवती प्रिया तनूस्तामेवाप्नोति, न षोडशी नाम य३ज्ञोऽस्तीत्या,—हु,—रथ कस्मात् षोडशीति, यत् स्तोत्रेण च शस्त्रेण च संपद्यते तस्मात् षोडशी,—यज्ञेन वै देवाः स्वर्गं लोकमाय,—न्त्सं एषां न प्राभवत्, तस्मिन्वा एतꣳ षोडशिनं प्रत्यग्रथ्नꣳ,—स्तेनामुं लोकꣳ व्याप्नुवꣳ,—स्तदमुष्य वाव लोकस्य व्याप्त्यै षोडशी गृह्यते, ऽमुष्य लोकस्य समष्ट्या, अग्निष्टोमे राजन्यस्य गृह्णीया,—दशान्त एनꣳ वज्रो भूत्वा इन्द्धे, ऽतिरात्रे ब्राह्मणस्य, वज्रो वै षोडशीश्वरोऽशान्तो यजमानꣳ हिꣳसितो, रात्रिरेव वज्रꣳ शमयति, प्रातःसवने गृह्य,—स्तेजो वै प्रातःसवनं, तेजस एव वज्रं निर्मिमीते, माध्यंदिने सवने गृह्य, ओजो वै माध्यंदिनꣳ सवन,—मोजस एव वज्रं निर्मिमीते, तृतीयसवने गृह्यः, पशवो वै

[६] मै. १,३,३४ । तै. सं. ६,६,११,१।

तृतीयसवनं, पशुभ्य एव वज्रं निर्मिमीते, यत् प्रातःसवने गृह्णीयाद्वज्रा उत्तरे सवने अभ्यतिरिच्यते, यन्माध्यंदिने सवने, मध्यतो वज्रो निर्हन्याद्, तृतीयसवने गृह्य,—स्तत् सर्वेषु सवनेषु गृह्णाति, न पूर्वे सवने आर्ति नीतः, पञ्चदशः कार्यो, वज्रो वै पञ्चदशो, वज्रमेवास्मा आधात्, तेन विद्विषि भूतिं गच्छति, षोडशी कार्यो, यजमानो वै पञ्चदशो, वज्रः षोडशी, वज्रमेवास्मा आधात्, स एनं भूत्यै श्रेष्ठ्यं इन्द्धे, सप्तदशः कार्यः, प्रजापतिर्वै सप्तदशः, प्राजापत्यः षोडशी, स्व एवैनꣳ योनौ दधात्ये,—कविꣳशः कार्यो, एकविꣳशतिधाम्नी वा अनुष्टु,—बानुष्टुभः षोडश्ये,—तद्वा अस्यायतनतमं, तस्मादेकविꣳशः कार्यो, मध्यमेऽहꣳस्त्रिरात्रस्य गृह्यो, मध्यमꣳ वा अहस्त्रिरात्रस्य शिथिरं,—मह्यो द्रढिम्नेऽशिथिरत्वाय, चतुर्थेऽहꣳश्चतूरात्रस्य गृह्य,—श्चतुर्थꣳ वा अहश्चतूरात्रस्य शिथिरं,—मह्यो द्रढिम्नेऽशिथिरत्वाय, चतुर्थे चतुर्थेऽहन्नहीनस्य गृह्य,—श्चतुर्थं चतुर्थꣳ वा अहरहीनस्य शिथिरं,—मह्यो द्रढिम्नेऽशिथिरत्वाय, न द्विरात्रेऽवकल्पते, द्वे वा एते छन्दसी गायत्रं च त्रैष्टुभं चा,—ऽऽछन्दस्कमनायतनं गृह्णीते, ऽनायतनो यजमानो भवत्यु,—त्तरेऽहन् द्विरात्रस्य गृह्यो, रात्रिमेवायतनमभ्यतिरिच्यते ॥ ६ ॥ १३

बर्हिषोऽदाभ्यो, देवाश्च वा असुराश्चास्पर्धन्त, ते देवा एतमपश्यꣳ,—स्तमगृह्णत, तानसुरा नादभ्नुवꣳ,—स्तदंदाभ्यस्यादाभ्यत्वं, नैनं भ्रातृव्यो दभ्नोति य एवं गृह्णीते, घ्नन्ति वा एतत् सोमꣳ यदभिषुण्वन्त्ये,—षा वै सोमस्यातिमोक्षिणी तनू,—र्यैनितानꣳशून् प्रवृहन्त्ये,—वꣳ वा एवं लोकꣳ यजमानोऽन्वतिमुच्यते, वि वा एतद्यज्ञश्छिद्यते यत् सवनानि संतिष्ठन्ते, यदेतानꣳशून् पुनरुपर्यस्यति, यज्ञस्य संतत्या अविच्छेदाय, वृष्ट्यै वा एष गृह्यते, मरुत्सामानि हि, वर्षति पर्जन्यो यत्रैष गृह्यते, ऽग्निः प्रातः सवनात् पात्वस्मानिति, सवनानि वा एतेन देवा असुराणामवृञ्जत, सवनान्येवैतेन यजमानो भ्रातृव्यस्य वृङ्क्ते, ऽग्ने त्वा प्रवृहामि गायत्रेण छन्दसेति, छन्दाꣳसि च वा एतेन देवताश्च देवा असुराणामवृञ्जत, छन्दाꣳसि चैवैतेन देवताश्च यजमानो भ्रातृव्यस्य वृङ्क्ते, चतुरꣳशून् प्रवृहति, दिशो वा एतेन देवा असुराणामवृञ्जत, दिश एवैतेन यजमानो भ्रातृव्यस्य वृङ्क्ते, जीवग्रहो वा एष सोमस्या,—हुतस्य संनिधुतस्य गृह्यते, यजुषा च वा आहुत्या च यज्ञः संततो, यदेतर्जुर्वदन्नाहुतिं जुहोति यजुषा

[७] मै. १,३,३६ । तै. सं. ६,६,९-१० ।

चैवाहुत्या च यज्ञꣳ संतनोति, देवा वै सोममगृह्णत, स प्रजापतिरवेद्, यो वा इदं प्रथमः सोमं ग्रहीष्यते स इदं भविष्यतीति, स एतमगृह्णीत सोऽभवद्, यो भूतिकामः स्यात् स एवं गृह्णीत, भवति, यदि शक्नोति ग्रहीतुमुभौ भवतो, यदि न शक्नोति ग्रहीतुमुभौ न भवता, पराचीनेन प्राणता ग्रहीत३व्यः, पराङ् हि स प्राणैः श्रियोऽन्तमगच्छ,—दपानता ग्रहीत३व्यो, ऽपानꣳ हि स तमगृह्णीत, प्राण्यापान्याव्यवानता ग्रहीतव्यो, ऽव्यवानꣳ हि स तमगृह्णीत, यद्व्यवानेत् प्राणान्विच्छिन्द्याद्, यदि व्यवानेद्धिरण्येनापिदध्या,—दमृतꣳ वै हिरण्य,—ममृतेनैव प्राणान्त्संदधाति, सकृदभिपुणोति, सकृद्गृह्णात्ये,—को वै प्रजापतिः, प्रजापतिमेवाप्नोति, चतुःस्रक्तिना ग्रहीत३व्य,—श्चतुःस्रक्तिना वा एतं प्रजापतिरगृह्णीत, स सर्वासु दिक्ष्वाभ्नोत्, स सर्वासु दिक्ष्वृध्नोति य एवꣳ विद्वानेतं चतुःस्रक्तिना गृह्णी३ते, ऽपां वै सोमस्य रसः प्रविष्टः, सोममपाꣳ रसो, यथा वा इदं गावौ संजग्माने अन्यान्याꣳ हत एवꣳ वा एतौ संजग्मानौ अ३न्योऽन्यस्येन्द्रियꣳ वीर्यꣳ विनिहत,—स्तयोर्वा एष रसो यद्दधि, यद्दध्ना जुहोति स्वेनैवैनौ रसेन शमयति ॥ ७ ॥ १४

कृष्णग्रीवाग्नेयो, मेषी सारस्वती, बभ्रुः सौम्यः, श्यामः पौष्णः, शितिपृष्ठो बार्हस्पत्यः, पिशङ्गो वैश्वदेवो, वृष्णिरैन्द्रः, कल्माषो मारुतः, सꣳहित ऐन्द्रा३ग्नो, ऽधोरामः सावित्रः, पेत्वो वारुणः, प्रजापतिः प्रजाः सृष्ट्वा रिरिचानोऽमन्यत, स एतामेकादशिनीमपश्यत्, तयात्मानमाप्रीणीत, यज्ञो वै प्रजापति,—स्तद्य एवꣳ विद्वानेतामेकादशिनीꣳ विसृजते यदेवास्यात्मन ऊनं तदाप्रीणीते, प्रजापतिः प्रजाः सृष्ट्वा रिरिचानोऽमन्यत, स एतानीन्द्रियाणि वीर्याण्यपश्यत्, तानि द्वन्द्वमात्मानमभिसमबध्नीता,—ऽऽत्माग्नेयो, वाक्सरस्वती,—न्द्रियꣳ सोमो वाचं चैवेन्द्रियं चात्मानमभिसमबध्नीत, पुष्टिः पौष्णो, ब्रह्म बृहस्पतिः, पुष्टिं चैव ब्रह्म चात्मानमभिसमबध्नीत, बलꣳ विश्वे देवा, वी३र्यमिन्द्रो, बलं चैव वीर्यं चात्मानमभिसमबध्नीतौ,—जो मरुतः, सह इन्द्राग्नी, ओजश्चैव सहश्चात्मानमभिसमबध्नीत, प्रसवाय सावित्रो, निर्वरुणत्वाय वारुण, आग्नेयाय सर्वा उपबध्यन्ते, ऽग्निर्वै सर्वा देवताः, सर्वाभ्य एव देवताभ्या उपबध्यन्ते, मिथुनत्वायैव सारस्वत्य,—थ यत् सौम्यः, सोमो वै रेतोधा रेतोऽस्मिन् दधात्य,—थ यत् पौष्णः, प्रजननꣳ वै पूषा, प्रजननाय, ब्रह्म बृहस्पति,—र्वैश्वदेवीरिमाः प्रजा, ब्रह्म वा एतत् पुरस्तादासां प्रजानामत्याद्धा,—दथो ब्रह्मण एवैमाः

[८] तै. सं. ६,६,५।

प्रजा अनुकाः करोति, क्षत्रमिन्द्रो, विण्मरुतो, विश॒ं वा एतत् क्षत्राय नियुनक्त्यं,—थो विशु-
मेवं क्षत्रायानुकां करोत्यो,—ज इन्द्राग्नी, ओजसा वा एतद्विशं क्षत्राय परिगृह्णात्या,—लभ्य
आग्नेयं, आलभ्य ऐन्द्रो, ऽथैष ऐन्द्राग्न आलभ्यते, ब्रह्म चैवं क्षत्रं च सयुजा अक,—र्यद-
ग्निश्चेन्द्रश्च भूयिष्ठभाजौ देवतानां तस्माद्ब्राह्मणश्च राजा च भूयिष्ठभाजौ मनुष्याणां, प्रसवाय
सावित्रो, निर्वरुणत्वाय वारुणः, समुद्रो वै वरुणो, दक्षिणा समुद्रो, यद्वारुणो दक्षिणार्ध
आलभ्यते, यजमानस्य निर्वरुणत्वायै,—तद्वा एषाभ्यनूक्ता ॥ १५

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदꣳ सूर्म्यꣳ सुषिरामिव ॥
इति ॥ ८ ॥ १६

ये देवानां बलपतयस्तेभ्यो दक्षिणार्ध आलभ्यन्ते, तस्मात् प्रजा दक्षिणाभिजंखन्तीर्यन्ति,
यदाग्नेयः सौम्यो बार्हस्पत्यस्ते सार्धमालभ्यन्ता ओज एवैतत् संधीयते, यदाग्नेयश्च बार्हस्पत्यश्च
सौम्यमभितस्तेजसा च वावास्मा एतद्ब्रह्मवर्चसेन चोभयत इन्द्रियं परिगृह्णात्ये,—कादश वा एतेषां
पशूनां देवता, मेषी सारस्वती देवतानां द्वादशी, यदेषातिरिच्यते तस्मात् स्त्रियः पुꣳसोऽति-
रिच्यन्ते, ऽथ द्वे एकस्य रशने, द्वे एकस्य, तस्मात् स्त्रियं जातां परास्यन्ति, न पुमाꣳस,-
—मथ स्त्रिय एवातिरिच्यन्ते, यꣳ वा अमुमिन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधाभवद्, यदग्रं
तेजा आसीत् स स्फ्योऽभवद्, यन्मध्यꣳ स रथो, यज्जघनꣳ स यूपः, स्फ्येन परिलिखति,
रथाक्षेण विमिमीते, यूपो भवति, वज्र एवैष संभ्रियत, एतावती वा इयं पृथिवी यावती
वेदि,—र्यज्ञ एकादशिनी, तिरश्चीं मिनोति, वज्रेण वा एतदिमां जयति, दक्षिणत उन्नता
मेतव्या, देवयजनस्य रूपं,—मथो वज्रꣳ वा एतद्यजमानो भ्रातृव्यायोच्छ्रयति, त्रयो मध्यतः
समा मेतव्याः, समत्वाय, समꣳ हि पशवोऽनुपतिष्ठन्ते, पशुभिरेवैनꣳ सम्यञ्चं दधाति,
यं कामयेत, पितृलोकं ऋध्नुयादिति, तस्यौपरसंमितां मिनुयात्, पितृलोकं एवं ऋध्नोत्यं,-
—थ यं कामयेत, मनुष्यलोकं ऋध्नुयादिति, तस्य मध्यसंमितां मिनुया,—न्मनुष्यलोकं एवं
ऋध्नोत्यं,—थ यं कामयेत, देवलोकं ऋध्नुयादिति, तस्य चषालसंमितां मिनुयाद्, देव-
लोकं एवं ऋध्नोति, तासाꣳ वा एषा समृद्धतमा या चषालसंमिता, तस्माच्चषालसंमिता
मेतव्या, समृद्धत्वाय, यस्य पश्चादुपस्थः पुरस्तान्निर्णतं तं मिनुयाद्, यं कामयेत, भ्रातृ-

[सुदेवो असि वरुण० । ऋ. ८,६९,१२, अथर्व. २०,९२,९, नि. ५,२७]
[९] तै. सं. ६,६,४ ।
मै० ५०

व्याय लोकं कुर्याद्, यजमानं निर्बाधेतेति, भ्रातृव्यायैव लोकं करोति, यजमानं निर्बाधते,
ऽथ यस्य पुरस्तादुपस्थः पश्चान्निर्णतं तं मिनुयाद्, यं कामयेत, यजमानाय लोकं कुर्याद्
भ्रातृव्यं निर्बाधेतेति, यजमानायैव लोकं करोति, भ्रातृव्यं निर्बाधते, सर्वेऽग्निष्ठाः कार्या,
या अग्निष्ठा अश्रयस्ता अग्निष्ठाः कार्या,—स्तेन सर्वेऽग्निष्ठा, अथ यदग्निष्ठादधि रशना विहि-
यन्ते तेन सर्वेऽग्निष्ठा, नाना वा एतेषां पशवो, नाना देवता, अथ य एष द्वादशो यज-
मान एवैतस्य पशुं,—र्यदस्मै पशुं न निर्दिशेत् तत् प्रमायुको यजमानः स्याद्, यं द्विष्यात् तं
ब्रूयात् ॥ असौ ते पशुः ॥ इति, तमेवास्मै पशुं निर्दिशति, प्रमायुको भवति, यद्यभिचरेत् ॥
इदमहममुमामुष्यायणममुष्याः पुत्रमिन्द्रवज्रेणाभिनिदधामि ॥ इत्यभिनिदध्या,—दिन्द्रवज्रेणैवैनम-
भिनिदधाति, प्रमायुको भवत्यं,—थो द्वादशस्यैवैष मासोऽवरुद्ध्यै ॥ ९ ॥ १७-२१
[२११०]

॥ इति खिलकाण्डे सप्तमः प्रपाठकः ॥ ७ ॥

अथाष्टमः प्रपाठकः ।

मनोर्ह पात्राण्यासꣳ,—स्तेषाꣳ समाहन्यमानानाꣳ यावन्तोऽसुरा उपाशृण्वꣳस्तावन्तस्तदहनी-
भुव,—न्नथ वा एतौ तर्ह्यसुराणां ब्राह्मणा आस्तां तृष्टावरुत्री, तौ अब्रुवꣳ,—श्चिकित्सतं ना
इति, तौ अब्रूतां, मनो यज्वा वै श्रद्धादेवोऽसी,—मानि नौ पात्राणि देहीति, तानि वा
आभ्यामददात्, तान्यग्निना समक्षापयतां, तान् ज्वालानृषभः संमुलेद्, तꣳ सा मेनिरन्व-
पद्यत, तस्य रुवतो यावन्तोऽसुरा उपाशृण्वꣳस्तावन्तस्तदहनीभुवꣳ,—स्तौ अब्रूतां, मनो
यज्वा वै श्रद्धादेवोऽस्य,—नेन त्व ऋषभेण याजयावेति, तेन वा एनमयाजयतां, तस्य श्रोणि-
मनवत्ताꣳ सुपर्णी उदमथ्नात्, सा मनाया उपस्थमापद्यत, ताꣳ सा मेनिरन्वपद्यत, तस्या
वदन्त्या यावन्तोऽसुरा उपाशृण्वꣳस्तावन्तस्तदहनीभुवꣳ,—स्तौ अब्रूतां, मनो यज्वा वै श्रद्धा-
देवोऽस्य,—नया त्वा पत्न्या याजयावेति, तां प्रोक्ष्य पर्यग्निं कृत्वेध्माबर्हिरछैताꣳ, स इन्द्रो-
ऽवे,—दिमे वै तं असुरमायेमं मनुं पत्न्या व्युर्धयता इति, तमिन्द्रो ब्राह्मणो ब्रुवाण उपैत्, सो
ऽब्रवी,—न्मनो यज्वा वै श्रद्धादेवोऽसि, याजयानि त्वा, कतमस्त्वमसि ब्राह्मणः ॥ १

[१] तै. सं. ६,६,६ । कपि. ४६,४ ।

किं ब्राह्मणस्य पितरं किमु पृच्छसि मातरम्। श्रुतं चेदस्मिन् वेद्यꣳ स पिता स पितामहः॥
२
केनेत्या,—भ्यां ब्राह्मणाभ्या,—मितीशेऽहं ब्राह्मणयो,—रितीशिषे हीत्य,—ब्रवी,—दतिथिपति-
वावातिथीनामीष्टा इति, स द्वितीयाꣳ वेदिमुद्धन्तुमुपापद्यत, तौ इध्माबर्हिर्विभ्रता एतां, तौ
अब्रूतां, किमिदं करोषी,—तीमं मनुꣳ याजयिष्यामीति, केनेति, युवाभ्यामिति, तौ
अविता,—मिन्द्रो वावेति, तौ न्यस्येध्माबर्हिः फलायेतां, तौ यद्धावतां परस्तादेवेन्द्रः प्रत्यैत्॥
तौ शृशथैवापश्याभवतां, तद्वृशस्य चैवापस्य च जन्म, स मनुरिन्द्रमब्रवीत्, स मे यज्ञꣳ
स्थापय, मा मे यज्ञो विकृष्टोऽभूदिति, सोऽब्रवीर्यत्काम एतामालब्धाः स ते कामः समृध्यता,-
—मथोत्सृजेति, ताꣳ वा उदसृजत्, तद्वध्या एवं, पात्नीवतस्त्वाष्ट्रः स्यात्, त्वाष्ट्रा हि
पशवो, ऽवाचीनं नाभ्याः कार्यो, ऽवाचीनꣳ हि नाभ्याः स्त्रिया वीर्यवद्, व्यवच्छिनाति वा
३-४
एकादशिनी यज्ञꣳ, यत् पात्नीवतः, प्रत्युत्तब्ध्यै ॥ १ ॥

अमुष्मिन्वै लोके यजमानो बुभूषत्य,—मुष्य खलु वा आदित्यस्यासौ लोको, यत् सौरीभ्यां
जुहोत्यमुष्मिन् वा एतल्लोके यजमानो भवति, द्वाभ्यां जुहोति, द्विपाद्यजमानः, प्रतिष्ठित्यै,
हिरण्यमवधाय जुहोति, हिरण्यज्योतिषमेवैनꣳ स्वर्गं लोकं गमयति, बद्धेन जुहोति, दक्षि-
णानाꣳ वा एषोऽन्वारम्भो, द्यां गच्छ स्वर्गच्छेत्यु,—द्रवति, स्वर्गस्य लोकस्य समष्ट्यै, रूपꣳ
वो रूपेणाभ्येमीति, रूपꣳ हिरण्यꣳ, रूपं पशव,—स्तुथो वो विश्ववेदा विभजत्वित्ये,—षं
वै तुथो विश्ववेदा यदग्नि,—रेषं वै तꣳ वेद या दक्षिणीयो, योऽदक्षिणीयं, एतत्ते अग्ने राध
एति सोमच्युतमित्य,—ग्नीधे वा एतद्दीयते, तत् सोमश्च्यावयति, तन्मित्रस्य पथा नयेत्ये,—षं
वै मित्रस्य पन्था यद्यज्ञ, आग्नेय्याग्नीध्रे जुहोत्या,—ग्नेयꣳ ह्याग्नीध्रꣳ, वारुण्या द्वितीयया,
यद्धेनो वा रथो वा दीयते वारुणꣳ हि तद्, ऋतस्य पथा प्रेतेत्ये,—षं वा ऋतस्य पन्था यद्यज्ञ-
श्चन्द्रदक्षिणा इति, चन्द्रꣳ हि दीयते, ब्राह्मणमद्य ऋध्यासं पितृमन्तं पैतृमत्यमित्ये,—षं वै
ब्राह्मणः पितृमान् पैतृमत्यो य आर्षेयः शुश्रुवा,—न्त्सुधातुदक्षिणमिति, सुधात्वेवास्य यज्ञे दधाति,
वि स्वः पश्य, व्यन्तरिक्षमित्य,—द एवं प्राप्य वदति, यतस्व सदस्यैरित्य,—रातीयन्ति
वा एवं एतस्मै ददत, ईश्वरा ब्राह्मणाः सोमपाश्चधुषापहन्तो,—स्तानेवं शमयत्य,—स्मद्राता
मधुमतीर्देवत्रा गच्छत, प्रदातारमाविशतेति, तथा हैनममुत्रागच्छन्ति, बहुमया यज्ञकुणपी,—

[२] मै. १,३,३७ । तै. सं. ६,६,१ । कपि. ४४,४ । वा. ७,४५-४६ । काण्व. ९,१०—११ ।

ति ह स्माह यज्ञवचा राजस्तम्बायनः, प्र वा इतो मनुष्या दक्षिणाश्च्यावयन्ति, नामुत्र
गछन्तीति, यदाहा,—ऽनवहायास्मान् देवयानेन पथा सुकृतां लोके सीदत, तन्नः सꣳस्कृत-
५
मिति, तथा हैनमिहं चामुत्र चागछन्ति ॥ २ ॥

घ्नन्ति वा एतत्सोमꣳ यदभिषुण्वन्ति, यज्ञꣳ वा एतद् घ्नन्ति, यद्दक्षिणा दीयन्ते यज्ञꣳ
वा एतद्दक्षयन्ति, तद्दक्षिणानां दक्षिणात्वꣳ, यच्चदक्षयन्ति, स्वर्गो वै लोको माध्यंदिनꣳ
सवनꣳ, यन्माध्यंदिने सवने दक्षिणा दीयन्ते, स्वर्गस्य लोकस्याक्रान्त्यै, बहु देयꣳ,
सेतुꣳ वा एतत् कुरुते, स्वर्गस्य लोकस्य समष्ट्यै, हिरण्यꣳ हस्ते भवत्यं,—ग्र नयति,
सत्यꣳ वै हिरण्यꣳ, सत्येनैवैना नयत्यं,—ग्रेण गार्हपत्यं, जघनेन सद,—स्ता उदीचीरुत्सृ-
जन्त्यन्तरा चात्वालं चाग्नीध्रं चै,—तेन वा अङ्गिरसः स्वर्गं लोकमायꣳ,—स्तमेवैना पन्थामपिन-
यति, द्वाभ्यां गार्हपत्ये जुहोती,—मां तेनाक्रमत, आग्नेय्याग्नीध्रे, ऽन्तरिक्षं तेना,—ऽथ यद्द-
क्षिणा दीयन्ते स्वर्गं तेन लोकं,—मग्नीधेऽग्रे ददाति, यज्ञमुखꣳ वा अग्नीद्, यज्ञमुखमेवं नापा-
रा,—दथो अग्निर्वै सर्वा देवता, देवता एवास्य तयाभीष्टाः प्रीता भवन्ति, ब्रह्मणे ददाति,
प्राजापत्यो वै ब्रह्मा, प्रजापतिमेवं तया प्रीणात्यृ,—त्विग्भ्यो ददाति, होत्रा एवं तया प्रीणाति,
याꣳ सदस्येभ्यो ददाति सोमपीथं तया निष्क्रीणीते, यामार्षेयाय शुश्रुवुषे ददाति छन्दाꣳसि तया
प्रीणाति, न हि तस्मादर्हन्ति सोमपीथं निष्क्रीयꣳ, यामार्षेयाय शुश्रुवुषे ददाति देवलोके तया
ऋध्नोति, यामनार्षेयाय शुश्रुवुषे मनुष्यलोके तया, यामप्रसृप्ताय ददाति वनस्पतयस्तया प्रथन्ते,
याꣳ याचमानाय ददाति भ्रातृव्यं तया जिन्वति, यां भीषा क्षत्रे तया नह्याति, यां प्रविनुदते
सा व्याघ्री दक्षिणा, यत्तां पुनः प्रतिगृह्णीयाद् व्याघ्र्येनं भूता प्रव्लिनीया,—दन्यया सह
प्रतिगृह्या, तथा हैनं न प्रव्लिनाति, यदजं ददात्या,—ग्नेयो वा अजो, ऽग्नेरेवं तेन प्रियं
धामोपैति, यदवि ददात्यन्तरिक्षं तेनापजयति, यद्गां ददाति, वैश्वदेवी गौ,—र्विश्वेषां
देवानां तया प्रियं धामोपैति, यद्वासो ददाति, सर्वदेवत्यꣳ वै वासो, देवता एवास्य
तेनाभीष्टाः प्रीता भवन्ति, यत् कृतान्नं ददाति माꣳसं तेन निष्क्रीणीते, यदनो वा रथꣳ वा
शरीरं तेन, यद्धिरण्यं ददात्यायुस्तेन वर्षीयः कुरुते, यदश्वं ददाति, प्राजापत्यो वा अश्वः,
प्रजापतेरेवं तेन प्रियं धामोपैत्यं,—थो अमुष्यादित्यस्य लोकं जयत्य,—न्तश्चः प्रतिहर्त्रे देयꣳ,
रौद्रो वै प्रतिहर्ता, यन्मध्यतः प्रतिहर्त्रे दद्यान्मध्यतो रुद्रमन्ववनयेत्, तस्मादन्ततः, प्रतिहर्त्रे

[३] मै. १,३,३७ । तै. सं. ६,६,१ । कपि ४४,४—५ ।

देवा२, स्वर्भानुर्वा आसुरः सूर्यं तमसाविध्यत्, तमत्रिरन्वपश्यद्, यदात्रेयाय हिरण्यं
ददाति तम एवापहत्य, ऽथो ज्योतिरुपरिष्टाद्दधाति, स्वर्गस्य लोकस्यानुख्यात्यै ॥ ३ ॥ ६

विश्वरूपो वा एतन्त्वाष्ट्रो यज्ञस्य व्यृद्धममन्यत, यदृक्सामे व्युह्येते स एतान्यपश्यद्, यज्ञस्य
निष्कृत्यै, यदेवात्र यज्ञस्य व्यृद्धं तस्यैतानि निष्कृत्यै हूयन्ते, षडृग्म्याणि भवन्ति, षड्वा
ऋतव, ऋतुष्वेव प्रतितिष्ठति, त्रीणि यजू२षि, त्रीणि वै सवनानि, सवनान्येवा-
प्नोति, नवैतानि समिष्टयजू२षि जुहोति, नवभिर्बहिष्पवमाने स्तुवते, तन्नव, नव
प्राणाः, प्राणानेवात्मन् धत्त, ऊर्ध्वस्तिष्ठन् जुहोत्यू,—र्ध्वो हि तिष्ठन् वीर्यवत्तरो, यं द्विष्यात्
तस्य तूष्णीं तिष्ठन् जुहुयाद्, प्राणानस्यान्तरेति, संततं जुहोति, प्राणाना२ संतत्या,
अविच्छिन्दन् जुहोति, प्राणानामविच्छेदाय, यद्विच्छिन्द्यात् प्राणान् विच्छिन्द्याद्, यं द्विष्यात्तस्य
विच्छिन्द्यात्, प्राणानस्य विच्छिनत्ति, समानेन विग्राहं जुहोति, समानो ३ह्यमे प्राणा, यज्ञस्य
वा एता आर्णी, एतौ वै विश्वामित्रो यज्ञस्यार्णी अपश्यत्, तद् यज्ञस्यैवैता आर्णी क्रियेते,
यतो यज्ञ आदीयेत तत् पुनर्निधेया, इति ह स्माह भरद्वाजो, यतो वा एतद्यज्ञ आदीयते
तत् पुनर्निधीयते ॥ ४ ॥ ७

पञ्चसवनो वै यज्ञ,—स्त्रीणि सवनान्यवभृथो, ऽनूब३न्ध्या सवनानां पञ्चमी, पाङ्क्तो
यज्ञो, यावानेव यज्ञस्तमालभ्य, यद्वै यज्ञस्यातिरिच्यते तद्वरुणो गृह्णात्य,—तिरिक्त२ वा एत-
द्यज्ञस्य यदृजीषो, ऽधिषवणमाधिषवणे, तस्मात्तेनावभृथमभ्यवयन्त्य,—३पोऽभ्यवयन्त्या,—पो
हि वरुणः, स्थावरा अभ्यवयन्ति, ता हि साक्षाद्वरुणो, यद्वहन्तीरभ्यवेयुः पशून्निर्वहेयु,—
रथ यत् स्थावरा अभ्यवयन्ति, पशूनामनिर्वाहाया,—ऽपो वै वरुणो, वातो वरुणो, यदु-
दञ्चोऽवभृथमभ्यवेयुरमीयतः प्रजा वरुणो गृह्णीया,—दथ यद्दक्षिणावभृथमभ्यवयन्ति यजमानस्य
निर्वरुणत्वायो,—रु२ हि राजा वरुणश्चकारे,—ति चात्वालात् प्रयन्तो वदन्त्ये,—ष वा अपरिपरः
पन्था अरक्षस्यो येनासा आदित्य एत्य,—ध्व वा एतदादित्यस्य पथ इति, शतं ते राजन्
भिषजः सहस्रमित्य,—पः पुरा दध्य वदन्त्य,—पो वा एतद्रूपन्ति, पूताभिराभिः पूताश्चरन्त्ये,-
—ककपाला भवन्ति, न वै पुरुषः कपालैराप्य, एकधैवैनमाप्नोत्य,—थो एका वा इयं,—

[४] मै. १,३,३८ ; तै. सं. ६,६,१ ।
[५] मै. १,३,३९ ; तै. सं. ६,६,३ ; कपि. ४५,५ ; का. ८,२३,२४,२७ ; १०,१९,२३ ; ३८,२५ । काण्व. ९,२३,
२५—२६ ; २२,४,७ ; ३८,२४ ।
[उरुं हि राजा० । म. १,२४,८. तै. सं. १,४,४५,१]

मस्यामेव प्रतितिष्ठति, तृणं प्रास्य जुहोत्य,—ग्निमत्येव जुहोत्यायतनवत्य,—न्धोऽध्वर्युः स्याद्,
यदनायतने जुहुया,—दपबर्हिषः प्रयाजान् यजति, प्रजा वै बर्हिः, प्रजा एव मृत्योरुत्सृजत्या,-
—ज्यभागौ यजति, यज्ञतायै, वरुण२ यजति, निर्वरुणताया, अग्नीवरुणौ यजत्यु,—
भयत एवैन२ वरुणान् मुञ्चति, नानुयाजान् यजति, न स२स्थापयन्त्य,—तिरिक्तमिव हि
तन्मन्यन्ते, समुद्रे ते हृदयम३प्स्वन्त,—रिति सह स्रुचोपमारयति, यदेवात्र क्रूरं क्रियते तच्
शमयत्य,—वभृथ निचुङ्कुणेत्य,—वभृथ एवास्यैष, ततो य ऋजीष उत्प्लवते तं भक्षयन्ति,
सोमपीथमिव हि तन्मन्यन्ते, वरुणो वा ऋजीषो, यद्भक्षयेद्वरुणमात्मन्यञ्जीत, तदाहु,—र्भ-
क्षयितव्यमेव, पशवो वा ऋजीषः, पशूनेवात्मन्यङ्क्ता इति, विचृत्तो वरुणस्य पाशा इति,
वरुणपाशमेव विष्यति, प्रत्यस्तो वरुणस्य पाशा इति, वरुणपाशमेव प्रत्यस्यति, नमो वरु-
णस्य पाशायेति, वरुणपाशायैव नमोऽक,—रङ्गिरसो वा उत्तिष्ठतो रक्षा२स्यनूदतिष्ठ२,—स्तान्वा
एतेन बृहस्पतिरन्ववैत्, तेनैभ्यो रक्षा२स्यपाहन्, यदेतेनान्ववैति, रक्षसामपहत्यै, यद्-
ध्वस्तोभं तेन बार्हस्पत्यं,—मथ यत् त्रिस्तोभं, त्रयो वा इमे लोका, एभ्यो वा एतल्लोकेभ्यो
यज्ञाद्रक्षा२स्यपहन्ति, यदतिछन्दसा, सर्वाणि वै छन्दा२स्यतिछन्दाः, सर्वैर्वा एतच्छन्दो-
भिर्यज्ञाद्रक्षा२स्यपहन्ति, यदाग्नेय्या,—ग्निर्वै सर्वा देवताः, सर्वाभिर्वा एतद्देवताभिर्यज्ञाद्रक्षा२-
स्यपहन्त्य,—३पोऽभ्यवयन्त्या,—पो वै रक्षोघ्नी,—रपो रक्षा२सि न तरन्ति, रक्षसामपहत्या,
अनपेक्षमाणा आयन्ति, वरुणस्याननववायाय, परोगोष्ठं मार्जयन्ते, परोगोष्ठमेव वरुणं निर-
वदयन्ता, एधोऽस्येधिषीमहीति, निर्वरुणा एव भूत्वैधितमुपयन्ति, समिदसि, समेधिषी-
महीति, समिद्ध्या एव ॥ ५ ॥ ८

यः कामयेत, सर्वो मे यज्ञः स्यात् सरसा इति, स एतास्तिस्रो वशा आलभेत, यज्ञस्य
सर्वत्वाया,—ऽथो सरसत्वाय, वैश्वदेवीं मध्यत आलभेत, रेतो वा एतन्मध्यतो दधाति,
मध्यतो हि रेतोऽनिरुक्तया प्रचरन्त्य,—निरुक्तमिव हि रेतो, यातयाम२ वा एतस्य देवताश्च ब्रह्म
च, यद्वैश्वदेवीं च बार्हस्पत्यां च वशे भवतो, देवतानां च ब्रह्मणश्चायातयामत्वाय, दुग्धानि
वा एतस्य छन्दा२सि यातयामानि भवन्ति, छन्दस्येव रसं दधाति, बार्हस्पत्यामन्तत आल-
भेत, ब्रह्म वै बृहस्पति,—र्ब्रह्मणि वा एतदन्ततो यज्ञस्य यजमानः प्रतितिष्ठति, यद्वै यज्ञः
संतिष्ठते मित्रोऽस्य स्विष्ट२ युवते, वरुणो दुरिष्ट२, यन्मैत्रावरुण्यनूब३न्ध्या भवति मित्रेण वा

[६] कपि. ४५, ६ ।

एतन्मित्राद्यज्ञस्य स्विष्टं मुञ्चति, वरुणेन वरुणाद्दुरिष्ट,—मुभयत एनं मुक्त्वा यजमानाय प्रयच्छति,
यथा वै लाङ्गलेनोर्वरां प्रभिन्दन्त्येवमृक्सामे यज्ञं प्रभिन्दन्ति, यथा मत्यमन्ववास्यत्येवमेषा
यज्ञस्य, यदुष्टुत२ यदशस्त२ यद्विलोमं यदुदृता कल्पयति, विदेशे वा ईजानः, सदेवोऽनी-
जाना, आ ह्यनीजाने देवता श२सन्ते, यथा वा अनड्वान् विमुक्तोऽपक्रामत्येवमीजानाद्देवता
अपक्रामन्ति, यदाग्नेय उदवसानीयो भवत्य,—ग्निर्वै सर्वा देवता, देवता एव पुनरालभते,-
ऽष्टाकपालो भवति, गायत्री३ह्यग्निर्गायत्रछन्दाः, पञ्चकपालः का३यः, पाङ्क्तो यज्ञो,
यावानेव यज्ञस्तमालभ्य, यत्र वा अ३दोऽग्नौ पुरुषं प्रमीतमादधति तदेनमभि सत्य२, सर्वा
एनमन्या देवता जहत्य,—ग्निरेनं देवतानां न जहाति ॥ ६ ॥ ९

प्र वा ऋचा ह प्रयच्छति, यजुषा गमयति ग्रहेण, स्तोत्राय वा ऋक्, शस्त्राय यजुः,
संवद्धे वै स्तोत्रं च शस्त्रं च, संवद्धे ऋक् च यजुश्चो,—च्चैरृचा क्रियत, उच्चैः साम्नो,—पा२शु
यजुषा, ते देवा अमन्यन्त,—द२ यज्ञस्य शिथिरमिति, तत् पुरोरुचमुपादधु,—रशिथिरत्वाय,
देवता वै सर्वा आश२सन्ते ग्रहे गृह्यमाणे, मह्यं गृह्णाति मह्यं गृह्णातीति, यत् पुरोरुग, देव-
ताना२ व्यावृत्त्यै ॥ जीवा नाम स्थ, ता इमं जीवयत, जीविका नाम स्थ, ता इमं
जीवयत, संजीवा नाम स्थ, ता इम२ संजीवयत ॥ इति यवानेकवि२शतिं दर्भपिञ्जूलानि
चात्वाले परिहृत्य,—दशाभिमन्त्रयेत ॥ प्राणापानौ त उपा२श्वन्तर्यामौ पाता२, व्यानं
त उपा२शुसवनः पातु, वाचं त ऐन्द्रवायवः पातु, दक्षक्रतू ते मैत्रावरुणः पातु, श्रोत्रं त
आश्विनः पातु, चक्षुषी ते शुक्रामन्थिनौ पाता,—मात्मानं त आग्रायणः पात्व,—ङ्गानि त
उक्थ्यः पात्वा,—युस्ते ध्रुवः पातु, स्तनौ त ऋतुपात्रे पातां, मूर्धानं ते द्रोणकलशः पातु,
कुक्षी ते कलशौ पातां, पृष्टपते चक्षुषे चक्षुः सने सानि२ वाचे वाचं प्राणाय प्राणं पुनर्देह्यस्मै
स्वाहा ॥ इति जुहुया,—देतद्ध स्म वा आह वासिष्ठः सात्यहव्यः, पात्रेषु वा अहं तद्ब्राह्मण२
वेद, यथा पुरुषः सकृदाहितमादधीत सर्व२स्यैव कुर्यात् ततः पुरा, यत् पुनः कुर्वीत प्रमीयेत,
यद्यु म्रियेरन्देवदेवे यज्ञक्रतुत्वायाभिमन्त्रयेत ॥ पुनस्तिरश्चा ॥ ७ ॥ १०-१५

पुनरन्यानि पात्राणि प्रयुज्यन्ते, नान्यानि, यानि पुनः प्रयुज्यन्ते तान्यस्मै लोकाय,
यानि न पुनः प्रयुज्यन्ते तान्यमुष्मै लोकाया,—ऽथैतदुक्थ्यपात्रं पुनः प्रयुज्यत, आरण्यान्वा

[८] तै. सं. ६,५,११ ।

एतत् पशून् प्रत्या,—रण्यानेवैतेन पशून् दाधार, यदेतत् पुनः प्रयुज्यते तस्मादेतान् पश्यतः
परीत्य मन्त्य,—थैतदृतुपात्रं पुनः प्रयुज्यते, ऽश्व२ वा एतत् प्रत्य,—श्वमेवैतेन दाधार, यदे-
तत् पुनः प्रयुज्यते तस्मादेतस्याश्वस्येवाधस्ताच् शफौ, ऽथैतदादित्यपात्रं पुनः प्रयुज्यते, गा२
वा एतत् प्रति, गामेवैतेन दाधार, यद्भूयिष्ठाभिर्ऋग्भिर्भूयिष्ठः सोमो गृह्यते तस्माद्गौर्हन्यमा-
नाद्यमाना पशूनां भूयिष्ठा,—ऽथैतच्छुक्रपात्रं पुनः प्रयुज्यते, पुरुष२ वा एतत् प्रति,
पुरुषमेवैतेन दाधारा,—ऽसौ वा आदित्यः शुक्रो, रश्मय ऋतवो, ऽन्तरमृतुपात्र२, शुक्रपात्रं
पुनः प्रयुज्यते, ऽन्तरे३ह्यमुष्मादादित्याद्रश्मयो, ऽथैतदुपा२शुपात्रं पुनः प्रयुज्यते, ऽवि२ वा
एतत् प्रत्य,—विमेवैतेन दाधारा,—ऽथैतदन्तर्यामपात्रं पुनः प्रयुज्यते, ऽजा२ वा एतत् प्रत्य,-
—जामेवैतेन दाधार, प्रजापतिर्वा आग्रायणो, यदेष पुनः प्रयुज्यते तस्मात् प्रजापतिः प्रजा
वेद, प्रजापतेर्वा एतत् पात्र२ यद् द्रोणकलशो, यदेष पुनः प्रयुज्यते तस्मादयं क्षयोऽस्ति,
सप्त वै पात्राणि पुनः प्रयोगमर्हन्ति, तानि हि बन्धुमन्ति सप्त छन्दा२सि, छन्दा२सि वाग्,
यावत्येव वाक्तामाप्नोति, सप्त छन्दा२सि, सप्त होत्राः, सप्त ग्राम्याः पशव,—स्तानेवाव-
रुन्द्धे, त्रीणि वै पात्राणि प्रत्यक्षबन्धूनि, परोक्षबन्ध्वेवान्यत् सर्वं, गायत्र्यैन्द्रवायवं,—स्त्रिष्टुप्
शुक्रो, जगत्याग्रायणो, ऽछिद्र२ स्रावयितव्यः, कामो हास्य समर्धुको भवत्य,—थो
अञ्जीमूतवर्षी पर्जन्यो भवति, न चमसमभ्युपाकुर्याद्, यच्चमसमभ्युपाकुर्याद्गर्भमृतः प्रजाः स्यु,-
—र्यैनैवाग्रे सर्पन्ति तेन पुनः सर्पेयु,—र्यदन्येन सर्पेयुर्गर्भा वेष्टुकाः स्यु,—र्यूपेन वा आहुतयः स्वर्गं
लोक२ यन्त्य,—ध्वर्युणा दक्षिणा, ऊर्ध्वो यूपो मीयत, ऊर्ध्वस्तिष्ठन् प्रतिगृणाति,
स्वर्गस्य लोकस्य समष्ट्यै ॥ ८ ॥ १६

यो ज्येष्ठबन्धुः स्यात् स ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीता,—ऽग्र२ ह्यैन्द्रवायवो, य आमयावी स
मैत्रावरुणाग्रान्, प्राणापानौ हि मित्रावरुणौ, यः पश्चात् सोमपीथः स आश्विनाग्रान्, पश्चेव
३ह्येतौ सोमपीथमाश्नुवाता२, यो ब्रह्मवर्चसकामः स शुक्राग्रा२,—स्तेजो वै शुक्रो ब्रह्मवर्चस२,
योऽभिचरेत् स मन्थ्यग्रा,—नार्त२ वा एतत् पात्र२ यन्मन्थिपात्र२, य आनुजावरः स आग्रा-
यणाग्रा,—नग्र२ ह्याग्रायणं, एति वा एष यज्ञमुखाद्य ऐन्द्रवायवाग्रेभ्यो ग्रहेभ्योऽन्याग्रान् ग्रहान्
गृह्णीते, धारयेयुस्त२ यं कामाय गृह्णीया,—दैन्द्रवायव२ सादयेद्, यथापूर्व२ वा एतद्

[९] कपि. ४६,६ ; का. २,११;१३,५;१०,३०;१९,६,२३,१८ । काण्व. २,१९,१४;५,११,४५;११,५;२५,४० ।

क्रियते, न यज्ञमुखादिति, यद्याग्रायणः स्कन्देदेषु वा दस्येदितरेभ्यो ग्रहेभ्यो निर्गृह्णीयाद्, यथा पिता पुत्रान् क्षित उपधावत्येवं तद्, यदीतरे ग्रहाः स्कन्देयुरेषु वा दस्येयुराग्रायणान्निर्गृह्णीयाद्, यथा पुत्राः पितरं क्षित उपधावन्त्येवं तद् द्रोणकलशान्निर्गृह्णन्त, एष वा एतेषाꣳ योनिः, स्वादेव योनेर्निर्गृह्णन्ते, ऽस्कन्नत्वाय, सोमः स्कन्त्स्यति, तमितो ग्रहीष्यामीति, तस्य वा एष परिशये, यदा वा एतमुवनयत्यथैष उभयतःशुक्रो, ऽथो सर्वतःशुक्रः, पशुभिर्वा एष व्यृध्यते यस्य सोमः स्कन्दति, व्यस्य यज्ञश्छिद्यते, पशवो वै पृषदाज्यꣳ, यत् पृषदाज्यं जुहोति, पशुभिरेवैनꣳ समर्धयति, मनो ज्योतिर्जुषतामाज्यस्य विच्छिन्नꣳ यज्ञꣳ समिमं दधात्विति, यज्ञमेव संदधाति ॥ वर्धतां भूतिर्दध्ना घृतेन मुञ्चतु यज्ञꣳ यज्ञपतिमꣳहसः । स्वाहा ॥ इति जुहुया,—दिर्यꣳ वा एतद्यज्ञस्य गृह्णाति यदाछेती,—यं भूति—रस्या एवैनदधि मुञ्चति, द्रप्सश्चस्कन्द पृथिवीमनु द्यामित्य,—भिमृशति, होत्रास्वेवैनत् प्रतिष्ठापयति, त्रयस्त्रिꣳशद्३पोऽन्वतिपिञ्चत्या,—पो हि यज्ञो, यज्ञꣳ वा एतस्य विभ्रशते यस्य पशुꣳ विभ्रशते, व्यस्य यज्ञश्छिद्यते, यदुवदानं न विन्देत्तदाज्यस्यावद्येत्, सर्वा वा अन्या देवता यातयाम्नीः, प्रजापतिरेवायातयामा, प्राजापत्यमाज्यं, प्राजापत्या देवाः, प्रजापतिहुतमेवास्य भवति, यदि कामयेत, यं पशुꣳ व्यमाथिषत तं आर्तिमार्छेयुरिति, कुविदङ्ग यवमन्तो यवं चिदिति, नमउक्तिमत्य ऋचाग्नीध्रे जुहुया,—न्नमउक्तीरेवैषाꣳ वृङ्क्ते, ताजगार्तिमार्छन्त्यं,—थैषाष्टापदी, यद्गर्भस्यावद्येद्वदानान्यतिरेचयेद्, यन्नावद्येत् प्रोक्षितस्य हविषो नावद्येद्, रसेन जुहोत्यं,—त्र प्रोक्षितस्य हविषो यति, नावदानान्यतिरेचयति॥९॥१७-१९

यथा वै शालैवꣳ सꣳवत्सरं,—स्तस्य यथा पक्षसी एवं पक्षसी, यथा मध्यमो वꣳशं एवं दिवाकीर्त्यꣳ, यथा वा इदꣳ शालायाः पक्षसी मध्यमꣳ वꣳशमभिसमागच्छन्त्येवꣳ वा एतत् सꣳवत्सरस्य पक्षसी, दिवाकीर्त्यमभिसंतनोति, यथा मध्यमो वꣳशं एवं दिवाकीर्त्यꣳ, यदेषं शिथिरः स्यादवशीर्येत, यदेतस्मिन्नहन्येते ग्रहा गृह्यन्ते, ऽह्नो द्रढिम्नेऽशिथिरत्वाय, शुक्राग्रा एतदहर्ग्रहा भवन्ति, त्रैष्टुभो वै शुक्र,—स्त्रैष्टुभमेतदहः प्रत्युत्तब्ध्यै सयत्त्वाय, सौर्यो ग्रहो गृह्यते, सौर्यः पशुरालभ्यते, ऽसा आदित्य एतदह,—स्तꣳ साक्षादाप्नोति, षड् ग्रहा गृह्यन्ते,

[द्रप्सश्चस्कन्द पृथिवी० । ऋ. १०,१७,११; अथर्व. १८,४,२८; तै. सं. ३,१,८,३; ४,२,८,२,९,५; तै. आ. ६,६,१ । कुविदङ्ग यवमन्तो० । ऋ. १०,१३१,२; अथर्व. २०,१२५,२; तै. सं. १,८,२१,१;५,२,११,२; तै. ब्रा. २,६,१,३]

पशुः सप्तम आलभ्यते, सप्त वै शीर्षन् प्राणा, असा आदित्यः शिरः, शीर्षन् वा एतत् प्राणान् दधाती,—न्द्रो वै वृत्रमह,—न्त्स इमं लोकमभ्यजय,—दमुं तु लोकं नाभ्यजयत्, तꣳ विश्वकर्मा भूत्वाभ्यजयद्, यद्वैश्वकर्मणो ग्रहो गृह्यते, ऽमुष्य लोकस्याभिजित्यै, यन्ति वा ए३तेऽस्माल्लोकाद्ये वैश्वकर्मणं ग्रहं गृह्णते, पराञ्चो हि यन्तीश्वराः प्रमेतोः, श्वो भूत आदित्यं गृह्णीर,—न्नियꣳ वा अदितिरियं प्रतिष्ठा, यदादि३त्यो, ऽस्यामेव प्रतितिष्ठन्ति, तयोरन्यमन्यमा पुरोधात् पक्षसा गृह्णीरन्, विश्वमन्येन कर्म कुर्वाणा यन्ती,—यꣳ वा अदिति,—रस्यामन्येन प्रतितिष्ठन्ति, ता उभौ सहार्के गृह्णीरन्नन्तं गत्वा, ऽन्तमेव गत्वोभयोर्लोकयोः प्रतितिष्ठन्त्या,—दित्येनास्मिल्लोके, वैश्वकर्मणेनामुष्मिन् ॥१०॥ २०

[२३१०]

॥ इति खिलकाण्डे अष्टमः प्रपाठकः ॥ ८ ॥

अथ नवम प्रपाठकः

प्रवर्ग्यः ।

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः ॥ १
देवस्य त्वा सवितुः प्रसवे३ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ अभ्रिरसि नारिरसि ॥
२-३
उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे । उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ ४
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः॥५
देवी द्यावापृथिवी अनु मेऽमꣳसाथा,—मृध्यासमद्य मखस्य शिरः ॥ मखाय त्वा ॥ मखस्य
त्वा शीर्ष्णे, देवीर्वम्रीरस्य भुवनस्य प्रथमजा ऋतावरी,—र्ऋध्यासमद्य मखस्य शिरः ॥ मखाय
त्वा ॥ मखस्य त्वा शीर्ष्णे ॥ इयत्यग्र आसीदतो देव्य,—ध्यासमद्य मखस्य शिरः॥ मखाय त्वा॥

[१] तै. आ. ४,२-३ । वा. ५,१४;११,४;३७,२;१,१०,२१,२४,२,११,५,२१,२६,६,१,९,३०,९,३०,३८—४०;११, ९,२८;१८,३७,२०,३;३७,१;३८,१,११,१०,३४,५६;३३,८९,३७,३—१९,११,६०—६३,५७,६५;३८,१७ । कान्व. ५,१९;१२,४;३७,२,१,१३,३६,४०;२,२२,५,२८,३३;६,१,१०,४३;१०,३९,११,४;१२,९,२८;२०,७; २१,९३,३७,१;३८,१;१२,२०;३३,४४;३७,३-१०; ११,५९,६१-६६;३८,१७ । [युञ्जते मन उत० । ऋ. ५, ८१,१; तै. सं. १,२,१३,१; ४,१,१,१; तै. आ. ४,२,१ । देवस्य त्वा सवितुः० । अथर्व. १९,५१,२ । उत्तिष्ठ ब्रह्मणस्पते० । ऋ. १,४०,१; तै. आ. ४,२,२ । प्रैतु ब्रह्मणस्पतिः० । ऋ. १,४०,३; सा. ५६; तै. आ. ४,२,१]

मखस्य त्वा शीर्ष्णे ॥ इन्द्रस्यौजोऽसि प्रजापते रेतः ॥ ऋध्यासमद्य मखस्य शिरः ॥ मखाय त्वा ॥
मखस्य त्वा शीर्ष्णे ॥ मधु त्वा मधुला कृणोतु ॥ मखस्य शिरोऽसि ॥ यज्ञस्य पदे स्थः ॥ गायत्रो
ऽसि ॥ त्रैष्टुभोऽसि ॥ जागतोऽसि ॥ मखस्य रास्नासि ॥ सूर्यस्य रसा आश्रयस्व ॥ वृष्णो अश्वस्य
निष्पदासि, वृष्णस्त्वाश्वस्य निष्पदा धूपयामासि ॥ वरुणस्त्वा धृतव्रतो धूपयतु मित्रावरुणौ ध्रुवेण
धर्मणा ॥ अदितिष्ट्वा देवी विश्वदेव्यवती पृथिव्याः सधस्थे अङ्गिरस्वत्खनत्ववट, देवानां त्वा
पत्नीर्देवीर्विश्वदेव्यवतीः पृथिव्याः सधस्थे अङ्गिरस्वद्दधतु महावीरान् ॥ ६-२८
अर्चिषे त्वा शोचिषे त्वा ज्योतिषे त्वा हरसे त्वा ।
अभीमान्महिना दिवो मित्रो बभूव सप्रथाः ॥ २९
३०
उत श्रवस आ पृथिवीम् ॥
मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ॥ ३१
देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्या ॥ ३२
ऋजवे त्वा, साधवे त्वा, सुक्षित्यै त्वा ॥ इदमहममुमामुष्यायणं तेजसा ब्रह्मवर्चसेन पर्यूहामि ॥ इदमहममुमामुष्यायणꣳ विशा क्षत्रेण पर्यूहामि ॥ इदमहममुमामुष्यायणं प्रजया पशुभिः पर्यूहामि ॥ छृणत्तु त्वा वाक्, छृणत्तु त्वोर्क्, छृणत्तु त्वा हविः ॥ देवपुरश्चरस, ऋध्यासं
३३-३८
त्वा ॥ १ ॥
नमो वाचे, नमो वाचस्पतये, या चोदिता या च नोदिता तस्यै वाचे नमो, नमा ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रविद्भ्यो मन्त्रपतिभ्यो, मा मामृषयो मन्त्रकृतो मन्त्रविदः प्रादु,—र्दैवीꣳ वाचमुद्यासं जुष्टां देवेभ्यः स्वधावरीं पितृभ्योऽनुमतान्मनुष्येभ्य,—स्तन्मा देवा अवन्तु शोभायि, पितरोऽनुमदन्तु ॥ गायत्रीं छन्दः प्रपद्ये, त्रिष्टुभं छन्दः प्रपद्ये, जगतीं छन्दः प्रपद्ये, ऽनुष्टुभं छन्दः प्रपद्ये, पङ्क्तिं छन्दः प्रपद्ये, छन्दाꣳसि छन्दः प्रपद्ये ॥ तानि नोऽवन्तु, तानि नः पालयन्तु, तानि सा ऋच्छतु यो अस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामो, होतर्घर्ममभिष्टु,—ह्याग्नीद्रौहिणौ पुरोडाशावधिश्रय, प्रतिप्रस्थातर्विहर, प्रस्तोतः सामानि
३९-४२
गाय ॥

[मित्रस्य चर्षणीधृतः० । ऋ. ३,५९,६; तै. सं. ३,४,११,५;४,१,६,३; तै. आ. ४,३,१]
[२] तै. आ. ४,१-४ । वा. ६,२१;२०,१९;३५,१२,३६,२३;३८,१३ । कान्व. ६,३१;२२,४;३५,४५;३६,२३;३८,१३।
[यो अस्मान् (ऽस्मान्) द्वेष्टि० । अथर्व १०,५,१५—२१,२५—३५,१६,७,५]

यजुर्युक्तꣳ सामभिराक्तखं त्वा विश्वाभिर्धीभिः संभृतं दक्षिणाभिः ।
प्रततं पारयिष्णुꣳ स्तुभो वहन्तु सुमनस्यमानाः ॥ ४३
भूर्भुवः स्व,—र्देवस्य सवितुः प्रसवे, बृहस्पतिप्रसूता ॥ ४४
ओमिन्द्रवन्तः प्रचरत ॥ २ ॥ ४५
यमाय त्वा ॥ मखाय त्वा ॥ सूर्यस्य हरसे त्वा ॥ देवस्त्वा सविता मध्वानक्तु ॥ पृथिव्याः
संपृचस्पाहि ॥ अर्चिषे त्वा, शोचिषे त्वा, ज्योतिषे त्वा, तपसे त्वा ॥ अर्चिरसि, शोचिरसि, ज्योतिरसि, तपोऽसि, सूर्यस्य तपस्तप ॥ ४६-५२
सꣳसीदस्व महाꣳ असि शोचस्व देववीतमः । वि धूममग्ने अरुषं मेध्य सृज प्रशस्त दर्शतम्॥ ५३
अञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तो नाग्निना तपन्तः ।
पितुर्न पुत्र उपसि प्रेष्ठा आ घर्मो अग्निरमृतो न सादि ॥ ५४
अनाधृष्टासि पुरस्ता,—दग्नेराधिपत्या, आयुर्मे दाः, पुत्रवती दक्षिणत, इन्द्रस्याधिपत्ये, प्रजां मे दाः॥ सुषदा पश्चात्, सवितुराधिपत्ये, चक्षुर्मे दाः ॥ आश्रुतिरुत्तरतो, मित्रावरुणयोराधिपत्ये, श्रोत्रं मे दाः ॥ विधृतिरुपरिष्टाद्, बृहस्पतेराधिपत्ये, वाचं मे दाः ॥ ब्रह्म मे दाः, क्षत्रं मे दाः, पयो मे दाः ॥ मनोरश्वासि भूरिपुत्रा सुपसदना, विश्वाभ्यो मा दुꣳश्राभ्यस्पाहि
॥ ३ ॥ ५५-६०
चिदसि ॥ स्वाहा मरुद्भ्यः परिश्रयस्व ॥ मासि ॥ प्रमासि ॥ प्रतिमासि ॥ विमासि ॥ संमासि ॥ उन्मासि ॥ अन्तरिक्षस्यान्तर्धिरसि ॥ दिवः संपृचस्पाहि ॥ ६१-७०
अर्हन् बिभर्षि सायकानि धन्वा । अर्हन्निष्कꣳ यजतꣳ विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमा धन्वा । ओजीयो रुद्रस्तदस्ति ॥ ७१
गायत्रोऽसि ॥ त्रैष्टुभोऽसि ॥ जागतमसि ॥ मधु । मधु । मधु ॥ रुचितो घर्मः ॥४॥ ७२-७६

[३] तै. आ. ४,५,१—५। वा. ७,४७,३—१२;३८,९,१७;११,३७ । काण्व. ९,१३;३७,३-१३,३८,९,१७;११,३७।
[सꣳसीदस्व महां (महाँ) असि० । ऋ. १,३६,९; तै. सं. ४,१,३,३, तै. आ. ४,५,२, । अञ्जन्ति यं प्रथयन्तो० । ऋ. ५,४३,७; तै. आ. ४,५,१ । आयुर्मे दाः । अथर्व. २,१७,४ । चक्षुर्मे दाः । अथर्व. २,१७, ६ । श्रोत्रं मे दाः । अथर्व २,१७,५]
[४] तै. आ. ४,५,५—७ । वा. ४,१९;१९,५३;३७,१३ । काण्व. ४,२५;१३,५४;३७,१३ । [अर्हन् बिभर्षि सायकानि० । ऋ. २,३३,१०; तै. आ. ४,५,७]

दश प्राचीर्दश भासि दक्षिणा, दश प्रतीचीर्दश भास्युदीची,—र्दशोर्ध्वा भासि सुमनस्यमानः ॥ सा नः प्रजां पशून् पाह्यरणीयमानः ॥ अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु, स मा रुचितो रोचय ॥ पितरस्त्वा यमराजानः पितृभिर्दक्षिणतो रोचयन्तु, स मा रुचितो रोचय ॥ सविता त्वादित्यैः पश्चाद्रोचयतु, स मा रुचितो रोचय ॥ मित्रावरुणौ त्वोत्तरतो मरुद्भी रोचयेता२, स मा रुचितो रोचय ॥ बृहस्पतिष्ट्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु, स मा रुचितो रोचय ॥ देव घर्म रुचितस्त्वं देवेष्वा, सुरुचितं मा देवमनुष्येषु कुरु, रुचं मयि धेहि, रुचिरसि, रुचोऽसि, स यथा त्व२ रुच्या रोचस एवमह२ रुच्या रोचिषीय, तवेव मे रोचमानस्य रोचो भूयासु,—र्भ्राजिरसि, भ्राजोऽसि, स यथा त्वं भ्राज्या भ्राजस एवमहं भ्राज्या भ्राजिषीय, तवेव मे भ्राजमानस्य भ्राजो भूयासु,—र्भ्राजिरसि, भ्राजोऽसि, स यथा त्वं भ्राज्या भ्राजस एवमहं भ्राज्या भ्राजिषीय, तवेव मे भ्राजमानस्य भ्राजो भूयासुः ॥ ५ ॥ ७७-८४

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः ॥ ८५

गर्भो देवानां जनिता मतीनां पतिः कवीनां पतिः प्रजानां धर्ता क्षत्रस्य ॥ सं देवो देवेन सवित्रा यजत्र सं२ सूर्येण रोचते ॥ इदं त्वा, मनसे त्वा, दिवे त्वा, सूर्याय त्वा ॥ ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ ॥ धर्ता दिवो रजसो विभाति धर्ता, पृथिव्या धर्तोरोरन्तरिक्षस्य धर्ता ॥ देवो देवानाममर्त्यस्तपोजा अप्सु प्रावीः ॥ विश्वासां भुवां पते विश्वस्य भुवनस्पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते विश्वस्य ब्रह्मणस्पते ॥ देवश्रुत्त्वं देव घर्म देवान् पाहि तपोजान् ॥ वाजमस्मिन्नियंसिहि देवायुवम् ॥ मधु माध्वीभ्यां, मधु माधूचीभ्यां, मधुमान् देववीतये ॥ सममिरग्निनागत, सं देवो देवेन सवित्रा यजत्र, सं२ सूर्येणारोचिष्ट स्वाहा ॥ सममिस्तपसागत, सं देवो देवेन सवित्रा यजत्र, सं२ सूर्येणायुक्था,—ऽऽयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असि, पितासि पिता नो बोधिषीमहि त्वा, नमस्ते अस्तु, मा मा हि२सीः ॥ त्वष्ट्रिमन्तस्त्वा सपेम ॥ ६ ॥
८६-९८

[५] तै. आ. ४,६ । वा १६,६४—६६ । काण्व. १७,६४ ।
[६] तै. आ. ४,७,१—५ । वा. ३७,१४—२०,३,६३;१८,४३,२०,१,३८,१६ । काण्व. ३७,१४—१९;२०;२३;२१, ९३;३८,१६ । [अपश्यं गोपामनिपद्यमानमा० । ऋ. १,१६४,३१; १०,१७७,३, अथर्व. ९,१०,११; ऐ. आ. २,६; तै. आ. ४,७,१. नि. १४,३]

देवस्य त्वा सवितुः प्रसवे३ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ अदित्यै रास्नासि ॥ इडा एह्य,—सावेह्य,—दिता एह्य,—सावेहि, सरस्वत्येहु,—सावेहि ॥ ९९-१०१
यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ॥ १०२

अदित्या उष्णीषमसि ॥ पूषा त्वोपावसीदतु ॥ वायुरस्य,—श्विभ्यां प्रधापय ॥ घर्माय शंक्ष्व ॥ बृहस्पतिष्ट्वोपसीदतु ॥ दानवः स्थ ॥ पेरवः स्थ ॥ अश्विभ्यां पिन्वस्व ॥ सरस्वत्यै पिन्वस्वे,—न्द्राय पिन्वस्वे,—न्द्राय पिन्वस्व ॥ उप मेहि सहोजो भागेन ॥ मधुहविरसि, स्वाहा त्वा वाताय सूर्यस्य रश्मये सिता वृष्टिसनये संजुहोमि स्वाहा ॥ इन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजत्रा वेट् ॥ गायत्रमसि ॥ त्रैष्टुभमसि ॥ जागतासि ॥ द्यावापृथिवीभ्यां त्वा परिगृह्णामि ॥ अन्तरिक्षेणोपयच्छामि ॥ दिविस्पृङ् मा मा हि२सीः ॥ अन्तरिक्षस्पृङ् मा मा हि२सीः ॥ पृथिवीस्पृङ् मा मा हि२सीः ॥ तेजोऽसि, तेजोऽनुप्रेहि ॥ ७ ॥ १०३-१२३

सलिलाय त्वा वाताय स्वाहा, ऽर्णवाय त्वा वाताय स्वाहा, सिन्धवे त्वा वाताय स्वाहा, समुद्राय त्वा वाताय स्वाहा, शिमिद्वते त्वा वाताय स्वाहा, कुमुद्वते त्वा वाताय स्वाहा, ऽवस्यवे त्वा वाताय स्वाहा, दुवस्यवे त्वा वाताय स्वाहा, ऽनाधृष्याय त्वा वाताय स्वाहा, ऽप्रतिधृष्याय त्वा वाताय स्वाहा, ऽग्नये त्वा वसुमते स्वाहा, सोमाय त्वा रुद्रवते स्वाहे,—न्द्राय त्वा मरुत्वते स्वाहा, यमाय त्वा पितृमतेऽङ्गिरस्वते स्वाहा ॥ सवित्रे त्वर्भुमते विभुमते वाजवते बृहस्पतिवते विश्वदेव्यावते स्वाहा ॥ अहः केतुना जुषता२, स्वर्ज्योतिर्जुषता२ स्वाहा ॥ रात्रिः केतुना जुषता२, स्वर्ज्योतिर्जुषता२ स्वाहा ॥ ८ ॥ १२४-१२७

आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ ११

तनूनपात् पथ ऋतस्य यानान् मध्वा समञ्जन्त्स्वदया सुजिह्व।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ १२

नराशंसस्य महिमानमेषामुपस्तोषाम यजतस्य यज्ञैः।
ये सुक्रतवः शुचयो धियंधाः स्वदन्तु देवा उभयानि हव्या ॥ १३

[३] तै. ब्रा. ३,६,३ । काठ. १६,२० । वा. २९,२५—३५ । काण्व. ३१,३७—४७ । [समिद्धो अद्य मनुषो० । ऋ. १,११०,१; अथर्व. ५,१२,१; तै. ब्रा. ३,६,३,१; नि. ८,५; काठ. १६,२० । तनूनपात् पथ ऋतस्य० । ऋ. १०,११०,२; अथर्व. ५,१२,२; तै. ब्रा. ३,६,३,१; नि. ८,६; काठ. १६,२० । नराशंसस्य महिमानम्० । ऋ. ७,२,२; तै. ब्रा. ३,६,३,१; नि. ८,७; काठ. ३७,४]

आजुह्वाना ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः।
त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान् ॥ १४

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम्।
व्यु प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ १५

व्यचस्वतीरुर्विया विश्रयन्तां पतिभ्यो न जनयः शुम्भमानाः।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ १६

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥ १७

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ १८

आ नो यज्ञं भारती तूयमेत्विडा मनुष्वदिह चेतयन्ती।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥ १९

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ २०

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ ३ ॥ २१

अग्निर्होता नो अध्वरे वाजी सन् परिणीयते। देवो देवेषु यज्ञियः ॥ २२

[आजुह्वाना ईड्यो वन्द्यश्चा०(श्च) । ऋ. १०,११०,३; अथर्व. ५,१२,३; तै. ब्रा. ३,६,३,२; नि. ८,८; काठ. १६,२० । प्राचीनं बर्हिः प्रदिशा० । ऋ. १०,११०,४; अथर्व. ५,१२,४; तै. ब्रा. ३,६,३,२; नि. ८,९; काठ. १६,२० । व्यचस्वतीरुर्विया विश्रयन्तां० । ऋ. १०,११०,५; अथर्व. ५,१२,५; तै. ब्रा. ३,६,३,३; नि. ८,१०; काठ. १६,२०; आ सुष्वयन्ती यजते० । ऋ. १०,११०,६; अथर्व. ५,१२,६; तै. ब्रा. ३,६,३,३; नि. ८,११; काठ. १६,२० । दैव्या होतारा प्रथमा सुवाचा० । ऋ. १०,११०,७; अथर्व. ५,१२,७; तै. ब्रा. ३,६,३,३; नि. ८,१२; काठ. १६,२० । आ नो यज्ञं भारती० । ऋ. १०,११०,८; अथर्व. ५,१२,८; तै. ब्रा. ३,६,३,४; नि. ८,१३; काठ. १६,२० । य इमे द्यावापृथिवी जनित्री० । ऋ. १०,११०,९; अथर्व. ५,१२,९; तै. ब्रा. ३,६,३,४; नि. ८,१४, काठ. १६,२० । उपावसृज त्मन्या समञ्जन्० । ऋ. १०,११०,१०; अथर्व. ५,१२,१०; तै. ब्रा. ३,६,३,४; नि. ८,१७; काठ. १६,२०]

[४] तै. ब्रा. ३,६,४-६ । वा. ११,२५; ४,२०;१,१५ । काण्व. १२,२५; ४,२६; १,२३ । [अग्निर्होता नो अध्वरे० । ऋ. ४,१५,१; तै. ब्रा. ३,६,४,१; काठ. १६,२१;३८,१२]

परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव। आ देवेषु प्रयो दधत् ॥ २३
परि वाजपतिः कविः ॥ अजैदग्निरसनद्वाजं, नि देवो देवेभ्यो हव्यावाड्, प्राञ्जोभिर्हिन्वा-
नो धेनाभिः कल्पमानो यज्ञस्यायुः प्रतिरन्नुपप्रेष्य होतर्हव्या देवेभ्यो, दैव्याः शमितार उत
मनुष्या आरभध्व,—मुपनयत मेध्यादुर आशासाना मेधपतये मेधं, प्रास्मा अग्निं भरत, स्तृ-
णीत बर्हि,—रन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्य, उदीचीनां
अस्य पदो निधत्तात्, सूर्यं चक्षुर्गमयताद्, वातं प्राणमन्ववसृजता,—दन्तरिक्षमसुं, पृथिवीं
शरीर,—मेकधास्य त्वचमाछयतात्, पुरा नाभ्या अपिशसो वपामुत्खिदता,—दन्तरेवोष्माणं
वारयताच्, श्येनमस्य वक्षः कृणुतात्, प्रशसा बाहू, शला दोषणी, कश्यपेवांसां,—च्छिद्रे
श्रोणी, कवषोरू स्रे, कपर्णाष्ठीवन्ता, षड्विंशतिरस्य वङ्क्रय,—स्ता अनुष्ठ्योच्च्यावयताद्,
गात्रं गात्रमस्यानूनं कृणुता,—दूवध्यगोहं पार्थिवं खनता,—दस्रा रक्षः संसृजताद्, वनिष्टु-
मस्य मा राविष्टो,—रूकं मन्यमाना नेद्वस्तोके तनये रविता रव,—दध्रिगो शमीध्वं, सुशमि
शमीध्वं, शमीध्वमध्रिगो ॥ २४-२५
अध्रिगुश्च विपापश्च देवानां शमितारौ। २६
ता एनं प्रविद्वांसौ श्रपयतं यथास्य श्रपणं तथा ॥ ४ ॥ २७
जुषस्व सप्रथस्तमम् ॥
इमं नो यज्ञममृतेषु धेहीमा हव्या जातवेदो जुषस्व। २८
स्तोकानामग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य ॥
घृतवन्तः पावक ते स्तोकाः श्चोतन्ति मेदसः। २९
स्वधर्मन् देववीतये श्रेष्ठं नो धेहि वार्यम् ॥

[परित्रिविष्ट्यध्वरं० । ऋ. ४,१५,२; तै. ब्रा. ३,६,४,१; १६,२१ । परि वाजपतिः कविः० । ऋ. ४,१५, ३; वा. ३०; तै. सं. ४,१,२,५; तै. ब्रा. ३,६,४,१; काठ. १६,२,२१; १९,३;३८,१२; कपि. ३०,१ । अजैदग्नि-रसद्वाजं० । तै. ब्रा. ३,६,५; काठ. १६,२१ । स्तृणीत बर्हिः० । ऋ. २,२३,५ । अन्वेनं माता मन्यता-मनु० । काठ. १६,२१ । उदीचीनां० । ऐ. ब्रा. २,६]

[५] तै. ब्रा. ३,६,७-९ । काठ. १६,२०-२१ । वा. ३,१३, २१,४०—४१,४३-४७; २९,३६; ३३,९, १२,५१ । काण्व. ३,१९; २३,४१-४६; ३१,४८; ३२,९; १३,५२ । [जुषस्व सप्रथस्तमम्० । ऋ. १,७५,१; तै. ब्रा. ३,६,७,१; काठ. १६,२१ । घृतवन्तः पावक ते० । ऋ. ३,२१,१; तै. ब्रा. ३,६,७,१; काठ. १६,२१ । इमं नो यज्ञममृतेषु० । ऋ. ३,२१,२; तै. ब्रा. ३,६,७,१ २; काठ. १६,२१]

तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय सन्त्य।
ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भव ॥ ३०

तुभ्यं श्चोतन्त्यध्रिगो शचीवः स्तोकासो अग्ने मेदसो घृतस्य।
कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर ॥ ३१

ओजिष्ठं ते मध्यतो मेद उद्भृतं प्र ते वयं ददामहे।
श्चोतन्ति ते वसो स्तोका अधि त्वचि प्रति तान् देवशो विहि ॥ ३२

होता यक्षदग्निं स्वाहा, ऽऽज्यस्य स्वाहा, मेदसः स्वाहा, स्तोकानां स्वाहा, स्वा-
हाकृतीनां स्वाहा, हव्यसूक्तीनां स्वाहा, देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु,
होतर्यज ॥ ३३

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत् पुरोगाः।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥ ३४

अग्निर्वृत्राणि जङ्घनत् ॥ होता यक्षदग्निमाज्यस्य, जुषतां हवि,—होतर्यज ॥ त्वं सो-
मासि सत्पतिः ॥ होता यक्षत्सोममाज्यस्य, जुषतां हवि,—होतर्यज ॥ शुचिं नु स्तोमम् ॥
होता यक्षदिन्द्राग्नी छागस्य वपाया मेदसो, जुषेतां हवि,—होतर्यज ॥ श्नथद् वृत्र,—मुभा वामि-
न्द्राग्नी ॥ होता यक्षदिन्द्राग्नी पुरोडाशस्य, जुषेतां हवि,—होतर्यज ॥ प्र चर्षणिभ्या, इडामग्ने,
होता यक्षदग्निं पुरोडाशस्य, जुषतां हवि,—होतर्यज ॥ ३५-४३

[तुभ्यं स्तोका घृतश्चुतो० । ऋ. ३,२१,३; तै. ब्रा. ३,६,७,२; काठ. १६,२१ । तुभ्यं श्चोतन्त्यध्रिगो० । ऋ. ३,२१,४; तै. ब्रा. ३,६,७,२; काठ. १६,२१ । ओजिष्ठं ते मध्यतो० । ऋ. ३,२१,५; तै. ब्रा. ३,६,७,२; काठ. १६,२१ । सद्यो जातो व्यमिमीत० । ऋ. १०,११०,११; अथर्व. ५,१२,११; तै. ब्रा. ३,६,३,४; नि. ८,२१; काठ. १६,२० । अग्निर्वृत्राणि जङ्घनद्० । ऋ. ६,१६,३४; सा. ४,१३९६; तै. सं. ४,३,१३,१; तै. ब्रा. ३,५,६,१; काठ. २,१४; २०,१४ । त्वं सोमासि सत्पतिः० । ऋ. १,९१,५; तै. सं. ४,३,१३,१; तै. ब्रा. ३,५,६,१; काठ. २,१४ । शुचिं नु स्तोमम्० । ऋ. ७,९३,१; तै. सं. १,१,१४,१; तै. ब्रा. २,४,८,३; काठ. १३,१५; २१,१३ । श्नथद् वृत्रम्० । ऋ. ६,६०,१; तै. सं. ४,२,११,१; ३,१३,८; तै. ब्रा. २,८,५,१; काठ. ३,५,७,३; काठ. ४,१५; २१,१३; २३,११ । उभा वामिन्द्राग्नी० । ऋ. ६,६०,१३; तै. सं. १,१,१४,१; ५, ५,२; तै. ब्रा. २,८,५,१; काठ. ६,९; ७,४-५; कपि. ४,८; ५,३-४ । प्र चर्षणिभ्या० (भ्यः) । ऋ. १,१०९,६; तै. सं. ४,२,११,१; तै. ब्रा. २,८,५,१; काठ. ४,१५ । इडा(ळा)मग्ने० । ऋ. ३,१,२३; ५,११; ६,११; ७,११; १५,७. २२,५; २३,५; सा. ७६; तै. सं. ४,२,४,३]

अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः ।
त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृतस्य नाभिम् ॥ ४४

इडोपहूता,—उपहूतेडो,—पास्मां इडा ह्वयताम्,—इडोपहूता मानवी घृतपदी मैत्रावरुणी ॥ ब्रह्म देवकृतमुपहूतं, दैव्या अध्वर्यव उपहूताः, उपहूता मनुष्या य इमं यज्ञमवान् ये च यज्ञपतिं वर्धान्,—उपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे, उपहूतोऽयं यजमान उत्तरस्यां देवयाज्यायाम्,—उपहूतो भूयसि हविःकरणे, दिव्ये धामन्नुपहूतो, देवा म इदं हविर्जुषन्तामिति, तस्मिन्नुपहूतः ॥ ५ ॥ ४५-४६

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता ।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥ ४७

अधा होता न्यसीदो यजीयानिडस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनुग्मन् ॥ ४८

वृतेव यन्तं बहुभिर्वसव्यैस्त्वे रयिं जागृवांसो अनुग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥ ४९

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥ ५०

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥ ५१

सपर्येण्यः स प्रियो विक्ष्वग्निर्होता मन्द्रो निषसादा यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥ ५२

[अग्निं सुदीतिं० । ऋ. ३,१७,४; तै. ब्रा. ३,६,९,१; काठ. १८,२१]

[६] तै. ब्रा. ३,६,१०; काठ. १८,२० । [त्वं ह्यग्ने प्रथमो० । ऋ. ६,१,१; तै. ब्रा. ३,६,१०,१; काठ. १८,२० । अधा होता न्यसीदो० । ऋ. ६,१,२; तै. ब्रा. ३,६,१०,१; काठ. १८,२० । वृतेव यन्तं बहुभिर्वसव्यैस्त्वे० । ऋ. ६,१,३; तै. ब्रा. ३,६,१०,१; काठ. १८,२० । पदं देवस्य नमसा० । ऋ. ६,१,४; तै. ब्रा. ३,६,१०,१; नि. ४,१९ । त्वां वर्धन्ति क्षितय० । ऋ. ६,१,५; तै. ब्रा. ३,६,१०,२; काठ. १८,२० । सपर्येण्यः स प्रियो० । ऋ. ६,१,६; तै. ब्रा. ३,६,१०,३; काठ. १८,२०]

तं त्वा वयं सुध्यो नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥ ५३

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥ ५४

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर्विश्वेत् स वामा दधते त्वोतः ॥ ५५

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥ ५६

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यस्तरुत्रः ।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥ ५७

नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु ॥ ५८

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन् वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥ ६ ॥ ५९

आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्र यातं नमोभिरग्ने अर्वाक् ।
युवं राधोभिरकवेभिरिन्द्राग्नी अस्मे भवतमुत्तमेभिः ॥ ६०

होता यक्षदिन्द्राग्नी छागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासेअज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवेन्द्राग्नी जुषेतां हविर्होतर्यज ॥ ६१

[तं त्वा वयं सुध्यो० । ऋ. ६,१,७; तै. ब्रा. ३,६,१०,३; काठ. १८,२० । विशां कविं विश्पतिं० । ऋ. ६,१,८; तै. ब्रा. ३,६,१०,३; काठ. १८,२० । सो अग्न ईजे शशमे० । ऋ. ६,१,९; तै. ब्रा. ३,६,१०,४; काठ. १८,२० । अस्मा उ ते महि महे० । ऋ. ६,१,१०; तै. ब्रा. ३,६,१०,४ । आ यस्ततन्थ रोदसी० । ऋ. ६,१,११; तै. ब्रा. ३,६,१०,५; काठ. १८,२० । नृवद्वसो सदमिद्धेह्यस्मे० । ऋ. ६,१,१२; तै. ब्रा. ३,६,१०,५; काठ. १८,२० । पुरूण्यग्ने पुरुधा त्वाया० । ऋ. ६,१,१३; तै. ब्रा. ३,६,१०,५; काठ. १८,२०]

[७] तै. ब्रा. ३,६,११-१२ । श. २१,४३-४७ । काण्व. २३,४४-४६ । [आ वृत्रहणा वृत्रहभिः० । ऋ. ६,६०,३; तै. ब्रा. ३,६,८,१ । एवेन्द्राग्नी जुषेतां० । तै. ब्रा. ३,६,११,१]

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥ ६२

देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् ।
प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः ॥ ६३

होता यक्षद्वनस्पतिम्,—अभि हि पिष्टतमया रभिष्ठया रशनयाधित यत्राग्नेराज्यस्य प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्रेन्द्राग्न्योश्छागस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतं प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयांसमिव कृत्वी करदेवं देवो वनस्पतिर्,—जुषतां हविर्,—होतर्यज ॥ ६४

वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् ।
वहा देवत्रा दधिषो हवींषि प्र च दातारममृतेषु वोचः ॥ ६५

पिप्रीहि देवान् ॥ होता यक्षदग्निं स्विष्टकृतम्,—अयाडग्निरग्नेः प्रिया धामान्य,—याट् सोमस्याज्यस्य हविषः प्रिया धामान्य,—याडिन्द्राग्न्योश्छागस्य हविषः प्रिया धामान्य,—याड् वनस्पतेः प्रिया पाथांस्य,—याड् देवानामाज्यपानां प्रिया धामानि, यक्षदग्नेर्होतुः प्रिया धामानि, यक्षत्स्वं महिमानम्,—आयजतामेज्या इषः, कृणोतु सो अध्वरा जातवेदा, जुषतां हविर्,—होतर्यज ॥ अग्ने यदद्य,—होपहूता ॥ ७ ॥ ६६-६७

देवं बर्हिः सुदेवं देवैः स्यात्, सुवीरं वीरैर्,—वस्तोर्वृज्येता,—ऽक्तोः प्रभ्रियेता,—ऽत्यन्यान् राया बर्हिष्मन्तो मदेम, वसुवने वसुधेयस्य वेतु, यज, देवीर्द्वारः संघाते वीड्वीर्यामञ्छिथिरा ध्रुवा देवहूतौ, वत्स ईमेना तरुणा आमिमीयात् कुमारो वा नवजातो, मैना अर्वा रेणुककाटः प्रणग्, वसुवने वसुधेयस्य व्यन्तु, यज, देवीर्द्वारो, वसुवने वसुधेयस्य व्यन्तु, देवी उषासानक्तायास्मिन् यज्ञे प्रयत्यह्वेताम्,—अपि नूनं दैवीर्विशः प्रायासिष्टां सुप्रीते सुधिते, वसुवने वसुधेयस्य वीतां, यज, देवी उषासानक्ता, वसुवने

[गीर्भिर्विप्रः प्रमतिमिच्छमाना० । ऋ. ७,९३,४; तै. ब्रा. ३,६,९,१; काठ. ४,१५ । देवेभ्यो वनस्पते हवींषि० । तै. ब्रा. ३,६,११,२; काठ. १८,२१ । देवो वनस्पतिर्जुषतां० । तै. ब्रा. ३,६,११,४ । वनस्पते रशनया नियूय० । ऋ. १०,७०,१०; तै. ब्रा. ३,६,१२,१; नि. ६,७ । पिप्रीहि देवान्० । ऋ. १०,२,१; तै. सं. ४,३,१३,४; तै. ब्रा. ३,५,७,५; ६,११,४; काठ. २,१५; १८,२१; २०,१५ । अग्ने यदद्य० । ऋ. ६,१५,१४; तै. सं. ४,३,१३,४; तै. ब्रा. ३,५,७,६; ६,११,४]

[८] तै. ब्रा. ३,६,१३ । वा. २१,४८-५८; २८,१२-२४ । काण्व. २३,५७-६७; ३०,१२-२१ ।

वसुधेयस्य वीतां, देवी जोष्ट्री वसुधिती ययोरन्याघा द्वेषांसि यूयवदान्या वक्षद्वसु वार्याणि यजमानाय, वसुवने वसुधेयस्य वीतां, यज, देवी जोष्ट्री, वसुवने वसुधेयस्य वीतां, देवी ऊर्जाहुती, इषमूर्जमन्या वक्षत्सग्धिं सपीतिमन्या, नवेन पूर्वं दयमानाः स्याम पुराणेन नवं, तामूर्जमूर्जाहुती ऊर्जयमाने अधातां, वसुवने वसुधेयस्य वीतां, यज, देवी ऊर्जाहुती, वसुवने वसुधेयस्य वीतां, देवा दैव्या होतारा पोतारा नेष्टारा हताघशंसा आभरद्वसुवने वसुधेयस्य वीतां, यज, देवा दैव्या होतारा, वसुवने वसुधेयस्य वीतां, देवीस्तिस्रस्तिस्रो देवीरिडा सरस्वती भारती, द्यां भारत्यादित्यैरस्पृक्षत् सरस्वतीमं रुद्रैर्यज्ञमावी,—दिहैवेडया वसुमत्या सधमादं मदेम, वसुवने वसुधेयस्य व्यन्तु, यज, देवीस्तिस्रस्तिस्रो देवी,—र्वसुवने वसुधेयस्य व्यन्तु, देवो नराशंसस्त्रिशीर्षा षडक्षः, शतमिदेनं शितिपृष्ठा आदधति, सहस्रमीं प्रवहन्ति, मित्रावरुणेदस्य होत्रमर्हतो, बृहस्पतिः स्तोत्र,—मश्विनाध्वर्यवं, वसुवने वसुधेयस्य वेतु, यज, देवो नराशंसो वसुवने वसुधेयस्य वेतु, देवो वनस्पतिर्वर्षप्रावा घृतनिर्णिग् द्यामग्रेणास्पृक्ष,—दान्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृंहीद्, वसुवने वसुधेयस्य वेतु, यज, देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु, देवं बर्हिर्वारितीनां निधेधासि प्रच्युतीनामप्रच्युतं निकामधरणं पुरुस्पार्हं यशस्व,—देना बर्हिषान्या बर्हींष्यभिष्याम, वसुवने वसुधेयस्य वेतु, यज, देवं बर्हिर्वारितीनां वसुवने वसुधेयस्य वेतु, देवो अग्निः स्विष्टकृद्, यज, देवो अग्निः स्विष्टकृत् ॥ ८ ॥ ६८

अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशं गृह्णन्नग्नये आज्यं गृह्णन्त्सोमायाज्यं बध्नन्निन्द्राग्निभ्यां छागं, सूपस्था अद्य देवो वनस्पतिरभवदग्नये आज्येन सोमायाज्येनेन्द्राग्निभ्यां छागेना,—ऽघस्तां तं, मेदस्तः प्रतिपचता,—ऽग्रभीष्टा,—मवीवृधेतां पुरोडाशेन, त्वामद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो, बहुभ्य आ संगतेभ्य एष मे देवेषु वसु वार्यायक्ष्यत इति, ता या देवा देवदानान्यदुस्तान्यस्मा आ च शास्वा च गुरस्वे,—षितश्च होतरसि भद्रवाच्याय प्रेषितो, मानुषः सूक्तवाकाय, सूक्ता ब्रूही,—दं द्यावापृथिवी भद्रमभू,—दार्ध्म सूक्तवाकमुत नमोवाकम्,—ऋध्यास्म सूक्तोच्य,—मग्ने त्वं सूक्तवागस्युपश्रुति दिवस्पृथिव्यो,—रोमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्तां शंगवी जीरदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभये कृतं, वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती च पयस्वती च, सूपचरणा च स्वधिचरणा च,

---

[९] तै. ब्रा. ३,६,१४; ३,५,१० । वा. २१,५९-६१; २८,२३,४६ । काण्व. २३,५८-६०; ३०,२३,४६ ।

उरुगव्यूती अभयंकृतौ वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती च पयस्वती च सूपचरणा च स्वधिचरणा च, तयोराविद्यग्निरिदंँ हविरजुषता,—ऽवीवृधत, महो ज्यायोऽकृत, सोम इदंँ हविरजुषता,—ऽवीवृधत, महो ज्यायोऽकृते,—न्द्राग्नी इदंँ हविरजुषेता,—मवीवृधेतां, महो ज्यायोऽक्राताँ, वनस्पतिरिदंँ हविरजुषता,—ऽवीवृधत, महो ज्यायोऽकृत, देवा आज्यपा आज्यमजुषन्ता,—ऽवीवृधन्त, महो ज्यायोऽकृता,—ऽग्निर्होत्रेणेदंँ हविरजुषता,—ऽवीवृधत, महो ज्यायोऽकृता,—ऽस्यामृधद्धोत्रायां देवंगमायामाशास्तेऽयंँ यजमाना, आयुरा-शास्ते, सुप्रजास्त्वमाशास्ते, विश्वं प्रियमाशास्ते, यदनेन हविषाशास्ते तदश्यात्, तदृ-ध्यात्, तदस्मै देवा रासन्तां, तदग्निर्देवो देवेभ्यो वनुताँ, वयमग्नेर्मानुषा इष्टं च वीतं
चो,—भे च नो द्यावापृथिवी अंँहसस्पातामि,—ह गतिर्वामस्ये,—दं नमो देवेभ्यः ॥ ९ ॥ ६९

तच्छं२योरावृणीमहे गातुंँ यज्ञाय गातुंँ यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः।
ऊर्ध्वं जिगातु भेषजंँ शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ७०

आप्यायस्व, सं ते पयांँसि ॥ ७१

इह त्वष्टारमग्रियंँ विश्वरूपमुपह्वये। अस्माकमस्तु केवलः ॥ ७२
तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ७३
देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यछत ॥ ७४
उत ग्ना व्यन्तु देवपत्नीरिन्द्रा३ण्यग्नाय्यश्विनी राट्।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥ ७५

[१०] तै. ब्रा. ३,५,११—१२। वा. ११,६३; १२,११२-११४; २७,२०; ३४,२०। काण्व. १२,६५; १३,११?— ११३; २९,२०; ३३,४। [तच्छंँयोरावृणीमहे०। तै. सं. २,६,१०,२; तै. ब्रा. ३,५,११; तै. आ. १,९, ७; ३,१। आप्यायस्व०। ऋ. १,९१,१६-१७; ९,३१,४; तै. सं. १,४,३२,१; ३,२,५,३; ४,२,७,४; तै. ब्रा. ३,५,११; ७,१३,४; तै. आ. ३,१७,१; ६,६,३; ताण्ड्य ब्रा. १,५,८; काठ. १६,१४; ३५,१३; ३७,५; कपि. २५,५। सं ते पयांँसि०। ऋ. १,९१,१८; तै. सं. ४,२,७,४; काठ. १६,१४; ३५,१३; ३७,५; कपि. २५,५। इह त्वष्टार-मग्रियँ०। ऋ. १,१३,१०; तै. सं. ३,१,११,१; तै. ब्रा. ३,५,१२,१। तन्नस्तुरीपमध०। ऋ. ३,४,९; ७,२,९; तै. सं. ३,१,११,१। देवानां पत्नीरुशतीः०। ऋ. ५,४६,७; तै. ब्रा. ३,५,१२,१। उत ग्ना व्यन्तु देवपत्नीः०। ऋ. ५,४६,८; अथर्व. ७,४९,२; तै. ब्रा. ३,५,१२,१; नि. १२,४६]

मै. ५९

राकामहंँ, यास्ते राके, सिनीवालि, या सुपाणिः, कुहूमहं, कुहूर्देवानाम् ॥ ७६
अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः।
देवानामुत यो मर्त्यानांँ यजिष्ठः स प्रयजतामृतावा ॥ ७७
हव्यवाडग्नि,—रिडोपहूता ॥ १० ॥ ७८

[१८६६]

॥ इति खिलकाण्डे त्रयोदशः प्रपाठकः ॥१३॥

अथ चतुर्दशः प्रपाठकः।

सोमो धेनुंँ सोमो अर्वन्तमाशुंँ सोमो वीरं कर्मण्यं ददाति।
सादन्यंँ विदथ्यंँ सभेयं पितृश्रवणंँ यो ददाशदस्मै ॥ १
अषाढंँ युत्सु पृतनासु पप्रिंँ स्वर्षामप्सांँ वृजनस्य गोपाम्।
भरेषुजांँ सुक्षितिंँ सुश्रवसं जयन्तं त्वामनुमदेम सोम ॥ २
त्वंँ सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः।
त्वंँ वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥ ३
या ते धामानि दिवि या पृथिव्याम् ॥ ४
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमाततन्थोर्३वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ ५

[राकामहंँ०। ऋ. २,३२,४; अथर्व. ७,४८,१; तै. सं. ३,३,११,५; नि. ११,३१; काठ. १३,१६। यास्ते राके०। ऋ. २,३२,५; अथर्व. ७,४८,२; तै. सं. ३,३,११,५; काठ. १३,१६। सिनीवालि०। ऋ. २,३२,६; अथर्व. ७,४६,१; तै. सं. ३,१,११,३; ३,११,५; नि. ११,३२; काठ. १३,१६। या सुपाणिः०। ऋ. २,३२, ७; अथर्व. ७,४६,२; तै. सं. ३,१,११,४; ३,११,५; काठ. १३,१६। कुहूमहं(०देवीं)। ऋ. परि. ३,१; अथर्व. ७,४७,१; तै. सं. ३,३,११,५; काठ. १३,१६। कुहूर्देवानाम्०। ऋ. परि. ३,२; अथर्व. ७,४७,२; तै. सं. ३,३,११,५; काठ. १३,१६। अग्निर्होता गृहपतिः०। ऋ. ६,१५,१३; तै. ब्रा. ३,५,१२,१। हव्यवाड(ळ)-ग्निः०। ऋ. ५,४,२; तै. सं. ३,४,११,१]

[१] तै. ब्रा. २,८,३; २,८,१। वा. ३४,२०-२२; ४,३७; १०,२०; २३,६५। काण्व. ३३,१४-१६; ४,४९; ११,२९। २५,६७। [सोमो धेनुंँ सोमो०। ऋ. १,९१,२०; तै. ब्रा. २,८,३,१। अषाढंँ युत्सु पृतनासु०। ऋ. १,९१,२१; तै. ब्रा. २,४,३,८; २,८,३,१; ७,४,१। त्वंँ सोम क्रतुभिः०। ऋ. १,९१,२; तै. ब्रा. २,४,३,८; २,८,३,१। या ते धामानि दिवि०। ऋ. १,९१,४; तै. सं. २,३,१४,१, ४,१,११,१; तै. ब्रा. २,८,३,२; काठ. १३,१५। त्वमिमा ओषधीः सोम०। ऋ. १,९१,२२; तै. ब्रा. २,८,३,१]

या ते धामानि हविषा यजन्ति, सोमापूषणे,—मौ देवौ ॥ ६
सोमापूषणा रजसो विमानंँ सप्तचक्रंँ रथमविश्वमिन्वम्।
विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम् ॥ ७
दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे।
तावस्मभ्यं पुरुवारं पुरुक्षुंँ रायस्पोषंँ विष्यतां नाभिमस्मे ॥ ८
धियं पूषा जिन्वतु विश्वमिन्वो रयिंँ सोमो रयिपतिर्दधातु।
अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः ॥ ९
विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति।
सोमापूषणा अवतं धियं मे युवाभ्यांँ विश्वाः पृतना जयेम ॥ १०
प्रजापते नहि त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयंँ स्याम पतयो रयीणाम् ॥ ११
रयीणां पतिंँ यजतं बृहन्तमस्मिन् भरे नृतमंँ वाजसातौ।
प्रजापतिं प्रथमजामृतस्य यजाम देवमधि नो ब्रवीतु ॥ १२
प्रजापते त्वं निधिपाः पुराणो देवानां पिता जनिता प्रजानाम्।
पतिर्विश्वस्य जगतः परस्पा हविर्नो देव विहवे जुषस्व ॥ १३
तवेमे लोकाः प्रदिशो दिशश्च परावतो निवत उद्वतश्च।
प्रजापते विश्वसृग् जीवधन्य इदं नो देव प्रतिहर्य हव्यम् ॥ १४
प्रजापतिं प्रथमंँ यज्ञियानां देवानामग्रे यजतंँ यजध्वम्।
स नो ददातु श्रवणं पितृणां तस्मै ते देव हविषा विधेम ॥ १५

[या ते धामानि हविषा०। ऋ. १,९१,१९; तै. सं. १,२,१०,१; तै. ब्रा. २,८,३,१; काठ. ११,१३। सोमा-पूषणा०। ऋ. २,४०,१,३; तै. सं. १,८,२२,५; २,६,११,४; तै. ब्रा. २,८,१,५; काठ. ८,१७। इमौ देवौ०। ऋ. २,४०,२; तै. सं. १,८,२२,५; २,६,११,४; तै. ब्रा. २,८,१,५; काठ. ८,१७। सोमापूषणा रजसो०। ऋ. २,४०,३; तै. सं. १,८,२२,५; तै. ब्रा. २,८,१,५। दिव्य१न्यः सदनं चक्र०। ऋ. २,४०,४; तै. ब्रा. २,८,१,६। विश्वान्यन्यो भुवना०। ऋ. २,४०,५; १,५। धियं पूषा जिन्वतु०। ऋ. २,४०,६; तै. ब्रा. २,८,१,६। प्रजापते नहि त्वदेतान्यन्यो०। ऋ. १०,१२१,१०; अथर्व. ७,७९,४; ८०,३; तै. सं. १,८,१४,२; ३,२,५,६; तै. ब्रा. २,८,१,२; ३,५,७,१; तै. आ. १०,५४; नि. १०,४३; काठ. १५,८। रयीणां पतिंँ यजतं०। तै. ब्रा. २,८,१,३। प्रजापते त्वं निधिपाः०। तै. ब्रा. २,८,१,३। तवेमे लोकाः प्रदिशो०। तै. ब्रा. २,८,१,३। प्रजापतिं प्रथमंँ०। तै. ब्रा. २,८,१,४]

यो राय ईशे शतदाय उक्थ्यो यः पशूनांँ रक्षिता विष्ठितानाम्।
प्रजापतिः प्रथमजा ऋतस्य सहस्रधामा जुषतांँ हविर्नः ॥ १ ॥ १६
वायो शतंँ हरीणांँ युवस्व पोष्याणाम्।
उत वा ते सहस्रिणो रथ आयातु पाजसा ॥ १७
ईशानाय प्रहुतिंँ यस्त आनट् शुचिंँ सोमंँ शुचिपास्तुभ्यंँ वायो।
कृणोषि तं मर्त्येषु प्रशस्तं जातो जातो जायते वाज्यस्य ॥ १८
युक्ष्वा हि त्वंँ रथासहा युवस्व पोष्या वसो।
आन्नो वायो मधु पिबास्माकंँ सवनागहि ॥ १९
कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन्।
ते वायवे मनवे बाधितायावासयन्नुषसंँ सूर्येण ॥ २०
आ नो वायो महे तने याहि मखाय पाजसे।
वयंँ हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ॥ २१
सं ते वायुः ॥ २२
पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः।
ते वायवे समनसो वितस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ २३
राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम्।
अध वायुं नियुतः सश्चत स्वा उत श्वेतंँ वसुधितिं निरेके ॥ २४
आ वायो, प्र वायुं, प्र याभिः ॥ २५

[यो राय ईशे०। तै. ब्रा. २,८,१,४]

[२] तै. ब्रा. २,८,१। वा. २१,३९; २७,२३-२४,२७-२८; ७,७; ३३,५५; १५,१५,२१-२२; ४,५; ३१,१६। काण्व. १२,३९; २९,२३—२४,०६,३२; ७,६; ३२,५५; २७.१९,२५-२६; ४,६; ३५,१६। [वायो शतंँ हरीणांँ०। ऋ. ४,४८,५; तै. सं. २,२,१२,७। ईशानाय प्रहुतिंँ०। ऋ. ७,९०,२। युक्ष्वा हि त्वंँ रथासहा०। ऋ. ८,२६,२०। कुविदङ्ग नमसा०। ऋ. ७,९१,१। आ नो वायो महे०। ऋ. ८,४६,२५। सं ते वायुः०। तै. सं. ४,१,४; ५,१,५,१; काठ. १६,४; १९,५; कपि. ३०,३। पीवोअन्नाँ (०न्नां) रयिवृधः०। ऋ. ७,९१,३; तै. ब्रा. २,८,१,१। राये नु यं जज्ञतू०। ऋ. ७,९०,३; तै. ब्रा. २,८,१,१। आ वायो०। ऋ. ७,९२,१; तै. सं. १,४,४,१; ३,४,२,१; तै. ब्रा. १,८,११; काठ. ४,२; १३,११—१२; कपि. ३,२। प्र वायुं०। ऋ. ६,४९,४; तै. ब्रा. २,८,१,१। प्र याभिः०। ऋ. ७, ९२,३; तै. सं. २,२,१२,७; तै. ब्रा. २,८,१,१; याज्ञ. १०,१०]

आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ २६
देवानां भद्रा सुमतिरृजूयतां देवानाꣳ रातिरभि नो नि वर्तताम् ।
देवानाꣳ सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥ २७
भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितꣳ यदायुः ॥ २८
शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ २९
आ यो देवास ईमहे ॥ ३०
उत देवा अवहितं देवा उन्नयथा पुनः । उतागश्चक्रुषं देवा देवा जीवयथा पुनः ॥ ३१
यज्ञेन यज्ञमयजन्त देवाः ॥ २ ॥ ३२
अग्ने नय ॥ ३३
प्र वः शुक्राय भानवे भरध्वꣳ हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूꣳष्यन्तर्विश्वानि विद्मना जिगाति ॥ ३४
अग्ने त्वं पारय ॥ ३५
अच्छा गिरो मतयो देवयन्तीरग्निꣳ यन्ति द्रविणं भिक्षमाणाः ।
सुसंदृशꣳ सुप्रतीकꣳ स्वञ्चꣳ हव्यवाहमरतिं मानुषाणाम् ॥ ३६
अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यꣳ सुवितायं देव क्षांꣳ विश्वेभिरमृतेभिर्यजत्र ॥ ३७

[आ नो नियुद्भि० । ऋ. ७,९२,५; तै. ब्रा. २,८,१,२। देवानां भद्रा सुमति० । ऋ. १,८९,२; नि. १२,३९। भद्रं कर्णेभिः शृणुयाम० । ऋ. १,८९,८; सा. १८७४; तै. आ. १,१,१; काठ. ३५,१; कपि. ४८,१ । शतमिन्नु शरदो० । ऋ. १,८९,९; तै. आ. १,२७,६; काठ. ३५,१; कपि. ४८,२ । आ यो देवास० । तै. सं. १,१,१,२ । उत देवा अवहितं० । ऋ. १०,१३७,१; अथर्व. ४,१३,१ । यज्ञेन यज्ञमयजन्त० । ऋ. १,१६४,५०; १०,९०,१६; अथर्व. ७,५,१; तै. सं. ३,५,११,५; तै. आ. ३,१,७; शत. ब्रा. १०,२,२,२]

[३] तै. ब्रा. २,८,२ । वा. ५,३६; ७,४३; ४०,१६; १२,१२; ४,३०; १८,४२; २१,२; ३८,५ । काण्व. ५,४५; ९,८; ४०,१८; १३,१३; ४,३०; २०,१९; २३,२; ३८,५ । अग्ने नय सुपथा० । ऋ. १,१८९,१; तै. सं. १, १,१४,१; ४,४३,१; तै. ब्रा. २,८,२,३; तै. आ. १,८,८; शत. ब्रा. १४,८,३,१; काठ. ३,१; ६,१०; कपि. २,८। प्र वः शुक्राय भानवे० । ऋ. ७,४,१; तै. ब्रा. २,८,२,३; काठ. ७,१६ । अग्ने त्वं पारय० । ऋ. १,१८९,२; तै. सं. १,१,१४,४; तै. ब्रा. २,८,२,५; तै. आ. १०,२,१ । अच्छा (च्छा) गिरो मतयो० । ऋ. ७,१०,३; तै. ब्रा. २,८,२,४ । अग्ने त्वमस्मद्युयोध्यमीवा० । १,१८९,३; तै. ब्रा. २,८,२,४]

प्र कारवो मनना वच्यमाना देवद्रीचीं नयत देवयन्तः ।
दक्षिणावाड् वाजिनी प्राच्येति हविर्भरन्त्यग्नये घृताची ॥ ३८
उदुत्तमं,—मस्तभ्नाद् द्यां,—मिमां धियम् ॥ ३९
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म ।
सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ॥ ४०
अव ते हेडो वरुण, तत्त्वायामि ॥ ४१
पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्नाभिरच्छिद्रꣳ शरणꣳ सजोषा दुराधर्षं गृणते शर्म यꣳसत् ॥ ४२
आ नो दिवः ॥ ४३
इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमꣳ सरस्वति जुषस्व ।
तव शर्मन् प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥ ४४
यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥ ४५
सरस्वत्यभि नो नेषि वस्य, इदं ते हव्यम् ॥ ३ ॥ ४६

[प्र कारवो मनना० । ऋ. ३,६,१; तै. ब्रा. २,८,२,५ । उदुत्तमं वरुण पाश० । ऋ. १,२४,१५; सा. ५८९; अथर्व. ७,८३,३; १८,४,६९; तै. सं. १,५,११,३; ४,२,१,३; तै. ब्रा. २,७,१६,४; ८,१,६; तै. आ. २,४,४; नि. २,१३; काठ. ३,८; १६,८; १९,११; २१,१३; कपि. २,१५; ३२,१ । अस्तभ्नाद् द्याम्० । ऋ. ८,४२,१; तै. सं. १,२,८,१; तै. ब्रा. २,८,१,६; काठ. २,६; ११,१२; कपि. १,१९ । इमां धियम्० । ऋ. ८,४२,३; १०,६७,१; अथर्व. २०,९१,१; तै. सं. १,२,२,२; ६,१,३,२; काठ. २,३; कपि. १,१५ । कितवासो यद्रिरिपु:० । ऋ. ५, ८५,८; तै. सं. ३,४,११,६; तै. ब्रा. २,८,१,५; काठ. २३,१२ । अव ते हेडो(ळो) वरुण० । ऋ. १,२४,१४; तै. सं. १,५,११,३; तै. ब्रा. २,७,१६,४; ८,१,६; तै. आ. २,४,४; काठ. ४०,११ । तत्त्वायामि ब्रह्मणा० । ऋ. १,२४,११; तै. सं. २,१,११,६; तै. ब्रा. २,८,१,६; काठ. ४,१६; ११,१३; १२,१५; १७,१९; २१,१३; ४०,११ । पावीरवी कन्या चित्रायु:० । ऋ. ६,४९,७; तै. सं. ४.१,११,२; तै. ब्रा. २,८,२,८ । आ नो दिवः० । ऋ. ५,४३,११; ७,२४,३; तै. सं. १,८,२२,१; २,५,१२.१; ३,१,११,२; काठ. ४,१६; २०,१५ । इमा जुह्वाना युष्मदा० । ऋ. ७,९५,५; तै. ब्रा. २,४,६,१; काठ. ४,१६ । यस्ते स्तनः शशयो० । ऋ. १,१६४,४९; अथर्व. ७,१०,१; तै. ब्रा. २,८,२,८; तै. आ. ४,८,२; ५,७,३; शत. ब्रा. १४,२,१,१५; ९,४,२८ । सरस्वत्यभि नो नेषि० । ऋ. ६, ६१,१४; तै. सं. ७,२,७,४; तै. ब्रा. २,४,३,१; २,८,२,८; काठ. १७,१८; ३०,३ । इदं ते हव्यम । तै. ब्रा. २,५,४,६]

आ वेधसं नीलपृष्ठं बृहन्तं बृहस्पतिꣳ सदने सादयध्वम् ।
सादद्योनिं दम आ दीदिवाꣳसꣳ हिरण्यवर्णमरुषꣳ सपेम ॥ ४७
स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरिषिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ४८
बृहस्पतिः, स सुष्टुभा ॥ ४९
बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ ५०
एवा पित्रे विश्वदेवाय वृष्णे ॥ ५१
सूर्यो देवीमुषसꣳ रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥ ५२
भद्रा अश्वा,—स्तन्मित्रस्य ॥ ५३
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥ ५४
अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५५

[४] तै. ब्रा. २,८,२; २,८,७ । वा. २६,३; ३३,३७-३८,४२; ७,४२; १३,४६; २१,५-६; २५,२३; २९,४ । काण्व. २,२१; २८,३; ३२,३७-३८,४२; ८,२३,१,७; १४,४८; २३,५-६; २७,२७; ३१,३ [आ वेधसं नीलपृष्ठं० । ऋ. ५,४३,१२; तै. ब्रा. २,५,५,३; २,८,२,७ । स हि शुचिः शतपत्र:० । ऋ. ७,९७,७; तै. ब्रा. २,५,५,४; ८,२,७ । बृहस्पतिः० । ऋ. ४,५०,४; ६,७३,१; १०,४२,११; ४३,११; ४४,११; १८२,१; अथर्व. ७,५१,१; २०,१७,११; ८८,४; ८९,११; ९०,३; ९४,११; तै. सं. ३,३,११,१; तै. ब्रा. २,८,२,७—८; काठ. १७,१८ । स सुष्टुभा० । ऋ. ४,५०,५; १,६२,४; अथर्व. २०,८८,५; तै. सं. २,३,१४,४; काठ. १०,१३ । बृहस्पते अति यदर्यो० । ऋ. २,२३,१५; तै. सं. १,८,२२,२; काठ. ४,१६; ४०,११ । एवा पित्रे विश्वदेवाय० । ऋ. ४,५०,६; अथर्व. २०,८८,६; तै. सं. १,८,२२,२; तै. ब्रा. २,८,२,८; काठ. १७,१८ । सूर्यो देवीमुषसं० । ऋ. १,११५,२; अथर्व. २०,१०७,१५; तै. ब्रा. २,८,७,१ । भद्रा अश्वा:० । ऋ. १,११५,३; तै. ब्रा. २,८,७,१ । तन्मित्रस्य० । ऋ. १,११५,४; अथर्व. २०,१२३,१; तै. ब्रा. २,८,७,१; नि. ४,११ । तन्मित्रस्य वरुणस्य० । ऋ. १,११५,५; अथर्व. २०,१२३,२; तै. ब्रा. २,८,७,२ । अद्या देवा उदिता० । ऋ. १,११५,६; तै. ब्रा. २,८, ७,२]

चित्रं देवानामुदगादनीकꣳ, सुत्रामाणं, महीमू षु,—दितिः पाशान् ॥ ५६
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥ ५७
विष्टम्भो दिवः, स्तीर्णं बर्हिः ॥ ४ ॥ ५८
विष्णोर्नु कं, तदस्य, प्र तद्विष्णुः ॥ ५९
परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥ ६०
विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनास उरुक्षितिꣳ सुजनिमा चकार ॥ ६१
त्रिर्देवः पृथिवीमेष एताꣳ वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषꣳ ह्यस्य स्थविरस्य नाम ॥ ६२
इन्द्रं नरो नेमधिता, युजे रथम् ॥ ६३
जगृभ्मा ते दक्षिणमिन्द्र हस्तꣳ वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिꣳ शूर गोनामस्मभ्यं चित्रꣳ वृषणꣳ रयिं दाः ॥ ६४

[चित्रं देवानाम्० । ऋ. १,११५,१; अथर्व. १३,२,३५; २०,१०७,१४; तै. सं. १,४,४३,१; २,४,१४,४; तै. ब्रा. २,८,७,३; ऐ. आ. ३,२; तै. आ. १,७,६; २,१३,१; नि. १२,१६; काठ. ४,६; १०,१३; १३,१६; २१, १४; २२,५-६,८; कपि. ३,४,७; ३५,२ । सुत्रामाणं पृथिवीं० । ऋ. १०,६३,१०; अथर्व. ७,६,३; तै. सं. १,५,११,५; ७,१,१८,२; तै. आ. १,१३,२; काठ. २,३ । महीमू षु० । तै. सं. १,५,११,५; ७,१,१८,२; तै. ब्रा. ३,१,३,२; तै. आ. १,१३,२; काठ. ३०,४—५; कपि. ४६,७ । अदितिः पाशान्० । तै. सं. ३,१, ४,४; काठ. ३०,८ । अदितिर्द्यौरदिति:० । ऋ. १,८९,१०; अथर्व. ७,६,१; तै. आ. १,१३,२; नि. ४,२३ । विष्टम्भो दिवः० । ऋ. ९,८९,६; तै. सं. ४,४,१२,५; काठ २२,१४ । स्तीर्णं बर्हि:० । ऋ. १,१३५,१; तै. सं. ५,१,११,२; काठ. ५,६,२]

[५] तै. ब्रा. २,८,२-३ । वा. ५,१८,२०; १९,८१; ८,१५ । काण्व. ५,२४,२६; २१,७८; ९,१५ । [विष्णोर्नु कं० । ऋ. १,१५४,१; अथर्व. ७,२६,१; तै. सं. १,२,१३,२; तै. ब्रा. २,८,३,२; काठ. २,१०; २५,८; कपि. २,४; ४०,१ । तदस्य० । ऋ. १,१५४,५; १०३,५; २,३५,११; तै. ब्रा. २,४,६,२; ८,३,२ । प्र तद्विष्णु:० । ऋ. १,१५४,२; अथर्व. ७,२६,२—३; तै. ब्रा. २,४,३,४; ८,३,२; ३,१,२,३; नि. १,२०; काठ. २,१०; २५,८; कपि २,४; ४०,१ । परो मात्रया तन्वा० । ऋ. ७,९९,१; तै. ब्रा. २,८,३,२ । विचक्रमे पृथिवीमेष० । ऋ. ७,१००,४; तै. ब्रा. २,४,३,५; ८,३,३ । त्रिर्देवः पृथिवीमेष० । ऋ. ७,१००,३; तै. ब्रा. २,४,३,५; ८,३,३ । इन्द्रं नरो नेमधिता० । ऋ. ७,२७,१; सा. ३१८; तै. सं. १,६,१२,१; तै. ब्रा. २,८,२,५ । युजे रथम्० । ऋ. ७,२३,३; अथर्व. २०,१२,३; तै. ब्रा. २,४,१,३; ८,२,५। जगृभ्मा(०म्मा०) ते दक्षिणमिन्द्र० । ऋ. १०, ४७,१; सा. ३१७; तै. ब्रा. २,८,२,५]

तवेदं विश्वमभितः पशव्यं यत् पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ६५

समिन्द्र नः ॥ ६६

आराच्छत्रुमपबाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन ।
अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम् ॥ ६७

इन्द्रो बलं रक्षितारं दुघानां करेणेव विचकर्ता रवेण ।
स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत् पणिमा गा अमुष्णात् ॥ ६८

अध्वर्यवो यो दभीकं जघान यो गा उदाजदप हि बलं वः ।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः ॥ ६९

इन्द्रा ओषधीरसनोदहानि वनस्पतीꣳरसनोदन्तरिक्षम् ।
बिभेद बलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनाम् ॥ ७०

यो हत्वाहिमरिणात् सप्त सिन्धून् यो गा उदाजदपधा बलस्य ।
यो अश्मनोरन्तरग्निं जजान सꣳवृक् समत्सु स जनास इन्द्रः ॥ ७१

अभि स्ववृष्टिम् ॥ ७२

भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दꣳहितान्यैरत् ।
रिणग्रोधाꣳसि कृत्रिमान्येषाꣳ सोमस्य ता मद इन्द्रश्चकार ॥ ५ ॥ ७३

विष्णुं देवं वरुणमूतये भगं मेदसा देवा वपया यजध्वम् ।
ता नो यज्ञमागतं विश्ववेदा प्रजावदस्मे द्रविणेह धत्तम् ॥ ७४

[तवेदं विश्वमभितः० । ऋ. ७,९८,६; अथर्व. २०,८७,६; तै. ब्रा. २,८,२,६ । समिन्द्र नः० (णो०) । ऋ. ५,४२,४; अथर्व. ७,९७,२; तै. सं. १,४,४४,१; तै. ब्रा. २,८,२,६; काठ. ४,१२; कपि. ३,१० । आराच्छत्रुमपबाधस्व० । ऋ. १०,४२,७; अथर्व. २०,८९,७; तै. ब्रा. २,८,२,७; नि. ५,२४ । इन्द्रो बलं (व०) रक्षितारं० । १०,६७,६; अथर्व. २०,९१,६ । अध्वर्यवो यो दभीकं० । ऋ. २,१४,३ । इन्द्रा (०न्द्र) ओषधीरसनो० । ऋ. ३,३४,१०; अथर्व. २०,११,१० । यो हत्वाहिमरिणात् सप्त० । ऋ. २,१२,३; अथर्व. २०,३४,३ । अभि स्ववृष्टिम्० । ऋ. १,५२,५ । भिनद्वलमङ्गिरोभिः० । ऋ. २,१५,८; तै. सं. २,३, १४,५]

[६] तै. ब्रा. २,८,४,६ । वा. ८,६,५९; ३३,४३; ३४,३१; १२,७५,७८,८१,८४,८८ । काण्व. ८,५; ९,४५; ३२, ४३; ३३,२५; १३,७६,७९,८२,८५,८९ । [विष्णुं देवं वरुणमूतये० । तै. ब्रा. २,८,४,४]

मै० ६०

मेदसा देवा वपया यजध्वं विष्णुं च देवं वरुणं च रातिम् ।
ता नो अमीवामपबाधमाना इमं यज्ञं जुषमाणा उपेतम् ॥ ७५

विष्णूवरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्यू हविषा वृधाना ज्योतिषारातीर्दहतं तमाꣳसि ॥ ७६

ययोरोजसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा ।
या पत्येते अप्रतीता सहोभिर्विष्णू अगन् वरुणा पूर्वहूतिम् ॥ ७७

विष्णूवरुणा अभिशस्तिपावा देवा यजन्त हविषा घृतेन ।
अपामीवाꣳ सेधतꣳ रक्षसश्चाया धत्तꣳ यजमानाय शंयोः ॥ ७८

अꣳहोमुचा वृषभा सुप्रतूर्ती देवानां देवतमा शविष्ठा ।
विष्णूवरुणा प्रतिहर्यतं न इदं नरा प्रयतमूतये हविः ॥ ७९

आ देवो याति सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयश्च प्रसुवंश्च भूम ॥ ८०

अभीवृतं कृशनैर्विश्वरूपꣳ हिरण्यशम्यꣳ यजतो बृहन्तम् ।
आस्थाद्रथꣳ सविता चित्रभानुः कृष्णा रजाꣳसि तविषीं दधानः ॥ ८१

स घा नो देवः सविता सहावासाविषद्वसुपतिर्वसूनि ।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥ ८२

आ कृष्णेन रजसा, याममद्य ॥ ८३

भगं धियꣳ वाजयन्तः पुरन्धिं नराशꣳसो ग्नास्पतिर्नो अव्यात् ।
आये वामस्य संगथे रयीणां प्रिया देवस्य सवितुः स्याम ॥ ८४

[मेदसा देवा वपया० । तै. ब्रा. २,८,४,४ । विष्णुवरुणा युवम्० । तै. ब्रा. २,८,४,५ । ययोरोजसा स्कभिता० । अथर्व. ७,२५(२६),१; तै. ब्रा. २,८,४,५ । विष्णुवरुणा अभि० । तै. ब्रा. २,८,४,६ । अꣳहोमुचा वृषभा० । तै. ब्रा. २,८,४,६ । आ देवो याति (नु०) सविता० । ऋ. ७,४५,१; तै. ब्रा. २,८,६,१; काठ. १७,१९ । अभीवृतं कृशनैः० । ऋ. १,३५,४; तै. ब्रा. २,८,६,१ । स घा नो देवः सविता० । ऋ. ७,४५, ३; तै. ब्रा. २,८,६,१ । आ कृष्णेन रजसा० । ऋ. १,३५,२; तै. सं. ३,४,११,२ । याममद्य० । ऋ. ६,७१,६; तै. सं. १,६,२३,१; २,२,१२,२ । भगं धियं वाजयन्तः० । ऋ. २,३८,१० तै. ब्रा. २,८,६,३]

या ओषधयो, ऽश्वावती,—मोषधीरिति मातरो, ऽति विश्वाः परिष्ठा, यदोषधयः ८५
संगच्छन्ते, ऽन्या वो अन्याम् ॥ ६ ॥

मही द्यावापृथिवी इह ज्येष्ठे रुचा भवताꣳ शुचयद्भिरर्कैः ।
यत् सीꣳ वरिष्ठे बृहती विमिन्वन् रुवद्धोक्षा पप्रथानेभिरेवैः ॥ ८६
 ८७
प्र पूर्वजे ॥

स इत् स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान ।
उर्वी गभीरे रजसी सुमेके अवꣳशे धीरः शच्या समैरत ॥ ८८

भूरि द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ८९

इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषꣳ वृजनं जीरदानुम् ॥ ९०

उर्वी पृथ्वी बहुले दूरेअन्ते उपब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ९१

इन्द्रो भूतस्य भुवनस्य राजेन्द्रो दाधार पृथिवीमुतेमाम् ।
इन्द्रे ह विश्वा भुवना श्रितानीन्द्रं मन्ये पितरं मातरं च ॥ ९२

इन्द्रः पृणन्तं पपुरिं चेन्द्रा इन्द्रः स्तुवन्तꣳ स्तवितारमिन्द्रः ।
इन्द्रः पृणन्तं ... ९३
दधाति शक्रः सुकृतस्य लोक इन्द्रं मन्ये पितरं मातरं च ॥

इन्द्रो द्यौरुरꣳव्युत भूमिरिन्द्रा इन्द्रः समुद्रो अभवद्गभीरः ।
इन्द्रो द्यौरुरꣳव्युत ... ९४
उरꣳवन्तरिक्षꣳ स जनास इन्द्रा इन्द्रं मन्ये पितरं मातरं च ॥

[या ओषधयः० (०षधीः) । ऋ. १०,९७,१; तै. सं. ४,२,६,१; नि. ९,२८; काठ. १३,१६; १६,१३; कपि. २५,४ । अश्वावतीम्० । ऋ. १०,९७,७; तै. सं. ४,२,६,४; तै. ब्रा. २,८,४,८; काठ. १३,१६; १६, १३; कपि. २५,४ । ओषधीरिति मातरः० । ऋ. १०,९७,४; तै. सं ४,२,६,१; तै. ब्रा. २,८,४,८; नि. ६,३; काठ. १६, १३; कपि. २५,४ । अति विश्वाः परिष्ठाः० । ऋ. १०,९७,१०; तै. सं ४,२,६,३; तै. ब्रा. २,८,४,८; काठ. १६, १३; कपि. २५,४ । अन्या वो अन्याम्० । ऋ. १०,९७,१४, तै. सं. ४,२,६,२; कपि. २५,४ । यदोषधयः संगच्छन्ते० । तै. सं. ४,२,६,३; तै. ब्रा. २,८,४,८; काठ. १६,१३; कपि. २५,४]

[७] तै. ब्रा. २,८,४,७-८; २,८,२,८ । वा. २०,५४; २७,२८,३४ ४० । काण्व. २२,३९; २९,३१ । [मही द्यावापृथिवी० ऋ. ४,५६,१ । प्र पूर्वजे० । ऋ. ७,५३,२; तै. सं. ४,१,११,४; तै. ब्रा. २,८,४,७ । स इत् स्वपा भुवनेष्वास० ऋ. ४,५६,३ तै. ब्रा. २,८,४,७ । भूरि द्वे अचरन्ती० । ऋ. १,१८५,२; तै. ब्रा. २,८,४,८ । इदं द्यावापृथिवी० । ऋ. १,१८५,११; तै. ब्रा. २,८,४,८ । उर्वी पृथ्वी (पृथिवी) बहुले० । ऋ. १,१८५,७; तै. ब्रा. २,८,४,८]

इन्द्रो वृत्रं वज्रेणावधीदिन्द्रो व्यꣳसमुत शुष्णमिन्द्रः ।
इन्द्रः पुरः शम्बरस्याभिनदिन्द्रं मन्ये पितरं मातरं च ॥ ९५

इन्द्रो बभूव ब्रह्मणा गभीर इन्द्रा आभूतः परिभूर्विन्द्रः ।
इन्द्रो भविष्यदुत भूतमिन्द्रा इन्द्रं मन्ये पितरं मातरं च ॥ ९६

इन्द्रोऽस्मे अवतु वज्रबाहुरिन्द्रे भूतानि भुवनानीन्द्रे ।
अस्माकमिन्द्रो भवतु प्रसाह इन्द्रं मन्ये पितरं मातरं च ॥ ९७

उत स्या नः सरस्वती जुषाणोप श्रवत् सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥ ९८

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।
प्र बाधमाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥ ९९

एकाचेतत् सरस्वती नदीनाꣳ शुचिर्यती गिरिभ्य आ समुद्रात् ।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥ १००

इदमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥ १०१

अयमु ते सरस्वति वसिष्ठो द्वारा ऋतस्य सुभगे व्यावः ।
वर्ध शुभ्रे स्तुवते रासि वाजान् यूयं पात स्वस्तिभिः सदा नः ॥ १०२

इयꣳ शुष्मेभिर्बिसखा इवारुजत् सानु गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः ॥७॥ १०३

शुचिं नु स्तोमꣳ, श्रथद्वृत्रं,—मुभा वामिन्द्राग्नी, प्र चर्षणिभ्या, आ वृत्रहणा,

[उत स्या नः सरस्वती जुषाणोप० । ऋ. ७,९५,४ । प्र क्षोदसा धायसा० । ऋ. ७,९५,१ । एकाचेतत् सरस्वती० । ऋ. ७,९५,२ । अयमु ते सरस्वति० । ऋ. ७,९५,६ । इयꣳ शुष्मेभिर्बिसखा० । ऋ. ६, ६१,२; मै. ब्रा. २,८,२,८; नि. २,२४; काठ. ४,१६]

[८] तै. ब्रा. २,८,७,४ । वा. ३,१३ २०,४४; २७,२० २९,९; ६,१० । काण्व. ३,१९; २२,२९; २९,२०; ३१,९; ३,२७ । [शुचिं नु स्तोमं० । ऋ. ७,९३,१; तै. सं. १,१,१४,१; तै. ब्रा. २,४,८,३; काठ १३,१५; ११,१३ । श्रथद् वृत्रम्० । ऋ. ६,६०,१; तै. सं. ४,२,११,१; ३,१३,८; तै. ब्रा. २,८,५,१; ३,५,७,३; काठ.४,१५; ११, १३,०३,११ । उभा वामिन्द्राग्नी० । ऋ. ६,६०,१३ तै. सं. १,१,१४,१; ५,५,१; तै. ब्रा. २,८,५,१; काठ. ७,४,७,५; ९,१; कपि. ४,८; ५,३—४ । प्र चर्षणिभ्या० (०भ्यः) । ऋ. १,१०९,६ तै. सं ४,२,११,१ तै. ब्रा. २,८,५,१; काठ. ४,१५ । आ वृत्रहणा० । ऋ. ६,६०,३ तै. ब्रा. ३,६,८,१]

गोर्भिर्विप्र,—स्त्वष्टा दधत्, तन्नस्तुरीपं, त्वष्टा वीरम् ॥ १०४

विश्वरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।
प्रजां त्वष्टा विष्यतु नाभिमस्मे अथा देवानामप्येतु पाथः ॥ १०५

देव त्वष्टः ॥ १०६

आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।
उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रतिजोषयेते ॥ १०७

अगृभ्णा ते दक्षिणमिन्द्र हस्तम् ॥ १०८

सुब्रह्माणं देववन्तं महान्तमुरुं गभीरं पृथुबुध्नमिन्द्र ।
श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १०९

वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः ।
हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः । ११०

स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।
चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १११

अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र ।
भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ११२

सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षम् ।
दस्युहनं पूर्भिदमिन्द्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ८ ॥ ११३

[गोर्भिर्विप्र० । ऋ. ७,९३,४; तै. ब्रा. २,८,५,१; ३,६,९,१; काठ. ४,१५ । त्वष्टा दधत्० । तै. ब्रा. २,६,८, ४; ८,७,४; काठ. ३८,६ । तन्नस्तुरीपं० । ऋ. १,१४२,१०; ३,४,९; ७,२,९; तै. सं. ४,१,८,३; ३,१,११,१; नि. ६,२१; काठ. १८,१७; कपि. २९,५ । त्वष्टा वीरम्० । मै. सं. ५,१,११,३; तै. ब्रा. २,८,७,४; काठ. ५, ६,१ । विश्वरूपः सुभरो० । ऋ. २,३,९; मै. सं. ३,१,११,२; तै. ब्रा. २,८,७,४ । देव त्वष्ट:० । ऋ. १०, ७०,९; तै. सं. ५,१,१०,१; ६,३,११,२; काठ. ३,५; कपि. २,१४ । आविष्ट्यो वर्धते० । ऋ. १,९५,५; तै. ब्रा. २,८,७,४; नि. ८,१५ । अगृभ्णा (०म्मा) ते दक्षिणम्० । ऋ. १०,४७,१; स. ३१७; तै. ब्रा. २,८, २,५ । सुब्रह्माणं देववन्तं० । ऋ. १०,४७,३; तै. ब्रा. २,५,६,१ । वनीवानो मम दूतास(स)० । १०, ४७,७ । स्वायुधं स्ववसं सुनीथं० । ऋ. १०,४७,२ । अश्वावन्तं रथिनं० । ऋ. १०,४७,५ । सनद्वाजं विप्रवीरं० । ऋ. १०,४७,४]

त्वष्टा पत्नीभिरिह नः सजोषा देवो देवीभिर्हविषो जुषाणः ।
उप नो रयिं बहुलं विष्यता नः शृणोतु नः सुमतिं यज्ञियासः ॥ ११४

रेतोधा यस्य भुवनस्य देवः ससाद योनौ जनिता जनित्रः ।
रूपाणि कृण्वन् विदधद्वपूंषि त्वष्टा पत्नीभिश्चरति प्रजानन् ॥ ११५

त्वष्टा पत्नीभिरनु मंहनेवाग्रेयावा धिषणे यं दधाते ।
विश्वा वसु हस्तयोरादधानोऽन्तर्मही रोदसी याति साधन् ॥ ११६

आ नो वीरैर्जनिता मतीनां गोभिरश्वेभिर्वसुभिर्वसूयन् ।
समञ्जानो धामभिर्विश्वरूपैस्त्वष्टा पत्नीभिश्चरति प्रजानन् ॥ ११७

त्वष्टा रेतो भुवनस्य पत्नीर्विकृण्वानास्तनुयं भूरि पश्वः ।
ग्रां वो देवी रोदसी तच्छृणोता नो रयिं जनत विश्ववारम् ॥ ११८

यज्ञं च नस्तन्वं च प्रजां च रयिं च नो जनत विश्वरूपम् ।
योनौ रेतो दधुदस्मै नु त्वष्टा देवीः पत्नीर्जनत जीवसे नः ॥ ११९

वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य ।
मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः ॥ १२०

पर ऋणा सावीरध मत्कृतानि माहं राजन्नन्यकृतेन भोजम् ।
अव्युष्टा इन्नु भूयसीरुषास आ नो वीरान् वरुण तासु शाधि ॥ १२१

अपो सु म्यक्ष वरुण भियसं मत्सम्राडृतावोऽनु नो गृभाय ।
दामेव वत्साद्विमुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे ॥ १२२

यो मे राजन् युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान् ॥ १२३

मा नो वधैर्वरुण ये त इष्टा एनः कृण्वन्तमसुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥ १२४

[९] वा. ७,२४; ३३,८; १८,७३; २६,७ । काण्व. ७,९६; ३२,८; २०,४२; २८,९ । [यज्ञं च नस्तन्वं च० । ऋ. १०,१५७,२; साम. ११११; अथर्व. २०,६३,१; १२४,४; तै. आ. १,२७,१ । वि मच्छ्रथाय रशनाम्० । ऋ. २,२८,५ । पर ऋणा सावीरध० । ऋ. २,२८,९ । अपो सु म्यक्ष० । ऋ. २,२८,६; नि. १३,१ । यो मे राजन् युज्यो० । ऋ. २,२८,१० । मा नो वधैर्वरुण० । ऋ. २,२८,७]

क्व त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ १२५

मूर्धानं दिवः, पृष्टो दिवि, वैश्वानरस्य सुमतौ स्याम, त्वमग्ने शोचिषा शोशुचानो,
ऽग्निः प्रातः सवनात्, विश्वं विष्याच ॥ ९ ॥ १२६

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः ।
घृतवर्तनिः पविभी रुचान इषां वोढा नृपतिर्वाजिनीवान् ॥ १२७

स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः ।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद्याममश्विना दधाना ॥ १२८

स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः ।
वि वां रथो वध्वा यादमानोऽन्तान् दिवो बाधते वर्तनिभ्याम् ॥ १२९

यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।
तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥ १३०

युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।
यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥ १३१

युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः ।
पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता ॥ १३२

ब्रह्मणस्पते त्वमस्य यन्ता ॥ १३३

[क्व त्यानि नौ सख्या० । ऋ. ७,८८,५ । मूर्धानं दिवः० । ऋ. ६,७,१; सा. ६७,११४०; तै. सं. १,४, १३,१; ६,५,०,१; काठ. ४,५; ४८,१; कपि. ३,४ । पृष्टो दिवि० । ऋ. १,९८,२; ७,५,२; तै. सं. १,५,११,१; तै. ब्रा. ३,११,६,४; काठ. ४,१६; ४०,३ । वैश्वानरस्य सुमतौ० । ऋ. १,९८,१; तै. सं. १,५,११,३; नि. ७,२२; काठ. ४,१६ । त्वमग्ने शोचिषा० । ऋ. ७,१३,२; तै. सं. १,५,११,२ । अग्निः प्रातः सवनात्० । मै. १,३,३६; तै. सं. ३,१,९,१; काठ. ३०,६—७]

[१०] तै. ब्रा. २,८,७; २,८,५—६ । वा. ३१,९; ३४,५८ । काण्व. ३३,९; ३३,४६ । आ वां रथो रोदसी० । ऋ. ७,६९,१; तै. ब्रा. २,८,७,६ । स पप्रथानो अभि पञ्च० । ७,६९,२; तै. ब्रा. २,८,७,७ । स्वश्वा यशसा यातम्० । ऋ. ७,६९,३; तै. ब्रा. २,८,७,७ । यो ह स्य वां रथिरा० । ऋ. ७,६९,५; तै. ब्रा. २,८,७,८; काठ. १७,१८ । युवोः श्रियं परि योषा० । ऋ. ७,६९,४; तै. ब्रा. २,८,७,८; नि. ६, ४ । युवं भुज्युमवविद्धं० । ऋ. ७,६९,७; तै. ब्रा. २,८,७,८ । ब्रह्मणस्पते त्वमस्य० । ऋ. २,२३,१९; २४,१६; तै. ब्रा. २,८,५,१]

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥ १३४

ब्रह्मणस्पतेरभवद्यथावशं सत्यो मन्युर्महि कर्मा करिष्यतः ।
यो गा उदाजत् स दिवे वि चाभजन्महीव रीतिः शवसासरत् पृथक् ॥ १३५

इन्धानो अग्निं वनवद्वनुष्यतः कृतब्रह्मा शूशुवद्रातहव्य इत् ।
जातेन जातमति स प्र सर्सृते यं यं युजं कृणुते ब्रह्मणस्पतिः ॥ १३६

ब्रह्मणस्पते सुयमस्य विश्वहा ॥ १३७

स इज्जनेन स विशा स जन्मना स पुत्रैर्वाजं भरते धना नृभिः ।
देवानां यः पितरमाविवासति श्रद्धामना हविषा ब्रह्मणस्पतिम् ॥ १३८

आयातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।
सं यावप्नःस्थो अपसेव जनाञ्छ्रुधीयतश्चिद्यतथो महित्वा ॥ १३९

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥ १४०

को नु वां मित्रावरुणा ऋतायन्दिवो वा महः पार्थिवस्य वा दे ।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान् ॥ १४१

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे ।
विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरावर्त ॥ १४२

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा ।
तेन नो मित्रावरुणा अविष्टं सिषासन्तो जिगीवांसः स्याम ॥ १४३

प्र बाहवा ॥ १० ॥ १४४

[स ईं सत्येभिः सखिभिः० । ऋ. १०,६७,७; अथर्व. २०,९१,७; तै. ब्रा. २,८,५,१; नि. ५,४ । ब्रह्मणस्पतेरभवद्यथा० । ऋ. २,२४,१४; तै. ब्रा. २,८,५,२ । इन्धानो अग्निं वनवद्० । ऋ. २,२५,१; तै. ब्रा. २, ८,५,२ । ब्रह्मणस्पते सुयमस्य० । ऋ. २,२४,१५; तै. ब्रा. २,८,५,२ । स इज्जनेन स विशा० । ऋ. २,२६, ३; तै. सं. २,३,१४,३; तै. ब्रा. २,८,५,३ । आयातं मित्रावरुणा० । ऋ. ६,६७,३ । युवं वस्त्राणि पीवसा० । ऋ. १,१५२,१; तै. ब्रा. २,८,६,६ । को नु वां मित्रावरुणा० । ऋ. ५,४१,१ । तत्सु वां मित्रावरुणा० । ऋ. ५,६२,२; तै. ब्रा. २,८,६,६ । यद्बंहिष्ठं नातिविधे० । ऋ. ५,६२,९; तै. ब्रा. २,८,६,७ । प्र बाहवा० । ऋ. ७,६२,५; तै. सं. १,८,२२,३; २,५,१२,३; तै. ब्रा. २,७,१५,६; ८,६,७; काठ. ११,१४]

आ नो विश्वा आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः।
भुवन् यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ॥ १४५
शं नो देवा विश्वदेवा भवन्तु शꣳ सरस्वती सह धीभिरस्तु।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ १४६
ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः।
ते सौभगꣳ वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥ १४७
सुगा वो देवा, विश्वे देवाः ॥ १४८
द्यौः पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृडता नः।
विश्व आदित्या अदिते सजोषा अस्मभ्यꣳ शर्म बहुलꣳ वियन्त ॥ १४९
ईडे अग्निꣳ स्ववसं नमोभिरिह प्रसत्तो विचयत् कृतं नः।
रथैरिव प्रभरे वाजयद्भिः प्रदक्षिणिन्मरुताꣳ स्तोममृश्याम् ॥ १५०
त्विषीमन्तो अध्वरस्येव दिद्युत् तृषुच्यवसो जुह्वो नाग्नेः।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥ १५१
अग्ने याहि दूत्यं मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन।
सरस्वतीं मरुतो अश्विनापो यक्षि देवान् रत्नधेयाय विश्वान् ॥ १५२
प्र चित्रमर्कं गृणते तुराय ॥ १५३
ये अग्नयो न शोशुचन्निधाना द्विर्यत् त्रिर्मरुतो वावृधन्त।
अरेणवो हिरण्ययास एषाꣳ साकं नृम्णैः पौꣳस्येभिश्च भूवन् ॥ १५४

[११] तै. ब्रा. २,८,६। वा. ८,१८,५५,५८; ३३,५३। काण्व. ९,१८,४१.४३; ३२,५३। [आ नो विश्वा आस्क्रा०। ऋ. १,१८६,२। तै.ब्रा. २.८,६.३। शं नो देवा विश्वदेवा०। ऋ. ७,३५,११; अथर्व.१९,११.२। तै. ब्रा. २.८,६,३। ये सवितुः सत्यसवस्य०। ऋ.१०,३६,१३; तै.ब्रा. २,८,६,४। सुगा वो देवा०। काठ. ४,१२; कपि.३,१०। विश्वे देवाः०। ऋ. ५,५१,१३;६,९,५; ५१,१०,५२,१३—१४; ९,५,११। १०,२४,५; ५२,१; ६५,१४; तै. सं. २.४ १४,५; ४,१,११,४; तै. ब्रा. २,८,६,५; शत. ब्रा. १,५,१,२६। द्यौः पितः (०ष्पि०) पृथिवि०। ऋ. ६,५१,५; तै. ब्रा. २,८,६,५। ईडे अग्निꣳ स्ववसं०। ऋ. ५ ६०,१; अथर्व. ७,५०,३; तै. ब्रा. २,७,१२,४। त्विषीमन्तो अध्वरस्येव०। ऋ. ६,६६,१०। अग्ने याहि दूत्यं मा०। ऋ. ७,९,५; तै. ब्रा. २,८,६,४। प्र चित्रमर्कं गृणते०। ऋ. ६,६६.९; तै. सं. ४,१,११,३; तै. ब्रा. २,८,५,५; नि. ३,२१; काठ. २०,१५। ये अग्नयो न शोशुचन्निधाना०। ऋ. ६,६,६,२]

मै. ६१

आ वो यन्तूदवाहासो अद्य ॥ १५५
सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञाः पृथिवीं धारयन्ति।
सा नो भूतस्य भुवनस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥ १५६
असंबाधा या मध्यतो मानवेभ्यो यस्या उद्वतः प्रवतः समं महत्।
नानारूपा ओषधीर्या बिभर्ति पृथिवी नः प्रथताꣳ राध्यतां नः ॥ १५७
याꣳ रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम्।
सा नो मधु घृतं दुहामथो उक्षतु वर्चसा ॥ १५८
यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन्।
या बिभर्ति बहुधा प्राणदेजत्सा नो भूमिः पूर्वपेयं दधातु ॥ १५९
यास्ते प्राचीः प्रदिशो या उदीचीर्याश्च भूम्यधराग्याश्च पश्चा।
शिवास्ता मह्यं चरते भवन्तु मा निपप्तं भुवने शिश्रियाणः ॥ १६०
विश्वंभरा वसुधानी पुरुक्षुर्हिरण्यवर्णा जगतः प्रतिष्ठा।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्र ऋषभा द्रविणं नो दधातु ॥ ११ ॥ १६१
आ वां मित्रावरुणा हव्यदातिं नमसा देवा अवसा ववृत्याम्।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकꣳ वृष्टिर्दिव्या सुपारा ॥ १६२
ऋतस्य गोपा अधितिष्ठथो रथꣳ सत्यधर्माणा परमे व्योमन्।
यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत् पिन्वते दिवः ॥ १६३
वाचꣳ सु मित्रावरुणा ऋतावरीं पर्जन्यश्चित्राꣳ वदति त्विषीमतीम्।
अभ्रा वसथ मरुतः सु मायया द्याꣳ वर्षयतमरुणामरेपसम् ॥ १६४

[आ वो यन्तूदवाहासो०। ऋ. ५,५८.३; तै. ब्रा. २,५,५,३। सत्यं बृहदृतमुग्रं०। अथर्व. १२,१,१। असंबाधा (०धं) या मध्यतो० (य०)। अथर्व. १२,१,२। याꣳ रक्षन्त्यस्वप्ना०। अथर्व. १२.१,७। यस्यां पूर्वे पूर्वजना०। अथर्व १२,१,५ (पूर्वार्धः); १२,१,४ (उत्तरार्धः)। यास्ते प्राचीः प्रदिशो०। अथर्व. १२,१,३१। विश्वंभरा वसुधानी०। अथर्व १२,१,६,]

[१२] तै. ब्रा. २,८,६; २,८,३—४। वा. १७,३९; २१,८; २०,५२; २९,३४। काण्व. १८,३९; २३,८; २२,१७; ३१,४६। [आ वां मित्रावरुणा०। ऋ. १,१५२,७; तै. ब्रा. २,८,६,५। ऋतस्य गोपा अधितिष्ठथो०। ऋ. ५,६३,१। वाचꣳ सु मित्रावरुणा०। ऋ. ५,६३,६; तै. ब्रा. २,४,५,४]

सम्राजा अस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा।
वृष्टिꣳ वाꣳ राधो अमृतत्वमीमहे द्यावापृथिवी विचरन्ति तन्यवः ॥ १६५
आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिडाभिः।
प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥ १६६
सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी।
चित्रेभिरभ्रैरुपतिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया ॥ १६७
आ ते महो, यो जातं एवा,—ऽभि गोत्राणि ॥ १६८
आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽवतारीर्दासीः ॥ १६९
अयꣳ शृण्वे अध जयन्नुत घ्नन्नयमुत प्रकृणुते युधा गाः।
यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृढं भयत एजदस्मात् ॥ १७०
अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानाम्।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥ १७१
इन्द्रस्तरस्वानभिमातिहोग्रो हिरण्यवर्ण इषिरः स्वर्षाः।
तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ॥ १७२
हिरण्यवर्णो अभयं कृणोत्वभिमातिहेन्द्रः पृतनासु जिष्णुः।
स नः शर्म त्रिवरूथꣳ वियꣳसद्यूयं पात स्वस्तिभिः सदा नः ॥ १७३
इन्द्रꣳ स्तुहि वज्रिणꣳ सोमपृष्ठं पुरोडाशस्य जुषताꣳ हविर्नः।
हत्वाभिमातीः पृतनाः सहस्वानथाभयं कृणुहि विश्वतो नः ॥ १७४

[सम्राजा अस्य भुवनस्य०। ऋ. ५,६३,२। आ नो मित्रावरुणा०। ऋ. ७,६५,४; तै. ब्रा. २,८,६,७। सम्राजा उग्रा वृषभा०। ऋ. ५,६३,३। आ ते महो०। ऋ. ७,२५,१; तै. सं. १,७,१३,२। यो जात एव०। ऋ. २,१२,१; अथर्व. २०,३४,१; तै. सं. १,७,१३,२; तै. ब्रा. २,८,३,३; नि. ३,२१; १०,१०; काठ. ८,१६। अभि गोत्राणि०। ऋ. १०,१०३,७; सा. १८५५; अथर्व. १९,१३,७; तै. सं. ४,६,४,२। आभिः स्पृधो मिथतीः०। ऋ. ६,२५,२; तै. ब्रा २,८,३,२। अयꣳ शृण्वे अध०। ऋ. ४,१७,१०; तै. ब्रा. २,८,३,२। अनु स्वधामक्षरन्नापो०। ऋ. १,३३.११; तै. ब्रा. २,८,३,४। तस्य वयꣳ सुमतौ०। ऋ. ६.४७,१३; १०,१३१,७; अथर्व. ७,९२,१; २०,१२५.७; तै. सं. १,७,१३,५; तै. ब्रा. २,८,४.१; नि. ६,७। हिरण्यवर्णो अभयं०। तै. ब्रा. २,८,४,१। इन्द्रꣳ स्तुहि वज्रिणꣳ०। तै. ब्रा. २,८,४,१]

स्तुहि शूरꣳ वज्रिणमप्रतीकꣳ वृत्रहणं पुरुहूतमिन्द्रम्।
य एको ईच् शतपतिर्जनेषु तस्मा इन्द्राय हविषा जुहोत ॥ १७५
इन्द्रो देवानामधिपाः पुरोहितो विशां पतिरभवद् वाजिनीवान्।
अभिमातिहा तविषस्तुविष्मानस्मभ्यं चित्रꣳ वृषणꣳ रयिं दात् ॥ १७६
य इमे द्यावापृथिवी महित्वा बलेनाꣳहदभिमातिहेन्द्रः।
स नो हविः प्रतिगृभ्णातु रातये देवानां देवो निधिपा नो अव्यात् ॥ १२ ॥ १७७
इन्द्रो वृत्रमतरद् वृत्रतूर्येऽनाधृष्यो मघवा शूर इन्द्रः।
अन्वेनꣳ विशो अमदन्त पूर्वीरयꣳ राजा जगतश्चर्षणीनाम् ॥ १७८
स एव वीरः स उ वीर्यावान्त्स एकराजो जगतः परस्पाः।
यदा वृत्रमतरच्छूर इन्द्रो अथैकराजो अभवज्जनानाम् ॥ १७९
इन्द्रो यज्ञꣳ वर्धयन् विश्ववेदाः पुरोडाशस्य जुषताꣳ हविर्नः।
वृत्रं तीर्त्वा दानवꣳ वज्रबाहुर्दिशोऽदृꣳहद् दृꣳहिता दृꣳहणेन ॥ १८०
इमꣳ यज्ञꣳ वर्धयन् विश्ववेदाः पुरोडाशं प्रतिगृभ्णात्विन्द्रः।
यदा वृत्रमतरच्छूर इन्द्रो अथाभवद्दमिताभिक्रतूनाम् ॥ १८१
अहन् वृत्रम् ॥ १८२
इन्द्रो देवाञ्छम्बरहत्य आवदिन्द्रो देवानामभवत् पुरोगाः।
इन्द्रो यज्ञे हविषा वावृधानो वृत्रतूर्नो अभयꣳ शर्म यꣳसत् ॥ १८३
इन्द्रस्य वृष्णो, जनिष्ठा उग्र, इन्द्र एषां नेता, भूरि चकर्थ ॥ १८४

[स्तुहि शूरꣳ वज्रिणम्०। तै. ब्रा. २,८,४,२। इन्द्रो देवानामधिपाः०। तै. ब्रा. २,८४,२। य इमे द्यावापृथिवी०। तै. ब्रा. २,८,४,३]

[१३] तै. ब्रा. २.८,३—४। वा. १७,४० - ४१; ३३,६४; २०,३६। काण्व. १८,४०—४१; ३२,६४; २२,११ [इन्द्रो वृत्रमतरद् वृत्रतूर्ये०। तै. ब्रा. २,८ ३.६। स एव वीरः स उ०। तै ब्रा. २,८,३,७। इन्द्रो यज्ञꣳ वर्धयन्०। तै. ब्रा. २,८,३,७। इमꣳ यज्ञꣳ वर्धयन्०। तै. ब्रा २,८.३,८। अहन् वृत्रम्०। ऋ. १,३२.५; तै. ब्रा. २,५,४,३; नि. ६,४। इन्द्रो देवाञ्छम्बरहत्ये०। तै. ब्रा. २,८.३.८। इन्द्रस्य वृष्णो०। ऋ. १०,१०३.९; सा. १८५७; अथर्व. १९,१३ १०; तै. सं. ४,६,४,३; काठ. १८,५; कपि. २८,५। जनिष्ठा उग्र०। ऋ. १०,७३,१; तै. ब्रा. २,८,३,४; काठ. ४,८; कपि. ३,६। इन्द्र एषां (आसां) नेता०। ऋ. १०,१०३,८; सा. १८५६; अथर्व. १९,१३.९; तै. सं. ४,६,४,३; काठ. १८,५; कपि. २८,५। भूरि चकर्थ०। ऋ. १.१६५,७; नि. ६,७; काठ. ९,१८ २३,११]

त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभिः स्तवस इन्द्र देवैर्विद्यामेषं वृजनं जीरदानुम् ॥ १८५

यः सप्त सिन्धूꣳरदधात् पृथिव्याꣳ यः सप्त लोकानकृणोद्दिशश्च ।
इन्द्रो हविष्मान्त्सगणो मरुद्भिर्वृत्रहणो यज्ञमिहोपयासत् ॥ १८६

समिद्धा इन्द्रो. ऽनवस्ते ॥ १८७

इन्द्रस्य नु वीर्याणि प्रवोचꣳ यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥ १८८

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रꣳ स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमवजग्मुरापः ॥ १८९

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥ १९०

अभि सिध्मो अजिगादस्य शत्रून् वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सꣳ वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥ १३ ॥ १९१

त्वमपो वि दुरो विषूचीरिन्द्र दृढमरुजः पर्वतस्य ।
राजाभवो जगतश्चर्षणीनाꣳ साकꣳ सूर्यं जनयन् द्यामुषासम् ॥ १९२

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपꣳ यदस्ति ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् ॥ १९३

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥ १९४

[त्वं मानेभ्य इन्द्र विश्वजन्या० । ऋ. १,१६९,८ । समिद्धा इन्द्रो० । तै. ब्रा. ३,६,८, कठ. ३८,६ । अनवस्ते० । ऋ. ५,३१ ते. सा. ४३२, ४४० तै. सं. १,६,१२,६; तै. ब्रा. २,८,४,३; काठ. ८,१६ । इन्द्रस्य नु वीर्याणि० । ऋ. १,३२,१; सा. ६१०; अथर्व. २,५,५; तै. ब्रा. २,५,४,१; ८,४,३ । अहन्नहिं पर्वते० । ऋ. १,३२,२; अथर्व. २,५,६; तै. ब्रा. २,५,४,२; ८,४,३ । इन्द्रो यातोऽवसितस्य० । ऋ. १,३२,१५; तै. ब्रा. २,८,४,३ । अभि सिध्मो अजिगादस्य० । ऋ. १,३३,१३; तै. ब्रा. २,८,४,४; नि. ६,१६]

[१४] तै. ब्रा. २,८,१,६ । वा. १७,४२; ८,४. ३३,६८; काण्व. १८,४२;८,३; ३२,६८ । [त्वमपो वि दुरो विषूची:० । ऋ. ६,३०,५ । इन्द्रो राजा जगतश्चर्षणीनाम्० । ऋ. ७,२७,३; अथर्व. १९,५,१; तै. ब्रा. २, ८५,८ । स्वादोरित्था विषूवतो० । ऋ. १,८४,१० सा. ४०९, १००५, अथर्व. २०,१०९,१]

युष्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य घृष्वेः ।
अजूर्यतो वज्रिणो वीर्याणीन्द्रः श्रुतस्य महतो महानि ॥ १९५

इदं नमो वृषभाय स्वराजे उक्थशुष्माय तवसेऽवाचि ।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत् सूरिभिस्तव शर्मन्त्स्याम ॥ १९६

अस्माकमिन्द्रः समृतेषु ध्वजेषु ॥ १९७

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमꣳ यज्ञं दधतु श्रोषमाणाः ॥ १९८

न दक्षिणा विचिकिते न सव्या न प्राचीनमादित्या नोत पश्चा ।
पाक्या चिद्वसवो धीर्या चिद्युष्मानीतो अभयं ज्योतिरश्याम् ॥ १९९

धारयन्तः ॥ २००

तिस्रो भूमीर्धारयꣳस्त्रीन् रुत द्यूꣳस्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन् वरुण मित्र चारु ॥ २०१

यज्ञो देवानां प्रत्येतु सुम्नम् ॥ २०२

शुचिरपः सूयवसा अदब्धा उपक्षयन्ति वृद्धवयाः सुवीरः ।
नकिष्टं घ्नन्त्यन्तितो न दूराद्य आदित्यानां भवति प्रणीतौ ॥ २०३

आदित्यो देव उदगात् पुरस्ताद्विश्वा भूतानि प्रति मोदमानः ।
तस्य देवाः प्रसवꣳ यन्ति सर्वे यत्रास्य नाम परमं गुहा विदुः ॥ २०४

यस्य भान्ति केतवो यस्य रश्मयो यस्येमा विश्वा भुवनानि सर्वा ।
तस्यादित्यस्य प्रसवं मनामहे यस्तेजसा प्रथमजा विभाति ॥ २०५

[युष्मस्य ते वृषभस्य० । ऋ. ३,४६,१ । इदं नमो वृषभाय० । ऋ. १,५१,१५ । अस्माकमिन्द्रः समृतेषु० । ऋ. १०,१०३,११; सा. १८५९; अथर्व. १९,१३,११; तै. सं. ४,६,४,३; काठ. १८,५; कपि. २८,५ । आदित्यानामवसा० । ऋ. ७५१,१; तै. सं. २,१,११,६; तै. ब्रा. २,८,१,६ । न दक्षिणा विचिकिते० । ऋ. २,२७,११; तै. सं. २,१,११,५; तै. ब्रा. २,८,१,६ । धारयन्त:० । ऋ. २,२७,४; तै. सं. २,१,११,४; तै. ब्रा. २,८,१,६; काठ ११,१२ । तिस्रो भूमीर्धारयꣳस्त्रीन्० । ऋ. २,२७,८; तै. सं. २,१,११,५; तै. ब्रा. २,८,१,६; काठ. ११,१२ । यज्ञो देवानां प्रत्येतु (०ति०) । ऋ. १,१०७,१; तै. सं. १,४,२२,१, २,१,११,४; तै. ब्रा. २,८,१,६; काठ. ४,१०; कपि. ३,८ । शुचिरपः सूयवसा० । ऋ. २,२७,१३; तै. सं. २,१,११,४; तै. ब्रा. २,८,१,६ । यस्य भान्ति केतवो० । तै. ब्रा. ३,१,१,१]

विभाति केतुरक्तः पुरस्तादादित्यो विश्वा भुवनानि सर्वा ।
सर्वं नु पन्थामन्वेति प्रजानन् पिता देवानामसुरो विपश्चित् ॥ २०६

व्रतेन यꣳ व्रतिनो वर्धयन्ति देवा मनुष्याः पितरश्च सर्वे ।
तस्यादित्यस्य प्रसवं मनामहे यस्तेजसा प्रथमजा विभाति ॥ २०७

आदित्यः शुक्र उदगात् पुरस्ताज्ज्योतिः कृण्वन् वि तमो बाधमानः ।
आशासमानः प्रदिशो नु सर्वा भद्रस्य कर्ता रोचमाना आगात् ॥ २०८

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।
यदा चरिष्णू मिथुना अभूतामादित् प्रापश्यन् भुवनानि विश्वा ॥ १४ ॥ २०९

वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सꣳशिशाधि ॥ २१०

अग्ने स क्षेषदृतपा ऋतेजा उरु ज्योतिर्नशते देवयुष्टे ।
यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमꣳहः ॥ २११

तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ॥ २१२

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यꣳ युवानꣳ स्वाध्यं जनयत् सूदयच्च ॥ २१३

स तेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः ।
अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥ २१४

स इदस्तेव प्रतिधादसिष्यञ्छिशीत तेजोऽयसो न धाराम् ।
चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजꣳहाः ॥ २१५

हव्यवाडग्निरजरः पिता नः ॥ २१६

[यदेदेनमदधुर्यज्ञियासो० । ऋ. १०,८८,११; नि. ७,२९]

[१५] [वयमु त्वा गृहपते० । ऋ. ६,१५,१९; तै. ब्रा. २,४,१२,१ । अग्ने स क्षेषदृतपा० । ऋ. ६,३,१ । तेजिष्ठा यस्यारतिः० । ऋ. ६,१२,३ । आ यदिषे नृपतिं० । ऋ. १,७१,८; तै. सं. १,३,१४,६ । स तेजीयसा मनसा० । ऋ. ३,१९,३; तै. सं. १,३,१४,६ । स इदस्तेव प्रतिधाद्० । ऋ. ६,३,५ । हव्यवाड(ळ)ग्निरजर:० । ऋ. ५,४,२; तै. सं. ३,४,११,१]

मथीद्यदीꣳ विष्टो मातरिश्वा होतारꣳ विश्वाप्सुꣳ विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु ३स्वर्णं चित्रꣳ वपुषे विभावम् ॥ २१७

अयꣳ स यस्य शर्मन्नवोभिरग्नेरेधते जरिताभिष्टौ ।
ज्येष्ठेभिर्यो भानुभिरृषूणां पर्येति परिवीतो विभावा ॥ २१८

अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ॥ २१९

स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः ॥ २२०

यो भानुभिर्विभावा विभात्यग्निर्देवेभिरृतावाजस्रः ।
आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥ २२१

यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तꣳ वीतात् ॥ २२२

एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।
शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥ २२३

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः ।
सनेम वाजꣳ समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ॥ २२४

आ नो गहि सख्येभिः शिवेभिर्महान् महीभिरूतिभिः सरण्यन् ।
अस्मे रयिं बहुलꣳ संतरुत्रꣳ सुवाचं भागꣳ यशसं कृधी नः ॥ २२५

कुर्मस्त आयुरजरꣳ यदग्ने यथा युक्तो जातवेदो न रिष्याः ।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥ २२६

[मथीद्यदीꣳ विष्टो० । ऋ. १,१४८,१ । अयꣳ स यस्य शर्मन्० । ऋ. १,६,१ । अदिद्युतत्स्वपाको० । ऋ. ६,११,४; अथर्व. ३,३,१ । स नो विभावा चक्षणिर्न० । ऋ. ६,४,२ । यो भानुभिर्विभावा विभाति० । ऋ. १०,६,२ । यदग्न एषा समिति० । ऋ. १०,११,८; अथर्व. १८,१,२६ । एता ते अग्न उचथानि० । ऋ. १,७३,१० । वि पृक्षो अग्ने मघवानो० । ऋ. १,७३,५ । आ नो गहि सख्येभि:० । ऋ. ३,१,१९ । कुर्मस्त आयुरजर०० । ऋ. १०,५१,१७]

हविषीव यजमानो ना आभाग् देवेभ्यः शिक्षुत मानुषेभ्यः ।
त्वं देवानामासि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ १५ ॥ २२७

अग्ने दा, दा नो अग्ने, ऽग्निर्दुदात्यं,—न्नपते अन्नस्य नो देह,—ग्निना रयिमश्नवत्,
सꣳ समिद्युवसे वृषन्, यास्ते ॥ २२८

यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या अनु स्वाः ॥ २२९
प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेताः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम् ॥ २३०
अङ्गिरोभिरागहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तꣳ हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य ॥ २३१
इमꣳ यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः सꣳविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ २३२
मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
याꣳश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ॥ २३३
परेयिवाꣳसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतꣳ संगमनं जनानाꣳ यमꣳ राजानꣳ हविषा दुवस्य ॥ २३४

[१६] तै. सं. २,६,१२। तै. ब्रा. २,८,५। वा. ११,८३; १५,३०; १३,११; १८.४६। काण्व. १२,८४; १६,५१; १४,२२; २०.१६। [अग्ने दा०। ऋ.३,२४,५। तै. सं. २,२,१२,६; काठ. ६,१०। दा नो अग्ने०। मै. ४,१२,१; ऋ. ७,१,५; २,२,७; तै. सं. २,२,१२,६। अग्निर्ददाति०। ऋ. ५,२५,६; काठ. १,१५। अन्नपते अन्नस्य०। तै. सं. ४,२,३,१; तै. ब्रा. ३,११,४; काठ. १६.१२; १६,१०, कपि. २५,१; ३२,२। अग्निना रयिमश्नवत्०। ऋ. १,१,३; तै. सं. ३,१,११.१। ४,३,१३,५। सꣳ समिद्युवसे वृषन्०। ऋ.१०,१९१,१; अथर्व.६.६३,४; तै. सं. १,६,११.४। ४,४,४,४; काठ. २,१५। यास्ते०। मै. २,७,१६; ऋ. १,४३,९। २,३२,५; ६,५८,३। तै. सं. ३,३,११,५। ४,२,९,४। ५,७,७,३। तै. ब्रा. २,५,५,५। काठ. ९,६२,७; सा. ९७९; अथर्व. ७,४८.२, यमो नो गातुं प्रथमो०। ऋ. १०,१४,२। अथर्व. १८,१,५०। प्रेहि प्रेहि पथिभि:०। ऋ. १६,१६। ४०,१३। अङ्गिरोभिरागहि०। ऋ.१०,१४,५; अथर्व. १८,१,५९; तै. सं. २,६,१२,६। १०,१४,७; अथर्व. १८,१,५४। मातली कव्यैर्यमो०। ऋ. इमꣳ यम प्रस्तरमा०। ऋ. १०,१४,४; अथर्व. १८,१,६०; तै. सं. २,६,१२,६। परेयिवाꣳसं प्रवतो०। ऋ. १० १०,१४,३। अथर्व. १८,१,४७; तै. सं. २,६,१२,५; तै. ब्रा. २,६,१६,२। १४,१। अथर्व. १८,१,४९; तै. आ. ६,१,१; नि. १०,२०]

मै० ६१

यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यꣳ सूर्यस्य कामेन कृतः श्रव इच्छमानः ॥ २३५
शुक्रं ते अन्यद्यजतं ते अन्यत् ॥ २३६
पूषेमा आशा अनुवेद सर्वाः सो अस्माꣳ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन् पुर एतु प्रजानन् ॥ २३७
प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥ २३८
पूषा सुबन्धुर्दिव आ पृथिव्या इडस्पतिर्मघवा दस्मवर्चाः ।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसꣳ स्वञ्चम् ॥ २३९
अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते ॥ १६ ॥ २४०
यद्देवा देवहेडनꣳ यद्वाचानृतमोदिम । आदित्यास्तस्मान्मुञ्चतर्तस्य त्वेनमाहुतः ॥ २४१
देवा जीवनकाम्या यद्वाचानृतमोदिम । तस्मान्न इह मुञ्चत विश्वे देवाः सजोषसः ॥ २४२
ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति ।
कृतान्नः पाह्यꣳहसो यत् किंचानृतमोदिम ॥ २४३
इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः ।
ते नो मुञ्चन्त्वेनसो यत् किंचानृतमोदिम ॥ २४४
संजातशꣳसादुत जामिशꣳसाज्ज्यायसः शꣳसादुत वा कनीयसः ।
अनाधृष्टं देवकृतꣳ यदेनस्तस्मात्त्वमस्मान् जातवेदो मुमुग्धि ॥ २४५

[यास्ते पूषन्नावो अन्तः०। ऋ. ६,५८,३। तै. ब्रा. २,५,५,५; ८,५,३। शुक्रं ते अन्यद्यजतं०। ऋ. ६, ५८,१; सा. ७५; तै. सं. ४,१,११,२; तै. ब्रा. २,८,५,३। तै. आ. १,२,४; १०,१; ४,५,६। नि. १२,१७; काठ. ४,१५; २०,१५। पूषेमा आशा अनुवेद०। ऋ. १०,१७,५; अथर्व. ७,९,२; तै. ब्रा. २,८,५,३; ४,१,५। तै. आ. ६,१,१। प्रपथे पथामजनिष्ट०। ऋ. १०,१७,६; अथर्व. ७,९,१; तै. ब्रा. २,८,५,३। पूषा सुबन्धुर्दिव आ०। ऋ. ६,५८,४; तै. ब्रा. २,८,५,४। अजाश्वः पशुपा०। ऋ. ६,५८,२; तै. ब्रा. २,८,५,४]
[१७] तै. आ. २,३-४। वा. २०,१४-१६; २१,१-४; १२,११; १८४९; १,२४। ८,१४,१६। काण्व. २२,१-३। २३,१-४। १३,१३; २०,१९; २,४४; ९,१६। [देवा जीवनकाम्या०। तै. ब्रा. ३,७,१२,१; तै. आ. २,३,१। ऋतेन द्यावापृथिवी०। तै. ब्रा. ३,४,१२,२; तै. आ. २,३,१। सजातशꣳसादुत०। तै. ब्रा. ३,७,१२,२: तै. आ. २,३]

यदन्तरिक्षं पृथिवीमुत द्याꣳ यन्मातरं पितरꣳ वा जिहिꣳसिम ।
अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरितानि यानि कानि च चकृम ॥ २४६
येन त्रितो अर्णवान्निर्बभूव येन सूर्यं तमसो निरमोचि ।
येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान अक्षि ॥ २४७
यद्धेन्यमृणमहं बभूव धिप्स्यꣳ वा संचकर जनेभ्यः ।
अग्निर्नस्तस्मादिन्द्रश्च सꣳविदानौ प्रमुञ्चताम् ॥ २४८
यत् कुसीदमप्रतीतं मयेह येन यमस्य निधिना चरावः ।
एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति हस्तानृणानि ॥ २४९
यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणाꣳ वग्नुमुपजिघ्नमानः ।
उग्रं पश्याद राष्ट्रभृच्च तान्यप्सरसामनुदत्तानृणानि ॥ २५०
उग्रं पश्ये राष्ट्रभृत् किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत् ।
नेन्न ऋणानृणवानीप्समानो यमस्य लोके निधिरजराय ॥ २५१
इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ २५२
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥ २५३
उदुत्तमꣳ वरुण पाशमस्मदवाधमꣳ वि मध्यमꣳ श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ २५४

[यदन्तरिक्षं पृथिवीमुत०। तै. सं. १,८,५,३; तै. ब्रा. ३,७,१२,४; तै. आ. २,६,२। काठ. ९,६; कपि.८,१०। येन त्रितो अर्णवान्निः०। तै. आ. २,३। यत् कुसीदमप्रतीतं०। तै. सं. ३,३,८,१। तै. आ. २,३। यद्धस्ताभ्यां चकर०। तै. ब्रा. ३,७,१२,३; तै. आ. २,४। उग्रं पश्येद्राष्ट्रभृत्०। तै. आ. २,४। इमं मे वरुण श्रुधी०। ऋ. १,२५,१९; सा. १५८५। तै. सं. ६,१,११,६। तै. ब्रा. ३,७,११,३; १२,३; तै. आ. २,४,४। काठ. ४,१६; ११,१२। तत्त्वा यामि ब्रह्मणा०। ऋ. १,२४,११; तै. सं. २,१,११,६; तै. ब्रा. २,८,१,६। ३,७, ११,३; १२,६; तै. आ, २,४; काठ. ४,१६। ११,१३। उदुत्तमꣳ वरुण पाशम्०। ऋ. १,२४,१५। सा. ५८९, अथर्व. ७,८३,३। १८,४,६९; तै. सं. १,५,११,३; २,५,१२,१; ४,२,१,३; तै. ब्रा. २,७,१६,४। ८,१,६। नि. २,१३। काठ. ३,८; १६,८; कपि. २,१५; ३२,१]

अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनाꣳसि शिश्रथः कृतानि ॥ २५५
त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः ।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ २५६
स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि ॥ २५७
संकुसुको विकुसुको निर्ऋतो यश्च निस्वनः। तेऽस्मद्यक्ष्ममनागसो दूराद्दूरमचीचतम्॥ २५८
निर्यक्ष्ममचीचते कृत्या निर्ऋतिं चकार ।
तेन योऽस्मत् समृच्छाति तमस्मै प्रसुवामसि ॥ २५९
दुःशꣳसानुशꣳसाभ्यां घणेनानुघणेन च ।
तेन योऽस्मत् समृच्छाति तमस्मै प्रसुवामसि ॥ २६०
सꣳ वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनु नो मार्ष्टु तन्वो यद्विलिष्टम् ॥१७॥ २६१
शुची वो हव्या मरुतः शुचीनाꣳ शुचिꣳ हिनोम्यध्वरꣳ शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥ २६२
या वः शर्म शशमानाय सन्ति ॥ २६३
अꣳसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥ २६४

[अव ते हेडो (०ळो) वरुण०। ऋ. १,२४,१४; तै. सं. १,५,११,३; २,५,१२,१; तै. ब्रा. २,७,१६,४; ८,१,३; तै. आ. २,४,४। काठ. ४०,११। त्वं नो अग्ने वरुणस्य०। ऋ. ४,१,४; तै. सं. २,५,१२,३; तै. ब्रा. ३,७,११,३; १२,६; तै. आ. २,४,४; ४,२०,३; काठ. ३४,१९। स त्वं नो अग्नेऽवमो०। ऋ. ४,१,५; तै.सं. २,५,१२,३; काठ. ३४,१९; कपि. ४८,१। संकुसुको विकुसुको०। अथर्व. १२,२,१४; तै. आ, २,४। निर्यक्ष्ममचीचते०। तै. आ. २,४। सꣳ वर्चसा पयसा०। अथर्व. ६,५३,३; तै. सं. १,४,४४,१; तै. आ. २,४,८; काठ. ४,१२; कपि. ३,१०]
[१८] तै. ब्रा. २,८,५; ७। [शुची वो हव्या मरुतः०। ऋ. ७,५६,१२; तै. ब्रा. २,८,५,५। या वः शर्म०। ऋ. १,८५,१२; तै. सं. १,५,११,५; २,१,११,१; ३,१४,४; तै. ब्रा. २,८,५,६; काठ. ८,१७; ११,१३। अꣳसेष्वा मरुतः०। ऋ. ७,५६,१३; तै. ब्रा. २,८,५,५]

ऋष्वयो वो मरुतो अ२सुबोधि ॥ २६५

इमे तुरं मरुतो रामयन्तीमे सहः सहस आनमन्ति ।

इमे शं२सं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ॥ २६६

अरा इवेदचरमा अहेव प्र प्रजायन्ते अकवा महोभिः ।

पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः संमिमिक्षुः ॥ २६७

अग्नीषोमा इमं२, युवमेतानि ॥ २६८

अग्नीषोमा यो अद्य वामिदं२ वचः सपर्यात् ।

तस्मै धत्त२ सुवीर्यं गवां पोषं२ स्वश्व्यम् ॥ २६९

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।

अग्नीषोमा ब्रह्मणा वावृधानोरु२ यज्ञाय चक्रथुरु लोकम् ॥ २७०

अग्नीषोमा य आहुतिं२ यो वां दाशाद्धविष्कृतिम् ।

स प्रजया सुवीर्यं२ विश्वमायुर्व्यश्नवत् ॥ २७१

अग्नीषोमा हविषः प्रस्थितस्य वीतं२ हर्यतं२ वृषणा जुषेथाम् ।

सुशर्माणा स्ववसा हि भूतमथा धत्त२ यजमानाय शं२योः ॥ २७२

आ चर्षणिप्रा वृषभो जनानां२ राजा कृष्टीनां पुरुहूत इन्द्रः ।

स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणायाह्यर्वाङ् ॥ २७३

विवेष यन्मा धिषणा जजान ॥ २७४

तं२ सध्रीचीरूतयो वृष्ण्यानि पौं२स्यानि नियुतः सश्चुरिन्द्रम् ।

समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आविशन्ति ॥ २७५

सत्यमित्तन्न त्वावाँ२ अन्योऽस्तीन्द्र देवो न मर्त्यो ज्यायान् ।

अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रम् ॥ २७६

[ऋष्वयो वो मरुतो० । ऋ. ५,५७,६ । इमे तुरं मरुतो० । ऋ. ७,५६,१९; तै. ब्रा. २,८,५,६ । अरा इवे-दचरमा० । ऋ. ५,५८,५; तै. ब्रा. २,८,५,७ । तमग्नीषोमा यो अद्य० । ऋ. १,९३,२; तै. ब्रा. २,८,७,९ । आन्यं दिवो मातरिश्वा० । ऋ. १,९३,६; तै. सं. २,३,१४,२; कठ. ४,१६ । अग्नीषोमा य आहुतिं० । ऋ. १,९३,३; तै. ब्रा. २,८,७,१० । अग्नीषोमा हविषः० । ऋ. १,९३,७; तै. सं. २,३,१४,२; तै. ब्रा. २,८,७,१० । आ चर्षणिप्रा वृषभो० । ऋ. १,१७७,१; तै. ब्रा. २,४,३,११; काठ. ३८,७ । विवेष यन्मा धिषणा० । ऋ. ३,३२,१४; तै. सं. १,६,१२,३; २,५,१२,५; तै. ब्रा. २,६,९,१; काठ. ८,१६; ३८,७ । तं२ सध्रीचीरूतयो० । ऋ. ६,३६,३ । तै. ब्रा. २,४,५,७; ६,९,१ । सत्यमित्तन्न त्वावां० (०वाँ०) । ऋ. ६,३०,४; तै. ब्रा. २,६,९,१]

प्र ससाहिषे पुरुहूत शत्रून् ॥ २७७

स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाडिन्द्र तव्यम् ।

रक्षा च नो मघोनः पाहि सूरीन् राये च नः स्वपत्या इषे धाः ॥ २७८

[३१४४]

॥ इति खिलकाण्डे चतुर्दशः प्रपाठकः ॥१४॥

॥ इति खिलकाण्डं समाप्तम् ॥

इति मैत्रायणी-संहिता समाप्ता ।

[प्र ससाहिषे पुरुहूत० । ऋ. १०,१८०,१; तै. सं. ३,४,११,४; तै. ब्रा. २,६,९,१; ३,५,७,४; काठ. ३८,७, १०,११ । स शेवृधमधि धा० । ऋ. १,५४,११; तै. ब्रा. २,६,९,१; काठ. ३८,७]

कपिष्ठलकठ संहिता

अथ कपिष्ठलकठसंहितायां

प्रथममष्टकम्

इषे त्वोर्जे त्वा। वायव स्थोपायव स्थ। देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। आप्यायध्वमघ्न्या देवभागं प्रजावतीरनमीवा अयक्ष्माः। मा व स्तेन ईशत माघशंसः। परि वो रुद्रस्य हेतिर्वृणक्तु। ध्रुवा अस्मिन्गोपतौ स्यात बह्वीः। यजमानस्य पशून्पाहि। वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारम् ॥१॥

घोपदसि। निष्टप्तं रक्षः। प्रेयमगाद्धिषणा बर्हिरच्छ मनुना कृता स्वधया वितष्टा। उर्वन्तरिक्षं वीहि। इन्द्रस्य परिपूतमसि। माघो मोपरि परुस्त ऋध्यासम्। आच्छेत्ता ते मा रिषत्। देव बर्हिः शतवल्शं विरोह सहस्रवल्शा वि वयं रुहेम। अदित्या रास्नासीन्द्राण्याः संनहनम्। पूषा ते ग्रन्थिं ग्रथ्नातु। स ते मा स्थात्। इन्द्रस्य त्वा बाहुभ्यामुद्यच्छे बृहस्पतेस्त्वा मूर्ध्नाहरामि। देवङ्गममसि। तदाहरन्ति कवयः पुरस्ताद्देवेभ्यो जुष्टमिह बर्हिरासदे ॥२॥

मातरिश्वनो घर्मोऽसि। द्यौरसि पृथिव्यसि। विश्वधाया परेण धाम्ना। अहुतासि मा ह्वाः। सा विश्वायुः सा विश्वव्यचाः सा विश्वधायाः। हुत स्तोको हुतो द्रप्सः। अग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्याम्॥

संपृच्यध्वमृतावरीरूर्मिला मधुमत्तमाः।
मन्द्रा धनस्य सातये॥

इन्द्रस्य त्वा भागं सोमेनातनच्मि। अदस्तमसि विष्णवे। विष्णो हव्यं रक्षस्व ॥३॥

कर्मणे वाम्। वानस्पत्यमसि। निष्टप्तं रक्षः। उर्वन्तरिक्षं वीहि। धूरसि धूर्व धूर्वन्तं यो ऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वामस्तं च धूर्व। देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्। विष्णोः क्रमो ऽसि। अहुतमसि हविर्धानम्। मित्रस्य त्वा चक्षुषा प्रेक्षे। उरु त्वा वाताय। देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामि। यच्छन्तु त्वा पञ्च। रक्षायै त्वा नारात्यै। इदं देवानामिदं नः सह। स्वरभिव्यख्यम्। दृंहन्तां दुर्याः स्वाहा पृथिव्याम्। उर्वन्तरिक्षं प्रेहि। अग्ने हव्यं रक्षस्व ॥४॥

विष्णोर्मनसा पूते स्थः। देवो वः सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। अग्नये त्वा जुष्टं प्रोक्षामि। शुन्धन्तां पात्राणि देवयज्यायै। यद्वो ऽशुद्धः पराजघान तद्व एतेन शुन्धन्ताम्। अवधूतं रक्षो ऽवधूतारातिः। अदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु। अधिषवणमसि वानस्पत्यं प्रति त्वादित्यास्त्वग्वेत्तु। अग्नेस्तनूरसि वाचो विसर्जनम्। देववीतये त्वा गृह्णामि। बृहद्ग्रावासि वानस्पत्यः। स देवेभ्यो हव्यं शमीष्व। सुशमि शमीष्व। अद्रिरसि श्लोककृत्। अपहतं रक्षो ऽपहतारातिः। वयं संघातंसंघातं जयेम। वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्तु। परापूतं रक्षः परापूतारातिः। निरस्तो अघशंसः। वायुर्व इप ऊर्जे विविनक्तु ॥५॥

अवधूतं रक्षो ऽवधूतारातिः। अदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु। धिषणासि पार्वती प्रति त्वादित्यास्त्वग्वेत्तु। पृथिवीं दृंह। धिषणासि पार्वतियी प्रति त्वा पार्वती वेत्तु। दिवं दृंह। दिवः स्कम्भन्यसि। धान्यमसि। धिनुहि देवान्।

प्राणाय त्वा व्यानाय त्वापानाय त्वा। दीर्घामनु प्रसितिम्। आयुषे त्वा। देवो वः सविता हिरण्यपाणिः प्रतिगृह्णातु। अदब्धेन वश्चक्षुषावपश्यामि ॥६॥

निर्दग्धं रक्षः। अपाग्ने अग्निमामादं जहि निः क्रव्याद सेध। आ देवयजन वह। ध्रुवमसि पृथिवीं दृंह। आयुर्देहि प्राणं देहि। सजातानस्मै यजमानाय परिवह। धरुणमस्यन्तरिक्षं दृंह। चक्षुर्देहि श्रोत्रं देहि। सजातानस्मै यजमानाय परिवह। धर्त्रमसि दिवं दृंह। ओजो देहि बलं देहि। सजातानस्मै यजमानाय परिवह। धर्मासि दिशो दृंह। रयिं देहि पोषं देहि। सजातानस्मै यजमानाय परिवह। यन्त्रमस्याशा दृंह। रूपं देहि वर्णं देहि। सजातानस्मै यजमानाय परिवह। चित स्थ परिचितो यजमानस्य सजाताः। भृगूणामङ्गिरसां तपसा तप्यध्वम् ॥७॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं संवपामि। समाप ओषधीभिः समोषधयो रसेन मधुना मधुमतीः पृच्यन्ताम्। यद्वो रेवती रेवत्यं यद्वो हविष्या हविष्यं यद्वो जगतीर्जगत्यं तेनास्मै यज्ञपतय आशासाना मधुना मधुमतीः संपृच्यध्वम्। जनयत्यै त्वा। मखस्य शिरोऽसि। घर्मोऽसि विश्वायुः। उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्। प्रत्युष्टं रक्षः। देवस्त्वा सविता श्रपयतु वर्षिष्ठे ऽधि नाके। अग्निस्ते तन्वं मा हिंसीत्। अग्ने ब्रह्म गृह्णीष्व। एकताय स्वाहा। द्विताय स्वाहा। त्रिताय स्वाहा ॥८॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजाः। वायुरसि तिग्मतेजाः। पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषम्। व्रजं गच्छ गोष्ठानम्। वर्षतु ते द्यौः। बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्यो अस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्। द्रप्सस्ते द्यां मा स्कन्। व्रजं गच्छ गोष्ठानम्। वर्षतु ते द्यौः। बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्यो अस्मान्दिप्सति यं वयं दिप्सामस्तमतो मा मौक्। अररुर्द्यां मा पप्तत्। व्रजं गच्छ गोष्ठानम्। वर्षतु ते द्यौः। बधान देव सवितः परमस्यां पृथिव्यां शतेन पाशैर्यो अस्मान्दिप्सति यं वयं दिप्सामस्तमतो मा मौक्। अपाररुमदेवयजनं पृथिव्या देवयजनाज्जहि॥

इमां नरः कृणुत वेदिमेत देवेभ्यो जुष्टामदित्या उपस्थे।
इमां देवा अजुषन्त विश्वे रायस्पोषा यजमानं विशन्तु॥

वसवस्त्वा परिगृह्णन्तु गायत्रेण च्छन्दसा। रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन च्छन्दसा। आदित्यास्त्वा परिगृह्णन्तु जागतेन च्छन्दसा।

पुरा क्रूरस्य विसृपो विरप्शिन्नुदादाय पृथिवीं जीरदानुम्।
तामैरयंश्चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्यायजन्त ॥९॥

पृश्न्याः पयो ऽसि। तस्य ते ऽक्षीयमाणस्य पिन्वमानस्य पिन्वमानं निर्वपामि। इषे त्वा। अदब्धेन त्वा चक्षुषावपश्यामि। ऊर्जे त्वा। अग्नेर्जिह्वासि सुहूर्देवेभ्यः। धाम्नेधाम्ने त्वा यजुषेयजुषे। हविरसि वैश्वानरमुन्नीतशुष्मं सत्यौजाः। सहो नामासि सहस्वारातिं सहस्व पृतनायतः। सहस्रवीर्यमसि तन्मा जिन्व। तेजो ऽसि शुक्रमसि ज्योतिरसि। धामासि प्रियं देवानामनाधृष्टं देवयजनम्। देववीतये त्वा गृह्णामि। निष्टप्तं रक्षः। अनिशिता स्थ सपत्नक्षयणीः। प्राणं वाचं मा निर्मृक्षम्। वाजिनं त्वा वाजिन्वाजजित्यायै संमार्ज्मि। चक्षुः श्रोत्रं मा निर्मृक्षम्। वाजिनीं त्वा वाजिनि वाजजित्यायै संमार्ज्मि। प्रजां योनिं मा निर्मृक्षम्। वाजिनीं त्वा वाजिनि वाजजित्यायै संमार्ज्मि ॥१०॥

देवीरापो अग्रेग्वः प्रेमं यज्ञं नयत। प्र यज्ञपतिं तिरत। युष्मानिन्द्रो ऽवृणीत वृत्रतूर्ये। यूयमिन्द्रमवृणीध्वं वृत्रतूर्ये। प्रोक्षिता स्थ। कृष्णो ऽस्याखरेष्ठो ऽग्नये त्वा जुष्टं प्रोक्षामि। वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि। बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामि। पितॄणां भागधेयी स्थ। ऊर्जा पृथिवीं गच्छत। विष्णो स्तुपो ऽसि। ऊर्णम्रदं प्रथस्व स्वासस्थं देवेभ्यः। गन्धर्वो ऽसि विश्वावसुर्विश्वस्माद्‌भयतो यजमानस्य परिधिरिड ईडितः। इन्द्रस्य बाहुरसि दक्षिण इड ईडितः। मित्रावरुणौ

त्वा परिधत्तां ध्रुवेण धर्मणा॥

वीतिहोत्रं त्वाग्ने द्युमन्तः समिधीमहि।
अग्ने बृहन्तमध्वरे।
सूर्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्याः।
वर्षिष्ठे ऽधि नाके।

सवितुर्बाहू स्थो देवजनानां विधरणी। वसूनां रुद्राणामादित्यानां सदनमसि। जुहेहि घृताची द्यौर्जन्मनादितिरच्छि-
न्नपत्रा प्रिया देवानां प्रियेण धाम्ना प्रिये सदसि सीद। उपभृदेहि घृताच्यन्तरिक्षं जन्मनादितिरच्छिन्नपत्रा प्रिया देवानां प्रियेण धाम्ना प्रिये
प्रियेण धाम्ना प्रिये सदसि सीद। ध्रुव एहि घृताची पृथिवी जन्मनादितिरच्छिन्नपत्रा प्रिया देवानां प्रियेण धाम्ना प्रिये सदसि सीद। ध्रुवा असदन्नृतस्य योनौ। ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम् ॥११॥
भुवनमसि विप्रथस्व। अग्निर्यष्टेदं नमः। जुह्वेह्यग्निस्त्वाह्वयतु देवयज्यायै। उपभृदेहि देवस्त्वा सविताह्वयतु देवयज्यायै। अङ्घ्रिणा विष्णू मा वामवक्रमिषम्। पाहि माग्ने दुश्चरितादा मा सुचरिते भज। विजिहाथां मा मा संताप्तम्। लोकं मे लोककृतौ कृणुतम्। विष्णो स्थाम्नः। इत इन्द्रो वीर्यमकृणोत्॥

ऊर्ध्वो अध्वरो दिविस्पृगहुतो यज्ञो यज्ञपतेः।
इन्द्रवान्बृहद्भाः स्वाहा॥

सं ज्योतिषा ज्योतिः। वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयोर्जयामि। वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयामुं प्रतिनुदामि।

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा। अक्तं रिहाणा व्यन्तु वयः॥

मरुतां पृषती वशा पृश्निर्भूत्वा दिवं गच्छ।
ततो नो वृष्टिमेरय॥
अहीनः प्राणः। चक्षुष्पा असि चक्षुर्मे पाहि॥

यं परिधिं पर्यधत्था अग्ने देव पणिभिरिध्यमानः।
तं त एतमनु जोषं भराम्येष त्वन्नेदपचेतयातै॥

यजमानं प्रथत॥

संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठाः परिधेयाश्च देवाः।
यज्ञस्य गोपा उत रक्षितारः स्वाहा देवा अमृता मादयन्ताम्॥

अग्ने ऽदब्धायो ऽशीततनो पाहि दिवः पाहि प्रसित्याः पाहि दुरिष्ट्याः पाहि दुरद्मन्याः। अविषं नः पितुं कृधि। सुधान्योनीन्सुषदां पृथिवीम्॥

घृतवन्तं कुलायिनं रायस्पोषं सहस्रिणम्।
वेदो वाजं ददातु नः॥

देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देवयज्ञं स्वाहा वाचि स्वाहा वाते धाः ॥१२॥
आर्द्रदानव स्थ जीवदानव स्थ। आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे। ओषधे त्रायस्वैनम्। स्वधिते मैनं हिंसीः। देवायुरिमान्प्रवपेत्। स्वस्त्युत्तरानशीय॥

आपो अस्मान्मातरः सूदयन्तु घृतेन मा घृतप्वः पुनन्तु।
विश्वं हि रिप्रं प्रवहन्तु देवीरुदिदाभ्यः शुचिरा पूत एमि॥

शं न आपो धन्वन्याः शं नः सन्त्वनूप्याः
शं नः समुद्रियाः सन्तु शमु नः सन्तु कूप्याः॥

सोमस्य दात्रमसि तनूरसि तन्वं मे पाहि। महीनां पयो ऽस्यपामोषधीनां रस। वर्चोधा असि वर्चो मे धेहि। वृत्रस्यासि कनीनिकान्तरहं त्वया द्वेषमन्तररातीर्दधे। चक्षुर्धा असि चक्षुर्मे धेहि। चित्पतिस्त्वा पुनातु। वाक्पतिस्त्वा पुनातु॥

देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण।
सूर्यस्य रश्मिभिः॥
तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयम् ॥१३॥

आकूत्यै प्रयुजे ऽग्नये स्वाहा। मेधायै मनसे ऽग्नये स्वाहा। दीक्षायै तपसे ऽग्नये स्वाहा। सरस्वत्यै पूष्णे ऽग्नये स्वाहा॥ आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उरो अन्तरिक्ष। बृहस्पतये हविषा विधेम ॥स्वाहा॥

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्।
विश्वो राय इषुध्यति द्युम्नं वुरीत पुष्यतु स्वाहा॥

इन्द्राग्नी द्यावापृथिवी आप ओषधय उरो अन्तरिक्षानु मे दीक्षां दीक्षापतयो मन्यध्वमनु तपस्तपस्पतयो ऽग्निश्च। देव सूर्येषमूर्जं दधातन। देव सवितस्त्वं दीक्षाणां दीक्षापतिरसि। इत्थं मा सन्तं पाहि। आ मोदृचः पाहि ॥१४॥
ऋक्सामयोः शिल्पे स्थस्ते वामारभे। आ मोदृचः पातम्।
शर्मासि शर्म यजमानस्य। नमस्ते अस्तु। मा मा हिंसीः॥
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संशिशाधि।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेयम्॥
इमां सु नावमारुहमरिष्टां पारयिष्णुम्।
शतारित्रां स्वस्तये॥

ऊर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मयि धेहि। मा मा हिंसीः। सोमस्य नीविरसि मा मा हिंसीः। इन्द्रस्य योनिरसि मा मा हिंसीः। कृष्यै त्वा सुसस्यायै। उत्कृधि। विष्णोः शर्मासि शर्म यजमानस्य। नमस्ते अस्तु। मा मा हिंसीः। नक्षत्राणां मातिकाशात्पाहि। सूपस्थावा वनस्पत ऊर्ध्वो मा पाह्योदृचः ॥१५॥

स्वाहा यज्ञं मनसः स्वाहा दिवः स्वाहा पृथिव्याः स्वाहोरोरन्तरिक्षात्स्वाहा वातात्प्रतिगृह्णामि। व्रतं कृणुतेदं शकेयम्।

दैवीं धियं मनामहे सुमृडीकामभिष्टये।
वर्चोधां विश्वधायसं सुतीर्था नो असद्वशे॥

ये देवा मनुजाता मनोयुजः सुदक्षा दक्षपितरस्ते नः पान्तु। तेभ्यः स्वाहा॥

अग्ने त्वं सु जागृहि वयं सु मन्दिषामहे।
गोपाय नो अप्रयुच्छन्प्रबुधे नः पुनस्कृधि॥

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा।
त्वं यज्ञेष्वीड्यः॥

पूषा सनीनां सोमो राधसाम्। रास्वेयत्सोम। आ भूयो भर। देवः सविता वसोर्वसुदावा। मा पृणन्पूर्त्या विराधिष्ट। माहमायुषा वर्चसा विराधिषि। देवीरापो अपां नपाद्य ऊर्मिर्हविष्यं इन्द्रियावांस्तं वो मा क्रमिषम्। सक्षेहि या ते यज्ञिया तनूस्तयारोह॥
अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।
तं जानन्नग्न आरोह ततो नो वर्धया रयिम्॥
एदमगन्म देवयजनं पृथिव्या यत्र देवा अजुषन्त विश्वे।

ऋक्सामाभ्यां संतरन्तो यजुर्भी रायस्पोषेण समिषा मदेम ॥१६॥

इयं ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छ। जूरसि धृता मनसा जुष्टा विष्णवे। तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा। शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवं हविरसि। चिदसि मनासि धीरसि दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभयतःशीर्ष्णी। सा नः सुप्राची सुप्रतीची भव। मित्रस्त्वा पदि बध्नातु। पूषाध्वनस्पातु। इन्द्रायाध्यक्षाय। अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः। सा देवि देवमच्छेहि। इन्द्राय सोमम्। रुद्रस्त्वावर्तयतु। स्वस्ति सोमसखा पुनरेहि ॥१७॥

वस्व्यसि रुद्रास्यदितिरस्यादित्यासि चन्द्रासि शुक्रासि। बृहस्पतिस्त्वा सुम्ने रण्वतु। रुद्रो वसुभिराचिकेतु। पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायास्पदे घृतवति स्वाहा। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। अस्मे रमस्व। अस्मे ते रायः। मे रायः। माहं रायस्पोषेण वियोषम्। सं देवि देव्योर्वश्याख्यत। सुरेता रेतो दधानास्त्वष्टृमन्तस्त्वा सपेम ॥१८॥

अस्माकोऽसि शुक्रस्ते ग्रहः॥
अभि त्यं देवं सवितारमोण्योः कविक्रतुम्।
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविम्।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि।
हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः॥

प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु। सोम ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यवन्तं बह्वर्षम्। शुक्रं ते शुक्रेण चन्द्रं चन्द्रेणामृतममृतेन क्रीणामि। शग्म यते गोः। अस्मे ते चन्द्राणि। तपसस्तनूरसि प्रजापतेर्वर्णः। सहस्रपोषं पुष्यन्ती। परमेण पशुना क्रीयसे। अस्मे ते बन्धुः। मित्रो न एहि सुमित्रधाः। इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम्। स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्॥
उदायुषा स्वायुषोद्रसेनौषधीनाम्।
उत्पर्जन्यस्य शुष्मेणोदस्थाममृतां अनु।
उर्वन्तरिक्षं वीहि।
अपि पन्थामगन्महि स्वस्तिगामनेहसम्।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु।
अदित्यास्त्वगस्यदित्याः सदने सीद।
अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि।
वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्न्यासु।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ।
सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकाम्।
यदेतशेभिरीयसे भ्राजमानो विपश्चिता ॥१९॥

इति कपिष्ठलकठसंहितायां प्रथमोऽध्यायः

उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ। वारुणमसि वरुणस्य स्कम्भनमसि।
प्रच्यवस्व भुवनस्पते विश्वान्यभि धामानि।

मा त्वा परिपरिणो विदन्मा परिपन्थिनो मा त्वा वृका अघायवो विदन्॥
श्येनो भूत्वा परापत यजमानस्य नो गृहे संस्कृतम्॥
नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शसत॥

वारुणमसि वरुणस्त्वोत्तभ्नातु। वरुणस्य स्कम्भसर्जन्यसि। प्रमुक्तो वरुणस्य पाशः। वरुणोऽसि धृतव्रतो ऽच्छिन्नपत्रः प्रजा उपावरोह। वरुणस्यर्तसदनमसि। अदित्यास्त्वगस्यदित्याः सदने सीद। वारुणमसि वरुणाय त्वा॥१॥

अग्नेस्तनूरसि विष्णवे त्वा। सोमस्य तनूरसि विष्णवे त्वा। अतिथेरातिथ्यमसि विष्णवे त्वा। अग्नये त्वा रायस्पोषदे विष्णवे त्वा। श्येनाय त्वा सोमभृते विष्णवे त्वा। आपतये त्वा परिपतये गृह्णामि। तनूनप्त्रे शक्मने शाक्वराय। शक्मन्नोजिष्ठाय। अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेन्यम्। अञ्जसा सत्यमुपगेषम्। सुविते मा धाः। अग्ने व्रतपा अस्मे व्रतपास्त्वे व्रतपा व्रतिनां व्रतानि। या मम तनूरेषा सा त्वयि या तव तनूरियं सा मयि। सह नौ व्रतपा व्रतिनां व्रतानि। या ते अग्ने रुद्रिया तनूस्तया नः पाहि। तस्यै ते स्वाहा। अंशुरंशुस्ते देव सोमाप्यायतामिन्द्रायैकधन। आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व। आप्यायय सखीन्सन्या मेधया। स्वस्ति ते देव सोम सुत्यामशीय। एष्टा राय एष्टा वामानि प्रेषे भगायर्तमृतवादिभ्यः। नमो दिवे नमः पृथिव्यै॥२॥

या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा वर्षिष्ठा गह्वरेष्ठोग्रं वचोऽपावधीत्त्वेषं वचोऽपावधीत्स्वाहा। या ते अग्ने रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठा वर्षिष्ठा गह्वरेष्ठोग्रं वचोऽपावधीत्त्वेषं वचो ऽपावधीत्स्वाहा। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। नार्यसीदमहं रक्षसो ग्रीवा अपिकृन्तामि। तप्तायन्यसि वित्तायन्यस्यवतान्मा नाथितमवतान्मा व्यथितम्। अग्ने अङ्गिरो यो ऽस्यां पृथिव्यामस्यायुना नाम्नेहि। यत्ते ऽनाधृष्टं नामानाधृष्यं तेन त्वादधे। अग्ने अङ्गिरो यो द्वितीयस्यां यस्तृतीयस्यां पृथिव्यामस्यायुना नाम्नेहि। यत्तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधे। विदेदग्निर्नभो नाम। सिंह्यसि महिष्यसि देवेभ्यः प्रथस्व देवेभ्यः कल्पस्व देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्व॥
विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम्।
वातजूतो यो अभिरक्षतु त्मना प्रजां पिपर्ति बहुधा विराजति॥

पितृणां भागधेयी स्थ। इन्द्रघोषास्त्वा पुरस्ताद्वसवः पान्तु। मनोजवसस्त्वा दक्षिणतः पितरः पान्तु। प्रचेतास्त्वा पश्चाद्रुद्रैः पातु। विश्वकर्मा त्वोत्तरादादित्यैः पातु। सिंह्यसि सपत्नसाही स्वाहा। सिंह्यसि रायस्पोषवनिः स्वाहा। सिंह्यसि सुप्रजावनिः स्वाहा। सिंह्यस्यादित्यवनिः स्वाहा। सिंह्यस्यावह देवान्देवायते यजमानाय स्वाहा। भूतेभ्यस्त्वा। विश्वायुरसि पृथिवीं स्कभान। अच्युतक्षिदस्यन्तरिक्षं स्कभान। ध्रुवक्षिदसि दिवं स्कभान। अग्नेः कुलायमस्यग्नेः पुरीषमसि। यज्ञः प्रत्यष्ठात् ॥३॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥
देवश्रुतौ देवेष्वाघोषेथाम्॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पांसुरे॥
इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्ये।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥

वैष्णवमसि विष्णुस्त्वोत्तभ्नातु॥
दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुरोरन्तरिक्षात्।

हस्तौ पृणस्व बहुभिर्वसव्यैरा प्रयच्छ दक्षिणादोत सव्यात्।
विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः॥

विष्णोः पृष्ठमसि। विष्णो रराटमसि। विष्णोः श्नप्त्रे स्थः। विष्णोः स्यूरसि। विष्णोर्ध्रुवोऽसि। वैष्णवमसि विष्णवे त्वा।
प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥४॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। इदमहं यो नः समानो योऽसमानोऽरातीयति तस्य ग्रीवा अपिकृन्तामि। बृहन्नसि बृहद्ग्रावा। बृहतीमिन्द्राय वाचं वद रक्षोहणं वलगहनं वैष्णवीम्। इदमहं तान्वलगानुद्वपामि यान्नः समानो योऽसमानो निचखान। इदमहं तान्वलगानुद्वपामि यान्नः सबन्धुर्योऽसबन्धुर्निचखान। इदमहं तान्वलगानुद्वपामि यान्नः सनाभिर्योऽसनाभिर्निचखान। इदमहं तान्वलगानुद्वपामि यान्नः स्वो योऽरणो निचखान। सम्राडसि सपत्नहा स्वराडस्यभिमातिहा सत्राराडसि रक्षोहा विश्वाराडस्यरातीयतो हन्ता। गायत्रेण च्छन्दसावबाढो यं द्विष्मः। त्रैष्टुभेन जागतेनानुष्टुभेन पाङ्क्तेन च्छन्दसावबाढो यं द्विष्मः। किमत्र भद्रं तन्नौ सह। निरस्तो वलगोऽवबाढो दुरस्तु। रक्षोघ्नो वलगघ्नः प्रोक्षामि वैष्णवान्। रक्षोघ्नो वलगघ्नोऽवसिञ्चामि वैष्णवान्। रक्षोघ्नो वलगघ्नोऽवस्तृणामि वैष्णवान्। रक्षोहणी वलगहनी प्रोक्षामि वैष्णवी। रक्षोहणी वलगहनावुपदधामि वैष्णवी। रक्षोहणी वलगहनी पर्यूहामि वैष्णवी। रक्षोहा त्वा वलगहा स्तृणामि वैष्णवम् ॥५॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा। शुन्धन्तां लोकाः पितृषदनाः। यवोऽसि यवयास्मद्द्वेषो यवयारातिम्। पितृषदनं त्वा लोकमास्तृणामि। उद् दिवं स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्याम्। नितानस्त्वा मारुतो निहन्तु मित्रावरुणयोर्ध्रुवेण धर्मणा। ब्रह्मवनि त्वा क्षत्रवनि देववनि सजातवनि रायस्पोषवनि पर्यूहामि। ब्रह्म दृंह क्षत्रं दृंह प्रजां दृंह रायस्पोषं दृंह। घृतेन द्यावापृथिवी आपृणाथाम्। विश्वजनस्य छायासि। इन्द्रस्य स्यूरसि। इन्द्रस्य ध्रुवोऽसि। ऐन्द्रमसीन्द्राय त्वा ॥६॥

विभूरसि प्रवाहणः। वह्निरसि हव्यवाहनः। श्वात्रोऽसि प्रचेताः। तुथोऽसि विश्ववेदाः। उशिगसि कविः। अङ्घारिरसि बम्भारिः। अवस्युरसि दुवस्वान्। शुन्ध्युरसि मार्जालीयः। सम्राडसि कृशानुः। परिषद्योऽस्यासन्द्यः। नभोऽसि प्रतक्वा। असंमृष्टोऽसि हव्यसूदः। ऋतधामासि स्वर्ज्योतिः। समुद्रोऽसि विश्वव्यचाः। अजोऽस्येकपात्। अहिरसि बुध्न्यः। कव्योऽसि कव्यवाहनः। रौद्रेणानीकेन पाहि माग्ने पिपृहि माग्ने। नमस्ते अस्तु मा मा हिंसीः ॥७॥
ज्योतिरसि विश्वरूपं मरुतां पृषती। देवेभ्यस्त्वा यज्ञियेभ्यो गृह्णामि।
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः।
उरु यन्तासि वरूथम् ॥स्वाहा॥
जुषाणो अप्तुराज्यस्य वेतु । स्वाहा॥
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम।
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर॥ स्वाहा ॥

अदित्यास्त्वगस्यदित्याः सदने सीद। देव सवितरेष ते सोमस्तं रक्षस्व मा त्वा दभन्। एतत्त्वं देव सोम देवानुपागाः। इदमहं मनुष्यान्सह प्रजया सह रायस्पोषेण। नमो देवेभ्यः स्वधा पितृभ्यः। निर्द्रुहो निर्वरुणस्य

पाशान्मुक्षीय। स्वरभिव्यख्यं ज्योतिर्वैश्वानरम्। अग्ने व्रतपा अस्मे व्रतपास्त्वे व्रतपाः पुनर्व्रतपा व्रतिनां व्रतानि। या मम तनूस्त्वय्यभूदियं सा मयि। या तव तनूर्मय्यभूदेषा सा त्वयि। यथायथं नो व्रतपा व्रतिनां व्रतानि। स्वाहा यज्ञं मनसि स्वाहा दिवि स्वाहा पृथिव्यां स्वाहोर्वन्तरिक्षे स्वाहा वाते वाचि विसृजे ॥८॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि।
घृतं घृतवने पिब प्रप्र यज्ञपतिं तिर ॥स्वाहा॥

अत्यन्यानगां नान्यानुपागाम्। यात्राजुजोषं परि तानवृजम्। अर्वाक्त्वा परेभ्यो ऽविदं परो ऽवरेभ्यः। तं त्वा जुषामहे वनस्पते देवयज्यायै जुष्टं विष्णवे। विष्णवे त्वा। देवस्त्वा सविता मध्वानक्तु। ओषधे त्रायस्वैनम्। स्वधिते मैनं हिंसीः। द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या संभव। वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम॥
यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय।
अच्छिन्नरायः सुवीरः ॥९॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा। शुन्धन्तां लोकाः पितृषदनाः। यवो ऽसि यवयास्मद्द्वेषं यवयारातिम्। पितृषदनं त्वा लोकमास्तृणामि। स्वावेशो ऽस्यग्रेगा नेतृणां। वनस्पतिस्त्वाधिष्ठास्यति। तस्य वित्तात्। घृतेन द्यावापृथिवी आपृणाताम्। देवस्त्वा सविता मध्वानक्तु। सुपिप्पला ओषधीस्कृधि। द्यामग्रेणास्तभ्नीरान्तरिक्षं मध्येनाप्राः पृथिवीमपरेणादृंहीः॥
ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा॥
ब्रह्मवनिं त्वा क्षत्रवनिं देववनिं सजातवनिं रायस्पोषवनिं पर्यूहामि। ब्रह्म दृंह क्षत्रं दृंह प्रजां दृंह रायस्पोषं दृंह॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्॥

परिवीरसि। परि त्वा दैवीर्विशो व्ययन्ताम्। परीमं रायो मनुष्यम्। अन्तरिक्षस्य सानूपेष। द्यां ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्म स्वाहा ॥१०॥

इषे त्वा। उपावीरसि। उप देवान्दैवीर्विशः प्रागुर्वह्नीरुशिजः। बृहस्पते धारया वसूनि। हव्या ते स्वदन्। देवत्वष्टर्वसु रण्व। रेवती रमध्वम्। अग्नेर्जनित्रमसि। वृषणौ स्थः। उर्वश्यस्यायुरसि पुरूरवा असि। गायत्रं छन्दो ऽनुप्रजायस्व। त्रैष्टुभं छन्दो ऽनुप्रजायस्व। जागतं छन्दो ऽनुप्रजायस्व॥
भवतं नः समनसौ समोकसावरेपसौ।
मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसौ शिवौ भवतमद्य नः॥
ऋषीणां पुत्रो अधिराज एषो अग्नावग्निश्चरति प्रविष्टः।
इमा हव्या वहते कल्पयामो मा देवानां मूमुहो भागधेयम् ॥११॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि। अमुष्मै जुष्टम्। धर्षा मानुषाः। अद्भ्यस्त्वौषधीभ्यः। अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्यः। आवह देवान्देवायते यजमानाय। अपां पेरुरसि। स्वात्तं हव्यं देवेभ्यो घृतवत्। सं ते वायुः प्राणेन गच्छतां सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा ॥१२॥

घृतेनाक्तौ पशुं त्रायेथाम्। रेवति प्रेधा यज्ञपतिमाविश। उरो अन्तरिक्ष सजूर्देवेन वातेनास्य हविषस्त्मना यज

समस्य तन्वा भव। वर्षीयो वर्षीयसो यज्ञं यज्ञपतौ धाः। नमस्त आतान। अनर्वाकृप्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेण। देवीरापः शुद्धा यूयं देवान्युयुध्वम्। शुद्धा वयं परिविष्टाः परिवेष्टारो भूयास्म। प्राणं ते मा हिंसिषम्। चक्षुस्ते मा हिंसिषम्। श्रोत्रं ते मा हिंसिषम्। वाचं ते मा हिंसिषम्। यत्ते क्रूरं यदास्थितं तत्त एतेन कल्पताम्। तत्ते मा हिंसिषम्। चरित्रांस्ते मा हिंसिषम्। नाभिं ते मा हिंसिषम्। मेढ्रं ते मा हिंसिषम्। पायुं ते मा हिंसिषम्। देवेभ्यः शुन्धस्व। समुद्धयः। ओषधे त्रायस्वैनम्। स्वधिते मैनं हिंसीः। रक्षसां भागो ऽसीदमहं रक्षो ऽवबाधे। इदमहं रक्षोऽधमं तमो नयामि। इषे त्वोर्जे। घृतेन द्यावापृथिवी प्रोर्णुवाताम्। देवेभ्यः शुन्धस्व। देवेभ्यः शुम्भस्व। अमुष्मै त्वा जुष्टाम्। उर्वन्तरिक्षं वीहि। वायो वे ष्टोकानाम्। प्रत्युष्टं रक्षः। देवेभ्यः स्वाहा। स्वाहा देवेभ्यः। प्रयुता द्वेषांसि स्वाहा। ऊर्ध्वनभसं मारुतं गच्छतम् ॥१३॥

रेडसि। अग्निस्त्वा श्रीणातु। आपः समरिणन्। वातस्य त्वा धाज्यै पूष्णो रंह्या ऊष्मणो ऽव्यथिष्या अपामोषधीनां रोहिष्यै। ऐन्द्रः प्राणो अङ्गेअङ्गे निदीध्यत्। ऐन्द्रो व्यानो अङ्गेअङ्गे निदीध्यत्। ऐन्द्रो ऽपानो अङ्गेअङ्गे निदीध्यत्॥
देव त्वष्टर्भूरि ते संसमेतु सलक्ष्मा यद्विषुरूपं बभूव।
देवत्रा यन्तमवसे सखायमनु त्वा माता पितरो मदन्तु॥

घृतं घृतपावानः पिबत। वसां वसापावानः पिबत। अन्तरिक्षस्य हविरसि। स्वाहा त्वा वाताय। दिशः प्रदिश आदिशो विदिश उद्दिशो दिशः। स्वाहा दिग्भ्यः। नमो दिग्भ्यः ॥१४॥

समुद्रं गच्छ स्वाहा। अन्तरिक्षं गच्छ स्वाहा। देवं सवितारं गच्छ स्वाहा। अहोरात्रे गच्छ स्वाहा। मित्रावरुणौ गच्छ स्वाहा। द्यावापृथिवी गच्छ स्वाहा। छन्दो गच्छ स्वाहा। सोमं गच्छ स्वाहा। यज्ञं गच्छ स्वाहा। नभो गच्छ स्वाहा। अग्निं वैश्वानरं गच्छ स्वाहा। मनो मे हार्दि यच्छ। पुत्रं नप्तारमशीय। ओषधीभ्यः स्वाहा॥
धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च।
यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥

सुमित्रिया न आप ओषधयो भवन्तु। दुर्मित्रियास्तस्मै सन्तु [यो ऽस्मान्द्वेष्टि यं च] वयं द्विष्मः॥
द्वीपे राज्ञो वरुणस्य गृहो हिरण्ययो मितः।
ततो धृतव्रतो राजा धाम्नोधाम्न इह मुञ्चतु ॥१५॥
हविष्मतीरिमा आपो हविष्मान्देवो अध्वरः।
हविष्मां आविवासति हविष्मां अस्तु सूर्यः॥

अग्नेर्वो ऽपन्नगृहस्य सदसि सादयामि। सुम्नायवः सुम्नाय सुम्नं धत्त। इन्द्राग्न्योर्भागधेयी स्थ। मित्रावरुणयोर्भागधेयी स्थ। विश्वेषां देवानां भागधेयी स्थ। सोमस्य वसतीवरीः॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा॥
ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ॥
सोम राजन्विश्वाः प्रजा उपावरोह। विश्वास्त्वां प्रजा उपावरोहन्तु॥
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः।
शृणोत ग्रावाणो विदुषो न यज्ञं शृणोतु देवः सविता हवं मे॥
देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमः।
तं देवेभ्यो देवत्रा दात शुक्रपेभ्यो येषां भाग स्थ स्वाहा॥
कर्षिरसि। समुद्रस्य वो ऽक्षित्या उन्नये॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः।
स यन्ता शश्वतीरिषः॥

वसूनां रुद्राणामादित्यानां पत्नेजनी स्थ। वसवो रुद्रा आदित्या एता वः पत्नेजनीः। समुद्रं गन्धर्वेष्ठामन्वातिष्ठत। वातस्य पत्मनेडिता। वाम्या ते संदृशि विश्वं रेतो धिषीय तव वाम्यनु संदृशि ॥१६॥

निग्राभ्या स्थ देवश्रुतः शुक्राः शुक्रभृतः। आयुर्मे तर्पयत। प्राणं मे तर्पयत। व्यानं मे तर्पयत। अपानं मे तर्पयत। चक्षुर्मे तर्पयत। श्रोत्रं मे तर्पयत। वाचं मे तर्पयत। आत्मानं मे तर्पयत। प्रजां मे तर्पयत। पशून्मे तर्पयत। गृहान्मे तर्पयत। गणान्मे तर्पयत। ते मे मा वितृषन्॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। ग्रावास्यध्वरकृद्देवेभ्यः। ऊर्ध्वमिममध्वरं कृधि। उत्तमेन पविनेन्द्राय सुषुत्तमं मधुमन्तं पयस्वन्तम्। इन्द्राय त्वाभिमातिघ्न इन्द्राय त्वा सहोद इन्द्राय त्वा वसुमत इन्द्राय त्वा रुद्रवत इन्द्राय त्वादित्यवते ऽग्नये त्वा रायस्पोषदे विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा। यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यज्ञपतय उरु राये कृधि। अधि धात्रे वोचः॥
श्वात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीः। ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबत॥

मा भैः। मा संभित्थाः। धिषणे ईडिते ईडयेथाम्। ऊर्जं दधाथाम्। ऊर्जमस्मासु धत्तम्। मा वां हिंसिषम्। मा युवमस्मान्हिंसिष्टम्। प्रागपागुदगधराक्तास्त्वा दिश आधावन्तु। अम्ब निस्वर। समरीर्विदम् ॥१७॥

इति कपिष्ठलकठसंहितायां द्वितीयोऽध्यायः

वाचस्पतये पवस्व। वृष्णो अंशुभ्यां गभस्तिपूतः। देवो देवानां पवित्रमसि। येषां भागो ऽसि। मधुमतीर्ण इषस्कृधि। स्वांकृतो ऽसि। उर्वन्तरिक्षं वीहि। विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। मनस्त्वाष्टु। स्वाहा त्वा सुभो सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्यः। प्राणाय त्वा। उपयामगृहीतो ऽसि॥
अन्तर्यच्छ मघवन्पाहि सोममुरुष्य रायः समिषो यजस्व।
अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्।
सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन्मादयस्व॥

मधुमतीर्ण इषस्कृधि। स्वांकृतोऽसि। उर्वन्तरिक्षं वीहि। विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। मनस्त्वाष्टु। स्वाहा त्वा सुभो सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्यः। अपानाय त्वा ॥१॥
आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥
उपयामगृहीतोऽसि। वायवे त्वा॥
इन्द्रवायू इमे सुता उप प्रयोभिरागतम्।
इन्दवो वामुशन्ति हि॥

उपयामगृहीतोऽसि। वायव इन्द्रवायुभ्यां त्वा। एष ते योनिः। सजोषोभ्याम् त्वा॥
अयं वां मित्रावरुणा सुतः सोम ऋतावृधा।
ममेदिह श्रुतं हवम्॥

उपयामगृहीतोऽसि। मित्रावरुणाभ्यां त्वा। एष ते योनिः। ऋतायुभ्यां त्वा॥
या वां कशा मधुमत्यश्विना सूनृतावती।
तया यज्ञं मिमिक्षतम्॥

उपयामगृहीतोऽसि। अश्विभ्यां त्वा। एष ते योनिः। माध्वीभ्यां त्वा। उपयामगृहीतोऽसि। वायव इन्द्रवायुभ्यां त्वा। एष ते योनिः। विष्णोरुरुक्रमे। उपयामगृहीतोऽसि। मित्रावरुणाभ्यां त्वा। एष ते योनिः। विष्णोरुरुक्रमे।

उपयामगृहीतोऽसि। अश्विभ्यां त्वा। एष ते योनिः। विष्णोरुरुक्रमे। तं रक्षस्व। मा त्वा दभन्। दुश्चक्षास्ते मावक्षत् ॥२॥
अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥
उपयामगृहीतोऽसि। शण्डाय त्वा। एष ते योनिः। वीरतायै त्वा॥
तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे॥

उपयामगृहीतो ऽसि। मर्काय त्वा। एष ते योनिः। प्रजाभ्यस्त्वा॥
अपनुत्ता शण्डामर्कौ सह तेन यं द्विष्मः। तृथो ऽसि जनधाया देवास्त्वा शुक्रपाः प्रणयन्तु। तृथो ऽसि जनधाया देवास्त्वा मन्थिपाः प्रणयन्तु। आयुः संधत्तं प्राणं संधत्तं चक्षुः संधत्तं श्रोत्रं संधत्तं वाचं संधत्तम्। अनाधृष्टासि। जिन्वेथां स्वपत्या मध्वा। सुवीराः प्रजाः प्रजनयन्परीहि। सुप्रजाः प्रजाः प्रजनयन्परीहि॥
संजग्माना दिवा पृथिव्या शुक्रः शुक्रशोचिषा मन्थी मन्थिशोचिषा। शुक्रो ऽसि शुक्रशोचिः। मन्थ्यसि मन्थिशोचिः। अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य दधितारः स्याम। निरस्ता शण्डामर्कौ सह तेन यं द्विष्मः।
शुक्रस्याधिष्ठानमसि। मन्थिनो ऽधिष्ठानमसि॥
या संस्कृतिः प्रथमा विश्वकर्मा यो मध्यमो बृहस्पतिश्चिकित्वान्।
यः परमो वरुणो मित्रो अग्निस्तस्मा इन्द्राय सुतमाजुहोत तस्मै सूर्याय सुतमाजुहोत॥
स्वाहा त्वा सुभो सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्यः ॥३॥
ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ।
अप्सुषदो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्॥
उपयामगृहीतो ऽस्याग्रयणः। जिन्व यज्ञं जिन्व यज्ञपतिम्। अभि सवनानि पाहि। विष्णुस्त्वां पात्विन्द्रियेण। विशं त्वं पाहीन्द्रियेण। एष ते योनिः। विश्वेभ्यस्त्वा देवेभ्यः॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा बृहद्वते वयस्वत उक्थाव्यम्। यत्त इन्द्र बृहद्वयस्तस्मै त्वा। विष्णवे त्वा। एष ते योनिः। इन्द्राय त्वा॥

उपयामगृहीतो ऽसि। मित्रावरुणाभ्यां त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। मित्रावरुणाभ्यां त्वा। पुनर्हविरसि। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतोऽसि। इन्द्राय त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राय त्वा। पुनर्हविरसि। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतोऽसि। इन्द्राग्निभ्यां त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राग्निभ्यां त्वा। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतोऽसि। इन्द्राय त्वा। इन्द्राय त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राय त्वा। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतो ऽसि। इन्द्रावरुणाभ्यां त्वा। इन्द्राबृहस्पतिभ्यां त्वा। इन्द्राविष्णुभ्यां त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राविष्णुभ्यां त्वा। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे ॥४॥
मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥

उपयामगृहीतो ऽसि वैश्वानरः। ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः। एष ते योनिः। वैश्वानराय त्वा॥

उपयामगृहीतो ऽसि। मधवे त्वा। उपयामगृहीतो ऽसि। माधवाय त्वा। उपयामगृहीतो ऽसि। शुक्राय त्वा। उपयामगृहीतो ऽसि। शुचये त्वा। उपयामगृहीतो ऽसि। नभसे त्वा। उपयामगृहीतो ऽसि। नभस्याय त्वा। उपयामगृहीतो ऽसि। इषाय त्वा। उपयामगृहीतो ऽसि। ऊर्जाय त्वा। उपयामगृहीतो ऽसि। सहसे त्वा। उपयामगृहीतो ऽसि। सहस्याय त्वा। उपयामगृहीतो ऽसि। तपसे त्वा। उपयामगृहीतो ऽसि। तपस्याय त्वा॥
इन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम्।
अस्य पातं धियेषिता॥

उपयामगृहीतो ऽसि। इन्द्राग्निभ्यां त्वा। एष ते योनिः। इन्द्राग्निभ्यां त्वा॥
ओमासश्चर्षणीधृतो विश्वे देवास आगत।
दाश्वांसो दाशुषः सुतम्॥

उपयामगृहीतो ऽसि। विश्वेभ्यस्त्वा देवेभ्यः। एष ते योनिः। विश्वेभ्यस्त्वा देवेभ्यः ॥५॥
जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥
इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥
मरुत्वां इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय।
आसिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम्॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥
मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥
महां इन्द्रो य ओजसा पर्जन्यो वृष्टिमां इव।
स्तोमैर्वत्सस्य वावृधे॥

उपयामगृहीतो ऽसि। महेन्द्राय त्वा। एष ते योनिः। महेन्द्राय त्वा॥
महां इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्॥

उपयामगृहीतो ऽसि। महेन्द्राय त्वा। एष ते योनिः। महेन्द्राय त्वा ॥६॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम्॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥

द्यां गच्छ स्वर्गच्छ। रूपं वो रूपेणाभ्यागां वयसा वयः। तुथो वो विश्ववेदा विभजतु वर्षिष्ठे अधि नाके। एतत्ते अग्ने राध एति सोमच्युतम्। तन्मित्रस्य पथा नय। ऋतस्य पथाप्रेत चन्द्रदक्षिणाः। ब्राह्मणमद्यर्ध्यासं पितृमन्तं पैतृमत्यमृषिमार्षेयं सुधातुदक्षिणम्॥
अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन्।

ब्रह्मसामाभ्यां संचरन्तो यजुर्भी रायस्पोषेण समिषा मदेम॥१६॥

इय ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छ। जूरसि धृता मनसा जुष्टा विष्णवे। तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा। शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवं हविरसि। चिदसि मनासि धीरसि दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभयतश्शीर्ष्णी। सा मा सुप्राची सुप्रतीची भव। मित्रस्त्वा पदि बध्नातु। पूषाध्वनस्पातु। इन्द्रायाध्यक्षाय। अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्यः। सा देवि देवमच्छेहि। इन्द्राय सोमम्। रुद्रस्त्वावर्तयतु। स्वस्ति सोमसखा पुनेहि ॥१७॥

वस्व्यसि रुद्रास्यदितिरस्यादित्यासि चन्द्रासि शुक्रासि। बृहस्पतिस्त्वा सुम्ने रण्वातु। रुद्रो वसुभिराचके। पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायास्पदे घृतवति स्वाहा। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। अस्मे रमस्व। अस्मे ते रायः। मे रायः। माहं रायस्पोषेण वियोषम्। सं देवी देव्योर्वश्याख्यत। सुरेता रेतो दधानास्त्वष्टृमन्तस्त्वा सपेम ॥१८॥

आस्माकोऽसि शुक्रस्ते ग्रहः॥
अभि त्यं देवं सवितारमोण्योः कविक्रतुम्।
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविम्॥
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि।
हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः॥

प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु। सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यवन्तं वह्मर्थम्। शुक्रं ते शुक्रेण चन्द्रं चन्द्रेणामृतममृतेन क्रीणामि। शग्म यत्ते गोः। अस्मे ते चन्द्राणि। तपसस्तनूरसि प्रजापतेर्वर्णः। सहस्रपोषं पुष्यन्ती। परमेण पशुना क्रीयसे। अस्मे ते बन्धुः। मित्रो न एहि सुमित्रधाः। इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तं स्योनः स्योनम्। स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्॥
उदायुषा स्वायुषोद्रसेनौषधीनाम्।
उत्पर्जन्यस्य वृष्ट्योदस्थाममृताँ अनु।
उर्वन्तरिक्षं वीहि।
अपि पन्थामगस्महि स्वस्तिगामनेहसम्।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु॥
अदित्यास्त्वगस्यदित्याः सदने सीद॥
अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः।
आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि॥
वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्न्यासु।
हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात्सोममद्रौ॥
सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीनिकाम्।
यदेतशेभिरीयसे भ्राजमानो विपश्चिता ॥१९॥

इति कपिष्ठलकठसंहितायां प्रथमोऽध्यायः

उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ। वारुणमसि वरुणस्य स्कम्भनमसि।
प्रच्यवस्व भुवनस्पते विश्वान्यभि धामानि।

मा त्वा परिपरिणो विदन्मा परिपन्थिनो मा त्वा वृका अघायवो विदन्॥
श्येनो भूत्वा परापत यजमानस्य नो गृहे संस्कृतम्॥
नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शसत॥

वारुणमसि वरुणस्त्वोत्तभ्नातु। वरुणस्य स्कम्भसर्जन्यसि। प्रमुक्तो वरुणस्य पाशः। वरुणोऽसि धृतव्रतो ऽच्छिन्नपत्रः प्रजा उपावरोह। वरुणस्यर्तसदनमसि। अदित्यास्त्वगस्यदित्याः सदने सीद। वारुणमसि वरुणाय त्वा॥१॥

अग्नेस्तनूरसि विष्णवे त्वा। सोमस्य तनूरसि विष्णवे त्वा। अतिथेरातिथ्यमसि विष्णवे त्वा। अग्नये त्वा रायस्पोषदे विष्णवे त्वा। श्येनाय त्वा सोमभृते विष्णवे त्वा। आपतये त्वा परिपतये गृह्णामि। तनूनप्त्रे शक्मने शाक्वराय। शक्मन्नोजिष्ठाय। अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेन्यम्। अञ्जसा सत्यमुपगेषम्। सुविते मा धाः। अग्ने व्रतपा अस्मे व्रतपास्त्वे व्रतपा व्रतिनां व्रतानि। या मम तनूरेषा सा त्वयि या तव तनूरियं सा मयि। सह नौ व्रतपा व्रतिनां व्रतानि। या ते अग्ने रुद्रिया तनूस्तया नः पाहि। तस्यै ते स्वाहा। अंशुरंशुस्ते देव सोमाप्यायतामिन्द्रायैकधन। आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व। आप्यायय सखीन्सन्या मेधया। स्वस्ति ते देव सोम सुत्यामशीय। एष्टा राय एष्टा वामानि प्रेषे भगायर्तमृतवादिभ्यः। नमो दिवे नमः पृथिव्यै॥२॥

या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गहनेष्ठा वर्षिष्ठा गह्वरेष्ठोग्रं वचोऽपावधीत्त्वेषं वचोऽपावधीत्स्वाहा। या ते अग्ने रजाशया हराशया तनूर्वर्षिष्ठा गहनेष्ठा वर्षिष्ठा गह्वरेष्ठोग्रं वचोऽपावधीत्त्वेषं वचो ऽपावधीत्स्वाहा। देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। नार्यसीदमहं रक्षसो ग्रीवा अपिकृन्तामि। तप्तायन्यसि वित्तायन्यस्यवतान्मा नाथितमवतान्मा व्यथितम्। अग्ने अङ्गिरो यो ऽस्यां पृथिव्यामस्यायुना नाम्नेहि। यत्ते ऽनाधृष्टं नामानाधृष्यं तेन त्वादधे। अग्ने अङ्गिरो यो द्वितीयस्यां यस्तृतीयस्यां पृथिव्यामस्यायुना नाम्नेहि। यत्तेऽनाधृष्टं नामानाधृष्यं तेन त्वादधे। विदेदग्निर्नभो नाम। सिंह्यसि महिष्यसि देवेभ्यः प्रथस्व देवेभ्यः कल्पस्व देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्व॥
विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम्।
वातजूतो यो अभिरक्षतु त्मना प्रजां पिपर्ति बहुधा विराजति॥

पितृणां भागधेयी स्थ। इन्द्रघोषास्त्वा पुरस्ताद्वसवः पान्तु। मनोजवसस्त्वा दक्षिणतः पितरः पान्तु। प्रचेतास्त्वा पश्चाद्रुद्रैः पातु। विश्वकर्मा त्वोत्तरादादित्यैः पातु। सिंह्यसि सपत्नसाही स्वाहा। सिंह्यसि रायस्पोषवनिः स्वाहा। सिंह्यसि सुप्रजावनिः स्वाहा। सिंह्यस्यादित्यवनिः स्वाहा। सिंह्यस्यावह देवान्देवायते यजमानाय स्वाहा। भूतेभ्यस्त्वा। विश्वायुरसि पृथिवीं स्कभान। अच्युतक्षिदस्यन्तरिक्षं स्कभान। ध्रुवक्षिदसि दिवं स्कभान। अग्नेः कुलायमस्यग्नेः पुरीषमसि। यज्ञः प्रत्यष्ठात् ॥३॥
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥
देवश्रुतौ देवेष्वाघोषेथाम्॥

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पांसुरे॥
इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्ये।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥

वैष्णवमसि विष्णुस्त्वोत्तभ्नातु॥
दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुरोरन्तरिक्षात्।

हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात्॥
विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः॥
विष्णोः पृष्ठमसि। विष्णो रराटमसि। विष्णोः श्नप्त्रे स्थः। विष्णोः स्यूरसि। विष्णोर्ध्रुवोऽसि। वैष्णवमसि विष्णवे त्वा॥
प्र तद्विष्णु स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥४॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। इदमहं यो नः समानो यो ऽसमानो ऽरातीयति तस्य ग्रीवा अपिकृन्तामि। बृहन्नसि बृहद्ग्रावा। बृहतीमिन्द्राय वाचं वद रक्षोहणं वलगहनं वैष्णवीम्। इदमहं तान्वलगानुद्वपामि यान्नः समानो यानसमानो निचखान। इदमहं तान्वलगानुद्वपामि यान्नः सबन्धुर्यानसबन्धुर्निचखान। इदमहं तान्वलगानुद्वपामि यान्नः सनाभिर्यानसनाभिर्निचखान। इदमहं तान्वलगानुद्वपामि यान्नः स्वो यानरणो निचखान। सम्राडसि सपत्नहा स्वराडस्यभिमातिहा सत्रराडसि रक्षोहा विश्वाराडस्यरातीयतो हन्ता। गायत्रेण च्छन्दसावबाढो यं द्विष्मः। त्रैष्टुभेन जागतेनानुष्टुभेन पाङ्क्तेन च्छन्दसावबाढो यं द्विष्मः। किमत्र भद्रं तन्नौ सह। निरस्तो वलगोऽवबाढो दुरस्युः। रक्षोघ्नो वलगघ्नः प्रोक्षामि वैष्णवान्। रक्षोघ्नो वलगघ्नो ऽवसिञ्चामि वैष्णवान्। रक्षोघ्नो वलगघ्नोऽवस्तृणामि वैष्णवान्। रक्षोहणी वलगहनी प्रोक्षामि वैष्णवी। रक्षोहणी वलगहनावुपदधामि वैष्णवी। रक्षोहणी वलगहनी पर्यूहामि वैष्णवी। रक्षोहा त्वा वलगहा स्तृणामि वैष्णवम् ॥५॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा। शुन्धन्तां लोकाः पितृषदनाः। यवो ऽसि यवयास्मद्द्वेषो यवयारातिम्। पितृषदनं त्वा लोकमास्तृणामि। उद् द्यां स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्याम्। मितानस्त्वा मारुतो निहन्तु मित्रावरुणयोर्ध्रुवेण धर्मणा। ब्रह्मवनि त्वा क्षत्रवनि देववनि सजातवनि रायस्पोषवनि पर्यूहामि। ब्रह्म दृंह क्षत्रं दृंह प्रजां दृंह रायस्पोषं दृंह। घृतेन द्यावापृथिवी आपृणाताम्। विश्वजनस्य छायासि। इन्द्रस्य स्यूरसि। इन्द्रस्य ध्रुवोऽसि। ऐन्द्रमसीन्द्राय त्वा ॥६॥

विभूरसि प्रवाहणः। वह्निरसि हव्यवाहनः। श्वात्रोऽसि प्रचेताः। तुथो ऽसि विश्ववेदाः। उशिगसि कविः। अङ्घारिरसि बम्भारिः। अवस्युरसि दुवस्वान्। शुन्ध्युरसि मार्जालीयः। सम्राडसि कृशानुः। परिषद्यो ऽस्यासत्व्यः। नभोऽसि प्रतक्वा। असंमृष्टोऽसि हव्यसूदनः। ऋतधामासि स्वर्ज्योतिः। समुद्रोऽसि विश्वव्यचाः। अजो ऽस्येकपात्। अहिरसि बुध्न्यः। कव्योऽसि कव्यवाहनः। रौद्रेणानीकेन पाहि माग्ने पिपृहि माग्ने। नमस्ते अस्तु मा मा हिंसीः ॥७॥

ज्योतिरसि विश्वरूपं मरुतां पृषती। देवेभ्यस्त्वा यज्ञियेभ्यो गृह्णामि।
त्वं सोम तनूकृद्भ्यो द्वेषोभ्यो ऽन्यकृतेभ्यः।
उरु यन्तासि वरूथम् ॥स्वाहा॥
जुषाणो अप्तुराज्यस्य वेतु। स्वाहा॥
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि।
घृतं घृतवने पिब प्र प्र यज्ञपतिं तिर। स्वाहा ॥

अदित्यास्त्वगस्यदित्याः सदने सीद। देव सवितरेष ते सोमस्तं रक्षस्व। मा त्वा दभन्। एतत्त्वं देव सोम देवानुपागाः। इदमहं मनुष्यान्सह प्रजया सह रायस्पोषेण। नमो देवेभ्यः स्वधा पितृभ्यः। निर्दुहो निर्वरुणस्य

पाशान्मुक्षीय। स्वरभिव्यख्यं ज्योतिर्वैश्वानरम्। अग्ने व्रतपा अस्मे व्रतपास्त्वे व्रतपाः पुनर्व्रतपा व्रतिनां व्रतानि। या मम तनूस्त्वय्यभूदियं सा मयि। या तव तनूर्मय्यभूदेषा सा त्वयि। यथायथं नो व्रतपा व्रतिनां व्रतानि। स्वाहा यज्ञं मनसि स्वाहा दिवि स्वाहा पृथिव्यां स्वाहोरावन्तरिक्षे स्वाहा वाते वाचि विसृजे ॥८॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि।
घृतं घृतवने पिब प्रप्र यज्ञपतिं तिर ॥स्वाहा॥

अत्यन्यानगां नान्यानुपागाम्। यात्राजुजोष परि तानवृजम्। अर्वाक्त्वा परेभ्यो ऽविदं परो ऽवरेभ्यः। तं त्वा जुषामहे वनस्पते देवयज्यायै जुष्टं विष्णवे। विष्णवे त्वा। देवस्त्वा सविता मध्वानक्तु। ओषधे त्रायस्वैनम्। स्वधिते मैनं हिंसीः। द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या संभव। वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम॥
यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय।
अच्छिन्नरायः सुवीरः ॥९॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। इदमहं रक्षसो ग्रीवा अपिकृन्तामि। पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा। शुन्धन्तां लोकाः पितृषदनाः। यवो ऽसि यवयास्मद्द्वेषं यवयारातिम्। पितृषदनं त्वा लोकमास्तृणामि। स्वावेशो ऽस्यग्रेगा नेतृणां। वनस्पतिस्त्वाधिष्ठास्यति। तस्य वित्तात्। घृतेन द्यावापृथिवी आपृणाताम्। देवस्त्वा सविता मध्वानक्तु। सुपिप्पला ओषधीस्कृधि। द्यामग्रेणास्तम्भीरान्तरिक्षं मध्येनाप्राः पृथिवीमपरेणादृंहीः।
ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि॥
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा॥
ब्रह्मवनिं त्वा क्षत्रवनिं देववनिं सजातवनिं रायस्पोषवनिं पर्यूहामि। ब्रह्म दृंह क्षत्रं दृंह प्रजां दृंह रायस्पोषं दृंह॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्॥

परिवीरसि। परि त्वा दैवीर्विशो व्ययन्ताम्। परीमं रायो मनुष्यम्। अन्तरिक्षस्य सानूपेष। द्यां ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्म स्वाहा ॥१०॥

इषे त्वा। उपावीरसि। उप देवान्दैवीर्विशः प्रागुर्वह्नीरुशिजः। बृहस्पते धारया वसूनि। हव्या ते स्वदम्। देवत्वष्टर्वसु रण। रेवती रमध्वम्। अग्नेर्जनित्रमसि। वृषणौ स्थः। उर्वश्यस्यायुरसि पुरूरवा असि। गायत्रं छन्दो ऽनुप्रजायस्व। त्रैष्टुभं छन्दो ऽनुप्रजायस्व। जागतं छन्दो ऽनुप्रजायस्व॥
भवतं नः समनसौ समोकसावरेपसौ।
मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसौ शिवौ भवतमद्य नः॥
ऋषीणां पुत्रो अधिराज एषो ऽग्नावग्निश्चरति प्रविष्टः।
इमा हव्या वहते कल्पयामो मा देवानां मूमुहो भागधेयम् ॥११॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। ऋतस्य त्वा देवहविः पाशेन प्रतिमुञ्चामि। अमुष्मै जुष्टम्। धर्षा मानुषाः। अद्भ्यस्त्वौषधीभ्यः। अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्यो ऽनु सखा सयूथ्यः। आवह देवान्देवायते यजमानाय। अपां पेरुरसि। स्वात्तं हव्यं देवेभ्यो घृतवत्। सं ते वायुः प्राणेन गच्छतां सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा ॥१२॥

घृतेनाक्तौ पशुं त्रायेथाम्। रेवति प्रेधा यज्ञपतिमाविश। उरो अन्तरिक्ष सजूर्देवेन वातेनास्य हविषस्त्मना यज

समस्य तन्वा भव। वर्षीयो वर्षीयसो यज्ञं यज्ञपतौ धाः। नमस्त आतान। अनर्वाकृप्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेण। देवीरापः शुद्धा यूयं देवान्युयुध्वम्। शुद्धा वयं परिविष्टाः परिवेष्टारो भूयास्म। प्राणं ते मा हिंसिषम्। चक्षुस्ते मा हिंसिषम्। श्रोत्रं ते मा हिंसिषम्। वाचं ते मा हिंसिषम्। यत्ते क्रूरं यदास्थितं तत्त एतेन कल्पताम्। तत्ते मा हिंसिषम्। चरित्रांस्ते मा हिंसिषम्। नाभिं ते मा हिंसिषम्। मेढ्रं ते मा हिंसिषम्। पायुं ते मा हिंसिषम्। देवेभ्यः शुन्धस्व। समुद्धयः। ओषधे त्रायस्वैनम्। स्वधिते मैनं हिंसीः। रक्षसां भागो ऽसीदमहं रक्षो ऽवबाधे। इदमहं रक्षोऽधमं तमो नयामि। इषे त्वोर्जे। घृतेन द्यावापृथिवी प्रोर्णुवाताम्। देवेभ्यः शुन्धस्व। देवेभ्यः शुम्भस्व। अमुष्मै त्वा जुष्टाम्। उर्वन्तरिक्षं वीहि। वायो वे ष्टोकानाम्। प्रत्युष्टं रक्षः। देवेभ्यः स्वाहा। स्वाहा देवेभ्यः। प्रयुता द्वेषांसि स्वाहा। ऊर्ध्वनभसं मारुतं गच्छतम् ॥१३॥

रेडसि। अग्निस्त्वा श्रीणातु। आपः समरिणन्। वातस्य त्वा धाज्यै पूष्णो रंह्या ऊष्मणो ऽव्यथिष्या अपामोषधीनां रोहिष्यै। ऐन्द्रः प्राणो अङ्गेअङ्गे निदीध्यत्। ऐन्द्रो व्यानो अङ्गेअङ्गे निदीध्यत्। ऐन्द्रो ऽपानो अङ्गेअङ्गे निदीध्यत्॥

देव त्वष्टर्भूरि ते संसमेतु सलक्ष्मा यद्विषुरूपं बभूव।
देवत्रा यन्तमवसे सखायमनु त्वा माता पितरो मदन्तु॥

घृतं घृतपावानः पिबत। वसां वसापावानः पिबत। अन्तरिक्षस्य हविरसि। स्वाहा त्वा वाताय। दिशः प्रदिश आदिशो विदिश उद्दिशो दिशः। स्वाहा दिग्भ्यः। नमो दिग्भ्यः ॥१४॥

समुद्रं गच्छ स्वाहा। अन्तरिक्षं गच्छ स्वाहा। देवं सवितारं गच्छ स्वाहा। अहोरात्रे गच्छ स्वाहा। मित्रावरुणौ गच्छ स्वाहा। द्यावापृथिवी गच्छ स्वाहा। छन्दो गच्छ स्वाहा। सोमं गच्छ स्वाहा। यज्ञं गच्छ स्वाहा। नभो गच्छ स्वाहा। अग्निं वैश्वानरं गच्छ स्वाहा। मनो मे हार्दि यच्छ। पुत्रं नप्तारमशीय। ओषधीभ्यः स्वाहा॥

धाम्नोधाम्नो राजन्नितो वरुण नो मुञ्च।
यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम॥

सुमित्रिया न आप ओषधयो भवन्तु। दुर्मित्रियास्तस्मै सन्तु [यो ऽस्मान्द्वेष्टि यं च] वयं द्विष्मः॥

द्रुपे राज्ञो वरुणस्य गृहो हिरण्ययो मितः।
ततो धृतव्रतो राजा धाम्नोधाम्न इह मुञ्चतु ॥१५॥

हविष्मतीरिमा आपो हविष्मान्देवो अध्वरः।
हविष्मां आविवासति हविष्मां अस्तु सूर्यः॥

अग्नेर्वो ऽपन्नगृहस्य सदसि सादयामि। सुम्नायवः सुम्नाय सुम्नं धत्त। इन्द्राग्न्योर्भागधेयी स्थ। मित्रावरुणयोर्भागधेयी स्थ। विश्वेषां देवानां भागधेयी स्थ। सोमस्य वसतीवरीः॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा॥
ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छ।
सोम राजन्विश्वाः प्रजा उपावरोह। विश्वास्त्वां प्रजा उपावरोहन्तु॥
शृणोत्वग्निः समिधा हवं मे शृण्वन्त्वापो धिषणाश्च देवीः।
शृणोत ग्रावाणो विदुषो न यज्ञं शृणोतु देवः सविता हवं मे॥
देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमः।
तं देवेभ्यो देवत्रा दात शुक्रपेभ्यो येषां भाग स्थ स्वाहा॥
कर्षिरसि। समुद्रस्य वो ऽक्षित्या उन्नये॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः।
स यन्ता शश्वतीरिषः॥

वसूनां रुद्राणामादित्यानां पन्नेजनी स्थ। वसवो रुद्रा आदित्या एता वः पन्नेजनीः। समुद्रं गन्धर्वेष्ठामन्वातिष्ठत। वातस्य पत्मनेडिता। वाम्या ते संदृशि विश्वं रेतो धिषीय तव वाम्यनु संदृशि ॥१६॥

निग्राभ्या स्थ देवश्रुतः शुक्राः शुक्रभृतः। आयुर्मे तर्पयत। प्राणं मे तर्पयत। व्यानं मे तर्पयत। अपानं मे तर्पयत। चक्षुर्मे तर्पयत। श्रोत्रं मे तर्पयत। वाचं मे तर्पयत। आत्मानं मे तर्पयत। प्रजां मे तर्पयत। पशून्मे तर्पयत। गृहान्मे तर्पयत। गणान्मे तर्पयत। ते मे मा वितृषन्॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। ग्रावास्यध्वरकृद्देवेभ्यः। ऊर्ध्वमिममध्वरं कृधि। उत्तमेन पविनेन्द्राय सुषुत्तमं मधुमन्तं पयस्वन्तम्। इन्द्राय त्वाभिमातिघ्न इन्द्राय त्वा सहोद इन्द्राय त्वा वसुमत इन्द्राय त्वा रुद्रवत इन्द्राय त्वादित्यवते ऽग्नये त्वा रायस्पोषदे विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा। यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यज्ञपतय उरु राये कृधि। अधि धात्रे वोचः॥

श्वात्रा स्थ वृत्रतुरो राधोगूर्ता अमृतस्य पत्नीः। ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबत॥

मा भैः। मा संभित्थाः। धिषणे ईडिते ईडयेथाम्। ऊर्जं दधाथाम्। ऊर्जमस्मासु धत्तम्। मा वां हिंसिषम्। मा युवमस्मान्हिंसिष्टम्। प्रागपागुदगधराक्तास्त्वा दिश आधावन्तु। अम्ब निस्वर। समरीर्विदम् ॥१७॥

इति कपिष्ठलकठसंहितायां द्वितीयोऽध्यायः

वाचस्पतये पवस्व। वृष्णो अंशुभ्यां गभस्तिपूतः। देवो देवानां पवित्रमसि। येषां भागो ऽसि। मधुमतीर्ण इषस्कृधि। स्वांकृतो ऽसि। उर्वन्तरिक्षं वीहि। विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। मनस्त्वाष्टु। स्वाहा त्वा सुभो सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्यः। प्राणाय त्वा। उपयामगृहीतो ऽसि॥

अन्तर्यच्छ मघवन्पाहि सोममुरुष्य रायः समिषो यजस्व।
अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्।
सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन्मादयस्व॥

मधुमतीर्ण इषस्कृधि। स्वांकृतोऽसि। उर्वन्तरिक्षं वीहि। विश्वेभ्य इन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः। मनस्त्वाष्टु। स्वाहा त्वा सुभो सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्यः। अपानाय त्वा ॥१॥

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥
उपयामगृहीतोऽसि। वायवे त्वा॥
इन्द्रवायू इमे सुता उप प्रयोभिरागतम्।
इन्दवो वामुशन्ति हि॥

उपयामगृहीतोऽसि। वायव इन्द्रवायुभ्यां त्वा। एष ते योनिः। सजोषोभ्याम् त्वा॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा।
ममेदिह श्रुतं हवम्॥

उपयामगृहीतोऽसि। मित्रावरुणाभ्यां त्वा। एष ते योनिः। ऋतायुभ्यां त्वा॥

या वां कशा मधुमत्यश्विना सूनृतावती।
तया यज्ञं मिमिक्षतम्॥

उपयामगृहीतोऽसि। अश्विभ्यां त्वा। एष ते योनिः। माध्वीभ्यां त्वा। उपयामगृहीतोऽसि। वायव इन्द्रवायुभ्यां त्वा। एष ते योनिः। विष्णोरुरुक्रमे। उपयामगृहीतोऽसि। मित्रावरुणाभ्यां त्वा। एष ते योनिः। विष्णोरुरुक्रमे।

उपयामगृहीतोऽसि। अश्विभ्यां त्वा। एष ते योनिः। विष्णोरुरुक्रमे। तं रक्षस्व। मा त्वा दभन्। दुश्चक्षास्ते मावक्षत् ॥२॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने।
इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥
उपयामगृहीतोऽसि। शण्डाय त्वा। एष ते योनिः। वीरतायै त्वा॥
तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्।
प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे॥

उपयामगृहीतो ऽसि। मर्काय त्वा। एष ते योनिः। प्रजाभ्यस्त्वा॥

अपनुत्ता शण्डामर्को सह तेन यं द्विष्मः। तूथो ऽसि जनधाया देवास्त्वा शुक्रपाः प्रणयन्तु। तूथो ऽसि जनधाया देवास्त्वा मन्थिपाः प्रणयन्तु। आयुः संधत्तं प्राणं संधत्तं चक्षुः संधत्तं श्रोत्रं संधत्तं वाचं संधत्तम्। अनाधृष्टासि। जिन्वेथां स्वपत्या मध्वा। सुवीराः प्रजाः प्रजनयन्परीहि। सुप्रजाः प्रजाः प्रजनयन्परीहि॥

संजग्माना दिवा पृथिव्या शुक्रः शुक्रशोचिषा मन्थी मन्थिशोचिषा। शुक्रो ऽसि शुक्रशोचिः। मन्थ्यसि मन्थिशोचिः। अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य दधितारः स्याम। निरस्ता शण्डामर्को सह तेन यं द्विष्मः। शुक्रस्याधिष्ठानमसि। मन्थिनो ऽधिष्ठानमसि॥

या संस्कृतिः प्रथमा विश्वकर्मा यो मध्यमो बृहस्पतिश्चिकित्वान्।
यः परमो वरुणो मित्रो अग्निस्तस्मा इन्द्राय सुतमाजुहोत तस्मै सूर्याय सुतमाजुहोत॥
स्वाहा त्वा सुभो सूर्याय। देवेभ्यस्त्वा मरीचिपेभ्यः ॥३॥
ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ।
अप्सुषदो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम्॥

उपयामगृहीतो ऽस्याग्रयणः। जिन्व यज्ञं जिन्व यज्ञपतिम्। अभि सवनानि पाहि। विष्णुस्त्वां पात्विन्द्रियेण। विशं त्वं पाहीन्द्रियेण। एष ते योनिः। विश्वेभ्यस्त्वा देवेभ्यः॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा बृहद्वते वयस्वत उक्थाव्यम्। यत्त इन्द्र बृहद्वयस्तस्मै त्वा। विष्णवे त्वा। एष ते योनिः। इन्द्राय त्वा॥

उपयामगृहीतो ऽसि। मित्रावरुणाभ्यां त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। मित्रावरुणाभ्यां त्वा। पुनर्हविरसि। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतोऽसि। इन्द्राय त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राय त्वा। पुनर्हविरसि। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतोऽसि। इन्द्राग्निभ्यां त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राग्निभ्यां त्वा। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतोऽसि। इन्द्राय त्वा। इन्द्राय त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राय त्वा। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे॥

उपयामगृहीतो ऽसि। इन्द्रावरुणाभ्यां त्वा। इन्द्राबृहस्पतिभ्यां त्वा। इन्द्राविष्णुभ्यां त्वा। उक्थेभ्यस्त्वोक्थाव्यं गृह्णामि। एष ते योनिः। इन्द्राविष्णुभ्यां त्वा। देवेभ्यस्त्वा देवाव्यं पृणच्मि यज्ञस्यायुषे ॥४॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥

उपयामगृहीतो ऽसि वैश्वानरः। ध्रुवो ऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमः। एष ते योनिः। वैश्वानराय त्वा॥

उपयामगृहीतो ऽसि। मधवे त्वा। उपयामगृहीतो ऽसि। माधवाय त्वा। उपयामगृहीतो ऽसि। शुक्राय त्वा। उपयामगृहीतो ऽसि। शुचये त्वा। उपयामगृहीतो ऽसि। नभसे त्वा। उपयामगृहीतो ऽसि। नभस्याय त्वा। उपयामगृहीतो ऽसि। इषाय त्वा। उपयामगृहीतो ऽसि। ऊर्जाय त्वा। उपयामगृहीतो ऽसि। सहसे त्वा। उपयामगृहीतो ऽसि। सहस्याय त्वा। उपयामगृहीतो ऽसि। तपसे त्वा। उपयामगृहीतो ऽसि। तपस्याय त्वा॥

इन्द्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यम्।
अस्य पातं धियेषिता॥

उपयामगृहीतो ऽसि। इन्द्राग्निभ्यां त्वा। एष ते योनिः। इन्द्राग्निभ्यां त्वा॥

ओमासश्चर्षणीधृतो विश्वे देवास आगत।
दाश्वांसो दाशुषः सुतम्॥

उपयामगृहीतो ऽसि। विश्वेभ्यस्त्वा देवेभ्यः। एष ते योनिः। विश्वेभ्यस्त्वा देवेभ्यः ॥५॥

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥

इन्द्र मरुत्व इह पाहि सोमं यथा शार्यते अपिबः सुतस्य।
तव प्रणीती तव शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥

मरुत्वां इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय।
आसिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम्॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम्।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा मरुत्वते। एष ते योनिः। इन्द्राय त्वा मरुत्वते॥

महां इन्द्रो य ओजसा पर्जन्यो वृष्टिमां इव।
स्तोमैर्वत्सस्य वावृधे॥

उपयामगृहीतो ऽसि। महेन्द्राय त्वा। एष ते योनिः। महेन्द्राय त्वा॥

महां इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्॥

उपयामगृहीतो ऽसि। महेन्द्राय त्वा। एष ते योनिः। महेन्द्राय त्वा ॥६॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम्॥
चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥

द्यां गच्छ स्वर्गच्छ। रूपं वो रूपेणाभ्यागां वयसा वयः। तूथो वो विश्ववेदा विभजतु वर्षिष्ठे ऽधि नाके। एतत्ते अग्ने राध एति सोमच्युतम्। तन्मित्रस्य पथा नय। ऋतस्य पथाप्रेत चन्द्रदक्षिणाः। ब्राह्मणमद्यर्ध्यासं पितृमन्तं पैतृमत्यमृषिमार्षेयं सुधातुदक्षिणम्॥

अयं नो अग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन्।

अयं शत्रूञ्जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसातौ।
वनेषु व्यन्तरिक्षं ततान॥

वि स्वः पश्य व्यन्तरिक्षम्। यतस्व सदस्यैः। अस्मद्दात्रा मधुमती देवत्रा गच्छ। प्रदातारमाविश। अनवहायास्मान्देवि दक्षिणे देवयानेन पथा यतो सुकृतां लोके सीद। तन्नौ संस्कृतम् ॥७॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते॥
उपयामगृहीतो ऽसि। आदित्येभ्यस्त्वा॥
कदा चन प्रयुच्छस्युभे निपासि जन्मनी।
तुरीयादित्य सवनं त इन्द्रियमातस्थावमृतं दिवि॥
उपयामगृहीतो ऽसि। आदित्येभ्यस्त्वा॥
यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः।
आ वो ऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत्॥

उपयामगृहीतो ऽसि। आदित्येभ्यस्त्वा। विवस्व आदित्यैष ते सोमपीथस्तस्मिन्मन्दस्व। या दिव्या वृष्टिस्तया त्वा श्रीणामि॥

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम्।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत॥

उपयामगृहीतो ऽसि। देवाय त्वा सवित्रे। उपयामगृहीतो ऽसि। सुशर्मासि सुप्रतिष्ठानः। बृहदुक्षे नमः। एष ते योनिः। विश्वेभ्यस्त्वा देवेभ्यः ॥८॥

उपयामगृहीतो ऽसि बृहस्पतिसुतस्य त इन्द इन्द्रियावतः पत्नीवन्तं ग्रहमृध्यासम्। अग्ना३इ पत्नीवा३न्सजूस्त्वष्ट्रा सोमं पिब॥

उपयामगृहीतो ऽसि। हरिरसि हारियोजनो हर्योः स्थाता। हरिभ्यां त्वा। सुतस्तोमस्य ते देव सोम शस्तोक्थस्येष्टयजुषो हरिवन्तं ग्रहमृध्यासम्। हर्योः स्थ हरिवन्तो धानाः सहसोमा इन्द्रस्य॥

अग्न आयूंषि पवस आसुवोर्जमिषं च नः।
आरे बाधस्व दुच्छुनाम्॥

उपयामगृहीतो ऽसि। अग्नये त्वा तेजस्वते। एष ते योनिः। अग्नये त्वा तेजस्वते॥

ओजस्तदस्य तित्विष उभे यत्समवर्तयत्।
इन्द्रश्चर्मेव रोदसी॥

उपयामगृहीतो ऽसि। इन्द्राय त्वौजस्वते। एष ते योनिः। इन्द्राय त्वौजस्वते॥

अदृश्रमस्य केतवो वि रश्मयो जनां अनु।
भ्राजन्तो अग्नयो यथा॥

उपयामगृहीतो ऽसि। सूर्याय त्वा भ्राजस्वते। एष ते योनिः। सूर्याय त्वा भ्राजस्वते॥

इन्द्रमिद्धरी वहतो ऽप्रतिधृष्टशवसम्।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम्॥

उपयामगृहीतो ऽसि। इन्द्राय त्वा हरिवते। एष ते योनिः। इन्द्राय त्वा हरिवते ॥९॥

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः।
त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु॥
समिन्द्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्त्या।

सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमत्या यज्ञियानाम्॥
सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन।
त्वष्टा सुदत्रो विदधातु रायो ऽनु नो मार्ष्टु तन्वो यद्विलिष्टम्॥
सुगा वो देवाः सदनेदमस्तु य आजग्मुः सवनेदं जुषाणाः।
जक्षिवांसः पपिवांसश्च विश्वे ऽस्मे धत्त वसवो वसूनि॥
यानावह उशतो देव देवांस्तान्प्रेरय स्वे अग्ने सधस्थे।
वहमाना भरमाणा हवींष्यसुं घर्मं दिवमातिष्ठतानु॥
यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह।
ऋधगयाडृधगुताशमिष्ट विद्वान्प्रजानन्नुपयाहि साधु॥

यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वं योनिं गच्छ स्वाहा। एष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीरः स्वाहा। देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत इमं देव यज्ञं स्वाहा वाचि स्वाहा वाते धाः ॥१०॥

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ।
अपदे पादा प्रतिधातवे ऽकरुतापवक्ता हृदयाविधश्चित्॥
शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु।
आरे बाधस्व निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत्॥
अग्नेरनीकमप आविवेशापां नपात्प्रतिरक्षन्नसुर्यम्।
दमेदमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्येत्॥
समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः।
यज्ञस्य त्वा यज्ञपते सूक्तवाके नमोवाके विधेम ॥स्वाहा॥

अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः। अव नो देवैर्देवकृतमेनो यक्ष्यव मर्त्यैर्मर्त्यकृतम्। उरोरा नो देव रिषस्पाहि। देवीराप एष वो गर्भः। तं वः सुप्रीतं सुभृतमभारिषम्। देवेषु णः सुकृतो ब्रूत। अभिष्ठितो वरुणस्य पाशः। अप्सु धौतस्य ते देव सोम नृभिः स्तुतस्य यो भक्षो गोसनिर्यो ऽश्वसनिस्तस्य त उपहूत उपहूतस्य भक्षं कृणोमि। प्रत्यस्तो वरुणस्य पाशः। नमो वरुणस्य पाशाय॥

गायत्रीं छन्दांस्यनु संरभन्तामस्मात्राय उत यज्ञाः सचन्ताम्॥
सुप्रीतः शिशुरप आविवेश॥
उन्नेतर्वस्यो ऽध्युन्नया नः॥
आपो अद्यान्वचारिषं रसेन समगस्महि।
आयुष्मानग्न आगमं तं मा संसृज वर्चसा॥

एधो ऽस्येधिषीमहि। समिदसि समेधिषीमहि। तेजो ऽसि तेजो मयि धेहि ॥११॥

प्रजापतिर्वा इदमासीत्। तस्मादग्निरध्यसृज्यत। सो ऽस्य मूर्ध्न ऊर्ध्व उदद्रवत्। तस्य यल्लोहितमासीत्तदपामृष्ट। तद्भूम्यां न्यमार्ट्। तत उदुम्बरो ऽजायत। तस्मात्स लोहितं पच्यते। स प्राङ् प्राद्रवत्। तं स्वा वागैट्ट जुहुधीति। स इतः पर्यमृष्ट। तत्स्वाहेत्यजुहोत्। तस्मादेवैवमाहुतिः। स्वा ह्येनं वागैट्ट। तस्मान्न ललाटे लोमास्ति न पाण्योः। तस्मादरत्निमात्री स्रुग्भवति। चक्षुर्वाव स तत्स्वमजुहोत्। अमुमेव स तदादित्यमजुहोत्। एष ह्येवाग्निहोत्रम्। श्वःश्वो वसीयान्भवति यस्यैवमग्निहोत्रं हूयते॥

न वै पुराहोरात्रे आस्ताम्। ते एतया हुत्योभे सहासृज्येताम्। यत्सायं जुहोति तेन भ्रातृव्याय पराचीं विवासयति यत्प्रातस्तेनात्मने प्रतीचीम्। अग्नेर्वै गुप्त्या अग्निहोत्रं हूयते। यत्सायं जुहोति तेनैनं रात्र्यै रमयति यत्प्रातस्तेनाह्ने। एषा

या अग्रयाहुतिः प्रथमा हुता यदग्निहोत्रम्। तस्मात्सर्वा एवाग्रयाहुतयो हूयन्ते। अथैषा वा अग्निहोत्रमुच्यते। अग्निहोत्रं ह वै नाम नास्मादन्यः। समानेषु वसीयान्भवति यस्यैवमग्निहोत्रं हूयते ॥१२॥

इति कपिष्ठलकठसंहितायां तृतीयो ऽध्यायः

स नारमत। स प्राद्रवत्। तस्मिन्नजुहोत्। तस्या आहुत्याः पुरुषो ऽजायत। स नारमत। स प्राद्रवत्। तस्मिन्नजुहोत्। तस्या आहुत्या अश्वो ऽजायत। तस्मात्पुरुषश्चाश्वश्च नाना प्रत्यञ्चौ न सु विज्ञायेते इव। स नारमत। स प्राद्रवत्। तस्मिन्नजुहोत्। तस्या आहुत्या गौरजायत। अविरजायत। अजाजायत। यवो ऽजायत। व्रीहिरजायत। एताभ्यो वै सप्तभ्य आहुतिभ्यः सप्तैव ग्राम्याः पशवो ऽसृज्यन्त। स नारमत। स प्राद्रवत्। तस्मिन्नजुहोत्। तस्या आहुत्या वसन्तो ऽजायत। ग्रीष्मो ऽजायत। वर्षा अजायन्त। शरदजायत। हेमन्तो ऽजायत। स ऋतोदश्यामाहुत्यामुद्यतायामबिभेत्। तं प्रत्यङ्ङुपाद्रवत्। तं पाणिः प्राविशत्। तस्मात्पाण्योर्लोम नास्ति। अग्निधानं ह्येतत्। तस्माद्धस्ताभ्यामग्निर्मथ्यमानो जायते। तस्माद्धन्यमानो हस्तौ प्रसार्य गृह्णाति। अग्नावेव तत्प्राणि मिच्छते। अग्निं वै पशवो ऽनूपतिष्ठन्ते पशूनग्निः। प्रैनं पशवो विशन्ति [प्र पशून्विशति] य एवं वेद। तामाहुतिमप्सु प्रासिञ्चत्। ततः शिशिरमजायत। तस्मात्तत्क्रूरतमम्। यदि तद्धुताहुत्या अजायत। साहुतिरपो दग्धुमुपाक्रमत। तत आपो ऽप्रवेव्यो ऽभवन्। तस्मादप्स्वग्निं न प्रास्येत्। यत्प्रास्येद्भुतेन यजेत। तामाहुतिमोषधिषु न्यदधात्। तस्मादोषधयो ऽप्यदग्धा रभन्ते। ओषधिभ्यो ऽधि पशवः पशुभ्यो ऽधि प्रजाः। तदेतच्छिशिर आज्यं श्यायति। अग्नये तस्माच्छिशिरे कक्ष उपादुत्यः। प्रियमेव धामाग्नये प्रादात्। सो ऽस्मा अन्नाद्यं प्रयच्छति। अन्नादो भवति य एवं वेद ॥१॥

समाने वै योनावास्तां सूर्यश्चाग्निश्च। ततः सूर्य ऊर्ध्व उदद्रवत्। तस्य रेतः परापतत्। तदग्निर्योनावगृह्णात्। अपमा तदकृडयत्। तदकृश्यमानं गवि न्यदधात्। तदिदं पयः। तस्मादत्र पयस्यत्र प्रतिधुक्कुर्वन्ति। यत्पयसाग्निहोत्रं जुहोत्यमुमेव तदादित्यं जुहोति। एष ह्येवाग्निहोत्रम्। अनड्वाहो वै पयस्तण्डुलाः। असावादित्यो ऽनड्वान्। यदनड्वाग्निहोत्रं जुहोत्यमुमेव तदादित्यं जुहोति। एष ह्येवाग्निहोत्रम्। यच्चक्रवृत्तं तदसुर्यं यदचक्रवृत्तं तद्देवपात्रम्। तस्मादचक्रवृत्तमग्निहोत्रस्थालीं कुर्वीत॥

न क्षीरेण प्रतिषिञ्चेन्नोदकेन। यत्क्षीरेण प्रतिषिञ्चेत् प्रतिषिक्तं स्यात्। यदुदकेन शमयेत्। दोहने संस्रावमुच्छिष्य तेनोदकमिश्रेण प्रतिषिञ्चेत्। तत्र क्षीरेण प्रतिषिक्तं भवति नोदकेन। स्कन्नमेव तत्। परि चेदाकरोति या स्थाल्यग्निहोत्रस्थानी तया दुह्यात्। इयं वै सा। न वा इममिह नेहास्कन्दति। अनयैवोपसीदति। तदस्यास्कन्नं भवति। अद्भिः प्रतिषिञ्चति। आपो हि प्रतिषेचनाय तस्मिन्। सम्मिथुनमापश्च पयश्च। यदि दुह्यमानावभिनृद्यादन्यया स्थाल्या दुह्यात्। सैव तत्र प्रायश्चित्तिः। यद्यधिश्रितं स्कन्देदन्यामभिदुह्याधिश्रित्योन्नीय जुहुयात्। सैव तत्र प्रायश्चित्तिः। यद्युन्नीयमानं स्कन्देदुन्नयनीयमन्यामभिदुह्याधिश्रित्योन्नीय जुहुयात्। सैव तत्र प्रायश्चित्तिः। यदि पुर उपसन्नमहुतं स्कन्देदुन्नयनीयमन्यामभिदुह्याधिश्रित्योन्नीय जुहुयात्। सैव तत्र प्रायश्चित्तिः। यत्र स्कन्देत्तदपो निनयेत्। आपो वै यज्ञस्य निष्कृतिः। अद्भिरेव निष्करोति। प्रतिषिक्तमन्यदप्रतिषिक्तमन्यत्। प्रतिषिक्तं पशुकामस्याप्रतिषिक्तं ब्रह्मवर्चसकामस्य। घर्मो वा एष प्रवृज्यते यदग्निहोत्रम्। यदप्रतिषिक्तेन जुहोति ब्रह्मवर्चसी भवति। यदि पयो न विन्देदाज्येन जुहुयात्। तद्धि पयःकस्मन्नशान्तमश्रमस्तस्मात् शुचा पशून्निर्दहेत्। प्रतिषिक्तं पशुकामस्य। तच्छान्तं मिथुनं पशव्यमापश्च पयश्च। यदि पयो न विन्देद्यवाग्वा जुहुयात्। तद्धि प्रतिषिक्तं शान्तं मिथुनं पशव्यमापश्च तण्डुलाश्च ॥२॥

अग्निहोत्रं वै जायापती व्यभिचरेते। यत्प्राचीनमुद्वासयेत्पूर्वः प्रमीयेत। यत्प्रतीचीनमुद्वासयेज्जाया पूर्वा प्रमीयेत। यदुदीचीनमुद्वासयेत्समेव जीयेत। पूर्णमग्र उन्नयेदथ संमितमथ संमितमथ संमिततममुत्तमम्। अनुज्येष्ठमस्य पुत्रा ऋध्नुवन्ति। संमितमग्र उन्नयेदथ भूयो ऽथ भूयो ऽथ पूर्णमुत्तमम्। भूयोभूय एवान्नाद्यमभ्युत्क्राम-

ति। कनिष्ठस्त्वस्य पुत्राणामर्धुको भवति। [सर्वान्समावदुन्नयेद्यः कामयेत सर्वे मे पुत्राः समावदृध्नुयुरिति। सर्वेषां वै पिता पुत्राणामृद्धिं कामयते। सर्व एव समावदृध्नुवन्ति। नान्यो ऽन्यमतिक्रामति।] चतुरुन्नयति। चतुष्पद एवास्मै पशून्गृह्णाति। द्विः पुरो जुहोति। द्विपद एवास्मै पशून्गृह्णाति। पशून्मे यच्छेति पश्चादुपसादयेत्। पशवो वै गार्हपत्यः। पशवः पयः। पशूनामेवैषा यतिः। न पश्चादुपसादयेत्। हविर्वा एतद्यदग्निहोत्रम्। यजमानो हविः। हविर्भूतमेव यजमानमपनुदते। उत्तरादुपसादयेत्। अनुत्पूतं वा एतद्यदग्निहोत्रम्। अग्निः पवित्रम्। यत्समयाग्निं हरति तेनैवैनत्पुनाति। अनु वा एष एतद्ध्यायति यत्पश्चाधिश्रित्य पुरो जुहोति। यत्समयाग्निं हरति तेनैवैनं प्राणात्यननुध्यायिनं करोति। अस्माद्वै गार्हपत्यादसौ पूर्वो ऽग्निरसृज्यत। अयं वाव प्रजापतिरसौ पूर्वो ऽग्निः। तदयमित आदाय प्राङनुद्रुत्या जुहोत्। तस्मादग्निहोत्रं पश्चाधिश्रित्य पुरो जुहोति। पुर एवान्यानि हवींषि शृतानि कुर्वन्ति। पुरो जुह्वति ॥३॥

इध्मो वा एषो ऽग्निहोत्रस्य यत्समित्। यत्समिधमादधातीध्ममेवैतदग्निहोत्रस्य करोति। रुद्र ओषधीर्विषेणालिम्पत्। ताः पशवो नालिशन्त। ताभ्यो देवाः प्रायश्चित्तिमैच्छन्। स प्रजापतिरब्रवीद्वार्यं वृणा अहं व एताः स्वदयिष्यामीति। स एतां समिधमवृणीत। तस्मादेकैको हि प्रजापतिस्ता अग्निनोपासृजत्। ता अग्निरस्वदयत्। एतस्यां वा आहितायामग्निहोत्रिणे वीरुधः स्वदन्ति। बह्वीं करोत्युभे आहुती समिद्धे जुहवानीति। एकैव कार्या। सकृद्ध्येव सर्वस्मै यज्ञाय समिध्यते। आयुर्मे यच्छ वर्चो मे यच्छ प्रजां मे यच्छेति पुर उपसादयेत्। सृष्टिर्वा एतद्यदग्निहोत्रम्। यत्रोपसादयेत्पराचीः प्रजा इयुः। युदपसादयति तस्मादिदं प्रजा यतास्तस्मादुपतिष्ठन्ते। अग्नौ ज्योतिर्ज्योतिरग्नाविति सायमग्निहोत्रं जुहुयात्। गर्भिण्या वाचा गर्भं दधाति। मिथुनया वाचा गर्भं दधाति। सूर्यो ज्योतिर्ज्योतिः सूर्य इति प्रातः। गर्भिण्यां वाचा मिथुनया प्रजनयति। यन्निरुक्तं चानिरुक्तं च तन्मिथुनम्। यद्यजुषा च मनसा च तन्मिथुनम्। तदजाम्याहुत्योः। आग्नेयी सायमाहुतिः सौरी प्रातः। अग्निः प्रवापयिता सूर्यः प्रजनयिता। अप्नः सूर्ये निम्रुक्ते सायमग्निहोत्रं जुहुयात्। उपोदयं सूर्यस्य प्रातः। अग्निरेव प्रवापयित्वा सूर्यं रात्र्यै गर्भं दधाति। तं गर्भिण्या वाचा मिथुनया प्रातः प्रजनयति। एतं वै प्रजायमानं प्रजा अनुप्रजायन्ते। प्र प्रजया प्र पशुभिर्जायते यस्यैवमग्निहोत्रं हूयते। एषा वा अग्निहोत्रस्य स्थाणुर्या पूर्वाहुतिः। तामतिहाय जुहुयात्। तमेव परिवृणक्ति। अभिक्रामं सायं होतव्यम्। गर्भमेव दधाति। प्रतिक्रामं प्रातः। प्रैव जनयति। अभिक्राममेव होतव्यम्। अभिक्रान्तेन हि यज्ञस्यर्ध्नोति। यज्जुहोति तद्देवानाम्। यन्निमार्ष्टि तत्पितॄणाम्। यत्प्राश्नाति तन्मनुष्याणाम्। तस्मादग्निहोत्रं वैश्वदेवमुच्यते ॥४॥

प्रैयमेधा वै नाम ब्राह्मणा आसन्। ते सर्वमेवाविदुः। तत्सह्याविदुः। ते ऽग्निहोत्र एव न समराधयन्। तेषां सकृदेको ऽग्निहोत्रमजुहोद्द्विरेकस्त्रिरेकः। तेषां यः सकृदजुहोत्तमितरावपृच्छतां कस्मै त्वं जुहोषीति। प्रजापतय एव जुहोमीति। एकधैवेदमित्यब्रवीत्प्रजापतिः। तेषां यो द्विरजुहोत्तमितरावपृच्छतां कस्मै त्वं जुहोषीति। अग्नये चैव सायमित्यब्रवीत्प्रजापतये च सूर्याय प्रातः प्रजापतये चेति। तेषां यस्त्रिरजुहोत्तमितरावपृच्छतां कस्मै त्वं जुहोषीति। अग्नये सूर्याय प्रजापतये तेभ्य एवं सायमित्यब्रवीत्तेभ्यः प्रातरिति। तेषां यो द्विरजुहोत्स आर्ध्नोत्। स भूयिष्ठो ऽभवत्प्रजया। अतीतरौ श्रियाक्रामत्। तस्य प्रजामितरयोः प्रजे सजातत्वमुपैताम्। तस्माद् द्विर्होतव्यम्। यजुषा च मनसा च। यामेव स ऋद्धिमार्ध्नोत्तामृध्नोति॥

यदि सायमहुते ऽग्निहोत्रे पूर्वो ऽग्निरनुगच्छेदग्निहोत्रमधिश्रित्योन्नीयाग्निना पूर्वेणोद्धृत्याग्निहोत्रेणानुद्रवेत्। आहुत्यैवैनं च्यावयति। यो ब्राह्मणो बहुवित्स्यात्स उद्धरेत्। सर्वेणैवैनं ब्रह्मणोद्धरति। यत्पुरा धनमदायो स्यात्तद्द्यात्। तत्र प्रायश्चित्तिः। यदि त्वरेत पूर्वमग्निमन्ववसाय ततः प्राञ्चमुद्धृत्य जुहुयात्। सैव तत्र प्रायश्चित्तिः। यदि प्रातरहुते ऽग्निहोत्रे ऽपरो ऽग्निरनुगच्छेदनुगमयित्वा पूर्वं मथित्वापरमुद्धृत्य जुहुयात्। सैव पूर्वो ऽग्निः। तं पश्चा करोति। अन्यत्रैवावसायाग्निं मथित्वोद्धृत्य जुहुयात्। सैव तत्र प्रायश्चित्तिः। जामि नु तद्यो ऽस्य जनद्वते पावकवत इष्टिं निर्वपेत्। यदा वा अग्निः संतप्यते [ऽथ जायते। ओषधयः पावकाः। ओषधीरेवास्मै पावका

भागधेयमपिदधाति। न गार्हमनुबुध्यते। यदा ह्येवास्मै नापिदधात्यथैषो ऽनुगच्छति। यौ पन्थानावभितस्तौ दर्शपूर्णमासौ। या मध्ये सृतिस्तदग्निहोत्रम्। एवं वा अग्निहोत्रिणे दर्शपूर्णमासिने स्वर्गो लोको ऽनुभाति।।

[मनसा वा इमां प्रजापतिर्वेदिं पर्यगृह्णादग्निहोत्रिणे। तत्र यत्किंच ददाति तद्बर्हिष्यम्। यथा सत्रेषु नाराशंसेषु ददात्येवमेष ददाति। यत्किंच ददाति मध्य एव यज्ञस्य। द्यावापृथिवी एतस्य सदोहविर्धाने। अहोरात्राणीध्मः दिशः परिधयः। प्रुष्वाः प्रोक्षणीः। ओषधयो बर्हिः। यजमानो यूपः। न संभवन्वदेत्। पशुरेव भूत्वा संभवति। अहरहर्वै] पशवः संभवन्तो ऽथ मेध्याः। न राजन्यस्याग्निहोत्रमस्ति। अव्रत्यो हि स हन्ति। व्रतं न विच्छिन्द्यात्। पौर्णमासीं च रात्रीममावस्यां च जुहुयात्। ते हि व्रतं गोपायति। यान्यहानि न जुहुयात्तानि ब्राह्मणायाग्रे ऽस्य गृह उपहरेयुः। अग्निर्वै ब्राह्मणः। अग्नावेव तज्जुहोति। तदस्य स्वदितमेष्टं भवति ।।५।।

वाचा वै सह मनुष्या अजायन्त। ऋते वाचो देवाश्चासुराश्च। ते यन्मनुष्या अवदंस्तदेवाभवन्। ते देवाश्चासुराश्च प्रजापतिमब्रुवन्निमे वावेदमभूवन्निति। स वाचः सत्यं निरमिमीत भूर्भुवः स्वरिति। यत्तुरीयमनृतं तन्मनुष्येषु न्यदधात्। एतद्वै वाचो ऽनृतं यन्मनुष्या वदन्ति। भूरितीमामसृजताग्निं रथन्तरं त्रिवृतं गायत्रीम्। भुव इत्यन्तरिक्षं वातं वामदेव्यं त्रिष्टुभ पञ्चदशम्। स्वरिति दिवं सूर्यं बृहदेकविंशं जगतीम्। भूर्भुवः स्वरग्नौ ज्योतिर्ज्योतिरग्नावित्यग्निहोत्रं जुहुयात्। एतद्वै वाचः सत्यमेतन्मिथुनमेतद्ब्रह्म। तेनैव जुहोति। इमा एवैतदिष्टका उपधत्ते। इमा एवैतदिष्टका उपधायोत्तमं नाकं रोहति। उत्तमः समानानां भवति यस्यैवमग्निहोत्रं हूयते।।

वाचं यच्छेदग्निहोत्र उन्नीयमाने। तपसा वै प्रजापतिः प्रजा असृजत। स यत्र व्यवहरत्तदेवातप्यत। सृष्टिर्वा एतद्यदग्निहोत्रम्। सृष्टिरेतद्व्रतम्। ता उद्भव स्थेत्युदभावयत्। यर्हि विन्दव इव स्युस्तर्ह्यवेक्षेतोद्भव स्थोदहं प्रजया प्र पशुभिर्भूयासमिति। उद्भूतिर्वा एतत्प्रभूतिर्यदग्निहोत्रम्। उत्प्रजया प्र पशुभिर्भवति यस्यैवमग्निहोत्रं हूयते। अग्निनावेक्षते। प्रजननं वा एतद्यग्निहोत्रम्। अग्निः प्रजनयिता। प्रैव जनयति। रेतो वा एतद्धीयते यदग्निहोत्रम्। न सुशृतं कुर्यादितः क्रूडयेत्। नो अशृतम्। अन्तरेवैव स्यात्। रुद्र मृडानार्भव मृड धूर्ते नमस्ते ऽस्त्विति हुत्वोदङ्ङुद्दिशेत्। एतानि वै रुद्रस्य क्रूराणि नामानि। तैरेष प्रजा हिनस्त्यग्निहोत्रे भागधेयमिच्छमानः। तान्येवास्य प्रतिनुदति तानि शमयति। यर्ह्ययं देवः प्रजा अभिमन्येत सजूर्जातवेदो दिवा पृथिव्या हविषो वीहि स्वाहेत्यग्निहोत्रं जुहुयात्। या वा अग्नेर्जातवेदास्तनूस्तयैष प्रजा हिनस्त्यग्निहोत्रे भागधेयमिच्छमानः। तामेवास्य शमयति। तस्यै तज्जुहोति। तदजाम्याहुत्योराग्नेय्येषाग्नेयीतरा। संवत्सरं वा एतमिन्धते ऽग्निं वैश्वानरम्। न वा एतस्य संवत्सरे ऽप्यस्ति न वैश्वानरे यो ऽनाहिताग्निः। यानि दारूणि ते मासाः। ये स्थूला अङ्गारास्त ऋतवः। ये ऽणीयांसस्ते ऽर्धमासाः। मुर्मुरा अहोरात्राणि। यत्सुवर्णं ज्योतिस्तद्बार्हस्पत्यम्। यत्र सुवर्णं न लोहितं तन्मैत्रम्। यल्लोहितं तद्वारुणम्। यत्सहधूमं तद्वैश्वदेवम्। यत्राङ्गारेभ्योग्निर्लेलायेव तदस्यास्यमाविर्नाम। तद्ब्रह्म। तस्मिन्होतव्यम्। मुखेन वा अश्नात्यङ्गान्यवत्याविः प्रजासु भवति श्वःश्वो वसीयान्भवति यस्यैवमग्निहोत्रं हूयते ।।६।।

ओदनपचनो गार्हपत्य आहवनीयो मध्याधिदेवनमामन्त्रणमेषा वै विराट् पञ्चपदा। तामेवाप्नोति तामवरुन्द्धे। यस्य ह्येषावरुद्धा स मनुष्याणां श्रेष्ठो भवति। यदि सायमग्निहोत्रस्य कालो ऽतिपद्येत दोषा वस्तोः स्वाहेति जुहुयात्। सैव तत्राहुतिः। तेनास्य तदनतिपन्नं भवति। यदि प्रातरग्निहोत्रस्य कालो ऽतिपद्येत दिवा वस्तोः स्वाहेति जुहुयात्। सैव तत्राहुतिः। तेनास्य तदनतिपन्नं भवति। न स्वाहाकुर्यात्। स्वाहाकारो वा अग्निहोत्रस्याहुतिं युवते। यर्हि वाक्प्रवदेत्तर्हि जुहुयात्। स ह्यग्निहोत्रस्य वषट्कारः। सजूरग्निर्दिवा पृथिव्येति द्यावापृथिवी अग्निं तानेव प्रीणाति तानवरुन्द्धे। सजूर्देवेन सवित्रेति। न हि सवितुर्ऋत आहुतिरस्ति। सजूः पूष्णान्तरिक्षेणेति। पशवो वै पूषा पशवो ऽन्तरिक्षम्। पशूनेवावरुन्द्धे। सजू रात्र्येन्द्रवत्या स्वाहेति रात्रीमेवैतदभिजुहोति। न ह्येन्द्रादृत आहुतिरस्ति। देवा वै पुराग्निहोत्रमहोषुः। तस्मात्पुरा बृहन्महानजनि। सजूरह्नेन्द्रवता स्वाहेति। बार्हतं वा अहर्बार्हतः सूर्यः। अहश्चैवास्यैतत्सूर्यश्चाभिजितावभिहुतौ भवतः। आनुष्टुभी वै रात्री त्रैष्टुभमहः। रात्रीं चैवैतदहश्चाभिजुहोति। अग्ने गृहपते जुषस्व

स्वाहेत्युत्तरामाहुतिं जुहोति। यथाग्रये समवद्यत्येवमेव तत्। अपिप्रेरग्रे स्वां तन्वमयाड् द्यावापृथिवी ऊर्जमस्मासु धेहीति तृणमक्त्वानुप्रहरति। संस्थितिरेवैषा स्वगाकृतिः। अग्निहोत्रस्य वा एषो ऽशान्तमनु प्रजा हिनस्ति यत्तृणमनुप्रहरति। तेनैवैनच्छमयति। अग्ने गृहपते ऽदाभ्य जुषस्व स्वाहेति स्रुवेण गार्हपत्ये जुहोति। यथा पत्नीः संयाजयत्येवमेव तत्। अनु वा एष एतद्ध्यायति यत्पश्चादधिश्रित्य पुरो जुहोति। यत्स्रुवेण गार्हपत्ये जुहोति तेनैवैनं प्रीणात्यननुध्यायिनं करोति। आस्याग्निहोत्री प्रजायां जायते यस्यैवमग्निहोत्रं हूयते ।।७।।

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये।
आरे अस्मे च शृण्वते।।
अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः।
पयः सहस्रसामृषिम्।।
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपां रेतांसि जिन्वति।।
उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै।
उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम्।।
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे।।
अयं ते योनिर्ऋत्वियः।।
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्।।

त्वमग्ने सूर्यवर्चाः सं मामायुषा वर्चसा सृज। सं त्वमग्ने सूर्यस्य ज्योतिषागथाः। समृषीणां स्तुतेन सं प्रियेण धाम्ना समहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मीय।।
इन्धानास्त्वा शतं हिमा द्युमन्तः समिधीमहि।
वयस्वन्तो वयस्विनं यशस्वन्तो यशस्विनम्।
सुवीरासो अदाभ्यमग्ने सपत्नदम्भनम्।।

आयुर्धा अग्ने ऽस्यायुर्मे धेहि। वयोधा अग्ने ऽसि वयो मे धेहि। वर्चोधा अग्ने ऽसि वर्चो मे धेहि। तनूपा अग्ने ऽसि तन्वं मे पाहि। यन्मे अग्न ऊनं तन्वस्तन्म आपृण। अग्नेः समिदस्यभिशस्त्या मा पाहि। सोमस्य समिदसि परस्पा म एधि। यमस्य समिदसि मृत्योर्मा पाहि। अग्ने यत्ते तपस्तेन तं प्रतितप यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। अग्ने यत्ते शोचिस्तेन तं प्रतिशोच यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। अग्ने यत्ते तेजस्तेन तं प्रतितितिग्धि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। अग्ने यत्ते ऽर्चिस्तेन तं प्रत्यर्च यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। अग्ने यत्ते हरस्तेन तं प्रतिहर यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। अग्ने रुचां पते नमस्ते रुचे मयि रुचं धेहि। चित्रावसो स्वस्ति ते पारमशीय। अर्वाग्वसो स्वस्ति ते पारमशीय ।।८।।

इति कपिष्ठलकठसंहितायां चतुर्थो ऽध्यायः।।

अम्भ स्थाम्भो वो भक्षीय। मह स्थ महो वो भक्षीय। ऊर्ज स्थोर्जं वो भक्षीय। रायस्पोष स्थ रायस्पोषं वो भक्षीय। रेवती रमध्वमस्मिन्योनावस्मिन्गोष्ठे। अयं वो बन्धुः। इतो मापगात। मा मा हासिष्ट। बह्वीर्मे भवन्तु। संहितासि विश्वरूपा मोर्जा विशा गौपत्येना प्रजया रायस्पोषेण। मयि ते रायः श्रयन्ताम्। सहस्रपोषं ते पुष्यासम्।। संपश्यामि प्रजा अहमिडप्रजसो मानवीः।

बह्वीर्भवन्तु नो गृहे।।
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि।।
राजन्तमध्वराणा गोपामृतस्य दीदिविम्।
वर्धमानं स्वे दमे।।
स नः पितेव सूनवे ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये।।
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः।
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः।।
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः।
स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्।।

स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्।। इडा स्थ मधुकृतः स्योना ऊर्जा वः पश्याम्यूर्जा मा पश्यत। रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यत। इडा स्थ मधुकृतः स्योना

मा विशतेरंमदः। मयि वो रायः श्रयन्ताम्। सहस्रपोषं वः पुष्यासम् ।।१।।
महि त्रीणामवो ऽस्तु द्युक्षं मित्रस्यार्यम्णः।
दुराधर्षं वरुणस्य।।
नहि तेषाममा चन नाध्वसु वारणेषु।
ईशे रिपुरघशंसः।।
यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय।
ज्योतिर्यच्छन्त्यजस्रम्।।
सोमानं स्वरणं कृणुहि ब्रह्मणस्पते।
कक्षीवन्तं य औशिजः।।
यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः।
स नः सिषक्तु यस्तुरः।।
मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य।
रक्षा णो ब्रह्मणस्पते।।
कदा चन स्तरीरसि।।
परि ते दूडभो रथो ऽस्माँ अश्नोतु विश्वतः।
येन रक्षसि दाशुषः।।

अच्छिन्नो दैव्यस्तन्तुर्मा मनुष्यश्छेदि। निम्रदो ऽसीदमहं तं निमृणामि यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। अभिभूरस्यभ्यहं तं भूयासं यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। प्रभूरसि प्राहं तमतिभूयासं यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मः। पूषा मा प्रपथे पातु। पूषा मा पशुपाः पातु। पूषा माधिपतिः पातु। प्राची दिगग्निर्देवता। अग्निं स ऋच्छतु यो मैतस्या दिशो ऽभिदासति। दक्षिणा दिगिन्द्रो देवता। इन्द्रं स ऋच्छतु यो मैतस्या दिशो ऽभिदासति। प्रतीची दिक्सोमो देवता। सोमं स ऋच्छतु यो मैतस्या दिशो ऽभिदासति। उदीची दिङ् मित्रावरुणौ देवता। मित्रावरुणौ स ऋच्छतु यो मैतस्या दिशो ऽभिदासति। ऊर्ध्वा दिग्बृहस्पतिर्देवता। बृहस्पतिं स ऋच्छतु यो मैतस्या दिशो ऽभिदासति। इयं दिगदितिर्देवता। अदितिं स ऋच्छतु यो मैतस्या दिशो ऽभिदासति। ज्योतिषे तन्तव आशिषमाशासे ऽसावनु मा तनु।।
धनं मे शंस्य पाहि। तन्मे गोपाय।।

मम नाम प्रथमं जातवेदो माता पिता च दधन्तुर्वग्रे।
तत्त्वं गोपाया पुनर्मदैतोस्तवाहमग्ने बिभराणि नाम।।
प्रजां मे नर्य पाहि। तां मे गोपाय।।
इमान्मे मित्रावरुणौ गृहान्गोपायतं युवम्।
अविनष्टानविहुतान्पूषैनानभिरक्षत्वास्माकं पुनरागमात्।।
अन्नं मे पुरीष्य पाहि। तन्मे गोपाय।।
धनं मे शंस्याजुगुपः। तन्मे पुनर्देहि।।
मम च नाम तव च जातवेदो वाससी इव विवसानौ चरावः।
ते बिभृवो महसे जीवसे च यथायथं नौ तन्वौ जातवेदः।।
अग्ने सहस्राक्ष शतमूर्धञ्छततेजः शतं ते प्राणाः सहस्रं व्यानाः।
साहस्रो वाजो ऽसि। तस्य नो रास्व। तस्य ते भक्तिवानो भूयास्म।।

प्रजां मे नर्याजुगुपः। तां मे पुनर्देहि। अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासं सुगृहपतिर्मया त्वं गृहपतिना भूयाः। अस्थूरि णौ गार्हपत्यं दीदायच्छतं हिमाः।।
अन्नं मे पुरीष्याजुगुपः। तन्मे पुनर्देहि ।।२।।

अग्निहोत्रे स्तोमो योक्तव्यः। यस्य वा अग्निहोत्रे स्तोमो युज्यते वसीयान्भवति। उपप्रयन्तो अध्वरमिति। प्रजा वा इमा उप। ताः सत्सत्स्तोमः। ता एवोपयुनक्ति। अस्य प्रत्नामनु द्युतमिति। देवा वै प्रत्नम्। ते सत्सत्स्तोमः। तानेव प्रायुङ्क्त स्वर्गाय। उपोपेन्नु मघवन्भूय इन्नु त इति। इयं वा उप। स्वर्गमेवेत्वास्यां प्रतितिष्ठति। या वै प्रजा आभविष्यन्तीस्ता उप। ता एवोपयुनक्ति। परि ते दूडभो रथ इति स्तोममेवैतया युक्तं परिगृह्णाति। अग्निर्मूर्धा दिवः ककुदित्येषा मिथुना रेतस्वती पशव्या। यासौ धुरां गायत्री प्रथमा सैषा गायत्र्योपास्थित। उभा वामिन्द्राग्नी इति। सूर्यो वा इन्द्रः। सो ऽग्निं नक्तं प्रविशति। उभा वेवैनौ सहेट्टे। यासौ धुरां त्रिष्टुप्प्रथमा सैषा त्रिष्टुभोपास्थित। अयमिह प्रथमो धायीति। अग्निर्ह्येवास्मिंल्लोक इह प्रथमो ऽधीयत। यासौ धुरां जगती प्रथमा सैषा जगत्योपास्थित। अयं ते योनिर्ऋत्विय इति। इयं ह्यग्नेर्योनिरग्निः। सूर्यस्य। यासौ धुरामनुष्टुप्प्रथमा सैषानुष्टुभोपास्थित।।

दधिक्राव्णो अकारिषमिति। एषा वा अग्नेः पशव्या तनूर्या दधिक्रावती। तामेवास्य गृह्णाति। तयस्थायुका एनं पशवो भवन्ति। पशुर्वा अग्निः। यथा वै गोर्जीर्यति यथाश्व एवमेष आहितो जीर्यति। अग्न्याधेयस्याग्निभिरुपस्थेयः। तन्वो वा अस्यैताः। ताभिरेवैनं पुनर्णवं करोति। यच्छन्दोभिरुपतिष्ठते तैरेवैनं पुनर्णवं करोति। यथाग्र आहित एवमस्य भवति। उपतिष्ठते। योग एवास्यैषः। याच्ञ एवास्यैषः। यथा श्रेयस आहृत्य नमस्यत्येवमेव तत् ।।३।।

अग्नीषोमीयया पूर्वपक्ष उपतिष्ठेत। अग्नीषोमयोर्वा एतद्भागधेयं यत्पौर्णमासम्। ताभ्यामेवैनं परिददाति। तावेनमनुपक्रामन्तौ गोपायतः। ऐन्द्राग्न्यापरपक्षे। इन्द्राग्न्योर्वा एतद्भागधेयं यदमावस्या। ताभ्यामेवैनं परिददाति। तावेनमनुपक्रामन्तौ गोपायतः। अग्नीषोमावेवैनं पूर्वपक्षाय परिदत्तः। इन्द्राग्नी अपरपक्षाय। संप्रदायं ह वा एनं देवा अनुपक्रामन्तो गोपायन्ति य एवं विद्वानग्निमुपतिष्ठते। कस्मै कमग्निरुपस्थीयत इत्याहुः। अशित्रं वा एतदग्नेर्यदग्निमुपतिष्ठते। अग्नय एवैतदशित्रं क्रियते। सायमुपतिष्ठते न प्रातः। तस्मात्सायमतिथये प्रत्येनसो नोत तथा प्रातः। यज्ञस्ययज्ञस्य वा आशीरस्ति यदग्निमुपतिष्ठते। अग्निहोत्रस्यैवैतामाशिषमाशास्ते। प्रजापतिः प्रजा असृजत। सो ऽग्निमेवाग्रे ऽसृजत। सो ऽस्मा एतद्भागधेयमपश्यद्यदग्न्युपस्थानम्। यदग्निमुपतिष्ठते स्वेनैवैनं भागधेयेन समर्धयति। अग्निर्वै प्रयुक्तिमभ्यकामयत यथाश्वो रथकाम्यति। यदग्निमुपतिष्ठते प्रैवैनं युङ्क्ते। काममस्यर्ध्नोति। मनुष्यस्येन्नु यः काममृध्नोति स वसीयान्भवति। ऋध्नोति वसीयान्भवति य एवं विद्वानग्निमुपतिष्ठते। उपेति संभवत्येवैतया।

अग्निर्मूर्धेति रेत एवैतया प्रसिञ्चति। उभा वामिन्द्राग्नी इति प्राणापानावेवैतया दधाति। अयमिह प्रथमो धायीति गर्भमेवैतया दधाति। अस्य प्रत्नामनुद्युतमित्युप एवैतया करोति। अयं ते योनिर्ऋत्विय इति जनयति चैवैतया वर्धयति च। कल्पता ह वा अस्य प्रजा जायते य एवं विद्वानग्निमुपतिष्ठते ॥४॥

अहर्वै देवानामासीद्रात्र्यसुराणाम्। ते देवास्तमसो ज्यसो मृत्यो रात्र्या अध्यात्स्वमानादबिभयुः। ते छन्दोभिरग्निमन्वारभन्त गायत्र्या वसवस्त्रिष्टुभा रुद्रा जगत्यादित्या। अभ स्थेति पशव इन्धाना इति मनुष्याः। ते देवास्तमसो ज्यसो मृत्यो रात्र्याः पारमायन्। यच्छन्दोभिरग्निमुपतिष्ठते तमस एवैतज्यसो मृत्यो रात्र्याः पारतीर्तिः। त्वमग्ने सूर्यवर्चा इत्यग्नय एवैतामाशिषमाशास्ते। सं मामायुषा वर्चसा सृजेत्यात्मन एवैतामाशिषमाशास्ते। सं त्वमग्ने सूर्यस्य ज्योतिषागथा इत्यग्नय एवैतामाशिषमाशास्ते। [समृषीणा स्तुतेनेति। छन्दांसि वा ऋषीणां स्तुतम्। छन्दोभिरेवैनं समर्धयति। सं प्रियेण धाम्नेति। पशवो वा अग्नेः प्रियं धाम। पशुभिरेवैनं समर्धयति।] समहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मीयेत्यात्मन एवैतामाशिषमाशास्ते। [इन्धानास्त्वा शतं हिमा इति। एतद्ध वै दाशर्म आरुणिमुवाचाग्निमादधिवांस्समुद्गाता केनाग्निमुपस्थेय इति। तस्मै हैतदग्न्युपस्थानमुवाच। स होवाचानयोपस्थेय इन्धानास्त्वा शतं हिमा इति। यो वा एतयोपतिष्ठते पापीयानस्माद्भ्रातृव्यो भवति पापीयान्सपत्नः। सर्वमायुरेति। आ जीवितोरश्नुते। आयुर्दा अग्ने ज्यायुर्मे धेहीत्यात्मन एवैतामाशिषमाशास्ते। वयोधा अग्ने ऽसि वयो मे धेहीत्यात्मन एवैतामाशिषमाशास्ते। तनूपा अग्ने ऽसि तन्वं मे पाहीत्यात्मन एवैतामाशिषमाशास्ते।] यन्मे अग्न ऊनं तन्वस्तन्म आपृणेति यदेवास्योनमात्मनस्तदापूरयते। अग्नेः समिदस्यभिशस्त्या मा पाहीति सर्वस्मादेवैनमेताः पान्तु। अग्ने यत्ते तपस्तेन तं प्रतितप यो ऽस्मान्द्वेष्टि यं च वयं द्विष्म इति तेनैवैनं प्रतितपति प्रतिशोचति प्रतितित्यक्ति प्रत्यर्चति प्रतिहरति। एतद्ध वा आरुणिरुवाचैतेन वाह सर्वान्सपत्नान्सर्वान्भ्रातृव्यानभ्यभवमिति। श्रेयाञ्छ्रेयानात्मना [भवति पापीयान्पापीयान्य एनं द्वेष्टि यो ऽस्मा अरातीयति य एवं विद्वानग्निमुपतिष्ठते। ... ॥५॥]

... [यत्पुत्रं ह्वयति] प्रजामेवानुसंतनोति। नास्यात्मनः प्रजा पापीयसी भवति। मानुषमिव वा एतदुपावर्तते यत्पुत्रं ह्वयति। अच्छिद्रो दैव्यस्तन्तुर्मा मनुष्यश्छेदीति देवलोकं चैव मनुष्यलोकं च संतनोति। उभौ लोकावाजयति। निम्रदो ऽसीत्यव तं गृह्णाति यो ऽस्य पश्चाद्भ्रातृव्यः। अभि तं भवति य एनेन सदृङ्। अति तं क्रामति यो ऽस्मात्पूर्वः। पूषा मा प्रपथे पात्विति। इयं वै पूषा प्रपथे। अन्तरिक्षं पशुपाः। द्यौरधिपतिः। इम एवैनं लोकाः पान्तु। अग्निं समिन्धे ऽनुमत्यै। प्राची दिगग्निर्देवतेत्येता एव स देवता आच्छिनि य एनमेताभ्यो दिग्भ्यो ऽभिदासति। ज्योतिषे तन्तव आशिषमाशास इत्याशिषमेवाशास्ते। यो ऽस्य प्रियः पुत्रः स्यात्तस्य नाम गृह्णीयात्। तस्मिन्नेव ता आशिषो दधाति ॥८॥

अहर्वावासीन्न रात्रिः। सा यमी भ्रातरं मृतं नामृष्यत। तां यदपृच्छन्यमि कर्हि ते भ्रातामृतेत्यद्येत्येवाब्रवीत्। ते देवा अब्रुवन्नन्तर्दधामेद रात्रिं करवामेति। ते रात्रिमकुर्वन्। ते रात्र्यां भूतायां पशूनपश्यन्। सावेत्र वै पश्यन्तीति। सा न व्यौच्छदेकस्त्वस्त्पशु। तान्देवा इच्छन्तः पर्यायन्त। तांश्छन्दोभिरन्वपश्यन्। तस्माच्छन्दोभिर्नक्तमग्निरुपस्थेयः पशूनामनुख्यात्यै। नास्मात्पशवस्तिरोभवन्ति। सावेदनु मा स्वप्स्यन्तीति। सा व्यौच्छत्। ते देवा अब्रुवन्नमा वै नो वस्वभूदिति। सामावस्या। अमा ह वा अस्य वसु भवति विन्दते ऽन्यस्य वसु नास्यान्यो वसु विन्दते य एवं विद्वानग्निमुपतिष्ठते।

देवा वा अह्नो रक्षांसि निरघ्नन्। तानि रात्रिं प्राविशन्। तां देवा न व्येतुमधृष्णुवन्। त इन्द्रमब्रुवंस्त्वं वै न ओजिष्ठो ऽसि त्वमिमां वीहीति। स्तुत मेत्यब्रवीत्तमस्तुतो वीर्यं कर्तुमर्हामीति। ते ऽब्रुवन्नय ते ऽग्निर्नैदिष्ठमेष त्वा स्तौत्विति। तमग्निरस्तौत्। स स्तुतः सर्वा मृधः सर्वाणि रक्षांस्यतरत्। इन्द्रो यजमानः। यदग्निमुपतिष्ठते सर्वा एव मृधः सर्वाणि रक्षांसि तरति। नास्य नक्तं रक्षांसीशते य एवं वेद। त्वष्टा वै भूत्वा प्रजापतिः प्रजा असृजत। त्वष्टा यजमानः। यद्वै

वाचा वदति तद्भवति। यद्यदेवैतदुद्वदति तत्तद्भवति तत्तत्सृजते ॥९॥

इति कपिष्ठलकठसंहितायां पञ्चमो ऽध्यायः॥

धनं मे शंस्य पाहीति। आहवनीयो वै शंस्यः। तस्मा एव धनं परिददाति प्रवत्स्यन्। सो ऽस्य धनं प्रवसतो गोपायति। मम नाम प्रथमं जातवेद इति तन्वावेवैतेन विपरिदधाते विप्रवसन्तौ। न ह प्रवसन्नार्तिमार्छति य एवं विद्वानग्निमुपस्थाय प्रवसति। प्रजां मे नर्य पाहीति। गार्हपत्यो वै नर्यः। तस्मा एव प्रजां परिददाति प्रवत्स्यन्। सो ऽस्य प्रजां प्रवसतो गोपायति। इमान्मे मित्रावरुणाविति। अहोरात्रे वै मित्रावरुणौ। इयं पुषा। तेभ्य एव गृहान् परिददाति प्रवत्स्यन्। ते ऽस्य गृहान्प्रवसतो गोपायन्ति। अन्नं मे पुरीष्य पाहीति। ओदनपचनो वै पुरीष्यः। तस्मा एवान्नं परिददाति प्रवत्स्यन्। सो ऽस्यान्नं प्रवसतो गोपायति।

धनं मे शंस्याजुगुप इत्याहवनीयं पुनरेत्यापान्योपतिष्ठते। आहवनीयो वै शंस्यः। तेनैव धनं गुप्तम्। तदपानेनात्मन्धत्ते। मम च नाम तव च जातवेद इति तन्वावेवैतेन व्याकरोत्यात्मनश्चाग्नेश्च यौ विप्रवसन्तौ विपरिदधातो। अग्ने सहस्राक्ष शतमूर्धञ्छततेज इति। सर्वेण वा एतौ तेजसा सर्वैः प्राणैः सर्वेणेन्द्रियेण व्यृध्येते विप्रवसन्तौ। तान्येवैतेनात्मन्श्चाग्नौ च दधाति। प्रजां मे नर्याजुगुप इति गार्हपत्यं पुनरेत्योपतिष्ठते। गार्हपत्यो वै नर्यः। तेनैव प्रजा गुप्ता। तामपानेनात्मन्धत्ते। अग्ने गृहपत इति शतं समा जीवतो नार्तिमार्छतः। अन्नं मे पुरीष्याजुगुप इत्योदनपचनं पुनरेत्यापान्योपतिष्ठते। ओदनपचनो वै पुरीष्यः। तेनैवान्नं गुप्तम्। तदपानेनात्मन्धत्ते ॥१॥

यो अश्वत्थः शमीगर्भ आरुरोह त्वयपि।
तं ते हरामि यज्ञियैः केतुभिः सह॥
मयि गृह्णाम्यहमग्रे अग्निं रायस्पोषेण सह वर्चसेह देवाः।
मयि प्रजां मयि पुष्टिं दधामि मदेम शतहिमाः सुवीराः॥
यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्यां आविवेश।
तमात्मनि परिगृह्णीमहे वयं मैषो अस्मानवहाय परागात्॥
सं वः सृजामि हृदयं संसृष्टं मनो अस्तु वः।
संसृष्टास्तन्वः सन्तु वः संसृष्टः प्राणो अस्तु वः।
सं वः प्रियास्तन्वः संप्रिया हृदयानि वः।
आत्मा वो अस्तु संप्रियः संप्रियास्तन्वो मम॥
यत्पृथिव्या अनामृतं संबभूव त्वे सचा।
तदग्निरग्नये ददत्तस्मिन्नाधीयतामयम्॥
यदन्तरिक्षस्य यद्दिवो अनामृतं संबभूव त्वे सचा।
तदग्निरग्नये ददत्तस्मिन्नाधीयतामयम्॥

अग्ने गृहपते उद्वे बुध्न्य परिषद्य दिवः पृथिव्याः पर्यन्तरिक्षाल्लोकं विन्द यजमानाय पृथिव्या मूर्धन्सीद यज्ञिये लोके यो। नो अग्ने निष्ट्यो यो ऽनिष्ट्यो ऽभिदासतीदमहं तं त्वयाभिनिदधामि। ..... यजमानाय पृथिव्या मूर्धन्सीद यज्ञिये लोके। यो नो अग्ने निष्ट्यो यो ऽनिष्ट्यो ऽभिदासतीदमहं तं त्वयाभिनिदधामि॥
समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्।
आस्मिन्हव्या जुहोतन॥
उदग्ने तव तद्घृतादर्ची रोचत आहुतम्।
निसानं जुह्वो मुखे॥

घृतेनाग्निः समिध्यते मधुप्रतीक आहुतः।
रोचमानो विभावसुः॥
यास्ते शिवास्तन्वो जातवेदो या अन्तरिक्षे दिवि याः पृथिव्याम्।
ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह हव्यमग्ने ॥२॥

या वाजिन्नग्नेः प्रिया तनूः पशुषु पवमाना तामावह। तया मा जिन्व। या वाजिन्नग्नेः प्रिया तनूरप्सु पावका तामावह। तया मा जिन्व। या वाजिन्नग्नेः प्रिया तनूः सूर्ये शुक्रा शुचिमती तामावह। तया मा जिन्व। ओजसे बलाय त्वोद्यच्छे वृष्णे शुष्माय। सपत्नतूरसि वृत्रतूः॥
प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्ने भवेह।
विश्वा आशा दीद्यद्विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे॥
नाको ऽसि ब्रध्नो ऽसि प्रतिष्ठा संक्रमणः॥

सं त्वमग्ने दिव्येन ज्योतिषा भाहि समन्तरिक्ष्येण सं पार्थिवेन। वैश्वानर्या समिधा दीदिहि न ऊर्जस्वत्या वर्चस्वत्या भान्वत्या रश्मिवत्या ज्योतिष्मत्या॥
ये अग्नयो दिवो ये अन्तरिक्षाद्
पृथिव्याः समाजग्मुरिषमूर्जं वसानाः।
ते अस्मा अग्नये द्रविणानि दत्त्वा
तृप्ताः प्रीताः पुनरस्तं परेत॥
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः।
कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः॥
ये अग्नयः समनसः सचेतस ओषधीष्वप्सु प्रविष्टाः।
ते सत्राज्ञमभिसंयन्तु सर्वे ऊर्जं नो धत्त द्विपदे चतुष्पदे॥

या ते अग्ने पवमाना तनूः पृथिवीमन्वाविवेश याग्नौ या रथन्तरे या गायत्रे छन्दसि या त्रिवृति स्तोमे तां त एतदवरुन्धे। तस्यै स्वाहा। या ते अग्ने पावका तनूरन्तरिक्षमन्वाविवेश या वाते या वामदेव्ये या त्रैष्टुभे छन्दसि या पञ्चदशे स्तोमे तां त एतदवरुन्धे। तस्यै स्वाहा। या ते अग्ने शुचिस्तनूर्दिवमन्वाविवेश या सूर्ये या बृहति या जागते छन्दसि या सप्तदशे स्तोमे तां त एतदवरुन्धे। तस्यै स्वाहा ॥३॥

वातः प्राणः। तदयमात्मा। पुरीष्यमसि संप्रियः पशुभिः। चक्षुः तोकाय तनयाय शं योः। घर्मः शिरः। तदयमग्निः। पुरीष्यमसि संप्रियः पशुभिः। स्वदितं नः पितुं पच। अर्कश्चक्षुः। तदसौ सूर्यः। पुरीष्यमसि संप्रियः पशुभिः। यत्ते शुक्र शुक्रं धाम शुक्रा तनूः शुक्रं ज्योतिरजस्रं यत्ते ऽनाधृष्टं नामानाधृष्यं तेन त्वादधे॥
धर्मणासि भूमिर्भूम्ना। तस्यास्ते देव्यदिते ऽपस्थे ऽन्नादमन्नाद्यायात्स्यादधे॥
आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः।
पितरं च प्रयन्त्स्वः॥
अस्य प्राणादपानत्यन्तश्चरति रोचना।
व्यख्यन्महिषो दिवम्॥
त्रिंशद्धाम विराजति वाक्पतङ्गो अशिश्रयुः।
प्रति वस्तोरह द्युभिः ॥४॥

अदितिर्वै प्रजाकामौदनमपचत्। तमुच्छिष्टमाश्नात्। सा गर्भमधत्त। तत आदित्या अजायन्त। य एष ओदनः पच्यत आरम्भणमेवैतद्। आक्रमणमेव। प्रादेशमात्रीः समिधो भवन्ति। एतावानुह्यात्मा प्रजापतिना संमितः। अग्नेर्वै

या यज्ञिया तनूरश्वत्थे तया समगच्छत। एषास्य घृत्या तनूर्यद्घृतम्। यद्घृतेन समिधो ऽनक्ति ताभ्यामेवैनं तनूभ्यां संगमयति। निर्मार्गस्यादधाति। अपगूर्त्यां वै वीर्यं क्रियते। यन्निर्मार्गस्यादधात्यपगूर्त्या एव। संवत्सरो वै प्रजननमग्निः प्रजनयिता। तत्प्रजननं यत्पुरा संवत्सरादग्नौ समिध आदधाति। प्रजननादेवैनं प्रजनयिता प्रजनयति। अभक्तर्तुर्वै पुरुषः। न हि तद्वेद यमृतुमभिजायते यन्नक्षत्रम्। यत्समिध आदधाति य एवास्यर्तुर्यन्नक्षत्रं तदाप्नोति। य एष ओदनः पच्यते योनिरेवैष क्रियते। यत्समिध आधीयन्ते रेत एवैतद्धीयते। संवत्सरे वै रेतो हितं प्रजायते। यत्संवत्सरे पर्येतेऽग्निमाधत्ते प्रजातमेवैनमाधत्ते। द्वादशसु रात्रीषु पुराधेयाः। ता हि संवत्सरस्य प्रतिमा। अथो तिसृष्वथो द्वयोरथो पूर्वेद्युराधेयास्त एवाग्निमादधानेन। आदित्या वा इत उत्तमा अमुं लोकमायन्। ते पथिरक्षयः। त इयक्षमाणं प्रतिनुदन्ते। उच्छेषणभागा वा आदित्याः। यदुच्छिष्टेन समिधो ऽनक्ति तेभ्य एव प्रावोचत। तेभ्य एव प्रोच्य स्वर्गं लोकमारोहति ॥५॥

दिशो वै नाकल्पन्त न प्राज्ञायन्त। तत एतामग्नये प्राचीं दिशमरोचयन्यत्कृत्तिकाः। यत्कृत्तिकास्वग्निमाधत्ते प्राच्यामेवैनं दिश्याधत्ते। एष वावैकः प्राङवस्यति य आहिताग्निः। प्रत्यञ्चो ऽन्ये। आग्नेयमेतन्नक्षत्रं यत्कृत्तिकाः। यत्कृत्तिकास्वग्निमाधत्ते स्व एवैनं नक्षत्र आधत्ते। प्रजापतेर्वा एतच्छिरो यत्कृत्तिकाः। यत्कृत्तिकास्वग्निमाधत्ते शीर्षण्यो मुख्यो भवति। सप्त वै कृत्तिकाः। सप्त शीर्षण्याः प्राणाः। प्राणा इन्द्रियाणि। प्राणानेवेन्द्रियाण्याप्नोति। [रोहिण्यामाधेयः]। रोहिण्यां वा एतं देवा आदधत। तया रोहमरोहयन्। तद्रोहिण्या रोहिणीत्वम्। रोहिण्यां वा एतं प्रजापतिराधत्त। तया रोहमरोहयत्। तद्रोहिण्या रोहिणीत्वम्। एष वै मनुष्यस्य स्वर्गो लोको यदस्मिंल्लोके वसीयान्भवति। ऋद्ध्या एव रोहिण्यामाधेयः॥

कालकाञ्जा वै नामासुरा आसन्। त इष्टका अचिन्वत। तदिन्द्र इष्टकामप्युपाधत्त। तेषां मिथुनौ दिवमाक्रमेताम्। ततस्तामावृहत्। ते ऽवाकीर्यन्त। तावेतौ दिव्यौ श्वानौ। यो व्यवृह्यत स एष ऊर्णवाभिः स्वैरान्तैः संतितंसति। ओजो वावैषां तद्वीर्यमाधत्त। ओज एव वीर्यं भ्रातृव्यस्याधत्ते यच्चित्रायामग्निमाधत्ते। तदेतदैन्द्रं नक्षत्रमभिभूतिमत्। पूर्वासु फल्गुनीष्वादधीत यः कामयेत भगी स्यामिति। भगस्य वा एतन्नक्षत्रम्। भगी भवति। उत्तरास्वादधीत यः कामयेत दानकामा मे प्रजाः स्युरिति। अर्यम्णो वा एतन्नक्षत्रम्। एषो ऽर्यमा यो ददाति। दानमिमाः प्रजा उपजीवन्ति। दानकामा अस्मै भवन्ति। राजन्यस्यादध्यात्। राजन्यो हि दानमुपजीवति। वसन्ते ब्राह्मणेनाधेयः। वसन्तो वै ब्राह्मणस्यर्तुः। स्व एवैनमृतावाधत्ते। तेजो ब्रह्मवर्चसमुपाधत्ते। ग्रीष्मे राजन्येनाधेयः। ग्रीष्मो वै राजन्यस्यर्तुः। स्व एवैनमृतावाधत्ते। ओजो वीर्यमुपाधत्ते। शरदि वैश्येनाधेयः। शरद्वै वैश्यस्यर्तुः। स्व एवैनमृतावाधत्ते। ऊर्जं पशूनुपाधत्ते। सोमेन यजा इति वा अग्निमाधत्ते। यस्मिन्नेव कस्मिंश्चर्तावादधीत सोमेन यक्ष्यमाणः। एतद्ध्यवर्धयद्यः सोमेन यजते। फल्गुनीपूर्णमास आधेयः। एतद्वा ऋतूनां मुखम्। ऋतुमुख एवैनमाधत्ते। [शिशिर आधेयः। शिशिरं वा अग्नेर्जन्म। प्रजातमेवैनमाधत्ते।] सर्वासु दिक्ष्वृध्नवानीति वा अग्निमाधत्ते। सर्वासु दिक्ष्वग्निः शिशिरे। सर्वास्वेव दिक्ष्वृध्नोति यः शिशिरे ऽग्निमाधत्ते। पूर्णमासे वामावस्यायां वादधीत। एतद्वै पुण्याहम्। पुण्याह एवैनमाधत्ते। तस्मादिष्ट्या वाग्रायणेन वा पशुना वा सोमेन वा पूर्णमासे वामावस्यायां वा यजेत। एष वै यज्ञः। यज्ञमेव प्रति यज्ञमालभते ॥६॥

यद्वा इमे व्यैतां यदमुष्या यज्ञियं तदिमामभ्यसृज्यतोषाः। यदूषा भवन्त्यनयोरेवैनं यज्ञिय आधत्ते। प्राजापत्या वा एते। श्वःश्वो भूयांसो भवन्ति। प्रजननायैवैते। पशूनां वा एतत्प्रियं धाम। यदूषा भवन्ति पशूनामेव प्रियं धामोपाप्नोति। अलेलेद्वा इयं पृथिवी। साबिभेदग्निर्मातिधक्ष्यतीति। अबिभेदग्निर्हरो मे विनेक्ष्यतीति। आर्द्रेव हीयमासीत्। तां देवाः शर्कराभिरदृंहन्। तेजो ऽस्यावदधुः। यच्छर्करा भवन्तीमामेव दृंहति। तेजो ऽग्नौ दधाति। अभिमृता वा इयं वृत्रेण। वम्रियस्त्वै तद्विदुर्यत्रास्या जीवं यज्ञियम्। यद्वल्मीकवपा भवत्यस्या एवैनं जीवे यज्ञिय आधत्ते। आपो वा इदमासन्। सलिलमेव स प्रजापतिर्वराहो भूत्वोपन्यमज्जत्। तस्य यावन्मुखमासीत्तावतीं मृदमुदहरत्। सेयमभवत्। यद्वराहविहतं भवत्यस्यामेवैनं प्रत्यक्षमाधत्ते। वराहो वा अस्यामन्नं पश्यति। तस्मा इयं विजिहीते। यद्वराहविहतं भवति

तदेवान्नमवरुंद्धे। यत्तदादत्त तददितिर्यदप्रथत तत्पृथिवी यदभवत्तद्भूमिः। यद्गृहविहतं भवति प्रथत एव प्रजया पशुभिः। नाना वै पशूनामन्नान्यन्यद्गोरन्नमन्यदश्वस्यान्यदवेरन्यदजाया अन्यत्पुरुषस्य। आपोऽन्नम्। यदप उपसृजति यावदेवान्नं तदवरुंद्धे। पञ्चैते संभाराः। पञ्च वै पुरुषे वीर्याणि। करोत्यनया वीर्यं करोत्यनया करोत्यननेन। यावदेव वीर्यं तदाप्नोति। पञ्चैते संभाराः। पाङ्क्तो यज्ञः। यज्ञमेवावरुंद्धे। न वा ऋत ऊर्जो ऽन्नं धिनोति। ऊर्गुदुम्बरः। यदौदुम्बराणि भवन्त्यत्र एवोर्जं दधाति। शमीमयानि भवन्ति मिथुनत्वाय। अग्निं वै सृष्टं प्रजापतिस्तं शम्याग्रे समैंद्ध। यच्छमीमयानि भवन्ति स्वयैवैनं समिधा समिंद्धे। अश्वो वै भूत्वाग्निर्देवेभ्यो ऽपाक्रामत्। स यत्रातिष्ठत्तदश्वत्थः समभवत्। तदश्वत्थस्याश्वत्थत्वम्। यदाश्वत्थानि भवन्ति यदेवास्य तत्र न्यक्तं ततः संभरति। अग्निर्वै मनुष्यैर्देवेभ्यो ऽपाक्रामत्। तं देवा अमन्यन्तायं वावेदं भविष्यतीति। तस्य मरुत स्तनयित्नुना हृदयमाच्छिन्दन्। सा दिव्याशनिरभवत्। यद्वृक्षस्याशनिहतस्य भवन्ति यदेवास्य तत्र न्यक्तं ततः संभरति। पर्णमयानि पञ्चथानि भवन्ति पाङ्क्तत्वाय ।।७।।

अष्टसु प्रक्रामेषु ब्राह्मणेनाधेयः। अष्टाक्षरा गायत्री। गायत्रच्छन्दा ब्राह्मणः। स्वस्यैवैनं छन्दसः प्रात्येनस्य आधत्ते। यथा पिता पुत्रं जिन्वत्येवमेनं स्वं छन्दो जिन्वति। एकादशसु प्रक्रामेषु राजन्येनाधेयः। एकादशाक्षरा त्रिष्टुप्। त्रिष्टुप्छन्दा राजन्यः। स्वस्यैवैनं छन्दसः प्रात्येनस्य आधत्ते। यथा पिता पुत्रं जिन्वत्येवमेनं स्वं छन्दो जिन्वति। [द्वादशसु प्रक्रामेषु वैश्येनाधेयः। द्वादशाक्षरा जगती। जगच्छन्दा वैश्यः। स्वस्यैवैनं छन्दसः प्रात्येनस्य आधत्ते। यथा पिता पुत्रं जिन्वत्येवमेनं छन्दो जिन्वति।] अपरिमितमवरुणधा इति वा अग्निमाधत्ते। अपरिमित आधेयो ऽपरिमितस्यावरुद्ध्ये यावति चक्षुषा मन्येत तावत्यादधीत। सत्यं वै चक्षुः। सत्य एवैनमाधत्ते। पूर्वाह्ण आधेयः। एतद्वै पुण्याहम्। पुण्याह एवैनमाधत्ते। व्युष्टायां पुरा सूर्यस्योदेतोराधेयः। एतस्मिन्वै लोके प्रजापतिः प्रजा असृजत। ताः प्राजायन्त। प्रजननायैवमाधेयः। आग्नेयी वै रात्र्यैन्द्रमहः। यदुदिते सूर्य आदधीताग्नेयाद्वर्णादियात्। यदनुदित ऐन्द्रात्। अनुदिते ऽपर आधेय उदिते पूर्वः। उभावेवेन्द्राग्न्योर्वर्णावाप्नोति। असुर्या वै रात्री वर्णेन शुक्रियमहः। शुक्रिय आधत्ते यदुदिते सूर्य आधत्ते। नक्तं वा अनुदितेन दिवोदितेन। दिवाधत्ते यदुदिते सूर्य आधत्ते। न वै सु विदुरिव मनुष्या नक्षत्रम्। मीमांसन्त इव ह्युदितेन वाव पुण्याहम्। पुण्याह आधत्ते यदुदिते सूर्य आधत्ते।।

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि।

सप्त होत्रा अनु विद्वान्सप्त योनीरापृणस्व घृतेन।।

इति यावतीर्वा अग्नेस्तन्वः। यो वा अस्य ता आदधानो वितर्पयति वि ह तृप्यति। एतावतीर्वा अग्नेस्तन्वः षोढा सप्तसप्त। ता एवास्य प्रीणाति। न वितृप्यति। पूर्णया स्रुचा जुहोति। पूर्णः प्रजापतिः। प्रजापतिमेवाप्नोति ।।८।।

अङ्गिरसां त्वा देवानां व्रतेनादध इति ब्राह्मणेनाधेयः। ये वै देवानामङ्गिरसस्ते ब्राह्मणस्य प्रत्येनसोऽग्निर्वायुर्वाग्बृहस्पतिः। ततोबंधुरस्य यज्ञस्ततआयनः। यतोबन्धुरेवास्य यज्ञो यतआयनः। तत एनं प्रतीच्छति। इन्द्रस्य त्वा मरुत्वतो व्रतेनादध इति राजन्येनाधेयः। ये वै देवानां राजानस्ते राजन्यस्य प्रत्येनस इन्द्रो वरुणो धाता त्वष्टा। ततो बन्धुरस्य यज्ञस्ततआयनः। यतोबंधुरेवास्य यज्ञो यतआयनः। तत एनं प्रतीच्छति। मनोस्त्वा ग्रामण्यो व्रतेनादध इति वैश्येनाधेयः। मरुतो वै देवानां विशः। ते वैश्यस्य प्रत्येनसः। ततोबन्धुरस्य यज्ञस्ततआयनः। यतोबन्धुरेवास्य यज्ञो यतआयनः। तत एनं प्रतीच्छति।

इडा वै मनावासीत्। सासुरानग्निमादधानानगच्छत्। त आहवनीयमग्र आदधताथ गार्हपत्यमथौदनपचनम्। तानब्रवीदाप्त्वा श्रियं प्रत्यवारुक्षन्पुण्या भविष्यन्ति परा [तु] भविष्यन्तीति। सा देवानग्निमादधानानगच्छत्। त ओदनपचनमग्र आदधताथ गार्हपत्यमथाहवनीयम्। तानब्रवीदापत्रुछ्रियं थीमं लोकमच्छिन्दन्पुण्या भविष्यन्ति प्रजास्त्वेषां न भविष्यन्तीति। सेडैव मनोरादधात्। साब्रवीत्तथा वै ते ऽग्निमाधास्यामि। यथा मनुष्या देवानुप प्रजास्त्वेषां न भविष्यन्तीति। सा गार्हपत्यमग्र आदधादथौदनपचनमथाहवनीयमनयोर्लोकयोर्व्यवगृहीत्यै। ततो मनुष्या देवानुप प्रजनिष्यन्त इति। सा गार्हपत्यमग्र आदधादथौदनपचनमथाहवनीयमनयोर्लोकयोर्व्यवगृहीत्यै। ततो मनुष्या देवानुप प्राजायन्त। प्रजननायैवमाधेयः । अथो अनयोरेव लोकयोर्व्यवगृहीत्यै।।

प्रजापतिर्वै यदग्रे व्याहरत्स सत्यमेव व्याहरत्। एतद्वाव स त्रिर्व्याहरद्भूर्भुवः स्वरिति। एतद्वै वाचः सत्यम्। यदेव वाचः सत्यं तेनाधत्ते। भूष्णु वै सत्यम्। य एवं विद्वानेतेनाधत्ते भवत्येव। अयं वा अपरो भूरसौ पूर्वो भुवः। भूर्भुव इत्यपर आधेयः सत्यस्याननुगत्यै। भूर्भुवः स्वरिति पूर्वः। तत्पुरः सर्वमाप्यते। वाग्वै देवतां निरवदत। निरुदितदेवता हि वै वाक्। अथ तत्सर्वं न सत्यं यद्वाचा शपते यत्प्राशूर्भवति। यां वै तां वाग्देवतां निरवदतैषा वाव सा यदेता व्याहृतयः। एतद्वै वाचः सदेवम्। यदेव वाचः सदेवं तेनाधत्ते। अयं वा अपरो भूरसौ पूर्वो भुवः। भूर्भुव इत्यपर आधेयः। उभावेवैनो सहाधत्ते। एव ह्येतस्य योनिः। एतस्माद्ध्येषोऽधिसृज्यते। यद्द्वितीयं ज्योतिस्तदेव तत्। भुर्भूवः स्वरिति पूर्व आधेयः। उभावेवैनो सहाधत्ते। एष ह्येतस्य योनिः। एतस्माद्ध्येषोऽधि प्रह्रियते। अयं वावाग्निर्यो ऽयमन्तरग्निः। यो ऽसौ पूर्वो ऽसावेवैष आदित्यो यो ऽसावमुष्मादधि प्रह्रियते। यत्तृतीयं ज्योतिस्तदेव तेनाप्यते। असौ वावैष आदित्यः प्रत्यङ्ङाधीयते। तस्मादेष सर्वाः प्रजाः प्रत्यङ्। अग्निना वै देवा अन्नमदन्ति। प्रत्यञ्चा अन्नमद्यते। यत्प्रत्यङ्ङाधीयते ऽन्नाद्याय। प्राचो वै देवान्प्रजापतिरसृजतापाचो ऽसुरान्। सो ऽसुरान्ब्रह्मणापानुदत। अग्निर्ब्रह्म। यत्प्रत्यङ्ङाधीयते भ्रातृव्यस्यापनुत्त्यै। इममर्धमग्निना परियन्तीममर्धमुपचरन्ति। देवानामेवार्धं परियन्ति देवानामर्धमुपचरन्ति। इमां दिशमभ्यावृत्य जुहोति। एतस्यां हि देवा दिशि। यस्यामेव देवा दिशि तां दिशमभ्यावृत्य जुहोति ।।९।।

इति कपिष्ठलकठसंहितायां षष्ठो ऽध्यायः।।

अग्निर्वै प्राङुदेतुं नोपाकामयत। तमश्वेनोदवहन्। यत्पूर्वमुदवहंस्तत्पूर्ववाहः पूर्ववाट्त्वम्। अग्निर्वै प्रजापतिः। तस्याश्वश्चक्षुः। यदश्वं पुरो नयन्ति स्वमेव तच्चक्षुः पश्यन्ननूदेति। स्तोमपुरोगा वै देवा एभ्यो लोकेभ्यो ऽसुरान्प्राणुदन्त। स्तोमादश्वः संभूतः। यदश्वं पुरो नयन्ति स्तोमपुरोगा एवैभ्यो लोकेभ्यो भ्रातृव्यं प्रणुदते। अग्निं वै जातं रक्षांस्यधूर्वन्। तान्येनमभिसमलभन्त। तान्यश्वेनापाहत। यदश्वं पुरो नयन्ति रक्षसामपहत्यै। अश्वो वै भूत्वा यज्ञो मनुष्यानत्यक्रामत्। तमेतमतिक्रामन्तं मन्यन्ते। यदश्वमभ्यावर्तयन्ति यज्ञमेवैतद्यजमानमभ्यावर्तयन्ति। अग्निर्वा अश्वं प्राविशत्। कृष्णो भूत्वा सो ऽत्रागच्छद्यत्रैष मृगशफः। तस्मादाक्रम्यः। यदश्वमाक्रमयति तमेवावरुंद्धे। वास्तु वा एतत्। अथो अन्तर्हितमिव। तस्मान्नाक्रम्यम्। इन्द्रो वै यतीन्सालावृकेयेभ्यः प्रायच्छत्। तेषामद्यमानानां स्यूमरश्मिरृषिरश्वं प्राविशत्। तस्मादश्वः स्वं शकृदुपजिघ्रति कच्चिदृषिं चाग्निं च न निरास्थामिति। अग्निं वै विभाजं नाशक्नुवन्। तमश्वेन व्यभजन्। यदश्वं पुरो नयन्त्यग्नेरेव विभक्त्यै। यौ वाव तावृषिश्चाग्निश्च ते एवैनं तद्देवते विभजतः। अश्वो देयः। प्राजापत्यो वा अश्वः। यदश्वं ददाति सर्वा एवास्य देवता अभीष्टाः प्रीता भवन्ति। परमा वा एषा दक्षिणा यदश्वः। यदश्वं ददाति पर्याप्त्यै। वही देयः। वहिनो वै पशवो भुञ्जन्ति। यज्ञो ऽग्नेर्वही। भुनक्त्येनमग्निराहितः। हिरण्यं देयं सतेजस्त्वाय। शतमानं वीरं वा एष जनयति यो ऽग्निमाधत्ते। शतदायो वीरः। त्रिंशन्माने पूर्वयोर्हविषोर्देयं। चत्वारिंशन्मानमुत्तमे ऽभिक्रान्त्यै। अभिक्रान्तेन हि यज्ञस्यर्धोति। आत्मा वै हविः। पवित्रं हिरण्यम्। सर्वेष्वेवैनं हविःषु पुनाति। अग्निर्वै वरुणानीरभ्यकामयत। तस्य तेजः परापतत्। तद्धिरण्यमभवत्। यद्धिरण्यमुपास्यति स्वेनैवैनं तेजसा सधर्मयति। नोपास्य पुनरादधीत। ग्रसितमस्य निष्खिदति क्षोधुको भवति। अग्निं वै वरुणानीरभ्यकामयन्त। आपो वरुणानीः। ताः समभवत्। यदग्ने रेतोऽसिच्यत तद्धरितमभवत्। यदपां तद्रजतम्। तस्माद्धरितरजताभ्यामुभयाहिरण्यः। यद्गर्भस्य शमलं तद्दुर्वर्णम्। तस्माद् ब्राह्मणेन दुर्वर्णं न भर्तव्यम्। शमलं हि तत्। यद्धिरण्यमुपास्यति स्वेनैवैनं रेतसा समर्धयति ।।१।।

सह वा इमा अग्नेस्तन्वः। इयमोदनपचनो ऽन्तरिक्षं गार्हपत्यो द्यौराहवनीयः। यो वा अस्यैता अव्याकृत्याधत्ते न पाप्मना व्यावर्तते घातुको ऽस्य रुद्रः पशून्भवति। ता एवैतद्व्याकृत्य यथायोनि प्रतिष्ठाप्याधत्ते वि पाप्मना वर्तते ऽघातुको रुद्रः पशून्भवति। द्यौर्महासीति महानग्निमाधाय भवति। भूमिर्भूम्नेति श्वःश्वो भूयान्भवति। तस्यास्ते देव्यदित उपस्थे ऽन्नादमन्नाद्यायान्नपत्यायादध इत्यन्नादमेवैनमन्नाद्यायान्नपत्यायाधत्ते। अत्यन्नं य एवं विद्वानग्निमाधत्ते। आयं गौः पृश्निरक्रमीदित्येताः सर्पराज्ञ्या ऋचः। इयं वै सर्पराज्ञी। अन्नं सार्पराज्ञम्। अन्नाद्यायाग्निमाधत्ते। अत्यन्नं य एवं

विद्वानग्निमाधत्ते। वसन्तो वा इमाः प्रजा उपरुणद्धि ग्रीष्माय। ग्रीष्मो वर्षाभ्यः। वर्षाः शरदे। शरद्धेमन्ताय। हेमन्तः शिशिराय। शिशिरमग्नये। अग्निर्यजमानाय। अत्यन्नं य एवं विद्वानग्निमाधत्ते।।

अजो देयः सयोनित्वाय। वासो देयम्। सर्वदेवत्यं वासः। देवतानामभीष्ट्यै वर्धमाना दक्षिणा देया। दक्षिणाया वै वृद्धिं यजमानो ऽनुवर्धते। उपाहरन्ती दक्षिणा देया। धेनुर्वा उपाहरन्ती। उप ह्येषा पय आहरति। नास्याग्निमादधानस्य कनीयो भवति। धेनुं होत्रे दद्यादाशिषामवरुद्ध्या अनड्वाहमध्वर्यवे। वह्वयेव यज्ञस्यावरुंद्धे। रथो देयः। देवरथो वा एष प्रयुज्यते यद्यज्ञः। मनुष्यरथेनैव देवरथमभ्यातिष्ठति। मिथुनौ गावौ देयौ मिथुनस्यावरुद्ध्यै। षड् देयाः। षड्वा ऋतवः। ऋतुष्वेव प्रतितिष्ठति। द्वादश देयाः। द्वादश मासाः संवत्सरः। संवत्सरस्याप्त्यै। यदि द्वादशातिप्रच्यवेत चतुर्विंशतिं दद्यात्। चतुर्विंशत्यक्षरा गायत्री। गायत्री यज्ञमुखम्। गायत्रीमेव यज्ञमुखं नातिक्रामति ।।२।।

त्रीणि हवींषि भवन्ति। त्रय इमे लोकाः। इमानेव लोकानाप्नोति। त्रिर्विराड् व्यक्रमत। विराज एवैनं विक्रान्तमनु विक्रमयति। यत्पवमानं पुनात्येवैनं तेन। यत्पावकमन्नमेवास्मै तेन प्रयच्छति। यच्छुचये मेध्यमेवैनं यज्ञियं तेन करोति। पशुमानसानि प्रजावानसानि तेजस्व्यसानीति वा अग्निमाधत्ते। प्राणो वै पवमानः। प्राणादधि पशवः प्रजायन्ते। यदग्नये पवमानाय पशूनेवास्मै तेन प्रजनयति। आपो वै पावकाः। अद्भ्यः प्रजाः प्रजायन्ते। यदग्नये पावकाय प्रजामेवास्मै तेन प्रजनयति। असौ वा आदित्यः शुचिः। एष तेजसः प्रदाता। यदग्नये शुचये ऽसावेवास्मा आदित्यस्तेजः प्रयच्छति। देवाश्च वा असुराश्च संयत्ता आसन्। सो ऽग्निर्विजयमुपयत्सु त्रेधा तन्वो विन्यधत्त पशुषु तृतीयमप्सु तृतीयममुष्मिन्नादित्ये तृतीयम्। यदेतानि हवींषि निरुप्यन्ते ता एवास्यैतत्तन्वः संभरति। [सतनूरेवैतत्सतेजा आधीयते। इमे वै लोका एतानि हवींषि। ना] नाबर्हींषि भवन्ति। इमानेव लोकानाप्नोति। यन्नानाबर्हींषि लोकं प्रजननाय। नोच्छिन्नष्टि। ऊनं वै प्रजा उपप्रजायन्ते। समानबर्हिषी उत्तरे कार्ये। लोकमेव प्रजननायाकः। तमुपप्रजायते। विद्म वा अमुं लोकं विद्मेमं नामुं पश्यामो वा न वा। तस्मात्समानबर्हिषी उत्तरे कार्ये। पशवो वा एतानि हवींषि। घृतं पुरोडाशः। रुद्रो ऽग्निः। यदग्नो ऽनुनिर्वपेद्रुद्राय पशूनपिदध्यादपशुः स्यात्। संवत्सरे ऽनुनिरुप्याणि। संवत्सरेणैवैनं शमयति। शिथिलं वा एतद्यज्ञस्य क्रियते ऽसयोनि यत्संवत्सरे ऽनुनिर्वपति। अग्न एवानुनिरुप्याण्यशिथिलत्वाय सयोनित्वाय ।।३।।

निरुप्तं हविरुपसन्नमप्रोक्षितं भवति। अथ मध्याधिदेवनमवोक्ष्याक्षान्न्युप्य

निषसाद धृतव्रतो वरुणः पस्त्यास्वा।

साम्राज्याय सुक्रतुः।।

इति मध्याधिदेवने जुहोति। त्रिर्वै विराड् व्यक्रमत गार्हपत्यमाहवनीयं मध्याधिदेवनम्। विराज एवैनं विक्रान्तमनुविक्रमयति। प्रत्येव तिष्ठति। गच्छति प्रतिष्ठाम्। धर्मधृत्या जुहोति। धर्मधृतमेवैनं करोति सवितारं धारयितारम्। गां घ्नन्ति। तां विदीव्यन्ति। तां समासद्य उपहरन्ति। तेनास्य सो ऽभीष्ट प्रीतो भवति।।

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।

यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे।।

इत्यामन्त्रणे जुहोति मन्त्रवत्या वैश्वदेव्या। मन्त्रमेवास्मै गृह्णाति। तमभिसमत्य मंत्रयन्ते। सह वै देवाश्च मनुष्याश्चौदनपचन आसन्। ते मनुष्या देवानत्यचरन्। तेभ्यो देवा अन्नं प्रत्युह्य गार्हपत्यमभ्युदक्रामन्। तांस्तस्मिन्नन्वागच्छन्। ते मनुष्या एव देवानत्यचरन्। [तेभ्यो देवाः] पशून्प्रत्युह्याहवनीयमभ्युदक्रामन्। तांस्तस्मिन्नन्वागच्छन्। ते मनुष्या एव देवानत्यचरन्। तेभ्यो देवा यज्ञं प्रत्युह्य सभामभ्युदक्रामन्। तांस्तस्यामन्वागच्छन्। ते मनुष्या एव देवानत्यचरन्। तेभ्यो देवा विराजं प्रत्युह्यामन्त्रणमभ्युदक्रामन्। तांस्ततो नानुप्राच्यवन्त। एते वै देवानां संक्रामाः। श्रेयांसंश्रेयांसं लोकमभ्युत्क्रामति य एवं वेद। एतद्वै देवानां सत्यमनभिजितं यदामन्त्रणम्। तस्मात्सुप्रातरामन्त्रणं गच्छेत्। सत्यमेव गच्छति। तस्मादामंत्रणं नाहूत यायात्। तस्मादामन्त्रणे नानृतं वदेत्। वह्निर्वै

नामौदनपचनः। आस्य वह्निर्जायते य एवं वेद। गृहा गार्हपत्यः। गृहवान्भवति य एवं वेद। धिष्ण्या आहवनीयः। उपैनं यज्ञो नमति य एवं वेद। सप्रथा मध्याधिदेवनम्। प्रथते प्रजया च पशुभिश्च य एवं वेद। अनाप्त आमन्त्रणम्। नैनमाप्नोति य ईप्सति य एवं वेद ।।४।।

अग्निर्वा इमं लोकं नोपाकामयत। यदस्मिन्नामं मांसं पचन्ति यत्पुरुषं दहन्ति यत्स्तेयं पचन्ति तदभीमं लोकं नोपाकामयत। स यदिमं लोकमुपावर्तत या अस्य यज्ञियास्तन्व आसंस्ताभिरुदक्रामत्। ता एताः पवमाना पावका शुचिः। तस्य या पवमाना तनूरासीत्पशूंस्तया प्राविशद्या पावकापस्तया प्राविशद्या शुचिरमुं तयादित्यं प्राविशत्। प्राणो वै पवमानः। प्राणेन पशवो यताः। यदग्नये पवमानाय पशूनेवास्मै तेन यच्छति। एषा वा अस्य सा तनूर्या पशून्प्राविशत्। यदिदं घृते हुते प्रतीवार्चिरुज्ज्वलत्येषा वा अस्य सा तनूर्यापः प्राविशत्। यदिदमप्सु परीव ददृशे यद्धस्ताववनिज्य स्नात्वा श्रदिव धत्ते य एवाप्स्वग्निः स एवैनं तत्पावयति स स्वदयति। यदग्नये पावकाय सपशुमेवैनं पावयति। एषा वा अस्य सा तनूर्यापः प्राविशत्। यदिदं घृते हुते शोणमिवार्चिरुज्ज्वलत्येषा वा अस्य सा तनूर्यामुमादित्यं प्राविशत्। यदिदमुपरिष्टाद्दीव भाति यज्ज्योतिरभवद्यदग्नये शुचय आविर्भूत्या एव घोषायैव श्लोकायैव रुच एव। एषा वा अस्य सा तनूर्यामुमादित्यं प्राविशत्। यदिदं घृतं हुते सुवर्णमिवार्चिरुज्ज्वलति यदेतानि हवींषि निरुप्यन्ते सतनूरेवैतत्सतेजा आधीयते। इमे वै लोका एतानि हवींषि। नानाबर्हींषि भवन्ति। नाना हीमे लोकाः प्रतिष्ठिताः ।।५।।

गायत्रीः संयाज्या भवन्ति। गायत्रो वा अग्निर्गायत्रच्छन्दाः। आग्नेयमेतत्क्रियते यदग्न्याधेयम्। अग्नावेवैतदग्निः प्रतितिष्ठत्रेति यदाग्नेयानि हवींषि। अग्निनाग्निः समिध्यत इत्युत्तरयोर्हविषोरनुवाक्यां कुर्यात्तेजस आयतनाय। उर्वशी देवी पुरूरवस्यासीत्। सान्तर्वती देवान्पुनः परैत्। सो ऽदो देवेष्वायुरजायत। तामन्वागच्छत्। तां पुनरयाचत। तामस्मै न पुनरददुः। तस्मा आयुं प्रायच्छन्नेष आयुरिति। अग्निं चोख्यम्। उखायां समुष्यैतमाधत्स्व तेन प्रजनिष्यस इति। स वृक्षस्य शाखायामग्निमासज्यायुना ग्राममभ्यवैत्। स पुनरैमीत्येद्वृक्षस्याग्रेऽग्निं ज्वलन्तम्। सो ऽचिकेदयं वाव सो ऽग्निरिति। तस्यारणी आदायाग्निं मथित्वाधत्त। तेन प्राजायत। यदारोहस्यारणी भवतः प्रजननाय। अदित्यै घृते चरुं पशुकामो ऽनुनिर्वपेत्। इयं वा अदितिः। अस्यामधि पशवः प्रजायन्ते। यज्ञमुखमग्न्याधेयम्। यज्ञमुखमेवालभ्य पशूनवरुंद्धे। चातुष्प्राश्यो भवति। आचतुरं हीमे पशवो द्वंद्वं मिथुनाः। ते वीर्यकृतः। अग्नीषोमीयमेकादशकपालं ऽनुनिर्वपेत्। आग्नेयो वै ब्राह्मणः। देवतया सोमराजा। यज्ञमुखमग्न्याधेयम्। यज्ञमुखमेवाक्रम्य स्वाराज्यमुपैति। देवान्वै यज्ञो नाभ्यनमत्। ते ऽश्राम्यन्यज्ञो नो नाभिनमतीति। सो ऽग्नीषोमावेवाग्रे यज्ञो ऽभ्यनमत्। ते ऽविदुरग्नीषोमौ वै नो ऽग्रे यज्ञो ऽभ्यनांस्तयोर्यज्ञस्याभिनतिमिच्छामहा इति। ते ऽब्रुवन्युवां वै नो ऽग्रे यज्ञो ऽभ्यनान्युवयोर्नो ऽधि यज्ञो ऽभिनमत्विति। तावब्रूतां वार्यं वृणावहा आवामेवाग्र आज्यभागौ यजानिति। तस्मादग्नीषोमावेवाग्र आज्यभागौ यजन्ति। वार्यवृतं ह्यनयोः। यदग्नीषोमीयमनुनिर्वपति यज्ञस्याभिनत्यै। अतो हि देवानग्रे यज्ञो ऽभ्यनमत्। यदन्यदनुनिर्वपेद्देवतया यज्ञमन्तर्दध्यात्। मिथुनं वा अग्निश्च सोमश्च। सोमो रेतोधा अग्निः प्रजनयिता। अग्निर्वा इदं सर्वम्। आप ओषधयो वनस्पतयः। तदेव सोमः। एतौ वै नो देवानां नेदिष्ठम्। एतौ हि पश्यामः। यथा वा इदं मनुष्या उपासत एवमेतं देवा उपासत। ते ऽचिकयुरुद्धृतेन वा अनेनाभिजयेमेति। तमुदहरन्त। तेनाभ्यजयन्। अभिजित्या एवैष उद्ध्रियते। अग्निर्वै निराधानादबिभेत्। नातिदूर आधेयो निराधानाय ।।६।।

आधेयो ऽग्नी३ नाधेया३ इति मीमांसन्ते। श्वो ऽग्निमाधास्यमानेनेति। आधेय एव। अयज्ञो ह्येष यो ऽनग्निः। अजो बद्धस्तां रात्रीं वसेत्। अग्नितेजसं वा अजः। तदेव तमग्निमाधत्ते। कल्माषः स्यात्। स हि सर्वदेवत्यः। यस्तं श्वो ऽग्निमाधास्यन्स्यात्स तां रात्रीं व्रतं चरेत्। न मांसमश्नीयात्। न स्त्रीमुपेयात्। सर्वो वै पुरुषो ऽग्निमान्। अग्निरस्मादपक्रामेत्। एष ह्येतस्य योनिः। एतस्माद्ध्येषो ऽधि सृज्यते यस्तमुद्धरति। यो दक्षिणो ब्रह्मवर्चसायैवैष मथ्यते। अथो अग्निभ्यामेवैनं सयोनिं करोति। दुर्गोपस्तु। अहरहरस्य मन्थेयुः। यत एव कुतश्चाहरेत्। एषा वा

अस्यामवरुद्धा तनूः तामेवावरुंद्धे। यत्र दीप्यमानं स्यात्तत आहरेत्। देवता वा एता आविर्भवन्ति। ता एवावरुंद्धे। भृज्जनादाहरेदन्नकामस्य। एषा वा अन्नादी तनूः तामेवावरुंद्धे। यो ब्राह्मणो वा वैश्यो वा पुष्टो ऽसुर इव स्यात्तस्य गृहादाहरेत्। सैव सा पुष्टिस्तामवरुंद्धे। गृहे त्वस्य ततो नाश्नीयात्। श्रियमुच्छते। त्रय इमे लोकाः। इमानेव लोकानाप्नोति। यदुद्यच्छत इमं तेन लोकमाप्नोति। यत्परादुद्द्रवत्यन्तरिक्षं तेन। यदादधात्यमुं तेन। नाधाय पुनरुद्गृह्णीयात्। अपक्रमः सः। पापीयान्भवति। प्राणेभ्यो वै प्रजापतिः प्रजा असृजत। ताः प्राजायन्त। तया मात्रयोद्गृह्णीयात्प्रजननाय। नात्युद्गृह्णीयात्। अग्निरस्य प्राणानुदहेत्प्रमीयेत। नाधो दम्युयात्। अपक्रमः सः। पापीयान्भवति ॥७॥

अग्निं वै सृष्टमग्निहोत्रमन्वसृज्यत। तस्मादग्निमाहितमग्निहोत्रेणानुद्द्रवन्ति। आग्नेयी सायमाहुतिः सौरी प्रातः। यदाग्नेय्या प्रातर्जुहुयात्प्रजननं पुरस्तात्परिहरेत्। अयथापूर्वं कुर्यात्। पूर्णया स्रुचा मनसा प्रजापतये जुहोति। पूर्णः प्रजापतिः। प्रजापतिमेवाप्नोति। पूर्णो वै प्रजापतिः समृद्धिभिरूनो व्यृद्धिभिः। पूर्णः पुरुषः कामैरूनः समृद्धिभिः। पूर्णैव पूर्णः समृद्धीरवरुंद्धे। आनीता वा अन्येषां देवानां स्तो ऽनानीता अन्येषाम्। संस्पर्शेनान्येषां जीवामः सकाशेनान्येषाम्। पृथिव्या वात्स्याया देवमानीताः स्तस्तेषां संस्पर्शेन जीवामः। अग्नेः सूर्यस्य दिवस्तेषामनानीताः स्तस्तेषां सकाशेन जीवामः। तानेवैतदालब्धा त एनमानेयत। श्रेयसो भ्रातस्य भवति। नास्य मनुष्याः पापवसीयसस्तोशते। यदात्मनालभेत प्रमायुकः स्यात्। आज्येन चौषधीभिश्चालभते ऽप्रमायुको भवति। आनीतो वा एष देवानां य आहिताग्निः। अदत्स्वत्यान्नम्। पूर्णया स्रुचा जुहोति। पूर्णयाग्नये ऽलमकः। अलमस्मै भवति। ओषधयश्च वै वनस्पतयश्च दिवा समदधुः। त इतो ऽन्यत्सर्वमबाधन्त। स प्रजापतिरमन्यतेमे वावेदमभूवन्निति। सो ऽग्निं सृष्ट्वा तमाधत्त। तेनैनानभावयत्। भ्रातृव्यसहनो वावैष आधीयते हुताद्याय। एष वा अहुताद्यो ऽलमग्न्याधेयाय सन्नाहिताग्निः। हुतमेवैतेन स्वदितमत्ति ॥८॥

इति कपिष्ठलकठसंहितायां सप्तमो ऽध्यायः

अहुतादो वा एतस्य पुरा देवाः। अथैतद्धुताद उपावर्तेते। ते ऽस्योर्जमपक्रामन्ति। ऊर्जमेवावरुंद्धे। तानेव भागिनः करोति। यजत्यमुष्मिंल्लोकेऽस्मिन्यजत्यमुष्मिन्नन्तरयायैतस्य। अथो वैश्वानरतायामेवैनमुपातिष्ठिपत्। ये वै यज्ञेनायजन्त भूयांसो। न वै सु विदुरिव मनुष्या यज्ञम्। तस्मान्न सर्वं इवर्ध्नोति। यद्दक्षिणां ददाति यज्ञस्यार्धः। दक्षिणावद्भ्यां ह स्म वै पुरा दर्शपूर्णमासाभ्यां यजन्ते। य एष ओदनः पच्यते दक्षिणामेवैतां ददाति यज्ञस्यर्द्ध्यै। इष्टी वा एतेन यद्यजते। य एष ओदनः पच्यते तेन पूर्णो एव वावेष्टापूर्ती य एतं पचति। प्रजापतिर्वै देवेभ्यो भागधेयानि व्यादिशत्। यज्ञमेव सो ऽमन्यतात्मानमन्तरगामिति। स एतमोदनमपश्यत्। तमात्मने भागमकल्पयत्। प्रजापतेर्वावैष भागः। महान्तमपरिमितं पचेत्। अपरिमितः प्रजापतिः। प्रजापतिमेवाप्नोति। देवाश्च वा असुराश्चास्पर्धन्त। ते देवाः प्रजापतिमेवाभ्ययजन्त। अन्यो ऽन्यस्मिन्नसुरा अजुहवुः। ते देवा एतमोदनमपश्यन्। तं प्रजापतये भागमनुनिरवपन्। तं भागं पश्यन्प्रजापतिर्देवानुपावर्तत। ततो देवा अभवन्पराऽसुरा अभवन्। य एवं विद्वानन्वाहार्यमाहरति भवत्यात्मना परास्य भ्रातृव्यो भवति। ईड्या वा अन्ये देवाः सपर्येण्या अन्ये। देवा ईड्या ब्राह्मणाः सपर्येण्याः। यज्ञेनैवेड्यान्प्रीणात्यन्वाहार्येण सपर्येण्यान्। तस्योभये प्रीता यज्ञे भवन्ति। प्रजापतेर्भागो ऽस्यूर्जस्वान्। अक्षितो ऽस्यक्षित्यै त्वा। अक्षितो नामासि मा मे क्षेष्ठाः। प्राणापानौ मे पाहि। उदानरूपे मे पाहि। ऊर्गस्यूर्जं मयि धेहि। प्रजापति त्वया समक्षमृध्यासमिति तमेव समक्षमृध्नोति ॥१॥

यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे।
आदित्या विश्वे तद्देवा वसवः पुनराभरन्॥
यत्त्वा क्रुद्धः परोवप मन्युना यदवर्त्या।
सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुधीतिमग्ने।
इहैव धेह्यधि दक्षमुग्रमश्वावद्गोमद्यवमत्सुवीर्यम्॥
पुनस्त्वा मित्रावरुणौ पुनरिन्द्रः पुनर्भगः।
पुनस्त्वा विश्वे देवा ब्राह्मणा उददीदिपन्॥
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा।
पुनर्नः पाह्यंहसः॥
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया।
विश्वप्स्न्या विश्वतस्परि॥

केतः सकेतः सुकेतस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा। सलिलः सलिगः सगरस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा। दिवो ज्योतिर्विवस्व आदित्य ते नो देवा देवेषु सत्यां देवहूतिमासुवध्वम्। आदित्येभ्यः स्वाहा ॥२॥

अग्नेर्वै भागः पुनराधेयम्। तं भागं प्रेप्सन्व्यर्धयति। यद्याधाय मन्येत व्यृध्यते स्य इति पुनरादधीत। यं भागं प्रेप्सन्व्यर्धयति तं प्राप्यार्धयत्येव। सर्वमाग्नेयं क्रियते। यदेव किंच सर्वमग्नये भागं प्रादात्सर्वामृद्धिमृध्नोति। न संभाराः संभृत्या इत्याहुर्न यजुः कार्यमिति। संभृतसंभारो ह्येष कृतयजुः। तत्तत्र सूक्ष्यम्। संभृत्या एव संभाराः कार्यं यजुः। पुनरुत्स्यूतं वासो देयं पुनरुत्सृष्टो ऽनड्वान्पुनर्निष्कृतो रथः। एतानि वै पुनराधेयस्य रूपाणि। रूपैरेवैनत्समर्धयति। अग्निर्वा उत्सीदन्नप ओषधीरनूत्सीदति। एता वा आप ओषधयो यद्दर्भाः। यद्दर्भा उपोलपा भवन्त्यद्भ्य एवैनमोषधीभ्यो ऽध्यवरुंद्धे॥

देवाश्च वा असुराश्चास्पर्धन्त। ते देवा विजयमुपयन्तो ऽग्नौ प्रियास्तन्वः संन्यदधत। यदि जयेमेमा उपावर्तेमहि यदि नो जयेयुरिमा अभ्युपधावेमेति। ते ऽभिजित्यान्वैच्छन्सर्वेषां नः सहेति। सो ऽग्निरब्रवीद्यो मा मद्देवत्यमादधातै स एताभिस्तनूभिः संभवादिति। तं देवा आदधत। त एताभिस्तनूभिः समभवन्। एताभिरेव तनूभिः संभवति य एवं विद्वानेतमाधत्ते। त्वष्टा पशुकाम आधत्त। त इमे त्वाष्ट्राः पशवः। तेनर्द्धाः। मनुः पुष्टिकाम आधत्त। स इमान्पोषानपुष्यत्। तेनर्द्धाः। प्रजापतिः प्रजाकाम आधत्त। ता इमाः प्राजापत्याः प्रजाः प्राजायन्त। तेनर्द्धाः। यो वै तमाधत्त स तेन वसुना समभवत्। तस्मात्पुनर्वसुः। तस्मात्पुनर्वसावाधेयः। आर्ध्नोद्धि स यस्तमाधत्त। तस्मादनूराधाः। तस्मादनूराधास्वाधेयः ॥३॥

अग्निर्वा उत्सीदन्संवत्सरमनूत्सीदति। सप्तदश सामिधेनीः कार्याः। पञ्चर्तवः। द्वादश मासाः। एष वाव स संवत्सरः। संवत्सरादेवाधि यज्ञमुखं प्रतनुते। तदाहुः पञ्चदशैव कार्या न सप्तदशेति। एतद्धि संवत्सरस्य संक्रमणतरं यत्पञ्चदश। पञ्चदश सामिधेनीरनूच्यन्ते। पञ्चदशार्धमासस्य रात्रयः। ताभिरेव ता आप्यन्ते। यावन्ति वै सामिधेनीनामक्षराणि तावन्ति संवत्सरस्याहानि। तैरेव तान्याप्यन्ते। अग्निर्वा उत्सीदन्संवत्सरमनूत्सीदति। षड्वा ऋतवः संवत्सरः। यत्षड्विभक्तयः संवत्सरादेवैनमध्यवरुन्द्धे। संवत्सरो वा अग्निर्वैश्वानरः। षडृतवः। तस्मात्षड्विभक्तयः यद् द्व्यक्षराः सतीश्चतुरक्षराः क्रियन्त आचतुरं हीमे पशवो द्वंद्वं मिथुनाः। यद्वा इदमग्निं बहुधा विहरन्ति यदिमान्पोषान्पुपोष तस्मादग्निरेवैतावतीर्विभक्तीरश्नुते नान्या देवता। यज्ञमुखं वै प्रयाजाः। यत्प्रयाजानन्तर्याद्यज्ञमुखमन्तर्यात्। अन्नं वै प्रयाजाः। यत्प्रयाजानान्तर्यादन्नमन्तर्यात्। यः कामयेतर्ध्नुयामित्युपरिष्टात्प्रयाजानां विभक्तीः कुर्यात्। वीर्यं वै विभक्तयः। वीर्यादेवाधि वषट्करोति। अजिरमृद्धिमभिक्रामति। नानाग्नेयं क्रियत इत्याहुः। कस्मात्सविभक्तयः प्रयाजा भवन्तीति। संवत्सरं वा एते परीज्यन्ते यत्प्रयाजाः। तेनाग्नेयं तेन नानाग्नेयं क्रियते॥
पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा।
पुनर्नः पाह्यंहसः॥

इति पुरस्तात्प्रयाजानां जुहुयात्।
सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया।
विश्वप्स्न्या विश्वतस्परि॥

इत्युपरिष्टादनुयाजानां जुहुयात्। ऊर्जा वा एष पशुभिरुत्सीदन्सहोत्सीदति। पुनरेवोर्जं पशूनवरुंद्धे। अथो उभयत एव यज्ञस्याशिषमृध्नोति ॥४॥

नानाग्नेयं क्रियत इत्याहुः। कस्मादाज्यभागौ यजन्तीति। चक्षुषी वा एते यज्ञस्य यदाज्यभागौ। यदाज्यभागावन्तर्यात् चक्षुषी यज्ञस्यान्तर्यात्। अग्न आयूंषि पवस इत्येतां सोमस्याज्यभागस्य लोके कुर्यात्। यदाग्नेयं तेनाग्नेयी यत्पवमाने तेन सौमी। नानाग्नेयं क्रियते। न सोममन्तरेति। अग्निर्मूर्धा दिवः ककुदित्येतां सोमस्याज्यभागस्य लोके कुर्यात्प्रजाकामस्य वा पशुकामस्य वा। यन्मिथुना तेन प्रजननवती यद्रेतस्वती तेन सौमी। नानाग्नेयं क्रियते। न सोममन्तरेति॥

वीरहा वा एष देवानां यो ऽग्निमुत्सादयते। शतदायो वीरः। यदेताः शताक्षरा अपरपङ्क्तयो वीरमेवैतद्देवानामवदयते। अन्यस्मै वै प्रमाय आधेयो ऽन्यस्मै पुनराधेयः। न वै तामाधेयेन स्पृणोति यस्मै पुनराधेयः। पुनराधेयेन वाव तां स्पृणोति। जरा वै देवहितमायुः। तावदीर्हि समा जीवति। तस्मादाहुः शतदायो वीरः। यदेताः शताक्षरा अक्षरपङ्क्तयो भवन्ति यावदेव वीर्यं तदाप्नोति तत्स्पृणोति। आयुषा वा एष वीर्येण व्यृध्यते यो ऽग्निमुत्सादयते। शतायुः पुरुषः शतवीर्यः। आयुर्वीर्यं हिरण्यम्। यद्धिरण्यं शतमानं ददात्यायुरेव वीर्यं पुनरालभते ॥५॥

यज्ञेन वा एष वीर्येण व्यृध्यते यो ऽग्निमुत्सादयते। पाङ्क्तो यज्ञः। यत्पञ्चकपालो यज्ञमेवालभते। तदाहुरष्टाकपाल एव कार्यो न पञ्चकपाल इति। अष्टाक्षरा गायत्री। गायत्रो ऽग्निर्गायत्रच्छन्दाः। आग्नेयमेतत्क्रियते यत्पुनराधेयम्। तस्मादष्टाकपालः। तत्तत्र सूक्ष्यम्। पञ्चकपाल एव कार्यः। अग्निर्वा उत्सीदन्संवत्सरमनूत्सीदति। पञ्च वा ऋतवः संवत्सरः। पञ्चधा ह्यध्यतः षष्ठ ऋतुर्बभूव। समानमेतद्यत्पञ्चषडृतुः षष्ठश्च। यत्पञ्चकपालः संवत्सरादेवैनमाप्नोति। पाङ्क्तश्च। प्रजननमृतवः। यत्पञ्चकपालः प्रजननाय। प्रजननं वा ऋतवो ऽग्निः प्रजनयिता। यत्पञ्चकपालः प्रजननादेवैनं प्रजनयिता प्रजनयति॥

आदित्या वा इतः सर्व एव सहामुं लोकमायन्। ते व्यतृष्यन्। ते ऽविदुरमुतःप्रदानाद्वा इहागमामेति। त एतं पुनरादधत। तेनार्ध्नुवन्। आदित्या वा अस्मिंल्लोके ऋद्धा आदित्या अमुष्मिन्। पशवो ऽस्मिन्नृतवो ऽमुष्मिन्। उभयोरेव लोकयोरृध्नोति य एवं विद्वानेतया यजते॥

केतः सकेतः सुकेतस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा। सलिलः सलिगः सगरस्ते न आदित्या जुषाणा अस्य हविषो व्यन्तु स्वाहा। दिवो ज्योतिर्विवस्व आदित्य ते नो देवा देवेषु सत्यां देवहूतिमासुवध्वम्। आदित्येभ्यः स्वाहेत्येतैर्वै ते तमादधत। यदेतैरेवाधत्ते ऽर्ध्नुवन्। आदित्यो हि पुनराधेयः ॥६॥

आग्नेयो ऽष्टाकपालः। सौम्यश्चरुः। सावित्रो द्वादशकपालः। सारस्वतश्चरुः। पौष्णश्चरुः। मारुतः सप्तकपालः। वैश्वदेव्यामिक्षा। द्यावापृथिव्य एककपालः। आग्नेयो ऽष्टाकपालः। सौम्यश्चरुः। सावित्रो ऽष्टाकपालः। सारस्वतश्चरुः। पौष्णश्चरुः। ऐन्द्राग्नो द्वादशकपालः। मारुत्यामिक्षा।

वारुण्यामिक्षा। काय एककपालः॥

नमस्त आतान। अनर्वा प्रेहि घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेण॥
प्रघासिनो हवामहे मरुतो यज्ञवाहसः।
करम्भेण सजोषसः॥
मो षू ण इन्द्रात्र पृत्सु देवा अस्तु ष्म ते शुष्मिन्नवयाः।

मही देवस्य मीढुषो ऽवया हविष्मतो मरुतो वन्दते गीः॥
यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये।
यदेनश्चकृमा वयं यदप्सश्चकृमा वयम्।
यदेकस्यापि धर्मणीदं तदवयजामहे ॥स्वाहा॥
अक्रन्कर्म कर्मकृतः सह वाचा मयोभुवा।
देवेभ्यः कर्म कृत्वास्तं प्रेत सुदानवः ॥७॥

अग्नये ऽनीकवते प्रातरष्टाकपालः। मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुः। मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनः॥

पूर्णा दर्वि परापत सुपूर्णा पुनरापत।
वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो॥
देहि मे ददामि ते नि मे धेहि नि ते दधे।
निहारमिन्नि मे हर निहारं निहरामि ते॥

मरुद्भ्यः क्रीडिभ्यः प्रातः सप्तकपालः पुरोडाशः। आग्नेयो ऽष्टाकपालः। सौम्यश्चरुः। सावित्रो ऽष्टाकपालः। सारस्वतश्चरुः। पौष्णश्चरुः। ऐन्द्राग्न एकादशकपालः। ऐन्द्रश्चरुः। वैश्वकर्मण एककपालः॥

अग्ने वेर्होत्रं वेर्दूत्यम्। ऊर्ध्वो ऽध्वरे ऽस्थाः। अवतां त्वा द्यावापृथिवी। अव त्वं द्यावापृथिवी। स्विष्टकृदिन्द्राय देवेभ्यो भव। जुषाणो अस्य हविषो घृतस्य वीहि स्वाहा ॥८॥

सोमाय पितृमत आज्यम्। पितृभ्यो बर्हिषद्भ्यः षट्कपालः पुरोडाशः। पितृभ्यो ऽग्निष्वात्तेभ्यो धानाः। अग्नये कव्यवाहनाय मन्थः। एतत्ते तत ये च त्वानु। एतत्ते पितामह ये च त्वानु। एतत्ते प्रपितामह ये च त्वानु। अत्र पितरो मादयध्वम्॥
सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि।
प्र नूनं पूर्णवन्धुर स्तुतो याहि वशां अनु योजा न्विन्द्र ते हरी॥
परेत पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणेभिः।
दत्त्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत॥
अमीमदन्त पितरः॥
अया विष्ठा जनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः।
स प्रत्युदैद्धरुणं मध्वो अग्रं स्वां यत्तनूं तन्वमैरयत॥
अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥

नमो वः पितरो मन्यवे। नमो वः पितरः शुष्माय। नमो वः पितरो जीवाय। नमो वः पितरो रसाय। नमो वः पितरो बलाय। नमो वः पितरो यत्क्रूरं तस्मै। नमो नमो वः पितरः। स्वधा वः पितरः। यत्र पितरः स्वधा यत्र यूयं स्थ सा युष्मासु तया यूयं यथाविभागं मादयध्वम्। येह पितर ऊर्ग्यत्र वयं स्मः सास्मासु। तस्यै वयं ज्योग्जीवन्तो भूयास्म॥
मनो न्वाहुवामहे नाराशंसेन स्तोमेन।
पितॄणां च मन्मभिः॥
आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे।
ज्योक्च सूर्यं दृशे।
पुनर्नः पितरो मनो ददातु दैव्यो जनः।

जीवं व्रातं सचेमहि ॥९॥
यदन्तरिक्षं पृथिवीमुत द्यां यत्पितरं मातरं वा जिहिंसिम।
अग्निर्नस्तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरितानि यानि चकृम॥

रुद्राखुं ते पशुं करोमि। एष ते रुद्र भागः। सह स्वस्राम्बिकया तं जुषस्व स्वाहा॥
अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकम्।
यथा नो वस्यसस्करद्यथा नः श्रेयस्करद्यथा नो व्यवसाययात्॥
भेषजं गवे ऽश्वाय पुरुषाय सुभगं मेषाय मेष्यै।
अथो अस्मभ्यं भेषजं सुभेषजं यथासति॥
त्र्यम्बकं यजामहे सुगन्धिं रयिपोषणम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

भगोऽसि। भगस्य ते लप्सीय। एष ते रुद्र भागः। तेनावसेन परो मूजवतो ऽतीहि कृत्तिवासाः पिनाकहस्तो ऽवततधन्वा। एधो ऽस्येधिषीमहि। समिदसि समेधिषीमहि। तेजो ऽसि तेजो मयि धेहि ॥१०॥

चित्तिः स्रुक्। चित्तमाज्यम्। वाग्वेदिः। आधीतं बर्हिः। केतो अग्निः। विज्ञातमग्नीत्। वाचस्पतिर्होता। मन उपवक्ता। प्राणो हविः। सामाध्वर्युः। इन्द्रं गच्छ स्वाहा। पृथिवी होता। द्यौरध्वर्युः। त्वष्टाग्नीत्। मित्र उपवक्ता। वाचस्पते वाचो वीर्येण संभृततमेनायक्षसे। यज्ञपतये वीर्यमा स्वस्करः। वाचस्पतिः सोमं पिबतु। जजनदिन्द्रमिन्द्रियाय स्वाहा। सोमः सोमस्य पुरोगः। शुक्रः शुक्रस्य पुरोगाः। श्रातास्त इन्द्र सोमा वातापयो हवनश्रुतः स्वाहा। अग्निर्होता। अश्विनाध्वर्यू। रुद्रो ऽग्नीत्। बृहस्पतिरुपवक्ता। वाचस्पते हृद्विधे नामन्वाचस्पतिः सोममपात्। आस्मासु नृम्णं धात्स्वाहा। सोमः सोमस्य पुरोगाः। शुक्रः शुक्रस्य पुरोगाः। श्रातास्त इन्द्र सोमा वातापयो हवनश्रुतः स्वाहा ॥११॥

देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि। वरुणस्त्वा नयतु देवि दक्षिणे। यमायाश्वम्। तेनामृतत्वमशीय। वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे। देवस्य त्वा। वरुणस्त्वा नयतु देवि दक्षिणे। अग्नये हिरण्यम्। रुद्राय गाम्। ग्रास्त्वाकृन्तन्नपसो ऽतन्वत वरुत्रीरवयन्। वरुणस्त्वा नयतु देवि दक्षिणे। बृहस्पतये वासः। तेनामृतत्वमशीय। वयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे॥

क इदं कस्मा अदात्। कामः कामाय। कामो दाता कामः प्रतिग्रहीता। कामः समुद्रमाविशत्। कामेन त्वा प्रतिगृह्णामि। कामैतत्ते॥

महाहविर्होता। सत्यहविरध्वर्युः। अचित्तपाजा अग्नीत्। अचित्तमना उपवक्ता। अनाधृष्यश्चाप्रतिधृष्यश्चाभिगरौ। अयास्य उद्गाता। वाचस्पते विधे नामन्विधेम ते नाम। विधेस्त्वमस्माकं नाम। मा देवानां तन्तुश्छेदि मा मनुष्याणाम् ॥१२॥

इति कपिष्ठलकठसंहितायामष्टमो ऽध्यायः।

चतुर्थमष्टकम्

ओम्॥
उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः।
स नो भव शिवस्त्वं सुप्रतीको विभावसुः॥
प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चिभिष्ट्वम्।
बृहद्भिर्भानुभिर्भासन्मा हिंसीस्तन्वा प्रजाः।
अक्रन्ददग्निः॥
अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे॥
समिधाग्निं दुवस्यत॥
प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः।
अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः॥
आपो देवीः प्रतिगृह्णीत भस्मैतत्स्योने कृणुध्वं सुरभावु लोके।
तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम्॥
अप्स्वग्ने सधिष्टव सौषधीरनुरुध्यसे।
गर्भे संजायसे पुनः॥
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम्।
गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि॥
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने।
संसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः॥
पुनरासद्य सदनमपश्च पृथिवीमग्ने।
शेषे मातुर्यथोपस्थे ऽन्तरस्यां शिवतमः॥
पुनरूर्जा॥ सह रय्या॥
बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः।
पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने॥
स बोधि सूरिर्मघवा वसुदावा वसुपतिः।
युयोध्यस्मद्द्वेषांसि ॥१॥ ॥
अपेत वीत वि च सर्पतातो ये ऽत्र स्थ पुराणा ये च नूतनाः।
अदाद्यमो ऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै॥

संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्। अग्नेर्भस्मासि। अग्नेः पुरीषमसि। चित्त स्थ परिचित ऊर्ध्वचितः श्रयध्वम्॥
अयं सो अग्निर्यस्मिन्सोममिन्द्रः सुतं दधे जठरे वावशानः।
सहस्रिणं वाजमत्यं न सप्तिं ससवान्सन्स्तूयसे जातवेदः॥
अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवां ऊचिषे धिष्ण्या ये।
याश्चावस्तादुपतिष्ठन्त आपो या वा परो रोचने सूर्यस्य॥
अग्ने यत्ते दिवि वर्चः पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः॥
पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः।
जुषन्तां हव्यमाहुतमनमीवा इषो महीः॥
इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥
अयं ते योनिर्ऋत्वियः॥

चिदसि। तया देवतयाङ्गिरस्वद् ध्रुवा सीद। परिचिदसि। तया देवतयाङ्गिरस्वद् ध्रुवा सीद॥
समितं संकल्पेथां संप्रियौ रोचिष्णू सुमनस्यमानौ। इषमूर्जमभिसंवसानौ॥
सं वां मनांसि सं व्रता समु चित्तान्याकरम्।
अग्ने पुरीष्याधिपा भव त्वं न इषमूर्जं यजमानाय धेहि॥
अग्ने त्वं पुरीष्यो रयिमान्पुष्टिमां असि।
शिवाः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः॥
भवतं नः समनसौ॥
मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा।
तां विश्वे देवा ऋतुभिः संविदानाः प्रजापतिर्विश्वकर्मा विमुञ्चतु ॥२॥
यदस्य पारे रजसश्चित्रं ज्योतिरजायत।
तन्नः पर्षदति द्विषो अग्ने वैश्वानर द्युमत्॥
असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्विहि।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु॥
यत्ते अस्मिन्घोर आसन्जुहोम्येषां बंधानामवसर्जनाय कम्।
यां त्वा जनो भूमिरिति प्रमन्दते निर्ऋतिरिति त्वाहं परि वेद विश्वतः॥
नमः सु ते निर्ऋते तिग्मतेजो ऽयस्मयं विचृता बन्धमेतम्।
यमेन त्वं यम्या संविदानोत्तमे नाके अधि रोहयैनम्॥
यं ते देवी निर्ऋतिराबबन्ध पाशं ग्रीवास्वविचर्त्यम्।
तं ते विष्याम्यायुषो नु मध्ये ऽधा विषितः पितुमद्धि प्रमुक्तः॥
निवेशनः संगमनो वसूनां विश्वा रूपाभिचष्टे शचीभिः।
देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम्॥
सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्।
धीरा देवेषु सुम्नया॥

युनक्त सीरा वि युगा तनोत कृते योनिर्वपतेह बीजम्।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्॥
पूषा युनक्तु सविता युनक्तु बृहस्पतिः सविता देवो अग्निः॥
शुनं सुफाला वितुदन्तु भूमिं शुनं कीनाशा अभियन्तु वाहान्।
शुनासीरा हव्यजुष्टिं जुषाणेदं बीजमवतमुप्यमानम्॥
लाङ्गलं पवीरवं सुशेवं सोमपित्सरु।
उदिद्वपति गामविं प्रस्थावद्रथवाहनं प्रफर्व्यं च पीवरीम्॥
घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमतं मरुद्भिः।
ऊर्जो भागं मधुमत्पिन्वमानास्मान्सीते पयसाभ्याववृत्स्व॥
विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारम्।
ज्योतिरापाम॥
कामं कामदुघे धुक्ष्व मित्राय वरुणाय च।
इन्द्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः ॥३॥
या ओषधयः प्रथमजा देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामहं शतं धामानि सप्त च॥
शतं वो अम्ब धामानि सहस्रमुत वो रुहः।
अधा शतक्रतो यूयमिमं मे अगदं कृत॥
पुष्पवतीः प्रसूमतीः फलिनीरफला उत।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः॥
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे।
रपांसि विघ्नतीरित रक्षश्चातयमानाः॥
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।
गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥
अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्।
आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये॥
यदोषधयः समग्मत राजानः समिताविव।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः॥
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते।
धनं सनिष्यन्तीनामात्मानं तव पूरुष॥
अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः।
ओषधयः प्राचुच्यवुर्यत्किंच तन्वो रपः॥
यास्त आतस्थुरात्मानमाविविशुः परुष्परुः।
तास्ते यक्ष्मं विबाधन्तामुग्रो मध्यमशीरिव॥
यदहं वाजयन्निमा ओषधीर्हस्त आदधे।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा॥
निष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः।

सीराः पतत्रिणी स्थन यदामयति निष्कृथ।
साकं यक्ष्म प्रपत चाषेण किकिदीविना
साकं वातस्य ध्राज्या साकं नश्य निहाकया।
अन्या वो अन्यामवत्वन्यान्यस्या उपावत।
ताः सर्वाः संविदाना इदं मे प्रावता वचः॥
अपवतन्तीरवदन्दिवो ज्नोषधयस्परि।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥४॥
मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा व्यानट्।
यश्चापश्चन्द्राः प्रथमो जजान कस्मै देवाय हविषा विधेम॥
अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह।
वपां ते अग्निरिषितो अरोहत्॥
अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यच्च यज्ञियम्।
तद्देवेभ्यो भरामसि॥
इषमूर्जमहमित आदमृतस्य योनिं महिषस्य धाराम्।
आ नो गोषु विशत्वा तनूषु जहामि सेदिमनिराममीवाम्॥
अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे॥
पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना।
पुत्रः पितरा विचरन्नुपावसि पृणक्षि रोदसी उभे॥
ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः।
त्वे विश्वे संदधुर्भूरिवर्पसश्चित्रोतयो वामजाताः॥
इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य।
स दर्शतस्य वपुषो विराजसि पृणक्षि सानसिं रयिम्॥
ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः।
श्रुतकर्णं सप्रथस्तमं त्वा युजा विप्रासो मानुषा युगा॥
निष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसे महे।
रातिं वामस्य सुभगां महीमिषं पृणक्षि दर्शतं क्रतुम्॥
आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्।
भवा वाजस्य संगथे॥
सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व [॥५॥]
अपां पृष्ठमसि।

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

द्रप्सश्चस्कन्द।
नमो अस्तु सर्पेभ्यो ये के च पृथिव्यामधि।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥
य इषवो यातुधानानां ये वा वनस्पतीँरनु।
ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः॥
ये वादो रोचने दिवो ये वा सूर्यस्य रश्मिषु।
ये अप्सु सदांसि चक्रिरे तेभ्यः सर्पेभ्यो नमः॥
कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवां इभेन।
तृष्वीमनु प्रसितिं द्रूणानो ऽस्तासि विध्य रक्षसस्तपिष्ठैः॥
तव भ्रमास आशुया पतन्त्यनुस्पृश धृषता शोशुचानः।
तपूंष्यग्ने जुह्वा पतङ्गानसंदितो विसृज विष्वगुल्काः॥
प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः।
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्॥
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्रां ओषतात्तिग्महेते।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्॥
ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने।
अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्॥
अग्नेस्त्वा तेजसा सादयामि। इन्द्रस्य त्वौजसा सादयामि॥
अयमग्निः [सहस्रिणो वाजस्य शतिनस्पतिः।
मूर्धा कवी रयीणाम्॥ ...... ॥६॥]
यो अग्निरग्नेस्तपसोऽधि जातः शोकात्पृथिव्या उत वा दिवस्परि।
येन प्रजा विश्वकर्मा जजान तमग्ने हेडः परि ते वृणक्तु॥
इमं मा हिंसीर्द्विपादं पशूनां सहस्राक्ष मेध आचीयमानः।
मयुं पशुं मेधमग्ने जुषस्व तेन चिन्वानस्तन्वं निषीद॥
मयुं ते क्षुत्। यं द्विष्मस्तं ते शुगृच्छतु॥
इयं मा हिंसीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु।
गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वं निषीद॥
गौरं ते क्षुत्। यं द्विष्मस्तं ते शुगृच्छतु॥
इमं साहस्रं शतधारमुत्सं व्यच्यमानं सरिरस्य मध्ये।
घृतं दुहानामदितिं जनायाग्ने मा हिंसीः परमे व्योमन्॥
गवयमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वं निषीद॥
गवयं ते क्षुत्। यं द्विष्मस्तं ते शुगृच्छतु॥
इममूर्णायुं वरुणस्य नाभिं त्वचं पशूनां द्विपदां चतुष्पदाम्।
त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन्।
मेषमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वं निषीद॥
मेषं ते क्षुत्। यं द्विष्मस्तं ते शुगृच्छतु॥

अजो ह्यग्नेरजनिष्ट शोकात्सो अपश्यज्जनितारमग्रे।
तेन देवा देवतामग्रमायंस्तेन रोहमायन्नुप मेध्यासः।
शरभमारण्यमनु ते दिशामि तेन चिन्वानस्तन्वं निषीद॥
शरभं ते क्षुत्। यं द्विष्मस्तं ते शुगृच्छतु ॥८॥

अपां त्वेमन्सादयामि। अपां त्वोद्मन्सादयामि। अपां त्वा भस्मन्सादयामि। अपां त्वा ज्योतिषि सादयामि। अपां त्वायने सादयामि। अर्णवे त्वा सदने सादयामि। समुद्रे त्वा सदने सादयामि। सरिरे त्वा सदने सादयामि। अपां त्वा क्षये सादयामि। अपां त्वा सधिषि सादयामि। अपां त्वा सदने सादयामि। अपां त्वा सधस्थे सादयामि। अपां त्वा योनौ सादयामि। अपां त्वा पुरीषे सादयामि। अपां त्वा पाथसि सादयामि। गायत्रेण त्वा छन्दसा सादयामि। त्रैष्टुभेन जागतेनानुष्टुभेन पाङ्क्तेन त्वा छन्दसा सादयामि॥

अयं पुरो भुः। तस्य प्राणो भौवायनः। वसन्तः प्राणायनः। गायत्री वासन्ती। गायत्र्या गायत्रम्। गायत्रादुपांशुः। उपांशोस्त्रिवृत्। त्रिवृतो रथन्तरम्। वसिष्ठ ऋषिः। प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्यः। अयं दक्षिणा विश्वकर्मा। तस्य मनो वैश्वकर्मणम्। ग्रीष्मो मानसः। त्रिष्टुब् ग्रैष्मी। त्रिष्टुभः स्वारम्। स्वारादन्तर्यामः। अन्तर्यामात्पञ्चदशः। पञ्चदशाद्बृहत्। भरद्वाज ऋषिः। प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः। अयं पश्चाद्विश्वव्यचाः। तस्य चक्षुर्वैश्वव्यचसम्। वर्षाणि चाक्षुषाणि। जगती वार्षी। जगत्या ऋक्समम्। ऋक्समाच्छुक्रः। शुक्रात्सप्तदशः। सप्तदशाद्वैरूपम्। जमदग्निर्ऋषिः। प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः। इदमुत्तरात्स्वः। तस्य श्रोत्रं सौवम्। शरच्छ्रौत्री। अनुष्टुप् शारदी। अनुष्टुभ ऐडम्। ऐडान्मन्थी। मन्थिन एकविंशः। एकविंशाद्वैराजम्। विश्वामित्र ऋषिः। प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः। इयमुपरि मतिः। तस्या वाङ् मात्या। हेमन्तो वाच्यः। पङ्क्तिर्हैमन्ती। पङ्क्त्या निधनवत्। निधनवत आग्रायणः। आग्रायणात्त्रिणवत्रयस्त्रिंशौ। त्रिणवत्रयस्त्रिंशाभ्यां शाक्वररैवते। विश्वकर्मर्षिः। प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः॥

लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम्।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्॥
ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः।
जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥९॥
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिमासीद साध्या।
उख्यस्य केतुं प्रथमं जुषाणाश्विनाध्वर्यू सादयतामिह त्वा॥
कुलायिनी घृतवती पुरंधिः स्योने सीद सदने पृथिव्याः।
अभि त्वा रुद्रा वसवो गृणन्त्विमा ब्रह्म पीपिहि सौभगाय।
अश्विनाध्वर्यू सादयतामिह त्वा॥
स्वैर्दक्षैर्दक्षपितेह सीद देवानां सुम्ने बृहते रणाय।
पितेवैधि सूनव आ सुशेवः स्वावेशया तन्वा संविशस्व।
अश्विनाध्वर्यू सादयतामिह त्वा॥
अग्नेः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व।
अश्विनाध्वर्यू सादयतामिह त्वा॥
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशाम्।
अधिपत्नीं भुवनानामूर्मिर्द्रप्सो अपामसि।

विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा॥
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैः।
अग्नये त्वा वैश्वानराय। अश्विनाध्वर्यू सादयतामिह वा॥
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजू रुद्रैः सजूरादित्यैः सजूर्विश्वैर्देवैः सजूर्देवैर्वयोनाधैः। अग्नये त्वा वैश्वानराय। अश्विनाध्वर्यू सादयतामिह त्वा॥
प्राणं मे पाहि व्यानं मे पाह्यपानं मे पाहि चक्षुर्म उर्विया विभाहि श्रोत्रं मे श्लोकय। अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात्पाहि दिवो वा वृष्टिमेरय ॥१०॥

इति कपिष्ठलकठसंहितायां पञ्चविंशतितमो ऽध्यायः॥

त्र्यविर्वयो गायत्री छन्दः। दित्यवाड् वयस्त्रिष्टुप्छन्दः। पञ्चाविर्वयो विराट् छन्दः। त्रिवत्सो वय उष्णिहा छन्दः। तुर्यवाड् वयो ऽनुष्टुप्छन्दः। षष्ठवाड्वयो बृहती छन्दः। उक्षा वयः ककुप्छन्दः। धेनुर्वयो जगती छन्दः। अनड्वान्वयः पङ्क्तिश्छन्दः। ऋषभो वयः सतोबृहती छन्दः। बस्तो वयो युवलं छन्दः। वृष्णिर्वयो विशालं छन्दः। व्याघ्रो वयो ऽनाधृष्यं छन्दः। सिंहो वयश्छदिश्छन्दः। पुरुषो वयस्तन्द्रं छन्दः। क्षत्रं वयो मयन्दं छन्दः। विष्टम्भो वयो ऽधिपतिश्छन्दः। मूर्धा वयः प्रजापतिश्छन्दः। विश्वकर्मा वयः परमेष्ठी छन्दः ॥१॥
इन्द्राग्नी अव्यथमानामिष्टकां दृंहतं युवम्।
पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधसे॥
राज्ञ्यसि प्राची दिक्। विराडसि दक्षिणा दिक्। सम्राडसि प्रतीची दिक्। स्वराडस्युदीचो दिक्। अधिपत्न्यसि बृहती दिक्। आयुर्मे पाहि प्राणं मे पाहि। व्यानं मे पाह्यपानं मे पाहि। चक्षुर्मे पाहि श्रोत्रं मे पाहि। मनो मे पिन्व वाचं मे जिन्व। आत्मानं मे पाहि ज्योतिर्मे यच्छ। मा छन्दः। प्रमा छन्दः। प्रतिमा छन्दः। अस्रीवयश्छन्दः। पङ्क्तिश्छन्दः॥ उष्णिहा छन्दः। अनुष्टुप्छन्दः। विराट् छन्दः। बृहती छन्दः। गायत्री छन्दः। त्रिष्टुप्छन्दः। जगती छन्दः। पृथिवी छन्दः। अन्तरिक्षं छन्दः। द्यौश्छन्दः। समा छन्दः। नक्षत्राणि छन्दः। वाक् छन्दः। मनश्छन्दः। कृषिश्छन्दः। हिरण्यं छन्दः। गोश्छन्दः। अजा छन्दः। अश्वश्छन्दः। अग्निर्देवता। वातो देवता। सूर्यो देवता। चन्द्रमा देवता। वसवो देवता। रुद्रा देवता। आदित्या देवता। मरुतो देवता। विश्वे देवा देवता। इन्द्रो देवता। वरुणो देवता। बृहस्पतिर्देवता। मूर्धासि राट्। ध्रुवासि धरुणा। धर्त्र्यसि धरणी। आयुषे त्वा। वर्चसे त्वा। कृष्यै त्वा। क्षेमाय त्वा। यन्त्री राट्। यंत्र्यसि यमनी। ध्रुवासि धरित्री। इषे त्वा। ऊर्जे त्वा। रय्यै त्वा। पोषाय त्वा ॥२॥
आशुस्त्रिवृत्। भान्तः पञ्चदशः। व्योमा सप्तदशः। प्रतूर्तिरष्टादशः। तपो नवदशः। अभीवर्तः सविंशः। धरुण एकविंशः। वर्चो द्वाविंशः। संभरणस्त्रयोविंशः। योनिश्चतुर्विंशः। गर्भाः पञ्चविंशः। ओजस्त्रिणवः। क्रतुरेकत्रिंशः। प्रतिष्ठा त्रयस्त्रिंशः। ब्रध्नस्य विष्टपं चतुस्त्रिंशः। नाकः षट्त्रिंशः। वीवर्तो अष्टाचत्वारिंशः। धर्त्रं चतुष्टोमः॥
अग्नेर्भागो ऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमः॥
इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रं स्पृतं पञ्चदश स्तोमः॥
नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रं स्पृतं सप्तदश स्तोमः॥
मित्रस्य भागो ऽसि वरुणस्याधिपत्यं दिवो वृष्टिर्वात स्पृत एकविंश स्तोमः॥
वसूनां भागो ऽसि रुद्राणामाधिपत्यं चतुष्पात्स्पृतं चतुर्विंशः स्तोमः॥
आदित्यानां भागो ऽसि मरुतामाधिपत्यं गर्भा स्पृताः पञ्चविंश स्तोमः॥
आदित्या भागो ऽसि पूष्ण आधिपत्यमोज स्पृतं त्रिणव स्तोमः॥
देवस्य सवितुर्भागो ऽसि बृहस्पतेराधिपत्यं समीचीर्दिश स्पृताश्चतुष्टोम स्तोमः॥
यवानां भागो ऽस्ययवानामाधिपत्यं प्रजा स्पृताश्चतुश्चत्वारिंश स्तोमः॥

ऋभूणां भागो ऽसि विश्वेषां देवानामाधिपत्यं भूतं निशान्तं त्रयस्त्रिंश स्तोमः ॥३॥

एकयास्तुवत प्रजा अधीयन्त प्रजापतिरधिपतिरासीत्। तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत्। पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्। सप्तभिरस्तुवत सप्तर्षयो ऽसृज्यन्त धाताधिपतिरासीत्। नवभिरस्तुवत पितरो ऽसृज्यन्तादितिरधिपत्न्यासीत्। एकादशभिरस्तुवतार्तवा असृज्यन्तर्तवो ऽधिपतय आसन्। त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरो ऽधिपतिरासीत्। पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रो ऽधिपतिरासीत्। सप्तदशभिरस्तुवत पशवो ऽसृज्यन्त बृहस्पतिरधिपतिरासीत्। नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्ताम्। एकविंशत्यास्तुवतैकशफाः पशवोऽसृज्यन्त वरुणो ऽधिपतिरासीत्। त्रयोविंशत्यावस्तुवत क्षुद्राः पशवो ऽसृज्यन्त पूषाधिपतिरासीत्। पञ्चविंशत्यास्तुवतारण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्। सप्तविंशत्यास्तुवत द्यावापृथिवी व्यैतां वसवो रुद्रा आदित्या अनुव्यायंस्त एवाधिपतय आसन्। नवविंशत्यास्तुवत वनस्पतयो ऽसृज्यन्त सोमो ऽधिपतिरासीत्। एकत्रिंशतास्तुवत प्रजा असृज्यन्त यवाश्चायवाश्चाधिपतय आसन्। त्रयस्त्रिंशतास्तुवत भूतान्यशाम्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥४॥

अग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व।
अधि नो ब्रूहि सुमना अहेडञ्छर्मंस्ते स्याम त्रिवरूथ उद्भौ॥
सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व।
अधि नो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान्॥
षोडश स्तोम ओजो द्रविणम्।
चतुश्चत्वारिंश स्तोमो वर्चो द्रविणम्॥
पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः॥
स्तोमापृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व॥

एवश्छन्दः। वरिवश्छन्दः। शम्भूश्छन्दः। परिभूश्छन्दः। आच्छच्छन्दः। मनश्छन्दः। व्यचश्छन्दः। सिन्धुश्छन्दः। समुद्रं छन्दः। सरिरं छन्दः। ककुप्छन्दः। त्रिककुप्छन्दः। काव्यं छन्दः। अङ्कुपं छन्दः। क्षुरो भ्रजश्छन्दः। अक्षरपंक्तिश्छन्दः। पदपंक्तिश्छन्दः। विष्टारपंक्तिश्छन्दः। आच्छच्छन्दः। प्रच्छच्छन्दः। संयच्छन्दः। वियच्छन्दः। बृहच्छन्दः। रथन्तरं छन्दः। निकायश्छन्दः। वीवधश्छन्दः। गिरश्छन्दः। भ्रजश्छन्दः। संस्तुप्छन्दः। अनुष्टुप्छन्दः। एवश्छन्दः। वरिवश्छन्दः। वयश्छन्दः। वयस्कृच्छन्दः। विशालं छन्दः। विष्पर्धाश्छन्दः। छदिश्छन्दः। दूरोहणं छन्दः। तन्द्रं छन्दः। अङ्काङ्कं छन्दः ॥५॥

रश्मिरसि क्षयाय त्वा क्षयं जिन्व। प्रेतिरसि धर्मणे त्वा धर्मं जिन्व। अन्वितिरसि दिवे त्वा दिवं जिन्व। संधिरस्यन्तरिक्षाय त्वान्तरिक्षं जिन्व। प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व। विष्टम्भो ऽसि वृष्ट्यै त्वा वृष्टिं जिन्व। प्रवास्यह्ने त्वाहर्जिन्व। अनुवासि रात्र्यै त्वा रात्रीं जिन्व। उशिगसि वसुभ्यस्त्वा वसूञ्जिन्व। प्रकेतो ऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व। सुदितिरस्यादित्येभ्यस्त्वादित्याञ्जिन्व। ओजो ऽसि पितृभ्यस्त्वा पितॄञ्जिन्व। तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व। पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व। रेवदस्योषधीभ्यस्त्वौषधीर्जिन्व। अभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्व। अधिपतिरसि प्राणाय त्वा प्राणं जिन्व। धरुणो ऽस्यपानाय त्वापानं जिन्व। संसर्पो ऽसि चक्षुसे त्वा चक्षुर्जिन्व। वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व। त्रिवृदसि त्रिवृते त्वा। सवृदसि सवृते त्वा। प्रवृदसि प्रवृते त्वा। अनुवृदस्यनूवृते त्वा। संरोहो ऽसि। विरोहो ऽसि। प्ररोहो ऽसि। अनुरोहो ऽसि। वसुको ऽसि। वस्यष्टिरसि। वेषश्रीरसि। देवस्य सवितुः प्रसवे बृहस्पतये स्तुत ॥६॥

राज्ञ्यसि प्राची दिक्। वसवस्ते देवा अधिपतयः। अग्निर्हेतीनां प्रतिधर्ता। त्रिवृत्त्वा स्तोमः पृथिव्यां श्रयतु। आज्यमुक्थमव्यथायै स्तभ्नातु। रथन्तरं साम प्रतिष्ठित्या अन्तरिक्षम्। ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा

प्रथन्तु। विधर्ता चायमधिपतिः। ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु।

विराडसि दक्षिणा दिक्। रुद्रास्ते देवा अधिपतयः। सोमो हेतीनां प्रतिधर्ता। पञ्चदशस्त्वा स्तोमः पृथिव्यां श्रयतु। प्रउगमुक्थमव्यथायै स्तभ्नातु। बृहत्साम प्रतिष्ठित्या अन्तरिक्षम्। ऋषयस्त्वा प्रथमजाः॥

सम्राडसि प्रतीची दिक्। आदित्यास्ते देवा अधिपतयः। इन्द्रो हेतीनां प्रतिधर्ता। सप्तदशस्त्वा स्तोमः पृथिव्यां श्रयतु। मरुत्वतीयमुक्थमव्यथायै स्तभ्नातु। वैरूपं साम प्रतिष्ठित्या अन्तरिक्षम्। ऋषयस्त्वा प्रथमजाः॥

स्वराडस्युदीची दिक्। मरुतस्ते देवा अधिपतयः। वरुणो हेतीनां प्रतिधर्ता। एकविंशस्त्वा स्तोमः पृथिव्यां श्रयतु। निष्केवल्यमुक्थमव्यथायै स्तभ्नातु। वैराजं साम प्रतिष्ठित्या अन्तरिक्षम्। ऋषयस्त्वा प्रथमजाः॥

अधिपत्न्यसि बृहती दिक्। विश्वे ते देवा अधिपतयः। बृहस्पतिर्हेतीनां प्रतिधर्ता। त्रिणवत्रयस्त्रिंशौ त्वा स्तोमौ पृथिव्यां श्रयताम्। वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्तभ्नीताम्। शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षम्। ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु। विधर्ता चायमधिपतिः। ते त्वा सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानं च सादयन्तु ॥७॥

अयं पुरो हरिकेशः सूर्यरश्मिः। तस्य रथकृत्सश्च रथौजाश्च सेनानीग्रामण्यौ। पुञ्जिकस्थला च कृतस्थला चाप्सरसौ। यातुधाना हेतिः। रक्षांसि प्रहेतिः। ते नः पान्तु। ते नो ऽवन्तु। ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि॥

अयं दक्षिणा विश्वकर्मा। तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्रामण्यौ। मेनका च सहजन्या चाप्सरसौ। दङ्क्ष्णवः पशवो हेतिः। पौरुषेयो वधः प्रहेतिः। ते नः पान्तु॥

अयं पश्चाद्विश्वव्यचाः(?) — अयं पश्चाद्विददद्वसुः। तस्य रथप्रोथश्चासमरथश्च सेनानीग्रामण्यौ। प्रम्लोचन्ती चानुम्लोचन्ती चाप्सरसौ। व्याघ्रा हेतिः। सर्पाः प्रहेतिः। ते नः पान्तु।

अयमुत्तरात्संयद्वसुः। तस्य ताक्ष्र्यश्चारिष्टनेमिश्च सेनानीग्रामण्यौ। विश्वाची च घृताची चाप्सरसौ। आपो हेतिः। वातः प्रहेतिः। ते नः पान्तु।

अयमुपर्यर्वाग्वसुः। तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ। उर्वशी च पूर्वचित्तिश्चाप्सरसौ। अवस्फूर्जन् हेतिः। विद्युत्प्रहेतिः। ते नः पान्तु। ते नो ऽवन्तु। ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥८॥

आयोस्त्वा सदने सादयाम्यवतश्छायायाम्। नमः समुद्राय। नमः समुद्रस्य चक्षसे॥
प्रोथदश्वो न यवसे ऽविष्यन्यदा महः संवरणाद्व्यस्थात्।
आदस्य वातो अनुवाति शोचिरध स्म ते व्रजनमस्तु कृष्णम्॥

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणाय व्यानायापानाय। विश्वं ज्योतिर्यच्छ। अग्निष्टे ऽधिपतिः। विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणाय व्यानायापानाय। विश्वं ज्योतिर्यच्छ। वायुष्टे ऽधिपतिः। प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणाय व्यानायापानाय। विश्वं ज्योतिर्यच्छ। सूर्यस्ते ऽधिपतिः।

मधुश्च माधवश्च वासन्तिकावृतू। अग्नेरन्तःश्लेषो ऽसि॥
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः॥
ये अग्नयः समनसो ऽन्तरा द्यावापृथिवी।
इमे वासन्तिकावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु॥
शुक्रश्च शुचिश्च ग्रैष्मावृतू। अग्नेरन्तःश्लेषो ऽसि॥
कल्पेताम्॥

नभश्च नभस्यश्च वार्षिकावृतू। अग्नेरन्तःश्लेषो ऽसि॥
कल्पेताम्॥
इषश्चोर्जश्च शारदावृतू। अग्नेरन्तःश्लेषो ऽसि॥
कल्पेताम्॥
सहश्च सहस्यश्च हैमन्तिकावृतू। अग्नेरन्तःश्लेषो ऽसि॥
कल्पेताम्॥
तपश्च तपस्यश्च शैशिरावृतू। अग्नेरन्तःश्लेषो ऽसि॥
कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधयः।
कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः॥
ये अग्नयः समनसो ऽन्तरा द्यावापृथिवी।
इमे शैशिरावृतू अभिकल्पमाना इन्द्रमिव देवा अभिसंविशन्तु॥

सहस्रस्य प्रमासि। सहस्रस्य प्रतिमासि। सहस्रस्योन्मासि। साहस्रो ऽसि। सहस्राय त्वा। इमा मे अग्न इष्टका धेनवः सन्तु॥

एका च दश च। शतं च सहस्रं च। अयुतं च प्रयुतं च। नियुतं चार्बुदं च। अर्बुदं च न्यर्बुदं च। समुद्रश्च मध्यं च। अन्तश्च परार्धश्च। ता मे अग्न इष्टका धेनवः सन्तु॥

ऋतवः स्थर्तावृधः। ऋतुष्ठा स्थर्तुस्पृशो घृतश्च्युतो मधुश्च्युत ऊर्जस्वतीः स्वधायिनीर्विराजो नाम कामदुघाः ॥९॥

इति कपिष्ठलकठसंहितायां षड्विंशतितमोऽध्यायः।

नमस्ते रुद्र मन्यवे बाहुभ्यामुत ते नमः।
उतो त इषवे नमः॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी।
तया नस्तन्वा शंतमया गिरिशन्ताभिचाकशीहि॥
यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत्॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्।
अहींश्च सर्वाञ्जम्भयन्सर्वाश्च यातुधान्यो ऽधराचीः परासुव॥
असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः।
ये चेमे रुद्रा अभितो दिक्षु श्रिताः सहस्रशो ऽवैषां हेड ईमहे॥
असौ यो ऽवसर्पति नीलग्रीवो विलोहितः।
उतैनं गोपा अदृश्रन्नुतैनमुदहार्यः।
स दृष्टः किं करिष्यति॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानो ऽहं तेभ्यो अकरं नमः॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्।

याश्च ते हस्त इषवः परा ता भगवो वप॥
विज्यं धनुः कपर्दिनो विशल्यो बाणवानुत।
अनेशन्नस्येषव आभुरस्य निषङ्गधिः॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः।
तयास्मान्विश्वतस्त्वमयक्ष्मेण परिभुज॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः।
अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥
नमांसि त आयुधायानातताय धृष्णवे।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥
अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे।
निशीर्य शल्यानां मुखं शिवो नः सुमना भव॥
या त इषुः शिवतमा शिवं बभूव ते धनुः।
शिव शरव्या या तव तया नो मृड जीवसे॥१॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः। नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमः। नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमः। नमो बभ्लुशाय व्याधिने ऽन्नानां पतये नमः। नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः। नमो भवस्य हेत्यै जगतस्पये नमः। नमो रुद्रायाततायिने क्षेत्राणां पतये नमः। नमः सूतायाहन्त्वाय वनानां पतये नमः। नमो रोहिताय स्थपतये वृक्षाणां पतये नमः। नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमः। नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमः। नम आक्रन्दयत उच्चैर्घोषाय सत्त्वानां पतये नमः। नमः कृत्स्नवीताय धावते पत्तीनां पतये नमः। नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमः। नमो निषङ्गिणे ककुभाय स्तेनानां पतेय नमः। नमो वञ्चते परिवञ्चते स्तायूनां पतये नमः। नमोः निचराय परिचरायारण्यानां पतये नमः। नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमः। नमः सृगायुभ्यो जिघांसद्भ्यो मुष्णतां पतये नमः। नमो ऽसिमद्भ्यो नक्तं चरेभ्यः प्रकृन्तानां पतये नमः। नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः॥2॥

नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमः। नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः। नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमः। नम आयच्छद्भ्यो ऽस्यद्भ्यश्च वो नमः। नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमः। नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमः। नमः शयानेभ्य आसीनेभ्यश्च वो नमः। नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः। नमः सभाभ्यः सभापतिभ्यश्च वो नमः। नमो ऽश्वेभ्यो ऽश्वपतिभ्यश्च वो नमः। नम आव्याधिनीभ्यो विविध्यद्भ्यश्च वो नमः। नम उगणाभ्यस्तृंहतीभ्यश्च वो नमः। नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः। नमो गणेभ्यो गणपतिभ्यश्च वो नमः। नमः कृच्छ्रेभ्यः कृच्छ्रपतिभ्यश्च वो नमः। नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः। नमः सेनाभ्यः सेनानीभ्यश्च वो नमः। नमो रथिभ्यो वरूथिभ्यश्च वो नमः। नमो महद्भ्यो ऽर्भकेभ्यश्च वो नमः। नमः क्षत्तृभ्यःसंग्रहीतृभ्यश्च वो नमः। नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः। नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमः। नमः पुञ्जिष्ठेभ्यो निषादेभ्यश्च वो नमः। नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः। नमः श्वभ्यः श्वपतिभ्यश्च वो नमः। नमो भवाय च रुद्राय च। नमः शर्वाय च पशुपतये च। नमो नीलग्रीवाय च शितिकण्ठाय च। नमः कपर्दिने च व्युप्तकेशाय च। नमः सहस्राक्षाय च शतधन्वने च ॥३॥

नमो गिरिशाय च शिपिविष्टाय च। नमो मीढुष्टमाय चेषुमते च। नमो ह्रस्वाय च वामनाय च। नमो बृहते च वर्षीयसे च। नमो वृद्धाय च सुवृद्धिने च। नमो ऽग्र्याय च प्रथमाय च। नम आशवे चाजिराय च। नमः शीभ्याय च शीघ्राय च। नम ऊर्म्याय चावस्वन्याय च। नमो नाद्याय च द्वीप्याय च। नमो ज्येष्ठाय च कनिष्ठाय च। नमः पूर्वजाय चापरजाय च। नमो मध्यमाय चापगल्भाय च। नमो बुध्न्याय च जघन्याय च। नमः सोभ्याय च प्रतिसर्याय च। नम

आशुषेणाय चाशुरथाय च। नमो बिल्मिने च कवचिने च। नमो वर्मिणे च वरूथिने च। नमः शूराय चावभेदिने च।
नमः श्रुताय च श्रुतसेनाय च। नमो याम्याय च क्षेम्याय च। नम उर्वर्याय च खल्याय च। नमः श्रवाय च प्रतिश्रवाय
च। नमः श्लोक्याय चावसान्याय च। नमो कक्ष्याय च वन्याय च। नमो दुन्दुभ्याय चाहनन्याय च। नमो धृष्णवे च
प्रमृशाय च। नमो निषङ्गिणे चेषुधिमते च। नमस्तीक्ष्णेषवे चायुधिने च। नमः स्वायुधाय च सुधन्वने च ॥४॥
नम स्रुत्याय च पथ्याय च। नमः काट्याय च नीप्याय च। नमो नाद्याय च वैशन्ताय च। नमः कुल्याय च
सरस्याय च। नमः कूप्याय चावट्याय च। नमो वर्ष्याय चावर्ष्याय च। नमो मेघ्याय च विद्युत्याय च। नमो वीध्रियाय
चातप्याय च। नमो वात्याय च रेष्म्याय च। नमो वास्तव्याय च वास्तुपाय च। नमः सोमाय च रुद्राय च। नमस्ताम्राय
चारुणाय च। नमः शंगवे च पशुपतये च। नम उग्राय च भीमाय च। नमो हन्त्रे च हनीयसे च। नमो ऽग्रेवधाय च
दूरेवधाय च। नमो वृक्षेभ्यो हरिकेशेभ्यः। नमस्ताराय। नमः शम्भवे च मयोभवे च। नमः शंकराय च मयस्कराय च।
नमः शिवाय च शिवतराय च। नमः किंशिलाय च क्षयणाय च। नम इरिण्याय च प्रपथ्याय च। नमः पुलस्तिने च
कपर्दिने च। नमो गोष्ठ्याय च गृह्याय च। नमस्तल्प्याय च गेह्याय च। नमः पार्याय चावार्याय च। नमः प्रतरणाय
चोत्तरणाय च। नमस्तीर्थ्याय च कूल्याय च। नमः फेन्याय च शष्प्याय च। नमः सिकत्याय च प्रवाह्याय च। नमो
ह्रदय्याय च निवेष्प्याय च। नमः काट्याय च गह्वरेष्ठाय च। नमः शुष्क्याय च हरित्याय च। नमो लोप्याय चोलप्याय
च। नमः पांसव्याय च रजस्याय च। नमः सूर्म्याय चोर्म्याय च। नमः पर्णाय च पर्णशदाय च। नम आखिदते च
प्रखिदते च। नमो ऽभिघ्नते चापकुम्बताय च। नम आखिदाय च विखिदाय च ॥५॥

नमो वः किरिकेभ्यो देवानां हृदयेभ्यः। नमो विचिन्वत्केभ्यः। नमो विक्षिणत्केभ्यः। नम आनिर्हतेभ्यः॥
द्रापे अन्धसस्पते दरिद्र नीललोहित।
आसां प्रजानामेषां पुरुषाणामेषां पशूनाम्।
मा भेर्मा रुरो मा नः किंचनाममत्।
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।
यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्॥
या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड॥
मीढुष्टम शिवतम शिवो नः सुमना भव।
परमे वृक्ष आयुधं निधाय कृत्तिं वसान उच्चर पिनाकं बिभ्रदुच्चर॥
विकिरिद्र विलोहित नमस्ते अस्तु भगवः।
यास्ते सहस्रं हेतयो ऽन्यमस्मन्निवपन्तु ताः॥
सहस्रधा सहस्राणि हेतयस्तव बाह्वोः।
तासामीशानो भगवः पराचीना मुखा कुरु॥
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम्।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये अस्मिन्महत्यर्णवे अन्तरिक्षे भवा अधि।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः।

तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये नीलग्रीवा शितिकण्ठाः शर्वा अधः क्षमाचराः।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये वनेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये ऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये पथीनां पथिरक्षय ईलमृडा यवधः।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥
य एतावन्तो वा भूयांसो वा दिशो रुद्रा वितस्थिरे।
तेषां सहस्रयोजने ऽव धन्वानि तन्मसि॥

नमो अस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमो अस्तु। ते नो मृडयन्तु। ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि॥

नमो अस्तु रुद्रेभ्यो ये ऽन्तरिक्षे येषां वात इषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमो अस्तु। ते नो मृडयन्तु। ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि॥

नमो अस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमो अस्तु। ते नो मृडयन्तु। ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दधामि ॥६॥

इति कपिष्ठलकठसंहितायां सप्तविंशतितमो ऽध्यायः॥

अश्मन्नूर्जं पर्वते शिश्रियाणामद्भ्य
ओषधीभ्यो वनस्पतिभ्यो अधि संभृताम्।
तां न ऊर्जं धत्त मरुतः संरराणा
अश्मंस्ते क्षुद्द्विष्मस्ते ते शुगृच्छतु।
समुद्रस्य त्वावकयाग्ने परिव्ययामसि।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव॥
हिमस्य त्वा जरायुणाग्ने परिव्ययामसि।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव॥
उप ज्मन्नुप वेतसे ऽवतर नदीष्वा।
अग्ने पित्तमपामसि मण्डूकि ताभिरागहि।
सेमं नो यज्ञं पावकवर्णं शिवं कृधि।
अपामिदं न्ययनं समुद्रस्य विमोचनम्।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव॥
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया।

आ देवान्वक्षि यक्षि च।
पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः॥
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव॥
नृषदे वडप्सुषदे वड्वनसदे वड् बर्हिषदे वट् स्वर्विदे वट्॥
ये देवा देवानां यज्ञिया यज्ञियानां संवत्सरीणमुप भागमासते।
अहुतादो हविषो यज्ञे अस्मिन्स्वयं पिबन्तु मधुनो घृतस्य॥
ये देवा देवेभ्यो अधि देवत्वमायन्ये ब्रह्मणः पुर एतारो अस्य।
येभ्यो नर्ते पवते धाम किं चन न ते दिवो पृथिव्या अधि स्नुषु॥
प्राणदा व्यानदा अपानदा वर्चोदा वरिवोदाः।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव ॥१॥
अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम्।
अग्निर्नो वनते रयिम्॥
य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवरां आविवेश॥
विश्वकर्मा विमना यो व्योमा धाता विधाता परमोत संदृक्।
तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन्पर एकमाहुः॥
त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना।
असूर्ते सूर्ते रजसि निषत्ता ये भूतानि समकृण्वन्निमानि॥
यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सन्निनाय।
यो देवानां नामधा एको अस्ति तं संप्रश्नं भुवना यन्त्यन्या॥
न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति॥
विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद् द्वितीयः।
तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा॥
परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे॥
तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त सर्वे।
अजस्य नाभावध्येकमर्पितं तस्मिन्विश्वं भुवनमधि श्रितम्॥
चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने।
यदिद् द्यावापृथिवी अप्रथेतामादिदन्ता अददृहन्त पूर्वे॥
किं स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः।
मनीषिणो मनसा पृच्छतेदु तदध्यतिष्ठद्भुवनानि धारयन्॥
किं स्विदासीदारम्भणमधिष्ठानं कतमत्स्वित्कथासीत्।
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः॥

यो विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः॥
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं जुषाणः॥
विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वं स्वा हि ते।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु॥
विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम्।
तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत्॥
वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्याहुवेम।
स नो नेदिष्ठं हवनान्यागमद्विश्वशंभूरवसे साधुकर्मा॥२॥
उदेनमुत्तरां नयाग्ने घृतेनाहुत।
रायस्पोषेण संसृज प्रजा च बहुं कृधि।
इन्द्रेमं प्रतरं कृधि सजातानामसद्वशी।
समेनं वर्चसा सृज देवेभ्यो भागदा असत्॥
यस्य कुर्मो गृहे हविरग्ने वर्धया त्वम्।
तस्मै देवा अधिब्रुवन्नयं च ब्रह्मणस्पतिः॥
उदु त्वा विश्वे देवाः॥
पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषे अधि यज्ञो अस्थात्॥
समिद्धे अग्नावधि मामहान उक्थपत्र ईड्यो गृहीतः।
तप्तं घर्मं परिगृह्यायजन्तोर्जा यद्यज्ञमयजन्त देवाः॥
दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमनाः शतपाः।
परिगृह्य यज्ञमयान्॥
हरिकेशः सूर्यरश्मिः पुरस्तात्सविता ज्योतिरुदयां अजस्रम्।
तस्य पूषा प्रसवे याति देवः संपश्यन्विश्वा भुवनानि गोपाः॥
देवा देवेभ्यो अध्वर्यन्तो अस्थुर्वीतं शमितं शमिता यजध्यै।
तुर्यो यज्ञो यत्र हव्यमेति ततो पाका आशिषो नो जुषन्ताम्॥
विमान एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम्।
स विश्वाची अभिचष्टे घृताची अन्तरा पूर्वमपरं च केतुम्॥
उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेश।
मध्ये दिवो निशितः पृश्निरश्मा विचक्रमे रजसः पात्यन्तौ॥
इन्द्रं विश्वा अवीवृधन्समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥
सुब्रह्मर्यज्ञ आ च वक्षत्। यक्षदग्निर्देवो देवां आ च वक्षत्॥
वाजस्य मा प्रसवेनोद्ग्राभेणोदजीगृभम्।
अथा सपत्नानिन्द्रो मे निग्राभेणाधरां अकः॥

उद्ग्राभश्च निग्राभश्च ब्रह्म देवां अवीवृधत्।
अथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् ॥३॥
क्रमध्वमग्निना नाकमुख्यं हस्तेषु बिभ्रतः।
दिवस्पृष्ठं स्वर्गत्वा मिश्रा देवेभिराध्वम्॥
प्राचीमनु प्रदिशं प्रेहि विद्वान्॥
पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम्।
दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगामहम्।
स्वर्यन्तो नापेक्षन्त आ द्यां रोहन्ति रोदसी।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे॥
अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम्।
इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति॥
नक्तोषासा॥
अग्ने सहस्राक्ष शतमूर्धञ्छततेजः शतं ते प्राणाः सहस्रं व्यानाः।
त्वं साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा॥
सुपर्णो ऽसि गरुत्मान्पृष्ठे पृथिव्याः सीद।
भासान्तरिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृंह॥
आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्व योनिमासीद साध्या।
अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत॥
तां सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम्।
यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गाम्॥
अग्ने विधेम ते परमे जन्मन्विधेम स्तोमैरवरे सधस्थे।
यस्माद्योनेरुदारिथा यजा तं प्र त्वे हवींषि जुहुमः समिद्धे॥
प्रेद्धो अग्ने दीदिहि पुरो नो ऽजस्रया सूर्म्या यविष्ठ।
त्वां शश्वन्त उपयन्ति वाजाः॥
सप्त ते अग्ने समिधः ॥४॥
आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।
संक्रन्दनो ऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः॥
संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा॥
स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन।
संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता॥
बृहस्पते परिदीया रथेन रक्षोहामित्रां अपबाधमानः।
प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्।
बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्॥
गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा।

इमं सजाता अनुवीरयध्वमिन्द्रं सखायो अनु संरभध्वम्॥
अभि गोत्राणि सहसा गाहमानो ऽदयो वीरः शतमन्युरिन्द्रः।
दुश्च्यवनः पृतनाषाऽयुध्यो ऽस्माकं सेना अवतु प्र युत्सु॥
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्तु मध्ये॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु।
अस्माकं वीरा उत्तरे भवन्त्वस्मां उ देवा अवता हवेषु ॥५॥

शुक्रज्योतिश्च चित्रज्योतिश्च। सत्यज्योतिश्च ज्योतिष्मांश्च। सत्यश्चर्तपाश्चात्यंहाः। ईदृङ् चान्यादृङ् च। सदृङ् च प्रतिसदृङ् च। मितश्च संमितश्च सभराः। ऋतश्च सत्यश्च। ध्रुवश्च धरुणश्च। धर्ता च विधर्ता च विधारय। ऋतजिच्च सत्यजिच्च। सेनजिच्च सुषेणश्च। अन्त्यमित्रश्च दूरेअमित्रश्च गणः। ईदृक्षास एतादृक्षास ऊ षु णः। सदृक्षासः प्रतिसदृक्षास एतन। मितासश्च संमितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन्। इन्द्रं दैवीर्विशो मरुतो ऽनुवर्त्मानो ऽभवन्। यथेन्द्रं दैवीर्विशो मरुतो ऽनुवर्त्मानो ऽभवन्नेवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥६॥

वाजश्च मे प्रसवश्च मे। प्रयतिश्च मे प्रसितिश्च मे। धीतिश्च मे क्रतुश्च मे। स्वरश्च मे श्लोकश्च मे। श्रावश्च मे श्रुतिश्च मे। ज्योतिश्च मे स्वश्च मे। प्राणश्च मे व्यानश्च मे। अपानश्च मे ऽसुश्च मे। चित्तं च म आधीतं च मे। वाक् च मे मनश्च मे। चक्षुश्च मे श्रोत्रं च मे। दक्षश्च मे बलं च मे। ओजश्च मे सहश्च मे। आत्मा च मे तनूश्च मे। शर्म च मे वर्म च मे। अङ्गानि च मे ऽस्थीनि च मे। परूंषि च मे शरीराणि च मे। आयुश्च मे जरा च मे। ज्यैष्ठ्यं च म आधिपत्यं च मे। मन्युश्च मे भामश्च मे। अमश्च मे ऽम्भश्च मे। जेमा च मे महिमा च मे। वरिमा च मे प्रथिमा च मे। वर्षिमा च मे द्राघिमा च मे। वृद्धं च मे वृद्धिश्च मे ॥७॥

सत्यं च मे श्रद्धा च मे। जगच्च मे धनं च मे। क्रीडा च मे मोदश्च मे। वशश्च मे त्विषिश्च मे। सूक्तं च मे सुकृतं च मे। जातं च मे जनिष्यमाणं च मे। वित्तं च मे वेद्यं च मे। भूतं च मे भविष्यश्च मे। सुगं च मे सुपथ्यं च मे। ऋद्धं च म ऋद्धिश्च मे। क्लृप्तं च मे क्लृप्तिश्च मे। मतिश्च मे सुमतिश्च मे। शं च मे मयश्च मे। प्रियं च मे ऽनुकामश्च मे। कामश्च मे सौमनसश्च मे। भगश्च मे द्रविणं च मे। भद्रं च मे श्रेयश्च मे। वस्यश्च मे यशश्च मे। यन्ता च मे धर्ता च मे। क्षेमश्च मे धृतिश्च मे। विश्वं च मे महश्च मे। संविच्च मे ज्ञात्रं च मे। सूश्च मे प्रसूश्च मे। सीलं च मे लायश्च मे ॥८॥

ऋतं च मे ऽमृतं च मे। अयक्ष्मं च मे ऽनामयच्च मे। जीवातुश्च मे दीर्घायुत्वं च मे। अनमित्रं च मे ऽभयं च मे। सुगं च मे शयनं च मे। सूषाश्च मे सुदिनं च मे। ऊर्क् च मे सूनृता च मे। पयश्च मे रसश्च मे। घृतं च मे मधु च मे। सग्धिश्च मे सपीतिश्च मे। कृषिश्च मे वृष्टिश्च मे। जैत्रं च म औद्भिदं च मे। रयिश्च मे रायश्च मे। पुष्टं च मे पुष्टिश्च मे। विभु च मे प्रभु च मे। पूर्णं च मे पूर्णतरं च मे। कुयवं च मे ऽक्षितिश्च मे। अन्नं च मे ऽक्षुच्च मे। व्रीहयश्च मे यवाश्च मे। माषाश्च मे तिलाश्च मे। नीवाराश्च मे श्यामाकाश्च मे। अणवश्च मे प्रियङ्गवश्च मे। गोधूमाश्च मे मसूराश्च मे। मुद्गाश्च मे खल्वाश्च मे ॥९॥

अश्मा च मे मृत्तिका च मे। गिरयश्च मे पर्वताश्च मे। सिकताश्च मे वनस्पतयश्च मे। हिरण्यं च मे ऽयश्च मे। सीसं च मे त्रपु च मे। श्यामं च मे लोहितायसं च मे। अग्निश्च म आपश्च मे। वीरुधश्च म ओषधयश्च मे। कृष्टपच्यं च मे ऽकृष्टपच्यं च मे। ग्राम्याश्च मे पशव आरण्याश्च मे। वित्तं च मे वित्तिश्च मे। भूतं च मे भूतिश्च मे। वसु च मे वसतिश्च मे। कर्म च मे शक्तिश्च मे। अर्थश्च म एमश्च मे। इत्या च मे गतिश्च मे। अग्निश्च म इन्द्रश्च मे। सोमश्च म इन्द्रश्च मे। सविता च म इन्द्रश्च मे। सरस्वती च म इन्द्रश्च मे। पूषा च म इन्द्रश्च मे। बृहस्पतिश्च म इन्द्रश्च मे। मित्रश्च म इन्द्रश्च मे।

वरुणश्च म इन्द्रश्च मे। धाता च म इन्द्रश्च मे। त्वष्टा च म इन्द्रश्च मे। मरुतश्च म इन्द्रश्च मे। विश्वे च मे देवा इन्द्रश्च मे। पृथिवी च म इन्द्रश्च मे। अन्तरिक्षं च म इन्द्रश्च मे। द्यौश्च म इन्द्रश्च मे। समाश्च म इन्द्रश्च मे। नक्षत्राणि च म इन्द्रश्च मे। दिशश्च म इन्द्रश्च मे ॥10॥

अंशुश्च मे रश्मिश्च मे। अदाभ्यश्च मे ऽधिपतिश्च मे। उपांशुश्च मे ऽन्तर्यामश्च मे। ऐन्द्रवायवश्च मे मैत्रावरुणश्च मे। आश्विनश्च मे प्रतिप्रस्थानश्च मे। शुक्रश्च मे मन्थी च मे। आग्रयणश्च मे क्षुल्लकवैश्वदेवश्च मे। ध्रुवश्च मे वैश्वानरश्च मे। ऐन्द्राग्नश्च मे वैश्वदेवश्च मे। मरुत्वतीयश्च मे महेन्द्रीयश्च मे। सावित्रश्च मे सारस्वतश्च मे। पात्नीवतश्च मे हारियोजनश्च मे। स्रुचश्च मे चमसाश्च मे। वायव्यानि च मे द्रोणकलशश्च मे। पूतभृच्च मे ऽपूतभृच्च मे। ग्रावाणश्च मे ऽधिषवणे च मे। अवभृथश्च मे स्वगाकारश्च मे। अग्निश्च मे घर्मश्च मे। अर्कश्च मे सूर्यश्च मे। प्राणश्च मे ऽश्वमेधश्च मे। पृथिवी च मे ऽदितिश्च मे। दितिश्च मे द्यौश्च मे। शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्ताम्। व्रतं चर्तुश्च। संवत्सरश्च तपश्च। अहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥११॥

इति कपिष्ठलकठसंहितायामष्टाविंशतितमोऽध्यायः

त्र्यविश्च मे त्र्यवी च मे। दित्यवाट् च मे दित्यौही च मे। पञ्चाविश्च मे पञ्चावी च मे। त्रिवत्सश्च मे त्रिवत्सा च मे। तुर्यवाट् च मे तुर्यौही च मे। पष्ठवाट् च मे पष्ठौही च मे। उक्षा च मे वशा च मे। अनड्वांश्च मे धेनुश्च मे। ऋषभश्च मे वेहच्च मे। एका च मे तिस्रश्च मे। तिस्रश्च मे त्रयस्त्रिंशच्च मे। चतस्रश्च मे ऽष्टौ च मे। अष्टौ च मे ऽष्टाचत्वारिंशच्च मे॥

वाजश्च प्रसवश्च। अपिजश्च क्रतुश्च। वाक्पतिश्च वसुश्च। स्वर्मूर्ध्नो मूर्धा। वैयशनो व्यश्नान्। आन्त्योऽन्त्यः। भौवनो भुवनस्पतिः। प्रजापतिरधिपतिः। इयं ते राट्। मित्राय यन्तासि यमनः। ऊर्जे त्वा। वृष्ट्यै त्वा। प्रजानां त्वाधिपत्याय। आयुर्यज्ञेन कल्पताम्। यज्ञो यज्ञेन कल्पताम्। ऋक् च साम च। स्तोमश्च यजुश्च। बृहच्च रथन्तरं च। स्वर्देवा अगन्म प्रजापतेः प्रजा अभूवन्नमृता अभूम वट् स्वाहा ॥१॥
आ मा वाजस्य प्रसवो जगम्यात्॥
वाजस्य नु प्रसवः सुषुवे ऽग्रे॥
वाजस्येदं प्रसव आबभूव॥
वाजस्य नु प्रसवः शिश्रिये देवी॥
सोमं राजानमवस इन्द्रं दानाय चोदय।
विष्णुं वाचं सरस्वतीं सवितारं च वाजिनम्॥
प्र नो यच्छत्वर्यमा प्र पूषा प्र बृहस्पतिः।
प्र वाग्देवी ददातु नः॥
अग्ने अच्छा वदेह नः॥
विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः।
विश्वे मा देवा अवसागमन्निह विश्वमस्तु द्रविणं वाजो अस्मे॥
वाजस्य नु प्रसवे मातरं महीम्॥
वाजो मे सप्त प्रदिशः॥
वाजो मे अद्य प्रसुवाति दानं वाजो देवान्हविषा वर्धयाति।
वाजस्य हि प्रसवे नन्नमीति विश्वा आशा वाजपतिर्जयेयम्॥
वाजः पुरस्तादुत मध्यतो नो वाजो देवानृतुभिः कल्पयाति।
वाजस्य हि प्रसवे नन्नमीति सर्वा आशा वाजपतिर्जयेयम्॥

सं मा सृजामि पयसा पृथिव्याः सं मा सृजाम्यद्भिरोषधीभिः।
सो ऽहं वाजं सनोम्यग्ने॥
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः।
पयस्वतीः प्रदिशः सन्तु मह्यम् ॥२॥

ऋताषाडृतधामाग्निर्गन्धर्वः। तस्यौषधयो ऽप्सरसो मुदा नाम। स न इदं ब्रह्म क्षत्रं पातु। तस्मै स्वाहा वट्। ताभ्यः स्वाहा वट्। सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः। तस्य नक्षत्राण्यप्सरसो वेकुरयो नाम। स न इदम्। संहितो विश्वसामा सूर्यो गन्धर्वः। तस्य मरीचयोऽप्सरस आयुवो नाम। स न इदम्। भुज्युः सुपर्णो यज्ञो गन्धर्वः। तस्य दक्षिणा अप्सरस स्तवा नाम। स न इदम्।
इषिरो विश्वव्यचा वातो गन्धर्वः। तस्यापो ऽप्सरस ऊर्जो नाम। स न इदम्। प्रजापतिर्विश्वकर्मा मनो गन्धर्वः। तस्यर्क्सामान्यप्सरस एष्टयो नाम। स न इदं ब्रह्म क्षत्रं पातु। तस्मै स्वाहा वट्। ताभ्यः स्वाहा वट्॥
स नो भुवनस्य पते यस्य त उपरि गृहा विराट्पते।
अस्मै ब्रह्मणे ऽस्मै क्षत्राय महि शर्म यच्छ स्वाहा॥

समुद्रो ऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा। अवस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहा। मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहा ॥३॥
अग्निं युनज्मि शवसा घृतेन दिव्यं सुपर्णं वयसा बृहन्तम्।
तेन वयं पतेम ब्रध्नस्य विष्टपं स्वो रुहाणा अधि नाक उत्तमे॥
इमौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंस्यग्ने।
ताभ्यां वयं पतेम सुकृतामु लोकं यत्रर्षयो जग्मुः प्रथमाः पुराणाः॥
इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्युः।
महान्सधस्थे ध्रुव आ निषत्तो नमस्ते अस्तु मा मा हिंसीः॥
दिवो मूर्धासि पृथिव्या नाभिरूर्गपामोषधीनाम्।
विश्वायुः शर्म सप्रथा नमस्पथे विश्वस्य मूर्धन्नधितिष्ठसि श्रितः॥
समुद्रे ते हृदयमन्तरायुरपो देह्युदधिं भिन्धि।
दिवस्पर्जन्यादन्तरिक्षात्पृथिव्यास्ततो मा वृष्ट्याव॥
समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या।
सं दिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशः पृथिव्याम्॥
सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय।
मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये॥
त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणो भवा नः।
सपत्नहाग्ने अभिमातिजित्स्वे गये जागृह्यप्रयुच्छन्॥
इहैवाग्ने अधिधारया रयिं मा त्वा निक्रन्पूर्वचितो निकारिणः।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृता॥
क्षत्रेणाग्ने स्वेन संरभस्व मित्रेणाग्ने मित्रधेये यतस्व।
सजातानां मध्यमेष्ठेयाय राज्ञामग्ने विहव्यो दीदिहीह॥
अति निहो अति स्रिधो अत्यचित्तिमति निर्ऋतिमद्य।
विश्वा ह्यग्ने दुरिता तर त्वमथास्मभ्यं सहवीरं रयिं दाः॥

अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद्दीदिहीह।
विश्वा अमीवाः प्रमुञ्चन्मानुषीभ्यः शिवेभिरद्य परिपाहि नो वृधे॥
अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः।
प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः॥
उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥
बृहस्पते सवितर्बोधयैनं संशितं चित्सन्तरां संशिशाधि।
वर्धयैनं महते सौभगाय विश्व एनमनुमदन्तु देवाः॥
क्षत्रभृदग्निभृष्टतेजाः सहस्रियो द्योततामप्रयुच्छन्।
वर्ष्मन्पृथिव्या अधि जातवेदा उदन्तरिक्षमारुहदगन्द्याम् ॥४॥
ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः।
द्युमत्तमा सुप्रतीकस्य सूनोः॥
तनूनपादसुरो विश्ववेदा देवो देवेषु देवः।
पथो अनक्तु मध्वा घृतेन॥
मध्वा यज्ञं नक्षति प्रीणानो नराशंसो अग्निः।
सुकृद्देवः सविता विश्ववारः॥
अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा।
अग्निं स्रुचो अध्वरेषु प्रयत्सु।
स यक्षदस्य महिमानमग्नेः स ईं मन्द्रा सुप्रयसः।
वसुश्चेतिष्ठो वसुधातमश्च॥
द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः।
उरुव्यचसो धाम्ना पत्यमानाः॥
ते अस्य योषणे दिव्ये न योना उषासानक्ता।
इमं यज्ञमवतामध्वरं नः॥
दैव्या होतारोर्ध्वमध्वरं नोऽग्नेर्जिह्वामभिगृणीतमुक्तम्।
कृणुतं नः स्विष्टिम्॥
तिस्रो देवीर्बर्हिरिदं स्योनमिडा सरस्वती मही।
भारती गृणाना॥
तन्नस्तुरीपमद्भुतं पुरुक्षु त्वष्टा सुवीर्यम्।
रायस्पोषं विष्यतु नाभिमस्मे॥
वनस्पतेऽवसृजा रराणस्त्मना देवेषु।
अग्निर्हव्यं शमिता सूदयाति॥
अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम्।
विश्वे देवा हविरिदं जुषन्ताम् ॥५॥
येनर्षयस्तपसा सत्रमासतेन्धाना अग्निं स्वराभरन्तः।
तस्मिन्नहं निदधे नाके अग्निं यमाहुर्मनवः स्तीर्णबर्हिषम्॥

तं पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः।
नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः।
आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः॥
अयमग्निर्वीरतमो वयोधाः सहस्रियो द्योततामप्रयुच्छन्।
विभ्राजमानः सरिरस्य मध्य उपप्रयाहि दिव्यानि धाम॥
संप्रच्यवध्वमुप संप्रयाताग्ने पथो देवयानान्कृणुध्वम्।
पुनः कृण्वन्ता पितरा युवानान्वातांसीत्त्वयि तन्तुमेतम्॥
उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते संसृजेथामयं च।
अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत॥
अयं ते योनिर्ऋत्वियः॥
येन सहस्रं वहसि येनाग्ने सर्ववेदसम्।
तेनेमं यज्ञं नो नय स्वर्देवेषु गन्तवे॥
इष्टो यज्ञो भृगुभिर्द्रविणोदा यतिभिराशीर्दा वसुभिराशीर्वा अथर्वभिः।
इष्टो अग्निराहुतः स्वाहाकृतः पिपर्तुमिष्टं हविः स्वगेदं देवेभ्यो नमः ॥६॥

जुहूं संमार्ष्टि। यज्ञमुखं वै जुहूः। यज्ञमुखमेवालभते। जुह्वा वै देवा विराजमह्वयन्। तज्जुह्वा जुहूत्वम्। अग्निर्वै विराट्। अग्निमेवैतद्विराजं ह्वयति। छन्दांसि देवेभ्योऽपाक्रामन्यज्ञे भागधेयमिच्छमानानि न वो भागधेयानि हव्यं वक्ष्याम इति। तेभ्य एतच्चतुर्गृहीतं प्रायच्छन्ननुवाक्यायै याज्यायै देवतायै च वषट्काराय। यच्चतुर्गृहीतेन जुहोति च्छन्दांस्येव भागधेयवन्ति करोति। सावित्राणि जुहोति प्रसूत्यै। एति वा एतद्यज्ञमुखाद्यदनाग्नेयमग्रे यज्ञस्य क्रियते। यदष्टौ कृत्वो गृहीत्वाष्टावेतानि जुहोति। अष्टाक्षरा गायत्री। गायत्रोऽग्निः। तेन यज्ञमुखान्नैति। प्रसूत्यै सावित्राणि। युञ्जते मन इति मनस्वन्ति। मनो ह्यग्रे युज्यते। मनसा यज्ञस्तायते। अग्निर्ज्योतिरिति ज्योतिष्मत्। सविता वा एतत्पृथिव्या ज्योतिः समभरत्। यदेवास्यात्र न्यक्तं तदेतेन संभरति। षड्चो भवन्ति। षड्तवः। ऋतुष्वेव प्रतितिष्ठति। द्वे यजुषी। द्विपाद्यजमानः। प्रतिष्ठित्यै। यदि कामयेत देवतां यज्ञयशसेनाहुत्यार्पयेयमित्यृचमन्ततः कुर्यात्। देवतामेव यज्ञयशसेनाहुत्यार्पयति। यदि कामयेत यजमानं यज्ञयशसेनाहुत्यार्पयेयमिति यजुरन्ततः कुर्यात्। यजमानमेव यज्ञयशसेनाहुत्यार्पयति। ऋचा स्तोमं समर्धयेति समृद्ध्यै। गायत्रेण रथन्तरं बृहद्गायत्रवर्तनीति। इयं वै रथन्तरमसौ बृहत्। व्यष्ट्यै। आहुत्या वा अभिक्रममन्वभिक्रम्य यजमानो वसीयान्भवति। आहुत्या अपक्रममन्वपक्रम्य पापीयान्भवति। सकृत्सर्वाण्यनुद्रुत्योत्तमेन जुहुयात्। आहुत्या एवाभिक्रममन्वभिक्रामति यजमानो वसीयान्भवति। एकमेकं जुहुयाद्यदि कामयेत सदृशो यजमानः स्यादिति। यजूंष्येव नानावीर्याणि करोति। अष्टावेतानि भवन्ति। आहुतिर्नवमी। त्रिवृतमेव यज्ञमुखं संपादयति। त्रिवृद्धि यज्ञमुखम्। पूर्णया स्रुचा जुहोति। पूर्णः प्रजापतिः। प्रजापतिमेवाप्नोति। ऊर्ध्वस्तिष्ठञ्जुहोति। ऊर्ध्वो हि तिष्ठन्वीर्यवत्तरः ॥७॥

सावित्रैरभ्रिमादत्ते प्रसूत्यै। इयं वै गायत्र्यन्तरिक्षं त्रिष्टुब्द्यौर्जगती दिशोऽनुष्टुप्। छन्दोभिरेवैनामेभ्यो लोकेभ्य आवर्तयति। उभयतःक्ष्णुद्भवति। अन्यतःक्ष्णुतेन्वै फालेनैयदन्न क्रियते। अन्नमर्कोऽर्कोऽग्निः। अन्नस्यैवार्कस्यावरुद्ध्यै। अरत्निमात्रीं कुर्यात्। पुरुषेण वै यज्ञः संमितः। यज्ञपुरुषासंमितां व्याममात्रीं कुर्यात्। एतावद्वै पुरुषे वीर्यम्। वीर्येण संमितामपरिमितां कुर्यादपरिमितस्यावरुद्ध्यै। यो वृक्षः फलग्रहिस्तस्य कुर्यात्। एष वै वनस्पतीनां वीर्यवत्तमः। सवीर्यत्वाय। कल्माषीं वैणवीं सुषिरां कुर्यात्। अग्निर्वै देवेभ्योऽपाक्रामत्। स वेणुं प्राविशत्। स एतानि वर्माण्यनह्यत यानि पर्वाणि। स एतं लोकमन्वचरद्यः सुषिरः। स यत्रयत्रावसत्तन्निरदहत्। तत्कल्माषमभवत्। यत्कल्माषी वैणवी

सुषिरा भवति। स ह्यग्नेर्योनिः। समृद्ध्यै। अथो यदेवास्यात्र न्यक्तं तस्यावरुद्ध्यै॥

अग्निर्वै देवेभ्योऽपाक्रामत्। स वरुणमाविशत्। प्रजापतिरन्वपश्यत्। प्राजापत्योऽश्वः। यदश्वेन यन्त्यग्नेरेवानुख्यात्यै। एतेन वै देवा असुराननुतममभ्यभवन्। यदश्वेन यन्ति भ्रातृव्यस्याभिभूत्यै। एतं वै रक्षांसि नातरन्। यदश्वेन यन्ति रक्षसामतीत्यै। अश्वं पूर्वं नयन्ति गर्दभमपरं पापवसीयसस्य व्यावृत्त्यै। तस्मात्पुण्यं पूर्वं यन्तं पापीयान्पश्चादन्वेति। गर्दभेन संभरति। तस्मादेष समावत्सु रेतो दधानो कनिष्ठः। अग्निर्ह्यस्य रेतो निरदहत्। यदेतेनास्यामुत्रमर्कं संभरति तस्मादेषा प्रजा जीवितृतमा। प्रतूर्तं वाजिन्नाद्रव। युञ्जाथां रासभं युवमित्यश्वगर्दभयोरेव॥
योगेयोगे तवस्तरं वाजेवाजे हवामहे।
सखाय इन्द्रमूतये॥

इति। ऊर्ध्वी हि वा अग्निमिश्चैषते। प्रतूर्वन्नेह्यवक्रामन्नशस्तीरिति। बहुर्वै भवतो भ्रातृव्यः। भवत्येव योऽग्निं चिनुते। अनुद्भवः। पापमानमभिभूत्यै। वज्रेणैव पाप्मानं भ्रातृव्यमवक्रामति। रुद्रस्य गाणपत्यं मयोभूरेहीति। रौद्रा वै पशवः। रुद्रेण पशुभ्यो ह्यस्मे कर्म कुरुते। उर्वन्तरिक्षं वीहि। स्वस्ति गव्यूतिरभयानि कृण्वन्पूष्णा सयुजा सहेति। पूषा वा अध्वनां संनेता। समष्ट्यै। पृथिव्याः सधस्थादग्निं [पुरीष्यमङ्गिरस्वदाभरेति। पुरीष्यायतनो वा अग्निः।] अङ्गिरस एतमग्रे देवताभिः समभरन्। तायतमेवैनं देवताभिः संभरति। अग्निं पुरीष्यमङ्गिरस्वदच्छेम इत्याह येन संगच्छते। सर्वा वै पुरुषे वीर्याणि। वाजमेवास्य वृङ्क्ते। प्रजापतये प्रोच्याग्निश्चेतव्यो राज्ञे प्रोच्य। स हि प्राजापत्यतमः। इयं वै प्रजापतिः। तस्या एष कर्णो यद्वल्मीकः। यद्वल्मीकवपामुद्धत्याभिमन्त्रयते प्रजापतय एव प्रोच्याग्निं चिनुते। शृण्वन्त्वेनमग्निं चिक्यानम्। अस्मादग्निमचैष्टेति। कर्णो हि वल्मीकः ॥८॥

इति कपिष्ठलकठसंहिता नवविंशतितमोऽध्यायः॥

अन्वग्निरुषसामग्रमख्यदित्यनुख्यात्यै। आगत्य वाज्यध्वानं सर्वा मृधो विधूनुत इति मृध एवैतयापहते। आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वमिति। ऐच्छद्वा एतं पूर्वया प्रजापतिरविन्ददुत्तरया। इच्छत्येव पूर्वया विन्दत्युत्तरया। द्यौस्ते पृष्ठं पृथिवी सधस्थमिति। वज्रो वा अश्वः प्राजापत्यः। लोमभिरभयादतः पशूनिति दद्भिरन्यतोदतः। वज्रेणैव भ्रातृव्यमवक्रामति। यत्र वै यज्ञस्यानुरूपं क्रियते तत्पशवोऽनुरूपा जायन्ते। उत्क्राम। उदक्रमीदित्यनुरूपाभ्यामुत्क्रमयति। तस्मात्पशवोऽनुरूपा जायन्ते। द्वाभ्याम्। द्विपाद्यजमानः। प्रतिष्ठित्यै। यो वा अनग्रावध्वर्युराहुतिं जुहोत्यन्धोऽध्वर्युर्भवति। रक्षांसि यज्ञं घ्नन्ति। अग्निर्वै यस्मान्नीरध्यक्रामयत। तस्य तेजः परापतत्। तद्धिरण्यमभवत्। यद्धिरण्यमुपास्य जुहोत्यग्नावेव जुहोति समृद्ध्यै। नान्धोऽध्वर्युर्भवति। न रक्षांसि यज्ञं घ्नन्ति। जिघर्म्यग्निं मनसा घृतेनेति। मनो वै वाचः श्रेयः। मनसैवाहुतिमाप्नोति। प्रतिक्ष्यन्तं भुवनानि विश्वेति। तस्मादेष सर्वाः प्रजाः प्रत्यङ् ङेति। व्यचिष्ठमन्नं रभसं विदानमित्यन्नमेवास्मै स्वदयति। आ त्वा जिघर्मि वचसा घृतेनेति पूर्वमेवोदितमनुवदति। अरक्षसा मनसा तज्जुषेत इति रक्षसामपहत्यै। मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे तन्वा जर्भुराण इत्यपरिवर्गमेवास्मिन्दधाति। द्वाभ्यां जुहोति। द्विपाद्यजमानः। प्रतिष्ठित्यै। यज्ञमुखेयज्ञमुखे वै यज्ञं रक्षांसि जिघांसन्ति। यत्परिलिखति रक्षसामपहत्यै। तिसृभिः परिलिखति। त्रय इमे लोकाः। एभ्य एव लोकेभ्यो रक्षांस्यपहन्ति। परि वाजपतिः कविरिति गायत्र्या परिलिखति। ब्रह्म वै गायत्री। ब्रह्मणैवैनं परिगृह्णाति। परि त्वाग्ने पुरं वयमित्यनुष्टुभा। वाग्वा अनुष्टुप्। अनुष्टुप्सर्वाणि च्छन्दांसि परिभूः। वाचैव सर्वाणि च्छन्दांसि परिगृह्णाति। त्वमग्ने द्युभिरिति त्रिष्टुभा। वीर्यं वै त्रिष्टुप्। वीर्येणैवैनं परिगृह्णाति। अनुष्टुभा मध्यतः परिलिखति। वाग्वा अनुष्टुप्। वाचमेव मध्यतो दधाति। तस्मान्मध्यतो वाग्वदति। तेजो वै गायत्री। यज्ञोऽनुष्टुप्। इन्द्रियं त्रिष्टुप्। तेजसा वीर्येन्द्रियेण च यज्ञमुभयतः परिगृह्णाति ॥१॥

सावित्राभ्यां खनति प्रसूत्यै। धृष्णुर्भव पृथुं विन्दति ज्योतिष्मन्तम्। द्वाभ्याम्। द्विपाद्यजमानः। प्रतिष्ठित्यै। अपां पृष्ठमसि योनिरग्नेरिति पुष्करपर्णमादत्ते। अपां ह्येतत्पृष्ठं योनिरग्नेः। यत्पुष्करपर्णेन संभरति स्वेनैवैनं योनिना संभरति। शान्त्या अनिर्दाहाय। कृष्णाजिनेन संभरति। यज्ञो वै कृष्णाजिनम्। यज्ञेनैव यज्ञं संभरत्यस्कन्दाय। न हि यज्ञे यज्ञ

स्कन्दति। एतद्वै ब्रह्मणो रूपं यत्कृष्णाजिनम्। ब्रह्मणा चैवैनमृक्सामाभ्यां च संभरति। शर्म च स्थो वर्म च स्थ इति संस्तृणाति। इयं वै पुष्करपर्णमसौ कृष्णाजिनम्। इमे एवैतत्संस्तृणाति। अच्छिद्रे बहुले उभे इत्यच्छिद्रे हीमे बहुले उभे। व्यचस्वती इति। तस्मादिमे व्यचस्वती। भर्तमग्निं पुरीष्यमिति। पुरीष्यो ह्येषः। संवसाथां स्वर्विदा समीची उरसा त्मनेति। तस्मादिमे नाना सती समीची। अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमिदिति ज्योतिरेवास्मिन्नजस्रं दधाति। पुरीष्योऽसि विश्वभरा इति। पुरीष्यो ह्येष विश्वभराः। अथर्वा त्वा प्रथमो निरमन्थदग्न इति। प्रजापतिर्वा अथर्वा। प्रजापतिरेतमग्रेऽमन्थत्। प्रजापतिरेवैनं जनयति। तमु त्वा दध्यङ्ङृषिरिति। दध्यङ् वा आथर्वणस्तेजस्व्यासीत्। तेनैवैनं संभरति। तमु त्वा पाथ्यो वृषेति। पूर्वमेवोदितमनुवदति। चतसृभिः संवपति। चत्वारि वै छन्दांसि। छन्दोभिरेवैनं संवपति। गायत्रीभिर्ब्राह्मणस्य संवपेत्। गायत्रो हि ब्राह्मणः। त्रिष्टुब्भी राजन्यस्य। त्रैष्टुभो हि राजन्यः। जगतीभिर्वैश्यस्य। जागतो हि वैश्यः। यथाछन्दसमेवोभयीभिः संवपेद्य कामयेत वसीयान्स्यादिति। तेजो वै गायत्री। इन्द्रियं त्रिष्टुप्। तेजश्चैवास्मिन्निन्द्रियं च समीची दधाति। अष्टाभिः संवपति। अष्टाक्षरा गायत्री। गायत्रोऽग्निः। यावानेवाग्निस्तं संभरति। सीद होतरिति देवता एवास्मिन्संसादयति। नि होतेति मनुष्यानेव। संसीदस्वेति वयांस्येव। जनिष्व हि जेन्यो अग्रे अह्नामिति देवमनुष्यानेवास्मिन्संसन्नान्प्रजनयति ॥२॥

अपो देवीरुपसृज मधुमतीरित्योषधीनां प्रतिष्ठित्यै। तासामास्थानादुज्जिहतामोषधयः सुपिप्पला इति। तस्मादोषधयः फलं गृह्णन्ति। सं ते वायुर्मातरिश्वा दधात्विति। तस्माद्वायुर्वृष्टिं वहति। प्राणो वै वायुः। प्राणमेवास्मिन्दधाति। तस्मै देव वषडस्तु तुभ्यमिति। षड् वा ऋतवः। ऋतुष्वेव वृष्टिं दधाति। तस्मादृतुमृतुं वर्षति। यत्प्रत्यक्षं वषट् कुर्याद्यातयामा वषट्कारः स्यात्। यत्र वषट् कुर्याद्रक्षांसि यज्ञं हन्युः। तस्मै देव वषडस्तु तुभ्यमिति परोक्षम्। न यातयामा वषट्कारो भवति न रक्षांसि यज्ञं घ्नन्ति। यदाज्येन जुहुयाच्छुचा पृथिवीमर्पयेत्। अपो निनयति शान्त्या अनिर्दाहाय॥
सुजातो ज्योतिषा शर्म वरूथमासदत्स्वः।
वासो अग्ने विश्वरूपं संव्ययस्व विभावसो॥

इति छन्दांसि वा अग्नेर्वासः। छन्दोभिरेवैनं परिददाति। अनुष्टुभा। अनुष्टुब्वा अग्नेः प्रिया तनूः। प्रिययैवैनं तन्वा परिददाति। वेदुको वासो भवति य एवं वेद। वरुणमेनिर्वा एष उपनद्धः। उदु तिष्ठ स्वध्वर॥ ऊर्ध्व ऊ षु ण ऊतय इत्यूर्ध्वमेव वरुणमेनिमुत्सृजति। द्वाभ्यामुपावहरति। द्विपाद्यजमानः। प्रतिष्ठित्यै। स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीष्विति। तस्मादग्निः सर्वा अन्वोषधीः। प्र मातृभ्यो अधि कनिक्रदद्गा इति। ओषधयो वा एतस्य मातरः। ताभ्य एवैनं परिणयति। स्थिरो भव वीड्वङ्ग इति गर्दभ एव स्थेमानं दधाति। तस्मादेष पशूनां भारभारितमः। शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिर इति। अभि वा एष एतर्हि प्रजाः शोचयति शान्त्यै। मा द्यावापृथिवी अभि शुचो मान्तरिक्षं मा वनस्पतीनित्येभ्य एवैनं लोकेभ्यः शमयति। प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वेति समष्ट्यै। भरन्नग्निं पुरीष्यं मा पाद्यायुषः पुरेत्यायुरेवास्मिन्दधाति। तस्माद्गर्दभः सर्वमायुरेति। तस्माद्गर्दभे प्रमीते बिभ्यति। वृषाग्निं वृषणं भरन्निति। वृषा ह्येष वृषाणं भरति। अपां गर्भं समुद्रियमिति। अपां ह्येष गर्भः। अग्न आयाहि वीतय इति। अग्निना वै देवा इदमग्रे व्यायन्। वीत्यै। प्रच्युतो वा एष एतर्ह्यायतनादगतः प्रतिष्ठाम्। स यजमानं चैवाध्वर्युं चाध्यायति। ऋतं सत्यमृतं सत्यमिति। इयं वा ऋतमसौ सत्यम्। अनयोरेवैनं प्रतिष्ठापयति। ओषधयः प्रतिगृह्णीताग्निमेतं शिवमायन्तमभ्यत्र युष्मानिति। ओषधयो वा एतस्य भागधेयम्। ताभिरेवैनं सम्यञ्चं दधाति। अथो याभ्य एनं प्रच्यावयति तास्वेनं प्रतिष्ठापयति। पुष्पवतीः सुपिप्पला इति। तस्मादोषधयः फलं गृह्णन्ति। द्वाभ्यामुपावहरति द्विपाद्यजमानः। प्रतिष्ठित्यै। वि पाजसेति विस्रसयति। वरुणमेनिमेव विष्यति। आपो हि ष्ठा मयोभुव इत्यप उपसृजति। आपः शान्ताः। शान्ताभिरेवास्य शुचं शमयति। तिसृभिः। त्रिवृद्ध्यग्निः। यावानेवाग्निस्तस्य शुचं शमयति। अजलोमैः संसृजति। एषा वा अग्नेः प्रिया तनूर्यदजा। प्रिययैवैनं तन्वा संसृजति। शर्कराभिः संसृजति

धृत्यै। अर्म्यैः कपालैः संसृजति। आरण्यानेव पशूञ्शुचार्पयति। तस्मादेते समावत्पशूनां प्रजायमानानां कनिष्ठाः। शुचा ह्येत ऋताः ॥३॥

मित्रः संसृज्य पृथिवीमिति। वरुणमेनिर्वा एषा। मित्रेणैव वरुणमेनिमुपैति। रुद्राः संसृज्य पृथिवीम्। संसृष्टां वसुभी रुद्रैरिति। एताभिर्वा एतां देवताभिः प्रजापतिः समसृजत्। ताभिरेवैनां संसृजति। प्रान्यैर्यच्छति। अन्वन्यैर्मन्त्रयते। मिथुनमेव करोति। अथो मध्यत एव यज्ञस्याशिषमवरुंद्धे। मखस्य शिरो ऽसीति। यज्ञो वै मखः। यज्ञस्यैव शिरः करोति। वसवस्त्वा कुर्वन्तु गायत्रेण च्छन्दसाङ्गिरस्वदिति। एताभिर्वा एतां देवताभिः प्रजापतिरकरोत्। ताभिरेवैनां करोति। त्रयुद्धिं करोति। त्रय इमे लोकाः। इमानेव लोकानाप्नोति। धारया मयि प्रजां रायस्पोषं गौपत्यमित्याशीरेवैषा छन्दसां दोहः। अरत्निमात्रीं कुर्यात्। पुरुषेण वै यज्ञः संमितः। यज्ञपुरुषासंमिताम्। यावद्बाहुभ्यां पर्याप्नुयात्तावतीं कुर्यात्। एतावद् वै पुरुषे वीर्यम्। वीर्येण संमिताम्। प्रादेशमात्रीं कुर्यात्। एतावद्वै मुखम्। मुखं देवानामग्निः। मुखेन संमिताम्। अपरिमितां कुर्यादपरिमितस्यावरुद्ध्यै। चतुस्तनां कुर्याददित्या दोहाय। अष्टास्तनां गायत्र्या दोहाय। षट्स्तनां कुर्यादृतूनां दोहाय। द्विस्तनां कुर्याद् द्यावापृथिव्योर्दोहाय। नवाश्रिमभिचरणीयां कुर्यात्। त्रिवृद्वज्रः। वज्रमेव भ्रातृव्याय प्रहरति। आदित्या रास्नास्यदितिस्ते बिलं गृह्णात्विति यजुषा बिलं करोति। अयजुषा हि मनुष्याः कुर्वन्ति। मानुषेणैवैनां पात्रेण व्यावर्तयन्ति। यद्वा एषा पुरा पक्तोर्भिद्येतार्तिं यजमान आर्छेद्धन्येतास्य यज्ञः। कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नय इति देवताभ्य एवैनां संप्रयच्छति गोपीथाय। वसवस्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वदिति। एताभिर्वा एतां देवताभिः प्रजापतिरधूपयत्। ताभिरेवैनां धूपयति। अश्वशकेन धूपयति। प्राजापत्यो वा अश्वः। यज्ञः प्रजापतिः। सयोनित्वाय। सप्तभिर्धूपयति। शिरो वा एतद्यज्ञस्य यदुखा। सप्त प्राणाः। शीर्षण्येव प्राणान्दधाति। तस्मात्सप्त शीर्षण्याः प्राणाः ॥४॥

अदितिस्त्वा देवी विश्वदेव्यावतीति। इयं वा अदितिः। अदित्यैवादित्यां खनत्यस्या अक्रूरंकाराय। न हि स्वः स्वं हिनस्ति। देवानां त्वा पत्नीर्देवीर्विश्वदेव्यावतीरिति। देवानां वा एतां पत्नीरग्रे ऽत्रादधुः। ताभिरेवैनां दधाति। धिषणास्त्वा देवीर्विश्वदेव्यावतीरिति। विद्या वै धिषणा। विद्ययैवैनामभींद्धे। वरूत्रीस्त्वा देवीर्विश्वदेव्यावतीरिति। होत्रा वै वरूत्रः। होत्राभिरेवैनां श्रपयति। ग्नास्त्वा देवीर्विश्वदेव्यावतीरिति। छन्दांसि वै ग्नाः। छन्दोभिरेवैनां पचति। जनयस्त्वाच्छिन्नपत्रा देवीर्विश्वदेव्यावतीरिति। देवानां वै पत्नीर्जनयः। ताभिरेवैनां पचति। द्विः पचन्त्वित्याह। तस्माद्द्विः संवत्सरस्य सस्यं पच्यते। षड्भिः पचति। षड्वा ऋतवः। ऋतुभिरेतां देवानां पत्न्यो ऽपचन्। तैरेवैनां पचति। वरुणमेनिर्वा एषाभीद्धा। मित्रस्य चर्षणीधृत इति। मित्रेणैव वरुणमेनिमुपैति। देवस्त्वा सवितोद्वपत्विति। सावित्र्योद्वपति प्रसूत्यै। अव्यथमाना पृथिव्यमाशा दिश आपृणेति। तस्मादग्निः सर्वा दिशो विभाति। उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमिति। दृंहत्येवैनाम्। यद्वा एषा भिद्येतार्तिं यजमान आर्छेद्धन्येतास्य यज्ञः। मित्रैतां त उखां परिददामीति। ब्रह्म वै मित्रः। ब्रह्मण एवैनां परिददाति। यदि भिद्येत तैः कपालैः संसृज्यान्यां कुर्यात्। सैव ततो यज्ञस्य निष्कृतिः। वसवस्त्वाच्छृन्दन्तु गायत्रेण च्छन्दसाङ्गिरस्वदिति। छन्दोभिर्वा एषा क्रियते छन्दोभिर्धूप्यते छन्दोभिः पच्यते। छन्दोभिराच्छृणत्ति स्वेनायतनेन। असुर्यं वै पात्रमनाच्छृण्णम्। यदाच्छृणत्ति देवत्रैव करोति। अजक्षीरेणाच्छृणत्ति। सा ह्याग्नेयीतमा। अथो परमेणैव पयसा ॥५॥

अथैते ऽग्निभ्यः कामेभ्यः पशव आलभ्यन्ते। कामा वा अग्नयः। सवनिवैतैः कामानभिजयति सर्वान्कामान्स्पृणोति। यत्पशून्नालभेतानवरुद्धा अस्य पशवः स्युः। यत्संस्थापयेद्यातयामानि शीर्षाणि स्युः। यन्न संस्थापयेद्यज्ञं विच्छिंद्यात्। यत्पशूनालभते तेनैव पशूनवरुंद्धे। यत्पर्यग्निकृतानुत्सृजति [शीर्ष्णामयातयामत्वाय ।... ॥६॥]

.... [यदग्नये वैश्वानराय नि] र्वपत्यश्नुते तं कामं यस्मै कामाय दीयते। यद्द्वादशकपालो द्वादशमासाः संवत्सरः। या वै प्रजा भ्रंशन्ते संवत्सरात्ता भ्रंशन्ते। याः प्रतितिष्ठन्ति संवत्सरे ताः प्रतितिष्ठन्ति। संवत्सर एव प्रतिष्ठायामग्निं बिभर्ति ॥७॥

षडाधीतयजूंषि जुहोति। षड्वा ऋतवः। ऋतुभिरेवैनं दीक्षयत्यृतुभिरस्या वीर्यमुद्यच्छते। सप्तैतानि जुहोति। सप्त

प्राणाः। प्राणैरेवैनं दीक्षयति। नाना जुहोति। तस्मान्नानावीर्याः प्राणाश्चक्षुः श्रोत्रं वाक्। अनुष्टुभोत्तमं जुहोति। वाग्वा अनुष्टुप्। वाचमेवोत्तमां दधाति। तस्माद्वाक्प्राणानामुत्तमा विहितं वदति। अनुष्टुब्वै सर्वाणि छन्दांसि। पशवश्छन्दांसि। अन्नं पशवः। पशूनेवान्नाद्यमवरुंद्धे। यज्ज्योतिषि प्रवृणक्ति भूतं तेनावरुंद्धे। यदङ्गारेषु भविष्यत्तेन। अङ्गारेषु प्रवृज्या। भविष्यद्धि भूयो भूतात्। मा सु भित्था मा सु रिष इति दृंहत्येवैनाम्। अरिष्टा त्वमुदिहि यज्ञे अस्मिन्निति समष्ट्यै। द्वाभ्यां प्रवृणक्ति। द्विपाद्यजमानः। प्रतिष्ठित्यै। परीध्या बुभूषतः। गर्भो वै दीक्षितः। अत इव वा एष भवत्यत एवैनं जनयति। मथित्वा गतश्रेरवदध्यात्। भूतो हि सः। स्वामेव देवतामुपैति। अन्यत आहृत्यावदध्याद्यं कामयेत भ्रातृव्यमस्मै जनयेयमिति। भ्रातृव्यमेवास्मै जनयति। भृज्जनादाहृत्यावदध्यादन्नकामस्य। भृज्जने वा अन्नं क्रियते। सयोन्येवान्नमवरुंद्धे। यो वृक्ष उपरि दीप्येत तस्यावदध्यात्स्वर्गकामस्य। एष वा अग्नीनां स्वर्ग्यः। स्वर्गस्य लोकस्य समष्ट्यै। द्रवन्नः सर्पिरासुतिरिति क्रमुकं लिखितं घृतेनाक्त्वावदध्यात्। अग्नेर्वै या प्रिया तनूस्तया क्रमुकं प्राविशत्। तेजो घृतम्। प्रियामेवास्य तन्वं तेजसा समनक्ति। मुञ्जानवदधाति। ऊर्ग्वै मुञ्जाः। ऊर्जमेवास्मा अपिदधाति। परस्या अधि संवत इत्यौदुम्बरीम्। देवा वै यत्रोर्जं व्यभजन्त तत उदुम्बरो ऽजायत। जातायैवास्मा ऊर्जमपिदधाति। परमस्याः परावत इति वैकङ्कतीम्। अग्नेर्वै सृष्टस्य विकङ्कतं भा आर्छत्। तदेवावरुंद्धे। यदग्ने कानि कानि च। यदत्त्युपजिह्विकेति। न ह स्म वै पुराग्निरपरशुवृक्णं दहति। तदस्मा एताभिः प्रयोग ऋषिरस्वदयत्। यदेताभिः समिधमादधातीध्ममेवास्मै स्वदयति। स्वदितमस्यान्नं भवति। छन्दांसि वा अग्नेर्योनिः। यच्छन्दोभिरादधाति स्वेनैवैनं योनिनानुबिभर्ति। रात्रींरात्रीमप्रयावं भरन्त इत्याशिषमेवाशास्ते। नाभा पृथिव्याः समिधानो अग्निमिति। पृतना एवैतया जयति। यः सेना अभीत्वरीरिति। अग्निं वै जातं रक्षांस्यजिघांसन्। ते देवा एता ऋचो ऽपश्यन्। ताभिरस्माद्रक्षांस्यपाघ्नन्। यदेताभिः समिध आदधाति रक्षसामपहत्यै। देवा असुराश्चस्पर्धन्त। ते देवा एतन्मालिम्लवमपश्यन्। तेनासुरानभ्यभवन्। यदेतेन समिधमादधाति भ्रातृव्यस्याभिभूत्यै। तस्माद्यां समामग्निं चिन्वन्ति ग्राहुका स्तेनं भवन्ति। यः सेना अभीत्वरीरित्यौदुम्बरीम्। ऊर्जमेवास्मा अपिदधाति। दंष्ट्राभ्यां मलिम्लूनग्न इत्याश्वत्थीम्। एष वै वनस्पतीनां सपत्नसाहः। विजित्यै। यर्हि दंष्ट्राभ्यामिति। ब्रूयाद्यं द्विष्यात्तं मनसा ध्यायेत्। मनो वै वाचः क्षेपीयः। आहुतिमेवैनं भूतामग्नये ऽपिदधाति। ये जनेषु मलिम्लव इति वैकङ्कतीम्। अग्नेर्वै सृष्टस्य विकङ्कतं भा आर्छत्। तदेवावरुंद्धे। यो अस्मभ्यमरातीयादिति शमीमयीं शान्त्यै। निन्दाद्यो अस्मान्दिप्साच्चेति। तस्मादग्निचितो नाश्लीलं कीर्तयेत्। संशितं मे ब्रह्मेति। ब्रह्मणैव क्षत्रं संश्यति क्षत्रेण ब्रह्म। तस्माद्ब्रह्मपुरोहितं क्षत्रमत्यन्यानि क्षत्राणि। तस्माद्ब्रह्म क्षत्रवदत्यन्यान्ब्राह्मणान्। उदेषां बाहू अतिरमुद्वर्चो अथो बलमित्याशिषमेवाशास्ते। क्षिणोमि ब्रह्मणामित्राननुन्नयामि स्वां अहमिति यथायजुः ॥८॥

इति कपिष्ठलकठसंहितायां त्रिंशत्तमो ऽध्यायः॥

दृशानो रुक्म उर्विया व्यद्यौदिति रुक्मं प्रतिमुञ्चते। मृत्युर्वा अग्निः। अमृतं हिरण्यम्। अमृतेनैव मृत्योरन्तर्धत्ते। एकविंशतिनिर्बाधो भवति प्रतिष्ठित्यै। एकविंशतिर्देवलोकाः। तेभ्य एव भ्रातृव्यं निर्बाधते। बहिष्टान्निर्बाधं कुर्यात्। अस्मादेवैनं लोकान्निर्बाधते। उभयतः पर्यस्यति प्रतिमुञ्चमानः। उभाभ्यामेवैनं लोकाभ्यां निर्भजति। नक्तोषासेत्यहोरात्राभ्यामेवैनं परिगृह्णाति। देवा अग्निं धारयन्द्रविणोदा इति। प्राणा वै देवा द्रविणोदाः। प्राणैरेवैनं दाधार। षडुद्यामं शिक्यं भवति। षड्वा ऋतवः। ऋतुभिरेवैनं परिगृह्णाति। द्वादशोद्यामं भवति। द्वादश मासाः संवत्सरः। संवत्सरेणैवैनं परिगृह्णाति। मौञ्जं भवति। ऊर्ग्वै मुञ्जाः। ऊर्जैवैनं परिगृह्णाति। नाधोनाभि बिभृयात्। अग्निरस्य रेतो निर्दहेत्। ऊर्ध्वं नाभ्या बिभृयात्। ऊर्ध्वं वै नाभ्याः सदेवम्। अग्निः सर्वा देवताः। सदेव एव देवता बिभर्ति। विश्वा रूपाणि प्रतिमुञ्चते कविरिति सावित्र्या प्रतिमुञ्चते प्रसूत्यै। आसीनः प्रतिमुञ्चते। तस्मादासीनाः प्रजाः प्रजायन्ते। सुपर्णोऽसि गरुत्मानिति। अग्नेर्वा एते संभाराः। अग्निमेवैतैः संभरति। एतद्वा अग्नेः प्रियं धाम। तदेवावरुंद्धे। दिवं गच्छ स्वः पतेति स्वर्गस्य लोकस्य समष्ट्यै। असुराणां वा इमे लोका आसन्। ते देवा विष्णुमब्रुवन्यावदयं कुमारो

विक्रमते तावन्नो दत्तेति। स सकृदेवेमां व्यक्रमत गायत्रीं छन्दः सकृदन्तरिक्षं त्रिष्टुभं छन्दः सकृद्दिवं जगतीं छन्दः सकृद्दिशो ऽनुष्टुभं छन्दः। ते देवा इमांल्लोकानसुराणामवृञ्जत। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वान्प्रक्रामान्प्रक्रामतीमानेव लोकान्भ्रातृव्यस्य वृङ्क्ते। भवत्यात्मना परास्य भ्रातृव्यो भवति। अक्रन्ददग्नि स्तनयन्निव द्यौरित्येतया वै वत्सप्रीर्भालन्दनो ऽग्नेः प्रियं धामावरुंद्ध। अग्नेरेवैतया प्रियं धामावरुंद्धे। अग्ने ऽभ्यावर्तिन्॥ अग्ने अङ्गिरः॥ पुनरूर्जा॥ सह रय्येति पुनरेति। तस्माद्ग्राम्याः पशवः सायमरण्याद्ग्राममायन्ति। चतसृभिः। चतुष्पादो हि पशवः। दक्षिणा पर्यावर्तते। तस्माद्दक्षिणो ऽर्ध आत्मनो वीर्यवत्तरः। आ त्वाहार्षमिति। आ ह्येनं हरति। विशस्त्वा सर्वा वाञ्छन्त्वस्मे राष्ट्रमधिश्रयेति। यं कामयेत राष्ट्रं स्यादिति तं मनसा ध्यायेत्। राष्ट्रमेव भवति। उदुत्तमं वरुण पाशमस्मदिति। शुनःशेपो वा एतामाजीगर्तिर्वरुणगृहीतो ऽपश्यत्। तया वै स वरुणपाशादमुच्यत। वरुणपाशमेवैतया प्रमुञ्चते। अग्रे बृहन्नुषसामूर्ध्वो अस्थादिति। पाप्मा वै तमः। पाप्मानमेवैतयापहते। हंसः शुचिषदिति। साप्तान्येवैतया प्रीणाति। सदित्यभिपूर्वमेवैनं सति प्रतिष्ठापयति। आसन्द्यां सादयति। सृयते वा एषो ऽग्नीनां य उखायां भ्रियते। तस्मादासंद्यां सादयति। यदधः सादयेत्प्रपादुका गर्भाः स्युः। उपरि सादयति गर्भाणां धृत्या अप्रपादाय। तिसृभिरुपतिष्ठते। त्रयो वै प्राणाः प्राणो व्यानो ऽपानः। तानेव यजमाने दधाति। त्रय इमे लोकाः। एष्वेव लोकेष्वृध्नोति ॥१॥

अथैतद्वात्सप्रम्। एतेन वै वत्सप्रीर्भालन्दनो ऽग्नेः प्रियं धामावरुंद्ध। अग्नेरेवैतेन प्रियं धामावरुंद्धे। एतेन वै स ऋषीणामधिवादमपाजयत्। पाप्मानमेवैतेनाधिवादमपजयति। एतेन वै सो ऽभिशस्तीरजयत्। अभिशस्तीरेव जयति य एवं विद्वानेतेनोपतिष्ठते। यत्प्रक्रमान्प्रक्रामति यामं तेन दाधार। यदुपतिष्ठते क्षेमं तेन। पूर्वेद्युः प्रक्रामत्यपरेद्युरुपतिष्ठते। तस्माद्यामे ऽन्यासां प्रजानां मनः क्षेमे ऽन्यासाम्। तस्माद्यायावरः क्षेमस्येशे। तस्माद्यायावरः क्षेम्यमध्यवस्यति। एकेषं वै पुरान आसीत्। तत एतद्व्यो एकादशं भवति। एकादशाक्षरा त्रिष्टुप्। [वीर्यं त्रिष्टुप्।] वीर्यमेवावरुंद्धे। उदु त्वा विश्वे देवा ऽग्नये द्वीपमाधानमपश्यन्। तस्माद्द्वीपमग्नय आधानं कुर्वन्ति। तामिदमनुकृति द्वीपमनः क्रियते। अग्ने भरन्तु इति। प्राणा वै विश्वे देवाः। प्राणैरेवैनमुद्यच्छते। मनुष्या वै विश्वे देवाः। मनुष्यैरेवैनमुद्यच्छते। प्रेदग्ने ज्योतिष्मान्याहीति। अभि वा एष एतर्हि प्रजाः चित्तिभिरिति। यस्मा एवैनं चित्तायोद्यच्छते तेनैनं समर्धयति। क्रन्दतैव ह्यनसा वहन्ति। तस्मादनस्वी च रथी शोचयति। शान्त्यै। अक्रन्ददग्निरिति यदि क्षुवेदत्। अनमीवस्य शुष्मिण इत्ययक्ष्मस्येत्येवैतदाह। चातिथीनामपचिततमौ। अन्नपते अन्नस्य नो देहीत्यन्नमेवास्मै स्वदयति। समिधाग्निं दुवस्यतेति घृतेनाक्त्वा प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याशिषमेवाशास्ते। गायत्र्या ब्राह्मणस्यादध्यात्। गायत्रो हि ब्राह्मणः। त्रिष्टुभा राजन्यस्य। त्रैष्टुभो हि राजन्यः। जगत्या वैश्यस्य। जागतो हि वैश्यः। यथाछन्दसमेव। समिधमादधाति। यथा ब्राह्मणायातिथये सर्पिष्मन्तं पचत्येवमेव तत्। आपो देवीः प्रतिगृह्णीत भस्मैतदित्यप्सु भस्म प्रवपति। आपो वा अग्नेर्योनिः। स्वमेवैनं योनिं गमयति। तिसृभिः प्रवपति। त्रिवृद्वा अग्निः। यावानेवाग्निस्तं प्रतिष्ठां गमयति। परा वा एषो ऽग्निं वपति यो ऽप्सु भस्म प्रवपति।

प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने।

संसृज्य मातृभिष्ट्वं ज्योतिष्मान्पुनरासदः॥

इति ज्योतिरेवास्मिन्दधाति। ऊर्जा वा एष पशुभिर्व्यृध्यते यो ऽप्सु भस्म प्रवपति। पुनरूर्जा॥ सह रय्येति पुनरेवोर्जं पशूनवरुंद्धे। बोधा मे अस्य वचसो यविष्ठेति। तस्मात्प्रजाः सुषुपुषीः प्रबुध्यन्ते। स बोधि सूरिर्मघवा वसुदावा वसुपतिरिति। तस्मात्पशवः प्रेत्वानिश्चरित्वा पुनरेत्य यथालोकं निषीदन्ति। द्वाभ्याम्। द्विपाद्यजमानः। प्रतिष्ठित्यै॥२॥

अपेत वीत वि च सर्पतात इति देवयजनमध्यवस्यति। यो वा अस्या अधिपतिं देवयजनमनिर्याच्याग्निं चिनुते यमाय ते ऽग्नयश्चीयन्ते। यमो ऽस्या अधिपतिः। यममेवास्या अधिपतिं देवयजनं निर्याच्यात्मने ऽग्निं चिनुते। इन्द्राग्नेण ह वा अस्या अनामृतमिच्छन्तो न विविदुः। यदेतेन देवयजनमध्यवस्यत्यस्या एवानामृते ऽग्निं चिनुते। उवाच ह

सनाच्छ्व एतन्मा कतिपयथं यजुरायतनादचुच्यवदिति। दिवः प्रिये धामन्नग्निश्चेतव्यः। ऊषा वै दिवः प्रियं धाम। यदूषान्निवपति दिव एव प्रिये धामन्नग्निं चिनुते। इष्टका वा एता वैश्वानरीरपरिमिता यत्सिकताः। यत्सिकता उपवपति ता एवावरुंद्धे। अयं सो अग्निर्यस्मिन्सोममिन्द्र इत्येतद्विश्वामित्रस्य सूक्तम्। एतेन वै विश्वामित्रो ऽग्नेः प्रियं धामावरुंद्ध। अग्नेरेवैतेन प्रियं धामावरुंद्धे। चतस्रः प्राचीरुपदधाति। चत्वारि वै छन्दांसि। छन्दोभिर्देवाः स्वर्गं लोकमायन्। तेषां दिशः समव्लीयन्त। त एता दिश्या अपश्यन्। ताभिर्दिशो ऽदृंहन्। यद्द्वे पुरस्तात्समीची उपदधाति द्वे पश्चात्समीची दिशां विधृत्यै। अष्टावेता उपदधाति। अष्टाक्षरा गायत्री। गायत्री स्वर्गं लोकमञ्जसा वेद। स्वर्गस्य लोकस्य प्रज्ञात्यै। अष्टावेता उपदधाति। अष्टाक्षरा गायत्री। गायत्रो वा अग्निः। यावानेवाग्निस्तं चिनुते। अष्टावेता उपधाय त्रयोदश लोकंपृणयो [पदधाति।] ता एकविंशतिः संपद्यन्ते। एकविंशो वै स्तोमानां प्रतिष्ठा। प्रतिष्ठा गार्हपत्यः। एकविंशस्यैव प्रतिष्ठामनु गार्हपत्येन प्रतितिष्ठति। प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद। पञ्चचितीकं चिन्वीत प्रथमं चिन्वानः। पाङ्क्तो वै यज्ञः। पाङ्क्ताः पशवः। यज्ञं चैव पशूंश्चावरुंद्धे। त्रिचितीकं चिन्वीत द्वितीयं चिन्वानः। त्रय इमे लोकाः। एष्वेव लोकेष्वृध्नोति। एकचितीकं चिन्वीतोत्तमं चिन्वानः। एकवृदेव स्वर्गं लोकमेति। पञ्च चितयो भवन्ति पञ्च पुरीषाणि। तद्दश। दशाक्षरा विराट्। अन्नं विराट्। विराज्येवान्नाद्ये प्रतितिष्ठति। अस्थि वा इष्टका मांसं पुरीषम्। यत्पुरीषेणाभ्यूहति तस्मादस्थि मांसेन च्छन्नम्। न दुश्चर्माभवति य एवं वेद। समितं संकल्पेथामिति संनिवपति। क्षत्रं समेति। ब्रह्म यजुः। ब्रह्मणैवैनौ संनिवपति। चतुर्भिः संनिवपति। चत्वारि वै छन्दांसि। छन्दोभिरेवैनौ संनिवपति। यत्संन्युप्य विहरति तस्माद्ब्रह्मणा क्षत्रं समेति ब्रह्मणा व्येति। मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा। तां विश्वे देवा ऋतुभिः संविदाना इति। ऋतुभिरेवैनं दीक्षयित्वर्तुभिर्विमुञ्चति। प्रजापतिर्विश्वकर्मा विमुञ्चत्विति प्रजापतिमेवास्या विमोक्तारं करोति ॥३॥

अथैता नैर्ऋतीस्तिस्रः कृष्णाः। तुषपक्वा यत्कृष्णाः। एष हि तं वर्णः सचते यं निर्ऋतिर्गृह्णाति। यत्तुषपक्वा एतद्वै निर्ऋत्या भागधेयम्। भागधेयेन च निरवदयते। यदस्य पारे रजस इति वैश्वानर्यादत्ते। स्वदयत्येव। इमां दिशं हरन्ति। एतां दिशं हरन्ति यं निर्ऋतिर्गृह्णाति। एषा वै निर्ऋत्या दिशाम्। स्वायामेव दिशि निर्ऋतिं निरवदयते। स्वकृत इरिण उपदधाति। एतद्वा अस्या निर्ऋतिगृहीतम्। यत्रैवास्या निर्ऋतिगृहीतं निर्ऋतिं निरवदयते। पराचीरुपदधाति। पराचीमेव निर्ऋतिं निरवदयते। तिस्र उपदधाति। त्रेधाविहितो वै पुरुषः। यावानेवास्यात्मा तस्मान्निर्ऋतिं निरवदयते। यं ते देवी निर्ऋतिराबबन्धेति शिक्यमधिन्यस्यति। नैर्ऋतो वै पाशः। निर्ऋतिपाशादेवैनं मुञ्चति। पितृलोकं वा एते निगच्छन्ति ये दक्षिणा नैर्ऋतीभिश्चरन्ति। देवलोक आहवनीयः। यदाहवनीयमुपतिष्ठते देवलोकमेवोपावर्तते। त्रिष्टुभोपतिष्ठते। वीर्यं त्रिष्टुप्। वीर्यमेवास्मिन्दधाति। एकयैकधैवास्मिन्वीर्यं दधाति ॥४॥

यावान्पुरुष ऊर्ध्वबाहुस्तावता वेणुना विमिमीते। एतावद्वै पुरुषे वीर्यम्। वीर्येणैवैनं विमिमीते। त्रीन्पुरुषान्प्राञ्चं मिमीते चतुरस्तिर्यञ्चम्। तस्मात्सप्त पुरुषानभ्यग्निचिदन्नमत्ति त्रीन्पुरस्तात्त्रीनधस्तादात्मा सप्तमः। अरत्निमात्रं पक्षयोरुपदधाति प्रादेशमात्रं पुच्छे। पुरुषेण वै यज्ञः संमितः। यज्ञपुरुषासंमितम्। तस्मात्पक्षप्रवयांसि वयांसि। षड्गवेन कृषति। षड्वा ऋतवः। ऋतुभिरेव। तिस्रस्तिस्रः सीताः संपादयति। त्रिवृद्वा अग्निः। ता द्वादश संपद्यन्ते। द्वादश मासाः संवत्सरः। संवत्सरस्यैव विधामनुविधीयते। अथो ऋतुभिरेव कृष्ट्वा संवत्सरे प्रतितिष्ठति। इयं वा अग्नेरतिदाहादबिभेत्। सैतद्द्विगुणं कृष्टं चाकृष्टं चाकुरुत। यत्कृष्टं चाकृष्टं च भवत्यस्या अनतिदाहाय। अथो द्विगुणेनैवास्या वीर्यमुद्यच्छते। एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च। तानेतदग्नौ प्रतिदधाति। यदुदीच उत्सृजेद्रुद्राय पशूनपिदध्यादपशुः स्यात्। यद्दक्षिणा पितृभ्यो निधूवेत्। यत्प्रतीचो रक्षांसि हन्युः। दक्षिणा प्राचः सूर्यमभ्युत्सृजति। सूर्यो वै पशूनां प्राणः। प्राणमेवैनानभ्युत्सृजति। ओषधीनामृग्भिः। ओषधीनां फलानि वपति। रूपेणैवान्नमवरुंद्धे। अन्नस्यान्नस्य वपति। सर्वमेवान्नमवरुंद्धे। यस्य न वपति तेन व्यृध्यते। यस्य न वपेत्तदिध्मे ऽपि प्रोक्षेत्। तेनैव तदवरुंद्धे। चतुर्दशभिर्वपति। सप्त वै ग्राम्या ओषधयः सप्तारण्याः। ता एवावरुंद्धे। अर्को वा

अग्निरन्नमर्कः। अर्कं एवैतदर्कं धीयते। कृष्टे वपति। कृष्टे ह्योषधयः प्रतितिष्ठन्ति। अनुसीतं प्रजात्यै। द्वादशसु सीतासु वपति। द्वादश मासाः संवत्सरः। संवत्सरेणैवास्मा अन्नं पचति ॥५॥

दिग्भ्यो लोष्टान्समस्यति। दिग्भ्य ऊर्जं संभरति। ऊर्ज्येवाग्निं चिनुते। यां जनतां द्विष्यात्तस्या दिश आहरेत्। इषमूर्जमहमित आदमिति। इषमेवास्या ऊर्जमादत्ते क्षोधुका भवति। उत्तरवेदिं निवपति। उत्तरवेद्यां ह्यग्निश्चीयते। अथो यज्ञपरुरेव नान्तरेति। पशवो वा उत्तरवेदिः। पशूनेवावरुन्द्धे। अन्नं सव श्रवो वपतीति षड्वेन निवपति। षड्वा ऋतवः संवत्सरः। संवत्सरो ऽग्निर्वैश्वानरः। साक्षादेव वैश्वानरमवरुन्द्धे। अष्टाक्षरा प्रथमा। अष्टाशफाः पशवः। पशूनेवावरुन्द्धे। उत्तरोत्तरिणा मिथुनाः प्रजात्यै। समुद्रं वै नामैतत्प्रजापतेश्छन्दः। समुद्रात्पशवः प्रजायन्ते। पशूनां प्रजात्यै। इन्द्रो वै वृत्राय वज्रं प्राहरत्। स त्रेधाभवत्स्फ्यस्तृतीयं यूपस्तृतीयं रथस्तृतीयम्। यदशीर्यंत ताः शर्कराः। पशुर्वा अग्निः। वज्रः शर्कराः। यच्छर्कराभिः परिमिनोति वज्रेणैवास्मै पशून्परिगृह्णाति। तस्मात्पशवो वज्रेण विधृताः। तस्मात्स्थेयानस्थेयसो नादत्ते। दशभिर्दशभिः परिमिनुयादन्नकामस्य। दशाक्षरा विराट्। अन्नं विराट्। विराज्येवान्नाद्ये प्रतितिष्ठति। नवभिर्नवभिरभिचरतः। त्रिवृद्वज्रः। वज्रमेव भ्रातृव्याय प्रहरति। सप्तभिः सप्तभिः पशुकामस्य। सप्त वै प्राणाः। प्राणेभ्यः पशवः प्रजायन्ते। पशूनां प्रजात्यै। अपरिमित्य शर्कराः सिकता व्यूहेद्यं कामयेतापशुः स्यादिति। अपरिगृहीतमेवास्य रेतः परासिच्यत्यपशुर्भवति। परिमित्य शर्कराः सिकता व्यूहेद्यं कामयेत पशुमान्स्यादिति। परिगृहीतमेवास्मै रेतः सिञ्चति पशुमान्भवति। छन्दांसि वा अग्नेर्योनिः सोमो रेतोधाः। यच्छन्दोभिर्व्युप्य सौम्या व्यूहति योनावेव रेतो दधाति। व्यूहति तस्माद्योनौ गर्भा वर्धन्ते। नानाप्रभृतयो भवन्ति समानोदर्काः। तस्मात्समानाद्योनेर्नानारूपाः प्रजायन्ते। गायत्र्या ब्राह्मणस्य व्यूहेत्। गायत्रो हि ब्राह्मणः। त्रिष्टुभा राजन्यस्य। त्रैष्टुभो हि राजन्यः। जगत्या वैश्यस्य। जागतो हि वैश्यः। यथाछन्दसमेव ॥६॥

उपांश्वन्वाह। अनिरुक्तो वा एतर्हि यज्ञो यर्ह्यव्यावृत्तः। तस्मादुपांश्वन्वाह। छन्दांस्यन्वाह। छन्दोभिर्वा अग्निरुत्तरवेदिमानशे। तस्माच्छन्दांस्यन्वाह। सुपर्णीचैतदधाना यन्ति यदश्वं प्राञ्चं च प्रत्यञ्चं चाक्रमयन्ति। तस्मादसावादित्यः प्राङ् चैति प्रत्यङ् च। प्राजापत्यो ऽश्वः। यदश्वमाक्रमयति प्रजापतिनैवैनं चिनुते। अपां पृष्ठमसि योनिरग्नेरिति पुष्करपर्णमुपदधाति। अपां ह्येतत्पृष्ठं योनिरग्नेः। यत्पुष्करपर्णमुपदधाति स्व एवैनं योनौ चिनुते। शान्त्या अनिर्दाहाय। वर्धमानो महाँ आ च पुष्कर इति। वर्धते ह्येष यो भवति। दिवो मात्रया वरिणा प्रथस्वेति प्रथयत्येव। ब्रह्म जज्ञानं प्रथमं पुरस्तादिति रुक्ममुपदधाति। ब्रह्ममुखाभिर्वै प्रजापतिः प्रजाभिरार्ध्नोत्। ऋद्ध्यै। एकविंशतिनिर्बाधो भवति प्रतिष्ठित्यै। एकविंशतिर्वै देवलोकाः। तेभ्य एव भ्रातृव्यं निर्बाधते। अधस्तान्निर्बाधान्करोति भ्रातृव्यस्यैव निगृहीत्यै। न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्यः। यत्पृथिव्यां चिन्वीतौषधीः शुचा निर्दहेत्। यदन्तरिक्षे वयांसि यद्दिवि दिवम्। अमृतं हिरण्यम्। यद्रुक्ममुपदधात्यमृत एवाग्निं चिनुते। हिरण्यगर्भः समवर्तताग्र इति पुरुषं हिरण्मयमुपदधाति। यजमानलोकमेवैतेन दाधार। अथो मध्येज्योतिषमेवाग्निं चिनुते। द्रप्सश्चस्कन्देत्यभिमृशति। होत्रास्वेवैनं सत्ये प्रतिष्ठापयति। सर्पशीर्षैरुपतिष्ठते। मृत्यव एवैनं परिददाति। अथो या सर्पे त्विषिस्तामेवावरुन्द्धे। यदुपदध्यात्प्रमायुकः स्यात्। यत्समीचीनमीक्षेत शीर्षण्वदध्याद् ग्राम्यान्पशून्दशुकाः स्युः। यद्विषूचीनमारण्यान्। यजुरेव वदेत्। तेनैव तां त्विषिमवरुन्द्धे। तेन शान्तम्। एतस्माद्ध वै पुराग्निचितमदिदृक्षन्त। सर्वा ह्येतास्त्विषीरवारुन्द्ध याग्नौ या सर्पे या सूर्ये। अथैतद्वामदेव्यस्य राक्षोघ्नम्। यज्ञमुखे यज्ञमुखे वै यज्ञं रक्षांसि जिघांसन्ति। रक्षसामपहत्यै। पञ्चैते भवति। पाङ्क्तो ऽग्निः। यावानेवाग्निस्तस्माद्रक्षांस्यपहन्ति। सर्वा दिशो ऽनुपरिचारं जुहोति। दिग्भ्य एव रक्षांसि हन्ति। स्रुचावुपदधाति। इमे एवैतदुपधत्ते। तूष्णीमुपदधाति। न ह्येमे यजुषाप्तुमर्हति। आत्मा वै पुरुषो बाहू स्रुचौ। यत्स्रुचावुपदधाति सात्मत्वाय। दक्षिणतो वै देवानां यज्ञं रक्षांस्याहुतीर्निष्कावमादन्। तानि कार्ष्मर्येणापाघ्नत। यत्कार्ष्मर्यमयीं दक्षिणत उपदधाति रक्षसामपहत्यै। घृतेन पूरयति। वज्रो वै कार्ष्मर्यो वज्रो घृतम्। वज्र एव वज्रं दधाति। गायत्र्योपदधाति। गायत्रो वा अग्निर्गायत्रच्छन्दाः। स्वेनैवैनं छन्दसा समर्धयति। दध्नौदुम्बरीं पूरयति। अन्नं वै

दध्यूर्गुदुम्बरः। अन्न एवोर्जं दधाति। त्रिष्टुभोपदधाति। ऐन्द्री वै त्रिष्टुप्। अन्नमिन्द्रियम्। इन्द्रियमेवान्नाद्यमवरुन्द्धे। इयं वै कार्ष्मर्यमय्यसावौदुम्बरी। यदौदुम्बरीमुत्तरामुपदधाति तस्मादसावस्या उत्तरा मूर्धन्वती। मूर्धैवैताभ्यां क्रियते। विराज्यग्निश्चेतव्यः। स्रुग्वै विराट्। यत्स्रुचावुपदधाति विराज्येवाग्निं चिनुते ॥७॥

यां वा अविद्वानध्वर्युरिष्टकां प्रथमामुपदधाति तया यजमानस्य प्राणमपिदधाति प्रजायाश्च पशूनां च। स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै। प्राजापत्यो ऽश्वः। यदश्वमुपघ्रापयति प्रजापतिनैवैनं चिनुते। इयं वै स्वयमातृण्णा। इमामेवैतदुपधत्ते। यदि मन्येत पूर्वो मातिक्रान्तो भ्रातृव्य इति प्राचीमुदूहेत्। य एवैनं पूर्वो ऽतिक्रान्तो भ्रातृव्यस्तमनया प्रणुदते। यदि मन्येत पश्चादिव मा भ्रातृव्य इति प्रतीचीमपोहेत्। य एवैनं पश्चाद्भ्रातृव्यस्तमनयापनुदते। यदि मन्येत सदृङ् मयेति विचालयेत्। या वा इयं प्रजा व्यधूनुत परा ता अभवन्। इयमेवैनं विधूनुते। अथैषा दूर्वेष्टका। पशुर्वा अग्निः। न पशव आयवसे रमन्ते। पशुभ्य एवैतदायतनं करोति। पशूनां धृत्यै। काण्डात्काण्डात्प्ररोहन्तीति प्रतिष्ठित्यै। सहस्रेण शतेन चेति। सहस्रवती प्रजापतिना संमिता। गच्छति साहस्रीं पुष्टिं पशूनां य एवं विद्वानेतामुपधत्ते। अथैषा वामभृत्। एतया वै देवा असुराणां वामं पशूनवृञ्जत। वाममेवैतया पशून्भ्रातृव्यस्य वृङ्क्ते। द्वियजुर्भवति। भ्रातृव्यलोकमेव द्वियजुषा वृङ्क्ते। द्वितीये हि लोके भ्रातृव्यो हिरण्यशीर्ष्णी भवति। हिरण्यज्योतिरिव स्वर्गं लोकमेति। प्रबाहुक्काचावाहतौ भवतः। तस्मात्प्रबाहुगक्ष्यौ। अथैते रेतःसिचौ। असौ वै स्वराडियं विराट्। उत्तानायां स्त्रियां पुमान्रेतः सिञ्चति। असावस्यां रेतः सिञ्चतीयं प्रजनयति। अग्निरत्ति। संरेतसमग्निं चिनुते। प्रजायते ऽन्यत्र य एवं विद्वानेते उपधत्ते स्वराडसीति दक्षिणत उपदधाति। तस्माद्दक्षिणतः पुमांस्त्रियमुपशये। यदि पूर्ववयसे चिन्वीतोभे सह प्रथमायां चित्यामुपदध्यात्। समीची एवास्मै रेतः सिञ्चतः। अन्यतरामुपदध्याद्यं द्विष्यात्तस्य। रेतसैवैनं व्यर्धयति। यद्युत्तरवयसे चिन्वीत प्रथमायामन्यां चित्यामुपदध्यादुत्तमायामन्याम्। रेत एव सिक्तमाभ्यां परिगृह्णाति। ऋतव्ये उपदधात्यृतूनां विधृत्यै। द्वे द्वे उपदधाति। द्वौ द्वौ ह्यृतवः। अथैषा त्र्यालिखिता। देवाश्च वा असुराश्च समावदेव यज्ञे ऽकुर्वत। यदेव देवा अकुर्वत तदसुरा अकुर्वत। ते देवा एतां त्र्यालिखितामपश्यन्। तामुत्तरलक्ष्माणमुपादधत। तदसुरा नान्ववायन्। ततो देवा अभवन् [परासुरा अभवन्।] य एवं विद्वानेतामुत्तरलक्ष्माणमुपधत्ते भ्रातृव्यस्यानन्ववायाय। भवत्यात्मना परास्य भ्रातृव्यो भवति। अधरलक्ष्माणमुपदध्याद्यं द्विष्यात्तस्य। असुरयोनिमेवैनमनुपराभावयति। इमे वै लोकास्त्र्यालिखिता। इमानेवैतया लोकानाप्नोति। यस्या मृद उखां कुर्वन्ति तस्या एतां कुर्यात्। तेनैवास्य सर्वा इष्टका ज्योतिष्मतीर्यजुष्मतीर्भवन्ति ॥८॥

मेधो वा एष पशूनां यत्कूर्मः। यत्कूर्ममुपदधात्येतमेवैनं मेधमभिसंजानानाः पशव उपतिष्ठन्ते। जीवन्तमुपदधाति। स हि मेध्यः। चतुष्पाद्भवति। चतस्रो दिशः। दिक्ष्वेव प्रतितिष्ठति। मही द्यौः पृथिवी च न इति। द्यावापृथिव्योरेवैतया रूपे दाधार। दध्ना च मधुना चाभ्यनक्ति। अपां वा एष ओषधीनां रसो यन्मधु। यन्मधुनाभ्यनक्त्यपामेवौषधीनां रसमवरुन्द्धे। मेधो वा एष पशूनामूर्द्धिः। यद्दध्नाभ्यनक्ति पशूनामेव मेध ऊर्जं दधाति। इष्टकचिद्वा अन्यो ऽग्निः पशुचिदन्यः। यज्जीवन्तं कूर्ममुपदधाति तेनैवैनं पशुचितं करोति। एष वै स्वर्गस्य लोकस्योत्तमपदी। यथा प्रजानन्क्षेत्रविदञ्जसान्यात्रयत्येवमेवैनमेष स्वर्गं लोकमभिनयति। विष्णोर्नाभावग्निश्चेतव्यः। यो वा अनाभिमग्निं चिनुते यजमानस्य नाभिमनुप्रविशति। स एनं निर्दहति। एषा वै विष्णोर्नाभिर्यदुलूखलमुपदधाति। विष्णोरेव नाभावग्निं चिनुते। औदुम्बरं भवति। ऊर्ग्वा उदुम्बरः। ऊर्जमेव मध्यतो दधाति। तस्मान्मध्यतः ऊर्गूर्जयति। प्रादेशमात्रं भवति एतावती हि विष्णोर्नाभिः। वैष्णव्या कर्मण्यभ्योपदधाति। कर्म ह्येतत्क्रियते। अथैषोखा ओजो वा एतद्वीर्यं संभ्रियते यदुखा। ओज एव वीर्यं मध्यतो दधाति। एषां वा एतल्लोकानां ज्योतिरवरुन्द्धे। ज्योतिरेव मध्यतो दधाति। मध्येज्योतिषमग्निं चिनुते। तस्मान्मध्यतो ज्योतिरुपासते। सिकताभिः पूरयति स्वेनायतनेन। अग्नेर्वा एतद्वैश्वानरस्य भस्म यत्सिकताः। रूपेणैव वैश्वानरमवरुन्द्धे। यदूनामुपदध्यात्क्षोधुको यजमानः स्यात्। पूर्णामुपदधात्यक्षोधुको यजमानो भवत्यनुपदस्यदन्नमत्ति। घृतेन पूरयति। एतद्वा अग्नेः प्रियं धाम यद्घृतम्। प्रियेणैवैनं धाम्ना समर्धयति ॥९॥

एकविंशतिं माषान्प्रीन्युप्य पुरुषशीर्षमाहरति। अमेध्या वै माषा अमेध्यं पुरुषशीर्षम्। अमेध्येनैवामेध्यं क्रीणाति। एकविंशतिर्भवन्ति। एकविंशो वै पुरुषः। यावानेवास्यात्मा तं क्रीणाति। सप्तधातृण्णां वल्मीकवपां प्रतिनिदधाति। व्युद्धं वा एतत्प्राणैः। सप्त शीर्षन्याः प्राणाः। प्राणैरेवैनत्समर्धयति। यमगाथा गायति। यमलोकादेवैनद्वृङ्क्ते। तिस्रो गायति। त्रय इमे लोकाः। एभ्य एवैनल्लोकेभ्यो वृङ्क्ते। तस्माद्गायते न देयम्। गाथा ह्येव तद्वृङ्क्ते। अप वा एतस्मादिन्द्रियं क्रामति प्राणाः शीर्षं वीर्यं चक्षुः श्रोत्रं वाक्। व्यृद्धेन्द्रियं वा एतदमेध्यम्। मृतशीर्षमिति वा एतदाहुः। मेध्यं हिरण्यम्। यद्धिरण्यशल्कैः प्रत्यस्यति मेध्यमेवैनद्यज्ञियं करोति। उखायामपिधाय प्रत्यस्यति। प्रतिष्ठामेवैनद्गमयित्वा प्राणैः समर्धयति। सहस्रदा असि सहस्राय त्वेति पुरुषशीर्षमुपदधाति। पुरुषो ह वै सहस्रं पशून्यच्छति। सहस्रमन्ये पशवः। यन्मध्ये पुरुषशीर्षमुपदधाति समत्वाय। अथैतानि पशुशीर्षाणि। एता ह वै साहस्रीरिष्टकाः सोमदक्षः कौश्रेयः श्मशानीयोपदधौ। ततो ह वै स साहस्रीं पुष्टिं पशूनामगाम्। गच्छति साहस्रीं पुष्टिं पशूनां य एवं विद्वानेता उपधत्ते। पुरस्तात्प्रतीचीनमश्वस्य शिर उपदधाति पश्चात्प्राचीनमृषभस्य। गोऽश्वानेवास्मिन्समीचो दधाति। समीचीनान्युपदध्याद्यं कामयेत पशुमान्स्यादिति। समीच एवास्मिन्पशून्दधाति। विषूचीनान्युपदध्याद्यं कामयेतापशुः स्यादिति। विमुखानेवास्मात्पशून्करोति। नान्तरा पशुशीर्षाणि व्यवेयादध्वर्युः। यविष्ठो वै नामैषो ऽग्निः। प्राणानस्य वृञ्जीत प्रमीयेत। एकमुपधायैतैः सर्वैरुपतिष्ठते। तद्वा सर्वतो ऽनुपरिहारं सादयेत्। तेनैव सर्वाण्युपधीयन्ते। नार्तिमार्छत्यध्वर्युर्न प्रेमं न्येति। एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च। तानेतच्छुचार्पयति। अमुमारण्यमनु ते दिशामि ते ते शुगृच्छत्विति। ग्राम्येभ्य एव पशुभ्य आरण्यान्पशूञ्छुचमनूत्सृजति। तस्मादेते समावत्पशूनां प्रजायमानानां कनिष्ठाः। शुचा ह्येत ऋताः ॥१०॥

पशुर्वा एष यदग्निः। पशोरेष योनिर्विक्रियते रेतोऽपस्याः। यदपस्या उपधीयन्ते योनावेव रेतो दधाति। यदा वै पशुः संभवति अथ जायते। पशवश्छन्दस्याः। यदपस्या अनु छन्दस्या उपदधाति पशूनां प्रजात्यै। पञ्चैता उपदधाति। पाङ्क्ताः पशवः। यावानेव पशुस्तं प्रजनयति। इयं वा अग्नेरतिदाहादबिभेत्। सैता अपस्या असृजत। ता उपाधत्त। यदस्या उपधीयन्ते ऽस्या अनतिदाहाय। उवाच हैतमदितिर्ब्रह्मणात्र यस्यैता उपधीयन्त इति। अति ब्रह्मणात्र य एवं विद्वानेता उपधत्ते। पञ्च पुरस्तात्प्रतीचीरुपदधाति। तस्मात्पुरस्तात्प्रत्यङ् पशुर्जायते। पञ्च दक्षिणत उदीचीः। तस्माद्दक्षिणतः पुमांसमुपशये। पञ्च पश्चात्प्राचीः। तस्मात्पश्चात्प्राचीनं रेतो धीयते। पञ्चोत्तराच्छन्दस्याः। पशवो वै छन्दस्याः। उत्तरादायतनाः पशवः। पशूनेव प्रजातान्स्वमायतनमभिपर्यूहति। पशूनामहिंसायै। नोत्तरादपस्या उपदध्यात्। यदुपदध्याद्दमीयेत प्रजा वरुणो गृह्णीयात्। अपस्या अनु प्राणभृत उपदधाति। रेतस्येव सिक्ते प्राणं मनश्चक्षुः श्रोत्रं वाचं दधाति। तस्मात्प्राणन्पश्यञ्छृण्वन्वदन्पशुर्जायते। अयं पुरो भूरिति याः प्राणवतीस्ताः पुरस्तादुपदधाति। प्राणमेव पुरस्ताद्धाति। तस्मात्प्राङ् पशुः प्राणिति। अयं दक्षिणा विश्वकर्मेति या मनस्वतीस्ता दक्षिणतः। मन एव दक्षिणतो दधाति। तस्माद्दक्षिणो ऽर्धो मनस्वितरस्तस्माद्दक्षिणतो मन उपचरन्ति। अयं पश्चाद्विश्वव्यचा इति याश्चक्षुष्मतीस्ताः पश्चात्। चक्षुरेव पश्चाद्धाति। तस्मात्प्राङ् पश्यति। इदमुत्तरात्स्वरिति याः श्रोत्रवतीस्ता उत्तरात्। श्रोत्रमेवोत्तरतो दधाति। तस्मादुत्तरतस्पृशः शृणोति। इयमुपरि मतिरिति या वाङ्मतीस्ता मध्ये। वाचमेव मध्यतो दधाति। तस्मान्मध्यतो वाग्वदति। अक्ष्णयोपदधाति। तस्मादक्ष्णया पदः पशवः प्रहरन्तो यन्ति। याः पुरस्तात्ताभिर्वसिष्ठ आर्ध्नोत्। या दक्षिणतस्ताभिर्भरद्वाजः। याः पश्चात्ताभिर्जमदग्निः। या उत्तरतस्ताभिर्विश्वामित्रः। या मध्ये ताभिर्विश्वकर्मा। य एवमेतासामृद्धिं वेदर्ध्नोति। य एवमासां क्लृप्तिं वेद कल्पते ऽस्मै। य एवमासां बन्धुतां वेद बन्धुमान्भवति। य एवमासां निदानं वेद निदानवान्भवति। य एवमासामायतनं वेदायतनवान्भवति। य एवमासां प्रतिष्ठां वेद गच्छति प्रतिष्ठाम् ॥११॥

अथैता आश्विनीः। उत्सन्नयज्ञो वा एष यदग्निः। को ह तद्वेद यावदेतस्य न क्रियते यावत्र चीयते। अश्विनौ देवानां भिषजौ। यदेवास्यात्र न क्रियते यत्र चीयते तदेताभिः कल्पयति भिषज्यति। पञ्चैता उपदधाति। पाङ्क्तो ऽग्निः।

यावानेवाग्निस्तस्मै भेषजं करोति। अग्नेरेवैताभिर्दिशः कल्पयते। अदित्यास्त्वा पृष्ठे सादयामीति। इमानेवैतया लोकान्दाधार। ऋतव्या उपदधात्यृतूनां विधृत्यै। पञ्चोपदधाति। पञ्च वा ऋतवः। यावन्त एवर्तवस्तान्कल्पयति। समानप्रभृतयो भवन्ति समानोदर्काः। समानप्रभृतयो ह्यृतवः समानोदर्काः। एकया व्याहृत्या व्यावर्तयति। तस्मादृतवो व्यावर्तन्ते। तस्मात्समानस्य संवत्सरस्य नाना रूपाणि। आश्विनीरन्वृतव्या उपदधाति। रेतस्येव हित ऋतूनुपदधाति। तस्माद्रेतो हितमृतूननु प्रजायते। ऋतव्या अनु वायव्या उपदधाति। ऋतुष्वेव प्राणं दधाति। तस्मादेते समानाः परियन्तो न जीर्यन्ति। तस्मादृतूननु वायुरावरीवर्ति। वायव्या अन्वपस्या उपदधाति। तस्माद्वायुर्वृष्टिं वहति। वृष्टिमेवैताभिरवरुन्द्धे। यदेकधोपदध्यादेकमृतुं वर्षेत्। अनुपरिहारं सादयति। तस्मादृतुमृतुं वर्षति। अपस्या अनु वयस्या उपदधाति। पशवो वै वयस्याः। यदपस्या अनु वयस्या उपदधाति तस्मान्नानामनसः पशवो नानाव्रता अप एवाभि समनसः। अपस्या उपधाय वयस्या उपदध्याद्यं कामयेत पशुमान्स्यादिति। संज्ञानं वा एतत्पशूनां यदापः। संज्ञान एव पशूनामग्निं चिनुते। पशुमान्भवति। वयस्या उपधायापस्या उपदध्याद्यं कामयेतापशुः स्यादिति। पशूनामेवासंज्ञाने ऽग्निं चिनुते। अपशुर्भवति। चतस्रः पुरस्तादुपदधाति। तस्मात्पुरस्तात्पशुरणीयान्। तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे। मूर्धन्वतीः। तस्मात्पुरस्तात्पशूनां मूर्धा। पञ्चपञ्चाभितः पशोः सयत्वाय। तस्मात्प्राङ्पशुः प्रवणः। बस्तो वय इति दक्षिणत उपदधाति। वृष्णिर्वय इत्युत्तरात्। अंसावेवास्योपदधाति। व्याघ्रो वय इति दक्षिणे पक्षे। सिंहो वय इत्युत्तरस्मिन्। पक्षयोरेव वीर्यं दधाति। व्याघ्रो वय इति पूर्वाम्। सिंहो वय इत्यपराम्। तस्मात्पुरो व्याघ्रो जायते पश्चात्सिंहः। पुरुषो वय इति मध्ये। तस्मात्पुरुषः पशूनामधिपतिः ॥१२॥

इन्द्राग्नी अव्यथमानामिति। ओजो वै वीर्यमिन्द्राग्नी। अन्तरिक्षमेषा चितिः। शिथिलमिवान्तरिक्षम्। प्रजा अन्तरिक्षम्। प्रजास्वेवौजो वीर्यं दधाति। स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै। प्राजापत्यो ऽश्वः। यदश्वमुपघ्रापयति प्रजापतिनैवैनं चिनुते। अथैता दिश्याः। देवानां वै स्वर्गं लोकं यतां तेषां दिश समव्लीयन्त। त एता दिश्या अपश्यन्। ताभिर्दिशो ऽदृंहन्। यदेता उपधीयन्ते दिशां विधृत्यै। राज्ञ्यसि प्राची दिगिति। तस्मादेषा दिशां राज्ञी। विराडसि दक्षिणा दिगिति। तस्मादेषा दिशां विराजति। सम्राडसि प्रतीची दिगिति। तस्मादत्र साम्राज्यम्। स्वराडस्युदीची दिगिति। तस्मादत्र स्वाराज्यम्। अधिपत्न्यसि बृहती दिगिति। तस्मादेषा दिशामधिपत्नी। एतान्येव सर्वाणि भवति य एवं विद्वानेता उपधत्ते। आयुर्मे पाहीति दश पुरस्तादुपदधाति। नव वै पुरुषे प्राणा नाभिर्दशमी। प्राणानेवास्मिन्दधाति। ज्योतिर्मे यच्छेत्युत्तमाम्। ज्योतिरेवोत्तमं दधाति। तस्माद्वाक्प्राणानां ज्योतिरुत्तमम्। दशैता उपदधाति। दशाक्षरा विराट्। विराट् छन्दसां ज्योतिः। चक्षुर्ज्योतिः। चक्षुरेव प्रजानां पुरस्ताद्धाति। मा छन्द इति दक्षिणतः। तस्माद्दक्षिणावृतो मासाः। पृथिवी छन्द इति पश्चात्प्रतिष्ठित्यै। अग्निर्देवतेत्युत्तरात्। ओजो वा अग्निः। ओज एवोत्तराद्धाति। तस्मादुत्तरादभिप्रयायी जयति। द्वादश दक्षिणत उपदधाति। द्वादश पश्चाद्द्वादशोत्तरात्। ताः षट्त्रिंशत्संपद्यन्ते। षट्त्रिंशदक्षरा बृहती। बृहती छन्दसां स्वाराज्यमानशे। स्वाराज्यं गच्छति य एवं विद्वानेता उपधत्ते। षट्त्रिंशदेताः। षट्त्रिंशदक्षरा बृहती। बार्हताः पशवः। अन्तरिक्षमेषा चितिः। पशवो ऽन्तरिक्षम्। पशुष्वेव पशून्दधाति। राडसीति पुरस्तादुपदधाति। य आदित्यधामानः प्राणास्तांस्तद्दाधार। यन्त्री राडिति पश्चात्। ये ऽङ्गिरोधामानः प्राणास्तांस्तद्दाधार। आदित्यधामानो वा अन्ये प्राणा अङ्गिरोधामानो ऽन्ये। ये पुरस्तात्त आदित्यधामानो ये पश्चात्ते ऽङ्गिरोधामानः। मूर्धासि राडिति पुरस्तादुपदधाति। सप्त पुरस्तादुपदधाति सप्त पश्चात्। तस्मादधरः प्राण उत्तरेषां प्राणानामर्धभाक्। प्रजापतिः प्रजाः सृष्ट्वा तासामकामयत मूर्धा स्यामिति। स एता मूर्धन्या अपश्यत्। ताभिर्निरजिहीत। तासां मूर्धाभवत्। तन्मूर्धन्यानां मूर्धन्यत्वम्। मूर्धैव समानानां भवति य एवं विद्वानेता उपधत्ते ॥१३॥

आशुस्त्रिवृदिति पुरस्तादुपदधाति। यज्ञमुखं वै त्रिवृत्। यज्ञमुखमेव पुरस्ताद्वियातयति। व्योमा सप्तदश इति दक्षिणतः। अन्नं वै सप्तदशः। सप्तदशं वै संवत्सरमन्नमनुप्रजायते। अन्नमेव दक्षिणतो दधाति। तस्माद्दक्षिणेन हस्तेन पुरुषो ऽन्नमत्ति। यत्सप्तदशवतीं दक्षिणत उपदधाति तस्माद्दक्षिणं पक्षं वयांस्यनुपरिप्लवन्ते। एकविंशवतीं

पश्चात्प्रतिष्ठित्यै। पश्चाद्धि वयांसि प्रतितिष्ठन्ति। पञ्चदशवतीमुत्तरात्। ओजो वै पञ्चदशः। ओज एवोत्तराद्धाति। तस्मादुत्तरादभिप्रयायी जयति। प्रतूर्तिरष्टादश इति पुरस्तात्। द्वौ त्रिवृतावभिपूर्वमेव यज्ञमुखे वियातयति। पञ्चदशवती दक्षिणतः सप्तदशवतीमुत्तरात्पक्षयोः सयत्वाय। अन्नं वै सप्तदशः। यत्सप्तदशवतीमुभयत उपदधात्यन्नमेवोभयतो दधाति। तस्मादुभाभ्यां हस्ताभ्यां परिगृह्य पुरुषो ऽन्नमत्ति। एकविंशवतीं पश्चात्प्रतिष्ठित्यै। अग्नेर्भागो ऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोम इत्येतत्। एतद्वै देवा एताभिरस्पृण्वन्। एतदेतदेवैताभि स्पृणोति। ता एता स्पृतयो नामेष्टकाः। एकयास्तुवत प्रजा अधीयन्तेत्येतत्। एतद्वै देवा एताभिरसृजन्त। एतदेवैताभिः सर्वमवरुंद्धे। अर्कस्य वा एषा विधामनु विधीयते। अन्नमर्को ऽर्को ऽग्निः। अत्त्यन्नं यस्यैवं विदुषो विधीयते ॥१४॥

देवाश्च वा असुराश्च समावदेव यज्ञे ऽकुर्वत। यदेव देवा अकुर्वत तदसुरा अकुर्वत। ते देवा एतां चतुर्थीं चितिमपश्यन्। तामन्यथानूच्यान्यथोपादधत। तदसुरा नान्ववायन्। ततो देवा अभवन्परासुरा अभवन्। यस्यैवं विदुष उपधीयते यश्चैवं विद्वानुपदधाति भवत्यात्मना परास्य भ्रातृव्यो भवति। आशुस्त्रिवृदिति पुरस्तादुपदधाति। यज्ञमुखं वै त्रिवृत्। यज्ञमुखमेव पुरस्ताद्धाति। व्योमा सप्तदश इति दक्षिणतः। अन्नं वै सप्तदशः। अन्नमेव दक्षिणतो ऽवरुंद्धे। एकविंशवतीं पश्चात्प्रतिष्ठित्यै। पञ्चदशवतीमुत्तरात्। ओजो वै पञ्चदशः। ओज एवोत्तराद्धाति। तस्मादुत्तरादभिप्रयायी जयति। .. [॥१५॥]

.... [यवानां भागो ऽसीति दक्षिणतः। मा] सा वै यवाः। अन्नं मासाः अन्नमेव दक्षिणतो ऽवरुंद्धे। ऋभूणां भागो ऽसीति पश्चात्। त्रयस्त्रिंशद्देवताः। देवतास्वेव प्रतितिष्ठति। वीवर्तोऽष्टाचत्वारिंश इत्युत्तरात्। तस्माद्धस्तौ समावद्वीर्यौ। अर्कस्य वा एषा विधामनु विधीयते। अन्नमर्को ऽर्को ऽग्निः। अत्त्यन्नं यस्यैवं विदुषो विधीयते। या मुख्यास्ताः पुरस्तादुपदधाति। आस्य मुख्यो जायते य एवं वेद। या अन्नवतीस्ता दक्षिणतः। आस्यान्नादो जायते य एवं वेद। या प्रतिष्ठावतीस्ताः पश्चात्। गच्छति प्रतिष्ठां य एवं वेद। या ओजस्वतीस्ता उत्तरात्। आस्य बली जायते य एवं वेद। एवमेतासां क्लृप्तिं वेद कल्पते ऽस्मै ॥१६॥

अग्ने जातान्प्रणुदा नः सपत्नानिति पुरस्तादुपदधाति। य एवैनं पूर्वो ऽतिक्रान्तो भ्रातृव्यस्तं तया प्रणुदते। सहसा जातानिति पश्चात्। य एवैनं पश्चाद्भ्रातृव्यस्तं तयापनुदते। षोडश स्तोम इत्युत्तरात्। चतुश्चत्वारिंश स्तोम इति दक्षिणतः। वज्रो वै षोडशः। वज्रस्त्रिष्टुप्। त्रैष्टुभश्चतुश्चत्वारिंशः। सव्यापग्रहणो वै वज्रो दक्षिणाविसर्जनः। भ्रातृव्यमेव प्रणुद्य तस्मै वज्रमनुविसृजति। चतुश्चत्वारिंश स्तोम इति दक्षिणतः। ब्रह्मवर्चसं वै चतुश्चत्वारिंशः। ब्रह्मवर्चसमेव दक्षिणतो ऽवरुंद्धे। षोडश स्तोम इत्युत्तरात्। ओजो वै षोडशः। ओज एवोत्तराद्धाति। तस्मादुत्तरादभिप्रयायी जयति। पृथिव्याः पुरीषमसीति मध्ये। पुरीषं वा आत्मनो मध्यम्। सात्मानमेवाग्निं चिनुते। ता एता अभ्रातृव्या नामेष्टकाः। नास्य भ्रातृव्यो भवति य एवं विद्वानेता उपधत्ते। अथैता विराजः। विराजमेव पशुषूत्तमां दधाति। तस्मात्पशुमानुत्तमां वाचं वदति। दशदशोपदधाति सयत्वाय। देवा वै स्वर्गं लोकं यन्तस्तेषां यानि च्छन्दांस्यनिरुक्तानि स्वर्ग्याण्यासंस्तैः सह स्वर्गं लोकमायन्। तान्यृषयो ऽनुप्राजिज्ञासन्त। तानीष्टकाभिर्निरमिमत। तानीमानि च्छन्दांसि यान्ययज्ञवाहानि। यान्येव देवानां छन्दांस्यानिरुक्तानि स्वर्ग्याणि तैः सह स्वर्गं लोकमेति य एवं विद्वानेता उपधत्ते॥ बृहस्पतिर्वा

अथैते स्तोमभागाः। बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामाहरत्। यदेत उपधीयन्ते यज्ञस्य प्रतिष्ठित्यै। बृहस्पतिर्वा एततेजो यज्ञस्य समभरत्। यदेतउपधीयन्ते सतेजसमेवाग्निं चिनुते। प्रजापतिः प्रजा असृजत। ता स्तोमभागैरेवासृजत। यदेत उपधीयन्ते प्रजननाय। दक्षिणतो वै देवानां यज्ञोऽव्लीयत। तं स्तोमभागैः प्रत्युदस्तभ्नुवन्। यदेते दक्षिणत उदञ्च उपधीयन्ते यज्ञस्य प्रत्युत्तब्ध्यै। सप्त सप्तोपदधाति सवीर्यत्वाय। श्रोण्मध्ये प्रतिष्ठित्यै। अथैता नाकसदः। नाकसद्भिर्वै देवाः स्वर्गं लोकमायन्। यदेता उपधीयन्ते स्वर्गस्य लोकस्याभिजित्यै। न वा अमुं लोकं जग्मुषे किञ्चनाकम्। तन्नाकसदां नाकसत्त्वम्। ता एताः सर्वपृष्ठा नामेष्टकाः। यदेव किञ्च पृष्ठानां तेजस्तदवरुंद्धे य एवं विद्वानेता उपधत्ते। अथैताः पञ्चचूडाः। यजमानायतनं वै पत्न्यः। यन्नाकसत्सु पञ्चचूडा उपदधाति नाक एव यजमानं

प्रतिष्ठापयति। अप्सरसो वा एता एतद्रूपं कृत्वा पत्न्यो भूत्वामुष्मिंल्लोके यजमानमुपशेरते। पश्चात्प्राचीमेकामुपदधाति। तस्मात्पश्चात्प्राची पत्न्यन्वास्ते। तनूपानीर्वा एता यजमानस्य। सर्वमायुरेति य एवं विद्वानेता उपधत्ते। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एता वै देवता अभिचरणीयाः। यं द्विष्यात्तं ब्रूयादमुं वो जम्भे दधामीति। एताभ्य एवैनं देवताभ्य आवृश्चति ताजकुप्रधन्वति ॥१७॥

आयोस्त्वा सदने सादयामीत्यायुरेवोत्तमं दधाति। तस्मादायुः प्राणानामुत्तमम्। स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै। प्राजापत्यो ऽश्वः। यदश्वमुपघ्रापयति प्रजापतिनैवैनं चिनुते। अथैषा विकर्णी। देवानां वा एषा विक्रान्तिर्यद्विकर्णी। देवानामेवैनं विक्रान्तिमनु विक्रमयति। वायुमती। प्राणो वै वायुः। आयुः स्वयमातृण्णा। आयुश्चैवास्मिन्प्राणं च समीची दधाति। सं वा एनमेतदि द्धे यच्चिनोति। दीपयति वायुमत्या। संवत्सरमेवाग्निं चिन्वीत। संवत्सरो वा अग्निर्वैश्वानरः। तस्याहोरात्राणीष्टकाः। आप्तेष्टकमेवैनं चिनुते। ऋध्नोति। यन्नैवं चिन्वीत प्रिययैन तन्वा व्यर्धयेत्। यदेवं चिनुते प्रिययैवैनं तन्वा समर्धयति। सतनूरेवैतद्वैश्वानरश्चीयते। ऋतव्या उपदधात्यृतूनां विधृत्यै। द्वे द्वे उपदधाति। द्वौ द्वौ ह्यृतवः। चतस्रो मध्यमायां चित्यामुपदधाति। अन्तरिक्षमिव वा एषा मध्यमा चितिः। शिथिलमिवान्तरिक्षम्। चतस्रो दिशः। दिक्ष्वेव प्रतितिष्ठति। ऋतुभ्यो वा एता देवा निरमिमत। तदृतव्यानामृतव्यात्वम्। आयन्तमायन्तमृतुं प्रतितिष्ठति य एवं विद्वानेता उपधत्ते। नानाप्रभृतयो भवन्ति समानोदर्काः। तस्मात्समानस्य संवत्सरस्य नाना रूपाणि। अवकामुपधायेष्टकामुपदधाति। अग्नेर्वा एषा वैश्वानरस्य योनिर्यदवका। स्व एवैना योनावुपदधाति। शान्त्या अनिर्दाहाय। ऋध्नोति य एवं विद्वानेता उपधत्ते। अथैता विश्वज्योतिषः। प्राणभृतो वा एता यजमानस्य। प्राणमेव प्रथमया दाधार व्यानं द्वितीययापानं तृतीयया। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एता वै देवता ज्योतिष्मतीः। अग्निरेवास्मा अस्मिंल्लोके ज्योतिर्भवति वायुरन्तरिक्षे सूर्यो दिवि। सर्वे ऽस्मा इमे लोका ज्योतिष्मन्तो भवन्ति। अधिपतिवतीर्भवन्ति। आधिपत्यमेवैताभिर्गच्छति। लोकं पृण छिद्रं पृणाथो सीद ध्रुवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरिति। ओजो वै वीर्यमिन्द्राग्नी। ओजसैवैनं वीर्येण चिनुते। ता अस्य सूददोहस इति। तस्मात्परुषिपरुषि सूदः। सोमं श्रीणन्ति पृश्नय इति। अन्नं पृश्नि। अन्नमेवावरुंद्धे। त्रिष्वा रोचने दिव इति। त्रीणि सवनानि। सवनेष्वेवैनं चिनुते। अनुष्टुबनुचरा भवति। प्राणो वा अनुष्टुप्। तस्मात्प्राणः सर्वाण्यङ्गान्यनुसंचरति। वाग्वा अनुष्टुप्। यदेवास्यात्र न क्रियते यत्र चीयते तद्वाचा कल्पयति तद्भिषज्यति ॥१८॥

या आग्नेयीर्गायत्रीर्मूर्धन्वतीस्ताभिस्तिसृभिस्तिस्रः पूर्वार्ध उपदध्यात्। अथ त्रिष्टुब्भिरथ जगतीभिरथानुष्टुब्भिरथ पङ्क्तिभिरथ यत्किञ्चाग्नेयं छन्दः। तिस्र एकेन च्छन्दसा तिस्र एकेन। सर्वमग्निमनूपदध्यात्। एतां ह वै यज्ञसेनश्चैत्रश्चितिं विदांचकार। तया ह वै स आनर्ध। ऋध्नोति य एवं विद्वानेता उपधत्ते। पशवो वै छन्दांसि वामं देवानाम्। पशूनेव वामं भ्रातृव्यस्य वृङ्क्ते। आत्मा वा आहवनीयो भ्रातृव्यो धिष्ण्यः। यद्गार्हपत्य उपदध्याद्भ्रातृव्ये वामं पशून्दध्यात्। आहवनीय उपदधाति। आत्मन्नेव वामं पशून्धत्ते। सैषोत्तरवेदिर्नाम चितिः। तस्मादेता उत्तमायां चित्यामुपधीयन्ते। उत्तमः समानानां भवति य एवं विद्वानेता उपधत्ते। पशुर्वा अग्निः। अग्निमुखान्प्रजापतिः पशूनसृजत। यत्पञ्च चितयस्तस्मात्पाङ्क्ताः पशव उच्यन्ते। यत्तिस्रश्चितयस्त्रिवृद्ध्यग्निः। यद्द्वे द्विपाद्यजमानः। प्रतिष्ठित्यै। द्व्यक्षरं लोम द्व्यक्षरं चर्म द्व्यक्षरं मांसं द्व्यक्षरमस्थि द्व्यक्षरो मज्जा। तद्दश। दशाक्षरा विराट्। तस्माद्वैराजाः पशव उच्यन्ते॥

यो जानुदघ्नः स गायत्रचिद्यो नाभिदघ्नः स त्रिष्टुप्चिद्यः पुरुषमात्रः स जगच्चित्। श्येनचितं पक्षिणं चिन्वीत स्वर्गकामः। श्येनो वै वयसां क्षेपिष्ठः। स्वर्गस्य लोकस्य समष्ट्यै। अलजचितं पक्षिणं चिन्वीत प्रतिष्ठाकामः। चतस्रो दिशः। दिक्ष्वेव प्रतितिष्ठति। कङ्कचितं शीर्षण्वन्तं चिन्वीत यः कामयेत सशीर्षामुष्मिंल्लोके स्यामिति। सशीर्षैवामुष्मिंल्लोके भवति। प्रउगचितं चिन्वीत यदि मन्येत पूर्वो मातिक्रान्तो भ्रातृव्य इति। प्रउगचिता वै देवा असुरान्प्राणुदन्त य एनान्पूर्वं ऽतिक्रान्ता आसन्। य एवैनं पूर्वो ऽतिक्रान्तो भ्रातृव्यस्तं तेन प्रणुदते। उभयतः प्रउगं

चिन्वीत यदि मन्येत पश्चान्मे भ्रातृव्य इति। य एवास्य पश्चाद्भ्रातृव्यस्तं तेनापनुदते प्र श्रेयांसं भ्रातृव्यं नुदते प्रति पापीयांसं नुदते। रथचक्रचितं चिन्वीताभिचरन्। रथचक्रचितं ह स्म वै देवा असुरेभ्यो वज्रमियद्धयस्त्वेत्यभ्यवसृजन्ति। वज्रमेव भ्रातृव्याय प्रहरति स्तृणुत एनम्। समूह्यं चिन्वीत पशुकामः। पशवो वै पुरीषम्। पशूनेवावरुंद्धे। परिचाय्यं चिन्वीत सजातकामः। परीव वै सजाता विशन्ति। सजातैरेवैनं परिचिनोति। द्रोणचितं चिन्वीतान्नकामः। पात्रेण वा अन्नमद्यते। तेनैव मुखेनान्नमत्ति। श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति। श्मशानचिता वै यमो ऽमुष्मिंल्लोक आर्ध्नोत्। पितृलोक एवर्ध्नोति। गायत्रचितं पक्षिणं चिन्वीत स्वर्गकामः। अग्निर्वै तत्पक्षी भूत्वा स्वर्गं लोकमपतत्। यदाहुर्गायत्री पक्षिणी भूत्वा स्वर्गं लोकमपतदिति स्वर्गस्य लोकस्य समष्ट्यै। ऊर्ध्वा वा अन्ये ऽग्नयश्चीयन्ते न्यञ्चोऽन्ये। य ऊर्ध्वाश्चीयन्ते ते ऽमुष्मै लोकाय ये न्यञ्चस्ते ऽस्मै। यदूर्ध्वस्तिष्ठन्हिरण्यशल्कैः प्रोक्षति तेनैवोर्ध्वं चिनुते। स्वर्गस्य लोकस्य समष्ट्यै ॥१९॥

षड्रात्रीर्दीक्षितः स्यात्। षड्वा ऋतवः संवत्सरः। संवत्सरो विराट्। विराजमेवाप्नोति। त्रयोदश रात्रीर्दीक्षितः स्यात्। त्रयोदश मासाः संवत्सरः। संवत्सरो विराट्। विराजमेवाप्नोति। दीक्षया विराडाप्तव्या। तिस्रो रात्रीर्दीक्षितः स्यात्। त्रिपदा विराट्। विराजमेवाप्नोति। दश रात्रीर्दीक्षितः स्यात्। दशाक्षरा विराट्। विराजमेवाप्नोति। द्वादश रात्रीर्दीक्षितः स्यात्। द्वादश मासाः संवत्सरः। संवत्सरो विराट्। विराजमेवाप्नोति। पञ्चदश रात्रीर्दीक्षितः स्यात्। पञ्चदशार्धमासस्य रात्रयः। अर्धमासशः संवत्सर आप्यते। संवत्सरो विराट्। विराजमेवाप्नोति। चतुर्विंशतिं रात्रीर्दीक्षितः स्यात्। चतुर्विंशतिः संवत्सरस्यार्धमासाः। अर्धमासशः संवत्सर आप्यते। संवत्सरो विराट् विराजमेवाप्नोति। मासं दीक्षितः स्यात्। यो मासः स संवत्सरः। संवत्सरो विराट्। विराजमेवाप्नोति। चतुरो मासो दीक्षितः स्यात्। चतुरो वा एतं मासौ वसवो ऽबिभरुः। ते पृथिवीमाजयन्गायत्रीं छन्दः। अष्टौ रुद्राः। ते ऽन्तरिक्षमाजयंस्त्रिष्टुभं छन्दः। द्वादशादित्याः। ते दिवमाजयञ्जगतीं छन्दः। ततो वै ते व्यावृतमगच्छञ्श्रैष्ठ्यं देवानाम्। द्वादश मासो भृत्वाग्निं चिन्वीत। द्वादश मासाः संवत्सरः। तस्याहोरात्राणीष्टकाः। आप्तेष्टकमेवैनं चिनुते। ऋध्नोति। व्यावृतमेव गच्छति श्रैष्ठ्यं समानानाम्॥

गायत्रं पुरस्ताद्गायति। शिरो वै देवानां गायत्रम्। गायत्रो ऽग्निः। तस्माद्गायत्रं पुरस्ताद्गायत्याग्निपावमान्याम्। अयं वाव यः पवते स प्राणः। मुखं देवानामग्निः। मुखत एव प्राणं दधाति। तस्मान्मुखतः प्राणः। रथन्तरमुत्तराद्गायति बृहद्दक्षिणतः। पक्षावेवास्योपदधाति। इयं वै रथन्तरमसौ बृहत्। आभ्यामेवैनं परिगृह्णाति। यज्ञायज्ञियं पुच्छे गायति श्रोण्यां वामदेव्यम्। आत्मा वै यज्ञायज्ञियं तनूर्वामदेव्यम्। सात्मानमेवैनं सतनूं चिनुते। हृदयमपिकक्षे। तस्मादपिकक्षे हृदयमनृचं भवति। तस्मादनस्थकं हृदयम्। अर्क्यैः परिगायति। अर्को वा अग्निः। अर्कमेवार्क्यैः परिगायति शान्त्यै॥२०॥

संवत्सरो वा अन्तरा तमः स्वर्गं लोकम्। ज्योतिष्मतीरेताः साहस्रीरिष्टकाः। यद्धिरण्यशल्कैः प्रोक्षति ज्योतिषैवास्मै संवत्सरं विवासयति। सहस्रस्य प्रमासि सहस्रस्य प्रतिमासीति। सहस्रसंमिता हीमे लोकाः। घ्नन्ति वा एतदग्नेर्यदस्यात्र न क्रियते यत्र चीयते। अमृतं हिरण्यम्। यद्धिरण्यशल्कैः प्रोक्षत्यमृतेनैवास्य तन्वं पृणक्ति। रुद्रं वै देवान्निरभजन्। स देवानायतयाभिपर्यावर्तत। ते देवा एतच्छतरुद्रियमपश्यन्। तेनैनमशमयन्। यच्छतरुद्रियं जुहोति तेनैवैनं शमयति। जानुदघ्ने ऽग्रे जुहोत्यस्या एव रुद्रमवयजते। अथ नाभिदघ्ने ऽन्तरिक्षादेव रुद्रमवयजते। अथ पुरुषमात्रे ऽमुष्या एव रुद्रमवयजते। इत एवोर्ध्वं रुद्रमवयजते। अथ पुरुषमात्रे ऽथ नाभिदघ्ने ऽथ जानुदघ्ने ऽमुत एवार्वाञ्चं रुद्रमवयजते। तत्षट् संपद्यते। षड्वा ऋतवः। ऋतुभ्य एव रुद्रं निरवयजते। गवेधुका सक्तुभिर्वा जर्तिलैर्वा कुसयसर्पिषा वा मृगक्षीरेण वा जुहोति। यद्ग्राम्येण जुहुयाद्ग्रामावतारिणं रुद्रं कुर्यात्। आरण्येनैवारण्यमभि रुद्रं निरवयजते। अर्कपर्णेन जुहोति। अर्को वा अग्निः। अर्केणैवैनमर्कादधि निरवयजते। उत्तरस्य पक्षस्य या चरमेष्टका तस्यां जुहोति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं प्रतिहृत्यावयजते। पशुर्वा अग्निः। एतर्हि वा एष जायते यर्हि चीयते। यथा वत्सो जात स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति। स यजमानं चैवाध्वर्युं च ध्यायति।

यच्छतरुद्रियं जुहोति भागधेयेनैवैनं शमयति। अङ्गिरसो वै स्वर्गं लोकं यन्तस्ते ऽजायां घर्मं प्रासिञ्चन्। सा शोचन्ती पर्णं परामृशत्। सो ऽर्को ऽभवत्। तदर्कस्यार्कत्वम्। यदर्कपर्णेन जुहोति सयोनित्वाय। यं द्विष्यात्तस्य संचरे पशूनां न्यस्येत्। यः प्रथमः पशुराक्रामति स आर्तिमार्छति। या उत्तमास्ता यजमानं वाचयेत्। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एता वै देवता अभिचरणीयाः। यं द्विष्यात्तं ब्रूयादमुं वो जम्भे दधामीति। एताभ्य एवैनं देवताभ्य आवृश्चति ताजकुप्रधन्वति ॥२१॥

इति कपिष्ठलकठसंहितायामेकत्रिंशत्तमोऽध्यायः॥

पञ्चममष्टकम्

[सजूरब्द आयवोभिरिति संवत्सरो वा अब्दः। मासा आयवाः। उषा अरुणीः। सूर] एतशः। इमे अश्विना। संवत्सरो ऽग्निर्वैश्वानरः। पशव इडा। पशवो घृतम्। संवत्सरं पशवो ऽनु प्रजायन्ते। संवत्सरादेवास्मै पशून्प्रजनयति। दर्भस्तम्बे जुहोति। यदेवास्या अनामृतं यद्वीर्यं तदेतदुत्सर्पति। यदेवास्या अनामृतं यद्वीर्यं तदवरुन्द्धे। नाग्निं चिक्यानः प्रमीयते यस्यैवं जुह्वति। चित्रं देवानामुदगादनीकमिति पुरुषशीर्षे जुहोति। अहर्वै मित्रो रात्री वरुणः। एतावद्वावास्ति। यावदेवास्ति तदवरुन्द्धे। सौर्यर्चा जुहोति। तस्मात्पुरुष एव पशूनां सूर्यं प्रत्यङ् न्यञ्चो ऽन्ये। यत्समान्यर्चा द्विर्जुहोति तस्मात्समानस्य पुरुषस्य द्वौ पादौ। यो ह वा अग्निं योगे आगते न युनक्ति न युञ्जानेषु युङ्क्ते। युक्ष्वा हि देवहूतमान्॥ अश्वाँ अग्ने रथीरिव सत्सि होता पूर्व्यः सदः॥ युक्ष्वा हि ये तवेत्यग्निमेवैतद्योगे आगते युनक्ति। युङ्क्ते युञ्जानेषु य एवं वेद। द्वाभ्यां युनक्ति। अस्थूरीत्याह। यो ह वा अग्निं विमोक आगते न विमुञ्चति न विमुञ्चमानेषु विमुञ्चते॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा।

तां विश्वे देवा ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु॥

इत्यग्निमेवैतद्विमोक आगते विमुञ्चति विमुञ्चमानेषु विमुञ्चते य एवं वेद। अथैताः संयानीः। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एषा वै गायत्री ज्योतिष्पक्षा। तयैव स्वर्गं लोकमेति य एवं वेद। यथा नावोदकादुदकमभिसंयात्येवं वा एताभिरग्निंचिदमुत्र यथालोकं संयाति। तत्संयानीनां संयानीत्वम्। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। अथैतान्यृतुनामानि। ऋतूनेवावरुन्द्धे। सुमेक इति। संवत्सरो वै सुमेकः। संवत्सरमेवावरुन्द्धे। अथैता आदित्येष्टकाः। आदित्या वा एतस्य तेज आददते यो ऽग्निं चिक्यानो नेव रोचते। यदेता उपधीयन्ते यथा दीयमाने भूयो ऽभ्यादधात्येवमेवास्मिंस्तदभि पूर्वं तेजो दधाति। नास्यादित्यास्तेज आददते। यथासौ देवेष्वेवं मनुष्येषु भवति। अथैता घृतेष्टकाः। तेजो वा अग्निस्तेजो घृतम्। तेजस्येव तेजो दधाति। अथैता वृष्टिसनयः। वृष्टिमेवैताभिरवरुन्द्धे। एताभिर्वा अग्निचिदमुत्र यथाकामं वर्षति। तद्वृष्टिसनीनां वृष्टिसनित्वम्। अथैता आत्मा। एतद्ध वा उवाच शङ्कुः कौष्यः पुत्रमग्निं चिकिवांसमकैरग्नो ऽसित्यचैष हो ऽस्यथ कथा न सर्वात्मागा इति तद्धि नूनं न विदाचकृमेति। यस्यैता उपधीयन्ते सात्मानमेवाग्निं चिनुते। पुनर्नितुन्ना भवन्ति। प्राण एव प्राणमुपसंदधाति। अथैषा षष्ठी चितिः। यो ऽग्निं चिक्यानो नेव प्रतितिष्ठेत्स एतां षष्ठीं चितिमुपदधीत। षड्वा ऋतवः संवत्सरः। ऋतुष्वेव संवत्सरे प्रतितिष्ठति। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एता वै देवता अभिचरणीयाः। यं द्विष्यात्तं वृषदमुं वो जम्भे दधामीति। एताभ्य एवैनं देवताभ्य आवृश्चति ताजक्प्रधन्वति ॥

इति कपिष्ठलकठसंहितायां चतुस्त्रिंशत्तमोऽध्यायः ॥

अग्निना वै देवाः स्वर्गं लोकमायन्। तान्पराच आवृतान्पश्चादन्वेत्य रक्षांस्यजिघांसन्। ते देवा एता वितृण्णीरपश्यन्। ताभी रक्षांस्यपाघ्नत। यद्द्वे पुरस्तादुपदधाति द्वे पश्चाच्चक्षुरेवोभयतो दधाति रक्षसामपहत्यै। स्वयमातृण्णा भवन्ति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै। चतस्रः। तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे। स्वर्गाय वै लोकायाग्निश्चीयते। यदेकादशिनीं कुर्याद्यज्ञेन पुरस्तादवगृह्णीयादस्वर्ग्यः स्यात्। यदनेकादशिनीम-

नवरुद्धा अस्य पशवः स्युः। एकयूप एकादश पशूनालभेत। तेनैव स्वर्ग्यस्तेन पशूनवरुन्द्धे॥

न पक्षसंमितां मिनुयात्। यत्पक्षसंमितां मिनुयात्कनीयांसं यज्ञक्रतुमुपेयात्पापीयस्यस्य प्रजात्मनः स्यात्। वेदिसंमितां मिनुयात्। ज्यायांसमेव यज्ञक्रतुमुपैति नास्यात्मनः प्रजा पापीयसी भवति। एतद्ध वा उवाच दिवा जातः शाकायन्यः शङ्कुं कौष्यं पक्षसंमितामेकादशिनीममेष्टेति श्रुत्वा कनीयांसं यज्ञक्रतुमुपागात्पापीयस्यस्य प्रजात्मनो भविष्यतीति। ततो वै तं पराभूतं मन्यन्ते। कस्मै कमग्निश्चीयत इत्याहुः। देवा मा वेदन्निति वा अग्निश्चीयते। य एवं विद्वानेतं चिनुते विदुरेतं देवाः। कस्मै कमग्निश्चीयत इत्याहुः। अन्नमदानि गृहा मे ऽसन्निति वा अग्निश्चीयते। य एवं विद्वानग्निं चिनुते ऽत्यन्नं गृहवान्भवति॥

सहस्रेष्टकं चिन्वीत प्रथमं चिन्वानः। सहस्रसंमितो ह्ययं लोकः। द्वे सहस्रे द्वितीयं चिन्वानः। अन्तरिक्षेण संमितम्। त्रीणि सहस्राणि तृतीयं चिन्वानः। एभिर्लोकैः संमितम्। व्रतं चरेदग्निं [चित्वा। प्रथमं चित्वा न रामामुपेयात्। द्वितीयं चित्वा नान्येषां स्त्रियः। तृतीयं चित्वा न कांचन। रेतो वा एतन्निधत्ते यदग्निं] चिनुते। यदुपेयाद्रेतसा व्यृध्येत। तदाहुर्ये एवामू रेतः सिचाविष्टके ते अग्निचितो रेतो बिभृतः। तस्मादुपेत्यैति। प्रजापतिर्वा उख्यमाग्नमबिभः। स इमाः प्रजा अनुप्राविशत्। सो ऽब्रवीत्स एव मे प्रजानामृध्नवद्यो मेतः संचिनवदिति। अग्निः प्रजापतिः। यदग्निं चिनुते प्रजापतिमेव संचिनोति। ऋध्नोति। तच्चित्यस्य चित्यत्वम्। तं वसुभ्यः प्रायच्छत्। तेन वसवस्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त। ते वसवो रुद्रेभ्यः प्रायच्छन्। तेन रुद्रास्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त तं रुद्रा आदित्येभ्यः प्रायच्छन्। तेनादित्यास्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त। उखा सहस्रतमी। य एवं वेदोखां सहस्रतमीं गच्छति साहस्रीं पुष्टिं पशूनाम् ॥१॥

यथारूपमग्निश्चेतव्यः। यो वै यथारूपमग्निं चिनुते नास्यापरूपमात्मञ्जायते। गायत्र्या प्रथमां चितिं संचितामभिमृशेत्त्रि [ष्टुभा द्वितीयां जगत्या तृतीयाम] नुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीम्। यथारूपमेवाग्निं चिनुते। नास्यापरूपमात्मञ्जायते। प्राणो वै प्रथमा चितिर्व्यानो द्वितीयापानस्तृतीया। प्राणापानैरेवैनं समिन्द्धे। इडाया वा एषा विभक्तिः। पशव इडा। पशुभिरेवैनं चिनुते। प्रजापतये प्रोच्याग्निश्चेतव्यः। यो वै प्रजापतये ऽप्रोच्याग्निं चिनुत आर्तिमार्छति। अश्वावभितस्तिष्ठेतां श्याव उत्तरार्द्धेतो दक्षिणतः। तावालम्भम्। इष्टकामिष्टकामुपदध्यात्। एतद्वै प्रजापते रूपम्। प्राजापत्यो ऽश्वः। प्रजापतय एव प्रोच्याग्निं चिनुते। नार्तिमार्छति॥

हिरण्यपात्रं मधोः पूर्णं ब्रह्मणो ददाति। मधव्यो भवति। शतमानम्। शतायुर्वै पुरुषः शतवीर्यः। आयुरेव वीर्यमात्मन्धत्ते। चित्रं देवानामिति चित्रवत्यावेक्षते। चित्रमेव भवति मध्यन्दिने। अश्वमुपघ्रापयति। असौ वा आदित्य इन्द्र एष प्रजापतिः। प्राजापत्यो ऽश्वः। प्रत्यक्षमेवैनमृध्नोति। यो ऽग्नेराप्तिं वेदाप्नोति तं कामं यस्मै कामायाग्निश्चीयते। प्रयास्यन्नग्निं चितमुपतिष्ठेत दीक्षया त्वापं तपसा त्वापं सुत्यया त्वापमवभृथेन त्वापं वशया त्वापमिति। तत्पञ्च संपद्यते। पञ्च वा ऋतवः। आप्नोति तं कामं यस्मै कामायाग्निश्चीयते॥

एकेष्टकेत्याहुर्ब्रह्मवादिनो वागेवैकेष्टकेति ब्राह्मण एवैकेष्टकेतीम एव लोकाः। एतद्ध स्म वा आहुः शर्कराख्यास्तिस्र एव वयमिष्टका अग्निं चित्यं विद्मेमानेव लोकानिति। ससत्यो ऽग्निश्चेतव्यः। भूरिति प्रथमां वितृण्णीमुपदध्याद्भुव इति द्वितीयां स्वरिति तृतीयाम्। एतद्वै वाचः सत्यम्। ससत्यमेवाग्निं चिनुते। ब्रह्मवादिनो वदन्ति ससत्यमग्निमचेष्टापसत्यमिति। स ह त्वा अग्निं ससत्यं चिनुते य एवं चिनुते। कस्यै देवतायै अग्निश्चीयत इत्याहुर्ब्रह्मवादिनः। प्रजापतय एव। तस्य किं हविरिति। आत्मैव ॥२॥

आपो वा इदमासन्सलिलमेव। स प्रजापतिः पुष्करपर्णे वातो भूतो ऽलेलीयत। स प्रतिष्ठां नाविन्दत। स एतमपां कुलायमपश्यत्। तमाहरत्। तमुपाधत्त। सेयमभवत्। ततः प्रत्यतिष्ठत्। इयं वावाग्निः। त [स्माद्यद] स्यां खनन्त्यभीष्टकां तृन्दन्त्यभि शर्कराम्। यां पुरस्तादुपादधात्तच्छिरो ऽभवत्। सा प्राची दिक्। यां दक्षिणत उपादधात्स दक्षिणः पक्षो ऽभवत्। सा दक्षिणा दिक्। यां पश्चादुपादधात्तत्पुच्छमभवत्। सा प्रतीची दिक्। यामुत्तरादुपादधात्स

उत्तरः पक्षो ऽभवत्। सोदीची दिक्। यां मध्य उपादधात्तत्पृष्ठमभवत्। सोर्ध्वा दिक्। इयं वावाग्निः पञ्चेष्टकः। य एवं वेद प्रजायते गच्छति प्रतिष्ठाम्। आग्नेयो वै ब्राह्मणः। तस्माद् ब्राह्मणाय सर्वासु दिक्ष्वर्धुकम्। स्वां ह्येव दिशमन्वेति। सर्वां ह वा इयं वयोभ्यो नक्तं दृशे दीप्यते। तस्मादिमां वयांसि नक्तं नाध्यासते। अयं वा एष कुलायः। तस्मादेतमापः प्रहारुकाः। अयं ह्येष कुलायः ॥३॥

यदि मन्येत पूर्वो माभिक्रान्तो भ्रातृव्य इत्यष्टावुपदध्याल्लोकंपृणया पुरस्ताद्बहिष्पवमानस्यैकादश पुरस्तान्माध्यन्दिनस्य पवमानस्य द्वादश पुरस्तादार्भवस्य पवमानस्य। अयं वाव यः पवते स पवमानः। वायुरग्नेस्तेजः। य एवैनं पूर्वो ऽभिक्रान्तो भ्रातृव्यस्तं तेजसा प्रणुदते। यदि मन्येत पश्चादिव भ्रातृव्य इति पश्चादुपदध्यात्स पवमानानाम्। अयं वाव यः पवते स पवमानः। वायुरग्नेस्तेजः। य एवैनं पश्चाद्भ्रातृव्यस्तं तेजसापनुदते [प्र श्रेयांसं] भ्रातृव्यं नुदते प्रति पापीयांसं नुदते। स एष सवनचित्। प्रजापतिर्वा उख्यमग्निमबिभः। तस्य शिरः प्रावर्तत। तेन देवा अश्राम्यन्। सवितेतिच्छन्दः प्रत्यदधुर्यद्युखा। तत्संवत्सरमरोहत्। अग्निः प्रजापतिः। यत्संवत्सरमुख्यं बिभर्ति प्रजापतेरेव शिरः प्रतिदधाति। तस्मात्संवत्सरमुख्यो भर्तव्यः। यदर्वाक्संवत्सरादर्वाक्छिद्रेव सः॥

येन देवा ज्योतिषोर्ध्वा उदायन्येनादित्या वसवो येन रुद्राः।

येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति॥

इति घृतेनाक्त्वा समिधमादधाति। समिद्धिरेवैषा। अथो यजमानस्यैवैतत्स्वस्त्ययनं क्रियते॥

ये अग्नयः पुरीषिण आविष्टाः पृथिवीमनु।

तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव॥

इति स्वमग्निं चितमुपतिष्ठेत। सर्वमायुरेति। उप त्वाग्ने दिवेदिव इत्येतेन त्र्यृचेनान्येषाम्। आशीरेव सा ॥४॥

यर्हि धिष्ण्या उपधीयन्ते [तर्हि] बार्हस्पत्याभि [स्तिसृभि] स्तिस्रो दक्षिणत उपदध्यात्। अथ याम्याभिस्तिसृभिस्तिस्रो ऽथ रौद्रीभिस्तिसृभिस्तिस्रो ऽथ वारुणीभिस्तिसृभिस्तिस्रः। दक्षिणतो वै देवानां रक्षांसि यज्ञमभिजिघांसन्। तानि बार्हस्पत्याभिरघ्नत यद्बार्हस्पत्या दक्षिणत उपधीयन्ते रक्षसामपहत्यै। अथ याम्यः। एताभिर्वा असितायं दैवताः इमे लोका अर्वाञ्चश्च पराञ्चश्च प्राभुः। यस्यैता उपधीयन्ते समस्ता इमे लोका अर्वाञ्चश्च पराञ्चश्च भान्ति। अथ रौद्रीः। अग्निर्वै रुद्रः। ईश्वरो वा एष एतमतो ऽनूत्थाय हन्तोः। यद्रौद्री रुद्रमेव निरवदयते। अथ वारुणीः। आपो वै वरुणः। ईश्वरो वा एतमवभृथादनूदेत्य वरुण उद्ग्रहीतोः। यद्वारुणीर्वरुणमेव निरवदयते॥

यद्युखे भ्रियमाणे ऽथ देवः प्रजा अभिमन्येत या आग्रेयीर्गायत्रीर्भिषग्वतीस्ताभिस्तिसृभिस्तिस्र आदध्यात्। एष वावैतत्प्रजा अभिमन्यते। यद्भिषग्वतीभिरादधाति भेषजमेव करोति। यद्युखे भ्रियमाणे कामयेत वर्षेदिति याः सौरी रश्मिवतीस्ताभिस्तिसृभिस्तिस्रः समिध आदध्यात्। असौ वा आदित्यस्तर्हि प्रजाः शुचार्पयति य [र्हि पर्जन्यो न वर्षति ...... ॥५॥]

...[न वहन्तीभि] स्नायात्। यद्वहन्तीभिः स्नायात्तत्र यस ऋच्छेत्। न कूप्याभिः स्नायात्। यत्कूप्याभिः स्नायाद्विशं यश ऋच्छेत्। स्थावराभिः स्नेयम्। एता वा अपां दीक्षिताः यत्सुवरीयाः स्थावराः। [लोमशाः संतताः।] लोमशाः पशवः। यजमानमेव यशसार्पयति ॥६॥

हविर्वै दीक्षितः। न हविरनभिघृतं मेधमश्नुते। यदभ्यनक्त्यभ्यैवैनं घारयति मेध्यत्वाय। घृतं देवानां निष्पक्वं मनुष्याणामायुतं गन्धर्वाणां स्वं विलीनमादित्यानाम्। नैतद्देवत्रा न मनुष्यत्रा यन्नवनीतम्। नैष देवत्रा न मनुष्यत्रा यो दीक्षितः प्रच्युतो ऽस्माल्लोकात्। यन्नवनीतेनाभ्यङ्क्ते समृद्ध्यै॥

वासः परिधत्ते। अग्नेस्तूषः पितॄणां नीविरोषधीनां प्रघातो वायोर्वातपा विश्वेषां देवानामोतवश्च तन्तवश्च नक्षत्राणामतीकाः। सर्वदेवत्यं वासः। सर्वदेवत्यो दीक्षितः। सर्वाभिरेवैनं देवताभिः समर्धयति॥

आङ्क्ते। इन्द्रं वै वृत्रं जघ्निवांसं रक्षांस्यसचन्त। तान्यक्ष्णागिरिणान्तरधत्त। रक्षांसीदं सचन्ते यो दीक्षते। भवति हि

यदाङ्क्ते। रक्षसामन्तर्हित्यै। इन्द्रो वै वृत्रमहन्। तस्य चक्षुः परापतत्। तत्त्रिककुभं प्राविशत्। यदाङ्क्ते तस्यैव चक्षुषो ऽवरुद्ध्यै। द्विर्दक्षिणमाङ्क्ते सकृत्सव्यम्। त्रिवृद्यज्ञः। मुखत एव यज्ञमालभते। त्रिर्दक्षिणमाङ्क्ते द्विः सव्यम्। पाङ्क्तो यज्ञः। यज्ञमेवावरुन्द्धे। दक्षिणं पूर्वमाङ्क्ते। सव्यं हि पूर्वं मनुष्या आञ्जते। व्यावृत्त्यै। यजुषाङ्क्ते। अयजुषा हि मनुष्या आञ्जते। व्यावृत्त्यै। पराचीनमानक्ति न निधावति। आचपराचं हि मनुष्या आञ्जते। व्यावृत्त्यै। इषीकयाङ्क्ते। शलल्या हि मनुष्या आञ्जते। व्यावृत्त्यै। सतूला भवति। मैत्री वै सतूला वारुणी परिशीर्णा। मैत्रो दीक्षितः। समृद्ध्यै। ऊनमिव वा एतच्छिद्रमिव यच्चक्षुः। यदाङ्क्ते तदेवापूरयति। अच्छिद्रत्वाय ॥

पावयति। इन्द्रो वै वृत्रमहन्। तमप्स्वेवाभ्यहन्। तासां या यज्ञिया मेध्या आसंस्ता उदक्रामन्। ता ओषधयो ऽभवन्। यत्तेजस्ते दर्भाः। तस्मात्ते पवित्रम्। तस्माद्दर्भैरपः पुनन्ति। यद्दर्भपिञ्जूलैः पावयत्यपामेवैनं तेजसा पावयति। द्वाभ्यां पावयति। द्वे सत्यं चानृतं च। सत्येनैवास्यानृतं पावयति। द्वौ प्राणश्चापानश्च। त्रिभिः पावयति। [त्रयो हि] प्राणाः प्राणो व्यानो ऽपानः। तानेव यजमाने दधाति। पञ्चभिः पावयति। पाङ्क्तः पुरुषः। यावानेवास्यात्मा तं पावयति। [सप्तभिः पावयति। सप्त वै छन्दांसि। छन्दोभिरेवैनं पावयति। नवभिः पावयति।] नव हि प्राणाः। प्राणैरेवैनं पावयति। एकविंशत्या पावयति। एकविंशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविंशः। यावानेवास्यात्मा तं पावयति। चित्पतिस्त्वा पुनात्विति। ब्रह्म वै चित्पतिः। ब्रह्मणैवैनं पावयति। वाक्पतिस्त्वा पुनात्विति। स हि पावयिता। देवस्त्वा सविता पुनात्विति। सवितृप्रसूत एवैनं देवताभिः पावयति। अच्छिद्रेण पवित्रेणेति। अच्छं वषट्कारमेवैतत्पुनीते। सूर्यस्य रश्मिभिरित्यादित्यस्यैवैनं तन्वा पावयति। तस्य ते पवित्रपते पवित्रेणेति। यज्ञो वै पवित्रपतिः। यज्ञायैवैतत्पुनीते। यस्मै कं पुने तच्छकेयमिति। यज्ञं शकेयमित्येवैतदाह। अन्वञ्चं पावयति। अन्वाङ्वै पुरुषं प्राणः। यदा वै प्राणस्तिर्यङ् भवत्यथ प्रमीयते। यत्तिर्यञ्चमस्य प्राणं कुर्यात्प्रमीयेत। अन्वात्ममेवास्य प्राणं करोति। बहिष्पावयति। मनुष्यलोक एवैनं पावयित्वा पूतं देवलोकं प्रणयति ॥७॥

गर्भो दीक्षितो योनिर्दीक्षितविमितमुल्वं दीक्षितवसनं जरायु कृष्णाजिनम्। एतस्माद्वै योनेरिन्द्रो ऽजायत। कुलायमेवैतदासीवनं कृत्वोपचरति। तस्माद्दीक्षितम्। नान्यत्र दीक्षितविमितात्सूर्यो ऽभिनिम्रोचेन्नान्यत्राभ्युदियात्। स्वादेव योनेः प्रजायते। आकूत्यै प्रयुजे ऽग्नये स्वाहेति। आकूय वै यज्ञः प्रयुज्यते। यत्रैव यज्ञमाकुवते तदेनमालभते। मेधायै मनसे ऽग्नये स्वाहेति। मेधया वै मनसाभिगच्छति यजतां स्य इति। यज्ञमेवावरुन्द्धे। दीक्षायै तपसे ऽग्नये स्वाहेति। दीक्षया वै तपसा यज्ञं प्राप्नोति। यज्ञमेवावरुन्द्धे। सरस्वत्यै पूष्णे ऽग्नये स्वाहेति। वाग्वै सरस्वती पशवः पूषा। वाचा पशुभ्यो ऽधियज्ञमालभते। आपो देवीर्बृहतीर्विश्वशम्भुव इति। आपो वै यज्ञः। दिवि यज्ञो ऽन्तरिक्षे पृथिव्याम्। ब्रह्म बृहस्पतिः। अत्रात्र वै यज्ञः। यत्र यत्रैव यज्ञस्तत एनं ब्रह्मणालभते। पञ्चैतानि जुहोति। पाङ्क्तो यज्ञः। यज्ञमेवावरुन्द्धे। यज्ञस्य वा एते संभारा यदेतानि यजूंषि। यदेतानि न जुहुयादसंभृतो ऽस्य यज्ञः स्यात्। यदेतानि जुहोति यावानेव यज्ञस्तं संभरति। अदीक्षितो वा एकयाहुत्या। अर्दन्ति ह स्म वा एतस्य पुरात्र यस्यैतानि न हूयन्ते। यदेतानि [जुहोति] दीक्षितत्वायैव द्वितीयत्वायैव। अग्नये स्वाहाग्नये स्वाहेति जुहोति। अग्निः सर्वा देवताः। सर्वा एव देवता अवरुन्द्धे। पञ्चैतानि जुहोति। औद्ग्रहणं षष्ठम्। षडृतवः। ऋतुष्वेव प्रतितिष्ठति। यज्ञः सृष्टः प्र यजुरक्लिनात्र साम। तमृगेवायच्छत्रव सामानि द्वादश यजूंषि। तस्मात्त्रवभिर्बहिष्पवमानं स्तुवन्ति। ऋचौद्ग्रहणं जुह्वति। यदृचौद्ग्रहणं जुहोति यज्ञमेव सृष्टं प्रत्युदृचा यच्छति। द्वादशभिर्हस्म वै पुरा कारुद्वेषिण औद्ग्रहणं जुह्वति। एतदेव द्वादशगृहीतं कृत्वा जुहुयात्। तेनैव तदाप्नोति। पूर्णया स्रुचा जुहोति। पूर्णः प्रजापतिः। प्रजापतिमेवाप्नोति। यदूनया जुहुयाद् भ्रातृव्याय लोकं कुर्यात्। कामातं वै पूर्णम्। यं हि कामं कामयते तं पूर्णस्य कुरुते। यमेव कामं कामयते तमवरुन्द्धे॥

स्वे छन्दसि यज्ञः प्रतिष्ठाप्यः। अनुष्टुब्वै प्रजापतेः स्वं छन्दः। यज्ञः प्रजापतिः। यदनुष्टुभौद्ग्रहणं जुहोति स्व एव च्छन्दसि यज्ञं प्रतिष्ठापयते। छन्दःप्रतिष्ठानो वै यज्ञः। स यथाछन्दसं छन्दःसु प्रतिष्ठाप्यः। सैषानुष्टुप्। तस्याः सप्ताक्षरमेकं पदमष्टाक्षराणि त्रीणि। तेषां सप्तानां यानि त्रीणि तान्यष्टावुपयन्ति। तान्येकादश। सा त्रिष्टुप्। यानि

चत्वारि तान्यष्टा वुपयन्ति। तानि द्वादश। सा जगती। यान्यष्टौ सा गायत्री। अविभक्तानुष्टुप्। स्वाहाकारेण पङ्क्तिः। एतावन्ति वै छन्दांसि। यज्ञमेव यथाछन्दसं छन्दःसु प्रतिष्ठापयते॥

यज्ञः सृष्टो देवताभिरालभ्यः। विश्वो देवस्य नेतुरिति यत्रेतृमती तेन सावित्री। मर्त इति पितृदेवत्या। विश्व इति वैश्वदेवी। द्युम्नमिति बार्हस्पत्या। पुष्यत्विति पौष्णी। सारस्वतः स्वाहाकारः। एतावतीर्वै देवताः। यज्ञमेवैतत्सृष्टं देवताभिरालभते। यज्ञश्च सृष्टो हुतस्त्रेधा प्रावि [शदृचं तृतीयेन साम तृतीयेन यजुस्तृतीयेन। .... ॥८॥]
... [यद्येकं स्यात्पा] दं प्रतिपीव्येत्। अनन्तर्हितो यजमानो यज्ञाच्च देवताभ्यश्च भवत्यनन्तर्हितो यज्ञो देवताभ्यः। विष्णोः शर्मासि शर्म यजमानस्येति। विष्णुर्वै यज्ञः। वैष्णवो यजमानः। विष्णुनैव यज्ञेनात्मानमुभयतः सयुजं कुरुते। यज्ञो यदसृज्यत तस्योल्बमन्ववेष्टत। तद्दीक्षितवसनमभवत्। गर्भो दीक्षितः। यद्दीक्षितवसनं परिधत्ते स्वेनैव योनिनात्मानमोर्णुते। तस्मान्महत्कार्यम्। एवमिव ह्युल्बेन गर्भ आवृत इव च्छन्न इव। न प्रत्यक्षं वदेद्वाचो ऽयातयामत्वाय ॥९॥

॥इति कपिष्ठलकठसंहितायां पञ्चत्रिंशत्तमो ऽध्यायः॥

अङ्गिरसो वै स्वर्गं लोकं यन्तस्ते मेखलाः संन्यकिरन्। ततः शर उदतिष्ठत्। यच्छरमयी मेखला भवति तामेव मेखलामालभते। देवा वै यत्रोर्जं व्यभजन्त ततः शर उदतिष्ठत्। यच्छरमयी मेखला भवति तामेवोर्जमालभते। ऊर्ग्वै मेखला। मध्यं प्रति परिव्ययति। ऊर्जमेव मध्यतो दधाति यजमानेषु च प्रजासु च। तस्मान्मध्यतः प्रजा ऊर्गूर्जयति। नाभिं प्रति परिव्ययति। ऊर्ध्वं वै पुरुषस्य नाभ्या मेध्यमवाचीनममेध्यम्। मेध्यस्य चामेध्यस्य च व्यावृत्त्यै। त्रिवृद्भवति। त्रिवृता वै स्तोमेन प्रजापतिः प्रजा असृजत। त्रिवृद्वज्रः। वज्रमेव भ्रातृव्याय प्रहरति। इन्द्रो वै वृत्राय वज्रं प्राहरत्। तस्य यत्प्राशीर्यत स शरोऽभवत्। तच्छरस्य शरत्वम्। वज्रो वै शरः। यच्छरमयी मेखला भवति वज्रमेव भ्रातृव्याय प्रहरति। यं द्विष्यात्तं परिव्ययन्ध्यायेत्। वज्रेणैवैनं समर्पयति। मेखला पुंसो भवति योक्त्रं स्त्रियाः। स्त्री वै मेखला पुमान्योक्त्रम्। मिथुनमेव यज्ञमुखे विपर्यूहति प्रजननाय। वज्रो वै मेखला। क्षुदुदरं पाप्मा भ्रातृव्यः। यन्मेखलां परिव्ययते वज्रेणैव पाप्मानं भ्रातृव्यमहपते॥

यज्ञो वै देवेष्वासीद्दक्षिणा पितृषु। स यज्ञो दक्षिणामभ्यकामयत। तं पितरोऽब्रुवन्देवेषु णो भागधेयमिच्छेति। ते ऽब्रुवंस्तृतीयसवनभागा असन्निति। तस्मात्पितृभ्यस्तृतीयसवनं क्रियते। तमह्वयत्। तां हूतोऽधावत्। तस्मात्पुमांस्त्रीहूतो धावति। तस्माच्छ्रोत्रिय स्त्रीकामतमः। स हि यज्ञस्य नेदिष्ठी। तां समभवत्। तदिन्द्रो ऽचायत्। सो ऽमन्यत यो वा इतो जनिष्यते स एवेदं भविष्यतीति। तं योनिं प्राविशत्। तस्मादजायत। स पुनः प्रत्यवैक्षत। सो ऽमन्यत यो वा इतोऽपरो जनिष्यते स मे भ्रातृव्यो भविष्यतीति। तमववृज्य प्राच्छिनत्। सा विषाणाभवत्। यद्विषाणा भवति यज्ञस्यैव रेत इन्द्रस्य योनिं दक्षिणाया योनिमालभते। पञ्चावृद्भवति। पञ्चभिर्हि स तां निवेष्टयाच्छिनत्। इन्द्रस्य योनिरसीति। इन्द्रस्य ह्येषा योनिः। कृष्यै त्वा सुसस्याया इति। तस्मात्कृष्टं पच्यते। उत्कृषीति। तस्मादूर्ध्वा ओषधय उत्पच्यन्ते। यजुषा कण्डूयते। अयजुषा हि मनुष्याः कण्डूयन्ते। व्यावृत्त्यै। यदयजुषा कण्डूयेत वरुणवत्कण्डूयेत। अपि गर्भाः पामना जायेरन्॥

वाग्वै देवान्मनुष्यान्प्रविशन्त्यैत्। तस्या यदत्यरिच्यत तद्वनस्पतीन्प्राविशत्। सैषा वनस्पतिषु वाग्वदति या दुन्दुभौ या नाड्यां या तूणवे। यद्दण्डो वाच एवातिरिक्तमवरुन्द्धे। तं मैत्रावरुणाय प्रयच्छति। वाचमेवास्मै तत्प्रयच्छति। तां शश्वदृत्विग्भ्यो विभजति। तस्मादस्य वाङ्‌ नोपदस्यति। आस्यदघ्नः कार्यः। तावती ह्ययं वाग्वदति। अथो एतावती वाचा वीर्यं क्रियते। यो वृक्षः फलग्रहिस्तस्य कुर्यात्फलग्रहिरसानीति ॥१॥

स्वाहा यज्ञं मनस इति। मनसा वै यज्ञ आलभ्यते। वातयोनिर्यज्ञः। दिवि यज्ञो ऽन्तरिक्षे पृथिव्याम्। अत्रात्र वै यज्ञः। यत्रयत्रैव यज्ञस्तत एनं मनसालभते। तं यत्वास्ते। यज्ञमेव तद्यत्वास्ते। यदि विसृजेद्यज्ञं विसृजेत्। यद्विसृजेत्पुनर्दीक्षयेत्। यत्पुनर्दीक्षयेदाहुतीरतिरेचयेत्। गायत्रीं वैष्णवीमनुब्रूयात्। वाग्वै गायत्री यज्ञो विष्णुः। वाचैव

यज्ञं संतनोति। बार्हस्पत्यामुत्तरामनुब्रूयात्। ब्रह्म वै बृहस्पतिः। ब्रह्मणा यज्ञस्यार्तं निष्क्रियते। ब्रह्मणैव यज्ञस्यार्तं निष्करोति। त्वमग्ने व्रतपा असीत्यग्नये व्रतपतये ऽनुब्रूयात्। व्रतपतिं वा एतस्य व्रतं गच्छति यो दीक्षितः सन्न व्रतं चरति। अग्निर्देवानां व्रतपतिः। व्रतपतेरेवाधि व्रतमालभते। अदीक्षिष्टायमसावामुष्यायण इति त्रिरुपांश्वाह त्रिरुच्चैः। देवेभ्यश्चैव मनुष्येभ्यश्च यज्ञं प्राह। नक्षत्रं दृष्ट्वा वाचं विसृजते। दि [वा वै मनुष्या यज्ञेन चरन्ति नक्तं देवाः। ..... ॥२॥]

.....[देवता] भिश्चैव यज्ञेन च सह तरति। आ पारादृगन्तोर्लोष्टं विमृणन्नासीत। तेनास्या नैतै। सक्षेहि ॥ अयं ते योनिर्ऋत्विय इति यथायजुः। एदमगन्म देवयजनं पृथिव्या इति देवयजनमध्यवस्यति। [ऋक्सामाभ्यां संचरन्तो यजुर्भिरिति] ऋक्सामाभ्यां चैव देवताभिश्च देवयजनमनुसंचरति ॥३॥

देवाश्च वा असुराश्च समावदेव यज्ञे ऽकुर्वत। यदेव देवा अकुर्वत तदसुरा अकुर्वत। अग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यान्येष वाव तर्हि यज्ञ आसीत्। ते देवा एतं सौम्यमध्वरमपश्यन्। तमाहरन्। ते ऽदीक्षयन्। ते ऽग्निहोत्रमेव व्रतमकुर्वत। अग्निहोत्रं वाव व्रतम्। तस्माद्यदग्निहोत्रस्य स्कन्नस्य प्रायश्चित्तिः सा व्रतस्य स्कन्नस्य प्रायश्चित्तिः। तस्माद् द्विव्रतो दीक्षितः स्यात्। द्विर्ह्यग्निहोत्रं जुह्वति। तेषां यत्पौर्णमासमासीत्तमग्नीषोमीयं पशुमकुर्वत यः पूर्वेद्युरालभ्यते। यद्दार्शं तमाग्नेयं यो ऽनुसवनमालभ्यते। वैश्वदेवमेव प्रातःसवनमकुर्वत वरुणप्रघासान्माध्यन्दिनं सवनं साकमेधांस्तृतीयसवनम्। तृतीयसवने पितृयज्ञमवाकल्पयंस्तृतीयसवने त्र्यम्बकान्। ते ऽसुरा अपक्रामन्तो अब्रुवन्न वा इमे ध्वर्तवा अभवन्निति। तदध्वरस्याध्वरत्वम्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वान्दीक्षते यमेवं विद्वान्दीक्षयति भवत्यात्मना परास्य भ्रातृव्यो भवति ॥४॥

स्वर्गं वा एतेन लोकं प्रयन्ति यत्प्रायणीयम्। तत्प्रायणीयस्य प्रायणीयत्वम्। छिद्यते वा एषो ऽस्माल्लोकाद्यो ऽमुं लोकं गच्छति। यदादित्यमुदयनीयं भवत्यस्मिन्नेव लोके प्रतितिष्ठति। देवा वा असुरान्हत्वा वैरदेयादीषमाणास्ते दिशो ऽमोहयन्नेत्र इद [मन्यो ऽनु प्रजानादिति। तदाहुः साध्या वै नाम देवा आसन्पूर्वे देवेभ्यः। ते दिशो मोहयित्वा स्वर्गं लोकमायन्नेत्र इ] मं लोकमन्यो ऽनु प्रजानादिति। ता इमे ऽवरे देवा अनु प्राजिज्ञासन्त। ता न प्राजानन्। सादितिरब्रवीद्वार्यं वृणै मत्प्रायण एव यज्ञोऽसन्मदुदयन इति। तस्मादादित्यं प्रायणीयं भवत्यादित्यमुदयनीयम्। वार्यवृतं ह्यस्याः। पथ्यां स्वस्तिं यजतेत्यब्रवीत्तया प्राचीं दिशं प्रज्ञास्यथेति। अग्निं यजतेत्यब्रवीत्तेन दक्षिणाम्। सोमं यजतेत्यब्रवीत्तेन प्रतीचीम्। सवितारं यजतेत्यब्रवीत्तेनोदीचीम्। अहमेवेमावित्यब्रवीत्। ..... [॥५॥]

..... [वा] चैव प्रयन्ति वाचोद्यन्ति। आदित्यं प्रायणीयं भवत्यादित्यमुदयनीयम्। अस्मिंश्चैव लोके ऽमुष्मिंश्च यज्ञमुखेन प्रतितिष्ठति। दिशो वै स्वर्गो लोकः। एतद्देवत्या दिशः। यत्प्रायणीयेन यजते दिश एव स्वर्गं लोकमभ्यातिष्ठति। यथा वै तेजन्यूयत एवं यज्ञ ऊयते। यदादित्यं प्रायणीयं भवत्यादित्यमुदयनीयं बर्सविवैतावन्ततो नह्यति द्रढिम्ने ऽप्रस्रंसाय। याः प्रायणीयस्यानुवाक्यास्ता उदयनीयस्य याज्या या याज्यास्ता अनुवाक्याः। येनैव प्रयन्ति तेनोद्यन्ति प्रतिपदत्वाय प्रतिप्रज्ञात्यै। व्यतिषजेद्याज्यानुवाक्या यं द्विष्यात्तस्य। प्रैनमस्माल्लोकाच्च्यावयति नामुं प्राप्नोति। यथा पथ उदेत्येवं तत्। उभयत एवैनं छिनत्ति। अननुयाजं प्रायणीयं स्यादप्रयाजमुदयनीयम्। समानं वा एतद्धविः संतत्यै। आत्मा वै प्रयाजाः प्रजानुयाजाः। यदेवं कुर्यादात्मानं च प्रजां चान्तरियादप्रजाः प्रमीयेत। प्रयाजवती एवानुयाजवती स्याताम्। समानं वा एतद्धविः समानी देवता समानं मेक्षणम्। तेनैव यज्ञं संतनोति। नात्मानं न प्रजामन्तरेति।

संस्थाप्यन्न संस्थाप्यमिति मीमांसन्ते। स्रवति वै यज्ञो ऽसंस्थितः। तं स्रवन्तं यजमानो ऽनु परास्रवति प्रजया च पशुभिश्च। संस्थाप्यमेव। पत्नीं तु न संयाजयेत्। अमेध्या वा एषापूता नेश्वरा स्वर्गं लोकं गन्तोः। तामुदयनीये संयाजयति। यथा प्रवासी स्वमायतनमागच्छत्येवमेवैतत्पत्नीं यजमानो ऽस्मिंल्लोकेऽधि प्रतितिष्ठति। दीक्षितात्रं हि वा ईजाना अदन्त्यथ न वसीयांसो भवन्ति। दीक्षितो वै तर्हि यर्हि प्रायणीयेन यजते। दीक्षित एतर्हि यर्ह्यवभृथादुदेति।

प्रायणीयस्य निष्काष उदयनीयमभिनिर्वपति। उदयनीयस्यैव नाश्नीयात्। दीक्षितान्नमेव परिवृणक्ति। वसीयान्भवति ॥६॥

॥इति कपिष्ठलकठसंहितायां षट्त्रिंशत्तमो ऽध्यायः॥

कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेताम्। सा कद्रूः सुपर्णीमात्मरूपमजयत्। इयं वै कद्रूर्द्यौः सुपर्णी। छन्दांसि सौपर्णानि। सा कद्रूः सुपर्णीमब्रवीत्तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मानं निष्क्रीणीष्वेति। सा सुपर्णी छन्दांस्यब्रवीदेतस्मै वै पितरौ पुत्रान्बिभृत ईदृशान्मा स्पृणवानितो मा निष्क्रीणीतेति। सा जगत्युदपतच्चतुर्दशाक्षरा सती। साप्राप्य न्यवर्तत। तस्या द्वे अक्षरे अहीयेताम्। सा पशूंश्च दीक्षां चादायापतत्। तस्मात्पशुमन्तं दीक्षोपनमति। तस्मादाहुर्जगती छन्दसां पशव्यतमेति। सा त्रिष्टुबुदपतत्त्रयोदशाक्षरा सती। साप्राप्य न्यवर्तत। तस्या द्वे अक्षरे अहीयेताम्। सा दक्षिणां च तपश्चादायापतत्। तस्मात्त्रिष्टुभो लोके दक्षिणा नीयन्ते। एतद्वाव तपो यत्स्वं ददाति। तस्मादाहुर्माध्यन्दिनं सवनानां तपस्वितममिति। सा गायत्र्युदपतच्चतुरक्षरा सती। साजया कर्णगृह्योदपतत्। तमस्या अजाभ्यारुणत्। तदजाया अजात्वम्। सा तानि च चत्वार्यक्षराणि सोमं चादायापतत्। साष्टाक्षराभवत्। ब्रह्मवादिनो वदन्ति कस्माद्गायत्री कनिष्ठा छन्दसां सती यज्ञमुखं पर्यायाय कस्मात्तेजस्वितमेति। यदेवादः सोममाहरत्तस्माद्गायत्री यज्ञमुखं तस्मात्तेजस्वितमा। सा पद्भ्यां द्वे सवने आहरन्मुखेन तृतीयम्। यन्मुखेनाहरत्तदधयत्। तस्माद् द्वे सवने शुक्रवती धीतमिव तृतीयं सवनम्। तस्मादृजीषं तृतीयसवने ऽभिषुण्वन्ति। यत्तृतीयसवन आशिरमवनयन्ति तृतीयसवनमेव तत्संभरन्तो मन्यन्ते ॥१॥

या श्येताक्षी कृष्णवाला कृष्णशफा न तया क्रीणीयात्। हतं वा अस्या एतत्परिपिष्टम्। पितृदेवत्या सा। प्रमायुकः स्यात्। या द्विरूपा न तया क्रीणीयात्। वार्त्रघ्नी सा। जिनाति वा जीयते वा। उत तया राजन्यस्य क्रीणीयात्। न हि तस्यान्तरास्ति। जिनाति वा हि स जीयते वा। याधीलोधकर्णी तया षोडशिनं क्रीणीयात्। अतिरिक्तं वा एतद्रूपाणामतिरिक्तः षोडशी। अतिरिक्तेनैवातिरिक्तमाप्नोति। या बभ्रुरेकहायनी तया क्रीणीयात्। वाग्वै सोमक्रयणी एतद्रूपाणामतिरिक्तः षोडशी। अतिरिक्तेनैवातिरिक्तमाप्नोति। या बभ्रुरेकहायनी तया क्रीणीयात्। वाग्वै सोमक्रयणी पुरुषो वाक्। यदेकहायन्या क्रीणाति तस्मादेकहायनः पुरुषो वाचं वदति। यज्ज्यायस्या क्रीणाति तस्माज्ज्यायान्वदति॥ पुरुषो वाक्। यदेकहायन्या क्रीणाति तस्मादेकहायनः पुरुषो वाचं वदति। यज्ज्यायस्या क्रीणाति तस्माज्ज्यायान्वदति॥

छन्दांसि वा अमुष्माल्लोकात्सोममाहरन्गायत्री श्येनो भूत्वा। तं गन्धर्वा अन्तरा पर्यमुष्णन्विश्वावसुः। स तिस्रो रात्रीरुपहृतो ऽवसत्। तस्मात्तिस्रो रात्रीः सोमः क्रीतो वसति। तं देवाः पुनरयाचन्त। तमेभ्यो न पुनरददुः। ते ऽब्रुवन्गावा निष्क्रीणामेति। ते ऽमन्यन्त यज्ञेन विक्रेष्यामहे यद्गवा निष्क्रेष्यामहा इति। ते ऽब्रुवन्स्त्रीकामा वै गन्धर्वा वाचं स्त्रियं कृत्वा मायामुपावसृजामेति। ते वाचं स्त्रियं कृत्वा मायामुपावासृजन्। ते ऽमन्यन्त प्रजया व्यक्रेष्महि ये वाचा व्यक्रेष्महीति। ते ऽन्वार्तीयन्तास्माकं सोमो ऽस्माकं सोमक्रयणीति। ते गन्धर्वा अब्रुवन्विह्वयामहा इति। ते ब्रह्म गन्धर्वा अवदन्नगायन्देवा। सा देवान्गायत उपावर्तत। तस्माद्गायन्तं स्त्री कामयते न ब्रह्म वदन्तम्। अदुह्यद्धि सा ब्रह्मणे। तस्मादाहुरक्रीतः सोमो न सोमक्रयण्यस्ति। देवान्हि सा पुनरुपावर्ततेति। ते ऽब्रुवन्स्त्रीकामा वै गन्धर्वा बहु वै गन्धर्वेषु मिथुनीभवन्ती संभवन्त्यचारीरपः प्रविश्योदेहीति। तस्या यद्धतं परिपिष्टमासीत्तज्जरती कूटा भूत्वोदैत्। ते ऽब्रुवन्पितृदेवत्या वा इयमिति। तस्मात्तां पितृभ्यो घ्नन्ति। ते ऽब्रुवन्पुनः प्रविश्योदेहीति। सा पष्ठौही वार्त्रघ्नी द्विरूपा भूत्वोदैत्। सा तेन रूपेणापासृणुत। तस्मात्सा वरोऽप्रतिवरेण्यः। य एवं विद्वान्वरं वृणीते नैनं वरो हिनस्ति। ते ऽब्रुवन्पुनः प्रविश्योदेहीति। सा बभ्रुरेकहायनी भूत्वोदैत्। तयाक्रीणन्। तस्मात्सा सोमक्रयणी। तदस्या रूपम् ॥२॥

सोमक्रयण्या तृतीयसवनमवरुद्धम्। पशवो वै तृतीयसवनम्। यद्गवा क्रीणाति तेनैव तृतीयं सवनमवरुन्द्धे। रोहिते चर्मन्मिमीते। तस्माद्रोहितरूपं पशवो भूयिष्ठाः। न विचेतवा अनुमन्येत न विचीयमानस्योपद्रष्टा स्यात्। सोम ओषधीनामधिराजः। ग्रसितमस्य निष्खिदति क्षोधुको भवति। तस्मात्सोमविक्रयी क्षोधुकः। अपामन्ते क्रीणाति सरसमेवैनं क्रीणाति। हिरण्येन क्रीणाति सतेजसमेवैनं क्रीणाति। अजया क्रीणाति सतपसमेवैनं क्रीणाति। धेन्वा क्रीणाति साशिरमेवैनं क्रीणाति। अनडुहा क्रीणाति वहृयेव यज्ञस्यावरुन्द्धे। वत्सतरेण च वत्सतर्या च क्रीणाति

मिथुनमेवावरुन्द्धे। ऋषभेण क्रीणाति सेन्द्रमेवैनं क्रीणाति। तदाहुः प्रजापतिना वा एष विक्रीणीते य ऋषभेण विक्रीणीत इति। य एव धूर्षाट् तेन क्रीणीयात्। तेनैव तं क्रीणीयान्न प्रजापतिना विक्रीणीते। दशभिः क्रीणाति। दशाक्षरा विराट्। अन्नं विराट्। विराज्येवान्नाद्ये प्रतितिष्ठति ॥३॥

जूरसीति वाग्वै सोमक्रयणी। जवते हि वाचेत्थं चेत्थं च। पश्यन्सोमक्रयणीं जुहोति। वाग्वै सोमक्रयणी। पश्यन्नेवैनां यच्छति। धृता मनसेति। मनसा हि वाग्धृता। [जुष्टा विष्णव इति। यज्ञो वै विष्णुः। यज्ञायैवैनां जुष्टां करोति। तस्यास्ते सत्यसवसः प्रसवे तन्वो यंत्रमशीय स्वाहेति। यो वा एतस्यास्तन्वो यंत्रमश्नुते भवति सः। सवितृप्रसूत एवास्यास्तन्वो यन्त्रमश्नुते। स्वाहाकारेणैवैनां यच्छति। अमुष्मा आदित्याय प्रोच्य सोमः क्रेतव्यो देव सूर्य सोमं क्रेष्याम इति। अमुष्मा एवादित्याय प्रोच्य सोमं क्रीणाति। चिदसीति। वाग्वै सोमक्रयणी। शास्त्येवैनाम्। तस्माच्छिष्टाः प्रजा जायन्ते। मनांसीति। मनसा हि वाग्धृता।] धीरसीति। ध्यायते हि वाचेत्थं चेत्थं च। दक्षिणासीति। दक्षिणा ह्येषा। यज्ञियासीति। यज्ञिया ह्येषा। क्षत्रियासीति। क्षत्रिया ह्येषा। अथो यं ह्येषा जुषते स क्षत्रियो भवति। अदितिरस्युभयतः शीर्ष्णीति। अदितिर्ह्येषोभयतः शीर्ष्णी। उभयतो ह्येषा यज्ञं परिभूः। आदित्यं प्रायणीयं भवत्यादित्यमुदयनीयम्। सा मा सुप्राची सुप्रतीची भवेति सुप्राचीमेवैनां सुप्रतीचीं कुरुते। मित्रस्त्वा पदि बध्नात्विति। यत्पदि बद्धा स्यात्पितृदेवत्या स्यात्। वाग्वै सोमक्रयणी। वरुण्यः पाशः। वाग्वरुणगृहीता न वदेत्। यत्कर्णगृहीता स्यात्पितृदेवत्या स्याद्वार्त्रघ्नी स्यात्। यदनालब्धायता। मित्रस्त्वा पदि बध्नात्विति। ब्रह्म वै मित्रः। ब्रह्मणैवैनां पदि बध्नाति। पूषाध्वनस्पात्विति। इयं वै पूषा। अस्या एवैनां परिददाति। इन्द्रायाध्यक्षायेति। इन्द्रो वै देवानामोजिष्ठः। तमेवास्या अध्यक्षं करोति। अनु त्वा माता मन्यतामनु पितेति। पिता च ह्येतस्या माता चानुमन्तारौ। सा देवि देवमच्छेहीति। इन्द्राय सोममिति। देवी ह्येषा देवमच्छैति। इन्द्राय सोमम्॥ रुद्रस्त्वावर्तयत्विति। रुद्रो वै देवानां क्षोदिष्ठः। तमेवास्याः परस्तात्करोत्यपरानंशाय। स्वस्ति सोमसखा पुनरेहीति पुनरेवास्या आवृत्तायै स्वस्ति करोति ॥४॥

दक्षिणेन पदा दक्षिणानि पदान्यनुनिष्क्रामति। तस्माद्दक्षिणार्ध आत्मनो वीर्यावत्तरः। षट् पदान्यनुनिष्क्रामति। षडृतवः। ऋतुष्वेव प्रतितिष्ठति। षट् पृष्ठानि। तान्येवावरुन्द्धे। सप्तमं पदमभिगृह्णीते। सप्त ग्राम्याः पशवः। तानेवावरुन्द्धे। सप्तधेयं वाग्वदति। तामेवाप्नोति। वस्व्यसि रुद्रासीति। देवनामानि वा एवैतानि प्रपद्यते। इयमसीयमसीत्येवैतदाह। यद्यद्धवत्यथो वाच एवैतत्सम्यगुद्यते। बृहस्पतिस्त्वा सुम्ने रण्वातु॥ रुद्रो वसुभिराचक इति। ब्रह्मवै बृहस्पतिः। रुद्रो देवानामोजिष्ठः। यावेव देवानामोजिष्ठौ ताभ्यामेनामन्ततो नह्यति। पृथिव्यास्त्वा मूर्धन्नाजिघर्मीति। एष हि पृथिव्या मूर्धा यद्देवयजनम्। इडायास्पदे घृतवति स्वाहेति। इडा वा एषा। तस्या एतद् घृतवत्पदम्। स्वाहाकारेणैवैनां यच्छति। इदमहं रक्षसो ग्रीवा अपिकृन्तामीति। भ्रातृव्यो वै रक्षः। भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति। स्थाल्यां पदं संवपति। आदित्या वै पशवः पृथिव्यदितिः। पृथिव्या स्थाली संभृता। स्व एवैनान्योनौ दधाति। अस्मे रमस्वास्मे ते राय इति। यत्त्वे राय इति ब्रूयादितरस्मै पशून्संप्रयच्छेदध्वर्युरपशुः स्यात्। मे राय इत्यात्मन्नेव पशून्यच्छते॥

व्यृद्धा वा एषाहुतिर्यामनग्नौ जुहोति। यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति समृद्ध्यै। अनग्नौ वा एतामाहुतिं जुहोति। तामीश्वराणि रक्षांस्यनूदय्य हन्तोः। यत्परिजुहोति शान्त्या एव रक्षसामपहत्यै। यावद् घृतं विधावेत्तावदभिपरिलिखेत्। पशवो वै घृतम्। पशूनेवावरुन्द्धे। अयोनीन्वा एतत्पशूञ्छुचार्पयति यदेषां पदं परिखायाहरति। यदपो निनयति पशूनेव शुचो मुञ्चति। सोमक्रयण्या पत्नीं संख्यापयति। पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय। त्वष्टृमन्तस्त्वा सपेमेति। अतो हीमाः प्रजाः प्रजायन्ते। प्रजननाय ॥५॥

हस्ते हिरण्यं कृत्वा मिमीते। सत्यं वै हिरण्यम्। सत्येनैवैनं मिमीते। अमृतं वै हिरण्यम्। अमृतेनैवैनं मिमीते। आस्माकोऽसीति स्वमेवैनं कुरुते। शुक्रस्ते ग्रह इति शुक्रमेवास्य गृह्णाति। अभित्यं देवं सवितारमिति सवितृप्रसूत एवैनं देवताभिर्मिमीते। अतिच्छन्दसा मिमीते। वर्ष्म वा एषा छन्दसां यदतिच्छन्दाः। वर्ष्मैवैनौ गमयति यज्ञं च

पञ्चममष्टकम्

[मजूरध्द आयवोभिरिति। संवत्सरो वा अब्दः। मासा आयवाः। उषा अरुणोः। सूर] एतशः। इमे अश्विना। संवत्सरो ऽग्निर्वैश्वानरः। पशव इडा। पशवो घृतम्। संवत्सरं पशवो ऽनु प्रजायन्ते। संवत्सरादेवास्मै पशून्प्रजनयति। दर्भस्तम्बे जुहोति। यदेवास्या अनामृतं यद्वीर्यं तदेतदुत्सर्पति। यदेवास्या अनामृतं यद्वीर्यं तदवरुंद्धे। नाग्निं चिक्यानः प्रमीयते यस्यैवं जुह्वति। चित्रं देवानामुदगादनीकमिति पुरुषशीर्षे जुहोति। अहर्वै मित्रो रात्री वरुणः। एतावद्वावास्ति। यावदेवास्ति तदवरुंद्धे। सौर्यर्चा जुहोति। तस्मात्पुरुष एव पशूनां सूर्यं प्रत्यङ् न्यञ्चो ऽन्ये। यत्समान्यर्चा द्विर्जुहोति तस्मात्समानस्य पुरुषस्य द्वौ पादौ। यो ह वा अग्नि योग आगते न युनक्ति न युञ्जानेषु युङ्क्ते। युक्ष्वा हि देवहूतमान्॥ अग्ने युक्ष्वा हि ये तवेत्यग्निमेवैतद्योग आगते युनक्ति। युङ्क्ते युञ्जानेषु य एवं वेद। द्वाभ्यां युनक्ति। अस्थूरीत्याह। यो ह वा अग्निं विमोक आगते न विमुञ्चति न विमुञ्चमानेषु विमुञ्चते॥

मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा।

तां विश्वे देवा ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु॥

इत्यग्निमेवैतद्विमोक आगते विमुञ्चति। विमुञ्चमानेषु विमुञ्चते य एवं वेद। अथैताः संयानीः। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एषा वै गायत्री ज्योतिष्पक्षा। तयैव स्वर्गं लोकमेति य एवं वेद। यथा नावोदकादुदकमभिसंयात्येवं वा एताभिरग्निचिदमुत्र यथालोकं संयाति। तत्संयानीनां संयानीत्वम्। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। अथैतान्यृतुनामानि। ऋतूनेवावरुंद्धे। सुमेक इति। संवत्सरो वै सुमेकः। संवत्सरमेवावरुंद्धे। अथैता आदित्येष्टकाः। आदित्या वा एतस्य तेज आददते यो ऽग्निं चिक्यानो नेव रोचते। यदेता उपधीयन्ते यथा दीप्यमाने भूयो ऽभ्यादधात्येवमेवास्मिंस्तदभि पूर्वं तेजो दधाति। नास्यादित्यास्तेज आददते। यथासौ देवेष्वेवं मनुष्येषु भवति। अथैता घृतेष्टकाः। तेजो वा अग्निस्तेजो घृतम्। तेजस्येव तेजो दधाति। अथैता वृष्टिसनयः। वृष्टिमेवैताभिरवरुंद्धे। एताभिर्वा अग्निचिदमुत्र यथाकामं वर्षति। तद्वृष्टिसनीनां वृष्टिसनित्वम्। अथैता आत्मा। एतद्ध वा उवाच शङ्खः कौष्यः पुत्रमग्निं चिकित्वांसमचैरयो ऽमित्यचैषं हो३इत्यथ कथा न सर्वात्मागा इति तद्धि नूनं न विदाञ्चकर्मेति। यस्यैता उपधीयन्ते सात्मानमेवाग्निं चिनुते। पुनर्नितुन्ना भवन्ति। प्राण एव प्राणमुपसंदधाति। अथैषा षष्ठी चितिः। यो ऽग्निं चिक्यानो नेव प्रतितिष्ठेत्स एतां षष्ठीं चितिमुपदधीत। षड्वा ऋतवः संवत्सरः। ऋतुष्वेव संवत्सरे प्रतितिष्ठति। एता वै देवताः स्वर्ग्याः। ताभिरेव स्वर्गं लोकमेति। एता वै देवता अभिचरणीयाः। यं द्विष्यात्तं ब्रूयादमु वो जम्भे दधामीति। एताभ्य एवैनं देवताभ्य आवृश्चति ताजक्प्रधन्वति ॥

इति कपिष्ठलकठसंहितायां चतुस्त्रिंशत्तमोऽध्यायः ॥

अग्निना वै देवाः स्वर्गं लोकमायन्। तान्पराच आवृतान्पश्चादन्ववेत्य रक्षांस्यजिघांसन्। ते देवा एता वितृण्णीरपश्यन्। ताभी रक्षांस्यपाघ्नत। यद्द्वे पुरस्तादुपदधाति द्वे पश्चाच्चक्षुरेवोभयतो दधाति रक्षसामपहत्यै। स्वयमातृण्णा भवन्ति प्राणानामुत्सृष्ट्यै स्वर्गस्य लोकस्यानुख्यात्यै। चतस्रः। तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे। स्वर्गाय वै लोकायाग्निश्चीयते। यदेकादशिनीं कुर्याद्वज्रेण पुरस्तादवगृह्णीयादस्वर्ग्यः स्यात्। यदनेकादशिनीम-

नवरुद्धा अस्य पशवः स्युः। एकयूप एकादश पशूनालभेत। तेनैव स्वर्ग्यस्तेन पशूनवरुंद्धे॥

न पक्षसंमितां मिनुयात्। यत्पक्षसंमितां मिनुयात्कनीयांसं यज्ञक्रतुमुपेयात्पापीयस्यस्य प्रजात्मनः स्यात्। वेदिसंमितां मिनुयात्। ज्यायांसमेव यज्ञक्रतुमुपैति नास्यात्मनः प्रजा पापीयसी भवति। एतद्ध वा उवाच दिवा जातः शाकायन्यः शङ्खं कौष्यं पक्षसंमितामेकादशिनीममेष्टेति श्रुत्वा कनीयांसं यज्ञक्रतुमुपागात्पापीयस्यस्य प्रजात्मनो भविष्यतीति। ततो वै तं पराभूतं मन्यन्ते। कस्मै कमग्निश्चीयत इत्याहुः। देवा मा वेदन्निति वा अग्निश्चीयते। य एवं विद्वानेतं चिनुते विदुरेतं देवाः। कस्मै कमग्निश्चीयत इत्याहुः। अन्नमदानि गृहा मे ऽसन्निति वा अग्निश्चीयते। य एवं विद्वानग्निं चिनुते ऽत्यन्नं गृहवान्भवति॥

सहस्रेष्टकं चिन्वीत प्रथमं चिन्वानः। सहस्रसंमितो ह्ययं लोकः। द्वे सहस्रे द्वितीयं चिन्वानः। अन्तरिक्षेण संमितम्। त्रीणि सहस्राणि तृतीयं चिन्वानः। एभिर्लोकैः संमितम्। व्रतं चरेदग्निं [चित्वा। प्रथमं चित्वा न रामामुपेयात्। द्वितीयं चित्वा नान्येषां स्त्रियः। तृतीयं चित्वा न कांचन। रेतो वा एतन्निधत्ते यदग्निं] चिनुते। यदुपेयाद्रेतसा व्यृध्येत। तदाहुर्ये एवामू रेतः सिचाविष्टके ते अग्निचितो रेतो बिभृतः। तस्मादुपेत्यैति। प्रजापतिर्वा उख्यमाग्नमबिभः। स इमाः प्रजा अनुप्राविशत्। सो ऽब्रवीत्स एव मे प्रजानामृध्नवद्यो मेतः संचिनवदिति। अग्निः प्रजापतिः। यदग्निं चिनुते प्रजापतिमेव संचिनोति। ऋध्नोति। तच्चित्यस्य चित्यत्वम्। तं वसुभ्यः प्रायच्छत्। तेन वसवस्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त। ते वसवो रुद्रेभ्यः प्रायच्छन्। तेन रुद्रास्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त तं रुद्रा आदित्येभ्यः प्रायच्छन्। तेनादित्यास्त्रीणि च शतानि त्रयस्त्रिंशतं चासृजन्त। उखा सहस्रतमी। य एवं वेदोखां सहस्रतमीं गच्छति साहस्रीं पुष्टिं पशूनाम् ॥१॥

यथारूपमग्निश्चेतव्यः। यो वै यथारूपमग्निं चिनुते नास्यापरूपमात्मञ्जायते। गायत्र्या प्रथमां चितिं संचितामभिमृशेत्त्रि[ष्टुभा द्वितीयां जगत्या तृतीयाम] नुष्टुभा चतुर्थीं पङ्क्त्या पञ्चमीम्। यथारूपमेवाग्निं चिनुते। नास्यापरूपमात्मञ्जायते। प्राणो वै प्रथमा चितिर्व्यानो द्वितीयापानस्तृतीया। प्राणापानैरेवैनं समिंद्धे। इडाया वा एषा विभक्तिः। पशव इडा। पशुभिरेवैनं चिनुते। प्रजापतये प्रोच्याग्निश्चेतव्यः। यो वै प्रजापतये ऽप्रोच्याग्निं चिनुत आर्तिमार्छति। अश्वावभितस्तिष्ठेतां श्याव उत्तराच्छ्वेतो दक्षिणतः। तावालम्भ्यम्। इष्टकामिष्टकामुपदध्यात्। एतद्वै प्रजापते रूपम्। प्राजापत्यो ऽश्वः। प्रजापतय एव प्रोच्याग्निं चिनुते। नार्तिमार्छति॥

हिरण्यपात्रं मधोः पूर्णं ब्रह्मणे ददाति। मधव्यो भवति। शतमानम्। शतायुर्वै पुरुषः शतवीर्यः। आयुरेव वीर्यमात्मन्धत्ते। चित्रं देवानामिति चित्रवत्यावेक्षते। चित्रमेव भवति मध्यन्दिने। अश्वमुपघ्रापयति। असौ वा आदित्य इन्द्र एष प्रजापतिः। प्राजापत्यो ऽश्वः। प्रत्यक्षमेवैनमृध्नोति। यो ऽग्नेराप्तिं वेदाप्नोति तं कामं यस्मै कामायाग्निश्चीयते। प्रयास्यन्नग्निं चितमुपतिष्ठेत दीक्षया त्वापं तपसा त्वापं सुत्यया त्वापमवभृथेन त्वापं वशया त्वापमिति। तत्पञ्च संपद्यते। पञ्च वा ऋतवः। आप्नोति तं कामं यस्मै कामायाग्निश्चीयते॥

एकेष्टकेत्याहुर्ब्रह्मवादिनो वागेवैकेष्टकेति ब्राह्मण एवैकेष्टकेतीम एव लोकाः। एतद्ध स्म वा आहुः शर्कराख्यास्तिस्र एव वयमिष्टका अग्निं चित्यं विद्मेमानेव लोकानिति। ससत्यो ऽग्निश्चेतव्यः। भूरिति प्रथमां वितृण्णीमुपदध्याद्भुव इति द्वितीयां स्वरिति तृतीयाम्। एतद्वै वाचः सत्यम्। ससत्यमेवाग्निं चिनुते। ब्रह्मवादिनो वदन्ति ससत्यमग्निमचेष्टापसत्यमिति। स ह त्वा अग्निं ससत्यं चिनुते य एवं चिनुते। कस्यै देवतायै अग्निश्चीयत इत्याहुर्ब्रह्मवादिनः। प्रजापतय एव। तस्य किं हविरिति। आत्मैव ॥२॥

आपो वा इदमासन्सलिलमेव। स प्रजापतिः पुष्करपर्णे वातो भूतो ऽलेलीयत। स प्रतिष्ठां नाविन्दत। स एतमपां कुलायमपश्यत्। तमाहरत्। तमुपाधत्त। सेयमभवत्। ततः प्रत्यतिष्ठत्। इयं वावाग्निः। त [स्माद्यद] स्यां खनन्त्यभीष्टकां तृन्दन्त्यभि शर्कराम्। यां पुरस्तादुपादधात्तच्छिरो ऽभवत्। सा प्राची दिक्। यां दक्षिणत उपादधात्स दक्षिणः पक्षो ऽभवत्। सा दक्षिणा दिक्। यां पश्चादुपादधात्तत्पुच्छमभवत्। सा प्रतीची दिक्। यामुत्तरादुपादधात्स

उत्तरः पक्षो ऽभवत्। सोदीची दिक्। यां मध्य उपादधात्तत्पृष्ठमभवत्। सोर्ध्वा दिक्। इयं वावाग्निः पञ्चेष्टकः। य एवं वेद प्रजायते गच्छति प्रतिष्ठाम्। आग्नेयो वै ब्राह्मणः। तस्माद् ब्राह्मणाय सर्वासु दिक्ष्वर्धुकम्। स्वां ह्येव दिशमन्वेति। सर्वा ह वा इयं वयोभ्यो नक्तं दृशे दीप्यते। तस्मादिमां वयांसि नक्तं नाध्यासते। अपां वा एष कुलायः। तस्मादेतमापः प्रहारुकाः। अपां ह्येष कुलायः ॥३॥

यदि मन्येत पूर्वो माऽतिक्रान्तो भ्रातृव्य इत्यष्टावुपदध्याल्लोकंपृणया पुरस्ताद्बहिष्पवमानस्यैकादश पुरस्तान्माध्यन्दिनस्य पवमानस्य द्वादश पुरस्तादार्भवस्य पवमानस्य। अयं वाव यः पवते स पवमानः। वायुरग्रेस्तेजः। य एवैनं पूर्वो ऽतिक्रान्तो भ्रातृव्यस्तं तेजसा प्रणुदते। यदि मन्येत पश्चादिव भ्रातृव्य इति पश्चादुपदध्यात्स पवमानानाम्। अयं वाव यः पवते स पवमानः। वायुरग्नेस्तेजः। य एवैनं पश्चाद्भ्रातृव्यस्तं तेजसानुदते [प्र श्रेयांसं] भ्रातृव्यं नुदते प्रति पापीयांसं नुदते। स एष सवनचित्। प्रजापतिर्वा उख्यमग्निमबिभः। तस्य शिरः प्रावर्तत। तेन देवा अश्राम्यन्। तस्यैतच्छिरः प्रत्यदधुर्यदुखा। तत्संवत्सरमरोहत्। अग्निः प्रजापतिः। यत्संवत्सरमुख्यं बिभर्ति प्रजापतेरेव शिरः प्रतिदधाति। तस्मात्संवत्सरमुख्यो भर्तव्यः। यदर्वाक्संवत्सरादर्धादिव सः॥

येन देवा ज्योतिषोर्ध्वा उदायन्येनादित्या वसवो येन रुद्राः।

येनाङ्गिरसो महिमानमानशुस्तेनैतु यजमानः स्वस्ति॥

इति घृतेनाक्त्वा समिधमादधाति। समिद्धिरेवैषा। अथो यजमानस्यैवैतत्स्वस्त्ययनं क्रियते॥

ये अग्नयः पुरीषिण आविष्टाः पृथिवीमनु।

तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव॥

इति स्वमग्निं चितमुपतिष्ठेत। सर्वमायुरेति। उप त्वाग्ने दिवेदिव इत्येतेन त्र्यृचेनान्येषाम्। आशीरेव सा ॥४॥

यर्हि धिष्ण्या उपधीयन्ते [तर्हि] बार्हस्पत्याभि [स्तिसृभि] स्तिस्रो दक्षिणत उपदध्यात्। अथ याम्याभिस्तिसृभिस्तिस्रो ऽथ रौद्रीभिस्तिसृभिस्तिस्रो ऽथ वारुणीभिस्तिसृभिस्तिस्रः। दक्षिणतो वै देवानां रक्षांसि यज्ञमभिजिघांसन्। तानि बार्हस्पत्याभिरघ्नत यद्बार्हस्पत्या दक्षिणत उपधीयन्ते रक्षसामपहत्यै। अथ याम्यः। एताभिर्वा असिताय दैवलायेमे लोका अर्वाञ्चश्च पराञ्चश्च प्राभुः। यस्यैता उपधीयन्ते समस्मा इमे लोका अर्वाञ्चश्च पराञ्चश्च भान्ति। अथ रौद्रीः। अग्निर्वै रुद्रः। ईश्वरो वा एष एतमतोऽनूत्थाय हन्तोः। यद्रौद्री रुद्रमेव निरवदयते। अथ वारुणीः। आपो वै वरुणः। ईश्वरो वा एतमवभृथादनूदेत्य वरुण उद्ग्रहीतोः। यद्वारुणीर्वरुणमेव निरवदयते॥

यदुख्ये ध्रियमाणे ऽथ देवः प्रजा अभिमन्येत या आग्नेयीर्गायत्रीभिर्यवतीस्ताभिस्तिसृभिस्तिस्र आदध्यात्। एष वा एतत्प्रजा अभिमन्यते। यद्भिषग्वतीभिरादधाति भेषजमेव करोति। यदुख्ये ध्रियमाणे कामयेत वर्षेदिति याः सौरी रश्मिवतीस्ताभिस्तिसृभिस्तिस्रः समिध आदध्यात्। असौ वा आदित्यस्तर्हि प्रजाः शुचार्पयति य [र्हि पर्जन्यो न वर्षति ...... ॥५॥]

...[न वहन्तीभि] स्नायात्। यद्वहन्तीभिः स्नायात्तत्र यज्ञ ऋच्छेत्। न कूप्याभिः स्नायात्। यत्कूप्याभिः स्नायाद्विशं यज्ञ ऋच्छेत्। स्थावराभिः केवम्। एता वा अपां दीक्षिताः पशुवतीर्यः स्थावराः। [लोमशाः संतताः।] लोमशाः पशवः। यजमानमेव पशुमर्पयति ॥६॥

हविर्वै दीक्षितः। न हविरनभिघृतं मेध्यमश्नुते। यदभ्यनक्त्यभ्येवैनं घारयति मेध्यत्वाय। घृतं देवानां निष्पक्वं मनुष्याणामायुतं गन्धर्वाणां स्वयं विलीनमादित्यानाम्। नैतद्देवत्रा न मनुष्यत्रा यन्नवनीतम्। नैव देवत्रा न मनुष्यत्रा यो दीक्षितः प्रच्युतोऽस्माल्लोकात्। यन्नवनीतेनाभ्यङ्क्ते समृद्ध्यै॥

वासः परिधत्ते। अग्नेस्तूषः पितॄणां नीविरोषधीनां प्रघातो वायोर्वातपा विश्वेषां देवानामोतवश्च तन्तवश्च नक्षत्राणामतीकाः। सर्वदेवत्यं वासः। सर्वदेवत्यो दीक्षितः। सर्वाभिरेवैनं देवताभिः समर्धयति॥

आङ्क्ते। इन्द्रं वै वृत्रं जघ्निवांसं रक्षांस्यसचन्त। तान्यञ्जनेनगिरिणान्तरधत्त। रक्षांस्येतं सचन्ते यो दीक्षते। भवति हि

यदाङ्क्ते। रक्षसामन्तर्हित्यै। इन्द्रो वै वृत्रमहन्। तस्य चक्षुः परापतत्। तत्त्रिककुभं प्राविशत्। यदाङ्क्ते तस्यैव चक्षुषो ऽवरुद्ध्यै। द्विर्दक्षिणमाङ्क्ते सकृत्सव्यम्। त्रिवृद्यज्ञः। मुखत एव यज्ञमालभते। त्रिर्दक्षिणमाङ्क्ते द्विः सव्यम्। पाङ्क्तो यज्ञः। यज्ञमेवावरुंद्धे। दक्षिणं पूर्वमाङ्क्ते। सव्यं हि पूर्वं मनुष्या आञ्जते। व्यावृत्त्यै। यजुषाङ्क्ते। अयजुषा हि मनुष्या आञ्जते। व्यावृत्त्यै। पराचीनमानक्ति न निधावति। आचपराचं हि मनुष्या आञ्जते। व्यावृत्त्यै। इषीकयाङ्क्ते। शलल्या हि मनुष्या आञ्जते। व्यावृत्त्यै। सतूला भवति। मैत्री वै सतूला वारुणी परिशीर्णा। मैत्रो दीक्षितः। समृद्ध्यै। ऊनमिव वा एतच्छिद्रमिव यच्चक्षुः। यदाङ्क्ते तदेवापूरयति। अच्छिद्रत्वाय ॥

पावयति। इन्द्रो वै वृत्रमहन्। तमप्स्वेवाध्यहन्। तासां या यज्ञिया मेध्या आसंस्ता उदक्रामन्। ता ओषधयो ऽभवन्। यत्तेजस्ते दर्भाः। तस्मात्ते पवित्रम्। तस्माद्दर्भैरपः पुनन्ति। यद्दर्भपिञ्जूलैः पावयत्यपामेवैनं तेजसा पावयति। द्वाभ्यां पावयति। द्वे सत्यं चानृतं च। सत्येनैवास्यानृतं पावयति। द्वौ प्राणश्चापानश्च। त्रिभिः पावयति। [त्रयो हि] प्राणाः प्राणो व्यानो ऽपानः। तानेव यजमाने दधाति। पञ्चभिः पावयति। पाङ्क्तः पुरुषः। यावानेवास्यात्मा तं पावयति। [सप्तभिः पावयति। सप्त वै छन्दांसि। छन्दोभिरेवैनं पावयति। नवभिः पावयति।] नव हि प्राणाः। प्राणैरेवैनं पावयति। एकविंशत्या पावयति। एकविंशो वै पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविंशः। यावानेवास्यात्मा तं पावयति। चित्पतिस्त्वा पुनात्विति। ब्रह्म वै चित्पतिः। ब्रह्मणैवैनं पावयति। वाक्पतिस्त्वा पुनात्विति। स हि पावयिता। देवस्त्वा सविता पुनात्विति। सवितृप्रसूत एवैनं देवताभिः पावयति। अच्छिद्रेण पवित्रेणेति। अच्छं वषट्कारमेवैतत्पुनीते। सूर्यस्य रश्मिभिरित्यादित्यस्यैवैनं तन्वा पावयति। तस्य ते पवित्रपते पवित्रेणेति। यज्ञो वै पवित्रपतिः। यज्ञायैवैतत्पुनीते। यस्मै कं पुने तच्छकेयमिति। यज्ञं शकेयमित्येवैतदाह। अन्वञ्चं पावयति। अन्वङ्ङ्वै पुरुषं प्राणः। यदा वै प्राणस्तिर्यङ् भवत्यथ प्रमीयते। यत्तिर्यञ्चमस्य प्राणं कुर्यात्प्रमीयेत। अन्वात्ममेवास्य प्राणं करोति। बहिष्पावयति। मनुष्यलोक एवैनं पावयित्वा पूतं देवलोकं प्रणयति ॥७॥

गर्भो दीक्षितो योनिर्दीक्षितविमितमुल्बं दीक्षितवसनं जरायु कृष्णाजिनम्। एतस्माद्वै योनेरिन्द्रो ऽजायत। कुलायमेवैतदासीवनं कृत्वोपचरति। तस्माद्दीक्षितम्। नान्यत्र दीक्षितविमितात्सूर्यो ऽभिनिम्रोचेन्नान्यत्राभ्युदियात्। स्वादेव योनेः प्रजायते। आकूत्यै प्रयुजे ऽग्नये स्वाहेति। आकूय वै यज्ञः प्रयुज्यते। यत्रैव यज्ञमाकुवते तदेनमालभते। मेधायै मनसे ऽग्नये स्वाहेति। मेधया वै मनसाभिगच्छति यजतां स्य इति। यज्ञमेवावरुंद्धे। दीक्षायै तपसेऽग्नये स्वाहेति। दीक्षया वै तपसा यज्ञं प्राप्नोति। यज्ञमेवावरुंद्धे। सरस्वत्यै पूष्णे ऽग्नये स्वाहेति। वाग्वै सरस्वती पशवः पूषा। वाचा पशुभ्यो ऽधियज्ञमालभते। आपो देवीर्बृहतीर्विश्वशम्भुव इति। आपो वै यज्ञः। दिवि यज्ञो ऽन्तरिक्षे पृथिव्याम्। ब्रह्म बृहस्पतिः। अत्रात्र वै यज्ञः। यत्र यत्रैव यज्ञस्तत एनं ब्रह्मणालभते। पञ्चैतानि जुहोति। पाङ्क्तो यज्ञः। यज्ञमेवावरुंद्धे। यज्ञस्य वा एते संभारा यदेतानि यजूंषि। यदेतानि न जुहुयादसंभृतोऽस्य यज्ञः स्यात्। यदेतानि जुहोति यावानेव यज्ञस्तं संभरति। अदीक्षितो वा एकयाहुत्या। अदन्ति ह स्म वा एतस्य पुरान्नं यस्यैतानि न हूयन्ते। यदेतानि [जुहोति] दीक्षितत्वायैव द्वितीयत्वायैव। अग्नये स्वाहाग्नये स्वाहेति जुहोति। अग्निः सर्वा देवताः। सर्वा एव देवता अवरुंद्धे। पञ्चैतानि जुहोति। औद्ग्रहणं षष्ठम्। षडृतवः। ऋतुष्वेव प्रतितिष्ठति। यज्ञः सृष्टः प्र यजुरव्लिनात्र साम। तमृगेवायच्छत्रव सामानि द्वादश यजूंषि। तस्मात्रवभिर्बहिष्पवमानं स्तुवन्ति। ऋचौद्ग्रहणं जुह्वति। यदृचौद्ग्रहणं जुहोति यज्ञमेव सृष्टं प्रत्युद्यच्छति। द्वादशभिर्हस्म वै पुरा कारुद्वेपिण औद्ग्रहणं जुह्वति। एतदेव द्वादशगृहीतं कृत्वा जुहुयात्। तेनैव तदाप्नोति। पूर्णया स्रुचा जुहोति। पूर्णः प्रजापतिः। प्रजापतिमेवाप्नोति। यदूनया जुहुयाद् भ्रातृव्याय लोकं कुर्यात्। कामार्तं वै पूर्णम्। यं हि कामं कामयते तं पूर्णस्य कुरुते। यमेव कामं कामयते तमवरुंद्धे॥

स्वे छन्दसि यज्ञः प्रतिष्ठाप्यः। अनुष्टुब्वै प्रजापतेः स्वं छन्दः। यज्ञः प्रजापतिः। यदनुष्टुभौद्ग्रहणं जुहोति स्व एव च्छन्दसि यज्ञं प्रतिष्ठापयते। छन्दःप्रतिष्ठानो वै यज्ञः। स यथाछन्दसं छन्दःसु प्रतिष्ठाप्यः। सैषानुष्टुप्। तस्याः सप्ताक्षरमेकं पदमष्टाक्षराणि त्रीणि। तेषां सप्तानां यानि त्रीणि तान्यष्टावुपयन्ति। तान्येकादश। सा त्रिष्टुप्। यानि

चत्वारि तान्यष्टा वुपयन्ति। तानि द्वादश। सा जगती। यान्यष्टौ सा गायत्री। अविभक्तानुष्टुप्। स्वाहाकारेण पङ्क्तिः। एतावन्ति वै छन्दांसि। यज्ञमेव यथाछन्दसं छन्दःसु प्रतिष्ठापयते॥

यज्ञः सृष्टो देवताभिरालभ्यः। विश्वो देवस्य नेतुरिति यन्नेतृमती तेन सावित्री। मर्त इति पितृदेवत्या। विश्व इति वैश्वदेवी। द्युम्नमिति बार्हस्पत्या। पुष्यत्विति पौष्णी। सारस्वतः स्वाहाकारः। एतावतीर्वै देवताः। यज्ञमेवैतत्सृष्टं देवताभिरालभते। यज्ञश्च सृष्टो हुतस्त्रेधा प्रावि [शदृचं तृतीयेन साम तृतीयेन यजुस्तृतीयेन। .... ॥८॥]

.... [यद्येकं स्यात्पा] दं प्रतिपीव्येत्। अनन्तर्हितो यजमानो यज्ञाच्च देवताभ्यश्च भवत्यनन्तर्हितो यज्ञो देवताभ्यः। विष्णोः शर्मासि शर्म यजमानस्येति। विष्णुर्वै यज्ञः। वैष्णवो यजमानः। विष्णुनैव यज्ञेनात्मानमुभयतः सयुजं कुरुते। यज्ञो यदसृज्यत तस्योल्बमन्ववेष्टत। तद्दीक्षितवसनमभवत्। गर्भो दीक्षितः। यद्दीक्षितवसनं परिधत्ते स्वेनैव योनिनात्मानमोर्णुते। तस्मान्महत्कार्यम्। एवमिव ह्युल्बेन गर्भ आवृत इव च्छत्र इव। न प्रत्यक्षं वदेद्वाचो ऽयातयामत्वाय ॥९॥

॥इति कपिष्ठलकठसंहितायां पञ्चत्रिंशत्तमो ऽध्यायः॥

अङ्गिरसो वै स्वर्गं लोकं यन्तस्ते मेखलाः संन्यकिरन्। ततः शर उदतिष्ठत्। यच्छरमयी मेखला भवति तामेव मेखलामालभते। देवा वै यत्रोर्जं व्यभजन्त ततः शर उदतिष्ठत्। यच्छरमयी मेखला भवति तामेवोर्जमालभते। ऊर्ग्वै मेखला। मध्यं प्रति परिव्ययति। ऊर्जमेव मध्यतो दधाति यजमानेषु च प्रजासु च। तस्मान्मध्यतः प्रजा ऊर्गूर्जयति। नाभिं प्रति परिव्ययति। ऊर्ध्वं वै पुरुषस्य नाभ्या मेध्यमवाचीनममेध्यम्। मध्यस्य चामेध्यस्य च व्यावृत्त्यै। त्रिवृद्भवति। त्रिवृता वै स्तोमेन प्रजापतिः प्रजा असृजत। त्रिवृद्वज्रः। वज्रमेव भ्रातृव्याय प्रहरति। इन्द्रो वै वृत्राय वज्रं प्राहरत्। तस्य यत्प्राशीर्यत स शरोऽभवत्। तच्छरस्य शरत्वम्। वज्रो वै शरः। यच्छरमयी मेखला भवति वज्रमेव भ्रातृव्याय प्रहरति। यं द्विष्यात्तं परिव्ययन्ध्यायेत्। वज्रेणैवैनं समर्पयति। मेखला पुंसो भवति योक्त्रं स्त्रियाः। स्त्री वै मेखला पुमान्योक्त्रम्। मिथुनमेव यज्ञमुखे विपर्यूहति प्रजननाय। वज्रो वै मेखला। क्षुदुदरं पाप्मा भ्रातृव्यः। यन्मेखलां परिव्ययते वज्रेणैव पाप्मानं भ्रातृव्यमहपते॥

यज्ञो वै देवेष्वासीद्दक्षिणा पितृषु। स यज्ञो दक्षिणामभ्यकामयत। तं पितरोऽब्रुवन्देवेषु णो भागधेयमिच्छेति। ते ऽब्रुवंस्तृतीयसवनभागा असन्निति। तस्मात्पितृभ्यस्तृतीयसवनं क्रियते। तमह्वयत्। तां हूतोऽधावत्। तस्मात्पुमांस्त्रीहूतो धावति। तस्माच्छ्रोत्रिय स्त्रीकामतमः। स हि यज्ञस्य नेदिष्ठी। तां समभवत्। तदिन्द्रो ऽचायत्। सो ऽमन्यत यो वा इतो जनिष्यते स एवेदं भविष्यतीति। तं योनिं प्राविशत्। तस्मादजायत। स पुनः प्रत्यवैक्षत। सो ऽमन्यत यो वा इतोऽपरो जनिष्यते स मे भ्रातृव्यो भविष्यतीति। तमववृज्य प्राच्छिनत्। सा विषाणाभवत्। यद्विषाणा भवति यज्ञस्यैव रेत इन्द्रस्य योनि दक्षिणाया योनिमालभते। पञ्चावृद्भवति। पञ्चभिर्हि स तां निवेष्टयाच्छिनत्। इन्द्रस्य योनिरसीति। इन्द्रस्य ह्येषा योनिः। कृष्यै त्वा सुसस्याया इति। तस्मात्कृष्टं पच्यते। उत्कृधीति। तस्मादूर्ध्वा ओषधय उत्पच्यन्ते। यजुषा कण्डूयते। अयजुषा हि मनुष्याः कण्डूयन्ते। व्यावृत्त्यै। यदयजुषा कण्डूयेत वरुणवत्कण्डूयेत। अपि गर्भाः पामना जायेरन्॥

वाग्वै देवान्मनुष्यान्प्रविशन्त्यैत्। तस्या यदत्यरिच्यत तद्वनस्पतीन्प्राविशत्। सैषा वनस्पतिषु वाग्वदति या दुन्दुभौ या नाड्यां या तूणवे। यद्दण्डो वाच एवातिरिक्तमवरुंद्धे। तं मैत्रावरुणाय प्रयच्छति। वाचमेवास्मै तत्प्रयच्छति। तां शश्वदृत्विग्भ्यो विभजति। तस्मादस्य वाङ् नोपदस्यति। आस्यदघ्नः कार्यः। तावती हीयं वाग्वदति। अथो एतावती वाचा वीर्यं क्रियते। यो वृक्षः फलग्रहिस्तस्य कुर्यात्फलग्रहिरसानीति ॥१॥

स्वाहा यज्ञं मनस इति। मनसा वै यज्ञ आलभ्यते। वातयोनिर्यज्ञः। दिवि यज्ञो ऽन्तरिक्षे पृथिव्याम्। अत्रात्र वै यज्ञः। यत्रयत्रैव यज्ञस्तत एनं मनसालभते। तं यत्वास्ते। यज्ञमेव तद्यत्वास्ते। यदि विसृजेद्यज्ञं विसृजेत्। यद्विसृजेत्पुनर्दीक्षयेत्। यत्पुनर्दीक्षयेदाहुतीरतिरेचयेत्। गायत्रीं वैष्णवीमनुब्रूयात्। वाग्वै गायत्री यज्ञो विष्णुः। वाचैव

यज्ञं संतनोति। बार्हस्पत्यामुत्तरामनुब्रूयात्। ब्रह्म वै बृहस्पतिः। ब्रह्मणा यज्ञस्यार्तं निष्क्रियते। ब्रह्मणैव यज्ञस्यार्तं निष्करोति। त्वमग्ने व्रतपा असीत्यग्नये व्रतपतये ऽनुब्रूयात्। व्रतपतिं वा एतस्य व्रतं गच्छति यो दीक्षितः सन्न व्रतं चरति। अग्निर्देवानां व्रतपतिः। व्रतपतेरेवाधि व्रतमालभते। अदीक्षिष्टायमसावामुष्यायण इति त्रिरुपांश्वाह त्रिरुच्चैः। देवेभ्यश्चैव मनुष्येभ्यश्च यज्ञं प्राह। नक्षत्रं दृष्ट्वा वाचं विसृजते। दि [वा वै मनुष्या यज्ञेन चरन्ति नक्तं देवाः। ..... ॥२॥]

..... [देवता] भिश्चैव यज्ञेन च सह तरति। आ पारादगन्तोर्लोष्टं विमृणन्नासीत। तेनास्या नैतो। सक्षेहि ॥ अयं ते योनिर्ऋत्विय इति यथायजुः। एदमगन्म देवयजनं पृथिव्या इति देवयजनमध्यवस्यति। [ऋक्सामाभ्यां संचरन्तो यजुर्भिरिति] ऋक्सामाभ्यां चैव देवताभिश्च देवयजनमनुसंचरति ॥३॥

देवाश्च वा असुराश्च समावदेव यज्ञे ऽकुर्वत। यदेव देवा अकुर्वत तदसुरा अकुर्वत। अग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यान्येष वाव तर्हि यज्ञ आसीत्। ते देवा एतं सौम्यमध्वरमपश्यन्। तमाहरन्। ते ऽदीक्षयन्। ते ऽग्निहोत्रमेव व्रतमकुर्वत। अग्निहोत्रं वाव व्रतम्। तस्माद्यामग्निहोत्रस्य स्कन्नस्य प्रायश्चित्तिः सा व्रतस्य स्कन्नस्य प्रायश्चित्तिः। तस्माद् द्विव्रतो दीक्षितः स्यात्। द्विर्ह्यग्निहोत्रं जुह्वति। तेषां यत्पौर्णमासमासीत्तमग्नीषोमीयं पशुमकुर्वत यः पूर्वेद्युरालभ्यते। यद्दार्शं तमाग्नेयं यो ऽनुसवनमालभ्यते। वैश्वदेवमेव प्रातःसवनमकुर्वत वरुणप्रघासान्माध्यन्दिनं सवनं साकमेधांस्तृतीयसवनम्। तृतीयसवने पितृयज्ञमवाकल्पयंस्तृतीयसवने त्र्यम्बकान्। ते ऽसुरा अपक्रामन्तो अब्रुवन्न वा इमे ध्वर्तवा अभवन्निति। तदध्वरस्याध्वरत्वम्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वान्दीक्षते यमेवं विद्वान्दीक्षयति भवत्यात्मना परास्य भ्रातृव्यो भवति ॥४॥

स्वर्गं वा एतेन लोकं प्रयन्ति यत्प्रायणीयम्। तत्प्रायणीयस्य प्रायणीयत्वम्। छिद्यते वा एषो ऽस्माल्लोकाद्यो ऽमुं लोकं गच्छति। यदादित्यमुदयनीयं भवत्यस्मिन्नेव लोके प्रतितिष्ठति। देवा वा असुरान्हत्वा वैरदेयादीपमाणास्ते दिशो ऽमोहयन्नेत्र इद [मन्यो ऽनु प्रजानादिति। तदाहुः साध्या वै नाम देवा आसन्पूर्वे देवेभ्यः। ते दिशो मोहयित्वा स्वर्गं लोकमायन्नेत्र इ] मं लोकमन्यो ऽनु प्रजानादिति। ता इमे ऽवरे देवा अनु प्राजिज्ञासन्त। ता न प्राजानन्। सादितिरब्रवीद्वार्यं वृणै मत्प्रायण एव यज्ञोऽसन्मदुदयन इति। तस्मादादित्यं प्रायणीयं भवत्यादित्यमुदयनीयम्। वार्यवृतं ह्यस्याः। पथ्यां स्वस्तिं यजतेत्यब्रवीत्तया प्राचीं दिशं प्रज्ञास्यथेति। अग्निं यजतेत्यब्रवीत्तेन दक्षिणाम्। सोमं यजतेत्यब्रवीत्तेन प्रतीचीम्। सवितारं यजतेत्यब्रवीत्तेनोदीचीम्। अहमेवेमावित्यब्रवीत्। ..... [॥५॥]

..... [वा] चैव प्रयन्ति वाचोद्यन्ति। आदित्यं प्रायणीयं भवत्यादित्यमुदयनीयम्। अस्मिंश्चैव लोके ऽमुष्मिंश्च यज्ञमुखेन प्रतितिष्ठति। दिशो वै स्वर्गो लोकः। एतद्देवत्या दिशः। यत्प्रायणीयेन यजते दिश एव स्वर्गं लोकमभ्यातिष्ठति। यथा वै तेजन्यूयत एवं यज्ञ ऊयते। यदादित्यं प्रायणीयं भवत्यादित्यमुदयनीयं वर्सावेवैतावन्ततो नह्यति द्रढिम्ने ऽप्रस्त्रंसाय। याः प्रायणीयस्यानुवाक्यास्ता उदयनीयस्य याज्या या याज्यास्ता अनुवाक्याः। येनैव प्रयन्ति तेनोद्यन्ति प्रतिपदत्वाय प्रतिप्रज्ञात्यै। व्यतिषजेद्याज्यानुवाक्या यं द्विष्यात्तस्य। प्रैनमस्माल्लोकाच्च्यावयति नामुं प्राप्नोति। यथा पथ उदेत्येवं तत्। उभयत एवैनं छिनत्ति। अननुयाजं प्रायणीयं स्यादप्रयाजमुदयनीयम्। समानं वा एतद्धविः संतत्यै। आत्मा वै प्रयाजाः प्रजानुयाजाः। यदेवं कुर्यादात्मानं च प्रजां चान्तरियादप्रजाः प्रमीयेत। प्रयाजवती एवानुयाजवती स्याताम्। समानं वा एतद्धविः समानी देवता समानं मेक्षणम्। तेनैव यज्ञं संतनोति। नात्मानं न प्रजामन्तरेति।

संस्थाप्यन्न संस्थाप्यमिति मीमांसन्ते। स्रवति वै यज्ञो ऽसंस्थितः। तं स्रवन्तं यजमानो ऽनु परास्रवति प्रजया च पशुभिश्च। संस्थाप्यमेव। पत्नीं तु न संयाजयेत्। अमेध्या वा एषापूता नेश्वरा स्वर्गं लोकं गन्तोः। तामुदयनीये संयाजयति। यथा प्रवासी स्वमायतनमागच्छत्येवमेवैतत्पत्नीं यजमानो ऽस्मिंल्लोकेऽधि प्रतितिष्ठति। दीक्षितान्नं हि वा ईजाना अदन्त्यथ न वसीयांसो भवन्ति। दीक्षितो वै तर्हि यर्हि प्रायणीयेन यजते। दीक्षित एतर्हि यर्ह्यवभृथादुदेति।

प्रायणीयस्य निष्काष उदयनीयमभिनिर्वपति। उदयनीयस्यैव नाश्नीयात्। दीक्षितान्नमेव परिवृणक्ति। वसीयान्भवति ॥६॥

इति कपिष्ठलकठसंहितायां षट्त्रिंशत्तमो ऽध्यायः॥

कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्धेताम्। सा कद्रूः सुपर्णीमात्मरूपमजयत्। इयं वै कद्रूर्द्यौः सुपर्णी। छन्दांसि सौपर्णानि। सा कद्रूः सुपर्णीमब्रवीत्तृतीयस्यामितो दिवि सोमस्तमाहर तेनात्मानं निष्क्रीणीष्वेति। सा सुपर्णी छन्दांस्यब्रवीदेतस्मै वै पितरौ पुत्रान्बिभृत ईदृशान्मा स्पृणवानितो मा निष्क्रीणीतेति। सा जगत्युदपतच्चतुर्दशाक्षरा सती। साप्राप्य न्यवर्तत। तस्या द्वे अक्षरे अहीयेताम्। सा पशूंश्च दीक्षां चादायापतत्। तस्मात्पशुमन्तं दीक्षोपनमति। तस्मादाहुर्जगती छन्दसां पशव्यतमेति। सा त्रिष्टुबुदपतत्त्रयोदशाक्षरा सती। साप्राप्य न्यवर्तत। तस्या द्वे अक्षरे अहीयेताम्। सा दक्षिणां च तपश्चादायापतत्। तस्मात्तित्रिष्टुभो लोके दक्षिणा नीयन्ते। एतद्वाव तपो यत्स्वं ददाति। तस्मादाहुर्माध्यन्दिनं सवनानां तपस्वितममिति। सा गायत्र्युदपतच्चतुरक्षरा सती। साजया कर्णगृह्योदपतत्। तमस्या अजाभ्यारुणत्। तदजाया अजात्वम्। सा तानि च चत्वार्यक्षराणि सोमं चादायापतत्। साष्टाक्षराभवत्। ब्रह्मवादिनो वदन्ति कस्माद्गायत्री कनिष्ठा छन्दसां सती यज्ञमुखं परीयाय कस्मात्तेजस्वितमेति। यदेवादः सोममाहरत्तस्माद्गायत्री यज्ञमुखं तस्मात्तेजस्वितमा। सा पद्भ्यां द्वे सवने आहरन्मुखेन तृतीयम्। यन्मुखेनाहरत्तदधयत्। तस्माद् द्वे सवने शुक्रवती धीतमिव तृतीयं सवनम्। तस्मादृजीषं तृतीयसवने ऽभिषुण्वन्ति। यत्तृतीयसवन आशिरमवनयन्ति तृतीयसवनमेव तत्संभरन्तो मन्यन्ते ॥१॥

या श्येताक्षी कृष्णवाला कृष्णशफा न तया क्रीणीयात्। हतं वा अस्या एतत्परिपिष्टम्। पितृदेवत्या सा। प्रमायुकः स्यात्। या द्विरूपा न तया क्रीणीयात्। वार्त्रघ्नी सा। जिनाति वा जीयते वा। उत तया राजन्यस्य क्रीणीयात्। न हि तस्यान्तरास्ति। जिनाति वा हि स जीयते वा। याधीलोधकर्णी तया षोडशिनं क्रीणीयात्। अतिरिक्तं वा एतद्रूपाणामतिरिक्तः षोडशी। अतिरिक्तेनैवातिरिक्तमाप्नोति। या बभ्रुरेकहायनी तया क्रीणीयात्। वाग्वै सोमक्रयणी पुरुषा वाक्। यदेकहायन्या क्रीणाति तस्मादेकहायनः पुरुषो वाचं वदति। यज्ज्यायस्या क्रीणाति तस्माज्ज्यायान्वदति॥

छन्दांसि वा अमुष्माल्लोकात्सोममाहरन्गायत्री श्येनो भूत्वा। तं गन्धर्वा अन्तरा पर्यमुष्णन्विश्वावसुः। स तिस्रो रात्रीरुपहृतो ऽवसत्। तस्मात्तिस्रो रात्रीः सोमः क्रीतो वसति। तं देवाः पुनरयाचन्त। तमेभ्यो न पुनरददुः। ते ऽब्रुवन्गवा निष्क्रीणामेति। ते ऽमन्यन्त यज्ञेन विक्रेष्यामहे यद्गवा निष्क्रेष्यामहा इति। ते ऽब्रुवन्स्त्रीकामा वै गन्धर्वा वाचं स्त्रियं कृत्वा मायामुपावसृजामेति। ते ऽमन्यन्त प्रजया व्यक्रेष्महि ये वाचा कृत्वा मायामुपावासृजन्। ते वाचं स्त्रियं कृत्वा मायामुपावासृजन्। ते गन्धर्वा अब्रुवन्विह्वयामहा इति। ते ब्रह्म गन्धर्वा व्यक्रेष्महीति। ते ऽन्वार्तीयन्तास्माकं सोमो ऽस्माकं सोमक्रयणीति। ते गन्धर्वा अब्रुवन्विह्वयामहा इति। ते ब्रह्म गन्धर्वा अवदन्नगायन्देवाः। सा देवान्गायत उपावर्तत। तस्माद्गायन्तं स्त्री कामयते न ब्रह्म वदन्तम्। अदुह्यद्धि सा ब्रह्मणे। तस्मादाहुरक्रीतः सोमो न सोमक्रयण्यस्ति। देवान्हि सा पुनरुपावर्ततेति। ते ऽब्रुवन्स्त्रीकामा वै गन्धर्वा बहु वै गन्धर्वेषु मिथुनीभवन्ती संभवन्त्यचारीरपः प्रविश्योदेहीति। तस्या यद्धतं परिपिष्टमासीत्तज्जरती कृष्टा भूत्वोदैत्। ते ऽब्रुवन्पितृदेवत्या वा इयमिति। तस्मात्तां पितृभ्यो घ्नन्ति। ते ऽब्रुवन्पुनः प्रविश्योदेहीति। सा पष्ठौही वार्त्रघ्नी द्विरूपा भूत्वोदैत्। सा तेन रूपेणापास्पृणुत। तस्मात्सा वरोऽतिवरेण्यः। य एवं विद्वान्वरं वृणीते नैनं वरो हिनस्ति। ते ऽब्रुवन्पुनः प्रविश्योदेहीति। सा बभ्रुरेकहायनी भूत्वोदैत्। तयाक्रीणन्। तस्मात्सा सोमक्रयणी। तदस्या रूपम् ॥२॥

सोमक्रयण्या तृतीयसवनमवरुद्धम्। पशवो वै तृतीयसवनम्। यद्गवा क्रीणाति तेनैव तृतीयं सवनमवरुंद्धे। सोम रोहिते चर्मन्मिमीते। तस्माद्रोहितरूपं पशवो भूयिष्ठाः। न विचेतवा अनुमन्येत न विचीयमानस्योपद्रष्टा स्यात्। सोम ओषधीनामधिराजः। ग्रसितमस्य निष्खिदति क्षोधुको भवति। तस्मात्सोमविक्रयी क्षोधुकः। अपामन्ते क्रीणाति सरसमेवैनं क्रीणाति। हिरण्येन क्रीणाति सतेजसमेवैनं क्रीणाति। अजया क्रीणाति सतपसमेवैनं क्रीणाति। धेन्वा क्रीणाति साशिरमेवैनं क्रीणाति। अनडुहा क्रीणाति वह्नेव यज्ञस्यावरुंद्धे। वत्सतरेण च वत्सतर्या च क्रीणाति

मिथुनमेवावरुन्द्धे। ऋषभेण क्रीणाति सेन्द्रमेवैनं क्रीणाति। तदाहुः प्रजापतिना वा एष विक्रीणीते य ऋषभेण विक्रीणीत इति। य एव धूर्षाट् तेन क्रीणीयात्। तेनैव तं क्रीणीयान्न प्रजापतिना विक्रीणीते। दशभिः क्रीणाति। दशाक्षरा विराट्। अन्नं विराट्। विराज्येवान्नाद्ये प्रतितिष्ठति ॥३॥

जूरसीति वाग्वै सोमक्रयणी। जवते हि वाचेत्थं चेत्थं च। पश्यन्सोमक्रयणीं जुहोति। वाग्वै सोमक्रयणी। पश्यन्नेवैनां यच्छति। धृता मनसेति। मनसा हि वाग्धृता। [जुष्टा विष्णव इति। यज्ञो वै विष्णुः। यज्ञायैवैनां जुष्टां करोति। तस्यास्ते सत्यसवसः प्रसवे तन्वो यंत्रमशीय स्वाहेति। यो वा एतस्यास्तन्वो यंत्रमश्नुते भवति सः। सवितृप्रसूत एवास्यास्तन्वो यन्त्रमश्नुते। स्वाहाकारेणैवैनां यच्छति। अमुष्मा आदित्याय प्रोच्य सोमः क्रेतव्यो देव सूर्य सोमं क्रेष्याम इति। अमुष्मा एवादित्याय प्रोच्य सोमं क्रीणाति। चिदसीति। वाग्वै सोमक्रयणी। शास्त्येवैनाम्। तस्माच्छिष्टाः प्रजा जायन्ते। मनांसीति। मनसा हि वाग्धृता।] धीरसीति। ध्यायते हि वाचेत्थं चेत्थं च। दक्षिणासीति। दक्षिणा ह्येषा। यज्ञियासीति। यज्ञिया ह्येषा। क्षत्रियासीति। क्षत्रिया ह्येषा। अथो यं ह्येषा जुषते स क्षत्रियो भवति। अदितिरस्युभयतः शीर्ष्णीति। अदितिर्ह्येषोभयतः शीर्ष्णी। उभयतो ह्येषा यज्ञं परिभूः। आदित्यं प्रायणीयं भवत्यादित्यमुदयनीयम्। सा मा सुप्राची सुप्रतीची भवेति सुप्राचीमेवैनां सुप्रतीचीं कुरुते। मित्रस्त्वा पदि बध्नात्विति। यत्पदि बद्धा स्यात्पितृदेवत्या स्यात्। वाग्वै सोमक्रयणी। वरुण्यः पाशः। वाग्वरुणगृहीता न वदेत्। यत्कर्णगृहीता स्यात्पितृदेवत्या स्याद्वार्त्रघ्नी स्यात्। यदनालब्धायता। मित्रस्त्वा पदि बध्नात्विति। ब्रह्म वै मित्रः। ब्रह्मणैवैनां पदि बध्नाति। पूषाध्वनस्पात्विति। इयं वै पूषा। अस्या एवैनां परिददाति। इन्द्रायाध्यक्षायेति। इन्द्रो वै देवानामोजिष्ठः। तमेवास्या अध्यक्षं करोति। अनु त्वा माता मन्यतामनु पितेति। पिता च ह्येतस्या माता चानुमन्तारौ। सा देवि देवमच्छेहीति। इन्द्राय सोममिति। देवी ह्येषा देवमच्छैति। इन्द्राय सोमम्॥ रुद्रस्त्वावर्तयत्विति। रुद्रो वै देवानां क्षोदिष्ठः। तमेवास्याः परस्तात्करोत्यपरानंशाय। स्वस्ति सोमसखा पुनरेहीति पुनरेवास्या आवृत्तायै स्वस्ति करोति ॥४॥

दक्षिणेन पदा दक्षिणानि पदान्यनुनिष्क्रामति। तस्माद्दक्षिणार्ध आत्मनो वीर्यावत्तरः। षट् पदान्यनुनिष्क्रामति। षड्तवः। ऋतुष्वेव प्रतितिष्ठति। षट् पृष्ठानि। तान्येवावरुंद्धे। सप्तमं पदमभिगृह्णीते। सप्त ग्राम्याः पशवः। तानेवावरुंद्धे। सप्तधेयं वाग्वदति। तामेवाप्नोति। वस्व्यसि रुद्रासीति। देवनामानि वा एवैतानि प्रपद्यते। इयमसीयमसीत्येवैतदाह। यद्यद्भवत्यथो वाच एवैतत्सम्यगुद्यते। बृहस्पतिस्त्वा सुम्ने रम्णातु॥ रुद्रो वसुभिराचक इति। ब्रह्मवै बृहस्पतिः। रुद्रो देवानामोजिष्ठः। यावेव देवानामोजिष्ठौ ताभ्यामेनामन्ततो नह्यति। पृथिव्यास्त्वा मूर्धन्नाजिघर्मीति। एष हि पृथिव्या मूर्धा यद्देवयजनम्। इडायास्पदे घृतवति स्वाहेति। इडा वा एषा। तस्या एतद् घृतवत्पदम्। स्वाहाकारेणैवैनां यच्छति। इदमहं रक्षसो ग्रीवा अपिकृन्तामीति। भ्रातृव्यो वै रक्षः। भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति। स्थाल्यां पदं संवपति। आदित्या वै पशवः पृथिव्यदितिः। पृथिव्या स्थाली संभृता। स्व एवैनान्योनौ दधाति। अस्मे रमस्वास्मे ते राय इति। यत्ते राय इति ब्रूयादितरस्मै पशून्संप्रयच्छेदध्वर्युरपशुः स्यात्। मे राय इत्यात्मन्नेव पशून्यच्छते॥

व्यृद्धा वा एषाहुतिर्यामनग्नौ जुहोति। यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति समृद्ध्यै। अनग्नौ वा एतामाहुतिं जुहोति। तामीश्वराणि रक्षांस्यनूदय्य हन्तोः। यत्परिजुहोति शान्त्या एव रक्षसामपहत्यै। यावद् घृतं विधावेत्तावदभिपरिलिखेत्। पशवो वै घृतम्। पशूनेवावरुंद्धे। अयोनीन्वा एतत्पशूञ्शुचार्पयति यदेषां पदं परिखायाहरति। यदपो निनयति पशूनेव शुचो मुञ्चति। सोमक्रयण्या पत्नीं संख्यापयति। पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय। त्वष्टृमन्तस्त्वा सपेमेति। अतो हीमाः प्रजाः प्रजायन्ते। प्रजननाय ॥५॥

हस्ते हिरण्यं कृत्वा मिमीते। सत्यं वै हिरण्यम्। सत्येनैवैनं मिमीते। अमृतं वै हिरण्यम्। अमृतेनैवैनं मिमीते। आस्माकोऽसीति स्वमेवैनं कुरुते। शुक्रस्ते ग्रह इति शुक्रमेवास्य गृह्णाति। अभित्यं देवं सवितारमिति सवितृप्रसूत एवैनं देवताभिर्मिमीते। अतिच्छन्दसा मिमीते। वर्ष्म वा एषा छन्दसां यदतिच्छन्दाः। वर्ष्मैवैनौ गमयति यज्ञं च

यजमाने च। एकैकया मिमीते। आत्मन्येव वीर्याण्यवरुन्धे। तस्मादिमा कामं न्यचामः कामं प्रसारयामः। यत्सर्वाभिः सह मिमीते हस्तमात्रा वीर्यमभिसमियात्। अङ्गुष्ठेन परिमिमीते। तस्मादेव एतासां वीर्याणि प्रत्युदेव सृजेन्न न्यचेत्। यदव्येष्यास्त्कुर्यात्। वरुण्यः पाशः। वरुण एनं ग्राहुको भवति। यदुत्सृजति वरुणपाशादेवात्मानं परिवृणक्ति। द्विर्मिमीते। द्वे हि शुक्रिये सवने। दश कृत्वो मिमीते। दशाक्षरा विराट्। अन्नं विराट्। विराज्येवान्नाद्ये प्रतितिष्ठति। यत्परिमितं मिमीत परिमितं जीवनं स्यात्। अपरिमितं मिमीते। तस्मादिदमपरिमितं जीवनम्। यत्परिमितं मिमीत यजमानायैव स्यात्। अपरिमितं मिमीते। तेन सदस्येभ्योऽपि क्रीयते। प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्त्विति। प्रजा वा अंशवः। प्रजास्वेव प्राणं दधाति। चतुर्गृहीतमाज्यं भवति। चतुष्पादः पशवः। पशूनेवास्मै गृह्णाति। एतद्रूपा वै पशवः। यद् घृते सत्यानेव पशूनवरुन्धे।

इयं ते शुक्र तनूरिदं वर्च इति हिरण्यं घृते ऽवदधाति। एषा वा अग्नेः प्रिया तनूर्यद् घृतम्। तेजो हिरण्यम्। प्रियामेवास्य तन्वं तेजसा समनक्ति। रेतो वै हिरण्यं पशवो घृतम्। यद्धिरण्यं घृते ऽवदधाति पशुष्वेव रेतो दधाति। तस्मादन्यस्यकादेतसो ऽस्यन्वन्तो गर्भाः प्रजायन्ते। बद्ध्वावदधाति गर्भाणां धृत्या अप्रपादाय। निष्टर्क्यं बध्नाति। तस्माद्योनेर्गर्भामुच्यन्ते। यदनिष्टर्क्यं बध्नीयात्र योनेर्गर्भा मुच्येरन्। यजुषावदधाति यजुषोद्धरति यजुषैव युनक्ति यजुषा विमुञ्चति। तस्मात्पराचीः प्रजा रेतो दधते ऽर्वाचीः प्रजायन्ते ॥६॥

न पूर्वस्मिन्पदमुपवपेत्। देवानां वा एष प्रत्याहुतीनाम्। रुद्रो ऽग्निः पशवः पदम्। रुद्राय पशूनपिदध्यादपशुः स्यात्। गार्हपत्य उपवपति। गार्हपत्ये वै पशवो ऽनूपतिष्ठन्ते। एष पशूनां योनिः। स्व एवैनान्योनौ दधाति। यत्र शार्त्समिकानक्षारं स्यात्तदुपवपेच्छान्त्या अनिर्मार्गाय। सोमं ते क्रीणामीति सोमस्यैवैतद्राज्ञो वीर्याणि महिमानं व्याचष्टे। न कलाशः पण्ते। यत्कलाशः पण्ते सोमस्य राज्ञो वीर्यमवतिरति यजमानस्यार्तिं व्याचष्टे क्षोधुको भवति। इयमिति ब्रूयात्तस्या आत्मा तस्या रूपं तस्याः प्रजा तस्याः पय इति। न सोमस्य राज्ञो वीर्यमवतिरति न यजमानस्यार्तिं व्याचष्टे ऽक्षोधुको भवति।

शुक्रं ते शुक्रेण चन्द्रं चन्द्रेणामृतममृतेन क्रीणामीति शुक्रमेवास्य शुक्रेण क्रीणाति चन्द्रं चन्द्रेणामृतममृतेन क्रीणाति। शक्म यत्ते गोरस्मे ते चन्द्राणीत्यात्मन्नेवास्य वीर्यं धत्ते। तेन निर्वीर्येण भूतेन विक्रीणीते। तपसस्तनूरसीति। तपसो ह्येषा तनूः। प्रजापतेर्वर्ण इति। अग्निर्वै प्रजापतेरग्निजा अजा। सहस्रपोषं पुष्यन्तीति। एषा हि पशूनां सहस्रपोषं पुष्यति। अतो ह्येषा त्रीञ्जनयत्यथो द्वौ। परमेण पशुना क्रीयस इति। परमो ह्येषा पशूनाम्। अस्मे ते बन्धुरित्यात्मन्नेवास्य वीर्यं धत्ते। तया निर्वीर्यया भूतया विक्रीणीते।

छन्दांसि वा अमुष्माल्लोकात्सोममाहरन्। तस्मिन्नन्तराधीयत। सा गायत्र्यजया ज्योतिषोदपतत्। सास्मै प्रारोचयत्। एतर्हि वा एष एतस्मा आह्रियते यर्हि क्रीयते। तम इदमन्तरा। यदजया क्रीणाति प्रैवास्मै रोचयति। मित्रो न एहि सुमित्रधा इति। वरुणो वा एष भूत्वा यजमानमभ्यैति। मित्रमेवैनं कुरुते। अपोर्णुते। यथा श्रेयांसमायन्तं पापीयान्प्रत्यपोर्णुत एवमेव तत्। इन्द्रस्योरुमाविश दक्षिणमिति। इन्द्रो वा एतमग्र ऊरावाधत्त। ऐन्द्रो यजमानः। स्व एवैनं योनौ दधाति। स्वान भ्राजेति सोमक्रयणाननुदिशति। एते वा एतं देवा अगोपायन्नमुष्मिँल्लोके। तं गायत्र्याहरत्। नेष्टापोत्रोः प्रति गोपीथम्। तस्मादेते होत्रे व्यृद्धे व्यृद्धसोमपीथे। तस्मान्न नेष्ट्रा न पोत्रा भवितव्यम्। तस्मादेतौ संसचन्तावेव यजतः। तमेते ऽन्वायन्। एते वा एतस्य गन्धर्वाः पुष्टिं हरन्ति। तस्मात्सोमविक्रयी न पुष्यति। यदि कच्छ्रायेतायैव हरेत्। एतेभ्यो ह्येष गन्धर्वेभ्यो ऽधि क्रीयते। उदायुषेति यथायजुः। उर्वन्तरिक्षं वीहीति। अन्तरिक्षदेवत्यो ह्येष एतर्हि। अपि पन्थामगस्महीति। रक्षांसि वा एतमेतर्हि सचन्ते प्रच्युतमितो ऽप्राप्तममदः। रक्षांस्येव वृञ्जान एति। अनसाच्छा यन्ति। महिमानमेवास्याच्छा यन्ति। [अनसा वहन्ति।] तस्मादनोवाह्यमोषधयः पच्यन्ते। यच्छीर्ष्णा हरेयुः शीर्षहार्यमोषधयः पच्येरन्। अदित्यास्त्वगस्यदित्याः सदने सीदेति। आदित्यो वै सोमः पृथिव्यदितिः। पृथिव्या अनः संभृतम्। स्व एवैनं योनौ दधाति। वारुणो वै सोमः। तं देवतया व्यर्धयति यन्मैत्रं करोति। यद्वारुण्या सादयति स्वयैवैनं

देवतया समर्धयति। वनेषु व्यन्तरिक्षं ततानेति वाससा पर्याणह्यति। सर्वदेवत्यं वै वासः। सर्वाभिरेवैनं देवताभिः समर्धयति। सूर्यस्य चक्षुरारुहमिति कृष्णाजिनं पुरस्तात्प्रत्यानह्यति। रक्षांसि वा एतमेतर्हि जिघांसन्ति स्वर्गं लोकमारोहन्तम्। असावादित्यो ऽपरिपरः पन्थाः। तमेवैनमभ्यारोहयति स्वर्गस्य लोकस्य समष्ट्यै। ॥७॥

प्रच्यवस्व भुवनस्पत इति। भूतानां ह्येष पतिः। विश्वान्यभि धामानीति। देवता वै विश्वा धामानि। देवता एवैनमुप प्रच्यावयति। श्येनो भूत्वा परापतेति। श्येनो वै वयसां क्षेपिष्ठः। श्येनमेवैनं कृत्वा रक्षांस्यपिसृजति। यजमानस्य नो गृहे संस्कृतमिति यजमानायतनमेवैनं करोति। अथो यजमानस्यैव गृहे देवताभिः संस्कृतं कुरुते। नमो मित्रस्य वरुणस्य चक्षस इति। वरुणो वा एष भूत्वा यजमानमभ्येति। मित्रमेवैनं कुरुते। आसन्दीमुद्गृह्णन्ति। यथा मनुष्यराजायावस्थितायासन्दीमुद्गृह्णन्त्येवमेवैतत्। अग्निना प्रतितिष्ठते। अग्निः सर्वा देवताः। देवताभिरेवैनं प्रतितिष्ठते। अग्नीषोमौ वा एतर्हि यजमानमभि संधत्तः। यत्पशुना प्रतितिष्ठते तमेवाभ्यामपिदधाति। अग्नीषोमाभ्यां वा एष आत्मानं मेधायालभते यो दीक्षते। यत्पशुमालभत आत्मानमेव तेन निष्क्रीणाति। यस्तूपरः श्मश्रुणो द्विदेवत्यस्य रूपं लोमशः पीवा पुरुषरूपस्तमालभेत। तस्य यो ऽश्नाति पुरुषमत्ति। तस्मात्तस्य नाशितव्यम्। [क्षुध्यति वै दीक्षितः। क्षुध एष निष्क्रयण आलभ्यते। तस्य यो ऽश्नाति क्षोधुको भवति। तस्मात्तस्य ना] शि [तव्य] म्। अग्नीषोमाभ्यां वै वीर्येणेन्द्रो वृत्रमहन्। स एष वार्त्रघ्नः पशुर्विजित्या आलभ्यते। तस्मादस्याशितव्यम्। देवता वा एनं पूर्वेद्युरालभ्यमानं नाभिप्राच्यवन्त परस्माद्यज्ञक्रतोर्निररिष्याम इति। तमग्नीषोमावेवाभिप्राच्यवेतां परार्चारितरा यज्ञमभ्यत्यसृजन्त। तस्मादेषो ऽग्नीषोमीय आलभ्यते। तस्मादग्नीषोमाभ्यां ग्रहो न गृह्यते। तौ देवान्पुनरुपावर्तमानौ तयोर्यत्प्रियं धामासीत्तदपन्यदधाताम्। तद्देवा अन्वेष्टुमध्रियन्त। ते प्रवाहुगिच्छन्त आयन्। ते नवं वा इदं सृप्तमित्यभ्यवायन्। यन्नवमित्यब्रुवंस्तन्नवनीतस्य नवनीतत्वम्। यत्सृप्तमिति तत्सर्पिषः सर्पिष्ट्वम्। यदजो ऽविन्दत्तदाज्यस्याज्यत्वम्। स घृङ्ङकरोत्। तद् घृतस्य घृतत्वम्। तस्मादजो घृङ्ङ्ख्रिच्चरति। तत्पशूनन्वाकुर्वन्। तत्पशवः समभरन्। तेनानेन पशुभ्यो ऽधिजायन्ते। तावब्रूतां वार्यं वृणावहा अयमेव नौ भागधेयमस्तु यो नौ प्रियं धामाविददिति। तस्मादेषो ऽग्नीषोमीय आलभ्यते। तस्मादस्याशितव्यम्। वार्यवृतो हि ॥८॥

इति कपिष्ठलकठसंहितायां सप्तत्रिंशत्तमो ऽध्यायः॥

विमुक्तो ऽन्यो ऽनड्वान्भवत्यविमुक्तो ऽन्यः। अथातिथ्यं निरूप्यते यज्ञस्य संतत्या अविच्छेदाय। यदुभौ विमुक्तौ स्यातां पितृदेवत्यं हविः स्याद्विच्छिन्नो यज्ञो ऽसंततो ऽनवरुद्धः। यदुभावविमुक्तौ वार्त्रघ्नं हविः स्यात्संततो यज्ञो ऽविच्छिन्नो ऽवरुद्धः। यद्विमुक्तो ऽन्यो भवत्यविमुक्तो ऽन्यो वार्त्रघ्नं हविर्भवत्यपितृदेवत्यं संततो यज्ञो ऽविच्छिन्नो ऽवरुद्धः। पत्नीमन्वारम्भयित्वा निर्वपति। पत्नी वै पारीणह्यस्येशे। अनुमतमेव प्रसृतं देवेभ्यो हविर्निर्वपति पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय॥

यावन्तो वै पुण्यमन्वायन्ति सर्वेभ्यस्तेभ्य आतिथ्यं क्रियते। छन्दांसि ह सोमं राजानं क्रीतमन्वायन्ति। अग्नेस्तनूरसि विष्णवे त्वेति गायत्र्यैतन्निर्वपति। सोमस्य तनूरसि विष्णवे त्वेति त्रिष्टुभैतन्निर्वपति। अति [थेरातिथ्यमसि विष्णवे त्वेति जगत्यैतन्निर्वपति। अग्नये त्वा रायस्पोषदे विष्णवे त्वेत्यनुष्टुभैतन्निर्वपति।] श्येनाय त्वा सोमभृते विष्णवे त्वेति गायत्र्यैतन्निर्वपति। गायत्री वा एतमाहरदमुष्माल्लोकात्। तस्मात्सा पुनर्याम्णी। तस्मात्पुनः प्रयुज्यते। पञ्च कृत्वो निर्वपति। पाङ्क्तो यज्ञः। यज्ञमेवावरुन्द्धे। यच्छन्दोभिर्निर्वपति च्छन्दांस्येव भागधेयवन्ति करोति। विष्णवे त्वा विष्णवे त्वेति। विष्णुर्ह्येतर्हि यज्ञो यर्ह्यनिरुक्तः। तस्माद्वैष्णवः पुरोडाशो भवति। त्रिकपालः कार्यः। स हि वैष्णवः। यन्नवकपालस्तेनैव त्रिकपालः। त्रयो हि ते त्रिकपालाः। नवकपालो भवति। नव प्राणाः। प्राणैरेव यज्ञमुखे प्रैति। अथो तेज एव त्रिवृतं यज्ञमुखे ऽधिवियातयति। यत्त्रिकपालस्तेन वैष्णवो यत्पट् तेन च्छन्दसाम्। तेनोभयस्मान्नैति॥

पशुरालभ्यः सोमाय राज्ञे। मनुष्यराजायेन्वै पशुरालभ्यते। यदग्निं मन्थन्ति। आग्नेया वै पशवः। तदेवास्मै पशुरालभ्यते। अग्निः सर्वा देवताः। सर्वा एव देवताः सोमाय च च्छन्दोभ्यश्चागतेभ्यो जनयति। आश्ववालः प्रस्तरो

भवत्यैक्षवावुद्यावौ। अश्व इव वै प्रजापतिरासीत्। तस्येमे वाला आसन्यदश्ववाला एतौ बाहू यावुद्यावौ। तं देवा अन्वारभ्य स्वर्गं लोकमायन्। यदाश्ववालः प्रस्तरो भवत्यैक्षवावुद्यावौ प्रजापतिमेवान्वारभते। स्वर्गस्य लोकस्य समष्ट्यै। प्रजापतेर्वा एतानि पक्ष्माणि यदाश्ववालाः। यदाश्ववालः प्रस्तरो भवति प्रजापतेरेवाधि यज्ञमुखं प्रतनुते॥

रक्षांसि वै देवानां यज्ञमजिघांसन्। तानि कार्ष्मर्येणापाघ्नत। यत्कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै। यद्वै देवा एतेनाकुर्वत तेनार्ध्नुवन्। तदस्य कर्मण्यत्वम्। कर्मण्यो वै नामैषः। यज्ञमुख एवैतेनर्ध्नोति। सप्तदश सामिधेनीर्भवन्ति। सप्तदशो वै संवत्सरः। पञ्चर्तवो द्वादश मासाः। एष वाव स संवत्सरः। संवत्सरादेवाधि यज्ञमुखं प्रतनुते॥

शिरो वा एतद्यज्ञस्य यदातिथ्यं ग्रीवा उपसदः। यत्संस्थापये [न्मुखतो यज्ञं संस्थापये] त्। शिरो ग्रीवाभ्यो यज्ञस्यावच्छिन्द्यात्। इडान्तं भवति। शिर एव ग्रीवासु यज्ञस्य प्रतिदधाति। नवकपालो भवति। तस्मान्नवधा पुरुषस्य शिरो विष्यूतम्। उपसदो वा एतस्यानुयाजास्तानूनप्त्रमाशीः। तस्मादननुयाजं भवति ॥१॥

देवा वा अन्योऽन्यस्मै श्रैष्ठ्याय नातिष्ठन्त। ते चतुर्धा व्युदक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैः। ते देवाः पापीयांसो ऽभवन्वसीयांसो ऽसुराः। ते ऽविदुः पापीयांसो वै त्वे भवन्ति वसीयांसो ऽसुरा इति। ते प्रियास्तन्वः समवाद्यन्त। ते ऽब्रुवन्नेवं नस्तत्र परवाद्यो नो ऽन्योऽन्यस्मै द्रुह्यादिति। तस्मात्सतनूनप्त्रिणे न द्रोग्धवै। यद् द्रुह्यति प्रियायै तन्वै द्रुह्यति। यत्तन्वः समवाद्यन्त तत्तानूनप्त्रस्य तानूनप्त्रत्वम्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वांस्तानूनप्त्रमुपैति भवत्यात्मना परास्य भ्रातृव्यो भवति। असौ वा आदित्य इन्द्रः। तस्य ते श्रैष्ठ्यायातिष्ठन्त। तिष्ठन्ते ऽस्य समानाः श्रैष्ठ्याय य एवं वेद। एतस्मिन्वै ते तास्तन्वः संन्यदधत। तस्माद्ध तेभ्यस्तेजिष्ठ भवति। तस्मात्सूर्यदेवत्याः सोमा भूयिष्ठा हूयन्ते। आज्येन वै वज्रेण देवा वृत्रमघ्नन्। स्रुग्भ्यां बाहुभ्याम्। सोमो वृत्रः। घ्नन्ति वा एतत्सोमं यदस्याज्येनान्तिकं जुह्वति। अंशुरंशुस्ते देव सोमाप्यायतामिति यदेवास्य घ्नन्ति यन्मितमर्यन्ति तदाप्याययन्ति। यन्ति वा एते ऽस्माल्लोकाद्ये सोममाप्याययन्ति। एष्टा रायः॥ प्रेषे भगायेत्यस्मिन्नेव लोके प्रतितिष्ठन्ति। पितरं च वा एष मातरं च हिनस्ति यो गर्भं हन्ति। अनयोर्गर्भः सोमो राजा। नमो दिवे नमः पृथिव्या इत्याभ्यामेव निह्नुते। किं दीक्षया स्पृणोतीत्याहुः किमवान्तरदीक्षयेति। आत्मानमेव दीक्षया स्पृणोति प्रजामवान्तरदीक्षया। संतरां मेखलामायच्छते। कनीयो व्रतमुपैति। तस्मादात्मनः प्रजा हीयसी। यत्परः सत्यां विसृजते तस्मात्परोवरीयः प्रजया पुत्रेण पौत्रेण प्रथते। अग्निर्वै दीक्षितः। शमयत्यग्निमापः। मदन्तीना मार्जयते। मदन्तीनां व्रतयत्यशान्त्यै। शान्तिर्ह्यापः। अथो तेज एवाभ्यनूय समाधत्ते। न वा एतेन हुतं व्रतयितव्यं नाहुतं यो दीक्षितः। अग्निर्वै रुद्रः। अग्निमेव तन्वं विपरिधत्ते तानूनप्त्रे। या ते अग्ने रुद्रिया तनूरिति व्रतयति। स्वायामेव देवतायां हुतं व्रतयति। तेनास्य न हुतं भवति नाहुतम् ॥२॥

देवाश्च वा असुराश्च संयत्ता आसन्। तेषामसुराणामिमाः पुर आसन्नयस्मयीयं रजतान्तरिक्षं हरिणी द्यौः। ते देवाः संयासंयाते पराजयन्त। ते ऽविदुरनायतना हि वै स्मस्तस्मात्पराजयामह इति। त एताः पुरः प्रत्यकुर्वत हविर्धानं दिव आग्नीध्रमन्तरिक्षात्सदः पृथिव्याः। ते ऽब्रुवन्नुपसदमुपायामोपसदा वै महापुरं जयन्तीति। त उपसदमुपायन्। तानुपसद्भिरेभ्यो लोकेभ्यो निरघ्नन्। तस्मादाहुरुपसदा वै महापुरं जयन्तीति। [त एभ्यो लोकेभ्यो निर्हता ऋतून्प्राविशन्।] ते षडुपायन्। तानुपसद्भिरेवर्तुभ्यो निरघ्नन्द्वाभ्याममुष्माल्लोकाद् द्वाभ्यामन्तरिक्षाद् द्वाभ्यां पृथिव्याः। त ऋतुभ्यो निर्हताः संवत्सरं प्राविशन्। ते द्वादशोपायन्। तानुपसद्भिरेव संवत्सरान्निरघ्नंश्चतसृभिरमुष्माल्लोकाच्चतसृभिरन्तरिक्षाच्चतसृभिः पृथिव्याः। ते संवत्सरान्निर्हता अहोरात्रे प्राविशन्। ते यत्सायमुपायंस्तेनैनानह्नो ऽनुदन्त यत्प्रातस्तेनाह्नः। तस्माद्गौः सायं प्रातस्तनमाप्यायते प्रातः सायन्तनम्। तानुपसद्भिरेभ्यो लोकेभ्यो नुदमाना आयन्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वानुपसदमुपैति भवत्यात्मना परास्य भ्रातृव्यो भवति।

न द्वादशाग्निष्टोमस्य कुर्यात्। अशान्ता निर्मृज्युः। न तिस्रो ऽहीनस्य। उपरिष्टाद्यज्ञक्रतुर्गरीयानभिर्वदेद्ग्रीवा

निःश्रृणायादार्तिमार्छेत्। द्वादशाहीनस्य कुर्याच्छान्त्या अनिर्मार्गाय। तिस्रो ऽग्निष्टोमस्य प्रत्युत्तब्ध्यै सयत्वाय। देवा वा असुर्यानिमांल्लोकान्नान्ववैतुमधृष्णुवन्। तानग्निना [मुखेनान्ववायन्। यदग्निमन्त्युपसदां प्रतीकानि भवन्ति यथा क्षेत्रपतिः क्षेत्रे ऽन्ववनयत्येवमेवैतत्। अग्निना] मुखेनेमांल्लोकानभिजयन्तो यन्ति। यो ह वै देवान्साध्यान्वेद सिध्यत्यस्मै। इमे वाव लोका देवाः साध्याः। सिद्धं ह्यस्मै सिद्धमस्मै सिद्धममुष्मै। य एवं वेद सिध्यत्यस्मै ॥ ३ ॥

इषुं वा एतां देवाः समस्कुर्वन्यदुपसदो ऽग्निं शृङ्गं सोमं शल्यं विष्णुं तेजनम्। ते ऽब्रुवन्को न ओजिष्ठः स इमां विसृजत्विति। ते रुद्रमब्रुवंस्त्वं वै न ओजिष्ठो ऽसि त्वमिमां विसृजेति। सो ऽब्रवीद्वार्यं वृणा अहमेव पशूनामीशा इति। ते ऽमन्यन्त यदयं पशूनामीशिष्यते सर्वान्निर्णेष्यतीति। ते ऽब्रुवन्सप्ताहानीशासै न पराचीनमिति। तस्मात्सप्ताहानि रुद्रः पशूनामीशे। रक्षांसि पराचीनं घ्नन्ति। तां व्यसृजत्। तया पुरः समरुजत्। यत्समरुजत्तद्रुद्रस्य रुद्रत्वम्। विसृष्टिमेव भ्रातृव्याय विसृजति य एवं विद्वानुपसदमुपैति। न पुनरपक्रामेत्। यतरो वै संयत्तयोः पुनरपक्रामति परा स जयते। समेष एतर्हि यतते य उपसदमुपैति। सकृदेव पराङतिक्रम्याश्रावयति यज्ञस्याभिजित्यै रक्षसामपहत्यै। न प्रयाजा भवन्ति नानुयाजाः। पुरो वा एते यज्ञस्य यत्प्रयाजानुयाजाः। यत्प्रयाजानुयाजान्कुर्यात्पुरो यज्ञस्य कुर्याद् दुरतिव्यथं स्यादतीक्ष्णामिषुं कुर्यात्। चतुर्व्रतो भवति। चत्वारि हीष्वाः पर्णानि। त्रिव्रतो भवति। त्रिषन्धिर्हीषुः शृङ्गं शल्यस्तेजनम्। द्विव्रतो भवति। द्विषन्धिर्हीषुः शल्यश्च तेजनं च एकव्रतो भवति। एका ह्येवेषुः। इषुमेवैतां संस्कृत्य तां श्वो भ्रातृव्याय विसृजति। अथो व्रतमेवाप्नोति॥

ग्रीवा वा एता यज्ञस्य यदुपसदः। न प्रयाजा भवन्ति नानुयाजाः। तस्माद् ग्रीवाः प्रति पुरुषस्याणिष्ठम्। ताः सवीर्याः प्रयुज्यन्ते। तस्माद् ग्रीवा अणिष्ठाः सतीर्वीर्यावत्तमाः। तिस्र उपसदो भवन्ति। त्रय इमे लोकाः। तस्मात्पुरुषस्य त्रय स्कन्दाः। अतिपक्ताभिर्यजति। तस्माद् ग्रीवा अतिपक्ताः। अथो अयातयाम्नी। अयातयाम्न्यैव यजति। सच्छन्दसो याज्यानुवाक्याः कुर्यात्। यद्विच्छन्दसः स्युरपचितो होतारं हन्युः। भिद्वतीः पुरां भित्त्यै ॥ ४ ॥

देवाश्च वा असुराश्च यज्ञे संयत्ता आसन्। स यज्ञो ऽविभेद्यतरे ऽभिजेष्यन्ति ते मा विमथिष्यन्त इति। स न्यलयत। तं देवा अभिजित्यान्वैच्छन्। ते प्रवाहुगिच्छन्त आयन्। तमिन्द्र उपर्युपर्यत्यक्रामत्। सो ऽब्रवीत्को मायमुपर्युपर्यत्यक्रमीदिति। अहमेष कृच्छ्रे हन्तेति। अथ कस्त्वमिति। अहमेष कृच्छ्रादाहर्तेति। एमूषो नामायं वराह इत्यब्रवीदेकविंशत्याः पुरामश्ममयीनां पारे यत्किंचासुराणां वामं वसु तेन तिष्ठति तं जहि य एष कृच्छ्रे हन्तावोचथा इति। [तमिन्द्रो दाल्भ्याभिविसृज्य पराभिनत्। सो ऽब्रवीदेष हतः। तमाहर य एष कृच्छ्रादाहर्तावोचथा इति।] तं विष्णुरुपासङ्गं आहरत्। यज्ञो वै विष्णुः। यज्ञेनैवैषां तद्यज्ञमवृञ्जत पशुभिः पशूनिन्द्रियेणेन्द्रियम्। ततो देवा अभवन्परासुरा अभवन्। यज्ञो वै विष्णुः। यज्ञेनैवैतद्यज्ञं भ्रातृव्यस्य वृङ्क्ते पशुभिः पशूनिन्द्रियेणेन्द्रियम्। भवत्यात्मना परास्य भ्रातृव्यो भवति। देवयजनमिच्छन्ति। यज्ञमेवेच्छन्ति। यद्विन्दन्ति यज्ञमेव विन्दन्ति॥

यदुदीचीनं प्राचीनं प्रवणं स्यात्तस्मिन्यजेत यज्ञकामः। एवमिव हि स यज्ञो ऽशयत्। यज्ञस्यानुवित्त्यै। यत्समं प्रतिष्ठितं तस्मिन्यजेत गतश्रीः। प्रतिष्ठा वा एतस्मा एष्टव्या यो गतश्रीः। एतद् भूम्याः प्रतिष्ठितं यत्समम्। प्रतिष्ठामेवास्मै विन्दति गच्छति प्रतिष्ठाम्। त्र्युन्नते यजेत भ्रातृव्यवान्। त्र्युन्नतेन वै विष्णुरिमांल्लोकानुदजयत्। स एभ्यो लोकेभ्यो ऽसुरान्प्राणुदत। इमानेव लोकानुज्जयत्येभ्यो लोकेभ्यो भ्रातृव्यं प्रणुदते। यस्यैकधा मध्य उन्नतं स्यात्तस्मिन्यजेत स्वर्गकामः। अतो वै देवाः स्वर्गं लोकमायन्। स्वर्गस्य लोकस्य समष्ट्यै। यत्रौषधयो बहीरन्या अन्या इव स्युस्तस्मिन्यजेत पशुकामः। ओषधयो वै पशवः। भूमानमेव पशूनामुपैति। यत्रौषधयः कृच्छ्रशः पर्यायशः परीयुस्तस्मिन्यजेत पशुकामः। अतो वै देवाः पशूनुदसृजन्त। पशूनेवोत्सृजते। यद्दृक्षमलोमकं तस्मिन्याजयेद्यं द्विष्यात्। व्यृद्धं वा एतदोषधिभिर्यद्दृक्षमलोमकम्। ओषधयः पशवः। पशुभिरेवैनं व्यर्धयति। यत्समया देवयजनं पन्था विधावेत्तस्मिन्याजयेद्यं कामयेत व्येनं प्रजया पशुभिश्छिनद्यामिति। एतद्वै विच्छिन्नं नाम देवयजनम्। व्येनं प्रजया पशुभिश्छिनत्ति। यदन्तरापश्च देवयजनं च पन्था विधावेत्तस्मिन्याजयेद्यं कामयेत नैनमपरो यज्ञ उपनमेदिति। एतद्वै

परिवर्त्म नाम देवयजनम्। पर्येणमपरो यज्ञो वृणक्ति। यत्रापः सर्वतः समवद्रवेयुस्तस्मिन्यजेतान्नकामः। दिग्भ्यो वा एतस्मा अन्नं हरन्ति यस्मै हरन्ति। आपो ऽन्नम्। सर्वाभ्य एव दिग्भ्यो ऽन्नाद्यमवरुन्द्धे। तदेतत्समापं नाम देवयजनम्। नीपतममिव [र्तं] समानानां भवति ॥५॥

यत्रापः प्राचीराहवनीयात्प्रतीचीर्गार्हपत्याद्व्यवद्रवेयुस्तस्मिन्याजयेद्यमुदके वा पात्रे वा विवाहे वा मीमांसेरन्। पाप्मना वा एषो ऽनुषक्तो यमुदके वा पात्रे वा विवाहे वा मीमांसन्ते। पाप्मनैवैनं व्यावर्तयति। यत्रापो दक्षिणा परिप्लूय पश्चात्प्राची रमेरंस्तस्मिन्यजेत बुभूषन्। आपो वै सर्वा देवताः। एतद्देवताभिर्जुष्टं देवयजनम्। यदेवं देवताभिरेव जुष्टे देवयजने यजते भवत्येव। यत्रापो दक्षिणत उदीची रमेरंस्तस्मिन्यजेत सजातकामः। आपो वै सर्वा देवताः। देवताः सजाताः। सजातानामेवैनं प्रार्धं करोति। कृत्रिमे यजेत बुभूषन्। आत्मा वै देवयजनम्। करोत्येवैनम्। यत्राग्निं चापश्च पश्यन्प्रातरनुवाकमनुब्रूयात्तस्मिन्यजेत यः कामयेत यज्ञो मापर उपनमेदिति। अग्निः सर्वा देवता आपो यज्ञः। उपैनमपरो यज्ञो नमति। देवताश्च हि यज्ञं च पश्यन्यजते। यत्राग्निमपः सूर्यं पश्यन्प्रातरनुवाकमनुब्रूयात्तस्मिन्यजेत ब्रह्मवर्चसकामः। एतद्वै त्रिशुक्रियं नाम देवयजनम्। ब्रह्मवर्चसी भवति। यत्पुरस्तादाप्तं स्याद्देवयजनं तस्मिन्यजेत भ्रातृव्यवान्। भ्रातृव्याय वा एष लोक उच्छिष्यते यत्पुरस्ताद्देवयजनस्योच्छिष्यते। एतावन्तमेवास्मै लोकमुच्छिंषति। अलोकमेनं करोति। यो ह वै विद्वान्देवयजनं यजत ऋध्नोति। अग्निर्वाव देवयजनम्। अग्नौ हि सर्वा देवता इज्यन्ते। यत्रैव क्वचाग्निमाधाय यजेत तेनैवर्ध्नोति। ब्राह्मणा वाव देवयजनम्। यत्र ब्राह्मणा बहवः संराधयेयुस्तस्मिन्यजेत। तेनैवर्ध्नोति ॥६॥

इति कपिष्ठलकठसंहितायामष्टात्रिंशत्तमो ऽध्यायः॥

वेदिं विमिमीते। त्रिंशता पश्चात्प्रक्रमैर्मिमीते षट्त्रिंशता प्राचीं चतुर्विंशत्या पुरस्तात्। विराजैवैनां पश्चात्परिमिमीते बृहत्या प्राचीं गायत्र्या पुरस्तात्। छन्दोभिरेवैनां सर्वतः परिमिमीते। विराज्येव प्रतितिष्ठति यद्विराजमभिसंपादयति। स्फ्येन स्तम्बयजुर्हरति। इन्द्रो वै वृत्राय वज्रं प्राहरत्। स त्रेधाभवत्स्फ्यस्तृतीयं यूपस्तृतीयं रथस्तृतीयम्। वज्रो वै स्फ्यः। एतावती पृथिवी यावती वेदिः। वज्रेणैव पृथिव्या भ्रातृव्यं निर्भजति। त्रिर्हरति। त्रय इमे लोकाः। एभ्य एवैनं लोकेभ्यो निर्भजति। तूष्णीं चतुर्थं हरति। अपरिमितादेवैनं निर्भजति। इन्द्रो वै वृत्रं हत्वा तमनयाभिन्यदधात्। यत्तूष्णीं चतुर्थं हरत्यनयैव भ्रातृव्यमभिनिदधाति। मूलं छिनत्ति। भ्रातृव्यस्यैव मूलं छिनत्ति। उद्धन्ति। तस्माच्छिशिर ओषधयः पराभवन्ति। बर्हिं स्तृणाति। तस्माद्वसन्ते पुनराभवन्ति। अपारुमदेवयजनं पृथिव्या देवयजनाज्जहोति। भ्रातृव्यो वा अररुः। भ्रातृव्यमेव पृथिव्या निर्भजति। द्रप्सस्ते द्यां मा स्कनिति। यो वा अस्या रसः स द्रप्सः। तमिमाः प्रजा उपजीवन्ति। तमेवास्यां यच्छति तस्यास्कन्दाय। अररुर्द्यां मा पप्तदिति। भ्रातृव्यो वा अररुः। भ्रातृव्यमेव स्वर्गाल्लोकात्प्रतिनुदते॥

विषाद्वै नामासुर आसीत्। स पृथिवीं विषेणावालिम्पत्। तस्या न [कश्चनाश्नात्। य आ] श्नात्सो ऽरुप्यत्। यदुद्धन्ति यदेवास्या अमेध्यं यदयज्ञियं तदपहन्ति। अपि मूलमनुखनेदाविद्धस्य निष्कृत्यै। अधो दूरं खनेत्। अधो वा अस्या वीर्यम्। वीर्यस्याभिक्लृप्त्यै। तस्मात्सुकृष्टे व्रीहियवाः पच्यन्ते। तदाहुरुत्तरार्धे वा अस्या वीर्यम्। तदिमाः प्रजा उपजीवन्ति। तस्मान्नातिखेयेति। आ प्रतिष्ठायाः खनेद्यजमानस्य प्रतिष्ठित्यै। दक्षिणत उद्धनं कुर्यात्। देवयजनस्य रूपम्। रक्षसामपहत्यै। पुरीषवतीं कुर्यात्। पशवो वै पुरीषम्। पशूनेवावरुन्द्धे ॥ १ ॥

स्फ्येन वेदिं परिगृह्णाति। वज्रो वै स्फ्यः। एतावती पृथिवी यावती वेदिः। वज्रेणैव पृथिव्या भ्रातृव्यं निर्भज्य छन्दोभिरात्मने परिगृह्णाति। वसवस्त्वा परिगृह्णन्तु गायत्रेण छन्दसेति दक्षिणतः। तेजो वै ब्रह्म गायत्री। तेजसैवैनां दक्षिणतः परिगृह्णाति। रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छन्दसेति पश्चात्। ओजो वै वीर्यं त्रिष्टुप्। ओजसैवैनां पश्चात्परिगृह्णाति। आदित्यास्त्वा परिगृह्णन्तु जागतेन छन्दसेत्युत्तरात्। जागता वै पशवः। उत्तरादायतनाः पशवः। पशुभ्य एवैतदायतनं करोति। पशूनां धृत्यै। अथो तेजसा चैवौजसा चोभयतः

पशून्परिगृह्णाति। पुरा क्रूरस्य विसृपो विरप्शिन्निति। यद्वा अस्यास्तेजो यज्ञियं तददश्चन्द्रमसि। तदेवावरुन्द्धे॥

इध्माबर्हिषी प्रोक्षति। शुष्काणि वा एतान्यमेध्यान्यारण्यादाहृतानि। आपो मेध्या यज्ञियाः। यदद्भिः प्रोक्षति मेध्ये एवैने यज्ञिये करोति। वेदिं प्रोक्षति। मेध्यामेवैनां यज्ञियां करोति। अथो यदेवास्या उद्घ्नन्तः क्रूरं कुर्वन्ति तच्छमयति। बर्हिं स्तृणाति। प्रजा वै बर्हिः पृथिवी वेदिः। प्रजा एव पृथिव्यां प्रतिष्ठापयति। सर्वां वेदिमनुस्तृणाति। तस्मात्पृथिवीं सर्वामन्वोषधयः। बहुलं स्तृणीयात्। अक्षोधुको यजमानो भवत्यनग्नंभावुको ऽध्वर्युः। बर्हिषि प्रस्तरं सादयति। यजमानो वै प्रस्तरः प्रजा बर्हिः। यजमानमेव प्रजास्वधिसादयति। उत्तरं सादयति। उत्तरो हि यजमानो ऽयजमानात्। व्यावृत्तं सादयति। व्यावृत्तो हि यजमानो ऽयजमानेन। अक्त्वा प्रस्तरं प्रहरति। यजमानो वै प्रस्तरः। हविर्भूतमेवैनं स्वर्गं लोकं गमयति। नात्यग्रं प्रहरेत्। यदत्यग्रं प्रहरेद् वृक्णकेशीर्जनयः स्युरत्यासारिणीर्नशुकाः। अग्रमग्र आदीपयति। अग्रेणैवाग्रं समर्धयति। ऋजुं प्रहरेत्स्वर्गकामस्य। ऋजुमेवैनं स्वर्गं लोकं गमयति। यं द्विष्यात्तस्य ह्रूर्छयेत्। स्वर्गादेवैनं लोकाद्ध्रूर्छयति। न्यञ्चं प्रहरेद् वृष्टिकामस्य। या वा इत आहुतिरुदयते सामुतो वृष्टिं च्यावयति। अनयैवाहुत्या दिवो वृष्टिं [नि] नयति। ऊर्ध्वं प्रहरेद्यदि कामयेत पुमानस्य पुत्रो जायेतेति। ऊर्ध्व एव हि पुमान्। प्रथयित्वा प्रहरेद्यदि कामयेत स्त्री जायेतेति। एवमेव हि स्त्री प्रथितेव। यजमानो वै प्रस्तरः। हविर्भूतमेवैनं स्वर्गं लोकं गमयति। एति वा एषो ऽस्माल्लोकाद्यत्प्रस्तरं प्रहरति। यत्तृणमुपगृह्णात्यस्मिन्नेवैनं लोके यच्छति। अनुप्रहरति। यदेवास्या उद्घ्नन्तः क्रूरं कुर्वन्ति यद्विच्छिन्दन्तस्तच्छमयति। अगा३नग्नी३दित्यगन्स्वर्गं लोकमित्येवैतदाह। श्रावय श्रौषडिति स्वर्गमेवैनं लोकं गतं श्रावयति ॥ २ ॥

देवाश्च वा असुराश्च संयत्ता आसन्। तान्यदस्यास्तेजो यज्ञियमासीत्तत्सिंहीरूपमिव महिषीरूपमिव भूत्वान्तरातिष्ठत्। ते ऽविदुर्यतरान्वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति। तां देवा उपामन्त्रयन्त। साब्रवीद्वार्यं वृणै मामेव पूर्वामग्नेराहुतिरश्नवाता अथ मया यूयं सर्वान्कामान्व्यश्नवाथेति। सा देवानुपावर्तत। ततो देवा अभवन्परासुरा अभवन्। यस्यैवं विदुष उत्तरवेदिर्न्युप्यते यश्चैवं विद्वान्निवपति भवत्यात्मना परास्य भ्रातृव्यो भवति। दश पश्चात्तिरश्ची पदानि भवन्ति दशोभयतः प्राच्यपरिमिता पुरस्ताद्विराजा संमिता। यद्वा असुराणां वित्तमासीत्तद्देवा वेद्याविन्दन्त। तद्वेद्या वेदित्वम्। यद्वेद्यं तदुत्तरवेद्या। तदुत्तरवेद्या उत्तरवेदित्वम्। यस्यैवं विदुषो वेदिश्च क्रियत उत्तरवेदिश्च न्युप्यते वित्तं चैव वेद्यं च भ्रातृव्यस्य विन्दते। प्रजापतेर्वै नासिका शीर्यत। सोत्तरवेदिरभवत्। यज्ञः प्रजापतिः। यदुत्तरवेदिं निवपति प्रजापतेरेव नासिकां मुखतः प्रतिदधाति। चत्वारि वा एतस्या नामानि नासिका कशारिः सिंह्युत्तरवेदिः। तप्तायन्यसीति। तप्ता ह्येनानैत्। वित्तायन्यसीति। वित्ता ह्येनानैत्। अवतान्मा नाथितमिति। नाथितान्ह्येनानावत्। अवताद्व्यथितमिति। व्यथितान्ह्येनानावत्। अग्ने अङ्गिरो यो ऽस्यां पृथिव्यामसि॥ यो द्वितीयस्यां यस्तृतीयस्यामिति यदेवास्यैषु लोकेषु श्लिष्टं यन्न्यक्तं तदवरुन्द्धे। विदेदग्निर्नभो नामेति। यद्वा अग्नेर्वामं वसु तन्नभः। तेनेमां पृथिवीं प्राविशज्जानुदघ्नमधः। तस्माज्जानुदघ्नं खेयम्। तस्यैव वामस्य वसोरनुवित्त्यै। सिंह्यसि महिष्यसीति। सिंहीरूपमिव महिषीरूपमिव भूत्वान्तरातिष्ठत्। देवेभ्यः प्रथस्वेति प्रथयत्येवैनाम्। देवेभ्यः कल्पस्वेति कल्पयत्येवैनाम्। देवेभ्यः शुन्धस्वेति शुन्धत्येवैनाम्। देवेभ्यः शुम्भस्वेति शुम्भत्येवैनाम्। विभ्राड् बृहत्पिबतु सोम्यं मध्विति अन्तान्कल्पयति। देवपात्रं वा उत्तरवेदिः। देवपात्रेणैव देवतास्तर्पयति। अथो देवताभ्य एव देवपात्रं निवेदयति ॥ ३ ॥

यतीन्वै सालावृकेया आदन्। त आदीयमानाः संमृश्यमाना उत्तरवेदिं समुदक्रामन्। तान्नाभ्यधृष्णुवन्। तेषामेको ऽस्मयत। तत एनानभ्यधृष्णुवन्। तेषामेकैकमावर्हमादन्। तस्मान्न मोघहासिना भव्यम्। यन्निःसारयति यदेवास्या अभिमृतममेध्यं यदयज्ञियं तन्निःसारयति। प्रोक्षति। एतावती वा इयं पृथिव्यासीद्यावत्युत्तरवेदिः। तां समन्तं रक्षांसि संप्राकम्पन्त। तानि देवा विनुद्यैताभिरेव देवताभिः समन्तं पर्यन्यदधुः। यत्प्रोक्षति। एतद्देवत्या वा इमा दिशः। रक्षांस्येव विनुद्यैताभिरेव देवताभिः समन्तमात्मानं परिनिदधाति। गोपीथाय। एतद्वा एतां पूर्वामग्नेराहुतिरश्नुते यद्व्याघारयति। अथादो ऽब्रवीन्मामेव पूर्वामग्नेराहुतिरश्नवाता अथ मया यूयं सर्वान्कामान्व्यश्नवाथेति। अथ वा एतेषां

तर्ह्यसुराः सपत्ना आसन्। ते ऽकामयन्त सपत्नान्सहेमहीति। सिंह्यसि सपत्नसाही स्वाहेति। सपत्नांस्तेनासहन्त। ते ऽकामयन्त पशून्विन्देमहीति। सिंह्यसि रायस्पोषवनिः स्वाहेति। पशूंस्तेनाविन्दन्त। ते ऽकामयन्त प्रजां विन्देमहीति। सिंह्यसि सुप्रजावनिः स्वाहेति। प्रजां तेनाविन्दन्त। ते ऽकामयन्तादित्याः स्यामेति। सिंह्यस्यादित्यवनिः स्वाहेति। आदित्यास्तेनाभवन्। तस्मादिमा आदित्याः प्रजाः। ते ऽकामयन्त यज्ञियाः स्यामेति। सिंह्यस्यावह देवान्देवायते यजमानाय स्वाहेति। यज्ञियास्तेनाभवन्। ते ऽकामयन्त स्वर्गं लोकमियामेति। भूतेभ्यस्त्वेति। देवा वै भूताः। स्वर्गमेव तेन लोकमायन्। यस्यैवं विदुष उत्तरवेदिर्व्याघार्यते यश्चैवं विद्वान्व्याघारयति सवनिवैतया कामान्व्यश्नोति। इमे वै लोका अविधृता आसन्। ते संप्राकम्पन्त। तान्देवा एतैर्यजुर्भिर्व्यष्टभ्नुवन्। यदेतैः परिधीन्परिदधात्येषां लोकानां विधृत्यै। अग्निर्वै देवेभ्यो ऽपाक्रामत्। स यां प्रथमां प्रावसत्तां पशुष्ववसद् वृष्णेरन्तराशृङ्गम्। तस्मादूर्णास्तुका भवति। यां द्वितीयां तां वनस्पतिषु पीतुदारौ। तस्मात्पीतुदारुर्भवति। यां तृतीयां तामोषधिषु सुगन्धितेजने। तस्मात्सुगन्धितेजनो भवति। यदेते संभारा भवन्ति यदेवास्यात्र श्लिष्टं यन्न्यक्तं तदेतैः संभरति। स पुनरुपावर्तमानः शरीरमधूनुत। तस्य यन्मांसमासीत्तद्गुल्गुल्वभवद्यदस्थि स पीतुदारुर्यानि लोमानि स सुगन्धितेजनः। तस्मात्सुगन्धितेजनो भवति। यदेते संभारा भवन्ति यदेवास्यात्र श्लिष्टं यन्न्यक्तं तदेतैः संभरति। अग्नेः कुलायमस्यग्नेः पुरीषमसीति। कुलायमिव ह्येतत्पुरीषमिव। यज्ञः प्रत्यष्ठादिति यज्ञस्यैव प्रतिष्ठित्यै ॥ ४ ॥

चत्वारो वै देवानां होतार आसन्भूपतिर्भुवनपतिर्भूतानां पतिर्भूतः। तेषां त्रयो होत्रेण प्रामीयन्त। अथो यद्भूत उदशिष्यत स प्रमयादबिभेत्। स न्यलयत। स समुद्रं प्राविशत्। स यत्समुद्रे भस्माकुरुत स एष कर्दमः। तं मत्स्यः प्राब्रवीत्। तमशपदभिगन्ता त्वा हतादिति। तस्मान्मत्स्यमभिगन्ता हन्ति। शप्तो हि सः। तत उद्द्रुत्य नडं प्राविशत्। तस्मान्नडो दग्धः क्रूर इव वर्वरः। तमश्वः श्वेतो ऽवमृशन्नन्वविन्दत्। तं प्रत्यौषत्। तस्मात्स प्रत्युष्टमुखः। सो ऽक्रन्दत्। सा या वागासीत्स सुश्लोकः शकुनिरभवत्। तस्माद्य स नष्टैषमभ्यवक्रन्दति विन्दत्येव। तं देवा अनुविद्यानयन्निदं नो होता भविष्यतीति। स प्रमयादबिभेत्। तं भ्रातरः प्रमीता अब्रुवन्वयं त इतो वर्म भविष्यामो देवेषु णो भागधेयमिच्छेति। ते ऽब्रुवन्यत्किंच हविर्भूतं बहिष्परिधि स्कन्देत्तदेषां भागधेयमिति। एते वाव ते परिधयः। यदि हविर्भूतं बहिष्परिधि स्कन्देद् भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यनुमन्त्रयेत। एते वै देवा स्कन्नभागाः। य एव देवा स्कन्नभागास्तानेतद्गमयति। यज्ञो वा एतेषां मध्यमो यजमानो दक्षिणार्ध्यो भ्रातृव्य उत्तरार्ध्यः। स्थविष्ठं मध्यमं कुर्याद्वर्षिष्ठं दक्षिणार्ध्यं क्रधिष्ठमुत्तरार्ध्यम्। स्थविष्ठं प्रथमं परिदधाति। प्रथमो हि यज्ञः। वर्षिष्ठं दक्षिणार्ध्यम्। यथा यजमानो दक्षिणतो यज्ञ उपसीदत्येवं तत्। पश्चेवोत्तरार्ध्यम्। पश्चेव हि भ्रातृव्यः। अक्त्वा दक्षिणार्ध्यं प्रहरति। मुखत एव यजमानं प्रीणाति। यज्ञेनैवैतद्यजमानं प्रतरां करोति। यज्ञेन भ्रातृव्यमपनुदते। अथो हविर्भूतमेवैनं स्वर्गं लोकं गमयति। उपवपत्युत्तरार्ध्यम्। भ्रातृव्यमेव तदुपवपति। अथ ह स्माहायलः क्रफोडिः किमु स यजेत यो यज्ञस्य स्कन्नेन न वसीयानि [व] स्यादिति। यत्रस्कन्देत्तदपो निनीय भूपतये स्वाहेति प्राक् प्रादेशेन मिमीत भुवनपतये स्वाहेति दक्षिणा भूतानां पतये स्वाहेति प्रत्यक्। जनं वा एतद्यज्ञस्यैति यत्स्कन्दति। इयं वाव जनः। यो वा इमामेति न स पुनरागच्छति। जनमेवैतस्य यज्ञस्य यां कामयत आशिषं तामवरुन्द्धे। दिशो मिमीते। दिशो वै यज्ञस्य स्कन्नस्याशीर्गच्छति। दिग्भ्य एव यज्ञस्याशिषमवरुन्द्धे। प्रादेशेन मिमीते। एतावद्वै पुरुषे वीर्यं यावदस्य प्राणा अभि। यावदेवास्मिन्वीर्यं तेनैनत्संभरति। अपो निनयति। म्रियते वा एतद्यज्ञस्य यत्स्कन्दति। अद्भिस्तान्तमभिषिञ्चन्ति। आपः सर्वा देवताः। देवता एवैनत्प्रवेशयति। यदि प्रातःसवने स्कन्देद्देवाञ्जनमगन्यज्ञस्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत। यदि मध्यन्दिने ओषधीर्जनमगन्यज्ञ- [स्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत।] यदि तृतीयसवने पितॄञ्जनमगन्यज्ञस्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत। यदि तिरोह्न्येषु यदि नक्तं द्यावापृथिवी जनमगन्यज्ञस्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत। एता वै देवता यज्ञस्य स्कन्नस्याशीर्गच्छति। गन्धर्वाञ्जनमगन्यज्ञस्तस्य मेष्टस्य [यज्ञस्य] द्रविणेहागम्या इत्यनुमन्त्रयेत। एता वै देवता यज्ञस्य स्कन्नस्याशीर्गच्छति।

एता एव देवता यथादेवतं प्रत्युपसृत्य यां कामयते यज्ञस्याशिषं तामवरुन्द्धे। यस्यैवं विदुषो यज्ञस्य स्कन्नमनुमन्त्रयन्ते यश्चैवं विद्वाननुमन्त्रयते वसीयान्भवति ॥ ५ ॥

॥इति कपिष्ठलकठसंहितायामेकोनचत्वारिंशत्तमोऽध्यायः॥

हविर्धाने प्रणेनेक्ति। मेध्ये एवैने यज्ञिये करोति। ग्रन्थीन्विवृञ्जन्ति। देवग्रन्थीनेव ग्रन्थिष्यन्तो मनुष्यग्रन्थीन्विवृञ्जन्ति। हविर्वै हविर्धाने। स्तीर्णे बर्हिषि हविरासादयन्ति। तस्मात्स्तीर्णे बर्हिषि हविर्धाने प्रवर्तयन्ति। पत्न्युपानक्ति। पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति। प्रजननाय। त्रिः प्राचीनमुपानक्ति। असंख्यातं हि तिरश्चीनं मनुष्या उपाञ्जन्ति। व्यावृत्त्यै। यजुषोपानक्ति। अयजुषा हि मनुष्या उपाञ्जन्ति। व्यावृत्त्यै। दक्षिणत उपानक्ति। दक्षिणतो ह्येते उदीची मनुष्यलोकमुपावर्तेते। मानुषमेवैनयोरुत्तरं करोति। यदुत्तरादुपाञ्ज्यान्नान्यतरं चन लोकमुपावर्तेयाताम्। स्वर्गाय वा एते लोकाय प्रवर्तेते यद्धविर्धाने॥

युञ्जते मन इति सावित्र्या जुहोति। सवितृप्रसूते एवैने स्वर्गं लोकं गमयति। हविर्वै हविर्धाने। न हविरनभिघृतं मेधमश्नुते। यदभ्यनक्त्यभ्येवैने घारयति। मेध्यत्वाय। शुष्को वा एष निर्ऋतिगृहीतो यदक्षो नभ्याभ्यामुभयतो बद्ध उपधिभ्यां संदष्टः। यदुपानक्ति मेध्यमेवैनं यज्ञियं करोति। घोषो वै नामासुर आसीत्। स वनस्पतीन्प्राविशत्। तं देवा गृहीत्वोभयतो ऽवघ्नन्। यत्क्षुवेदेदसुर्या वाग्यज्ञमववदेद्रक्षांसि यज्ञमन्ववेत्य हन्युः। अनुगृह्णन्तो यन्ति रक्षसामनन्ववायाय। वर्त्मना वै यज्ञं रक्षांस्यन्ववेत्य जिघांसन्ति। वैष्णव्या वर्त्मञ्जुहोति। विष्णुर्वै यज्ञः। विष्णुनैव यज्ञाद्रक्षांस्यपहन्ति। व्यृद्धा वा एषाहुतिर्यामनग्नौ जुहोति। यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति। समृद्ध्यै। स्वर्गं वा एते लोकं प्रेतो यद्धविर्धाने। गायत्र्या दक्षिणस्य वर्त्मञ्जुहोति। अस्यामेवैने आक्रमयति। त्रिष्टुभोत्तरस्य। अन्तरिक्ष एवैने आक्रमयति। आहवनीयं गमयति। स्वर्गमेवैने लोकं गमयति। स्वर्गो हि लोक आहवनीयः। त्रीन्पुरस्तात्प्रक्रामानुच्छिंषति। त्रय इमे लोकाः। इमानेवास्मै लोकानुच्छिंषति॥

दिवो वा विष्णवुत वा पृथिव्या इति दक्षिणस्य हविर्धानस्य मेथीमुपमिनोति। विष्णुर्वै यज्ञः। मुखत एव यज्ञस्याशिषमवरुन्द्धे। तां परुषिपरुष्याशासान एति। विष्णोर्नु कं वीर्याणि प्रवोचमित्युत्तरस्य। वैष्णवं वै हविर्धानम्। स्वयैवैनद्देवतया समर्धयति। विष्णोः पृष्ठमसीति च्छदिरुपरिष्टादभिनिदधाति। इदमेव तेन करोति यदिदमुत्तरार्धं शीर्ष्णः। विष्णो रराटमसीति पुरस्ताद्रराटमेव तेन करोति। विष्णोः श्नप्त्रे स्थ इत्यभितः। श्नप्त्रे एव तेन करोति। तिर्यञ्चं पुरस्ताद्वंशं विषीव्यन्ति। तस्मात्तिरश्ची पुरुषस्य भ्रुवौ। विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसीति। वैष्णवं हि हविर्धानम्। स्वयैव देवतया सीव्यति। स्वया देवतया ग्रन्थिं ग्रथ्नाति। यं प्रथमं ग्रन्थिं ग्रथ्नीयात्तं प्रथमं विवृजेदात्मनो गोपीथाय। यदन्यं पूर्वं विवृजेदमेहेनाध्वर्युः प्रमीयेत। उपरिष्टाच्छम्याः संनह्यन्ति पश्चादुपमिन्वन्ति। अधस्ताद्धि मनुष्या युञ्जन्ति पुरस्तादुपमिन्वन्ति। व्यावृत्त्यै। शिरो वा एतद्यज्ञस्य यद्धविर्धानम्। पुरस्ताद्वर्षीयो भवति पश्चात्क्रधीयः। तस्मात्पुरस्तात्पुरुषस्य शिरो वर्षीयः पश्चात्क्रधीयः। वैष्णवमसि विष्णवे त्वेति संमितमभिमन्त्रयते। वैष्णवं वै हविर्धानम्। स्वयैवैनद्देवतया समर्धयति। प्र तद्विष्णु स्तवते वीर्येणेति त्रीन्प्रक्रमान्यजमानं प्राञ्चं प्रक्रमयति। विष्णुमेवैनं भूतमिमांल्लोकान्गमयति ॥1॥

शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवाः। दक्षिणस्य हविर्धानस्याधस्तात्परिलिखति। एतद्वा एतयोः पूर्वम्। मुखत एव यज्ञस्य प्राणान्प्रतिदधाति। तस्मान्मुखतः प्राणाः। चतुरः परिलिखति। चत्वारो हि प्राणाः। प्रादेशं-प्रादेशं परिलिखति। एतावदेतावद्धीमे ऽभि प्राणाः। असंभिन्दन्तः खनन्ति प्राणानामसंभेदाय। यत्संभिन्द्या [त्प्राणान्संभिन्द्या] त्प्रमीयेत। तान्पर एकधा संतृन्दन्ति। तस्मात्प्राणाः पर एकधा संतृण्णाः॥

देवस्य त्वा सवितुः प्रसव इत्यभिमादत्ते। सवितृप्रसूत एवैनां देवताभिरादत्ते। इदमहं रक्षसो ग्रीवा अपिकृन्तामीति। भ्रातृव्यो वै रक्षः। भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति। इदमहं यो नः समानो योऽसमानो ऽरातीयति तस्य ग्रीवा

यजमानं च। एकैकया मिमीते। आत्मानमेव वीर्यवन्तं करोति। तस्मादिमाः कामं न्यञ्चामः कामं प्रसारयामः। यत्सर्वाभिः सह मिमीते हस्तमात्रा वीर्यमभिसर्जमियात्। अङ्गुष्ठेन परिमिमीते। तस्मादेष एतासां वीर्याणि प्रत्युदेव सृजेत्र न्यचेत्। यन्न्यचेत्पाशं कुर्यात्। वरुण्यः पाशः। वरुण एनं ग्राहुको भवति। यदुत्सृजति वरुणपाशादेवात्मानं परिवृणक्ति। द्विर्मिमीते। द्वे हि शुक्रिये सक्नी। दश कृत्वो मिमीते। दशाक्षरा विराट्। अन्नं विराट्। विराज्येवान्नाद्ये प्रतितिष्ठति। यत्परिमितं मिमीत परिमितं जीवनं स्यात्। अपरिमितं मिमीते। तस्मादिदमपरिमितं जीवनम्। यत्परिमितं मिमीत यजमानायैव स्यात्। अपरिमितं मिमीते। तेन सदस्येभ्योऽपि क्रीयते। प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्त्विति। प्रजा वा अंशवः। प्रजास्वेव प्राणं दधाति। चतुर्गृहीतमाज्यं भवति। चतुष्पादः पशवः। पशूनेवास्मै गृह्णाति। एतद्रूपा वै पशवः। यद् घृतं सरूपानेव पशूनवरुन्द्धे॥

इयं ते शुक्र तनूरिदं वर्च इति हिरण्यं घृते ऽवदधाति। एषा वा अग्नेः प्रिया तनूर्यद् घृतम्। तेजो हिरण्यम्। प्रियामेवास्य तनूं तेजसा समनक्ति। रेतो वै हिरण्यं पशवो घृतम्। यद्धिरण्यं घृते ऽवदधाति पशुष्वेव रेतो दधाति। तस्मादनस्थकाद्रेतसो ऽस्थन्वन्तो गर्भाः प्रजायन्ते। बद्ध्वावदधाति गर्भाणां धृत्या अप्रपादाय। निष्टर्क्यं बध्नाति। तस्माद्योनेर्गर्भा मुच्यन्ते। यदनिष्टर्क्यं बध्नीयात योनेर्गर्भा मुच्येरन्। यजुषावदधाति यजुषोद्धरति यजुषैव युनक्ति यजुषा विमुञ्चति। तस्मात्प्राचीः प्रजा रेतो दधते ऽर्वाचीः प्रजायन्ते ॥६॥

न पूर्वस्मिन्पदमुपवपेत्। देवानां वा एष प्रदग्धाहुतीनाम्। रुद्रो ऽग्निः पशवः पदम्। रुद्राय पशूनपिदध्यादपशुः स्यात्। गार्हपत्य उपवपति। गार्हपत्यं वै पशवो ऽनूपतिष्ठन्ते। एष पशूनां योनिः। स्व एवैनान्योनौ दधाति। यत्र शान्तमिवानङ्गारं स्यात्तदुपवपेच्छान्त्या अनिर्दाहाय। सोमं ते क्रीणामीति सोमस्यैवैतद्राज्ञो वीर्याणि महिमानं व्याचष्टे। न कलाशः पणते। यत्कलाशः पणते सोमस्य राज्ञो वीर्यमवतिरति यजमानस्यार्तिं व्याचष्टे क्षोधुको भवति। इयमिति ब्रूयात्तस्या आत्मा तस्या रूपं तस्याः प्रजा तस्याः पय इति। न सोमस्य राज्ञो वीर्यमवतिरति न यजमानस्यार्तिं व्याचष्टे ऽक्षोधुको भवति॥

शुक्रं ते शुक्रेण चन्द्रं चन्द्रेणामृतममृतेन क्रीणामीति शुक्रमेवास्य शुक्रेण क्रीणाति चन्द्रं चन्द्रेणामृतममृतेन क्रीणाति। शक्म यत्ते गोरस्मे ते चन्द्राणीत्यात्मन्नेवास्य वीर्यं धत्ते। तेन निर्वीर्येण भूतेन विक्रीणीते। तपसस्तनूरसीति। तपसो ह्येषा तनूः। प्रजापतेर्वर्ण इति। अग्निर्वै प्रजापतेरग्निजा अजा। सहस्रपोषं पुष्यन्तीति। एषा हि पशूनां सहस्रपोषं पुष्यति। अतो ह्येव श्रीडुत्पत्स्यते हि। परमेण पशुना क्रीयस इति। परमो ह्येष पशूनाम्। अस्मे ते बन्धुरित्यात्मन्नेवास्य वीर्यं धत्ते। तया निर्वीर्यया भूतया विक्रीणीते॥

छन्दांसि वा अमुष्माल्लोकात्सोममाहरन्। तस्मा ऽन्तरधीयत। सा गायत्र्यजया ज्योतिषोदपतत्। सास्मै प्रारोचयत्। एतर्हि वा एष एतस्मा आह्रियते यर्हि क्रीयते। तम इदमन्तरा। यदजया क्रीणाति प्रैवास्मै रोचयति। मित्रो न एहि सुमित्रधा इति। वरुणो वा एष भूत्वा यजमानमभ्यैति। मित्रमेवैनं कुरुते। अपोर्णुते। यथा श्रेयांसमायन्तं पापीयान्प्रत्यपोर्णुत एवमेव तत्। इन्द्रस्योरुमाविश दक्षिणमिति। इन्द्रो वा एतमग्र ऊरावाधत्त। ऐन्द्रो यजमानः। स्व एवैनं योनौ दधाति। स्वान भ्राजेति सोमक्रयणाननुदिशति। एते वा एतं देवा अगोपायन्नमुष्मिँल्लोके। तं गायत्र्याहरत्। नेष्टापोत्रे प्रति गोपेथम्। तस्मादेते होत्रे व्यृद्धे व्यृद्धसोमपीथे। तस्मान्न नेष्टा न पोता भवितव्यम्। तस्मादेतौ संसदन्ताविव यजतः। समेते ऽन्यायन्। एते वा एतस्य गन्धर्वाः पुष्टिं हरन्ति। तस्मात्सोमविक्रयी न पुष्यति। यदि कृच्छ्रायेतापैव हरेत्। एतेभ्यो ह्येष गन्धर्वेभ्यो ऽधि क्रीयते। उदायुषेति यथायजुः। उर्वन्तरिक्षं वीहीति। अन्तरिक्षदेवत्यो ह्येष एतर्हि। अपि पन्थामगस्महीति। रक्षांसि वा एतमेतर्हि सचन्ते प्रच्युतमितो ऽप्राप्तममुतः। रक्षांस्येव वृञ्जान एति। अनसाच्छ यन्ति। महिमानमेवास्याच्छ यन्ति। [अनसा वहन्ति।] तस्मादनोवाह्यमोषधयः पच्यन्ते। यच्छीर्ष्णा हरेयुः शीर्षहार्यमोषधयः पच्येरन्। अदित्यास्त्वगस्यदित्याः सदने सीदेति। आदित्यो वै सोमः पृथिव्यदितिः। पृथिव्या अनः संभृतम्। स्व एवैनं योनौ दधाति। वारुणो वै सोमः। तं देवतया व्यर्धयति यन्मैत्रं करोति। यद्वारुण्या सादयति स्वयैवैनं

देवतया समर्धयति। वनेषु व्यन्तरिक्षं ततानेति वाससा पर्यणह्यति। सर्वदेवत्यं वै वासः। सर्वाभिरेवैनं देवताभिः समर्धयति। सूर्यस्य चक्षुरारुहमिति कृष्णाजिनं पुरस्तात्प्रत्यानह्यति। रक्षांसि वा एतमेतर्हि जिघांसन्ति स्वर्गं लोकमारोहन्तम्। असावादित्यो ऽपरिपरः पन्थाः। तमेवैनमभ्यारोहयति स्वर्गस्य लोकस्य समष्ट्यै। ॥७॥

प्रच्यवस्व भुवनस्पत इति। भूतानां ह्येष पतिः। विश्वान्यभि धामानीति। देवता वै विश्वा धामानि। देवता एवैनमुप प्रच्यावयति। श्येनो भूत्वा परापतेति। श्येनो वै वयसां क्षेपिष्ठः। श्येनमेवैनं कृत्वा रक्षांस्यपिसृजति। यजमानस्य नो गृहे संस्कृतमिति यजमानायतनमेवैनं करोति। अथो यजमानस्यैव गृहे देवताभिः संस्कृतं कुरुते। नमो मित्रस्य वरुणस्य चक्षस इति। वरुणो वा एष भूत्वा यजमानमभ्येति। मित्रमेवैनं कुरुते। आसन्दीमुद्गृह्णन्ति। यथा मनुष्यराजायावस्थितायासन्दीमुद्गृह्णन्त्येवमेवैतत्। अग्निना प्रतितिष्ठते। अग्निः सर्वा देवताः। देवताभिरेवैनं प्रतितिष्ठते। अग्नीषोमौ वा एतर्हि यजमानमभि संधत्तः। यत्पशुना प्रतितिष्ठते तमेवाभ्यामपिदधाति। अग्नीषोमाभ्यां वा एष आत्मानं मेधायालभते यो दीक्षते। यत्पशुमालभत आत्मानमेव तेन निष्क्रीणाति। यस्तूपरः श्मश्रुणो द्विदेवत्यस्य रूपं लोमशः पीवा पुरुषरूपस्तमालभेत। तस्य यो ऽश्नाति पुरुषमत्ति। तस्मात्तस्य नाशितव्यम्। [क्षुध्यति वै दीक्षितः। क्षुध एष निष्क्रयण आलभ्यते। तस्य यो ऽश्नाति क्षोधुको भवति। तस्मात्तस्य ना] शि [तव्य] म्। अग्नीषोमाभ्यां वै वीर्येणेन्द्रो वृत्रमहन्। स एष वार्त्रघ्नः पशुर्विजित्या आलभ्यते। तस्मादस्याशितव्यम्। देवता वा एनं पूर्वेद्युरालभ्यमानं नाभिप्राच्यवन्त परस्माद्यज्ञक्रतोर्निररिष्याम इति। तमग्नीषोमावेवाभिप्राच्यवेतां पराचीरितरा यज्ञमभ्यत्यसृजन्त। तस्मादेषो ऽग्नीषोमीय आलभ्यते। तस्मादग्नीषोमाभ्यां ग्रहो न गृह्यते। तौ देवान्पुनरुपावर्तमानौ तयोर्यत्प्रियं धामासीत्तदपन्यदधाताम्। तद्देवा अन्वेष्टुमध्रियन्त। ते प्रबाहुगिच्छन्त आयन्। ते नवं वा इदं सृप्तमित्यभ्यवायन्। यन्नवमित्यब्रुवंस्तन्नवनीतस्य नवनीतत्वम्। यत्सृप्तमिति तत्सर्पिषः सर्पिष्ट्वम्। यदजो ऽविन्दत्तदाज्यस्याज्यत्वम्। स घृङ्ङकरोत्। तद् घृतस्य घृतत्वम्। तस्मादजो घृङ्ङ्खिक्रिच्चरति। तत्पशूनन्वाकुर्वन्। तत्पशवः समभरन्। तेनानेन पशुभ्यो ऽधिजायन्ते। तावब्रूतां वार्यं वृणावहा अयमेव नौ भागदेयमस्तु यो नौ प्रियं धामाविददिति। तस्मादेषो ऽग्नीषोमीय आलभ्यते। तस्मादस्याशितव्यम्। वार्यवृतो हि ॥८॥

इति कपिष्ठलकठसंहितायां सप्तत्रिंशत्तमो ऽध्यायः॥

विमुक्तो ऽन्यो ऽनड्वान्भवत्यविमुक्तो ऽन्यः। अथातिथ्यं निरूप्यते यज्ञस्य संतत्या अविच्छेदाय। यदुभौ विमुक्तौ स्यातां पितृदेवत्यं हविः स्याद्विच्छिन्नो यज्ञो ऽसंततो ऽनवरुद्धः। यदुभावविमुक्तौ वार्त्रघ्नं हविः स्यात्संततो यज्ञो ऽविच्छिन्नो ऽवरुद्धः। यद्विमुक्तो ऽन्यो भवत्यविमुक्तो ऽन्यो वार्त्रघ्नं हविर्भवत्यपितृदेवत्यं संततो यज्ञो ऽविच्छिन्नो ऽवरुद्धः। पत्नीमन्वारम्भयित्वा निर्वपति। पत्नी वै पारीणह्यस्येशे। अनुमतमेव प्रसूतं देवेभ्यो हविर्निर्वपति पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय॥

यावन्तो वै पुण्यमन्वायन्ति सर्वेभ्यस्तेभ्य आतिथ्यं क्रियते। छन्दांसि ह सोमं राजानं क्रीतमन्वायन्ति। अग्नेस्तनूरसि विष्णवे त्वेति गायत्र्यैतन्निर्वपति। सोमस्य तनूरसि विष्णवे त्वेति त्रिष्टुभैतन्निर्वपति। अति [थेरातिथ्यमसि विष्णवे त्वेति जगत्यैतन्निर्वपति। अग्नये त्वा रायस्पोषदे विष्णवे त्वेत्यनुष्टुभैतन्निर्वपति।] श्येनाय त्वा सोमभृते विष्णवे त्वेति गायत्र्यैतन्निर्वपति। गायत्री वा एतमाहरदमुष्माल्लोकात्। तस्मात्सा पुनर्याम्णी। तस्मात्पुनः प्रयुज्यते। पञ्च कृत्वो निर्वपति। पाङ्क्तो यज्ञः। यज्ञमेवावरुन्द्धे। यच्छन्दोभिर्निर्वपति च्छन्दांस्येव भागधेयवन्ति करोति। विष्णवे त्वा विष्णवे त्वेति। विष्णुर्ह्येतर्हि यज्ञो यर्ह्यनिरुक्तः। तस्माद्वैष्णवः पुरोडाशो भवति। त्रिकपालः कार्यः। स हि वैष्णवः। यन्नवकपालस्तेनैव त्रिकपालः। त्रयो हि ते त्रिकपालाः। नवकपालो भवति। नव प्राणाः। प्राणैरेव यज्ञमुखे प्रैति। अथो तेज एव त्रिवृतं यज्ञमुखे ऽधिवियातयति। यत्त्रिकपालस्तेन वैष्णवो यत्षट् तेन च्छन्दसाम्। तेनोभयस्मान्नैति॥

पशुरालभ्यः सोमाय राज्ञे। मनुष्यराजायेन्वै पशुरालभ्यते। यदग्निं मन्थन्ति। आग्नेया वै पशवः। तदेवास्मै पशुरालभ्यते। अग्निः सर्वा देवताः। सर्वा एव देवताः सोमाय च च्छन्दोभ्यश्चागतेभ्यो जनयति। आश्ववालः प्रस्तरो

भवत्यैक्षवावुद्यावौ। अश्व इव वै प्रजापतिरासीत्। तस्येमे वाला आसन्यदश्ववाला एतौ बाहू यावुद्यावौ। तं देवा अन्वारभ्य स्वर्गं लोकमायन्। यदाश्ववालः प्रस्तरो भवत्यैक्षवावुद्यावौ प्रजापतिमेवान्वारभते। स्वर्गस्य लोकस्य समष्ट्यै। प्रजापतेर्वा एतानि पक्ष्माणि यदाश्ववालाः। यदाश्ववालः प्रस्तरो भवति प्रजापतेरेवाधि यज्ञमुखं प्रतनुते॥

रक्षांसि वै देवानां यज्ञमजिघांसन्। तानि कार्ष्मर्येणापाघ्नत। यत्कार्ष्मर्यमयाः परिधयो भवन्ति रक्षसामपहत्यै। यद्वै देवा एतेनाकुर्वत तेनार्ध्नुवन्। तदस्य कर्मण्यत्वम्। कर्मण्यो वै नामैषः। यज्ञमुख एवैतेनर्ध्नोति। सप्तदश सामिधेनीर्भवन्ति। सप्तदशो वै संवत्सरः। पञ्चर्तवो द्वादश मासाः। एष वाव स संवत्सरः। संवत्सरादेवाधि यज्ञमुखं प्रतनुते॥

शिरो वा एतद्यज्ञस्य यदातिथ्यं ग्रीवा उपसदः। यत्संस्थापये [न्मुखतो यज्ञं संस्थापये] त्। शिरो ग्रीवाभ्यो यज्ञस्यावच्छिन्द्यात्। इडान्तं भवति। शिर एव ग्रीवासु यज्ञस्य प्रतिदधाति। नवकपालो भवति। तस्मान्नवधा पुरुषस्य शिरो विस्यूतम्। उपसदो वा एतस्यानुयाजास्तानुत्तरत्रमाशीः। तस्मादननुयाजं भवति ॥१॥

देवा वा अन्योऽन्यस्मै श्रैष्ठ्याय नातिष्ठन्त। ते चतुर्धा व्युदक्रामन्नग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैः। ते देवाः पापीयांसो ऽभवन्वसीयांसो ऽसुराः। ते ऽविदुः पापीयांसो वै त्वे भवन्ति वसीयांसो ऽसुरा इति। ते प्रियास्तन्वः समवाद्यन्त। ते ऽब्रुवन्नेषां नस्तत्र परयाद्यो नो ऽन्योऽन्यस्मै द्रुह्यादिति। तस्मात्सतनूनप्त्रिणे न द्रोग्धव्यं। यद् द्रुह्यति प्रियायै तन्वै द्रुह्यति। यत्तन्वः समवाद्यन्त तत्तानूनप्त्रस्य तानूनप्त्रत्वम्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वांस्तानूनप्त्रमुपैति भवत्यात्मना परास्य भ्रातृव्यो भवति। असौ वा आदित्य इन्द्रः। तस्य ते श्रैष्ठ्यायातिष्ठन्त। तिष्ठन्ते ऽस्य समानाः श्रैष्ठ्याय य एवं वेद। एतस्मिन्वै ते तास्तन्वः संन्यदधत। तस्माद्धि तेभ्यस्तेजिष्ठं भवति। तस्मात्सूर्यदेवत्याः सोमा भूयिष्ठा हूयन्ते। आज्येन वै वज्रेण देवा वृत्रमघ्नन्। स्रुग्भ्यां बाहुभ्याम्। सोमो वृत्रः। घ्नन्ति वा एतत्सोमं यदस्याज्येनान्तिकं जुह्वति। अंशुरंशुस्ते देव सोमाप्यायतामिति यदेवास्य घ्नन्ति यत्क्षितमयन्ति तदाप्याययन्ति। यन्ति वा एते ऽस्माल्लोकाद्ये सोममाप्याययन्ति। एष्टा रायः। प्रेषे भगायेत्यस्मिन्नेव लोके प्रतितिष्ठन्ति। पितरं च वा एष मातरं च हिनस्ति यो गर्भं हन्ति। अनयोर्गर्भः सोमो राजा। नमो दिवे नमः पृथिव्या इत्याभ्यामेव निह्नुते। किं दीक्षा स्पृणोतीत्याहुः किमवान्तरदीक्षेति। आत्मानमेव दीक्षया स्पृणोति प्रजामवान्तरदीक्षया। संतरां मेखलामायच्छते। कनीयो ह्यत्युर्वेति। तस्मादात्मनः प्रजा श्रेयसी। यदपरः सत्यां विसृजते तस्मात्परोवरीयः प्रजया पुत्रेण पौत्रेण प्रथते। अग्निर्वै दीक्षितः। शमयन्त्यग्निमापः। मदन्तीना मार्जयते। मदन्तीनां व्रतयत्यशान्त्यै। शान्तिर्ह्यापः। अथो तेज एवात्मन्धत्ते। समाधत्ते। न वा एतेन हुतं व्रतयितव्यं नाहुतं यो दीक्षितः। अग्निर्वै रुद्रः। अग्निनैष तन्वं विपरिधत्ते तानूनप्त्रे। या ते अग्ने रुद्रिया तनूरिति व्रतयति। स्वायामेव देवतायां हुतं व्रतयति। तेनास्य न हुतं भवति नाहुतम् ॥२॥

देवाश्च वा असुराश्च संयत्ता आसन्। तेषामसुराणामिमाः पुर आसन्नयस्मयीयं रजतान्तरिक्षं हरिणी द्यौः। ते देवाः संयत्तसंयत्ते पराजयन्त। ते ऽविदुरनायतना हि वै स्मस्तस्मात्पराजयामह इति। त एताः पुरः प्रत्यकुर्वत हविर्धानं दिव आग्नीध्रमन्तरिक्षात्सदः पृथिव्याः। ते ऽब्रुवन्नुपसदमुपायामोपसदा वै महापुरं जयन्तीति। त उपसदमुपायन्। तानुपसद्भिरेभ्यो लोकेभ्यो निरघ्नन्। तस्मादाहुरुपसदा वै महापुरं जयन्तीति। [त एभ्यो लोकेभ्यो निर्हता ऋतून्प्राविशन्।] ते षडुपायन्। तानुपसद्भिरर्तुभ्यो निरघ्नन्द्वाभ्याममुष्माल्लोकाद् द्वाभ्यामन्तरिक्षाद् द्वाभ्यां पृथिव्याः। त ऋतुभ्यो निर्हताः संवत्सरं प्राविशन्। ते द्वादशोपायन्। तानुपसद्भिरेव संवत्सरान्निरघ्नन्चतसृभिरमुष्माल्लोकाच्चतसृभिरन्तरिक्षाच्चतसृभिः पृथिव्याः। ते संवत्सरान्निर्हता अहोरात्रे प्राविशन्। ते यत्सायमुपायंस्तेनैनान्रात्र्या अनुदन्त यत्प्रातस्तेनाह्नः। तस्माद्गौः सायं प्रातस्तनमाप्यायते प्रातः सायंस्तनम्। तानुपसद्भिरेभ्यो लोकेभ्यो नुदमाना आयन्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वानुपसदमुपैति भवत्यात्मना परास्य भ्रातृव्यो भवति।

न द्वादशाग्निष्टोमस्य कुर्यात्। अशान्ता निर्मृग्युः। न तिस्रो ऽहीनस्य। उपरिष्टाद्यज्ञक्रतुर्गरीयानभिधाविद्ग्रीवा

निःश्रृणायादार्तिमार्छेत्। द्वादशाहीनस्य कुर्याच्छान्त्या अनिर्मार्गाय। तिस्रो अग्निष्टोमस्य प्रत्युत्तब्ध्यै सयत्वाय। देवा वा असुर्यानिमाँल्लोकान्नान्ववैतुमधृष्णुवन्। तानग्निना [मुखेनान्ववायन्। यदग्निमन्त्युपसदां प्रतीकानि भवन्ति यथा क्षेत्रपतिः क्षेत्रे ऽन्ववनयत्येवमेवैतत्। अग्निना] मुखेनेमाँल्लोकानभिजयन्तो यन्ति। यो ह वै देवान्साध्यान्वेद सिध्यत्यस्मै। इमे वाव लोका देवाः साध्याः। सिद्धं ह्यस्मै सिद्धमस्मै सिद्धममुष्मै। य एवं वेद सिध्यत्यस्मै ॥ ३ ॥

इषुं वा एतां देवाः समस्कुर्वन्यदुपसदोऽग्निं शृङ्गं सोमं शल्यं विष्णुं तेजनम्। ते ऽब्रुवन्यो न ओजिष्ठः स इमां विसृजत्विति। ते रुद्रमब्रुवंस्त्वं वै न ओजिष्ठो ऽसि त्वमिमां विसृजेति। सो ऽब्रवीद्वार्यं वृणा अहमेव पशूनामीशा इति। ते ऽमन्यन्त यदयं पशूनामीशिष्यते सर्वान्निर्णेष्यतीति। ते ऽब्रुवन्सप्ताहानीशासै न पराचीनमिति। तस्मात्सप्ताहानि रुद्रः पशूनामीशे। रक्षांसि पराचीनं घ्नन्ति। तां व्यसृजत्। तया पुरः समरुजत्। यत्समरुजत्तद्रुद्रस्य रुद्रत्वम्। विसृष्टिमेव भ्रातृव्याय विसृजति य एवं विद्वानुपसदमुपैति। न पुनरपक्रामेत्। यतरो वै संयत्तयोः पुनरपक्रामति परा स जयते। समेष एतर्हि यतते य उपसदमुपैति। सकृदेव पराङतिक्रम्याश्रावयति यज्ञस्याभिजित्यै रक्षसामपहत्यै। न प्रयाजा भवन्ति नानुयाजाः। पुरो वा एते यज्ञस्य यत्प्रयाजानुयाजाः। यत्प्रयाजानुयाजान्कुर्यात्पुरो यज्ञस्य कुर्याद् दुरतिव्यथं स्यादतीक्ष्णामिषुं कुर्यात्। चतुर्व्रतो भवति। चत्वारि हीषोः पर्णानि। त्रिव्रतो भवति। त्रिषन्धिर्हीषुः शृङ्गं शल्यस्तेजनम्। द्विव्रतो भवति। द्विषन्धिर्हीषुः शल्यश्च तेजनं च एकव्रतो भवति। एका ह्येवेषुः। इषुमेवैतां संस्कृत्य तां श्वो भ्रातृव्याय विसृजति। अथो व्रतमेवाप्नोति॥

ग्रीवा वा एता यज्ञस्य यदुपसदः। न प्रयाजा भवन्ति नानुयाजाः। तस्माद् ग्रीवाः प्रति पुरुषस्याणिष्ठम्। ताः सर्वीर्याः प्रयुज्यन्ते। तस्माद् ग्रीवा अणिष्ठाः सतीर्वीर्यावत्तमाः। तिस्र उपसदो भवन्ति। त्रय इमे लोकाः। तस्मात्पुरुषस्य त्रय स्कन्दाः। अतिषक्ताभिर्यजति। तस्माद् ग्रीवा अतिषक्ताः। अथो अयातयाम्नी। अयातयाम्न्यैव यजति। सच्छन्दसो याज्यानुवाक्याः कुर्यात्। यद्विच्छन्दसः स्युरपचितो होतारं हन्युः। भिद्वतीः पुरां भित्त्यै ॥ ४ ॥

देवाश्च वा असुराश्च यज्ञे संयत्ता आसन्। स यज्ञो ऽविभेद्यतरे ऽभिजेष्यन्ति ते मा विमथिष्यन्त इति। स न्यलयत। तं देवा अभिजित्यान्वैच्छन्। ते प्रबाहुगिच्छन्त आयन्। तमिन्द्र उपर्युपर्यत्यक्रामत्। सो ऽब्रवीत्को मायमुपर्युपर्यत्यक्रमीदिति। अहमेष कृच्छ्रे हन्तेति। अथ कस्त्वमिति। अहमेष कृच्छ्रादाहर्तेति। एमूषो नामायं वराह इत्यब्रवीदेकविंशत्याः पुरामश्ममयीनां पारे यत्किंचासुराणां वामं वसु तेन तिष्ठति तं जहि य एष कृच्छ्रे हन्तावोचथा इति। [तमिन्द्रो दाल्भ्यभिविसृज्य पराभिनत्। सो ऽब्रवीदेष हतः। तमाहर य एष कृच्छ्रादाहर्तावोचथा इति।] तं विष्णुरपासङ्ग आहरत्। यज्ञो वै विष्णुः। यज्ञेनैवैषां तद्यज्ञमवृञ्जत पशुभिः पशूनिन्द्रियेणेन्द्रियम्। ततो देवा अभवन्परासुरा अभवन्। यज्ञो वै विष्णुः। यज्ञेनैवैतद्यज्ञं भ्रातृव्यस्य वृङ्क्ते पशुभिः पशूनिन्द्रियेणेन्द्रियम्। भवत्यात्मना परास्य भ्रातृव्यो भवति। देवयजनमिच्छन्ति। यज्ञमेवेच्छन्ति। यद्विन्दन्ति यज्ञमेव विन्दन्ति॥

यदुदीचीनं प्राचीनं प्रवणं स्यात्तस्मिन्यजेत यज्ञकामः। एवमिव हि स यज्ञो ऽशयत्। यज्ञस्यानुवित्त्यै। यत्समं प्रतिष्ठितं तस्मिन्यजेत गतश्रीः। प्रतिष्ठा वा एतस्मा एष्टव्या यो गतश्रीः। एतद् भूम्याः प्रतिष्ठितं यत्समम्। प्रतिष्ठामेवास्मै विन्दति गच्छति प्रतिष्ठाम्। त्र्युन्नते यजेत भ्रातृव्यवान्। त्र्युन्नतेन वै विष्णुरिमाँल्लोकानुदजयत्। स एभ्यो लोकेभ्यो ऽसुरान्प्राणुदत। इमानेव लोकानुज्जयत्येभ्यो लोकेभ्यो भ्रातृव्यं प्रणुदते। यस्यैकधा मध्य उन्नतं स्यात्तस्मिन्यजेत स्वर्गकामः। अतो वै देवाः स्वर्गं लोकमायन्। स्वर्गस्य लोकस्य समष्ट्यै। यत्रौषधयो बह्वीरन्या अन्या इव स्युस्तस्मिन्यजेत पशुकामः। ओषधयो वै पशवः। भूमानमेव पशूनामुपैति। यत्रौषधयः कृच्छ्रशः पर्यायशः पर्येयुस्तस्मिन्यजेत पशुकामः। अतो वै देवाः पशूनुदसृजन्त। पशूनेवोत्सृजते। यदृक्षमलोमकं तस्मिन्याजयेद्यं द्विष्यात्। व्यृद्धं वा एतदोषधिभिर्यदृक्षमलोमकम्। ओषधयः पशवः। पशुभिरेवैनं व्यर्धयति। यत्समया देवयजनं पन्था विधावेत्तस्मिन्याजयेद्यं कामयेत व्येनं प्रजया पशुभिश्छिनद्यामिति। एतद्वै विच्छिन्नं नाम देवयजनम्। व्येनं प्रजया पशुभिश्छिनत्ति। यदन्तरापथ देवयजनं च पन्था विधावेत्तस्मिन्याजयेद्यं कामयेत नैनमपरो यज्ञ उपनमेदिति। एतद्वै

परिवर्त्म नाम देवयजनम्। पर्येणमपरो यज्ञो वृणक्ति। यत्रापः सर्वतः समवद्रवेयुस्तस्मिन्यजेतान्नकामः। दिग्भ्यो वा एतस्मा अन्नं हरन्ति यस्मै हरन्ति। आपो ऽन्नम्। सर्वाभ्य एव दिग्भ्यो ऽन्नाद्यमवरुन्द्धे। तदेतत्समापं नाम देवयजनम्। नीपतममिव [र्त] समानानां भवति ॥५॥

यत्रापः प्राचीराहवनीयात्प्रतीचीर्गार्हपत्याद्व्यवद्रवेयुस्तस्मिन्याजयेद्यमुदके वा पात्रे वा विवाहे वा मीमांसेरन्। पाप्मना वा एषो ऽनुषक्तो यमुदके वा पात्रे वा विवाहे वा मीमांसन्ते। पाप्मनैवैनं व्यावर्तयति। यत्रापो दक्षिणा परिप्लूय पश्चात्प्राची रमेरंस्तस्मिन्यजेत बुभूषन्। आपो वै सर्वा देवताः। एतद्देवताभिर्जुष्टं देवयजनम्। यदेवं देवताभिरेव जुष्टे देवयजने यजते भवत्येव। यत्रापो दक्षिणत उदीची रमेरंस्तस्मिन्यजेत सजातकामः। आपो वै सर्वा देवताः। देवताः सजाताः। सजातानामेवैनं प्रार्धे करोति। कृत्रिमे यजेत बुभूषन्। आत्मा वै देवयजनम्। करोत्येवैनम्। यत्राग्निं चापश्च पश्यन्प्रातरनुवाकमनुब्रूयात्तस्मिन्यजेत यः कामयेत यज्ञो मापर उपनमेदिति। अग्निः सर्वा देवता आपो यज्ञः। उपैनमपरो यज्ञो नमति। देवताश्च हि यज्ञं च पश्यन्यजते। यत्राग्निमपः सूर्यं पश्यन्प्रातरनुवाकमनुब्रूयात्तस्मिन्यजेत ब्रह्मवर्चसकामः। एतद्वै त्रिशुक्रियं नाम देवयजनम्। ब्रह्मवर्चसी भवति। यत्पुरस्तादाप्तं स्याद्देवयजनं तस्मिन्यजेत भ्रातृव्यवान्। भ्रातृव्याय वा एष लोक उच्छिष्यते यत्पुरस्ताद्देवयजनस्योच्छिष्यते। एतावन्तमेवास्मै लोकमुच्छिंषति। अलोकमेनं करोति। यो ह वै विद्वान्देवयजनं यजत ऋध्नोति। अग्निर्वाव देवयजनम्। अग्नौ हि सर्वा देवता इज्यन्ते। यत्रैव क्वचाग्निमाधाय यजेत तेनैवर्ध्नोति। ब्राह्मणा वाव देवयजनम्। यत्र ब्राह्मणा बहवः संराधयेयुस्तस्मिन्यजेत। तेनैवर्ध्नोति ॥६॥

इति कपिष्ठलकठसंहितायामष्टात्रिंशत्तमो ऽध्यायः॥

वेदिं विमिमीते। त्रिंशता पश्चात्प्रक्रमैर्मिमीते षट्त्रिंशता प्राचीं चतुर्विंशत्या पुरस्तात्। विराजैवैनां पश्चात्परिमिमीते बृहत्या प्राचीं गायत्र्या पुरस्तात्। छन्दोभिरेवैनां सर्वतः परिमिमीते। विराज्येव प्रतितिष्ठति यद्विराजमभिसंपादयति। स्फ्येन स्तम्बयजुर्हरति। इन्द्रो वै वृत्राय वज्रं प्राहरत्। स त्रेधाभवत्स्फ्यस्तृतीयं यूपस्तृतीयं रथस्तृतीयम्। वज्रो वै स्फ्यः। एतावती पृथिवी यावती वेदिः। वज्रेणैव पृथिव्या भ्रातृव्यं निर्भजति। त्रिर्हरति। त्रय इमे लोकाः। एभ्य एवैनं लोकेभ्यो निर्भजति। तूष्णीं चतुर्थं हरति। अपरिमितादेवैनं निर्भजति। इन्द्रो वै वृत्रं हत्वा तमनयाभिन्यदधात्। यत्तूष्णीं चतुर्थं हरत्यनयैव भ्रातृव्यमभिनिदधाति। मूलं छिनत्ति। भ्रातृव्यस्यैव मूलं छिनत्ति। उद्धन्ति। तस्माच्छिशिर ओषधयः पराभवन्ति। बर्हिः स्तृणाति। तस्माद्वसन्ते पुनराभवन्ति। अपाररुमदेवयजनं पृथिव्या देवयजनाज्जहीति। भ्रातृव्यो वा अररुः। भ्रातृव्यमेव पृथिव्या निर्भजति। द्रप्सस्ते द्यां मा स्कनिति। यो वा अस्या रसः स द्रप्सः। तमिमाः प्रजा उपजीवन्ति। तमेवास्यां यच्छति तस्यास्कन्दाय। अररुर्द्यां मा पप्तदिति। भ्रातृव्यो वा अररुः। भ्रातृव्यमेव स्वर्गाल्लोकात्प्रतिनुदते॥

विषाद्वै नामासुर आसीत्। स पृथिवीं विषेणावालिम्पत्। तस्या न [कश्चनाश्नात्। य आ] श्नात्सो ऽरुप्यत्। यदुद्धन्ति यदेवास्या अमेध्यं यदयज्ञियं तदपहन्ति। अपि मूलमनुखनेदाविद्धस्य निष्कृत्यै। अधो दूरं खनेत्। अधो वा अस्या वीर्यम्। वीर्यस्याभिक्लृप्त्यै। तस्मात्सुकृष्टे व्रीहियवाः पच्यन्ते। तदाहुरुत्तरार्धं वा अस्या वीर्यम्। तदिमाः प्रजा उपजीवन्ति। तस्मान्नातिखेयेति। आ प्रतिष्ठायाः खनेद्यजमानस्य प्रतिष्ठित्यै। दक्षिणत उद्वनं कुर्यात्। देवयजनस्य रूपम्। रक्षसामपहत्यै। पुरीषवतीं कुर्यात्। पशवो वै पुरीषम्। पशूनेवावरुन्द्धे ॥ १ ॥ वज्रेणैव पृथिव्या भ्रातृव्यं निर्भज्य

स्फ्येन वेदिं परिगृह्णाति। वज्रो वै स्फ्यः। एतावती पृथिवी यावती वेदिः। छन्दोभिरात्मने परिगृह्णाति। वसवस्त्वा परिगृह्णन्तु गायत्रेण छन्दसेति दक्षिणतः। तेजो वै ब्रह्म गायत्री। तेजसैवैनां दक्षिणतः परिगृह्णाति। रुद्रास्त्वा परिगृह्णन्तु त्रैष्टुभेन छन्दसेति पश्चात्। ओजो वै वीर्यं त्रिष्टुप्। ओजसैवैनां पश्चात्परिगृह्णाति। आदित्यास्त्वा परिगृह्णन्तु जागतेन छन्दसेत्युत्तरात्। जागता वै पशवः। उत्तरादायतनाः पशवः। पशुभ्य एवैतदायतनं करोति। पशूनां धृत्यै। अथो तेजसा चैवौजसा चोभयतः

पशून्परिगृह्णाति। पुरा क्रूरस्य विसृपो विरप्शिन्निति। यद्वा अस्यास्तेजो यज्ञियं तदद्श्चन्द्रमसि। तदेवावरुन्द्धे॥

इध्माबर्हिषी प्रोक्षति। शुष्काणि वा एतान्यमेध्यान्यारण्यादाहृतानि। आपो मेध्या यज्ञियाः। यदद्भिः प्रोक्षति मेध्ये एवैने यज्ञिये करोति। वेदिं प्रोक्षति। मेध्यामेवैनां यज्ञियां करोति। अथो यदेवास्या उद्घ्नन्तः क्रूरं कुर्वन्ति तच्छमयति। बर्हिः स्तृणाति। प्रजा वै बर्हिः पृथिवी वेदिः। प्रजा एव पृथिव्यां प्रतिष्ठापयति। सर्वां वेदिमनुस्तृणाति। तस्मात्पृथिवीं सर्वामन्वोषधयः। बहुलं स्तृणीयात्। अक्षोधुको यजमानो भवत्यनग्नंभावुको ऽध्वर्युः। बर्हिषि प्रस्तरं सादयति। यजमानो वै प्रस्तरः प्रजा बर्हिः। यजमानमेव प्रजास्वधिसादयति। उत्तरं सादयति। उत्तरो हि यजमानो ऽयजमानात्। व्यावृत्तं सादयति। व्यावृत्तो हि यजमानो ऽयजमानेन। अक्त्वा प्रस्तरं प्रहरति। यजमानो वै प्रस्तरः। हविर्भूतमेवैनं स्वर्गं लोकं गमयति। नात्यग्रं प्रहरेत्। यदत्यग्रं प्रहरेद् वृकणकेशीर्जनयः स्युरत्यासारिणीर्नशुकाः। अग्रमग्र आदीपयति। अग्रेणैवाग्रं समर्धयति। ऋजुं प्रहरेत्स्वर्गकामस्य। ऋजुमेवैनं स्वर्गं लोकं गमयति। यं द्विष्यात्तस्य हूर्छयेत्। स्वर्गादेवैनं लोकादधूर्छयति। न्यञ्चं प्रहरेद् वृष्टिकामस्य। या वा इत आहुतिरुदयते सामुतो वृष्टिं च्यावयति। अनयैवाहुत्या दिवो वृष्टिं [नि] नयति। ऊर्ध्वं प्रहरेद्यदि कामयेत पुमानस्य पुत्रो जायेतेति। ऊर्ध्व एव हि पुमान्। प्रथयित्वा प्रहरेद्यदि कामयेत स्त्री जायेतेति। एवमेव हि स्त्री प्रथितेव। यजमानो वै प्रस्तरः। हविर्भूतमेवैनं स्वर्गं लोकं गमयति। एति वा एषो ऽस्माल्लोकाद्यत्प्रस्तरं प्रहरति। यत्तृणमुपगृह्णात्यस्मिन्नेवैनं लोके यच्छति। अनुप्रहरति। यदेवास्या उद्घ्नन्तः क्रूरं कुर्वन्ति यद्विच्छिन्दन्तस्तच्छमयति। अगा३नग्नी३दित्यगन्स्वर्गं लोकमित्येवैतदाह। श्रावय श्रौषडिति स्वर्गमेवैनं लोकं गतं श्रावयति ॥ २ ॥

देवाश्च वा असुराश्च संयत्ता आसन्। तान्यदस्यास्तेजो यज्ञियमासीत्तत्सिंहीरूपमिव महिषीरूपमिव भूत्वान्तरातिष्ठत्। ते ऽविदुर्यतरान्वा इयमुपावर्त्स्यति त इदं भविष्यन्तीति। तां देवा उपामन्त्रयन्त। साब्रवीद्वार्यं वृणे मामेव पूर्वामग्नेराहुतिरश्नवाता अथ मया यूयं सर्वान्कामान्व्यश्नवाथेति। सा देवानुपावर्तत। ततो देवा अभवन्परासुरा अभवन्। यस्यैवं विदुष उत्तरवेदिर्न्युप्यते यश्चैवं विद्वान्निवपति भवत्यात्मना परास्य भ्रातृव्यो भवति। दश पश्चात्तिरश्ची पदानि भवन्ति दशोभयतः प्राच्यपरिमिता पुरस्ताद्विराजा संमिता। यद्वा असुराणां वित्तमासीत्तद्देवा वेद्याविन्दन्त। तद्वेद्या वेदित्वम्। यद्वेद्यं तदुत्तरवेद्या। तदुत्तरवेद्या उत्तरवेदित्वम्। यस्यैवं विदुषो वेदिश्च क्रियत उत्तरवेदिश्च न्युप्यते वित्तं चैव वेद्यं च भ्रातृव्यस्य विन्दते। प्रजापतेर्वै नासिका शीर्यत। सोत्तरवेदिरभवत्। यज्ञः प्रजापतिः। यदुत्तरवेदिं निवपति प्रजापतेरेव नासिकां मुखतः प्रतिदधाति। चत्वारि वा एतस्या नामानि नासिका कशारिः सिंह्युत्तरवेदिः। तप्तायन्यसीति। तप्ता ह्येनानैत्। वित्तायन्यसीति। वित्ता ह्येनानैत्। अवतान्मा नाथितमिति। नाथितान्ह्येनानावत्। अवताद्व्यथितमिति। व्यथितान्ह्येनानावत्। अग्ने अङ्गिरो यो ऽस्यां पृथिव्यामसि॥ यो द्वितीयस्यां यस्तृतीयस्यामिति यदेवास्यैषु लोकेषु श्लिष्टं यत्र्यक्तं तदवरुन्द्धे। विदेदग्निर्नभो नामेति। यद्वा अग्नेर्वामं वसु तन्नभः। तेनेमां पृथिवीं प्राविशज्ज्ञानुदघ्नमधः। तस्माज्जानुदघ्नं खेयम्। तस्यैव वामस्य वसोरनुवित्त्यै। सिंह्यसि महिष्यसीति। सिंहीरूपमिव महिषीरूपमिव भूत्वान्तरातिष्ठत्। देवेभ्यः प्रथस्वेति प्रथयत्येवैनाम्। देवेभ्यः कल्पस्वेति कल्पयत्येवैनाम्। देवेभ्यः शुन्धस्वेति शुन्धत्येवैनाम्। देवेभ्यः शुम्भस्वेति शुम्भत्येवैनाम्। विभ्राड् बृहत्पिबतु सोम्यं मध्वित्यन्तान्कल्पयति। देवपात्रं वा उत्तरवेदिः। देवपात्रेणैव देवतास्तर्पयति। अथो देवताभ्य एव देवपात्रं निवेदयति ॥ ३ ॥

यतीन्वै सालावृकेया आदन्। त आदीयमानाः संमृश्यमाना उत्तरवेदिं समुदक्रामन्। तान्नाभ्यधृष्णुवन्। तेषामेको ऽस्मयत। तत एनानभ्यधृष्णुवन्। तेषामेकैकमावर्हमादन्। तस्मान्न मोघहासिना भव्यम्। यन्निःसारयति यदेवास्या अभिमृतममेध्यं यदयज्ञियं तन्निःसारयति। प्रोक्षति। एतावती वा इयं पृथिव्यासीद्यावत्युत्तरवेदिः। तां समन्तं रक्षांसि संप्राकम्पन्त। तानि देवा विनुद्यैताभिरेव देवताभिः समन्तं परिन्यदधुः। यत्प्रोक्षति। एतद्देवत्या वा इमा दिशः। रक्षांस्येव विनुद्यैताभिरेव देवताभिः समन्तमात्मानं परिनिदधाति। गोपीथाय। एतद्वा एतां पूर्वामग्नेराहुतिरश्नुते यदव्याघारयति। अथादो ऽब्रवीन्मामेव पूर्वामग्नेराहुतिरश्नवाता अथ मया यूयं सर्वान्कामान्व्यश्नवाथेति। अथ वा एतेषां

तर्ह्यसुराः सपत्ना आसन्। ते ऽकामयन्त सपत्नान्सहेमहीति। सिंह्यसि सपत्नसाही स्वाहेति। सपत्नांस्तेनासहन्त। ते ऽकामयन्त पशून्विन्देमहीति। सिंह्यसि रायस्पोषवनिः स्वाहेति। पशूंस्तेनाविन्दन्त। ते ऽकामयन्त प्रजां विन्देमहीति। सिंह्यसि सुप्रजावनिः स्वाहेति। प्रजां तेनाविन्दन्त। ते ऽकामयन्तादित्याः स्यामेति। सिंह्यस्यादित्यवनिः स्वाहेति। आदित्यास्तेनाभवन्। तस्मादिमा आदित्याः प्रजाः। ते ऽकामयन्त यज्ञियाः स्यामेति। सिंह्यस्यावह देवान्देवायते यजमानाय स्वाहेति। यज्ञियास्तेनाभवन्। ते ऽकामयन्त स्वर्गं लोकमियामेति। भूतेभ्यस्त्वेति। देवा वै भूताः। स्वर्गमेव तेन लोकमायन्। यस्यैवं विदुष उत्तरवेदिर्व्याघार्यते यश्चैवं विद्वान्व्याघारयति सवनिवैतया कामान्व्यश्नोति। इमे वै लोका अविधृता आसन्। ते संप्राकम्पन्त। तान्देवा एतैर्यजुर्भिर्व्यष्टभ्नुवन्। यदेतैः परिधीन्परिदधात्येषां लोकानां विधृत्यै। अग्निर्वै देवेभ्यो ऽपाक्रामत्। स यां प्रथमां प्रावसत्तां पशुष्ववसद् वृष्णेरन्तराशृङ्गम्। तस्मादूर्णास्तुका भवति। यां द्वितीयां तां वनस्पतिषु पीतुदारौ। तस्मात्पीतुदारुर्भवति। यां तृतीयां तामोषधिषु सुगन्धितेजने। तस्मात्सुगन्धितेजनो भवति। यदेते संभारा भवन्ति यदेवास्यात्र श्लिष्टं यत्र्यक्तं तदेतैः संभरति। स पुनरुपावर्तमानः शरीरमधूनुत। तस्य यन्मांसमासीत्तद्गुल्गुल्वभवद्यदस्थि स पीतुदारुर्यानि लोमानि स सुगन्धितेजनः। तस्मात्सुगन्धितेजनो भवति। यदेते संभारा भवन्ति यदेवास्यात्र श्लिष्टं यत्र्यक्तं तदेतैः संभरति। अग्नेः कुलायमस्यग्नेः पुरीषमसीति। कुलायमिव ह्येतत्पुरीषमिव। यज्ञः प्रत्यष्ठादिति यज्ञस्यैव प्रतिष्ठित्यै ॥ ४ ॥

चत्वारो वै देवानां होतार आसन्भूपतिर्भुवनपतिर्भूतानां पतिर्भूतः। तेषां त्रयो होत्रेण प्रामीयन्त। अथो यद्भूत उदशिष्यत स प्रमयादबिभेत्। स न्यलयत। स समुद्रं प्राविशत्। स यत्समुद्रे भस्माकुरुत स एष कर्दमः। तं मत्स्यः प्राब्रवीत्। तमशपदभिगन्ता त्वा हतादिति। तस्मान्मत्स्यमभिगन्ता हन्ति। शप्तो हि सः। तत उद्द्रुत्य नडं प्राविशत्। तस्मान्नडो दग्धः क्रूर इव बर्बरः। तमश्वः श्वेतो ऽवमृशन्नन्वविन्दत्। तं प्रत्योषत्। तस्मात्स प्रत्युष्टमुखः। सो ऽक्रन्दत्। सा या वागासीत्स सुश्लोकः शकुनिरभवत्। तस्माद्य स नष्टैषमभ्यवक्रन्दति विन्दत्येव। तं देवा अनुविद्यानयन्निदं नो होता भविष्यतीति। स प्रमयादबिभेत्। तं भ्रातरः प्रमीता अब्रुवन्वयं त इतो वर्म भविष्यामो देवेषु णो भागधेयमिच्छेति। ते ऽब्रुवन्यत्किंच हविर्भूतं बहिष्परिधि स्कन्देत्तदेषां भागधेयमिति। एते वाव ते परिधयः। यदि हविर्भूतं बहिष्परिधि स्कन्देद् भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहेत्यनुमन्त्रयेत। एते वै देवा स्कन्नभागाः। य एव देवा स्कन्नभागास्तानेतद्गमयति। यज्ञो वा एतेषां मध्यमो यजमानो दक्षिणार्ध्यो भ्रातृव्य उत्तरार्ध्यः। स्थविष्ठं मध्यमं कुर्याद्वर्षिष्ठं दक्षिणार्ध्यं क्रधिष्ठमुत्तरार्ध्यम्। स्थविष्ठं प्रथमं परिदधाति। प्रथमो हि यज्ञः। वर्षिष्ठं दक्षिणार्ध्यम्। यथा यजमानो दक्षिणतो यज्ञ उपसीदत्येवं तत्। पश्चेवोत्तरार्ध्यम्। पश्चेव हि भ्रातृव्यः। यज्ञेनैवैतद्यजमानं प्रतरं करोति। यज्ञेन भ्रातृव्यमपनुदते। अक्त्वा दक्षिणार्ध्यं प्रहरति। मुखत एव यजमानं प्रीणाति। अथो हविर्भूतमेवैनं स्वर्गं लोकं गमयति। उपवपत्युत्तरार्ध्यम्। भ्रातृव्यमेव तदुपवपति। अथ ह स्माहायलः काफोडिः किमु स यजेत यो यज्ञस्य स्कन्नेन न वसीयान् [व] स्यादिति। यत्रस्कन्देत्तदपो निनीय भूपतये स्वाहेति प्राक् प्रादेशेन मिमीत भुवनपतये स्वाहेति दक्षिणा भूतानां पतये स्वाहेति प्रत्यक्। जनं वा एतद्यज्ञस्यैति यत्स्कन्दति। इयं वाव जनः। यो वा इमामेति न स पुनरागच्छति। जनमेवैतस्य यज्ञस्य यां कामयत आशिषं तामवरुन्द्धे। प्रादेशेन मिमीते। एतावद्वै पुरुषे मिमीते। दिशो वै यज्ञस्य स्कन्नस्याशीर्गच्छति। दिग्भ्य एव यज्ञस्याशिषमवरुन्द्धे। प्रादेशेन मिमीते। वीर्यं यावदस्य प्राणा अभि। यावदेवास्मिन्वीर्यं तेनैनत्संभरति। अपो निनयति। म्रियते वा एतद्यज्ञस्य यत्स्कन्दति। अद्भिस्तान्तमभिषिञ्चन्ति। आपः सर्वा देवताः। देवता एवैनत्प्रवेशयति। यदि प्रातःसवने स्कन्देद्देवाञ्जनमगन्यज्ञस्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत। यदि मध्यन्दिन ओषधीर्जनमगन्यज्ञ- [स्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत।] यदि तृतीयसवने पितॄञ्जनमगन्यज्ञस्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत। यदि तिरोह्नयेषु यदि नक्तं द्यावापृथिवी जनमगन्यज्ञस्तस्य मेष्टस्य यज्ञस्य द्रविणेहागम्या इत्यनुमन्त्रयेत। एता वै देवता यज्ञस्य स्कन्नस्याशीर्गच्छति। गन्धर्वाञ्जनमगन्यज्ञस्तस्य मेष्टस्य [यज्ञस्य] द्रविणेहागम्या इत्यनुमन्त्रयेत।

एता एव देवता यथादेवतं प्रत्युपसृत्य यां कामयते यज्ञस्याशिषं तामवरुन्द्धे। यस्यैवं विदुषो यज्ञस्य स्कन्नमनुमन्त्रयन्ते यश्चैवं विद्वाननुमन्त्रयते वसीयान्भवति ॥ ५ ॥

॥इति कपिष्ठलकठसंहितायामेकोनचत्वारिंशत्तमोऽध्यायः॥

हविर्धाने प्रणेनेक्ति। मेध्ये एवैने यज्ञिये करोति। ग्रन्थीन्विवृञ्जन्ति। देवग्रन्थीनेव ग्रन्थिष्यन्तो मनुष्यग्रन्थीन्विवृञ्जन्ति। हविर्वै हविर्धाने। स्तीर्णे बर्हिषि हविरासादयन्ति। तस्मात्स्तीर्णे बर्हिषि हविर्धाने प्रवर्तयन्ति। पत्न्युपानक्ति। पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति। प्रजननाय। त्रिः प्राचीनमुपानक्ति। असंख्यातं हि तिरश्चीनं मनुष्या उपाञ्जन्ति। व्यावृत्त्यै। यजुषोपानक्ति। अयजुषा हि मनुष्या उपाञ्जन्ति। व्यावृत्त्यै। दक्षिणत उपानक्ति। दक्षिणतो ह्येते उदीची मनुष्यलोकमुपावर्तेते। मानुषमेवैनयोरुत्तरं करोति। यदुत्तरादुपाञ्ज्यान्नान्यतरं चन लोकमुपावर्तेयाताम्। स्वर्गाय वा एते लोकाय प्रवर्तेते यद्धविर्धाने॥

युञ्जते मन इति सावित्र्या जुहोति। सवितृप्रसूते एवैने स्वर्गं लोकं गमयति। हविर्वै हविर्धाने। न हविरनभिघृतं मेधमश्नुते। यदभ्यनक्त्यभ्येवैने घारयति। मेध्यत्वाय। शुष्को वा एष निर्ऋतिगृहीतो यदक्षो नभ्याभ्यामुभयतो बद्ध उपधिभ्यां संदष्टः। यदुपानक्ति मेध्यमेवैनं यज्ञियं करोति। घोषो वै नामासुर आसीत्। स वनस्पतीन्प्राविशत्। तं देवा गृहीत्वोभयतो ऽवघ्नन्। यत्क्षवेदेदसुर्या वाग्यज्ञमववदेद्रक्षांसि यज्ञमन्ववेत्य हन्युः। अनुगृह्णन्तो यन्ति रक्षसामनन्ववायाय। वर्त्मना वै यज्ञं रक्षांस्यन्ववेत्य जिघांसन्ति। वैष्णव्या वर्त्मञ्जुहोति। विष्णुर्वै यज्ञः। विष्णुनैव यज्ञाद्रक्षांस्यपहन्ति। व्यृद्धा वा एषाहुतिर्यामनग्नौ जुहोति। यद्धिरण्यमुपास्य जुहोत्यग्निमत्येव जुहोति। समृद्ध्यै। स्वर्गं वा एते लोकं प्रेतो यद्धविर्धाने। गायत्र्या दक्षिणस्य वर्त्मञ्जुहोति। अस्यामेवैने आक्रमयति। त्रिष्टुभोत्तरस्य। अन्तरिक्ष एवैने आक्रमयति। आहवनीयं गमयति। स्वर्गमेवैने लोकं गमयति। स्वर्गो हि लोक आहवनीयः। त्रीन्पुरस्तात्प्रक्रामानुच्छिंषति। त्रय इमे लोकाः। इमानेवास्मै लोकानुच्छिंषति॥

दिवो वा विष्णवुत वा पृथिव्या इति दक्षिणस्य हविर्धानस्य मेथीमुपमिनोति। विष्णुर्वै यज्ञः। मुखत एव यज्ञस्याशिषमवरुन्द्धे। तां परुषिपरुष्याशासान एति। विष्णोर्नु कं वीर्याणि प्रवोचमित्युत्तरस्य। वैष्णवं वै हविर्धानम्। स्वयैवैनद्देवतया समर्धयति। विष्णोः पृष्ठमसीति च्छदिरुपरिष्टादभिनिदधाति। इदमेव तेन करोति यदिदमुत्तरार्धं शीर्ष्णः। विष्णो रराटमसीति पुरस्ताद्रराटमेव तेन करोति। विष्णोः श्नप्त्रे स्थ इत्यभितः। श्नप्त्रे एव तेन करोति। तिर्यञ्चं पुरस्ताद्वंशं विषीव्यन्ति। तस्मात्तिरश्ची पुरुषस्य भ्रुवौ। विष्णोः स्यूरसि विष्णोर्ध्रुवो ऽसीति। वैष्णवं हि हविर्धानम्। स्वयैव देवतया सीव्यति। स्वया देवतया ग्रन्थिं ग्रथ्नाति। यं प्रथमं ग्रन्थिं ग्रथ्नीयात्तं प्रथमं विवृजेदात्मनो गोपीथाय। यदन्यं पूर्वं विवृजेदमेहेनाध्वर्युः प्रमीयेत। उपरिष्टाच्छम्याः संनह्यन्ति पश्चादुपमिन्वन्ति। अधस्ताद्धि मनुष्या युञ्जन्ति पुरस्तादुपमिन्वन्ति। व्यावृत्त्यै। शिरो वा एतद्यज्ञस्य यद्धविर्धानम्। पुरस्ताद्वर्षीयो भवति पश्चात्क्रधीयः। तस्मात्पुरस्तात्पुरुषस्य शिरो वर्षीयः पश्चात्क्रधीयः। वैष्णवमसि विष्णवे त्वेति संमितमभिमन्त्रयते। वैष्णवं वै हविर्धानम्। स्वयैवैनद्देवतया समर्धयति। प्र तद्विष्णु स्तवते वीर्येणेति त्रीन्प्रक्रमान्यजमानं प्राञ्चं प्रक्रमयति। विष्णुमेवैनं भूतमिमांल्लोकान्गमयति ॥1॥

शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवाः। दक्षिणस्य हविर्धानस्याधस्तात्परिलिखति। एतद्वा एतयोः पूर्वम्। मुखत एव यज्ञस्य प्राणान्प्रतिदधाति। तस्मान्मुखतः प्राणाः। चतुरः परिलिखति। चत्वारो हि प्राणाः। प्रादेशं-प्रादेशं परिलिखति। एतावदेतावद्धीमे ऽभि प्राणाः। असंभिन्दन्तः खनन्ति प्राणानामसंभेदाय। यत्संभिन्द्या [त्प्राणान्संभिन्द्या] त्प्रमीयेत। तान्पर एकधा संतृन्दन्ति। तस्मात्प्राणाः पर एकधा संतृण्णाः॥

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते। सवितृप्रसूत एवैनां देवताभिरादत्ते। इदमहं रक्षसो ग्रीवा अपिकृन्तामीति। भ्रातृव्यो वै रक्षः। भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति। इदमहं यो नः समानो यो ऽसमानो ऽरातीयति तस्य ग्रीवा

अपिकृन्तामीति। प्राणा उपरवाः। प्राणेभ्य एवैनमन्तरेति ताजक्प्रधन्वति। बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वदेति। बृहतीं ह्येष इन्द्राय वाचं वदति। रक्षोहणो वलगहनो वैष्णवीमिति रक्षसामपहत्यै। यद्वैष्णवीमिति। यज्ञो वै विष्णुः। स्वयैवैनां देवतया समर्धयति। देवाश्च वा असुराश्च व्यस्पर्धन्त। ते ऽसुरा देवानां प्राणेषु वलगान्न्यखनन्। तान्बाहुमात्रे ऽन्वविन्दन्। तस्माद्बाहुमात्रः खेयः। प्राणानामनुवित्त्यै। इदमहं तान्वलगानुद्वपामि यान्नः समानो यानसमानो निचखानेति। यदेवास्यात्र शत्रुं यदभिचरितं तदनुविद्योद्वपति। तस्मादेते भिषज्याः। तस्मादामयाविनमनुमर्शयन्ति। सम्राडसि स्वराडसीति साम्राज्यमेवैनैति। गायत्रेण च्छन्दसावबाढो यो द्विष्मः। त्रैष्टुभेन जागतेनेति। एतावन्ति वै च्छन्दांसि। छन्दोभिरेव भ्रातृव्यमवबाधते। किमत्र भद्रं तन्नौ सहेत्याशिषमेवाशास्ते। निरस्तो वलगो ऽवबाढो दुरस्युरिति यथायजुः। रक्षोघ्नो वलगघ्नः प्रोक्षामि वैष्णवानिति रक्षसामपहत्यै। यद्वैष्णवानिति। यज्ञो वै विष्णुः। स्वयैवैनान्देवतया समर्धयति। रक्षोघ्नो वलगघ्नो ऽवसिञ्चामि वैष्णवानिति रक्षसामपहत्यै। अथो यदेवैषां खनन्तः क्रूरं कुर्वन्ति तच्छमयति। यद्वैष्णवानिति। यज्ञो वै विष्णुः। स्वयैवैनान्देवतया समर्धयति। रक्षोघ्नो वलगघ्नो ऽवस्तृणामि वैष्णवानिति रक्षसामपहत्यै। यद्वैष्णवानिति। यज्ञो वै विष्णुः। स्वयैवैनान्देवतया समर्धयति। अथावसिञ्चत्यव च स्तृणाति। तस्मात्प्राणा अन्तरतो लोमशा उदन्वन्तः। रक्षोहणौ वलगहनौ प्रोक्षामि वैष्णवी इति रक्षसामपहत्यै। यद्वैष्णवी इति। यज्ञो वै विष्णुः। स्वयैवैने देवतया समर्धयति। रूक्षे वा एते तष्टे अमेध्ये। आपो मेध्या यज्ञियाः। यदद्भिः प्रोक्षति मेध्ये एवैने यज्ञिये करोति। हनू वा एते यज्ञस्य यदधिषवणे। अवितृण्णे भवतः। तस्माद्धनू अवितृण्णे। पुरस्ताद्वरीयसी भवतः पश्चाद्वरीयसी। एवमेव हि हनू। द्व्यङ्गुलमन्तराधिषवणे भवति। तस्मादियमन्त [रा हनू] रालाकेव। रक्षोहणौ वलगहनावुपदधामि वैष्णवी इति रक्षसामपहत्यै। यद्वैष्णवी इति। यज्ञो वै विष्णुः। स्वयैवैने देवतया समर्धयति। रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी इति रक्षसामपहत्यै। यद्वैष्णवी इति। यज्ञो वै विष्णुः। स्वयैवैने देवतया समर्धयति। पर्यूहति। तस्माद्धनू अन्ते अमुषिते बर्स्वैरोष्ठाभ्यां सृक्वाभ्यां श्मश्रुभिः। शिरो वा एतद्यज्ञस्य यद्धविर्धानं प्राणा उपरवा हनू अधिषवणे दन्ता ग्रावाणो जिह्वाधिषवणं चर्म मूर्धा द्रोणकलशः। यज्ञः प्रजापतिः। मुखतो वा इदं प्रजापतेः सोमं निष्पिबन्ति। तस्मादूर्जं जग्धमिव प्सातमिव। एवमिव हि दद्भिः प्सातं भवति। यो विराजं यज्ञमुखे दोह्यां वेद दुह एनाम्। इयं वाव विराट्। तस्या एतदूधो यदधिषवणे स्तना उपरवा वत्सा ग्रावाणस्त्वगधिषवणं चर्म। ऋत्विजो दुहन्ति। य एवं विराजं यज्ञमुखे दोह्यां वेद दुह एनाम् ॥२॥

शिरो वा एतद्यज्ञस्य यद्धविर्धानं ग्रीवा आग्नीध्रमुदरं सद ऊर्गुदुम्बरः। यत्सदस्यौदुम्बरीं मिनोत्यूर्जमेव मध्यतो दधाति यजमाने च प्रजासु च। तस्मान्मध्यतः प्रजा ऊर्जं जयति। अस्मै वै लोकायौदुम्बरी मीयते ऽमुष्मै यूपः। तस्मादितः पराञ्चं यूपं प्रोक्षत्यमुतो ऽर्वाचीमौदुम्बरीम्। अनयोर्लोकयोर्विजित्यै। ऊर्ग्वा उदुम्बरः। यदमुतो ऽर्वाचीमौदुम्बरीं प्रोक्षत्यमुत एवार्वाचीमूर्जं च्यावयति। अस्मिन्नेव लोक ऊर्जं न्यनक्ति। प्रजापतेर्वा उद्गातौदुम्बरी। उद्गायति। प्रजास्वेवोर्जं न्यनक्ति।

देवस्य त्वा सवितुः प्रसव इत्यभिमादत्ते। सवितृप्रसूत एवैनां देवताभिरादत्ते। इदमहं रक्षसो ग्रीवा अपिकृन्तामीति। भ्रातृव्यो वै रक्षः। भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति। शुन्धन्तां लोकाः पितृषदना इति शुन्धत्येवैनाम्। अथो यदेवास्य खनन्तः क्रूरं कुर्वन्ति तच्छमयति। यवमसीत्यवसिञ्चति। अन्नं वै यवा ऊर्गुदुम्बरः। अन्न एवोर्जं दधाति। पितृषदनं त्वा लोकमास्तृणामीति। यद्वा एतामबर्हिषं मिनुयुर्गर्तमित्स्यात्। अस्या उत्तरार्ध ओषधयः। अस्या एवैनामुत्तरार्धे मिनोति। अगर्तमितमेवाकः। उद्दिवं स्तभानान्तरिक्षं पृण दृंहस्व पृथिव्यामिति दृंहत्येवैनाम्। नितानस्त्वा मारुतो निहन्त्विति। मनो वै नितानः प्राणा मारुताः। स्वयैवैनां देवतयावहरति। नितानो ह स्म वै मारुतो देवानामौदुम्बरीं मिनोति। तेनैवैनां मिनोति। मित्रावरुणयोर्ध्रुवेण धर्मणेति। मित्रेण वा इमाः प्रजाः शान्ता वरुणेन विधृताः। क्लृप्त्या एव विधृत्यै। ब्रह्मवनि त्वा क्षत्रवनिमित्याशिषमेवाशास्ते। ब्रह्म दृंह क्षत्रं दृंहेत्याशिषमेवास्मा आशिष्टां दृंहति। घृतेन द्यावापृथिवी आपृणाथामिति घृतेन द्यावापृथिवी व्युनत्ति। तस्मादोषधयो ऽनभ्यक्ता रेभन्ते। घृतेनौदुम्बरीमभिजुहोति। तेजो वै

घृतमन्नमुदुम्बरः। अन्न एव तेजो दधाति। आन्तमन्ववस्रावयति। आन्तमेव वनस्पतिषु चौषधिषु च रसं दधाति। विश्वजनस्य च्छायासीति। विश्वजनस्य ह्येषा छाया। गोत्राद्गोत्राद्ध्येतत्संप्रसर्पन्ति। औदुम्बरीमभि च्छदींषि संमुखानि कुर्यात्। दैवीर्वा एता विशो यदोषधयः। ओषधयश्छदींषि। यजमान औदुम्बरी। यजमानमेव प्रजा अभि संमुखाः करोति। छदिर्भवति। अथान्तर्वर्तः। तस्मात्पुरुषस्य मांसम्। अथ पर्शुः। उदरं वा एतद्यज्ञस्य यत्सदः। तिर्यङ् मिनोति। तस्मात्पुरुषे ऽशितं ध्रियते। पुरुषेण वै यज्ञः संमितो यज्ञेन पुरुषः। यत्सद उभयतश्छिद्रं। तस्मात्पुरुष उभयतश्छिद्रः। विषीव्यन्ति। तस्मात्पुरुषो ऽन्तरतो विष्यूतः। इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवो ऽसीति। ऐन्द्रं वै सदः। स्वयैव देवतया सीव्यति। स्वया देवतया ग्रन्थिं ग्रथ्नाति। ऐन्द्रमसीन्द्राय त्वेति संमितमभिमन्त्रयते। ऐन्द्रं वै सदः। स्वयैवैनं देवतया समर्धयति॥

नव च्छदींषि कुर्याद्यद्यग्निष्टोमः स्यात्। तेजसा त्रिवृता संमितम्। पञ्चदश यद्युक्थ्यः। पञ्चदशेन संमितम्। वज्रः पञ्चदशः। वज्रेण संमितम्। सप्तदश यद्यतिरात्रः। सप्तदशेन संमितम्। प्रजापतिः सप्तदशः। प्रजापतिना संमितम्। एकविंशतिं प्रतिष्ठाकामस्य कुर्यात्। एकविंशो वै स्तोमानां प्रतिष्ठा। प्रतिष्ठित्यै। अथो यज्ञक्रतूनामेव व्यावृत्त्यै। या अन्तत स्थूणास्ताः ऋधिष्ठाः कुर्याद्यदि कामयेत वर्षेदिति। नीचैरिव हि द्यौर्वर्षिष्यन्ती भवति। ता वर्षिष्ठाः कुर्याद्यदि कामयेत न वर्षेदिति। उच्चैरिव हि द्यौरवर्षिष्यन्ती भवति। यानि दक्षिणानि च्छदींषि तान्युत्तराणि कुर्यात्। यजमानलोके वा एतानि यानि दक्षिणानि भ्रातृव्यलोक उत्तराणि। उत्तरमेव यजमानमयजमानाद् भ्रातृव्यात्करोति। उत्तरो हि यजमानो ऽयजमानात् ॥३॥

धिष्ण्या न्युप्यन्ते ऽनयोर्लोकयोर्विधृत्यै। न्यन्य उप्यन्ते नान्ये। ये न्युप्यन्त इमं तैर्लोकं दाधार। ये न न्युप्यन्ते ऽमुं तैः। पराङ् ह्यसौ लोको ऽनिरुक्तः। अग्निर्वै देवेभ्यो ऽपाक्रामत्। स पृथिवीं प्राविशत्। तं जानुदघ्ने ऽन्वविन्दन्। तस्माज्जानुदघ्नं खेयम्। अनुविद्यैवैतान्निवपति। चात्वालान्निवपति। एषा वा अग्नेर्योनिः। स्वादेवैनान्योनेर्निवपति। यो वेद्यास्तीर्थं [वेद न सदस्यामार्तिमार्छति। प्राचीनमाग्नीध्रात्प्रतीचीनं चात्वालात्तेन संचरेत्। एतद्वै वेद्यास्तीर्थम्। य] एवं वेद न सदस्यामार्तिमार्छति। न प्रत्यङ् सदो ऽतीयादध्वर्युः। उदरं वा एतद्यज्ञस्य यत्सदः। उदरं यज्ञस्य संकर्षेत्प्रमीयेत। जनो वा एषो ऽध्वर्योर्जनमेति जनता जनतामभीत्य जिनाति। यद्यतीयादैन्द्र्या संचरेत्। ऐन्द्रं वै सदः। स्वयैव देवतया संचरति। न प्राङ् हविर्धानमतीयादध्वर्युः। शिरो वा एतद्यज्ञस्य यद्धविर्धानम्। शिरो यज्ञस्य संकर्षेत्प्रमीयेत। यद्यतीयाद्वैष्णव्या संचरेत्। वैष्णवं वै हविर्धानम्। स्वयैव देवतया संचरति। तदाहुः क्षैत्रपत्ययैव संचरेदिति। इयं क्षेत्रस्य पतिः। तेनास्या नैति॥

अमुष्मिन्वै लोके सोम आसीत्। तं धिष्ण्या अगोपायन्। तं गायत्र्याहरत्। नेष्टापोत्रोः प्रति गोपीथम्। तस्मादेते होत्रे व्यृद्धे व्यृद्धसोमपीथे। तस्मान्न नेष्ट्रा न पोत्रा भवितव्यम्। तस्मादेतौ संसचन्ताविव यजतः। तमेते ऽन्वायन्द्वितीयानि नामानि कृत्वा। तस्माद्ब्राह्मणो द्विनामार्धुकः। तं पर्यविशन्भागधेयमिच्छमानाः। तेभ्य एतद्भागधेयमकल्पयत्। यद्धिष्ण्यान्व्याघारयति स्वेनैवैनान्भागधेयेन समर्धयति। तेषां ये नेदिष्ठं पर्यविशंस्ते सोमपीथं प्राप्नुवन्नाहवनीय आग्नीध्रो होत्रीयः। तस्मादेत उपर्युपरि वषट्कुर्वन्तं न हिंसन्ति। प्रीता हि। न प्रत्यङ् धिष्ण्यानतिसर्पेदध्वर्युः। प्राणा वै धिष्ण्याः। प्राणान्संकर्षेत्प्रमीयेत। न प्रत्यङ् होतारम्। नाभिर्वा एषा यज्ञस्य यद्धोता। ऊर्ध्वं वै नाभ्याः प्राणो ऽवाचीनमपानः। अपाने प्राणं दध्यात्प्रमीयेत॥

दक्षिणतो वै देवानां रक्षांसि यज्ञमभ्यजयन्। तमाग्नीध्रात्पुनरपाजयन्। यदाग्नीध्राद्धिष्ण्यान्विहरन्ति यज्ञस्याभिजित्यै रक्षसामपहत्यै। जम्भो वै नामासुर आसीत्। स देवानां यज्ञमगिरत्। स आग्नीध्रमपि नागिरत्। यदाग्नीध्राद्धिष्ण्यान्विहरन्ति तेन यज्ञो जीवस्तेन मेध्यः। अङ्गारान्पूर्वयोः सवनयोर्विहरन्ति। शुक्रवती हि ते। शलाकान्दीप्यमानांस्तृतीयसवने। तेन तच्छुक्रवत्। सर्वाण्यस्य सवनानि शुक्रवन्ति भवन्ति य एवं वेद॥

प्राचीभिर्वा आहुतिभिर्देवा अन्यानसुरान्प्राणुदन्त प्रतीचीभिरन्यान्। प्रत्यञ्चो धिष्ण्या व्याघार्यन्ते प्राचीरन्या आहुतयो हूयन्ते भ्रातृव्यस्य वितृत्त्यै। अग्नेर्वा एता वैश्वानरस्य प्रियास्तन्वो यद्धिष्ण्याः। यद्धिष्ण्यान्व्याघारयति ता

एवैतत्समुद्दर्शयति। अग्निर्वा एष वैश्वानर उपावसृज्यते यदग्निष्टोमः। स ईश्वरो ऽशान्तो यजमानं च सदस्यांश्चाभ्युषः। प्रोर्णुवीत यजमान आत्मनो ऽनतिदाहाय। तृतीयसवने वै यजमानशिर कुरुते। यत्प्रोर्णुवीत ताभ्य आत्मानमन्तर्दध्यात्। नाभि वै पितरो ऽभिसंजानते। आविर्नाभिं कुर्वीत। अभीव कर्णौ प्रोर्णुवीत। नाशीर्भ्य आत्मानमन्तर्दधाति। आनन्त्येन पितरः। घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति। यावन्तः प्रसृताः स्युस्ते सर्वे ऽग्निष्टोममुपगायेयुः। अन्तो वा अग्निष्टोमः। अन्तमेवैनमागत्य समीरयन्ति। इन्द्रियाय वै कं ब्राह्मणः सोमं पिबति। यदुपगायेदिन्द्रियं निःस्वरेत्। तस्मान्नोपगेयम्॥

संवत्सरो वा अग्निष्टोमः। द्वादशाग्निष्टोमस्य स्तोत्राणि। द्वादश मासाः संवत्सरः। संवत्सरं प्रजा अनुप्रजायन्ते। यदग्निष्टोमस्य स्तोत्रे ऽप उपप्रवर्तयति प्रजननाय। यद्वै पत्नी यज्ञे करोति तन्मिथुनम्। यत्पत्न्याप उपप्रवर्तयति मिथुन एव रेतः प्रसिञ्चति। उद्गात्रा पत्नीं संख्यापयति। वृषा वा उद्गाता। पत्न्यः प्रजाः प्रजायन्ते। वृषाणमेवास्यामपिसृजति प्रजननाय। ऊरुभ्यां प्रवर्तयति। ऊरुभ्यां हि प्रजाः प्रजायन्ते। प्रजननाय। अन्तरत इव नु देवता। अन्तरतो ह्येषा वीर्यं करोति। दुरमुष्युदुहेत। अहीतमुख्यस्या जायते। न दक्षिणा प्रवर्तयेत्। यद्दक्षिणा प्रवर्तयेत्पितृभ्यः प्रजा निधूवेत्। उदीचीः प्राचीः प्रवर्तयति। एषा वै मनुष्याणां दिक्। मनुष्यलोक एवैना उपप्रजनयति ॥४॥

उपसद्भिर्वै देवा इमाँल्लोकानभ्यजयन्। तान्वैसर्जनैरभिव्यसृजन्त यथा ग्रामः संग्रामादिसृज्यते। तद्वैसर्जनानां वैसर्जनत्वम्। प्राञ्चं सोमं प्रणयन्ति। प्राचीं पत्नीमुदानयन्ति। इमानेवैतल्लोकानभिप्रयन्ति। अग्निना वै मुखेन देवा इमाँल्लोकानभ्यजयन्गार्हपत्येनेममाग्नीध्रेणान्तरिक्षमाहवनीयेनामुम्। यद्गार्हपत्य इमं तेन लोकमभिजयति यदाग्नीध्रे ऽन्तरिक्षं तेन यदाहवनीये ऽमुं तेन। स्वर्गाय वा एष लोकाय प्रह्रियते। द्वाभ्यां गार्हपत्ये जुहोति। द्विपाद्यजमानः। अन्यामेवैनमाक्रमयति। यदाग्नेय्याग्नीध्रे जुहोत्यन्तरिक्ष एवैनमाक्रमयति। यद्वैष्णव्याहवनीये जुहोति स्वर्गमेवैनं लोकं गमयति। स्वर्गो हि लोक आहवनीयः। रक्षांसि वा एतमेतर्हि जिघांसन्ति प्रच्युतमितो ऽप्राप्तमदः॥

त्वं सोमेति सौम्या गार्हपत्ये जुहोति। सौमीरिमाः प्रजाः। प्रजाभ्य एवैनं प्राह। जुषाणो अप्तुरित्यप्तुमेवैनं कृत्वेमामतिनयति। यदाग्नेय्याग्नीध्रे जुहोत्यग्निमेवैनं कृत्वान्तरिक्षमतिनयति। यद्वैष्णव्याहवनीये जुहोति स्वर्गमेवैनं लोकं गमयति। स्वर्गो हि लोक आहवनीयः। सर्वेभ्यो वा एष आह्रियते मनुष्येभ्यः पितृभ्यो देवेभ्यः। त्वं सोमेति सौम्या गार्हपत्ये जुहोति। सौमीरिमाः प्रजाः। प्रजाभ्य एवैनं प्राह। जुषाणो अप्तुरिति पितृभ्य एवैनं प्राह। यदाग्नेय्याग्नीध्रे जुहोति। अग्निः सर्वा देवताः। देवताभ्य एवैनं प्राह। वैष्णवो वै सोमः। तं देवतया व्यर्धयति यदन्यामन्यां देवतां करोति। यद्वैष्णव्याहवनीये जुहोति स्वयैवैनं देवतया समर्धयति। सर्वान्वा एतद्वरुणो गृह्णाति यद्दीक्षिते मनुष्यान्पितॄन्देवान्। त्वं सोमेति सौम्या गार्हपत्ये जुहोति। सौमीरिमाः प्रजाः। प्रजा एव वरुणपाशान्मुञ्चति। [जुषाणो अप्तुरिति पितॄनेव वरुणपाशान्मुञ्चति। यदाग्नेय्याग्नीध्रे जुहोति। अग्निः सर्वा देवताः। देवता एव वरुणपाशान्मुञ्चति।] सो ऽनृण इमाँल्लोकानभिविसृजमान एति। तद्वैसर्जनानां वैसर्जनत्वम्। तस्मादाहुरपि वा एष देवतापितृभ्य आरण्येभ्यः पशुभ्यो विसृजत इति॥

आग्नीध्रे ग्रावकलशान्सादयति। प्राञ्चं सोमं प्रणयति। एतेषां एतं घ्नन्ति। हनूभिरेवैनं व्यावर्तयति। न हन्वोरभिपद्यते य एवं वेद। न पुरस्तात्प्रतिसंधेत। रुद्रो वा अग्निः पशवो ऽशवः। रुद्राय पशूनपिदध्यादपशुः स्यात्। पश्चात्प्राङ् प्रपद्यते। श्रीर्वै सोमः। पश्चादेव प्राङ् श्रियमाप्नोति। तस्मात्पश्चात्प्राचीः प्रजाः क्षेत्राण्यभिजयन्तीर्यन्ति। पुरस्ताद्गतश्रीः प्रपद्येत। पुरस्तादेव प्रत्यङ् श्रियमाप्नोति। इममेव लोकमभि प्रतितिष्ठति। पश्चात्सोमं प्रपादयन्ति पुरस्ताद्यजमानः प्रपद्यते। उभयत एवास्मै श्रियं परिगृह्णाति॥

उर्वन्तरिक्षं वीहीति। अन्तरिक्षदेवत्यो ह्येष एतर्हि। अदित्यास्त्वगस्यदित्याः सदने सीदेति। आदित्यो वै सोमः पृथिव्यदितिः। पृथिव्या अनः संभृतम्। स्व एवैनं योनौ दधाति। देव सवितरेष ते सोम इति। सविता वै देवानामधिपतिः। मनुष्या एनमतः प्राञ्चं गोपायन्ति। तस्मा एवैनं संप्रयच्छति गोपीथाय। एतत्त्वं देव सोम देवानुपागा इति। देवो ह्येष देवानुपैति। इदमहं मनुष्यान्सह प्रजया सह रायस्पोषेणेति सहैव प्रजया पशुभिरिम

लोकमुपावर्तते। नमो देवेभ्यः स्वधा पितृभ्य इति। नमो हि देवानां स्वधा पितृणाम्। निर्द्रुहो निर्वरुणस्य पाशान्मुक्षीयेति द्रुह एवैनं वरुणपाशान्मुञ्चति। स्वरभिव्यख्यमिति। इमे वै लोकाः स्वः। इमानेव लोकानभिविपश्यति। अग्ने व्रतपा इति। अग्निना वा एष तन्वं विपरिधत्ते तानूनप्त्रे। सैनमीश्वरा हिंसितोः। अग्निनैवैतत्तन्वं यथायथं कुरुते। एतर्हि वा एष देवैस्तन्वं विसृजते। तद्वैसर्जनानां वैसर्जनत्वम्। यात्मनस्तां पूर्वां ब्रूयात्। यदितरस्य पूर्वां ब्रूयादीश्वरो निकमः। यं द्विष्यात्तस्योत्तरां ब्रूयात्। अग्निर्वै रुद्रः। रुद्रायैवैनमपिदधाति ताजक्प्रधन्वति ॥५॥

इति कपिष्ठलकठसंहितायां चत्वारिंशत्तमो ऽध्यायः॥

षष्ठमष्टकम्

...[जुष्टं विष्णव इति।] यज्ञो वै विष्णुः। यज्ञायैवैनं जुष्टं करोति। देवस्त्वा सविता मध्वानक्त्विति। घृतं वै देवानां मधु। मेध्यमेवैनं यज्ञियं करोति। श्रोषधे त्रायस्वैनमिति वर्मैव करोति। स्वधिते मैनं हिंसीरिति। वज्रो वै स्वधितिः। अहिंसायै। यः प्रथमः शकलः परापतति तमाहरेत्। एतं वा एतस्य परापतन्तं तेजो ऽनुपरापतति। सतेजसमेवैनं मिनोति। यो दक्षिणावृत्त तं वृश्चेत्। गर्त्यः सः। य उदङ्ङावृत्तो न तम्। स्थूण्यः सः। य ऊर्ध्वशाख ऊर्ध्वशकलस्तं वृश्चेत्। एष वै यूप्यः। य एव यूप्यस्तं वृश्चति। यो ऽशुष्काग्रो बहुशाखो बहुपर्णस्तं वृश्चेत्। श्रोषधयो वै वनस्पतयः पशव श्रोषधयः। पशुभिरेवैनं समर्धयति। यः शुष्काग्रोऽशाखो ऽपर्णस्तं वृश्चेद्यं द्विष्यात्तस्य। श्रोषधयो वै वनस्पतयः पशव श्रोषधयः। पशुभिरेवैनं व्यर्धयति। य उदङ् प्राङुपनतस्तं वृश्चेत्। एष वै मेधमभ्युपनतः। य एव मेधमभ्युपनतस्तं वृश्चति। द्यां मा लेखीरन्तरिक्षं मा हिंसीः पृथिव्या संभवेति। वज्रो वै यूपः। एषां लोकानामहिंसायै। उदञ्चं प्राञ्चं प्रश्रयति। एष वै देवलोकः। देवलोकमेवैनमुपप्रश्रयति। वनस्पते शतवल्शो विरोहेत्याव्रश्चने जुहोति। वनस्पतिष्वेव भूमानं दधाति। तस्मादेत आव्रश्चनाद् भूयांसो जायन्ते। सहस्रवल्शा वि वयं रुहेमेत्याशिषमेवाशास्ते। यं त्वायं स्वधितिस्तेतिजानः प्रणिनाय महते सौभगायेति। महते ह्येष सौभाग्याय प्रणीयते यद्यज्ञाय प्रणीयते। य आरोहस्तं वृश्चेद्यं द्विष्यात्तस्य। अयोनिर्वा एषो ऽनायतनो य आरोहः। अयोनिमेवैनमनायतनं करोति। यः स्वारुस्तं वृश्चेत्। एष वै योनिमानायतनवान्यः स्वारुत्। योनिमन्तमेवायतनवन्तं यजमानं करोति। गुल्फदघ्ने वृश्चेत्। परुर्हि गुल्फः। यज्ञपरुषा संमितम्। जानुदघ्ने वृश्चेत्। परुर्हि जानु। यज्ञपरुषा संमितम्। यावत्यनक्षसङ्गः स्यात्तावति वृश्चेत्। यज्ञपरुषा संमितम्। पशूनामप्रतिनोदाय ॥१॥

पशुसंमितो व्रष्टव्यो दशारत्निः। दश वै पशोः प्राणा आत्मैकादशः। अष्टाश्रयो द्वे परुषी आत्मैकादशः। पशुसंमितमेव वृश्चति। स्तोमसंमितो व्रष्टव्यो नवारत्निः। तेजसा त्रिवृता संमितः। पञ्चदशारत्निर्व्रष्टव्यः पञ्चदशेन संमितः। वज्रः पञ्चदशः। वज्रेण संमितः। सप्तदशारत्निर्व्रष्टव्यः सप्तदशेन संमितः। प्रजापतिः सप्तदशः। प्रजापतिना संमितः। एकविंशत्यरत्निर्व्रष्टव्य एकविंशेन संमितः। असावादित्य एकविंशः। आदित्येन संमितः। सप्तविंशत्यरत्निर्व्रष्टव्यः सप्तविंशेन संमितः। त्रिणवा इमे लोकाः। एभिर्लोकैः संमितः। त्रयस्त्रिंशदरत्निर्व्रष्टव्यस्त्रयस्त्रिंशेन संमितः। त्रयस्त्रिंशद्देवताः। देवताभिः संमितः। छन्दःसंमितो व्रष्टव्यः। पञ्चारत्निः पङ्क्त्या छन्दसा संमितः। षडरत्निरतिच्छन्दसा संमितः। सप्तारत्निः शक्वर्या संमितः। अष्टारत्निर्गायत्र्या संमितः। नवारत्निर्बृहत्या संमितः। दशारत्निर्विराजा संमितः। एकादशारत्निस्त्रिष्टुभा संमितः। द्वादशारत्निर्जगत्या संमितः। त्रयोदशारत्निः साध्यैर्देवैः संमितः। बृहन्नपरिमितो व्रष्टव्यः। यूपाद्वै देवाः स्वर्गं लोकमायन्। स्वर्गस्य लोकस्य समष्ट्यै। य एव कश्च पुरुषाद्वर्षीयान्स्यात्तं वृश्चेत्। एषा वै यूपस्य मात्रा। यावानेव यूपस्तं वृश्चति। चषालं भवति। चषालाद्वै देवाः स्वर्गं लोकमायन्। स्वर्गस्य लोकस्य समष्ट्यै। इन्द्रो वै वृत्राय वज्रं प्राहरत्। तस्य यावदालब्धमासीत्तत्प्राशीर्यत। तच्चषालं प्रत्यवृञ्जन्। यच्चषालं भव [ति द्राढम्न एवालब्ध्या अ] शिथिलत्वाय। इयद्भवति। एतावद्धि तदाहुर्लब्धमासीत्। न यूपस्यातिरेचयेत्। यद्वै यदतिरेचयेदर्बुदिनोर्जनयः स्युः। यावदुत्तममङ्गुलिकाण्डं तावदतिरेचयेत्। यज्ञपरुषा संमितम्। पशूनामप्रतिनोदाय। यद्वै

यज्ञस्यातिरिच्यते साध्यांस्तद्देवानभ्यतिरिच्यते। यज्ञस्यैतदतिरिच्यते यद्यूपस्यातिरिच्यते। साध्यानेव तेन देवान्प्रीणाति। अन्यस्य वृक्षस्य चषालं कुर्याद्यस्य च यूपः स्याद्यं कामयेत भ्रातृव्यमस्मै जनयेयमिति। भ्रातृव्या वा एतस्यान्ये वनस्पतयः। भ्रातृव्यमेवास्य लोकमभ्यारोहयत्यलोकमेनं करोति ॥२॥

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेति यूपं प्रोक्षति। एभ्य एवैनं लोकेभ्यः प्रोक्षति। अस्मै वै लोकायौदुम्बरी मीयते ऽमुष्मै यूपः। तस्मादितः पराञ्चं यूपं प्रोक्षत्यमुतो ऽर्वाचीमौदुम्बरीमनयोर्लोकयोर्विधृत्यै। देवस्य त्वा सवितुः प्रसव इत्यभिमादत्ते। सवितृप्रसूत एवैनां देवताभिरादत्ते। इदमहं रक्षसो ग्रीवा अपिकृन्तामीति। भ्रातृव्यो वै रक्षः। भ्रातृव्यस्यैव ग्रीवा अपिकृन्तति। शुन्धन्तां लोकाः पितृषदना इति शुन्धत्येवैनम्। अथो यदेवास्य खनन्तः क्रूरं कुर्वन्ति तच्छमयति। यवमतीरवसिञ्चति। अन्नं वै यवास्तेजो यूपः। अन्न एव तेजो दधाति। अन्नं वै यवा वज्रो यूपः। अन्न एव वज्रं दधाति। पितृषदनं त्वा लोकमास्तृणामीति। यद्वा एतमपबर्हिषं मिनुयुर्गर्तमित्स्यात्। अस्या उत्तरार्धमोषधयः। अस्या एवैनमुत्तरार्धे मिनोत्यगर्तमितमेवाकः। स्वावेशो ऽस्यग्रेगा नेतृणामिति यूपशकलमवास्यति। ऋक्षो वा एष तष्टो ऽमेध्यो ऽपशव्यः। सत्वचसमेवैनं मिनोति। घृतेन द्यावापृथिवी आपृणातामिति घृतेनैव द्यावापृथिवी व्युनत्ति। तस्मादोषधयो ऽनभ्यक्ता रेभन्ते। देवस्त्वा सविता मध्वानक्त्विति। घृतं वै देवानां मधु। मेध्यमेवैनं यज्ञियं करोति। सुपिप्पला श्रोषधीस्कृधीति चषालं प्रतिमुञ्चति। श्रोषधीरेव फलं ग्राहयति। तस्मादेता अकृष्टपच्याः पच्यन्ते। घृतेनाग्निष्ठामनक्ति। तेजो वै घृतं यजमानो ऽग्निष्ठाः। तेजसैव यजमानं समर्धयति। आन्तं संततमनक्ति तेजसः संतत्या अविच्छेदाय। यं द्विष्यात्तस्य विच्छिन्द्यात्। तेजसैवैनं व्यर्धयति। सर्वतो ऽनक्ति। सर्वत एवैनं तेजसा समर्धयति। द्यामग्रेणास्तम्भीरान्तरिक्षं मध्येनाप्राः पृथिवीमपरेणादृंहीरिति। वज्रो वै यूपः। एषां लोकानां विधृत्यै। ता वां वास्तूनीति वैष्णव्यावहरति। वैष्णवो वै यूपः। स्वयैवैनं देवतयावहरति। विष्णोः कर्माणि पश्यतेति वैष्णव्या कल्पयति। वैष्णवो वै यूपः। स्वयैवैनं देवतया कल्पयति। अग्निं प्रत्यग्निष्ठां कुर्यात्। तेजो वा अग्निर्यजमानो ऽग्निष्ठाः। तेजसैव यजमानं समर्धयति। यं द्विष्यात्तस्येत्थं वेत्थं वा नमयेत्। तेजसैवैनं व्यर्धयति। ब्रह्मवनिं त्वा क्षत्रवनिमित्याशिषमेवाशास्ते। ब्रह्म दृंह क्षत्रं दृंहेत्याशिषमेवास्मा आशिष्टां दृंहति। तद्विष्णोः परमं पदमिति वैष्णव्योदीक्षते। वैष्णवो वै यूपः। स्वयैवैनं देवतयोदीक्षते ॥३॥

अर्धं वेद्यां यूपावटस्य कुर्यादर्धं बहिर्वेदि परिमितस्य चापरिमितस्य चावरुद्ध्यै। नाविरूपरस्य कुर्यात्। यदाविरूपरस्य कुर्याद्गर्तमित्स्यात्। नापरिवीतमवसृजेत्। यदपरिवीतमवसृजेत्क्षोधुको यजमानो भवति नग्नंभावुको ऽध्वर्युः। ऊर्ग्वै रशना। मध्यं प्रतिपरिव्ययति। ऊर्जमेव मध्यतो दधाति यजमाने च प्रजासु च। तस्मान्मध्यतः प्रजा ऊर्गूर्जयति। अरशनं मिनुयाद्यं द्विष्यात्तस्य। ऊर्ग्वै रशना। ऊर्जैवैनं व्यर्धयति। ऊर्ध्वामुदूहेदवाचीं यं द्विष्यात्तस्य। ऊर्ग्वै रशना। ऊर्जैवैनं व्यर्धयति। उपरि दूरे परिव्ययेद्यदि कामयेत वर्षेदिति। अद्भ्यो वा एष श्रोषधिभ्यो वर्षति यर्हि वर्षति। श्रोषधयो रशना। श्रोषधीरेव [नेदीयो वृष्ट्याः करोति ताजक्प्रवर्षति। अधो दूरे परिव्ययेद्यदि कामयेत न वर्षेदिति। अद्भ्यो वा एष श्रोषधिभ्यो वर्षति यर्हि वर्षति। श्रोषधयो रशना। श्रोषधीरेव] दवीयो वृष्ट्याः करोति चिरं प्रवर्षति। परिवीरसि परि त्वा दैवीर्विशो व्ययन्तामिति। दैवीर्वा एता विशो यदोषधयः। श्रोषधयो रशना। यजमानो यूपः। यजमानमेव प्रजा अभिसंमुखीः करोति। परीमं रायो मनुष्यमिति। पशवो वै रायः। पशुभिरेवैनं समर्धयति। अन्तरिक्षस्य सानूपेषेति स्वरुमुपोहति। अन्तरिक्षदेवत्यो ह्येष एतर्ह्युपरीवास्माल्लोकादधो ऽमुष्मात्। स्वयैवैनं देवतयोपोहति। पितॄणामुपरं मनुष्याणामूर्ध्वमुपरादोषधीनां रशनां प्रति विश्वेषां देवानामूर्ध्वं रशनाया इन्द्रस्य चषालं साध्यानामतिरिक्तम्। एवमिव वा एषु लोकेषु पितरो मनुष्या देवाः। सर्वदेवत्यो यूपः। सर्वाभिरेवैनं देवताभिः समर्धयति। अग्रेरर्धादुपनतं यूपस्य कुर्याद्बहिष्टान्निर्णतम्। अग्रेर्वा अर्धादुपनतेन यजमानाय लोकं करोति बहिष्टान्निर्णतेन भ्रातृव्यं यज्ञान्निर्णुदते। यज्ञेन वै देवाः स्वर्गं लोकमायन्। ते ऽकामयन्तेमं नो लोकमन्यो नानुप्रजानीयादिति। ते दिशो ऽयोपयन्। यद्दिशो ऽयोपयंस्तद्यूपस्य यूपत्वम्। ते ऽमुं लोकं गत्वा व्यतृष्यन्। ते

ऽविदुरमुतःप्रदानाद्वा इहाजगामेति। त एतं पुनः प्रायच्छन्। तेनार्ध्नुवन्। एष वै यज्ञस्य तन्तुरेष उत्तमपदी। यथा वै मयूखात्तन्तुं तायत एवमतो यज्ञस्तायते। तं ह स्म वा एतं पुरावृश्चैव जुह्वति। यत्स्वरुं जुहोत्येतस्यैव निष्क्रीत्यै। सो ऽस्य निष्क्रीतः प्रीतः स्वगाकृत इमांल्लोकानुपतिष्ठते। द्यां ते धूमो गच्छत्वन्तरिक्षमर्चिः पृथिवीं भस्म स्वाहेतीमानेवैनं लोकान्गमयति ॥४॥

साध्या वै नाम देवा आसन्पूर्वे देवेभ्यः। तेषां न किंचन स्वमासीत्। ते ऽग्निं मथित्वाग्नौ जुह्वत आसत। तस्माद्धव्यो पशवो ऽजायन्त। तस्मादाग्नेयाः सर्वे पशव उच्यन्ते। यदग्निं मथित्वा पशुमालभते प्रजातमेवैनमालभते। अथो यथापूर्वमेव करोति। तदाहुः पशुमालभ्याग्निर्मथितव्य इति। अग्निः सर्वा देवताः। सर्वा एव देवताः पशवः। यद्वपया प्रातःसवने चरन्ति तेन आलब्धाय जनयति। पशुना सर्वाणि सवनानि पशुमन्ति वीर्यावन्ति कर्तव्यानि। यद्वपया प्रातःसवने चरन्ति तेन तत्पशुमद्वीर्यावत्। यत्पुरोडाशेन मध्यन्दिने चरन्ति तेन तत्पशुमद्वीर्यावत्। यदितरेण पशुना तृतीयसवने चरन्ति तेन तत्पशुमद्वीर्यावत्। सर्वाण्यस्य सवनानि पशुमन्ति वीर्यावन्ति भवन्ति य एवं वेद। सर्वाभ्यो वा एष दिग्भ्य ऋद्ध्या आलभ्यते यत्पशुः। यत्प्राचीनं प्रीणन्ति देवलोकं तेनाभिजयति। यदुदञ्चमाप्रीतं नयन्ति मनुष्यलोकं तेनाभिजयति। यत्प्रतीचीनं समवत्तं हरन्त्येतां तेन दिशमभिजयति। यद्दक्षिणतः परिहृत्यावद्यन्ति पितृलोकं तेनाभिजयति। यदूर्ध्वास्तिष्ठञ्जुहोति स्वर्गं तेन लोकमभिजयति॥

पशुना वै देवाः स्वर्गं लोकमायन्। ते शरीरमधून्वत। स्वर्गो वपा। यद्वपया प्रातःसवने चरन्ति स्वर्गस्य लोकस्य समष्ट्यै। यदितरेण पशुना तृतीयसवने शरीरस्य निष्क्रीत्यै। यार्द्रा बहुपर्णा तयोपाकुर्यात्। श्रोषधयो वै वनस्पतयः पशव श्रोषधयः। पशुभिरेवैनं समर्धयति। या शुष्कापर्णा तयोपाकुर्याद्यं द्विष्यात्तस्य। श्रोषधयो वै वनस्पतयः पशव श्रोषधयः। पशुभिरेवैनं व्यर्धयति। घोरो वा अन्यो वज्रः शिवो ऽन्यः। यः शुष्कः स घोरो य आर्द्रः स शिवः। य एव शिवस्तेनोपाकरोति। बर्हिषोपाकरोति। पशवो वै बर्हिः। पशुभिरेवास्मै पशूनुपाकरोति। उपावीरसीत्युप ह्येषो ऽवति। पशूनेवास्मा उपाकरोति। वह्नीनुशिज इति। ऋत्विजो वै वह्नय उशिजः। ऋत्विग्भ्य एवैनानुपाकरोति। उप देवान्दैवीर्विशः प्रागुरिति। दैवीर्वा एता विशो यत्पशवः। पशूनेवास्मा उपाकरोति। बृहस्पते धारया वसूनीति। ब्रह्म वै बृहस्पतिः। ब्रह्मणः प्रजाः प्रजायन्ते। ब्रह्मणैवैनाः प्रजनयति। देव त्वष्टर्वसु रण्वेति। त्वष्टा वै रूपाणां विकर्ता। सो ऽस्मै रूपाणि विकरोति। रेवती रमध्वमिति। ब्रह्म वै बृहस्पतिः पशवो रेवतीः। ब्रह्मणैवास्मै पशून्यच्छति। अग्नेर्जनित्रमसीति। अग्नेर्ह्येतज्जनित्रम्। वृषणौ स्थ इति। न ह्यमुष्काः प्रजा प्रजायन्ते। प्रजननाय। उर्वश्यस्यायुरसि पुरूरवा असीति। माता वा उर्वश्यायुर्गर्भः पिता पुरूरवा रेतो घृतम्। घृतेनारणी यत्समनक्ति मिथुन एव रेतो दधाति। गायत्रं छन्दो ऽनुप्रजायस्व। त्रैष्टुभम्॥ जागतमिति। एतावन्ति वै छन्दांसि। छन्दोभी रेतो हितं प्रजायते। छन्दोभिरेवास्मै रेतो हितं प्रजनयति। दक्षिणा वर्तयति। एषा वा आदित्यस्य प्रजनिष्णुस्तनूः। तामेवानुप्रजायते। अग्नौ वा एतर्हि यजमानमभिसंधत्तः। भवतं नः समनसाविति समनसावेवैनौ करोति। मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसावित्यात्मनो ऽहिंसायै। शिवौ भवतमद्य न इति शिवावेवैनौ कुरुते। रक्षसां वा एते ऽनवजयाय परिधीयन्ते यत्परिधयः। यदुपर्युपरि प्रहरेद्रक्षोभ्यस्तीर्थं कुर्यात्। संधिना वा प्रहरत्यग्रेण वा। अतीर्थेनैव स्रुवेण जुहोति। संजग्मानाभ्यामेवाभ्यां भागधेयमपिदधाति ॥५॥

सावित्रीमन्वाह। सवितृप्रसूत एवैनं प्रजनयति। एकदेवत्यामन्वाह। एकधैवैनं प्रजनयति। यद्द्विदेवत्यामनुब्रूयाद्भ्रातृव्यमस्मै द्वितीयं जनयेत्। द्यावापृथिव्यामन्वाह प्रजानां प्रजातानां परिगृहीत्यै। न धूमवतीमनुब्रूयात्। इन्द्रो वै यद्वृत्रमहंस्तस्य यत्रयत्र व्यृद्धमासीत्ततो धूम उदायत। व्यृद्धाद्वा एष जातः। व्यर्धुकमस्मै भवति। यदि मथ्यमानो न प्रजायेत रक्षोघ्नीमनुब्रूयाद्रक्षसामपहत्यै। अनवानमनुब्रूयात्। अवानं वा अनु यज्ञं रक्षांसि जिघांसन्ति। रक्षोभ्य एवातीर्थं करोति। गायत्रीं ब्राह्मणस्यानुब्रूयात्। गायत्रो हि ब्राह्मणः। त्रिष्टुभं राजन्यस्य। त्रैष्टुभो हि राजन्यः। जगतीं वैश्यस्य। जागतो हि वैश्यः। यथाछन्दसमेव॥

ऋतस्य त्वा देवहविः पाशेन देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते। सवितृप्रसूत एवैनां देवताभिरादत्ते।

प्रतिमुञ्चामीति। यो वै यज्ञियो मेध्यः स ऋतस्य पाशः। तेनैवैनमालभते। अमुष्मै जुष्टमिति यस्या देवताया आलभते तस्या एनं जुष्टं करोति। धर्षा मानुषा इति। वज्रो वै यूपः पशवो मानुषाः। वज्रेणैवास्मै पशून्यच्छति। ऋक्षो वा एष तष्टो ऽमेध्यः। यत्पशुं नियुनक्ति मेध्यमेवैनं यज्ञियं करोति। पुरस्ताद्वै पशवो मेधमुपतिष्ठन्ते। देवता एतस्मिन्प्राणाः। यत्पुरस्तात्प्रत्यञ्चमाप्रीणन्ति देवतानामेवैनमाप्रीणन्ति। अद्भ्यस्त्वौषधीभ्य इति। अद्भ्यो वा एष श्रोषधिभ्य आलभ्यते यत्पशुः। अद्भ्य एवैनमोषधिभ्यः प्रोक्षति। अनु त्वा माता मन्यतामनु पितेति। पिता च ह्येतस्य माता चानुमन्तारौ। आपो वै सर्वा देवताः। सर्वदेवत्यः पशुः। सर्वाभिरेवैनं देवताभिः समर्धयति। बहु वा एषो ऽमेध्यमेवैनमयज्ञियं निगच्छति यत्पशुः। आपो मेध्या यज्ञियाः। यदद्भिः प्रोक्षति मेध्यमेवैनं यज्ञियं करोति। अपां पेरुरसीत्यप उपगृह्णाति। यान्यन्तरतो ऽवदानानि तानि तन्मेध्यानि करोति। स्वात्तं हव्यं देवेभ्यो घृतवदित्युरः प्रत्युपोक्षति। यान्यधस्तादवदानानि तानि तन्मेध्यानि करोति। सर्वत उपोक्षति। सर्वत एवैनं मेधेन समर्धयति। शिरो वा एतद्यज्ञस्य यदाघार आत्मा पशुः। यदाघारमाघार्य पशुं समनक्ति शिर एव यज्ञस्यात्मन्प्रतिदधाति। सं ते वायुः प्राणेन गच्छतामिति वायुमेवास्य प्राणं गमयति। सं यजत्रैरङ्गानीति। देवता यजत्राः। देवता एवास्याङ्गानि गमयति। सं यज्ञपतिराशिषेत्याशिषैव यजमानं समर्धयति ॥६॥

ऋत्विजो वृणीते। छन्दांसि वा ऋत्विजः। छन्दांस्येव तद् वृणीते। तैरस्य वृतैर्युक्तैर्वषट्काराः पुरा युज्यन्ते। होतारं वृणीते। जगतीं तच्छन्दसां वृणीते। अग्नीधं वृणीते। पङ्क्तिं तच्छन्दसां वृणीते। अध्वर्युं वृणीते। अतिच्छन्दसं तच्छन्दसां वृणीते। अन्तरा होतारं चाध्वर्युं चाग्नीधं वृणीते। तस्मादग्निर्मध्यत श्रोषधीः प्रविष्टः। यदुत्तमः संयजति तस्मादुपरिष्टान्मथ्यमानो जायते। मैत्रावरुणं वृणीते। गायत्रीं तच्छन्दसां वृणीते। ब्राह्मणाच्छंसिनं वृणीते। त्रिष्टुभं तच्छन्दसां वृणीते। पोतारं वृणीते। उष्णिहं तच्छन्दसां वृणीते। नेष्टारं वृणीते। ककुभं तच्छन्दसां वृणीते॥

पश्चाजमिव वा एतच्छन्दो यदनुष्टुप्। पश्चाजेवैषा होत्रा यदच्छावाक्या। तस्मादच्छावाकमुपैव ह्वयन्ते न वृणते। अथैता आप्रियः। प्रजापतिः प्रजाः सृष्ट्वा स रिरिचान इवामन्यत। स एता आप्रीरपश्यत्। ताभिरात्मानमाप्रीणीत। यज्ञः प्रजापतिर्यज्ञात्मा यजमानः। यदेताः पूर्वार्धे यज्ञस्य क्रियन्ते मुखत एव यजमानमाप्रीणाति। प्रयाजान्यजति। प्राणा वै प्रयाजाः। प्राणानेव तत्प्रयजति। तत्प्रयाजानां प्रयाजत्वम्।ताननुयाजैरन्वाप्रीणाति। तदनुयाजानामनुयाजत्वम्। अनवानमाप्रीणीयाद्यं कामयेत सर्वमायुरियादिति। प्राणा वै प्रयाजाः। अविच्छिन्नानेवास्मिन्प्राणान्प्रतिदधाति सर्वमायुरेति। आत्मा वै पशोर्वपात्मा यजमानस्याप्रीः। यदुत्तमाप्रीर्वपां परिशय आत्मैवात्मानं परिशये यज्ञस्य संतत्या अविच्छेदाय। एकादश प्रयाजा एकादशानुयाजा एकादशोपयजः। एतावतीर्वै देवताः। सर्वदेवत्यः पशुः। सर्वाभिरेवैनं देवताभिः समर्धयति।

त्रयस्त्रिंशद्वै देवाः सोमपास्त्रयस्त्रिंशदसोमपाः। अष्टौ वसव एकादश रुद्रा द्वादशादित्या वषट्कारश्च प्रजापतिश्च ते सोमपाः। प्रयाजा अनुयाजा उपयजस्ते ऽसोमपाः। तस्मात्ते बहिर्यज्ञं क्रियन्ते। सोमेनैव तद्देवान्सोमपान्प्रीणाति पशुनासोमपान्। ते ऽस्योभये प्रीता यज्ञे भवन्ति। एतद्ध वा उवाच श्यापर्णः सायकायनो ऽथाहं कैशिनं यत्रैनमदः सोमान्नयति यदि वै मा सोमान्नेष्यस्युभयैर्मा देवैः सह नेष्यसि सोमपैश्चासोमपैश्च। विदेवस्ते यज्ञो ऽवहास्यते। अथो यद्यञ्चं मा नेष्यन्ति ततस्त्वाभीत्य ज्यास्यन्तीति। ते मीमांसित्वेतो नो भयं नास्तीति दक्षिणा प्रत्यञ्चं निन्युः। ततः कुन्तयः पञ्चालानभीत्य जिनन्ति। य एवंविदं सोमान्नयत्युभयैरेनं देवैः सह नयति सोमपैश्चासोमपैश्च। विदेवो ऽस्य यज्ञो ऽवहीयते। अथो यद्यञ्चमेनं नयन्ति तत एनमभीत्य जिनन्ति ॥७॥

देवाश्च वा असुराश्च समावदेव यज्ञे ऽकुर्वत। यदेव देवा अकुर्वत तदसुरा अकुर्वत। ते देवा एतमुपांशुमपश्यन्। त एतस्मिन्यज्ञं संस्थाप्यमपश्यन्। त एतस्मिन्नेव यज्ञं समस्थापयन्। अष्टौ कृत्वो ऽभ्युषुण्वन्। गायत्रीं तच्छन्द आप्नुवन्। एकादश कृत्वः। त्रिष्टुभं तत्। द्वादश कृत्वः। जगतीं तत्। त्रिर्व्यगृह्णन्। सवनान्येव तदाप्नुवन्। ते देवा यावानेव यज्ञस्तं परिगृह्योपोदतिष्ठन्होतुम्। ते ऽसुरा अपश्यञ्जुह्वति वै देवा इति। तान्वज्रमुद्यत्याभ्यपतन्। ते देवा

अन्तर्यामेणान्तर्दधात्येभ्यो लोकेभ्यः। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वानुपांशुं जुहोति यश्चैवं विद्वानुभाभ्यो एव लोकेभ्यो भ्रातृव्यमन्तर्धत्ते भवत्यात्मना परास्य भ्रातृव्यो भवति। अथ ह स्माहारुण औपवेशिः किमु स यजेत य उपांशौ यज्ञं संस्थाप्य न विद्यादिति। षट् कृत्वो ऽभिषुणोति। गायत्रीं तच्छन्द आप्नोति। एकादश कृत्वः। त्रिष्टुभं तत्। द्वादश कृत्वः। जगतीं तत्। त्रिर्निगृह्णाति। सवनान्येव तदाप्नोति। उपांशावेवैतद्यज्ञं संस्थाप्य तेन सौम्येनारिष्टेनाकालेन प्रचरति। अष्टावष्टावभिषुणुयाद्ब्रह्मवर्चसकामस्य। अष्टाक्षरा गायत्री। गायत्रीमेव यज्ञमुखे ऽधि विधातयति। गायत्र्यामेवैतत्तेजसि स्वे योनौ स्वर्गे लोके यज्ञमुखं तायते। मुख्यो भवति य एवं वेद। नोपयामगृहीतो ऽसीति ब्रूयात्। इयं वा उपयामः। अनया प्राणानपिहन्यात्। न पवित्रं वितन्वन्ति। अन्तरिक्षं वै पवित्रम्। अन्तरिक्षेण प्राणान्परिगृह्णीयात्प्रमीयेत। अयं वाव यः पवते स प्राणः। तस्येदमनप्राहं प्राणिमः। यन्नोपयामगृहीतो ऽसीत्याह न पवित्रं वितन्वन्ति। तस्मादयमपरिगृहीतः। कामामित्थं चेत्थं च पवते। तस्मात्कामं प्राणिमः। प्राणपवित्रो वा उपांशुः। प्राणैरेवैनं पावयति। षडंशून्परिगृह्णाति। तस्मात्षट्प्राणाः। द्वंद्वं पावयति। तस्मात्प्राणा द्वंद्वम्। उपांशुसवनादुपांशुं निगृह्णाति। प्राणो वा उपांशुसवनः प्राण उपांशुः। प्राणादेव प्राणं निगृह्णाति। उत्तर उपांशुसवनो भवत्यधो ऽशवः। प्राणो वा उपांशुसवनः प्रजा अशवः। प्रजास्वेव प्राणं [दधाति।] तस्मात्प्राण उत्तमः ॥८॥

इति कपिष्ठलकठसंहितायामेकचत्वारिंशत्तमो ऽध्यायः॥

वाचस्पतये पवस्वेति वाच आधिपत्याय पवस्वेत्येवैतदाह। तस्मादेतया कामं वदामश्च प्र चानिमः। प्रजापतिर्वा इदमासीत्। तस्य वाग्द्वितीयासीत्। तां मिथुनं समभवत्। सा गर्भमधत्त। सास्मा [दपाक्रामत्। सेमाः प्रजा असृजत। सा प्रजापतिमेव पुनः प्राविशत्। वाचस्पतये पवस्वेति। एतस्मा] देव मिथुनात्प्रजया च पशुभिश्च प्रजायते। वाचस्पतये पवस्वेति। ब्रह्म वै वाचस्पतिः। ब्रह्मणैवैनं पावयति। वृष्णो अंशुभ्यां गभस्तिपूत इति। इन्द्रो वै वृषा। तस्य हस्तौ गभस्ती। ताभ्यामेवैनं [पावयति। देवो देवानां पवित्रमसीति देवताभ्य एवैनं निदिशति। मधुमतीर्न इष इति सोमेन हि सोमं पुनन्ति। येषां भागो ऽसीति देवताभ्य एवैनं निदिशति।] मधुमतीर्न इषस्कृधीति। देवता वा इषः। देवेभ्य एवैनं मधुमन्तं करोति। स्वांकृतो ऽसीति प्राणमेव स्वं कुरुते। उर्वन्तरिक्षं वीहीति। अन्तरिक्षदेवत्यो ह्येष एतर्हि। विश्वेभ्य इन्द्रियेभ्य इति देवेषु चैव मनुष्येषु च प्राणं दधाति। मनस्त्वाष्ट्विति। मनसा हि प्राणो धृतः। स्वाहा त्वा सुभो सूर्यायेति। सोमो वै सुभूः। अमुष्मिन्नादित्ये देवानां प्रियास्तन्वः। ता एव तर्पयति। अथो स्वाहाकारेणैवास्मिन्नाहुतीः श्रीणाति॥

सर्वहुतं जुहोति। तस्मात्सर्वाङ् प्राणः। [ऋजुस्तिष्ठञ्जुहोति। पुरुषेण] वै यज्ञः संमितः। प्राणापानाभ्यां पुरुषः संततः। प्राणापानयोरसंभेदाय। नाध्वर्युर्विह्वलति य एवं वेद। उत्तरादुपांशुं जुहुयाद्दक्षिणतो ऽन्तर्यामम्। देवरथो वा एष यद्यज्ञः। तस्यैतौ रश्मी यदुपांश्वन्तर्यामौ। देवरथस्यैव पुरस्ताद्रश्मी विहरति संवत्सरस्य क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्यै। तामनुकृति मनुष्यरथस्य रश्मी विह्रियेते। ऋजू होतव्यौ प्राणानामव्यतिहाराय। ऊर्ध्वमुन्मृज्याद्यदि कामयेत न वर्षेदिति। अमुत्रैव वृष्टिं परिगृह्णाति। अवाचीनमवमृज्याद्यदि कामयेत वर्षेदिति। या वा इतराहुतिरुदयते सामुतो वृष्टिं च्यावयति। अनयैवाहुत्या दिवो वृष्टिं निनयति।

देवेभ्यस्त्वा मरीचिपेभ्य इति परिधौ निमार्ष्टि। प्राणा वै देवा मरीचिपाः। तानेव प्रीणाति। अथो परिधीनामेवैष सोमपीथः। अन्तरतो निमार्ष्टि। तस्मात्प्राणा अन्तरतः। वि वा एतद्यज्ञं छिनत्ति यत्पुराभिषोतोः संस्थां गमयति। यदंशूननभिषुतानपिसृजति यज्ञस्य संतत्या अविच्छेदाय। षडसंश्लिष्टानंशूनपिसृजति। तस्मात्षट् प्राणाः। द्वंद्वं पावयति। तस्मात्प्राणा द्वंद्वम्। आर्द्राः सन्तो ऽसंश्लिष्टा भवन्ति। तस्मात्प्राणा आर्द्राः सन्तो ऽसंश्लिष्टाः। यो ह वै सोमस्य सोमपीथं वेद न सोमपीथाच्छिद्यते नास्य प्रजा। यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहेति। एष वै सोमस्य सोमपीथः। सोममेवैतत्सोमस्य तर्पयति। न सोमपीथाच्छिद्यते नास्य प्रजा य एवं वेद। यद्यभिचरेद् देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इत्याददीत। अहर्निणो मदिरस्य मदे मृषासावस्त्वय त्वा

होष्यामीति मृधैवैनं करोति। सर्वदेवत्यो वै सोमः। सर्वा वा एतर्ह्येतस्मिन्देवता आशंसन्ते मह्यं होष्यति मह्यं होष्यतीति। देवता एवैनमाहुतिमभीप्सन्तीरुद्दहन्ति। आ तमितोस्तिष्ठति। प्राणस्यैवास्यान्तं गच्छति। यद्यजुर्वदति देवेभ्य एवैनमावृश्चति। उपांशुनाभिचरति। प्राणो वा उपांशुः। प्राणेनैवास्य प्राणमभिचरति ताजक्प्रधन्वति ॥१॥

देवा वै सोमायाभिषुताय पात्रं नाविन्दन्त येनेमं विगृह्णीमहीति। त इमामेव देवपात्रमपश्यन्। तमनयैव व्यगृह्णत। इयं वाव देवपात्रम्। अस्या स्थालीं कुर्वन्त्यस्या वायव्यानि। प्र श्रेयसः पात्रमाप्नोति य एवं वेद। ब्राह्मणं पात्रे न मीमांसेत। तद्व्रतम्। उपयामगृहीतो ऽसीति। इयं वा उपयामः। यदत्र स्कन्दत्यनया तद्यतम्। नास्य सोम स्कन्दति य एवं वेद। उपयामगृहीतो ऽसीति। उपयामगृहीता ह्यतः सोमा भवन्ति। पवित्रं वितन्वन्ति। पवित्रपूता ह्यतः सोमा भवन्ति। स्वर्भानुर्वा असुरः सूर्यं तमसाविध्यत्। स न व्यरोचत। तस्माद्देवास्तमो ऽपालुम्पन्। यत्प्रथममपालुम्पन्सावि कृष्णाभवत्। यद्द्वितीयं सा फलू यत्तृतीयं सा बलक्षी। तस्मात्तस्याः पवित्रं कुर्वन्ति। आदित्यस्यैवैनं तन्वा पावयति। अन्तर्यच्छ मघवन्पाहि सोममित्येभ्य एव लोकेभ्यो भ्रातृव्यमन्तर्धत्ते। मधुमतीर्न इषस्कृधीति। देवता वा इषः। देवेभ्य एवैनं मधुमन्तं करोति। स्वांकृतो ऽसीत्यपानमेव स्वं कुरुते। उर्वन्तरिक्षं वीहीति। अन्तरिक्षदेवत्यो ह्येष एतर्हि। विश्वेभ्य इन्द्रियेभ्य इति देवेषु चैव मनुष्येषु चापानं दधाति। मनस्त्वाष्ट्विति। मनसा ह्यपानो धृतः। स्वाहा त्वा सुभो सूर्यायेति। सोमो वै सुभूः। अमुष्मिन्नादित्ये देवानां प्रियास्तन्वः। ता एव तर्पयति। अथो स्वाहाकारेणैवास्मिन्नाहुतीः श्रीणाति॥

सूदि कुर्यादन्तर्यामपात्रम्। ऊर्वं सोमरसो ऽन्तरिक्षमन्तर्यामः। अन्तरिक्ष एव रसं दधात्यूर्जं पशुषु। उपांश्वन्तर्यामौ वै पशवो ऽनुप्रजायन्त इतरान्ग्रहानन्वन्याः प्रजाः। तावसन्नौ जुहोति। तस्मादसन्नाः पशवः सददि प्रजायन्ते। तस्मात्सद्यो जाताः पशवः प्रतितिष्ठन्ति। संवत्सरे पुरुषः। प्राणाय त्वेत्युपांशुपात्रं सादयति। व्यानाय त्वेत्युपांशुसवनम्। अपानाय त्वेत्यन्तर्यामपात्रम्। व्यानेन वा इमौ प्राणापानौ विधृतौ प्राङ् च प्रत्यङ् च न क्षीयेते। नायमूर्ध्व उत्क्रामति नेतरो ऽवाङ् संक्रामति। व्यानमेव मध्यतो दधाति प्राणापानयोर्विधृत्यै॥

शृङ्गमुपांशुरेतो ऽन्तर्याम इन्द्रियं प्रजाः सोमपीथः। एतौ ह स्म वै तद्रजनः कौणेयो ग्रहौ धयन्मन्यते यच्छृङ्गं धयति। यदेतौ पूर्वार्धे यज्ञस्य क्रियेते मिथुनमेव यज्ञमुखे दधाति प्रजननाय। तस्मादाहुः प्राणापानौ वै प्रजा अनुप्रजायन्त इति। पुरुषेण वै यज्ञः संमितः। प्राणापानाभ्यां पुरुषः संततः। यदेते प्रातःसत्रे आ तृतीयसवनाच्छ्यते प्राणापानाभ्यामेव यज्ञं संतनोति। तस्मात्पुरुषात्सुप्तात्प्राणापानौ नापक्रामतः। ते पुनस्तृतीयसवने प्रयुज्येते। तस्मात्सुप्त्वा प्रबुध्यते। तस्माद् द्वाववाञ्चौ प्राणौ ॥२॥

प्राण उपांशुरपानो ऽन्तर्यामो वागैन्द्रवायवः। यदुपांश्वन्तर्यामावैन्द्रवायवो ऽनुगृह्यते प्राणापानयोरेव वाचमुपरिष्टाद्दधाति। तस्मात्प्राण्यापान्य पुरुषो वाचं वदति। देवा वै प्रातःसवनमुद्यमं नाशक्नुवन्। तृतीयसवने तर्हि वायुरासीत्। तं देवाः प्राञ्चं पर्यहरन्। प्राणो वायुरैन्द्रो यज्ञः। यदैन्द्रवायवः प्रातःसवने गृह्यते प्राणेनैव यज्ञं परिगृह्य पुरस्तादुद्यच्छन्ते। वायव्यो वा एष पुरासीत्। सा वाक्सृष्टा न व्यावर्तताध्वनदेव। स इन्द्रो ऽब्रवीन्मह्यमत्रापि गृह्यतामहमेतां व्यावर्तयिष्यामीति। तत एतमैन्द्रवायवमगृह्णन्। सेयं वागिन्द्रियेण व्यावृत्ता वदति। स एष सोमो वाचो व्यावृत्त्यै गृह्यते। व्यावृत्तं पापीयसा वदति य एवं वेद। प्रजानां सृष्टानां प्राणापानौ समभिद्येताम्। ता न प्राण्यापानमशक्नुवन्नापान्य प्राणितुम्। स इन्द्रो ऽब्रवीन्मह्यमत्रापि गृह्यतामहमेतौ प्राणापानौ विदधिष्या इति। तत एतमैन्द्रवायवमगृह्णन्। वायव इन्द्रवायुभ्यामनुब्रूहीतीन्द्रं मध्ये करोति वायुमभितः प्राणापानयोर्विधृत्यै। इन्द्रियं वै व्यानः। व्यानेन वा इमौ प्राणापानौ विधृतौ प्राङ् च प्रत्यङ् च न क्षीयेते। नायमूर्ध्व उत्क्रामति नेतरो ऽवाक्संक्रामति। व्यानमेव मध्यतो दधाति प्राणापानयोर्विधृत्यै॥

त्रिर्विगृह्णाति। तस्मात्त्रिर्वाग्वदति शनकैरुच्चैरथ सूच्चैः। देवा वै वायुमब्रुवंस्त्वया मुखेन वृत्रं हनामेति। सो ऽब्रवीद्वार्यं वृणै मदग्रा एव ग्रहा गृह्यन्ता इति। तस्माद्वाय्वग्रा ग्रहा गृह्यन्ते। वार्यवृता ह्यस्य। स इन्द्रो ऽब्रवीन्मह्यमत्रापि

गृह्यतामथ त्वै तरिष्यामह इति। तत एतमैन्द्रवायवमगृह्णन्। ततो वृत्रमघ्नन्। स एष सोमो वार्त्रघ्नो विजित्यै गृह्यते। सोमो वै वृत्रः। स हतो ऽपूयत्। ते देवा वायुमब्रुवन्निमं नो विवाहीति। सो ऽब्रवीद्वार्यं वृणै मद्देवत्यान्येव पात्राण्युच्यान्ता इति। ते ऽब्रुवन्। तस्माद्गन्धमपाहन्। स एव पशौ प्रमीतः। तस्मात्तस्मात्रापिगृह्यम्। सोमस्य हि स राज्ञो गन्धः। नैनं राजयक्ष्मो विन्दति य एवं वेद। तस्मात्कुले विषजन्ति। तस्मादपि तृतीयं वायोः पात्रम्। अथ वायव्यान्युच्यन्ते। वार्यवृतानि ह्यस्य ॥३॥

नाना वा एतौ पुरा सोमावगृह्णन्मित्राय च वरुणाय च। ताः प्रजा अशान्ता अविधृता अन्यान्यां प्रतीरचरन्। ते देवा अब्रुवन्सहेमं गृह्णाम मित्रेण वरुणं शमयाम वरुणेन मित्रमिति। ततो वा एतं सहागृह्णन्। ते मित्रेणैव वरुणमशमयन्वरुणेन मित्रम्। ता इमाः प्रजा मित्रेण शान्ता वरुणेन विधृताः। यन्मैत्रावरुणो गृह्यते क्लृप्त्या एव विधृत्यै। देवा वै मित्रमब्रुवन्वृत्रं हनामेति। नेत्यब्रवीन्मित्रो ऽहमस्मि न हिनस्मीति। हनामैवेत्यब्रुवन्। सो ऽब्रवीद्वार्यं वृणै पयसा मे सोमं श्रीणन्निति। तस्मात्पयसा मैत्रावरुणं श्रीणन्ति। वार्यवृतं ह्यस्य। ततो वृत्रमघ्नन्। तस्माद्राजन्येनाध्यक्षेण वैश्यं घ्नन्ति। तं मित्रः सक्रूरमकरिति वरुणो ऽगृह्णादप पशवो ऽक्रामन्। स मित्रो वरुण एवानाधत्त। सो ऽब्रवीत्सहानेव सोमं गृह्णामथ त्वातो मोक्ष्यामीति। ततो वा एतं सहागृह्णन्। तेनैनं वरुणादमुञ्चन्। यन्मैत्रावरुणो गृह्यते निर्वरुणत्वाय। पशवो वै पयः। पशूनां हि पयः। यत्पयसा मैत्रावरुणं श्रीणाति पशुभिरेवैनं समर्धयति। असोमो वा एष इत्याहुर्यदध्य एतः पय एव सोम इति। यत्पयसा मैत्रावरुणं श्रीणाति सोममेवैनं करोति। अथो यदेवास्याभिषुण्वन्तो घ्नन्ति यत्क्रूरं कुर्वन्ति तच्छमयति। शृतेन श्रीणाति। मैत्रं वै शृतं वारुणं प्रतिधुक्। स्वेनैवैनौ भागधेयेन समर्धयति। मैत्रो ब्राह्मणो वारुणो राजन्यः। यदेष मैत्रावरुणो गृह्यते तस्माद्ब्रह्मपुरोहितं क्षत्रम्॥

यज्ञस्य वै शिरो ऽच्छिद्यत। अथ तर्ह्यश्विनावसोमपौ भिषजौ देवानामास्ताम्। तौ देवा अब्रुवन्भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रतिधत्तमिति। तावब्रूतां वार्यं वृणावहै सोमपीथो नौ देवेष्वस्तु ग्रहो नौ गृह्यतामिति। तौ देवा बहिष्पवमानेन पावयित्वा ताभ्यां शुचिभ्यां मेध्याभ्यां पूताभ्यां ग्रहमगृह्णन्। तस्मात्स्तुते बहिष्पवमान आश्विनो गृह्यते। तस्माद्ब्राह्मणो बहिष्पवमानमासीत। पवित्रं हि तत्। तस्माद्ध द्विष्यन्तं बहिष्पवमानात्परिबाधेत। पवित्रादेवैनं परिबाधते। तौ देवानुपावर्तमानौ तयोर्याभिषज्या तनूरासीत्तां त्रेधा विन्यदधातामग्नौ तृतीयं ब्राह्मणे तृतीयमप्सु तृतीयम्। य कामयेतामयाविनं जीवेदित्यप्रेत्ये ब्राह्मणाय प्रोच्यापः परिब्रूयात्। एतावद्वै भेषजम्। यावदेव भेषजं तदस्मै करोति जीवति सर्वमायुरेति न पुरायुषः प्रमीयते ॥४॥

प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते। तस्मात्प्राणा एकनामानस्ते द्विपात्रा हूयन्ते। तस्मात्प्राणा द्वंद्वम्। येन यजुषा प्रयच्छति तेन प्रतिगृह्णाति प्राणानां संतत्यै प्रतिज्ञात्यै। नानुवषट्करोति। यदनुवषट्कुर्यात्प्राणान्संस्थापयेत्प्रमीयेत। यन्नानुवषट्करोति तस्मात्प्राणा असंस्थिता आ च परा च चरन्ति। द्विदेवत्याः पूर्वे भक्षयितव्या 3 इडोपहूया 3 इति मीमांसन्ते। इडैव पूर्वोपहूया यज्ञस्य यथापूर्वत्वाय। प्राणा वै द्विदेवत्याः पशव इडा। यदेवं कुर्यात्पशुभिः प्राणानन्तरियात्प्रमीयेत। द्विदेवत्या एव पूर्वे भक्षयितव्याः। अन्तरे वै प्राणाः परे पशवः। प्राणानेवात्मन्धित्वा पशूनुपह्वयति। ये वा इमे पुरुषे प्राणास्ते द्विदेवत्या वाक्च प्राणश्चैन्द्रवायवश्चक्षुश्च मनश्च मैत्रावरुणः श्रोत्रं चात्मा चाश्विनः। अग्निर्होतासीत्। स वषट्कृत्यातप्यत्। आहितास्येडासीत्। तस्य देवा द्विदेवत्यैरन्वैन्दन्। प्राणा वै द्विदेवत्याः। प्राणैरेवैनं तदभ्यैन्वन्। स इडोपहूतोपहूतेति प्रत्यपद्यत। प्राणा वै द्विदेवत्याः। यद्द्विदेवत्यान्भक्षयति प्राणैरेवात्मानमभिधिनोति। तस्माद्द्विदेवत्या एव पूर्वे भक्षयितव्याः। ते हि पूर्वे भक्षिताः। आश्विनो दशमो गृह्यते। दश हि प्राणाः। तं तृतीयं जुहोति। शिर एव प्राणानभिसंदधाति। समन्तं परिगृह्य भक्षयति। श्रोत्रं वा आश्विनः। तस्मात्पुरुषः सर्वतः शृणोति।

रक्षांसि वा एतत्पात्रं सचन्ते यद्यज्ञे रिक्तविमुक्तं भवति। पुरोडाशमैन्द्रवायवस्य पात्रे ऽवदधाति पयसा मैत्रावरुणस्य धानामाश्विनस्य रक्षसामपहत्यै। तस्मात्प्राणा अदता अरिक्ताः। दक्षिणस्य हविर्धानस्याधस्तात्सादयति।

एतद्वा एतयोरग्निमद्वीर्यवत्। यदेवाग्निमद्वीर्यवत्तस्मिन्सादयति। पुरुषेण वै यज्ञः संमितः। प्राणापानैः पुरुषः संततः। यदेतानि प्रातःसत्रान्या तृतीयसवनाच्छेरे प्राणापानैरेव यज्ञं संतनोति। एकया च दशभिश्चेत्येतां प्रति विमुञ्चति। यदर्वाग्विमुञ्चेत्प्राणान्विच्छिन्द्याद्यत्परः प्राणानतिरिचयेत्प्रमीयेत। प्राणो वै वायुः प्राणा द्विदेवत्याः। प्राणेनैव प्राणान्विमुञ्चति। बहु वायव्यं प्रातः सवने शस्यत एकैव तृतीयसवने। तस्माद्बहवो मुखे प्राणा एको ऽवाङ्। यदि कामयेतावगतमपरुन्ध्युरपरुद्धो ऽवगच्छेदितीदमहममुमामुष्यायणममुष्याः पुत्रममुष्या विश उदूहामीत्यध्वर्योः पात्रमुदूहेत्। इदमहममुमामुष्यायणममुष्याः पुत्रममुष्यां विश्यध्यूहामीति प्रतिप्रस्थातुः पात्रमध्यूहेत्। अध्वर्युर्वै श्रेयान्पापीयान्प्रतिप्रस्थाता। अवगतः श्रेयान्पापीयानपरुद्धः। अवगतमेवापरुणद्ध्यपरुद्धमवगमयति। ताजग्व्यवगच्छेत्। व्यत्यूहेत्पात्राणि। यदि कामयेत पापवसीयसं स्यादित्यध्वर्योः पात्राणां लोके प्रतिप्रस्थातुः। पात्राणि सादयेत्प्रतिप्रस्थातुः पात्राणां लोके ऽध्वर्योः पात्राणि सादयेत्। अध्वर्युर्वै श्रेयान्पापीयान्प्रतिप्रस्थाता। पापीयांसमेव वसीयसो लोके सादयति वसीयांसं पापीयसः। पापवसीयसं करोति। एतद्ध वै विपूजनः सौराकिः पापवसीयसं विदांचकार ॥५॥

यदि कामयेत यजमानादयजमानं भ्रातृव्यं पूर्वं कुर्यामिति प्रतिप्रस्थाता पूर्वो गृहीत्वा स पूर्वो निरूहेत्। यजमानो वै श्रेयान्पापीयान्प्रतिप्रस्थाता भ्रातृव्यः। तस्माद्भ्रातृव्यो ऽयजमानः। भ्रातृव्यमेव तस्मात्पूर्वं करोति। अध्वर्योर्लोके तिष्ठञ्जुहोति। अध्वर्युर्वै श्रेयान्पापीयान्प्रतिप्रस्थाता। भ्रातृव्यमेवास्य लोकमध्यारोहयति। अलोकमेनं करोति। नयत्राश्रावयेदध्वर्युरप्रतिष्ठानः स्यात्। नानालभ्य पात्रमाश्रावयेत्। एतद्वा अध्वर्योः स्वम्। अस्वः स्यात्। यत्राग्र आहुतिं जुहोति तदुत्तरा जुहुयात्। यत्र वा अग्र आहुतिं जुहोति तद्देवताः परिविशन्ति। यदन्यत्र जुहुयाद्देवताभ्यः समदं कुर्यात्। साक्षादेव देवेभ्यो भागधेयं संप्रयच्छति। नाना वा एतौ पुराग्नी आस्तां पशोश्चाहवनीयश्च। तस्मात्पुरा रुद्रः पशूनघातुक आसीत्। पशवो वै पशवः पशवो ऽशंवो रुद्रो ऽग्निः। यदाहुतीः संसृजति रुद्राय पशूनपिदधात्यपशुर्भवति। तस्मादिदानीं रुद्रः पशून्यातुकः। मध्ये ऽग्नेर्जुहुयादाज्याहुतीश्च पश्चाहुतीश्चाभितः सोमाहुतीः। रुद्रमेव पशुभिः परिवृणक्ति। अघातुकस्तत्र रुद्रः पशून्भवति यत्रैवंविदध्वर्युर्भवति ॥६॥

॥इति कपिष्ठलकठसंहितायां द्वाचत्वारिंशत्तमोऽध्यायः॥

........[आयुः] प्रजानां प्रदध्यात्प्रमायुकाः स्युः। होतुश्चमसे ऽवनयति। वैश्वदेवो वै होता वैश्वदेवीरिमाः प्रजाः। प्रजास्वेवायुर्दधाति। अध्रुवं वा एनमेतत्करोति यदवनयति। एतस्य वा अध्रुवत्वमनु प्रजाभ्यो न कल्पते। दृंहन्तां दैवीर्विशः कल्पन्तां मनुष्या दिवि दिव्यानि सन्त्वन्तरिक्षे वयांसि पृथिव्यां पार्थिवानीति ध्रुवमवनयति। यथायतनमेव प्रजा दृंहति। आहूत उक्थे ऽवनयेत्। स्तुतेनैव शस्त्रमभिसंतनोति। यदाहूते ऽवनयेदुक्थमतिरेचयेद्यच्छस्ते ग्रहमतिरेचयेत्। या मध्यमा परिधानीया तस्यामवनयति। अङ्गानि वा एतानि यज्ञस्य यदुक्थामदानि। आयुर्ध्रुवः। अर्धं वै पुरुषस्यात्मनो ऽङ्गान्यर्धमायुः। अन्तावेवाभितः संधायायुर्मध्यतो दधाति। कस्मात्सत्यादित्याहुर्ब्रह्मवादिन आपस्त्वरमाणा न क्षीयन्ते न प्रदस्यन्तीति। एतमेव सोमपीथं प्रतीक्षमाणा यद्ध्रुवः। एष ह्येना अपनुदते। प्रत्यङ्ङासीनो ऽवनयति। अन्वीपमेवैना अवार्जति। न सामि प्रस्रावयेत। अग्निष्टोममेवासीत। आयुर्वै ध्रुवः। आयुर्व्यवस्रावयेत। एतावान्वै यज्ञो यावानग्निष्टोमः। यदाग्निष्टोममास्ते प्राणस्यैवास्यान्तं गच्छति सर्वमायुरेति। उदरं वा एतद्यज्ञस्य यत्सदः। तद्द्रवन्ति निःसर्पन्तः। यज्ञः प्रजापतिः। यदाग्निष्टोममास्ते प्रजापतेरेवोदरं न रिणक्त्यक्षोधुको भवति ॥१॥

देवा वा असुरान्हत्वा वैरदेयाद्दीयमानास्त ऋतून्संवत्सरममोहयन्। तस्य देवाः क्लृप्तिमैच्छन्। तमृतुग्रहैरेवाकल्पयन्। यदृतुग्रहा गृह्यन्ते संवत्सरस्य क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्यै। उभौ सह प्रथमं गृह्णाते। उभौ ह्येतौ सह संवत्सरं कल्पयितुमुपप्रेतः। उभौ सहोत्तमम्। संवत्सरमेव कल्पयित्वोभौ सहविमुच्येते। उभयतोमुखे ऋतुपात्रे भवतः उभयतोमुखा ह्यृतवः। न हि तद्विद्म यतरत ऋतूनां मुखम्। नान्यो ऽन्यमभिप्रपद्येयाताम्।

यदभिप्रपद्येयातामृतुर्ऋतुमभ्यायुकः स्यात्। यद्व्यतीतस्तस्मादाहुरश्वाविवर्तू समघ्रातामिति। द्वादशैते गृह्यन्ते। द्वादश मासाः संवत्सरः। संवत्सरस्य क्लृप्त्यै। संवत्सरो वै स्वर्गो लोकः। तस्यैत आक्रामाः संक्रामा यदृतुग्रहाः। रोहमेवैते रोहति स्वर्गस्य लोकस्य समष्ट्यै। षडन्ये भवन्ति षडन्ये। असौ वा आदित्य ऋतुः। तस्मादेष षण्मास उदङ्ङेति षड् दक्षिणा। षडृतुना। षड्वा ऋतवः। ऋतुष्वेव प्रतितिष्ठति। चतुर्ऋतुभिः। चतुष्पदाः पशवः। संवत्सरं पशवो ऽनुप्रजायन्ते। संवत्सरादेवास्मै पशून्प्रजनयति। द्विऋतुना पुनः। द्विपाद्यजमानः। पशुष्वेवोपरिष्टात्प्रतितिष्ठति॥

सोमपा वा एते। सोमपा इन्द्रस्य सजाता यदृतुग्रहाः। ऋतुना सोमं पिबत्विति ह्याह। नर्तवे जुह्वति। तेषामेते स्वे पात्रे याभ्यामेनाञ्जुह्वति। तस्मात्सजातः स्वेन पात्रेणा बलिं हरति। आस्मै बलिं हरन्ति य एवं वेद। व्यतिहारं भक्षयन्त्ययातयामत्वाय। तस्मादृतुमृतु वर्षति। ते देवाः संवत्सरं कल्पयित्वा स्वर्गं लोकं प्रज्ञाय त एतद्यज्ञस्य ज्योतिरुपरिष्टाददधुः। यदैन्द्राग्नो गृह्यते ज्योतिरेव मुखतो यज्ञस्य दधाति संवत्सरस्य क्लृप्त्यै स्वर्गस्य लोकस्य प्रज्ञात्यै। तस्मात्संवत्सरं ज्योतिरुपर्युपरि चरति। ऋतुपात्रेणैन्द्राग्नं गृह्णाति। क्षत्रं वा इन्द्राग्नी विडृतवः। विश्येव क्षत्रमध्यूहति। विश्वे वै देवास्तृतीयसवनभागाः सन्तस्ते प्रातःसवनमभ्यकामयन्त। तान्प्रजापतिरेतस्मिन्ग्रहे तर्पयितव्यानपश्यत्। यद्वैश्वदेवः प्रातःसवने गृह्यते विश्वानेव देवान्प्रातःसवने तर्पयति। तानस्य तृप्तान्प्रीतानुत्तरे सवने अभिविसृज्येते। शुक्रपात्रेण वैश्वदेवं गृह्णाति। असौ वा आदित्यः शुक्रो वैश्वदेवीरिमाः प्रजाः। तस्मादेष सर्वाः प्रजाःप्रत्यङ्। मां प्रति मां प्रतीति हि मन्यन्ते ॥२॥

माध्यन्दिनेन वै सवनेनेन्द्रो वृत्रमहन्मरुद्भिर्वीर्येण। मरुत्वतीयं स्तोत्रं भवति मरुत्वतीयमुक्थं मरुत्वतीया ग्रहाः। सर्वत एव यजमानं वीर्येण समर्धयति सर्वतो वृत्रं हन्ति। प्रतिहितिरेव प्रथमो मरुत्वतीयो ऽपायतिर्द्वितीयः। विसृष्टमु तृतीयेन विसृजति। वज्रमेव प्रथमेन मरुत्वतीयेनोद्यच्छति। प्र द्वितीयेन हरति स्तृणुते तृतीयेन। यं द्विष्यादमरुत्वतीयांस्तस्य गृह्णीयात्। वीर्यं वै मरुतः। वीर्येणैवैनं व्यर्धयति। इन्द्रो वै वृत्रं हनिष्यन्प्रदानं देवेभ्यः प्रायच्छद्दक्षिणाः। स मरुत्वतीयैरेव वृत्रमहन्। तस्मान्मरुत्वते ऽनूक्ते न देयम्। हतो हि तर्हि वृत्रो विजितं भवति। नो प्रतिगृह्णीयात्। प्रतिष्ठितान्पशून्प्रच्यावयति। अपशुर्भवति। इन्द्रो वै वृत्रं हत्वा स महेन्द्रो ऽभवत्। सो ऽन्यान्देवानत्यमन्यत। स एतं ग्रहमुद्धारमुदहरत महेन्द्रीयम्। तस्माद्राजा संग्रामं जित्वा निराजं निरजते। ते तं देवा अब्रुवन्सर्वं वा अवोचथा अस्तु नो ऽत्रापीति कथं वो ऽपि स्यादिति। विराजैतस्य ग्रहस्य यजत्विति। देवपात्रं वै विराट्। यद्विराजा यजति देवपात्रेणैव देवतास्तर्पयति। तस्माद्यद्राजा संग्रामं जयत्यपि तत्र सूतग्रामणीनाम्। गायत्र्या वै त्रिवृदायतनवांस्त्रिष्टुभा पञ्चदशो जगत्यैकविंशः। अथैषा विराडायतनमेव यत्सप्तदशः। यद्विराजा यजति सप्तदशमेवायतनवन्तं यजमानं करोति। यं द्विष्यात्त्रिष्टुभा तस्य यजेत्। ओजो वै वीर्यं त्रिष्टुप्। ओजसैवैनं वीर्येणायतनाच्छिनत्ति। सो ऽनायतनः पराभवति। देवा वा असुरान्हत्वा वैरदेयादीषमाणास्ते यज्ञं मध्यतः प्राविशन्। एतां वाव तदृचं प्राविशन्विराजमेव। यद्विराजा यजति देवतानामभीष्ट्यै। आदित्या वै स्वर्गं लोकं यन्तस्ते ऽङ्गिरसो ऽस्मिंल्लोके सह यज्ञेन प्रत्यौहन्। ते ऽङ्गिरस आदित्यानब्रुवन्कतिभ्यो हव्यं वक्ष्याम इति। त्रयस्त्रिंशत इत्यब्रुवन्। दश वसव इन्द्र एकादशो दश रुद्रा इन्द्र एकादशो दशादित्या इन्द्र एकादशः। त्रिंशदेता देवतास्त्रिंशदक्षरा विराट्। तेनैता देवतास्तर्पयति यास्त्रिंशत्। द्व्यक्षरो वषट्कार एकाक्षरा वाक्। तेनैन्द्रम्। कल्पन्ते ऽस्य देवता हव्ये। यथादेवतमस्य हव्यं गच्छति। वृणत एनमार्त्विज्याय य एवं वेद। यावतीर्हि देवतास्ता हव्यं गमयति ॥३॥

माध्यन्दिनाद्वै सवनाद्देवाः स्वर्गं लोकमायन्। तेषामेत आक्रामाः संक्रामा यद्दक्षिणाः। यद्दक्षिणा ददाति सेतुमेव कीर्त्वा स्वर्गं लोकमेति। यावद्वा इह प्राणद्ददाति तावन्तो ऽमुष्मिंल्लोके प्राणाः। तस्माद्बहु देयम्। तस्मादिह बहु दत्तं प्रशंसन्ति। ज्यायांसमेव सेतुं किरते। एतर्हि वै देवता नेदिष्ठान्त्यानमन्ति। तस्मादेष एतर्हि तेजिष्ठं तपति यावन्नेदिष्ठादेव स्वर्गं लोकमारोहति। सौरीभ्यां जुहोति स्वर्गस्य लोकस्य समष्ट्यै। द्वाभ्याम्। द्विपाद्यजमानः। अस्यामेवैनमाक्रमयति। यदाग्नय्याग्नीध्रे जुहोत्यन्तरिक्ष एवैनमाक्रमयति। यद्ददाति स्वर्गमेवैनं लोकं गमयति। द्यां गच्छ स्वर्गच्छेति स्वर्गस्य

लोकस्य समष्ट्यै। रूपं वो रूपेणाभ्यागां वयसा वय इति। एतद्वै पशूनां रूपं यद् घृतं यद्धिरण्यम्। रूपमेवैषां रूपेणाभ्यैति वयसा वयः। तुथो वो विश्ववेदा विभजत्विति। सत्यं वै तुथो विश्ववेदाः। सत्येनैवैनां ब्रह्मणा विभजति। एतत्ते अग्ने राध एति सोमच्युतमिति। आग्नेया वै पशवः। ते सोमे दीयन्ते। तन्मित्रस्य पथा नयेति मित्रस्यैवैनाः पथा नयति। अन्तराग्नीध्रं च सदश्च नयति। एतेन वै पथा देवाः स्वर्गं लोकमायन्। तमेवैना अपिपादयति।

दक्षिणतो वै देवानां यज्ञं रक्षांस्यभ्यजयन्। तमाग्नीध्रात्पुनरपाजयन्। यदाग्नीध्राद्दक्षिणा दक्षिणा नयन्ति यज्ञस्याभिजित्यै रक्षसामपहत्यै। आग्नेय्याग्नीध्रे जुहोति। आग्नेया वै पशवः। पशूनां निष्क्रीत्यै। वारुण्या द्वितीयया जुहुयाद्यद्यश्वं वानो वा रथं वा दास्यन्स्यात्। वारुणा ह्यश्वा वारुणा वनस्पतयः। अग्नीध्रे ऽग्रे ददाति। अग्निः सर्वा देवताः। देवतानामभीष्ट्यै। उपबर्हणं ददाति। एतद्वै छन्दसां रूपम्। रूपेणैव च्छन्दांस्यवरुन्द्धे। हिरण्यं ददाति। हिरण्यज्योतिष एवैनाः स्वर्गं लोकं गमयति। अस्मद्राता मधुमती देवत्रा गच्छेति स्वर्गमेवैना लोकं गमयति। प्रदातारमाविशेति। तस्मादमुष्मिंल्लोक आगामुकाः। ऋतस्य पथा प्रेत चन्द्र दक्षिणा इति। यो वै यज्ञियो मेध्यः स ऋतस्य पन्थाः। तेनैवैना नयति। ब्राह्मणमद्यध्यासं पितृमन्तं पैतृमत्यमिति। यो वै श्रोत्रिय आर्षेयः स पितृमान्पैतृमत्यः। तं विदेयमित्येवैतदाह। स हि सुधातुदक्षिणः। यामब्राह्मणाय ददाति वनस्पतयस्तया प्रथन्ते। यां कण्वकश्यपेभ्यो ददाति नीहारस्तया प्रथते। यां ब्राह्मणायाश्रोत्रियाय ददाति मरीचयस्तया प्रथन्ते। यां श्रोत्रियायार्षेयाय ददाति तयामुष्मिंल्लोक ऋध्नोति। अस्मिंश्चास्य लोके पुनर्भोगाय भवति। तस्मात्स एवेष्टव्यः। वि स्वःपश्य व्यन्तरिक्षमिति सदः प्रेक्षते। सोमपा वा एते ब्राह्मणाः। तेषां तेजस्वीनि चक्षूंषि। अरातीयन्ति वा एते ददते। त एनमीश्वराः प्रतिनुदः। तेभ्य एव नमस्करोत्यप्रतिनोदाय। अत्रिर्हिरण्यं ददाति। स्वर्भानुर्वा असुरः सूर्यं तमसाविध्यत्। तमत्रिरेवान्वविन्दत्। यदत्रिर्हिरण्यं ददाति स्वर्गस्य लोकस्य समष्ट्यै। यद्यात्रेयं न विन्देद्य आर्षेयः संहितस्तस्मै दद्यात्। तेनैवर्ध्नोति। असुरा वै देवेभ्यो दक्षिणामनयन्। तां प्रत्यनुदन्त। ते ऽब्रुवन्नत्रिहदेषेति। तेभ्यो ऽपरामनयन्। तां [प्रत्यनुदन्त। ते ऽब्रुवन्नृम्णमेषा] गादिति। तेभ्यो ऽपरामनयन्। तां प्रत्यनुदन्त। ते ऽब्रुवन्नद्राप्सीदेषेति। एतां ह वै तदृषिरभ्यनूवाच॥

अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः।

आवत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणामदधाम्॥

इति। सा सालावृकी संभूयासुरान्प्राविशत्। सैनानिरदहत्। तस्माद्दक्षिणा प्रतिनुत्ता न प्रतिगृह्या। न गोषु चारयेत्। सालावृक्येवैनं भूत्वा प्रविशति। सैनं निर्दहति ॥४॥

यद्गां ददात्यायुस्तेन स्पृणोति। यद्वासो ददाति दीर्घं तेनायुः कुरुते। यदश्वं ददाति सूर्यभ्राजमेवैनं करोति। यदनो यद्रथं ददाति शरीराणि तेन स्पृणोति। यदविं यदजां ददाति मांसानि तेन स्पृणोति। यदोदनं यन्मन्थं ददाति यदेवास्यान्तरात्मं तत्तेन स्पृणोति। यद्वरं ददात्यात्मानं तेन स्पृणोति। आत्मा हि वरः। यद्ब्रह्मणे ददाति बार्हस्पत्यो वै ब्रह्मा बृहस्पतिमेव तेन प्रीणाति। यदुद्गात्रे ददाति प्राजापत्यो वा उद्गाता प्रजापतिमेव तेन प्रीणाति। यद्धोत्रे ददाति वैश्वदेवो वै होता सर्वा एवास्य तेन देवता अभीष्टाः प्रीता भवन्ति। यदध्वर्युभ्यां ददात्याश्विनौ वा अध्वर्यू अश्विनावेव तेन प्रीणाति। यदृत्विग्भ्यो ददाति होत्रा वा ऋत्विजो होत्रा एवास्य तेनाभीष्टाः प्रीता भवन्ति। यत्सदस्येभ्यो ददाति यमेव ते सोमं पिबन्ति तं तेन निष्क्रीणाति। यां ब्राह्मणाय श्रोत्रियायानृत्विजे प्रसृप्ताय ददाति यामेव स विद्यां वेद सास्य तेनाभीष्टा प्रीता भवति। यामब्राह्मणायाश्रोत्रियायानृत्वजे प्रसृप्ताय ददाति यामेव स विद्यां वेद सास्य तेनाभीष्टा प्रीता भवति। यामकामो ददाति तस्मात्क्षत्रं ब्रह्मात्ति। यां याचितो ददाति भ्रातृव्यं तया जिन्वति। यां बहिर्वेदि ददाति नैनं सा गच्छति। यां ज्ञातये ऽनृत्विजे प्रसृप्ताय ददाति पाप्मानं तन्निधत्ते। यां ज्येष्ठाय यां श्रोत्रियाय ददाति येनैव स तदिन्द्रियेण भवति तदस्याभीष्टं प्रीतं भवति ॥५॥

आदित्या वा असुरान्हत्वा वैरदेयादीषमाणास्ते देवान्प्राविशन्। द्विदेवत्यान्वाव तत्प्राविशन्। एते हि देवानां सह भूयिष्ठाः। तस्मादादित्यो द्विदेवत्येभ्यो गृह्यते। उच्छिष्टाद्वा आदित्या जाताः। तस्मादेष उच्छिष्टः सोमो गृह्यते

[उच्छेषणभागा वा आदित्याः। तस्मादेष उच्छिष्टः सोमो गृह्यते।] परिश्रिते गृह्णाति। रुद्रो वा अग्निः पशव आदित्याः। पशूनां गोपीथाय। रुद्रं वै देवा यज्ञान्निरभजन्। ते समवादिशन्नेष ते मातरि भाग इत्यादित्यान्तमेतावदागमयित्यैतत्प्रति यज्ञादन्तरदधुः। यत्परिश्रित आदित्यं गृह्णाति रुद्रमेव यज्ञादन्तर्दधाति। पशवो वा आदित्यः। यदेष भूयिष्ठः सोमो गृह्यते तस्मात्पशवो ऽद्यमाना न क्षीयन्ते। यदा बहवो ऽन्तर्वेदि स्युरथ गृह्णीयात्। एष वै यजमानस्य स्वो लोको यद्वेदिः। पशवस्तानेवात्रान्नाद्यमवरुन्द्धे। यदास्य भ्रातृव्यो ऽन्तर्वेदि स्यादथ गृह्णीयात्। बृहतीः पुरोरुचो भवन्ति। पशवो वै बृहतीःपशव आदित्यः। पशुष्वेव आदित्यः। स्व एव लोके भ्रातृव्यस्य पशून्वृङ्क्ते। ऊर्जं वै दधि पशव आदित्यः। ऊर्जमेव पशुषु मध्यतो दधाति। पशून्दधाति। सोममग्रे गृह्णाति। अथ दध्यथ सोमम्। यदि कामयेत वर्षेदिति या दिव्या वृष्टिस्तया त्वा श्रीणामीति शृंतातङ्क्यं भवति। तस्मादामा पक्वं दुहे। पशव आदित्यः। पशुभ्य एव वर्षति यर्हि वर्षति। पशुभ्य एव वृष्टिं निनयति। दध्नोपरिष्टाच्छ्रीणीयात्। पशवो वै दधि पशव आदित्यः। पशुष्वेव प्राणं दधाति। विवस्व आदित्यैष ते उपांशुसवनेन मेक्षयति। प्राणो वा उपांशुसवनः पशव आदित्यः। पशुष्वेव प्राणं दधाति। यद्युद्गृहीतस्य स्तोको ऽवपद्यते सोमपीथ इति। एष वाव स उपांशुसवनः। साक्षादेवैनं सोमपीथेन समर्धयति। यद्युद्गृहीतस्य स्तोको ऽवपद्यते ताजक्प्रवर्षति। गृहीत्वापिदधाति गर्भाणां धृत्या अप्रपादाय। तं दशमे स्तोत्रे प्रच्यावयति। तस्माद्दशमे मासि गर्भा हिताः प्रजायन्ते। अन्यत्रेक्षमाणो जुहोति। रुद्रो वा अग्निः पशव आदित्यः। पशूनां गोपीथाय। यदीक्षेत ब्राह्मण उपद्रष्टा पशून्गृह्णीयात्। पशूनामेव प्रदीयमानानामनुपद्रष्टा भवति ॥६॥

अन्तर्यामपात्रेण सावित्रं गृह्णाति। पशवो वा अन्तर्यामः। सवितृप्रसूताः पशवः प्रजायन्ते। सवितृप्रसूत एवैनान्प्रजनयति। तमसन्नं जुहोति। तस्मादसन्नाः पशव सदर्दि प्रजायन्ते। देवा वै तृतीयसवनमुद्यमं नाशक्नुवन्। प्रातःसवने तर्हि सवितासीत्। तं देवा अब्रुवंस्त्वयेदमुद्यच्छामहा इति। नेत्यब्रवीन्मुख्यो ऽहमस्मि न प्रत्यङ्ङुपक्रमिष्यामीति। मुख्य एवात्रास इत्यब्रुवन्मुख्य इहाथ त्वयोद्यच्छामहा इति। तत्सवित्रोदयच्छन्त। यत्सावित्रो गृह्यते तृतीयसवनस्योद्यत्यै। अभि त्वा देव सवितरित्येतया प्रातःसवने मुख्यः। समन्तं वै तत्सविता यज्ञं पर्यभवत्। समन्तं भ्रातृव्यं परिभवति य एवं वेद। अन्तर्यामपात्रेणाग्रायणात्सावित्रं तृतीयसवने गृह्णाति। प्रातर्वा एष गृह्यते गायत्र्या लोके यदाग्रायणः। तं तृतीयसवने विगृह्णाति जगत्या लोके। तस्मादाग्रायणात्सवित्रो गृह्यते। सविता हि देवानां गायत्रः। सावित्रस्य संस्रावे वैश्वदेवमभिगृह्णाति। समानो वा एष ग्रहः। संतत्यै। वैश्वदेवीरिमाः प्रजाः। सवितृप्रसूता प्रजाः प्रजायन्ते। सवितृप्रसूता एवैनाः प्रजनयति। सुशर्मासि सुप्रतिष्ठान इति। सोमे हि सोममभिगृह्णाति। अथो सुशर्माणमेवोत्तरमधरस्मै करोति सुप्रतिष्ठानमधरमुत्तरस्मै। बृहदुक्षे नम इति। बृहद्धि देवानां नमः पितॄणाम्। उक्थभागा वै पितरो ऽसोमभाजः। यत्रैवैभ्य उक्थं शंसति तदेभ्यो ग्रहं गृह्णाति ॥ ७ ॥

प्रजननं वै पात्नीवतः। यद्वै किंच यज्ञे पात्नीवतं क्रियते प्रजननमेव तत्। उपांशुपात्रेण गृह्णाति। प्राणो वा उपांशुः। प्रजननं वै पात्नीवतः। यद्वै किंच यज्ञे पात्नीवतं क्रियते प्रजननमेव तत्। उपांशुपात्रेण गृह्णाति। प्राणो वा उपांशुः। प्राणेनैव प्रयन्ति प्राणात्प्रजाः प्रजायन्ते। प्रजननाय। उपांशुना प्रयन्त्युपांशुपात्रेणोद्यन्ति। प्राणो वा उपांशुः। प्राणेनैव प्रयन्ति प्राणेनोद्यन्ति। बृहस्पतिसुतस्य त इति। ब्रह्म वै बृहस्पतिः। ब्रह्मणः प्रजाः प्रजायन्ते। ब्रह्मणैवैनाः प्रजनयति। इन्द इति प्राणेनोद्यन्ति। बृहस्पतिसुतस्य त इति। ब्रह्म वै बृहस्पतिः। ब्रह्मणः प्रजाः प्रजायन्ते। ब्रह्मणैवैनाः प्रजनयति। इन्द इति रेत एव दधाति। इन्द्रियावत इति। इन्द्रियं वै प्रजाः सोमपीथः। अग्ना३इ पत्नीवा३निति मिथुनमेव करोति। सजूस्त्वष्ट्रा सोमं पिबेति। त्वष्टा वै रूपाणां विकर्ता। सो ऽस्मै रूपाणि विकरोति। एष वै ग्रहः पत्नीभ्यो नातिष्ठत। तं देवा आज्यं वज्रं कृत्वाघ्नन्। यत्पात्नीवतं श्रीणाति स्तृत्यै। संपातेन श्रीणाति संतत्यै। उपरिष्टाच्छ्रीणाति। तस्मात्स्त्र्यखलतिर्भावुका। शृत वा एतं सोमं जुहोत्यशृतानितरान्। तस्मात्स्त्री निर्वीर्यानिर्वीर्यः पुमान्। नैतस्य होता यजति। पश्चेव हि सः। पुरः प्राणाञ्ञनुयजति। यदनुयजेदग्निना प्राणातन्तरियात्प्रमीयेत। शृतं पश्चात्प्राणान्परिहरेत्। अग्नीद्यजति। पुरो हि सः। पुरः प्राणाञ्ञनुयजति। तस्माद्बहुपशुर्भावुकः। सह पात्रेण वा एतं सोमं भक्षयति। तस्मादग्नीत्पण्डको भावुकः। प्रजननं वै पात्नीवतः। तस्माद्बहुपशुर्भावुकः। सह पात्रेण वा एतं सोमं भक्षयति। तस्मादग्नीत्पण्डको भावुकः। नोपस्थ आसीत। यदुपस्थ आसीत पण्डकः स्यात्। अन्तरा नेष्टारं च नेष्टारमभिसर्पति। पत्नीरेव सोमपीथं गमयति। नोपस्थ आसीत। यदुपस्थ आसीत पण्डकः स्यात्। अन्तरा नेष्टारं च धिष्ण्यं च व्यवसर्पति। स्त्रीणां वै नेष्टा पुमानग्निधिष्ण्यः। मिथुन एव रेतो दधाति ॥८॥

इन्द्रो वै वृत्रमहन्। तस्य मूर्धानमुदरुजत्। स द्रोणकलशो ऽभवत्। ततो यः सोमः समस्रवत्स हारियोजनो ऽभवत्। इन्द्रो वै वृत्रं हत्वा तस्य क्लोम्नो हृदयात्सोमं समसिञ्चत्। स हारियोजनो ऽभवत्। सो ऽमन्यत यदिममशृतमद्वितीयं होष्यामि तदन्वसुरा आभविष्यन्ति यत्र होष्यामि तदन्वाभविष्यन्तीति। संस्थितः सोम आसीत्प्रहृताः परिधयः। अथोपोदतिष्ठद्धोतुम्। तमग्निरब्रवीन्न मय्येतमशृतमद्वितीयं होष्यसीति। तस्मिन्धाना आवपत्। तं शृतं द्वितीयवन्तमजुहोत्। यद्धाना आवपति शृतत्वायैव द्वितीयत्वाय। ये वै ते वृत्रे पशव आसंस्त एवैते। पशूनेवैतत्कामदुघो ऽवरुन्द्धे। कामंकामं ह्येतेषां कुरुते। ऋक्सामे वा इन्द्रस्य हरी। तयोरेतद्भागधेयं यद्धारियोजनः। आधानानि परिधयः। यत्प्रहृतेषु परिधिषु हारियोजनं जुहोति निराधानाभ्यामेवाभ्यां घासमपिदधाति। प्रजापतिर्वा आग्रायणः। आग्रायणादेष सोमो ऽतिरिच्यते। यद्वै यज्ञस्यातिरिच्यते प्रजापतिं तदभ्यतिरिच्यते। यदेतमतिरिक्तं सोमं जुहोति तस्मादयमतिरिक्तः प्रजापतिः प्रजा अभिपवते। द्रोणकलशेनोन्नेता हारियोजनं जुहोति। अतिरिक्तं वा एतत्पात्राणां यद्द्रोणकलशो ऽतिरिक्त एष ऋत्विजां यदुन्नेतातिरिक्त एष सोमानां यद्धारियोजनः। अतिरिक्तेनैवातिरिक्तमाप्नोति। उन्नेतर्युपहवमिच्छन्ति य एव तत्र सोमपीथस्तस्यावरुद्ध्यै। ये वै ते वृत्रे पशव आसंस्त एवैते। यत्संभिन्द्यात्संशारुका एनमल्पाः पशवो भुञ्जन्त उपतिष्ठेरन् हिनस्ति हि। यन्न संभिन्द्यादसंशारुका एनं बहवः पशवो भुञ्जन्त उपतिष्ठेरन्। न हि हिनस्ति। समवगृह्णीयात्। उभयमेव करोति। असंशारुका एनं बहवः पशवो भुञ्जन्त उपतिष्ठन्ते। निरवधयेद्य एव तत्र सोमपीथस्तस्यावरुद्ध्यै। उत्तरवेद्यां निवपति। पशवो वा उत्तरवेदिः पशवो हारियोजनीः। पशुष्वेव पशून्दधाति ॥९॥

इति कपिष्ठलकठसंहितायां चतुश्चत्वारिंशत्तमोऽध्यायः॥

पात्राणि प्रयुज्यन्ते ऽनयोर्लोकयोर्विधृत्यै। प्रान्यानि युज्यन्ते नान्यानि। यानि प्रयुज्यन्त इमं तैर्लोकं दाधार। यानि न प्रयुज्यन्ते ऽमुं तैः। पराङ् ह्यसौ लोको ऽनिरुक्तः। उपांशुपात्रं प्रयुज्यते। अजा एव तत्पशूनामनुप्रजायन्ते। त्रिर्विगृह्णाति। तस्मात्सा त्रीञ्जनयति। अथो द्वौ। यदुपांशुपात्रं प्रयुज्यते ऽजा एव तेन पशूनां दाधार। अन्तर्यामपात्रं प्रयुज्यते। अवय एव तत्पशूनामनुप्रजायन्ते। यदन्तर्यामपात्रं प्रयुज्यते ऽवीरेव तेन पशूनां दाधार। ऋतुपात्रे प्रयुज्येते। अश्वा एव तत्पशूनामनुप्रजायन्ते। तस्मात्तयोरश्वस्येव शफो ऽधस्तात्। यदृतुपात्रे प्रयुज्येते अश्वानेव तेन पशूनां दाधार। उक्थ्यपात्रं प्रयुज्यते। आरण्या एव तत्पशवो ऽनुप्रजायन्ते। तस्मात्तान्धृतान्ग्राममागतान्घ्नन्ति। यदुक्थ्यपात्रं प्रयुज्यत आरण्यानेव तेन पशून्दाधार। शुक्रपात्रं प्रयुज्यते। अत्तीरेव तत्प्रजा अनुप्रजायन्ते। मन्थिपात्रं प्रयुज्यते। आद्या एव तत्प्रजा अनुप्रजायन्ते। यदेते प्रयुज्येते उभयीरेवैतदत्त्रीश्चाद्याश्च प्रजा दाधार। ऋतुपात्रे शुक्रपात्रात्पूर्वे प्रयुज्येते। असौ वा आदित्यः शुक्रो रश्मय ऋतवः। तस्मादेते पूर्वे प्रयुज्येते। पूर्वे ह्येते। एतस्मादवरमादित्यपात्रं शुक्रपात्रात्प्रयुज्यते। गाव एव तत्पशूनामनुप्रजायन्ते। यदादित्यपात्रं प्रयुज्यते गा एव तेन पशूनां दाधार। आग्रायणपात्रं प्रयुज्यते। सर्वा एव तत्प्रजा अनुप्रजायन्ते। यदाग्रायणपात्रं प्रयुज्यते सर्वा एव तेन प्रजा दाधार। द्रोणकलशः प्रयुज्यते। प्रजापतिर्वै द्रोणकलशः। यद्द्रोणकलशः प्रयुज्यते तस्मादिदं प्रजापतिः प्रजा वेद तस्मादयं क्षयो ऽस्ति। एतावन्तो वै प्रातर्ग्रहा गृह्यन्ते। ते स्तोत्रवन्त उक्थवन्तो निदानवन्त आयतनवन्तः कर्तव्याः। नवैतान्गृहीत्वा नवभिर्बहिष्पवमानं स्तुवन्ति। तेन ते स्तोत्रवन्तः। यत्पुनरेत्याश्विनं गृह्णाति। स्तोमेनैव स स्तोत्रवान्। यदुपांश्वन्तर्यामौ हुतौ होतानुमन्त्रयते तेन तावुक्थवन्तौ। यदैन्द्रवायवं तेनैन्द्रवायव उक्थवान्। यन्मैत्रावरुणं तेन मैत्रावरुण उक्थवान्। यदाश्विनं तेनाश्विन उक्थवान्। यत्त्रिष्कैवल्यं तेन शुक्रामन्थिनावुक्थवन्तौ। यद्वैश्वदेवं तेनाग्रायण उक्थवान्। यदाग्निमारुतं तेन ध्रुव उक्थवान्। यदुक्थान्युक्थशंसिनः शंसन्ति तेनोक्थ्य उक्थवान्। एतावन्तो वै प्रातर्ग्रहा गृह्यन्ते। तानेतत्स्तोत्रवत उक्थवतो निदानवत आयतनवतः करोति। निदानवानायतनवान्भवति य एवं वेद ॥१॥

देवाश्च वा असुराश्च संयत्ता आसन्। ते देवाः संघातं-संघातं पराजयन्त। ते ऽविदुरनायतना हि वै स्मस्तस्मात्पराजयामहा इति। त एताः पुरो ऽकुर्वत। ता एषामनायतना नाधियन्त। त एतान्पुरोडाशानपश्यन्।

तानुसवनं निरवपन्। तैः पुरो ऽदृंहन्। सवनानि वाव ते पुरो ऽकुर्वत। यत्पुरो ऽदृंहंस्तत्पुरोडाशानां पुरोडाशत्वम्। यदनुसवनं पुरोडाशान्निर्वपति सवनानां धृत्यै विधृत्यै। तस्मादनुसवनं पुरोडाशस्य प्राश्नीयात्सोमपीथस्य धृत्यै। यतो घृतानक्तं स्यात्ततः प्राश्नीयात्। आज्येन वै वज्रेण देवा वृत्रमघ्नन्। सोमो वृत्रः सोमपीथस्याघाताय। तदाहुर्न वा अन्येनाज्यादर्हीने सम्मृष्टुमर्हतीति। सर्वमेतद्धविर्भूतं यत्किंचोत्पुनन्ति। यदेवानुत्पूतं स्यात्तस्य नाश्नीयात्। दीर्घजिह्वी वै देवानां यज्ञमवालेट्। प्रातःसवनं तद्धमात्। यस्मा पयस्याभवत्तस्मादामिक्षा किमदितेव। यत्पयस्या प्रातःसवने भवति प्रातःसवनस्य समृद्ध्यै। मैत्रावरुणी प्रातःसवने भवति नोत्तरे सवने ऽश्नुते। प्राणापानौ वै मित्रावरुणौ। प्राणापानावेव मुखतः परिहरते। तस्मान्मुखतः प्राणापानौ। न वै स्तोत्रेण न शस्त्रेण पङ्क्तिर्यज्ञे ऽवकल्पते। पञ्चैतानि हवींषि। पङ्क्तिमेवैतद्यज्ञे ऽवकल्पयति। हविष्पङ्क्तिर्वै यज्ञो नाराशंसपङ्क्तिः पाङ्क्तः। पञ्चैतानि हवींषि। तेन हविष्पङ्क्तिः। द्विनाराशंसा प्रातःसवने द्विनाराशंसा माध्यन्दिन एकनाराशंसा तृतीयसवने। तेन नाराशंसपङ्क्तिः। अग्नीषोमीयः पशुस्त्रीणि सवनानि वशानूबन्ध्या तेन पाङ्क्तः। य एवमेतानि यज्ञस्य रूपाण्यनुवेदर्ध्नोति॥

देवाश्च वा असुराश्च संयत्ता आसन्। ते देवेभ्यो महिमानो ऽपाक्रामन्। ते ऽसुरानगच्छन्। ते ऽसुरा देवानां बहूनि शतान्यघ्नन्। तानीमानि च्छन्दांसि यान्यदृश्यावहानि। ते देवा अबिभयुरित्थं वाव नः सर्वानसुरा अवपत्स्यन्तीति। तान्युपामन्त्रयन्त। ते ऽब्रुवन्वार्यं वृणामहा इति। ते परिवापपुरोडाशमवृणत। तद्भागधेयमभ्यायन्। ऋक्सामे वा ऐभ्यस्तदपाक्रामताम्। पशवो वा इन्द्रियं प्राणापानौ। स इन्द्रो ऽमन्यतेमे वावेदमभूवन्निति। तेषां सायुज्यमगच्छत्। हरिवां इन्द्रो धाना अत्त्विति। ऋक्सामे वा इन्द्रस्य हरी। ऋक्सामयोरेव तत्सायुज्यमगच्छत्। पूषण्वान्करम्भमिति। पशवो वै पूषा। पशूनामेव तत्सायुज्यमगच्छत्। सरस्वतीवान्भारतीवान्परिवाप इति। वाग्वै सरस्वती। वाच एव तत्सायुज्यमगच्छत्। इन्द्रस्यापूप इति। इन्द्रियं वा इन्द्रः। इन्द्रियस्यैव तत्सायुज्यमगच्छत्। मित्रावरुणयोः पयस्येति। प्राणापानौ वै मित्रावरुणौ। प्राणापानयोरेव तत्सायुज्यमगच्छत्। एतेषामेव महिम्नां सायुज्यं गच्छति सर्वमायुरेति पशुमान्भवति न यज्ञियामार्तिमार्छति य एवं वेद ॥२॥

नीडं वा एतद्यज्ञस्य क्रियते यदाशुषा क्रियते। उच्चैर्ऋचा च साम्ना च क्रियते। यदृचः पुरोरुचो भवन्ति द्रढिम्न एव प्रत्युत्तब्ध्या अशिथिलत्वाय। प्रैवर्चा प्र यजुषा यच्छति गमयति ग्रहेण। ऋचा वै स्तोत्राय गृह्यते यजुषा शस्त्राय। तस्मादेते संहिते। संहिते हि स्तोत्रं च शस्त्रं च। पराङ् वा एतर्हि यज्ञः पराचीर्देवतास्तृतीयसवने यजमानात्। आग्नेय्या पुरस्तात्सौम्यं परियजति वैष्णव्योपरिष्टात्। अग्निर्वै सर्वा देवता विष्णुर्यज्ञः। देवताश्चैव यज्ञं चालभते। घ्नन्ति वा एतत्सोमं यदभिषुण्वन्ति। तस्यैतदनुस्तरणी यत्सौम्यः। दक्षिणार्धे ऽग्नेर्जुहोति। दक्षिणा हि पितॄणाम्। सकृदवद्यति। सकृदवत्तं हि पितॄणाम्। यस्क्षेत्रेण द्वितीयमवद्यति तेनैव सकृदवत्तं भवति। उद्गातृभ्यो हरन्ति। सोमदेवत्यं वै साम। साम्नः सवीर्यत्वाय सतनुत्वाय। प्राश्यो न प्राश्य इति मीमांसन्ते। यत्प्राश्नीयात्प्राकालुकः स्याद्यन्न प्राश्नीयादहविः स्यात्। अवजिघ्रेत्। उभयमेव करोति। यो ऽलमन्नाद्याय सन्नन्नं नाद्यात्स प्राश्नीयात्। परं वा एतदन्नं यत्पितरः। परेणैवान्नेनावरमन्नाद्यमवरुन्द्धे। भेषजं वा एतद्देवा यज्ञायाकुर्वन्। यत्सौम्यस्तदेष भिषज्यः। तस्मादामयाविना प्राश्यः।

पितरो मन्दन्तां सोमप्रतीका मन्दन्तां व्यशेम देवहितं यदायुः। इन्द्रपीतो विचक्षणो व्यशेम देवहितं यदायुः। हृदिस्पृक् [क्रतुस्पृग्] वर्चोधा असि वर्चो मे धेहि।

यन्मे मनो यमं गतं यद्वा मे अपरागतम्।
राज्ञा सोमेन तद्वयमस्मासु धारयामसि॥

इति सौम्यमवेक्षेत। यद्वा इह प्राकरोति यदस्यात्मनो मीयते पितॄंस्तद्गच्छति। यत्सौम्यमवेक्षते तदेवात्मन्यच्छते। परीव पश्येत्। यत्परिपश्यत्यात्मानमेव परिपश्यति। स ह त्वा अमुष्मिंल्लोके सर्वतनूर्य एवं विद्वान्सौम्यमवेक्षते। वीर्यं वा उपसदो निर्वीर्यं तृतीयसवनम्। ता बहिर्यज्ञं क्रियन्ते। यत्सौम्येन [तृतीयसवने चरन्ति] तृतीयसवन एव वीर्यं

दधाति। एता हि देवता उपसत्स्विज्यन्ते। आग्नेय्या पुरस्तात्सौम्यं परियजति हतो नेद्यज्ञमभिप्रपद्याता इति। वैष्णव्योपरिष्टादग्निष्टोमे नेत्सौम्यमभिप्रपद्याता इति। उभयत एव परिस्तृणात्यनभिप्रपादाय। आग्नेय्या घृतस्य यजति सौम्या सौम्यस्य वैष्णव्योपरिष्टाद्घृतस्य। यथापूर्वमेव देवतास्तर्पयति ॥३॥

प्राणा वै संस्थितयजूंषि। नवैतानि यजूंषि। नवभिर्बहिष्पवमानं स्तुवन्ति। नव प्राणाः। प्राणैरेव प्रयन्ति प्राणैरुद्यन्ति। संततं जुहोति प्राणानां संतत्या अविच्छेदाय। यं कामयेत प्रमीयेतेति नव कृत्वो गृहीत्वायजुष्केणैकैकं जुहुयात्। प्राणा वै संस्थितयजूंषि। प्राणेभ्य एवैनमन्तरेति ताजक्प्रधन्वति। विश्वरूपो वै त्वाष्ट्रो यज्ञस्य व्यृद्धं च समृद्धं चापश्यत्। षडेतान्यृग्म्याणि। यदेवास्य व्यृद्धं तत्तैः समर्धयति। त्रीणि यजूंषि। समृद्धमेव तत्। षडृग्म्याणि। षड्वा ऋतवः। ऋतुष्वेव प्रतितिष्ठति। त्रीणि यजूंषि। त्रय इमे लोकाः। एष्वेव लोकेष्वृध्नोति॥

यद्वै यज्ञस्यातिरिच्यते वरुणस्तद्गृह्णाति। यज्ञस्यैतदतिरिच्यते यदृजीषं यदौदुम्बरी यदधिषवणे। तेनाप्सु ऽवभृथमवयन्ति। आपो वै वरुणः। निर्वरुणत्वाय। न वहन्तीष्वभ्यवेयुः। पशवो वा ऋजीषम्। पशूनस्य निर्मृज्युरपशुः स्यात्। नोदञ्चो ऽभ्यवेयुः। यदुदञ्चो ऽभ्यवेयुरभीपतः प्रजा वरुणो गृह्णीयात्। न दक्षिणा। यद्दक्षिणा पितृभ्यः प्रजा निधूवेयुः। उदञ्चः प्राञ्चो ऽभ्यवयन्ति। पश्चाद्धि प्राङ् यज्ञो वरुणपाशादुन्मुच्यमान एति। स्थावरास्ववयन्ति। स्थावरा वै प्रत्यक्षं वरुणः। वरुण एव वरुणमवयजते। उरुं हि राजा वरुणश्चकार॥ शतं ते राजन्भिषजः सहस्रमिति यथायजुः। अग्नेरनीकमप आविवे [शेत्याघारमाघारयति समिद्ध्या एवोद्दीप्त्यै।.....॥४॥

[यज्ञस्य वै शिरो ऽच्छिद्यत। ततो यो रसो ऽस्रवत्सा वशाभवत्। यद्वशानूबन्ध्या भवति यज्ञस्य सरसत्वाय। मित्रो वै यज्ञस्य स्विष्टं] गृह्णाति वरुणो दुरिष्टम्। यन्मैत्रावरुणी वशानूबन्ध्या भवत्युभयत एव यज्ञं प्रमुच्य यजमानाय संप्रयच्छति मित्राच्च वरुणाच्च। यथा लाङ्गलेनोर्वरां प्रभिनेत्त्येवमृक्सामाभ्यां यज्ञः प्रभिद्यते। यथा मत्यमन्ववास्यत्येवं तत् यद्वशानूबन्ध्या यज्ञस्य शान्त्या अनुबध्यते। यत्प्रथममस्रवत्तद्बृहस्पतिरुपायद्यद्द्वितीयं तन्मित्रावरुणौ यत्तृतीयं तद्विश्वे देवाः। यदि तिस्रो ऽनूबन्ध्याःस्युर्मैत्रावरुणीं प्रथमां कुर्यादथ वैश्वदेवीमथ बार्हस्पत्यां यज्ञस्य सर्वत्वाय सरसत्वाय। अत्रात्र हि यज्ञस्य रसः। यातयामा वा एतस्य देवताश्च ब्रह्म च यः सोमेन यजते। यदेते वैश्वदेवी च बार्हस्पत्या च भवतो देवतानां चैव ब्रह्मणश्चायातयामत्वाय। वैश्वदेवी मध्ये भवति। वैश्वदेवीरिमाः प्रजाः। प्रजास्वेव रेतो दधाति। उपांशु यजति। अनिरुक्तं हि रेतः। बार्हस्पत्योत्तमा भवति। ब्रह्म वै बृहस्पतिः। अन्तमेवागत्य ब्रह्मवर्चसे प्रतितिष्ठति। यथा वा अनड्वान्यथाश्वो विमुक्तो ऽपक्रामत्येवं सोमेनेजानाद्देवताश्च यज्ञश्चापक्रामन्ति। आग्नेयं पञ्चकपालमुदवसानीयं निर्वपति। अग्निर्वै सर्वा देवताः पाङ्क्तो यज्ञः। देवताश्चैव यज्ञं चालभते। गायत्रो वा अग्निर्गायत्रच्छन्दाः। तं छन्दसा व्यर्धयति यत्पञ्चकपालं करोति। अष्टाकपालः कार्यः। अष्टाक्षरा गायत्री। गायत्रो ऽग्निर्गायत्रच्छन्दाः। स्वेनैवैनं छन्दसा समर्धयति। पाङ्क्ते याज्यानुवाक्ये भवतः। पाङ्क्तो यज्ञः। तेन यज्ञान्नैति ॥५॥

उपयामगृहीतो ऽसि। प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधम्। अग्निजिह्वेभ्यस्त्वर्तायुभ्यो वातापिभ्य पर्जन्यात्मभ्यः इन्द्रज्येष्ठेभ्यो वरुणराजभ्यः। पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वा। सते त्वासते त्वा भूताय त्वा भव्याय त्वा। यतः प्रजा अखिद्रा अजायन्त तस्मै त्वा प्रजापतये विभुदाम्ने जुहोमि स्वाहा॥

अभि सोमो ऽपःकामयते ऽभि सोममापः। यथा गावःसंजानानाः संगत्यान्यान्यां घ्नन्त्येवं वा एतौ संजानानौ संगत्यान्यो ऽन्यस्येन्द्रियं वीर्यं निर्हतः। उभयमेतत्प्राजापत्यं यत्सोमश्चापश्च। अपामेष ओषधीनां रसो यद्दधि। यद्वै पुत्रौ युध्येते पिता ताभ्यां कल्पयति। स्व एवैनौ लोके स्वेन भागधेयेन पिता शमयति। सह त्वै यज्ञेन समृद्धेन यजते यस्यैष गृह्यते। दध्ना सर्वाणि सवनानि पशुमन्ति वीर्यवन्ति कर्तव्यानि। यत्पयस्यया प्रातःसवने चरन्ति तेन तत्पशुमद्वीर्यवत्। यद्दधिघर्मेण मध्यन्दिने तेन तत्पशुमद्वीर्यवत्। यदाशिरा तृतीयसवने तेन तत्पशुमद्वीर्यवत्। सर्वाण्यस्य सवनानि पशुमन्ति वीर्यवन्ति भवन्ति य एवं वेद ॥ ६ ॥

देवा वा असुरान्यज्ञमभिजित्य ते प्रबाहुग्ग्रहान्गृह्णाना आयन्। स प्रजापतिरमन्यत यः प्रथमो ग्रहीष्यते स एवेदं

भविष्यतीति। स एतमंशुमपश्यत्। तं पराङ् प्राणन्नगृह्णीत। स पराङ् श्रियो ऽन्तमगच्छत्। बुभूषन्नेतं गृह्णीत। पराङेव प्राण्यात्प्रानन्यात्। पराङेव श्रियो ऽन्तं गच्छति। यदानिन्यादार्तिमार्छेत् प्र वा मीयते सर्वज्यानिं वा जीयते। यदि कामयेत सदृङ् यजमानः स्यादिति न प्राण्यात्प्रानन्यात्। सदृङ्ङेव भवति। चतुःस्रक्ति पात्रं भवति। चतस्रो दिशः। सर्वास्वेव दिक्ष्वृध्नोति। हिरण्येन संस्पर्शयति। अमृतं वै हिरण्यम्। अमृतेनैवैनं संदधाति। स [कृदभिषुतस्य गृह्णाति। न वै प्रजापतिं सवनैराप्तुमर्हति। एकधैवैनमाप्नोति। नर्चमन्वाह न यजुर्वद]ति। न वै प्रजापतिं वाचाप्तुमर्हति। मनसैवैनमाप्नोति। यो ऽंशोरायतनं वेदायतनवान्भवति। वामदेव्यमेवांशुं गृह्णन्वामदेव्यं मनसा ध्यायेत्। एतद्वा अंशोरायतनम्। आयतनवान्भवति य एवं वेद। हिरण्यमभिव्यनिति। आयुर्वै हिरण्यम्। आयुरेवात्मन्नभिधिनोति। अद्भिः प्रत्युक्षति। अमृतं वा आपः। अमृते [नैवैनं] संभरति ॥७॥

अथैते अतिग्राह्या यदेव परमोजो वीर्यमनरुद्धं तत्तावरुन्द्ध्यै। यदाग्नेयस्तेजो वा अग्निस्तेज एव तेन पुरस्ताद्धत्ते। यदैन्द्र इन्द्रियं वा इन्द्र इन्द्रियमेव तेन मध्यतो धत्ते। यत्सौर्यो ब्रह्मवर्चसमसावादित्य उपरिष्टादेव तेन ब्रह्मवर्चसं धत्ते। तेजो वा अग्निरिन्द्रियमिन्द्रो ब्रह्मवर्चसमसावादित्यः। तेजसा चैव ब्रह्मवर्चसेन चेन्द्रियमुभयत आत्मन्परिगृह्णाति। उपस्तम्भनं वा एतद्यज्ञस्य यदतिग्राह्याः। चक्रियौ पृष्ठानि। यदेते न गृह्येरन्नुपरिष्टाद्गरीयांसि पृष्ठानि प्राञ्चं यज्ञं संमृणुः। यदेते गृह्यन्ते पुरस्तादेव यज्ञमुपस्तभ्य चक्रियावुपास्यति सयत्वाय। प्रातःसवने गृह्णीयात्। एतद्वै सवनानां वीर्यवत्तमम्। वीर्यादेवैनानधिगृह्णाति॥

देवा वै सर्वे एव सदृशा आसन्। न व्यावृतमगच्छन्। तत एत एतान्ग्रहानपश्यन्नग्निराग्नेयमिन्द्र ऐन्द्रं सूर्यः सौर्यम्। ततो वै ते व्यावृतमगच्छञ्छ्रैष्ठ्यं देवानाम्। यस्यैते गृह्यन्ते व्यावृतमेव गच्छति श्रैष्ठ्यं समानानाम्। प्रजापतिर्वै देवेभ्यो भागधेयानि व्यादिशत्। यज्ञमेव सो ऽमन्यतात्मानमन्तरगामिति। तस्य याः प्रियास्तिलस्तन्व आसंस्ता अपन्यधत्त। एतान्वाव तद्ग्रहानपन्यधत्त। येन यज्ञेनैतैर्नाभिगृह्णीयात्। सर्वमेवैनं सवीर्यं सयोनिं सतनूमृद्ध्यै संभरति॥

वृत्रे वा एते पुरासन्। स इन्द्रो वृत्रं हत्वा स एतमाग्नेयमविन्दत। तमग्नये प्रायच्छदेतं मे धारयेति। स सौर्यमविन्दत। तं सूर्याय प्रायच्छदेतं मे धारयेति। स ऐन्द्रं विलेतरौ पुनरयाचत। तावस्मै न पुनरदत्ताम्। त इमाल्लोकान्व्यभजदग्निरिममिन्द्रो ऽन्तरिक्षं सूर्यो ऽमुम्। एतैर्वै ते ग्रहैरेषु लोकेष्वार्ध्नुवन्नेतैरेषां लोकानामाधिपत्यं पर्यायन्। सर्वेष्वेवेषु लोकेष्वृध्नोत्येषां लोकानामाधिपत्यं पर्येति यस्यैते गृह्यन्ते ॥

यद्वै विराजस्तेजस्तदा [ग्नेयो यच्छ्रव्यवर्यास्तदैन्द्रो यद्वेत्रस्तत्सौर्यः.........॥८॥

इति कपिष्ठलकठसंहितायां पञ्चचत्वारिंशत्तमो ऽध्यायः॥

.........अथ सौम्यः। सोमो रेतोधाः। मिथुन एव रेतो दधाति। अथ [पौष्णः ....अथ] पौष्णो ऽथ बार्हस्पत्यः। पशवो वै पूषा ब्रह्म बृहस्पतिः। पशूंश्चैव ब्रह्म चात्मन्ननुनियुङ्क्ते। अथ वैश्वदेवो ऽथैन्द्रः। वीर्यं वै विश्वे देवाः सह इन्द्रः। वीर्यं चैव सहश्चात्मन्ननुनियुङ्क्ते। अथ मारुतो ऽथैन्द्राग्नः। बलं वै मरुत ओज इन्द्राग्नी। बलं चैवौजश्चात्मन्ननुनियुङ्क्ते। प्रसवायैव सावित्रो निर्वरुणत्वाय वारुणः ॥ २ ॥

आग्नेयं सारस्वतीं सौम्यं बार्हस्पत्यं तान्त्सहालभेत ब्रह्मवर्चसकामः प्रजाकामः [पशुकामः] पुरोधाकामः। यदाग्नेय आग्नेयो हि ब्राह्मणः। यत्सारस्वती वाग्वै सरस्वती। वाचं हि वदति। यत्सौम्यः सोमं हि पिबति। यद्बार्हस्पत्यो ब्रह्म वै बृहस्पतिर्ब्रह्मण्येव चतुष्पात्संवत्सरं प्रतिष्ठापयति। ब्रह्मवर्चसी भवति। अथ पौष्णः। पशवो वै पूषा। पशूनेव ब्रह्मन्ननुनियुनक्ति। अथैन्द्रः। क्षत्रं वा इन्द्रः। क्षत्रमेव संपाद्य प्रतिष्ठापयति। अथो क्षत्रेणैव पशून्ब्रह्मण उपोहति। आग्नेयो मध्ये भवत्यैन्द्राग्नमितः। आग्नेयो वै ब्राह्मण ऐन्द्रो राजन्यः। ब्रह्मणैव क्षत्रं मध्यतो व्यवसर्पति। प्र पुरोधामाप्नोति य एवं वेद। इन्द्राग्नी पशूनां भूयिष्ठभाजौ करोति। अग्नेरग्नेय इन्द्रस्येन्द्र ऐन्द्राग्नः सह। तस्माद्ब्राह्मणश्च राजन्यश्च प्रजानां भूयिष्ठभाजौ। अथ वैश्वदेवो ऽथ मारुतः। विड्वै विश्वे देवा विण्मरुतः। विशमेव संपाद्य तां क्षत्रायानुनियुनक्ति। ब्रह्ममुखमेव क्षत्रं कृत्वा तस्मै विशमनुनियुनक्ति। प्रसवायैव सावित्रो निर्वरुणत्वाय वारुणः।

सम्यगेव ब्रह्म समूहति सम्यक्क्षत्रं समीचीं विशम्। यत्रैव क्लृप्तैकादशिन्यालभ्यते कल्पते तत्र प्रजाभ्यः। ब्राह्मण एव ब्राह्मणो भवति राजन्यो राजन्यो वैश्यो वैश्यः। एकादशिन्या वा इदमक्लृप्तमनु प्रजाभ्यो न कल्पते। एषा वावैकादशिनी। तामेतां कापेया विदुः। तामेतामतिरात्रचरम आलभेत। सत्रियेयमितरा यामिदं प्रजा आपद्य चरन्ति। अह्नामेवैषा विधा। एतद्देवत्यान्यहानि ॥३॥

प्रजननं वै पात्नीवतः। यद्वै किंच यज्ञे पात्नीवतं क्रियते प्रजननमेव तत्। पराङ् वा एतर्हि यज्ञः पराचीर्देवताः। त्वाष्ट्रो भवति। पराचीष्वेव देवतासु त्वष्टारं वृषाणमपिसृजति। सो ऽस्मै मिथुनं करोति। वज्रो वा एष पुरस्तात्संमीयते यदेकादशिनी। स ईश्वरः प्रत्यञ्चं यज्ञं संपुरः। यत्पात्नीवतो मीयते प्रत्युत्तब्ध्यै सयत्वाय। मनोर्वै कपालान्यासन्। तैर्यावतोयावतो ऽसुरानभ्युपादधात्ते पराभवन्। अथ तर्हि त्वष्टावरुत्री आस्तामसुरब्रह्मौ। तावसुरा अब्रुवन्निमानि मनुकपालानि याचेथामिति। तौ प्रातरित्वानावभिप्रापद्येतां वायवे ऽग्ना३ इ वायव इन्द्रा३ इति। किंकामौ स्थ इत्यब्रवीत्। इमानि नौ कपालानि देहीति। तान्याभ्यामददात्। तान्यरण्यं पराहृत्य समपिंष्टाम्। तन्मनोर्गावो ऽभिव्यतिष्ठन्त। तान्वृषभः समलेट्। तस्य रुवतो यावन्तो ऽसुरा उपाशृण्वंस्ते पराभवन्। तौ प्रातरित्वानावभिप्रापद्येतां वायवे ऽग्ना३ इ वायव इन्द्रा३ इति। किंकामौ स्थ इत्यब्रवीत्। अनेन त्वर्षभेण याजयावेति। तत्पत्नी यजुर्वदन्ती प्रत्यपद्यत। तस्या द्यां वागातिष्ठत्। तस्या वदन्त्या यावन्तो ऽसुरा उपाशृण्वंस्ते पराभवन्। तस्मात्तक्तं स्त्री चन्द्रतरं वदति। तौ प्रातरित्वानावभिप्रापद्येतां वायवे ऽग्ना३ इ वायव इन्द्रा३ इति। किंकामौ स्थ इत्यब्रवीत्। अनया त्वा पत्न्या याजयावेति। सा पर्यग्निकृतासीत्। अथेन्द्रो ऽचायन्मनुं श्रद्धादेवं त्वष्टावरुत्री असुरब्रह्मौ जायया व्यर्धयत इति। स आगच्छत्। सो ऽब्रवीदाभ्यां त्वा याजयानीति। नेत्यब्रवीत्। न वा अहमनयोरीश इति। अतिथिपतिर्वा अतिथेरीश इत्यब्रवीत्। तावस्मै प्रायच्छत्। स प्रतिवेशो वेदिं कुर्वन्नास्त। तावपृच्छतां को ऽसीति। ब्राह्मण इति। कतमो ब्राह्मण इति॥

किं ब्राह्मणस्य पितरं किमु पृच्छसि मातरम्।
श्रुतं चेदस्मिन्वेद्यं स पिता स पितामहः॥

इति। तावविन्तामिन्द्रो वा इति। तौ प्रापतताम्। तयोर्याः प्रोक्षणीराप आसंस्ताभिरनुविसृज्य शीर्षे अच्छिनत्। तौ वृषश्च यवाषश्चाभवताम्। तस्मात्तौ वर्षेषु शुष्यतः। अद्भिर्हि हतौ। तां पर्यग्निकृतामुदसृजत्। तयार्ध्नोत्। ता इमा मनाव्याः प्रजाः। यत्पर्यग्निकृतं पात्नीवतमुत्सृजति यामेव मनुर्ऋद्धिमार्ध्नोत्तामृध्नोति। संस्थाप्यां३ न संस्थाप्या३ मिति मीमांसन्ते। स्रवति वै यज्ञो ऽसंस्थितः। तं स्रवन्तं यजमानो ऽनु परास्रवति प्रजया च पशुभिश्च। संस्थाप्यमेव यज्ञस्य प्रतिष्ठित्यै। यदि संस्थापयेद्यावन्ति पशोरवदानानि तावन्त्याज्यस्यावद्येत्। अयातयामं ह्येतत्प्राजापत्यं यदाज्यम्। अयातयामो देवानां प्रजापतिः। तदेव संस्थापयति तदु न संस्थापयति। उभयमेव करोति ॥ ४ ॥

ऐन्द्रवायवाग्रा अग्रे गृह्यन्ते ऽथ शुक्राग्रा अथाग्रायणाग्राः। गायत्रो वा ऐन्द्रवायवस्त्रैष्टुभः शुक्रो जागत आग्रायणः। एतावन्ति वै छन्दांसि। छन्दोभिर्देवाः स्वर्गं लोकमायन्। छन्दोभिरेव स्वर्गं लोकमेति। आग्रायणश्चतुर्थे ऽहन्। जागतो वा आग्रायणः। जगन्मुख एष त्रिरात्रः। यदेव च्छन्द आप्नोति तेनोत्तरं त्रिरात्रं प्रतनुते। ऐन्द्रवायवाग्राः पञ्चमे ऽहन्। गायत्रो वा ऐन्द्रवायवः। प्राणो गायत्री। प्राणमेव मध्यतो दधाति। तस्मान्मध्यतः प्राणः। शुक्राग्रा एव षष्ठे ऽहन्। त्रैष्टुभो वै शुक्रः। त्रिष्टुबन्त एष त्रिरात्रः। अन्तमेवैनमभ्युदूहति। शुक्राग्रा एव सप्तमे ऽहन्। त्रैष्टुभो वै शुक्रः। त्रिष्टुम्मुख एष च्छन्दोमः प्रत्युत्तब्ध्यै सयत्वाय। अथो यदेव च्छन्द आप्नोति तेनोत्तरं त्रिरात्रं प्रतनुते। आग्रायणाग्रा अष्टमे ऽहन्। जागतो वा आग्रायणः। जगन्मध्य एष च्छन्दोमः। छन्दसामेव व्यूहमनुव्यूहति ऐन्द्रवायवाग्राः प्रायणीय ऐन्द्रवायवाग्रा उदयनीये। प्राणो वा ऐन्द्रवायवः। प्राणेनैव प्रयन्ति प्राणेनोद्यन्ति। प्राणा वै ग्रहाः। तानेतन्मोहयति यद्व्यतिहारं गृह्णाति। यदग्रान्यदग्रान्गृह्णीयात्तं घारयन्ना सादयितोरासीत। प्राणा वै ग्रहाः। प्राणानेवायतनश आपादयति। अथोत्तरं प्रसृता गृह्यन्ते। एवं ह वै केशिनो दाल्भ्यस्य वंशव्रश्चने ग्रहाञ्जगृहुः। स होवाच लुशाकपिः खार्गलिः कथं

ग्रहानग्रहीष्टेति। इत्थमित्थमिति हास्मा ऊचुः। स होवाच त्र्यनीकमस्य प्रजा भविष्यतीति। ततः पञ्चालास्त्रेधाभवन्। यस्यैवं ग्रहा गृह्यन्ते त्र्यनीकमस्य प्रजा भवति ॥ ५ ॥

ऐन्द्रवायवाग्रान्गृह्णीत यः कामयेत यथापूर्वं प्रजाभ्यः कल्पेतेति। यज्ञस्य वै क्लृप्तमनु प्रजाभ्यः कल्पते। यज्ञस्याक्लृप्तमनु न कल्पते। यथापूर्वमेव प्रजाभ्यः कल्पयति। न कनीयाञ्ज्यायांसमतिक्रामति। ऐन्द्रवायवाग्रान्गृह्णीयादामयाविनः। प्राणेन वा एष व्यृध्यते यस्यामयति। प्राण ऐन्द्रवायवः। प्राणेनैवैनं समर्धयति। मैत्रावरुणाग्रान्गृह्णीरन्येषां दीक्षितानां प्रमीयेत। प्राणापानाभ्यां वा एते व्यध्यन्ते येषां दीक्षितानां प्रमीयते। प्राणापानौ मित्रावरुणौ। प्राणापानावेव मुखतः परिहरन्ते। तस्मान्मुखतः प्राणापानौ। आश्विनाग्रान्गृह्णीतानुजावरः। अश्विनौ वै देवानामानुजावरौ। तावग्रं पर्यैताम्। अश्विनावेतस्य देवता य आनुजावरः। तावेवान्वारभते। तावेनमग्रं परिणयतः। शुक्राग्रान्गृह्णीत गतश्रीः। असौ वा आदित्यः शुक्रः। एषो ऽन्तः। अन्तं मनुष्यः श्रियो गत्वा निवर्तते। अन्तादेवान्तमालभते। न ततः पापीयान्भवति यादृङ् सन्यजते। मन्थ्यग्रान्गृह्णीताभिचरन्। आर्तपात्रं वा एतद्यन्मन्थिपात्रम्। मृत्युनैवैनं ग्राहयति। उक्थ्याग्रान्गृह्णीताभिचर्यमाणः। सर्वेषां वा एतत्पात्राणामिन्द्रियं वीर्यं यदुक्थ्यपात्रम्। सर्वेणैवैनमिन्द्रियेणातिप्रयुङ्क्ते॥

मा त्वक्षेत्राण्यरणानि गन्म मापस्फरीः पयसा मा न आधक्।
मा वयमेनो ऽन्यकृतं भुजेम सरस्वत्यभि नो नेषि वस्यः॥

इति। मृत्योर्वै क्षेत्राण्यरणानि। तेनैव मृत्योः क्षेत्राणि न गच्छति। आग्रायणाग्रान्गृह्णीत यस्य पिता पितामहः पुण्यः स्यात्। अथ तत्र प्राप्नुयात्। वाचा वा एष इन्द्रियेण व्यृध्यते यस्य पिता पितामहः पुण्यो भवति। अथ तत्र प्राप्नोति। उर इवैतद्यज्ञस्य वागिव यदाग्रायणः। वाचैवैनमिन्द्रियेण समर्धयति। पूर्णान्ग्रहान्गृह्णीयादामयाविनः। प्राणान्वा एतस्य शुगृच्छति यस्यामयति। प्राणा ग्रहाः। प्राणानेवास्य शुचो मुञ्चति। पूर्णान्ग्रहान्गृह्णीयाद्यर्हि पर्जन्यो न वर्षेत्। प्राणान्वा एतर्हि प्रजानां शुगृच्छति यर्हि पर्जन्यो न वर्षति। प्राणा ग्रहाः। प्राणानेव प्रजानां शुचो मुञ्चति ताजक्प्रवर्षति ॥ ६ ॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व।
मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु॥

उपयामगृहीतो ऽसि। अदित्यै त्वा चतुरूध्न्यै॥

उदीरयत मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः।
न वो दस्रा उपदस्यन्ति धेनवः शुभं यातामनु रथा अवृत्सत॥

उपयामगृहीतो ऽसि। अदित्यै त्वा चतुरूध्न्यै॥

महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम।
तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम्॥

उपयामगृहीतो ऽसि। अदित्यै त्वा चतुरूध्न्यै॥

एष ते योनिः॥
अदित्यै त्वा चतुरूध्न्यै॥

वृष्टिर्वै देवेभ्यो ऽपाक्रामत्। सैषु लोकेष्वश्रयत। तां देवा अन्वेष्टुमध्रियन्त। त एतं ग्रहमपश्यन्। तमगृह्णत। तेनैभ्यो लोकेभ्यो वृष्टिं संप्राच्यावयन्। तमेतं वृष्टिकामो गृह्णीत। क्षेत्रस्य पते मधुमन्तमूर्मिमिति। असौ वै क्षेत्रस्य पतिरमुतो वर्षति। उदीरयत मरुतः समुद्रत इति। मरुतः सृष्टां वृष्टिं नयन्ति। महीमू षु मातरं सुव्रतानामिति। इयमदितिः। अस्यां वर्षति। एता वै देवता वर्षस्येशते। ता एवोपधावति। एभ्य एव लोकेभ्यो वृष्टिं संप्रच्यावयति। चतुस्तनं पात्रं भवति। चतस्रो दिशः। दिग्भ्य एव वृष्टिं संप्रच्यावयति। यं प्रथमं स्तनमनुपद्यते तस्या दिशो ऽभ्येतद्वर्षति। अपि पात्रे क्रियमाणे वर्षति। मृन्मयेन गृह्णाति। दारुमयेण जुहोति। न हि मृन्मयमाहुतिमानशे ॥७॥

तृतीयस्यां वै दिवि सोम आसीत्। तं गायत्र्याहरत्। तस्य पर्णमच्छिद्यत। स पर्णो ऽभवत्। तत्पर्णस्य पर्णत्वम्। तस्मात्सर्वे वृक्षाः पर्णवन्तः। अथैष एव पर्ण उच्यते यत्पर्णशाखा भवति। तमेव सोममवरुन्द्धे। देवा वै ब्रह्मन्समवदन्त। तत्पर्ण उपाशृणोत्। सुश्रवा वै नामैषः। न बधिरो भवति य एवं वेद। यत्पर्णशाखया प्रार्पयति ब्रह्मणैवैनाः प्रार्पयति। प्रजापतिः पशूनसृजत। तानयं देवो ऽभ्यमन्यत। तं शम्याशमयत्। तच्छम्याः शमीत्वम्। यच्छमीशाखया प्रार्पयति शान्त्यै। अपां वा एतदोषधीनां तेजो यद्दर्भाः। यद्दर्भपिञ्जूलैः प्रार्पयत्यपामेवैना ओषधीनां तेजसा प्रार्पयति। इषे त्वोर्जे त्वेति। इषमेवोर्जं यज्ञे दधाति। वायव स्थेति। वायुर्वा अन्तरिक्षस्याध्यक्षः। अन्तरिक्षदेवत्याः पशवः। वायुरेवैनानन्तरिक्षाय परिददाति। प्र वा एनानेतदाकरोति यद्वायव स्थेत्याह। अरण्यस्येव हि वायुः। उपायव स्थेति यजमानायैव पशूनपाकरोति। देवो वः सविता प्रार्पयत्विति प्रसूत्यै। श्रेष्ठतमाय कर्मण इति। यज्ञो वै श्रेष्ठतमं कर्म। आप्यायध्वमघ्न्या देवभागमिति। वत्सेभ्यश्च वा एता मनुष्येभ्यश्च पुराप्यायन्ते। अथैतर्हि देवेभ्य एवैना आप्याययति। प्रजावतीरनमीवा अयक्ष्मा इति। प्रजावतीरेवैना अनमीवा अयक्ष्माः करोति। मा व स्तेन ईशत माघशंस इत्याशिषमेवाशास्ते। परि वो रुद्रस्य हेतिर्वृणक्त्विति रुद्रमेव पशुभिः परिवृणक्ति। अयातुको ऽस्य रुद्रः पशून्भवति यस्यैवं विदुषो यश्चैवं विद्वान्हविषे गाः प्रार्पयति। ध्रुवा अस्मिन्गोपतौ स्यातेति दृंहत्येवैनाः। बह्वीरिति भूमानमेवैना गमयति। यजमानस्य पशून्पाहीति यजमानस्य पशूनां गोपीथाय। वसोः पवित्रमसि शतधारं वसूनां पवित्रमसि सहस्रधारमिति। वसूनां वा एतद्भागधेयं यत्पवित्रम्। तेभ्य एवैनत्करोति। प्रतीचीं शाखामुपगूहति। तस्माद्ग्राम्याः पशवः सायमारण्याद्ग्राममायन्ति। यत्पराचीमुपगूहेदरण्ये ह्रीयेरन् ॥८॥

॥ इति कपिष्ठलकठसंहितायां षट्चत्वारिंशत्तमोऽध्यायः॥

प्रजापतिर्वा ओषधीः परुःशो वेद। प्राजापत्यो ऽश्वः। यदश्वपर्शा बर्हिर्दात्योषधीनामहिंसायै। घोषदसीति रयिमेव यजमाने दधाति। निष्टप्तं रक्ष इति यज्ञमुखादेव रक्षांस्यपहन्ति। प्रेयमगाद्धिषणा बर्हिरच्छेति। विद्या वै धिषणा। विद्ययैवैनदच्छैति। मनुना कृता स्वधया वितष्टेति। मनुना ह्येषा कृता स्वधया वितष्टा। उर्वन्तरिक्षं वीहीति समष्ट्यै। इन्द्रस्य परिपूतमसीति। यद्वा इदं किंच तदिन्द्रस्य परिपूतम्। यथा श्रेयसे प्रोच्य कर्म करोत्येवमेवैतदिन्द्राय प्रोच्य बर्हिर्दाति। यावत्परिदिशति तत्सर्वं दाति। यत्तत्सर्वं न दाति यज्ञस्य तदतिरिच्यते। यद्वै यज्ञस्यातिरिच्यते भ्रातृव्यं तेन वर्धयति। एकं स्तम्बं परिदिशेत्। तं सर्वं दायाद्यज्ञस्यानतिरेकाय। यत्सर्वं दायात्र पशुभ्यो जीवनमुच्छिंषेत्। एकां वा श्रुष्टिं द्वे वोच्छिंषेत्। न यज्ञस्यातिरेचयति। उत्पशुभ्यो जीवनं शिंषति। माधो मोपरि परुस्त ऋध्यासमित्यृद्ध्यै। आच्छेत्ता ते मा रिषदिति। यावद्यावद्वा अविद्वानध्वर्युर्बर्हिषो दाति तावदस्यात्मनो मीयते। नास्यात्मनो मीयते य एवं वेद। देव बर्हिः शतवल्शं विरोहेत्योषधिष्वेव भूमानं दधाति। सहस्रवल्शा वि वयं रुहेमेत्याशिषमेवाशास्ते। अदित्या रास्नासीति। इयमदितिः। अस्या एवैनद्रास्नां करोति। इन्द्राण्याः संनहनमिति। इन्द्राणी वा अग्रे देवतानां समनह्यत। साध्नोत्। ऋद्ध्यै। बर्हिः संनह्यति। प्रजा वै बर्हिः। प्रजानामपरावापाय। तस्मात्स्नाव्ना प्रजाः संतताः। पूषा ते ग्रन्थिं ग्रथ्नात्विति। पुष्टिर्वै पूषा। पुष्टिमेव यजमाने दधाति। स ते मा स्थादित्यहिंसायै। इन्द्रस्य त्वा बाहुभ्यामुद्यच्छ इतीन्द्रस्यैवैनद्बाहुभ्यामुद्यच्छते। बृहस्पतेस्त्वा मूर्ध्ना हरामीति। ब्रह्म वै बृहस्पतिः। ब्रह्मणैवैनद्धरति। देवंगममसीति। बहु वा एतस्य पूर्वेद्युराह्रियमाणस्य स्कन्दति। अस्कन्नमेवैनद्देवेभ्यः संप्रयच्छति। तदाहरन्ति कवयः पुरस्तादिति। ब्राह्मणा वै कवयः। ब्राह्मणा ह्येतदाहरन्ति। देवेभ्यो जुष्टमिह बर्हिरासद इति देवेभ्य एवैनज्जुष्टं करोति ॥१॥

प्रजापतिः प्रजा असृजत। तस्योखे अस्रंसेताम्। स एते उखे अपश्यत्। ताभ्यामादत्त। यदेते उखे भवतः प्रजापतेरेवोखे प्रतिदधाति। अयक्ष्मा वः प्रजया संसृजामीत्ययक्ष्मा एवैनाः करोति। रायस्पोषेण बहुला भवन्तीरिति भूमानमेवैना गमयति। मधुमद्घृतवत्पिन्वमाना इति मधुमदेव घृतवद्देवेभ्यो हव्यं करोति। जीवा जीवन्तीरुप वःसदेमेत्याशिषमेवाशास्ते। मातरिश्वनो घर्मो ऽसीति। अन्तरिक्षं वै मातरिश्वनो घर्मः। द्यौरसि पृथिव्यसीति दिवमेवैनां पृथिवीमकः। विश्वधायाः परेण धाम्नाहुतासि मा ह्वारिति दृंहत्येवैनाम्। पवित्रमपिदधाति। ओषधीनां चैव पशूनां च

पयः संसृजति। सा विश्वायुः सा विश्वव्यचाः सा विश्वधाया इति। असौ वै विश्वायुरन्तरिक्षं विश्वव्यचा इयं विश्वधायाः। इमानेव लोकान्यथापूर्वं प्रदापयति। इमे ऽस्मै लोका यथापूर्वं प्रत्ता दुहे। तिस्रो यजुषाभिमन्त्रयते। त्रय इमे लोकाः। एष्वेवे लोकेषु रसं दधाति। तस्मादिमांल्लोकान्प्रजा उपजीवन्ति। उपजीवनीयो भवति य एवं वेद। हुत स्तोको हुतो द्रप्स इत्यनुमन्त्रयते ऽस्कन्दाय। अग्नये बृहते नाकायेति। इयं वा अग्निर्बृहन्नाकः। बहु वा एतस्य दुह्यमानस्य स्कन्दति। अस्यामेवैनत्प्रतिष्ठापयति। अस्कन्दाय। न दारुपात्रेण दुह्यात्। अग्निमद्वै दारुपात्रम्। यातयाम्ना हविषा यजेत। तदु ह स्माहुदत्रियाः पुरोडाशमुखं वै हविर्न वा इतइतः पुरोडशं हविषो यामो ऽस्ति दोग्धव्यमेवेति। न शूद्रो दुह्यात्। असतो वा एष संभूतः। असतस्यात्। यद्वाव पवित्रमत्येति तद्धविः। अग्निहोत्रमेव शूद्रो न दुह्यात्। तद्धि नोत्पुनन्ति। संपृच्यध्वमृतावरीरिति प्रत्यानयति शृतत्वाय। शृतकामा हि देवाः। इन्द्रस्य त्वा भागं सोमेनातनच्मीति सोममेवैनं करोति। सोमो वै देवानां परोक्षं सान्नाय्यम्। तस्य ह त्वै सोमपीथः संततो य एवं विद्वान्सान्नाय्येन यजते। अदस्तमसि विष्णव इति। यज्ञो वै विष्णुः। यज्ञायैवैनददस्तं करोति। न मृत्पात्रेणापिदध्यात्। यन्मृत्पात्रेणापिदध्यात्पितृदेवत्यं हविः स्यात्। दारुपात्रेणापिदधाति। अग्निमद्वै दारुपात्रम्। अग्निरेव हव्यं रक्षते। उदन्वत्कुर्यात्। आपो रक्षोघ्नीः। रक्षसामपहत्यै। ताभ्य एवैनत्परिददाति ॥२॥

विष्णो हव्यं रक्षस्वेति विष्णुरेव हव्यं रक्षते। आपो जागृतेति। आपो यज्ञस्य गोप्त्रीः। आपो देवानां प्रियं धाम। देवानामेव प्रियं धाम प्रणीय प्रचरति। अपः प्रणयति। आपो वै यज्ञः। यज्ञमेव तत्वा प्रचरति। आपो वज्रः। वज्रमेव भ्रातृव्याय प्रहरति। आपः श्रद्धा। श्रद्धास्मै देवाः प्रचरति। आपो रक्षोघ्नी रक्षसामपहत्यै। आपो वज्रः। वज्रमेव भ्रातृव्याय प्रहरति। आपः श्रद्धा। श्रद्धास्मै देवा अन्मनुष्या दधते यस्यैवं विदुषो यस्यैवं विद्वानपः प्रणयति। कर्मणे वामिति हस्तावनेनिक्ते। कर्म ह्येतत्क्रियते। उर्वन्तरिक्षं वीहीति समष्ट्यै। धूरसि वानस्पत्यमसीति स्रुक्शूर्पमादत्ते। निष्टप्तं रक्ष इति यज्ञमुखादेव रक्षांस्यपहन्ति। द्वौ वै पुरुषस्य भ्रातृव्यौ यं च द्वेष्टि यश्चैनं धूर्व धूर्वन्तमिति। धुर्यो वा एषो ऽग्निः। यदनालभ्यातीयाद्यजमानं शुचार्पयेत्। धूर्व धूर्वन्तमिति। धुर्यो वा एषो ऽग्निः। यदनालभ्यातीयाद्यजमानं शुचार्पयेत्। देवानामसि वह्नितममिति देवेभ्य एवैनद्वह्नि करोति। विष्णोः क्रमो ऽस्यहुतमसि द्वेष्टि। तावेवास्य शुचार्पयति। देवानामसि वह्नितममिति देवेभ्य एवैनद्वह्नि करोति। उरु त्वा वातायेति। यद्वै किं च वातो हविर्धानमिति दृंहत्येवैनत्। मित्रस्य त्वा चक्षुषा प्रेक्ष इति मित्रमेवैनत्कुरुते। उरु त्वा वातायेति। यद्वै किं च वातो नाभिवाति तद्वरुणस्य। अवरुण्यमेवैनत्करोति। देवस्य त्वा सवितुः प्रसव इति सवितृप्रसूत एवैनद्देवताभ्यो निर्वपति। यच्छन्तु त्वा पञ्चेति। पञ्च वा ऋतवः। ऋतूनेव अमुष्मै जुष्टमिति यस्या एव देवतायै निर्वपति तस्या एनज्जुष्टं करोति। यच्छन्तु त्वा पञ्चेति। पञ्च वा ऋतवः। ऋतूनेव प्रीणाति। ते ऽस्मै प्रीताः कल्पन्ते। कल्पन्ते ऽस्मा ऋतवो य एवं वेद। रक्षायै त्वा नारात्या इति रक्षसामपहत्यै। इदं देवानामिदं नः सहेति व्यावृत्त्यै। स्वरभिव्यख्यमिति। तम इव वा एष प्रपद्यते परीणहम्। स्वरेवाभिविपश्यति। इमे वै लोका हविषो गृहीतादुद्वेपन्त। तान्देवा एतेन यजुषादृंहन्। दृंहन्तां दुर्या इतीमानेव लोकान्दृंहति। उर्वन्तरिक्षं वीहीति ब्रूयाद्व्यायुको ऽध्वर्युः स्यात्। उर्वन्तरिक्षं प्रेहीत्यव्यायुको ऽध्वर्युर्भवति य एवं वेद। अग्ने हव्यं रक्षस्वेत्युपसादयति। अग्निरेव हव्यं रक्षते ॥३॥

विष्णोर्मनसा पूते स्थ इति पुनात्येवैने। देवो वः सविता पुनात्विति सवितृप्रसूत एवैना देवताभिरुत्पुनाति। अमुष्मै जुष्टमिति यस्या एव देवतायै प्रोक्षति तस्या एनज्जुष्टं करोति। शुन्धन्तां पात्राणि देवयज्याया इति देवेभ्य एवैनानि शुन्धति। अवधूतं रक्षो ऽवधूता अरातिरिति रक्षसामपहत्यै। अदित्यास्त्वगसीति। इयमदितिः। अस्या एवैनत्त्वचं करोति। अधिषवणमसि वानस्पत्यमित्यधिषवणमेवैनत्करोति। अग्नेस्तनूरसि वाचो विसर्जनमिति। अग्नेर्ह्येषा तनूर्वाचो विसर्जनम्। यदा हि पशव ओषधीरश्नन्त्यथ वाचं विसृजन्ते। बृहद्ग्रावासि वानस्पत्य इति ग्रावाणमेव कृत्वा हविष्करोति। हविष्कृदाद्रवेति य एव देवानां हविष्कृत्तं ह्वयति। त्रिर्ह्वयति। त्रिसत्या हि देवाः। अद्रिरसि श्लोककृदपहतं रक्षो ऽपहता अरातिरिति रक्षसामपहत्यै। वयं संघातंसंघातं जयेमेति संघातंसघातमेव भ्रातृव्यं जयति॥

मनोर्वै श्रद्धादेवस्य यजमानस्यासुरघ्नी वाग्यज्ञायुधानि प्रविष्टासीत्। तेषां यावन्तो ऽसुरा उपाशृण्वंस्ते पराभवन्। य एवं विद्वान्भ्रातृव्याणां मध्ये ऽवसाय यजेत यावन्तो ऽस्य भ्रातृव्या यज्ञायुधानामुपशृण्वन्ति तेषामिन्द्रियं वीर्यं वृङ्क्ते। वर्षवृद्धमसि प्रति त्वा वर्षवृद्धं वेत्त्विति मिथुनमेव करोति। असा वै देवाः भवत्यात्मना परास्य भ्रातृव्यो भवति।

पशुभ्यो रक्षांसि निरवादयन्त तुषैरोषधिभ्यः परापूतं रक्षः परापूता अरातिरित्येतावतैव यज्ञाद्रक्षांसि निरवदयते। निरस्तो अघशंस इति। भ्रातृव्यो वा अघशंसः। भ्रातृव्यमेव निरस्यति। वायुर्व इष ऊर्जे विविनक्त्विति। वायुर्वै देवानां पवित्रम्। पुनात्येवैनान्। सुफलीकृतान्करोति। मेध्यानेवैनान्यज्ञियान्करोति। त्रिः फलीकरोति। त्रिषत्या हि देवाः ॥४॥

अवधूतं रक्षो ऽवधूता अरातिरिति रक्षसामपहत्यै। अदित्यास्त्वगसीति। इयमदितिः। अस्या एवैनं त्वचं करोति। धिषणासि पार्वती प्रति त्वादित्यास्त्वग्वेत्तु पृथिवीं दृंहेति पृथिवीमेव दृंहति। धिषणासि पार्वतेयी प्रति त्वा पार्वती वेत्तु दिवं दृंहेति दिवमेव दृंहति। दिव स्कम्भन्यसीति शम्यामुपदधाति। इमे वै सहास्ताम्। ते शम्यामात्रंशम्यामात्रं व्यैताम्। वज्रः शम्या। यच्छम्यामुपदधात्यनयोरेव विधृत्यै। धान्यमसि धिनुहि देवानिति। एतस्य वै यजुषो वीर्येण यावदेका देवता कामयेत। यावदेका तावदस्या अहुतिः प्रथते। प्राणाय त्वा व्यानाय त्वापानाय त्वेति प्राणं व्यानमपानं तानेव यजमाने दधाति। दीर्घामनु प्रसितिमायुषे त्वेत्यायुरेवास्मिन्दधाति। देवो वःसविता हिरण्यपाणिः प्रतिगृह्णात्विति प्रेव वा एते स्कन्दन्ति प्रतिष्ठित्यै। अदब्धेन वश्चक्षुषावपश्यामीति चक्षुषो गोपीथाय ॥५॥

निर्दग्धं रक्ष इति रक्षसामपहत्यै। अपाग्ने अग्निमामादं जहीति य आमात्क्रव्यात्तमपहत्य यज्ञिये देवयजन उपदधाति। यदधस्तादङ्गारमुपवर्तयत्यस्मिंस्तेन लोके ज्योतिर्धत्ते। यदुपरिष्टादधिवर्तयत्यन्तरिक्षे तेन ज्योतिर्धत्ते। असावेवास्यादित्यो ऽमुष्मिंल्लोके ज्योतिर्भवति। त्रीणि समीचीनान्युपदधाति। त्रयो वै प्राणाः प्राणो व्यानो ऽपानः। तानेव यजमाने दधाति। त्रय इमे लोकाः। एष्वेव लोकेष्वृध्नोति॥

ध्रुवमसि पृथिवीं दृंहेति पृथिवीमेव दृंहति। आयुर्देहि प्राणं देहीत्याशिषमेवाशास्ते। धरुणमस्यन्तरिक्षं दृंहेत्यन्तरिक्षमेव दृंहति। चक्षुर्देहि श्रोत्रं देहीत्याशिषमेवाशास्ते। धर्त्रमसि दिवं दृंहेति दिवमेव दृंहति। ओजो देहि बलं देहीत्याशिषमेवाशास्ते। धर्मासि दिशो दृंहेति दिश एव दृंहति। रयिं देहि पोषं देहीत्याशिषमेवाशास्ते। चन्नमस्याशा दृंहेत्याशा एव दृंहति/ रूपं देहि वर्णं देहीत्याशिषमेवाशास्ते ॥

प्रजापतिर्वै यदग्रे समभवत्स एतावच्छ एव समभवत्। एकं वा अग्रे शीर्ष्णः कपालं संभवत्यथ द्वितीयमथ तृतीयमथ चतुर्थमथ पञ्चममथ षष्ठमथ सप्तममथाष्टमम्। यदष्टौ समीचीनान्युपदधात्यात्मानमेवैतद्यजमानः [संस्कुरुते.......... ॥६॥]

....[पुरोडाशं वा अधिश्रि] तं रक्षांस्यजिघांसन्। स नाको नाम दिवि रक्षोहाग्निः। सो ऽस्माद्रक्षांस्यपाहन्। देवस्त्वा सविताश्रपयतु वर्षिष्ठे ऽधि नाक इति रक्षसामपहत्यै। अग्निस्ते तन्वं मा हिंसीदित्यहिंसायै त्वचं ग्राहयति। तस्मान्मस्तिष्कः परिततः। यानि वा इमानि शीर्ष्णः कपालानि तानि कपालानि। यो मस्तिष्कः स पुरोडाशः। यन्नाभिवासयेदाविर्मस्तिष्कः स्यात्। यदभिवासयति तस्माद्गुहा मस्तिष्कः। भस्मनाभिवासयति। तस्मादस्थि मांसेन च्छन्नम्। वेदेनाभ्यूहति। तस्माच्छिरः केशैश्छन्नम्। ते देवास्तन्नाविन्दन्त यस्मिन्यज्ञस्य क्रूरं माक्ष्यामह इति। सो ऽग्निरब्रवीदहं वस्तं जनयिष्यामि यस्मिन्यज्ञस्य क्रूरं माक्ष्यध्व इति। सो ऽपो ऽङ्गारेणाभ्यपातयत्। तत एकतो ऽजायत। द्वितीयम्। ततो द्वितः। तृतीयम्। ततस्त्रितः। यदात्मनो निरमिमीत तदात्मेयानामात्मेयत्वम्। यदद्भ्यो निरमिमीत तदाप्येयानामाप्येयत्वम्। अन्तर्वेदि निनयति। तद्देवावरुन्द्धे। उल्मुकेनाभिघारयति शृतत्वाय। शृतकामा हि देवाः। ते ऽतिमृजाना आयन्। सूर्याभ्युदिते ते ऽमृजत। सूर्याभ्युदितः सूर्याभिनिम्रुक्ते। सूर्याभिनिम्रुक्तः कुनखिनि। कुनखी श्यावदति। श्यावदन्परिवित्ते। परिवित्तः परिविविदाने। परिविविदानो ऽग्रेदिधिषौ। अग्रेदिधिषुर्दिधिषूपतौ। दिधिषूपतिर्वीरहणि। वीरहा ब्रह्महणि। ब्रह्महा भ्रूणहनि। भ्रूणहनमेनो नात्येति ॥७॥

देवस्य त्वा सवितुः प्रसव इति स्फ्यमादत्ते। सवितृप्रसूत एवैनं देवताभिरादत्ते। इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजा इति। वज्रो वै स्फ्यः। वज्रमेव संश्यति भ्रातृव्याय प्रहरिष्यन्। वायुरसि तिग्मतेजा इत्यधस्तादनुमार्ष्टि। पृथिवि देवयजन्योषध्यास्ते मूलं मा हिंसिषमित्योषधीनामहिंसायै। व्रजं गच्छ गोष्ठानमिति। छन्दांसि वै व्रजो गोष्ठानः। छन्दांस्येवास्मै व्रजं गोष्ठानं करोति। वर्षतु ते द्यौरिति वृष्टिमेव निनयति। बधान देव सवितः

परमस्यां पृथिव्यां शतेन पाशैरिति। द्वौ वै पुरुषस्य भ्रातृव्यौ यं च द्वेष्टि यश्चैनं द्वेष्टि। तावेवास्य बध्नाति। द्रप्सस्ते द्यां मा स्कन्निति। यो वा अस्या रसः स द्रप्सः। तमिमाः प्रजा उपजीवन्ति। तमेवास्यां यच्छति तस्मात्सुताय। अररुर्दां मा पप्तदिति। भ्रातृव्यो वा अररुः। भ्रातृव्यमेव स्वर्गाल्लोकादभिनुदति। अररुर्वै नामासुर आसीत्। सो ऽबिभेद्यज्ञेन नो देवा अभिभविष्यन्तीति। स पृथिवीं बिल्वालिम्पदमेध्यां कुर्वन्। इन्द्रो वै वज्रमहन्। तस्येमां लोहितमनुव्यधाव [त्। तदमेध्यमभव] त्। यदुद्धन्ति यदेवास्या अमेध्यमवजिनं तदपहन्ति। अररुर्वै नामासुर आसीत्। सो ऽबिभेद्देवा मा पृथिव्या नोत्स्यन्त इति। [स] पृथिवीमुदकुप्यदाशयत्। तमिन्द्रो ऽन्वायत्। तमपारस्मदेवयजनं पृथिव्या देवयजनाज्जहीति पृथिव्या अपाहन्। स दिवमपतत्। अररुर्दां मा पप्तदिति तं दिवः प्रत्यनुदत। ततो देवा अभवन्परासुरा अभवन्। यत्रैव विद्वान्त्स्तम्बयजुर्हियते यत्रैव विद्वान्हरत्येभ्य एव लोकेभ्यो भ्रातृव्यमन्तर्धत्ते भवत्यात्मना परास्य भ्रातृव्यो भव [ति। असुराणां वा इयं पृथिव्यासीत्। ते देवा अब्रुवन्द] न नो ऽस्या इति। ते वै स्वयं कृष्यामित्यब्रुवन्। सो ऽग्निरेव प्राचीं दिशमुदजयद्वसवो दक्षिणां रुद्राः प्रतीचीमादित्या उदीचीम्। ते देवा इमामसुराणामविन्दन्। ततो देवा अभवन् [परासुरा अभवन्।] य एवं विद्वानेताभिर्देवताभिर्वेदिं परिगृह्णातीमामेव भ्रातृव्यस्य विन्दते भवत्यात्मना परास्य भ्रातृव्यो भवति।

पृथिव्या वै मेध्यं चामेध्यं च व्युदक्रामत्। प्राचीनमुदीचीनं मेध्यमुदक्रामत्प्रतीचीनं दक्षिणामेध्यम्। प्राचीमुदीचीं वेदिं प्रवणां कुर्यात्। मेध्यामेवैनां यज्ञियां करोति। अथ मेध्यस्य चामेध्यस्य च व्यावृत्त्यै। प्राञ्चौ बाहू उन्नयति। आहवनीयमेव परिगृह्णाति। प्रतीची श्रोणी। गार्हपत्यमेव परिगृह्णाति। मूलं वै रक्षांस्यनूत्पिबन्ति। न नखेन छिन्द्यात्। यन्नखेन छिन्द्यात्कुनखी स्यात्। स्फ्येन छिनत्ति। वज्रो वै स्फ्यः। वज्रेणैव रक्षांस्यपहन्ति ॥८॥

घृतं च वै मधु च प्रजापतावास्ताम्। यतो मध्वासीत्ततः प्रजा असृजत। तस्मान्मधोः प्रजननमिवास्ति। तस्मान्मधुना न प्रचरन्ति। यातयाम हि तत्। घृतेन प्रचरन्ति। अयातयामं ह्येतत्प्राजापत्यं यदाज्यम्। अयातयामा देवानां प्रजापतिर्गार्हपत्ये ऽधिश्रयति। पत्न्यवेक्षते। पत्न्या एवैष यज्ञस्यान्वारम्भः। अथो मिथुनमेव यज्ञमुखे दधाति प्रजननाय। यद्वै पत्नी यज्ञे करोति तन्मिथुनम्। यत्पत्न्यवेक्षते मिथुनमेव करोति। अमेध्यं वा एतदयज्ञियं यत्पत्न्यवेक्षते। आहवनीये ऽधिश्रयति। मेध्यमेवैनद्यज्ञियं करोति। देवाश्च वा असुराश्च समावदेव यज्ञे ऽकुर्वत। यदेव देवा अकुर्वत तदसुरा अकुर्वत। स इन्द्र एतमवकाशमपश्यत्। तेनावैक्षत। तेनासुरानभ्यभवत्। ततो देवा अभवन्परासुरा अभवन्। य एवं विद्वांस्तेनाज्यमवेक्षते ऽभ्येव भ्रातृव्यं भवति भवत्यात्मना परास्य भ्रातृव्यो भवति। प्रत्युष्टं रक्ष इति यज्ञमुखादेव रक्षांस्यपहन्ति। अनिशिता स्थ सपत्नक्षयणीरित्यनिशिता एवैनाः करोति। स्रुचः संमार्ष्टि पुनात्येवैनाः। स्रुवमग्रे संमार्ष्टि। पुमांसमेवासामग्रे संश्यति। अथ जुहूमथोपभृतमथ ध्रुवाम्। असौ वै जुहूरन्तरिक्षमुपभृदियं ध्रुवा। इमानेव लोकाननुपूर्वं संमार्ष्टि। यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृत्। चतुर्जुह्वां गृह्णन्भूय आज्यं गृह्णाति। अष्टौ गृह्णन्नुपभृति कनीयः। भ्रातृव्यमेवास्मा उपस्तिं करोति ॥९॥

देवीरापो अग्रेग्व इति यज्ञमेव प्रणयति। इमं यज्ञं नयत प्र यज्ञपतिं तिरतेत्याशिषमेवाशास्ते। अग्नेर्वै मेधो ऽपाक्रामत्। कृष्णो भूत्वा स वनस्पतीन्प्राविशत्। प्रोक्षिता स्थ। कृष्णो ऽस्याखरेष्ठो ऽग्नये त्वा जुष्टं प्रोक्षामीति तमेव मेधमवरुन्द्धे। आपो वस्य एव देवताये प्रोक्षति तस्या एनं जुष्टं करोति। वेदिरसि बर्हिषे त्वा जुष्टं प्रोक्षामि। बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामीति। प्रजा वै बर्हिः पृथिवी वेदिः। प्रजा एव पृथिव्यां प्रतिष्ठापयति। ऊर्जा पृथिवीं गच्छतेति पृथिव्यामेवोर्जं दधाति। तस्मात्पृथिवीं प्रजा उपजीवन्ति। उपजीवनीयो भवति य एवं वेद।

बर्हिरासादयेत्। यावतीर्वै प्रोक्षणीरासादयति तावतीरस्यामुष्मिंल्लोक आपः। तस्माद्बर्हिरासाद्याः। पुरस्तात्प्रस्तरं गृह्णाति। मुख्यमेव यजमानं करोति। यावद्धस्तेन पर्यामृशेत्तावन्तं गृह्णीयात्। अक्षोधुको यजमानो भवत्यनग्नंभावुको ऽध्वर्युः। न विधूनुयात्। यद्विधूनुयात्प्रजां चास्य पशूंश्च विधूनुयात्। न प्रमृज्यात्। यदेवास्य स्वं [यद्विन्नं] यद्देव तत्प्रमार्ष्टि। न प्रमृज्यात्। यदेवैनमागमिष्यद्भवति तत्प्रतिनुदते।

दक्षिणतः संनहनं स्तृणाति। तस्माद्दक्षिणतो नीविः। प्रस्तरं धारयन्परिधीन्परिदधाति। यजमानो वै प्रस्तरः। स्वयमेवैतद्यजमान आत्मानं परिदधाति रक्षसामपहत्यै। संहितान्परिधीन्परिदधाति रक्षसामनन्ववायाय। न पुरस्तात्परिदधाति। असावेवास्मादादित्य उद्यन्पुरस्ताद्रक्षांस्यपहन्ति। ऊर्ध्वे समिधावादधाति। उपरिष्टादेव रक्षांस्यपहन्ति। द्वे आदधाति। मिथुनमेव करोति। सवितुर्बाहू स्थो देवजनानां विधरणी इति। सवितुर्ह्येतौ बाहू देवजनानां विधरणी। वसूनां रुद्राणामादित्यानां सदनमसीति या एव देवता अभ्यजयंस्ताभ्य एनत्सदनं करोति। जुह्वेहि घृताचीति। एतद्वा आसां प्रियं धाम यद्घृतवत्। प्रियेणैवैना धाम्ना समर्धयति। ध्रुवा असदन्नृतस्य योनौ॥ ता विष्णो पाहीति। यथाहैष ते भागस्तं गोपायस्वेत्येवैतद्विष्णुमाहैतत्त आज्यं तद्गोपायस्वेति ॥१०॥

भुवनमसि विप्रथस्वेति प्रथयत्येव। अग्निर्यष्टेदं नम इति। नमस्कृत्य हि श्रेयांसमुपचरन्ति। जुह्वेह्यग्निस्त्वाह्वयतु देवयज्याया इति। अग्निः सर्वा देवताः। सर्वा एव देवता अवरुन्द्धे। उपभृदेहि देवस्त्वा सविताह्वयतु देवयज्याया इति। सवितृप्रसूत एव प्रचरति नार्तिमार्छति। अङ्घ्रिणाविष्णू मा वामवक्रमिषमिति यथायजुः। पाहि माग्ने दुश्चरितादा मा सुचा रिते भजेति पाप्मानमेवापहते। विजिहाथां मा मा संताप्तमित्यात्मनो ऽहिंसायै। लोकं मे लोककृतौ कृणुतमित्याशिषमेवाशास्ते। विष्णो स्थाम्न इति प्रतिष्ठित्यै। ऊर्ध्वो अध्वरो दिविस्पृगिति। यज्ञो वा अध्वरः। यज्ञस्योर्ध्वत्वाय। अह्रुतो यज्ञो यज्ञपतेरिति समृद्ध्यै। इन्द्रवान्बृहद्भाः स्वाहेति। ऐन्द्रो वै यज्ञः। मुखत एवेन्द्राय यज्ञं संप्रयच्छति। सेन्द्रो ऽस्य यज्ञो भवति। सं ज्योतिषा ज्योतिरिति। ज्योतिर्वै यज्ञः। यज्ञ एव यज्ञमनुसंतनोति। वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयोर्जयामीति य एवैनं पूर्वो ऽतिक्रान्तो भ्रातृव्यस्तं तेन प्रणुदते। वाजस्याहं प्रसवेनाग्नीषोमाभ्यां देवतयामुं प्रतिनुदामीति य एवैनं पश्चाद्भ्रातृव्यस्तं तेनापनुदते प्र श्रेयांसं भ्रातृव्यं नुदते प्रति पापीयांसं नुदते।

पृथिव्यै त्वान्तरिक्षाय त्वा दिवे त्वेति। इमानेवैनं लोकान्गमयति। अक्तं रिहाणा व्यन्तु वय इति स्वदयत्येव। मरुतां पृषती वशा पृश्निर्भूत्वा दिवं गच्छेति। [यजमानो वै प्रस्तरः। हविर्भूतमेवैनं स्वर्गं लोकं गमयति। ततो नो वृष्टिमेरयेति] वृष्टिमेवावरुन्द्धे। अहीनः प्राण इति प्राणानेवैतदध्वर्युर्मुखतः कल्पयति। चक्षुष्पा असि चक्षुर्मे पाहीति चक्षुषो गोपीथाय। यं परिधिं पर्यधत्था अग्ने देव पणिभिरिध्यमान इति। अग्निः सर्वा देवताः। सर्वा एव देवता अवरुन्द्धे। यजमानं प्रथतेति प्रथयत्येव। अथो यजमानमेवैनं स्वर्गं लोकं गमयति। संस्रवभागस्तविषेति परिधीनभिजुहोति स्वेनैवैनान्भागधेयेन समर्धयति।

अग्ने ऽदब्धायो ऽशीततन इति यदेवान्तर्यन्ति यत्क्रूरं कुर्वन्ति तच्छमयति। अविषं नः पितुं कृणोत्यन्नमेवास्मै स्वदयति। सुषीन्योनीन्सुषदां पृथिवीमिति सुषदेवैनं सादयति। वेदिर्वै देवेभ्यो ऽपाक्रामत्। तां वेदेनान्वविन्दन्। तद्वेदस्य वेदत्वम्। यद्वेदो भवति वेद्या अनुवित्त्यै। स्त्री वै वेदिः पुमान्वेदः। यद्वेदो वेद्यां स्तृणाति मिथुनमेवावरुन्द्धे ॥११॥

इति कपिष्ठलकठसंहितायां सप्तचत्वारिंशत्तमोऽध्यायः ॥

अग्निं नरो दीधितिभिररण्योः॥
अग्निनाग्निः समिध्यते॥
सप्त ते अग्ने समिधः॥
मनो ज्योतिर्जुषतामाज्यस्य विच्छिन्नं यज्ञं समिमं तनोतु। [बृहस्पतिः प्रतनोतु प्रविद्वान्] अच्छिन्नं तन्तुं तनुतां पुनर्णः।
या व्युष्टा उषसो याश्च निम्रुचस्ताः संदधातु हविषा घृतेन॥
त्रयस्त्रिंशत्तन्तवः॥
यन्मे मनसश्छिद्रं यद्वाचो यच्च मे हृदः।
अयं देवो बृहस्पतिः सं तत्सिञ्चतु राधसा॥
विश्वकर्मा हविरिदं जुषाणः संतानैर्यज्ञं समिमं दधातु।

बृहस्पतिः प्रतनोतु प्रविद्वानच्छिन्नं तन्तुं तनुतां पुनर्णः।
या व्युष्टा उषसो याश्च निम्रुचस्ताः संदधातु हविषा घृतेन॥
अयाश्चाग्ने ऽस्यनभिशस्तिश्च॥
त्वं नो अग्ने॥
स त्वं नो अग्ने ॥ १ ॥
भद्रं कर्णेभिः॥
स्वस्ति न इन्द्रः॥
पृषदश्वा मरुतः॥
शतमिन्नु शरदः॥
प्रेद्धो अग्ने दीदिहि।
अग्रेणीय कवये वेद्याय वचोभिर्लोकमुपयामि शंसन्।
यतो भयमभयं तन्नो अस्त्वग्ने देवानामव हेड इक्षुव॥
अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम्।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः॥
घृतप्रतीको घृतपृष्ठो अग्निर्घृताहवनो घृतमस्य धाम।
घृतप्रुषो हरितस्त्वावहन्तु घृतं पिबन्यजतादिह देवान् ॥ २ ॥
इमो अग्ने वीततमानि हव्या॥
सप्त ते अग्ने समिधः॥
त्रयस्त्रिंशत्तन्तवः॥
यन्मे मनसः॥
विश्वकर्मा॥
अग्निं युनज्मि॥
इन्धानास्त्वा॥

अग्निर्न ईडित ईडितव्यैर्देवैः पार्थिवैः पातु। वायुर्न ईडित ईडितव्यैर्देवैरान्तरिक्ष्यैः पातु। सूर्यो न ईडित ईडितव्यैर्देवैर्दिव्यैः पातु। विष्णुर्न ईडित ईडितव्यैर्देवैर्दिश्यैः पातु। अग्निर्यजुर्भिः सविता स्तोमैः पूषा स्वगाकारैः। त इमं यज्ञमवन्तु ते मामवन्तु। अनु व आरभे ऽनु मारभध्वम् ॥ ३ ॥

पृथिवि विभूवरि सिनीवाल्युरुघ्न आचिते मनसे भुवो विवस्तो य ऊर्मिर्हविष्य इन्द्रियावांस्तं व ऋध्यासम्। सोमस्यान्नमसि हविषो हविर्ज्योतिषो ज्योतिः। विश्वेषां देवानां भागधेयी स्था देववीतये वो गृह्णामि॥
सं वः सिञ्चन्तु मरुतः सं पूषा सं धाता समिन्द्रः सं बृहस्पतिः।
सं वो ऽयमग्निः सिञ्चतु प्रजया च धनेन च॥
आयुष्मन्तं कृणोतु मा॥
मान्दा वशाः॥
आपो देवीर्घृतम्॥
आदित्यवर्णामुत वा मृणोमि मा पोषो गच्छति वाहम आसाम्।
मेने भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः॥
समन्या यन्त्युप यन्त्यन्याः॥

आपो हि ष्ठेति तृचः॥
स ईं वृषाजनयत्तासु गर्भं स ईं शिशुर्धयति तं रिहन्ति।
सो अपां नपादनभिम्लातवर्णो ऽन्यस्येवेह तन्वा विवेष॥
इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः।
इहो सहस्रदक्षिणो रायस्पोषः प्रजायताम्॥
अयं यज्ञो वर्धतां गोभिरश्वैरियं वेदिः स्वपत्या सुवीरा।
इदं बर्हिरति बर्हींष्यन्येमं यज्ञं विश्वे अवन्तु देवाः॥
स्व आ दमे सुदुघा यस्य धेनुः स्वधां पीपाय सुभ्वन्नमत्ति।
सो अपां नपादूर्जयन्नप्स्वन्तर्वसुदेयाय विधते विभाति ॥४॥
स्कन्ना द्यौ स्कन्ना पृथिवी स्कन्नं विश्वमिदं जगत्।
स्कन्नादो विश्वा भूतानि प्र स्कन्नं जायतां हविः॥
इह गावः॥
अयं यज्ञः॥
पयस्वतीरोषधयः पयस्वद्वीरुधां पयः।
अपां पयसो यत्पयस्तेन ते सह वर्धताम्॥
यदवामृक्षच्चक्षुर्निर्मुखेन निर्ऋते तव।
अग्निष्टत्सर्वं शुन्धतु हव्यवाड् घृतसूदनः॥
यदवामृक्षच्छ्वयान्मुखेन निर्ऋते तव।
वायुष्टत्सर्वं शुन्धतु हव्यवाड् घृतसूदनः॥
भूतिर्दध्ना घृतेन वर्धताम्। यज्ञं यज्ञाय मुञ्चतु स्वाहा।
घृतेन वर्धतां भूतिः। मुञ्चेमं यज्ञं मुञ्च यज्ञपतिमंहसः स्वाहा॥
यास्ते अग्ने समिधो अप्स्वन्तर्वर्मन्पृथिव्या उप सूर्ये याः।
तास्ते वर्धन्त्वाहुतीर्घृतस्य देवायते यजमानाय शर्म ॥५॥
यज्ञस्य हि स्थ ऋत्विजाविन्द्राग्नी कल्पना युवम्।
हुताहुतस्य तृम्पतमहुतस्य हुतस्य च॥
हुतस्य चाहुतस्य चाहुतस्य हुतस्य च।
पीतापीतस्य सोमस्यास्य हव्यस्येन्द्राग्नी वीतं पिबतमागतम्॥
मेमं यज्ञं तमो विदन्मार्तिजो मो इमाः प्रजाः।
मा यः सोमं पिबादिमं संसृष्टमुभयं कृतम्॥
मा नो श्वारिषुः पितरो मोत देवा मा नः सबन्धुरुत वान्यबन्धुः।
मा नो दुःशंसो अघशंस ईशताहुतो ऽयं यज्ञो अप्येतु देवान्॥
सप्तर्त्विजः सप्त सदांस्येषां दश क्षिपो अश्विना पञ्च वाजाः।
प्राणो व्यानो ऽपानो मन आकूतमग्निः स्वाहा देवा हविरिदं जुषन्ताम् ॥६॥
आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः।
प्रत्नं निपाति काव्यम्॥
गोषा इन्दो नृषा अस्यश्वसा वाजसा उत।

आत्मा यज्ञस्य पूर्व्यः॥
आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य योनिरमृतं विजायते।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमवमेहन्ति पेरवः।

देवा देवेषु श्रयन्ताम्। प्रथमा द्वितीयेषु श्रयन्ताम्। द्वितीयास्तृतीयेषु श्रयन्ताम्। ये स्थ त्रय एकादशास्त्रयश्च त्रिंशच्च त्री च शतास्त्रयश्च त्री च सहस्रास्त इमं यज्ञमवन्तु ते मामवन्तु। अनु व आरभे ऽनु मारभध्वम् ॥७॥

असवे स्वाहा। वसवे स्वाहा। विभवे स्वाहा। विवस्वते स्वाहा। शूषाय स्वाहा। संसर्पाय स्वाहा। मलिम्लुचाय स्वाहा। गणश्रिये स्वाहा। शुक्राय स्वाहा। शुचये स्वाहा। अभिभवे स्वाहा। अधिपतये स्वाहा। दिवापतये स्वाहा ॥८॥

असवे स्वाहा। वसवे स्वाहा। वसुधेयाय स्वाहा। भूपतये स्वाहा। भुवनपतये स्वाहा। भूतानां पतये स्वाहा। भूताय स्वाहा॥

द्रप्सश्चस्कन्द॥
यस्ते द्रप्सः पतति यस्ते अंशुः॥
यो अंशुर्द्रप्सः पतितः पृथिव्याम्॥
यस्ते द्रप्सो मधुमां इन्द्रियावान्॥
यस्ते द्रप्स स्कन्नः॥

वसवस्त्वोदीरयन्तु गायत्रेण च्छन्दसा। रुद्रास्त्वोदीरयन्तु त्रैष्टुभेन च्छन्दसा। आदित्यास्त्वोच्छ्रयन्तु [जागतेन च्छन्दसा।]

विश्वे त्वा देवा दृंहन्तु॥
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत्।
देवा ह धर्मणा ध्रुवा यजमानः पशुभिर्ध्रुवः॥
दिवि दिव्यान्दृंह। अन्तरिक्षे ऽन्तरिक्ष्यान्दृंह। पृथिव्यां पार्थिवान्दृंह॥
आ त्वाहार्षमन्तरभूर्ध्रुवास्तिष्ठाविचाचलत्।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्यज्ञो अधिभ्रशत्॥
ध्रुवं ध्रुवेण हविषा हविरव सोमं नयामसि।
यथा न इन्द्रः केवलीर्विशो बलिहृतस्करत्॥

स्वाहा दिव आप्यायस्व। स्वाहान्तरिक्षादाप्यायस्व। स्वाहा पृथिव्या आप्यायस्व। आयुर्धा असि ध्रुवायुर्मे धेहि। वयोधा असि ध्रुव वयो मे धेहि। वर्चोधा असि ध्रुव वर्चो मे धेहि। तनूपा असि ध्रुव तन्वं मे पाहि॥

अध्वर्यो ऽयं यज्ञो अस्तु देवा ओषधीभ्यः पशुभ्यो मे धनाय।
विश्वस्मै भूताय ध्रुवो अस्तु देवाः स पिन्वस्व घृतवद्देव यज्ञ॥
इहैवैधि मापच्योष्ठाः पर्वत इवाविचाचलिः।
इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय॥
इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा हविः।
तस्मै सोमो अधिब्रुवत्तस्मा उ ब्रह्मणस्पतिः॥
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामसि ॥९॥
विसृष्टधेनाः सरिरा घृतश्चुतो वसन्तो ग्रीष्मो मधुमन्ति वर्षाः।
शरद्धेमन्त ऋतवो मयोभुव उदप्रुतो नभसी संवसन्ताम्॥

आ नः प्रजाम्॥
आ देवानाम्॥
त्वमग्ने व्रतपा असि॥
यद्वो वयं प्रमिनाम व्रतानि॥

मधुश्च माधवश्च वासन्तिकावृतू। शुक्रश्च शुचिश्च ग्रैष्मावृतू। नभश्च नभस्यश्च वार्षिकावृतू। इ[षश्चोर्जश्च शारदावृतू। सहश्च सहस्यश्च हैमन्तिकावृतू। तपश्च तपस्यश्च शैशिरावृतू।] त इमं यज्ञमवन्तु ते मामवन्तु। अनु व आरभे ऽनु मारभध्वम् ॥१०॥

द्यौश्च त्वा पृथिवी च श्रीणीताम्। अहश्च त्वा रात्री च श्रीणीताम्। आपश्च त्वौषधयश्च श्रीणन्तु। वाक् च त्वा मनश्च श्रीणीताम्। चक्षुश्च त्वा श्रोत्रं च श्रीणीताम्। ब्रह्म च त्वा क्षत्रं च श्रीणीताम्। दक्षश्च त्वा बलं च श्रीणीताम्। ओजश्च त्वा सहश्च श्रीणीताम्। ऋक् च त्वा साम च श्रीणीताम्। स्तोमश्च त्वा यजुश्च श्रीणीताम्। बृहच्च त्वा रथंतरं च श्रीणीताम्। यज्ञश्च त्वा दक्षिणा च श्रीणीताम्। सूर्यश्च त्वा चन्द्रमाश्च श्रीणीताम्। दर्शश्च त्वा पौर्णमासश्च श्रीणीताम्। अर्कश्च त्वाश्वमेधश्च श्रीणीताम्। श्रीतस्त्वं श्रीतो ऽहम्। इन्दुरिन्दुमवागात्। उभे सोमाः समस्त्विक्षत। तस्य त इन्द इन्द्रपीतस्येन्द्रियावतः सर्वगणस्य सर्वगण [उपहूत] उपहूतस्य भक्षयामि ॥११॥

इन्द्रस्य ग्रहो ऽस्यगृहीतो ग्राह्यः। देवानां पूरसि। तां त्वा प्रविशामि तां त्वा प्रपद्ये सह गृहैः सह प्रजया सह पशुभिः सहर्त्विग्भिः सह सोम्यैः सह सदस्यैः सह दक्षिणीयैः सह यज्ञेन सह यज्ञपतिना॥

इन्द्राग्नी परिधी मम वातो देवपुरा कृता। तत्त्वेन्द्रग्रह प्रपद्ये सगुः साश्वः सपूरुषः सह यन्मे अस्तु तेन॥

अरिष्ट्या [अव्यथ्यै] सवेशायोपवेशाय गायत्र्यै छन्दसे ऽभिभुवे स्वाहा। अरिष्ट्या अव्यथ्यै संवेशायोपवेशाय त्रिष्टुभे जगत्या अनुष्टुभे छन्दसे ऽभिभुवे स्वाहा।

विश्वा अग्ने त्वया वयं धारा उदन्या इव।
अतिगाहेमहि द्विषः॥
या देव्यष्टकास्वपसामपस्तमा स्वपा असि।
तस्यै त एना हविषा विधेम त्वं यज्ञे वरुणस्यावया असि॥
श्रुत्कर्णाय कवये वेद्याय॥
अनुमते ऽनुमन्यस्व न इदं यद्देयजं कृणुमहे तनूषु।
यद्वो तोकेषु तनुषु प्रजासु यद्गोष्वश्वेष्वोषधीष्वप्सु ॥१२॥
हिरण्यगर्भः॥
तदित्पदं न विचिकेत विद्वान्यन्मृतः पुनरप्येति जीवान्।
त्रिवृद्भुवनं यद्रथवृज्जीवो गर्भो न मृतः स्वाहा॥
आप्यायस्व॥
सं ते पयांसि॥
आप्यायस्व मदिन्तम्॥
स्वर्गे सधिष्टव॥
तपो ष्वग्ने अन्तरां अमित्रान्तपा शंसमररुषः परस्य।
तपो वसो चिकितानो अचित्तान्वि ते तिष्ठन्तामजरा अयासः॥
यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात्।

तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान्॥
स स्मा कृणोतु केतुमा नक्तं चिद्दूर आ सते।
पावको यद्वनस्पतीन्प्र स्मा मिनात्यजरः।
नहि ते अग्ने तन्वः क्रूरमानंश मर्त्यः।
कपिर्बभस्ति तेजनं पुनर्जरायु गौरिव॥
मेष इव यदुप च वि च चर्वति यदप्सरद्रूरुपरस्य खादति।
शीर्ष्णा शिरो वक्षसा वक्ष एजयन्नंशु बभस्ति हरितेभिरासभिः॥
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः।
न्यङ् नियन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्रितः।
य आविष्टः॥

अग्निना तपो ऽन्वाभवत्सूर्येण तेजो वायुना प्राणाः ॥१३॥

यस्य द्रोणकलश उपदस्यति कलशमेव तस्योपवायन्तं प्राणेनोपदस्यति। प्राणो हि सोमः। तदाहुः पयो ऽवनयेदिति। अथो खल्वाहुरन्तर्हितमिव वा एतद्यत्पयः। हिरण्यमेवापो ऽभ्यवनयेत्। हिरण्यमभ्युन्नयेत्। अमृतं वा आप आयुर्हिरण्यम्। अमृतादेवाध्यायुरात्मन्धत्ते। चत्वारो वरा देया ब्रह्मण उद्गात्रे होत्रे ऽध्वर्यवे। एते वै यज्ञस्येन्द्राः। तानेव प्रीणाति। सैव तत्र प्रायश्चित्तिः। यस्य चमस उपदस्यति चमसमेव तस्योपवायन्तं प्राणेनोपदस्यति। प्राणो हि सोमः। यमध्वर्युरन्तमं ग्रहं गृह्णीयात्तस्य संपातमवनयेत्। प्रायश्चित्त्यै वै सोमो गृह्यते। प्रायश्चित्त्यैवास्मै प्रायश्चित्तिं करोति। सर्वमायुरेति। सैव तत्र प्रायश्चित्तिः। यस्य ग्रावावशीर्यते पशुभिर्व्यृध्यते। पशवो हि ग्रावाणः। द्युतानस्य मारुतस्य ब्रह्मसामेन स्तुवीरन्। पशवो वै द्युतानो मारुतः। स्वेनैवैनं साम्ना संदधाति। पशुमान्भवति। सैव तत्र प्रायश्चित्तिः। प्रजापतये स्वाहेत्यभक्षणीयानुपरवेष्ववनयेत्। प्राजापत्यो वै सोमः। प्रतिष्ठामेवैनं गमयति। सैव तत्र प्रायश्चित्तिः। यस्य सोममभिदहेद्ग्रहानध्वर्युः पाशयेत। स्तोत्राण्युद्गाता शस्त्राणि होता। यथापूर्वं यज्ञेन चरेयुः। पञ्च वरा देयाः। पाङ्क्तो यज्ञः। यज्ञमेवावरुन्द्धे। अवभृथं गत्वा पुनरुदेत्य पुरा द्वादश्याः पुनर्दीक्षेत। यद्द्वादशीमतिनयेदन्तर्धीयेत। तत्र ता दक्षिणा दद्याद्याः पूर्वस्मिन्दास्यन्भवति। सैव तत्र प्रायश्चित्तिः ॥१४॥

सर्वान्वा एषो ऽग्नौ कामान्प्रवेशयते यो ऽग्निमन्वाधाय व्रतमुपैति। स यदनिष्ट्वा प्रयायादकामप्रीता एनं कामा नानु प्रयायुः। अतेजा अवीर्यः स्यात्। स प्रयास्यञ्जुहुयात्॥
तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्।
अग्ने कामाय येमिरे॥
इति कामानेवास्मिन्दधाति। कामप्रीता एवं कामा अनु प्रयान्ति। तेजस्वी वीर्यवान्भवति। संततिर्वा एषा यज्ञस्य यो ऽग्निमन्वाधाय व्रतमुपैति। स यदनिष्ट्वा उद्वायाद्विच्छिन्निरेवास्य सा। प्राञ्चमुद्धृत्य मनसोपतिष्ठेत। मन इव वै प्रजापतिः। प्राजापत्यो यज्ञः। यज्ञमेव संतनोति। भूरिति व्याहरेत्। भूतो वै प्रजापतिः। भूतिमेवोपैति। आयुषा वा एष वीर्येण व्यृध्यते यद्याहिताग्नेरग्निरपक्षायति। स यावच्छम्यया पराविध्येद्यदि तावदपक्षायेत्तं संभरेत्॥
इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व।
संवेशनस्तन्वे चारुरेधि प्रियो देवानां परमे जनित्रे॥
इति ब्रह्मणैवैनं संभरति। सैव तत्र प्रायश्चित्तिः। यदि परस्तरामपक्षायेदनुप्रयाय वसेत्। सैव तत्र प्रायश्चित्तिः। ओषधीर्वा एतस्य पयः पशून्प्रविशति यस्य हविषे ऽपाकृता वत्सा धयन्ति। वायव्यां यवागूं निर्वपेत्। वायुर्वै पयसः प्रदाता। तमेव भागधेयेनोपधावति। सो ऽस्मै पयः प्रयच्छति। अथोत्तरस्मै हविषे वत्सानपावर्तयेत्। सैव तत्र प्रायश्चित्तिः ॥१५॥

अर्धं वा एतस्य यज्ञस्य मीयते यस्य सायं दुग्धं हविरार्तिमार्छति। इन्द्राय व्रीहीन्निरुप्योपवसेत्। पयो वा ओषधयः। पय एवारभ्योवसति। यत्प्रातः स्यात्तच्छृतं कुर्युः। ऐन्द्र इतरः पुरोडाशः स्यात्। पयो वा ओषधयः। पयसैवास्मै पयः प्रदापयति। अथोत्तरस्मै हविषे वत्सानपावर्तयेत्। सैव तत्र प्रायश्चित्तिः। उभयान्वा एष देवान्भागधेयेन व्यर्धयति ये यजमानस्य सायं च प्रातश्च गृहमागच्छन्ति। यस्य सायं प्रातर्दुग्धं हविरार्तिमार्छेत्योदनं पञ्चशरावं निर्वपेत्। अग्निं देवतानां प्रथमं यजेत्। अग्निमुखा एव देवताः प्रीणाति। अग्निं वा अन्वन्या देवता इन्द्रमन्याः। ता एवोभयीः प्रीणाति। अथोत्तरस्मै हविषे वत्सानपावर्तयेत्। सैव तत्र प्रायश्चित्तिः। यत्कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानः स्यात्। यदनायतने निनयेदनायतनः स्यात्। मध्यमेन पर्णेन द्यावापृथिव्यर्चान्तःपरिधि निनयेत्। द्यावापृथिवी वै यज्ञस्य प्रतिष्ठा। प्रतिष्ठामेवैनं गमयति। सैव तत्र प्रायश्चित्तिः। यत्प्रयाजेष्वनिष्टेषु प्राङ्ङ्गार स्कन्देदध्वर्यवे च यजमानाय चार्कं स्यात्। यद्दक्षिणा ब्रह्मणे च यजमानाय चार्कं स्यात्। यत्प्रत्यङ् होत्रे च पत्न्यै चार्कं स्यात्। यदुदङ्ङग्निधे च यजमानस्य च पशुभ्यो ऽर्कं स्यात्। तं प्रहरेत्॥
सहस्रशृङ्गो वृषभो जातवेदा स्तोमपृष्ठो घृतवान्सुप्रतीकः।
मा मा हासीन्नाथितो नेत्त्वा जहामि सहस्रपोषं मे गोपोषं च यच्छ॥
इति ब्रह्मणैवैनं प्रहरति। सैव तत्र प्रायश्चित्तिः। अर्धं वा एतस्य यज्ञस्य मीयते यस्य व्रत्ये ऽहन्पत्न्यनालम्भुका भवति। तामपरुध्य यजेत। सर्वेणैव यज्ञेन यजते। तामिष्ट्वोपह्वयेत॥
द्यौरहं पृथिवी त्वं सामाहमस्म्यृक्त्वम्।
अमो ऽहमस्मि सा त्वं सा त्वमस्यमो ऽहम्।
तावेहि संरभावहै पुंसे पुत्राय कर्तवे॥
इत्यर्ध एवैनामुपह्वयते। सैव तत्र प्रायश्चित्तिः ॥१६॥
यदववृष्टेन जुहुयादपरूपमस्यात्मञ्जायेत। यत्प्रत्येयात्पापीयान्स्यात्। यत्र जुहुयादार्तिमार्छेत्॥
मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्याम्।
मित्रः कृष्टीरनिमिषाभिचष्टे मित्राय हव्यं घृतवज्जुहोत॥
इति मैत्र्यर्चा समिधमाधाय होतव्यम्। मित्रो वै यज्ञस्य शान्तिः। मित्रेणैवैनं शमयति। तद्धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यम्। सैव तत्र प्रायश्चित्तिः। यत्कीटावपन्नेन जुहुयादप्रजा अपशुर्यजमानः स्यात्। यत्र जुहुयादार्तिमार्छेत्। प्राजापत्ययर्चा वल्मीकवपायामवनयेत्। प्राजापत्यो वै वल्मीकः यज्ञः प्रजापतिः। यज्ञ एव यज्ञं प्रतिष्ठापयति। तद्धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यम्। सैव तत्र प्रायश्चित्तिः। यदि पूर्वस्यामाहुत्यां हुतायामुत्तराहुतिं स्कन्देद् द्विपाद्भिः पशुभिर्यजमानो व्यृध्येत। यदभिजुहुयाच्चतुष्पाद्भिः पशुभिर्यजमानो व्यृध्येत॥
यत्र वेत्थ वनस्पते देवानां गुह्या नामानि।
तत्र हव्यानि गामय ॥
इति वानस्पत्ययर्चा समिधमाधाय होतव्यम्। वनस्पतिर्वैनैवास्यार्तां चानार्तां चाहुतीं विदाधार। तद्धुत्वाथान्यां दुग्ध्वा पुनर्होतव्यम्। सैव तत्र प्रायश्चित्तिः ॥१७॥
देवाश्च वा असुराश्चास्मिंल्लोक आसन्। स प्रजापतिरकामयत परासुराननुदेय प्रजाः सृजेयेति। स एतानि चातुर्मास्यान्यपश्यत्। तैश्चातुर्मास्यैरेतानसुरान्प्राणुदत चातुर्मास्यैः प्रजा असृजत। य एवं विद्वांश्चातुर्मास्यैर्यजते परा भ्रातृव्यं नुदते प्र प्रजया प्र पशुभिर्जायते। अग्निष्टोमाद्वैश्वदेवं यज्ञक्रतुं निर्माय प्रजापतिः प्रजा असृजत। उक्थ्याद्वरुणप्रघासान्यज्ञक्रतुं निर्माय प्रजा वरुणेनाग्राहयत्। अतिरात्रात्साकमेधान्यज्ञक्रतुं निर्मायेन्द्रो वृत्रमहन्। वैश्वदेवेन वै सो ऽसुरान्प्राणुदत वैश्वदेवेन प्रजा असृजत। सृष्टा वा अन्याः प्रजा आसन्नसृष्टा अन्याः। अथ प्रजापतिरकामयत प्रजाः सृजेयेति। संवत्सरो वै यज्ञो यज्ञः प्रजापतिः। स एते आत्मनो ऽधि पयसो निरमिमीतोधन्यं

स ब्रह्म च। अथैताभ्यो देवताभ्य एतानि हवींषि भागं निरवपत्। तै प्रजा असृजत। ऋतुभ्यो वै ताः प्रजाः प्राजायन्त। ऋतव एतानि पञ्च हवींषि। पञ्च ह्यृतवः। तत एव प्रजायते अग्निरेव प्राजायत्। सोमो रेतो ऽदधात्। मिथुनं वा अग्निश्च सोमश्च। सविता प्रासुवत्। संवत्सरो वै सविता। द्वादश मासाः संवत्सरः। तस्माद् द्वादशकपालः। अथो वैश्वदेवत्वायैव द्वादशकपालः। उपांशु यजति। अनिरुक्तो हि संवत्सरः। सरस्वत्येव सृष्टासु वाचमदधात्। पूषणं प्रतिष्ठामभ्यसृज्यन्त। यान्वै सरस्वती पशवः पूषा। मिथुनं वाक् च पशवश्च। मध्यतो वै प्रजा विसृज्यन्ते। अन्ततो मिथुनाद्विपृचीः प्रजायन्ते। तदेतत्प्रजायन्तेऽभितोऽधि मध्यतः प्रजा विसृज्यन्ते। अथादो ऽन्ततो मिथुनादुभयतो विपृचीः प्रजायन्ते। वार्त्रघ्नानि वा एतानि हवींषि। अग्निना वा अग्नीकेनेन्द्रो वृत्रमहन्। सोमेन राज्ञा सवित्रा प्रसूतः सरस्वत्या वाचा पूषा वीर्येणान्वतिष्ठत। विजितिरेवैतानि हवींषि ॥१८॥

॥ इति कपिष्ठलकठसंहितायामष्टाचत्वारिंशत्तमोऽध्यायः ॥

सामवेद संहिता

ॐ

राणायनीयाना कौथुमाना च

सामवेद-संहिता।

पूर्वार्चिकः (छन्द आर्चिकः)

आग्नेयं काण्डम्।

अथ प्रथमोऽध्यायः।

अथ प्रथमप्रपाठके प्रथमोऽर्धः।

[१]

(१-१०) १-२, ४, ७, ९ भरद्वाजो बार्हस्पत्यः, ३ मेधातिथिः काण्वः, ५ उशनाः काव्यः, ६ सुदीति-पुरुमीढावाङ्गिरसौ तयोर्वान्यतरः, ८ वत्सः काण्वः, १० वामदेवः ॥ अग्निः ॥ गायत्री ॥

(ऋग्वेदे) (सामवेदे)

१ अग्न आ याहि वीतये गृणानो हव्यदातये।
नि होता सत्सि बर्हिषि ॥ १ ॥ ६।१६।१० ६६०

२ त्वमग्ने यज्ञानां होता विश्वेषां हितः।
देवेभिर्मानुषे जने ॥ २ ॥ ६।१६।१ १४७४

३ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्।
अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥ १।१२।१ ७९०

४ अग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया।
समिद्धः शुक्र आहुतः ॥ ४ ॥ ६।१६।३४ १३९९

५ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्।
अग्ने रथं न वेद्यम् ॥ ५ ॥ ८।८४।१ १२४४

६ त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः।
उत द्विषो मर्त्यस्य ॥ ६ ॥ ८।७१।१
१

(ऋग्वेदे) (सामवेदे)

७ एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः।
एभिर्वर्धास इन्दुभिः ॥ ७ ॥ ६।१६।१६ ७०५

८ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्।
अग्ने त्वां कामये गिरा ॥ ८ ॥ ८।११।७ ११६६

९ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।
मूर्ध्नो विश्वस्य वाघतः ॥ ९ ॥ ६।१६।१३

१० अग्ने विवस्वदा भरास्मभ्यमूतये महे।
देवो ह्यसि नो दृशे ॥१०॥ (१) (न ऋग्वेदीयः)

स्वरिताः ९। उ० ना०। धा० ३७। वे ॥

इति प्रथमा दशतिः ॥१॥ प्रथमः खण्डः ॥१॥

[२]

(१-१०) १ आयुङ्क्ष्वाहिः (ऋ० विरूप आङ्गिरसः), २ वामदेवो गौतमः, ३, ८-९ प्रयोगो भार्गवः, ४ मधुच्छन्दा वैश्वामित्रः, ५, ७ शुनःशेप आजीगर्तिः, ६ मेधातिथिः काण्वः, १० वत्सः काण्वः ॥ अग्निः ॥ गायत्री ॥

११ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः।
अमैरमित्रमर्दय ॥ १ ॥ ८।७५।१० १६४८

१२ दूतं वो विश्ववेदसं हव्यवाहममर्त्यम्।
यजिष्ठमृञ्जसे गिरा। ॥ २ ॥ ४।८।१

१३ उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः।
वायोरनीके अस्थिरन् ॥ ३ ॥ ८।१०२।१३ १५७०

१४ उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्।
नमो भरन्त एमसि ॥ ४ ॥ १।१।७

१५ जराबोध तद्विविड्ढि विशेविशे यज्ञियाय।
स्तोमं रुद्राय दृशीकम् ॥ ५ ॥ १।२७।१० १६६३

(ऋग्वेदे) (सामवेदे)

१६ प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे।
मरुद्भिरग्न आ गहि ॥ ६ ॥ १।१९।१

१७ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः।
सम्राजन्तमध्वराणाम् ॥ ७ ॥ १।२७।१ १६३४

१८ और्वभृगुवच्छुचिमप्नवानवदा हुवे।
अग्निं समुद्रवाससम् ॥ ८ ॥ ८।१०२।४

१९ अग्निमिन्धानो मनसा धियं सचेत मर्त्यः।
अग्निमिन्धे विवस्वभिः ॥ ९ ॥ ८।१०२।२२

२० आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम्।
परो यदिध्यते दिवि ॥१०॥ ८।६।३०

स्व० ६। उ० २। धा० ५२। खा ॥

इति द्वितीया दशतिः ॥२॥ द्वितीयः खण्डः ॥२॥

[३]

(१-१४) १ प्रयोगो भार्गवः, २, ५ भरद्वाजो बार्हस्पत्यः, ३, १० वामदेवो गौतमः, ४, ६ वसिष्ठो मैत्रावरुणिः, ७ विरूप आङ्गिरसः, ८ शुनःशेप आजीगर्तिः, ९ गोपवन आत्रेयः, ११ प्रस्कण्वः काण्वः, १२ मेधातिथिः काण्वः, १३ सिन्धुद्वीप आम्बरीषः, त्रित आप्त्यो वा, १४ उशना काव्यः ॥ अग्निः ॥ गायत्री ॥

२१ अग्निं वो वृधन्तमध्वराणां पुरूतमम्।
अच्छा नप्त्रे सहस्वते ॥ १ ॥ ८।१०२।७ ९४६

२२ अग्निस्तिग्मेन शोचिषा यंसद्विश्वं न्यत्रिणम्।
अग्निर्नो वंसते रयिम् ॥ २ ॥ ६।१६।२८

२३ अग्ने मृड महाँ असि य ईमा देवयुं जनम्।
इयेथ बर्हिरासदम्। ॥ ३ ॥ ४।९।१

२४ अग्ने रक्षा णो अंहसः प्रति स्म देव रीषतः।
तपिष्ठैरजरो दह ॥ ४ ॥ ७।१५।१३

(ऋग्वेदे) (सामवेदे)

२५ अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः।
अरं वहन्त्याशवः ॥ ५ ॥ ६।१६।४३

२६ नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम्।
सुवीरमग्न आहुत ॥ ६ ॥ ७।१५।७

२७ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।
अपां रेतांसि जिन्वति ॥ ७ ॥ ८।४४।१६

२८ इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम्।
अग्ने देवेषु प्र वोचः ॥ ८ ॥ १।२७।४ १४९७

२९ तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः।
स पावक श्रुधी हवम् ॥ ९ ॥ ८।७४।११

३० परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्।
दधद्रत्नानि दाशुषे ॥१०॥ ४।१५।३

३१ उदु त्यं जातवेदसं देवं वहन्ति केतवः।
दृशे विश्वाय सूर्यम् ॥११॥ १।५०।१

३२ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे।
देवममीवचातनम् ॥१२॥ १।१२।७

३३ शं नो देवीरभिष्टये शं नो भवन्तु पीतये।
शं योरभि स्रवन्तु नः ॥१३॥ १०।९।४

३४ कस्य नूनं परीणसि धियो जिन्वसि सत्पते।
गोषाता यस्य ते गिरः ॥१४॥ ८।८४।७

स्व० ९। उ० २। धा० ५७। वे ॥

इति तृतीया दशतिः ॥३॥ तृतीयः खण्डः ॥३॥

[४]

(१-१०) १,३,७ शंयुर्बार्हस्पत्यः (७ तृणपाणिः); २,५,८-९ भर्गः प्रागाथः; ४ वसिष्ठः मैत्रावरुणिः; ६ प्रस्कण्वः काण्वः; १० सोभरिः काण्वः ॥ अग्निः ॥ बृहती ॥

३५ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे । (ऋग्वेदे) (सामवेदे)
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥ ६।४८।१ ७०३

३६ पाहि नो अग्न एकया पाह्यू३त द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ २ ॥ ८।६०।९ १५४४

३७ बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि ॥ ३ । ६।४८।७

३८ त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥ ४ ॥ ७।१६।७

३९ अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः ।
अप्रोषिवान् गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥ ५ ॥ ८।६०।१९

४० अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ ६ ॥ १।४४।१ १७८०

४१ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥ ७ ॥ ६।४८।९ १६२३

४२ त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः ।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ८ ॥ ८।६०।५

४३ आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥ ९ ॥ ८।६०।११

४४ यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥१०॥ ८।१०३।६ १५६३

स्व० ९ । उ० ३ । धा० ८३ । ही ॥

इति चतुर्थी दशतिः ॥४॥ चतुर्थः खण्डः ॥४॥

[५]

(१-१०) १ वसिष्ठो मैत्रावरुणिः; २ भर्गः प्रागाथः; ३, ७ सौभरिः काण्वः; ४ मनुर्वैवस्वतः; ५ सुदीतिपुरुमीळ्हावांगिरसौ; ६ प्रस्कण्वः काण्वः; ८ मेधातिथिमेध्यातिथी काण्वौ; ९ विश्वामित्रो गाथिनः; १० कण्वो घौरः ॥ अग्निः, ८ इन्द्रः ॥ बृहती ॥

४५ एना वो अग्निं नमसोर्जो नपातमा हुवे । (ऋग्वेदे) (सामवेदे)
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥ ७।१६।१ ७४९

४६ शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते ।
अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि ॥ २ ॥ ८।६०।१५

४७ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥ ३ ॥ ८।१०३।१ १५१५

४८ अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम् ॥ ४ ॥ ८।२७।१

४९ अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् ।
अग्निं राये पुरुमीढ श्रुतं नरोऽग्निः सुदीतये छर्दिः ॥ ५ ॥ ८।७१।१४

५० श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥ ६ ॥ १।४४।१३

५१ प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना ।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ ७ ॥ ८।१०३।२ १५१७

५२ अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ ८ ॥ ८।१।१८

५३ कायमानो वना त्वं यन्मातॄरजगन्नपः ।
न तत्ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्निहाभुवः ॥ ९ ॥ ३।९।२

५४ नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥१०॥ १।३६।१९

स्व० उ० ६ धा० ७१ । पा ॥

इति पञ्चमी दशतिः ॥५॥ पञ्चमः खण्डः ॥५॥

इति प्रथमप्रपाठके प्रथमोऽर्धः ॥ १ ॥

[६]

(१-८) १, ७ वसिष्ठो मैत्रावरुणिः, २, ३, ५ कण्वो घौरः; ४ सौभरिः काण्वः; ६ उत्कीलः कात्यः; ८ विश्वामित्रो गाथिनः ॥ अग्निः, २ ब्रह्मणस्पतिः; ३ यूपः ॥ बृहती ॥

अथ प्रथमप्रपाठकस्य द्वितीयोऽर्धः ॥ १ ॥

५५ देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् । (ऋग्वेदे) (सामवेदे)
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ १ ॥ ७।१६।११ १५१३

५६ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ २ ॥ १।४०।३

५७ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ३ ॥ १।३६।१३

५८ प्र यो राये निनीषति मर्तो यस्ते वसो दाशत् ।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥ ४ ॥ ८।१०३।४

५९ प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
अग्निं सूक्तेभिर्वचोभिर्वृणीमहे यं समिदन्य इन्धते ॥ ५ ॥ १।३६।१

६० अयमग्निः सुवीर्यस्येशे हि सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६ ॥ ३।१६।१

६१ त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥ ७ ॥ ७।१६।५

६२ सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
अपां नपातं सुभगं सुदंससं सुप्रतूर्तिमनेहसम् ॥ ८ ॥ ३।९।१

॥ स्व०११ । उ०२ । धा० ५७ । ख ॥

इति षष्ठी दशतिः ॥ ६ ॥ षष्ठः खण्डः ॥ ६ ॥

[७]

(१-१०) १ श्यावाश्वो वामदेवो वा, २ उपस्तुतो वार्ष्टिहव्यः; ३ बृहदुक्थो वामदेव्यः; ४ कुत्स आंगिरसः; ५-६ भरद्वाजो बार्हस्पत्यः; ७ वामदेवो गौतमः; ८, १० वसिष्ठो मैत्रावरुणिः; ९ त्रिशिरास्त्वाष्ट्रः ॥ १,३,५,९ त्रिष्टुप्; २, ४ जगती; १० त्रिपाद्विराड्गायत्री ॥

६३ आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् । (ऋग्वेदे) (सामवेदे)
इडस्पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥ १ ॥

६४ चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्यां३ चरन् ॥२॥१०।११५।१

६५ इदं त एकं पर उ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशनस्तन्वे३चारुरेधि प्रियो देवानां परमे जनित्रे ॥ ३ ॥ १०।५६।१

६६ इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव॥४ ॥ १।९४।१

६७ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥ ५ ॥ ६।७।१।११४०

६८ वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः॥ ६ ॥६।२४।६

६९ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ७ ॥ ४।३।१

७० इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
नरो हव्येभिरीडते सबाध आग्निरग्रमुषसामशोचि ॥ ८ ॥ ७।८।१

७१ प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥ ९ ॥ १०।८।१

७२ अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् ।
दूरेदृशं गृहपतिमथव्युम् ॥१० । ७।१।१,१३७१

स्व० १५ । उ० ८ । धा० १०४ ॥ षी ॥

इति सप्तमी दशतिः । सप्तमः खण्डः ॥ ७ ॥

[८]

(१-८) १ बुधगविष्ठिरावात्रेयौ; २, ५ वत्सप्रिर्भालन्दनः; ३ भरद्वाजो बार्हस्पत्यः; ४, ७ विश्वामित्रो गाथिनः; ६ वसिष्ठो मैत्रावरुणिः; ८ पायुर्भारद्वाजः ॥
अग्निः, ३ पूषा ॥ त्रिष्टुप् ॥

७३ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।　(ऋग्वेदे)　(सामवेदे)
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥ १ ॥ ५।१।१　१७४६
७४ प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणम् ।
नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥ २ ॥ १०।४६।५
७५ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु ॥ ३ ॥ ६।५८।१
७६ इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ४ ॥ ३।६।११
७७ प्र होता जातो महान्नभोविन्नृषद्मा सीदद्पां विवर्ते ।
दधद्यो धायि सुते वयांसि यन्ता वसूनि विधते तनूपाः ॥ ५ ॥ १०।४६।१
७८ प्र सम्राजमसुरस्य प्रशस्तं पुंसः कृष्टीनामनुमाद्यस्य ।
इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ६ ॥ ७।६।१
७९ अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः ।
दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ७ ॥ ३।२९।२
८० सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः ।
अनु दह सहमूरान्कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ८ ॥ १०।८७।१९
स्व० १३ । उ० १ । धा० ६ ॥ टो ॥
इति अष्टमी दशतिः ॥८॥ अष्टमः खण्डः ॥८॥

२

[९]

(१-१०) १ गय आत्रेयः; २ वामदेवः; ३, ४ भरद्वाजो बार्हस्पत्यः; ५ द्वितो मृक्तवाहा आत्रेयः; ६ वसूयव आत्रेयाः; ७, ९ गोपवन आत्रेयः; ८ पुरुरात्रेयः; १० वामदेवः, कश्यपो वा मारीचो, मनुर्वा वैवस्वत, उभौ वा ॥ अग्निः ॥ अनुष्टुप् ॥

८१ अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।　(ऋग्वेदे)　(सामवेदे)
प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ १ ॥ ५।१०।१
८२ यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः ।
आजुह्वद्धव्यमानुषक् शर्म भक्षीत दैव्यम् ॥ २ ॥ (न ऋग्वेदीयः)
८३ त्वेषस्ते धूम ऋण्वति दिवि सं च्छुक्र आततः ।
सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥ ६।२।६
८४ त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥ ६।२।१
८५ प्रातरग्निः पुरुप्रियो विश स्तवेतातिथिः ।
विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥ ५ ॥ ५।१८।१
८६ यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ६ ॥ ५।२५।७
८७ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥ ८।७४।१　१५६४
८८ बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः । ॥ ८ ॥ ५।१६।१
८९ अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।
य स्म श्रुतर्वन्नार्क्ष्ये बृहदनीक इध्यते । ॥ ९ ॥ ८।७४।४
९० जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः ।
पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥१०॥ (न ऋग्वेदीयः)
स्व० १४ । उ० ७ । धा० ५१ ॥ य ॥
इति नवमी दशतिः ॥ ९ ॥ नवमः खण्डः ॥ ९ ॥

[१०]

(१-६) १ अग्निस्तापसः; २, ३ वामदेवः कश्यपः, असितो देवलो वा; ४ सोमाहुतिर्भार्गवः; ५ पायुर्भारद्वाजः; ६ प्रस्कण्वः काण्वः ॥ अग्निः, १ विश्वेदेवाः; २ अङ्गिराः ॥ अनुष्टुप् ॥

९१ सोमं राजानं वरुणमग्निमन्वारभामहे ।　(ऋग्वेदे)　(सामवेदे)
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥ १०।१४१।३
९२ इत एत उदारुहन्दिवः पृष्ठान्या रुहन् ।
प्र भूर्जयो यथा पथोद्यामङ्गिरसो ययुः ॥ २ ॥ (न ऋग्वेदीयः)
९३ राये अग्ने महे त्वा दानाय समिधीमहि ।
ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥ ३ ॥ (न ऋग्वेदीयः)
९४ दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत् ।
परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥ ४ ॥ २।५।३
९५ प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि ।
यातुधानस्य रक्षसो बलं न्युब्जवीर्यम् ॥ ५ ॥ १०।८७।२५
९६ त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ ६ ॥ १।४५।१
॥ स्व० ४ । उ० ३ । धा० २० । वौ ।
॥ इति प्रथमप्रपाठके द्वितीयोऽर्धः प्रथमः प्रपाठकश्च समाप्तः ॥१॥
इति दशमी दशतिः ॥१०॥ दशमः खण्डः ॥१०॥

अथ द्वितीयप्रपाठके प्रथमोऽर्धः ॥

[१]

(१-१०) दीर्घतमा औचथ्यः; २, ४ विश्वामित्रो गाथिनः, ३ गोतमो राहूगणः; ५ त्रित आप्त्यः; ६ इरिम्बिठिः काण्वः; ७, ८, १० विश्वमना वैयश्वः; ९ ऋजिश्वा भारद्वाजः ॥ अग्निः; ५ पवमानः सोमः; ६ अदितिः; ९ विश्वे देवाः ॥ उष्णिक् ॥

९७ पुरु त्वा दाशिवाँ वोचेऽरिरग्ने तव स्विदा ।
तोदस्येव शरण आ महस्य ॥ १ ॥ १।१५०।१
९८ प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।
विपां ज्योतींषि बिभ्रते न वेधसे ॥ २ ॥ ३।१०।५

९९ अग्ने वाजस्य गोमत ईशान सहसो यहो ।　(ऋग्वेदे)　(सामवेदे)
अस्मे देहि जातवेदो महि श्रवः ॥ ३ ॥ १।७९।४　१५६१
१०० अग्ने यजिष्ठो अध्वरे देवां देवयते यज ।
होता मन्द्रो वि राजस्यति स्रिधः ॥ ४ ॥ ३।१०।७
१०१ जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये ।
अयं ध्रुवो रयीणां चिकेतदा ॥ ५ ॥ ९।१०२।४
१०२ उत स्या नो दिवा मतिरदितिरूत्यागमत् ।
सा शन्ताता मयस्करदप स्रिधः ॥ ६ ॥ ८।१८।७
१०३ ईडिष्वा हि प्रतीव्यां३ यजस्व जातवेदसम् ।
चरिष्णुधूममगृभीतशोचिषम् ॥ ७ ॥ ८।२३।१
१०४ न तस्य मायया च न रिपुरीशीत मर्त्यः ।
यो अग्नये ददाश हव्यदातये ॥ ८ ॥ ८।२३।१५
१०५ अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् ।
दविष्ठमस्य सत्पते कृधी सुगम् ॥ ९ ॥ ६।५१।१३
१०६ श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
नि मायिनस्तपसा रक्षसो दह ॥१०॥ ८।२३।१४
स्व० ९ । उ० ३ । धा० ४२ ॥ वा ॥
इति प्रथमा दशतिः ॥१॥ एकादशः खण्डः ॥११॥

[२]

(१-८) १ प्रयोगो भार्गवः (ऋ० सौभरिः काण्वः), २, ३, ५-७ सौभरिः काण्वः, ४ प्रयोगो भार्गवः सौभरिः काण्वो वा; ८ विश्वमना वैयश्वः ॥
अग्निः ॥ उष्णिक् ॥

१०७ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥ १ ॥ ८।१०३।८　८७८

१०८ प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः । (ऋग्वेदे) (सामवेदे)
यस्य त्वं सख्यमाविथ ॥ २ ॥ ८।१९।३० १८२२
१०९ तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।
देवत्रा हव्यमूहिषे ॥ ३ ॥ ८।१९।१ १६८७
११० मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एषः ।
यः सुहोता स्वध्वरः ॥ ४ ॥ ८।१०३।१२
१११ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥ ५ ॥ ८।१९।१९ १५५२
११२ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ ६ ॥ ८।१९।३
११३ तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणम् ।
मन्युं जनस्य दूढ्यम् ॥ ७ ॥ ८।१९।१५
११४ यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
विश्वेदग्निः प्रति रक्षांसि सेधति ॥ ८ ॥ ८।२३।१३
स्व० १२ । उ० २ । धा० ४४ । छी ॥

इति द्वितीया दशतिः ॥२॥ द्वादशः खण्डः ॥१२॥

इत्याग्नेयं पर्व काण्डम् वा ॥ इति प्रथमोऽध्यायः ॥ इति प्रथमं पर्व ॥

अग्नेयकाण्डस्य मन्त्रसंख्या ११४

गायत्र्यः	३४	(१-३४)
बृहत्यः	२८	(३५-६२)
त्रिष्टुभः	१८	(६३-८०)
अनुष्टुभः	१६	(८१-९६)
उष्णिहः	१८	(९७-११४)
	११४	

अथ ऐन्द्रं काण्डम् ।

अथ द्वितीयोऽध्यायः ।

[३]

(१-१०) १ शंयुर्बार्हस्पत्यः; २ श्रुतकक्षः सुकक्षो वा आंगिरसः; ३ हर्यतः प्रागाथः; ४, ५ श्रुतकक्षः (ऋ० सुकक्षो वा, ५ सुकक्षः) आंगिरसः; ६ देवजामय इन्द्रमातरः ऋषिकाः; ७, ८ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ; ९, १० मेधातिथिः काण्वः प्रियमेधश्चांगिरसः ॥ इन्द्रः (ऋ०३ अग्निर्हवींषि वा)
॥ गायत्री ॥

११५ तद्वो गाय सुते सचा पुरुहूताय सत्वने । (ऋग्वेदे) (सामवेदे)
शं यद्गवे न शाकिने ॥ १ ॥ ६।४५।२२ १६६६
११६ यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः ।
तेन नूनं मदे मदेः ॥ २ ॥ ८।९२।१६
११७ गाव उप वदावटे मही यज्ञस्य रप्सुदा ।
उभा कर्णा हिरण्यया ॥ ३ ॥ ८।७२।१२ १६०२
११८ अरमश्वाय गायत श्रुतकक्षारं गवे ।
अरमिन्द्रस्य धाम्ने ॥ ४ ॥ ८।९२।२५
११९ तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥ ५ ॥ ८।९३।७ १२२२
१२० त्वमिन्द्र बलादधि सहसो जात ओजसः ।
त्वं सन्वृषन्वृषेदसि ॥ ६ ॥ १०।१५३।२
१२१ यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।
चक्राण ओपशं दिवि ॥ ७ ॥ ८।१४।५ १६३९
१२२ यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् ।
स्तोता मे गोसखा स्यात् ॥ ८ ॥ ८।१४।१ १८३७

१२३ पन्यंपन्यमित्सोतार आ धावत मद्याय । (ऋग्वेदे) (सामवेदे)
सोमं वीराय शूराय ॥ ९ ॥ ८।२।२५ १६५७
१२४ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
अनाभयिन्ररिमा ते ॥१०॥ ८।२।१ ७३४
स्व० १० । उ० ४ । धा० ४६ । भू ॥

इति तृतीया दशतिः ॥३॥ प्रथमः खण्डः ॥१॥

(४)

(१-१०) १, २ सुकक्षश्रुतकक्षौ (ऋ० सुकक्ष आंगिरसः); ३ भारद्वाजः (ऋ० शंयुर्बार्हस्पत्यः); ४ श्रुतकक्षः (ऋ० सुकक्षो वा आंगिरसः); ५, ६ मधुच्छन्दा वैश्वामित्रः; ७, ९, १० त्रिशोकः काण्वः; ८ वसिष्ठो मैत्रावरुणिः ॥ इन्द्रः (९ ऋ० अग्नीन्द्रौ) ॥ गायत्री ॥

१२५ उद्घेदभि श्रुतामघं वृषभं नर्यापसम् ।
अस्तारमेषि सूर्य ॥ १ ॥ ८।९३।१ १४५०
१२६ यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
सर्वं तदिन्द्र ते वशे ॥ २ ॥ ८।९३।४
१२७ य आनयत्परावतः सुनीती तुर्वशं यदुम् ।
इन्द्रः स नो युवा सखा ॥ ३ ॥ ६।४५।१
१२८ मा न इन्द्राभ्या३ दिशः सूरो अक्तुष्वा यमत् ।
त्वा युजा वनेम तत् ॥ ४ ॥ ८।९२।३१
१२९ एन्द्र सानसिं रयिं सजित्वानं सदासहम् ।
वर्षिष्ठमूतये भर ॥ ५ ॥ १।८।१
१३० इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ।
युजं वृत्रेषु वज्रिणम् ॥ ६ ॥ १।७।५
१३१ अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे ।
तत्राददिष्ट पौंस्यम् ॥ ७ ॥ ८।४५।२६

१३२ वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् । (ऋग्वेदे) (सामवेदे)
विद्धी त्वा३स्य नो वसो ॥ ८ ॥ ७।३१।४
१३३ आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
येषामिन्द्रो युवा सखा ॥ ९ ॥ ८।४५।१ १३३८
१३४ भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
वसु स्पार्हं तदा भर ॥१०॥ ८।४५।४० १०७०
स्व० ८ । उ० ३ । धा० ३२ । डा ॥

इति चतुर्थी दशतिः ॥ ४ ॥ द्वितीयः खण्डः ॥ २ ॥

॥ ५ ॥

(१-१०) १ कण्वो घौरः; २ त्रिशोकः काण्वः; ३ वत्सः काण्वः; ४ कुसीदी काण्वः; ५ मेधातिथिः काण्वः; ६ श्रुतकक्षः (ऋ० सुकक्षः) आंगिरसः ७ श्यावाश्व आत्रेयः; ८ प्रगाथः काण्वः; ९ वत्सः काण्वः; १० इरिंबिठिः काण्वः ॥ इन्द्रः (ऋ० १ मरुतः; ४ विश्वे देवाः; ५ ब्रह्मणस्पतिः; ७ सविता) ॥ गायत्री ॥

१३५ इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
नि यामं चित्रमृञ्जते ॥ १ ॥ १।३७।३
१३६ इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।
पुष्टावन्तो यथा पशुम् ॥ २ ॥ ८।४५।१६
१३७ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
समुद्रायेव सिन्धवः ॥ ३ ॥ ८।६।४ १६५१
१३८ देवानामिदवो महत्तदा वृणीमहे वयम् ।
वृष्णामस्मभ्यमूतये ॥ ४ ॥ ८।८३।१
१३९ सोमानां स्वरणं कृणुहि ब्रह्मणस्पते ।
कक्षीवन्तं य औशिजः ॥ ५ ॥ १।१८।१ १४६३
१४० बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः ।
शृणोतु शक्र आशिषम् ॥ ६ ॥ ८।९३।१८

(ऋग्वेदे) (सामवेदे)

१४१ अद्या नो देव सवितः प्रजावत्सावीः सौभगम् ।
परा दुःष्वप्न्यं सुव   ॥ ७ ॥ ५।८२।४

१४२ क्वऽ३स्य वृषभो युवा तुविग्रीवो अनानतः ।
ब्रह्मा कस्तं सपर्यति   ॥ ८ ॥ ८।६४।७

१४३ उपह्वरे गिरीणां सङ्गमे च नदीनाम् ।
धिया विप्रो अजायत   ॥ ९ ॥ ८।६।२८

१४४ प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः ।
नरं नृषाहं मंहिष्ठम्   ॥१०॥ ८।१६।१

स्व० ९ । उ० ना । धा० ४४ । ली ॥

इति पञ्चमी दशतिः ॥५॥ तृतीयः खण्डः ॥३॥

॥ इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥१॥

[६]

(१-१०) १ श्रुतकक्षः (ऋ० सुकक्षः) आङ्गिरसः, २ मेधातिथिः (ऋ० शंयुर्बार्हस्पत्यः) काण्वः; ३ गोतमो राहूगणः; ४ भरद्वाजो बार्हस्पत्यः; ५ बिन्दुः पूतदक्षो वा आङ्गिरसः, ६, ७ श्रुतकक्षः सुकक्षो वा (ऋ० सुकक्षः) आङ्गिरसः; ८ वत्सः काण्वः, ९ शुनःशेप आजीगर्तिः, १० शुनःशेपो आजीगर्तिः, वामदेवो वा ॥ इन्द्रः, (४ ऋ० इन्द्रापूषणौ) ५ मरुतः ॥ गायत्री ॥

१४५ अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः ।
इन्दोरिन्द्रो यवाशिरः   ॥ १ ॥ ८।९२।४

१४६ इमा उ त्वा पुरूवसोऽभि प्र नोनुवुर्गिरः ।
गावो वत्सं न धेनवः   ॥ २ ॥ ६।४५।२५

१४७ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
इत्था चन्द्रमसो गृहे   ॥ ३ ॥ १।८४।१५   २१५

१४८ यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः ।
तत्र पूषाभुवत्सचा   ॥ ४ ॥ ६।५७।४

१४९ गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् ।
युक्ता वह्नी रथानाम्   ॥ ५ ॥ ८।९४।१

२

(ऋग्वेदे) (सामवेदे)

१५० उप नो हरिभिः सुतं याहि मदानां पते ।
उप नो हरिभिः सुतम्   ॥ ६ ॥ ८।९३।३१   १७९०

१५१ इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे ।
अच्छावभृथमोजसा   ॥ ७ ॥ ८।९३।२३

१५२ अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।
अहं सूर्य इवाजनि   ॥ ८ ॥ ८।६।१०   १५००

१५३ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
क्षुमन्तो याभिर्मदेम   ॥ ९ ॥ १।३०।१३   १०८४

१५४ सोमः पूषा च चेततुर्विश्वासां सुक्षितीनाम् ।
देवत्रा रथ्योर्हिता   ॥ १० ॥ (न ऋग्वेदीयः)

स्व० ८ । उ० ५ । धा० ४४ । णी ॥

इति षष्ठी दशतिः ॥६॥ चतुर्थः खण्डः ॥४॥

[७]

(१-१०) १, ४ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; २ वसिष्ठो मैत्रावरुणिः, ३ मेधातिथिः काण्वः, प्रियमेधश्चांगिरसः; ५ इरिम्बिठिः काण्वः, ६. १० मधुच्छन्दा वैश्वामित्रः; ७ त्रिशोकः काण्वः, ८ कुसीदी काण्वः; ९ शुनःशेप आजीगर्तिः ॥ इन्द्रः ॥ गायत्री ॥

१५५ पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम्   ॥ १ ॥ ८।९२।१   ७१३

१५६ प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
सखायः सोमपाव्ने   ॥ २ ॥ ७।३१।१   ७१६

१५७ वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
कण्वा उक्थेभिर्जरन्ते   ॥ ३ ॥ ८।२।१६   ७१९

१५८ इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
अर्कमर्चन्तु कारवः   ॥ ४ ॥ ८।९२।१९   ७२२

१५९ अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
एहीमस्य द्रवा पिब   ॥ ५ ॥ ८।१७।११   ७२५

(ऋग्वेदे) (सामवेदे)

१६० सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
जुहूमसि द्यविद्यवि   ॥ ६ ॥ १।४।१   १०८७

१६१ अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
तृम्पा व्यश्नुही मदम्   ॥ ७ ॥ ८।४५।२२   ७३१

१६२ य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः ।
पिबेदस्य त्वमीशिषे   ॥ ८ ॥ ८।८२।७

१६३ योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये   ॥ ९ ॥ १।३०।७   ७४३

१६४ आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
सखायः स्तोमवाहसः   ॥१०॥ १।५।१   ७४०

स्व० ५ । उ० २ । धा० ३९ । फो ॥

इति सप्तमी दशतिः ॥७॥ पञ्चमः खण्डः ॥५॥

[८]

(१-१०) १ विश्वामित्रो गाथिनः; २ मधुच्छन्दा वैश्वामित्रः; ३ कुसीदी काण्वः, ४ प्रियमेध आंगिरसः, ५, ८ वामदेवो गौतमः; ६, ९ श्रुतकक्षः सुकक्षो वा आंगिरसः (९ ऋ० सुकक्ष आंगिरसः), ७ मेधातिथिः काण्वः; १० बिन्दुः पूतदक्षो वा आंगिरसः ॥ इन्द्रः (ऋ० ७ सदसस्पतिः; १० मरुतः) ॥ गायत्री ॥

१६५ इदं ह्यन्वोजसा सुतं राधानां पते ।
पिबा त्वाऽ३स्य गिर्वणः   ॥ १ ॥ ३।५१।१०   ७३७

१६६ महाँ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे ।
द्यौर्न प्रथिना शवः   ॥ २ ॥ १।८।५

१६७ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन   ॥ ३ ॥ ८।८१।१   ७२८

१६८ अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।
सूनुं सत्यस्य सत्पतिम्   ॥ ४ ॥ ८।६९।४   १४८९

(ऋग्वेदे) (सामवेदे)

१६९ कया नश्चित्र आ भुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता   ॥ ५ ॥ ४।३१।१   ६८२

१७० त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।
आ च्यावयस्यूतये   ॥ ६ ॥ ८।९२।७

१७१ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम्   ॥ ७ ॥ १।१८।६

१७२ ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः ।
उत श्रोषन्तु नो भुवः   ॥ ८ ॥ (न ऋग्वेदीयः)

१७३ भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो ।
यदिन्द्र मृडयासि नः   ॥ ९ ॥ ८।९३।२८

१७४ अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः ।
उत स्वराजो अश्विना   ॥१०॥ ८।९४।४   १७८५

स्व० १२ । उ० १ । धा० ४० ॥ चौ ॥

इति अष्टमी दशतिः ॥८॥ षष्ठः खण्डः ॥६॥

[९]

(१-१०) १ देवजामय इन्द्रमातरः, २ गोधा ऋषिका; ३ दध्यङ्ङाथर्वणः; ४ प्रस्कण्वः काण्वः; ५ गोतमो राहूगणः; ६ मधुच्छन्दा वैश्वामित्रः; ७ वामदेवो गौतमः; ८ वत्सः काण्वः; ९ शुनःशेप आजीगर्तिः। १० उलो वातायनः ॥ इन्द्रः (ऋ० ४ अश्विनौ; १० वायुः) ॥ गायत्री ॥

१७५ ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते ।
वन्वानासः सुवीर्यम्   ॥ १ ॥ १०।१५३।१

१७६ नकि देवा इनीमसि न क्या योपयामसि ।
मन्त्रश्रुत्यं चरामसि   ॥ २ ॥ १०।१३४।७

१७७ दोषो आगाद् बृहद्गाय द्युमद्गामन्नाथर्वण ।
स्तुहि देवं सवितारम्   ॥ ३ ॥ (न ऋग्वेदीयः)

१७८ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
स्तुषे वामश्विना बृहत् ॥ ४ ॥ १।४६।१

१७९ इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।
जघान नवतीर्नव ॥ ५ ॥ १।८४।१३ ९१३

१८० इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः ।
महाँ अभिष्टिरोजसा ॥ ६ ॥ १।९।१

१८१ आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि ।
महान्महीभिरूतिभिः ॥ ७ ॥ ४।३२।१

१८२ ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ।
इन्द्रश्चर्मेव रोदसी ॥ ८ ॥ ८।६।५

१८३ अयमु ते समतसि कपोत इव गर्भधिम् ।
वचस्तच्चिन्न ओहसे ॥ ९ ॥ १।३०।४ १५९९

१८४ वात आ वातु भेषजं शम्भु मयोभु नो हृदे ।
प्र न आयूंषि तारिषत् ॥१०॥ १०।१८६।१ १८४०

स्व० १० । उ० २ । धा० ४५ । फु ॥

इति नवमी दशतिः ॥ ९ ॥ सप्तमः खण्डः ॥ ७ ॥

[१०]

(१-९) १ कण्वो घौरः; २, ३, ९ वत्सः (ऋ० २, ९ शशोऽद्भ्यः) काण्वः; ४ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; ५ मधुच्छन्दा वैश्वामित्रः; ६ वामदेवो गौतमः; ७ हरिम्बिठिः काण्वः; ८ सत्यधृति वारुणिः ॥ इन्द्रः (ऋ० १ वरुणमित्रार्यमणः; ८ आदित्यः) गायत्री ॥

१८५ यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
न किः स दभ्यते जनः ॥ १ ॥ १।४१।१

१८६ गव्यो षु णो यथा पुराश्वयोत रथया ।
वरिवस्या महोनाम् ॥ २ ॥ ८।४६।१०

१८७ इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् ।
एनामृतस्य पिप्युषीः ॥ ३ ॥ ८।६।१९

१८८ अया धिया च गव्यया पुरुणामन्पुरुष्टुत ।
यत्सोमेसोम आभुवः ॥ ४ ॥ ८।९३।१७

१८९ पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
यज्ञं वष्टु धियावसुः ॥ ५ ॥ १।३।१०

१९० क इमं नाहुषीष्वा इन्द्रं सोमस्य तर्पयात् ।
स नो वसून्या भरात् ॥ ६ ॥ (न ऋग्वेदीयः)

१९१ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
एदं बर्हिः सदो मम ॥ ७ ॥ ८।१७।१ ६६६

१९२ महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः ।
दुराधर्षं वरुणस्य ॥ ८ ॥ १०।१८५।१

१९३ त्वावतः पुरूवसो वयमिन्द्र प्रणेतः ।
स्मसि स्थातर्हरीणाम् ॥ ९ ॥ ८।४६।१

स्व० ६ । उ० ४ । धा० ३५ । घु ॥

इति दशमी दशतिः ॥ १० ॥ अष्टमः खण्डः ॥ ८ ॥

इति द्वितीयप्रपाठके द्वितीयोऽर्धः, द्वितीयः प्रपाठकश्च समाप्तः ॥

अथ तृतीयप्रपाठके प्रथमोऽर्धः ।

[१]

(१-१०) १ प्रगाथः काण्वः; २ विश्वामित्रो गाथिनः; ३, १० वामदेवो गौतमः; ४, ६ श्रुतकक्ष आङ्गिरसः (ऋ० ४ सुकक्षो वा; ६ सुकक्ष आंगिरसः); ५ मधुच्छन्दा वैश्वामित्रः; ७ गृत्समदः शौनकः; ८, ९ भरद्वाजः (ऋ०- ८ शंयुः) बार्हस्पत्यः ॥ इन्द्रः (९ ऋ० इन्द्रापूषणौ) ॥ गायत्री ॥

१९४ उत्त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
अव ब्रह्मद्विषो जहि ॥ १ ॥ ८।६४।१ १३५४

१९५ गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे ।
इन्द्र त्वादातमिद्यशः ॥ २ ॥ ३।४०।६

१९६ सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् ।
न देवो वृतः शूर इन्द्रः ॥ ३ ॥ (न ऋग्वेदीयः)

१९७ आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । (ऋग्वेदे) (सामवेदे)
न त्वामिन्द्राति रिच्यते ॥ ४ ॥ ८।९२।२२ १६६०

१९८ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
इन्द्रं वाणीरनूषत ॥ ५ ॥ १।७।१ ७९६

१९९ इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिम् ।
वाजी ददातु वाजिनम् ॥ ६ ॥ ८।९३।३४

२०० इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् ।
स हि स्थिरो विचर्षणिः ॥ ७ ॥ २।४१।१०

२०१ इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः ।
गावो वत्सं न धेनवः ॥ ८ ॥ ६।४५।२८

२०२ इन्द्रा नु पूषणा वयं सख्याय स्वस्तये ।
हुवेम वाजसातये ॥ ९ ॥ ६।५७।१

२०३ न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् ।
न क्येवं यथा त्वम् ॥१०॥ ४।३०।१

स्व० ८ । उ० ७ । धा० ३५ । टु ॥

इति प्रथमा दशतिः ॥१॥ नवमः खण्डः ॥९॥

[२]

(१-१०) १, ४ त्रिशोकः काण्वः; २ मधुच्छन्दा वैश्वामित्रः; ३ वत्सः काण्वः; (ऋ० वशोऽश्व्यः); ५ सुकक्ष आङ्गिरसः; ६, ९, वामदेवो गौतमः; ७ विश्वामित्रो गाथिनः । ८ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ; १० श्रुतकक्षः सुकक्षो वा आङ्गिरसः ॥ इन्द्रः ॥ गायत्री ॥

२०४ तरणिं वो जनानां त्रदं वाजस्य गोमतः ।
समानमु प्र शंसिषम् ॥ १ ॥ ८।४५।२८

२०५ असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत ।
सजोषा वृषभं पतिम् ॥ २ ॥ १।९।४

२०६ सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा ।
मित्रास्पान्त्यद्रुहः ॥ ३ ॥ ८।४६।४

२०७ यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् । (ऋग्वेदे) (सामवेदे)
वसु स्पार्हं तदा भर ॥ ४ ॥ ८।४५।४१ १०७२

२०८ श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् ।
आशिषे राधसे महे ॥ ५ ॥ ८।९३।२६

२०९ अरं त इन्द्र श्रवसे गमेम शूर त्वावतः ।
अरं शक्र परेमणि ॥ ६ ॥ (न ऋग्वेदीयः)

२१० धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ।
इन्द्र प्रातर्जुषस्व नः ॥ ७ ॥ ३।५२।१

२११ अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।
विश्वा यदजय स्पृधः ॥ ८ ॥ ८।१४।१३

२१२ इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः ।
तेषां मत्स्व प्रभूवसो ॥ ९ ॥ (न ऋग्वेदीयः)

२१३ तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो ।
स्तोतृभ्य इन्द्र मृडय ॥ १० ॥ ८।९३।२५

स्व० ८ । उ० २ । धा० ३३ । ठि ॥

इति द्वितीया दशतिः ॥२॥ दशमः खण्डः ॥१०॥

[३]

(१-९) १ शुनःशेप आजीगर्तिः; २ श्रुतकक्ष आंगिरसः (ऋ० सुकक्षो आंगिरसो वा;) ३ त्रिशोकः काण्वः; ४ मेधातिथिः काण्वः; ५ गोतमो राहूगणः; ६ ब्रह्मातिथिः काण्वः; ७ विश्वामित्रो गाथिनो जमदग्निर्वा; ८ प्रस्कण्वः काण्वः (ऋ० कण्वो घौरः); ९ मेधातिथिः काण्वः ॥ इन्द्रः (ऋ० ५ विश्वेदेवाः); ६ अश्विनौ; मित्रावरुणौ; ८ मरुतः; ९ विष्णुः) ॥ गायत्री ॥

२१४ आ व इन्द्रं कृविं यथा वाजयन्तः शतक्रतुम् ।
मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ॥ १।३०।१

२१५ अतश्चिदिन्द्र न उपा याहि शतवाजया ।
इषा सहस्रवाजया ॥ २ ॥ ८।९२।१०

२१६ आ बुन्दं वृत्रहा ददे जातः पृच्छाद्वि मातरम् ।
क उग्राः के ह शृण्विरे ॥ ३ ॥ ८।४५।४

(ऋग्वेदे) (सामवेदे)

२१७ वृषवुक्थं हवामहे सृप्रकरस्नमूतये।
साधः कृण्वन्तमवसे ॥ ४ ॥ ८।३२।१०

२१८ ऋजुनीती नो वरुणो मित्रो नयति विद्वान्।
अर्यमा देवैः सजोषाः ॥ ५ ॥ १।९०।१

२१९ दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत्।
वि भानुं विश्वधातनत् ॥ ६ ॥ ८।५।१

२२० आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्।
मध्वा रजांसि सुक्रतू ॥ ७ ॥ ३।६२।१६ ६६३

२२१ उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत।
वाश्रा अभिज्ञु यातवे ॥ ८ ॥ १।३७।१०

२२२ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्।
समूढमस्य पांसुले ॥ ९ ॥ १।२२।१७

स्व० ६। उ० १। धा० ३९। को ॥

इति तृतीया दशतिः ॥३॥ एकादशः खण्डः ॥११॥

[४]

(१-१०) १, ७, ८ मेधातिथिः काण्वः, २ वामदेवो गौतमः, ३, ५ मेधातिथिः काण्वः, प्रियमेधश्चाङ्गिरसः, ४ विश्वामित्रो गाथिनः, ६ दुर्मित्रः (सुमित्रो वा) कौत्सः, ९ विश्वामित्रो गाथिनोऽभीपाद् उदलो वा, १० श्रुतकक्षः (ऋ० सुकक्षो वा) आंगिरसः ॥ इन्द्रः ॥ गायत्री ॥

२२३ अतीहि मन्युषाविणं सुषुवांसमुपेरय।
अस्य रातौ सुतं पिब ॥ १ ॥ ८।३२।२१

२२४ कदु प्रचेतसे महे वचो देवाय शस्यते।
तदिध्यस्य वर्धनम् ॥ २ ॥ (न ऋग्वेदीयः)

(ऋग्वेदे) (सामवेदे)

२२५ उक्थं च न शस्यमानं नागो रयिरा चिकेत।
न गायत्रं गीयमानम् ॥ ३ ॥ ८।२।१४ १८०५

२२६ इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः।
हरिवांत्सुतानां सखा ॥ ४ ॥ (न ऋग्वेदीयः)

२२७ आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः।
महां इव युवजानिः ॥ ५ ॥ ८।२।१९

२२८ कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधद्वाः।
दीर्घं सुतं वाताप्याय ॥ ६ ॥ १०।१०५।१

२२९ ब्राह्मणादिन्द्र राधसः पिबा सोममृतूंरनु।
तवेदं सख्यमस्तृतम् ॥ ७ ॥ १।१५।५

२३० वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः।
त्वं नो जिन्व सोमपाः ॥ ८ ॥ ८।३२।७

२३१ एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः।
सत्राजिदुग्र पौंस्यम् ॥ ९ ॥ (न ऋग्वेदीयः)

२३२ एवा ह्यसि वीरयुरेवा शूर उत स्थिरः।
एवा ते राध्यं मनः ॥ १० ॥ ८।९२।२८ ८२४

स्व० १२। उ० ना। धा० ३०। यी ॥

इति चतुर्थी दशतिः ॥४॥ द्वादशः खण्डः ॥१२॥

इति द्वितीयोऽध्यायः ॥२॥

इत्येकसामि समाप्तम् ॥

अथ तृतीयोऽध्यायः।

[५]

(१-१०) १, ६, ९ वसिष्ठो मैत्रावरुणिः, २ भरद्वाजः (ऋ० शंयुः) बार्हस्पत्यः ३ प्रस्कण्वः काण्वः, ४ नोधा गौतमः, ५ कलिः प्रागाथः। ७ मेधातिथिः काण्वः, ८ भर्गः प्रागाथः, १० प्रगाथो घौरः काण्वः ॥ इन्द्रः, ९ मरुतः ॥ बृहती ॥

(ऋग्वेदे) (सामवेदे)

२३३ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ १ ॥ ७।३२।२२ ६८०

२३४ त्वामिद्धि हवामहे सातौ वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ २ ॥ ६।४६।१ ८०९

२३५ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ३ ॥ ८।४९।१ ८११

२३६ तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ४ ॥ ८।८८।१ ६८५

२३७ तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ५ ॥ ८।६६।१ ६८७

२३८ तरणिरित्सिषासति वाजं पुरन्ध्या युजा।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ ६ ॥ ७।३२।२० ८६७

२३९ पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः।
आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥ ७ ॥ ८।३।१ १४२१

२४० त्वं ह्येहि चेरवे विदा भगं वसुत्तये।
उद्वावृषस्व मघवन् गविष्टय उदिन्द्राश्वमिष्टये ॥ ८ ॥ ८।६१।७ १५८१

२४१ न हि वश्चरमं च न वसिष्ठः परिमंसते।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥ ९ ॥ ७।५९।३

२४२ मा चिदन्यद्वि शंसत सखायो मा रिषण्यत।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥ १० ॥ ८।१।१ १३६०

स्व० १२। उ० ५। धा० ७३। जि ॥

इति पञ्चमी दशतिः ॥५॥ प्रथमः खण्डः ॥१॥ इति तृतीय प्रपाठके प्रथमोऽर्धः ॥१॥

[६]

(१-१०) १ पुरुहन्मा आंगिरसः, २, ३ मेधातिथि-मेध्यातिथी काण्वौ, ४ विश्वामित्रो गाथिनः, ५ गोतमो (गौतमो वा) राहूगणः, ६ नृमेधपुरुमेधावांगिरसौ; ७, ८, ९ मेधातिथिर्मेध्यातिथिर्वा (ऋ० मेध्यातिथिः) काण्वः, १० देवातिथिः काण्वः ॥ इन्द्रः ॥ बृहती ॥

(ऋग्वेदे) (सामवेदे)

२४३ नकिष्टं कर्मणा नशद्यश्चकार सदावृधम्।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ १ ॥ ८।७०।३ ११५५

२४४ य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः।
सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥ २ ॥ ८।१।१२

२४५ आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ ३ ॥ ८।१।२४ १३४१

२४६ आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः।
मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥४॥ ३।४५।१ १७१८

२४७ त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम्।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ५ ॥ १।८४।१९ १७२३

२४८ त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः।
त्वं वृत्राणि हंस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ ६ ॥ ८।९०।५

२४९ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ७ ॥ ८।३।५ १५८७

२५० इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम।
पावकवर्णाः शुचयो विपश्चितोऽभिस्तोमैरनूषत ॥ ८ ॥ ८।३।३ १६०७

२५१ उदु त्ये मधुमत्तमा गिर स्तोमास ईरते।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ ९ ॥ ८।३।१५

२५२ यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम्।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥१०॥ ८।४।३ १७२१

स्व० ११। उ० ७। धा० ७२। खा ॥

इति षष्ठी दशतिः ॥६॥ द्वितीयः खण्डः ॥२॥

[७]

(१-१०) १ भर्गः प्रागाथः; २, ८ रेभः काश्यपः; ३ जमदग्निर्भार्गवः; ४, ९ मेधातिथिः काण्वः; (ऋ० मेध्यातिथिः काण्वः); ५, ६ नृमेधपुरुमेधावांगिरसौ; ७ वसिष्ठो मैत्रावरुणिः; १० भरद्वाजः (ऋ० शंयुः) बार्हस्पत्यः ॥ इन्द्रः, ३ मित्रावरुणादित्याः ॥ बृहती ॥

२५३ शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः ।　(ऋग्वेदे)　(सामवेदे)
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि　॥ १ ॥ ८।६१।५　१५७९
२५४ या इन्द्र भुज आभरः स्वर्वां असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः　॥ २ ॥ ८।९७।१
२५५ प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।
वरूथ्ये३ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत　॥ ३ ॥ ८।१०१।५
२५६ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम्　॥ ४ ॥ ८।३।७　१५७३
२५७ प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा　॥ ५ ॥ ८।८९।३
२५८ बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि　॥ ६ ॥ ८।८९।१
२५९ इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥७॥ ७।३२।२६
२६० मा न इन्द्र परा वृणग्भवा नः सधमाद्ये ।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक्　॥ ८ ॥ ८।९७।७
२६१ वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते　॥ ९ ॥ ८।३३।१　८६४
२६२ यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु ।
यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥१०॥ ६।४६।७
॥ स्व० १० । उ० १ । धा० ६२ । पा ॥
इति सप्तमी दशतिः ॥ ७ ॥ तृतीयः खण्डः ॥ १० ॥

[८]

(१-१०) १ मेधातिथिः (ऋ० मेध्यातिथिः) काण्वः; २ रेभः काश्यपः; ३ वत्सः (ऋ० वशोऽश्व्यः); ४ भरद्वाजः (शंयुः) बार्हस्पत्यः; ५ नृमेध आंगिरसः; ६ पुरुहन्मा आंगिरसः; ७ नृमेध-पुरुमेधावांगिरसौ; ८ वसिष्ठो मैत्रावरुणिः; ९ मेधातिथि-मेध्यातिथी काण्वौ; १० कलिः प्रागाथः ॥ इन्द्रः ॥ बृहती ॥

२६३ सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता ।　(ऋग्वेदे) (सामवेदे)
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः　॥ १ ॥ ८।३३।१०
२६४ यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥२॥ ८।९७।४
२६५ अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा　॥ ३ ॥ ८।४६।१४
२६६ इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः　॥ ४ ॥ ६।४६।९
२६७ श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिम ॥ ५ ॥ ८।९९।३　१३१९
२६८ न सीमदेव आप तदिषं दीर्घायो मर्त्यः ।
एतग्वा चिद्य एतशो युयोजत इन्द्रो हरी युयोजते　॥ ६ ॥ ८।७०।७
२६९ आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम　॥ ७ ॥ ८।९०।१　१४९२
२७० तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ॥ ८ ॥ ७।३२।१६
२७१ क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः　॥ ९ ॥ ८।१।७

२७२ वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।　(ऋग्वेदे) (सामवेदे)
तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते　॥१०॥ ८।६६।७　१६९१
स्व० १४ । उ० १ । धा० ७४ । ती ॥
इति अष्टमी दशतिः ॥ ८ ॥ चतुर्थः खण्डः ॥ ४ ॥

[९]

(१-१०) १, ६ पुरुहन्मा आंगिरसः; २ भर्गः प्रागाथः; ३ इरिम्बिठिः काण्वः; ४ जमदग्निर्भार्गवः; ५, ७ देवातिथिः काण्वः; ८ वसिष्ठो मैत्रावरुणिः; ९ भरद्वाजो बार्हस्पत्यः; १० मेध्यः काण्वः ॥ इन्द्रः (ऋ० ३ वास्तोष्पतिर्वा; ४ सूर्यः; ९ इन्द्राग्नी) ॥ बृहती ॥

२७३ यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे　॥ १ ॥ ८।७०।१　९३३
२७४ यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥ २ ॥ ८।६१।१३　१३२१
२७५ वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्यानाम् ।
द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनां सखा　॥ ३ ॥ ८।१७।१४
२७६ बण्महाँ असि सूर्य बळादित्य महाँ असि ।
महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि　॥ ४ ॥ ८।१०१।११　१७८८
२७७ अश्वी रथी सुरूप इद्गोमाँ यदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप　॥ ५ ॥ ८।४।९
२७८ यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी　॥ ६ ॥ ८।७०।५　८६२
२७९ यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे　॥ ७ ॥ ८।४।१　१२३१
२८० कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥ ८ ॥ ७।३२।१४　१६८२

२८१ इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।　(ऋग्वेदे) (सामवेदे)
हित्वा शिरो जिह्वया रारपच्चरत्त्रिंशत्पदा न्यक्रमीत्　॥ ९ ॥ ६।५९।६
२८२ इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः　॥१०॥ ८।५३।५
स्व० १६ । उ० ५ । धा० ७२ । ञ ॥
इति नवमी दशतिः ॥९॥ इति पञ्चमः खण्डः ॥५॥

[१०]

(१-१०) १ नृमेध आंगिरसः; २, ३ वसिष्ठो मैत्रावरुणिः; ४ भरद्वाजः (ऋ० शंयुः) बार्हस्पत्यः; ५ परुच्छेपो दैवोदासिः; ६ वामदेवो गौतमः; ७ मेध्यातिथिः काण्वः; ८ भर्गः प्रागाथः; ९, १० मेधातिथि-मेध्यातिथी काण्वौ ॥ इन्द्रः (५ ऋ० आश्विनौ) ॥ बृहती ॥

२८३ इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्रियावृधम्　॥ १ ॥ ८।९९।७
२८४ मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि　॥ २ ॥ ७।३२।१　१६७५
२८५ सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः　॥ ३ ॥ ७।३२।८
२८६ यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम् ।
सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ ४ ॥ ६।४६।३
२८७ शचीभिर्नः शचीवसू दिवा नक्तं दिशस्यतम् ।
मा वां रातिरुप दसत्कदाचनास्मद्रातिः कदाचन　॥ ५ ॥ १।१३९।५
२८८ यदा कदा च मीढुषे स्तोता जरेत मर्त्यः ।
आदिद्वन्देत वरुणं विपा गिरा धर्तारं विव्रतानाम्　॥ ६ ॥ (न ऋग्वेदीयः)
२८९ पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥ ७ ॥ ८।३३।४

(ऋग्वेदे) (सामवेदे)

२९० उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥८॥ ८।६१।१ १२३२
२९१ महे च न त्वाद्रिवः परा शुल्काय दीयसे ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ९ ॥ ८।१।५
२९२ वस्यां इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥१०॥ ८।१।६
स्व० १५ । उ० ४ । धा० ७६ । भू ॥

इति दशमी दशतिः ॥ १० ॥ षष्ठः खण्डः ॥ ६ ॥
इति तृतीयप्रपाठके द्वितीयोऽर्धः, तृतीयः प्रपाठकश्च समाप्तः ॥

अथ चतुर्थप्रपाठके प्रथमोऽर्धः ।

[१]

(१-१०) १ वसिष्ठो मैत्रावरुणिः; २, ६, ७ वामदेवो गौतमः; ३ मेधातिथि-मेध्यातिथी काण्वौ, विश्वामित्र इत्येके; ४ नोधा गौतमः; ५ मेधातिथिः (ऋ० मेध्यातिथिः) काण्वः; ८ श्रुष्टिगुः काण्वः; ९ मेध्यातिथिः (मेधातिथिर्वा) काण्वः; १० नृमेध आंगिरसः ॥ इन्द्रः; ७ वसुः ॥ बृहती ॥

२९३ इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ १ ॥ ७।३२।४
२९४ इम इन्द्र मदाय ते सोमाश्चिकित्र उक्थिनः ।
मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥ २ ॥ (न ऋग्वेदीयः)
२९५ आ त्वा३द्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरङ्कृतम् ॥ ३ ॥ ८।१।१०
२९६ न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
यच्छिक्षासि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥ ४ ॥ ८।८८।३
२९७ क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्योजसा मन्दानः शिप्र्यन्धसः ॥ ५ ॥ ८।३३।७ १६९६
२९८ यदिन्द्र शासो अव्रतं च्यावया सदसस्परि ।
अस्माकमंशुं मघवन्पुरुस्पृहं वसव्ये अधि बर्हय ॥ ६ ॥ (न ऋग्वेदीयः)

(ऋग्वेदे) (सामवेदे)

२९९ त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥ ७ ॥ (न ऋग्वेदीयः)
३०० कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ८ ॥ ८।५१।७
३०१ युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥ ९ ॥ ८।३।१७
३०२ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥१०॥ ८।९९।१ ८१३
स्व० १३ । उ० २ । धा० ८२ । ठि ॥

इति प्रथमा दशतिः ॥१॥ सप्तमः खण्डः ॥७॥

[२]

(१-१०) १,२,७,८ वसिष्ठो मैत्रावरुणिः; ३ अश्विनौ वैवस्वतौ; ४ प्रस्कण्वः काण्वः; ५ मेधातिथि-मेध्यातिथी काण्वौ; ६ देवातिथिः काण्वः; ९ नृमेध आंगिरसः; १० नोधाः गौतमः ॥ इन्द्रः; १ उषाः; २, ३ (ऋ० ४) अश्विनौ ॥ बृहती ॥

३०३ प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥ १ ॥ ७।८१।१ ७५१
३०४ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥ २ ॥ ७।७४।१ ७५३
३०५ कुष्ठः को वामश्विना तपानो देवा मर्त्यः ।
घ्नता वामश्मया क्षपमाणोंऽशुनेत्थमु आद्वन्यथा ॥ ३ ॥ (न ऋग्वेदीयः)
३०६ अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥ ४ ॥ १।४७।१
३०७ आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ ५ ॥ ८।१।२०

(ऋग्वेदे) (सामवेदे)

३०८ अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ६ ॥ ८।४।११
३०९ अभीषतस्तदा भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥ ७ ॥ ७।३२।२४
३१० यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ॥ ८ ॥ ७।३२।१८ १७२६
३११ त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ ९ ॥ ८।९९।५ १६३७
३१२ प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥१०॥ ८।८८।५
स्व० १० । उ० ३ । धा० ७५ । ये ॥

इति द्वितीया दशतिः ॥२॥ अष्टमः खण्डः ॥८॥
इति बृहती समाप्ता ।

[३]

(१-१०) १, २, ६ वसिष्ठो मैत्रावरुणिः; ३ गातुरात्रेयः; ४ पृथुर्वैन्यः; ५ सप्तगुरांगिरसः; ७ गौरिवीतिः शाक्त्यः; ८ वेनो भार्गवः; ९ बृहस्पतिर्नकुलो वा; १० सुहोत्रो भारद्वाजः ॥ इन्द्रः; (ऋ० ५ इन्द्रो वैकुण्ठः) ८ वेनः ॥ त्रिष्टुप् ॥

३१३ असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ॥ १ ॥ ७।२१।१
३१४ योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधश्चिद्ददो वसूनि ममदश्च सोमैः ॥ २ ॥ ७।२४।१
३१५ अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।
महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान्हन् ॥ ३ ॥ ५।३२।१
३१६ सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य कोना तना त्मना सह्याम त्वोताः ॥ ४ ॥ १०।१४८।१

(ऋग्वेदे) (सामवेदे)

३१७ जगृभ्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥५॥ १०।४७।१
३१८ इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ॥६॥ ७।२७।१
३१९ वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्या३स्मान्निधयेव बद्धान् ॥ ७ ॥ १०।७३।११
३२० नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ८ ॥ १०।१२३।६
३२१ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥९॥ (न ऋग्वेदीयः)
३२२ अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शन्तमानि वचांस्यस्मै स्थविराय तक्षुः ॥१०॥ ६।३२।१
स्व० १३ । उ० ६ । धा० ९१ । ट ॥

इति तृतीया दशतिः ॥३॥ इति नवमः खण्डः ॥९॥

[४]

(१-२) १, २, ४ द्युतानो मारुतः (ऋ० तिरश्चीराङ्गिरसः); ३ बृहदुक्थो वामदेव्यः; ५ वामदेवो गौतमः; ६, ८ वसिष्ठो मैत्रावरुणिः; ७ विश्वामित्रो गाथिनः; ९ गौरिवीतिः शाक्त्यः ॥ इन्द्रः ॥ त्रिष्टुप्, (६ ऋ० विराट्) ॥

३२३ अव द्रप्सो अंशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः ॥१॥ ८।९६।१३
३२४ वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ २ ॥ ८।९६।७
३२५ विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ ३ ॥ १०।५५।५ १७८२
३२६ त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥४॥ ८।९६।१६

३२७ मंहिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुम् । (ऋग्वेदे) (सामवेदे)
करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे ॥ ५ ॥ (न ऋग्वेदीयः)
३२८ प्र वो महे महे वृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चर चर्षणिप्राः ॥ ६ ॥ ७।३१।१० १७९३
३२९ शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानि ॥ ७ ॥ ३।३०।२२
३३० उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचांसि ॥ ८॥ ७।२३।१
३३१ चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात् ।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥ ९ ॥ १०।७३।९

स्व० १६ । उ० ६ । धा० ७३ ॥ क्रि

इति चतुर्थी दशतिः ॥ ४ ॥ दशमः खण्डः ॥ १० ॥

[५]

(१-१०) १ अरिष्टनेमिस्तार्क्ष्यः; २ भरद्वाजः (ऋ० गर्गो भारद्वाजः); ३ विमद ऐन्द्रः,वसुकृद्वा वासुक्रः (ऋ० प्राजापत्यो वा); ४-६, ९ वामदेवो गौतमः (९ ऋ० यमी वैवस्वती) ७ विश्वामित्रो गाथिनः; ८ रेणुर्वैश्वामित्रः; १० गोतमो राहूगणः ॥ इन्द्रः (ऋ० १ तार्क्ष्यः; ७ पर्वतेन्द्रौ, ९ यमो वैवस्वतः) ॥ त्रिष्टुप् ॥

३३२ त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥ १ ॥ १०।१७८।१
३३३ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रमिदं हविर्मघवा वेत्विन्द्रः ॥ २ ॥ ६।४७।११
३३४ यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यां३ विव्रतानाम् ।
प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो वि राधसा॥३॥१०।२३।१
३३५ सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः॥४॥ ४।१७।८

३३६ यो नो वनुष्यन्नभिदाति मर्त उगणा वा मन्यमानस्तुरो वा । (ऋग्वेदे) (सामवेदे)
क्षिधी युधा शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः ॥ ५ ॥(न ऋग्वेदीयः)
३३७ यं वृत्रेषु क्षितय स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
यं शूरसातौ यमपामुपज्मन्यं विप्रासो वाजयन्ते स इन्द्रः ॥ ६ ॥(न ऋग्वेदीयः)
३३८ इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः ।
वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिडया मदन्ता ॥ ७ ॥ ३।५३।१
३३९ इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥ ८ ॥१०।८९।४
३४० आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवां जगम्याः ।
पितुर्नपातमा दधीत वेधा अस्मिन्क्षये प्रतरां दीद्यानः ॥ ९ ॥ १०।१०।१
३४१ को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्नेषामप्सुवाहो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥१०॥ १।८४।१६

स्व० १८ । उ० ४ । धा० ८६ । दू ॥

इति पञ्चमी दशतिः ॥५॥ एकादशः खण्डः ॥११॥
इति त्रिष्टुप् समाप्ता ॥ इति चतुर्थप्रपाठकस्य प्रथमोऽर्धः ॥१॥

[६]

(१-१०) १ मधुच्छन्दा वैश्वामित्रः; २ जेता माधुच्छन्दसः; ३, ६ गोतमो राहूगणः; ४ अत्रिर्भौमः; ५, ८ तिरश्चीराङ्गिरसः; ७ नीपातिथिः काण्वः; ९ विश्वामित्रो गाथिनः; १० तिरश्चीरांगिरसः शंयुर्बार्हस्पत्यो वा ॥ इन्द्रः ॥ अनुष्टुप् ॥

३४२ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥ १।१०।१ १३४४
३४३ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ २ ॥ १।११।१ ८२७
३४४ इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ३ ॥ १।८४।४ ९४९

३४५ यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः । (ऋग्वेदे) (सामवेदे)
राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥ ४ ॥ ५।३९।१ ११७२
३४६ श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ ५ ॥ ८।९५।४ ८८३
३४७ असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥ ६ ॥ १।८४।१ १०२८
३४८ एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥ ८।३४।१ १८०७
३४९ आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
अभि त्वा समनूषत गावो वत्सं न धेनवः ॥ ८ ॥ ८।९५।१
३५० एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु ॥ ९ ॥ ८।९५।७ १४०२
३५१ यो रयिं वो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥१०॥ ६।४४।१

स्व० ४ । उ० ४ । धा० ५४ ॥ धी ॥

इति षष्ठी दशतिः ॥६॥ द्वादशः खण्डः ॥१२॥
इति तृतीयोऽध्यायः ॥३॥

अथ चतुर्थोऽध्यायः ।

[७]

(१-८) १ भरद्वाजो बार्हस्पत्यः; २ वामदेवो गौतमः, शाकपूतो वा; ३ प्रियमेध आङ्गिरसः; ४ प्रगाथः काण्वः; ५ श्यावाश्व आत्रेयः; ६ शंयुर्बार्हस्पत्यः; ७ वामदेवो गौतमः; ८ जेता माधुच्छन्दसः ॥ इन्द्रः; ५ मरुतः; ७ दधिक्रा वा ॥ अनुष्टुप् ॥

३५२ प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरङ्गमाय जग्मयेऽपश्चाद्दघ्वने नरः ॥ १ ॥ ६।४२।१ १४४०
३५३ आ नो वयो वयःशयं महान्तं गह्वरेष्ठां महान्तं पूर्विणेष्ठाम्
उग्रं वचो अपावधीः ॥ २ ॥ (न ऋग्वेदीयः)

३५४ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि । (ऋग्वेदे) (सामवेदे)
तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम् ॥ ३ ॥ ८।६८।१ १७७१
३५५ स पूर्व्यो महोनां वेनः क्रतुभिरानजे ।
यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥ ४ ॥ ८।६३।१
३५६ यदी वहन्त्याशवो भ्राजमाना रथेष्वा ।
पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ॥ ५ ॥ (न ऋग्वेदीयः)
३५७ त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
इन्द्रं विश्वासाहं नरं शचिष्ठं विश्ववेदसम् । ॥ ६ ॥ ६।४४।४
३५८ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत् ॥ ७ ॥ ४।३९।६
३५९ पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ८ ॥ १।११।४ १२५०

स्व० ५ । उ० २ । धा० ४५ । पु ॥

इति सप्तमी दशतिः ॥ ७ ॥ इति प्रथमः खण्डः ॥ १॥

[८]

(१-१०) १,३,५ प्रियमेध आङ्गिरसः; २,१० वामदेवो गौतमः; ४ मधुच्छन्दा वैश्वामित्रः; ६ भरद्वाजो बार्हस्पत्यः; ७ अत्रिर्भौमः; ८ प्रस्कण्वः काण्वः; ९ त्रित आप्त्यः (ऋ० कुत्स आंगिरसो वा)॥ इन्द्रः; (६ ऋ० अग्निः), ८ उषाः; ९ विश्वेदेवाः ॥ अनुष्टुप् ॥

३६० प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे ।
धिया वो मेधसातये पुरन्ध्या विवासति । ॥ १ ॥ ८।६९।१
३६१ कश्यपस्य स्वर्विदो यावाहुः सयुजाविति ।
ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥ २ ॥ (न ऋग्वेदीयः)
३६२ अर्चत प्रार्चत नरः प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरमिद्धृष्ण्वर्चत ॥ ३ ॥ ८।६९।८

(ऋग्वेदे)　(सामवेदे)

३६३ उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिःषिधे ।
शक्रो यथा सुतेषु णो रारणत्सख्येषु च　॥ ४ ॥ १।१०।५

३६४ विश्वानरस्य वस्पतिमनानतस्य शवसः ।
एवैश्च चर्षणीनामूती हुवे रथानाम् ।　॥ ५ ॥ ८।६८।४

३६५ स घा यस्ते दिवो नरो धिया मर्तस्य शमतः ।
ऊती स बृहतो दिवो द्विषो अंहो न तरति　॥ ६ ॥ ६।२।४

३६६ विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अथा नो विश्वचर्षणे द्युम्नं सुदत्र मंहय　॥ ७ ॥ ५।३८।१

३६७ वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि ।
उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि　॥ ८ ॥ १।४९।३

३६८ अमी ये देवा स्थन मध्य आ रोचने दिवः ।
कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः　॥ ९ ॥ १।१०५।५

३६९ ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते ।
वि ते सदसि राजतो यज्ञं देवेषु वक्षतः　॥ १० ॥ (न ऋग्वेदीयः)

स्व० ७ । उ० ३ । धा० ५४ । जी ॥

इति अष्टमी दशतिः ॥८॥ द्वितीयः खण्डः ॥२॥ इत्यनुष्टुभः ॥

[९]

(१-११) १ रेभः काश्यपः, २ सुवेदाः शैलूषिः, ३ वामदेवो गौतमः, ४, ७, ८ सव्य आङ्गिरसः, ५ विश्वामित्रो गाथिनः, ६ कृष्ण आङ्गिरसः, ९ भरद्वाजो बार्हस्पत्यः, १० मेधातिथिः काण्वः (ऋ० मान्धाता यौवनाश्वः), ११ कुत्स आङ्गिरसः ॥ इन्द्रः, ९ द्यावापृथिव्यौ ॥ जगती, १ अति जगती, १० महापङ्क्तिः ॥

३७० विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम्　॥ १ ॥ ८।९७।१०　९३०

३७१ श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्दस्युं नर्यं विवेरपः ।
उभे यत्वा रोदसी धावतामनु भ्यसाते शुष्मात्पृथिवी चिदद्रिवः ॥२॥ १०।१४७।१

(ऋग्वेदे)　(सामवेदे)

३७२ समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाजिगीषं तं वर्तनीरनु वावृत एक इत्　॥ ३ ॥ (न ऋग्वेदीयः)

३७३ इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्य नो वचः ॥४॥ १।५७।४

३७४ चर्षणीधृतं मघवानमुक्थ्या३मिन्द्रं गिरो बृहतीरभ्यनूषत ।
वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे　॥ ५ ॥ ३।५१।१

३७५ अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥६॥ १०।४३।१

३७६ अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।
यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठमभि विप्रमर्चत ॥७॥ १।५१।१

३७७ त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभुवः साकमीरते ।
अत्यं न वाजं हवनस्यदं रथमिन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥८॥ १।५२।१

३७८ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥९॥ ६।७०।१

३७९ उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्　॥१०॥ १०।१३४।१　१०९०

३८० प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि　॥११॥ १।१०१।१

स्व० १४ । उ० ७ । धा० ९३ । थि ॥

इति नवमी दशतिः ॥९॥ तृतीयः खण्डः ॥३॥

॥ इति जगत्यः ॥

[१०]

(१-१०) १ नारदः काण्वः, २, ३ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ, ४ पर्वतः काण्वः, ५-७, १० विश्वमना वैयश्वः, ८ नृमेध आङ्गिरसः, ९ गोतमो राहूगणः ॥ इन्द्रः ॥ उष्णिक् ॥

(ऋग्वेदे)　(सामवेदे)

३८१ इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
विदे वृधस्य दक्षस्य महाँ हि षः　॥ १ ॥ ८।१३।१　७४६

३८२ तमु अभि प्र गायत पुरुहूतं पुरुष्टुतम् ।
इन्द्रं गीर्भिस्तविषमा विवासत　॥ २ ॥ ८।१५।१

३८३ तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
उ लोककृत्नुमद्रिवो हरिश्रियम्　॥ ३ ॥ ८।१५।४　८८०

३८४ यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये ।
यद्वा मरुत्सु मन्दसे समिन्दुभिः　॥ ४ ॥ ८।१२।१६

३८५ एदु मधोर्मदिन्तरं सिञ्चाध्वर्यो अन्धसः ।
एवा हि वीरस्तवते सदावृधः ।　॥ ५ ॥ ८।२४।१६—१६८४

३८६ एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
प्र राधांसि चोदयते महित्वना　॥ ६ ॥ ८।२४।१३　१५०९

३८७ एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
कृष्टीर्यो विश्वा अभ्यस्त्येक इत्　॥ ७ ॥ ८।२४।१९

३८८ इन्द्राय साम गायत विप्राय बृहते बृहत् ।
ब्रह्मकृते विपश्चिते पनस्यवे　॥ ८ ॥ ८।९८।१　१०२५

३८९ य एक इद्विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग　॥ ९ ॥ १।८४।७　१३४१

३९० सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
स्तुष ऊ षु वो नृतमाय धृष्णवे　॥१०॥ ८।२४।१

स्व० १० । उ० ४ । धा० ६२ । खा

इति दशमी दशतिः ॥१०॥ चतुर्थः खण्डः ॥४॥

इति चतुर्थप्रपाठके द्वितीयोऽर्धः, चतुर्थः प्रपाठकश्च समाप्तः ॥

अथ पञ्चमः प्रपाठकः ।

[१]

(१-८) १ प्रगाथो घौरः काण्वः, २ भरद्वाजो बार्हस्पत्यः, ३ नृमेध आङ्गिरसः, ४ पर्वतः काण्वः, ५, ७ इरिम्बिठिः काण्वः, ६ विश्वमना वैयश्वः, ८ वसिष्ठो मैत्रावरुणिः ॥ इन्द्रः, ५,७ आदित्याः ॥ उष्णिक्, ८ विराडुष्णिक् ॥

(ऋग्वेदे)　(सामवेदे)

३९१ गृणे तदिन्द्र ते शव उपमां देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते　॥ १ ॥ ८।६२।८

३९२ यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन् ।
अयं स सोम इन्द्र ते सुतः पिब　॥ २ ॥ ६।४३।१

३९३ एन्द्र नो गधि प्रिय सत्राजिदगोह्य ।
गिरिर्न विश्वतः पृथुः पतिर्दिवः　॥ ३ ॥ ८।९८।४　१२४७

३९४ य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
येना हंसि न्या३त्रिणं तमीमहे　॥ ४ ॥ ८।१२।१

३९५ तुचे तुनाय तत्सु नो द्राघीय आयुर्जीवसे ।
आदित्यासः समहसः कृणोतन　॥ ५ ॥ ८।१८।१८

३९६ वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
अहरहः शुन्ध्युः परिपदामिव　॥ ६ ॥ ८।२४।२४

३९७ अपामीवामप स्रिधमप सेधत दुर्मतिम् ।
आदित्यासो युयोतना नो अंहसः　॥ ७ ॥ ८।१८।१०

३९८ पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा　॥ ८ ॥ ७।२२।१　९२७

स्व० ५ । उ० २ । धा० ५१ । फ ॥

इति प्रथमा दशतिः ॥१॥ पञ्चमः खण्डः ॥ ५ ॥ इत्युष्णिहः ।

[२]

(१-१०) सौभरिः काण्वः, ७, ८ नृमेध आंगिरसः ॥ इन्द्रः, ३, ६ मरुतः ॥ ककुप् ॥

३९९ अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
युधेदापित्वमिच्छसे　॥ १ ॥ ८।२१।१३　१३८९

(ऋग्वेदे) (सामवेदे)

४०० यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे ।
सखाय इन्द्रमूतये ॥ २ ॥ ८।२१।९

४०१ आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
दृढा चिद्यमयिष्णवः ॥ ३ ॥ ८।२०।१

४०२ आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते ।
सोमं सोमपते पिब ॥ ४ ॥ ८।२१।३

४०३ त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
संस्थे जनस्य गोमतः ॥ ५ ॥ ८।२१।११

४०४ गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः ।
रिहते ककुभो मिथः ॥ ६ ॥ ८।२०।२१

४०५ त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
आ वीरं पृतनासहम् ॥ ७ ॥ ८।९८।१० १२६९

४०६ अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
उदेव ग्मन्त उदभिः ॥ ८ ॥ ८।९८।७ ८१०

४०७ सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।
अभि त्वामिन्द्र नोनुमः ॥ ९ ॥ ८।२१।५

४०८ वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
वज्रिं चित्रं हवामहे ॥१०॥ ८।२१।१ ७०८

स्व० २ । उ० २ । धा० ४१ । छ ॥

इति द्वितीया दशतिः ॥२॥ षष्ठः खण्डः ॥६॥ इति ककुभः ॥

[३]

(१-१०) १-८ गोतमो (सम्मदो वा) राहूगणः; ९ त्रितः आप्त्यः (ऋ० कुत्स आंगिरसो वा); १० अवस्युरात्रेयः ॥ इन्द्रः; ९ विश्वेदेवाः; १० अश्विनौ ॥ पंक्तिः ॥

४०९ स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥ १ ॥
१।८४।१० १००५

(ऋग्वेदे) (सामवेदे)

४१० इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनम् ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥ २ ॥
१।८०।१

४११ इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ ३ ॥
१।८१।१ १००२

४१२ इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।
यद्ध त्यं मायिनं मृगं तव त्यन्मायायावधीरर्चन्ननु स्वराज्यम् ॥ ४ ॥
१।८०।७

४१३ प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥ ५ ॥
१।८०।३

४१४ यदुदीरत आजयो धृष्णवे धीयते धनम् ।
युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः॥ ६ ॥
१।८१।३ १००४

४१५ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ ७ ॥
१।८२।२

४१६ उपो षु शृणुही गिरो मघवन्मातथा इव ।
कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी ॥ ८ ॥
१।८२।१

४१७ चन्द्रमा अप्स्वाऽ३न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ ९ ॥
१।१०५।१

४१८ प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम् ॥ १० ॥
५।७५।१ १७४३

स्व० १३ । उ० ५ । धा० ७५ । णु ॥

इति तृतीया दशतिः ॥३॥ सप्तमः खण्डः ॥७॥

[४]

(१-८) १,७ वसुश्रुत आत्रेयः; २, ४ विमद ऐन्द्रः (ऋ० प्राजापत्यो वा, वसुकृद्वा वासुक्रः); ३ सत्यश्रवा आत्रेयः; ५, ६ गोतमो राहूगणः; ८ अंहोमुग्वामदेव्यः; (ऋ० कुस्मलबर्हिषः शैलूषिर्वा;) ॥ अग्निः; ३ उषाः; ४ सोमः; ५, ६ इन्द्रः; ८ विश्वेदेवाः ॥ पंक्तिः; ८ बृहती ॥

(ऋग्वेदे) (सामवेदे)

४१९ आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥१॥ ५।६।४

४२० आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे ॥२॥ १०।२१।१

४२१ महे नो अद्य बोधयोषो राये दिवित्मती
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३॥ ५।७९।१-१७४०

४२२ भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अथा ते सख्ये अन्धसो वि वो मदे रणा गावो न यवसे विवक्षसे ॥४॥ १०।२५।१

४२३ क्रत्वा महाँ अनुष्वधं भीम आ वावृते शवः ।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवां दधे हस्तयोर्वज्रमायसम् ॥५॥ १।८१।१

४२४ स घा तं वृषणं रथमधि तिष्ठाति गोविदम् ।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजा न्विन्द्र ते हरी ॥६॥ १।८२।४

४२५ अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥७॥
५।६।१ १७३७

४२६ न तमंहो न दुरितं देवासो अष्ट मर्त्यम् ।
सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः ॥ ८ ॥ १०।१२६।१

स्व० ७ । उ० ३ । धा० ५७ । जे ॥

इति चतुर्थी दशतिः ॥४॥ अष्टमः खण्डः ॥८॥

इति पंक्तयः ॥

[५]

(१-१०) ऋण-त्रसदस्यू, (ऋ० १, ३-५, १० अग्नयो धिष्ण्या ऐश्वराः, २, ६, त्र्यरुणत्रैवृष्णः, त्रसदस्युः पौरुकुत्सः) ७ वसिष्ठो मैत्रावरुणिः; ८ वामदेवो गौतमः ॥ पवमानः सोमः; ७ मरुतः; ८ अग्निः ९ वाजिनः ॥ द्विपदा विराट्; ८ पदपंक्तिः; ९ पुरउष्णिक्;
२, ६ त्रिपदा अनुष्टुप्पिपीलिकामध्या ॥

(ऋग्वेदे) (सामवेदे)

४२७ परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ १ ॥ ९।१०९।१ १३६७

४२८ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईरसे ॥ २ ॥ ९।११०।१ १३६४

४२९ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम॥ ३ ॥ ९।१०९।४ १२४१

४३० पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ ४ ॥ ९।१०९।१० १३३२

४३१ इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥ ५ ॥ ९।१०९।१३

४३२ अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
वाजाँ अभि पवमान प्र गाहसे ॥ ६ ॥ ९।११०।२ १३६६

४३३ क ईं व्यक्ता नरः सनीडा रुद्रस्य मर्या अथा स्वश्वाः ॥ ७ ॥ ७।५६।१

४३४ अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।
ऋध्यामा त ओहैः ॥ ८ ॥ ४।१०।१ १७७७

४३५ आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम् ।
स्वर्गाँ अर्वन्तो जयत ॥ ९ ॥ (न ऋग्वेदीयः)

४३६ पवस्व सोम द्युम्नी सुधारो महाँ अवीनामनुपूर्व्यः ॥ १० ॥ ९।१०९।७

स्व० ८ । उ० २ । धा० ३५ । ठु ॥

इति पञ्चमी दशतिः ॥५॥ इति नवमः खण्डः ॥९॥

इति पंचमप्रपाठकस्य प्रथमोऽर्धः ॥१॥

[६]

(१-१०) त्रसदस्युः; ७ संवर्त आंगिरसः॥ इन्द्रः; ६ विश्वेदेवाः; ७ उषाः ॥
द्विपदा विराट् ॥

४३७ विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥१॥ (न ऋग्वेदीयः)

४३८ एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ २ ॥ (न ऋग्वेदीयः) १७६८

(ऋग्वेदे) (सामवेदे)

४३९ ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ ३ ॥ ५।३१।४
४४० अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥ ४ ॥ (न ऋग्वेदीयः)
४४१ शं पदं मघं रयीषिणो न काममव्रतो हिनोति न स्पृशद्रयिम् ॥५॥ (न ऋग्वेदीयः)
४४२ सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥ ६ ॥ (न ऋग्वेदीयः)
४४३ आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥ ७ ॥ १०।१७२।१
४४४ उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥८॥ (न ऋग्वेदीयः) १११५
४४५ अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥९॥ (न ऋग्वेदीयः) १११४
४४६ प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥१०॥ (न ऋग्वेदीयः) १११३
स्व० ७ । उ० २ । धा० ४२ । ष्ठा ॥

इति षष्ठी दशतिः ॥ ६ ॥ दशमः खण्डः ॥१०॥

[७]

(१-१०) १ पृषध्रः काण्वः; २, ३, ४ बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण गोपायना लौपायना वा, ५ संवर्त आंगिरसः, ६ भुवन आप्त्यः, साधनो वा भौवनः, ७ कवष ऐलूषः, ८ भरद्वाजो बार्हस्पत्यः; ९ आत्रेयः; १० वसिष्ठो मैत्रावरुणिः ॥ अग्निः; ५ उषाः; ६, ७, ९ विश्वे देवाः; ३, ४, ८, १० इन्द्रः ॥ द्विपदा विराट्, १० एकपदा ॥

४४७ अचेत्यग्निश्चिकितिर्हव्यवाड्‌ सुमद्रथः ॥ १ ॥ ८।५६।५
४४८ अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ २ ॥ ५।२४।१ ११०७
४४९ भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ॥ ३ ॥ (न ऋग्वेदीयः)
४५० विश्वस्य प्र स्तोभ पुरो वा सन्यदि वेह नूनम् ॥ ४ ॥ (न ऋग्वेदीयः)
४५१ उषा अप स्वसुष्टमः सं वर्तयति वर्तनिं सुजातता ॥ ५ ॥ १०।१७२।४
४५२ इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ ६ ॥ १०।१५७।१ १११०
४५३ वि स्रुतयो यथा पथा इन्द्र त्वयन्तु रातयः ॥ ७ ॥ (न ऋग्वेदीयः) १७७०
४५४ अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ ८ ॥ ६।१७।१५
४५५ ऊर्जो मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ॥९॥ (न ऋग्वेदीयः)
४५६ इन्द्रो विश्वस्य राजति ॥ १० ॥ (न ऋग्वेदीयः)
स्व० ५ । उ० ४ । धा० ४१ । भ ॥

इति सप्तमी दशतिः ॥७॥ एकादशः खण्डः ॥११॥

७

[८]

(१-१०) १, १० गृत्समदः शौनकः; २ गौरांगिरसः, ३, ५, ९, परुच्छेपो दैवोदासिः; ४ रेभः काश्यपः; ६ एवयामरुदात्रेयः, ७ अनानतः पारुच्छेपिः; ८ नकुलः ॥ १,३,४,१० इन्द्रः, २ सूर्यः; ५ विश्वेदेवाः; ६ मरुतः, ७ पवमानः सोमः; ८ सविता, ९ अग्निः ॥ १,१० अष्टिः (१० अतिशक्वरी वा), ३,५, ७-९ अत्यष्टिः, २, ४, ६ अतिजगती (अष्टिर्वा ?) ॥

(ऋग्वेदे) (सामवेदे)

४५७
त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥१॥
२।२२।१ १४८६

४५८ अयं सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म ।
ब्रध्नः समीचीरुषसः समैरयदरेपसः
सचेतसः स्वसरे मन्युमन्तश्चिता गोः ॥ २ ॥ (न ऋग्वेदीयः)
४५९ एन्द्र याह्युप नः परावतो नायमच्छा
विदथानीव सत्पतिरस्ता राजेव सत्पतिः ।
हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न
पितरं वाजसातये मंहिष्ठं वाजसातये ॥ ३ ॥ १।१३०।१
४६० तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्त
राये नो विश्वा सुपथा कृणोतु वज्री ॥ ४ ॥ ८।९७।१३
४६१ अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु
त्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे ।
अध प्र नूनमुप यन्ति धीतयो देवाँ अच्छ न धीतयः ॥ ५ ॥ १।१३९।१
४६२ प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।
प्र शर्धाय प्र यज्यवे सुखादये तवसे
भन्ददिष्टये धुनिव्रताय शवसे ॥ ६ ॥ ५।८७।१

(ऋग्वेदे) (सामवेदे)

४६३ अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि
तरति सयुग्वभिः सूरो न सयुग्वभिः ।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिरृक्वभिः ॥ ७ ॥ ९।१११।१
४६४ अभि त्यं देवं सवितारमोण्योः कविक्रतु
मर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि
हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ ८ ॥ (न ऋग्वेदीयः)
४६५ अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं
सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥ ९ ॥ १।१२७।१ १८१३
४६६ तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यो देवस्य शवसा प्रारिणा असु रिणन्नपः ।
भुवो विश्वमभ्यदेवमोजसा विदेदूर्जं शतक्रतुर्विदेदिषम् ॥१०॥ २।२२।४
स० ३ । उ० ६ । धा० १० । ट ॥

इति अष्टमी दशतिः ॥८॥ द्वादशः खण्डः ॥१२॥ इत्यैन्द्रं पर्व काण्डं वा समाप्तम् ॥ इति चतुर्थोऽध्यायः ॥४॥

ऐन्द्रकाण्डे ।

गायत्र्यः १९५—२३२ (११८)
तत्र १५५ 'पान्तं' इत्यनुष्टुप् ।
बृहत्यः २३३—३१२ (८०)
त्रिष्टुभः ३१३—३४१ (२९)
तत्र ३२८ 'प्र वो' इति त्रिपाद्विराट् ।
अनुष्टुभः ३४२—३६९ (२८)
जगत्यः ३७०—३८० (११)
तत्र ३७९ 'उभे यदिन्द्रे'ति महापंक्तिः ।
उष्णिहः ३८१—३९८ (१८)
तत्र ३९८ 'पिबे'ति विराट् ।
ककुभः ३९९—४०८ (१०)
पंक्तयः ४०९—४२६ (१८)
तत्र ४२६ 'नतमि'त्युपरिष्टाद्बृहती ।
द्विपदाः ४२७—४५५ (२९)
[तत्र ४२८, ४३२, ४३४; ४३५ अनुष्टुबादयस्तत्रैवोक्ताः]
अत्यष्ट्यः ४५६—४६६ (११)
तत्र ४६६ 'इन्द्रो विश्वस्ये'त्येकपदा ।
३५२

ऐन्द्रकाण्डस्य	मन्त्रसंख्या	३५२
आग्नेयकाण्डस्य	,, ,,	११४
	सर्वयोगः	४६६

अथ पावमानं काण्डम् ।

अथ पञ्चमोऽध्यायः ।

(९)

(१-१०) १, ४ अमहीयुराङ्गिरसः, २ मधुच्छन्दा वैश्वामित्रः, ३ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा, ५ त्रित आप्त्यः, ६ कश्यपः मारीचः, ७ जमदग्निर्भार्गवः, ८ दृढच्युत आगस्त्यः, ९, १० असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

४६७ उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । (ऋग्वेदे) (सामवेदे)
उग्रं शर्म महि श्रवः ॥ १ ॥ ९।६१।१० ६७२
४६८ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
इन्द्राय पातवे सुतः ॥ २ ॥ ९।१।१ ६८९
४६९ वृषा पवस्व धारया मरुत्वते च मत्सरः ।
विश्वा दधान ओजसा ॥ ३ ॥ ९।६५।१० ८०३
४७० यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।
देवावीरघशंसहा ॥ ४ ॥ ९।६१।१९ ८१५
४७१ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।
हरिरेति कनिक्रदत् ॥ ५ ॥ ९।३३।४ ८६९
४७२ इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
अर्कस्य योनिमासदम् ॥ ६ ॥ ९।६४।२२ १०७६
४७३ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः ।
श्येनो न योनिमासदत् ॥ ७ ॥ ९।६२।४ १००८
४७४ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
मरुद्भ्यो वायवे मदः ॥ ८ ॥ ९।२५।१ ९१९

(ऋग्वेदे) (सामवेदे)

४७५ परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
मदेषु सर्वधा असि ॥ ९ ॥ ९।१८।१ १०९३

४७६ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः ।
स्वानैर्याति कविक्रतुः ॥ १० ॥ ९।९।१ ९३५

स्व० ६ । उ० ३ । धा० ४२ । गा ॥

इति नवमी दशतिः ॥९॥ प्रथमः खण्डः ॥१॥

[१०]

(१-१०) १ (कविर्मेधावी) श्यावाश्व आत्रेयः; २ त्रित आप्त्यः; ३, ८ अमहीयुराङ्गिरसः; ४ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ५, ६ कश्यपो मारीचः; ७ निध्रुविः काश्यपः; ९, १० असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

४७७ प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
सुता विदथे अक्रमुः ॥ १ ॥ ९।३२।१ ७६९

४७८ प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः ।
वनानि महिषा इव ॥ २ ॥ ९।३३।१ ७६४

४७९ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
विश्वा अप द्विषो जहि ॥ ३ ॥ ९।६१।२८

४८० वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
पवमान स्वर्दृशम् ॥ ४ ॥ ९।६५।४ ७८४

४८१ इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः ।
सृजदश्वं रथीरिव ॥ ५ ॥ ९।६४।१०

४८२ असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
शुक्रासो वीरयाशवः ॥ ६ ॥ ९।६४।४ १०३४

४८३ पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः ।
वायुमा रोह धर्मणा ॥ ७ ॥ ९।६३।२२ १२१५

(ऋग्वेदे) (सामवेदे)

४८४ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
ज्योतिर्वैश्वानरं बृहत् ॥ ८ ॥ ९।६१।१६ ८८९

४८५ परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
मधो अर्षन्ति धारया ॥ ९ ॥ ९।१०।४

४८६ परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः ।
कारुं बिभ्रत्पुरुस्पृहम् ॥१०॥ ९।१४।१

स्व० ११ । उ० ना । धा० ४९ । हो ॥

इति दशमी दशतिः ॥ द्वितीयः खण्डः ॥
इति पञ्चमप्रपाठकस्य द्वितीयोऽर्धः, पञ्चमः प्रपाठकश्च समाप्तः ॥ ५ ॥

[१]

अथ षष्ठप्रपाठकस्य प्रथमोऽर्धः ॥६॥

(१-१०) १, ८, ९ अमहीयुरांगिरसः; २ बृहन्मतिराङ्गिरसः; ३ जमदग्निर्भार्गवः; ४ प्रभूवसुरांगिरसः; ५ मेध्यातिथिः काण्वः; ६, ७ निध्रुविः काश्यपः; १० उचथ्य आंगिरसः ॥ पवमानः सोमः ॥ गायत्री ॥

४८७ उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषुः ॥ १ ॥ ९।६१।१३; ७६२, १३३५

४८८ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।
शुम्भन्ति विप्रं धीतिभिः ॥ २ ॥ ९।४०।१ ९२४

४८९ आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः ।
इन्दुरिन्द्राय धीयते ॥ ३ ॥ ९।६२।१९

४९० असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।
कार्ष्मन्वाजी न्यक्रमीत् ॥ ४ ॥ ९।३६।१

४९१ प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
घ्नन्तः कृष्णामप त्वचम् ॥ ५ ॥ ९।४१।१ ८९२

४९२ अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।
नुदस्वादेवयुं जनम् ॥ ६ ॥ ९।६३।२४

४९३ अया पवस्व धारया यया सूर्यमरोचयः ।
हिन्वानो मानुषीरपः ॥ ७ ॥ ९।६३।७ १२१६

४९४ स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
वव्रिवांसं महीरपः ॥ ८ ॥ ९।६१।२२

४९५ अया वीती परि स्रव यस्त इन्दो मदेष्वा ।
अवाहन्नवतीर्नव ॥ ९ ॥ ९।६१।१ १२१०

४९६ परि द्युक्षं सनद्रयिं भरद्वाजं नो अन्धसा ।
स्वानो अर्ष पवित्र आ ॥ १० ॥ ९।५२।१

स्व० ९ । उ० ६ । धा० ३५ । तु ॥

इति प्रथमा दशतिः ॥ १ ॥ तृतीयः खण्डः ॥ ३ ॥

[२]

(१-१४) १ मेधातिथिः काण्वः; २, ७ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ३ उचथ्य आङ्गिरसः; ४ अवत्सारः काश्यपः; ५ निध्रुविः काश्यपः; ६, १० असितः काश्यपो देवलो वा; ८, ९ कश्यपो मारीचः; ११ कविर्भार्गवः; १२ जमदग्निर्भार्गवः; १३ अयास्य आंगिरसः; १४ अमहीयुरांगिरसः ॥ पवमानः सोमः ॥ गायत्री ॥

४९७ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
सं सूर्येण दिद्युते ॥ १ ॥ ९।२।६ १०४२

४९८ आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।
पान्तमा पुरुस्पृहम् ॥ २ ॥ ९।६५।२८

४९९ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय ।
पुनाहीन्द्राय पातवे ॥ ३ ॥ ९।५१।१ १२२५

५०० तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
तरत्स मन्दी धावति ॥ ४ ॥ ९।५८।१ १०५५

५०१ आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् ।
अस्मे श्रवांसि धारय ॥ ५ ॥ ९।६३।१

५०२ अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।
रुचे जनन्त सूर्यम् ॥ ६ ॥ ९।२३।२

५०३ अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
सीदन्योनौ वनेष्वा ॥ ७ ॥ ९।६५।१९ ९९४

५०४ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।
वृषा धर्माणि दध्रिषे ॥ ८ ॥ ९।६४।१ ७८१

५०५ इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
इन्दो रुचाभि गा इहि ॥ ९ ॥ ९।६४।१३ ८४१

५०६ मन्द्रया सोम धारया वृषा पवस्व देवयुः ।
अव्या वारेभिरस्मयुः ॥१०॥ ९।६।१

५०७ अया सोम सुकृत्यया महान्त्सन्नभ्यवर्धथाः ।
मन्दान इद्वृषायसे ॥११॥ ९।४७।१

५०८ अयं विचर्षणिर्हितः पवमानः स चेतति ।
हिन्वान आप्यं बृहत् ॥१२॥ ९।६२।१०

५०९ प्र न इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि ।
अभि देवाँ अयास्यः ॥१३॥ ९।४४।१

५१० अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।
गच्छन्निन्द्रस्य निष्कृतम् ॥१४॥ ९।६१।२५

स्व० १५ । उ० २ । धा० ५७ । फो ॥

इति द्वितीया दशतिः ॥ २ ॥ चतुर्थः खण्डः ॥ ४ ॥ इति गायत्र्यः ॥

[३]

(१-१२) सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः; २ कश्यपो मारीचः, ३ गोतमो राहूगणः; ४ अत्रिर्भौमः; ५ विश्वामित्रो गाथिनः; ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः) ॥ पवमानः सोमः ॥ बृहती ॥

५११ पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥१॥ ९।१०७।४ ६७५

५१२ परीतो षिञ्चता सुतं सोमो य उत्तमं हविः । (ऋग्वेदे) (सामवेदे)
दधन्वाँ यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥२॥ ९।१०७।१
५१३ आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥३॥ ९।१०७।१० १६८९
५१४ प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥४॥ ९।१०७।१२ ७६७
५१५ सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥५॥ ९।१०७।८ ९९७
५१६ तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥६॥ ९।१०७।१९ ९२२
५१७ मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥७॥ ९।१०७।२१ १०७९
५१८ अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥८॥ ९।१०७।१४ ८५६
५१९ पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥९॥ ९।१०७।६
५२० इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥१०॥ ९।१०७।१७
५२१ पवस्व वाजसातमोऽभि विश्वानि वार्या ।
त्वं समुद्रः प्रथमे विधर्म देवेभ्यः सोम मत्सरः ॥११॥ ९।१०७।२३
५२२ पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥१२॥ ९।१०७।२५

स्व० १९ । उ० ३ । धा० ९१ । द ॥

इति तृतीया दशतिः ॥३॥ पञ्चमः खण्डः ॥५॥ इति बृहत्यः ॥

[४]

(१-१०) १, ९ उशना काव्यः; २ वृषगणो वासिष्ठः; ३, ७ पराशरः शाक्त्यः; ४, ६ वसिष्ठो मैत्रावरुणिः; ५, १० प्रतर्दनो दैवोदासिः; ८ प्रस्कण्वः काण्वः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

५२३ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष । (ऋग्वेदे) (सामवेदे)
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥ ९।८७।१ ६७७
५२४ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥२॥ ९।९७।७ ११९६
५२५ तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥३॥
९।९७।३४ ८५९
५२६ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन् मितेव सद्म पशुमन्ति होता ॥४॥ ९।९७।१ १३९९
५२७ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥५॥ ९।९६।५ ९४३
५२८ अभि त्रिपृष्ठं वृषणं वयोधामङ्गोषिणमवावशन्त वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥६॥ ९।९०।२ १४०८
५२९ अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन् प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥७॥ ९।९७।४०,१२५३
५३० कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ॥८॥ ९।९५।१
५३१ एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥९॥ ९।८७।४
५३२ पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥१०॥ ९।९६।१३

स्व० १८ । उ० ३ । धा० ८७ । डे ॥

इति चतुर्थी दशतिः ॥४॥ षष्ठः खण्डः ॥६॥

[५]

(१-१२) १ प्रतर्दनो दैवोदासिः; २, १० पराशरः शाक्त्यः; ३ इन्द्रप्रमतिर्वासिष्ठः; ४ वासिष्ठो मैत्रावरुणिः; ५ कर्णश्रुद्वासिष्ठः; ६ नोधा गौतमः; ७ कण्वो घौरः; ८ मन्युर्वासिष्ठः; ९ कुत्स आङ्गिरसः; ११ कश्यपो मारीचः; १२ प्रस्कण्वः काण्वः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

५३३ प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना । (ऋग्वेदे) (सामवेदे)
भद्रान् कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥ ९।९६।१
५३४ प्र ते धारा मधुमतीरसृग्रन्वारं यत्पूतो अत्येष्यव्यम् ।
पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः ॥ २ ॥ ९।९७।३१
५३५ प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय ।
स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ॥ ३ ॥ ९।९७।४
५३६ प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत् ।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥४॥ ९।९०।१
५३७ तक्षद्यदी मनसो वेनतो वाग् ज्येष्ठस्य धर्मं द्युक्षोरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥५॥ ९।९७।२२
५३८ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ६ ॥ ९।९३।१ १४१८
५३९ अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
अपो वृणानः पवते कवीयान्व्रजं न पशुवर्धनाय मन्म ॥ ७ ॥ ९।९४।१
५४० इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ ८ ॥ ९।९७।१० १०१२
५४१ अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिदस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥ ९ ॥ ९।९७।५२ ११०४
५४२ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥१०॥ ९।९७।४१ १२५५

५४३ असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा । (ऋग्वेदे) (सामवेदे)
दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्वच्छ ॥११॥ ९।९१।१
५४४ अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तम् ॥१२॥ ९।९५।३

स्व० १९ । उ० ३ । धा० ८२ । द ॥

इति पञ्चमी दशतिः ॥५॥ सप्तमः खण्डः ॥७॥ इति त्रिष्टुभः ॥ इति षष्ठप्रपाठकस्य प्रथमोऽर्धः ॥६॥

[६]

(१-९) १ अन्धीगुः श्यावाश्विः; २ नहुषो मानवः; ३ ययातिर्नाहुषः; ४ मनुः सांवरणः; ५, ८ अम्बरीषो वार्षागिरः ऋजिश्वा भारद्वाजश्च; ६, ७ रेभसूनू काश्यपौ; ९ प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ पवमानः सोमः ॥ अनुष्टुप्, ७ बृहती ॥

अथ षष्ठप्रपाठकस्य द्वितीयोऽर्धः ॥६॥

५४५ पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ १ ॥ ९।१०१।१ ६९७
५४६ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ २ ॥ ९।१०१।७ ८१८
५४७ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ३ ॥ ९।१०१।४ ८७२
५४८ सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ४ ॥ ९।१०१।१० ११०१
५४९ अभी नो वाजसातमं रयिमर्ष शतस्पृहम् ।
इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ५ ॥ ९।९८।१ १२३८
५५० अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥ ६ ॥ ९।१००।१
५५१ आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौंस्यम् ।
शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ॥ ७ ॥ ९।९९।१

५५२ परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण । (ऋग्वेदे) (सामवेदे)
यो देवान्विश्वा इत्परि मदेन सह गच्छति ॥ ८ ॥ ९।९८।७ १३२९

५५३ प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥ ९ ॥ ९।१०१।१३ ७७४,१३८६

स्व० १० । उ० ५ । धा० ६१ । म ॥

इति षष्ठी दशतिः ॥६॥ अष्टमः खण्डः ॥८॥ इत्यनुष्टुभः (एका बृहती)॥

[७]

(१-१२) १-३,५ कविर्भार्गवः; ४, ६ सिकता निवावरी; ७ रेणुर्वैश्वामित्रः; ८ वेनो भार्गवः;
९ वसुर्भारद्वाजः; १० वत्सप्रिर्भालन्दः; ११ गृत्समदः शौनकः; १२ पवित्र आङ्गिरसः ॥
पवमानः सोमः ॥ जगती ॥

५५४ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ १ ॥ ९।७५।१ ७००

५५५ अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।
वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः॥२॥९।७९।१

५५६ एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।
अभ्यृ३तस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः॥३॥९।७७।१

५५७ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति सङ्गिरम् ।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥४॥९।८६।१६; ११५२

५५८ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा॥५॥९।७६।१ १२२८

५५९ वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषिभिः॥६॥
९।८६।१९ ८२१

५६० त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥७॥ ९।७०।१ १४२३

५६१ इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह । (ऋग्वेदे) (सामवेदे)
मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः॥८॥ ९।८५।१

५६२ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥९॥ ९।८२।१

५६३ प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१०॥ ९।६८।१

५६४ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते ।
सिन्धोरुऽच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥११॥
९।८६।४३ १६१४

५६५ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥१२॥ ९।८३।१ ८७५

स्व० १५ । उ० ११ । धा० १३७ । पे ॥

इति सप्तमी दशतिः ॥७॥ नवमः खण्डः ॥९॥ इति जगत्यः ॥

[८]

(१-१२) १,७, ११ अग्निश्चाक्षुषः; २ चक्षुर्मानवः; ३, ४, ९, १० पर्वतनारदौ काण्वौ (३, १०
शिखण्डिन्यावप्सरसौ काश्यप्यौ वा); ५ त्रित आप्त्यः; ६ मनुराप्सवः; ८,१२ द्वित आप्त्यः; ॥
पवमानः सोमः ॥ उष्णिक् ॥

५६६ इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टे जातास इन्दवः स्वर्विदः ॥ १ ॥ ९।१०६।१ ६९४

५६७ प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।
द्युमन्तं शुष्ममा भर स्वर्विदम् ॥ २ ॥ ९।१०६।४

५६८ सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥ ९।१०४।१ ११५७

५६९ तं वः सखायो मदाय पुनानमभि गायत ।
शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ४ ॥ ९।१०५।१ १०९८

५७० प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् । (ऋग्वेदे) (सामवेदे)
विश्वा परि प्रिया भुवदध द्विता ॥ ५ ॥ ९।१०२।१ १०१३

५७१ पवस्व देववीतय इन्दो धाराभिरोजसा ।
आ कलशं मधुमान्त्सोम नः सदः ॥ ६ ॥ ९।१०६।७ १३२६

५७२ सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥ ७ ॥ ९।१०६।१० ९३०

५७३ प्र पुनानाय वेधसे सोमाय वच उच्यते ।
भृतिं न भरा मतिभिर्जुजोषते ॥ ८ ॥ ९।१०३।१

५७४ गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
शुचिं च वर्णमधि गोषु धारय ॥ ९ ॥ ९।१०५।४ १६११

५७५ अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।
गोभिष्टे वर्णमभि वासयामसि ॥ १० ॥ ९।१०४।४

५७६ पवते हर्यतो हरिरति ह्वरांसि रंह्या ।
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ ११ ॥ ९।१०६।१३ ७७३

५७७ परि कोशं मधुश्चुतं सोमः पुनानो अर्षति ।
अभि वाणीर्ऋषीणां सप्ता नूषत ॥ १२ ॥ ९।१०३।३

स्व० ८ । उ० ३ । धा० ४६ । ट ॥

इत्यष्टमी दशतिः ॥८॥ दशमः खण्डः ॥१०॥

[९]

(१-८) १ गौरिवीतिः शाक्त्यः; २ ऊर्ध्वसद्मा आङ्गिरसः; ३, ८ ऋजिश्वा भारद्वाजः; ४ कृतयशा आंगिरसः;
५ ऋणंचयो राजर्षिः; ६ शक्तिर्वासिष्ठः; ७ ऊरुरांगिरसः ॥ पवमानः सोमः ॥
ककुप्, ५ यवमध्या गायत्री ॥

५७८ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥ १ ॥ ९।१०८।१ ६९२

५७९ अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम् ।
वि कोशं मध्यमं युव ॥ २ ॥ ९।१०८।९ १०११

५८० आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम् । (ऋग्वेदे) (सामवेदे)
वनप्रक्षमुदप्रुतम् ॥ ३ ॥ ९।१०८।७ १३९४

५८१ एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवोदुहम् ।
विश्वा वसूनि बिभ्रतम् ॥ ४ ॥ ९।१०८।११

५८२ स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
सोमो यः सुक्षितीनाम् ॥ ५ ॥ ९।१०८।१३ १०९६

५८३ त्वं ह्या३ङ्ग दैव्यं पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयन् ॥ ६ ॥ ९।१०८।३ ९३८

५८४ एष स्य धारया सुतोऽव्या वारेभिः पवते मदिन्तमः ।
क्रीडन्नूर्मिरपामिव ॥ ७ ॥ ९।१०८।५

५८५ य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ।
ओ३म् वर्मीव धृष्णवा रुज ॥ ८ ॥ ९।१०८।६

स्व० ७ । उ० १ । धा० ४३ । त्रि ॥

इति नवमी दशतिः ॥ ९ ॥ एकादशः खण्डः ॥११॥ इत्युष्णिक्ककुभः ॥
इति षष्ठप्रपाठकस्य द्वितीयोऽर्धः षष्ठप्रपाठकश्च समाप्तः ॥ ६ ॥ इति पञ्चमोऽध्यायः ॥ ५ ॥
इति छन्दोगप्रकृतिश्छन्दः समाप्ता ॥ इति सौम्यं पावमानं काण्डं पर्व वा समाप्तम् ॥

॥ इति पूर्वार्चिकः (छन्द आर्चिकः) समाप्तः ॥

पावमानकाण्डस्य मन्त्रसंख्या ११९

तत्र गायत्र्यः	४६७—५१०	(४४)
बृहत्यः	५११—५२२	(१२)
त्रिष्टुभः	५२३—५४४	(२२)
अनुष्टुभः	५४५—५५३	(९)
[तत्र 'आहर्यत' इति ५५१ बृहती]		
जगत्यः	५५४—५६५	(१२)
उष्णिक्ककुभः	५६६—५८५	(२०)
		११९

ऐन्द्रकाण्डस्य मन्त्रसंख्या	३५२
आग्नेयकाण्डस्य ,, ,,	११४
सर्वयोगः	५८५

अथ आरण्यं काण्डम् ।

अथ षष्ठोऽध्यायः ।

[१]

(१-९) १ शंयुर्बार्हस्पत्यः (भरद्वाजः); २ वसिष्ठो मैत्रावरुणिः; ३, ६ वामदेवो गौतमः; ४ शुनःशेप आजीगर्तिः कृत्रिमो देवरातो वैश्वामित्रो वा; ५ कुत्स आंगिरसः (गृत्समदः); ७, ८ अमहीयुरांगिरसः; ९आत्मा ॥ इन्द्रः; ४ वरुणः; ५, ७, ८ पवमानः सोमः; ६ विश्वे देवाः; ९ अन्नम् ॥
१ बृहती; २, ४, ५, ९ त्रिष्टुप्; ३, ७-८ गायत्री; ६ एकपाज्जगती ॥

५८६ इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः । (ऋग्वेदे) (सामवेदे)
यद्दिधृक्षेम वज्रहस्त रोदसी उभे सुशिप्र पप्राः ॥ १ ॥ ६।४६।५

५८७ इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ॥२॥ ७।२७।३

५८८ यस्येदमा रजोयुजस्तुजे जने वनं स्वः ।
इन्द्रस्य रन्त्यं बृहत् ॥ ३ ॥ (न ऋग्वेदीयः)

५८९ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ ४ ॥ १।२४।१५

५९० त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्ता
मदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५ ॥ ९।९७।५८

५९१ इमं वृषणं कृणुतैकमिन्माम् ॥ ६ ॥ (न ऋग्वेदीयः)

५९२ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
वरिवोवित्परिस्रव ॥ ७ ॥ ९।६१।१२ ६७३

५९३ एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।
सिषासन्तो वनामहे ॥ ८ ॥ ९।६१।११ ६७४

५९४ अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥ ९ ॥ (न ऋग्वेदीयः)

इति प्रथमा दशतिः ॥ प्रथमः खण्डः ॥१॥

९

[२]

(१-७) १ धृतकक्ष आङ्गिरसः; २ पवित्र आङ्गिरसः; ३, ४ मधुच्छन्दा वैश्वामित्रः; ५ प्रयो वासिष्ठः; ६ गृत्समदः शौनकः; ७ नृमेधपुरुमेधावांगिरसौ ॥ इन्द्रः; २ पवमानः सोमः; ५ विश्वे देवाः; ६ वायुः ॥ गायत्री, २ जगती, ५ त्रिष्टुप्, ७ अनुष्टुप् ॥

५९५ त्वमेतदधारयः कृष्णासु रोहिणीषु च । (ऋग्वेदे) (सामवेदे)
परुष्णीषु रुशत्पयः ॥ १ ॥ ८।९३।१३

५९६ अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥२॥ ९।८३।३ ८७७

५९७ इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥ ३ ॥ १।७।२ ७९७

५९८ इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
उग्र उग्राभिरूतिभिः ॥ ४ ॥ १।७।४ ७९८

५९९ प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥५॥ १०।१८१।१

६०० नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते ।
गन्तासि सुन्वतो गृहम् ॥ ६ ॥ २।४१।२

६०१ यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ ७ ॥ ८।८९।५ १४२९

इति द्वितीया दशतिः ॥ द्वितीय खण्डः ॥ २ ॥

[३]

(१-१३) १, ५, ७, १० वामदेवो गौतमः; २, ३, गोतमो राहूगणः; ४ मधुच्छन्दा वैश्वामित्रः; ६ गृत्समदः शौनकः; ८ भरद्वाजो बार्हस्पत्यः; ९ ऋजिश्वा भारद्वाजः; ११ हिरण्यस्तूप आंगिरसः; १२, १३ विश्वामित्रो गाथिनः (१२ ब्रह्म) ॥ १ प्रजापतिः; २, ३ सोमः; ४, ५, ८, १३ अग्निः; ६ अपांनपात्; ७ रात्रिः; ९ विश्वे देवाः; १० लिंगोक्ता; ११ इन्द्रः; १२ आत्मा अग्निर्वा ॥ त्रिष्टुप्; १, ७ अनुष्टुप्; ४ गायत्री; ८, ९ जगती; १० महापङ्क्तिः ॥

६०२ मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः ।
परमेष्ठी प्रजापतिर्दिवि द्यामिव दृंहतु ॥ १ ॥ (न ऋग्वेदीयः)

६०३ सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः । (ऋग्वेदे) (सामवेदे)
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥२॥ १।९१।१८

६०४ त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ ३ ॥ १।९१।२२

६०५ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । ॥ ४ ॥ १।१।१
होतारं रत्नधातमम्

६०६ ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः ॥ ५ ॥ ४।१।१६

६०७ समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यस्पृणन्ति ।
तमू शुचिं शुचयो दीदिवांसमपान्नपातमुप यन्त्यापः ॥ ६ ॥ २।३५।३

६०८ आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति ।
अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥ ७ ॥ (न ऋग्वेदीयः)

६०९ प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे ।
वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये ॥ ८ ॥ ६।८।१

६१० विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥ ९ ॥ ६।५२।१४

६११ यशो मा द्यावापृथिवी यशो मेन्द्राबृहस्पती ।
यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
यशसाऽस्याः संसदोऽहं प्रवदिता स्याम् । ॥१०॥ (न ऋग्वेदीयः)

६१२ इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥११॥ १।३२।१

६१३ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम् ॥१२॥ ३।२६।७

६१४ पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य । (ऋग्वेदे) (सामवेदे)
पाति नाभा सप्तशीर्षाणमग्निः पाति देवानामुपमादमृष्वः ॥१३॥ ३।५।५

इति तृतीया दशतिः ॥ तृतीयः खण्डः ॥३॥

[४]

(१-१२) वामदेवो गौतमः; ३-७ नारायणः ॥ १-२ अग्निः; ३-७ पुरुषः; ८ द्यावापृथिवी; ९-११ इन्द्रः; १२ गावः ॥ अनुष्टुप्; १-२ पंक्तिः; ८, ११, १२ त्रिष्टुप् ॥

६१५ भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि ।
स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेऽदाः ॥ १ ॥ (न ऋग्वेदीयः)

६१६ वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः ।
वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥ २ ॥ (न ऋग्वेदीयः)

६१७ सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३ ॥ १०।९०।१

६१८ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
तथा विष्वङ् व्यक्रामदशनानशने अभि ॥ ४ ॥ १०।९०।४

६१९ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ५ ॥ १०।९०।२

६२० तावानस्य महिमा ततो ज्यायांश्च पूरुषः ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ६ ॥ १०।९०।३

६२१ ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ७ ॥ १०।९०।५

६२२ मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम् ।
द्यावापृथिवी भवतं स्योने ते नो मुञ्चतमंहसः ॥ ८ ॥ (न ऋग्वेदीयः)

६२३ हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरी ।
तं त्वा स्तुवन्ति कवयः पुरुषासो वनर्गवः ॥ ९ ॥ (न ऋग्वेदीयः)

६२४ यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत । (ऋग्वेदे) (सामवेदे)
सत्यस्य ब्रह्मणो वर्चस्तेन मा संसृजामसि ॥१०॥ (न ऋग्वेदीयः)

६२५ सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन् ।
क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शत्रून्त्सहना कृधी नः॥११॥ (न ऋग्वेदीयः)

६२६ सहर्षभाः सहवत्सा उदेत विश्वा रूपाणि बिभ्रतीर्द्व्यूध्नीः ।
उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥१२॥ (न ऋग्वेदीयः)

इति चतुर्थी दशतिः ॥ चतुर्थः खण्डः ॥ ४ ॥

[५]

(१-१४) १ शतं वैखानसाः; २ विभ्राट् सौर्यः; ३ कुत्स आङ्गिरसः; ४-६ सार्पराज्ञी;७-१४ प्रस्कण्वः काण्वः ॥ सूर्यः; १ अग्निः पवमानः; ४-६ आत्मा वा ॥ गायत्री; २ जगती; ३ त्रिष्टुप् ॥

६२७ अग्न आयूंषि पवस आसुवोर्जमिषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ १ ॥ ९।६६।१९;१५१८,१४६४

६२८ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति॥२॥१०।१७०।१;१४५३

६२९ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥३॥ १।११५।१

६३० आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥ ४ ॥ १०।१८९।१ १३७६

६३१ अन्तश्चरति रोचनास्य प्राणादपानती ।
व्यख्यन्महिषो दिवम् ॥ ५ ॥ १०।१८९।२ १३७७

६३२ त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते ।
प्रति वस्तोरह द्युभिः ॥ ६ ॥ १०।१८९।३ १३७८

६३३ अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
सूराय विश्वचक्षसे ॥ ७ ॥ १।५०।२

६३४ अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु । (ऋग्वेदे) (सामवेदे)
भ्राजन्तो अग्नयो यथा ॥ ८ ॥ १।५०।३

६३५ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमाभासि रोचनम् ॥ ९ ॥ १।५०।४

६३६ प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।
प्रत्यङ् विश्वं स्वर्दृशे ॥१०॥ १।५०।५

६३७ येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥११॥ १।५०।६

६३८ उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः ।
पश्यञ्जन्मानि सूर्य ॥१२॥ १।५०।७

६३९ अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ।
ताभिर्याति स्वयुक्तिभिः ॥१३॥ १।५०।९

६४० सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षण । ॥१४॥ १।५०।८

इति पञ्चमी दशतिः॥ पञ्चमः खण्डः ॥ ५ ॥

इति षष्ठोऽध्यायः ॥६॥ इति सामवेद-संहितायामारण्यं काण्डं पर्व वा समाप्तम् ॥

अथ महानाम्न्यार्चिकः ।

(१-१०) प्रजापतिः ॥ इन्द्रस्त्रैलोक्यात्मा ॥ त्रिकं = [१ प्रथमं द्विपदा+ (२) ततस्त्रयः शाक्वराः पादाः+ (३) तत उपसर्गौ+ (४) उभयं (शाक्वरोपसर्गौ)+ (५) ततः शाक्वरास्त्रयः पादाः+(६) उपसर्गः ।]

६४१ (१) विदा मघवन् विदा गातुमनुशंसिषो दिशः ।
(२) शिक्षा शचीनां पते । पूर्वीणां पुरूवसो ॥ ॥ १ ॥

६४२ आभिष्ट्वमभिष्टिभिः । (३) स्वाऽ३र्णांशुः ।
प्रचेतन प्रचेतये-(४)- न्द्र द्युम्नाय न इषे । ॥ २ ॥

६४३ एवा हि शक्रो । (५) राये वाजाय वज्रिवः ।
शविष्ठ वज्रिन्नृञ्जसे । मंहिष्ठ वज्रिन्नृञ्जसे ।
(६) आ याहि पिब मत्स्व ॥ ३ ॥

६४४ (१) विद्मा राये सुवीर्यं भवो वाजानां पतिर्वशाँ अनु ।
(२) मंहिष्ठ वज्रिन्नृञ्जसे । यः शविष्ठः शूराणाम् ॥ ४ ॥

६४५ यो मंहिष्ठो मघोनाम् । (३) अंशुर्न शोचिः ।
चिकित्वो अभि नो नय । (४) इन्द्रो विदे तमु स्तुहि ॥ ५ ॥

६४६ ईशे हि शक्रस् । (५) तमूतये हवामहे जेतारमपराजितम् ।
स नः स्वर्षदति द्विषः । (६) क्रतुश्छन्द ऋतं बृहत् ॥ ६ ॥

६४७ (१) इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् ।
(२) स नः स्वर्षदति द्विषः । स नः स्वर्षदति द्विषः ॥ ७ ॥

६४८ पूर्वस्य यत्ते अद्रिवो-(३)- ऽंशुर्मदाय ।
सुम्न आ धेहि नो वसो । (४) पूर्तिः शविष्ठ शस्यते ।
वशी हि शक्रो । (५) नूनं तन्नव्यं संन्यसे ॥ ८ ॥

६४९ प्रभो जनस्य वृत्रहन् त्समर्येषु ब्रवावहै ।
(६) शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ९ ॥

अथ पञ्च पुरीषपदानि ॥

६५० एवाह्योऽ३ऽ३ऽ३ वे । एवा ह्यग्ने । एवाहीन्द्र ।
एवा हि पूषन् । एवा हि देवाः ॥१०॥

इति पञ्च पुरीषपदानि ॥

इति महानाम्न्यार्चिकः समाप्तः ॥

पूर्वार्चिकस्य मन्त्रसंख्या

१ आग्नेयस्य काण्डस्य	(१—११४)	११४
२ ऐन्द्रस्य ,,	(११५—४६६)	३५२
३ पावमानस्य ,,	(४६७—५८५)	११९
४ आरण्यकस्य ,,	(५८६—६४०)	५५
५ महानाम्न्यार्चिकस्य	(६४१—६५०)	१०
सर्वयोगः		६५०

सामवेदसंहिता।

(उत्तरसंहिता) उत्तरार्चिकः।

अथ प्रथमोऽध्यायः।

अथ प्रथमप्रपाठके प्रथमोऽर्धः ॥१॥

[१]

(१-२३) १ असितः काश्यपो देवलो वा; २ कश्यपो मारीचः ३ शतं वैखानसः, ४, २१ भरद्वाजो बार्हस्पत्यः; ५,७ विश्वामित्रो गाथिनः; ५ जमदग्निर्वा; ६ इरिम्बिठिः काण्वः;८ अमहीयुरांगिरसः; ९ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः; ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः; ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः); १० उशना काव्यः; ११ वसिष्ठो मैत्रावरुणिः, १२ वामदेवो गौतमः, १३ नोधा गौतमः, १४ कलिः प्रागाथः; १५ मधुच्छन्दा वैश्वामित्रः; १६ गौरवीतिः शाक्त्यः, १७ अग्निश्चाक्षुषः; १८ अन्धीगुः श्यावाश्विः; १९ कविर्भार्गवः;२० शंयुर्बार्हस्पत्यः (तृणपाणिः)२२ सोभरिः काण्वः;२३ नृमेध आङ्गिरसः॥१-३, ८-१०, १५-१९ पवमानः सोमः; ४,२०,२१ अग्निः; ५ मित्रावरुणौ; ७ इन्द्राग्नी; ६, ११-१४, २२-२३ इन्द्रः॥ १-८, १२ (१-२),१५, १८ (२-३), २१ गायत्री; ९, ११,१३, १४, २० प्रगाथः= (विषमा बृहती, समा सतो बृहती), १० त्रिष्टुप्, १२ (३) पादनिचृत्, १६,२२ काकुभः प्रगाथः=(विषमा ककुप्, समा सतो बृहती) १७ उष्णिक्; १८ (१) अनुष्टुप्, १९ जगती, २३ (१) ककुप्, (२) उष्णिक्, (३) पुर उष्णिक् ॥

(ऋग्वेदे) (सामवेदे)

६५१ उपास्मै गायता नरः पवमानायेन्दवे।
अभि देवाँ इयक्षते ॥ १ ॥ ९।११।१ ७६३

६५२ अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः।
देवं देवाय देवयु ॥ २ ॥ ९।११।२

६५३ स नः पवस्व शं गवे शं जनाय शमर्वते।
शं राजन्नोषधीभ्यः ॥ ३ ॥ ॥१(ती)॥ ९।११।३

६५४ दविद्युतत्या रुचा परिष्टोभन्त्या कृपा।
सोमाः शुक्रा गवाशिरः ॥ १ ॥ ९।६४।२८

६५५ हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत्।
सीदन्तो वनुषो यथा ॥ २ ॥ ९।६४।२९

१०

(ऋग्वेदे) (सामवेदे)

६५६ ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे।
पवस्व सूर्यो दृशे ॥ ३ ॥ ॥२ (यि)॥ ९।६४।३०

६५७ पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत।
अर्वन्तो न श्रवस्यवः ॥ १ ॥ ९।६६।१०

६५८ अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये।
अवावशन्त धीतयः ॥ २ ॥ ९।६६।११

६५९ अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः।
अग्मन्नृतस्य योनिमा ॥ ३ ॥ ॥३ (कौ)॥ ९।६६।१२

॥ इति प्रथमः खण्डः ॥१॥

६६० अग्न आ याहि वीतये गृणानो हव्यदातये।
नि होता सत्सि बर्हिषि ॥ १ ॥ ६।१६।१० १

६६१ तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि।
बृहच्छोचा यविष्ठ्य ॥ २ ॥ ६।१६।११

६६२ स नः पृथु श्रवाय्यमच्छा देव विवाससि।
बृहदग्ने सुवीर्यम् ॥ ३ ॥ ॥ ४ ॥ ६।१६।१२

६६३ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्।
मध्वा रजांसि सुक्रतू ॥ १ ॥ ३।६२।१६ २२०

६६४ उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः।
द्राघिष्ठाभिः शुचिव्रता ॥ २ ॥ ३।६२।१७

६६५ गृणाना जमदग्निना योनावृतस्य सीदतम्।
पातं सोममृतावृधा ॥ ३ ॥ ॥ ५ (यि)॥ ३।६२।१८

६६६ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्।
एदं बर्हिः सदो मम ॥ १ ॥ ८।१७।१ १९१

(ऋग्वेदे) (सामवेदे)

६६७ आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना।
उप ब्रह्माणि नः शृणु ॥ २ ॥ ८।१७।२

६६८ ब्रह्माणस्त्वा युजा वयं सोमपामिन्द्र सोमिनः।
सुतावन्तो हवामहे ॥ ३ ॥ ॥६(फौ)॥ ८।१७।३

६६९ इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यम्।
अस्य पातं धियेषिता ॥ १ ॥ ३।१२।१

६७० इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः।
अया पातमिमं सुतम् ॥ २ ॥ ३।१२।२

६७१ इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे।
ता सोमस्येह तृम्पताम् ॥ ३ ॥ ॥७(ता)॥ ३।१२।३

॥इति द्वितीयः खण्डः॥२॥

६७२ उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे।
उग्रं शर्म महि श्रवः ॥ १ ॥ ९।६१।१० ४६७

६७३ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः।
वरिवोवित्परि स्रव ॥ २ ॥ ९।६१।१२ ५९२

६७४ एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्।
सिषासन्तो वनामहे ॥ ३ ॥ ॥८(ठी)॥ ९।६१।११ ५९३

६७५ पुनानः सोम धारयापो वसानो अर्षसि।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥ १ ॥ ९।१०७।४ ५११

६७६ दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत्।
आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः ॥२॥९(लु)॥ ९।१०७।५

६७७ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥१॥ ९।८७।१ ५२३

(ऋग्वेदे)(सामवेदे)

६७८ स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः॥२॥ ९।८७।२

६७९ ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन।
स चिद्विवेद निहितं यदासामपीच्यां३ गुह्यं नाम गोनाम्॥३॥१०(हु)॥ ९।८७।३

॥ इति तृतीयः खण्डः ॥ ३ ॥

६८० अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ १ ॥ ७।३२।२२ २३३

६८१ न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे॥२॥११(यी)॥ ७।३२।२३

६८२ कया नश्चित्र आ भुवदूती सदावृधः सखा।
कया शचिष्ठया वृता ॥ १ ॥ ४।३१।१ १६९

६८३ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः।
दृढा चिदारुजे वसु ॥ २ ॥ ४।३१।२

६८४ अभी षु णः सखीनामविता जरितॄणाम्।
शतं भवास्यूतये ॥ ३ ॥ ॥१२(टा)॥ ४।३१।३

६८५ तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ १ ॥ ८।८८।१ २३६

६८६ द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम्।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे॥२॥१३(ही)॥ ८।८८।२

६८७ तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ १ ॥ ८।६६।१ २३७

६८८ न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम्॥२॥१४(जु)॥ ८।६६।२

॥ इति चतुर्थः खण्डः ॥४॥

६८९ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । (ऋग्वेदे) (सामवेदे)
इन्द्राय पातवे सुतः ॥ १ ॥ ९।१।१ ४६८
६९० रक्षोहा विश्वचर्षणिरभि योनिमयोहते ।
द्रोणे सधस्थमासदत् ॥ २ ॥ ९।१।२
६९१ वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः ।
पर्षि राधो मघोनाम् ॥ ३ ॥ ॥१५(पौ)॥९।१।३
६९२ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
महि द्युक्षतमो मदः ॥ १ ॥ ॥९।१०८।१ ५७८
६९३ यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः ।
स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥२॥ ॥१६(प)॥९।१०८।२
६९४ इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टे जातास इन्दवः स्वर्विदः ॥ १ ॥ ९।१०६।१ ५६६
६९५ अयं भराय सानसिरिन्द्राय पवते सुतः ।
सोमो जैत्रस्य चेतति यथा विदे ॥ २ ॥ ९।१०६।२
६९६ अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम् ।
वज्रं च वृषणं भरत्समप्सुजित् ॥ ३ ॥ ॥१७(कि)॥ ९।१०६।३
६९७ पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ १ ॥ ९।१०१।१ ५४५
६९८ यो धारया पावकया परिप्रस्यन्दते सुतः ।
इन्दुरश्वो न कृत्व्यः ॥ २ ॥ ९।१०१।२
६९९ तं दुरोषमभी नरः सोमं विश्वाच्या धिया ।
यज्ञाय सन्त्वद्रयः ॥ ३ ॥ ॥१८(यि)॥ ९।१०१।३
७०० अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ १ ॥९।७५।१ ५५४

७०१ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः । (ऋग्वेदे)(सामवेदे)
दधाति पुत्रः पित्रोरपीच्यां३नाम तृतीयमधि रोचने दिवः ॥२॥९।७५।२
७०२ अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये ।
अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ॥३॥१९(दि)॥ ९।७५।३

॥ इति पञ्चमः खण्डः ॥५॥

७०३ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥ ६।४८।१ ३५
७०४ ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥२॥ ॥२०(यु)॥६।४८।२
७०५ एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।
एभिर्वर्धास इन्दुभिः ॥ १ ॥ ६।१६।१६ ७
७०६ यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
तत्र योनिं कृणवसे ॥ २ ॥ ६।१६।१७
७०७ न हि ते पूर्तमक्षिपद्भुवन्नेमानां पते ।
अथा दुवो वनवसे ॥ ३ ॥ ॥२१(यी)॥ ६।१६।१८
७०८ वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
वज्रिं चित्रं हवामहे ॥ १ ॥ ८।२१।१ ४०८
७०९ उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥२॥२२(च)॥ ८।२१।२
७१० अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
उदेव ग्मन्त उदभिः ॥ १ ॥ ८।९८।७ ४०६
७११ वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि ।
वावृध्वांसं चिदद्रिवो दिवेदिवे ॥ २ ॥ ८।९८।८

७१२ युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा । (ऋग्वेदे) (सामवेदे)
इन्द्रवाहा स्वर्विदा ॥३॥ ॥२३(यि)॥ ८।९८।९

॥ इति षष्ठः खण्डः ॥६॥

इति प्रथमप्रपाठके प्रथमोऽर्धः ॥१॥ इति प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः ।

[२]

अथ प्रथमप्रपाठके द्वितीयोऽर्धः ॥१॥

(१-२२) १,४ श्रुतकक्षः सुकक्षो वा आङ्गिरसः, २,८, १३-१५ वसिष्ठो मैत्रावरुणिः ३ मेधातिथिः काण्वः प्रियमेधश्चाङ्गिरसः; ५ इरिम्बिठिः काण्वः; ६ कुसीदी काण्वः; ७ त्रिशोकः काण्व ९ विश्वामित्रो गाथिनः; १० मधुच्छन्दा वैश्वामित्रः; ११ शुनःशेप आजीगर्तिः; १२ नारदः काण्वः; १६ अवत्सारः काश्यपः, १७ (१) शुनःशेप आजीगर्तिः स देवरातः कृत्रिमो वैश्वामित्रः; १७ (२–३) मेध्यातिथिः काण्वः; १८ (१, ३) असितः काश्यपो देवलो वा; १८ (२) अमहीयुराङ्गिरसः; १९ त्रित आप्त्यः; २० सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, वसिष्ठो मैत्रावरुणिः); २१ श्यावाश्व आत्रेयः; २२ (१-२) अग्निश्चाक्षुषः; २२ (३) प्रजापतिर्वैश्वामित्रो वाच्यो वा ॥ १—१२ इन्द्रः; १३ अग्निः; १४ उषाः; १५ अश्विनौ; १६-२२ पवमानः सोमः ॥ १(२-३)—११; १६-१९, २१; गायत्री; १२, २२ (१-२) उष्णिक्; १३-१५,२० प्रगाथः= (विषमा बृहती, समा सतोबृहती); १ (१), २२ (३) अनुष्टुप् ॥

७१३ पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥ ८।९२।१ १५५
७१४ पुरुहूतं पुरुष्टुतं गाथान्यां३ सनश्रुतम् ।
इन्द्र इति ब्रवीतन ॥ २ ॥ ८।९२।२
७१५ इन्द्र इन्नो महोनां दाता वाजानां नृतुः ।
महाँ अभिज्ञ्वा यमत् ॥ ३ ॥ ॥१(वा)॥ ८।९२।३
७१६ प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
सखायः सोमपाव्ने ॥ १ ॥ ७।३१।१ १५६
७१७ शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः ।
चकृमा सत्यराधसे ॥ २ ॥ ७।३१।२

७१८ त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो । (ऋग्वेदे) (सामवेदे)
त्वं हिरण्ययुर्वसो ॥ ३ ॥ ॥२(गौ)॥ ७।३१।३
७१९ वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
कण्वा उक्थेभिर्जरन्ते ॥ १ ॥ ८।२।१६ १५७
७२० न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ ।
तवेदु स्तोमैश्चिकेत ॥ २ ॥ ८।२।१७
७२१ इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
यन्ति प्रमादमतन्द्राः ॥ ३ ॥ ॥३(पा)॥ ८।२।१८
७२२ इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
अर्कमर्चन्तु कारवः ॥ १ ॥ ८।९२।१९ १५८
७२३ यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
इन्द्रं सुते हवामहे ॥ २ ॥ ८।९२।२०
७२४ त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।
तमिद्वर्धन्तु नो गिरः ॥ ३ ॥ ॥४(ला)॥ ८।९२।२१

॥ इति प्रथमः खण्डः ॥१॥

७२५ अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
एहीमस्य द्रवा पिब ॥ १ ॥ ८।१७।११ १५९
७२६ शाचिगो शाचिपूजनायं रणाय ते सुतः ।
आखण्डल प्र हूयसे ॥ २ ॥ ८।१७।१२
७२७ यस्ते शृङ्गवृषो णपात्प्रणपात्कुण्डपाय्यः ।
न्यस्मिं दध्र आ मनः ॥ ३ ॥ ॥५(द्रि)॥ ८।१७।१३
७२८ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन ॥ १ ॥ ८।८१।१ १६७

(ऋग्वेद) (सामवेद)

७२९ विभ्रा हि त्वा तुविकूर्मि तुविदेष्णं तुवीमघम् ।
तुविमात्रमवोभिः ॥ २ ॥ ८।८१।२

७३० न हि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
भीमं न गां वारयन्ते ॥ ३ ॥ ॥ ६ (के) ॥ ८।८१।३

७३१ अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
तृम्पा व्यश्नुही मदम् ॥ १ ॥ ८।४५।२२ १६१

७३२ मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।
मा कीं ब्रह्मद्विषं वनः ॥ २ ॥ ८।४५।२३

७३३ इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।
सरो गौरो यथा पिब ॥ ३ ॥ ॥ ७ (या) ॥ ८।४५।२४

७३४ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
अनाभयिन्ररिमा ते ॥ १ ॥ ८।२।१ १२४

७३५ नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः ।
अश्वो न निक्तो नदीषु ॥ २ ॥ ८।२।२

७३६ तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः ।
इन्द्र त्वास्मिन्त्सधमादे ॥ ३ ॥ ॥ ८(धौ)॥ ८।२।३

॥ इति द्वितीयः खण्डः ॥२॥

७३७ इदं ह्यन्वोजसा सुतं राधानां पते ।
पिबा त्वा३स्य गिर्वणः ॥ १ ॥ ३।५१।१० १६५

७३८ यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् ।
स त्वा ममत्तु सोम्य ॥ २ ॥ ३।५१।११

७३९ प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
प्र बाहू शूर राधसा ॥ ३ ॥ ॥ ९ (पी)॥ ३।५१।१२
११

(ऋग्वेद) (सामवेद)

७४० आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
सखाय स्तोमवाहसः ॥ १ ॥ १।५।१ १६४

७४१ पुरूतमं पुरूणामीशानं वार्याणाम् ।
इन्द्रं सोमे सचा सुते ॥ २ ॥ १।५।२

७४२ स घा नो योग आ भुवत्स राये स पुरन्ध्या ।
गमद्वाजेभिरा स नः ॥ ३ ॥ ॥ १० (टी) ॥ १।५।३

७४३ योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥ १ ॥ १।३०।७ १६३

७४४ अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
यं ते पूर्वं पिता हुवे ॥ २ ॥ १।३०।९

७४५ आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ।
वाजेभिरुप नो हवम् ॥ ३ ॥ ॥ ११ (ला) ॥ १।३०।८

७४६ इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
विदे वृधस्य दक्षस्य महाँ हि षः ॥ १ ॥ ८।१३।१ ३८१

७४७ स प्रथमे व्योमनि देवानां सदने वृधः ।
सुपारः सुश्रवस्तमः समप्सुजित् ॥ २ ॥ ८।१३।२

७४८ तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।
भवा नः सुम्ने अन्तमः सखा वृधे ॥ ३ ॥ ॥ १२ (वा) ॥ ८।१३।३

॥ इति तृतीयः खण्डः ॥३॥

७४९ एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥ ७।१६।१ ४५

७५० स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥२॥ ॥१३(तु)॥ ७।१६।२

(ऋग्वेद) (सामवेद)

७५१ प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥१॥ ७।८१।१ ३०३

७५२ उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत् ।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ २ ॥ ॥१४ (वा)॥ ७।८१।२

७५३ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥ १ ॥ ७।७४।१ ३०४

७५४ युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥२॥ ॥१५(चा)॥ ७।७४।२

॥ इति चतुर्थः खण्डः ॥४॥

७५५ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः ।
पयः सहस्रसामृषिम् ॥ १ ॥ ९।५४।१

७५६ अयं सूर्य इवोपदृगयं सरांसि धावति ।
सप्त प्रवत आ दिवम् ॥ २ ॥ ९।५४।२

७५७ अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
सोमो देवो न सूर्यः ॥ ३ ॥ ॥१६(ते)॥ ९।५४।३

७५८ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
हरिः पवित्रे अर्षति ॥ १ ॥ ९।३।९

७५९ एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ।
कविर्विप्रेण वावृधे ॥ २ ॥ ९।४२।२

७६० दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे ।
क्रन्दं देवाँ अजीजनः ॥ ४ ॥ ॥ १७(हा)॥ ९।४२।४

७६१ उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे ।
पवमान विदा रयिम् ॥ १ ॥ ९।१९।६

(ऋग्वेद) (सामवेद)

७६२ उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
इन्दुं देवा अयासिषुः ॥ २ ॥ ९।६१।१३ ४८७; १३३५

७६३ उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवाँ इयक्षते ॥ ३ ॥ ॥१८(वौ)॥ ९।११।१ ६५१

॥ इति पञ्चमः खण्डः ॥५॥

७६४ प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः ।
वनानि महिषा इव ॥ १ ॥ ९।३३।१ ४७८

७६५ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
वाजं गोमन्तमक्षरन् ॥ २ ॥ ९।३३।२

७६६ सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
सोमा अर्षन्तु विष्णवे ॥ ३ ॥ ॥१९(वि)॥ ९।३३।३

७६७ प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥१॥ ९।१०७।१२ ५१४

७६८ आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥२॥२०(रू)॥ ९।१०७।१३

७६९ प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
सुता विदथे अक्रमुः ॥ १ ॥ ९।३२।१ ४७७

७७० आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् ।
अत्यो न गोभिरज्यते ॥ २ ॥ ९।३२।३

७७१ आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।
इन्दुमिन्द्राय पीतये ॥ ३ ॥ ॥२१(ली)॥ ९।३२।२

७७२ अया पवस्व देवयु रेभन्पवित्रं पर्येषि विश्वतः ।
मधोर्धारा असृक्षत ॥ १ ॥ ९।१०६।१४

७७३ पवने हर्येनो हरिरति हरांसि रंह्या ।　　(ऋग्वेदे)　(सामवेदे)
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ २ ॥　　९।१०६।१३　　५७६

७७४ प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥ ३ ॥ ॥२२(लि)॥　　९।१०१।१३; ५५३; १३८६

॥ इति षष्ठः खण्डः ॥६॥

॥ इति प्रथमप्रपाठके द्वितीयोऽर्धः प्रथमप्रपाठकश्च समाप्तः ॥ १ ॥

॥ इति द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

[१]

अथ द्वितीयप्रपाठके प्रथमोऽर्धः ॥ २ ॥

(१-१९) १ जमदग्निर्भार्गवः; २, ५, १५ अमहीयुराङ्गिरसः; ३ कश्यपो मारीचः; ४, १० भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ६-७ मेधातिथिः काण्वः; ८ मधुच्छन्दा वैश्वामित्रः; ९ वसिष्ठो मैत्रावरुणिः; ११ उपमन्युर्वासिष्ठः; १२ शंयुर्बार्हस्पत्यः; १३ वालखिल्याः, प्रस्कण्वः काण्वः; १४ नृमेध आङ्गिरसः; १६ नहुषो मानवः; १७ (१-२) सिकता निवावरी; १७ (३) पृश्नयोऽजाः; १८ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; १९ जेता माधुच्छन्दसः ॥ १-५, १०-११, १५-१७ पवमानः सोमः; ६ अग्निः; ७ मित्रावरुणौ; ८, १२-१४, १८-१९ इन्द्रः; ९ इन्द्राग्नी ॥ १-१०, १५, १८ गायत्री; ११ त्रिष्टुप्; १२-१४ प्रगाथः = (विषमा बृहती, समा सतोबृहती); १६, १९ अनुष्टुप्; १७ जगती ॥

७७५ पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः
अभि विश्वानि काव्या ॥ १ ॥　　९।६२।२५

७७६ त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् ।
पवस्व विश्वचर्षणे ॥ २ ॥　　९।६२।२६

७७७ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
तुभ्यं धावन्ति धेनवः ॥ ३ ॥　　॥ १ (यी)॥　　९।६२।२७

७७८ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।　　(ऋग्वेदे)　(सामवेदे)
विश्वा अप द्विषो जहि ॥ १ ॥　　९।६१।२८

७७९ यस्य ते सख्ये वयं सासह्याम पृतन्यतः ।
तवेन्दो द्युम्न उत्तमे ॥ २ ॥　　९।६१।२९

७८० या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।
रक्षा समस्य नो निदः ॥ ३ ॥　　॥२ (हृ)॥　　९।६१।३०

७८१ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।
वृषा धर्माणि दध्रिषे ॥ १ ॥　　९।६४।१　　५०४

७८२ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ।
स त्वं वृषन्वृषेदसि ॥ २ ॥　　९।६४।२

७८३ अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः ।
वि नो राये दुरो वृधि ॥ ३ ॥　　॥ ३(लु)॥　　९।६४।३

७८४ वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
पवमान स्वर्दृशम् ॥ १ ॥　　९।६५।४　　४८०

७८५ यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः ।
द्रोणे सधस्थमश्नुषे ॥ २ ॥　　९।६५।६

७८६ आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।
इहो ष्विन्दवा गहि ॥ ३ ॥　　॥४ (यौ)॥　　९।६५।५

७८७ पवमानस्य ते वयं पवित्रमभ्युन्दतः ।
सखित्वमा वृणीमहे ॥ ४ ॥　　९।६१।४

७८८ ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया ।
तेभिर्नः सोम मृडय ॥ ४ ॥　　९।६१।५

७८९ स नः पुनान आ भर रयिं वीरवतीमिषम् ।　　(ऋग्वेदे)　(सामवेदे)
ईशानः सोम विश्वतः ॥ ५ ॥　　॥ ५(ला)॥　　९।६१।६

इति प्रथमः खण्डः ॥१॥

७९० अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥　　१।१२।१　　३

७९१ अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।
हव्यवाहं पुरुप्रियम् ॥ २ ॥　　१।१२।२

७९२ अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।
असि होता न ईड्यः ॥ ३ ॥　　॥ ६(यौ)॥　　१।१२।३

७९३ मित्रं वयं हवामहे वरुणं सोमपीतये ।
या जाता पूतदक्षसा ॥ १ ॥　　१।२३।४

७९४ ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती ।
ता मित्रावरुणा हुवे ॥ २ ॥　　१।२३।५

७९५ वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।
करतां नः सुराधसः ॥ ३ ॥　　॥ ७(वा)॥　　१।२३।६

७९६ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
इन्द्रं वाणीरनूषत ॥ १ ॥　　१।७।१　　१९८

७९७ इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥ २ ॥　　१।७।२　　५९७

७९८ इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
उग्र उग्राभिरूतिभिः ॥ ३ ॥　　१।७।४　　५९८

७९९ इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि ।
वि गोभिरद्रिमैरयत् ॥ ४ ॥　　॥ ८(वा)॥　　१।७।३

८०० इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे ।　　(ऋग्वेदे)　(सामवेदे)
धिया धेना अवस्यवः ॥ १ ॥　　७।९४।४

८०१ ता हि शश्वन्त ईडत इत्था विप्रास ऊतये ।
सबाधो वाजसातये ॥ २ ॥　　७।९४।५

८०२ ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे ।
मेधसाता सनिष्यवः ॥ ३ ॥　　॥ ९(हु)॥　　७।९४।६

॥इति द्वितीयः खण्डः ॥२॥

८०३ वृषा पवस्व धारया मरुत्वते च मत्सरः ।
विश्वा दधान ओजसा ॥ १ ॥　　९।६५।१०　　४६९

८०४ तं त्वा धर्तारमोण्यो३ः पवमान स्वर्दृशम् ।
हिन्वे वाजेषु वाजिनम् ॥ २ ॥　　९।६५।११

८०५ अया चित्तो विपानया हरिः पवस्व धारया ।
युजं वाजेषु चोदय ॥ ३ ॥　　॥१०(ट)॥　　९।६५।१२

८०६ वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ॥ १ ॥　　९।९७।१३

८०७ रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥ २ ॥　　९।९७।१४

८०८ एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥३॥ ॥११(रि)॥　　९।९७।१५

॥ इति तृतीयः खण्डः ॥ ३ ॥

८०९ त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ १ ॥　　६।४६।१　　२३४

(ऋग्वेद) (सामवेद)

८१० स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥२॥ ॥१२(फु)॥ ६।४६।२
(धा० १० । उ० २ । स्व० ५)

८११ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ १ ॥ ८।४९।१ २३५

८१२ शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः॥२॥१३(हि)॥ ८।४९।२
(धा० १६ । उ० ना० । स्व० ३)

८१३ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन् भूर्णयः।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ १ ॥ ८।९९।१ ३०२

८१४ मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः।
तव श्रवांस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः॥२॥ ॥१४(ल)॥ ८।९९।२
(धा० १९ । उ० ना० । स्व० १)

॥ इति चतुर्थः खण्डः ॥४॥

८१५ यस्ते मदो वरेण्यस्तेना पवस्वान्धसा।
देवावीरघशंसहा ॥ १ ॥ ९।६१।१९ ४७०

८१६ जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे।
गोषातिरश्वसा असि॥ २ ॥ ९।६१।२०

८१७ सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः।
सीदं छ्येनो न योनिमा ॥३॥ ॥१५(चौ)॥ ९।६१।२१
(धा० १२ । उ० १ । स्व० नास्ति.)

८१८ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ १ ॥ ९।१०१।७ ५४६

८१९ समु प्रिया अनूषत गावो मदाय घृष्वयः।
सोमासः कृण्वते पथः पवमानास इन्दवः ॥ २ ॥ ९।१०१।८

१२

(ऋग्वेद) (सामवेद)

८२० य ओजिष्ठस्तमा भर पवमान श्रवाय्यम्।
यः पञ्च चर्षणीरभि रयिं येन वनामहे॥३॥ ॥१६(थु)॥ ९।१०१।९
(धा० १९ । उ० २ । स्व० ५)

८२१ वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः।
प्राणा सिन्धूनां कलशां अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषिभिः ॥१॥ ९।८६।१९ ५५९

८२२ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशां असिष्यदत्।
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायुं सख्याय वर्धयन् ॥२॥ ९।८६।२०

८२३ अयं पुनान उषसो अरोचयदयं सिन्धुभ्यो अभवदु लोककृत्।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥३॥१७गी॥
(धा० ३६ । उ० ३ । स्व० ४ ॥)

॥ इति पञ्चमः खण्डः ॥५॥ ९।८६।२१

८२४ एवा ह्यसि वीरयुरेवा शूर उत स्थिरः।
एवा ते राध्यं मनः ॥१॥ ८.९२.२८ २३२

८२५ एवा रातिस्तुविमघ विश्वेभिर्धायि धातृभिः।
अधा चिदिन्द्र नः सचा॥ २ ॥ ८।९२।२९

८२६ मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते।
मत्स्वा सुतस्य गोमतः ॥३॥ (धा० १४ । उ० १ । स्व० ३) ॥१८(ति)॥ ८।९२।३०

८२७ इन्द्रं विश्वा अवीवृधंत्समुद्रव्यचसं गिरः।
रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥ १ ॥ १।११।१ ३४३

८२८ सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।
त्वामभि प्र नोनुमो जेतारमपराजितम्॥ २ ॥ १।११।२

८२९ पूर्वीरिन्द्रस्य रातयो न वि दस्यंत्यूतयः।
यदा वाजस्य गोमत स्तोतृभ्यो मंहते मघम्॥३॥ ॥१९(री)॥ १।११।३
(धा० १८ । उ० नास्ति । स्व० ४)

इति षष्ठः खण्डः ॥ ६ ॥ ॥ इति द्वितियप्रपाठके प्रथमोऽर्धः ॥ २ ॥

॥ इति तृतीयोऽध्यायः॥३॥

अथ चतुर्थोऽध्यायः।

[२]

अथ द्वितीयप्रपाठके द्वितीयोऽर्धः ॥ २ ॥

(१-१९) १ जमदग्निर्भार्गवः; २ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ३ कविर्भार्गवः; ४ कश्यपो मारीचः; ५, मेधातिथिः काण्वः; ६-७ मधुच्छन्दा वैश्वामित्रः; ८ भरद्वाजो बार्हस्पत्यः; ९ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः; २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः; ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः); १० पराशरः शाक्त्यः; ११ पुरुहन्मा आङ्गिरसः, १२ मेध्यातिथिः काण्वः १३ वसिष्ठो मैत्रावरुणिः; १४ त्रित आप्त्यः, १५ ययातिर्नाहुषः, १६ पवित्र आंगिरसः; १७ सोभरिः काण्वः; १८ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ; १९ तिरश्चीरांगिरसौ ॥ १-४, ९, १०, १४-१६ पवमानः सोमः; ५, १७ अग्निः; ६ मित्रावरुणौ, ७ मरुतः, ७ (१,३) इन्द्रश्च; ८ इन्द्राग्नी; ११-१३,१८-१९ इन्द्रः ॥ १-८, १४ गायत्री; ९ (३) द्विपदा विराट्; १० त्रिष्टुप्; ९ (१-२) ११, १३ प्रगाथः = (विषमा बृहती, समा सतोबृहती); १२ बृहती; १५, १९ अनुष्टुप्, १६ जगती, १७ प्रगाथः= (विषमा ककुप्, समा सतोबृहती)। १८ उष्णिक् ॥

(ऋग्वेद) (सामवेद)

८३० एत असृग्रमिन्दवस्तिरः पवित्रमाशवः।
विश्वान्यभि सौभगा ॥ १ ॥ ९।६२।१

८३१ विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः।
त्मना कृण्वन्तो अर्वतः ॥ २ ॥ ९।६२।२

८३२ कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्।
इडामस्मभ्यं संयतम् ॥३॥ (धा० ७ । उ० नास्ति । स्व० २) ॥१ (या)॥ ९।६२।३

८३३ राजा मेधाभिरीयते पवमानो मनावधि।
अन्तरिक्षेण यातवे ॥ १ ॥ ९।६५।१६

८३४ आ नः सोम सहो जुवो रूपं न वर्चसे भर।
सुष्वाणो देववीतये ॥ २ ॥ ९।६५।१८

८३५ आ न इन्द्रो शतग्विनं गवां पोषं स्वश्व्यम्।
वहा भगत्तिमूतये ॥३॥ (धा० १४ । उ० नास्ति । स्व० २) ॥२ (ला)॥ ९।६५।१७

(ऋग्वेद) (सामवेद)

८३६ तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः।
चारुं सुकृत्ययेमहे ॥ १ ॥ ९।४८।१

८३७ संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्।
शतं पुरो रुरुक्षणिम् ॥ २ ॥ ९।४८।२

८३८ अतस्त्वा रयिरभ्ययद्राजानं सुक्रतो दिवः।
सुपर्णो अव्यथी भरत् ॥ ३ ॥ ९।४८।३

८३९ अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे।
अभिष्टिकृद्विचर्षणिः ॥ ४ ॥ ९।४८।५

८४० विश्वस्मा इ स्वर्दृशे साधारणं रजस्तुरम्।
गोपामृतस्य विर्भरत्॥५॥ (धा० २६ । उ० नास्ति । स्व० ६) ॥३(हृ)॥ ९।४८।४

८४१ इषे पवस्व धारया मृज्यमानो मनीषिभिः।
इन्दो रुचाभि गा इहि ॥ १ ॥ ९।६४।१३ ५०५

८४२ पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः।
हरे सृजान आशिरम् ॥ २ ॥ ९।६४।१४

८४३ पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्।
द्युतानो वाजिभिर्हितः ॥३॥ (धा० १७ । उ० नास्ति । स्व० २) ॥४(या)॥ ९।६४।१५

इति प्रथमः खण्डः ॥१॥

८४४ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा।
हव्यवाड्जुह्वास्यः ॥ १ ॥ १।१२।६

८४५ यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति।
तस्य स्म प्राविता भव ॥ २ ॥ १।१२।८

८४६ यो अग्निं देववीतये हविष्मां आविवासति।
तस्मै पावक मृडय ॥३॥ (धा० १३ । उ० नास्ति । स्व० ३)॥५ (रि)॥ १।१२।९

७७३ पवते हर्यतो हरिरति ह्वरांसि रंह्या ।	(ऋग्वेदे)	(सामवेदे)
अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ २ ॥	९।१०६।१३	५७६
७७४ प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः ।		
अप श्वानमराधसं हता मखं न भृगवः ॥ ३ ॥ ॥२२(लि)॥	९।१०१।१३; ५५३; १३८६	

॥ इति षष्ठः खण्डः ॥६॥

॥ इति प्रथमप्रपाठके द्वितीयोऽर्धः प्रथमप्रपाठकश्च समाप्तः ॥ १ ॥

॥ इति द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

[१]

अथ द्वितीयप्रपाठके प्रथमोऽर्धः ॥ २ ॥

(१-१९) १ अमहीयुरांगिरसः २, ५, १५ अमहीयुराङ्गिरसः; ३ कश्यपो मारीचः; ४, १० भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ६-७ मेधातिथिः काण्वः; ८ मधुच्छन्दा वैश्वामित्रः; ९ वसिष्ठो मैत्रावरुणिः; ११ उपमन्युर्वासिष्ठः; १२ शंयुर्बार्हस्पत्यः; १३ वालखिल्याः, प्रस्कण्वः काण्वः; १४ नृमेध आङ्गिरसः; १६ नहुषो मानवः; १७ (१-२) सिकता निवावरी; १७ (३) पृश्नयोऽजाः; १८ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; १९ जेता माधुच्छन्दसः ॥ १-५, १०-११, १५-१७ पवमानः सोमः; ६ अग्निः; ७ मित्रावरुणौ; ८, १२-१४, १८-१९ इन्द्रः; ९ इन्द्राग्नी ॥ १-१०, १५, १८ गायत्री; ११ त्रिष्टुप्; १२-१४ प्रगाथः (विषमा बृहती, समा सतोबृहती); १६, १९ अनुष्टुप्; १७ जगती ॥

७७५ पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः	
अभि विश्वानि काव्या ॥ १ ॥	९।६२।२५
७७६ त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् ।	
पवस्व विश्वचर्षणे ॥ २ ॥	९।६२।२६
७७७ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।	
तुभ्यं धावन्ति धेनवः ॥ ३ ॥ ॥ १ (यी)॥	९।६२।२७

७७८ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।	(ऋग्वेदे)	(सामवेदे)
विश्वा अप द्विषो जहि ॥ १ ॥	९।६१।२८	
७७९ यस्य ते सख्ये वयं सासह्याम पृतन्यतः ।		
तवेन्दो द्युम्न उत्तमे ॥ २ ॥	९।६१।२९	
७८० या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।		
रक्षा समस्य नो निदः ॥ ३ ॥ ॥२ (हु)॥	९।६१।३०	
७८१ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।		
वृषा धर्माणि दध्रिषे ॥ १ ॥	९।६४।१	५०४
७८२ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ।		
स त्वं वृषन्वृषेदसि ॥ २ ॥	९।६४।२	
७८३ अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः ।		
वि नो राये दुरो वृधि ॥ ३ ॥ ॥ ३(लु)॥	९।६४।३	
७८४ वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।		
पवमान स्वर्दृशम् ॥ १ ॥	९।६५।४	४८०
७८५ यदद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः ।		
द्रोणे सधस्थमश्नुषे ॥ २ ॥	९।६५।६	
७८६ आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।		
इहो ष्विन्दवा गहि ॥ ३ ॥ ॥४ (यौ)॥	९।६५।५	
७८७ पवमानस्य ते वयं पवित्रमभ्युन्दतः ।		
सखित्वमा वृणीमहे ॥ ४ ॥	९।६१।४	
७८८ ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया ।		
तेभिर्नः सोम मृडय ॥ ४ ॥	९।६१।५	

७८९ स नः पुनान आ भर रयिं वीरवतीमिषम् ।	(ऋग्वेदे)	(सामवेदे)
ईशानः सोम विश्वतः ॥ ६ ॥ ॥ ५(ला)॥	९।६१।६	

इति प्रथमः खण्डः ॥१॥

७९० अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।		
अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥	१।१२।१	३
७९१ अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।		
हव्यवाहं पुरुप्रियम् ॥ २ ॥	१।१२।२	
७९२ अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।		
असि होता न ईड्यः ॥ ३ ॥ ॥ ६(यौ)॥	१।१२।३	
७९३ मित्रं वयं हवामहे वरुणं सोमपीतये ।		
या जाता पूतदक्षसा ॥ १ ॥	१।२३।४	
७९४ ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती ।		
ता मित्रावरुणा हुवे ॥ २ ॥	१।२३।५	
७९५ वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।		
करतां नः सुराधसः ॥ ३ ॥ ॥ ७(वा)॥	१।२३।६	
७९६ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।		
इन्द्रं वाणीरनूषत ॥ १ ॥	१।७।१	१९८
७९७ इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।		
इन्द्रो वज्री हिरण्ययः ॥ २ ॥	१।७।२	५९७
७९८ इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।		
उग्र उग्राभिरूतिभिः ॥ ३ ॥	१।७।४	५९८
७९९ इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि ।		
वि गोभिरद्रिमैरयत् ॥ ४ ॥ ॥ ८(स्वा)॥	१।७।३	

८०० इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे ।	(ऋग्वेदे)	(सामवेदे)
धिया धेना अवस्यवः ॥ १ ॥	७।९४।४	
८०१ ता हि शश्वन्त ईळत इत्था विप्रास ऊतये ।		
सबाधो वाजसातये ॥ २ ॥	७।९४।५	
८०२ ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे ।		
मेधसाता सनिष्यवः ॥ ३ ॥ ॥ ९(हु)॥	७।९४।६	

॥इति द्वितीयः खण्डः ॥२॥

८०३ वृषा पवस्व धारया मरुत्वते च मत्सरः ।		
विश्वा दधान ओजसा ॥ १ ॥	९।६५।१०	४६९
८०४ तं त्वा धर्तारमोण्योः पवमान स्वर्दृशम् ।		
हिन्वे वाजेषु वाजिनम् ॥ २ ॥	९।६५।११	
८०५ अया चित्तो विपानया हरिः पवस्व धारया ।		
युजं वाजेषु चोदय ॥ ३ ॥ ॥१०(ट)॥	९।६५।१२	
८०६ वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।		
इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ॥ १ ॥	९।९७।१३	
८०७ रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।		
पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥ २ ॥	९।९७।१४	
८०८ एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।		
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥ ३ ॥ ॥११(रि)॥	९।९७।१५	

॥ इति तृतीयः खण्डः ॥ ३ ॥

८०९ त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।		
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ १ ॥	६।४६।१	२३४

८१० स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः । (ऋग्वेद) (सामवेद)
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥२॥ ॥१२(फु)॥ ८।४६।२
(धा॰ १० । उ॰ २ । स्व॰ ५)

८११ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ १ ॥ ८।४९।१ २३५

८१२ शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः॥२॥१३(हि)॥८।४९।२
(धा॰ १६ । उ॰ ना॰ । स्व॰ ३)

८१३ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन् भूर्णयः ।
स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ १ ॥ ८।९९।१ ३०२

८१४ मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः ।
तव श्रवांस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः॥२॥ ॥१४(ल)॥ ८।९९।२
(धा॰ १९ । उ॰ ना॰ । स्व॰ १)

॥ इति चतुर्थः खण्डः ॥४॥

८१५ यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।
देवावीरघशंसहा ॥ १ ॥ ९।६१।१९ ४७०

८१६ जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे ।
गोषातिरश्वसा असि॥ २ ॥ ९।६१।२०

८१७ सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः ।
सीदं च्छ्येनो न योनिमा ॥३॥ ॥१५(र्चा)॥ ९।६१।२१
(धा॰ १२ । उ॰ १ । स्व॰ नास्ति)

८१८ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ १ ॥ ९।१०१।७ ५५६

८१९ समु प्रिया अनूषत गावो मदाय घृष्वयः ।
सोमासः कृण्वते पथः पवमानास इन्दवः ॥ २ ॥ ९।१०१।८
१२

८२० य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् । (ऋग्वेद) (सामवेद)
यः पञ्च चर्षणीरभि रयिं येन वनामहे॥३॥ ॥१६(शु)॥ ९।१०१।२
(धा॰ १९ । उ॰ २ । स्व॰ ५)

८२१ वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
प्राणा सिन्धूनां कलशां अचिक्रददिन्द्रस्य हार्दिमाविशन्मनीषिभिः ॥१॥
९।८६।१९ ५५९

८२२ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशां असिष्यदत् ।
त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायुं सख्याय वर्धयन् ॥२॥ ९।८६।२०

८२३ अयं पुनान उषसो अरोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥३॥१७गी॥
(धा॰ ३६ । उ॰ ३ । स्व॰ ४ ॥)

॥ इति पञ्चमः खण्डः ॥५॥ ९।८६।२१

८२४ एवा ह्यसि वीरयुरेवा शूर उत स्थिरः ।
एवा ते राध्यं मनः ॥१॥ ८।९२।२८ २३२

८२५ एवा रातिस्तुविमघ विश्वेभिर्धायि धातृभिः ।
अधा चिदिन्द्र नः सचा॥ २ ॥ ८।९२।२९

८२६ मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते ।
मत्स्वा सुतस्य गोमतः ॥३॥ (धा॰ १४ । उ॰ १ । स्व॰ ३) ॥१८(ति)॥ ८।९२।३०

८२७ इन्द्रं विश्वा अवीवृधंत्समुद्रव्यचसं गिरः ।
रथीतमं रथीनां वाजानां सत्पतिं पतिम्॥ १ ॥ १।११।१ ३४३

८२८ सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
त्वामभि प्र नोनुमो जेतारमपराजितम्॥ २ ॥ १।११।२

८२९ पूर्वीरिन्द्रस्य रातयो न वि दस्यंत्यूतयः ।
यदा वाजस्य गोमत स्तोतृभ्यो मंहते मघम्॥३॥ ॥१९(री)॥ १।११।३
(धा॰ १८ । उ॰ नास्ति । स्व॰ ४)

इति षष्ठः खण्डः ॥ ६ ॥ ॥ इति द्वितीयप्रपाठके प्रथमोऽर्धः ॥ २ ॥

॥ इति तृतीयोऽध्यायः॥३॥

अथ चतुर्थोऽध्यायः ।

[२]

अथ द्वितीयप्रपाठके द्वितीयोऽर्धः ॥ २ ॥

(१-१९) १ जमदग्निर्भार्गवः; २ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ३ कविर्भार्गवः; ४ कश्यपो मारीचः। ५, मेधातिथिः काण्वः; ६-७ मधुच्छन्दा वैश्वामित्रः; ८ भरद्वाजो बार्हस्पत्यः; ९ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः; २ कश्यपो मारीचः; ३ गोतमो राहूगणः; ४ अत्रिर्भौमः; ५ विश्वामित्रो गाथिनः; ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः); १० पराशरः शाक्त्यः; ११ पुरुहन्मा आङ्गिरसः; १२ मेध्यातिथिः काण्वः १३ वसिष्ठो मैत्रावरुणिः; १४ त्रित आप्त्यः; १५ ययातिर्नाहुषः; १६ पवित्र आंगिरसः; १७ सोभरिः काण्वः; १८ गोपूक्त्यश्वसूक्तिनौ काण्वायनौ; १९ तिरश्चीरांगिरसौ ॥ १-४, ९, १०, १४-१६ पवमानः सोमः; ५, १७ अग्निः; ६ मित्रावरुणौ; ७ मरुतः, ७ (१,३) इन्द्रश्च; ८ इन्द्राग्नी; ११-१३,१८-१९ इन्द्रः ॥ १-८, १४ गायत्री; ९ (३) द्विपदा विराट्; १० त्रिष्टुप्; ९ (१-२) ११, १३ प्रगाथः = (विषमा बृहती, समा सतोबृहती); १२ बृहती; १५, १९ अनुष्टुप्; १६ जगती, १७ प्रगाथः= (विषमा ककुप्, समा सतोबृहती); १८ उष्णिक् ॥

८३० एते असृग्रमिन्दवस्तिरः पवित्रमाशवः । (ऋग्वेद) (सामवेद)
विश्वान्यभि सौभगा ॥ १ ॥ ९।६२।१

८३१ विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
त्मना कृण्वन्तो अर्वतः ॥ २ ॥ ९।६२।२

८३२ कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् ।
इडामस्मभ्यं संयतम् ॥३॥ (धा॰ ७ । उ॰ नास्ति । स्व॰ २) ॥१ (या)॥ ९।६२।३

८३३ राजा मेधाभिरीयते पवमानो मनावधि ।
अन्तरिक्षेण यातवे ॥ १ ॥ ९।६५।१६

८३४ आ नः सोम सहो जुवो रूपं न वर्चसे भर ।
सुष्वाणो देववीतये ॥ २ ॥ ९।६५।१८

८३५ आ न इन्द्रो शतग्विनं गवां पोषं स्वश्व्यम् ।
वहा भगत्तिमूतये ॥३॥ (धा॰ १४ । उ॰ नास्ति । स्व॰ २) ॥२ (ला)॥ ९।६५।१७

८३६ तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः । (ऋग्वेद) (सामवेद)
चारुं सुकृत्ययेमहे ॥ १ ॥ ९।४८।१

८३७ संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् ।
शतं पुरो रुरुक्षणिम् ॥ २ ॥ ९।४८।२

८३८ अतस्त्वा रयिरभ्ययद्राजानं सुक्रतो दिवः ।
सुपर्णो अव्यथी भरत् ॥ ३ ॥ ९।४८।३

८३९ अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।
अभिष्टिकृद्विचर्षणिः ॥ ४ ॥ ९।४८।५

८४० विश्वस्मा इ स्वर्दृशे साधारणं रजस्तुरम् ।
गोपामृतस्य विर्भरत्॥५॥ (धा॰ २६ । उ॰ नास्ति । स्व॰ ६) ॥३(हृ)॥ ९।४८।४

८४१ इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
इन्दो रुचाभि गा इहि ॥ १ ॥ ९।६४।१३ ५०५

८४२ पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः ।
हरे सृजान आशिरम् ॥ २ ॥ ९।६४।१४

८४३ पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
द्युतानो वाजिभिर्हितः ॥३॥(धा॰ १७ । उ॰ नास्ति । स्व॰ २)॥४(या)॥ ९।६४।१५

इति प्रथमः खण्डः ॥१॥

८४४ अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।
हव्यवाड्जुह्वास्यः ॥ १ ॥ १।१२।६

८४५ यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ।
तस्य स्म प्राविता भव ॥ २ ॥ १।१२।८

८४६ यो अग्निं देववीतये हविष्माँ आविवासति ।
तस्मै पावक मृडय ॥३॥ (धा॰ १३ । उ॰ नास्ति । स्व॰ ३)॥५ (रि)॥ १।१२।९

(ऋग्वेदे) (सामवेदे)

८४७ मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताचीं साधन्ता ॥ १ ॥ १।२।७

८४८ ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ।
क्रतुं बृहन्तमाशाथे ॥ २ ॥ १।२।८

८४९ कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
दक्षं दधाते अपसम् ॥३॥ (धा० १० । उ० नास्ति । स्व० १) ॥६(च)॥ १।२।९

८५० इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा ॥ १ ॥ १।६।७

८५१ आदह स्वधामनु पुनर्गर्भत्वमेरिरे ।
दधाना नाम यज्ञियम् ॥ २ ॥ १।६।४

८५२ वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।
अविन्द उस्रिया अनु ॥३॥ (धा० १४ । उ० १ । स्व० ३) ॥७(ति)॥ १।६।५

८५३ ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम् ।
इन्द्राग्नी न मर्धतः ॥ १ ॥ ६।६०।४

८५४ उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
ता नो मृडात ईदृशे ॥ २ ॥ ६।६०।५

८५५ हथो वृत्राण्यार्या हथो दासानि सत्पती ।
हथो विश्वा अप द्विषः ॥३॥ (धा० १० । उ० १ । स्व० ४) ॥८(पी)॥ ६।६०।६

॥ इति द्वितीयः खण्डः ॥२॥

८५६ अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥१॥ ९।१०७।१४ ५१८

८५७ तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥२॥ ९।१०७।१५

(ऋग्वेदे)(सामवेदे)

८५८ नृभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥३॥ ९ (चु)॥ ९।१०७।१६
(धा० १५ । उ० नास्ति । स्व० ५)

८५९ तिस्रो वाच ईरयति प्र वह्निरृतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥१॥ ९।९७।३४ ५२५

८६० सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुत ऋच्यते पूयमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥२॥ ९।९७।३५

८६१ एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरंधिम्॥३॥१०(पी)॥ ९।९७।३६
(धा० ३० । उ० १ । स्व० ४)

॥ इति तृतीयः खण्डः ॥३॥

८६२ यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥१॥ ८।७०।५ २१८

८६३ आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति व्रजे वज्रिं चित्राभिरूतिभिः॥२॥११(ली)॥८।७०।६
(धा० १९ । उ० नास्ति । स्व० ४)

८६४ वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ १ ॥ ८।३३।१ २६१

८६५ स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गमदिन्द्र स्वब्दीव वंसगः ॥२॥ ८।३३।२

८६६ कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥३॥ ॥१२(छा)॥ ८।३३।३
(धा० २७ । उ० २ । स्व० २)

८६७ तरणिरित्सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥ १ ॥ ७।३२।२० २३८

८६८ न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तं रयिर्नशत् ।
सुशक्तिरिन्मघवं तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥१३(यि)॥ ७।३२।२१

॥ इति चतुर्थः खण्डः ॥४॥ (धा० १७ । उ० नास्ति । स्व० ३)

(ऋग्वेदे) (सामवेदे)

८६९ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।
हरिरेति कनिक्रदत् । ॥ १ ॥ ९।३३।४ ४७१

८७० अभि ब्रह्मीरनूषत यह्वीरृतस्य मातरः ।
मर्जयन्तीर्दिवः शिशुम् ॥ २ ॥ ९।३३।५

८७१ रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणः ॥ ३ ॥ (धा० १८ उ० १ । स्व० २) ॥ १४(टा) ॥ ९।३३।६

८७२ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरं देवान्गच्छन्तु वो मदाः ॥ १ ॥ ९।१०१।४ ५४७

८७३ इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् ।
वाचस्पतिर्मखस्यते विश्वस्येशान ओजसः ॥ २ ॥ ९।१०१।५

८७४ सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
सोमस्पती रयीणां सखेन्द्रस्य दिवेदिवे । ३ ॥ ॥ १५ (लि)॥ ९।१०१।६
(धा० २९ । उ० नास्ति । स्व० २)

८७५ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥ १ ॥ ९।८३।१ ५६५

८७६ तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन् ।
अवन्त्यस्य पवितारमाशवो दिवः पृष्ठमधि रोहन्ति तेजसा ॥२॥ ९।८३।२

८७७ अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥३॥१६(टु)॥
(धा० ३८ । उ० १ । स्व० ५) ९।८३।३ ५९६

॥ इति पञ्चमः खण्डः ॥५॥

८७८ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥ १ ॥ ८।१०३।८ १०७

(ऋग्वेदे) (सामवेदे)

८७९ आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
कुविन्नो अस्य सुमतिर्भवीयस्यच्छा वाजेभिरागमत् ॥२॥१७(या)॥ ८।१०३।९
(धा० १७ । उ० नास्ति । स्व० २)

८८० तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
उ लोककृत्नुमद्रिवो हरिश्रियम् ॥१॥ ८।१५।४ ३८३

८८१ येन ज्योतींष्यायवे मनवे च विवेदिथ ।
मन्दानो अस्य बर्हिषो वि राजसि ॥ २ ॥ ८।१५।५

८८२ तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा ।
वृषपत्नीरपो जया दिवेदिवे ॥ ३ ॥ ॥ १८ (हृ) ॥ ८।१५।६
(धा० २१ । उ० नास्ति । स्व० १)

८८३ श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ १ ॥ ८।९५।४ ३४६

८८४ यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत् ।
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ २ ॥ ८।९५।५

८८५ तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥३॥ ॥१९(फा)॥ ८।९५।६
(धा० १५ । उ० २ । स्व० २)

॥ इति षष्ठः खण्डः ॥६॥

इति द्वितीयप्रपाठके द्वितीयोऽर्धः, द्वितीयप्रपाठकश्च समाप्तः ॥२॥

॥ इति चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ।

[१]

अथ तृतीयप्रपाठके प्रथमोऽर्धः ॥ ३ ॥

(१-२२) १ अकृष्टा माषाः; २ अमहीयुराङ्गिरसः; ३ मेध्यातिथिः काण्वः; ४, १२ बृहन्मतिराङ्गिरसः; ५ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ६ सुतंभर आत्रेयः; ७ गृत्समदः शौनकः; ८, २१ गोतमो राहूगणः; ९, १३ वसिष्ठो मैत्रावरुणिः; १० दृढच्युत आगस्त्यः; ११ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः; ४ अत्रिर्भौमः; ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः) १४ रेभः काश्यपः; १५ पुरुहन्मा आङ्गिरसः; १६ असितः काश्यपो देवलो वा; १७ (१) शक्तिर्वासिष्ठः, १७ (२) ऊरुरांगिरसः; १८ अग्निश्चाक्षुषः; १९ प्रतर्दनो दैवोदासिः; २० प्रयोगो भार्गवः; २१ पावकोऽग्निर्वार्हस्पत्यो वा, गृहपतियविष्ठौ सहसः पुत्रावन्यतरो वा; २२. ॥ १-५, १०-१२, १६-१९ पवमानः सोमः; ६, २० अग्निः; ७ मित्रावरुणौ; ८, १३-१५, २१ इन्द्रः; ९ इन्द्राग्नी; २२ ॥ १, ६ जगती; २-५, ७-१०, १२, १६, २० गायत्री; ११, १५ प्रगाथः= (विषमा बृहती, समा सतोबृहती); १३ विराट्; १४ (१) अति जगती, १४ (२-३) उपरिष्टाद् बृहती; १७ काकुभः प्रगाथः= (विषमा ककुप्, समा सतोबृहती); १८ उष्णिक्; १९ त्रिष्टुप्; २१ अनुष्टुप् ॥

(ऋग्वेदे) (सामवेदे)

८८६ प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥१॥
९।८६।४

८८७ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥२॥
९।८६।६

८८८ विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परि यन्ति केतवः ।
व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि ॥३॥ ॥१(वी)॥
(धा० ३५ । उ० नास्ति । स्व० ४) ९।८६।५

८८९ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
ज्योतिर्वैश्वानरं बृहत् ॥ १ ॥ ९।६१।१६ ४८४

८९० पवमान रसस्तव मदो राजन्नदुच्छुनः ।
वि वारमव्यमर्षति ॥ २ ॥ ९।६१।१८

१३

८९१ पवमानस्य ते रसो दक्षो वि राजति द्युमान् ।
ज्योतिर्विश्वं स्वर्दृशे ॥ ३ ॥ ॥२(पा)॥ ९।६१।१७
(धा २० । उ० १ स्व० २)

८९२ प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
घ्नन्तः कृष्णामप त्वचम् ॥ १ ॥ ९।४१।१ ४९१

८९३ सुवितस्य वनामहेऽति सेतुं दुराय्यम् ।
साह्याम दस्युमव्रतम् ॥ २ ॥ ९।४१।२

८९४ शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।
चरन्ति विद्युतो दिवि ॥ ३ ॥ ९।४१।३

८९५ आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।
अश्ववत्सोम वीरवत् ॥ ४ ॥ ९।४१।४

८९६ पवस्व विश्वचर्षण आ मही रोदसी पृण ।
उषाः सूर्यो न रश्मिभिः ॥ ५ ॥ ९।४१।५

८९७ परि णः शर्मयन्त्या धारया सोम विश्वतः ।
सरा रसेव विष्टपम् ॥६॥ ॥३ (भी)। ९।४१।६
(धा० ३५ । उ० ४ । स्व० ४)

॥ इति प्रथमः खण्डः ॥ १ ॥

८९८ आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।
यत्रा देवा इति ब्रुवन् ॥ १ ॥ ९।३९।१

८९९ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।
वृष्टिं दिवः परि स्रव ॥ २ ॥ ९।३९।२

९०० अयं स यो दिवस्परि रघुयामा पवित्र आ ।
सिन्धोरूर्मा व्यक्षरत् ॥ ३ ॥ ९।३९।४

९०१ सुत एति पवित्र आ त्विषिं दधान ओजसा ।
विचक्षाणो विरोचयन् ॥ ४ ॥ ९।३९।३

(ऋग्वेदे) (सामवेदे)

९०२ आविवासन्परावतो अथो अर्वावतः सुतः ।
इन्द्राय सिच्यते मधु ॥ ५ ॥ ९।३९।५

९०३ समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः ।
इन्दुमिन्द्राय पीतये ॥ ६ ॥ ॥ ४ (जी) ॥ ९।३९।६
(धा० ३२ । उ० ३ । स्व० ४)

९०४ हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।
महामिन्दुं महीयुवः ॥ १ ॥ ९।६५।१

९०५ पवमान रुचारुचा देव देवेभ्यः सुतः ।
विश्वा वसून्या विश ॥ २ ॥ ९।६५।२

९०६ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
इषे पवस्व संयतम् ॥३॥ (धा० ११ । उ० नास्ति । स्व० १) ॥५ (ह)॥ ९।६५।३

॥ इति द्वितीयः खण्डः ॥ २ ॥

९०७ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः ॥१॥ ५।११।१

९०८ त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दं छिश्रियाणं वनेवने ।
स जायसे मथ्यमानः सहो महत्वामाहुः सहसस्पुत्रमङ्गिरः ॥२॥ ५।११।६

९०९ यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥३॥ ॥६(वे)॥
(धा० ३० । उ० नास्ति । स्व० ७) ५।११।२

९१० अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
ममेदिह श्रुतं हवम् ॥ १ ॥ २।४१।४

९११ राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
सहस्रस्थूण आशाते ॥ २ ॥ २।४१।५

९१२ ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
सचेते अनवह्वरम् ॥ ३ ॥ (धा० १५ । उ० १ । स्व० ३) ॥ ७ (पि) ॥ २।४१।६

(ऋग्वेदे) (सामवेदे)

९१३ इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।
जघान नवतीर्नव ॥ १ ॥ १।८४।१३ १७९

९१४ इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् ।
तद्विदच्छर्यणावति ॥ २ ॥ १।८४।१४

९१५ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
इत्था चन्द्रमसो गृहे ॥३॥ (धा० १३ । उ० २ । स्व० ४) ॥८ (त्री)॥ १।८४।१५ १४७

९१६ इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
अभ्राद्वृष्टिरिवाजनि ॥ १ ॥ ७।९४।१

९१७ शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः ।
ईशाना पिप्यतं धियः ॥ २ ॥ ७।९४।२

९१८ मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
मा नो रीरधतं निदे ॥३॥ (धा० १२ । उ० १ । स्व० २) ॥९(ना)॥ ७।९४।३

॥ इति तृतीयः खण्डः ॥ ३ ॥

९१९ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
मरुद्भ्यो वायवे मदः ॥ १ ॥ ९।२५।१ ४७४

९२० सं देवैः शोभते वृषा कविर्योनावधि प्रियः ।
पवमानो अदाभ्यः ॥ २ ॥ ९।२५।३

९२१ पवमान धिया हितोऽभि योनिं कनिक्रदत् ।
धर्मणा वायुमारुहः ॥ ३ ॥ (धा० ११ । उ० २ । स्व० १) ॥१०(ब)॥ ९।२५।२

९२२ तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥१॥ ९।१०७।१९ ५१६

९२३ तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि ।
घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥२॥ ॥११(ति)॥ ९।१०७।२०
(धा० १४ । उ० १ । स्व० ३)

९२४ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । (ऋग्वेदे) (सामवेदे)
शुम्भन्ति विप्रं धीतिभिः ॥ १ ॥ ९।४०।१ ४८८

९२५ आ योनिमरुणो रुहद्गमदिन्द्रो वृषा सुतम् ।
ध्रुवे सदसि सीदतु ॥ २ ॥ ९।४०।२

९२६ नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥३॥ ॥ १२ (चा) ॥ ९।४०।३
(धा० १२ । उ० १ । स्व० २)

॥ इति चतुर्थः खण्डः ॥४॥

९२७ पिबा सोममिन्द्र मदन्तु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥ ७।२२।१ ३९८

९२८ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥ ७।२२।२

९२९ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥ ॥१३(चा)॥ ७।२२।३
(धा० १२ । उ० १ । स्व० २)

९३० विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ १ ॥ ८।९७।१० ३७०

९३१ नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥ २ ॥ ८।९७।१२

९३२ समु रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वःपतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः ॥३॥ ॥१४(नी)॥ ८।९७।११
(धा० २२ । उ० १ । स्व० ४)

९३३ यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १ ॥ ८।७०।१ २७३

९३४ इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्तेन वज्रः प्रति धायि दर्शतो महां देवो न सूर्यः ॥२॥ १५(चि)॥ ८।७०।२
(धा० १७ । उ० १ । स्व० ३)

॥ इति पञ्चमः खण्डः ॥ ५ ॥

९३५ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः ।
स्वानैर्याति कविक्रतुः ॥ १ ॥ ९।९।१ ४७६

९३६ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।
महान्मही ऋतावृधा ॥ २ ॥ ९।९।३

९३७ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
वीत्यर्ष पनिष्टये ॥ ३ ॥ (धा० ३ । उ० नास्ति । स्व० ३) ॥१६(रि)॥ ९।९।२

९३८ त्वं ह्या३ङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयन् ॥ १ ॥ ९।१०८।३ ५८१

९३९ येना नवग्वा दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत ॥२॥१७(पौ)॥ ९।१०८।४
(धा० ११ । उ० १ । स्व० नास्ति)

९४० सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥ १ ॥ ९।१०६।१० ५७२

९४१ धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम् ।
अभि त्रिपृष्ठं मतयः समस्वरन् ॥ २ ॥ ९।१०६।११

९४२ असर्जि कलशाँ अभि मीढ्वान्त्सप्तिर्न वाजयुः ।
पुनानो वाचं जनयन्नसिष्यदत् ॥ ३ ॥ ॥ १८ (फा) ॥ ९।१०६।१२
(धा० १० । उ० २ । स्व० २)

९४३ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ १ ॥ ९।९६।५ ५२७

९४४ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । (ऋग्वेदे) (सामवेदे)
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ २ ॥ ९।९६।६

९४५ प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ ३ ॥ १९(क्रू) ॥
(धा० ३० । उ० २ । स्व० ६) ९।९६।७

॥ इति षष्ठः खण्डः ॥६॥

९४६ अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
अच्छा नप्त्रे सहस्वते ॥ १ ॥ ८।१०२।७ २१

९४७ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ।
अस्य क्रत्वा यशस्वतः ॥ २ ॥ ८।१०२।८

९४८ अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।
आ वाजैरुप नो गमत् ॥ ३ ॥ ॥ २० (डा) ॥ ८।१०२।९
(धा० ८ । उ० ३ । स्व० २)

९४९ इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ १ ॥ १।८४।४ ३४४

९५० न किष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।
न किष्ट्वानु मज्मना न किः स्वश्व आनशे ॥ २ ॥ १।८४।६

९५१ इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ३ ॥ ॥२१(र)॥ १।८४।५
(धा० ८ । उ० नास्ति । स्व० १)

९५२ इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ॥ १ ॥ (न ऋग्वेदीयः)

९५३ इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न ।
अस्य सुतस्य स्वा३र्नोप त्वा मदाः सुवाचो अस्थुः ॥२॥ (न ऋग्वेदीयः)

९५४ इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न ।
बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥ ३ ॥२२(ङ)॥ (न ऋग्वेदीयः)
(धा० ११ । उ० ५ । स्व० १)

॥ इति सप्तमः खण्डः ॥ ७ ॥
॥ इति तृतीयप्रपाठके प्रथमोऽर्धः ॥ ३ ॥
॥ इति पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

[२]

अथ तृतीयप्रपाठके द्वितीयोऽर्धः ॥ ३ ॥

(१-२३) १ (अकृष्टा माषादयः) त्रयः ऋषयः; २ कश्यपो मारीचः; ३, ४, १३ असितः काश्यपो देवलो वा, ५ अवत्सारः काश्यपः; ६, १६ जमदग्निर्भार्गवः; ७ अरुणो वैतहव्यः; ८ उरुचक्रिरात्रेयः; ९ कुरुसुतिः काण्वः; १० भरद्वाजो बार्हस्पत्यः; ११ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः); १४,१५,२३ गोतमो राहूगणः; १७ (१) ऊर्ध्वसद्मा आङ्गिरसः, १७ (२) कृतयशा आङ्गिरसः; १८ त्रित आप्त्यः, १९ रेभसूनू काश्यपौ; २० मन्युर्वासिष्ठः; २१ वसुश्रुत आत्रेयः; २२ नृमेध आङ्गिरसः ॥ १-६, ११-१३, १६-२० पवमानः सोमः; ७, २१ अग्निः; ८ मित्रावरुणौ; ९, १४-१५, २२-२३ इन्द्रः; १० इन्द्राग्नी ॥ १, ७ जगती; २-६, ८-११, १३, १६ गायत्री; १२ बृहती; १४,१५,२१ पंक्तिः; १७ काकुभः प्रगाथः= (विषमा ककुप्, समा सतो बृहती); १८, २२ उष्णिक्; १९,२३ अनुष्टुप्; २० त्रिष्टुप् ॥

९५५ गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः । (ऋग्वेदे)
त्वं सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते ॥१॥ ९।८६।३९

९५६ त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥२॥ ९।८६।३८

९५७ ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥३॥१(र्वा)॥
(धा० ४१ । उ०२ । स्व० ४) ९।८६।३७

९५८ पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।
सूर्यस्येव न रश्मयः ॥ १ ॥ ९।६४।७

९५९ केतुं कृण्वं दिवस्परि विश्वा रूपाभ्यर्षसि । (ऋग्वेद) (सामवेद)
समुद्रः सोम पिन्वसे ॥ २ ॥ ९।६४।८
९६० जज्ञानो वाचमिष्यसि पवमान विधर्मणि ।
क्रन्दं देवो न सूर्यः ॥ ३ ॥ (धा० १५। उ० १। स्व० २) ॥२ (पा)॥ ९।६४।९
९६१ प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
श्रीणाना अप्सु वृञ्जते ॥ १ ॥ ९।२४।१
९६२ अभि गावो अधन्विषुरापो न प्रवता यतीः ।
पुनाना इन्द्रमाशत ॥ २ ॥ ९।२४।२
९६३ प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
नृभिर्यतो वि नीयसे ॥ ३ ॥ ९।२४।३
९६४ इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे ।
अरमिन्द्रस्य धाम्ने ॥ ४ ॥ ९।२४।५
९६५ त्वं सोम नृमादनः पवस्व चर्षणीधृतिः ।
सस्निर्यो अनुमाद्यः ॥ ५ ॥ ९।२४।४
९६६ पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः ।
शुचिः पावको अद्भुतः ॥ ६ ॥ ९।२४।६
९६७ शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।
देवावीरघशंसहा ॥ ७ ॥ (धा० ४१। उ० नास्ति। स्व० ८) ॥३(है)॥ ९।२४।७

॥ इति प्रथमः खण्डः ॥ १ ॥

९६८ प्र कविर्देववीतयेऽव्या वारेभिरव्यत ।
साह्वान्विश्वा अभि स्पृधः ॥ १ ॥ ९।२०।१
९६९ स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति ।
पवमानः सहस्रिणम् ॥ २ ॥ ९।२०।२

१४

९७० परि विश्वानि चेतसा मृज्यसे पवसे मती । (ऋग्वेद) (सामवेद)
स नः सोम श्रवो विदः ॥ ३ ॥ ९।२०।३
९७१ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् ।
इषं स्तोतृभ्य आ भर ॥ ४ ॥ ९।२०।४
९७२ त्वं राजेव सुव्रतो गिरः सोमाविवेशिथ ।
पुनानो वह्ने अद्भुत ॥ ५ ॥ ९।२०।५
९७३ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
सोमश्चमूषु सीदति ॥ ६ ॥ ९।२०।६
९७४ क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि ।
दधत्स्तोत्रे सुवीर्यम् ॥ ७ ॥ ॥ ४(को)॥ ९।२०।७
(धा० २१। उ० १। स्व० ९)

९७५ यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव ।
विश्वा च सोम सौभगा ॥ १ ॥ ९।५५।१
९७६ इन्दो यथा तव स्तवो यथा ते जातमन्धसः ।
नि बर्हिषि प्रिये सदः ॥ २ ॥ ९।५५।२
९७७ उत नो गोविदश्ववित्पवस्व सोमान्धसा ।
मक्षूतमेभिरहभिः ॥ ३ ॥ ९।५५।३
९७८ यो जिनाति न जीयते हन्ति शत्रुमभीत्य ।
स पवस्व सहस्रजित् ॥ ४ ॥ (धा० ११। उ० नास्ति। स्व० ३)॥५(हि)॥ ९।५५।४

९७९ यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये ।
ताभिः पवित्रमासदः ॥ १ ॥ ९।६२।७
९८० सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया ।
सीदन्नृतस्य योनिमा ॥ २ ॥ ९।६२।८

९८१ त्वं सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः । (ऋग्वेद) (सामवेद)
वरिवोविद्घृतं पयः ॥ ३ ॥ (धा० ११। उ० नास्ति। स्व० ३) ॥६ (हि)॥ ९।६२।९

॥ इति द्वितीयः खण्डः ॥२॥

९८२ तव श्रियो वर्ष्यस्येव विद्युतोऽग्नेश्चिकित्र उषसामिवेतयः ।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि ॥१॥ १०।९१।५
९८३ वातोपजूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।
आ ते यतन्ते रथ्योऽयथा पृथक् शर्धांस्यग्ने अजरस्य धक्षतः ॥२॥ १०।९१।७
९८४ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतरं मतिम् ।
त्वामर्भस्य हविषः समानमित्त्वां महो वृणते नान्यं त्वत् ॥३॥७(तु)॥ १०।९१।८
(धा० ३५। उ० ३। स्व० ५)

९८५ पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण ।
मित्र वंसि वां सुमतिम् ॥ १ ॥ ५।७०।१
९८६ ता वां सम्यगद्रुह्वाणेषमश्याम धाम च ।
वयं वां मित्रा स्याम ॥ २ ॥ ५।७०।२
९८७ पातं नो मित्रा पायुभिरुत त्रायेथां सुत्रात्रा ।
साह्याम दस्यूं तनूभिः ॥ ३ ॥ (धा० १२। उ० नास्ति। स्व० १,॥८(ग)॥ ५।७०।३

९८८ उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः ।
सोममिन्द्र चमू सुतम् ॥ १ ॥ ८।७६।१०
९८९ अनु त्वा रोदसी उभे स्पर्धमानमददेताम् ।
इन्द्र यद्दस्युहाभवः ॥ २ ॥ ८।७६।११
९९० वाचमष्टापदीमहं नवस्रक्तिमृतावृधम् ।
इन्द्रात्परितन्वं ममे ॥३॥ (धा० ११। उ० नास्ति। स्व० ४) ॥९ (ही)॥ ८।७६।१२

९९१ इन्द्राग्नी युवामिमेऽभि स्तोमा अनूषत ।
पिबतं शम्भुवा सुतम् ॥ १ ॥

९९२ या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । (ऋग्वेद) (सामवेद)
इन्द्राग्नी ताभिरा गतम् ॥ २ ॥ ६।६०।८
९९३ ताभिरा गच्छतं नरोपेदं सवनं सुतम् ।
इन्द्राग्नी सोमपीतये ॥३॥ (धा० ११। उ० नास्ति। स्व० २) ॥१०(हा)॥ ६।६०।९

॥ इति तृतीयः खण्डः ॥३॥

९९४ अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
सीदन्योनौ वनेष्वा ॥ १ ॥ ९।६५।१९ ५०३
९९५ अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
सोमा अर्षन्तु विष्णवे ॥ २ ॥ ९।६५।२०
९९६ इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥३॥ (धा० १४। उ० नास्ति। स्व० २) ॥११(ला)॥ ९।६५।२१

९९७ सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥१॥ ९।१०७।८ ५१५
९९८ अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥२॥ ॥१२(फ)॥ ९।१०७।९
(धा० १५। उ० २। स्व० १)

९९९ यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।
तन्नः पुनान आ भर ॥ १ ॥ ९।१९।१
१००० वृषा पुनान आयूंषि स्तनयन्नधि बर्हिषि ।
हरिः सन्योनिमासदः ॥ २ ॥ ९।१९।३
१००१ युवं हि स्थः स्वःपती इन्द्रश्च सोम गोपती ।
ईशाना पिप्यतं धियः ॥३॥ (धा० १५। उ० १। स्व० ५) ॥ १३ (पु) ॥ ९।१९।२

॥ इति चतुर्थः खण्डः ॥४॥

९२४ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । (ऋग्वेदे) (सामवेदे)
शुम्भन्ति विप्रं धीतिभिः ॥ १ ॥ ९।४०।१ ४८८
९२५ आ योनिमरुणो रुहद्गमदिन्द्रो वृषा सुतम् ।
ध्रुवे सदसि सीदतु ॥ २ ॥ ९।४०।२
९२६ नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥३॥ ॥ १२ (चा) ॥ ९।४०।३
(धा० १२ । उ० १ । स्व० २)

॥ इति चतुर्थः खण्डः ॥४॥

९२७ पिबा सोममिन्द्र मदन्तु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥ ७।२२।१ ३९८
९२८ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥ ७।२२।२
९२९ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥ ॥१३(चा)॥ ७।२२।३
(धा० १२ । उ० १ । स्व० २)

९३० विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ १ ॥ ८।९७।१० ३५०
९३१ नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥ २ ॥ ८।९७।१२
९३२ समु रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वःपतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः ॥३॥ ॥१४(ची)॥ ८।९७।११
(धा० २२ । उ० १ । स्व० ४)

९३३ यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १ ॥ ८।७०।१ २७३

९३४ इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्तेन वज्रः प्रति धायि दर्शतो महां देवो न सूर्यः ॥२॥ १५(चि)॥ ८।७०।२
(धा० १७ । उ० १ । स्व० ३)

॥ इति पञ्चमः खण्डः ॥ ५ ॥

९३५ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः ।
स्वानैर्याति कविक्रतुः ॥ १ ॥ ९।९।१ ४७६
९३६ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।
महान्मही ऋतावृधा ॥ २ ॥ ९।९।३
९३७ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
वीत्यर्ष पनिष्टये ॥ ३ ॥ (धा० ३ । उ० नास्ति । स्व० ३) ॥१६(रि)॥ ९।९।२
९३८ त्वं ह्या३ङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
अमृतत्वाय घोषयन् ॥ १ ॥ ९।१०८।३ ५८३
९३९ येना नवग्वा दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।
देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत ॥२॥१७(पौ)॥ ९।१०८।४
(धा० ११ । उ० १ । स्व० नास्ति)

९४० सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
अग्रे वाचः पवमानः कनिक्रदत् ॥ १ ॥ ९।१०६।१० ५७२
९४१ धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम् ।
अभि त्रिपृष्ठं मतयः समस्वरन् ॥ २ ॥ ९।१०६।११
९४२ असर्जि कलशां अभि मीढ्वांत्सप्तिर्न वाजयुः ।
पुनानो वाचं जनयन्नसिष्यदत् ॥ ३ ॥ ॥ १८ (फा) ॥ ९।१०६।१२
(धा० १० । उ० २ । स्व० २)
९४३ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ १ ॥ ९।९६।५ ५२७

९४४ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । (ऋग्वेदे) (सामवेदे)
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ २ ॥ ९।९६।६
९४५ प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः ।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ ३ ॥ १९(फ़) ॥
(धा० ३० । उ० २ । स्व० ६) ९।९६।७

॥ इति षष्ठः खण्डः ॥६॥

९४६ अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
अच्छा नप्त्रे सहस्वते ॥ १ ॥ ८।१०२।७ २१
९४७ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ।
अस्य क्रत्वा यशस्वतः ॥ २ ॥ ८।१०२।८
९४८ अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।
आ वाजैरुप नो गमत् ॥ ३ ॥ ॥ २० (डा) ॥ ८।१०२।९
(धा० ८ । उ० ३ । स्व० २)
९४९ इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ १ ॥ १।८४।४ ३४४
९५० न किष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।
न किष्ट्वानु मज्मना न किः स्वश्व आनशे ॥ २ ॥ १।८४।६
९५१ इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ३ ॥ ॥२१(र)॥ १।८४।५
(धा० ८ । उ० नास्ति । स्व० १)
९५२ इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ॥ १ ॥ (न ऋग्वेदीयः)
९५३ इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न ।
अस्य सुतस्य स्वा३र्नोप त्वा मदाः सुवाचो अस्युः ॥२॥ (न ऋग्वेदीयः)

९५४ इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न ।
बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥ ३ ॥२२(ङ)॥ (न ऋग्वेदीयः)
(धा० ११ । उ० ५ । स्व० १)

॥ इति सप्तमः खण्डः ॥ ७ ॥
॥ इति तृतीयप्रपाठके प्रथमोऽर्धः ॥ ३ ॥
॥ इति पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

[२]

अथ तृतीयप्रपाठके द्वितीयोऽर्धः ॥ ३ ॥

(१-२३) १ (अकृष्टा माषादयः) त्रयः ऋषयः, २ कश्यपो मारीचः; ३, ४, १३ असितः काश्यपो देवलो वा; ५ अवत्सारः काश्यपः; ६, १६ जमदग्निर्भार्गवः; ७ अरुणो वैतहव्यः; ८ उरुचक्रिरात्रेयः; ९ कुरुसुतिः काण्वः; १० भरद्वाजो बार्हस्पत्यः; ११ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः); १४,१५,२३ गोतमो राहूगणः; १७ (१) ऊर्ध्वसद्मा आङ्गिरसः, १७ (२) कृतयशा आङ्गिरसः; १८ त्रित आप्त्यः; १९ रेभसून् काश्यपौ; २० मन्युर्वासिष्ठः; २१ वसुश्रुत आत्रेयः; २२ नृमेध आङ्गिरसः ॥ १-६, ११-१३, १६-२० पवमानः सोमः; ७, २१ अग्निः; ८ मित्रावरुणौ; ९, १४-१५, २२-२३ इन्द्रः; १० इन्द्राग्नी ॥ १,७ जगती; २-६, ८-११, १३, १६ गायत्री; १२ बृहती; १४,१५,२१ पंक्तिः; १७ काकुभः प्रगाथः= (विषमा ककुप्, समा सतो बृहती), १८, २२ उष्णिक्; १९,२३ अनुष्टुप्, २० त्रिष्टुप् ॥

९५५ गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः । (ऋग्वेदे)
त्वं सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते ॥१॥ ९।८६।३९
९५६ त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥२॥ ९।८६।३८
९५७ ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥३॥१(र्वा)॥
(धा० ४१ । उ० २ । स्व० ४) ९।८६।३७
९५८ पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।
सूर्यस्येव न रश्मयः ॥ १ ॥ ९।६४।७

(ऋग्वेदे) (सामवेदे)

९५९ केतुं कृण्वं दिवस्परि विश्वा रूपाभ्यर्षसि।
समुद्रः सोम पिन्वसे ॥ २ ॥ ९।६४।८
९६० जज्ञानो वाचमिष्यसि पवमान विधर्मणि।
क्रन्दं देवो न सूर्यः ॥ ३ ॥ (धा० १५। उ० १। स्व० २) ॥२ (पा)॥ ९।६४।९
९६१ प्र सोमासो अधन्विषुः पवमानास इन्दवः।
श्रीणाना अप्सु वृञ्जते ॥ १ ॥ ९।२४।१
९६२ अभि गावो अधन्विषुरापो न प्रवता यतीः।
पुनाना इन्द्रमाशत ॥ २ ॥ ९।२४।२
९६३ प्र पवमान धन्वसि सोमेन्द्राय मादनः।
नृभिर्यतो वि नीयसे ॥ ३ ॥ ९।२४।३
९६४ इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे।
अरमिन्द्रस्य धाम्ने ॥ ४ ॥ ९।२४।५
९६५ त्वं सोम नृमादनः पवस्व चर्षणीधृतिः।
सस्निर्यो अनुमाद्यः ॥ ५ ॥ ९।२४।४
९६६ पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः।
शुचिः पावको अद्भुतः ॥ ६ ॥ ९।२४।६
९६७ शुचिः पावक उच्यते सोमः सुतः स मधुमान्।
देवावीरघशंसहा ॥ ७ ॥ (धा० ४१। उ० नास्ति। स्व० ८) ॥३(है)॥ ९।२४।७

॥ इति प्रथमः खण्डः ॥ १ ॥

९६८ प्र कविर्देववीतयेऽव्या वारेभिरव्यत।
साह्वान्विश्वा अभि स्पृधः ॥ १ ॥ ९।२०।१
९६९ स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति।
पवमानः सहस्रिणम् ॥ २ ॥ ९।२०।२

१४

(ऋग्वेदे) (सामवेदे)

९७० परि विश्वानि चेतसा मृज्यसे पवसे मती।
स नः सोम श्रवो विदः ॥ ३ ॥ ९।२०।३
९७१ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम्।
इषं स्तोतृभ्य आ भर ॥ ४ ॥ ९।२०।४
९७२ त्वं राजेव सुव्रतो गिरः सोमाविवेशिथ।
पुनानो वह्ने अद्भुत ॥ ५ ॥ ९।२०।५
९७३ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः।
सोमश्चमूषु सीदति ॥ ६ ॥ ९।२०।६
९७४ क्रीडुर्मखो न मंहयुः पवित्रं सोम गच्छसि।
दधत्स्तोत्रे सुवीर्यम् ॥ ७ ॥ ॥ ४(को)॥ ९।२०।७
(धा० २१। उ० १। स्व० ९)

९७५ पवस्व नो अन्धसा पुष्टपुष्टं परि स्रव।
विश्वा च सोम सौभगा ॥ १ ॥ ९।५५।१
९७६ इन्दो यथा तव स्तवो यथा ते जातमन्धसः।
नि बर्हिषि प्रिये सदः ॥ २ ॥ ९।५५।२
९७७ उत नो गोविदश्वविस्पवस्व सोमान्धसा।
मक्षूतमेभिरहभिः ॥ ३ ॥ ९।५५।३
९७८ यो जिनाति न जीयते हन्ति शत्रुमभीत्य।
स पवस्व सहस्रजित् ॥ ४ ॥ (धा० ११। उ० नास्ति। स्व० ३) ॥५(हि)॥ ९।५५।४

९७९ यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये।
ताभिः पवित्रमासदः ॥ १ ॥ ९।६२।७
९८० सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया।
सीदन्नृतस्य योनिमा ॥ २ ॥ ९।६२।८

(ऋग्वेदे) (सामवेदे)

९८१ त्वं सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः।
वरिवोविद्घृतं पयः ॥ ३ ॥ (धा० ११। उ० नास्ति। स्व० ३) ॥६ (हि)॥ ९।६२।९

॥ इति द्वितीयः खण्डः ॥२॥

९८२ तव श्रियो वर्ष्यस्येव विद्युतोऽग्नेश्चिकित्र उषसामिवेतयः।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि ॥१॥ १०।९१।५
९८३ वातोपजूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे।
आ ते यतन्ते रथ्योऽयथा पृथक् शर्धांस्यग्ने अजरस्य धक्षतः ॥२॥ १०।९१।७
९८४ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतरं मतिम्।
त्वामर्भस्य हविषः समानमित्त्वां महो वृणते नान्यं त्वत् ॥३॥७(नु)॥ १०।९१।८
(धा० ३५। उ० ३। स्व० ५)

९८५ पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण।
मित्र वंसि वां सुमतिम् ॥ १ ॥ ५।७०।१
९८६ ता वां सम्यगद्रुह्वाणेषमश्याम धाम च।
वयं वां मित्रा स्याम ॥ २ ॥ ५।७०।२
९८७ पातं नो मित्रा पायुभिरुत त्रायेथां सुत्रात्रा।
साह्याम दस्यूं तनूभिः ॥ ३ ॥ (धा० १२। उ० नास्ति। स्व० १,॥८(य)॥ ५।७०।३

९८८ उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः।
सोममिन्द्र चमू सुतम् ॥ १ ॥ ८।७६।१०
९८९ अनु त्वा रोदसी उभे स्पर्धमानमददेताम्।
इन्द्र यद्दस्युहाभवः ॥ २ ॥ ८।७६।११
९९० वाचमष्टापदीमहं नवस्रक्तिमृतावृधम्।
इन्द्रात्परितन्वं ममे ॥३॥ (धा० ११। उ० नास्ति। स्व० ४) ॥९ (ही)॥ ८।७६।१२

९९१ इन्द्राग्नी युवामिमे३ऽभि स्तोमा अनूषत।
पिबतं शम्भुवा सुतम् ॥ १ ॥

(ऋग्वेदे) (सामवेदे)

९९२ या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा।
इन्द्राग्नी ताभिरा गतम् ॥ २ ॥ ६।६०।८
९९३ ताभिरा गच्छतं नरोपेदं सवनं सुतम्।
इन्द्राग्नी सोमपीतये ॥३॥ (धा० ११। उ० नास्ति। स्व० २) ॥१०(द्रा)॥ ६।६०।९

॥ इति तृतीयः खण्डः ॥३॥

९९४ अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्।
सीदन्योनौ वनेष्वा ॥ १ ॥ ९।६५।१९ ५०२
९९५ अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः।
सोमा अर्षन्तु विष्णवे ॥ २ ॥ ९।६५।२०
९९६ इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः।
आ पवस्व सहस्रिणम् ॥३॥ (धा० १४। उ० नास्ति। स्व० २) ॥११(ला)॥ ९।६५।२१

९९७ सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम्।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥१॥ ९।१०७।८ ५१५
९९८ अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥२॥ ॥१२(फ)॥ ९।१०७।९
(धा० १५। उ० २। स्व० १)

९९९ यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु।
तन्नः पुनान आ भर ॥ १ ॥ ९।१९।१
१००० वृषा पुनान आयूंषि स्तनयन्नधि बर्हिषि।
हरिः सन्योनिमासदः ॥ २ ॥ ९।१९।३
१००१ युवं हि स्थः स्वःपती इन्द्रश्च सोम गोपती।
ईशाना पिप्यतं धियः ॥३॥ (धा० १५। उ० १। स्व० ५) ॥ १३ (पु) ॥ ९।१९।२

॥ इति चतुर्थः खण्डः ॥४॥

१००२ इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः। (ऋग्वेदे) (सामवेदे)
तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥१॥ १।८१।१ ४११
१००३ असि हि वीर सेन्योऽसि भूरि पराददिः।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥२॥ १।८१।२
१००४ यदुदीरत आजयो धृष्णवे धीयते धनम्।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्मां इन्द्र वसौ दधः ॥३॥१४(खु)॥
(धा० २६। उ० २। स्व० ५) १।८१।३ ४१४

१००५ स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥ १ ॥
१।८४।१० ४०९
१००६ ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥ २ ॥
१।८४।११
१००७ ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥३॥ १५(व)॥
(धा० १५। उ० नास्ति। स्व० १) १।८४।१२

॥ इति पञ्चमः खण्डः ॥ ५ ॥

१००८ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः।
श्येनो न योनिमासदत् ॥ १ ॥ ९।६२।४ ४७३
१००९ शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम्।
स्वदन्ति गावः पयोभिः ॥ २ ॥ ९।६२।५
१०१० आदीमश्वं न हेतारमशूशुभन्नमृताय।
मधो रसं सधमादे ॥ ३ ॥ (धा० १२। उ० १। स्व० ५) ॥ १६ (चु) ॥ ९।६२।६

१०११ अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम्।
वि कोशं मध्यमं युव ॥ १ ॥ ९।१०८।९ ५७९

१०१२ आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः। (ऋग्वेदे) (सामवेदे)
वृष्टिं दिवः पवस्व रीतिमपो जिन्वन् गविष्टये धियः ॥ २ ॥ १७ (डा) ॥
(धा० १८। उ० ३। स्व० २) ९।१०८।१०

१०१३ प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्।
विश्वा परि प्रिया भुवदध द्विता ॥ १ ॥ ९।१०२।१ ५७०
१०१४ उप त्रितस्य पाष्योरभक्त यद्गुहा पदम्।
यज्ञस्य सप्त धामभिरध प्रियम् ॥ २ ॥ ९।१०२।२
१०१५ त्रीणि त्रितस्य धारया पृष्ठेष्वेरयद्रयिम्।
मिमीते अस्य योजना वि सुक्रतुः ॥ ३ ॥ ॥ १८ (री) ॥ ९।१०२।३
(धा० ८। उ० नास्ति। स्व० ४)

१०१६ पवस्व वाजसातये पवित्रे धारया सुतः।
इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः ॥ १ ॥ ९।१००।६
१०१७ त्वां रिहन्ति धीतयो हरिं पवित्रे अद्रुहः।
वत्सं जातं न मातरः पवमान विधर्मणि ॥ २ ॥ ९।१००।७
१०१८ त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे।
प्रति द्रापिममुञ्चथाः पवमान महित्वना ॥ ३ ॥ १९ (ता) ॥ ९।१००।९
(धा० २४। उ० १। स्व० २)

१०१९ इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय।
हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ १ ॥ ९।९७।१० ५४०
१०२० अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः।
इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ २ ॥ ९।९७।११
१०२१ अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन्।
इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥३॥२०(पी)॥
(धा० २० । उ० १ स्व० ४) ९।९७।१२

॥ इति षष्ठः खण्डः ॥६॥

१०२२ आ ते अग्न इधीमहि द्युमन्तं देवाजरम्। (ऋग्वेदे) (सामवेदे)
यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर ॥१॥ ५।६।४
१०२३ आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते।
सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥२॥
[५।६।५]
१०२४ ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि।
उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर ॥३॥२१(रा)॥
(धा० २८। उ० नास्ति। स्व० २) ५।६।९

१०२५ इन्द्राय साम गायत विप्राय बृहते बृहत्।
ब्रह्मकृते विपश्चिते पनस्यवे ॥ १ ॥ ८।९८।१ ३८८
१०२६ त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः।
विश्वकर्मा विश्वदेवो महाँ असि ॥ २ ॥ ८।९८।२
१०२७ विभ्राजं ज्योतिषा स्वरगच्छो रोचनं दिवः।
देवास्त इन्द्र सख्याय येमिरे ॥३ (धा० १५। उ० नास्ति। स्व० १) २२(व)॥ ८।९८।३

१०२८ असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥ १ ॥ १।८४।१ ३४७
१०२९ आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ २ ॥ १।८४।३
१०३० इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम्।
ऋषीणां सुष्टुतीरुप यज्ञं च मानुषाणाम् ॥३॥ ॥ २३ (पा) ॥ १।८४।२
(धा० १०। उ० १। स्व० २)

॥ इति सप्तमः खण्डः ॥७॥
॥ इति तृतीयप्रपाठके द्वितीयोऽर्धः ॥ २ ॥
॥ तृतीयः प्रपाठकश्च समाप्तः ॥३॥
॥ इति षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः।

[१]

अथ चतुर्थप्रपाठके प्रथमोऽर्धः ॥ ४ ॥

(१-२४) १ (अकृष्टमाषादयः) ऋषयः; २,११ कश्यपो मारीचः; ३ मेधातिथिः काण्वः; ४ हिरण्यस्तूप आङ्गिरसः; ५ अवत्सारः काश्यपः; ६ जमदग्निर्भार्गवः; ७, २१ कुत्स आङ्गिरसः; ८ वसिष्ठो मैत्रावरुणिः; ९ त्रिशोकः काण्वः; १० श्यावाश्व आत्रेयः; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः; ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः), १३ अमहीयुरांगिरसः; १४ शुनःशेप आजीगर्तिः; १५ मधुच्छन्दा वैश्वामित्रः; १६ (१,३,२-पूर्वार्धः) मान्धाता यौवनाश्वः, १६ (२ उत्तरार्धः) गोधा ऋषिका; १७ असितः काश्यपो देवलो वा; १८ (१) ऋणंचयो राजर्षिः, १८ (२) शक्तिर्वासिष्ठः; १९ पर्वतनारदौ काण्वौ; २० मनुः सांवरणः, २२ बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च क्रमेण गौपायना लौपायना वा; २३ भुवन आप्त्यः साधनो वा भौवनः ॥ १-६, ११-१३, १७-२१ पवमानः सोमः; ७, २२ अग्निः, ८ आदित्यः, ९, १४-१६ इन्द्रः; १० इन्द्राग्नी; २३ विश्वे देवाः, २४ ॥ १, ७ जगती; २-६, ८-११, १३-१५, १७ गायत्री; १२ प्रगाथः= (विषमा बृहती, समा सतोबृहती); १६ महापंक्तिः; १८ (१) यवमध्या गायत्री, १८ (२) सतो बृहती; १९ उष्णिक्; २० अनुष्टुप्; २१ त्रिष्टुप्; २२ द्विपदा विराट्, २३ द्विपदा त्रिष्टुप्; २४ ॥

१०३१ ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः। (ऋग्वेदे) (सामवेदे)
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥१॥ ९।८६।१०
१०३२ अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥२॥ ९।८६।११
१०३३ अग्रे सिन्धूनां पवमानो अर्षस्यग्रे वाचो अग्रियो गोषु गच्छसि।
अग्रे वाजस्य भजसे महद्धनं स्वायुधः सोतृभिः सोम सूयसे ॥३॥१(लु)॥
(धा० २९। उ० नास्ति। स्व० ५) ९।८६।१२
१०३४ असृक्षत प्र वाजिनो गव्या सोमासो अश्वया।
शुक्रासो वीरयाशवः ॥ १ ॥ ९।६४।४ ४८२
१०३५ शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः।
पवन्ते वारे अव्यये ॥ २ ॥ ९।६४।५
१०३६ ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा।
पवन्तामान्तरिक्ष्या ॥ ३ ॥ (धा० २०। उ० नास्ति। स्व० ४) ॥ २(बी) ॥ ९।६४।६

१०३७ पवस्व देववीरति पवित्रं सोम रंह्या । (ऋग्वेद) (सामवेद)
इन्द्रमिन्दो वृषा विश ॥ १ ॥ ९।२।१
१०३८ आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।
आ योनिं धर्णसिः सदः ॥ २ ॥ ९।२।२
१०३९ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।
अपो वसिष्ट सुक्रतुः ॥ ३ ॥ ९।२।३
१०४० महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः ।
यद्गोभिर्वासयिष्यसे ॥ ४ ॥ ९।२।४
१०४१ समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
सोमः पवित्रे अस्मयुः ॥ ५ ॥ ९।२।५
१०४२ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
सं सूर्येण दिद्युते ॥ ६ ॥ ९।२।६ ४९१
१०४३ गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।
याभिर्मदाय शुम्भसे ॥ ७ ॥ ९।२।७
१०४४ तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ।
तव प्रशस्तये महे ॥ ८ ॥ ९।२।८
१०४५ गोषा इन्दो नृषा अस्यश्वसा वाजसा उत ।
आत्मा यज्ञस्य पूर्व्यः ॥ ९ ॥ ९।२।१०
१०४६ अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया ।
पर्जन्यो वृष्टिमाँ इव ॥ १० ॥ (धा० ५१ । उ० १ । स्व० ८) ॥३(कै)॥ ९।२।९

॥ इति प्रथमः खण्डः ॥१॥

१०४७ सना च सोम जेषि च पवमान महि श्रवः ।
अथा नो वस्यसस्कृधि ॥ १ ॥ ९।४।१

१०४८ सना ज्योतिः सना स्व३र्विश्वा च सोम सौभगा । (ऋग्वेद) (सामवेद)
अथा नो वस्यसस्कृधि ॥ २ ॥ ९।४।२
१०४९ सना दक्षमुत क्रतुमप सोम मृधो जहि ।
अथा नो वस्यसस्कृधि ॥ ३ ॥ ९।४।३
१०५० पवीतारः पुनीतन सोममिन्द्राय पातवे ।
अथा नो वस्यसस्कृधि ॥ ४ ॥ ९।४।४
१०५१ त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः ।
अथा नो वस्यसस्कृधि ॥ ५ ॥ ९।४।५
१०५२ तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् ।
अथा नो वस्यसस्कृधि ॥ ६ ॥ ९।४।६
१०५३ अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम् ।
अथा नो वस्यसस्कृधि ॥ ७ ॥ ९।४।७
१०५४ अभ्य३र्षानपच्युतो वाजिन्त्समत्सु सासहिः ।
अथा नो वस्यसस्कृधि ॥ ८ ॥ ९।४।८
१०५५ त्वां यज्ञैरवीवृधन्पवमान विधर्मणि ।
अथा नो वस्यसस्कृधि ॥ ९ ॥ ९।४।९
१०५६ रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर ।
अथा नो वस्यसस्कृधि ॥१०॥ (धा० २२ । उ० १ । स्व० २) ॥४(चा)॥ ९।४।१०
१०५७ तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
तरत्स मन्दी धावति ॥ १ ॥ ९।५८।१ ५००
१०५८ उस्रा वेद वसूनां मर्तस्य देव्यवसः ।
तरत्स मन्दी धावति ॥ २ ॥ ९।५८।३
१०५९ ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे ।
तरत्स मन्दी धावति ॥ ३ ॥ ९।५८।२

१०६० आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे । (ऋग्वेदे) (सामवेदे)
तरत्स मन्दी धावति ॥ ४ ॥ (धा० ६ । उ० नास्ति । स्व० २) ॥५(हा)॥ ९।५८।४
१०६१ एते सोमा असृक्षत गृणानाः शवसे महे ।
मदिन्तमस्य धारया ॥ १ ॥ ९।६२।२२
१०६२ अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
सनद्वाजः परि स्रव ॥ २ ॥ ९।६२।२३
१०६३ उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः ।
गृणानो जमदग्निना ॥ ३ ॥ (धा० १५ । उ० नास्ति । स्व० ३)॥६(वि)॥ ९।६२।२४
१०६४ इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥१॥ १।९४।१
१०६५ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥२॥ १।९४।४
१०६६ शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आ वह तान्ह्यु३श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥३॥७(छौ)॥
(धा० ३७ । उ० २ । स्व० १०) १।९४।३

॥ इति द्वितीयः खण्डः ॥४॥

१०६७ प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् ।
अर्यमणं रिशादसम् ॥ १ ॥ ७।६६।७
१०६८ राया हिरण्यया मतिरियमवृकाय शवसे ।
इयं विप्रा मेधसातये ॥ २ ॥ ७।६६।८
१०६९ ते स्याम देव वरुण ते मित्र सूरिभिः सह ।
इषं स्वश्च धीमहि ॥ ३ ॥ (धा० ११ । उ० नास्ति । स्व० २)॥८(हा)॥ ७।६६।९

१०७० भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः । (ऋग्वेदे)(सामवेदे)
वसु स्पार्हं तदा भर ॥ १ ॥ ८।४५।४० १३४
१०७१ यस्य ते विश्वमानुषग्भूरेर्दत्तस्य वेदति ।
वसु स्पार्हं तदा भर ॥ २ ॥ ८।४५।४२
१०७२ यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।
वसु स्पार्हं तदा भर ॥ ३ ॥ (धा० १२ । उ० १ । स्व० ६) ॥ ९(नू) ॥ ८।४५।४१ २०७
१०७३ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
इन्द्राग्नी तस्य बोधतम् ॥ १ ॥ ८।३८।१
१०७४ तोशासा रथयावाना वृत्रहणापराजिता ।
इन्द्राग्नी तस्य बोधतम् ॥ २ ॥ ८।३८।२
१०७५ इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः।
इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥(धा० ८ । उ० १ । स्व० २)॥१०॥(टा)८।३८।३

॥ इति तृतीयः खण्डः ॥ ३ ॥

१०७६ इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
अर्कस्य योनिमासदम् ॥ १ ॥ ९।६४।२२ ४७२
१०७७ तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम् ।
सं त्वा मृजन्त्यायवः ॥ २ ॥ ९।६४।२३
१०७८ रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
पवमानस्य मरुतः ॥ ३ ॥ (धा० १४ । उ० नास्ति । स्व० १) ॥११(ल)॥ ९।६४।२४
१०७९ मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ १ ॥ ९।१०७।२१ ५१७
१०८० पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद्वने ।
देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥२॥१२(ति)॥
(धा० २४ । उ० १ । स्व० ३) ९।१०७।२२

१०८१ एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् । (ऋग्वेदे) (सामवेदे)
समादित्येभिरख्यत ॥ १ ॥ ९।६१।७
१०८२ समिन्द्रेणोत वायुना सुत एति पवित्र आ ।
सं सूर्यस्य रश्मिभिः ॥ २ ॥ ९।६१।८
१०८३ स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।
चारुर्मित्रे वरुणे च ॥ ३ ॥ (धा० ८ । उ० १ । स्व० ३) ॥१३ (टि) ॥ ९।६१।९

॥ इति चतुर्थः खण्डः ॥ ४ ॥

१०८४ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
क्षुमन्तो याभिर्मदेम ॥ १ ॥ १।३०।१३ १५३
१०८५ आ घ त्वावान् त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः ।
ऋणोरक्षं न चक्र्योः ॥ २ ॥ १।३०।१४
१०८६ आ यद् दुवः शतक्रतवा कामं जरितॄणाम् ।
ऋणोरक्षं न शचीभिः ॥ ३ ॥ (धा० १८ । उ० २ । स्व० ४) ॥१४ (टी)॥ १।३०।१५

१०८७ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
जुहूमसि द्यविद्यवि ॥ १ ॥ १।४।१ १६०
१०८८ उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद्रेवतो मदः ॥ २ ॥ १।४।२
१०८९ अथा ते अन्तमानां विद्याम सुमतीनाम् ।
मा नो अति ख्य आ गहि ॥ ३ ॥ (धा० ११ । उ० १ । स्व० नास्ति) ॥१५(कौ)॥ १।४।३

१०९० उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १ ॥ १०।१३४।१ ३७९

१०९१ दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः । (ऋग्वेदे) (सामवेदे)
पूर्वेण मघवन्पदा वयामजो यथा यमः ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ २ ॥ १०।१३४।६
१०९२ अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।
अधस्पदं तमीं कृधि यो अस्माँ अभिदासति ।
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ३ ॥१६(यौ)॥ १०।१३४।२
॥ इति पञ्चमः खण्डः ॥ ५ ॥ (धा० ४२ । उ० नास्ति । स्व० १०)

१०९३ परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
मदेषु सर्वधा असि ॥ १ ॥ ९।१८।१ ४७५
१०९४ त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः ।
मदेषु सर्वधा असि ॥ २ ॥ ९।१८।२
१०९५ त्वे विश्वे सजोषसो देवासः पीतिमाशत ।
मदेषु सर्वधा असि ॥ ३ ॥ (धा० ११ । उ० २ । स्व० २) ॥ १७(त्वा)॥ ९।१८।३

१०९६ स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
सोमो यः सुक्षितीनाम् ॥ १ ॥ ९।१०८।१३ ५८२
१०९७ यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥२॥ ॥१८(ली)॥ ९।१०८।१४
(धा० ९ । उ० नास्ति । स्व० ४)
१०९८ तं वः सखायो मदाय पुनानमभि गायत ।
शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ १ ॥ ९।१०५।१ ५६९
१०९९ सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते ।
देवावीर्मदो मतिभिः परिष्कृतः ॥ २ ॥ ९।१०५।२
११०० अयं दक्षाय साधनोऽयं शर्धाय वीतये ।
अयं देवेभ्यो मधुमत्तरः सुतः ॥ ३ ॥ ॥ १९(गि) ॥ ९।१०५।३
(धा० १७ । उ० नास्ति । स्व० ३)

११०१ सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः । (ऋग्वेदे) (सामवेदे)
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ १ ॥ ९।१०१।१० ५४८
११०२ ते पूतासो विपश्चितः सोमासो दध्याशिरः ।
सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ २ ॥ ९।१०१।१२
११०३ सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।
इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥ ३ ॥॥ २०(वा) ॥ ९।१०१।११
(धा० १० । उ० नास्ति । स्व० २)

११०४ अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥ १ ॥ ९।९७।५२ ५४१
११०५ उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥ २ ॥ ९।९७।५३
११०६ महीमे अस्य वृष नाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥३॥ २१(कि)॥
(धा० १६ । उ० १ । स्व० ३ ।) ९।९७।५४

॥ इति षष्ठः खण्डः ॥६॥

११०७ अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ १ ॥ ५।२४।१ ४४८
११०८ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ २ ॥ ५।२४।२
११०९ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥३॥२२(बा)॥
(धा० १५ । उ० नास्ति । स्व० २) ५।२४।४

१११० इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ १ ॥ १०।१५७।१ ४५२
११११ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु ॥२॥ १०।१५७।२
१११२ आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ॥३॥२३(छा)॥
(धा० १२ । उ० २ । स्व० २) १०।१५७।३

१११३-१५ प्र वोऽर्चोप ॥२४॥ (ऋग्वेदे) (सामवेदे)
[१११३ प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥१॥](न ऋग्वेदीयः)४४६
[१११४ अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥२॥](न ऋग्वेदीयः)४४५
[१११५ उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥३॥ २४(य)॥]
(धा० २ । उ० नास्ति । स्व० १) (न ऋग्वेदीयः) ४४४

इति सप्तमः खण्डः ॥ ७ ॥ इति चतुर्थप्रपाठकस्य प्रथमोऽर्धः ॥ ७ ॥ इति सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

[२]

अथ चतुर्थप्रपाठकस्य द्वितीयोऽर्धः ॥ ४ ॥

(१-१४) १ (१-३) वृषगणो वासिष्ठः; १ (४-१२), २ (१-९) असितः काश्यपो देवलो वा; २ (१०-१२), ११ भृगुर्वारुणिर्जमदग्निर्भार्गवो वा; ३, ६ भरद्वाजो बार्हस्पत्यः; ४ यजत आत्रेयः; ५ मधुच्छन्दा वैश्वामित्रः; ७ सिकता निवावरी; ८ पुरुहन्मा आंगिरसः; ९ पर्वतनारदौ काण्वौ शिखण्डिन्यावप्सरसौ काश्यपौ वा; १० अग्नये धिष्ण्यो ऐश्वराः १२ वत्सः काण्वः; १३ नृमेध आंगिरसः; १४ अत्रिर्भौमः ॥ १-२, ७, ९-११ पवमानः सोमः; ३, १२ अग्निः; ४ मित्रावरुणौ; ५, ८, १३-१४ इन्द्रः; ६ इन्द्राग्नी ॥ (१-३,), ३ त्रिष्टुप्; १ (४-१२), २, ४-६, ११-१२ गायत्री; ७ जगती; ८ प्रगाथः=(विषमा बृहती, समा सतो बृहती); ९ उष्णिक्; १० द्विपदा विराट्; १३ (१-२) ककुप्, १३ (३) पुर उष्णिक्; १४ अनुष्टुप् ॥

१११६ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥१॥ ९।९७।७ ५२४
१११७ प्र हंसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः ।
अङ्गोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥२॥ ९।९७।८
१११८ स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥३॥ ९।९७।९
१११९ प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः ।
सोमासो राये अक्रमुः ॥४॥ ९।१०।१

११२० हिन्वानासो रथा इव दधन्विरे गभस्त्योः। (ऋग्वेदे)(सामवेदे)
भरासः कारिणामिव ॥५॥ ९।१०।२

११२१ राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते।
यज्ञो न सप्त धातृभिः ॥६॥ ९।१०।३

११२२ परि स्वानास इन्दवो मदाय बर्हणा गिरा।
मधो अर्षन्ति धारया ॥७॥ ९।१०।४

११२३ आपानासो विवस्वतो जिन्वन्त उषसो भगम्।
सूरा अण्वं वि तन्वते ॥ ८ ॥ ९।१०।५

११२४ अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः।
वृष्णो हरस आयवः ॥ ९ ॥ ९।१०।६

११२५ समीचीनास आशत होतारः सप्तजानयः।
पदमेकस्य पिप्रतः ॥१०॥ ९।१०।७

११२६ नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे।
कवेरपत्यमा दुहे ॥११॥ ९।१०।८

११२७ अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम्।
सूरः पश्यति चक्षसा ॥१२॥ (धा० ५७। उ० ४। स्व० ८) ॥ १(ध्रै)॥ ९।१०।९

॥ इति प्रथमः खण्डः ॥१॥

११२८ असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः।
विदाना अस्य योजना ॥ १ ॥ ९।७।१

११२९ प्र धारा मधो अग्रियो महीरपो वि गाहते।
हविर्हविःषु वन्द्यः ॥ २ ॥ ९।७।२

११३० प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने।
सद्माभि सत्यो अध्वरः ॥ ३ ॥ ९।७।३

१६

११३१ परि यत्काव्या कविर्नृम्णा पुनानो अर्षति। (ऋग्वेदे) (सामवेदे)
स्वर्वाजी सिषासति ॥ ४ ॥ ९।७।४

११३२ पवमानो अभि स्पृधो विशो राजेव सीदति।
यदीमृण्वन्ति वेधसः ॥ ५ ॥ ९।७।५

११३३ अव्या वारे परि प्रियो हरिर्वनेषु सीदति।
रेभो वनुष्यते मती ॥ ६ ॥ ९।७।६

११३४ स वायुमिन्द्रमश्विना साकं मदेन गच्छति।
रणा यो अस्य धर्मणा ॥ ७ ॥ ९।७।७

११३५ आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः।
विदाना अस्य शक्मभिः ॥ ८ ॥ ९।७।८

११३६ अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये।
श्रवो वसूनि सञ्जितम् ॥ ९ ॥ ९।७।९

११३७ आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे।
पान्तमा पुरुस्पृहम् ॥१०॥ ९।६५।२८

११३८ आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्।
पान्तमा पुरुस्पृहम् ॥११॥ ९।६५।२९

११३९ आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा।
पान्तमा पुरुस्पृहम् ॥१२॥ (धा० ३८। उ० ५। स्व० ११) ॥२ (ण)॥ ९।६५।३०

॥ इति द्वितीयः खण्डः ॥२॥

११४० मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥१॥ ६।७।१ १७

११४१ त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते।
तव क्रतुभिरमृतत्वमायन् वैश्वानर यत्पित्रोरदीदेः ॥ २ ॥ ६।७।४

११४२ नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त। (ऋग्वेदे) (सामवेदे)
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥३(कु)॥ ६।७।२
(धा० २६। उ० १। स्व० ५)

११४३ प्र वो मित्राय गायत वरुणाय विपा गिरा।
महिक्षत्रावृतं बृहत् ॥ १ ॥ ५।६८।१

११४४ सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च।
देवा देवेषु प्रशस्ता ॥ २ ॥ ५।६८।२

११४५ ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य।
महि वां क्षत्रं देवेषु ॥३॥(धा० १३। उ० नास्ति। स्व० १) ॥४(र)॥ ५।६८।३ १४६५

११४६ इन्द्रा याहि चित्रभानो सुता इमे त्वायवः।
अण्वीभिस्तना पूतासः ॥ १ ॥ १।३।४

११४७ इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः।
उप ब्रह्माणि वाघतः ॥२॥ १।३।५

११४८ इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः।
सुते दधिष्व नश्चनः ॥३॥ (धा० १६। उ० नास्ति। स्व० ४) ॥५ (ही)॥ १।३।६

११४९ तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत्।
कृष्णा कृणोति जिह्वया ॥१॥ ६।६०।१०

११५० य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः।
द्युम्नाय सुतरा अपः ॥२॥ ६।६०।११

११५१ ता नो वाजवतीरिष आशून् पिपृतमर्वतः।
ऐन्द्रमग्निं च वोढवे ॥३॥ (धा० ७ उ० नास्ति। स्व० १) ॥६(ग)॥ ६।६०।१२

॥इति तृतीयः खण्डः ॥३॥

११५२ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति सङ्गिरम्।
मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥ ॥ ९।८६।१६ ५५

११५३ प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः। (ऋग्वेदे) (सामवेदे)
हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः ॥२॥ ९।८६।१७

११५४ आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥३॥ ॥७(ठि)॥
(धा० २८। उ० २। स्व० ३) ९।८६।१८

११५५ न किष्टं कर्मणा नशद्यश्चकार सदावृधम्।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥१॥ ८।७०।३ २४३

११५६ अषाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः ॥२॥॥८(ही)॥ ८।७०।४
(धा० १६। उ० नास्ति। स्व० ४)

॥ इति चतुर्थः खण्डः ॥ ४ ॥

११५७ सखाय आ नि षीदत पुनानाय प्रगायत।
शिशुं नः यज्ञैः परि भूषत श्रिये ॥ १ ॥ ९।१०४।१ ५६८

११५८ समी वत्सं न मातृभिः सृजता गयसाधनम्।
देवाव्यं३मदमभि द्विशवसम् ॥ २ ॥ ९।१०४।२

११५९ पुनाता दक्षसाधनं यथा शर्धाय वीतये।
यथा मित्राय वरुणाय शन्तमम् ॥ ३ ॥ ॥ ९(पि) ॥ ९।१०४।३
(धा० १५। उ० १। स्व० ३)

११६० प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥१॥ ९।१०९।१६

११६१ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥२॥ ९।१०९।१७

११६२ प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥३॥ ॥१०(पु)॥
(धा० १५। उ० १। स्व० ५।) ९।१०९।१८

११६३ ये सोमासः परावति ये अर्वावति सुन्विरे।
ये वादः शर्यणावति ॥१॥ ९।६५।२२

(ऋग्वेदे) (सामवेदे)

११६४ ये आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
ये वा जनेषु पञ्चसु ॥ २ ॥   ९।६५।२३

११६५ ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् ।
स्वाना देवास इन्दवः ॥३॥ (धा० ७ उ० १ स्व० ३) ॥ (चि)॥ ९।६५।२४

॥ इति पञ्चमः खण्डः ॥ ५ ॥

११६६ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
अग्ने त्वां कामये गिरा ॥१॥   ८।११।७   ८

११६७ पुरुत्रा हि सदृङ्ङसि दिशो विश्वा अनु प्रभुः ।
समत्सु त्वा हवामहे ॥२॥   ८।११।८

११६८ समत्स्वग्निमवसे वाजयन्तो हवामहे ।
वाजेषु चित्रराधसम् ॥३॥ (धा० १३। उ० २। स्व० २) ॥१२ (ठा)॥ ८।११।९

११६९ त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
आ वीरं पृतनासहम् ॥१॥   ८।९८।१०   ४०

११७० त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अधा ते सुम्नमीमहे ॥२॥   ८।९८।११

११७१ त्वां शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत ।
स नो रास्व सुवीर्यम् ॥३॥ (धा० १४।उ० ना० । स्व० १) ॥१३॥(ल)॥ ८।९८।१२

११७२ यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥१॥   ५।३९।१   ३४

११७३ यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।
विद्याम तस्य ते वयमकूपारस्य दावनः ॥२॥   ५।३९।२

(ऋग्वेदे) (सामवेदे)

११७४ यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥३॥ ॥१४(पी)॥ ५।३९।३
(धा० २५ । उ० १ । स्व० ४)

॥ इति षष्ठः खण्डः ॥ ६ ॥

इति चतुर्थप्रपाठके द्वितीयोऽर्धः ॥२॥ चतुर्थप्रपाठकश्च समाप्तः ॥ ४ ॥
॥ इति अष्टमोऽध्याय ॥ ८ ॥

अथ नवमोऽध्यायः ।

[१]

अथ पञ्चमप्रपाठके प्रथमोऽध्यायः ॥५॥

(१-२०) १ प्रतर्दनो दैवोदासिः; २, ३, ४ असितः काश्यपो देवलो वा; ५, ११ उचथ्य आंगिरसः; ६, ७ अमहीयुराङ्गिरसः; ८, १५ निध्रुविः काश्यपः; ९ वसिष्ठो मैत्रावरुणिः; १० सुकक्ष आंगिरसः; १२ कविर्भार्गवः; १३ देवातिथिः काण्वः; १४ भर्गः प्रागाथः; १६ अम्बरीषो वार्षागिरः ऋजिश्वा भारद्वाजश्च; १७ अग्नये धिष्ण्या ऐश्वराः; १८ उशना काव्यः; १९ नृमेध आंगिरसः; २० जेता माधुच्छन्दसः॥ १-८, ११-१२, १५-१७ पवमानः सोमः; ९, १८ अग्निः; १०, १३, १४, १९-२० इन्द्रः ॥ १-९ त्रिष्टुप्; २-८,१०-११, १५, १८ गायत्री; १२ जगती १३,१४ प्रगाथः= (विषमा बृहती, समा सतोबृहती); १६, २० अनुष्टुप्; १७ द्विपदा विराट् ; १९ उष्णिक् ॥

११७५ शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥१॥ ९।९६।१७

११७६ ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥२॥ ९।९६।१८

११७७ चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥३॥१(लु)॥
(धा० २४ । उ० ना० । स्व० ५।) ९।९६।१९

११७८ एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् ।
वर्धन्तो अस्य वीर्यम् ॥१॥   ९।८।१

(ऋग्वेदे) (सामवेदे)

११७९ पुनानासश्चमूषदो गच्छन्तो वायुमश्विना ।
ते नो धत्त सुवीर्यम् ॥२॥   ९।८।२

११८० इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
देवानां योनिमासदम् ॥३॥   ९।८।३

११८१ मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।
अनु विप्रा अमादिषुः ॥४॥   ९।८।४

११८२ देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः ।
सं गोभिर्वासयामसि ॥५॥   ९।८।५

११८३ पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः ।
परि गव्यान्यव्यत ॥६॥   ९।८।६

११८४ मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
इन्दो सखायमा विश ॥ ७ ॥   ९।८।७

११८५ नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम् ।
भक्षीमहि प्रजामिषम् ॥ ८ ॥   ९।८।९

११८६ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।
सहो नः सोम पृत्सु धाः॥९॥(धा० ३९ । उ० १ । स्व० १३) ॥(ति)२॥ ९।८।८

॥ इति प्रथमः खण्डः ॥ १ ॥

११८७ सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
वायोरिन्द्रस्य निष्कृतम् ॥ १ ॥   ९।१३।१

११८८ पवमानमवस्यवो विप्रमभि प्र गायत ।
सुष्वाणं देववीतये ॥ २ ॥   ९।१३।२

११८९ पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
गृणाना देववीतये ॥ ३ ॥   ९।१३।३

११९० उत नो वाजसातये पवस्व बृहतीरिषः ।
द्युमदिन्दो सुवीर्यम् ॥ ४ ॥   ९।१३।४

(ऋग्वेदे) (सामवेदे)

११९१ अत्या हियाना न हेतृभिरसृग्रं वाजसातये ।
वि वारमव्यमाशवः ॥ ५ ॥   ९।१३।६

११९२ ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् ।
स्वाना देवास इन्दवः ॥ ६ ॥   ९।१३।५

११९३ वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः ।
दधन्विरे गभस्त्योः ॥ ७ ॥   ९।१३।७

११९४ जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत् ।
विश्वा अप द्विषो जहि ॥ ८ ॥   ९।१३।८

११९५ अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
योनावृतस्य सीदत ॥ ९ ॥ (धा० ३९ । उ० ३ । स्व० ६) ॥ (दू) ३॥ ९।१३।९

॥ इति द्वितीयः खण्डः ॥२॥

११९६ सोमा असृग्रमिन्दवः सुता ऋतस्य धारया ।
इन्द्राय मधुमत्तमाः ॥ १ ॥   ९।१२।१

११९७ अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
इन्द्रं सोमस्य पीतये ॥ २ ॥   ९।१२।२

११९८ मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् ।
सोमो गौरी अधि श्रितः ॥ ३ ॥   ९।१२।३

११९९ दिवो नाभा विचक्षणोऽव्यो वारे महीयते ।
सोमो यः सुक्रतुः कविः ॥ ४ ॥   ९।१२।४

१२०० यः सोमः कलशेष्वा अन्तः पवित्र आहितः ।
तमिन्दुः परि षस्वजे ॥ ५ ॥   ९।१२।५

१२०१ प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि ।
जिन्वन्कोशं मधुश्चुतम् ॥ ६ ॥   ९।१२।६

१२०२ नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघाम्। (ऋग्वेदे) (सामवेदे)
हिन्वानो मानुषा युजा ॥ ७ ॥ ९।१२।७

१२०३ आ पवमान धारया रयिं सहस्रवर्चसम्।
अस्मे इन्दो स्वाभुवम् ॥ ८ ॥ ९।१२।९

१२०४ अभि प्रिया दिवः कविर्विप्रः स धारया सुतः।
सोमो हिन्वे परावति ॥ ९ ॥ (धा० ४०। उ०४। स्व० ७) ॥ ४ (भे) ॥ ९।१२।८

॥ इति तृतीयः खण्डः ॥३॥

१२०५ उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः।
वाणस्य चोदया पविम् ॥ १ ॥ ९। ०।१

१२०६ प्रसवे त उदीरते तिस्रो वाचो मखस्युवः।
यदव्य एषि सानवि ॥ २ ॥ ९।५०।२

१२०७ अव्या वारैः परि प्रियं हरिं हिन्वन्त्यद्रिभिः।
पवमानं मधुश्चुतम् ॥ ३ ॥ ९।५०।३

१२०८ आ पवस्व मदिन्तम पवित्रं धारया कवे।
अर्कस्य योनिमासदम् ॥ ४ ॥ ९।५०।४

१२०९ स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः।
एन्द्रस्य जठरं विश ॥ ५ ॥ (धा० ३१। उ०१। स्व० २) ॥ ५ (का) ॥ ९।५०।५

॥ इति चतुर्थ खण्डः ॥४॥

१२१० अया वीती परि स्रव यस्त इन्दो मदेष्वा।
अवाहन्नवतीर्नव ॥ १ ॥ ९।६१।१ ४९५

१२११ पुरः सद्य इत्थाधिये दिवोदासाय शंबरम्।
अध त्यं तुर्वशं यदुम् ॥ २ ॥ ९।६१।२

१२१२ परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्।
क्षरा सहस्रिणीरिषः ॥३॥ (धा० ११। उ० नास्ति। स्व० ३) ॥६(हि)॥ ९।६१।३

१७

१२१३ अपघ्नन्पवते मृधोऽप सोमो अराव्णः। (ऋग्वेदे) (सामवेदे)
गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥ ९।६१।२५

१२१४ महो नो राय आ भर पवमान जही मृधः।
रास्वेन्दो वीरवद्यशः ॥ २ ॥ ९।६१।२६

१२१५ न त्वा शतं च न ह्रुतो राधो दित्सन्तमा मिनन्।
यत्पुनानो मखस्यसे ॥ ३ ॥ (धा० ११। उ० २। स्व० २) ॥७(त्वा)॥ ९।६१।२७

१२१६ अया पवस्व धारया यया सूर्यमरोचयः।
हिन्वानो मानुषीरपः ॥ १ ॥ ९।६३।७ ४९३

१२१७ अयुक्त सूर एतशं पवमानो मनावधि।
अन्तरिक्षेण यातवे ॥ २ ॥ ९।६३।८

१२१८ उत त्या हरितो रथे सूरो अयुक्त यातवे।
इन्दुरिन्द्र इति ब्रुवन् ॥ ३ ॥ (धा० ११। उ० १। स्व० २) ॥ ८ (का) ॥ ९।६३।९

॥ इति पञ्चमः खण्डः ॥५॥

१२१९ अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम्।
यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १ ॥ ७।३।१

१२२० प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥२॥ ७।३।२

१२२१ उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः।
अच्छा द्यामरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥३॥९(टी)॥
(धा० १८। उ० १। स्व० ४) ७।३।३

१२२२ तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे।
स वृषा वृषभो भुवत् ॥ १ ॥ ८।९३।७ ११९

१२२३ इन्द्रः स दामने कृत ओजिष्ठः स बले हितः।
द्युम्नी श्लोकी स सोम्यः ॥ २ ॥ ८।९३।८

१२२४ गिरा वज्रो न सम्भृतः सबलो अनपच्युतः। (ऋग्वेदे)(सामवेदे)
ववक्ष उग्रो अस्तृतः ॥ ३ ॥ (धा० १७। उ० २। स्व० ७) ॥१०(छे)॥ ८।९३।९

॥ इति षष्ठः खण्डः ॥ ६ ॥

१२२५ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय।
पुनाहीन्द्राय पातवे ॥ १ ॥ ९।५१।१ ४९९

१२२६ तव त्य इन्दो अन्धसो देवा मधोर्व्याशत।
पवमानस्य मरुतः ॥ २ ॥ ९।५१।३

१२२७ दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे।
सुनोता मधुमत्तमम् ॥ ३ ॥ (धा० ११। उ० २। स्व० २)॥११(त्वा)॥९।५१।२

१२२८ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा ॥१॥ ९।७६।१ ५५८

१२२९ शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन्रथिरो गविष्टिषु।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥२॥ ९।७६।२

१२३० इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश।
प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजाँ उप माहि शश्वतः॥३॥१२(चा)॥
(धा० २७। उ० १। स्व० २)९।७६।३

१२३१ यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥ ८।४।१

१२३२ यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा।
कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रा यच्छन्त्या गहि ॥२॥१३(कि)॥
(धा० ११। उ० १। स्व० ३) ८।४।२

१२३३ उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः।
सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥१॥ ८।६१।१ २९०

१२३४ तं हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः। (सामवेदे)(ऋग्वेदे)
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥२॥१४(ची)॥
(धा० १७। उ० १। स्व० ४।) ८।६१।२

॥ इति सप्तमः खण्डः ॥७॥

१२३५ पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः।
वायुमा रोह धर्मणा ॥ १ ॥ ९।६३।२२ ४८३

१२३६ पवमान नि तोशसे रयिं सोम श्रवाय्यम्।
इन्दो समुद्रमा विश ॥ २ ॥ ९।६३।२३

१२३७ अपघ्नन्पवसे मृधः [क्रतुवित्सोम मत्सरः।
नुदस्वादेवयुं जनम्] ॥ ३ ॥ (धा० १४। उ० नास्ति। स्व० ३)॥१५(लि)॥९।६३।२४ ४९२

१२३८ अभी नो वाजसातमं [रयिमर्ष शतस्पृहम्।
इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम्] ॥ १ ॥ ९।९८।१ ५४९

१२३९ वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः।
नि नेदिष्ठतमा इषः स्याम सुम्ने ते अध्रिगो ॥ २ ॥ ९।९८।५

१२४० परि स्य स्वानो अक्षरदिन्दुरव्ये मदच्युतः।
धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥ ३ ॥१६(ली)॥ ९।९८।३
(धा० १४। उ० नास्ति। स्व० ५)

१२४१ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ १ ॥ ९।१०९।४ ४२९

१२४२ शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः॥ २॥ ९।१०९।५

१२४३ दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥ ३ ॥ १७ (हि)॥
(धा० ११। उ० नास्ति। स्व० ३) ९।१०९।६

॥ इत्यष्टमः खण्डः ॥ ८ ॥

१२४४ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्।
अग्ने रथं न वेद्यम् ॥ १ ॥ ८।८४।१ ५

(ऋग्वेदे) (सामवेदे)

१२४५ कविमिव प्रशंस्यं यं देवास इति द्विता ।
नि मर्त्येष्वादधुः ॥ २ ॥ ८।८४।२

१२४६ त्वं यविष्ठ दाशुषो नॄः पाहि शृणुही गिरः ।
रक्षा तोकमुत त्मना ॥३॥ (धा० १२ । उ० नास्ति । स्व० ४)॥१८(यी)॥ ८।८४।३

१२४७ एन्द्र नो गधि प्रियं सत्राजिदगोह्य ।
गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥ १ ॥ ८।९८।४ ३९३

१२४८ अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ २ ॥ ८।९८।५

१२४९ त्वं हि शश्वतीनामिन्द्र धर्ता पुरामसि ।
हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥३॥ (धा० २० । उ० २ । स्व० ७)॥१९(फे)॥८।९८।६

१२५० पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ १ ॥ १।११।४ ३५९

१२५१ त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।
त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ २ ॥ १।११।५

१२५२ इन्द्रमीशानमोजसाभि स्तोमैरनूषत ।
सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ ३ ॥ २०(ही)॥ १।११।८
(धा० ११ । उ० नास्ति । स्व० ४)

इति नवमः खण्डः ॥ ९ ॥

इति पञ्चमप्रपाठके प्रथमोऽर्धः ॥ ५-१ ॥

॥ नवमोऽध्यायः समाप्तः ॥ ९ ॥

अथ दशमोऽध्यायः ।

[२]

अथ पञ्चमप्रपाठकस्य द्वितीयोऽर्धः ॥ ५ ॥

(१-२३) १ पराशरः शाक्त्यः; २ शुनःशेप आजीगर्तिः स देवरातः कृत्रिमो वैश्वामित्रः; ३ असितः काश्यपो देवलो वा; ४,७, राहूगण आंगिरसः; ५ (१-४), ५ (प्रथम पादः) प्रियमेध आंगिरसः; ५ (शेषास्त्रयः पादाः) ६ (प्रथम पादः) १४ नृमेध आंगिरसः; ६ (शेषास्त्रयः पादाः) इध्मवाहो दार्ढच्युतः; ८ पवित्र आंगिरसो वा वसिष्ठो वा उभौ वा; ९ वसिष्ठो मैत्रावरुणिः; १० वत्सः काण्वः; ११ शतं वैखानसः; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः; ७ वसिष्ठो मैत्रावरुणिः); १३ वसुर्भारद्वाजः; १५ भर्गः प्रागाथः; १६ भरद्वाजो बार्हस्पत्यः; १७ मनुराप्सवः; १८ अम्बरीषो वार्षागिरः ऋजिश्वा भारद्वाजश्च; १९ अग्नयो धिष्ण्या ऐश्वराः, २० अमहीयुरांगिरसः, २१ त्रिशोकः काण्वः; २२ गोतमो राहूगणः, २३ मधुच्छन्दा वैश्वामित्रः ॥ १-७, ११-१३, १६-२० पवमानः सोमः, ८ पवमानाध्येता, ९, १४-१५, २१ (२-३), २२-२३ इन्द्रः; ९ अग्निः, २१ (१) अग्नीन्द्रौ ॥
१,९ त्रिष्टुप्; २-७, १०-११, १६, २०-२१ गायत्री; ८, १८, २३ अनुष्टुप्;
१२ (१-२), १४,१५ प्रगाथः=(बृहती, सतोबृहती); १३ (३),
१९ द्विपदा विराट्, १३ जगती, १७, २२ उष्णिक् ॥

(ऋग्वेदे) (सामवेदे)

१२५३ अक्रान्त्समुद्रः प्रथमे विधर्मन् जनयन्प्रजा भुवनस्य गोपाः ।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥ १ ।
९।९७।४० ५२९

१२५४ मत्सि वायुमिष्टये राधसे नो मत्सि मित्रावरुणा पूयमानः ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥२॥ ९।९७।४२

१२५५ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ ३ ॥ १ (टै) ॥
(धा० २८ । उ० १ । स्व० ८) ९।९७।४१ ५४२

१२५६ एष देवो अमर्त्यः पर्णवीरिव दीयते ।
अभि द्रोणान्यासदम् ॥ १ ॥ ९।३।१

१२५७ एष विप्रैरभिष्टुतोऽपो देवो वि गाहते ।
दधद्रत्नानि दाशुषे ॥ २ ॥ ९।३।६

(ऋग्वेदे) (सामवेदे)

१२५८ एष विश्वानि वार्या शूरो यन्निव सत्वभिः ।
पवमानः सिषासति ॥ ३ ॥ ९।३।४

१२५९ एष देवो रथर्यति पवमानो दिशस्यति ।
आविष्कृणोति वग्वनुम् ॥ ४ ॥ ९।३।५

१२६० एष देवो विपन्युभिः पवमान ऋतायुभिः ।
हरिर्वाजाय मृज्यते ॥ ५ ॥ ९।३।३

१२६१ एष देवो विपा कृतोऽति ह्वरांसि धावति ।
पवमानो अदाभ्यः ॥ ६ ॥ ९।३।२

१२६२ एष दिवं वि धावति तिरो रजांसि धारया ।
पवमानः कनिक्रदत् ॥ ७ ॥ ९।३।७

१२६३ एष दिवं व्यासरत्तिरो रजांस्यस्पृतः ।
पवमानः स्वध्वरः ॥ ८ ॥ ९।३।८

१२६४ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
हरिः पवित्रे अर्षति ॥ ९ ॥ ९।३।९

१२६५ एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ।
धारया पवते सुतः ॥१०॥ (धा० २४ । उ० ३ । स्व० ६) ॥ २ (दू) ॥ ९।३।१०

॥ इति प्रथमः खण्डः ॥१॥

१२६६ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः ।
गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥ ९।१५।१

१२६७ एष पुरू धियायते बृहते देवतातये ।
यत्रामृतास आशत ॥ २ ॥ ९।१५।२

१२६८ एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः ।
प्रचक्राणं महीरिषः ॥ ३ ॥ ९।१५।७

(ऋग्वेदे)(सामवेदे)

१२६९ एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा ।
यदी तुञ्जन्ति भूर्णयः ॥ ४ ॥ ९।१५।३

१२७० एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः ।
पतिः सिन्धूनां भवन् ॥ ५ ॥ ९।१५।५

१२७१ एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा ।
नृम्णा दधान ओजसा ॥ ६ ॥ ९।१५।४

१२७२ एष वसूनि पिब्दनः परुषा ययिवाँ अति ।
अव शादेषु गच्छति ॥ ८ ॥ ९।१५।६

१२७३ एतमु त्यं दश क्षिपो हरिं हिन्वन्ति यातवे ।
स्वायुधं मदिन्तमम् ॥ ८ ॥ (धा० ३१ । उ० १ । स्व० ७) ॥३(के)॥ ९।१५।८

॥ इति द्वितीयः खण्डः ॥ २ ॥

१२७४ एष उ स्य वृषा रथोऽव्यो वारेभिरव्यत ।
गच्छन्वाजं सहस्रिणम् ॥ १ ॥ ९।३८।१

१२७५ एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।
इन्दुमिन्द्राय पीतये ॥ २ ॥ ९।३८।२

१२७६ एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।
गच्छं जारो न योषितम् ॥ ३ ॥ ९।३८।४

१२७७ एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः ।
य इन्दुर्वारमाविशत् ॥ ४ ॥ ९।३८।५

१२७८ एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।
क्रन्दन्योनिमभि प्रियम् ॥ ५ ॥ ९।३८।६

१२७९ एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ।
याभिर्मदाय शुम्भते ॥६॥ (धा० २९ । उ० ८ । स्व० ४) ॥४(बी)॥ ९।३८।३

॥ इति तृतीयः खण्डः ॥ ३ ॥

१२८० एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। (ऋग्वेदे) (सामवेदे)
अव्यं वारं वि धावति ॥ १ ॥ ९।२८।१

१२८१ एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः।
विश्वा धामान्याविशन् ॥ २ ॥ ९।२८।२

१२८२ एष देवः शुभायतेऽधि योनावमर्त्यः।
वृत्रहा देववीतमः ॥ ३ ॥ ९।२८।३

१२८३ एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः।
अभि द्रोणानि धावति ॥ ४ ॥ ९।२८।४

१२८४ एष सूर्यमरोचयत्पवमानो अधि द्यवि।
पवित्रे मत्सरो मदः ॥ ५ ॥ ९।२८।५ (प्रथमः पादः) ९।२७।४ (त्रयः पादाः)

१२८५ एष सूर्येण हासते संवसानो विवस्वता।
पतिर्वाचो अदाभ्यः॥ ६ ॥ (धा० २६। उ० १। स्व० ७) ॥५(के)॥ ९।२७।५ (प्रथमः पादः)
९।२६।४ (त्रयः पादाः)

॥ इति चतुर्थः खण्डः ॥ ४ ॥

१२८६ एष कविरभिष्टुतः पवित्रे अधि तोशते।
पुनानो घ्नन्नप द्विषः ॥ १ ॥ ९।२७।१

१२८७ एष इन्द्राय वायवे स्वर्जित्परि षिच्यते।
पवित्रे दक्षसाधनः ॥ २ ॥ ९।२७।२

१२८८ एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः।
सोमो वनेषु विश्ववित् ॥ ३ ॥ ९।२७।३

१२८९ एष गव्युरचिक्रदत्पवमानो हिरण्ययुः।
इन्दुः सत्राजिदस्तृतः ॥ ४ ॥ ९।२७।४

१२९० एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः।
पुनान इन्दुरिन्द्रमा ॥ ५ ॥ ९।२७।६

१२९१ एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। (ऋग्वेदे) (सामवेदे)
देवावीरघशंसहा ॥ ६ ॥ (धा० ३१। उ० ३। स्व० ५) ॥६(गु)॥ ९।२८।६

॥ इति पञ्चमः खण्डः ॥ ५ ॥

१२९२ स सुतः पीतये वृषा सोमः पवित्रे अर्षति।
विघ्नन्रक्षांसि देवयुः ॥ १ ॥ ९।३७।१

१२९३ स पवित्रे विचक्षणो हरिरर्षति धर्णसिः।
अभि योनिं कनिक्रदत् ॥ ॥ ९।३७।२

१२९४ स वाजी रोचनं दिवः पवमानो वि धावति।
रक्षोहा वारमव्ययम् ॥ ३ ॥ ९।३७।३

१२९५ स त्रितस्याधि सानवि पवमानो अरोचयत्।
जामिभिः सूर्यं सह ॥ ४ ॥ ९।३७।४

१२९६ स वृत्रहा वृषा सुतो वरिवोविददाभ्यः।
सोमो वाजमिवासरत् ॥ ५ ॥ ९।३७।५

१२९७ स देवः कविनेषितोऽभि द्रोणानि धावति।
इन्दुरिन्द्राय मंहयन् ॥ ६ ॥ (धा० २१। उ० २। स्व० ७) ॥७(खे)॥ ९।३७।६

॥ इति षष्ठः खण्डः ॥ ६ ॥

१२९८ यः पावमानीरध्येत्यृषिभिः संभृतं रसम्।
सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ १ ॥ ९।६७।३१

१२९९ पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ २ ॥ ९।६७।३२

१३०० पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः।
ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥ ३ ॥ (न ऋग्वेदीयः)

१३०१ पावमानीर्दधन्तु न इमं लोकमथो अमुम्।
कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः ॥ ४ ॥ (न ऋग्वेदीयः)

१३०२ येन देवाः पवित्रेणात्मानं पुनते सदा। (ऋग्वेदे) (सामवेदे)
तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥ ५ ॥ (न ऋग्वेदीयः)

१३०३ पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम्।
पुण्यांश्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥ ६ ॥ ८ (ती)॥ (न ऋग्वेदीयः)
(धा० ४४। उ० १। स्व० ४)

॥ इति सप्तमः खण्डः ॥ ७ ॥

१३०४ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १ ॥ ७।१२।१

१३०५ स मह्ना विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः।
स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥२॥ ७।१२।२

१३०६ त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥३॥९(ही)॥ ७।१२।३
(धा० २१। उ० नास्ति। स्व० ४)

१३०७ महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव।
स्तोमैर्वत्सस्य वावृधे ॥ १ ॥ ८।६।१

१३०८ कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्।
जामि ब्रुवत आयुधा ॥ २ ॥ ८।६।३

१३०९ प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः।
विप्रा ऋतस्य वाहसा ॥ ३ ॥ (धा० ८। उ० १। स्व० ३) ॥१०(टि)॥ ८।६।२

॥ इति अष्टमः खण्डः ॥ ८ ॥

१३१० पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत।
जीरा अजिरशोचिषः ॥ १ ॥ ९।६६।२५

१३११ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः।
हरिश्चन्द्रो मरुद्गणः ॥ २ ॥ ९।६६।२६

१३१२ पवमान व्यश्नुहि रश्मिभिर्वाजसातमः। (ऋग्वेदे) (सामवेदे)
दधत्स्तोत्रे सुवीर्यम् ॥३॥ (धा० ११। उ० नास्ति। स्व० १) ॥११(ह)॥ ९।६६।२७

१३१३ परीतो षिञ्चता सुतं सोमो य उत्तमं हविः।
दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥१॥ ९।१०७।१

१३१४ नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः।
सुते चित्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥२॥ ९।१०७।२

१३१५ परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥३॥ १२(खा)॥ ९।१०७।३
(धा० १६। उ० २। स्व० २)

१३१६ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत्।
पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत् ॥१॥ ९।८२।१

१३१७ पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे।
स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे॥२॥ ९।८२।३

१३१८ कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि।
अपसेधन्दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम्॥३॥१३(गू)॥
(धा० २६। उ० ३। स्व० ६) ९।८२।२

॥ इति नवमः खण्डः ॥ ९ ॥

१३१९ श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत।
वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥१॥ ८।९९।३ २६७

१३२० अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः।
यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥२॥१४(लू)॥ ८।९९।४
(धा० १९। उ० नास्ति। स्व० ६)

१३२१ यत इन्द्र भयामहे ततो नो अभयं कृधि।
मघवन्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥१॥ ८।६१।१३ २७७

१३२२ त्वं हि राधसस्पते राधसो महः क्षयस्यासि विधर्ता।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥२॥१५(या)॥ ८।६१।१४
(धा० २०। उ० ३। स्व० २)

॥ इति दशमः खण्डः ॥ १० ॥

१३२३ त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे । (ऋग्वेदे) (सामवेदे)
पवस्व मंहयद्रयिः ॥ १॥ ९।६७।१

१३२४ त्वं सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः ।
इन्दुः सत्राजिदस्तृतः ॥२॥ ९।६७।२

१३२५ त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।
द्युमन्तं शुष्ममा भर ॥३॥ (धा० १४ । उ० नास्ति । स्व० ४) ॥१६(ली)॥ ९।६७।३

१३२६ पवस्व देववीतय इन्दो धाराभिरोजसा ।
आ कलशं मधुमान्त्सोम नः सदः ॥ १ ॥ ९।१०६।७ ५७१

१३२७ तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।
त्वां देवासो अमृताय कं पपुः ॥ २ ॥ ९।१०६।८

१३२८ आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ३ ॥ ॥१७(वौ)॥ ९।१०६।९
(धा० १५ । उ० नास्ति । स्व० नास्ति)

१३२९ परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥ १ ॥ ९।९८।७ ५५२

१३३० द्विर्यं पञ्च स्वयशसं सखायो अद्रिसंहतम् ।
प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ २ ॥ ९।९८।६

१३३१ इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
नरे च दक्षिणावते वीराय सदनासदे ॥ ३ ॥ ॥१८(जी)॥ ९।९८।१० १६७२
(धा० २२ । उ० ३ । स्व० ४)

१३३२ पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १ ॥ ९।१०९।१० ४३०

१३३३ प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥ २ ॥ ९।१०९।११

१३३४ शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥३॥१९(का)॥
(धा० ११ । उ० १ । स्व० २) ९।१०९।१२

१३३५ उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । (ऋग्वेदे) (सामवेदे)
इन्दुं देवा अयासिषुः ॥ १ ॥ ९।६१।१३ ४८७,७६२

१३३६ तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव ।
य इन्द्रस्य हृदं सनिः ॥ २ ॥ ९।६१।१४

१३३७ अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम् ।
वर्धा समुद्रमुक्थ्य ॥३॥ (धा० ११ । उ० नास्ति । स्व० ४) ॥२०(ही)॥ ९।६१।१५

॥ इति एकादशः खण्डः ॥११॥

१३३८ आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
येषामिन्द्रो युवा सखा ॥ १ ॥ ८।४५।१ १३३

१३३९ बृहन्निदिध्म एषां भूरि शस्त्रं पृथुः स्वरुः ।
येषामिन्द्रो युवा सखा ॥ २ ॥ ८।४५।२

१३४० अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः ।
येषामिन्द्रो युवा सखा ॥३॥ (धा० ३ । उ० २ । स्व० १) ॥२१(ठ)॥ ८।४५।३

१३४१ य एक इद्विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ १ ॥ १।८४।७ ३८९

१३४२ यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।
उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥ २ ॥ १।८४।९

१३४३ कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् ।
कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥३॥ (धा० ११ । उ० १ । स्व० ३) ॥२२(कि)॥
१।८४।८

१३४४ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥ १।१०।१ ३४२

१३४५ यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्वम् ।
तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ २ ॥ १।१०।२

१३४६ युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । (ऋग्वेदे) (सामवेदे)
अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥ ३ ॥२३(षी)॥ १।१०।३
(धा० २५ । उ० ३ । स्व० ४)

॥ इति द्वादशः खण्डः ॥१२॥

॥ इति पञ्चमप्रपाठके द्वितीयोऽर्धः, पञ्चमप्रपाठकश्च समाप्तः ॥ ५-२ ॥

॥ इति दशमोऽध्यायः ॥ १० ॥

अथ एकादशोऽध्यायः ।

[१]

अथ षष्ठप्रपाठके प्रथमोऽर्धः ॥ ६ ॥

(१-११) मेधातिथिः काण्वः, २, १० वसिष्ठो मैत्रावरुणिः; ३ प्रगाथः काण्वः, ४ पराशरः शाक्त्यः, ५ प्रगाथो घौरः काण्वः; ६ मेध्यातिथिः काण्वः; ७ त्र्यरुणत्रैवृष्णः, त्रसदस्युः पौरुकुत्स्यः, ८ अग्नयो धिष्ण्या ऐश्वराः; ९ हिरण्यस्तूप आङ्गिरसः; १० सार्पराज्ञी ॥ १ आप्रीसूक्तं= (१ इध्मः समिद्धोऽग्निर्वा, २ तनूनपात्, ३ नराशंसः, ४ इळः); २ आदित्याः ३, ५-६ इन्द्रः, ४, ७-९ पवमानः सोमः; १० अग्निः; ११ आत्मा, सूर्यो वा । १-३ ११ गायत्री; ४ त्रिष्टुप्; ५-६ प्रगाथः= (विषमा बृहती, समा सतोबृहती); ७ पिपीलिकमध्या अनुष्टुप्; ८ द्विपदा विराट्; ९ जगती; १० विराट् ॥

१३४७ सुषमिद्धो न आ वह देवाँ अग्ने हविष्मते ।
होतः पावक यक्षि च ॥ १ ॥ १।१३।१

१३४८ मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
अद्या कृणुह्यूतये ॥ २ ॥ १।१३।२

१३४९ नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये ।
मधुजिह्वं हविष्कृतम् ॥ ३ ॥ १।१३।३

१३५० अग्ने सुखतमे रथे देवाँ ईळित आ वह ।
असि होता मनुर्हितः ॥४॥ (धा० १८ । उ० नास्ति । स्व० २)॥१(रा)॥ १।१३।४

१३५१ यदद्य सूर उदितेऽनागा मित्रो अर्यमा ।
सुवाति सविता भगः ॥ १ ॥ ७।६६।४

१३५२ सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः । (ऋग्वेदे)(सामवेदे)
ये नो अंहोऽतिपिप्रति ॥ २ ॥ ७।६६।५

१३५३ उत स्वराजो अदितिरदब्धस्य व्रतस्य ये ।
महो राजान ईशते ॥ ३ ॥ (धा० ११ । उ० २ । स्व० ३) ॥२(ग्वि)॥ ७।६६।६

१३५४ उ त्वा मदन्तु सोमाः कृणुष्व राधो अद्रिवः ।
अव ब्रह्मद्विषो जहि ॥ १ ॥ ८।६४।१ १९४

१३५५ पदा पणीनराधसो नि बाधस्व महाँ असि ।
न हि त्वा कश्च न प्रति ॥ २ ॥ ८।६४।२

१३५६ त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् ।
त्वं राजा जनानाम् ॥ ३ ॥ (धा० १३ । उ० २ । स्व० ३) ॥३(ठि)॥ ९।९७।३७

॥ इति प्रथमः खण्डः ॥१॥

१३५७ आ जागृविर्विप्र ऋतं मतीनां सोमः पुनानो असदच्चमूषु ।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ १ ॥ ९।९७।३७

१३५८ स पुनान उप सूरे दधान ओभे अप्रा रोदसी वी ष आवः ।
प्रिया चिद्यस्य प्रियसास ऊती सतो धनं कारिणे न प्र यंसत् ॥२॥ ९।९७।३८

१३५९ स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावित् ।
यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमिष्णन् ॥३॥ ४(तै)॥
(धा० १९ । उ० १ । स्व० ८) ९।९७।३९

१३६० मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥ १ ॥ ८।१।१ २४२

१३६१ अवक्रक्षिणं वृषभं यथा जुवं गां न चर्षणीसहम् ।
विद्वेषणं संवननमुभयङ्करं मंहिष्ठमुभयाविनम् ॥ २ ॥ ५(यी)॥ ८।१।२
(धा० १७ । उ० ना० । स्व० ४)

१३६२ उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ १ ॥ ८।३।१५

१३६३ कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमाशत। (ऋग्वेदे) (सामवेदे)
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥ २ ॥ ६(ला)॥
(धा० १४। उ० नास्ति। स्व० २) ८।३।१६

१३६४ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः।
द्विषस्तरध्या ऋणया न ईरसे ॥ १ ॥ ९।११०।१ ४२८
१३६५ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः।
गोजीरया रंहमाणः पुरन्ध्या ॥ २॥ ९।११०।३
१३६६ अनु हि त्वा सुतं सोम मदामसि [महे समर्यराज्ये।
वाजाँ अभि पवमान प्र गाहसे] ॥ ३ ॥ ७ (ल) ॥ ९।११०।२ ४३२
(धा० ९। उ० नास्ति। स्व० १)

१३६७ परि प्र धन्व[इन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय] ॥ १ ॥ ९।१०९।१ ४२७
१३६८ एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ २ ॥ ९।१०९।३
१३६९ इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः ॥३॥८(ला)॥
(धा० ९। उ० नास्ति। स्व० २) ९।१०९।२

॥ इति द्वितीयः खण्डः ॥२॥

१३७० सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ॥१॥ ९।६९।६
१३७१ उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि।
पवमानः सन्तनिः सुन्वतामिव मधुमान् द्रप्सः परि वारमर्षति॥२॥९।६९।२
१३७२ उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम्।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥३॥९(ग)॥
(धा० २६। उ० ३। स्व० १) ९।६९।४

१३७३ अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम्।
दूरेदृशं गृहपतिमथव्युम् ॥ १ ॥ ७।१।१ ७२
१९

१३७४ तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्। (ऋग्वेदे)(सामवेदे)
दक्षाय्यो यो दम आस नित्यः ॥ २ ॥ ७।१।२
१३७५ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ।
त्वां शश्वन्त उप यन्ति वाजाः ॥३॥ (धा० २८। उ० ३। स्व० ४)॥१०(डी)॥ ७।१।३
१३७६ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः।
पितरं च प्रयन्त्स्वः ॥ १ ॥ १०।१८९।१ ६३०
१३७७ अन्तश्चरति रोचनास्य प्राणादपानती।
व्यख्यन्महिषो दिवम् ॥ २ ॥ १०।१८९।२ ६३१
१३७८ त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते।
प्रति वस्तोरह द्युभिः ॥३॥ (धा० १७। उ० २। स्व० ३) ॥११(छि)॥ १०।१८९।३ ६३२
॥ इति तृतीयः खण्डः ॥ ३ ॥ इति षष्ठप्रपाठके प्रथमोऽर्धः ॥ ६-१ ॥
॥ एकादशोऽध्यायः समाप्तः ॥ ११ ॥

अथ द्वादशोऽध्यायः।

[२]

अथ षष्ठप्रपाठके द्वितीयोऽर्धः ॥ ६-२ ॥

(१-२०) १ (१-२) गोतमो राहूगणः; १ (३), ८, ११ वसिष्ठो मैत्रावरुणिः; २, ७ भरद्वाजो बार्हस्पत्यः; ३ प्रजापतिर्वैश्वामित्रो वाच्यो वा; ४,१३ सोभरिः काण्वः; ५ मेधातिथि-मेध्यातिथी काण्वौ; ६ (१) ऋजिश्वा भारद्वाजः; ६ (२) ऊर्ध्वसद्मा आंगिरसः, ९ तिरश्चीराङ्गिरसः; १० सुतंभर आत्रेयः; १२,१९ नृमेध-पुरुमेधावाङ्गिरसौ; १४ शुनःशेप आजीगर्तिः; १५ नोधा गौतमः १६ मेध्यातिथिः काण्वः; १७ रेणुर्वैश्वामित्रः; १८ कुत्स आङ्गिरसः; २० अगस्त्यो मैत्रावरुणः॥
१-२, ७, १०, १३-१४ अग्निः; ३, ६, ८, ११, १५,१७-१८ पवमानः सोमः; ४,५,९,१२, १६,१९,२० इन्द्रः ॥ १-२,७,१०,१४, गायत्री; ३,९,१९ (१-२) २० (२-३) अनुष्टुप्; ४, ६ १३ काकुभः प्रगाथः= (विषमा ककुप्, समा सतोबृहती); ५, १९ (३), बृहती; ८, ११, १५, १८ त्रिष्टुप्; १२, १६ प्रगाथः = (विषमा बृहती, समा सतोबृहती); १७ जगती; २० (१) स्कन्धोग्रीवी बृहती ॥

१३७९ उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये।
आरे अस्मे च शृण्वते ॥ १ ॥ १।७४।१

१३८० यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। (ऋग्वेदे) (सामवेदे)
अरक्षद्दाशुषे गयम् ॥ २ ॥ १।७४।२
१३८१ स नो वेदो अमात्यमग्नी रक्षतु शन्तमः।
उतास्मान्पात्वंहसः ॥ ३ ॥ ७।१५।३
१३८२ उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि।
धनञ्जयो रणेरणे ॥ ४ ॥ (धा० १९। उ० १। स्व० ३) ॥ १ (ति) ॥ १।७४।३
॥ इति प्रथमः खण्डः ॥१॥

१३८३ अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः।
अरं वहन्त्याशवः ॥ १ ॥ ६।१६।४३
१३८४ अच्छा नो याह्या वहाभि प्रयांसि वीतये।
आ देवान्त्सोमपीतये ॥ २ ॥ ६।१६।४४
१३८५ उदग्ने भारत द्युमदजस्रेण दविद्युतत्।
शोचा वि भाह्यजर ॥३॥ (धा० १७। उ० नास्ति। स्व० ४)॥२(यी)॥ ६।१६।४५

१३८६ प्र सुन्वानायान्धसो मर्तो न वष्ट तद्वचः।
अप श्वानमराधसं हता मखं न भृगवः ॥ १ ॥ ९।१०१।१३ ५५३;७७४
१३८७ आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः।
सरज्जारो न योषणां वरो न योनिमासदम् ॥ २ ॥ ९।१०१।१४
१३८८ स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी।
हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥ ३ ॥ ३ (खै) ॥ ९।१०१।१५
(धा० २१। उ० २। स्व० ८।)

१३८९ अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि।
युधेदापित्वमिच्छसे ॥ १ ॥ ८।२१।१३ ३९९
१३९० न की रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः।
यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥ २ ॥४(पि)॥ ८।२१।१४
(धा० १५। उ० १। स्व० ३)

१३९१ आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये। (ऋग्वेदे) (सामवेदे)
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ १ ॥ ८।१।२४ २४५
१३९२ आ त्वा रथे हिरण्यये हरी मयूरशेप्या।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥ २ ॥ ८।१।२५
१३९३ पिबा त्व३स्य गिर्वणः सुतस्य पूर्वपा इव।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥३ ॥५(प)॥ ८।१।२६
(धा० २०। उ० १। स्व० १)

१३९४ आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम्।
वनप्रक्षमुदप्रुतम् ॥ १ ॥ ९।१०८।७ ५८०
१३९५ सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥२॥६(या)॥ ९।१०८।८
(धा० १२। उ० नास्ति। स्व० २)
॥ इति द्वितीयः खण्डः ॥ २ ॥

१३९६ अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया।
समिद्धः शुक्र आहुतः ॥ १ ॥ ६।१६।३४ ४
१३९७ गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे।
सीदन्नृतस्य योनिमा ॥ २ ॥ ६।१६।३५
१३९८ ब्रह्म प्रजावदा भर जातवेदो विचर्षणे।
अग्ने यद्दीदयद्दिवि ॥३॥ (धा० १० । उ० नास्ति। स्व० १) ॥३(व)॥ ६।१६।३६
१३९९ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम्।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥ १ ॥ ९।९७।१ ५२६
१४०० भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन्।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥ ९।९७।२
१४०१ समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे।
अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३॥८(रि)॥
(धा० १८। उ० नास्ति। स्व० ३) ९।९७।३

(ऋग्वेदे) (सामवेदे)

१४०२ एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु ॥ १ ॥ ८।९५।७ ३५०

१४०३ इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य ॥ २ ॥ ८।९५।८

१४०४ इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥ ३ ॥ ९ (यी) ॥ ८।९५।९

॥ इति तृतीय खण्डः ॥ ३ ॥ (धा० १२ । उ० नास्ति । स्व० ४)

१४०५ अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः ।
देवस्य द्रविणस्यवः ॥ १ ॥ ५।१३।२

१४०६ अग्निर्जुषत नो गिरो होता यो मानुषेष्वा ।
स यक्षद्दैव्यं जनम् ॥ २ ॥ ५।१३।३

१४०७ त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः ।
त्वया यज्ञं वि तन्वते ॥३॥ (धा० १३ । उ० नास्ति । स्व० ३) ॥१०(रि)॥ ५।१३।४

१४०८ अभि त्रिपृष्ठं वृषणं वयोधामङ्गोषिणमवावशंत वाणीः ।
वना वसानो वरुणो न सिन्धुर्वि रत्नधा दयते वार्याणि ॥ १ ॥ ९।९०।२ ५२८

१४०९ शूरग्रामः सर्ववीरः सहावान् जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाढः साह्वान्पृतनासु शत्रून् ॥२॥ ९।९०।३

१४१० उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
अपः सिषासन्नुषसः स्वऽ३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥३॥११(पू)॥
(धा० ३० । उ० १ । स्व० ६) ९।९०।४

१४११ त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः
त्वं वृत्राणि हं स्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ १ ॥ ८।९०।५

१४१२ तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥२॥१२(न)॥
(धा० १४ । उ० १ स्व० १) ८।९०।६

(ऋग्वेदे) (सामवेदे)

१४१३ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥ ८।१९।३

१४१४ अपां नपातं सुभगं सुदीदितिमग्निमु श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥२॥१३(ना)॥
(धा० १४ । उ० १ । स्व० २) १।२२।७

॥ इति चतुर्थः खण्डः ॥ ५ ॥

१४१५ यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।
स यन्ता शश्वतीरिषः ॥ १ ॥ १।२७।७

१४१६ न किरस्य सहन्त्य पर्येता कयस्य चित् ।
वाजो अस्ति श्रवाय्यः ॥ २ ॥ १।२७।८

१४१७ स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता ।
विप्रेभिरस्तु सनिता ॥ ३ ॥ (धा० १८ । उ०२ । स्व० २) ॥१४(ठा)॥ १।२७।९

१४१८ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ १ ॥ ९।९३।१ ५३८

१४१९ सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥२॥ ९।९३।२

१४२० उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥३॥१३(वू)॥
(धा० ३० । उ० नास्ति । स्व० ६) ९।९३।३

१४२१ पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥ १ ॥ ८।३।१ २३९

१४२२ भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।
अस्माँ चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥२॥१६(ल)॥
(धा० १४ । उ० नास्ति । स्व० १) ८।३।२

१४२३ त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि । (ऋग्वेदे) (सामवेदे)
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥ १ ॥ ९।७०।१ ५६०

१४२४ स भक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥ २ ॥
९।७०।२

१४२५ ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।
येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥३॥१७(चे)॥
(धा०३२ । उ०१ । स्व०७) ९।७०।३

॥ इति पञ्चमः खण्डः ॥ ५ ॥

१४२६ अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥ १ ॥ ९।९७।४९

१४२७ अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥ १ ॥ ९।९७।५०

१४२८ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥३॥१८(त्वे)॥
(धा० २१ । उ०२ । स्व०७) ९।९७।५१

१४२९ यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।
तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् । ॥ १ ॥ ८।८९।५

१४३० तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।
तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥ २ ॥ ८।८९।६

१४३१ आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।
घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥३॥१९(पे)॥
(धा० ३० । उ० १ । स्व० ७) ८।८९।७

१४३२ मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः । ॥ १ ॥ १।१७५।१

(ऋग्वेदे) (सामवेदे)

१४३३ आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।
सहावाँ इन्द्र सानसिः पृतनाषाडमर्त्यः ॥ २ ॥ १।१७५।२

१४३४ त्वं हि शूरः सनिता चोदयो मनुषो रथम् ।
सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥३॥२०(थि) १।१७५।३
(धा० २५ । उ० ३ । स्व० ३)

॥ इति षष्ठ खण्डः ॥ ६ ॥

॥ इति षष्ठप्रपाठके द्वितीयोऽर्धः ॥ ६-२ ॥

॥ इति द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

[३]

अथ षष्ठप्रपाठके तृतीयोऽर्धः ॥ ६-३ ॥

(१-२०) १ कविर्भार्गवः; २,९,१६ भरद्वाजो बार्हस्पत्यः; ३ आसतः काश्यपो देवलो वा, ४ सुकक्ष आंगिरसः; ५ विभ्राट्सौर्यः; ६,८ वसिष्ठो मैत्रावरुणिः; १०-१७ भार्गवः प्रागाथः, १०, १७ विश्वामित्रो गाथिनः; ११ मेधातिथिः काण्वः; १२ शतं वैखानसाः; १३ यजत आत्रेयः; १४ मधुच्छन्दा वैश्वामित्रः; १५ उशना काव्यः; १८ हर्यतः प्रागाथः; १९ बृहद्दिव आथर्वणः, २० गृत्समदः शौनकः ॥ १, ३, १५ पवमानः सोमः; २,४,६,७,१४,१९,२० इन्द्रः; ८ सरस्वान्, ९ सरस्वती, १० सविता, ११ ब्रह्मणस्पतिः; १२ अग्निः पवमानः; १३ मित्रावरुणौ, १६—१८ अग्निः; १८ हवींषि वा; ५ सूर्यः ॥ १, ३-४, ८-१४,१६ (२-३) १८ गायत्री; २ (१-३) अनुष्टुप्, २ (४) बृहती, ६,७ प्रगाथः= (विषमा बृहती, समा सतोबृहती), १६ (१) वर्धमाना, १९ त्रिष्टुप्, २० (१) अष्टिः; २० (२-३) अतिशक्वरी, ५ जगती ॥ १५

१४३५ पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि ।
अयक्ष्मा बृहतीरिषः ॥ १ ॥ ९।४९।१

१४३६ तया पवस्व धारया यया गाव इहागमन् ।
जन्यास उप नो गृहम् ॥ २ ॥ ९।४९।२

१४३७ घृतं पवस्व धारया यज्ञेषु देववीतमः ।
अस्मभ्यं वृष्टिमा पव ॥ ३ ॥ ९।४९।३

(ऋग्वेदे) (सामवेदे)

१४३८ स न ऊर्जे व्य३ऽव्ययं पवित्रं धाव धारया ।
देवासः शृणवन् हि कम् ॥ ४ ॥ ९।४२।४

१४३९ पवमानो असिष्यदद्रक्षांस्यपजङ्घनत् ।
प्रत्नवद्रोचयन्रुचः ॥ ५ ॥ (धा० २२ । उ० १ । स्व० ४) ॥ १ (ची) ॥ ९।४९।५

१४४० प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरङ्गमाय जग्मयेऽपश्चाददध्वने नरः ॥ १ ॥ ६।४२।१ ३५२

१४४१ एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।
अमत्रेभिर्ऋजीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥ २ ॥ ६।४२।२

१४४२ यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
वेदा विश्वस्य मेधिरो धृषत्तन्तमिदेषते ॥ ३ ॥ ६।४२।३

१४४३ अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।
कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत् ॥ ४ ॥२(ठ)॥ ६।४२।४
(धा० २३ । उ० २ । स्व० १)

॥ इति प्रथमः खण्डः ॥ १ ॥

१४४४ बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे ।
सोमाय गाथमर्चत ॥ १ ॥ ९।११।४

१४४५ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन ।
मधावा धावता मधु ॥ २ ॥ ९।११।५

१४४६ नमसेदुप सीदत दध्नेदभि श्रीणीतन ।
इन्दुमिन्द्रे दधातन ॥ ३ ॥ ९।११।६

१४४७ अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।
देवेभ्यो अनुकामकृत् ॥ ४ ॥ ९।११।७

१४४८ इन्द्राय सोम पातवे मदाय परि षिच्यसे ।
मनश्चिन्मनसस्पतिः ॥ ५ ॥ ९।११।८
२०

१४४९ पवमान सुवीर्यं रयिं सोम रिरीहि णः ।
इन्दविन्द्रेण नो युजा ॥ ६ ॥ (धा० ३२ । उ० नास्ति । स्व०६) ॥३(यू)॥ ९।११।९

१४५० उद्धेदभि श्रुतामघं वृषभं नर्यापसम् ।
अस्तारमेषि सूर्य ॥ १ ॥ ८।९३।१ १२५

१४५१ नव यो नवतिं पुरो बिभेद बाह्वोजसा ।
अहिं च वृत्रहावधीत् ॥ २ ॥ ८।९३।२

१४५२ स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् ।
उरुधारेव दोहते ॥ ३ ॥ (धा० ९ । उ० १ । स्व० ४) ॥ ४ (ती)॥ ८।९३।३

॥ इति द्वितीयः खण्डः ॥ २ ॥

१४५३ विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥१॥
१०।१७०।१ ६२८

१४५४ विभ्राड् बृहत्सुभृतं वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितम् ।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥२॥ १०।१७०।२

१४५५ इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥३॥५(जि)॥
(धा० २७ । उ० ३ । स्व० ३) १०।१७०।३

१४५६ इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥१॥ ७।३२।२६

१४५७ मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥ २ ॥ ६(ल)॥ ७।३२।२७
(धा० ९ । उ० नास्ति । स्व० १)

१४५८ अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥१॥ ८।६१।१७

(ऋग्वेदे) (सामवेदे)

१४५९ प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो वीर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥२॥७(वी)॥ ८।६१।१८
(धा० १५ । उ० नास्ति । स्व० ४)

॥ इति तृतीयः खण्डः ॥ ३ ॥

१४६० जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः ।
सरस्वन्तं हवामहे ॥१॥ (धा० ३ । उ० नास्ति । स्व० नास्ति) ॥८(रौ)॥ ७।९६।४

१४६१ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।
सरस्वती स्तोम्या भूत् ॥१॥(धा० १। उ० नास्ति । स्व० नास्ति) ॥९(हौ)॥ ६।६१।१०

१४६२ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥ १ ॥ ३।६२।१०

१४६३ सोमानां स्वरणं [कृणुहि ब्रह्मणस्पते ।]
[कक्षीवन्तं य औशिजः] ॥ २ ॥ १।१८।१ १३९

१४६४ अग्न आयूंषि पवसे [आसुवोर्जमिषं च नः ।]
[आरे बाधस्व दुच्छुनाम्]॥३॥(धा० २ । उ० नास्ति । स्व० १)॥१०(य)॥ ९।६६।१९ ६२७। १५१८

१४६५ ता नः शक्तं पार्थिवस्य [महो रायो दिव्यस्य ।]
[महि वां क्षत्रं देवेषु] ॥ १ ॥ ५।६८।३ ११६५

१४६६ ऋतमृतेन सपन्तेषिरं दक्षमाशाते ।
अद्रुहा देवौ वर्धेते ॥ २ ॥ ५।६८।४

१४६७ वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः ।
बृहन्तं गर्तमाशाते ॥ ३ ॥ (धा० ५ । उ० १ । स्व० २) ॥११(पा)॥ ५।६८।५

१४६८ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना दिवि ॥ १ ॥ १।६।१

१४६९ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥ २ ॥ १।६।२

(ऋग्वेदे) (सामवेदे)

१४७० केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथाः ॥ ३ ॥ (धा० ७ । उ० नास्ति । स्व० १) ॥१२(य)॥ १।६।३

॥ इति चतुर्थः खण्डः ॥ ४ ॥

१४७१ अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ १ ॥ ९।८८।१

१४७२ स ईं रथो न भुरिषाडयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥२॥ ९।८८।२

१४७३ शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥३॥१३(घी)॥
(धा० २६ । उ० ४ । स्व० ४) ९।८८।७

१४७४ त्वमग्ने यज्ञानां होता विश्वेषां हितः ।
देवेभिर्मानुषे जने ॥ १ ॥ ६।१६।१ २

१४७५ स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः ।
आ देवान्वक्षि यक्षि च ॥ २ ॥ ६।१६।२

१४७६ वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा ।
अग्ने यज्ञेषु सुक्रतो ॥३॥ (धा० ६ । उ० नास्ति । स्व० नास्ति) ॥१४(हौ)॥ ६।१६।३

१४७७ होता देवो अमर्त्यः पुरस्तादेति मायया ।
विदथानि प्रचोदयन् ॥ १ ॥ ३।२७।७

१४७८ वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते ।
विप्रो यज्ञस्य साधनः ॥ २ ॥ ३।२७।८

१४७९ धिया चक्रे वरेण्यो भूतानां गर्भमा दधे ।
दक्षस्य पितरं तना ॥ ३ ॥ (धा० १३ । उ० नास्ति । स्व० २)१५(रा)॥ ३।२७।९

॥ इति पञ्चमः खण्डः ॥ ५ ॥

१४८० आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् ।
रसा दधीत वृषभम् ॥ १ ॥ ८।७२।१३

१४८१ ते जानत स्वमोक्यं३ सं वत्सासो न मातृभिः ।　(ऋग्वेदे) (सामवेदे)
मिथो नसन्त जामिभिः ॥ २ ॥　८।७२।१४

१४८२ उप स्रक्केषु बप्सतः कृण्वते धरुणं दिवि ।
इन्द्रे अग्ना नमः स्वः ॥ ३ ॥ (धा० १२ । उ० १ । स्व० १) ॥१६(च)॥　८।७२।१५

१४८३ तदिदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥१॥　१०।१२०।१

१४८४ वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ २ ॥　१२।१२०।२

१४८५ त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः॥३॥१७(णी)॥
(धा० २३ । उ० ५ । स्व० ४)　१०।१२०।३

१४८६ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना
सुतं यथावशम् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं
सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥ १ ॥　२।२२।१　४५७

१४८७ साकं जातः क्रतुना साकमोजसा ववक्षिथ
साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
दाता राध स्तुवते काम्यं वसु
प्रचेतन सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥ २ ॥　२।२२।३

१४८८ अध त्विषीमाँ अभ्योजसा कृविं युधाभवदा
रोदसी अपृणदस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेमरिच्यत प्र चेतय
सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रम् ॥ ३ ॥
(धा० ५४ । उ० २ । स्व० १३) ॥ (१८) थि ॥　२।२२।२

॥ इति षष्ठः खण्डः ॥६॥ इति षष्ठप्रपाठकेः तृतीयोऽर्धः षष्ठः प्रपाठकश्च समाप्तः ॥६॥
॥ इति त्रयोदशोऽध्यायः ॥१३॥

अथ चतुर्दशोऽध्यायः ।

अथ सप्तमप्रपाठके प्रथमोऽर्धः ॥ ७ ॥

(१-१६) १, ९ प्रियमेध आङ्गिरसः; २ नृमेध-पुरुमेधावाङ्गिरसौ, ३, ७ त्र्यरुणस्त्रैवृष्णः, त्रसदस्युः पौरुकुत्सः; ४ शुनःशेप आजीगर्तिः; ५ वत्सः काण्वः; ६ अग्निस्तापसः; ८ विश्वमना वैयश्वः; १० वसिष्ठो मैत्रावरुणिः; ११ सौभरिः काण्वः; १२ शतं वैखानसः; १३ वसूयव आत्रेयः; १४ गोतमो राहूगणः; १५ केतुराग्नेयः; १६ विरूप आङ्गिरसः ॥ १-२, ५, ८-९ इन्द्रः; ३, ७ पवमानः सोमः; ४, १०-११, १३-१६ अग्निः; ६ विश्वे देवाः, १२ अग्निः पवमानः ॥ १, ४-५, १२-१६ गायत्री; २, १० प्रगाथः= (विषमा बृहती, समा सतोबृहती); ३,७ ऊर्ध्वा बृहती; ६. अनुष्टुप्, ८-९ उष्णिक्; ११ बृहती ॥

१४८९ अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।　(ऋग्वेदे) (सामवेदे)
सूनुं सत्यस्य सत्पतिम् ॥ १ ॥　८।६९।४　१६८

१४९० आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि ।
यत्राभि संनवामहे ॥ २ ॥　८।६९।५

१४९१ इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु ।
यत्सीमुपह्वरे विदत् ॥ ३ ॥ (धा० ११ । उ० नास्ति । स्व० २) ॥१(हा)॥　८।६९।६

१४९२ आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥ १ ॥　८।९०।१　२६९

१४९३ त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥२॥ २(या)॥　८।९०।२
(धा० १७ । उ० नास्ति । स्व० २)

१४९४ प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ॥ १ ॥　९।११०।८

१४९५ आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
दिवो न वारं सविता व्यूर्णुते ॥ २ ॥　९।११०।६

१४९६ अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना। (ऋग्वेदे)(सामवेदे)
यूथे न निष्ठा वृषभो वि राजसि ॥ ३ ॥ ३(स्रु)॥　९।११०।९
(धा० १६ । उ० २ । स्व० ६)

१४९७ इमम् षु त्वमस्माकं सनिं गायत्रं नव्यांसम् ।
अग्ने देवेषु प्र वोचः ॥ १ ॥　१।२७।४　२८

१४९८ विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ ।
सद्यो दाशुषे क्षरसि ॥ २ ॥　१।२७।६

१४९९ आ नो भज परमेष्वा वाजेषु मध्यमेषु ।
शिक्षा वस्वो अन्तमस्य ॥ ३ ॥ (धा० १३ । उ० १ । स्व० २) ॥४(टा)॥　१।२७।५

१५०० अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।
अहं सूर्य इवाजनि ॥ १ ॥　८।६।१०　१५२

१५०१ अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत् ।
येनेन्द्रः शुष्ममिद्दधे ॥ २ ॥　८।६।११

१५०२ ये त्वामिन्द्र न तुष्टुवुरृषयो ये च तुष्टुवुः ।
ममेद्वर्धस्व सुष्टुतः ॥ ३ ॥ (धा० १४ । उ० २ । स्व० ५) ॥ ५ (शु)॥　८।६।१२

॥ इति प्रथमः खण्डः ॥१॥

१५०३ अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत ।
ये देवत्रा य आयुषु तेभिर्नो महया गिरः ॥ १ ॥　(न ऋग्वेदीयः)

१५०४ प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः ।
तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः ॥ २ ॥　(न ऋग्वेदीयः)

१५०५ त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।
त्वं नो देवतातये रायो दानाय चोदय ॥ ३ ॥ ६ (हि) ॥　१०।१४१।६
(धा० १८ । उ० ३ । स्व० ३)

१५०६ त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ॥ १ ॥　९।११०।७

१५०७ अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।　(ऋग्वेदे)(सामवेदे)
शर्याभिर्न भरमाणो गभस्त्योः ॥ २ ॥　९।११०।५

१५०८ अजीजनो अमृत मर्त्याय कमृतस्य धर्मन्नमृतस्य चारुणः ।
सदासरो वाजमच्छा सनिष्यदत् ॥ ३ ॥ ७ (ले) ॥　९।११०।४
(धा० १० । उ० नास्ति । स्व० ७)

१५०९ एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
प्र राधांसि चोदयते महित्वना ॥　॥　८।२४।१३　३८९

१५१० उपो हरीणां पतिं राधः पृञ्चन्तमब्रवम् ।
नूनं श्रुधि स्तुवतो अश्व्यस्य ॥ २ ॥　८।२४।१४

१५११ न ह्यं३ग पुरा च न जज्ञे वीरतरस्त्वत् ।
न की राया नैवथा न भन्दना ॥ ३ ॥ ८ (चा) ॥　८।२४।१५
(धा० १७ । उ० १ । स्व० २)

१५१२ नदं व ओदतीनां नदं योयुवतीनाम् ।
पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ १ ॥ ९ (व) ॥　८।६९।२
(धा० ५ । उ० नास्ति । स्व० १)

॥ इति द्वितीयः खण्डः ॥ २ ॥

१५१३ देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ १ ॥　७।१६।११　५५

१५१४ तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥२॥१०(लि)॥　७।१६।१२
(धा० १४ । उ० ना० । स्व० ३)

१५१५ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥ १ ॥　८।१०३।१　४७

१५१६ यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
सहस्रसां मेधसाताविव त्मनाग्निं धीभिर्नमस्यत ॥ २ ॥　८।१०३।३

१५१७ प्र दैवोदासो अग्नि[र्देव इन्द्रो न मज्मना ।] (ऋग्वेदे) (सामवेदे)
[अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि] ॥३॥११(हा)॥
(धा० १६ । उ० नास्ति । स्व० २) ८।१०३।२ ५१

१५१८ अग्न आयूंषि पवस [आसुवोर्जमिषं च नः ।] ६२७
[आरे बाधस्व दुच्छुनाम्] ॥ १ ॥ ९।६६।१९ १४६४

१५१९ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
तमीमहे महागयम् ॥ २ ॥ ९।६६।२०

१५२० अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
दधद्रयिं मयि पोषम् ॥ ३ ॥ (धा० १० । उ० २ । स्व० १) १२ (फ)॥ ९।६६।२१

१५२१ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान्वक्षि यक्षि च ॥ १ ॥ ५।२६।१

१५२२ तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।
देवाँ आ वीतये वह ॥ २ ॥ ५।२६।२

१५२३ वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि ।
अग्ने बृहन्तमध्वरे ॥ ३॥ (धा० १८ । उ० १ । स्व० नास्ति ।)॥१३(टौ)॥५।२६।३

॥ इति तृतीयः खण्डः ॥ ३ ॥

१५२४ अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।
विश्वासु धीषु वन्द्य ॥ १ ॥ १।७९।७

१५२५ आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् ।
विश्वासु पृत्सु दुष्टरम् ॥ २ ॥ १।७९।८

१५२६ आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् ।
मार्डीकं धेहि जीवसे ॥३॥ (धा० १५ । उ० नास्ति । स्व० नास्ति) ॥१४(वौ)॥ १।७९।९

२१

१५२७ अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु । (ऋग्वेदे) (सामवेदे)
तेन जेष्म धनंधनम् ॥ १ ॥ १०।१५६।१

१५२८ यया गा आकरामहे सेनयाग्ने तवोत्या ।
तां नो हिन्व मघत्तये ॥ २ ॥ १०।१५६।२

१५२९ आग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनम् ।
अङ्धि खं वर्तया पविम् ॥ ३ ॥ १०।१५६।३

१५३० अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि ।
दधज्ज्योतिर्जनेभ्यः ॥ ४ ॥ १०।१५६।४

१५३१ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत ।
बोधा स्तोत्रे वयो दधत ॥५॥ (धा० १९ । उ० २ । स्व० २) ॥१५(धा)॥ १०।१५६।५

१५३२ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति ॥ १ ॥ ८।४४।१६

१५३३ ईशिषे वार्यस्य हि दात्रस्याग्ने स्वःपतिः ।
स्तोता स्यां तव शर्मणि ॥ २ ॥ ८।४४।१८

१५३४ उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।
तव ज्योतींष्यर्चयः ॥३॥ (धा० ४ । उ० नास्ति । स्व० ४)॥१६(ली)॥ ८।४४।१७

॥ इति चतुर्थः खण्डः ॥ ४ ॥

॥ इति सप्तमप्रपाठके प्रथमोऽर्धः॥ ७-१ ॥

॥ इति चतुर्दशोऽध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

[२]

अथ सप्तमप्रपाठके द्वितीयोऽर्धः ॥ ७-२ ॥

(१-१४) १, ११ गोतमो राहूगणः; २, ९ विश्वामित्रो गाथिनः; ३ विरूप आङ्गिरसः; ४, ७ भर्गः प्रागाथः, ५ त्रित आप्त्यः; १० सोभरिः काण्वः; १२ गोपवन आत्रेयः; १३ भरद्वाजो बार्हस्पत्यो, वीतहव्य आङ्गिरसो वा; १३ प्रयोगो भार्गवः, पावकोऽग्निर्बार्हस्पत्यो वा, गृहपति-यविष्ठौ सहसः पुत्रवान्यतरो वा ॥ अग्निः ॥ १-३, ६, ९, १४ गायत्री; ४, ७, ८ प्रगाथः= (विषमा बृहती, समा सतोबृहती); ५ त्रिष्टुप्; १० काकुभः प्रगाथः= (विषमा ककुप्, समा सतोबृहती); ११ उष्णिक्; १२ अनुष्टुम्मुखः प्रगाथः = (अनुष्टुप्+गायत्र्यौ); १३ जगती ॥

(ऋग्वेदे) (सामवेदे)

१५३५ कस्ते जामिर्जनानामग्ने को दाश्वध्वरः ।
को ह कस्मिन्नसि श्रितः ॥ १ ॥ १।७५।३

१५३६ त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।
सखा सखिभ्य ईड्यः ॥ २ ॥ १।७५।४

१५३७ यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् ।
अग्ने यक्षि स्वं दमम् ॥ ३ ॥ (धा० ८ । उ० नास्ति । स्व० ५) ॥ १(रु) ॥१।७५।५

१५३८ ईळेन्यो नमस्यस्तिरस्तमांसि दर्शतः ।
समग्निरिध्यते वृषा ॥ १ ॥ ३।२७।१३

१५३९ वृषो अग्निः समिध्यतेऽश्वो न देववाहनः ।
तं हविष्मन्त ईळते ॥ २ ॥ ३।२७।१४

१५४० वृषणं त्वा वयं वृषन्वृषणः समिधीमहि ।
अग्ने दीद्यतं बृहत् ॥ ३ ॥ (धा० ९ । उ० नास्ति । स्व० ३) ॥ २(लि)॥ ३।२७।१५

१५४१ उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।
अग्ने शुक्रास ईरते ॥ १ ॥ ८।४४।४

१५४२ उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत ।
अग्ने हव्या जुषस्व नः ॥ २ ॥ ८।४४।५

१५४३ मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम् । (ऋग्वेदे) (सामवेदे)
अग्निमीडे स उ श्रवत् ॥३॥ (धा० ६ । उ० नास्ति । स्व० १)॥३(हृ)॥ ८।४४।६

१५४४ पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ १ ॥ ८।६०।९ ११

१५४५ पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥२॥४(यि) ॥ ८।६०।१०
(धा० १७ । उ० नास्ति । स्व० ३)

॥ इति प्रथमः खण्डः ॥ १ ॥

१५४६ इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।
चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥ १०।३।१

१५४७ कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम् ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवो वसुभिररतिर्वि भाति ॥२॥ १०।३।२

१५४८ भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥५(यो)॥ १०।३।३
(धा० २७ । उ० नास्ति । स्व० ९)

१५४९ कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् ।
वराय देव मन्यवे ॥ १ ॥ ८।८४।४

१५५० दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
कदु वोच इदं नमः ॥ २ ॥ ८।८४।५

१५५१ अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः ।
वाजद्रविणसो गिरः ॥ ३ ॥ (धा० १८ । उ० १ । स्व० १) ॥ ६ (ट) ॥ ८।८४।६

१५५२ अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १ ॥ ८।६०।१

१५५३ अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे । (ऋग्वेद) (सामवेद)
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ २ ॥ ७(या) ॥ ८।६०।२
(धा० १७ । उ० नास्ति । स्व० २)

१५५४ अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥ १ ॥ ८।७१।१०
१५५५ अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ २ ॥ ८(हा) ॥ ८।७१।११
(धा० ८ । उ० १ । स्व० २)

॥ इति द्वितीयः खण्डः ॥ २ ॥

१५५६ अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् ।
तूर्णी रथः सदा नवः ॥ १ ॥ ३।११।५
१५५७ अभि प्रयांसि वाहसा दाश्वाँ अश्नोति मर्त्यः ।
क्षयं पावकशोचिषः ॥ २ ॥ ३।११।७
१५५८ साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः ।
अग्निस्तुविश्रवस्तमः ॥ ३ ॥ ॥ ९(वि) ॥ ३।११।६
(धा० १० । उ० नास्ति । स्व० ३)

१५५९ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥ १ ॥ ८।१९।१९ १११
१५६० भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ २ ॥ १०(लि) ॥ ८।१९।२०
(धा० ४ । उ० नास्ति । स्व० ३)

१५६१ अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे देहि जातवेदो महि श्रवः ॥ १ ॥ १।७९।४ ९९
१५६२ स इधानो वसुष्कविरग्निरीडेन्यो गिरा ।
रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ २ ॥ १।७९।५

१५६३ क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । (ऋग्वेद) (सामवेद)
स तिग्मजम्भ रक्षसो दह प्रति ॥ ३ ॥ ११ ॥ (धा० १३ । उ० १ । स्व० २) १।७९।६

॥ इति तृतीयः खण्डः ॥ ३ ॥

१५६४ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वच स्तुषे शूषस्य मन्मभिः ॥ १ ॥ ८।७४।१ ८७
१५६५ यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् ।
प्रशंसन्ति प्रशस्तिभिः ॥ २ ॥ ८।७४।२
१५६६ पन्यांसं जातवेदसं यो देवतात्युद्यता ।
हव्यान्यैरयद्दिवि ॥ ३ ॥ (धा० १३ । उ० १ । स्व० २) ॥ १२(टा) ॥ ८।७४।३
१५६७ समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥ १ ॥ ६।१५।७
१५६८ त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ २ ॥ ६।१५।८
१५६९ विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥ ३ ॥ १३(या) ॥
(धा० २२ । उ० नास्ति । स्व० २) ६।१५।९

१५७० उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
वायोरनीके अस्थिरन् ॥ १ ॥ ८।१०२।१३ १३
१५७१ यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनम् ।
आपश्चिन्नि दधा पदम् ॥ २ ॥ ८।१०२।१४
१५७२ पदं देवस्य मीढुषोऽनाधृष्टाभिरूतिभिः ।
भद्रा सूर्य इवोपदृक् ॥ ३ ॥ (धा० १६ । उ० नास्ति । स्व० ५) ॥ १४(हु) ॥ ८।१०२।१५

॥ इति चतुर्थः खण्डः ॥ ४ ॥
॥ इति सप्तमप्रपाठके द्वितीयोऽर्धः ॥ ७-२ ॥
॥ इति पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

अथ षोडशोऽध्यायः ।

[१]

अथ सप्तमप्रपाठके तृतीयोऽर्धः ॥ ७-३ ॥

(१-२१) १, ८, १८ मेध्यातिथिः काण्वः; २ विश्वामित्रो गाथिनः; ३-४ भर्गः प्रागाथः; ५ सोभरिः काण्वः; ६, १५ शुनःशेप आजीगर्तिः; ७ सुकक्ष आङ्गिरसः; ९ विश्वकर्मा भौवनः; १० अनानतः पारुच्छेपिः; ११ भरद्वाजो बार्हस्पत्यः; १२ गोतमो राहूगणः; १३ ऋजिश्वा भारद्वाजः; १४ वामदेवो गौतमः; १७ देवातिथिः काण्वः; १९ वालखिल्यः (श्रुष्टिगुः काण्वः); २० पर्वतनारदौ; २१ अत्रिर्भौमः ॥ १, ३-४, ७-८, १५, १७-१९ इन्द्रः; २ इन्द्राग्नी; ६ वरुणः; ९ विश्वकर्मा; १०, २०, २१ पवमानः सोमः; ११ पूषा; १२ मरुतः; १३ विश्वे देवाः; १४ द्यावापृथिव्यौ; १६ अग्निः हवींषि वा ॥ १, ३-५, ८, १७-१९ प्रगाथः (विषमा बृहती, समा सतोबृहती); २, ६-७, ११-१६ गायत्री; ९ त्रिष्टुप्, १० अत्यष्टिः, २० उष्णिक्, २१ जगती ॥

१५७३ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः । (ऋग्वेद) (सामवेद)
समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥ १ ॥ ८।३।७ २५६
१५७४ अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥ २ ॥ १(रि) । ८।३।८
(धा० १८ । उ० नास्ति । स्व० ३)

१५७५ प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
इन्द्राग्नी इष आ वृणे ॥ १ ॥ ३।१२।५ १७०३
१५७६ इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।
साकमेकेन कर्मणा ॥ २ ॥ ३।१२।६ १७०४
१५७७ इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः ।
ऋतस्य पथ्या३ अनु ॥ ३ ॥ ३।१२।७ १६९४
१५७८ इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च ।
युवोरप्तूर्यं हितम् ॥ ४ ॥ (धा० १३ । उ० १ । स्व० २) ॥ २(टा) ॥ ३।१२।८ १६९५
१५७९ शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ १ ॥ ८।६१।५ २४३

१५८० पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः । (ऋग्वेद) (सामवेद)
न किर्हि दानं परि मर्धिषत्त्वे यद्यद्यामि तदा भर ॥ २ ॥ ३(छु) ॥ ८।६१।६
(धा० १७ । उ० १ । स्व० ५)
१५८१ त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।
उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥ १ ॥ ८।६१।७ २४०
१५८२ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे ।
आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥ २ ॥ ४(फौ) ॥ ८।६१।८
(धा० १५ । उ० २ । स्व० नास्ति)

१५८३ यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥ १ ॥ ८।१०३।६ ४४
१५८४ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥ २ ॥ ५(पु) ॥ ८।१०३।७
(धा० १५ । उ० १ । स्व० ५)

॥ इति प्रथमः खण्डः ॥ १ ॥

१५८५ इमं मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युरा चके ॥ १ ॥ (धा० ५ । उ० नास्ति । स्व० १) ॥ ६(ब) ॥ १।२५।१९

१५८६ कया त्वं न ऊत्याभि प्र मन्दसे वृषन् ।
कया स्तोतृभ्य आ भर ॥ १ ॥ (धा० २ । उ० नास्ति । स्व० १) ॥ ७(य) ॥ ८।९३।१९

१५८७ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ८।३।५ २४९
१५८८ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे स्वानास इन्दवः ॥ २ ॥ ८(वा) ॥
(धा० १५ । उ० नास्ति । स्व० २) ८।३।६
१५८९ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वं३ स्वा हि ते ।
मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥ १ ॥ ९(ला) ॥
(धा० ९ । उ० नास्ति । स्व० २) १०।८१।६

१५९० अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति (ऋग्वेदे) (सामवेदे)
सयुग्वभिः सूरो न सयुग्वभिः।
धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः।
विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥ १ ॥ ९।१११।१ ४६३
१५९१ प्राचीमनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो
रथो दैव्यो दर्शतो रथः।
अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥ २ ॥ ९।१११।३
१५९२ त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम
ऋतस्य धीतिभिर्दमे।
परावतो न साम तद्यत्रा रणन्ति धीतयः।
त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥३॥ १०(के)॥ ९।१११।२
(धा० ४१ । उ० ५ । स्व० ७)

॥ इति द्वितीयः खण्डः ॥ २ ॥

१५९३ उत नो गोषणिं धियमश्वसां वाजसामुत।
नृवत्कृणुह्यूतये ॥ (धा० २ । उ० नास्ति । स्व०नास्ति) ॥ ११(यौ) ॥ ६।५३।१०
१५९४ शशमानस्य वा नरः स्वेदस्य सत्यशवसः।
विदा कामस्य वेनतः ॥ (धा० ५ । उ० नास्ति । स्व० १) ॥१२(व)॥ १।८६।८
१५९५ उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये।
सुमृडीका भवन्तु नः॥ (धा० ३ । उ० नास्ति । स्व० नास्ति) ॥१३(रौ)॥ ६।५२।९
१५९६ प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे।
शुची उप प्रशस्तये ॥ १ ॥ ४।५६।५
१५९७ पुनाने तन्वा मिथः स्वेन दक्षेण राजथः।
ऊह्याथे सनादृतम् ॥ २ ॥ ४।५६।६
२२

१५९८ मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। (ऋग्वेदे) (सामवेदे)
परि यज्ञं नि षेदथुः ॥३॥ (धा० ६ । उ० १ । स्व० २) ॥१४(का)॥ ४।५६।७
१५९९ अयमु ते समतसि कपोत इव गर्भधिम्।
वचस्तच्चिन्न ओहसे ॥ १ ॥ १।३०।४ १८३
१६०० स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते।
विभूतिरस्तु सूनृता ॥ २ ॥ १।३०।५
१६०१ ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो।
समन्येषु ब्रवावहै ॥ ३ ॥ (धा० १६ । उ० नास्ति । स्व० १) ॥१५(ह)॥ १।३०।६

१६०२ गाव उप वदावटे मही यज्ञस्य रप्सुदा।
उभा कर्णा हिरण्यया ॥ १ ॥ ८।७२।१२ ११७
१६०३ अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु।
अवटस्य विसर्जने ॥ २ ॥ ८।७२।११
१६०४ सिञ्चन्ति नमसावटमुच्चाचक्रं परिज्मानम्।
नीचीनबारमक्षितम् ॥ ३ ॥ (धा० ८ । उ० नास्ति । स्व० २) ॥१६(रा) ८।७२।१०

॥ इति तृतीयः खण्डः ॥ ३ ॥

१६०५ मा भेम मा श्रमिष्मोग्रस्य सख्ये तव।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ १ ॥ ८।४।७
१६०६ सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥२॥१७(वी)॥ ८।४।८
(धा० १० । उ० नास्ति । स्व० ४)

१६०७ इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ १ ॥ ८।३।३ २५०

१६०८ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे। (ऋग्वेदे) (सामवेदे)
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥२॥१८(रि)॥
(धा० १८ । उ० नास्ति । स्व० ३) ८।३।४
१६०९ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः।
तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ १ ॥ ८।५१।९
१६१० तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे स्वानास इन्दवः ॥ २ ॥ १९(त)॥
(धा० १४ । उ० १ । स्व० १) ८।५१।१०
१६११ गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव।
शुचिं च वर्णमधि गोषु धारय ॥ १ ॥ ९।१०५।४ ५७४
१६१२ स नो हरीणां पत इन्दो देवप्सरस्तमः।
सखेव सख्ये नर्यो रुचे भव ॥ २ ॥ ९।१०५।५
१६१३ सनेमि त्वमस्मदा अदेवं कं चिदत्रिणम्।
साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥३॥२० (ल)॥ ९।१०५।६
(धा० ९ । उ० नास्ति । स्व० १)
१६१४ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते ॥१॥
९।८६।४३ ५६४
१६१५ विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति।
अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः ॥२॥ ९।८६।४४
१६१६ अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥३॥२ (ले)॥
(धा० ३९ । उ० नास्ति । स्व० ७) ९।८६।४५

॥ इति चतुर्थः खण्डः ॥ ४ ॥

॥ इति सप्तमप्रपाठकस्य तृतीयोऽर्धः, सप्तमः प्रपाठकश्च समाप्तः ॥ ७-३ ॥
॥ इति षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः।

[१]

अथाष्टमप्रपाठके प्रथमोऽर्धः ॥ ८-१ ॥

(१-१४) १, ७ शुनःशेप आजीगर्तिः, २ मधुच्छन्दा वैश्वामित्रः; ३ शंयुर्बार्हस्पत्यः, (तृणपाणिः) ४ वसिष्ठो मैत्रावरुणिः, ५ वामदेवो गौतमः; ६ रेभसूनू काश्यपौ; ८ नृमेध आंगिरसः; ९, ११ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ, १० श्रुतकक्षः सुकक्षो वा आङ्गिरसः, १२ विरूप आंगिरसः; १३ वत्सः काण्वः ॥ १, ३, ७, १२ अग्निः, २, ८—११, १३ इन्द्रः; ४ विष्णुः; ५ (१) वायु, ५ (२-३) इन्द्रवायू; ६ पवमानः सोमः॥ १-२, ७, ९, १०, १२, १३ गायत्री; ३, ८ प्रगाथः = (विषमा बृहती, समा सतोबृहती); ४ त्रिष्टुप्; ५, ६ अनुष्टुप्; ११ उष्णिक्।

१६१७ विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः। (ऋग्वेदे) (सामवेदे)
चनो धाः सहसो यहो ॥ १ ॥ १।२६।१०
१६१८ यच्चिद्धि शश्वता तना देवंदेवं यजामहे।
त्वे इद्धूयते हविः ॥ २ ॥ १।२६।६
१६१९ प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः।
प्रियाः स्वग्नयो वयम् ॥३॥ (धा० ११ । उ० नास्ति । स्व० ४)॥१(ही)॥ १।२६।७
१६२० इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः।
अस्माकमस्तु केवलः ॥ १ ॥ १।७।१०
१६२१ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि।
अस्मभ्यमप्रतिष्कुतः ॥ २ ॥ १।७।६
१६२२ वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा।
ईशानो अप्रतिष्कुतः ॥ ३ ॥ (धा० ८ । उ० नास्ति । स्व० १)॥२(र)॥ १।७।८
१६२३ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥१॥ ६।४८।९ ४१
१६२४ पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः।
अग्ने हेडांसि दैव्या युयोधि नोऽदेवानि ह्वरांसि च ॥२॥३(की)॥ ६।४८।१०
(धा० ११ । उ० १ । स्व० ४)

१६२५ किमित्ते विष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि । (ऋग्वेदे) (सामवेदे)
मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥ १ ॥ ७।१००।६
१६२६ प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शंसामि वयुनानि विद्वान् ।
तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥२॥ ७।१००।५
१६२७ वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥३॥४(ते)॥
(धा० ४४ । उ० १ । स्व० ७) ७।१००।७

॥ इति प्रथमः खण्डः ॥ १ ॥

१६२८ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ १ ॥ ४।४७।१
१६२९ इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः ।
युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥ २ ॥ ४।४७।२
१६३० वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती ।
नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥ ३ ॥ ५ (ता) ॥
(धा० १९ । उ० १ । स्व० २) ४।४७।३

१६३१ अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहसे ।
यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥ १ ॥ ९।९९।२
१६३२ तमस्य मर्जयामसि मदो य इन्द्रपातमः ।
यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥ २ ॥ ९।९९।३
१६३३ तं गाथया पुराण्या पुनानमभ्यनूषत ।
उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥३॥ ६ (लु) ॥
(धा० १४ । उ० नास्ति । स्व० ५) ९।९९।४

१६३४ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
सम्राजन्तमध्वराणाम् ॥ १ ॥ १।२७।१ १७

१६३५ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः । (ऋग्वेदे) (सामवेदे)
मीढ्वाँ अस्माकं बभूयात् ॥ २ ॥ १।२७।२
१६३६ स नो दूराच्चासाच्च नि मर्त्यादघायोः ।
पाहि सदमिद्विश्वायुः ॥३॥ (धा० १३ । उ० १ । स्व० ३) ॥७(टि)॥ १।२७।३

१६३७ त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ १ ॥ ८।९९।५ ३११
१६३८ अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥२॥ ८ (टा)॥
(धा० १८ । उ० १ । स्व० २) ८।९९।६

॥ इति द्वितीयः खण्डः ॥ २ ॥

१६३९ यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।
चक्राण ओपशं दिवि ॥ १ ॥ ८।१४।५ १२१
१६४० व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना ।
इन्द्रो यदभिनद्वलम् ॥ २ ॥ ८।१४।७
१६४१ उद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः ।
अर्वाञ्चं नुनुदे वलम् ॥३॥ (धा० २० । उ० १ । स्व०४) ॥९(पी)॥ ८।१४।८
१६४२ त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् । आ च्यावयस्यूतये ॥१॥ ८।९२।७
१६४३ युध्मं सन्तमनर्वाणं सोमपामनपच्युतम् ।
नरमवार्यक्रतुम् ॥ २ ॥ ८।९२।८
१६४४ शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम ।
अवा नः पार्ये धने ॥३॥ (धा० १४ । उ० १ । स्व० २) ॥१०(ता)॥ ८।९२।९

१६४५ तव त्यदिन्द्रियं बृहत्तव दक्षमुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥ १ ॥ ८।१५।७

१६४६ तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः । (ऋग्वेदे) (सामवेदे)
त्वामापः पर्वतासश्च हिन्विरे ॥ २ ॥ ८।१५।८
१६४७ त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
त्वां शर्धो मदत्यनु मारुतम् ॥३॥ (धा०१३ । उ० २ । स्व० ४)॥११(ठी)॥ ८।१५।९

॥ इति तृतीयः खण्डः ॥ ३ ॥

१६४८ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
अमैरमित्रमर्दय ॥ १ ॥ ८।७५।१० ११
१६४९ कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् ।
उरुकृदुरु णस्कृधि ॥ २ ॥ ८।७५।११
१६५० मा नो अग्ने महाधने परा वर्ग्भारभृद्यथा ।
संवर्गं सं रयिं जय ॥३॥ (धा० १५ । उ० १ । स्व० १) ॥१२(प)॥ ८।७५।१२

१६५१ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
समुद्रायेव सिन्धवः ॥ १ ॥ ८।६।४ १३७
१६५२ वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना ।
वज्रेण शतपर्वणा ॥ २ ॥ ८।६।६
१६५३ ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ।
इन्द्रश्चर्मेव रोदसी ॥३॥ (धा०१४ । उ० १ । स्व० नास्ति) ॥१३(तौ)॥ ८।६।५

१६५४ सुमन्मा वस्वी रन्ती सूनरी ॥ १ ॥ (न ऋग्वेदे)
१६५५ सरूप वृषन्ना गहीमौ भद्रौ धुर्यावभि ।
ताविमा उप सर्पतः ॥ २ ॥ (न ऋग्वेदे)
१६५६ नीव शीर्षाणि मृढ्वं मध्य आपस्य तिष्ठति ।
शृङ्गेभिर्दशभिर्दिशन् ॥३॥ (धा०७ । उ० नास्ति । स्व० ३)॥१४(पि)॥ (न ऋग्वेदे)

॥ इति चतुर्थः खण्डः ॥ ४ ॥ इत्यष्टम-प्रपाठकस्य प्रथमोऽर्धः ॥ ८-१ ॥
॥ इति सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः ।

[२]

अथाष्टमप्रपाठके द्वितीयोऽर्धः ॥ ८-२ ॥

(१-१९) १ मेधातिथिः काण्वः प्रियमेधश्चाङ्गिरसः; २ श्रुतकक्षः सुकक्षो वा आङ्गिरसः; ३ शुनःशेप आजीगर्तिः; ४ शंयुर्बार्हस्पत्यः; ५ मेधातिथिः काण्वः; ६, ९ वसिष्ठो मैत्रावरुणिः; ७ वालखिल्यम् (आयुः काण्वः); ८ अम्बरीषो वार्षागिरः, ऋजिश्वा भारद्वाजश्च; १० विश्वमना वैयश्वः; ११ सोभरिः काण्वः; १२ सप्तर्षयः (१ भरद्वाजो बार्हस्पत्यः, २ कश्यपो मारीचः, ३ गोतमो राहूगणः, ४ अत्रिर्भौमः, ५ विश्वामित्रो गाथिनः, ६ जमदग्निर्भार्गवः, ७ वसिष्ठो मैत्रावरुणिः), १३ कलिः प्रागाथः; १४, १७ विश्वामित्रः प्रागाथः; १५ मेध्यातिथिः काण्वः, १६ निध्रुविः काश्यपः; १८ भरद्वाजो बार्हस्पत्यः ॥ १-२, ४, ६-७, ९-१०, १३, १५ इन्द्रः; ३, ११ १८ अग्निः; ५ विष्णुः, ५ (६) देवो वा; ८, १२, १६ पवमानः सोमः; १४, १७ इन्द्राग्नी ॥ १-५, १४ १६-१८ गायत्री; ६, ७, ९, १२, १३ प्रगाथः= (विषमा बृहती, समा सतोबृहती); ८ अनुष्टुप् १० उष्णिक्, ११ काकुभः प्रगाथः=(विषमा ककुप्, समा सतोबृहती); १५ बृहती ॥

१६५७ पन्यंपन्यमित्सोतार आ धावत मद्याय । (ऋग्वेदे) (सामवेदे)
सोमं वीराय शूराय ॥ १ ॥ ८।२।२५ १२३
१६५८ एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् ।
इन्द्रं गीर्भिर्गिर्वणसम् ॥ २ ॥ ८।२।२७
१६५९ पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् ।
नि यमते शतमूतिः ॥३॥ (धा० १४ । उ० १ । स्व० ३) ॥ १ (ति) ८।२।२८
१६६० आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।
न त्वामिन्द्राति रिच्यते ॥ १ ॥ ८।९२।२२ १९७
१६६१ विव्यक्थ महिना वृषन्भक्षं सोमस्य जागृवे ।
य इन्द्र जठरेषु ते ॥ २ ॥ ८।९२।२३
१६६२ अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।
अरं धामभ्य इन्दवः ॥३॥ (धा० ११ । उ० १ । स्व० १) ॥२ (क)॥ ८।९२।२४

(ऋग्वेदे) (सामवेदे)

१६६३ जराबोध तद्विविड्ढि विशेविशे यज्ञियाय।
स्तोमं रुद्राय दृशीकम् ॥ १ ॥ १।२७।१० १५

१६६४ स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः।
धियें वाजाय हिन्वतु ॥ २ ॥ १।२७।११

१६६५ स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः।
उक्थैरग्निर्बृहद्भानुः ॥ ३ ॥ (धा० ११ । उ० नास्ति । स्व० १)॥३(हृ)॥ १।२७।१२

१६६६ तद्वो गाय सुते सचा पुरुहूताय सत्वने।
शं यद्गवे न शाकिने ॥ १ ॥ ६।४५।२२ ११५

१६६७ न घा वसुर्नि यमते दानं वाजस्य गोमतः।
यत्सीमुपश्रवद्गिरः ॥ २ ॥ ६।४५।२३

१६६८ कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्।
शचीभिरप नो वरत् ॥ ३ ॥ (धा० १५ । उ० २ । स्व० ४) ॥४(फी)॥ ६।४५।२४

॥ इति प्रथमः खण्डः ॥ १ ॥

१६६९ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्।
समूढमस्य पांसुले ॥ १ ॥ १।२२।१७

१६७० त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्माणि धारयन् ॥ २ ॥ १।२२।१८

१६७१ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा ॥ ३ ॥ १।२२।१९

१६७२ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ॥ ४ ॥ १।२२।२०

१६७३ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते।
विष्णोर्यत्परमं पदम् ॥ ५ ॥ १।२२।२१

(ऋग्वेदे) (सामवेदे)

१६७४ अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।
पृथिव्या अधि सानवि ॥६॥ (धा० ३३ । उ० २ । स्व० ६) ॥५(ट्र)॥ १।२२।१६

१६७५ मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन्।
आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ १ ॥७।३२।१ २८४

१६७६ इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥ २ ॥६(डी)॥ ७।३२।२
(धा १३ । उ० ४ । स्व० ४)

१६७७ अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत।
पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ १ ॥ ८।५२।९

१६७८ समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम्।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः॥२॥७(ठा)॥ ८।५२।१०
(धा० १३ । उ० २ । स्व० २)

१६७९ इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे।
नरे च दक्षिणावते वीराय सदनासदे ॥ १ ॥ ९।९८।१० १३३१

१६८० तं सखायः पुरूरुचं वयं यूयं च सूरयः।
अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥ २ ॥ ९।९८।१२

१६८१ परि त्यं हर्यतं हरिं [बभ्रुं पुनन्ति वारेण।
यो देवान्विश्वाँ इत्परि मदेन सह गच्छति] ॥३॥ ८ (हा) ॥ ९।९८।७ १३२९ ५५२।
(धा० १६ । उ० नास्ति । स्व० २)

१६८२ कस्तमिन्द्र त्वा वसु[वा मर्त्यो दधर्षति। (वसो। आ)
श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजं सिषासति] ॥ १ ॥ ७।३२।१४ २८०

१६८३ मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु।
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥ २ ॥ ९(यि)॥ ७।३२।१५
(धा० १७ । उ० नास्ति । स्व० ३)

॥ इति द्वितीयः खण्डः ॥ २ ॥

(ऋग्वेदे) (सामवेदे)

१६८४ एवु मघोर्मदिन्तरं सिश्चाध्वर्यो अन्धसः।
एवा हि वीर स्तवते सदावृधः ॥ १ ॥ ८।२४।१६ १८५

१६८५ इन्द्र स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिम्।
उदानंश शवसा न भन्दना ॥ २ ॥ ८।२४।१७

१६८६ तं वो वाजानां पतिमहूमहि श्रवस्यवः।
अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥ ३ ॥ ॥१०(क)॥ ८।२४।१८
(धा० १६ । उ० १ । स्व० १)

१६८७ तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे।
देवत्रा हव्यमूहिषे ॥ १ ॥ ८।१९।१ १०९

१६८८ विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरम्।
अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥२॥११(या)॥ ८।१९।२
(धा० १७ । उ० नास्ति । स्व० २)

१६८९ आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥ १ ॥ ९।१०७।१० ५१३

१६९० स मामृजे तिरो अण्वानि मेष्यो मीढ्वान्त्सप्तिर्न वाजयुः।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥२॥१२(तु)॥
(धा० १४ । उ० १ । स्व० ५ ।) ९।१०७।११

१६९१ वयमेनमिदा ह्योऽपीपेमेह वज्रिणम्।
तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ १ ॥ ८।६६।७ २७२

१६९२ वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति।
सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥२॥ १३(खा) ॥
(धा० १६ । उ० २ । स्व० २) ८।६६।८

१६९३ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः।
तद्वां चेति प्र वीर्यम् ॥ १ ॥ ३।१२।९

(ऋग्वेदे) (सामवेदे)

१६९४ इन्द्राग्नी अपसस्परि [उप प्र यन्ति धीतयः।
ऋतस्य पथ्या३ अनु] ॥ २ ॥ (ईपरि। उप) ३।१२।७ १५७७

१६९५ इन्द्राग्नी तविषाणि वां [सधस्थानि प्रयांसि च।
युवोरप्तूर्यं हितम्] ॥३॥ (धा० ६ । उ० १ । स्व० १) ॥ १४(क) ॥ ३।१२।८ १५७८

१६९६ क ईं वेद सुते सचा [पिबन्तं कद्वयो दधे।
अयं यः पुरो विभिनत्योजसा मन्दानः शिप्र्यन्धसः] ॥ १ ॥ ८।३३।७ २९७

१६९७ दाना मृगो न वारणः पुरुत्रा चरथं दधे।
न किष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥ २ ॥ ८।३३।८

१६९८ य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः।
यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥३॥१५(ही)॥ ८।३३।९
(धा० ११ । उ० नास्ति । स्व० ४)

॥ इति तृतीयः खण्डः ॥ ३ ॥

१६९९ पवमाना असृक्षत सोमाः शुक्रास इन्दवः।
अभि विश्वानि काव्या ॥ १ ॥ ९।६३।२५

१७०० पवमाना दिवस्पर्यन्तरिक्षादसृक्षत।
पृथिव्या अधि सानवि ॥ २ ॥ ९।६३।२७

१७०१ पवमानास आशवः शुभ्रा असृग्रमिन्दवः।
घ्नन्तो विश्वा अप द्विषः ॥३॥ (धा० १५ । उ० २ । स्व० १)।१६(क)॥ ९।६३।२६

१७०२ तोशा वृत्रहणा हुवे सजित्वानापराजिता।
इन्द्राग्नी वाजसातमा ॥ १ ॥ ३।१२।४

१७०३ प्र वामर्चन्त्युक्थिनो [नीथाविदो जरितारः।
इन्द्राग्नी इष आ वृणे] ॥ २ ॥ (नेः।) ३।१२।५ १५७५

१७०४ इन्द्राग्नी नवतिं पुरो [दासपत्नीरधूनुतम् ।　　(असुरः)
साकमेकेन कर्मणा] ॥३॥ (धा० ८ । उ० नास्ति । स्व० १) ॥१७(र)॥ ३।१२।६　　१५७६

१७०५ उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत ।
अग्ने ससृज्महे गिरः ॥ १ ॥　　६।१६।३७

१७०६ उप च्छायामिव घृणेरगन्म शर्म ते वयम् ।
अग्ने हिरण्यसंदृशः ॥ २ ॥　　६।१६।३८

१७०७ य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः ।
अग्ने पुरो रुरोजिथ ॥ ३ ॥ (धा० ७ । उ० नास्ति । स्व० १)॥१८(य)॥६।१६।३९

१७०८ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ।　　(न ऋग्वेदीयः)
अजस्रं घर्ममीमहे ॥ १ ॥

१७०९ य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन् ।
ऋतूनुत्सृजते वशी ॥ २ ॥　　(न ऋग्वेदीयः)

१७१० अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य ।
सम्राडेको विराजति ॥ ३ ॥ (धा० ११ । उ० १ । स्व० २) ॥१९(का)॥ (न ऋग्वेदीयः)

॥ इति चतुर्थः खण्डः ॥ ४ ॥

॥ इत्यष्टमप्रपाठके द्वितीयोऽर्धः ॥ ८-२ ॥

॥ इत्यष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

[३]

अथ अथाष्टमप्रपाठके तृतीयोऽर्धः ॥ ८-३ ॥

(१--१८) १ द्विरूप आङ्गिरसः; २, १८ अवत्सारः काश्यपः; ३ विश्वामित्रो गाथिनः; ४ देवातिथिः काण्वः; ५,८,९,१६ गोतमो राहूगणः; ६ वामदेवो गौतमः, ७ प्रस्कण्वः काण्वः; १० वसुश्रुत आत्रेयः; ११ सत्यश्रवा आत्रेयः; १२ अवस्युरात्रेयः; १३ बुधगविष्ठिरावात्रेयौ; १४ कुत्स आङ्गिरसः; १५ अत्रिर्भौमः, १७ दीर्घतमा औचथ्यः ॥ १,१०,१३ अग्निः; २,१८ पवमानः सोमः; ३-५ इन्द्रः; ६,८,११,१४ (१ उत्तरार्धः रात्रिश्च), १६ उषाः; ७, ९, १२, १५, १७ अश्विनौ ॥ १-२, ६-७, १८ गायत्री; ३, १३-१५ त्रिष्टुप्; ४-५ प्रगाथः= (विषमा बृहती, समा सतोबृहती), ८-९ उष्णिक् १०-१२ पङ्क्तिः; १६, १७ जगती ॥

१७११ अग्निः प्रत्नेन जन्मना शुम्भानस्तन्व३ स्वाम् ।　　(ऋग्वेदे) (सामवेदे)
कविर्विप्रेण वावृधे ॥ १ ॥　　८।४४।१२

१७१२ ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम् ।
अस्मिन्यज्ञे स्वध्वरे ॥ २ ॥　　८।४४।१३

१७१३ स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा ।
देवैरा सत्सि बर्हिषि ॥३॥ (धा० ९ । उ० नास्ति । स्व० ४) ॥१(ली)।　　८।४४।१४

१७१४ उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।
नुदस्व याः परिस्पृधः ॥ १ ॥　　९।५३।१

१७१५ अया निजघ्निरोजसा रथसङ्गे धने हिते ।
स्तवा अबिभ्युषा हृदा ॥२॥　　९।५३।२

१७१६ अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।
रुज यस्त्वा पृतन्यति ॥३॥　　९।५३।३

१७१७ तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् ।
इन्दुमिन्द्राय मत्सरम् ॥४॥ (धा० २० । उ० १ । स्व० ४) ॥२(पी)॥　　९।५३।४

१७१८ आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
मा त्वा के चिन्नि यमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥ १ ॥ ३।४५।१　　२४६

१७१९ वृत्रखादो वलं रुजः पुरां दर्मो अपामजः ।　　(ऋग्वेदे) (सामवेदे)
स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढा चिदारुजः ॥ २ ॥　　३।४५।२

१७२० गम्भीराँ उदधीँरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥३॥ ३ (छा)॥
(धा० १३ । उ० २ । स्व० २)　　३।४५।३

१७२१ यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ १ ॥　　८।४।३　　२५२

१७२२ मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥२॥४(घ)॥　　८।४।४
(धा० २१ । उ० ४ । स्व० १)

१७२३ त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १ ॥　　१।८४।१९　　२४७

१७२४ मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥२॥५(का)॥
(धा० २१ । उ० १ । स्व० २)　　१।८४।२०

॥ इति प्रथमः खण्डः ॥ १ ॥

१७२५ प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः ।
दिवो अदर्शि दुहिता ॥ १ ॥　　४।५२।१

१७२६ अश्वेव चित्रारुषी माता गवामृतावरी ।
सखाभूदश्विनोरुषाः ॥ २ ॥　　४।५२।२

१७२७ उत सखास्यश्विनोरुत माता गवामसि ।
उतोषो वस्व ईशिषे ॥३॥ (धा०९ । उ० नास्ति । स्व० ३)॥६(लि)॥　　४।५२।३

१७२८ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
स्तुषे वामश्विना बृहत् ॥ १ ॥　　१।४६।१

१७२९ या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।　　(ऋग्वेदे) (सामवेदे)
धिया देवा वसुविदा ॥ २ ॥　　१।४६।२

१७३० वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि ।
यद्वां रथो विभिष्पतात् ॥३॥ (धा०१४ । उ० नास्ति । स्व०३) ॥७(लि)॥　　१।४६।३

१७३१ उपस्तचित्रमा भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे ॥ १ ॥　　१।९२।१३

१७३२ उषो अद्येह गोमत्यश्वावति विभावरि ।
रेवदस्मे व्युच्छ सूनृतावति ॥ २ ॥　　१।९२।१४

१७३३ युङ्क्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
अथा नो विश्वा सौभगान्या वह ॥ ३ ॥ ८ (हि) ॥　　१।९२।१५
(धा० ६ । उ० ना० । स्व० ३)

१७३४ अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।
अर्वाग्रथं समनसा नि यच्छतम् ॥ १ ॥　　१।९२।१६

१७३५ एह देवा मयोभुवा दस्रा हिरण्यवर्तनी ।
उषर्बुधो वहन्तु सोमपीतये ॥ २ ॥　　१।९२।१८

१७३६ यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
आ न ऊर्जं वहतमश्विना युवम् ॥ ३ ॥ ९ (भा) ॥　　१।९२।१७
(धा० २० । उ० ४ । स्व० २)

॥ इति द्वितीयः खण्डः ॥ २ ॥

१७३७ अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर ॥१॥　　४२५

१७३८ अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।　　५।६।१
अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर ॥२॥　　५।६।२

१७३९ सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः । (ऋग्वेदे) (सामवेदे)
समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर ॥३॥१०(घु)॥
(धा० १६ । उ० ४ । स्व० ५)　५।६।२

१७४० महे नो अद्य बोधयोषो राये दिवित्मती ।
यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥१॥ ५।७९।१　४२१
१७४१ या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।
सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥२॥ ५।७९।२
१७४२ सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।
यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥३(तु)११॥
(धा० १९ । उ० १ । स्व० ५)　५।७९।३

१७४३ प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवम् ॥ १ ॥
५।७५।१　४१८
१७४४ अत्यायातमश्विना तिरो विश्वा अहं सना ।
दस्रा हिरण्यवर्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम श्रुतं हवम् ॥ २ ॥
५।७५।२
१७४५ आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।
रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम् ॥३॥(था)१२॥
(धा० १० । उ० नास्ति । स्व० २)　५।७५।३

॥ इति तृतीयः खण्डः ॥ ३ ॥

१७४६ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥१॥ ५।१।१　७३
१७४७ अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।
समिद्धस्य रुशदर्दर्शि पाजो महान् देवस्तमसो निरमोचि ॥२॥ ५।१।२

१७४८ यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः । (ऋग्वेदे) (सामवेदे)
आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥३॥१३(लि)॥
(धा० १९ । उ० नास्ति । स्व० ३)　५।१।३

१७४९ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक् ॥ १ ॥　१।११३।१
१७५० रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ २ ॥　१।११३।२
१७५१ समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥१४(म)॥
(धा० ३० । उ० ५ । स्व० १)　१।११३।३

१७५२ आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ ॥१॥　५।७६।१
१७५३ न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शम्भविष्ठा ॥२॥　५।७६।२
१७५४ उता यातं संगवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य ।
दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान ॥३॥१५(लो)॥
(धा० २४ । उ० नास्ति । स्व० ९)　५।७६।३

॥ इति चतुर्थः खण्डः ॥ ४ ॥

१७५५ एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥१॥
१।९२।१
१७५६ उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥ २ ॥　१।९२।२

१७५७ अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः । (ऋग्वेदे)(सामवेदे)
इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥३॥१६(कि)॥
(धा० २६ । उ० १ । स्व० ३)　१।९२।३

१७५८ अबोध्यग्निर्ज्म उदेति सूर्यो व्युषाश्चन्द्रा मह्यावो अर्चिषा ।
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १ ॥
१।१५७।१
१७५९ यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ २ ॥
१।१५७।२
१७६० अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।
त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥३॥१७(छा)॥
(धा० २२ । उ० २ । स्व० २) १।१५७।३

१७६१ प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
अच्छा वाजं सहस्रिणम् ॥ १ ॥　९।५७।१
१७६२ अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
हरिस्तुञ्जान आयुधा ॥ २ ॥　९।५७।२
१७६३ स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।
श्येनो न वंसु षीदति ॥ ३ ॥　९।५७।३
१७६४ स नो विश्वा दिवो वसूतो पृथिव्या अधि ।
पुनान इन्दवा भर ॥४॥ (धा० १४ । उ० १ । स्व० ४) ॥१८(नी)॥　९।५७।४

॥ इति पञ्चमः खण्डः ॥५॥

॥ इति अष्टमप्रपाठके तृतीयोऽर्धः, अष्टमप्रपाठकश्च समाप्तः ॥ ८ ॥

॥ इत्येकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः ।

[१]

अथ नवमप्रपाठके प्रथमोऽर्धः ॥ ९-१ ॥

(१-१८) १ नृमेध आङ्गिरसः; २ ... ३ प्रियमेध आङ्गिरसः; ४ दीर्घतमा औचथ्यः; ५ वामदेवो गौतमः; ६ प्रस्कण्वः काण्वः; ७ बृहदुक्थो वामदेव्यः; ८ बिन्दुः पूतदक्षो वा आंगिरसः; ९,१७ जमदग्निर्भार्गवः; १० सुकक्ष आंगिरसः; ११-१३ वसिष्ठो मैत्रावरुणिः; १४ सुदाः पैजवनः; १५ मेधातिथिः काण्वः; १६ नीपातिथिः काण्वः; १८ परुच्छेपो दैवोदासिः ॥ १, १७ पवमानः सोमः; ३, ७, १०, १६ इन्द्रः; ४-६, १८ अग्निः; ९ मरुतः; १० सूर्यः ॥ २...... ॥ १, ८, १०, १५-१७ गायत्री; (१७ नित्यपदा) २...... ; ३ अनुष्टुम्मुखा प्रगाथः (१ अनुष्टुप्+गायत्री); ४, ११, १३ विराट्; ५ पदपंक्तिः; ६, ९, १२ प्रगाथः (विषमा बृहती, समा सतो-बृहती); ७ त्रिष्टुप्, १४ शक्वरी, १८ अत्यष्टिः ॥

१७६५ प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसः ।　(ऋग्वेदे)(सामवेदे)
देवाँ अनु प्रभूषतः ॥ १ ॥　९।२९।१
१७६६ सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा ।
ज्योतिर्जज्ञानमुक्थ्यम् ॥ २ ॥　९।२९।२
१७६७ सुषहा सोम तानि ते पुनानाय प्रभूवसो ।
वर्धा समुद्रमुक्थ्य ॥३॥ (धा० १२ । उ० नास्ति । स्व०२) ॥१(पि)॥　९।२९।३
१७६८ एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ १ ॥　(न ऋग्वेदीयः)　४३८
१७६९ त्वामिच्छवसस्पते यन्ति गिरो न संयतः ॥ २ ॥　(न ऋग्वेदीयः)
१७७० वि स्रुतयो यथा पथा [इन्द्र त्वद्यन्तु रातयः] ॥ ३ ॥ २ (प) ॥ (न ऋग्वेदीयः)　४५३
(धा० ५ । उ० १ । स्व० १)
१७७१ आ त्वा रथं यथोतये [सुम्नाय वर्तयामसि ।
तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम्] ॥ १ ॥　८।६८।१　३५४
१७७२ तुविशुष्म तुविक्रतो शचीवो विश्वया मते ।
आ पप्राथ महित्वना ॥ २ ॥　८।६८।२

१७७३ यस्य ते महिना महः परि ज्मायन्तमीयतुः । (ऋग्वेदे) (सामवेदे)
हस्ता वज्रं हिरण्ययम् ॥३॥ (धा०१० । उ० नास्ति । स्व०१) ॥३(ब)॥ ८।६८।३

१७७४ आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा ।
सूरो न रुरुक्वाञ्छतात्मा ॥ १ ॥ १।१४९।३

१७७५ अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।
होता यजिष्ठो अपां सधस्थे ॥ २ ॥ १।१४९।४

१७७६ अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ॥ ३ ॥ ४ (छ) ॥ १।१४९।५
(धा० १२ । उ० २ । स्व० १)

१७७७ अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।
ऋध्यामा त ओहैः ॥ १ ॥ ४।१०।१ ४३४

१७७८ अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः ।
रथीरृतस्य बृहतो बभूथ ॥ २ ॥ ४।१०।२

१७७९ एभिर्नो अर्कैर्भवा नो अर्वाङ्स्वर्ण३ ज्योतिः ।
अग्ने विश्वेभिः सुमना अनीकैः ॥ ३ ॥ ५ (चि) ॥ ४।१०।३
(धा० ७ । उ० १ । स्व० ३)

॥ इति प्रथमः खण्डः ॥ १ ॥

१७८० अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ १ ॥ १।४४।१ ४०

१७८१ जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् ।
सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥२॥६(ला)॥
(धा० ९ । उ० नास्ति । स्व० २) १।४४।२

१७८२ विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ १ ॥ १०।५५।५ ३२५

१७८३ शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः ।(ऋग्वेदे)(सामवेदे)
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥२॥ १०।५५।६

१७८४ ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री ।
ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ॥३॥७(घे)॥
(धा० ३१ । उ० ४ । स्व० ७) १०।५५।७

१७८५ अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः ।
उत स्वराजो अश्विना ॥ १ ॥ ८।९४।४ १७४

१७८६ पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः ।
त्रिषधस्थस्य जावतः ॥ २ ॥ ८।९४।५

१७८७ उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः ।
प्रातर्होतेव मत्सति ॥३॥ (धा० ९ । उ० नास्ति । स्व० ४) ॥८(ली)॥ ८।९४।६

१७८८ बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥ १ ॥ ८।१०१।११ २७६

१७८९ बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥२॥९(त)॥
(धा० १४ । उ० १ । स्व० १) ८।१०१।१२

॥ इति द्वितीयः खण्डः ॥ २ ॥

१७९० उप नो हरिभिः सुतं याहि मदानां पते ।
उप नो हरिभिः सुतम् ॥ १ ॥ ८।९३।३१ १५०

१७९१ द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः
उप नो हरिभिः सुतम् ॥ २ ॥ ८।९३।३२

१७९२ त्वं हि वृत्रहन्नेषां पाता सोमानामसि ।
उप नो हरिभिः सुतम् ॥३॥(धा०१३ । उ० नास्ति । स्व० ४) ॥१०(री)॥ ८।९३।३३

१७९३ प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चर चर्षणिप्राः ॥ १ ॥ ७।३१।१० ३२८

१७९४ उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः । (ऋग्वेदे)(सामवेदे)
तस्य व्रतानि न मिनन्ति धीराः ॥ २ ॥ ७।३१।११

१७९५ इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया समापीन् ॥ ३ ॥ ॥ ११ (हि) ॥ ७।३१।१२
(धा० २६ । उ० नास्ति । स्व० ३)

१७९६ यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषम् ॥ १ ॥ ७।३२।१८ ३१०

१७९७ शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न ॥३॥१२(ना)॥
(धा० १४ । उ० १ । स्व० २) ७।३२।१९

१७९८ श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवांस्यन्तमा सचेमा ॥ १ ॥ ७।२२।४

१७९९ न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥ २ ॥ ७।२२।५

१८०० भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
मारे अस्मन्मघवञ्ज्योक्कः ॥३॥ (धा० १५ । उ० ३ । स्व० २) ॥१३(या)॥ ७।२२।६

॥ इति तृतीयः खण्डः ॥ ३ ॥

१८०१ प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।
अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रहा ।
अस्माकं बोधि चोदिता नभन्तामन्यकेषां
ज्याका अधि धन्वसु ॥ १ ॥ १०।१३३।१

१८०२ त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् ।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।
तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥२॥ १०।१३३।२

१८०३ वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः । (ऋग्वेदे)(सामवेदे)
अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति ।
या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥३॥(टि)१४॥
(धा० ४३ । उ० ६ । स्व० ३) १०।१३३।३

१८०४ रेवाँ इद्रेवत स्तोता स्यात्त्वावतो मघोनः ।
प्रेदु हरिवः सुतस्य ॥ १ ॥ ८।२।१३

१८०५ उक्थं च न शस्यमानं नागो रयिरा चिकेत ।
न गायत्रं गीयमानम् ॥२॥ ८।२।१४ २२५

१८०६ मा न इन्द्र पीयत्नवे मा शर्धते परा दाः ।
शिक्षा शचीवः शचीभिः ॥३॥ (धा० १४ । उ० १ । स्व० ३) ॥१५(ति)॥ ८।२।१५

१८०७ एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १ ॥ ८।३४।१ ३४८

१८०८ अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ २ ॥ ८।३४।३

१८०९ आ त्वा ग्रावा वदन्निह सोमी घोषेण वक्षतु ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥३॥१६(व)॥ ८।३४।२
(धा० ५ । उ० नास्ति । स्व० १)

१८१० पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ १ ॥ ९।६७।१६

१८११ ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत ॥ २ ॥ ९।६७।१८

१८१२ असृग्रं देववीतये वाजयन्तो रथा इव ॥३॥१७(रौ)॥ ९।६७।१७
(धा० ८ । उ० नास्ति । स्व० नास्ति)

॥ इति चतुर्थः खण्डः ॥ ४ ॥

१८१३ अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं
सहसो जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥१॥ १।१२७।१ ४६५

१८१४ यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र (ऋग्वेदे)(सामवेदे)
मन्मभिर्विप्रेभिः शुक्र मन्मभिः।
परिज्मानमिव द्यां होतारं चर्षणीनाम्।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥२॥ १।१२७।२

१८१५ स हि पुरु चिदोजसा विरुक्मता दीद्यानो
भवति द्रुहन्तरः परशुर्न द्रुहन्तरः।
वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम्।
निष्पहमाणो यमते नायते धन्वासहा नायते ॥३॥१८(ठी)॥ १।१२७।३
(धा० ४३। उ० २। स्व० ४)

॥ इति नवमप्रपाठके प्रथमोऽर्धः ॥ ९-१ ॥

[२]

अथ नवमप्रपाठके द्वितीयोऽर्धः ॥ ९-२ ॥

(१-१३) १ अग्निः पावकः; २ सोभरिः काण्वः, ३ अरुणो वैतहव्यः, ५-६ अवत्सारः काश्यपः, ९ गोषूक्त्यश्वसूक्तिनौ काण्वायनौ, १० त्रिशिरास्त्वाष्ट्रः, सिन्धुद्वीप आम्बरीषो वा; ११ उलो वातायनः, १३ वेनो भार्गवः, ४, ७, ८, १२। १-४, ७-८, १२ अग्निः; ५-६ विश्वे देवाः; ९ इन्द्रः; १० आपः; ११ वायुः १३ वेनः १ (१-२) विष्टारपंक्तिः, १ (३-५) सतोबृहती, १ (६) उपरिष्टाज्ज्योतिः, २ काकुभः प्रगाथः=(विषमा ककुप्, समा सतोबृहती)। ३ जगती, ५-६, १३ त्रिष्टुप्। ४,७,-११ गायत्री, ४, ७, ८, १२।

१८१६ अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो।
बृहद्भानो शवसा वाजमुक्थ्यां३ दधासि दाशुषे कवे ॥१॥ १०।१४०।१

१८१७ पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥२॥ १०।१४०।२

१८१८ ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः।
त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥३॥ १०।१४०।३

९५

१८१९ इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य। (ऋग्वेदे) (सामवेदे)
स दर्शतस्य वपुषो वि राजसि पृणक्षि दर्शतं क्रतुम् ॥४॥ १०।१४०।४

१८२० इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम् ॥५॥ १०।१४०।५

१८२१ ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥६॥१(वि)॥ १०।१४०।६
(धा० ५९। उ० ३। स्व० ३)

॥ इति पञ्चमः खण्डः ॥ ५॥

१८२२ प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः।
यस्य त्वं सख्यमाविथ ॥१॥ ८।१९।३० १०८

१८२३ तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्ण[illegible] दृदे।
त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥२॥२(यी)॥ ८।१९।३१
(धा० १२। उ० नास्ति। स्व० ४)

१८२४ तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः।
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥१॥३(रि)॥
(धा० १३। उ० नास्ति। स्व० ३) १०।९१।६

१८२५ अग्निरिन्द्राय पवते दिवि शुक्रो वि राजति।
महिषीव वि जायते ॥१॥ (धा० ७। उ० नास्ति। स्व[illegible] ४ (या)॥ (न ऋग्वेदीयः)

१८२६ यो जागार तमृचः कामयन्ते यो जागार तमु [illegible] यन्ति।
यो जागार तमयं सोम आह तवाहमस्मि सख्[illegible] ओकाः ॥५(या)॥
(धा० ७। उ० नास्ति। स्व० २) ५।४४।१४

१८२७ अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥६(वा)॥
(धा० १०। उ० नास्ति। स्व० २) ५।४४।१५

१८२८ नमः सखिभ्यः पूर्वसद्भ्यो नमः साकंनिषेभ्यः। (ऋग्वेदे) (सामवेदे)
युञ्जे वाचं शतपदीम् ॥ १ ॥ (न ऋग्वेदीयः)

१८२९ युञ्जे वाचं शतपदीं गाये सहस्रवर्तनि।
गायत्रं त्रैष्टुभं जगत् ॥ २ ॥ (न ऋग्वेदीयः)

१८३० गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि सम्भृता।
देवा ओकांसि चक्रिरे ॥३॥(धा० १२। उ० नास्ति। स्व० ५)॥७(यु)॥(न ऋग्वेदीयः)

१८३१ अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः।
सूर्यो ज्योतिर्ज्योतिः सूर्यः ॥ १ ॥ (न ऋग्वेदीयः)

१८३२ पुनरूर्जा नि वर्तस्व पुनरग्न इषायुषा।
पुनर्नः पाह्यंहसः ॥ २ ॥ (न ऋग्वेदीयः)

१८३३ सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया।
विश्वप्स्न्या विश्वतस्परि ॥ ३ ॥(धा० ८। उ० २। स्व० २)॥८(ठा)॥(न ऋग्वेदीयः)

॥ इति षष्ठः खण्डः ॥ ६ ॥

१८३४ यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्।
स्तोता मे गोसखा स्यात् ॥ १ ॥ ८।१४।१ १२२

१८३५ शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे।
यदहं गोपतिः स्याम् ॥ २ ॥ ८।१४।२

१८३६ धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते।
गामश्वं पिप्युषी दुहे ॥ ३ ॥(धा० १५। उ० १। स्व० ३)॥९(पि)॥ ८।१४।३

१८३७ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन।
महे रणाय चक्षसे ॥ १ ॥ १०।९।१

१८३८ यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः ॥ २ ॥ १०।९।२

१८३९ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। (ऋग्वेदे) (सामवेदे)
आपो जनयथा च नः ॥३॥(धा० १०। उ० नास्ति। स्व० २)॥१०(वा)॥ १०।९।३

१८४० वात आ वातु भेषजं शम्भु मयोभु नो हृदे।
प्र न आयूंषि तारिषत् ॥ १ ॥ १०।१८६।१ १८४

१८४१ उत वात पितासि न उत भ्रातोत नः सखा।
स नो जीवातवे कृधि ॥ २ ॥ १०।१८६।२

१८४२ यददो वात ते गृहे३ऽमृतं निहितं गुहा।
तस्य नो धेहि जीवसे ॥३॥ (धा० १०। उ० १। स्व० नास्ति) ॥११(पौ)॥ १०।१८६।३

१८४३ अभि वाजी विश्वरूपो जनित्रं हिरण्ययं बिभ्रदत्कं सुपर्णः।
सूर्यस्य भानुमृतुथा वसानः परि स्वयं मेधमृज्रो जजान ॥ १ ॥ (न ऋग्वेदीयः)

१८४४ अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यत्संबभूव।
अन्तरिक्षे स्वं महिमानं मिमानः कनिक्रन्ति वृष्णो अश्वस्य रेतः ॥ २ ॥
(न ऋग्वेदीयः)

१८४५ अयं सहस्रा परि युक्ता वसानः सूर्यस्य भानुं यज्ञो दाधार।
सहस्रदाः शतदा भूरिदावा धर्ता दिवो भुवनस्य विश्पतिः ॥३॥१२(पु)॥
(धा० २०। उ० १। स्व० ५) (न ऋग्वेदीयः)

१८४६ नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ १ ॥ १०।१२३।६ १२०

१८४७ ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि।
वसानो अत्कं सुरभिं दृशे कं स्वा३र्ण नाम जनत प्रियाणि ॥२॥ १०।१२३।७

१८४८ द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन्।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥१३(खु)॥
(धा० २६। उ० २। स्व० ५) १०।१२३।८

॥ इति सप्तमः खण्डः ॥ ७॥ इति नवमप्रपाठकस्य द्वितीयोऽर्धः ॥९-२॥

॥ इति विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः ।

[१]

अथ नवमप्रपाठके तृतीयोऽर्धः ॥ ९-३ ॥

(१-९) १-४, ५ (१-२), अप्रतिरथ ऐन्द्रः; ५ (३), ६ (३), ८ (१, ३) पायुर्भारद्वाजः; ७
(१-२) शासो भारद्वाजः; ९ (१) जय ऐन्द्रः; ९ (२-३) गोतमो राहूगणः; ४ (३) ६ (१-२)-?
७ (१) ... ८ (२) ... ॥ १, २ (२-३), ३-४, ५ (२), ६, ७, ९ (१) इन्द्रः;
५ (२) इन्द्रो मरुतो वा; २ (१) बृहस्पतिः; ५ (१) अप्वा देवी, ५ (३)
इषवः; ६ (३) (संग्रामाशिषः) युद्धभूमि-कवच-ब्राह्मणस्पत्यादितयः; ८
(१, ३) [संग्रामाशिषः १ वर्म-सोम-वरुणाः, ३ देवब्रह्माणि];
९ सोमावरुणौ । (२-३) विश्वे देवाः; ८ (३)... ॥ ३ ॥ १-४, ५
(१), ६(१) ८ (१) ९ (१-२) त्रिष्टुप्; ५ (२-३), ६ (२)
७ (१-२), ८ (२) अनुष्टुप्; ६ (३) पंक्तिः; ९ (३)
विराट्स्थाना; ७ (३) विराड् जगती ८ (२)...॥

१८४९ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।(ऋग्वेदे)(सामवेदे)
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥१॥ १०।१०३।१
१८५० संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ २ ॥ १०।१०३।२
१८५१ स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्यू३ग्रधन्वा प्रतिहिताभिरस्ता ॥३॥१(फे)॥
(धा० ४० । उ० २ । स्व० ७) १०।१०३।३

१८५२ बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥१॥ १०।१०३।४
१८५३ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥२॥
१०।१०३।५
१८५४ गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ॥३॥२(हे)॥
(धा० २६ । उ० नास्ति । स्व० ७) १०।१०३।६

१८५५ अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः । (ऋग्वेदे)(सामवेदे)
दुश्च्यवनः पृतनाषाडयुध्यो३ऽस्माकं सेना अवतु प्र युत्सु ॥१॥ १०।१०३।७
१८५६ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥ २ ॥ १०।१०३।८
१८५७ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥३॥३(च)॥
(धा २७ । उ० १ । स्व० १) १०।१०३।९

१८५८ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि ।
उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१॥ १०।१०३।१०
१८५९ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥ २ ॥ १०।१०३।११
१८६० असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।
तां गूहत तमसापव्रतेन यथैतेषामन्यो अन्यं न जानात् ॥३॥५(चु)॥ (न ऋग्वेदीयः)
(धा० ३२ । उ० १ । स्व० ५)

१८६१ अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥१॥ १०।१०३।१२
१८६२ प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥ २ ॥ १०।१०३।१३
१८६३ अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान्प्र पद्यस्व मामीषां कं च नोच्छिषः ॥३॥ ५ (ठा)॥ ६।७५।१६
(धा० १८ । उ० २ । स्व० २)

१८६४ कङ्काः सुपर्णा अनु यन्त्वेनान् गृध्राणामन्नमसावस्तु सेना ।
मैषां मोच्यघहारश्च नेन्द्र वयांस्येनाननुसंयन्तु सर्वान् ॥१॥ (न ऋग्वेदीयः)

१८६५ अमित्रसेनां मघवन्नस्माञ्छत्रुयतीमभि । (ऋग्वेदे) (सामवेदे)
उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥ २ ॥ (न ऋग्वेदीयः)
१८६६ यत्र बाणाः संपतन्ति कुमारा विशिखा इव ।
तत्र नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु
विश्वाहा शर्म यच्छतु ॥ ३ ॥ ६ (गा) ॥ (धा० २७ । उ० नास्ति । स्व० २) ६।७५।१७

१८६७ वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥ १ ॥ १०।१५२।३
१८६८ वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ अभिदासत्यधरं गमया तमः ॥ २ ॥ १०।१५२।४
१८६९ इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।
तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणां सहो महत् ॥३॥७(थि)॥
(धा० २९ । उ० २ । स्व० ३) (न ऋग्वेदीयः)

१८७० मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥ १ ॥ ६।७५।१८
१८७१ अन्धा अमित्रा भवताशीर्षाणोऽहय इव ।
तेषां वो अग्निनुन्नानामिन्द्रो हन्तु वरंवरम् ॥ २ ॥ (न ऋग्वेदीयः)
१८७२ यो नः स्वोऽरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरं शर्म वर्म ममान्तरम् ॥३॥८(वी)॥
(धा० २५ । उ० नास्ति । स्व० ४) ६।७५।१९

१८७३ मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व ॥१॥ १०।१८०।२
१८७४ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ २ ॥ १।८९।८

१८७५ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । (ऋग्वेदे) (सामवेदे)
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥
स्वस्ति नो बृहस्पतिर्दधातु ॥३॥ (धा० २६ । उ० १ । स्व० ६) ॥ ९(कू) ॥ १।८९।६

॥ इति नवमप्रपाठकस्य तृतीयोऽर्धः, नवमप्रपाठकश्च समाप्तः ॥ ९-३ ॥

॥ इत्येकविंशोऽध्यायः ॥ २१ ॥

॥ इत्युत्तरार्चिकः समाप्तः ॥

॥ इति सामवेदसंहिता समाप्ता ॥

अथ महानाम्न्यार्चिकः।

६४१ विदा मघवन् विदा गातुमनुशँसिषो दिशः।
शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥ १ ॥
६४२ आभिष्ट्वमभिष्टिभिः स्वऽ३र्नांशुः। प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥ २ ॥
६४३ एवा हि शक्रो राये वाजाय वज्रिवः।
शविष्ठ वज्रिन्नृञ्जसे मँहिष्ठ वज्रिन्नृञ्जसँ
आ याहि पिब मत्स्व (धा० २२। स्व० २। उ० २) ॥ ३ (छा) ॥
६४४ विदा राये सुवीर्यं भुवो वाजानां पतिर्वशाँ अनु।
मँहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥ ४ ॥
६४५ यो मँहिष्ठो मघोनामँशुर्न शोचिः।
चिकित्वो अभि नो नयेन्द्रो विदे तमु स्तुहि ॥ ५ ॥
६४६ ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम्।
स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् (धा० १४। स्व० ३। उ० २) ॥६ (ठी)॥
६४७ इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम्।
स नः स्वर्षदति द्विषः। स नः स्वर्षदति द्विषः ॥ ७ ॥
६४८ पूर्वस्य यत्ते अद्रिवोऽँशुर्मदाय। सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते।
वशी हि शक्रो नूनं तन्नव्यं संन्यसे ॥ ८ ॥
६४९ प्रभो जनस्य वृत्रहन् त्समर्येषु ब्रवावहै
शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ९ ॥

अथ पञ्च पुरीषपदानि ॥

६५० एवाह्ये ३ऽ३ऽ३ व। एवा ह्यग्ने। एवाहीन्द्र।
एवा हि पूषन्। एवा हि देवाः। ओं। एवा हि देवाः। ओम् ॥ १०(त्वी) ॥

॥ इति पञ्च पुरीषपदानि ॥ इति महानाम्न्यार्चिकः समाप्तः ॥ (धा० २४। स्व० ६। उ० २)

[अस्माभिस्तु महानाम्न्यार्चिकः पूर्वं पादविच्छेदपूर्वकं मुद्रितः (पृष्ठे ७१—७२ मन्त्रसंख्या ६४१—६५० द्रष्टव्या)। अत्र तु वैदिकानां यथा पठनपाठनपरंपराऽस्ति तथैव संहिता मुद्रितेति ज्ञातव्यम्।]

शुद्धि-पत्रकम्

(कोष्ठाद्बहिरशुद्धम्, कोष्ठान्तर्गतं शुद्धं ज्ञातव्यम्)

मन्त्रक्रमाङ्कः= ४३ पुरस्पृहं (पुरुस्पृहं); यशा (यशा), ४६ शेपे वनेषु (शेपे वनेषु); ६६ तव (तव); ६९ मवसे (मवसे); ७७ धायि (धायी); १०१ माशा (माशा); ११३ साहा (सह); १२८ मत (मत्); २०८-८।९३।२६ (८।९३।१६); २१६ के हा (के ह); २४५-१३४१ (१३९१); २८२ स्वापे-(स्वापे); ३६० मिपे (मिपे); ४६६ विदद्विषन् (विदद्विषम्); ६१७ शीर्षा (शीर्षा), दशाङ्गुलम्....(दशाङ्गुलम्); ६१८ उदैत्पुरुष (उदैत्पुरुष); ६२३ पुरुपासो (परुपासो); ६२५ न्द्र दध्योज ई (न्द्र दध्योज ई); ८६५ गमदिन्द्र (गम इन्द्र); ८९९ घृष्टि (घृष्टि); ९०५ वा देव (वा देव); १२३९ सम्रे (सुम्ने); १४१४-१।२२।७ (८।१९।४); १८१५ पुरु (पुरू)

गणना-शुद्धिः।

२१० पृष्ठे (प्रथम-मण्डलस्य) सर्वयोगः २०५+पुनरुक्ताः ३१=२३६ ॥ २१२ पृष्ठे-(चतुर्थ-मण्डलस्य) सर्वयोगः २४+ पुनरुक्ताः ३=२७ ॥ २१२ पृष्ठे-(पञ्चम-मण्डलस्य) सर्वयोगः- ५३+पु० ८= ६१ ॥ २१६ पृष्ठे-(अष्टम-मण्डलस्य) सर्वयोगः ३६४+पु० ८८=४५२ ॥ २१९ पृष्ठे (नवम-मण्डलस्य) सर्वयोगः ५४७+पु० ९६=६४३ ॥ २२० पृष्ठे (दशम-मण्डलस्य) सर्वयोग १०१+पु० ९ = ११० ॥ एतेन सामवेदान्तर्गतानामृग्वेदमन्त्राणां गणनैवं भवति-

मण्डलं	मन्त्रसंख्या		पुनरुक्ताः		सर्व-योग
१	२०५		३१		२३६
२	११		१		१२
३	४२		७		४९
४	२४		३		२७
५	५३		८		६१
६	८१		१०		९१
७	७६		१४		९०
८	३६४		८८		४५२
९	५४७		९६		६४३
१०	१०१		९		११०
सर्वयोगः	१५०४	+	२६७	=	१७७१
,,	९९	+	५	=	१०४
,,	१६०३	+	२७२	=	१८७५

२२१ पृष्ठे चतुर्थ-प्रपाठकस्य द्वितीयार्धस्य मन्त्रसंख्या=४६ स्थाने '४९ अस्ति।'

२२४ पृष्ठे सामगानसूच्यां **प्रथमं, द्वितीयं** आदि पदानां अग्रे '**पृष्ठं**' पठनीयम्, यथा '**प्रथमं पृष्ठं, द्वितीयं पृष्ठं**' इ० ॥

जैमिनीय संहिता

सामवेदीया

जैमिनीयसंहिता

१.१

ऋ ६.१६.१०	अग्न आ याहि वीतये गृणानो हव्यदातये ।
	नि होता सत्सि बर्हिषि ॥ १ ॥
६.१६.१	त्वम् अग्ने यज्ञानां होता विश्वेषां हितः ।
	देवेभिर् मानुषे जने ॥ २ ॥
१.१२.१	अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
	अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥
६.१६.३४	अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया ।
	समिद्धः शुक्र आहुतः ॥ ४ ॥
८.८४.१	प्रेष्ठं वो अतिथिं स्तुषे मित्रम् इव प्रियम् ।
अग्नि...	अग्ने रथं न वेद्यम् ॥ ५ ॥
८.७१.१	त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।
	उत द्विषो मर्त्यस्य ॥ ६ ॥
६.१६.१६	एह्य् ऊ षु ब्रवाणि ते अग्न इत्थेतरा गिरः ।
	एभिर् वर्धास इन्दुभिः ॥ ७ ॥
८.११.७	आ ते वत्सो मनो यमत् परमाच् चित् सधस्थात् ।
• त्वांकामया •	अग्ने त्वां कामये गिरा ॥ ८ ॥
६.१६.१३	त्वाम् अग्ने पुष्करा्द् अध्य् अथर्वा निर् अमन्थत ।
	मूर्ध्नो विश्वस्य वाघतः ॥ ९ ॥
ऋग्वेदे नास्ति	अग्ने विवस्वद् आ भरास्मभ्यम् ऊतये महे ।
	देवो ह्य् असि नो दृशे ॥ १० ॥ ॥१॥

१.२

ऋ ८.७५.१०	नमस् ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
...अर्दय (एवं कौ)	अमैर् अमित्रम् अर्दया ॥ १ ॥
४.८.१	दूतं वो विश्ववेदसं हव्यवाहम् अमर्त्यम् ।
	यजिष्ठम् ऋञ्जसे गिरा ॥ २ ॥
८.१०२.१३	उप त्वा जामयो गिरो देदिशतीर् हविष्कृतः ।
	वायोर् अनीके अस्थिरन् ॥ ३ ॥
१.१.७	उप त्वाग्ने दिवेदिवे दोषावस्तर् धिया वयम् ।
	नमो भरन्त एमसि ॥ ४ ॥

१.२७.१०	जराबोध तद् विविड्ढि विशेविशे यज्ञियाय ।
	स्तोमं रुद्राय दृशीकम् ॥ ५ ॥
१.१९.१	प्रति त्यं चारुम् अध्वरं गोपीथाय प्र हूयसे ।
	मरुद्भिर् अग्न आ गहि ॥ ६ ॥
१.२७.१	अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
	सम्राजन्तम् अध्वराणाम् ॥ ७ ॥
८.१०२.४	और्वभृगुवच् छुचिम् अप्नवानवद् आ हुवे ।
	अग्निं समुद्रवाससम् ॥ ८ ॥
८.१०२.२२	अग्निम् इन्धानो मनसा धियं सचेत मर्त्यः ।
• ईधे •	अग्निम् इन्धे विवस्वभिः ॥ ९ ॥
८.६.१०	आद् इत् प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् ।
...दिवा	परो यद् इध्यते दिवि ॥ १० ॥ ॥२॥

१.३

ऋ ८.१०२.७	अग्निं वो वृधन्तम् अध्वराणां पुरूतमम् ।
	अच्छा नप्त्रे सहस्वते ॥ १ ॥
६.१६.२८ 'वासद्...	अग्निस् तिग्मेन शोचिषा यंसद् विश्वं न्य् अत्रिणम् ।
...वनते •	अग्निर् नो वंसते रयिम् ॥ २ ॥
४.९.१ 'य इम् आ • •	अग्ने मृळ महं अस्य् अय आ देवयुं जनम् ।
	इयेथ बर्हिर् आसदम् ॥ ३ ॥
७.१५.१३ ...ष्म • रिषतः	अग्ने रक्षा णो अंहसः प्रति स्म देव रिषतः ।
	तपिष्ठैर् अजरो दह ॥ ४ ॥
६.१६.४३ • युक्ष्वा ...	अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः ।
• • मन्यवे	अरं वहन्त्य् आशवः ॥ ५ ॥
७.१५.७ '• देव धीमहि ।	नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।
	सुवीरम् अग्न आहुत ॥ ६ ॥
८.४४.१६	अग्निर् मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
	अपां रेतांसि जिन्वति ॥ ७ ॥
१.२७.४	इमम् ऊ षु त्वम् अस्माकं सनिं गायत्रं नव्यांसम् ।
	अग्ने देवेषु प्र वोचः ॥ ८ ॥
८.७४.११ यं...वनिष्ठद् • •	तं त्वा गोपवनो गिरा जनिष्ठद् अग्ने अङ्गिरः ।
	स पावक श्रुधी हवम् ॥ ९ ॥
४.१५.३	परि वाजपतिः कविर् अग्निर् हव्यान्य् अक्रमीत् ।
	दधद् रत्नानि दाशुषे ॥ १० ॥
१.५०.१	उद् उ त्यं जातवेदसं देवं वहन्ति केतवः ।
	दृशे विश्वाय सूर्यम् ॥ ११ ॥
१.१२.७	कविम् अग्निम् उप स्तुहि सत्यधर्माणम् अध्वरे ।

	देवम् अमीवचातनम् ॥ १२ ॥
१०.९.४ 'आपो • •	शं नो देवीर् अभिष्टये शं नो भवन्तु पीतये ।
	शंयोर् अभि स्रवन्तु नः ॥ १३ ॥
८.८४.७ • • परीणसो • • दंपते	कस्य नूनं परीणसि धियो जिन्वसि सत्पते ।
	गोषाता यस्य ते गिरः ॥ १४ ॥ ॥३॥

१.४

ऋ ६.४८.१	यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
	प्रप्र वयम् अमृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥
८.६०.९	पाहि नो अग्न एकया पाह्य् उत द्वितीयया ।
	पाहि गीर्भिस् तिसृभिर् ऊर्जां पते पाहि चतसृभिर् वसो ॥ २ ॥
६.४८.७ [दीदिहि	बृहद्भिर् अग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
'रेवन्नः शुक्र दीदिहि द्युमत् पावक	भरद्वाजे समिधानो यविष्ठ्य रेवत् पावक दीदिहि ॥ ३ ॥
७.१६.७ त्वे (एवं कौ)...	त्वय्य् अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
	यन्तारो ये मघवानो जनानाम् ऊर्वं दयन्त गोनाम् ॥ ४ ॥
८.६०.१९ ...तेपानो • •	अग्ने अरितर् विश्पतिस् तपानो देव रक्षसः ।
• गृहपतिर् ...	अप्रोषिवान् गृहपते महं असि दिवस् पायुर् दुरोणयुः ॥ ५ ॥
१.४४.१ ...अमर्त्यं (एवं कौ)	अग्ने विवस्वद् उषसश् चित्रं राधो अमर्त्यम् ।
	आ दाशुषे जातवेदो वहा त्वम् अद्या देवं उषर्बुधः ॥ ६ ॥
६.४८.९ ...चोदय (एवं कौ)	त्वं नश् चित्र ऊत्या वसो राधांसि चोदया ।
	अस्य रायस् त्वम् अग्ने रथीर् असि विदा गाधं तुचे तु नः ॥ ७ ॥
८.६०.५ ...ऋतस् •	त्वम् इत् सप्रथा अस्य् अग्ने त्रातर् ऋतः कविः ।
	त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ८ ॥
८.६०.११	आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
...स्वयशस्तरम्	रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरम् ॥ ९ ॥
८.१०३.६	यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
...यन्त्य	मधोर् न पात्रा प्रथमान्य् अस्मै प्र स्तोमा यन्त्व् अग्नये ॥ १० ॥ ॥४॥

१.५

ऋ ७.१६.१	एना वो अग्निं नमसोर्जो नपातम् आ हुवे ।
	प्रियं चेतिष्ठम् अरतिं स्वध्वरं विश्वस्य दूतम् अमृतम् ॥ १ ॥
८.६०.१५ • • मात्रोः ...	शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते ।

• हव्या ...	अतन्द्रो हव्यं वहसि हविष्कृत आद् इद् देवेषु राजसि ॥ २ ॥
८.१०३.१	अदर्शि गातुवित्तमो यस्मिन् व्रतान्य् आदधुः ।
...नक्षन्त •	उपो षु जातम् आर्यस्य वर्धनम् अग्निं नक्षन्तु नो गिरः ॥ ३ ॥
८.२७.१	अग्निर् उक्थे पुरोहितो ग्रावाणो बर्हिर् अध्वरे ।
...पतिं देवाँ (ओ पते देवा) • •	ऋचा यामि मरुतो ब्रह्मणस् पते देवं अवो वरेण्यम् ॥ ४ ॥
८.७१.१४	अग्निम् ईडिष्वावसे गाथाभिः शीरशोचिषम् ।
...ऽग्निं • •	अग्निं राये पुरुमीढ श्रुतं नरो अग्निः सुदीतये छर्दिः ॥ ५ ॥
१.४४.१३	श्रुधि श्रुत्कर्ण वह्निभिर् देवैर् अग्ने सयावभिः ।
• सीदन्तु...प्रातर्यावाणो अध्वरम्	आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिर् अध्वरे ॥ ६ ॥
८.१०३.२ 'देवाँ अच्छा • •	प्र दैवोदासो अग्निर् देव इन्द्रो न मज्मना ।
...नाकस्य सानवि	अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ ७ ॥
८.१.१८	अध ज्मो अध वा दिवो बृहतो रोचनाद् अधि ।
...वृण (एवं कौ)	अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृणा ॥ ८ ॥
३.९.२	कायमानो वना त्वं यन् मातॄर् अजगन्न् अपः ।
...इहाभवः	न तत् ते अग्ने प्रमृषे निवर्तनं यद् दूरे सन्न् इहाभुवः ॥ ९ ॥
१.३६.१९	नि त्वाम् अग्ने मनुर् दधे ज्योतिर् जनाय शश्वते ।
	दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ १० ॥ ॥५॥

१.६

ऋ ७.१६.११ ...विवष्ट्य् •	देवो वो द्रविणोदाः पूर्णां विवष्ट्व् आसिचम् ।
	उद् वा सिञ्चध्वम् उप वा पृणध्वम् आद् इद् वो देव ओहते ॥ १ ॥
१.४०.३	प्रैतु ब्रह्मणस् पतिः प्र देव्य् एतु सूनृता ।
	अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ २ ॥
१.३६.१३	ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।
	ऊर्ध्वो वाजस्य सनिता यद् अञ्जिभिर् वाघद्भिर् विह्वयामहे ॥ ३ ॥
८.१०३.४ • यं • निनीषसि ...	प्र यो राये निनीषति मर्तो यस् ते वसो दाशत् ।
	स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥ ४ ॥
१.३६.१	प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
• • • ईमहे • सीमिदन्य ईळते	अग्निं सूक्तेभिर् वचोभिर् वृणीमहे यं सम् इद् अन्य इन्धते ॥ ५ ॥
३.१६.१ • • • महः •	अयम् अग्निः सुवीर्यस्येशे हि सौभगस्य ।

	राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६ ॥
७.१६.५	त्वम् अग्ने गृहपतिस् त्वं होता नो अध्वरे ।
...वेषि • •	त्वं पोता विश्ववार प्रचेता यक्षि यासि च वार्यम् ॥ ७ ॥
६.१.१	सखायस् त्वा ववृमहे देवं मर्तास ऊतये ।
• • • सुदीदितिं...	अपां नपातं सुभगं सुदंससं सुप्रदूर्तिम् अनेहसम् ॥ ८ ॥ ॥६॥
	१.७
ऋग्वेदे नास्ति	आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
	इडस् पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानाम् ॥ १ ॥
ऋ १०.११५.१	चित्र इच् छिशोस् तरुणस्य वक्षथो न यो मातराव् अन्वेति धातवे ।
अन्वेति •	
• यदि जीजनद् • च नु ववक्ष • •	अनूधा यद् अजीजनद् अधा चिद् आ ववक्षत् सद्यो महि दूत्यं चरन् ॥ २ ॥
१०.५६.१	इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
संवेशने तन्वश्...	संवेशनस् तन्वे चारुर् एधि प्रियो देवानां परमे जनित्रे ॥ ३ ॥
१.९४.१	इमं स्तोमम् अर्हते जातवेदसे रथम् इव सं महेमा मनीषया ।
कौ ...रिषाम	भद्रा हि नः प्रमतिर् अस्य संसद्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥
ऋ ६.७.१	मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
...आसन्ना • •	कविं सम्राजम् अतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः ॥ ५ ॥
६.२४.६ 'उक्थेभिरिन्द्रजनयन्त यज्ञैः {	वि त्वद् आपो न पर्वतस्य पृष्ठाद् उक्थेभिर् अग्ने जनयन्त देवाः ।
• त्वाभिः सुष्टुतिभिर्वाजयन्त • • { आजुर्गिर्वाहो • {	तं त्वा गिरः सुष्टुतयो वाजयन्त्य् आजिं न गिर्ववाहो जिग्युर् अश्वाः ॥ ६ ॥
४.३.१	आ वो राजानम् अध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।
	अग्निं पुरा तनयित्नोर् अचित्ताद् धिरण्यरूपम् अवसे कृणुध्वम् ॥ ७ ॥
७.८.१	इन्धे राजा सम् अर्यो नमोभिर् यस्य प्रतीकम् आहुतं घृतेन ।
...सबाध अग्निर् (एवं कौ) अग्र •	नरो हव्येभिर् ईडते सबाधो अग्निर् अग्रम् उषसाम् अशोचि ॥ ८ ॥
१०.८.१	प्र केतुना बृहता यात्य् अग्निर् आ रोदसी वृषभो रोरवीति ।
• • अन्तॉं उपमॉं...	दिवश् चिद् अन्ताद् उपमाम् उद् आनड् अपाम् उपस्थे

• ववर्ध (एवं कौ)	महिषो ववर्धा ॥ ९ ॥
७.१.१ ...हस्तच्युती जनयन्त	अग्निं नरो दीधितिभिर् अरण्योर् हस्तच्युतं जनयत प्रशस्तम् ।
...अथर्युम्	दूरेदृशं गृहपतिम् अथव्युम् ॥ १० ॥ ॥७॥
	१.८
ऋ ५.१.१	अबोध्य् अग्निः समिधा जनानां प्रति धेनुम् इवायतीम् उषासम् ।
...सिस्रते •	यह्वा इव प्र वयाम् उज्जिहानाः प्र भानवः सस्रते नाकम् अच्छा ॥ १ ॥
अच्छ (एवं कौ)	
१०.४६.५ ...मूरं • • •	प्र भूर्जयन्तं महां विपोधां मूरैर् अमूरं पुरां दर्माणम् ।
नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं [नार्वाणं धनर्चम्	नयन्तं गीर्भिर् वना धियं धा हरिश्मश्रुं न वर्मणा धनर्चिम् ॥ २ ॥
६.५८.१	शुक्रं ते अन्यद् यजतं ते अन्यद् विषुरूपे अहनी द्यौर् इवासि ।
• • • • स्वधावो ...	विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्न् इह रातिर् अस्तु ॥ ३ ॥
३.१.२३	इळाम् अग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
	स्यान् नः सूनुस् तनयो विजावाग्ने सा ते सुमतिर् भूत्व् अस्मे ॥ ४ ॥
१०.४६.१ ...नृषद्वा • • उपस्थे	प्र होता जातो महान् नभोविन् नृषद्मा सीदद् अपां विवर्ते ।
दधिर् • • स ते वयांसि...	दधद् यो धायि सुते वयांसि यन्ता वसूनि विधते तनूपाः ॥ ५ ॥
७.६.१ • सम्राजो • प्रशस्ति...	प्र सम्राजम् असुरस्य प्रशस्तं पुंसः कृष्टीनाम् अनुमाद्यस्य ।
'वन्दे दारुं वन्दमानो विवक्मि	इन्द्रस्येव प्र तवसः कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ६ ॥
३.२९.२ 'गर्भ इव सुधितो गर्भिणीषु	अरण्योर् निहितो जातवेदा गर्भ इवेत् सुभृतो गर्भिणीभिः ।
	दिवेदिव ईड्यो जागृवद्भिर् हविष्मद्भिर् मनुष्येभिर् अग्निः ॥ ७ ॥
१०.८७.१९	सनाद् अग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
• • • क्रव्यादो...	अनु दह सहमूरान् कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ८ ॥ ॥ ८ ॥
	१.९
ऋ ५.१०.१ • • • भर (एवं कौ)...	अग्न ओजिष्ठम् आ भरा द्युम्नम् अस्मभ्यम् अध्रिगो ।
• • राया परीणसा...	प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ १ ॥
ऋग्वेदे नास्ति	यदि वीरो अनुष्याद् अग्निम् इन्धीत मर्त्यः ।

	आजुह्वद् धव्यम् आनुषक् शर्म भक्षीत दैव्यम् ॥ २ ॥
ऋ ६.२.६ ...दिवि षन्छुक •	त्वेषस् ते धूम ऋण्वति दिवि सं शुक्र आततः ।
	सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ३ ॥
६.२.१	त्वं हि क्षैतवद् यशो अग्ने मित्रो न पत्यसे ।
	त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ४ ॥
५.१८.१ [स्पति	प्रातर् अग्निः पुरुप्रियो विशः स्तवेतातिथिः ।
विश्वानि यो अमर्त्यो हव्या मर्तेषु	विश्वे यस्मिन्न् अमर्त्ये हव्यं मर्तास इन्धते ॥ ५ ॥
५.२५.७	यद् वाहिष्ठं तद् अग्नये बृहद् अर्च विभावसो ।
	महिषीव त्वद् रयिस् त्वद् वाजा उद् ईरते ॥ ६ ॥
८.७४.१	विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
	अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ७ ॥
५.१६.१	बृहद् वयो हि भानवे अर्चा देवायाग्नये ।
• • • प्रशस्तिभिर्...	यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥ ८ ॥
८.७४.४ आगन्म...	अगन्म वृत्रहन्तमं ज्येष्ठम् अग्निम् आनवम् ।
यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते	यः स्म श्रुतर्वन्न् आर्क्ये बृहद् अनीक इध्यते ॥ ९ ॥
ऋग्वेदे नास्ति	जातः परेण धर्मणा यत् सवृद्भिः सहाभुवः ।
	पिता यत् कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥ १० ॥
	१.१०
[ईमहे	
ऋ १०.१४१.३ • • अवसे अग्नि गीर्भि-	सोमं राजानं वरुणम् अग्निम् अन्वारभामहे ।
आदित्यान्...	आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ १ ॥
{	इत एत उद् आरुहन् दिवः पृष्ठान्य् आरुहन् ।
ऋग्वेदे न सन्ति {	प्र भूर्जयो यथा पथो द्याम् अङ्गिरसो ययुः ॥ २ ॥
{	राये अग्ने महे त्वा दानाय सम् इधीमहि ।
{	ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥ ३ ॥
२.५.३ ...ब्रह्माणि वेद तद्	दधन्वे वा यद् ईम् अनु वोचद् ब्रह्मेति वेर् उतत् ।
...इवाभवत्	परि विश्वानि काव्या नेमिश् चक्रम् इवाभुवत् ॥ ४ ॥
१.४५.१	त्वम् अग्ने वसुंर् इह रुद्रं आदित्यं उत ।
[अध्वरम्परि	यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ ५ ॥
१०.८७.२५ ...शृणीहि • । कौ ...वि-	प्रत्य् अग्ने हरसा हरः शृणाहि विश्वतः प्रति ।
• • • वि रुज •	यातुधानस्य रक्षसो बलं न्य् उब्ज वीर्यम् ॥ ६ ॥
	१.११
[द्रविणं) वोचे ...	
'ऋ १.१५०.१ • • दाश्वान् (कौ	पुरु त्वा दाशिवं वोचेद् अरिर् अग्ने तव स्विद् आ ।
...महस्य (एवं कौ)	तोदस्येव शरण आ महस्या ॥ १ ॥
१.१०.५	प्र होत्रे पूर्व्यं वचो ऽग्नये भरता बृहत् ।
	विपां ज्योतींषि बिभ्रते न वेधसे ॥ २ ॥

१.७९.४	अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
• धेहि...	अस्मे देहि जातवेदो महि श्रवः ॥ ३ ॥
१.१०.७	अग्ने यजिष्ठो अध्वरे देवान् देवयते यज ।
[शासत •	होता मन्द्रो वि राजस्यति स्रिधः ॥ ४ ॥
९.१०२.४ जज्ञानं • मातरो वेधाम-	जज्ञानः सत मातृभिर् मेधाम् आशासत श्रिये ।
...चिकेत यत्	अयं ध्रुवो रयीणां चिकेतद् आ ॥ ५ ॥
८.१८.७	उत स्या नो दिवा मतिर् अदितिर् ऊत्या गमत् ।
• शंताति • करद् (एवं कौ)...	सा शंताता मयस् कराद् अप स्रिधः ॥ ६ ॥
८.२३.१ ईळिष्वा (एवं कौ)...	ईळिष्व हि प्रतीव्यं यजस्व जातवेदसम् ।
	चरिष्णुधूमम् अगृभीतशोचिषम् ॥ ७ ॥
८.२३.१५ ...घन (एवं कौ)...	न तस्य मायया चना रिपुर् ईशीत मर्त्यः ।
...हव्यदातिभिः	यो अग्नये ददाश हव्यदातये ॥ ८ ॥
६.५१.१३	अप त्यं वृजिनं रिपुं स्तेनम् अग्ने दुराध्यम् ।
	दविष्ठम् अस्य सत्पते कृधी सुगम् ॥ ९ ॥
८.२३.१४	श्रुष्ट्य् अग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
• • तपुषा...	नि मायिनस् तपसा रक्षसो दह ॥ १० ॥ ॥११॥
	१.१२
ऋ ८.१०३.८	प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
	उपस्तुतासो अग्नये ॥ १ ॥
८.१९.३० ...तिरते वाजभर्मभिः	प्र सो अग्ने तवोतिभिः सुवीराभिस् तरति वाजकर्मभिः ।
...आवरः	यस्य त्वं सख्यम् आविथ ॥ २ ॥
८.१९.१	तं गूर्धया स्वर्णरं देवासो देवम् अरतिं दधन्विरे ।
...ओहिरे	देवत्रा हव्यम् ऊहिषे ॥ ३ ॥
८.१०३.१२ • • हृणीतामतिथिर्...	मा नो हृणीया अतिथिं वसुर् अग्निः पुरुप्रशस्त एषः ।
	यः सुहोता स्वध्वरः ॥ ४ ॥
८.१९.१९ ...सुभग (एवं कौ) • •	भद्रो नो अग्निर् आहुतो भद्रा रातिः सुभगा भद्रो अध्वरः ।
	भद्रा उत प्रशस्तयः ॥ ५ ॥
८.१९.३	यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारम् अमर्त्यम् ।
	अस्य यज्ञस्य सुक्रतुम् ॥ ६ ॥
८.१९.१५ ...सासहद् (कौ सासाहा) [• • •	तद् अग्ने द्युम्नम् आ भर यत् सासह सदने कं चिद् अत्रिणम् ।
...दूढ्यः	मन्युं जनस्य दूढ्यम् ॥ ७ ॥
८.२३.१३ ...विशि	यद् वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
	विश्वेद् अग्निः प्रति रक्षांसि सेधति ॥ ८ ॥
ऋग्वेदे नास्ति । तै १.५.१०.२ का ७.१४	अयम् अग्निः श्रेष्ठतमो अयं वां मधुमत्तमः ।
[(उभे संहिते नाना)	अयं सहस्रसातमो अस्मिन्न् अस्तु सुवीर्यम् ॥ ९ ॥

ऋग्वेदे नास्ति । मै ४.१४.१४	आदित्यः शुक्र उद् अगात् पुरस्ताज् ज्योतिः कृण्वन्
	वि तमो बाधमानः ।
मै ... रोचमाना आगात् }	आभासमानः प्रदिशो नु सर्वा भद्रस्य कर्ता रुचयन्
	न आगात् ॥ १० ॥ ॥१२॥

इत्याग्नेयं पर्व समाप्तम् ॥

१.१३

ऋ ६.४५.२२	तद् वो गाय सुते सचा पुरुहूताय सत्वने ।
	शं यद् गवे न शाकिने ॥ १ ॥
८.९२.१६	यस् ते नूनं शतक्रतव् इन्द्र द्युम्नितमो मदः ।
[यवावटे) ..	तेन नूनं मदे मदेः ॥ २ ॥
८.७२.१२ • उपावतावतं (कौ उप	गाव उपा यवावटे मही यज्ञस्य रप्सुदा ।
	उभा कर्णा हिरण्यया ॥ ३ ॥
८.९२.२५ • • गायति श्रुतकक्षो	अरम् अश्वाय गायत श्रुतकक्षारं गवे ।
[अरं •	अरम् इन्द्रस्य धाम्ने ॥ ४ ॥
८.९३.७	तम् इन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
	स वृषा वृषभो भुवत् ॥ ५ ॥
१०.१५३.२ ... सहसो (एवं कौ) • •	त्वम् इन्द्र बलाद् अधि सहसा जात ओजसः ।
त्वं वृषन् • •	त्वं सन् वृषन् वृषेद् असि ॥ ६ ॥
८.१४.५	यज्ञ इन्द्रम् अवर्धयद् यद् भूमिं व्यवर्तयत् ।
	चक्राण ओपशं दिवि ॥ ७ ॥
८.१४.१	यद् इन्द्राहं यथा त्वम् ईशीय वस्व एक इद् ।
... गोषखा •	स्तोता मे गोसखा स्यात् ॥ ८ ॥
८.२.२५	पन्यंपन्यम् इत् सोतार आ धावत मद्याय ।
	सोमं वीराय शूराय ॥ ९ ॥
८.२.१	इदं वसो सुतम् अन्धः पिबा सुपूर्णम् उदरम् ।
	अनाभयिन् ररिमा ते ॥ १० ॥ ॥१॥

१.१४

ऋ ८.९३.१	उद् घेद् अभि श्रुतामघं वृषभं नर्यापसम् ।
	अस्तारम् एषि सूर्य ॥ १ ॥
८.९३.४	यद् अद्य कच् च वृत्रहन्न् उदगा अभि सूर्य ।

	सर्वं तद् इन्द्र ते वशे ॥ २ ॥
६.४५.१	य आनयत् परावतः सुनीती तुर्वशं यदुम् ।
	इन्द्रः स नो युवा सखा ॥ ३ ॥
८.९२.३१ ... यमन्	मा न इन्द्राभ्य् आदिशः सूरो अक्तुष्व् आ यमत ।
	त्वा युजा वनेम तत् ॥ ४ ॥
१.८.१	एन्द्र सानसिं रयिं सजित्वानं सदासहम् ।
कौ ... भरा	वर्षिष्ठम् ऊतये भर ॥ ५ ॥
ऋ १.७.५	इन्द्रं वयं महाधन इन्द्रम् अर्भे हवामहे ।
	युजं वृत्रेषु वज्रिणम् ॥ ६ ॥
८.४५.२६	अपिबत् कद्रुवः सुतम् इन्द्रः सहस्रबाह्वे ।
अत्रादेदिष्ट •	तत्राददिष्ट पौंस्यम् ॥ ७ ॥
७.३१.४ ... णोनुमो •	वयम् इन्द्र त्वायवो ऽभि प्र नोनुमो वृषन् ।
	विद्धी त्व् अस्य नो वसो ॥ ८ ॥
८.४५.१	आ घा ये अग्निम् इन्धते स्तृणन्ति बर्हिर् आनुषक् ।
	येषाम् इन्द्रो युवा सखा ॥ ९ ॥
८.४५.४०	भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
.. भर (एवं कौ)	वसु स्पार्हं तद् आ भरा ॥ १० ॥ ॥२॥

१.१५

ऋ १.३७.३	इहेव शृण्व एषां कशा हस्तेषु यद् वदान् ।
• यामन् (कौ यामं) ..	नि यामं चित्रम् ऋञ्जते ॥ १ ॥
८.४५.१६	इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।
	पुष्टावन्तो यथा पशुम् ॥ २ ॥
८.६.४	सम् अस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
	समुद्रायेव सिन्धवः ॥ ३ ॥
८.८३.१	देवानाम् इद् अवो महत् तद् आ वृणीमहे वयम् ।
	वृष्णाम् अस्मभ्यम् ऊतये ॥ ४ ॥
१.१८.१ सोमानं ...	सोमानं स्वरणं कृणुहि ब्रह्मणस् पते ।
	कक्षीवन्तं य औशिजः ॥ ५ ॥
८.९३.१८ बोधिन्मना ...	बोधन्मना इद् अस्तु नो वृत्रहा भूर्यासुतिः ।
	शृणोतु शक्र आशिषम् ॥ ६ ॥
५.८२.४ अद्या ...	अद्य नो देव सवितः प्रजावत् सावीः सौभगम् ।
... सुव (एवं कौ)	परा दुष्ष्वप्न्यं सुवा ॥ ७ ॥
८.६४.७ क १ स्य ...	कास्य वृषभो युवा तुविग्रीवो अनानतः ।
	ब्रह्मा कस् तं सपर्यति ॥ ८ ॥
८.६.२८ • • संगये ...	उपह्वरे गिरीणां संगमे च नदीनाम् ।
	धिया विप्रो अजायता ॥ ९ ॥

८.१६.१	प्र सम्राजं चर्षणीनाम् इन्द्रं स्तोता नव्यं गीर्भिः ।
	नरं नृषाहं मंहिष्ठम् ॥ १० ॥ ॥३॥

१.१६

ऋ ८.९२.४	अपाद् उ शिप्रिय् अन्धसः सुदक्षस्य प्रहोषिणः ।
६.४५.२५ • • • शतक्रतो ऽभि (कौ पुरूवसो ऽभि) • णोनुवुर (कौ नोनवुर्) • }	इन्दोर् इन्द्रो यवाशिरः ॥ १ ॥
	इमा उ त्वा पुरोवसो अभि प्र नोनुवुर् गिरः ।
इन्द्र • • मातरः	गावो वत्सं न धेनवः ॥ २ ॥
१.८४.१५	अत्राह गोर् अमन्वत नाम त्वष्टुर् अपीच्यम् ।
	इत्था चन्द्रमसो गृहे ॥ ३ ॥
६.५७.४	यद् इन्द्रो अनयद् रितो महीर् अपो वृषन्तमः ।
• पूषाभवत् •	तत्र पूषाभुवत् सचा ॥ ४ ॥
८.९४.१	गौर् धयति मरुतां श्रवस्युर् माता मघोनाम् ।
	युक्ता वह्नी रथानाम् ॥ ५ ॥
८.९३.३१	उप नो हरिभिः सुतं याहि मदानां पते ।
	उप नो हरिभिः सुतम् ॥ ६ ॥
८.९३.२३ ... वृधासो •	इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे ।
	अच्छावभृथम् ओजसा ॥ ७ ॥
८.६.१० ... जग्रभ	अहम् इद् धि पितुः परि मेधाम् ऋतस्य जग्रह ।
	अहं सूर्य इवाजनि ॥ ८ ॥
१.३०.१३	रेवतीर् नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
	क्षुमन्तो याभिर् मदेम ॥ ९ ॥
ऋग्वेदे नास्ति	सोमः पूषा च चेततुर् विश्वासां सुक्षितीनाम् ।
कौ .. हिता	देवत्रा रथ्योर् हितः ॥ १० ॥ ॥४॥

१.१७

ऋ ८.९२.१	पान्तम् आ वो अन्धस इन्द्रम् अभि प्र गायत ।
	विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥
७.३१.१ ... गायत (एवं कौ)	प्र व इन्द्राय मादनं हर्यश्वाय गायता ।
	सखायः सोमपाव्ने ॥ २ ॥
८.२.१६	वयम् उ त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
	कण्वा उक्थेभिर् जरन्ते ॥ ३ ॥
८.९२.१९	इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
	अर्कम् अर्चन्तु कारवः ॥ ४ ॥
८.१७.११	अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
	एहीम् अस्य द्रवा पिब ॥ ५ ॥
१.४.१	सुरूपकृत्नुम् ऊतये सुदुघाम् इव गोदुहे ।

	जुहूमसि द्यविद्यवि ॥ ६ ॥
८.४५.२२	अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
	तृम्पा व्य् अश्नुही मदम् ॥ ७ ॥
८.८२.७	य इन्द्र चमसेष्व् आ सोमश् चमूषु ते सुतः ।
	पिबेद् अस्य त्वम् ईशिषे ॥ ८ ॥
१.३०.७	योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
	सखाय इन्द्रम् ऊतये ॥ ९ ॥
१.५.१	आ त्व् एता नि षीदतेन्द्रम् अभि प्र गायत ।
	सखायः स्तोमवाहसः ॥ १० ॥ ॥५॥

१.१८

ऋ ३.५१.१०	इदं ह्य् अन्व् ओजसा सुतं राधानां पते ।
पिबा (एवं कौ) ..	पिब त्व् अस्य गिर्वणः ॥ १ ॥
१.८.५ • • परश् • नु ..	महं इन्द्रः पुरश् च नो महित्वम् अस्तु वज्रिणे ।
	द्यौर् न प्रथिना शवः ॥ २ ॥
८.८१.१ ... ग्राभं (एवं कौ) • •	आ तू न इन्द्र क्षुमन्तं चित्रं राभं सं गृभाय ।
	महाहस्ती दक्षिणेन ॥ ३ ॥
८.६९.४ • • • गिरेन्द्रम् (एवं कौ)	अभि प्र गोपतिं गिर इन्द्रम् अर्च यथा विदे ।
[• • •	सूनुं सत्यस्य सत्पतिम् ॥ ४ ॥
४.३१.१	कया नश् चित्र आ भुवद् ऊती सदावृधः सखा ।
	कया शचिष्ठया वृता ॥ ५ ॥
८.९२.७	त्यम् उ वः सत्रासाहं विश्वासु गीर्ष्व् आयतम् ।
	आ च्यावयस्य् ऊतये ॥ ६ ॥
१.१८.६	सदसस् पतिम् अद्भुतं प्रियम् इन्द्रस्य काम्यम् ।
	सनिं मेधाम् अयासिषम् ॥ ७ ॥
ऋग्वेदे नास्ति । ८.'श्री ७.५५.१ ये ते पन्था-	ये ते पन्था अधो दिवो येभिर् व्य् अश्वम् ऐरयः ।
[नो ऽव दिवो येभिर्विश्वमैरयः	उत श्रोषन्तु नो भुवः ॥ ८ ॥
८.९३.२८	भद्रंभद्रं न आ भरेषम् ऊर्जं शतक्रतो ।
	यद् इन्द्र मृडयासि नः ॥ ९ ॥
८.९४.४	अस्ति सोमो अयं सुतः पिबन्त्य् अस्य मरुतः ।
	उत स्वराजो अश्विना ॥ १० ॥ ॥६॥

१.१९

ऋ १०.१५३.१	ईङ्खयन्तीर् अपस्युव इन्द्रं जातम् उपासते ।
भेजानासः • [नकिरा •	वन्वानासः सुवीर्यम् ॥ १ ॥
१०.११४.७ नकिर् • मिनीमसि	न कि देवा इनीमसि न क्य् आ योपयामसि ।
	मन्त्रश्रुत्यं चरामसि ॥ २ ॥

ऋग्वेदे नास्ति	दोषो आगाद् बृहद् गाय द्युमद्गामाथर्वण ।
	स्तुहि देवं सवितारम् ॥ ३ ॥
१.४६.१	एषो उषा अपूर्व्या व्य् उच्छति प्रिया दिवः ।
	स्तुषे वाम् अश्विना बृहद् ॥ ४ ॥
१.८४.१३	इन्द्रो दधीचो अस्थभिर् वृत्राण्य् अप्रतिष्कुतः ।
	जघान नवतीर् नव ॥ ५ ॥
१.९.१	इन्द्रेहि मत्स्य् अन्धसो विश्वेभिः सोमपर्वभिः ।
	महं अभिष्टिर् ओजसा ॥ ६ ॥
४.३२.१	आ तू न इन्द्र वृत्रहन्न् अस्माकम् अर्धम् आ गहि ।
	महान् महीभिर् ऊतिभिः ॥ ७ ॥
८.६.५	ओजस् तद् अस्य तित्विष उभे यत् समवर्तयत् ।
	इन्द्रश् चर्मेव रोदसी ॥ ८ ॥
१.३०.४	अयम् उ ते सम् अतसि कपोत इव गर्भधिम् ।
	वचस् तच् चिन् न ओहसे ॥ ९ ॥
१०.१८६.१	वात आ वातु भेषजं शंभु मयोभु नो हृदे ।
• ण...	प्र न आयूंषि तारिषत् ॥ १० ॥ ॥७॥

१.२०

ऋ १.४१.१	यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
नू चित् • • •	न किः स दभ्यते जनः ॥ १ ॥
८.४६.१०	गव्यो षु णो यथा पुराश्वयोत रथया ।
वरिवस्य महामह	वरिवस्या महोनाम् ॥ २ ॥
८.६.१९	इमास् त इन्द्र पृश्नयो घृतं दुहत आशिरम् ।
	एनाम् ऋतस्य पिप्युषीः ॥ ३ ॥
८.९३.१७	अया धिया च गव्यया पुरुणामन् पुरुष्टुत ।
... आभुवः	यत् सोमेसोम आभुवः ॥ ४ ॥
१.३.१०	पावका नः सरस्वती वाजेभिर् वाजिनीवती ।
	यज्ञं वष्टु धियावसुः ॥ ५ ॥
ऋग्वेदे नास्ति । कौ... तर्पयाद	क इमं नाहुषीष्व् आ इन्द्रं सोमस्य तर्पयत् ।
कौ... भरात्	स नो वसून्य् आ भरत् ॥ ६ ॥
ऋ ८.१७.१	आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
	एदं बर्हिः सदो मम ॥ ७ ॥
१०.१८५.१ • • अस्तो अस्तु...	महि त्रीणाम् अवर् अस्तु द्युक्षं मित्रस्यार्यम्णः ।
	दुराधर्षं वरुणस्य ॥ ८ ॥
८.४६.१ • पुरूवसो (एवं कौ)...	त्वावतः पुरूवसो वयम् इन्द्र प्रणेतः ।
	स्मसि स्थातर् हरीणाम् ॥ ९ ॥ ॥८॥

१.२१

ऋ ८.६४.१ उत् • • सोमाः...	उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
	अव ब्रह्मद्विषो जहि ॥ १ ॥
३.४०.६	गिर्वणः पाहि नः सुतं मधोर् धाराभिर् अज्यसे ।
[उपानसः •	इन्द्र त्वादातम् इद् यशः ॥ २ ॥
१०.१०५.४ सचायोरिन्द्रश्चकृष औँ	सदा व इन्द्रश् चर्कृषद् आ उपो नु स सपर्यन् ।
नदमोर्वित्रतयोः • • (कौ न देवो वृतः)	न देव वृतः शूर इन्द्रः ॥ ३ ॥
८.९२.२२	आ त्वा विशन्त्व् इन्दवः समुद्रम् इव सिन्धवः ।
	न त्वाम् इन्द्राति रिच्यते ॥ ४ ॥
१.७.१	इन्द्रम् इद् गाथिनो बृहद् इन्द्रम् अर्केभिर् अर्किणः ।
	इन्द्रं वाणीर् अनूषत ॥ ५ ॥
८.९३.३४	इन्द्र इषे ददातु न ऋभुक्षणम् ऋभुं रयिम् ।
	वाजी ददातु वाजिनम् ॥ ६ ॥
२.४१.१०	इन्द्रो अङ्ग महद् भयम् अभी षद् अप चुच्यवत् ।
	स हि स्थिरो विचर्षणिः ॥ ७ ॥
६.४५.२८	इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः ।
वत्सं गावो • •	गावो वत्सं न धेनवः ॥ ८ ॥
६.५७.१	इन्द्रा नु पूषणा वयं सख्याय स्वस्तये ।
[ज्यायाँ • •	हुवेम वाजसातये ॥ ९ ॥
४.३०.१ नकिर् • • उत्तरो •	न कि इन्द्र त्वद् उत्तरं न ज्यायो अस्ति वृत्रहन् ।
नकिरेवा • •	न क्य् एवं यथा त्वम् ॥ १० ॥ ॥९॥

१.२२

ऋ ८.४५.२८	तरणिं वो जनानां त्रदं वाजस्य गोमतः ।
	समानम् उ प्र शंसिषम् ॥ १ ॥
१.९.४	असृग्रम् इन्द्र ते गिरः प्रति त्वाम् उद् अहासत ।
अजोषा...	सजोषा वृषभं पतिम् ॥ २ ॥
८.४६.४	सुनीथो घा स मर्त्यो यं मरुतो यम् अर्यमा ।
मित्रः (कौ मित्राम्)...	मित्रा पान्त्य् अद्रुहः ॥ ३ ॥
८.४५.४१	यद् वीडाव् इन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् ।
	वसु स्पार्हं तद् आ भर ॥ ४ ॥
८.९३.१६	श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् ।
आ शुषे • •	आशिषे राधसे महे ॥ ५ ॥
ऋग्वेदे नास्ति	अरं त इन्द्र श्रवसे गमेम शूर त्वावतः ।
	अरं शक्र परेमणि ॥ ६ ॥
३.५२.१	धानावन्तं करम्भिणम् अपूपवन्तम् उक्थिनम् ।
	इन्द्र प्रातर् जुषस्व नः ॥ ७ ॥

८.१४.१३	अपां फेनेन नमुचेः शिर इन्द्रोद् अवर्तयः ।
	विश्वा यद् अजयः स्पृधः ॥ ८ ॥
ऋग्वेदे नास्ति	इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः ।
	तेषां मत्स्व प्रभूवसो ॥ ९ ॥
८.९३.२५ • सोमा सुता इमे • • •	तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर् विभावसो ।
• इन्द्रमा वह (कौ इन्द्र मृडय)	स्तोतृभ्य इन्द्र मृडय ॥ १० ॥ ॥१०॥

१.२३

ऋ १.३०.१ । कौ • • • कृविं...	आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् ।
	मंहिष्ठं सिञ्च इन्दुभिः ॥ १ ॥
८.९२.१० • • • • न...	अतश् चिद् इन्द्र न उपा याहि शतवाजया ।
	इषा सहस्रवाजया ॥ २ ॥
८.४५.४	आ बुन्दं वृत्रहा ददे जातः पृच्छद् वि मातरम् ।
	क उग्राः के ह शृण्विरे ॥ ३ ॥
८.३२.१०	वृषदुक्थं हवामहे सृप्रकरस्नम् ऊतये ।
साधु...	साधः कृण्वन्तम् अवसे ॥ ४ ॥
१.९०.१ ... मयतु •	ऋजुनीती नो वरुणो मित्रो नयति विद्वान् ।
	अर्यमा देवैः सजोषाः ॥ ५ ॥
८.५.१ • • • मर्ता...	दूराद् इहेव यत् सतो अरुणप्सुर् अशिश्वितत् ।
• • विश्वथा°	वि भानुं विश्वधातनत् ॥ ६ ॥
३.६२.१६	आ नो मित्रावरुणा घृतैर् गव्यूतिम् उक्षतम् ।
	मध्वा रजांसि सुक्रतू ॥ ७ ॥
१.३७.१० ... काष्ठेष्व् •	उद् उ त्ये सूनवो गिरः काष्ठा यज्ञेष्व् अत्नत ।
	वाश्रा अभिज्ञु यातवे ॥ ८ ॥
१.२२.१७	इदं विष्णुर् वि चक्रमे त्रेधा नि दधे पदम् ।
... पांसुरे	समूढम् अस्य पांसुले ॥ ९ ॥ ॥११॥

१.२४

ऋ ८.३२.२१ उपारणे	अतीहि मन्युषाविणं सुषुवांसम् उपेरया ।
इमं रातं...	अस्य राती सुतं पिब ॥ १ ॥
ऋग्वेदे नास्ति	कद् उ प्रचेतसे महे वचो देवाय शस्यते ।
	तद् इद् ध्य् अस्य वर्धनम् ॥ २ ॥
८.२.१४ • • • अगोररिर् • •	उक्थं चन शस्यमानं नागो रयिर् आ चिकेत ।
	न गायत्रं गीयमानम् ॥ ३ ॥
ऋग्वेदे नास्ति	इन्द्र उक्थेभिर् मन्दिष्ठो वाजानां च वाजपतिः ।
	हरिवान् सुतानां सखा ॥ ४ ॥
१.१५.५	ब्राह्मणाद् इन्द्र राधसः पिबा सोमम् ऋतूंर् अनु ।
तवेदं • •	तवेदं सख्यम् अस्तृतम् ॥ ५ ॥

८.३२.७ ...ष्मसि • • •	वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः ।
	त्वं नो जिन्व सोमपाः ॥ ६ ॥
८.२.१९ ओ षु प्र याहि वाजेभिर्मा	आ याह्य् उप नः सुतं वाजेभिर् मा हृणीयथाः ।
[हृणीथा अभ्यस्मान्	महं इव युवजानिः ॥ ७ ॥
१०.१०५.१ • • • • आव • • •	कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधद् वाः ।
• • वाताप्याय(एवं कौ)	दीर्घं सुतं वाताप्याया ॥ ८ ॥
ऋग्वेदे नास्ति	एन्द्र पृक्षु कासु चिन् नृम्णं तनूषु धेहि नः ।
	सत्राजिद् उग्र पौंस्यम् ॥ ९ ॥
१.९.२ एमेनं सृजता सुते • • •	अयम् एनं सचतां सुतो मन्दिम् इन्द्राय मन्दिने ।
	चक्रिं विश्वानि चक्रये ॥ १० ॥ ॥ १२ ॥ ॥१॥

१.२५

ऋ ७.३२.२२	अभि त्वा शूर नोनुमो अदुग्धा इव धेनवः ।
	ईशानम् अस्य जगतः स्वर्दृशम् ईशानम् इन्द्र तस्थुषः ॥ १ ॥
६.४६.१ ... साता • •	त्वाम् इद् धि हवामहे सातौ वाजस्य कारवः ।
	त्वां वृत्रेष्व् इन्द्र सत्पतिं नरस् त्वां काष्ठास्व् अर्वतः ॥ २ ॥
८.४९.१	अभि प्र वः सुराधसम् इन्द्रम् अर्च यथा विदे ।
...पुरूवसुः (एवं कौ) • •	यो जरितृभ्यो मघवा पुरोवसुः सहस्रेणेव शिक्षति ॥ ३ ॥
८.८८.१	तं वो दस्मम् ऋतीषहं वसोर् मन्दानम् अन्धसः ।
	अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर् नवामहे ॥ ४ ॥
८.६६.१	तरोभिर् वो विदद्वसुम् इन्द्रं सबाध ऊतये ।
	बृहद् गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ५ ॥
७.३२.२०	तरणिर् इत् सिषासति वाजं पुरन्ध्या युजा ।
	आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥ ६ ॥
८.३.१	पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
• • • °मायो...	आपिर् नो बोधि सधमाद्ये वृधे अस्मं अवन्तु ते धियः ॥ ७ ॥
८.६१.७	त्वं ह्य् एहि चेरवे विदा भगं वसुत्तये ।
...इन्द्राश्वमिष्टये (एवं कौ)	उद् वावृषस्व मघवन् गविष्टय उद् इन्द्रो अश्वमिष्टये ॥ ८ ॥
७.५९.३	न हि वश् चरमं चन वसिष्ठः परिमंसते ।
...पिबत •	अस्माकम् अद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥ ९ ॥
८.१.१	मा चिद् अन्यद् वि शंसत सखायो मा रिषण्यत ।
	इन्द्रम् इत् स्तोता वृषणं सचा सुते मुहुर् उक्था च शंसत ॥ १० ॥ ॥१॥

१.२६

ऋ ८.७०.३	नकिष् टं कर्मणा नशद् यश् चकार सदावृधम् ।
...रुप्योजसम् {	इन्द्रं न यज्ञैर् विश्वगूर्तम् ऋभ्वसम् अधृष्टं धृष्णुम् ओजसा ॥१॥

[८.१.१२ / ...पुरूवसुर् (एवं कौ) इष्कर्ता • • / ८.१.२८]
य ऋते चिद् अभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरोवसुर् निष्कर्ता विहुतं पुनः ॥ २ ॥
आ त्वा सहस्रम् आ शतं युक्ता रथे हिरण्यये ।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ ३ ॥
[३.४५.१ / • • • • • यमन् विं (कौ येमुर् [इन्]...)]
आ मन्द्रैर् इन्द्र हरिभिर् याहि मयूररोमभिः ।
मा त्वा के चिन् नि येमुर् विं न पाशिनो अति धन्वेव तं इहि ॥ ४ ॥
[१.८४.१९]
त्वम् अङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वद् अन्यो मघवन्न् अस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ ५ ॥
[८.९०.५ ...पते / ...एक इदनुत्ता चर्षणीधृता]
त्वम् इन्द्र यशा अस्य् ऋजीषी शवसस् पतिः ।
त्वं वृत्राणि हंस्य् अप्रतीन्य् एक इत् पुरुनुत्तश् चर्षणीधृतिः ॥ ६ ॥
[८.३.५]
इन्द्रम् इद् देवतातय इन्द्रं प्रयत्य् अध्वरे ।
इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ ७ ॥
[८.३.३ • • • पुरूवसो (एवं कौ)...]
इमा उ त्वा पुरोवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितो अभि स्तोमैर् अनूषत ॥ ८ ॥
[८.३.१५ / ...इव (एवं कौ) / ८.४.३]
उद् उ त्ये मधुमत्तमा गिरः स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इवा ॥ ९ ॥
यथा गौरो अपा कृतं तृष्यन्न् एत्य् अवेरिणम् ।
[पिब (एवं कौ)]
आपित्वे नः प्रपित्वे तूयम् आ गहि कण्वेषु सु सचा पिबा ॥ १० ॥ ॥२॥

१.२७

[ऋ ८.६१.५]
शग्ध्य् ऊ षु शचीपत इन्द्र विश्वाभिर् ऊतिभिः ।
भगं न हि त्वा यशसं वसुविदम् अनु शूर चरामसि ॥ १ ॥
[८.९७.१]
या इन्द्र भुज आभरः स्वर्वां असुरेभ्यः ।
स्तोतारम् इन् मघवन्न् अस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ २ ॥
[८.१०१.५ / वरूथ्यं...]
प्र मित्राय प्रार्यम्णे सचथ्यम् ऋतावसो ।
वरूथ्ये वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥ ३ ॥
[८.३.७]
अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिर् आयवः ।
समीचीनास ऋभवः सम् अस्वरन् रुद्रा गृणन्त पूर्व्यम् ॥ ४ ॥
[८.८९.३]
प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर् वज्रेण शतपर्वणा ॥ ५ ॥
[८.८९.१]
बृहद् इन्द्राय गायत मरुतो वृत्रहन्तमम् ।

[...जागृवि (एवं कौ)]
येन ज्योतिर् अजनयन्न् ऋतावृधो देवं देवाय जागृवीम् ॥ ६ ॥
[७.३२.२६]
इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिर् अशीमहि ॥ ७ ॥
[८.९७.७ । कौ ...सधमाद्ये / • • ऊती (एवं कौ)...]
मा न इन्द्र परा वृणग् भवा नः सधमाद्यः ।
त्वं न ऊतिस् त्वम् इन् न आप्यं मा न इन्द्र परा वृणक् ॥ ८ ॥
[८.३३.१]
वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥ ९ ॥
[६.४६.७]
यद् इन्द्र नाहुषीष्व् आ ओजो नृम्णं च कृष्टिषु ।
यद् वा पञ्च क्षितीनां द्युम्नम् आ भर सत्रा विश्वानि पौंस्या ॥ १० ॥ ॥३॥

१.२८

[* ८.३३.१० ...ऽवृतः]
सत्यम् इत्था वृषेद् असि वृषजूतिर् नोऽविता ।
वृषा ह्य् उग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ १ ॥
[८.९७.४]
यच् छक्रासि परावति यद् अर्वावति वृत्रहन् ।
अतस् त्वा गीर्भिर् द्युगद् इन्द्र केशिभिः सुतावं आ विवासति ॥ २ ॥
[८.४६.१४ • • • अन्धसो (एवं कौ)...]
अभि वो वीरम् अन्धसा मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥ ३ ॥
[६.४६.९ ...स्वस्तिमत्]
इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये ।
छर्दिर् यच्छ मघवद्भ्यश् च मह्यं च यावया दिद्युम् एभ्यः ॥ ४ ॥
[८.९९.३ / • जाते जनमान... / दीधिम]
श्रायन्त इव सूर्यं विश्वेद् इन्द्रस्य भक्षत ।
वसूनि जातो जनिमान्य् ओजसा प्रति भागं न दीधिमः ॥ ५ ॥
[८.७०.७ • • • आपदिवं • • / • • • एतशा • हरी इन्द्रो •]
न सीम् अदेव आप तद् इषं दीर्घायो मर्त्यः ।
एतग्वा चिद् य एतशो युयोजत इन्द्रो हरी युयोजते ॥ ६ ॥
[८.९०.१ • • • हव्य इन्द्रः • भूषतु / • • • वृत्रहा • ऋचीषमः (कौ ऋचीषम)]
आ नो विश्वासु हव्यम् इन्द्रं समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ॥ ७ ॥
[७.३२.१६]
तवेद् इन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि नकिष् ट्वा गोषु वृण्वते ॥ ८ ॥
[८.१.७]
क्वेयथ क्वेद् असि पुरुत्रा चिद् धि ते मनः ।

अलर्षि युध्म खजकृत् पुरन्दर प्र गायत्रा अगासिषुः ॥९॥
[८.६६.७ / • • • समना...]
वयम् एनम् इदा ह्यो ऽपीपेमेह वज्रिणम् ।
तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ १० ॥ ॥४॥

१.२९

[ऋ ८.७०.१ / • • • ज्येष्ठो...]
यो राजा चर्षणीनां याता रथेभिर् अध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १ ॥
[८.६१.१३ / • • • • • ऊतिभिर्...]
यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवन् शग्धि तव तन् न ऊतये वि द्विषो वि मृधो जहि ॥ २ ॥
[८.१७.१४ / • भेत्ता पुरां...]
वास्तोष् पते ध्रुवा स्थूणांसत्रं सोम्यानाम् ।
द्रप्सः पुरां भेत्ता शश्वतीनाम् इन्द्रो मुनीनां सखा ॥ ३ ॥
[८.१०१.११ / • • • • पनस्यते ऽद्धा • • •]
बण् महं असि सूर्य बड् आदित्य महं असि ।
महस् ते सतो महिमा पनिष्टम मह्ना देव महं असि ॥ ४ ॥
[८.४.१]
यद् इन्द्र प्राग् अपाग् उदङ् न्यग् वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्य् आनवे ऽसि प्रशर्ध तुर्वशे ॥ ५ ॥
[७.३२.१४ ...त्वावसुं • • दधर्षति (एवं कौ) / • इत्...]
कस् तम् इन्द्र त्वावसव् आ मर्त्यो दधर्षति ।
श्रद्धा हि ते मघवन् पार्ये दिवि वाजी वाजं सिषासति ॥ ६ ॥
[८.४.९ • • सुरूप इद् गोमाँ (एवं कौ) इद् • • • / ...चन्द्रो • •]
अश्वी रथी सुरूपयु गोमं यद् इन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रैर् याति सभाम् उप ॥ ७ ॥
[८.७०.५]
यद् द्याव इन्द्र ते शतं शतं भूमीर् उत स्युः ।
न त्वा वज्रिन् सहस्रं सूर्या अनु न जातम् अष्ट रोदसी ॥ ८ ॥
[६.५९.६ / हित्वी • • वावदत्...]
इन्द्राग्नी अपाद् इयं पूर्वागात् पद्वतीभ्यः ।
हित्वा शिरो जिह्वया रारपच् चरत् त्रिंशत् पदा न्य् अक्रमीत् ॥ ९ ॥
[८.५३.५]
इन्द्र नेदीय एद् इहि मितमेधाभिर् ऊतिभिः ।
आ शंतम शंतमाभिर् अभिष्टिभिर् आ स्वापे स्वापिभिः ॥ १० ॥ ॥५॥

१.३०

[ऋ ८.९९.७]
इत ऊती वो अजरं प्रहेतारम् अप्रहितम् ।
आशुं जेतारं होतारं रथीतमम् अतूर्तं तुग्रियावृधम् ॥ १ ॥
[७.३२.१ / • चिद्...]
मो षु त्वा वाघतश् चनारे अस्मन् नि रीरमन् ।
आरात्ताद् वा सधमादं न आ गहीह वा सन्न् उप श्रुधि ॥२॥

[७.३२.८ सुनोता...]
सुनोत सोमपाव्ने सोमम् इन्द्राय वज्रिणे ।
पचता पक्तीर् अवसे कृणुध्वम् इत् पृणन्न् इत् पृणते मयः ॥ ३ ॥
[६.४६.३ / सहस्रमुष्क...]
यः सत्राहा विचर्षणिर् इन्द्रं तं हूमहे वयम् ।
सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ ४ ॥
[१.१३९.५ ...दशस्यतम्]
शचीभिर् नः शचीवसू दिवा नक्तं दिशस्यतम् ।
मा वां रातिर् उप दसत् कदा चनास्मद् रातिः कदा चन ॥ ५ ॥
[ऋग्वेदे नास्ति]
यदा कदा च मीढुषे स्तोता जरेत मर्त्यः ।
आद् इद् वन्देत वरुणं विपा गिरा धर्तारं विव्रतानाम् ॥ ६ ॥
[८.३३.४ • गायान्धसो... / • • • यः सुते सचा वज्री रथो •]
पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर् यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥ ७ ॥
[८.६१.१]
उभयं शृणवच् च न इन्द्रो अर्वाग् इदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥ ८ ॥
[८.१.५ • • त्वामद्रिवः • • देयाम्]
महे चन त्वाद्रिवः परा शुल्काय दीयसे ।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥ ९ ॥
[८.१.६]
वस्यं इन्द्रासि मे पितुर् उत भ्रातुर् अभुञ्जतः ।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ १० ॥ ॥६॥

१.३१

[ऋ ७.३२.४]
इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
तं आ मदाय वज्रहस्त पीतये हरिभ्यां याह्य् ओक आ ॥ १ ॥
[ऋग्वेदे नास्ति]
इम इन्द्र मदाय ते सोमाश् चिकित्र उक्थिनः ।
मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥ २ ॥
[८.१.१०]
आ त्व् अद्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघाम् अन्याम् इषम् उरुधाराम् अरंकृतम् ॥३॥
[८.८८.३ / • दित्ससि...]
न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
यच् छिक्षसि स्तुवते मावते वसु नकिष् टद् आ मिनाति ते ॥ ४ ॥
[८.३३.७... पिबन्तं (एवं कौ) • • दधे (एवं कौ)]
क ईं वेद सुते सचा पिबन्तः कद् वयो दधुः ।
अयं यः पुरो विभिनत्त्य् ओजसा मन्दानः शिप्रिय्

अन्धसः (एवं कौ)
अन्धसा ॥ ५ ॥
ऋग्वेदे नास्ति
यद् इन्द्र शासो अव्रतं च्यावया सदसस् परि ।
अस्माकम् अंशुं मघवन् पुरुस्पृहं वसव्ये अधि
कौ बर्हय
बर्हया ॥ ६ ॥
ऋग्वेदे नास्ति ; शौ ६.४.१
त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस् पतिः ।
पुत्रैर् भ्रातृभिर् अदितिर् नु पातु नो दुष्टरं त्रामणं
वचः ॥ ७ ॥
ऋ ८.५१.७
कदा चन स्तरीर् असि नेन्द्र सश्चसि दाशुषे ।
...पृच्यते (एवं कौ)
उपोपेन् नु मघवन् भूय इन् नु ते दानं देवस्य पृच्यसे ॥८॥
८.३.१७ युक्ष्वा ...
युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन् सोमपीतय उग्र ऋष्वेभिर् आ
गहि ॥ ९ ॥
८.९९.१
त्वाम् इदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
• • स्तोमवाहसाम्
स इन्द्र स्तोमवाहस इह श्रुध्य् उप स्वसरम् आ
गहि ॥ १० ॥ ॥७॥

१.३२

ऋ ७.८१.१ प्रत्यु अदर्श्य् (एवं कौ)
प्रति षो अदर्दर् आयत्य् उच्छन्ती दुहिता दिवः ।
• महि च्यवति चक्षसे ...
अपो मही वृणुते चक्षुषा तमो ज्योतिष् कृणोति
सूनरी ॥ १ ॥
७.७४.१
इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वाम् अह्वे ऽवसे शचीवसू विशंविशं हि गच्छथः ॥ २ ॥
ऋग्वेदे नास्ति
कु ह्यः को वाम् अश्विना तपानो देवा मर्त्यः ।
घ्नता वाम् अश्मया क्षपमाणो ऽंशुनेत्थम् उ आद् व्
अन्यथा ॥ ३ ॥
१.४७.१ • • • • • • ऋतावृधा
अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
तम् अश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥ ४ ॥
८.१.२० मा ... अहं गिरा
आ त्वा सोमस्य गल्दया सदा याचन्न् अहं ज्या ।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ ५ ॥
८.४.११
अध्वर्यो द्रावया त्वं सोमम् इन्द्रः पिपासति ।
उप ...
उपो नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ६ ॥
७.३२.२४
अभी षतस् तद् आ भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर (एवं कौ) • • सनादसि ...
पुरोवसुर् हि मघवन् बभूविथ भरेभरे च हव्यः ॥ ७ ॥
७.३२.१८
यद् इन्द्र यावतस् त्वम् एतावद् अहम् ईशीय ।
• • दिधिषेय ... रासीय (कौ रंसिषम्)
स्तोतारम् इद् दिधिषे रदावसो न पापत्वाय रंसिषः ॥ ८ ॥
८.९९.५
त्वम् इन्द्र प्रतूर्तिष्व् अभि विश्वा असि स्पृधः ।
• • विश्वतूर् ...
अशस्तिहा जनिता वृत्रतूर् असि त्वं तूर्य तरुष्यतः ॥ ९ ॥

८.८८.५ • हि ... अन्तेभ्यस् •
प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस् परि ।
... अनु स्वधां
न त्वा विव्याच रज इन्द्र पार्थिवम् अति विश्वं
ववक्षिथ ॥ १० ॥ ॥८॥

१.३३

ऋ ७.२१.१
असावि देवं गोऋजीकम् अन्धो न्य् असिन्न् इन्द्रो
जनुषेम् उवोच ।
बोधामसि त्वा हर्यश्व यज्ञैर् बोधा नः स्तोमम् अन्धसो
मदेषु ॥ १ ॥
७.२४.१
योनिष् ट इन्द्र सदने अकारि तम् आ नृभिः पुरुहूत
प्र याहि ।
• • • • वृधे च ...
असो यथा नो ऽविता वृधश् चिद् ददो वसूनि ममदश् च
सोमैः ॥ २ ॥
५.३२.१
अदर्दर् उत्सम् असृजो वि खानि त्वम् अर्णवान् बद्बधानं
अरम्णाः ।
... सृजो वि धारा अव दानवं •
महान्तम् इन्द्र पर्वतं वि यद् वः सृजद् धारा अव यद्
दानवान् हन् ॥ ३ ॥
१०.१४८.१ ... ससवांसश् च •
सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश् चित् तुविनृम्ण
वाजम् ।
• • • • • याकन् त्मना तना सनुयाम •
आ नो भर सुवितं यस्य कोना तना त्मना सह्यामा
त्वोताः ॥ ४ ॥
१०.४७.१ जगृभ्मा ...
जगृह्मा ते दक्षिणम् इन्द्र हस्तं वसूयवो वसुपते वसू-
नाम् ।
विद्मा हि त्वा गोपतिं शूर गोनाम् अस्मभ्यं चित्रं वृषणं
रयिं दाः ॥ ५ ॥
७.२७.१ ... युनजते (एवं कौ) • •
इन्द्रं नरो नेमधिता हवन्ते यत् पार्या युनजन्ते धियस् ताः ।
• • शवसश्चकान आ ...
शूरो नृषाता श्रवसश् च काम आ गोमति व्रजे भजा त्वं
नः ॥ ६ ॥
१०.७३.११
वयः सुपर्णा उप सेदुर् इन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अप ध्वान्तम् ऊर्णुहि पूर्धि चक्षुर् मुमुग्ध्य् अस्मान् निध-
येव बद्धान् ॥ ७ ॥
१०.१२३.६
नाके सुपर्णम् उप यत् पतन्तं हृदा वेनन्तो अभ्य् अचक्षत
त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्
॥ ८ ॥
ऋग्वेदे नास्ति
कौ ... आवः (एवमितरासु संहितासु)
ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन
आवत् ।

स बुध्न्या उपमा अस्य विष्ठाः सतश् च योनिम् असतश्
च विवः ॥ ९ ॥
१.३२.१
अपूर्व्या पुरुतमान्य् अस्मै महे वीराय तवसे तुराय ।
... भाम्मा • तक्षम्
विरप्शिने वज्रिणे शंतमानि वचांस्य् अस्मै स्थविराय
तक्षुः ॥ १० ॥ ॥१॥

१.३४

ऋ ८.९६.१३ • • • • इयानः ...
अव द्रप्सो अंशुमतीम् अतिष्ठद् ईयानः कृष्णो दशभिः
सहस्रैः ।
... स्नेहितीर् • अधत्त
आवत् तम् इन्द्रः शच्या धमन्तम् अप स्नीहितिं नृमणा
अधद्राः ॥ १ ॥
८.९६.७
वृत्रस्य त्वा श्वसथाद् ईषमाणा विश्वे देवा अजहुर्
ये सखायः ।
मरुद्भिर् इन्द्र सख्यं ते अस्त्व् अथेमा विश्वाः पृतना
जयासि ॥ २ ॥
१०.५५.५
विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः सम्
आन ॥ ३ ॥
८.९६.१६
त्वं ह त्यत् सप्तभ्यो जायमानो ऽशत्रुभ्यो अभवः शत्रुर्
इन्द्र ।
गूढे द्यावापृथिवी अन्व् अविन्दो विभुमद्भ्यो भुवनेभ्यो
रण धाः ॥ ४ ॥
ऋग्वेदे नास्ति
मेळिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिर-
प्स्नुम् ।
करोष्य् अर्यस् तरुषीर् दुवस्युर् इन्द्र द्युक्षं वृत्रहणं
गृणीषे ॥ ५ ॥
७.३१.१० • • • महिवृधे ...
प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
• • • चरा
विशः पूर्वीः प्र चर चर्षणिप्राः ॥ ६ ॥
३.३०.२२
शुनं हुवेम मघवानम् इन्द्रम् अस्मिन् भरे नृतमं वाज-
सातौ ।
शृण्वन्तम् उग्रम् ऊतये समत्सु घ्नन्तं वृत्राणि संजितं
धनानाम्
धनानि ॥ ७ ॥
७.२३.१
उद् उ ब्रह्माण्य् ऐरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
• • • शवसा ...
आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो
वचांसि ॥ ८ ॥
१०.७३.९
चक्रं यद् अस्याप्स्व् आ निषत्तम् उतो तद् अस्मै मध्व्
इच् चच्छद्यात् ।

पृथिव्याम् अतिषितं यद् ऊधः पयो गोष्व् अदधा
ओषधीषु ॥ ९ ॥ ॥२॥

१.३५

ऋ १०.१७८.१ ... सहावानं • •
त्यम् ऊ षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजम् आशुं स्वस्तये तार्क्ष्यम् इहा
हुवेम ॥ १ ॥
६.४७.११
त्रातारम् इन्द्रम् अवितारम् इन्द्रं हवेहवे सुहवं शूरम्
इन्द्रम् ।
ह्वयामि शक्रं • • स्वस्ति नो • धात्व्
हुवे नु शक्रं पुरुहूतम् इन्द्रम् इदं हविर् मघवा वेत्व्
इन्द्रः ॥ २ ॥
१०.२३.१
यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानाम् ।
• श्मश्रु • ऊर्ध्वया भुद् • •
दुधमानो • •
प्र श्मश्रुभिर् दोधुवद् ऊर्ध्वधा भुवद् वि सेनाभिर्
भयमानो वि राधसा ॥ ३ ॥
४.१७.८
सत्राहणं दाधृषिं तुम्रम् इन्द्रं महाम् अपारं वृषभं सुवज्रम् ।
हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा
सुराधाः ॥ ४ ॥
यो नो वनुष्यन्न् अभिदाति मर्त उगणा वा मन्य-
मानस् तुरो वा ।
ऋग्वेदे न सन्ति
क्षिधी युधा शवसा वा तम् इन्द्राभी ष्याम वृषमणस्
त्वोताः ॥ ५ ॥
यं वृत्रेषु क्षितयः स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
यं शूरसातौ यम् अपाम् उपज्मन् यं विप्रासो वाजयन्ते
स इन्द्रः ॥ ६ ॥
१.५३.१ [?]
इन्द्रापर्वता बृहता रथेन वामीर् इष आ वहतं सुवीराः ।
वीतं हव्यान्य् अध्वरेषु देवा वर्धेथां गीर्भिर् इडया
मदन्ता ॥ ७ ॥
१०.८९.४ ... प्रैरयं •
इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत् सगरस्य
बुध्नात् ।
• • चक्रिया ...
यो अक्षेणेव चक्रियौ शचीभिर् विष्वक् तस्तम्भ पृथिवीम्
उत द्याम् ॥ ८ ॥
१०.१०.१ ओ चित् सखायं • ववृत्यां • • • अर्णवं जगन्वान्
आ त्वा सखायः सख्या ववृत्युस् तिरः पुरू चिद् अर्णवां
जगम्याः ।
... वेधा अधि क्षमि प्रतरं दीध्यानः
पितुर् नपातम् आ दधीत वेधा अस्मिन् क्षये प्रतरां
दीद्यानः ॥ ९ ॥
१.८४.१६
को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो
दुर्हृणायून् ।

आसन्निपून् हव्वसो मयो'...	आसन्न् एषाम् अप्सुवाहो मयोभून् य एषां भृत्याम्
	ऋणधन् स जीवात् ॥ १० ॥ ॥२॥
	१.३६
ऋ १.१०.१	गायन्ति त्वा गायत्रिणो अर्चन्त्य् अर्कम् अर्किणः ।
	ब्रह्माणस् त्वा शतक्रत उद् वंशम् इव येमिरे ॥ १ ॥
१.११.१	इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
	रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ २ ॥
१.८४.४	इमम् इन्द्र सुतं पिब ज्येष्ठम् अमर्त्यं मदम् ।
	शुक्रस्य त्वाभ्य् अक्षरन् धारा ऋतस्य सादने ॥ ३ ॥
५.३९.१ • • • मेहनास्ति...	यद् इन्द्र चित्र म इह नास्ति त्वादातम् अद्रिवः ।
...भर (एवं कौ)	राधस् तन् नो विदद्वस उभयाहस्त्य् आ भरा ॥ ४ ॥
८.९५.४	श्रुधी हवं तिरश्च्या इन्द्र यस् त्वा सपर्यति ।
	सुवीर्यस्य गोमतो रायस् पूर्धि महं असि ॥ ५ ॥
१.८४.१	असावि सोम इन्द्र ते शविष्ठ धृष्णव् आ गहि ।
	आ त्वा पृणक्त्व् इन्द्रियं रजः सूर्यो न रश्मिभिः ॥६॥
८.३४.१	एन्द्र याहि हरिभिर् उप कण्वस्य सुष्टुतिम् ।
दिवो (एवं कौ)...	देवा अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥
८.९५.१	आ त्वा गिरो रथीर् इवास्थुः सुतेषु गिर्वणः ।
• • • • इन्द्र • • मातरः	अभि त्वा सम् अनूषत गावो वत्सं न धेनवः ॥ ८ ॥
८.९५.७	एतो न्व् इन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।
• • • शुद्ध...	शुद्धैर् उक्थैर् वावृध्वांसं शुद्धैर् आशीर्वान् ममत्तु ॥ ९ ॥
६.४४.१ • रयिवो रयितमो...	यो रयिं वो रयिंतमो यो द्युम्नैर् द्युम्नवत्तमः ।
	सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ १० ॥ ॥ ४ ॥
	१.३७
ऋ ६.४२.१	प्रत्य् अस्मै पिपीषते विश्वानि विदुषे भर ।
...नरे	अरंगमाय जग्मयेऽपश्चादध्वने नरः ॥ १ ॥
ऋग्वेदे नास्ति	आ नो वयोवयःशयं महान्तं गह्वरेष्ठाम् ।
	महान्तं पूर्विनेष्ठाम् उग्रं वचो अपावधीः ॥ २ ॥
८.६८.१	आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
...इन्द्र • सत्पते	तुविकूर्मिम् ऋतीषहम् इन्द्रं शविष्ठ सत्पतिम् ॥ ३ ॥
८.६३.१ • • महानां...	स पूर्व्यो महोनां वेनः क्रतुभिर् आनजे ।
	यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥ ४ ॥
५.६१.११ य ईं वहन्त आशुभिः {	यदी वहन्त्य् आशवो भ्राजमाना रथेष्व् आ ।
पिबन्तो • मधु । अत्र श्रवांसि दधिरे {	पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते ॥ ५ ॥
६.४४.४	त्वम् उ वो अप्रहणं गृणीषे शवसस् पतिम् ।

• विश्वासाहं (एवं कौ) • मंहिष्ठं } विश्वचर्षणिम् }	इन्द्रं विश्वासहं नरं शचिष्ठं विश्ववेदसम् ॥ ६ ॥
४.३९.६	दधिक्राव्णो अकारिषं जिष्णोर् अश्वस्य वाजिनः ।
कौ ...न • •	सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥ ७ ॥
१.११.४	पुरां भिन्दुर् युवा कविर् अमितौजा अजायत ।
	इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥ ८ ॥
	॥५॥
	१.३८
ऋ ८.६९.१ ...मन्दद्वी	प्रप्र वस् त्रिष्टुभम् इषं वन्दद्वीरायेन्दवे ।
	धिया वो मेधसातये पुरन्ध्या विवासति ॥ १ ॥
ऋग्वेदे नास्ति । कौ • • याव्...	कश्यपस्य स्वर्विदो य आहुः सयुजाव् इति ।
कौ ...व्रतं • • निचाय्य	ययोर् विश्वम् अपि व्रतं यज्ञं धीरा निचाय्या ॥ २ ॥
८.६८.४	विद्वानरस्य वस् पतिम् अनानतस्य शवसः ।
[शशमते	एवैश् च चर्षणीनाम् ऊती हुवे रथानाम् ॥ ३ ॥
६.२.४ ऋधद्यस्ते सुदानवे धिया मर्तः	स वा यस् ते दिवो नरो धिया मर्तस्य शमतः ।
• व...	ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥ ४ ॥
८.६९.८ नरः नास्ति	अर्चत प्रार्चत नरः प्रियमेधासो अर्चत ।
...पुरं न • •	अर्चन्तु पुत्रका उत पुरम् इद् धृष्ण्व् अर्चत ॥ ५ ॥
१.१०.५	उक्थम् इन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे ।
	शक्रो यथा सुतेषु णो रारणत् सख्येषु च ॥ ६ ॥
५.३८.१ उरोष्... [मंहय)	विभोष् ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
अधा • • द्युम्ना सुक्षत्र मंहय (कौ अपि	अधा नो विश्वचर्षणे द्युम्नं सुदत्र मंहया ॥ ७ ॥
१.४९.३ ... द्विपच् चतुष्पद् •	वयश् चित् ते पतत्रिणो द्विपाच् चतुष्पाद् अर्जुनि ।
[• •	उषः प्रारन्न् ऋतुं अनु दिवो अन्तेभ्यस् परि ॥ ८ ॥
१.१०५.५ ...त्रिष्वा (कौ मध्य आ)	अमी ये देवाः स्थन मध्ये ये रोचने दिवः ।
• • • • अनृतं क • • आहुतिर्विसं मे	कद् व ऋतं कद् अमृतं का प्रत्ना व आहुतिः ॥ ९ ॥
शौ ७.५४.१ ...कुर्वते [अस्य रोदसी	ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते ।
एते सदसि...यच्छतः	वि ते सदसि राजतो यज्ञं देवेषु वक्षतः ॥ १० ॥ ॥६॥ ॥३॥
	१.३९
ऋ ८.९७.१० • • • नरं...	विश्वाः पृतना अभिभूतरं नरः सजूस् ततक्षुर् इन्द्रं
	जजनुश् च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिम्... { तवसं • {	क्रत्वे वरे स्थेमन्य् आमुरीम् उतोग्रम् ओजिष्ठं तरसं तर-
	स्विनम् ॥ १ ॥
१०.१४७.१ ... वृत्रं	श्रत् ते दधामि प्रथमाय मन्यवे अहन् यद् दस्युं नर्यं
	विवेर् अपः ।
• यत् त्वा भवतो रोदसी अनु रेजते •	उभे यत्वा रोदसी धावताम् अनु भ्यसात् ते शुष्मात्

	पृथिवी चिद् अद्रिवः ॥ २ ॥
शौ ७.२१.१ • विश्वे वचसा • दिव { एको विभूर् • • {	समेत विश्वा ओजसा पतिं दिवो य एक इद् भूर्
	अतिथिर् जनानाम् ।
• • • आविवासत् • वर्तनिर् • •	स पूर्व्यो नूतनम् आजिगीषं तं वर्तनीर् अनु वावृत
एकमित् पुरु	एक इत् ॥ ३ ॥
ऋ १.५७.४	इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि
	प्रभूवसो ।
	नहि त्वद् अन्यो गिर्वणो गिरः सघत् क्षोणीर् इव
प्रति नो हर्यं तद् •	प्रति तद् धर्य नो वचः ॥ ४ ॥
३.५१.१	चर्षणीधृतं मघवानम् उक्थ्यम् इन्द्रं गिरो बृहतीर्
	अभ्य् अनूषत ।
	वावृधानं पुरुहूतं सुवृक्तिभिर् अमर्त्यं जरमाणं दिवे-
	दिवे ॥ ५ ॥
१०.४३.१ • म • • स्वर्विदः...	अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर् विश्वा उश-
	तीर् अनूषत ।
• स्वजन्ते...	परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघ-
	वानम् ऊतये ॥ ६ ॥
१.५१.१ • • • • ऋग्मियम् (एवं कौ)...	अभि त्यं मेषं पुरुहूतम् ऋग्म्यम् इन्द्रं गीर्भिर् मदता
	वस्वो अर्णवम् ।
• • • • मानुषा...	यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठम् अभि
	विप्रम् अर्चत ॥ ७ ॥
१.५२.१ ...सुन्वः •	त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभुवः साकम्
	ईरते ।
	अत्यं न वाजं हवनस्यदं रथम् एन्द्रं ववृत्याम् अवसे
	सुवृक्तिभिः ॥ ८ ॥
६.७०.१	घृतवती भुवनानाम् अभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
	द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरि-
	रेतसा ॥ ९ ॥
१०.१३४.१	उभे यद् इन्द्र रोदसी आपप्राथोषा इव ।
	महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
	देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १० ॥
१.१०१.१	प्र मन्दिने पितुमद् अर्चता वचो यः कृष्णगर्भा निर-
	हन्न् ऋजिश्वना ।
...हवामहे	अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि ॥
	॥ ११ ॥ ॥१॥
	१.४०
	स्वादोर् इत्था विषूवतो मधोः पिबन्ति गौर्यः ।
ऋ १.८४.१० ...मध्वः • •	

...शोभसे •	या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभथा वस्वीर्
	अनु स्वराज्यम् ॥ १ ॥
१.८०.१ ...मदे ब्रह्मा • •	इत्था हि सोम इन् मदो ब्रह्म चकार वर्धनम् ।
	शविष्ठ वज्रिन्न् ओजसा पृथिव्या निः शशा अहिम् अर्चन्न्
	अनु स्वराज्यम् ॥ २ ॥
१.८१.१	इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
• • • अभिष्टुतेम्...	तम् इन् महत्स्व् आजिषूतिम् अर्भे हवामहे स वाजेषु
	प्र नो ऽविषत् ॥ ३ ॥
१.८०.७	इन्द्रं तुभ्यम् इद् अद्रिवो ऽनुत्तं वज्रिन् वीर्यम् ।
• • • • • तमु त्वं मायया वधीर्...	यद् ध त्यं मायिनं मृगं तव त्यन् माययावधीर् अर्चन्न्
	अनु स्वराज्यम् ॥ ४ ॥
१.८०.३	प्रेह्य् अभीहि धृष्णुहि न ते वज्रो नि यंसते ।
	इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपो ऽर्चन्न्
	अनु स्वराज्यम् ॥ ५ ॥
१.८१.३ ...धना	यद् उदीरत आजयो धृष्णवे धीयते धनम् ।
युक्ष्वा...	युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्मां इन्द्र
	वसौ दधः ॥ ६ ॥
१.८२.२...	अक्षन्न् अमीमदन्त ह्य् अव प्रिया अधूषत ।
	अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्व् इन्द्र
	ते हरी ॥ ७ ॥
१.८२.१	उपो षु शृणुही गिरो मघवन् मातथा इव ।
यदा • • • अर्थ...	कदा नः सूनृतावतः कर इद् अर्थयास इद् योजा न्व् इन्द्र
	ते हरी ॥ ८ ॥
१.१०५.१	चन्द्रमा अप्स्व् अन्तर् आ सुपर्णो धावते दिवि ।
	न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे
	अस्य रोदसी ॥ ९ ॥
५.७५.१	प्रति प्रियतमं रथं वृषणं वसुवाहनम् ।
• • • • स्तोमन प्रति भूषति	स्तोता वाम् अश्विनाव् ऋषिः स्तोमेभिर् भूषति प्रति
	माध्वी मम श्रुतं हवम् ॥ १० ॥ ॥२॥
	१.४१
ऋ ५.६.४	आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
	यद् ध स्या ते पनीयसी समिद् दीदयति द्यवीषं स्तोतृभ्य
	आ भर ॥ १ ॥
१०.२१.१	आग्निं न स्ववृक्तिभिर् होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे { शीरं पावकशोचिषं विवक्षसे {	शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं
	विवक्षसे ॥ २ ॥

५.७९.१	महे नो अद्य बोधयोषो राये दिवित्मती ।
	यथा चिन् नो अबोधयः सत्यश्रवसि वाय्ये सुजाते
	अश्वसूनृते ॥ ३ ॥
१०.२५.१ [• •	भद्रं नो अपि वातय मनो दक्षम् उत क्रतुम् ।
अधा • • अन्धसो (एवं कौ) ... रणन्	अधा ते सख्ये अन्धसा वि वो मदे रणा गावो न
	यवसे विवक्षसे ॥ ४ ॥
१.८१.४ • • अनुष्वधं (एवं कौ) } • • वावृधे • }	क्रत्वा महाँ अनुष्वधो भीम आ वावृते शवः ।
	श्रिय ऋष्व उपाकयोर् नि शिप्री हरिवान् दधे हस्तयोर्
	वज्रम् आयसम् ॥ ५ ॥
१.८२.४	स घा तं वृषणं रथम् अधि तिष्ठाति गोविदम् ।
	यः पात्रं हारियोजनं पूर्णम् इन्द्र चिकेतति योजा न्व्
	इन्द्र ते हरी ॥ ६ ॥
५.६.१	अग्निं तं मन्ये यो वसुर् अस्तं यं यन्ति धेनवः ।
	अस्तम् अर्वन्त आशवो ऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य
	आ भर ॥ ७ ॥
१०.१२६.१	न तम् अंहो न दुरितं देवासो अष्ट मर्त्यम् ।
कौ ... नयति • •	सजोषसो यम् अर्यमा मित्रो नयन्ति वरुणो अति
	द्विषः ॥ ८ ॥ ॥१॥

१.४२

क ९.१०९.१	परि प्र धन्वेन्द्राय सोम स्वादुर् मित्राय पूष्णे भगाय ॥१॥
९.११०.१	पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
...ईयसे	द्विषस् तरध्या ऋणया न ईरसे ॥ २ ॥
९.१०९.४	पवस्व सोम महान् समुद्रः पिता देवानां विश्वाभि
	धाम ॥ ३ ॥
९.१०९.१० • • कार्ये ...	पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ ४ ॥
९.१०९.१२	इन्दुः पविष्ट चारुर् मदायापाम् उपस्थे कविर् भगाय ॥ ५ ॥
९.११०.२	अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।
	वाजं अभि पवमान प्र गाहसे ॥ ६ ॥
७.५६.१ ... अधा (कौ अधा)	क ईं व्यक्ता नरः सनीडा रुद्रस्य मर्या यथा स्वश्वाः ॥ ७ ॥
४.१०.१	अग्ने तम् अद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।
	ऋध्यामा त ओहैः ॥ ८ ॥
ऋग्वेदे नास्ति	आविर् मर्या आ वाजं वाजिनो ग्मं देवस्य सवितुः
कौ सवम्	सवे ।
कौ स्वर्गाँ	स्वर्गां अर्वन्तो जयत ॥ ९ ॥
क ९.१०९.७ • • • • • • महाम् (कौ } महाँ) अवीनाम् • • }	पवस्व सोम द्युम्नी सुधारो महीनाम् अनु पूर्व्यः
	॥ १० ॥ ॥४॥

१.४३

८.१३.१ इन्द्रः ... पुनीत •	इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
• • दक्षसो ...	विदे वृधस्य दक्षस्य महां हि षः ॥ १ ॥
८.१५.१	तम् व् अभि प्र गायत पुरुहूतं पुरुष्टुतम् ।
... विवासत (एवं कौ)	इन्द्रं गीर्भिस् तविषम् आ विवासता ॥ २ ॥
८.१५.४ ... पृत्सु •	तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
	उ लोककृत्नुम् अद्रिवो हरिश्रियम् ॥ ३ ॥
८.१२.१६ • • • विष्णवि (एवं कौ) ...	यत् सोमम् इन्द्र विष्णवे यद् वा घ त्रित आप्त्ये ।
	यद् वा मरुत्सु मन्दसे सम् इन्दुभिः ॥ ४ ॥
८.२४.१६ • मध्वो • सिञ्च वा- } ध्वर्यो अन्धसः (कौ अपि अन्धसः) }	एद् उ मधोर् मदिन्तरं सिञ्चाध्वर्यो अन्धसा ।
	एवा हि वीरः स्तवते सदावृधः ॥ ५ ॥
८.२४.१३ ... पिबाति (एवं कौ) • •	एन्दुम् इन्द्राय सिञ्चत पिबत सोम्यं मधु ।
• राधसा चोदयाते (कौ चोदयते) •	प्र राधांसि चोदयता महित्वना ॥ ६ ॥
८.२४.१९	एतो न्व् इन्द्रं स्तवाम सखायः स्तोम्यं नरम् ।
	कृष्टीर् यो विश्वा अभ्य् अस्त्य् एक इत् ॥ ७ ॥
८.९८.१	इन्द्राय साम गायत विप्राय बृहते बृहत् ।
धर्मकृते ...	ब्रह्मकृते विपश्चिते पनस्यवे ॥ ८ ॥
१.८४.७	य एक इद् विदयते वसु मर्ताय दाशुषे ।
	ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ९ ॥
८.२४.१ • • शिषामहि ...	सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
	स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ १० ॥ ॥५॥

१.४४

क ८.९८.४ ... प्रियः • अगोह्यः (कौ [अगोह्य)	एन्द्र नो गधि प्रिय सत्राजिद् अगोह्य ।
	गिरिर् न विश्वतः पृथुः पतिर् दिवः ॥ १ ॥
६.४३.१ ... रन्धयः	यस्य त्यच् छम्बरं मदे दिवोदासाय रन्धयन् ।
... पिब (एवं कौ)	अयं स सोम इन्द्र ते सुतः पिबा ॥ २ ॥
८.६२.८ ... उपमं •	गृणे तद् इन्द्र ते शव उपमां देवतातये ।
... शचीपते भद्रा इन्द्रस्य रातयः	यद् धंसि वृत्रम् ओजसा शचीपते ॥ ३ ॥
८.१२.१	य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
	येना हंसि न्य् अत्रिणं तम् ईमहे ॥ ४ ॥
८.१८.१८ • तनाय ...	तुचे तुनाय तत् सु नो द्राघीय आयुर् जीवसे ।
• सुमहसः •	आदित्यासः समहसः कृणोतन ॥ ५ ॥
८.२४.२४	वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
	अहरहः शुन्ध्युः परिपदाम् इव ॥ ६ ॥
८.१८.१०	अपामीवाम् अप स्रिधम् अप सेधत दुर्मतिम् ।
	आदित्यासो युयोतना नो अंहसः ॥ ७ ॥

७.३२.२	पिबा सोमम् इन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
	सोतुर् बाहुभ्यां सुयतो नार्वा ॥ ८ ॥ ॥६॥

१.४५

क ८.२१.१३	अभ्रातृव्यो अना त्वम् अनापिर् इन्द्र जनुषा सनाद् असि ।
	युधेद् आपित्वम् इच्छसे ॥ १ ॥
८.२१.९	यो न इदमिदं पुरा प्र वस्य आनिनाय तम् उ वः स्तुषे ।
	सखाय इन्द्रम् ऊतये ॥ २ ॥
८.२०.१ ... स्थाता •	आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
स्थिरा चिन्नमयिष्णवः (कौ दृढा ...	दृढाश् चिद् यमयिष्णवः ॥ ३ ॥
८.२१.६ • याहीम इन्दवो ...	आ याह्य् अयम् इन्दवे ऽश्वपते गोपत उर्वरापते ।
	सोमं सोमपते पिब ॥ ४ ॥
८.२१.११	त्वया ह स्विद् युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
	संस्थे जनस्य गोमतः ॥ ५ ॥
८.२०.२१	यावश् चिद् घा समन्यवः सजात्येन मरुतः सबन्धवः ।
	रिहते ककुभो मिथः ॥ ६ ॥
८.९८.१० • • • भर ...	त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
• • पृतनाषहम्	आ वीरं पृतनासहम् ॥ ७ ॥
८.९८.७ ... कामान्महः ससृज्महे	अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
• यन्त •	उदेव ग्मन्त उदभिः ॥ ८ ॥
८.२१.५ ... गोश्रीते मधौ मदिरे [विवक्षणे (एवं कौ)	सीदन्तस् ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणः ।
	अभि त्वाम् इन्द्र नोनुमः ॥ ९ ॥
८.२१.१	वयम् उ त्वाम् अपूर्व्य स्थूरं न कच् चिद् भरन्तो ऽवस्यवः ।
वाजे ...	वज्रिं चित्रं हवामहे ॥ १० ॥ ॥७॥

१.४६

ऋग्वेदे न स्तः	विश्वतोदावन् विश्वतो न आ भर यं त्वा शविष्ठम्
	ईमहे ॥ १ ॥
	एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ २ ॥
५.३१.४[१,२]	ब्रह्माण इन्द्रं महयन्तो अर्कैर् अवर्धयन्न् अहये
	हन्तवा उ ॥ ३ ॥
५.३१.४[३,४] • • • • तक्षद् ...	अनवस् ते रथम् अश्वाय तक्षुस् त्वष्टा वज्रं पुरुहूत
	द्युमन्तम् ॥ ४ ॥
	शं पदं मघं रयीषिणे न कामम् अव्रतो हिनोति न
ऋग्वेदे न स्तः	स्पृशद् रयिम् ॥ ५ ॥
	सदा गावः शुचयो विश्वधायसः सदा देवा अरे-
	पसः ॥ ६ ॥

१०.१७२.१	आ याहि वनसा सह गावः सचन्त वर्तनिं यद्
	ऊधभिः ॥ ७ ॥
	उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र
	॥ ८ ॥
ऋग्वेदे न सन्ति	अर्चन्त्य् अर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा
	स इन्द्रः ॥ ९ ॥
	प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं
	जुजोषते ॥ १० ॥ ॥८॥

१.४७

क ८.५६.५[१,२] • • चिकितुर्हव्यवाट् } स (कौ हव्यवाड् न) • }	अचेत्य् अग्निश् चिकितिर् हव्यवाण् ण सुमद्रथः ॥ १ ॥
५.२४.१[१,२] ... भवा •	अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ २ ॥
ऋग्वेदे न स्तः	भगो न चित्रो अग्निर् महोनां दधाति रत्नम् ॥ ३ ॥
	विश्वस्य प्र स्तोभ पुरो वा सन् यदि वेह नूनम् ॥ ४ ॥
१०.१७२.४ • • स्वसुस्तमः ...	उषा अप स्वसुष् टमः सं वर्तयति वर्तनिं सुजातता ॥ ५ ॥
१०.१५७.१ • • • • सीषधामेन्द्रश् ...	इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवाः ॥ ६ ॥
ऋग्वेदे नास्ति । कौ ... कृणुही •	ऊर्जा मित्रो वरुणः पिन्वतेळाः पीवरीम् इषं कृणुहि न
	इन्द्र ॥ ७ ॥
ऋग्वेदे नास्ति	वि स्रुतयो यथा पथा इन्द्र त्वद् यन्तु रातयः ॥ ८ ॥
६.१७.१५	अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ ९ ॥
ऋग्वेदे नास्ति	इन्द्रो विश्वस्य राजति ॥ १० ॥ ॥९॥

१.४८

क २.२२.१ ... तृपत् •	त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस् तृम्पत् सोमम्
... यथावशत्	अपिबद् विष्णुना सुतं यथावशम् ।
... स एनं • [... इन्द्रम्	स ईं ममाद महि कर्म कर्तवे महाम् उरुं सैनं सश्चद्
• • सत्यमिन्द्रं सत्य इन्दुः (कौ	देवो देवं सत्य इन्दुः सत्यम् इन्द्रः ॥ १ ॥
ऋग्वेदे नास्ति । कौ ७.२२.१	अयं सहस्रमानवो दृशः कवीनां मतिर् ज्योतिर् विधर्म ।
कौ ७.२२.२	ब्रध्नः समीचीर् उषसः सम् ऐरयद् अरेपसः सचेतसः
	स्वसरे मन्युमन्तश् चिता गोः ॥ २ ॥
क १.१३०.१ ... विदथानीव (एवं कौ)	एन्द्र याह्य् उप नः परावतो नायम् अच्छा विदथान् एव
• अस्तं ...	सत्पतिर् अस्ता राजेव सत्पतिः ।
• • वयं प्रयस्वन्तः सुते सचा • • •	हवामहे त्वा प्रयस्वन्तः सुतेष्व् आ पुत्रासो न पितरं
	वाजसातये मंहिष्ठं वाजसातये ॥ ३ ॥
८.९७.१३	तम् इन्द्रं जोहवीमि मघवानम् उग्रं सत्रा दधानम्
अप्रतिष्कुतं (एवं कौ) श्रवांसि [भूरि	अप्रतिष्कृतं श्रवांसि भूरि ।
... ववर्तद् • • • [नास्ति)	मंहिष्ठो गीर्भिर् आ च यज्ञियो ववर्त राये नो विश्वा

	सुपथा कृणोतु वज्री ॥ ४ ॥
ऋग्वेदे नास्ति	अभि त्यं देवं सवितारम् ओण्योः कविक्रतुम् अर्चामि
	सत्यसवं रत्नधाम् अभि प्रियं मतिम् ।
	ऊर्ध्वा यस्यामतिर् भा अदिद्युतत् सवीमनि हिरण्यपाणिर्
	अमिमीत सुक्रतुः कृपा स्वः ॥ ५ ॥
२.२२.४	तव त्यन् नर्यं नृतो ऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।
यद् … । कौ …असु • •	यो देवस्य शवसा प्रारिणा असुं रिणन्न् अपः ।
भुवद् • • अदेवम् • विदाद् • •	भुवो विश्वम् अभ्य् अदेवम् ओजसा विदेद् ऊर्जं शतक्रतुर्
विदाद् •	विदेद् इषम् ॥ ६ ॥
१.१३९.१ …तच् •	अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु त्यच् छर्धो
	दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।
…विवस्वति • संदायि नव्यसी	यद् ध क्राणा विवस्वते नाभा संदाय नव्यसे ।
• • सू न उप यन्तु • • अच्छा…	अध प्र नूनम् उप यन्ति धीतयो देवं अच्छ न धीतयः
	॥ ७ ॥
५.८७.१	प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवया-
	मरुत् ।
	प्र शर्धाय प्रयज्यवे सुखादये तवसे भन्ददिष्टये धुनि-
	व्रताय शवसे ॥ ८ ॥
९.१११.१	अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति
स्वयुग्वभिः • • स्वयुग्वभिः	सयुग्वभिः सूरो न सयुग्वभिः ।
• सुतस्य ..	धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
• • • परियास्य्…	विश्वा यद् रूपा परियास्य् ऋक्वभिः सप्तास्येभिर्
	ऋक्वभिः ॥ ९ ॥
१.१२७.१ • • • • यमुं • सहसो	अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसा जातवेदसं
[(एवं कौ) •	विप्रं न जातवेदसम् ।
	य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
• • अनु वष्टि शोचिषाजुह्वानस्य	घृतस्य विभ्राष्टिम् अनु शुक्रशोचिष आजुह्वानस्य
	सर्पिषः ॥ १० ॥ ॥१०॥ ॥४॥ ॥२॥
	१.४९
ऋ ९.६१.१० • • • • अन्धसो (एवं कौ)	उच्चा ते जातम् अन्धसा दिवि सद् भूम्य् आ ददे ।
[• यद् ..	उग्रं शर्म महि श्रवः ॥ १ ॥
९.१.१	स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
	इन्द्राय पातवे सुतः ॥ २ ॥
९.६५.१०	वृषा पवस्व धारया मरुत्वते च मत्सरः ।
	विश्वा दधान ओजसा ॥ ३ ॥
९.६१.१९	यस् ते मदो वरेण्यस् तेना पवस्वान्धसा ।

	देवावीर् अघशंसहा ॥ ४ ॥
९.३३.४	तिस्रो वाच उद् ईरते गावो मिमन्ति धेनवः ।
	हरिर् एति कनिक्रदत् ॥ ५ ॥
९.६४.२२	इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
ऋतस्य • •	अर्कस्य योनिम् आसदम् ॥ ६ ॥
९.६२.४	असाव्य् अंशुर् मदायाप्सु दक्षो गिरिष्ठाः ।
	श्येनो न योनिम् आसदत् ॥ ७ ॥
९.२५.१	पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
	मरुद्भ्यो वायवे मदः ॥ ८ ॥
९.१८.१ • सुवानो …अक्षाः	परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
	मदेषु सर्वधा असि ॥ ९ ॥
९.९.१	परि प्रिया दिवः कविर् वयांसि नप्त्योर् हितः ।
सुवानो • •	स्वानैर् याति कविक्रतुः ॥ १० ॥ ॥१॥
	१.५०
ऋ ९.३२.१ …मघोनः	प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
	सुता विदथे अक्रमुः ॥ १ ॥
९.३३.१ • • • ऽर्षा • यन्त्य् •	प्र सोमासो विपश्चितो ऽपो नयन्त ऊर्मयः ।
…इव (एवं कौ)	वनानि महिषा इवा ॥ २ ॥
९.६१.२८	पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
	विश्वा अप द्विषो जहि ॥ ३ ॥
९.६५.४[१.१]	वृषा ह्य् असि भानुना द्युमन्तं त्वा हवामहे ।
• स्वाध्यः	पवमान स्वर्दृशम् ॥ ४ ॥
९.६४.१० …मती	इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः ।
	सृजद् अश्वं रथीर् इव ॥ ५ ॥
९.६४.४	असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
	शुक्रासो वीरयाशवः ॥ ६ ॥
९.६३.२२	पवस्व देव आयुषग् इन्द्रं गच्छतु ते मदः ।
	वायुम् आ रोह धर्मणा ॥ ७ ॥
९.६१.१६	पवमानो अजीजनद् दिवश् चित्रं न तन्यतुम् ।
	ज्योतिर् वैश्वानरं बृहत् ॥ ८ ॥
९.१०.४ • सुवानास ..	परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
सुता • •	मधो अर्षन्ति धारया ॥ ९ ॥
९.१४.१	परि प्रासिष्यदत् कविः सिन्धोर् ऊर्मांव् अधि श्रितः ।
कारं…	कारुं बिभ्रत् पुरुस्पृहम् ॥ १० ॥ ॥२॥

	१.५१
ऋ ९.६१.१३[१.१]	उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
	इन्दुं देवा अयासिषुः ॥ १ ॥
९.४०.१	पुनानो अक्रमीद् अभि विश्वा मृधो विचर्षणिः ।
	शुम्भन्ति विप्रं धीतिभिः ॥ २ ॥
९.६२.१९	आविशन् कलशं सुतो विश्वा अर्षन्न् अभि श्रियः ।
शूरो न गोषु तिष्ठति	इन्दुर् इन्द्राय धीयते ॥ ३ ॥
९.३६.१	असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।
	कार्ष्मन् वाजी न्य् अक्रमीत् ॥ ४ ॥
९.४१.१ • ये…	प्र यद् गावो न भूर्णयस् त्वेषा अयासो अक्रमुः ।
	घ्नन्तः कृष्णाम् अप त्वचम् ॥ ५ ॥
९.६३.२४	अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः ।
	नुदस्वादेवयुं जनम् ॥ ६ ॥
९.६३.७	अया पवस्व धारया यया सूर्यम् अरोचयः ।
	हिन्वानो मानुषीर् अपः ॥ ७ ॥
९.६१.२२	स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
	ववियांसं महीर् अपः ॥ ८ ॥
९.६१.१ • वीती (एवं कौ) ..	अया पीती परि स्रव यस् त इन्दो मदेष्व् आ ।
• • नव (एवं कौ)	अवाहन् नवतीर् नवा ॥ ९ ॥
९.५२.१ • द्युक्षः सनद्रयिर् …	परि द्युक्षं सनद् रयिं भरद् वाजं नो अन्धसा ।
सुवानो…	स्वानो अर्ष पवित्र आ ॥ १० ॥ ॥३॥
	१.५२
	अचिक्रदद् वृषा हरिर् महान् मित्रो न दर्शतः ।
ऋ ९.२.६	सं सूर्येण दिद्युते ॥ १ ॥
• • रोचते	आ ते दक्षं मयोभुवं वह्निम् अद्या वृणीमहे ।
९.६५.२८	पान्तम् आ पुरुस्पृहम् ॥ २ ॥
९.५१.१ …सृज (कौ नय)	अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय ।
पुनीहीन्द्राय •	पुनाहीन्द्राय पातवे ॥ ३ ॥
९.५८.१	तरत् स मन्दी धावति धारा सुतस्यान्धसः ।
	तरत् स मन्दी धावति ॥ ४ ॥
९.६३.१	आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् ।
अस्मे (एवं कौ) • धारय (एवं कौ)	अस्मे श्रवांसि धारया ॥ ५ ॥
९.२३.२	अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।
	रुचे जनन्त सूर्यम् ॥ ६ ॥
९.६५.१९	अर्षा सोम द्युमत्तमो ऽभि द्रोणानि रोरुवत् ।

• श्येनो न योनिमा	सीदन् योनौ वनेष्व् आ ॥ ७ ॥
९.६४.१	वृषा सोम द्युमं असि वृषा देव वृषव्रतः ।
…दधिषे	वृषा धर्माणि दध्रिषे ॥ ८ ॥
९.६४.१३	आ पवस्व धारया मृज्यमानो मनीषिभिः ।
	इन्दो रुचाभि गा इहि ॥ ९ ॥
९.६.१	मन्द्रया सोम धारया वृषा पवस्व देवयुः ।
अव्यो वारेष्व् •	अव्या वारेभिर् अस्मयुः ॥ १० ॥
९.४७.१ • सोमः • महश्चिदभ्यव-	अया सोम सुकृत्यया महान् सन्न् अभ्य् अवर्धथाः ।
• उद् वृषायते [र्धत	मन्दान इद् वृषायसे ॥ ११ ॥
९.६२.१०	अयं विचर्षणिर् हितः पवमानः स चेतति ।
	हिन्वान आप्यं बृहत् ॥ १२ ॥
९.४४.१ • ण • • तन • • • •	प्र न इन्दो महे तु न ऊर्मिं न बिभ्रद् अर्षसि ।
	अभि देवं अयास्यः ॥ १३ ॥
९.६१.२५	अपघ्नन् पवते मृधो ऽप सोमो अराव्णः ।
	गच्छन्न् इन्द्रस्य निष्कृतम् ॥ १४ ॥ ॥४॥
	१.५३
ऋ ९.१०७.४	पुनानः सोम धारयापो वसानो अर्षसि ।
.. देव	आ रत्नधा योनिम् ऋतस्य सीदस्य् उत्सो देवो
	हिरण्ययः ॥ १ ॥
१ परीतः…	परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
	दधन्वान् यो नर्यो अप्स्व् अन्तर् आ सुषाव सोमम्
	अद्रिभिः ॥ २ ॥
१० • • सुवानो…	आ सोम स्वानो अद्रिभिस् तिरो वाराण्य् अव्यया ।
…दधिषे	जनो न पुरि चम्वोर् विशद् धरिः सदो वनेषु दध्रिषे ॥३॥
१२	प्र सोम देववीतये सिन्धुर् न पिप्ये अर्णसा ।
	अंशोः पयसा मदिरो न जागृविर् अच्छा कोशं मधु-
	श्चुतम् ॥ ४ ॥
८ • • पुनानः…	सोम उ ष्वाणः सोतृभिर् अधि ष्णुभिर् अवीनाम् ।
	अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥५॥
१९	तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
	पुरूणि बभ्रो नि चरन्ति माम् अव परिधींर् अति तं
	इहि ॥६॥
२१ • सुहस्त्य…	मृज्यमानः सुहस्त्या समुद्रे वाचम् इन्वसि ।
	रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्य् अर्षसि ॥ ७ ॥
१४	अभि सोमास आयवः पवन्ते मद्यं मदम् ।
• विष्टपि • • स्वर्विदः	समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥८॥

१ अव्यो वारे • •	पुनानः सोम जागृविर् अव्या वारैः परि प्रियः ।
• • • ऽङ्गिरस्तमो … कौ … मः	त्वं विप्रो अभवो ऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष नः ॥ ९ ॥
२५	पवमाना असृक्षत पवित्रम् अति धारया ।
	मरुत्वन्तो मत्सरा इन्द्रिया हया मेधाम् अभि प्रयांसि च ॥ १० ॥
२३ • वाजसातये • • काव्या	पवस्व वाजसातमो ऽभि विश्वानि वार्या ।
• समुद्रे प्रथमो वि धारयो • • •	त्वं समुद्रः प्रथमे विधर्मन् देवेभ्यः सोम मत्सरः ॥ ११ ॥
१० [कौ • • • विधर्मे …	इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
	सहस्रधारो अत्य् अव्यम् अर्षति तम् ईं मृजन्त्य् आयवः ॥ १२ ॥ ॥५॥

१.५४

* १.८०.१	प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजम् अर्ष ।
	अश्वं न त्वा वाजिनं मर्जयन्तो अच्छा बर्ही रशनाभिर् नयन्ति ॥ १ ॥
१.९७.७	प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
	महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ॥ २ ॥
१.९७.३४	तिस्रो वाच ईरयति प्र वह्निर् ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
	गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ३ ॥
१.९७.१	अस्य प्रेषा हेमना पूयमानो देवो देवेभिः सम् अपृक्त रसम् ।
…पशुमन्ति • {	सुतः पवित्रं पर्य् एति रेभन् मितेव सद्म पशुमन्ति होता ॥ ४ ॥
१.९७.४० कौ • • • विधर्मे … राजा	अक्रान् समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य गोपाः ।
सुवान इन्दुः	वृषा पवित्रे अधि सानो अव्ये बृहत् सोमो वावृधे स्वानो अद्रिः ॥ ५ ॥
१.९५.१	कनिक्रन्ति हरिर् आ सृज्यमानः सीदन् वनस्य जठरे पुनानः ।
…मा • मतीर् •	नृभिर् यतः कृणुते निर्णिजं गाम् अतो मतिं जनयत स्वधाभिः ॥ ६ ॥

१.८७.४ …वृष्णे • •	एष स्य ते मधुमं इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
सहस्रसाः शतसा …	सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिर् आ वाज्य् अस्थात् ॥ ७ ॥
१.९६.१३ …साना	पवस्व सोम मधुमं ऋतावापो वसानो अधि सानो अव्ये ।
• • • सीद • • •	अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥ ८ ॥
१.९६.५	सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
	जनिताग्नेर् जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ९ ॥
१.९०.२ …आङ्गूषाणाम् • •	अभि त्रिपृष्ठं वृषणं वयोधाम् अङ्गोषिणम् अवावशन्त वाणीः ।
…सिन्धुर् • • •	वना वसानो वरुणो न सिन्धुर् वि रत्नधा दयते वार्याणि ॥ १० ॥ ॥६॥

१.५५

* १.९६.१	प्र सेनानीः शूरो अग्रे रथानां गव्यन्न् एति हर्षते अस्य सेना ।
	भद्रान् कृण्वन्न् इन्द्रहवान् सखिभ्य आ सोमो वस्त्रा 'रभसानि दत्ते ॥ १ ॥
१.९७.३१ …वारान् • • • अव्यान्	प्र ते धारा मधुमतीर् असृग्रन् वारं यत् पूतो अत्येष्य् अव्यम् ।
…जज्ञानः • •	पवमान पवसे धाम गोनां जनयन् सूर्यम् अपिन्वो अर्कैः ॥ २ ॥
१.९७.४ …हिनोत (एवं कौ) • धनाय (एवं कौ) }	प्र गायताभ्य् अर्चाम देवान् सोमं हिनोता महते धनाय ।
• पवाते …सीदाति • देवयुर्नः	स्वादुः पवताम् अति वारम् अव्यम् आ सीदतु कलशं देव इन्दुः ॥ ३ ॥
१.९०.१ सनिष्यन्	प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्न् अयासीत् ।
	इन्द्रं गच्छन्न् आयुधा संशिशानो विश्वा वसु हस्तयोर् आदधानः ॥ ४ ॥
१.९७.२२ …ज्येष्ठस्य वा धर्मणि क्षोर्	तक्षद् यदी मनसो वेनतो वाग् ज्येष्ठस्य धर्मं द्युक्षोर् अनीके ।
	आद् ईम् आयन् वरम् आ वावशाना जुष्टं पतिं कलशे

	गाव इन्दुम् ॥ ५ ॥
१.९३.१	साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
	हरिः पर्य् अद्रवज् जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ६ ॥
१.९७.१०	इन्दुर् वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
• • • • मरातीर् …	हन्ति रक्षो बाधते पर्य् अरातिं वरिवः कृण्वन् वृजनस्य राजा ॥ ७ ॥
१.९१.१ …सूर्ये	अधि यद् अस्मिन् वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
• • • कवीयन्	अपो वृणानः पवते कवीयान् व्रजं न पशुवर्धनाय मन्म ॥ ८ ॥
१.९७.४१	महत् तत् सोमो महिषश् चकारापां यद् गर्भो ऽवृणीत देवान् ।
	अदधाद् इन्द्रे पवमान ओजो ऽजनयत् सूर्ये ज्योतिर् इन्दुः ॥ ९ ॥
१.९५.३	अपाम् इवेद् ऊर्मयस् तर्तुराणाः प्र मनीषा ईरते सोमम् अच्छ ।
	नमस्यन्तीर् उप च यन्ति सं चा च विशन्त्य् उशतीर् उशन्तम् ॥ १० ॥
१.९७.५२ …धन्व (एवं कौ)	अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व ।
• • अत्र • • सूत्र पुरुमेधश् … • दात्	ब्रध्नश् चिद् यस्य वातो न जूतिं पुरुमेधाश् चित् तकवे नरं धात् ॥ ११ ॥
१.९१.१ …प्रथमो मनीषी {	असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीषा ।
…ऽजन्ति • सदनान्य्	दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्व् अच्छ ॥ १२ ॥ ॥७॥

१.५६

* १.१०१.१	पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
	अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ १ ॥
१.१०१.७	अयं पूषा रयिर् भगः सोमः पुनानो अर्षति ।
	पतिर् विश्वस्य भूमनो व्य् अख्यद् रोदसी उभे ॥ २ ॥
१.९९.१ …धनुस्तन्वन्ति •	आ हर्यताय धृष्णवे धनुष् टन्वन्ति पौंस्यम् ।
शुक्रां वयन्त्य् • निर्णिजं …	शुक्रा वि यन्त्य् असुराय निर्णिजे विपाम् अग्रे महीयुवः ॥ ३ ॥

१.९८.७	परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
	यो देवान् विश्वां इत् परि मदेन सह गच्छति ॥ ४ ॥
१.१०१.४	सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
कौ • अक्षरं …	पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ५ ॥
* १.१०१.१०	सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
• सुवाना …	मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ६ ॥
१.९८.१ अभि … पुरुस्पृहम्	अभी नो वाजसातमं रयिम् अर्ष शतस्पृहम् ।
…विश्वासहम्	इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ७ ॥
१.१००.१	अभी नवन्ते अद्रुहः प्रियम् इन्द्रस्य काम्यम् ।
	वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥ ८ ॥
१.१०१.१३ • सुन्वानस्यान्धसो • } • वृत …	प्र सुन्वानायान्धसो मर्तो न वष्ट तद् वचः ।
	अप श्वानम् अराधसं हता मखं न भृगवः ॥ ९ ॥ ॥८॥

१.५७

* १.७५.१	अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
	आ सूर्यस्य बृहतो बृहन्न् अधि रथं विष्वञ्चम् अरुहद् विचक्षणः ॥ १ ॥
१.७९.१ …सुवानासो • दिवेषु	अचोदसो नो धन्वन्त्व् इन्दवः प्र स्वानासो बृहद् देवेषु हरयः ।
• च नशन्न इषो • • नशन्त सनिषन्त	वि चिद् अश्नाना इषयो अरातयो ऽर्यो नः सन्तु सनिषन्तु नो धियः ॥ २ ॥
१.७७.१ वपुष्टरः	एष प्र कोशे मधुमं अचिक्रदद् इन्द्रस्य वज्रो वपुषो वपुष्टमः ।
…पयसेव धेनवः : कौ अभ्य् ऋतस्य … {	अभीम् ऋतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥ ३ ॥
१.८६.१६	प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतं सखा सख्युर् न प्र मिनाति संगिरम् ।
…शतयाम्ना	मर्य इव युवतिभिः सम् अर्षति सोमः कलशे शतयामना पथा ॥ ४ ॥
१.७६.१ • • • कृत्व्यो (एवं कौ)	धर्ता दिवः पवते कृत्वियो रसो दक्षो देवानाम् अनुमाद्यो नृभिः ।
कृणुते • •	हरिः सृजानो अत्यो न सत्वभिर् वृथा पाजांसि कृणुषे नदीष्व् आ ॥ ५ ॥
१.८६.१९ …अह्नः प्रतरीतोषसो • {	वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।

क्राणा • • अचीवशद् ...	प्राणा सिन्धूनां कलशां अचिक्रदद् इन्द्रस्य हार्दि आविशन् मनीषिभिः ॥ ६ ॥
९.८२.१	असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
• • पर्य् एष्य् ... • आसदम्	पुनानो वारम् अत्य् एष्य् अव्ययं श्येनो न योनिं घृतवन्तम् आसदत् ॥ ७ ॥
९.६८.१	प्र देवम् अच्छा मधुमन्त इन्दवो ऽसिष्यदन्त गाव आ न धेनवः ।
	बर्हिषदो वचनावन्त ऊधभिः परिस्रुतम् उस्रिया निर्णिजं धिरे ॥ ८ ॥
९.७०.१ ...दुदुह्रे • • पूर्व्ये •	त्रिर् अस्मै सप्त धेनवो दुदुह्रिरे सत्याम् आशिरं परमे व्योमनि ।
	चत्वार्य् अन्या भुवनानि निर्णिजे चारूणि चक्रे यद् ऋतैर् अवर्धत ॥ ९ ॥
९.८५.१ ... स्रवापामीवा (एवं कौ) • •	इन्द्राय सोम सुषुतः परि स्रवा अपामीवा भवतु रक्षसा सह ।
	मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्व् इन्दवः ॥ १० ॥
९.८६.४३ ...मधुनाम्य् •	अञ्जते व्य् अञ्जते सम् अञ्जते क्रतुं रिहन्ति मध्वाभ्य् अञ्जते ।
	सिन्धोर् उच्छ्वासे पतयन्तम् उक्षणं हिरण्यपावाः पशुम् अप्सु गृभ्णते ॥ ११ ॥
आसु • ९.८३.१	पवित्रं ते विततं ब्रह्मणस् पते प्रभुर् गात्राणि पर्य् एषि विश्वतः ।
तत्समाशत	अतप्ततनूर् न तद् आमो अश्नुते शृतास इद् वहन्तः सं तद् आशत ॥ १२ ॥ ॥९॥

१.५८

ऋ ९.१०६.१	इन्द्रम् अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी ...	श्रुष्टे जातास इन्दवः स्वर्विदः ॥ १ ॥
९.१०६.४	प्र धन्वा सोम जागृविर् इन्द्रायेन्दो परि स्रव ।
...भरा •	द्युमन्तं शुष्मम् आ भर स्वर्विदम् ॥ २ ॥
९.१०४.१	सखाय आ नि षीदत पुनानाय प्र गायत ।
	शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥
९.१०५.१	तं वः सखायो मदाय पुनानम् अभि गायत ।
• • यज्ञैः ...	शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ४ ॥
९.१०२.१ क्राणा ...	प्राणा शिशुर् महीनां हिन्वन्न् ऋतस्य दीधितिम् ।

...द्विता (एवं कौ)	विश्वा परि प्रिया भुवद् अध द्विता ॥ ५ ॥
९.१०६.७	पवस्व देववीतय इन्दो धाराभिर् ओजसा ।
	आ कलशं मधुमान् सोम नः सदः ॥ ६ ॥
९.१०६.१० • • ऊर्मिणाव्यो ...	सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
	अग्रे वाचः पवमानः कनिक्रदत् ॥ ७ ॥
९.१०३.१ ... उद्यतम्	प्र पुनानाय वेधसे सोमाय वच उच्यते ।
	भृतिं न भरा मतिभिर् जुजोषते ॥ ८ ॥
९.१०५.४ ...धन्व (कौ धनिव)	गोमन् न इन्दो अश्ववत् सुतः सुदक्ष धनिव ।
• ते ...दीधरम्	शुचिं च वर्णम् अधि गोषु धारय ॥ ९ ॥
९.१०४.४	अस्मभ्यं त्वा वसुविदम् अभि वाणीर् अनूषत ।
	गोभिष् टे वर्णम् अभि वासयामसि ॥ १० ॥
९.१०६.१३	पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।
• अर्षन् ...	अभ्य् अर्ष स्तोतृभ्यो वीरवद् यशः ॥ ११ ॥
९.१०३.३ • • • अव्यये वारे •	परि कोशं मधुश्चुतं सोमः पुनानो अर्षति ।
...सप्त •	अभि वाणीर् ऋषीणां सप्ता नूषत ॥ १२ ॥ ॥१०॥

१.५९

ऋ ९.१०८.१	पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
	महि द्युक्षतमो मदः ॥ १ ॥
९ ... देवयुः	अभि द्युम्नं बृहद् यश इषस् पते दिदीहि देव देवयुम् ।
	वि कोशं मध्यमं युव ॥ २ ॥
७	आ सोता परि षिञ्चताश्वं न स्तोमम् अप्तुरं रजस्तुरम् ।
वनक्रक्षम् •	वनप्रक्षम् उदप्रुतम् ॥ ३ ॥
११ ...दिवो दुहुः	एतम् उ त्यं मदच्युतं सहस्रधारं वृषभं दिवोदुहम् ।
	विश्वा वसूनि बिभ्रतम् ॥ ४ ॥
१३	स सुन्वे यो वसूनां यो रायाम् आनेता य इडानाम् ।
	सोमो यः सुक्षितीनाम् ॥ ५ ॥
३ • • • दैव्या ...	त्वं ह्य् अङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
• घोषयः (कौ घोषयन्)	अमृतत्वाय घोषयत् ॥ ६ ॥
५ • • • • ऽव्यो	एष स्य धारया सुतो ऽव्या वारेभिः पवते मदिन्तमः ।
...इव (एवं कौ)	क्रीळन्न् ऊर्मिर् अपाम् इवा ॥ ७ ॥
६ • • अप्या अन्तरश्मनो ...	य उस्रिया अपि या अन्तर् अश्मनि निर् गा अकृन्तद् ओजसा ।
	अभि व्रजं तत्निषे गव्यम् अश्व्यं वर्मीव धृष्णव् आ रुज ॥ ८ ॥ ॥ ११ ॥

२.१

ऋ ७.२७.३ ...क्षमि विषुरूपं • अस्ति	इन्द्रो राजा जगतश् चर्षणीनाम् अधि क्षमा विश्वरूपं यद् अस्य ।
...उपस्तुतश् •	ततो ददाति दाशुषे वसूनि चोदद् राध उपस्तुतं चिद् अर्वाक् ॥ १ ॥
१.९१.१८	सं ते पयांसि सम् उ यन्तु वाजाः सं वृष्णियान्य् अभिमातिषाहः ।
	आप्यायमानो अमृताय सोम दिवि श्रवांस्य् उत्तमानि धिष्व ॥ २ ॥
१.९१.२२	त्वम् इमा ओषधीः सोम विश्वास् त्वम् अपो अजनयस् त्वं गाः ।
• आ ततन्थ ... ववर्थ (एवं कौ)	त्वम् आतनोर् उर्व् अन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्था ॥ ३ ॥
आ • • • यशो ...	मयि वर्चो अथो भगम् अथो यज्ञस्य यत् पयः ।
	परमेष्ठी प्रजापतिर् दिवि द्याम् इव दृंहतु ॥ ४ ॥
	इदं छन्दो जमदग्ने ऋतावृधो येन देवासो अमृतत्वम् आयन् ।
	तत्र द्यावापृथिवी धत्तम् अस्मान् यत्र देवानां गुह्यं निधाम ॥ ५ ॥
ऋ २.३५.३	सम् अन्या यन्त्य् उप यन्त्य् अन्याः समानम् ऊर्वं नद्यः पृणन्ति ।
तमू शुचिं (एवं कौ) • • • परि तस्थुर्	तमोपुचं शुचयो दीदिवांसम् अपां नपातम् उप यन्त्य् आपः ॥ ६ ॥
४.१.१६ • • • • धेनोस् • • मातुः परमाणि विन्दन्	ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जानन् ।
तज् • • • व्रा • भुवद् • • गोः	ता जानतीर् अभ्य् अनूषत क्षा आविर् भुवन्न् अरुणी यशसा गावः ॥ ७ ॥
	सहर्षभाः सहवत्सा उद् एत विश्वा रूपाणि बिभ्रतीर् द्व्यूध्नीः ।
	उरुः पृथुर् अयं वो अस्तु लोक इमा आपस् सुप्रपाणा इह स्त ॥ ८ ॥
	आरत् सुपर्णः पततुम् आश्वानम् आशितं करत् ।

	तीर्थानि सुप्रपाणानि सुगं गोयवनं करत् ॥ ९ ॥
ऋ १.१.१	अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम् ।
	होतारं रत्नधातमम् ॥ १० ॥ ॥१॥

२.२

आ • • • सुभोजसौ ...	मन्ये वां द्यावापृथिवी सुभोजसा ये अप्रथेथाम् अमितम् अभि योजनम् ।
	द्यावापृथिवी भवतं स्योने ते नो मुञ्चतम् अंहसः ॥ १ ॥
आ यशो • • यशो मेन्द्रबृहस्पती	यशसा मा द्यावापृथिवी भगेनेन्द्रबृहस्पती ।
	यशो भगस्य विन्दतु यशो मा प्रति मुच्यताम् ।
आरण्यसंहितायां अहं भूयासम् उत्तमः इति न विद्यते	यशस्व्य् अस्याः संसदो ऽहं प्रवदिता स्याम् अहं भूयासम् उत्तमः ॥ २ ॥
आ ...नो वचो •	प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नु वोचो विदथा जातवेदसे ।
	वैश्वानराय मतिर् नव्यसे शुचिः सोम इव पवते चारुर् अग्नये ॥ ३ ॥
ऋ ६.५२.१४ • • • • यज्ञिया ...	विश्वे देवा मम शृण्वन्तु यज्ञम् उभे रोदसी अपां नपाच् च मन्म ।
	मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्व् इद् वो अन्तम् आ मदेम ॥ ४ ॥
ऋ ८.९२.२८	एवा ह्य् असि वीरयुर् एवा शूर उत स्थिरः ।
	एवा ते राध्यं मनः ॥ ५ ॥
आ ...ईप्सति	आ प्रागाद् भद्रा युवतिर् अह्नः केतून् सम् ईप्सति ।
आ • • • • • रात्री (उग्रं • • इति नास्ति)	अभूद् भद्रा निवेशनी विश्वस्य जगतो रात्रिर् उग्रं वाजिन्य् अक्रमीत् ॥ ६ ॥
ऋ ३.२६.७	अग्निर् अस्मि जन्मना जातवेदा घृतं मे चक्षुर् अमृतं म आसन् ।
अर्कस्त्रिधातु • • ऽजस्रो घर्मो • • नाम	त्रिधातुर् अर्को रजसो विमानो ऽजस्रं ज्योतिर् हविर् अस्मि सर्वम् ॥ ७ ॥
ऋ ३.५.५ पाति प्रियं रिपो ...	पात्य् अग्निर् विपो अग्रं पदं वेः पाति यह्वश् चरणं सूर्यस्य ।
	पाति नाभा सप्तशीर्षाणम् अग्निः पाति देवानाम् उपमादम् ऋष्वः ॥ ८ ॥
	भ्राजन्त्य् अग्ने समिधान दीदिवो जिह्वा चरत्य् अन्तर् आसनि ।
	स त्वं नो अग्ने पयसा वसुविद् रयिं वर्चो दृशे दाः ॥ ९ ॥ ॥२॥

२.३

ऋ १.३२.१ इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्न् अहिम् अन्व् अपस् ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥ १ ॥
१०.१७०.१ विभ्राड् बृहत् पिबतु सोम्यं मध्व् आयुर् दधद् यज्ञपताव् अविह्रुतम् ।
• • • • • पुपोष पुरुधा वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ २ ॥
ऋग्वेदे नास्ति वसन्त इन् नु रन्त्यो ग्रीष्म इन् नु रन्त्यः ।
वर्षाण्य् अनु शरदो हेमन्तः शिशिर इन् नु रन्त्यः ॥ ३ ॥
१.१८७.५ तव त्ये पितो ददतस् तव स्वादिष्ठ ते पितो ।
• स्वाद्मानो प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ ४ ॥
८.६१.१५ इन्द्रः स्पळ् उत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच् चरमं स मध्यमं स पश्चात् पातु नः पुरः ॥ ५ ॥
१०.९०.१ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
• • विश्वतो स भूमिं सर्वतो वृत्वात्य् अतिष्ठद् दशाङ्गुलम् ॥ ६ ॥
४ त्रिपाद् ऊर्ध्व उद् ऐत् पुरुषः पादो ऽस्येहाभवत् पुनः ।
ततः साशनानशने • तथा विष्वङ् व्य् अक्रामद् अशनानशने अभि ॥ ७ ॥
२ • • • यद् भूतं • • भव्यं पुरुष एवेदं सर्वं भव्यं यच् च भाव्यम् ।
३ • • विश्वा पादो ऽस्य सर्वा भूतानि त्रिपाद् अस्यामृतं दिवि ॥ ८ ॥
३ एतावान् • • अतो तावान् अस्य महिमा ततो ज्यायांश् च पूरुषः ।
२ उतामृतत्वस्येशानो यद् अन्नेनातिरोहति ॥ ९ ॥
५ तस्माद् ततो विराड् अजायत विराजो अधि पूरुषः ।
स जातो अत्य् अरिच्यत पश्चाद् भूमिम् अथो पुरः ॥ १० ॥ ॥ ३ ॥

२.४

ऋ १०.९०.६ यद् पुरुषेण हविषा देवा यज्ञम् अतन्वत ।
• अस्यासीद् वसन्त एषाम् आसीद् आज्यं ग्रीष्म इध्मः शरद् धविः ॥ १ ॥
१०.९०.१५ सप्तास्यासन् परिधयस् त्रिः सप्त समिधः कृताः ।
पशुम् देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषं हविः ॥ २ ॥
ॠ हरिती • हरी त इन्द्र श्मश्रूण्य् उतो ते हरिता हरी ।
• • • कवय तं त्वा स्तुवन्ति कारवः पुरुषासो वनर्गवः ॥ ३ ॥
ऋभ्वास इन्द्र भुङ्ग इति मघवन्न् इन्द्र भुङ्ग इति ।
इन्द्रस् प्रसर्पतः ॥ ४ ॥

यद् वर्चो हिरण्यस्य यद् वा वर्चो गवाम् उत ।
सत्यस्य ब्रह्मणो वर्चस् तेन मा सं सृजामसि ॥ ५ ॥
ऋ १.११५.१ चित्रं देवानाम् उद् अगाद् अनीकं चक्षुर् मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस् तस्थुषश् च ॥ ६ ॥
यद् इतस् तन्वो मम दोषा रसस्य भेजिरे ।
नराशंसेन सोमेनाहं तत् पुनर् आ ददे ।
युष्मद् अप्सरसस् परि ॥ ७ ॥
यस्येदम् आ रजो युजस् तुजे जने वनं स्वः ।
इन्द्रस्य रन्त्यं बृहत् ॥ ८ ॥
सहस् तन् न इन्द्र दध्य् ओज ईशे ह्य् अस्य महतो विरप्शिन् ।
क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शत्रून् सुहना कृधी नः ॥ ९ ॥
ऋ ६.४६.५ इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र • • ओभे • प्राः यद् दिधृक्षेम वज्रहस्त रोदसी उभे सुशिप्र आ प्राः ॥ १० ॥
॥ ४ ॥

२.५

ऋ १.२४.१५ उद् उत्तमं वरुण पाशम् अस्मद् अवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते • • • अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ १ ॥
९.९७.५८ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ २ ॥
इमं वृषणं कृणुतैकम् इन् माम् ॥ ३ ॥
९.६१.१२ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
वरिवोवित् परि स्रव ॥ ४ ॥
९.६१.११ एना विश्वान्य् अर्य आ द्युम्नानि मानुषाणाम् ।
सिषासन्तो वनामहे ॥ ५ ॥
८.९३.१३ त्वम् एतद् अधारयः कृष्णासु रोहिणीषु च ।
परुष्णीषु रुशत् पयः ॥ ६ ॥
१०.१८१.१ प्रथश् च यस्य सप्रथश् च नामानुष्टुभस्य हविषो हविर् यत् ।
धातुर् द्युतानात् सवितुश् च विष्णो रथन्तरम् आ जभारा वसिष्ठः ॥ ७ ॥

१.७.२ इन्द्र इद् धर्योः सचा संमिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥ ८ ॥
१.७.४ इन्द्र वाजेषु नो ऽव सहस्रप्रधनेषु च ।
उग्र उग्राभिर् ऊतिभिः ॥ ९ ॥
९.८३.३ ... बिभर्ति भुवनानि • { अरूरुचद् उषसः पृश्निर् अग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भम् आ दधुः ॥ १० ॥ ॥ ५ ॥

२.६

ऋ ८.८९.५ ... वृत्रहत्याय (एवम् आ) यज् जायथा अपूर्व्य मघवन् वृत्रहत्याय ।
... क्षाम् (आ उतो दिवम्) तत् पृथिवीम् अप्रथयस् तद् अस्तभ्ना उत दिवम् ॥ १ ॥
९.६६.१९ अग्न आयूंषि पवस आ सुवोर्जम् इषं च नः ।
आरे बाधस्व दुच्छुनाम् ॥ २ ॥
१०.१८९.१ आयं गौः पृश्निर् अक्रमीद् असदन् मातरं पुनः ।
पितरं च प्रयन् स्वः ॥ ३ ॥
२ अन्तश् चरति रोचनास्य प्राणाद् अपानती ।
व्य् अख्यन् महिषो दिवम् ॥ ४ ॥
३ त्रिंशद् धाम वि राजति वाक् पतङ्गाय धीयते ।
प्रति वस्तोर् अह द्युभिः ॥ ५ ॥ ॥ ६ ॥

२.७

विद्मा मघवन् विद्मा गातुम् अनु शंसिषो दिशः ।
शिक्षा शचीनां पते पूर्वीणां पुरोवसो ॥
आभिष् ट्वम् अभिष्टिभिः । प्रचेतन प्रचेतया । इन्द्र द्युम्नाय न इषे । एवा हि शक्रः । राये वाजाय वज्रिवः । शविष्ठ वज्रिन्न् ऋञ्जसे । मंहिष्ठ वज्रिन्न् ऋञ्जसे । आ याहि पिब मत्स्व ॥ १ ॥
विद्मा राये सुवीर्यं भुवो वाजानां पतिर् वशां अनु ।
मंहिष्ठ वज्रिन्न् ऋञ्जसे यः शविष्ठः शूराणाम् ।
यो मंहिष्ठो मघोनां चिकित्वो अभि नो नय ।
इन्द्रो विदे तम् उ स्तुहि ॥
ईशे हि शक्रस् तम् ऊतये हवामहे जेतारम् अपराजितम् ।
स नः पर्षद् अति द्विषः क्रतुश् छन्द ऋतं बृहत् ॥ २ ॥
इन्द्रं धनस्य सातये हवामहे जेतारम् अपराजितम् ।
स नः पर्षद् अति द्विषः स नः पर्षद् अति द्विषः ॥

पूर्व्यस्य यत् ते अद्रिवः ॥
सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
वशी हि शक्रो नूनं तन् नव्यं सन्यसे ॥
प्रभुर् जनस्य वृत्रहन् सम् अर्येषु स्तवामहे ।
शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ३ ॥
एवा ह्य् एवा । एवा ह्य् अग्ने । एवा हीन्द्र ।
एवा हि पूषन् । एवा हि देवाः ॥ ४ ॥ ॥ ७ ॥

३.१

नमः पितृभ्यः पूर्वसद्भ्यो नमः साकंनिषद्भ्यः ।
युञ्जे वाचं शतपदीं गये सहस्रवर्तनि ॥ १ ॥
गायत्रं त्रैष्टुभं जगद् विश्वा रूपाणि संभृतम् ।
देवा ओकांसि चक्रिरे ॥ २ ॥
क ९.११.१ उपास्मै गायता नरः पवमानायेन्दवे ।
अभि देवं इयक्षते ॥ ३ ॥
२ अभि ते मधुना पयो ऽथर्वाणो अशिश्रयुः ।
• • देवयु (एवं कौ) देवं देवाय देवयुम् ॥ ४ ॥
३ स नः पवस्व शं गवे शं जनाय शम् अर्वते ।
शं राजन्न् ओषधीभ्यः ॥ ५ ॥
९.६४.२८ दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।
सोमाः शुक्रा गवाशिरः ॥ ६ ॥
२९ हिन्वानो हेतृभिर् हित आ वाजं वाज्य् अक्रमीत् ।
सीदन्तो वनुषो यथा ॥ ७ ॥
३० ...दिवः कविः ऋधक् सोम स्वस्तये संजग्मानो दिवा कवे ।
पवस्व सूर्यो दृशे ॥ ८ ॥
९.६६.१० पवमानस्य ते कवे वाजिन् सर्गा असृक्षत ।
अर्वन्तो न श्रवस्यवः ॥ ९ ॥
११ अच्छा कोशं मधुश्चुतम् असृग्रं वारे अव्यये ।
• धीतयः (एवं कौ) अवावशन्त धीतये ॥ १० ॥
१२ अच्छा समुद्रम् इन्दवो ऽस्तं गावो न धेनवः ।
अग्मन्न् ऋतस्य योनिम् आ ॥ ११ ॥ ॥१॥

३.२

ख ६.१६.१० अग्न आ याहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥ १ ॥
११ तं त्वा समिद्भिर् अङ्गिरो घृतेन वर्धयामसि ।
बृहच् छोचा यविष्ठ्य ॥ २ ॥
१२ स नः पृथु श्रवाय्यम् अच्छा देव विवाससि ।
बृहद् अग्ने सुवीर्यम् ॥ ३ ॥
३.६२.१६ आ नो मित्रावरुणा घृतैर् गव्यूतिम् उक्षतम् ।
मध्वा रजांसि सुक्रतू ॥ ४ ॥

३.६२.१७ उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः ।
द्राघिष्ठाभिः शुचिव्रता ॥ ५ ॥
१८ गृणाना जमदग्निना योनाव् ऋतस्य सीदतम् ।
पातं सोमम् ऋतावृधा ॥ ६ ॥
८.१७.१ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
एदं बर्हिः सदो मम ॥ ७ ॥
२ आ त्वा ब्रह्मयुजा हरी वहताम् इन्द्र केशिना ।
उप ब्रह्माणि नः शृणु ॥ ८ ॥
३ • त्वा वयं युजा ... ब्रह्माणस् त्वा युजा वयं सोमपाम् इन्द्र सोमिनः ।
सुतावन्तो हवामहे ॥ ९ ॥
३.१२.१ इन्द्राग्नी आ गतं सुतं गीर्भिर् नभो वरेण्यम् ।
अस्य पातं धियेषिता ॥ १० ॥
२ इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।
अया पातम् इमं सुतम् ॥ ११ ॥
३ इन्द्रम् अग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।
ता सोमस्येह तृम्पताम् ॥ १२ ॥ ॥२॥

३.३

क ९.६१.१० • • • अन्धसो (एवं कौ) [• • भूमिर् • • उच्चा ते जातम् अन्धसा दिवि सद् भूम्य् आ ददे ।
उग्रं शर्म महि श्रवः ॥ १ ॥
१२ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
• • स्रव (एवं कौ) वरिवोवित् परि स्रवा ॥ २ ॥
११ • विश्वान्य् (एवं कौ) ... एना विश्वन्य् अर्य आ द्युम्नानि मानुषाणाम् ।
सिषासन्तो वनामहे ॥ ३ ॥
९.१०७.४ पुनानः सोम धारयापो वसानो अर्षसि ।
...देव आ रत्नधा योनिम् ऋतस्य सीदस्य् उत्सो देवो
हिरण्ययः ॥ ४ ॥
५ दुहान ऊधर् दिव्यं मधु प्रियं प्रत्नं सधस्थम् आसदत् ।
...अर्षति • धूतो • आ पृच्छ्यं धरुणं वाज्य् अर्षसि नृभिर् धौतो विचक्षणः
॥ ५ ॥
९.८७.१ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजम्
अर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तो ऽच्छा बर्ही रशनाभिर्
नयन्ति ॥ ६ ॥
२ ...वृजनं • स्वायुधः पवते देव इन्दुर् अशस्तिहा वृजना रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः
पृथिव्याः ॥ ७ ॥

३ ऋषिर् विप्रः पुरएता जनानाम् ऋभुर् धीर उशना काव्येन ।
स चिद् विवेद निहितं यद् आसाम् अपीच्यं गुह्यं नाम
गोनाम् ॥ ८ ॥ ॥ ३ ॥

३.४

क ७.३२.२२ अभि त्वा शूर नोनुमो ऽदुग्धा इव धेनवः ।
ईशानम् अस्य जगतः स्वर्दृशम् ईशानम् इन्द्र त-
स्थुषः ॥ १ ॥
२३ न त्वावां अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्न् इन्द्र वाजिनो गव्यन्तस् त्वा हवा-
महे ॥ २ ॥
४.३१.१ कया नश् चित्र आ भुवद् ऊती सदावृधः सखा ।
कया शचिष्ठया वृता ॥ ३ ॥
२ कस् त्वा सत्यो मदानां मंहिष्ठो मत्सद् अन्धसः ।
दृढा चिद् आरुजे वसु ॥ ४ ॥
३ अभी षु णः सखीनाम् अविता जरितॄणाम् ।
• • ऊतिभिः शतं भवास्य् ऊतये ॥ ५ ॥
८.८८.१ तं वो दस्मम् ऋतीषहं वसोर् मन्दानम् अन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर् नवामहे ॥ ६ ॥
२ द्युक्षं सुदानुं तविषीभिर् आवृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तम् ईमहे ॥ ७ ॥
८.६६.१ तरोभिर् वो विदद्वसुम् इन्द्रं सबाध ऊतये ।
बृहद् गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ८ ॥
२ ...मदे सुशिप्रम् • न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रम् अन्धसः ।
य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम्
॥ ९ ॥ ॥ ४ ॥

३.५

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
क ९.१.१ इन्द्राय पातवे सुतः ॥ १ ॥
रक्षोहा विश्वचर्षणिर् अभि योनिम् अयोहते ।
२ ...अयोहतम् द्रोणे सधस्थम् आसदत् ॥ २ ॥
द्रुणा • • वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः ।
३ • भव ... पर्षि राधो मघोनाम् ॥ ३ ॥
९.१०६.१४ (द्वितीयतृतीयपादयोर् विपर्यासः) { अया पवस्व देवयू रेभन् पवित्रं पर्य् एषि विश्वतः ।
मधोर् धारा असृक्षत ॥ ४ ॥
११ पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।

अभ्यर्षन् स्तोतृभ्यो वीरवद् यशः ॥ ५ ॥
९.१०१.१ पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ ६ ॥
२ यो धारया पावकया परिप्रस्यन्दते सुतः ।
इन्दुर् अश्वो न कृत्वियः ॥ ७ ॥
३ तं दुरोषम् अभी नरः सोमं विश्वाच्या धिया ।
यज्ञं हिन्वन्त्य् अद्रिभिः यज्ञाय सन्त्व् अद्रयः ॥ ८ ॥
९.७५.१ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु
वर्धते ।
आ सूर्यस्य बृहतो बृहन्न् अधि रथं विष्वञ्चम् अरुहद्
विचक्षणः ॥ ९ ॥
२ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर् धियो अस्या
अदाभ्यः ।
...रोचने दधाति पुत्रः पित्रोर् अपीच्यं नाम तृतीयम् अधि रोचनं
दिवः ॥ १० ॥
३ ... येमानः • अव द्युतानः कलशां अचिक्रदन् नृभिर् यमाणः कोश
आ हिरण्यये ।
अभीम्... अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि
राजति राजसि ॥ ११ ॥
६.४८.१ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
...शंसिषम् (एवं कौ) प्रप्र वयम् अमृतं जातवेदसं प्रियं मित्रं न शंसिषः ॥ १२ ॥
२ ऊर्जो नपातं स हिनायम् अस्मयुर् दाशेम हव्यदातये ।
भुवद् वाजेष्व् अविता भुवद् वृध उत त्राता तनू-
नाम् ॥ १३ ॥ ॥५॥

३.६

क ९.१६.१६ एष्ष् ऊ षु ब्रवाणि ते ऽग्न इत्थेतरा गिरः ।
एभिर् वर्धास इन्दुभिः ॥ १ ॥
१७ यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
तत्रासदः • तत्र योनिं कृणवसे ॥ २ ॥
१८ ...वसो नहि ते पूर्तम् अक्षिपद् भुवन् नेमानां पते ।
अथा दुवो वनवसे ॥ ३ ॥
८.२१.१ वयम् उ त्वाम् अपूर्व्य स्थूरं न कच् चिद् भरन्तो
ऽवस्यवः ।
वाजे • • वज्रिं चित्रं हवामहे ॥ ४ ॥
उप त्वा कर्मन्न् ऊतये स नो युवोग्रश् चक्राम यो धृषत् ।
त्वाम् इद् ध्य् अवितारं ववृमहे सखाय इन्द्र

	सानसिम् ॥ ५ ॥
८.९८.७ अधा (एवं कौ)...कामाद्	अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
• • यन्त • [महः ससृग्महे	उद् एव ग्मन्त उदभिः ॥ ६ ॥
८	वार् ण त्वा यव्याभिर् वर्धन्ति शूर ब्रह्माणि ।
	वावृध्वांसं चिद् अद्रिवो दिवेदिवे ॥ ७ ॥
९ ...उरुयुगे (वचोयुजा इति नास्ति) ॥ {	युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा
इन्द्रवाहा वचोयुजा ॥ {	इन्द्रवाहा स्वर्विदा ॥ ८ ॥
	इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
	पिबा सुतस्य मतिर् न मधोश् चकानश् चारुर् मदाय ॥ ९ ॥
ऋग्वेदे न सन्ति	इन्द्र जठरं नव्यं न पृणस्व मधोर् दिवो न ।
	अस्य सुतस्य स्वर् णोप त्वा मदाः सुवाचो अस्थुः ॥ १० ॥
	इन्द्रस् तुराषाण् मित्रो न जघान वृत्रं यतिर् न ।
	बिभेद वलं भृगुर् न ससाहे शत्रून् मदे सोमस्य ॥ ११ ॥
	॥ ६ ॥

३.७

ऋ ८.९२.१	पान्तम् आ वो अन्धस इन्द्रम् अभि प्र गायत ।
	विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥ १ ॥
२	पुरुहूतं पुरुष्टुतं गाथान्या सनश्रुतम् ।
	इन्द्र इति ब्रवीतन ॥ २ ॥
३ • • • महानां...	इन्द्र इन् नो महानां दाता वाजानां नृतुः ।
महाँ अभिज्ञ्व् आ (एवं कौ) •	महं अभिज्ञुवा यमत् ॥ ३ ॥
७.३१.१	प्र व इन्द्राय मादनं हर्यश्वाय गायत ।
	सखायः सोमपाव्ने ॥ ४ ॥
२	शंसेद् उक्थं सुदानव उत द्युक्षं यथा नरः ।
	चकृमा सत्यराधसे ॥ ५ ॥
३	त्वं न इन्द्र वाजयुस् त्वं गव्युः शतक्रतो ।
	त्वं हिरण्ययुर् वसो ॥ ६ ॥
८.२.१६	वयम् उ त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
	कण्वा उक्थेभिर् जरन्ते ॥ ७ ॥
१०	न घेम् अन्यद् आ पपन वज्रिन्न् अपसो नविष्टौ ।
...स्तोमं •	तवेद् उ स्तोमैश् चिकेत ॥ ८ ॥
१८	इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
	यन्ति प्रमादम् अतन्द्राः ॥ ९ ॥
८.९२.१९	इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
	अर्कम् अर्चन्तु कारवः ॥ १० ॥

२०	यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
	इन्द्रं सुते हवामहे ॥ ११ ॥
२१	त्रिकद्रुकेषु चेतनं देवासो यज्ञम् अत्नत ।
	तम् इद् वर्धन्तु नो गिरः ॥ १२ ॥ ॥७॥

३.८

ऋ ८.१७.११	अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
...पिब (एवं कौ)	एहीम् अस्य द्रवा पिबा ॥ १ ॥
१२	शाचिगो शाचिपूजनायं रणाय ते सुतः ।
	आखण्डल प्र हूयसे ॥ २ ॥
१३ • • • नपाद्...	यस् ते शृङ्गवृषो णपात् प्रणपात् कुण्डपाय्यः ।
	न्य् अस्मिन् दध्र आ मनः ॥ ३ ॥
८.८१.१	आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
	महाहस्ती दक्षिणेन ॥ ४ ॥
२	विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
	तुविमात्रम् अवोभिः ॥ ५ ॥
३	नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
	भीमं न गां वारयन्ते ॥ ६ ॥
८.४५.२२	अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।
	तृम्पा व्य् अश्नुही मदम् ॥ ७ ॥
२३	मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।
• ब्रह्मद्विषो •	माकीं ब्रह्मद्विषं वनः ॥ ८ ॥
२४ • • गोपरीणसा...	इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।
	सरो गौरो यथा पिब ॥ ९ ॥
८.२.१	इदं वसो सुतम् अन्धः पिबा सुपूर्णम् उदरम् ।
	अनाभयिन् ररिमा ते ॥ १० ॥
२ • धूतः • • अव्यो...	नृभिर् धौतः सुतो अश्नैर् अव्या वारैः परिपूतः ।
	अश्वो न निक्तो नदीषु ॥ ११ ॥
३	तं ते यवं यथा गोभिः स्वादुम् अकर्म श्रीणन्तः ।
	इन्द्र त्वास्मिन् सधमादे ॥ १२ ॥ ॥८॥

३.९

ऋ ३.५१.१०	इदं ह्य् अन्व् ओजसा सुतं राधानां पते ।
	पिबा त्व् अस्य गिर्वणः ॥ १ ॥
१२	प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
...राधसे	प्र बाहू शूर राधसा ॥ २ ॥
११	यस् ते अनु स्वधाम् असत् सुते नि यच्छ तन्वम् ।

...सोम्यम्	स त्वा ममत्तु सोम्य ॥ ३ ॥
१.५.१	मा त्व् एता नि षीदतेन्द्रम् अभि प्र गायत ।
	सखायः स्तोमवाहसः ॥ ४ ॥
२	पुरूतमं पुरूणाम् ईशानं वार्याणाम् ।
	इन्द्रं सोमे सचा सुते ॥ ५ ॥
३ ...पुरन्ध्याम्	स घा नो योग आ भुवत् स राये स पुरन्ध्या ।
	गमद् वाजेभिर् आ स नः ॥ ६ ॥
१.३०.७	योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
	सखाय इन्द्रम् ऊतये ॥ ७ ॥
८	आ घा गमद् यदि श्रवत् सहस्रिणीभिर् ऊतिभिः ।
	वाजेभिर् उप नो हवम् ॥ ८ ॥
९	अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
	यं ते पूर्वं पिता हुवे ॥ ९ ॥
८.१३.१ इन्द्रः...पुनीत •	इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
• • दक्षसो ...	विदे वृधस्य दक्षस्य महान् हि षः ॥ १० ॥
२	स प्रथमे व्योमनि देवानां सदने वृधः ।
	सुपारः सुश्रवस्तमः सम् अप्सुजित् ॥ ११ ॥
३ • अह्वे ...	तम् उ हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।
	भवा नः सुम्ने अन्तमः सखा वृधे ॥ १२ ॥ ॥९॥

३.१०

ऋ ७.१६.१	एना वो अग्निं नमसोर्जो नपातम् आ हुवे ।
	प्रियं चेतिष्ठम् अरतिं स्वध्वरं विश्वस्य दूतम् अमृतम् ॥ १ ॥
२	स योजते अरुषा विश्वभोजसा स दुद्रवत् स्वाहुतः ।
(कौ) • •	सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥ २ ॥
७.८१.१ प्रत्यु अदर्श्यायत्युच्छन्ती (एवं	प्रति षो दृश्यायत्य् उच्छन्ती दुहिता दिवः ।
अपो महि व्ययति चक्षसे • • •	अपो मही वृणुते चक्षुषा तमो ज्योतिष् कृणोति
	सूनरी ॥ ३ ॥
२	उद् उस्रियाः सृजते सूर्यः सचा उद्यन् नक्षत्रम् अर्चिवत् ।
	तवेद् उषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ ४ ॥
७.७४.१	इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
• • अह्व अवसे (एवं कौ) • • • •	अयं वाम् अह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥५॥
२	युवं चित्रं ददथुर् भोजनं नरा चोदेथां सूनृतावते ।
	अर्वाग् रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥ ६ ॥
	॥१०॥

३.११

ऋ ९.५४.१	अस्य प्रत्नाम् अनु द्युतं शुक्रं दुदुह्रे अह्रयः ।

	पयः सहस्रसाम् ऋषिम् ॥ १ ॥
२	अयं सूर्य इवोपदृग् अयं सरांसि धावति ।
	सप्त प्रवत आ दिवम् ॥ २ ॥
३	अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
	सोमो देवो न सूर्यः ॥ ३ ॥
९.३.९	एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
	हरिः पवित्रे अर्षति ॥४॥
९.४२.२[१]	एष प्रत्नेन मन्मना देवो देवेभ्यस् परि ।
८.४४.१२[२]	कविर् विप्रेण वावृधे ॥ ५ ॥
९.४२.४ • प्रत्नमिद (एवं कौ)...	दुहानः प्रत्नवित् पयः पवित्रे परि षिच्यसे ।
• • अजीजनत्	क्रन्दन् देवं अजीजनः ॥ ६ ॥
९.१९.६ ...शत्रुषु	उप शिक्षापतस्थुषो भियसम् आ धेहि शत्रवे ।
	पवमान विदा रयिम् ॥ ७ ॥
९.६१.१३	उपो षु जातम् अप्तुरं गोभिर् भङ्गं परिष्कृतम् ।
	इन्दुं देवा अयासिषुः ॥ ८ ॥
९.११.१	उपास्मै गायता नरः पवमानायेन्दवे ।
	अभि देवं इयक्षते ॥ ९ ॥ ॥११॥

३.१२

ऋ ९.३३.१ • • • अपां न यन्त्य •	प्र सोमासो विपश्चितो अपो नयन्त ऊर्मयः ।
	वनानि महिषा इव ॥ १ ॥
२	अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
	वाजं गोमन्तम् अक्षरन् ॥ २ ॥
३	सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
• अर्षन्ति •	सोमा अर्षन्तु विष्णवे ॥ ३ ॥
९.१०७.१२	प्र सोम देववीतये सिन्धुर् न पिप्ये अर्णसा ।
	अंशोः पयसा मदिरो न जागृविर् अच्छा कोशं मधुश्चु-
	तम् ॥ ४ ॥
१३ • • अर्जुने	आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर् न मर्ज्यः ।
	तम् ईं हिन्वन्त्य् अपसो यथा रथं नदीष्व् आ
	गभस्त्योः ॥ ५ ॥
९.३२.१ ...मघोनः	प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
	सुता विदथे अक्रमुः ॥ ६ ॥
९.१०६.१३	पवते हर्यतो हरिर् अति ह्वरांसि रंह्या ।
	अभ्यर्षन् स्तोतृभ्यो वीरवद् यशः ॥ ७ ॥
९.१०१.१३ • सुन्वानस्यान्धसो }	प्र सुन्वानायान्धसो मर्तो न वष्ट तद् वचः ।
• • हत • • }	अप श्वानम् अराधसं हता मखं न भृगवः ॥ ८ ॥ ॥१२॥

३.१३

ऋ ९.६२.२५	पवस्व वाचो अग्रियः सोम चित्राभिर् ऊतिभिः ।
	अभि विश्वानि काव्या ॥ १ ॥
२६	त्वं समुद्रिया अपो ऽग्रियो वाच ईरयन् ।
• विश्वमेजय	पवस्व विश्वचर्षणे ॥ २ ॥
२७	तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
• अर्षन्ति सिन्धवः	तुभ्यं धावन्ति धेनवः ॥ ३ ॥
९.६१.२८	पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
	विश्वा अप द्विषो जहि ॥ ४ ॥
२९ अस्य ... (द्वितीयतृतीयपादयोर् विपर्यासः)	यस्य ते सख्ये वयं सासह्याम पृतन्यतः ।
	तवेन्दो द्युम्न उत्तमे ॥ ५ ॥
३०	या ते भीमान्य् आयुधा तिग्मानि सन्ति धूर्वणे ।
	रक्षा समस्य नो निदः ॥ ६ ॥
९.६४.१	वृषा सोम द्युमं असि वृषा देव वृषव्रतः ।
• • दधिषे	वृषा धर्माणि दधिषे ॥ ७ ॥
२ ... मदः	वृष्णस् ते वृष्ण्यं शवो वृषा वनं वृषा सुतः ।
सत्यं • • •	स त्वं वृषन् वृषेद् असि ॥ ८ ॥
३ • • चक्रदो (एवं कौ) ...	अश्वो न चक्रदद् वृषा सं गा इन्दो सम् अर्वतः
	वि नो राये दुरो वृधि ॥ ९ ॥
९.६५.४[१.१]	वृषा ह्य् असि भानुना द्युमन्तं त्वा हवामहे ।
११[१]	पवमान स्वर्दृशम् ॥ १० ॥
६ • • • मृज्यमानो गभस्त्योः	यद् अद्भिः परिषिच्यसे मर्मृज्यमान आयुभिः ।
द्रुणा ...	द्रोणे सधस्थम् अश्नुषे ॥ ११ ॥
५	आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।
	इहो ष्व् इन्दव् आ गहि ॥ १२ ॥
९.६१.४	पवमानस्य ते वयं पवित्रम् अभ्युन्दतः ।
	सखित्वम् आ वृणीमहे ॥ १३ ॥
५	ये ते पवित्रम् ऊर्मयो ऽभिक्षरन्ति धारया ।
... मृळय (कौ मृडय)	तेभिर् नः सोम मृडया ॥ १४ ॥
६	स नः पुनान आ भर रयिं वीरवतीम् इषम् ।
	ईशानः सोम विश्वतः ॥ १५ ॥ ॥१३॥

३.१४

ऋ १.१२.१	अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
	अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥
२	अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् ।

	हव्यवाहं पुरुप्रियम् ॥ २ ॥
३	अग्ने देवां इहावह जज्ञानो वृक्तबर्हिषे ।
	असि होता न ईड्यः ॥ ३ ॥
१.२३.४ (जाता •	मित्रं वयं हवामहे वरुणं सोमपीतये ।
जज्ञाना (या नास्ति) पूतदक्षसा । कौ •	या जज्ञाना पूतदक्षसा ॥ ४ ॥
५	ऋतेन याव् ऋतावृधाव् ऋतस्य ज्योतिषस् पती ।
	ता मित्रावरुणा हुवे ॥ ५ ॥
६	वरुणः प्राविता भुवन् मित्रो विश्वाभिर् ऊतिभिः ।
	करतां नः सुराधसः ॥ ६ ॥
१.७.१	इन्द्रम् इद् गाथिनो बृहद् इन्द्रम् अर्केभिर् अर्किणः ।
	इन्द्रं वाणीर् अनूषत ॥ ७ ॥
२	इन्द्र इद् धर्योः सचा संमिश्ल आ वचोयुजा ।
	इन्द्रो वज्री हिरण्ययः ॥ ८ ॥
४ • • मो ऽव (एवं कौ) ...	इन्द्र वाजेषु णो अव सहस्रप्रधनेषु च ।
	उग्र उग्राभिर् ऊतिभिः ॥ ९ ॥
७.९४.४	इन्द्रे अग्ना नमो बृहत् सुवृक्तिम् एरयामहे ।
	धिया धेना अवस्यवः ॥ १० ॥
५	ता हि शश्वन्त ईडत इत्था विप्रास ऊतये ।
	सबाधो वाजसातये ॥ ११ ॥
६ • • • विपन्यवः ...	ता वां गीर्भिर् विपन्युवः प्रयस्वन्तो हवामहे ।
	मेधसाता सनिष्यवः ॥ १२ ॥ ॥ १४ ॥

३.१५

ऋ ९.६५.१०	वृषा पवस्व धारया मरुत्वते च मत्सरः ।
	विश्वा दधान ओजसा ॥ १ ॥
११	तं त्वा धर्तारम् ओण्योः पवमान स्वर्दृशम् ।
	हिन्वे वाजेषु वाजिनम् ॥ २ ॥
१२	अया चित्तो विपानया हरिः पवस्व धारया ।
• • चोदय (एवं कौ)	युजं वाजेषु चोदया ॥ ३ ॥
९.९७.१३	वृषा शोणो अभिकनिक्रदद् गा नदयन्न् एषि पृथिवीम् उत द्याम् ।
... प्रचेतयन्नर्षति	इन्द्रस्येव वग्नुर् आ शृण्व आजौ प्रचोदयन्न् अर्षसि वाचम् एमाम् ॥ ४ ॥
१४	रसाय्यः पयसा पिन्वमान ईरयन्न् एषि मधुमन्तम् अंशुम् ।
पवमानः ...	पवमान संतनिम् एषि कृण्वन्न् इन्द्राय सोम परिषिच्यमानः ॥ ५ ॥

१५ ... वधस्नैः	एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नुम् ।
	परि वर्णं भरमाणो रुशन्तं गव्युर् नो अर्ष परि सोम सिक्तः ॥ ६ ॥
६.४६.१ ... साता • •	त्वाम् इद् धि हवामहे साता वाजस्य कारवः ।
	त्वां वृत्रेष्व् इन्द्र सत्पतिं नरस् त्वां काष्ठास्व् अर्वतः ॥ ७ ॥
२	स त्वं नश् चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
	गाम् अश्वं रथ्यम् इन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ८ ॥
८.४९.१	अभि प्र वः सुराधसम् इन्द्रम् अर्च यथा विदे ।
	यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ९ ॥
२	शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
	गिरेर् इव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ १० ॥
८.९९.१	त्वाम् इदा ह्यो नरो ऽपीप्यन् वज्रिन् भूर्णयः ।
• • स्तोमवाहसाम् ...	स इन्द्र स्तोमवाहस इह श्रुध्य् उप स्वसरम् आ गहि ॥११॥
२ • सुशिप्र • तद् ...	मत्स्वा सुशिप्रिन् हरिवस् तम् ईमहे त्वय् आ भूषन्ति वेधसः ।
• • • उक्थ्या ...	तव श्रवांस्य् उपमान्य् उक्थ्य सुतेष्व् इन्द्र गिर्वणः ॥ १२ ॥ ॥१५॥

३.१६

ऋ ९.६१.१९	यस् ते मदो वरेण्यस् तेना पवस्वान्धसा
	देवावीर् अघशंसहा ॥ १ ॥
२०	जघ्निर् वृत्रम् अमित्रियं सस्निर् वाजं दिवेदिवे ।
गोषा उ • •	गोषातिर् अश्वसा असि ॥ २ ॥
२१ • • मव ...	संमिश्लो अरुषो भुवः सूपस्थाभिर् न धेनुभिः ।
	सीदन् श्येनो न योनिम् आ ॥ ३ ॥
९.१०८.१	पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
	महि द्युक्षतमो मदः ॥ ४ ॥
९.१०६.१	इन्द्रम् अच्छ सुता इमे वृषणं यन्तु हरयः ।
श्रुष्टी ...	श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ५ ॥
९.१०१.७	अयं पूषा रयिर् भगः सोमः पुनानो अर्षति ।
	पतिर् विश्वस्य भूमनो व्य् अख्यद् रोदसी उभे ॥६॥
८	सम् उ प्रिया अनूषत गावो मदाय घृष्वयः ।
	सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ७ ॥
९	य ओजिष्ठस् तम् आ भर पवमान श्रवाय्यम् ।
... वनामहै	यः पञ्च चर्षणीर् अभि रयिं येन वनामहे ॥ ८ ॥
९.८६.१९ ... अह्नः •	वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।

प्राणा • • अचिक्रदत् ...	प्राणा सिन्धूनां कलशं अचिक्रदद् इन्द्रस्य हार्दं आविशन् मनीषिभिः ॥ ९ ॥
२० / अचिक्रदत्	मनीषिभिः पवते पूर्व्यः कविर् नृभिर् यतः परि कोशां असिष्यदत् ।
... क्षरद् • वायोः • / वर्धय	त्रितस्य नाम जनयन् मधु क्षरन्न् इन्द्रस्य वायुं सख्याय वर्धयन् ॥ १० ॥
२१ • • • वि रोचयद् ...	अयं पुनान उषसो अरोचयद् अयं सिन्धुभ्यो अभवद् उ लोककृत् ।
	अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥ ११ ॥
८.९२.२८	एवा ह्य् असि वीरयुर् एवा शूर उत स्थिरः ।
	एवा ते राध्यं मनः ॥ १२ ॥
२९	एवा रातिस् तुवीमघ विश्वेभिर् धायि धातृभिः ।
• • • मे •	अधा चिद् इन्द्र नः सचा ॥ १३ ॥
३०	मो षु ब्रह्मेव तन्द्रयुर् भुवो वाजानां पते ।
	मत्स्वा सुतस्य गोमतः ॥ १४ ॥
१.११.१	इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसं गिरः ।
	रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥ १५ ॥
२	सख्ये त इन्द्र वाजिनो मा भेम शवसस् पते ।
• • • णोनुमो ...	त्वाम् अभि प्र नोनुमो जेतारम् अपराजितम् ॥ १६ ॥
३	पूर्वीर् इन्द्रस्य रातयो न वि दस्यन्त्य् ऊतयः ।
यदी ...	यदा वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ १७ ॥ ॥१६॥

३.१७

ऋ ९.६२.१	एते असृग्रम् इन्दवस् तिरः पवित्रम् आशवः ।
	विश्वान्य् अभि सौभगा ॥ १ ॥
२	घ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
तना • अर्वते	त्मना कृण्वन्तो अर्वतः ॥ २ ॥
	कृण्वन्तो वरिवो गवे ऽभ्य् अर्षन्ति सुष्टुतिम् ।
	इडाम् अस्मभ्यं संयतम् ॥ ३ ॥
९.६५.१६	राजा मेधाभिर् ईयते पवमानो मनाव् अधि ।
	अन्तरिक्षेण यातवे ॥ ४ ॥
१८	आ नः सोम सहो जुवो रूपं न वर्चसे भर ।
	सुष्वाणो देववीतये ॥ ५ ॥
१७ • • • शतग्विनं ...	आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम् ।
	वहा भगत्तिम् ऊतये ॥ ६ ॥

९.४८.१ तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः ।
• सुकृत्ययेमहे (एवं कौ) चारुं सुकृत्ययेमहि ॥ ७ ॥
२ संवृक्तधृष्णुम् उक्थ्यं महामहिव्रतं मदम् ।
शतं पुरो रुरुक्षणिम् ॥ ८ ॥
३ • • रयिमभि राजानं • • अतस् त्वा रयिर् अभ्य् अयद् राजानं सुक्रतो दिवः ।
• अव्ययीर् • सुपर्णो अव्यथी भरत् ॥ ९ ॥
४ विश्वस्मा इत् स्वर् दृशे साधारणं रजस्तुरम् ।
गोपाम् ऋतस्य विर् भरत् ॥ १० ॥
५ अधा हिन्वान इन्द्रियं ज्यायो महित्वम् आनशे ।
अभिष्टिकृद् विचर्षणिः ॥ ११ ॥
९.६४.१३ इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
इन्दो रुचाभि गा इहि ॥ १२ ॥
१४ पुनानो वरिवस् कृध्य् ऊर्जं जनाय गिर्वणः ।
हरे सृजान आशिरम् ॥ १३ ॥
१५ पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
• • यतः द्युतानो वाजिभिर् हितः ॥ १४ ॥ ॥ १७ ॥

३.१८

ऋ १.१२.६ अग्निनाग्निः सम् इध्यते कविर् गृहपतिर् युवा ।
हव्यवाड् जुह्वास्यः ॥ १ ॥
८ यस् त्वाम् अग्ने हविष्पतिर् दूतं देव सपर्यति ।
तस्य स्म प्राविता भव ॥ २ ॥
९ यो अग्निं देववीतये हविष्मं आविवासति ।
• • मृळय (कौ मृडय) तस्मै पावक मृडया ॥ ३ ॥
१.२.७ मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।
धियं घृताचीं साधन्ता ॥ ४ ॥
८ ऋतेन मित्रावरुणाव् ऋतावृधाव् ऋतस्पृशा ।
• • आशाथे (एवं कौ) क्रतुं बृहन्तम् आशाथे ॥ ५ ॥
९ कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
दक्षं दधाते अपसम् ॥ ६ ॥
१.६.७ इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा ॥ ७ ॥
४ आद् अह स्वधाम् अनु पुनर् गर्भत्वम् एरिरे ।
दधाना नाम यज्ञियम् ॥ ८ ॥
५ वीळु (कौ वीडु)... वीडु चिद् आरुजत्नुभिर् गुहा चिद् इन्द्र वह्निभिः ।
अविन्द उस्रिया अनु ॥ ९ ॥

६.६०.४ ता हुवे ययोर् इदं पप्ने विश्वं पुरा कृतम् ।
इन्द्राग्नी न मर्धतः ॥ १० ॥
५ उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
ता नो मृडात ईदृशे ॥ ११ ॥
६ हतो • • हतो • • हथो वृत्राण्य् आर्या हथो दासानि सत्पती ।
हतो ... हथो विश्वा अप द्विषः ॥ १२ ॥ ॥१८॥

३.१९

ऋ ९.१०७.१४ अभि सोमास आयवः पवन्ते मद्यं मदम् ।
• विष्टपि • • स्वर्विदः समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ १ ॥
१५ तरत् समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षन्... अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥२॥
१६ • येमानो... नृभिर् येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥ ३ ॥
९.९७.३४ तिस्रो वाच ईरयति प्र वह्निर् ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ४ ॥
३५ सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
• • पूयते अज्यमानः... सोमः सुत ऋच्यते पूयमानः सोमे अर्कास् त्रिष्टुभः सं नवन्ते ॥ ५ ॥
३६ एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
• • • • रवेण... इन्द्रम् आ विश बृहता मदेन वर्धया वाचं जनया पुरंधिम् ॥ ६ ॥
८.७०.५ यद् द्याव इन्द्र ते शतं शतं भूमीर् उत स्युः ।
न त्वा वज्रिन् सहस्रं सूर्या अनु न जातम् अष्ट रोदसी ॥ ७ ॥
६ आ पप्राथ महिना वृष्ण्या वृषन् विश्वा शविष्ठ शवसा ।
अस्मं अव मघवन् गोमति व्रजे वज्रिन् चित्राभिर् ऊतिभिः ॥ ८ ॥
८.३३.१ वयं घ त्वा सुतावन्तः आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥ ९ ॥
२ स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
... गमः • • कदा सुतं तृषाण ओक आ गमद् इन्द्र स्वब्दीव वंसगः ॥ १० ॥

२ कण्वेभिर् धृष्णव् आ धृषद् वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तम् ईमहे ॥ ११ ॥
७.३२.२० तरणिर् इत् सिषासति वाजं पुरंध्या युजा ।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥ १२ ॥
२१ • दुष्टुती मर्त्यो विन्दते वसु • • • • } न दुष्टुतिर् द्रविणोदेषु शस्यते न स्रेधन्तं रयिर् नशत् ।
सुशक्तिर् इन् मघवन् तुभ्यं मावते देष्णं यत् पार्ये दिवि ॥ १३ ॥ ॥१९॥

३.२०

ऋ ९.३३.४ तिस्रो वाच उद् ईरते गावो मिमन्ति धेनवः ।
हरिर् एति कनिक्रदत् ॥ १ ॥
५ अभि ब्रह्मीर् अनूषत यह्वीर् ऋतस्य मातरः ।
मर्मृज्यन्ते • • मर्मृज्यन्तीर् दिवः शिशुम् ॥ २ ॥
६ रायः (एवं कौ)... रायः समुद्रांश् चतुरो ऽस्मभ्यं सोम विश्वतः ।
...सहस्रिणः (एवं कौ) आ पवस्व सहस्रिणम् ॥ ३ ॥
९.१०८.७ आ सोता परि षिञ्चताश्वं न स्तोमम् अप्तुरं रजस्तुरम् ।
वनक्रक्षम् • वनप्रक्षम् उदप्रुतम् ॥ ४ ॥
९.१०५.१ सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ ५ ॥
९.१०१.४ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन् देवान् गच्छन्तु वो मदाः ॥ ६ ॥
५ इन्दुर् इन्द्राय पवत इति देवासो अब्रुवन् ।
• • मखस्यते (एवं कौ) ... (कौ ... ओजसा) वाचस् पतिर् मखस्यते विश्वस्येशान ओजसा ॥ ७ ॥
६ सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
सोमस् पती रयीणां सखेन्द्रस्य दिवेदिवे ॥ ८ ॥
९.८३.१ पवित्रं ते विततं ब्रह्मणस् पते प्रभुर् गात्राणि पर्य् एषि विश्वतः ।
अतप्ततनूर् न तद् आमो अश्नुते शृतास इद् वहन्तः
तद् सम् (विपर्यासः) • सं तद् आशत ॥ ९ ॥
२ कौ • • • • अर्चन्तो... तपोष् पवित्रं विततं दिवस् पदे शोचन्तो अस्य तन्तवो व्य् अस्थिरन् ।
• • पवीतारम् अवन्त्य् अस्य पवीतारम् आशवो दिवः पृष्ठम् अधि
• चेतसा (कौ रोहन्ति • तिष्ठन्ति चेतसा ॥ १० ॥
३ • • • • • • बिभर्ति भुवनानि } कौ ... सिमेति • } अरूरुचद् उषसः पृश्निर् अग्रिय उक्षा मिमाति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भम् आ दधुः ॥ ११ ॥

८.१०३.८ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
उपस्तुतासो अग्नये ॥ १२ ॥
९ ...द्युम्न्य् (एवं कौ) • आ वसते मघवा वीरवद् यशः समिद्धो द्युम्न्य् आहुतः ।
...नवीयस्य् • • कुविन् नो अस्य सुमतिर् भवीयस्य् अच्छा वाजेभिर् आगमत् ॥ १३ ॥
८.१५.४ ...पृत्सु • तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम् ।
उ लोककृत्नुम् अद्रिवो हरिश्रियम् ॥ १४ ॥
५ येन ज्योतींष्य् आयवे मनवे च विवेदिथ ।
मन्दानो अस्य बर्हिषो वि राजसि ॥ १५ ॥
६ तद् अद्या चित् त उक्थिनो अनु ष्टुवन्ति पूर्वथा ।
वृषपत्नीर् अपो जया दिवेदिवे ॥ १६ ॥
८.९५.४ श्रुधी हवं तिरश्च्या इन्द्र यस् त्वा सपर्यति ।
सुवीर्यस्य गोमतो रायस् पूर्धि महं असि ॥ १७ ॥
५ इन्द्र यस्ते (विपर्यासेन)... यस् त इन्द्र नवीयसीं गिरं मन्द्राम् अजीजनत् ।
चिकित्विन्मनसं धियं प्रत्नाम् ऋतस्य पिप्युषीम् ॥ १८ ॥
६ तम् उ ष्टवाम यं गिर इन्द्रम् उक्थानि वावृधुः ।
पुरूण्य् अस्य पौंस्या सिषासन्तो वनामहे ॥ १९ ॥ ॥२०॥

३.२१

ऋ ९.८६.४ • • • • • धीजुवो ... प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन् पयसा धरीमणि ।
प्रान्तरिक्षात् स्थाविरीस् ते असृक्षत ये त्वा मृजन्त्य् ऋषिषाण वेधसः ॥ १ ॥
प्रान्तऋक्षय: स्थाविरीरसृक्षत • • • ऋषिषाण •
५ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
योना • यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥ २ ॥
६ ... प्रभोस्ते • • विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष् टे सतः परि यन्ति केतवः ।
व्यानशिः • • धर्मभिः ... व्यानशी पवसे सोम धर्मणा पतिर् विश्वस्य भुवनस्य राजसि ॥ ३ ॥
९.६१.१६ पवमानो अजीजनद् दिवश् चित्रं न तन्यतुम् ।
ज्योतिर् वैश्वानरं बृहत् ॥ ४ ॥
१७ पवमानस्य ते रसो मदो राजन्न् अदुच्छुनः ।
कौ पवमानस्थयोः विपर्यासः } वि वारम् अव्यम् अर्षति ॥ ५ ॥
१८ पवमान रसस् तव दक्षो वि राजति द्युमान् ।
ज्योतिर् विश्वं स्वर् दृशे ॥ ६ ॥

९.४१.१ • ये ...	प्र यद् गावो न भूर्णयस् त्वेषा अयासो अक्रमुः ।
	घ्नन्तः कृष्णाम् अप त्वचम् ॥ ७ ॥
२ • मनामहे • • दुराव्यम्	सुवितस्य मनामहे अति सेतुं दुराव्यम् ।
साह्वांसो ...	साह्याम दस्युम् अव्रतम् ॥ ८ ॥
३	शृण्वे वृष्टेर् इव स्वनः पवमानस्य शुष्मिणः ।
	चरन्ति विद्युतो दिवि ॥ ९ ॥
४	आ पवस्व महीम् इषं गोमद् इन्दो हिरण्यवत् ।
• वाजवत् सुतः	अश्ववत् सोम वीरवत् ॥ १० ॥
५ स पवस्व विचर्षण • • • पृण (एवं कौ)	पवस्व विश्वचर्षण आ मही रोदसी पृणा ।
	उषाः सूर्यो न रश्मिभिः ॥ ११ ॥
६ कौ • नः ...	परि णः शर्मयन्त्या धारया सोम विश्वतः ।
	सरा रसेव विष्टपम् ॥ १२ ॥
९.३९.१	आशुर् अर्ष बृहन्मते परि प्रियेण धाम्ना ।
	यत्र देवा इति ब्रुवन् ॥ १३ ॥
२	परिष्कृण्वन्न् अनिष्कृतं जनाय यातयन्न् इषः ।
	वृष्टिं दिवः परि स्रव ॥ १४ ॥
४	अयं स यो दिवस् परि रघुयामा पवित्र आ ।
	सिन्धोर् ऊर्मा व्य् अक्षरत् ॥ १५ ॥
३	सुत एति पवित्र आ त्विषिं दधान ओजसा ।
	विचक्षाणो विरोचयन् ॥ १६ ॥
५	आविवासन् परावतो अथो अर्वावतः सुतः ।
	इन्द्राय सिच्यते मधु ॥ १७ ॥
६	समीचीना अनूषत हरिं हिन्वन्त्य् अद्रिभिः ।
योनावृतस्य सीदत	इन्दुम् इन्द्राय पीतये ॥ १८ ॥
९.६५.१	हिन्वन्ति सूरम् उस्रयः स्वसारो जामयस् पतिम् ।
	महाम् इन्दुं महीयुवः ॥ १९ ॥
२ • रुचारुचा देवो देवेभ्यस्परि	पवमान रुचारुचा देव देवेभ्यः सुतः ।
... विशा (एवं कौ)	विश्वा वसून्य् आ विश ॥ २० ॥
३	आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
	इषे पवस्व संयतम् ॥ २१ ॥ ॥२१॥
	३.२२
क ६.१६.३४	अग्निर् वृत्राणि जङ्घनद् द्रविणस्युर् विपन्यया ।
	समिद्धः शुक्र आहुतः ॥ १ ॥
३५	गर्भे मातुः पितुष् पिता विदिद्युतानो अक्षरे ।
	सीदन्न् ऋतस्य योनिम् आ ॥ २ ॥
३६	ब्रह्म प्रजावद् आ भर जातवेदो विचर्षणे ।

	अग्ने यद् दीदयद् दिवि ॥ ३ ॥
५.११.१	जनस्य गोपा अजनिष्ट जागृविर् अग्निः सुदक्षः सुविताय
	नव्यसे ।
	घृतप्रतीको बृहता दिविस्पृशा द्युमद् वि भाति भर-
	तेभ्यः शुचिः ॥ ४ ॥
६	त्वाम् अग्ने अङ्गिरसो गुहा हितम् अन्व् अविन्दन्
	शिश्रियाणं वनेवने ।
	स जायसे मथ्यमानः सहो महत् त्वाम् आहुः सहसस्
	पुत्रम् अङ्गिरः ॥ ५ ॥
२	यज्ञस्य केतुं प्रथमं पुरोहितम् अग्निं नरस् त्रिषध-
• • ईधिरे	स्थे सम् इन्धते ।
	इन्द्रेण देवैः सरथं स बर्हिषि सीदन् नि होता यजथाय
	सुक्रतुः ॥ ६ ॥
२.४१.४	अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
	ममेद् इह श्रुतं हवम् ॥ ७ ॥
५	राजानाव् अनभिद्रुहा ध्रुवे सदस्य उत्तमे ।
• आसाते	सहस्रस्थूण आशाते ॥ ८ ॥
६	ता सम्राजा घृतासुती आदित्या दानुनस् पती ।
	सचेते अनवह्वरम् ॥ ९ ॥
१.८४.१३	इन्द्रो दधीचो अस्थभिर् वृत्राण्य् अप्रतिष्कुतः ।
	जघान नवतीर् नव ॥ १० ॥
१४	इच्छन्न् अश्वस्य यच् छिरः पर्वतेष्व् अपश्रितम् ।
	तद् विदच् छर्यणावति ॥ ११ ॥
१५	अत्राह गोर् अमन्वत नाम त्वष्टुर् अपीच्यम् ।
	इत्था चन्द्रमसो गृहे ॥ १२ ॥
७.९४.१	इयं वाम् अस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
	अभ्राद् वृष्टिर् इवाजनि ॥ १३ ॥
२	शृणुतं जरितुर् हवम् इन्द्राग्नी वनतं गिरः ।
	ईशाना पिप्यतं धियः ॥ १४ ॥
३	मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
	मा नो रीरधतं निदे ॥ १५ ॥ ॥२२॥
	३.२३
क ९.२५.१	पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
	मरुद्भ्यो वायवे मदः ॥ १ ॥
२	सं देवैः शोभते वृषा कविर् योनाव् अधि प्रियः ।

	पवमानो अदाभ्यः ॥ २ ॥
वृत्रहा देववीतमः	पवमान धिया हितो ऽभि योनिं कनिक्रदत् ।
२	धर्मणा वायुम् आ रुह ॥ ३ ॥
... विशा (कौ) • • आरुहः	तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
९.१०७.१९	पुरूणि बभ्रो नि चरन्ति माम् अव परिधींर् अति तां इहि ॥४॥
	तवाहं नक्तम् उत सोम ते दिवा दुहानो बभ्र ऊधनि ।
२० उताहं • • • • • सख्याय • •	घृणा तपन्तम् अति सूर्यं परः शकुना इव पप्तिम ॥ ५ ॥
... पप्तिम (एवं कौ)	पुनानो अक्रमीद् अभि विश्वा मृधो विचर्षणिः ।
९.४०.१	शुम्भन्ति विप्रं धीतिभिः ॥ ६ ॥
	आ योनिम् अरुणो रुहद् गमद् इन्द्रो वृषा सुतम् ।
२ ... इन्द्रं • सुतः	ध्रुवे सदसि सीदतु ॥ ७ ॥
... सीदति	नू नो रयिं महाम् इन्दो ऽस्मभ्यं सोम विश्वतः ।
३	आ पवस्व सहस्रिणम् ॥ ८ ॥
	पिबा सोमम् इन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
७.२२.१	सोतुर् बाहुभ्यां सुयतो नार्वा ॥ ९ ॥
	बोधा सु मे मघवन् वाचम् एमां यां ते वसिष्ठो अर्चति
३	प्रशस्तिम् ।
	इमा ब्रह्म सधमादे जुषस्व ॥ १० ॥
... जुषस्व (एवं कौ)	यस् ते मदो युज्यश् चारुर् अस्ति येन वृत्राणि हर्यश्व
२	हंसि ।
	स त्वाम् इन्द्र प्रभूवसो ममत्तु ॥ ११ ॥
	विश्वा पृतना अभिभूतरं नरः सजूस् ततक्षुर् इन्द्रं जजनुश्
८.९७.१०	च राजसे ।
	क्रत्वे वरे स्थेमन्य् आमुरीम् उतोग्रम् ओजिष्ठं तरसं तर-
क्रत्वा वरिष्ठं वर आमुरिम् • • तवसं •	स्विनम् ॥ १२ ॥
	नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
१२ ... अभिस्वरा	सुदीतयो वो अद्रुहो ऽपि कर्णे तरस्विनः सम् ऋक्वभिः ॥ १३ ॥
	सम् उ रेभासो अस्वरन्न् इन्द्रं सोमस्य पीतये ।
११ • ई ...	स्वःपतिर् यदी वृधे धृतव्रतो ह्य् ओजसा सम् ऊतिभिः ॥१४॥
स्वर्पतिं यदीं ...	यो राजा चर्षणीनां याता रथेभिर् अध्रिगुः ।
८.७०.१	विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ १५ ॥
• • • ज्येष्ठः ...	इन्द्रं तं शुम्भ पुरुहन्मन्न् अवसे यस्य द्विता विधर्तरि ।
२	हस्तेन वज्रः प्रति धायि दर्शतो महान् देवो न सूर्यः
हस्ताय ... महो दिवे • •	॥ १६ ॥ ॥२३॥
	३.२४
	परि प्रिया दिवः कविर् वयांसि नप्त्योर् हितः ।
क ९.९.१	

सुवानो ...	स्वानैर् याति कविक्रतुः ॥ १ ॥
२ ... अद्रुहे	प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
• • वनिष्ठया	वीत्य् अर्ष पनिष्टये ॥ २ ॥
३	स सूनुर् मातरा शुचिर् जातो जाते अरोचयत् ।
	महान् मही ऋतावृधा ॥ ३ ॥
९.१०८.३ • • • दैव्या ...	त्वं ह्य् अङ्ग दैव्य पवमान जनिमानि द्युमत्तमः ।
• घोषयः	अमृतत्वाय घोषयन् ॥ ४ ॥
४ • नवग्वो ...	येना नवग्वा दध्यङ्ङ् अपोर्णुते येन विप्रास आपिरे ।
... आनशुः	देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्य् आशत ॥ ५ ॥
९.१०६.१० • • ऊर्मिणाव्यो (कौ	सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
[ऊर्मिणाव्यं) • • •	अग्रे वाचः पवमानः कनिक्रदत् ॥ ६ ॥
११ • हिन्वन्ति ...	धीभिर् मृजन्ति वाजिनं वने क्रीडन्तम् अत्यविम् ।
	अभि त्रिपृष्ठं मतयः सम् अस्वरन् ॥ ७ ॥
१२ • • • मीळ्हं ...	असर्जि कलशां अभि मीढ्वान् सप्तिर् न वाजयुः ।
	पुनानो वाचं जनयन्न् असिष्यदत् ॥ ८ ॥
९.९६.५	सोमः पवते जनिता मतीनां जनिता दिवो जनिता
	पृथिव्याः ।
	जनिताग्नेर् जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः
	॥ ९ ॥
६	ब्रह्मा देवानां पदवीः कवीनाम् ऋषिर् विप्राणां महिषो
	मृगाणाम् ।
	श्येनो गृध्राणां स्वधितिर् वनानां सोमः पवित्रम् अत्य्
	एति रेभन् ॥ १० ॥
७ ... सोमः •	प्रावीविपद् वाच ऊर्मिं न सिन्धुर् गिरः स्तोमान् पवमानो
	मनीषाः ।
	अन्तः पश्यन् वृजनेमावराण्य् आ तिष्ठति वृषभो गोषु
	जानन् ॥ ११ ॥
८.१०२.७	अग्निं वो वृधन्तम् अध्वराणां पुरूतमम् ।
	अच्छा नप्त्रे सहस्वते ॥ १२ ॥
८	अयं यथा न आभुवत् त्वष्टा रूपेव तक्ष्या ।
	अस्य क्रत्वा यशस्वतः ॥ १३ ॥
९	अयं विश्वा अभि श्रियो अग्निर् देवेषु पत्यते ।
	आ वाजैर् उप नो गमत् ॥ १४ ॥
१.८४.४	इमम् इन्द्र सुतं पिब ज्येष्ठम् अमर्त्यं मदम् ।
	शुक्रस्य त्वाभ्य् अक्षरन् धारा ऋतस्य सादने ॥ १५ ॥
६	नकिष् ट्वद् रथीतरो हरी यद् इन्द्र यच्छसे ।

नकिष् ट्वद्य मज्मना नकिः स्वश्व आनशे ॥ १६ ॥
५ इन्द्राय नूनम् अर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुर इन्दवो ज्येष्ठं नमस्यता सहः ॥ १७ ॥ ॥२४॥

३.२५

* ९.८६.३९ गोवित् पवस्व वसुविद् धिरण्यविद् रेतोधा इन्दो भुवनेष्व् अर्पितः ।
कौ ...तर • • त्वं सुवीरो असि सोम विश्ववित् तं त्वा विप्रा उप गिरेम आसते ॥ १ ॥
३८ त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद् धिरण्यवद् वयं स्याम भुवनेषु जीवसे ॥ २ ॥
३७ कौ • • • ईयसे... ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास् ते क्षरन्तु मधुमद् घृतं पयस् तव व्रते सोम तिष्ठन्तु कृष्टयः ॥ ३ ॥
९.६४.७ पवमानस्य विश्ववित् प्र ते सर्गा असृक्षत ।
सूर्यस्येव न रश्मयः ॥ ४ ॥
८ केतुं कृण्वन् दिवस् परि विश्वा रूपाभ्य् अर्षसि ।
समुद्रः सोम पिन्वसे ॥ ५ ॥
• हिन्वानो... जज्ञानो वाचम् इष्यसि पवमान विधर्मणि ।
अचान् • • • क्रन्दं देवो न सूर्यः ॥ ६ ॥
९.२४.१ प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
• • मृजत श्रीणाना अप्सु वृञ्जते ॥ ७ ॥
२ अभि गावो अधन्विषुर् आपो न प्रवता यतीः ।
पुनाना इन्द्रम् आशत ॥ ८ ॥
३ • • • • • पवते प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
नृभिर् यतो वि नीयसे ॥ ९ ॥
५ ...परिधावसि इन्दो यद् अद्रिभिः सुतः पवित्रं परिदीयसे ।
अरम् इन्द्रस्य धाम्ने ॥ १० ॥ ॥ २५ ॥

३.२६

* ९.२४.४ ...चर्षणीसहे त्वं सोम नृमादनः पवस्व चर्षणीधृतिः ।
सस्निर् यो अनुमाद्यः ॥ १ ॥
६ • वृत्रहन्तमोक्थेभिर् • पवस्व वृत्रहन्तम उक्थेभिर् अनुमाद्यः ।
शुचिः पावको अद्भुतः ॥ २ ॥
७ • • • • सुतस्य मधवः शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।

देवावीर् अघशंसहा ॥ ३ ॥
९.२०.१ • • • ऽव्यो • अर्षति प्र कविर् देववीतये ऽव्या वारेभिर् अव्यत ।
साह्वान् विश्वा अभि स्पृधः ॥ ४ ॥
२ स हि ष्मा जरितृभ्य आ वाजं गोमन्तम् इन्वति ।
• महश्रिवम् (एवं कौ) पवमानः सहस्रिणम् ॥ ५ ॥
३ • • • मृजसे... परि विश्वानि चेतसा मृज्यसे पवसे मती ।
स नः सोम श्रवो विदः ॥ ६ ॥
४ अभ्य् अर्ष बृहद् यशो मघवद्भ्यो ध्रुवं रयिम् ।
इषं स्तोतृभ्य आ भर ॥ ७ ॥
५ त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ।
पुनानो वह्ने अद्भुत ॥ ८ ॥
६ स वह्निर् अप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
सोमश् चमूषु सीदति ॥ ९ ॥
७ क्रीळुर्मखो ... । कौ क्रीडुर् ... क्रीडुर् मखो न मंहयुः पवित्रं सोम गच्छसि ।
दधत् स्तोत्रे सुवीर्यम् ॥ १० ॥ ॥ २६ ॥

३.२७

* ९.५५.१ यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव ।
सोम विश्वा च • विश्वा च सोम सौभगा ॥ १ ॥
२ इन्दो यथा तव स्तवो यथा ते जातम् अन्धसः ।
नि बर्हिषि प्रिये सदः ॥ २ ॥
३ उत नो गोविद् अश्ववित् पवस्व सोमान्धसा ।
मक्षूतमेभिर् अहभिः ॥ ३ ॥
४ यो जिनाति न जीयते हन्ति शत्रुम् अभीत्य ।
स पवस्व सहस्रजित् ॥ ४ ॥
९.६२.७ यास् ते धारा मधुश्चुतो असृग्रम् इन्द ऊतये ।
ताभिः पवित्रम् आसदः ॥ ५ ॥
८ ...गोमाण्य् • सो अर्षेन्द्राय पीतये तिरो वाराण्य् अव्यया ।
सीदन्योना वनेष्वा सीदन्न् ऋतस्य योनिम् आ ॥ ६ ॥
९ • इन्दो ... त्वं सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।
वरिवोविद् घृतं पयः ॥ ७ ॥ ॥ २७ ॥

३.२८

* ५.१३.२ • • मनामहे (एवं कौ)... अग्नेः स्तोमं वनामहे सिध्रम् अद्य दिविस्पृशः ।
देवस्य द्रविणस्यवः ॥ १ ॥
३ अग्निर् जुषत नो गिरो होता यो मानुषेष्व् आ ।
स यक्षद् दैव्यं जनम् ॥ २ ॥
४ त्वम् अग्ने सप्रथा असि जुष्टो होता वरेण्यः ।

त्वया यज्ञं वि तन्वते ॥ ३ ॥
१०.९१.५ विश्राण् • • कौ • • • • अर्चिश्रिंक्त • तव श्रियो वर्ष्यस्येव विद्युतो अग्ने चिकित्र उषसाम् इवेतयः ।
न केतवः यद् ओषधीर् अभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नम् आसनि ॥ ४ ॥
• आस्ये
७ वातोपधूत वातोपजूत इषितो वशां अनु तृषु यद् अन्ना वेविषद् वितिष्ठसे ।
...अजराणि आ ते यतन्ते रथ्यो यथा पृथक् शर्धांस्य् अग्ने अजरस्य धक्षतः ॥ ५ ॥
८ कौ परिभूतम् मेधाकारं विदथस्य प्रसाधनम् अग्निं होतारं परिभूतमं मतिम् ।
तमिदर्भे हविष्या • • समिन्मही • त्वाम् अर्भस्य हविषः समानम् इत् त्वां महो वृणते नान्यं त्वद् ॥ ६ ॥
५.७० १ पुरूरुणा चिद् ध्य् अस्त्य् अवो नूनं वां वरुण ।
मित्र वंसि वां सुमतिम् ॥ ७ ॥
२ • • • • • • आशये ता वां सम्यग् अद्रुह्वाणेषम् अश्याम धाम च ।
• ते रुद्रा • वयं वां मित्रा स्याम ॥ ८ ॥
३ • • रुद्रा पातं नो मित्रा पायुभिर् उत त्रायेथां सुत्रात्रा ।
तुर्याम • • कौ • दस्यूं • साह्याम दस्यून् तनूभिः ॥ ९ ॥
८.७६.१० • • • पीत्वी उत्तिष्ठन्न् ओजसा सह पीत्वा शिप्रे अवेपयः ।
सोमम् इन्द्र चमू सुतम् ॥ १० ॥
११ • • • • • अस्पर्धमानमदुहेताम् (कौ अदर्हेताम्) अनु त्वा रोदसी उभे स्पर्धमानम् अददाताम् ।
• • भव (एवं कौ) इन्द्र यद् दस्युहाभुवः ॥ ११ ॥
१२ ...ऋतावृधम् वाचम् अष्टापदीम् अहं नवस्रक्तिम् ऋतावृधम् ।
इन्द्रात् परि तन्वं ममे ॥ १२ ॥
६.६० ४ इन्द्राग्नी युवाम् इमे ऽभि स्तोमा अनूषत ।
पिबतं शंभुवा सुतम् ॥ १३ ॥
८ या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
इन्द्राग्नी ताभिर् आ गतम् ॥ १४ ॥
९ ताभिर् आ गच्छतं नरोपेदं सवनं सुतम् ।
इन्द्राग्नी सोमपीतये ॥ १५ ॥ ॥ २८ ॥

३.२९

* ९.६२.१९ अर्षा सोम द्युमत्तमो ऽभि द्रोणानि रोरुवत् ।
• श्येनो न योनिमा सीदन् योनौ वनेष्व् आ ॥ १ ॥
२० अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

सोमो अर्षति • सोमा अर्षन्तु विष्णवे ॥ २ ॥
२१ इषं तोकाय नो दधद् अस्मभ्यं सोम विश्वतः ।
आ पवस्व सहस्रिणम् ॥ ३ ॥
९.१०७.८ • • पुनाणः... सोम उ ष्वाणः सोतृभिर् अधि ष्णुभिर् अवीनाम् ।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ४ ॥
९ अनूपे गोमान् गोभिर् अक्षाः सोमो दुग्धाभिर् अक्षाः ।
समुद्रं न संवरणान्य् अग्मन् मन्दी मदाय तोशते ॥ ५ ॥
९.१९.१ यत् सोम चित्रम् उक्थ्यं दिव्यं पार्थिवं वसु ।
तन् नः पुनान आ भर ॥ ६ ॥
३ • • आयुषु... वृषा पुनान आयूंषि स्तनयन्न् अधि बर्हिषि ।
...आसदत् हरिः सन् योनिम् आसदः ॥ ७ ॥
२ • • • स्वर्पती... युवं हि स्थः स्वःपती इन्द्रश् च सोम गोपती ।
ईशाना पिप्यतं धियः ॥ ८ ॥
१.८१.१ इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
• • • आजिषूतेम्... तम् इन् महत्स्व् आजिषूतिम् अर्भे हवामहे स वाजेषु प्र नो ऽविषत् ॥ ९ ॥
२ असि हि वीर सेन्यो ऽसि भूरि पराददिः ।
असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ १० ॥
३ ...धना यद् उदीरत आजयो धृष्णवे धीयते धनम् ।
युक्ष्वा... युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधो ऽस्मां इन्द्र वसौ दधः ॥ ११ ॥
१.८४.१० • • • मध्वः... स्वादोर् इत्था विषूवतो मध्वः पिबन्ति गौर्यः ।
...शोभसे • या इन्द्रेण सयावरीर् वृष्णा मदन्ति शोभथा वस्वीर् अनु स्वराज्यम् ॥ १२ ॥
११ ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीर् अनु स्वराज्यम् ॥ १३ ॥
१२ ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्य् अस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीर् अनु स्वराज्यम् ॥ १४ ॥ ॥ २९ ॥

३.३०

* ९.६२.४ असाव्य् अंशुर् मदायाप्सु दक्षो गिरिष्ठाः ।
श्येनो न योनिम् आसदत् ॥ १ ॥
५ ...धूतो • सुतः शुभ्रम् अन्धो देववातम् अप्सु धूतं नृभिः सुतम् ।
स्वदन्ति गावः पयोभिः ॥ २ ॥

६ • ईम् (एवं कौ) • • हेतारो…	अद् ईद् अश्वं न हेतारम् अशूशुभन्न् अमृताय ।
मध्वो…	मधो रसं सधमादे ॥ ३ ॥
९.१०८.९ …दिदीहि (एवं कौ) • देवयुः	अभि द्युम्नं बृहद् यश इषस् पते दीदिहि देव देवयुम् ।
	वि कोशं मध्यमं युवा ॥ ४ ॥
१०	आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर् न विश्पतिः ।
… अपां जिन्व •	वृष्टिं दिवः पवस्व रीतिम् अपो जिन्वन् गविष्टये धियः ॥ ५ ॥
९.१०२.१ क्राणा…	प्राणा शिशुर् महीनां हिन्वन्न् ऋतस्य दीधितिम् ।
	विश्वा परि प्रिया भुवद् अध द्विता ॥ ६ ॥
२ …एरय •	त्रीणि त्रितस्य धारया पृष्ठेष्व् एरयद् रयिम् ।
	मिमीते अस्य योजना वि सुक्रतुः ॥ ७ ॥
३	उप त्रितस्य पाष्योर् अभक्त यद् गुहा पदम् ।
	यज्ञस्य सप्त धामभिर् अध प्रियम् ॥ ८ ॥
९.१००.६ • वाजसातमः…	पवस्व वाजसातये पवित्रे धारया सुतः ।
कौ…मधुमत्तरः	इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥ ९ ॥
७ • • मातरो…	त्वां रिहन्ति धीतयो हरिं पवित्रे अद्रुहः ।
• • • धेनवः पवमान •	वत्सं जातं न मातरः पवमाना विधर्मणि ॥ १० ॥
९	त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
	प्रति द्रापिम् अमुञ्चथाः पवमान महित्वना ॥ ११ ॥
९.९७.१०	इन्दुर् वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन् मदाय ।
• • • • अरातीर्…	हन्ति रक्षो बाधते पर्य् अरातिं वरिवः कृण्वन् वृजनस्य राजा ॥ १२ ॥
११	अध धारया मध्वा पृचानस् तिरो रोम पवते अद्रिदुग्धः ।
	इन्दुर् इन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ १३ ॥
१२ • प्रियाणि…	अभि व्रतानि पवते पुनानो देवो देवान् स्वेन रसेन पृञ्चन् ।
	इन्दुर् धर्माण्य् ऋतुथा वसानो दश क्षिपो ऽव्यत सानो अव्ये ॥ १४ ॥
५.६.४	आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
	यद् ध स्या ते पनीयसी समिद् दीदयति द्यवीषं स्तोतृभ्य आ भर ॥ १५ ॥
५ …शोचिषस् •	आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस् पते ।
	सुश्चन्द्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं स्तोतृभ्य आ भर ॥ १६ ॥

१ उभे • सर्पिरो…	ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।
	उतो न उत् पुपूर्या उक्थेषु शवसस् पत इषं स्तोतृभ्य आ भर ॥ १७ ॥
८.९८.१	इन्द्राय साम गायत विप्राय बृहते बृहत् ।
धर्मकृते	ब्रह्मकृते विपश्चिते पनस्यवे ॥ १८ ॥
२	त्वम् इन्द्राभिभूर् असि त्वं सूर्यम् अरोचयः ।
	विश्वकर्मा विश्वदेवो महाँ असि ॥ १९ ॥
३ विभ्राजन्…	विभ्राजं ज्योतिषा स्वर् अगच्छो रोचनं दिवः ।
	देवास् त इन्द्र सख्याय येमिरे ॥ २० ॥
१.८४.१	असावि सोम इन्द्र ते शविष्ठ धृष्णव् आ गहि ।
	आ त्वा पृणक्त्व् इन्द्रियं रजः सूर्यो न रश्मिभिः ॥ २१ ॥
३	आ तिष्ठ वृत्रहन् रथं युक्ता ते ब्रह्मणा हरी ।
	अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ २२ ॥
२	इन्द्रम् इद् धरी वहतो ऽप्रतिधृष्टशवसम् ।
ऋषीणां च सुष्टुतीर् • • • •	ऋषीणां सुष्टुतीर् उप यज्ञं च मानुषाणाम् ॥ २३ ॥ ॥३०॥
	३.३१
क ९.८६.१०	ज्योतिर् यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
	दधाति रत्नं स्वधयोर् अपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥ १ ॥
११	अभिक्रन्दन् कलशं वाज्य् अर्षति पतिर् दिवः शतधारो विचक्षणः ।
	हरिर् मित्रस्य सदनेषु सीदति मर्मृजानो ऽविभिः सिन्धुभिर् वृषा ॥ २ ॥
१२ • • • अर्षस्…	अग्रे सिन्धूनां पवमानो अर्षस्य् अग्रे वाचो अग्रियो गोषु गच्छसि ।
• • भजसे महाधनं • •	अग्रे वाजस्य भजसे महद् धनं स्वायुधः सोतृभिः सोम सूयसे ॥ ३ ॥
पूयते वृषा	
९.६४.४	असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
	शुक्रासो वीरयाशवः ॥ ४ ॥
५	शुम्भमाना ऋतायुभिर् मृज्यमाना गभस्त्योः ।
	पवन्ते वारे अव्यये ॥ ५ ॥
६	ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।
	पवन्ताम् आन्तरिक्ष्या ॥ ६ ॥
९.२.१	पवस्व देववीर् अति पवित्रं सोम रंह्या ।
	इन्द्रम् इन्दो वृषा विश ॥ ७ ॥

२	आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।
	आ योनिं धर्णसिः सदः ॥ ८ ॥
३	अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।
	अपो वसिष्ट सुक्रतुः ॥ ९ ॥
४	महान्तं त्वा महीर् अन्व् आपो अर्षन्ति सिन्धवः ।
	यद् गोभिर् वासयिष्यसे ॥ १० ॥
५	समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
	सोमः पवित्रे अस्मयुः ॥ ११ ॥
६	अचिक्रदद् वृषा हरिर् महान् मित्रो न दर्शतः ।
• • रोचते	सं सूर्येण दिद्युते ॥ १२ ॥
७	गिरस् त इन्द्र ओजसा मर्मृज्यन्ते अपस्युवः ।
	याभिर् मदाय शुम्भसे ॥ १३ ॥
८	तं त्वा मदाय घृष्वय उ लोककृत्नुम् ईमहे ।
	तव प्रशस्तये महे ॥ १४ ॥
• प्रशस्तयो महीः	गोपा इन्दो नृपा अस्य् अश्वसा वाजसा उत ।
१०	आत्मा यज्ञस्य पूर्व्यः ॥ १५ ॥
९ • • इन्द्रयुर् मध्वः • •	अस्मभ्यम् इन्दव् इन्द्रियं मधोः पवस्व धारया ।
	पर्जन्यो वृष्टिमाँ इव ॥ १६ ॥
	सना च सोम जेषि च पवमान महि श्रवः ।
९.४.१	अथा नो वस्यसस् कृधि ॥ १७ ॥
	सना ज्योतिः सना स्वर् विश्वा च सोम सौभगा ।
२	अथा नो वस्यसस् कृधि ॥ १८ ॥
	सना दक्षम् उत क्रतुम् अप सोम मृधो जहि ।
३	अथा नो वस्यसस् कृधि ॥ १९ ॥
	पवीतारः पुनीतन सोमम् इन्द्राय पातवे ।
४	अथा नो वस्यसस् कृधि ॥ २० ॥
	त्वं सूर्ये ण आ भज तव क्रत्वा तवोतिभिः ।
५ • • न (एवं कौ)…	अथा नो वस्यसस् कृधि ॥ २१ ॥
	तव क्रत्वा तवोतिभिर् ज्योक् पश्येम सूर्यम् ।
६	अथा नो वस्यसस् कृधि ॥ २२ ॥
	अभ्य् अर्ष स्वायुध सोम द्विबर्हसं रयिम् ।
७	अथा नो वस्यसस् कृधि ॥ २३ ॥
	अभ्य् अर्षानपच्युतो वाजिन् समत्सु सासहिः ।
८ • • रयिं • •	अथा नो वस्यसस् कृधि ॥ २४ ॥
	त्वां यज्ञैर् अवीवृधन् पवमान विधर्मणि ।
९	अथा नो वस्यसस् कृधि ॥ २५ ॥

१०	रयिं नश् चित्रम् अश्विनम् इन्दो विश्वायुम् आ भर ।
	अथा नो वस्यसस् कृधि ॥ २६ ॥
९.५८.१	तरत् स मन्दी धावति धारा सुतस्यान्धसः ।
	तरत् स मन्दी धावति ॥ २७ ॥
२	उस्रा वेद वसूनां मर्तस्य देव्य् अवसः ।
	तरत् स मन्दी धावति ॥ २८ ॥
३	ध्वस्रयोः पुरुषन्त्योर् आ सहस्राणि दद्महे ।
	तरत् स मन्दी धावति ॥ २९ ॥
४	आ ययोस् त्रिंशतं तना सहस्राणि च दद्महे ।
	तरत् स मन्दी धावति ॥ ३० ॥
९.६२.२२	एते सोमा असृक्षत गृणानाः शवसे महे ।
	मदिन्तमस्य धारया ॥ ३१ ॥
२३	अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
	सनद्वाजः परि स्रव ॥ ३२ ॥
२४	उत नो गोमतीर् इषो विश्वा अर्ष परिष्टुभः ।
	गृणानो जमदग्निना ॥ ३३ ॥ ॥३१॥
	३.३२
क १०.१८७.१	प्राग्नये वाचम् ईरय वृषभाय क्षितीनाम् ।
	स नः पर्षद् अति द्विषः ॥ १ ॥
२	यः परस्याः परावतस् तिरो धन्वातिरोचते ।
	स नः पर्षद् अति द्विषः ॥ २ ॥
४	यो विश्वाभि विपश्यति भुवना सं च पश्यति ।
	स नः पर्षद् अति द्विषः ॥ ३ ॥
१.९४.१	इमं स्तोमम् अर्हते जातवेदसे रथम् इव सं महेमा मनीषया ।
	भद्रा हि नः प्रमतिर् अस्य संसद्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥
४	भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
• प्रतरं …	जीवातवे प्रतरं साधया धियो ऽग्ने सख्ये मा रिषामा वयं तव ॥ ५ ॥
३	शकेम त्वा समिधं साधया धियस् त्वे देवा हविर् अदन्त्य् आहुतम् ।
	त्वम् आदित्याँ आ वह तान् ह्य् उश्मस्य् अग्ने सख्ये मा रिषामा वयं तव ॥ ६ ॥
७.६६.७	प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् ।

अर्यमणं रिशादसम् ॥ ७ ॥
राया हिरण्यया मतिर् इयम् अवृकाय शवसे ।
इयं विप्रा मेधसातये ॥ ८ ॥
ते स्याम देव वरुण ते मित्र सूरिभिः सह ।
इषं स्वश् च धीमहि ॥ ९ ॥
भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
वसु स्पार्हं तद् आ भर ॥ १० ॥
यस्य ते विश्वम् आनुषग् भूरेर् दत्तस्य वेदति ।
वसु स्पार्हं तद् आ भर ॥ ११ ॥
यद् वीडाव् इन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् ।
वसु स्पार्हं तद् आ भर ॥ १२ ॥
यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
इन्द्राग्नी तस्य बोधतम् ॥ १३ ॥
इदं वां मदिरं मध्व् अधुक्षन्न् अद्रिभिर् नरः ।
इन्द्राग्नी तस्य बोधतम् ॥ १४ ॥
तोशासा रथयावाना वृत्रहणापराजिता ।
इन्द्राग्नी तस्य बोधतम् ॥ १५ ॥ ॥३२॥

३.३३

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
अर्कस्य योनिम् आसदम् ॥ १ ॥
तं त्वा विप्रा वचोविदः परिष् कृण्वन्ति धर्णसिम् ।
सं त्वा मृजन्त्य् आयवः ॥ २ ॥
रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
पवमानस्य मरुतः ॥ ३ ॥
मृज्यमानः सुहस्त्या समुद्रे वाचम् इन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्य् अर्षसि ॥ ४ ॥
पुनानो वारे पवमानो अव्यये वृषो अचिक्रदद् वने ।
देवानां सोम पवमान निष्कृतं गोभिर् अञ्जानो अर्षसि ॥ ५ ॥
एतम् उ त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।
सम् आदित्येभिर् अख्यत ॥ ६ ॥
सम् इन्द्रेणोत वायुना सुत एति पवित्र आ ।
सं सूर्यस्य रश्मिभिः ॥ ७ ॥
स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।
चारुर् मित्रे वरुणे च ॥ ८ ॥
रेवतीर् नः सधमाद इन्द्रे सन्तु तुविवाजाः ।

क्षुमन्तो याभिर् मदेम ॥ ९ ॥
आ घ त्वावान् त्मना युक्तः स्तोतृभ्यो धृष्णव् ईयानः ।
ऋणोर् अक्ष न चक्र्योः ॥ १० ॥
आ यद् दुवः शतक्रतव् आ कामं जरितॄणाम् ।
ऋणोर् अक्षं न शचीभिः ॥ ११ ॥
सुरूपकृत्नुम् ऊतये सुदुघाम् इव गोदुहे ।
जुहूमसि द्यविद्यवि ॥ १२ ॥
अथा ते अन्तमानां विद्याम सुमतीनाम् ।
मा नो अति ख्य आ गहि ॥ १३ ॥
उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद् रेवतो मदः ॥ १४ ॥
उभे यद् इन्द्र रोदसी आपप्राथोषा इव ।
महान्तं त्वा महीनां सम्राजं चर्षणीनाम् ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १५ ॥
दीर्घं ह्य् अङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
पूर्वेण मघवन् पदा वयाम् अजो यथा यमः ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १६ ॥
अव त्या बृहतीर् इषो विश्वश्चन्द्रा अमित्रहन् ।
शचीभिः शक्र धूनुय इन्द्र विश्वाभिर् ऊतिभिः ।
देवी जनित्र्य् अजीजनद् भद्रा जनित्र्य् अजीजनत् ॥ १७॥ ॥३३॥

३.३४

परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
मदेषु सर्वधा असि ॥ १ ॥
त्वं विप्रस् त्वं कविर् मधु प्र जातम् अन्धसः ।
मदेषु सर्वधा असि ॥ २ ॥
त्वे विश्वे सजोषसो देवासः पीतिम् आशत ।
मदेषु सर्वधा असि ॥ ३ ॥
स सुन्वे यो वसूनां यो रायाम् आनेता य इडानाम् ।
सोमो यः सुक्षितीनाम् ॥ ४ ॥
यस्य त इन्द्रः पिबाद् यस्य मरुतो यस्य वार्यम्णा भगः ।
आ येन मित्रावरुणा करामह एन्द्रम् अवसे महे ॥ ५ ॥
तं वः सखायो मदाय पुनानम् अभि गायत ।
शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ६ ॥
सं वत्स इव मातृभिर् इन्दुर् हिन्वानो अज्यते ।
देवावीर् मदो मतिभिः परिष्कृतः ॥ ७ ॥

अयं दक्षाय साधनो ऽयं शर्धाय वीतये ।
अयं देवेभ्यो मधुमत्तमः सुतः ॥ ८ ॥
सोमाः पवन्त इन्दवो ऽस्मभ्यं गातुवित्तमाः ।
मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ९ ॥
ते पूतासो विपश्चितः सोमासो दध्याशिरः ।
सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ १० ॥
सुष्वाणासो व्य् अद्रिभिश् चिताना गोर् अधि त्वचि ।
इषम् अस्मभ्यम् अभितः सम् अस्वरन् वसुविदः ॥ ११ ॥
अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश् चिद् यस्य वातो न जूतिं पुरुमेधाश् चित् तकवे नरं धात् ॥ १२ ॥
उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद् रणाय ॥ १३ ॥
महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे ।
अस्वापयन् निगुतः स्नेहयच् चापामित्रं अपाचितो अचेतः ॥ १४ ॥
अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ १५ ॥
वसुर् अग्निर् वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ १६ ॥
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनम् ईमहे सखिभ्यः ॥ १७ ॥
इमा नु कं भुवना सीषधेमेन्द्रश् च विश्वे च देवाः ॥ १८ ॥
यज्ञं च नस् तन्वं च प्रजां चादित्यैर् इन्द्रः सह सीषधातु ॥ १९ ॥
आदित्यैर् इन्द्रः सगणो मरुद्भिर् अस्मभ्यं भेषजा करत् ॥ २० ॥
प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ २१ ॥
अर्चन्त्य् अर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ २२ ॥
उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ २३ ॥ ॥३४॥

३.३५

प्र काव्यम् उशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्य् एति रेभन् ॥ १ ॥

प्र हंसासस् तृपला मन्युम् अच्छामाद् अस्तं वृषगणा अयासुः ।
अङ्गोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥ २ ॥
स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।
परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर् ददृशे नक्तम् ऋज्रः ॥ ३ ॥
प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः ।
सोमासो राये अक्रमुः ॥ ४ ॥
हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।
भरासः कारिणाम् इव ॥ ५ ॥
राजानो न प्रशस्तिभिः सोमासो गोभिर् अञ्जते ।
यज्ञो न सप्त धातृभिः ॥ ६ ॥
परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
मधो अर्षन्ति धारया ॥ ७ ॥
आपानासो विवस्वतो जिन्वन्त उषसो भगम् ।
सूरा अण्वं वि तन्वते ॥ ८ ॥
अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः ।
वृष्णो हरस आयवः ॥ ९ ॥
नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे ।
कवेर् अपत्यम् आ दुहे ॥ १० ॥ ॥३५॥

३.३६

समीचीनास आशत होतारः सप्तजामयः ।
पदम् एकस्य पिप्रतः ॥ १ ॥
अभि प्रियं दिवस् पदम् अध्वर्युभिर् गुहा हितम् ।
सूरः पश्यति चक्षसा ॥ २ ॥
असृग्रम् इन्दवः पथा धर्मन्न् ऋतस्य सुश्रियः ।
विदाना अस्य योजना ॥ ३ ॥
प्र धारा मधो अग्रियो महीर् अपो वि गाहते ।
हविर् हविःषु वन्द्यः ॥ ४ ॥
प्र युजा वाचो अग्रियो वृषो अचिक्रदद् वने ।
सद्माभि सत्यो अध्वरः ॥ ५ ॥
परि यत् काव्या कविर् नृम्णा पुनानो अर्षति ।
स्वर् वाजी सिषासति ॥ ६ ॥
पवमानो अभि स्पृधो विशो राजेव सीदति ।
यद् ईम् ऋण्वन्ति वेधसः ॥ ७ ॥

६ अव्यो ... अव्या वारे परि प्रियो हरिर् वनेषु सीदति ।
...मती (एवं कौ) रेभो वनुष्यते मती ॥ ८ ॥
७ स वायुम् इन्द्रम् अश्विना साकं मदेन गच्छति ।
...धर्मभिः रणा यो अस्य धर्मणा ॥ ९ ॥
८ • मित्रावरुणा भगं मध्वः • • आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः ।
विदाना अस्य शक्मभिः ॥ १० ॥ ॥३६॥

३.३७

* ९.७.९ अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये ।
श्रवो वसूनि सं जितम् ॥ १ ॥
९.६५.२८ आ ते दक्षं मयोभुवं वह्निम् अद्या वृणीमहे ।
पान्तम् आ पुरुस्पृहम् ॥ २ ॥
२९ आ मन्द्रम् आ वरेण्यम् आ विप्रम् आ मनीषिणम् ।
पान्तम् आ पुरुस्पृहम् ॥ ३ ॥
३० आ रयिम् आ सुचेतनम् आ सुक्रतो तनूष्व् आ ।
पान्तम् आ पुरुस्पृहम् ॥ ४ ॥ ॥३७॥

३.३८

वैश्वानरो अजीजनद् अग्निर् नो नव्यसीं मतिम् ।
क्षमया वृधा न ओजसा ॥ १ ॥
अन्यत्र संहितासु न सन्ति — दिवि पृष्टो अरोचताग्निर् वैश्वानरो बृहत् ।
ज्योतिषा बाधते तमः ॥ २ ॥
स नः पावक दीदिह्य् अग्ने वैश्वानर द्युमान् ।
जमदग्नेर् भरद्धुतः ॥ ३ ॥
* ६.७.१ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरम् ऋत आ जातम् अग्निम् ।
• • • • आसन्ना .. कविं सम्राजम् अतिथिं जनानाम् आसन्नः पात्रं जनयन्त देवाः ॥ ४ ॥
४ त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते ।
तव क्रतुभिर् अमृतत्वम् आयन् वैश्वानर यत् पित्रोर् अदीदेः ॥ ५ ॥
२ नाभिं यज्ञानां सदनं रयीणां महाम् आहावम् अभि सं नवन्त ।
वैश्वानरं रथ्यम् अध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ ६ ॥
५.६८.१ प्र वो मित्राय गायत वरुणाय विपा गिरा ।

महिक्षत्राव् ऋतं बृहत् ॥ ७ ॥
२ सम्राजा या घृतयोनी मित्रश् चोभा वरुणश् च ।
देवा देवेषु प्रशस्ता ॥ ८ ॥
३ ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।
महि वां क्षत्रं देवेषु ॥ ९ ॥
१.३.४ इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
अण्वीभिस् तना पूतासः ॥ १० ॥
५ इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
उप ब्रह्माणि वाघतः ॥ ११ ॥
६ इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुते दधिष्व नश् चनः ॥ १२ ॥ ॥३८॥

३.३९

* ९.८६.१६ प्रो अयासीद् इन्दुर् इन्द्रस्य निष्कृतं सखा सख्युर् न प्र मिनाति संगिरम् ।
...शतयाम्ना मर्य इव युवतिभिः सम् अर्षति सोमः कलशे शतयाम्ना पथा ॥ १ ॥
१७ ...संवसनेषु प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्व् अक्रमुः ।
सोमं मनीषा • • • • • पयसेम् हरिं क्रीडन्तम् अभ्य् अनूषत स्तुभो ऽभि धेनवः पयसेद् अशिश्रयुः ॥ २ ॥
१८ आ नः सोम संयतं पिप्युषीम् इषम् इन्दो पवस्व पवमान ऊर्मिणा ।
अस्रिधम् या नो दोहते त्रिर् अहन्न् असश्चुषी क्षुमद् वाजवन् मधुमत् सुवीर्यम् ॥ ३ ॥
८.७०.१ नकिष् टं कर्मणा नशद् यश् चकार सदावृधम् ।
...धृष्णवोजसम् इन्द्रं न यज्ञैर् विश्वगूर्तम् ऋभ्वसम् अधृष्टं धृष्णुम् ओजसा ॥ ४ ॥
४ अषाढम् उग्रं पृतनासु सासहिं यस्मिन् महीर् उरुज्रयः ।
• • • • द्यावः क्षामो (कौ द्यावः क्षामीर्) • सं धेनवो जायमाने अनोनवुर् द्याव क्षामीर् अनोनवुः ॥ ५ ॥ ॥३९॥

३.४०

* ९.१०८.५ • • • • उव्यो ... एष स्य धारया सुतो ऽव्या वारेभिः पवते मदिन्तमः ।
क्रीडन्न् ऊर्मिर् अपाम् इव ॥ १ ॥
६ • • अप्या अन्तरश्मनो • • • य उस्रिया अपिया अन्तर् अश्मनि निर् गा अकृन्तद् ओजसा ।

अभि व्रजं तत्निषे गव्यम् अश्व्यं वर्मीव धृष्णव् आ रुजा ॥ २ ॥
रुजा (एवं कौ)
९.१०४.१ सखाय आ नि षीदत पुनानाय प्र गायत ।
शिशुं न यज्ञैः परि भूषत श्रिये ॥ ३ ॥
२ ...गयसाधनम् (एवं कौ) सम् ई वत्सं न मातृभिः सृजता गयसाधनम् ।
देवाव्यं मदम् अभि द्विशवसम् ॥ ४ ॥
३ पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
...शंतमः यथा मित्राय वरुणाय शंतमम् ॥ ५ ॥
९.१०९.१६ • सुवानो ... प्र वाज्य् अक्षाः सहस्रधारस् तिरः पवित्रं वि वारम् अव्यम् ॥ ६ ॥
१७ स वाज्य् अक्षाः सहस्ररेता अद्भिर् मृजानो गोभिः श्रीणानः ॥ ७ ॥
१८ ...येमानो • प्र सोम याहीन्द्रस्य कुक्षा नृभिर् येमाणो अद्रिभिः सुतः ॥ ८ ॥
९.६५.२२ ये सोमासः परावति ये अर्वावति सुन्विरे ।
ये वादः शर्यणावति ॥ ९ ॥
२३ य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
ये वा जनेषु पञ्चसु ॥ १० ॥
२४ ते नो वृष्टिं दिवस् परि पवन्ताम् आ सुवीर्यम् ।
सुवाना ... स्वाना देवास इन्दवः ॥ ११ ॥
८.११.७ आ ते वत्सो मनो यमत् परमाच् चित् सधस्थात् ।
• त्वांकामया • अग्ने त्वां कामये गिरा ॥ १२ ॥
८ • • • • विशो ... पुरुत्रा हि सदृङ्ङ् असि दिशो विश्वा अनु प्रभुः ।
समत्सु त्वा हवामहे ॥ १३ ॥
९ समत्स्व् अग्निम् अवसे वाजयन्तो हवामहे ।
वाजेषु चित्रराधसम् ॥ १४ ॥
८.९८.१० त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे ।
• • पृतनाषहम् आ वीरं पृतनासहम् ॥ १५ ॥
११ त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अथा ... अथा ते सुम्नम् ईमहे ॥ १६ ॥
१२ ...शतक्रतो त्वां शुष्मिन् पुरुहूत वाजयन्तम् उप ब्रुवे सहस्कृत ।
स नो रास्व सुवीर्यम् ॥ १७ ॥
५.३९.१ • • • मंहनास्ति • • यद् इन्द्र चित्र म इह नास्ति त्वादातम् अद्रिवः ।
राधस् तन् नो विदद्वस उभयाहस्त्य् आ भर ॥ १८ ॥
यत् ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
२ • • दित्सु ... तेन दृढा चिद् अद्रिव आ वाजं दर्षि सातये ॥ १९ ॥

२ यन् मन्यसे वरेण्यम् इन्द्र द्युक्षं तद् आ भर ।
कौ ...दावनः विद्याम तस्य ते वयम् अकूपारस्य दावने ॥ २० ॥ ॥४०॥

३.४१

* ९.९६.१७ ... वह्नि • • शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
कविर् गीर्भिः काव्येन कविः सन् सोमः पवित्रम् अत्य् एति रेभन् ॥ १ ॥
१८ ...सहस्रनीथः • • ऋषिमना य ऋषिकृत् स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन् सोमो विराजम् अनु राजति ष्टुप् ॥ २ ॥
१९ चमूषच् छ्येनः शकुनो विभृत्वा गोविन्दुर् द्रप्स आयुधानि बिभ्रत् ।
अपाम् ऊर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ३ ॥
९.८.१ एते सोमा अभि प्रियम् इन्द्रस्य कामम् अक्षरन् ।
वर्धन्तो अस्य वीर्यम् ॥ ४ ॥
२ पुनानासश् चमूषदो गच्छन्तो वायुम् अश्विना ।
• • धान्व • ते नो धत्त सुवीर्यम् ॥ ५ ॥
३ इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
ऋतस्य • • देवानां योनिम् आसदम् ॥ ६ ॥
४ मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।
अनु विप्रा अमादिषुः ॥ ७ ॥
५ देवेभ्यस् त्वा मदाय कं सृजानम् अति मेष्यः ।
सं गोभिर् वासयामसि ॥ ८ ॥
६ पुनानः कलशेष्व् आ वस्त्राण्य् अरुषो हरिः ।
परि गव्यान्य् अव्यत ॥ ९ ॥
७ मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
इन्दो सखायम् आ विश ॥ १० ॥ ॥४१॥

३.४२

* ९.८.९ नृचक्षसं त्वा वयम् इन्द्रपीतं स्वर्विदम् ।
भक्षीमहि प्रजाम् इषम् ॥ १ ॥
८ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।
सहो नः सोम पृत्सु धाः ॥ २ ॥
९.१३.१ सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
वायोर् इन्द्रस्य निष्कृतम् ॥ ३ ॥
२ पवमानम् अवस्यवो विप्रम् अभि प्र गायत ।

सुष्वाणं देववीतये ॥ ४ ॥
३ पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
गृणाना देववीतये ॥ ५ ॥
४ उत नो वाजसातये पवस्व बृहतीर् इषः ।
द्युमद् इन्दो सुवीर्यम् ॥ ६ ॥
५ ते नः सहस्रिणं रयिं पवन्ताम् आ सुवीर्यम् ।
सुवाना • • स्वाना देवास इन्दवः ॥ ७ ॥
६ अत्या हियाना न हेतृभिर् असृग्रं वाजसातये ।
वि वारम् अव्यम् आशवः ॥ ८ ॥
७ ...धेनवः वाश्रा अर्षन्तीन्दवो ऽभि वत्सं न मातरः ।
दधन्विरे गभस्त्योः ॥ ९ ॥
८ जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत् ।
विश्वा अप द्विषो जहि ॥ १० ॥ ॥४२॥

३.४३

क ९.१३.१ अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
योनाव् ऋतस्य सीदत ॥ १ ॥
९.१०.१ ...सादने सोमा असृग्रम् इन्दवः सुता ऋतस्य धारया ।
इन्द्राय मधुमत्तमाः ॥ २ ॥
२ ...मातरः अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
इन्द्रं सोमस्य पीतये ॥ ३ ॥
३ मदच्युत् क्षेति सादने सिन्धोर् ऊर्मा विपश्चित् ।
सोमो गौरी अधि श्रितः ॥ ४ ॥
४ • • • अव्यो ... दिवो नाभा विचक्षणो ऽव्या वारे महीयते ।
सोमो यः सुक्रतुः कविः ॥ ५ ॥
५ यः सोमः कलशेष्व् आ अन्तः पवित्र आहितः ।
तम् इन्दुः परि षस्वजे ॥ ६ ॥
६ प्र वाचम् इन्दुर् इष्यति समुद्रस्याधि विष्टपि ।
जिन्वन् कोशं मधुश्चुतम् ॥ ७ ॥
७ • • • धीनाम् • सबर्दुघः ...युगा नित्यस्तोत्रो वनस्पतिर् धेनाम् अन्तः सबर्दुघाम् ।
हिन्वानो मानुषा युगा ॥ ८ ॥
९ आ पवमान धारय रयिं सहस्रवर्चसम् ।
अस्मे इन्दो स्वाभुवम् ॥ ९ ॥
८ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥ ...वो हितोयस्मिन् पाद विप्रः स • • अभि प्रिया दिवः कविर् विप्रस्य धारया सुतः ।
सोमो हिन्वे परावति ॥ १० ॥ ॥४३॥

३.४४

क ९.५०.१ उद् ते शुष्मास ईरते सिन्धोर् ऊर्मेर् इव स्वनः ।

वाणस्य चोदया पविम् ॥ १ ॥
२ प्रसवे त उद् ईरते तिस्रो वाचो मखस्युवः ।
यद् अव्य एषि सानवि ॥ २ ॥
३ अव्यो वारे... अव्या वारैः परि प्रियं हरिं हिन्वन्त्य् अद्रिभिः ।
पवमानं मधुश्चुतम् ॥ ३ ॥
४ आ पवस्व मदिन्तम पवित्रं धारया कवे ।
अर्कस्य योनिम् आसदम् ॥ ४ ॥
५ स पवस्व मदिन्तम गोभिर् अञ्जानो अक्तुभिः ।
इन्दविन्द्राय पीतये एन्द्रस्य जठरं विश ॥ ५ ॥
९.६१.२२ स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
वव्रिवांसं महीर् अपः ॥ ६ ॥
२४ ...आयुरः त्वोतासस् तवावसा स्याम वन्वन्तः किकरः ।
सोम व्रतेषु जागृहि ॥ ७ ॥
२३ त्वीरासो वयं धना जयेम सोम मीढ्वः ।
पुनानो वर्ध नो गिरः ॥ ८ ॥
२५ अपघ्नन् पवते मृधो ऽप सोमो अराव्णः ।
गच्छन्न् इन्द्रस्य निष्कृतम् ॥ ९ ॥
२७ न त्वा शतं चन ह्रुतो राधो दित्सन्तम् आ मिनन् ।
यत् पुनानो मखस्यसे ॥ १० ॥ ॥४४॥

३.४५

क ९.६१.२८ महो नो राय आ भर पवमान जही मृधः ।
रास्वेन्दो वीरवद् यशः ॥ १ ॥
१ अया वीती परि स्रव यस् त इन्दो मदेष्व् आ ।
अवाहन् नवतीर् नव ॥ २ ॥
२ पुरः सद्य इत्थाधिये दिवोदासाय शंबरम् ।
अध त्यं तुर्वशं यदुम् ॥ ३ ॥
३ • णो परि नो अश्वम् अश्वविद् गोमद् इन्दो हिरण्यवत् ।
क्षरा सहस्रिणीर् इषः ॥ ४ ॥ ॥४५॥

३.४६

क ८.४३.१४ त्वं ह्य् अग्ने अग्निना विप्रो विप्रेण सन् सता ।
सखा सख्या समिध्यसे ॥ १ ॥
१५ स त्वं विप्राय दाशुषे • • • त्वं सुन्वते यजमानाय रयिं देहि सहस्रिणम् ।
अग्ने वीरवतीम् इषम् ॥ २ ॥
१६ अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत ।
...मे इमं स्तोमं जुषस्व नः ॥ ३ ॥

७.१६.१ अग्निं वो देवम् अग्निभिः सजोषा यजिष्ठं दूतम् अध्वरे कृणुध्वम् ।
यो मर्त्येषु निध्रुविर् ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ ४ ॥
२ प्रोथद् अश्वो न यवसे ऽविष्यन् यदा महः संवरणाद् व्य् अस्थात् ।
आद् अस्य वातो अनु वाति शोचिर् अध स्म ते व्रजनं कृष्णम् अस्ति ॥ ५ ॥
३ उद् यस्य ते नवजातस्य वृष्णो ऽग्ने चरन्त्य् अजरा इधानाः ।
• • • • एति... अच्छा द्याम् अरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥ ६ ॥
७.६६.४ यद् अद्य सूर उदिते ऽनागा मित्रो अर्यमा ।
सुवाति सविता भगः ॥ ७ ॥
५ सुप्रावीर् अस्तु स क्षयः प्र नु यामन् सुदानवः ।
यो नो अंहो ऽतिपिप्रति ॥ ८ ॥
६ उत स्वराजो अदितिर् अदब्धस्य व्रतस्य ये ।
महो राजान ईशते ॥ ९ ॥
८.९३.७ तम् इन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥ १० ॥
८ ...मदे • इन्द्रः स दामने कृत ओजिष्ठः स बले हितः ।
द्युम्नी श्लोकी स सोम्यः ॥ ११ ॥
९ गिरा वज्रो न संभृतः सबलो अनपच्युतः ।
• कृष्वो • ववक्ष उग्रो अस्तृतः ॥ १२ ॥ ॥४६॥

३.४७

क ९.५१.१ ...सुत अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय ।
पुनीहीन्द्राय • पुनाहीन्द्राय पातवे ॥ १ ॥
२ ...आसते तव त्य इन्दो अन्धसो देवा मधोर् व्य् आशत ।
पवमानस्य मरुतः ॥ २ ॥
२ दिवः पीयूषम् उत्तमं सोमम् इन्द्राय वज्रिणे ।
सुनोता मधुमत्तमम् ॥ ३ ॥
९.७२.१ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानाम् अनुमाद्यो नृभिः ।
...कृणुते हरिः सृजानो अत्यो न सत्वभिर् वृथा पाजांसि कृणुते नदीष्व् आ ॥ ४ ॥
२ शूरो न धत्त आयुधा गभस्त्योः स्वः सिषासन् रथिरो गविष्टिषु ।

इन्द्रस्य शुष्मम् ईरयन्न् अपस्युभिर् इन्दुर् हिन्वानो अज्यते मनीषिभिः ॥ ५ ॥
३ इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्व् आ विश ।
वो • नः न • • वो माहि • प्र णः पिन्व विद्युद् अभ्रेव रोदसी धिया नो वाजं उप मासि शश्वतः ॥ ६ ॥
८.४.१ यद् इन्द्र प्राग् अपाग् उदङ् न्यग् वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्य् आनवे ऽसि प्रशर्ध तुर्वशे ॥ ७ ॥
२ यद् वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
• • ब्रह्मभिः स्तोमवाहस... कण्वासस् त्वा स्तोमेभिर् ब्रह्मवाहस इन्द्रा यच्छन्त्य् आ गहि ॥ ८ ॥
८.६१.१ उभयं शृणवच् च न इन्द्रो अर्वाग् इदं वचः ।
• मघवा... सत्राच्या मघवान् सोमपीतये धिया शविष्ठ आ गमत् ॥ ९ ॥
२ ...ओजसे • • तं हि स्वराजं वृषभं तम् ओजसा धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ १० ॥ ॥४७॥

३.४८

क ९.६३.२२ • देवायुवग्... पवस्व देव आयुषग् इन्द्रं गच्छतु ते मदः ।
वायुम् आ रोह धर्मणा ॥ १ ॥
२३ पवमान नि तोशसे रयिं सोम श्रवाय्यम् ।
प्रियः... इन्दो समुद्रम् आ विश ॥ २ ॥
२४ अपघ्नन् पवसे मृधः क्रतुवित् सोम मत्सरः ।
नुदस्वादेवयुं जनम् ॥ ३ ॥
९.९८.१ अभि... पुरुस्पृहम् ...विश्वासहम् अभी नो वाजसातमं रयिम् अर्ष शतस्पृहम् ।
सरूपौ द्वौ विरूपौ द्वौ कृष्णौ द्वौ रोहितौ द्वौ ।
बभ्रुश्च बभ्रुकर्णश्च गृध्रः कोकश्च ते हताः ४
ये क्रिमयः शितिकक्षा ये कृष्णाः शितिबाहवः ।
ये के च विश्वरूपास्तान् क्रिमीन् जम्भयामसि ५
उत् पुरस्तात् सूर्य एति विश्वदृष्टो अदृष्टहा ।
दृष्टांश्च घ्नन्नदृष्टांश्च सर्वांश्च प्रमृणन् क्रिमीन् ६
येवाषासः कष्कषास एजत्काः शिपवित्नुकाः ।
दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम् ७
हतो येवाषः क्रिमीणां हतो नदनिमोत ।
सर्वान् नि मष्मषाकरं दृषदा खल्वाँ इव ८ (२५९)

त्रिशीर्षाणं त्रिककुदं क्रिमिं सारङ्गमर्जुनम् ।
शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ९
अत्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत् ।
अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् १०
हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः ।
हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ११
हतासो अस्य वेशसो हतासः परिवेशसः
अथो ये क्षुल्लका इव सर्वे ते क्रिमयो हताः १२
सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणाम् ।
भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम् १३ (२६४)

(२४) ब्रह्मकर्म ।

१-१७ अथर्वा । ब्रह्मकर्मात्मा, १ सविता, २ अग्निः, ३ द्यावापृथिवी, ४ वरुणः, ५ मित्रावरुणौ, ६ मरुतः, ७ सोमः, ८ वायुः, ९ सूर्यः, १० चन्द्रमाः, ११ इन्द्रः, १२ मरुतां पिता, १३ मृत्युः, १४ यमः, १५ पितरः, १६ तताः, १७ ततामहाः । अतिशक्वरी, १-१०, १२-१४ चतुष्पदातिशक्वरी, ११ शक्वरी, १५-१६ त्रिपदा भुरिग्जगती, १७ त्रिपदा विराट् शक्वरी ।

सविता प्रसवानामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १
अग्निर्वनस्पतीनामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा २
द्यावापृथिवी दातृणामधिपत्नी ते मावताम् ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ३
वरुणोऽपामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ४
मित्रावरुणौ वृष्ट्याधिपती तौ मावताम् ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ५ (२६९)

मरुतः पर्वतानामधिपतयस्ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ६
सोमो वीरुधामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ७
वायुरन्तरिक्षस्याधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ८
सूर्यश्चक्षुषामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ९
चन्द्रमा नक्षत्राणामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १०
इन्द्रो दिवोऽधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा ११
मरुतां पिता पशूनामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १२
मृत्युः प्रजानामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १३
यमः पितृणामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १४ (२७८)

पितरः परे ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १५
तता अवरे त मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १६
ततस्ततामहास्ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा १७ (२८१)

(२५) गर्भाधानम् ।

१-१३ ब्रह्मा । योनिगर्भः, पृथिव्यादयो देवताः । अनुष्टुप्, १३ विराट्पुरस्ताद्बृहती ।

पर्वताद् दिवो योनेरङ्गादङ्गात् समाभृतम् ।
शेपो गर्भस्य रेतोधाः सरौ पर्णमिवा दधत् १
यथेयं पृथिवी मही भूतानां गर्भमादधे ।
एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे २
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनोभा धत्तां पुष्करस्रजा ३
गर्भं ते मित्रावरुणौ गर्भं देवो बृहस्पतिः ।
गर्भं त इन्द्रश्चाग्निश्च गर्भं धाता दधातु ते ४
विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ५
यद् वेद राजा वरुणो यद् वा देवी सरस्वती ।
यदिन्द्रो वृत्रहा वेद तद् गर्भकरणं पिब ६
गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् ।
गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेह धाः ७
अधि स्कन्द वीरयस्व गर्भमा धेहि योन्याम् ।
वृषासि वृष्ण्यावन् प्रजायै त्वा नयामसि ८
वि जिहीष्व बार्हत्सामे गर्भस्ते योनिमा शयाम् ।
अदुष्टे देवाः पुत्रं सोमपा उभयाविनम् ९ (२९०)

धातः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रमा धेहि दशमे मासि सूतवे १०
त्वष्टः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ११
सवितः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रमा धेहि दशमे मासि सूतवे १२
प्रजापते श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रमा धेहि दशमे मासि सूतवे १३ (२९४)

(२६) नवशालाया घृतहोमः ।

१-१२ ब्रह्मा । वास्तोष्पतिः, १ अग्निः, २ सविता, ३,११ इन्द्रः, ४ निविदः ५ मरुतः, ६ अदितिः ७ विष्णुः, ८ त्वष्टा, ९ भगः, १० सोमः, १२ अश्विनौ, बृहस्पतिः । १, ५ द्विपदार्ची उष्णिक्, २,४,६,७,८,१०,११ द्विपदा प्राजापत्या बृहती, ३ त्रिपदा विराड् गायत्री, ९ त्रिपदा पिपीलिकमध्या पुरउष्णिक्, (१-११ एकावसाना) १२ परातिशक्वरी चतुष्पदा जगती ।

यजूंषि यज्ञे समिधः स्वाहाग्निः प्रविद्वानिह वो युनक्तु १
युनक्तु देवः सविता प्रजानन्नस्मिन् यज्ञे महिषः स्वाहा २
इन्द्र उक्थामदान्यस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ३
प्रैषा यज्ञे निविदः स्वाहा शिष्टाः पत्नीभिर्वहतेह युक्ताः ४
छन्दांसि यज्ञे मरुतः स्वाहा मातेव पुत्रं पिपृतेह युक्ताः ५
एयमगन् बर्हिषा प्रोक्षणीभिर्यज्ञं तन्वानादितिः स्वाहा ६
विष्णुर्युनक्तु बहुधा तपांस्यस्मिन् यज्ञे सुयुजः स्वाहा ७
त्वष्टा युनक्तु बहुधा नु रूपा अस्मिन् यज्ञे सुयुजः स्वाहा ८
भगो युनक्त्वाशिषो न्वस्मा अस्मिन् यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ९
सोमो युनक्तु बहुधा पयांस्यस्मिन् यज्ञे सुयुजः स्वाहा १०
इन्द्रो युनक्तु बहुधा वीर्याण्यस्मिन् यज्ञे सुयुजः स्वाहा ११
अश्विना ब्रह्मणा यातमर्वाञ्चौ वषट्कारेण यज्ञं वर्धयन्तौ ।
बृहस्पते ब्रह्मणा याह्यर्वाङ् यज्ञो अयं स्वरिदं यजमानाय स्वाहा १२ (३०६)

॥ इति पञ्चमोऽनुवाकः ॥५॥

(२७) अग्निः ।

१-१२ ब्रह्मा । अग्निः । १ बृहतीगर्भा त्रिष्टुप्, २ द्विपदा साम्नी भुरिगनुष्टुप्, ३ द्विपदार्ची बृहती, ४ द्विपदा साम्नी भुरिग्बृहती, ५ द्विपदा साम्नी त्रिष्टुप्, ६ द्विपदा विराण्नाम गायत्री, ७ द्विपदा साम्नी बृहती, ८ संस्तारपङ्क्तिः, ९ षट्पदानुष्टुब्गर्भा परातिजगती, १०-१२ पुरउष्णिक् (२-७ एकावसाना) ।

[६] ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः ।
द्युमत्तमा सुप्रतीकः ससूनुस्तनूनपादसुरो भूरिपाणिः १
देवो देवेषु देवः पथो अनक्ति मध्वा घृतेन २
मध्वा यज्ञं नक्षति प्रैणानो नराशंसो अग्निः सुकृद् देवः सविता विश्ववारः ३
अच्छायमेति शवसा घृता चिदीडानो वह्निर्नमसा ४
अग्निः स्रुचो अध्वरेषु प्रयक्षु स यक्षदस्य महिमानमग्नेः ५
तरी मन्द्रासु प्रयक्षु वसवश्चातिष्ठन् वसुधातरश्च ६
द्वारो देवीरन्वस्य विश्वे व्रतं रक्षन्ति विश्वहा ७
उरुव्यचसाग्नेर्धाम्ना पत्यमाने ।
आ सुष्वयन्ती यजते उपाके उषासानक्तेमं यज्ञमवतामध्वरं नः ८
दैवा होतार ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वयाभि गृणत गृणता नः स्विष्टये ।
तिस्रो देवीर्बर्हिरेदं सदन्तामिडा सरस्वती मही भारती गृणाना ९
तन्नस्तुरीपमद्भुतं पुरुक्षु । देव त्वष्टा रायस्पोषं वि ष्य नाभिमस्य १०
वनस्पतेऽव सृजा रराणः । त्मना देवेभ्यो अग्निर्हव्यं शमिता स्वदयतु ११
अग्ने स्वाहा कृणुहि जातवेदः । इन्द्राय यज्ञं विश्वे देवा हविरिदं जुषन्ताम् १२ (३१८)

(२८) दीर्घायुः ।

१-१४ अथर्वा । त्रिवृत्, अग्न्यादयः । त्रिष्टुप्, ६ पञ्चपदातिशक्वरी, ७, ९-१०, १२ ककुम्मत्यनुष्टुप्, १३ पुरउष्णिक् ।

नव प्राणान् नवभिः सं मिमीते दीर्घायुत्वाय शतशारदाय ।
हरिते त्रीणि रजते त्रीण्ययसि त्रीणि तपसाविष्ठितानि १
अग्निः सूर्यश्चन्द्रमा भूमिरापो द्यौरन्तरिक्षं प्रदिशो दिशश्च ।
आर्तवा ऋतुभिः संविदाना अनेन मा त्रिवृता पारयन्तु २
त्रयः पोषास्त्रिवृति श्रयन्तामनक्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम् ३ (३२१)

इममादित्या वसुना समुक्षतेममग्ने वर्धय वावृधानः ।
इममिन्द्र सं सृज वीर्येणास्मिन् त्रिवृच्छ्रयतां पोषयिष्णु ४
भूमिष्ट्वा पातु हरितेन विश्वभृदग्निः पिपर्त्वयसा सजोषाः ।
वीरुद्भिष्टे अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम् ५
त्रेधा जातं जन्मनेदं हिरण्यमग्नेरेकं प्रियतमं बभूव
सोमस्यैकं हिंसितस्य परापतत् ।
अपामेकं वेधसां रेत आहुस्तत् ते हिरण्यं त्रिवृदस्त्वायुषे ६
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेऽकरम् ७
त्रयः सुपर्णास्त्रिवृता यदायन्नेकाक्षरमभिसंभूय शक्राः ।
प्रत्यौहन् मृत्युममृतेन साकमन्तर्दधाना दुरितानि विश्वा ८
दिवस्त्वा पातु हरितं मध्यात् त्वा पात्वर्जुनम् ।
भूम्या अयस्मयं पातु प्रागाद् देवपुरा अयम् ९
इमास्तिस्रो देवपुरास्तास्त्वा रक्षन्तु सर्वतः ।
तास्त्वं बिभ्रद् वर्चस्व्युत्तरो द्विषतां भव १०
पुरं देवानाममृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणोम्यनु मन्यतां त्रिवृदाबधे मे ११
आ त्वा चृतत्वर्यमा पूषा बृहस्पतिः ।
अहर्जातस्य यन्नाम तेन त्वाति चृतामसि १२
ऋतुभिष्ट्वार्तवैरायुषे वर्चसे त्वा ।
संवत्सरस्य तेजसा तेन संहनु कृण्मसि १३
घृतादुल्लुप्तं मधुना समक्तं भूमिदृंहमच्युतं पारयिष्णु ।
भिन्दत् सपत्नानधरांश्च कृण्वदा मा रोह महते सौभगाय १४ (३३२)

(२९) रक्षोघ्नम् ।

१-१५ चातनः । जातवेदाः, मन्त्रोक्ताः । त्रिष्टुप्, ३ त्रिपदा विराण्नाम गायत्री, ५ पुरोऽतिजगती विराड्जगती, १२-१५ अनुष्टुप् (१२ भुरिक्, १४ चतुष्पदा पराबृहती ककुम्मती ।)

पुरस्ताद् युक्तो वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गामश्वं पुरुषं सनेम १ (३३३)

तथा तदग्ने कृणु जातवेदो विश्वेभिर्देवैः सह संविदानः ।
यो नो दिदेव यतमो जघास यथा सो अस्य परिधिष्पताति २
यथा सो अस्य परिधिष्पताति तथा तदग्ने कृणु जातवेदः ।
विश्वेभिर्देवैः सह संविदानः ३
अक्ष्यौ३ नि विध्य हृदयं नि विध्य जिह्वां नि तृन्द्धि प्र दतो मृणीहि ।
पिशाचो अस्य यतमो जघासाग्ने यविष्ठ प्रति तं शृणीहि ४
यदस्य हृतं विहृतं यत् पराभृतमात्मनो जग्धं यतमत् पिशाचैः ।
तदग्ने विद्वान् पुनरा भर त्वं शरीरे मांसमसुमेरयामः ५
आमे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ६
क्षीरे मा मन्थे यतमो ददम्भाकृष्टपच्ये अशने धान्ये३ यः ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ७
अपां मा पाने यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ८
दिवा मा नक्तं यतमो ददम्भ क्रव्याद् यातूनां शयने शयानम् ।
तदात्मना प्रजया पिशाचा वि यातयन्तामगदो३यमस्तु ९
क्रव्यादमग्ने रुधिरं पिशाचं मनोहनं जहि जातवेदः ।
तमिन्द्रो वाजी वज्रेण हन्तु छिनत्तु सोमः शिरो अस्य धृष्णुः १०
सनादग्ने मृणासि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
सहमूरानन्तु दह क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ११
समाहर जातवेदो यद्धृतं यत् पराभृतम् ।
गात्राण्यस्य वर्धन्तामंशुरिवा प्यायतामयम् १२
सोमस्येव जातवेदो अंशुरा प्यायतामयम् ।
अग्ने विरप्शिनं मेध्यमयक्ष्मं कृणु जीवतु १३
एतास्ते अग्ने समिधः पिशाचजम्भनीः ।
तास्त्वं जुषस्व प्रति चैना गृहाण जातवेदः १४
ताष्टार्चीरग्ने समिधः प्रति गृह्णाह्यर्चिषा ।
जहातु क्रव्याद् रूपं यो अस्य मांसं जिहीर्षति १५ (३४७)

(३०) दीर्घायुष्यम् ।

१-१७ उन्मोचनः (आयुष्कामः) । आयुष्यम् । अनुष्टुप्, १ पथ्यापङ्क्तिः, ९ भुरिक्, १२ चतुष्पदा विराड्जगती, १४ विराट्प्रस्तारपङ्क्तिः, १७ त्र्यवसाना षट्पदा जगती ।

आवतस्त आवतः परावतस्त आवतः ।
इहैव भव मा नु गा मा पूर्वाननु गाः पितॄनसुं बध्नामि ते दृढम् १
यत् त्वाभिचेरुः पुरुषः स्वो यदरणो जनः । उन्मोचनप्रमोचने उभे वाचा वदामि ते २
यद् दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या । उन्मोचनप्रमोचने उभे वाचा वदामि ते ३
यदेनसो मातृकृताच्छेषे पितृकृताच्च यत् । उन्मोचनप्रमोचने उभे वाचा वदामि ते ४
यत् ते माता यत् ते पिता जामिर्भ्राता च सर्जतः । प्रत्यक् सेवस्व भेषजं जरदष्टिं कृणोमि त्वा ५
इहैधि पुरुष सर्वेण मनसा सह । दूतौ यमस्य मानु गा अधि जीवपुरा इहि ६
अनुहूतः पुनरेहि विद्वानुदयनं पथः । आरोहणमाक्रमणं जीवतोजीवतोऽयनम् ७
मा बिभेर्न मरिष्यसि जरदष्टिं कृणोमि त्वा । निरवोचमहं यक्ष्ममङ्गेभ्यो अङ्गज्वरं तव ८
अङ्गभेदो अङ्गज्वरो यश्च ते हृदयामयः । यक्ष्मः श्येन इव प्रापप्तद् वाचा साढः परस्तराम् ९
ऋषी बोधप्रतीबोधावस्वप्नो यश्च जागृविः । तौ ते प्राणस्य गोप्तारौ दिवा नक्तं च जागृताम् १०
अयमग्निरुपसद्य इह सूर्य उदेतु ते । उदेहि मृत्योर्गम्भीरात् कृष्णाच्चित् तमसस्परि ११
नमो यमाय नमो अस्तु मृत्यवे नमः पितृभ्य उत ये नयन्ति ।
उत्पारणस्य यो वेद तमग्निं पुरो दधेऽस्मा अरिष्टतातये १२
ऐतु प्राण ऐतु मन ऐतु चक्षुरथो बलम् । शरीरमस्य सं विदां तत् पद्भ्यां प्रति तिष्ठतु १३
प्राणेनाग्ने चक्षुषा सं सृजेमं समीरय तन्वा३ सं बलेन ।
वेत्थामृतस्य मा नु गान्मा नु भूमिगृहो भुवत् १४
मा ते प्राण उप दसन्मो अपानोऽपि धायि ते । सूर्यस्त्वाधिपतिर्मृत्योरुदायच्छतु रश्मिभिः १५
इयमन्तर्वदति जिह्वा बद्धा पनिष्पदा । त्वया यक्ष्मं निरवोचं शतं रोपीश्च तक्मनः १६
अयं लोकः प्रियतमो देवानामपराजितः । यस्मै त्वमिह मृत्यवे दिष्टः पुरुष जज्ञिषे ।
स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः १७ (३६४)

(३१) कृत्यापरिहरणम् ।

१-१२ शुक्रः । कृत्यादूषणम् । अनुष्टुप्, ११ बृहतीगर्भा अनुष्टुप्, १२ पथ्याबृहती ।

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये ।
आमे मांसे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् १ (३६५)

यां ते चक्रुः कृकवाकावजे वा यां कुरीरिणि ।
अव्यां ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् २
यां ते चक्रुरेकशफे पशूनामुभयादति ।
गर्दभे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ३
यां ते चक्रुरमूलायां वलगं वा नराच्याम् ।
क्षेत्रे ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ४
यां ते चक्रुर्गार्हपत्ये पूर्वाग्नावुत दुश्चितः ।
शालायां कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ५
यां ते चक्रुः सभायां यां चक्रुरधिदेवने ।
अक्षेषु कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ६
यां ते चक्रुः सेनायां यां चक्रुरिष्वायुधे ।
दुन्दुभौ कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ७
यां ते कृत्यां कूपेऽवदधुः श्मशाने वा निचख्नुः ।
सद्मनि कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ८
यां ते चक्रुः पुरुषास्थे अग्नौ संकसुके च याम् ।
म्रोकं निर्दाहं क्रव्यादं पुनः प्रति हरामि ताम् ९
अपथेना जभारैणां तां पथेतः प्र हिण्मसि ।
अधीरो मर्याधीरेभ्यः सं जभाराचित्त्या १०
यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् ।
चकार भद्रमस्मभ्यमभगो भगवद्भ्यः ११
कृत्याकृतं वलगिनं मूलिनं शपथेय्यम् ।
इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया १२ (३७६)

[इति द्वादशः प्रपाठकः ॥१२॥]		॥ इति षष्ठोऽनुवाकः ॥६॥

॥ इति पञ्चमं काण्डं समाप्तम् ॥५॥

मन्त्रसंख्या—
चतुर्थकाण्डस्यान्तपर्यन्तं ९१४
पञ्चमकाण्डस्य... ३७६
सर्वयोगः १२९०

षष्ठं काण्डम् ।

(१) अमृतप्रदाता ।

१-३ अथर्वा । सविता । उष्णिक्, १ त्रिपदा पिपीलिकमध्या साम्नी जगती, २-३ पिपीलिकमध्या पुरउष्णिक् ।

[अथ त्रयोदशः प्रपाठकः ॥१३॥]

[१] दोषो गाय बृहद् गाय द्युमद् धेहि । आथर्वण स्तुहि देवं सवितारम् १
तमु ष्टुहि यो अन्तः सिन्धौ सूनुः । सत्यस्य युवानमद्रोघवाचं सुशेवम् २
स घा नो देवः सविता साविषदमृतानि भूरि । उभे सुष्टुती सुगातवे ३ (१)

(२) जेता इन्द्रः ।

१-३ अथर्वा । सोमः, वनस्पतिः । परोष्णिक् ।

इन्द्राय सोममृत्विजः सुनोता च धावत । स्तोतुर्यो वचः शृणवद्धवं च मे १
आ यं विशन्तीन्दवो वयो न वृक्षमन्धसः । विरप्शिन् वि मृधो जहि रक्षस्विनीः २
सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे । युवा जेतेशानः स पुरुष्टुतः ३ (४)

(३) आत्मगोपनम् ।

१-३ अथर्वा । १ इन्द्रापूषणौ, अदितिः, मरुतः, अपां नपात्, सिन्धवः, विष्णुः, द्यौः, २ द्यावापृथिवी, ग्रावा, सोमः, सरस्वती, अग्निः, ३ अश्विनौ, उषासानक्ता, अपां नपात्, त्वष्टा । जगती, १ पथ्याबृहती ।

पातं न इन्द्रापूषणादितिः पान्तु मरुतः ।
अपां नपात् सिन्धवः सप्त पातन पातु नो विष्णुरुत द्यौः १
पातां नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोमो नो अंहसः ।
पातु नो देवी सुभगा सरस्वती पात्वग्निः शिवा ये अस्य पायवः २
पातां नो देवाश्विना शुभस्पती उषासानक्तोत न उरुष्यताम् ।
अपां नपादभिह्रुती गयस्य चिद् देव त्वष्टर्वर्धय सर्वतातये ३ (९)

(४) आत्मगोपनम् ।

१-३ अथर्वा । १ त्वष्टा, पर्जन्यः, ब्रह्मणस्पतिः, अदितिः, २ अंशः, भगः, वरुणः, मित्रः, अर्यमा, अदितिः, मरुतः, ३ अश्विनौ, द्यौष्पिता । पथ्याबृहती, २ संस्तारपङ्क्तिः, ३ त्रिपदा विराड्गायत्री ।

त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रायमाणं सहः १
अंशो भगो वरुणो मित्रो अर्यमादितिः पान्तु मरुतः ।
अप तस्य द्वेषो गमेदभिह्रुतो यावयच्छत्रुमन्तितम् २
धिये समश्विना प्रावतं न उरुष्या ण उरुज्मन्नप्रयुच्छन् ।
द्यौष्पितर्यावय दुच्छुना या ३ (१२)

(५) वर्चःप्राप्तिः ।

१-३ अथर्वा । १ अग्निः, २ इन्द्रः, ३ अग्निः, सोमः, ब्रह्मणस्पतिः । अनुष्टुप्, २ भुरिक् ।

उदेनमुत्तरं नयाग्ने घृतेनाहुत । समेनं वर्चसा सृज प्रजया च बहुं कृधि १
इन्द्रेमं प्रतरं कृधि सजातानामसद् वशी । रायस्पोषेण सं सृज जीवातवे जरसे नय २
यस्य कृण्मो हविर्गृहे तमग्ने वर्धया त्वम् । तस्मै सोमो अधि ब्रवदयं च ब्रह्मणस्पतिः ३ (१५)

(६) शत्रुनाशनम् ।

१-३ अथर्वा । १ ब्रह्मणस्पतिः, २-३ सोमः । अनुष्टुप् ।

योऽस्मान् ब्रह्मणस्पतेऽदेवो अभिमन्यते । सर्वं तं रन्धयासि मे यजमानाय सुन्वते १
यो नः सोम सुशंसिनो दुःशंस आदिदेशति । वज्रेणास्य मुखे जहि स संपिष्टो अपायति २
यो नः सोमाभिदासति सनाभिर्यश्च निष्ट्यः । अप तस्य बलं तिर महीव द्यौर्वधत्मना ३ (१८)

(७) असुरक्षयणम् ।

१-३ अथर्वा । सोमः, अदितिः, ३ देवाः । गायत्री, १ निचृत् ।

येन सोमादितिः पथा मित्रा वा यन्त्यद्रुहः । तेना नोऽवसा गहि १
येन सोम साहन्त्यासुरान् रन्धयासि नः । तेना नो अधि वोचत २
येन देवा असुराणामोजांस्यवृणीध्वम् । तेना नः शर्म यच्छत ३ (२१)

(८) कामात्मा ।

१-३ जमदग्निः । कामात्मा, २ सुपर्णः, ३ द्यावापृथिवी, सूर्यः । पथ्यापङ्क्तिः ।

यथा वृक्षं लिबुजा समन्तं परिषस्वजे ।
एवा परि ष्वजस्व मां यथा मां कामिन्यसो यथा मन्नापगा असः १ (२२)

यथा सुपर्णः प्रपतन् पक्षौ निहन्ति भूम्याम् ।
एवा नि हन्मि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः २
यथेमे द्यावापृथिवी सद्यः पर्येति सूर्यः ।
एवा पर्येमि ते मनो यथा मां कामिन्यसो यथा मन्नापगा असः ३ (२४)

(९) कामात्मा ।

१-३ जमदग्निः । कामात्मा, ३ गावः । अनुष्टुप् ।

वाञ्छ मे तन्वं पादौ वाञ्छाक्ष्यौ वाञ्छ सक्थ्यौ ।
अक्ष्यौ वृषण्यन्त्याः केशा मां ते कामेन शुष्यन्तु १
मम त्वा दोषणिश्रिषं कृणोमि हृदयश्रिषम् । यथा मम क्रतावसो मम चित्तमुपायसि २
यासां नाभिरारेहणं हृदि संवननं कृतम् । गावो घृतस्य मातरोऽमूं सं वानयन्तु मे ३ (२७)

(१०) संप्रोक्षणम् ।

१-३ शन्तातिः । १ पृथिवी, श्रोत्रं, वनस्पतिः, अग्निः; २ प्राणः, अन्तरिक्षं, वयः, वायुः; ३ द्यौः, चक्षुः, नक्षत्राणि, सूर्यः । द्विपदम्, १ साम्नी त्रिष्टुप्, २ प्राजापत्या बृहती, ३ साम्नी बृहती ।

पृथिव्यै श्रोत्राय वनस्पतिभ्योऽग्नयेऽधिपतये स्वाहा १
प्राणायान्तरिक्षाय वयोभ्यो वायवेऽधिपतये स्वाहा २
दिवे चक्षुषे नक्षत्रेभ्यः सूर्यायाधिपतये स्वाहा ३ (३०)

॥ इति प्रथमोऽनुवाकः ॥१॥

(११) पुंसवनम् ।

१-३ प्रजापतिः । रेतः, ३ प्रजापतिः, अनुमतिः, सिनीवाली । अनुष्टुप् ।

[२] शमीमश्वत्थ आरूढस्तत्र पुंसुवनं कृतम् । तद् वै पुत्रस्य वेदनं तत् स्त्रीष्वा भरामसि १
पुंसि वै रेतो भवति तत् स्त्रियामनु षिच्यते । तद् वै पुत्रस्य वेदनं तत् प्रजापतिरब्रवीत् २
प्रजापतिरनुमतिः सिनीवाल्यचीक्लृपत् । स्त्रैषूयमन्यत्र दधत् पुमांसमु दधदिह ३ (३३)

(१२) सर्प-विष-निवारणम् ।

१-३ गरुत्मान् । तक्षकः । अनुष्टुप् ।

परि द्यामिव सूर्योऽहीनां जनिमागमम् । रात्री जगदिवान्यद्धंसात् तेना ते वारये विषम् १
यद् ब्रह्मभिर्यदृषिभिर्यद् देवैर्विदितं पुरा । यद् भूतं भव्यमासन्वत् तेना ते वारये विषम् २
मध्वा पृञ्चे नद्यः पर्वता गिरयो मधु । मधु परुष्णी शीपाला शमास्ने अस्तु शं हृदे ३ (३६)

(१३) मृत्युजयः ।

१-३ अथर्वा (स्वस्त्ययनकामः) । मृत्युः । अनुष्टुप् ।

नमो देववधेभ्यो नमो राजवधेभ्यः । अथो ये विश्यानां वधास्तेभ्यो मृत्यो नमोऽस्तु ते १
नमस्ते अधिवाकाय परावाकाय ते नमः । सुमत्यै मृत्यो ते नमो दुर्मत्यै त इदं नमः २
नमस्ते यातुधानेभ्यो नमस्ते भेषजेभ्यः । नमस्ते मृत्यो मूलेभ्यो ब्राह्मणेभ्य इदं नमः ३ (३९)

(१४) बलासनाशनम् ।

१-३ बभ्रुपिङ्गलः । बलासः । अनुष्टुप् ।

अस्थिस्रंसं परुस्रंसमास्थितं हृदयामयम् । बलासं सर्वं नाशयाङ्गेष्ठा यश्च पर्वसु १
निर्बलासं बलासिनः क्षिणोमि मुष्करं यथा । छिनद्म्यस्य बन्धनं मूलमुर्वार्वा इव २
निर्बलासेतः प्र पताशुङ्गः शिशुको यथा । अथो इट इव हायनोप द्राह्यवीरहा ३ (४२)

(१५) शत्रुनिवारणम् ।

१-३ उद्दालकः । वनस्पतिः । अनुष्टुप् ।

उत्तमो अस्योषधीनां तव वृक्षा उपस्तयः । उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति १
सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति । तेषां सा वृक्षाणामिवाहं भूयासमुत्तमः २
यथा सोम ओषधीनामुत्तमो हविषां कृतः । तलाशा वृक्षाणामिवाहं भूयासमुत्तमः ३ (४५)

(१६) अक्षिरोगभैषजम् ।

१-४ शौनकः । चन्द्रमाः, मन्त्रोक्तदेवताः । अनुष्टुप्, १ निचृत्त्रिपदा गायत्री, ३ बृहतीगर्भा ककुम्मत्यनुष्टुप्, ४ त्रिपदा प्रतिष्ठा ।

आबयो अनाबयो रसस्त उग्र आबयो । आ ते करम्भमद्मसि १
विहल्हो नाम ते पिता मदावती नाम ते माता । स हिन त्वमसि यस्त्वमात्मानमावयः २
तौविलिकेऽवेलयावायमैलब ऐलयीत् । बभ्रुश्च बभ्रुकर्णश्चापेहि निराल ३
अलसालासि पूर्वा सिलाञ्जालास्युत्तरा । नीलागलसाला ४ (४९)

(१७) गर्भदृंहणम् ।

१-४ अथर्वा । गर्भदृंहणम्, पृथिवी । अनुष्टुप् ।

यथेयं पृथिवी मही भूतानां गर्भमादधे । एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे १
यथेयं पृथिवी मही दाधारेमान् वनस्पतीन् । एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे २
यथेयं पृथिवी मही दाधार पर्वतान् गिरीन् । एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ३ (५२)

यथेयं पृथिवी मही दाधार विष्ठितं जगत् । एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ४ (५३)

(१८) ईर्ष्याविनाशनम् ।

१-३ अथर्वा । ईर्ष्याविनाशनम् । अनुष्टुप् ।

ईर्ष्याया ध्राजिं प्रथमां प्रथमस्या उतापराम् । अग्निं हृदय्यं शोकं तं ते निर्वापयामसि १
यथा भूमिर्मृतमना मृतान्मृतमनस्तरा । यथोत मम्रुषो मन एवेर्ष्योर्मृतं मनः २
अदो यत् ते हृदि श्रितं मनस्कं पतयिष्णुकम् । ततस्त ईर्ष्यां मुञ्चामि निरूष्माणं दृतेरिव ३ (५६)

(१९) पावमानम् ।

१-३ शन्तातिः । चन्द्रमाः, १ देवजनाः, मनवः, विश्वा भूतानि, पवमानः, २ पवमानः, ३ सविता । गायत्री, १ अनुष्टुप् ।

पुनन्तु मा देवजनाः पुनन्तु मनवो धिया । पुनन्तु विश्वा भूतानि पवमानः पुनातु मा १
पवमानः पुनातु मा क्रत्वे दक्षाय जीवसे । अथो अरिष्टतातये २
उभाभ्यां देव सवितः पवित्रेण सवेन च । अस्मान् पुनीहि चक्षसे ३ (५९)

(२०) यक्ष्मनाशनम् ।

१-३ भृग्वङ्गिराः । यक्ष्मनाशनम् । १ अतिजगती, २ ककुम्मतीप्रस्तारपङ्क्तिः, ३ सतः पङ्क्तिः ।

अग्नेरिवास्य दहत एति शुष्मिण उतेव मत्तो विलपन्नपायति ।
अन्यमस्मदिच्छतु कं चिदव्रतस्तपुर्वधाय नमो अस्तु तक्मने १
नमो रुद्राय नमो अस्तु तक्मने नमो राज्ञे वरुणाय त्विषीमते ।
नमो दिवे नमः पृथिव्यै नम ओषधीभ्यः २
अयं यो अभिशोचयिष्णुर्विश्वा रूपाणि हरिता कृणोषि ।
तस्मै तेऽरुणाय बभ्रवे नमः कृणोमि वन्याय तक्मने ३ (६२)

॥ इति द्वितीयोऽनुवाकः ॥२॥

(२१) केशवर्धनी औषधिः ।

१-३ शन्तातिः । चन्द्रमाः । अनुष्टुप् ।

[३] इमा यास्तिस्रः पृथिवीस्तासां ह भूमिरुत्तमा । तासामधि त्वचो अहं भेषजं समु जग्रभम् १
श्रेष्ठमसि भेषजानां वसिष्ठं वीरुधानाम् । सोमो भग इव यामेषु देवेषु वरुणो यथा २
रेवतीरनाधृषः सिषासवः सिषासथ । उत स्थ केशदृंहणीरथो ह केशवर्धनीः ३ (६५)

(२२) भैषज्यम् ।

१-३ शन्तातिः । १ आदित्यरश्मिः, २-३ मरुतः । त्रिष्टुप्, २ चतुष्पदा भुरिग्जगती ।

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत् पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद् घृतेन पृथिवीं व्यूदुः १
पयस्वतीः कृणुथाप ओषधीः शिवा यदेजथा मरुतो रुक्मवक्षसः ।
ऊर्जं च तत्र सुमतिं च पिन्वत यत्रा नरो मरुतः सिञ्चथा मधु २
उदप्रुतो मरुतस्ताँ इयर्त वृष्टिर्या विश्वा निवतस्पृणाति ।
एजाति ग्लहा कन्येव तुन्नैरुं तुन्दाना पत्येव जाया ३ (६८)

(२३) अपां भैषज्यम् ।

१-३ शन्तातिः । आपः । १ अनुष्टुप्, २ त्रिपदा गायत्री, ३ परोष्णिक् ।

सस्रुषीस्तदपसो दिवा नक्तं च सस्रुषीः । वरेण्यक्रतुरहमपो देवीरुप ह्वये १
ओता आपः कर्मण्या मुञ्चन्त्वितः प्रणीतये । सद्यः कृण्वन्त्वेतवे २
देवस्य सवितुः सवे कर्म कृण्वन्तु मानुषाः । शं नो भवन्त्वप ओषधीः शिवाः ३ (७१)

(२४) अपां भैषज्यम् ।

१-३ शन्तातिः । आपः । अनुष्टुप् ।

हिमवतः प्र स्रवन्ति सिन्धौ समह संगमः ।
आपो ह मह्यं तद् देवीर्ददन् हृद्द्योतभेषजम् १
यन्मे अक्ष्योरादिद्योत पार्ष्ण्योः प्रपदोश्च यत् ।
आपस्तत् सर्वं निष्करन् भिषजां सुभिषक्तमाः २
सिन्धुपत्नीः सिन्धुराज्ञीः सर्वा या नद्य स्थन ।
दत्त नस्तस्य भेषजं तेना वो भुनजामहे ३ (७४)

(२५) मन्याविनाशनम् ।

१-३ शुनःशेपः । मन्याविनाशनम् । अनुष्टुप् ।

पञ्च च याः पञ्चाशच्च संयन्ति मन्या अभि ।
इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव १
सप्त च याः सप्ततिश्च संयन्ति ग्रैव्या अभि ।
इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव २ (७६)

नव च या नवतिश्च संयन्ति स्कन्ध्या अभि ।
इतस्ताः सर्वा नश्यन्तु वाका अपचितामिव ३ (७७)

(२६) पाप्मनाशनम् ।

१-३ ब्रह्मा । पाप्मा । अनुष्टुप् ।

अव मा पाप्मन्त्सृज वशी सन् मृडयासि नः ।
आ मा भद्रस्य लोके पाप्मन् धेह्यविह्रुतम् १
यो नः पाप्मन् न जहासि तमु त्वा जहिमो वयम् ।
पथामनु व्यावर्तनेऽन्यं पाप्मानु पद्यताम् २
अन्यत्रास्मन्न्युच्यतु सहस्राक्षो अमर्त्यः ।
यं द्वेषाम तमृच्छतु यमु द्विष्मस्तमिज्जहि ३ (८०)

(२७) अरिष्टक्षयणम् ।

१-३ भृगुः । यमः, निर्ऋतिः । जगती, २ त्रिष्टुप् ।

देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे १
शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहं नः ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु २
हेतिः पक्षिणी न दभात्यस्मानाष्ट्री पदं कृणुते अग्निधाने ।
शिवो गोभ्य उत पुरुषेभ्यो नो अस्तु मा नो देवा इह हिंसीत् कपोतः ३ (८३)

(२८) अरिष्टक्षयणम् ।

१-३ भृगुः । यमः, निर्ऋतिः । १ त्रिष्टुप्, २ अनुष्टुप्, ३ जगती ।

ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयामः ।
संलोभयन्तो दुरिता पदानि हित्वा न ऊर्जं प्र पदात् पथिष्ठः १
परीमेऽग्निमर्षत परीमे गामनेषत ।
देवेष्वक्रत श्रवः क इमाँ आ दधर्षति २
यः प्रथमः प्रवतमाससाद बहुभ्यः पन्थामनुपस्पशानः ।
योऽस्येशे द्विपदो यश्चतुष्पदस्तस्मै यमाय नमो अस्तु मृत्यवे ३ (८६)

(२९) अरिष्टक्षयणम् ।

१-३ भृगुः । यमः, निर्ऋतिः । (बृहती) १-२ विराण्नाम गायत्री, ३ त्र्यवसाना सप्तपदा विराडष्टिः ।

अमून् हेतिः पतत्रिणी न्येतु यदुलूको वदति मोघमेतत् । यद् वा कपोतः पदमग्नौ कृणोति 1
यौ ते दूतौ निर्ऋत इदमेतोऽप्रहितौ प्रहितौ वा गृहं नः । कपोतोलूकाभ्यामपदं तदस्तु । 2
अवैरहत्यायेदमा पपत्यात् सुवीरतया इदमा ससद्यात् । पराङेव परा वद पराचीमनु संवतम् ।
यथा यमस्य त्वा गृहेऽरसं प्रतिचाकशानाभूकं प्रतिचाकशान् ३ (८९)

(३०) पापशमनम् ।

१-३ उपरिबभ्रवः । शमी । जगती, २ त्रिष्टुप्, ३ चतुष्पाच्छंकुमत्यनुष्टुप् ।

देवा इमं मधुना संयुतं यवं सरस्वत्यामधि मणावचर्कृषुः ।
इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन् मरुतः सुदानवः 1
यस्ते मदोऽवकेशो विकेशो येनाभिहस्यं पुरुषं कृणोषि ।
आरात् त्वदन्या वनानि वृक्षि त्वं शमि शतवल्शा वि रोह 2
बृहत्पलाशे सुभगे वर्षवृद्ध ऋतावरि ।
मातेव पुत्रेभ्यो मृड केशेभ्यः शमि ३ (९१)

(३१) गौः ।

१-३ उपरिबभ्रवः । गौः । गायत्री ।

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः 1
अन्तश्चरति रोचना अस्य प्राणादपानतः । व्यख्यन्महिषः स्वः 2
त्रिंशद् धामा वि राजति वाक् पतङ्गो अशिश्रियत् । प्रति वस्तोरहर्द्युभिः ३ (९५)

॥ इति तृतीयोऽनुवाकः ॥३॥

(३२) यातुधानक्षयणम् ।

(१-३) १-२ चातनः, ३ अथर्वा । १ अग्निः, २ रुद्रः, ३ मित्रावरुणौ । त्रिष्टुप्, २ प्रस्तारपङ्क्तिः ।

[४] अन्तर्दावे जुहुता स्वेतद् यातुधानक्षयणं घृतेन ।
आराद् रक्षांसि प्रति दह त्वमग्ने न नो गृहाणामुप तीतपासि 1
रुद्रो वो ग्रीवा अशरैत् पिशाचाः पृष्टीर्वोऽपि शृणातु यातुधानाः ।
वीरुद् वो विश्वतोवीर्या यमेन समजीगमत् । 2
अभयं मित्रावरुणाविहास्तु नोऽर्चिषात्त्रिणो नुदतं प्रतीचः ।
मा ज्ञातारं मा प्रतिष्ठां विदन्त मिथो विघ्नाना उप यन्तु मृत्युम् ३ (९८)

(३३) इन्द्रस्तवः ।

१-३ जाटिकायनः । इन्द्रः । गायत्री, २ अनुष्टुप् ।

यस्येदमा रजो युजस्तुजे जना वनं स्वः । इन्द्रस्य रन्त्यं बृहत् 1
नाधृष आ दधृषते धृषाणो धृषितः शवः । पुरा यथा व्यथिः श्रव इन्द्रस्य नाधृषे शवः 2
स नो ददातु तां रयिमुरुं पिशङ्गसंदृशम् । इन्द्रः पतिस्तुविष्टमो जनेष्वा ३ (१०१)

(३४) शत्रुनाशनम् ।

१-५ चातनः । अग्निः । गायत्री ।

प्राग्नये वाचमीरय वृषभाय क्षितीनाम् । स नः पर्षदति द्विषः 1
यो रक्षांसि निजूर्वत्यग्निस्तिग्मेन शोचिषा । स नः पर्षदति द्विषः 2
यः परस्याः परावतस्तिरो धन्वातिरोचते । स नः पर्षदति द्विषः 3
यो विश्वाभि विपश्यति भुवना सं च पश्यति । स नः पर्षदति द्विषः 4
यो अस्य पारे रजसः शुक्रो अग्निरजायत । स नः पर्षदति द्विषः ५ (१०६)

(३५) वैश्वानरः ।

१-३ कौशिकः । वैश्वानरः । गायत्री ।

वैश्वानरो न ऊतय आ प्र यातु परावतः । अग्निर्नः सुष्टुतीरुप 1
वैश्वानरो न आगमदिमं यज्ञं सजूरुप । अग्निरुक्थेष्वंहसु 2
वैश्वानरोऽङ्गिरसां स्तोममुक्थं च चाक्लृपत् । ऐषु द्युम्नं स्वर्यमत् ३ (१०९)

(३६) वैश्वानरः ।

१-३ अथर्वा (स्वस्त्ययनकामः) । अग्निः । गायत्री ।

ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् । अजस्रं घर्ममीमहे 1
स विश्वा प्रति चाक्लृप ऋतूंरुत् सृजते वशी । यज्ञस्य वय उत्तिरन् 2
अग्निः परेषु धामसु कामो भूतस्य भव्यस्य । सम्राडेको वि राजति ३ (११२)

(३७) शापनाशनम् ।

१-३ अथर्वा (स्वस्त्ययनकामः) । चन्द्रमाः । अनुष्टुप् ।

उप प्रागात् सहस्राक्षो युक्त्वा शपथो रथम् ।
शप्तारमन्विच्छन् मम वृक इवाविमतो गृहम् १ (११३)

परि णो वृङ्धि शपथ ह्रदमग्निरिवा दहन् ।
शप्तारमत्र नो जहि दिवो वृक्षमिवाशनिः 2
यो नः शपादशपतः शपतो यश्च नः शपात् ।
शुने पेष्ट्रमिवावक्षामं तं प्रत्यस्यामि मृत्यवे ३ (११५)

(३८) वर्चस्यम् ।

१-४ अथर्वा (वर्चस्कामः) । त्विषिः, (बृहस्पतिः) । त्रिष्टुप् ।

सिंहे व्याघ्र उत या पृदाकौ त्विषिरग्नौ ब्राह्मणे सूर्ये या ।
इन्द्रं या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना 1
या हस्तिनि द्वीपिनि या हिरण्ये त्विषिरप्सु गोषु या पुरुषेषु ।
इन्द्रं या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना 2
रथे अक्षेष्वृषभस्य वाजे वाते पर्जन्ये वरुणस्य शुष्मे ।
इन्द्रं या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना 3
राजन्ये दुन्दुभावायतायामश्वस्य वाजे पुरुषस्य मायौ ।
इन्द्रं या देवी सुभगा जजान सा न ऐतु वर्चसा संविदाना ४ (११९)

(३९) वर्चस्यम् ।

१-३ अथर्वा (वर्चस्कामः) । (बृहस्पतिः), २ इन्द्रः, ३ इन्द्रः, अग्निः, सोमः । १ जगती,
२ त्रिष्टुप्, ३ अनुष्टुप् ।

यशो हविर्वर्धतामिन्द्रजूतं सहस्रवीर्यं सुभृतं सहस्कृतम् ।
प्रसर्स्राणमनु दीर्घाय चक्षसे हविष्मन्तं मा वर्धय ज्येष्ठतातये 1
अच्छा न इन्द्रं यशसं यशोभिर्यशस्विनं नमसाना विधेम ।
स नो रास्व राष्ट्रमिन्द्रजूतं तस्य ते रातौ यशसः स्याम 2
यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः ३ (१२२)

(४०) अभयम् ।

१-३ अथर्वा । १ द्यावापृथिवी, सोमः, सविता, अन्तरिक्षं, सप्तऋषयः; २ सविता, इन्द्रः;
३ इन्द्रः । १-२ जगती, ३ अनुष्टुप् ।

अभयं द्यावापृथिवी इहास्तु नोऽभयं सोमः सविता नः कृणोतु ।
अभयं नोऽस्तूर्वन्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु १ (१२३)

अस्मै ग्रामाय प्रदिशश्चतस्र ऊर्जं सुभूतं स्वस्ति सविता नः कृणोतु ।
अशत्र्विन्द्रो अभयं नः कृणोत्वन्यत्र राज्ञामभि यातु मन्युः 2
अनमित्रं नो अधरादनमित्रं न उत्तरात् ।
इन्द्रानमित्रं नः पश्चादनमित्रं पुरस्कृधि ३ (१२५)

(४१) दीर्घायुःप्राप्तिः ।

१-३ ब्रह्मा । १ चन्द्रमाः, २ सरस्वती, ३ दैव्या ऋषयः । १ भुरिक्, २ अनुष्टुप् ३ त्रिष्टुप् ।

मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् 1
अपानाय व्यानाय प्राणाय भूरिधायसे ।
सरस्वत्या उरुव्यचे विधेम हविषा वयम् 2
मा नो हासिषुर्ऋषयो दैव्या ये तनूपा ये नस्तन्वस्तनूजाः ।
अमर्त्या मर्त्यां अभि नः सचध्वमायुर्धत्त प्रतरं जीवसे नः ३ (१२८)

॥ इति चतुर्थोऽनुवाकः ॥४॥

(४२) परस्परचित्तैकीकरणम् ।

१-३ भृग्वङ्गिराः (परस्परचित्तैकीकरणकामः) । मन्युः । १-२ भुरिक्, ३ अनुष्टुप् ।

[५] अव ज्यामिव धन्वनो मन्युं तनोमि ते हृदः ।
यथा संमनसौ भूत्वा सखायाविव सचावहै 1
सखायाविव सचावहा अव मन्युं तनोमि ते ।
अधस्ते अश्मनो मन्युमुपास्यामसि यो गुरुः 2
अभि तिष्ठामि ते मन्युं पार्ष्ण्या प्रपदेन च ।
यथावशो न वादिषो मम चित्तमुपायसि ३ (१३१)

(४३) मन्युशमनम् ।

१-३ भृग्वङ्गिराः (परस्परचित्तैकीकरणकामः) । मन्युशमनम् । अनुष्टुप् ।

अयं दर्भो विमन्युकः स्वाय चारणाय च ।
मन्योर्विमन्युकस्यायं मन्युशमन उच्यते 1
अयं यो भूरिमूलः समुद्रमवतिष्ठति ।
दर्भः पृथिव्या उत्थितो मन्युशमन उच्यते 2
वि ते हनव्यां शरणिं वि ते मुख्यं नयामसि ।
यथावशो न वादिषो मम चित्तमुपायसि ३ (१३४)

(४४) रोगनाशनम् ।

१-३ विश्वामित्रः । वनस्पतिः । अनुष्टुप्, ३ त्रिपदा महाबृहती ।

अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।
अस्थुर्वृक्षा ऊर्ध्वस्वप्नास्तिष्ठाद् रोगो अयं तव   १
शतं या भेषजानि ते सहस्रं संगतानि च ।
श्रेष्ठमास्रावभेषजं वसिष्ठं रोगनाशनम्   २
रुद्रस्य मूत्रमस्यमृतस्य नाभिः ।
विषाणका नाम वा असि पितॄणां मूलादुत्थिता वातीकृतनाशनी   ३   (१३७)

(४५) दुःष्वप्ननाशनम् ।

१-३ अङ्गिराः प्रचेता, यमश्च । दुःष्वप्ननाशनम् । १ पथ्यापङ्क्तिः, २ भुरिक् त्रिष्टुप्, ३ अनुष्टुप् ।

परोऽपेहि मनस्पाप किमशस्तानि शंससि ।
परेहि न त्वा कामये वृक्षां वनानि सं चर गृहेषु गोषु मे मनः   १
अवशसा निःशसा यत् पराशसोपारिम जाग्रतो यत् स्वपन्तः ।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद् दधातु   २
यदिन्द्र ब्रह्मणस्पतेऽपि मृषा चरामसि ।
प्रचेता न आङ्गिरसो दुरितात् पात्वंहसः   ३   (१४०)

(४६) दुःष्वप्ननाशनम् ।

१-३ अङ्गिराः प्रचेता यमश्च । दुःष्वप्ननाशनम् । १ विष्टारपङ्क्तिः, २ त्र्यवसाना शक्करीगर्भा पञ्चपदा जगती, ३ अनुष्टुप् ।

यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न ।
वरुणानी ते माता यमः पितारुरुर्नामासि   १
विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि मृत्युरसि ।
तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुष्वप्न्यात् पाहि   २
यथा कलां यथा शफं यथर्णं संनयन्ति ।
एवा दुष्वप्न्यं सर्वं द्विषते सं नयामसि   ३   (१४३)

(४७) दीर्घायुःप्राप्तिः ।

१-३ अङ्गिराः प्रचेताः । १ अग्निः, २ विश्वे देवाः, ३ सुधन्वा । त्रिष्टुप् ।

अग्निः प्रातःसवने पात्वस्मान् वैश्वानरो विश्वकृद् विश्वशंभूः ।
स नः पावको द्रविणे दधात्वायुष्मन्तः सहभक्षाः स्याम   १
विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः ।
आयुष्मन्तः प्रियमेषां वदन्तो वयं देवानां सुमतौ स्याम   २
इदं तृतीयं सवनं कवीनामृतेन ये चमसमैरयन्त ।
ते सौधन्वनाः स्वरानशानाः स्विष्टिं नो अभि वस्यो नयन्तु   ३ (१४६)

(४८) स्वस्तिवाचनम् ।

१-३ अङ्गिराः, प्रचेताः । १ श्येनः, २ ऋभुः, ३ वृषा । उष्णिक् ।

श्येनोऽसि गायत्रच्छन्दा अनु त्वा रभे । स्वस्ति मा सं वहास्य यज्ञस्योदृचि स्वाहा १
ऋभुरसि जगच्छन्दा अनु त्वा रभे । स्वस्ति मा सं वहास्य यज्ञस्योदृचि स्वाहा   २
वृषासि त्रिष्टुप्छन्दा अनु त्वा रभे । स्वस्ति मा सं वहास्य यज्ञस्योदृचि स्वाहा   ३ (१४९)

(४९) अग्निस्तवः ।

१-३ गार्ग्यः । अग्निः । १ अनुष्टुप्, २ जगती, ३ विराड्जगती ।

नहि ते अग्ने तन्वः क्रूरमानंश मर्त्यः ।
कपिर्बभस्ति तेजनं स्वं जरायु गौरिव   १
मेष इव वै सं च वि चोर्वच्यसे यदुत्तरद्रावुपरश्च खादतः ।
शीर्ष्णा शिरोऽप्ससाप्सो अर्दयन्नंशून् बभस्ति हरितेभिरासभिः   २
सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
नि यन्नियन्त्युपरस्य निष्कृतिं पुरू रेतो दधिरे सूर्यश्रितः   ३ (१५२)

(५०) अभययाचना ।

१-३ अथर्वा (अभयकामः) । अश्विनौ । १ विराड्जगती, २-३ पथ्यापङ्क्तिः ।

हतं तर्दं समङ्कमाखुमश्विना छिन्तं शिरो अपि पृष्टीः शृणीतम् ।
यवान्नेददानपि नह्यतं मुखमथाभयं कृणुतं धान्याय   १ (१५३)

तर्द है पतङ्ग है जभ्य हा उपक्वस ।
ब्रह्मेवासंस्थितं हविरनदन्त इमान् यवानहिंसन्तो अपोदित   २
तर्दापते वघापते तृष्टजम्भा आ शृणोत मे ।
य आरण्या व्यद्वरा ये के च स्थ व्यद्वरास्तान्त्सर्वान् जम्भयामसि   ३   (१५५)

(५१) एनोनाशनम् ।

१-३ शन्तातिः । आपः, ३ वरुणः । १ गायत्री, २ त्रिष्टुप्, ३ जगती ।

वायोः पूतः पवित्रेण प्रत्यङ् सोमो अति द्रुतः ।
इन्द्रस्य युज्यः सखा   १
आपो अस्मान् मातरः सूदयन्तु घृतेन नो घृतप्वः पुनन्तु ।
विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि   २
यत् किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरन्ति ।
अचित्त्या चेत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः   ३   (१५८)

॥ इति पञ्चमोऽनुवाकः ॥५॥

[इति त्रयोदशः प्रपाठकः ॥१३॥]

(५२) भैषज्यम् ।

१-३ भागलिः । १ सूर्यः, २ गावः, ३ भेषजम् । अनुष्टुप् ।

[अथ चतुर्दशः प्रपाठकः ॥१४॥]

उत् सूर्यो दिव एति पुरो रक्षांसि निजूर्वन् । आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा   १
[६] नि गावो गोष्ठे असदन् नि मृगासो अविक्षत । न्यूर्मयो नदीनां न्यदृष्टा अलिप्सत   २
आयुर्ददं विपश्चितं श्रुतां कण्वस्य वीरुधम् । आभारिषं विश्वभेषजीमस्यादृष्टान् नि शमयत् ३
(१६१)

(५३) सर्वतो रक्षणम् ।

१-३ बृहच्छुक्रः । १ द्यौः, पृथिवी, शुक्रः, सोमः, अग्निः, वायुः, सविता, १ भगः, २ वैश्वानरः, ३ त्वष्टा । त्रिष्टुप्, १ जगती ।

द्यौश्च म इदं पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणया पिपर्तु ।
अनु स्वधा चिकितां सोमो अग्निर्वायुर्नः पातु सविता भगश्च   १
पुनः प्राणः पुनरात्मा न ऐतु पुनश्चक्षुः पुनरसुर्न ऐतु ।
वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा   २   (१६३)

सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं शिवेन ।
त्वष्टा नो अत्र वरीयः कृणोत्वनु नो मार्ष्टु तन्वो यद् विरिष्टम्   ३   (१६४)

(५४) अमित्रदम्भनम् ।

१-३ ब्रह्मा । अग्नीषोमौ । अनुष्टुप् ।

इदं तद् युज उत्तरमिन्द्रं शुम्भाम्यष्टये । अस्य क्षत्रं श्रियं महीं वृष्टिरिव वर्धया तृणम् १
अस्मै क्षत्रमग्नीषोमावस्मै धारयतं रयिम् । इमं राष्ट्रस्याभीवर्गे कृणुतं युज उत्तरम्   २
सबन्धुश्चासबन्धुश्च यो अस्माँ अभिदासति । सर्वं तं रन्धयासि मे यजमानाय सुन्वते ३(१६७)

(५५) सौमनस्यम् ।

१-३ ब्रह्मा । १ विश्वे देवाः, २-३ रुद्रः । जगती, २ त्रिष्टुप् ।

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।
तेषामज्यानिं यतमो वहाति तस्मै मा देवाः परि धत्तेह सर्वे   १
ग्रीष्मो हेमन्तः शिशिरो वसन्तः शरद् वर्षाः स्विते नो दधात ।
आ नो गोषु भजता प्रजायां निवात इद् वः शरणे स्याम   २
इदावत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम   ३   (१७०)

(५६) सर्पेभ्यो रक्षणम् ।

१-३ शन्तातिः । १ विश्वे देवाः, २-३ रुद्रः । १ उष्णिग्गर्भा पथ्यापङ्क्तिः, २ अनुष्टुप्, ३ निचृत् ।

मा नो देवा अहिर्वधीत् सतोकान्त्सहपूरुषान् ।
संयतं न वि ष्परद् व्यात्तं न सं यमन्नमो देवजनेभ्यः   १
नमोऽस्त्वसिताय नमस्तिरश्चिराजये ।
स्वजाय बभ्रवे नमो नमो देवजनेभ्यः   २
सं ते हन्मि दता दतः समु ते हन्वा हनू ।
सं ते जिह्वया जिह्वां सम्वास्नाह आस्यम्   ३   (१७३)

(५७) जलचिकित्सा ।

१-३ शन्तातिः । रुद्रः । १-२ अनुष्टुप्, ३ पथ्याबृहती ।

इदमिद् वा उ भेषजमिदं रुद्रस्य भेषजम् ।
येनेषुमेकतेजनां शतशल्यामपब्रवत्   १   (१७४)

जालाषेणाभि षिञ्चत जालाषेणोप सिञ्चत ।
जालाषमुग्रं भेषजं तेन नो मृड जीवसे २
शं च नो मयश्च नो मा च नः किं चनाममत् ।
क्षमा रपो विश्वं नो अस्तु भेषजं सर्वं नो अस्तु भेषजम् ३ (१७६)

(५८) यशःप्राप्तिः ।

१-३ अथर्वा (यशस्कामः) । बृहस्पतिः, १-२ इन्द्रः, द्यावापृथिवी, सविता; ३ अग्निः, इन्द्रः, सोमः ।
१ जगती, २ प्रस्तारपङ्क्तिः, ३ अनुष्टुप् ।

यशसं मेन्द्रो मघवान् कृणोतु यशसं द्यावापृथिवी उभे इमे ।
यशसं मा देवः सविता कृणोतु प्रियो दातुर्दक्षिणाया इह स्याम् १
यथेन्द्रो द्यावापृथिव्योर्यशस्वान् यथाप ओषधीषु यशस्वतीः ।
एवा विश्वेषु देवेषु वयं सर्वेषु यशसः स्याम २
यशा इन्द्रो यशा अग्निर्यशाः सोमो अजायत ।
यशा विश्वस्य भूतस्याहमस्मि यशस्तमः ३ (१७९)

(५९) ओषधिः ।

१-३ अथर्वा । रुद्रः, अरुन्धती ओषधिः । अनुष्टुप् ।

अनडुद्भ्यस्त्वं प्रथमं धेनुभ्यस्त्वमरुन्धति ।
अधेनवे वयसे शर्म यच्छ चतुष्पदे १
शर्म यच्छत्वोषधिः सह देवीररुन्धती ।
करत् पयस्वन्तं गोष्ठमयक्ष्माँ उत पूरुषान् २
विश्वरूपां सुभगामच्छावदामि जीवलाम् ।
सा नो रुद्रस्यास्तां हेतिं दूरं नयतु गोभ्यः ३ (१८२)

(६०) पतिलाभः ।

१-३ अथर्वा । अर्यमा । अनुष्टुप् ।

अयमा यात्यर्यमा पुरस्ताद् विषितस्तुपः ।
अस्या इच्छन्नग्रुवै पतिमुत जायामजानये १
अश्रमदियमर्यमन्नन्यासां समनं यती ।
अङ्गो न्वर्यमन्नस्या अन्याः समनमायति २
धाता दाधार पृथिवीं धाता द्यामुत सूर्यम् ।
धातास्या अग्रुवै पतिं दधातु प्रतिकाम्यम् ३ (१८५)

(६१) विश्वस्रष्टा ।

१-३ अथर्वा । रुद्रः । १ त्रिष्टुप्, २-३ भुरिक् ।

मह्यमापो मधुमदेरयन्तां मह्यं सूरो अभरज्ज्योतिषे कम् ।
मह्यं देवा उत विश्वे तपोजा मह्यं देवः सविता व्यचो धात् १
अहं विवेच पृथिवीमुत द्यामहमृतूँरजनयं सप्त साकम् ।
अहं सत्यमनृतं यद् वदाम्यहं दैवीं परि वाचं विशश्च २
अहं जजान पृथिवीमुत द्यामहमृतूँरजनयं सप्त सिन्धून् ।
अहं सत्यमनृतं यद् वदामि यो अग्नीषोमावजुषे सखाया ३ (१८८)

॥ इति षष्ठोऽनुवाकः ॥६॥

(६२) पावमानम् ।

१-३ अथर्वा । रुद्रः, वैश्वानरः, वातः, द्यावापृथिवी । त्रिष्टुप् ।

[७] वैश्वानरो रश्मिभिर्नः पुनातु वातः प्राणेनेषिरो नभोभिः ।
द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये नः पुनीताम् १
वैश्वानरीं सूनृतामा रभध्वं यस्या आशास्तन्वो वीतपृष्ठाः ।
तया गृणन्तः सधमादेषु वयं स्याम पतयो रयीणाम् २
वैश्वानरीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
इहेडया सधमादं मदन्तो ज्योक् पश्येम सूर्यमुच्चरन्तम् ३ (१९१)

(६३) वर्चोबलप्राप्तिः ।

१-४ द्रुह्वणः । १ निर्ऋतिः, २ यमः, ३ मृत्युः, ४ अग्निः । १-३ जगती, २ अतिजगतीगर्भा, ४ अनुष्टुप् ।

यत् ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत् ।
तत् ते वि ष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः १
नमोऽस्तु ते निर्ऋते तिग्मतेजोऽयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे २
अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ३
संसमिद् युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इडस्पदे समिध्यसे स नो वसून्या भर ४ (१९५)

(६४) सांमनस्यम् ।

१-३ अथर्वा । सांमनस्यम्, १ विश्वे देवाः । अनुष्टुप्, (२ त्रिष्टुप्) ।

सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते १
समानो मन्त्रः समितिः समानी समानं व्रतं सह चित्तमेषाम् ।
समानेन वो हविषा जुहोमि समानं चेतो अभिसंविशध्वम् २
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ३ (१९८)

(६५) शत्रुनाशनम् ।

१-३ अथर्वा । (चन्द्रमाः), इन्द्रः, पराशरः । अनुष्टुप्, १ पथ्यापङ्क्तिः ।

अव मन्युरवायताव बाहू मनोयुजा ।
पराशर त्वं तेषां पराञ्चं शुष्ममर्दयाधा नो रयिमा कृधि १
निर्हस्तेभ्यो नैर्हस्तं यं देवाः शरुमस्यथ ।
वृश्चामि शत्रूणां बाहूननेन हविषाहम् २
इन्द्रश्चकार प्रथमं नैर्हस्तमसुरेभ्यः ।
जयन्तु सत्वानो मम स्थिरेणेन्द्रेण मेदिना ३ (२०१)

(६६) शत्रुनाशनम् ।

१-३ अथर्वा । इन्द्रः । अनुष्टुप्, १ त्रिष्टुप् ।

निर्हस्तः शत्रुरभिदासन्नस्तु ये सेनाभिर्युधमायन्त्यस्मान् ।
समर्पयेन्द्र महता वधेन द्रात्वेषामघहारो विविद्धः १
आतन्वाना आयच्छन्तोऽस्यन्तो ये च धावथ ।
निर्हस्ताः शत्रवः स्थनेन्द्रो वोऽद्य पराशरीत् २
निर्हस्ताः सन्तु शत्रवोऽङ्गैषां म्लापयामसि ।
अथैषामिन्द्र वेदांसि शतशो वि भजामहै ३ (२०४)

(६७) शत्रुनाशनम् ।

१-३ अथर्वा । इन्द्रः । अनुष्टुप् ।

परि वर्त्मानि सर्वत इन्द्रः पूषा च सस्रतुः । मुह्यन्त्वद्यामूः सेना अमित्राणां परस्तराम् १ (२०५)

मूढा अमित्राश्चरताशीर्षाण इवाहयः । तेषां वो अग्निमूढानामिन्द्रो हन्तु वरंवरम् २
ऐषु नह्य वृषाजिनं हरिणस्या भियं कृधि । पराङमित्र एषत्वर्वाची गौरुपेषतु ३ (२०७)

(६८) वपनम् ।

१-३ अथर्वा । १ सविता, आदित्याः, रुद्राः, वसवः; २ अदितिः, आपः, प्रजापतिः; ३ सविता, सोमः, वरुणः । १ पुरोविराडतिशाक्करगर्भा चतुष्पदा जगती, २ अनुष्टुप्, ३ अतिजगतीगर्भा त्रिष्टुप् ।

आयमगन्त्सविता क्षुरेणोष्णेन वाय उदकेनेहि ।
आदित्या रुद्रा वसव उन्दन्तु सचेतसः सोमस्य राज्ञो वपत प्रचेतसः १
अदितिः श्मश्रु वपत्वाप उन्दन्तु वर्चसा ।
चिकित्सतु प्रजापतिर्दीर्घायुत्वाय चक्षसे २
येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदमस्य गोमानश्ववानयमस्तु प्रजावान् ३ (२१०)

(६९) वर्चःप्राप्तिः ।

१-३ अथर्वा । बृहस्पतिः, अश्विनौ । अनुष्टुप् ।

गिरावरगराटेषु हिरण्ये गोषु यद् यशः । सुरायां सिच्यमानायां कीलाले मधु तन्मयि १
अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती । यथा भर्गस्वतीं वाचमावदानि जनाँ अनु २
मयि वर्चो अथो यशोऽथो यज्ञस्य यत् पयः । तन्मयि प्रजापतिर्दिवि द्यामिव दृंहतु ३ (२१३)

(७०) अघ्न्या ।

१-३ काङ्कायनः । अघ्न्या । जगती ।

यथा मांसं यथा सुरा यथाक्षा अधिदेवने ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्न्ये मनोऽधि वत्से नि हन्यताम् १
यथा हस्ती हस्तिन्याः पदेन पदमुद्युजे ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्न्ये मनोऽधि वत्से नि हन्यताम् २
यथा प्रधिर्यथोपधिर्यथा नभ्यं प्रधावधि ।
यथा पुंसो वृषण्यत स्त्रियां निहन्यते मनः ।
एवा ते अघ्न्ये मनोऽधि वत्से नि हन्यताम् ३ (२१६)

(७१) अन्नम् ।

१-३ ब्रह्मा । अग्निः, ३ वैश्वानरः, देवाः । जगती, ३ त्रिष्टुप् ।

यदन्नमद्मि बहुधा विरूपं हिरण्यमश्वमुत गामजामविम् ।
यदेव किं च प्रतिजग्रहाहमग्निष्टद्धोता सुहुतं कृणोतु १
यन्मा हुतमहुतमाजगाम दत्तं पितृभिरनुमतं मनुष्यैः ।
यस्मान्मे मन उदिव रारजीत्यग्निष्टद्धोता सुहुतं कृणोतु २
यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत संगृणामि ।
वैश्वानरस्य महतो महिम्ना शिवं मह्यं मधुमदस्त्वन्नम् ३ (२१९)

(७२) वाजीकरणम् ।

१-३ अथर्वाङ्गिराः । शेपोऽर्कः । १ जगती, २ अनुष्टुप्, ३ भुरिक् ।

यथासितः प्रथयते वशाँ अनु वपूंषि कृण्वन्नसुरस्य मायया ।
एवा ते शेपः सहसायमर्कोऽङ्गेनाङ्गं संसमकं कृणोतु १
यथा पसस्तायादरं वातेन स्थूलभं कृतम् ।
यावत् परस्वतः पसस्तावत् ते वर्धतां पसः २
यावदङ्गीनं पारस्वतं हास्तिनं गार्दभं च यत् ।
यावदश्वस्य वाजिनस्तावत् ते वर्धतां पसः ३ (२२२)

॥ इति सप्तमोऽनुवाकः ॥७॥

(७३) सांमनस्यम् ।

१-३ अथर्वा । सांमनस्यम्, वरुणसोमाग्निबृहस्पतिवसवः, ३ वास्तोष्पतिः । १, ३ भुरिक्, २ त्रिष्टुप् ।

[८] एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु ।
अस्य श्रियमुपसंयात सर्व उग्रस्य चेत्तुः संमनसः सजाताः १
यो वः शुष्मो हृदयेष्वन्तराकूतिर्या वो मनसि प्रविष्टा ।
तान्त्सीवयामि हविषा घृतेन मयि सजाता रमतिर्वो अस्तु २
इहैव स्त माप याताध्यस्मत् पूषा परस्तादपथं वः कृणोतु ।
वास्तोष्पतिरनु वो जोहवीतु मयि सजाता रमतिर्वो अस्तु ३ (२२५)

(७४) सांमनस्यम् ।

१-३ अथर्वा । सांमनस्यम्, नाना देवताः, त्रिणामा । अनुष्टुप्, ३ त्रिष्टुप् ।

सं वः पृच्यन्तां तन्वः सं मनांसि समु व्रता ।
सं वोऽयं ब्रह्मणस्पतिर्भगः सं वो अजीगमत् १
संज्ञपनं वो मनसोऽथो संज्ञपनं हृदः ।
अथो भगस्य यच्छ्रान्तं तेन संज्ञपयामि वः २
यथादित्या वसुभिः संबभूवुर्मरुद्भिरुग्रा अहृणीयमानाः ।
एवा त्रिणामन्नहृणीयमान इमान् जनान्त्संमनसस्कृधीह ३ (२२८)

(७५) सपत्नक्षयणम् ।

१-३ कबन्धः । इन्द्रः । अनुष्टुप्, ३ षट्पदा जगती ।

निरमुं नुद ओकसः सपत्नो यः पृतन्यति । नैर्बाध्येन हविषेन्द्र एनं पराशरीत् १
परमां तं परावतमिन्द्रो नुदतु वृत्रहा । यतो न पुनरायति शश्वतीभ्यः समाभ्यः २
एतु तिस्रः परावत एतु पञ्च जनाँ अति ।
एतु तिस्रोऽति रोचना यतो न पुनरायति शश्वतीभ्यः समाभ्यो यावत् सूर्यो असद् दिवि ३ (२३१)

(७६) आयुष्यम् ।

१-४ कबन्धः । सान्तपनाग्निः । अनुष्टुप्, ३ ककुम्मती ।

य एनं परिषीदन्ति समादधति चक्षसे । संप्रेद्धो अग्निर्जिह्वाभिरुदेतु हृदयादधि १
अग्नेः सांतपनस्याहमायुषे पदमा रभे । अद्धातिर्यस्य पश्यति धूममुद्यन्तमास्यतः २
यो अस्य समिधं वेद क्षत्रियेण समाहिताम् । नाभिह्वारे पदं नि दधाति स मृत्यवे ३
नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव गच्छति । अग्नेर्यः क्षत्रियो विद्वान् नाम गृह्णात्यायुषे ४ (२३५)

(७७) प्रतिष्ठापनम् ।

१-३ कबन्धः । जातवेदाः । अनुष्टुप् ।

अस्थाद् द्यौरस्थात् पृथिव्यस्थाद् विश्वमिदं जगत् ।
आस्थाने पर्वता अस्थु स्थाम्न्यश्वाँ अतिष्ठिपम् १
य उदानट् परायणं य उदानण् न्यायनम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे २
जातवेदो नि वर्तय शतं ते सन्त्वावृतः ।
सहस्रं त उपावृतस्ताभिर्नः पुनरा कृधि ३ (२३८)

(७८) दम्पत्यो रयिप्राप्तये प्रार्थना ।

१-३ अथर्वा । १-२ चन्द्रमाः, ३ त्वष्टा । अनुष्टुप् ।

तेन भूतेन हविषायमा प्यायतां पुनः ।
जायां यामस्मा आवाक्षुस्तां रसेनाभि वर्धताम् १
अभि वर्धतां पयसाभि राष्ट्रेण वर्धताम् ।
रय्या सहस्रवर्चसेमौ स्तामनुपक्षितौ २
त्वष्टा जायामजनयत् त्वष्टास्यै त्वां पतिम् ।
त्वष्टा सहस्रमायूंषि दीर्घमायुः कृणोतु वाम् ३ (२४१)

(७९) ऊर्जःप्राप्तिः ।

१-३ अथर्वा । संस्फानम् । गायत्री, ३ त्रिपदा प्राजापत्या गायत्री ।

अयं नो नभसस्पतिः संस्फानो अभि रक्षतु । असमातिं गृहेषु नः १
त्वं नो नभसस्पत ऊर्जं गृहेषु धारय । आ पुष्टमेत्वा वसु २
देव संस्फान सहस्रापोषस्येशिषे ।
तस्य नो रास्व तस्य नो धेहि तस्य ते भक्तिवांसः स्याम ३ (२४४)

(८०) अरिष्टक्षयणम् ।

१-३ अथर्वा । चन्द्रमाः । १ भुरिक्, २ अनुष्टुप्, ३ प्रस्तारपङ्क्तिः ।

अन्तरिक्षेण पतति विश्वा भूतावचाकशत् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम १
ये त्रयः कालकाञ्जा दिवि देवा इव श्रिताः ।
तान्त्सर्वानह्व ऊतयेऽस्मा अरिष्टतातये २
अप्सु ते जन्म दिवि ते सधस्थं समुद्रे अन्तर्महिमा ते पृथिव्याम् ।
शुनो दिव्यस्य यन्महस्तेना ते हविषा विधेम ३ (२४७)

(८१) गर्भाधानम् ।

१-३ अथर्वा । आदित्यः, ३ त्वष्टा । अनुष्टुप् ।

यन्तासि यच्छसे हस्तावप रक्षांसि सेधसि । प्रजां धनं च गृह्णानः परिहस्तो अभूदयम् १
परिहस्त वि धारय योनिं गर्भाय धातवे । मर्यादे पुत्रमा धेहि तं त्वमा गमयागमे २
यं परिहस्तमबिभरदितिः पुत्रकाम्या । त्वष्टा तमस्या आ बध्नाद् यथा पुत्रं जनादिति ३ (२५०)

(८२) जायाकामना ।

१-३ भगः । इन्द्रः । अनुष्टुप् ।

आगच्छत आगतस्य नाम गृह्णाम्यायतः । इन्द्रस्य वृत्रघ्नो वन्वे वासवस्य शतक्रतोः १
येन सूर्यां सावित्रीमश्विनोहतुः पथा । तेन मामब्रवीद् भगो जायामा वहतादिति २
यस्तेऽङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः । तेना जनीयते जायां मह्यं धेहि शचीपते ३ (२५३)

॥ इति अष्टमोऽनुवाकः ॥८॥

(८३) भैषज्यम् ।

१-४ भगः । १ सूर्यः, चन्द्रमाः, २ रोहिणी, ३ रामायणी । अनुष्टुप्, ४ एकावसाना द्विपदा निचृदार्च्यनुष्टुप् ।

[९] अपचितः प्र पतत सुपर्णो वसतेरिव ।
सूर्यः कृणोतु भेषजं चन्द्रमा वोऽपोच्छतु १
एन्येका श्येन्येका कृष्णैका रोहिणी द्वे ।
सर्वासामग्रभं नामावीरघ्नीरपेतन २
असूतिका रामायण्यपचित् प्र पतिष्यति ।
ग्लौरितः प्र पतिष्यति स गलुन्तो नशिष्यति ३
वीहि स्वामाहुतिं जुषाणो मनसा स्वाहा मनसा यदिदं जुहोमि ४ (२५७)

(८४) निर्ऋतिमोचनम् ।

१-४ भगः । निर्ऋतिः । १ भुरिग्जगती, २ त्रिपदार्षी बृहती, ३ जगती, ४ भुरिक् त्रिष्टुप् (जगती) ।

यस्यास्त आसनि घोरे जुहोम्येषां बद्धानामवसर्जनाय कम् ।
भूमिरिति त्वाभिप्रमन्वते जना निर्ऋतिरिति त्वाहं परि वेद सर्वतः १
भूते हविष्मती भवैष ते भागो यो अस्मासु ।
मुञ्चेमानमूनेनसः स्वाहा २
एवो ष्वस्मन्निर्ऋतेऽनेहा त्वमयस्मयान् वि चृता बन्धपाशान् ।
यमो मह्यं पुनरित् त्वां ददाति तस्मै यमाय नमो अस्तु मृत्यवे ३
अयस्मये द्रुपदे बेधिष इहाभिहितो मृत्युभिर्ये सहस्रम् ।
यमेन त्वं पितृभिः संविदान उत्तमं नाकमधि रोहयेमम् ४ (२६१)

(८५) यक्ष्मनाशनम् ।

१-३ अथर्वा । वनस्पतिः । अनुष्टुप् ।

वरणो वारयाता अयं देवो वनस्पतिः । यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् १
इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च । देवानां सर्वेषां वाचा यक्ष्मं ते वारयामहे २
यथा वृत्र इमा आपस्तस्तम्भ विश्वधा यतीः । एवा ते अग्निना यक्ष्मं वैश्वानरेण वारये ३ (२६४)

(८६) वृषकामना ।

१-३ अथर्वा । एकवृषः । अनुष्टुप् ।

वृषेन्द्रस्य वृषा दिवो वृषा पृथिव्या अयम् । वृषा विश्वस्य भूतस्य त्वमेकवृषो भव १
समुद्र ईशे स्रवतामग्निः पृथिव्या वशी । चन्द्रमा नक्षत्राणामीशे त्वमेकवृषो भव २
सम्राडस्यसुराणां ककुन्मनुष्याणाम् । देवानामर्धभागसि त्वमेकवृषो भव ३ (२६७)

(८७) राज्ञः संवरणम् ।

१-३ अथर्वा । ध्रुवः । अनुष्टुप् ।

आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलत् ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद् राष्ट्रमधि भ्रशत् १
इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलत् ।
इन्द्रेवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय २
इन्द्र एतमदीधरद् ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रवदयं च ब्रह्मणस्पतिः ३ (२७०)

(८८) ध्रुवो राजा ।

१-३ अथर्वा । ध्रुवः । अनुष्टुप्, ३ त्रिष्टुप् ।

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ।
ध्रुवासः पर्वता इमे ध्रुवो राजा विशामयम् १
ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् २
ध्रुवोऽच्युतः प्र मृणीहि शत्रूञ्छत्रूयतोऽधरान् पादयस्व ।
सर्वा दिशः संमनसः सध्रीचीर्ध्रुवाय ते समितिः कल्पतामिह ३ (२७३)

(८९) प्रीतिसंजननम् ।

१-३ अथर्वा । (रुद्रः) १ सोमः, २ वातः, ३ मित्रावरुणौ । अनुष्टुप् ।

इदं यत् प्रेण्यः शिरो दत्तं सोमेन वृष्ण्यम् ।
ततः परि प्रजातेन हार्दिं ते शोचयामसि १
शोचयामसि ते हार्दिं शोचयामसि ते मनः ।
वातं धूम इव सध्र्यङ् मामेवान्वेतु ते मनः २
मह्यं त्वा मित्रावरुणौ मह्यं देवी सरस्वती ।
मह्यं त्वा मध्यं भूम्या उभावन्तौ समस्यताम् ३ (२७६)

(९०) इषुनिष्कासनम् ।

१-३ अथर्वा । रुद्रः । अनुष्टुप्, ३ आर्षी भुरिगुष्णिक् ।

यां ते रुद्र इषुमास्यदङ्गेभ्यो हृदयाय च । इदं तामद्य त्वद् वयं विषूचीं वि वृहामसि १
यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः । तासां ते सर्वासां वयं निर्विषाणि ह्वयामसि २
नमस्ते रुद्रास्यते नमः प्रतिहितायै । नमो विसृज्यमानायै नमो निपतितायै ३(२७९)

(९१) यक्ष्मनाशनम् ।

१-३ भृग्वङ्गिराः । यक्ष्मनाशनम्, ३ आपः । अनुष्टुप् ।

इमं यवमष्टायोगैः षड्योगेभिरचर्कृषुः । तेना ते तन्वो३ रपोऽपाचीनमप व्यये १
न्य१ग् वातो वाति न्यक् तपति सूर्यः । नीचीनमघ्न्या दुहे न्यग् भवतु ते रपः २
आप इद् वा उ भेषजीरापो अमीवचातनीः ।
आपो विश्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ३(२८२)

(९२) वाजी ।

१-३ अथर्वा । इन्द्रः, वाजी । त्रिष्टुप्, १ जगती ।

वातरंहा भव वाजिन् युज्यमान इन्द्रस्य याहि प्रसवे मनोजवाः ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु १
जवस्ते अर्वन् निहितो गुहा यः श्येने वात उत योऽचरत् परीत्तः ।
तेन त्वं वाजिन् बलवान् बलेनाजिं जय समने पारयिष्णुः २
तनूष्टे वाजिन् तन्वं१ नयन्ती वाममस्मभ्यं धावतु शर्म तुभ्यम् ।
अह्रुतो महो धरुणाय देवो दिवीव ज्योतिः स्वमा मिमीयात् ३ (२८५)

॥ इति नवमोऽनुवाकः ॥९॥

(९३) स्वस्त्ययनम् ।

१-३ शन्तातिः । रुद्रः, १ यमः, मृत्युः, शर्वः, २ भवः, शर्वः, ३ विश्वे देवाः, मरुतः, अग्नीषोमौ, वरुणः, वातपर्जन्यौ । त्रिष्टुप् ।

[१०] यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डः ।
देवजनाः सेनयोत्तस्थिवांसस्ते अस्माकं परि वृञ्जन्तु वीरान् १
मनसा होमैर्हरसा घृतेन शर्वायास्त्र उत राज्ञे भवाय ।
नमस्येभ्यो नम एभ्यः कृणोम्यन्यत्रास्मदघविषा नयन्तु २
त्रायध्वं नो अघविषाभ्यो वधाद् विश्वे देवा मरुतो विश्ववेदसः ।
अग्नीषोमा वरुणः पूतदक्षा वातापर्जन्ययोः सुमतौ स्याम ३ (२८८)

(९४) सांमनस्यम् ।

१-३ अथर्वाङ्गिराः । सरस्वती । अनुष्टुप्, २ विराड् जगती ।

सं वो मनांसि सं व्रता समाकूतीर्नमामसि ।
अमी ये विव्रता स्थन तान् वः सं नमयामसि १
अहं गृभ्णामि मनसा मनांसि मम चित्तमनु चित्तेभिरेत ।
मम वशेषु हृदयानि वः कृणोमि मम यातमनुवर्त्मान एत २
ओते मे द्यावापृथिवी ओता देवी सरस्वती ।
ओतौ म इन्द्रश्चाग्निश्च ऋध्यास्मेदं सरस्वति ३ (२९१)

(९५) कुष्ठौषधिः ।

१-३ भृग्वङ्गिराः । वनस्पतिः । अनुष्टुप् ।

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि । तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत १
हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि । तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत २
गर्भो अस्योषधीनां गर्भो हिमवतामुत । गर्भो विश्वस्य भूतस्येमं मे अगदं कृधि ३ (२९४)

(९६) चिकित्सा ।

१-३ भृग्वङ्गिराः । वनस्पतिः, ३ सोमः । अनुष्टुप्, ३ त्रिपादविराण्नाम गायत्री ।

या ओषधयः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः १
मुञ्चन्तु मा शपथ्या३दथो वरुण्यादुत ।
अथो यमस्य पड्वीशाद् विश्वस्माद् देवकिल्बिषात् २ (२९६)

यच्चक्षुषा मनसा यच्च वाचोपारिम जाग्रतो यत् स्वपन्तः ।
सोमस्तानि स्वधया नः पुनातु ३ (२९७)

(९७) अभिभूर्वीरः ।

१-३ अथर्वा । १, ३ देवाः, २ मित्रावरुणौ । १ त्रिष्टुप्, २ जगती, ३ भुरिक् ।

अभिभूर्यज्ञो अभिभूरग्निरभिभूः सोमो अभिभूरिन्द्रः ।
अभ्य१हं विश्वाः पृतना यथासान्येवा विधेमाग्निहोत्रा इदं हविः १
स्वधास्तु मित्रावरुणा विपश्चिता प्रजावत् क्षत्रं मधुनेह पिन्वतम् ।
बाधेथां दूरं निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्तमस्मत् २
इमं वीरमनु हर्षध्वमुग्रमिन्द्रं सखायो अनु सं रभध्वम् ।
ग्रामजितं गोजितं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ३ (३००)

(९८) अजरं क्षत्रम् ।

१-३ अथर्वा । इन्द्रः । त्रिष्टुप्, २ बृहतीगर्भास्तारपङ्क्तिः ।

इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै ।
चर्कृत्य ईड्यो वन्द्यश्चोपसद्यो नमस्यो भवेह १
त्वमिन्द्राधिराजः श्रवस्युस्त्वं भूरभिभूतिर्जनानाम् ।
त्वं दैवीर्विश इमा वि राजायुष्मत् क्षत्रमजरं ते अस्तु २
प्राच्या दिशस्त्वमिन्द्रासि राजोतोदीच्या दिशो वृत्रहञ्छत्रुहोऽसि ।
यत्र यन्ति स्रोत्यास्तज्जितं ते दक्षिणतो वृषभ एषि हव्यः ३ (३०३)

(९९) संग्रामजयः ।

१-३ अथर्वा । इन्द्रः, सोमः, सविता च । अनुष्टुप्, ३ भुरिग्बृहती (सौम्या सावित्री)।

अभि त्वेन्द्र वरिमतः पुरा त्वांहूरणाद्धुवे । ह्वयाम्युग्रं चेत्तारं पुरुणामानमेकजम् १
यो अद्य सेन्यो वधो जिघांसन् न उदीरते । इन्द्रस्य तत्र बाहू समन्तं परि दद्मः २
परि दद्म इन्द्रस्य बाहू समन्तं त्रातुस्त्रायतां नः ।
देव सवितः सोम राजन्त्सुमनसं मा कृणु स्वस्तये ३ (३०६)

(१००) विषदूषणम् ।

१-३ गरुत्मान् । वनस्पतिः । अनुष्टुप् ।

देवा अदुः सूर्यो अदाद् द्यौरदात् पृथिव्यदात् ।
तिस्रः सरस्वतीरदुः सचित्ता विषदूषणम् १ (३०७)

यद् वो देवा उपजीका आसिञ्चन् धन्वन्युदकम्। तेन देवप्रसूतेनेदं दूषयता विषम् २
असुराणां दुहितासि सा देवानामसि स्वसा। दिवस्पृथिव्याः संभूता सा चकर्थारसं विषम् ३ (३०९)

(१०१) वाजीकरणम्।

१-३ अथर्वाङ्गिराः। ब्रह्मणस्पतिः। अनुष्टुप्।

आ वृषायस्व श्वसिहि वर्धस्व प्रथयस्व च। यथाङ्गं वर्धतां शेपस्तेन योषितमिज्जहि १
येन कृशं वाजयन्ति येन हिन्वन्त्यातुरम्। तेनास्य ब्रह्मणस्पते धनुरिवा तानया पसः २
आहं तनोमि ते पसो अधि ज्यामिव धन्वनि। क्रमस्वर्श इव रोहितमनवग्लायता सदा ३ (३१२)

(१०२) अभिसांमनस्यम्।

१-३ जमदग्निः। अश्विनौ। अनुष्टुप्।

यथायं वाहो अश्विना समैति सं च वर्तते। एवा मामभि ते मनः समैतु सं च वर्तताम् १
आहं खिदामि ते मनो राजाश्वः पृष्ट्यामिव। रेष्मच्छिन्नं यथा तृणं मयि ते वेष्टतां मनः २
आञ्जनस्य मदुघस्य कुष्ठस्य नलदस्य च। तुरो भगस्य हस्ताभ्यामनुरोधनमुद् भरे ३ (३१५)

॥ इति दशमोऽनुवाकः ॥१०॥

[इति चतुर्दशः प्रपाठकः ॥१४॥]

(१०३) शत्रुनाशनम्।

१-३ उच्छोचनः। इन्द्राग्नी, १ बृहस्पतिः, सविता, मित्रः, अर्यमा, भगः, अश्विनौ, २-३ इन्द्रः, अग्निः। अनुष्टुप्।

[अथ पञ्चदशः प्रपाठकः ॥१५॥]

[११] संदानं वो बृहस्पतिः संदानं सविता करत्।
संदानं मित्रो अर्यमा संदानं भगो अश्विना १
सं परमान्त्समवमानथो सं द्यामि मध्यमान्।
इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सं द्या त्वम् २
अमी ये युधमायन्ति केतून् कृत्वानीकशः।
इन्द्रस्तान् पर्यहार्दाम्ना तानग्ने सं द्या त्वम् ३ (३१८)

(१०४) शत्रुनाशनम्।

१-३ प्रशोचनः। इन्द्राग्नी, ३ इन्द्राग्नी, सोम इन्द्रश्च। अनुष्टुप्।

आदानेन संदानेनामित्राना द्यामसि। अपाना ये चैषां प्राणा असुनासून्त्समच्छिदन् १
इदमादानमकरं तपसेन्द्रेण संशितम्। अमित्रा येऽत्र नः सन्ति तानग्न आ द्या त्वम् २ (३२०)

ऐनान् द्यतामिन्द्राग्नी सोमो राजा च मेदिनौ।
इन्द्रो मरुत्वानादानममित्रेभ्यः कृणोतु नः ३ (३२१)

(१०५) कासशमनम्।

१-३ उन्मोचनः। कासा। अनुष्टुप्।

यथा मनो मनस्केतैः परापतत्याशुमत्। एवा त्वं कासे प्र पत मनसोऽनु प्रवाय्यम् १
यथा बाणः सुसंशितः परापतत्याशुमत्। एवा त्वं कासे प्र पत पृथिव्या अनु संवतम् २
यथा सूर्यस्य रश्मयः परापतन्त्याशुमत्। एवा त्वं कासे प्र पत समुद्रस्यानु विक्षरम् ३ (३२४)

(१०६) दूर्वाशाला।

१-३ प्रमोचनः। दूर्वाशाला। अनुष्टुप्।

आयने ते परायणे दूर्वा रोहतु पुष्पिणीः। उत्सो वा तत्र जायतां ह्रदो वा पुण्डरीकवान् १
अपामिदं न्ययनं समुद्रस्य निवेशनम्। मध्ये ह्रदस्य नो गृहाः पराचीना मुखा कृधि २
हिमस्य त्वा जरायुणा शाले परि व्ययामसि। शीतह्रदा हि नो भुवोऽग्निष्कृणोतु भेषजम् ३ (३२७)

(१०७) विश्वजित्।

१-४ शन्तातिः। विश्वजित्। अनुष्टुप्।

विश्वजित् त्रायमाणायै मा परि देहि।
त्रायमाणे द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् १
त्रायमाणे विश्वजिते मा परि देहि।
विश्वजिद् द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् २
विश्वजित् कल्याण्यै मा परि देहि।
कल्याणि द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ३
कल्याणि सर्वविदे मा परि देहि।
सर्वविद् द्विपाच्च सर्वं नो रक्ष चतुष्पाद् यच्च नः स्वम् ४ (३३१)

(१०८) मेधावर्धनम्।

१-५ शौनकः। मेधा, ४ अग्निः। अनुष्टुप्, २ उरोबृहती, ३ पथ्याबृहती।

त्वं नो मेधे प्रथमा गोभिरश्वेभिरा गहि। त्वं सूर्यस्य रश्मिभिस्त्वं नो असि यज्ञिया १
मेधामहं प्रथमां ब्रह्मण्वतीं ब्रह्मजूतामृषिष्टुताम्। प्रपीतां ब्रह्मचारिभिर्देवानामवसे हुवे २ (३३३)

यां मेधामृभवो विदुर्यां मेधामसुरा विदुः। ऋषयो भद्रां मेधां यां विदुस्तां मय्या वेशयामसि ३
यामृषयो भूतकृतो मेधां मेधाविनो विदुः। तया मामद्य मेधयाग्ने मेधाविनं कृणु ४
मेधां सायं मेधां प्रातर्मेधां मध्यंदिनं परि। मेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहे ५ (३३६)

(१०९) पिप्पली-भैषज्यम्।

१-३ अथर्वा। पिप्पली-भैषज्यं, आयुः। अनुष्टुप्।

पिप्पली क्षिप्तभेषज्यू३ तातिविद्धभेषजी। तां देवाः समकल्पयन्नियं जीवितवा अलम् १
पिप्पल्य१ः समवदन्तायतीर्जननादधि। यं जीवमश्नवामहै न स रिष्याति पूरुषः २
असुरास्त्वा न्यखनन् देवास्त्वोदवपन् पुनः। वातीकृतस्य भेषजीमथो क्षिप्तस्य भेषजीम् ३ (३३९)

(११०) दीर्घायुःप्राप्तिः।

१-३ अथर्वा। अग्निः। त्रिष्टुप्, १ पङ्क्तिः।

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि।
स्वां चाग्ने तन्वं पिप्रायस्वास्मभ्यं च सौभगमा यजस्व १
ज्येष्ठघ्न्यां जातो विचृतोर्यमस्य मूलबर्हणात् परि पाह्येनम्।
अत्येनं नेषद् दुरितानि विश्वा दीर्घायुत्वाय शतशारदाय २
व्याघ्रेऽह्न्यजनिष्ट वीरो नक्षत्रजा जायमानः सुवीरः।
स मा वधीत् पितरं वर्धमानो मा मातरं प्र मिनीज्जनित्रीम् ३ (३४२)

(१११) उन्मत्ततामोचनम्।

१-४ अथर्वा। अग्निः। अनुष्टुप्, १ परानुष्टुप् त्रिष्टुप्।

इमं मे अग्ने पुरुषं मुमुग्ध्ययं यो बद्धः सुयतो लालपीति।
अतोऽधि ते कृणवद् भागधेयं यदानुन्मदितोऽसति १
अग्निष्टे नि शमयतु यदि ते मन उद्युतम्। कृणोमि विद्वान् भेषजं यथानुन्मदितोऽससि २
देवैनसादुन्मदितमुन्मत्तं रक्षसस्परि। कृणोमि विद्वान् भेषजं यदानुन्मदितोऽसति ३
पुनस्त्वा दुरप्सरसः पुनरिन्द्रः पुनर्भगः। पुनस्त्वा दुर्विश्वे देवा यथानुन्मदितोऽससि ४ (३४६)

(११२) पाशमोचनम्।

१-३ अथर्वा। अग्निः। त्रिष्टुप्।

मा ज्येष्ठं वधीदयमग्न एषां मूलबर्हणात् परि पाह्येनम्।
स ग्राह्याः पाशान् वि चृत प्रजानन् तुभ्यं देवा अनु जानन्तु विश्वे। १ (३४७)

उन्मुञ्च पाशांस्त्वमग्न एषां त्रयस्त्रिभिरुत्सिता येभिरासन्।
स ग्राह्याः पाशान् वि चृत प्रजानन् पितापुत्रौ मातरं मुञ्च सर्वान् २
येभिः पाशैः परिवित्तो विबद्धोऽङ्गेअङ्ग आर्पित उत्सितश्च।
वि ते मुच्यन्तां विमुचो हि सन्ति भ्रूणघ्नि पूषन् दुरितानि मृक्ष्व ३ (३४९)

(११३) पापनाशनम्।

१-३ अथर्वा। पूषा। त्रिष्टुप्, ३ पङ्क्तिः।

त्रिते देवा अमृजतैतदेनस्त्रित एनन्मनुष्येषु ममृजे।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु १
मरीचीर्धूमान् प्र विशानु पाप्मन्नुदारान् गच्छोत वा नीहारान्।
नदीनां फेनाँ अनु तान् वि नश्य भ्रूणघ्नि पूषन् दुरितानि मृक्ष्व २
द्वादशधा निहितं त्रितस्यापमृष्टं मनुष्यैनसानि।
ततो यदि त्वा ग्राहिरानशे तां ते देवा ब्रह्मणा नाशयन्तु ३ (३५२)

॥ इत्येकादशोऽनुवाकः ॥११॥

(११४) उन्मोचनम्।

१-३ ब्रह्मा। विश्वे देवाः। अनुष्टुप्।

[१२] यद् देवा देवहेडनं देवासश्चकृमा वयम्।
आदित्यास्तस्मान्नो यूयमृतस्यर्तेन मुञ्चत १
ऋतस्यर्तेनादित्या यजत्रा मुञ्चतेह नः।
यज्ञं यद् यज्ञवाहसः शिक्षन्तो नोपशेकिम २
मेदस्वता यजमानाः स्रुचाज्यानि जुह्वतः।
अकामा विश्वे वो देवाः शिक्षन्तो नोप शेकिम ३ (३५५)

(११५) पापमोचनम्।

१-३ ब्रह्मा। विश्वे देवाः। अनुष्टुप्।

यद् विद्वांसो यदविद्वांस एनांसि चकृमा वयम्।
यूयं नस्तस्मान्मुञ्चत विश्वे देवाः सजोषसः १
यदि जाग्रद् यदि स्वपन्नेन एनस्योऽकरम्।
भूतं मा तस्माद् भव्यं च द्रुपदादिव मुञ्चताम्। २
द्रुपदादिव मुमुचानः स्विन्नः स्नात्वा मलादिव।
पूतं पवित्रेणेवाज्यं विश्वे शुम्भन्तु मैनसः ३ (३५८)

(११६) मधुमदनम् ।

१-३ जाटिकायनः । विवस्वान् । जगती, २ त्रिष्टुप् ।

यद् यामं चक्रुर्निखनन्तो अग्रे कार्षीवणा अन्नविदो न विद्यया ।
वैवस्वते राजनि तज्जुहोम्यथ यज्ञियं मधुमदस्तु नोऽन्नम् १
वैवस्वतः कृणवद् भागधेयं मधुभागो मधुना सं सृजाति ।
मातुर्यदेन इषितं न आगन् यद् वा पितापराद्धो जिहीडे २
यदीदं मातुर्यदि वा पितुर्नः परि भ्रातुः पुत्राच्चेतस एन आगन् ।
यावन्तो अस्मान् पितरः सचन्ते तेषां सर्वेषां शिवो अस्तु मन्युः ३ (३६१)

(११७) आनृण्यम् ।

१-३ कौशिकः । अग्निः । त्रिष्टुप् ।

अपमित्यमप्रतीत्तं यदस्मि यमस्य येन बलिना चरामि ।
इदं तदग्ने अनृणो भवामि त्वं पाशान् विचृतं वेत्थ सर्वान् १
इहैव सन्तः प्रति दद्म एनज्जीवा जीवेभ्यो नि हराम एनत् ।
अपमित्य धान्यं१ यज्जघसाहमिदं तदग्ने अनृणो भवामि २
अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम ।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आ क्षियेम ३ (३६४)

(११८) आनृण्यम् ।

१-३ कौशिकः । अग्निः । त्रिष्टुप् ।

यद्धस्ताभ्यां चकृम किल्बिषाण्यक्षाणां गत्नुमुपलिप्समानाः ।
उग्रंपश्ये उग्रजितौ तदद्याप्सरसावनु दत्तामृणं नः १
उग्रंपश्ये राष्ट्रभृत् किल्बिषाणि यदक्षवृत्तमनु दत्तं न एतत् ।
ऋणान्नो नर्णमेर्त्समानो यमस्य लोके अधिरज्जुरायत् २
यस्मा ऋणं यस्य जायामुपैमि यं याचमानो अभ्यैमि देवाः ।
ते वाचं वादिषुर्मोत्तरां मद्देवपत्नी अप्सरसावधीतम् ३ (३६७)

(११९) आनृण्यम् ।

१-३ कौशिकः । वैश्वानरोऽग्निः । त्रिष्टुप् ।

यददीव्यन्नृणमहं कृणोम्यदास्यन्नग्न उत संगृणामि ।
वैश्वानरो नो अधिपा वसिष्ठ उदिन्नयाति सुकृतस्य लोकम् १ (३६८)

वैश्वानराय प्रति वेदयामि यद्यृणं संगरो देवतासु ।
स एतान् पाशान् विचृतं वेद सर्वानथ पक्वेन सह सं भवेम २
वैश्वानरः पविता मा पुनातु यत् संगरमभिधावाम्याशाम् ।
अनाजानन् मनसा याचमानो यत् तत्रैनो अप तत् सुवामि ३ (३७०)

(१२०) सुकृतस्य लोकः ।

१-३ कौशिकः । अन्तरिक्षं, पृथिवी, द्यौः, अग्निः । १ जगती, २ पङ्क्तिः, ३ त्रिष्टुप् ।

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम ।
अयं तस्माद् गार्हपत्यो नो अग्निरुदिन्नयाति सुकृतस्य लोकम् १
भूमिर्मातादितिर्नो जनित्रं भ्रातान्तरिक्षमभिशस्त्या नः ।
द्यौर्नः पिता पित्र्याच्छं भवाति जामिमृत्वा माव पत्सि लोकात् २
यत्रा सुहार्दः सुकृतो मदन्ति विहाय रोगं तन्वः१ स्वायाः ।
अश्लोणा अङ्गैरह्रुताः स्वर्गे तत्र पश्येम पितरौ च पुत्रान् ३ (३७३)

(१२१) सुकृतलोकप्राप्तिः ।

१-४ कौशिकः । अग्निः, ३ तारके । १-२ त्रिष्टुप्, ३-४ अनुष्टुप् ।

विषाणा पाशान् वि ष्याध्यस्मद् य उत्तमा अधमा वारुणा ये ।
दुष्वप्न्यं दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम् १
यद् दारुणि बध्यसे यच्च रज्ज्वां यद् भूम्यां बध्यसे यच्च वाचा ।
अयं तस्माद् गार्हपत्यो नो अग्निरुदिन्नयाति सुकृतस्य लोकम् २
उदगातां भगवती विचृतौ नाम तारके ।
प्रेहामृतस्य यच्छतां प्रैतु बद्धकमोचनम् ३
वि जिहीष्व लोकं कृणु बन्धान्मुञ्चासि बद्धकम् ।
योन्या इव प्रच्युतो गर्भः पथः सर्वाँ अनु क्षिय ४ (३७७)

(१२२) तृतीयो नाकः ।

१-५ भृगुः । विश्वकर्मा । त्रिष्टुप्, ४-५ जगती ।

एतं भागं परि ददामि विद्वान् विश्वकर्मन् प्रथमजा ऋतस्य ।
अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनु सं तरेम १
ततं तन्तुमन्वेके तरन्ति येषां दत्तं पित्र्यमायनेन ।
अबन्ध्वेके ददतः प्रयच्छन्तो दातुं चेच्छिक्षान्त्स स्वर्ग एव २ (३७९)

अन्वारभेथामनुसंरभेथामेतं लोकं श्रद्दधानाः सचन्ते ।
यद् वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ३
यज्ञं यन्तं मनसा बृहन्तमन्वारोहामि तपसा सयोनिः ।
उपहूता अग्ने जरसः परस्तात् तृतीये नाके सधमादं मदेम ४
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिञ्चामि वोऽहमिन्द्रो मरुत्वान्त्स ददातु तन्मे ५ (३८२)

(१२३) सौमनसम् ।

१-५ भृगुः । विश्वे देवाः । त्रिष्टुप्, ३ द्विपदा साम्न्यनुष्टुप्, ४ एकावसाना द्विपदा प्राजापत्या भुरिगनुष्टुप् ।

एतं सधस्थाः परि वो ददामि यं शेवधिमावहाज्जातवेदाः ।
अन्वागन्ता यजमानः स्वस्ति तं स्म जानीत परमे व्योमन् १
जानीत स्मैनं परमे व्योमन् देवाः सधस्था विद लोकमत्र ।
अन्वागन्ता यजमानः स्वस्तीष्टापूर्तं स्म कृणुताविरस्मै २
देवाः पितरः पितरो देवाः । यो अस्मि सो अस्मि ३
स पचामि स ददामि स यजे स दत्तान्मा यूषम् ४
नाके राजन् प्रति तिष्ठ तत्रैतत् प्रति तिष्ठतु ।
विद्धि पूर्तस्य नो राजन्त्स देव सुमना भव ५ (३८७)

(१२४) निर्ऋत्यपस्तरणम् ।

१-३ अथर्वा । दिव्या आपः । त्रिष्टुप् ।

दिवो नु मां बृहतो अन्तरिक्षादपां स्तोको अभ्यपप्तद् रसेन ।
समिन्द्रियेण पयसाहमग्ने छन्दोभिर्यज्ञैः सुकृतां कृतेन १
यदि वृक्षादभ्यपप्तत् फलं तद् यद्यन्तरिक्षात् स उ वायुरेव ।
यत्रास्पृक्षत् तन्वो३ यच्च वासस आपो नुदन्तु निर्ऋतिं पराचैः २
अभ्यञ्जनं सुरभि सा समृद्धिर्हिरण्यं वर्चस्तदु पूत्रिममेव ।
सर्वा पवित्रा वितताध्यस्मत् तन्मा तारीन्निर्ऋतिर्मो अरातिः ३ (३९०)

॥ इति द्वादशोऽनुवाकः ॥१२॥

(१२५) वीरस्य रथः ।

१-३ अथर्वा । वनस्पतिः । त्रिष्टुप्, २ जगती ।

[१३] वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि १
दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः ।
अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रं हविषा रथं यज २
इन्द्रस्यौजो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ।
स इमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ३ (३९३)

(१२६) दुन्दुभिः ।

१-३ अथर्वा । दुन्दुभिः । भुरिक् त्रिष्टुप्, ३ पुरोबृहतीगर्भा त्रिष्टुप् ।

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते वन्वतां विष्ठितं जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद् दवीयो अप सेध शत्रून् १
आ क्रन्दय बलमोजो न आ धा अभि ष्टन दुरिता बाधमानः ।
अप सेध दुन्दुभे दुच्छुनामित इन्द्रस्य मुष्टिरसि वीडयस्व २
प्रामूं जयाभीमे जयन्तु केतुमद् दुन्दुभिर्वावदीतु ।
समश्वपर्णाः पतन्तु नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ३ (३९६)

(१२७) यक्ष्मनाशनम् ।

१-३ भृग्वङ्गिराः । यक्ष्मनाशनम्, वनस्पतिः । अनुष्टुप्, ३ त्र्यवसाना षट्पदा जगती ।

विद्रधस्य बलासस्य लोहितस्य वनस्पते । विसल्पकस्योषधे मोच्छिषः पिशितं चन १
यौ ते बलास तिष्ठतः कक्षे मुष्कावपश्रितौ । वेदाहं तस्य भेषजं चीपुद्रुरभिचक्षणम् २
यो अङ्ग्यो यः कर्ण्यो यो अक्ष्योर्विसल्पकः । वि वृहामो विसल्पकं विद्रधं हृदयामयम् ।
परा तमज्ञातं यक्ष्ममधराञ्चं सुवामसि ३ (३९९)

(१२८) राजा ।

१-४ अङ्गिराः । सोमः, शकधूमः । अनुष्टुप् ।

शकधूमं नक्षत्राणि यद् राजानमकुर्वत । भद्राहमस्मै प्रायच्छन्निदं राष्ट्रमसादिति १
भद्राहं नो मध्यंदिने भद्राहं सायमस्तु नः । भद्राहं नो अह्नां प्राता रात्री भद्राहमस्तु नः २
अहोरात्राभ्यां नक्षत्रेभ्यः सूर्याचन्द्रमसाभ्याम् । भद्राहमस्मभ्यं राजञ्छकधूम त्वं कृधि ३
यो नो भद्राहमकरः सायं नक्तमथो दिवा । तस्मै ते नक्षत्रराज शकधूम सदा नमः ४ (४०३)

(१२९) भगप्राप्तिः ।

१-३ अथर्वाङ्गिराः । भगः । अनुष्टुप् ।

भगेन मा शांशपेन साकमिन्द्रेण मेदिना । कृणोमि भगिनं माप द्रान्त्वरातयः १
येन वृक्षाँ अभ्यभवो भगेन वर्चसा सह । तेन मा भगिनं कृण्वप द्रान्त्वरातयः २
यो अन्धो यः पुनःसरो भगो वृक्षेष्वाहितः । तेन मा भगिनं कृण्वप द्रान्त्वरातयः ३ (४०६)

(१३०) स्मरः ।

१-४ अथर्वाङ्गिराः । स्मरः । अनुष्टुप्, १ विराट् पुरस्ताद्बृहती ।

रथजितां राथजितेयीनामप्सरसामयं स्मरः । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु १
असौ मे स्मरतादिति प्रियो मे स्मरतादिति । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु २
यथा मम स्मरादसौ नामुष्याहं कदा चन । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु ३
उन्मादयत मरुत उदन्तरिक्ष मादय । अग्न उन्मादया त्वमसौ मामनु शोचतु ४ (४१०)

(१३१) स्मरः ।

१-३ अथर्वाङ्गिराः । स्मरः । अनुष्टुप् ।

नि शीर्षतो नि पत्तत आध्यो३ नि तिरामि ते । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु १
अनुमतेऽन्विदं मन्यस्वाकूते समिदं नमः । देवाः प्र हिणुत स्मरमसौ मामनु शोचतु २
यद् धावसि त्रियोजनं पञ्चयोजनमाश्विनम् । ततस्त्वं पुनरायसि पुत्राणां नो असः पिता ३ (४१३)

(१३२) स्मरः ।

१-५ अथर्वाङ्गिराः । स्मरः । अनुष्टुप्, १ त्रिपदा अनुष्टुप्; २, ४, ५ बृहती; ३ भुरिक् ।

यं देवाः स्मरमसिञ्चन्नप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा १
यं विश्वे देवाः स्मरमसिञ्चन्नप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा २
यमिन्द्राणी स्मरमसिञ्चदप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा ३
यमिन्द्राग्नी स्मरमसिञ्चतामप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा ४ (४१७)

यं मित्रावरुणौ स्मरमसिञ्चतामप्स्व१न्तः शोशुचानं सहाध्या ।
तं ते तपामि वरुणस्य धर्मणा ५ (४१८)

(१३३) मेखलाबन्धनम् ।

१-५ अगस्त्यः । मेखला । १ भुरिक् २, ५ अनुष्टुप्; ३ त्रिष्टुप्, ४ जगती ।

य इमां देवो मेखलामाबबन्ध यः संननाह य उ नो युयोज ।
यस्य देवस्य प्रशिषा चरामः स पारमिच्छात् स स उ नो वि मुञ्चात् १
आहुतास्यभिहुत ऋषीणामस्यायुधम् ।
पूर्वा व्रतस्य प्राश्नती वीरघ्नी भव मेखले २
मृत्योरहं ब्रह्मचारी यदस्मि निर्याचन् भूतात् पुरुषं यमाय ।
तमहं ब्रह्मणा तपसा श्रमेणानयैनं मेखलया सिनामि ३
श्रद्धाया दुहिता तपसोऽधि जाता स्वस ऋषीणां भूतकृतां बभूव ।
सा नो मेखले मतिमा धेहि मेधामथो नो धेहि तप इन्द्रियं च ४
यां त्वा पूर्वे भूतकृत ऋषयः परिबेधिरे ।
सा त्वं परि ष्वजस्व मां दीर्घायुत्वाय मेखले ५ (४२३)

(१३४) शत्रुनाशनम् ।

१-३ शुक्रः । वज्रः । १ परानुष्टुप् त्रिष्टुप्, २ अनुष्टुप्, ३ भुरिक् त्रिपदा गायत्री ।

अयं वज्रस्तर्पयतामृतस्यावास्य राष्ट्रमप हन्तु जीवितम् ।
शृणातु ग्रीवाः प्र शृणातूष्णिहा वृत्रस्येव शचीपतिः १
अधरोऽधर उत्तरेभ्यो गूढः पृथिव्या मोत् सृपत् । वज्रेणावहतः शयाम् २
यो जिनाति तमन्विच्छ यो जिनाति तमिज्जहि ।
जिनतो वज्र त्वं सीमन्तमन्वञ्चमनु पातय ३ (४२६)

(१३५) बलप्राप्तिः ।

१-३ शुक्रः । वज्रः । अनुष्टुप् ।

यदश्नामि बलं कुर्व इत्थं वज्रमा ददे । स्कन्धानमुष्य शातयन् वृत्रस्येव शचीपतिः १
यत् पिबामि सं पिबामि समुद्र इव संपिबः । प्राणानमुष्य संपाय सं पिबामो अमुं वयम् २
यद् गिरामि सं गिरामि समुद्र इव संगिरः । प्राणानमुष्य संगीर्य सं गिरामो अमुं वयम् ३ (४२९)

(१३६) केशदृंहणम् ।

१-३ वीतहव्यः । नितत्नी वनस्पतिः । अनुष्टुप्, २ एकावसाना द्विपदा साम्नी बृहती ।

देवी देव्यामधि जाता पृथिव्यामस्योषधे । तां त्वा नितत्नि केशेभ्यो दृंहणाय खनामसि १
दृंह प्रत्नान् जनयाजातान् जातानु वर्षीयसस्कृधि २
यस्ते केशोऽवपद्यते समूलो यश्च वृश्चते । इदं तं विश्वभेषज्याभि षिञ्चामि वीरुधा ३ (४३२)

(१३७) केशवर्धनम् ।

१-३ वीतहव्यः । वनस्पतिः । अनुष्टुप् ।

यां जमदग्निरखनद् दुहित्रे केशवर्धनीम् । तां वीतहव्य आभरदसितस्य गृहेभ्यः १
अभीशुना मेया आसन् व्यामेनानुमेयाः । केशा नडा इव वर्धन्तां शीर्ष्णस्ते असिताः परि २
दृंह मूलमाग्रं यच्छ वि मध्यं यामयौषधे । केशा नडा इव वर्धन्तां शीर्ष्णस्ते असिताः परि ३ (४३५)

(१३८) क्लीबत्वम् ।

१-५ अथर्वा । वनस्पतिः । अनुष्टुप्, ३ पथ्यापङ्क्तिः ।

त्वं वीरुधां श्रेष्ठतमाभिश्रुतास्योषधे । इमं मे अद्य पूरुषं क्लीबमोपशिनं कृधि १
क्लीबं कृध्योपशिनमथो कुरीरिणं कृधि । अथास्येन्द्रो ग्रावभ्यामुभे भिनत्त्वाण्ड्यौ २
क्लीब क्लीबं त्वाकरं वध्रे वध्रिं त्वाकरमरसारसं त्वाकरम् ।
कुरीरमस्य शीर्षणि कुम्बं चाधिनिदध्मसि ३
ये ते नाड्यौ देवकृते ययोस्तिष्ठति वृष्ण्यम् । ते ते भिनद्मि शम्ययामुष्या अधि मुष्कयोः ४
यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना । एवा भिनद्मि ते शेपोऽमुष्या अधि मुष्कयोः ५ (४४०)

(१३९) सौभाग्यवर्धनम् ।

१-५ अथर्वा । वनस्पतिः । अनुष्टुप्, १ त्र्यवसाना षट्पदा विराड् जगती ।

न्यस्तिका रुरोहिथ सुभगंकरणी मम । शतं तव प्रतानास्त्रयस्त्रिंशन्नितानाः ।
तया सहस्रपर्ण्या हृदयं शोषयामि ते १
शुष्यतु मयि ते हृदयमथो शुष्यत्वास्यम् । अथो नि शुष्य मां कामेनाथो शुष्कास्या चर २
संवननी समुष्पला बभ्रु कल्याणि सं नुद । अमूं च मां च सं नुद समानं हृदयं कृधि ३
यथोदकमपपुषोऽपशुष्यत्यास्यम् । एवा नि शुष्य मां कामेनाथो शुष्कास्या चर ४
यथा नकुलो विच्छिद्य संदधात्यहिं पुनः । एवा कामस्य विच्छिन्नं सं धेहि वीर्यावति ५ (४४५)

(१४०) सुमङ्गलौ दन्तौ ।

१-३ अथर्वा । ब्रह्मणस्पतिः, दन्ताः । (अनुष्टुप् ?) १ उरोबृहती, २ उपरिष्टाज्ज्योतिष्मती त्रिष्टुप्, ३ आस्तारपङ्क्तिः ।

यौ व्याघ्राववरूढौ जिघत्सतः पितरं मातरं च ।
यौ दन्तौ ब्रह्मणस्पते शिवौ कृणु जातवेदः १
व्रीहिमत्तं यवमत्तमथो माषमथो तिलम् ।
एष वां भागो निहितो रत्नधेयाय दन्तौ मा हिंसिष्टं पितरं मातरं च २
उपहूतौ सयुजौ स्योनौ दन्तौ सुमङ्गलौ ।
अन्यत्र वां घोरं तन्व१ः परैतु दन्तौ मा हिंसिष्टं पितरं मातरं च ३ (४४८)

(१४१) गोकर्णयोर्लक्ष्यकरणम् ।

१-३ विश्वामित्रः । अश्विनौ । अनुष्टुप् ।

वायुरेनाः समाकरत् त्वष्टा पोषाय ध्रियताम् । इन्द्र आभ्यो अधि ब्रवद् रुद्रो भूम्ने चिकित्सतु १
लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि । अकर्तामश्विना लक्ष्म तदस्तु प्रजया बहु २
यथा चक्रुर्देवासुरा यथा मनुष्या उत । एवा सहस्रपोषाय कृणुतं लक्ष्माश्विना ३ (४५१)

(१४२) अन्नसमृद्धिः ।

१-३ विश्वामित्रः । वायुः । अनुष्टुप् ।

उच्छ्रयस्व बहुर्भव स्वेन महसा यव । मृणीहि विश्वा पात्राणि मा त्वा दिव्याशनिर्वधीत् १
आशृण्वन्तं यवं देवं यत्र त्वाच्छावदामसि । तदुच्छ्रयस्व द्यौरिव समुद्र इवैध्यक्षितः २
अक्षितास्त उपसदोऽक्षिताः सन्तु राशयः । पृणन्तो अक्षिताः सन्त्वत्तारः सन्त्वक्षिताः ३ (४५४)

॥ इति त्रयोदशोऽनुवाकः ॥१३॥

[इति पञ्चदशः प्रपाठकः ॥१५॥]

॥ इति षष्ठं काण्डं समाप्तम् ॥

मन्त्रसंख्या-

पञ्चमकाण्डस्यान्तपर्यन्तं	१२९०
षष्ठकाण्डस्य...	४५४
सर्वयोगः	१७४४

सप्तमं काण्डम् ।

(१) आत्मा ।

१-२ अथर्वा (ब्रह्मवर्चसकामः) । आत्मा । त्रिष्टुप्, २ विराड् जगती ।

[अथ षोडशः प्रपाठकः ॥१६॥]

[१] धीती वा ये अनयन् वाचो अग्रं मनसा वा येऽवदन्नृतानि ।
तृतीयेन ब्रह्मणा वावृधानास्तुरीयेणामन्वत नाम धेनोः १
स वेद पुत्रः पितरं स मातरं स सूनुर्भुवत् स भुवत् पुनर्मघः ।
स द्यामौर्णोदन्तरिक्षं स्वः स इदं विश्वमभवत् स आभवत् २ (२)

(२) आत्मा ।

१ अथर्वा (ब्रह्मवर्चसकामः) । आत्मा । त्रिष्टुप् ।

अथर्वाणं पितरं देवबन्धुं मातुर्गर्भं पितुरसुं युवानम् ।
य इमं यज्ञं मनसा चिकेत प्र णो वोचस्तमिहेह ब्रवः १ (३)

(३) आत्मा ।

१ अथर्वा (ब्रह्मवर्चसकामः) । आत्मा । त्रिष्टुप् ।

अया विष्ठा जनयन् कर्वराणि स हि घृणिरुरुर्वराय गातुः ।
स प्रत्युदैद् धरुणं मध्वो अग्रं स्वया तन्वा तन्वमैरयत १ (४)

(४) विश्वप्राणः ।

१ अथर्वा (ब्रह्मवर्चसकामः) । वायुः । त्रिष्टुप् ।

एकया च दशभिश्चा सुहुते द्वाभ्यामिष्टये विंशत्या च ।
तिसृभिश्च वहसे त्रिंशता च वियुग्भिर्वाय इह ता वि मुञ्च १ (५)

(५) आत्मा ।

१-५ अथर्वा (ब्रह्मवर्चसकामः) । आत्मा । त्रिष्टुप्, ३ पङ्क्तिः, ४ अनुष्टुप् ।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः १
यज्ञो बभूव स आ बभूव स प्र जज्ञे स उ वावृधे पुनः ।
स देवानामधिपतिर्बभूव सो अस्मासु द्रविणमा दधातु २ (७)

यद् देवा देवान् हविषायजन्तामर्त्यान् मनसामर्त्येन ।
मदेम तत्र परमे व्योमन् पश्येम तदुदितौ सूर्यस्य ३
यत् पुरुषेण हविषा यज्ञं देवा अतन्वत ।
अस्ति नु तस्मादोजीयो यद् विहव्येनेजिरे ४
मुग्धा देवा उत शुनायजन्तोत गोरङ्गैः पुरुधायजन्त ।
य इमं यज्ञं मनसा चिकेत प्र णो वोचस्तमिहेह ब्रवः ५ (१०)

[६ (६-७)] अदितिः ।

१-४ अथर्वा (ब्रह्मवर्चसकामः) । अदितिः । त्रिष्टुप्, २ भुरिक्, ३-४ विराड् जगती ।

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् १
महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हवामहे ।
तुविक्षत्रामजरन्तीमुरूचीं सुशर्माणमदितिं सुप्रणीतिम् २ (६)
सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसो अस्रवन्तीमा रुहेमा स्वस्तये ३
वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करामहे ।
यस्या उपस्थ उर्वन्तरिक्षं सा नः शर्म त्रिवरूथं नि यच्छात् ४ (७) (१४)

[७ (८)] आदित्याः ।

१ अथर्वा (ब्रह्मवर्चसकामः) । अदितिः । आर्षी जगती ।

दितेः पुत्राणामदितेरकारिषमव देवानां बृहतामनर्मणाम् ।
तेषां हि धाम गभिषक् समुद्रियं नैनान् नमसा परो अस्ति कश्चन १ (१५)

[८ (९)] शत्रुनाशनम् ।

१ उपरिबभ्रवः । बृहस्पतिः । त्रिष्टुप् ।

भद्रादधि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्तु ।
अथेममस्या वर आ पृथिव्या आरेशत्रुं कृणुहि सर्ववीरम् १ (१६)

[९ (१०)] स्वस्तिदा पूषा ।

१-४ उपरिबभ्रवः । पूषा । त्रिष्टुप्, ३ त्रिपदा आर्षी गायत्री, ४ अनुष्टुप् ।

प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् १ (१७)

पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन् पुर एतु प्रजानन् २
पूषन् तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ३
परि पूषा परस्ताद्धस्तं दधातु दक्षिणम् । पुनर्नो नष्टमाजतु सं नष्टेन गमेमहि ४ (२०)

[१० (११)] सरस्वती ।

१ शौनकः । सरस्वती । त्रिष्टुप् ।

यस्ते स्तनः शशयुर्यो मयोभूर्यः सुम्नयुः सुहवो यः सुदत्रः ।
येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः १ (२१)

[११ (१२)] सरस्वती ।

१ शौनकः । सरस्वती । त्रिष्टुप् ।

यस्ते पृथु स्तनयित्नुर्य ऋष्वो दैवः केतुर्विश्वमाभूषतीदम् ।
मा नो वधीर्विद्युता देव सस्यं मोत वधी रश्मिभिः सूर्यस्य १ (२२)

[१२ (१३)] राष्ट्रसभा ।

१-४ शौनकः । सभा, १-२ सभा, पितरः, ३ इन्द्रः, ४ मनः । अनुष्टुप्, १ भुरिक् त्रिष्टुप् ।

सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने ।
येना संगच्छा उप मा स शिक्षाच्चारु वदानि पितरः संगतेषु १
विद्म ते सभे नाम नरिष्टा नाम वा असि ।
ये ते के च सभासदस्ते मे सन्तु सवाचसः २
एषामहं समासीनानां वर्चो विज्ञानमा ददे ।
अस्याः सर्वस्याः संसदो मामिन्द्र भगिनं कृणु ३
यद् वो मनः परागतं यद् बद्धमिह वेह वा ।
तद् व आ वर्तयामसि मयि वो रमतां मनः ४ (२६)

[१३ (१४)] शत्रुनाशनम् ।

१-२ अथर्वा (द्विषो वर्चो हर्तुकामः) । सूर्यः । अनुष्टुप् ।

यथा सूर्यो नक्षत्राणामुद्यंस्तेजांस्याददे । एवा स्त्रीणां च पुंसां च द्विषतां वर्च आ ददे १
यावन्तो मा सपत्नानामायन्तं प्रतिपश्यथ । उद्यन्त्सूर्य इव सुप्तानां द्विषतां वर्च आ ददे २ (२८)

॥ इति प्रथमोऽनुवाकः ॥१॥

[१४ (१५)] सविता ।

१-४ अथर्वा । सविता । अनुष्टुप्, ३ त्रिष्टुप्, ४ जगती ।

[२] अभि त्यं देवं सवितारमोण्योः कविक्रतुम् ।
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिम् १
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत् सवीमनि ।
हिरण्यपाणिरमिमीत सुक्रतुः कृपात् स्वः २
सावीर्हि देव प्रथमाय पित्रे वर्ष्माणमस्मै वरिमाणमस्मै ।
अथास्मभ्यं सवितर्वार्याणि दिवोदिव आ सुवा भूरि पश्वः ३
दमूना देवः सविता वरेण्यो दधद् रत्नं दक्षं पितृभ्य आयूंषि ।
पिबात् सोमं ममददेनमिष्टे परिज्मा चित् क्रमते अस्य धर्मणि ४ (३२)

[१५ (१६)] सविता ।

१ भृगुः । सविता । त्रिष्टुप् ।

तां सवितः सत्यसवां सुचित्रामाहं वृणे सुमतिं विश्ववाराम् ।
यामस्य कण्वो अदुहत् प्रपीनां सहस्रधारां महिषो भगाय १ (३३)

[१६ (१७)] सविता ।

१ भृगुः । सविता । त्रिष्टुप् ।

बृहस्पते सवितर्वर्धयैनं ज्योतयैनं महते सौभगाय ।
संशितं चित् संतरं सं शिशाधि विश्व एनमनु मदन्तु देवाः १ (३४)

[१७ (१८)] द्रविणार्थं प्रार्थना ।

१-४ भृगुः । धाता, सविता, ४ अग्निः, त्वष्टा, विष्णुः । १ त्रिपदा आर्षी गायत्री, २ अनुष्टुप्, ३-४ त्रिष्टुप् ।

धाता दधातु नो रयिमीशानो जगतस्पतिः । स नः पूर्णेन यच्छतु १
धाता दधातु दाशुषे प्राचीं जीवातुमक्षिताम् ।
वयं देवस्य धीमहि सुमतिं विश्वराधसः २
धाता विश्वा वार्या दधातु प्रजाकामाय दाशुषे दुरोणे ।
तस्मै देवा अमृतं सं व्ययन्तु विश्वे देवा अदितिः सजोषाः ३
धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः ।
त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ४ (३८)

[१८ (१९)] वृष्टिः ।
१-२ अथर्वा । पृथिवी, पर्जन्यः । १ चतुष्पदा भुरिगुष्णिक्, २ त्रिष्टुप् ।

प्र नभस्व पृथिवि भिन्द्धी३दं दिव्यं नभः ।
उद्नो दिव्यस्य नो धातरीशानो वि ष्या दृतिम् १
न घ्रंस्तताप न हिमो जघान प्र नभतां पृथिवी जीरदानुः ।
आपश्चिदस्मै घृतमित् क्षरन्ति यत्र सोमः सदमित् तत्र भद्रम् २ (४०)

[१९ (२०)] प्रजाः ।
१ ब्रह्मा । प्रजापतिः । जगती ।

प्रजापतिर्जनयति प्रजा इमा धाता दधातु सुमनस्यमानः
संजानानाः संमनसः सयोनयो मयि पुष्टं पुष्टपतिर्दधातु १ (४१)

[२० (२१)] अनुमतिः ।
१-६ अथर्वा । अनुमतिः । १-२ अनुष्टुप्, ३ त्रिष्टुप्, ४ भुरिक्, ५ जगती, ६ अतिशाक्वरगर्भा जगती ।

अन्वद्य नोऽनुमतिर्यज्ञं देवेषु मन्यताम् ।
अग्निश्च हव्यवाहनो भवतां दाशुषे मम १
अन्विदनुमते त्वं मंससे शं च नस्कृधि ।
जुषस्व हव्यमाहुतं प्रजां देवि ररास्व नः २
अनु मन्यतामनुमन्यमानः प्रजावन्तं रयिमक्षीयमाणम् ।
तस्य वयं हेडसि मापि भूम सुमृडीके अस्य सुमतौ स्याम ३
यत् ते नाम सुहवं सुप्रणीतेऽनुमते अनुमतं सुदानु ।
तेना नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम् ४
एमं यज्ञमनुमतिर्जगाम सुक्षेत्रतायै सुवीरतायै सुजातम् ।
भद्रा ह्यस्याः प्रमतिर्बभूव सेमं यज्ञमवतु देवगोपा ५
अनुमतिः सर्वमिदं बभूव यत् तिष्ठति चरति यदु च विश्वमेजति ।
तस्यास्ते देवि सुमतौ स्यामानुमते अनु हि मंससे नः ६ (४७)

[२१ (२२)] एको विभुः ।
१ ब्रह्मा । आत्मा । शक्वरी विराड्गर्भा जगती ।

समेत विश्वे वचसा पतिं दिव एको विभूरतिथिर्जनानाम् ।
स पूर्व्यो नूतनमाविवासत् तं वर्तनिरनु वावृत एकमित् पुरु १ (४८)

[२२ (२३)] ज्योतिः ।
१-२ ब्रह्मा । ब्रध्नः । १ द्विपदा एकावसाना विराड्गायत्री, २ त्रिपदा अनुष्टुप् ।

अयं सहस्रमा नो दृशे कवीनां मतिर्ज्योतिर्विधर्मणि १
ब्रध्नः समीचीरुषसः समैरयन् ।
अरेपसः सचेतसः स्वसरे मन्युमत्तमाश्चिते गोः २ (५०)

॥ इति द्वितीयोऽनुवाकः ॥२॥

[२३ (२४)] दुःष्वप्ननाशनम् ।
१ यमः । दुःष्वप्ननाशनम् । अनुष्टुप् ।

[३] दौष्वप्न्यं दौर्जीवित्यं रक्षो अभ्वमराय्यः ।
दुर्णाम्नीः सर्वा दुर्वाचस्ता अस्मन्नाशयामसि १ (५१)

[२४ (२५)] सविता ।
१ ब्रह्मा । इन्द्रः, अग्निः, विश्वे देवाः, मरुतः, सविता, प्रजापतिः अनुमतिः । त्रिष्टुप् ।

यन्न इन्द्रो अखनद् यदग्निर्विश्वे देवा मरुतो यत् स्वर्काः ।
तदस्मभ्यं सविता सत्यधर्मा प्रजापतिरनुमतिर्नि यच्छात् १ (५२)

[२५ (२६)] विष्णुः ।
१-२ मेधातिथिः । विष्णुः, वरुणः । त्रिष्टुप् ।

ययोरोजसा स्कभिता रजांसि यौ वीर्यैर्वीरतमा शविष्ठा ।
यौ पत्येते अप्रतीतौ सहोभिर्विष्णुमगन् वरुणं पूर्वहूतिः १
यस्येदं प्रदिशि यद् विरोचते प्र चानति वि च चष्टे शचीभिः ।
पुरा देवस्य धर्मणा सहोभिर्विष्णुमगन् वरुणं पूर्वहूतिः २ (५४)

[२६ (२७)] विष्णुः ।
१-८ मेधातिथिः । विष्णुः । १, ८ त्रिष्टुप्, २ त्रिपदा विराड्गायत्री, ३ त्र्यवसाना षट्पदा विराट् शक्वरी, ४-७ गायत्री ।

विष्णोर्नु कं प्रा वोचं वीर्याणि यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः १
प्र तद् विष्णु स्तवते वीर्याणि मृगो न भीमः कुचरो गिरिष्ठाः ।
परावत आ जगम्यात् परस्याः २ (५६)

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।
उरु विष्णो वि क्रमस्वोरु क्षयाय नस्कृधि ।
घृतं घृतयोने पिब प्रप्र यज्ञपतिं तिर ३
इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा । समूढमस्य पांसुरे ४
त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । इतो धर्माणि धारयन् ५
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ६
तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ७
दिवो विष्ण उत वा पृथिव्या महो विष्ण उरोरन्तरिक्षात् ।
हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणादोत सव्यात् ८ (६१)

[२७ (२८)] इडा ।
१ मेधातिथिः । इडा । त्रिष्टुप् ।

इडैवास्माँ अनु वस्तां व्रतेन यस्याः पदे पुनते देवयन्तः ।
घृतपदी शक्वरी सोमपृष्ठोप यज्ञमस्थित वैश्वदेवी १ (६२)

[२८ (२९)] स्वस्ति ।
१ मेधातिथिः । वेदः । त्रिष्टुप् ।

वेदः स्वस्तिर्द्रुघणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्ति ।
हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषन्ताम् १ (६४)

[२९ (३०)] अग्नाविष्णू ।
१-२ मेधातिथिः । अग्नाविष्णू । त्रिष्टुप् ।

अग्नाविष्णू महि तद् वां महित्वं पाथो घृतस्य गुह्यस्य नाम ।
दमेदमे सप्त रत्ना दधानौ प्रति वां जिह्वा घृतमा चरण्यात् १
अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणौ ।
दमेदमे सुष्टुत्या वावृधानौ प्रति वां जिह्वा घृतमुच्चरण्यात् २ (६६)

[३० (३१)] अञ्जनम् ।
१ भृग्वङ्गिराः । द्यावापृथिवी, मित्रः, ब्रह्मणस्पतिः, सविता च । बृहती ।

स्वाक्तं मे द्यावापृथिवी स्वाक्तं मित्रो अकरयम् ।
स्वाक्तं मे ब्रह्मणस्पतिः स्वाक्तं सविता करत् १ (६७)

[३१ (३२)] शत्रुनाशनम् ।
१ भृग्वङ्गिराः । इन्द्रः । भुरिक् त्रिष्टुप् ।

इन्द्रोतिभिर्बहुलाभिर्नो अद्य यावच्छ्रेष्ठाभिर्मघवञ्छूर जिन्व ।
यो नो द्वेष्ट्यधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु १ (६८)

[३२ (३३)] दीर्घायुः ।
१ ब्रह्मा । आयुः । अनुष्टुप् ।

उप प्रियं पनिप्नतं युवानमाहुतीवृधम् ।
अगन्म बिभ्रतो नमो दीर्घमायुः कृणोतु मे १ (६९)

[३३ (३४)] दीर्घायुः ।
१ ब्रह्मा । मरुतः, पूषा, बृहस्पतिः, अग्निः । पथ्यापङ्क्तिः ।

सं मा सिञ्चन्तु मरुतः सं पूषा सं बृहस्पतिः ।
सं मायमग्निः सिञ्चतु प्रजया च धनेन च दीर्घमायुः कृणोतु मे १ (७०)

[३४ (३५)] शत्रुनाशनम् ।
१ अथर्वा । जातवेदाः । जगती ।

अग्ने जातान् प्र णुदा मे सपत्नान् प्रत्यजातान् जातवेदो नुदस्व ।
अधस्पदं कृणुष्व ये पृतन्यवोऽनागसस्ते वयमदितये स्याम १ (७१)

[३५ (३६)] सपत्नीनाशनम् ।
१-३ अथर्वा । जातवेदाः । १ जगती, २ अनुष्टुप्, ३ त्रिष्टुप् ।

प्रान्यान्त्सपत्नान्त्सहसा सहस्व प्रत्यजातान् जातवेदो नुदस्व ।
इदं राष्ट्रं पिपृहि सौभगाय विश्व एनमनु मदन्तु देवाः १
इमा यास्ते शतं हिराः सहस्रं धमनीरुत ।
तासां ते सर्वासामहमश्मना बिलमप्यधाम् २
परं योनेरवरं ते कृणोमि मा त्वा प्रजाभि भून्मोत सूनुः ।
अस्वं१ त्वाप्रजसं कृणोम्यश्मानं ते अपिधानं कृणोमि ३ (७४)

[३६ (३७)] अञ्जनम् ।
१ अथर्वा । अक्षि, मनः । अनुष्टुप् ।

अक्ष्यौ३ नौ मधुसंकाशे अनीकं नौ समञ्जनम् ।
अन्तः कृणुष्व मां हृदि मन इन्नौ सहासति १ (७५)

[३७ (३८)] वासः ।
१ अथर्वा । वासः । अनुष्टुप् ।

अभि त्वा मनुजातेन दधामि मम वाससा ।
यथासो मम केवलो नान्यासां कीर्तयाश्चन १ (७६)

[३८ (३९)] केवलः पतिः ।
१-५ अथर्वा । वनस्पतिः । अनुष्टुप्, ३ चतुष्पदा उष्णिक् ।

इदं खनामि भेषजं मांपश्यमभिरोरुदम् । परायतो निवर्तनमायतः प्रतिनन्दनम् १
येना निचक्र आसुरीन्द्रं देवेभ्यस्परि । तेना नि कुर्वे त्वामहं यथा तेऽसानि सुप्रिया २
प्रतीची सोममसि प्रतीच्युत सूर्यम् । प्रतीची विश्वान् देवान् तां त्वाच्छावदामसि ३
अहं वदामि नेत् त्वं सभायामह त्वं वद । ममेदसस्त्वं केवलो नान्यासां कीर्तयाश्चन ४
यदि वासि तिरोजनं यदि वा नद्यस्तिरः । इयं ह मह्यं त्वामोषधिर्बद्ध्वेव न्यानयत् ५ (८१)

॥ इति तृतीयोऽनुवाकः ॥३॥

[३९ (४०)] आपः ।
१ प्रस्कण्वः । आपः, सुपर्णः, वृषभः । त्रिष्टुप् ।

[४] दिव्यं सुपर्णं पयसं बृहन्तमपां गर्भं वृषभमोषधीनाम् ।
अभीपतो वृष्ट्या तर्पयन्तमा नो गोष्ठे रयिष्ठां स्थापयाति १ (८२)

[४० (४१)] सरस्वान् ।
१-२ प्रस्कण्वः । सरस्वान् । १ भुरिक्, २ त्रिष्टुप् ।

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रत उपतिष्ठन्त आपः ।
यस्य व्रते पुष्टपतिर्निविष्टस्तं सरस्वन्तमवसे हवामहे १
आ प्रत्यञ्चं दाशुषे दाश्वंसं सरस्वन्तं पुष्टपतिं रयिष्ठाम् ।
रायस्पोषं श्रवस्युं वसाना इह हुवेम सदनं रयीणाम् २ (८४)

[४१ (४२)] सुपर्णः ।
१-२ प्रस्कण्वः । श्येनः । १ जगती, २ त्रिष्टुप् ।

अति धन्वान्यत्यपस्ततर्द श्येनो नृचक्षा अवसानदर्शः ।
तरन् विश्वान्यवरा रजांसीन्द्रेण सख्या शिव आ जगम्यात् १
श्येनो नृचक्षा दिव्यः सुपर्णः सहस्रपाच्छतयोनिर्वयोधाः ।
स नो नि यच्छाद् वसु यत् पराभृतमस्माकमस्तु पितृषु स्वधावत् २ (८६)

[४२ (४३)] पापमोचनम् ।
१-२ प्रस्कण्वः । सोमारुद्रौ । त्रिष्टुप् ।

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
बाधेथां दूरं निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुक्तमस्मत् १
सोमारुद्रा युवमेतान्यस्मद् विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो असत् तनूषु बद्धं कृतमेनो अस्मत् २ (८८)

[४३ (४४)] वाक् ।
१ प्रस्कण्वः । वाक् । त्रिष्टुप् ।

शिवास्त एका अशिवास्त एकाः सर्वा बिभर्षि सुमनस्यमानः ।
तिस्रो वाचो निहिता अन्तरस्मिन् तासामेका वि पपातानु घोषम् १ (८९)

[४४ (४५)] इन्द्राविष्णू ।
१ प्रस्कण्वः । इन्द्रः, विष्णुः । भुरिक् त्रिष्टुप् ।

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनयोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् १ (९०)

[४५ (४६-४७)] ईर्ष्यानिवारणम् ।
१-२ प्रस्कण्वः, २ अथर्वा । ईर्ष्यापनयनं, भेषजम् । अनुष्टुप् ।

जनाद् विश्वजनीनात् सिन्धुतस्पर्याभृतम् । दूरात् त्वा मन्य उद्भृतमीर्ष्याया नाम भेषजम् १
अग्नेरिवास्य दहतो दावस्य दहतः पृथक् । एतामेतस्येर्ष्यामुद्नाग्निमिव शमय २ (९१)

[४६ (४८)] सिनीवाली ।
१-३ अथर्वा । सिनीवाली । अनुष्टुप्, ३ त्रिष्टुप् ।

सिनीवालि पृथुष्टुके या देवानामसि स्वसा । जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः १
या सुबाहुः स्वङ्गुरिः सुषूमा बहुसूवरी । तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन २
या विश्पत्नीन्द्रमसि प्रतीची सहस्रस्तुकाभियन्ती देवी ।
विष्णोः पत्नि तुभ्यं राता हवींषि पतिं देवि राधसे चोदयस्व ३ (९५)

[४७ (४९)] कुहूः ।
१-२ अथर्वा । कुहूः । १ जगती, २ त्रिष्टुप् ।

कुहूं देवीं सुकृतं विद्मनापसमस्मिन् यज्ञे सुहवा जोहवीमि ।
सा नो रयिं विश्ववारं नि यच्छाद् ददातु वीरं शतदायमुक्थ्यम् १ (९६)

कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषो जुषेत ।
शृणोतु यज्ञमुशती नो अद्य रायस्पोषं चिकितुषी दधातु २ (९७)

[४८ (५०)] राका ।
१-२ अथर्वा । राका । जगती ।

राकामहं सुहवा सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना ।
सीव्यत्वपः सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यम् १
यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमना उपागहि सहस्रापोषं सुभगे रराणा २ (९९)

[४९ (५१)] देवपत्न्यः ।
१-२ अथर्वा । देवपत्नीः । १ आर्षी जगती, २ चतुष्पदा पङ्क्तिः ।

देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नस्तुजये वाजसातये ।
याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छन्तु १
उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्य१ग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् २ (१०१)

[५० (५२)] विजयः ।
१-९ अङ्गिराः (कितववधकामः) । इन्द्रः । अनुष्टुप्, ३, ७ त्रिष्टुप्, ४ जगती, ६ भुरिक् त्रिष्टुप् ।

यथा वृक्षमशनिर्विश्वाहा हन्त्यप्रति । एवाहमद्य कितवानक्षैर्बध्यासमप्रति १
तुराणामतुराणां विशामवर्जुषीणाम् । समैतु विश्वतो भगो अन्तर्हस्तं कृतं मम २
ईडे अग्निं स्वावसुं नमोभिरिह प्रसक्तो वि चयत् कृतं नः ।
रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणं मरुतां स्तोममृध्याम् ३
वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।
अस्मभ्यमिन्द्र वरीयः सुगं कृधि प्र शत्रूणां मघवन् वृष्ण्या रुज ४
अजैषं त्वा संलिखितमजैषमुत संरुधम् ।
अवि वृको यथा मथदेवा मथ्नामि ते कृतम् ५
उत प्रहामतिदीवा जयति कृतमिव श्वघ्नी वि चिनोति काले ।
यो देवकामो न धनं रुणद्धि समित् तं रायः सृजति स्वधाभिः ६
गोभिष्टरेमामतिं दुरेवां यवेन वा क्षुधं पुरुहूत विश्वे ।
वयं राजसु प्रथमा धनान्यरिष्टासो वृजनीभिर्जयेम ७ (१०८)

कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः ।
गोजिद् भूयासमश्वजिद् धनंजयो हिरण्यजित् ८
अक्षाः फलवतीं द्युवं दत्त गां क्षीरिणीमिव ।
सं मा कृतस्य धारया धनुः स्नाव्नेव नह्यत ९ (११०)

[५१ (५३)] परिपाणम् ।
१ अङ्गिराः । इन्द्राबृहस्पती । त्रिष्टुप् ।

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरीयः कृणोतु १ (१११)

॥ इति चतुर्थोऽनुवाकः ॥४॥

[५२ (५४)] सांमनस्यम् ।
१-२ अथर्वा । सांमनस्यं, अश्विनौ । १ ककुम्मत्यनुष्टुप्, २ जगती ।

[५] संज्ञानं नः स्वेभिः संज्ञानमरणेभिः ।
संज्ञानमश्विना युवमिहास्मासु नि यच्छतम् १
सं जानामहै मनसा सं चिकित्वा मा युष्महि मनसा दैव्येन ।
मा घोषा उत् स्थुर्बहुले विनिर्हते मेषुः पप्तदिन्द्रस्याहन्यागते २ (११३)

[५३ (५५)] दीर्घायुः ।
१-७ ब्रह्मा । आयुः, बृहस्पतिः अश्विनौ च । १-२ त्रिष्टुप्, ३ भुरिक्, ४ उष्णिग्गर्भार्षी पङ्क्तिः, ५-७ अनुष्टुप् ।

अमुत्रभूयादधि यद् यमस्य बृहस्पतेरभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्विना मृत्युमस्मद् देवानामग्ने भिषजा शचीभिः १
सं क्रामतं मा जहीतं शरीरं प्राणापानौ ते सयुजाविह स्ताम् ।
शतं जीव शरदो वर्धमानोऽग्निष्टे गोपा अधिपा वसिष्ठः २
आयुर्यत् ते अतिहितं पराचैरपानः प्राणः पुनरा ताविताम् ।
अग्निष्टदाहार्निर्ऋतेरुपस्थात् तदात्मनि पुनरा वेशयामि ते ३
मेमं प्राणो हासीन्मो अपानोऽवहाय परा गात् ।
सप्तर्षिभ्य एनं परि ददामि त एनं स्वस्ति जरसे वहन्तु ४
प्र विशतं प्राणापानावनड्वाहाविव व्रजम् । अयं जरिम्णः शेवधिररिष्ट इह वर्धताम् ५
आ ते प्राणं सुवामसि परा यक्ष्मं सुवामि ते । आयुर्नो विश्वतो दधदयमग्निर्वरेण्यः ६
उद् वयं तमसस्परि रोहन्तो नाकमुत्तमम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ७ (११०)

[५४ (५६, ५७-१)] अध्यापकविघ्नशमनम् ।

(१-२) १ ब्रह्मा, २ भृगुः । १ ऋक्सामनी, २ इन्द्रः । अनुष्टुप् ।

ऋचं साम यजामहे याभ्यां कर्माणि कुर्वते । एते सदसि राजतो यज्ञं देवेषु यच्छतः १
ऋचं साम यदप्राक्षं हविरोजो यजुर्बलम् । एष मा तस्मान्मा हिंसीद् वेदः पृष्टः शचीपते २ (१२२)

[५५ (५७-२)] मार्गस्वस्त्ययनम् ।

१ भृगुः । इन्द्रः । विराट् परोष्णिक् ।

ये ते पन्थानोऽव दिवो येभिर्विश्वमैरयः । तेभिः सुम्नया धेहि नो वसो १ (१२३)

[५६ (५८)] विषभैषज्यम् ।

१-८ अथर्वा । वृश्चिकादयः, २ वनस्पतिः, ४ ब्रह्मणस्पतिः । अनुष्टुप्, ४ विराट्प्रस्तारपङ्क्तिः ।

तिरश्चिराजेरसितात् पृदाकोः परि संभृतम् । तत् कङ्कपर्वणो विषमियं वीरुदनीनशत् १
इयं वीरुन्मधुजाता मधुश्चुन्मधुला मधूः । सा विह्रुतस्य भेषज्यथो मशकजम्भनी २
यतो दष्टं यतो धीतं ततस्ते निर्ह्वयामसि । अर्भस्य तृप्रदंशिनो मशकस्यारसं विषम् ३
अयं यो वक्रो विपरुर्व्यङ्गो मुखानि वक्रा वृजिना कृणोषि ।
तानि त्वं ब्रह्मणस्पत इषीकामिव सं नमः ४
अरसस्य शर्कोटस्य नीचीनस्योपसर्पतः । विषं ह्यस्यादिष्यथो एनमजीजभम् ५
न ते बाह्वोर्बलमस्ति न शीर्षे नोत मध्यतः । अथ किं पापयामुया पुच्छे बिभर्ष्यर्भकम् ६
अदन्ति त्वा पिपीलिका वि वृश्चन्ति मयूर्यः । सर्वे भल ब्रवाथ शार्कोटमरसं विषम् ७
य उभाभ्यां प्रहरसि पुच्छेन चास्येन च । आस्ये न ते विषं किमु ते पुच्छधावसत् ८ (१३१)

[५७ (५९)] सरस्वती ।

१-२ वामदेवः । सरस्वती । जगती ।

यदाशसा वदतो मे विचुक्षुभे यद् याचमानस्य चरतो जनाँ अनु ।
यदात्मनि तन्वो मे विरिष्टं सरस्वती तदा पृणद् घृतेन १
सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवृतन्नृतानि ।
उभे इदस्योभे अस्य राजत उभे यतेते उभे अस्य पुष्यतः २ (१३३)

[५८ (६०)] अन्नम् ।

१-२ कौरुपथिः । इन्द्रावरुणौ । जगती, २ त्रिष्टुप् ।

इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रतौ ।
युवो रथो अध्वरो देववीतये प्रति स्वसरमुप यातु पीतये १ (१३४)

इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमासद्यास्मिन् बर्हिषि मादयेथाम् २ (१३५)

[५९ (६१)] शाप-मोचनम् ।

१ बादरायणिः । अरिनाशनम् । अनुष्टुप् ।

यो नः शपादशपतः शपतो यश्च नः शपात् ।
वृक्ष इव विद्युता हत आ मूलादनु शुष्यतु १ (१३६)

[इति षोडशः प्रपाठकः ॥१६॥] ॥ इति पञ्चमोऽनुवाकः ॥५॥

[६० (६२)] रम्यं गृहम् ।

१-७ ब्रह्मा । गृहाः, वास्तोष्पतिः । अनुष्टुप्, १ परानुष्टुप् त्रिष्टुप् ।

[अथ सप्तदशः प्रपाठकः ॥ १७ ॥]

[६] ऊर्जं बिभ्रद् वसुवनिः सुमेधा अघोरेण चक्षुषा मित्रियेण ।
गृहानैमि सुमना वन्दमानो रमध्वं मा बिभीत मत् १
इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः । पूर्णा वामेन तिष्ठन्तस्ते नो जानन्त्वायतः २
येषामध्येति प्रवसन् येषु सौमनसो बहुः । गृहानुप ह्वयामहे ते नो जानन्त्वायतः ३
उपहूता भूरिधनाः सखायः स्वादुसंमुदः । अक्षुध्या अतृष्या स्त गृहा मास्मद् बिभीतन ४
उपहूता इह गाव उपहूता अजावयः । अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ५
सूनृतावन्तः सुभगा इरावन्तो हसामुदाः । अतृष्या अक्षुध्या स्त गृहा मास्मद् बिभीतन ६
इहैव स्त मानु गात विश्वा रूपाणि पुष्यत । ऐष्यामि भद्रेणा सह भूयांसो भवता मया ७
(१४३)

[६१ (६३)] तपः ।

१-२ अथर्वा । अग्निः । अनुष्टुप् ।

यदग्ने तपसा तप उपतप्यामहे तपः । प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधसः १
अग्ने तपस्तप्यामह उप तप्यामहे तपः । श्रुतानि शृण्वन्तो वयमायुष्मन्तः सुमेधसः २ (१४५)

[६२ (६४)] शत्रुनाशनम् ।

१ मरीचिः काश्यपः । अग्निः । जगती ।

अयमग्निः सत्पतिर्वृद्धवृष्णो रथीव पत्तीनजयत् पुरोहितः ।
नाभा पृथिव्यां निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः १ (१४६)

[६३ (६५)] दुरितनाशनम् ।

१ मरीचिः काश्यपः । जातवेदाः । जगती ।

पृतनाजितं सहमानमग्निमुक्थैर्हवामहे परमात् सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवोऽति दुरितान्यग्निः १ (१४७)

[६४ (६६)] पापमोचनम् ।

१-२ यमः । आपः, अग्निः, निर्ऋतिः । १ भुरिगनुष्टुप्, २ न्यङ्कुसारिणी बृहती ।

इदं यत् कृष्णः शकुनिरभिनिष्पतन्नपीपतत् ।
आपो मा तस्मात् सर्वस्माद् दुरितात् पान्त्वंहसः १
इदं यत् कृष्णः शकुनिरवामृक्षन्निर्ऋते ते मुखेन ।
अग्निर्मा तस्मादेनसो गार्हपत्यः प्र मुञ्चतु २ (१४९)

[६५ (६७)] दुरितनाशनम् ।

१-३ शुक्रः । अपामार्गवीरुत् । अनुष्टुप् ।

प्रतीचीनफलो हि त्वमपामार्ग रुरोहिथ । सर्वान् मच्छपथाँ अधि वरीयो यावया इतः १
यद् दुष्कृतं यच्छमलं यद् वा चेरिम पापया । त्वया तद् विश्वतोमुखापामार्गाप मृज्महे २
श्यावदता कुनखिना बण्डेन यत् सहासिम । अपामार्ग त्वया वयं सर्वं तदप मृज्महे ३ (१५२)

[६६ (६८)] ब्रह्म ।

१ ब्रह्मा । ब्रह्म । त्रिष्टुप् ।

यद्यन्तरिक्षे यदि वात आस यदि वृक्षेषु यदि वोलपेषु ।
यदश्रवन् पशव उद्यमानं तद् ब्राह्मणं पुनरस्मानुपैतु १ (१५३)

[६७ (६९)] आत्मा ।

१ ब्रह्मा । आत्मा । पुरःपरोष्णिग्बृहती ।

पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च । पुनरग्नयो धिष्ण्या यथास्थाम कल्पयन्तामिहैव १
(१५४)

[६८ (७०, ७१)] सरस्वती ।

१-३ शन्तातिः । सरस्वती । १ अनुष्टुप्, २ त्रिष्टुप्, ३ गायत्री ।

सरस्वति व्रतेषु ते दिव्येषु देवि धामसु । जुषस्व हव्यमाहुतं प्रजां देवि ररास्व नः १
इदं ते हव्यं घृतवत् सरस्वतीदं पितॄणां हविरास्यं यत् ।
इमानि त उदिता शंतमानि तेभिर्वयं मधुमन्तः स्याम २
शिवा नः शंतमा भव सुमृडीका सरस्वति । मा ते युयोम संदृशः ३ (१५७)

[६९ (७२)] सुखम् ।

१ शन्तातिः । सुखम् । पथ्यापङ्क्तिः ।

शं नो वातो वातु शं नस्तपतु सूर्यः ।
अहानि शं भवन्तु नः शं रात्री प्रति धीयतां शमुषा नो व्युच्छतु १ (१५८)

[७० (७३)] शत्रुदमनम् ।

१-५ अथर्वा । श्येनः, देवाः । १ त्रिष्टुप्, २ अतिजगतीगर्भा जगती, ३-५ अनुष्टुप्
(३ पुरःककुम्मती) ।

यत् किं चासौ मनसा यच्च वाचा यज्ञैर्जुहोति हविषा यजुषा ।
तन्मृत्युना निर्ऋतिः संविदाना पुरा सत्यादाहुतिं हन्त्वस्य १
यातुधाना निर्ऋतिरादु रक्षस्ते अस्य घ्नन्त्वनृतेन सत्यम् ।
इन्द्रेषिता देवा आज्यमस्य मथ्नन्तु मा तत् सं पादि यदसौ जुहोति २
अजिराधिराजौ श्येनौ संपातिनाविव । आज्यं पृतन्यतो हतां यो नः कश्चाभ्यघायति ३
अपाञ्चौ त उभौ बाहू अपि नह्याम्यास्यम् । अग्नेर्देवस्य मन्युना तेन तेऽवधिषं हविः ४
अपि नह्यामि ते बाहू अपि नह्याम्यास्यम् । अग्नेर्घोरस्य मन्युना तेन तेऽवधिषं हविः ५ (१६३)

[७१ (७४)] अग्निः ।

१ अथर्वा । अग्निः । अनुष्टुप् ।

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावतः १ (१६४)

[७२ (७५, ७६)] इन्द्रः ।

१-३ अथर्वा । इन्द्रः । १ अनुष्टुप्, २-३ त्रिष्टुप् ।

उत् तिष्ठताव पश्यतेन्द्रस्य भागमृत्वियम् । यदि श्रातं जुहोतन यद्यश्रातं ममत्तन १
श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो वि मध्यम् ।
परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् २
श्रातं मन्य ऊधनि श्रातमग्नौ सुशृतं मन्ये तदृतं नवीयः ।
माध्यन्दिनस्य सवनस्य दध्नः पिबेन्द्र वज्रिन् पुरुकृज्जुषाणः ३ (१६७)

[७३ (७७)] घर्मः ।

१-११ अथर्वा । घर्मः, अश्विनौ । त्रिष्टुप्, १, ४, ६ जगती, २ पथ्याबृहती ।

समिद्धो अग्निर्वृषणा रथी दिवस्तप्तो घर्मो दुह्यते वामिषे मधु ।
वयं हि वां पुरुदमासो अश्विना हवामहे सधमादेषु कारवः १ (१६८)

समिद्धो अग्निरश्विना तप्तो वां घर्म आ गतम् ।
दुह्यन्ते नूनं वृषणेह धेनवो दस्रा मदन्ति वेधसः २
स्वाहाकृतः शुचिर्देवेषु यज्ञो यो अश्विनोश्चमसो देवपानः ।
तमु विश्वे अमृतासो जुषाणा गन्धर्वस्य प्रत्यास्ना रिहन्ति ३
यदुस्रियास्वाहुतं घृतं पयोऽयं स वामश्विना भाग आ गतम् ।
माध्वी धर्तारा विदथस्य सत्पती तप्तं घर्मं पिबतं रोचने दिवः ४
तप्तो वां घर्मो नक्षतु स्वहोता प्र वामध्वर्युश्चरतु पयस्वान् ।
मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः ५
उप द्रव पयसा गोधुगोषमा घर्मे सिञ्च पय उस्रियायाः ।
वि नाकमख्यत् सविता वरेण्योऽनुप्रयाणमुषसो वि राजति ६
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचत् ७
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसा न्यागन् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ८
जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्य शत्रूयतामा भरा भोजनानि ९
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि १०
सूयवसाद् भगवती हि भूया अथा वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ११ (१७८)

॥ इति षष्ठोऽनुवाकः ॥६॥

[७४ (७८)] गण्डमालाचिकित्सा ।

१-४ अथर्वाङ्गिराः । मन्त्रोक्ताः, ४ जातवेदाः । अनुष्टुप् ।

[७] अपचितां लोहिनीनां कृष्णा मातेति शुश्रुम । मुनेर्देवस्य मूलेन सर्वा विध्यामि ता अहम् १
विध्याम्यासां प्रथमां विध्याम्युत मध्यमाम् । इदं जघन्यामासामा च्छिनद्मि स्तुकामिव २
त्वाष्ट्रेणाहं वचसा वि त ईर्ष्याममीमदम् । अथो यो मन्युष्टे पते तमु ते शमयामसि ३
व्रतेन त्वं व्रतपते समक्तो विश्वाहा सुमना दीदिहीह ।
तं त्वा वयं जातवेदः समिद्धं प्रजावन्त उप सदेम सर्वे ४ (१८९)

[७५ (७९)] अघ्न्याः ।

१-२ उपरिबभ्रवः । अघ्न्याः । १ त्रिष्टुप्, २ त्र्यवसाना पञ्चपदा भुरिक् पथ्यापङ्क्तिः ।

प्रजावतीः सूयवसे रुशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु १
पदज्ञा स्थ रमतयः संहिता विश्वनाम्नीः । उप मा देवीर्देवेभिरेत ।
इमं गोष्ठमिदं सदो घृतेनास्मान्त्समुक्षत २ (१८४)

[७६ (८०, ८१)] गण्डमालाचिकित्सा ।

१-६ अथर्वा । १, २ अपचिद्भैषज्यं, ३-६ जायान्यः, इन्द्रः । अनुष्टुप्, १ विराट्, २ परोष्णिक्, ५ भुरिगनुष्टुप्, ६ त्रिष्टुप् ।

आ सुस्रसः सुस्रसो असतीभ्यो असत्तराः । सेहोररसतरा लवणाद् विक्लेदीयसीः १
या ग्रैव्या अपचितोऽथो या उपपक्ष्याः । विजाम्नि या अपचितः स्वयंस्रसः २
यः कीकसाः प्रशृणाति तलीद्यमवतिष्ठति । निर्हास्तं सर्वं जायान्यं यः कश्च ककुदि श्रितः ३
पक्षी जायान्यः पतति स आ विशति पूरुषम् । तदक्षितस्य भेषजमुभयोः सुक्षतस्य च ४
विद्म वै ते जायान्य जानं यतो जायान्य जायसे । कथं ह तत्र त्वं हनो यस्य कृण्मो हविर्गृहे ५
धृषत् पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम् ।
माध्यन्दिने सवन आ वृषस्व रयिष्ठानो रयिमस्मासु धेहि ६ (१९०)

[७७ (८२)] शत्रुनाशनम् ।

१-३ अङ्गिराः । मरुतः । १ त्रिपदा गायत्री, २ त्रिष्टुप्, ३ जगती ।

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । अस्माकोती रिशादसः १
यो नो मर्तो मरुतो दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान् प्रति मुञ्चतां सस्तपिष्ठेन तपसा हन्तना तम् २
संवत्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषासः ।
ते अस्मत् पाशान् प्र मुञ्चन्त्वेनसः सांतपना मत्सरा मादयिष्णवः ३ (१९३)

[७८ (८३)] बन्धमोचनम् ।

१-२ अथर्वा । अग्निः । १ परोष्णिक्, २ त्रिष्टुप् ।

वि ते मुञ्चामि रशनां वि योक्त्रं वि नियोजनम् । इहैव त्वमजस्र एध्यग्ने १
अस्मै क्षत्राणि धारयन्तमग्ने युनज्मि त्वा ब्रह्मणा दैव्येन ।
दीदिह्यस्मभ्यं द्रविणेह भद्रं प्रेमं वोचो हविर्दां देवतासु

[७९ (८४)] अमावास्या ।

१-४ अथर्वा । अमावास्या । त्रिष्टुप्, १ जगती ।

यत् ते देवा अकृण्वन् भागधेयममावास्ये संवसन्तो महित्वा ।
तेना नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम् १
अहमेवास्म्यमावास्या३ मामा वसन्ति सुकृतो मयीमे ।
मयि देवा उभये साध्याश्चेन्द्रज्येष्ठाः समगच्छन्त सर्वे २
आगन् रात्री संगमनी वसूनामूर्जं पुष्टं वस्वावेशयन्ती ।
अमावास्यायै हविषा विधेमोर्जं दुहाना पयसा न आगन् ३
अमावास्ये न त्वदेतान्यन्यो विश्वा रूपाणि परिभूर्जजान ।
यत् कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ४ (१९९)

[८० (८५)] पूर्णिमा ।

१-४ अथर्वा । पौर्णमासी, ३ प्रजापतिः । त्रिष्टुप्, २ अनुष्टुप् ।

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवैः संवसन्तो महित्वा नाकस्य पृष्ठे समिषा मदेम १
वृषभं वाजिनं वयं पौर्णमासं यजामहे ।
स नो ददात्वक्षितां रयिमनुपदस्वतीम् २
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिभूर्जजान ।
यत् कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ३
पौर्णमासी प्रथमा यज्ञियासीदह्नां रात्रीणामतिशर्वरेषु ।
ये त्वां यज्ञैर्यज्ञिये अर्धयन्त्यमी ते नाके सुकृतः प्रविष्टाः ४ (२०३)

[८१ (८६)] सूर्याचन्द्रमसौ ।

१-६ अथर्वा । सावित्री, सूर्यः, चन्द्रमाः । त्रिष्टुप्, ३ अनुष्टुप्, ४ आस्तारपङ्क्तिः, ५ सम्राडास्तारपङ्क्तिः ।

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽर्णवम् ।
विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः १
नवोनवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।
भागं देवेभ्यो वि दधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः २ (२०५)

सोमस्यांशो युधां पतेऽनूनो नाम वा असि ।
अनूनं दर्श मा कृधि प्रजया च धनेन च ३
दर्शोऽसि दर्शतोऽसि समग्रोऽसि समन्तः ।
समग्रः समन्तो भूयासं गोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन ४
योऽस्मान् द्वेष्टि यं वयं द्विष्मस्तस्य त्वं प्राणेना प्यायस्व ।
आ वयं प्याशिषीमहि गोभिरश्वैः प्रजया पशुभिर्गृहैर्धनेन ५
यं देवा अंशुमाप्याययन्ति यमक्षितमक्षिता भक्षयन्ति ।
तेनास्मानिन्द्रो वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः ६ (२०९)

॥ इति सप्तमोऽनुवाकः ॥७॥

[८२ (८७)] अग्निः ।

१-६ शौनकः (संपत्कामः) । अग्निः । त्रिष्टुप्, २ ककुम्मती बृहती, ३ जगती ।

[८] अभ्यर्चत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ताम् १
मय्यग्रे अग्निं गृह्णामि सह क्षत्रेण वर्चसा बलेन ।
मयि प्रजां मय्यायुर्दधामि स्वाहा मय्यग्निम् २
इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन् पूर्वचित्ता निकारिणः ।
क्षत्रेणाग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ३
अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य उषसो अनु रश्मीननु द्यावापृथिवी आ विवेश ४
प्रत्यग्निरुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः ।
प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावापृथिवी आ ततान ५
घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे ।
घृतं ते देवीर्नप्त्य आ वहन्तु घृतं तुभ्यं दुह्रतां गावो अग्ने ६ (२१५)

[८३ (८८)] पाशमोचनम् ।

१-४ शुनःशेपः । वरुणः । अनुष्टुप्, २ पथ्यापङ्क्तिः, ३ त्रिष्टुप्, ४ बृहतीगर्भा त्रिष्टुप् ।

अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः ।
ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु १ (२१६)

धाम्नोधाम्नो राजन्नितो वरुण मुञ्च नः ।
यदापो अघ्न्या इति वरुणेति यदूचिम ततो वरुण मुञ्च नः २
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अधा वयमादित्य व्रते तवानागसो अदितये स्याम ३
प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उत्तमा अधमा वारुणा ये ।
दुष्वप्न्यं दुरितं नि ष्वास्मदथ गच्छेम सुकृतस्य लोकम् ४ (२२१)

[८४ (८९)] क्षत्रभृदग्निः ।

१-३ भृगुः । १ जातवेदा अग्निः, २-३ इन्द्रः । त्रिष्टुप्, १ जगती ।

अनाधृष्यो जातवेदा अमर्त्यो विराडग्ने क्षत्रभृद् दीदिहीह ।
विश्वा अमीवाः प्रमुञ्चन् मानुषीभिः शिवाभिरद्य परि पाहि नो गयम् १
इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रायन्तमुरुं देवेभ्यो अकृणोरु लोकम् २
मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगम्यात् परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व ३ (२२२)

[८५ (९०)] अरिष्टनेमिः ।

१ अथर्वा (स्वस्त्ययनकामः) । तार्क्ष्यः । त्रिष्टुप् ।

त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजिमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम १ (२२३)

[८६ (९१)] त्राता इन्द्रः ।

१ अथर्वा (स्वस्त्ययनकामः) । इन्द्रः । त्रिष्टुप् ।

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रं स्वस्ति न इन्द्रो मघवान् कृणोतु १ (२२४)

[८७ (९२)] व्यापको देवः ।

१ अथर्वा । रुद्रः । जगती ।

यो अग्नौ रुद्रो यो अप्स्व१न्तर्य ओषधीर्वीरुध आविवेश ।
य इमा विश्वा भुवनानि चाक्लृपे तस्मै रुद्राय नमो अस्त्वग्नये १ (२२५)

[८८ (९३)] सर्पविषनाशनम् ।

१ गरुत्मान् । तक्षकः । त्र्यवसाना बृहती ।

अपेह्यरिरस्यरिर्वा असि । विषे विषमपृक्था विषमिद् वा अपृक्थाः ।
अहिमेवाभ्यपेहि तं जहि १ (२२६)

[८९ (९४)] दिव्या आपः ।

१-४ सिन्धुद्वीपः । अग्निः । अनुष्टुप्, ४ त्रिपदा निचृत् परोष्णिक् ।

अपो दिव्या अचायिषं रसेन समपृक्ष्महि । पयस्वानग्न आगमं तं मा सं सृज वर्चसा १
सं माग्ने वर्चसा सृज सं प्रजया समायुषा । विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः २
इदमापः प्र वहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् ३
एधोऽस्येधिषीय समिदसि समेधिषीय । तेजोऽसि तेजो मयि धेहि ४ (२३०)

[९० (९५)] शत्रुबलनाशनम् ।

१-३ अङ्गिराः । मन्त्रोक्ताः । १ गायत्री, २ विराट् पुरस्ताद् बृहती, ३ त्र्यवसाना षट्पदा भुरिग्जगती ।

अपि वृश्च पुराणवद् व्रततेरिव गुष्पितम् । ओजो दासस्य दम्भय १
वयं तदस्य संभृतं वस्विन्द्रेण वि भजामहे । म्लापयामि भ्रजः शिभ्रं वरुणस्य व्रतेन ते २
यथा शेपो अपायातै स्त्रीषु चासदनावयाः । अवस्थस्य क्नदीवतः शाङ्कुरस्य नितोदिनः
यदाततमव तत् तनु यदुत्ततं नि तत् तनु ३ (२३३)

॥ इति अष्टमोऽनुवाकः ॥८॥

[९१ (९६)] सुत्रामा इन्द्रः ।

१ अथर्वा । चन्द्रमाः (इन्द्रः ?) । त्रिष्टुप् ।

[९] इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कृणोतु सुवीर्यस्य पतयः स्याम १ (२३४)

[९२ (९७)] सुत्रामा इन्द्रः ।

१ अथर्वा । चन्द्रमाः (इन्द्रः?) । त्रिष्टुप् ।

स सुत्रामा स्ववाँ इन्द्रो अस्मदाराच्चिद् द्वेषः सनुतर्युयोतु ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम १ (२३५)

[९३ (९८)] शत्रुनाशनम् ।

१-२४ अथर्वा । मधु, अश्विनौ । त्रिष्टुप्; २ त्रिष्टुब्गर्भा पङ्क्तिः; ३ परानुष्टुप्; ६ यवमध्या अतिशाक्करीगर्भा महाबृहती; ७ यवमध्या अतिजागतगर्भा महाबृहती; ८ बृहतीगर्भा संस्तारपङ्क्तिः; ९ पराबृहती प्रस्तारपङ्क्तिः; १० परोष्णिक्पङ्क्तिः; ११-१३, १५-१६, १८-१९ अनुष्टुप्; १४ पुर उष्णिक्; १७ उपरिष्टाद्विराड् बृहती; २० भुरिग्विष्टारपङ्क्तिः; २१ एकावसाना द्विपदार्च्यनुष्टुप्; २२ त्रिपदा ब्राह्मी पुर उष्णिक्; २३ द्विपदा आर्ची पङ्क्तिः; २४ त्र्यवसाना षट्पदाष्टिः ।

[अथ विंशः प्रपाठकः ॥२०॥]

[१] दिवस्पृथिव्या अन्तरिक्षात् समुद्रादग्नेर्वातान्मधुकशा हि जज्ञे ।
तां चायित्वामृतं वसानां हृद्भिः प्रजाः प्रति नन्दन्ति सर्वाः १
महत् पयो विश्वरूपमस्याः समुद्रस्य त्वोत रेत आहुः ।
यत ऐति मधुकशा रराणा तत् प्राणस्तदमृतं निविष्टम् २
पश्यन्त्यस्याश्चरितं पृथिव्यां पृथङ् नरो बहुधा मीमांसमानाः ।
अग्नेर्वातान्मधुकशा हि जज्ञे मरुतामुग्रा नप्तिः ३
मातादित्यानां दुहिता वसूनां प्राणः प्रजानाममृतस्य नाभिः ।
हिरण्यवर्णा मधुकशा घृताची महान् भर्गश्चरति मर्त्येषु ४
मधोः कशामजनयन्त देवास्तस्या गर्भो अभवद् विश्वरूपः ।
तं जातं तरुणं पिपर्ति माता स जातो विश्वा भुवना वि चष्टे ५
कस्तं प्र वेद क उ तं चिकेत यो अस्या हृदः कलशः सोमधानो अक्षितः ।
ब्रह्मा सुमेधाः सो अस्मिन् मदेत ६
स तौ प्र वेद स उ तौ चिकेत यावस्याः स्तनौ सहस्रधारावक्षितौ ।
ऊर्जं दुहाते अनपस्फुरन्तौ ७
हिङ्करिक्रती बृहती वयोधा उच्चैर्घोषाभ्येति या व्रतम् ।
त्रीन् घर्मानभि वावशाना मिमाति मायुं पयते पयोभिः ८ (८)

यामापीनामुपसीदन्त्यापः शाक्वरा वृषभा ये स्वराजः ।
ते वर्षन्ति ते वर्षयन्ति तद्विदे काममूर्जमापः ९
स्तनयित्नुस्ते वाक् प्रजापते वृषा शुष्मं क्षिपसि भूम्यामधि ।
अग्नेर्वातान्मधुकशा हि जज्ञे मरुतामुग्रा नप्तिः १० (१)
यथा सोमः प्रातःसवने अश्विनोर्भवति प्रियः ।
एवा मे अश्विना वर्च आत्मनि ध्रियताम् ११
यथा सोमो द्वितीये सवन इन्द्राग्न्योर्भवति प्रियः ।
एवा म इन्द्राग्नी वर्च आत्मनि ध्रियताम् १२
यथा सोमस्तृतीये सवन ऋभूणां भवति प्रियः ।
एवा म ऋभवो वर्च आत्मनि ध्रियताम् १३
मधु जनिषीय मधु वंशिषीय ।
पयस्वानग्न आगमं तं मा सं सृज वर्चसा १४
सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः १५
यथा मधु मधुकृतः संभरन्ति मधावधि ।
एवा मे अश्विना वर्च आत्मनि ध्रियताम् १६
यथा मक्षा इदं मधु न्यञ्जन्ति मधावधि ।
एवा मे अश्विना वर्चस्तेजो बलमोजश्च ध्रियताम् १७
यद् गिरिषु पर्वतेषु गोष्वश्वेषु यन्मधु ।
सुरायां सिच्यमानायां यत् तत्र मधु तन्मयि १८
अश्विना सारघेण मा मधुनाङ्क्तं शुभस्पती ।
यथा वर्चस्वतीं वाचमावदानि जनाँ अनु १९
स्तनयित्नुस्ते वाक् प्रजापते वृषा शुष्मं क्षिपसि भूम्यां दिवि ।
तां पशव उप जीवन्ति सर्वे तेनो सेषमूर्जं पिपर्ति २०
पृथिवी दण्डोऽन्तरिक्षं गर्भो द्यौः कशा विद्युत् प्रकशो हिरण्ययो बिन्दुः २१
यो वै कशायाः सप्त मधूनि वेद मधुमान् भवति ।
ब्राह्मणश्च राजा च धेनुश्चानड्वांश्च व्रीहिश्च यवश्च मधु सप्तमम् २२ (११)

मधुमान् भवति मधुमदस्याहार्यं भवति ।
मधुमतो लोकान् जयति य एवं वेद २३
यद् वीध्रे स्तनयति प्रजापतिरेव तत् प्रजाभ्यः प्रादुर्भवति ।
तस्मात् प्राचीनोपवीतस्तिष्ठे प्रजापतेऽनु मा बुध्यस्वेति ।
अन्वेनं प्रजा अनु प्रजापतिर्बुध्यते य एवं वेद २४ (२) (२४)

(२) कामः ।

१-२५ अथर्वा । कामः । त्रिष्टुप्; ५ अतिजगती; ७; १४-१५, १७-१८, २१-२२ जगती; ८ द्विपदा आर्ची पङ्क्तिः; ११,२०,२३ भुरिक्; १२ अनुष्टुप्; १३ द्विपदार्ची अनुष्टुप्; १६ चतुष्पदा शक्वरीगर्भा परा जगती ।

सपत्नहनमृषभं घृतेन कामं शिक्षामि हविषाज्येन ।
नीचैः सपत्नान् मम पादय त्वमभिष्टुतो महता वीर्येण १
यन्मे मनसो न प्रियं न चक्षुषो यन्मे बभस्ति नाभिनन्दति ।
तद् दुष्वप्न्यं प्रति मुञ्चामि सपत्ने कामं स्तुत्वोदहं भिदेयम् २
दुष्वप्न्यं काम दुरितं च कामाप्रजस्तामस्वगतामवर्तिम् ।
उग्र ईशानः प्रति मुञ्च तस्मिन् यो अस्मभ्यमंहूरणा चिकित्सात् ३
नुदस्व काम प्र णुदस्व कामावर्तिं यन्तु मम ये सपत्नाः ।
तेषां नुत्तानामधमा तमांस्यग्ने वास्तूनि निर्दह त्वम् ४
सा ते काम दुहिता धेनुरुच्यते यामाहुर्वाचं कवयो विराजम् ।
तया सपत्नान् परि वृङ्ग्धि ये मम पर्येनान् प्राणः पशवो जीवनं वृणक्तु ५
कामस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर्बलेन सवितुः सवेन ।
अग्नेर्होत्रेण प्र णुदे सपत्नाञ्छम्बीव नावमुदकेषु धीरः ६
अध्यक्षो वाजी मम काम उग्रः कृणोतु मह्यमसपत्नमेव ।
विश्वे देवा मम नाथं भवन्तु सर्वे देवा हवमा यन्तु म इमम् ७
इदमाज्यं घृतवज्जुषाणाः कामज्येष्ठा इह मादयध्वम् ।
कृण्वन्तो मह्यमसपत्नमेव ८
इन्द्राग्नी काम सरथं हि भूत्वा नीचैः सपत्नान् मम पादयाथः ।
तेषां पन्नानामधमा तमांस्यग्ने वास्तून्यनुनिर्दह त्वम् ९ (३३)

जहि त्वं काम मम ये सपत्ना अन्धा तमांस्यव पादयैनान् ।
निरिन्द्रिया अरसाः सन्तु सर्वे मा ते जीविषुः कतमच्चनाहः १० (३)
अवधीत् कामो मम ये सपत्ना उरुं लोकमकरन्मह्यमेधतुम् ।
मह्यं नमन्तां प्रदिशश्चतस्रो मह्यं षडुर्वीर्घृतमा वहन्तु ११
तेऽधराञ्चः प्र प्लवन्तां छिन्ना नौरिव बन्धनात् ।
न सायकप्रणुत्तानां पुनरस्ति निवर्तनम् १२
अग्निर्यव इन्द्रो यवः सोमो यवः ।
यवयावानो देवा यावयन्त्वेनम् १३
असर्ववीरश्चरतु प्रणुत्तो द्वेष्यो मित्राणां परिवर्ग्यः स्वानाम् ।
उत पृथिव्यामव स्यन्ति विद्युत उग्रो वो देवः प्र मृणत् सपत्नान् १४
च्युता चेयं बृहत्यच्युता च विद्युद् बिभर्ति स्तनयित्नूंश्च सर्वान् ।
उद्यन्नादित्यो द्रविणेन तेजसा नीचैः सपत्नान् नुदतां मे सहस्वान् १५
यत् ते काम शर्म त्रिवरूथमुद्भु ब्रह्म वर्म विततमनतिव्याध्यं कृतम् ।
तेन सपत्नान् परि वृङ्ग्धि ये मम पर्येनान् प्राणः पशवो जीवनं वृणक्तु १६
येन देवा असुरान् प्राणुदन्त येनेन्द्रो दस्यूनधमं तमो निनाय ।
तेन त्वं काम मम ये सपत्नास्तानस्माल्लोकात् प्र णुदस्व दूरम् १७
यथा देवा असुरान् प्राणुदन्त यथेन्द्रो दस्यूनधमं तमो बबाधे ।
तथा त्वं काम मम ये सपत्नास्तानस्माल्लोकात् प्र णुदस्व दूरम् १८
कामो जज्ञे प्रथमो नैनं देवा आपुः पितरो न मर्त्याः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि १९
यावती द्यावापृथिवी वरिम्णा यावदापः सिष्यदुर्यावदग्निः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि २०(४)
यावतीर्दिशः प्रदिशो विषूचीर्यावतीराशा अभिचक्षणा दिवः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि २१
यावतीर्भृङ्गा जत्वः कुरूरवो यावतीर्वघा वृक्षसर्प्यो बभूवुः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि २२
ज्यायान् निमिषतोऽसि तिष्ठतो ज्यायान्त्समुद्रादसि काम मन्यो ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि २३ (४७)

न वै वातश्चन काममाप्नोति नाग्निः सूर्यो नोत चन्द्रमाः ।
ततस्त्वमसि ज्यायान् विश्वहा महांस्तस्मै ते काम नम इत् कृणोमि २४
यास्ते शिवास्तन्वः काम भद्रा याभिः सत्यं भवति यद् वृणीषे ।
ताभिष्ट्वमस्माँ अभिसंविशस्वान्यत्र पापीरप वेशया धियः २५ (५) (४९)

॥ इति प्रथमोऽनुवाकः ॥१॥

(३) शाला ।

१-३१ भृग्वङ्गिराः । शाला । अनुष्टुप्; ६ पथ्यापङ्क्तिः; ७ परोष्णिक्; १५ त्र्यवसाना पञ्चपदातिशक्वरी; १७ प्रस्तारपङ्क्तिः; २१ आस्तारपङ्क्तिः; २५, ३१ त्रिपदा प्राजापत्या बृहती; २६ साम्नी त्रिष्टुप्; २७-३० प्रतिष्ठानाम गायत्री; (२५-३१ एकावसाना त्रिपदा) ।

[२] उपमितां प्रतिमितामथो परिमितामुत ।
शालाया विश्ववाराया नद्धानि वि चृतामसि १
यत् ते नद्धं विश्ववारे पाशो ग्रन्थिश्च यः कृतः ।
बृहस्पतिरिवाहं बलं वाचा वि स्रंसयामि तत् २
आ ययाम सं बबर्ह ग्रन्थींश्चकार ते दृढान् ।
परूंषि विद्वाञ्छस्तेवेन्द्रेण वि चृतामसि ३
वंशानां ते नहनानां प्राणाहस्य तृणस्य च ।
पक्षाणां विश्ववारे ते नद्धानि वि चृतामसि ४
संदंशानां पलदानां परिष्वञ्जल्यस्य च ।
इदं मानस्य पत्न्या नद्धानि वि चृतामसि ५
यानि तेऽन्तः शिक्यान्याबेधू रण्याय कम् ।
प्र ते तानि चृतामसि शिवा मानस्य पत्नी न उद्धिता तन्वे भव ६
हविर्धानमग्निशालं पत्नीनां सदनं सदः ।
सदो देवानामसि देवि शाले ७
अक्षुमोपशं विततं सहस्राक्षं विषूवति ।
अवनद्धमभिहितं ब्रह्मणा वि चृतामसि ८
यस्त्वा शाले प्रतिगृह्णाति येन चासि मिता त्वम् ।
उभौ मानस्य पत्नि तौ जीवतां जरदष्टी ९ (५८)

अमुत्रैनमा गच्छताद् दृढा नद्धा परिष्कृता ।
यस्यास्ते विचृतामस्यङ्गमङ्गं परुष्परुः १० (६)

यस्त्वा शाले निमिमाय संजभार वनस्पतीन्
प्रजायै चक्रे त्वा शाले परमेष्ठी प्रजापतिः ११

नमस्तस्मै नमो दात्रे शालापतये च कृण्मः ।
नमोऽग्नये प्रचरते पुरुषाय च ते नमः १२

गोभ्यो अश्वेभ्यो नमो यच्छालायां विजायते ।
विजावति प्रजावति वि ते पाशांश्चृतामसि १३

अग्निमन्तश्छादयसि पुरुषान् पशुभिः सह ।
विजावति प्रजावति वि ते पाशांश्चृतामसि १४

अन्तरा द्यां च पृथिवीं च यद् व्यचस्तेन शालां प्रति गृह्णामि त इमाम् ।
यदन्तरिक्षं रजसो विमानं तत् कृण्वेऽहमुदरं शेवधिभ्यः ।
तेन शालां प्रति गृह्णामि तस्मै १५

ऊर्जस्वती पयस्वती पृथिव्यां निमिता मिता ।
विश्वान्नं बिभ्रती शाले मा हिंसीः प्रतिगृह्णतः १६

तृणैरावृता पलदान् वसाना रात्रीव शाला जगतो निवेशनी ।
मिता पृथिव्यां तिष्ठसि हस्तिनीव पद्वती १७

इटस्य ते वि चृताम्यपिनद्धमपोर्णुवन् ।
वरुणेन समुब्जितां मित्रः प्रातर्व्युब्जतु १८

ब्रह्मणा शालां निमितां कविभिर्निमितां मिताम् ।
इन्द्राग्नी रक्षतां शालाममृतौ सोम्यं सदः १९

कुलायेऽधि कुलायं कोशे कोशः समुब्जितः ।
तत्र मर्तो वि जायते यस्माद् विश्वं प्रजायते २० (७)

या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमीयते ।
अष्टापक्षां दशपक्षां शालां मानस्य पत्नीमग्निर्गर्भ इवा शये २१

प्रतीचीं त्वा प्रतीचीनः शाले प्रैम्यहिंसतीम् ।
अग्निर्ह्य१न्तरापश्चर्तस्य प्रथमा द्वाः २२ (७१)

इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः ।
गृहानुप प्र सीदाम्यमृतेन सहाग्निना २३

मा नः पाशं प्रति मुचो गुरुर्भारो लघुर्भव ।
वधूमिव त्वा शाले यत्रकामं भरामसि २४

प्राच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः २५
दक्षिणाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः २६
प्रतीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः २७
उदीच्या दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः २८
ध्रुवाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः २९
ऊर्ध्वाया दिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ३०
दिशोदिशः शालाया नमो महिम्ने स्वाहा देवेभ्यः स्वाह्येभ्यः ३१ (८) (८०)

(४) ऋषभः ।

१-२४ ब्रह्मा । ऋषभः । त्रिष्टुप्, ८ भुरिक्, ६, १०, २४ जगती; ११-१७, १९-२०, २३ अनुष्टुप्, १८ उपरिष्टाद्बृहती; २१ आस्तारपङ्क्तिः ।

साहस्रस्त्वेष ऋषभः पयस्वान् विश्वा रूपाणि वक्षणासु बिभ्रत् ।
भद्रं दात्रे यजमानाय शिक्षन् बार्हस्पत्य उस्रियस्तन्तुमातान् १

अपां यो अग्रे प्रतिमा बभूव प्रभूः सर्वस्मै पृथिवीव देवी ।
पिता वत्सानां पतिरघ्न्यानां साहस्रे पोषे अपि नः कृणोतु २

पुमानन्तर्वान्त्स्थविरः पयस्वान् वसोः कबन्धमृषभो बिभर्ति ।
तमिन्द्राय पथिभिर्देवयानैर्हुतमग्निर्वहतु जातवेदाः ३

पिता वत्सानां पतिरघ्न्यानामथो पिता महतां गर्गराणाम् ।
वत्सो जरायु प्रतिधुक् पीयूष आमिक्षा घृतं तद् वस्य रेतः ४

देवानां भाग उपनाह एषो३पां रस ओषधीनां घृतस्य ।
सोमस्य भक्षमवृणीत शक्रो बृहन्नद्रिरभवद् यच्छरीरम् ५

सोमेन पूर्णं कलशं बिभर्षि त्वष्टा रूपाणां जनिता पशूनाम् ।
शिवास्ते सन्तु प्रजन्व इह या इमा न्य१स्मभ्यं स्वधिते यच्छ या अमूः ६

आज्यं बिभर्ति घृतमस्य रेतः साहस्रः पोषस्तमु यज्ञमाहुः ।
इन्द्रस्य रूपमृषभो वसानः सो अस्मान् देवाः शिव ऐतु दत्तः ७ (८७)

इन्द्रस्यौजो वरुणस्य बाहू अश्विनोरंसौ मरुतामियं ककुत् ।
बृहस्पतिं संभृतमेतमाहुर्ये धीरासः कवयो ये मनीषिणः ८

दैवीर्विशः पयस्वाना तनोषि त्वामिन्द्रं त्वां सरस्वन्तमाहुः ।
सहस्रं स एकमुखा ददाति यो ब्राह्मण ऋषभमाजुहोति ९

बृहस्पतिः सविता ते वयो दधौ त्वष्टुर्वायोः पर्यात्मा त आभृतः ।
अन्तरिक्षे मनसा त्वा जुहोमि बर्हिष्टे द्यावापृथिवी उभे स्ताम् १० (९)

य इन्द्र इव देवेषु गोष्वेति विवावदत् ।
तस्य ऋषभस्याङ्गानि ब्रह्मा सं स्तौतु भद्रया ११

पार्श्वे आस्तामनुमत्या भगस्यास्तामनूवृजौ ।
अष्ठीवन्तावब्रवीन्मित्रो ममैतौ केवलाविति १२

भसदासीदादित्यानां श्रोणी आस्तां बृहस्पतेः ।
पुच्छं वातस्य देवस्य तेन धूनोत्योषधीः १३

गुदा आसन्त्सिनीवाल्याः सूर्यायास्त्वचमब्रुवन् ।
उत्थातुरब्रुवन् पद ऋषभं यदकल्पयन् १४

क्रोड आसीज्जामिशंसस्य सोमस्य कलशो धृतः ।
देवाः संगत्य यत् सर्व ऋषभं व्यकल्पयन् १५

ते कुष्ठिकाः सरमायै कूर्मेभ्यो अदधुः शफान् ।
ऊबध्यमस्य कीटेभ्यः श्ववर्तेभ्यो अधारयन् १६

शृङ्गाभ्यां रक्ष ऋषत्यवर्तिं हन्ति चक्षुषा ।
शृणोति भद्रं कर्णाभ्यां गवां यः पतिरघ्न्यः १७

शतयाजं स यजते नैनं दुन्वन्त्यग्नयः ।
जिन्वन्ति विश्वे तं देवा यो ब्राह्मण ऋषभमाजुहोति १८

ब्राह्मणेभ्य ऋषभं दत्त्वा वरीयः कृणुते मनः ।
पुष्टिं सो अघ्न्यानां स्वे गोष्ठेऽव पश्यते १९

गावः सन्तु प्रजाः सन्त्वथो अस्तु तनूबलम् ।
तत् सर्वमनु मन्यन्तां देवा ऋषभदायिने २०

अयं पिपान इन्द्र इद् रयिं दधातु चेतनीम् ।
अयं धेनुं सुदुघां नित्यवत्सां वशं दुहां विपश्चितं परो दिवः २१ (१०

पिशङ्गरूपो नभसो वयोधा ऐन्द्रः शुष्मो विश्वरूपो न आगन् ।
आयुरस्मभ्यं दधत् प्रजां च रायश्च पोषैरभि नः सचताम् २२

उपेहोपपर्चनास्मिन् गोष्ठ उप पृञ्च नः ।
उप ऋषभस्य यद् रेत उपेन्द्र तव वीर्यम् २३

एतं वो युवानं प्रति दध्मो अत्र तेन क्रीडन्तीश्चरत वशाँ अनु ।
मा नो हासिष्ट जनुषा सुभागा रायश्च पोषैरभि नः सचध्वम् २४ (१०)(१०४)

॥ इति द्वितीयोऽनुवाकः ॥२॥

(५) पञ्चौदनो अजः ।

१-३८ भृगुः । पञ्चौदनोऽजः; मन्त्रोक्ताः । त्रिष्टुप्, ३ चतुष्पदा पुरोतिशक्वरी जगती, ४, १० जगती; १४, १७, २७-३० अनुष्टुप् (३० ककुम्मती); १६ त्रिपदानुष्टुप्, १८, ३७ त्रिपदा विराड् गायत्री; २३ पुर उष्णिक्; २४ पञ्चपदानुष्टुबुष्णिग्गर्भोपरिष्टाद्विराड् जगती; २०-२२, २६ पञ्चपदानुष्टुबुष्णिग्गर्भोपरिष्टाद्बार्हता भुरिक्; ३१ सप्तपदाष्टिः; ३२-३५ दशपदा प्रकृतिः; ३६ दशपदाऽऽकृतिः; ३८ एकावसाना द्विपदा साम्नी त्रिष्टुप् ।

[३] आ नयैतमा रभस्व सुकृतां लोकमपि गच्छतु प्रजानन् ।
तीर्त्वा तमांसि बहुधा महान्त्यजो नाकमा क्रमतां तृतीयम् १

इन्द्राय भागं परि त्वा नयाम्यस्मिन् यज्ञे यजमानाय सूरिम् ।
ये नो द्विषन्त्यनु तान् रभस्वानागसो यजमानस्य वीराः २

प्र पदोऽव नेनिग्धि दुश्चरितं यच्चचार शुद्धैः शफैरा क्रमतां प्रजानन् ।
तीर्त्वा तमांसि बहुधा विपश्यन्नजो नाकमा क्रमतां तृतीयम् ३

अनु च्छ्य श्यामेन त्वचमेतां विशस्तर्यथापर्व१सिना माभि मंस्थाः ।
माभि द्रुहः परुशः कल्पयैनं तृतीये नाके अधि वि श्रयैनम् ४

ऋचा कुम्भीमध्यग्नौ श्रयाम्या सिञ्चोदकमव धेह्येनम् ।
पर्याधत्ताग्निना शमितारः शृतो गच्छतु सुकृतां यत्र लोकः ५

उत् क्रामातः परि चेदतप्तस्तप्ताच्चरोरधि नाकं तृतीयम् ।
अग्नेरग्निरधि सं बभूविथ ज्योतिष्मन्तमभि लोकं जयैतम् ६

अजो अग्निरजमु ज्योतिराहुरजं जीवता ब्रह्मणे देयमाहुः ।
अजस्तमांस्यप हन्ति दूरमस्मिँल्लोके श्रद्दधानेन दत्तः ७ (१११)

पञ्चौदनः पञ्चधा वि क्रमतामाक्रंस्यमानस्त्रीणि ज्योतींषि ।
ईजानानां सुकृतां प्रेहि मध्यं तृतीये नाके अधि वि श्रयस्व ८
अजा रोह सुकृतां यत्र लोकः शरभो न चत्तोऽति दुर्गाण्येषः ।
पञ्चौदनो ब्रह्मणे दीयमानः स दातारं तृप्त्या तर्पयाति ९
अजस्त्रिनाके त्रिदिवे त्रिपृष्ठे नाकस्य पृष्ठे ददिवांसं दधाति ।
पञ्चौदनो ब्रह्मणे दीयमानो विश्वरूपा धेनुः कामदुघास्येका १० (११)
एतद् वो ज्योतिः पितरस्तृतीयं पञ्चौदनं ब्रह्मणेऽजं ददाति ।
अजस्तमांस्यप हन्ति दूरमस्मिंल्लोके श्रद्दधानेन दत्तः ११
ईजानानां सुकृतां लोकमीप्सन् पञ्चौदनं ब्रह्मणेऽजं ददाति ।
स व्याप्तिमभि लोकं जयैतं शिवोऽस्मभ्यं प्रतिगृहीतो अस्तु १२
अजो ह्यग्नेरजनिष्ट शोकाद् विप्रो विप्रस्य सहसो विपश्चित् ।
इष्टं पूर्तमभिपूर्तं वषट्कृतं तद् देवा ऋतुशः कल्पयन्तु १३
अमोतं वासो दद्याद्धिरण्यमपि दक्षिणाम् ।
तथा लोकान्त्समाप्नोति ये दिव्या ये च पार्थिवाः १४
एतास्त्वाजोप यन्तु धाराः सोम्या देवीर्घृतपृष्ठा मधुश्चुतः ।
स्तभान पृथिवीमुत द्यां नाकस्य पृष्ठेऽधि सप्तरश्मौ १५
अजोऽस्यज स्वर्गोऽसि त्वया लोकमङ्गिरसः प्राजानन् । तं लोकं पुण्यं प्र ज्ञेषम् १६
येना सहस्रं वहसि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह स्वर्देवेषु गन्तवे १७
अजः पक्वः स्वर्गे लोके दधाति पञ्चौदनो निर्ऋतिं बाधमानः ।
तेन लोकान्त्सूर्यवतो जयेम १८
यं ब्राह्मणे निदधे यं च विक्षु या विप्रुष ओदनानामजस्य ।
सर्वं तदग्ने सुकृतस्य लोके जानीतान्नः संगमने पथीनाम् १९
अजो वा इदमग्ने व्यक्रमत तस्योर इयमभवद् द्यौः पृष्ठम् ।
अन्तरिक्षं मध्यं दिशः पार्श्वे समुद्रौ कुक्षी २० (१२)
सत्यं चर्तं च चक्षुषी विश्वं सत्यं श्रद्धा प्राणो विराट् शिरः ।
एष वा अपरिमितो यज्ञो यदजः पञ्चौदनः २१
अपरिमितमेव यज्ञमाप्नोत्यपरिमितं लोकमव रुन्धे ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति २२ (१३६)

नास्यास्थीनि भिन्द्यान्न मज्ज्ञो निर्धयेत् ।
सर्वमेनं समादायेदमिदं प्र वेशयेत् २३
इदमिदमेवास्य रूपं भवति तेनैनं सं गमयति ।
इषं मह ऊर्जमस्मै दुहे योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति २४
पञ्च रुक्मा पञ्च नवानि वस्त्रा पञ्चास्मै धेनवः कामदुघा भवन्ति ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति २५
पञ्च रुक्मा ज्योतिरस्मै भवन्ति वर्म वासांसि तन्वे भवन्ति ।
स्वर्गं लोकमश्नुते योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति २६
या पूर्वं पतिं वित्त्वाथान्यं विन्दतेऽपरम् ।
पञ्चौदनं च तावजं ददातो न वि योषतः २७
समानलोको भवति पुनर्भुवापरः पतिः ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति २८
अनुपूर्ववत्सां धेनुमनड्वाहमुपबर्हणम् ।
वासो हिरण्यं दत्त्वा ते यन्ति दिवमुत्तमाम् २९
आत्मानं पितरं पुत्रं पौत्रं पितामहम् ।
जायां जनित्रीं मातरं ये प्रियास्तानुप ह्वये ३० (१३)
यो वै नैदाघं नामर्तुं वेद । एष वै नैदाघो नामर्तुर्यदजः पञ्चौदनः ।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ३१
यो वै कुर्वन्तं नामर्तुं वेद । कुर्वतींकुर्वतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वै कुर्वन्नामर्तुर्यदजः पञ्चौदनः ।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ३२
यो वै संयन्तं नामर्तुं वेद । संयतींसंयतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ॥
एष वै संयन्नामर्तुर्यदजः पञ्चौदनः ।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ३३ (१३७)

यो वै पिन्वन्तं नामर्तुं वेद । पिन्वतींपिन्वतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वै पिन्वन्नामर्तुर्यदजः पञ्चौदनः ।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ३४
यो वा उद्यन्तं नामर्तुं वेद । उद्यतीमुद्यतीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वा उद्यन्नामर्तुर्यदजः पञ्चौदनः
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ३५
यो वा अभिभुवं नामर्तुं वेद ।
अभिभवन्तीमभिभवन्तीमेवाप्रियस्य भ्रातृव्यस्य श्रियमा दत्ते ।
एष वा अभिभूर्नामर्तुर्यदजः पञ्चौदनः ।
निरेवाप्रियस्य भ्रातृव्यस्य श्रियं दहति भवत्यात्मना ।
योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति ३६
अजं च पचत पञ्च चौदनान् ।
सर्वा दिशः संमनसः सध्रीचीः सान्तर्देशाः प्रति गृह्णन्तु त एतम् ३७
तास्ते रक्षन्तु तव तुभ्यमेतं ताभ्य आज्यं हविरिदं जुहोमि ३८ (१४) (१४२)

[इति त्रिंशः प्रपाठकः ॥३०॥]

(६) अतिथि-सत्कारः ।

१-६२ (पर्यायाः) ब्रह्मा । अतिथिः, विद्या । (१) १-१७; १ नागीनाम त्रिपदा गायत्री, २ त्रिपदाऽऽर्षी गायत्री; ३, ७ साम्नी त्रिष्टुप्; ४, ९ आर्च्यनुष्टुप्; ५ आसुरी गायत्री; ६ त्रिपदा साम्नी जगती; ८ याजुषी त्रिष्टुप्; १० साम्नी भुरिग्बृहती; ११, १४-१६ साम्न्यनुष्टुप्; १२ विराड् गायत्री; १३ साम्नी निचृत्पङ्क्तिः; १७ त्रिपदा विराड् भुरिग्गायत्री ।

[अथैकत्रिंशः प्रपाठकः ॥३१॥]

(१) यो विद्याद् ब्रह्म प्रत्यक्षं परूंषि यस्य संभारा ऋचो यस्यानूक्यम् १
सामानि यस्य लोमानि यजुर्हृदयमुच्यते परिस्तरणमिद्धविः २
यद् वा अतिथिपतिरतिथीन् प्रतिपश्यति देवयजनं प्रेक्षते ३
यदभिवदति दीक्षामुपैति यदुदकं याचत्यपः प्र णयति ४
या एव यज्ञ आपः प्रणीयन्ते ता एव ताः ५
यत् तर्पणमाहरन्ति य एवाग्नीषोमीयः पशुर्बध्यते स एव सः ६ (१४८)

यदावसथान् कल्पयन्ति सदोहविर्धानान्येव तत् कल्पयन्ति ७
यदुपस्तृणन्ति बर्हिरेव तत् ८
यदुपरिशयनमाहरन्ति स्वर्गमेव तेन लोकमव रुन्द्धे ९
यत् कशिपूपबर्हणमाहरन्ति परिधय एव ते १०
यदाञ्जनाभ्यञ्जनमाहरन्त्याज्यमेव तत् ११
यत् पुरा परिवेषात् खादमाहरन्ति पुरोडाशावेव तौ १२
यदशनकृतं ह्वयन्ति हविष्कृतमेव तद्ध्वयन्ति १३
ये व्रीहयो यवा निरुप्यन्तेऽंशव एव ते १४
यान्युलूखलमुसलानि ग्रावाण एव ते १५
शूर्पं पवित्रं तुषा ऋजीषाभिषवणीरापः १६
स्रुग् दर्विर्नेक्षणमायवनं द्रोणकलशाः कुम्भ्यो वायव्यानि
पात्राणीयमेव कृष्णाजिनम् १७ (१५) (१४९)

[१] १८-३० (१-१३) = १ विराट् पुरस्ताद्बृहती; २, १२ साम्नी त्रिष्टुप्; ३ आसुरी अनुष्टुप्; ४ साम्नी उष्णिक्; ५, ११ साम्नी बृहती (११ भुरिक्); ६ आर्च्यनुष्टुप्; ७ त्रिपदा स्वराडनुष्टुप्; ८ आसुरी गायत्री; ९ साम्नी अनुष्टुप्; १० त्रिपदाऽऽर्ची त्रिष्टुप्; १३ त्रिपदाऽऽर्ची पङ्क्तिः (७ पञ्चपदा विराट् पुरस्ताद्बृहती; ८ साम्न्यनुष्टुप् वा) ।

(२) यजमानब्राह्मणं वा एतद्यदतिथिपतिः कुरुते यदाहार्याणि
प्रेक्षत इदं भूयाइ इदा३मिति १ । १८
यदाह भूय उद्धरेति प्राणमेव तेन वर्षीयांसं कुरुते २ । १९
उप हरति हवींष्या सादयति ३ । २०
तेषामासन्नानामतिथिरात्मन् जुहोति ४ । २१
स्रुचा हस्तेन प्राणे यूपे स्रुक्कारेण वषट्कारेण ५ । २२
एते वै प्रियाश्चाप्रियाश्चर्त्विजः स्वर्गं लोकं गमयन्ति यदतिथयः ६ । २३
स य एवं विद्वान् न द्विषन्नश्नीयान्न द्विषतोऽन्नमश्नीयान्न
मीमांसितस्य न मीमांसमानस्य ७ । २४
सर्वो वा एष जग्धपाप्मा यस्यान्नमश्नन्ति ८ । २५ (१६७)

सर्वो वा एषोऽजग्धपाप्मा यस्यान्नं नाश्नन्ति ९ । २६
सर्वदा वा एष युक्तग्रावार्द्रपवित्रो विततांध्वर
आहृतयज्ञक्रतुर्य उपहरति १० । २७
प्राजापत्यो वा एतस्य यज्ञो विततो य उपहरति ११ । २८
प्रजापतेर्वा एष विक्रमाननुविक्रमते य उपहरति १२ । २९
योऽतिथीनां स आहवनीयो यो वेश्मनि स गार्हपत्यो
यस्मिन् पचन्ति स दक्षिणाग्निः १३ । ३० (१६)(१७९)

[३] ३१-३९ (१-९)= १-६, ९ त्रिपदा पिपीलिकमध्या गायत्री; ७ साम्नी बृहती, ८ पिपीलिकमध्योष्णिक् ।

(३) इष्टं च वा एष पूर्तं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति १ । ३१
पयश्च वा एष रसं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति २ । ३२
ऊर्जां च वा एष स्फातिं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ३ । ३३
प्रजां च वा एष पशूंश्च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ४ । ३४
कीर्तिं च वा एष यशश्च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ५ । ३५
श्रियं च वा एष संविदं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ६ । ३६
एष वा अतिथिर्यच्छ्रोत्रियस्तस्मात् पूर्वो नाश्नीयात् ७ । ३७
अशितावत्यतिथावश्नीयाद् यज्ञस्य सात्मत्वाय यज्ञस्याविच्छेदाय तद् व्रतम् ८ । ३८
एतद् वा उ स्वादीयो यदधिगवं क्षीरं वा मांसं वा तदेव नाश्नीयात् ९ । ३९(१७) (१८१)

[४] ४०-४४ (१-१०) = १-४ प्राजापत्यानुष्टुप् । २-५ त्रिपदा गायत्री, ९ भुरिक्; १० चतुष्पदा प्रस्तारपङ्क्तिः ।

(४) स य एवं विद्वान् क्षीरमुपसिच्योपहरति १
यावदग्निष्टोमेनेष्ट्वा सुसमृद्धेनावरुन्धे तावदेनेनाव रुन्धे २ । ४०
स य एवं विद्वान्त्सर्पिरुपसिच्योपहरति ३
यावदतिरात्रेणेष्ट्वा सुसमृद्धेनावरुन्धे तावदेनेनाव रुन्धे ४ । ४१
स य एवं विद्वान् मधूपसिच्योपहरति ५ (१८६)

यावत् सत्त्रसद्येनेष्ट्वा सुसमृद्धेनावरुन्धे तावदेनेनाव रुन्धे ६ । ४२
स य एवं विद्वान् मांसमुपसिच्योपहरति ७
यावद् द्वादशाहेनेष्ट्वा सुसमृद्धेनावरुन्धे तावदेनेनाव रुन्धे ८ । ४३
स य एवं विद्वानुदकमुपसिच्योपहरति ९
प्रजानां प्रजननाय गच्छति प्रतिष्ठां प्रियः प्रजानां भवति
य एवं विद्वानुदकमुपसिच्योपहरति १० । ४४ (१८) (१९१)

[५] ४५-४८ (१-१०) = १ साम्नी उष्णिक्, २ पुर उष्णिक्, ३ साम्नी भुरिग्बृहती, ४. ६, ९ साम्नी अनुष्टुप्, ५ त्रिपदा निचृद्विषमा नाम गायत्री, ७ त्रिपदा विराड् विषमा नाम गायत्री, ८ त्रिपदा विराडनुष्टुप् ।

(५) तस्मा उषा हिङ् कृणोति सविता प्र स्तौति १
बृहस्पतिरूर्जयोद्गायति त्वष्टा पुष्ट्या प्रति हरति विश्वे देवा निधनम् २
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ३ । ४५
तस्मा उद्यन्त्सूर्यो हिङ् कृणोति संगवः प्र स्तौति ४
मध्यंदिन उद्गायत्यपराह्णः प्रति हरत्यस्तंयन् निधनम्
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ५ । ४६
तस्मा अभ्रो भवन् हिङ् कृणोति स्तनयन् प्र स्तौति ६
विद्योतमानः प्रति हरति वर्षन्नुद्गायत्युद्गृह्णन् निधनम् ।
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ७
अतिथीन् प्रति पश्यति हिङ् कृणोत्यभि वदति प्र स्तौत्युदकं याचत्युद्गायति ८ । ४७
उप हरति प्रति हरत्युच्छिष्टं निधनम् ९
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद १० । ४८(१९)(२०१)

[६] ४९-६२ (१-१४) = १ आसुरी गायत्री, २ साम्नी अनुष्टुप् । ३, ५ त्रिपदार्ची पङ्क्तिः, ४ एकपदा प्राजापत्या गायत्री, ६-११ आर्ची बृहती; १२ एकपदाऽऽसुरी जगती, १३ याजुषी त्रिष्टुप्; १४ एकपदाऽऽसुरी उष्णिक् ।

(६) यत् क्षत्तारं ह्वयत्या श्रावयत्येव तत् १ । ४९
यत् प्रतिशृणोति प्रत्याश्रावयत्येव तत् २ । ५० (२०३)

यत् परिवेष्टारः पात्रहस्ताः पूर्वे चापरे च प्रपद्यन्ते चमसाध्वर्यव एव ते ३ । ५१
तेषां न कश्चनाहोता ४ । ५२
यद् वा अतिथिपतिरतिथीन् परिविष्य गृहानुपोदैत्यवभृथमेव तदुपावैति ५ । ५३
यत् सभागयति दक्षिणाः सभागयति यदनुतिष्ठत उदवस्यत्येव तत् ६ । ५४
स उपहूतः पृथिव्यां भक्षयत्युपहूतस्तस्मिन् यत् पृथिव्यां विश्वरूपम् ७ । ५५
स उपहूतोऽन्तरिक्षे भक्षयत्युपहूतस्तस्मिन् यदन्तरिक्षे विश्वरूपम् ८ । ५६
स उपहूतो दिवि भक्षयत्युपहूतस्तस्मिन् यद् दिवि विश्वरूपम् ९ । ५७
स उपहूतो देवेषु भक्षयत्युपहूतस्तस्मिन् यद् देवेषु विश्वरूपम् १० । ५८
स उपहूतो लोकेषु भक्षयत्युपहूतस्तस्मिन् यल्लोकेषु विश्वरूपम् ११ । ५९
१२ । ६०
स उपहूत उपहूतः
१३ । ६१
आप्नोतीमं लोकमाप्नोत्यमुम्
१४ । ६२ (२०)(२१५)
ज्योतिष्मतो लोकान् जयति य एवं वेद

॥ इति तृतीयोऽनुवाकः ॥३॥

(७) गौः ।

१-२६ (एकः पर्यायः) ब्रह्मा । गौः । १ आर्ची बृहती, २ आर्च्युष्णिक्, ३, ५ आर्च्यनुष्टुप्, ४, १४-१६ साम्नी बृहती; ६, ८ आसुरी गायत्री; ७ त्रिपदा पिपीलिकमध्या निचृद्गायत्री; ९, १३ साम्नी गायत्री; १० पुर उष्णिक्; ११-१२, १७, २५ साम्न्युष्णिक्, १८, २२ एकपदाऽऽसुरी जगती, १९ एकपदाऽऽसुरी पङ्क्तिः; २० याजुषी जगती, २१ आसुर्यनुष्टुप्; २३ एकपदाऽऽसुरी बृहती; २४ साम्नी भुरिग्बृहती; २६ साम्नी त्रिष्टुप् (७, १८-१९, २२-२३ आभ्योऽतिरिक्ता द्विपदा) ।

१
[४] प्रजापतिश्च परमेष्ठी च शृङ्गे इन्द्रः शिरो अग्निर्ललाटं यमः कृकाटम् २
सोमो राजा मस्तिष्को द्यौरुत्तरहनुः पृथिव्यधरहनुः ३
विद्युज्जिह्वा मरुतो दन्ता रेवतीर्ग्रीवाः कृत्तिका स्कन्धा घर्मो वहः ४
विश्वं वायुः स्वर्गो लोकः कृष्णद्रं विधरणी निवेष्यः ५
श्येनः क्रोडोऽन्तरिक्षं पाजस्यं बृहस्पतिः ककुद् बृहतीः कीकसाः ६
देवानां पत्नीः पृष्टय उपसदः पर्शवः ७ (२२२)
मित्रश्च वरुणश्चांसौ त्वष्टा चार्यमा च दोषणी महादेवो बाहू

इन्द्राणी भसद् वायुः पुच्छं पवमानो बालाः ८
ब्रह्म च क्षत्रं च श्रोणी बलमूरू ९
धाता च सविता चाष्ठीवन्तौ जङ्घा गन्धर्वा अप्सरसः कुष्ठिका अदितिः शफाः १०
चेतो हृदयं यकृन्मेधा व्रतं पुरीतत् ११
क्षुत् कुक्षिरिरा वनिष्ठुः पर्वताः प्लाशयः १२
क्रोधो वृक्कौ मन्युराण्डौ प्रजा शेपः १३
नदी सूत्री वर्षस्य पतय स्तना स्तनयित्नुरूधः १४
विश्वव्यचाश्चर्मौषधयो लोमानि नक्षत्राणि रूपम् १५
देवजना गुदा मनुष्या आन्त्राण्यत्रा उदरम् १६
रक्षांसि लोहितमितरजना ऊबध्यम् १७
अभ्रं पीबो मज्जा निधनम् १८
अग्निरासीन उत्थितोऽश्विना १९
इन्द्रः प्राङ् तिष्ठन् दक्षिणा तिष्ठन् यमः २०
प्रत्यङ् तिष्ठन् धातोदङ् तिष्ठन्त्सविता २१
तृणानि प्राप्तः सोमो राजा २२
मित्र ईक्षमाण आवृत्त आनन्दः २३
युज्यमानो वैश्वदेवो युक्तः प्रजापतिर्विमुक्तः सर्वम् २४
एतद् वै विश्वरूपं सर्वरूपं गोरूपम् २५
उपैनं विश्वरूपाः सर्वरूपाः पशवस्तिष्ठन्ति य एवं वेद २६ (२१) (२४१)

(८) यक्ष्मनिवारणम् ।

१-२२ भृग्वङ्गिराः । सर्वशीर्षामयाद्यपाकरणम् । अनुष्टुप् । ११ अनुष्टुब्गर्भा ककुम्मती चतुष्पदोष्णिक् । १५ विराडनुष्टुप्; २१ विराट् पथ्याबृहती; २२ पथ्यापङ्क्तिः ।

शीर्षक्तिं शीर्षामयं कर्णशूलं विलोहितम् ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे १
कर्णाभ्यां ते कङ्कूषेभ्यः कर्णशूलं विसल्पकम् ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे २ (२४३)

यस्य हेतोः प्रच्यवते यक्ष्मः कर्णत आस्यतः ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ३
यः कृणोति प्रमोतमन्धं कृणोति पूरुषम् ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ४
अङ्गभेदमङ्गज्वरं विश्वाङ्गं विसल्पकम् ।
सर्वं शीर्षण्यं ते रोगं बहिर्निर्मन्त्रयामहे ५
यस्य भीमः प्रतीकाश उद्वेपयति पूरुषम् ।
तक्मानं विश्वशारदं बहिर्निर्मन्त्रयामहे ६
य ऊरू अनुसर्पत्यथो एति गवीनिके ।
यक्ष्मं ते अन्तरङ्गेभ्यो बहिर्निर्मन्त्रयामहे ७
यदि कामादपकामाद्धृदयाज्जायते परि ।
हृदो बलासमङ्गेभ्यो बहिर्निर्मन्त्रयामहे ८
हरिमाणं ते अङ्गेभ्योऽप्वामन्तरोदरात् ।
यक्ष्मोधामन्तरात्मनो बहिर्निर्मन्त्रयामहे ९
आसो बलासो भवतु मूत्रं भवत्वामयत् ।
यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् १० (२२)
बहिर्बिलं निर्द्रवतु काहाबाहं तवोदरात् ।
यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् ११
उदरात् ते क्लोम्नो नाभ्या हृदयादधि ।
यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् १२
याः सीमानं विरुजन्ति मूर्धानं प्रत्यर्षणीः ।
अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् १३
या हृदयमुपर्षन्त्यनुतन्वन्ति कीकसाः ।
अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् १४
याः पार्श्वे उपर्षन्त्यनुनिक्षन्ति पृष्टीः ।
अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् १५
यास्तिरश्चीरुपर्षन्त्यर्षणीर्वक्षणासु ते ।
अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् १६ (९५७)

या गुदा अनुसर्पन्त्यान्त्राणि मोहयन्ति च ।
अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् १७
या मज्ज्ञो निर्धयन्ति परूंषि विरुजन्ति च ।
अहिंसन्तीरनामया निर्द्रवन्तु बहिर्बिलम् १८
ये अङ्गानि मदयन्ति यक्ष्मासो रोपणास्तव ।
यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् १९
विसल्पस्य विद्रधस्य वातीकारस्य वालजेः ।
यक्ष्माणां सर्वेषां विषं निरवोचमहं त्वत् २०
पादाभ्यां ते जानुभ्यां श्रोणिभ्यां परि भंससः ।
अनूकादर्षणीरुष्णिहाभ्यः शीर्ष्णो रोगमनीनशम् २१
सं ते शीर्ष्णः कपालानि हृदयस्य च यो विधुः ।
उद्यन्नादित्य रश्मिभिः शीर्ष्णो रोगमनीनशोऽङ्गभेदमशीशमः २२(२३)(९६३)

॥ इति चतुर्थोऽनुवाकः ॥४॥

(९) आत्मा ।

१-२२ ब्रह्मा । वामः, अध्यात्मं, आदित्यः । त्रिष्टुप्; १२, १४, १६, १८ जगती ।

[५] अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः ।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् १
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः २
इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभि सं नवन्त यत्र गवां निहिता सप्त नाम ३
को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित् को विद्वांसमुप गात् प्रष्टुमेतत् ४
इह ब्रवीतु य ईमङ्ग वेदास्य वामस्य निहितं पदं वेः ।
शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ५
पाकः पृच्छामि मनसाविजानन् देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून् वि तत्निरे कवय ओतवा उ ६ (९६९)

अचिकित्वांश्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मनो न विद्वान् ।
वि यस्तस्तम्भ षडिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ७
माता पितरमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ।
सा बीभत्सुर्गर्भरसा निविद्धा नमस्वन्त इदुपवाकमीयुः ८
युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद् गर्भो वृजनीष्वन्तः ।
अमीमेद् वत्सो अनु गामपश्यद् विश्वरूप्यं त्रिषु योजनेषु ९
तिस्रो मातृस्त्रीन् पितॄन् बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्त ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदो वाचमविश्वविन्नाम् १० (२४)
पञ्चारे चक्रे परिवर्तमाने यस्मिन्नातस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न छिद्यते सनाभिः ११
पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणे सप्तचक्रे षडर आहुरर्पितम् १२
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः १३
सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं यस्मिन्नातस्थुर्भुवनानि विश्वा १४
स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान् न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात् स पितुष्पितासत् १५
साकंजानां सप्तथमाहुरेकजं षडिद् यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः १६
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात् क्व स्वित् सूते नहि यूथे अस्मिन् १७
अवः परेण पितरं यो अस्य वेदावः परेण पर एनावरेण ।
कवीयमानः क इह प्र वोचद् देवं मनः कुतो अधि प्रजातम् १८
ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः ।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति १९
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति २० (९८३)

यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्य यदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद् यः पितरं न वेद २१
यत्रा सुपर्णा अमृतस्य भक्षमनिमेषं विदथाभिस्वरन्ति ।
एना विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश २२ (२५) (९८५)

(१०) आत्मा ।

१-२८ ब्रह्मा । गौः, विराट्, अध्यात्मम्, २३ मित्रावरुणौ । त्रिष्टुप्, १,७,१४,१७-१८ जगती; २१ पञ्चपदातिशक्वरी; २४ चतुष्पदा पुरस्कृतिर्भुरिगतिजगती; २, १६-२७ भुरिक् ।

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभं वा त्रैष्टुभान्निरतक्षत ।
यद् वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः १
गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः २
जगता सिन्धुं दिव्यस्कभायद् रथंतरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ३
उप ह्वये सुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनाम् ।
श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो घर्मस्तदु षु प्र वोचत् ४
हिङ्कृण्वती वसुपत्नी वसूनां वत्समिच्छन्ती मनसाभ्यागात् ।
दुहामश्विभ्यां पयो अघ्न्येयं सा वर्धतां महते सौभगाय ५
गौरमीमेदभि वत्सं मिषन्तं मूर्धानं हिङ्ङकृणोन्मातवा उ ।
सृक्वाणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः ६
अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यान् विद्युद् भवन्ती प्रति वव्रिमौहत ७
अनच्छये तुरगातु जीवमेजद् ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ८
विधुं दद्राणं सलिलस्य पृष्ठे युवानं सन्तं पलितो जगार ।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ९
य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् ।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिरा विवेश १० (९९५)

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम्।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ११
द्यौर्नः पिता जनिता नाभिरत्र बन्धुर्नो माता पृथिवी महीयम्।
उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् १२
पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि वृष्णो अश्वस्य रेतः।
पृच्छामि विश्वस्य भुवनस्य नाभिं पृच्छामि वाचः परमं व्योम १३
इयं वेदिः परो अन्तः पृथिव्या अयं सोमो वृष्णो अश्वस्य रेतः।
अयं यज्ञो विश्वस्य भुवनस्य नाभिर्ब्रह्मायं वाचः परमं व्योम १४
न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि।
यदा मागन् प्रथमजा ऋतस्यादिद् वाचो अश्नुवे भागमस्याः १५
अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम् १६
सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः १७
ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्ते अमी समासते १८
ऋचः पदं मात्रया कल्पयन्तोऽर्धर्चेन चाक्लृपुर्विश्वमेजत्।
त्रिपाद् ब्रह्म पुरुरूपं वि तष्ठे तेन जीवन्ति प्रदिशश्चतस्रः १९
सूयवसाद् भगवती हि भूया अधा वयं भगवन्तः स्याम।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती २० (२७)
गौरिन्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्याः समुद्रा
अधि वि क्षरन्ति २१
कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति।
त आववृत्रन्त्सदनादृतस्यादिद् घृतेन पृथिवीं व्यूदुः २२
अपादेति प्रथमा पद्वतीनां कस्तद् वां मित्रावरुणा चिकेत।
गर्भो भारं भरत्या चिदस्या ऋतं पिपर्त्यनृतं नि पाति २३ (३०८)

विराड् वाग् विराट् पृथिवी विराडन्तरिक्षं विराट् प्रजापतिः।
विराण्मृत्युः साध्यानामधिराजो बभूव तस्य भूतं भव्यं वशे
स मे भूतं भव्यं वशे कृणोतु २४
शकमयं धूममारादपश्यं विषूवता पर एनावरेण।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् २५
त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम्।
विश्वमन्यो अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् २६
चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति २७
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः २८ (२८) (३१३)

[इत्येकविंशः प्रपाठकः ॥२१॥]　　॥ इति पञ्चमोऽनुवाकः ॥५॥

॥ इति नवमं काण्डं समाप्तम् ॥

मन्त्रसंख्या—

अष्टमकाण्डस्यान्तपर्यन्तं	१३२३
नवमकाण्डस्य ...	३१३
सर्वयोगः	१६३६

दशमं काण्डम्।

(१) कृत्यादूषणम्।

१-३२ प्रत्यङ्गिरसः। कृत्यादूषणम्। अनुष्टुप्, १ महाबृहती; २ विराण्नाम गायत्री; ९ पथ्यापङ्क्तिः; १२ पङ्क्तिः, १३ उरोबृहती, १५ चतुष्पदा विराड्जगती, १७, २०, २४ प्रस्तारपङ्क्तिः (२० विराट्), १६, १८ त्रिष्टुप्, १९ चतुष्पदा जगती, २२ एकावसाना द्विपदार्ची उष्णिक्; २३ त्रिपदा भुरिग्विषमा गायत्री; २८ त्रिपदा गायत्री, २९ मध्ये ज्योतिष्मती जगती, ३२ द्व्यनुष्टुब्गर्भा पञ्चपदातिजगती।

[अथ द्वाविंशः प्रपाठकः ॥२२॥]

[१] यां कल्पयन्ति वहतौ वधूमिव विश्वरूपां हस्तकृतां चिकित्सवः।
सारादेत्वप नुदाम एनाम् १
शीर्षण्वती नस्वती कर्णिनी कृत्याकृता संभृता विश्वरूपा।
सारादेत्वप नुदाम एनाम् २
शूद्रकृता राजकृता स्त्रीकृता ब्रह्मभिः कृता।
जाया पत्या नुत्तेव कर्तारं बन्ध्वृच्छतु ३
अनयाहमोषध्या सर्वाः कृत्या अदूदुषम्।
यां क्षेत्रे चक्रुर्यां गोषु यां वा ते पुरुषेषु ४
अघमस्त्वघकृते शपथः शपथीयते।
प्रत्यक् प्रतिप्रहिण्मो यथा कृत्याकृतं हनत् ५
प्रतीचीन आङ्गिरसोऽध्यक्षो नः पुरोहितः।
प्रतीचीः कृत्या आकृत्यामून् कृत्याकृतो जहि ६
यस्त्वोवाच परेहीति प्रतिकूलमुदाय्यम्।
तं कृत्येऽभिनिवर्तस्व मास्मानिच्छो अनागसः ७
यस्ते परूंषि संदधौ रथस्येवर्भुर्धिया।
तं गच्छ तत्र तेऽयनमज्ञातस्तेऽयं जनः ८
ये त्वा कृत्वालेभिरे विद्वला अभिचारिणः।
शंभ्वी३दं कृत्यादूषणं प्रतिवर्त्म पुनःसरं तेन त्वा स्नपयामसि ९ (२)

यद् दुर्भगां प्रस्नपितां मृतवत्सामुपेयिम।
अपैतु सर्वं मत् पापं द्रविणं मोप तिष्ठतु १० (१)
यत् ते पितृभ्यो ददतो यज्ञे वा नाम जगृहुः।
संदेश्या३त् सर्वस्मात् पापादिमा मुञ्चन्तु त्वौषधीः ११
देवैनसात् पित्र्यान्नामग्राहात् संदेश्यादभिनिष्कृतात्।
मुञ्चन्तु त्वा वीरुधो वीर्येण ब्रह्मण ऋग्भिः पयस ऋषीणाम् १२
यथा वातश्च्यावयति भूम्या रेणुमन्तरिक्षाच्चाभ्रम्।
एवा मत् सर्वं दुर्भूतं ब्रह्मनुत्तमपायति १३
अप क्राम नानदती विनद्धा गर्दभीव।
कर्तॄन् नक्षस्वेतो नुत्ता ब्रह्मणा वीर्यावता १४
अयं पन्थाः कृत्येति त्वा नयामोऽभिप्रहितां प्रति त्वा प्र हिण्मः।
तेनाभि याहि भञ्जत्यनस्वतीव वाहिनी विश्वरूपा कुरूटिनी १५
पराक् ते ज्योतिरपथं ते अर्वागन्यत्रास्मदयना कृणुष्व।
परेणेहि नवतिं नाव्या३ अति दुर्गाः स्रोत्या मा क्षणिष्ठाः परेहि १६
वात इव वृक्षान् नि मृणीहि पादय मा गामश्वं पुरुषमुच्छिष एषाम्।
कर्तॄन् निवृत्येतः कृत्येऽप्रजास्त्वाय बोधय १७
यां ते बर्हिषि यां श्मशाने क्षेत्रे कृत्यां वलगं वा निचख्नुः।
अग्नौ वा त्वा गार्हपत्येऽभिचेरुः पाकं सन्तं धीरतरा अनागसम् १८
उपाहृतमनुबुद्धं निखातं वैरं त्सार्यन्वविदाम कर्त्रम्।
तदेतु यत आभृतं तत्राश्व इव वि वर्ततां हन्तु कृत्याकृतः प्रजाम् १९
स्वायसा असयः सन्ति नो गृहे विद्मा ते कृत्ये यतिधा परूंषि।
उत्तिष्ठैव परेहीतोऽज्ञाते किमिहेच्छसि २० (२)
ग्रीवास्ते कृत्ये पादौ चापि कर्त्स्यामि निर्द्रव।
इन्द्राग्नी अस्मान् रक्षतां यौ प्रजानां प्रजावती २१
सोमो राजाधिपा मृडिता च भूतस्य नः पतयो मृडयन्तु २२
भवाशर्वावस्यतां पापकृते कृत्याकृते। दुष्कृते विद्युतं देवहेतिम् २३
यद्येयथ द्विपदी चतुष्पदी कृत्याकृता संभृता विश्वरूपा।
सेतो३ष्टापदी भूत्वा पुनः परेहि दुच्छुने २४ (१४)

अन्य॒त्रास्मत् स्व॒रकृता स॒र्वं भर॑न्ती दुरि॒तं प॑रेहि ।
जा॒नीहि कृ॑त्ये क॒र्तारं॑ दुहि॒तेव॑ पि॒तरं॒ स्वम् २५
परे॑हि कृत्ये॒ मा ति॑ष्ठो वि॒द्धस्ये॑व प॒दं न॑य । मृ॒गः स मृ॑ग॒यु॒स्त्वं न त्वा॒ निक॑र्तु॒मर्ह॑ति २६
उ॒त ह॑न्ति पूर्वा॒सिनं॑ प्रत्या॒दाया॑पर॒ इष्वा॑ । उ॒त पूर्व॑स्य नि॒घ्नतो॒ नि ह॒न्त्यप॑रः॒ प्रति॑ २७
ए॒तद्धि शृ॒णु मे॒ वचोऽथे॑हि॒ यत॑ ए॒यथ॑ । यस्त्वा॑ च॒कार॒ तं प्रति॑ २८
अ॒ना॒गो॒ह॒त्या वै भी॒मा कृ॑त्ये॒ मा नो॒ गाम॑श्वं॒ पुरु॑षं वधीः ।
यत्र॑यत्रासि॒ निहि॑ता त॒तस्त्वोत्था॑पयामसि प॒र्णाल्लघी॑यसी भव २९
यदि॒ स्थ तम॒सावृ॑ता जाले॑न॒ाभिहि॑ता इव । सर्वाः॑ सं॒लुप्ये॒तः कृ॒त्याः पुन॑ः
क॒र्त्रे प्र हि॑ण्मसि ३०
कृ॒त्या॒कृतो॑ व॒लगि॒नोऽभिनि॒ष्का॒रिणः॑ प्र॒जाम् ।
मृ॒णीहि कृ॑त्ये॒ मोच्छि॑षो॒ऽमून् कृ॑त्या॒कृतो॑ जहि ३१
यथा॒ सूर्यो॑ मु॒च्यते॒ तम॑स॒स्परि॒ रात्रिं॒ जहा॑त्यु॒षस॑श्च के॒तून् ।
ए॒वाहं सर्वं॑ दुर्भू॒तं कर्त्रं॑ कृत्या॒कृता॑ कृ॒तं ह॒स्तीव॒ रजो॑ दुरि॒तं ज॑हामि ३२(३)(३२)

(२) ब्रह्मप्रकाशनम् ।

१-३३ नारायणः । पार्ष्णिसूक्तम्, पुरुषः, ब्रह्मप्रकाशनम् । अनुष्टुप्; १-४, ७-८ त्रिष्टुप्;
६, ११ जगती; २८ भुरिग्बृहती ।

केन॒ पार्ष्णी॒ आभृ॑ते॒ पूरु॑षस्य॒ केन॑ मां॒सं संभृ॑तं॒ केन॑ गु॒ल्फौ ।
केना॒ङ्गुलीः॒ पेश॑नीः॒ केन॒ खानि॒ केनो॑च्छ्ल॒ङ्खौ म॑ध्य॒तः कः प्र॑ति॒ष्ठाम् १
कस्मा॒न्नु गु॒ल्फावध॑राव॒कृण्व॑न्नष्ठी॒वन्ता॒वुत्त॑रौ॒ पूरु॑षस्य ।
जङ्घे॑ नि॒र्ऋत्य॒ न्य॒दधुः॒ क्व॒ स्वि॒ज्जानु॑नोः॒ संधी॒ क उ॒ तच्चि॑केत २
च॒तु॒ष्टयं॑ युज्यते॒ संहि॑तान्तं॒ जानु॑भ्यामू॒र्ध्वं शि॑थि॒रं कब॑न्धम् ।
श्रोणी॒ यदू॒रू क उ॒ तज्ज॑जान॒ याभ्यां॒ कुसि॑न्धं॒ सुदृ॑ढं ब॒भूव॑ ३
कति॑ दे॒वाः क॑त॒मे त आ॑सन्॒ य उरो॑ ग्री॒वाश्चि॒क्युः पूरु॑षस्य ।
कति॒ स्तनौ॒ व्य॒दधुः॒ कः क॑फो॒डौ कति॑ स्क॒न्धान् कति॑ पृ॒ष्टीर॑चिन्वन् ४
को अ॑स्य बा॒हू सम॑भर॒द् वी॒र्यं॒ क॒रवा॒दिति॑ ।
अंसौ॒ को अ॑स्य॒ तद् दे॒वः कुसि॑न्धे॒ अध्या द॑धौ ५
कः स॒प्त खानि॒ वि त॑तर्द शी॒र्षणि॒ कर्णा॑वि॒मौ नासि॑के॒ चक्ष॑णी॒ मुख॑म् ।
येषां॑ पु॒रु॒त्रा वि॑ज॒यस्य॑ म॒ह्मनि॒ चतु॑ष्पादो॒ द्विप॑दो॒ यन्ति॒ याम॑म् ६ (३८)

हन्वो॒र्हि जि॒ह्वामद॑धात् पु॒रू॒चीमधा॑ म॒हीमधि॑ शिश्राय॒ वाच॑म् ।
स आ व॑रीवर्ति॒ भुव॑नेष्व॒न्तर॒पो वसा॑नः॒ क उ॒ तच्चि॑केत ७
म॒स्ति॒ष्कम॑स्य यत॒मो ल॒लाटं॑ क॒का॒टिकां॑ प्रथ॒मो यः क॒पाल॑म् ।
चि॒त्वा चित्यं॒ हन्वोः॒ पूरु॑षस्य॒ दिवं॑ रुरोह कत॒मः स दे॒वः ८
प्रि॒याप्रि॒याणि॑ बहु॒ला स्वप्नं॑ संबाधत॒न्द्र्य॑ः ।
आ॒न॒न्दानु॒ग्रो नन्दां॑श्च॒ कस्मा॑द् वहति॒ पूरु॑षः ९
आर्ति॒रव॑र्ति॒र्निर्ऋ॑ति॒ः कुतो॒ नु पुरु॒षेऽम॑तिः ।
राद्धिः॒ समृ॑द्धि॒रव्यृ॑द्धिर्म॒ति॒रुदि॑तयः॒ कुतः॑ १० (४)
को अ॑स्मि॒न्नापो॒ व्य॒दधा॒द् वि॒षू॒वृतः॑ पु॒रू॒वृतः॑ सिन्धु॒सृत्या॑य जा॒ताः ।
ती॒व्रा अ॑रु॒णा लोहि॑नीस्ताम्रधू॒म्रा ऊ॒र्ध्वा अवा॑चीः॒ पुरु॑षे ति॒रश्चीः॑ ११
को अ॑स्मिन् रू॒पम॑दधा॒त् को म॒ह्मानं॑ च॒ नाम॑ च ।
गा॒तुं को अ॑स्मि॒न् कः के॒तुं कश्च॒रित्रा॑णि॒ पूरु॑षे १२
को अ॑स्मिन् प्रा॒णम॑वय॒त् को अ॑पा॒नं व्या॒नमु॑ ।
स॒मा॒नम॑स्मि॒न् को दे॒वोऽधि॑ शिश्राय॒ पूरु॑षे १३
को अ॑स्मिन् य॒ज्ञम॑दधा॒देको॑ दे॒वोऽधि॒ पूरु॑षे ।
को अ॑स्मिन्त्स॒त्यं कोऽनृ॑तं॒ कुतो॑ मृ॒त्युः कुतो॒ऽमृत॑म् १४
को अ॑स्मै॒ वासः॒ पर्य॑दधा॒त् को अ॒स्यायु॑रकल्पयत् ।
बलं॒ को अ॑स्मै॒ प्राय॑च्छ॒त् को अ॑स्याकल्पयज्ज॒वम् १५
केनापो॒ अन्व॑तनुत॒ केनाह॑रकरोद्॒ रु॒चे ।
उ॒षसं॒ केनान्वै॑न्द्ध॒ केन॑ सायंभ॒वं द॑दे १६
को अ॑स्मि॒न् रेतो॒ न्य॒दधा॒त् तन्तु॒रा ताय॑ता॒मिति॑ ।
मे॒धां को अ॑स्मि॒न्नध्यौ॑ह॒त् को बा॒णं को नृतो॑ दधौ १७
केने॒मां भूमि॑मौर्णो॒त् केन॒ पर्य॑भव॒द् दिव॑म् । केना॒भि म॒ह्ना पर्व॑ता॒न् केन॒ कर्मा॑णि॒ पूरु॑षः १८
केन॑ प॒र्जन्य॒मन्वे॑ति॒ केन॒ सोमं॑ विचक्ष॒णम् । केन॑ य॒ज्ञं च॑ श्र॒द्धां च॒ केना॑स्मि॒न् निहि॑तं॒ मनः॑ १९
केन॒ श्रोत्रि॑यमाप्नोति॒ केने॒मं प॑रमे॒ष्ठिन॑म् । केने॒मम॒ग्निं पूरु॑षः॒ केन॑ संवत्स॒रं म॑मे २०(५)
ब्रह्म॒ श्रोत्रि॑यमाप्नोति॒ ब्रह्मे॒मं प॑रमे॒ष्ठिन॑म् । ब्रह्मे॒मम॒ग्निं पूरु॑षो॒ ब्रह्म॑ संवत्स॒रं म॑मे २१
केन॑ दे॒वाँ अनु॑ क्षियति॒ केन॒ दैव॑जनी॒र्विशः॑ । केने॒दम॒न्यन्नक्ष॑त्रं॒ केन॒ सत् क्ष॒त्रमु॑च्यते २२
ब्रह्म॑ दे॒वाँ अनु॑ क्षियति॒ ब्रह्म॒ दैव॑जनी॒र्विशः॑ । ब्रह्मे॒दम॒न्यन्नक्ष॑त्रं॒ ब्रह्म॒ सत् क्ष॒त्रमु॑च्यते २३(५५)

केने॒यं भूमि॒र्विहि॑ता॒ केन॒ द्यौरुत्त॑रा हि॒ता । केने॒दमू॒र्ध्वं ति॒र्यक् चा॒न्तरि॑क्षं॒ व्यचो॑ हि॒तम् २४
ब्रह्म॑णा॒ भूमि॒र्विहि॑ता॒ ब्रह्म॒ द्यौरुत्त॑रा हि॒ता । ब्रह्मे॒दमू॒र्ध्वं ति॒र्यक् चा॒न्तरि॑क्षं॒ व्यचो॑ हि॒तम् २५
मू॒र्धान॑मस्य सं॒सीव्याथ॑र्वा॒ हृद॑यं च॒ यत् । म॒स्ति॒ष्कादू॒र्ध्वः प्रैर॑य॒त् पव॑मा॒नोऽधि॑ शीर्ष॒तः २६
तद् वा अथ॑र्वणः॒ शिरो॑ देवको॒शः समु॑ब्जितः । तत् प्रा॒णो अ॒भि र॑क्षति॒ शिरो॒ अन्न॒मथो॒ मनः॑ २७
ऊ॒र्ध्वो नु सृ॒ष्टा३स्ति॒र्यङ् नु सृ॒ष्टा३ः सर्वा॒ दिशः॒ पुरु॑ष॒ आ ब॑भूवाँ३ ।
पुरं॒ यो ब्रह्म॑णो॒ वेद॒ यस्याः॒ पुरु॑ष उ॒च्यते॑ २८
यो वै तां ब्रह्म॑णो॒ वेदा॒मृते॒नावृ॑तां॒ पुर॑म् । तस्मै॒ ब्रह्म॑ च ब्रा॒ह्माश्च॒ चक्षुः॑ प्रा॒णं प्र॒जां द॑दुः २९
न वै तं चक्षु॑र्जहाति॒ न प्रा॒णो ज॒रसः॑ पु॒रा । पुरं॒ यो ब्रह्म॑णो॒ वेद॒ यस्याः॒ पुरु॑ष उ॒च्यते॑ ३०
अ॒ष्टाच॑क्रा॒ नव॑द्वारा दे॒वानां॒ पूर॑यो॒ध्या । तस्यां॑ हिर॒ण्ययः॒ कोशः॑ स्व॒र्गो ज्योति॒षावृ॑तः ३१
तस्मि॒न् हि॑र॒ण्यये॒ कोशे॒ त्र्य॒रे त्रिप्र॑तिष्ठिते । तस्मि॒न् यद् य॒क्षमा॑त्म॒न्वत् तद् वै ब्र॑ह्म॒विदो॑ विदुः ३२
प्र॒भ्राज॑मानां॒ हरि॑णीं॒ यश॑सा सं॒परी॑वृताम् । पुरं॑ हिर॒ण्ययीं॒ ब्रह्मा वि॑वे॒शाप॑राजिताम् ३३ (६) (६५)

॥ इति प्रथमोऽनुवाकः ॥१॥

(३) सपत्नक्षयणो वरणमणिः ।

१-२५ अथर्वा । वरणमणिः, वनस्पतिः, चन्द्रमाः । अनुष्टुप्; २-३, ६ भुरिक् त्रिष्टुप्;
८, १३-१४ पथ्यापङ्क्तिः; ११, १६ भुरिक्; १५, १७-२५ षट्पदा जगती ।

[२] अ॒यं मे॑ वर॒णो म॒णिः स॑पत्न॒क्षय॑णो॒ वृषा॑ ।
तेना र॑भस्व॒ त्वं शत्रू॒न् प्र मृ॑णीहि दुरस्य॒तः १
प्रैणा॑ञ्छृणीहि॒ प्र मृ॒णा र॑भस्व म॒णिस्ते॑ अस्तु पुरए॒ता पु॒रस्ता॑त् ।
अवा॑रयन्त वर॒णेन॑ दे॒वा अ॑भ्याचा॒रमसु॑राणां॒ श्वःश्वः॑ २
अ॒यं म॒णिर्व॑र॒णो वि॒श्वभे॑षजः सहस्रा॒क्षो हरि॑तो हिर॒ण्ययः॑ ।
स ते॒ शत्रू॒नध॑रान् पादयाति पूर्व॒स्तान् द॑भ्नुहि॒ ये त्वा॑ द्वि॒षन्ति॑ ३
अ॒यं ते॑ कृ॒त्यां वित॑तां॒ पौरु॑षेयाद॒यं भ॒यात् ।
अ॒यं त्वा॒ सर्व॑स्मात् पा॒पाद् व॑र॒णो वा॑रयिष्यते ४
व॒र॒णो वा॑र॒याता॒ अ॒यं दे॒वो वन॒स्पतिः॑ ।
यक्ष्मो॒ यो अ॒स्मिन्नावि॑ष्ट॒स्तमु॑ दे॒वा अ॑वीवरन् ५
स्वप्नं॑ सु॒प्त्वा यदि॒ पश्या॑सि पा॒पं मृ॒गः सृ॒तिं यति॒ धावा॒दजु॑ष्टाम् ।
प॒रि॒क्ष॒वाच्छ॒कुनेः॑ पापवा॒दाद॒यं म॒णिर्व॑र॒णो वा॑रयिष्यते ६
अरा॑त्यास्त्वा॒ निर्ऋ॑त्या अभिचा॒राद॑थो॒ भ॒यात् ।
मृ॒त्योरोजी॑यसो व॒धाद् व॑र॒णो वा॑रयिष्यते ७ (७१)

यन्मे॑ मा॒ता यन्मे॑ पि॒ता भ्रात॑रो॒ यच्च॑ मे॒ स्वा यदेन॑श्चकृ॒मा व॒यम् ।
ततो॑ नो वारयिष्यते॒ऽयं दे॒वो वन॒स्पतिः॑ ८
व॒र॒णेन॒ प्रव्य॑थिता॒ भ्रातृ॑व्या मे॒ सब॑न्धवः । अ॒सूर्तं॒ रजो॒ अप्य॑गु॒स्ते य॑न्त्वध॒मं तमः॑ ९
अरि॑ष्टो॒ऽहमरि॑ष्टगु॒रायु॑ष्मा॒न्त्सर्व॑पूरुषः । तं मा॒यं व॑र॒णो म॒णिः परि॑ पातु दि॒शोदि॑शः १०(७)
अ॒यं मे॑ वर॒ण उर॑सि॒ राजा॑ दे॒वो व॒नस्पतिः॑ । स मे॒ शत्रू॒न् वि बा॑धता॒मिन्द्रो॒ दस्यू॑नि॒वासु॑रान् ११
इ॒मं बि॑भर्मि वर॒णमायु॑ष्मा॒ञ्छतशा॑रदः । स मे॑ रा॒ष्ट्रं च॑ क्ष॒त्रं च॑ प॒शूनोज॑श्च मे दधत् १२
यथा॒ वातो॒ वन॒स्पती॒न् वृ॒क्षान् भ॒नक्त्योज॑सा ।
ए॒वा स॒पत्ना॑न् मे भङ्ग्धि॒ पूर्वा॑न् जा॒ताँ उ॒ताप॑रान् वर॒णस्त्वा॒भि र॑क्षतु १३
यथा॒ वात॑श्चा॒ग्निश्च॑ वृ॒क्षान् प्सा॒तो वन॒स्पती॑न् ।
ए॒वा स॒पत्ना॑न् मे प्साहि॒ पूर्वा॑न् जा॒ताँ उ॒ताप॑रान् वर॒णस्त्वा॒भि र॑क्षतु १४
यथा॒ वाते॑न॒ प्रक्षी॑णा वृ॒क्षाः शेरे॒ न्य॑र्पिताः ।
ए॒वा स॒पत्ना॑स्त्वं मम॒ प्र क्षि॑णीहि॒ न्य॑र्पय॒ पूर्वा॑न् जा॒ताँ
उ॒ताप॑रान् वर॒णस्त्वा॒भि र॑क्षतु १५
तांस्त्वं प्र छि॑न्द्धि वरण पु॒रा दि॒ष्टात् पु॒रायु॑षः ।
य ए॑नं प॒शुषु॒ दिप्स॑न्ति॒ ये चा॑स्य राष्ट्रदि॒प्सवः॑ १६
यथा॒ सूर्यो॑ अति॒भाति॒ यथा॑स्मि॒न् तेज॒ आहि॑तम् ।
ए॒वा मे॑ वर॒णो म॒णिः की॒र्तिं भू॒तिं नि य॑च्छतु
तेज॑सा मा॒ समु॑क्षतु॒ यश॑सा॒ सम॑नक्तु मा १७
यथा॒ यश॑श्च॒न्द्रम॑स्यादि॒त्ये च॑ नृ॒चक्ष॑सि ।
ए॒वा मे॑ वर॒णो म॒णिः की॒र्तिं भू॒तिं नि य॑च्छतु
तेज॑सा मा॒ समु॑क्षतु॒ यश॑सा॒ सम॑नक्तु मा १८
यथा॒ यशः॑ पृथि॒व्यां यथा॒स्मिन् जा॒तवे॑दसि ।
ए॒वा मे॑ वर॒णो म॒णिः की॒र्तिं भू॒तिं नि य॑च्छतु
तेज॑सा मा॒ समु॑क्षतु॒ यश॑सा॒ सम॑नक्तु मा १९
यथा॒ यशः॑ क॒न्या॒यां यथा॒स्मिन्त्संभृ॑ते॒ रथे॑ ।
ए॒वा मे॑ वर॒णो म॒णिः की॒र्तिं भू॒तिं नि य॑च्छतु
तेज॑सा मा॒ समु॑क्षतु॒ यश॑सा॒ सम॑नक्तु मा २०(८)(७९)

यथा यशः सोमपीथे मधुपर्के यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २१
यथा यशोऽग्निहोत्रे वषट्कारे यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २२
यथा यशो यजमाने यथास्मिन् यज्ञ आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २३
यथा यशः प्रजापतौ यथास्मिन् परमेष्ठिनि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २४
यथा देवेष्वमृतं यथैषु सत्यमाहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २५ (९) (९०)

(४) सर्पविषदूरीकरणम् ।

१-२६ गरुत्मान्। तक्षकः। अनुष्टुप्; १ पथ्यापङ्क्तिः; २ त्रिपदा यवमध्या गायत्री; ३-४ पथ्याबृहती; ८ उष्णिग्गर्भा परा त्रिष्टुप्; १२ भुरिग्गायत्री; १६ त्रिपदा प्रतिष्ठागायत्री; २१ ककुम्मती; २३ त्रिष्टुप्; २६ त्र्यवसाना षट्पदा बृहतीगर्भा ककुम्मती भुरिक् त्रिष्टुप् ।

इन्द्रस्य प्रथमो रथो देवानामपरो रथो वरुणस्य तृतीय इत् ।
अहीनामपमा रथ स्थाणुमारदथार्षत् १
दर्भः शोचिस्तरूणकमश्वस्य वारः परुषस्य वारः । रथस्य बन्धुरम् २
अव श्वेत पदा जहि पूर्वेण चापरेण च । उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ३
अरंघुषो निमज्योन्मज्य पुनरब्रवीत् । उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ४
पैद्वो हन्ति कसर्णीलं पैद्वः श्वित्रमुतासितम् । पैद्वो रथर्व्याः शिरः सं बिभेद पृदाक्वाः ५
पैद्व प्रेहि प्रथमोऽनु त्वा वयमेमसि । अहीन् व्यस्यतात् पथो येन स्मा वयमेमसि ६
इदं पैद्वो अजायतेदमस्य परायणम् । इमान्यर्वतः पदाहिघ्न्यो वाजिनीवतः ७ (१७)

संयतं न वि ष्परद् व्यात्तं न सं यमत् । अस्मिन् क्षेत्रे द्वावही स्त्री च पुमांश्च तावुभावरसा ८
अरसास इहाहयो ये अन्ति ये च दूरके । घनेन हन्मि वृश्चिकमहिं दण्डेनागतम् ९
अघाश्वस्येदं भेषजमुभयोः स्वजस्य च । इन्द्रो मेऽहिमघायन्तमहिं पैद्वो अरन्धयत् १० (१०)
पैद्वस्य मन्महे वयं स्थिरस्य स्थिरधाम्नः । इमे पश्चा पृदाकवः प्रदीध्यत आसते ११
नष्टासवो नष्टविषा हता इन्द्रेण वज्रिणा । जघानेन्द्रो जघ्निमा वयम् १२
हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः । दर्विं करिक्रतं श्वित्रं दर्भेष्वसितं जहि १३
कैरातिका कुमारिका सका खनति भेषजम् । हिरण्ययीभिरभ्रिभिर्गिरीणामुप सानुषु १४
आयमगन् युवा भिषक् पृश्निहापराजितः । स वै स्वजस्य जम्भन उभयोर्वृश्चिकस्य च १५
इन्द्रो मेऽहिमरन्धयन्मित्रश्च वरुणश्च । वातापर्जन्योभा १६
इन्द्रो मेऽहिमरन्धयत् पृदाकुं च पृदाक्वम् । स्वजं तिरश्चिराजिं कसर्णीलं दशोनसिम् १७
इन्द्रो जघान प्रथमं जनितारमहे तव । तेषामु तृह्यमाणानां कः स्वित् तेषामसद् रसः १८
सं हि शीर्षाण्यग्रभं पौञ्जिष्ठ इव कर्वरम् । सिन्धोर्मध्यं परेत्य व्यनिजमहेर्विषम् १९
अहीनां सर्वेषां विषं परा वहन्तु सिन्धवः । हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः २० (११)
ओषधीनामहं वृण उर्वरीरिव साधुया । नयाम्यर्वतीरिवाहे निरैतु ते विषम् २१
यदग्नौ सूर्ये विषं पृथिव्यामोषधीषु यत् । कान्दाविषं कनक्नकं निरैत्वैतु ते विषम् २२
ये अग्निजा ओषधिजा अहीनां ये अप्सुजा विद्युत आबभूवुः ।
येषां जातानि बहुधा महान्ति तेभ्यः सर्पेभ्यो नमसा विधेम २३
तौदी नामासि कन्या घृताची नाम वा असि । अधस्पदेन ते पदमा ददे विषदूषणम् २४
अङ्गादङ्गात् प्र च्यावय हृदयं परि वर्जय । अधा विषस्य यत् तेजोऽवाचीनं तदेतु ते २५
आरे अभूद् विषमरौद् विषे विषमप्रागपि । अग्निर्विषमहेर्निरधात् सोमो निरणयीत् ।
दंष्टारमन्वगाद् विषमहिरमृत २६ (१२) (११६)

॥ इति द्वितीयोऽनुवाकः ॥२॥

(५) विजयप्राप्तिः ।

[३] १-२४ सिन्धुद्वीपः। आपः, चन्द्रमाः। अनुष्टुप्; १-५ त्रिपदा पुरोऽभिकृतिककुम्मतीगर्भा पङ्क्तिः; ६ चतुष्पदा जगतीगर्भा जगती; ७-१४ त्र्यवसाना पञ्चपदा विपरीतपादलक्ष्मा बृहती (११, १४ पथ्यापङ्क्तिः); १५-२१ चतुरवसाना दशपदा त्रैष्टुब्गर्भातिधृतिः (१९-२० कृतिः; २४ त्रिपदा विराड् गायत्री)

[३] (१) इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय ब्रह्मयोगैर्वो युनज्मि १ (११७)

इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय क्षत्रयोगैर्वो युनज्मि २
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगायेन्द्रयोगैर्वो युनज्मि ३
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय सोमयोगैर्वो युनज्मि ४
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगायाप्सुयोगैर्वो युनज्मि ५
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्यं स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय विश्वानि मा भूतान्युप तिष्ठन्तु युक्ता म आप स्थ ६
(२) अग्नेर्भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ७
इन्द्रस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ८
सोमस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ९
वरुणस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १० (१३)
मित्रावरुणयोर्भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ११
यमस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १२
पितॄणां भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १३
देवस्य सवितुर्भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १४
(३) यो व आपोऽपां भागोऽप्स्व१न्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १५ (१३१)

यो व आपोऽपामूर्मिरप्स्व१न्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १६
यो व आपोऽपां वत्सोऽप्स्व१न्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १७
यो व आपोऽपां वृषभोऽप्स्व१न्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १८
यो व आपोऽपां हिरण्यगर्भोऽप्स्व१न्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १९
यो व आपोऽपामश्मा पृश्निर्दिव्योऽप्स्व१न्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या २० (१४)
ये व आपोऽपामग्नयोऽप्स्व१न्तर्यजुष्या देवयजनाः । इदं तानति सृजामि तान् माभ्यवनिक्षि ।
तैस्तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या २१
(४) यदर्वाचीनं त्रैहायणादनृतं किं चोदिम ।
आपो मा तस्मात् सर्वस्माद् दुरितात् पान्त्वंहसः २२
समुद्रं वः प्र हिणोमि स्वां योनिमपीतन ।
अरिष्टाः सर्वहायसो मा च नः किं चनाममत् २३
अरिप्रा आपो अप रिप्रमस्मत् ।
प्रास्मदेनो दुरितं सुप्रतीकाः प्र दुष्वप्न्यं प्र मलं वहन्तु २४ (१४०)

अन्यं१ काक्ता स्व१रिकृता सर्वं भरन्ती दुरितं परेहि ।
जानीहि कृत्ये कर्तारं दुहितेव पितरं स्वम् २५
परेहि कृत्ये मा तिष्ठो विद्धस्येव पदं नय । मृगः स मृगयुस्त्वं न त्वा निकर्तुमर्हति २६
उत हन्ति पूर्वासिनं प्रत्यादायापर इष्वा । उत पूर्वस्य निघ्नतो नि हन्त्यपरः प्रति २७
एतद्धि शृणु मे वचोऽथेहि यत एयथ । यस्त्वा चकार तं प्रति २८
अनागोहत्या वै भीमा कृत्ये मा नो गामश्वं पुरुषं वधीः ।
यत्रयत्रासि निहिता ततस्त्वोत्थापयामसि पर्णाल्लघीयसी भव २९
यदि स्थ तमसावृता जालेनाभिहिता इव । सर्वाः संलुप्येतः कृत्याः पुनः
कर्त्रे प्र हिण्मसि ३०
कृत्याकृतो वलगिनोऽभिनिष्कारिणः प्रजाम् ।
मृणीहि कृत्ये मोच्छिषोऽमून् कृत्याकृतो जहि ३१
यथा सूर्यो मुच्यते तमसस्परि रात्रिं जहात्युषसश्च केतून् ।
एवाहं सर्वं दुर्भूतं कर्त्रं कृत्याकृता कृतं हस्तीव रजो दुरितं जहामि ३२(३)(३२)

(२) ब्रह्मप्रकाशनम् ।

१-३३ नारायणः । पार्ष्णिसूक्तम्, पुरुषः, ब्रह्मप्रकाशनम् । अनुष्टुप्; १-४, ७-८ त्रिष्टुप्; ६, ११ जगती; २८ भुरिग्बृहती ।

केन पार्ष्णी आभृते पूरुषस्य केन मांसं संभृतं केन गुल्फौ ।
केनाङ्गुलीः पेशनीः केन खानि केनोच्छ्लङ्खौ मध्यतः कः प्रतिष्ठाम् १
कस्मान्नु गुल्फावधरावकृण्वन्नष्ठीवन्तावुत्तरौ पूरुषस्य ।
जङ्घे निर्ऋत्य न्य१दधुः क्व१ स्विज्जानुनोः संधी क उ तच्चिकेत २
चतुष्टयं युज्यते संहितान्तं जानुभ्यामूर्ध्वं शिथिरं कबन्धम् ।
श्रोणी यदूरू क उ तज्जजान याभ्यां कुसिन्धं सुदृढं बभूव ३
कति देवाः कतमे त आसन् य उरो ग्रीवाश्चिक्युः पूरुषस्य ।
कति स्तनौ व्य१दधुः कः कफोडौ कति स्कन्धान् कति पृष्टीरचिन्वन् ४
को अस्य बाहू समभरद् वीर्यं१ करवादिति ।
अंसौ को अस्य तद् देवः कुसिन्धे अध्या दधौ ५
कः सप्त खानि वि ततर्द शीर्षणि कर्णाविमौ नासिके चक्षणी मुखम् ।
येषां पुरुत्रा विजयस्य मह्मनि चतुष्पादो द्विपदो यन्ति यामम् ६ (३८)

हन्वोर्हि जिह्वामदधात् पुरूचीमधा महीमधि शिश्राय वाचम् ।
स आ वरीवर्ति भुवनेष्वन्तरपो वसानः क उ तच्चिकेत ७
मस्तिष्कमस्य यतमो ललाटं ककाटिकां प्रथमो यः कपालम् ।
चित्वा चित्यं हन्वोः पूरुषस्य दिवं रुरोह कतमः स देवः ८
प्रियाप्रियाणि बहुला स्वप्नं संबाधतन्द्र्य१ः ।
आनन्दानुग्रो नन्दांश्च कस्माद् वहति पूरुषः ९
आर्तिरवर्तिर्निर्ऋतिः कुतो नु पुरुषेऽमतिः ।
राद्धिः समृद्धिरव्यृद्धिर्मतिरुदितयः कुतः १० (४)
को अस्मिन्नापो व्य१दधाद् विषूवृतः पुरूवृतः सिन्धुसृत्याय जाताः ।
तीव्रा अरुणा लोहिनीस्ताम्रधूम्रा ऊर्ध्वा अवाचीः पुरुषे तिरश्चीः ११
को अस्मिन् रूपमदधात् को मह्मानं च नाम च ।
गातुं को अस्मिन् कः केतुं कश्चरित्राणि पूरुषे १२
को अस्मिन् प्राणमवयत् को अपानं व्यानमु ।
समानमस्मिन् को देवोऽधि शिश्राय पूरुषे १३
को अस्मिन् यज्ञमदधादेको देवोऽधि पूरुषे ।
को अस्मिन्त्सत्यं कोऽनृतं कुतो मृत्युः कुतोऽमृतम् १४
को अस्मै वासः पर्यदधात् को अस्यायुरकल्पयत् ।
बलं को अस्मै प्रायच्छत् को अस्याकल्पयज्जवम् १५
केनापो अन्वतनुत केनाहरकरोद् रुचे ।
उषसं केनान्वैन्द्ध केन सायंभवं ददे १६
को अस्मिन् रेतो न्य१दधात् तन्तुरा तायतामिति ।
मेधां को अस्मिन्नध्यौहत् को बाणं को नृतो दधौ १७
केनेमां भूमिमौर्णोत् केन पर्यभवद् दिवम् । केनाभि मह्ना पर्वतान् केन कर्माणि पूरुषः १८
केन पर्जन्यमन्वेति केन सोमं विचक्षणम् । केन यज्ञं च श्रद्धां च केनास्मिन् निहितं मनः १९
केन श्रोत्रियमाप्नोति केनेमं परमेष्ठिनम् । केनेममग्निं पूरुषः केन संवत्सरं ममे २०(५)
ब्रह्म श्रोत्रियमाप्नोति ब्रह्मेमं परमेष्ठिनम् । ब्रह्मेममग्निं पूरुषो ब्रह्म संवत्सरं ममे २१
केन देवाँ अनु क्षियति केन दैवजनीर्विशः । केनेदमन्यन्नक्षत्रं केन सत् क्षत्रमुच्यते २२
ब्रह्म देवाँ अनु क्षियति ब्रह्म दैवजनीर्विशः । ब्रह्मेदमन्यन्नक्षत्रं ब्रह्म सत् क्षत्रमुच्यते २३(५५)

केनेयं भूमिर्विहिता केन द्यौरुत्तरा हिता । केनेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् २४
ब्रह्मणा भूमिर्विहिता ब्रह्म द्यौरुत्तरा हिता । ब्रह्मेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम् २५
मूर्धानमस्य संसीव्याथर्वा हृदयं च यत् । मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधि शीर्षतः २६
तद् वा अथर्वणः शिरो देवकोशः समुब्जितः । तत् प्राणो अभि रक्षति शिरो अन्नमथो मनः २७
ऊर्ध्वो नु सृष्टा३स्तिर्यङ् नु सृष्टा३ः सर्वा दिशः पुरुष आ बभूवाँ३ ।
पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते २८
यो वै तां ब्रह्मणो वेदामृतेनावृतां पुरम् । तस्मै ब्रह्म च ब्राह्माश्च चक्षुः प्राणं प्रजां ददुः २९
न वै तं चक्षुर्जहाति न प्राणो जरसः पुरा । पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते ३०
अष्टाचक्रा नवद्वारा देवानां पूरयोध्या । तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः ३१
तस्मिन् हिरण्यये कोशे त्र्य१रे त्रिप्रतिष्ठिते । तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ३२
प्रभ्राजमानां हरिणीं यशसा संपरीवृताम् । पुरं हिरण्ययीं ब्रह्मा विवेशापराजिताम् ३३ (६) (६५)

॥ इति प्रथमोऽनुवाकः ॥१॥

(३) सपत्नक्षयणो वरणमणिः ।

१-२५ अथर्वा । वरणमणिः, वनस्पतिः, चन्द्रमाः । अनुष्टुप्; २-३, ६ भुरिक् त्रिष्टुप्; ८, १३-१४ पथ्यापङ्क्तिः; ११, १६ भुरिक्; १५, १७-२५ षट्पदा जगती ।

[२] अयं मे वरणो मणिः सपत्नक्षयणो वृषा ।
तेना रभस्व त्वं शत्रून् प्र मृणीहि दुरस्यतः १
प्रैणाञ्छृणीहि प्र मृणा रभस्व मणिस्ते अस्तु पुरएता पुरस्तात् ।
अवारयन्त वरणेन देवा अभ्याचारमसुराणां श्वःश्वः २
अयं मणिर्वरणो विश्वभेषजः सहस्राक्षो हरितो हिरण्ययः ।
स ते शत्रूनधरान् पादयाति पूर्वस्तान् दभ्नुहि ये त्वा द्विषन्ति ३
अयं ते कृत्यां विततां पौरुषेयादयं भयात् ।
अयं त्वा सर्वस्मात् पापाद् वरणो वारयिष्यते ४
वरणो वारयाता अयं देवो वनस्पतिः ।
यक्ष्मो यो अस्मिन्नाविष्टस्तमु देवा अवीवरन् ५
स्वप्नं सुप्त्वा यदि पश्यासि पापं मृगः सृतिं यति धावादजुष्टाम् ।
परिक्षवाच्छकुनेः पापवादादयं मणिर्वरणो वारयिष्यते ६
अरात्यास्त्वा निर्ऋत्या अभिचारादथो भयात् ।
मृत्योरोजीयसो वधाद् वरणो वारयिष्यते ७ (७२)

यन्मे माता यन्मे पिता भ्रातरो यच्च मे स्वा यदेनश्चकृमा वयम् ।
ततो नो वारयिष्यतेऽयं देवो वनस्पतिः ८
वरणेन प्रव्यथिता भ्रातृव्या मे सबन्धवः । असूतं रजो अप्यगुस्ते यन्त्वधमं तमः ९
अरिष्टोऽहमरिष्टगुरायुष्मान्त्सर्वपूरुषः । तं मायं वरणो मणिः परि पातु दिशोदिशः १०(७)
अयं मे वरण उरसि राजा देवो वनस्पतिः । स मे शत्रून् वि बाधतामिन्द्रो दस्यूनिवासुरान् ११
इमं बिभर्मि वरणमायुष्मान्छतशारदः । स मे राष्ट्रं च क्षत्रं च पशूनोजश्च मे दधत् १२
यथा वातो वनस्पतीन् वृक्षान् भनक्त्योजसा ।
एवा सपत्नान् मे भङ्ग्धि पूर्वान् जाताँ उतापरान् वरणस्त्वाभि रक्षतु १३
यथा वातश्चाग्निश्च वृक्षान् प्सातो वनस्पतीन् ।
एवा सपत्नान् मे प्साहि पूर्वान् जाताँ उतापरान् वरणस्त्वाभि रक्षतु १४
यथा वातेन प्रक्षीणा वृक्षाः शेरे न्य१र्पिताः ।
एवा सपत्नांस्त्वं मम प्र क्षिणीहि न्य१र्पय पूर्वान् जाताँ
उतापरान् वरणस्त्वाभि रक्षतु १५
तांस्त्वं प्र च्छिन्द्धि वरण पुरा दिष्टात् पुरायुषः ।
य एनं पशुषु दिप्सन्ति ये चास्य राष्ट्रदिप्सवः १६
यथा सूर्यो अतिभाति यथास्मिन् तेज आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा १७
यथा यशश्चन्द्रमस्यादित्ये च नृचक्षसि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा १८
यथा यशः पृथिव्यां यथास्मिन् जातवेदसि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा १९
यथा यशः कन्यायां यथास्मिन्त्संभृते रथे ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २०(८)(८१)

यथा यशः सोमपीथे मधुपर्के यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २१
यथा यशोऽग्निहोत्रे वषट्कारे यथा यशः ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २२
यथा यशो यजमाने यथास्मिन् यज्ञ आहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २३
यथा यशः प्रजापतौ यथास्मिन् परमेष्ठिनि ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २४
यथा देवेष्वमृतं यथैषु सत्यमाहितम् ।
एवा मे वरणो मणिः कीर्तिं भूतिं नि यच्छतु
तेजसा मा समुक्षतु यशसा समनक्तु मा २५ (९) (१०)

(४) सर्पविषदूरीकरणम् ।

१-२६ गरुत्मान्। तक्षकः। अनुष्टुप्; १ पथ्यापङ्क्तिः; २ त्रिपदा यवमध्या गायत्री; ३-४ पथ्याबृहती; ८ उष्णिग्गर्भा परा त्रिष्टुप्, १२ भुरिग्गायत्री; १६ त्रिपदा प्रतिष्ठागायत्री; २१ ककुम्मती; २३ त्रिष्टुप्; २६ त्र्यवसाना षट्पदा बृहतीगर्भा ककुम्मती भुरिक् त्रिष्टुप्।

इन्द्रस्य प्रथमो रथो देवानामपरो रथो वरुणस्य तृतीय इत् ।
अहीनामपमा रथं स्थाणुमारदथार्षत् १
दर्भः शोचिस्तरूणकमश्वस्य वारः परुषस्य वारः । रथस्य बन्धुरम् २
अव श्वेत पदा जहि पूर्वेण चापरेण च । उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ३
अरंघुषो निमज्योन्मज्य पुनरब्रवीत् । उदप्लुतमिव दार्वहीनामरसं विषं वारुग्रम् ४
पैद्वो हन्ति कसर्णीलं पैद्वः श्वित्रमुतासितम् । पैद्वो रथर्व्याः शिरः सं बिभेद पृदाक्वाः ५
पैद्व प्रेहि प्रथमोऽनु त्वा वयमेमसि । अहीन् व्यस्यतात् पथो येन स्मा वयमेमसि ६
इदं पैद्वो अजायतेदमस्य परायणम् । इमान्यर्वतः पदाहिघ्न्यो वाजिनीवतः ७ (१७)

संयतं न वि ष्परद् व्यात्तं न सं यमत् । अस्मिन् क्षेत्रे द्वावही स्त्री च पुमांश्च तावुभावरसा ८
अरसास इहाहयो ये अन्ति ये च दूरके । घनेन हन्मि वृश्चिकमहिं दण्डेनागतम् ९
अघाश्वस्येदं भेषजमुभयोः स्वजस्य च । इन्द्रो मेऽहिमघायन्तमहिं पैद्वो अरन्धयत् १० (१०)
पैद्वस्य मन्महे वयं स्थिरस्य स्थिरधाम्नः । इमे पश्चा पृदाकवः प्रदीध्यत आसते ११
नष्टासवो नष्टविषा हता इन्द्रेण वज्रिणा । जघानेन्द्रो जघ्निमा वयम् १२
हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः । दर्विं करिक्रतं श्वित्रं दर्भेष्वसितं जहि १३
कैरातिका कुमारिका सका खनति भेषजम् । हिरण्ययीभिरभ्रिभिर्गिरीणामुप सानुषु १४
आयमगन् युवा भिषक् पृश्निहापराजितः । स वै स्वजस्य जम्भन उभयोर्वृश्चिकस्य च १५
इन्द्रो मेऽहिमरन्धयन्मित्रश्च वरुणश्च । वातापर्जन्योभा १६
इन्द्रो मेऽहिमरन्धयत् पृदाकुं च पृदाक्वम् । स्वजं तिरश्चिराजिं कसर्णीलं दशोनसिम् १७
इन्द्रो जघान प्रथमं जनितारमहे तव । तेषामु तृह्यमाणानां कः स्वित् तेषामसद् रसः १८
सं हि शीर्षाण्यग्रभं पौञ्जिष्ठ इव कर्वरम् । सिन्धोर्मध्यं परेत्य व्यनिजमहेर्विषम् १९
अहीनां सर्वेषां विषं परा वहन्तु सिन्धवः । हतास्तिरश्चिराजयो निपिष्टासः पृदाकवः २० (११)
ओषधीनामहं वृण उर्वरीरिव साधुया । नयाम्यर्वतीरिवाहे निरैतु ते विषम् २१
यदग्नौ सूर्ये विषं पृथिव्यामोषधीषु यत् । कान्दाविषं कनक्नकं निरैत्वैतु ते विषम् २२
ये अग्निजा ओषधिजा अहीनां ये अप्सुजा विद्युत आबभूवुः ।
येषां जातानि बहुधा महान्ति तेभ्यः सर्पेभ्यो नमसा विधेम २३
तौदी नामासि कन्या घृताची नाम वा असि । अधस्पदेन ते पदमा ददे विषदूषणम् २४
अङ्गादङ्गात् प्र च्यावय हृदयं परि वर्जय । अधा विषस्य यत् तेजोऽवाचीनं तदेतु ते २५
आरे अभूद् विषमरौद् विषे विषमप्रागपि । अग्निर्विषमहेर्निरधात् सोमो निरणयीत् ।
दंष्टारमन्वगाद् विषमहिरमृत २६ (१२) (११६)

॥ इति द्वितीयोऽनुवाकः ॥२॥

(५) विजयप्राप्तिः ।

[१] १-२४ सिन्धुद्वीपः। आपः, चन्द्रमाः। अनुष्टुप्; १-५ त्रिपदा पुरोऽभिकृतिककुम्मतीगर्भा पङ्क्तिः; ६ चतुष्पदा जगतीगर्भा जगती; ७-१४ त्र्यवसाना पञ्चपदा विपरीतपादलक्ष्मा बृहती (११, १४ पथ्यापङ्क्तिः); १५-२१ चतुरवसाना दशपदा त्रैष्टुब्गर्भातिधृतिः (१९-२० कृतिः), २४ त्रिपदा विराड् गायत्री)

[३] (१) इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय ब्रह्मयोगैर्वो युनज्मि १ (११७)

इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय क्षत्रयोगैर्वो युनज्मि २
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगायेन्द्रयोगैर्वो युनज्मि ३
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय सोमयोगैर्वो युनज्मि ४
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगायाप्सुयोगैर्वो युनज्मि ५
इन्द्रस्यौज स्थेन्द्रस्य सह स्थेन्द्रस्य बलं स्थेन्द्रस्य वीर्य स्थेन्द्रस्य नृम्णं स्थ ।
जिष्णवे योगाय विश्वानि मा भूतान्युप तिष्ठन्तु युक्ता म आप स्थ ६
(२) अग्नेर्भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ७
इन्द्रस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ८
सोमस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ९
वरुणस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १० (१३)
मित्रावरुणयोर्भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये ११
यमस्य भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १२
पितॄणां भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १३
देवस्य सवितुर्भाग स्थ । अपां शुक्रमापो देवीर्वर्चो अस्मासु धत्त ।
प्रजापतेर्वो धाम्नास्मै लोकाय सादये १४
(३) यो व आपोऽपां भागोऽप्स्वन्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १५ (१३१)

यो व आपोऽपामूर्मिरप्स्वन्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १६
यो व आपोऽपां वत्सोऽप्स्वन्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १७
यो व आपोऽपां वृषभोऽप्स्वन्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १८
यो व आपोऽपां हिरण्यगर्भोऽप्स्वन्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या १९
यो व आपोऽपामश्मा पृश्निर्दिव्योऽप्स्वन्तर्यजुष्यो देवयजनः । इदं तमति सृजामि तं माभ्यवनिक्षि ।
तेन तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या २० (१४)
ये व आपोऽपामग्नयोऽप्स्वन्तर्यजुष्या देवयजनाः । इदं तानति सृजामि तान् माभ्यवनिक्षि ।
तैस्तमभ्यतिसृजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
तं वधेयं तं स्तृषीयानेन ब्रह्मणानेन कर्मणानया मेन्या २१
(४) यदर्वाचीनं त्रैहायणादनृतं किं चोदिम ।
आपो मा तस्मात् सर्वस्माद् दुरितात् पान्त्वंहसः २२
समुद्रं वः प्र हिणोमि स्वां योनिमपीतन ।
अरिष्टाः सर्वहायसो मा च नः किं चनाममत् २३
अरिप्रा आपो अप रिप्रमस्मत् ।
प्रास्मदेनो दुरितं सुप्रतीकाः प्र दुष्वप्न्यं प्र मलं वहन्तु २४ (१४०)

(५) [२] २५-३५ (१-११) कौशिकः । विष्णुक्रमः, मन्त्रोक्ताः ।
२५-३५ त्र्यवसाना षट्पदा यथाक्षरं शक्वर्यतिशक्वर्यौ ।

(५) विष्णोः क्रमोऽसि सपत्नहा पृथिवीसंशितोऽग्नितेजाः ।
पृथिवीमनु वि क्रमेऽहं पृथिव्यास्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु २५ । १
विष्णोः क्रमोऽसि सपत्नहान्तरिक्षसंशितो वायुतेजाः ।
अन्तरिक्षमनु वि क्रमेऽहमन्तरिक्षात् तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु २६ । २
विष्णोः क्रमोऽसि सपत्नहा द्यौसंशितः सूर्यतेजाः ।
दिवमनु वि क्रमेऽहं दिवस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु २७ । ३
विष्णोः क्रमोऽसि सपत्नहा दिक्संशितो मनस्तेजाः ।
दिशोऽनु वि क्रमेऽहं दिग्भ्यस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु २८ । ४
विष्णोः क्रमोऽसि सपत्नहाशासंशितो वाततेजाः ।
आशा अनु वि क्रमेऽहमाशाभ्यस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु २९ । ५
विष्णोः क्रमोऽसि सपत्नहा ऋक्संशितः सामतेजाः ।
ऋचोऽनु वि क्रमेऽहमृग्भ्यस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ३० । ६ (१५)
विष्णोः क्रमोऽसि सपत्नहा यज्ञसंशितो ब्रह्मतेजाः ।
यज्ञमनु वि क्रमेऽहं यज्ञात् तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ३१ । ७
विष्णोः क्रमोऽसि सपत्नहौषधीसंशितः सोमतेजाः ।
ओषधीरनु वि क्रमेऽहमोषधीभ्यस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ३२ । ८
विष्णोः क्रमोऽसि सपत्नहाप्सुसंशितो वरुणतेजाः ।
अपोऽनु वि क्रमेऽहमद्भ्यस्तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ३३ । ९ (१८९)

विष्णोः क्रमोऽसि सपत्नहा कृषिसंशितोऽन्नतेजाः ।
कृषिमनु वि क्रमेऽहं कृष्यास्तं निर्भजामो योऽस्मान् द्वेष्टि यं वय द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ३४ । १०
विष्णोः क्रमोऽसि सपत्नहा प्राणसंशितः पुरुषतेजाः ।
प्राणमनु वि क्रमेऽहं प्राणात् तं निर्भजामो योऽस्मान् द्वेष्टि यं वयं द्विष्मः ।
स मा जीवीत् तं प्राणो जहातु ३५ । ११ (१५१)

(६) [३] ३६-४१ (१-६) ब्रह्मा । मन्त्रोक्ताः । ३६ मार्त्वी पञ्चपदातिशाकरातिजागतगर्भाष्टिः; ३७ विराट् पुरस्ताद्बृहती; ३८ पुर उष्णिक्; ३९, ४१ आर्षी गायत्री; ४० विराड्विषमा गायत्री ।

(६) जितमस्माकमुद्भिन्नमस्माकमभ्यष्ठां विश्वाः पृतना अरातीः ।
इदमहमामुष्यायणस्यामुष्याः पुत्रस्य वर्चस्तेजः प्राणमायुर्नि
वेष्टयामीदमेनमधराञ्चं पादयामि ३६ । १
सूर्यस्यावृतमन्वावर्ते दक्षिणामन्वावृतम् ।
सा मे द्रविणं यच्छतु सा मे ब्राह्मणवर्चसम् ३७ । २
दिशो ज्योतिष्मतीरभ्यावर्ते । ता मे द्रविणं यच्छन्तु ता मे ब्राह्मणवर्चसम् ३८ । ३
सप्तऋषीनभ्यावर्ते । ते मे द्रविणं यच्छन्तु ते मे ब्राह्मणवर्चसम् ३९ । ४
ब्रह्माभ्यावर्ते । तन्मे द्रविणं यच्छतु तन्मे ब्राह्मणवर्चसम् ४० । ५ (१६)
ब्राह्मणाँ अभ्यावर्ते । ते मे द्रविणं यच्छन्तु ते मे ब्राह्मणवर्चसम् ४१ । ६ (१५७)

(७) [४] ४२-५० (१-९) विहव्यः । प्राजापत्या अनुष्टुप्; ४४ त्रिपदा गायत्रीगर्भानुष्टुप्; ५० त्रिष्टुप् ।

(७) यं वयं मृगयामहे तं वधै स्तृणवामहै । व्यात्ते परमेष्ठिनो ब्रह्मणापीपदाम तम् ४२
वैश्वानरस्य दंष्ट्राभ्यां हेतिस्तं समधादभि । इयं तं प्सात्वाहुतिः समिद् देवी सहीयसी ४३
राज्ञो वरुणस्य बन्धोऽसि । सोऽमुमामुष्यायणममुष्याः पुत्रमन्ने प्राणे बधान ४४
यत् ते अन्नं भुवस्पत आक्षियति पृथिवीमनु । तस्य नस्त्वं भुवस्पते संप्रयच्छ प्रजापते ४५
अपो दिव्या अचायिषं रसेन समपृक्ष्महि । पयस्वानग्न आगमं तं मा सं सृज वर्चसा ४६
सं माग्ने वर्चसा सृज सं प्रजया समायुषा ।
विद्युर्मे अस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ४७
यदग्ने अद्य मिथुना शपातो यद् वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या जायते या तया विध्य हृदये यातुधानान् ४८ (१६४)

परा शृणीहि तपसा यातुधानान् पराग्ने रक्षो हरसा शृणीहि ।
परार्चिषा मूरदेवां छृणीहि परासुतृपः शोशुचतः शृणीहि ४९
अपामस्मै वज्रं प्र हरामि चतुर्भृष्टिं शीर्षभिद्याय विद्वान् ।
सो अस्याङ्गानि प्र शृणातु सर्वा तन्मे देवा अनु जानन्तु विश्वे ५० (१७) (१६६)

(६) मणिबन्धनम् ।

१-३५ बृहस्पतिः । फालमणिः, वनस्पतिः, ३ आपः । अनुष्टुप्, १, ४, २१ गायत्री; ५ षट्पदा जगती; ६ सप्तपदा विराट् शक्वरी; ७-१० त्र्यवसाना अष्टपदाऽष्टिः (१० नवपदा धृतिः); ११, २०, २३-२७ पथ्यापङ्क्तिः; १२-१७ त्र्यवसाना षट्पदा शक्वरी; ३१ त्र्यवसाना षट्पदा जगती; ३५ पञ्चपदा त्र्यनुष्टुब्गर्भा जगती ।

अरातीयोर्भ्रातृव्यस्य दुर्हार्दो द्विषतः शिरः । अपि वृश्चाम्योजसा १
वर्म मह्यमयं मणिः फालाज्जातः करिष्यति । पूर्णो मन्थेन मागमद् रसेन सह वर्चसा २
यत् त्वा शिक्वः परावधीत् तक्षा हस्तेन वास्या ।
आपस्त्वा तस्माज्जीवलाः पुनन्तु शुचयः शुचिम् ३
हिरण्यस्रगयं मणिः श्रद्धां यज्ञं महो दधत् । गृहे वसतु नोऽतिथिः ४
तस्मै घृतं सुरां मध्वन्नमन्नं क्षदामहे ।
स नः पितेव पुत्रेभ्यः श्रेयः श्रेयश्चिकित्सतु भूयोभूयः श्वःश्वो देवेभ्यो मणिरेत्य ५
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तमग्निः प्रत्यमुञ्चत सो अस्मै दुह आज्यं भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ६
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तमिन्द्रः प्रत्यमुञ्चतौजसे वीर्याय कम् ।
सो अस्मै बलमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ७
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं सोमः प्रत्यमुञ्चत महे श्रोत्राय चक्षसे ।
सो अस्मै वर्च इद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ८
यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं सूर्यः प्रत्यमुञ्चत तेनेमा अजयद् दिशः ।
सो अस्मै भूतिमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ९ (१७५)

यमबध्नाद् बृहस्पतिर्मणिं फालं घृतश्चुतमुग्रं खदिरमोजसे ।
तं बिभ्रच्चन्द्रमा मणिमसुराणां पुरोऽजयद् दानवानां हिरण्ययीः ।
सो अस्मै श्रियमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १० (१८)
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे ।
सो अस्मै वाजिनं दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि ११
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे । तेनेमां मणिना कृषिमश्विनावभि रक्षतः ।
स भिषग्भ्यां महो दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १२
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे । तं बिभ्रत् सविता मणिं तेनेदमजयत् स्वः ।
सो अस्मै सूनृतां दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १३
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे । तमापो बिभ्रतीर्मणिं सदा धावन्त्यक्षिताः
स आभ्योऽमृतमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १४
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे । तं राजा वरुणो मणिं प्रत्यमुञ्चत शंभुवम् ।
सो अस्मै सत्यमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १५
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे । तं देवा बिभ्रतो मणिं सर्वाँल्लोकान् युधाजयन् ।
स एभ्यो जितिमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १६
यमबध्नाद् बृहस्पतिर्वाताय मणिमाशवे । तमिमं देवता मणिं प्रत्यमुञ्चन्त शंभुवम् ।
स आभ्यो विश्वमिद् दुहे भूयोभूयः श्वःश्वस्तेन त्वं द्विषतो जहि १७
ऋतवस्तमबध्नतार्तवास्तमबध्नत । संवत्सरस्तं बद्ध्वा सर्वं भूतं वि रक्षति १८
अन्तर्देशा अबध्नत प्रदिशस्तमबध्नत । प्रजापतिसृष्टो मणिर्द्विषतो मेऽधराँ अकः १९
अथर्वाणो अबध्नताथर्वणा अबध्नत ।
तैर्मेदिनो अङ्गिरसो दस्यूनां बिभिदुः पुरस्तेन त्वं द्विषतो जहि २० (१९)
तं धाता प्रत्यमुञ्चत स भूतं व्यकल्पयत् । तेन त्वं द्विषतो जहि २१
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् । स मायं मणिरागमद् रसेन सह वर्चसा २२
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् सह गोभिरजाविभिरन्नेन प्रजया सह २३
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् सह व्रीहियवाभ्यां महसा भूत्या सह २४ (१९०)

यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमन्मधोर्घृतस्य धारया कीलालेन मणिः सह २५
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमदूर्जया पयसा सह द्रविणेन श्रिया सह २६
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् ।
स मायं मणिरागमत् तेजसा त्विष्या सह यशसा कीर्त्या सह २७
यमबध्नाद् बृहस्पतिर्देवेभ्यो असुरक्षितिम् । स मायं मणिरागमत् सर्वाभिर्भूतिभिः सह २८
तमिमं देवता मणिं मह्यं ददतु पुष्टये । अभिभुं क्षत्रवर्धनं सपत्नदम्भनं मणिम् २९
ब्रह्मणा तेजसा सह प्रति मुञ्चामि मे शिवम् ।
असपत्नः सपत्नहा सपत्नान् मेऽधराँ अकः ३० (२०)
उत्तरं द्विषतो माम्यं मणिः कृणोतु देवजाः ।
यस्य लोका इमे त्रयः पयो दुग्धमुपासते ।
स मायमधि रोहतु मणिः श्रैष्ठ्याय मूर्धतः ३१
यं देवाः पितरो मनुष्या उपजीवन्ति सर्वदा । स मायमधि रोहतु मणिः श्रैष्ठ्याय मूर्धतः ३२
यथा बीजमुर्वरायां कृष्टे फालेन रोहति । एवा मयि प्रजा पशवोऽन्नमन्नं वि रोहतु ३३
यस्मै त्वा यज्ञवर्धन मणे प्रत्यमुचं शिवम् ।
तं त्वं शतदक्षिण मणे श्रैष्ठ्याय जिन्वतात् ३४
एतमिध्मं समाहितं जुषाणो अग्ने प्रति हर्य होमैः ।
तस्मिन् विदेम सुमतिं स्वस्ति प्रजां चक्षुः पशून्त्समिद्धे जातवेदसि ब्रह्मणा ३५ (२१) (२०१)

॥ इति तृतीयोऽनुवाकः ॥३॥

(७) सर्वाधारवर्णनम् ।

१-४४ अथर्वा । स्कम्भः आत्मा वा । त्रिष्टुप्, १ विराड् जगती; २, ८ भुरिक्; ७, १३ परोष्णिक्; १०, १४, १६, १८-१९ उपरिष्टाद् बृहती; ११-१२, १५, २०, २२, ३९ उपरिष्टाज्ज्योतिर्जगती; १७ त्र्यवसाना षट्पदा जगती; २१ बृहतीगर्भानुष्टुप्, २३-३०, ३७, ४० अनुष्टुप्; ३१ मध्येज्योतिर्जगती; ३२, ३४, ३६ उपरिष्टाद्विराड्बृहती; ३३ पराविराडनुष्टुप्; ३५ चतुष्पदा जगती; ३८, ४२-४३ त्रिष्टुप्; ४१ आर्षी त्रिपदा गायत्री; ४४ एका० आर्च्यनुष्टुप्

[४] कस्मिन्नङ्गे तपो अस्याधि तिष्ठति कस्मिन्नङ्ग ऋतमस्याध्याहितम् ।
क्व व्रतं क्व श्रद्धास्य तिष्ठति कस्मिन्नङ्गे सत्यमस्य प्रतिष्ठितम् १ (२०२)

कस्मादङ्गाद् दीप्यते अग्निरस्य कस्मादङ्गात् पवते मातरिश्वा ।
कस्मादङ्गाद् वि मिमीतेऽधि चन्द्रमा मह स्कम्भस्य मिमानो अङ्गम् २
कस्मिन्नङ्गे तिष्ठति भूमिरस्य कस्मिन्नङ्गे तिष्ठत्यन्तरिक्षम् ।
कस्मिन्नङ्गे तिष्ठत्याहिता द्यौः कस्मिन्नङ्गे तिष्ठत्युत्तरं दिवः ३
क्व प्रेप्सन् दीप्यत ऊर्ध्वो अग्निः क्व प्रेप्सन् पवते मातरिश्वा ।
यत्र प्रेप्सन्तीरभियन्त्यावृतः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ४
क्वार्धमासाः क्व यन्ति मासाः संवत्सरेण सह संविदानाः ।
यत्र यन्त्यृतवो यत्रार्तवाः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ५
क्व प्रेप्सन्ती युवती विरूपे अहोरात्रे द्रवतः संविदाने ।
यत्र प्रेप्सन्तीरभियन्त्यापः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ६
यस्मिन्त्स्तब्ध्वा प्रजापतिर्लोकान्त्सर्वाँ अधारयत् ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ७
यत् परममवमं यच्च मध्यमं प्रजापतिः ससृजे विश्वरूपम् ।
कियता स्कम्भः प्र विवेश तत्र यन्न प्राविशत् कियत् तद् बभूव ८
कियता स्कम्भः प्र विवेश भूतं कियद् भविष्यदन्वाशयेऽस्य ।
एकं यदङ्गमकृणोत् सहस्रधा कियता स्कम्भः प्र विवेश तत्र ९
यत्र लोकांश्च कोशांश्चापो ब्रह्म जना विदुः ।
असच्च यत्र सच्चान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १० (२२)
यत्र तपः पराक्रम्य व्रतं धारयत्युत्तरम् ।
ऋतं च यत्र श्रद्धा चापो ब्रह्म समाहिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ११
यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता ।
यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यार्पिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १२
यस्य त्रयस्त्रिंशद् देवा अङ्गे सर्वे समाहिताः ।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः १३
यत्र ऋषयः प्रथमजा ऋचः साम यजुर्मही ।
एकर्षिर्यस्मिन्नार्पितः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १ १४
यत्रामृतं च मृत्युश्च पुरुषेऽधि समाहिते ।
समुद्रो यस्य नाड्यः पुरुषेऽधि समाहिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १५ (२१६)

यस्य चतस्रः प्रदिशो नाड्यस्तिष्ठन्ति प्रथमाः ।
यज्ञो यत्र पराक्रान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १६
ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम् ।
यो वेद परमेष्ठिनं यश्च वेद प्रजापतिम् ।
ज्येष्ठं ये ब्राह्मणं विदुस्ते स्कम्भमनुसंविदुः १७
यस्य शिरो वैश्वानरश्चक्षुरङ्गिरसोऽभवन् ।
अङ्गानि यस्य यातवः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १८
यस्य ब्रह्म मुखमाहुर्जिह्वां मधुकशामुत ।
विराजमूधो यस्याहुः स्कम्भं तं ब्रूहि कतमः स्विदेव सः १९
यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन् ।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं स्कम्भं तं ब्रूहि कतमः स्विदेव सः २० (२३)
असच्छाखां प्रतिष्ठन्तीं परममिव जना विदुः ।
उतो सन्मन्यन्तेऽवरे ये ते शाखामुपासते २१
यत्रादित्याश्च रुद्राश्च वसवश्च समाहिताः ।
भूतं च यत्र भव्यं च सर्वे लोकाः प्रतिष्ठिताः स्कम्भं तं ब्रूहि कतमः स्विदेव सः २२
यस्य त्रयस्त्रिंशद् देवा निधिं रक्षन्ति सर्वदा ।
निधिं तमद्य को वेद यं देवा अभिरक्षथ २३
यत्र देवा ब्रह्मविदो ब्रह्म ज्येष्ठमुपासते ।
यो वै तान् विद्यात् प्रत्यक्षं स ब्रह्मा वेदिता स्यात् २४
बृहन्तो नाम ते देवा येऽसतः परि जज्ञिरे ।
एकं तदङ्गं स्कम्भस्यासदाहुः परो जनाः २५
यत्र स्कम्भः प्रजनयन् पुराणं व्यवर्तयत् । एकं तदङ्गं स्कम्भस्य पुराणमनुसंविदुः २६
यस्य त्रयस्त्रिंशद् देवा अङ्गे गात्रा विभेजिरे । तान् वै त्रयस्त्रिंशद् देवानेके ब्रह्मविदो विदुः २७
हिरण्यगर्भं परममनत्युद्यं जना विदुः । स्कम्भस्तदग्रे प्रासिञ्चद्धिरण्यं लोके अन्तरा २८
स्कम्भे लोकाः स्कम्भे तपः स्कम्भेऽध्यृतमाहितम् ।
स्कम्भ त्वा वेद प्रत्यक्षमिन्द्रे सर्वं समाहितम् २९
इन्द्रे लोका इन्द्रे तप इन्द्रेऽध्यृतमाहितम् ।
इन्द्रं त्वा वेद प्रत्यक्षं स्कम्भे सर्वं प्रतिष्ठितम् ३० (२४) (२३१)

नाम नाम्ना जोहवीति पुरा सूर्यात् पुरोषसः ।
यदजः प्रथमं संबभूव स ह तत् स्वराज्यमियाय यस्मान्नान्यत् परमस्ति भूतम् ३१
यस्य भूमिः प्रमान्तरिक्षमुतोदरम् । दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ३२
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः । अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः ३३
यस्य वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन् । दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः ३४
स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दाधारोर्वन्तरिक्षम् ।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कम्भ इदं विश्वं भुवनमा विवेश ३५
यः श्रमात् तपसो जातो लोकान्त्सर्वान्त्समानशे । सोमं यश्चक्रे केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ३६
कथं वातो नेलयति कथं न रमते मनः । किमापः सत्यं प्रेप्सन्तीर्नेलयन्ति कदा चन ३७
महद् यक्षं भुवनस्य मध्ये तपसि क्रान्तं सलिलस्य पृष्ठे ।
तस्मिञ्छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव शाखाः ३८
यस्मै हस्ताभ्यां पादाभ्यां वाचा श्रोत्रेण चक्षुषा ।
यस्मै देवाः सदा बलिं प्रयच्छन्ति विमितेऽमितं स्कम्भं तं ब्रूहि कतमः स्विदेव सः ३९
अप तस्य हतं तमो व्यावृत्तः स पाप्मना ।
सर्वाणि तस्मिन् ज्योतींषि यानि त्रीणि प्रजापतौ ४०
यो वेतसं हिरण्ययं तिष्ठन्तं सलिले वेद । स वै गुह्यः प्रजापतिः ४१
तन्त्रमेके युवती विरूपे अभ्याक्रामं वयतः षण्मयूखम् ।
प्रान्या तन्तूंस्तिरते धत्ते अन्या नाप वृञ्जाते न गमातो अन्तम् ४२
तयोरहं परिनृत्यन्त्योरिव न वि जानामि यतरा परस्तात् ।
पुमानेनद् वयत्युद्गृणत्ति पुमानेनद् वि जभाराधि नाके ४३
इमे मयूखा उप तस्तभुर्दिवं सामानि चक्रुस्तसराणि वातवे ४४ (२५) (२४५)

(८) ज्येष्ठब्रह्मवर्णनम् ।

१-४४ कुत्सः । आत्मा । त्रिष्टुप्; १ उपरिष्टाद्विराड्बृहती; २ बृहतीगर्भानुष्टुप्; ५ भुरिगनुष्टुप्, ६, १४, १९-२१, २३, २५, २९, ३१-३४, ३७-३८, ४१, ४३, अनुष्टुप्; ७ पराबृहती; १० अनुष्टुब्गर्भा; ११ जगती; १२ पुरोबृहती त्रिष्टुब्गर्भाऽऽर्षी पङ्क्तिः; १५, २७ भुरिग्बृहती; २२ पुर उष्णिक्; २६ द्व्युष्णिग्गर्भानुष्टुप्; ३० भुरिक्; ३९ बृहतीगर्भा; ४२ विराड् गायत्री ।

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति । स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः १
स्कम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः । स्कम्भ इदं सर्वमात्मन्वद् यत् प्राणन्निमिषच्च यत् २ (२४७)

तिस्रो ह प्रजा अत्यायमायन् न्य१न्या अर्कमभितोऽविशन्त ।
बृहन् ह तस्थौ रजसो विमानो हरितो हरिणीरा विवेश ३
द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तत्राहतास्त्रीणि शतानि शङ्कवः षष्टिश्च खीला अविचाचला ये ४
इदं सवितर्वि जानीहि षड् यमा एक एकजः ।
तस्मिन् हापित्वमिच्छन्ते य एषामेक एकजः ५
आविः सन्निहितं गुहा जरन्नाम महत् पदम् ।
तत्रेदं सर्वमार्पितमेजत् प्राणत् प्रतिष्ठितम् ६
एकचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं क्व१ तद् बभूव ७
पञ्चवाही वहत्यग्रमेषां प्रष्टयो युक्ता अनुसंवहन्ति ।
अयातमस्य ददृशे न यातं परं नेदीयोऽवरं दवीयः ८
तिर्यग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम् ।
तदासत ऋषयः सप्त साकं ये अस्य गोपा महतो बभूवुः ९
या पुरस्ताद् युज्यते या च पश्चाद् या विश्वतो युज्यते या च सर्वतः ।
यया यज्ञः प्राङ् तायते तां त्वा पृच्छामि कतमा सर्चाम् १० (२६)
यदेजति पतति यच्च तिष्ठति प्राणदप्राणन्निमिषच्च यद् भुवत् ।
तद् दाधार पृथिवीं विश्वरूपं तत् संभूय भवत्येकमेव । ११
अनन्तं विततं पुरुत्रानन्तमन्तवच्चा समन्ते ।
ते नाकपालश्चरति विचिन्वन् विद्वान् भूतमुत भव्यमस्य १२
प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा वि जायते ।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः १३
ऊर्ध्वं भरन्तमुदकं कुम्भेनेवोदहार्य१म् ।
पश्यन्ति सर्वे चक्षुषा न सर्वे मनसा विदुः १४
दूरे पूर्णेन वसति दूर ऊनेन हीयते ।
महद् यक्षं भुवनस्य मध्ये तस्मै बलिं राष्ट्रभृतो भरन्ति १५
यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किं चन १६ (२६१)

ये अर्वाङ् मध्य उत वा पुराणं वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परि वदन्ति सर्वे अग्निं द्वितीयं त्रिवृतं च हंसम् १७
सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा १८
सत्येनोर्ध्वस्तपति ब्रह्मणार्वाङ् वि पश्यति ।
प्राणेन तिर्यङ् प्राणति यस्मिन् ज्येष्ठमधि श्रितम् १९
यो वै ते विद्यादरणी याभ्यां निर्मथ्यते वसु ।
स विद्वान् ज्येष्ठं मन्येत स विद्याद् ब्राह्मणं महत् २० (२७)
अपादग्रे समभवत् सो अग्रे स्व१राभरत् । चतुष्पाद् भूत्वा भोग्यः सर्वमादत्त भोजनम् २१
भोग्यो भवदथो अन्नमदद् बहु । यो देवमुत्तरावन्तमुपासातै सनातनम् २२
सनातनमेनमाहुरुताद्य स्यात् पुनर्णवः ।
अहोरात्रे प्र जायेते अन्यो अन्यस्य रूपयोः २३
शतं सहस्रमयुतं न्यर्बुदमसंख्येयं स्वमस्मिन् निविष्टम् ।
तदस्य घ्नन्त्यभिपश्यत एव तस्माद् देवो रोचत एष एतत् २४
बालादेकमणीयस्कमुतैकं नेव दृश्यते । ततः परिष्वजीयसी देवता सा मम प्रिया २५
इयं कल्याण्य१जरा मर्त्यस्यामृता गृहे । यस्मै कृता शये स यश्चकार जजार सः २६
त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।
त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः २७
उतैषां पितोत वा पुत्र एषामुतैषां ज्येष्ठ उत वा कनिष्ठः ।
एको ह देवो मनसि प्रविष्टः प्रथमो जातः स उ गर्भे अन्तः २८
पूर्णात् पूर्णमुदचति पूर्णं पूर्णेन सिच्यते ।
उतो तदद्य विद्याम यतस्तत् परिषिच्यते २९
एषा सनत्नी सनमेव जातैषा पुराणी परि सर्वं बभूव ।
मही देव्यु१षसो विभाती सैकेनैकेन मिषता वि चष्टे ३०(२८)
अविर्वै नाम देवतर्तेनास्ते परीवृता ।
तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः ३१
अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति ।
देवस्य पश्य काव्यं न ममार न जीर्यति ३२(१७७)

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् ।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ३३
यत्र देवाश्च मनुष्या३श्चारा नाभाविव श्रिताः ।
अपां त्वा पुष्पं पृच्छामि यत्र तन्मायया हितम् ३४
येभिर्वात इषितः प्रवाति ये ददन्ते पञ्च दिशः सध्रीचीः ।
य आहुतिमत्यमन्यन्त देवा अपां नेतारः कतमे त आसन् ३५
इमामेषां पृथिवीं वस्त एकोऽन्तरिक्षं पर्येको बभूव ।
दिवमेषां ददते यो विधर्ता विश्वा आशाः प्रति रक्षन्त्येके ३६
यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत् ३७
वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्याहं वेदाथो यद् ब्राह्मणं महत् ३८
यदन्तरा द्यावापृथिवी अग्निरैत् प्रदहन् विश्वदाव्य१ः ।
यत्रातिष्ठन्नेकपत्नीः परस्तात् क्वे३वासीन्मातरिश्वा तदानीम् ३९
अप्स्वा३सीन्मातरिश्वा प्रविष्टः प्रविष्टा देवाः सलिलान्यासन् ।
बृहन् ह तस्थौ रजसो विमानः पवमानो हरित आ विवेश ४०
उत्तरेणेव गायत्रीममृतेऽधि वि चक्रमे । साम्ना ये साम संविदुरजस्तद् ददृशे क्व१ ४१
निवेशनः संगमनो वसूनां देव इव सविता सत्यधर्मा ।
इन्द्रो न तस्थौ समरे धनानाम् ४२
पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् । तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः ४३
अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः ।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ४४ (२९) (१८९)

॥ इति चतुर्थोऽनुवाकः ॥४॥

(९) शतौदना गौः ।

१-३७ अथर्वा । शतौदना । अनुष्टुप्, १ त्रिष्टुप्, १२ पथ्यापङ्क्तिः, २५ द्व्युष्णिग्गर्भाऽनुष्टुप्, २६ पञ्चपदा बृहत्यनुष्टुबुष्णिग्गर्भा जगती, २७ पञ्चपदातिजागतानुष्टुब्गर्भा शक्वरी ।

[५] अघायतामपि नह्या मुखानि सपत्नेषु वज्रमर्पयैतम् ।
इन्द्रेण दत्ता प्रथमा शतौदना भ्रातृव्यघ्नी यजमानस्य गातुः १ (१९०)

वेदिष्टे चर्म भवतु बर्हिर्लोमानि यानि ते ।
एषा त्वा रशनाग्रभीद् ग्रावा त्वैषोऽधि नृत्यतु २
बालास्ते प्रोक्षणीः सन्तु जिह्वा सं मार्ष्ट्वघ्न्ये ।
शुद्धा त्वं यज्ञिया भूत्वा दिवं प्रेहि शतौदने ३
यः शतौदनां पचति कामप्रेण स कल्पते ।
प्रीता ह्यस्यर्त्विजः सर्वे यन्ति यथायथम् ४
स स्वर्गमा रोहति यत्रादस्त्रिदिवं दिवः ।
अपूपनाभिं कृत्वा यो ददाति शतौदनाम् ५
स तांल्लोकान्त्समाप्नोति ये दिव्या ये च पार्थिवाः ।
हिरण्यज्योतिषं कृत्वा यो ददाति शतौदनाम् ६
ये ते देवि शमितारः पक्तारो ये च ते जनाः ।
ते त्वा सर्वे गोप्स्यन्ति मैभ्यो भैषीः शतौदने ७
वसवस्त्वा दक्षिणत उत्तरान्मरुतस्त्वा ।
आदित्याः पश्चाद् गोप्स्यन्ति साग्निष्टोममति द्रव ८
देवाः पितरो मनुष्या गन्धर्वाप्सरसश्च ये ।
ते त्वा सर्वे गोप्स्यन्ति सातिरात्रमति द्रव ९
अन्तरिक्षं दिवं भूमिमादित्यान् मरुतो दिशः ।
लोकान्त्स सर्वानाप्नोति यो ददाति शतौदनाम् १० (३०)
घृतं प्रोक्षन्ती सुभगा देवी देवान् गमिष्यति । पक्तारमघ्न्ये मा हिंसीर्दिवं प्रेहि शतौदने ११
ये देवा दिविषदो अन्तरिक्षसदश्च ये ये चेमे भूम्यामधि ।
तेभ्यस्त्वं धुक्ष्व सर्वदा क्षीरं सर्पिरथो मधु १२
यत् ते शिरो यत् ते मुखं यौ कर्णौ ये च ते हनू ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु १३
यौ त ओष्ठौ ये नासिके ये शृङ्गे ये च तेऽक्षिणी ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु १४
यत् ते क्लोमा यद्धृदयं पुरीतत् सहकण्ठिका । आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु १५
यत् ते यकृद् ये मतस्ने यदान्त्रं याश्च ते गुदाः। आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु १६
यस्ते प्लाशिर्यो वनिष्ठुर्यौ कुक्षी यच्च चर्म ते । आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु १७(३०६)

यत् ते मज्जा यदस्थि यन्मांसं यच्च लोहितम् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   १८
यौ ते बाहू ये दोषणी यावंसौ या च ते ककुत् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   १९
यास्ते ग्रीवा ये स्कन्धा याः पृष्टीर्याश्च पर्शवः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   २० (३१)
यौ त ऊरू अष्ठीवन्तौ ये श्रोणी या च ते भसत् ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   २१
यत् ते पुच्छं ये ते बाला यदूधो ये च ते स्तनाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   २२
यास्ते जङ्घा याः कुष्ठिका ऋच्छरा ये च ते शफाः ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   २३
यत् ते चर्म शतौदने यानि लोमान्यघ्न्ये ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिरथो मधु   २४
क्रोडौ ते स्तां पुरोडाशावाज्येनाभिघारितौ ।
तौ पक्षौ देवि कृत्वा सा पक्तारं दिवं वह   २५
उलूखले मुसले यश्च चर्मणि यो वा शूर्पे तण्डुलः कणः ।
यं वा वातो मातरिश्वा पवमानो ममाथाग्निष्टद्धोता सुहुतं कृणोतु २६
अपो देवीर्मधुमतीर्घृतश्चुतो ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत् काम इदमभिषिञ्चामि वोऽहं तन्मे सर्वं सं पद्यतां वयं स्याम पतयो रयीणाम् २७(३२)(३१६)

(१०) वशा गौः ।

१-३४ कश्यपः । वशा । अनुष्टुप्, १ ककुम्मती; ५ पञ्चपदा० स्कन्धोग्रीवी बृहती, ६, ८, १० विराट्,
२३ बृहती; २४ उपरिष्टाद्बृहती, २६ आस्तारपङ्क्तिः, २७ शंकुमती,
२९ त्रिपदा विराड्गायत्री; ३१ उष्णिग्गर्भा;
३२ विराट्पथ्याबृहती ।

नमस्ते जायमानायै जाताया उत ते नमः ।
बालेभ्यः शफेभ्यो रूपायाघ्न्ये ते नमः   १   (३१७)

यो विद्यात् सप्त प्रवतः सप्त विद्यात् परावतः ।
शिरो यज्ञस्य यो विद्यात् स वशां प्रति गृह्णीयात्   २
वेदाहं सप्त प्रवतः सप्त वेद परावतः ।
शिरो यज्ञस्याहं वेद सोमं चास्यां विचक्षणम्   ३
यया द्यौर्यया पृथिवी ययापो गुपिता इमाः ।
वशां सहस्रधारां ब्रह्मणाच्छावदामसि   ४
शतं कंसाः शतं दोग्धारः शतं गोप्तारो अधि पृष्ठे अस्याः ।
ये देवास्तस्यां प्राणन्ति ते वशां विदुरेकधा   ५
यज्ञपदीराक्षीरा स्वधाप्राणा महीलुका ।
वशा पर्जन्यपत्नी देवाँ अप्येति ब्रह्मणा   ६
अनु त्वाग्निः प्राविशदनु सोमो वशे त्वा ।
ऊधस्ते भद्रे पर्जन्यो विद्युतस्ते स्तना वशे   ७
अपस्त्वं धुक्षे प्रथमा उर्वरा अपरा वशे ।
तृतीयं राष्ट्रं धुक्षेऽन्नं क्षीरं वशे त्वम्   ८
यदादित्यैर्हूयमानोपातिष्ठ ऋतावरि ।
इन्द्रः सहस्रं पात्रान्त्सोमं त्वापाययद् वशे   ९
यदनूचीन्द्रमैरात् त्व ऋषभोऽह्वयत् ।
तस्मात् ते वृत्रहा पयः क्षीरं क्रुद्धोऽहरद् वशे   १० (३३)
यत् ते क्रुद्धो धनपतिरा क्षीरमहरद् वशे ।
इदं तदद्य नाकस्त्रिषु पात्रेषु रक्षति   ११
त्रिषु पात्रेषु तं सोममा देव्यहरद् वशा ।
अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये   १२
सं हि सोमेनागत समु सर्वेण पद्वता ।
वशा समुद्रमध्यष्ठाद् गन्धर्वैः कलिभिः सह   १३
सं हि वातेनागत समु सर्वैः पतत्रिभिः ।
वशा समुद्रे प्रानृत्यदृचः सामानि बिभ्रती   १४
सं हि सूर्येणागत समु सर्वेण चक्षुषा ।
वशा समुद्रमत्यख्यद् भद्रा ज्योतींषि बिभ्रती   १५   (३३१)

अभीवृता हिरण्येन यदतिष्ठ ऋतावरि ।
अश्वः समुद्रो भूत्वाध्यस्कन्दद् वशे त्वा   १६
तद् भद्राः समगच्छन्त वशा देष्ट्र्यथो स्वधा ।
अथर्वा यत्र दीक्षितो बर्हिष्यास्त हिरण्यये   १७
वशा माता राजन्यस्य वशा माता स्वधे तव ।
वशाया यज्ञ आयुधं ततश्चित्तमजायत   १८
ऊर्ध्वो बिन्दुरुदचरद् ब्रह्मणः ककुदादधि ।
ततस्त्वं जज्ञिषे वशे ततो होताजायत   १९
आस्नस्ते गाथा अभवन्नुष्णिहाभ्यो बलं वशे ।
पाजस्याज्जज्ञे यज्ञ स्तनेभ्यो रश्मयस्तव   २० (३४)
ईर्माभ्यामयनं जातं सक्थिभ्यां च वशे तव ।
आन्त्रेभ्यो जज्ञिरे अत्रा उदरादधि वीरुधः   २१
यदुदरं वरुणस्यानुप्राविशथा वशे ।
ततस्त्वा ब्रह्मोदह्वयत् स हि नेत्रमवेत् तव   २२
सर्वे गर्भादवेपन्त जायमानादसूस्वः ।
ससूव हि तामाहुर्वशेति ब्रह्मभिः क्लृप्तः स ह्यस्या बन्धुः   २३
युध एकः सं सृजति यो अस्या एक इद् वशी ।
तरांसि यज्ञा अभवन् तरसां चक्षुरभवद् वशा   २४
वशा यज्ञं प्रत्यगृह्णाद् वशा सूर्यमधारयत् ।
वशायामन्तरविशदोदनो ब्रह्मणा सह   २५
वशामेवामृतमाहुर्वशां मृत्युमुपासते ।
वशेदं सर्वमभवद् देवा मनुष्या३ असुराः पितर ऋषयः   २६
य एवं विद्यात् स वशां प्रति गृह्णीयात् ।
तथा हि यज्ञः सर्वपाद् दुहे दात्रेऽनपस्फुरन्   २७
तिस्रो जिह्वा वरुणस्यान्तर्दीद्यत्यासनि ।
तासां या मध्ये राजति सा वशा दुष्प्रतिग्रहा   २८
चतुर्धा रेतो अभवद् वशायाः ।
आपस्तुरीयममृतं तुरीयं यज्ञस्तुरीयं पशवस्तुरीयम्   २९   (३४५)

वशा द्यौर्वशा पृथिवी वशा विष्णुः प्रजापतिः ।
वशाया दुग्धमपिबन्त्साध्या वसवश्च ये   ३०
वशाया दुग्धं पीत्वा साध्या वसवश्च ये ।
ते वै ब्रध्नस्य विष्टपि पयो अस्या उपासते   ३१
सोममेनामेके दुह्रे घृतमेक उपासते ।
य एवं विदुषे वशां ददुस्ते गतास्त्रिदिवं दिवः   ३२
ब्राह्मणेभ्यो वशां दत्त्वा सर्वाँल्लोकान्त्समश्नुते ।
ऋतं ह्यस्यामार्पितमपि ब्रह्माथो तपः   ३३
वशां देवा उप जीवन्ति वशां मनुष्या उत ।
वशेदं सर्वमभवद् यावत् सूर्यो विपश्यति   ३४ (३५) (३५०)

[इति त्रयोविंशः प्रपाठकः ॥२३॥]

॥ इति पञ्चमोऽनुवाकः ॥५॥

॥ इति दशमं काण्डं समाप्तम् ॥

मन्त्रसंख्या–

नवमकाण्डस्यान्तपर्यन्तं	१६३६
दशमकाण्डस्य	३५०
सर्वयोगः	१९८६

एकादशं काण्डम् ।

(१) ब्रह्मौदनम् ।

१-३७ ब्रह्मा । ओदनः । त्रिष्टुप्; १ अनुष्टुब्गर्भा भुरिक्पङ्क्तिः; २ बृहतीगर्भा विराट्; ३ चतुष्पदा शाक्वरगर्भा जगती; ४, १२-१३ भुरिक्; ५ बृहतीगर्भा विराट्; ६ उष्णिक्; ८ विराड् गायत्री; ९ शाक्वरातिजागतगर्भा जगती; १० विराट् पुरोतिजगती विराड्जगती; ११ जगती; १७, २१, २४-२६, २९ (भुरिक्); ३७ विराड् जगती; १८ अतिजागतगर्भा परातिजागता विराडतिजगती; २० अतिजागतगर्भा परा शाक्वरा चतुष्पदा भुरिग्जगती; २७ अतिजागतगर्भा जगती; ३१ भुरिक्; ३२ चतुष्पदा ककुम्मत्युष्णिक्; ३६ पुरोविराट् (व्याप्तादिष्ववगन्तव्या);

[अथ चतुर्विंशः प्रपाठकः ॥२४॥]

[१] अग्ने जायस्वादितिर्नाथितेयं ब्रह्मौदनं पचति पुत्रकामा ।
सप्तऋषयो भूतकृतस्ते त्वा मन्थन्तु प्रजया सहेह   १
कृणुत धूमं वृषणः सखायोऽद्रोघाविता वाचमच्छ ।
अयमग्निः पृतनाषाट् सुवीरो येन देवा असहन्त दस्यून्   २
अग्नेऽजनिष्ठा महते वीर्याय ब्रह्मौदनाय पक्तवे जातवेदः ।
सप्तऋषयो भूतकृतस्ते त्वाजीजनन्नस्यै रयिं सर्ववीरं नि यच्छ   ३
समिद्धो अग्ने समिधा समिध्यस्व विद्वान् देवान् यज्ञियाँ एह वक्षः ।
तेभ्यो हविः श्रपयं जातवेद उत्तमं नाकमधि रोहयेमम्   ४
त्रेधा भागो निहितो यः पुरा वो देवानां पितॄणां मर्त्यानाम् ।
अंशान् जानीध्वं वि भजामि तान् वो यो देवानां स इमां पारयाति   ५
अग्ने सहस्वानभिभूरभीदसि नीचो न्युब्ज द्विषतः सपत्नान् ।
इयं मात्रा मीयमाना मिता च सजातांस्ते बलिहृतः कृणोतु   ६
साकं सजातैः पयसा सहैध्युदुब्जैनां महते वीर्याय ।
ऊर्ध्वो नाकस्याधि रोह विष्टपं स्वर्गो लोक इति यं वदन्ति   ७
इयं मही प्रति गृह्णातु चर्म पृथिवी देवी सुमनस्यमाना ।
अथ गच्छेम सुकृतस्य लोकम्   ८ (८)

एतौ ग्रावाणौ सयुजा युङ्ग्धि चर्मणि निर्भिन्ध्यंशून् यजमानाय साधु ।
अवघ्नती नि जहि य इमां पृतन्यव ऊर्ध्वं प्रजामुद्भरन्त्युदूह   ९
गृहाण ग्रावाणौ सकृतौ वीर हस्त आ ते देवा यज्ञिया यज्ञमगुः ।
त्रयो वरा यतमांस्त्वं वृणीषे तास्ते समृद्धीरिह राधयामि   १० (१)
इयं ते धीतिरिदमु ते जनित्रं गृह्णातु त्वामदितिः शूरपुत्रा ।
परा पुनीहि य इमां पृतन्यवोऽस्यै रयिं सर्ववीरं नि यच्छ   ११
उपश्वसे द्रुवये सीदता यूयं वि विच्यध्वं यज्ञियासस्तुषैः ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि   १२
परेहि नारि पुनरेहि क्षिप्रमपां त्वा गोष्ठोऽध्यरुक्षद् भराय ।
तासां गृह्णीताद् यतमा यज्ञिया असन् विभाज्य धीरीतरा जहीतात्   १३
एमा अगुर्योषितः शुम्भमाना उत्तिष्ठ नारि तवसं रभस्व ।
सुपत्नी पत्या प्रजया प्रजावत्या त्वागन् यज्ञः प्रति कुम्भं गृभाय   १४
ऊर्जो भागो निहितो यः पुरा व ऋषिप्रशिष्टाप आ भरैताः ।
अयं यज्ञो गातुविन्नाथवित् प्रजाविदुग्रः पशुविद् वीरविद् वो अस्तु   १५
अग्ने चरुर्यज्ञियस्त्वाध्यरुक्षच्छुचिस्तपिष्ठस्तपसा तपैनम् ।
आर्षेया दैवा अभिसंगत्य भागमिमं तपिष्ठा ऋतुभिस्तपन्तु   १६
शुद्धाः पूता योषितो यज्ञिया इमा आपश्चरुमव सर्पन्तु शुभ्राः ।
अदुः प्रजां बहुलान् पशून् नः पक्तौदनस्य सुकृतामेतु लोकम्   १७
ब्रह्मणा शुद्धा उत पूता घृतेन सोमस्यांशवस्तण्डुला यज्ञिया इमे ।
अपः प्र विशत प्रति गृह्णातु वश्चरुरिमं पक्त्वा सुकृतामेत लोकम्   १८
उरुः प्रथस्व महता महिम्ना सहस्रपृष्ठः सुकृतस्य लोके ।
पितामहाः पितरः प्रजोपजाहं पक्ता पञ्चदशस्ते अस्मि   १९
सहस्रपृष्ठः शतधारो अक्षितो ब्रह्मौदनो देवयानः स्वर्गः ।
अमूंस्त आ दधामि प्रजया रेषयैनान् बलिहाराय मृडतान्मह्यमेव   २० (२)
उदेहि वेदिं प्रजया वर्धयैनां नुदस्व रक्षः प्रतरं धेह्येनाम् ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि   २१
अभ्यावर्तस्व पशुभिः सहैनां प्रत्यङेनां देवताभिः सहैधि ।
मा त्वा प्रापच्छपथो माभिचारः स्वे क्षेत्रे अनमीवा वि राज   २२ (११)

ऋतेन तष्टा मनसा हितैषा ब्रह्मौदनस्य विहिता वेदिरग्रे ।
अंसध्रीं शुद्धामुप धेहि नारि तत्रौदनं सादय दैवानाम्   २३
अदितेर्हस्तां स्रुचमेतां द्वितीयां सप्तऋषयो भूतकृतो यामकृण्वन् ।
सा गात्राणि विदुष्योदनस्य दर्विर्वेद्यामध्येनं चिनोतु   २४
शृतं त्वा हव्यमुप सीदन्तु दैवा निःसृप्याग्नेः पुनरेनान् प्र सीद ।
सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयास्ते मा रिषन् प्राशितारः   २५
सोम राजन्त्संज्ञानमा वपैभ्यः सुब्राह्मणा यतमे त्वोपसीदान् ।
ऋषीनार्षेयांस्तपसोऽधि जातान् ब्रह्मौदने सुहवा जोहवीमि   २६
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदमभिषिञ्चामि वोऽहमिन्द्रो मरुत्वान्त्स ददादिदं मे   २७
इदं मे ज्योतिरमृतं हिरण्यं पक्वं क्षेत्रात् कामदुघा म एषा ।
इदं धनं नि दधे ब्राह्मणेषु कृण्वे पन्थां पितृषु यः स्वर्गः   २८
अग्नौ तुषाना वप जातवेदसि परः कम्बूका अप मृड्ढि दूरम् ।
एतं शुश्रुम गृहराजस्य भागमथो विद्म निर्ऋतेर्भागधेयम्   २९
श्राम्यतः पचतो विद्धि सुन्वतः पन्थां स्वर्गमधि रोहयैनम् ।
येन रोहात् परमापद्य यद् वय उत्तमं नाकं परमं व्योम   ३० (३)
बभ्रेरध्वर्यो मुखमेतद् वि मृड्ढ्याज्याय लोकं कृणुहि प्रविद्वान् ।
घृतेन गात्रानु सर्वा वि मृड्ढि कृण्वे पन्थां पितृषु यः स्वर्गः   ३१
बभ्रे रक्षः समदमा वपैभ्योऽब्राह्मणा यतमे त्वोपसीदान् ।
पुरीषिणः प्रथमानाः पुरस्तादार्षेयास्ते मा रिषन् प्राशितारः   ३२
आर्षेयेषु नि दध ओदन त्वा नानार्षेयाणामप्यस्त्यत्र ।
अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभि रक्षन्तु पक्वम्   ३३
यज्ञं दुहानं सदमित् प्रपीनं पुमांसं धेनुं सदनं रयीणाम् ।
प्रजामृतत्वमुत दीर्घमायू रायश्च पोषैरुप त्वा सदेम   ३४
वृषभोऽसि स्वर्ग ऋषीनार्षेयान् गच्छ ।
सुकृतां लोके सीद तत्र नौ संस्कृतम्   ३५
समाचिनुष्वानुसंप्रयाह्यग्ने पथः कल्पय देवयानान् ।
एतैः सुकृतैरनु गच्छेम यज्ञं नाके तिष्ठन्तमधि सप्तरश्मौ   ३६ (३६)

येन देवा ज्योतिषा द्यामुदायन् ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम्   ३७ (४) (३७)

(२) रुद्रः ।

१-३१ अथर्वा । भव-शर्वौ रुद्राः । त्रिष्टुप्; १ परातिजागता विराड्जगती; २ अनुष्टुब्गर्भा पञ्चपदा पथ्याजगती; ३ चतुष्पदा स्वराडुष्णिक्; ४-५, ७, १३, १५-१६, २१ अनुष्टुप्; ६ आर्षी गायत्री; ८ महाबृहती; ९ आर्षी; १० पुरोकृति त्रिपदा विराट्; ११ पञ्चपदा विराड्जगतीगर्भा शाक्वरी; १२ भुरिक्; १४, १७-१९, २३, २६-२७ विराड्गायत्री; २० भुरिग्गायत्री; २२ विषमपादलक्ष्मा त्रिपदा महाबृहती; २४, २९ जगती; २५ पञ्चपदातिशाक्वरी; ३० चतुष्पदा उष्णिक्; ३१ त्र्यवसाना विपरीतपादलक्ष्मा षट्पदा (जगती ?) ।

भवाशर्वौ मृडतं माभि यातं भूतपती पशुपती नमो वाम् ।
प्रतिहितामायतां मा वि स्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः   १
शुने क्रोष्ट्रे मा शरीराणि कर्तमलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा अविष्यवः ।
मक्षिकास्ते पशुपते वयांसि ते विघसे मा विदन्त   २
क्रन्दाय ते प्राणाय याश्च ते भव रोपयः । नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य   ३
पुरस्तात् ते नमः कृण्म उत्तरादधरादुत । अभीवर्गाद् दिवस्पर्यन्तरिक्षाय ते नमः   ४
मुखाय ते पशुपते यानि चक्षूंषि ते भव । त्वचे रूपाय संदृशे प्रतीचीनाय ते नमः   ५
अङ्गेभ्यस्त उदराय जिह्वाया आस्याय ते । दद्भ्यो गन्धाय ते नमः   ६
अस्त्रा नीलशिखण्डेन सहस्राक्षेण वाजिना । रुद्रेणार्धकघातिना तेन मा समरामहि   ७
स नो भवः परि वृणक्तु विश्वत आप इवाग्निः परि वृणक्तु नो भवः ।
मा नोऽभि मांस्त नमो अस्त्वस्मै   ८
चतुर्नमो अष्टकृत्वो भवाय दश कृत्वः पशुपते नमस्ते ।
तवेमे पञ्च पशवो विभक्ता गावो अश्वाः पुरुषा अजावयः   ९
तव चतस्रः प्रदिशस्तव द्यौस्तव पृथिवी तवेदमुग्रोर्वन्तरिक्षम् ।
तवेदं सर्वमात्मन्वद् यत् प्राणत् पृथिवीमनु   १० (५)
उरुः कोशो वसुधानस्तवायं यस्मिन्निमा विश्वा भुवनान्यन्तः ।
स नो मृड पशुपते नमस्ते परः क्रोष्टारो अभिभाः श्वानः परो यन्त्वघरुदो विकेश्यः ११ (४८)

धनुर्बिभर्षि हरितं हिरण्ययं सहस्रघ्नि शतवधं शिखण्डिनम् ।
रुद्रस्येषुश्चरति देवहेतिस्तस्यै नमो यतमस्यां दिशीतः १२
योऽभियातो निलयते त्वां रुद्र निचिकीर्षति ।
पश्चादनुप्रयुङ्क्षे तं विद्धस्य पदनीरिव १३
भवारुद्रौ सयुजा संविदानावुभावुग्रौ चरतो वीर्याय ।
ताभ्यां नमो यतमस्यां दिशीतः १४
नमस्तेऽस्त्वायते नमो अस्तु परायते ।
नमस्ते रुद्र तिष्ठत आसीनायोत ते नमः १५
नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा ।
भवाय च शर्वाय चोभाभ्यामकरं नमः १६
सहस्राक्षमतिपश्यं पुरस्ताद् रुद्रमस्यन्तं बहुधा विपश्चितम् ।
मोपाराम जिह्वयेयमानम् १७
श्यावाश्वं कृष्णमसितं मृणन्तं भीमं रथं केशिनः पादयन्तम् ।
पूर्वे प्रतीमो नमो अस्त्वस्मै १८
मा नोऽभि स्रा मत्यं देवहेतिं मा नः क्रुधः पशुपते नमस्ते ।
अन्यत्रास्मद् दिव्यां शाखां वि धूनु १९
मा नो हिंसीरधि नो ब्रूहि परि णो वृङ्ग्धि मा क्रुधः ।
मा त्वया समरामहि २० (६)
मा नो गोषु पुरुषेषु मा गृधो नो अजाविषु ।
अन्यत्रोग्र वि वर्तय पियारूणां प्रजां जहि २१
यस्य तक्मा कासिका हेतिरेकमश्वस्येव वृषणः क्रन्द एति ।
अभिपूर्वं निर्णयते नमो अस्त्वस्मै २२
योऽन्तरिक्षे तिष्ठति विष्टभितोऽयज्वनः प्रमृणन् देवपीयून्
तस्मै नमो दशभिः शक्वरीभिः २३
तुभ्यमारण्याः पशवो मृगा वने हिता हंसाः सुपर्णाः शकुना वयांसि ।
तव यक्षं पशुपते अप्स्वन्तस्तुभ्यं क्षरन्ति दिव्या आपो वृधे २४ (६१)

शिंशुमारा अजगराः पुरीकया जषा मत्स्या रजसा येभ्यो अस्यसि ।
न ते दूरं न परिष्ठास्ति ते भव सद्यः सर्वान् परि
पश्यसि भूमिं पूर्वस्माद्धंस्युत्तरस्मिन्त्समुद्रे २५
मा नो रुद्र तक्मना मा विषेण मा नः सं स्रा दिव्येनाग्निना ।
अन्यत्रास्मद् विद्युतं पातयैताम् २६
भवो दिवो भव ईशे पृथिव्या भव आ पप्र उर्वन्तरिक्षम् ।
तस्मै नमो यतमस्यां दिशीतः २७
भव राजन् यजमानाय मृड पशूनां हि पशुपतिर्बभूथ ।
यः श्रद्दधाति सन्ति देवा इति चतुष्पदे द्विपदेऽस्य मृड २८
मा नो महान्तमुत मा नो अर्भकं मा नो वहन्तमुत मा नो वक्ष्यतः ।
मा नो हिंसीः पितरं मातरं च स्वां तन्वं रुद्र मा रीरिषो नः २९
रुद्रस्यैलबकारेभ्योऽसंसूक्तगिलेभ्यः ।
इदं महास्येभ्यः श्वभ्यो अकरं नमः ३०
नमस्ते घोषिणीभ्यो नमस्ते केशिनीभ्यः ।
नमो नमस्कृताभ्यो नमः संभुञ्जतीभ्यः ।
नमस्ते देव सेनाभ्यः स्वस्ति नो अभयं च नः ३१(७)(६८)

॥ इति प्रथमोऽनुवाकः ॥१॥

(३) ओदनः ।

[१] १-३१ अथर्वा । ओदनः (बार्हस्पत्यौदनः ।) (त्रयः पर्यायाः) । १, १४ आसुरी गायत्री; २ त्रिपदा समविषमा गायत्री; ३, ६, १० आसुरी पङ्क्तिः; ४, ८ साम्न्यनुष्टुप्; ५, १३, १५, २५ साम्न्युष्णिक्; ७, १९-२२ प्राजापत्याऽनुष्टुप्, ९, १७-१८ आसुर्यनुष्टुप्, ११ भुरिगार्च्यनुष्टुप् ; १२ याजुषी जगती; १६, २३ आसुरी बृहती; २४ त्रिपदा प्राजापत्या बृहती, २६ आर्च्युष्णिक्; २७-२९ साम्नी बृहती, (२८-२९ भुरिक्); ३० याजुषी त्रिष्टुप्; ३१ अल्पशः पङ्क्तिश्च याजुषी ।

[२] (१) तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम् १
द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी सप्तऋषयः प्राणापानाः २
चक्षुर्मुसलं काम उलूखलम् ३ (७१)

दितिः शूर्पमदितिः शूर्पग्राही वातोऽपाविनक् ४
अश्वाः कणा गावस्तण्डुला मशकास्तुषाः ५
कब्रु फलीकरणाः शरोऽभ्रम् ६
श्याममयोऽस्य मांसानि लोहितमस्य लोहितम् ७
त्रपु भस्म हरितं वर्णः पुष्करमस्य गन्धः ८
खलः पात्रं स्फ्यावंसावीषे अनूक्ये ९
आन्त्राणि जत्रवो गुदा वरत्राः १०
इयमेव पृथिवी कुम्भी भवति राध्यमानस्यौदनस्य द्यौरपिधानम् ११
सीताः पर्शवः सिकता ऊबध्यम् १२
ऋतं हस्तावनेजनं कुल्योपसेचनम् १३
ऋचा कुम्भ्यधिहितार्त्विज्येन प्रेषिता १४
ब्रह्मणा परिगृहीता साम्ना पर्यूढा १५
बृहदायवनं रथन्तरं दर्विः १६
ऋतवः पक्तार आर्तवाः समिन्धते १७
चरुं पञ्चबिलमुखं घर्मोऽभीन्धे १८
ओदनेन यज्ञवचः सर्वे लोकाः समाप्याः १९
यस्मिन्त्समुद्रो द्यौर्भूमिस्त्रयोऽवरपरं श्रिताः २०
यस्य देवा अकल्पन्तोच्छिष्टे षडशीतयः २१
तं त्वौदनस्य पृच्छामि यो अस्य महिमा महान् २२
स य ओदनस्य महिमानं विद्यात् २३
नाल्प इति ब्रूयान्नानुपसेचन इति नेदं च किं चेति २४
यावद् दाताभिमनस्येत तन्नाति वदेत् २५
ब्रह्मवादिनो वदन्ति पराञ्चमोदनं प्राशी३ः प्रत्यञ्चा३मिति २६
त्वमोदनं प्राशी३स्त्वामोदना३ इति २७
पराञ्चं चैनं प्राशीः प्राणास्त्वा हास्यन्तीत्येनमाह २८
प्रत्यञ्चं चैनं प्राशीरपानास्त्वा हास्यन्तीत्येनमाह २९
नैवाहमोदनं न मामोदनः ३०
ओदन एवौदनं प्राशीत् ३१(१) (९९)

[२] ३२-४९ मन्त्रोक्ताः । ३२,३८,४१ (प्रथमा), ३२-४९ (सप्तमी) साम्नी त्रिष्टुप्; ३२, ३५, ४२ (द्वितीया), ३२-४९ (तृतीया) ३३-३४,४४-४८ (पञ्चमी) एकपदाऽऽसुरी गायत्री, ३२,४१,४३,४७ दैवी जगती; ३८,४४,४६ (द्वि०), ३२,३५-४३,४९ (पञ्च०) एकपदाऽऽसुर्यनुष्टुप्; ३२-४९ (षष्ठी) साम्न्यनुष्टुप्; ३३-४९ (प्र०) आर्च्यनुष्टुप्, ३७ (प्र०) साम्नी पङ्क्तिः; ३३,३६,४०,४७-४८ (द्वि०) आसुरी जगती, ३४,३७,४१,४३,४५ (द्वि०) आसुरी पङ्क्तिः; ३४ (च०) आसुरी त्रिष्टुप्, ३५,४६,४८ (च०) याजुषी गायत्री, ३६-३७,४० (च०) दैवी पङ्क्तिः; ३८-३९ (च०) प्राजापत्या गायत्री; ३९ (द्वि०) आसुर्युष्णिक्; ४२,४५,४९ (च०) दैवी त्रिष्टुप्; ४९ (द्वि०) एकपदा भुरिक्साम्नी बृहती ।

(२) ततश्चैनमन्येन शीर्ष्णा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
ज्येष्ठतस्ते प्रजा मरिष्यतीत्येनमाह ॥२॥
तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
बृहस्पतिना शीर्ष्णा ॥४॥ तेनैनं प्राशिषं तेनैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३२
ततश्चैनमन्याभ्यां श्रोत्राभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
बधिरो भविष्यसीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
द्यावापृथिवीभ्यां श्रोत्राभ्याम् ॥४॥ ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३३
ततश्चैनमन्याभ्यामक्षीभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
अन्धो भविष्यसीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
सूर्याचन्द्रमसाभ्यामक्षीभ्याम् ॥४॥ ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३४
ततश्चैनमन्येन मुखेन प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
मुखतस्ते प्रजा मरिष्यतीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
ब्रह्मणा मुखेन ॥४॥ तेनैनं प्राशिषं तेनैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३५ (१०३)

ततश्चैनमन्यया जिह्वया प्राशीर्यया चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
जिह्वा ते मरिष्यतीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
अग्नेर्जिह्वया ॥४॥ तयैनं प्राशिषं तयैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३६

ततश्चैनमन्यैर्दन्तैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
दन्तास्ते शत्स्यन्तीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
ऋतुभिर्दन्तैः ॥४॥ तैरेनं प्राशिषं तैरेनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३७

ततश्चैनमन्यैः प्राणापानैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
प्राणापानास्त्वा हास्यन्तीत्येनमाह॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्॥३॥
सप्तर्षिभिः प्राणापानैः ॥४॥ तैरेनं प्राशिषं तैरेनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३८

ततश्चैनमन्येन व्यचसा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
राजयक्ष्मस्त्वा हनिष्यतीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
अन्तरिक्षेण व्यचसा ॥४॥ तेनैनं प्राशिषं तेनैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ३९

ततश्चैनमन्येन पृष्ठेन प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
विद्युत् त्वा हनिष्यतीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्॥३॥
दिवा पृष्ठेन ॥४॥ तेनैनं प्राशिषं तेनैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ४० (१०८)

ततश्चैनमन्येनोरसा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
कृष्या न रात्स्यसीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
पृथिव्योरसा ॥४॥ तेनैनं प्राशिषं तेनैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ४१

ततश्चैनमन्येनोदरेण प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् ॥१॥
उदरदारस्त्वा हनिष्यतीत्येनमाह ॥२॥ तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् ॥३॥
सत्येनोदरेण ॥४॥ तेनैनं प्राशिषं तेनैनमजीगमम् ॥५॥
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ॥६॥
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद ॥७॥ ४२

इन्द्र जुषस्व याहि शूर पिबा सुतस्य ।
मधोश् चकानश् चारुर् मदाय ॥१॥
आ त्वा विशन्तु सुतास इन्द्र पृणस्व कुक्षी ।
विड्ढि धियेषो धियेह्य् आ नः ॥२॥
इन्द्र जठरं पृणस्व मधोर् अस्य सुतस्य ।
उप त्वा मदास् सुवाचो अस्थुः ॥३॥
इन्द्रस् तुराषाड् अयात वृत्रं जघान दायुर् ।
अमुष्य वज्री मदे सोमस्य ॥४॥
सुषी इमं मे गिरो जुषस्वेन्द्र स्वयुग्भिर् मत्स्व ।
मदाय महे रणाय ॥५॥

२.८

उद् इतो ये ऽक्रमन् अथो व्याघ्र× पुरुषो वृकः ।
हिरुग् देवर् सूर्यो हिरुग् वनस्पतिर् हिरुङ् नमन्तु शत्रवः ॥१॥
परमेण पथा वृक× परेण स्तेनो अर्षतु ।
ततो व्याघ्र× परमेण ॥२॥
अक्ष्यौ च ते हनू च ते व्याघ्र जम्भयामसि ।
आत् सर्वान् विंशतिं नखान् ॥३॥
यत् संयमो [न वि यमो] वि यन् यमो न सं यमः ।
मूर्धा मृगस्य हन्ता उपशीर्षं उ वृश्चतः ॥४॥
व्याघ्रं दत्वतां वयं प्रथमं जम्भयामसि ।
आद् इत्? स्तेनम् अहिं यातुधानम् अथो वृकम् ॥५॥
¿शैवरस्सैव वृक× परश् चर? ।
द्विपाच् चतुष्पान् नो मा हिंसीर् इन्द्रजास् सोमजा असि ॥६॥

२.९

इयं वीरु[त्] मधुजाता मधुने त्वा खनामसि ।
मधोर् अधि प्रजातासि सा नो मधुमतस् कृधि ॥१॥
जिह्वाया [अ]ग्रे मे मधु जिह्वामूले मधूलकम् ।
यथा मां कामिन्य् असस् यथा? माम् अन्व् आयसि ॥२॥
परि त्वा परितत्नुनेक्षुणागामविद्विषे ।
यथा न विद्विषावहै न वि भवाव कदा चन ॥३॥
रात्रे सृदि वदणायाश्वाय पुरुषाय च ।
यथा मे पत्ये देवति आयतम् आ वह सातुना ॥४॥
आयां मे मित्रावरुणा आयां [मि] देवी सरस्वती ।
आयां मे अश्विनाव् उभा धत्तां पुष्करस्रजा ॥५॥

२.१०

दशवृक्ष मुञ्चेमम् अहिंस्रो? ग्राह्याश् च ।
अथो एनं वनस्पते जीवानां लोकम् उन् नय ॥१॥
यश् चकार स निष् करत् स एव सुभिषक्तमः ।
स एव तुभ्यं भेषजं चकार भिषजा शुचिः ॥२॥
शतं ते देवा अविदन् ब्रह्माण उत वीरुधः ।
शतं ते अप्सुजमम् अविदन् भूम्याम् अधि ॥३॥
अगाद् उद् अगाद् अयं जीवानां व्रातम् अप्य् अगात् ।
अभूद् उ पुत्राणां पिता नृणां च भगवत्तमः ॥४॥
अधीतिम् अप्य् अगाद् अयं अधि जीवपुरा [अ]गात् ।
शतं ते? [अ]स्य वीरुधस् सहस्रम् उत भेषजा ॥५॥

२.११

दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणास् सदैवम् ।
[… … … … … … … … … ॥१॥
[… … … … … … … … … ।]
मणिस् सहस्रवीर्य× परि न× पातु विश्वतः ॥२॥
अयं विष्कन्धं सहते अयं रक्षान् अप बाधते ।
अयं नो विश्वभेषजो जङ्गिड× पात्व् अंहसः ॥३॥
देवैर् दत्तेन मणिना जङ्गिडेन मयोभुवा ।
विष्कन्धं सर्वा रक्षांसि व्यायामे सहामहे ॥४॥
शणश् च त्वा जङ्गिडश् च विष्कन्धाद् अभि रक्षताम् ।
अरण्याद् अन्य आभृत× कृष्या [अ]न्यो रसेभ्यः ॥५॥

२.१२

एह यन्तु पशवो ये [परे]युर् वायुर् येषां सहचारं जुजोष ।
त्वष्टा येषां रूपधेयानि वेदास्मिंस् तान् गोष्ठे सविता नि यच्छतु ॥१॥
इमं गोष्ठं पशवस् सं स्रवन्तु बृहस्पतिर् आ नयतु प्रजानन् ।
सिनीवाली नयत्व् आग्रम् एषाम् आजग्मुषो अनुमतिर् नि यच्छतु ॥२॥
सं सं स्रवन्तु पशवस् समश्वा उत पूरुषाः ।
¿सं धान्यस्या स्फातिभिस् संस्राव्येण? हविषा जुहोमि ॥३॥
सं सिञ्चामि गवां क्षीरं सम् आज्येन बलं रसम् ।
संसिक्ता [अ]स्माकं वीरा मयि गावश् च गोपतौ ॥४॥
आ हरामि गवां क्षीरम् आहार्षं धान्यं रसम् ।
आहार्षम् अस्माकं वीरान् आ पत्नीम् इदम् अस्तकम् ॥५॥

२.१३

सं यम् सृजात्व् अर्यमा सं पूषा सं बृहस्पतिः ।
सम् इन्द्रो यो धनंजयो मयि पुष्यति यद् वसु ॥१॥
इहैव गाव एतनेहो शकेव पुष्यत ।
इहो भवा? प्र जायध्वं मयि संज्ञानम् अस्तु वः ॥२॥
मया गावो गोपतिना? सचध्वं मयि वो गोष्ठ इह पोषयाति ।
रायस् पोषेण बहुला भवन्तीर् जीवा जीवन्तीर् उप वस् सदेम ॥३॥
सं वो गोष्ठेन सुषदा सं रय्या सं सुभूत्या ।
अहर्जातस्य यन् नाम तेना वस् सं सृजामसि ॥४॥
संजग्माना अबिभ्युषा अस्मिन् गोष्ठे करीषिणीः ।
बिभ्रतीस् सोम्यं हविर् स्वायेशा प्र यतन ॥५॥

२.१४

उद्यन्न् आदित्य× क्रिमीन् हन्तु सूर्यो निम्रोचन् रश्मिभिः ।
हन्तु ये [अ]न्त× क्रिमयो गवि नः ॥१॥
यो द्विशीर्षा चतुरक्ष× क्रिमिश् सारङ्गो अर्जुनो हतः ।
हतभ्राता क्रिमिर् हतमाता हतस्वसा ॥२॥
हतो राजा क्रिमीणाम् उतैषां स्थपतिर् हतः ।
हतासो [अ]स्य वेशासो हतास× परिवेशासः ॥३॥
प्र ते शृणामि शृङ्गे याभ्यां वितुदायसि ।
अथो भिनद्मि तं कुम्भं यस्मिन् ते निहितं विषम् ॥४॥
अत्रिवत् त्वा क्रिमे हन्मि कण्ववज् जमदग्निवत् ।
अगस्त्यस्य ब्रह्मणा सर्वे ते क्रिमयो हताः ॥५॥

२.१५

इन्द्रस्य या मही दृषत् क्रिमेर् विश्वस्य तर्हणी ।
तया पिनष्मि सं क्रिमीन् दृषदा खल्वाँ इव ॥१॥
दृष्टम् अदृष्टम् अतृहम् अथो कुरीरम् अतृहम् ।
अल्गण्डून् सर्वाञ् छलुनान् क्रिमीन् वचसा जम्भयामसि ॥२॥
अल्गण्डून् हन्मि महता वधेन दूना अदूना अरसा अभूवन् ।
शिष्टान् अशिष्टान् नि तिरामि वाचा यथा क्रिमीणां नकिर् उच्छिषातै? ॥३॥
अन्वान्त्र्यं शीर्षण्यम् अथो पार्ष्टेयं क्रिमीन्? ।
अवस्कवं व्यध्वरं क्रिमीन् वचसा जम्भयामसि ॥४॥
ये क्रिमय× पर्वतेषु ये वनेषु य ओषधीषु पशुष्व् अप्स्व् अन्तः ।
ये [अ]स्माकं तन्वः स्थान् आविविशुर् इन्द्रस् तान् हन्तु महता वधेन ॥५॥

२.१६

या शत्रून् संजयात् सहमानाभिभूर् असि ।
सास्मान् प्रतिसरो अपारसान् कृणु ओषधे ॥१॥
सुपर्णस् त्वान्व् अविन्दत् सूकरस् त्वाखनन् नसा ।
इन्द्रस् त्वा चक्रे बाहाव् असुरेभ्य[स्] स्तरीतवे ॥२॥
पाठाम् इन्द्रो व्य् आश्नाद् धन्तवा असुरेभ्यः ।
तयाहं शत्रून् साक्ष इन्द्रस् सालावृकाँ इव ॥३॥
तत्र जलाषभेषज नीलशिखण्ड कर्मकृत् ।
प्राशं प्रतिप्राशो जहि यो [अ]स्मां अभि दासति ॥४॥

[illegible]

२.१७

[illegible]

२.१८

[illegible]

२.१९

[illegible]

२.२०

[illegible]

अग्नो वा इंयते ह्रियत्वां चतुष्पदां तयोर वयम् मनुष्याके? स्याम ।
पञ्चीर्वि वधी? प्रतिभूयन्ती नो वयं देवानां सुमती स्याम ॥३॥
प्रतीची नाम ते माता शतवारो ह ते पिता ।
ततो ह जज्ञिषे त्वम् अस्त्रिरिग? ॥४॥
अरुन्धती माता नामासि मातुली अनुतस्यैव यासि ।
अरुन्धति त्वां सर्वम् अविर्जायम् अथायुधम्? ॥५॥

२.२१

आ नो अग्ने सुमतिं स्कन्दलोके इदमां कुमार्यां मा? नो भगेन ।
जुष्टा वरेषु समनेषु वल्गुर् ओषं पत्या भवाति सुभगेयम् ॥१॥
[इ]यम् अग्ने नारी पतिं विदेष्ट सोमो हि राजा सुभगां कृणोतु ।
सुवाना पुत्रान् महिषी भवासि गत्वा पतिं सुभगे वि राजः ॥२॥
सोमजुष्टं [ब्रह्मजुष्टम्] अर्यम्णा संभृतं भगम् ।
धातुर देवस्य सत्येन कृणोमि पतिवेदनम् ॥३॥
यथाखरो मघवं[श्] चारुर एष प्रियो मृगाणां सुषदा बभूव ।
एवं भगस्य जुष्टा अस्त्वास्तु संप्रिया पत्याविराधयन्ती ॥४॥
भगस्य नावम् आ रोह पूर्णाम् अनुपदस्वतीम् ।
तयोपप्रतारितो? यः पतिः प्रतिकाम्यः ॥५॥
इदं हिरण्यं गुल्गुल्व अयम् औक्षो अथो भगः ।
एते पतिभ्यस् त्वाम् अदुः प्रतिकामाय वेत्तवे ॥६॥

२.२२

युनक्त सीरा वि युगा तनोत कृते योनौ वपतेह बीजम् ।
विराजः श्नुष्टिः सभरा असन् नो नेदीय इत् सृण्यः पक्वम् आ यवन् ॥१॥
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् ।
धीरा देवेषु सुम्नयौ ॥२॥
अनड्वाहः पुरुषा ये कृण्वन्ति लाङ्गलं फालं सुमनसि स्यात्या? ।
शुनं कीनाशो अन्व् एतु वाहान् शुनं फालो भिन्दन्न् एतु भूमिम् ।
शुनासीरा हविषा यो यजाते सुपिप्पला ओषधयस् सन्तु तस्मै ॥३॥
शुनं वरो लाङ्गलेनाभ्युद्भिर [भगः फालैस् सीरपतिर मरुद्भिः] ।
पर्जन्यो बीजम् इरयानो हिनोतु शुनासीरा कृणुतं धान्यं नः ॥४॥
इन्द्रस् सीतां नि गृह्णातु तां पूषा मधं रक्षतु ।
सा नः पयस्वती दुहाम् उत्तराम् उत्तरां समाम् ॥५॥
उद् अस्याद् रथजिद् गोजिद् अश्वजिद् धिरण्यजित् सूनृतया परीवृतः ।
एकचक्रेण सविता रथेनोर्जो भागः पृथिवीम् एत्व् आपृणन् ॥६॥

२.२३

यां गृहाणां रसम् ओषधीनाम् अनुज्येष्ठं यर्च आयुर विकल्पयः ।
तां मा? हिंसिषुः पितरो वर्धमाना भद्रां गच्छन्तीम्? अमिं लोकम् एहि ॥१॥
यदीदं भर्तं यदि वा विमर्तं क्षेत्रं देवानां यदि वा पितॄणाम् ।
उद् उ सूर्य? उदिते दिवा मनुष्यवत्? शिवा नो [अ]स्तु पृथिव्य् उत द्यौः ॥२॥
ऊर्जो यो भागो यत्र पृथिव्यां देवैर भागो? भक्षया यां धारयामि ।
शिवं शग्मम् अवसानं नो अस्तु रातिर देवेभिः पितृभिर मनुष्यैः ॥३॥
विश्वावसो अस्त्व् आसादनं? कुलायं गन्धर्वास् सुवेदसो मह्यम् ऊषुः ।

[illegible]

२.२४

[illegible]

२.२५

[illegible]

२.२६

[illegible]

२.२७

[illegible]

आरोहन् पर्वणा सह मणिं दुर्णामचातनम् ॥१॥
गर्भात्यां रक्षो दुरते मूलेन यातुधान्यः ।
मध्येन यक्ष्मं बाधते अग्रेण पाप्मानं तरति ॥२॥
ये पश्चात्तो अमीवा महान्तो ये च शायिनः? ।
सर्वान् दुर्णाम्ना मणिना शतवारो अनीनशत् ॥३॥
शतं वीर्याण्य् अजनयच् छतं यक्ष्मान् अपावपत् ।
दुर्णाम्नस् सर्वान् हत्वाव रक्षांस्य् अक्रमीत् ॥४॥
शतम् अहं दुर्णाम्नीनां गन्धर्वाप्सरसां शतम् ।
शतं [च] श्वन्वतीनां शतवारेण वारये ॥५॥

२.२८

विश्वं विभ्रमि पृथिवीव पुष्टम् अस्माद् आयन् प्रति गृह्णाम्य् अश्मम् ।
वैश्वानरस्य महतो महिम्नाग्निर इद् विश्वं सुहुतं कृणोतु ॥१॥
यद् अश्मम् मयि बहुधा विरूपं वासो हिरण्यम् अश्वम् उत गाम्
अजाम् अविम् ।
यद् अश्मम् अनृतम् अनृतेन देवा [शास्यन्न्] अशास्यन्न् उत वा करिष्यन् ॥२॥
यन् मा हुतं यद् अहुतम् आजगाम यस्माद् अयान् मनसोदारजीमि ।
यद् देवानां चक्षुष्य् आगो अस्त्य् अग्निर इद् घोता सुहुतं कृणोतु ॥३॥
अमहानि? कश्यपस् साध्य एतद् मरुतो भग अर्यं कृणोतु ।
प्रतिग्रहीता गोतमो वसिष्ठो विश्वामित्र नः प्र तिरन्त्व् आयुः ॥४॥

२.२९

अग्ने यक्ष्म चक्षुर एवं विद्यामि यथेदं भविष्यति स्वाहा ॥१॥
अग्ने यक्ष्मस्य श्रोत्रम् [एवं विद्यामि यथेदं भविष्यति स्वाहा] ॥२॥
अग्ने यक्ष्मस्य प्राणं [एवं विद्यामि यथायं भविष्यति स्वाहा] ॥३॥
अग्ने यक्ष्मस्यापानं [एवं विद्यामि यथायं भविष्यति स्वाहा] ॥४॥
अग्ने यक्ष्मस्यात्मा [एवं विद्यामि यथायं भविष्यति स्वाहा] ॥५॥
अग्ने यक्ष्मस्य सर्वम् एवं विद्यामि यथेदं भविष्यति स्वाहा ॥६॥

२.३०

देवानां यज्ञं सुमतिर ऋतूनां देवानां रातिर अभि नो नि वर्तताम् ।
देवानां सख्यम् उप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥१॥
तान् पूर्वया निविदा हूमहे वयं भगं मित्रम् अदितिं दक्षम् अस्रिधम् ।
अर्यमणं वरुणं सोमम् अश्विना सरस्वती नस् सुभगा मयस् करत् ॥२॥
एवं पितृभ्यो नमो अस्त्व् अद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्य् आ निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥३॥
प्रत्यञ्चो अग्ने सर्वाः पलायन्तु कृत्याकृते रिपवे मर्त्याय ।
कृत्याकृते ...? मा ते भूता कविस्यो मा येहि निर्जिरे उपरस्य ॥४॥
ज्यायसस् शंसाद् उत वा कनीयसस् समानशंसाद् उत अतिशंसात् ।
अनामृणम् अन्वत्तं यद् एनस् तद् मत् तस्मात् जातवेदो मुमुग्धि ॥५॥

२.३१

इमी यदी इन्द्रस्य आ गृहेभ्यस् स्वस्तये ।
[इ]न्द्रः पश्चाद् इन्द्रः पुरस्ताद् इन्द्रो नः पातु मध्यतः ॥१॥
इन्द्रं भयं विभ्यतस् नाथा कामायाँ च ।
इन्द्रः परिसिद् आ धृषद् अभयकृता भयापयः ॥२॥

इन्द्रं हृष्यतां विधिर वि नः पाशान् इवा चरत् ।
एवं पन्थाम् अरुक्षाम सुगं स्वस्तिवाहनम् ॥३॥
यत्र विश्वान् परि द्विषो वृणक्ति निन्दितेषु आन्तम् एत्य् अनाहतः ।
‡परा मजत किं तत् तव कां यक्षन्न् इव? ॥४॥
विश्वङ्गो यन्तु शकला? विश्वङ्गः परिपन्थिनः ।
विश्वङ् पुनर्भुवा मनो असमृद्धा [अ]घायवः ॥५॥
‡स्वस्ति व्याकरां स्वस्ति प्रत्युपाकरां स्वस्ति परिदिष्टं म्य् अप
स्वस्त्य् अस्त्व् अन्तः ।
‡परि मजं स्वरिज स्वस्तेन स मे भरद्वाजं स्वस्ति पुनर् आयपम्? ॥६॥
॥का°६॥ ॥अनु°६॥

२.३२

य उत्तराद् आजायते मधुषो मधुपाद् अधि ।
वेदा[म]हे तद् भेषजं जिह्वा मधुमती पिब ॥१॥
मधुमती पौर्णमासी मधो[श्] शृङ्गो अप पुष्पकम् ।
‡मधुमान् पर्वताम्? असि यतो जातास्य् ओषधे ॥२॥
गर्भो ऽस्य् ओषधीनाम् अपां गर्भ उतासिथ ।
अथो सोमस्य भ्रातासि मधुना प्राय मे वचः ॥३॥
भोगि? यद् मधुषस्य पितृणाम् एव जग्रभ ।
यो मा हिरण्यवर्चसं कृणोति पूरुषं प्रियम् ॥४॥
प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥५॥ ॥का°१॥

२.३३

ऊभा यन हृदा यन मुखेन जिह्वया यन ।
प्रपीना पयसा यन ॥१॥
याम्छ मे पादौ तन्वं याम्छ्यत्यौ याम्छ सक्थ्यौ ।
वीचिम् अनु प्र ते मनो निम्नं वार् इव धावतु ॥२॥
ऊर्ध्वानि ते लोमानि तिष्ठन्त्व् अघ्न्यौ कामेन शुष्येताम् ।
‡शिमीयता वत्सेन गौर् इव ऊभा सुरेव पश्यताम्? ॥३॥
इमा गावस् सबन्धवस् समानं वत्सम् मक्षत ।
हिङ्कृति क नि मक्षी रा त्रा रा नि र चि घ स्ता? ॥४॥
शृङ्गीपक्षा गलभूषा भम्भ्यारा चर्मवासिनीः ।
गावो घृतस्य मातरस् ता वत्स इवा नयामसि ॥५॥ ॥का°१७

२.३४

यच् च वर्चः कन्यासु यच् च हस्तिष्व् आहितम् ।
हिरण्येषु यद् वर्चस् तस्य भक्षीह वर्चसः ॥१॥
यच् च वर्चो राजरथे यच् च राजस्व् आहितम् ।
निष्के रुक्मे यद् वर्चस् तस्य भक्षीह वर्चसः ॥२॥
यद् अप्सु यद् वनस्पतौ यद् अग्नौ यच् च सूर्ये ।
यद् दक्षिणायां वर्चस् तस्य भक्षीह वर्चसः ॥३॥
वर्चस्वन् मे मुखम् अस्तु वर्चस्वद् उत मे शिरः ।
वर्चस्वान् विश्वतः प्रत्यङ् वर्चस्वान् वर्चो ऽस्तु मे ॥४॥
सुभगं मे मुखम् अस्तु सुभगम् उत मे शिरः ।
सुभगो विश्वतः प्रत्यङ् सुभगो वर्चो ऽस्तु मे ॥५॥ ॥का°१॥

२.३५

उद् असौ सूर्यो अगात् सहवत् तन् नाम म[म] ।
भद्रं ते मधुमती मधुमान् मधुमत्तरा ॥१॥
यद् गिरिषु पर्वतेषु गोष्व् अश्वेषु यन् मधु ।

सुरायां सिच्यमानायां कीलाले मधु तन् मयि ॥२॥
यथा सुरा यथा मधु यथाक्षा अधिदेवने ।
यथाह गच्छतो मन एवा माम् अभि ते मनः ॥३॥
यथा ते पदं पदेनर्प्यतां मनसा मनः ।
प्रत्यञ्चम् अप्रपं त्वाहम् इवाद्याभिधान्या ॥४॥
मह्यं त्वा द्यावापृथिवी मह्यं देवी सरस्वती ।
मह्यं त्वा मध्यं भूम्या उभाव् अन्तौ सम् अस्यताम् ॥५॥ ॥का°४४

२.३६

या वैश्वदेवीर् इषवो या वसूनां या रुद्रस्य सोमस्य या भगस्य ।
विश्वे देवा इषवो यावतीर् यस् ता वो अग्निना शर्मणा शमयामि ॥१॥
या आदित्यीर् इषवो या वसूनां या रुद्रस्याश्विनोर् यावतीस् ताः ।
विश्वे देवा इषवो यावतीर् यस् ता वो देवस् सविता शमयाति ॥२॥
यास् ते ऽग्न इषवो वात या[स्] ते भगाम् उत्सृष्ट्याम् उत वा मरुत्सु ।
इन्द्रस्य साह्ना वरुणस्य राज्ञस् ता वस् सूर्यो बृहता शमयाति ॥३॥
मा बिभृम आदित्याय वसुभ्यो मा रुद्रायाग्नये पार्थिवाय ।
इन्द्रस्य शुष्मो वरुणस्य या शुचिस् ता वो देवम् अदितिर् शमयाति ॥४॥
याश् च वाते विष्वग्वाते याश् च रुद्रस्य धन्वनि ।
अग्निर् टा वसोर् ईशानस् तास् सर्वा भिषजः करत् ॥५॥ ॥का°५॥ ॥अनु°७॥

२.३७

चित्ति यच्चासि? मनसा चित्ति देवा ऋतावृधः ।
जातवेदः प्र वस् तिर अग्ने विद्यामहङ्गिः? ॥१॥
यवयास्मद् द्वेषांसि यवयमेन हविषा ।
यस् ते मृत? दुष्वप्नस्य मायस् स ते तुदन्त वर्तं प्र हिण्मः ॥२॥
यथा कलां यथा शफं यथर्णं संनयन्ति ।
एवा दुष्वप्न्यं सर्वम् अप्रिये सं नयामसि ॥३॥
अरतो हीय? शतम् अप गवां भक्षीय शतम् अजानां शतम् अवीनाम् ।
शतम् अश्वानां पुरुषाणां शतानि? भक्षीय ॥४॥
अमुम् आमुष्यायणम् अमुष्याः पुत्रं तम् अहं निरृतये प्रेष्यामि ।
तं मृत्योः पाशे बध्नामि स बद्धो इतो ऽस्तु स ततो मा मोचि ॥५॥ ॥का°१॥

२.३८

ये नश् शपन्त् अप ते भवन्तु वृक्षान्व? वृक्ष्या अपि तान् अयाम ।
द्राघीय आयुः प्रतरं दधाना वयं देवानां सुमतौ स्याम ॥१॥
कृत्याकृतं वलवान् ‡अङ्गति अग्नेः? ।
प्रत्यस्य नु दुष्यस्य प्रति स्म रेवतं गृहः ॥२॥
यस् त्वा कृत्ये प्रतिपाय? विद्वाँ अविदुषो गृहम् ।
पुनस् त्वा तस्मै कृष्मो यथा क[त्या]कृतं हनत् ॥३॥
पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय ।
उतो त्वम् उत्तमा पुनस् त त मै प सु द नै स्वं? ॥४॥
कृत्या यन्तु कृत्याकृतं वृषीयायिमतो गृहम् ।
स्तोकं पाकस्य वर्धतां संसृष्टा ओषधीर् इव ॥५॥ ॥का°१॥

२.३९

यत् ते ग्रावा बाहुच्युतो अचुच्यवीन् नरो यद् वा ते हस्तयोर् अधुक्षन् ।
तत् त आ प्यायतां तत् ते नि ष्प्यायतां सोम राजन् ॥१॥
यत् ते ग्राव्णा विच्छिदुस् सोम राजन् प्रियाण्य् अङ्गा सुकृता पुरूणि ।
तत् सं धत्स्वाज्येनोत वर्धयस्वानागसो यथा सदम् इत् संक्षियेम ॥२॥
यां ते श्येनं विभिदुर् यां च योनिं यदि वा स्थानात् प्रच्युतो[य]दि वासुतो ऽसि ।
तस्यै ते सोम सुतम् अस्माकम् एतद् उप नो राजन् सुकृते ह्वयस्व ॥३॥
सं प्राणापानाभ्यां सं चक्षुषा सं श्रोत्रेण गच्छस्व सोम राजन् ।

यत् ते विरिष्टं सम् उ तत् त एतज् जानीतान् मत् संगमने पथीनाम् ॥४॥
अहाय शरीरं पयसा समेत्याभ्यो ऽन्यो भवति वर्णो [अ]स्य ।
तस्मै त इन्द्रो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥५॥
अभिक्षरन्ति जुह्वो घृतेनाङ्गा परूंषि तव वर्धयन्ति ।
तस्मै ते सोम नम इद् वषट् चोप नो राज[न्] सुकृते ह्वयस्व ॥६॥ ॥का°१॥

२.४०

इहैत देवीर् अभयम् अस्तु पन्था अयं वो लोकश् शरणाय साधुः ।
इदं हविर् जुषमाणा उदित? क्षिप्रा [रा]ज्ञा वरुणेन प्रसूताः ॥१॥
इहैतु राजा वरुणो वृधाभिर्? देवा देवेषु हविषो जुषन्ताम् ।
कृणुध्व पन्थां ‡मदयान् दूर्दिभिर्? अनेन वध्रो महता पृथिव्याम् ॥२॥
‡मियद् भियद् च मदयान् अभूत्र नी रो को पा ना म् इव पार्यतु ।
‡ संनेनेव गां मृजत क्षिपीनतो जहोवां शर्म् भजनां अपृण्वता? ॥३॥
ये पारतो मध्यतो ये च यन्ति ये अनुपतो निहितास् तीरे मन्यवः ।
ते देवजा इह नो मृडन् न आपस् त मा जिन्वन्त् उभये सबन्धवः ॥४॥
इदं व आपो हृदयम् अयं वत्स ऋतावरीः ।
इहेत्थम् एत शक्वरी[र्] यत्रेयं वेशयामसि ॥५॥ ॥का°४॥

२.४१

उद् असौ सूर्यो अगाद् उद् अयं मामको भगः ।
तेनाहं विद्वला पतिम् अभ्य् असाक्षि विषासहिः ॥१॥
अहं केतुर् अहं मूर्धाहम् उग्रा विवाचनी? ।
ममेद् अप क्रतुं पतिम् सेहानाया उपाचरात् ॥२॥
मम पुत्राश् शत्रुहणो अथो मे दुहिता विराट् ।
उताहम् अस्मि संजया पत्युर् मे श्लोक उत्तमः ॥३॥
येन देवा असुरेभ्यो भवन्ति अमेतरा?
इदं तद् अक्रि देवा असपत्ना किलाभुवम् ॥४॥
असपत्ना सपत्नघ्नी जयन्त्य् अभिभूवरी ।
भुञ्जाम्य् अन्यासां भगं वर्चो अस्थेयसाम् इव ॥५॥ ॥का°५॥ ॥अनु°८॥

२.४२

शेरभक शेरभ पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त ॥१॥
शेवृधक शेवृध [पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥२॥
सर्पानुसर्प [पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥३॥
म्रोकानुम्रोक [पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥४॥
जूर्णि [पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥५॥
अर्कत्रि [पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥६॥
अर्जुनि [पुनर् वो यन्तु यातवः पुनर् हेतिः किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥७॥
उपब्दे पुनर् वो यन्तु यातवः पुनर् जूतिः? किमीदिनः ।
यस्य स्थ तम् अत्त यो वः प्राहैत् तम् अत्त स्वा मांसान्य् अत्त ॥८॥ ॥का°१॥

२.४३

द्यावापृथिवी उपश्रुतेर् मा पातं स्वाहा ॥१॥
धाताषायुषे प्रजायै मा पातं स्वाहा ॥२॥

प्राणापानौ मृत्योर् मा पातं स्वाहा ॥३॥
सूर्य चक्षुषो मा पाहि स्वाहा ॥४॥
अग्ने विश्वंभर विश्वतो मा पाहि स्वाहा ॥५॥ ॥का°१॥

२.४४

आयुर्दा अग्न आयुर् मे दास् स्वाहा ॥१॥
वर्चोदा अग्ने वर्चो मे दास् स्वाहा ॥२॥
तेजोदा अग्ने तेजो मे दास् स्वाहा ॥३॥
सहोदा अग्ने सहो मे दास् स्वाहा ॥४॥
बलदा अग्ने बलं मे [दास्] स्वाहा ॥५॥ ॥का°१॥

२.४५

आयुर् अस्य् आयुर् मयि धेहि स्वाहा ॥१॥
वर्चो ऽसि वर्चो मयि धेहि स्वाहा ॥२॥
तेजो ऽसि तेजो मयि धेहि स्वाहा ॥३॥
सहो ऽसि सहो मयि धेहि स्वाहा ॥४॥
बलम् असि बलं मयि धेहि स्वाहा ॥५॥ ॥का°१॥

२.४६

पिशाचक्षयणम् असि पिशाचजम्भनम् असि स्वाहा ॥१॥
यातुधानक्षयणम् असि यातुधानजम्भनम् असि स्वाहा ॥२॥
सदान्वाक्षयणम् असि सदान्वाजम्भनम् असि स्वाहा ॥३॥
सपत्नक्षयणम् असि सपत्नजम्भनम् असि स्वाहा ॥४॥
भ्रातृव्यक्षयणम् असि भ्रातृव्यजम्भनम् असि स्वाहा ॥५॥ ॥का°५॥ ॥अनु°९॥

२.४७

आ ते सौवीर्यं ददे मयि ते सौवीर्यम् ॥१॥
आ [ते] सौवर्चो ददे मयि ते सौवर्चः ॥२॥
आ [ते] सौतेजो ददे मयि ते सौतेजः ॥३॥
आ [ते] सौवृष्ण्यं ददे मयि ते सौवृष्ण्यम् ॥४॥
आ ते सौशुष्मं ददे मयि ते सौशुष्मम् ॥५॥ ॥का°१॥

२.४८

अग्ने यत् ते तपस् तेन तं प्रति तप यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥१॥
[अग्ने यत्] ते हरस् तेन तं प्रति हर [यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः] ॥२॥
[अग्ने] यत् ते शोचिस् तेन तं प्रति शोच [यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः] ॥३॥
[अग्ने यत्] ते ऽर्चिस् तेन तं प्रत्य् अर्च [यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः] ॥४॥
अग्ने यत् ते ज्योतिस् तेन तं प्रति दह यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥५॥
॥का°१॥

२.४९

प्राची दिग् आग्नेयं देवता यद् देवेषु पितृषु मनुष्येषु मय् चकारायत्त?
तस्यावेदनम् असि ।
सं क्षेमम् अस्माद् यच्छ! तस्माद् आमयतु? स्वाहा ॥१॥
दक्षिणा दिग् ऐन्द्रं देवता [यद् देवेषु पितृषु मनुष्येषु मय् चकारायत्त?
तस्यावेदनम् असि ।
[सं क्षेमम् अस्माद् यच्छ! तस्माद् आमयतु? स्वाहा] ॥२॥
प्रतीची दिग् वारुणं देवता [यद् देवेषु पितृषु मनुष्येषु मय् चकारायत्त?
तस्यावेदनम् असि ।
[सं क्षेमम् अस्माद् यच्छ! तस्माद् आमयतु? स्वाहा] ॥३॥
उदीची दिग् प्राजापत्यं देवता [यद् देवेषु पितृषु मनुष्येषु मय् चकारा-
यत्त? तस्यावेदनम् असि ।

[सं क्षेमम् कस्मात् यच्छ? तस्मात् आयन्तु? स्वाहा] ॥५॥
ऊर्ध्वो दिव इहद् देवता यद् देवेषु पितृषु मनुष्येषु मद् यशस्वायचो?
तस्मादेकाद् अमि ।
सं क्षेमम् कस्मात् यच्छ? तस्मात् आयन्तु? स्वाहा ॥६॥ ऋ°६॥

२.५०

अग्निं वयं त्रातारं हवामहे [स] इमं त्रायते उत्स्मात् यस्मात् तस्मात् आयन्तु? ।
जुषाणो अग्निर् आज्यस्य त्राता त्रायतां स्वाहा ॥१॥
मित्रावरुणौ वयं त्रातारौ हवामहे यद् इमं त्रायेते उत्स्मात् यस्मात् तस्मात् आयन्तु? ।
जुषाणौ मित्रावरुणाव् आज्यस्य त्रातारौ त्रायेतां स्वाहा ॥२॥
मरुतो वयं त्रातॄन् हवामहे [य] इमं त्रायन्ते उत्स्मात् यस्मा[द् तस्मा]द् आयन्तु? ।
जुषाणा मरुत आज्यस्य त्रातारस् त्रायन्तां स्वाहा ॥३॥
[illegible]
पितॄन् वयं त्रातॄन् हवामहे [य] इमं त्रायन्ते उत्स्मात् यस्मात् तस्मात् आयन्तु ।
जुषाणाः पितर आज्यस्य त्रातारस् त्रायन्तां स्वाहा ॥४॥
बृहस्पतिं वयं त्रातारं हवामहे [य] इमं त्रायते उत्स्मात् यस्मात् तस्मात् आयन्तु? ।
जुषाणो बृहस्पतिर् आज्यस्य त्राता त्रायतां स्वाहा ॥५॥ ऋ°२॥

२.५१

अग्निं वयं त्रातारं यज्ञामहे मेनिहनं बलगहनम् ।
जुषाणो अग्निर् आज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा ॥१॥
इन्द्रं वयं [त्रातारं यज्ञामहे मेनिहनं बलगहनम्] ।
जुषाण इन्द्र आज्यस्य [मेनिहा बलगहा त्राता त्रायतां स्वाहा] ॥२॥
सोमं वयं त्रातारं यज्ञामहे मेनिहनं बलगहनम् ।
जुषाणस् सोम आज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा ॥३॥
विश्वान् वयं देवांस् त्रातॄन् यज्ञामहे मेनिहनो बलगहः ।
[जुषाणा विश्वे देवा आज्यस्य मेनिहनो बलगहन]स् त्रातारस् त्रायन्तां स्वाहा ॥४॥
बृहस्पतिं वयं त्रातारं यज्ञामहे मेनिहनं बलगहनम् ।
जुषाणो बृहस्पतिर् आज्यस्य मेनिहा बलगहा त्राता त्रायतां स्वाहा ॥५॥
ऋ°५॥ अनु°१०॥

२.५२

ये बर्हिषः प्रथमास् सत्रम् आसत येभिर् आहुतं यद् इदं विरोच[ति] ।
तेभ्यो जुहोमि हविषा घृतेनाश्वयात् सोमात् भयम् अस्तु वीराः ॥१॥
अर्कं प्रथमम् तपसो मुच्यते त्रिणामानीयं दीक्षा वशिनीनां ह एतत् ।
स केशान् सुवते कपिशको भवन्तु तेषां मह[इ]दो वरुणस्य राज्ञः ॥२॥
येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य केशान् ।
तेन ब्रह्माणो वपतेदम् अस्यायुष्यान् दीर्घायुर् भयम् अस्तु वीराः ॥३॥
मा ते केशान् अनु गाद् वर्च एतत् तथा धाता दधातु ते ।
तुभ्यम् इन्द्रो वरुणो बृहस्पतिः सविता वर्चो प्रयच्छत् ॥४॥
आ रोह रोह विपश्चित शत्रून् अपाक्रम? दीक्षा वशिनी ह उग्रा ।
देहि दक्षिणां ब्राह्मणेभ्यो अथो मुच्यस्व वरुणस्य पाशात् ॥५॥ ऋ°२॥

२.५३

ये देवाः पुरस्सदो ऽग्निनेत्रा रक्षोहणस् ते नः पान्तु [ते नो ऽवन्तु] तेभ्यो

नमस् तेभ्यस् स्वाहा ॥१॥
ये देवा दक्षिणासदो यमनेत्रा रक्षोहणस् ते नः पान्तु [ते नो ऽवन्तु]
तेभ्यो नमस् तेभ्यस् स्वाहा ॥२॥
ये देवाः पश्चात्सदो मरुन्नेत्रा रक्षोहणस् ते नः पान्तु [ते नो ऽवन्तु]
तेभ्यो नमस् तेभ्यस् स्वाहा ॥३॥
ये देवा उत्तरात्सदस् सोमनेत्रा रक्षोहणस् ते नः पान्तु [ते नो ऽवन्तु]
तेभ्यो नमस् तेभ्यस् स्वाहा ॥४॥
[ये देवा दिविषदो ऽवस्वन्नेत्रा रक्षोहणस् ते नः पान्तु ते नो ऽवन्तु
तेभ्यो नमस् तेभ्यस् स्वाहा ॥५॥]
ये देवा अन्तरिक्षसदो बृहस्पतिनेत्रा रक्षोहणस् ते नः पान्तु ते नो ऽवन्तु
तेभ्यो नमस् तेभ्यस् स्वाहा ॥६॥ ऋ°१॥

२.५४

अग्नये पुरस्सदे रक्षोघ्ने स्वाहा ॥१॥
यमाय दक्षिणासदे रक्षोघ्ने स्वाहा ॥२॥
मरुद्भ्यः पश्चात्सद्भ्यो रक्षोघ्न्यस् स्वाहा ॥३॥
सोमायोत्तरात्सदे रक्षोघ्ने स्वाहा ॥४॥
अवस्वते दिविषदे रक्षोघ्ने स्वाहा ॥५॥
बृहस्पतये ऽन्तरिक्षसदे रक्षोघ्ने स्वाहा ॥६॥ ऋ°२॥

२.५५

दिवो जातो दिवस् पुत्रो अस्माद् जातं सहद् सहः ।
अभ्यारायन् अग्ने मैत्रायात् सहदेवं वामसि? ॥१॥
तं त्वाम् आ यथा रथम् उप तिष्ठन्तु राजानः ।
सुमतिभ्यो वि बभुवे? ॥२॥
त्वया वयं देवजात सर्वान् प्र शोषयामसि ।
उत सत्या उतानृताः ॥३॥
यो अभ्यारेण मित्रेण सुमतीद्? इव गच्छति ।
जयंश् च सर्वाः पृतना याश् च सत्या उतानृताः ॥४॥
अधराञ्चो नि द्रवन्तु सुमत्या उलुलाकृताः ।
अभ्यारामित्रं पुरुषं य ऽयाताः पृतन्यन्ति ॥५॥ ऋ°४॥

२.५६

उग्रा नाम स्थ तेषां वः पुरो गृहाः प्राची दिक् तेषां वो अग्निर् इषवः ।
ते नो मृडत द्विपदे चतुष्पदे तेषां वो यान्य् आयुधानि या इषवस् तेभ्यो
नमस् तेभ्यस् स्वाहा ॥१॥
क्रव्या नाम स्थ तेषां वो दक्षिणाद् गृहा दक्षिणा दिक् तेषां व आप इषवः ।
[ते नो मृडत द्विपदे चतुष्पदे तेषां वो यान्य् आयुधानि या इषवस् तेभ्यो
नमस् तेभ्यस् स्वाहा] ॥२॥
विराजो नाम स्थ तेषां वः पश्चाद् गृहाः प्रतीची दिक् तेषां वः काम इषवः ।
[ते नो मृडत द्विपदे चतुष्पदे तेषां वो यान्य् आयुधानि या इषवस् तेभ्यो
नमस् तेभ्यस् स्वाहा] ॥३॥
अवस्था नाम स्थ तेषां व उत्तराद् गृहा उदीची दिक् तेषां वो वात इषवः ।
[ते नो मृडत द्विपदे चतुष्पदे तेषां वो यान्य् आयुधानि या इषवस्
तेभ्यो नमस् तेभ्यस् स्वाहा] ॥४॥
उपरे नाम स्थ तेषां व उपरि गृहा ऊर्ध्वा दिक् तेषां वो वर्षम् इषवः ।
ते नो मृडत द्विपदे चतुष्पदे तेषां वो यान्य् आयुधानि या इषवस् तेभ्यो
नमस् तेभ्यस् स्वाहा ॥५॥ ऋ°५॥ अनु°११॥

२.५७

यदीदं दिवो यद् अवाजगाम यद् अन्तरिक्षाद् यदि पृथिव्याः ।
यदि यज्ञो यज्ञपतेस् सर्गम् तेभ्यस् सर्वेभ्यो नमसा विधेम ॥१॥

यम् इन्द्रम् आहुर् यं मित्रम् आहुर् यं सोमम् आहुर् यम् अग्निम् आहुः ।
यं [वरुणं बृहस्पतिम्] आहुस् तेभ्यस् सर्वेभ्यो नमसा विधेम ॥२॥
यदिदिन्द्रिया जल्प्याः मोदयन्ति स्वप्नं दुर्भूतम् अभि ये विशन्ति? ।
ये देवानाम् ऋत्विजो यज्ञियानां तेभ्यस् सर्वेभ्यो नमसा विधेम ॥३॥
ये शतमाना नमसा विपन्ति सूर्यस्य रश्मीन् अनु सं चरन्ति ।
ये देवानां धर्मधृतो बभूवुस् तेभ्यस् सर्वेभ्यो नमसा विधेम ॥४॥
[illegible] ये मानयन्ति येभ्यः कृण्वन्ति यो रोदयन्ति? ।
ये वा ऋषीणां प्रतिरूपा बभूवुस् तेभ्यस् सर्वेभ्यो नमसा विधेम ॥५॥ ऋ°२॥

२.५८

अन्वानृची पती माची विश्वी विश्वानत विश्वेषणम् ।
विलासि [illegible] ॥१॥
[illegible] त्रिषद् वासतीभ्यस् समान्या? ।
अयोमुखम् इव खादिरम् अग्निर् याम् मरुद् अन्तरः ॥२॥
सिदस् ते वायुतो व्याघ्रः परितु? अन्ते ।
अग्निर् याम् मरुद् अन्तरो यथा वां नशालति? ॥३॥
वि वीर् [illegible] सन् बधासत कारठयाः? ।
यथा ओजसे अरस्थम्? अग्निर् इव त इहः ॥४॥
व्यवस्यन्तु हृदयानि वि चित्तानि मनांसि च ।
अथो यद् तन्वो संगतं तद् याम् अस्तु विपुलकम् ॥५॥
अरिला दैवा विश्चिन्न् ख्यो कर्मेवतः? ।
विश्वाञ्ची पर्यावर्तिने यथा वो नशालति? ॥६॥ ऋ°२॥

२.५९

अयः पीताम् विघुतद् अवध्नाम् अमस्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह अवध्नाम् ॥१॥
इमम् आदित्या वसुना सम् उक्षतेमम् अग्ने वर्धय वावृधानः ।
अविमम् विघुद् [illegible] इमम् इन्द्र सं सृज वीर्येण ॥२॥
भूमिप्रष्टा पातु हरितेन विश्वभृद् अग्निः पिपर्तु अयसा सजोषाः ।
वीरुद्भिष् ते अर्जुनं संविदानं दक्षं दधातु सुमनस्यमानम् ॥३॥
देवा यत् अतं हिरण्यम् मंहद् एवं विपतनं बभूव ।
सोममीनं हिरितस्य परायतद् अयाम् एवं वयसो तेन आयुस् तत् ते
हिरण्यं विविंद् अस्य मायुषे ॥४॥
त्रियायुषं जमदग्नेः कश्यपस्य त्रियायुषम् ।
[illegible] श्रीषम् आयुषि तम् कृधि ॥५॥
[illegible] विघृता यद् आयज्य [illegible] दराणः ।
[illegible] अनृतेन [illegible] सर्वान् वि [illegible] ॥६॥
दिवस् त्वा पातु हरितं म[ध्यात्] त्वा पात्व् अर्जुनम् ।
[भूम्या अयस्म]यं पातु प्रागाद् देवपुरा अयम् ॥७॥
इमास् ति[स्रो] देवपुरास् तास् त्वा रक्षन्तु सर्व[त]ः ।
तास् त्वं बिभ्रद् आयुष्मान् वर्चस्वान् उत्त[रो] द्विषतां भव ॥८॥
[पुरं देवानाम् अ]मृतं हिरण्यं य आबेधे प्रथमो देवो अग्रे ।
[तस्मै नमो दश प्राचीः कृ]णोम्य् अनु मन्यतां त्रिवृद् आबधे मे ॥९॥
[illegible]
हरितं [illegible] अजैम् [illegible] रजसाविच्छिंदानि ॥१०॥
आ त्वा चृतत्व् अर्यमा पूषा बृहस्पतिः ।
[अ]हर्जातस्य यन् नाम तेन त्वा ऽति चृ[तामसि] ॥११॥ ऋ°२॥

२.६०

यां वसतो तपसा [illegible] अभिनीपतामि नमसा सयो[नि]म् ।
[illegible] अग्ने त्रयः परस्ताद् तृतीये नाके अधमारे सदेम ॥१॥

[तं प्रजानन्] प्रति गृह्णाति विद्वान् बृ[हस्पतिः] प्रथमजा ऋतस्य ।
[अस्माभिर् दत्तं जरसः पर]स्ताद् अ[च्छिन्नं तन्तुम् अनु सं तरेम] ॥२॥
× × × × ×

२.६१

× × × × × ×ते ।
यस्मात् विद्वा भुवनानि गोपा अन्तरिक्षस्य [महतो] वि[मानः] ॥ ॥
×मा मिलं ते घृतपृष्ठं अर्दीना पथे? सुधुतं जुहोमि ।
अविद्वान् × मुमुग्धि पाशान् अस्य पत्नी विधवा यथासत् ॥ ॥
अनातुरेण वरुणः ×ं नो स्वस्तिभिर् अति दुर्गाणि येष्यत्? ।
तम् अभिना प्रतिगृह्या स्वस्त[ये] रोपयेत? पूषा मे सं प्र यच्छत् ॥ ॥
ऋ°५॥ अनु°१२॥

२.६२

ये पिशाचा इमां विद्याम् आकूतिं मोहयन्तु नः ।
तेषां त्वम् अग्ने नाशय सर्व[श् चि]त्तम् अथो प्रजाम् ॥१॥
आशायाग्रे पिशाचानां सर्वेषु चित्तम् अथो प्रजाम् ।
यथाशां मह्यं धारय यथा इ कामयन्तु मे ॥२॥
आशां मह्यं धारयन्त् इन्द्रियेभ्यः × ×ताम् ।
त्वम् अग्ने क्रव्यादस् सर्वान् पिशाचान् अर्चिषा दह ॥३॥
प्रति दह [यातु]धानान् सुर देवान् किमीदिनः ।
यो नो पुरस्ताद् देवनं यथाशां × × नः ॥४॥
ये नः पशून् अग्न इच्छन्त्य आशायां पुरुषेषु च ।
तांस् त्वं सहस्र[चक्षः] पि[शाचाँ अर्चि]षा [द]ह ॥५॥ ऋ°१॥

२.६३

× × × × ×
× × × × × ×
× × × × ×

२.६४

× × × × × × ×
× [मि रेकाति देवानां सर्वेषां सजातानां × इ × थ × निर्ऋतिर् इ×? ॥ ॥
[क]श्यपस्य प्रतिसरो द्यौष् पिता पृथिवी माता ।
यथाभिचक्र देवास् तथापि कृणुता पुनः ॥ ॥
याः कृत्या नीलवतीर् याः कृत्याः पद्वावती? ।
कृत्या याश् च बभ्रुर् लोहितीस् ता इतो नाशयामसि ॥ ॥
यदि वा यद् इमा अहुर् इने मद्रासि सुन्वति? ।
हन्यासि कल्याण्य अमि स्वामं कर्तारस्यं? अहि ॥ ॥ ऋ°४॥

२.६५

बृहत् ते वर्चः प्रथताम् अभि यां मित्रो ऽम्य् एति सुगृभित? सुवर्चाः ।
कर्त राजा वरुणो अर्दीतु तस्मात् त्वं हविषा मायया असः ॥१॥
शतं हेमन्तान् शमया सपत्नान् विदाम् त्वा सर्वा गुणयो भवन्तु ।
वसन्तोतिरातां अपप तम् यातयस् त्वा सुजातो विलहा त्वं नि च ॥२॥
इन्द्रस् त्वं योक्रृ अधि मे विचरन्तु मत्ते यस् त्वा यच्छन्तं प्रत्युं सि ×
× × इमा त्रिर्याणं पृ त भे स्स प यें पृ इ स्त म च जं य नी × ×
×रास्य ते पति योम गृ आ ता तु प सं × × × ×
× × × × × × × × ×
× × ×रो मम्य प्रथुह इमया सपत्नान्?
[illegible]
[illegible] ॥ ऋ°४॥

२.६६

अपाय राज्ञे प्रथमं जुहोमि विश्वे देवा उत्तरे मादयन्ताम् ।

उशन् पत्नीम्य उशतीम्य आप्य× पतिम् अग्न आ वह रातहव्य ॥१॥
पतिं गृणीम्य हविषा गृणाना तम् आ वहन् सविता तं ते अग्निः ।
¿तम् इन्द्रम् अरिम? शतशारदाय भगवत्का भगवती सुवीरा ॥२॥
यमर्या? सं पतिम् अस्यै दिदेशिथ जने चित्तम्तं तम् इहा वहासि ।
सुमङ्गल्य अप्रतिघ्नी सुवेशा रायस् पोषेण सम् इषा सृजस्व ॥३॥
यत् ते पतिम् अर्यमा आयमानं यं धाता च कल्पजम् इहावहासि ।
अभि परेण हविषा जुहोमि प्रजां नयतु सुमनस्यमानाम् ॥४॥
पतिं ते द्यावापृथिवी आ धातां पतिं मित्रावरुणा वातो [अ]ग्निः ।
सरस्वत्यो ऽदितिस् सोम इन्द्रस् ते त्वा देवा× पतिवती कृण्वन्तु ॥५॥ ॥अ°५॥ ॥अनु°११॥

२.६७

यस् त्वाराय× प्रविवेश आनु आनियाद्गुत? ।
अथो तन्वं पस्पर्शा तम् इतो निर् नयामसि ॥१॥
निर् द्वाराय? नयामसि य इमां प्रविवेशिथ ।
आत्मानम् अस्या मा हिंसीर् अन्यत्र चर मेह भूः ॥२॥
येआराये माम्? उपायसि धेह्य अस्यै रायस् पोषणम् ।
प्रजां च तस्या मा हिंसीर् अन्यत्र चर मेह भूः ॥३॥
येआराये? ध्यायसि हनामि वीरुधा त्वा ।
अथो खनित्रमीस्? त्वा यर्येण यथा भगम् ॥४॥
येआरायास्यंस्नुपुयमायतोक्यम्? ।
यत् पौत्रसयं शैमोग्यं तम् इतो निर् नयामसि ॥५॥ ॥अ°१॥

२.६८

अग्नेर् वो बलवतो बलेन मन्युं वि नयामसि ॥१॥
इन्द्रस्य वो [बलवतो बलेन मन्युं वि नयामसि] ॥२॥
सोमस्य वो [बलवतो बलेन मन्युं वि नयामसि] ॥३॥
बृहस्पतेर् वो [बलवतो बलेन मन्युं वि नयामसि] ॥४॥
प्रजापतेर् वो बलवतो बलेन मन्युं वि नयामसि ॥५॥
यत् ते सूर्य दिवि देवेषु वर्चस् तस्य नो धेहि तमसि प्रचेताः ।
अहं च विप्रस्? त्विपितस् त्विषीमान् इमां वाचं वि चक्षीय ॥६॥ ॥अ°१॥

२.६९

वात× पुरस्तात् ¿पव मे? नमस्वान् नमस् ते विघ ते नामधेयं मा नो हिंसीः ॥१॥
तपाद्य× पुरो दक्षिणत× ¿पव मे? नमस्वान् नमस् ते विघ ते नामधेयं मा नो हिंसीः ॥२॥
विश्वायुर् विश्वजननीन× प्रतीच्या दिश× ¿पव मे? नमस्वान् नमस् ते विघ ते नामधेयं मा नो हिंसीः ॥३॥
दिवो वैश्वदेव उदीच्या दिश× ¿पव मे? नमस्वान् नमस् ते विघ ते नामधेयं मा नो हिंसीः ॥४॥
अतिष्ठाया बार्हस्पत्य ऊर्ध्वाया दिश× ¿पव मे? नमस्वान् नमस् ते विघ ते नामधेयं मा नो हिंसीः ॥५॥ ॥अ°१॥

२.७०

अपयोरपाउतनद्? अपस्कन्ध वधेर् अहिम् ।
¿कल्याण्य् आयताः स्मृतं? सुमन[स]स् सन्तु विपुतः ॥१॥
शौ ५.८१.१ यत् पर्ज[न्यस्] स्तनयित्नुस् सं सं व्ययते जगत् ।
पतन्तु द्वितीया व्रयावती? पृथिवी प्रति मोदते ॥२॥
एषनाध्यकंदीपृकाध्वेधेनुंकाम्? इव ।
अहींस् त्वं विपुतां अहि मास्माकं पुरुषान् वधीः ॥३॥

अभिक्रन्दस् स्तनयित्नोर् अथास्कुर्जद् अशन्या उत ।
देवा मरुतो मृडत न× पान्तु नो दुरिताद् अवद्यात् ॥४॥
वीचिते? परि णो नम अदित्याश् शर्म यच्छत ।
सुयोत पर्जिनं शरम् उतायवं रिशादसः ॥५॥ ॥अ°१॥

२.७१

शौ ५.१४.५ कृत्यव्यधनि विध्य तं यश् चकार तम् इज् जहि ।
न त्वाम् अचकुषे वयं वधाय सं शिशीमहि ॥१॥
यथा ¿त्वा देव्य् ओषधे प्रतीचीनं फलं कृतम्? ।
एवा त्वं कृत्येन कृतं हस्तगृह्य परा णय ॥२॥
पुन× कृत्यां कृत्याकृते गौर् धेनुका यद्वंमुं? नयत् ।
शशुल्यंशशुचेसयं? प्रतीचीः प्रति तद् वसत् ॥३॥
यां ते चकुर् वर्तनेषु वल्माकृणुमेतासु? च ।
मण्डूके कृत्यां यां चकुर् तया कृत्याकृतो जहि ॥४॥
शौ ५.१४.११ अग्निर् इवैतु प्रतिकूलम् अनुकूलम् इवोदकम् ।
सुखो रथ इव वर्ततां कृत्या कृत्याकृतं पुनः ॥५॥ ॥अ°५॥ ॥अनु°१४॥

२.७२

अग्निर् शुभ्रेण सूर्यो ज्योतिषा चौर् महिमान्तरिक्षं व्यचसा ।
दिश आशाभि× पृथिवी पयोभिर् इदं राष्ट्रं वर्धयन्तु प्रजावत् ॥१॥
त्वष्टा रूपेण सविता सवेनाहर् मित्रेण वरुणेन रात्री ।
पूषा पुष्टिभिर् भागधेयेन भगया इदं राष्ट्रं वर्धयन्तु प्रजावत् ॥२॥
यानि विश्वकर्मा निजग्रान सेदिम् अन्तरा द्यावापृथिवी उभे ।
तस्याद्य× क्षत्रियं गर्भं परि मा वयवा मूर्धनि धारयस्व ॥३॥
छन्दांस्य् अभितो मयूखान् स्तोमायमायजरस्याः? ।
पुरीषं तस्याद्य× क्षत्रियं निर्मितं परि मा वयवा मूर्धनि धारयस्व ॥४॥
पराचि तस्य ¿मलया यानि महति मदस्यदं? कृणुष्व दुर्धराय या ।
मा त्वा दभन् सपत्ना दिप्सतस् तव शत्रून् उत्तमं सुम्नम् अस्तु ॥५॥ ॥अ°१॥

२.७३

इदं तन् मित्रावरुणा हविर् वां येनाग्रे देवा अमृतत्वम् आयन् ।
येनास्मे क्षत्रम् अधिधारयीथो असपत्ना× प्रदिशस् सन्तु मह्यं ॥१॥
घृतस्य धारा मित्रावरुणा दुहे वां धेनुर् अनपस्फुरन्ती ।
देवस् सवितोत वायुर् अग्निर् भूतस्य पतिर् इह शर्म यच्छत ॥२॥
तं नस् तन् मित्रावरुणा गृणीतां त्रेधा मित्रा बहुधा वरीराम्? ।
अपते सेना अप घोष एतत् पृथग् सत्यानो बहुधा भवन्ताम् ॥३॥
हनान मित्रावरुणा अमित्रान् भयाम मद्रे सुकृतस्य लोके ।
पारयान्? नस् सविता देवो अग्निर् जयामेदं हविषा कश्यपस्य ॥४॥
वातो यन् मित्रावरुणा तद् अह हविष्य् अन्तरं निर्मितं कश्यपस्य ।
अध्वर्यवो मरुतो यस्यासन् तेन देवेभ्यो वरिमाणि चक्रुः ॥५॥ ॥अ°१॥

२.७४

सो ३.३.१ च ६.९९.४ मे ४.१४. [१५ अचिक्रदत् स्वपा इह भवद् अग्ने व्यच[स्व] रोदसी उरूची ।
यासुं नय नमसा रातहव्यं युञ्जन्ति सुप्रजसं पञ्च जनाः ॥१॥
सो १ दूरे चित् सन्तम् अरुणास इन्द्रम् आ च्यावयन्तु सख्याय विप्रम् ।
यद् गायत्रीं बृहतीम् अर्कम् अस्मै सौत्रामण्या दधृषन्त देवाः ॥२॥
सो ३ अद्भ्यस् त्वा राजा वरुणो जुहाव सोमस् त्वायं ह्वयति पर्वतेभ्यः ।
इन्द्रस् त्वायं ह्वयति विड्भ्य आभ्यश् श्येनो भूत्वा विश आ पतेमाः ॥३॥
सो ४ श्येनो हविर् नयत्व् आ परस्माद् अन्यक्षेत्रे अपरुद्धं चरन्तम् ।
अश्विना पन्थां कृणुतां सुगं ते गर्भं सजाता अभिसंविशध्वम् ॥४॥
¿श्येनो हवि× कश्यपस्योप शिक्षे इन्द्रं वात× प्रहितो नृता वा ।
¿विधिय शत्रून् सेनाग्रे विषो वृषणो अधराकासी? ॥५॥

शौ १ यस् ते हवं प्रतितिष्ठत् सजात उत निष्ट्यः ।
अपाञ्चम् इन्द्र तं कृत्वाथेमम् इह गमय ॥६॥
शौ ५ ह्वयन्ति त्वा पञ्च जना× प्रति मित्रा अवृषत ।
इन्द्राग्नी विश्वे देवा[स् ते] विशि क्षेमम् अदीधरन् ॥७॥ ॥अ°१॥

२.७५

प्रजापतिर् अनुवर्तिस् स प्रजाभिर् अनुवर्तिः ।
स मानुवर्तिर् अनुवर्तिं कृणोतु ॥१॥
इन्द्रो अनुवर्तिस् स वीर्येणानुवर्तिः ।
[स मानुवर्तिर् अनुवर्तिं कृणोतु] ॥२॥
सोमो अनुवर्तिस् स ओषधीभिर् अनुवर्तिः ।
[स मानुवर्तिर् अनुवर्तिं कृणोतु] ॥३॥
आपो [अ]नुवर्तयस् ता× पर्जन्येनानुवर्तयः ।
ता मानुवर्तयो अनुवर्तिं कृण्वन्तु ॥४॥
देवा अनुवर्तयस् ते ऽमृतेनानुवर्तयः ।
ते मानुवर्तयो अनुवर्तिं कृण्वन्तु ॥५॥ ॥अ°१॥

२.७६

पयो मह्यम् ओषधय× पयो मे वीरुधो दधन् ।
अपां पयस्वद् यत् पयस् तन् मे वर्षन्तु वृष्टयः ॥१॥
पयो मह्यं पयस्वन्तो हस्तिनो मे पयो दधन् ।
पय× पतत्रिणो मह्यं वीचया मे पयो दधन् ॥२॥
पयस्वन् मे क्षेत्रम् अस्तु पयस्वद् उत [मे] धाम ।
अहं पयस्वान् भूयासं गावो म उत पयस्वतीः ॥३॥
पयो मह्यम् अप्सरसो गन्धर्वा मे पयो दधन् ।
पयो मे विश्वा भूतानि वातो दधातु मे पयः ॥४॥
पयो मह्यं द्यावापृथिवी अन्तरिक्षं पयो दधत् ।
पयो मे विश्वा भूतानि धाता दधातु मे पयः ॥५॥
वा १८.३६ मे २.११.८ पय× पृथिव्यां पय ओषधीषु पयो दिव्य् अन्तरिक्षे पयो धाः ।
पयस्वती× प्रदिशस् सन्तु मह्यम् ॥६॥ ॥अ°५॥ ॥अनु°१५॥

२.७७

अहं विमर्मि ते मनो अहं चित्तम् अहं व्रतम् ।
वै २.५०.३[१], 'शौ १.३४.२' ममेद् अह क्रताव् असो मामसबेदसीदयि? ।
आद्यासीस्या? मयि ते रमतां मनः ॥१॥
शौ ६.१०२.३[१] आञ्जनस्य मधुघस्य कुष्ठस्य नलदस्य च ।
वीरोशीकस्य? मूलेन मुखेन मदंनं कृतम् ॥२॥
मधु मे अन्तर् आस्ये मुखेन मदंनं कृतम् ।
तत्र त्वं वि वर्तस्व ¿मराची इव वर्तसि? ॥३॥
"शौ ६.८.१" यथा नेमी रथचक्रं समन्तं परिषस्वजे ।
एवा परि ष्वजस्व मां यथासन् मयि ते मनः ॥४॥ ॥अ°१॥

२.७८

यथेदम् अश्विना तृणं वातो वहतु भूम्याम् ।
एवा वयं वहामसि यां वयं कामयामहे ॥१॥
उत् त्वा माता श्वापयतु प्र त्वा नुदताम् अश्विना ।
काश्चशुर? इव मातरं माम् एवोशीतु ते मनः ॥२॥
यथा क्षीरं च सर्पिश् च मनुष्याणां हृदे प्रियम् ।
एवाहम् अस्या भार्या हृदो भूयासम् उत्तमः ॥३॥
अग्निष् ट्वा तपत् तपतु वातस्य ध्राजिर् मा स्नुहत् ।
तानि पदनानि साधाय उत् तिष्ठ प्रेह्य् अग्निवत् ते कृणोमि ॥४॥

सूर्यस् त्वा तपत् तपतु वातस्य ध्राजिर् मा स्नुहत् ।
तानि पदनानि साधाय उत् तिष्ठ प्रेहि सूर्यवत् ते कृणोमि ॥५॥ ॥अ°१॥

२.७९

हिरण्यपुष्पी सुभगा रूपद् यायं सुमङ्गलः ।
तान् एतां भद्रया दृशाम् अमृतात् अमृते भगे ॥१॥
हिरण्यपिण्डं हरितं तत् ते अङ्गेषु रोहति ।
'शौ १४.१.५५' तेनेमाम् अश्विना नारीं भगेनाभि षिञ्चताम् ॥२॥
यथा रूपसुधृतस् तृष्यन्तो यन्ति कामिनः ।
एवा त्वा सर्वे देवरा× पतयो? यन्तु कामिनः ॥३॥
हिरण्याक्षो मधुवर्णो हिरण्यपरिचित्लम्? ।
अङ्गो हिरण्यो यस् तव तेनास्यै पतिम् आ वह ॥४॥
शौ ७.३८.५ । 'शौ विरोचनं (सायणस्तु विरोचनं' यदि वासि तिरोचनं यदि वा नद्यस् तिरः ।
[इ]यं त्वा मह्यम् ओषधिर् अङ्गेन मे न्यानयत् ॥५॥ ॥अ°१॥

२.८०

पुन× प्राणं पुनर् अपानम् अस्मै पुनर् व्यानम् उत सोम देहि ।
आत्मानं चक्षुर् ¿उदिते समानस्? तम् अनु पाहि तम् अनु जीव आगधि? ॥१॥
त्वष्टा रूपेण सविता सवेनाहर् मित्रेण वरुणेन रात्री ।
इन्द्रो ज्येष्ठेन ब्रह्मणाय बृहस्पति× पूषास्मै पुनर् असुं ददातु ॥२॥
यथादित्या वसवो ये च रुद्रा विश्वे देवा अदितिर् या च रात्री ।
यज्ञो भगस् सविता ये च देवा यमो ऽस्मै पुनर् असुं ददातु ॥३॥
सोमो राजा वसुविन् ते पुनर् दात् ।
इन्द्रो मरुद्भिर् अश्विना ते भिषग् यद् अग्नी रुद्रो वसुविन् ते पुनर् दात् ॥४॥
पुनर् द्यौर् देवी पुन[र् अ]न्तरिक्षम् अग्निर् वात× पवमानो भिषज्यतु ।
ग्राह्या× पाशान् निर्ऋत्या× पाशान् मृत्यो× पाशाद् वाक् च देवी पुनर् ददातु ॥५॥ ॥अ°१॥

२.८१

इदं चक्षुर् कलायरी मा हिंसीत् पुर आयुषः ।
यद् वां तमो यन् किल्बिषम् अप वाचा नि दध्मसि ॥१॥
¿इदे पंक्ष् अद गर्भं वयोमांति रोहति ।
¿अयम् अवस्ताद्गुतो अक्षीरर्सअपुत्तंयतु ॥२॥
¿यमो ह्य् आम्याम् उद् अयन् सुचक्षा यं शंसेवत् ।
¿शल्क निर्वं सुपर्णां उद् आयुर् चक्षुर् अदितेर् अनन्तम्? ।
सोमो वृषभा मयि तद् धनं दधातु ॥३॥
यथा चक्षुस् सुपर्णस्य यथा श्वधया यथा शुनः ।
एवा मे अश्विना चक्षु× कृणुतां पुष्करस्रजा ॥४॥
यस् सुपर्णस्य प्रपातद् चक्षुषा चक्षुर् आदधे ।
तस्यादं समुद्रं जेतवे चक्षुषा चक्षुर् आ दधे ॥५॥ ॥अ°५॥ ॥अनु°१६॥

२.८२

अग्निं ते हरस् सिषक्तु यातुधान स्वाहा ॥१॥
वातं ते प्राणस् सिषक्तु [यातुधान स्वाहा] ॥२॥
सूर्यं ते चक्षुस् सिषक्तु [यातुधान स्वाहा] ॥३॥
अन्तरिक्षं ते श्रोत्रं सिषक्तु [यातुधान स्वाहा] ॥४॥
परमं ते परावतां मनस् सिषक्तु यातुधान स्वाहा ॥५॥ ॥अ°१॥

२.८३

अपस् ते रसस् सिषक्तु यातुधान स्वाहा ॥१॥

ओषधीन् ते ओषानि छिनत्तु [यातुधान स्वाहा] ॥२॥
मज्जानं ते वज्र छिनत्तु यातुधान स्वाहा ॥३॥ ॥का°१०॥

२.८४

इदं ते शिरो छिनद्मि यातुधान स्वाहा ।
इदं ते ललाटं [छिनद्मि] छिनद्मि ! भूयात् ॥१॥
[इदं] ते हनू छिनद्मि यातुधान स्वाहा ।
इदं ते जिह्वां [छि]नद्मि छिनद्मि ! भूयात्] ॥२॥
[इदं] ते ग्रीवा छिनद्मि यातुधान स्वाहा ।
इदं ते स्कन्धान् [छि]नद्मि छिनद्मि ! भूयात्] ॥३॥
इदं ते हस्तौ छिनद्मि यातुधान स्वाहा ।
इदं ते बाहू [छि]नद्मि छिनद्मि ! भूयात्] ॥४॥
[इदं] ते हृदयं छिनद्मि यातुधान स्वाहा ।
इदं ते पर्शून् [छि]नद्मि छिनद्मि ! भूयात्] ॥५॥
[इदं] ते श्रोणी छिनद्मि यातुधान स्वाहा ।
इदं ते क्लोम [छि]नद्मि छिनद्मि ! भूयात्] ॥६॥
[इदं] ते पृष्ठे छिनद्मि यातुधान स्वाहा ।
इदं ते [उपस्थं छि]नद्मि छिनद्मि ! भूयात्] ॥७॥
इदं ते ऊरू छिनद्मि यातुधान स्वाहा ।
इदं ते अष्ठे [छि]नद्मि छिनद्मि ! भूयात्] ॥८॥
इदं ते गुल्फौ छिनद्मि यातुधान स्वाहा ।
इदं ते पादौ [छि]नद्मि छिनद्मि ! भूयात्] ॥९॥
[इदं] ते त्वचं छिनद्मि यातुधान स्वाहा ।
इदं ते मांसं [छि]नद्मि छिनद्मि ! भूयात्] ॥१०॥
इदं ते पर्वाणि छिनद्मि यातुधान स्वाहा ।
इदं ते मज्जा [छि]नद्मि छिनद्मि ! भूयात् ॥११॥ ॥का°११॥

२.८५

[अन्न ...] पराजित मधु भूयात् सर्वेष स्वयं पाताद् पातली भवत् ! ॥१॥
येनु सहकामु येनु मा प्राचो भयो बलम् ।
अथो रयातु मधुपानिह विश्वात्रातु मा स्वपते ॥२॥
दक्षिणा मा दक्षिणतो दक्षिणा पातु सव्यतः ।
पश्चाद् पर्व मद पश्चात् पातु सर्वस्या भवदेभ्या ! ॥३॥
उत्तरान् मारो दिव्या विश्वस्य च दक्षिणः ।
धाता सविता यद्गृह ते मो मुञ्चन्तु अंहसः ॥४॥
ऊर्ध्वं पातात् तु ब्रह्मस्य ब्रह्मणत् पते ।
[इति भाग्यद् पतांं नो विश्व शतात् पतोभ्यो यच्छताम् ! ॥५॥ ॥का°१२॥

२.८६

प्राचीं दिशाम् आरुहम् अग्निर् मावतु ओजसे बलाय ।
दिशां प्रियो भूयासम् अनु मित्रा मे दिशो भवन्तु घृतप्रतीकाः ॥१॥
दक्षिणां दिशाम् आरुहम् इन्द्रो मावतु ओजसे बलाय ।
[दिशां प्रियो भूयासम् अनु मित्रा मे दिशो भवन्तु घृतप्रतीकाः] ॥२॥
प्रतीचीं दिशाम् आरुहं वरुणो मावतु ओजसे बलाय ।
[दिशां प्रियो भूयासम् अनु मित्रा मे दिशो भवन्तु घृतप्रतीकाः] ॥३॥
उदीचीं दिशाम् आरुहं सोमो मावतु ओजसे बलाय ।
[दिशां प्रियो भूयासम् अनु मित्रा मे दिशो भवन्तु घृतप्रतीकाः] ॥४॥
ध्रुवां दिशाम् आरुहं विष्णुर् मावतु ओजसे बलाय ।

[दिशां प्रियो भूयासम् अनु मित्रा मे दिशो भवन्तु घृतप्रतीकाः] ॥५॥
ऊर्ध्वां दिशाम् आरुहं बृहस्पतिर् मावतु ओजसे बलाय ।
दिशां प्रियो भूयासम् अनु मित्रा मे दिशो भवन्तु घृतप्रतीकाः ॥६॥
॥का°५॥ ॥अनु°१०॥

२.८७

मनाये तन्तुं प्रथमं पश्येद् अन्या अतन्वत ।
तद् नारी× प्र प्रवीमि यस् साध्वीर् यस् सन्तूर्वरीः ॥१॥
साधुर् यस् तन्तुर् भवति साधुर् ओतु रेतु ! घृतः ।
अपो दोर्यरीर् यूयं प्रातद् योदेय धावत ॥२॥
अर्गला इव पत्वरीर् अपाम् ऊर्मम् इवायनम् ।
पतन्तु पत्वरीर् इयोर्वरीस् साधुना पथा ॥३॥
अवाच्यौ ते तोतुदेते तोदेनाश्वतराव् इव ।
प्र स्तोमम् उर्वरीणां शरायानाम् अलाविषम् ॥४॥
नारी पञ्चमयूखं सूयवत् कृणुतं वसु ।
अरिष्टो [अ]स्य वस्ता प्रियंदयासितताविरः ! ॥५॥ ॥का°१०॥

२.८८

शास इत्था महाँ अस्य् अमित्रखादो अद्भुतः ।
न यस्य हन्यते सखा न जीयते कदा चन ॥१॥
वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युम् इन्द्र वृत्रहन्न् अमित्रस्याभिदासतः ॥२॥
वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
अधमं गमया तमो यो अस्माँ अभिदासति ॥३॥
स्वस्तिदा विशां पतिर् वृत्रहा विमृधो वशी ।
वृषेन्द्र× पुर एतु नस् सोमपा अभयंकरः ॥४॥
अपेन्द्र द्विषतो मनो [अ]प जिज्यासतो वधम् ।
वि महच् छर्म यच्छ वरीयो यवया वधम् ॥५॥ ॥का°११॥

२.८९

[देवो] यो ऽतितरो मणिस् तेनाति तरध्व द्विषः ! ।
सपत्नान् द्विषतो मणे प्र णुदस्व पृतन्यतः ॥१॥
प्र णुदस्व प्र दहस्व सपत्नान् द्विषतो मणे ।
तराति महत्त्वं द्विषां यचौ महूग्धि पृतन्यताम् ॥२॥
यचौ जहि मन्युं अघ आकूतिं द्विषतां मणे ।
देवो यो ऽतितरो मणिस् तेनाति तर धूर्वतः ॥३॥
ये धूर्वन्ति ये द्रुह्यन्ति ये द्विषन्ति पृतन्यन्तः ।
सर्वान् सपत्नांस् तान् मणिर् निर्मन्मून् द्विषतस् करत् ॥४॥
तव चित्ते तव व्रते तवेवावस् पदं करम् ।
देवो यो ऽतितरो मणिम् तेनाति तर दुच्छुना ! ॥५॥ ॥का°१२॥

२.९०

आ ते मनश् चक्षुर् आ ते हृदयं ददे ।
पादोर् टे पदम् आ ददे यथा तिष्ठासि मे वशे ॥१॥
याम्ब मे पाणी तन्वं याम्बात्यी याम्ब सक्थ्यौ ।
अक्ष्यौ वृषण्यन्त्या× केशा आंष्ठौ मां ते कामेन शुष्येताम् ॥२॥
मयि त्वा दोषणिश्रियं कृणोमि हृदयश्रियम् ।
यथेद् अह क्रताव् असो ममास ओदस ओदसी दपि ! ॥३॥
यासां नाभिर् आरोहणं हृदि संवननं कृतम् ।
गावो घृतस्य मातरो अमूं सं वानयन्तु मे ॥४॥

मह्यं त्वा द्यावापृथिवी मह्यं देवी सरस्वती ।
मह्यं त्वेन्द्रश् चाग्निश् चाहोरात्रे नि यच्छताम् ॥५॥ ॥का°१३॥

२.९१

मूलि मूलम् अर्जुनि पुनर् वो यन्तु यातव× पुनर् हूति× किमीदिनीः ।
यस्य स्थ तम् अत्त यो व× प्राहैत् तम् अत्त स्वा मांसान्य् अत्त ॥१॥
अपच्छयो जिरायव× [पुनर् वो यन्तु यातव× पुनर् हूति× किमीदिनीः ।
यस्य स्थ तम् अत्त यो व× प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥२॥
इविष्मव× पाश्यव× [पुनर् वो यन्तु यातव× पुनर् हूति× किमीदिनीः ।
यस्य स्थ तम् अत्त यो व× प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥३॥
स्थालिहारि रमहारि [पुनर् वो यन्तु यातव× पुनर् हूति× किमीदिनीः ।
यस्य स्थ तम् अत्त यो व× प्राहैत् तम् अत्त स्वा मांसान्य् अत्त] ॥४॥
बालयूते मनोजवा× पुनर् वो यन्तु यातव× पुनर् हूति× किमीदिनीः ।
यस्य स्थ तम् अत्त यो व× प्राहैत् तम् अत्त स्वा मांसान्य् अत्त ॥५॥
॥का°१४॥ ॥अनु°११॥

अथर्ववेदे पैप्पलादशाखायां द्वितीय× काण्डस् समाप्तः ॥

३.१

आ त्वा गन् राष्ट्रं सह वर्चसोद् इहि प्राङ् विशां पतिर् एकराट् त्वं वि राज ।
सर्वास् त्वा राजन् प्रदिशो ह्वयन्तूपसद्यो नमस्यो भवेह ॥१॥
त्वां विशो वृणतां राज्याय त्वाम् इमा× प्रदिश× पञ्च देवीः ।
वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्वातो न उग्रो वि भजा वसूनि ॥२॥
अच्छ त्वा यन्तु [सुहवस्य आत्मा अग्निर् दूतो ऽज अरसे इयर्ति ! ।
जाया× पुत्रास् सुमनसो भवन्तु बहुं बलिं प्रति पश्यासा उग्रः ॥३॥
अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस् त्वा ह्वयन्तु ।
अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि ॥४॥
आ प्र द्रव परमस्या× परावतश् शिवे ते द्यावापृथिवी उभे स्ताम् ।
तद् अयं राजा वरुणस् तथाह स त्वायम् अह्वत् स उपेदम् एहि ॥५॥
इन्द्रेन्द्र मनुष्या× परेहि सं ह्य् अज्ञास्था वरुणैस् संविदानः ।
स त्वायम् अह्वत् स्वे सधस्थे स देवान् यक्षत् स उ कल्पयाद् विशः ॥६॥
पथ्या रेवतीर् बहुधा विरूपास् सर्वास् संगत्य वरीयस् ते अक्रन् ।
तास् त्वा सर्वास् संविदाना ह्वयन्तु दशमीम् उग्रस् सुमना वशेह ॥७॥
यद् अजास्व् इन्द्रविहि त्वा मनसानुमसि ।
अथा त इन्द्र× केवलीर् विशो बलिहृतस् करत् ॥८॥ ॥का°१॥

३.२

इन्द्रियस्य राजुर्घ्नो [ज्यो]षि ... ।
स ... ॥१॥
अनु त्वा ... ।
... ॥२॥
... ।
... ॥३॥
यद् ... ।
दिव× × × × × ॥४॥

[..........................] क्षेत्रियं त्वाभ्यानशे ।
यदाहं तस्मिन् भेषजं क्षेत्रियं नाशयामि ते ॥५॥
अपवासे नक्षत्राणाम् अपवास उषसाम् ।
अपास्मत् सर्वम् आमयद् अप क्षेत्रियम् अक्रमीत् ॥६॥
आप इद् वा उ भेषजीर् आपो अमीवचातनीः ।
आपो विश्वस्य भेषजीस् तास् त्वा मुञ्चन्तु क्षेत्रियात् ॥७॥ ॥का°२॥

३.३

पुमान् पुंस× परिजातो अश्वत्थ× खदिराद् अधि ।
स हन्तु शत्रून् मामकान् यांश् चाहं द्वेष्मि ये च माम् ॥१॥
तान् अश्वत्थ निः शृणीहि शत्रून् मयि बाध दोधतः ।
इन्द्रेण वृत्रघ्ना मेदिनी ! मित्रेण वरुणेन च ॥२॥
यथाश्वत्थ निः शृणासि पूर्वान् जातान् उतापरान् ।
एवा पृतन्यतस् त्वम् अभि तिष्ठ सहस्व च ॥३॥
यथाश्वत्थ वि भिनत्स्य् अन्तर् [अ]र्णव अर्णवे ।
एवा मे शत्रोश् चित्तानि विष्वग् भिन्धि सहस्व च ॥४॥
यस् सहमानश् चरति सासहान इवर्षभः ।
तेनाश्वत्थ त्वया वयं सपत्नान् सहिषीमहि ॥५॥
सिनात्व् एनान् निर्ऋतिर् मृत्यो× पाशैर् अविमोक्यैः ।
अश्वत्थ शत्रून् मामकान् यांश् चाहं द्वेष्मि ये च माम् ॥६॥
[त] अधराञ्च× प्र प्लवन्तां छिन्ना नौर् इव बन्धनात् ।
न विबाधप्रणुत्तानां पुनर् अस्ति निवर्तनम् ॥७॥
प्रैणान् नुदामि मनसा प्र चित्तेनोत ब्रह्मणा ।
प्रैणान् वृक्षस्य शाखयाश्वत्थस्य नुदामसि ॥८॥ ॥का°३॥

३.४

यद् अदस् सं[प्र]तीर् अहाव् अनदता हते ।
तस्माद् आ नद्यो नाम स्थ ता वो नामानि सिन्धवः ॥१॥
यत् प्रेषिता वरुणेनाच् छीभं समवल्गत ।
तद् आप्नोद् इन्द्रो वो यतीस् तस्माद् आपो अनु ष्ठन ॥२॥
अपकामं स्यन्दमाना अवीवरत वो हि कम् ।
इन्द्रो वस् शक्तिभिर् देवीस् तस्माद् वार् नाम वो हितम् ॥३॥
एको वो देव उपातिष्ठत् स्यन्दमाना यथावशम् ।
उद् आनिषुर् महीर् इति तस्माद् उदकम् उच्यते ॥४॥
आपो देवीर् घृतम् इद् आप आसुर् अग्नीषोमौ बिभ्रत्य् आप इत् ताः ।
तीव्रो रसो मधुपृचाम् अरंगम आ मा प्राणेन सह वर्चसा गन् ॥५॥
आद् इत् पश्याम्य् उत वा शृणोम्य् आ मा घोषो गच्छद् वाङ् मासाम् ! ।
मेने भेजानो [अ]मृतस्य तर्हि हिरण्यवर्णा अतृपं ! यदा वः ॥६॥ ॥का°४॥

३.५

अग्निर् नो दूत× प्रत्येतु शत्रून् प्रतिदहन्न् अभिशस्तिम् अरातिम् ।
स चित्ता[नि] मोहयतु परेषां निर्हस्तांश् च कृणवज् जातवेदाः ॥१॥
अयम् अग्निर् अमूमुहद् यानि चित्तानि वो हृदि ।
वि वो धमत्व् ओकस× प्र वो धमतु सर्वतः ॥२॥
इन्द्र चित्तानि मोहयन्न् अर्वाङ् आकूत्या चर ।
अग्नेर् वातस्य ध्राज्या तान् विषूचो वि नाशय ॥३॥
व्य् एषाम् आकूतय इतायो चित्तानि मुह्यत ।
अथो यद् अद्यैषां हृदि तद् एषां परि निर् जहि ॥४॥
अमीषां चित्तानि प्रतिमोहयन्ती गृहाणाङ्गान्य् अप्वे परेहि ।
अभि प्रेहि निर् दह हृत्सु शोकैर् ग्राह्यामित्रांस् तमसा विध्य शत्रून् ॥५॥

असौ या सेना मरुतः परेषाम् अस्मान् अभ्य् एत्य् ओजसा स्पर्धमाना ।
तां गूहत तमसापव्रतेन यथैषाम् अन्यो अन्यं न जानात् ॥६॥ ॥ऋ॰५॥ ॥अनु॰१॥

१.६

अग्निर् नो विद्वान् प्रत्य् एतु शत्रून् प्रतिदहन्न् अभिशस्तिम् अरातिम् ।
स सेनां मोहयतु परेषां निर्हस्तांश् च कृणवज् जातवेदाः ॥१॥
यूयम् उग्रा मरुत ईदृशे स्थाभि प्रेत मृणत सहध्वम् ।
अमीमृणन् वसवो नाथितेभ्यो अग्निर् येषां विद्वान् प्रत्येतु शत्रून् ॥२॥
अमित्रसेनां मघवन्न् अस्मान् छत्रूयतीम् अभि ।
तां त्वम् इन्द्र वृत्रहन्न् अग्निश् च दहतं प्रति ॥३॥
प्रसूत इन्द्र प्रवता हरिभ्यां प्र ते वज्रः प्रमृणन् याहि शत्रून् ।
जहि प्रतीचो [अ]नूचः पराचो विष्वं विषं कृणुहि सत्यम् एषाम् ॥४॥
सेनामोहनं कृणव इन्द्रामित्रेभ्यस् त्वम् ।
अग्नेर् वातस्य ध्राज्या तान् विषूचो वि नाशय ॥५॥
इन्द्रस् सेनां मोहयन् मरुतो घ्नन्त्व् ओजसा ।
चक्षूंष्य् अग्निर् आ दत्तां पुनर् एतु पराजिता ॥६॥ ॥ऋ॰१॥

१.७

एकशतं विष्कन्धानि विष्ठिता पृथिवीम् अनु ।
तेषां च सर्वेषाम् इदम् अस्ति विष्कन्धदूषणम् ॥१॥
कर्णभस्य विषभस्य द्यौष् पिता पृथिवी माता ।
यथा[भि]चक्र देवास् तथाप कृणुता पुनः ॥२॥
अश्लेष्माणो [अ]धारयन् तथा तन् मनुना कृतम् ।
क्षिणोमि वध्रि विष्कन्धं मुष्काबर्हो गवाम् इव ॥३॥
सूत्रे पिशाङ्गे मृगलं पद् आबध्नन्तु वेधसः ।
अवस्युं शुष्मं काबवं वध्रिं कृण्वन्तु बन्धुरः ॥४॥
येना श्रवस्यवश् चरथ देवा इवासुरमायया ।
शुनां कपिर् इव दूषणो बन्धुरा काबवस्य च ॥५॥
दुष्ट्यै हि त्वा भत्स्यामि दूषयिष्यामि काबवम् ।
उत्तराशवो? रथा इव [श]पथेभिस् सरिष्यथ ॥६॥ ॥ऋ॰१०॥

१.८

यमस्य लोकाद् अध्य् आ बभूविथ प्रमदा मर्तान् प्र युनक्षि धीरः ।
एकाकिना सरथं यासि विद्वान् स्वप्नं मिमानो असुरस्य योनौ ॥१॥
बन्धस् त्वाग्रे विश्वचया अप पश्यत् पुरा रात्र्या जनितोर् एके [अ]ह्नि ।
ततस् स्वप्नेदम् अध्य् आ बभूविथ भिषग्भ्यो रूपम् अपगूहमानः ॥२॥
बृहद्गावासुरेभ्यो ऽधि देवान् उपावर्तत महिमानम् इच्छन् ।
तस्मै स्वप्ना[य] दधुर् आधिपत्यं त्रयस्त्रिंशासस् स्वर् आनशानाः ॥३॥
नैतां विदुः पितरो नोत देवा येषां जल्पिश् चरत्य् अन्तर् एदम् ।
त्रिते स्वप्नम् अदधुर् आप्त्ये नर आदित्यासो वरुणेनानुशिष्टाः ॥४॥
यस्य क्रूरम् अभजन्त दुष्कृतो [अ]स्वप्नेन सुकृतः पुण्यम् आयुः ।
स्वर् मदसि परमेण बन्धुना तप्यमानस्य मनसो ऽधि जज्ञिषे ॥५॥
विद्म ते सर्वाः परिजाः पुरस्ताद् विद्म स्वप्न यो [अ]धिपा इहा ते ।
यशस्विनो नो यशसेह पाह्य् आराद् द्विषेभिर् अप याहि दूरम् ॥६॥ ॥ऋ॰१॥

१.९

अस्वाप्स्वप्नुपात्स्प्य् तपहत्य्जत सत्यपत्रियेयं स्वाहि दण्ड् तान्? ।
अस्मै विषाय हन्तवे वार् उग्रम् अरसं विषम् आहेयम् अरसं विषं निर्विषम् ॥१॥

इन्द्रम् अहम् इवं हुवे सोमपम् उभयाविनम् ।
अस्मै [विषाय हन्तवे वार् उग्रम् अरसं विषम् आहेयम् अरसं विषं निर्विषम्] ॥२॥
वरुणम् अहम् इवं हुव उग्रो राजन्यस् सासहिः ।
[अस्मै विषाय हन्तवे वार् उग्रम् अरसं विषम् आहेयम् अरसं विषं निर्विषम्] ॥३॥
अदितिम् अहम् इवं हुवे शूरपुत्रां कनीनिकाम् ।
अस्मै [विषाय हन्तवे वार् उग्रम् अरसं विषम् आहेयम् अरसं विषं निर्विषम् ॥४॥
बृहस्पतिम् अहम् इवं हुवे यो देवानां पुरोहितः ।
अस्मै [विषाय हन्तवे वार् उग्रम् अरसं विषम् आहेयम् अरसं विषं निर्विषम् ॥५॥]
आत्यात्यात्यद्वाह्मकोन? ।
अस्मै विषाय हन्तवे वार् उग्रम् अरसं विषम् आहेयम् अरसं विषं निर्विषम् ॥६॥
नद्यानां नदीनां विषस्य रोपुषीणाम् ।
सर्वासाम् अग्रभं नाम वीतालतारसं विषम् ॥७॥ ॥ऋ॰४॥

१.१०

मृत्युर् एको यम एकस् सर्वेषु शरद उद् भव ।
ते नः कृण्वन्तु भेषजं देवसेनाभ्यस् परि ॥१॥
पुनर् नो यमः पितृभिर् ददातु पुनर् मित्रावरुणा वातो [अ]ग्निः ।
अयमारो मयशंसः पुनर् दात् पुनर् नो देवी निर्ऋतिर् ददातु ॥२॥
या देवी प्रहितेषुः पतात्? तपसे वा महसे वावसृष्टा ।
सोमस् त्वाम् अस्मद् यावयतु विद्वान् पितरो वा देवहूता नृचक्षसः ॥३॥
सहस्राक्षो अमर्त्यः पुनरूप? रक्षतु ।
प्रस्पेद्? उग्रम् आहार्यं सहयुस् सहपूर्वः ॥४॥
यस् ते मन्युस् सहस्राक्ष विषेण परिषिच्यते ।
तेन त्वम् अस्मभ्यं मृड शिवो नस् शंभुर् आ चर ॥५॥
मा ते मन्युस् सहस्राक्ष मामेत्? तन् मामकं जगत् ।
यो नो द्वेष्टि तं गच्छ यं [वयं] द्विष्मस् तं जहि ॥६॥ ॥ऋ॰५॥ ॥अनु॰२॥

१.११

रक्षः ये स्थास्यां प्राच्यां दिशि हेतयो नाम देवास् तेषां वो अग्निर् इषवः ।
ते नो मृडत ते नो [ऽधि] ब्रूत तेभ्यो नमस् तेभ्यस् स्वाहा ॥१॥
रक्षः ये स्थास्यां दक्षिणायां दिश्य् अविष्यवो नाम देवास् तेषां व आप इषवः ।
ते नो मृडत ते नो ऽधि ब्रूत तेभ्यो नमस् तेभ्यस् स्वाहा ॥२॥
रक्षः ये स्थास्यां प्रतीच्यां दिशि विराजो नाम देवास् तेषां वः काम इषवः ।
ते नो मृडत ते नो ऽधि ब्रूत तेभ्यो नमस् तेभ्यस् स्वाहा ॥३॥
रक्षः ये स्थास्याम् उदीच्यां दिशि प्रविध्यन्तो नाम देवास् तेषां [वो] वात इषवः
ते नो मृडत ते नो ऽधि ब्रूत तेभ्यो नमस् तेभ्यस् स्वाहा ॥४॥
रक्षः ये स्थास्यां ध्रुवायां दिशि धिलिम्पा नाम देवास् तेषां व ओषधीर् इषवः ।
ते नो मृडत ते नो ऽधि ब्रूत तेभ्यो नमस् तेभ्यस् स्वाहा ॥५॥
रक्षः ये स्थास्याम् ऊर्ध्वायां दिश्य् अवस्वन्तो नाम देवास् तेषां वो वर्षम् इषवः ।
ते नो मृडत ते नो ऽधि ब्रूत तेभ्यो नमस् तेभ्यस् स्वाहा ॥६॥ ॥ऋ॰१॥

१.१२

यो अप्स्व् अन्त[र् अग्नि]र् यो वृत्रे अन्तर् यः पुरुषे यो ऽश्मनि ।
य आविवेशौषधीर् यो वनस्पतींस् तेभ्यो [अ]ग्निभ्यो हुतम् अस्त्व् एतत् ॥१॥

यस् सोमे अन्तर् यो गोष्व् अन्तर् य आविष्टो वयसि यो मृगेषु ।
य आविवेश द्विपदो यश् चतुष्पदस् तेभ्यो [अग्निभ्यो हुतम् अस्त्व् एतत्] ॥२॥
य इन्द्रेण सरथं संबभूव वैश्वानर उत विश्वदाव्यः ।
यं जोहवीमि पृतनासु सासहिं तेभ्यो [अग्निभ्यो हुतम् अस्त्व् एतत्] ॥३॥
यो देवो विश्वाद् यम् उ कामम् आहुर् यं दातारं प्रतिगृह्णन्तम् आहुः ।
यो धीरश् शक्रः परिभूर् अदाभ्यस् तेभ्यो [अग्निभ्यो हुतम् अस्त्व् एतत्] ॥४॥
यं त्वा होतारं मनसाभि संविदुस् त्रयोदश भौवनाः पञ्च मानवाः ।
वर्चोधसे यशसे सूनृतावते तेभ्यो [अग्निभ्यो हुतम् अस्त्व् एतत्] ॥५॥
उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
वैश्वानरज्येष्ठेभ्यस् तेभ्यो [अग्निभ्यो हुतम् अस्त्व् एतत्] ॥६॥
दिवं पृथिवीम् अ[न्व् अ]न्तरिक्षं ये विद्युतम् अनुसंचरन्ति ।
यो दिक्ष्व् अन्तर् यो वाते अन्तस् तेभ्यो अग्निभ्यो हुतम् अस्त्व् एतत् ॥७॥
बृहस्पतिं वरुणं मित्रम् अग्निं हिरण्यपाणिं सवितारम् इन्द्रम् ।
विश्वान् देवान् अङ्गिरसो हवामह इमं क्रव्यादं शमयन्त्व् अग्निम् ॥८॥
शान्तो अग्निः क्रव्याद् अथो पुरुषरेषणः ।
अथो यो विश्वदाव्यस् तं क्रव्यादम् अशीशमम् ॥९॥ ॥ऋ॰१॥

१.१३

आयम् अगन् पर्णमणिर् बली बलेन प्रमृणन् सपत्नान् ।
ओजो देवानां पय ओषधीनां मयि राष्ट्रं जिन्वतु अप्रयच्छन्? ॥१॥
मयि राष्ट्रं पर्णमणे मयि धारय राष्ट्रम्? ।
अहं राष्ट्रस्याभीवर्गो वशा? भूयासम् उत्तरः ॥२॥
यं निदधुर् वनस्पतौ वाजं देवाः प्रियं निधिम् ।
तं म इन्द्रस् सहायुषा मणिं ददातु भर्तवे ॥३॥
सोमस्य पर्णस् सह उग्रम् आगन्न् इन्द्रेण दत्तो वरुणेन शिष्टः ।
तम् अहं बिभर्मि बहु रोचमानो दीर्घायुत्वाय शतशारदाय ॥४॥
आ मारुक्षत् पर्णमणिर् मह्या अरिष्टतातये ।
यथाहम् उत्तरो ऽसानि मनुष्या अधिसंवतः? ॥५॥
पुनर् मैत्व् इन्द्रियं पुनर् आत्मा द्रविणं ब्राह्मणं च ।
पुनर् अग्नयो धिष्ण्यासो यथास्थाम [क]ल्पयन्ताम् इहैव ॥६॥
ये तक्षाणो रथकाराः कर्मारा ये मनीषिणः ।
सर्वांस् तान् पर्ण रन्धयोपस्तिं कृणु मेदिनम् ॥७॥
उपस्तिर् अस्तु वैश्य उत शूद्र उतार्यः ।
सर्वांस् तान् पर्ण रन्धयोपस्तिं कृणु मेदिनम् ॥८॥ ॥ऋ॰१॥

१.१४

येन वेह[... ... ...]
[... ... ...] कृष्मसि ॥१॥
आ ते गर्भो योनिम् एतु [... ... ...
[... ... ...] ॥२॥
पुमांसं पुत्रं जनय तं पुमान् अनु जायताम् ।
भवासि पुत्राणां माता जातानां जनयाश् च [यान्] ॥३॥
यानि भद्राणि बीजान्य् ऋषभा जनयन्ति [च] ।
तैस् त्वं पुत्रं विन्दस्व सा प्रसूर् धेनुका भव ॥४॥
कृणोमि ते प्राजापत्यम् आ गर्भो योनिम् एतु ते ।
विन्दस्व [त्वं] पुत्रं नारि [यस्] तुभ्यं शम् असच् छम् उ तस्मै त्वं भव ॥५॥

यासां पिता पर्जन्यो भूमिर् माता बभूव ।
तास् त्वा पुत्रविद्याय देवीः प्रावन्त्व् ओषधीः ॥६॥
यस् ते योनिम् उदिङ्गया[द्] वृषभो रेतसा सह ।
स त आ सिञ्चतु प्रजां दीर्घायोश् शतशारदम् ॥७॥ ॥ऋ॰४॥

१.१५

यां त्वा वातो वरवरादिह्माभा? महर्षभः ।
तस्यास् ते विश्वधायसो विषदूषणम् उद् भरे ॥१॥
यां त्वा वराहो अखनद् एकस्मिन्न् अधि पुष्करे ।
[तस्यास् ते विश्वधायसो विषदूषणम् उद् भरे] ॥२॥
यां त्वादितिर् अखनद् बीजवापम् अधि पुष्करे ।
[तस्यास् ते विश्वधायसो विषदूषणम् उद् भरे] ॥३॥
यस्याः कूलायं सलिले अन्तर् महत्य् अर्णवे ।
तस्यास् ते विश्वधायसो विषदूषणम् उद् भरे ॥४॥
उत् ते भरम् उत्तमाया अधमायास् तूद् भरे ।
अनु मध ्या मध्यमे तव विषदूषणम् अग्रभम् ॥५॥
[मध्यं भूम्यास्] सम् अग्रभम् उभाद् अन्तौ सम् अग्रभम् ।
दिवश् च पृथिव्याश् च विषदूषणम् उद् भरे ॥६॥ ॥ऋ॰५॥ ॥अनु॰१॥

१.१६

चैत्रो ऽसि पृतनायुस् स्वाहा ॥१॥
सोम हिंसीस् सोम हिंसितो ऽसि स्वाहा ॥२॥
ब्रह्मण्म? हिंसीर् ब्रह्म हिंसितो ऽसि स्वाहा ॥३॥
माभूद् अहिर् भूमभान्महिर् अस्मिन् अरसावधी ।
विषस्य ब्रह्मणाम् आसीत्? ततो जीवन् न मोक्ष्यसे ॥४॥
अहो ऽहि[म्] समूहो ऽहि[र्] निपीतो ऽरसः कृतः ।
विषस्य ब्रह्मणाम् आसीत्? ततो जीवन् न मोक्ष्यसे ॥५॥
पुनर् ददाति मे विषं पूर्वरूपम् उदाहृत[म्] ।
मां दृश्यात् मन्यसे मया दृष्टो न मोक्ष्यसे ॥६॥ ॥ऋ॰१०॥

१.१७

एकशतं भेषजानि तेषां मातास्य् ओषधे ।
समुद्रम् इव गच्छसि पृथिव्याम् अधि निष्ठिता ॥१॥
यस्यां देवादिमेचकं दशातीर्यां दशाशिखा ।
ते प्रथमा इषे सं भावन्त? ओषधे यमराज्ञीरवद्? भिषज् ॥२॥
पुनश् चक्षुः पुनः प्राणः पुनर् आयुर् न आ गमत् ।
मिर् ह्वाकरं विष्कन्धा मिर् ह्वानिष्कन्धाकरम् ॥३॥
मुञ्चामि त्वा शपथ्याद् अथो वारुण्याद् उत ।
अथो यमस्य पड्बीशाद् विश्वस्माद् देवकिल्बिषात् ॥४॥
सं ते शीर्ष्णः कपालानि हृदयस्य च यो विधुः ।
उद्यन् सूर्य आदित्यो अङ्गभेदम् अशीशमत् ॥५॥
हिमवतः प्र स्रवत सिन्धौ समह संगमः ।
ता आपस् सर्वास् संगत्य चक्षुः प्राणं ददतु नः ॥६॥ ॥ऋ॰१०॥

१.१८

हस्तिवर्चसं प्रथतां बृहद् यशो अदित्या यत् तन्वस् संबभूव ।
तत् सर्वे सम् अदुर् मह्यम् एतद् विश्वे देवासो अदितिस् सजोषाः ॥१॥
मित्रश् च वरुणश् चेन्द्रो रुद्रश् च चेततु ।
देवासो विश्वधायसस् ते माञ्जन्तु वर्चसा ॥२॥
यत् ते वर्चो जातवेदो बृहद् भवत्य् आहुतम् ।
तेन माम् अद्य वर्चसाग्ने वर्चस्विनं कृधि ॥३॥

येन हस्ती वर्चसा संबभूव येन राजा मनुष्येष्व् अप्स्व् अन्तः ।
येन देवा ज्योतिषा द्याम् उदायन् येन अग्ने वर्चसा सं सृजेह ॥४॥
यावद् वर्चः सूर्यस्यायनस्य च हस्तिनः ।
तावन् मे अश्विना वर्च आ धत्तां पुष्करस्रजा ॥५॥
यावच् चतस्रः प्रदिशश् चक्षुर् यावत् समश्नुते ।
तावत् समैत्व् इन्द्रियं मयि तद् धस्तिवर्चसम् ॥६॥ अ°१०

३.१९

संशितं म इदं ब्रह्म संशितं वीर्यं बलम् ।
संशितं क्षत्रं मे जिष्णु येषाम् अस्मि पुरोहितः ॥१॥
सम् अहम् एषां राष्ट्रं स्यामि सम् ओजो वीर्यं बलम् ।
वृश्चामि शत्रूणां बाहून् अनेन हविषाहम् ॥२॥
तीक्ष्णीयांसः परशोर् अग्नेस् तीक्ष्णतरा उत ।
इन्द्रस्य वज्रात् तीक्ष्णीयांसो येषाम् अस्मि पुरोहितः ॥३॥
अधस् पद्यन्ताम् अधरे भवन्तु ये न इन्द्रं मघवानं पृतन्यान् ।
क्षिणामि ब्रह्मणामित्रान् उन् नयामि स्वान् अहम् ॥४॥
एषाम् अहम् आयुधा सं स्यामि एषां राष्ट्रं सुवीरं वर्धयामि ।
एषां क्षत्रम् अजरम् अस्तु जिष्णूग्रम् एषां चित्तं बहुधा विश्वरूपम् ॥५॥
अभि प्रेत जयत प्रसूतान् सं स्यामि [illegible] ।
तीक्ष्णेषवो ऽबलधन्वनो हतोग्रायुधा [अ]बलान् उग्रबाहवः ॥६॥ अ°११

३.२०

इहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतम् उक्षमाणा ।
तां त्वा शाले सर्ववीराः सुवीरा [अरिष्टवीरा] अभि सं चरेम ॥१॥
इहैव ध्रुवा प्र[ति] तिष्ठ शाले अश्वावती गोमती सूनृतावती ।
ऊर्जस्वती घृतवती पयस्वत्य् उच् छ्रयस्व महते सौभगाय ॥२॥
धरुण्य् असि शाले बृहच्छन्दाः पूतिधान्या ? ।
आ त्वा वत्सो गमेद् आ कुमार आ धेनवः सायम् आस्पन्दमानाः ॥३॥
इमां शालां सविता वायुर् अग्निर् त्वष्टा होता नि मिनोतु प्रजानन् ।
उक्षन्तूद्ना मरुतो घृतेन सोमो मे राजा नि कृषिं तनोतु ॥४॥
मानस्य पत्नि शरणा स्योना [देवी] देवेभिर् निमितास्य् अग्रे ।
तृणं वसाना सुमना असस् त्वं रयिं नो धेहि ? सुभगे सुवीरम् ॥५॥
आ त्वा कुमारस् तरुण आ वत्सो जगता सह ।
आ त्वा परिस्रुतः कुम्भ आ दध्नः कलशैर् अगुः ॥६॥ अ°१२ अनु°४

३.२१

इमम् इन्द्र वर्धय क्षत्रियं म इमं विशाम् एकवृषं कृणु त्वम् ।
निर् अमित्रान् अक्ष्णुह्य् अस्य सर्वांस् तान् रन्धयास्मा [अ]हमुत्तरेषु ॥१॥
अयम् अस्तु धनपतिर् धनानाम् अयं विशां विश्पतिर् अस्तु राजा ।
अस्मिन्न् इन्द्र महि वर्चांसि धेह्य् अवर्चसं कृणुहि शत्रुम् अस्य ॥२॥
एमं भज ग्रामे अश्वेषु गोषु निष् टं भज यो [अ]मित्रो [अ]स्य ।
वर्ष्मन् क्षत्राणाम् अयम् अस्तु राजेन्द्र शत्रुं रन्धय सर्वम् अस्मै ॥३॥
अस्मै द्यावापृथिवी भूरि वामं दुहाथां घर्मदुघे इव धेनू ।
अयं राजा प्रिय इन्द्रस्य भूयात् प्रियो गवाम् ओषधीनाम् उतापाम् ॥४॥
युनज्मि त उत्तरावन्तम् इन्द्रं येन [जयन्ति न पराजयन्ते] ।
यस् त्वा करद् एकवृषं जनानाम् उत राज्ञाम् उत्तमं मानवानाम् ॥५॥
उत्तरस् त्वम् अधरे सन्त्व् अन्ये [illegible] ते राजन् प्रतिशत्रवस् ते ।

एकवृष इन्द्रसखा जिगीवाञ् छत्रूयताम् अभि तिष्ठा महांसि ॥६॥ अ°१३

३.२२

पिशाचजम्भनी भाङ्गिरसी देवजा प्रतिचक्षिणी ।
दिवस् पृथिव्यास् संभूता सहस्राक्षी [पि ष्या]भि नः ॥१॥
सहस्राक्षी यद् गृभाति [तेन !] पश्यास्य ओषधे ।
सदान्वाघ्नी रक्षोघ्नी भवेह प्रतिचक्षिणी ॥२॥
ये इरस्य मामुलेयं ! पयस्स्फाति ओषधे ।
सदान्वाघ्नी रक्षोघ्नी भवेह प्रतिचक्षिणी ॥३॥
यातुधानान् रन्धयन्ती रक्षन्तं ? च पिइतम् ।
तांस् त्वं सहस्रचक्षो गृभाय कृतवीर्याय ? ॥४॥
यथा श्वा चतुरक्षो रात्रिं नक्तम् पश्यति ।
एवा सहस्रचक्षो त्वं प्रति पश्यास्य आयतः ॥५॥
गोभिर् अश्वैर् वसुभिर् अपक्रीतास्य ओषधे ।
श्यावाश्वस्य चक्षुषा प्रति पश्य किमीदिनः ॥६॥ अ°१४

३.२३

सं शुन्धध्वं सं पिबध्वम् अथं वो मधुनत् सहः ।
प्रतं वम् सर्वं सध्रयञ्च् समानं चेतो [अ]स्तु वः ॥१॥
सं जानीध्वम् इन्द्राय चित्ता वो ऽस्तु भयं वो ऽग्निर् नि हरः शमयाति ।
यद् वैरहत्यम् उ भीमम् आसीद् विश्वे देवा उत् प्रापयन्तु ॥२॥
शं वरुण अस्तु बृहस्पतिश् शं द्यावापृथिवी उभे ।
शम् अन्तरिक्षम् उत वो मरुत्वाञ् शं यशिन्य् अस्त्व् अदितिर् देवपुत्रा ॥३॥
कल्पेतां द्यावापृथिवी कल्पन्ताम् आप ओषधीः ।
कल्पन्ताम् अग्नयस् सर्वे अस्मै श्रैष्ठ्याय सव्रताः ॥४॥
सं वस् सृजामि हृदयं संसृष्टं मनो अस्तु वः ।
संसृष्टा वस् तन्वस् सन्तु संसृष्टः प्राणो अस्तु वः ॥५॥
सं वः पशूनां हृदयं सृजामि सं पुत्राणाम् उत या दुहितरो वः ।
सं जायानां मनसा मनांसि सं पत्नीनाम् उत चक्षुषा सृजामि ॥६॥ अ°१५

३.२४

प्राची दिग् अग्निर् अधिपतिर् असितो रक्षितादित्या इषवः ।
तेभ्यो नमो ऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वो ऽस्तु ।
यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं वो जम्भे दध्मस् तम् उ प्राणो जहातु ॥१॥
दक्षिणा दिग् इन्द्रो ऽधिपतिस् तिरश्चिराजी रक्षिता पितर इषवः ।
[तेभ्यो नमो ऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वो ऽस्तु ।
[यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं वो जम्भे दध्मस् तम् उ प्राणो जहातु] ॥२॥
प्रतीची दिग् वरुणो ऽधिपतिः पृदाकू रक्षिता मित्र इषवः ।
[तेभ्यो नमो ऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वो ऽस्तु ।
[यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं वो जम्भे दध्मस् तम् उ प्राणो जहातु] ॥३॥
उदीची दिक् सोमो ऽधिपतिस् स्वजो रक्षिता वात इषवः ।
[तेभ्यो नमो ऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वो ऽस्तु ।
[यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं वो जम्भे दध्मस् तम् उ प्राणो जहातु] ॥४॥
ध्रुवा दिग् विष्णुर् अधिपतिः कल्माषग्रीवो रक्षिता वीरुध इषवः ।
[तेभ्यो नमो ऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वो ऽस्तु ।
[यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं वो जम्भे दध्मस् तम् उ प्राणो जहातु] ॥५॥
ऊर्ध्वा दिग् बृहस्पतिर् अधिपतिश् श्वित्रो रक्षिताशनिर् इषवः ।

तेभ्यो नमो ऽधिपतिभ्यो नमो रक्षितृभ्यो नम इषुभ्यो नमो वो ऽस्तु ।
यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तं वो जम्भे दध्मस् तम् उ प्राणो जहातु ॥६॥ अ°१६

३.२५

अनड्वान् दाधार पृथिवीम् उत द्याम् अनड्वान् दाधारोर्व् अन्तरिक्षम् ।
अनड्वान् दाधार प्रदिशष् षड् उर्वीर् अनड्वान् इदं विश्वं भुवनम् आ विवेश ॥१॥
अनड्वान् दुहे सुकृतस्य लोक ऐनं प्याययति पवमानः पुरस्तात् ।
पर्जन्यो धारा मरुत ऊधो अस्य यज्ञः पयो दक्षिणा दोहो अस्य ॥२॥
अनड्वान् इन्द्रस् स पशुभ्यो वि चष्टे त्रयाञ् छक्रो वि मिमीते अध्वनः ।
भूतं भविष्यद् भुवना दुहानस् सर्वा देवानां चरति व्रतानि ॥३॥
यस्य नेशे यज्ञपतिर् न यज्ञो नास्य दातेशे न प्रतिग्रहीता ।
यो विश्वजिद् विश्वभृद् विश्वकर्मा घर्मं नो ब्रूत यतमश् चतुष्पात् ॥४॥
इन्द्र एष मनुष्येष्व् अन्तर् घर्मस् तप्तश् चरति शोशुचानः ।
सुप्रजास् सन् स उदारे न सर्षद् यो नाश्नीयाद् अनडुहो विजानन् ॥५॥
येन देवास् स्वर् आरुरुहुर् हित्वा शरीरम् अमृतस्य नाभिम् ।
तेन गेष्म सुकृतस्य लोकं घर्मस्य व्रतेन तपसा यशस्यवः ॥६॥
इन्द्रौजा स[ञ्जी]र् [illegible] प्रजापतेर् [illegible] ।
[illegible] यो वेद [illegible] ॥७॥
दुहे वा अनड्वान् सायं दुहे प्रातर् दुहे दिवा ।
दोहा ये [अ]स्य संयन्ति तान् विद्मानुपदस्वतः ॥८॥
यो वेदानडुहो दोहान् सप्तानुपदस्वतः ।
प्रजां च लोकं चाप्नोति तथा सप्तर्षयो विदुः ॥९॥
मध्यम् एतद् अनडुहो यत्रैष वह आहितः ।
एतावद् अस्य प्राचीनं यावान् प्रत्यङ् समाहितः ॥१०॥
पद्भिस् सेदिम् अवक्रामन्न् इरां जङ्घाभिर् उत्खिदन् ।
श्रमेणानड्वान् कीलालं कीनाशश् चाभि गच्छतः ॥११॥
इ[न्द्र] एष मनुष्येष्व् अनड्वान् इव दृश्यते ।
[illegible] ॥१२॥
इन्द्रो [illegible] परमेष्ठी [illegible] वैश्वदेवाः ।
यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तस्य प्राणान् अप [illegible] प्राणान् वि वर्हः ॥१३॥ अ°१७ अनु°५

३.२६

गृहान् ऐमि मनसा मोदमान ऊर्जं बिभ्रद् वसुमनिस् सुमेधाः ।
[अ]घोरेण चक्षुषा मित्रियेण गृहाणां पश्यन् पय उत् तरामि ॥१॥
इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः ।
पूर्णा वामस्य तिष्ठन्तस् ते नो जानन्त्व् आयतः ॥२॥
सूनृतावन्तस् सुभगा इरावन्तो हसामुदाः ।
अक्षुध्या अतृष्यासो गृहा मास्मद् बिभीतन ॥३॥
येषाम् अध्येति प्रवसन् येषु सौमनसो बहुः ।
गृहान् उप ह्वयामहे ते नो जानन्त्व् आयतः ॥४॥
उपहूता इह गाव उपहूता अजावयः ।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ॥५॥
उपहूता भूरिधनास् सखायस् स्वादुसंमुदः ।
अरिष्टास् सर्वपूरुषा गृहा नस् सन्तु सर्वदा ॥६॥ अ°१८

३.२७

[illegible] सं वाम् इन्द्र पूतनामृदि ? ।
प्रजापतिर् [illegible] ओजो [illegible] हविषा वर्धयेन ॥१॥

प्रजापते हविषा वर्धने[न] हन्तारम् इन्द्रम् अकृणोर् अवध्यम् ।
तस्मै विशो देवकृता नमन्त सहन्तम्! स हि हव्यो बभूव ॥२॥
प्रजापते अभि नो नेषि वसूनीं गव्यूतिम् अभिमातिषाहः ।
वर्धयन्न् इन्द्रं बृहते रणाय देवं दैवेन हविषा वर्धनेन ॥३॥
यथा विद्वांः पूतनाम् संजया यथा शत्रून् सहसा मनसा ।
महीं यथासत् सम्राट् ! सुसम्राड् देवस् त्वेन्द्रो अप्रतिषयं कृणोतु ॥४॥
अयं वीरो प्रति हन्तु शत्रून् विश्वे देवा उपसदस्करात ? ।
नास्य प्रजां रीरिषन् मोत वीरान् इमान् इन्द्रः ॥५॥
अहि शत्रून् प्रति रन्धयस्वाग्निर् ते गोपा अधिपा वसिष्ठः ।
शर्म ते राजा वरुणो नि यच्छा[द्] देवस् त्वेन्द्रो अप्रतिषयं कृणोतु ॥६॥ अ°२०

३.२८

सं स्रुचोर् तनुभ्यां सं मुखाभ्यां सम् आत्मना ।
सं वां ब्रह्मणस् पतिस् सोमस् सं स्पर्शयातु याम् ॥१॥
अभ्य्अस्यमद्गमि ? वाचा दधामि सहसोक्षणे ।
[उ]प मे दाहिनं कामे अभि कृष्णम् इवार्वरे ॥२॥
यः प्रेमा प्रेष्याम् आसीद् दृशम् सोमेन बभ्रुणा ।
तस्माद् अधि धूतं मनो मय्य् अस्य मन आहितम् ॥३॥
यं पुमांसं कामयते यस्मिन्न् आ मनम् इच्छते ।
इच्छाकम् अस्मिन्न् आ दध्मो यथा शुष्याति त्वाम् अनु यथास्य हृदयं शुष्यात् ॥४॥
अपि वक्रे गृशां गुर्वी ? चक्षुर् आकाशं भीमं मांपदयम् अभिरोदयम् ।
प्रियंकर[ण]म् उत्तमं मनुयेन तद् आभृतम् ॥५॥
त्वं हासि वर्चस्यो मयो हासि सुमङ्गलः ।
अथो सुवांसां वीरुधां प्रियंकरणम् उच्यसे ॥६॥ अ°२१

३.२९

प्रतीची सोमम् असि ओषधे प्रतीच्य् अनु सूर्यम् ।
प्रतीची विश्वान् देवांस् तथा त्वाच्छावदामसि ॥१॥
इमां खनाम्य् ओषधिं विलम्बीम् अनुलम्बुनाम् ! ।
आयतः प्रतिरन्धनी ! परायतो निवर्तनाम् ॥२॥
अमुष्याइ परायत आयतो मनो ममवम् ।
ममवं हरिः ! मनो अथो हृदयं मम ॥३॥
अधि ते मन आहितं अधि चित्तं अधि व्रतम् ।
ममेद् अप क्रतावु असो ममासबोदलीदधि ? ॥४॥
अहं वदामि मेद् त्वं सभायाम् [अ]ह त्वं वद ।
ममेद् असस् त्वं केवलो नान्यासां कीर्तयाश् चन ॥५॥
यदि वासि तिरोजनं यदि वा नद्यस् तिरः ।
[इ]यं त्वा मह्यम् ओषधिर् बद्ध्वेव न्यानयत् ॥६॥ अ°२२

३.३०

यथा कलां [यथा शफं यथर्णं संनयन्ति ।
[एवा दुष्वप्न्यं सर्वम् अप्रिये सं नयामसि] ॥१॥
सं राजानो [अ]गुस् [स]म् ऋणान्य् अगुस् सं कुष्ठा अगुस् सं कला अगुः ।
सम् अस्मासु दुष्वप्न्यं ? निर् द्विषते दुष्वप्न्यं ? सुवाम ॥२॥
देवानां पत्नीनां गर्भ यमस्य करण यो भद्रस् स्वप्न ।
स मम यः पापस् तं द्विषते प्र हिण्मः ॥३॥
तृष्टामा नामासि कृष्णशकुनेर् मुखं निर्ऋतेर् मुखं तं त्वा स्वप्न तथा विद्म ।
स्यमोल् स्वप्न्या ? अश्वम् इव नायम् अश्वम् इव नीनाहम् ।
आस्माकं देवपीयुं पियारुं वप ॥४॥

यद् अस्मासु दुष्वप्न्यं यद् गोषु यच् च नो गृहे ।
सास्माकं देवपीयुं पियारुं निष्कम् इव प्रति मुञ्चताम् ॥५॥
नवारत्नीन् अपमायास्माकं तन्वस् परि ।
दुष्वप्न्यं सर्वं दुर्भूतं द्विषते निर् द्विषामसि ? ॥६॥ ॥ऋ°५॥ ॥अनु°६॥

३.३१

देवा मरुत× पृश्निमातरो ऽपो दत्तोदधिं भिन्त ।
दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हत ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा ॥१॥
देवा अप्र इन्द्र सूर्यापो [दत्तोदधिं भिन्त ।
[दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हत ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा] ॥२॥
देवाद् घोतो ? मित्रावरुणार्यमन्न् अपो [दत्तोदधिं भिन्त ।
[दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हत ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा] ॥३॥
देवा× पितरो पसव्या× काव्यासो ऽपो [दत्तोदधिं भिन्त ।
[दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हत ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा] ॥४॥
देवा अप्सुषदो ऽपां नपात् तनूनपान् नाराशंसापो दत्तोदधिं भिन्त ।
[दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हत ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा] ॥५॥
देव बृहस्पते अपो देहय उदधिं भिन्धि ।
[दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हि ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा] ॥६॥
देव प्रजापते अपो [देह्य उदधिं भिन्धि ।
[दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हि ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा] ॥७॥
देव परमेष्ठिन्न् अपो देह्य उदधिं भिन्धि ।
दिवस् पृथिव्या उरोर् अन्तरिक्षात् तस्मै क्षत्राय न हि ब्रह्मणाम्य× ?
प्रजाभ्य आभ्य ओषधीभ्यस् स्वाहा ॥८॥ ॥ऋ°१॥

३.३२

प्रजापतेर् जायमाना× प्रजा जाताश् च या इमाः ।
ता अस्मै प्रति वेदय चिकित्वाँ अनु मन्यताम् ॥१॥
येषाम् ईशे पशुपति× पशूनां चतुष्पदाम् उत या ये द्विपादः ।
निष्क्रीतास् ते यज्ञियं यन्तु लोकं रायस् पोषा यजमानं सचन्ताम् ॥२॥
प्रमुञ्चन्तो भुवनस्य गोपा गातुं देवा यजमानाय धत्त ।
उपाकृतं शशमानं यद् अस्थात् प्रियं देवानाम् अप्य् एतु पाथः ॥३॥
ये बध्यमानम् अनु दीध्याना अन्वैक्षन्त मनसा चक्षुषा च ।
अग्निष् टान् अग्रे प्र मुमोक्तु देव× प्रजापति× प्रजाभिस् संविदानः ॥४॥
येषां ¿प्राणं न बध्नन्ति बद्धं ? गवां पशूनाम् उत पौरुषाणाम् ।
इन्द्रस् तान् [अग्रे प्र मुमोक्तु देव× प्रजापति× प्रजाभिस् संविदानः] ॥५॥
य आरण्या× पशवो विश्वरूपा [विरूपा] उत य एकरूपाः ।
वायुष् टान् अग्रे प्र मुमोक्तु देव× प्रजापति× प्रजाभिस् संविदानः ॥६॥
प्रजानन्त× प्रति गृह्णन्तु देवा× प्राणम् अङ्गेभ्यस् पर्य् आचरन्तम् ।
दिवं गच्छ प्रति तिष्ठा शरीरैस् स्वर्गं याहि पथिभिर् शिवेभिः ॥७॥ ॥ऋ°१॥

३.३३

समास् त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या ।
सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशश् चतस्रः ॥१॥
सं चेध्यस्वाग्ने प्र च बोधयैनम् उच् च तिष्ठ महते सौभगाय ।

मा ते रिषन्न् उपसत्तारो अग्ने ब्रह्माणस् ते यशसस् सन्तु मान्ये ॥२॥
त्वाम् अग्ने वृणते ब्राह्मणा इमे शिवो अग्ने ' प्र भृ णो भे वि हि ? ।
सपत्नहाग्ने अभिमातिजिद् उ भव स्वे ग[ये] दीदिह्य् अप्रयुच्छन् ॥३॥
इहैवाग्ने अधि धारया रयिं मा त्वा दभन् पूर्वचित्ता निकारिणः ।
क्षत्रं सुयमम् अस्तु तुभ्यम् उपसत्ता वर्धतां ते अनिष्कृतः ॥४॥
क्षत्रेणाग्ने स्वेन सं रभस्व मित्रेणाग्ने मित्रधेयं यतस्व ? ।
सजातानां मध्यमेष्ठा इह स्या राज्ञाम् अग्ने विहव्यो दीदिहीह ॥५॥
अति निहो ऽति स्रिधो ऽत्य् अचित्तीर् अत्य् अरातीर् अति द्विषः ।
विश्वा ह्य् अग्ने दुरिता चर त्वम् अथास्मभ्यं सहवीरं रयिं दाः ॥६॥
अनाधृष्यो जातवेदा अनिष्कृतो विराड् अग्ने क्षत्रभृद् दीदिहीह ।
विश्वा अमीवा× प्रमुञ्चन् मनुष्येभ्यश् शिवेभिर् अद्य परि पाहि नो गयैः ॥७॥
॥ऋ°१॥

३.३४

अयं ते योनिर् ऋत्वियो यतो जातो अरोचथाः ।
तं जानन्न् अग्न आ रोहाधा नो वर्धया रयिम् ॥१॥
प्रदातारं हवामहे अग्निम् उग्रम् ऊतये ।
शुचिर् यो वृत्रहन्तमः ॥२॥
अग्ने [अ]च्छा वदेह न× प्रत्यङ् नस् सुमना भव ।
प्र णो यच्छ विशां पते धनदा असि नस् त्वम् ॥३॥
प्र णो यच्छत्व् अर्यमा प्र भग× [प्र बृहस्पतिः] ।
प्र पूषा प्रोत सूनृता रयिं देवी दधातु नः ॥४॥
अर्यमणं बृहस्पतिम् इन्द्रं दानाय चोदय ।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ॥५॥
सोमं राजानम् अवसे [अ]ग्निं गीर्भिर् हवामहे ।
आदित्यं विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥६॥
[इन्द्रवायू उभाव् इह] सुहवेह हवामहे ।
यथा नस् सर्व इज् जनस् संगत्यां सुमना असत् ॥७॥
त्वं नो अग्ने अग्निभिर् ब्रह्म यज्ञं च वर्धय ।
त्वं नो देवतातये रयिं दानाय चोदय ॥८॥
वाजस्येदं प्रसवे सं बभूव यः ? इमा च विश्वा भुवनान्य् अन्तः ।
उतादित्सन्तं दापयतु प्रजानन् रयिं धेहि सर्ववीरं नि यच्छताम् ॥९॥
ध्रुवां मे पञ्च प्रदिशो ध्रुवम् उर्वीर् यथायथम् ।
प्रत्येयं सर्वा म आकूतीर् मनसा हृदयेन च ॥१०॥
गोसनिं वाचम् उदेयं वर्चसा माभ्य् उदर्ष्टं हि ? ।
आ रुन्धां सर्वतो वा[युस्] त्वष्टा पोषाय ध्रियताम् ॥११॥ ॥ऋ°२॥

३.३५

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ् छग्धि तव त्वं न ऊतिभिर् वि द्विषो वि मृधो जहि ॥१॥
इन्द्रं वयम् अनूराधं हवामहे ऽनु राध्यास्म द्विपदा चतुष्पदा ।
मा नस् सेना अररुषीर् उप गुर् विषूचीर् इन्द्र द्रुहो वि नाशय ॥२॥
इन्द्रस् त्रातोत वृत्रहा परस्पा नो वरेण्यः ।
स रक्षिता चरमतस् स मध्यतस् स पश्चात् स पुरस्तान् नो [अ]स्तु ॥३॥
उरुं नो लोकम् अनु नेषि विद्वान् स्वर्यज् ज्योतिर् अभयं स्वस्ति ।
उग्रा त इ[न्द्र] स्थविरस्य बाहू उप क्षियेम शरणा बृहन्ता ॥४॥
अभयं न× करत्य् अन्तरिक्षम् अभयं द्यावापृथिवी उभे ।
अभयं पश्चाद् अभयं पुरस्ताद् उत्तराद् अधराद् अभयं नो [अ]स्तु ॥५॥
अभयं मित्राद् अभयम् अमित्राद् अभयं ज्ञाताद् अभयं पुरो यः ।
अभयं नक्तम् अभयं दिवा नस् सर्वा आशा [मम] मित्रं भवन्तु ॥६॥
॥ऋ°५॥ ॥अनु°७॥

३.३६

मा नेहि माप क्रामद् शत्रूणां वेद् आ विद ।
इन्द्रस् सपत्नहा भीमस् संजयस् ते सम् आनुषक् ॥१॥
त्वं जयासि न परा जयासा अर्भेष्व् आजा मघवन् महत्सु च ।
उग्रं चित् त्वाम् अवसे सं शिशीमहे स त्वं न इन्द्र हवनेषु मृड ॥२॥
गोजिता बाहू अमितक्रतु× ? कर्मन्कर्मन् छतम् ऊति× खजंकरः ।
अकल्प इन्द्र× प्रतिमानम् ओज[सा] स त्वं न इन्द्र हवनेषु मृड ॥३॥
वेदाहम् इन्द्र प्रियम् अस्य शेवधिं यद् अस्य नाम गुह्यं समीके ।
संपश्यन्तपासि मघवा समानं मत्य अस्माकं ¿विश्वो विहवे ? इयं गमत् ॥४॥
वयं जयेम त्वया युजा वृता वृषो अस्माकम् अंशम् उद् अवा भरेभरे ।
अस्मभ्यम् इन्द्र वरिवस् सुगं कृधि प्र शत्रूणां मघवन् वृ[ष्ण्या रु]ज ॥५॥
त्वां देवेषु प्रथमं हवामहे त्वं बभूविथ पृतनासु सासहिः ।
सोमं ? न× कारुम् उपमन्युम् उद्भिदम् इन्द्र करासि प्रसवे रथं पुरः ॥६॥
॥ऋ°१॥

३.३७

स्मर स्मरो ऽसि देवैर् दत्तो ऽसि स्मर ।
अमुष्य मनस् स्मर यथाहं कामये तथा शोचयास्य हृदयम् ॥
काम यच्छन्त्र स्मरो दहतु शोचतु त्मना ।
¿स इ द्यात्स्य स्मरन्ता धीभि र् ष मे या स्य दि ष्मो
¿इ म म म्या म रा म न्ता× प्रमुष्यतो मनुमहो मैषो मद्यकर्तं अर्थयः
¿मायेशिनी× प्रमुषो रोपयिष्णुर् एतास् त्वाय प्र हिणो[मि] ब्रह्मणा
¿अ तु क न्तु भी अ त्वि ता प्र मा म्या सि भी स्वप्न यच्छन्तु तु भ्य म मो मु ह
¿आवेशिनी× प्रमुषो रोपो रोपयिष्णुरेतास्त्वाय प्र हिणोमि ब्रह्मणा
¿इन्द्राग्नी मित्रावरुणा वे भ्यो त य त द्यावापृथिवी मातरिश्वा अश्विना
¿देवस् सविता भगश् च मनस् तु भ्र य न्तु म र मा सा तु अपाश्रियास् त्वा
¿भूमं तु देवाग्निर् विद् यम् उप हे भध्याजय् च मु त यस् मिशतांद् छिवे
¿यमोर्ध्वं धना प्र मृषस्व ? ॥
एता× पतन्त्व् आप्यो वार्षिकीर् इव विद्युतः ।
तासां [प्र]तिमहो भव सायं गोष्ठो गवाम् इव ॥
निशीर्षो निपातिताभ्यो वेदयामि ते ।
¿तास् त्वा स मु स न्तीर् शोचयन्तीर् उपा समाम् एतास् त्वाय प्र हि-
णोमि ब्रह्मणा ॥
¿स्त्रिय× मा पुरोगवां ? तास् त्वा तृणम् इव शोचयाम् ।
अथो त्वा रोदया बहु । ॥ ॥ ॥ऋ°१॥

३.३८

अजो ह्य् अग्नेर् अजनिष्ट शोकात् सो अपश्यज् जनितारम् अग्रे ।
तेन देवा देवताम् अग्र आयन् तेन रोहान् अरोहन्न् उप मेध्यासः ॥१॥
क्रमध्वम् अग्निभिर् नाकम् उख्यां ? हस्तेषु बिभ्रतः ।
दिवस् पृष्ठं स्वर् गत्वा मिश्रा देवेभिर् आध्वम् ॥२॥
अग्ने प्रेहि प्रथमो देवयतां चक्षुर् देवानाम् उत मर्त्यानाम् ।
इयक्षमाणा भृगुभिस् सजोषसस् स्वर् यन्तु यजमानास् स्वस्ति ॥३॥
स्वर् यन्तो नापेक्षन्त आ द्यां रोहन्तु रोदसी ।
यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥४॥
अग्निं युनज्मि शवसा घृतेन दिव्यं सुपर्णं वयसं बृहन्तम् ।
तेन वयं गमेम सुकृतस्य लोकं स्वो रुहाणा अधि नाकम् उत्तमम् ॥५॥
इमौ ते पक्षाव् अजरौ पतत्रिणौ याभ्यां रक्षांस्य् अपहंस्य् अग्ने ।
ताभ्यां पतास्मि ? सुकृतस्य लोकं यत्रर्षय× प्रथमजा× पुराणाः ॥६॥
यद् अतिष्ठो दिवस् पृष्ठे व्योमन्न् अध्य् ओदन ।
अन्व् आयन् सत्यधर्माणो ब्राह्मणा तपसा सह ॥७॥

पृष्ठात् पृथिव्या [अहम्] अन्तरिक्षम् आरुहम् अन्तरिक्षाद् दिवम् आरुहम् ।
दिवो नाकस्य पृष्ठात् स्वर् ज्योतिर् अगाम् अहम् ॥८॥
अजो ऽस्य् अज स्वर्गो ऽसि त्वया लोकम् अङ्गिरस× प्राजानन् ।
तं लोकम् अनु प्र ज्ञेषम् ॥९॥
येन वा सहस्रं वहसि येन वा सर्ववेदसम् ।
तेन[न]मं यज्ञं नो वह स्वर् देवेषु गन्तवे ॥१०॥
अजं च पचत पञ्च चौदनान् ।
अजं पञ्चौदनान् पक्त्वा देवा लोकान् सम् आनशुः ॥११॥ ॥ऋ°१॥

३.३९

¿या ते प्रजा विहता पराभू[द्] अग्नेध्याभ्यितरं भरामि ।
¿अग्निष् टे ताम् आयम× ? पुनर् [द्]दाद् वैश्वानरः ॥१॥
परमस्माभ्यो ? ऽग्नस् तां पतिद् दिवो ऽग्निर् द्वितीयं मे प्रजां जरदष्टिं सजस्व ? ।
मुञ्चैनं ग्राह्या निर्ऋतिर् यद् अबभाद् अग्ने प्रजां प्रजाकामाय धेहि ॥२॥
त्वम् अग्ने वृषभं ¿वाशितेयम् आन्यजात् ? पुत्रकामासु यदं पति ।
ताम् आ रोह सुमनस्यमान× प्रजापते प्र वय रेपिवीनाम् ॥३॥
तुभ्यं नारी पुत्रकामा यद् अग्ने गुह्यं पूतं घृतम् आजुहोति ।
¿तामभि नामभि च्यव ? धीलयस्व रेतोधा उग्र× प्रजया सं सृजैनाम् ॥४॥
पर्वताद् दिवो योनेर् गात्राद्गात्रात् समाभृतम् ।
¿रेतो देवस्य देवस् ? सरी पर्णम् इवाधात् ॥५॥
इन्द्रस्य जातस्य प्र यपात नाभिस् ताम् उक्षोदेन× ? प्रति जग्राह कामी ।
त्वया वयं ¿ब्रह्मणस् सोमपास् सुपयास् सुतपान सूपते ? ॥६॥ ॥ऋ°२॥

३.४०

त्वज्जनात् त्वजनं जातं त्वजनं जायते शरः ।
नैनति न शोचति यस् त्वा बिभर्ति तेजन ॥१॥
पवित्रम् असि तेजन पवित्रं ते प्रमञ्जनम् ।
पवित्रो [अ]स्तु स कामो येन मूर्छाम् आयामहे ॥२॥
¿या दोषध शरो ऽस्त्व् ओदनेभ्य× कृत्यवर्त्याम् ।
¿तस्य दोषस् त्वं तेजन ? त्वजनं मरुतो दधन् ॥३॥
त्वजनं मे विश्वे देवास् त्वजनं पितरो दधन् ।
¿तेनाहम् अन्येषां क्षिपो त्वास्थं पुरा मध्यंदिनात् उत ? ।
पुरा सायिस्यादि ? त्वास्थं तेजने यन् महद् बिलम् ॥४॥
अस्थाद् द्यौर् अस्थात् पृथिव्य् अस्थाद् विश्वम् इदं जगत् ।
अस्थाद् विहरित एव तिष्ठात् कामो अयं तव ॥५॥ ॥ऋ°५॥ ॥अनु°८॥

इत्यथर्ववेदे पैप्पलादशाखायां तृतीय× काण्ड× समाप्तः ॥

४.१

हिरण्यगर्भस् सम् अवर्ततागे भूतस्य जात× पतिर् एक आसीत् ।
स दाधार पृथिवीं द्याम् उतेमां कस्मै देवाय हविषा विधेम ॥१॥
य ओजोदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य च्छायामृतं यस्य मृत्यु× कस्मै देवाय हविषा विधेम ॥२॥
य× प्राणतो निमिषतो विपदां पतिर् विश्वस्य जगतो बभूव ।
ईशे यो अस्य द्विपदश् चतुष्पद× कस्मै देवा[य हविषा विधेम] ॥३॥
येन द्यौर् उग्रा पृथिवी च दृढा येन स्वस् स्तभितं येन नाकः ।

यो अन्तरिक्षं विममे वरीयः कस्मै दे[वाय हविषा विधेम] ॥५॥
य इमे द्यावापृथिवी तस्तभाने अधारयद् अवसा रेजमाने ।
यस्मिन्न् अधि वितत एति सूरः कस्मै दे[वाय हविषा विधेम] ॥६॥
यस्य विश्वे हिमवन्तो महित्वा समुद्रं यस्य रसया सहाहुः ।
दिशो यस्य प्रदिशः पञ्च देवीः कस्मै देवाय हविषा विधेम ॥७॥
आपो ह यद् विश्वम् आयुर् दधाना गर्भं जनयन्ति मातरः ।
तत्र देवानाम् अधि देव आसत एकस्थूणे विमिते दृढ उग्रे ॥८॥
आपो गर्भं जनयन्तीर् वत्सम् अग्रे सम् ऐरयन् ।
तस्योत जायमानस्योल्ब [आ]सीद् हिरण्ययः ॥९॥
हिरण्य इव आसीद् यो ऽग्रे वत्सो अजायत ।
[illegible] ॥१२॥

४.२

भूतो भूतेषु पय आ दधाति स भूतानाम् अधिपतिर् बभूव ।
स ते मृत्युश् चरति राजसूये स राजा राज्य[म् अनु] मन्यताम् इदम् ॥१॥
अभि प्रेहि वीरयस्वोग्रश् चेत्ता सपत्नहा ।
आ तिष्ठ मित्रवर्धन तुभ्यं देवा अधि ब्रुवन् ॥२॥
आतिष्ठन्तं परि विश्वे अभूषञ् छ्रियं वसानश् चरति स्वरोचिः ।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ ॥३॥
एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वन्ति महते सौभगाय ।
समुद्रं न सुभुवस् तस्थिवांसं मर्मृज्यन्ते द्वीपिनम् अप्स्व् अन्तः ॥४॥
व्याघ्रो अधि वैयाघ्रे वि क्रमस्व दिशो महीः ।
विशस् त्वा सर्वा वाञ्छन्त्व् आपो दिव्याः पयस्वतीः ॥५॥
या आपो दिव्याः पयसा मदन्त्य् अन्तरिक्ष उत पार्थिवा याः ।
तासां त्वा सर्वासाम् अपाम् अभि षिञ्चामि वर्चसा ॥६॥
अभि त्वा वर्चसासिचन्न् आपो दिव्याः पयस्वतीः ।
यथासो मित्रवर्धनस् तथा त्वा सविता करत् ॥७॥

४.३

यत् ते चन्द्रं कश्यप रोचनावद् यत् संहितं पुष्कलं चित्रभानु ।
यस्मिन् सूर्या आर्पिताः सप्त साकं तस्मिन् राजानम् अधि वि श्रयेमम् ॥१॥
येभिः शिल्पैः पप्रथानाम् अदृंहद् येभिर् द्याम् अभ्यपिंशत् प्रजापतिः ।
येभिर् वाचं पुष्टवतीम् अवर्धयन् तेन माद्य वर्चसा सं सृजेह ॥२॥
येभिः सूर्यस् तपति प्रकेतुभिर् येभिर् अग्निर् ददृशे चित्रभानुः ।
येभिर् आपश् चन्द्रवर्णा अजिन्वन् तेन माद्य वर्चसा सं सृजेह ॥३॥
आयं यातु सविता पञ्च देवीर् इन्द्र इव ज्येष्ठो भवतु प्रजावान् ।
अस्मिन्न् अग्ने पुष्कलं चित्रभानुं मा पृणातु रक्षोर् उपस्थम् ॥४॥
अनु त्वेन्द्रो ऽवतु अनु बृहस्पतिर् अनु त्वा सोमो अनु अग्निर् आवीत् ।
अनु त्वा विश्वे अवन्तु देवाः सप्त राजानो य उदाभिषिक्ताः ॥५॥
अनु त्वा मित्रावरुणाव् इहावताम् अनु द्यावापृथिवी विश्वशंभुवी ।
सूर्यो अहोभिर् अनु त्वावतु चन्द्रमा नक्षत्रैर् अनु त्वेदम् आवीत् ॥६॥
द्यौश् च त्वा पृथिवी च प्रचेतसा शुक्रो बृहद् दक्षिणा त्वा पिपर्तु ।
अनु स्वधा चिकितां सोमो [अ]ग्निः पूषा त्वावतु सविता सवेन ॥७॥

४.४

स्तुवानम् अग्न आ वह यातुधानं किमीदिनम् ।
त्वं हि देववन्दितो हन्ता दस्योर् बभूविथ ॥१॥
आज्यस्य परमेष्ठिन् जातवेदस् तनूवशिन् ।
अग्ने तौलस्य प्राशान यातुधानान् वि लापय ॥२॥
वि लपन्तु यातुधाना अत्त्रिणो ये किमीदिनः ।

अथेदम् अग्ने नो हविर् इन्द्रश् च प्रति हर्यतम् ॥३॥
अग्निः पुरस्ताद् आ यच्छतु प्रेन्द्रो नुदद् बाहुमान् ।
ब्रवीतु सर्वो यातुमान् अयम् अस्मीत्य् एत्य ॥४॥
पश्यामि ते वीर्यं जातवेदः प्र णो ब्रूहि यातुधानान् नृचक्षः ।
त्वया सर्वे परितप्ताः पुरस्ताद् आ यान्तु प्रब्रुवाणा उपेदम् ॥५॥
आ रभस्व जातवेदो ऽस्माकार्थाय जज्ञिषे ।
दूतो नो अग्न उद् तिष्ठ यातुधानान् इहानय ॥६॥
त्वम् अग्ने यातुधानान् उपबद्धान् इहानय ।
अथैषाम् इन्द्रो वज्रेणापि शीर्षा[णि] वृश्चतु ॥७॥
इदं हविर् यातुधानान् नदी फेनम् इवा वहत् ।
य इदं स्त्री पुमान् अकर् इह स स्तुवतां जनः ॥८॥
यातुधानस्य सोमप जहि प्रजां नयस्व च ।
नि स्तुवानस्य पातय परम् अक्ष्य् उतावरम् ॥९॥
अयं स्तुवान आगमत् तं स्मोत प्रति हर्यत ।
बृहस्पते वशे लब्ध्वाग्नीषोमा [वि] विध्यतम् ॥१०॥

४.५

यां त्वा गन्धर्वो अखनद् वरुणाय मृतभ्रजे ।
तां त्वा वयं खनामस्य् ओषधिं शेपहर्षणीम् ॥१॥
ऊ[र्ज]मस् ते खनितारो वृषा त्वम् असि ओषधे ।
वृषासि वृष्ण्यावति वृषणे त्वा खनामसि ॥२॥
उद् उषा उद् उ सूर्य उद् इदं मामकं वचः ।
उद् एजतु प्रजापतिर् वृषा शुष्मेण वाजिनाम् ⁑ऊर्ध्वखावितम् इदं कृधि⁑ ॥३॥
यथा स्म ते विरोहतो ऽभितप्तम् इवानति ।
ततस् ते शुष्मवत्तरम् इयं कृणोत्व् ओषधिः ॥४॥
अपां रस ओषधीनाम् अथो वनस्पतीनाम् ।
अथो सोमस्य भ्रातासि आर्षभम् असि वृष्ण्यम् ॥५॥
अश्वस्य अश्वतरस्य अजस्य पुरुषस्य च ।
य ऋषभस्य वाजास् तान् अस्मै धेहि ओषधे ॥६॥
सं वाजा ऋषभाणां सं शुष्मा ओषधीनाम् ।
सं पुंसाम् इन्द्र वृष्ण्यम् अस्मै धेहि तनूबलम् ॥७॥
अद्याग्ने अद्य सवितर् अद्य देव बृहस्पते ।
अद्य मे ब्रह्मण[स् प]ते धनुर् इवा तानया पसः ॥८॥
ऊर्ध्वास् तिष्ठन्ति गिरय ऊर्ध्वा वाता उद् ईरते ।
ऊर्ध्वो ऽयं मामको मायुः पीवाहाद्! भूम्यान् ॥९॥
⁑उद् तिष्ठो ऽग्ने वि मृनुष्व वि तेष्ठ् मा यन्तु मान्या इव या ।
⁑मतो ऽग्रो ष्व पा य व मा य स्था यो ऽधि मुष्कयोः! ॥१०॥

४.६

हिरण्यशृङ्गो वृषभो यस् समुद्राद् उदाचरत् ।
तेना सहस्येना वयं नि जनान् स्वापयामसि ॥१॥
न भूमिं वात उद् वाति नाति प[श्य]ति सूर्यः ।
जनांश् च सर्वान् स्वापय शुनश् चन्द्रसखा चरन् ॥२॥
प्रोष्ठेशयाः प्रोष्ठेशया नारीर् यास् तल्पशीवरीः ।
स्त्रियो याः पुण्यगन्धास् तास् सर्वास् स्वापयामसि ॥३॥
एजदेजद् अजग्रभं चक्षुः प्राणम् अजग्रभम् ।
अङ्गान्य् अ[ज]ग्रभं सर्वा रात्रीणाम् उत शर्वरे ॥४॥
य [आ]स्ते यश् [च] चरति यश् च तिष्ठन् विपश्यति ।
तेषां सं दध्मो [अ]क्षाणि यथेदं हर्म्यं तथा ॥५॥
स्वप्तु माता स्वप्तु पिता स्वप्तु श्वा स्वप्तु विश्पतिः ।
स्वपन्तु सर्वे ज्ञातयस् सर्वं नि ⁑स्वापनं द्राव्यः! ॥६॥

अध स्वजायिकरत्नेन सर्वं वि ध्यामसि जनम् ।
मोत् सूर्यम् अन्यान् स्वापयोत् व्युषं चरतात् अहम् इन्द्र इवारिष्टो अक्षतः ॥७॥

४.७

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्याम् आस्याद् उत ।
यक्ष्मं शीर्षण्यं मस्तिष्काल् ललाटाद् वि वृहामसि ॥१॥
ग्रीवाभ्यस् त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।
यक्ष्मं दोषण्यम् अंसाभ्यां बाहुभ्यां वि वृहामसि ॥२॥
क्लोम्नस् ते हृदयाद् अधि! हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस् ते वि वृहामसि ॥३॥
आन्त्रेभ्यस् ते गुदाभ्यो वनिष्ठोर् उदराद् उत ।
यक्ष्मं पाण्योर् अङ्गुलिभ्यो नखेभ्यो वि वृहामसि ॥४॥
अस्थिभ्यस् ते मांसेभ्यः स्नावभ्यो धमनिभ्यः ।
यक्ष्मं पृष्टिभ्यो मज्जभ्यो भासदा वि वृहामसि ॥५॥
ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं भसद्यं श्रोणिभ्यां भंससो वि वृहामसि ॥६॥
अङ्गादङ्गाल् लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मं त्वचस्यं ते वयं विष्वञ्चं वि वृहामसि ॥७॥

४.८

अग्नी रक्षोहा तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
अपायते अयं प्रति हराम ॥१॥
इन्द्रो रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥२॥
सोमो रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥३॥
वरुणो रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥४॥
वायू रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥५॥
त्वष्टा रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥६॥
धाता रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥७॥
सविता रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥८॥
सूर्यो रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥९॥
चन्द्रमा रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥१०॥

बृह[स्प]ती रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥११॥
प्रजापती रक्षोहा [तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
[अपाघशंसं दुरितं सहताम् अरातिं प्रत्यक् प्रतिहरण्येना ।
[अपायते अयं प्रति हराम] ॥१२॥
परमेष्ठी रक्षोहा तिग्मस् तिग्मशृङ्ग इषिरा क्रतय× कवि× कवितमः ।
अपाघशंसं दुरितं सहताम् अरातिं [प्रत्यक्] प्रतिहरण्येना ।
अपायते अयं प्रति हराम ॥१३॥

४.९

संवसव इति वो नामधेयम् उग्रंपश्या राष्ट्रभृतो ह्य् अक्षाः ।
तस्मै व इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥१॥
इदम् उग्राय बभ्रवे यो [अ]क्षेषु तनूवशी ।
घृतेन कलिं शिक्षामि स नो मृडातीदृशे ॥२॥
घृतम् अग्ने अप्सराभ्यो वह त्वं पांसून् अक्षेभ्यस् सिकता अपश् च ।
यथाभागं हव्यदातिं जुषाणो मदन्तु देवा उभयानि हव्या ॥३॥
यो नो देवो धनम् इदं दिदेश यो [अ]क्षाणां ग्रहणं शेषणं च ।
स नो [अ]वतु हविर् इदं जुषाणो गन्धर्वैस् सधमादं मदेम ॥४॥
या अप्सरसस् सधमादं मदन्त्य् अन्तरा हविर्धानं सूर्यं च ।
ता नो हस्तं कृतेन सं सृजन्तु सपत्नान् नः कितवान् रन्धयन्तु ॥५॥
यद् देवान् नाथितो हुवे ब्रह्मचर्यं यद् ऊषिम ।
अक्षान् यद् बभ्रून् आलभे ते नो मृडन्त्व् ईदृशे ॥६॥
आदिनवं [... ... ... ।
[... ... ...] ॥७॥

आदिनवमित्यस्य(अत्र प्रतीकेनैव निर्देशः)

४.१०

अयम् त्वेतो नयतु हस्तगृह्य बृहस्पतिः [पु]रएता ते अस्तु ।
देवम् त्वा सविता सत्यधर्म उपसर्पा अमर्त्या कृणोतु ॥१॥
याम् अश्विना मधुकशां देवा अग्रे अजनयन् ।
तया त्वा पत्याम्! अभ्यक्तां कृण्मो मधुमतीं वयम् ॥२॥
उत्तरा श्वश्रुवा भव ननान्दुर् उप शिक्षाः ।
विशस् त्वा पत्यां! कृण्व[न्तु] मना[सि] देवेषु प्रिया ॥३॥
अङ्गिर आम्नातं तन्वं शुम्भमाना गृहान् प्रेहि महिषी भवासि ।
तत्र त्वादुर् गार्हपत्याय देवाः प्रजापतिर् अदधिर् वयासत् ॥४॥
उद् उत्तरम् आरोहन्ती व्यस्यन्ती पृतन्यतः ।
अङ्गिर ह्रा! शत्रोर् मूर्धानं सहदुषा विराड् भव ॥५॥
श्वश्रूणां श्वशुराणां गृ[हा]णां च धनस्य च ।
वि राज पत्यां! देवेषु सजातानां विराड् भव ॥६॥
यद् गिरिषु पर्वतेषु गोष्व् अश्वेषु यन् मधु ।
येनाक्षा अभ्यषिच्यन्त तेनाहम् अस्या मूर्धान[म्] अभि षिञ्चामि भार्यां ॥७॥
यद् वर्चो गवि कन्याने यद् वा सूर्ये ऽश्वे सृजे ।
अभ्याकृतस्य यद् वर्चस् तेन मानज्मि वर्चसा ॥८॥

४.११

वेनावरद् उशना काव्यो ऽग्रे विद्वान् जनूनाम् उत देवतानाम् ।
सहदेवेन हविषा जुहोमि सार्वत्रिकं यो मनो [अ]स्तुमम् ॥१॥
महत् सत्यं महद् धविर् उशना काव्यो महान् ।
देवानाम् उशनां प्रातं हृदयानि महाचरा ॥२॥

अहं सत्येन सयुजा चराम्य् अहं देवीम् अनुमतिं प्र वेद ।
इन्द्रो देवानां हृदयं यो [अ]स्तु सध्रीचीनं यो मनो [अ]स्तूमम् ॥३॥
त्वष्टा वायुः कश्यप इन्द्रो अग्निर् मनसा त्वायन् हविषस् पदेन ।
अचिन्वन् शक्रो? रजसि प्रविष्टं सध्रीचीनं यो मनो [अ]स्तूमम् ॥४॥
येनेमे द्यावापृथिवी अतः कर्तुर? येनाभव[द् अ]न्तरिक्षं स्वर् यत् ।
मनसा विद्वान् हविषा जुहोमि सध्रीचीनं यो मनो [अ]स्तूमम् ॥५॥
द्यावापृथिवी हृदयं समूचथी? येनेदं त्वष्टा व्याकृणोतु धीरः ।
तस्योशाना क्रतुभिस् संविदानश् चित्तं विवेद मनसि प्रविष्टम् ॥६॥
चित्तं चैतद् आकूतिश् च येन देवा विपेहिरे ।
एतत् सत्यस्य श्रद्धया ऋषयस् सत जुहति ॥७॥ ॥ऋ°१॥

ऋ १०.८४.१–७ शौ ४.३१.१–७ — ४.१२

तैब्रा २.४.१.१० । 'शौ हृषिता- (सो (हृषितासो वा) मरुत्वः। (हृषितासः तैब्रा दधता
त्वया मन्यो सरथम् आ रुजन्त हर्षमाणासो धृषिता मरुत्वन् ।
तिग्मेषव आयुधा संशिशाना उप प्र यन्ति नरो अग्निरूपाः ॥१॥
अग्निर् इव मन्यो त्विष सासहस्व सेनानीर् नस् सहुरे हूत एधि ।
हत्वाय शत्रून् वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥२॥
सहस्व मन्यो अभिमातिम् अस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्व् आ रुरुध्रे? वशी वशं नयासा एकज त्वम् ॥३॥
एको बहूनाम् असि मन्यव् ईडितः विशंविशं युधाय सं शिशाधि ।
अकृत्तरुक् त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ॥४॥
विजेषकृद् इन्द्र इवानवब्रवो ऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तम् उत्सं यत आबभूथ ॥५॥
'ऋ शौ सहजा — आभूत्या सहसा? वज्र सायक सहो बिभर्ष्य् अभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्य् एधि महाधनस्य पुरुहूत संसृजि ॥६॥
संसृष्टं धनम् उभयं समाकृतम् अस्मभ्यं दत्तां वरुण च मन्यो ।
भियो दधाना हृदयेषु शत्रवः पराजिता यन्तु परमां परावतम् ॥७॥ ॥ऋ°२॥

४.१३

शौ २.२५.१ — शं नो देवी पृश्निपर्ण्य् अशं निर्ऋतये ऽकरत् ।
उग्रा हि कण्वजम्भनी तां त्वाहार्षं सहस्वतीम् ॥१॥
शौ २ — सहमानेयम् प्रथमा पृश्निपर्ण्य् अजायत ।
तया कण्वस्य शिरश् छिनद्मि शकुनेर् इव ॥२॥
ऊर्ध्वभूतं प्राणभूतं प्रजानाम् उपतर्पणीम् ।
सर्वांस् त्वं पृश्निपर्ण्य् अतः कण्वा अनीनशः ॥३॥
समाहृतीन् मा निर् अदात? स्तीर्णगर्भ इवर्षभः ।
[अ]रायं कण्वं पाप्मानं पृश्निपर्णि सहस्वति ॥४॥
शौ ४,५ । 'शौ ४' अनुष्टुब्विधि — त्वम् अग्ने पृश्निपर्ण्य् अग्निर् इव पृन्धि? ।
कण्वा जीवितयोपनीर् गिरिम् एना [आ] वेशय ।
'शौ ५' गच्छन्ति — तमांसि यत्र गच्छन्त्? तत् पापीर् अप पातय ॥५॥
शौ ३ — [अ]रायम् असृक्पावानं यश् च स्फातिं जिहीर्षति ।
गर्भादं कण्वं नाशय पृश्निपर्णि सहस्वति ॥६॥
या नो गवान् या नो गृहान् या च स्फातिम् उपाहरन् ।
उग्रे पृश्निपर्णि त्वं तां कण्वाम् आ नाशयेतः ॥७॥ ॥ऋ°१॥

४.१४

यस्मिन्न् ¿आसीस्तिहित इदं तरुक्ष्यो वेशुर् वेहलं तेजनं च ।
¿मौनिर्जनिश्री अनवेहि श्रृण्वम् अयं तातुमपतहितु प्रहित? ॥१॥
मस्थि भित्त्वा यदि मज्जः ¿पापाय यदि वा सरितः पुरुषं निकामे? ।
उपी गव्यूतिम् अन्व् एष्य् अर्वाङ् पश्चाद् रश्मीन् उद् धनत् सूर्यस्य ॥२॥
मातरिश्वन् पवमानास्व् अयं सूर्यभ्राजन् तन्वां हरीकः ।
अश्वो गन्धात् पुंसः प्रत्र् अवस्व वि मुच्यस्व यो ऽस्य मासे ऽत्र ॥३॥

प्रत्य् अवस्व तान् अन्व् एष्य् अर्वाङ् तांस् ते विश्व वसुधाय धीर्वे ।
इमास् स्वसारो अयम् इत् पिता येयं ते मातेमम् एहि बन्धुम् ॥४॥
अमित्रैर् अस्त्या? यदि वा सुमित्रैर् देवैर् वा देवी प्रहितावसृष्टा ।
¿यद्यान्ग्रगं पुरुषे जहाति शृङ्गो शिखरस् सं गृभाम् इतः? ॥५॥
सिचासि सत्यो यदि वास्य् अग्ने यदि वास्य् असितः? पुरुषस्य मांसे ।
¿इषूकृ पाशान् उपसृज्य मुञ्चाभि शल्यः कृणुतां आयिमाय ॥६॥
¿हस्ताभ्यस्तं शमयो श्रीयमाणो यद्विद्वातच्यां वीरुधां बलेन ।
¿अद्भिः प्रापन्त स्याम् सत्यत्का कोशे जमीनां निहतं श् मेसा ॥७॥
¿यद्विरात्रे यद्विशास शल्यस्य परिधिः इतः ।
¿एतस् त्वाम् अद्य देवयुम् आस्थानाद् उत्थापयामसि? ॥८॥ ॥ऋ°२॥

४.१५

शौ ४.१२.१ — सं [ते] मज्जा मज्ज्ञा भवतु सम् उ ते परुषा परुः ।
सं ते मांसस्य विस्रस्तं सं अस्थ्य् अपि रोहतु ॥१॥
'शौ ४' — मज्जा मज्ज्ञा सं धीयताम् अस्थ्नास्थि वि रोहतु ।
'शौ ४' — स्नाव ते सं दधमः स्नाव्ना चर्मणा चर्म रोहतु ॥२॥
शौ ५ — लोम लोम्ना सं धीयतां त्वचा सं कल्पया त्वचम् ।
शौ ४ — असृक् ते [अ]स्ना रोहतु मांसं मांसेन रोहतु ॥३॥
शौ १ 'रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी । रोहिण्यसि रोहिण्यस्थ्नश्छिन्नस्य रोहिणी — रोहिण्य् असि रोहिण्य् अस्थ्नश् शीर्णस्य रोहिणी ।
¿रोहिणी रोहिण्याम् अहं आतासि? रोहिण्य् अस्य् ओषधे ॥४॥
शौ २ । 'शौ रेष्टं' — यद् उ शीर्णं यद् उ द्युत्तम् अस्थि पेष्टं? त आत्मनः ।
धाता तत् सर्वं कल्पयात् सं दधत् परुषा परुः ॥५॥
¿यदि वज्रो विसृष्टा स्थारभा जातु पतित्वा यदि वा विरिष्टम् ।
¿वृक्षाद् वा यदि वा विभ्यसि शीर्णभूर् इति स एवं संधामि ते परुः? ॥६॥
शौ ६ — उत् तिष्ठ प्रेहि सम् उ धाहि? ते परुः सं ते धाता दधातु तन्वो विरिष्टम् ।
रथस् सुचक्रस् सुपविर् यथैति सुखस् सुनाभिः प्रति तिष्ठ एवम् ॥७॥
॥ऋ°५॥ ॥अनु°१०॥

४.१६

वै १.१४.१ — उद्यन्न् आदित्यो ग्रावान् हन्तु सूर्यो निम्रोचन् रश्मिभिर् उ हन्तु ।
तावन् नो अधि संहतम् ॥१॥
अप्सरा मूलम् अखनद् गन्धर्वः पर्य् अकर्तत् ।
तेन वो वृत्रह सूर्यो नि जघान नि सृजत? ग्रावान् ॥२॥
ऋ १.१९१.२ — ग्रावान् इन्द्र् आयती ग्रावान् हन्तु परायती ।
ग्रावान् [अ]वघ्नती हन्तु ग्रावान् पिनष्टि पिंषती ॥३॥
'ऋ ०'; 'ऋ' सर्वे साकं नि जस्यत — ग्रावाः किं वनेह वः [... ... ...] ।
ऋ ५ — प्रतिबुद्धा अभूतन प्रदोषं तस्करा इव ॥४॥
ग्रावानां मध्यतो ज्येष्ठः कनिष्ठ उत मध्यमः ।
हता वस् सर्वे ज्ञातयो हता माता हतः पिता ॥५॥
यथा येन उदके वृक्षानो निजस्यति ।
एवा वयं ग्रावान् सर्वान् साकं यत्वा नि जासयामसि ॥६॥
ऋ ४ शौ ६.५२.२ — नि गावो गोष्ठे असदन् नि मृगासो अविक्षत ।
नित्यम् आदित्य रश्मिभिर् ग्रावान् सर्वान् अजीजसः ॥७॥
'शौ ११.२.१०' — उद्यन् रश्मीन् आ तनुष्व ग्रावान् अभि सम् अर्दय ।
ग्रावान् त्वं पर्यमादित्य घोरया तन्वा तपः ॥८॥ ॥ऋ°१॥

४.१७

¿यावतः परश्वतो? शरोर् इवाचतक्षणम् ।
शर्कोटो नाम वा असि कुर्तस् त्वं विषवान् असि ॥१॥

शौ ७.५६.८ — य उभयेन प्रहरसि पुच्छेन चास्येन च ।
आस्ये च न ते विषं कुतस् ते पुच्छधाव् असत् ॥२॥
विदृप्युतदव? दानवस्य तस्य त्वं नवाद्सि? ।
तस्याग्रे अरसं विषं ततस् त्व् अपारसं? विषम् ॥३॥
शौ ६.११८.१ — [अ]रसारसं त्वाकरं यद्भ्रे यद्भ्र त्वाकरम् ।
यद्भ्रि त्वा चक्रुर् देवा अमुतासासुरम्? ॥४॥
ऋ १.१९१.१५ — [इ]यत्तकः कुषुम्भकस् तकं भिनद्म्य् अश्मना ।
ततो विषं परा सिचम् अपाचीम् अनु संवतम् ॥५॥
ऋ १४ — इमाः पद्या मयूर्यस् शाम स्वसारो अपुवः ।
तास् ते विषं वि जह्र उदकं कुम्भिनीर् इव कूपात् कुलजनीर् इव ॥६॥
वै १.९.७ — अयानां नयतीनां [विषस्य रोपुषीणाम् ।
[सर्वासाम् अग्रभं नाम वीतापतारसं विषम्] ॥७॥ ॥ऋ°३॥

४.१८

मातम् अह सपक्षिण्यां मातं तुण्डीयशाम्? उत ।
मातं युवियर्णोमांमहंग्रध्यांरक्षा? इव चातये ॥१॥
प्रचक्ता ¿प्रमारैता निर्भ्रा तन्द्रीस् तीतीयका? ।
'शौ १०.८' — तान् अङ्गिरस्याग्निना सर्वां" अप यजामहि ॥२॥
असुन्धान् नः परि पाहि रक्षोभ्य उत अङ्गिर ।
यातुधानात् किमीदिनस् तस्मान् नः पाहि अङ्गिर ॥३॥
अप्सराभ्यो गन्धर्वेभ्यो देवेभ्यो असुरेभ्यः ।
यातुधानात् किमीदिनस् तस्मान् नः पातु अङ्गिरः ॥४॥
यातुधानात् किमीदिनस् तस्मान् नः पातु अङ्गिरः अग्निर् नि[र्द]ति देवो अग्निर् निर् अरातिम् असितं यातुधानम् ।
निस् ते शत्रून् र[ह]ति देवो अग्निर् निर् अरातिम् असितं यातुधानम् ।
आ पाहि शत्रून् दुरितापग्रायांस? तान् नो यक्ष्मेभ्यः परि पाहि
अङ्गिर ॥५॥
अकर्माग्निम् अधिपाम् अस्य देवम् अन्व् आ एष्य सहसा दैव्येन ।
सहस्वान् अस् सैहसा पातु अङ्गिरो यतो अयेन पृतनाज्येषु ॥६॥
सत्यो [अ]ग्निस् सत्या आपस् सत्ये इमे द्यावापृथिवी ।
विश्वशंभु सत्यम् इदं अह्नास्माकं कृतम् अस्तु ।
यम् अबध्नाद् उशनेन्द्राय तं ते बध्नामि अङ्गिरम् ॥७॥ ॥ऋ°१॥

४.१९

ऋ १.१९१.११ — इयत्तिका शकुन्तिका सका जघास ते विषम् ।
¿महं गृष्य? असाव् असी पुरुषो [अ]मृतः ।
सो चिन् [नु] न मराति मा वयं मरामारे ।
अस्य योजनं हरिष्ठा मधु त्वा मधुलाकरत् ॥१॥
ऋ १० — सूर्ये विषं सं गृजामि दृतिं सुरावतो गृहे ।
[¿महं गृष्य? असाव् असी पुरुषो अमृतः ।
[सो चिन् नु न मराति मा वयं मरामारे ।
[अस्य योजनं हरिष्ठा मधु त्वा मधुलाकरत्] ॥२॥
ऋ १२ — त्रिस् सप्त विष्पुलिङ्गका विषस्य पुष्पकम् अक्षन् ।
[¿महं गृष्य? असाव् असी पुरुषो अमृतः ।
[ताश् चिन् नु न मरन्ति मा वयं मरामारे ।
[अस्य योजनं हरिष्ठा मधु त्वा मधुलाकरत्] ॥३॥
¿आस्यमन्तरोढं चिरं चितारी? करम्भो [अ]रसं विषम् ।
[¿महं गृष्य? असाव् असी पुरुषो अमृतः ।
[सो चिन् नु न मराति मा वयं मरामारे ।
[अस्य योजनं हरिष्ठा मधु त्वा मधुलाकरत्] ॥४॥
'वै ३.१.१' — वार् उग्रम् अरसं विषम् अग्निश् विद्यवचर्षणिः ।
[¿महं गृष्य? असाव् असी पुरुषो अमृतः ।
[सो चिन् नु न मराति मा वयं मरामारे ।

[अस्य योजनं हरिष्ठा मधु त्वा मधुलाकरत्] ॥५॥
शकुन्तिका मे अब्रवीद् विषपुष्पं धयन्तिका ।
न रोपयति न मादयति न विषं हन्ति पूरुषम् ।
¿मह गृष्य? असाव् असी पुरुषो [अ]मृतः ।
सो चिन् [नु] न मराति मा वयं मरामारे ।
अस्य योजनं हरिष्ठा मधु त्वा मधुलाकरत् ॥६॥
वै १.९.७ — अयानां नयतीनां [विषस्य रोपुषीणाम् ।
[सर्वासाम् अग्रभं नाम वीतापतारसं विषम्] ॥७॥ ॥ऋ°४॥

४.२०

¿मधुमती पश्येसिसयवाराय मधुमत्तरः ।
¿अपो मधुमध्यसेमंसोमयोश्रियतनेहं? ॥१॥
मधुना मा सं सृजामि मासुरेण सुराम् इव ।
'शौ ७.११.१' — वाङ् मह्यं मधुना संसृष्टवती मे मधुसंदती ॥२॥
मधु द्यौर् मधु पृथिवी मध्व् इन्द्रो मधु सूर्यः ।
स्त्रियो या अङ्किरे मधु ताभ्यो ऽहं मधुमत्तरः ॥३॥
मधुमतीर् ओषधय आपो मधुमतीर् उत ।
गावो या अङ्किरे [म]धु ताभ्यो ऽहं मधुमत्तरः ॥४॥
मधोर् जातो मधुघो वीरुधां बलवत्तमः ।
तेनाहं सर्वस्मै पुंसे कृण्वे निकरणं हविः ॥५॥
यथाश्वो बन्धनेभ्यो वडवाम् अभिधावति ।
एवा त्वम् उग्र ओषधे [म]धुं कनिक्रदतम् आ नय ॥६॥
¿अंगोनमो दिवि अवसो अंगोनमो दिवि स्तनः? ।
अन्या विविक्षमाणो अन्याः पराश्रियासन् ।
'शौ ६.१८.१' — माम् अनु प्र ते मनश् शम्यायां तम् इवानयत् ॥७॥ ॥ऋ°५॥ ॥अनु°११॥

४.२१

¿अमन्ति त्वा तपिमातावामारसि बाहवः ।
'शौ ४.७.१' — ¿दासस्य प्रक्षीणुस्युतबइमरससं विषम्? ॥१॥
अवृन्ति त्वा कर्कटवा कृत्त्रा अधि सानुषु ।
'शौ ६.१.४',५' शौ ४.७.५' — यत्नी? अग्नि मयूद् असत् अभिखाते? न वक्षः ॥२॥
शौ ६.४६.१ — अव ज्याम् इव धन्वनश् शुष्मं तनोमि ते विष ।
¿परा रोदस्य पातय सूर्यपूर्वा शयोचसा? ॥३॥
वै ४.११.३ — सिन्धुः पश्चात् परिहितस् सूर्यस्योदयनं पुरः ।
ततो यद् अन्तरा विषं तत् सर्वं वि[ष]दूषणम् ॥४॥
मधु त्वा मधुकृत् कृणोतु पितुं त्वा पितुकृत् कृणोतु ।
ततो निवप ¿पातये रथो वाय? तिष्ठते ॥५॥
¿अपास त्वा सोमकथ्यस् तन् माम् उपरिव्यापर ।
¿उद् दैषि वधिरे खुत्र सर्वं ओषधो विषम्? ॥६॥
उर्ध्वउरक्षतस्तुरायातुरस्य? च ।
भूम्या हि अग्रथं नाम विषं वारयताद् इति विषं दूषयताद् इति ॥७॥ ॥ऋ°१॥

४.२२

¿महं वा इन्द्रमातरम् इन्द्रो माम् इन्द्रभ्रातरम् ।
¿इन्द्राविश्वतो वीरुधम् अवं विषदूषणी? ॥१॥
यत् किं चित् पतत्य् अकरद् यत् काण्डे यच् च पुष्पवत् ।
'शौ ४.८.१' — उद् एजतु प्रजापतिस् सर्वं तद् विषदूषणम् ॥२॥
वै ४.११.३ — सिन्धुः पश्चाद् वरुणस्य सूर्यस्योदयनं पुरः ।
ततो यद् अन्तरा विषं तद् वाचा दूषयामसि ॥३॥
यावत् सूर्यो ऽधिपतिर् यावच् च द्यौर् विभस्यति ।
तावद् विषस्य दूषणं वचो निर् मन्त्रयामहे ॥४॥

जिह्वा मे मधुमत्तमा जिह्वा मे मधुवादिनी ।
जिह्वे वर्चस्वती भव मम ते पुरतो विषत् ॥५॥
हा हि! कल्याणि सुभगे पृश्निपर्णि अमानुषे ।
इमं मे अद्य वीरवं दीर्घायुत्वाय सम्भव! ॥६॥
या वीरं वर्धनु पुरतो यशिन् श्रीमन्त् अभ्यम ।
ता मे विश्वस्य पृश्नीमि सविता धातमम्! ॥७॥

४.२३

प्रजापतिर् नु बधातु प्रथमम् अस्तृतं वीर्याय कम् ।
तं ते बध्नाम्य् आयुषे वर्चस ओजसे च बलाय चास्तृतस् त्वाभि रक्षतु ॥१॥
ऊर्ध्वस् तिष्ठतु रक्षन्न् अप्रमादम् अस्तृतेमं मा त्वा दभन् पणयो यातुधानाः ।
इन्द्र इव दस्यून् अव धू[नु]ष्व पृतन्यतस् सर्वाञ् छत्रून् वि षह-
स्वास्तृतस् [त्वाभि रक्षतु] ॥२॥
शतम् च न प्रहरन्तो निघ्नन्तो न तस्तिरे ।
यस्मिन्न् इन्द्रः पर्यच्छत् चक्षुः प्राणम् अथो बलम् अस्तृतस् [त्वा-
भि रक्षतु] ॥३॥
मणिन्न् प्रवाद् एकशतं वीर्याणि सहस्रं प्राणा अस्मिन्न् अस्तृते ।
व्याघ्रः शत्रून् अभि तिष्ठ सर्वान् यस् त्वा पृतन्याद् अधरस् सो [अ]-
स्त्व् अस्तृतस् [त्वाभि रक्षतु] ॥४॥
घृताद् उल्लुप्तो मधुमान् पयस्वान् [स] सहस्रप्राणश् शतयोनिर् वयोधाः ।
शंभूश् च मयोभूश् चोर्जस्वांश् च पयस्वांश् चास्तृतस् [त्वाभि
रक्षतु] ॥५॥
इन्द्रस्य त्वा वर्मणा परि धा[पया]मो [... ... ...] ।
पुनस् त्वा देवाः प्र णयन्तु सर्वे अस्तृतस् [त्वाभि रक्षतु] ॥६॥
यथा त्वम् उत्तरो [अ]सो [अ]सपत्नस् सपत्नहा ।
सजातानाम् असो वशी तथा त्वा सविता करद् अस्तृतस् त्वाभि
रक्षतु ॥७॥

४.२४

अन्यद् व एतद् बोध्या व वाः पक्ष शोचद् वामिविरोध ।
दूर्वाविन्द व सोवरत् व ते तक्मनो अपत! ॥१॥
यद् वै ते तक्मन् सामाग्निर् उत सामासितम् ।
लोको वि अवामस्व् अनु तक्मन् पृशन्त ऐमि? ममस्तो मपात् ॥२॥
यौर् चानाद् पृथिवी च तक्मानं नाशयताम् इतः ।
पक्षप तुम्नि! नाम ते माता अद्यप्तवयु पृथवे ॥३॥
तस्माद् वेद ते नाम ;श तक्मन् नि दमो मुचः! ।
दुदूत अव यानानि प्रियानिविर्य च तम् इतो नाशयामसि अग्रना
वीर्यवता ॥४॥
यो उषि ;अन्यद् च अन्यद् वा मायुत् च तमेद् च ।
;दूर्वाविन्द व सोवरत् व ते तक्मनो अपत! ॥५॥
;विधितोप त्वि रोहतु पृथामः कलिङ्ग मर्जुत ।
;गिरि गच्छ पृथकोनो अन्येन नां न संधते! ।
दूरस् त्वम् अधि इतो यमि मा अदि मध्यमम् उत्तमम् अर्पयादि ॥६॥
इं तो नमितु ज्योतिद् अमीतो मन्तु तां पायावृथिवी मंहसः ।
मातेव वितेव रक्षतं पुत्रकं एवं अंहसः ॥७॥

४.२५

वाताज् जातो अन्तरिक्षाद् विद्युतो ज्योतिषस् परि ।
स नो हिरण्यजाश् शङ्खः कृशनः पात्व् अंहसः ॥१॥
हिरण्यानाम् एको ऽसि स सोमाद् अधि जज्ञिषे ।
रथेषु दर्शतस् त्वम् इषुधौ रोचनस् त्वम् ॥२॥

यो [अ]ग्रतो रोचमानां समुद्राद् अधि जज्ञिषे ।
शङ्खेन [ह]त्वा रक्षांस्य् अत्रिणो वि षहामहे ॥३॥
ये [अ]त्रिणो यातुधाना रक्षसो ये किमीदिनः ।
सर्वांस् तच् छङ्ख त्वया वयं विषूचो वि तुदामहे! ॥४॥
शङ्खेनामीवाम् अमतिं शङ्खेनोत सदान्वाः ।
शङ्खो नो विश्वभेषजः कृशनः पात्व् अंहसः ॥५॥
दिवि जातस् समुद्रतस् सिन्धुतस् पर्य् आभृतः ।
स नो हिरण्यजाश् शङ्ख आयुष्प्रतरणो मणिः ॥६॥
देवानाम् अस्थि कृशनं बभूव तद् आत्मन्वच् चरत्य् अप्स्व् अन्तः ।
तं ते बध्नाम्य् आयुषे वर्चसे बलाय च कार्शनस् त्वाभि रक्षतु ॥७॥

४.२६

कन्या वार् अवायती सोमम् अ[पि] स्रुताविदत् ।
अस्तं भरन्त्य् अब्रवीद् इन्द्राय सुनवानि त्वा शक्राय सुनवानि त्वा ॥१॥
असौ य एषि वीरको गृहंगृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणम् अपूपवन्तम् उक्थिनम् ॥२॥
कु[वि]च् छकत् कुवित् करत् कुविन् नो वस्यसस् करत् ।
कुवित् पतिद्विषो यतीर् इन्द्रेण संगमामहै ॥३॥
आ चन त्वा चिकित्सामो ऽधि चन त्वा नेमसि ।
शनैर् इव शनकैर् इवेन्द्रायेन्दो परि स्रव ॥४॥
इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।
शिरस् ततस्योर्वराम् आद् इदं म उपोदरे ॥५॥
असौ च या न उर्वराद् इमां तन्वं परि ।
अथो ततस्य यच् छिरस् सर्वा ता रोमशा कृधि ॥६॥
खे रथस्य खे ऽनसः खे युगस्य श[त]क्रतो ।
अपालाम् इन्द्र त्रिः पूत्व्य् अकृणोस् सूर्यत्वचम् ॥७॥

४.२७

दिवस् पृष्ठे मधुपृचस् सुपर्णाः पञ्चराते भुवनस्य गोपाः ।
;मानुमावरम् मनुरत्त? उभा तेषाम् इन्द्रं वीर्यैरयन्त ॥१॥
पुरोहितः परमेष्ठी स दा आ या मि य धे म्! अस्मै कृणोद् बृहस्पतिः ।
तेन सपत्नान् मघवन् कृणुष्व क्षेमे पशून् बहुलान् वर्धयित्वा! ॥२॥
त्रैशायोद् यातु रथवाहनं ते ।
गोमायम् उपन्त ये समानास् सर्वे समया ध्रुवा भरन्त ॥३॥
अभि वर्धस्व आतृव्यान् अभि ये त्वा पृतन्यवः ।
नि शिन्धि सर्वान् धूर्वतो अमीयवो यथासमि ॥४॥
अभिवर्धम् अभिभवम् अभीवेचं महागयम् ।
विदास् त्वा सर्वा आशस्त्व् आपो दिव्याः पयस्वतीः ॥५॥
अभि वर्धस्व प्रजया यातुधानो अस्म् अनीकैः पशुभिर् भवासि ।
ब्रह्मराजन्यैर् विश्वैर् यातुधानस् शूद्रैर् अतीह! समया पृतन्यतः ॥६॥
वर्धस्व क्षेत्रैः प्रदतस्व! प्रजया वर्धस्व वीरैः पशुभिर् बहुर् भव ।
धिया स उत्कैर् यमस् त्वा पृतन्याद् आपृतम् तुभ्यं शपत! अत्याय
तिष्ठतु ॥७॥

४.२८

इन्द्रं मित्रं वरुणम् अग्निम् ऊतये मारुतं शर्धो अदितिं हवामहे ।
रथं न दुर्गाद् वसवस् सुदानवो विश्वस्मान् नो अंहसो निष् पिपर्तन ॥१॥
त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः ।
रथं न दुर्गाद् वसवस् सुदानवो विश्वस्मान् नो अंहसो निष् पिपर्तन ॥२॥
अवन्तु नः पितरस् सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा ।

रथं न दुर्गाद् वसवस् सुदानवो विश्वस्मान् नो अंहसो निष् पिपर्तन ॥३॥
नराशंसं वाजिनं वाजयन्न् इह क्षयद्वीरं पूषणं सुम्नैर् ईमहे ।
रथं न दुर्गा[द् वसवस् सुदानवो विश्वस्मान् नो अंहसो निष् पिपर्तन] ॥४॥
बृहस्पते सदम् इन् नस् [सु]गं कृधि शं योर् यत् ते मनुर्हितं तद् ईमहे ।
रथं न दुर्गा[द् वसवस् सुदानवो विश्वस्मान् नो अंहसो निष् पिपर्तन] ॥५॥
इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिर् अह्वद् ऊतये ।
रथं न दुर्गाद् वसवस् सुदानवो विश्वस्मान् नो अंहसो निष् पिपर्तन ॥६॥
देवैर् नो देव्य् अदितिर् नि पातु देवस् त्राता त्रायताम् अप्रयुच्छन् ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिस् सिन्धुः पृथिवी उत
द्यौः ॥७॥

४.२९

अप नस् शोशुचद् अघम् अग्ने शुशुग्ध्य् आ रयिम् ।
अप नस् शोशुचद् अघम् ॥१॥
सुक्षेत्रिया सुगातुया वसूया च यजामहे ।
अप नस् शोशुचद् अघम् ॥२॥
प्र यद् भन्दिष्ठ एषां प्रास्माकासश् च सूरयः ।
अप नस् शोशुचद् अघम् ॥३॥
प्र यत् ते अग्ने सूरयो जायेमहि प्र ते वयम् ।
अप नस् शोशुचद् अघम् ॥४॥
प्र यद् अग्नेः [स]हस्वतो विश्वतो यन्ति भानवः ।
अप नस् शोशुचद् अघम् ॥५॥
त्वं हि विश्वतोमुख विश्वतः परिभूर् असि ।
अप नस् शोशुचद् अघम् ॥६॥
द्विषो नो विश्वतोमुखाति नावेव पारय ।
अप नस् शोशुचद् अघम् ॥७॥
स नस् सिन्धुम् इव नावयाति पर्षा स्वस्तये ।
अप नस् शोशुचद् अघम् ॥८॥

४.३०

देवाश् शरणकृतश् शरणा मे भवत ।
प्राच्या दिशो ऽग्निना राजाध्यक्षेण यशा भूयासम् ।
यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत ॥१॥
[देवाश् शरणकृतश् शरणा मे] भवत ।
दक्षिणाया दिश इन्द्रेण राजा[ध्य]क्षेण यशा भूयासम् ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत] ॥२॥
[देवाश् शरणकृतश् शरणा मे] भवत ।
प्रतीच्या दिशो वरुणेन राजा[ध्य]क्षेण यशा भूयासम्] ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत ॥३॥
[देवाश् शरणकृतश् शरणा मे] भवत ।
उदीच्या दिशस् सोमेन राजा[ध्य]क्षेण यशा भूयासम् ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत ॥४॥
[देवाश् शरणकृतश् शरणा मे] भवत ।
ध्रुवाया दिशो विष्णुना राजा[ध्य]क्षेण यशा भूयासम् ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत ॥५॥
[देवाश् शरणकृतश् शरणा मे] भवत ।
ऊर्ध्वाया दिशो बृहस्पतिना राजा[ध्य]क्षेण यशा भूयासम् ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत ॥६॥
[देवाश् शरणकृतश् शरणा मे] भवत ।
उपमाया दिशः प्रजापतिना राजा[ध्य]क्षेण यशा भूयासम् ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत ॥७॥

[देवाश् शरणकृतश् शरणा मे] भवत ।
परमाया दिशः परमेष्ठिना राजाध्यक्षेण [यशा भूयासम् ।
[यशसं मा कृणुत वाचम् अन्नादं परा द्विषन्तं शृणीत] ॥८॥
देवाश् शर[ण]कृतश् शरणा मे भवत ।
सर्वाभ्यो [दि]ग्भ्य ईशानेन राजाध्यक्षेण यशा भूयासम् ।
यशसं मा कृणुत द्विषन्तं शृणीत ॥९॥

४.३१

प्रातर् अग्निं प्रातर् इन्द्रं हवामहे प्रातर् मित्रावरुणा प्रातर् अश्विना ।
प्रातर् भगं पूषणं ब्रह्मणस् पतिं प्रातस् सोमम् उत रुद्रं हुवेम ॥१॥
प्रातर्जितं भगम् उग्रं हुवेम वयं पुत्रम् अदितेर् यो विधर्ता ।
आध्रश् चिद् यं मन्यमानस् तुरश् चि[द्] राजा चिद् यं भगं भक्षीत्य्
आह ॥२॥
भग प्रणेतर् भग सत्यराधो भगेमां धियम् उद् अवा ददन् नः ।
भग प्र णो जनय गोभिर् अश्वैर् भग प्र नृभिर् नृवन्तस् स्याम ॥३॥
उतेदानीं भगवन्तस् स्यामोत प्रपित्व उत मध्ये अह्ना[म्] ।
उतोदिता मघवन् सूर्ये वयं देवानां सुमतौ स्याम ॥४॥
भग एव भगवाँ अस्तु देवस् तेना वयं भगवन्तस् स्याम ।
तं त्वा भग सर्व इज् जोहवीमि स नो भगः पुरएता भवेह ॥५॥
समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथम् इवाश्वा वाजिन आ वहन्तु ॥६॥
अश्वावतीर् गोमतीर् न उषासो वीरवतीस् सदम् उच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिस् सदा नः ॥७॥

४.३२

यस् ते मन्यो ऽविधद् वज्र सायक सह ओजः पुष्यद् विश्वम् आनुषक् ।
साह्याम दासम् आर्यं त्वया युजा वयं सहस्कृतेन सहसा सहीयसा ॥१॥
मन्युर् इन्द्रो मन्युर् एवास देवो मन्युर् होता वरुणो जातवेदाः ।
मन्युर् विश ईडते मानुषीर् याः पाहि नो मन्यो तपसा सजोषाः ॥२॥
अभीहि मन्यो तवसस् तवीयान् तपसा युजा वि जहि शत्रून् ।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्य् आ भरा त्वं नः ॥३॥
त्वं हि मन्यो अभिभूत्योजास् स्वयंभूर् भामो अभिमातिषाहः ।
विश्वचर्षणिस् सहुरिस् सहीयान् अस्मास्व् ओजः पृतनासु धेहि ॥४॥
अभागस् सन्न् अप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः ।
तं त्वा मन्यो अक्रतुर् जिहीडाहं स्वा तनूर् बलदावा न एहि ॥५॥
अयं ते अस्म्य् उप न एह्य् अर्वाङ् प्रतीचीनस् सहुरे विश्वदावन् ।
मन्यो वज्रिन्न् अभि न आ ववृत्स्व हनाव दस्यून् उत बोध्य् आपेः ॥६॥
अभि प्रेहि दक्षिणतो भवा नो ऽधा वृत्राणि जङ्घनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रम् उभा उपांशु प्रथमा पिबाव ॥७॥

४.३३

अग्नेर् मन्वे प्रथमस्य प्रचेतसः पाञ्चजन्यस्य बहुधा यम् इन्धते ।
विशोविश[ः] प्रविविशिवांसम् ईमहे स नो मुञ्चत्व् अंहसः ॥१॥
सुजातं जातवेदसम् अग्निं वैश्वानरं विभुम् ।
हव्यवाहं हवामहे स नो मुञ्चत्व् अंहसः ॥२॥
यथा हव्यं वहसि जातवेदो यथा यज्ञं कल्पयसि प्रजानन् ।
एवा देवेभ्यस् सुमतिं न आ वह स नो मुञ्चत्व् अंहसः ॥३॥
यामन्यामन्न् उपयुक्तं वहिष्ठं कर्मन्कर्मन्न् आभगम् अग्निम् ईडे ।
रक्षोहणं यज्ञवृधं घृताहुतं स नो मुञ्चत्व् अंहसः ॥४॥
देवेभ्यो बलम् अयोतय[न् सु]रा येनासुराणाम् अयुवन्त मायाः ।
येनाग्निना पणीन् इन्द्रो जिगाय स नो मुञ्चत्व् अंहसः ॥५॥

येन देवा अमृतम् अन्वविन्दन् येनौषधीर् मधुमतीर् अकृण्वन्।
येनेदं स्वर् आभरन् स नो मुञ्चत्व् अंहसः ॥६॥
यस्येदं प्रदिशि यद् विरोचते यज् जातं जनितव्यं च केवलम् ।
स्तौम्य् अग्निं नाथितो जोहवीमि स नो मुञ्चत्व् अंहसः ॥७॥ ऋ°१०

शौ ४.२५.१,२,३,६,५,४,७

४.३४

वायो[स्] सवितुर् विदथानि मन्महे याव् आत्मन्वद् विशथो यौ च रक्षथः।
यौ विश्वस्य परि[भू] बभूव[थु]स् तौ नो मुञ्चतम् अंहसः ॥१॥
'शौ पुरितम्
ययोस् संख्याता वरिमाणि पार्थिवा याभ्यां रजो युपितम् ? अन्तरिक्षे ।
ययोः प्रायं नानु कश् चनाशे तौ नो मुञ्चतम् अंहसः ॥२॥
तव व्रते नि विशन्ते जनासस् त्वय्य् उदिते प्रेरते चित्रभानो ।
युवं वायो सविता च भुवनानि रक्षथस् तौ नो मुञ्चतम् अंहसः ॥३॥
प्र सुमतिं सवितर् वा[य] ऊतये महस्वन्तं मत्सरं मादयेथाम् ।
अर्वाग् वामस्य प्रवता नि यच्छतस् तौ नो मुञ्चतम् अंहसः ॥४॥
रयिं मे पोषं सवितोत वायुस् तनू दक्षम् आ सुवतां सुशेवौ ।
याव् अयक्ष्मतां महो अस्मासु धत्तं तौ नो मुञ्चतम् अंहसः ॥५॥
'शौ ओषेतु युक्तिं शिमिशी सच- [च्छ शमिषी
अपेतो वायो सविता च दुष्कृतम् अप रक्षांसि शिमिदां सेधतं परा ।
सं ह्य् ऊर्जया सृजथस् सं बलेन तौ नो मुञ्चतम् अंहसः ॥६॥
उप श्रेष्ठा न आशिषो देवयोर् धामन्न् अस्थिरन् ।
स्तौमि देवं सवितारं च वायुं तौ नो मुञ्चतम् अंहसः ॥७॥ ऋ°२०

शौ ४.२७.१-७

४.३५

सिनीवाली रक्षिणी सेमां [सेनां रक्षतु] ।
अनुष्ठात्र् अनु [तिष्ठ सर्वे वीरा भवन्तु मे] ॥५॥
समुद्रो रक्षिता [स इमां सेनां रक्षतु ।
[अनुष्ठातर् अनु तिष्ठ सर्वे वीरा भवन्तु मे] ॥६॥
पर्जन्यो रक्षिता [स इमां सेनां रक्षतु ।
[अनुष्ठातर् अनु तिष्ठ सर्वे वीरा भवन्तु मे] ॥७॥
बृहस्पती रक्षिता [स इमां सेनां रक्षतु ।
[अनुष्ठातर् अनु तिष्ठ सर्वे वीरा भवन्तु मे] ॥८॥
प्रजापती रक्षिता [स इमां सेनां रक्षतु ।
[अनुष्ठातर् अनु तिष्ठ सर्वे वीरा भवन्तु मे] ॥९॥
परमेष्ठी रक्षिता स इमां सेनां रक्षतु ।
अनुष्ठातर् अनु तिष्ठ सर्वे वीरा भवन्तु मे ॥१०॥ ॥ऋ°१०॥ ॥अनु°४॥

इत्यथर्ववेदे पैप्पलादशाखायां दशमः काण्डः समाप्तः ॥

११.१

वृषा ते ऽहं वृषण्वन्तं गर्भं दधामि योन्याम् ।
यदि देवपरिष्ठिता प्रजां तोकं न विन्दसे ॥१॥
धाता ते तं सिनीवाली वरुणानी प्र यच्छति ।
पुमांसं पुत्रम् इन्द्राणी सरस्वती? दधातु ते ॥२॥
संभूतस् ते वक्षणासु गर्भः पुंसां पुमान् कृतः ।
सर्वाङ्गस् तस्माज् जायताम् अग्निर् अरण्योर् इवेधितः ॥३॥
गम्भीरं कर्मण्यं प्रत्यं तान् कृणोमि ।
आरभताम् ते लोहितात् गर्भस् सं बर्तता वृषाकपे ॥४॥
त्वष्टा विंशतु ते प्रजां धाता तोकं दधातु ते ।
राका सीम्यस् च सुभ्वा मूलस्येशाना भुवनस्य देवी ॥५॥
सिनीवालीम् अनुमतिं राकां गुङ्गूं सरस्वतीम् ।
देवानां पत्नी या देवीन्द्राणीम् अवसे हुवे ॥६॥
अभिजाता वृषणमां अरिष्टासि वीरसूर् या ।
वि जायतां प्र जायतां मही भवतु पृथिवी ॥७॥
परिस्रुतं गर्भं धेहि मास्याः प्र च्योष्ट लोहितम् ।
अनूनः पूर्णो जायताम् अस्याम्? ऽश्मनो ऽधिवासमधि ॥८॥
तं दधामि ह्रियते वानुष्ठे गर्भं प्रजाम् पजते विश्वरूपे ।
अभिक्रन्दन् वृषभो वीडुमोपा? प्रजापते तस्यां धेहि गर्भम् ॥९॥
अभिक्रन्दन् स्तनयन् धेहि गर्भं विद्योतमानः पवमानो ऽधि धेहि ।
पर्जन्येनां पृथिवी रेतसाधियासां रसेनौषधीनां पयसाम् ॥१०॥
आ ते नयामि वृषणं यः प्रजानां प्रजापतिः ।

स ते वृष्यात् तृतीयं गर्भं योन्यां विज्ञां प्रजाम् ॥११॥
ये वृषाणो गर्भंकृत ऋषियतां सुमेधसः ।
तांस् ते ब्रवामि [सुतये] तद् उ ते सं पद्यताम् ॥१२॥
अग्नेस् ते त्वष्टुर् वरुणाद् इन्द्रात् सोमाद् बृहस्पतेः ।
पुत्रं ते पुत्रकामायै देवेभ्यो निर् ममे प्रजाम् ॥१३॥
अङ्गादङ्गात् सं स्रवतु तद् योनौ प्रति तिष्ठतु ।
प्रजा ते ¦यक्षात्या शया तं? ते बीजं निर् ऊहतु ॥१४॥ ॥अ॰१॥

११.२

अहं ससो वमनं ससो भूतिर् यक्षमम् अजीजरत् ।
इमं सहस्रभाग इन्द्रो विषं नाशयाति ते ॥१॥
य× कार्यो यश् च कृतस् स्वयंज उत हार्यः ।
देवा इन्द्रज्येष्ठा इन्द्रो विषं नाशयातु ते ॥२॥
विदारस्य विजम्भस्येषुधिर् माता धनु× पिता ।
आदित्या× पुदित्याद्? विषं नाशयन्तु ते ॥३॥
धन्विनो ज्याया इष्वा अपस्कम्भस्य वाह्वोः ।
अयाझाय् कृष्णात् कुर्मलात् विषं नाशयामि ते ॥४॥
अलपतेर् मार शीर्ष्णम् अथो [अ]स्या यन् मुखम् ।
देवी× पर्जन्यरेतस इयं कृणुता नमः ॥५॥
इमाम् अत्रयो ऽङ्गिरसो गौतमा वीरुधं विदुः ।
तया भरद्वाज× कण्वो विषं नाशयाति ते ॥६॥
यास् त्वा स्रेणा उपसरो या× पुंसो [अ]भ्य् आवहन् ।
आह्वान्तं संह्वान्तं ¦ब्राय तकु? ते कल्पयामसि ॥७॥
याता इयाश्रं च्यावयामि यत्नं ते तन्व× परि ।
याता य[च्] चक्षुस् ते गुर्वं भरजा लघु कृण्मसि ॥८॥
तेनाहम् क्रतो? तेन विषं नाशयामि ते ।
यथा मस् सत्यं पुरुष सदा वदितुम् अर्हसि ॥९॥
विष्कन्धं तद् अपिदारं विदारं वृण्वा वयम् ।
अम्भहनुं प्राह शङ्ख त्वानुजयेमां? भजामसि ॥१०॥
शुनम् इद् वा ओषधयो नि दधे भेषजाय कम् ।
धनायवस् सनायव× पुरुषं पारयिष्णवः ॥११॥
या ते पत्राणी देवजूता वीरुद् आयुष्या कृता ।
तयाहम् इन्द्रदत्तया विषं नाशयामि ते ॥१२॥
अलस्य व्यञ्जनस्य वेधृतस् स्फोतयंजथे? ।
अन्धे[र्] ज्याया इष्वास् तु यद् विषं नाशयामि ते ॥१३॥
साकं विष्कन्धं प्र पत वायेन किकिदीव्या ।
साकं वातस्य ध्राज्या साकं नदय निहाकया ॥१४॥ ॥अ॰२॥

११.३

शौ १९.३४.१-१०

अङ्गिडो ऽसि अङ्गिडो रक्षितासि अङ्गिडः ।
द्विपाच् चतुष्पाद् अस्माकं सर्वं रक्षतु अङ्गिडः ॥१॥
¦या× कृत्कृतः? त्रिपञ्चाशीश् शतं कृत्याकृतश् च ये ।
सर्वान् विनक्तु? तेजसो ऽरसान् अङ्गिडस् करत् ॥२॥
[अ]रसं कृत्रिमं नाडम् अरसास् सप्त विस्रसः ।
अपेतो अङ्गिडामतिम् इषुम् अस्तेव शातय ॥३॥
कृत्यादूषण्णो वा अयम् अथो [अ]रातिदूषणः ।
अथो सहस्वान् अङ्गिड× प्र ण आयूंषि तारिषत् ॥४॥
स अङ्गिडस्य महिमा परि ण× पातु विश्वतः ।
विष्कन्धं येन सासह संस्कन्धम् ओज ओजसा ॥५॥
त्रिप? ष्ट्वा देवा अजनयन् निष्ठितं भूम्याम् अधि ।

तम् उ त्वाङ्गिरा इति ब्राह्मणा× पूर्व्या विदुः ॥६॥
न त्वा पूर्वा ओषधयो न त्वा तरन्ति या नवाः ।
विबाध उग्रो अङ्गिड× परिपाणस् सुमङ्गलः ॥७॥
अथयोपदानि? अगयो अङ्गिडमितवीर्यं ।
पुरा त उग्राय सत उपेन्द्रो वीर्यं दधौ ॥८॥
उग्र इत् ते वनस्पत इन्द्र ओज्मानम् आ दधौ ।
अमीवास् सर्वा रक्षांसि अहि रक्षांस्य् ओषधे ॥९॥
आशरीकं? विशरीकं बलासं पृष्ट्यामयम् ।
तक्मानं विश्वशारदम् अरसं अङ्गिडस् करत् ॥१०॥ ॥अ॰३॥

११.४

शौ १९.३५.१-५

इन्द्रस्य नाम गृह्णन्त ऋषयो अङ्गिडं ददुः ।
देवा यं चक्रुर् भेषजम् अग्रे विष्कन्धदूषणम् ॥१॥
स नो रक्षतु अङ्गिडो धनपालो धनेव ।
देवा यं चक्रुर् ब्राह्मणा× परिपाणम् अरातिहम् ॥२॥
दुर्हार्दं घोरचक्षुषं पापकृत्वानम् आगतम् ।
तांस् त्वं सहस्रचक्षो प्रतीबोधेन नाशय परिपाणो ऽसि अङ्गिडः ॥३॥
परि मा दिव× परि मा पृथिव्या× पर्य् अन्तरिक्षात् परि मा वीरुद्भ्यः ।
परि मा भूतात् परि मोत भव्या[द्] दिशोदिशो अङ्गिड× पात्व् अस्मान् ॥४॥
य ऋष्णयो देवकृता य उतो विमृ?येत्या? ।
सर्वांस् तान् विश्वभेषजो ऽरसान् अङ्गिडस् करत् ॥५॥ ॥अ॰४॥

११.५

प्रतिगृह्णामि पृथिवीनियतम् एतद् आज्यस्य मथितम् ।
शरीरम् [इ]मां धेनुम् अस्य तानुस् त्वं रक्ष बर्हिष्या यथासत् ॥१॥
उत त्वाहुर् यमस्य पत्नीम् अथो त्वाहुर् अदितिं विश्वरूपाम् ।
अधिजरायुम् आयारे हव्यवाहम् अग्नाव् अस्या महिमानं जुहोमि ॥२॥
स सहस्वान् तन्तुम् अन्व् आ तताम यो ऽग्निहोमान् ददातं सम् आप ।
अधिजरायुं सवत्सां यो ददाति तं वै देवास् स्वर् आ रोहयन्ति ॥३॥
अधिजरायु[म्] स्वर् आ रोहयन्त्य् अमेन दत्ता सुदुघा पयोधाः ।
सहो ऽस्मै दुहां शतधारम् अक्षितम् अमुष्मिन् लोके युग उत्तरस्मिन् ॥४॥
पूर्वपत्सेन सा पश्चिनी गौर् वेवस्या? वत्सो अजरो जरायुषत् ।
तृतीयं मांसं परिलिखितं यत् तस्माद् देवा अधिजरायुम् आहुः ॥५॥
मा धावय शवसा यातुधानो [अ]न्तरा त्वद् अवादे? ऽस्मै ।
इमम् इन्द्र महता मे वि रक्ष सं प्रजया तन्वा सं बलेन ॥६॥
दुर्वेशवलाद् बभ्रुधा परस्ताद् विश्वे देवा× प्रति यद्यन्त्य् आयतीम् ।
या भद्रा या सर्वतस् समीची सेद् आहुर् भवतु मे ऽजरायुः ॥७॥
गृष्टिं धेनुम् अधिजरायुं स्वधां कृण्वान× प्र ददातु ब्रह्मणे ।
सहो ऽस्मै दुहां सहस्रधारम् अक्षितम् अमुष्मिन् लोके परमे व्योमन् ॥८॥
वत्सं जरायु प्रददन् पीयूषं यो नो ददातु सुदुघाम् उ धेनुम् ।
तस्य देवा अपि यवताजुस् स मा रोहतु सुकृताम् उ लोकम् ॥९॥
¦परीवालाम् अधिजरायुं मधा जीवो यदद्यांश्रमदता? ।
श्योनां शग्मां शिवां शिवेह मा नो हिंसीर् [अ]हसा दैव्येन ॥१०॥
मधुकृतं सुकृतम् आदित्यं ध्रुवं सरां ध्रुवं प्रति गृह्णास्य् आयतीम् ।
घृतधियं नमसा संवसानो देवान् मनुष्यान् असुरान् भतर्हि? ॥११॥
पञ्च देवा× प्रविशयन्त एताम् इन्द्रम् त्वष्टा वरुणो मित्रो अग्निः ।
ते सर्वे सवितुर्? मह्यम् एतां त इह जीवं प्र तिरन्त आयुः ॥१२॥
कश्यपो ऽयं जमदग्निर् वसिष्ठ ऋषयो युवस्व? सनुर् अग्र एताम् ।
भरद्वाजो गोतमो भर्विरंजा? श्योनं विश्वामित्रो ददुष× प्र तिरन्त्य् आयुः ॥१३॥

शौ ८९.१२

ऊर्जं देवेभ्यस् सुभग ऊर्जं पितृभ्यो अपद्वाम् ।
ऊर्जं दधातु मा पिता ऊर्जं मनुष्या उत ॥१४॥ ॥अ॰५॥

११.६

या जाता ओषधयो देवेभ्यस् त्रियुगं पुरा ।
मन्ये नु बभ्रूणाम् अहं शतं धामानि सप्त च ॥१॥
शतं वो अम्ब धामानि सहस्रम् उत वो रुहः ।
अधा शतक्रत्वो यूयम् इ[मं मे] अगदं कृत ॥२॥
पुष्पवती× प्रसूमती× फलिनीर् अफला उत ।
अश्वा इव सजित्वरीर् वीरुध× पारयिष्णवः ॥३॥
ओषधीर् इति मातरो यद् वो देवीर् उप ब्रुवे ।
रपांसि विघ्नतीर् इत रपस् चातयमानाः ॥४॥
निष्कृतिर् नाम वो माता निष्कृतिर् नाम व× पिता ।
सरा पतत्रिणीस् स्थ[न] यद् आमयति निर् कृत ॥५॥
अश्वत्थे वो निषदनं पर्णे वो वसति× कृता ।
गोभाज इत् किलासथ यत् सनवथ पूरुषम् ॥६॥
यद् अहं वाजयन्न् इमा ओषधीर् हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥७॥
उच् छुष्मा ओषधीनां गावो गोष्ठाद् इवेरते ।
धनं सनिष्यन्तीनाम् आत्मानं तव पूरुष ॥८॥
यद् ओषधयस् समग्मत राजानस् समिताव् इव ।
विप्रस् स उच्यते भिषग् रक्षोहामीवचातनः ॥९॥
अश्वावतीं सोमावतीम् ऊर्जयन्तीम् उदोजसम् ।
आ वित्सि सर्वा ओषधी[र्] नूतां? मा पारयान् इति ॥१०॥
अति विश्वा× परिष्ठा[स्] स्तेन इव व्रजम् अक्रमुः ।
ओषधय× प्राचुच्यवुर् यत् किं च तन्वो [रपस्] ¦तं शश्वी विपूरुषम्? ॥११॥ ॥अ॰६॥

११.७

अदितिजन्माय? वरामसि मुञ्चावहौ गवाम् इव ।
वीला उत्सृजन् इन्दुर् उपसम्भे पृदाकम् ॥१॥
¦ये के चे सम्रपा इवे पुर्वा दंड्मीते मिचदसंदूपश्रीपायते यदा? ।
आखिदं त्वा वातो दंत् आखिदम् अभि वर्षतु ।
आकुतेन भेषजेन तेनाहीन् जम्भयामसि ।
¦सञ्चेतुतचाम्यक्षकः शयमान? अरसो अकः ॥२-३॥
अभितस्याहरं विषम् उभयोस् स्वजस्य च ।
अधिकस्य? या रोपीस् ता इतो वि नयामसि ॥४॥
इदं पैद्वो अजायतेदम् अस्य विवर्तनम् ।
इदं कनिक्रदो मयो? क्षियते तु परायसम् ॥५॥

त्रिपूर्थान् धाता वहन्तु विष्वग् वर्षन्तु वृष्टयः ।
विष्वग् विषं प्र मेह त्वं शतधार इवार्णवः ॥६॥
निरलं हरितस् सृजन् मित्रो वर्तयते रथम् ।
¦तेनापि सस्हीय तेन पीयूषं महिमापिमः? ॥७॥
येनेन्द्रजस्य येन वृत्रो येन वृत्रं पराजिनः ।
तेना शतक्रतो त्वम् अहेर् जातानि जम्भय ॥८॥
प्रत्य् अमोदन्त× पृथिवी प्रति द्यौ× प्रति सूर्यः ।
पैद्वो यद् अश्वमाता अन्वेनाहीन् अवाययन् ।
रज्जुर् च दन्वती शेरे पयन्ती×? पृथिवीम् अनु ॥९॥
भासो जीवन्ते आघ्नत सेन्द्राणी अविभयाभयत् ।
नत्वा मस्ते? विष्वग् विषम् आवनम् इव सात्यकम् ॥१०॥
इन्द्राग्नी मित्रावरुणा त्वष्टारम् अदितिं भगम् ।
इयामो अर्वाञ्चं पैद्वं मा नो ऽयं पुरुषो रिषत् ॥११॥
सचो जातो ऽकनिक्रदत् स उक्थो अध्य् अधूनुत ।
अश्वेनाश्वस्य वाजिनो हव्यवाहन× पृषद् ॥१२॥ ॥अ॰७॥ ॥अनु॰१॥

इत्यथर्ववेदे पैप्पलादशाखायाम् एकादश× काण्डस् समाप्तः ॥

१२.१

इमं स्तोमम् अर्हते जातवेदसे रथम् इव सं महेमा मनीषया ।
भद्रा हि न× प्रमतिर् अस्य संसद्य् अग्ने सख्ये मा रिषामा वयं तव ॥१॥
यस्मै त्वम् आयजसे? स साधत्य् अनर्वा क्षेति दधते सुवीर्यम् ।
स तूताव नैनम् अश्नोत्य् अंहतिर् अग्ने [सख्ये मा रिषामा वयं तव] ॥२॥
भरामेध्मं कृणवामा हवींषि ते चितयन्त× पर्वणापर्वणा वयम् ।
जीवातवे प्रतरं साधया धियो अग्ने [सख्ये मा रिषामा वयं तव] ॥३॥
शकेम त्वा समिधं साधया धियस् त्वे देवा हविर् अदन्त्य् आहुतम् ।
त्वम् आदित्याँ आ वह तान् ह्य् उश्मस्य् अग्ने [सख्ये मा रिषामा वयं तव] ॥४॥
त्वम् अध्वर्युर् उत होतासि पूर्व्य× प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्य् अग्ने [सख्ये मा रिषामा वयं तव] ॥५॥
विश्वां गोपा अस्य चरन्तु जन्तवो द्विपच् च यद् उत चतुष्पद् अक्तुभिः ।
चित्र× प्रकेत उषसो महाँ अस्य् अग्ने [सख्ये मा रिषामा वयं तव] ॥६॥
यो विश्वतस् सुप्रतीकस् सदृङ्ङ् असि दूरे चित् सन् तलिद् इवाति रोचसे ।
रात्र्याश् चिद् अन्धो अति देव पश्यस्य् अग्ने [सख्ये मा रिषामा वयं तव] ॥७॥
पूर्वो देवा भवतु सुन्वतो? रथो [अ]स्माकं शंसो अभ्य् अस्तु दूढ्यः ।
तद् आ जानीतोत पुष्यता वचो अग्ने [सख्ये मा रिषामा वयं तव] ॥८॥
वधैर् दुश्शंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिद् अत्रिणः ।
अथा यज्ञाय गृणते सुगं कृध्य् अग्ने [सख्ये मा रिषामा वयं तव] ॥९॥
यद् अयुक्था अरुषा? रोहिता रथे वातजूता वृषभस्येव ते रवः ।
आद् इन्वसि वनिनो धूमकेतुनाग्ने [सख्ये मा रिषामा वयं तव] ॥१०॥
अध स्वनाद् उत बिभ्यु× पतत्रिणो द्रप्सा य[त्] ते यवसादो व्य् अस्थिरन् ।
सुगं तत् ते तावकेभ्यो रथेभ्यो [अ]ग्ने [सख्ये मा रिषामा वयं तव] ॥११॥
अयं? मित्रस्य वरुण[स्य] धायसे [अ]वयातां मरुतां हेलो अद्भुतः ।
मृडा सु नो भूत्व् एषां मन× पुनर् अग्ने [सख्ये मा रिषामा वयं तव] ॥१२॥
देवो देवानाम् असि मित्रो अद्भुतो वसुर् वसूनाम् असि चा[रुर् अ]ध्वरे ।

सर्वेन् मास तव सप्तपत्ने [म]हि [मन्वे मा रिषाम वयं तव] ॥१३॥
तत् ते मधु यत् सन्धितम् [स्वे रुवे] सोमपूतो भवे सूद्दपत्नाः ।
स्फातिं रहं हविषं च सुचुने भवे मन्वे मा रिषाम वयं तव ॥१४॥
षष्ठे त्वं पुत्रविणो हयासो यमानास्त्वम् अदिते सर्वतातः ।
यं मह्येन हवसा योद्धयामि प्रजावन्तो रायस्ते ते स्याम ॥१५॥
स त्वं नु म]न्ये सौभगत्वस्य विद्वान् समाकम् आयुः प्र तिरेह देव ।
तन् नो मित्रो वरुणो मामहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः
॥१६॥ ॥ऋ°१॥

१२.२

कालो अश्वो वहतु सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः ।
तम् आ रोहन्ति कवयो विपश्चितस् तस्य चक्रा भुवनानि विश्वा ॥१॥
सप्त चक्रान् वहतु काल एष सप्तास्य नाभीर् अमृतं न्व् अक्षः ।
स इमा विश्वा भुवनान्य् अञ्जत् कालः स ईयते प्रथमो नु देवः ॥२॥
पूर्णः कुम्भो अधि काल आहितस् तं वै पश्यामो बहुधा नु सन्तम्? ।
स इमा विश्वा भुवनानि प्रत्यङ् कालं तम् आहुः परमे व्योमन् ॥३॥
स एव सं भुवनान्य् आभरत् स एव सं भुवनानि पर्य् ऐत् ।
पिता सन्न् अभवत् पुत्र एषां तस्माद् वै नान्यत् परम् अस्ति तेजः ॥४॥
कालो ऽमूं दिवम् अजनयत् काल इमां पृथिवीम् उत ।
कालेन? भूतं भव्यं चेषितं ह वि तिष्ठते ॥५॥
कालो भूतिम् असृजत काले तपति सूर्यः ।
काले विश्वा भूतानि काले चक्षुर् वि पश्यति ॥६॥
काले मनः काले प्राणः काले नाम समाहितम् ।
कालेन सर्वा नन्दन्त्य् आगतेन प्रजा इमाः ॥७॥
काले तपः काले ज्येष्ठं काले ब्रह्म समाहितम् ।
कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः ॥८॥
तेनेषितं तेन जातं तद् उ तस्मिन् प्रतिष्ठितम् ।
कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम् ॥९॥
कालः प्रजा असृजत कालो [अ]ग्रे प्रजापतिम् ।
स्वयंभूः कश्यपः कालात् तपः कालाद् अजायत ॥१०॥
कालाद् आपः सम् अभवन् कालाद् ब्रह्म तपो दिशः ।
कालेनोद् एतु सूर्यः काले नि विशते पुनः ॥११॥
कालेन वातः पवते कालेन [पृथिवी मही ।
[द्यौर् मही काल आहिता ॥१२॥
[कालो ह] भूतं भव्यं च पुत्रो [अ]जनयत् पुरा ।
कालाद् ऋचः सम् अभवन् यजुः कालाद् अजायत ॥१३॥
कालो यज्ञं सम् ऐरयद् देवेभ्यो भागम् अक्षितम् ।
काले गन्धर्वाप्सरसः काले लोकाः प्रतिष्ठिताः ॥१४॥
काले ऽयम् अङ्गिरा देवो [अ]थर्वा चाधि तिष्ठतः ।
इमं च लोकं परमं च लोकं पुण्यांश् च लोकान् विधृतीश् च पुण्याः ।
सर्वांल् लोकान् अभिजित्य ब्रह्मणा कालः स ईयते परमो नु देवः ॥१५॥
॥ऋ°२॥

१२.३

[सर्वेषां ... मास्ति ...]
[इन्द्राशिर् महोरगम्? ॥१॥
इन्द्राणी ... महास्तम् ।
... ॥२॥
... ॥

दृढं विषम् इव तैमातम् इन्द्राशिरः शाले शये ॥३॥
अयं शये तन्वो रक्षाणो अयं [..............] ।
[.............. अ]दिवनाभ्य अवचक्षाणात् एनम् ॥४॥
मध्ये बलस्य निर्मित इन्द्राशिर महोरगः ।
भीमो अन्यस्य शाङ्कसे मभैयाभ्युत्सिनो? महम् ॥५॥
अन्येन्द्राशिर एधेनु वर्धयतु प्रलमन्या ।
स्फातिं च बल्यां गृह्णातु गयां च बहु पुष्पतु ॥६॥
यम् भोग्? अश्विना रोपतुर यम् इन्द्रो ब्रह्मणस् पतिः ।
तं शक्र शिवम् अस्मभ्यं पृथ्यो? जीवनाय कम् ॥७॥
हदांशाकुम्भमयाः? घृतम् आसीद् द्रुपदम् ।
पक्राश्लुप्यमलः शेर? यत् तस्य [आ]हुतं हविः ॥८॥
सनडुहान् पृष्ठिवहान् वहतान् वहर? आपृणाम् ।
कीनाशस्य समस् स्वेदात्? इन्द्राशिर अजायत ॥९॥
यदि कीनाशस् सस्वेद पति शिरस्तस् तन्वं परि ।
अयां गाव इव दुष्पर्लाम्द्राशिरो सो [अ]श्नुते ॥१०॥
यदि कीनाशं सीरपतिर दण्डेन हन्तु मन्युतः ।
यदि किं च बल्यं संहाल्पा इन्द्राशा उपाहृतम् ॥११॥
उलूखलं मुसलं तानि? वोऽवयन् प्र शूर्पं नप पवते कृणुष्व ।
याहि पुत्राय गोतमम् इन्द्राशिर मधुमन्तं कृणोतु ॥१२॥
एतत् शूर्पं अनिलर आहरोलूखलं मुसलं कुम्भ्या गहि ।
पुत्रा मो ऽप पुत्रविते वहि पितुम् अदनन्ति मधुमन्तम् ओपम् ॥१३॥
अग्निर नो दूतः प्रहितो [अ]यम् आगन् मनो मन्थम् ।
अथम् आयुयं कृणोमि ॥१४॥
निराविधम् आहुतं प्रज्ञये नो यशो मन्दं पितुम् अध्वपसूता? ।
स्वादो पितो मधो पितो उप नः पिताव् आ गहि शिवश् शिवा-
भिर ऊतिभिः ॥१५॥
सिंहो भूत्वा गा भुणाम्य अग्निर भूत्वा धान्यम् ।
इन्द्राशिर निर्मितो मयाधारं वाचं गच्छतु ॥१६॥ ॥ऋ°१॥

१२.४

शतकाण्डो दुश्च्यवनस् सहस्रपर्ण उत्तिरः ।
दर्भो य उग्र ओषधिस् तं ते बध्नाम्य् आयुषे ॥१॥
नास्य केशान् प्र वपन्ति नोरसि ताडम् आ घ्नते ।
यस्मा अच्छिन्नपर्णेन दर्भेण शर्म यच्छतु ॥२॥
दिवि ते तूलम् ओषधे पृथिव्याम् असि निष्ठितः ।
त्वया सहस्रकाण्डेनायुः प्र वर्धयामहे ॥३॥
तिस्रो दिवो [अ]त्य् अतृणत् तिस्रो यां पृथिवीम् उत ।
त्वया दुर्हार्दो जिह्वां नि तृणद्मि वचांसि च ॥४॥
त्वम् असि सहमानो ऽहम् अस्मि सहस्वान् ।
उभौ सहस्वन्तौ भूत्वा सपत्नान् सहिषीवहि ॥५॥
सहस्व नो अभिमातिं सहस्व पृतनायतः ।
सहस्व सर्वान् दुर्हार्दः सुहार्दो मे बहून् कृधि ॥६॥
दर्भेण देवजातेन दिवि ष्टम्भेन शश्वद् इत् ।
तेनाहं शश्वतो जनां असनं सनवानि च ॥७॥
प्रियं मा दर्भ कृणु ब्रह्मराजन्याभ्यां शूद्राय चार्याय च ।
यस्मै च कामयामहे सर्वस्मै च विपश्यते ॥८॥
यो जायमानः पृथिवीम् अदृंहद् यो [अ]स्तभ्नाद् अन्तरिक्षं दिवं च ।
यं बिभ्रतं ननु पाप्मा विवेद स नो ऽयं दर्भो वरुणो ऽधिवाकः ॥९॥
सपत्नहा शतकाण्डस् सहस्वान् ओषधीनां प्रथमस् सं बभूव ।

स नो ऽयं दर्भः परि पातु विश्वतस् तेन साक्षीय पृतनाः पृतन्यतः ॥१०॥
॥ऋ°२॥

१२.५

सहस्रकाण्डः शतकाण्डः पयस्वान् अपाम् अग्निर् वीरुधां राजसूयम् ।
स नो ऽयं दर्भः परि पातु विश्वतो देवो मणिर् आयुषा सं सृजातु नः ॥१॥
घृताद् उल्लुप्तो मधुमान् पयस्वान् भूमिदृंहो ऽच्युत[श्] च्यावयिष्णुः ।
नुदन् सपत्नान् अधरांश् च कृण्वन् दर्भा रोह महतान् इन्द्रियेण ॥२॥
त्वं भूमिम् अत्य् एष्य् ओजसा त्वं वेद्यां सीदसि चारुर् अध्वरे ।
त्वां पवित्रम् ऋषयो ऽभरन्त त्वं पुनीहि दुरितान्य् अस्मत् ॥३॥
तीक्ष्णो राजा विषासही रक्षोहा विश्वचर्षणिः ।
ओजो देवानां बलम् उग्रम् एतत् तत् ते बध्नामि जरसे स्वस्तये ॥४॥
दर्भेण त्वं कृणु वीर्याणि दर्भं बिभ्रद् आत्मना मा व्यथिष्ठाः ।
अतिष्ठाय वर्चसा ऽधान्यान् सूर्य इवा भाहि प्रदिशश् चतस्रः ॥५॥
॥ऋ°३॥

१२.६

उद् ईरतं पृथिवी जीरदानुर् यावन्तम्? अर्वाङ् अनु याति वातः ।
कविमासत्ती पृथिवी प्रति दृंहतु वीरं सहस्रवर्किशा सुदुघा रोहन्ती ॥१॥
इन्द्र[ः] सीतां दर्शयतो अग्निर् वा रोहिताश्वः ।
अश्विना रासभाश्वा कृषिं देवीम् अयोयुजन् ॥२॥
शुनं वरत्रान् आ यच्छ शुनम् अष्ट्राम् उद् इङ्गय ।
शुनं तु सस्यानां पक्वम् शुनं वहतु लाङ्गलम् ॥३॥
शुनका वाहा वि युगा तनोत कृते योनौ वपतेह बीजम् ।
तथा धाता तथा मनुस् तथा कृषुणान् अश्विना तथा देवी सरस्वती ॥४॥
सुपिप्पला ओषधयो ...मार्डीकाम् अक्षतम् तद्? ।
इन्द्रो वरुणो वायुर् अदितिर्नं मे ग्राव्णा वचः ॥५॥
धाता पूषा बृहस्पति[र्] भूम्याम् सम्मीडाम् अक्षन् ।
कृषिं देवाम् अवर्धिरः सम्मानी सुमेधा या ॥६॥
संश्रवा वा मधु पुत्रपाला मरिक्षिराज? मधुमन्तम् अंशम् ।
अन्नवम् सीता पुष्यवत् सीता सीता पशूनां नु हि प्रदद्यात् ॥७॥
सीता वर्धतु दृढ्यो भूमये महते दृढे ।
विश्वासः वहेनम् निषुति व पुष्टयोद् यति ।
पूर्व आवाद् अजनन् पुत्र? पर्णां जनातिर् अपवायमानाः ॥८॥
वि विहरिष दृषिद अधूर? विस्तरा ।
मुही मय वह गोभ्यु सम्मम् ॥९॥
इन्द्रोय सेय मा अजाम् विन्देहोरा वहन् कृषि ।
मा नो रिष्यद् वृषभाहो मा वा शाकिनालकार ॥१०॥
यो ऽश्माम् उग्रम संरस्यद् ते त वि समाननम् ।
तावन् शेते सुवर्णाहतो सीता वनाशु च या ॥११॥
इन्द्रो वनुर विस्तरिती कृषि सो उष्ठिक्रयाः ।
इन्ना वा पञ्च सदितम् ता वाचो उष्ठिक्रमाः ।
वर्तिके मन्यमान् इव सीता वर्धतु दृढः ॥१२॥
शुनं कीनाशो अन्न् एति वाहान् शुनं कालो विलिखन् एतु भूमिम् ।
शुनासीरा हविषा वाहमाना शुनं धान्यानि कृणुतम् ॥१३॥
या नः सीरम् अतिवन्धा ज्योतिष्मती तमस् विराः ।
तास् अर्घे राजानाम् इयम् ॥१४॥ ॥ऋ°४॥

१२.७

ऊर्ध्वंभूतो वै नामैता आपो यद् औषधयश् च वनस्पतयश् च । तासाम्
अग्निर् अधिपतिः । यो वा एता ऊर्ध्वभूत आपो वेदाग्निम् अधिपतिम्

अथैनम् एता ऊर्ध्वा उप तिष्ठन्त्य् एव । एनम् ऊर्ध्वा उप तिष्ठन्त्य्
अधिपतिर् भवति स्वानां चान्येषां च य एवं वेद ॥१॥
प्रस्कन्दरी[र्] वै नामैता आपो यद् वर्षास् । तासाम् आदित्यो अधि-
पतिः । यो वा एताः प्रस्क[न्द]रीर् आपो वेदादित्यम् अधिपतिम्
अथैता एतस्मिन् उद्यति प्र स्कन्दन्त्य् एव । अस्मिन्न् आयति प्र स्क-
न्दन्ति । अधिपतिर् [भवति स्वानां चान्येषां च य एवं वेद] ॥२॥
तकरीर् वै नामैता आपो या[स्] सृतयः । तासां पृथिव्य् अधिपत्नी ।
यो वा एतास् तकरीर् आपो वेद पृथिवीम् अधिपत्नी[म्] अथैता
एतस्यां प्रभुत्वाम् तकरीर् यन्त्य् एव । एनेन द्विषन्तः प्रभुता यन्ति ।
अधिपति[र् भवति स्वानां चान्येषां च य एवं वेद] ॥३॥
वशिनी[र्] वै नामैता आपो या[स्] स्यन्दन्ते । तासां वरुणो अधिपतिः ।
यो वा एता वशिनीर् आपो वेद वरुणम् अधिपतिम् अथैव
एतासां स्यन्दमानानां वशाम् आवृत एवा । द्विषतां वशम् आ इते
अधिपति[र् भवति स्वानां चान्येषां च य एवं वेद] ॥४॥
ऊर्जा वै नामैता आपो यद् आपः । तासां त्वष्टाधिपतिः । यो वा
एता ऊर्जा आपो वेद त्वष्टारम् अधिपतिम् ऊर्जस्वी तेजस्वी
भवति प्रसहन् पशून् आप्नोति । अधिपतिर् [भवति स्वानां चान्येषां
च य एवं वेद] ॥५॥
ओजो वै नामैता आपो यद् मधु । तासाम् इन्द्रो अधिपतिः ।
[यो वा एता ओज आपो वेदेन्द्रम् अधिपतिम्] ओजस्वी
वीर्यावान् इन्द्रियावी भवति पराजसभायां मधुपर्कम्
आप्नोति । अधिपतिर् [भवति स्वानां चान्येषां च य एवं वेद] ॥६॥
वर्चो वै नामैता आपो यद् घृतम् । तासां पूषाधिपतिः । यो वा
एता वर्च आपो वेद पूषाणम् अधिपतिं वर्चस्वी तेजस्वी भवति ।
वर्चस्यान्? इव उज्ज्वलं मुखं रोचते । अधिपतिर् [भवति स्वानां
चान्येषां च य एवं वेद] ॥७॥
उग्रा वै नामैता आपो यद् ब्रावुषयः । तासां मरुतो [अधिपतयः । यो वा
एता उ]ग्रा आपो वेद मरुतो अधिपतीन् उग्रो बलवान् भवति । मारुतं
शर्ध इव एनम् आहुर । अधिपतिर् [भवति स्वानां चान्येषां
च य एवं वेद] ॥८॥
सहो वै नामैता आपो यद् वर्षम् । तासां पर्जन्यो अधिपतिः ।
यो वा एतास् सह आपो वेद पर्जन्यम् अधिपतिम् अथास्मै मित्रवाहयो
भवन्त्य अहीनेन स्था नन्दन्त्य अस्मात् वयम् इव अस्मात् उर्वो
गृहे महीयते । अधिपतिर् [भवति स्वानां चान्येषां च य एवं वेद] ॥९॥
अभिमन्या वै नामैता आपो यद् स्वरा? । तासाम् अश्विनाधिपती ।
यो वा एता अभिमन्या आपो वेदाश्विनाव् अधिपती अभि मन्यते
भ्रातृव्या[न्] नैनं भ्रातृव्या अभि मन्यन्ते । तस्मात् मन्योर् मनम्?
अनु मन्यन्ते । अधिपतिर् [भवति स्वानां चान्येषां च य
एवं वेद] ॥१०॥
परिक्षितो वै नामैता आपो याः कारिष्यांस्? । तासां यमो अधिपतिः ।
यो वा एताः परिक्षित आपो वेद यमम् अधिपतिं पर्य् एनं
स्या स्व पि इवा स्या? वसन्ति । अधिपतिर् [भवति स्वानां चान्येषां
च य एवं वेद] ॥११॥
रन्त्यो वै नामैता आपो यास् स्त्रियः । तासां कामो अधिपतिः । यो
वा एता रन्तीर् आपो वेद कामम् अधिपतिं रमन्ते ऽस्मिन्
रन्तीयो भवति काम एव कामीनाम् । अधिपतिर् [भवति स्वानां
चान्येषां च य एवं वेद] ॥१२॥
विश्वभृतो वै नामैता आपो यद् दुग्धा । तासां मृत्युर [अधिपतिः ।
[यो वा एता विश्वभृत आपो वेद मृत्युम्] अधिपतिं विश्वस्य

मर्ता भवति विद्वम् एवं विभ्रतस् सं भयो अन्यपो गृहे भीयन्ते
दक्षिणाग्नि[र्] गार्हपत्य आहवनीयः । एवं चत्वारि धामानि
गच्छन्ति निष्कः कंसो अश्वतरो [ह]स्ती! । अधिपतिर् [भवति
स्वानां चान्येषां च य एवं वेद] ॥१३॥
हिमा वै [नामैता आपो यद्...] तासाम् अपां हिमवान् गोधाम् सोमो
वत्सः परमेष्ठय् अधिपतिः । यो वा एता [हिमा आपो वेद
ता]साम् अपां हिमवन्तं गोधसं सोमं वत्सं परमेष्ठिनम् अधि-
पतिम् परमेष्ठी भवतु गच्छतु परमेष्ठिन्! धामम् । अधि-
पतिर् भवति स्वानां चान्येषां च य एवं वेद ॥१४॥ ॥ऋ॰८॥
॥अनु॰१॥

इत्यथर्ववेदे पैप्पलादशाखायां [...]: काण्डः समाप्तः ॥

१३.२

भग्निस् तक्मानम् अप बाधताम् इतस् सोमो ग्रावा मरुतः पूतदक्षाः ।
वेदि[र्] बर्हिस् समिधस् संशिशाना अप रक्षांस्य् अमुया धमन्तु ॥१॥
अयं हरो अभिशोचयिष्णुर् विश्वा रूपाणि हरिता कृणोषि ।
तस्मै ते अरुणाय बभ्रवे तपुर्मघवाय! नमो ऽस्तु तक्मने ॥२॥
तक्मन् सार्वेनम् इच्छस्व यदी सन् मूलयासि नः ।
अपेहि यत्र ते गृहा अन्यत् पूर्वेषु धाम्यतु ॥३॥
यः परुषः पारुषेयो अवध्वंस इवारुणः ।
तक्मानं विश्वधावीर्याधराञ्चं परा सुव ॥४॥
अधराञ्चं प्र हिणोमि नमः कृत्वाय तक्मने ।
शकंभरस्य मुष्टिहा पुनर् गच्छ महावृषान् ॥५॥
महावृषान् मूजवतो कौपि! परेत्य ।
प्रैतानि तक्मने ब्रूमो [अ]न्यक्षेत्राणि वा इमा ॥६॥
ओको अस्य मूजवन्त ओको [अ]स्य महावृषाः ।
महान् जातस् तक्मन् तद् असि बह्लिकेषु न्योचरः ॥७॥
तक्म[न्] व्याल वि गद व्यङ्ग भूरि यावय ।
दासीं निष्टक्वरीं पृच्छ तां वज्रेण सम् अर्पय ॥८॥
गिरिं गच्छ गिरिजा असि ¦रौतेष मानुषो गृहाः! ।
दासीम् अन्व् इच्छ प्रफर्व्यं तां तक्मन् वीव धूनुहि ॥९॥
यस् त्वं शीतो अथो रूरस् सह कासावीविपः ।
भीमास् ते तक्मन् हेतयस् ताभिस् स्म परि वृङ्धि नः ॥१०॥
तक्मन् भ्राता बलासेन स्वस्रा कासिकया सह ।
पाप्मा भ्रातृव्येण [सह] गच्छैतो मरजान्! अभि ॥११॥
गन्धारिभ्यो मूजवद्भ्यः काशिभ्यो मगधेभ्यः ।
धाने प्रियम् इव शेवधि तक्मानं परि दद्मसि ॥१२॥
¦मा कं चिदाँ मा र्दिदासां नदीयं वैतुकायतीं! ।
प्रैतानि तक्मने ब्रूमो [अ]न्यक्षेत्राणि वा इमा ॥१३॥
अन्यक्षेत्रे न रमते सहस्राक्षो [अ]मर्त्यः ।
अभूद् उ प्रार्थस् तक्मा स गमिष्यति बह्लिकान् ॥१४॥
अतो गच्छ मूजवतस् ततो वा नः परस्तराम् ।
मा स्मातो ऽभ्य् अगोः पुनः प्र त्वा तक्मन्न् उप ब्रुवे ॥१५॥

परस्मा यत्र त्वं चर परमस्यां परावति ।
यथा नूनं त्वम् आयस्य यथा नूनम् अभि शोचय ॥१६॥ ॥ऋ॰१॥

१३.२

यथेयम् उर्वी पृथिवी विवेश गर्भम् आदधे ।
एवा दधामि ते गर्भं तस्मै त्वाम् अवसे हुवे ॥१॥
पर्वताद् दिवो योनेर् [गात्राङ्गात् समाभृतम् ।
¦रेतो देवस्य देवम्! सरौ पर्णम् इवाधात्] ॥२॥
विष्णुर् योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आ सिञ्चतु प्रजापतिर् धाता गर्भं दधातु ते ॥३॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं यो[न्या]म् अश्विनावत्ताम् आ धत्तं पुष्करस्रजा ॥४॥
गर्भं ते राजा वरुणो गर्भं देवो बृहस्पतिः ।
गर्भं [त] इन्द्रश् चाग्निश् च गर्भं धाता दधातु ते ॥५॥
गर्भो ऽस्य् ओषधीनां गर्भो वनस्पतीनाम् ।
गर्भो विश्वस्य भूतस्य सो अग्ने गर्भम् ए[ह] धाः ॥६॥
यद् ओषधयो गर्भिणीः एवावो येन गर्भिणः ।
एवां गर्भस्य यो गर्भस् तेन त्वं गर्भिणी भव ॥७॥
वि ते भिनद्मि घृतामसि धाता गर्भं दधातु ते ।
आ योनिं पुत्रो रोहतु जननं प्रति आयताम् ॥८॥
अनिष्ठा इह मैत्रावो अन्यं समुद्रा चर ।
यथा सोम इव भक्षनम् आ गर्भंस् सीदद् ऋत्वियम् ॥९॥
सवितुः श्रेष्ठेन [रूपेणास्या नार्या गवीन्योः ।
[पुमांसं पुत्रम् आ धेहि दशमे मासि सूतवे] ॥१०॥
[.........] श्रेष्ठेन [रूपेणास्या नार्या गवीन्योः ।
[पुमांसं पुत्रम् आ धेहि दशमे मासि सूतवे] ॥११॥
विष्णो श्रेष्ठेन [रूपेणास्या नार्या गवीन्योः ।
[पुमांसं पुत्रम् आ धेहि दशमे मासि सूतवे] ॥१२॥
त्वष्टुः श्रेष्ठेन [रूपेणास्या नार्या गवीन्योः ।
[पुमांसं पुत्रम् आ धेहि दशमे मासि सूतवे] ॥१३॥
भग श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रम् आ धेहि दशमे मासि सूतवे ॥१४॥
अधि [स्कन्द वीरयस्व गर्भम्] आ धेहि योन्याम् ।
[वृषा]ऽसि वृष्ण्यावन्तं प्रजायै त्वा नयामसि ॥१५॥
यद् वेद राजा वरुणो वेद देवो बृहस्पतिः ।
इन्द्रो यद् वृत्रहा वेद तद् उ गर्भक[रणं पि]ब ॥१६॥
वि जिहीष्व बार्हत्सामे गर्भस् ते योनिम् आ शयाम् ।
ददन् ते पुत्रं देवास् सोमपा उभयाविनम् ॥१७॥
सोमस्य हवियोनरीम! गर्भकृत्यानम् ।
ततस् ते पुत्रो जायतां कर्तवे वीर्येभ्यः ॥१८॥ ॥ऋ॰२॥

१३.३

आयस्मात् अश्वत्थाद् अग्नी क्षमायीञ्जसे ।
उग्र आपधिकाद् अधि यो वृक्षान् अधिरोहति ॥१॥
विबाधं चिन् सहमान त्वाम् अग्ने जनयामसि ।
जातान् जनिष्यमाणान् सपत्नान् वृश्चस्व मे ॥२॥
अश्वत्थस्याधिरोहस्य वृक्षस्यारुपः कृताः ।
ततो जातय ते ऽजन[द्] वीडुजम्भो अग्निर् अग्ने ॥३॥
त्वां जातं जातवेदसम् आ दधाम्य् अमर्त्यम् ।
पावकम् अग्निम् ऊतये शुचिमन्तं विषासहिम् ॥४॥

उत् तनुष्व धनुः प्रति मुञ्चस्व वर्म ।
अहि शत्रून् वीर्या ते कृणोतु अत्रिरिक्षंतयते! ॥५॥
[ऋषभं त्वा समानानां] सपत्नानां विषासहिम् ।
हन्तारं शत्रूणां कृण्मो विराजं गोपतिं गवाम् ॥६॥
समुद्रो [अ]स्य् अपां ज्येष्ठ इन्द्रो देवेषु वृत्रहा ।
व्याघ्रं सिंहं त्वा कृण्मो दमितारं पृतन्यताम् ॥७॥
इन्द्र इव दस्यून् अधरान् कृणुष्वोग्र इव यावो वि सृजन् सपत्नान् ।
ते शुष्यन् तता आप इवाग्ने एवांथेरवायमां! ॥८॥
सं वृश्चेनांस् ते शुष्का वृश्चेनान् सोमजान् शिखस्! ।
सपत्नान् सर्वान् दहन् त्वम् एकवृषो भव ॥९॥
त्वम् उग्रस् त्वं बली त्वम् एधि विषासहिः ।
त्वं पृतन्यतः पूर्वान् सपत्नान् अव धूनुष्व ॥१०॥
असपत्नस् सपत्नहेन्द्र इवारिष्टो अक्षतः ।
अधस् सपत्नास् ते पदोस् सर्वे सन्त्व् अभिष्ठिताः ॥११॥
म्लायन्तु ते वातमूलास् सपत्ना अग्निम् एषां निर् दयामि शरीरात् ।
हविषे कामो विद्मा[न] प्राणांस् तदे ×ो × × ×विष्कृताः ॥१२॥
अभिवर्धम् अभिभवं सपत्नक्षयणं हविः ।
राष्ट्राय मह्यं कृण्मस् सपत्नेभ्यः पराभव ॥१३॥
यो न[स्] स्वो यो अरणो अरातिर् अतिपूरुषः ।
युष्मस्यैव प्रजायतस् तस्य मोघं छेपि किं चन ॥१४॥
असपत्नं [पुरस्तात् पश्चान् नो अभयं कृतम् ।
[सविता मा दक्षिणत उत्तरान् मा शचीपतिः] ॥१५॥
[दिवो मादित्या रक्षन्तु भूम्या रक्षन्त्व् अग्नयः ।
[इन्द्राग्नी रक्षतां मा पुरस्ताद् अश्विनाव् अभितश् शर्म यच्छताम् ।
[तिरश्चीनाघ्न्या रक्षतु जातवेदा भूतकृतो मे सर्वतस् सन्तु वर्म] ॥१६॥
॥ऋ॰१॥

१३.४

त्वया पूर्वम् अथर्वाणो जघ्नू रक्षांस्य् ओषधे ।
त्वया जघान कश्यपस् त्वया कण्वो अगस्त्यः ॥१॥
त्वया वयम् अप्सरसो गन्धर्वांश् चातयामसि ।
अजशृङ्ग्य् अज रक्षस् सर्वान् गन्धेन नाशय ॥२॥
नदीं [यन्तु] अप्सरसो अपां तारम् अवश्वसम् ।
गुल्गुलूः पीला नलद्य् औक्षगन्धिः प्रमन्दिनी ॥३॥
यत्रामर्त्या अन्तर् अन्तस् समुद्रे तुरूव्यरीतुवंशी! पुण्डरीका ।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥४॥
यत्र प्रेङ्खो गन्धर्वाणां दिवि बध्यो हिरण्ययः ।
[तत् परेताप्सरसः प्रतिबुद्धा अभूतन] ॥५॥
गन्धर्वाणाम् अप्सरसाम् अगन्मन् इति संगमम् ।
[तत् परेताप्सरसः प्रतिबुद्धा अभूतन] ॥६॥
यत्राश्वत्था न्यग्रोधा महावृक्षाय शि[ख]ण्डिनः ।
[तत् परेताप्सरसः प्रतिबुद्धा अभूतन] ॥७॥
यत्र वीक्षा! हरिता अर्जुना आघाटाः कर्करयस् संवदन्ति ।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन ॥८॥
इयं वीरुद् छिन्नच्छिनो गन्ध[र्व]स्याप्सरापतेः ।
भिनत्तु मुष्कावः अपि यातु शेपः ॥९॥
एषम् अगन्न् ओषधिर् वीरुधां वीर्यावती ।
अजशृङ्ग्य् अराटकी तीक्ष्णशृङ्गी व्य् ऋषतु ॥१०॥
आनृत्यतो [अ]प्सरसो गन्धर्वा यत्र वो गृहाः ।
अजशृङ्ग्य् अराटक्य् तीक्ष्णशृङ्गी व्य् ऋषतु ॥११॥

आया इद् वो अप्सरसो गन्धर्वाः पतयो यूयम् ।
अप क्रामत पुरुषाद् अमर्त्या मर्त्यं मा सचध्वम् ॥१२॥
भीमा इन्द्रस्य हेतयश् शतमृष्टीर् अयस्मयीः ।
ताभिर् गन्धर्वान् अभेया! अवकादान् व्य् ऋषत ॥१३॥
अवकादान् अभिशोचान् विविद्य! चोतय मामकान् ।
गन्धर्वान् सर्वान् ओषधे कृणु नस्वपरायतः! ॥१४॥
उन्मादयन्तीर् अभिशोचयन्तीर् मुनिम् अग्नि कृण्वन्तीर् मोहयन्तिम! ।
अप्सरसो यास् चरन्ति गन्धर्वपत्नीर् अजशृङ्ग्य् अतो ॥१५॥
द्वैधीहव्यानः एवं विश्वा रूपाणि यो ऽभवत् ।
श्वेवैकः कपिर् इवैकः कुमारम् सर्वकेशकः ।
प्रियो दृशा [इव] भूत्वा गन्धर्व[स्] सचते स्त्रियं तम् इतो नाशयामसि ॥१६॥
॥ऋ॰१॥

१३.५

यो वै वशां देवयते पचते [दुतां] चाहुतां वा ।
मृत्योस् स बध्यते पाशो देवानां च यमस्य च ॥१॥
दक्षिणां सूर्याम् अदितिं सरस्वती गृह्णपा कल्पयन्तः ।
इमां वशापाचम् आहुर् यतोति लिप्सो यशा अभिहताम् सचध्वे ।
तासाम् अग्नी मनसैकां जुहोमि तां मम स्वाहां भूतपतिः कृणोतु ॥२॥
स्वाहां न एतां सविता कृणोतु स्वाहां न एतां जनिता पशूनाम् ।
जुहुम्य्! अग्ने यतुजाति विद्वांस् तां मम स्वाहां भूतपतिः कृणोतु ॥३॥
इयं तृतीयं वशिनी वशासु अहिकेष्व! गर्भो ऽस्या विवेशः! ।
उशती त्वम् उशतो गच्छ देवान् सत्यास् सन्तु यजमानस्य कामाः ॥४॥
इमां मजा यावत्स्व तेस्ले ये ओर! यस्याम् इन्द्रो वरुणस् तद् विशाते ।
मूर्ध्ना स उग्रम् आ गर्धीरः पशूर् वीर्यम् आ पिबे[त] ॥५॥
वशासि सुत स्थविरं विपश्चितं वशासि सुत वध्वकं विपिश्यजाम् ।
वशासि सुत तरुणं विभाजने वशासि सुत संचितिं धनानाम् ॥६॥
यत् प्रोक्षणम् अयुतद्! बर्हिष्यस् परि दक्षिणतो देवा अवेतु ।
वशा संवृक्ता यथा गौर् अवीने[त्] तस्याः पीतो अभवद् वर्मवासः ॥७॥
नमो महिम्न उत चक्षुषे वां यदावभ्री मनसा तत् कृणोमि ।
देवैर् अभीतं परिभिरन् शिवेभिर् मा नो हिंसिष्ट हरसा दैव्येन ॥८॥
वशाम् अस्कन्धद् ऋषभस् तिष्ठन्तीम् अदितिं विदुः! ।
गर्भं तम् अप गो[र्] वेद ¦इति वा सोम कल्पता! ॥९॥
रूपम् एकः पर्यं अभवद् राजा नामैक उच्यते ।
प्रतिरूपस्यैकं [रूपं] रूपम् एकस्य कर्मन् ॥१०॥
प्रजापतिः परमेष्ठी मृत्युर् वैश्वानरश् [च] ।
सरस्वत्य् मानस्या! पक्षश् च वशाया अधि श्रिरे ॥११॥
वश एह आजायेत वशा देवकृतं हविः ।
निधानम् अस्या येभ्यां! दुहितरो यत्याम् इव ॥१२॥
नास्याप्यकृतः प्र तिष्ठन् नास्य सुता गृहे स्या[त्] ।
वशा हंसेवुद्यंका! परीत्या विजानतः ॥१३॥
मैनां रक्षे ब्राह्मणेभ्यो न मा वि म्लापयति च ।
अतीमं न प्रय आवर्तयद् यस्य गोषु वशा स्या[त्] ॥१४॥
नास्य पराम् आ इच्छन्ति देवा मनुष्या अतीताः ।
वशी यद् अन्विये! ब्रह्मणां तस्माद् एता भरद् वशाः ॥१५॥
वशां कुर्वाणा परिलीयम् आसन् एवं कल्याण्य अवदास्यमानाः ।
अपिहम्! अभिजायमाना यक्षस्य मात्राम् अभिजायमाना ॥१६॥
इन्द्रवत्तस् ते मदतस् तुरीयं भेजिरे वशे ।
तुरीयम् आदित्या दद्रास् तुरीयं वसवो वशे ॥१७॥
तुरीयभाज आदित्यान् वशायाः कवयो विदुः ।

[illegible] ॥१८॥
[illegible] ।
[आ]दित्याय [illegible] तपस्विनः ॥१९॥
[illegible] [अ]कल्मा[illegible] ।
[illegible] ॥२०॥
[illegible] सरस्वती[र्] ।
[illegible] पृथिवी [इ]मा ॥२१॥
[illegible] ।
[illegible] ॥२२॥
[illegible] ।
[illegible] ॥२३॥
[illegible] ।
[illegible] ॥२४॥
को अस्याः [illegible] वेद च [illegible] जरायु च ।
[illegible] ॥२५॥
[illegible] जरायु च ।
[illegible] ॥२६॥
[illegible] ।
[illegible] जरायु च ॥२७॥
[illegible] ।
[illegible] ॥२८॥

१३.६

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्न् अहिम् अन्व् अपस् ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥१॥
अहन्न् अहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रम् अव जग्मुर् आपः ॥२॥
वृषायमाणो ऽवृणीत सोमं त्रिकद्रुकेष्व् अपिबत् सुतस्य ।
आ सायकं मघवादत्त वज्रम् अहन्न् एनं प्रथमजाम् अहीनाम् ॥३॥
यद् इन्द्राहन् प्रथमजाम् अहीनाम् आन् मायिनाम् अमिनाः प्रोत मायाः ।
आत् सूर्यं जनयन् द्याम् उषासं तादीत्ना शत्रुं न किला विवित्से ॥४॥
अहन् वृत्रं वृत्रतरं व्यंसम् इन्द्रो वज्रेण महता वधेन ।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक् पृथिव्याः ॥५॥
अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधम् ऋजीषम् ।
नातारीद् अस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥६॥
अपाद् अहस्तो अपृतन्यद् इन्द्रम् आस्य वज्रम् अधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद् व्यस्तः ॥७॥
नदं न भिन्नम् अमुया शयानं मनो रुहाणा अति यन्त्य् आपः ।
याश् चि[द्] वृत्रो महिना पर्यतिष्ठत् तासाम् अहिः पत्सुतःशीर् बभूव ॥८॥
नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर् जभार ।
उत्तरा सूर् अधरः पुत्र आसीद् दानुः शये सहवत्सा न धेनुः ॥९॥
अतिष्ठन्तीनाम् अनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्य् आपो दीर्घं तम आशयद् इन्द्रशत्रुः ॥१०॥
दासपत्नीर् अहिगोपा अतिष्ठन् निरुद्धा आपः पणिनेव गावः ।
अपां बिलम् अपिहितं यद् आसीद् वृत्रं जघन्वाँ अप तद् ववार ॥११॥
अश्व्यो वारो अभवस् तद् इन्द्र सृके य[त्] त्वा प्रत्यहन् देव एकः ।
अजयो गा अजयः शूर सोमम् अवासृजः सर्तवे सप्त सिन्धून् ॥१२॥
नास्मै विद्युन् न तन्यतुः सिषेध न यां मिहम् अकिरद् ध्रादुनिं च ।
इन्द्रश् च यद् युयुधाते अहिश् चोतापरीभ्यो मघवा वि जिग्ये ॥१३॥

अहे[र्] यातारं कम् अपश्य इन्द्र हृदि यत् ते जघ्नुषो भीर् अगच्छत् ।
नव च यन् नवतिं च स्रवन्ती[र्] श्येनो न भीतो अतरो रजांसि ॥१४॥
इन्द्रो यातो ऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेद् उ राजा क्षयति चर्षणीनाम् अरान् न नेमिः परि ता बभूव ॥१५॥

१३.७

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥१॥
यः पृथिवीं व्यथमानाम् अदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्याम् अस्तभ्नात् स [जनास इन्द्रः] ॥२॥
यो [ह]त्वाहिम् अरिणात् स[प्त] सिन्धून् यो गा उदाजद् अपधा वलस्य ।
यो अश्मनोर् अन्तर् अग्निं जजान संवृक् समत्सु स [जनास इन्द्रः] ॥३॥
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णम् अधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षम् आदद् अर्यः पुष्टानि स [जनास इन्द्रः] ॥४॥
यं स्मा पृच्छन्ति कुह सेति घोरम् उतेम् आहुर् नैषो अस्तीत्य् एनम् ।
सो अर्यः पुष्टीर् भुज? इवा मिनाति श्रद् अस्मै धत्त स [जनास इ]न्द्रः ॥५॥
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो यो ऽविता सुशिप्रस् सुतसोमस्य स [जनास इन्द्रः] ॥६॥
यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यस् सूर्यं य उषसं जजान यो अपां नेता स [जनास इन्द्रः] ॥७॥
यं क्रन्दसी संयती विह्वयेते परे ऽवर उभया अमित्राः ।
समानं चिद् रथम् आतस्थिवांसा नाना हवेते स [जनास इ]न्द्रः ॥८॥
यस्मान् न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स [जनास इन्द्रः] ॥९॥
यश् शश्वतो मह्य एनो दधानान् अमन्यमानान् शर्वा जघान ।
यश् शर्धते नानुददाति शृध्यां यो दस्यो[र्] हन्ता स [जनास इन्द्रः] ॥१०॥
यश् शम्बरं पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्य् अन्वविन्दत् ।
ओजायमानं यो [अ]हिं जघान दानुं शयानं स [जनास इ]न्द्रः ॥११॥
यश् शम्बरं पर्यतरत् कसीभिर् यो ऽचाकशद् यो ऽपिबत् सुतम् ।
अन्तर् गिरौ यजमानं बहुं जनं यस्मिन्न् आमूर्छत् स [जनास इन्द्रः] ॥१२॥
यस् सप्तरश्मिर् वृषभस् तुविष्मान् अवासृजत् सर्तवे सप्त सिन्धून् ।
यो रौहिणम् अस्फुरद् वज्रबाहुर् द्याम् आरोहन्तं स [जनास इन्द्रः] ॥१३॥
द्यावा चिद् अस्मै पृथिवी नमेते शुष्माच् चिद् अस्य पर्वता भयन्ते ।
यस् सोमपा निचितो वज्रबाहु[र्] यो वज्रहस्तस् स [जनास] इन्द्रः ॥१४॥

यः सुन्वन्तम् अवति यः पचन्तं यः शंसन्तं यः शशमानम् ऊती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥१५॥
यः सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह? प्रियासः सुवीरासो विदथम् आ वदेम ॥१६॥
जातो व्य् अख्यत्? पित्रोर् उपस्थे भुवो न वेद जनितुः परस्य ।
स्तविष्यमाणो नो यो अस्मद्? व्रता देवानां स जनास इन्द्रः ॥१७॥
यः सोमकामो हर्यश्वः सूरिर् यस्माद् रेजन्ते भुवनानि विश्वा ।
यो जघान शम्बरं यश् च शुष्णं य एकवीरः स जनास इन्द्रः ॥१८॥

१३.८

शं न इन्द्राग्नी भवताम् अवोभिः शं न इन्द्रावरुणा रातहव्या ।
शम् इन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥१॥
शं नो भगः शम् उ नः शंसो अस्तु [शं नः पुरंधिः शम् उ सन्तु रायः ।
[शं नः सत्यस्य सुयमस्य शंसः] शं नो अर्यमा पुरुजातो अस्तु ॥२॥
शं नो धाता शम् उ धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥३॥
शं नो अग्निर् ज्योतिरनीको अस्तु शं नो मित्रावरुणाव् अश्विना शम् ।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥४॥
शं नो द्यावापृथिवी पूर्वहूतौ शम् अन्तरिक्षं दृशये नो अस्तु ।
शं [न] ओषधीर् वनिनो भवन्तु शं नो रजसस् पतिर् अस्तु जिष्णुः ॥५॥
शं न इन्द्रो वसुभिर् देवो अस्तु शम् आदित्येभिर् वरुणः सुशंसः ।
शं नो [रुद्रो] रुद्रेभिर् जलाषः शं नस् त्वष्टा ग्नाभिर् इह शृणोतु ॥६॥
शं नः सोमो भवतु ब्रह्म [शं नः] शं नो ग्रावाणः शम् उ सन्तु यज्ञाः ।
शं नः स्वरूणां मितयो भवन्तु [शं नः प्रस्वः शम् व् अस्तु वेदिः ॥७॥
[शं नः सूर्य उरुचक्षा उद् एतु] शं नो भवन्तु प्रदिशश् चतस्रः ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शम् उ सन्त्व् आपः ॥८॥
शं नो अदितिर् भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शम् उ पूषा नो अस्तु शं नो भवित्रं शम् व् अस्तु
वायुः ॥९॥
शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिर् अस्तु शंभुः ॥१०॥
शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शम् उ सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥११॥
शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिर् अस्तु ।
शम् अभिषाचः शम् उ रातिषाचः शं नो दिव्याः पार्थिवाः

शं नो अप्याः ॥१२॥
शं नो अज एकपाद् देवो अस्तु शं नो ऽहिर् बुध्न्यः शं समुद्रः ।
शं नो अपां नपात् पेरुर् अस्तु शं नः पृश्निर् भवतु देवगोपाः ॥१३॥
आदित्या रुद्रा वसवो जुषन्ताम् इदं ब्रह्म क्रियमाणं नवीयः ।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥१४॥
ये देवानाम् ऋत्विजो यज्ञियासो मनोर् यजत्रा अमृता ऋतज्ञाः ।
ते नो रासन्ताम् उरुगायम् अद्य यूयं पात स्वस्तिभिस् सदा नः ॥१५॥
तद् अस्तु मित्रावरुणा तद् अग्ने शं योर् अस्मभ्यम् इदम् अस्तु शस्तम् ।
अशीमहि गाधम् उत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥१६॥

१३.९

अग्नाव् अग्निश् चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्तिपा उ ।
तस्मै जुहोमि हविषा घृतेन मा देवानां यौयुवद् भागधेयम् ॥१॥
पुरो वह जातवेदः पुरस्ताद् अग्ने विद्धि क्रियमाणं यथेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गाम् अश्वं पुरुषं सनेम ॥२॥
तथा त्वम् अग्ने कृणु जातवेदो [अ]नेन विद्वान् हविषा यविष्ठ ।
पिशाचो [अ]स्य यतमो दिदेव यथा सो [अ]स्य परिधिः पताति ॥३॥
यो [अ]स्य दिदेव यतमो जघास यथा सो [अ]स्य परिधिः पताति ।
तथा त्वम् अग्ने कृणु जातवेदो विश्वेभिर् देवैस् सह संविदानः ॥४॥
अक्ष्यौ नि विध्य हृदयं नि विध्य जिह्वां नि तृन्द्धि प्र दतो मृणीहि ।
पिशाचो [अ]स्य [य]तमो जघासाग्ने यविष्ठ प्रति तं मृणीहि ॥५॥
यद् अस्य हृतं यद् धृतं यत् पराभृतम् आत्मनो जग्धम् उत यत् पिशाचैः ।
तद् अग्ने विद्वान् पुनर् आ भर त्वं शरीरे प्राणम् असुम् एरया सं सृजेम ॥६॥
अपां त्वा पाने यतमो ददम्भ्यौदने मन्थे दिव उत लेहे ।
तद् आत्मना प्रजया पिशाचा वि यातयन्ताम् अगदो [अ]यम् अस्तु ॥७॥
क्षीरे त्वा मांसे यतमो ददम्भाकृष्टपच्ये [अ]शने धान्ये वा ।
तद् आत्मना प्रजया पिशाचा वि यातयन्ताम् अगदो [अ]यम् अस्तु ॥८॥
आमे सुपक्वे शबले विपक्वे यो मा पिशाचो [अ]शने ददम्भ ।
तम् इन्द्रो वाजी वज्रेण हन्तु भिनत्तु सोमश् शिरो [अ]स्य धृष्णुः ॥९॥
दिवा त्वा नक्तं यतमो ददम्भ क्रव्याद् यातूनां शयने पिशाचः ।
तद् अग्ने [वि]द्वान् पुनः पुनः? मृणीहि अग्न्? एतं येहि निर्ऋते[र्] उपस्थे ॥१०॥
सोमस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर् बलेन सवितुस् सवेन ।
अग्नेर् होत्रेण प्र णुदे पिशाचं मनोहनं अहि? जातवेदस् सहोभिः ॥११॥
अक्षेमन्? जुषतां इक्षिन्नायुः? यथा जीवेन् अगदो भवासि ॥११॥
पुनस् त्वा प्राणः पुनर् एतु आयुः पुनश् चक्षुः पुनर् एतु श्रोत्रम् ।
अप [नि]र्ऋ[ति]ं नो दुरितानि विश्वा शतं हिमाश् सर्ववीरा मदेम ॥१२॥
पुनर् अस्मै मनो धेहि पुनर् आयुः पुनर् बलम् ।
अपानम् अस्य प्राणं चाग्ने धेहि जीवसे ॥१३॥
चक्षुस् सूर्यं पुनर् धेहि वात प्राणं सम् ईरय ।
शरीरम् अस्य मांसान्य् अग्ने सं भावया त्वम् ॥१४॥
यद् आ भर जातवेदो यद् अस्य यत् पराभृतम् ।
गात्राण्य् अस्य वर्ध[न्ताम् अंशुर् इवा प्या]यताम् अयम् ॥१५॥
[सोमस्येव जातवेदो अंशुर् आ प्यायताम् अयम्] ।
अग्ने विरप्शिनं मेध्यम् अयक्ष्मं कृणु जीवसे ॥१६॥
सं मा सिञ्चन्तु मरुतः [सं पूषा सं बृहस्पतिः ।
[सं मायम् अग्निः सिञ्चतु प्रजया च धनेन च ।

[दीर्घम् आयुः कृणोतु मे] ॥१७॥ ॥का॰ ९॥

१३.१०

वि मुञ्चामि ब्रह्मणा जातवेदसम् अग्निं होतारम् अजरं रथस्पृतम् ।
सर्वा देवानां जनिमानि विद्वान् यथाभागं वहतु [ह]व्यम् अग्निः ॥१॥
ये पुमांसो यातुधाना याश् स्त्रियो यातुधान्यः ।
बलपद् इन्द्रस्य वज्रेणावाचीना नि पद्यन्ताम् ॥२॥
यं शपामो यो नश् शपाति यं द्विष्मो यो द्वेषत् पिशाचः ।
क्रव्यादम् अग्नि[ं] महता वधेन तम् अत्रापि प्र दहाज् जातवेदाः ॥३॥
आ रेभे उरव यथा मत्स्यान्सरा यः कण्वेन संविद् यातुमावान् ।
उलूकयातु[ं] भृमलो यश् च यातुस् त्वं या जुदेपि वयात् सरिस्वाप्त्
¿तेन श्वयाहिर उत मंहिधंहिभिः? ॥४॥
¿यः प्रपाद् रोधनस्यादिदवनं? क्रव्यात् पिशाचः कपिपस् तितुप्सन् ।
उलूकयातुर् भृमलो यश् च यातुस् त्वं [या जुदेपि वयात् सरिस्वाप्त्
¿तेन श्वयाहिर उत मंहिधंहिभिः?] ॥५॥
यः पौरेयैति रथेन क्रव्याद् यातुः पिशुनः ।
पिशुनःपिशुनः पिशाचो वैश्वानरेण संयुजा सूर्येण ॥६॥
¿मो नो वनि मृगयां? यश् च नः कृपि प्रतिभाद् यातुभिः ।
यश् च नश् शकृत्मला हृदस् सरयं त्यायुनस्यताम्? ॥७॥
¿याशातुमातृत्रतमृडतारम्? आलोका अस्मै प्रदिशो भवन्तु ।
सम् एनं तपतां रोदसी उभे तम् अत्रापि प्र दहाज् जातवेदाः ॥८॥
ज्योतिष्मतीस् तपना या[स्] सुरोचनाः प्रत्योषन्तीस् तन्वो यास् ते अग्ने ।
ताभिर् मे वर्माण्य् अभितो नुदस्व मा मा दभन् यातुधाना नृचक्ष[स]ः ॥९॥
आपो देवीः पिशाचानाम् अपि नह्यन्त्व् आस्यन् ।
यथेयमंसमास्मनम्? अनाधृष्य पुनः पताद् ॥१०॥
सदं पुष्पे सदं फले सदन् इन्द्राभिरक्षताम् ।
सदा पिशाचा मीयन्तां येषाम् उप् छेपि कश् चन ॥११॥
ये पतन्तो यातुधाना दिवा नक्तम् उपाचरान् ।
रात्री मा तेभ्यो रक्षतु अह्नात्मानं परि ददे ॥१२॥ ॥का॰ १०॥

१३.११

इमं बध्नामि ते मणिं दीर्घायुत्वाय वर्चसे ।
दर्भं सपत्नजम्भनं द्विषतस् तपनं हृदः ॥१॥
[द्विषतस् तापयन् हृद्य] शत्रूणां तापयन् मनः ।
दुर्हार्दस् सर्वांस् त्वं दर्भ घर्म इवाभीन् सं तापयन् ॥२॥
घर्म इवाभितपन् दर्भ द्विषतो नितोचयन् मणे ।
हृदस् सपत्नानां भिन्द्धीन्द्र इव विरुजन् बलम् ॥३॥
भिन्द्धि दर्भ सपत्नानां हृदयं द्विषतां मणे ।
उद्यन् त्वचम् इव भूम्याश् शिर एषां वि पातय ॥४॥
छिन्द्धि दर्भ सपत्नान् मे छि[न्द्धि] मे पृतनायतः ।
छिन्द्धि मे सर्वा[न्] दुर्हार्दो छिन्द्धि मे द्विषतो मणे ॥५॥
भिन्द्धि दर्भ सपत्नान् मे भिन्द्धि मे पृतनायतः ।
भिन्द्धि मे सर्वा[न्] दुर्हार्दो भिन्द्धि मे द्विषतो मणे ॥६॥
कृन्त दर्भ सपत्नान् मे कृन्त मे पृतनायतः ।
कृन्त मे सर्वा[न्] दुर्हार्दः कृन्त मे द्विषतो मणे ॥७॥
पिंश दर्भ सपत्नान् मे पिंश मे पृतनायतः ।
पिंश मे सर्वान् दुर्हार्दः पिंश मे द्विषतो मणे ॥८॥
विध्य दर्भ सपत्नान् मे विध्य मे पृतनायतः ।
विध्य मे सर्वान् दुर्हार्दो विध्य मे द्विषतो मणे ॥९॥
निक्ष दर्भ सपत्ना[न्] मे निक्ष मे पृतनायतः

निक्ष मे सर्वान् दुर्हार्दो निक्ष मे द्विषतो मणे ॥१०॥
तृन्द्धि दर्भ सपत्नान् मे तृन्द्धि मे पृतनायतः ।
तृन्द्धि मे सर्वान् दुर्हार्दस् तृन्द्धि मे द्विषतो मणे ॥११॥
मढ्धि दर्भ सपत्नान् मे मढ्धि मे पृतनायतः ।
मढ्धि मे सर्वा[न्] दुर्हार्दो मढ्धि मे द्विषतो मणे ॥१२॥
मृण दर्भ सपत्नान् मे मृण मे पृतनायतः ।
मृण मे सर्वान् दुर्हार्दो मृण मे द्विषतो मणे ॥१३॥
मन्थ दर्भ सपत्ना[न्] मे मन्थ मे पृतनायतः ।
मन्थ मे सर्वान् दुर्हार्दो मन्थ मे द्विषतो मणे ॥१४॥
पिण्ड्ढि दर्भ सपत्नान् मे पिण्ड्ढि मे पृतनायतः ।
पिण्ड्ढि मे सर्वान् दुर्हार्दः पिण्ड्ढि मे द्विषतो मणे ॥१५॥
ओष दर्भ सपत्नान् म ओष मे पृतनायतः ।
ओष मे सर्वान् दुर्हार्द ओष मे द्विषतो मणे ॥१६॥
दह दर्भ सपत्ना[न्] मे दह मे पृतनायतः ।
दह मे सर्वान् दुर्हार्दो दह मे द्विषतो मणे ॥१७॥
जहि दर्भ सपत्ना[न्] मे जहि मे पृतनायतः ।
जहि मे सर्वान् दुर्हार्दो जहि मे द्विषतो मणे ॥१८॥
यत् ते दर्भ जरामृत्युश् शतं वर्मसु वर्म ते ।
तेनेमं वर्मिणं? कृत्वा सपत्नान् जहि वीर्यैः ॥१९॥
शतं ते दर्भ वर्माणि सहस्रं वीर्याणि ते ।
तम् अस्मै विश्वे त्वां देवा जरसे भर्तवा अदुः ॥२०॥
त्वाम् इन्द्र देववर्माहुस् त्वां दर्भ ब्रह्मणस् पतिम् ।
त्वाम् इन्द्रस्याहुर् वर्म त्वं राष्ट्राणि रक्षसि ॥२१॥
सपत्नक्षयणं दर्भ द्विषतस् तपनं हृदः ।
मणिं क्षत्रस्य वर्धनं तनूपानं कृणोमि ते ॥२२॥
यत् समुद्रो [अ]भ्यक्रन्दत् पर्जन्यो विद्युता सह ।
ततो हिरण्ययो बिन्दुस् ततो दर्भो अजायत ॥२३॥ ॥का॰ ११॥

१३.१२

अन्तर्हितं मे बृहद् अन्तरिक्षम् अन्तर्हिताः पर्वता अश्मयो मे ।
महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि ॥१॥
तपस्व मातरिश्वा मन् अथवा दिवं यत् पृथिवीं च कृष्महे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥२॥
अन्तर्हितं मे नाम प्रस्तितम् अन्तर्हितः परमेष्ठी प्रजापतिः ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥३॥
अन्तर्हितस् सर्वराजो विराज् मे अन्तर्हितः पुरुषो मेध्यो मे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥४॥
अन्तर्हिता मे यज उर्वीस् सधीचीर् अन्तर्हितास् सत्या अरातता मे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥५॥
[अन्तर्हिता] म ऋषयः प्रचेतसो अन्तर्हितम् सूर्यो मातरिश्वा ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥६॥
अन्तर्हिता नद्यस् स्यन्दमाना अन्तर्हिता ओषधीः पुष्पिणीर् मे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥७॥
अन्तर्हिताः पशवः कक्षा मे अन्तर्हितं [मे] वयो यत् पतत्रि ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥८॥
अन्तर्हिता म इषवो ब्राह्मणानाम् अन्तर्हिता वनस्पतयो मे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥९॥
अन्तर्हिता देवतल्पाः पुरो म [अ]न्तर्हिता जगती छन्दसा मे ।

[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥१०॥
अन्तर्हिता अग्नयो धृष्ण्या मे अन्तर्हिता ऋतव आर्तवा मे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥११॥
अन्तर्हिता समुद्रा द्वादश मे [अ]न्तर्हिता उपती तारका मे ।
[महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि] ॥१२॥
अन्तर्हिता मे प्रदिशश् चतस्रो अन्तर्हितं भूतं हव्यं च देवम् ।
महिषान् राष्ट्रे अपचर एष प्रत्यग् एतान् प्रतिसरेण हन्मि ॥१३॥ ॥का॰ १२॥

१३.१३

हन्मि ते ऽहं कृतं हविर् यो मे घोरम् अचीकृतः ।
अपाञ्चौ त उभौ बाहू अपि नह्याम्य् आस्यम् ॥१॥
अपि नह्यामि ते बाहू अपि नह्याम्य् आस्यम् ।
अग्नेर् देवस्य मन्युना तेन ते ऽवधिषं हविर् यो मे घोरम् अचीकृतः ॥२॥
उद्दितश् शतयोजनम् इन्द्रो वर्तयते रथम् ।
सायकं क्षुरवन्तं मानिमदेजाताति? जम्भय[न्] ॥३॥
तृढा शयन्तिम् य भायन् हता उदरे सर्पिणः ।
पृच्छसि ह्यत्रपमस्त्वापिण्डमदन्? युव ॥४॥
पापक पापकृत्क किं मे सखायम् मा तुरः ।
ममासि शय्यायतम्[...................] रपः ॥५॥
यस्यौषधयः प्रसर्पथाङ्गमङ्गं परुष्परुः ।
ततस्माद् यक्ष्मं वि बाधध्वम् उग्रो मध्यमशीर् इव ॥६॥
अन्या वो अन्याम् अवत्व् अन्यान्यस्या उपावत ।
ओषधयस् संविदाना इदं मे प्र तिरता वचः ॥७॥
अवपतन्तीर् अवदन् दिव ओषधयस् परि ।
यं जीवम् अश्नवामहै न स रिष्याति पूरुषः ॥८॥
या ओषधयस् सोमराज्ञी[र्] बह्वीश् शतविचक्षणाः ।
बृहस्पतिप्रसूतास् ता नो मुञ्चन्त्व् अंहसः ॥९॥
जीवलां नघारिषाम् आ ते बध्नाम्य् ओषधिम् ।
या त्वायुर् उपाहराद् अप रक्षांसि चातयात् ॥१०॥ ॥का॰ १३॥

१३.१४

किम् इन्द्रस्य परिहितं किम् अग्नेः किं विष्णोस् त्वष्टुर् वरुणस्य ।
वासो बृहस्पतेर् उत सोमस्य राज्ञः किं यमस्य मरुतो पर्जन्यु ॥१॥
धातु चन्द्रस्य किं वायोर् वाजिनां वृजनं महत् ।
किं पूषा ब्रह्मणस् पतिर् विश्वे देवाश् च बिभ्रति ॥२॥
किं देवानां परिधानं समानं यस्मिन्न् एषां साम्राट्? संबभूव ।
क रात्री नि विशते काहः केतुम् अभ्रं भवति यत् समेति क्वेति च ॥३॥
कतमेनापो दिवम् उद् वहन्ति कस्य तद् अश्नैति मनेनेतां? ।
वातस्य त्वा विद्युतो अस्तनयन्न् उरपां? पृच्छाम्य् एवा न्य् अग्ने ॥४॥
पृच्छामि त्वा पृश्नीं रोहिणीं च वत्सं पृच्छामि सहमातरं ते ।
इन्द्रं त्वा नि पृच्छामि साक्षात् सभानां च सभापतिम् ॥५॥
को वयसाम् अधिपान् नामानि कः पशूनां कस् सर्पाणाम् ।
देवजना य आसन् को ऽस्य जन्तोर् अभवत्? आ ब्रूहि यत् तत् ॥६॥
कति रोहा[न्] स्वर आ रोहयन्ति वेशी रोहितो दिवम् आरुरोह ।
राष्ट्रभृतः क्षत्रभृतो वसुभृतो वसुदानयो? वसूयवः ॥७॥
कश् चित् तावान् वि क्रामते महित्वा को रक्षति को वहति प्रसादम् ।
पुरुषं त्वा नि पृच्छामि साक्षान् मृत्योर् अङ्गानि कति तानि वेत्थ ॥८॥
अहं पियङ्गदकश्? वर्षणीनाम् इन्द्रो यथं महिमा स्पर्धमानाः ।
येन वृत्रं मघवा [सं पिपि]षे तद् नः प्र ब्रूहि यद् इदं प्रवेत्थ ॥९॥

कः पर्वतानाम् अदधा[द्] नामानि को वनस्प[ती]नाम् अदधा[द्]
ओषधीनाम् ।
पृच्छामि त्वा भुवनस्य नाभिं शं त्वा पृच्छामि कतमानि साक्षात् ॥१०॥
देवतल्पा देवकोशाः केह तन् नः प्र ब्रूहि यद् इदं प्रवेत्थ ।
पृच्छामि त्वा गर्भर किं तेभ्यो अग्निर् हव्यं वहतु प्रजानन् ।
[अ]मृतं मर्त्यैर् अमृतो मर्त्येभ्यः ॥११॥
स्वर्गेनैकस् तपसा [सा]कहीन्द्र अङ्गानि पृङ्क्तान् पुरु[ष]स्य चाङ्गुः ।
स प्राणद् एति तपसा पुनस् सहज्योतिर् एति क स्वोति? ॥१२॥
[अ]नपतिं मधुपतिं मधुपूर्णं मधुपतिम् ।
देवांस् त्वां सर्वान् पृच्छाम्य् अद्भुता[व् इ च] ते कति ॥१३॥
को अन्तरिक्षात् प्रतिपश्यत इदं यस्माद् अग्र इन्द्रियं संबभूव ।
महत् सदः कस्माद् अभयं वि भाति कस्येकृतस्यात्यामकालो-
हितं? परायत केह ॥१४॥
इत्थम् एके [अर्वाञ्चः] प्र वजन्तीत्यम् एके दक्षिणाः प्रत्यञ्चः ।
उदञ्चः प्राञ्चो [अ]भि वृजन्त्य् एके तेषां सर्वेषाम् इह संगतिस् साकम् ॥१५॥
स एको भूमिं चरति प्रजानन् । मरीचिर् आसीत् सा मनसस् सम्
अभवत् । सा प्राधीत सा गर्भम् आ धत्त । स गर्भो वर्धमान स वृद्धो
ऽवर्धीद् आयेति । तस्यै प्रजापतिर् वृद्धो[ऽति] स्वाधिष्ठानाद् एति
स्वाधिचरणाच् चैति ॥१६॥
प्रजापति[स्] सयुजे कपाले विजिह्वातान्मतां? मन्वा यति महान्तं
लोकम् अभितप्यमानः ।
सोऽप्? आतस्य आतस्य द्यावापृथिवी पार्श्वे अस्तां समुद्रो कुक्षी
सूर्याचन्द्रमसाव् अक्ष्यौ विराट् शिरः । तस्माज् जातास् सर्वे
पाप्मानो वि जायन्ते य एवं वेद ॥१७॥ ॥का॰ १४॥ ॥अनु॰ १॥

इत्यथर्ववेदे पैप्पलादशाखायां त्रयोदशः काण्डः समाप्तः ॥

१४.१

इन्द्रो [illegible] ।
[illegible] ।
ता न आपो राजसूया भवन्तु ॥१॥
हिरण्यवर्णा [illegible] ।
[illegible] ता न आपो राजसूया भवन्तु ॥२॥
[illegible] ।
[illegible] ता न आपो राजसूया भवन्तु ॥३॥
[illegible] ।
[illegible] ता न आपो राजसूया भवन्तु ॥४॥
[illegible] ।
[illegible] ता न आपो राजसूया भवन्तु] ॥५॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥६॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥७॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥८॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥९॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥१०॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥११॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥१२॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥१३॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥१४॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥१५॥
[illegible] ।
[illegible] [ता न आपो राजसूया भवन्तु] ॥१६॥
[illegible] ।
[illegible] ता न आपो राजसूया भवन्तु ॥१७॥
[illegible] ।
[illegible] ॥१८॥
[illegible] ।
[illegible] ॥१९॥
[illegible] ।
[illegible] ॥२०॥

॥का० १॥

१४.२

[illegible] ।
[illegible] ॥१॥
[illegible] ।

उतास्य पश्यतेमं नीलग्रीवं विलोहितम् ॥२॥
एष एतु अधीवक्ता रुद्रो जलाषभेषजी ।
वि[ति]ऽक्षमम् अनीनशद् आ यातुधानो यश् एतु ते ॥३॥
नमस् ते भवभामाय नमस् ते भवमन्यवे ।
नमस् ते बाहुभ्याम् उतोत त इषवे नमः ॥४॥
याम् इषुं गिरिशन्त हस्ते बिभर्ष्य् अस्तवे ।
शिवां गिरित्र तां कृणु मा हिंसीः पुरुषं मम ॥५॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नस् सर्वम् इज् जगद् अयक्ष्मं सुमना असत् ॥६॥
या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो मृड जीवसे ॥७॥
या ते रुद्र शिवा तनूर् अघोरापापकाशिनी ।
तया नस् तन्वा शंतमया गिरिशन्ताभि चाकशीहि ॥८॥
असौ यस् ताम्रो अरुण उत बभ्रुर् विलोहितः ।
ये चेमे अभितो रुद्रा दिक्षु श्रितास् सहस्रशो ऽवैषां हेड ईमहे ॥९॥
अदृशन् त्वावरोहन्तं नीलग्रीवं विलोहितम् ।
उत त्वा गोपा अदृशन्न् उत त्वोदहार्यः ।
उतो त्वा विश्वा भूतानि तस्मै दृष्टाय ते नमः ॥१०॥
नमो अस्तु नीलशिखण्डाय सहस्राक्षाय वाजिने ।
अथो ये अस्य सत्वानस् तेभ्यो ऽहम् अकरं नमः ॥११॥
नमांसि त आयुधायानाततायि धृष्णवे ।
उभाभ्याम् अकरं नमो बाहुभ्यां तव धन्वने ॥१२॥
प्र मुञ्च धन्वनस् त्वम् उभयोर् आर्त्न्योर् ज्याम् ।
याश् च ते हस्त इषवः परा ता भगवो वप ॥१३॥
अवतत्य धनुष् त्वं सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नस् शम्भुर् आ चर ॥१४॥
विज्यं धनुश् शिखण्डिनो विशल्यो बाणवां उत ।
अनेशन्न् अस्येषव शिवो अस्य निषङ्गधिः ॥१५॥
परि ते धन्वनो हेतिर् अस्मान् वृणक्तु विश्वतः ।
अथो य इषुधिस् तवारे अस्मिन् नि धेहि तम् ॥१६॥
या ते हेतिर् मीढुष्टम हस्ते बभूव ते धनुः ।
तया त्व विश्वतो ऽस्मान् अयक्ष्मया परि भुज ॥१७॥ ॥का० १॥

१४.३

सुपार्श्वा कामदुघा न आगन् शतौदना पयसा पिन्वमाना ।
ऊर्जं दुहानानपस्फुरन्ती यजमानस्य प्रतिरन्त्य् आयुः ॥१॥
गृभ्णामि यथाम् उशतीं स्वक्त्याम् ऊर्जस्वतीम् अनमीवां स्योनाम् ।
विश्वो लोको मम देवेष्व् अस्तु ॥२॥
शतौदना कामदुघा ह्य् एषा नैनां हिंसीद् अश्विना अहंयावः ।
अन्य एतु देवां अपि गच्छतु दिशः ॥३॥
आ रभस्व प्रथमा येभ्यं ददाः शतौदनां शतम् आ च मा नो रुच ? ।
समोषिय ? रश्मिना पर्वतेन स्वर्गं लोकम् अधि रोहयैनम् ॥४॥
; भूम्याम् ह एतां विश्वधा नि कृन्तं अपायोज्य चरम् इरया समृञ्जे ।
; मां विराजो दुहितरया सम्मन् कामंकामं यजमानाय दुहाम् ? ॥५॥
यद्याप्र विशसन मामि मंशान कृणुष्व म एनाम् अर्चयां पृथक् ।
अयं देवा मानुषी या पराभूच् छतौदना पुरूरूपा सपत्नी ॥६॥

[illegible] ।
[illegible] शतौदनां [illegible]
[illegible] ॥७॥
[illegible] ।
[illegible] ॥८॥
[illegible] ।
[illegible]
[illegible] ॥९॥
[illegible] ।
[illegible] ॥१०॥
[illegible] ।
[illegible] स्वर्गं लोकम् आ [illegible] ॥११॥
शतौदनां [illegible] ।
[illegible] ॥१२॥
शतौदना [illegible] ।
[illegible] ॥१३॥
शतौदना [illegible] ।
[illegible] ॥१४॥
[illegible] ।
[illegible] ॥१५॥
[illegible] ।
[illegible] ॥१६॥
[illegible] ।
[illegible] ॥१७॥
[illegible] ।
[illegible] ॥१८॥
[illegible] ।
[illegible] ॥१९॥
[illegible] ।
	प्रिया[श्] श्रुतस्य भूयास्मायुष्मन्तस् सुमेधसः ॥१२॥ ऋ॰ ६	

१९.१३३

शौ ८.१०.१-११	विराड् वा इदम् अग्रे ऽजायत ।	● ● इदम् ...
	तस्या जातायाः सर्वम् अबिभेद् इ[य]म् एवेदं भविष्यति न वयम् इति ॥१॥	● ● ● बिभेद् ...
	[सोद् अक्रामत् सा गार्हपत्ये न्य् अक्रामत् ।	
	[गृहमेधी गृहपतिर् भवति य एवं वेद ॥२॥	
	[सोद् अक्रामत् साहवनीये न्य् अक्रामत् ।	
	[यन्त्य् अस्य देवा देवहूतिं प्रियो देवानां भवति य एवं वेद ॥३॥]	
	सोद् अक्रामत् सा दक्षिणाग्नौ न्य् अक्रामत् ।	
	यज्ञर्तो वासतेयो भवति य एवं वेद ॥४॥	यज्ञर्तो वासतेयो ...
	[सोद् अक्रामत्] सा सभायां [न्य् अक्रामत्] ।	● सभायाम्
	[यन्त्य्] अस्य सभां सभ्यो भवति [य एवं वेद] ॥५॥	यन्त्य ● सभ्यो
	[सोद् अक्रामत्] सा समितौ न्य् अक्रामत् ।	
	[यन्त्य् अस्य समितिं सामित्यो भवति य एवं वेद ॥६॥]	
	[सोद् अक्रामत्] सामन्त्रणे न्य् अक्रामत् ।	
	यन्त्य् अस्यामन्त्रणम् आमन्त्रणीयो भवति य एवं वेद ॥७॥	यन्त्यो आमन्त्रणीयो भवति ● ● ●
	सोद् अक्रामत् सान्तरिक्षे चतुर्धा विक्रान्तातिष्ठत् ।	... विक्रान्तातिष्ठत्
	तां देवमनुष्या अब्रुवन् इयम् एव तद् वेद यद् उभय उपजीवेमेमाम् उप ह्वयामहा इ[ति] ॥८॥	तन् ● अब्रुवन् इयम् एव तद् वेद यद् उभय उपजीवेमेमाम् ● ह्वयामहि
	ताम् उपाह्वयन्त ऊर्ज एहि स्वध एहि सूनृत एहीरावत्य् एहीति ॥९॥	● 'ह्वयन्त ऊर्जेहि स्वधेहि सूनृतेहि इरावतीहि
	तस्या [इ]न्द्रो वत्स आसीद् गायत्र्य् अभिधान्य् अभ्रम् ऊधः ।	● ● वत्सासीद् गायत्र्य् अभिधान्य् अभ्र ऊधः
	तस्या बृहच् च र[थ]न्तरं च द्वौ स्तनाव् आस्तां यज्ञायज्ञियं च वामदेव्यं च द्वौ ॥१०॥	... द्वौ स्तनावास्तां यज्ञायज्ञिय ● ●
	ओषधीर् एव रथन्तरं देवा अदुह्रन् व्यचो बृहत् ।	● ये ● ● दुह्र ● बृहत्
शौ नास्ति	अपो वामदेव्यं यज्ञं यज्ञायज्ञियम् ॥११॥	... 'यज्ञं
	ये ते वै विराजः कामदुघास् स्तनाः कामंकामं यजमानं दोहयन् ॥१२॥ ऋ॰ ७	... कामदुघास्तना ... दुह्र॰

शौ ८.१०.[illegible]	१९.१३४	
	[सोद् अक्रामत् । सा] वनस्पतीन् आगच्छत् । तां वनस्पतयो ऽघ्नत । सा संवत्सरे सम् अभवत् ।	
	तस्मात् संवत्सरे वनस्पतीनां वृक्णम् अपि रोहति वृश्चते ऽस्याप्रियो भ्रातृव्यो [य एवं वेद ॥१॥	● ● ● वृक्णम् अपि रोहतु वनस्पतीनाम् भ्रातृव्यः
	[सोद् अक्रामत् ।] सा पितॄन् आगच्छत् । तां पितरो ऽघ्नत । सा मासे सम् अभवत् ।	● पितृन् आगच्छत्...

तस्मान् मासि पितृभ्यो ददाति स्वधावान् पितृषु भवति [प्र] पितृयाणं पन्थां जानाति य [एवं वेद] ॥२॥
[सोद् अक्रामत् ।] सा देवान् आगच्छत् । तां देवा [अ]घ्नत । सार्धमासे सम् अभवत् ।
तस्माद् अर्धमासे देवेभ्यो जुहोति जुहोत्य् अग्निहोत्रं प्र देवयानं पन्थां जानाति [य एवं वेद] ॥३॥
[सोद् अक्रामत् ।] सा मनुष्यान् आगच्छत् । तां मनुष्या [अ]घ्नत । सा सद्यस् सम् अभवत् ।
तस्माद् उभयद्युर् मनुष्याणा[म्] उप हरन्त्य् उपास्य [गृहे] भवन्ति य [एवं वेद] ॥४॥ ॥का° ८॥

१६.१२५

शौ ८.१०.११-१५ [सोद् अक्रामत् ।] सासुरान् आगच्छत् । ताम् असुरा उपाह्वयन्त माय एहीति ।
तस्या विरोचनः प्राह्रादिर् वत्स आसीद् अयस्पात्रं पात्रम् ।
तां द्विमूर्धार्त्व्यो ऽधोक् तां मायाम् अधोक् ।
तां मायाम् असुरा उप जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥१॥
शौ ४०-४१ [सोद् अक्रामत् ।] सा मनुष्यान् आगच्छत् । तां मनुष्या उपाह्वयन्तेरावत्य् एहीति ।
तस्या मनुर् वैवस्वतो वत्स आसीत् पृथिवीपात्रं पात्रम् ।
तां पृथी वैन्यो ऽधोक् तां कृषिं च सस्यं चाधोक् ।
तां कृषिं च सस्यं च मनुष्या उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥२॥
शौ ४४-४६ [सोद् अक्रामत् ।] सा पितॄन् आगच्छत् । तां पितर उपाह्वयन्त स्वध एहीति ।
तस्या यमो वत्स आसीद् रजतपात्रं पात्रम् ।
ताम् अन्तको मार्त्यवो ऽधोक् तां स्वधाम् अधोक् ।
तां स्वधां पितर उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥३॥
शौ ४८-५१ [सोद् अक्रामत् ।] सा देवान् आगच्छत् । तां देवा उपाह्वयन्तोर्ज एहीति ।
तस्या इन्द्रो वत्स आसीद् चमसपात्रं पात्रम् ।
तां सविताधोक् ताम् ऊर्जाम् [अधोक् ।
[ताम् ऊर्जां] देवा उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥४॥
शौ ५५-५७ [सोद् अक्रामत् ।] सा सप्तऋषीन् आगच्छत् । तां सप्तऋषय उपाह्वयन्त ब्रह्मण्वत्य् एहीति ।
तस्याम् सोमो वत्स आसीच् छन्दःपात्रं पात्रम् ।
तां बृहस्पतिर् आ[ङ्गिर]सो ऽधोक् तां ब्रह्म च तपश् चाधोक् ।
तद् ब्रह्म च तपश् च सप्तऋषय उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥५॥
[सोद् अक्रामत् ।] सा गन्धर्वाप्सरस आगच्छत् । तां गन्धर्वाप्सरस उपाह्वयन्त पुण्यगन्ध [ए]हीति ।
तस्याः कुबेरो वैश्रवणो वत्स आसीद् आमपात्रं पात्रम् ।
तां रजतनाभिः काबेरको ऽधोक् तां पुण्यगन्धम् अधोक् ।
तं पुण्यगन्धं गन्धर्वाप्सरस उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद ॥६॥
शौ ५२-५५ [सोद् अक्रामत् ।] सा पुण्यजनान् आगच्छत् । तां पुण्यजना उपाह्वयन्[त] तिरोध एहीति ।
तस्या चित्ररथस् सौर्यवर्चसो वत्स आसीत् पुष्करपर्णपात्रं पात्रम् ।
तां वसुरुचिस् सौर्यवर्चसो ऽधोक् तां तिरोधाम् अधोक् ।
तां तिरोधां पुण्यजना उप [जीवन्त्य् उपजीवनीयो भवति य एवं वेद] ॥७॥

शौ ८.१०.२२-२५ सोद् अक्रामत् । सा सर्पान् आगच्छत् । तां सर्पा उपाह्वयन्त विषवत्य् एहीति ।
तस्यास् तक्षको वैशालेयो वत्स आसीद् अलाबुपात्रं [पात्रम्] ।
तं धृतराष्ट्र ऐरावतो ऽधोक् तां विषम् अधोक् ।
तद् विषं सर्पा उप जीवन्त्य् [उपजीवनीयो] भवति य एवं वेद ॥८॥
शौ १४-१० तस्माद् यस्या अलाबुनाभिषिञ्चेत् [प्रत्याहन्यात् ।
[न च प्रत्याहन्यात्] मनसा त्वा प्रत्याहन्मीति प्रत्याहन्या[त्] ॥९॥
यत् प्रत्याहन्ति विषं प्रत्याहन्ति तम् अनुविषिच्यते विषम् ।
अस्याप्रियं भ्रातृव्यं हन्ति य एवं वेद ॥१०॥ ॥का° १०॥ ॥अनु° १९॥

१६.१२६

शौ १०.९.१ अघायताम् अपि नह्या मुखानि सपत्नेषु वज्रम् अर्पयैतम् ।
इन्द्रेण दत्ता प्रथमा शतौदना भ्रातृव्यघ्नी यजमानाय गातुः ॥१॥
शौ २ वेदिस् ते चर्म भवतु बर्हिर् लोमानि यानि ते ।
एषा त्वा रशनाग्रभीद् ग्रावा त्वैषो अधि नृत्यतु ॥२॥
शौ ३ बालास् ते प्रोक्षणी[स्] सन्तु जिह्वा सं मार्ष्ट्व् अघ्न्ये ।
शुद्धा त्वं यज्ञिया भूत्वा दिवं प्रेहि शतौदने ॥३॥
शौ ४ यश् शतौदनां पचति कामप्रेण स [क]ल्पते ।
प्रीता ह्य् अस्य ऋत्विजस् सर्वे यन्तु यथायथम् ॥४॥
शौ ७ ये ते देवि शमितारः पक्तारो ये च ते जनाः ।
ते त्वा सर्वे गोप्स्यन्ति मैभ्यो भैषीश् शतौदने ॥५॥
शौ ५[a,b] स स्वर्गम् आ रोहतु यत्रादस् त्रिदिवं दिवः ।
शौ ६[c,d] हिरण्यज्योतिषं कृत्वा यो ददातु शतौदनाम् ॥६॥
शौ ६[a] स तांल् लोकान् सम् आप्नोति येषु देवास् समासते ।
शौ ५[c,d] अपूपनाभिं कृत्वा यो द[दाति शतौद]नाम् ॥७॥
शौ ८ वसवस् त्वा दक्षिणत उत्तरान् मरुतस् त्वा ।
आदित्याः पश्चाद् ! गोप्स्यन्ति साग्निष्टोमम् अति द्रव ॥८॥
शौ ९ गन्धर्वाप्सरसो देवा यज्ञाङ्गिरसश् च ये ।
ते त्वा सर्वे गोप्स्यन्ति सातिरात्रम् अति द्रव ॥९॥
शौ १० अन्तरिक्षं दिवं भूमिम् आदित्या[न्] मरुतो दिशः ।
लोकां[श्] च सर्वान् आप्नोति यो ददातु शतौदनाम् ॥१०॥ ॥का° १॥

१६.१२७

शौ १०.९.११ घृतं प्रोक्षन्ती सुभगा देवान् देवी गमिष्यति ।
पक्तारम् अघ्न्ये मा हिंसीर् दिवं प्रेहि शतौदने ॥१॥
शौ १२ पितरो दिविषदो ऽन्तरिक्षसदश् च ये ये चेमे भूम्या[म्] अधि ।
तेभ्यस् त्वं धुक्ष्व सर्वदा क्षीरं सर्पिर् अथो मधु ॥२॥
शौ १३-१४ यत् ते शिरो यत् ते मुखं यौ कर्णौ ये च ते हनू ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु ॥३॥
यत् ते मुखं या जिह्वा ये दन्ता ये च ते हनू ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥४॥
शौ १५ यत् ते क्लोमा य[द्] धृदयं पुरीतत् सहकण्ठिका ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥५॥
शौ १६ यत् ते [य]कृद् ये मतस्ने या[न्य् आ]न्त्राणि याश् च ते गुदाः ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥६॥
१७ शौकेषु भूमिः प्लाशिः यत् ते प्लाशिर् यो वनिष्ठुर् यौ [कु]क्षी यच् चोदरम् ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥७॥
शौ १८ यत् ते मज्जा यान्य् अस्थीनि यन् मांसं यच् च लोहितम् ।

[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥८॥
शौ १९ यौ ते बाहू यौ ते अंसौ ये दोषणी या च ते ककुत् ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥९॥
शौ २० ये ते स्कन्धा या ग्रीवा याः पृष्टीर् याश् च पर्शवः ।
[आमि° दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥१०॥ ॥का° १॥

१६.१२८

शौ १०.९.२१ यौ त ऊरू अष्ठीवन्तौ ये श्रोणी या च ते भसत् ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥१॥
शौ २२ यत् ते पुच्छं ये [ते] बाला [य]द् ऊधो ये च ते स्तनाः ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥२॥
शौ २३ यास् ते जङ्घा याः कुष्ठिका ऋच्छरा ये च ते शफाः ।
[आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु] ॥३॥
शौ २४ यत् ते चर्म शतौदने यानि लोमान्य् अघ्न्ये ।
आमिक्षां दुह्रतां दात्रे क्षीरं सर्पिर् अथो मधु ॥४॥
अयं ते शुक्लमिक्षाम् अयं सर्पिर् अथो मधु ।
अयं ते सर्वकान् दुहां दधि शतौदने ॥५॥
शौ २५ क्रोडौ ते स्तां पुरोडाशाव् आज्येनाभिघारितौ ।
तौ पक्षौ देवि कृत्वा सा दातारं दिवं वह ॥६॥
शौ २६ उलूखले मुसले यश् च चर्मणि यो वा शूर्पे तण्डुलः कणः ।
यं वा वातो मातरिश्वा पवमानो ममाथाग्निष् टद् धोता सुहुतं कृणोतु ॥७॥
शौ इमा अपो मधुमतीर् घृतश्चुतो ब्रह्मणां हस्तेषु प्रपृथक् सादयामि ।
यत्काम इदम् अभिषिञ्चामि वो ऽहं तन् मो [सर्वं सं पद्यतां] वयं स्याम पतयो रयीणाम् ॥८॥ ॥का° १॥

१६.१२९

शौ ९.७.१ प्रजापतिश् च परमेष्ठी च शृङ्गे इन्द्रश् शिरो अग्निर् ललाटं [यमः कृकाटम्] ॥१॥
शौ २ सोमो राजा मस्तिष्को द्यौर् उत्तरहनुः पृथिव्य् अधर[हनुः] ॥२॥
शौ ३[a] अग्निर् आस्यं विद्युज् जिह्वा मरुतो दन्ताः पवमानः प्राणः ॥३॥
शौ ४ विश्वं वायुस् स्वर्गो लोकः कृष्णद्रं विधरणी निवेष्यः ॥४॥
शौ ३[b] देवानी[ः] ग्रीवाः कृत्तिकास् स्कन्धा घर्मो वहः ॥५॥
शौ ५[c] श्येनः क्रोडो ऽन्तरिक्षं पाजस्यम् ॥६॥
मित्रश् च वरुणश् चांसौ त्वष्टा चार्यमा च दोषणी ॥७॥
शौ ७,५[b] महादेवो बाहू बृहस्पतिः ककुद् बृहतीः कीकसाः ॥८॥
शौ ६ देवानां पत्नीः पृष्टय उपसदः पर्शवः ॥९॥
शौ ९ ब्रह्म च क्षत्रं च श्रोणी बलम् ऊरू ॥१०॥
शौ १० धाता च सविता चाष्ठीवन्तौ जङ्घा गन्धर्वा [अ]प्सरसः कुष्ठिका अदितिश् शफाः ॥११॥
शौ ११ चेतो हृदयं [य]कृन् मेधा ! व्रतम् पुरीतत् ॥१२॥
शौ १२ क्षुत् कुक्षिर् इरा वनिष्ठुः पर्वताः प्लाशयः ॥१३॥
शौ १३ देवजना गुदा मनुष्या [आ]न्त्राण्य् अत्रा उदरम् ॥१४॥
शौ १४ इतरजना ऊबध्यं रक्षांसि लोहितम् ॥१५॥
शौ १७ क्रोधो वृक्को मन्युर् आण्डौ प्रजा शेपः ॥१६॥
शौ १४ समुद्रो वस्तिर् नदी सूत्री स्तनयित्नुर् ऊधो वर्षस्य पतय[स्] स्तना[ः] ॥१७॥
शौ १५ विश्वव्यचास् चर्मौषधयो रोमाणि नक्षत्राणि रूपम् ॥१८॥
शौ १८ मज्जं पीयो मज्जा निधनम् ॥१९॥
शौ १६ [ईशानो] भूयाः प्रजायाः पशूनां भवति य एवं वेद ॥२०॥

शौ २० इन्द्रः प्राङ् तिष्ठन् दक्षिणा तिष्ठन् यमः ॥२१॥
शौ २१ प्रत्यङ् तिष्ठन् धातोदङ् तिष्ठन् सविता ॥२२॥
शौ २२ तृणानि प्राप्तस् सोमो राजा ॥२३॥
शौ २३ मित्र ईक्षमाण आवृत्त आनन्दः ॥२४॥
शौ २४ युज्यमानो वैश्वानरो युक्तः प्रजापतिर् विमुक्तस् सर्वम् ॥२५॥
शौ २५ एतद् वै विश्वरूपम् ॥२६॥
शौ २६ उपैनं रूपवन्तः पशवस् तिष्ठन्ति य एवं वेद ॥२७॥ ॥का° १०॥ ॥अनु° २०॥

१६.१४०

शौ १२.५.१-६ श्रमेण तपसा सृष्टा ब्रह्मणा वित्त ऋते श्रिता ॥१॥
सत्येनावृता श्रिया प्रावृता यशसा परीवृता ॥२॥
स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता यज्ञे प्रतिष्ठिता लोको निधनम् ॥३॥
छन्दांसि रूपम् अङ्गिरसस् संताप्य ब्रह्म पदवायं ब्राह्मणो ऽधिपतिः ॥४॥
ताम् आददानस्य ब्रह्मगवीं जिनतो ब्राह्मणं क्षत्रियस्य ॥५॥
अप क्रामतु सूनृता वीर्यं पुण्या लक्ष्मीः ॥६॥ ॥का° १॥

१६.१४१

शौ १२.५.७-११ ओजश् च तेजश् च सहश् च बलं च वाक् चेन्द्रियं च श्रीश् च धर्मश् च ॥१॥
ब्रह्म च क्षत्रं च राष्ट्रं च विशश् च त्विषिश् च यशश् च वर्चश् च द्रविणं च ॥२॥
आयुश् च [रूपं च नाम च कीर्तिश् च प्राणश् चापानश् च चक्षुश् च] श्रोत्रं च ॥३॥
[पयश् च रसश् चान्नं चान्नाद्यं च ऋतं च सत्यं चेष्टं च पूर्तं च प्रजा च पशवश् च] ॥४॥
तानि सर्वाण्य् अप क्रामन्ति [ब्रह्मगवीम् आददानस्य जिनतो ब्राह्मणं] क्षत्रियस्य ॥५॥ ॥का° १॥

१६.१४२

शौ १२.५.१२ पूर्वार्धम् ब्रह्मगव्य् अपविद्या हृन्दा पूर्वत्स्य ! आवृता ॥१॥
शौ १३ सर्वाण्य् अस्यां घोराणि सर्वे च मृत्यवः ॥२॥
शौ १४ सर्वे पुरुषवधा[ः] ॥३॥
शौ १५ सा ब्रह्मज्यं ब्रह्मगव्य् आदीयमाना मृत्योः पड्वीश आ द्यति ॥४॥
शौ १६ मेनिश् शतवधा हि सा ब्रह्मज्यस्य क्षितिर् हि सा ॥५॥
शौ १७[a] महादेवो मरिष्यमाणा ॥६॥
शौ १८[a],१९[a],२०[a] वज्रो धावन्ती हेतिश् शफा[न्] निकृन्तन्ती क्षुरपविर् ईक्षमाणा ॥७॥
शौ २१[b],२०[b] मृत्युर् हिङ्कृण्वती वाश्यमानानु स्फूर्जयति ब्रह्मगवी ब्रह्मज्यम् ॥८॥ ॥का° १॥

१६.१४३

शौ १२.५.२३[b]-२७ उग्रो देवः पुच्छं पर्यस्यन्ती ॥१॥
सर्वज्यानिः कर्णौ वरीवर्जयन्ती राजयक्ष्मो मेहन्ती ॥२॥
मेनिर् दुह्यमाना शीर्षक्तिर् दुग्धा ॥३॥
सेदिर् उपतिष्ठन्ती मिथोयोधः परामृष्टा ॥४॥
शरव्या मुखे ऽपिनह्यमान ऋतिर् हन्यमाना ॥५॥
अघा हितायविषा स्वयन्ती तमो निपतिता ॥६॥
अनुगच्छन्ती प्राणान् उप दासयति ब्रह्मगवी ब्रह्मज्यस्य ॥७॥ ॥का° १॥

१६.१४४

ईर्ष्ये [illegible] ॥१॥
[illegible] ॥२॥
[illegible] ॥३॥
[illegible] ॥४॥
[illegible] ॥५॥
[illegible] ॥६॥
[illegible] ॥७॥
[illegible] ॥८॥
[illegible] ॥९॥
[illegible] ब्रह्मचारी [illegible]
[illegible] ॥१०॥

१६.१४५

[illegible] ॥१॥
[illegible] ॥२॥
[अ]हि॰ [illegible] ब्रह्मचारी [illegible] ॥३॥
[illegible] ॥४॥
[illegible] ॥५॥
[illegible] ब्रह्मचारी [illegible]
[illegible] ॥६॥
[illegible] ॥७॥
[illegible] ॥८॥
[illegible] ॥९॥
[किं वै] [illegible] ।
[illegible] ॥१०॥
[किं वै] [illegible] ॥११॥
किं वै [illegible] [इति] ॥१२॥

१६.१४६

[illegible] ॥१॥
[illegible] ॥२॥
[illegible] ॥३॥
[illegible] ॥४॥
[illegible] ॥५॥
[illegible] ॥६॥
[illegible] ॥७॥
[illegible] ॥८॥
[illegible] ॥९॥
[illegible] ॥१०॥
[illegible] ॥११॥
[illegible] ॥१२॥

१६.१४७

यत् ते [illegible] दौर्भाग्यं [illegible] ।
अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु ॥१॥
यत् ते भ्रुवोर् दौर्भाग्यं [illegible] ।

[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥२॥
यत् ते दत्सु दौर्भाग्यं जिह्वायां चुबुके हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥३॥
यत् ते हन्वोर् दौर्भाग्यं कण्ठे ह्रीमसु विष्ठितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥४॥
यत् ते स्कन्धेषु ग्रीवासु दौर्भाग्यं कीकसास्व् अनूक्ये ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥५॥
यत् ते हन्वोर् दौर्भाग्यम् अंसयोर् उपपक्षयोः ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥६॥
यत् ते बाह्वोर् दौर्भाग्यम् अरत्न्योः कफूदयोर् अनु ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥७॥
यत् ते हस्तयोर् दौर्भाग्यं पाण्योर् अङ्गुलीर् अनु ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥८॥

१६.१४८

यत् ते पृष्ठेषु दौर्भाग्यं जघने श्रोण्योर् हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥१॥
यत् त उरसि दौर्भाग्यं पार्श्वयोस् स्तनयोर् हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥२॥
यत् ते हृदये दौर्भाग्यं क्लोम्नां यक्ष्मण्या [अ]नु ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥३॥
यत् ते प्रियन्ति ! दौर्भाग्यं यद् वा यकनि वृक्कयोः ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥४॥
यत् ते मतस्नि दौर्भाग्यं यद् वा वनुक ! मुष्कयोः ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥५॥
यत् ते वसति ! दौर्भाग्यम् ऊर्वोर् जान्वोर् हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥६॥
यत् ते गुदास्व् अन्त्रेषु दौर्भाग्यम् उदरे हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥७॥
यत् ते वस्तिषु दौर्भाग्यं वनिष्ठौ प्लाशाव् आहितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥८॥
यत् ते श्रोण्योर् दौर्भाग्यम् अवखाद्व्योर् ! हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥९॥
यत् ते अङ्गयोर् दौर्भाग्यं स्फूरयोः पार्श्वयोर् हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥१०॥

१६.१४९

यत् ते गुल्फयोर् दौर्भाग्यं पादयोर् अङ्गुलीर् अनु ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥१॥
यत् ते किं चिद् दौर्भाग्यम् अङ्गेष्वङ्गेषु प्रतिष्ठितं यद् वा लोमसु विष्ठितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥२॥
यत् ते ऽक्षेषु दौर्भाग्यं प्रादयाम् ? अधिदेवने ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥३॥
यत् ते पार्श्वे दौर्भाग्यं मांसे ऽस्थिषु मज्जसु ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥४॥
यत् त पशुषु दौर्भाग्यं कृष्याम् उदरे हितम् ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥५॥

या ते ऽवक्रीर् [illegible] या ते [illegible] ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥६॥
या ते या च पापी [illegible] या ते [illegible] ? ।
[अयं तद् विश्वभेषजो ऽपामार्गो ऽप लुम्पतु] ॥७॥
यत् ते ऽदः [illegible] या ते [illegible] ।
अयं तद् विश्वभेषजो [अ]पामार्गो ऽप लुम्पतु ॥८॥
[illegible] ।
[illegible] ॥९॥
[illegible] ।
[illegible] ॥१०॥
[illegible] [अ]स्मात् [illegible] ।
[illegible] ॥११॥
[illegible] ।
[illegible] [आ] [illegible] ।
[illegible] ॥१२॥

१६.१५०

ब्रह्म जज्ञानं [प्रथमं पुरस्ताद् वि सीमतस् सुरुचो वेन आवः ।
[स बुध्न्या उपमा अस्य विष्ठास् सतश् च योनिम् असतश् च वि वः] ॥१॥
[illegible] दिवं च [illegible] ।
[illegible] ॥२॥
[illegible] [स्] [illegible] [॰] [illegible]
[illegible] ॥३॥
[illegible] दिवम् [illegible] ।
[illegible] [ह्]रसा [illegible] दिवम् आ रोह
सूर्यं ॥४॥
[illegible] [अ]सुरा [illegible] ।
[illegible]
[illegible] ॥५॥
[illegible] [अन्त] [illegible] ।
हिरण्यवर्णो [illegible] [र्][षि]
[illegible] ॥६॥
वि [illegible] हिरण्यवर्णः [अ]सुरा [अ]न्तर् [illegible]
समुद्रे ।
[illegible] [दु] [illegible] परि [illegible]
[illegible] ॥७॥
[illegible] [अ] [illegible] [ः] ।
[illegible]
[illegible] ॥८॥
[illegible] अन्तरिक्षं दिवं च [illegible]
[illegible] ।
[illegible] ॥९॥
वैश्वानरस् [illegible] ।
[illegible]
[illegible] ॥१०॥

१६.१५१

वैश्वानरस् [illegible] अन्तरिक्षं दिवं च [illegible] ।
[illegible] [अ]पि [illegible]
[illegible] ॥१॥

रक्तपत्ते नीलपत्ते शीतकरे तस्मात् अस्य नीम ।
कपाल्य एति बहुधा वसानो ब्रह्म[न्] कृष्णास् तन्व[ः] पराचे ॥२॥
पञ्चारे चक्रे परिवर्तमाने तस्मिन्न् आ तस्थुर् भुवनानि विश्वा ।
तस्य नाक्षस् तप्यते भूरिभारस् सनाद् एव न छिद्यते सनाभिः ॥३॥
पञ्चभिस् तपस् तपत्य् एवं एतत् सहस्रधामाणय् अधि तिष्ठन्त्य् एनम् ।
सप्त त्वा सूर्य हरितो वहन्ति ब्रह्मणादित्य विभृता सपर्ये ॥४॥
वि घोतते घोतत आ घोतते यान्त्स् अन्तर् अमृतो घर्म उद्यन् ।
इन्द्रा वृत्रस्य हरितम् अनीकम् अनापृष्टास् तन्वस् सुर्यस्य ॥५॥
घर्मः पश्चाद् उत घर्मः पुरस्ताद् अघोर्द्वाय द्विषतो ऽपि वृष्णः ।
वैश्वानरस् च शीतकरे वसानस् सपत्नान् मे द्विषतो हन्तु सर्वान् ॥६॥
अद्[र्] अङ्गुभिश् शमयति [ब्रह्मणैर्वीरो] घर्मस् सुचानस् समिधा समिद्धः ।
[ब्रह्म त्वा तपति] ब्रह्मणा तेजसा च ॥७॥
ब्रह्म जज्ञानं प्रथमं समारभे तद् आयमानं न विम्बे न तद् विदे ।
त[द्] रोहमाणं ; वितर्यो द ततस्य माक्यो तता विततास् ततानता ? ॥८॥
अमर्त्यत्रा तस् स्वराज्यमारो रवि अजान स्वजासु भर्ता ।
प्रजापतिः प्रजाभिस् संविदानस् त्रीणि ज्योतींषि दधते वसाकः ॥९॥
प्रजापतिश् चरति गर्भे अन्तस् स्वजायमानो बहुधा वि जायते ।
तस्य पदम् अभि पश्यन्ति वेधसस् तस्मिन्न् आर्पिता भुवनानि विश्वा ॥१०॥

१६.१५२

यस्मिन् देवाः पितरो मनुष्या[श् च]रा नामाद् इव श्रिताः ।
अर्वां त्वा पुष्पं पृच्छामि यत्र तन् मायया हितम् ॥१॥
यत्रापां पुष्पं निहितं मायाभिर् हितं गुहा न ।
यो वै तद् विद्यात् प्रत्यक्षं स विद्याद् ब्राह्मणं महत् ॥२॥
अभिस् तु सूत्रे निहितस् स्वर्षेद् ऊर्ण[स्] श्रियं विश्वानु प्रजानन् ।
स पुमान् पुंसो जनयन् ; ततेन सर्वान् अदस्तो अदसन्तु संयच ? ॥३॥
सर्वा रात्रिं सम् मोपतद् आदित्यो आतवेदसा ।
अर्केर् अधि दिवम् आरोहन् आयुषा स पुनातु मां वर्चसा सं सृजतु माम् ॥४॥
घर्मस् साहस्रम् समिधा समिद्धो ऽसपत्नः प्रदिशो मे भवन्तु ।
सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो हरि॰] ।
घर्मस् तत्र प्र दहतु भ्रातृव्यान् द्विषतो मृ॰ ॥५॥
उद्यन् मे शुक आदित्यो विमृधो वक्षि सूर्य[ः] ।
वैश्वानरः प्र दहतु भ्रातृव्यान् द्विषतो मम ॥६॥
आदन्याय ? शत्रून् आदित्य विमृधो हन्नि रक्षसा ।
शुक्रं सुवर्णं हरिं ब्रह्म भाजिष्ठं ज्योतिर् दिवम् आ तताय ॥७॥
हरिस् सुवर्णस् सुभ्रस् अभयंकरो हिरण्यवर्णो दुरिता पातु ? ।
सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो गृहन् ॥८॥
महान्तम् अर्चं परिसर्पन्त्य् अहोरात्रे वितनय शुक उद्यन् ।
सपत्नान् सर्वान् मे सूर्यो हन्तु वैश्वानरो गृहन् ॥९॥
उद्यन्न् अद्य मित्रमह[स्] सपत्नान् मे अव जहि ।
[दिव एनान् रश्मिभिस् सह रात्रीणां तमसा वधीस् ते यन्तु अधमं तमः] ॥१०॥
तेजस् तपांसि सुभगो विमर्ष्ये आलब्धे मूलं महसि प्रतिष्ठाम् ।
पर्यूढमायस् अयं तेषु सर्वतो अमोघं सत्यं यदा उद्यते ते ॥११॥

१६.१५३

ब्रह्मचारिण्यश् चरति रोदसी उभे अस्मिन् देवास् सुमनसो भवन्तु ।

	स दाधार पृथिवीं द्याम् उतेमां स आचार्यं तपसा बिभर्ति ॥१॥	सद • • • • आचार्यं तपसा •
शौ ३	आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भम् अन्तः ।	• उपनयमानो ...
	तं रात्रीस् तिस्र उदरे बिभर्ति तं जातं द्रष्टुम् अभिसंयन्तु देवाः ॥२॥	तं • • • • • तं • तिसृ [illegible] देवाः
शौ २	ब्रह्मचारिणं पितरो मनुष्या देवजना गन्धर्वा अनुसंयन्तु सर्वे ।	...देवजना गन्धर्वा अनुसंयन्ति •
	त्रयस्त्रिंशत् त्रिशताष् षट्सहस्रास् सर्वान् स देवांस् तपसा बिभर्ति ॥३॥	त्रयस्त्रिंशत् त्रिशताः • षट्सहस्राः ...
शौ ४	[इ]यं समित् पृथिवी द्यौ[र्] द्वितीयोतान्तरिक्षं समिधा पृणाति ।	...समिधा पृणाति
	ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस् तपसा बिभर्ति ॥४॥	...। शौ श्रमेण लोकांस् तपसा पिपर्ति
शौ ५	पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस् तपसोद् अतिष्ठत् ।	शौ पूर्वो...तपसोद् अतिष्ठत्
	तस्माज् जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश् च सर्वे अमृतेन साकम् ॥५॥	
शौ ६	ब्रह्मचार्य् [एति] समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः ।	ब्रह्मचारी...एति • • •
	स सद्य एति पूर्वान् अपरं समुद्रं लोकान् संगृभ्य मुहुर् आचरिक्रत् ॥६॥	• सद्य पूर्वस्मात् • • लोकान् संगृभ्य [illegible]
शौ ७	ब्रह्मचारी जनयन् ब्रह्मापो लोकं प्रजापतिं परमेष्ठिनं विराजम् ।	...लोकं प्रजापतिं • विराजम् [illegible]
	गर्भो भूत्वामृतस्य योनाव् इन्द्रो भूत्वासुरांस् ततर्ह ॥७॥	• • योनाव् • भूत्वासुरान् ततर्ह
शौ ९	इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षाम् [आ] जभार प्रथमो दिवं च ।	... जभार प्रथमो • •
	ते ब्रह्म कृत्वा समिधाव् उपास्ते तयोर् आर्पिता भुवनानि विश्वा ॥८॥	ते • • कृत्वा समिधाव् उपास्ते तयोर् आर्पिता • •
शौ ८	आचार्यस् ततक्ष नभसी उभे [इमे] उर्वी गम्भीरे पृथिवीं दिवं च ।	• ततक्ष...
	ते ब्रह्मचारी तपसाभि रक्षतु तयोर् देवास् सधमादं मदन्ति ॥९॥	तौ...
शौ १०	अर्वाग् अन्यः परो अन्यो गुहा [निधी] निहितौ ब्राह्मणस्य ।	• • परान्यो • निहितौ ब्राह्मणस्य
	तौ ब्रह्मचारी तपसाभि रक्षतु तत् केवलं कृणुते ब्रह्म विद्वान् ॥१०॥ ॥ऋ॰४७	...विद्वान्

१६.१५४

शौ ११.५.११	अर्वाग् अन्यो दिवस् पृष्ठाद् इतो ऽन्यः पृथिव्या [अ]ग्नी समेतो नभसी अन्तरेमे ।	...समेतो •
	तयो[श्] श्रयन्ते रश्मयो ऽधि दृढास् तान् आ तिष्ठतु तपसा ब्रह्मचारी ॥१॥	• श्रयन्ते • अधि • तान् ...
शौ १२	अभिक्रन्दन् स्तनयन्न् अरुणः शितिङ्गो बृहच् छेपो ऽनु भूमौ जभार ।	• स्तनयन्न् अरुणः शितिङ्गः • • नु भूमौ •
	ब्रह्मचारी सिञ्चतु सानौ रेतः पृथिव्यां तेन जीवन्ति प्रदिशश् चतस्रः ॥२॥	• • सानौ...
शौ १४	पर्जन्यो मृत्युर् वरुणस् सोम ओषधयः पयः ।	
	जीमूता [आ]सन् सत्वानस् तैर् इदं स्वर् आभरम् ॥३॥	• सं • • भृतं • •
शौ १३	अग्नौ सूर्ये चन्द्रमसि मातरिश्वन् ब्रह्मचार्य् अप्सु समिधम् आ दधाति ।	अग्नौ... दधाति
	तेषाम् अर्चींषि पृथग् अभ्रे अन्तस् तेषाम् आज्यं पुरुषो वर्षम् आप[ः] ॥४॥	• अर्चींषि चरन्ति पृथग् अभ्रे • • • वर्षम् •
शौ १५	अमा घृतं कृणुते केवलम् आचार्यो भूत्वा वरुणो [य]द्यद् ऐच्छत् प्रजापतौ ।	आचार्यो...ऐच्छत् • तत्
	स ब्रह्मचारी [प्रायच्छत् स्वान् मित्रो अध्य् आत्मनः ॥५॥	
शौ १६	[आचार्यो ब्रह्मचारी] ब्रह्मचारी प्रजापतिः ।	
	प्रजापतिर् वि राजति विराड् इन्द्रो ऽभवद् वशी ॥६॥	• • • विराट् • भवत् •
शौ १७	ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति ।	...रक्षति
	आचार्यो ब्रह्मचर्येण ब्रह्मचारिणम् इच्छते ॥७॥	...इच्छते
शौ १८	ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् ।	...विन्दते •
	अनड्वान् ब्रह्मचर्येणाश्वो घासं जिगीर्षति ॥८॥	अनड्वान् ब्रह्मचर्येणाश्वो • जिगीर्षति
शौ १९	ब्रह्मचर्येण तपसा देवा मृत्युम् उपाजयन् ।	...उपाघ्नत
	इन्द्रो ह ब्रह्मचर्येणामृतं स्वर् आभरत् ॥९॥	
शौ २०	ओषधयो भूतभव्यम् अहोरात्रे वनस्पतयः ।	• भूतभव्यम्...
	संवत्सरस् सह ऋतुभिस् ते जाता ब्रह्मचारिणः ॥१०॥ ॥ऋ॰४७	संवत्सरः सहर्तुभिस् • • ब्रह्मचारिणः

१६.१५५

शौ ११.५.२१	पार्थिवा दिव्याः पशव आरण्या ग्राम्याश् च ये ।	
	अपक्षा[ः] पक्षिणश् च ये ते जाता ब्रह्मचारिणः ॥१॥	...°चारिणः

शौ २२	पृथक् सर्वे प्राजापत्या[ः] प्राणान् आत्मसु बिभ्रति ।	...आत्मसु बिभ्रति
	सर्वान् तान् ब्रह्म रक्षति ब्रह्मचारिण्य् आभृतम् ॥२॥	सर्वांस् तान् ... आभृतम्
शौ २४[१-२]	ब्रह्मचारी ब्रह्म भ्राजद् बिभर्त्य् अस्मिन् देवा अधि विश्वे समोताः ।	...समोताः
शौ २५[३-४]	स जातो बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते ॥३॥	
शौ म १.१.० शौ २३[३-४]	देवानाम् एतत् पुरुहूतम् अनभ्यारूढं चरति रोचमानम् ।	...अनभ्यारूढं • •
	तस्मिन् सर्वे पशवस् तत्र यज्ञास् तस्मिन्न् अन्नं सह देवताभिः ॥४॥	अन्नं • •
शौ २४[३-४],२५	प्राणापानौ जनयन्न् आद् व्यानं चक्षुः श्रोत्रं जनयन् ब्रह्म मेधाम् ।	• • वा
	वाचं श्रेष्ठां यशो ऽस्मासु धेह्य् अन्नो रेतो लोहितम् उदरम् ॥५॥	...वाचं • • •
शौ २६[१-२]	तानि कल्पद् ब्रह्मचारी सलिलस्य पृष्ठे तपो ऽतिष्ठत् तप्यमानस् समुद्रे ॥६॥ ॥ऋ॰१० ॥अनु॰११	[illegible]

॥ इत्यथर्ववेदे पैप्पलादशाखायां षोडशः काण्डः समाप्तः ॥ — इत्यथर्ववेदे पैप्पलादसंहितायां काण्डः षोडश- [काण्डः समाप्तः ॥ ॥

१७.१

शौ १२.१.१	सत्यं बृहद् ऋतम् उग्रं दीक्षा तपो ब्रह्म यज्ञ[ः] पृथिवीं धारयन्ति ।	ओं अथ [illegible]
	सा नो भूतस्य भव्यस्य पत्न्य् [उरुं] लोकं पृथिवी नः कृणोतु ॥१॥	• • भूतस्य भव्यस्य पत्नी...
शौ २	असंबाधं बध्यतो मानवेषु यस्या उद्वतः प्रवतस् समं बहु ।	... [illegible]
	नानावीर्या ओषधीर् या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥२॥	...राध्यतां नः
शौ ३	यस्यां समुद्र उत सिन्धुर् आपो यस्यां देवा [अ]मृतम् अन्वविन्दन् ।	
शौ ४[१-२]	या बिभर्ति बहुधा प्राणद् एजत् सा नो भूमिर् गोष्व् अश्वेषु पिन्वे ? कृणोतु ॥३॥	...प्राणत् एजत् सो • • • •
शौ ५[१-२]	यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरान् अभ्यवर्तयन् ।	• • • वि° चक्रि...
शौ ३[३-४]	यस्याम् इदं जीवति ? विश्वम् एजत् सा नो भूमिः पूर्वपेये दधातु ॥४॥	...पूर्वपेये •
शौ ४[१-२]	यस्यां चतस्रः प्रदिशः पृथिव्यां यस्याम् अन्नं कृष्टयस् संबभूवुः ।	...कृष्टयः •
शौ ५[३-४]	गवाम् अश्वानां वयसश् च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥५॥	• • वयसश्च विष्ठा...
शौ ६	विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।	• वसुधानी ...
	वैश्वानरं बिभ्रती भूमिर् अग्निम् इन्द्रऋषभा द्रविणे नो दधातु ॥६॥	• • • अग्निम् इन्द्र°...
शौ ९	यस्याम् आपः परिचराः समानीर् अहोरात्रे अ[प्र]मादं क्षरन्ति ।	यस्याम् • °चराः • °रात्रे...
	सा नो भूमिर् भूरिधारा पयो दुहाम् अथो उक्षतु वर्चसा ॥७॥	• • • °धारा • • अथो उक्षतु •
शौ ७	यां रक्षन्त्य् [अ]स्वप्ना विश्वदानीं देवा भूमिं पृथिवीम् अप्रमादम् ।	• रक्षन्त्य् अस्वप्ना...अप्रमादम्
	सा नो मधु प्रियं दुहाम् अथो उक्षतु वर्चसा ॥८॥	मधु •
शौ ८	यार्णवे अधि सलिलम् अग्र आसीद् यां मायाभिर् अन्वचरन् मनीषिणः ।	...अग्र • यां मायाभिर् अन्वचरन् •
	यस्या हृदयं परमे व्योमन् सत्येनावृतम् [अ]मृतं पृथिव्या[ः] ।	...सत्येनावृतम् • •
	सा नो भूमिस् त्विषिं बलं राष्ट्रे दधातूत्तमे ॥९॥	• नो भूमिस् त्विषिं बलं • •
शौ १०[१-२]	याम् अश्विनाव् अमिमातां विष्णुर् यस्यां विचक्रमे ॥१०॥ ॥ऋ॰१०	• अश्विनाव् अमिमाताम्...

१७.२

शौ १२.१.१०[३]–१२	इन्द्रो यां चक्र आत्मने ऽनमित्रां शचीपतिः ।	• • चक्र आत्मने ऽनमित्रां •
	सा नो भूमिर् वि सृजतां माता पुत्राय नः पयः ॥१॥	
	गिरयस् ते पर्वता हिमवन्तो ऽरण्यं ते पृथिवि स्योनम् अस्तु ।	गिरिस्...अस्तु

	बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीम् इन्द्रगुप्ताम् ।	अजीतो हतो • अक्षतो • •
	अजीतो ऽहतो अक्षतो ऽध्य् अष्ठां पृथिवीम् अहम् ॥२॥	[illegible]
	यत् ते मध्यं पृथिवि यच् च नभ्यं यास् त ऊर्जस् तन्वस् संबभूवुः ।	तासु ... पवस्व...
	तासु नो धेह्य् अभि नः पवस्व माता भूमिः पुत्रो ऽहं पृथिव्याः ।	• • नो • पिपर्तु
	पर्जन्यः पिता स उ नः पिपर्तु ॥३॥	
	यस्यां वेदिं परिगृह्णन्तु भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः ।	
	यस्यां मीयन्ते स्वरवः पृथिव्याम् ऊर्ध्वाश् शुक्रा आहुत्याः पुरस्तात् ।	...शुक्रा शुक्रा •
	सा नो भूमिर् वर्धयतु वर्धमाना ॥४॥	• • भूमि वर्धयतु वर्धमाना [illegible]
	यो नो द्वेषत् पृथिवि यः पृतन्याद् यो ऽभिमन्याते मनसा यो वधेन ।	• • • पृथिवी यद्...वधेन
	तं नो भूमे रन्धय पूर्वकृत्वरि ॥५॥	तम् • भूमे • °कृत्वने
	त्वज् जातास् त्वयि चरन्ति मर्त्यास् त्वं बिभर्षि द्विपदस् त्वं चतुष्पदः ।	त्व • त्वं चरन्ति...
	तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिर् अमृतं मर्त्येभ्य उद्यन् सूर्यो रश्मिभिर् आतनोति ॥६॥	तवेमे पृथिवी...
	ता नः प्रजास् सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम् ॥७॥	• • प्रजाः मिन दुह्रतां • • मधु • • मह्यम्
	विश्वस्वं मातरम् ओषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।	विश्वस्वं...
	शिवां स्योनाम् अनु चरेम विश्वहा ॥८॥	
	महत् सधस्थं महती बभूविथ महान् वेग एजथुर् वेपथुष् टे ।	• सधस्थं • बभूविथ • वेगः एजथुर् वेपथुष्टे
	महांस् त्वेन्द्रो रक्षतु वीर्येण ।	महांस् त्वेन्द्रो • •
	सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि ॥९॥	
	[अग्निर् भूम्याम् ओषधीष्व् अग्निम् आपो बिभ्रत्य् अग्निर् अश्मसु ।]	
	अग्निर् अन्तः पुरुषेषु गोष्व् अश्वेष्व् अ[ग्नयः] ॥१०॥ ॥ऋ॰१०	

१७.३

शौ १२.१.२०–२०,२४	अग्निर् दिव आ तपत्य् अग्नेर् देवस्योर्व् अन्तरिक्षम् ।	• दिवा तपति...
	अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम् ॥१॥	
	अग्निवासाः पृथिव्य् असितज्ञूस् त्विषीमन्तं संशितं मा कृणोतु ॥२॥	अग्निवासाः • असितज्ञुः • संशितं • •
	भूम्यां देवेभ्यो जुह्वति यज्ञं हव्यम् अरंकृतम् ।	...ददो...
	भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः ।	...स्वधयान्नेन मर्त्याः
	सा नो भूमिः प्राणम् आयुर् दधातु जरदष्टिं मा पृथिवी कृणोतु ॥३॥	
	यस् ते गन्धः पृथिवि संबभूव यं बिभ्रत्य् ओषधयो यम् आपः ।	...यद् आपः
	यं गन्धर्वा अप्सरसश् च भेजिरे यस् ते नाम भद्रम् अर्हति ।	
	तेनास्मान् सुरभीन् कृणु मा नो द्विक्षत कश् चन ॥४॥	तेनास्मान् सुरभीः...द्विक्षत...
	यस् ते गन्धः पुष्करम् आविवेश यं संजभ्रुः सूर्याया विवाहे ।	...संजभ्रुः • •
	अमर्त्याः पृथिवि गन्धम् अग्रे तेनास्मान् सुरभीन् कृणु मा नो द्विक्षत कश् चन ॥५॥	अमर्त्याः ... सुरभीः ... द्विक्षत
	यस् ते भूमे पुरुषेषु स्त्रीषु पुंसु भगो रुचिः ।	• • स्त्रीषु • • पुंसु • वचुर्
	यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु ।	
	कन्यायां वर्चो यद् भूमे तेनास्मां अभि सं सृज मा नो द्विक्षत कश् चन ॥६॥	• वर्चो • भूमे तेनास्मां...द्विक्षत •
	शिला भूमिर् अश्मा पांसुर् या भूमि[स्] संधृता धृता ।	• • अश्मा पांसुर् • • संधृता •
	[तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः] ॥७॥	
	यस्यां वृक्षा वानस्पत्या ध्रुवास् तिष्ठन्ति विश्वहा ।	
	भूमिं हिरण्यवक्षसं धृताम् अच्छावदामसि ॥८॥	पृथ्वी °वक्षसं...
	उदीराणा उतासीनास् तिष्ठन्तः प्रक्रामन्तः ।	... तिष्ठन्तु प्रक्रामन्तः
	पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम् ॥९॥	• °सव्याभ्यां • व्यथिष्महि •
	विमृग्वरीं पृथिवीम् आ वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम् ।	विमृग्वरीं
	ऊर्जं पुष्टिं बिभ्रतीम् अन्नभागं घृतं त्वाभि नि षीदामि भूमे ॥१०॥	• • • अन्नभागं • • घृ • भूमे
शौ [illegible]	शुद्धा न आपस् तन्वे क्षरन्तु यो नः सेदुर् अप्रिये तं नि द[ध्म]ः ।	• आपस् तन्वे क्षरन्तु • • सेदुर् • • दध्मः •
	पवित्रेण पृथिवि मोत् पुनामि ॥११॥	• पृथिवी मोत् •

	निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु नः ।	निधिं • मणिं • • ददातु •
	वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ॥१२॥ ॥ऋ॰१२	... सुमनस्यमाना

१७.४

शौ १२.१.३१	यास् ते प्राचीः प्रदिशो या उदीचीर् यास् ते भूमे अधराद् याश् च पश्चात् ।	...भूमे अधराद् • •
	स्योनास् ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः ॥१॥	• स्योनास् • • चरते • • मा नि • शिश्रियाणः
शौ ३२	मा नः पश्चान् मा पुरस्तान् नुदिष्ठा [मोत्तराद् अधराद् उत] ।	मा • • • पुरस्तान् नुदिष्ठा
	स्वस्ति भूमे मे कृणु वरीयो यावया वधं मा विदन् परिपन्थिनः ॥२॥	• भूमे • • नो ... विदन् •
शौ ३३	यावत् ते [अ]भि विपश्यामि भूमे सूर्येण मेदिना ।	• • • विपश्यामि भूमे...
	तावन् मे चक्षुर् मा मेष्टोत्तराम् उत्तरां समाम् ॥३॥	• • चक्षुर्मेष्टोत्तरां •
शौ ३५	यत् ते भूमे विखनामि क्षिप्रं तद् अपि रोहतु ।	• • भूमे विखनामि क्षिप्रं तद् अपि रोहतु •
	मा ते मर्म विमृग्वरि मा ते हृदयम् अर्पिपम् ॥४॥	• • मर्म विमृग्वरि
शौ ३४	यच् छयानः पर्यावर्ते दक्षिणं सव्यम् अभि भूमे पार्श्वम् ।	...भूमे •
	उत्तानास् त्वा प्रतीचीं यत् पृष्टीभिर् अधिशेमहे ।	उत्तानस् • • पृष्टीभिर् अधिशेमहे
	मा हिंसीस् तत्र नो भूमे सर्वस्य प्रतिशीवरि ॥५॥	... भूमे • •
शौ ३६	ग्रीष्मस् ते भूमे वर्षाणि शरद् धेमन्तः शिशिरो वसन्तः	• • भूमे
	ऋतवस् ते विहिता हायना [अ]होरात्रे पृथिवि नो दुहाताम् ॥६॥	• • नो
शौ ३७ विमृग्वरी	याप सर्पं विजमाना ? विमृग्वरी यस्याम् आसन्न् अग्नयो ये ऽप्स्व् अन्तः ।	याप सर्पं • विमृग्वरी यस्याम्...
	परा दस्यून् ददती देवपीयून् इन्द्रं वृणाना पृथिवी न वृत्रम् ।	• • ददती °पीयून् ...
	शक्राय दध्रे वृषभाय वृष्णे ॥७॥	
शौ ४०	सा नो भूमि[र्] आ दिशतु यद् धनं कामयामहे ।	
	भगो अनुप्रयुङ्क्ताम् इन्द्रो यातु पुरोगवः ॥८॥	• अनुप्रयुङ्क्ताम् ...
शौ ३८[३-४]	ब्राह्मणो यस्याम् अर्चन्त्य् ऋग्भिस् साम्ना यजुर्विदः ।	
	युज्यन्ते [य]स्याम् ऋत्विजस् सोमम् इन्द्राय पातवे ।	• • ऋत्विजः...
	सा नो भूमि[र्] दक्षिणायां सुशेवा यज्ञं दधातु सुमनस्यमाना ॥९॥	सुशेवा...
शौ ३९	यस्यां पूर्वे भूतकृत ऋषयो गा उद् आनृचुः ।	...आनृचुः
	सप्त सत्रेण वेधसो यज्ञेन तपसा सह ।	• • वेधसो ...
	सा नः पशून् विश्वरूपान् दधातु जरदष्टिं मा पृथिवी कृणोतु ॥१०॥	
शौ ४२	यस्याम् अन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः ।	• • व्रीहियवौ • कृष्टयः
	भूम्यै पर्जन्यपत्न्यै नमो ऽस्तु वर्षमेदसे ॥११॥ ॥ऋ॰११	भूम्यै °पत्न्यै • • °मेदसे

१७.५

शौ १२.१.४१	यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलबाः ।	वैलबा
	युध्यन्ते [य]स्याम् आक्रन्दो यस्यां वदति दुन्दुभिः ।	युध्यन्ते...
	सा नो भूमिः प्र णुदतां सपत्नान् यो नो द्वेषद् अपरं तं कृणोतु ॥१॥	• • • • असपत्नं मा • • पृथिवी [illegible]
शौ ४३	यस्याः पुरो देवकृताः क्षेत्रे यस्या विकुर्वते ।	
	प्रजापतिः पृथिवीं विश्वगर्भाम् आशामाशां रण्यां नः कृणोतु ॥२॥	• • • आशामाशां रण्यां [illegible]
शौ ४५	जनं बिभ्रती बहुधा [विवा]चसं नानाधर्माणं पृथिवी यथौकसम् ।	जनं • यथौकसम्
	सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुर् अनपस्फुरन्ती ॥३॥	सहस्रं • • • • दुहां
शौ ४६	यस् ते सर्पो वृश्चिकस् तृष्टदंश्मा हेमन्तजब्धो भृमलो गुहा शये ।	• वृश्चिकस् • °दंश्मा हेमन्त° • •
	क्रिमिर् जिन्वत् पृथिवि यद्-यद् एजति प्रावृषि तन् नस् सर्पन् मोप सृपद् यच् छिवं तेन नो मृड ॥४॥	[illegible]
शौ ४७	ये ते पन्थानो बहवो जनायना रथस्य वर्त्मानसश् च यातवे ।	...जनायना • °वर्त्मानसश्च • •
	यैः संचरन्त्य् उभये भद्रपापास् तं पन्थानं जयेमानमित्रम् अतस्करं [यच् छिवं तेन नो मृड] ॥५॥	• भद्र° • °पापा ... अतस्करम्
शौ ४८	मल्वं बिभ्रती गुरुभृद् भद्रपापस्य निधनं तितिक्षुः ।	• • • गुरुभृद् • भद्र°

[illegible]

१७.६

[illegible]

१७.७

[illegible]

यत्र प्रेप्सन्तीर् अभियन्त्य् आवृत[स्] स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥५॥
शौ ६ क्व प्रेप्सन्ती युवती विरूपे अहोरात्रे द्रवतस् संविदाने ।
यत्र प्रेप्सन्तीर् अभियन्त्य् आपस् स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥६॥
शौ ५ अर्धमासाः क्व यन्ति मासास् संवत्सरेण सह संविदानाः ।
यत्र यन्त्य् ऋतवो यत्रार्तवा[स्] स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥७॥
शौ ७ यस्मिन् स्तब्ध्वा प्रजापतिर् लोकान् सर्वान् अधारयत् ।
स्कम्भं तं ब्रूहि कतम[स्] स्विद् एव सः ॥८॥
शौ ८ यत् परमम् अवमं यच् च मध्यमं प्रजापतिस् ससृजे विश्वरूपम् ।
कियता स्कम्भ[ः] प्र विवेश तत्र यन् न प्राविशत् कियत् तद् [ब]भूव ॥९॥
शौ ९ कियता स्कम्भ[ः] प्र विवेश भूतं कियद् भविष्यद् अन्व् आशये ऽस्य ।
एकं यद् अङ्गम् अकृणोत् सहस्रधा कियता स्कम्भ[ः] प्र विवेश तत्र ॥१०॥ अनु° १

१७.८

शौ १०.७.१० यत्र लोकांश् च कोशांश् चा[पो] ब्रह्म [जना विदुः ।
असच् च यत्र सच् चान्तस् स्कम्भं तं ब्रूहि] कतम[स्] स्विद् एव सः ॥१॥
शौ ११ यत्र तपः पराक्रम्य व्रतम् धारयत्य् उत्तरम् ।
ऋतं च यत्र श्रद्धा च ब्रह्मापस् समाहिता[स्] स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥२॥
शौ १२ यस्मिन् भूमिर् अन्तरिक्षं द्यौर् यस्मिन्न् अध्य् आहिता ।
यत्राग्निश् चन्द्रमास् सूर्यो वातस् तिष्ठन्त्य् आर्पितास् [स्कम्भं तं ब्रूहि कतमस् स्विद् एव सः] ॥३॥
शौ १३ यस्य त्रयस्त्रिंशद् देवा [अ]ङ्गे सर्वे समाहिताः ।
स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥४॥
शौ १४ यत्र ऋषयो भूतकृत ऋचस् साम यजुर् मही ।
एकर्षिर् यस्मिन्न् आर्पितस् स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥५॥
शौ १६ यस्य चतस्रः प्रदिशो नाड्यस् तिष्ठन्ति प्रथमाः ।
यज्ञो [य]स्मिन् पराक्रान्तस् [स्कम्भं तं ब्रूहि कतमस् स्विद् एव सः] ॥६॥
शौ १५ यत्रामृतं च मृत्युश् च पुरुषश् च समाहिताः ।
समुद्रो यस्य नाड्यस् स्कम्भं तं ब्रूहि कतम[स्] स्विद् एव सः ॥७॥
शौ १७ ये पुरुषे ब्रह्म विदुस् ते स्कम्भम् अनुसंविदुः ।
यो वेद परमेष्ठिनं यश् च वेद प्रजापतिम् ।
ज्येष्ठं ये ब्राह्मणं विदुस् ते स्क[म्भ]म् अनुसंविदुः ॥८॥
शौ १८ यस्य शिरो वैश्वानरश् चक्षुर् अङ्गिरसो ऽभवन् ।
अङ्गानि यस्य यातवस् स्कम्भं तं ब्रूहि कतम[स्] स्विद् एव सः ॥९॥
शौ १९ यस्य ब्रह्म मुखम् आहुर् जिह्वां मधुकशाम् उत ।
विराजं यस्योध आहुस् स्कम्भं [तं ब्रूहि कतमस् स्विद् एव सः] ॥१०॥ अनु° २

शौ १०.७.२०-२१

१७.९

यस्माद् ऋचो अपातक्षन् यजुर् यस्माद् अपाकषन् ।
छन्दांसि यस्य लोमानि स्कम्भं तं ब्रूहि कतम[स्] स्विद् एव सः ॥१॥
असच्छाखां प्रतिष्ठन्तीं परमम् इव जना विदुः ।
उतो सन् मन्यन्ते ऽवरे यस्य शाखाम् उपासते ॥२॥
यत्रादित्याश् च रुद्राश् च वसवश् च समाहिताः ।
स्कम्भं तं ब्रूहि कतमस् स्विद् एव सः ॥३॥

[illegible]

१७.१०

शौ १०.७.२९ इन्द्रे लोका इन्द्रे तप इन्द्रे ऽध्य् ऋतम् आहितम् ।
[illegible]

१७.११

[illegible]

१७.१२

अस्नःपात्रे रेरिहती दुश्चितं सिंहदंष्ट्रिणीम् ।
दुरन्तं अभिचक्रमां यक्ष्मम् उच्च वस्तवासिनीम् ॥१॥
सर्वासां मन्यावत् साकं नामधेयानि विद्मसि ।
यानि आरान्ति दस्युभ्यो नाशयेतस् सदान्वा[ः] ॥२॥
[illegible] उलूकीं कोशिनीं कृहम् ।
[illegible] नाशयामस् सदान्वा[ः] ॥३॥
[illegible]
[illegible] नाशयामस् सदान्वा[ः] ॥४॥
[illegible]
[illegible] ता इतो नाशयामसि ॥५॥
[illegible] सदान्वा[ः] ।
[illegible] ॥६॥
[illegible]
[illegible] हन्मि रक्षसः ॥७॥
चतुर्दंष्ट्रान् कुम्भमुष्कान् दीर्घकेशान् असृङ्मुखान् ।
अलाबुगन्धीन् असुरान् दुर्णाम्नो नाशयामसि ॥८॥
[illegible]
दुर्णाम्नीस् सर्वास् सम्मोदा नाशयामस् सदान्वा[ः] ।
[illegible] ॥९॥
[illegible]
[illegible] दुर्णाम्नीस् सर्वास् सम्मोदा नाशयामस् सदान्वा[ः] ॥१०॥ अनु° १०

१७.१३

[illegible]
[illegible] नाशयेतस् सदान्वा[ः] ॥१॥
[illegible] × × × × [illegible]
[illegible] ॥२॥
उत् तिष्ठत नि[र्] द्रवत [illegible]
[illegible] ॥३॥
[illegible]
[illegible] सदान्वा[ः] ॥४॥
[illegible]
[illegible] नाशयामस् सदान्वा[ः] ॥५॥
[illegible] सदान्वा[ः] ।
[illegible] ॥६॥
[illegible]
[illegible] नाशयामस् सदान्वा[ः] ॥७॥
[illegible]
[illegible] ॥८॥
[illegible]
सर्वासां [illegible] नामधेयानि [illegible] ।
[illegible] सदान्वाः ॥९॥
[illegible]
[illegible] नाशयामसि ॥१०॥ अनु° ९

१७.१४

यद् दाह्रासो भीमचक्षोरर् अग्ने अंग्ने सहान्वे ।
भ्रातिं त्विषि शुचिम् अग्निम् अरावि किम् दहसे ।
धूमम् भाति न यात्र् अतिस्तृथामि महोन्वे ॥१॥
कद्रू एकाः पृषद् एकाः किम् उत् पृषन्त्य् अभिधिषा ।
वरन्ति नक्तं दुर्णाम्नो रात्री मृतकीष्यस् ता इतो नाशयामसि ॥२॥
अपक्रालाम् अभिश्रयाम् आतुरवर्न्ती कुतूहलम् ।
कुशलियं रसभवर्नी खन्जाज् जातास् त्रिमूकयस् ता इतो नाशयामसि ॥३॥
या दुविता वयंन शुष्क खदन्ति वपुषाम् ।
यद्वा गर्दभीर् इव नाशयामस् सदान्वाः ॥४॥
याः पुरुन् दहमानं शून्यम् अग्नौ जिघत्सन्ति ।
अन्दालः कुष्ठमार्गानि मुष्टाग्रेण सदान्वाम् ता इतो नाशयामसि ॥५॥
या विकडीर् उन्मूत्योरता घोरचक्षवः ।
शीर्षाण्य् आम्यान्य् आमां वितावन्तीर् इवासते ।
सदान्वा अयनस् पंत पदो अूणान्य् अर्पत ॥६॥
यासां गन्धो नानारूपः ग [illegible] पुरुषं प्रति ।
ता [अ]ग्निम् सहताम् इतो जातवेदास् सदान्वाम् ता इतो नाशयामसि ॥७॥
गर्भान् एकः प्रतिमृशन् व्यायर्ति सदान्वा[ः] ।
उचितस् तन्वां स्त्रिया यात आ रोहिणीर् इव ता इतो नाशयामसि ॥८॥
याः पिङ्गान् संचरन्तीन्द्रजा नस् सदान्वा[ः] ।
अप मृत्युम् इयादन्तु पुनस् त्वा प्रति दध्मसि ॥९॥
आमादिनीश् च पुरादिनीर् अतम्रिदच्यादिनीः ।
अमुं परन्यां हूत शवम् अत्त सदान्वाः ।
शवः केवल आचारः किम् उ शालास्व् उच्छ्रिताः ॥१०॥ अ॰ १॥

१७.१५

याः कुमारीर् यास् त्व् अधीन युवतीर् यास् सदान्वा[ः] ।
सर्वा यन्तु कुरूदुर्नी[ः] कुलीना धेनु[ः] सर्पंतु रात्री रचिता हिता ॥१॥
तान्यो इन्द्रो वि मृजात्व् अवयमध्य अपयायिनी ।
ताम् त्वा हन्तु विपुला वज्रेणालगर्धिता ।
तासाम् दाक मोष्टियम् इन्द्र भन्धाः फलीकुरु ॥२॥
कुमारान् एका अधविशन् या [अ]दन्ति प्रयायिनी[ः] ।
ता इन्द्रो हन्तु वृत्रहा यो वयो विभ्याद् रक्षांसि सेधतु ॥३॥
याश् च दासीर् असुराणां मनुष्यकृताश् च याः कृताः ।
उत्सर्वीस् ताः परा यन्ति परा यन्ति परायतो भवति नाशया [अ]ति ॥४॥
या निशां यथाकथातात् रात्री यक्षाणि प्रेरत ।
अग्निर् ता सर्वा अन्तीका विभ्याद् रक्षांसि सेधतु ॥५॥
या दर्शीकः कलिलान्या [अ]प्सु आयाः पुरीकया ।
गोवा[आ]साम् एका वद यत्र जातास् सदान्वास् ता इतो नाशयामसि ॥६॥
यासां घोषस् सगता वृकाणाम् इव गच्छत ।
मूतं कशाम् भविषाः प्रवदन्त्यों प्रतिग्रहा नाशयामस् सदान्वा[ः] ॥७॥
गुरुगहया मूलरायं शिशुमाकां प्रतिधुका ।
भति दृषा व्यतन्वां व्यतुलिमाम् ।
सर्वांश् चण्डमनन्यो नाशयामस् सदान्वा[ः] ॥८॥
यावन्तीं नामदूकां त्वं स्वर्नीकां वृन्धयन्तीम् ।
उग्रिदन्तीम् अनामिकां नाशयामस् सदान्वा[ः] ॥९॥
वावशाकाम् अल्पगामां विज्ञयां चवृं चमुम् ।
रायीं वातमंजयान नाशयामस् सदान्वा[ः] ॥१०॥ अ॰ २॥ अनु॰ १॥

१७.१६

ददामीत्य् एव ब्रूयाद् अनु चैनाम् अभुत्सत ।
वशां ब्रह्मभ्यो याचद्भ्यस् तत् प्रजावद् अपत्यवत् ॥१॥
प्रजया स वि क्री[णी]ते पशुभिश् चोप दस्यति ।
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ॥२॥
कूटयास्य सं शीर्यन्ते श्लोणया काटम् अर्दति ।
बण्डया दह्यन्ते गृहाः काणया दीयते स्वम् ॥३॥
विलोहितो अधिष्ठानाच् छक्नो विन्दति गोपतिम् ।
तथा वशायास् संविद्यं दुरदभ्ना ह्य् उच्यसे ॥४॥
यो ऽस्याः कर्णाव् आस्कुनोत्य् आ स देवेषु वृश्चते ।
लक्ष्म कुर्व इति मन्यते कनीयः कृणुते स्वम् ॥५॥
यदीर् अस्या [अ]धिष्ठानाद् विक्लिन्दुर् नाम विन्दति ।
अमामनात् सं शीर्यते या मुखेनोपजिघ्रति ॥६॥
यद् अस्या गोपतौ सत्या लोम ध्वाङ्क्षो अजीहिडत् ।
ततः किशोरा म्रियन्ते वत्सांश् च घातुको वृकः ॥७॥
यद् अस्याः कस्मै चिद् भोगाय बालान् कश् चित् प्रकृन्तति ।
ततः कुमारा म्रियन्ते यक्ष्मो विन्दत्य् अनामनात् ॥८॥
यद् अस्याः पल्पूलनं शकृद् दासी समस्यति ।
ततो ऽपरूपं जायते तस्माद् अव्येष्यद् एनसः ॥९॥
जायमानाभि जायते देवान् सब्राह्मणान् वशा ।
तस्माद् ब्रह्मभ्यो देयैषा तद् आहुः स्वस्य गोपनम् ॥१०॥ अ॰ १॥

१७.१७

य एनां वनिम् आयन्ति तेषां देवकृता वशा ।
ब्रह्मज्येयं तद् अब्रुवन् य एनां नु प्रियायते ॥१॥
यो देवानां [गां] याचद्भ्य आर्षेयेभ्यो न दित्सति ।
आ स देवेषु वृश्चते ब्राह्मणानां च मन्यवे ॥२॥
यस्यान्य[म्] स्याद् वशाभोगो ऽन्याम् इच्छेत तर्हि सः ।
हिंस्ते अदत्ता पुरुषं याचितां च न दित्सति ॥३॥
यथा शेवधिर् निहितो ब्राह्मणानां तथा वशा ।
ताम् एतद् आयन्ति यस्मिन् कस्मिंश् च जायते ॥४॥
स्वम् एतद् आयन्ति यद् वशां ब्राह्मणा अभि ।
यथैनान् अन्यज् जिनीयाद् एवास्या [अ]धिरोहणम् ॥५॥
चरेद् एवा त्रैहायणाद् अविज्ञातगदा सती ।
वशां च विद्यान् नारद ब्राह्मणास् तर्ह्य् एष्याः ॥६॥
य एनाम् अवशाम् आह देवानां निहितं निधिम् ।
उभौ तस्मै भवाशर्वौ परिक्रम्येषुम् अस्यतः ॥७॥
पुरुषः केवलम् आ शये याचितां च न दित्सति ।
नास्मै कामास् समृ ध्यन्ते याम् अदत्त्वा चिकीर्षति ॥८॥
यो ऽस्या ऊधो न वेद यो ऽस्या[स्] स्तनान् उत ।
उभयेनैवास्मै दुहे दातुं चेद् अशकद् वशाम् ॥९॥
देवा वशां याचन्ति मुखं कृत्वा ब्राह्मणम् ।
तेषां च सर्वेषाम् अददद् हेडं न्य् एति मानुषः ॥१०॥ अ॰ २॥

१७.१८

हेडं पशूनां न्य् एति ब्राह्मणेभ्यो ऽददद् वशाम् ।
देवानां निहितं भागं मर्त्यश् चेन् नु प्रियायते ॥१॥

यद् अन्ये शतं याचेयुर् ब्राह्मणा गोपतिं वशा[म्] ।
अथैनां देवा [अ]ब्रुवन्न् एवं ह विदुषो वशा ॥२॥
य एवं विदुषे ऽदत्त्वाथान्येभ्यो ददद् वशा[म्] ।
दुर्गा तस्मा [अ]धिष्ठाने पृथिवी सहदेवता ॥३॥
देवा वशाम् अयाचन् यस्मिन्न् अग्रे अजायत ।
ताम् एतां विद्यान् नारदस् सह देवैर् उद् आजत ॥४॥
अनपत्यम् अल्पपशुं वशा कृणोतु पूरुषम् ।
ब्राह्मणैश् च याचिताम् [अथैनां] नु प्रियायते ॥५॥
अग्नीषोमाभ्यां कामाय मित्राय वरुणाय च ।
तेभ्यो याचन्ति ब्राह्मणास् तेष्व् आ वृश्चते ऽददत् ॥६॥
यावद् अस्या गोपतिर् नोपशृणुयाद् ऋचस् स्वयम् ।
चरेद् अस्य तावद् गोषु नास्य श्रुत्वा गृहे स्यात् ॥७॥
यो ऽस्या ऋच उपश्रुत्याथ गोष्व् अचीचरत् ।
आयुश् च तस्य भूतिं च देवा वृश्चन्तु हीडिताः ॥८॥
वशा चरन्ती बहुधा देवानां निहितो निधिः ।
आविष् कृणुष्व रूपाणि यदा स्थाम जिघांसति ॥९॥
[आविर् आत्मानं कृणुते यदा स्थाम जिघांसति] ।
उतो ह ब्रह्मभ्यो वशा याञ्चाय कृणुते मनः ॥१०॥ अ॰ ३॥

१७.१९

मनसा सं कल्पयति तद् देवान् अपि गच्छति ।
ततो ह ब्रह्माणो वशाम् उपप्रयन्ति याचितुम् ॥१॥
स्वधाकारेण पितृभ्यो यज्ञेन देवेभ्यः ।
दानेन राजन्यो वशाया मातुर् हेडं न गच्छति ॥२॥
वशा राजन्य ते माता तथा संभूतम् अग्रशः ।
तस्या [आ]हुर् अनर्पणं यद् ब्रह्मभ्यः प्रदीयते ॥३॥
यद् आज्यं प्रतिगृह्णाहम् ! भाल्लुग्गेत् स्रुचो अग्नये ।
ततो ऽब्राह्मणो वशाम् अग्नये वृश्चते ऽददत् ॥४॥
पुरोडाशवत्सा सुदुघा लोके ऽस्योप तिष्ठति ।
तस्मै सर्वान् कामान् दुहे वशा प्रददुषे दुहे ॥५॥
सर्वान् कामान् यमराज्ये वशा प्रददुषे दुहे ।
तथाहुर् नारकं त्व् एकं निरुन्धानस्य याचिताम् ॥६॥
प्रवीयमाना चरति क्रुद्धा गोपतये वशा ।
वेहतं मा मन्यमानो मृत्योः पाशेषु बध्यताम् ॥७॥
यो वेहतं मन्यमानो गृहेषु पचते वशाम् ।
अप्य् अस्य पुत्रान् पौत्रांश् [च] यातयते बृहस्पतिः ॥८॥
महद् एषाव तपति चरन्ती गोषु गौर् अपि ।
ततो गोपतये वशाददुषे विषं दुहे ॥९॥
प्रियं पशूनां भवति यद् ब्रह्मभ्यः प्रदीयते ।
अथो वशायास् तत् प्रियं यद् देवत्रा हविर् अस्याः ॥१०॥ अ॰ ४॥

१७.२०

या वशा उद् अकल्पयन् देवा यज्ञाद् उदेत्य ।
तासां विलिप्त्यं भीमाम् उदाकुरुत नारदः ॥१॥
तां देवा [अ]मीमांसन्त वशेयाम् अवशेति ।
ताम् अब्रवीन् नारद एषा वशानां वशतमा ॥२॥
कति नु वशा नारद यास् त्वं वेत्थ मनुष्यजा[ः] ।
कतमासां भीमतमा कस्या नाश्नीयाद् अब्राह्मणः ॥३॥

विलिप्त्या बृहस्पते या च सूतवशा वशा ।
तासां नाश्नीयाद् अब्राह्मणो य आशंसेत भूत्याम् ॥४॥
नमस् ते ऽस्तु नारदानुष्ठु विदुषे वशा ।
कतमासां भीमतमा याम् अदत्त्वा पराभवे[त्] ॥५॥
विलिप्ती [या] बृहस्पते या च सूतवशा वशा ।
तासां नाश्नीयाद् अब्राह्मणो य आशंसेत भूत्याम् ॥६॥
त्रीणि वै वशाजातानि विलिप्ती सूतवशा वशा ।
ताः प्र यच्छेद् ब्रह्मभ्यस् सो ऽनाव्रस्कः प्रजापतौ ॥७॥
एतद् वो ब्राह्मणा हविर् इति मन्वीत याचितः ।
वशां चेद् एनं याचेयुर् या भीमाददुषो गृहे ॥८॥
देवा वशाम् अयाचन् स नो राजन् ! हेडिता[ः] ।
एताभिर् ऋग्भिर् भेदस्य तस्माद् वै स पराभवत् ॥९॥
उतैनां भेदो नाददाद् वशाम् इन्द्रेण याचितः ।
तस्मा[त्] तं देवा एनसो वृश्चिन्नाद् ! अहमुत्तरे ॥१०॥
ये वशाया [अ]दानाय वदन्ति परिरापिणः ।
इन्द्रस्य मन्यवे जाल्मा [आ] वृश्चन्ते ऽचित्त्या ॥११॥
ये गोपतिं पराणीयाथाहुर् मा ददा इति ।
रुद्रस्यास्तां हेतिं ते परि यन्त्य् अचेतसः ॥१२॥
यदि हुतां यद्य् अहुताम् अमा च पचते वशाम् ।
देवान् सब्राह्मणान् ऋत्वा जिह्मो लोकान् निर् ऋच्छति ॥१३॥ अ॰ ५॥ अनु॰ ४॥

१७.२१

अगृह्य मांसं त्वचं येन्नं संमरणम् अंसान् शरीरम् अग्निः क्रव्याद् यस्
अमुष्यामुष्यायणस्यामुष्याः पुत्रस्य ॥१॥
प्राच्यां दिश्यो देवेभ्यस् सायंयावद्भ्यो देवेभ्यो विश्वदानीयावद्भ्यो
देवेभ्यो अमुम् आमुष्यायणम् अमुष्याः पुत्रम् आ वृश्चामि ॥२॥
[illegible] छिद्रपक्षेण अमुम् आमुष्यायणम् अमुष्याः पुत्रम् आ
वृश्चामि ॥३॥
छिद्रपक्षेण छिद्रहस्तामुम् आमुष्यायणम् अमुष्याः पुत्रं ! इदं महन्
न तस्य प्रवृश्च्या ? ॥४॥
इन्द्राग्निभ्यां प्रजापतये परमेष्ठिने सोमाय राज्ञे वरुणाय राज्ञे पृथ्व्यै धात्रे
सवित्रे त्वष्ट्रे अमुम् आमुष्यायणम् अमुष्याः पुत्रम् आ वृश्चामि ॥५॥
उषसे अह्ने रात्र्यै सूर्यायामुम् [आमुष्यायणम् अमुष्याः पुत्रम् आ
वृश्चामि] ॥६॥
ओषधीभ्य आपश्चीभ्यो वनस्पतिभ्यो वानस्पत्येभ्यो अमुम् [आमुष्यायणम्
अमुष्याः पुत्रम् आ वृश्चामि] ॥७॥
इदावत्सराय परिवत्सराय संवत्सराय इदते विश्वरूपायामुम् [आमुष्या-
यणम् अमुष्याः पुत्रम् आ वृश्चामि] ॥८॥
ऋतुभ्यस् संवत्सरायामुम् [आमुष्यायणम् अमुष्याः पुत्रम् आ वृश्चामि] ॥९॥
अ॰ १॥

१७.२२

दिग्भ्यो अन्तर्देशेभ्य आशाभ्य आशापालेभ्यो अमुम् [आमुष्यायणम्
अमुष्याः पुत्रम् आ वृश्चामि] ॥१॥
ऋतुभ्य आर्तवेभ्यो अधिपतिभ्य आधिपत्येभ्यो अमुम् [आमुष्यायणम्
अमुष्याः पुत्रम् आ वृश्चामि] ॥२॥
वसुभ्यो रुद्रेभ्यस् साध्येभ्य आप्त्येभ्यो अमुम् [आमुष्यायणम् अमुष्याः
पुत्रम् आ वृश्चामि] ॥३॥
ऋषिभ्य आर्षेयेभ्यो ऽङ्गिरोभ्य आङ्गिरसेभ्यो अमुम् [आमुष्यायणम्

अमुष्या॰ पुत्रम् आ वृश्चामि] ॥७॥
अपहूतो अभिजतो अहस्ते अहस्तम् यत्ते अमुम् आमुष्यायणम् अमुष्या॰ पुत्रम् आ वृश्चामि ॥८॥
ये [अ]न्तरा यज्ञा ये प्रजापतिमयाम् तेजसा ... अमुम् [आमुष्यायणम् अमुष्या॰ पुत्रम् आ वृश्चामि] ॥९॥
ते ... अमुम् [आमुष्यायणम् अमुष्या॰ पुत्रं परा भावयन्तु] ॥१०॥
ये ... यज्ञा ये ... अमुम् [आमुष्यायणम् अमुष्या॰ पुत्रम् आ वृश्चामि] ॥११॥
ते ... [अ]मुम् [आमुष्यायणम् अमुष्या॰ पुत्रं परा भावयन्तु] ॥१२॥
ये ... यज्ञा ये ... अमुम् आमुष्यायणम् अमुष्या॰ पुत्रम् आ वृश्चामि ॥१३॥
ते ... अमुम् आमुष्यायणम् अमुष्या॰ पुत्रं परा भावयन्तु ॥१४॥
... अमुम् ... दिवम् ... ? देवमनुष्या॰ ... ॥१५॥
... अमुम् आमुष्यायणम् अमुष्या॰ पुत्रं [परा भावयन्तु] ॥१६॥
... अमुम् ... [अ]मुम् आमुष्यायणम् अमुष्या॰ पुत्रम् ... ॥१७॥

१७.२२

[इ]न्द्र ... ।
यद् ... ? ... ॥१॥
... [इ] ... ।
... ॥२॥
... विश्वकर्म[इ] ... ।
... ॥३॥
... ।
... ।
... हरामि ... ? ... ॥४॥

१७.२४

विद्म ते स्वप्न जनित्रं ... पुत्रो ऽस्य ... [अ]धिजातो यमस्य करणः ।
तं त्वा स्वप्न तथा विद्म ।
यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म ॥१॥
... विश्वानरो ... विश्वानरो ...
... ॥२॥
... ॥३॥
[विद्म ते स्वप्न] जनित्रं ... पुत्रो ऽसि ... [अ]धि[जातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।

[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥४॥
[विद्म ते स्वप्न] जनित्रं यमस्य पुत्रो ऽसि यमान्या [अ]धि[जातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥५॥
[विद्म ते स्वप्न] जनित्रं राज्ञ॰ पुत्रो ऽसि राज्ञ्या [अ]धि[जातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥६॥
[विद्म ते स्वप्न] जनित्रं दिवस् पुत्रो ऽसि भूम्या [अ]धि[जातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥७॥
[विद्म ते स्वप्न] जनित्रं वानस्पत्यानां पुत्रो ऽस्य ओषधीभ्यो [अधिजातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥८॥
[विद्म ते स्वप्न] जनित्रम् इन्द्रस्य पुत्रो ऽसि कर्णया ?{अ}धिजातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥९॥
[विद्म ते स्वप्न] जनित्रं रक्षसां पुत्रो ऽस्य अद्रुघेभ्यो ? [अ]धि[जातो यमस्य करणः ।
[तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥१०॥
विद्म ते स्वप्न जनित्रं गन्धर्वाणां पुत्रो ऽस्य अप्सरोभ्यो [अ]धिजातो यमस्य करणः ।
तं त्वा स्वप्न तथा विद्म ।
[यो ऽस्मान् स्वप्नस् स्वप्नमय॰ पापस् तं द्विषते प्र हिण्म] ॥११॥ ॥अ॰४॥

१७.२५

द्यावापृथिवी अहोरात्रे नक्षत्रपयसः ? ।
इदम् अहम् अमुष्मिन्न् आमुष्यायणे अमुष्या॰ पुत्रे दुष्वप्न्यं मृजे ॥१॥
। यद् अस्मास्वुग्या अश्वादशाकी ? ।
मा प्र गाम पथो वयं मा यज्ञाद् इन्द्र सोमिनः ।
मान्तस् स्थुर् नो अरातयः ॥२॥
यो यज्ञस्य प्रसाधनस् तन्तुर् देवेष्व् आ[त]तः ।
तम् आहुतम् अशीमहि ॥३॥
नमो मित्रस्य वरुणस्य चक्षसे महो [दे]वाय तद् ऋतम् सपर्यत ।
दूरेदृशे देवजाताय केतवे दि[व]स् पुत्राय सूर्याय शंसत ॥४॥
[सा मा सत्योक्ति॰ परि पातु विश्वतो] द्यावा च यत्र ततनन्न् अहानि च ।
[विश्वम् अन्यन् नि विशते यद् एजति विश्वाहापो विश्वाहोद् एति सूर्यः] ॥५॥
न ते ऽदेव॰ प्रदिवो नि वासति यद् एतशेभि॰ पतरै रथर्यसि ।
प्राचीनम् अन्यद् अनु वर्तते रज उद् अन्येन ज्योतिषा यासि सूर्य ॥६॥
येन सूर्य ज्योतिषा बाधसे तमो जगच् च विश्वम् उदियर्षि ? भानुना ।
तेनास्मद् विश्वाम् अनिराम् अनाहुतिम् अपामीवाम् अप दुष्वप्न्यं सुव ॥७॥
विश्वाम् अनिराम् अपामीवाम् अनाहुतिम् आमुष्यायणायामुष्या॰ पुत्राय प्र हिण्म ॥८॥ ॥अ॰५॥

१७.२६

द्यावापृथिवी वहतं दुष्वप्न्यं परा वहतं दुष्वप्न्यम् ।

अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म ॥१॥
वातान्तरिक्षे वहतं [दुष्वप्न्यं परा वहतं दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥२॥
इन्द्राग्नी वहतं [दुष्वप्न्यं परा वहतं दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥३॥
मित्रावरुणौ वहतं [दुष्वप्न्यं परा वहतं दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥४॥
भवाशर्वौ वहतं [दुष्वप्न्यं परा वहतं दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥५॥
देवाश्विना वहतं दुष्वप्न्यं परा वहतं दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥६॥
देवा मरुतो वहत दुष्वप्न्यं परा वहत दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥७॥
देवा॰ पितरो वहत दुष्वप्न्यं परा वहत दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥८॥
देव सूर्य वह दुष्वप्न्यं परा वह दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥९॥
देव चन्द्रमो वह दुष्वप्न्यं परा वह दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥१०॥
देवा नक्षत्राणि वहत दुष्वप्न्यं परा वहत दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥११॥
दर्शिर आपो वहत दुष्वप्न्यं परा वहत दुष्वप्न्यम् ।
[अमुष्यामुष्यायणस्यामुष्या॰ पुत्राय प्र हिण्म] ॥१२॥
देव विष्णो वह दुष्वप्न्यं परा वह दुष्वप्न्यम् ।
त्वं न इन्द्र महते सौभगायादब्धैः परि पाह्य् अक्तुभिः ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥४॥
त्वं न इन्द्रोतिभिश् शिवाभिश् शंतमो भव ।
आरोहन् त्रिदिवं दिवो गृणानस् सोमपीतये प्रियधामा स्वस्तये ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥५॥
त्वम् इन्द्रासि विश्वजित् सर्ववित् पुरुहूतस् [त्वम् इन्द्र] ।
त्वम् इन्द्रेमं सुहवं स्तोमम् एरयस्व शिवाभिस् तनूभिर् अभि न[स्] सचस्व ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशु[भिर्] विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥६॥
असद्यो दिवि पृथिव्याम् उतासि न त आपुर् महिमानम् अन्तरिक्षे ।
अदब्धेन ब्रह्मणा वावृधानस् स त्वं न इन्द्र दिवि षन् शर्म यच्छ ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥७॥
त्वं रक्षसे प्रदिशश् चतस्रस् त्वं शोचिषा नभसी वि भासि ।
त्वम् इमा विश्वा भुवनानि तिष्ठस्य् ऋतस्य पन्थाम् अन्व् एषि विद्वान् ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥८॥ ऋ॰ २०

१८.३२

पञ्चभिः पराङ् तपस्य् एकयार्वाङ् अशस्तिम् एषि सुदिने बाधमानः ।
त्वं त्रितं त्वं पर्य् एष्य् उस्रम् ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥१॥
त्वम् इन्द्रस् त्वं महेन्द्रस् त्वं विष्णुस् त्वं प्रजापतिः ।
तुभ्यं यज्ञो वि तायते तुभ्यं जुह्वति जुह्वतः ।
तवेद् विष्णो बहुधा वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥२॥
असति सत् प्रतिष्ठितं सति भूतं प्रतिष्ठितम् ।
भूतं ह भव्य आहितं भव्यं भूते समाहितम् ।
तवेद् विष्णो बहु[धा] वीर्याणि ।
त्वं नः पृणीहि पशुभिर् विश्वरूपैस् सुधायां मो धेहि परमे व्योमन् ॥३॥
शुक्रो ऽसि भ्राजो ऽसि ।

[illegible]
रुचिर् असि रोचो ऽसि ।
[illegible]
विराजे नमः स्वराजे नमः सम्राजे नमः ॥[illegible]
[illegible]
विराजे नमः स्वराजे नमः सम्राजे नमः ॥[illegible]
[illegible]

अथर्ववेदे पैप्पलादशाखायाम् अष्टादशः काण्डः समाप्तः ॥

१९.१

[illegible]

आरे अस्मद् दधते दैव्यं भयं सुवीर्यम् ।
मरुतश् शर्म यच्छत ॥११॥
इहेति द्यावापृथिवीह पर्वता अपश् च सूर्यम् उरु अन्तरिक्षम् ।
वनस्पतीन् ओषधीर् गन्धर्वीश् च ऋतस्य नः पतयो मृळयन्तु ॥१२॥
हुवे विष्णुं पूषणं ब्रह्मणस् पतिं भगं नु शंसं सवितारम् ऊतये ।
इह सोमो वरुणो वायुर् अग्निर् मम उभो [अ]वसे नो गमन्तु ॥१३॥
पातं न इन्द्रापूषणा वरुणः पान्तु मरुतः ।
अपां नपा[त्] सिन्धवस् सप्त पातन पातु [नो] विष्णुर् उत द्यौः ॥१४॥
पातां नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोमो नो अंहसः ।
पातु नो देवी सुहवा सरस्वती पात्व् अग्निर् ये शिवा [अ]स्य पायवः ॥१५॥
पातां नो देवाश्विना शुभस्[पती] उषासानक्तोत न उरुष्यताम् ।
अपां नपाद् विहुती गयस्य चिद् देवो त्वष्टर् वर्धय ? शर्म यच्छ नः ॥१६॥ ऋ॰ १६

१९.२

त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस् पतिः ।
पुत्रैर् भ्रातृभिर् अदितिर् नु पातु नो दुष्टरं त्रायमाणं सहः ? ॥१॥
अंशो भगो वरुणो मित्रो अर्यमादितिः पान्तु अंहसः ।
अप तस्य द्वेषो गमेद् अभिह्रुतो यावयच् छत्रुम् अन्तितम् ॥२॥
देव त्वष्टर् वर्धय सर्वतातये पिबे सम् उ प्रिये मादयाद्युः ? ।
उरुष्या णो ? दधिरः प्रयच्छन् ? पीनः पितर् यावय दुच्छुनाम् इतः ॥३॥
यो नो यचो उभिदसति सनाभिस् तं मम सोम पलिता अप यन्ति ।
शीर्षिम् तान् वृश्चन् पता ? वृश्चो मा ते दधान् सूर्यम् उच्चरन्तम् ॥४॥
त्वयेद्या त्वया सोम शम्भिना त्वया सुशिप्रा शाशद्मेह वयम् ।
तं त्वं वृषेद् अभ्यवद्यावामे ? न स दभ्नेन यदति सनाभिः ॥५॥
परेतेन तान् चक्ष्यो नयन्तु यमेन् पत्नान् पितरो होषयन्तु ।
यथा न जीवाति कतमश् चनैषाम् ॥६॥
येन सोमादितिः पथा मित्रा वा यन्त्य् अद्रुहः ।
तेना नो ऽवसा गमः ॥७॥
यो अस्य सोम सुरासिनो दुरशंसो अभिदासति ।
वज्रेणास्य मुखे जहि स संपिष्टो ऽपा ति ॥८॥
यो अस्य सोमाभिदासति सनाभिर् यश् च निष्ट्यः ।
अप तस्य बलं तिर महीव द्यौर् वधत्मना ॥९॥
पुनर् अयन् अयकृतम् अनु देवाः, पुनर् यन्ते ? नमस्कृतं विजानत् ।
पुन[ः] पुन[ः] पितरम् अनु पिता[र] इतम् उतापि इत्यथान् ? अशिर ॥१०॥
येन चाक्षी धावति येन धीनं घासयासि ।
तमी संवृत्य तौ तस्माद् यन्तिकार्येत् ? तम् अनयताम् ॥११॥
ये पार्थिवासश् च पथि च उराष् अन्तरिक्षे ।
ये वातस्य प्रकर्षेषि तेभिष् टं वर्तयामसि ॥१२॥
यो ऽप्सनान् ईषि यं च वयं द्विष्मः ।
यो ऽप्सनान् प रि मा मृ पः कु ख य मा नि ? विद्वतः ।
दद् देवस् तेषां वृश्चतु मूलम् उभ्यावो यथा ॥१३॥
यद् एष यर्यदन् अयम् अभ्यचितन् मतो संयते ।
इमौ रोगस्य पूर्व[प]ः प्रलदु कर्तारम् ऋच्छतु ॥१४॥
पुनर् यथा यदीय ? पुत्रं मनेयर्यतु ।
आदित्या तुर्ये ? महिमा मही सिन्धोर् इवाखनि[ः] ॥१५॥ ऋ॰ १५

१९.३

यान्वर् दीघान् जीवमानां प्रतीची अति पनत ? ।
प्रलद् कर्तारम् ऋच्छतु ॥१॥
यामन्तम् इच्छ सदानम् अन्यका द्युरिताचन ? ।
प्रतीचीर् यशद ऋच्छतु ॥२॥
यद् एतद् भूरि धासरः ? प्रतीचीनम् अपोदके ।

वि या ध्य वि प स ध्य त तु ? ॥३॥
नमस् ते प्रवतो नपाद् यतस् त्वम् समीहसे ।
मृळया नस् तनूभ्यश् शं नस् तोकेभ्यः कृधि ॥४॥
प्रवतो नपान् नमो अस्तु तुभ्यं नमस् ते हेतये तपुषे [च कृण्मः] ।
विद्म यो नाम परमं गुहा यत् समुद्रे अन्तर् निहितासि नाभिः ॥५॥
यां त्वा देवासो ऽजनयन्त विश्व इषुं कृण्वाना असनाय धृष्णुं ।
सा नो मृळ विदथे गृणाना मित्रस्य वरुणस्य प्रसूतौ ॥६॥
गृणं नः प्रवतो नपान् मरुतस् सूर्यत्वच[स्]ः ।
शर्म यच्छत सप्रथा[ः] ॥७॥
सुमृळत सुमृडत मृळया नो अपाभ्यः ।
तोकाय तन्वे [शं] श[ः] ॥८॥
नमस् ते [अ]स्तु विद्युते नमस् ते स्तनयित्नवे ।
नमस् ते अस्त्व् अश्मने येना दूडाशे [अ]स्यसि ॥९॥
यो ऽस्मान् ब्रह्मणस् पते ऽदेवो अभिदासति ।
सर्वं तं रीरिसि ? नः ॥१०॥
येभिस् सोम साह्मस्यासुरान् रन्धयासि ।
तेना नो ऽविता भुवः ॥११॥
येन देवा असुराणाम् ओजांस्य् अवृणीध्वम् ।
तेभिर् नो अधि वोचत ॥१२॥
उद् एनम् उत्तरं नयाग्ने घृतेभिर् आहुतः ।
सम् एनं वर्चसा सृज देवानां भागधा असत् ॥१३॥
इन्द्रेमं प्रतरं कृधि सजातानाम् असद् वशी ।
रायस् पोषेण सं सृज प्रजया च बहुं कृधि ॥१४॥
यस्य कृण्मो गृहे हविस् तम् अग्ने वर्धया त्वम् ।
तस्मै सोमो अधि ब्रुवद् अयं च ब्रह्मणस् पतिः ॥१५॥ अनु॰ १॥

१९.४

ऋतावानं वैश्वानरम् ऋतस्य ज्योतिषस् पतिम् ।
अजस्रं घर्मम् ईमहे ॥१॥
स इन्द्र[ः] प्रथम[ः] पृथग् यहस्य स्वर् उत्तिरन् ।
ऋतून् उत् सृजते वशी ॥२॥
अग्निः पीयूषधामसु कामो भूतस्य भव्यस्य ।
सम्राड् एको वि राजति ॥३॥
परि द्याम् इव सूर्यो ऽहीनां जनिम् आगमम् ।
रात्री जगद् इवान्यद् धंसात् अवधीद् ? इदं विषम् ॥४॥
यद् ब्रह्मभिर् यद् ऋषिभिर् यद् देवैर् विदितं पुरा ।
यद् भूतं भव्यम् आसन्वत् तेन ते वारये विषम् ॥५॥
अभि न मावृक्षि ? नद्यः पर्वता गिरयो मधु ।
मधु पृष्टी[ग्] शीपाला शम् आस्ने [अ]स्तु शं हृदे ॥६॥
यथेयम् उर्वी पृथिवी दाधार विष्ठितं जगत् ।
एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥७॥
[यथेयम् उर्वी पृथिवी] दाधारेमान् वनस्पतीन् ।
[एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥८॥]
यथेयम् उर्वी पृथिवी दाधार पर्वतान् अप[ः] ।
एवा ते ध्रियतां गर्भो अनु सूतुं सवितवे ॥९॥
सध्रुचीर् तद् अपसो दिवा नक्तं च सध्रुची[ः] ।
वरेण्यक्रतुर् अहम् अपो देवीर् उप ह्वये ॥१०॥
ओता आपः कर्मण्या मुञ्चन्त्व् इतः प्रणीतये ।
सद्यो भवन्त्व् एतवे ॥११॥
देवस्य सवितुस् सवे कर्म कृण्वन्ति मानुषा[ः] ।

शं नो भवन्त्व् अप ओषधीर् इमाः ॥१२॥
शतस्य ते धमनीनां सहस्रस्य हिराणां ते ? ।
अस्थुर् इन् मध्यमा या साकम् अन्ता अरंसत ॥१३॥
परि वस् सिकतामयी धनूस् स्थिरा शरम् स्थिराः ।
तिष्ठतेलयता सु कम् ॥१४॥
अमूर् या यन्तु जामयस् सर्वा लोहितवाससः ।
अभ्रातर इव योषितस् तिष्ठन्ति हतवर्चसः ॥१५॥
तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ मध्यमे ।
कनिष्ठिकासि तिष्ठास् तिष्ठाद् इद् धमनिर् मही ॥१६॥ अर्थ॰ ४॥ अनु॰ १॥

१९.५

नमो देवबधेभ्यो नमो राजबधेभ्यः ।
अथो ये विश्यानां बधास् तेभ्यो मृत्यो नमो ऽस्तु ते ॥१॥
नमस् [ते अधिवाकाय पराचाकाय ते] नमः ।
सुमत्यै मृत्यो ते नमो दुर्मत्यै त इदं नमः ॥२॥
नमस् ते यातुधानेभ्यो नमस् ते भेषजेभ्यः ।
मूलेभ्यो मृत्यो ते नमो ब्राह्मणेभ्य इदं नमः ॥३॥
नव च या नवतिम् च संयन्ति मन्या अभि ।
अवस् तास् सर्वा नश्यन्तु वाका अपचिताम् इव ॥४॥
सप्त च या[स्] सप्ततिश् च [सं]यन्ति ग्रैव्या अभि ।
[अवस् तास् सर्वा नश्यन्तु वाका अपचिताम् इव ॥५॥]
पञ्च च याः पञ्चाशच् च संयन्ति स्कन्ध्या अभि ।
अवस् तास् सर्वा नश्यन्तु वाका अपचिताम् इव ॥६॥
आबयो [अ]नाबयो रसस् त उग्र आबयो ।
आ ते करम्भम् अद्मसि ॥७॥
[विहह्लो नाम ते पिता मदावती नाम ते माता ।]
स [हि]न त्वम् असि यस् त्वम् आत्मानम् आवयः ॥८॥
तौविलिका च बभ्रुकर्णश् च नीलागलसाला शफः ।
तस्मात् तौविलिके ऽवेलयावायम् ऐलब ऐलयीत् ? ॥९॥
वीहि स्वाम् आहुतिं जुषाणो मनसा स्वाहा ।
स्वाहा मनसा यद् इदं करोमि ॥१०॥
यस्यास् त आसनि जुहोमि घोर एषां बद्धानाम् अवसर्जनाय कम् ।
भूमिर् इति त्वाभिप्रमन्वते जना निरृतिर् इति त्वाहं परि वेद विश्वतः ॥११॥
भूत्यै हविष्मन् तस्या ईशाते भागः ।
तेन ते विधेयं स्वाहा ॥१२॥
यथो म्न् अस्मत् त्वं निरृते विश्ववारे अयस्मयान् प्र मुमुग्धि पाशान् ।
यमेन त्वं यम्या संविदानो यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस् तस्मिन्
तान् पाशान् प्रति मुञ्च सर्वान् ॥१३॥
उत्तमो ऽस्य् ओषधीनां तव वृक्षा उपस्तयः ।
उपस्तिर् अस्तास्कं भूयात् यो [अ]स्माँ अभिदासति ॥१४॥
सबन्धुश् चासबन्धुश् च यो [अ]स्माँ अभिदासति ।
सबन्धून् सर्वान् तीर्त्वाहं भूयासम् उत्तमः ॥१५॥
यथा सोम ओषधीनाम् उत्तमं हविर् उच्यते ।
यथा त्वम् एव वृक्षाणाम् अहं भूयासम् उत्तमः ॥१६॥ अर्थ॰ १॥

१९.६

वरणो वारया[ता अयं देवो वनस्पतिः ।
[यक्ष्मो यो अस्मिन्न् आविष्टस् तम् उ देवा अवीवरन् ॥१॥]
इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च ।

देवानां सर्वेषां वाचा यक्ष्मं ते वारयामहे ॥२॥
यथा वृत्र इमा आपस् तस्तम्भ विश्वधा यतीः ।
एवा ते अग्निना यक्ष्मं वैश्वानरेण वारये ॥३॥
ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि ।
अथा त इन्द्रः केवलीर् विशो बलिहृतस् करत् ॥४॥
आ त्वाहार्षम् अन्तर् अभूर् ध्रुवस् तिष्ठाविचाचलत् ।
विशस् त्वा सर्वा आ यन्तु मा त्वद् राष्ट्रम् अधि भ्रशत् ॥५॥
इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलत् ।
इन्द्रेहैव ध्रुवस् तिष्ठेह राष्ट्रम् उ धारय ॥६॥
इन्द्र एतम् अदीधरद् ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रुवद् अयं च ब्रह्मणस् पतिः ॥७॥
ध्रुवं ते देवस् सविता ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश् चाग्निश् च राष्ट्रं धारयतां ध्रुवम् ॥८॥
ध्रुवा द्यौर् ध्रुवा पृथिवी समुद्राः पर्वता ध्रुवा[ः] ।
यथा ह धर्मणा ध्रुवा? ध्रुवो राजा विशाम् अयम् ॥९॥
वृषेन्द्रस्य वृषा दिवो वृषा पृथिव्या अयम् ।
वृषा विश्वस्य भूतस्य त्वम् एकवृषो भव ॥१०॥
समुद्र ईशे स्रवताम् अग्निः पृथिव्या वशी ।
सूर्यो नक्षत्राणाम् ईशे [त्वम् एकवृषो भव] ॥११॥
त्वं सम्राळ् असुराणां ककुन् मनुष्याणाम् ।
देवानाम् अर्धभाग् असि त्वम् एकवृषो भव ॥१२॥
परि वर्मान्य् एषाम् इन्द्रः पूषा च सस्रतुः ।
मुह्यन्त्व् अद्यामूस् सेना अमित्राणां परस्तराम् ॥१३॥
मुग्धा अमित्राश् चरताशीर्षाण इवाहयः ।
तेषाम् अग्निदग्धानाम् इन्द्रो हन्तु वरंवरम् ॥१४॥
एषु नद्ध वृषाजिनं हरिणस्य भियं कृधि ।
पराङ् अमित्र एषत्व् अर्वाची गौर् उपेषतु ॥१५॥ अर्थ॰ ३॥

१९.७

संसम् इद् युवसे वृषन्न् अग्ने विश्वान्य् अर्य आ ।
इळस् पदे सम् इध्यसे स नो वसून्य् आ भर ॥१॥
सं जानीध्वं सं [पृ]च्यध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥२॥
समानो मन्त्रस् समितिस् समानी समानं चित्तं सह वा मनांसि ।
समानेन वो हविषा जुहोमि ॥३॥
समानो मन्त्रस् समितिस् समानी समानं मनस् सह चित्तम् एषाम् ।
समानं मन्त्रम् अभि मन्त्रये वस् समानम् एनां हविषा जुहोमि ॥४॥
उत् सूर्यो दिव एति पुरो विश्वा निजूर्वन् ।
आदित्यः पर्वतो अधि विश्वदृष्टो अदृष्टहा ॥५॥
आयुर्विदं विपश्चितं श्रुतां कण्वस्य वीरुधम् ।
आहार्षं विश्वभेषजीम् अस्याहष्टान् नि शमयत् ॥६॥
नि गावो गोष्ठे असदन् नि मृगासो अविक्षत ।

नि केतवो जनानां न्य् अदृष्टा अलिप्सत ॥७॥
हिमवतः प्र स्रवथ तास् सिन्धुम् उप गच्छत ।
आपो ह मह्यं तद् देवीर् ददन् हृद्द्योतभेषजम् ॥८॥
अक्षिभ्याम् आद्योत पार्ष्णिभ्यां हृदयेन च ।
आपस् तत् सर्वं निः करन् त्वष्टा रिप्रम् इवाक्षरत् ॥९॥
सिन्धुपत्नीस् सिन्धुपत्नीस् सर्वा या नद्यस् स्थन ।
दत्त नस् तस्य भेषजं तेन वो भुनजामहे ॥१०॥
पुनन्तु मा देवजनाः पुनन्तु मनवो धिया ।
पुनन्तु विश्वा भूतानि पवमानः पुनातु माम् ॥११॥
पुनातु मा पवमानः क्रत्वे दक्षाय जीवसे ।
ज्योक् च सूर्यं दृशे ॥१२॥
उभाभ्यां देव सवितः पवित्रेण सवेन च ।
अस्मान् पुनीहि चक्षसे ॥१३॥
ईर्ष्याया ध्राजिं प्रथमाम् प्रथमां मध्यमाम् उत ।
सत्यं हृदय्यं शोकं तं ते निर् मन्त्रयामहे ॥१४॥
यद् यत् मे हृदि श्रितं मनस्कं पतयिष्णुकम् ।
तां त ईर्ष्यां मुञ्चामि निर् ऊष्माणं दृतेर् ? इव ॥१५॥
यथा भूमिर् मृतमना मृतान् मृतमनस्तरा ।
यथोत मम्रुषो मन एवेर्ष्योर् मृतं मनः ॥१६॥ अर्थ॰ १॥

१९.८

द्यौश् च मा पृथिवी च प्रचेतसौ शुक्रो बृहन् दक्षिणा मा पिपर्तु ।
अनु स्वधा चिकितां सोमो अग्निर् वायुर् मा पातु सविता भगश् च ॥१॥
पुनर् मनः पुनर् आयुर् न आगन् पुनश् चक्षुः पुनर् आकूतिर् आगन् ।
वैश्वानरो नो अदब्धस् तनूपा अन्तस् तिष्ठासि दुरिताद् अवद्यात् ॥२॥
सं वर्चसा पयसा सं तनूभिर् अगन्महि मनसा सं शिवेन ।
त्वष्टा सुदत्रो वरिवः कृणोत्व् अनु नो मार्ष्टु तन्वो विरिष्टम् ॥३॥
इदं तद् युज उत्तरं येनेन्द्रं शुम्भाम्य् अष्टये ।
अस्य क्षत्रं श्रियं महीं वृष्टिर् इव वर्धया तृणम् ॥४॥
अस्य क्षत्रम् अग्नीषोमाव् अस्य वर्धयतो रयिम् ।
अथो राष्ट्राभीवर्गे कृणुतं युज उत्तरम् ॥५॥
सबन्धुश् चासबन्धुश् च यो अस्मान् यश् च निष्ट्यः ।
यज्ञमानाय सुन्वते सर्वं तं रीरधासि नः ॥६॥
यशो हविर् वर्धताम् इन्द्रजूतं सहस्रवृष्णि सुभृतं सहस्वत् ।
प्रसर्स्राणम् अनु दीर्घाय जीवसे हविष्मन्तं वर्धय सर्वतातये ॥७॥
यशा इन्द्रो यशा [अ]ग्निर् यशा[स्] सोमो अजायत ।
यशा विश्वस्य भूतस्याहम् अस्मि यशस्तमः ॥८॥
इयन्तो मन्ये यशसं यशोभिर् यशस्विनो हविषैनं विधेम ।
स नो दधद् राष्ट्रम् इन्द्रजूतं तव आवे ? [अ]विधाके स्याम ॥९॥
अव ज्याम् इव धन्वनो मन्युं तनोमि ते हृदः ।
यथा संमनसौ भूत्वा सखायाव् इव सचावहै ॥१०॥
वि ते मन्युं नयामसि सखायाव् इव सचावहै ।
अधस् ते अश्मनो मन्युं गुहयामि नि दध्मसि ॥११॥
अभि तिष्ठामि ते मन्युं पार्ष्णिभ्यां प्रपदाभ्याम् ।
परा ते देहिं वधं परा मन्युं सुवामि ते ॥१२॥
हिरण्ययः पन्था आसीद् अरित्राणि हिरण्मया ।
नावो हिरण्ययीर् आसन् याभिः कुष्ठं निरावहन् ॥१३॥
सुवर्णसवनं गिरौ जातं हिमवतस् परि ।
धनैर् अभि श्रुतं यन्ति कुष्ठंहि तक्मनाशनम् ॥१४॥

[illegible]

यशसं मा देवस् सविता कृणोतु प्रियो दातुर् दक्षिणाया[स्] स्याम् अहम् ॥६॥
यथेन्द्रो द्यावापृथिव्योर् यशस्वान् यथाप ओषधीषु [यशस्वतीः]।
यथा विश्वेषु देवेषु एवा देवेषु यशसस् स्याम ॥७॥
अच्छा वयम् इन्द्रं यशसं यशोभिर् यशस्विनो हविषैनं विधेम।
स नो ददद् राष्ट्रम् इन्द्रजूतं तस्य राते ? अधिपाके स्याम ॥८॥
यद् यातु यवसस् सोमो ऽग्निर् बृहस्पतिर् वसुभिर् यद यातु।
अस्य धियम् अभिसंयात सर्वे उग्रस्य चेतसस् संमनसस् सुजाता[ः] ॥९॥
एह यात माप याताग्न्य् अस्तात् पूषा वः पुरस्ताद् अपथं कृणोतु।
वास्तोष् पतिर् अनु वो ऽयम् अह्वन् मयि सुजा[ता] रमतिर् वो ऽस्तु ॥१०॥
यो वश् शुष्मो हृदयेष्व् अन्तर् याकूतिर् [यो] मनसि प्रविष्टा।
तां शीवयामि ? हविषा घृतेन मयि सुजाता रमतिर् वो ऽस्तु ॥११॥
मम चित्तं परि वो मन्यत इन्द्राग्न्योर् इव हवम् एत सर्वे।
बृहस्पतिर् वो नि युनक्तु मह्यं मम याचम् एकचित्तास् सचध्वम् ॥१२॥
अहं गृह्णामि मनसा मनांसि मम चित्तम् उप चित्तेभिर् एत।
मम वशे हृदयं वः कृणोमि मम यातम् अनुवर्त्मान एत ॥१३॥
सं वश् चक्षुर् गच्छतु सं मनो धाता पथम् अनु व्रतं वः कृणोतु।
ये वो बृहन्त उत ये कुमारा मम यातम् अनु यातेभिर् एत ॥१४॥ ॥का° २॥

१९.११

अश्वत्थो देवसदनस् [तृतीयस्याम् इतो दिवि।
[तत्रामृतस्य चक्षणं ततः कुष्ठो] अजा[य]त ॥१॥
देवेभ्यो अधि जातो ऽसि सोमस्य सखा हितः।
स प्राणायापानाय चक्षुषे ऽस्य मृड ॥२॥
अयक्ष्मे सुपदे वेधिष इद् अभिहितो मृत्युभिर् ये सहस्रम्।
यमो मह्यं पुनर् इत् त्वां ददातु तस्मै देवाय हविषा विधेम ॥३॥
यत् ते देवी निर्ऋतिर् आबबन्ध दाम ग्रीवास्व् अविमोक्यम्।
तत् ते वि ष्याम्य् आयुषे वर्चसे बलायादोमदम् अन्नम् अद्धि प्रसूतः ॥४॥
नमो ऽस्तु ते निर्ऋते विश्ववारे अयस्मयान् वि चृता बन्धपाशान्।
यमेन त्वं पितृभिस् संविदान उत्तमे नाके अधि रोहयैनम् ॥५॥
अन्तर्दावे जुहुता स्व् एतद् यातुधानक्षयणं घृतं मा।
आराद् रक्षांसि प्रति दह त्वम् अग्ने न नो गृहाणाम् उप तीतपासि ॥६॥
शर्वो वो ग्रीवा अशरीत् पिशाचा[ः] पृष्टीर् वो ऽपि शृणात्व् अग्निः।
वीरुद् वो विश्वधा वीर्या मृत्युना सम् अजीगमत् ॥७॥
अपिशाचं नो अधरात् [अपिशाचं न उत्तरात्।
[इन्द्रापिशाचं नः पश्चाद्] अपिशाचं पुरस् कृधि ॥८॥
इन्द्रश् चकार प्रथमो नैर्हस्तम् असुरेभ्यः।
वृश्चामि शत्रूणां बाहून् अनेन हविषाहम् ॥९॥
निर्हस्तश् शत्रुर् अभिदासन् नो ऽस्तु ये सेनाभिर् युधम् आयन्त्य् अस्मान्।
सम् अर्पयेन्द्र महता वधेन द्रात्व् एषाम् अघहारो विविद्धः ॥१०॥
अप मन्युर् अपायताय बाहू मनोयुजा।
पराशर त्वं तेषां पराञ्चं शुष्मम् अर्दयाधा नो रयिम् आ कृधि ॥११॥
आतन्वाना आयच्छन्तो अस्यन्तो ये च धावथ।
निर्हस्ताश् शत्रवस् स्थनेन्द्रो वो ऽद्य पराशरी[त्] ॥१२॥
निर्हस्ताम् सन्तु शत्रवो ऽङ्गैषां म्लापयामसि।
अथैषाम् इन्द्र वेदांसि शतशो वि भजामहै ॥१३॥
निर्हस्तेभ्यो नैर्हस्तं यं देवाश् शरुम् अस्यथ।
अयन्तु सप्तानो मम स्थिरेणेन्द्रेण मेदिना ॥१४॥ ॥का° १॥

१९.१२

[illegible]

अस्थिस्रंसं परुस्रंसम् आस्थितं हृदयामयम्।
बला[सं] सर्वं नि× कृण्य् अङ्गेष्ठा यश् च पर्वसु ॥७॥
निर् बलासं बलासिन[×] कृणोमि पुष्करं यथा।
छिनद्म्य् अस्य बन्धनं मूलम् उर्वार्वा यथा ॥८॥
निर् बलासेतः प्र पत शुपर्णो वसतेर् इव।
अथो [इट] इव हायनो ऽप द्राह्य् अवीरहन् ॥९॥
आ सूपायस्व शर्मणि यर्पस्य प्रपथस्य च।
यथाङ्ग वर्धतां ते शेपस् तेन योषितम् इज् जहि ॥१०॥
येना कृशम् वधयन्ति येन हिन्वन्त्य् आतुरम्।
तेनास्य ब्रह्मणस् पते धनुर् इवा तानया पसः ॥११॥
आहं तनोमि ते पसो ऽधि ज्याम् इव धन्वनि।
क्रमस्वर्श इव रोहितम् अनवग्लायता सदा ॥१२॥
देवाः कपोत इषितो यद् इच्छन् दूतो निर्ऋत्या इदम् आजगाम।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे [शं] चतुष्पदे ॥१३॥
शिवः कपोत इषितो नो अस्त्व् अनागा देवाश् शकुनो गृहेषु।
अग्निर् हि विप्रो जुषतां हविर् नः परि हेतिः पक्षिणी नो वृणक्तु ॥१४॥
हेतिः पक्षिणी न दभात्य् अस्मान् आष्ट्री पदं कृणुते अग्निधाने।
शं नो गोभ्य उत पुरुषेभ्यो मा देवा हिंसीत् कपोतः ॥१५॥
इदं यद् दूताः परि सीं वदाथ(?) संमोदयन्तो दुरिता पदानि।
अथा कपोतं नुदत प्रणोद हित्वा न ऊर्जं प्र पताद् पतिष्ठः ॥१६॥
नुदे त्वा प्र णुदे त्वा कपोत रक्षसा सह।
यतो न पुनर् आयासि तत्र त्वा गमयामसि ॥१७॥ ॥का° १॥

१९.१४

यथायं वाहो अश्विना समैति सं च वर्तते।
एवा माम् अभि ते मनस् समैतु सं च वर्तताम् ॥१॥
अहम् आ खिदामि ते मनो राजाश्वः पृष्ट्याम् इव।
रेष्माछिन्नं यथा तृण मयि ते वेष्टतां मनः ॥२॥
आञ्जनस्य मधुघस्य कुष्ठस्य नलदस्य च।
तुरो भगस्य हस्ताभ्याम् अनुरोधनम् आ भरे ॥३॥
अयम् आ यात्व् अर्यमा पुरस्ताद् विषितस्तुपः।
अस्या इच्छन्न् अग्रुवै पतिम् उतो जायाम् अजानये ॥४॥
अश्रमद् इयम् अर्यमन्न् अन्यासां समनं यती।
अङ्गो न्व् अस्या अर्यमन्न् अन्याम् समनम् आयति ॥५॥
धाता दाधार पृथिवीं धाता द्याम् उत सूर्यम्।
धातास्या अग्रुवै पतिं दधातु प्रतिकाम्यम् ॥६॥
महान् वायो मयुमद् वरयन्न् मह्यं सूर्यो ऽजर[ज्] ज्योतिषां कम्।
मह्यं देवा उत विश्वे सजोषा मह्यं देवस् सविता व्यचो धा[त्] ॥७॥
अहं दाधार पृथिवीम् उत द्याम् अहं सिन्धून् [स]प्त सत्र साकम्।
अहं सत्यम् अनृतं यद् वदाम्य् अहं दैवीम् परि वाचं विशश् च ॥८॥
अहं विवेच पृथिवीम् उत द्याम् अहम् ऋतूंर् [स]प्त सत्र साकम्।
अहं यद् परि सर्वा बभूव यो अस्मीभोमाव् अभूप सखाया ॥९॥
अहर्गृहेभ्यो नः प्रथमं धेनुष्याम् त्वम् अरुन्धति।
अधमेव यशसं शर्म यच्छ मनुष्यैः ॥१०॥
शर्म यच्छन्त्व् ओषधिम् अह देवीर् अरुन्धती।
करत् पयस्वन्तं गोष्ठम् अयक्ष्मान् उत पूरुषान् ॥११॥
विश्वरूपां सुभगाम् अच्छावदामि जीवलाम्।

सा नो दभ्रस्यास्तां हेति दूरं भवतु गोभ्यः ॥१२॥
शौ ६.९३.१ यमो मृत्युर् अघमारो निर्ऋथो बभ्रु शर्वो ऽस्ता [नील]शिखण्डी ।
देवजना[स्] सेनाम् उत्तस्थिवांसस् ते ऽस्माकं परि वृञ्जन्तु वीरान् ॥१३॥
शौ २ मनसा होमैर् हरसा घृतेन शर्वायास्त्र उत राज्ञे भवाय ।
नमस् तेभ्यो मम एभ्यः कृणोम्य् अन्यत्रास्मद् अघविषा नयन्तु ॥१४॥
शौ ३ त्रायध्वं नो अघविषाभ्यो वधाद् अग्नीषोमा वरुणः पूतदक्षा[ः] ।
विश्वे देवा मरुतो विश्ववेदसो वातापर्जन्ययोस् सुमतौ स्याम ॥१५॥ ॥ऋ° १०

१९.१५

शौ ७.५४.२ सं जानतां मनसा सं चिकित्या सं गच्छतु मन्युना दैव्येन ।
मा घोषा युक्ता बहुले विनिर्हते मेषुः पतद् इन्द्रस्याहन्य् आगते ॥१॥
शौ ६.९४.१ सं वो मनांसि सं व्रता सम् आकूतीर् नयामसि ।
इमे ये विव्रतास् [स्थन] तान् वस् सं न[म]यामसि ॥२॥
शौ ६.७४.२ संज्ञपनं वो मनसो ऽथो संज्ञपनं हृदः ।
अथो भगस्य यच् छ्रान्तं तेन संज्ञपयामि माम् ॥३॥
शौ १ सं वः पृच्यन्तां तन्वस् सं मनांसि सम् उ व्रता ।
सं वो [ऽयं] ब्रह्मणस् पतिस् सोम[स्] सं स्पर्शयातु माम् ॥४॥
शौ ७.५४.१ संज्ञानं नस् स्वेभ्यस् संज्ञानम् अरणेभ्यः ।
संज्ञानम् अश्विना युवम् इहास्मासु नि यच्छतम् ॥५॥
शौ ६.७४.१ यथादित्या वसवस् संबभूवुर् मरुद्भिर् उग्रा अहृणीयमानाः ।
एवा त्रिणामन्न् अहृणीयमान इमान् जनान् संमनसस् कृणु त्वम् ॥६॥
शौ ६.७५.१ तै ब्रा ३.३.११.२ निर् अमुं नुद ओकसस् सपत्नो यः पृतन्यति ।
निर्बाध्येन हविषेन्द्र एनं पराशरी[त्] ॥७॥
शौ २ तै ब्रा ३ इहि तिस्रः परावत इहि पञ्च जनाँ अनु ।
इहि चत्वारि रोचना यावत् सूर्यो असद् दिवि ॥८॥
शौ २ तै ब्रा २,४ परमां त्वा परावतम् इन्द्रो देवो अचीक्लृपत् ।
यतो न पुनर् आयसि शश्वतीभ्यस् समाभ्यः ॥९॥
शौ ४.१६.४ प्रतीचीनफलो [हि त्वम् अपामार्ग बभूविथ ।
[सर्वान् मच् छपथाँ अधि वरीयो यावयास् त्वम्] ॥१०॥
शौ २.७.१ अघद्विष्टा देवजाता वीरुच् छपथयोपनी ? ।
उद्रा मलम् इवापानैस् सर्वान् मच् छपथाँ अधि ॥११॥
शौ ६.७६.१ य एनं परिषीदन्ति समादधति चक्षसे ।
संप्रेद्धो [अ]ग्निर् जिह्वाभिर् उद् एतु हृदयाद् अधि ॥१२॥
शौ २ अग्ने[स्] सांतपनस्याहम् आयुषे पदम् आ रभे ।
अद्धातिर् यस्य पश्यति [धू]मम् उद्यन्तम् आस्यतः ॥१३॥
शौ ३ यो ऽस्य समिधं वेद क्षत्रियेण समाहिताम् ।
ना भिह्वारे पदं नि दधाति स मृत्यवे ॥१४॥
शौ ४ नैनं घ्नन्ति पर्यायिणो न सन्नाँ अव गच्छति ।
अग्नेर् यः क्षत्रियो विद्वान् नाम गृह्णात्य् आयुषे ॥१५॥ ॥ऋ° १०

१९.१६

शौ ६.७७.१ अस्था[द्] द्यौर् अस्थात् पृथिव्य् अस्थाद् विश्वम् इदं जगत् ।
तिष्ठन्ति य[ं]ता इमे स्वामन्न् अश्वा [अ]रंसत ॥१॥
शौ २ ऋ १०.१९.५ य [उ]दानड् व्ययनं य [उ]दानट् परायणम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥२॥
[यो] आवृतो न्यावृतो ऽप्यावर्तनम् आयनम् ।
अग्नेय चतस्र आवृतस् ताभिर् इवा तर्पयामसि ॥३॥

शौ ३ जातवेदो नि वर्तय शतं ते सन्त्व् आवृतः ।
सहस्रं त उपावृतस् ताभिर् एनं नि वर्तय ॥४॥
शौ ६.२०.१ अहरहर् भवतु देव सोमाग्निर् यत्र मरुतो मृळता नः ।
मा नो विदद् अभिभा मो अशस्तिर् मा नः प्रापद् दुच्छुना द्वेष्या या ॥५॥
शौ २ यो ऽद्य सेन्यो वधो जिघांसन् न उदायति ।
युवं तं मित्रावरुणाव् अस्मद् यावयतं परि ॥६॥
शौ ३ इतश् चामुतश् चापं वरुण यावय ।
वि महच् छर्म यच्छ वरीयो यावया वधम् ॥७॥
शौ १०.१२९.१ अपेन्द्र परायो मघवन्न् अमित्रान् अपाचो अभिभूते नुदस्व ।
अपोदीचो अप शूराधराच उरौ यथा तव शर्मन् मदेम ॥८॥
शौ ६.७८.१ तेन भूतस्य हविषा पुनर् आ प्यायताम् अयम् ।
जायां याम् अस्मा [आ]विदन् ता रसेनाभि वर्धताम् ॥९॥
शौ २ अभि वर्धतां प्रजयाभि राष्ट्रेण (व)र्धताम् ।
पत्या सहस्रवीर्यया रयी स्ताम् अनुपक्षितौ ॥१०॥
शौ ३ त्वष्टा जायाम् अजनयत् त्वष्टास्यै त्वां पतिं दधौ ।
त्वष्टा सहस्रम् आयूंषि दीर्घम् आयुः कृणोतु वाम् ॥११॥
शौ ६.८०.१ अन्तरिक्षेण पतति सर्वा भूतावचाकशत् ? ।
शुनो दिव्यस्येदं महस् तस्मा एतेन हविषा जुहोमि ॥१२॥
शौ ३ अप्सु ते अग्न दिवि ते सधस्थं समुद्र आत्मा महिमा ते पृथिव्याम् ।
शुनो दिव्यस्येदं महस् तस्मा एतेन हविषा जुहोमि ॥१३॥
शौ २ ये त्रयः कालकाञ्जा दिवि देवा इव श्रिताः ।
तान् सर्वान् अह्व ऊतये ऽस्मा अरिष्टतातये ॥१४॥
यत् पुरुषं हविर् इच्छसि श्वा दिव्यो मधीरद् ? ते ।
तस्माद् अहन्या दद् पुरुषं मा परा वधीः ॥१५॥
यः पिशाचो यो दंशा श्वा दिव्यः परिद्रवः ।
तस्मादं नाम वरात ? अस्मा अरिष्टतातये अयं नो जीवताद् इति ॥१६॥
शौ ६.७९.१ अयं नो नभ[स]स् पतिस् संस्फानो अभि [रक्षतु] ।
[असमातिं] गृहेषु नः ॥१७॥
शौ २ त्वं नो नभसस् पतिर् ऊर्जं गृहेषु धारय ।
आ पुष्टम् [एत्व् आ वसु] ॥१८॥
शौ ३ देव संस्फान सहस्रपो[षस्ये]शिषे ।
तस्य नो धेहि तस्य ते महीमहि [तस्य] ते भक्तिवांसो भूयास्म स्वाहा ॥१९॥ ॥ऋ° २४ ॥अनु° २३

१९.१७

शौ ६.८१.१ यन्तासि यच्छसे हस्ताव् अप रक्षांसि सेधसि ।
प्रजां धनं च गृह्णानः परिहस्तो ऽभूद् अयम् ॥१॥
शौ २ परिहस्त वि धारय योनिं गर्भाय कर्तवे ।
मर्यादे पुत्रम् आ धेहि तं त्वम् आ गमयागमे ॥२॥
शौ ३ यं परिहस्तम् अबिभर् अदितिः पुत्रकाम्या ।
त्वष्टा तम् अस्या आ बध्नाद् यथा पुत्रं सुवाद् इति ॥३॥
शौ ६.८२.१ आगच्छत आगतस्य नाम गृह्णाम्य् आयतः ।
इन्द्रस्य वृत्रघ्नो राज्ञो वासवस्य शतक्रतो[ः] ॥४॥
शौ २ येन सूर्यां सावित्रीम् अश्विनोह[तु]ः पथा ।
तेन माम् अब्रवीद् भगो जायाम् आ वहताद् इति ॥५॥
शौ ३ यस् ते अङ्कुशो वसुदानो बृहन्न् इन्द्र हिरण्ययः ।
तेना जनीयते जायां मह्यं धेहि शतक्रतो ॥६॥
शौ ६.१०८.१ त्वं नो मेधे प्रथमा गोभिर् अश्वेभिर् आ गहि ।
त्वं सूर्यस्य रश्मिषु त्वं नो असुरा यज्ञिया ॥७॥
शौ २ मेधाम् अहं प्रथमां ब्रह्मण्वतीम् ऋषिष्टुताम् ।

प्रपीतां ब्रह्मचारिभिर् देवानाम् अवसा वृणे ॥८॥
शौ ५ मेधां सायं मेधां प्रातर् मेधां मध्यन्दिनं परि ।
मेधां सूर्यस्योदतोदीराणा उत् तुष्टुम ॥९॥
शौ २.२९.१ पार्थिवस्य रसे देव भगस्य तन्वो बले ।
आयुर् अस्मै सोमो [दधाद्] वर्चो धाता बृहस्पतिः ॥१०॥
शौ २ तै १४.५.२ आयुर् अस्मै [धेहि जातवेदः प्रजां त्वष्टर् अधिनिधेह्य् अस्मै ।
[रायस् पोषं सवितर् आ सुवास्मै शतं जीवातु शरदस् तवायम्] ॥११॥
शौ ३ पाठभे० आशीर् ण ऊर्जम् उत सुप्रजास्त्वं दक्षं धातु ? द्रविणं सुवर्चसम् ।
सं जयन् क्षेत्राणि सहसायम् इन्द्र कृण्वानो अन्यान् अधरान् सपत्नान् ॥१२॥
शौ ६.६८.१ आयम् अगन् सविता क्षुरेणोष्णेन वायव् उदकेनेहि ।
आदित्या रुद्रा वसव उन्दन्तु सचेतसस् सोमस्य राज्ञो वपत प्रचेतसः ॥१३॥
शौ ३ पै ३.५१.१ येनावपत् सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।
तेन ब्रह्माणो वपतेदम् अस्यायुष्मान् दी[र्घा]युर् अयम् अस्तु वीरः ॥१४॥
शौ १ अदिति[श्] श्मश्रु वपत्व् आप उन्दन्तु वर्चसा ।
धारयतु प्रजापतिः पुनः पुनस् सुवपाय ॥१५॥ ॥ऋ° १०

१९.१८

शौ ६.९०.१ यास् ते हिरा धमनयो ऽङ्गान्य् अनु विष्ठिता[ः] ।
तासां ते सर्वासां साकं निर् विषाणि ह्वयामसि ॥१॥
शौ १ यां ते रुद्र इषुम् आस्यद् अङ्गेभ्यो हृदयाय च ।
इमां ताम् अद्य ते वयं विषूचीं वि वृहामसि ॥२॥
शौ ३ पै १.१०.१ नमस् ते रुद्रास्यते नमः प्रतिहिताभ्यः ।
नमो विसृज्यमानाभ्यो नमस् आपताभ्यः ? ॥३॥
अपाचीः परिमूर्धन्या यास् ते धम[न]यश् शतम् ।
तास् ते प्र हार्पन्तां ? पृथक् शिन्यो लोहितावटम् ॥४॥
स्यन्दन्तां लोचनावतीर् अनु त्वा लोहितावटम् ।
यथास्याम् अन्तं न रसयन् नानुवृक्तम् इवोदकम् ॥५॥
प्रतीचीनमुखं पति प्रतीचीस् प्रवत्तः कृताः ।
अपाचीस् तु हित्वा कुत्वा [अ]यं पृष्ठतस् ओषधीः ॥६॥
शौ ६.९१.१ इमं यवम् अष्टायोगैष् षड्योगेभिर् अचर्कृषुः ।
स वा ते तन्वो रपः प्रतीचीन[म्] अप हव[म्] ॥७॥
शौ २ ऋ १०.६०.११ न्यग् वातो वाति न्यक् तपति सूर्यः ।
नीचीनम् अघ्न्या दुहे न्यग् भवतु ते रपः ॥८॥
शौ ३ आप इद् वा उ भेषजी[र्] आपो अमीवचातनीः ।
आपस् समुद्रायां पत्नीः ? परा वहन्तु ते रपः ॥९॥
शौ ६.१०१.१ अमी ये युधम् आयन्ति केतून् कृत्वानीकशः ।
इन्द्रस् तान् पर्य् अहार् दाम्ना तान् अग्ने सं द्या त्वम् ॥१०॥
यावती[स्] सिञ्चा आ पश्लि मी का मी चा खल मा ? ।
[इन्द्रस् तान् पर्य् अहार् दाम्ना तान् अग्ने सं द्या त्वम्] ॥११॥
शौ २ सं परमान् सम् अवमान् अथो सं द्यामि मध्यमान् ।
इन्द्रस् तान् पर्य् अहार् दाम्ना तान् अग्ने सं द्या त्वम् ॥१२॥
शौ ३ संदानं वो बृहस्पतिस् संदानं सविता करत् ।
संदानम् इन्द्रश् चाग्निश् च संदानं भगो अश्विना ॥१३॥
वा ११.११ यास् ते रुचो देव सूर्ये या अग्नौ दिव्य् आतता[ः] ।
ताभिर् माम् अद्य सर्वाभि[र्] मनुष्येभ्यो रुचे कृ[धि] ॥१४॥
वा १८.४८ [रुचं] मा धेहि ब्रह्मसु रुचं राजसु धेहि माम् ।
रुचं विश्वेषु शूद्रेषु मयि धेहि रुचं रुचम् ॥१५॥
या रुचो हिरण्यये या [अ]ग्नौ याश् च सूर्ये ।

इन्द्राग्नी म एता रुचो रुचो धेहि बृहस्पते ॥१६॥ ॥ऋ° १४

१९.१९

शौ ६.११६.१ अव मा पाप्मन् सृज वशी सन् मृळयासि नः ।
आ मा भद्रस्य धामन् मा त्वं धेह्य् अविह्रुतम् ॥१॥
शौ ३ यो मा पाप्मन् न जहासि तम् उ त्वा जहिमो वयम् ।
शौ ३ अन्यत्रास्मन् न्य् उच्य[तु] सहस्राक्षो ऽमर्त्यः ॥२॥
शौ ३ यथो ऽभि व्यावर्तन्ते भिः पाप्मन् त्वां सुवामसि ।
शौ ३ यो नो द्वेष्टि तं गच्छ यं द्विष्मस् तम् [इद्] जहि ॥३॥
स या एवासि संनद्धो न भोगम् अविदन्न् अहे ? ।
शिरो भिनद्मि ते ऽपाद् [अथो] मो मध्यतः पातु भूमिराड् खलतये ॥४॥
सूर्यो ऽस्मान् दिवा पातु मृत्योः पाशात् खलतये ।
अथो नो मध्यतः पातु मा नो निर्ऋतिं यच्छतु ॥५॥
सं वां चक्षुस् सं हृदयं [सं] मनसाधीतम् ।
यतो अस्यास् सकृपयन् माया ? पूतं होमेन सर्पिषा ॥६॥
यत् कक्षीवान् संवननं पुत्रो अङ्गिरसाम् अवेत् ।
तेन माम् अद्य देवास् संप्रियं सम् अवीवनन् ॥७॥
शौ ६.७४.१ संवननं वाङ् मनसो [अ]थो संवननं हृद[ः] ।
अथो भगस्य यच् छ्रान्तं तेन संज्ञपयामि माम् ॥८॥
अहं ते मनसा मनश् चक्षुर् गृह्णामि चक्षुषा ।
एवा परि वजस्य मा भयासि मयि ते मनः ॥९॥
इयक्षेव चाक्षा भीमा वर्चसा गिरौ ।
शौ ६.१०२.१ देव्यक्षिन्नं यथा त्वं वेदयामि मनो मयि ॥१०॥
परि त्वा पातुर् असरं परि भ्रातुः परि स्वसुः ।
परि त्वाण्याभ्यस् तरीभ्यो मो वो व्य ए ? असरम् ॥११॥
य इन्द्रस्य सभायाम् यक्षिन् समितिम् आसते ।
हिरण्या यस्य पर्णानि तस्मा अश्वत्थ ते नमः ॥१२॥
यस् छायाभिर् अन्तरिक्षम् आ पुर पति भिक्षवः ।
छन्दांसि यस्य पर्णानि तस्मा अश्वत्थ ते नमः ॥१३॥
यं मृगो न समाप्नोति पक्षाभ्यां शकुनिः पतन् ।
दिवं यस् संस्पृशति तस्मा अश्वत्थ ते नमः ॥१४॥ ॥ऋ° १४

१९.२०

शौ ६.११०.१,३ ज्येष्ठघ्न्यां जातो विचृतोर् यमस्य [स] मा हिंसीः पितरौ वर्धमानः ।
सोमो व्याघ्रो विहितो ऽहियो स्ताम् अधिसाते ? दुरितानि विश्वा ॥१॥
शौ ३ व्याघ्रे ऽह्न्य् अजनिष्ट वीरो नक्षत्रजास् सर्ववीरस् सुवीरः ।
[स] मा हिंसीः पितरौ वर्धमानस् तस्य ते देवाः प्रति गृह्णन्तु होमम् ॥२॥
या रोहिणीर् देवत्या आप्या धेनुर् विपिन्वते ? ।
तत्र तिस्रो न्यङ्का[स्] ? सर्वा [अ]धि भुवन्तु प्रजायै जगते च धाम् ॥३॥
यद् आत्मात्यो ; महृषीभ्यां देवस् चकामर्ध्यं ? पुरुषेण पुरुषम् ।
अश्वा पुष्यन्तां मिथुना सलोमी ? जीवां प्रजां जरदष्टी सचेतसः ॥४॥
शौ ६.५०.१ हतं तर्दम् उत तर्दम् आखुम् अश्विना छिन्तं शिरो पृष्ठो हनू च तः ? ।
यवा ; नमद्यं नवासं ? व्याहरा देवायनं कृणुतं धान्याय नः ॥५॥
शौ १ तर्द है पतङ्ग है जभ्य हा उपक्वस ।
अनदन्त इदं धान्य[म्] अहिंसन्तो ऽपोदित ॥६॥
शौ ३ तर्दापते वघापते तृष्टजंभा ? शृणोत नः ।
होत्रेय प्राहितं हविर् वृकजिह्वाम् उपस्पृशम् ? ॥७॥
तदा चाम् उपजिह्वया यद् इदं दिव्यं विषम् ।
पतम ब्रुसुन्वा ? त्वां प्रत्यञ्चम् अर्चिषा व्यथाम मन ? ॥८॥
ये अभ्रजा ये वातजा ये दिवस् परि जज्ञिरे ।

[illegible]

१९.२१

[illegible]

परि वो विश्वतो दध ऊर्जा घृतेन पयसा ।
ये देवाः के च यज्ञियास् ते रय्या सं सृजन्तु माम् ॥१६॥ ऋ° १०

१९.२२

नमो अस्तु सर्पेभ्यो ये के च पृथिवीम् अनु ।
ये अन्तरिक्षे ये दिवि तेभ्यस् सर्पेभ्यो नमः ॥१॥
ये ऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषाम् अप्सु सदस् कृतं तेभ्यस् सर्पेभ्यो नमः ॥२॥
या इषवो यातुधानानां ये वा वनस्पतीनाम् ।
ये ऽवटेषु शेरते तेभ्यस् सर्पेभ्यो नमः ॥३॥
पयोच्छिष्ट हविषा वर्धयेमं यथा पुत्रैः कृणवद् वीर्याणि ।
सजूर् देवेभिर् अभि भूस् सपत्नान् आयुष्मत् क्षत्रम् अजरं ते अस्तु ॥४॥
पुं सा ये ये न ? हविषा पयस्वतोच्छिष्टस्यायं रक्षन्तु देवाः ।
देवा इद् अस्मिन् नि दधुर् नृम्णं बृहद् अस्मिन्न् इन्द्रो वयो दधातु ॥५॥
सम् उच्छिष्टस्य हविषा सृजामि सम् आयुषा वर्चसा पयो दधामि ।
देवा इद् अस्मिन् नि दधुर् नृम्णं बृहद् अस्मिन्न् इन्द्रो वयो दधातु ॥६॥
धातुर् मना[त्] समाकर[त्] त्वष्टा पोषाय ध्रियताम् ।
इन्द्र आभ्यो अधि ब्रुवद् रुद्रो भूम्ने चिकित्सतु ॥७॥
यथा चक्रुर् देवासुरा यथा मनुष्या उत ।
एवा सहस्रपोषाय कृणुतं लक्ष्माश्विना ॥८॥
लोहितेन स्वधितिना मिथुनं कर्णयोः कृधि ।
अकर्ताम् अश्विना लक्ष्म तद् अस्तु प्रजया बहु ॥९॥
कृष्णं नियानं हरयस् सुपर्णा [अ]पो वसाना दिवम् उत् पतन्ति ।
त आववृत्रन् सदनाद् ऋतस्याद् इद् घृतेन पृथिवी व्य् उद्यते ॥१०॥
पयस्वतीः कृणुथाप ओषधीर् इमा यद् एजथा मरुतो रुक्मवक्षसः ।
ऊर्जं च तत्र सुमतिं च पिन्वत यत्रा नरो मरुतस् सिञ्चता मधु ॥११॥
उदप्लुतो मरुतस् तान् इयर्त वृष्ट्या यद् विश्वा नियतस् पृणाथ ।
पक्षांति कुहा ! कन्येव तुन्नेवं तुन्दाना पत्येव जाया ॥१२॥
त्वेषेव पूषा सूर्यो दमूना अधि स्तिर् पृथव्या नाम ।
विश्वाषाद् सुपयसस् संरराणो अस्मा रय्याः पुरएता न पथि ॥१३॥
या इद यन्य अनामयद् वहाना [अ]नमीवा उपती[र्] विश्वरूपाः ।
वर्धीर् अवन्तीर् उपजायमाना इन्द्रो यो रमयद् गावः ॥१४॥
प्रजापतिर् जनयतु प्रजा इमास् त्वष्टा दधातु सुमनस्यमानः ।
संवत्सर ऋतुभिस् सविदानो मयि पुष्टिं पुष्टिपतिर् दधातु ॥१५॥ ऋ° ११

१९.२३

सहस्री नाम वा [अ]सि सह[स]स् परि जज्ञिषे ।
सहस्वान् इन्द्रो देवेषु सहसे त्वा खनामसि ॥१॥
सहस्रेण भेषजेन दिव्येन शतपर्वणा ।
तेन सहस्रकाण्डेन कृणोमि पुनराभृतम् ॥२॥
सहसो भेषजस्य दिव्यस्य नाम जग्रभ ।
एषु आशिषेव तस्थिरे यक्ष्मासः पुरस्ताद् अधि ॥३॥
अपेत एतु निर्ऋतिर् नेहास्या [अ]पि किं चन ।
अपाक्यां सचनः पाशान् मृत्यून् एकशतं नुदे ॥४॥
ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे ।

[illegible]

१९.२४

[illegible]

जीवं व्रातं सचेमहि ॥१२॥
वयं सोम व्रते तव [म]नस् तनूषु बिभ्रतः ।
प्रजावन्तस् सचेमहि ॥१३॥
वर्चो मे मित्रावरुणा वर्चो यज्ञमाने वधू च यद् उष्य आहितम् ।
सुरायां बभ्रु यद् वर्चस् तस्य भक्षीय वर्चसः ॥१४॥
या हसेभ्यः प्रस्रवन्ति दिनोदारा नदीभ्यः ।
तासां त्वा सर्वासाम् अपाम् अभि षिञ्चामि वर्चसा ॥१५॥
यद् राज्ञानं शकधूमं नक्षत्राण्य् अकृण्वत ।
भद्राहम् अस्मै प्रायच्छन् ततो राष्ट्रम् अजायत ॥१६॥
भद्राहम् अस्तु नस् सायं भद्राहं प्रातर् अस्तु नः ।
भद्राहम् अस्मभ्यं त्वं शकधूम सदा कृधि ॥१७॥
यो नो भद्राहम् अकरत् सायं प्रातर् अथो दिवा ।
तस्मै ते नक्षत्रराज शकधूम सदा नमः ॥१८॥
यद् आहुश् शकधूमं [महा]नक्षत्राणां प्रथमजं ज्योतिर् अग्रे ।
तन् नस् सती मधुमती कृणोतु रयिं च सर्ववीरं नि यच्छताम् ॥१९॥
ऋ° ११ अनु° १॥

१९.२५

घृणेर् अग्ने विश्वरूपं देवानां वर्चसा कृतम् ।
अग्निर् वाम् अस्त्व् अन्तरा यथा वां नसो असति ॥१॥
यथाहिं द्वेष्टि पुरुषो अहिर् वा द्वेष्टि पूरुषम् ।
अग्नि[र्] वाम् अस्त्व् अन्तरा यथा [वां नसो असति] ॥२॥
नाना वाम् आकृतानि नाना चित्तानि सन्ति वाम् ।
विश्वञ्ची परं आ वर्तयामो यथा वां नसो असति ॥३॥
अत्र इ कमंड इ तुन्दे न म शी क तं तं ग छा प ते ? ।
हायवद् ? यत् ते यद् वा सं नो च ते मयत् ॥४॥
अश्रं बिलं यथा धने महयाद् यद् पति रेचितम् ।
; या सिलाप सिलाः पापज्ञितो सिलः महयात्र अधिकम् अक्षगम् ? ॥५॥
दीर्घायुत्वाय शतसे मह्या अरिष्टतातये ।
सुपर्णो मह्यम् अब्रवीद् एतद् आयुर्हिरण्यजम् ॥६॥
अव छिन्द्धि आयुर्हिम ऊर्णा इव असि मेचकी ।
दिव्यस् सुपर्णो अब्रवीद् एतद् आयुर्हिरण्यजम् ॥७॥
अकृत ! विसतो ऽविसतो विद्वांसो नाशाम् अकृत ।
संक्रम्यस् सर्वाक्रम्य[:] प्र ते छिन्द उग्र आयुर्हिम् ॥८॥
अभिभूर् अहम् आगमं विश्वकर्माणम् आयुषा ।
अहं मित्रस्य कल्प[यं] ना श्वा श्वा पु यु र रा ! ॥९॥
अहं च मि स्न नो ! उद विशां पुरोहितः ।
अहं मित्रस्य कल्पयं अधि धाम अस्तु यदण्य् असि ॥१०॥
मा वयं चक्षुर् मा वो वाचम् मा वो (ऽहं) समिति वृषे ।
योगक्षेमं च आदायाहं भूयासम् उत्तमः ॥११॥
ब्रह्मणाग्निस् संविदानो रक्षोहा नुदताम् इतः ।
[अ]रायो यस् ते तन्वां दुर्णामा योनिम् आशये ॥१२॥
यस् ते ऽरायस् तन्वां दुर्णामा योनिम् आशये ।
अग्निर् इदं ब्रह्मणा युजा रक्षोहा नुदताम् इतः ॥१३॥
यान्य् अन्त्यानि रक्षांसि ये ऽराया यातुधानाः ।
अग्निर् ता[न्] ब्रह्मणा तन्वा रक्षोहा पातु तेभ्यः ॥१४॥ ऋ° १०

१९.२६

अग्निश् च देव सवितर् इदम् ऊर्जं दधावहे ।
पातं मा दुश्चरिताद् आ मा सुचरिते भजतम् ॥१॥

यवयोर् अवयान्म् ? अतीव ।
इदं तन् म इवे यत् तुषुमा तत् परि ॥२॥
वाचम् पतिर् नि यच्छतु मय्य् एव तन्वं मम ।
माप ज्यायस् ते अकरन् मा श्रुतेन वि राधिषि ॥३॥
अमोघम् अस्माकं धान्तम् मय्य् द्रविणम् आ धृधि ।
मरुपमेहा वर्चस्वान् आयुष्यं वर्चसे कृधि ॥४॥
धनुष्व विश्वदेवेषु धनुष्व त्वं बृहस्पते ।
घृतेन प्रजां धनुते घृतेन रयिम् अश्नुते ॥५॥
घृतमायुष्यं वर्चस्यं देवेभ्यो धनुते परि ।
पर्जन्य[ः] पिप्पलं तुष्यात् नदो गर्भं बबले ॥६॥
मर्यादा अह्नदेववीर आयुष्यं वर्चसा सूत्रम् ॥७॥
यथा हस्ती हस्तिन्या पदेन पदम् अन्व् अगात् ।
एवा त्वम् अग्ने वर्चस्व[न्] पदेन पदम् अन्व् इहि ॥८॥
यथा रथस्य चक्र[म्] वि पथः पांसुम् अस्यामः ।
एवाहं मनो स्य् अस्यामि इदं संवननाय कम् ॥९॥
इन्द्रस्य प्रथमं वचो देवाना[म्] अपरं वचः ।
तृतीयम् अश्विनो[र्] वचस् तेन गां वासयामसि ॥१०॥
शौ ७.१००.१ उद् अस्य श्यावौ विथुरौ दिवं गृध्राव् इवैताम् ।
शोचनाद् अतिशोचनाद् अस्योच्छोचनौ हृदः ॥११॥
शोचया अभि शोचया दीपयो अभि दीपयः ।
अहेर् अग्ने विषं त्वं तृणम् इव कल्वलं दह ॥१२॥
सेध तं निपतात ? येनं योदकं त्वम् ।
कृष्णा वां गौस् सारस्वती पावात्री ? कृष्णतया गोः कृष्णाद् कृष्णवर्मणी
अशोचिष्कं यथा रूपम् एवेदं मामकं शिरः । [॥१३॥
यथाङ्करो अभिषिक्तो इव्यशाखे ? यथासितः ॥१४॥
अमुष्याङ्गस्य कल्पयं यथा दाषाद् दह्यमाना[द्] कृष्णो ज्वलो वि ध्वंसते ।
अहिवाद् ? अस्य तन् मुखम् एवेदं मामकं शिरः ॥१५॥ ॥ऋ° २॥

१९.२७

शौ ७.७१.१ यत् किं चासौ मनसा यच् च वाचा यज्ञैर् जुहोति यजुषा हविर्भिः ।
तन् मृत्युना निर्ऋतिस् संविदाना पुरा दद्याद् आहुतिं हन्त्व् अस्य ॥१॥
शौ २ यातुधाना निर्ऋतिर् आद् उ रक्षस् ते ऽस्य घ्नन्त्व् अनृतेन सत्यम् ।
इन्द्रपिता [मा]त्य[म् अ]स्य मथ्नन्तु मा तत् सं पादि यद् असौ जुहोति ॥२॥
वे १६.८.२ परि त्वाग्ने [पुरं वयं विप्रं सहस्य धीमहि ।
[धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावताम्] ॥३॥
शौ १ स्वरतिर् ? अधिराजो इवैनो संपातिमान् इव ।
आम्यं पृतन्यतो हतां यो ऽस्मान् पृतनायति ॥४॥
पृथिव्यै वनस्पतिभ्य ओषधीभ्यो अग्नये अधिपतये स्वाहा ॥५॥
अन्तरिक्षाय प्राणाय वातेभ्यो वायवे अधिपतये स्वाहा ॥६॥
दिवे चक्षुषे नक्षत्रेभ्यस् सूर्यायाधिपतये स्वाहा ॥७॥
शौ ६.१०९.२ पिप्पल्यस् सम् अवदन्तायतीर् जननाद् अधि ।
यं जीवम् अश्नवामहै न स रिष्याति पूरुषः ॥८॥
शौ १ पिप्पली क्षिप्तभेषज्य् उतातिविद्धभेषजी ।
तां देवास् सम् अकल्पयन् अलं जीवितवा इति ॥९॥
शौ ३ असुरास् ते नि खनन्तु देवास् त्वोद् अवपन् पुनः ।
वातीकृतस्य भेषजी[म् अथो क्षिप्तस्य भेषजीम्] ॥१०॥
शौ ६.२९.१ यद् उलूको वदति मोघम् एतद् यत् कपोतः पदम् अग्नौ कृणोति ।
यस्य दूतौ प्रहिताव् एषस् तस्मै यमाय नमो ऽस्तु मृत्यवे ॥११॥
शौ २ यत् ते दूतो निर्ऋत आजगामाप्रहितः प्रहितो वा गृहं नः ।

शौ १^४, १^५ कपोतोलूकाव् अपदं तद् अस्त्व् अवैरहत्यायेदम् आ अगस्याद् सुवीरताया
इदम् आ ससद्यात् ॥१२॥
शौ ६.२८.१ यः प्रथमः प्रवतम् आससाद बहुभ्यः पन्थाम् अनुपस्पशानः ।
यो ऽस्य द्विपदो यश् चतुष्पदस् तस्मै यमाय नमो अस्तु मृत्यवे ॥१३॥
शौ ६.७१.१ यदासितः प्रयते वर्षा अनु वपूंषि कृण्वन्न् असुरस्य मा[य]या ।
एवा मे शेपस् सहसायम् अर्को ऽङ्गेनाङ्गं संसमकं कृणोतु ॥१४॥
शौ १ यावदङ्गीनं पारस्वतं हास्तिनं गार्दभं च यत् ।
यावद् अश्वस्य वाजिनस् तावन् मे वर्धतां पसः ॥१५॥
शौ १ सायारं यथा पसस् त्वांपाम्बर ? वातेन स्थूलभं कृतम् ।
यावत् परस्वतः पसस् तावन् मे वर्धतां पसः ॥१६॥ ॥ऋ° १॥

१९.२८

शौ ६.११.१ शमीम् अश्वत्थ आरूढस् तत्र पुंसवनं कृतम् ।
इन्द्रस्य नाभिर् इह दायः ॥१॥
शौ १ वृषाणो वृषतयः दायः पुरा यथाविहितः ? ।
इन्द्रस्य दस्यं महत् ॥२॥
शौ १ स नो दधातु नो रयिम् उरुं विश्वसंवरम् ।
इन्द्रः पतिस् तुविष्टमो जनेष्व् आ ॥३॥
आयुर् अग्निर् आ धत्ता[म्] जातवेदास् तनूवशी ।
यथाहं ज्योग्जीवो ऽसानि प्रजानाम् अधिपावशी ॥४॥
आयुर् इन्द्रो दधातु म आयुर् देवो बृहस्पतिः ।
आ[यु]र् मे विश्वे देवा अहोरात्रे च यच्छतु ॥५॥
आयुर् आयुष्या पतत्ती प्राणं प्राणो दधातु मे ।
देवा य[ष्ट]व्यकर देवेभ्यस् स्वर् यन्तो यथायथम् ॥६॥
उदलगुर नमस्वती समुद्राद् अधि योषिणी ।
उखा समुद्रिया आपस् तासाम् इदा तर्पयामसि ॥७॥
यां आंतो दिष्यां यां चान्ताद् परिजज्ञिरे ।
इन्द्रो मरुत्वांस् त्वं शृ ता स्वा मा तां सिः ? ॥८॥
यास् शुष्का या हरिणीर् या मुमित्वत्याद् ? अधि ।
सर्वास् समग्रा ओषधीस् तासाम् इदा तर्पयामसि ॥९॥
आ नो मेधा सुमतिस् सुमनीका गिरोर ? बृहस्पतेर् आवेशयन्ती ।
दधो मे बहीर् नि युवसु गावो यथास्वम् भुवन्तु कश्विनः ? ॥१०॥
अथर्व शौ १.११.१ दीक्षा तपो मनसो मातरिश्वा बृहस्पतिर् वाचो ऽस्य स योनिः ।
वेदान्तं वेदाम् अयुञ्जन्त बहीर् [र्] अमीवो[मो] यशो ऽस्मासु धत्तम् ॥११॥
शौ ७.११.१ यद् अग्ने तपसा तप उपतेपामहे वयम् ।
प्रिया[ः] श्रुतस्य भूयास्मायुष्मन्तस् सुमेधसः ॥१२॥
यस् त्वा मातुर् उत वा पितुः परि आयमानम् अधिसंबभूव ।
यस् ते यक्ष्मो मज्जसि पर्वणि यो गि रा स स्वतुह् ? यक्ष्मम् अमुना शपामस्
सो ऽस्याक्षिन् शयते प्रविष्टः ॥१३॥
यस् त्वा यक्ष्मो हृदयेषो नाभिम् ? दद्रा हृदयङ्गमः ।
अथो यच् शिक्षिये परेतं शीर्षरोगम् अङ्गरोगम् ॥१४॥
संस्रावयं विषहंतम् अभिशार्थं विसल्पकम् ।
यस् ते [य]क्ष्मो मज्जसि पर्वणि यो गि रा स स्वत म ? यक्ष्मम् अमुना
शपामस् सो ऽस्याक्षिन् शयते प्रविष्टः ॥१५॥ ॥ऋ° २॥ ॥अनु° ८॥

१९.२९

अग्नी रक्षोहा तिग्मत् तिग्मशृङ्गो हन्ति रक्षो दुरिताम् अरातिम् ।
अपापयांसम् अस्यतु ॥१॥
या त पति परावतो वचन् ओजो दिवस् परि ।

या गिरिभ्यः पर्वतेभ्य आयुग् टे विश्वतो दधत् ॥२॥
ऋ १०.५९.७ पुनस् ते ऽसुं पृथिवी ददातु पुनर् द्यौर् देवी पुनर् अन्तरिक्षम् ।
पुनस् ते सोमस् तन्वं ददातु पुनः पूषा पथ्यां या स्वस्ति[ः] ॥३॥
शौ ५.११.७ कक्ष्याः कक्ष्याः पिशा देवाधार्यावाः पिशाः ।
नवेपवन्तस् स्वयुजाः पाशावा दृशा अदृशाः ॥४॥
दशान् अदशान् धनपते अहीन्द्रस्य वधेन ।
हताश् च विश्वरूपाश् च गृध्राः कोकाश् च ते हताः ॥५॥
कामय कामय समा[ः] प्रतीचीः प्रति मा मय[न्] ।
माम् अनु प्र ते मनो वत्सा पाकेव धावतु ।
अर्भीते ? अभिमादं न सोमाद् अधि मावतु ॥६॥
चित्र एतव्यच्यां ? वयम् दृषुक मामकं तव ।
अहं ते मन आ ददे मनो मनोमुषिर् यथा ॥७॥
मयि ते मन आहितं रथ इव रथवाहने ।
उद् असौ सूर्यो अगात् महाम् अवसुना सह ॥८॥
अहं विप्रा पुरोहितो मधुहस्तो मधुप्रियः ।
मयि वाग् अस्तु धरुणी ॥९॥
अहं विदथेन कतुना सम् आगच्छे मानुषेषा[ः] ।
अस्माकम् अस्तु केवलं इहद् विशो ? अधि विश्वेषु राजसु ॥१०॥
स्वादोश् चिन् मा स्वादीयांसं मधोश् चिन् मधुमत्तरम् ।
प्रियं च चक्षुर् अन्तरं स्वादीयांसं कृणोतु माम् ॥११॥
अग्ने ब्रह्म त्वं ब्रह्मासि विष्वा त्वं ब्राह्मणं ब्रूहि ।
यदीदं तथा भविष्यसि यदि वा माघ र त स इ वो वि ह ? स्वाहा ॥१२॥
वि पृच्छे द्यावापृथिवी स्व् अन्तर् ? वि बृहस्पतिम् ।
वि देवान् यज्ञियान् पृच्छे स्व् अस्वं ? जीवनाय कम् ॥१३॥
विज्ञानायोद्यतः प्रस्तुतस् सुगं यम राजन् हविर् इदं जुषस्व ।
अर्थासोर् ? हविषो मादयस्व निरृति गच्छन्ती य द य स सो ? ॥१४॥
॥ऋ° १॥

१९.३०

य त्वा गर्भां से अ प चो ? यद् उ अन्ये यद् ओदने ।
अग्निष् ट्वा विश्वभेषजस् तस्मात् [त्वा] पातु अंहसः ॥१॥
यस् त्वा वातो वात् अधरा[द्] उत्तराद् उत ।
आपो वा विश्वशम्भुवस् तास् त्वा पान्त्व् अंहसः ॥२॥
अप त्वन् मृत्युं निर्ऋतिम् अप यक्ष्मं नि दध्मसि ।
यथा त्वम् अरपो असः उदोज्ञा अतरो भव ॥३॥
ऋ १०.९.५ वैश्वानरो रश्मिभिर् [नः पुनातु वातः प्राणेनेषिरो नभोभिः ।
[द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये मा पुनीताम्] ॥४॥
प्रजापतिर् ऋतुभिः पञ्चभिस् संवत्सरो धामभिः पातु विश्वैः ।
इहैव प्राणस् सख्ये नो ऽस्तु तम् आत्मनि पुनर् आ वेशयामि ॥५॥
शौ ६.६२.१ वैश्वदेवी सूनृताम् आ रभध्वं शुद्धा भवन्तश् शुचयः पावकाः ।
तया गृणन्तस् सधमादेषु वयं स्याम पतयो रयीणाम् ॥६॥
शौ २ वैश्वानरी वर्चस आ रभध्वं यस्या [आ]शास् तन्वो वीतपृष्ठाः ।
तयेह सधमादं मदन्तो ज्योग् प[श्येम] सूर्यम् उच्चरन्तम् ॥७॥
अवत्कं यस भेषजम् अवत्कं परिवाचनम् ।
माराध्य अभिमात ? तृष्येव यन् अत्मारोगभेषजम् ।
शम्मुखेम् ? दशहरस् तम् उदक्षीरा उद् अवन्ति ॥८॥
शौ २.३.१^१० तद् आस्रावस्य भेषजं तद् [उ] रोगम् अनीनशत् ।
नदीषु महवत्सासु कुम्भेषु कलशेषु च ॥९॥
प्रतीके वन भेषजं तद् ते कृणोमि भेषजम् ।

मध्यमं सं विषोदकं य ह्ना क्ति ह्रं वि प अ स म् ? ॥१०॥
वि प अ स प दा म प री दशा मि ? विशायकस्य हविः ।
तेन क्रव्यादं हन्मि सर्वांश् च यातुधान्यः ॥११॥
इच्छन्ति त्वा बला ? उपञ्चरन्ति ब्रतुमन् ? त्वा ।
प्रीणन्तु योषिद् अश्वैर् अमृतस्येव नासि ? ॥१२॥
अमुं सुनाम भेषजं पृथिव्या अध्य् उद्भृतम् ।
वक्रा नु मह्यम् अब्रवीत् इदं हि पारयाद् इति ॥१३॥
चक्षुर् असि पुरुषस्य चक्षुर् गोश् चक्षुर् अर्वतः ।
चक्षुर् भूतस्य भव्यस्य चक्षुर् अप्सरसाम् असि ॥१४॥
चक्षुर् असि सुपर्णस्य चक्षुर् अहेर् अथो शुनः ।
चक्षुस् सर्वस्य पश्यतो अथो यद् विश्वम् एजति ॥१५॥
आदधानम् अङ्गिरसं प्रतिस्पाशनम् अमृतम् ।
शौ ४.२०.९^१^९ दर्शय मा यातुधानान् दर्शय यातुधान्यः ॥१६॥ ॥ऋ° १॥

१९.३१

अतीमाम् अहं पृथिवीम् उत द्याम् उत सूर्यम् ।
अति विश्वम् इदं भूतम् अति पश्यं यातुधान्यः ॥१॥
शौ ४.२०.६ दर्शय मा यातुधानान् दर्शय यातुधान्यः ।
अथायून् सर्वान् दर्शयेत् ओषधी रसे ॥२॥
शौ ५^११ वे १.११.५^१^२ एवा सहस्रचक्षो त्वं प्रति पश्यास्व् आयतः ।
सहो ऽसि यातुधानजम्भनम् ॥३॥
शौ १.१७.१ इमाः यारे पृदाकस् त्रिषता निर्भ्रंशयथ ।
तासां जरायुणा वयम् अहवात् अपि व्ययामसर् अथायोः परिपन्थिनः ॥४॥
शौ ३ विपृच्च एतु कृन्तती पिनाकम् इव बिभ्रती ।
विष्वक् पुनर्भवा मनो ऽसमृद्धा अघायवः ॥५॥
अपेत परिपन्थिनो ऽपायायुर् अर्षतु ।
शौ ३^४ न बहवस् सं शशकुवन् नार्भका अभि धृष्णुयन् ॥६॥
शौ ४ प्रेतं पादौ प्र स्फुरतं वहतं पृणतो गृहम् ।
इन्द्राण्य् एतु प्रथमाजीतामुषिता पुरः ॥७॥
आपम् अगन् फल्गुमन्तिर् बलेन बला[स] सह ।
येनेन्द्रो दस्यूनां वीरो असुराणाम् अवासृजत् ॥८॥
वर्चसा मां पयसोक्षन्तु देवा [व]र्चसा द्यावापृथिवी उभे ।
वर्चो मे देवस् सविता दधातु वर्चो विप्रः कश्यपो मे दधातु ॥९॥
वर्चो म आपो दधन् वर्चो मे वीरुधो दधन् ।
भूतानि सर्वा संभाय वर्चं मा धुर मुखे मम ॥१०॥
याः पुरस्ताद् विचिहृन्ते याः प्रजाजिनीर् इव ।
वातीकृतस्य भेषजीः पिप्पलीः पारयिष्णवः ॥११॥
शौ ६.४४.३ रुद्रस्य मूत्रम् अस्य अमृतस्य नाभिः ।
पृथिव्यां निहितम् असि विषाणा नाम वातीकृतभेषजी ॥१२॥
शं ते ऽस्तु मतस्नाभ्यां शं च ते सम्नसाधीः ? ।
वे १.१०.४^१^२ शं ते पृष्टिभ्यो मज्जभ्यः शम् अस्तु तन्वे तव ॥१३॥
शौ १.४४.१ नहि ते अग्ने तन्व[ः] क्रूरम् आनंश मर्त्यम् ।
कपुर् ? बभस्ति तेजनं स्वं जरायु गौर् इव ॥१४॥
शौ २ त्वेष इव [ते] सं च वि चोर्ने अधयते उन् ? उत्तरम्नाद् उपरस्य वाहति ।
शीर्ष्णो शिरो अप्ससाप्सो अर्दयन्न् अंशून् बभस्ति हरितेभिर् आसभिः ॥१५॥
शौ ३ सुपर्णा वाचम् अक्रतोप द्यव्य् आखरे कृष्णा इषिरा अनर्तिषुः ।
नि यद् नियन्त्य् उपरस्य निष्कृति पुरू रेतो दधिरे सूर्यश्रितः ॥१६॥ ॥ऋ° १॥

१९.३२

शौ ६.१३६.१ अयेन मा शांशपेन साकम् इन्द्रेण मेदिना ।

[illegible]

१९.२२

[illegible]

उक्तो वा यत्र आयता हरो वा पुण्डरीकवान् ॥५॥
औ १ हिमवत् त्वा ऽवरंधुमा शाले परि व्ययामसि ।
डीलीहरा ति नो भुवो ऽभिर् दधातु मेचकम् ॥६॥
शौ ६.४२.१ अवं ज्यां विमन्युकस् स्वायं चारणाय च ।
सम्यंद् विमन्युको मन्युशमनो ऽस्तु मे ॥७॥
शौ २ अयं यो भूरिमूल× पृथिव्याम् अधि निष्ठितः ।
इदं× पृथिव्यां निष्ठितस् स मे ऽस्तु विमन्युकः ॥८॥
शौ ३ वि ते [ह]न्यां शरण्यं वि ते मुख्यां नयामसि ।
[यथावशो न वादिषो मम चित्तम् उपायसि] ॥९॥
शौ ६.११२.३ [येभि× पाशै× प]रिविष्टो विबद्ध× परौपरत् मार्षितो मशेमहे ।
वि ते मुच्यन्तां विमुचो हि सन्ति भ्रूणघ्नि पूषन् दुरितानि मृक्षा ॥१०॥
शौ ६.११३.१ त्रि[ते] देवा अमृजतैतद् एनस् त्रित एनन् मनुष्येषु ममृजे ।
ततो यदि त्वा मम्येहिरे ? आहरत् तद् अहं त्वद् ब्रह्मणाप करोमि ॥११॥
शौ २ मरीचीर् धूमं प्र विशानु पाप्मन् उदारान् गच्छोत वा निहारान् ।
नदीनां फेनम् अनु तान् वि नश्य भ्रूणघ्नि पूषन् दुरितानि मृक्षाः ॥१२॥
यद् ते रक्ष× प्रतिदहद् य× कुल्याभिर् ? आधृतम् ।
अनाधृष्यस्य धाम्नस् त्वं भू र्जे ? याश्रयेयम् ॥१३॥
यन् मानवद् यद् घामवत् प्रमृणत् किं च पुण्यवत् ।
उर्वापत्तो ? मपूलकं तस्य धारक्षम् ? य[म]म् अनाश्रायम् अरोगणम् ॥१४॥
यास् समुद्राद् उच्चरन्ति देवीर् हिमवतस् परि ।
आपो या विश्वशम्भुवस् ता इहा यान्तु ओषधीः ॥१५॥ ॥ऋ° १॥

१९.२४

त्वचायिधाने सुभगे यद् परिस्तरणे कवे ।
पकाम् इव मडकां ? परि त्वा वर्चसा सृजन् ॥१॥
अम्भंसीर् इव हंसानां प्रपश्यन्ती पुर× पयन् ।
शिष्ठ मा विम्बयो मा यथापूर्वं त्वं वधः ॥२॥
शौ १९.३३.८ ; वर्चस्यायाम् उपास्तं ? ब्रह्मराजन्याभ्यां शूद्राय चार्याय च ।
यस्मै च कामयामहे सर्वस्मै च विपश्यते ॥३॥
अर्वाञ्चो पादौ प्र हराम्य् अर्वाचीनं मनस् तव ।
अर्वाची[म] मह्यतेत× प्रवत् मन्युर् नि वर्तताम् ॥४॥
[यद् च] छमलादे मनो ऽपाङ् ज्योति× परम् तमः ।
मा त्वा वले ऽभिका[ध] तस्मात् पुनर् आ वर्तयामसि ॥५॥
यथा मीढिं मीढिखले समाकुर्वन्ति तूलिभिः ।
एवा ते निहितं मनस् सम् (आ)करोमि मामुभे ? ॥६॥
त्वम् उत्तमं सुरायसां मध्यमं द्रुवतोर् असि ।
त्वया पितुर् वि अह्नेह ? त्वा ? धर्म्म आ ददे ॥७॥
मूर्ध्वंत् ते पुष्पयोर्ष्वो ? अग्नुव× पतिविद्या[ः] ।
पद्मं दीपित आ ददे ॥८॥
यद् च स्तामा ते अङ्गेषु य× प्रेमा हृदये च ते ।
; तन्तुर् आ वेशयामहे मयि वाजाद् उदीक्षत् ? ॥९॥
शौ ६.९२.१ वातरंहा वाजिन् भव युज्यमान इन्द्रस्य याहि प्रसवे मनोजवा[ः] ।
युञ्जन्तु त्वा मरुतो विश्ववेदस आ ते त्वष्टा पत्सु जवं दधातु ॥१०॥
शौ २ जवस् ते अर्वन् निहितो गुहा यस् श्येने चरति यश् च वाते ।
तेन त्वं वाजिन् बलवान् बलेनाजिं जय समने पारयिष्णुः ॥११॥
आसीनानो ऽधि मनसासीनानो ऽधि चक्षुषा ।
आसीनान[द्] सयावा मृत्याजि जय समने पारयिष्णुः ॥१२॥
शौ ६ च १०.५६.२ तनूस् ते वाजिन् तन्वं वहन्ती धानम् अस्मभ्यं धातु शर्म तुभ्यम् ।

[illegible]

१९.२५

[illegible]

१९.२६

[illegible]

शौ २ अवदत्सा निराता यद् पराशसोपारिम यद् आमतो यद् स्वपन्ता ।
अग्निर् विश्वान्य् अप दुष्कृतान्य् अजुष्टान्य् आरे अस्मद् दधातु ॥५॥
शौ ३ यद् इन्द्र ब्रह्मणस् पते यद् ईर्ष्यां चरामसि ।
प्रचेता न आङ्गिरसो द्विषतस् पातु तेभ्यः ॥६॥
यद् माम् उत्तरं हविर् अहसा पृतनायतः ।
इन्द्र अक्षन् कृत्वा ? इन्द्र अक्षन् उपयम् इव ॥७॥
यो नो ऽभिवदान् मनसा यश् च पापी मनो मन्य मा ? ।
आहुतिं तस्य देवा हृदय् चित्तानि वृश्चन्ताम् ॥८॥
अश्व इव धृतियोग× प्रति हरामहे भाम ।
इन्द्रानं अग्नानम् एते शंभ्राभ्याम् उपहितं अहि ॥९॥
यो ऽस्याधि[×] प्राज्ञापत मूर्ध्नोपाति वर्धताम् ।
त्वं सत्यावासतो आनुपूर्व्या अव धूनुष्व ॥१०॥
बहुर् अयं सङ्कुहो ? स्वप्नो भूम्याम् अधि ।
तेनाहम् अस्य कृन्तामि यथा त्वा मा जिघांसति ॥११॥
श्यामानं हृदद् अक्षतं स्वाम स्व अश्वो ऽस्यति ।
अनुष्ठानस्य यो राजा [स] सं स्वान गमिष्यति ॥१२॥
अगमद् राजा सदनम् अगमत् सूर्यो दिवम् ।
अद्य वृषभन् ह्रीडाग्रराजो ? अचीरथा ॥१३॥
यथा पन्थाम् अचार यो ऽभ्येति महापथम् ।
यथा त्वं द्विरीन झीब ? अयो ऽस्य अभ्यागतः ॥१४॥
इन्द्रेण दत्तं बलम् मातुरम्यां [illegible] ? दे च तुभ्यम् ।
त्वं तुरस्य कन्या अशिवा [अ]शुचा [अ]पा गृहाणां गृहपा त्वम् पथाम् ॥१५॥
त्वम् अग्रे गृहपतिर् गृहाणां त्वं प्रजानां जनिता सुजातः ।
त्वं तुरस्य कन्या [अ]शिवा [अ]शुचा सदान्धा नि दधस्व पता× पापी[ः] ॥१६॥
अपाद् य× कृन्तानो ? दि हरिज्ञस्य मयं कृधि ।
मृगाँ अनु प्र पातय मरीचीर् अनु आतय ॥१७॥
यद् अस्य अन्यारावेद् ? यदि त्वा दधो गृहे ।
अक्षा उपस्तुतं हविर् मनसा जुहोमि ते ॥१८॥ ॥ऋ° ४॥ ॥अनु° ५॥

१९.२७

अभि त्वा शतपाशायो सहस्रपाशया ।
हसो वरसम् इव तीत्वा ? अधि बध्नामि ते मनः ॥१॥
आ हि ते (व)र् दक्षतं परं हृदयं [स] ददे ।
उप स्तेय दमो य ? नि त्वाम् अश्रुमदे ऽवसे ॥२॥
परि त्वा गाम् इवावरं मम पशो नियानते ।
तं आसनम् अमीवृतम् अथ तं चरणं कृतम् ॥३॥
आ नयामि ते मनो ऽश्वम् इवाश्वाभिधान्या ।
३ २.९९.१ उप ते सुम्ने मन× पयोर् उपानहो यथा ॥४॥
यथा सुरा (यथा मधु यथाक्षा अधिदेवने ।
* शौ ६.७०.१ [यथाह मन्मतो मन यथा माम् अभि ते मनः)] ॥५॥
* शौ ६.१८.१ यथा कृमुकस्य मा विधाम् अन्त× कृमुकस्य माँ हृदि ।
यथा यम्या अभियेवता मात्यायां कीर्तयारा यन ॥६॥
यथेदं देवस्य हविर् अग्नय हरस्योर् हितम् ।
तेना त्वायि शतानां मृगे मान्याय अक्षतां ॥७॥
; संसे मां सम्भूतकरो ? मा पथात् मा परो भव ।
अधा अमस्त्र यो अगस् तेन मां [सं] सृजा मम ॥८॥
अमेन त्वा सं सृजामि मातरेण सुरम् इव ।
अथा यो ऽस्माम्× प्रिय× पतिर् देवृभ्यस् सुभगो ऽससि ॥९॥

उद् इतो दैव्यं वच इयम् इव भृत्य ? इष्यते ।
अंधा सर्पजान् मामकान् संहसा निजनानि ? च ॥१०॥
अग्निर् मा [पा]तु वसुभिः पुरस्ता[त्] सवितादित्यैर् अभि पातु दक्षिणा[त्] ।
इन्द्रो मरुद्भिर् अभि पातु पश्चाद् विश्वे देवा अभि रक्षन्तु न उत्तरात् ॥११॥
देवराक्षसान् मा पाहि मनुष्यराक्षसान् मा पाहि ।
विश्वक्षान् मा रक्षसस् पाहि ॥१२॥
असौ यस् त्रिककुद् गिरिस् शृङ्गाभ्याम् अभितिष्ठति ।
न संपतत्रम् उपगं स्व[ग्] ग्लौस् तत्र भविष्यसि ॥१३॥
दिव्यस् सुपर्णो [अ]पतद् अयं दक्षो अपोमुखः ।
स संपतत्रम् उपगम् इतो वहनं परामरत् ॥१४॥
च १०.९७.१३ साकं यक्ष्म प्र पत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१५॥ ॥ऋ° १०॥

१९.३८

अभि गाय शायलीयं ध्रोणीयं साधुवाहनम् ।
नमस् ते मद्रया कृष्णो ऽपिबता चक्षुषा त्वं शामका शमयामि त्वा ॥१॥
त्रि ग्धि प क्ष णी य ? पयसः कुर्यामि मा ? त्वम् ।
परेहि न त्वा कामये वृक्षान् वनानि सं चरः ॥२॥
अकृत्वा[साद् अ]भ्य् अकृत्वाभ्यक्त शारनं गमः ।
अपो विकृत्यो मा पच्छ ।
विज्ञानेन भयेन च शामका शमयाति त्वा ॥३॥
च१०.१६४.१ अपेहि मनसस् पताप क्राम प[रश् च]र ।
परो निर्ऋत्या [आ] चक्ष्व बहुधा जीवतो मनः ॥४॥
च २ भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम् ।
भद्रं वैवस्वते चक्षुर् बहुधा जीवतो मनः ॥५॥
शौ १९.४०.१ यन् मे छिद्रं मनसो यच् च वाचस् सरस्वती मन्युमित्तं जगाम ।
विश्वैस् तद् देवैस् सह संविदानस् सं दधातु बृहस्पतिः ।
? स्फिरत स्फिरतरं स्फिरत्तरः ? ॥६॥
शौ १.१४.३ शातहस्त समाहर सहस्रेव सं किर ।
